TEXT PROBLEM WITHIN THE BOOK ONLY

UNIVERSAL
LIBRARY
OU_176576
UNIVERSAL
LIBRARY

॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थ संख्या ९४

॥ श्रीः ॥

वाचस्पत्यम्

(बृहत् संस्कृताभिधानम्)

गवर्नमेंटसंस्कृतमहाविद्यालय-दर्शन-व्याकरणाध्यापक-

श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्येण

सङ्कलितम्

तेनैव संस्कृतम्

द्वितीयो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

विक्रम सं० २०१८] [ई० १९६२

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१
मुद्रक : विद्याविलास प्रेस, वाराणसी-१

The
Chowkhamba Sanskrit Series Office,
P. O. Box 8, Varanasi-1
(INDIA)
1962
Phone : 3145

THE

CHOWKHAMBA SANSKRIT SERIES

WORK NO. 94

VACHASPATYAM

(A Comprehensive Sanskrit Dictionary)

COMPILED BY

SRI TARANATHA TARKAVACHASPATI

Professor of Grammar and Philosophy

Govt. Sanskrit College, Calcutta.

VOL. II

THE

CHOWKHAMBA SANSKRIT SERIES OFFICE

POST BOX 8, VARANASI-1 (India) Phone : 3145

1962

प्रभुरस्मिः प्रपचने भूमिरावपने प्रभुः" भा० आ० ८८ अ०। करणे ल्युट्। ४वपनसाधने त्रि० "भूतानामावपनं सर्व्वेषाम्" यत० ब्रा० स्त्रियां ङीप्। त्वमस्यावपनी जनानाम्" अथ० १२, १, ६१। अन्तर्भूतण्यर्थे ल्युट्। ५केशादेः सर्व्वसंस्कृतने।

आवपनिष्क्रिया स्त्री आवप निष्क्रिय क्युच्यते यस्यां क्रियायां मयूर० स०। आवपननिष्क्रियार्थनिदेशक्रियायाम्।

आवप्य पु० आ+अज–अच वोभावः। १आगतौ। कर्त्तरि अच्। २आगन्तरि ३देयभेदे पु०। धूमा० युज् आवयक०। आवश्यदेयभवे त्रि०। [आच्छादके वस्त्रादौ।

आवरक न० आ+वृ–करणे अप संज्ञायांवुन्। अपवरके,

आवरण न० आव्रियते ढेहः चैतन्यं वाऽनेन आ+वृ–करणे ल्युट्। (ढाक) १चर्म्मफलके। वेदान्तिमतसिद्धे चैतन्यावरणे २अज्ञाने आवरणशक्तिशब्दे विवृतिः। ३आच्छादनसाधनमात्रे "तमसु नेत्रावरणं प्रकल्प्य" रघुः "स्फुटमिवावरणं किमभाक्तैः" माघः "लक्ष्मान्तरावरणेऽपि गेहे" रघुः पुरादिषु आच्छादनसाधने ४प्राचीरादौ च यथा काष्ठां सम्यावरणानि। वेड़ा) ५वेष्टने भावे ल्युट्। ६आवृतौ" "हृदयावरणं नित्यं कुर्य्याद्वस्त्रमित्र मध्यगः" मनुः। "स्रोतसां भेदकोयस्य तेषां चावरणे रतः" मनुः। "सूर्य्ये तपत्यावरणाय दृष्टेः" "तस्य सावरणा दृष्टिस्तथायः" रघुः "नलिनीदलकल्पितं त्वलावरणम्" शकु०

आवरणशक्ति स्त्री आवरणे शक्तिः आवृणोति संज्ञायां कर्त्तरि ल्युट् कर्म्म वा०वा। वेदान्तिमतसिद्धे अज्ञानस्य चैतन्यापिधानशक्तिभेदे यथोक्तं वेदा०सा० आवरणशक्तिस्तावदल्पोऽपि मेघोऽनेकयोजनायतमादित्यमण्डलमण्डलोवलितनयनपथपिधायकतया यथाच्छादयतीव तथाऽज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणमण्डलोकवितवृद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यम्। तदुक्तं "घनच्छन्नदृष्टिर्घनाच्छन्नमर्कं यथा निष्प्रभं मन्यते चातिमूढः। तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा" अनयाऽऽवृतस्वात्मनः कर्त्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिसंसारसंभावनाऽपि भवति यथा स्वाभाविकतायां रज्ज्वां सर्पत्वसंभावना"।

आवरसमक न० अवरं समानाम् एक० त० "द्वीआवरसमात् वुञ्" पा०नि० वुञः अवरसमे वर्षेऽदात्काले देयद्रव्यम् वुञ्। वर्षेऽदात्समये देये द्रव्ये।

आवर्जित त्रि० आ+व्रज–णिच्–क्त। १दत्ते २त्यक्ते "नहि नेन यथा तुल्यजल्पनयावर्ज्जितपिण्डकाङ्क्षिणः" मूलमावर्जितं मया" "हरिणावर्ज्जितं क्षीरस्त्वया विधिवदन्धसु" इति च रघुः। ३निर्म्लीकृते च "अध.प्रस्थापितास्त्रेण समावर्ज्जितकेतुना" "आवर्ज्जितजटाभोगविलम्बिशिखिकोटयः" कुमा०।

आवर्त्त पु० आ+वृत–भावादौ घञ्। चक्राकारेण जलस्य स्वयं भ्रमणे, (घुरनो) प्रवाहस्थे क्षोदकविशेषे २रोमसंस्थानभेदे राजावर्त्तनामके ३भ्रमणे ४आवर्त्तने, ५भेदाधिपभेदे च ६आत्मिकधातौ न०। "अयं तमावर्त्तमनोन्नाभिः" रघुः "तथापि समतावर्त्ते क्षोदगर्त्ते निपातिताः" देवीभा० "त्रियुते, याकारे तु चतुर्भिः यैर्युते क्रमात्। आवर्त्तं विद्धि संवर्त्तं पुष्करं द्रोणकध्रुवम्। आवर्त्तो निर्जलोमेघः संवर्त्तस्तु बहूदकः। पुष्करोदुष्करजलो द्रोणः सम्यक्प्रपूरकः" उद्भो०त०। "आवर्त्तिनः शुभफलप्रदशुक्तियुक्ता आपत्तद्देवमणयोऽतरत्नभागाः। अम्बाम्बुवर्षसमतोमतिरोचमानास्तूर्णं पयोधय इवोर्मिभिरापतन्तः" माघः। "आवर्त्तिनः दशावर्त्तयुक्ताः प्रशस्ताः त्रिणि। ते च "द्वावुरस्यौ गिरस्यौ द्वौ द्वौ स्कन्धोपरिस्थितौ। एकोभाले ह्यधाने च दशावर्त्ता धुराः स्मृताः" पयोधिपक्षे जलभ्रमः" मल्लि० आवर्त्तस्य अश्वशब्दे ५०२पृष्ठे उक्तः। ७आवर्त्ताकारे देहिनां रोमसंस्थानभेदे पु० अस्यानामपि उक्तध्रुवरूपावर्त्तोरोमसंस्थानविशेष एवेति बोध्यम्। णिच–भावे अच्। ८पुनः पुनस्थालने ९परिघट्टने (आकोटान) १० धातूनां द्रावणे (गलान) ११चिन्तायाञ्च चिन्तया हि चित्तं स्वविषयेषु पुनःपुनर्याच्यते इति तस्याः तथात्वम्। आवर्त्यन्ते भ्रमन्ति अनेकक्रोटिषु आ+वृत–णिच्–ण्यर्त्तिच्। अनेककोटिभ्रमणे १२ संख्याभेदे "भ्रमं खंखोल्कावर्त्तमध्याद्विधितोजयेत्" भा० मा० २७१ अ० आवर्त्तमनेककोटिभ्रमणं संयमम् अभ्यासात् तत्त्वाभ्यासात्" सांख्यक०। आवर्त्तते कर्त्तरि अच्। १३आवर्त्तमाने त्रि० "दक्षिणावर्त्तशङ्खोऽयं दक्षपूर्णीकृतोभवा" भा० द० १४ संसारे पु० तस्यानियतावर्त्तमानत्वात्तथात्वम्। "दुरमावर्त्तं नावर्त्तन्ते" इति श्रुतिः "यज्ञनाभ्यावृतिर्वोनिष्क्रमार्त्ता सा प्रकीर्त्तिता। तस्यास्तीये त्वावर्त्त गर्भयन्त्रा प्रतिष्ठिता" "यज्ञावर्त्तनिभाश्चापि उपर्य्युपरि संस्थिताः। नवलोकुनिभाश्चापि वर्त्तयः सप्रकीर्त्तिताः" इति सुश्रुतोक्ते देहान्तर्वर्त्तिनि आवर्त्ताकारे १५ नाडीउन्निवेशभेदे च।

आवर्त्तक पु० आवर्त्तएव स्वार्थे कन् । १मेघाधिपभेदे "रजनिकरविम्बचुम्बितावर्त्तकाम्बुदविडम्बकेन" काद० । तटीयास्तोदेशेषु पुष्करावर्त्तकादिषु" कुमा० जातं वंशे भुवनविदिते पुष्करावर्त्तकानाम्" मेघदू० । आवर्त्त इव कायति कै-क । २आवर्त्ताकारे आवर्त्त शब्दोक्ते अक्षरोर्मिचक्रभेदे आवर्त्तयति आ-वृत-णिच् ण्वुल् । २पुनः पुनराचक्रके त्रि० ।

आवर्त्तकी स्त्री आवर्त्त इव कायति प्रकाशते कै-क-ङीष् । कोद्रवे (भगतवल्ली) प्रसिद्धे लतभेदे सा तु विषाणाकारा रक्तपुष्पी रक्ताकारा पीतकीलकयुक्ता चर्म्मरञ्जनकारिणी "कषायाम्ला पीतशीर्षकारिणी पित्तनाशिनी" वैद्य० २भट्टदन्तिकायां च राजनि० ।

आवर्त्तन न० आ+वृत-आधारे ल्युट् । सूर्य्यस्य पश्चिमदिग्यस्थितच्छायायाः १पूर्व्वदिग्मनसमये मध्याह्नकाले "आवर्त्तनात् पूर्व्वाह्णोऽपराह्णस्तु ततःपरम्" स्मृतिः । "आवर्त्तनसमीपे वा दृष्टिमाकृष्य पक्रमेत्" स्मृतिः आ+वृत-णिच्-भावे ल्युट् (आवोटान) २आलोडने ३गुणने च धातूनां ४५।वर्षे(गखान) । आवर्त्तयति संसारचक्रम् आ+वृत-णिच् कर्त्तरि ल्यु । ५विष्णौ "आवर्त्तनोनिवृत्तात्मा" विष्णु सह० ६जम्बुद्वीपेऽपद्वीपभेदे च । आवर्त्यतेऽनया ल्युट् ङीप् । ७दर्व्याम् स्त्री आधारे ल्युट् ङीप् । (सर्वत्र) धातुद्रव्यशोधनाधारे दर्व्यामूषायाम् स्त्री करणे ल्युट् । ८वेष्टने प्राचीरादौ ।

आवर्त्तनीय त्रि० आ+वृत-णिच्-अनीयर् । १द्रावणीये धात्वादौ २आलोड्ये दुग्धादौ गुणे ३अङ्गादौ च । पुनः पुनः४पाठ्ये पदादौ च । "क्षिप्तपदमावर्त्तनीयम्" भा० को० ।

आवर्त्तमणि पु० आवर्त्ताकारोमणिः । राजावर्त्तमणौ ।

आवर्त्तिक त्रि० आवर्त्तः प्रयोजनमस्य ठक् । आवर्त्ताकारधूमसाधने धूपादौ "आवर्त्तिकं मालुभिर्धूपैरामोदिमन्दिरे" काशी० ।

आवर्त्तित त्रि० आ+वृत-णिच्-क्त । १कृतावर्त्तने दुग्धादौ द्राविते २घात्वादौ, ३गुणिते ४अभ्यस्ते च । आवर्त्तो जातोऽस्य तारं० इतच् । ५जातावर्त्ते जलादौ ।

आवर्त्तिन् त्रि० आ+वृत-णिनि । १पुनःपुनर्वर्त्तनशीले "आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्জुन" गीता "कालान्नरावर्त्तिशुभाशुभानि" कि० । णिच्-णिनि । आवर्त्तके २द्रावके ३दुग्धादेरावर्त्तके स्त्रियामभयतो ङीप् ।

आवर्त्तिनी स्त्री आवर्त्तः षष्ठ्यकारवेष्टनमस्त्यस्याः इनि ङीप् । अजशृङ्गीवृक्षे राजनि० ।

आव(ब)र्हित त्रि० आ+बृह-उद्यमे णिच्-क्त आ+बर्ह-हिंसायां क्त वा । उत्पाटिते उन्मूलिते ।

आव(लि)ली स्त्री आ+वल-इन् वा ङीप् । १श्रेणौ सजातीयसमुदायेन कृतपङ्क्तौ "इक्षावलिः धनावलिरिति । "के वा न सन्ति भुवि तामरसावतंसा हंसावलीवलयिनो जलसन्निवेशाः" उद्भटः । "हिजावलीबालनिशाकरांशुभिः" माघः । "व्यलोकयच्चक्रमकोरकावलीः" नैष० २परम्परायाञ्च । [च ।

आवलित आ+वल-चलने क्त । ईषच्चलिते सम्यक्चलिते

आवशीर पु० अवशीरदेशेभवः तस्य राजा वा अञ् । १अवशीरदेशभवे जने २तद्भूमौ च । "आवशीरांश्च योधांश्च अक्षिप्तांश्च योधयन्" भा० व० २५३ । स च देशः वत्सभूमेः पूर्व्वदिग्वर्त्ती "पूर्व्वां दिशं विनिर्जित्य वत्सभूमिं तथागमत्" इत्यनन्तरश्लोके पूर्व्वां दिशमित्यभिधानात् ।

आवश्यक न० अवश्यं भावः मनोज्ञा० वुञ् । १अवश्यंभावे नैयत्ये "यद् आवश्यके" पा० अवश्यं भवः वा० २वुञ् २नियते त्रि० "एतेष्वावश्यकस्त्वसौ" भाषा० ३अवश्यकर्त्तव्ये नियमात् कर्त्तव्ये "तत्यायावश्यकं कृत्वा कृतशौचः समाहितः" मनुः । कालप्रतीक्षाक्रियान्तरे ०निरवकाशे च "नेहेतात्र विशेषेऽन्यत्रावश्यकादिधेः" पु० "आवश्यकात् निरवकाशात्" मल्ल० त० रघु० ।

आवश्यपुत्रक न० न वश्यः अवश्यः पुत्रः तस्य भावः मनोज्ञा० वुञ् । पुत्रस्य वश्यत्वाभावे ।

आवसति स्त्री वसत्यत्र स्टे वसतिः रात्रिः सम्यक्वसतिः प्रा० स० । निशीथे वसतेः सम्यक्त्वञ्चावश्यस्टवासयोग्यत्वं तच्चार्द्धरात्रेऽवश्ये भवतीति तस्य तथात्वम् ।

आवसथ पु० आवसत्यत्र आ+वस-अथच् । १वसतिस्थाने, २विश्रामस्थाने ३ग्रामे ४व्रतभेदे च । तत्र वासस्थाने "दूरादावसथान्मूत्रं दूरात् पादावसेचनम्" मनुः विश्रामस्थाने । "अतिथिनाव सचौ मय्यामनुव्रज्यासनम्" मनुः विश्रामस्थाने "स किलाश्रममन्यमाश्रितो नियमज्ञावसथे पुराद्वहिः" रघुः । ग्रामे "वह्वर्च्चत आवसथान् भाषयाश्चक्रे" छा० उ० । ५आर्षाक्षन्दोरचिते कोषभेदे । [स्टहस्थे ।

आवसथिक त्रि० आवसथे स्टहे वसति ठञ् स्त्रियां ङीप् ।

आवसथ्य पु० अवसथस्यायं ञ्य । १स्टहसम्बन्धिनि त्रौकि; कोऽग्नौ "आवसथ्यं द्विजाः प्राहुर्दीप्तमग्निं महाप्रभम्" भा० व० २१अ० । "आवसथ्यस्तथाधाने" इत्यत्र

आम्नायानकर्माङ्गे २वङ्गौ च। "आवसथ्याग्नयनीयौ दक्षिणाग्निस्तथैव च। अन्वाहार्य्योगार्हपत्य इत्येते यस्य वह्नयः इत्युक्ते यत्राङ्गवह्निपञ्चकान्तर्गते २वह्निभेदे च। स च गृह्याग्निः आवसथशब्दार्थगृहसम्बन्धात् तस्य गृह्यत्वम्। [सीमान्तवासिनि स्त्रियां ङीप्।

आवमान त्रि० अवसानमभिजनोऽस्य तत्र० अञ्। ग्राम-

आवसानिक त्रि० अवसाने तत्काले भवः ठञ्। अवसानकाले (शेषकाले) भवे स्त्रियां ङीप्।

आवसित न० आ+अव+सो–क्त। १पक्वधान्ये, मर्दनानन्तरमपनीतहुसे राशीकृते २धान्ये च। ३निर्णीते ४अवधारिते ५समाप्ते च त्रि०।

आवस्थिक त्रि० अवस्थायां भवः ठञ्। कालकृतावस्थाभवे "आवस्थिकं क्रमञ्चापि मत्वा कार्य्यं विकृष्णम्" सुश्रु०।

आवह पु० आवहति आभिमुख्येन गच्छति आ+वह–अच्। सप्तस्वात्मवायोः प्रथमे स्कन्धे १भूवायौ। "भूवायुरावह इह प्रवहस्तदूर्द्धम्" सि०शि०। अभिलयशब्दे १६४ पृष्ठे विवृतिः "आवहः प्रवहश्चैव विवहश्च समीरणः। परावहः संवहश्च उद्वहश्च महाबलः। तथा परिवहः श्रीमान्" हरिवं० २२६ अ०। आवहति प्रापयति आ+वह–अच्। २प्रापके त्रि० "क्लेशावहा भर्त्तुरलक्षणाहम्" रघुः। फलैधःकुसुमस्तेयमर्घ्यञ्च मलावहम्" मनुः। "सस्तन्नहेत् साहसिकान् सर्वभूतभयावहान्" मनुः।

आवहमान त्रि० आ+वह–शानच्। क्रमागते।

आवाप पु०आ+वप–आधारे या घञ्। १आलवाले तत्र हि जलसेकेन वृक्षान् आवपन्तीति तस्य तथात्वम् २भाण्डादेः पात्रभेदे,(घञर्थे) भावे घञ्। ३समन्तात् वपने। "यस्यावापे कृषीवलाः" भार० ४धान्यादिस्थापने ५शस्त्रचिन्तने ६परराष्ट्रचिन्तने, "तन्त्रावापविदा योगैर्मण्डलान्यधिष्ठिता" माघः। ७प्रधानक्षोभे च। स्त्र्याख्यौ, "आवापो द्वयाभ्याम्" या० द०। आङ्पोतृञोर्याभ्यामित्यर्थः आ+वप–कर्म्मणि घञ्। ९आवपनीये प्रक्षेपणीये "पञ्चकृत्वा आवाप चार्वेऽवमान" इति ताण्ड्य०ब्रा०। अवापः आवनीयः आवापस्य क्षोमस्यैते सान्न आत्रेय इति भा० १०वस्त्रे च"। ईषदूढश्यतेऽत्र आधारे घञ्। ११निम्नोन्नतभूमौ तत्र हि शस्यादिकं न सम्यक् वप्तुं शक्यते इति तथात्वम्।

आवापक पु०आ+वप–कर्म्मणि घञ् संज्ञायां कन्। १प्रकोष्ठाभरणे वलयादौ। कर्त्तरि ण्वुल्। २आवपनकर्त्तरि त्रि०।

आवापन न०आ+वप–णिच्-करणे ल्युट्। (तौत) १क्षेत्रवपने। भावे ल्युट्। २केशादेः सम्यग् संस्कृते च।

आवापिक न० आवापाय साधु ठक्। आवापे साधौ।

आवारि न०समन्तात् वियते आच्छाद्यते आ+वृ–वा० इण्। १समन्ताद्याच्छाद्ये वृक्षस्थाने शब्दचि०। २सम्यग्जलयुक्ते त्रि०।

आवाल न० आवाल्यते जलमनेन आ+वल संवरणे णिच् करणे अच्। १आलवाले वृक्षादेरधोभागे मृदादिनिर्म्मिते जलाधारे सेतुभेदे। आ+वल–भावे घञ्। २संवारे।

आवास पु० आ+वस–आधारे घञ्। १वासस्थाने गृहादौ "आवासोन्मुखवर्हिणान्" रघुः। आवासमेवोपशमाय योगम्" भा०आ० ११६ अ०। भावे घञ्। २सम्यग्वास

आवाहन न० आ+वह–णिच् ल्युट्। सान्निध्याय देवानामाह्वाने। "चकारावाहनं तत्र भागार्थं सर्वदैवतम्" पुरा० "प्रतिमास्थानेषूद्वासनौ नावाहनविसर्জ্জने" ति०त०पुरा०।

आवाहनी स्त्री आवाह्यतेऽनया आ+वह–णिच्–करणे ल्युट् ङीप्। देवाह्वानार्थे "कृत्वाभ्यासमृक्षिं ब्रह्मजानाग्निका मूलपर्व्वणोः। अङ्गुष्ठौ निक्षिपेत्तत्र सुस्रुवावहनी स्रुता" तन्त्रोक्तलक्षणे स्रुग्भेदे।

आविक न० अविना तल्लोम्ना निर्म्मितं ठक्। १कम्बले। "सर्व्वेषु तान्तवं रक्तं शाणक्षौमाविकानि च" मनुः अवेर्मेषस्य २सम्बन्धिनि त्रि० "आविकं सन्धिनीक्षीरं विस्त्रायास्त्वगोः पयः"। "वसावसानुपूर्व्वेण शाणक्षौमाविकानि च" मनुः। कौशेयाविकयोरुर्णैः कृतपालामरिष्टकैः" मनुः।

आविकसौत्रिक न० सूत्रमेव सौत्रं कर्म्म० आविकसूत्रेण निर्म्मितम् ठक्। मेषलोमनिर्म्मिते। "वैश्यस्यावैकसौत्रिकम्" मनुः।

आविक्य न०आविकानां भावः गुरो०यक्। आविकसम्बन्धित्वे

आविग्न पु० आ+विज–कर्त्तरि क्त। उद्विग्ने (पाणिआमला) वृक्षे पु०।

आविज्ञान्य न० अविज्ञानमेव चातु० स्वार्थे ष्यञ्। विज्ञानहीने "तदाविज्ञान्यमिव हवींषि" शत०ब्रा० "आविज्ञान्यं विज्ञानविहीनमिव" भा०। [विदूर्य्ये" मा०।

आविदूर्य्य न० अविदूरस्य भावः ष्यञ्। सन्निकर्षे। "अभेषा-

आविद्ध त्रि० आ+व्यध–क्त। १ताडिते २विद्धे ३लिखिते ४क्षिप्ते च "नक्षतोर्ध्वमथाऽऽविद्धः" मनुः। [पाठायाम्।

आविद्धकर्णी स्त्री आविद्धौ कर्णाविव पत्रमस्याः गौ०ङीष्।

आविध पु० आविध्यतेऽनेन आ+व्यध–घञर्थे क। काष्ठादि-वेधनसाधने (भमर) (तुरपिन) रूप्याकाराऽस्त्रे अस्त्रे।

आविर्भाव पु० आविस्+भू–घञ्। १प्रकाशे सांख्यमतसिद्धे उत्पत्तिस्थानीयेऽभिव्यक्तिरूपे २भावधर्मभेदे तथा हि नैयायिकादयः क्रियानिरोधधर्मद्विव्यपदेशार्थक्रियाव्यवस्था-भेदात् कार्य्यस्य कारणात् भिन्नतया कारणादुत्पत्तिरित्या-हुरुक्तः तदेतन्मतमनूद्य सां०त०कौ० दूषयित्वा सतामेव कार्य्याणामाविर्भावः इति स्थिरीकरणेन कार्य्यकारणयो-रभिन्नत्वं समर्थितम् यथा खलु क्रियानिरोधधर्मद्वि-व्यपदेशार्थक्रियाव्यवस्थाभेदाच्च नैकान्तिकं भेदं साधयितु मर्हन्ति एकस्मिन्नपि तत्तद्विशेषाविर्भावतिरोभावाभ्यामेतेषा मविरोधात् यथा हि कूर्मस्याङ्गानि कूर्मशरीरे निविशमानानि-तिरोभवन्ति निःसरन्ति चाविर्भवन्ति न तु कूर्मतच्छरीरा-ण्युत्पद्यन्ते प्रध्वंसन्ते वा एवमेकस्या मृदः सुवर्णस्य वा-घटरुचकादयोविशेषा निःसरन्त आविर्भवन्त उत्पद्यन्त इत्युच्यन्ते न पुनरसतासत्पादः सतां वा तिरोधः।यथाह भगवान् कृष्णद्वैपायनः 'नासतोविद्यते भावो नाभावो विद्यते सतः इति'। यथा कूर्मः स्वावयवेभ्यः सङ्कोचविकाशिभ्योन भिन्नः एवं घटरुचकादयोऽपि मृत्सुवर्णादिभ्योन भिन्नाः। एवञ्चेत् तन्तुषु पटइति व्यपदेशो यथेह वने तिलका इत्यु पपन्नः। न चार्थक्रियाभेदोऽपि भेदमापादयति एकस्यापि नानार्थक्रियादर्शनात् यथैक एव यष्टिर्दोहकः प्रका-शकः प्रत्यवस्थेति। नार्थक्रियाव्यवस्था वस्तुभेदे हेतुः तेषामेव समस्तव्यस्तानामर्थक्रियाव्यवस्थादर्शनात् यथा प्रत्येकं विटपो वर्त्मदर्शनलक्षणामर्थक्रियां कुर्वन्ति न तु शिबिकावहनं, मिलितास्तु शिबिकां वहन्ति एवं तन्तवः प्रत्येकं प्रावरणमकुर्व्वाणा अपि मिलिताः आवि-र्भूतपटभावाः प्रावरिष्यन्ति। स्यादेतत्। आविर्भावः घटस्य कारणव्यापारात् प्राक् सन्नसन् वा असंश्चेत् प्राग् तर्ह्यसत उत्पादनम्। अथ सन्, ननु तर्हि कारणव्यापारेण, नहि सति कार्य्ये कारणव्यापारप्रयोजनं पश्यामः। आवि-र्भावे चाविर्भावान्तरकल्पने ऽनवस्थाप्रसङ्गः। तस्मादाविर्भू-तपटभावात्तन्तवः क्रियन्त इति रिक्तं वचः। अथासदुत्पद्यत इत्यत्रापि मते केयमसदुत्पत्तिः सती असती वा, सती चेत् ननु तर्हि कारणैः, असती चेत्सा अप्युत्पत्त्यन्तरमित्यनवस्था। अथोत्पत्तिः पटाद्भिन्नार्थान्तरम् अपि तु पटएवासौ तथापि तावदुक्तं भवति पटइति तावदुक्तं भवत्युत्पद्यत इति। ततश्च पटस्य तौ उत्पद्यत इति न वाच्यं पौनरुक्त्यात् विनश्यतीत्य-पि न वाच्यं उत्पत्तिविनाशयोर्युगपदेकत्र विरोधात् तस्मादियं पटोत्पत्तिः स्वकारणसमवायो वा स्वसत्तासम-वायोवा उभयथापि नोत्पद्यते अथ च तदर्थानि कारणानि व्यापार्यन्ते एवं पटादेराविर्भावेऽपि कारणापेक्षेत्युपपन्नम्। न च पटरूपेण कारणानां सम्बन्धः, तद्रूपस्याक्रिय-त्वात् क्रियासम्बन्धित्वाच्च कारकाणाम् अन्यथा कारकत्वा-भावात्। तस्मात् सत्कार्य्यमिति पुष्कलम्" सा०कौ०। प्रपञ्चस्तु अभिव्यक्तिशब्दे ३०० पृष्ठादौ द्रष्टव्यः। बाह्य-मेयविसदृशतापादकः कश्चनान्तरो धर्मः सत्त्वं तल्लोहेकः रजस्तमसी अभिभूयाविर्भावः" सा०द०। देवादीनां मनुष्यादाकारपरिग्रहरूपे २अवतारे च। "तदा मे मनसा-ध्यातो दयासिन्धुर्जनार्दनः। भक्तानामनुकम्पार्थं यत्रा-विर्भावमिच्छति" जैमि०भा०।

आविर्भूत त्रि० आविस्+भू–कर्त्तरि क्त। १प्रकटिते २अभिव्यक्ते "आविर्भूता महाघोरा योगिनीकोटिभिः सह" योगि०त० आविर्भूतप्रथमसृजाः कन्दलीस्वानुकक्षम्" मेघदू० "आविर्भूतपटभावाः" सा०कौ०।

आविल त्रि० स्राविलति हिंसति स्रु(स्रा)वति विल–इलच् क। १कलुषे अय विल भेदने विलप्रकृतिकत्वात् वस्य बमध्य-दृतिरादेशः० "समलक्ष्यत बिम्बदाबि(वि)म्बम्" "तस्याबि-(वि)म्बाभाधरद्युद्विहेतोः"। "ननन्दुरानन्दजलाबि(वि)लाक्षाः," रघुः "यथा त्वदीयैस्त्वरितैरनाबि(वि)लैः" कुमा।

आविष्करण न०आविस्+कृ–भावे ल्युट् णत्वम्। १प्रकाशने "असूया गुणेषु दोषाविष्करणम्" सि०कौ०करणे ल्युट्। २प्रकाशसाधने त्रिषायां ङीप्। यञ्। आविष्कारोऽभुदयत्व पु० आविष्कारातिशयस्वाभिधेयवत्प्रतीयते" सा०द०।

आविष्कर्त्तृ त्रि० आविस्+कृ–तृच्। प्रकाशके स्त्रियां ङीप्।

आविष्कृत त्रि० आविस्+कृ–कर्मणि क्त। प्रकाशिते। "कृतापचारोऽपि परैरनाविष्कृतविक्रियः" माघः"व्याख्या-दनाविष्कृतलक्ष्यलक्षणेन" कुमा० "आविष्कृतसदन्वया"रघुः

आविष्ट त्रि० आ+विश–क्त। १भूतादियुक्ते, २आवेशयुक्ते, ३निविष्टे ४व्याप्ते च।

आविस् अव्य० आ+अव–इसुन्। प्रकाशे। क्त्वास्त्रिषु गतिसंज्ञत्वम्। एतेन सह भूधातुः प्रकाशार्थे यथा आवि-र्भावः, कृञ्धातुः प्रकाशकरणेऽर्थे यथा आविष्कारः। "स्वरादिपाठात् अव्ययत्वम् "तेषामाविरभूत् ब्रह्मा परि-ज्ञानसुखस्त्रियाम्" कुमा० देवानां कार्य्यसिद्ध्यर्थमावि-र्भवति सा यदा" देवीभा०। "आचार्य्यं विजानि मान्न-

समाविराखोत्" "सरसन्नतमणिस्तमाविष्कृते भुजाभूजम्" मा०द०।

आविस्तराम् अव्य० आविस्+तरप् आम्। अतिशय प्रकाशे "आविस्तरां वा अग्निः कर्म्मणा" श०ब्रा०। तमप् आम आविस्तमाम्। अत्यन्तप्रकाशे।

आवी स्त्री अवीरेव स्वार्थे अण् ङीप्। रजस्वलायां १नार्य्यां २गर्भवत्यां च। "गर्भस्यन्दनमावीनां प्रथमोऽवायरुच्यते" सुश्रु०।

आवीत त्रि० आ+व्ये-क्त। १समन्तात्स्यूते उत्तशिष्य २वृते च। भावे क्त। २सम्यक् स्यूतौ ४उत्तशिष्य धारणे च न०।

आवीतिन् पु० आवीतमनेन वृता० इनि। "उद्धृते दक्षिणे यज्ञोपवीतेऽप्युच्यते बुधैः। सव्ये प्राचीनआवीती निवीती कण्ठलम्बिते" मनुक्ते सव्यपार्श्वे बर्हिष्कृत्य दक्षिणस्कन्धोपरिधृतयज्ञसूत्रे प्राचीनावीतिनि। [न्याय्योक्तौ जनके।

आवुक पु० अवति रक्षति अव-वा० उण् संज्ञायां कन्।

आवीरचूर्ण पु० आ समन्तात् विशेषेण ईर्य्यते क्षिप्यते आ+वि+ईर-घञ् कर्म्मधा०।(आवीर) इति ख्याते फलगुनि "आवीरचूर्णं रुचिरं स्नुह्यतां परमेश्वर"! पुरा०

आवृत् स्त्री आ+वृत-सम्प० क्विप्। १आवर्त्तने २भ्रमणे ३पुनःपुनर्भवने "सूर्य्यस्यावृतमन्वावर्त्ते दक्षिणामन्वावृतम्" अथ० १०,५,२७, ४पुनःपुनरेकजातीयक्रियाकरणे। आधारे क्विप्। ५परिपाट्याम् अनुक्रमे ६वृत्तिकर्त्तव्यतायाम्। "अनयैवावृता कार्य्यं पिण्डनिर्वपणं बुधैः" मनुः। "आवृते सोमपीतये" ऋ० २,४२,२, ७संस्कारे च। "अ "अग्निका तु कार्य्या वै स्त्रीणामावृदशेषतः। संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्" मनुः। वृतॄशब्दे च। "आवृतैव पर्य्याग्नि कृत्वोदकं नयन्ति" आश्व०गृ०। "आवृतैव तूष्णीमेवेत्यर्थः" वृत्तिः। कर्त्तरि क्विप्। ९आवर्त्तमाने त्रि०।

आवृत त्रि० आ+वृ-क्त। १कृतावरणे अप्रकाशीकृते आच्छादिते "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" गीता एतज्ज्ञानावृतत्वेनविषयम् आवृते तु पुनर्मार्गस्तेऽपि दोष एवेति" मिता०। "ब्राह्मणायुपकुर्व्वाणावावृतो नाम जायते" मनूक्ते २संस्कीर्णवर्णभेदे पुंस्त्री स्त्रियां जातित्वात् ङीप्।

आवृति स्त्री आ+वृ-क्तिन्। आवरणयज्ञार्थे।

आवृत्त त्रि० आ+वृत-क्त। १पुनःपुनरभ्यस्ते २आवर्त्यमाने च ३पराहते ४प्रतिनिहते च "आवृत्तानां गुरुकुलात् विप्राणां पूजकोभवेत्" मनुः। "कस्त्रीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" कठोप० "आवृत्तं व्यावृत्तं चक्षुः श्रोत्रादिकमिन्द्रियजातं विषयाद्यर्थे" भा०।

आवृत्ति स्त्री आ+वृत-क्तिन्। १पुनः पुनरभ्यासे २भूयएकजातीयक्रियाकरणे "आवृत्तिः सर्व्वशास्त्राणां बोधादपि गरीयसी" उद्भटः। "उदयावृत्तिपर्येण नारदः" रघुः। "एकदृश्ये कर्म्मावृत्तौ सकृन्नाम्नश्चवचनम्" कात्या० १,७,९। "आवृत्तिरसकृदुपदेशात्" या०स्मृ०। ३प्रत्यावृत्तौ ४"पुनरागतौ "अनावृत्तिः शब्दात्" या०स्मृ० "तत्र प्राप्तविवेकख्यातेरावृत्तिः" सां०सू०। "यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः" गीता। "गुर्व्वीं जामावृदं कृन्तं कृतमावृत्तिसाहस्रम्" किरा०। "तपोवनावृत्तिपथं गताभ्याम्" रघुः।

आवृत्तिदीपक न० आवृत्त्या दीपकम्। दीपकावृत्तिरूपे अर्थालङ्कारभेदे तल्लक्षणं १०० उल्लासे।

आवृष्टि स्त्री आ+वृष-क्तिन्। सम्यग्वर्षणे "भूयश्च शतवार्षिक्यामनावृष्टावनम्भसि" देवीभा०।

आवेग पु० आ+विज-घञ्। उत्कण्ठाजनके त्वरान्विते च मानसे वेगे। वेगश्च क्रियाजन्यः गुणविशेषः मानसवेगस्तोत्कण्ठादिसाधनत्वे आवेगत्वम्। "आवेगमाकुलिरस्य तूर्णौ" किरा०। २व्यभिचारिभावभेदे। व्यभिचारित्वञ्च सा०द० दर्शिता यथा निर्वेदावेगदैन्यश्रममदजड़ता औग्र्यमोहौ विबोधः" इत्यादयः। तत्र आवेगः सम्भ्रमस्तत्र वर्षजे पीड़िताकृता। उत्पातजे लब्धताक्षे धूमाद्याकुलताग्निजे। राजविद्रवजादेस्तु यक्षनागादिवो जनम्। गजादेः स्तम्भकम्पादिः पांसाद्याकुलता निजात्। दृष्टार्थाः गुरोऽनिष्टाज्ञे याद्याश्चे यथायथम्"।

आवेगी स्त्री आवेगोऽस्त्यस्याः अर्श आद्यच् गौरा० ङीष्। इङ्गुदीवृक्षे।

आवेदक त्रि० आ+विद-णिच्-ण्वुल्। १विज्ञापके "कृत्याचारव्ययेतेन मार्गेणाधार्थिते परैः। आवेदयति चेद्राज्ञे व्यवहारपदं हि तदिति" स्मृत्युक्ते व्यवहारोत्थापके २वादिनि च

आवेदन न० आ+विद-णिच्-ल्युट्। १विज्ञापने व्यवहारोत्थापने (नालिशकरा) "राज्ञे कुर्य्यात् पूर्व्वमावेदनं नरः" इति नारदः। आवेद्यते अनेन करणे ल्युट्। व्यवहारोत्थापके २भाषापत्रे (आरजी) तल्लक्षणादि स्मृतौ दर्शितं यथा "प्रत्यर्थिनोऽग्रतोलेख्यं यथाऽऽवेदितमर्थिना। समाप्तावपि तद्वर्णोत्तमजात्यादि-

चिह्नितम्" या० स्मृ०। "निवेश्य कालं वर्षञ्च मासं पक्षं तिथिं तथा। देशं प्रदेशं विषयं स्थानं ज्ञात्वाऽऽत्मनो वयः। साध्यं प्रमाणं द्रव्यञ्च संख्यां नाम तथाऽऽत्मनः। राज्ञां च क्रमयोगानां निवासं साध्यनाम च। क्रमात् पितॄणां नामानि पीठमाकर्तृदायकौ। क्षमालिङ्गानि चान्यानि पत्रं संकल्प्य कीर्त्तयेत्" कात्या०। "अर्थवत्-क्रमसंयुक्तं परिपूर्णमनाकुलम्। साध्यसङ्गाचकपदं प्रकृतार्थानुबन्धि च। प्रसिद्धमविरुद्धञ्च निश्चितं साधनक्षमम्। संक्षिप्तं निखिलार्थञ्च देशकालाविरोधि च। वर्षर्त्तु-मासपक्षार्कवेलादेयप्रदेशवत्। स्थानावसथसाध्याख्या-जात्याकारवयोयुतम्। साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनाम च। पुरात्मपूर्व्वजानेकराजनामभिरङ्कितम्। क्षमालिङ्गा-त्मपीठवत् कथिताकर्तृदायकम्। यदावेदयते राज्ञे तद्भाषेत्यभिधीयते" नार०। अत्र विशेषः वीरमि०। 'देशश्चैव तथा स्थानं सन्निवेशस्तथैव च। जातिः संज्ञा निवासश्च प्रमाणं क्षेत्रनाम च। पितृपैतामहञ्चैव पूर्व्वराजानुकीर्त्त-नम्। स्थानेषु विषादेषु दृष्टानि निवेशयेत्" कात्या०। संख्याविशेषनिर्द्देशे "आसनं शयनं यानं ताम्रं कांस्य-मयोमयम्। धान्यमन्नमयं यच्च द्विपदञ्च चतुष्पदम्। मणिमुक्ताप्रवालानि हीरकं रूप्यकाञ्जनम्। यदि द्रव्यसमूहः स्यात् संख्या कार्य्या तदैव तु। यस्मिन् देशे च यद्द्रव्यं येन मानेन मीयते। तेन तस्मिंस्तदा संख्या वक्तव्या व्यवहारिभिः" हारी०। "देशकालविहीनस्य द्रव्यसंख्या विवर्ज्जितः। क्रियामानविहीनस्य पक्षोनादेय दूष्यते" कात्या०। क्रिया प्रमाणं, मानं साध्यपरिमाणम्। भाषादोषाश्च नारदोक्ता यथा। "अन्यार्थमर्थहीनञ्च प्रमाणागमवर्ज्जितम्। लेख्यहीनाधिकं भ्रष्टं भाषादोषा उदाहृताः" इति विभज्य तेषां लक्षणान्याह स एव। "अर्थे साधारणेऽप्येकोऽसम्बन्धोऽथानियुक्तकः। लेखयेत् यन्तु भाषार्थमन्यार्थं तं विदुर्बुधाः। ब्रह्महायमिति द्वेषात् क्रोधाद्वापि वदेत्तु यः। साध्यञ्च मोचयेत् पश्चादर्थहीनन्तु तं विदुः। गणिते लिखिते मेये तथा क्षेत्रगृहादि-षु। यत्र संख्या न निर्दिष्टा सा प्रमाणविवर्ज्जिता। विद्यया प्राप्तमर्थार्थं लब्धं क्रीतं क्रमागतम्। न त्वेवं लिख्यते यत्र सा भाषा स्यादनागमा। क्षमा मासस्तथा पक्षस्तिथिर्नक्षत्रमेव च। यत्रैतानि न लिख्यन्ते लेख्य-हीनं तु तं विदुः" लेखयित्वा तु तां भाषामनि-र्दिष्टे तथोत्तरे। निर्दिशेत् साक्षिणः पूर्व्वमधिकां तां विनिर्दिशेत्। यत्र स्यात्तु यथापूर्व्वं निर्दिष्टं पूर्व्व-वादिना। सन्निबन्धमेव लेख्येन भ्रष्टां भाषां तु तां विदुः"। भाषादोषान्तरमाह" कात्या०। अप्रसिद्धं नि-राबाधं निरर्थं निःप्रयोजनम्। असाध्यं वा विरुद्धं वा पक्षाभासं विवर्ज्जयेत्"। तत्र अप्रसिद्धमाह वृह०। "न लेनचित् कृतोयस्तु सोऽप्रसिद्ध उदाहृतः"। यथा कूलसकृत कृतं क्षेत्रमपकृतम्" वीरमि०। "मदीयं यशविषाणं गृहीत्वा न प्रयच्छति" मिता०। "खल्वापराधः खल्वार्थो निरर्थक इति स्मृतः" वृह०। "यथाकृमनेन सञ्चितमीक्षित इति" स्मृति-चन्द्रिका। "कार्य्यबाधाविहीनस्तु विज्ञेयोनिष्प्रयो-जनः" वृह०। "यथाऽयं देवदत्तोमदीयमुहृत्सन्धौ सुखरमधीते इत्यादि" मिता०। निरर्थकानिष्प्रयोजनौ अन्यथाऽपि वृह०। लक्षितौ यथा "कुसीदाद्यैः पदै हीनोव्यवहारोनिरर्थकः। वाक्पारुष्यादिभिश्चैव विज्ञे-योनिष्प्रयोजनः"। "कुसीदमूलदानं तत्प्रभृतिभिश्च-तुर्दशभिरर्थविषयव्यवहारैः हीनो निरर्थकः, वाक्पारुष्यादि-हिंसात्मकैश्चतुर्भिर्हीनोनिष्प्रयोजनः" वीरमि०। असा-ध्यविरुद्धावाह वृह०। "समानेन प्रदातव्यं यथाकृकृतं धनुः। असम्भाव्यमसाध्यं तं पक्षमार्त्तमनीषिणः। यस्मिन्नावेदिते पत्रे प्राड्विवेकोऽथ राजनि च पुरे राष्ट्रे विरोधः स्याद्विरुद्धः सोऽभिधीयते" अन्येऽपि पक्षाभासाः स्मृतिचन्द्रिकायामुक्ता यथा "भिन्न-क्रमोव्युत्क्रमार्थः प्रकीर्णार्थो निरर्थकः। अतीत-कालोवा द्विरुक्तपक्षोनादेय दूष्यते। यथास्थानानिवेशेन नैव पक्षार्थकल्पना। गम्यते तेन पक्षः स भिन्नक्रम उदा-हृतः"। व्यत्यस्ताहरसन्निवेशोभिन्नक्रम इत्यर्थः। व्युत्-क्रमार्थो व्यवहिताऽन्वयेनार्थबोधकः। प्रकीर्णार्थोऽस-ङ्गतार्थः। "मूलमर्थं परित्यज्य तद्बुध्यैवत्र लिख्यते। निरर्थकः स वै पक्षो भूतसाधनवर्ज्जितः। भूतकालमति-क्रान्तं द्रव्यं यत्र हि लिख्यते। अतीतकालः पक्षोऽसौ प्रमाणे सत्यविस्मृतः। यस्मिन् पक्षे द्विधा साध्यं भिन्नकाल-विभक्तयम्। विरुध्यते क्रियाभेदात् द्विरुक्तः स दृष्ट एव च्यते"। अन्ये च भाषाया दोषास्तत्रैवोक्ताः। "अन्यान्तरनिवेशेन अन्यथागमनेन च। आकुलं तु भवेल्लेख्यं क्रिया चैवा-कुला भवेत्। साधनं यद्द साध्येन निर्द्दिष्टं यत्र लेखयेत्। उक्तिक्रमविहीनत्वात् सोऽपि पक्षो न सिद्धति। विरु-द्धस्याविरुद्धस्य द्वावप्यर्थौ निवेशितौ। एकस्मिन् यत्र दृश्येते तं पक्षं दूरतस्त्यजेत्। परापरविरुद्धानि यः पदानि

निवेशयेत् । विरूढपदसंकीर्णा भाषा तस्य न सिध्यति" अनेकपदसंकीर्णस्य दुष्यत्वं च युगपत्तत्साधनायोग्यत्वादेव । क्रमेण तु तत्साधनयोग्यत्वे तदपि शास्त्रमेव "बहु प्रतिज्ञं यत् शास्त्रं व्यवहारेषु निश्चितम् । कामं तदपि दृष्टीयाद्राजा तत्त्वबुभुत्सयेति" काशा० उक्तेः भाषापलक्षं संस्कृतदेशभाषान्यतरेण यथाबोधं लेख्यम् मूर्खाणामपि वादिप्रतिवादि तादर्थ्यात् अतएव अध्यापनेऽपि तथात्वं विष्णु० उक्तम् । "संस्कृतैः प्राकृतैर्वाक्यैर्यः शिष्यमनुरूपतः । देशभाषादिभाषाभिर्बोधयेत् स गुरुः स्मृतः" इति । येन सर्वेषामबोधस्तथा लेख्यम् व्य०त० रघु० । तच्च यावदुत्तरं पाण्डुलेखं कृत्वा शोधनीयम् यथोक्तं पूर्वपत्रं स्वभावोक्तं प्राड्विवेकोऽभिलेखयेत् । पाण्डुलेखेन फलके ततः पत्रे निवेशयेत्" इत्त० । "पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् । जनाधिकं तु संशोध्य पश्चात् पत्रे निवेशयेत् । शोधयेत् पूर्ववादन्तु यावल्लोत्तरदर्शनम् । अवश्यमुत्तरेण निहत्तं शोधनं भवेत्" नार० ।

आवेदनीय त्रि० आ+विद्–णिच्–अनीयर् । १विज्ञापनीये यं प्रति ज्ञानाय आवेदनं क्रियते तस्मिन्, यस्य पदार्थस्यावेदनं क्रियते तस्मिंश्च । व्यवहारे २आवेद्ये मूल्यादानादौ च ।

आवेदित त्रि० आ+विद्+णिच्–कर्म्मणि क्त । १विज्ञापिते यं प्रति विज्ञापनं कृतं तस्मिन्, यस्य पदार्थस्य वेदनं कृतं तस्मिंश्च । व्यवहारे आवेदनकाले २निवेदिते पदार्थे च । "लिखितं साक्षिणो वापि पूर्वभावेदितं न चेत्" नारदः "यथावेदितमर्थिना" या० स्मृतिः ।

आवेदिन् त्रि० आ+विद्–णिच्–णिनि । १विज्ञापके । व्यवहारे २वादिनि च । "अनिष्टावेदिनं स्वयं दहा" रामा० स्त्रियां ङीप् । आ+विद्–णिनि । २आत्मातरि त्रि० स्त्रियां ङीप्

आवेद्य त्रि० आ+विद्–णिच्–यत् । १विज्ञाप्ये २आवेदनीयार्थे आ+विद्–णिच्–ल्यप् । २विज्ञाप्यत्वर्थे अव्य० ।

आवेध्य त्रि० आ+विध–यत् । आवेधार्हे शक्तादिगणौ ।

आवेश पु० आ+विश–घञ् । १अहङ्कारभेदे, २संरम्भे, ३अभिनिवेशे, ४आसङ्गे, ५अनुप्रवेशे, यथा भूतावेशः । ६यक्षभेदे, ७भूताद्यावेशरोगे च । "तर्कं व्यायावेशविवर्द्धितास्" रघुः "तपनं प्रियविच्छेदे वारावेशोऽव्यवेष्टितम्" या०६० । "आवेशमोहौ क्रोधश्च गान्धारीधृतराष्ट्रयोः" भा० आ० प० १अ० "पञ्चानामिन्द्रियाणां शोकावेशवशात्मनः" भाग० ११अ०

आवेशन न० आ+विश–आधारे ल्युट् । १शिल्पशालायाम् तत्र हि मनोऽभिनिवेशेनैव कार्य्यकरणात्तस्यात्मत्वम् २भूतावेशादिरोगे ३सूर्य्येन्दुपरिधौ च । "मनःक्षेपस्वपकारो यक्षाद्यावेशनादिजः" या०६० । "जीर्णोद्यानान्यरण्यानि कारुकावेशनानि च" मनुः आवेशशब्दार्थे ४कोपादौ च आधारे ल्युट् । ५यक्षे च । आ+विश–णिच्+ल्युट् । ६प्रवेशसम्पादने व्यापारे

आवेशिक त्रि० आवेशे यक्षे भवः आगतो वा ठञ् तत । १अतिथौ २असाधारणे ३बान्धवादौ च । [२वेष्टके (वेड़ा)

आवेशित त्रि० आ+विश–णिच्–क्त । निवेशिते, "न मय्यावेशितधियां कामः कामाय कल्पते" भाग० । "मय्यावेशित चेतसः" गीता ।

आवेष्टक पु० आवेष्टयति ण्वुल् । आवरणकारके प्राचीरादौ

आवेष्टन न० आ+वेष्ट–भावे ल्युट् । १आवरणे करणे ल्युट् । आवरणसाधने २प्राचीरादौ । (वेड़ा) इति ३पदार्थे च

आविद्क त्रि० अब्दे भवः ठक् । वर्षभवे श्राद्धादौ "आब्दिके पित्तकल्पे च चान्द्रं मासं विनिर्दिशेत्" स्मृतिः "तथा लाक्षोपहीतव्रीहाद्राद्याब्दिकः करः" मनुः षट्त्रिंशदाब्दिकं चर्य्यम्" मनुः असंस्कारेऽपि कर्त्तव्यमाब्दिकं प्रथमं द्विजैः" लघुहा० । "एकाहः पुनराब्दिके" स्मृतिः । [आदौ

आव्य त्रि० अवेर्मेषस्य विकारः यञ् । मेषसम्बन्धिनि दुग्धादौ

आव्याध पु० आ+व्यध–घञ् उपसृष्टत्वात्न अप् । सम्यक्पीडने

आव्याधिन् त्रि० आ+व्यध–णिनि । सम्यक्पीडके । स्त्रियां ङीप् । सा च २चोरसेनायाम् "नदीषिकाः पुरुषव्याघ्राः परिमोषिण आव्याधिन्यस्तस्करा अरण्येष्वाजावेरन्" यत० ब्रा० "आव्याधिन्यः चोरसेनाः" भा० ।

आव्रश्चन न० व्रश्च् व्रश्चनं छेदनम् प्रा०स० । १वृक्षच्छेदने, "आव्रश्चनाहनस्तयोस्तुप्रजायन्ते" यत०ब्रा० । आधारे ल्युट् । २छेद्यवृक्षप्रदेशे त्रि० आज्ञप्त्या हि यो यूपः संस्कर्त्तव्यः स्थाणुः आव्रश्चनशब्देनोच्यते "आतस्त्वमित्याव्रश्चने जुहोति" काशा० ६.१,२० । आहृश्यते यूपोऽस्मादाव्रश्चनः स्थाणौ छेदनप्रदेशः" इत्तिः "आव्रश्चनमभिजुहोति" यत०ब्रा० ।

आव्रस्क पु० आ+व्रश्च–घञ् कुत्वम् । वृक्षच्छेदने । आत्मनेपदिनाव्रस्काय" तैत्ति०स्मृतिः । [वृक्ष । निर्लज्जदेशे ।

आव्रीडक पु० आव्रीडस्य निर्लज्जस्य विषयो देशः राजदन्ता०

आव्रु पु०अव–भोजने वृक् । भोजने । प्रातराशः, सायमाशः, कर्मणि उपपदे कर्त्तरि अण् उपपदस० । तत्तद्वस्तुभक्षके

यथा कृताय: आश्रयाय: मांसाय: पक्वाय: कृविष्याय:।

आशंसा स्त्री आ+शंस-अ। अप्राप्तस्य १प्राप्तीच्छायाम्, २दृष्टार्थाशंसने च। "निदधे विजयाशंसां चापे सीताञ्च लक्ष्मणे" रघु:। "आशंसायां भूतवच्च" "आशंसावचने लिङ्" पा०। ल्युट् आशंसनमप्यत्र न० "दृष्टार्थाशंसनमाशी:" रघु०। [भूते। भावे क्त २आशंसायाम् न०।

आशंसित त्रि० आ+शंस-क्त। १कथिते २दृष्टाविषयी-

आशंसितृ त्रि० आ+शंस-तृच्। भाविशुभेच्छावति। स्त्रियां ङीप्। [कर्त्तरि स्त्रियां ङीप्।

आशंसिन् त्रि० आ+शंस-णिनि। आशंसौ आशंसा

आशंसु त्रि० आ+शंस-उ। दृष्टाकारके भाविशुभाशंसावति "लक्ष्मी: पुंयोगमाशंसुः कुलटेव कुलद्वयम्" भट्टि:

आशक त्रि० अश्नाति अश-ण्वुल्। १भक्षके २भोगयुक्ते। ण्विच्-ण्वुल्। २भोगसम्बादके। "तमेतं ब्राह्मणा-विविदिषन्ति-तपसाऽनाशकेन" श्रुति:।

आशक्त त्रि० सम्यक् शक्त: प्रा०स०। सम्यक्शक्तियुक्ते

आशङ्कनीय त्रि० आ+शकि-अनीयर्। १शङ्कया विषयीकार्य्ये २अनिष्टतया चिन्तनीये च।

आशङ्का स्त्री आ+शकि-अ। १भये त्रासे अनिष्टतया २चिन्तने "यद्यदृतायङ्कमनीचकाशे" माघ:। "रत्या च साशङ्कमनुप्रयात:" कुमा०। "शुद्धपरिकर्म्मसमाशङ्का पाण्डु-रोगयक्ष्मोदोष योषाणाम्" सुश्रु०सम्यक्शङ्कायां २सन्देहे इत्याशङ्कायामाह इति भूरिप्र: जगदीश: गदाधरश्च प्रायुङ्क्त।

आशङ्कित त्रि० आ+शकि-कर्त्तरि क्त। १भीते कर्म्मणि क्त अनिष्टतया २चिन्तिते ३सन्दिग्धे च। भावे क्त। २भये ३सन्देहे ५अनिष्टतया चिन्तने च न०।

आशङ्किन् त्रि० आ+शकि-णिनि। आशङ्कायुक्ते "रघोरभिनवाशङ्कि चुक्षुभे हिमतां गत:" रघु:। अशुभाशङ्कि हृदयम्" रामा० कुजा नोचतयैव वान्ति मनकैरालक्ष्यते-शङ्किन:" रत्ना०। स्त्रियां ङीप्।

आशङ्क्य त्रि० आ+शकि-कर्म्मणि यत्। १सन्देहविषयीकार्य्ये २अनिष्टतया चिन्त्ये क्त्वप्। ३संदिग्धेत्यर्थे ४अनिष्टतया भाव्येत्यर्थे च अव्य० अव्याप्यवृत्तिसाध्यकसन्देहावव्याप्तिमाशङ्क्याह" दीधितिः।

आशन पु० अशनएव स्वार्थे अण्। १अशनदक्षे द्विरूपकोष: अश-ल्युट्। २भोजयितरि त्रि०। अशनि: अशनि-जीवी स्वार्थे पक्षा०-अण्। ३वज्रजीविनि त्रि०। आशन: आशनौ वज्रेतु तक्षत्वक् अशनव इत्येव। अशनिरेव प्रज्ञा०

अण्। ४वज्रे स्वार्थिकप्रत्ययस्य प्रकृतिलिङ्गत्वात् पुंस्त्री०।

आशय पु०आ-शी-अच्। १अभिप्राये, २आधारे, ३विभवे, ४मनसदक्षे वैद्यकोक्ते ५स्थानभेदे च। आ फलविषयात् चित्तभूमौ शेते इति कर्त्तरि अच् कर्म्मजन्ये दैवासनारूपे संस्कारे, "क्लेशकर्म्मविपाकाशयैरपरामृष्ट: पुरुषविशेष ईश्वर:" पात०सू०। धर्माधर्मरूपे दृष्टे च। अधारे अच्। आशयवति दृचित्ते। "अकृतात्माऽयुक्तेश्च। सर्व-भूताशयस्थित:" गीता०। भावे अच्। १०शयने ११स्थाने च "यो यक्षानेदृगाशय:" किरा०। "अक्षोत्तुकामादरिणाशय-येन" नैष०। विषमोऽपि विगाह्यते नय: कृततीर्थ: पयसा-मिवाशय:" किरा०। "दृष्टोत्थैतानि संयाति वायुर्गन्धा-निवाशयात्" वैद्यकोक्ता: देहान्तर्वर्त्तिन आशयास्तु सप्त यथा ह" श्रुतौ "त्वच: सप्त, कलाः सप्त, आशया: सप्त" इति विभज्य आशयास्तु वाताशय: पित्ताशय: श्लेष्माशय: रक्ताशय: आमाशय: पक्वाशय: मूलाशय:, स्त्रीणां गर्भाशयोऽष्टम" इति। एषां स्थानानि भावप्र०। "उरोरुक्षाशयस्थस्यादध:श्लेष्माशय: स्मृत:। आमा-शयस्तु तदध: सञ्चित्य चरकोऽवदत्" नाभिस्थानान्तरं जन्तोराद्धरामाशयं बुधा:। आमाशयादध: पक्वाशयादूर्द्धं तु या कला। यकृत्प्लीहामिका सैव कथित: पाचकाशय:। जर्त्वमन्त्राशयो नाभेर्मध्य-भागे व्यवस्थित:। तस्योपरि विज्ञेयं तदध: पवनाशय:। पक्वाशयस्तु तदध: सप्त च मलाशय:। तदध: कथिता वस्ति: सा हि मूलाशयो मत:। पुरुषेभ्योऽधिका-स्त्रीणामाशयास्त्रय:। एकोनगर्भाशय: प्रोक्त: पित्त-पक्वाशयान्तरे। स्तनौ प्रसिद्धौ तावेव बुधै:स्तन्याशयौ स्मृतौ"। १२कोष्ठागारे १३बौद्धमतसिद्धे आलयविज्ञान रूपे विज्ञानसन्ताने १४आस्पदे १५किंपचाने पचुधार-णार्थगर्त्तरूपे १६ज्ञातभेदे च। "अयञ्च पार्थो बीभत्सु-र्वरिष्ठोऽस्त्राविकर्षणे। आस्ते परमसन्तोषं नूनं क्षिप्त इवाशये" भा०व० २५अ०।

आशयाश्म पु० आशयमाश्रयमश्नाति अश-अण् उप०स०। वस्तौ जोरखभौ तस्य स्वाश्रयकाष्ठादेर्भक्षकत्वेन तथात्वम्

आशर पु० आशृणाति आ+शृ-अच्। १अग्नौ, २राक्षसे च।

आशव न० आशोर्भाव: पृषो० वा अण्। शीघ्रत्वे पर्य्ये ईमनिच् आशिमा पु०। त्व आशुत्वम् न०तस् आशुता स्त्री तत्रार्थे।

आशस् त्रि०आ+शंस-क्विप्। १आशंसनकर्त्तरि। भावे क्विप्

आशंसने "नमसा पृच्छ्यमानस्त्वाशसा जातवेदोयदीदम्" ऋ०७,५,११, "तवाशसा त्वदुत्या" भा०।

आशसन न० आ+शंस-ल्युट्। १कथने २आशंसायाञ्च। "तस्या आशसनं कृत्वा मैनिराशसनम्" अथ० १२, ५,३६, "शिष्टेऽस्याशसनं जनिष्यते" शत०ब्रा०।

आशस्त त्रि० आ+शंस-क्त। स्तुते। "यच्छिद्धि सत्य सोमपा अनाशस्ता इव स्मसि" ऋ०१,२,६१।

आशा स्त्री सम्यक्त्वात् अश्नुते आ+अश-अच्। दिशि, "अगस्त्याचरितामाशामनाशास्यजयोयथौ" रघुः "करभकरुहकुङ्कारमाशाः" माघः। "गच्छतस्तस्य चित्तरथतनया न केवलमन्तर्बहिरपि सैव सर्व्वाशाभिबन्धनमासीत्" काद०। दिक् च नैयायिकादिमते संख्यापरमितिदृषकत्वसंयोगविभागाश्रयेद्रव्यभेदः दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया तत्सिद्धिः तस्या एकत्वेऽपि उपाधिभेदात् प्राच्यादिव्यवहारः तथा च यत्पुरुषस्य उदयगिरिसन्निहिता या दिक् सा तस्य प्राची, उदयगिरिव्यवहिता प्रतीची तत्पुरुषीयमेरुसन्निहिता दिगुदीची "सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थितः" इत्युक्तेरुत्तरत्वात्तथात्वम्। तद्व्यवहिता दिक् अवाची। दृश्यत्व दिक् ईश्वर एवेति रघुनाथः "दिक्कालावीश्वरादतिरिच्येते" इति पदार्थखण्डने तस्योक्तेः सां०कौ० मते यदुपाधिना पूर्व्वापरत्वव्यवहारस्तदुपाधेरेव दिक्शब्दवाच्यत्वं न तदाश्रयत्वेनातिरिक्तदिक्कल्पनम् तथा च गगनात्मकत्वमेव दिशः "दिक्कालावाकाशादिभ्यः" सां०सू० आकाशोपाधिभ्यामेव दिक्कालयोर्नार्थान्तरत्वमिति व्यवस्थापितम्।

२अगस्त्योपावार्थविषयायाम् तीव्राकाङ्क्षायाम् ३अप्राप्तप्राप्तीच्छायां तृष्णायां च। "आशा बलवती राजन्! यस्योज्जेष्यति पाण्डवान्" "तासामाशां हृदये कृत्वा" भा० यत्स्यप०। "आशा हि परमं दुःखं नैराश्यं परमं सुखम्। यथा संछिद्य कान्ताशां सुखं सुष्वाप पिङ्गला" पुरा० "मनो बधूवेन्दुमतीनिराशम्" "राघवोरथमप्राप्तां तामाशामिव सुरद्विषाम्" रघुः आशायाश्च ब्रह्मरूपेणोपासनं श्रुतौ विहितं यथा "अरात्वाव भूयोऽशीति तन्मे भगवान् ब्रवीत्विति" प्रश्ने "आशावाव अरादभूयस्त्वमेवैतं अरोमन्वानधीते कर्म्माणि कुरुते पुत्रांश्च पशूंश्चेच्छत इमं च लोकमसुञ्चेच्छत आशासुपास्वेति। स य आशां ब्रह्मेत्युपास्ते आशयास्य सर्व्वे कामाः समृध्यन्त्यमोघाः फलायिनो भवन्ति यावदाशाया गतं तत्रास्य यथा कामचारो भवति य आशां ब्रह्मेत्युपास्ते" छा०उ० आख्यातं च भा०। यथा "आशावाव अरादभूयसी। आशाप्रवत्वाकाङ्क्षा आशा तृष्णा काम इति यावाशुः पर्य्यायः। सा च अरात् भूयसी। कथम्? आशया ह्यन्तःकरणस्थया अरति गच्छति। आशा विषयरूपं अरत्वसौ अरो भवति आशेद्ध आशयाभिवर्द्धितः अरभूतः अरवृगादीन्मन्वानधीतेऽधीत्य च तदर्थं ब्राह्मणेभ्यो विधीच्च श्रुत्वा कर्म्माणि कुरुते तत्फलायैव। पुत्रांश्च पशूंश्च कर्म्मफलभूतानिच्छतेऽभिवाञ्छति आशयैव तत्साधनान्यनुतिष्ठन् इमञ्च लोकमाशेद्धएव अरन् लोकसंग्रहैषिभिरिच्छद्भिश्च लोकमाशेद्धः अरन् अराकाशादिनामपर्य्यन्तं जगद्भक्षीभूतं प्रतिप्राणि, अत आशायाः अरादपि भूयस्त्वमित्यत आशासुपास्व। यस्त्वाशां ब्रह्मेत्युपास्ते ह्यणु तस्य फलम् आशया सदोपास्तियास्योपासकस्य सर्वे कामाः समृद्धन्ति समृद्धिं गच्छन्त्यमोघाफलायिनः प्रार्थनाः सर्व्वा भवन्ति यत् प्रार्थितं सर्व्वं तदवश्यं भवतीत्यर्थः"। ईषद्भक्षे दमादायैव आशाकामतृष्णादेर्भेदं तदभिप्रायेणैव "आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला" इत्यादौ आशादीनां भेदेन वर्णनम्।

आशा(ड)ढ पु० आषाढ+पृ०। आषाढशब्दार्थे द्विरूपकोषः

आशाढा(ढी) स्त्रीपृ०आषाढानक्षत्रे "मार्गे च फाल्गुने चैव आशा(ढे)ढे कार्त्तिके तथा। पक्षयोर्भाषमासस्य द्वितीयां परिवर्जयेत्" मल० त० पु०। आशाढा प्रयोजनमस्य अण्। २ब्रह्मचारिधार्य्ये पालाशे दण्डे। आशाढानक्षत्रयुक्ता पौर्णमासी अण्ङीप्। आशाढी चान्द्राशाढपौर्णमास्याम् स्त्री सा यत्र मासे अण्। चान्द्राशाढे पु०।

आशादामन् न० आशा दामेव उपमि० स०। आशारूप बन्धनसाधने दामनि आशारूपरज्जौ।

आशापाल पु० आशां दिशं पालयति पा-णिच्-अण् उप०स०। १दिक्पाले इन्द्रादौ ते च "इन्द्रोयमश्चपितृपतिर्नैर्ऋतोवरुणोमरुत्। कुबेरईशः पतयः पूर्व्वादीनां दिशां क्रमात्" इत्यमरोक्ता अष्टौ ऊर्द्ध्वाधोदिशोश्च ब्रह्मानन्तौ चेति दश। २अश्वमेधीयपशुरक्षके राजकुमारभेदे च। तेषां स्वरूपादिकस्तु शत०ब्रा०। "आदित्यानेवैनं गमयति देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितं रक्षतेति यतं वै तत्प्रा राजपुत्रा आशापालास्तेभ्य एवैनं परिददातीह रन्तिरिह रमतामिह धृतिरिह स्वधृतिः स्वाहेति संवत्सरमाक्रीडतीर्जुहोति

षोडश नवतीरेता वा अश्वस्य बन्धनं ताभिरेवैनं बध्नाति तस्मादश्वः प्रसन्नोबन्धनमागच्छति षोडश नवतीरेता वा अश्वस्य बन्धनं ताभिरेवैनं बध्नाति तस्मादश्वः प्रसन्नोबन्धनं जहाति। राष्ट्रं वा अश्वमेधः राष्ट्रियते आयच्छन्ते मेध्यं रक्षन्ति तेषां य उदर्चं गच्छन्ति राष्ट्रियैव ते राष्ट्रं यन्ति अथ ये नोदर्चं गच्छन्तिराष्ट्रात् व्यवच्छिद्यन्ते तस्माद्राष्ट्रियोऽश्वमेधेन यजेत परा वा एष सिच्यते योऽनग्नीरश्वमेधेन यजते यद्यग्निमो अश्वं विन्देत यत्तोऽस्य विच्छिद्येत पापीयान् तस्माच्छतं कवचिनो रक्षन्ति यत्तस्य संतत्या अव्यवच्छेदाय न पापीयान् भवत्यथान्यमानीय प्रोक्षेयुः, सैव तत्र प्रायश्चित्तिः" शत०ब्रा०। अधिकमश्वमेधशब्देदृश्यम्।

आग्नापुर न० पुरभेदे यत्र प्रद्युम्नगुरुर्वसन्तवज्राद्दग्धे नगरे।

आग्नापुरसम्भव न० आग्नापुरे सम्भवति सम्+भू अच्। गुग्गुलुभेदे।

आग्नाबन्ध पु० आग्नां दिशं बध्नाति अच्। १सर्कटजाले, -बन्ध-घञ् इत०। २तथाबन्धे ई०त०। ३दिशां बन्धे च। ४समाम्नासे। आग्ना बन्धश्च। ५आग्नाख्ये बन्धे। "आग्नाबन्धः कृत्तसप्तदशं प्रायश्चित्तानाम्" भेषजटी०।

आग्नाबन्ध त्रि० बन्ध-अच् ई०त०। १आग्नाधायके आग्नासंपादके। २नक्षत्रभेदे "आग्नाबन्धो निरुद्धसमीक्षः सारिनेजय" भा०आ० १८६अ०। २दिवः पुत्रभेदे च पु०"दिवः पुत्रो बृहद्भानुश्चतुरात्मा विभावसुः। सविता स ऋचीकोऽर्कः भानुरात्मबन्धो रविः" भा०आ० १अ०।

आग्नाय त्रि० आ+ग्ना-घञ्। आग्नीःसाध्ये, आग्नयनीये "आग्नाध्यमन्यत् पुनरुक्तमेव" रघुः। "अनाग्नाध्यजयोयदौ" रघुः।

आग्नात त्रि०आग्नाति आ+ग्ना-क्त। १सम्यगभ्यस्ते, अक्षादौ भावे क्त। २सम्यगभ्यसने न०। आग्नातमक्षस्य अर्थ० अच्। ३अग्नयेन हृते त्रि० "नातिप्रगे नातिसायं न सायं प्रातरग्नितः" मनुः।

आग्नातकृतीन त्रि० आग्नाता अग्नयेन हृत्वाग्नाबो यत्र खञ् त्रि० तुम्। यत्र स्थले वासादिभक्षणेन गावश्चरन्निमाग्नाख्ये प्रचुरवासे स्थले "क्रियाग्नातकृतीनानि" भट्टिः।

आग्नातभव त्रि०आग्नातोऽग्नयेन हृतो भवत्यग्नयेन आग्नात+भू-खरुचे अच् तुम् त०स०। १यस्य भोजनेन प्राग्निनकृत्प्राभवन्ति २ताडयेऽक्षादौ। भावे अच्। ३अग्नयेन हृतभवने न०। "अक्षैर्वेश्माग्नातभवम्" भट्टिः। [ङीप्।

आग्नाह त्रि० आ+ग्रह-क्त। हृत्या भक्षणे ई०त०। स्त्रियां

आग्निम् त्रि० अग्न-भोजने थिनि। भक्षके "ब्रह्मणवाडो मांसाशी सर्पराशी मद्यालम्" वटुकशोलम्। "मांसस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी" "भोजनार्थन्तु ते संस्तु वाल्लाशीत्युच्यते बुधैः" "आगारदाही गरदः कुण्डाशी सोमविक्रयी" "पिशुनाशी भवेन्नित्यं नित्यं वाऽहुतभोजनः" इति च मनुः। "दिवोपवाशी तु निशामिताशी" काशी० "एवं ज्ञात्वा कविर्विद्याशी जमेज्ञत्तमनन्यधीः" तन्त्रम्।

आग्निल त्रि० आग्नि+स्वार्थे अण् वेदे त्रि० न टिलोपः। भक्षके "जनोयुवभ्योजन आग्निभ्यः" ऋ० १,२७,१३।

आग्निमन् पु०आग्नीर्भावः मुच्या० इमनिच् ङित्वात्। वीभत्से।

आग्निर् त्रि० आग्नीयते पच्यते आ+ग्नी-क्विप् त्रि०। पच्यमाने क्षीरादौ "मुक्ता आग्निरं यावन्ते" ऋ० ८,२,१०। "आग्निरं क्षीरादिकं अग्नयेदृश्यम्" भा०। "ता आग्निरं पुरोडाशमिन्द्रियम्" ऋ० ८,२,१०। "इन्द्रा य गाव आग्निरं दुदुह्रे वज्रिणे मधु" ऋ० ८,५८,६।

आग्निर त्रि० आग्नीरेव स्वार्थे अण्। अग्नयीये क्षीरादौ "अथ यद्येतुर्भवति साग्निरमेवैतत् क्रीणाति" शत० ब्रा० २,२,१। आ+अग्न-आग्नौ भोजने वा इरच्।२अग्नौ ३क्षत्रिये ४राक्षसे च पु० वि०को०। अग्निराक्षसयोः सर्वभक्षत्वात्, क्षत्रियस्य च दीप्त्या सर्वव्याप्तियोगत्वात्।

आग्निविक त्रि० आग्निना चरति ठन् "इकसुकञ्ठञ्ठाल्" पा०सूत्रे प्रतिपादोक्तस्यैव इको पक्षत्वात् न कः किन्तु ठक एव। आग्नीध्रीयेण चरितमि आग्नीध्रिके।

आग्निष्ट त्रि० आ+ग्नास-क्त। जताग्नीध्रीये।

आग्निष्ठ त्रि०अतिशयेन आशु दृढम् ङित्वत्। अत्यन्तशीघ्रे।

आग्निस् स्त्री आ+ग्नास् क्विप् आदृपूर्व्वत्वात् अतदृत्वम्। १दृष्टार्थाविघ्नकरणे। "यां वै कामु यज्ञ ऋत्विज आग्निमायाचते यजमानस्यैव सा" शत० ब्रा० १,२,१,२६। "आग्नीध्रमक्षिया वस्तुनिर्देशोवाऽपि तत्कुले" सा०६०। "जगत्करणस्य निराग्निधः सतः" कुमा०। "अनोवाः प्रतिदृष्टमत्यवर्त्तानुपदमाग्निधः" रघुः। २प्रार्थनायाञ्च तस्य आज्ञाः सञ्जघन्यमोवाङ्माग्निधो भवन्ति" सा०६०। "आग्निधः प्रार्थनाः" भा०। "वेदोक्तमायुर्मन्त्राणामाग्निधर्वं कर्मणाम्" मनुः। आग्नीध्र "वासुसख्याद्याल आग्नेय कनिष्ठाभिधीयते। दृढावधारकं वाक्यमाग्नीधः सा परिच्छित्ति" इत्येवं लक्षणा प्रार्थनायाम् अत्र कनिष्ठेत्युपलक्षणम्। "तत्र जयाग्नीः सङ्गजे पुरस्तात् सम्मिश्रिताग्नीः क्षितपूर्व्वभाङ्" कुमा० सम्मिश्रितग्नियाग्नीध्रीयत्वात्

आशी स्त्री आशीर्यतेऽनया आ+शॄ क्विप् पृ० । "१सर्पदंष्ट्रायाम् । आशीविषः । "विषमाशीभिरत्यन्तं क्षमन्तः साधवः । "आशीभिव सलाभिर्व्योः" राजेश्वरः "आशी उरगदंष्ट्रायाम्" मेदि० । "आशी तालुगता दंष्ट्रा तया विद्धो न जीवति" आशिस् पृ० । २आशीर्व्यादे द्विरूपकोषः २दङ्गिनामोषधौ च । स्त्रियां ङीप् ।

आशीयस् त्रि० अतिशयेनाशुः दीर्घ इयसुन् । अत्यन्तशीघ्रे

आशीर्त्त त्रि० आ+शॄ-क्त वेदे त्रि० । आक्रान्ते पक्वे दुग्धादौ "मध्यत आशीर्त्तः" त्रि०कौ० धृता श्रुतिः ।

आशीर्वत त्रि० आशीरस्त्यस्य मतुप् वेदे मस्य वः । आशीर्वादयुक्ते "सवनान्याशीर्वन्ति" कात्या० २,८,८ कर्के तु आशीर्मन्त्रिणीत्येव स्त्रियां ङीप् ।

आशीर्वाद पु० आशिषो वादः वचनम् । इष्टार्थाविष्करणवाक्ये "मङ्गल्यं दीर्घवर्त्तिनामाशीर्वादाभिधानवत्" मनुः "संजानन्त्यतुलं वीर्य्यमाशीर्वादपरायणाः" भा० आ० ५ अ० । आशीर्वचनादयोऽप्यत्र । "आशीर्वचनसंयुक्तां नित्यं यच्छन्ति प्रकुर्व्वते" भा० द० ।

आशीविष पु० आशुः विषमस्य । १सर्पे तद्दंष्ट्राक्रियत्वे ५८१ पृष्ठे उक्ताः । "गरलदाशीविषभोगदर्शनैः" रघुः २दन्तीकरसर्षपभेदे च अक्षिण्यत्वे सुश्रुते उदा० "आशीविषः क्षणसर्पैर्भीमसेनमदंशयत् । सर्व्वेषेवाक्षदेशेषु न प्रमारं च गच्छति" भा० व० १२ अ० । "तैर्यिकं भुङ्क्ते यस्तु मणिनागस्य भारत ! । दष्टस्याशीविषेणापि न तस्य क्रमते विषम्" भा० व० ८४ अ० । "क्षुद्रान् सतः सत्यशीलान् सत्यधर्म्मानुपाश्रितः । आशीविषानिव क्रुद्धान् पतीन् परिचरान्यहम्" भा० व० २२२ अ० ।

आशु त्रि० अश्-आशुः उण् । १शीघ्रे "यदाशुभिः पतति योजनान्तरः" ऋ० २, १९, २, गुणवचनत्वात् स्त्रियां वा ङीप् । वर्णाभेदे २धान्यभेदे पु० (आउस) । तस्य वर्हिदिवसमध्ये पच्यमानतयाऽऽशुधान्यात् आशुत्वम् तद्गुणलक्षणानि भाव० । "वार्षिकाः शालिषष्टाः शुक्लाश्रीव्रीहिरुपचिरपाकिनः । क्षुद्राश्रीव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि । शालीक्षुगोजतुण्डश्च इत्याद्याश्रीव्रीहयः स्मृताः । क्षुद्राश्रीव्रीहिः स विज्ञेयो यः क्षुद्रतण्डकुक्कुटः (ओड्र) । पाटलः पाटलाघ्रुम वर्णको व्रीहिरुच्यते (राजिधान्य) कुक्कुटाण्डाकृतिव्रीहिः कुक्कुटाण्ड इत्युच्यते । शालीक्षुकः क्षुद्रशुकः क्षुद्रतण्डक उच्यते । क्षुद्रावर्णं तण्डं यस्य स तोयजतण्डस्तु सः । व्रीहयः कथिताः पाके मधुरा वीर्य्यतो हिमाः । अल्पाभिष्यन्दिनोऽल्पवर्चस्काः षष्टिकैः समाः" "क्षुद्राश्रीव्रीहिरङ्गेषु तत्कादङ्गगुणाः परे" २ पाठले व्रीहौ न० । ३क्रियाविशेषवति त्रि० । "प्रस्थितः सत्वमपि भवान् गन्तुमाशु व्यवस्यन्" यानि नेयं प्रणधिभिरतीवार्त्त भावोऽजायु" मेघदूतम् "स जीवसञ्चैव मृदूत्यमाशु गच्छति सान्तयः" "कृत्वान्येव नयन्त्याशु समस्तानि च भूरुताम्" मनुः

आशुकारिन् त्रि० आशु शीघ्रं करोति कृ-णिनि स्त्रियां ङीप् । १शीघ्रकरे "आशुकारी तथाशुत्वाद्यथास्मिन् तैलबत्" सुश्रुतोक्ते २द्रुवभेदे च । क्विप् । आशुकृत्यत्र त्रि० ।

आशुक्रिया स्त्री आशु यथा तथा क्रिया । शीघ्रकरणे "अष्टाङ्गमायुर्वेदतन्त्रेषु एतदेवाधिकमभिमतमाशुक्रियेति" सुश्रु० ।

आशुग पु० आशु+गम-ड । १वायौ, २सूर्य्ये च । एतयोः शीघ्रगामित्वात् तथात्वम् । "वायुर्वै क्षिप्रिका देवतेति" श्रुतौ क्षिप्रगामित्वोक्तेः शीघ्र गतिप्रवृत्तित्वाच्च वायोस्तथात्वम् सूर्य्यस्याशुगत्वमनुपदं वक्ष्यते ३वाणे "पपावनाक्षादितपूर्व्वमाशुगः" "रावणस्य-पि रामास्त्रोभिन्नं हृदयमाशुगः" रघुः ४शीघ्रगामिनि त्रि० विनीतैस्तु प्रजेशित्वमाशुगैर्कक्षणान्वितैः" मनुः । "दिशां गजस्तु श्वेताक्षं (ऐरावतम्) श्वेताऽजनयताशुगम्" भा० आ० ५० ६६ अ० । "जवनाश्चाशुगाश्चैव वराश्च सदृशानयत्" भा० स० प्र० २६ अ० "शोभमाना रथे युक्ताश्चारित्र्यनवयाशुगाः" भा० व० प० १६१ अ० । आशुगत्वं च अल्पकालमध्ये गन्तव्यदेशगमनात् भवति कालाल्पत्वञ्च आपेक्षिकं ततश्च "शीघ्रोऽल्पभागे शुक्रभागमन्दे" इत्यादौ गोल० ता० पङ्क्तीनां शीघ्रमन्दत्वमापेक्षिकमिति बोध्यम् तथा च खलक्षाख्यां पङ्क्तीनां तुल्यगतित्वेऽपि कक्षाणामल्पत्वदृष्ट्याभ्यां गन्तव्यदेशाल्पाधिकत्वभेदात् गतिभेदः पङ्क्तीनां कक्षामान च पङ्क्तिकक्षाख्ये वक्ष्यते । तथा च खल्पकक्षाख्यपङ्क्त्या दृष्टकक्षाख्यपङ्क्तेरपेक्षया शीघ्रगत्वम् तच्च स्वाभाविकम् । अत्र प्रसङ्गात् पङ्क्तीनां शीघ्रमन्दगतित्वे कारणमुच्यते तथा हि सर्व्वेषां पङ्क्तीनां राशिचक्रस्थलक्षणत्वात् तुल्यप्राग्गतित्वेऽपि खलक्षाख्यानामल्पत्वदृष्ट्याभ्याम् अल्पाधिकत्वाभ्यामेव खलक्षाख्यराशिचक्रस्थभागभोगः दृश्यतो यस्य यत्र लब्धौ स शीघ्रगः यत्र च दृश्यतो स मन्दग इत्युच्यते एतदभिप्रायेणैव पङ्क्तीनां राशिभोगे लाघवभेदो दर्शितः यथा "रविभांशं निशानाथः सपाददिवसत्रयम् । मङ्गलं भूमिपुत्रो बुधोऽष्टादश वासरान् । बृहस्पतिं सुराचार्य्यस्त्रयोविंशं दिनं भगुः ।

यनि· सार्द्धद्वयं वर्षं राज्ञः सार्द्धसप्तां तथा" ज्यो० सूर्यस्य यद्यपि चन्द्रबुधशुक्रापेक्षया मन्दगतित्वम् तथापि कुजगुरुराहुशन्यपेक्षया शीघ्रगतित्वात् आशुगत्वम्। स्वस्वकक्षायां सूर्ययोगेन च सर्वाणां पुनःशीघ्रगत्वं "सूर्ययुक्ता ग्रहाः शीघ्रा इत्युक्तेः। ग्रहाणां शीघ्रनीचशीघ्रफलादिकम्" सि०शि० दर्शितं विस्तरभयान्नोक्तं तत एवावसेयम्। किञ्च सर्व्वग्रहापेक्षया राशिचक्रस्य शीघ्रगतित्वात् प्रतिदिनं स्वगत्यनुसारेण ग्रहाणां प्राग्गतित्वेऽपि राशिचक्रस्य प्रवहवायुना पश्चात् नीयमानतया तदारूढरव्यादेः पश्चाद्गतित्वभ्रमात् तदनुरूपशीघ्रगत्वमारोप्यते। ग्रहाणां राशिचक्रभोगार्थं स्वस्वकक्षासु या प्राग्गतिस्तस्या अल्पकालसाध्यत्वे शीघ्रत्वमिति बोध्यम्। एवं ग्रहाणां स्वाभाविक्यां स्वस्वकक्षासु गतौ स्थितायामपि प्रवहानिलेन पश्चाद्भ्राम्यमाणस्य राशिचक्रस्य प्रतिदिनं पृथिवीभ्रमणात् तद्गतेश्च सर्व्वग्रहापेक्षयातिशीघ्रत्वात् तत्र च वंभ्रम्यमाणराशिचक्रस्य गतौ तत्स्थग्रहगतित्वारोपेण नीकागतौ तत्स्थवस्तुगतित्वारोपवत् ग्रहाणां राशिचक्रतुल्यशीघ्रगतित्वं पुराणादावुक्तम् यथा "योजनाना सहस्रे द्वे द्वे शते द्वे च योजने। एकेन निमिषार्द्धेन क्रममाण नमोऽस्तु ते। नवतिर्योजनानाञ्च सहस्राणि च सप्तधः। यावद्घटिकभात्रेण तावच्चलति भास्करः" व्याख्यातञ्च। "यदा चेन्द्राः पुर्य्याः प्रचलति पञ्चदशभिर्घटिकाभिर्याम्यां सपादकोटिद्वयं योजनानां सार्द्धद्वादशलक्षाणि साधिकानि चोपयाति" भाग० ५ स्क० २० अ० "साधिकानि पञ्चविंशतिसहस्राधिकानि" श्रीधरः। तेन पञ्चदशभिर्घटिकाभिर्यदि २२७७५००० योजनानि तदा ६० दण्डात्मके दिने कानीति चतुर्भिर्गुणितानि तानि प्रत्यहं राशिचक्रगतिमानं तदारोपाच्च सूर्य्यादीनां तथागतित्वमिति बोध्यम्। एतदपि पुराणाश्रितं वस्तुतोराशिचक्रस्य प्रत्यहं पृथ्वीभ्रमणात् राशिचक्रपरिधिमानमेव अहोरात्रे गन्तव्ययोजनमानमेतच्च खगोलशब्दे वक्ष्यते। तथा च अल्पकालेन गन्तव्यस्थानगामित्वमाशुगत्वमिति सिद्धम्।

आशुगामिन् स्त्री आशु गच्छति गम–णिनि। १शीघ्रगामिनि स्त्रियां ङीप्। २सूर्य्ये पु० "आशुगामी तमोघ्नश्च हरिताश्वश्च कीर्त्यते" भा०४०प० ३अ० सूर्य्यस्तवः।

आशुगन्ध त्रि०आशु गन्धति वेदे नि० खच् मुम्। शीघ्रगामिनि "निर्वलासेत प्रपताशुगः शिशुको यथा" अथ०६, १४, ३

आशुतोष पु० आशु शीघ्रं तोषो यस्य। १शिवे खल्पकालार्चनेनैव तस्य तुष्टत्वात् तथात्वम्। २शीघ्रतोषयिषि त्रि०।

आशुपत्नी स्त्री आशुपत्नं यस्याः गौ०ङीष्। यज्ञकीलतायाम्

आशुपत्वन् पु० आशु पतति पत–वनिप्। १शीघ्रगामिनि "ग्रहेन ग्रहेभ्य आशुपत्वा" ऋ० ४, ६, ४। स्त्रियां ङीप् रत्वं। आशुपत्वरी।

आशुमत् त्रि०आशु शैघ्र्यं विद्यतेऽस्य मतुप्। शीघ्रतायुक्ते "यथा सूर्य्यस्य रश्मय परापतन्त्याशुमत" अथ०६, १०५, २

आशुव्रीहि पु० कर्म्म०। वार्षिके धान्यभेदे (आउस) आशुशब्दे विवृतिः।

आशुशुक्षणि पु०आ+शुष–सन्+अनि। १अग्नौ, २वायौ च। अस्य च वेदएव प्रयोगः लोकेऽपि क्वचित्तेन "मन्त्रपूतानि हवींषि प्रतिगृह्णात्येतत्प्रीत्याशुशुक्षणिः" काठ० "अन्तरात्मा ह्ययं साक्षात्त्रिस्तोत्राशुशुक्षणिः" काशी०।

आशुषाण त्रि० आ+शुष–कर्त्तरि कानच्। सम्यक् शुष्यमाणे

आशुहेषस् त्रि० आशु+हेष–शब्दे–असुन्। शीघ्रं शब्दायमाने। "इन्द्राविष्णू वृत्रिणी वाशुहेषसा" ऋ०८, १०, २, "आशुहेषसा शीघ्रं शब्दायमानौ" भा०।

आशू त्रि० आशु+वेदे पृ०दीर्घः। शीघ्रे। "इन्द्र प्राप्नुभया सचा" यजु०२४, ५, ६, "आशुशब्दो दीर्घश्छान्दसः" वेददीपः। [कृटति–णिनि। पर्व्वतभेदे शब्दमाला।

आशोकुटिन् पु० आशेतेऽस्मिन् आ+शी+विच् स इव

आशोकेय त्रि० अशोक+चतुरर्थ्यां सख्या० ढञ्। अशोक वृक्षसन्निकृष्टदेशादौ। अशोका+शुभा० ढक्। अशोकाया अपत्ये। स्त्रियां तु गार्ङ्गरवा० ङीन्। आशोकेयी।

आशौच न० अशुचेर्भावः अण् "नञ् शुचीत्या०" पा० पूर्व्वपदस्य वा वृद्धिरुत्तरपदस्य नित्यम्। अशौचशब्दार्थे ४८६ पृष्ठे विवृतिः। "दशाहं शावमाशौचं ब्राह्मणस्य विधीयते" "सर्व्वेषां शावमाशौचं मातापित्रोस्तु सूतकम्" "त्रिरात्रमाकुराशौचमाचार्य्ये संस्थिते सति" मनुः अज्। आशौच्यमप्यत्र न० "आशौच्यात् विप्रमुच्यते ब्राह्मणान् क्षत्रियाच्च च" शुद्धितत्त्वधृतिः।

आशस्य न० आ+चर–यत् "आशस्यमनित्ये" पा० सुट्। १अद्भुते २विस्मयरसे ३तद्वति त्रि०। "शोभाः स्थिरत्व मिच्छन्ति किमाशस्यमतः परम्" भा०व०। "आशस्यवत् पश्यति कश्चिदेनमाशस्यवत् वदति तथैव चान्यः–आशस्यवच्चैनमन्यः शृणोति" गीता। "पुष्पमाशस्य मेघाः" रघुः। "किमाशस्यं तारदेये प्राणदा यमदूतिकाः" उद्भटः।

र्वर्णिकाधिकारं प्रपेदिरे । तथा श्रुतिः "स जिज्ञासमन्त्यमाश्रितः" इति अत्रापि कविनाध्ययनमेव पक्षो विधित्सित इति प्रतीमः । अन्यथा वानप्रस्थाश्रमतया आख्याने "विद्धे विधिमस्य नैष्ठिकं यतिभिः सार्द्धमनग्निमन्निचित्" इति वक्ष्यमाणेनाग्निसंस्कारेण विरोधः स्यात् अग्निसंस्काररहितस्य वानप्रस्थत्वाभावात्" । अतएव मनुना "अनेन क्रमयोगेन परिव्रजति यो द्विजः इति द्विजमात्रस्य परिव्रज्याधिकार उक्तः । एवञ्च मनुना प्रयत्नेन गुरुराचार्येण आश्रमस्यैव संन्यासेऽधिकारस्य समर्थनं लिङ्गस्यविषयमिति । एतेषु आश्रमेषु ब्रह्मचर्य्यञ्च नित्यत्वम् इतराश्रमाणां "यमिच्छेत् तमावसेत्" इति सिता० श्रुतवचनात् इच्छाधीनतया काम्यत्वम् । तस्माश्रमाणां सत्त्वश्रयश्च कामनावतश्च, विकल्पस्तु अकामनावतो विरक्तस्य, । अधिकारिभेदाच्च आश्रम सत्त्वश्रयविकल्पश्रयौ सिता०सम्मतौ यथा

"वनात् दृष्ट्वा व्रतेष्टिं सार्ववेदसदक्षिणाम् । प्राजापत्यान्तदग्नीनारोप्य चात्मनि । अधीतवेदो जपयज्ञं पुत्रवानग्रदोऽग्निमान् । यज्ञाश्च यज्ञसम्भारो मनः कुर्य्यान्न चान्यथा" या० । यावता कालेन नीव्रतपः योग्यितयपुरोधिषय क्षयपरिपाको भवति । पुनश्च सदोऽवायज्ञानोद्भाव्यते । तस्मिन्नात्मानं वनस्थं ज्ञात्वा ततस्समनन्तरं मोक्षे मनः कुर्य्यात्। वनस्थदृष्ट्वाभ्यान्तरसत्त्वसन्न्यासमोक्षयते । मोक्षयज्ञेन च मोक्षैकफलकत्वतुर्य्याश्रमः । अथ वा दृष्ट्वात् गार्हस्थ्यादनन्तरं मोक्षे मनः कुर्य्यादनेन च पूर्वोक्तऋतुराश्रमसत्त्वश्रयपक्षःप्राप्तिक इति द्योतयति । तथा च विकल्पो जाबालश्रुतौ श्रूयते । "ब्रह्मचर्य्यमरिसमाप्य दृष्टी भवेत् दृष्टी भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् यदि वेतरथा ब्रह्मचर्य्यादेव प्रव्रजेद्गृहाद्वा वनाद्वेति"। तथा गार्हस्थ्येतराश्रमाधश्च गौतमेन दर्शितः । "एकाश्रममन्वाचार्याः प्रत्यक्षविधानात् गार्हस्थ्यश्रेति"। एवञ्च सत्त्वश्रयविकल्पाश्चपक्षाणां सर्वेषां श्रुतिसूत्रादिच्छया विकल्पः । अतो यत्कैश्चित् पण्डितंमन्यैरुक्तम् । आर्षत्वाच्चैतिकत्वादीनाङ्गार्हस्थ्येन गौतेन बाधः । गार्हस्थ्यानधिकृतानाञ्चतीयादिविषयता वेति । तन्नाध्याया ध्ययनवैधर्य्यनिबन्धनमित्युपेक्षणीयम् । किञ्च । यथा विष्णुक्रमणाद्यालेखनाद्यालम्बनं पङ्गादीनां श्रौतेष्वनधिकारेऽपि आर्त्वेज्यदक्षकर्माकरणाधिकाराच्चर्य्यालम्बनात् तथा पङ्गादिविषयतया नैष्ठिकाद्याश्रमनिर्वाहः । अस्मिंश्चाश्रमे आश्रमस्यैवाधिकारः । "आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्" । तथा "एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः" इत्युपक्रमोपसंहाराभ्यां मनुना ब्राह्मणस्याधिकारप्रतिपादनात् । "ब्राह्मणाः प्रव्रजन्तीति" श्रुतेश्चाश्रमस्थ एवाधिकारो न द्विजातिमात्रस्य । अन्ये तु सर्वर्त्विजानाम् प्रक्रान्तत्वात् "ब्रह्मचार्य्यं वसेत्तावत् वेदमधीत्य चतुरः आश्रमा" इति श्रुतावारभ्यमाणत्वाच्च द्विजातिमात्रस्याधिकारमाहुः । यदा पुनः दृष्ट्वा प्रव्रजति तदा सार्वं वेदसदक्षिणाम् सार्ववेदसी सर्वधनसम्बन्धिनी दक्षिणा यस्याः सा तथोक्ता ताम् प्रजापतिदेवताकामिष्टिं' ज्ञात्वा तदन्ते तान्वैतानाग्नीन् आत्मनि समुत्तिष्ठापनेन समारोप्य यजेत्' इति श्रुतेः 'उदगयने पौर्णमास्याम् पुरश्चरणादौ ज्ञात्वा गुह्येन कामेन अष्टौ आज्यानि निर्वपेत् द्वादश वा" इति बौधायनाद्युक्तं पुरश्चरणादिञ्च ज्ञात्वा । तथाऽधीतवेदो जपपरायणोजातपुत्रोदीनान्नजपणादिसाध्याय यथाशक्त्यदत्त्व भूत्वा अनाहिताग्निर्ब्रह्मत्वादिना प्रतिबन्धाभावे ज्ञाताधानो नित्यनैमित्तिकान् यज्ञान् ज्ञात्वा मोक्षे मनः कुर्य्यात् चतुर्थाश्रमं प्रविशेन नान्यथा । अनेनाज्ञातपर्णालयस्य दृष्टस्यस्य प्रव्रज्यावाक्यनधिकारस्यर्थयति । तथाच मनुः । "ऋणानि त्रीण्यपाकृत्य मनोमोक्षे निवेशयेत् । अनपाकृत्य मोक्षन्तु सेवमानो व्रजत्यध इति" । यदा तु ब्रह्मचर्य्यात् प्रव्रजति तदा न प्रजोत्पादनादिविधयः । अज्ञातदारपरिग्रहस्य तत्रानधिकारात्तानप्रयुक्तत्वाच्च विधायकस्य । न च ऋणत्रयापाकरणविधिरेव दारानादित्सतीति मन्तव्यम् । विद्याधनार्जनविवाहवह्न्याधानप्रयुक्तदारग्रहणयोस्तत्रानाक्षेपकत्वात् । ननु "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्य्येण ऋषिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः" इति जातमात्रस्यैव त्रैजोत्पादनादीन्यावश्यकानीति दर्शयति, सैवञ्च न हि जीवन्नाज्ञातदारादित्यपरिग्रहो ब्रह्मचर्य्यादिभिर्भवति । तस्माद्विधारो जायमानो ब्राह्मणादिर्ब्रह्मचर्य्यादीनुद्दिश्येति तस्यार्थः । ततश्चोपनीतस्य वेदाध्ययनमेवावश्यकम् । ज्ञातदारपरिग्रहस्य प्रजोत्पादनमपीति" ततश्च ब्रह्मचर्य्याश्रमस्यैव नित्यत्वमितरेषां तु "यमिच्छेत् तमावसेत्" इति सिताक्षरादृतवचनात् काम्यत्वमेव । अन्यथाधाकरत्वावश्यकता तु ज्ञातविवाहस्यैवेति सिद्धम् ।

आश्रमाश्च चतुर्विधाः । ब्रह्मचर्य्यं गार्हस्थ्यं वानप्रस्थभिक्षुभेदात् । "ब्रह्मचारी गृहस्थश्च वानप्रस्थो य-

त्तिक्रया । एते यज्ञस्यप्रभवश्चाराः पृथगाश्रमाः "मनूक्तेः तत्र ब्रह्मचारी द्विविधः । नैष्ठिक उपकुर्वाणश्च तत्राद्यः गुरुकुलवासितया ज्ञातब्रह्मचर्यः नैष्ठिकः । घटसिंधदण्डाजिनादिकं गुरौ वसित्वा गार्हस्थ्यार्थं ज्ञातसमावर्त्तनेन उपकुर्व्वाणः । यज्ञस्योऽपि द्विविधः । अज्ञातदारः ज्ञातकः ज्ञातदारश्च । तत्र ज्ञातसमावर्त्तनोऽपि कन्याद्याभावात् पूर्वं श्रुतधार्म्मधर्म्मभेदः ज्ञातकः । तद्धर्म्मश्च आश्वलायने ७५२ पृष्ठेऽभिहितः । ज्ञातदारोऽपि द्विविध आग्निमिरग्निमश्च आग्निरपि द्विविधः श्रौताग्निमुक्तः आर्त्ताग्निमुक्तश्च । बालप्रम्योऽपि द्विविधः सदारोदारश्च "पुत्रेषु दारान् निक्षिप्य वनं गच्छेत् सहैव वा" मनूक्तेः सदारादारत्वपक्षयोः समधिगमात् । तत्र अदारस्य अपचमानाग्नयकृदुदकौल्लखलादिसंज्ञा । सदारस्य पचमानसंज्ञा । भिक्षुरपि चतुर्विधः कुटीचकबहूदक हंसपरमहंसभेदात् । भिक्षुकोऽपि प्रकारान्तरेण द्विविधः विविदिषासंन्यासी विद्वत्संन्यासी च तद्भेदश्च जीवन्मुक्तौ विद्वारण्यकेन निरूपितः यथा "वक्ष्ये विविदिषासंन्यासं विद्वत्संन्यासञ्च भेदतः । हेतू विद्वेषहृत्तेश्च जीवन्मुक्तेश्च तौ क्रमात् ॥ संन्यासहेतवश्चैते यदर्थं विरजेत्तदा । प्रव्रजेदिति वेदोक्तेस्त्रयोदण्डेषु पुराणतः । विरक्तिर्द्विविधा प्रोक्ता तीव्रतीव्रतरेति च । तत्राद्यस्य तु तीव्रायां न्यसेद्योगी कुटीचके ॥ मध्यमोबहूदके तीव्रतरायां हंसमंत्रिते । तत्त्वतः परमे हंसे ज्ञानाद्विज्ञानसाधने । ज्ञातदारश्चतुर्दाद्यो नाद्ये तात्कालिकी मतिः । भिक्षुसंन्यासनिरोद्यक्षाद्विद्वत्संन्यस्ता हि सा ॥ अविद्वान् जन्मनि सा भूयात् पुत्रदारादयोऽमम । इति या तुच्छिरा बुद्धिः सा वैराग्यस्य तीव्रता ॥ पुनरादत्तिसहितो लोको मे भास्तु कर्म्मणा । इति तीव्रतरत्वं स्यान्नन्दे न्यासेन कोऽपि हि ॥ बालाद्यश्चित्तशुद्धिभ्यां तीव्रे न्यासद्वयं भवेत् । कुटीचकोबहूदकौ त्रिदण्डिखण्डौ । इयं तीव्रतरे ब्रह्मलोकमोक्षविभेदतः । तद्भेदे तत्त्वविद्वंसौलोकेऽस्मिन् परमहंसकः ॥ एतेषान्तु समाचाराः प्रोक्ताः पारापरश्रुतेः । व्याख्यानेऽस्माभिरत्रायं परमहंसो विविच्यते । जिज्ञासुस्तत्त्वसंज्ञेति परमहंसो द्विधा मतः । प्राक्तत्त्वज्ञानयज्ञिज्ञासोन्यासं वाजसनेयिनः । "प्रव्राजिनोलोकमेतमिच्छन्तः प्रव्रजन्ति हि" । एतस्यार्थन्तु शब्देन वक्ष्येऽन्यविबुद्धये ॥ लोको हि द्विविधः आत्मलोकोऽनात्मलोकश्चेति । तत्रानात्मलोकस्य त्रैविध्य इदृदारभेदेन तृतीयाध्याये श्रूयते । "अथ त्रयोवाव लोकाः मनुष्यलोकः पितृलोको देवलोक" इति । सोयं मनुष्यलोकः पत्नीसंयोगाख्येन कर्म्मणा । कर्म्मणा पितृलोको विद्यया देवलोक इति । आत्मलोकस्य तत्रैव श्रूयते । "स वा एष आत्मा लोकात् खं लोकमहं प्रैति स एतमेवंविदं ब्रह्म" "आत्मानमेव लोकमुपासीत" मत्र ब्रह्मात्मा मे [illegible] स ब्रह्मास्य कर्म क्रीयते इ [illegible] कारिष्यामेऽथ [illegible] एतमेव प्रव्राजिनो लोकमिच्छन्त प्रव्रजन्ति इत्यनेन लोको विवक्षित इति गम्यते । सचाय सकामस्य [illegible] प्रकान्तत्वात्तस्य एतच्छब्देन परामृष्टत्वात् । न श्रुते अनुभूयत इति लोकः । तथा चात्मा [illegible] प्रव्रजन्तीति श्रुतेस्तात्पर्य्यात् सम्पद्यते । [illegible] ब्रह्मी [illegible] परब्रह्मसमाश्रय । ग्राम्यिताद्यादिभि [illegible] साधनै सहितो भवेदिति" । इह जन्मनि जन्मान्तरे वा सम्यगनुष्ठितैर्विहितैरुप चलादिभिरनुग्रहया विविदिषया सन्न्यासितत्वात्तयं विविदिषा सन्न्यासो द्विविध जन्मादावकल्पादित्यागमात्रात्मकः प्रैषोच्चारणपूर्व्वकदण्डधारणाद्याश्रमरूप इति । त्यागस्य तैत्तिरीयादौ श्रूयते "न कर्म्मणा न प्रजया न धनेन, त्यागेनैके अमृतत्वमानशुरिति" । अस्मिं स्त्यागे स्त्रियोऽप्यधिक्रियन्ते । अतएव मैत्रेयीयाज्ञवल्क्यसंवादे "येनाहं नामृता स्यां किमहं तेन कुर्य्यां यदेव भगवान् वेद तदेव मे ब्रूहीति" । ब्रह्मचारिदण्डस्यधारणप्रभृत्यां लैङ्गविधिमिश्रेण सन्न्यासाश्रमस्वीकारे प्रतिबद्धे सति स्वाश्रमधर्म्मोक्तहुतीयमानेष्वपि वेदनाशो मानसकर्म्मादित्यागो न विरुध्यते स्मृति स्मृतीतिहासपुराणेषु लोके च तादृशात्मत्त्वविदां बहूनामुपलम्भात् । यस्तु दण्डधारणादिरूपो वेदनहेतु परमहंसाश्रमः स पूर्व्वैराचार्य्यैर्बहुधा प्रपञ्चित इत्यस्माभिरुपरम्यते । इति विविदिषासंन्यासः ।

"अथ विद्वत्संन्यासं निरूपयामः ॥ सम्यगनुष्ठितैः श्रवणमननादिध्यानैः परतत्त्व विदितवद्भिः सन्न्यासमात्मानोविद्वत्संन्यास" । तद्यथा याज्ञवल्क्यः सन्न्यादयासास । तथाहि विद्वच्छिरोमणिर्भगवान् याज्ञवल्क्यो विजितगीष्पतिसभायां बन्दिविप्रेण तत्त्वनिरूपणेनाश्वलायनप्रभृतीन् विजित्य वीतरागसभायां संक्षेपविस्तराभ्यामनेकधा जनकं बोधयित्वा मैत्रेयीं बोधयितुमुद्यतया तत्त्वाभिमुखाय स्वकर्म्मसंन्यासं प्रतिजज्ञे ततस्तां बोधयित्वा संन्यासञ्चकार । तदुभयं मैत्रेयीब्राह्मणाद्यन्तयोराम्नायते" "अथ ह

याज्ञवल्क्योऽन्यद्वृत्तमधाकरिष्यन् मैत्रेयीति होवाच याज्ञवल्क्यः, प्रव्रजिष्यन् वा अरे अहमस्मात् स्थानादस्मीति, एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजेति"॥ कहोले ब्राह्मणेऽपि विद्वत्संन्यास आम्नायते "एतं वेदमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति" । नचैतद्वाक्यं विविदिषासंन्यासपरमिति शङ्कनीयं" पूर्वकालवाचिनोविदित्वेति क्त्वाप्रत्ययस्य ब्राह्मणशब्दस्य च बाधप्रसङ्गात्। नचात्र ब्राह्मणशब्दोजातिवाचकः वाक्यशेषे पाण्डित्यबाल्यमौनशब्दाभिधेयैः श्रवणमनननिदिध्यासनैः साधनं ब्रह्मसाक्षात्कारमभिप्रेत्याथ ब्राह्मण इत्यभिहितत्वात् । ननु तत्र विविदिषासंन्यासोपेतः पाण्डित्यादौ प्रवर्त्तमानोऽपि ब्राह्मणशब्देन परामृष्टः तस्मात् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेदिति" नैवं भाविनी दृष्टिमाश्रित्य तत्र ब्राह्मणशब्दस्य प्रयुक्तत्वात् । अन्यथा कथमथ ब्राह्मण इति साधनानुष्ठानोत्तरकालवाचिन मथशब्दं प्रयुञ्जीत । शारीरब्राह्मणेऽपि विद्वत्संन्यासविविदिषासंन्यासौ स्पष्टं निर्दिष्टौ "एतमेव विदित्वाऽमुनिर्भवत्येवमेव प्रव्रजिनोलोकमिच्छन्तः प्रव्रजन्तीति" । मुनित्वं मननशीलत्वम् । तच्चासति कर्त्तव्यान्तरे सम्भवतीत्यर्थात् संन्यास एवाभिधीयते । एतच्च वाक्यशेषे स्पष्टीकृतम् "एतद्ध स्म वैतत् पूर्वे विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामोयेषां नोऽयमात्मायं लोक इति" "ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति" । अयंलोक इत्यापरोक्ष्येणानुभूत इत्यर्थः । नन्वत्र मुनित्वेन फलेन प्रलोभ्य विविदिषासंन्यासं विधाय वाक्यशेषे स एव प्रपञ्चितः अतोन संन्यासान्तरं कल्पनीयं नैवं वेदनस्यैव विविदिषासंन्यासफलत्वात् । न च वेदन मुनित्वयोरैक्यं शङ्कनीयं विदित्वा मुनिर्भवतीति पूर्वोत्तरकालीनयोस्तयोः साध्यसाधनत्वप्रतीतेः । ननु वेदनस्यैव परिपाकातिशयरूपमन्यत्स्थानान्तरम् मुनित्वम् अतोवेदनद्वारा पूर्वं संन्यासस्यैवैतत् फलमितिचेत् वाढम् अतएव साधनरूपात् संन्यासादन्यं फलरूपमेनं संन्यासं ब्रूमः । यथा विविदिषासंन्यासिना तत्त्वज्ञानाय श्रवणादीनि सम्पादनीयानि तथा विद्वत्संन्यासिनापि जीवन्मुक्त्यै मनोनाशवासनाक्षयौ सम्पादनीयौ । एतच्चोपरिष्टात् प्रपञ्चयिष्यामः । सत्यप्यनयोः संन्यासयोरवान्तरभेदे परमहंसत्वाकारेणैकीकृत्य चतुर्विधा भिक्षव इति श्रुतिषु चतुःसंख्योक्ता । पूर्व्वोक्तयोः संन्यासयोः परमहंसत्वं जाबालश्रुतावगम्यते । तत्र हि जनकेन संन्यासे दृष्टे सति याज्ञवल्क्योऽधिकारिविशेषविधानेनोत्तरकालानुष्ठेयेन च सङ्कितं विविदिषासंन्यासमभिधाय पश्चादत्रिणा यज्ञोपवीतरहितस्याग्निहोत्रे ब्राह्मण्ये पश्चादात्मज्ञानमेव यज्ञोपवीतमिति समादधौ अतोब्राह्मण्ययज्ञोपवीताभावात् परमहंसत्वं निश्चीयते । तथान्यस्यां कण्डिकायां तत्र परमहंसोनामेत्युपक्रम्य संवर्त्ताकादीन् बह्वधिकान् ब्रह्मविदोऽधस्मुक्तानुदाहृत्य "अव्यक्तलिङ्गा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरन्तः" इतिविहितसंन्यासिनोदर्शिताः । तथा "त्रिदण्डं कमण्डलुं शिक्यं पात्रं जलपवित्रं शिखां यज्ञोपवीतञ्चेत्येतत्सर्वं भूःस्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेदिति" त्रिदण्डिनः सत एकदण्डलक्षणं विविदिषासंन्यासं विधाय तत्फलरूपं विद्वत्संन्यासमेवसदाजहार । "यथा जातरूपधरोनिर्द्वन्द्वो निष्परिग्रहस्तत्त्वब्रह्ममार्गे सम्यक् सम्पन्नः शुद्धमानसः प्राणसन्धारणार्थं यथोक्तकाले विमुक्तो भैक्षमाचरन्नुदरपात्रेण लाभालाभौ समौ कृत्वा शून्यागारे देवमृष्टहतणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकन्दरकोटरनिर्झरस्थण्डिलेष्वनिकेतनवास्यप्रयत्नोनिर्ममः शुक्लध्यानपरायणोऽध्यात्मनिष्ठः शुभाशुभकर्म्मनिर्म्मूलनपरः संन्यासेन देहत्यागं करोति स परमहंसोनामेति" । तस्मादनयोरुभयोः परमहंसत्वं सिद्धम् । समानेऽपि परमहंसत्वे सिद्धे विरुद्धधर्म्माक्रान्तत्वादवान्तरभेदोऽभ्युपगन्तव्यः । विरुद्धधर्म्मत्वञ्चारुण्युपनिषत्परमहंसोपनिषदोः पर्य्यालोचनायामवगम्यते ।"केन भगवन् ! कर्म्माण्यशेषतोविसृजामीति" शिखायज्ञोपवीतस्वाध्यायगायत्रीजप्याद्यशेषकर्म्मत्यागरूपे विविदिषासंन्यासे शिष्येणेदृशेन पृष्टे सति गुरुः प्रजापतिः "शिखां यज्ञोपवीतम्" इत्यादिना सर्वत्यागमभिधाय "दण्डाच्छादनं कौपीनञ्च परिग्रहेदिति" दण्डादि स्वीकारं विधाय "त्रिसन्ध्यादौ स्नानमाचरेत्। सन्ध्यिसमाधावात्मन्याचरेदिति" "सर्व्वेषु वेदेष्वारण्यकावर्त्तयेदुपनिषदावर्त्तयेदुपनिषदावर्त्तयेदिति" वेदनहेतूनाश्रमधर्म्मानुष्ठेयतया विधत्ते । "अथ योगिनां परमहंसानां कोऽयं मार्गः" इति विद्वत्संन्यासे नारदेन पृष्टे सति गुरुर्भगवान् सनत्कुमारादिना पूर्ववत् संन्यासमभिधाय "कौपीनं दण्डमा-

श्रादनन्तु स्वयरोपभोगार्थाय लोकोपकारार्थाय च परिग्रहेदिति" दण्डादिलोकारक्ष लौकिकत्वमभिप्राय "तच्च सूत्रे नाक्षोति" याक्षोयत्वं प्रतिषिध्य "लोकयं मुख्य इति चेदयं मुख्येन दण्डं न शिखां न यज्ञोपवीतं नाच्छादनञ्चरति परमहंसः" इति दण्डादिशिक्षराहित्यक्ष याक्षोयतामुक्ता "न शीतं न चोष्ण" मित्यादिना वाक्येन "आत्मारामो निर्नमस्कार" इत्यादिवाक्येन च लोकव्यवहारातीतत्वमभिधायान्ते "अतःपूर्वमनर्हत्वमोक्षसङ्कल्पाक्षमोति कृतकृत्यो भवति" इत्यनेन ग्रन्थेन ब्रह्मात्मानुभवस्यात्यर्थं वचनमाचष्टे। अतोविद्वद्धर्म्मोपेतत्वादस्त्रेवानयोर्भेदान्। स्मृतिग्रन्थयं भेद उक्तादिग्रादृष्टव्यः। "संसारमेवं निःसारं दृष्ट्वा सारदिदृक्षया। प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः। प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणम्। तस्माज्ज्ञानं पुरस्कृत्य संन्यस्येद्विद्वान्" इत्यादिविविदिषासंन्यासः। "यदा तु विदितं तत्त्वात् परं ब्रह्म सनातनम्। तदैकदण्डं संदह्य सोपवीतां शिखां त्यजेत्। ज्ञात्वा सम्यक्परं ब्रह्म सर्व्वत्यक्त्वा परिव्रजेदिति" विद्वत्संन्यासः। नन्वेवं कक्षावित्त्वादाविव कदाचिदौत्सुक्यभावेऽपि वेदितं शिखा सन्नयनत्वेव विद्वत्साधारणदर्शिनः पण्डितं मन्यमानस्याध्वक्षोक्यते। न च तौ प्रव्रजन्तौ दृष्टौ अतोविविदिषाविद्वत्ते कोदृक्षौ विवक्षित इति चेदुच्यते। यथा तोत्रायां बुभुक्षायास्तृप्तायां भोजनादन्यो व्यापारो न रोचते। भोजने च विलम्बोन सोढुं शक्यते। तथा यदा जन्मक्षेतुषु कर्म्मस्वत्यन्तभक्तिः वेदनाधनन्यस्यादिषु च त्वरा भवति सम्पद्यते तादृशी विविदिषा संन्यासहेतुः। विद्वत्ताया अवधिरूपदेश साक्षात्साधनमभिधितः। "हेयात्मज्ञानवज्ज्ञानं हेयात्मज्ञानबाधकम्। आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते" इति। श्रुतावपि "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः। क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे इति"। परशब्दपि हैरण्यगर्भादिपदमवरं यस्मादसौ परावरः। हृदये ब्रह्मो वासिष्ठत्वादात्माध्यासोऽनाद्यविद्यानिमित्तत्वेन अन्विष्यहं ठसंज्ञे यस्परत्वादुपन्थिरित्युच्यते। आत्मा साक्षोकर्त्ता वा, साक्षित्वेऽध्यस्त ब्रह्मत्वमस्ति न वा, ब्रह्मत्वेऽपि तद्बुद्धा वेदितं शक्यते न वा, शक्यत्वेऽपि तद्वेदनमात्रेण सन्निरस्ति नवेत्यादयः संशयाः। कर्म्मोच्छेदनारम्भाणि आगामिजन्मारम्भाणि। तदेतत् सम्यग्ज्ञानादित्यमविद्यानिमित्तत्वादात्मदर्शनेन निवर्त्तते। स्मृतावप्यवधर्म्म उपलभ्यते "यस्य नाहंकृतोभावोबुद्धिर्यस्य न लिप्यते। हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते" इति। यस्य ब्रह्मविदो,भावः सत्ता स्वभाव आत्मा, नाहं कृतोनाहंकृतश्च तदात्माध्यासादाविर्भावितः, बुद्धिश्लेषः संशयः। तद्भावे लौकिकव्यवहेनापि न निबध्यते किन्तुताभ्येन कर्म्मश्लेषार्थः। नन्वेवं सति विविदिषाफलेन तत्त्वज्ञानेनैवागामिजन्मनां निवारितत्वाद्देहमानजन्मक्षयेण भोगसमरेण निवारितत्वाद्देहपातेन विद्वत्संन्यासप्रयोजनेति चेन्नैवं विद्वत्संन्यासस्य जीवन्मुक्तिफलत्वात्। तस्माद्भेदनाय यथा विविदिषासंन्यास एवं जीवन्मुक्तये विद्वत्संन्यासः सम्भवतोयः इति विद्वत्संन्यासः"।

"दीर्घकालं ब्रह्मचर्य्यम् इत्यादिलघुग्रन्थे बहु कथितत्वेन दीर्घकालब्रह्मचर्य्यसंन्यासाश्रमयोर्विधानम् तत् नैष्ठिकब्रह्मचर्य्यघट्टितं यदल्पादिब्रह्मचर्य्यवोर्निषेधपरम् न पुनर्यज्ञादिफलब्रह्मचर्य्यमात्रस्य निषेधः दीर्घकालेतिविशेषणवैयर्थ्यात् तेन "घट्टितं यदाहितं चर्य्यं गुरौ वैवेदिकं व्रतम्। तदर्द्धिकं यादिकं वा यज्ञादिफलमेव वा" इति मनुनोक्तषडब्दतदर्द्धमध्ये अल्पाधिकस्यैव कर्त्तव्यता। "तथाऽग्निहोत्रं गवालम्भं संन्यासं पलपैतृकमिति" निगमवाक्यमपि लिङ्गबाधितम् "यावज्जीवमिभागोऽस्ति यावद्वेदः प्रवर्त्तते। संन्यासश्चाग्निहोत्रञ्च तावत् तुल्यौ युगे युगे" देवलस्मरणात्। "चत्वार्यश्वसहस्राणि चत्वार्यश्वशतानि च। कलेर्वर्षा गमिष्यन्ति तदा लोतापरिप्लवः। संन्यासश्च न कर्त्तव्यो ब्राह्मणेन विपश्चित" इति व्यासवचनन्तु लिङ्गबाधितम्। अन्यानिर्वाचतन्त्रे तु। "पुरैव कथितं तावत् कलिधर्म्मविचेष्टितम्। तपःस्वाध्यायशीलानां कलावल्पायुषामपि। क्लेशप्रवाहाक्षमाणां कृतोद्देशपरिश्रमः। ब्रह्मचर्य्याश्रमोक्तोऽपि वानप्रस्थोऽपि न प्रिये। गार्हस्थ्यभैक्षुकौ चैव आश्रमौ द्वौ कलौ युगे! स्वकर्म्मस्थस्य क्रियाः सर्व्वा आगमोक्ता कलौ प्रिये। अन्यमार्गैः क्रियासिद्धिः कदापि स्वप्नमेधिनाम्। भैक्षुकेऽप्याश्रमे वापि वेदोक्तं दण्डधारणम्। कलौ नास्त्येव तत्त्वज्ञे! यतस्तच्छ्रौतसंस्कृतिः। वैवसंस्कारविधिनाऽधूतात्मधारणम्। तदेव कथितं भद्रे! संन्यासस्यकृतं कलौ। विप्राद्यामितरेषाञ्च वर्णानां प्रवले कलौ। उभये आश्रमे देवि! सर्व्वेषामधिकारिता। सर्व्वेषामेव संस्कारकर्म्मणी वैववर्त्मना। विप्राद्यामितरेषाञ्च

धर्म्म विक्षं पृथक् पृथक्" । उभावेवाश्रमौ विक्षितौ एतदाश्रमाधिकारिणः पतितसाक्षादेरक्षतप्रायश्चित्तस्यैव मोक्षणम् । आश्रमविधायधिकारित्वेन आश्रमयज्ञे ९।१४ पृष्ठे उक्ताः एतदेवान्ते च औतदक्षादिधारत्वविधेयः तेषां औत स्मार्ताधिकारात् । वस्तुतः आश्रमशब्देऽपि. प्रवृत्ते यत्राधिति विशेषोक्तेः प्रवृत्ते यत्रौ धर्म्मेऽनेव पतित प्रायश्चित्तस्याक्षणमाद्रागमधर्म्मस्यैवावश्यत्वेन तेषामेव तदाश्रमाश्रमोक्षाश्रमशब्देऽधिकार इति भेद इति दिक् ।

आश्रमगुरु पु० आश्रमाणां ब्रह्मचर्य्यादीनां गुरुर्मिश्रता । आश्रमनिश्चयरि ऋषे । "धर्म्मुआश्रमगुरुः स आश्रमः" भाग० ।

आश्रमधर्म्म पु० आश्रमविक्षितोधर्म्मः । ब्रह्मचर्य्यादिविक्षिते धर्म्मे धर्मो हि बहुविधः वर्णधर्म आश्रमधर्मो वर्णाश्रमधर्मो गुणधर्मो निमित्तधर्मोद्धाधारत्वधर्मश्चेति । तत्र वर्णधर्मो ब्राह्मणो निजं यज्ञं यज्ञं वेदिताद्यिः । आश्रमधर्मो ब्रह्मचर्य्यमैक्षब्रह्मचर्य्यादिः वर्णाश्रमधर्मो ब्राह्मणादि क्षत्रेव यजनादिदक्षधारत्वादि"नैमित्तिकधर्म्मो विक्षितारत्वनिमित्तकं प्रायश्चित्तम्, साधारणधर्मोऽहिंसादि सार्व्विकात् वर्णाश्रमाणामाचारत्वात् साधारणधर्मः, अत्यन्तः इति" विता० । अत्रत्र चान्ये आश्रमधर्माः दर्शिताः । "ब्रह्मचारित्वः आश्रावः, अक्षक्षत्र दानं दमो यज्ञव, क्षत्रक्षत्र तपः, भिक्षुक्षत्र "अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः" इत्यादिकः तथा च "यज्ञाश्रमं यजाश्रित्य अधिकारः प्रवर्त्तते । न चास्याश्रमधर्मस्तु भिक्षादक्षादिकं यथा । यतीनां तु यतीधर्मोऽभिक्षोपनयनादिकात् । दानमेव अक्षक्षत्रानां शुश्रूषा ब्रह्मचारिणामिति"शुक्ला शुक्ला च वेदे धर्मा यज्ञयज्ञाश्रमे निर्दिष्टाश्रेते आश्रमधर्म्मग्रहेणोक्ताश्रे ते च धर्म्मोक्तशब्दे प्रपञ्चेन वक्ष्यते । [यजादौ आश्रमस्थानाद्धवोऽत्र ।

आश्रमपद न० आश्रमस्य पदम् । तृणादेर्निर्माणस्थानं तपोवनादौ ।

आश्रमवास पु० आश्रमे वासः । तृणादीनां १तपोवनादौ वासे आश्रमवासनिमित्तं ज्ञातोपनयः अत्र । एतदाश्रमोक्षाश्रमवाधिकारेण आवर्त्तिष्यते आरतार्त्तगते २धर्म्मभेदे । "एतदाश्रमवासाख्यम्" भा०आ० १अ० ।

आश्रमवासिक न० आश्रमवासः प्रतिपाद्यतयाऽस्त्यस्य ठन् । आरतार्त्तगते एतदाश्रमाश्रमवासप्रतिपादके धर्म्मभेदे ।

आश्रमसद् त्रि० आश्रमे सीदति सद्–क्विप् । आश्रमवासिनि तपोवनवासनिरते वानप्रस्थादौ ।

आश्रमिक त्रि० आश्रमोऽस्यास्त्र ठन् । आश्रमयुक्ते ।

आश्रमिन् त्रि०आश्रमोऽस्यास्त्र इनि । आश्रमयुक्ते स्त्रियां ङीप् । "तथैवाश्रमिणः धर्म्मे अक्षय्ये वाहि संस्थिते" "अनुभिरपि चैवैतैर्निजमाश्रमिभिर्द्विजैः" मनुः ।

आश्रय पु० आश्रीयतेऽसौ आ+श्रि-कर्म्मणि अच् । १आश्रयणे "वह्निंशुआश्रयणगणतमभ्युपैति" "द्रुआश्रयेऽपि सुखेषु रराज सीता" माघः । "चित्रं वताश्रय इते स्थाणोरहिमो विना यदाश्रावा । तद्रहिता विशेषं न विद्मति निराश्रयं चित्रम्" सां०भा० २आधारे "आश्रयस्तिरात्रयवान्तु सामान्यज्ञानमिष्यते" "हेतोरेवाश्रये येषां स्वयाध्यव्यभिचारिता "लक्षणां लक्षणः भावो लक्षणाश्रय इतः" भाषा० "तमाश्रयं दुग्धघृतस्य तेजसः" रघुः २सर्गे । "मित्रसाक्षाश्रये गच्छ" ३अवलम्बे "विनाश्रयं न तिष्ठन्ति पण्डिता वनिता लता" उद्भटः "निराश्रयं मां जगदीश : रक्ष" मुरा० ४विषये "बभूव यत् प्रेक्षणरत्नराश्रयम्" रघुः अग्निभीद्यमानेन यजदक्षाश्रयत्वरूपे यजुर्यजमानर्त्तते रात्रां दैर्घ्यभेदे यथाश्रयः कर्त्तव्यस्तथोक्तमग्निपुराणे "अग्निनोर्द्विगतोर्भेदे याचालानं यजमेवनम् । द्वैधीभावेन तिष्ठेत आकाशिवदव्यक्तितः । उभयोरपि संघाते शैवेत यजयत्तरम् । यदा द्वावपि नेच्छेतां संस्कर्त्तुं आसंविदौ । तदोपवर्त्तेत्तज्ज्ञानग्निं वा स्वयं व्रजेत् । उच्चिद्यमानो यजिना निष्पावप्रतिक्रियः । कुशोत्तरपत्र यजनार्च्चनादिषेत यजोत्तरतः । तद्दर्शनोदाहितता नित्यं तद्भावभाविता । तत्कारितप्रभविता इत्तं संस्थविधः स्मृतम्" । भावे अच् । ७अवलम्बने । "योऽवमन्येत ते मूले हेतुशास्त्राश्रयेण च" मनुः । ८आश्रयणे "शुक्लयदाश्रयणशुक्लोदये" भाषा० । त्र । आश्रयत्व आधारत्वे न० । "आश्रयत्वविषयत्वभागिनी" सं०भा० तच् । आश्रयता । तत्रार्थे स्त्री आधारग्रन्थे विवृतिः ।

आश्रयण न०आ+श्रि ल्युट् ।१आश्रयणे २अवलम्बने च । तृन्नरि ल्युट् । २आश्रयकर्त्तरि त्रि० स्त्रियां ङीप् । "अकृतेऽत्र यतस्तस्मात् मा पुनरहमाश्रयी भवामि ते"कुमा० ।

आश्रयणीय त्रि० आ+श्रि-कर्म्मणि अनीयर् । यत्राश्रयः क्रियते १तस्मिन् २अवलम्बे च ।

आश्रयवत् त्रि०आश्रयोऽस्यास्त्र मतुप् मस्य वः स्त्रियांङीप् । आश्रययुक्ते आधारवति आधारे यदार्थे ।

आश्रयाश्र पु० आश्रयमश्नाति अश–अच् उप०स० ।

१वक्त्रौ तस्य आश्वयस्य आकारेङ्गितत्वात्तथात्वम् । "दुर्दृष्टः क्रियते धूर्तैः श्रोत्रात्रविहस्ते । किं नाम खलसंसर्गः कुरुते नाश्वयावयम्" उद्भटः २चित्तवृत्तौ २क्षत्रियाणामलंकारे च । ३आश्वयनाख्यके त्रि० ।

आश्वयाशिद्धु पु० आश्वयोऽशिद्धोऽस्य । न्यायोक्ते हेत्वाभासभेदे यथा गगनपद्मं सुरभि पद्मत्वात् सरोजपद्मवदित्यादौ गगनपद्मत्वरूपस्य हेतोराश्वयाप्रसिद्धत्वात् हेतोर्दोषत्वम् ।

आश्वयासिद्धि स्त्री आश्वयस्य सिद्धिः अप्रसिद्धिः न्यायोक्ते हेतोर्दोषभेदे असिद्धिशब्दे ५५४पृष्ठे विवृतिः ।

आश्वयिन् त्रि० आश्वयति आ+श्वि-इनि । आश्वय कारके आश्रिते । "नवरूपाश्वयिणा गुणेन" रघुः "पर्य्यन्ताश्वयिभिर्निजस्य सदयं नाम्नः शिरातैः क्षतम्" रत्ना० ।

आश्वय त्रि० आश्वयोति वाक्यम् आ+श्वु-अच् । वाक्यस्थिते वाचि प्रवक्ते वाक्यं श्रुत्वा तदर्थानुष्ठायिनि । "संगवस्तु भिषजामनाश्वयः" रघुः । भावे+अच् । २अङ्गीकारे ३क्लेशे च ।

आश्वाव त्रि० आ+श्वु-घिच्-अच् । १आवये २अङ्गीकारणे च

आश्रि स्त्री सम्यक् अश्निः प्रा०स० । सम्यक्कोणे शब्दच०

आश्रित त्रि० आ+श्रि-क्त । आश्वयप्राप्ते, शरणागते,आधेये "प्रावण्यं गौरवान्नितेषु" कुमा० "अथ द्रव्याश्रिता गुणाः" । "अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिष्यते इति" च भाषा० ।

आश्रित्य अव्य० आ+श्रि-ल्यप् । अवलम्ब्येत्यर्थे ।

आश्रिन् त्रि० आश्रं चक्षुर्जलमस्यास्त्यस्य वा० इनि । चक्षुर्जलयुक्ते स्त्रियां ङीप् । [क्षिप् । २अङ्गीकर्त्तरि त्रि० ।

आश्रुत् स्त्री आ+श्रु-भावे क्विप् । १अङ्गीकारे । अङ्गीकर्त्तरि

आश्रुत त्रि० आ+श्रु-क्त । १अङ्गीकृते, २आकर्णिते च । "एवं वर्त्मानाश्रुतेषु" भाषा० १,२ ६ ।

आश्रुति स्त्री आ+श्रु-क्तिन् । १अङ्गीकारे २अवधे च ।

आश्रेय त्रि० आ+श्रि-यत् । १आश्वयणीये २अवलम्ब्ये च ।

आश्लिष्ट त्रि० आ+श्लिष-क्त । १आलिङ्गिते २संबद्धे "शिखाभिरालिष्टदवाग्निसानिधिः" "आश्लिष्टभूमिं रविसारथेः" इति च माघः ।

आश्लेष पु० श्लेषेणेदं श्लेषः संबन्धः आ+श्लिष-घञ् । १एकदेशसंबन्धे । "साधीयाश्लेषविषयैर्व्याप्त्याधारत्वविधिः" तत्त्वचि० । २आलिङ्गने च । "आश्लेषोत्पवधूजनस्य कार्य्यं साक्षिणीम्" माघः भेदे त्रि० क्वचित् तस्य रः । आश्लेषोऽस्त्यर्थे पु० अश्लेषैव स्वार्थे अण् । अश्लेषानक्षत्रे स्त्री । "आश्लेषा नक्षत्रं तदधं देवताः तैत्ति०

आश्व न० अश्वानां समूहः अण् । १अश्वसमूहे अश्वैरस्यं यंत्रियः अण् अश्वसंबन्धं वाहनमू अण् वा । २अश्ववाहे त्रि० वि०की० । अश्वस्य भावः कर्म्म वा प्राग्वदण् तित्वात् अञ् । २अश्वभावे ३तत्कर्म्मणि च न० अश्वसंबन्धम् अण् । ५अश्वसंबन्धिनि त्रि० । "आश्व मक्षरं मूलं क्षविहङ्गु मन्यते" सुश्रुतः ।

आश्वतराशि पु० अश्वतराश्वयोरपत्यम् इञ् । वृषिवलनी

आश्वत्थ न०अश्वत्थस्य अवयवम् वृक्षा०तस्य च वुञ् । १अश्वत्थवृक्षसमूहे । अश्वत्थसंबन्धिनि त्रि० । अश्वत्थस्येदम् अण् । २अश्वत्थसंबन्धिनि त्रि० स्त्रियां गौ० ङीष् । आश्वत्थी शाखा तस्यिदा । "तर्पिराश्वित्थाश्वत्थीक्षिकः क्षविधः" यत०ब्रा० । तत्रादाश्वत्थे अश्वत्थशाखातम्" मदे०ब्रा० अश्वत्थेन युक्ता अण् । अश्वत्थयुक्तायां २रात्रौ स्त्री । गङ्गा०अ । आश्वत्थीयः आश्वत्थसंबन्धिनि त्रि० ।

आश्वत्थिक न० अश्वत्थमर्हति ५०७ पृष्ठे विषयादि । आन्दाश्मिने साधि । [संबन्धिनि

आश्वपत त्रि० अश्वपतेरिदम् अश्वपत्या० अण् । अश्वपति

आश्वपस् त्रि०आशु आशोति अशुन् सुडागमः । शीघ्रप्राप्तरि

आश्वपालिक पुंस्त्री अश्वपालाः अधिकृतं देवता० ठक् अश्वपाला अधिकृते । [खिनि । अश्वमेधविधिप्रोक्ताध्यायिनि

आश्वमेधिन् त्रि० ब०व० । अश्वमेधेन प्रोक्तमधीयते वेदिता०

आश्ववाल त्रि० अश्ववालाया ओषधेरयम् अण् । अश्ववालोषधेः संबन्धिनि । "आश्ववालः प्रकरः, यत्रोप देवेभ्योऽपक्रामत सोऽश्वोभूत्वा पराङ्गावर्त्त तस्य देवा आ हरन्त यन्नानमिमेदुस्तानानुसुप्तानानुप्य वाहं संभाहुस्ततस्ता ओषधयः समभवन् यदश्ववालाः शिरो वै यज्ञ स्यातिच्यं जघनार्धौ वालाः उभयतएवैनमग्रं परिच्छ्यन्ति यदाश्ववालः प्रकरोभवति" यत०ब्रा० ।

आश्वभारिक त्रि० अश्वभारः भारत्वभूतं भारं वा हरति वहति आवहति वा ठक् । अश्वभारस्य अश्वभूतस्य वा भारस्य १हारके २वाहके ३आवाहके च ।

आश्वमेधिक त्रि० अश्वमेधाय हितं ठक् । अश्वमेधसाधने द्रव्यादौ अश्वमेधद्रव्यादिषु च अश्वमेधयज्ञे ५११ पृष्ठे उक्तानि अश्वमेधसंबन्धिन्यः कृतः सम्भः ठञ् । मतवर्थ प्राक्षधात्वर्गते १२ प्रपाठके पञ्चाध्यायीरूपे यज्ञभेदे तत्र पञ्चमाध्यायेषु अश्वमेधस्योत्पत्तिः फलञ्च । तस्य धर्म विधयः आश्चर्य्यगौरवाल्पत्वाजाभावविषयाः तत्र प्रथमाध्यायनवमेषु मन्त्रव्याख्यानेषु तद्द विशेषधर्मा

अनुक्रान्ताः । शेषाध्यायद्वयेन च तदेव धर्म्मान्तरसंहिता अनुक्रान्ता इति भेदः । अश्वमेधमधिकृत्य कृतोपन्यः ठक् । युधिष्ठिराश्वमेधाधिकारेण व्याख्याते भारतान्तर्गते १पर्व्वभेदे न० । "इत्याश्वमेधिकं पर्व्व प्रोक्तमेतन्महाद्भुतम्" भा०आ० प० १ अ० । अश्वमेधः प्रतिपाद्यतयाऽस्यास्ति ठन् । आश्वमेधिकमप्यत्र न० । "ततोऽश्वमेधिकं नाम पर्व्व प्रोक्तं चतुर्हयम्" भा०आ०प०१अ० ।

आश्वयुज पु० आश्वयुजी अश्विनीनक्षत्रयुक्ता पौर्णमासी यस्मिन् मासेऽण् । शुक्लप्रतिपदादिके दर्शान्ते चान्द्रे आश्विने मासे । "त्यजेदाश्वयुजे मासि लवणं पूर्व्वसञ्चितम्" मनुः "भाद्रपदाश्वयुजौ वर्षा" "शाकमाश्वयुजे मासि प्रावृषेण्यैर्वृतेति" इति च स्मृ० ।

आश्वयुजक त्रि० आश्वयुज्यासम्पूर्णो मासः वुञ् । चान्द्राश्विनपौर्णमास्यासम्पूर्णे मासे स हि तस्यामेव तिथौ उपः स्नुग्भरोहति वर्द्धते च इति लोकप्रसिद्धिः ।

आश्वयुजी स्त्री अश्वयुजा अश्विनीनक्षत्रेण युक्ता पौर्णमासी "नक्षत्रेण युक्तः कालः" पा० अण् । आश्विनमासीयपौर्णमास्याम् "आश्वयुज्यां पौर्णमास्यां निकुम्भो वालुकार्ह्यवात्" वृद्धगु० । "तेन वसन्तमासेन पञ्चवर्षात्मकाश्वयुजीशुक्लेषु चतुर्व्विंशतं मन्त्रलक्षमते मासेतानि" कात्या० २२,२,४ । "आश्वयुज्या वुञ्" पा० ।

आश्वरथ्य त्रि० अश्वयुक्तो रथः अश्वरथलक्षणेदम् गतपूर्व्वकत्वात् अञ् । अश्वरारोहणसम्बन्धिनि ।

आश्वलक्षणिक त्रि० अश्वलक्षणं वेत्ति तत्प्रतिपादकशास्त्रमधीते वा ठक् । १अश्वलक्षणाभिज्ञे २तद्बोधकशास्त्राध्येतरि च

आश्वलायन पु० अश्वल+अश्वपाकादिः सन्निवेदनस्यापत्यं नडा० फक् । ऋग्वेदीयशौनकशाखाप्रवक्तरि ऋषिभेदे "ऋक्सर्व्वानुक्रमणं स्वकृतं सूत्रं ब्राह्मणसन्निभम् शिष्यायाश्वलायन प्रोक्त्वा शौनकेन विपाठितम्" इत्युक्तेः शौनकोपदिष्टेन तेन च "अथैतस्य सनाम्नो यस्य वितानेऽयोगायत्तिं वक्ष्यामः" इत्युपक्रम्य "नमः शौनकाय" इत्यन्तम् अध्यायचतुष्टयात्मकं वैतानिकसूत्रोपयोगि श्रौतसूत्रम् "उक्थानि वैतानिकानि सूक्तानि वक्ष्यामः" इत्युपक्रम्य "नमः शौनकाय" इत्यन्तम् अध्यायचतुष्टयात्मकं सूक्तसूत्रोपयोगि सूक्तसूत्रं, तत् परिशिष्टाध्यायचतुष्टयात्मकं सूत्रं शौनकाचार्य्यप्रसादात् रचितम् । तदीयसूत्रोपरि देवस्वामिना भाष्यं कृतं तन्मूलकत्वा गर्गगोत्रेण नरसिंहपुत्रेण नारायणोपाध्यायेन वृत्तिः रचिता तत्र श्रौतसूत्रे प्रतिपाद्यविषयाणामवद्यभिधीयन्ते ।

तत्र प्रथमाध्याये प्रधानस्याङ्गसंस्कृतिस्थानाय सर्व्वादौ दर्शपूर्णमासयोर्व्याख्यानम् । १अग्निहोत्रादिषु ऋक्सामान्यस्य प्रयोगसूक्तरूपकथनप्रतिज्ञा । २ऋक्सामान्यातकर्मसु आहिताग्नेरधिकारकथनम् । ३ऋक्सङ्कल्पविध्यन्तरस्थानायादौ दर्शपूर्णमासयोर्व्याख्यान प्रतिज्ञा । ४दर्शपूर्णमासयोर्व्याख्यारम्भः । ५अनोषधिरुपविष्कृत्येऽप्रणीते कर्मणि अपरेणोध्मप्रपदनम् । ६ अवटरूपवात्यालवत्सु पशुसोमादिषु अपरेण चात्यालप्रपदनम् । ७ चात्यालरूपस्थाध्वनो वैदिकी तीर्थसंज्ञा । ८ होतुः प्राक्प्रसवस्य मनोवाक्कायव्यञ्जनादीनाञ्च चेष्टाया नित्यता । इति परिषाया संग्रहः । ९ उक्थ्यीकरणरूपाया अङ्गधारणाया नित्यत्वम् । १० यज्ञोपवीतयज्ञियनियमस्यान्तर्विहारे यौवनियमस्य च नित्यत्वम् । ११ विहारे कर्म कुर्वतस्तत्प्रवृत्तः करणनिषेधः । १२ एकाङ्गोक्षेऽपि दक्षिणप्रतीतिः । १३ सर्व्वदक्षिणासङ्कोचेऽपि दक्षिणप्रतीतिः । १४ कर्तृरहिते क्रियाविधौ होतुर्ग्रहणं कर्तृस्थानम् । १५ दानविधौ यजमाने कर्तृस्थानम् । १६ कुर्व्वीत जपतीति प्रायश्चित्ते ब्रह्मणि कर्तृस्थानम् । १७ ऋचो मूलप्रश्ने ऋत्विग्वेदनम् । १८ सूक्तादौ गायत्र्यादिभागरूपे पादे होत्रे स्तोत्रमाधे सूक्तस्थानम् । १९ सूक्तादावूक्तादौ चाधिकपादप्रश्ने तत्स्थानम् । २० अग्निम् यास्ये जपादीनामंशुग्रहोक्तव्यत्वम् । २१ मन्त्राणां कर्मकरणानामुपांशुग्रहकथनम् । २२ सामान्यविशेषयोर्विशेषविधेर्बलीयस्त्वम् । २३-२४ होतुरवस्थानकथनम् । २५ कर्तुरासनकथनम् । २६ वचनादतिरिक्तस्य कर्त्तव्यत्वम् । २७ सामिधेन्यर्थं प्रेषितस्य होतुर्जपविधानम् । २७सूत्राणि प्रथम कण्डिकायाम् । १सामिधेन्यर्थजपः । २तज्जपानन्तरं सामिधेनीनाम् ऋचामनुवचनम् । ३ द्विरुक्तरूपपूर्वकप्रथमान्याहुतिमन्त्रजपविधानम् । ४सजपद्विरुक्तस्वाभिद्विरुक्तसंज्ञाकथनम् । ५ कौत्समते निरोक्तारभ्याहुतिमन्त्रजपान्तरद्विरुक्तदर्शनम् । ६कौत्समते सामिधेन्यर्थौङ्कारजपस्याकरणम् । ७ऋचामेव सामिधेनीत्वप्रदर्शनम् । ८सामीधेनीनाम् ऋचामेकमुखेन सान्तत्येन चानुवचनम् । ९ऐकमुख्यलक्षणम् १०सन्ततलक्षणम् ११सन्ततस्यावसानत्वकथनम् । १२पूर्व्वोक्तासाविभ्ये उत्तरोक्तासारम्भः । १३प्रथमेनावसानकथनम् । १४ विकृते एवावसाने प्रथमस्य चतुर्मात्रत्वेनोच्चारणम् । १५ प्रथमान्तमकारस्य वर्णान्तरापत्तिकथनप्रतिज्ञा । १६ प्रथमान्तमकारेण सूक्तात् परस्य यस्य कस्यचित् वर्णस्य तद्वर्णी-

वाक्यवर्णोपादनम् । १७ प्रथमवाक्यकारेण यजमानस्यान्तु परोक्षस्यानामनुनासिकत्वापादनम् । १८ रेफोष्मसु वर्णेषु प्रथमवाक्यकारस्यानुस्वारत्वापत्तिः । १९ प्रथमोत्तमे ऋचौ त्रिरभ्यर्धीत्याद्य तयोरनुवचनम् । २० अभ्यर्धयोर्ऋचोरनुवचनावसानेऽभ्यर्धचतुष्पात्किकयोर्द्वयोर्ऋचोरनुवचनम् । २१ उत्तमायामृचि आदौ हे यस्यात् अभ्यर्धा । २२ एकादशानामृचां द्वयोस्त्रिरभ्यासयोगेन पञ्चदशसंख्यापूरणनिदर्शनम् । २३ यस्मिन्याज्यादिषु सामिधेनीनां कतिपयधर्मातिदेशः । २४ सामिधेनीभ्योऽन्यत्राभ्यर्धकरणप्रतिषेधादयः २५ विहितेऽवसानेऽभिहिङ्कारस्याभ्यासनिषेधः । २६ यस्मिन्नेव होत्रकाण्डमभिहिङ्कारविधानात् आवस्तुतस्तन्निषेधसाधनम् । २७ प्रथमेन निगदस्यानानन्तरं तेनैव तदवसानविधानम् ।२७सू० १अ० २क० । १यजमानस्यार्षेयप्रवरत्वम् । २ अन्यतोजातद्व्यामुष्यायणार्षेयप्रवरत्वप्रकारः । ३ राजन्यविशां तत्तद्वर्णिकानुलोमस्त्रीजातानां पुरोहितार्षेयभागित्वम् ।४ राज्ञां राजर्षिप्रवरत्वं पौरोहित्यप्रवरत्वं वा ५ प्रवराख्याने तत्संबन्धे च वर्णत्रयस्य मानवप्रवरः । ६ चतुर्दशनिवित्पदकथनम् आवाहननिगदकथनं, सामिधेन्यादीनां चावाहनीयाभिधायित्वम् । ७ अग्निरूपप्रथमदेवतावाहनम् । ८ अग्नीषोमदेवताजप्रभागयागयोराख्या । ९ अग्नेरग्नीषोमयोश्च पौरुषेयाणां प्रधानदेवतात्वम् । १० अमावास्यायां दर्शियोर्भ्यां यागमकुर्वतोऽग्नीषोमयोः स्थाने इन्द्राग्न्योः प्रधानदेवतात्वम् । ११ तद्धिने उक्तयागरूपसञ्चयनकारिणोऽग्नीषोमस्थाने इन्द्राग्नेन्द्रयोरन्यतरावाहनम् ।१२ उभयोरपि पर्वणोरैतरेयिणाम् विष्णुदेवताकोपांशुयागकरणम् । १३ याज्यानरीयाणाम् उभयोरपि पक्षयोरुपांशुयागभिन्नयागाभावः ।१४ पित्र्याग्नेयोपांशुयागानाम् आवाहनादिनिगदचतुष्टये आवाहनादीनां यज्ञां पदानाम् उच्चैरितिसंज्ञाविधानम् । १५ उपांशुयाजवचनानामन्येषाम् परोक्षाण्णाम् उपांशुत्वानुवादः, विकल्पेनोच्चैः संज्ञाविधानं च । १६ विहितदेवतानामरूपस्य प्रत्यक्षस्योपांशुत्वम् । १७ प्रतिनोदितदेवतमावाहनभेदः । १८ एकप्रदानानां सर्वासां देवतानामावाहने सकृद्देवावहमन्त्रप्रयोगः । १९ उत्तरनिगमेषु एकदेवतात्वेन संस्रवः । २० एकप्रयोजनार्थाया देवतायाः कारणवशात् एकवचनेनैव समानता । २१ अपराह्णवहितायां देवतायां निगमेषु सकृद्देववचनमाम्नानम् ।२२ आवापोद्वापयोश्च प्रधानदेवतासु कृतावाहनासु देवान्तरापाक्षिप्तकृतावाहनप्रक्रिया । २३ आस्रावशिष्यतेऽध्वर्यवेऽनुमन्त्रणं तदनन्तरकरणीयस्य । २४ उत्थानपूर्वकं बर्हिष्येतिमन्त्रपाठः । २५ अंसे पार्श्वस्थेन पाणिनाध्वर्युन्यारम्भणम् । २६ सव्येन पाणिनाङ्गुलीरुत्कृष्य वाऽऽग्नीध्रकर्तृकमन्यारम्भणम् । २७ उक्षोभयान्यारम्भणे साधारणमन्त्रः । २८ दृष्वसक्थनरूपैर्वृषणैरालम्भसंमार्जनम् । २९ संस्कारकर्माहुतिमात्रे सकृन्मन्त्रेण हिङ्कृणीं संस्करणम् । ३० उदक्स्थमानन्तर होत्रदनाभिमन्त्रणम् । ३१ दक्षिणोत्तरिणोपस्थेनोपवेषणं होत्रदनात् हृत्वनिरसनम् । ३२ उक्तयोरेतयोर्निरसनोपवेषणयोः सर्वासनेषु प्रथमप्रयोग एव समानत्वम् । ३३ गौतमाचार्यमते हितीयेऽपि प्रयोगे तादृग्निरसनोपवेषणयोः सङ्भावः । ३३सू० १अ०३क० । १अग्न्याधेये ब्रह्मौदनप्रायणकाले ब्रह्मणो हिर्निरसनोपवेषणकरणम् । २ सर्वेषु सोमेषु बर्हिष्यवमानात् प्रत्येत्य ब्रह्मणः पूर्वासने पुनः करणम् । ३ आसने पर्यग्नेसंविष्टस्य होतुः सदःप्रसर्पणानन्तरं तत्रैव पुनः करणम् । ४ पत्नीसंयाजार्थोपवेषणाकरणम् । ५ कौत्समते होत्रभिक्षानामैतयोर्निरसनोपवेषणयोरकरणम् । ६ उपविश्यानन्तरं देवेत्यादिमन्त्रपाठः । ७ जान्वक्ष्ण बर्हिरुपस्तृण्य अभिहिङ्कृत्येत्यादिमन्त्रजपः । ८ दृष्वप्रदीप्ते उक्तजपानन्तरं भूपतये नम इति निगदेनाध्वर्यवे स्रुगावदापनम् । ९ अग्निर्होतेति निगदमवसाय होतारमहथा इति मन्त्रजपः ११ अग्निर्होतेत्यादिना सह हृतवतीत्यादिकमेकनिगदं विधाय तत्समापनम् । १२ उक्तनिगदे समाप्ते ऽध्वर्युकर्मसमाप्तावृक्त्वम् । १३ उत्करदेशे तिस्र आग्नीध्रं प्रस्तावयत्प्रकारः । १३सू० १अ०४क० । १ याज्यसक्तसंख्ययाजैर्यजनम् । २ तनूनपात्पात्रार्थसंबोरन्यतरेण प्रयाजानां पञ्चसङ्ख्याकत्वम् । ३ सकृत्प्रेषितस्य न सर्वयजनम् । ४ अननुयाजानां सर्वेषां याज्यानामादिरागूर्भवतीति । ५ ये यजामह इति आगूः स्वरूपं, वषट्कारस्वरूपस्य । ६ याज्याया एव उच्चैस्तरत्वस्वीयस्वोभयधर्मवत्त्वम् । ७ आगूर्वषट्कारयोरादोः स्मृतिकरणम् । ८ याज्यान्तस्य स्मारणम् । ९ विधिक्रियोः सन्धिजातयोरैकारैकारयोरौकारौकारयो आ इ, इति आइ इत्येतं व्यञ्जनान्तानां सन्ध्यक्षराणां सर्वदा स्वरूपेणैव च स्मारणम् । १० अनक्षरौपधस्य विसर्जनीयस्य रेफिभावः । ११ रेफिसंज्ञिनोऽक्षरौपधस्य विसर्जनीयस्य रेफिभावः । १२ वषट्-

कारसम्पौ अरेफसंयुक्तावर्णोपधस्य विसर्जनीयस्य लोपः । ११ वर्गाणां प्रथमस्य स्ववर्गीयहतीयवर्णापादनम् । १४ मकारे सानुनासिकभावस्य निपातनम् । १५ वौषट्यज्ञस्य वषट्कारस्वरूपत्वम् । १६ इत्येवंरूपः प्रथमप्रयाजः । १७ वषट्कारोच्चारणपूर्वकोऽनुमन्त्रणप्रकारः । १८ वषट्कारस्य दिवाकीर्त्तनीयत्वम् । १९ अनुमन्त्रणस्यापि दिवाकीर्त्तनीयत्वम् । २० इत्येवं याज्यास्वरूपम् । २१ वयिष्ठादिभिन्नानां तनूनपादित्यादिः हितीयप्रयाजः । २२ वयिष्ठादीनां नरांश स इत्यादिः हितीयप्रयाजः । २३ इडो अग्न इत्यादिः सर्वेषां हतीयप्रयाजः । २४ बर्हिरग्ने इत्यादिः चतुर्थः स्वाहाकारनिमित्तादि पञ्चमप्रयाजः । २५ अग्निमन्वनादौ मन्द्रस्वरप्रयोजः । २६ ईयंयुवाकादूर्ध्वं मन्द्रस्वरेण प्रयोगः । २७ प्रयाजेभ्य ऊर्ध्वमाखिदन्तो मध्यमेन प्रयोगः । २८ इडादियंयुवाकान्तस्वरूपस्य शेषस्योत्तमेन प्रयोगः । २९ पूर्वोत्तरयोराज्यभागनामकयागयोरागोरूपदेवतादेयद्रव्यासम्बन्धपूर्वको यागः । ३० अनुवाक्यावतीनामप्रधानां चान्यायाज्याभ्योऽन्यासां देवतानाम् आदेयपूर्वकयागः । ३१ अङ्गप्रधानरूपे सोमकर्म्मणि वैश्वानरीयपत्नीसंयाजयज्ञयोधितवोः पदार्थयोर्मध्ये तत्तोत्पन्नाभ्यो देवताभ्योऽन्यासाम् आदेयपूर्वको यागः । ३२ पौर्णमास्यामाज्यभागयोः सन्निमित्ता वार्त्तप्रसंज्ञा । ३३ अनुवाक्यातत्वविचारावश्यकादि । ३४ याजमूषोरानुवाक्यादेवतान्यत्वम् । ३५ आदित आरभ्याजमागपर्य्यन्तं वाच्यमनम् । ३६ ईयाज्यादिभ्योऽन्यदारभ्यासमाप्तेर्वाच्यमनम् । ३७ यत्रसाधनवचनोऽन्यत्र वाच्यमननियमः । ३८ वाच्यमननियमातिक्रमे अतो देवा अवन्तु न इति वैष्णव्या ऋचो जपः । ३९ उक्तातिक्रमेऽन्यस्या अपि वैष्णव्या ऋचो जपविधानम् । ३९ सू० १ अ० ५ क० । १ विधिक्रमप्राप्तानां देवतानां वक्ष्यमाणक्रमाभ्यां याज्यानुवाक्यायोजना । २ प्रधानानन्तरं स्विष्टकृतो यागः सर्वत्र च पूर्वमनुवाक्यायाः पश्चाद्याज्यायाः प्रयोगः । ३ ये यजामहे इत्युक्ता यज्ञा विभक्ता देवतादिरूपा प्रिया धामान्यवोचिति मन्त्रपाठः । ४ प्रथमदेवतायाः पुरस्तादग्निमन्द्रस्वरेणोक्त्वा उत्तरासामग्राट्यज्ञस्यैव सर्व्यासानुपरिष्टात् प्रिया धामानिमन्द्रस्वरेण च मन्त्रप्रयोगः । ५ याज्याविशेषेऽनुरुक्तस्य कर्त्तव्यम् । ईयाज्यापाठे अर्धर्चे वोल्क्तुसकर्त्तव्यता । ईसू० १ अ० ६ क० १ अध्वर्युणा प्रहेयिनीपर्य्यङ्कनपूर्वकौडापवर्गयोधने । २ आज्ञाधरयोधनस्य मन्त्रविशेषः । ३ अध्वर्युणा इडाभक्षणपूर्वकावान्तरेडावदापनप्रकारः । ४ स्वयं यजमानेन इडाया अवान्तरेडाभक्षणप्रकारः । ५ अध्वर्युकर्त्तृकं वा तद्भक्षणम् । ६ इडोपस्थानप्रकारः । ७ सह दिवेत्यादिना तक्षिन्नपकृत इत्यन्तेन मन्त्रेण इडोपस्थानम् । ८ होतृयजमानपत्नीनां वा सर्व्वेषामवान्तरेडाभक्षणपूर्वकेडाभक्षणम् । ८ सू० अ० ७ क० । १ इडाभोक्तृमार्जनपूर्वकमनुयाजकरणम् । २ मार्जनप्रकारः । ३ अनुयाजलक्षणम् । ४ प्रयाजानुयाजयोर्गुणकथनम् । ५ अनुयाजानां नित्यत्वव्यवस्थापनम् । ६ एकैकं प्रेषितस्य यजनविधानम् । ७ अनुयाजमन्त्राणां स्वरविशेषे क्वचिदवसानपूर्वकं क्वचिन्नावसानपूर्वकं यजनविधानम् । ७ सू० अ० ८ क० । १ सूक्तवाकाय सम्प्रेषितस्य देवतादेयानन्तरम् इदं हविरित्युपस्थानम् । २ उत्तरा अपि देवता आदिश्येदं हविरित्येवमुपस्थानम् । ३ हिर्देवतयुक्तदेवतयोरर्धर्चयोर्नावहतेत्यस्य स्थाने अक्रातामकृतेत्यूहस्य कर्त्तव्यता । ४ आवह स्वाहेतिनिगदस्य पशुयागेऽपि प्रयोग । ५ आवापिकदेवताक्रमप्राप्त्यर्थम् आवापिकान्तर्भावेतदादिकथनम् । ५ सू० १ अ० ९ क० । १ ईयंयुवाकाय प्रेषितस्य तच्चयोरिति मन्त्रपाठे प्रथवनिषेधः । २ ताक्ष्यप्रेषितायाध्वर्युणा वेददानम् । ३ वेदप्रदाने वेदोऽसीति मन्त्रपाठः । ४ प्रकृतिविकारभावेऽपि ऋत्विग्यजमान-प्राप्तिः, आज्येन सोमयाग एव याज्यानुवाक्याव्यवस्थानं यागएव केवलं देवताविशेषाणामनुवृत्तिकथनं च । ५ मन्त्रभेदानां पत्नीसंयाजसंज्ञाविधानम् । ६ प्रजाकामस्य यजमानस्य यागभेदः । ७ यजमाने सन्निहितेऽपि होतृरेव कर्तृत्वं याज्यानुवाक्ययोर्होतृकर्त्तृत्वज्ञातः प्रसिद्धिः, कुरुष्वेमं पुरुषमिति मन्त्रपाठे यजमानस्य स्वयंकर्त्तृत्वं च । ८ पात्रिकस्याज्यस्रुवेडोपस्थानानन्तरं तद्भक्षणविधिः । ९ आज्येडाया ऊर्ध्वं ईयंयुवाको भवति न वेति संशये इतिकर्त्तव्यताविधानम् । ९ सू० १ अ० १० क० । १ होताऽध्वर्युणा वा पत्न्यै वेदं प्रदाय वेदोऽसीत्यादि-काभावेत्येवमन्त्रवाचनम् । २ प्रजाकामायाः पत्न्या वेदग्रिरसा स्वनाभ्यावत्तनम् । ३ आसनाभावे वाचनानन्तरं वोल्क्तविमोकः । ४ द्विगुणितं वोल्क्तं निधाय तस्योपरिष्टात् वेदस्तम्बानां निधानम् । ५ हस्तेभ्य पुरस्तात् वेदस्तम्बसंश्लिष्टस्य पूर्णपात्रस्य निधानम् । ६ आत्मानमभिमृशन्तीं पत्नीमभिमन्त्रयते पूर्णमसीति मन्त्रवाचनम् । ७ पूर्णपात्रादुदकं स्पृष्ट्वा तदुदकेन तां चैव कुर्वतीं वाचयतीत्युक्तिः । ८ वोल्क्तस्याधस्तात् पत्न्यङ्गुलिसन्तानमात्रस्य सव्यपाणिसन्तानं निधाय पूर्णपात्रं निधयन् माहं प्रजा-

मिति तां वाचयतीत्युक्तिः । ९ वेदलक्षणानि स्फ्योत्पा गार्हपत्यादारभ्य तत्तु तत्तच्छिल्पादिना यन्तं कृत्वा आहवनीयं गच्छतीत्युक्तिः । १० सर्वाणि वेदलक्षणानि न स्मरितव्यानि लिङ्गेन चोदितव्यान्युत्तरक्रियार्थमित्युक्तिः । ११ नौतानिरिक्तेषु मार्गेष्वपि मन्त्रसाध्येषु कर्मसु स्वाहाकारस्यैव कर्तव्यत्वं न वषट्कारस्येत्युक्तिः । १२ अविकृतविषेषाणां स्फोमाभ्याधानोपस्थानानां, तत्तद्दिनकर्तव्यताप्रकारस्य च विधानम् । १३ एवमन्यापि कर्मावीति न्यायेन व्याकृतिभिरिति वक्तुवचनलिङ्गेभ्यात् चतुर्णां कर्मणां क्रमेणैव करणम् । १४ प्रयोगमध्ये मार्गान्तरेण निष्क्रान्तस्यापि नियता भवन्त्येतत्सत्र व्यतिरेकाक्षेप व्यवस्थापनम् । १५ संख्याजपः तस्य च स्तोमेष्वेव निवेशः ।१६स्फोतरेव क्षेत्रसंज्ञेतावत्त्वम् अग्नीध्रसाम्यादप्रीत्युक्तिः ।१७ऐत्त० १ अ० ११ क० । १ ब्रह्माधिकारे विधयः । २ आख्यातानां स्फोलाचमनयज्ञोपवीतयोश्चानां ब्रह्माधिकारेऽतिदेशनम् ।३ तत्र कर्मसु क्वचिदुच्यन्ति क्वचित्तिष्ठति तत्र भूयसामेव धर्म्माचरणं ब्रह्मणः इति व्यवस्थापनम् ।४ ऋत्विजामभिसुखादिशः प्राचीत्युक्तिः । ५ एकस्मिन्नपि प्रयोगे क्वचिदासनस्थ क्वचित् स्थानस्थ च कार्योक्तिः । ६ तिसृतां स्फोमेषु अवघट्टारेषु च स्थानासनयोर्विकल्पः ।७ अनन्तरस्तुतशस्त्रविधादन्यत्रासादनस्थापनम् । ८ समस्तपाठस्तुरुक्षाय्ये चाहवनीयं परीत्य तत्र दक्षिणतः कृत्वोपवेशनम् । ९ ब्रह्मोपवेशनानन्तरं मन्त्रभेदजपः । ब्रह्मजपस्य ब्रह्मजपत्वम् । ११ अध्वर्युकर्म उपविष्टातिसर्जनम् । १२ ओं प्रणयेत्यादयातिसर्जनरूपानुज्ञाप्रकारः । १३ कर्मानुरूपाणाम् आदेशानां कर्तव्यतोक्तिः । १४ उत्तरविधार्थम् उद्गैः प्रस्तवादिग्रहणम् । १५ प्रस्तवादूर्ध्वं वा उद्गैर्भावोक्तिः । १६ प्रणीताप्रणयनकालादूर्ध्वं कविष्कृन्मन्त्रोच्चारणपर्यन्तं वाग्यमनपूर्वं जपासनम् । १७ मध्यभागे चात्वालमार्जनपर्यन्तं वाक्संयमः । १८ सर्वस्तोमेषु ब्रह्मणाभिप्रेतारम्भपूर्वं स्तुतशस्त्रयोः पर्यन्तं वाग्यमः । १९ प्रातरनुवाकाकालात् परम् अन्तर्वामपदप्रयागपर्यन्तं वाग्यमनोक्तिः । २० सवनत्रयेऽपि इरोडाग्रप्रचारादि, तदिडापर्यन्तं वाग्यमनोक्तिश्च । २१ स्फोलादौ स्तुतशस्त्रादि-ब्रह्मवाच्यावषट्कारपर्यन्तं वाग्यमनोक्तिः । २२ एवं नाराशंसेषु उप।करणादि समाप्तिपर्यन्तं वाग्यमनोक्तिः २३ सर्वत्र मन्त्रवति कर्मणि वाग्यमनोक्तिः । २४ ब्रह्मदन्यत्रापि विषये स्फोलस्तुतवाग्यमनभावः । २५ वाग्यमनभङ्गे प्रायश्चित्तविधानम् । २६ अग्नीधोः नीवप्रणयनावधिवाग्यमनम् । २७ दक्षिणतो ब्रह्मत एवाशुःशिषान इति स्तुतजपः । २८ सवनत्रयादरिक्तमाप्रातर्पि उपवेषणादिकरणं, ब्रह्मजपविधानञ्च । २९ स्तोमयागे अग्निप्रणयनान्ते ब्रह्मजपनिषेधः । ३० विकृतयाज्यास्वापि यजमानस्तोक्तिः । ३१ विपर्य्याख्यानन्तरितयोः प्रायश्चित्तविधेयोक्तिः । ३२ वेदभेदेन भेदेऽग्निभेदे प्रायश्चित्तभेदः । ३३ सर्वेभ्यो वेदेभ्यो युगपदुभयोर्यागयोः सवनत्रयाभिर्ष्टस्तिरेकाकृतिरूपप्रायश्चित्तम् । ३४ कृष्णदारणात् प्रागङ्गारस्य बहिःपरिधि घाते कर्मभेदः । ३५ तत्र दिग्भेदेन निगतौ स्फोमभेदः कर्माणि स्वाहाकारान्तत्वभावः । ३६ अध्वर्युप्रकरणोक्तिः ३७ । सकृत्प्रवृत्त इत्यादिना प्रकृताङ्गारस्फोलोक्तिः । ३७ सू० १ अ० १२ क० । १ प्राग्निलक्षणनिधानपूर्वकं तत्प्रायणम् । २ दक्षाभक्षणमार्जनपूर्वकं चतुर्धाकरणे कृते प्राग्निलक्षणे ब्रह्मण आनीतब्रह्मभागस्य निधानम् । ३ प्राग्निलक्षणदेशस्य पश्चात् कृष्णेषु यजमानभागनिधानम् । ४ प्रजापतेरित्यादि मन्त्रेणाग्नाहार्य्यावेक्षणम् । ५ आग्नेयाग्नेयाग्नाहार्य्यविग्राहविधानं ब्रह्मभागे विष्टभागविधानञ्च । ६ प्रत्याख्यात इति अध्वर्युमन्त्रपाठानन्तरं प्रतिक्षेत्रेत्यादयुक्तिः । ७ समिदुत्तमानं, जघन्यीभवतः सर्वप्रायश्चित्तस्फोमः, आग्नीध्रस्य ब्रह्मान्तरत्वञ्च । ८ इतरेषां स्फोलारम्भविधिः । ९ उक्तयोरेतयोर्द्वौ एव कार्यौ अन्तरत्वस्य परस्परभावः । १० सर्वेषां स्फोलकर्तृणामन्तरत्वकर्तृणां च संख्याक्रमेण उपासनविधानम् । १० सू० १ अध्याये १२ क० ।

१ पौर्णमासेनेष्टिपशुसोमानामुपदिष्टत्वम् । २ उपदिष्टैरिष्टिपशुसोमैरमावास्यायां पौर्णमास्यां वा यागस्य कर्तव्यतोक्तिः । ३ अग्निवर्यस्वयोः पर्य्यग्नेरवाग्निस्फोलस्फोमकर्तव्यताविधानम् । ४ राजन्यवैश्वयोः पर्य्यग्नेरन्येषु क्रतुषु तत्तच्छास्त्राद्यावीदनदानम् । ५ क्रतुसत्रभावस्य सोमवाजिनश्च अग्निवस्य वैश्यस्य वा सदा स्फोमविधानं न केवलं पर्य्यग्नेरित्युक्तिः । ६ वैश्यपूर्वा समानानां प्रस्तादिधाने इति क्रमेण यज्ञस्योक्तिः । ७ एकस्या एकस्या देवताया द्वे द्वे ऋचौ याज्यानुवाक्ये । ८ देवताविशेषस्य तच्छिल्पाज्यानुवाक्यानादेये निग्रहोत्तरयोर्धृतीत्यत्योक्तिः । ९ सर्वानुज्ञानभूतानामन्याधेयप्रकृतीनां मध्ये गार्हपत्याद्याग्न्युत्पत्त्यर्थमङ्गार-

निधानरूपाग्न्याधानम् । १० कृत्तिकादीनां सप्तानां नक्षत्राणामन्यतमेऽग्न्याधानविधानम् । ११ उक्तानां सप्तानां ऋक्षेषु नक्षत्रे पर्व्वणि वाऽग्न्याधानस्य कर्त्तव्यत्वम् । १२ वसन्ते ब्राह्मणगुरुकाधानविधिः । १३ ग्रीष्मे क्षत्रियगुरुकं वर्षासु वैश्यगुरुकं यदि वा उभयगुरुकं चेति आधानत्रयविधानम् । १४ आपदि आधानपक्षे कालनियमाभावः । १५ क्रतुसोमयागसङ्कल्पस्य आधानमिच्छत आधानकालानवेक्षणम् । १६ आधानाग्नेयमभ्यर्युयजमानयोः प्रभीगमोदन्यत्यादरणाकरणविधिः । १७ अग्न्याधेयस्य पूर्व्वाङ्गत्वस्य कर्त्तव्यत्वम् । १८ दर्शनामग्निसाधनत्वोक्तिः । १९ प्रथमायामिष्टौ वैश्वानरेऽग्नियजमानाग्निनामके हे देवते । २० पवमानगुणकस्य द्वितीयस्याग्नेयीस्त्यानुवाक्योक्तिः । २१ खिष्टकृत्सम्बन्धिन्योर्याज्यानुवाक्ययोर्भूयोः संवाज्यात्वसंज्ञा । २२ सर्वत्र देवतागमे प्राकृतीनां सर्वासां देवतानामनुद्धारोक्तिः । २३ आज्यभागौ खिष्टकृतः प्राग्नेरा यजमानां देवतानामनुद्धर्त्तव्यं विकृतौ पुनर्विहितानां तद्वत्त्वमित्येके । २४ देवताभ्योऽन्यत्रापि अतिदिष्टस्य विधेरेकार्थत्वोक्तिः । २५ द्वितीयायामिष्टौ पावकाग्निगुह्याग्निनामिके हे देवते । २६ साकाम्यानित्यादेर्द्वादशस्य संवाज्यात्वकथनं, तृतीयायामिष्टौ अधिकसामिधेनीद्वयोक्तिः । २७ अग्नीषोमाविन्द्राग्नी विष्णुरित्यस्य वैकल्पिकत्वम् । २८ अदितिर्नामिका दृष्टिः । २९ अदितीष्टेर्याज्योक्तिः । ३० प्रेतो अग्न इत्यग्न इत्यनयोः संवाज्यात्वोक्तिः विराजौ धाय्ये इत्युक्तिश्च । ३१ आद्योत्तमे दृष्टी । ३२ आद्या वा दृष्टिः । ३३ आद्यायां धाय्यौ विराजौ । ३४ वैराजतन्त्रायां दृष्टेर्नियमः । ३५ आधानेनेष्टिभिश्च सिद्धा अग्नयो द्वादशाहोक्तं सर्वं खरूपेणैव धार्य्यन्त इत्येतदङ्गीकारोक्तिः । ३६ गतश्रियामग्नयो यावज्जीवमङ्गा भवन्ति न द्वादशाहमेवेत्युक्तिः । ३७ सू० २ अ० १ क० । १ गार्हपत्यात् व्यवहार्य्याहवनीयोद्धरणम् । २ देवं त्वेति मन्त्रेणाग्निहोत्रार्थसुद्धरणम् । ३ आहवनीयं प्रति मन्त्रपूर्व्वकाग्निप्रणयनमन्त्रः । ४ आहवनीयायतनेऽग्निनिधानमन्त्रः । ५ सायं प्रातरुपःकालेषु निधानान्तकर्म्मकरणम् । ६ रात्र्यां यदेन इति मन्त्रेणाग्निप्रणयनम् । ७ आहिताग्नेर्व्रतचारित्वोक्तिः । ८ अनुदितहोमिन औदयाहुव्रतचारित्वोक्तिः । ९ अस्तमनसमये होमविधानम् । १० आचमनस्य नित्यत्वम् । ११ अग्निपर्य्युक्षणमन्त्रोदाहरणविधिः पर्य्युक्षणे अग्नीनामुत्पत्तिक्रमस्य होमक्रमस्य वा विधानम् । १२ दक्षिणाग्निगार्हपत्याहवनीयपर्य्युक्षणे क्रमोक्तिः । १३ गार्हपत्यादविच्छिन्नोदकधाराकरणम् । १५ अधिश्रयणार्थं गार्हपत्यात् कतिपयाङ्गारदृषदुपकरकरणविधिः । १६ होमसाधनभूताग्निहोत्राधिश्रयणम् । १७ अधिश्रयणे मन्त्रविकल्पः । १८ दध्यधिश्रयणानधिश्रयणविकल्पः १८ सू० २ अ० २ क० । १ अकामकर्त्तृकस्य नित्याग्निहोत्रहोमस्य पयसा कार्य्यता । २ श्यामाद्यैन्द्रियतेजस्कामानां यवाग्वोदनदधिसर्पींषि यथासङ्ख्यमग्निहोत्रद्रव्याणि भवन्तीत्युक्तिः । ३ आहवनीयेऽग्निं विना अधिश्रितमात्र एवाज्यस्रुवनविधानम् । ४ अपक्वदृषदध्यादीनामधिश्रितानामप्यज्यस्रुवनविधिः । ५ पयसा होमे समन्त्रकदोहनपात्रप्रक्षालनपूर्वं स्रुवेण प्रतिषेकत्रिकल्पः । ६ एकस्मिन् पुरुषे प्रतिषेकाप्रतिषेकयोरसङ्करत्वोक्तिः । ७ अवज्वलनार्थं मन्त्रपूर्वकं गार्हपत्यात् स्फ्योतेनोल्मुकेन पुनः परिकरणविधानम् । ८ पच्यमानपयोऽवतारणमन्त्रः । ९ गार्हपत्येऽङ्गाराणां प्रक्षेपमन्त्रः । १० आहिताग्नेरतिसर्ज्जनमन्त्रः । ११ आहिताग्नेः पत्न्याश्च कृतिकर्त्तव्यताकथनम् । १२ अतिसृष्टस्योद्वयनविधिः । १३ पुत्राणां तारतम्यमिच्छतः सपुत्रस्य यजमानस्य काम्यकल्पः । १४ एकपुत्रस्यापि काम्यकल्पः । १५ समिद्धरणानन्तरं समन्त्रकं तदाधानविधानम् । १६ समिदाधानानन्तरम् आचमनपूर्वकं तदवधिहोमविधानम् । १७ पूर्वोक्तस्यानन्तरं कुशेषु स्रुक्सादनमन्त्रपूर्वकं गार्हपत्यावेक्षणम् । १८ पूर्वोक्तेः प्रागुदक् उत्तरतो वा उत्तराकृत्यर्थं द्रव्योत्पादनविधानम् । १९ होमेषु सर्व्वत्र प्रजापतिध्यानविधानम् । २० भूयिष्ठद्रव्यपूर्णस्रुक्काज्यग्रहणानन्तरं तप्ततेषवसर्जनं पाणितलगततेषवासर्जनञ्च । २१ तेषवनिमार्जनकुशमूलानां दक्षिणत उत्तानाङ्गुलिनिधानम् । २२ कुशमूलानां दक्षिणतो जलावनिनयनविधानम् । २३ स्रुक्निधानानन्तरं जलोपस्पर्शनम् । २४ आहिताग्निकर्त्तृकानुमन्त्रणविधानम् । २५ समन्त्रकमाधीयमानसमिदनुमन्त्रणम् । २६ ता अश्लेत्यृचा पूर्वाकृत्यनुमन्त्रणम् । २७ समीपस्थेन सकटाक्षमीक्षित्याकृत्यनुमन्त्रणम् । २८ याभिः काभिश्च तावराभिराग्नेयीभिर्ऋग्भिरुत्तराकृत्यनुमन्त्रणम् । २९ पूर्वकृतोक्तस्य ऋचां त्रयस्य निरूपणम् २९ सू० २ अ० ३ क० । १ पूर्णे पूर्णे संवत्सरेऽधिकाभिर्ऋग्भिः यजदनुमन्त्रणम् । २ पर्वविहितयवाग्वादिना सायंप्रातर्होमेषु यजमानस्य स्वयं

कर्त्तव्यम् । २ पूर्वपर्वसत्यरेतरकाले येन केनापि ऋत्विजाग्निहोत्रहोमः । ३ पुत्रशिष्ययोरन्यतरेणाग्नेर्वाग्विना होमस्तूष्णीमेव च । ५ होमकर्तुः स्रुग्गतयेषभक्षणप्रकारः । ६ अपरपर्विजोहोमपूर्वकं स्रुग्गतयेषभक्षणम् । ७ प्रथमोत्तरभक्षणाद्वये मन्त्रभेदौ । ८ समिदाधानपूर्वको गार्हपत्ये होमविधिः । ९ उत्तराकृतेर्नित्यत्वोक्तिः । १० समिदाधानपूर्वकं दक्षिणाग्निहोमप्रकारः । ११ उत्तराकृतेः पूर्ववत् नित्यत्वोक्तिः । १२ यक्षयेषभक्षणानन्तरं स्रुचामपां निनयनम् । १३ सुक्प्रक्षालनानन्तरं प्रागुदोच्योः चतसृणां पूर्णानां स्रुचां निनयनीयत्वम् । १४ कुण्डदेशे पञ्चमी स्रुक् गार्हपत्यस्य पश्चात् वक्तव्येति । १५ आहवनीये प्रतापितायाः स्रुचोऽन्तर्वेदिदेशे निधानम् । १६ परिचारकरूपाय परिकर्मिणे वा ताडङ्गाः स्रुचोदानम् । १७ उदक्प्लुतेन समिन्मयस्रुवाधानं पर्युक्षणादिकरणञ्च । १८ तिस्रूणां समिधां प्रथमायाः समन्त्रकाधानम् । १९ आहवनीयगार्हपत्यदक्षिणाग्निषु दीदिहि दीदाय दीदिदायेति मन्त्राणां क्रमेण स्वाक्रान्तानां पाठ्यत्वम् । २० उक्तकार्ये पूर्ववत् पर्युक्षणविधानम् । २१ पर्युक्षणहवधर्मस्य परिसमूहनहवेऽतिदेशः । २२ पर्युक्षणाभ्यां परिसमूहनयोः पूर्वभावोक्तिः । २३ सायंप्रातरुभयत्राग्निहोमहोमयोरेकाकारत्वम् । २४ सूर्योदयस्यौपकाल्पेयकालादित्योदयकालानां प्रातर्होमस्य प्रधानकालत्वम् । २५ प्रातर्होमे विशेषोक्तिः २ अ० ७ क० । १ प्रवत्स्यत आहिताग्नेरग्निप्रज्वालनाचमनाभिक्रमणानन्तरं तदुपस्थानम् । २ दक्षिणाग्न्युपासनानन्तरं सकल्पकं गार्हपत्याहवनीयेक्षणविधानम् । ३ आहवनीयदक्षिणाग्न्युपासनपूर्वकं गार्हपत्याहवनीयेक्षणं कृत्वाहवनीयसमीपं गत्वा तदुपस्थानम् । ४ पुरतोऽग्नीनवेक्षमाणस्याहिताग्नेर्यथेष्टगमनम् । ५ अग्निसमीपं गत्वा वाग्विसर्गविधानम्, इतः प्राक् वाग्यमनविधानञ्च । ६ अभिलषितदेशगामिनं पन्थानं प्राप्य सदा सुगः पितरिति मन्त्रपाठः । ७ यदि दैवात् मानुषाद्वा निमित्तात् अनुपस्थिताग्नेः प्रोषितस्य दृष्टेति मन्त्रपूर्वकं प्रतिदिशमग्न्युपस्थानम् । ८ प्रेत्य स्वयामसमीपं प्राप्य अपि पन्थामिति मन्त्रपाठः । ९ समित्पाणेर्वाग्यतस्याहिताग्निव्रजनस्थानाभिक्रमणपूर्वकम् आहवनीयेक्षणम् । १० नानाग्निषु समिध उपनिधायाहवनीयोपस्थानम् । ११ उपनिहितानां समिधामभ्याधानम् । १२ दक्षिणाग्निसमीपे स्थितस्याहिताग्नेः गार्हपत्याहवनीयेक्षणविधानम् । १३ वाग्विसर्गस्य प्रकारभेदः । १४ दशरात्रादूर्ध्वं प्रोष्य चतुर्थ्यहीतेनाज्येन प्रायश्चित्तहोमः । १५ एकाग्नेरग्निहोत्रविच्छेदे पूर्वोक्तयाज्ञत्या होमविधानम् । १६ उक्ताकृतिहोमानन्तरं प्रतिहोमविधानम् । १७ अनाहिताग्नेरपि दैक्षणप्रपदनयोः कर्त्तव्यत्वविधानं न वेश्यस्याहिताग्नेस्तदित्युक्तिः । १८ प्रवासादागतस्य तदहनि विदितस्याग्नीनस्य न निवेदनीयत्वम् । १९ प्रवासादागतस्याहरहरग्निहोत्रहोमोपस्थानं तत्स्थानं तत्प्रयोगक्रमस्य च अ० ५ क० । १ अमावास्यायामपराह्णे पिण्डपितृयज्ञविधानम् । २ दक्षिणाग्नेरेकोल्मुकं गृहीत्वा तस्मादेव प्राग्दक्षिणायां दिशि मन्त्रपूर्वकं तत्प्रणयनम् । ३ अविशिष्टदिक्कानां सर्वेषां कर्म्मणां प्राग्दक्षिणां दिशमभिकर्त्तव्यत्वम् । ४ उभयोरपि अग्नीरुपसमाधानपरिस्तरणपूर्वकं दक्षिणाग्नेः प्रागुदक् प्रत्यगुदग् वा एकैकशः चतस्रस्थालीप्रभृतीनां यज्ञपात्राणां सादनम् । ५ अग्निसमीपस्थितं शकटं दक्षिणत आरुह्य भूमेरुपरि श्रीहिपूर्णस्थालीनिमार्जनरूपतदास्तरेषादूर्ध्वं श्रीहिपातनम् । ६ स्थाल्यास्तदेषात् भूमेरुपरि पातितानां श्रीहीणां शकटे निधानम् । ७ कृष्णाजिननिहिते उलूखले स्थाल्यन्तर्गतावशिष्टान् श्रीहीन् कृत्वा यजमानपत्नीकर्त्तृकतदवघातः । ८ अवहतानां श्रीहीणां दक्षिणाग्नौ अपवपणम् । ९ दक्षिणाग्न्यतिप्रणीतयोरन्तराले रेखोल्लेखनम् । १० सकृदाच्छिन्नावत्तीर्ष्वभ्युक्षितरेखायां ध्रुवास्थितमाज्यं दक्षिणतो दक्षिणाग्नेर्निधाय तेनाज्येन अभिधारितस्य स्थालीपाकस्य दक्षिणाग्नेः पश्चादासादनम् । ११ आज्यस्थालीनां दक्षिणाग्नेर्दक्षिणतो निधानम् । १२ प्राचीनावीतिनो यजमानस्य उपसमाहितैरिध्मबर्हिर्यूपेन स्रुचा स्रुक्तैरवदानस्यादा होमः । १३ स्वधानमःयज्ञस्य स्थाने स्वाहाकारं कृत्वा होमः । १४ अग्नौ मेक्षणानुप्रक्षणपूर्वकं पिण्डस्थानेषु लेखायां तिसृभिर्मन्त्रैस्त्रिर्निनयनम् । १५ रेखायां पिण्डनिपरणम् (दानम्) । १६ दैवाणगारिमते पित्रादीनां त्रयाणां ये मृताः स्रुक्तेषां पिण्डदानं जीवतां प्रत्यवनेजनम् । १७ तौल्वलिमते पित्रादिभ्यस्त्रिभ्यः प्रेतेभ्यो जीवद्भ्यश्च सर्वेभ्यो निपरणम् । १८ गौतममते त्रयाणामेकस्मिन् द्वयोः सर्वेषु वा जीवत्सु यावदर्थं परान् पितॄन् सृष्ट्वा त्रिभ्यः प्रेतेभ्यः पिण्डनिपरणम् । १९ पित्रादीनां जीवितानां

कृतानाञ्च पिण्डदाने उपायविशेषकथनप्रतिज्ञा । २० क्रमेण गौतमगार्ग्यगारित्यौल्वलीनां मतदूषणानि । २१ जीवत्यवहितेभ्यः पिण्डेभ्यो न निपरणम् । २२ जीवेभ्यो होमः कृतेभ्यो निपरणम् । २३ सर्व्वजीविनः सर्वकृतविधाने तत्र पिण्डहोमस्य निपरणमन्त्रेण स्वाहाकारेण कर्त्तव्यत्वम्, अन्येषामपि प्रयोजनानां चिन्तनीयत्वञ्च । २४ पित्रादीनां नामोच्चारणे तत्पितामहप्रपितामहशब्दानां नामस्थाने प्रयोगः । २५० ६ क० । १ निपूर्त्तानां पिण्डानामनुमन्त्रणम् । २ उक्तानुमन्त्रणप्रयोगे नियमोक्तिः । ३ तूष्णीमेव चरोः प्राणभक्षणस्य कार्यत्वम् । ४ उदक्कोपनयननिगदनस्य नित्यकर्त्तव्यत्वम् । ५ पिण्डेषु अभ्यञ्जनाञ्जनदानम् । ६ पिण्डेषु वासोदानं तत्र विशेषोक्तिः । ७ यजमानस्य पितृपासनं तत्र मन्त्रश्च । ८ तिसृभिर्ऋग्भिः पितृपस्थानम् । ९ पिण्डस्थानां पितॄणां प्रवाहणम् । १० यजमानस्य दक्षिणाग्निं प्रति गतिः । ११ दक्षिणाग्निप्रतिगत्यनन्तरं यजमानस्य गार्हपत्याग्निं प्रति गतिः । १२ यजमानकर्त्तृकं पिण्डानां मध्यमादानम् । १३ पत्नीकर्त्तृकं तादृगवटहीतमध्यमपिण्डप्राशनम् । १४ अवशिष्टपिण्डहृदयेषु प्रक्षेपः । १५ अतिप्रणीते वाज्यो प्रक्षिप्य तादृगपिण्डहृदयदाहः । १६ यस्यार्त्तेच्छाभावोक्तिर्निमित्तः तादृग्न पिण्डस्य प्राशनम् । १७ क्षयकुष्ठादिमङ्गारोगवतः तादृगपिण्डप्राशने सद्य एवारोगित्वमरणयोरन्यतरमतिक्षाभोक्तिः । १८ अमाहिताग्नेरग्न्यैः पिण्डपितृयज्ञकरणम् । १९ चरुश्रपणानन्तरं तदतिप्रपचनं ततस्तदुपसमाधानतत्परिस्तरणे कृत्वा होमकरणम् । २० हिरण्यं चरुपूर्णपात्रायासत्यागः । २१ एकस्मादतिरिक्तस्य हव्यस्य हित्वं सम्भाद्य तदुत्सर्गकरणविधानम् । २अ० ७मक० । १ दर्शपूर्णमासावारभ्याग्रयणान्तारभ्याधीतेष्टिकरणम् । २ अग्नेर्भगीतिगुणोक्तिः । ३ इष्टेर्याज्यानुवाक्योक्तिः । ४ आधानानन्तरं तत्संवत्सरे रोगार्त्तेष्टानिरूपनिमित्तसद्भावे पुनराधेयम्, पुनराधेये च वसन्तमारभ्याग्रयणेष्टेः कर्त्तव्यत्वम् । ५ उक्तायामिष्टौ विभक्तिभिः सङ्गतिभ्यां प्रयाजानुयाजाभ्यां यजनम् । ६ नराशंसिनां नराशंसः । ७ आग्नेययोराज्यभागयोरुक्तिः । ८ आज्यभागयोर्गुणद्वयोक्तिः । ९ निगमेषु सगुणयोरेवानुवक्ष्यमाणिः । १० याज्यायां देवतादेवरूपायां इज्यायाः कथनम् । ११ अनुमाल्लक्षिनामाचार्य्याणां मते पूर्व्वस्य क्रौरुक्ष्याग्नेः, अग्निर्हव्यवाडनुवाक्यावांश्च नित्यत्वम् । १२ उक्तमते उत्तरस्यापि केवलस्याग्नेरुक्षानुवाक्यायां नित्यत्वविधानम् । १३ उत्तरे याज्यामन्त्रे कविःशब्दस्य नित्यत्वोक्तिः । १४ संयाज्यामन्त्रभेदः । २अ० ८ क० । १ व्रीहिश्यामाकयवैः संवत्सरे प्रथमनिष्पन्नैः आग्रयणकर्मकरणम् । २ आग्रयणेनानिष्टा नवनिष्पन्नस्य भोजननिषेधः । ३ वर्षत्रयस्य लोकस्य आग्रयणेन यागविधानं व्रीह्याग्रयणे परत्वाल्लस्य प्राधान्यम् । ४ आग्रयणाख्या इष्टिः प्रथमः कल्पः, तदवयवेऽग्निहोत्रीयां धेनुं व्रीहिश्यामाकयवानामन्यतममाग्रयित्वा तत्पयसा सायंप्रातरग्निहोत्रहोम इति द्वितीय इति कल्पद्वयम् । ५ यवैराग्रयणस्य क्रियाऽक्रिया वा इति विकल्पः । ६ अविशेषेण वर्षत्रयाणां कल्पद्वये प्राप्ते राज्ञ इष्टिरेव नान्य इति विशेषोक्तिः । ७ एकेषां मते सर्वेषां इष्टिरेवेति व्यवस्थापनम् । ८ वर्षायां श्यामाकाग्रयणेष्टौ सोमदैवत्यचरुव्यवस्थापनम् । ९ अवान्तरेडाप्रपानन्तरम् सद्ये पात्रौ कृत्वा तदभिमर्शनम् । १० इडाप्राशनानन्तरम् आचमनपूर्वको नाभ्यालम्भः । ११ उक्तेन विधिना सर्वभक्षेषु सर्व्वेषां भक्षिणां सर्वभक्षत्वम् । १२ व्रीहीणां यवानां चाग्रयणेष्टौकालादि तत्र यवाग्रयणस्य यत्सन्नकालविधानम् ध्याख्याविराजपरुक्षञ्च । १३ श्यामाकाग्रयणस्य समानतन्त्रेण करणे सोमस्य क्रतोयत्वव्यवस्थापनम् । १४ तत्र इन्द्राग्न्योः सोमस्य च याज्यानुवाक्याः । २अ० ९क० । १ चातुर्मास्येभ्यः पूर्वं आख्या इत्यः । २ आयुष्कामेष्ट्यां जीवातुमत्यौ हे देवते अग्निरिन्द्रश्च । ३ उक्तयोर्देवतयोरग्नेरायुष्मत्त्वं गुणः, इन्द्रस्य च लाक्षत्वं गुणः । ४ आयुष्कामेष्ट्याम् अग्नीन्द्रयोर्देवतयोः संयाज्ये । ५ स्वस्त्ययनीयेष्ट्यां रक्षितवन्तौ देवौ अग्निः सोमश्च । ६ उक्तयोरग्नीषोमयोः संयाज्ये । ७ पुत्रकामेष्टौ अग्निः पुत्रो देवता । ८ उक्तावाग्नेष्टौ हे संयाज्ये । ९ वसन्तमारभ्ययोरिष्ट्योरग्निदेवतात्वम् । १० मूर्द्धन्वतोऽग्नेर्मित्रे संयाज्ये । ११ कामगुणकस्याग्नेर्याज्यानुवाक्ये । १२ उत्तरयोरिष्ट्योर्वैरूप्यत्वं, तयोर्याज्यानुवाक्ययुगलयोर्वैरूप्याभ्ययोरिन्द्रदेवतात्वं, तस्य चेन्द्रस्य विरूपदृगुणकत्वं वैरूप्यभ्यर्थगुणकत्वं वा, अतस्तयोर्वैरूप्यसंज्ञाभाक्त्वञ्च । १३ पुष्टिकामस्य याज्यानुवाक्ये । १४ इन्द्रो दाता च पुनर्दाता वा देवता भवति । १५ उभयथापि इन्द्रस्य याज्यानुवाक्ये । १६ आग्नानामाग्याधानानां वा देवता-

त्वम् । १८ आधाशापाज्ञानां याज्यानुवाक्याशास्यम् । १९ इष्टिविशेषस्य लोकेष्टिसंज्ञोक्तिः । २० पृथिव्यादीनां पृथग्देवतात्वकथनम् । २१ त्रयाणां ऋषिणां याज्यानुवाक्याङ्गयाज्ञिक्यश्चः । २२ त्रयाणां ऋषिणां तिसृणाम् ऋचां विनियोजनम् २अ०१०मक०। १ मित्रत्वलिङ्गेतुभूता मरुद्वैराजी नामेष्टिः । २ मरुद्वैराज्यामग्न्यादीनां दशानां देवतात्वम् एकपदात्वञ्च । ३ उक्तानां दशानां देवतानामनुवाक्योक्तिः । ४ प्रतिलोममादित्यानामुक्तानां दशानां यजनम् । ५ अष्टौ वैराजतन्त्रा इष्टय । ६ तासां प्रथमाः पञ्चेष्टय एकर्षयः । ७ स्रुघ्नाश्वशुरीया नाम आभिचारिको इष्टिः । ८ स्रुघ्नाश्वशुरीयेष्टौ याज्यावाक्यानिङ्गात् देवतायाः कल्पनीयत्वं, सा चेन्द्रः, इन्द्रः सूरगुणो वेति । ९ पूर्वोक्तायां देवतायाः संयाज्ये । १० स्वाभिष्टुत्योः सम्मतिकामानां संज्ञानी नाम इष्टिः । ११ संज्ञानाख्यां चतसृणां गुणानां देवतानाम् एकपदात्वम् । १२ अग्निसोमेन्द्रादित्यानां सगुणानां देवतानां प्रतिपादनम् । १३ भेदकामानाम् ऐन्द्राबार्हती इष्टिः । १४ इन्द्रस्य नित्ये याज्यानुवाक्ये । १५ इन्द्रबार्हतोर्विकल्पविधानम् । १६ मारुताद्यागादूर्ध्वम् ऐन्द्रो यागः । १७ राजविशोरसम्मतिकामानाम् व्याहिताग्नीनां च प्रकृत्यैव संज्ञानो नामेष्टिः । १८ ग्रामभि ग्राह्यमाणानाम् ऐन्द्राबार्हस्पत्या नाम इष्टिः । १९ अध्वर्यवसेत ऐन्द्राबार्हस्पत्यं निरूप्य इन्द्राय नोदयेयु यद्वा बार्हस्पत्यं निरूप्य इन्द्राय नोदयेयुः तदा उभयोरपि पक्षयोः याज्यानुवाक्याशास्यम् १९ सू० । २अ० ११ क० । १ संवत्सरमतिप्रवसतः मुष्टिकामस्य पवित्रेष्टिविधानम् । २ पवित्रेष्टौ पावकवत्यौ धाय्ये । ३ पवित्रेष्टौ न याज्ये । ४ पवित्रेष्टौ संयाज्ये । २अ०१२क० वर्षकामाणां कारीरी नामेष्टिः । २ कारीर्यां धाय्याद्वयम् । ३ वर्षकामेष्टिमात्रेऽग्नुमत्यौ गायत्यौ देवौ । ४ वर्षकामेष्टिमात्रेऽग्नेः सोमस्य च मन्त्रभेदः । ५ उक्तेष्टिमात्रे धामच्छद्मुष्णिगग्निः । ६ उत्तरात्रिष्टो मरुद्देवत्याद्वयः पिण्डीसंज्ञकाः । ७ धामच्छद्मुष्णिकाग्नेयीज्यानुवाक्याद्वयस्य व्यवस्थया योजनीयत्वम् । ८ पिण्डीयागस्य करणम् । ९ संस्थितायामिष्टौ सर्वासां दिशाम् उपासनम् २अ० १३क० । १ इष्ट्ययनसंज्ञकानि कर्माणि । २ एकानेकसंवत्सरसाध्यानि सांवत्सरिकाणि कर्माणि । ३ सांवत्सरिकाणां कर्मणां फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा प्रयोग । ४ तुरायणं नाम इष्ट्ययनम् । ५ अहन्यहनि अग्निदेवत्या इन्द्रदेवत्या विश्वेदेवदेवत्या चैतासिस्र इष्टयः त्रिषु सवनेषु यथासङ्ख्यम् एकैकेष्टेः कार्यत्वम् । ६ त्रिष्टुविक्काया एकस्या एवेष्टेरुक्ताभिर्देवताभिर्युक्तायाः प्रतिदिनम् प्रातःसवन एव कर्त्तव्यत्वम् । ७ दाक्षायणयज्ञे पौर्णमास्यामाधेयागहयम् । ८ व्याहृत्योः पूर्वे ये ते नित्ये न विद्यते । ९ उत्तरयोस्तु एष विकारो यत् पौर्णमास्यां द्वितीयं ऋषिवस्य ऐन्द्रत्वम् । १० अमावस्यायां द्वितीयस्य ऋषिणो मैत्रावरुणत्वम् । ११ प्रतिपर्व्वकर्त्तव्यं प्राजापत्यम् इडादधो नामेष्ट्ययनम् । १२ द्यावापृथिव्योरयनं नामेष्ट्ययनम् । १३ उक्तस्य इष्ट्ययनस्य कालविधानम् । १४ एतच्छास्त्रानान्नातास्त्रिष्टिषु पौर्णमासात् तन्त्रान्यत्वविधानम् । १५ यजुर्वेदएव प्रकृतं तन्त्रं नान्यदपरमिति । १६ अग्निमन्थनसंयुक्तायामिष्टौ वैराजमेव तन्त्रम् । १७ अग्निमन्थने सत्यपि धाय्ये एव केवले तन्त्रं न तदन्यत् । १८ याज्यानुवाक्यास्वरूपोक्तिः । १९ अनुवाक्याकालत्वोक्तिः । २० असम्भवे विहितच्छन्दसोऽन्यस्य वा याज्यानुवाक्यानां कर्त्तव्यत्वम् । २१ सर्वथाऽनुवाक्यापेक्षया याज्याया न क्षतीयस्त्वम् । २२ उष्णिग्गृहकृत्यानें याज्यात्वम् । २३ ग्रामनष्टहृतदग्धपतीनां वर्जनम् । २४ देवतापदसम्पत्ये न लक्षणान्तरान्वेषणम् । २५ देवतापदेऽव्यक्ते लक्षणस्य गायत्र्यादेराश्रयणीयत्वम् । २६ देवतानामनधिगमे याज्यानुवाक्यानिर्वर्त्तव्यत्वोक्तिः । २७ सर्व्वथाऽनधिगमे याभ्यां काभ्यांचिद्दृग्भ्यां यागोऽनुवचनञ्च । २८ व्याहृतिभिर्या यागानुवचने । २९ द्वितीयया विभक्त्या देवतामादिश्य प्रणवेन यजनञ्च । ३० नवसंज्ञाभ्यां ऋग्भ्यां वा प्रणवयजने । ३१ नवसंज्ञके ऋचौ । २२ देवतापदरहिते ऋचौ भवत इति । २अ० १४क० । १ अग्निर्देवत्ये चात्वालाख्ये ऐड्यनस्थानार्थं पूर्वेद्युर्वैश्वानरपार्जन्ययोरिष्टेः कर्त्तव्यत्वम् । २ अग्नाधेयादीनां उपांशुप्रधानत्वोक्तिः । ३ सोमोत्पत्त्या इष्टयः । ४ प्रायश्चित्ता अग्नेरुत्पत्त्या इष्टयः । ५ अग्न्याधेयात्मनाम् एकविंशतेः [illegible] यागानां उपांशुप्रयोक्तव्यत्वम् । ६ सर्वत्र वा वारुणर्क्षासु उपांशुत्वम् । ७ चात्वालाख्येषु सावित्रयागस्य उपांशुत्वम् । ८ वैश्वदेववरुणप्रघासमाहेन्द्रगुनासीरीयेष्वाम् उपांशुत्व[illegible] । ९ तन्त्रयुक्तानां पित्रोपसद्यामकानामिष्टीनामुपांशुत्वम् । १० उत्तमादनुयाजात् प्राक् पुनराधेयेष्टेः स्वतन्त्रोपांशुत्वम् । ११ स्वतन्त्रोपांशुत्वविधिष्टानां सर्वेषाम्

प्रेषितेषु तूष्णीमन्त्रवत्तन्त्रत्वम् ।१० आगूःप्रणववषट्काराणां सर्वत्र ऊर्ध्वभोगोक्तिः । ११ आप्रयणेष्टौ आग्नेन्द्रस्य ऐन्द्राग्नस्य वा प्रथमस्य हविष ऊर्ध्वभावकथनम् । १४ ऊर्ध्वविक्षितस्य पुरोऽनुवाक्याप्रणवस्य प्राणसन्ततत्वम् ।१५ याज्यायाः आगूर्वषट्कारयोः प्राणसन्ततत्वम् ।१६ उपांशोस्तन्त्रस्वराणाम् ऊर्ध्वत्वम् । १७ उपांशुतन्त्राणां तानि ऊर्ध्वानि मन्द्रस्वराणि भवन्तीत्युक्तिः । २अ० १५क० । १ प्रातर्वैश्वदेव्यां प्रेषितस्याग्निमन्थनीयानुवचनाभिधिक्कृतिकरणे । २ संप्रैषस्यवषट्कारपर्यन्तं पूर्वेद्युरवसाने आरामो नोत्तरादानम् । ३ मध्ये त्वनवसाने यत्रारामविधिः तत्राप्यासन्नैषाच्चोत्तरारम्भः । ४ मथ्यमानोऽग्निश्चेज्जायते तदाग्नेराजन्यस्य पुनः पुनः अग्ने हंसीति सूक्तावापनम् । ५ अग्निजन्मन्यवधानानन्तरम् उक्तसूक्तीयप्रथमेन शिष्टार्धर्चोपसन्नत्वनम् । ६ अनावापपक्षे जातस्यवधानानन्तरं शिष्टेनार्द्धर्चेन उत्तरायाश्च उपसन्नत्वनम् । ७ यज्ञेनेत्यनया ऋचा समापनम् । ८ सर्वत्र यज्ञादिषु उत्तमाया ऋचः समापनीयत्वम् । ९यद्धिरण्म इति प्रयाजानन्तरं प्रयाजान्नादीनामावपनम् १० देवताष्टकोल्लेखः; मरुतां स्वतवस्त्वेति गुणकथनञ्च । ११ प्रकरणपठितानां निर्गुणानां मरुतां धाय्याहृयकथनम् । १२ अनुयाजानां देयकथनम् । १३अनुयाजाद्यन्यतमे काले वाजिभ्यो यागः । १४ अर्द्धजानुनाऽनवाख्याप्रयोगः । १५ यत्र क्वच विषये एकस्मिन्नेवाध्वर्युसंप्रैषे तुल्यरूपयोरतुल्यरूपयोर्द्वयोर्वषट्कारयोः समवायोर्हितत्वम् ।१६ ऐयाज्याधर्मस्तु इतरेषु अनुवषट्कारादिषु आगुरः प्रतिषेधः ।१७ इष्टयिष्टं वाजिनम् इडाभिव भक्षार्थं अङ्गुलौ निधाय उपहवयाचनम् ।१८ अध्वर्युब्रह्माग्नीध्राणां सभीपे उपहवयाचनम् । १९ उक्तवाजिनस्य चित्तिदादाय स्रुक्लोकमन्त्रेणाग्नाग्नाम् । २० होतुर्भक्षणानन्तरम् अध्वर्युब्रह्माग्नीध्राणां क्रमेण वाजिनभक्षणम् । २१यजमानादितरेषां सर्वेषां दीक्षितानां इष्टपतेरन्येषाञ्च प्राशनमेव तन्त्रलक्षणम् । २२ वैश्वदेवीष्टिदिवसादपरिक्रान्दिने पौर्णमासेनेष्ट्वा तदानीमेव वक्ष्यमाणानां चातुर्मास्यप्रतानां क्रोधनिवर्त्तनमध्वादिवर्जनकृपायाम् आचरणारम्भः । २३क्रोधनिवर्त्तनम् । २४ प्रस्रवणाधःमध्ये चार्द्धे मधुमांसवर्जनस्यवक्ष्यमाणानि वर्जनानि। २५ कामविषये प्रतिषिद्धस्य प्रतिप्रसवार्थम् ऋतौ भार्योपगमनविधानम् । २६ उत्तरविक्षार्धानुवादरूपं सर्वपर्वसु वापनम् । २७ आद्योत्तमयोर्वा पर्वणोर्वापनं न मध्यमयोरिति । २अ० १६क० ।१ प्रकृतवैश्वदेवेष्टिकायां पौर्णमासीमारभ्य पञ्चव्यां पौर्णमास्यां वरुणप्रघासैर्यागविधानम् । २ प्रणीयमानस्याग्नेः पश्चादुपविश्य प्रोक्षितस्याग्निप्रणयनीया प्रतिपत्तिः । ३ आसीनस्य सप्रणवायाः प्रथमाया उपांश्वनुवचनम् । ४ उपांशुस्वरस्थानां स्वरान्तरस्थानसङ्कमणे प्रणवेनावसाय अनुच्चस्य उत्तरस्या ऋच आरम्भः । ५ उक्तावसानानुच्चारपूर्वकम् उत्तरारम्भस्य प्राणसन्ततभावित्वम् । ६ प्रणीयमानयोर्द्वयोरुत्तरमग्निमनुव्रजत उत्तरासाङ्गत्वमनुवचनम् । ७ राजन्यवैश्ययोरादौ ऋचौ । ८ उत्तरस्या वेदेः पश्चादवस्थाय शेषसमापनम् । ९ सोमेषु उत्तरवेदेः पश्चादवस्थाय समापनम् । १० यज्ञियेवासने पूर्वोक्तमनुवचनमारभ्य तस्मिन्नुपविश्य व्याहृतित्रयरूपवाग्विसर्जनम् । ११ अन्यत्रापि अनुवचनानुव्रजनयोर्वाग्विसर्गः । १२ तिष्ठतः संप्रैषेषु तिष्ठत एव वाग्विसर्गः । १४ वैश्वदेव्या समानाऽग्निमन्थना नाम इष्टिः । १४यज्ञादीनां तिसृणां हविषाम् ऐन्द्राग्नादीनां कर्त्तव्यत्वम् । १५ तनूसंगतमन्त्रस्य उपहवयाचने तृतीयत्वम् । भक्षणे चतुर्थत्वम् । उपहवयाजनभक्षणयोश्च विशेषकथनम् । वैश्वदेव्यामपि एवम्भावत्वम् । १६ इष्टौ संस्थितायामवभृतकर्म निमित्तं अध्वर्यूणाम् उदकदेशगमनम् । १७अवभृतस्यानित्यत्वेऽपि इच्छाभावेऽन्येषामपि अव-धानादीनां सत्त्वम् । १८चातुर्मास्याङ्गत्वेन द्वयोर्मासयोरैन्द्राग्ननामकपशून्तरविधानम् । २अ० १८क० ।

१ वरुणप्रघासेभ्यः परम् ऐन्द्राग्नवत्परं अनीकवदादित्यान्तकर्मरूपाणां साकमेधानां यजनम् । २ साकमेधीयपौर्णमास्याः पूर्वेद्युः सवने सवने एकैका इष्टिः । ३ उक्तानुसवनीयानामिष्टीनां प्रथमायामनीकवान् अग्निः एतदुत्तरस्यां हविर्धान्यौ, मरुतः शालपनाः तदुत्तरा आखुभागप्रभृतीड़ान्ता इष्टिः । ४ सप्तसेभ्यो मरुद्भ्यो देवताभ्य आम्नातयोर्द्यावापृथिव्योश्च उल्लेखः । ५ पुष्टिपतोर्विराजयोर्निगदरहितसंयाज्यात्वम् । ६ सप्तसेधीयादन्यत्रापि आवहनरहिते स्थले अनिगदयोः संयाज्ययोः सम्भवः । ७ पित्र्यायां पयौ चेतीष्टिद्वये आवाहने सत्यपि अनिगदं संयाज्याद्वयम् । । एकमासपितृष्टिकायां रात्रौ बहूनां यात्रिकाणाम् अन्नदानम् । ९ रात्रेः पश्चाद्भागे पौर्णदर्वीनामकस्य स्रोमकर्मणः कर्त्तव्यत्वम् । १०हविरर्चने भूयमाणे उक्तस्रोमकालः । ११ मेघध्वनौ भूयमाणे तद्रोमकालः । १२ तस्रोऽन्नदेयस्याभावे ब्रह्मणस्तन्नाम्नोक्तं सम्बोध्य कैश्चित् रवप्रावर्त्तनम् ।

१२पूर्वार्द्धर्चीत्यादिमन्त्रयोरध्वर्युणा होतृप्रैषे याज्यानुवाक्यात्वम् । १३ क्रौञ्चिभ्यो मरुद्भ्य उत्तरा दृष्टिः । १५ क्रौञ्चिनां मरुतां परोक्षवाक्त्वान्नावाज्यभागौ । १६अक्रौञ्चिनां मरुतां याज्यानुवाक्ये । १७ माहेन्द्री दृष्टिः । १८ माहेन्द्र्यामिष्टौ अष्टदेवतोक्तिः । १९माहेन्द्र्यां याज्याकथनम् । १९सू० २अ० १८क० । १ दक्षिणाग्नेरग्निमारीय तमन्यत्र स्थापयित्वा तत्र पित्र्याख्यकर्मकरणम् । २ पित्र्याया दृष्टेर्लुप्तजपानुमन्त्रणादित्वम् । ३तस्यां पित्र्या-यामिष्टौ कर्मणां प्राङ्मुखत्वम् । ४ अन्यस्यामिष्टौ दक्षिणामुखत्वम् । ५ इतरदिङ्मुखानि प्रकृतौ यथान्वयं करणीयानि । ६ अनुच्छ्रयता उपनह्यते तस्या ऋचस्तिरस्त्वचनं तत्र च तासामेव सामिधेनीनां न पुनरभ्यासः । ७ तासां सामिधेनीनामुत्तमेन प्रणवेन प्रतिपत्तिः । ८ आज्यपान्तदेवतावाहनानन्तरं प्राक्षतात् खिष्टकृतावाहनात् परं कव्यवाहनाख्याग्निसमावाहनम् । ९ उत्तमे च प्रयाजे आज्यशेषेभ्यः पूर्वं कव्यवाहनाख्याग्नि-निर्गमनम् । १०सूक्तवाके विशेषोल्लेखः । ११कार्यार्थमन्त्र-लोपेऽपि कार्यलोपप्राप्तौ कार्यस्य लोपप्रतिषेधः । १२पित्र्यायामिष्टौ अवान्तरेड़ाभक्षणेड़ाभक्षणयोरभावः । १३ इड़ाभक्षणे मार्जनाभावः । १४ सूक्तवाके यजमान-नामादेशाभावः ।१५दक्षिणतः सोद होसरितिवोक्तस्योपवेशनम् ।१६सव्योपर्युपस्थानां प्राचीनावीतिनां हविर्भिर्जोषा-मनुद्धारणम् । १७ पित्र्यायामाग्नीध्रस्य दक्षिणत्वम् अध्वर्योरुत्तरत्वम्, अनुवाक्याहृयम्, अध्युद्धायामनवानम् । १८आश्रावणप्रत्याश्रावणसम्प्रैषेषु ओँ स्वधेत्यादीनां दीर्घा-नानां प्रयोक्तव्यत्वम् । २०मुतोनां नित्यत्वव्यवस्थापनम् । २१ पितृणां सोमवत्ता सोमस्य पितृमत्ता बर्हिषदः अग्नि-ष्वात्तावेतियुग्मोक्तिः । २२पञ्चानां पितृणां तिसृणां सूक्त इत्युक्तिः । २३ वैश्वदेवस्य चेद्देवतात्वं तदा उत्तमे त्रिके मध्यमाया याज्यात्वं प्रथमोत्तरयोरनुवाक्यात्वम् । २४ खिष्टकृतो याज्योक्तिः । २५ खिष्टकृतोऽग्नेः कव्यवाहन-संज्ञा । २६ खिष्टकृत जर्हृं प्रकृतिभावः । २७ मन्त्र-लोपादिभिज्ञानां सव्योपर्युपस्थातादीनामभावाय प्रकृ-तिभावविधानम् । २८ प्रकृतिभावादेवानुवाक्याया एकै-कत्वम् । २९ वषट्कारक्रियायामेव संयाज्याहृयम् । ३० विशेषनियमार्थं दक्षिणाहुतो दक्षिणाग्नेरुपस्थानम् । ३१पित्र्यायामिष्टौ आवर्त्तनविरहेणोपस्थानम् । ३२दक्षि-णाग्नेरुपस्थानमन्त्रः । ३३गार्हपत्याहवनीययोरुपस्थानम् । ३४ आहवनीयोपस्थानमन्त्रः । ३५ तन्मन्त्र इत्येकयर्चा गार्हपत्योपस्थानम् ।३६प्रादक्षिण्येन गार्हपत्यमभितः समा-गमने मन्त्रः । ३७गार्हपत्यानन्तरं सव्याहवनीयाभ्यवकरूपकर्म-भेदार्थगमनम् । ३८अध्वर्युक्तस्य यजमानेरपि कर्त्तव्यत्वम् । ३९ प्रत्येत्य यदितिदेवताकया ऋचा चरणम् । ४०पुष्टि-मत्यौ धाये विराजौ । ४० सू० २अ० १९क० । १ साकमेधकालमारभ्य पञ्चम्यां पौर्णमास्यां शुनासीरीया नामेष्टिः । २ पञ्चम्याः पौर्णमास्या अर्वागपि वा शुना-सीरीयारम्भः । ३ नियुत्वानिति वायोर्युक्ष्वः शुनासीरीयः शुनमेति इन्द्रस्य शुन इत्युक्तिः । ४एतत्-प्रकरणगतानां याज्यान्तरीयाणाञ्च देवतानां एतत्-प्रकरणान्नाता एव याज्यानुवाक्या इत्युक्तिः । ५ज्योतिष्टो-मप्रकृतिकौ चातुर्मास्याङ्गभूतौ पशुसोमौ ताभ्यां यत्किमेदेन व्यत्ययसंस्थाभ्यां यागः । ६ चातुर्मास्याना समाप्तौ पुनरभ्यासः ६सू० २अ०२०क० ।

३अध्याये पशुकर्माधिकारः । १प्रायश्चित्तात् पूर्वं पशु-गुणकं कर्म । २पशोरुभयतोऽन्यतरतो वा दृष्टिकरणम् । ३ पशुयागसम्बन्धिन्या दृष्टेरग्निर्देवत्यधिकल्पः । ४ पशु-यागसम्बन्धिन्या दृष्टेः करणपक्षे देवताविकल्पः । ५ एक-स्मिन् पशुप्रयोगे आग्नेयी चाग्नावैष्णवी चेति दृष्टि-द्वयम् । ६ उभयेष्टिकरणपक्षे एकस्याः पुरस्तात् अपरस्या उपरिष्टात् कर्त्तव्यत्वम् । ७ सविधिकस्य वारुणप्राघा-सिकस्योक्तस्याग्निप्रणयनस्य पुनरुल्लेखः । ८ पशुबन्धयाग-सम्बन्धिन्या वेदेः पशादुपविष्टस्यानुवचनार्थं प्रेषितस्य यूपमज्यमानमभिधातुम् ऋग्विशेषानुवचनम् । ९ अज्य-मानयूपानुवचनपरिधानयोर्मन्त्रभेदौ । १० सप-शुकयूपपक्षके एकपशुतन्त्रके कर्मणि अन्ययूपानुवचनं परिधायान्ययूपसस्तवनञ्च । ११प्रथमोत्तमयोरनभ्यासवि-धानम् । १२ पशुदेवताभ्योऽनन्तरं वनस्पत्याहवनम् । १३ संमार्गे संमार्जनानन्तरं प्रदृताङ्गुतिभिर्होमः । सकृदुपहरणपूर्वकैकाङ्गुतिहवनानन्तरं पुनः सकृदुपहरण-पूर्वकपञ्चाङ्गुतिहोमः, मन्त्रविपरिणमञ्च । १५ सौत्ये एवाहनि पूर्वोक्तहोमः । १६ तीर्थेनैव लब्धविहारप्र-दानाय प्रणाम्ने समन्तकदण्डदानम् । १७ प्रणामस्तूद-ङ्मुखोत्तराभ्यां पाणिभ्यां समन्तकदण्डप्रतिपत्तिपूर्वम् । १८ यावत् प्रैषवचनं नास्ति तावत् उक्तेन दण्डेन स्वपरयोः संस्पर्शननिषेधनियमः । १९ उपदुष्टानाङ्ग-न्येषामपि यज्ञाङ्गानां विकारेण व्यापत्तिनिषेधः ।

२०प्रेषितस्य मैत्रावरुणस्य प्रैषानुवचनप्रकारः । २१मैत्रावरुणस्यानुवाक्यानुवचनम् । २२मैत्रावरुणस्य पर्य्याग्नि लोकमनीयतोन्नीयमानसूक्तपाठ । २३आसीनेनैव मैत्रावरुणस्य सोमाधिकरणकर्मान्तरस्य करणम् ।२३सू०२अ० १क० । १ पशुयागे एकादशप्रयाजनियमः । २ तत्र तेषां प्रयाजानां प्रैषा अपि एकादशसंख्याः । ३ प्रकृतादुक्तमप्राकृतेष्वपि प्रैषेषु स्वादित्येवमर्थं पूर्वोक्तस्य प्रैषसूक्तस्य पुनरुपदेशः । ४अध्वर्युप्रैषस्य होतुरनाकाङ्क्षणीयत्वम् । ५ प्रैषलिङ्गाभिराप्रीभिर्होतृयजनम् । ६ शुनकानां, वसिष्ठानां, सर्वेषाञ्चाप्रीसूक्तभेदकथनम् । ७ ऋषिनामधेयस्यानुगुणानामाप्रीणां व्याख्यत्वम् । ८ प्राजापत्ये तु वसिष्ठगुणकसंहितानां सर्वासामाप्रीणां जामदग्न्यत्वम् । ९ दशसु सूक्तेषु प्रेषितस्य मैत्रावरुणस्य प्रैषवचनम् । १० उक्तप्रैषवचनस्य होतुरन्वेवेति दण्डनिधानम् । ११ अग्निगुणशब्दाच्चैव दैव्याः पतिमतार इत्यादिके मन्त्रेऽङ्गादि शब्दानामूहः । १२स्त्रीपुंसयोः समाहारे पुंलिङ्गनैवोहः । १३स्त्रीदेवतायामभिधेयायां मेधपतिशब्दस्य पुंवद्वचनम् । १४ स्त्रीपक्षे मेधशब्दस्य पुंवद्वा स्त्रीवद्वा वचनविकल्पः । १५अग्निगोरूढम् अङ्गादिशब्दानामितरेषाञ्चोहनं, स्त्रीपुंसमाहारेषु सर्व्वत्र पुंवदेवाभिधानञ्च । १६न केवलमस्योहविधेः पशुकर्मार्थत्वं किन्तर्हि सर्वेषु यज्ञेषु निगदेषु चार्थवशेन कार्य्यत्वम् । १७प्रकृतौ समर्थनिगमेषूहनम् ।१८मन्त्रगतानां शब्दानां प्राकृतत्वेन ऊहनम् । १९प्रतिनिधिष्वपि प्राकृतानां शब्दानामूहनम् । २० उपमार्थानां श्येनादीनां शब्दानामूहनम् । २० सू० २अ०२क० । १ अग्निगुणनामकमन्त्रविशेषकथनं तत्स्थानां पदानामूहश्च । २अस्मेत्यादीनां त्रयाणां शब्दानां स्वे स्वे स्थाने उपांशुप्रयोक्तव्यत्वम् । ३षट्त्रिंशतिशब्दस्याभ्यासनियमः । ४मन्त्रविशेषजपानन्तरं विहारादादृत्य दक्षिणाद्वत आवर्त्तनम् पृष्ठतः कृत्वा आसनञ्च । ५ मैत्रावरुणस्यादृत्य पृष्ठतः करणम् । ६पुनरावर्तनकाले पराचामेवासनम् ६सू०२अ० ३क० । १वषायां श्रप्यमाणायां तत्संस्कारार्थं प्रेषितस्य स्तोकेभ्योऽनुवचनम् । २स्वाहाकृत्यर्थं स्रुगादानस्य कर्तव्यत्वम् । ३ उत्तमा आप्रीयाज्या । ४ वषा पुरोडाशोऽधिरिति पशोर्यागाः । ५ नानादैवतेषु पशुषु याज्यानुवाक्याभेदादेव वषायागवत् पृथग्भावः । ६ प्रतिपशु मनोतामन्त्रस्यावर्त्तनम् । ७एकेषां मते मनोतायां श्रुतावर्त्तनम् । ८ उक्तप्रदानगतप्रैषाणां समानलिङ्गत्वोक्तिः । ९ प्रदानप्रैषेषु विकृतिषु च या देवतास्तासामेकैकस्या देवताया अग्नीषोमस्थाने निर्दिश्य यष्टव्यत्वम् । १० गोमेषहयानामेकैकस्या जातेर्द्वयोर्द्वयोः शब्दयोर्नियमनस्य वैकल्पिकत्वम् । ११ वनस्पतिखिष्टकृत्सूक्तवाकप्रैषेषु प्रदानप्रैषीयप्रयोगवत् प्रयोगः । १२ सूक्तवाकप्रैषेषु पुरोड़ाशेन पशुदेवतायाश्चर्वनम् । १३ हविषां नानारूपत्वात् स्वेन स्वेनैव यज्ञेन निगमने प्राप्ते पुरोडाशशब्देनैव चर्वादीनां निगमनविधानम् ।१४मेधोरभीयानित्यत्र तयोः पदयोः पञ्चभिर्व्यायकत्वम् । १५ आम्नायसिद्धानां द्विवचनानानाम् एकवचनबहुवचनयोरिष्टकारपरिपूरार्थं पाठविशेषः १५सू०३अ०४क० । १६वषाहोमानन्तरं सव्रश्चकानां बर्हिषां सक्तं मार्जनम् । २६इडामार्षं इत्यनयर्चा यजुषा च उभाभ्यां मार्जनम् । ३ प्रत्यङ्गभूतायामिष्टौ व्यतिदेशिकमार्जनस्य प्रत्यृचमप्यावृत्तौ मार्जनस्य एतावत्त्वोक्तिः । ४ पुरोडाशश्रपणपर्य्यन्तं तीर्थेन निष्क्रम्यास्रमविधिः । ५ प्रधानखिष्टकृतोर्भेदप्रतिपत्त्यर्थं प्रधानेन चरित्वा खिष्टकृता चरणविधिः । ६ खिष्टकृच्चरणावसरे आगन्तूकर्याग्नेरग्ने पशुपुरोडाशखिष्टकृतां चरणम् ।७अन्वायत्तदेवतानां हविषां चावाकृनाद्रिषु निगमेषु अनुवृत्त्यभावः ।८पुरोडाशानामिति हविर्भेदे प्रैषस्योह्यत्वम् ।१०इड़ाया ऊर्द्धम् उक्तप्रैषस्योह्यता १०सू० २अ०४क० । १इड़ोपधानानन्तरं मनोतानुचरणम् ।२हविषा चरणम् प्रैषाणां तत्सलिङ्गत्वञ्च । ३हविःप्रैषे कतर एवाग्नीषोमावेवेत्यत्र ऐतरेयाणां सम्मतिः । ४ द्विदैवतादन्यत्र एकदैवते बहुदैवते पशौ मैत्रावरुणयोर्दैवतात्वम् । ५एकदैवतेषु बहुदैवतेषु च प्रैषेषु तथाहृत्वम् । ६ प्रकृतिभावे गार्हपत्यसंयोज्यैः । ७ अर्थभेदरहिते आम्नाये विकारस्य निरर्थकत्वम् । ८वषाहोमे कृते अर्द्धर्चयोर्मध्ये याज्यायाः समापनम् । ९ प्रैषसमाम्नायपठितं वनस्पतिप्रैषमभितो ये द्वौ तयोर्वनस्पतियाज्यानुवाक्यात्वम् । १० आज्यभागयोः करणे प्रैषे प्रधानदेवताङ्गदेवतयोर्मिश्रणम् । ११ खिष्टकृति इड़ोपधानानन्तरम् अनुयाजैश्चरणम् । १२ उक्तस्थलेऽनुयाजानामेकादशसङ्ख्याविधानम् । १३प्रकृतिभ्योऽन्यासां वैश्वदेव्यानामाहृत्यव्यत्वम् । १४प्रैषाधिकारनिष्टप्तार्थम् अवदानशब्दस्य पुनरावृत्तिः । १५ पुनरवदानस्य व्याख्यानार्थोल्लेखः । १६ सूक्तवाकप्रैषे आज्यभागयोर्यथाहृणम् । १७पशुतन्त्रे पदत्रयस्याभ्यासत्वाभावाय पठितस्यापि पुनरभ्यासः । १८ देवतानाम

मेकजातीयपशुकत्वकथनम् । १६ पशुगुह्यानामेवावदानं नान्ययोर्देवयोः ।२० उत्तरे पूर्वयोक्तस्योक्तेः । २१अनवरुद्धे कर्म्मणि सूक्तवाकप्रैषसमापनानन्तरम् आहवनीये दण्डानुप्रहरणम् । २२ सावरुद्धे कर्म्मणि अवरुद्धानुप्रहरणम् । २३ वेदस्तरणोत्तरकालः संस्थाजपात् प्राक् निष्क्रम्य उदस्यमानस्य हृदयशूलस्यानुमन्त्रणे मन्त्रः । २४ उदस्यमानस्य हृदयशूलस्य उपरिष्टात् अपाकृष्यस्यर्गनमन्त्रः ।२५ अस्य हृताद्धृदयशूलानामृ अन्योन्यसंस्पर्शवेष्टनमन्त्रयोरेव सर्वेषामेकैकेन समिक्त्रयस्य यकरणम् । २६ मन्त्रविशेषपूर्वकं प्रथमायाः द्वितीयायाः तृतीयायाश्च समिधोऽभ्याधानम् । २७पूर्वयज्ञोक्तुरेव पूर्वाभ्याधानं न सर्वेषां युगपत्" । २८संस्थाजपान्तं पशुतन्त्रम् । २८सू० २अ० ६क० । १ प्रदानाख्यकर्म्मोक्तप्रैषा एव सर्व्वत्र भवन्ति नान्ये इत्युक्तिः । २ येषां पशूनां यानि प्रदानानि तेषां पशूनां याज्यानुवाक्याकथनप्रतिज्ञा ।३सर्वत्र पूर्वसूक्ता अनुवाक्याः उत्तरा याज्या इति ज्ञापनम् । ४ याज्यानुवाक्यालिङ्गितदेवतेन वक्ष्यमाणानां पशूनां नानात्वोक्तिः । ५ अग्नेर्याज्यानुवाक्याः । ६ सरस्वत्या याज्यानुवाक्याः । ७सोमदेवतायाः याज्यानुवाक्याः । ८ पूष्णो याज्यानुवाक्याः । ९ बृहस्पतेर्याज्यानुवाक्याः। १० विश्वेषां देवानां याज्यानुवाक्याः । ११ इन्द्रस्य याज्यानुवाक्याः । १२ मरुतां याज्यानुवाक्याः । १३इन्द्राग्नोर्याज्यानुवाक्याः । १४सवितुर्याज्यानुवाक्याः ।१५बृहस्पतेश्च याज्यानुवाक्याः । १६सू० २अ० ७क० । १ अष्टाद्यभिर्ऋग्भिः पशुकर्मविधानम्, तासाञ्चर्चां प्रजापतिदेवताकत्वम् । २ याज्यानुवाक्याभिरुक्तकल्पितदैवत्यानामिष्टिरूपाणां पशूनां विधानं, साकल्येनैतदध्यायगणितानां तासां त्रिंशत्सङ्ख्याकत्वोक्तिः । ३ खण्डद्वये समाम्नातानां पशूनां मध्ये केषाञ्चित् सोमाङ्गत्वं केषाञ्चित् स्वतन्त्रत्वञ्च । ४ पशूनां प्रकृतिभूतस्य ऐन्द्राग्नस्य निरूढनामकस्य पयोः कर्त्तव्यत्वम् । ५ निरूढस्य पयोः षट्सु षट्सु मासेषु वत्सरे वत्सरे वा कार्य्यता।६प्राजापत्योपांशुसावित्रसौर्य्यवैष्णववैश्वकर्म्मणरूपपशुकतन्त्रेषु उपांशुजपविकारोक्तिः । ७प्रैषादेरपि आगुरः स्यानभाजित्वम् । ८ आदृदादीनां सप्तानां यथास्थानसुपांशुत्वम् । ८सू० २अ० ८क०।१सौत्रामण्याख्यकर्म्माधिकारः। २तत्राश्विनसारस्वतैन्द्राःपयवःवार्हस्त्यस्तृतीयः ऐन्द्रसावित्रवारुणाः पशुपुरोडाशाः यथासङ्ख्येन भवन्तीत्युक्तिः।३चात्वालमार्जनानन्तरम् आश्विनसारस्वतैर्यजे प्रचरणं तेषामानुवाक्या प्रैष याजयानां कथनम् । ४कुम्भीस्थसुरावेक्षणमन्त्रः यज्ञपात्रस्थसुरावेक्षणप्रकारश्च । ५ सुराग्रहपयोग्रहयोर्भक्षजपविधानम् । ६ सुराग्रहेष्वेव प्राणभक्षविधानम् । ६सू० २अ०६क०। १विधानान्यथाभावे प्रायश्चित्ताधिकारः । २ विहितस्याभावे प्रतिनिधिग्रहादानम् । ३ दृष्टिमध्यरूपस्याग्नाहितान्नेः प्रयाणोपयन्तौ अग्नीनां दृष्टयुद्वयनम् । ४ समन्त्रकं साज्याक्षतिहोमकं समारोपणं कृत्वा गमनविधानम् । ५ समारोपस्वरूपम् । ६ यजमानकर्तृकं गार्हपत्ये याणिद्वयस्य सकृत्प्रतपनम् । ७उक्तप्रकारेणाहिताग्नेः समारोपणानन्तरमकृत्वागमनविधानम् । ८ यजमानकर्तृकं समन्त्रकमरणीमन्थनविधानम् । ९अवदीयमानस्याहवनीयस्य शस्यापरादर्वाक् संयमनम् । १० यदि तृतीयाद्यहोरात्रे पौर्णमासीं यातीयाद्यदि वाऽन्यस्मिन्नग्निषु यजेत यदि वास्यान्योऽग्निषु यजेत यदि वास्यान्योऽग्निरग्नीन् व्यवेयाद्यदि वा साग्निकोत्र उपसन्ने हविषि वा निरूप्ते चक्रीवच्छ्वा शुरुपोवाऽविर्विकारमन्तरियाद्यदि वाध्वे प्रमीयेत इत्येवं निमित्ते दृष्टिविधानम् । ११ उक्तायां दृष्टेः पथिकृद्रुद्राग्निदेवताकत्वम् । १२ उक्तायामिष्टौ अनड्वृत्तिणा । १३पूर्वोक्तायां दृष्टेः अग्निभिन्नव्यवधाननिमित्तकत्वे विधानभेदः । १४शुना व्यवाये स्वपदानां भक्षणा परिपूरणम् । १५ भक्षराजोदकराजा च सन्नयने प्रतिराजि मन्त्राद्वृत्तिः । १६उक्तराजिभ्यां समानं कृत्वा ऽऽहवनीयानुगमनानन्तरं ततः प्रणीय तदुपस्थानम् । १७ पथि स्रुतस्य अन्यवस्त्रेण दोहनीयायां गोः पयसाग्निहोत्रान्तरं प्रातरादौ प्राक् देहाग्निसंस्काराद् कृत्वा दाह इत्युक्तिः । १८ अपरपक्षे आहिताग्नेर्मरणशङ्कायां तत्पत्न्यावपिताक्षतिभिः एतत्पूर्वपक्षनयनम् ।१९आवाहनानन्तरं प्रधानयागादर्वाक् हविर्व्यापत्तौ तस्य प्रधानयागादेः सर्वस्याज्ञानेष्टिं समाप्य पुनरिज्या न भवतीत्युक्तिः । २० च्युतदेशनखादिभिरन्यैर्वा दोषैर्हविःषु दुष्टेषु नान्यः प्रत्युक्तः शुद्धुपायः । २१ कठिनानां भेदने दूषणां चरुणे हविषां दुष्टत्वम् । २२ दुष्टानां हविषां अप्सु प्रक्षेपः। २३साद्यस्कस्य दुष्टस्य मध्यमेन पलाशपर्णेन वल्मीकद्वारे प्रतिषेचनम् अप्सु वा तूष्णीमिति विकल्पः । २४ अन्तःपरिधिदेशे विष्यन्दमानस्य हविषो निर्वपणम् । २५प्रातर्दोहे अदुष्टे द्वयोः पात्रयोः कृत्वाऽन्यतरत्

दधिभावाय जातच्य ताभ्यां दधिघर्मोभ्यां प्रचरणम् । २६ पयसि दुष्टे तत्स्थाने पुरोडाशव्यवस्था । २७ दधिपयोरूपे साक्षाच्यहये दुष्टे इन्द्राग्निदैवत्यौदनसिद्ध्यर्थं पञ्चशरावपरिमितदोहिनिर्वपणम् । २८ इन्द्राग्नेग्राः पृथक् चरणम् । २९ एकैषां मते कैवल्यमित्रदेवताकपञ्चशरावोत्पादनानन्तरम् इन्द्राग्नेग्राः पृथक्चरणम् । ३० साक्षाच्यार्थमपाक्रतानां पत्नीनां पाने वायुदेवत्यया यवाग्वा यजनम् । ३१ गर्भमिति मन्त्रेण स्वनोऽधिश्रितस्याग्निहोत्रस्याभिमन्त्रणम् । ३१सू० २अ० १०क० । १ उपावसृष्टाया दुह्यमानायाश्च अग्निहोत्रा गोरभिमन्त्रणम् । २ उक्षाया गोरुत्थापनम् । ३उक्षाया गोरुधसि सक्थे चोदपात्रसपोदुष्टस्य दुग्ध्वा ब्राह्मणाय मानार्थेनतत्प्रदानम् । ४यज्ञायज्ञायार्थे उक्षार्थे गवे यवसदानम् ।५दुग्धस्य शोणिताकारत्वे निरवयवस्य गार्हपत्येदाहविधानमन्येन द्रव्येण च होमकरणम् । ६ दोहनोत्तरं पात्रस्य भेदने पात्रात् पतने वा विच्छिन्नपतितत्यागेनान्यस्यादुष्टस्याभिमन्त्रणम् । ७दोहनावस्थायां पयसः स्कन्दने स्कन्दांशाभिमन्त्रणम् । ८परिस्रुतेन स्थालीस्थेन होमः । ९ होमस्थापर्य्याग्नौ अभ्यानीयान्येन होमः । १०पयसि स्कन्ने प्रायश्चित्तम् । ११स्कन्ने स्कन्नाभिमर्शनम् । १२ पय शेषेण होमविधिः । १३ स्रुग्गतस्याऽशेषे पुनरुच्चीय होमकरणम् । १४स्थालीपाके शेषाभावे संस्कृतेनाऽन्येनोच्चीय होमः । १५ प्रधानहोमहयपर्य्यन्तम् उक्तरूपा प्रायश्चित्तिः । १६ पूर्वोक्तहोमे प्राकृतस्य मन्त्रस्यापवादरूपया वारुण्या ऋचा होमः वारुणीजपश्च । १७ वारुणीजपो वारुणीहोमः अनयनमिति त्रयस्य शेषेण होमे मात्रापचारहोमे पुनरुच्चीय होमे च कर्त्तव्यता । १८ गायत्रगारिमते उक्तपक्षत्रये पुनर्होमः। १९ सरसरेति शब्दायमानस्याग्निहोत्रद्रव्यस्य अभिमन्त्रणम् । २० उद्वासिते विध्यन्दिते च प्रायश्चित्तान्तरम् । २१ बोभत्से मध्यमेन पलाशपर्णेन होमः । २२ अभिदुष्टेऽधिकसमिदाधानम् । २३ उत्तरस्या आहुतेः स्कन्दने समिदाधानम् । २३सू० २अ० ११क० । १ सायं होमस्य प्रदोषान्तकालविधानम् । २ सङ्गवान्तस्य प्रातर्होमकालत्वम् । ३ सायं प्रातर्होमेऽतीते चतुर्होतेनाऽन्येन होमः । ४ कस्मिन् काले केन मन्त्रेण होमस्योक्तिः । ५ अग्निहोत्रे समाप्ते वारुणीहोमः कार्य्यः । ६ होमोत्तरकाले प्रातः दुह्यन्ते वरदानम् । ७अग्निहोत्रसमाप्तौ आहवनीयस्यानुगमनं कृत्वा पुनस्तदुद्वरणम् । ८ तन्निमित्ता मित्रसूर्य्योभयदेवताका दृष्टिः । ९ दृष्टिसमाप्तौ यतवाचोः पत्नीयजमानयोरग्नीन् व्यत्ययतोरनञ्चतोरङ्गुष्ठेशेषणम् । १० हयोर्गवोर्दुग्धेन रात्रेः पूर्वचतुर्थभागे सायमग्निहोत्रहोमः । ११ एकस्मिन् पयस्यधिश्रिते द्वितीयमवनीय तेन होमकरणम् ।१२प्रातःकालातिपातनिमित्ता प्रातरिष्टिः । १३ उक्षायामिष्टौ व्रतभङ्गकस्याग्नेर्दैवतात्वम् । १४स्वकाले एव प्रणीतेष्वग्निषु होमकालातिपत्तौ प्रायश्चित्तोक्तिः । १५ दुःस्वेनास्रुपाते प्रायश्चित्तिः । १६ अग्निहोत्रार्थं विधिनानुद्धृतेऽाहवनीये यद्यस्मियादर्कस्तदा यद्भविद्भ्राह्मणेन तस्य निधानान्तं कारयेदित्युक्तिः । १७पूर्ववत् अनुद्धृतेऽभ्युदितो यद्यर्को यद्भविद्भ्राह्मणेन तत्प्रणयनम् ।१८आहवस्य क्षेमरजतायनयनरूपकार्य्यान्तरोक्तिः । १९कालात्ययेन प्रायश्चित्तविशेषोक्तिः ।२०उक्तविषये प्रातःकाले विशेषोक्तिः ।२१विद्यमाने आहवनीये गार्हपत्यानुगमने कर्त्तव्यताविधानम् । २२ मथनसमर्थत्वाभावे भक्षणाऽरणी क्षेपयित्वा तन्मन्थनम् । २३ मन्थनविषये कर्त्तव्यताकलापः ।

२४ उक्तमन्थनविषये द्वितीयः कल्पः । २५ पुनर्मन्थनविषये कल्पान्तरम् । २६ त्रिगुणयुक्तोऽग्निरेवात्र मन्थनविषये एका देवता । २७ अग्निहोत्रार्थं प्रणीते आहवनीयेऽनुगतप्रायश्चित्तत्वेन दृष्टिविशेषोक्तिः । २८ ज्योतिष्मद्दृषदकाग्निरुणयोः प्रकृते देवतात्वोक्तिः । २९ सर्वेष्वग्निष्वनुगतेषु आदित्येऽस्तमिते उदिते वाऽग्नेः पुनराधानरूपप्रायश्चित्तोक्तिः । ३० अरण्योः समारूढेषु अग्निषु अरण्योर्नाशे अग्न्याधेयस्य पुनराधेयस्य वा कर्त्तव्यत्वम् ।३०सू० २अ० १२क० ।१व्यतःपरं भाविनोनाग्निहोत्रीणाम् आग्नेयत्वोक्तिः । २व्रतातिपाते आग्नेयोष्टिः ।३व्रतेऽग्निकर्म्मण्यिदोषेणेष्टिः किन्तु व्याहृतिहोमः । ४ आगारदाहे शालायाग्नये, शालाग्निसंसर्जने च शुचयेऽग्नये, दृष्टिः । ५ सर्वेषां हयोर्वा अग्न्योः परस्परं संसर्गे विविचयेऽग्नये उक्तेष्टिः । ६गार्हपत्याहवनीययोः संसर्गे वीतयेऽग्नये दृष्टिः ७ पचनाग्निना संसर्गे संवर्गायाग्नये दृष्टिः । ८ वैद्युतेऽग्नौ अग्नये महाव्रताय, शूलगवसूक्ष्मौजने वैश्वानरनामकायाग्नये चेष्टिकरणम् । ९ पुरोडाशकपाले नष्टेऽन्यस्मिन् पूर्वोक्तैवेष्टिः । १० अभ्याधाविते उक्षाया दृष्टेः कर्त्तव्यत्वम् । ११ जीवत्येवाहिताग्नौ मृतशब्दोक्तेऽे शुभतयेऽग्नये दृष्टिः । १२ तत्रेष्टौ मरुतोदेवता ।

१३ आधानाख्येऽग्न्यारब्धे चन्द्रमसः पुरस्ादभ्युदेत्यानेऽग्नेवताका उक्तेष्टिः। १४ प्रायश्चित्तप्रकरणोक्तानां ब्राह्मणोक्तानाञ्चेष्टीनां वैकल्पिकत्वकथनम्। १५ कविधां स्रुक्स्रुवानामभिमर्शनम्। १६ बर्हिरादिषु स्रुक्स्रुवया आकृत्या आज्यप्रकर्तृको होमः। १७ स्रुवते अग्नीषोमाय पूर्णपात्रदानम्। १८ देवताविपर्यासरूपयुत्क्रमेण महाव्याहृतिहोमः प्रायश्चित्तं हिरण्यदानञ्च। १९ क्वचित्कर्मणि यस्यदेवताया आहवनमुक्त्वा उत्तरकर्मप्रवृत्तौ यदा अरण्यम् भवति तदैवोत्थाय तदाहवनं कर्त्तव्यम्। २० मनसा वा तदाहवनमित्यन्यमतम्। अस्यानिन्द्राया देवताया अरण्यकमेव याग:। २० सू० २ अ० १३ क०।

१ अपक्वहविषा होमे कृते चतुःशरावौदनेन ब्रह्मब्राह्मणभोजनरूपा प्रायश्चित्तिः। २ अदर्शे किञ्चिद्धविरवदानेऽप्येतो न पर्याप्तश्चेत्तदा पूर्वोक्तप्रायश्चित्तम्। ३ हविष्यभेदे दर्शे पुनराहुतिः कार्या। ४ आयाहून तु प्राक् प्रविहोमे पुनराहुतिरेव। ५ गुणभूतानां पुनराहुतिकथनम्। ६ स्विष्टकृतः प्राक् प्रधानभूतानां पुनराहुतिकथनम्। ७ अवदानदोषे पुनरायतनदवदानोक्तिः। ८ तत्रामे शेषपक्वहविषे दक्षिणाङ्गारेण कृत्विग्भ्य इत्युक्तिः। ९ अपक्वहविषि विक्षिप्तदक्षिणाङ्गारे यस्यसम्बन्धभूमिरस्तम्। १० प्रोक्षणाद्यभावे प्रायश्चित्ताभावः। ११ आहिताग्नेर्मासि मासि तद्दर्शादिभिरभिन्नानां भिन्नानां वा पुनरिष्टिबन्धकपालानामभिन्नानाम् अपाकस्यकरणम्। १२ कपालोऽन्येषामसत्यानां भिन्नानामभिन्नानाञ्च अपाकस्यकरणम्। १३ स्फुटितोत्पतितपुरोडाशानां निधानादिकथने। १४ अग्निहोत्रहोमकाले अग्निप्रणयनकाले मध्यभागे ऽग्नौ न जाते लौकिकमग्निं प्रणीय तत्र होमकरणम्। १५ अन्वाहार्यात्तु नेषां पूर्वपक्षालाभे उत्तरोत्तरयजनम्। १६ ब्राह्मणपरागत्यादिषु पक्षेषु आकृतिधारणार्थं न मन्त्रवति इध्मबर्हिषी समिधो न भवन्त्येवेति। १७ उद्धोपासनस्य अन्वहमपि भवतीत्युक्तिः। १८ यदि दार्शो दुग्धात् तदा दार्शिनो ब्राह्मणस्य भावरोधः करणीय इत्युक्तिः। १९ यजनकर्मणि अनुज्ञातं तदा आगमांसस्यभक्षणम्। २० कव्ये चेत्तदन्नानामनधिकारः। २१ अन्यच्चेत् भोजनार्थाभोजनीयद्रव्यविवेकाभावः। २२ सांवत्सरिकश्राद्धाङ्गौपासनयोर्विकल्पः। २३ आहुत्योरन्तराऽग्न्युत्तरणे सति निर्हिते हिरण्ये द्वितीयाहुतिहोमः। इअ० १४ क०

चतुर्थोऽध्यायः सोमयागेतिकर्त्तव्यताकलापः।

१ आधानामनन्तरमारब्धयोर्दर्शपूर्णमासयोरनन्तरम् इष्टपशुवानुवन्धैरिष्ट्वा सोमेन यजनम्। २ एकेषां मते दर्शपूर्णमासानन्तरम्, कस्यचिन्मते ताभ्यां पूर्वमपि सोमेन यजनम्। ३ सोमयागकर्तृणामृत्विजां संख्यानिरूपणाय प्रतिज्ञा। ४ ते च त्रिपुरुषवत्सप्तदशकल्पेन तत्र षोडशर्त्विज:। ५ यज्ञमानपक्षे षोडशर्त्विजां मध्ये स्वस्यापीत्येतया उत्तरे त्रय स्वस्वगणभूता इति चतुःसोमेऽप्यत्यग्निष्टुति। ६ होता मैत्रावरुणोऽच्छावाकोऽग्नीध्रश्चैते इडोकाले। अध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेता इडोकाले। ब्रह्मा ब्राह्मणाच्छंसी आग्नीध्रः पोता इडोकाले सदः उद्गाता प्रस्तोता प्रतिहर्त्ता सुब्रह्मण्यश्च इडोकाले सदः इडोकाले। एतेषामेव ऋत्विजां य ऋत्वीजैकदेशिजस्तदसम्भवेऽन्यस्मादपि कर्त्तव्यमिति ज्ञापनम्। ८ अध्वर्युनिष्पन्नप्रधानसंस्कारः सोमयागे ऋत्विजो सर्वे यजन्ति। ९ ऐहिके लोके कस्मिन् पुरुषार्थे समाधाय दीक्षणीयेष्टिः कर्त्तव्येत्यत्र। १० कस्य दीक्षणीयेष्टिः प्रत्यक्षेऽनाधानेऽग्निहोत्रादिके तत्रेति। ११ अग्निहोत्रादयो अग्निकर्मकत्वे। १२ अग्नेरेव निर्वाप्यमन्त्रकत्वे। १३ अग्नेरेव निर्वाप्यमन्त्रकत्वे। १४ अग्नेरेव निर्वाप्यमन्त्रकत्वे। १५ अग्नेरेव निर्वाप्यमन्त्रकत्वे। १६ अग्नेरेव निर्वाप्यमन्त्रकत्वे। १७ अग्नेरेव निर्वाप्यमन्त्रकत्वे। १८ अग्नेरेव निर्वाप्यमन्त्रकत्वे। १९ अग्नेरेव निर्वाप्यमन्त्रकत्वे। २० अग्नेरेव निर्वाप्यमन्त्रकत्वे। २१ एकेषां मते अग्निहोत्रादयोऽपि यज्ञसम्बन्धीयमैहिकं कर्म। २२ अग्नेयत्वलक्षणत्वाद्यत्र कामानामग्नीनां देवतात्वोक्तिः। २३ [illegible] उत्तरोत्तरं धर्मश्रेष्ठ्यं भवितव्यमिति। २४ [illegible] यस्य यौगपद्यमसम्भवं [illegible]। २५ सामान्यस्य प्रायणीयातिरात्रयोरिति। २६ औपवसथ्येऽग्निप्रणयनस्य प्रधानाया जघनीयेन अभ्यनुज्ञाभावः। २७ वर्मे मध्यसोमयोर्नियमाभावोक्तिः। २७ सू० ४ अ० ८ क०

१ दीक्षणीयायामिष्टौ विराजौ धाय्ये। २ दीक्षणीयायामग्नीषोमीयपशौ देवसे। ३ साग्निचित्ये तीर्थसन्दे [illegible] ४ अन्वयोरुभयोरानर्वेण्यादधिकानि [illegible]

वीति । ५ भुवद्वह्न्य आदित्येभ्यः भुवनपितेभ्यो वा आदित्येभ्यो याज्यानुवाक्ये । ६ इडादिषु उदयनीयायाः प्राक् मार्जनाभावोक्तिः । ७ इडायां लुप्तवाक्ये च स्थितानामाधिषवं स्थाने आगूर्णामक्षमन्नस्य प्रयोगः । ८ इडादानिगदकथनम् । ९ लुप्तयाजनिगदोक्तिः । १० नामाग्नेयाभावोक्तिः । ११ सवनीयपशविड़ायाः कथनम् । १२ अग्निप्रणयनोत्तरकालं गार्हपत्याहवनीययोर्मध्ये दीक्षितानामासनप्रयत्नकथनपूर्वकस्वारदेशः ।१३सत्रिणां दीक्षाविधानम् । १४अहीनसत्रिते सत्रे विशेषोक्तिः १५ द्वादशाहतापस्वितेषु यत्संख्याः सुत्यास्तत्संख्याएवोपसदो दीक्षाश्च भवन्तीति । १६ विकल्पेकाहानां कर्माचारः । १७ दीक्षाकालएव विधातव्ये दीक्षोपसत्कृतानामेकाहःप्रयोगकालविधानम् ।१८दीक्षाहःसु परिसमाप्तेषु अनन्तरं यद्दक्षसक्थिकृष्णि सोमक्रयविधानम् । १९सू० ४अ० २ क०।१ सोमक्रयदिवसे प्रायणीयेष्टिकरणम् । २प्रायणीयेष्टेः पंक्तत्वम्, नोदयनीयान्तत्वमिति । ३ उक्षाया इष्टेरनाज्यभागत्वं नोदयनीयत्वमिति । ४ अहर्गणेषु सोमक्रयस्य सकृदेव कर्त्तव्यत्वम् । ४ सू० ४अ० १क० । १ सोमक्रयरूपं कर्म । २ क्रीतं सोमं प्राग्वंशसमीपं नेष्यतस्तु अध्वर्युषु अग्रतः पश्चात् त्रिपदमात्रेऽतीते अन्तर्वेदि सोमभागस्य शकटदेशे प्रेषितस्य सतः पार्ष्णीप्रहारेण यतः प्रभृति दक्षिणस्यां दिशि लिंगांशूद्वपनम् । ३ अन्तरेणैव वर्त्मनी अनुव्रजनएव उत्तराभ्रातृव्यवचनम् अ व्रजनविच्छेदे इत्युक्तिः।४अवस्थितस्थानसो दक्षिणपार्श्वेन सोमसमीपं गत्वा तमीक्षमाणस्य तत्रैवावस्थानम् । ५ अवस्थितेऽग्नि दक्षिणात् पक्षाद्भिक्षान्तस्य सोमाभिमुखं अवस्थानम् ।आहवनीयस्थापतोत्रजनञ्च । ६सोमे निक्षिप्ते तिष्ठतएव परिधानोक्तिः । ७ उपसर्जनविधस्यविकल्पोक्तिः । ७सू० ४ अ० ४ क० ।

१ इडाभक्षो आतिथ्या नाम इष्टिः । २ आतिथ्येऽग्निमन्थनरूपाङ्गकथनम् । ३ आतिथ्येष्टौ धाय्याद्वयं, संयाज्यद्वयम्, आर्त्विज्यं करिष्यतां स्वयमभिमर्शनम् । ४उदक्प्रत्यग्गार्हपत्यानन्तरं सोमाध्ययनम् । ५ उपसत्सु उदक्प्रत्यग्गे उच्चोदकपूर्णम् । ६ आध्ययनमन्त्रः । ७उदक्प्रत्यग्गानन्तरं नमस्कारात्मकेन पाणिनिधानस्य कर्त्तव्यत्वम् । ७सू० ४अ० ५क० । १ उदक्प्रत्यग्गानाम् आध्ययनविशेषप्रवर्त्याङ्गत्वोक्तिः । २ प्रत्यृचमनवानसङ्ख्या मन्त्रेण तदवदानम् । ३पूर्वस्याभिष्टवनस्य एतावत्पक्षकथनम्

२सू० ४अ० ६क० । १ बाह्यात्यवधाने सत्यप्येकमेवाभिष्टवनम् । २ होत्रादिषु उपविष्टेषु अध्वर्युकर्तृकवर्म दुधाङ्गानस्य उत्तरारम्भे हेतूक्तिः । ३ अभिहिङ्कारवर्जम् उत्तराभिष्टवनविधानम् । ४ उत्तरपटलस्य समष्टिप्रयोजनानि । ५ उत्तमयोः प्रवर्ग्ययोः स्वरूपकथनम् । ५ सू० ४अ० ७क० । १प्रवर्ग्योपसदोः सम्बन्धाय प्रवर्ग्यार्थं प्रणयस्य उपसत्करत्व विधानम् । २ उपसदि पित्र्याया जपक्षोपः । ३पित्र्यायैव प्रवेशोपवेशनयोर्व्याख्यानम् ।४ पित्र्याया उपवेशनातिदेशात् दक्षिणोपर्युपस्थतविधानम् । ५ उपसद्यायभीढुषे इलाद्याः तिस्रः सामिधेन्यः ।६तासासुत्तमेन प्रणवेन अग्निं सोमं विष्णुमावाह्योपवेशनम् । ७ एकेषां मते देवतामात्रावाहनम् अनावाहनेऽपि उक्ता एव देवताः इत्युक्तिः। ८ खिष्टकृदादिप्रयाजाज्यभागहोपकथनम् । ९ आध्यायनिष्क्रयोर्नित्यत्वकथनम् । १०अपराह्णेऽपि कर्त्तव्यायामुपसदि विशेषादिकथनम् ।११तत्र पूर्वापराह्णिककर्म्माणि। १२पौर्व्वाह्णिकीनामुपसदां सुपूर्व्वाह्णे, आपराह्णिकीनाञ्च स्वपराह्णे कार्य्यतोक्तिः । १३पूर्व्वाह्णिकस्यापराह्णिकस्याप्युपसदो एकोऽग्न्य एकोपसद्व्यवहारः, तादृश्या उपसदश्च त्रिष्वहःसु कर्त्तव्यत्वम् । १४षट्सु वेति व्यवस्थाविकल्पः । १५ अहीनादीनाम् अध्वर्यु प्रत्यवादुपसद्विषयः ।१६ एकेषां याज्ञिकानां ज्योतिष्टोमस्य प्रथमप्रयोगे धर्म्मोक्ताभावोक्तिः । १७ औपवसथ्येऽहनि वर्त्तमानयोरुपसदोः पूर्वाह्णएव कर्त्तव्यत्वम् । १८होता दीक्षितश्चेत् तदा औपवसथ्येऽहनि प्रथमोपसदि समाप्तायां प्रेषितः पुरोधायित्वर्षभमनुवचनम् । १९होतरि अदीक्षिते यजमानानुवचनम् । २० पश्चात् पदमात्रे स्थित्वाऽभिहिङ्कृत्य पुरोधासोऽन्वयः इति सप्रणवाया ऋचश्चिरनुवचनम् । २१ सुमन्द्रेवैवानुवचनं नोपांशित्वम् । २२ व्रजत्सु अध्वर्युषु अनुव्रतोऽनुव्रजनम् । २३ तिष्ठत्सु अध्वर्युषु अनुवचनारम्भस्थाने स्थित्वा भूर्भुवः स्वरिति वाचं विसृजत्र प्रत्याहरतीति सर्व्वमानुवचनम् । २४ होता दीक्षितश्चेत् प्रसोष्टकर्त्तृसंस्कृतस्य अग्नेः अनुगोत्तरायणरूपसंक्रान्तिः । २५निर्म्रक्षमया वाचा पूर्वोक्तमग्नानुगायनम् । २६अग्निपुच्छस्य पश्चात् वैश्वानरीययजनम् ॥ सान्निध्येषु क्रतुषु पुरोधायित्रिः, अनुगायनं, वैश्वानरीयमिश्रेतत् सर्वं भवतीत्युक्तिः । २८ ब्रह्मणो नियमभेदः । २९ उक्षाग्निप्रणयनस्य कर्त्तव्यत्वम् । ३० दीक्षितश्चेद्ब्रह्मा तदा तस्य

वसोर्धारा होमकाले तत्प्रतिगमनविधानम् । ३ । ० सू० । ४ अ० ८ क० । १ इविर्धानयोः शकटयोः अध्वर्युणर्तृक प्रवर्त्तनम् । २ उक्तप्रवर्त्तने सोमप्रवहणेन कार्य्यतोक्तिः । ३ पूर्वोक्तानुवचने विशेषकथनम् । ४ रराट्यामवद्यायाम् अधिहवीरित्यस्या ऋचः अर्द्धर्चेऽवसानम् । ५ वहन्तां रराटीमोजमायुष्यं ऋग्विशेषानुवचनम् । ६ उपनिष्कृतयोर्मेध्योः ऋग्विशेषेण परिधानम् ऐसू० ४ अ० ६ क० । १ प्रेषितानुवचने इतिकर्त्तव्यताकलापः । २ अनुव्रजत पत्तरानुवचनम् । ३ ऋग्विशेषसमाप्तौ प्रणवेनोपरमः । ४ आग्निध्रीयमभिप्रजनत्सु अध्वर्युषु उत्तरेण तमतिक्रम्य ऋग्विशेषसूक्तानुवचनम् ऋग्विशेषस्य चार्द्धे आरामः । ५ प्रपद्यमानस्य सोमस्याऽनुप्रपदनप्रकारः । ६ यावानुक्ते ३ नोपवेषनप्रकारः । ७ ब्रह्मकर्त्तृकस्य सोमप्रणयनस्य पात्निवतकथनम् । ८ सोमसम्प्रणयतो ब्रह्मणः कर्त्तव्यभेदः । ९ आहवनीयस्य दक्षिणतः ब्रह्मोपवेषने नियमः । १० अग्निचित्याधिकृतायां सोमयागक्रियायाम् अग्निपुच्छस्य दक्षिणत उपवेषनम् । ११ अग्निषोमीये पशौ उक्तब्रह्मानुमतिदेशः । १२ सौम्ये चाकृनि यथाकोमार्थ्यनामाऽऽहवनीयस्य दक्षिणत आसनम् । १ इष्टहवतये सोमं प्रणीय इविर्धाने चाग्नेये यदि गतः स्यात्तदा प्रपद्यमाने सोमे आसादनार्थं पुनः प्रत्येवादिनिष्क्रान्तिः । १२ सू० ४ अ० १० क० । १ अग्निषोमीयेण पशुना चरणम् । २ प्रवचनपर्यन्तसुत्तरवेदिसमीपे आदण्डप्रदानस्य कार्य्यभेदाः । ३ होतुः स्वस्य विष्णोश्च पत्नीदुपवेषने कार्य्यभेदः । ४ मैत्रावरुणस्य इविर्धानस्य पत्नीदवस्थानम् । ५ देवसूनां सूर्यायाति संज्ञाकथनम्, तत्र सर्वासामृतानां देवतानां सगुणत्वम्, रुद्रस्य गुणविशेषस्य । ६ उक्तदेवतानां याज्यानुवाक्याकथनम् । ऐसू० ४ अ० ११ क० । १ सूर्य्यपुत्रीतिवचनमात्रानां सूर्यायां संज्ञा, तासाञ्चाश्वात्मत्वं तद्देवतोपदेशस्य ध्यानार्थं तासामष्टौ संहताः तत्रादितः पञ्चानामेकैकस्याश्वत्वारश्चत्वारो गुणपक्षाः ततोऽष्टमी अदितिरित्येका, ततश्चानुमतिरिति द्वे । उक्तानामृतानां देवतानां याज्यानुवाक्याकथनम् । वैश्वानरीयस्य नवत्वं, कायस्य द्वयत्वञ्च । २ औपयाजरूपार्थवादपरिष्कारे बलस्य कार्य्यता । ४ आग्नीध्रस्योत्तरेण होतुर्वचनं दक्षिणे होत्रीये निधानम् । ५ याज्यानीदाहरणे दक्षिणेन कौलायदर्भं, होत्रीयस्य निधानम् । ६ ऐडोपवानमिश्रणे तथा वैदपक्षणम् । ७ क्षुदमन्थोद्वासनप्रकारः । ८ वसतीवरीणां परिष्कारे क्रियमाणे दीक्षितालाभनमावः अदीक्षितानां बहिर्भावश्च । ४ अ० १२ क० । १ यस्यां रात्रौ पयोः समाम्नित्सान्तुर्य्यभागे पत्नीप्रयाजात् प्राक् प्रातरनुवाकायामन्वितस्य विधिपूर्वकः आकृतिहोमः । २ उक्तविषये द्वितीयाकृतिहोमः । ३ ब्रह्मणस्य होत्रवायं विधिः समान इति । ४ इविर्धाने प्राग्य रराट्यभिमर्शनम् । ५ दक्षिणेन पात्निवता पर्य्यावेष्य रराट्यभिमर्शनम् । ६ मन्द्रस्वरेण प्रातरनुवाकानुवचनम् । ७ प्रातरनुवाकार्थमाज्ञानविशेषः । ८ अग्निदेवताकक्रतुः ४ अ० १२ क० । १ औपस्थक्रतुः ॥ २ तत्रेतिकर्त्तव्यताकलापः ४ अ० १४ क० । १ आश्विनः क्रतुः । २ तत्र प्रातरनुवाकः । ३ पूर्व्वोक्तादन्यः प्रातरनुवाकः । ४ अन्धोभिरित्यन्धोभिराग्नेयस्य गायत्रस्य ऋचन्दसोनावावसानम् । ५ राजन्यस्य न वैदूभ, वैश्यस्य न जागतमिति । ६ अध्यासवस् एकपदद्विपदानां संहितानामन्ते प्रवचकरणम् । ७ आकूतादीनां यथाक्रमं वक्तव्यता । ८ मैत्रेयतः स्वर्गकामस्य माहेन्द्रकथनम् । ९ तमसोपघातपर्य्यन्तं दक्षेद्यावोषधूक्षावर्त्तनम् । १० तमसोपघातकाले दक्षेद्यावीयस्य सूक्तमयदा प्रतिप्रियतमिति सूक्तस्योपसन्नत्वम् । ११ उत्तरार्धस्य रूपकथनम् । ११ सू० ४ अ० १५ क० ।

५ अध्याये । १ परिधानोत्तरानुवचनप्रकारः । २ तत्र निगदादि । ३ अपोनप्त्रीयाणां प्रयोगसम्बन्धौ । ४ प्रातःसवनस्य मन्द्रस्वरेण प्रयोगः । ५ अध्वर्युकारस्यानुशासन वचनम् । ६ दक्षिणाग्नेस्य सामधेनीवत् प्रक्षालनावचनम् । ७ प्रक्षालनाभावे यथर्चमर्द्धर्चे क्रियाकाङ्क्षा । ८ दृषदीपक्षेऽध्वर्युणानुवादः । ९ एकधनानु अधु आवर्त्तनीयर्चकथनम् । १० दक्षिणयमागतासु तासु जघनतः । ११ वसोधारागतासु तासु जघनतः । १२ वसतीवरीषु समानातासु ब्राह्मणोक्तकार्य्यचरणम् । १० तीर्थदेशे होत्रकसदो अपां पूर्व्वभागे आपोनप्त्रीयोरिति मन्त्रं समाप्य प्रणवेनोपरमः । १४ लिङ्गकथनेन लिङ्गकमणविधिः । १५ आज्ञानेऽवधानानामानच्छब्दीनां सुखतो गत्वा ता । अपरेणातीत्य उत्तरतः स्थितिविधिः । १६ तासूदरेणातीतासन्नावर्त्तनम् । १७ अन्वाहृत्य मन्त्रप्रणेष्य क्रमणम् क्रमणानन्तरं प्रणवेनवसानक्रिया । १८ तिरुच्यासु उत्तमयातुप्रपदनम् । १९ अग्निरथनेन होमाभिसन्धे उपवेषनप्रकारः । १२ सू० ५ अ० १ क० । १ उपांशुयागपक्षे कूपयजमाने तद्दक्षिणतोभूत प्राणवायोर्नाविधाहारेण बहिष्करणम् । २ अग्निः स्विष्ट यागो-

नासिक्या देहे प्रवेशनप्रकरणम् । ७ उपांशुयाजहविर्भक्षो मरुत्वतीयसाधनपक्षे च व्याख्याय स्वेत्यभिमृश्य नासिक्यसर्ग । ४ मैत्रावरुणप्रकरणम् । कार्यभेद । ५ नाभ्यामितरेषां दक्षिणतो नाना कार्यभेद । ६ विप्रुड्होमौ कृत्वा अध्वर्यु कृत्वा अन्योन्यं स्पृशन्त आतिष्ठतां इत्यन्तान्त्यर्क्त्वा । ७ कर्षूपवमानस्तुत्यर्थमुद्गातारमभिमृशेत्याद्य कृत्विजां सूपवेशनम् । ८ तत्र वासनेनोत्तरे [illegible] मन्त्रवर्णमन्त्रौ । ९ होतृदक्षिणतस्तेऽध्वर्यमन्त्रे याज्यमन्त्रे च मनम । १० दक्षिणतः प्रोडुकस्य सदनं सर्पणमपि । ११ ब्रह्मभैत्रावरुणयोर्विधानभेद । १२ प्रातःसवने ब्रह्मण कार्यभेद । १३ तस्यैव द्वितीयतृतीयसवनयो कार्यभेद । १४ मन्त्रभेदं कृत्वा मैत्रावरुणं प्रति स्तुध्वमित्यृत्विजं नियोजनम् । १५ रू० ५ अ० २ क० । १ सवनीयेन पशुना चरणम । २ याज्यान्तरे याज्यतो याज्यैकत्वं तद्वैगत पशु कार्यं । ३।४ क्रतुभेद दृष्टभेद । ५ अग्नीषोमीयपशुर्भो नेत्यतिदेश । ६ अन्वारब्धप्रकार । ७ यैर्मिक्रय निगमम् आवृत्तप्रकरण । ८ क्रियाजने निषेध । ९ विप्रुभेद प्रातःसवने [illegible] १० अभिदृष्टदृष्ट कर्मणाम् दृष्ट शास्त्र तासामाहवनम् । ११ [illegible] होम । १२ चात्वालमार्जन-प्रकृति पशुक कर्म कृत्वा सौम्यकर्मकरणम् आदित्यान् यजमानश्च । १३ आदित्या दाक्षस्थानाकार । १४ निर्मन्थ्यदर्शे यूपादिमे कर्म आदि

करालस्थाना सव्याष्टाग्नस्थानम् (आस्तानोवहिष्पवमान कर्मान्तम् । १७ आग्नेध्रे प्राक्चावाकादनस्थानदक्षिणमार्जा-र्ययज्ञसंयोगसाधनत्वमुद्गातृपक्षपरीक्षा दक्षिणतस्तामक्षकरणेन एवस्य नम । १८ आग्नीध्रमन्तरेण परिव्रज्य सदोद्वार प्राप्य सदोऽभिदर्शनमन्त्र । १९ द्वारिभवे स्थूणे अभिमृश्य शाला-मखाया-दीनामुपस्थानम् । २० उपस्थितानुपस्थितयो दर्शन-पूर्वक सर्वतोच्छ्या सदस पूर्व द्वारस्थेनोपस्थान कार्य-म् । २१ उदत्र इत्यृच सदजपन्न होता मैत्रावरुण ब्राह्मणाच्छंसी पोता नेष्टोन्नेता पञ्चपूर्व्यद्वारेण सद प्रविश्यो-पविशेरन्नित्यृक्ति । २२ तेषामासनक्रमेण रूढाप्रवण व्यूढ-क्रमेण उपवयन ततो मन्त्रविशेषजप । २३ प्रसर्पकाणा कृत्विजामुपस्थानादिजपान्तधर्मस्य अध्वर्यतिदेश

२४ सवभक्षणमवसवनीये तेषामुपवेशनम् । २५ उक्त-

कर्षूपवमानस्य पुनःकरणम् आग्नीध्रीयस्थानप्रवेश । २६ प्रसर्पिणां तेषा दक्षिणादय उदक् सस्थानानीत्युक्ति । २७ आद्ययोर्होतृमैत्रावरुणयोर्वैपरीत्यं ततश्च मैत्रावरुण-दक्षिणत अस्थानतश्चोत्तरतोहोतुःस्थानम् । २८ तेषा यथा-स्थान सुपविष्टाना स्वस्वस्थानस्योत्तरदेशस्य विसंस्थितसंचार-सत्ता । २९ अनुक्तस्थानानामृत्विजा दक्षिणाधस्तादुत्तरेण विसंस्थितसंचारइत्युक्ति । २९ रू० ५ अ० २ क० । १ प्रतिसवनमिन्द्रदैवत पुरोडाशस्वरणम् । २ प्रात सवने धानावन्त करम्भिणमित्यनुवाक्या । ३ माध्यन्दिनतृतीय सवनयो प्रैषभद । ४ आदेशपदसंकृत्य तमेव पदेन याग । ५ यत्र क्वचित कर्मणि प्रैषेण यागे कर्त्तव्ये यज योक्षु इत्युक्त्वा तयो स्थाने आगर्वषट्कारौ कृत्वा यागइत्युक्ति । ६ अनुसवनमनुवाक्याभेद । ७ अनुवाक्यास्थपुरोडाशस्य बहुवचनान्तोक्ति । ८ क्रमभेदे अकृतिनिषेध । ९ रू० ५ अ० ३ क० । १ द्विदैवत्ययाज्याप्रैषानुवाक्याभिस्मरणम् । २ द्विदैवत्ययोरनुवाक्ययोरुक्ति तेष्वप्यृथक्कर्मप्रयोगे प्रयोज्ये च सकृत्सवनम् । ३ प्रैषाणामनवानिर्णय । ४ क्रम-भेदे याज्ये च सकृत्सवनम एकागुर पृथक् वषट्कारे च वक्तव्ये इत्युक्ति । ५ प्रात सवने इदमहं अनवान याज्यानुवाक्ययोरिति निर्णय । ६ प्रैषौ याज्यानुवाक्ये च उत्तरयोर्हविर्योरनवान भवतीत्युक्ति । ७ सोमभक्षण पात्रमक्षत्या अध्वर्युणा तद्ग्राह्यम् । ८ तत्र च मन्त्र । ९ तद्दृष्ट्वा दक्षिणोरुच्छादनेन तत्र स्थापयित्वा आकाश-वतीभिरङ्गुलिभिरभिधानम् । १० एवमुत्तरपात्रयोर्यथा-[illegible] नम् । २ मैत्रावरुणस्याग्रहणे विशेष । ३ अनुवचन-याज्यासंप्रैषा नित्यमध्वर्युणा कार्या । १४ अनु-सवन चमसेषूद्गीयमानेभ्य सोमेभ्य एकैकग्रहजप । १५ अनुसवनं प्रेषितस्य होतुः खाभि प्रस्थितयाज्याभि-र्यजनम् । ६ प्रयाजादीना नामादेश प्रेषितानामेव यजनम् । १७ प्रयाजादिग्राह्यग्रहणम । १८ प्रात सवनीयप्रस्थितयाज्योक्ति । १९ तृतीयसवनीयानु-वषट्कार । २० मारुतशेषे हारियोजने प्रस्थितया ज्यादिभेद: आश्विने याज्यान्यूनत्वञ्च । २१ यज्ञ-गाथा । २२ प्रतिवषट्कार भक्षणम् । २३ तूष्णीमेवो-त्तरभक्षणम । २४ अध्वर्योराहवनीयदेशात् सदसो-गति । २५ अग्न्यन्तमध्वर्युप्रति अयमिग्नीदिति होतृप्रेष । २६ दृष्टस्य तस्य होतार प्रति अग्नाविष्णुस्तुतोक्ति ।

२७ ततो होत्रजघन्यमन्त्रः । २७सू० ५अ० ५क० । १इतरपात्रद्वयं सव्येनापिधाय ऐन्द्राग्नयं पात्रं दक्षिणहस्तेनोत्तरभागे गृहीत्वा अध्वर्युणापि तस्य गृहणाय एष वस्तुरिति मन्त्रेण होत्रा प्रणयनम् । २ नासिकाभ्यामवघ्राय होत्रा सोमस्य भक्षणे मन्त्रः ।३ होत्रा भक्षितसमध्वर्युणा च प्रतिभक्षितं होत्रचमसे किञ्चिदवनीय अनाचम्यैवोपस्थानादि कृत्वा पुनः सक्तू भुक्त्वा शेषं होत्रचमसे आनीय तत्पात्रोत्सर्गः । ४ उत्तरग्रहपात्रे उक्षाधस्थितिदेशः । ५ उत्तरग्रहपात्रयोर्न पुनर्भक्षणम् । ६ हिरण्यवतां मध्ये कस्मिंचित् यज्ञस्य होत्रचमसे अनवनीतस्य नोद्गर्गः । ७ होत्रा मैत्रावरुणस्य ग्रहपात्रस्याध्वर्यवे पूर्ववत् प्रणयनम् । ८ तस्य दक्षसव्याभ्यां नेत्राभ्यां क्षणेनोक्षणम् । ९ मैत्रावरुणस्योत्सर्गान्तं कर्म कृत्वा दक्षहस्तेनाश्विनमपिधाय सव्येन होत्रचमसादानेमन्त्रोक्तिः । १० सव्यस्थारत्निना सव्योरुयसनमाच्छाद्य तत्र निधायाहृताञ्जलीभिरपिधानम् । ११ होत्रचमसं सव्येनापिधाय दक्षिणेनाश्विनं गृहीत्वा पूर्ववत् प्रणामम् । १२ आश्विनसतक्षस्य दक्षहस्तेन होत्रचमसं निधाय जलं स्पृष्ट्वा दृढोपक्षानम् । १३ दृढोपक्षानकाले चमसिनः खस्वचमसस्योड़ामभीधे उद्यमनम् । १४ अवान्तरेडां प्राश्याचम्य होत्रचमसभक्षणम् । १५ दीक्षितस्य होतुः दीक्षिता उपकृयध्वमित्युक्त्वा चमसभक्षणम् । १६यजमाना उपकृयध्वमित्युक्त्वा वा होतृचमसभक्षणम् ।१७सख्यान् प्रति पृथक् तत्तत्प्रोक्षणेन इतर[illegible] चमसभक्षणम् । १८ उक्तक्रमेण दीक्षितादीक्षितानां मैत्रावरुणादीनां स्वस्वचमसभक्षणम् । अदीक्षितानां समानभक्षं प्रति पूर्ववत् उपक्षानं कृत्वा चमसभक्षणमिति भेदः । २० अवभृथानां सख्यचमसाद्भक्षणम् । २१ द्रोणकलशादुदुम्बरचमसानां सोमभक्षणम् । २२ सर्वत्र सोमभक्षणे वाग्देवीत्यादिमन्त्रजपः । २३ होतुर्षट्कर्तृत्वात् प्रथमभक्षणं पश्चादुद्गात्रादीनां भक्षणमिति गौतमसूत्रम् । २४ तौल्वलिसूत्रे इतरेषामभक्षणम् । २५ गाणगारिसूत्रे सर्वेषां भक्षणम् । २६ सोमभक्षोत्तरं सख्यहृदयसर्गे मन्त्रः २७ प्रथमद्वितीययोः सवनयोरादानां द्वितीयानान्तु चमसानां जलेनाभिमर्शने मन्त्रद्वयम् । २८ हतशेषसवने आद्यानामे व तथाभिमर्शनम् । २९ ऊर्ध्वपात्राणि विना सर्वपात्राणां सख्यहृदयाभिमर्शनम् । ३० इत्यसाध्वायनेन भादितानां चमसानां नाराशंससंज्ञा ३०सू०५अ०६क० । १अस्मिन्काले अच्छावाकस्याग्नीध्रस्योत्तरं सदोगत्वा स्वस्थाने उपवेशनम् । २अध्वर्युणा दत्तं पुरोडाशखण्डमिड़ाभिरोद्यस्य प्रेषितस्याच्छावाकस्य जघ्यं भक्षणम् । ३ यजमानेत्यादिना अन्येन प्रणवेनोपसन्नानरूपनिगदः । ४उक्तनिगदसमाप्तौ अध्वर्युणा होतृग्रहपक्षयोराक्रान्तौ ।५ उपक्षाने प्रकारः ।६ उक्षीयमाणाय प्रत्यस्मै इति स्रुक्स्रुवाभ्यामेनानुवचनपूर्वकं यजनम् । ७पुरोडाशखण्डं निधाय जलं स्पृष्ट्वा चमसभक्षणम् । ८अस्यतूदकानां सोमेतरहविषां स्पर्शनिषेधः । ९पुरोडाशखण्डप्राशनप्रकारः ।१०यदाच्छावाक उपविष्टस्तदा भक्षा तीर्थेन निष्क्रम्य बर्हिर्वेद्यामाग्नीध्रीयं प्राप्नोति अच्छावाकस्य दक्षिणकूपं पुरोडाशखण्डं प्राश्य तीर्थेन निष्क्रम्याचम्य तं देशं प्राप्नुयात् इतरे होतादयोऽप्युपविष्टेष्वच्छावाके तं देशं प्राप्नुयुरित्युक्तिः । ११ अस्मिन् काले चुक्षित्यध्वर्यभक्ष्यदपि प्राश्य प्रतिगृह्य उत्तरकण्डिकोक्तं कर्म कार्यम् ११सू० ५अ०७क० । १ सर्वेषु प्रतिगृहीतेषु ऋतुयाजैस्तरणम् । २ तत्र प्रैषाः । ३ प्रैषसमाम्नाये पञ्चमसूक्तस्य ऋतुयाजानां प्रैषत्वम् । ४स्वस्वप्रैषेण प्रेषि तस्य यजनम् । ५ अध्वर्युग्रहपतिभ्यां प्रेषितस्य होतुर्यजनम् । ६ पार्ष्णिके षष्ठेऽहनि अध्वर्युग्रहपतिभ्यां स्वयंयजनम् । ७ तयोर्यजनप्रकारः । ८ षष्टकर्तृणामानान्तर्येण ऋतुपात्रभक्षणम् । ९तत्र अध्वर्योः पृथक्भक्षणम् । १०तत्रैव काले प्रतिभक्षकस्योपक्षानम् ५अ०८क० । १ ऋतु[illegible] दिषु पूर्वोक्तप्रकारातिदेशः,पर्यायप्रश्नतां सख्यवान्यग्रहत्वम् । २ उक्षणोपाक्षानेनोत्तरयोरुपसन्नानम् । ४ओथामोदैवेत्यस्य प्रतिगरसंज्ञा सच यज्ञस्वरतुल्यस्वरः इत्युक्तिः । ५ आक्षाने यो सोमोदैवेत्यादेः प्रतिगरसंज्ञा ईप्रणवे शृतादि अवसाने अशृतादिरिति परिभाषितम् । ७ आक्षावोत्तरे प्रणवे प्रणवत्वं न शृतादित्वम् । ८अवसाने प्रणवस्य प्रतिगरसंज्ञा । ९ प्रणवान्तस्य उक्तक्षियहृदयविकल्पः । १०अन्तःस्थप्रणवावसाने प्रतिगरसंज्ञा यज्ञान्ते तु प्रणवत्वं न शृतादित्वम् । ११ विषटषट्पदाटौ शंसनावसानविधेयः । १२ निविदो यथापठितस्वसानं कर्त्तव्यं तत्र कश्चित्यज्ञ । १३ निविदां आक्षावाभाव । १४ तस्या उपसन्नानाभावश्च । निविदाहुतमन्त्र[illegible]पदेनाव्यक्तोक्तौ सोपसन्नानम् । [illegible]प्रकारेण मध्या

निविद: यस्त्या इत्युक्ति: । १७ यटसमाम्नायानामपि निविदां तुल्ययस्त्यत्वम् । १८अस्या निविदोऽन्यासु निवित्सु यटसमाम्नायेषु च उपसन्ननम् । १६ अन्यासु निवित्सु आङ्गानञ्च भवतीत्युक्ति । २० यत्र द्वे स्रुक्ये तीर्णि वा आज्यकार्ये विकृतानि तत्राद्यार्धाद्याया: त्रि:संसनं नोत्तरस्येति नियमनम् अर्द्धर्चोविगृह्य च तथात्वम् । २१ विग्रहे प्राणसन्नानस्य कार्यता । २२प्रतिपदाद्याया ऋच: पूर्वोक्तप्रकारेण गन्तव्यता । ऋगावानस्य तथात्वञ्च । २३ आङ्गाणविहितस्य आनुपूर्व्ये विकल्प ।२४याज्यानानां यस्त्यसन्तत्तमाया आङ्गानपूर्व्वं कपरिधानीयत्वञ्च ।२५ सर्व्वासु यस्त्यपरिधानीयासु उक्तधर्म्मातिदेश: । २६उक्ते वाचीत्यादि यस्त्वा जप तत्र याज्या, उक्त्यपात्रस्थाये भक्षणञ्च २७ सर्व्वयस्त्वयाज्यान्तेषु चमसिनशमसभक्षणम् । २८आदित्यसावित्रपक्ष्येयर्षट्कर्तृभक्षणाभाव । ५ अ०६क० । १यस्त्वात् परं स्रोतं भवतीत्युक्ति: । २एषेति प्रोक्ते प्रस्तोता उद्गातुर्हिङ्कारकाले प्रात: सवने यस्त्वायाङ्गयीरन् इत्युक्ति: । ३ उक्थयो: सवनयो: प्रतिहारकाले तथाङ्गानम् । ४ वायुरग्नेगा यत्तप्रीत्यादीनां सप्तानाङ्गयां पुरोरुकसंज्ञा तस्यास्तस्या उपरिष्टात् हच हच तत्र यंसेदित्युक्ति । वायवायाहि दर्शतेति सप्तानां हचसज्ञा ६यस्त्यस्य प्रउगसंज्ञा । तत्र द्वितीयायाश्चि:पाठत्वम् । ७ पुरोरुक्प्रउगानां सप्तानाङ्गयां मध्ये विश्वान् देवानित्येतस्या यज्या: अर्द्धर्चे अर्द्धर्चे त्रिरवसानेनाङ्गानम् । ८ पुरोरुचा उत्तमया न यंसेत् तस्या अंशसने ऽपि हचे आङ्गानं कर्त्तव्यम् । ६ प्रउगस्य आधच्छन्दस्यार्धत्वम् । १०उक्थं वाचि श्लोकायत्वेति यस्त्वा जप: । तत्र विश्वेभि: सोम्य मध्वित्यादि याज्या । एतद्वा आङ्गाणञ्चंसो अन्नाद्यस्य इत्येते त्रय: शस्त्रिणोस्तोत्रान्ताश्च इत्युक्ति । ११उक्तानां त्रयाणां प्रात: सवने चतुराङ्गयानि यस्त्वानि । तृतीयसवने पर्य्यायेषु अतिरिक्तेषु भवन्तीत्युक्ति: । १२माध्यन्दिने यस्त्वाङ्गयानि । १३स्तोत्रियानुरूपेभ्य: प्रतिपदनुचरेभ्य: प्रगाथेभ्य:याज्याभ्यश्च प्रगाथानं कार्य्यम् । १४स्तोत्रस्थानानि उपद्वाभ्यस्त्रिणिस्तानि । १५ तेभ्योऽन्यदधनन्तरम् । स्तोत्रा कर्त्तव्यम् । १५आदौ निविद्धानीयानां स्तुतानामनेकस्तुत् प्रथमेऽभ्यावर्त्त: । १७आपोहि ष्ठा इत्यादि हचे आङ्गाव कार्य्य: । १८ तेषां यस्त्वादिषु ये हचाङ्के स्तोत्रियानुरूपासु ऋक्षु आङ्गाव कार्य्य: । १६ माध्यन्दिने तेषामेव यस्त्वेषु तृतीया आदेयास्ते प्रगाथा: ज्ञेया: । २०प्रगाथ इत्युक्ते स्तोत्रियोभवति नान्यथेत्युक्ति । २१ याज्यानानि यस्त्वाणि । उक्थं वाचीत्यादि यस्त्वा प्रात: सवने जप: । २२ षोड़शिन ऊर्द्धं यानि यस्त्वाणि तेष्वपि अयमेव यस्त्वा जप: कार्य्य: । २४ सषोड़शिनि उक्थे उक्थं वाचीत्यादे र्माध्यन्दिने विशेष: । २५ अनन्तरस्य पूर्व्वेण तुल्यविधत्वोक्ति: । २६ इन्द्र:प्रथमाखिङ्कैर्देवतै: स्तोत्रियाणां तुल्यता । २६ आर्षेणापि तुल्यतेत्येके-आहु: ।२८आनोमित्रावरुण इत्यादयोयाज्याभेदा: तासां मध्ये कासाञ्चित् स्तोत्रियानुरूपत्वम् । तासां मध्ये यासुकासुचित्पदि छन्दोगा: स्तुवीरन् तदा तिसृभिरेव स्तोत्रियां कृत्वा शिष्टाभिरनुरूप: कर्त्तव्य इत्युक्ति: ५ अ०१०क० । १,२,३,४,५ अतिरात्रषोड़शिनि स्तोत्रादीनां निष्क्रमणप्रवेशादिप्रकार: । ६ यजमानस्य पूर्व्वद्वारेण प्रतिसर्पणम् ५ अ०११क० ।१उक्तकाले यावस्तुत: प्रपदनम् ।२तस्य उपसर्पणमपि तदैव ।३तस्य ऋत्विङ्नामग्रकटस्य उत्तरशिरोरूपाक्षशिरोदेशे हचनिरसनं कृत्वा सोमाभिमुखं स्थिति: । ४तत्रोपवेषणे मन्त्राभाव । ५उपविष्टस्य यो अद्य सौम्येति मन्त्रजप: । ६ अध्वर्य्युणा तस्मै उष्णीषदानम् । ७तस्याङ्गिरसा धरुणेन तेन संसृष्टे शिरसोवेष्टनोत्तरं सोमाभिमर्शनाद्यावाभिष्टवनम् ।८६दादि मध्यमसवनं तत्र मध्यमस्त्रेण प्रयोगश्च । ६ अर्बुदनामधेयस्तुतोक्ति: । १० तस्य प्रागुक्तमाया: आ व इन्द्रमुसे इति सूक्तपाठ: । ११ उक्त स्तुतयोरुपरिष्टात् शिष्टार्बुदस्योक्तमया परिधाय वेद्यां यजमानसोणीषं तस्मै देयम् ।१२अन्येषु दिनेषु आदाव पुनर्यजमानाय दानम् । १३ अन्यदिनेषु येन तद्दत्तं तस्मै एव तद्दानम् । १४ गाणगारिमते अपराभिरुपकरणम् । १५आप्यायस्व समेतु ते इत्यादय: द्वादश ऋचस्तासु चतस्र स्तृचा भवन्ति अर्बुदस्य चतुर्थी उर्वरीया तत्र उत्तमा परिधानीया शिष्टा द्वादश ता अपि चतस्रस्तृचा एता: पावमान्य: । १६,१७,१८,१६, एषां चतुर्णां हचानां क्रमेण कर्म्मभेदे विनियोगज्ञापनम् यथा उदकसेकरूपे आप्यायने प्रथमम् मार्जने द्वितीयम् दोहने तृतीयं अभिषवेण इदोक्तस्याधवनीये सम्भरणरूपे आसेचने चतुर्थम् । २०प्रतिहरुच्चं चतुर्णां विनियोग: ।२१ यज्ञने या चिदित्यादीति ऋचो विनियोग: ।२२अर्बुदपावमानीभ्योऽन्यत् सर्वं समानम् । २४ वैश्वाङ्गिरसे अर्बुदेन समता २५ अन्यत्रते प्र वो यावाण इत्यस्य समता १६,१७ सूक्ते

माध्यन्दिने यजमाने यिङ्कृत्याङ्कारान् उपसर्पणम् । ५ अ० १२ क० । १प्रवर्ग्यवति क्रतौ दधिधर्मेण चरणम् । (दधिधर्मः कर्मभेदः)। २ अगावानस्य तद्धर्मत्वम् । ३ भक्षिण ५ अ० । ४होतर्वदक्षेत्युक्तस्य उक्तिप्रतोऽवघस्तेत्युक्तिः । ५ आतं कृविरित्युक्तौ आतं कृविरित्यनुवचनम् इयमनुवाक्या: । ६ परि त्वाग्ने इत्यादि मन्त्रजपे निमित्तभेदोक्तिः । ७ दोक्षितस्यैव अग्निहो जपः । ८सवनीयानां पुरस्तादुपरिष्टाद्वा पशुपुरोडाशेन चरणम् । ९ एकमते तेन नाचरणम् ।१०आग्नेयरथ्यमते तेनाचरणम् । ११ अक्षौहैकाक्षेषु नाराशंसासादनात् परं दक्षिणानयनम् १२अक्षौहैकाक्षेषु दीक्षितस्य जघनमन्त्रोक्तिः । १३ आग्नीध्रेण उक्ष्यमाणानां दक्षिणाकृतीनां हवनम् ।१४आकृतिमन्त्रप्रकारौ १५ स्फिरहरेणाभिक्रमेण नीलेषु दक्षिणाद्रव्येषु मध्ये प्राणिरूपदक्षिणाद्रव्यप्रतिपत्ते मन्त्रभेद: ।१६अप्राणिद्रव्याभिमर्शनमात्रम् । १७ कन्यायां दैवविवाहविधिना दत्तायां आदानेऽभिमर्शनमात्रम् न पाणिग्रहणम् । १८ एवं प्रतिपत्तौ नियमः सर्वत्र । १९ प्रतिगृह्याग्नीधीयं प्राग्य उक्तिरूपविधिः सर्वैः प्राग्यम् । ५ अ० १३ क० ।

१ मरुद्दैवतेन यज्ञेन चरणम् । २ तत्पात्रभक्षणे मन्त्रः। मरुद्दैवतयज्ञसंसनम् । ३ माध्यन्दिनसवने यज्ञादिषु अध्वर्योराक्षाप्रकारः । ४ मरुद्दैवतौ प्रतिपदनुचरसंज्ञौ हचौ । इन्द्रनिहवः प्रगाथः । ६ ब्राह्मणस्त्यप्रगाथः । ७हचाः प्रतिपदनुचराः, हचाः प्रगाथाः । आख्यमारभ्य ब्राह्मणस्त्यपर्यन्तं सूक्तमर्धर्चम् । ८ स्तोत्रियानुचराः प्रतिपदनुचराः सर्वत्र प्रगाथाः । ९ गायत्रादीनि पञ्चप्रयोगानि अर्धर्चयः यज्ञानि भवन्तीत्युक्तिः । १०पञ्चधा उत्तरेषु त्रिषु वा अचतुष्पदास्तासामर्धर्चयः संसनम् । ११ पञ्चपदासु पङ्क्तिषु द्वयोर्द्वयोः पादयोर्द्विरवसानम् । १२ आग्नेयपक्षे याः पङ्क्तयस्तासामर्धर्चयः संसनम् । पङ्क्तिशंसनं केति विकल्पः । १३स्तुतशस्तयोः, पङ्क्तेः पञ्चः शंसनकथनम् । १४ पङ्क्तेः पञ्चः शंसने ये उत्तमे पदे अतिरिक्ते ते तयोः सर्वं कृत्वा शंसनम् । १५ उक्षाग्न्यन्तं पञ्चः शंसनम् । १६अर्धर्चान्ते प्रथमं कृत्वा मन्त्रनम् । १७ तत्र धाय्याभेदाः । १८ मरुद्दैवतः प्रगाथः । १९ जनिष्ठा उग्र इति स्तोत्रोक्तिः । २० उक्तस्तोत्रसाङ्गा एकाधिकाः यज्ञा तदन्तराले इन्द्रोमरुत्वान् इत्येतस्या निविदोधानम् । २१ माध्यन्दिने अयुग्मासु तथा धानम् । २२हचे एकां यज्ञा युग्मासु च अङ्गां यज्ञा निविद्धानम् । २३ तृताधसवने एकां यज्ञा निविद्धानम् । २४तिसृषु सवनेषु नेत्रे ऋजुतालनः पापं ध्यायता च निविद्धेया । २५सर्वत्र तयैव परिधानातिदेशः । २६यज्ञा जघ्यमन्त्रः याज्यामन्त्रश्च । ५ अ०१४ क० । १निष्केवल्येति यज्ञनाम । २यदि पृष्ठकार्ये रथन्तरं सामगाः कुर्वीरन् अभि त्वा शूर । नोनुमः "अभि त्वा पूर्वपीतय इत्येतौ प्रगाथौ स्तोत्रियानुचरौ स्याताम् पृष्ठयज्ञेनात ज्योतिष्टोमभूतं सामाभिव्यक्तजगत्यं सम्पाद्य स्तुतिजन्यं यागफलमधिगम्य कार्यसच्यते । ३ अन्ययोरपि प्रगाथयोः स्तोत्रियानुरूपत्वोक्तिः । ४ उक्तानां सर्वेषां प्रगाथत्वम् सामगैर्हिपदोत्तर हकारतया गानेऽपि बहृचैरर्हचत्वेन संसनम् कार्यम् । अनभ्यासेन हकारस्तवनेऽपि ता हचा एव न हचाः कार्याः ताभिस संसनं कार्यम् । ५हकृतांच्छन्दस्तो हचि प्रगाथे चतुर्थपदौ पादौ पुनरभ्यस्य पञ्चमसप्तमयोः पादयोरवसानकरणविधिः । ७ यदि तिस्रोहकृत्य एव चिकीर्षिताश्चेदा चतुर्थपदौ पादौ द्विरभ्यस्यावसानं कार्यम् । काकुभेषु प्रगाथेषु तृतीयपञ्चमौ अभ्यस्यावसानं कार्यम् ९ प्रत्यादानेन उत्तरा ऋग्रूपा भवति । १० येष्वहःसु हकृद्यन्तरं वा तयोः संकृतिर्वा पृष्ठकार्ये भवति तत्र पृष्ठकृद्यन्तरस्तोत्रियानुरूपयोः शंसनं यथा भवति तथा इन्द्रनिहवब्राह्मणस्त्यानां शंसनम् । ११ इतरपृष्ठेषु तेषां हकृतीं कृत्वा शंसनम् । १२ यदा हकृद्यन्तरे गायत्रादिषु अभ्यस्तासु तिसृषु कासु स्तूयते स्वयोनिषु वा हिपदोत्तराकारं तदापीन्द्रनिहवब्राह्मणास्त्यानां हकृतीं कृत्वा शंसनम् । १३येषां स्तोत्रकाण्यां प्रगाथाः स्तोत्रियानुरूपाःतेऽपीन्द्रनिहवब्राह्मणस्त्यपक्षस्थाः । १४ उक्तभिन्नस्य सर्वस्य यथाश्रुतं शंसनम् । । १५ एकस्मिन् दिने सर्वधर्मभागितया उपदिश्यमानोज्योतिष्टोम एकाहशब्दवाच्यः परिमितयज्ञः परिपूर्णशंसनयुक्तः । १६स एकाहः यद्युभयसामा हकृद्यन्तरसामसाध्यः तस्य पवमाने योनिरनुरूपा भवतीति । १७ज्योतिष्टोमभिन्नः यःकश्चिदुभयसामा एकाहः स्यात् तत्र पवमाने यस्य कृतं तस्य योनिरनुरूपा यज्ञा । १८निष्केवल्ये धाय्याया ऊर्ध्वं स्थानं योनिस्थानं तदेव शंसनस्थानम् । १९ अनेकासां सामयोनीनां सह शंसने प्राप्ते आदावेव सर्वासामाख्यानं सकृत् पृथक् वा कार्यम् । २० ब्राह्मणस्त्यमरुत्वतीयसामप्रगाथानामनेकेषां सहपातेषु इन्द्रनिहवादूर्ध्वमाख्यावः कार्यः । २१ तत्र

धाद्यासामप्रगाथयोः प्रदर्शनम् । २२ ऋग्विशेषे ऐन्द्री निविद् धेयेत्युक्तिः । २३ अनुब्राह्मणं स्वरः उक्थं वाचीत्यस्य यज्ञस्य जपः । पिबा सोममित्यादि याज्या । ५ अ० १५ क०। होत्रकाणां स्तोत्रियानुरूपौ प्रगाथौ याज्या चेति-निर्णयः । १ तत्रैव याज्यानन्तरं तत्काले सवनसंख्या निमित्तकर्म कार्य्यता ५ अ० १६ क० । १ उत्तमस्वरेण तृतीयसवनम् २ आदित्यपदेन चरणम् । ३ कृयमाण यज्ञाणामीक्षणे अध्यमन्त्रः । ४ स्तुते आर्भवे पवमाने विष्णुत्याङ्गारान् मनोतादिपञ्चविंशान् प्रयुक्तकर्म ज्ञात्वा नाराशंसादनपर्य्यन्तं पुरोडाशादिकर्म कार्य्यम् ।५ नाराशंसेषु सादितेषु पुरोडाशस्य क्षुद्रतमात् प्रदेशात् दक्षिणा सर्व्वं चमसिनः पुरोडाशं तिस्रः तिस्रः पिण्डीकृत्य स्वात् स्वात्चमसात् दक्षिणतः स्वान् स्वान् पितॄनुद्दिश्य चमसान्तिके अत्र पितर इति मन्त्रे स्व स्व पित्र्यपदेत्युक्तिः ६ सव्याहृत आग्नेयीं प्राप्य ऋविरुच्छिष्टं सर्व्वं प्राश्नीयुः । ५ अ० १७ क०। १ सावित्रेण पदेन चरणम् । २ तत्र मन्त्रभेदः। २ षट्कृते होतुः यज्ञवैश्वदेवयज्ञोक्तिः । संयता तेन हेष्वदिशं विहाय सर्व्वदिग्व्यापनञ्च । ४ माध्यन्दिनसव-ने यज्ञादिषु आज्ञावमन्त्रः । ५ तत् सवितुरित्यादि मन्त्रौ वैश्वदेवहोक्तिः तत्र उत्तमायाः परिधानीय त्वम् । ६ वैश्वदेवाग्निमारुतयोः सूक्तेषु सावित्रादिनि विनियोगमन्त्र । ७ तत्र चतस्रोवैश्वदेव्यस्ते प्रयोज्याः । ८ आग्निमारुते यज्ञे उत्तरस्मिन्नृचः याज्याः । ९ सूक्तानां दैवतस्य निविद्देवतात्वम् । १० दैवतस्य सूक्तान्तरानात्वम् तथाच यावतां सूक्तानामेकं दैवतं तावदेक एव सूक्तान्त इत्युक्तिः । ११ वैश्वदेवाग्निमारु-तयोरेकपात्नित्व एव धाय्याः । १२ सर्व्वत्र प्रकृतौ विकृतौ च वैश्वदेवेयज्ञे हि: पक्षः अर्द्धर्चयः सहैव भूय्यस्यर्चने परिधाने च मन्त्रः १३ उक्थं वाचीत्यादि यज्ञस्य जपः । विश्वे देवाः शृणुतेत्यादियाज्याः । ५ अ० १८ क० ।

१ सौम्यस्य चरुहविष्कर्मभेदस्य याज्या । २ तस्योभय पार्श्वे हुतयाज्याश्चोपांशुयागः । ३ तत्रैव विशेषोक्तिः । ४ अध्वर्युणाऽऽहुतस्य उक्ताद्यभ्य पूर्व्वं गृहीत्वा जपस्य मन्त्राः। ५ तस्मिंश्चरौ हुतयुते स्वस्वक्षायाऽर्द्धने नैमित्तिकः मन्त्र-द्वयजपः तौ च मन्त्रौ । ६ अङ्गुष्ठोपकनिष्ठाभ्यामाज्येन नेत्रे अभ्यज्य ऋन्दोगेभ्य प्रदानार्थमध्वर्यवे दानम् । ७ दर्भपोलाभ्यामग्निषु विष्णुतेषु पात्नीवतस्य आग्नीध्रस्य उपांशुजपमन्त्रः । ८ नेष्टरि संस्थितसंस्कारेण तमनु प्रपद्य तस्यान्तिक उपविश्य पात्नीवतस्य भक्षणम् । ५ अ० १९ क० । १ सदसोनिष्क्रम्य आग्नीध्रं प्रति गतिः । २ आग्निमारुत यज्ञे हुतयज्ञस्था त्र्यृचोक्तव्यम् । ३ तस्याद्याऋच पक्षः ऋगावानं शंसेत् यदि सा पक्षः यज्ञा भवेत् तदा पादेपादेऽनुष्टुभसैव शंसेत् । ४ यदि सा अर्द्धर्चयः यज्ञा तदार्द्धेऽवसायानवानम् । ५ उत्तमेन वच-नेन द्वितीयायाः सन्नमनं कर्त्तव्यम् । ६ स्तोत्रारम्भे प्राङ्मुतगिरस्त्वादिभूमिस्थानियुणोक्तिः । ७ परि-धानीयाया उत्तमेन वचनेन ध्रुवयज्ञस्यावेक्षनं स्तोत्रच मसे कार्य्यम् । ८ आग्निमारुते याज्याकथनम् । एत-दन्तसोमयागस्याग्निष्टोमसंज्ञा ५ अ० २० क० ।

६ अध्याये । १ तृतीयसवने स्तोत्रकाणामपि यज्ञाणि भवन्ति । २ तत्र याज्यानुरूपस्याणां प्रदर्शनम् । ३ तदन्तस्य उक्थ्यत्वम् । ४ ६ अ० १ क० । ५ यदि षोडशी क्रतुः स्यात् तदा तृतीयसवने स्तोत्रकयज्ञानन्तरं तस्य कार्य्यता । अथ यज्ञनाम षोडशी तस्य विधानाधिकारः । २ तत्र स्तोत्रियानुरूपौ तत्र च षडृचः । ३ तत्र तिस्रोगायत्र्यः । ४ एका हृचा पक्षौ । ५ हृचौ त्रिष्टुबार्हतौ । आर्भवस्या इति द्विपदा साच पक्षः यज्ञा । ६ अन्त्येषां हृचानां त्रिष्टुबादीनामुक्तिः । ७ तत्र पूर्वं हृचं हेत्वा ज्ञात्वा शंसेत् एकैकामृचं हे हे ज्ञात्वा शंसेत् । अस्य हृचस्य ऋग्पदात्मकत्वात् एकैकां ऋचमेकैकामनुष्टुभमेकैका गायत्रीञ्च क्रमात्दयेत् तथा च आर्द्धर्चतृतीयसप्तभिः पादैरनुष्टुभः त्रिभिस्त्रिभिश्चिभिः गायत्र्यः । अनेन प्रकारेण हृचा अपि षड्भवन्तीति । ६ निविदतिपत्नौ आक्लप्तयानुष्टुभे हृचे निविद्धेयेति परिधानीयानुष्टुभहृचदर्शनम् । १० उत्तरमस्योत्तमा-मिहा उत्तमां निविदं दध्यात् । ११ निविद्धियस्य लिङ्ग-प्रदर्शनम् । १२ परिधानीया ऋक् । तां जप्त्वा यागः ६ अ० २ क० । १ विष्णुतस्य षोडशिनः इन्द्रा जुषस्वेत्याद्याः सूक्ते पठिताः षडृचः स्तोत्रियानु-रूपौ भवतः । २ स्तोत्रियानुरूपाभ्यामूर्द्धं विष्णुते यज्ञस्य तदेव गन्तव्यम् । ३ हाभ्यां पादाभ्यामनर्द्ध-र्चानां उक्थसाम अनृगले प्रथम हृत्यमर्द्धर्चयः शंसनम् । ४ पूर्वार्द्धां पूर्वपदानां शंसनम् । ५ गायत्रीणां पङ्क्ति-भिर्विकरणम् । ६ पङ्क्तीनां हे हे त्रिष्यते ताभ्यां प्रथम-नम् । ७ उष्णिक्षोडशभिर्विकरणम् उष्णिहानुष्टु-भान् पादान् हौ कुर्य्यात् । ८ चतुरोभागान् ज्ञात्वा

दृष्टतोपादैर्विकरणम् तेन अष्टाक्षरमन्यत्साद्यं चतुरक्षरं यथा भवति तथा विकरणम् । ६ द्विपदाश्च तत्र ताः सर्वाश्चतुर्दा कर्त्तव्याः । प्रथमायां सर्वे भागा व्यूढेनाव्यूढेन च यज्ञाक्षराः उत्तरास्तु चतुरक्षराः । तत्र च प्रथमां त्रिष्टुभा विकरेत् । उत्तरास्तिसृभिर्जगतीभिः । १० उत्तमाभाद्विपदाया यच्चतुर्थमक्षरं तत् प्रथमस्य भागस्यान्त्यं तदेव द्वितीयस्याद्यम् । ११ तत्र विकरणप्रकारः । १२उत्तरास्तु इतरान् पादान् यजात् ज्ञात्वानुष्टुभं च ज्ञात्वा संसनम् । १३ स्तोत्रियानुरूपाभ्यामूर्द्धं प्रोथ्या इत्येतदन्तस्य यज्ञायज्ञीयस्य विकृतिसंज्ञा । १४ यत्र यत्र विकृतो भवति तत्र तत्र द्वौ प्रतिगरौ तयोरुदाहृतिः । १५ याज्यायाजभेन मिश्रणम् । १६ द्विपदाकारः । १७ विकृतस्य विशेषस्तोऽन्यत्र सर्वत्रविकृतेन समानम् । १८ विकृतस्यैव विशेषः । १९ आकृतं षोडशिपात्रे सक्तपक्वं भक्षयेत् । २० अन्ये ये भक्षियन्तोऽपि भक्षयन्तीत्यतिदेशः । २१ सुब्रह्मण्यवर्जितमैत्रावरुणादयस्त्रयश्छन्दोगाः । २२ षोडशिभक्षमन्त्रः । ईक्ष० २क० । १ अतिरात्राधिकारः । २ प्रथमे पर्य्याये ये स्तोत्रियानुरूपास्तेषामाद्यस्याद्याक्षरं त्रिका अन्यासु सर्वासु ऋक्षु प्रथमानि पदानि हित्वा तत्सवसानम् । ३ त्रिष्टयोः पादयोः समस्य प्रथमम् । ४ स्तोत्रादौ त्रिका मध्यमानि सर्वाक्षरं पदानि सकृदुक्त्वोऽवसायस्तान्येव प्रस्तावाय तैर्गत्वानि सन्त्वाय प्रथमम् । ५ उत्तमे पर्य्याये स्तोत्रियानुरूपेषु सर्वासामृक्षु चतुस्तमानि पदानि मध्ये सर्वे मैत्रावरुणाः हित्वा तैः प्रथमुः । ६ उत्तमे पर्य्याये अच्छावाकः अन्त्यचतुरक्षराणि हित्वा प्रथयात् । ७ यज्ञायज्ञीयस्य चतुःपर्य्यायत्वम् । ८तत्राद्यं यज्ञं स्तोत्रः।९याज्याभ्यः पूर्व्वं प्रतीकानि पर्य्यासंज्ञा ।१०पर्य्यासोदाहरणम् । तेषां पर्य्यायसंज्ञापि ।११पर्य्यासनिज्ञानां गायत्रत्वाभावात्तत्वम् ६ क० १अतिरात्रे पर्य्यायेषु यज्ञप्रेषु छन्दोगा आश्विनयज्ञेष स्तुवते । २ संसिष्यन् विसंस्थितसङ्ख्येन निष्क्रम्याग्नीध्रीये ज्ञातुभक्षेण अङ्गाकृतीर्जुहुयात् तत्र मन्त्राः तत्राज्ञातेनाप्राप्तं तूष्णीमेव कुर्य्यात् । ३ स्तोत्रार्थं पृथक्, तत्रस्थाज्ञस्य शिल्पाख्यं प्राग्र्य अप उपस्पृशेत्राचामेत् अनाचमनेऽपि नाशुद्धिरित्यत्र हेतवश्च इत्यादिस्तुतिनिदर्शनम् । ४ प्राग्र्य प्रतिप्रस्थाय पत्नीं स्वस्थानस्थ, यज्ञाज्ञीकरत्विग्भ्याम् उपस्थं ज्ञात्वा (पादाकृतीभिर्भूमिमाश्रित्य) उत्पतिष्यन् पत्नीव उपविशेत् । ५ ज्ञातोपस्थोपवेशनस्थैव आश्विनसंसनम् । ६ एकपात्किाः प्रतिपदः पक्षः संसनम् । ७ प्रतिपदा गायत्रसाम्नो यज्ञोपसन्ननम् । ८स्तोत्रसंसने प्रातरनुवाकधर्म्मातिदेशः । ९त्रयो वाईता लूषा स्तोत्रियाः प्रगाथा वा तान् यथादैवतं यथास्तुतं संसेत् । १० अन्येषु ऋन्द्रःसु यथादैवतं संसेत् । ११ द्विपदाः पक्षः संसेत् । १२ एकपदाः प्रथमेनोपसन्नत्वात् । १३ एकपदाभ्यो याऽत्तराः ताः एकपदाभ्यः प्रथमैरुपसन्नत्वात् । १४ अर्द्धर्चयज्ञेषु पक्षः यज्ञाः पक्षः यज्ञेषु चार्द्धर्चयज्ञा यास्ता उद्धरेत् । १५ सङ्ख्यान्तरेण वा संसनम् नोद्धार इति विकल्पः । त्रिष्टुब्जगतीभ्योऽन्यत्र विशेषः । १७ उदिते सूर्य्ये प्रतिप्रियतमभि यज्ञोत्तमेन प्रथमेन सूर्य्यानोदित इत्येतत् सम्राय तदादीनि सौर्य्याणि सूक्तानि संसेत् । १८ सौर्य्यसूक्तानि सूर्य्यानोदित इत्यादीनि दर्शितानि । १९ दृष्टक्षते अति वदर्य इत्यादि परिधानीया । २० प्रतिपदे परिधानीयाया आहावत्वविधानम् । २१ यदि दृष्टसाम कुर्य्यात् तस्य योनिम् त्वामिद्धवामहे इति दृश्यम् । एतेषु प्रगाथेषु द्वितीयाम् ऋक्षोत्तमिश्रयोपरिष्टात्, तृतीयाम् अभि त्वेत्यस्योपरिष्टात् संसेत् । २२तत्र विकल्पः । २३आश्विनपुरोडाशेन पुरोडाशेन चरणम् । तत्र अनुवाक्या प्रैषः याज्याद्वयम् अध्वर्यो आसवानक्रमेणोक्तानि । २५ आश्विनपुरोडाशस्य खिलकृतावरणे संयाज्याद्वयम् इत्यन्तोऽतिरात्रः कल्पः । ईक्ष० ५क० । १ नैमित्तिककार्यभेदकथनायोत्तरग्रन्थः यदि सर्वे पर्य्यायाः प्रयुक्ता न भवन्ति इत्येवमाद्या ज्ञात्वा स्यात् यतिक्रान्तः प्राया रात्रिः सा पर्य्यायाणामाश्विनस्य चापर्य्यायेति तदा सर्वेभ्यःपर्य्यायेभ्यः एकं पर्य्यायं सङ्क्षिप्तं कुर्य्युः । २ तत्र करणप्रकारः । प्रथमात् पर्य्यात् स्तोत्रा स्तोत्रमादद्यात् । मैत्रावरुणाच्छावाकाच्छंसिनौ द्वितीयात् पर्य्यायात् ते यज्ञे, उत्तमादच्छावाकः स्तोत्रमित्येवं प्रकारः । ३ यदा तु प्रथमः पर्य्यायः प्रयुक्तः मध्यमोत्तमावप्रयुक्तौ तयोराश्विनस्य चापर्य्याप्ता रात्रिरिष्यायङ्ग्रा स्यात् तदैवं कुर्य्युः । द्वौ स्तोत्रमैत्रावरुणौ प्रथमात्, ब्राह्मणाच्छंसिनाराशंसौ तु उत्तमात् यज्ञमादद्यात् । ४ सर्वेषां वा स्तोत्रनिर्हारः । ५ स्तोत्रनिर्हारे यज्ञनिर्हारप्रकारः । ६ स्तोत्रनिर्हारे सम्भरणयोर्निर्हारविधानम् । ७ एके याज्ञिनः स्तोत्रवर्ज्यं स्तोत्रनिर्हारं कुर्व्वन्ति । ८ अन्ये ! विश्वजूभत इत्येतत् आश्विनीय एकस्तोत्रियः । ९ आग्नेये क्रतौ तस्य एकस्तोत्रियस्य दृष्टतोच्छन्दः । १०तीर्त्वा यदिषितानि

आग्निने पुरस्तात् सक्तञ्चमनम् यथास्तुतमनुदेवतं ११ । १२ द्विमासमहिषां वा नवाद्यादिभिरव्यवधाने तुल्यासन्निपाते सन्नवोदोषः । १३ तथा दोषसन्नावनायाम् आ सवनदेवतावाहनात् सव्यकृत्वरां कृत्वा कर्म कार्य्यम् । १४ सन्नावे दोषे सति मरुत्वतीये यस्यं यस्मिन् सूक्ते निविद्धीयते तस्य सूक्तस्य पुरस्तादिदं सूक्तं शंसेत् । १५ निष्केवल्ये बोजात इवेति सूक्तस्याग्रयणम् । १६ वैश्वदेवस्य वैश्वदेवसूक्तस्य पुरस्तात् शंसनम् । १७ एतेषु आगन्तुषु निविदाद्ध्यात् यस्य पुरस्तात् यस्यानि सूक्तानि विहितानि तान्युद्धारेत् । १८ निविद् स्थानं वद्यतिरेत् तदा यस्मिन् सूक्ते निविदतिपन्ना तत्पूर्व्वामरभूतं समाप्य आगन्तुकात् दैवतात् पुरस्तात् "मा प्रगामेति" सूक्तमखण्डितं यस्यान्यस्मिन्नागन्तुके तद्दैवतानां निविदं दध्यात् । ऐच्छ० ६क० । १ सवनार्थस्य सोमस्य सवने समाप्ते अतिरेके सोमातिरेकसंज्ञा । स च स्तुतशस्त्रोपजननो भवति तत्र छन्दोगैः स्तोतव्यं, बह्वृचैः यस्तव्यम् । २ तत्र प्रातःसवने स्तोत्रियानुरूपयाज्याशस्त्रयजनम् । ३ गायत्र्या वैष्णव्या यजनं वेति विकल्पः । ४ गायत्रीरिष्टे छन्दोवैष्णव्या यजनम् । ५ "ऐन्द्रालैष्णवो" च सं वां कर्म्मणेत्यादि" त्रिष्टुपछन्दस्त्वात् यजने आद्या । ६ माध्यन्दिनसवने स्तोत्रियानुरूपयोः शस्त्रयोश्च उक्तिः । ७ तृतीयसवने यद्यग्निष्टोमे सोमातिरेकः तदा उक्थ्यं कुर्य्यात् । यदुक्थ्ये सोमातिरेकस्तदा षोडशिनं कुर्य्यात् यदि षोडशिनि तथा स्यात् तदाऽतिरात्रं कुर्य्यात् इत्युक्तिः । ८ अतिरात्रेऽहनि सोमातिरेकस्तदा प्रतिष्ठे इत्यादि स्तोत्रियानुरूपौ कृत्वा माध्यन्दिनसवनवत् शेषकरणम् । ९ माध्यन्दिनीयशस्त्रान्तरम् ६क० ७क० । १ क्रीते सोमे नष्टे दग्धे वा प्रायश्चित्तविधिः । २ सदोऽधिषवणानि कृधिधीनानि अमन्तवं कुर्वन्ति पूर्व्वपक्षः । ३ अमन्तवं वा तदाचरणमिति सिद्धान्तः । ४ सोमेन यागसिद्धिरित्यतोऽन्यसोमविधानेन सोमाभिषवः । ५ सोमान्तराभावे पूतिका फाल्गुनानि वा संसृष्टान्यभिषुण्वन्ति । (पूतिका सोमसदृशी लताविशेषः फाल्गुनानि च तत्सदृशा ओषधिभेदाः अभिषुण्वन्तीत्यनेन स्वरूपतोऽपि वा:) । ६ फाल्गुनाभावे दूर्व्यादिसंसृष्टपूतिकाभिषवः । ७ दीक्षाकालतात् क्रीतसोमनाशे वा सोमनाशात् दीक्षाकालवर्द्धनम् उपसत्सु कालात् सोमनाशे उपसत्कालवर्द्धनम् । तत्र सर्व्वत्र प्रधानकालानुरोधेन कालवर्द्धनम् । कालवर्द्धनेऽपि सोमाभावे प्रतिनिधिना प्रधानकालमध्ये यागसमापनम् इत्येकः पक्षः । भूः स्वाहेति प्रायश्चित्तं कृत्वारब्धं प्रयोगं विसृज्य सोमं सम्पाद्य पुनर्यागकरणमिति सिद्धान्तपक्षः । ८ कृत्वापि नष्टे सोमे तदभावे प्रतिनिधिप्रयोगकरणमेव न तत्याज्यदृष्टिः प्रयोगत्यागोवेति सिद्धान्तः । प्रातःसवने सोमे नष्टे प्रतिनिधिद्रव्यमभिषुत्य तदहरेव प्रतिदुहोभिश्चयम् (सदोदुग्धं पयः प्रतिधुक्) । १० माध्यन्दिने तत्र पक्वपयोभिश्चयम् । ११ तृतीयसवने पूर्व्ववत् दधिभिश्चयम् । १२ फाल्गुनानां प्रतिनिधित्वेन यत्रत्ये आवन्तीयं शस्त्रं शस्त्रं भवति वारवन्तीयञ्च यज्ञायज्ञीयस्थाने । १३ शस्त्रशस्त्रं तु तत्रविषये आवन्तीयं शस्त्रं यज्ञायज्ञीयं तु यथोक्तमेवेति एकमतम् । १४ प्रतिनिधिना उदवसानीयान्तं यज्ञं समाप्य तस्मादेवाहरुदवसाय सोमं सम्पाद्य पुनर्यागः कार्य्यः । १५ पुनः प्रयोगे पुनर्दीक्षणा । १६ यद्यनुमासेऽपि प्रतिनिधौ आगात् प्राक् सोमलाभः तदा प्रतिनिधिद्रव्यत्यागेन यथोक्तमेव सोमेन यजनम् प्रतिनिधिनिमित्तानि सोमसम्पादनादीनि न सन्ति । यदा पुनरुत्तरेषु सुत्यासम्भवात् प्रतिनिधिनैवैकमहः क्रियते तदा तत्प्रयोगं समाप्य उदवसाय तदेवाहः पुनः प्रयुञ्जीरन् तथा च आरब्धं फलसाधनं यज्ञ प्रयुक्तत्वात्तदेतत् कर्म्मत्वं नावान्तरमेकस्याहः प्रयोगः एकाहेषु प्रतिनिधावुपात्ते प्रतिनिधिनैवेष्ट्वा पुनर्याग ।१६क० ऐच्छ० ८क० । १ दीक्षितानां मध्ये यस्यचित् व्याधाद्युपतापे प्रायश्चित्तविधानम् । २ जीवानामस्यता इत्यादि मन्त्रचतुष्टयेन वा ओषधीरिति सूक्तेन च पीडितं स्वपयित्वानुमार्जनं कार्य्यम् एतत्सर्व्वं ब्रह्मणा कार्य्यम् । २ अनुमार्जने मन्त्रभेदाः । ४ एवमुपतप्तस्य कर्म्मणि कृते सतेवां यथास्थानं गतिः । ५ तस्मिन्निमित्ते त्रातारमिन्द्रमिति ऋक् ताक्ष्यं कार्य्यं स्त्रीवा भवति । ६ तस्मिन् वैश्वदेवसूक्तादिजपः कार्य्यान्तरञ्च । ७ रोगनिवृत्तौ यथोपदिष्टतया प्रत्यवैष्णवं कर्म्म कार्य्यम् । ७क० ९क० १०क० । १ कृते तस्मिन् अतीर्णेन निर्गमस्य अवभृतार्थं सङ्कल्पिते हेमे कृतस्य प्रेतालङ्कारादिकरणम् । २ कृतस्य अग्निहोत्रस्य होमस्यापनम् । ३ उशीरेत्यादिजपनम् । ४ मनोजूतेत्यादिपरिधापनम् । ५ प्रेतस्य देहस्यान्त्राणि निःसृतानीति ज्ञात्वा घृतदाज्येन पूरयित्वा घृतदेहे बध्नीयादनीं सेवनम् । ६ कृतस्य वाससा वेष्टनप्रकारः । ७ तस्यैव

वक्षस्येकदेशस्य प्रेतक्रियाधिकारिणा यष्टव्यम् । ८प्रतेस्तानीन् द्वयोररण्योः समारोप्य देवयजनस्य बहिर्वेदि प्रेतमाधायाग्निं मथित्वा विच्छ्य तत्रैव दहेयुः।९अनाहिताग्नेरौपासनकव्येष्वाऽऽहार्येण दाहः । १०दीक्षितस्य पत्नीसंनहनेऽपि लौकिकाग्निना दाहः । आहिताग्नेरपि सर्वाधाने लौकिकाग्निनैव पत्न्या दाहः । औपासनाग्निसत्त्वे तु तेन दाह इति भेदः । ११प्रेतदाहदेशादारभ्य पूर्वापरीभूताङ्गसमापनं यथाविहितं कुर्युः । १२ दीक्षितदहनोत्तरं शास्त्रानुवचनाभिष्टवनसंस्तवनेषु विशेषोक्तिः । १३ ब्रह्मणालयतने परितः कर्त्तव्यभेदः । १४ होतुःस्वस्थानात् पश्चादुपवेशनम् । १५तत्र अध्वर्योरुपवेशनप्रकारः । १६ तत्र आयं गौरित्यादिषु ऋक्षु उपांशुस्तुतिप्रदर्शनम् । १७ ब्रह्मणोत्तरं होतुः कर्त्तव्यम् । १८ । १९ । तत्र यमदग्न्यात्मतया प्रेक्षिप्रेक्षीत्यादि लक्षणजपः । २० अनुद्रवणाख्यिसङ्गने कृत्वा यथासन्नत्विजामासादनम् । २१ तेषां भक्षणप्रकारादि । २२ दीक्षितस्य मृत्यूदिने उक्तप्रकारं कर्म समाप्य सप्तदशस्रोमं त्रिवृत्पवमानकं रथन्तरपृष्ठमग्निष्टोमसंस्थं दृष्टद्रुघ्नरं दीक्षितमरण्यनिमित्तं सत्रमध्ये सत्रिणः कुर्युः । २३उक्ते अग्नि समाप्ते एतान्यस्थीनि अवभृतकाले अवभृतार्थं संकल्पितास्वप्सु कृष्णेन सह क्षिपेयुः एतस्य मृतस्य तदहरिति वदन्तः सर्वे सत्रिणः कुर्युः। २४मृतस्य दाहादारभ्य कार्य्यान्तरोपदेशः ।२५शेषसमापने मृतस्य संख्यापूरणाय तत्सङ्किष्टं दीक्षयित्वा सत्रसमापनं कुर्युः २६ यष्टपतौ मृते तदहःप्रभृति समाप्तावभृथं कृत्वा सदोदग्ध्वा च सत्राद्गत्वा भवति न पुनः शेषसमापनम् ।२७यष्टपतेरपि अस्थिसंक्षयादयः पूर्ववेन्नेया: कार्याः । २८ एकाहेषु अङ्गमानस्य पूर्वाह्णे तस्य तस्य शयनम् । २९ मृतस्य यष्टपतेः वह्नीषु अप्सु अवभृथं कर्म कृत्वा प्रेतस्य तत्र निक्षेपः एवमाहवनीयस्य आधानं खोक्तिः । ३० आहवनीयस्य तस्य ब्रह्मणालैः यष्टव्याः । ३१ एतत्पर्यन्तं अन्वहमेव अवश्यकोनाध्यः । ऐ० १०अ० । १ सोमयागस्य अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त संस्थाः । २तासां मध्ये वाजपेयसंस्थाने यज्ञपुच्छं नाम कर्म वर्त्तव्यम् । ३यज्ञपुच्छस्य प्रकारः । तत्र प्रस्तावप्रभृति उद्गातव्यम् । पृतत्र प्रातरोडावपदे अग्नीदग्नेता पुरोडाशैरिति वचनमित्युक्तिः । ७ सवनीयैः कार्ष्णमृन्मृद्भिः पशुपुरोडाशेन पशुदेवताहृदयः । ८ यदि वाजाद्दूर्वा हारियोजनं कार्ष्णम् ।९हारियोजनस्य अनुवाक्याप्रैषयाज्याः । १०अङ्गर्गणेषु अन्येष्वङ्गेषु उक्त एव याज्यानुवाक्ये । ११अङ्गर्गणेष्वन्येभ्योऽन्यानि, तेषां प्रतीकोक्तिः । १२ सारस्वतसत्रादिषु यानि तुल्यानि सौत्या कोभिरुत्तरवन्ति तेष्वन्येषुनुवाक्या । १३ हारियोजने मैत्रावरुणस्य अनुषट्कारात् प्राक्प्रतिप्रैषनामक प्रैषकथनम् । १४ अतिरात्रे तेजस्वः इत्यत्र तेजोऽसीति प्रयोगः । १५ यज्ञमाणे स्वःसुत्यामित्यत्र अद्य सुत्यामिति प्रयोगः । १६ आग्नीध्रः अतिप्रैषस्थाने सुत्वा यज्ञः स्वः सुत्यामित्यादि मन्त्रं वदेत् ऐ० ११अ० । १ अथैतावाहुतं द्रौणकलशमभिघारयति प्रतिगृह्णो द्रोणकलशस्थस्योमभवपश्येत् । २यस्तुः प्राणश्च मन्त्रः हरिवत इत्यादि । द्रोणकलशस्थोमं गृहीत्व मन्त्राभ्यां सुवमृदयमभिघार्य येन पथा सदोऽभिधीतं वा गतः तेन पथा तत्र प्रतिनिवृत्तिः । विनिष्क्रामाहुतिमामको होमौ कुर्य्यात् तत्र होममन्त्रौ च । २ षड्भिर्मन्त्रैः आहवनीये षट्षट्यकलाभ्याधानम् । ते च देवकृतस्यैनसइत्यादयः सूक्तोक्ताः षट् । ४ द्रोणकलशादाज्यगृहीत्वा पश्येयुः तत्र मन्त्रः आपूर्य्या इत्युक्तिः ४ तूष्णीमवघ्राय ता धानाः अन्तःपरिधिदेशे निषेयुः। आहवनीयदेशात् सर्वे दक्षिणाहृतः प्रत्येत्याग्नीध्रीयं गच्छेयुः विनिष्क्रामाहुतिपर्यन्तमेतत् सर्वं सर्वे कुर्युः । ७ ताश्चमसान् गत्वा आर्द्रदूर्वाजातीयानि तिस्रोदूर्वा क्षिप्त्वा सर्वैऽध्वरा प्रतिष्ठ सर्वे चमसिनः स्वान् स्वान् चमसान् दूर्वादिरसयुक्तान् गृहीत्वा प्रोक्षिताभिरद्भिः स्वं स्वमात्मानं दक्षिणैः पाणिभिरप्रदक्षिणं पर्युक्षेरन् । ८सर्व्यं वा पाणिभिः प्रदक्षिणं पर्युक्षेरन् । ९तत्र पर्युक्षणे गाथामन्त्रः । १०पितादिस्वजीवने नैता गाथा याज्याः नापि पर्युक्षणं कुर्युः तद्वर्जं सर्वं सर्वं कुर्युः । ११ अवभृथाभिगमनमन्त्राः । १२ वयजमानर्त्विजां परस्परस्य कृत्य प्रकृते मन्त्राः ऐ० १२अ० । पत्नीसंयाजैश्चरित्वा पत्न्यै वेदप्रदानादि पूर्णपात्रनिर्वपनान्तं कर्म कृत्वा वेदत्यागं कृत्वाऽकृत्वा वा प्रायश्चित्तानि जुहूयात् ।

२ यज्ञभङ्गिकस्य सान्नोनिधनरूपामन्त्यां भक्तिं कृत्वा सर्वेऽवभृथं कुर्युः । ३ जले क्रियमाणा दक्षिरवभृथेष्टिः । तत्रा चरणम् । ४ ५ अत्र विशेषाः । अस्माभिर्यो प्रया-

ज्ञाद्यनुयाजान्ता नाराशंसिका न बर्हिष्मती प्रयाजानुयाजावनुमती तौ च गायत्रौ । ६ तत्र वारुणं कृत्तिः कृत्तिर्दोषे सति यागावसरे कृत्तिरोत्पाद्य यष्टव्यम । ७ स्विष्टिकृदागे अग्नीवरुणौ देवते अवते क्षोढ्रोवरुण नमोभिरिति हे ऋचौ तत्र साधनम् । अत्र च निगदाभावात् अग्नीवरुणावादित्य च त्वं इत्यृचा यष्टव्यम । ८अग्नाविष्टौ नमोवरुणाय इति मन्त्रेण दक्षिणानूपादानहवने निदध्युः । ९ तत्र आचमने मन्त्रलयम् । १० आचमनप्रकारः । ११ यौवाङ्गमाचमनं कृत्वा क्षत्राङ्गमाचमनं कृत्वा प्राङ्गायुः तत्र मन्त्रा; । १२अदीक्षितानामन्त्रैरात्मावनं वाऽभ्युक्षणं वा । १३ उक्तेतरा स्वाम्नोक्तविधिना सर्वानुद्वदादुद्धारयेत् । १४ उक्तेतरा उक्तीयमानाः उक्तेतरित्यादि मन्त्रं जपेयुः । १५उदङ्नाडुत्तीर्य उद्वयं तमस इत्यादि मन्त्रं जपेयुः । १६ इत अर्वं संख्याजपपर्यन्तं हृदयशूलेन समानं तथा च अनवेक्षमाणाः इत्यादयः सनिदाधानान्ताः सर्वैः कार्याः । १७ अपहतरक्षांसः संख्याजपं कुर्युः १७सू० १८अ० १२क० । १ गार्हपत्ये उदवसीयया चरुम् । २ सा च प्राजापत्यया हुत्वा । २सर्वसाम्येऽपि अयं विशेषः । तत्र चतसृ आज्यहविषोदेवता अदितिः पथ्या स्वस्तिरित्यत्र प्रथमा ऋक् चतुर्थी भवतीति । ३ याज्यानुवाक्ये च विपरीते तत्र या याज्या सा ऋक् अनुवाक्या । तत्रानुवाक्या ऋक् याज्या । ५ प्रायणीयाया: कर्तार एवात्र कर्तारः । ६ संयाज्याया ऐकरूप्यं न याज्यात्वेन वैपरीत्यम् । ७उदयनीयायां सप्तानां सौम्यावद्यदेवतोऽनूबन्ध्यः पशुः । ८ उदवसानीयैष्टीत्यादिभिः पशुः कार्यः स च वारुणीय इत्येके ९ उत्तरवेदिसमीपे आग्नीध्रैः कार्य इत्येके । १०तत्र नैमित्तिकः कर्मभेदः । अनूबन्ध्यपशोर्वपायां हुतायां वह्न्यादग्निसंयतः हुता तदाऽग्नीषोमीयेण चरुणेष्ट्वा गार्हपत्ये त्वाष्ट्रेण पशुना चरुम् । ११ त्वाष्ट्रपशुकरणप्रकारः । त्वाष्ट्रं पशुं यूपाङ्गनादिलक्षणं कृत्वा उत्सृजेत् इत्येकः पक्षः । १२यदि अध्वर्यव आज्येन तं पशुयागं समापयेयुः तदा होतापि तथा कुर्यात् १३ आज्येन समाप्ते अन्येषां पशवः । आज्यहोमादिमावेद्याः ।१४ आज्येन करणपक्षे पशुवत् मन्त्रप्रयोगः । १५ यद्यत्र देविका ऋचीति अनुनिर्वपेयुः धाताऽनुमतिः राका सिनीवाली कुहूरिति पञ्च देवताः ।१६तत्र धातृयजमाने मन्त्रभेदः ।१७एषामेव पञ्चानां देव्य इति संज्ञा । देवीषष्ठेऽहर्द्यौः क्षमा सौः पृथिवीति पञ्च देवताः ।१८तत्र सूर्यस्य चातुर्मास्येभ्यो याज्यानुवाक्येभ्यः ।१९अनूबन्ध्यपशुहविषामभे मैत्रावरुण्या पयस्या वर्तन्याः । २०सा च आज्यभागादिः वाजिनान्ता कार्या ।२१ ऋत्विजो वाजिनं भक्षयेयुः । सप्तविधे सर्वे भक्षयेयुः । २२ उदवसनीयया चरणं तत्करणप्रकारः । २४ प्रकृतेन ज्योतिष्टोमाख्येन सोमेन यजमानदक्षिणीयया दीक्षां प्रविष्टः स सोमेनेष्ट्वा अवभृथेष्टौ दीक्षोक्तोचनं कृत्वा तत्प्रासङ्गिकं एतावदुक्तिं एतावदूर्ध्वं प्रयोगं समाप्य तदग्नेऽग्नीनरण्योः समारोप्य उदग्देवयजनात् यो देशस्त्रिवृन्मेखलोदक्प्रवणो यया यजते इत्येतावदर्थः । अपरस्तु यदि सर्वे दीक्षिताः स्युः सप्तसप्तेति दीक्षिता उत्सिता इति पाठः कर्तव्यः समाख्यपाठेऽर्थस्य दुर्गमत्वात् यदि सर्वे दीक्षितास्युः क्षुल्लका पूर्ववदेवानूबन्ध्यान् कर्मकृत्वा सर्वे स्वानि स्वानाग्नीनि स्वे स्वे आरणीये पृथक् पृथक् समारोप्य पूर्ववत्स्थित्वा पृथगेवोदवसानीयया यजेरन्निति विशेषतोऽर्थः । सेयमुदवसानीया एवंरूपा भवति । पुनराधाने याज्याता दृष्टिरूपा । सा च अविकृता अविभक्ताज्यभागविकारा उपांशुत्वरहिता सैवाग्निदेवता । ६अ० २७क० ।

इत्थं पूर्वार्धस्य षष्ठाध्यायोक्तस्य प्रतिसूत्रमभिधेयार्था दर्शिताः उत्तरार्धमपि सप्तमाध्यायोक्तम् आज्ञप्त्यभावात् तत्तत्प्रतिसूत्रप्रतिपाद्यार्था न दर्शिता सूत्रपत्रे इत्याः। संक्षेपेणायमर्थस्तत्तत्र । सप्तमाष्टमाध्याययोः सत्राधिकारेण इतिकर्तव्यतादिदर्शनम् । नवमे अहीनेष्वाधिकारेण इति कर्तव्यतावतारः। दशमे रात्रिसत्रविवरणम् । एकादशे ज्ञानविशेषेण तदाचरणम् गवामयनचरणम् । द्वादशे गवामयनस्यैव दिनसङ्ख्यानादि । प्रागस्य षष्ठाध्यायस्य तत्रोक्तिः प्रामादिकी ।

तदीयसप्तमसत्रे प्रतिपाद्यविषया स्वावदभिधीयन्ते । तत्र प्रथमाध्याये । स्वाग्नीषोमीयादयो पाकयज्ञास्तानि कर्माणि । १ यज्ञव्याख्यानप्रतिज्ञा । २ पाकयज्ञप्रकारः । ३ पाकयज्ञप्रकारस्य त्रैविध्योपदेशः । ४ एतान्यपि कर्माणि नित्यानि नैमित्तिकानि आहिताग्नेरपीत्युक्तिः । ५ पाकयज्ञानामर्थवादरूपं ब्राह्मणम् । १अ० १क० । १ दर्शपूर्णमासप्रकृतिविकृतिप्रयोगः । २ देवयज्ञः । ३ स्वाहाकारेण यजिहरणम् । ४ यजिप्रदानार्हदेवतानिर्णयः । ५ दिक्षु देवताभ्यो देवताप्रदेशेभ्यो यजिहरणम् । ६ मध्ये ब्रह्मणे ब्रह्मप्रदेशेभ्यश्च यजिहरणम् । ७ मध्ये विश्वेभ्यो

देवेभ्यो बलिहरणम् । ८ नक्तं, दिवसे, दिवाचारिभ्यो भूतेभ्यो बलिहरणम् । ९ रात्रौ, नक्तंचारिभ्यो भूतेभ्यो बलिहरणम् । १० सर्वस्मै सर्वेभ्यो बलिहरणम् । ११ पितृयज्ञे प्राचीनावीती अन्यत्र तिलादिभ्यः दक्षिणावीतोत्सृष्टिः । १अ० २क० । १यज्ञोपवीतकर्मणां क्षौमविधिः । २ पवित्राभ्यामाज्यशोधनम् । ३पवित्रस्रुवशोधनयोर्निर्णयः । आज्यक्षौमेषु परिसरणं कार्यं वा न वेति निर्णयः । ५ पात्रयज्ञेषु आज्यभागौ कार्यौ वा न वेति निर्णयः । ६ धान्यलवित्रं शुल्बमन्यत्र वर्जयित्वा सर्वेषु पात्रयज्ञेषु ब्रह्मा कार्यो वा नवेति निर्णयः । ७ अनाहिते नाग्नयेन क्षौमः । ८ अनाहिते देवतानिर्णयः । ९ एकमग्निरादित्यस्तस्मानकाहिकाः । १० पूर्वोक्तस्य प्रणाद्यर्थं यज्ञगवोदाहरणम् । १अ० २क० । १चौलकर्मादीनां कालविधिः । २एके आचार्याः सर्वस्मिन् काले विवाहमिच्छन्ति । ३ आज्यक्षौमः । ४ अनाहुतयोऽभ्याहुत्याहुतयश्च । ५ उभयाहुतिसिद्धस्तूष्णीमपक्षः । एके अनाहिताहुतिमिच्छन्तीत्युत्सृष्टिः । ७तेषामाहुतयः । १अ०४क० ।१ वंशपरीक्षा । २ वरयुग्मकथनम् । ३कन्यायुग्मकथनम् ।४ परीक्षान्तरम् । ५ क्षेत्राद्यष्टसप्तिसर्वैः परीक्षा । ६ पित्र्याणां ऋद्धिभेदकथनम् । १अ०५क० ।१ आज्ञाव्यविधविवाहोत्सृष्टिः । १अ० ६क० । १ विवाहे देवधर्मप्राजापत्यधर्मार्षधर्मासुरधर्मगान्धर्वराक्षसपैशाचानां कर्तव्यता । २ जघनपादिधर्म्यं सर्वत्र समानत्वमित्युत्सृष्टिः । २ पाणिग्रहणविधिः । १ लाजाजिना अक्षुण्णेन पक्षेण । ४ दृषदजाजिना अक्षुण्णेनैकेन पक्षेण । ५ उभयाजाजिना अक्षुण्णाक्षुण्णविवर्तितपक्षाभ्यां पक्षेण । ६ अग्न्युदकयुक्तप्रदक्षिणे वधूजघनकथनम् । ७अश्मारोहणे आचार्यजघनकथनम् । ८आज्यक्षौमप्रकारः । आत्मादृष्टिर्वा लाजानावपतीत्युत्सृष्टिः । ९ वरो लाजमद्भ्यवेत् सिक्ता लाजानावपति । १० लाजेषु कृविरवधारणम् । ११ वरकर्तृकमवदानम् । १२अवदानस्य सर्वजनातिदेशः । १३ वरकर्तृकक्षौमकथनम् । १४ अनन्वारब्धं सूर्यदृष्टेन वधूकर्तृकं लाजावदानम् । १५ एके लाजानोप्य पवनादग्निमुपसमाधायाक्षतानित्युत्सृष्टिः । १६ग्रन्थिविमोचनम् । १७ दक्षिणग्रन्थिविमोचनम् । १८ उत्तरग्रन्थिविमोचनम् । १९ सप्त पदोनिगमनम् । २० उभयोः शिरसि उदकुम्भसेचनम् । २१आज्यालम्भनमग्नौ जनारा वसतिः ।१२ ध्रुवारुन्धत्यादिं दृष्ट्वा वाग्विसर्जनम् । १अ०७क० ।१ वासोविसर्जनम् ।

२ लाजाहोमोपस्थानम् । ३उदक्याद्युत्तारणम् । ४वधूर्वर्दिरोदिति तदा अग्निमेवं जपेत् । ५विवाहाग्निं स्वदोषा नलक्ष्यम् । ६ देवद्रव्यवतुष्प्रभृतौ जप्यमन्त्रः । ७पत्निका रैवत्याः सन्ति चेत् तदोक्षणमन्त्रः । ८ स्वप्रवेशनमन्त्रः । ९ उपवेशनदधिप्राश्नमन्त्रदृत्याङ्गमादयः । १०विवाहाग्नि ब्रह्मचर्यधारणादिः । ११ त्रिरात्रं द्वादशरात्रं वा ब्रह्मचर्यधारणम् । १२ संवत्सरं वा ब्रह्मचर्यधारणम् । १३ततोनन्तरं वधूवस्त्रदानम् । १४आचार्येभ्योऽन्नदानम् । १५ स्वस्तिवाचनम् । १अ० ८क० । १ पाणिग्रहणप्रभृतिसप्ताग्निपरिचरणम् । २ अग्नौ नष्टे प्रायश्चित्तं ज्ञात्वा पुनरग्निपरिचरणम् । ३ एके अग्न्युपयामौ यज्ञा उपवासं वदन्तीत्युत्सृष्टिः । ४तदग्निपरिचरणं अग्निहोत्रविधानेनेत्युत्सृष्टिः । ५क्षौमादिकालव्यवस्था ।६क्षौमद्रव्याणि । ७ उक्तद्रव्याभावे द्रव्यान्तरप्रतिनिधिः । ८व्याख्यातक्षौमः । १अ०९क० । पार्वणस्थालीपाकः । २भोजनविधयः । ३ ब्रह्मवर्चसौर्ध्वमन्थनम् । ४ तद्देवता । ५ काम्यदेवता । ६ सूर्यसृष्टिनिर्ध्वमथनम् । ७ सूर्यसृष्टिप्रोक्षणम् । ८ अवघातप्रक्षालनेनानेकत्र अपक्वानि । ९ एकत्र अपक्वं वा ।१०नानाश्रपणप्रकारः । ११ एकत्र श्रपणप्रकारः । १२ आज्योत्पवनादिः । १३ आधारालम्भागौ खिष्टिज्जोमश्च । १४ आग्नेयादिहोमः । १५ आज्यभागयोर्यत्रचतुर्गृहीतत्वम् । १६ वसतीवरश्च उपवेशनविधयः । १७ आग्नेयोत्तरपूर्वदेशे क्षौमः।१८कृविःस्थापनदेशयः ।१९पवित्रहस्तिक्षौमनिर्णयः । २०खिष्टिज्जोमविधयः । २१खिष्टिज्जोमे कृविःशेषाभावः ।२२खिष्टिज्जोमसमाप्तिः ।२३पूर्णपात्रविधानम् । २४ पूर्णपात्रविधयश्च । २५ पात्रासादनम् । २६दक्षिणादानम् । १अ०१०क० । १ पशुकल्पः ।२प्रत्यूषकर्मणम् । ३ पशुप्रोक्षणम् । ४पशुविधानम् । ५ अन्यवर्जम् पशुविधानम् । ६ उखासूक्ताधरणम् । ७ यागिनीत्युक्तिः । ८ पत्न्यागारप्रवेशनम् । अन्यारब्धे कर्तृकथनम् । १० वपाक्षौमः । ११स्थालीपाकविधानम् । १२ पत्न्यवदानं स्थालीपाकक्षौमश्च । १३अवदानावशिष्टक्षौमो वा । १४ प्रत्यवदाने हिरिरवदानम् । १५ तूष्णीं हृदयशूलाधरणम् । १अ० ११क० । १ चौलयज्ञे खिष्टिकृतः प्राक् बलिहरणम् । २ विदेशयज्ञनैष्ठापत्ये पत्नीयदूतेन बलिहरणम् । ३ भवच्छायनायां दूताय यज्ञदानम् । ४ नक्षत्रान्ते चेत् ध्रुवदानम् । ५ अन्यस्मिन्

चैत्यश्चेत्पुरोहिताय बलिहरणम् । १अ० १२क० । १ पुंसवनम् अनवलोभनञ्च । २ तृतीयमासे पुष्यनक्षत्रे उपोष्य तुल्यवर्णावत्साया गोर्दधिमात्रया प्राशनम् । ३प्रत्यवेक्षणम् । ४ त्रिःप्राशनम् । ५ दूर्वारसस्य नासिकायां सेचनम् । ६ नक्षत्रहरणम् । ७ चूडाकर्मप्रभृतयः । १अ० १२क० । १ सीमन्तोन्नयनं कर्म । २ तस्य कालनिर्णयः । ३ होममन्त्राः । ४सीमन्तव्यूहनम् । ५चतुर्धा व्यूहनम् । ६ वीणागाथाकथनप्रेषणम् । ७गेयगाथाकथनम् । ८ब्राह्मणयोर्बहुभूयुक्तदाचरणम् । ९दक्षिणादानम् । १अ०१४क० । १ जातकर्म । २ मेधाजननजपः । ३ अंसस्पर्शनम् । ४ नामकरणम् । ५ नामलक्षणम् । ६ चतुरक्षरं वा नाम । ७नाम्नि कामनाभेदेनाक्षरनिर्णयः । ८यु नामधेयानि युग्माक्षराणि । ९ स्त्रीनामधेयानि अयुग्माक्षराणि । १०येन नाम्ना उपनीतः तेनाभिवादनं कुर्यात् । ११ मूर्धावघ्राणे मन्त्रजपः । १२ कुमार्या अमन्त्रकं कर्म । १अ०१५क० । १ अन्नप्राशनम् । २ अजमांसाद्याशनम् । ३तिस्तिरिमांसाद्याशनम् । ४ घृतौदनाद्याशनम् । ५ अन्नाशनमन्त्राः । ६ कुमार्या अमन्त्रकम् । १अ०१६क०१ चौलं कर्म । २पूर्णपात्रादानम् । ३ कुमारावस्थानं दृष्ट्वाशादनञ्च । ४ कुर्यपिङ्गूकङ्कलकुमारपिलवस्थानम् । ५ब्रह्मा वा कुर्यपिङ्गूकानि धारयेत् । ६ अपां निनयनमन्त्राः । ७ शिरउन्दनमन्त्राः । ८ कुर्यपिङ्गूकनिधानमन्त्राः । ९ तेषु ताञ्जुरस्थापनमन्त्राः । १० केशच्छेदनमन्त्राः । ११ केशस्थापनम् । १२ द्वितीयस्य तृतीयस्य मन्त्रौ । १३चतुर्थस्य मन्त्राः । १४ एवमुत्तरत्रिष्वरम् । १५क्षुरधारणोक्षणमन्त्राः । १६ नापितानुज्ञापनम् । १७ केशवपनिवेशकरणम् । १८ कुमार्या अमन्त्रकम् । १अ०१७ १ गोदानं कर्म । २ तस्य कालनिर्णयः । ३ मन्त्रे केशवपनेषु प्रकृतिवत्करणम् । ४ प्रक्षालनम् । ५क्षुरधारणोक्षणे विशेषमन्त्राः । ६ नापितानुज्ञापनम् । ७ आचार्याय दानप्रार्थना । ८ गोमिथुनदक्षिणादानम् । ९ संवत्सरव्रताचरणादेशः । १अ० १८क० । १ उपनयनम् । ब्राह्मणे वर्षे ब्राह्मणस्य । २ गर्भादेकादशे वर्षे वा । ३ एकादशे वर्षे क्षत्रियस्य । ४ द्वादशे वैश्यस्य । ५ आ षोडशात् ब्राह्मणस्य नातीतः कालः । ६आ द्वाविंशात् क्षत्रियस्य, आ चतुर्विंशात् वैश्यस्य ।७अत ऊर्ध्वं पतितसावित्रीकान् याजयेत् । ८ संवीतकर्मनिर्णयः । ९ परिधेयवासोनिर्णयः । १० मेखलाधिकारः । ११ जातिभेदे मेखलानिर्णयः । १२ दण्डाधिकारः । १३ जातिभेदे दण्डनिर्णयो दण्डपरिमाणञ्च । १अ०१६ क० । १ सर्वे दण्डाः सर्वेषां वा भवन्ति । २आचार्यादिके उपवेशननिर्णयः । ३ब्रह्मचारिण उपवेशननिर्णयः । ४ साङ्कुशमाचिपत्रकम् । ५ माचिपत्रकमन्त्राः । ६आदित्यावेक्षणम् । ७ तत्र जप्यमन्त्राः । ८प्रदक्षिणावर्तनम् । हृदयस्पर्शनम् । १० अमन्त्रकं समिदाधानम् । १अ० २०क० । १ एकमते मन्त्रेण समिदाधानम् । २ मुखमार्जनम् । ३तेजसा मार्जनम् । ४ सावित्र्युपदेशप्रार्थना । ५ सावित्र्युपदेशः । ६सावित्रीवाचनम् । ७ ब्रह्मचारिणो हृदयदेशे अङ्गुष्ठाङ्गुलिस्थापनं मन्त्रस्य ।१अ०२१क० । १ ब्रह्मचर्यादेशः । २ ब्रह्मचर्यादेशमन्त्राः । ३ वेदब्रह्मचर्यकालनिर्णयः । ४ वेदमहाव्रतानां वा ब्रह्मचर्यं भवति । ५ भिक्षाकालनिर्णयः । ६ समिदाधानकालनिर्णयः । ७प्रथमभिक्षानिर्णयः । ८भिक्षामन्त्राः । ९भैक्ष्यमाचार्यायाचार्याय निवेदनम् । १० भाक्षयज्ञः । ११ आचाराङ्गभागान्तहोममन्त्राः । १२ सावित्र्या द्वितीयम् । १३ महानाम्न्यादिहोमः । १४ऋषिभ्यस्तृतीयम् । १५सौविष्टिकृतं चतुर्थम् । १६ वेदसमाप्तिवाचनम् । १७ ब्रह्मचर्यव्रतधारणम् । १८ मेधाजननम् । १९ उदकस्नाभिषेकवाचनम् । २० व्रतादेशयोगः । २१ अनुमेतस्य विधिविशेषः । २२ उभयेतस्य विधिः । २३ स्नातकस्नातञ्च । २४ गोदानमन्नाद्यम् । २५ काषोऽनिरुक्तः । २६ प्रायश्चित्तार्थे सावित्र्यनुत्तरम् । १अ० २२क० । १ ऋत्विग्वरणम् । २ एके वृणते वदन्ति । ३ वरणनिर्णयः । ४ वरणविशेषनिर्णयः । ५ सदृशवरणम् । ६ वरणविशेषः । ७ क्षौद्रवरणमन्त्राः । ८ ब्रह्मवरणमन्त्राः । ९ अध्वर्युादिवरणमन्त्राः । १० क्षौद्रप्रतिष्ठा । ११ब्रह्मप्रतिष्ठा ।१२अपरप्रतिष्ठा जप्यमन्त्राश्च ।१३ वाग्यतत्वम् ।१४। १५। १६। १७। १८ आसनस्य निर्णयः ।१९सोमप्रवाकप्रश्नाः ।२०सत्याढ्यः सकृत्संप्रयोगः । २१तत्र निमित्तानि । २२ आज्याहुतिहोमः । २३आज्याहितानिसंस्पर्शयोः । १अ० २३क० १ऋत्विजे मधुपर्काहरणम् । २ एवं स्नातानतावुक्तावुक्तौ, विवाहार्षिणे । ३ राज्ञे उपस्थितायै । ४ आचार्यश्वशुरपितृव्यमातुलेभ्यः । ५ मधुपर्कसंकल्पनिर्णयः । ६ यज्ञलाभे घृतस्नानप्रतिनिधिः । ७ आसनपाद्यार्घाचमनीयानि गां च निष्क्रयेद्देयेत् । ८ आसनपक्षे मन्त्रप्रकारौ ।

६ पादप्रक्षालननिर्णयः । १० वामपादादिप्रक्षालनम् । ११ अर्घ्यभक्षणम् । १२ अर्घ्यभक्षणमन्त्रः । १३ मधुपर्कभक्षणमन्त्रः । १४ मधुपर्कभक्षणादिमन्त्राः । १५ तिलद्वारत्वम् । १६ मधुपर्कभोजनम् । १७ सर्वान्नभक्षणनिषेधः । १८ हविर्निषेधः । १९ अवशिष्टमधुपर्कप्रक्षेपः । २० सर्वान्नभक्षणं वा । २१ आचमनम् । २२ द्वितीयाचमनम् । २३ आचान्तोदकाय मोदानम् । २४ आक्षालनमन्त्रे जपोऽनुक्ता च । २५ उत्सर्गपक्षे उत्सर्गमन्त्रः । २६ मधुपर्काङ्गं भोजनमसाङ्गं न भवति । १अ० २४क० ।

२ अध्याये । १ अन्वाहार्यकालः । २ सप्तकलशयष्टयोस्थापनम् । ३ दिशाश्रतदानादि । ४ अक्षतक्षिते स्थालीपाकहोमः । ५ अवस्थानविधयः । ६ पुरोडाशीपरिहोमः । ७ आज्याहुतिहोमः । ८ हुतशेषस्य प्रतिपत्तिः । ९ सर्वमन्त्रिकृत्यम् । १० प्रदक्षिणोपवेशने परिदानमन्त्राश्च । ११ अमात्याय परिदानम् । १२ परिदानान्तरम् । १३ ब्रह्मिणात्मानं चान्तरा न व्यवेयुरन्ये ।१४ वायव्यातर्पणहिरण्यम् । १५ प्रकारान्तरब्रह्मिरण्यम् । २अ० १क०आश्वयुज्याम् आश्वयुजीकर्म्म । २ स्थालीपाकहोमः । ३ घृतावकाशः । ४ आहिताग्नेः आधानकृत्यन्तेताङ्गं स्थालीपाकश्च । ५ अनाहिताग्नेर्लौकिकाग्नौ- २अ० २क० । मार्गशीर्ष्यां चतुर्ष्वाम् प्रत्यवरोहणकर्म्म । २ पौर्णमास्यां वा । ३ पायसहोममन्त्रौ । ४ खिलिङ्गविधेः । ५ ध्यानं तन्मन्त्राश्च । ६ पुनर्जप्यमन्त्रः । ७अभात्यग्नेयः । ८ हविष्कृत्तर प्रणेयः । ९ मन्त्रविदो मन्त्रजपः ।१० उत्थाय लिङ्गजपमन्त्रः । ११ लिङ्गिब्राह्मणां जपब्राह्मणभोजनसङ्कल्पवचनानि, चतुर्थजपमन्त्राश्च १२ सङ्कल्पवचनम् । २अ० ३क० । १अष्टकाकर्म्मकालः । २ एकस्याम् अष्टम्यां वा । ३ पूर्व्वेद्युः सप्तम्यां पितृभ्यो दानम् । ४ तत्र ओदनक्षीरपायसानां त्रयाणम् । ५ चतुःशरावपरिमितधान्यं पिण्डा पूपत्रयाणम् । ६ मन्त्रा एकैहोमः, यावद्बलं कामयेत तावद्बलिर्वा । ७ परदिने अष्टम्याम् अष्टका, पशुना स्थालीपाकेन वा । ८ अनुष्ठो ववसमाहरेद्वा । ९ त्रयाणामप्यसम्भवे अग्निना कार्यं दहेत् । १० यवसदाने कव्यदाहे मनसा ध्यानम् । ११ चतुर्थीमिकस्याप्यनुष्ठाने नानष्टकः स्यात् । १२ दैवतादिविकल्पप्रदर्शनम् । १३ वपाहोममन्त्रः । १४ वप्र होममन्त्राः । १५ खिलिङ्गति अष्टमहोमः । १६ ब्राह्मणभोजनोत्तरं खल्ययनवाचनम् । २अ० ४क० । १आन्वष्टक्यं तदुत्तरत्रयाणां कार्य्यम् । २ सांकल्यादि । ३ पिण्डपितृयज्ञसंकल्पप्रदर्शनम् । ४ पितृभ्यः मधुमन्त्रवर्जं पिण्डनिधानम् । ५ मातृपितामहीप्रपितामहीभ्यः स्वराजमेन पिण्डनिधानम् । ६ अवटसंस्थानिर्णयः । ७ पित्रादिपिण्डस्थानम् । ८ मात्रादिपिण्डस्थानम् । ९ भ्रातृपत्नीभगिनीश्वश्रूमात्रादिनिमन्त्रणे कर्त्तव्ये श्राद्धावर्त्ते उक्तधर्म्मातिदेशः । १० ब्राह्मणपक्षे अयुग्मान् तिसृषु आन्वष्टक्यवत् । मासि मासि पितृभ्य एव श्राद्धं कर्त्तव्यं न मात्रादिभ्यः । ११ आन्वष्टक्ये नवावरान् भोजयेत् ।१२ अथवा त्रीन् पञ्च सप्त एकं वा । १३ दक्षिणकर्म्मणि पूर्त्तकर्म्मणि च युग्मान् भोजयेत् । १४ इतरत्र युग्मब्राह्मणभोजनम् तिलस्थाने यवदानञ्च । २अ० ५क० । १ रथारोहणात् पूर्व्वं तत्स्पर्शनमन्त्रः । २ अक्षस्पर्शनमन्त्रः । ३ आरोहण मन्त्रान्मन्त्रश्च । ४ रश्मिस्पर्शनमन्त्रः । ५ गमनप्रवर्त्तमानेषु रथेषु जप्यमन्त्रः । ६ शकटाद्यारोहणेऽपि तस्य जपः ।७ शकटाद्यक्षस्पर्शनमन्त्रः । ८ नावारोहणमन्त्रः । ९ नवरथे विशेषः ।१० कुटुम्बोपयोगिद्रव्याहरणम् ।११ स्टक्सभीपागमनम् ।१२ रथावरोहणमन्त्रः ।१३ नवरथावरोहणमन्त्रः । १४ तत्र जप्यमन्त्रः । १५ तत्र पुनर्जप्यमन्त्रः । २अ० ६क० । १ वास्तुपरीक्षा । २ भूमिलक्षणम् । ३ भूमेरपरलक्षणम् । ४ भूमेरन्यलक्षणञ्च । ५ विद्धदुष्टलक्षणोत्पाटनम् । ६ भूमेरन्यनिम्नतानिर्णयः । ७ भोजनस्टक्स्थाननिर्णयः । ८ तत्फलम् । ९ सभास्टक्स्थाननिर्णयः । १० तत्फलम् । ११ तदपरस्थाननिर्णयः २अ० ७क० । १ वास्तुपरीक्षाक्रमः । २ तत्र खातखननं तत्पूरणञ्च । ३ प्रथमखनध्यमनर्क्षितवास्तुनिर्णयः । ४ अखनितेऽर्के खनेत्पूरणम् । प्रथमखनध्यमनर्क्षितनिर्णयः । ५ ब्राह्मणवास्तुनिर्णयः । ६ क्षत्रियवास्तुनिर्णयः । ७ वैश्यवास्तुनिर्णयः । ८ शूद्रवास्तुनिर्णयः । ९ वास्तुकर्षणम् । १० खण्डचतुष्कोणं दीर्घं वा । ११ वास्तुप्रोक्षणम् । १२ अविच्छिन्नधारया प्रोक्षणे मन्त्रः । १३ अवान्तरस्टक्प्रभेदनिर्णयः । १४ स्तूणानां गर्त्तेषु विशेषविधिः । १५ मध्यमस्तूणागर्त्ते विशेषः । १६ मध्यमस्तूणागर्त्ते मन्त्रः । २अ० ८क० । १ वंशाधानानुमन्त्रणम् । २ वंशाधानमन्त्रः । ३ अग्निकप्रतिष्ठापनम् । ४ तन्मन्त्रान्तरविधानम् । ५ अग्निकसेचनमन्त्रः । ६ वास्तुदोषशमनम् । ७ तत्प्रोक्षणम् । ८ अविच्छिन्नजलधारादानम् । ९ स्थालीपाकप्रपचादि शिवावाचनञ्च । २अ० ९क० । १ स्टक्प्रपदनम् ।

२वीजवदुष्टकृप्रयदनम् ।२तत्काङ्क्षनिर्णयः । ३ तत्र होमकर्म । ५अनुमन्त्रणम् । ६आवतीनां गवामनुमन्त्रणे मन्त्रः । ७एके अन्यत्रुक्तमिच्छन्ति । ८अयातीनां गवामनुमन्त्रणे । २अ०१०क०

तृतीयाध्याये पञ्चयज्ञादिसङ्काल्पानानि कर्माणि । १ पञ्चयज्ञप्रतिज्ञा ।२ पञ्चानां नामकथनम् । ३पञ्चानां स्वरूपकथनम् । ४तेषामकरणे कर्त्तव्यता । २अ०१क०। १ स्वाध्यायविधिः। २ स्वाध्यायाध्ययननियमः । ३ ओंपूर्वो व्याहृतीः सप्तधा वूयात् । ४ सावित्र्यध्ययननियमः । २अ० २क० । १ स्वाध्यायक्रमः । २ अध्ययने दैशकृतिनिर्णयः । ३ अध्ययने पैलाकृतिनिर्णयः । ४ अध्ययने कालविधिनिर्णयः । २अ० ३क० । १ देवतर्पणम् । २ ऋषितर्पणम् । ३ प्राचीनावीती । ४ आचार्यतर्पणम् । ५ पितृतर्पणम् । ६त्रिरावीती । ७तिथिविशेषादौ निषेधवचनं नित्यस्वाध्यायस्यैव, न ब्रह्मयज्ञस्य । ७ब्रह्मयज्ञप्रशंसाध्यायः २अ० ४क० । १ अध्ययनप्रारम्भः । २ अध्ययनकालनिर्णयः । ३तत्र कालान्तरम् । ४ आज्यभागाकृतिः । ५ दधिसक्तुहोमः । ७होममन्त्रः ।७तत्काण्डे ह्रुचा मन्त्राः । ८ एकोमन्त्रः । ९ तत्रापरोमन्त्रः । १० देवताहोमादिकालनम् । ११ जपनियमः । १२ व्याहृतिसावित्रीजपोपवेदारम्भश्च । १३उत्सर्गविधिः । १४अध्ययनकालनिर्देशः । १५ ब्रह्मचारिधर्म्मवृत्तोऽधीयीत । १६ ब्रह्मचारिणामपि अध्ययनम् । १७ श्रवणद्रोणायां गच्छेदित्येके । १८प्रजोत्पत्त्यर्थं जायागमनमपरे । १९ उपाकरणकर्म । २० माघ्यां पौर्णमास्यां तत्करणम् । २१ तत्र सावित्र्यादितर्पणम् । १२आचार्यादितर्पणम् । २३ ततः ब्रह्मयज्ञोत्तरमनुषङ्गकर्म्म । २अ० ५क० । १ काम्यकर्म्मस्थाने पाकयज्ञः । पुरोडाशस्थाने चरुः । २ कामप्राप्तिफलम् । ३ नैमित्तिकहोमः । ५ होममन्त्रः । ६अशुभस्वप्नदर्शने उपस्थानमन्त्रः । ७ तत्र मन्त्रान्तरम् । ८ अशक्तयादौ जपमन्त्राः । ९ अगमनीयगमनादौ आज्यहोमः । १० तत्र समिदाधानं वा । ११ तत्र मन्त्रजपो वा । २अ० ६क० । १अभ्युदितेऽर्के स्वपतः प्रायश्चित्तम् २ तत्र मन्त्रचतुष्टयम् । अभिनिर्मुक्तस्य प्रायश्चित्तहोमः । ३ सन्ध्योपासनम् । ४ तत्र कालभेदे कर्त्तव्यभेदः । ५ तत्र प्रातर्नियमभेदः । ६ तत्र कालनिर्णयः । ७ कपोतपाते होमजपौ । ८ अर्घार्थं गच्छतो होमजपौ । ९ नष्टं वस्तु लब्धुमिच्छतो होमजपौ । १० लब्धान्नमश्नं गमिष्यतो होमजपौ । २अ०७क० । १ स्नानवर्त्तनम् । तत्र आचार्य्यस्य आत्मने वा एकादशगडूषाकरणम् । २उभयोर्हस्तयोरभ्यङ्गाभे आचार्यायैव दानम् । ३ समिदाहरणनियमः । ४ कामनाविशेषे समिन्निर्णयः । ५उभयकामस्यार्द्रशुष्का समित् । ६ समिदाधानादि गोदानम् ।७मन्त्रान् आत्मवाचकान् कुर्य्यात् ।८नारङ्गोन्मर्दनम् । ९ स्नानाङ्गतर्पणविधिः । १० कुशद्वयबन्धनम् । ११ अनुलेपनविधिः । १२ वस्त्रधारणम् । १३ माल्यविधिः । १४ अन्नादानम् । १५ वैश्वदेवान्नादानम् । १६अन्नस्तुत्यादनसमिधादानम् । २अ०८क० ।

तृतीये १ उपवेशमन्त्रः । २ मन्त्रपूर्वं समिदाधानम् । ३ मधुपर्केण पूजनम् । ४ अनुज्ञाते स्वाध्यायकर्त्तव्यज्ञानम् । ५ व्रतविशेषः । ६ निषेधविशेषः । ७ निषेधान्तरम् । ८ स्नातस्य सङ्काल्पाद्यम् । ३अ०९क० । १ गुरवे नामकथनम् । २ उपवेशनाज्ञप्तौ । ३ ऊर्ध्वनामकथनम् । ४ उपांशुजपने मन्त्रः । ५ शिष्यस्य उपांशुजपने मन्त्रः । ६आचार्य्य जपमन्त्रः । ७जपान्तरम् अनुमन्त्रणञ्च । ८ तत्प्रयत्नः । ९ पक्षिणाम् अमनोज्ञा वाचः श्रुत्वा जपमन्त्राः । १० अगम्यागमनोज्ञा वाचः श्रुत्वा जपमन्त्रः । ११ भयप्राप्तौ जपमन्त्राः । २अ०१०क० । १ सर्व्वाभ्योदिग्भ्यो भयप्राप्तौ जपमन्त्रोहोमश्च । २तत्र जप्यमन्त्राः सङ्ख्याविशेषश्च । ३अ०११क० । १ राजसत्काङ्क्षणम् । २तत्र जप्यमन्त्राः। ३ रात्रौ अवचदाने मन्त्राः । ४ धनुर्दाने मन्त्राः । ५ रात्रौ जप्यमन्त्राः । ६ स्त्रीयजप्यमन्त्राः । ७दुःस्वप्नदाने मन्त्राः । ८रजगमने जप्यमन्त्राः । ९अन्नाद्यमन्त्रणम् । १०दूतनेत्रजप्यश्च जप्यमन्त्राः। ११संग्रामराजजप्यमन्त्राः । १२ नारदिगारोहणाये रथे जप्यमन्त्राः। १३राजेज्यमन्त्राः । १४वीर्यवन्त्राः । १५अनुक्रमेण रथगमनम् । १६युद्धप्रहरणनिर्णयः । १७युद्धविभाद्दने मन्त्राः ।१८वाद्याद्यासनमन्त्राः । १९ध्यमाने राजनि पुरोहितजप्यमन्त्राः ।२०तत्पुनर्गमन्त्राः।३अ०१२क०

चतुर्थाध्याये । आहिताग्नेः पोढ़ाप्रयजनादियन्तासोमयागानानि कर्माणि ।१ व्याधिपीडितस्याहिताग्नेः कर्त्तव्यम् ।२ग्रामकामस्य प्रमाणम् ।३ग्रामे वास्तव्याग्ने प्रमाणम् । ४अगदः लोमादिभिरिद्धं ग्रामं प्रविशेत् । ५ अनिद्धं वा ग्रामं प्रविशेत् । ६स्नातस्याहिताग्नेस्त्रिसायंजिघ्रणम् । ७स्नातस्य निर्गोव्रतानिर्देशः। ८स्नातस्य आवासनिर्णयः ।

६ स्रातस्य विस्तृतिनियमः । १० स्रातस्य अधोनिर्णेयः । ११ ब्रह्मयानदेयनिरूपणम् । १२ तत्स्थानस्य वह्नयौधधिस्थानम् । १३ कण्डरिटस्याद्युद्वासनम् । १४ दक्षनक्षत्रयज्ञयानस्य विशेषविधिः । १५ प्रेतस्य केशादिवपनम् । १६ बर्हिराज्यादिसंस्थापनम् । १७ घृषदाज्यनयनम् । ४अ०१क० । १ अग्नियत्तपात्रादिनयनम् । २ प्रेतनयनकर्तृनिर्णयः । ३ यक्टादिना प्रेतनयनभिन्नके । ४अनुसरणीपशुस्थानीयनयनम् । ५ अनुसरणीं गामाकुरेके लक्षाम् एकखुरामजामित्यपरे ८ मधोः सव्यबाहुबन्धन क्रत्वा आनयनम् । ६ तदनुक्तमात्रादीनामानयनम् । १० दाहकर्तृ कर्त्तव्यभेदः । ११दक्षिणपूर्वदेशे आहवनीयनिधानम् । १२उत्तरपश्चिमे गार्हपत्यनिधानम् ।१३दक्षिण पश्चिमे दक्षिणाग्ननिधानम् । १४ चिताग्निचयनम् । १५ चितायां प्रेतसंवेशनम् । १६ प्रेतपत्नीसंवेशनम् । १७ क्षत्रियप्रेतस्य धनुःसंवेशनम् । १८ देवरादिना पत्न्याउत्थापनम् । १६तत्र दग्धे उत्थापके कर्त्तरि, देवरे तेनैव मन्त्रस्य जपः । २०धनुरपनयने मन्त्रः । २१ पुनः कर्त्रुत्थापकयोर्भन्त्रजपः । २२ धनुर्भङ्गा क्षेपः । ४अ०२क० । १ पात्रयोजनम् । २दक्षहस्ते जुहूयोजनम् । ३सव्ये उपभृतोनयनम् । दक्षे पार्श्वे स्फ्यस्य सव्येऽग्निहोत्रहवन्या योजनम् । ५ उरः प्रभृतिषु प्रभृतिनिधानम् । ६ नासिकयोः स्रुवाधानम् । ७ एकां स्रुवं भित्त्वा नासिकाद्वये योजनम् । ८ कर्णयोः प्राशित्राधानम् । ६ एकस्रुचं भित्त्वोभयत्र तन्निधानम् । १० उदरे स्रुचः पात्रीनिधानम् । ११ तत्र सप्तवत्तधानक्रमसप्तयोजनम् । १२ उपस्थे यज्ञपात्रनिधानम् । १३ अरणीमूर्वोः, उदूखलमुषले जङ्घयोर्निदध्यात् । १४ पादद्वये सूर्पनिधानम् । १५ एकस्रुचं छित्त्वा निधानम् पूर्ववत् । १६ आसेचनपात्रे घृतदाज्यपूरणम् । १७ हवदुपलाद्युपयोगद्रव्यनिधानम् । १८ औदुम्बरस्रुवादिनिधानम् । १६अनुसरण्या वपाखण्डं छित्त्वा तत्र प्रेतस्य शिरोमुखाच्छादनं तनूनप्त्रस्य । २० प्रेतपाणयोर्वृक्ष्ययोर्निधानम् । २१ कूर्चयोः कूर्चाधानम् । २२ प्रेतपाद्योः पिण्डग्राधानमित्यके । २३वृक्षाभावे पिण्डग्राधानमित्यन्ये । २४प्रणीताप्रणयनानुमन्त्रणे । २५दक्षिण जानुपातेन दक्षिणाग्नौ चतुराज्याहुतिहोमः। २६प्रेतस्योरसि पञ्चमाहुतिहोमनन्त्रः ।३अ०२क०।।युगपदग्निप्रज्वालने प्रेतस्यम् । आहवनीयस्य प्राक् प्रेतदेहप्राप्तौ प्रेतस्य स्वर्गलोकगतिः पुत्रविद्यिष्टस्य च फलम् । गार्हपत्यस्य तथात्वे प्रेतस्यान्तरिक्षलोकप्राप्तिः पुत्रस्य इष्टस्य च फलम् । दक्षिणाग्नेस्तथात्वे प्रेतस्य मनुष्यलोकप्राप्तिः पुत्रस्य इष्टस्य फलम् । ५ युगपत्प्राप्तौ सर्वसमृद्धिः फलम् । ईदृक्षनामन्त्रः । ७ दक्षनप्रशंसा । ८ जानुमात्रे गर्त्तस्थाय दाहोत्तरमातिवाहिकशरीरमाख्याय धूमेन सह स्वर्गलोकगमनम् । ६ दाहकर्तृजयमन्त्रः पुत्रतोऽन्यैर्वा सर्वेषां गमनञ्च । १० स्नात्वा स्नाता प्रेताय उलाङ्गलिं दत्त्वान्यानि वासांसि परिधाय दिवा आनक्षत्रदर्शनात् तत्रावस्थानम् । ११ रात्रौ आदित्यमन्त्रं हुत्वा गृहं प्रविशेत् । १२ गृहप्रवेशे इन्द्वादिपूर्व्वापरनिर्णयः । १३ गृहमागत्य अश्मादीनासपस्पर्शः । १४ तस्मिन् दिने अन्नं न पचेरन् । १५ क्रीतान्नेन वर्त्तेरन् । १६ सपिण्डानां शिरोमन्त्रारक्तवर्णाद्यायनम् । १७मन्त्रगुरुकृतौ द्वादशरात्रं तथायनं दानाध्ययनवर्जनञ्च १८ सपिण्डेषु दशाहं दानाध्ययनवर्जनम् । १६ उपनेतृगुरौ असपिण्डेऽपि दशाहं द्वादशाहं वा यौगपद्यम् । २०अदत्तासु स्त्रीषु कृतासु दशाहम् । २१ एकदेशाध्यापकेषु त्रिरात्रम् । २२ असपिण्डकर्तृकौ त्रिरात्रम् । २३दत्तासु स्त्रीषु त्रिरात्रम् । २४ अदत्तजाते त्रिरात्रम् । २५ असम्पूर्णगर्भे त्रिरात्रम् । २६ सब्रह्मचारिषु स्रोत्रिषु एकाहम् । २७ समानप्रवरेषु श्रोत्रिये एकाहम् । १ अस्थिसञ्चयनम् । २ स्त्रीपुंसयोरेकेन कुल्मलियमः । ३ प्रोक्षणमन्त्रौ । ४सञ्चयने पूर्व्वापरनिर्णयः । ५ सञ्चयनानन्तरमवधाननिर्णय । ६ पांशुप्रक्षेपः । ७ पांशुप्रक्षेपानन्तरम् उत्तराङ्गं जपेत् । ८स्नात्वापालेन कुम्भं निधाय पृष्ठतोऽन्वेक्षंस्त्या गत्वाप उपस्पृश्य प्रेतायाश्मदानम् । ४अ०५क०।१ स्नातगुरुकस्याभ्यतोवापत्नीधिमाणपस्त्रादिकस्यामावस्यां शान्तिकर्म । २कव्यादाग्निकरणम् । ३ चतुरर्थे तदग्निपरित्यागः । ४पृष्ठतोऽन्वेक्षणादि क्रत्वा प्रत्यागत्याप उपस्पृश्य क्षेत्रादीन् वापयित्वा नवघटादिकृषपिञ्जूलान्तकल्पनम् । ५पचननामाग्निजननम् । ६ अग्निदीपनम् । ७अग्निसेवनम् । ८ अनड्वर्ङ्मार्गयमात्यारोहणम् (कर्तृभिन्नाः सर्वे पुमांसः स्त्रियश्चामात्याः) । ६परिधिपरिधानम् । १०आक्रान्ति चतुष्टयमन्त्रः ।११अमात्याः स्त्रियः तत्पत्यन्तर्धानवनीतं गृहीत्वा तेनाङ्गुलीपर्वनिष्ठाभ्यां चक्षुषी आक्षीरन् ।१२अन्यासां स्त्रीणां कर्त्रा वीक्षणम् ।१३कर्तुः अश्माभिमर्शनम्

।१४परिक्रमणमन्त्रजपः । १५क्षिप्तिहृदादिसमाप्तनम् । १६ अक्षतवासस्याच्छादोपवेशनम् । १७ आ उदयादग्नय आधीरन् ।१८क्षौमसमाप्तनम् । ४अ०९ब्र०।। आग्नाधिकारः । १पार्श्वयोरग्न्याहुतिभ्यां जोदिङ्मन्त्राभ्यां पात्रविप्रक्षणसंस्कृते ।२यपिण्डोत्करणनिरूपणे यत्रेष्टं विप्रसंख्या तत्र तु तत्रार्धा तत्र एव आर्धा इति भेदः। ४पिण्डपितृयज्ञे ऊनानां पिण्डनिधरणादीनां आद्धेऽतिदेशः। ५ ब्राह्मणाय अन्नदानम् ।६दर्भासनदानम् ।७पुनर्जलदानम् । ८अर्घपात्रे तिलावपनं तन्मन्त्रस्य। ९ पित्र्यं वर्म अग्रदक्षिणं आर्घ्यम् । १०अर्घदानम् । ११ अर्घदानात् पूर्वं अन्नदानम् । १२अर्घस्थजलनिवेदनम् । १३ अर्घानुमन्त्रणं तन्मन्त्रस्य । १४अर्घ्यं आपो वश्यिम् पात्रे एवीनाताः तत् प्रथमपात्रं नोद्धरेत् । ४अ०७ब्र० । १ गन्धादिदानम् । २ अग्नौ करणानुज्ञा । ३ प्रत्यनुज्ञा । ४ अग्नौ करणक्षौमः । ५ पाणिभ्यां वा क्षौमः । ६ देवपितृभ्यां क्रमेणाग्निसक्थपाणिसक्थे । ७ भोजनपात्रे अन्नदानविधानम् । ८ घृतमेघान्नदानम् । ९ भोजनपात्रे अधिकान्नदानम् ।१०भोजनात् ऊर्ध्वम् पात्रान्नम् ।११पित्र्यकार्यमन्नसृज्य मेधनिवेदनम् । १२ अन्नाद्यान्नेषु पिण्डनिधरणम् । १३आद्यान्नेषु तदिच्छेत् । १४ब्राह्मणानुज्ञानविधिरिदानम् । १५अस्तु अक्षेति प्रत्यनुज्ञानम् विसर्जनम् ।४अ०८ब्र० । १ अथ भुञ्जानः । २ तस्य आचारनिर्णयः । ३ यद्भिक्षणम् । ४यद्भुञ्जानम् । ५अन्नाविन्दुन्नुन्ना यद्भिक्षेत् । ६ अन्यद्वहयं अन्यां वार्यं वृणीयात् । ७ यत्र-भिक्षेत् । ८थिर आरभ्य पुरुषदेयपर्यन्तमभिक्षेत् ।९यद्भुञ्जानः । १० यद्दीक्षितपर्यन्तं भोजनम् । ११ तत्र दिग्निर्णयः । १२आसनदर्शनायोन्मदेशे भोजनम् । १३अङ्गरालाचूर्णसदितेऽग्नौ आज्ये भुञ्जानः कार्यः । १४यूपनिखननं तत्र यद्भुञ्जानम् । १५मोक्षणादि यद्भुञ्जानेन समानम् । १६ विदेयत्वं पात्रा पत्नाग्नेय आ यवाक्षौमः । १७करादि ब्राह्मणान्तं क्षौमनन्नः । १८ ऊर्ध्वादिवस्त्रनाशको वा मन्त्रः । १९वस्त्रधारको वा मन्त्रः । २०वस्त्रनिधरणम् । २१यत्किं चित् अन्नं यतर्हि यद्भुञ्जानम् ।२२ सर्वेभ्यस्तूष्णीं तेभ्यो नमः । ४अ०१ब्र० । १ अथ भोक्तृणां नियमः । २ भोक्तृणां संख्या । ३ भोक्तृणां संख्यानियमः । ४ भोक्तृणां संख्यानियमः । ५ भोक्तृणां संख्यानियमः । ६ भोक्तृणां संख्यानियमः । ७ भोक्तृणां संख्यानियमः । ८ भोक्तृणां संख्यानियमः । ९ भोक्तृणां संख्यानियमः । १० भोक्तृणां संख्यानियमः । ११ भोक्तृणां संख्यानियमः । १२ भोक्तृणां संख्यानियमः ।

२ अग्निकार्य्यसमापनम् । ३ऋतुवदुदकावाप· । ५ पिण्डक्रिया । ६ नवश्राद्धानि । ७ सञ्चयनम् । ८ दशाहकृत्यम् ९ एकोद्दिष्टम् । १० एकोद्दिष्टविधिः । ११ सपिण्डीकरणम् । १२ आमश्राद्धम् । १३ अतीतसंस्कारः । १४ यात्राविधिः । १५ नारायणबलिः । १६ नागबलिः । १७ पुराणमेकोद्दिष्टम् । १८ दर्शश्राद्धगणः । २० अ० पदार्थाः ।

३ अध्याये १ पूर्त्तकर्म्मादीनि अग्निकार्य्यान्तानि कर्म्माणि । १ पूर्त्तानि । २ मण्डपादिविधिः । ३ प्रतिमाद्यङ्गानि । ४ प्रासादप्रतिष्ठादि । ५ तद्दानफलानि । ६ अग्निस्थापनादि । ७ देवाभिषेकादि । ८ यज्ञादिप्रतिष्ठादि । ९ यात्रादिविधिः १० आरामादिविधिः । ११ क्षौमविधेयः । १२ प्राचीं दिशमन्यावर्त्तते । १३ दक्षिणां दिशमन्यावर्त्तते । १४ प्रतीचीं दिशमन्यावर्त्तते । १५ उदीचीं दिशमन्यावर्त्तते १६ पृथिवीमन्यावर्त्तते । १७ अन्तरिक्षमन्यावर्त्तते १८ दिवमन्यावर्त्तते । १९ राशिमन्यावर्त्तते । २० परमन्यावर्त्तते । २१ सर्व्वा दिशोऽन्यावर्त्तते । २२ अग्निकार्य्यफलम् । ४अ० गता· एते पदार्थाः ।

आग्नेयण पुंस्त्री अग्न+गोत्रे अण्+फक्ञ् । अग्नेर्गोत्रापत्ये स्त्रियां ङीप् । [अग्नावतानर्हेरपत्ये स्त्रियां ङीप् ।

आग्नावतान पुंस्त्री० अग्नावतानमर्हेरपत्यम् विदा०अञ् ।

आग्न्यास पु०आ+ग्रस–घञ् ।१निर्हरणे २आत्मरक्षणे ३भीतस्य भयनिवारणार्थे व्यापारे ४खण्डने च "धारणाग्न्यासनं नाम नमस्तु" स्तुत० । [२खण्डनार्थकधातुजे ।

आग्न्यासक त्रि० आ+ग्रस–ण्वुल् । १आग्न्यासकारके

आग्न्यासन न० आ–ग्रस–णिच्–ल्युट् । १खण्डने ।"आग्न्यासनञ्च शत्रूणां दुःखार्त्तानां प्रकीर्त्तितम्" भा०आ० १अ० २आग्न्यासकारके "तद्विद्धि द्वितीयं क्षुद्रकाग्न्यासनम्" भक्ति० । [तद्भावदर्शनाग्न्यासि" भक्ति० ।

आग्न्यासिन् त्रि० आ+ग्रस–णिनि । प्रत्याग्न्यासुके । "जनस्तु

आग्न्यास्य त्रि०आ+ग्रस–ण्यि–यत् । १खण्डनीये । क्लीव् । २खण्डनिमित्तेऽर्थेऽव्य० ।

आग्निक त्रि० अग्नान् भारभूतान् हरति वहति आवहति वा ठक् । भारभूतवाहके १हारके २वाहके २आवाहके च । अग्नय निमित्तं संयोग उपधासो वा ठक् । अग्न्याधानकर्म्मणे ३संयोगे ५उपधाने ६निमित्ते च ।

आग्निल पु० आग्निनी पूर्णिमा लक्षितु यागे अण् । अग्नाल खाते चान्द्रे १मासभेदे "अग्नलमासिके ग्रहे यागार्थे दीक्षाग्नलम्" इतीक्षणतत्त्व० । १आग्निलमासधान आग्निलमासात् अण् अतोलुक् । २दर्शभेदे स्त्री ङीप् । "वैष्णवा आग्नेयीमेवदर्शमाहरति" शत० ब्रा०८,२,१,११। आग्निनी देवते अस्य अण् ।१चितिभेदे च "प्रत आग्निलोः पवमान" ऋ०९,८६,४, यज्ञाग्निस्थोक्तमन्त्रेषु वैष्णवदैवत्यः यज्ञप्रायश्चित्तः यज्ञायज्ञा एकया न विंशतिर्मन्त्राणा एकचत्वारिंशदुत्तरशतीया चितिः" शत० ब्रा० । ३अग्नियजमानभेदे पु० "कौण्डेन सङ्काग्निनो द्विजमाजः सर्व्वत्र" काया० १२,६,२, "मैत्रावरुणस्य न आग्निलस्य मे इति" यजु० १८,१९, अग्निर्यो भवः अण् ।५ अग्निनीकुमारदेवतयोः त्रि० व० । अग्निनी देवते अस्य अण् । अग्निनीकुमारदेवताके ६ यज्ञे ७यज्ञे च । आश्वलायनगृह्ये उदा० ।

आग्निनी स्त्री अग्निना अग्नाधारचिता नक्षत्रेष्टि युक्ता पूर्णिमा नक्षत्राण् ।१आग्नेयीपौर्णमासीयाम् २आग्निनयज्ञोक्तार्थे च ।

आग्निनेय पु० द्वि० अग्निन्याः दीक्षाकारचिताः संज्ञायाः अपत्यं ढक् । १अग्निनीकुमारयोः, तयोः तच्चा उत्पत्तिकथा अश्वमेधपर्व्वणि २२८पृष्ठे दृश्या । तस्यापत्यं विदा० अञ् ।२नकुले २सहदेवे च पु० तयोर्दीक्षाग्निनीकुमाराभ्यामुत्पादितत्वात् तथात्वम् । "जिगाय समरे वीरानाग्निनेयः प्रतापवान्" भा०व०४ अ० । अग्नीक्षाकृतगमः गम्याः ढक् । २अग्नीक्षाकृतगम्ये अध्वनि ।

आग्नीध्र पु० अग्नीक्षाकृतगमः गम्याः वा ख्यञ् । अग्नीक्षाकृतगम्ये देशे "सप्तद्वाग्नीध्रो वा इतः स्वर्गो लोकः" ऐत० ब्रा० । अष्टचत्वारिंशाग्नीध्राणि स्मृतिः ।

आग्नेय त्रि० अग्ना देवता अस्य ढक् । १ तद्देवताके कृत्तिकादौ अग्नाया अपत्यम् युष्मा०ढक् । २अग्नाभवे ।

आग्नाढ पु० आग्नाढी पूर्णिमाऽस्मिन् नक्षत्रेऽण् । अग्नाल खाते चान्द्रे १मासभेदे "आग्नाढस्य प्रथमद्विदर्शे" लेखकः "यदे विष्णुः शयनाढे आग्निक्षे प्रतिबुध्यते" इति हरा० । आग्नाढी पूर्णिमा प्रयोजनमस्य अण् । प्रतिपत् भाद्रे मासाद्ये २दर्शे "उपक्षितायाग्नाढम्" काद० "तत्रुद्धत्य च नक्षत्रीतप्रतेनाग्नाढिना" काद० । "अग्नाजिनाग्नाढवरः प्रगल्भवाक् 'कुमा० । ३मासभवर्त्तते पु०मेदि०पु०ढक् ढ० । आग्नाढोऽनुमासेऽनु । आर्थे अनु आग्नाढोऽनुमासेऽनु ।

आग्नाढा स्त्री आ+ग्नढ–क्त "अग्नाग्नाढेति" भा० निर्देशात् नि० मासनीमासाभावे । राधिमासके १विधितिथौ २दर्शविशे च मासे "मूलं पूर्व्वाग्नाढा प्रथमचाणुत्तरोत्तरा" ज्योत्स्नी । अग्नरक्षतृपदिष्टेयं अग्नया चार्द्रे अनिराग्ना" धृतयोः दा च पूर्व्वा उत्तरा च । तत्र पूर्व्वेज्याः प्रथमपादस्य

धनूराशिघटत्वसुखरायाच्च शेषपादत्रिभक्ष मकरराशि-घटकत्वम् तत्रार्थे न० च आषाढभूः" भक्तकल्पद्रुः तस्य तत्र जातत्वात्तथात्वम् ।

आषाढाभव पु० आषाढायां नक्षत्रे भवति भू-अच् । भक्तकल्पद्रुके आषाढाजातोऽत्यत्र क्विप् । आषाढासूरत्यत्र ।

आषाढि स्त्री आ+सह-क्विन् नि० ओतू लत्वञ्च । १सम्यक् सहने "तथाषाढेः सौश्रमतेयस्योपदधुः" यत० ब्रा० ६,२,१, २७ । २रतिदेव्याः स्थाने च शब्दार्थद० ।

आषाढी स्त्री आषाढया नक्षत्रेण युक्ता पूर्णिमा "नक्षत्रेण युक्तः काल:" पा० ट्यण् । १आषाढमासीयपौर्णमास्याम् । २यज्ञियेष्टकाभेदे च ।

आषाढीय त्रि० आषाढायां भवः "अधिकाषाढायामिति" पा० तस्येदम् इत्वात् वा छ । १आषाढानक्षत्रे भवे २आषाढसम्बन्धिनि च ।

आष्टम पु० अष्टमोभागः अण् । अष्टमे भागे ।

आष्टु अव्य-व्याप्तौ इनु इडित्त्व । आकार्ये उज्ज्व० ।

आस उपवेशनेऽदादि० आ० अक० सेट् । आस्ते आस्ताम् आसते आसीत आस्ताम् आस्तु आहुम् आस आसत आसिष्ट आसांबभूव आसामास आसाञ्चक्रे आसिता आसिष्यते । आसीनः आसितम् आसितवान् आसितम् आसिता आसिः आसः आसनम् आसना "य आस्ते मनसा स्मरन्" गीता "दिवि देवास आसते" ऋ० १,२०,२ । "आसीतामरणात् क्षान्त्या" नीति गुरुणा सार्द्धं शिक्षाफलञ्चनौषु" इति च मनुः । "सुखितमास्व ततः परदां यतम्" मा० द० । "निषद्यतामध्वं पितरस्त्र शेध्वम्" भट्टि० । "जगन्ति यस्यां सविकाशमासते" माघः । "आसिष्ट कैकल्य गुहा अरण्ये" भागु० । "आसीत संयतो भूत्वा पूर्वां सन्ध्यां जपन्द्विजः" सन्ध्यामासीतामिसखं गुरौ" मनुः । "इच्छामि नित्य मेवाहं त्वया पुत्र ! सहासितुम्" भा० व० । अ० 'जनकोऽह वैदेह आसाञ्चक्रे" यत० ब्रा० १४,६,१,१ । तूष्णींभूय भयादासाञ्चक्रिरे सुरगणास्तदा" भट्टिः "कैलासशिखरासीनम्" तन्त्रम् 'आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणाम्" मेघदू० । "आसितं भाषित चैव यत्र मत्र्यस्य कुत्सितम्" रामा० । "जन्मासिताद्विजन" मा० द० ।

अधि-अध्यारोहणे सक० । गगनमध्यमध्यास्ते दिवाकरः भाद० "आयामध्यास्त सैनिकाः "ययौ जगाध्यासितमाहवानि" इति च रघुः । अध्यूढिपमध्यास्ते परभृता" विक्रमो० । "आचख्यौ दिवसमध्यास्य शासनात् परमेश्वरः" रघुः । अलाधारञ्च मैथिली । **अनु-पश्चादुपवेशनेन वेशने** सक० । "अन्वासितमरुन्धत्या साक्षेव कृषिर्जनम्" रघुः । "इतः सञ्जायतामाशे सदैव मनदं वयः" भा० स० १० अ० ।

अभि-आभिमुख्येन स्थितौ नैकट्ये च अक० अभ्यासः अभ्यासोयत्ते जपूर्यं निमापद्मेरन्" छा० उ० ।

उद-औदासीन्ये प्रकृतकर्म्मण उपरमे अक० "विधाय वैरं सामर्षं नरोत्तौ य उदासते" माघः । "उदासीनदासीनः" गीता

उप-सेवने सक० । "नोपासते यश्च पश्चिमाम्" मनुः । "उपासते हरिहरौ सकारोऽप्यते यतः" वाक्यप० । "वायुवच्चानुगच्छन्ति तथा दीनानुपासते" मनुः । "ऋतवस्तपासते" कुमा० ।

परि-उप-उपासनस्य प्रकर्षार्थे "यथैव क्षुधिता बाला मातरं पर्य्युपासते" "पितामहं च के तस्यां सभायां पर्य्युपासते" भा० स० १ अ० । (एनम्) "भुजङ्गाःपर्य्युपासते" कुमा० ।

सम्-उप-सम्यगुपासने सक० । "सम्पासत पुत्रभोज्यया" रघुः

परि-परितः स्थितौ अक० सम्यक् सेवने सक० । तामेतद्वाच पर्य्यासते ये चेमे ब्राह्मणाः" यत० ब्रा० ।

सम्-सम्यक् स्थितौ उपवेशने च । "भोगिभोगसमासीनम्" "पश्चिमां तु समासीनः" मनुः ।

आस् अव्य० आ+अस्-क्विप्-आस+क्विप् वा । १ करणे, २आक्षेपे "आः क एष मयि जीवतीति" सुद्रारा० । "आङुरात्मनु इयामकण्ठपाठक" वेणी० । ३क्रोधे, ४सम्भ्रमे, ५पीडायां सगर्वगर्जने च । "आ जिघेतदिति क्रोधादाभाष्य महिषासुरः" देवीमा० । ६खेदे "विद्यामातरमाः प्रदर्य्यन्धयन्तु भिक्षामहे निघृणपाः" उद्भटः ।

आस पु० आस-घञ् । १आसने २स्थितौ ३उपवेशने आस्यतेऽनेन करणे घञ् । ४उपवेशनस्थाने शुक्लपार्श्वभागे "यथा कपास पुण्डरीकमेवमक्षिणी" छा० उ० आन्दस न० । अस्यते क्षिप्यतेऽनेन अस-करणे घञ् । ५धनुषि "स सासिसासुरुः सासः" किरा० "सासः सचापः" मल्लि० । ६घासः अस क्षेपे भावे घञ् । ७ विक्षेपे निरासः ।

आसक्त क्ति० आ+सनुज-क्त । १आसक्तियुक्ते विषयान्तरपरिहारेण तदेकतानतयाभिनिष्टे २अनवरते न० भट्टा० ३तत्परे ४सम्यक्संयुक्ते च त्रि० आसक्तचित्तः आसक्तचेताः ।

आसक्ति त्रि० आ+सनुज-क्तिन् । विषयान्तरपरिहारेण कविषयावलम्बने "ते देवा आसक्तिमलं वहन्तः" "आसक्तवन्तं वहन्तः इति च" यत० ब्रा० ६,२,१,११,१२ "गीत-

क्षोक्षितं भवति ज्ञानाक्षक्तिर्भवति" ऋ०१०,८५,२८ ।

आसङ्ग पु० आ+षञ्ज–घञ् । १अभिनिवेशे, प्राप्तस्योपस्थिकरणं वा नश्वतो वस्तुनः २रक्षणाभिलाषे, ३भोगाभिलाषे, ४ अहंत्वाभिमाने ५ विषयान्तरपरिहारेण चेतस एकत्राभिनिवेशे च । "नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ संकल्पः" भा०द० । "तेऽक्षरात्परतोऽथ आसङ्गाद्विभवत्यचक्षुः" यत०आ०१,१,२,१ "तथोर्ध्वेन लुप्यमानमासङ्गो न विन्दति" यत०आ०५२,१,५, "त्यक्त्वा कर्मफलासङ्गम्" गीता । ई सम्यक् सम्बन्धे "सर्वथाऽसङ्गमपि प्रकाशते" कुमा० । आसज्यते कर्मणि घञ् । ७आसञ्जनीये उत्तरासङ्गः "त्वगुत्तरासङ्गवती त्रिवीतिनीम्" कुमा० । ८सौराष्ट्रमृत्तिकायां राजनि० ९अनवरते अ०१० तुहति लि० झटा० । सौराष्ट्रमृत्तिकाया गात्रे आसञ्जनीयत्वात्तथात्वम् । अनवरतस्य च सततसम्बन्धात् आसङ्गत्वम् ।

आसङ्गल्य न० न सङ्गतः तस्य भावः यञ् यतुरादिषु पर्युदासात् नोत्तरपदवृद्धिः । सङ्गत्वाभावे असम्बन्धे ।

आसङ्गिनी स्त्री आसङ्गः सप्तम्यन्तस्य इनि ङीप् । १यात्रायां त्रिकाण्ड० । २आसङ्गयुक्ते त्रि० स्त्रियां ङीप् ।

आसङ्गिम पु० आसङ्गे भवः डिमच् । सुश्रुतोक्ते कर्णबेधासङ्गकर्णबन्धनजातिभेदे । "तत्र समासेन पञ्चदश कर्णबन्धना जातयोभवन्ति वक्त्रश्च वन्यूरक आसङ्गिम"इत्यादिना विभक्ते "अभ्यन्तरदीर्घैकपालिरासङ्गिमः" इति सुश्रुते व्याख्याते ।

आसञ्जन न० आ+षञ्ज–ल्युट् । १आसङ्गे २सम्बन्धसम्बन्धे "प्रततिसन्ततयासञ्जनात्" मनु० । चित्र–ल्युट् । ३योजने

आसञ्जित त्रि० आ+षञ्ज–णिच्–क्त । संयोजिते

आसत्ति स्त्री आ+सद–क्तिन् । १नैकट्यसंबन्धे २प्राप्तौ न्यायमते १प्रत्यासन्नजनकसन्निकर्षे "आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते" भाषा० । ४शाब्दबोधोपयोगिन्यामव्यवधानेन पदजन्यपदार्थोपस्थितौ । "आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते । कारकसन्निधानन्तु पदस्यासन्निधीयते, भाषा० "वस्तुपदार्थश्च वस्तुपदार्थेनान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिः कारकम् । तेन गिरिर्भुञ्जतामग्निमानयेत्यादौ देवदत्तेनेत्यादौ न शाब्दबोधः । नीलो घटो इत्यं पट इत्यादावासत्तिसत्त्वाच्छाब्दबोधः । आसत्तिसत्त्वाच्छाब्दबोधाभावेऽपि न क्षतिः । नन्वत्र जलं जलं कुरुष्वेति वाक्ये देवदत्त इत्यत्र तत्तोत्तरपदस्मारकाभावे पूर्वपदस्मारकत्व नाशात् व्यवधानेन उत्तरपदस्मारकासत्त्वात् इति चेन्न प्रत्येकपदसंस्कारे सत्यनावश्यिकयत्नस्मारकत्वाव्यवधानेनोपस्थितेः नानासन्निकर्षेरेकप्रत्यक्षवेद नानासंस्कारैरेकस्मरणोपपत्तेरपि सम्भवात् । तावत्पदसंस्कारसहितचरमपदस्य ज्ञानस्यैवोधकत्वात् । अथवान्यथा नानावर्णजपदस्मरणम् । परन्तु तावत्पदार्थानां स्मरणादेवैदं खलेकपोतन्यायात् तावत्पदार्थानां क्रियाकर्मभावेनान्वयबोधरूपः शब्दबोधो भवतीति केचित्" सुक्ता० ।

शाब्दबोधहेतुः आसत्तिश्च शब्दचिन्तामणौ निरूपिता यथा । "आसत्तिश्चाव्यवधानेनान्वयप्रतियोग्युपस्थितिः सा च क्वचिन्नानुभवोऽतोनान्योन्याश्रयः अथ नानाविधेच्छाकर्मकर्तृकरणाधिकरणक्रियादिपदज्ञानजन्यक्रमिकपदार्थस्मृतीनां न योगपद्यं सम्भवति आशुतरविनाशिनां क्रमिकाणां मेलकानुपपत्तेरिति चेन्न तावत्पदार्थान्वयबोधः विशेषणज्ञानसाध्यत्वाद्विशिष्टज्ञानस्येति चेत् औत्पत्तिकसंस्कारानुभवजन्यसंस्कारमेलकादेव तावत्पदस्मृतिः तत्र एकदेव तावत्पदार्थस्मृतौ सत्यां वाक्यार्थानुभवः न चान्त्यविषयसंस्कारेणान्त्यस्य न स्मरणमिति वाच्यं वाक्यार्थानुभवानुपपत्त्या फलबलेन संस्काराणां परस्परसहकारेण तत्तत्स्मरणसम्भवात् प्रत्येकपदसंस्काराणामिवानन्यगतितया पदस्मरणे । अथ "यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते । तेन तेनान्वितः शब्दः पदैरेवावगम्यते" नचैवमन्वयज्ञानाभिधानं न स्यात् विरम्य व्यापाराभावादिति वाच्यं एवमपि प्रथमपदे चेत्यनुपपत्तेः उत्तरस्य चेदं स्मारकीवैलक्षण्यं न पूर्वस्येति चेत् अस्तावदेवं तथापि चरमज्ञानावृत्पदार्थघटितवाक्यार्थानुभवे उक्तैव गतिरनन्यगतित्वात् । अत्र वदन्ति । सन्निधानं पदजन्यैवान्वयबोधहेतुः द्वारनिराकाङ्क्षत्वेनापि निधानादिनान्वयबोधदर्शनात् न च द्वारं निधेरीतियद्यप्याकाङ्क्षितं अनुपयोगात् अर्थस्यैवान्वयप्रतियोगित्वादाकाङ्क्षत्वात् अर्थापत्तेरपपादकविषयकत्वात् न च शब्दज्ञानस्यापपादकमपि तु तदर्थः । अवश्यं कल्प्यार्थाकाङ्क्षयैव दैवमसम्भवशब्दस्मृतेरन्यथासिद्धेः अन्यथा पदबोधितस्यैवार्थस्यान्वयबोधकत्वमिति नियमशक्तिकल्पनापत्तिः आर्थान्वयपरत्वाच्छब्दानां द्वारमिति न निधानान्वयबोधकमिति तदन्वयबोधार्थमवश्यं शब्दकल्पनमिति चेत् लक्षणायां अभिधाराद् तत्रार्थेपात्तिप्रमेण कार्यान्वयबोधाच्च अथ द्वारपदस्मृतभावात् निधेरिह शब्दस्य कल्प्यते लाघवात् न च निधानाभिधायकाभावेन शब्देनोपस्थितौ विनिगमकविरहः संस्कारतारतम्यात्-

यदविशेषश्रुतेरिति चेत् न आकाङ्क्षादिसत्प्रतियोग्यन्वितस्यार्थपरत्वस्य क्लृप्तत्वाल्लाघवेनार्थाध्याहारात् न च श्रुतपदानि लक्ष्यप्रयोजनानीति लक्ष्यमध्याहृते तेषां तात्पर्यमिति वाच्यं श्रुतार्थान्वयानुपपत्त्याध्याहृते तात्पर्यात् लक्ष्यलक्षणोदनं पचतीत्यत्र सर्वमभिव्याहृतमात्मादन्वयबोधः लक्षणादेरपि श्रुतत्वादिति चेत् न तात्पर्यनियमादिति वेदि 'यत्परः शब्दः स शब्दार्थः' इति न्यायात् अन्यथा तवापि दैवयात् श्रुतलक्षणापदोपस्थानेनान्वयबोधः स्यात् अथ देवदत्त ओदनमित्यादिवाक्ये क्रियापदाध्याहाराभावेन कर्तुरनभिधानात् श्रुतोक्ता स्यादिति चेत् न अध्याहृतेनापि पचतिपदेन कर्तुरनभिधानात् । कर्तृसंख्याभिधित्सेति चेत् न, देवदत्तस्य पाकदत्वात् तृतीयापत्तेः तात्पर्यं तत्रास्य व्यवस्थेति चेत् तुल्यं नन्वेवं द्वारं विधेरोदनादौ विधानाद्वाहुलके विधानोपस्थापकपदत्वेनान्वयबोधजनकत्वमिति चेत् न अन्वयप्रतियोग्युपस्थापकपदत्वेनजनकत्वात् न तु तदुपस्थापकत्वावच्छेदकत्वेन गौरवात् एवं विधानान्वयबोधेऽपि अन्यथा गौरवात्तण्डुलयोरन्वयबोधोन स्यात् तण्डुलस्याभावत्वादिति उच्यते क्रियापदोपस्थापिता क्रिया कारकपदोपस्थापितं च कारकं परस्परमाकाङ्क्षति न तूपस्थितिमात्रम् अन्यथा द्वारं कर्मता विधेरिति द्वारं विधानमृतिरित्यत्रापि क्रियाकर्मणोराकाङ्क्षाद्वयानुभवोधप्रसङ्गः क्रियाकर्मणोरुपस्थितेस्तुल्यत्वात् एवंविधपदोपस्थापिते परस्परमाकाङ्क्षा नास्तीति चेत् तर्ह्याकाङ्क्षायां यद्विशेषो पस्थापितत्वं तत्रं तदुपस्थितिमात्रम् । अर्थविशेषेऽर्थाभावात् न तत्रान्वयबोध इति चेत् न विधेरिति यद्वं विना द्वार मित्यस्याप्यर्थाभावात् तद्वर्थप्रयोगे साधुत्वस्य तुल्यत्वात् साधुत्वज्ञानस्यान्वयबोधेऽप्रयोजकत्वात् गोपदाद्यत्र शक्तिग्रहाद्यत्र अन्वयबोधात् न चात्राप्तसंसर्गाप्रबोधकाभावात् । तस्मात् क्रियापदस्य कारकपदेन, कारकपदस्य च क्रियापदेन सकाङ्क्षान्वयबोधत्वं नत्वेवं विनापदस्य । अपि च यत्कर्मकक्रियापदप्रयोगं विना द्वितीयानुपपत्तिः क्रियापदार्थबोधे द्वितीया चेत् पदः ज्ञानजन्यं ज्ञातिरित्यत्रापि द्वितीयापत्तेः तथा पुरोभ्य इत्यत्र क्लृप्तपतिपदाध्याहारं विना चतुर्थ्यनुपपत्तिः यदि च क्लृप्तपतिपदयोगे चतुर्थी तदा मुक्तिस्पृहनीयत्वादापि स्यात् क्लृप्तपतीच्छति पदबोधेत्यापत्तेः । अत्र वाक्यार्थे द्वारं मुख्यत्वं इत्यत्र विधेरिति क्लृप्तमिति पदाध्याहारोऽनुभवते तत्रान्वयबोधार्थं तत्रान्वयप्रतियोगिज्ञानादेवोपस्थितेरिति चेत् तर्हि क्रियापदप्रयोगं विना न कारकविभक्तिः कारकपदप्रयोगं विना न तदन्वयबोध्यं क्रियापदमिति केवलकारके क्रियापदाध्याहारः केवलक्रियायाश्च कारकपदाध्याहारः साधुत्वार्थमावश्यक इति तत्तदन्वयबोधोपस्थितिरन्वयबोधौपयिकी । तस्मात् क्रियाकारकपदोपस्थापितयोरेव क्रियाकारकयोः परस्परमाकाङ्क्षेति यद्वाध्याहारएव अत्रोक्तेपे वक्ष्यामः" ।

व्याख्यातं चैतत् मथुरानाथेन दिक्कालशब्दोद्धृत्यते "आसत्तिं लिङ्गयति आसत्तिश्चेति अन्वयप्रतियोगिनोःपदार्थयोरव्यवधानेनोपस्थितिरासत्तिरित्यर्थः आन्वयितत्वसम्बन्धेन तत्पदार्थोपस्थितिमती तत्पदार्थोपस्थितितत्पदार्थे तत्पदार्थस्यासत्तिरिति फलितार्थः नचैवमासत्तिज्ञानसहविभागव्याघातः समूहालम्बनरूपपदार्थोपस्थितेरेव सर्वत्र आवश्यकोपयोगितया निर्भेदभ्रमजनकत्वात् देवदत्तेनेत्यादावपि आद्यात्तृतीयाश्रुतपूर्ववर्त्तिसमूहालम्बनोपस्थितिमादायैवान्वयव्यधानेनोपस्थितिसत्त्वात् उपस्थितेरेकस्य व्यवधानासम्भवादिति वाच्यं भेदभ्रमीयव्यवधानस्य पूर्वोत्तरत्वसाधारण्यात् प्रवेशात् तत्र खण्डं खाधिकरणभिन्नत्वे सति यः स्वप्रागभावाधिकरणसमवायिप्रागभावानधिकरणत्वसत्त्वावच्छेदेन यत्समवायित्वेनोपस्थितित्वे सति यद्भिन्नत्वम् । इत्थञ्च प्रथमं या प्रत्येकपदेभ्यः प्रत्येकपदार्थानां स्मृतिः सैवासत्तिरन्वयबोधाध्यवहितपूर्ववर्त्तिसमूहालम्बनरूपोपस्थितिः । अतएवासत्तिज्ञानं हेतुः प्रत्येकपदजन्यपदार्थोपस्थितीनामानुभविनामिनीनां सुलभत्वाद्बोधात् पूर्वं सकलेन खण्डपदेन तात्पर्यग्रहात् नचैवं दण्डी कुण्डली खण्डी देवदत्तस्यादावेकविशेषणजन्यानाविशेषणजन्यान्वयबोधस्थले आसत्तिभावप्रसङ्गः तत्र विशेषणो पस्थितेर्विशेषणान्तरोपस्थित्या व्यवधानादिति वाच्यं प्रज्ञतान्वयबोधानुगुण्यात् खाधिकरणसमवेतत्वसम्बन्धावच्छिन्नत्वाश्रयव्यवधानघटकीभूतसमान्तदर्शत्वात् विशेषणान्तरोपस्थितिरपि न प्रज्ञतान्वयबोधानुगुणः अनन्तगुणत्वञ्च फलबलकल्प्य आद्यव्याहृतपदेन व्यवधानेऽन्वयबोधोऽनुभवसिद्धतृतीयाभिन्नत्वं दानस्तुत्यत्वरूपत्वात् । अतएव निर्भेदभ्रमेऽपि आद्यात् भुक्ताद्विपदार्थोपस्थितिसमूहालम्बनपदोद्धारत्वानतरं चिरतरं विलम्बान्वयपदस्मारितं तत्रान्व

पस्थितेरव्यधानेन तत्पदार्थोपस्थितिस्तत्पदद्वयजन्यतत्पदार्थद्योरन्वयबोधे आसत्तिरिति विवक्षितत्वात् । एवञ्च यत्र पदोपस्थितिरव्यधानेन, पदार्थोपस्थितिश्च व्यवधानेन, यत्र वा पदार्थोपस्थितिरव्यधानेन, पदोपस्थितिश्च व्यवधानेन, तत्रोभयत्रापि नासत्तिः किन्त्वेवंपदोपस्थितिजन्यपदार्थोपस्थितिरपरपदोपस्थितिश्च समूहालम्बनरूपा ततोऽपरपदार्थोपस्थितिः पदान्तरोपस्थितिश्च समूहालम्बनरूपेत्यादिक्रमेण पदार्थोपस्थितित्वमेवासत्तिः पदोपस्थितेरव्यवधानमपि पूर्वोत्तरत्वसाधारणं प्रकृतान्वयबोधानुगुणत्वघटितं बोध्यम् ननु आसत्तिभ्रमादन्वयबोध इति तर्कोपपत्तये स कुलेति वाच्यं बल व्यवच्छितपदोपस्थितावव्यवच्छितायां पदार्थोपस्थितौ अव्यवच्छितत्वप्रवेशे तत्र तत्सम्भवात् । अथैवमासत्तिज्ञानस्य शाब्दबोधहेतुत्वे किं मानं, न च विशेषणज्ञानसाध्यं विशिष्टज्ञानमिति विशेषणज्ञानत्वेन आरम्भणमिति वाच्यम् आसत्तिज्ञानस्यैव पदार्थविषयकत्वेन विशेषणज्ञानत्वादिति चेन्न तद्विषयत्वेनापि शाब्दधीविलम्बात् तस्यापि पृथक्कारणत्वात् न च तद्व्यतिरेकस्थाने आसत्तिविलम्बादेव शाब्दधीविलम्ब इति वाच्यं तस्यापि कल्पनौचित्यात् स्वरूपसती हेतुः किन्तु तज्ज्ञानमेव तद्व्यतिरेकस्थानेऽपि सम्भवादिति चिन्त्यम्लक्षदृश्यं एकस्वरूपस्याप्यज्ञातविशेषणानत्वयोरन्वयबोधस्थानेऽव्याप्तेर्मैत्रात्मनित्यादिना एकदेव पदजातं स्मृतिं स्मृतं वा ततश्च समूहालम्बनपदार्थस्मारकं ज्ञातं तत्राव्याप्तेश्च तत्र प्रत्येकपदार्थोपस्थितेरभावात् नच तत्रापि सामूहिकप्रत्येकपदार्थोपस्थितिः लक्षणीयेति वाच्यम् अनुभवविरोधात् प्रत्येकपदार्थोपस्थितिमन्तरेणापि तत्र शाब्दबोधस्यानुभविकत्वात् किन्तु तस्याः स्वरूपसतो हेतुत्वं स्वयमेव निराकृतं सामूहिकप्रत्येकपदार्थोपस्थितेः शाब्दबोधात् पूर्वं सिद्धत्वात् नाप्येतज्ज्ञानं कारणं मानाभावात् नच्चोपस्थितिज्ञानविलम्बात् शाब्दबोधविलम्बानुभविकः न च दैवाद्दष्टादिनी पदार्थोपस्थितौ पदजन्यत्वभ्रमेण शाब्दबोधानुदयात् तज्ज्ञानस्यापि हेतुत्वमिति वाच्यं इष्टा पदजन्यपदार्थोपस्थितेः स्वरूपसतोहेतुत्वात् तदुभ्रमे शाब्दबोधाभावात् अव्यवधानांशवैयर्थ्याच्च न चैतदुभ्रमानन्तरं शाब्दानुभवदर्शनादेतज्ज्ञानं हेतुरिति वाच्यं यद्धि यत्सत्त्वे यदुत्पद्यते तदेव तत्कारणं, यद्व्यवहितपूर्ववर्त्तित्वावत्पदार्थानामेव घटहेतुत्वापत्तेः न च पदजन्यपदार्थोपस्थितौ अव्यवहितत्वाव्यवहितपदजन्यत्वयोः संशये व्यवहितत्वव्यवहितपदजन्यत्वनिश्चये च शाब्दबोधानुत्पत्तेर्व्यभिचारोहेतोः तयोः प्रतिबन्धकत्वकल्पने गौरवादिति वाच्यं तात्पर्यज्ञानसत्त्वे व्यवहितत्वव्यवहितपदजन्यत्वयोरपेक्षेऽपि शाब्दबोधदर्शनादनुत्पत्तेरेवाक्षिप्तेः नचैवं व्यवहितपदजन्यत्वज्ञानाभावदशायां शाब्दबोधापत्तिरिति वाच्यं तात्पर्यज्ञानाभावदशायां शाब्दबोधानुदयेनाव्यभिचारात् । अतएव यत्र योजनां विनैव तात्पर्यं पर्यवस्यति न योजनापेक्षा । एतेन अन्वयप्रतियोगिपदं तदुपस्थापकपरं तथा च तदुपस्थापकपदोपस्थित्यव्यवधानेन तदुपस्थापकपदोपस्थितिजन्यो यो यत्किञ्चित्तत्पदार्थोपस्थितिस्तादृशी तत्पदार्थोपस्थितौ अव्यवधानमपेक्षितमिति केनाप्यसङ्गतमपास्तं वक्ष्यमाणव्युत्पत्त्याद्यनुग्राहकतर्कैः समूहालम्बनोपस्थितिलाघवाच्च सर्वत्रैव आसत्तिज्ञानस्यापेक्षितत्वेन आसत्तिज्ञानस्यार्थविभागव्याप्यत्वापत्तेः । न च भेदगर्भव्यवधानं विवक्षणीयं पूर्वोक्तादोषाच्चापि इष्टेः । एतज्ज्ञानस्य कारणत्वे लक्षणत्वेन मानाभावाच्च । नैयायिकास्तु अव्यवधानेनेति विशेषणे तृतीया अन्वयप्रतियोगिपदस्य अन्वयप्रतियोगिन उपस्थितिं प्रयोजयति इति व्युत्पत्त्या अन्वयप्रतियोग्युपस्थापकपरं तथा च तत्पदार्थान्वितततत्पदार्थशाब्दबुद्धौ तत्पदे तत्पदार्थव्यवधानप्रयोजिका आसत्तिः, तत्पदोपस्थितीतरव्यवधानं विवक्षितं नीलिम्नीत्यादौ द्विष्ठादिरूपदोषविधेयात् अव्यवधानप्रवेशेनान्वयबोधः । नचैवं घटोऽयं नीलादौ नीलतायामव्यवधानेन नान्वयबोधः स्यात् घटपदं व्यवधानेनोच्चारितमिति विशेषदर्शनेन मानाभावात् इति वाच्यं नीलतोपस्थितत्वावच्छिन्नादेव तत्रान्वयबोधात् न तु घटोपस्थितेः । अव्यवधानज्ञानस्यानुगुणत्वभेदाभेदसाधारणं व्यतिरेकाधारणञ्च वाच्यं तेनैकपदाद्युपस्थितयोः प्रतियोगिनवीनयोरन्वयबोधेऽपि न व्याप्यनुपपत्तिरित्याहुः तदप्यसत् वक्ष्यमाणान्वयव्यवहारात्तिनेवात् पर्य्यादिज्ञानसत्त्वे अव्यवधानज्ञानाभावेऽपि शाब्दानुदयेनाव्यभिचाराच्च नव्यास्तु इत्थं पदधीजन्यपदार्थोपस्थितिरासत्तिरित्यञ्च स्वरूपसत्त्वेव हेतुः अतएव लिङ्गलक्षणं आसत्तिस्तु यद्यपि स्वरूपसत्त्वेव प्रयोजिका इत्यादिप्रभाकरोपाध्यायोक्तं न च एतस्या अपि कारणत्वे मानाभाव इति वाच्यं तथासति आनयेति वाक्यमाकर्ण्यतः प्रत्यक्षेण घटं पश्यतोघटस्य शाब्दबोधापत्तेः घटमानयेति वाक्यमाकर्ण्यतः कारणतया घटपदजन्यस्य

आपद्यरूपत्वात् आक्षायस्य शाब्दबोधापत्तेः नचैवं गिरि-र्भुञ्जनग्निमान् देवदत्तेनेत्याद्देशोगिरिरग्निमान् भुक्तं देवदत्तेनेत्यन्वयबोधापत्तिरिति वाच्यं तथा तात्पर्य्य-ग्रहस्यत्वे दृष्टापत्तेः वस्तुतस्तु तत्र तथान्वयबोधस्य सर्वैरेव दृष्टत्वात् नचैवं क्वचिद्योजनायाः वस्तुप्रयोग-दृष्टिवाच्य तात्पर्य्यग्रहार्थं तदुपयोगितेत्युक्तत्वादिति प्राञ्चः अन्वयबोधेनान्वयप्रतियोग्युपस्थितिरासत्तिरूपा सा च शाब्दबोधादेव तथा च तस्यापि आसत्तिः कारणं सा च शाब्दबुद्धिरूपा तस्याश्च यद्यपरोक्षत्वं तदा अन्व-यस्य झटीभूता चेत् अन्योन्याश्रय इत्यतआह सा चेति प्रथमाद्यन्वयबोधनिरूपकपदजन्यपदार्थोपस्थितिपरिपाटी प्रदर्शयितुं आयाङ्क्षते अथेति नन्वास्तु तत्तुल्या पद जन्यप-दार्थोपस्थितिरेवासत्तिस्तदा नानाविशेषणकस्थाने कथमन्वय-बोधः ? सर्व्वासां पदार्थोपस्थितीनां एकदाऽसम्भवादि-त्याशङ्क्ते अथेति इत्याद्युक्तः। मेलकं मेलनम् । विशेषणत्वान-साध्यत्वादिति विशेषणं पदार्थस्तदुपस्थितिसाध्यत्वात् इत्यर्थः इत्तया पदधीजन्येत्यादिः । विशिष्टज्ञानस्य शाब्दबोधानुभव-त्वम् । मेलकात् समूहात् एकैव तावत्पदकृतिः न च सक-लपदगोचरत्वाभावेऽपि प्रत्येकपदानुभवजनितप्रत्येकपदार्थ-स्मरणाहितसंस्कारैरेव सकलपदार्थगोचरमेकं स्मरणं जन्यवति तथा च सकलपदगोचरैकस्मरणपर्य्याप्तानुधा-वनं विफलमिति वाच्यं प्रकारान्तरेण पदार्थोपस्थितेः शाब्दबोधहेतुत्वात् पदज्ञानजन्यत्वोपपत्तये तदनुधावनात् ननु श्रोतेव प्रत्येकपदानुभवोऽपि न जन्यवति तथाहि आदौ श्रोतृपत्तिस्ततो द्वितीयक्षणे पदजन्यनिर्विकल्पकोत्पत्तिः अकारोत्पत्तिश्च अथ तृतीयक्षणे अकारजन्य निर्विकल्पक-जन्यविशिष्टधीढोत्पत्तिश्चनायाः ततश्चतुर्थक्षणे जन्यविशिष्टधी टटजन्यनिर्विकल्पकाकारजायचरमाकारोत्पत्तयः इदानीञ्च अकारभानं न जन्यवति प्रत्यक्षं प्रति विषयस्य हेतुत्वात् ततश्च पञ्चमक्षणे टटजन्यविशिष्टबोधाकारजन्यनिर्विकल्पकटकारजायाः इदानीं प्राग्जनिकाकारभानं न जन्यवति तदभावात् ततः षष्ठक्षणे जन्यविशिष्टबोधाकारजायौ इदानीं टकारभानं न जन्यवति तदभावात् तथा च कथं वर्णसमूहात्मकपद-गोचरश्रौतानुभवः न च पूर्व्वपूर्व्ववर्णोपनयसहितान्त्य-वर्णजन्यधीरिति वाच्यं बहिरिन्द्रियजन्यत्वे उपनीतं विशेषणतयैव भासते इति नियमात् प्रत्येकवर्णसमूहरूपविशेष्यकपदप्रत्यक्षोपनय-नमोदया श्रवणसम्भवात् पदप्रत्यक्षे प्रत्येकं सर्व्वस्य वर्णस्य तुल्यविशेष्यत्वात् न च पूर्व्ववर्णोऽन्यवर्णविशेषणतया भासत इति वाच्यं पूर्व्ववर्णोऽन्यवर्णविशेषणत्वनियामकस्य तत्सम्बन्धस्याभावात् इति चेत् मैवं चादिसहायभानं न घटादिपदं टघाद्देरपि घटपदत्वापत्तेरिति तु अन्यवहितो-त्तरत्वसम्बन्धेन पूर्वपूर्ववर्णदुत्तरोत्तरवर्णे एव यद्यं तच्च अव-श्यं न दुर्व्वचं पूर्व्वपूर्ववर्णोपनयसंस्कारेणाव्यवहितोत्तरत्व सम्बन्धेन उत्तरोत्तरवर्णविशेषणतया पूर्वपूर्ववर्णग्रहसम्भवात् वैयाकरणास्तु पूर्व्ववर्ण्ज्ञानजन्यायां उपनयसामग्र्यां सत्त्वे-ऽपि पूर्व्ववर्णस्यैवोत्तरवर्णे विशेषणत्वेन भाने नियामक-ाभावात् विनिगमनाभावेन अव्यवहितपूर्व्वत्वसम्बन्धेनैव उत्तरोत्तरवर्णस्यापि विशेषणतया भानस्य दुर्वारतया अन्तयवह्योस्तुल्यपदत्वापत्तेः तथा च अन्तपदोच्चारणे तत्पदस्य श्रवसा पाठत्वापत्तिरित्यतोवर्ण्यसंस्तदवयवान्त्यः स्फोट-एव पदमित्याहुः तन्निरासश्च स्फोटशब्दे वक्ष्यते ।

आत्मायं विशेषः । चित्रमणिमिते गन्धाध्याहारएव वस्तु-तात्पर्य्यग्राहकेण तु आसत्तिज्ञानयोगे आधाराध्याहारोऽपीति व्यवस्थापितम् । यथा "अस्तु वा गन्धाध्याहार एवावश्यक स्तथापि तज्जन्यपदार्थोपस्थितित्वेन कृतोपेक्षत्वं लाघ-वात् पदार्थोपस्थितित्वेन हेतुत्वस्योचितत्वात् तथा च ओदनं पचतीत्यादौ यति तात्पर्य्यग्रहे यथाकथञ्चिदुप-स्थितस्यापि आधेयान्वयबोध इत्यर्थाध्याहारएव सम्यक्" "वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" सा० द० । "आसत्तिरन्वयानुभवः" रघु० ।

आसदन न० आ+सद्-ल्युट् । १प्राप्तौ २सैन्यसन्निवेशे च ।

आसन न० आस-ल्युट् । १स्थितौ "एकमासनभोजनैः" स्मृतिः । २स्थानान्तरस्थितिकृते दासां भङ्गे शुद्धात्मवर्त्तिगुच्छ-भेदे च । तद्विद्वानन्यत्रोक्ते । "परस्परस्य सामर्थ्य-विघातादासनं कृतम् । अरेश्च विजिगीषोश्च यावत्पञ्चधा कृतम्" । यानस्य पञ्चविधत्वञ्च । "विग्रहाय तथा संभूयाथ प्रसङ्गतः । उपेक्षया च निपुणैर्जनैः पञ्चविधं कृतमिति" अमरोक्तम् । "परस्य खस्य सैन्यानां ज्ञात्वा शक्तिं बलाबलम् । आसनं खास्थिते भूभृत्सन्धी खास्थिते रतः इत्युक्ते १क्षितिशेषोर्योगान्तरे च । आस्यतेऽत्र आधारे ल्युट् । ४उपवेशनाधारे कम्बलाद्यासने । "आसनं वसनं शय्या दारभारं अमङ्गलम् । आत्मनस्तु शुचि प्रोक्तं न परेषां कदाचन" आ० त० पु० । "प्रयत्नसाध्यासनया स्थितः" रघुः । "खट्वाटङ्के नलिनासने सति:" माघः "क्षुण्णकं कौतुकवे-

दिग्भ्यम्" क्रमा० "शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः" गीता "स्थापयेदासने तस्मिन् शिवः कार्य्योऽथ नान्यः" मनुः। "स वासवेनासनमर्द्धमृष्टम्" "प्राञ्जलिर्जलजासनम्" कुमा०। ५ देवतापूजाङ्गे उपचारभेदे तद्भेदादि कालि० पु०। "आसनं प्रथमं दद्यात् पौष्यं दारुजमेव वा। वास्त्रं वा चार्म्मणं कौशं मण्डलस्योत्तरे क्षुजेत्। पौष्यासनं यद्विहितं यस्य तद्यदि गर्भकम्। निवेदयेत्तदा पद्मे विपुलं हारि चोत्क्षुजेत्। पौष्यं पुष्पौघरचितं कुशरत्नादिसंयुतम्। अतिप्रीतिकरं देव्या ममाप्यस्य भैरव!। यत्तदारुमयं भूतमासनं मरुणं शुभम्। नोच्छ्रायं नातिविस्तीर्णमासनं विनियोजयेत्। अन्यदारुभवस्यापि दद्यादासनमुत्तमम्। सकण्टकं क्षीरयुक्तं दारु सारविवर्जितम्। चैत्यद्रुमाणां संभूतं वर्जयित्वा विभीतकम्। वास्त्रं कौशं फालं वल्क मेतत्त्रयं मतम्। रोमजं कम्बलञ्चैव तदनेन चतुष्टयम्। अनेन रचितं दद्यादासनं चेष्टभूतये। सिंहव्याघ्रतरक्षूणां छागस्य महिषस्य च। गजानां सुरगाणाञ्च कृष्णसारस्य चर्म्मणा। क्षुमरस्याथ रासस्य खड्गानां नवभेदिनाम्। चर्म्मभिः सर्व्वदेवानामासनं प्रीतिदं क्षुतम्। वास्त्रेष कम्बल मस्तमासनं देवतुष्टये। राङ्कवं चार्म्मणं श्रेष्ठं दारवं चन्द्रनोद्भवम्। यद्यासनं कुशमयं तदासनमनुत्तमम्। सर्व्वेषा मपि देवानामृषीणाञ्च यतात्मनाम्। योगपीठस्य सदृश मासनं स्थानमुच्यते। आसनस्य प्रदानेन सौभाग्यं भुवि माप्नुयात्। क्षुमरो रोहितो व्याघ्रः शंवरो बभ्रुको वृकः। गवयेक्षरिणाश्चेति मृगा नवविधा मताः। कृष्णसारेऽपि विज्ञेयः पञ्चभेदोऽत्र भैरव!। कृष्ण खड्गो वृकश्चैव पृषतश्च मृगस्तथा। एते चर्म्मप्रदानेषु चर्म्मदाने च कीर्त्तिताः। सर्व्वेषां तैजसानाञ्च आसनं श्रेष्ठ मुच्यते। आयसं वर्ज्जयित्वा तु कांस्यं सीसकमेव च। शिलामयं मणिमयं तथा रत्नमयं मतम्। आसनं देवता-भ्यस्तु शुभं सम्यगुपक्षुजेत्। अतश्चैव साधकानाञ्च आसनं शृणु भैरव!। यत्रासीनः पूजकस्तु सर्व्वसिद्धि मवाप्नुयात्। ऐणञ्च चार्म्मणं वास्त्रं तैजसञ्च चतुष्टयम्। आसनं साधकानाञ्च सततं परिकीर्त्तितम्। पूर्व्वोक्तं यच्च देवेभ्य आसनं परिकीर्त्तितम्। तत् सर्व्वमासनं यस्तं पूजाकर्म्मणि साधके। न यत्रेष्टासनो भूयात् पूजाकर्म्मणि साधकः। काष्ठादिकासनं कुर्य्यात् मितमेवं सदा बुधः। चतुर्भिः पलमुच्छ्रयेण दीर्घं काष्ठासनं मतम्। षोडशाङ्गुल-विस्तीर्णमुत्तमेभ चतुरङ्गुलम्। पञ्चाङ्गुलं वा कुर्य्यात्तु नोच्छ्रितं चासनं कारयेत्। पूर्व्वोक्तं वर्ज्जयेद्दारुमासनं पूजनेष्वपि। वास्त्रं द्विहस्तात्तो दीर्घं सार्द्धहस्तात्तु विस्तृतम्। तदूर्द्ध-मात्तु तथोच्छ्रायं पूजाकर्म्मणि संश्रयेत्। यत्रेष्टं चार्म्मणं कुर्य्यात् पूर्व्वोक्तं सिद्धिदायकम्। षडङ्गुलाधिकं कुर्य्यान्नोच्छ्रये तु कदाचन। काम्बलं चार्म्मणं चैलं महामायाप्रपूजने। प्रशस्तमासनं प्रोक्तं कामाख्यायास्तथैव च। त्रिपुरायाश्च सततं विष्णोरापि कुशासनम्। बहूच्छ्रायं न चैव स्यात् तथैव बहुविस्तृतम्। दारु भूमिसमं प्रोक्तमन्यापि सर्व्व-कर्म्मणि। पृथक् पृथक् कल्पयेच्च शोभनं तादृशासनम्। न पत्रमासनं कुर्य्यात् कदाचिदपि पूजने। न प्राग्यद्भू-न मृदुभूतमस्थिजं हिरदाहते। मातङ्गदन्तसञ्जातमासनं कामिको चरेत्। चर्म्म पूर्व्वोदितं प्राप्य तथा गन्धङ्गजस्य च। सलिले यदि कुर्व्वीत देवतानां प्रपूजनम्। तत्राप्यासन मासीनो नोत्थितस्तु समाचरेत्। तोये शिलामयं कुर्य्या-दासनं कौशमेव वा। दारवं तैजसं वापि नान्यदासन माचरेत्। आसनारोपसंस्थानस्थानाभावे तु पूजकः। आसनं कल्पयित्वा तु मनसा पूजयेच्छिवे। यद्यासनस्य संस्थानं तोयमध्ये न विद्यते। अन्यत्र वा तदा स्थित्वा देवपूजां समाचरेत्। इत्येतत् कथितं पुत्र! पूजापूजक सङ्कृतम्"। आस्यतेऽनेन करणे ल्युट्। ५ देहस्थैर्य साधने करचरणादिबन्धभेदरूपे योगाङ्गभेदे "यमनियमासनप्राणा-यामप्रत्याहारध्यानधारणासमाधयोऽष्टावङ्गानि" विभक्त "स्थिरसुखमासनम्" पात०सू० लक्षितं तस्य संख्या यथा "नियमं सुखावहं च यदासनं तद्योगाङ्गम्। आस्यतेऽनेने-त्यासनं तच्च द्विविधम् बाह्यं शारीरं च तत्र चैलाजि-नकुशोत्तरं बाह्यं, शारीरं पद्मस्वस्तिकादि। तत्र पद्मासनं प्रसिद्धम्। सव्यमाकुञ्चितचरणम् दक्षिणजङ्घोर्व्वन्तरे, दक्षिणं च सव्यजङ्घोर्व्वन्तरे, निक्षिपेदिति स्वस्तिकासनम्। हे पादतले उपरिसन्धी संपुटीकृत्य संपुटोपरिपार्श्विक-ऋपिकां न्यसेदिति भद्रासनम्। योगपट्टेन सीवाव-धासनम्। आतुप्रसारितदक्षिणवामपादाङ्गुष्ठासनं क्रौञ्चो-ड्डनजादिवदुपवेशनं क्रौञ्चासनं द्रष्टव्यम्। आसन-स्थैर्य्योपायमाह। "प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्" पात०सू०। "स्वाभाविकः प्रयत्नसत्त्वादासनविघातकः तत्रोपरतेरासनं सिध्यति अनन्ते नागनायके स्थिर-तरफणासहस्रविष्टतविश्वमण्डले चित्तस्य समापत्त्या देहा-भिमानाभावेनासनदृढत्वाच्छ्रमक्षयैरासनं सिध्यति। ततस्सिद्धि-श्चिन्तमाह। "ततोद्वन्द्वानभिघातः": पात०सू०। "आसन-

जवाच्छीतोष्णादिनिरभिघातो बाधाभावो भवति" इत्तिः हृदश्च राजयोगाङ्गं कृटयोगाङ्गानि पुनरन्येऽपि बन्धाः कार्यो० उक्ताः यथा "महामुद्रां नभोमुद्रामुड्डीयानं जलन्धरम्। मूलबन्धन्तु योवेत्ति स योगी योगसिद्धिभाक्। शोधनं नाड़िजालस्य घटनञ्चेन्द्रस्त्रयोः। रसानां शोषणं सम्यक् महामुद्राभिधीयते। योनिं वामाङ्घ्रिणापीड्य कृत्वा वक्षःस्थले हनुम्। हस्ताभ्यां प्रसृतं पादं धारयेद्दक्षिणञ्चिरम्। प्राणान् कृत्वा समापूर्य्य चिरं सञ्चारयेच्छनैः। एषा प्रोक्ता महामुद्रा महारोगविनाशिनी। चन्द्राङ्गे तु समभ्यस्य सूर्य्याङ्गे पुनरभ्यसेत्। या तुल्या भवेत् संख्या ततोमुद्रां विसर्जयेत्। न हि पथ्यमपथ्यं वा रसाः सर्व्वेऽपि नीरसाः। अपि घोरं विषं घोरं पीयूषमिव जीर्य्यति। क्षयकुष्ठगुदावर्त्तगुल्मार्जीर्णपुरोगमाः। तस्य दोषाः क्षयं यान्ति महामुद्राञ्च योऽभ्यसेत्। कपालकुहरे जिह्वा प्रविष्टा विपरीतगा। भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी। न पीड्यते स रोगेण न च लिप्यते कर्म्मणा। बाध्यते वस कालेन योमुद्रां वेत्ति खेचरीम्। चित्तञ्चरति खे यस्माज्जिह्वा चरति खेगता। तेनैषा खेचरी नाम मुद्रा सिद्धनिषेविता। यावद्विन्दुः स्थितोदेहे तावन्मृत्युभयं कुतः। यावद्बद्धा नभोमुद्रा तावद्विन्दुर्न गच्छति। उड्डीनङ्कुरुते यस्मादुड्डीयानं महाखगः। उड्डीयानं ततः प्रोक्तं तत्र बन्धोऽभिधीयते। जठरे पश्चिमं जानुनाभेरूर्द्ध्वञ्च धारयेत्। उड्डीयानं ह्ययं बन्धोमृत्योरपि भयं जयेत्। बध्नाति हि शिराजालमधोगामि नभोजलम्। एव जलन्धरो बन्धः कण्ठे दुःखौघनाशनः। जलन्धरे कृते बन्धे कण्ठसङ्कोचलक्षणे। न पीयूषं पतत्यग्नौ न च वायुः प्रधावति। षण्णिभागेन संयोज्य योनिमाकुञ्चयेद्गुदम्। अपानमूर्द्धमाकृष्य मूलबन्धोऽभिधीयते। अपानप्राणयोरैक्यं क्षये मूत्रपुरीषयोः। युवा भवति वृद्धोऽपि सततं मूलबन्धनात्"।

रुद्रयामले ऽनेकविधान्यासनानि दर्शितानि यथा। "अथासनप्रभेदञ्च वक्ष्ये सिद्धिकाङ्क्षिणाम्। यत्र तत्र पूजकानां सिद्धिरत्र महीतले। अधोमुखासनं नाथ! सर्व्वेषां प्राणिनां सुखम्। ऊर्द्धमार्गेण देवेश! धारयेत् मारुतं सुधीः। ऊर्द्धासनानां श्रेष्ठं हि ऊर्द्धपादो हि यत्नतः। तदैव महितां सिद्धिं ददाति वायवी कला। पद्मासनं तथा कुर्य्यात्प्राणवायुप्रसिद्धये। शुभासनं सदा ध्यायेत् पूरयित्वा पुनःपुनः। उत्थमूरौ वामपादं पुनस्तद्दक्षिणं पदम्। वामोरौ स्थापयित्वा च पद्मासनमिति स्मृतम्। सव्यापसव्ययोगेन आसनं परिकल्पयेत्। तदैकासनकाले तु द्वितीयासनमारभेत्। पृष्ठे पादद्वयं सीव्यिदङ्गाङ्गुष्ठद्वयं सुधीः। कायसङ्कोचमाकृत्य कृत्वा बद्धासनं भवेत्। इति बद्धासनं बद्ध्वा वायुबद्धः पुनःपुनः। चिबुके स्थापयेत्पश्चाद्धृदि तेजश्च भास्करे। कृत्वासनं हि सर्व्वेषां प्राणिनां सिद्धिकारणम्। वायुं वध्नेत्तु कुर्य्याद्यः स योगी नात्र संशयः। भावसिद्धिकरं नाथ! सर्व्वेषां दृष्टिकारणम्। वामपादतले कुर्य्यात् पादं दक्षिणमेव तत्। सव्यापसव्ययोगेन आसनद्वयमेव च। सर्व्वत्रैवं प्रकारञ्च कृत्वा नासौव साधयेत्। ह्यशीत्यान्यासनानि स्युः लक्षाणि यत्संख्यकानि च। सव्यापसव्ययोगेन द्विगुणं प्रभवेदिह। चतुःषष्ट्यासनानीह वदामि वायुशोधनात्। द्वासप्ततिसहस्राणि नाड्यो निर्म्मथ्य कल्पयेत्। वायुतत्त्वे कार्ष्मुकासनमाकृत्य उदरे पूरयेत् सुखम्। तदा वायुर्वशं याति कालेन सूक्ष्मवायुना। वह्निपद्मासनं सम्यो वेष्टयित्वा प्रधारयेत्। करेण दक्षिणेनैव वामपादाङ्गुलीतटम्। कृत्वा पसव्यद्विगुणं कार्ष्मुकासनमेव च। कार्ष्मुकद्वयसंयोगेन मरुद्वह्वायुना जयेत्। कुक्कुटासनमावक्ष्ये नाड़ीनिर्म्मथकेतुतः। सप्तकुम्भागमार्गेण कुर्य्यात् वायुनिशेवनम्। निजकुक्षिद्वयं भूमौ पातयित्वा जितेन्द्रियः। पद्मपद्मा बद्धा करौ देव! कर्परद्वयमध्यतः। सव्यापसव्ययुगलं कुक्कुटं ब्रह्मणाकृतम्। यद्वं कृत्वा अधःशीर्षं यः करोति खगासनम्। खगासनप्रसादेन श्रमलोपोभवेद्ध्रुवम्। पुनःपुनः श्रमादेव विषयश्रमलोपकृत्। लोलासनं सदा कुर्य्यात् वायुलौल्यापघातनात्। स्थिरवायुप्रसादेन स्थिरचेता भवेद्ध्रुवम्। पद्मासनं समाकृत्य पादयोः सन्धिगह्वरे। कूर्परद्वयमधोदेशे निवेश्य कुक्कुटाकृति। निजकुक्षिद्वयं खम्भं निपात्य कूर्परैर्भरम्। तस्मात् शरीरमुत्थाप्य स्थिरपद्मासनेऽखिलम्। स्थित्वैतदासने सम्यो अधःशीर्षं करोति चेत्। उत्तमं त्वासनं ह्येयं योगिनामतिदुर्लभम्। एतद्वागनमात्रेण शरीरं शीतलं भवेत्। पुनःपुनः शोधनेन चेतना कफलो भवेत्। सव्यापसव्ययोगेन यः करोति पुनःपुनः। पूरयित्वा मूलपद्मे सूक्ष्मवायुं विकुम्भयेत्। कृत्वा कुम्भकमेवं हि सूक्ष्मवायौ सुसिद्धयौ। मूलादिब्रह्मरन्ध्रान्ते स्थापयेत् मनसे मरुत्। एतत् शुभासनं कृत्वा सूक्ष्मरन्ध्रेष्वशेषतः। सूचीरन्ध्रे यथा सूत्रं पूरयेत् सूक्ष्मवायुना। एवं क्रमेण बन्धाद्यात् पूरकाद्यापि

लक्षणम्। महासुखं समाप्नोति योगाष्टाङ्गनिषेवणात्। अथ वक्ष्ये महादेव! पर्वतासनमुत्तमम्। यत् कृत्वा स्थिरकृपःस्यात् षट्चक्रादिविलोड़नः। योन्यासनं सर्व्वयोगे योगिनामवलम्बनम्। तत्कालं सकलं तावत् खेचरीयावदेव हि। पादगोष्ठेन चाक्रम्य लिङ्गाग्रं योनियो जयेत्। अन्यं पादसरौ दत्त्वा तत्र योन्यासनं भवि। एतन्मध्ये महादेव! बद्धयोन्यासनं दृढ़म्। यत् कृत्वा विचरेत् योगी पृथिव्यामीश्वरो यथा। कृत्वा योन्यासनं नाथ! सिद्धगुह्यादिबन्धनम्। सव्यगासानेतत्कर्णं कनिष्ठाङ्गुलिभिस्तथा। ओष्ठाधरं कनिष्ठाभ्यामनामाभ्यान्तु नासिके। मध्यमाभ्यां नेत्रयुग्मं तर्जनीभ्यामथ श्रुती। एतत् सिद्धासनं नाम योगिनामतिदुर्लभम्। कृत्वा वायुस्तन्मनं च मूलमारभ्य खन्नयेत्। सव्यापसव्ययोगेन सिद्धो भवति साधकः। यत्नै यत्नैः समारुह्य कुम्भयेच्च प्रपूरयेत्। आरुह्योदयकालाच्च वसुदण्डेन भैरव!। सव्यापसव्ययोगेनगृहीत्वा बाह्यगानिलम्। द्वितीयप्रहरे कुर्य्यात् बाह्यपूजां मनोरमाम्। एतदासनमाकृत्य सिद्धो भवति साधकः। अथान्यदासनं वक्ष्ये यत् कृत्वा चामरोभवेत्। मत्साधकः शुचिः श्रीमान् कुर्य्याद्भावाभिभावितः। भेकनामासनं योग्यं नाथ! वक्ष्यामि तद्गुणम्। निधाय पादयुगलं स्कन्धे बाहौ पदोपरि। ध्याने दिष्टपदं श्रीमान् आसनस्थः सुखाय च। यदि सर्व्वाङ्गसुलोल्य गगने खेचरासनम्। महाभेकासनं प्रोक्तं सर्व्वसिद्धिप्रदायकम्। महाविद्या-महामन्त्रं प्राप्नोति जपतोऽचिरम्। एतत् प्रभेदं वक्ष्यामि यः करोति सचाचरः। एकं पादसरौ बद्धा स्कन्धेऽन्यपदरज्जयम्। एतत् प्राणासनं नाम सर्व्वसिद्धिप्रदायकम्। वायुं मूर्द्धे समारोप्य प्रत्याकृष्य प्रसारयेत्। केवलं पादमेकञ्च स्कन्धे वारोप्य यत्नतः। एकपादेन गगने तिष्ठेत् स दण्डवत् प्रभो!। अपानासनमेतद्धि सर्व्वेषां पूरकात्रयम्। कृत्वा स्कन्धशीर्षयुग्मे समारोप्य च वायुभिः। तदा सिद्धो भवेन्मर्त्यो नात्र कार्य्या विचारणा। प्राणापानासने कृत्वा जन्मी योगेश्वरो भवि। समानासनभावञ्च सिद्धिमन्त्रादिसाधनम्। एकं पादसरौ दत्त्वा गुह्योऽन्य सिक्थवल्लभे। एतद्वीरासनं नाथ! समानासनसंज्ञकम्। इत्याकृत्य जपेन्मन्त्रं धृत्वा वायुं चतुर्दले। कुण्डलीं भावयेन्मन्त्री कोटिविद्युल्लताकृतिम्। आत्मचन्द्रान्तरसैरासुतां योगिनीं सदा। वीरासनं तु वीराणां योगवायुप्रसाधनम्। योजानाति महावीरः स योगी भवति ध्रुवम्। अथ वक्ष्ये महाकाल! समानासनसाधनम्। भेदक्रमेण यज्ज्ञात्वा वीराणामधिपोभवेत्। समानासनमाकृत्य बद्धाङ्गुष्ठं करेण च। एतन्न साधकारी स्यात् सर्व्वयोगादिसाधने। आसनं योऽहि जानाति वायुना चरणं तथा। कालादीनां निर्ज्जयन्तु स कदाचित् न नश्यति। कालेन लभ्यते सिद्धिः कालरूपोमहोज्ज्वलः। साधकैर्योगिभिर्ध्येयः सिद्धवीरासनात्मना। अथ वक्ष्ये नालकरात्। ग्रन्थिभद्रासनं शुभम्। ज्ञात्वा रुद्रो भवेत् क्षिप्रं सूक्ष्मवायुनिषेवणात्। कृत्वा पद्मासनं मन्त्री जङ्घायाः कूपरे करौ। कूर्परस्थपर्य्यन्तं विभिद्य स्कन्धधारणम्। भित्त्वा पद्मासनं मन्त्री कृच्छ्रेण न विपाटयन्। येन यौगं भवेत्तत्र सर्व्वाङ्गुलिभिरान्वितम्। ग्रन्थिभेदासनं कुर्य्यात् खेचरादिप्रदर्शनम्। कृत्वा सूक्ष्मवायुलयं परमात्मानि कारयेत्। अथान्यासनमाख्ये योगपूर्वकरक्षणात्। कृत्वा पद्मासनं पादाङ्गुष्ठं जङ्घां हि संस्थितम्। हस्तमेकन्तु जङ्घायां कार्म्मुकं कूर्परोन्नकम्। पद्मासने समाधाय अङ्गुष्ठं परिधारयेत्। कार्म्मुकासनमेतद्धि सव्यापसव्ययोगतः। पद्मासनं वेष्टयित्वा अङ्गुष्ठं च प्रधारयेत्। यः करोति सदा नाथ! कार्म्मुकासनमुत्तमम्। रोगादिनाशं यत्नेषां जयं नीत्वा सुखी भवेत्। अथ वक्ष्येऽत्र संक्षेपात् सर्व्वाङ्गासनमुत्तमम्। यत् कृत्वा निपुणो योगी विद्याभिः परिवृतो भवेत्। अधो निधाय शीर्षञ्च ऊर्द्ध पादद्वयञ्चरेत्। पद्मासनं तु तत्रैव भूमौ कूर्परयुग्मकम्। दण्डे दण्डे तु वः कुर्य्यात् श्वासग्लानिपरः सुधीः। नित्यं सर्व्वासनं क्षित्वा न कुर्य्याद्वायुधारणम्। मासेन तस्य सिद्धिः स्यात् सर्व्वरोगविनाशनम्"। अन्यान्यासनानि तन्त्रोक्तानि विस्तरात्र दर्शितानि। निर्वाणतन्त्रे जन्तुसंख्यया चतुरशीतिलक्षसंख्यकान्यासनान्युक्तानि किन्तु तेषां सर्व्वविधेभ्यस्तत्र मोक्षाः तेषां मध्ये द्वयोरेव प्राधान्यमित्यपि तत्रैवोक्तम्। यथा "आसनानि कुलेशानि! यावल्लोकेषु सन्तव। चतुरशीतिलक्षाणि चैकैकं समुदाहृतम्। आसनेभ्यः समस्तेभ्यः साध्यते द्वयमुच्यते। एकं सिद्धासनं नाम द्वितीयं कमलासनम्"। एषां बहुविधानामासनानां मध्ये "सुखेनैव भवेद्यस्मिन्नासने ब्रह्मचिन्तनम्। आसनं तद्विजानीयादितरत् सुखनाशनम्" इत्यभियुक्तोक्तेः पातञ्जलोक्तस्य स्थिरसुखमासनस्य ब्रह्मचिन्तने आनुकूल्येनेयत्वम्। तन्मध्ये योगाङ्गासनानि पञ्च सङ्गच्छन्ते-

क्षानि यथा "पद्मानन खस्तिकाख्य भद्र वज्रासनत्यथा। वीरासनमिति प्रोक्तं क्रमादासनपञ्चकम्। ऊर्व्योरुपरि विन्यस्य सव्यक् पादतले उभे। अङ्गुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमात्ततः। पद्मासनमिदं प्रोक्तं योगिनां हृदयङ्गमम्। जानूर्वोरन्तरे सव्यक् कृत्वा पादतले उभे। ऋजुकायो विशेद्योगी स्वस्तिकन्तत् प्रचक्षते। सीवनि पार्श्वयोर्व्यस्य गुल्फयुग्मं सुनिश्चलम्। दृढ्याधः पार्श्व पादौ पाणिभ्यां परिरक्षयेत्। भद्रासनं समुद्दिष्टं योगिभिः परिकल्पितम्। ऊर्वोः पादौ क्रमात्कृत्वा सम्यक् प्रसार्य चोत्तानौ। करौ निदध्यादाख्यातं वज्रासनमनुत्तमम्। एकस्मादधः कृत्वा विन्यसोरौ तथेतरम्। ऋजुकायोविशेन्नम्रो वीरासनमितीरितम्" यत्र महाभारोवसति तस्मिन् ईगजस्कन्धदेशे आस्तेऽनेन आ+अस-कर्त्तरि ल्युट्। ७सम्यग् विज्ञेयमासनम्। ८सनमेव अण्। ८आसनवृक्षे पु०। ९जीवकवृक्षे पु०। आसनशब्दस्थाने यजादौ तद्धितयाजादौ च परे आसन्नादेशः इति काशिकादयः मसोरभायान्तु तत् दूषयित्वा आसशब्दस्थाने एव तदादेश इत्युक्तं यथा "यत्तु आसनशब्दस्य आसन्नादेश इति काशिकायामुक्तन्तत् प्रामादिकम् "आसोऽकस्य वर्त्ति कामभीमो" इति मन्त्रे सुखादित्यर्थस्यौचित्यात् "एकस्य चित् वर्त्तिकामन्नरासादिति" मन्त्रान्तरसंवादाच्च व्याख्यातञ्च तथैव वेदभाष्ये इति। ["निषेदुषीमासनबन्धधीरः" रघुः।

आसनबन्ध पु०आसनार्थो बन्धः। करचरणादीनामन्योन्यबन्धे

आसनमन्त्र पु० आसनस्य शुद्ध्यर्थो दानार्थो वा मन्त्रः। तन्त्रोक्ते "आधारशक्तिकमलासनाय नमः" इत्यादिके तत्तत्प्रकरणोक्ते १मन्त्रभेदे २देवेभ्य आसनदानार्थे मन्त्रभेदे च। स च मन्त्रः "पुरुष एवेदं सर्व्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येशानो यदन्नेनाभिरोहति" श्रौतः। "शेषमन्त्रं मन्त्रादिव्य फणामणिसङ्कलम्। कोटिसूर्य्यप्रतीकाशं नागाद्यासनमीश्वर!" इति गौराधिकेच। एवमन्योऽपि तत्तत्कल्पोक्तो ज्ञेयः। आसनपरिपाट्यर्थे १मन्त्रे च "आसनमन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्म्मोदेवता आसनपरिग्रहे विनियोगः" तन्त्रसा०।

आसना स्त्री आस-युच्।१स्त्रियौ २उपवेशने।

आसनादि पु० आसनमादिर्यस्य। मन्त्रोक्ते पूजाङ्गे आसनप्रभृतौ उपचारगणे "आसनं स्वागत पाद्यमर्घमाचमनीयकम्" उपचारशब्दे निदर्शितः।

आसनी स्त्री आस-आधारे ल्युट् ङीप्। १ विपञ्चौ २मर्य्यादायाञ्च मेदि०। [नि०। वासुदेवे मेदि०।

आसन्द पु० आसीदत्यस्मिन् प्रलयकाले आ+सद-अच्आदि०

आसन्दी स्त्री आसद्यतेऽस्याम् आ+सद-अच्आदि०नि०गौरा० ङीप्। १ उपवेशनयोग्ये आसनयन्त्रे (मोढारा) २ लतृक्षवृक्षायाम् (कौँच)। ३सभामध्ययेदिकायाम् "औदम्बरीमासन्दीं नाभिदघ्नामरत्निमात्रामुत्तरतः करोति" कात्या०७,२७। ४उक्तलक्षणायां पीठिकायाञ्च। आसन्दीशब्दस्य निरुक्तिरपि यत० आ० दर्शिता। "इयं वा आसन्दी अस्यां हीदं सर्व्वमासद्यम् तस्मादस्या आसन्दीमाहरन्ति" इति। स्वार्थे कन्। क्षुद्रासनयन्त्रभेदे स्त्री। "जाम्बूनदमयीमासन्दिकाम्" काद०। आसन्दी+अस्त्यर्थे मतुप् मध्वा० मस्य वः। आसन्दीयुक्ते त्रि०स्त्रियां ङीप्। "आसन्दीवान् आसभेदः" सि०कौ०।

आसन्न त्रि० आ+सद-क्त। १निकटस्थे, २उपस्थिते च। "आसन्नपतने कूले कूलं पिपतिषतीति" या० भा०। ३सन्निधानयुक्ते ४सम्यक्स्थिते च "सर्व्वमत्रासन्नमिति" यत०आ०। ५ईषद्बोधसाधनासक्तियुक्ते वाक्ये "आसन्नानासन्नविभागव्याघातः" मङ्गिल्ला०। ६समूर्द्धे च।

आसन्नकाल पु० आसीदत्यस्मिन् काले आ+सद-आधारे क्त कर्म्म०। मृत्युकाले।

आसन्य पु० आस्ये भवः यत् आसन्नादेशः। सुखभवे सुखान्तर्विलस्थे सुख्ये प्राणे "अथ ह्वैनमासन्य प्राणमूचुः" यत०आ०।

आसन्वत् त्रि० आसनमानार्थकः आसनशब्दोऽस्ति ततः अस्त्यर्थे मतुप्। आसनयुक्ते सासने। "यद्भूतं यच्च भाव्यमासन्वत्तेन ते चारये विषम्" अथ० ६,१२,२।

आसमञ्ज पु० असमञ्ज एव स्वार्थे अण्। सूर्य्यवंश्ये सगरपुत्रे अलियभेदे।

आसव्याध त्रि० समन्तात् संबाधा यत्र। सङ्कीर्णस्थाने परस्परसंघर्षणेन क्लिष्टे। "आसव्याधा भविष्यन्ति पन्थानः शरदृष्टिभिः" रामा०।

आसव पु० आस्रवते आ+स्रु-कर्त्तरि अण्। १ अभिषवजीवे मद्ये (चोआनमद) तद्गुणधर्म्मादि भावप्र०। "यद्यं पञ्चौषधाभ्यां सिद्धं मद्यं स आसवः। आसवस्य गौडद्राक्षगुडैर्यावुद्याः समाः" नवपुराणमद्ययोर्गुणाश्चात्रैव। "मद्यं नवमभिष्यन्दि लिदोषजनकः परम्। अत्यन्तं दंपत्यं पाहि दुर्गन्धं विषदं गुरु। जीर्णं तदेव रोचिष्णु लघिष्ठेक्षुविकारपटुम्। वृष्यं सुगन्धि सुरवत्तु क्रम-

विशोधनम्"। सात्विकादिधानवर्गभेदेन भेदाविशेषाश्च तल्लोक्ताः "सात्विकोगीतिहारुचादि राजसो वाहवादिकम्। तामसो निन्द्यकर्माणि निद्रां च मदिरां चरन्" । चरन् पिबन् कुर्यादिति शेषः। "विधिना मात्रया काले हितं सर्व्वैर्यथाबलम्। प्रकृतीयः पिबेन्मद्यं तस्य स्यादमृतं यथा। किन्तु मद्यं स्वभावेन यद्यप्यन्नं तथा कृतम्" सुश्रुते तु मद्यभेदेन गुणविशेषादिकमुक्तं यथा

"सर्व्वं पित्तकरं मद्यमम्लं दीपनरोचनम्। भेदनं कफवातघ्नं हृद्यं वस्तिविशोधनम्। पाके लघु विदाह्यूर्ण तीक्ष्णमिन्द्रियबोधनम्। विकाशि सूक्ष्मविस्रम्लं ग्रहणि तस्य विशेषकम्। माहीकमविदाहित्वान्मधुरान्वयतस्तथा। रक्तपित्तेऽपि सततं बुधैर्न प्रतिषिध्यते। मधुरं तद्धि रूक्षत्व कषायानुरसं लघु। लघुपाकि सरं योषविषमज्वरनाशनम्। माहीकात्पानरं किञ्चित् खार्जूरं वातशोधनम्। तदेव विगतं रुच्यं कफघ्नं कर्षणं लघु। कषायमधुरं हृद्यं सुगन्धीन्द्रियबोधनम्। कासार्शोव्रणदोषमूत्राघातानिलापहा। स्तन्यरक्तक्षयहिता सुरा दुःखदोषनी। कासार्शोव्रणदोषास्रप्रतिश्यायविनाशिनी। श्वेता मूत्रकफस्तन्यरक्तमांसकरी सुरा। अर्द्धरोचकशूलकुक्षितोदशूलप्रमर्दनी। प्रसन्ना कफवातार्शोविबन्धानाहनाशिनी। पित्तलात्यकफा रुच्या सर्व्वातप्रकोपणी। विष्टम्भिनी सुरा गुर्वी क्लेद्या तु मधूत्किटा। रूक्षा नातिकफा हृद्या पाचनी वातिकी स्मृता। सिंदोषो भेद्यहृद्यश्च कोष्ठशो मदनप्रियः। श्यामाश्यामजगन्धः पक्वा रूक्षकटूकफयोपहृत्। हृद्यः प्रवाहिकाटोपदुर्नामानिलगोषहृत्। वक्रसो रूक्षसारत्वाद्विष्टम्भी वातकोपनः। दीपनः रूक्षविस्रम्लो विग्दोत्क्लमदो गुरुः। कषायो मधुरः शीधुर्गौडः पाचन दीपनः। माक्षिको मधुरो रुच्यो दीपनो वस्तिशोधनः। वातघ्नो मधुरः पाके हृद्य इन्द्रियबोधनः। तद्वत् पक्वरसः शीधुर्बलवर्णकरः सरः। शोफघ्नो दीपनो हृद्यो रुच्यः क्लेदार्शसां हितः। मार्द्वीकः शीतरसिकः क्षयघूदरनाशनः। वर्णबलकरः स्वर्यो विबन्धार्शोऽर्शसां हितः। आक्षिकः पाण्डुरोगघ्नोमेहघ्नः संग्राहको लघुः। कषायमधुरः शीधुः पित्तश्लेष्मरक्तप्रसादनः। जाम्बवो बद्धनिस्नेहस्तुवरो वातकोपनः। तीक्ष्णः सुराखवो हृद्यो मूत्रकृत् कफवातहृत्। सुखप्रियः स्थिरमदो विष्टम्भोऽनिलनाशनः। बदुर्मधूखवस्त्वेवं भेदकृत्विषापहः। तिक्तः कषायशोफघ्नस्तीक्ष्णः स्वादुरवातकृत्। तीक्ष्णः कषायो मदकृन्नामकफगुल्मजित्। क्रमिमेदोऽनिलहरो वैरेयो मधुरो गुरुः। बल्यः पित्तहरो वर्ष्यो ग्रहणीकेशुरासवः। शीधुर्मधूकपुष्पोत्थो विदाह्यग्निबलप्रदः। रूक्षः कषायकफहृद्वातपित्तप्रकोपणः। निर्दिशेद्रसतस्त्वन्यान् कन्दमूलफलासवान्। नवं मद्यमभिष्यन्दि गुरु वातादिकोपनम्। अभिष्टगन्धं विरसमहृद्यञ्च विदाहि च। सुगन्धि दीपनं हृद्यं रोचिष्णु क्रमिनाशनम्। स्फुटकोत्थरं जीर्णं लघु वातकफापहम्। अरिष्टो द्रव्यसंयोगसंस्कारादधिको गुणैः। बहुदोषहरश्चैव दोषाणां शमनश्च सः। दीपनः कफवातघ्नः सरः पित्तविशोधनः। शूलाध्मानोदरश्लीहज्वराजीर्णार्शसां हितः। पिप्पल्यादिकृतो गुल्मकफरोगहरः स्मृतः। चिकित्सितेषु वक्ष्यन्तेऽरिष्टा रोगहराः पृथक्। अरिष्टासवधीनां गुणान् कर्म्माणि चादिशेत्। बहुशो यथास्वं संस्कारमवेक्ष्य कुशलो भिषक्। सान्द्रं विदाहि दुर्गन्धं विरसं क्रमिलं गुरु। अहृद्यं तरुणं तीक्ष्णसुण्णं दुर्भाजनस्थितम्। अल्पौषधं पर्य्युषितमत्यम्लं पिच्छिलञ्च यत्। तदहृद्यं सर्व्वदा मद्यं किञ्चिच्छेषन्तु यद्भवेत्। तत् यत् स्तोकसंस्कारं तरुणं पिच्छिलं गुरु। कफप्रकोपि तन्मद्यं दुर्जरञ्च विशेषतः। पित्तप्रकोपि बहुलं तीक्ष्णसुण्णं विदाहि च। अहृद्यं क्लेमलं पूति क्रमिलं विरसं गुरु। तथा पर्य्युषितस्यापि विद्यादभिषकोपनम्। सर्व्वदोषकरमेतन्तु सर्व्वदोषप्रकोपनम्। चिरस्थितं वातरुजं दीपनं कफवातजित्। रुच्यं प्रसन्नं सुरभि मद्यं सेव्यं मदावहम्। तस्यानेकप्रकारस्य सद्यस्य रसयोनयः। सौम्यग्नेयौष्णशीतैस्तैर्गुण्याच्च विकाशित्वाच्च वह्निना। समेत्य हृदयं प्राप्य धमनीरूर्द्धमागतम्। विशोभ्येन्द्रियचेतांसि शीघ्रं मदयतेऽचिरात्। चिरेण श्लेष्मिके दुःखि पानतो जायते मदः। अचिराद्वातिके हृष्टः पैत्तिके शीघ्रमेव तु। सात्विके शौचदाक्षिण्यकर्म्मसञ्जनजागरः। गीताभ्यवन सौभाग्यसुरतोत्साहलक्षणमदः। राजसे दुःखशीलत्वमात्मत्यागं सखाहसम्। कलहं साहसबन्धन्तु करोति तामसे मदः। अयौचनिद्रामात्सर्य्यागम्यागमनशीलताः, अल्पभाग्यत्वमप्यत्र कुर्य्याद्धि तामसे मदः। रक्तपित्तकरं गुरु क्लेदि भुक्तविपाचनम्। वैस्वर्य्यं जरयं श्लेष्मपाण्डुकिमिकरं लघु। तीक्ष्णोष्णं मूलकं हृद्यं कफघ्नं कटुपाकि च। तद्वत्तदासुतं सर्व्वं रोचनञ्च विशेषतः। गौड़ानि

रसगुल्मानि मधुगुल्मानि यानि च । यथापूर्वं गुरुतरागस्यभिस्यन्दकराणि च । तस्मात् तु दीपनं रूक्षं रूक्षाम्लकफरोगनुत् । यकृत्प्लीहोदरकरं भेदि सौवीरकं तथा । धान्याम्लं धान्ययोनित्वाद्दीपनं दाहनाशनम् । स्वर्गीत्पानास्तु पवनकफघ्नाहरं लघु । तैक्ष्ण्याच्च निर्हरेदाशु कफं गरुडधारणात् । सुखवैरस्यदौर्गन्ध्यमलशोषक्लमापहम् । दीपनं लघ्वग्नं भेदि हितमास्थापनेषु च । सप्तधर्माश्रितानाञ्च जनानां सात्म्यमुच्यते ।"

स्मृतौ तु जातिभेदेन मद्यविशेषपाननिषेधार्थं मद्यविभागादि दर्शितं यथा प्रा० वि० मनुहारीतयमैः । "सुरा वै मलमन्नानां पाप्मा च मलमुच्यते । तस्माद्ब्राह्मण राजन्यौ वैश्यश्च न सुरामिबेत्" । तथा च स्मृतिः "सुरा वै मलमन्नानामन्नं पाप्मतमं सुरेति" । यद्यप्यन्नशब्दः शूकधान्यतण्डुलविकारविशेष ओदने प्रसिद्धस्तथापि बहुतरवचनात् पिण्याकादिविकारमपि लक्षयति । तेनान्नविकारविशेषोभयहेतुः सुरा इत्युच्यते । स्मृतिः । "गौड़ी-पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा । यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैरिति" त्रिविधैव सुरेति पनसादिविकारव्याहत्तस्य त्रितयस्यानुगतस्यैकस्य प्रवृत्तिनिमित्तस्याभावात् न पानक्रियाव्याप्यत्वम् इतरव्यावर्त्तकधर्मस्य महापातकहेतुपानकर्मत्वसुपाधिः सुराज्ञानाधीनं महापातकं तज्ज्ञानाधीनञ्च सुराज्ञानम् इतरेतराश्रयापत्तेः-पुलस्त्यवचनविरोधाच्च यथा पुलस्त्यः । "पानसं द्राक्षं माधूकं खार्जूरं तालमैक्षवम् । मास्तिकं टाङ्कं माध्वीकमैरेयं नारिकेलजम् । समानानि विजानीयान्माद्यान्येकादशैव तु । द्वादशन्तु सुरा मद्यं सर्वेषामधमं स्मृतम्" । अनेनैकादशानां सुरात्वं निषेधति । मद्यशब्दस्तु मदहेतुद्रव्यमात्रवचनः अन्नादेव वचनात् न तु मद्यमात्रं सुराशब्दस्यार्थः तथा च वक्ष्यति: । "गौड़ीं माध्वीं सुरां पैष्टीं पीत्वा विप्रः समाचरेत् । तप्तकृच्छ्रं पराकञ्च चान्द्रायणमनुक्रमात्" । तयोर्यां सुरात्वे क्रमेण प्रायश्चित्तत्रयं न स्यात् । तथा भविष्ये "सुरा पैष्टी तु सुख्योक्ता न तस्यां त्वेतरे समे" । पैष्टीति तण्डुलविकारमात्रोपलक्षणम् । इतरे गौड़ीमाध्व्यौ । अतो अन्नविकार एव सुराशब्दस्य मुख्यत्वात् त्रिविधा सुरेति गौड़ीमाध्व्योर्गौणसुरात्वज्ञापनार्थम् तेनैतत्पानेऽपि महापातकत्वमतिदिशति यथैवैका तथा सर्वेति पैष्ट्यां पूर्वं प्रसिद्धिं दर्शयति यथा पैष्टी सुरा तथा सर्वा गौड़ी माध्वी च । पूर्ववचनोक्तापि पैष्टी दृष्टान्तत्वेनात्र दर्शिता । न पातव्या द्विजोत्तमैर्ब्राह्मणैरित्यर्थः । त्रैवर्णिकपरत्वे उत्तमपदानर्थक्यात् । न तु बहुवचनानर्थक्यपरीहारार्थं सुत्तमप्रातिपादिकानर्थक्यं युक्तं बहुवचनस्य सजातीयोपस्थापकत्वेन चरितार्थत्वात् । अतो ब्राह्मणस्य त्रिविधसुरापानं महापातकम् । "क्षत्रियवैश्ययोस्तु" सुरा वै मलमन्नानामिति वचनेन पैष्ट्यामेवेति स्थितम् गोविन्दराजविश्वरूपसर्वज्ञनारायणमनुमतोऽर्थः । अत एव "एवं माध्वी च गौड़ी च पैष्टी च त्रिविधा सुरा । द्विजातिभिर्न पातव्या कदाचिदपि कर्हिचित्" इतिमनुवचनेऽपि द्विजातिपदं ब्राह्मणपरमेव । अतएव द्विविधसुरापाने क्षत्रियादीनां महापातकं तावदस्तु दोषाभावमेवाह हारीतः । "कामादपि हि राजन्यो वैश्यो वापि कथञ्चन । मद्यमेवासुरां पीत्वा न दोषं प्रतिपद्यते" तदेवं पैष्टी निषेधस्तैवर्णिकानाम् गौडीमाध्वीनिषेधस्तु ब्राह्मणस्यैव मनु ब्राह्मणराजन्याविति कर्तृविशेषणं पुंलिङ्गं तत्र विवक्षितम् अतः कथं ब्राह्मणाः सुरापानं महापातकम् उच्यते निषिध्यमानक्रियायाविधेयत्वेन तत्कर्तुरनुपादेयत्वात्त द्विशेषणं लिङ्गमविवक्षितम् कृविकृभ्यत्ववत् । अतस्तज्जातिस्त्रीणामपि पाननिषेधः । तथा च भविष्ये "तस्माच्च पेयं विप्रेण सुरामद्यं कथञ्चन । ब्राह्मण्यापि न पेया वै सुरा पापभयावहा" । "यद्ब्राह्मणी सुरापी स्यात्र तां देवाः पतिलोकं नयन्ति" स्मृतिः । "मलमेतद्धरीरेण भार्या यस्य सुरां पिबेत् । पतितार्द्धशरीरस्य निष्कृतिर्नोपपद्यते" । न चैवं क्षत्रियवैश्यस्त्रीणामनिषेधः ब्राह्मणीपदस्य निषिद्धसुरापानकर्तृभार्यापरत्वकल्पात् "भार्या यस्य सुरां पिबेदिति सामान्यश्रवणाच्च ।

वैद्यविहितः मद्यसवनप्रकारस्तु गौडमाध्वीयशब्दे वक्ष्यते । "यत्तरत्नः पिबाचाच्च मद्यं मांसं सुरासवम् । तत्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः" मनुः । "अनासवास्यं करणं मदस्य" कुमा० । "नानासवपानसङ्कुलम्" काद० । "सुखं लालालिङ्गं पिबति चषकं सासवमिव" माल्लिश० । "संविदासवयोर्मध्ये संविदेव गरीयसी" तन्त्र० । भावे घञ् । २मद्यादेरभिषवे (मदचोवाण) आधारे घञ् । ३अभिषवपात्रे । आ+सू-प्रसवे अच् । ४प्रसवकर्त्तरि त्रि० । "देवस्य सवितुर्गतिमासवं विश्वदेव्यम्" स्मृतिः । [त० । तारतम्ये ।

आसवद्रु पु० आसवस्य (ताड़ी) मद्यभेदस्य कारणं द्रुः मध्य० आसवनीय त्रि० आ+सु-कर्म्मणि अनीयर् । अभिषवयोग्ये-

आसा स्त्री आ+सो-अङ्। अन्तिके निघ०"पितुर्न यस्या-सया" ऋ०१,१२७,८, "आसया अन्तिकेन" भा०। तस्य स्त्रीत्वमपि। "आ न इन्द्रो दूरादासात्" ऋ०४,२०,१, "आसादन्तिकादिति" भा०।

आसादन न०आ+सद-णिच्-ल्युट्। १सन्निधापने, २स्थापने "ज्ञानोत्तरपरिग्रहादि करोत्याज्ञासादनात्" कात्या०६,२,५, आश्व०श्रा० उदा० २आसन्नतासम्पादने ४मर्दने च "वयमासादने तस्य दर्पमद्य हरेमहि" भा०स०२०अ०।

आसादित त्रि०आ+सद-णिच्-क्त। १निकटीकृते २प्राप्ते च "आसादितप्रकटनिर्मलचन्द्रहासः" सा०द० २आयोजिते ४सन्निधापिते ५सम्पादिते ६कामकेलिपरे च।

आसाद्य त्रि० आ+सद-णिच्-यत्। प्राप्ये "अभूदनासाद्यम-धिज्यधन्वनः" रघुः। २निकटीकार्य्ये ३अवसादं प्रापणीये आ+सद-णिच्-ल्यप्। ४प्राप्येऽर्थे अव्य०।

आसार पु०आ+सृ-घञ्। १धारासम्पाते२वेगवृष्टौ, "त्वासा-सारप्रशमितवनोपप्लवं साधु मूर्ध्ना"। "पुष्पासारैः क्षपयतु भवान् व्योमगङ्गाजलार्द्रैः" मेघदू० "आसारसिक्तक्षितिसौरभेण" रघुः। ३प्रसरणे, ४सैन्यानां सर्व्वतो व्याप्तौ च। ५वरणे घञ्। सुवृष्टिवृक्षे। ६हादयराजमण्डलमध्ये व्यूहभेदे। हादयराजमण्डलस्थाने दर्शितम् यथा "आत्ममण्डलमेवात्र प्रथमं मण्डलं भवेत्। समन्तात्तस्य विज्ञेया रिपवो मण्डलस्य तु। उपेतस्तु सुहृत् ज्ञेयः मित्रमित्रमतः परम्। मित्रमित्रमतो ज्ञेयं मित्रमित्र रिपुस्ततः। एतत् पुरस्तात् कथितं पश्चादपि निशोच मे। पार्ष्ण्याक्रन्दस्ततः पश्चात् तत आक्रन्द उच्यते। आसारस्तु ततोऽप्यः स्यादाक्रन्दासार उच्यते। जिगीषोः मण्डलस्यास्य विज्ञेयाः तथा द्विज!। तत्रापि निश्चयः यत्नोवक्ष्यते मनुजपुङ्गव! विपक्षानुयाते यत्नोमध्यस्थः परिकीर्त्तितः। विपक्षानुयाते यत्नः सर्वेषामपि यो भवेत्। उदासीनः स कथितो बलवान् पृथिवीपतिः। मण्डलं तव संप्रोक्त मेतत् हादयराजकम्"। ६षड्विंशरगणैः रचिते दण्डदक्षन्दोभेदे च।

आसाव्य त्रि० आ+सु-ण्यत्। अभिषवणीये मद्यादौ।

आसिक पु० असिः प्रहरणमस्य ठक्। खड्गेन युद्धकारके

आसिका स्त्री पर्य्याप्तेपासनम् आस-पर्य्याये ण्वुल्। पर्य्या-प्तेव उपवेशने। "उड्डासिकाः सुखने" पात०भा०।

आसिक्त त्रि०ईषत् सम्यक् वा सिक्तः आ+सिच-क्त। १ईषत् सिक्ते २सम्यक्सिक्ते च।

आसित न० आस+भावे-क्त। १उपवेशने। आसधातौ उदा०। आधारे क्त। उपवेशनाधारे स्थाने। आसि-तस्य सुनेरपत्यं शिवा० अण्। असितसुनेरपत्ये स च शाण्डिल्यगोत्रे प्रवरः।

आसिधार न० असिधारा इवाचरत्यच्। "युवा युवत्या सार्द्धं यत् सुप्तभर्त्तृवदाचरेत्। अन्तर्निहितनङ्गः स्यात् आसिधार-व्रतं हि तत्" इति यादवोक्ते व्रतभेदे "अभ्यस्येत्तीव्र व्रत-मासिधारम्" रघुः।

आसिद्ध त्रि० आ+सिध-क्त। राजाज्ञया वादिना कृतावरोधे प्रतिवादिनि "नासिद्धस्तं विलङ्घयेत्" नार०।

आसिनासि पुंस्त्री आसिरिव तीक्ष्णाग्रा नासा यस्य असिनासः सुनिभेदत्वस्यापत्यम् इञ्। तदपत्ये ततः युवापत्ये फक् तौल्व० न लुक्। आसिनासायनः तत्पौत्रे।

आसिबन्धकि पु० असिबन्धकस्यापत्यम् इञ्। असिबन्धका-पत्ये ततः युवापत्ये फक् तस्य तौल्व० न लुक्। आसि-बन्धकायनः तत्पौत्रे।

आसीन त्रि०आस+शानच्। उपविष्टे आसधातौ उदा०

आसीनप्रचलायित न० आसीनेन उपविष्टेनैव प्रचलवत् आचरितम् प्रचल-क्यच् भावे क्त। उपविष्टस्य निद्रावशेन प्रचलनरूपे (वसेढोला) दोलने।

आसुत् त्रि० आ+सु-क्विप्। स्नताभिषवे। तस्येदम् मद्रा० क्त। आसुतीयः। तत्सम्बन्धिनि त्रि०।

आसुति स्त्री आ+सु-क्तिन्। सोमादिनिष्पीड़ने १अभिषवे, २मद्यनिष्पादने(चोयान)इति ख्याते मद्यपाके च। "परिष्कृ-तस्य रसिन इयमासुतिस्तवार्थमादाय" ऋ०८,१,२६। आ+सु-प्रसवे क्तिप्। २प्रसवे। "योनाविन्द्र! क्षुध्यद्भ्योवय आसुतिं दाः" ऋ०१,१०४,७। आसुतेः सन्निकृष्टदेशादि चतुरर्थ्यां मध्वा० मतुप्। आसुतिमत् तद्वति त्रि० स्त्रियां ङीप्।

आसुतीवल पु० आसुतिरस्यास्ति वलच् दीर्घः। १यौधिष्ठिरे। २सोमाभिषवशालिनि याज्ञिके च।

आसुर त्रि० असुरस्येदम् अण्। असुरसम्बन्धिनि। "आसुरं तद्वयेत्तोयं पीत्वा चान्द्रायणञ्चरेत्" स्मृतिः "कुलाल-चक्रनिष्पन्नमासुरं मृण्मयं स्मृतम्। तदेव कृतसंघटितं स्यात्यादि दैविकं भवेत्" कात्या०श्रा०। तेन (आसुरा) प्रभृतिमृण्मयस्य कृतसंघटितत्वेन याज्ञवल्क्यादेर्वा तथात्वता। स्त्रियां ङीप्। "आसुरी रात्रिरन्यत्र तत्रातां परिवर्जयेत्" स्मृतिः। २असुरवदाचरणशीले तदाचारश्च गीतायामुक्तोयथा।

"द्वौ भूतसर्गौ लोकेऽस्मिन् दैवआसुरएव च। दैवोविस्तरशः प्रोक्तआसुरं पार्थ मे शृणु। प्रवृत्तिञ्च निवृत्तिञ्च जना न विदुरासुराः। न शौचं नापि चाचारो न सत्यं तेषु विद्यते। असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम्। अपरस्परसम्भूतं किमन्यत् कामहैतुकम्। एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः। प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः। काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः। मोहाद्गृहीत्वासद्ग्राहान् प्रवर्त्तन्तेऽशुचिव्रताः। चिन्तामपरिमेयाञ्च प्रलयान्तामुपाश्रिताः। कामोपभोगपरमाएतावदिति निश्चिताः। आशापाशशतैर्बद्धाः कामक्रोधपरायणाः। ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्। इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम्। इदमस्तीदमपि मे भविष्यति पुनर्धनम्। असौ मया हतः शत्रुर्हनिष्ये चापरानपि। ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी। आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया। यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः। अनेकचित्तविभ्रान्तामोहजालसमावृताः। प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ। आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः। यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम्। अहङ्कारं बलं दर्पं कामं क्रोधञ्च संश्रिताः। मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः। तानहं द्विषतः क्रूरान् संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु। आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि। मामप्राप्यैव कौन्तेय ततोयान्त्यधमां गतिम्। त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः। कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्। एतैर्विमुक्तः कौन्तेय! तमोद्वारैस्त्रिभिर्नरः। आचरत्यात्मनः श्रेयस्ततोयाति परां गतिम्। यः शास्त्रविधिमुत्सृज्य वर्त्तते कामचारतः। न स सिद्धिमवाप्नोति न सुखं न परां गतिम्। तस्माच्छास्त्रं प्रमाणन्ते कार्य्याकार्य्यव्यवस्थितौ। ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्त्तुमिहार्हसि"।

२असुरवत् कर्त्तव्ये विवाहभेदे पु०। स च "ब्राह्मोदैवस्तथैवार्षः प्राजापत्यस्तथासुर" इति विभज्य "पैशाचश्चासुरश्चैव न कर्त्तव्यौ कदाचन" इति निषिध्य "ज्ञातिभ्योद्रविणं दत्त्वा कन्यायै चैव शक्तितः। कन्याप्रदानं स्वाच्छन्द्यादासुरोधर्म उच्यते" इति मनुना लक्षितः। ब्राह्मादिविवाहेषु प्रथमे पुत्रलाभरूपफलसङ्गा "इतरेषु चतुर्दशेषु सप्तसप्तावरादिनः। जायन्ते दुर्विवाहेषु ब्रह्मधर्म्मद्विषः सुताः"। अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा। निन्दितैर्निन्दिता स्त्रीणां तस्मान्निन्द्यान् विवर्जयेत्"। "कृविवाहैः क्रियालोपैरवेदानध्ययनेन च। कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च" इति मनुना तस्य निन्दा कृता "आसुरोद्रविणादानात्" या०स्मृ०। आसुरादिविवाहस्तु कर्त्तव्योऽभिसन्धिजः" इत्युक्तेः तत्राध्यन्याधानं कार्य्यमेव "आसुरादिविवाहेषु पितृगामि भवेदृनम्" स्मृतिः "अप्रजस्त्वोधनं भर्त्तुरासुरादिषु चतुर्ष्वपि। दुहितृणां प्रसूता चेच्छ्रेयेषु पितृगामि तत्" या०स्मृ०। "गर्हेष्वासुरगान्धर्वराक्षसपैशाचेषु भार्य्यात्वं प्राप्नुयाः" इति मिता०। दायभागगता तत्तद्विवाहकालेषु दत्तं धनमिति व्याख्यातम्। ३राजसर्षपे (राइसरिषा) स्त्री राजनि०।५ विड्लवणे न०। स्वार्थे अण्। ६असुरे। "तस्मादप्येतेददानमश्रद्धानमयजमानमासुरा रक्षांसीत्येवैतदाह" शा०उ० उक्ते ७अयजनशीले अयजनादिकर्त्तृत्वादस्यासुरत्वम्। अतएव मनुना "अयज्वनां हि यद्धिरण्यमासुरस्वं तदुच्यते इति" तदुद्रव्यस्यासुरधनत्वमुक्तम्। ततश्च शास्त्रानभ्युपगतविषयभोगहेतुरागप्रधाना, वैदिकनिषेधातिक्रमेण स्वभावसिद्धरागद्वेषानुसारिस्वज्ञानार्थहेतुप्रवृत्तिहेतुभूता च राजसी प्रवृत्तिः आसुरी प्रकृतिः। आसुरी सम्पत्तु असुरसम्पत्तुल्यहेतुभूता रजस्तमोमयी सम्पद् सा च अशुभासनासन्ततिजन्या तल्लक्षणं तु "दम्भोदर्पोऽभिमानश्च क्रोधः पारुष्यमेव च। अज्ञानं चाभिजातस्य पार्थ। सम्पदमासुरीम्" गीतोक्तम्। "दैवी सम्पद् विमोक्षाय निबन्धायासुरी मता" गीता उक्तेदात्मकचिकित्सायामेदे स्त्री शब्दच०।

आसुरस्व न० दैत०। "अयज्वनान्तु यद्द्रव्यमासुरस्वं तदुच्यते" इति मनूक्ते अयाज्यिधने।

आसुरायण पु०आसुरेरपत्यं युवा फक्। आसुरेर्युवगोत्रापत्ये स च शुक्लयजुःसम्प्रदाय प्रवर्त्तके "आसुरायणाच्च वाक्षादासुरायणः" यतः ब्रा० "आसुरेरपसंख्यानम्" वार्त्ति०उक्तेः स्त्रियां ङीषि। आसुरायणी।

आसुरि पु० तत्त्वज्ञानोपदेशेन असुरति संसारम् असुरच् असुरः कपिलस्तस्य अत्रिः इञ्। सांख्ययोगाचार्ये कपिलशिष्ये ऋषिभेदे। "एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ। आसुरिरपि पञ्चशिखाय तेन बहुधा कृतं तन्त्रम्" सा०का०। अयं प्रलयं तर्पणोपरिगणे पठितः। "सनकश्च सनन्दश्च तृतीयश्च सनातनः। कपिलश्चासुरिश्चैव बोढुः पञ्चशिखस्तथेति" तर्पणे स्मृतिः।

युवापत्ये तु फक् तस्य लोप्यन लुक्। आसुरिः तत्पुत्रः आसुरायणः तत्पौत्रः स च यजुर्वेदसंप्रदायप्रवर्त्तकः आसुरायणशब्दे उदा०।

आसुरिवासिन् पु० आसुरौ तत्समीपे वसति णिनि। आसुरिमुनेरन्तेवासिनि प्राग्दीव्यतीये शुक्लयजुःसंप्रदाय प्रवर्त्तके ऋषिभेदे। "प्राग्दीव्यतात् आसुरिवासिनः प्राग्दीव्यतः" यत०ब्रा०। [२सम्यक्सेके च।

आसेक पु०आ+सिच-घञ्। जलादिना १दृत्तादेरीषत्सेचने

आसेक्य पु०आसेकमर्हति यत् आ+सिच-ण्यत् वा। "पित्तोत्तु तुल्यगोत्रात्सेक्यः पुरुषो भवेत्। स शुक्रं प्राप्य लभते ध्वजोन्नतिमसंशयम्" इति वैद्यकोक्ते नपुंसकभेदे। ध्वजोन्नतये तस्य जन्मोत्तरं शुक्रसेकयोग्यत्वात् तथात्वम्।

आसेचन त्रि० न सिच्यते तृप्यति मनोऽत्र आधारे ल्युट् असेचनः स्वार्थेऽण्। १यद्दर्शने मनो न तृप्यति तस्मिन् मन आनन्दविषयहेतौ पदार्थे। स्वार्थेकन्। तत्रैव। "नयनयुगासेचनकम्" सा०द०। रावसकुटस्तु असेचनशब्देनाह। आ+सिच-भावे ल्युट्। २सम्यक्सेके न०। "तस्य सर्पिरासेचनं कृत्वा" यत०ब्रा०। करणे ल्युट्। ३आसेचनसाधने पात्रे। "या पात्राणि पृणन्त्यासेचनानि" ऋ०१,१६२,१९। ४तादृशे क्षुद्रपात्रे स्त्री ङीप्।

आसेदिवस् त्रि० आ+षद-लुसु। १निकटागते २प्राप्ते च। स्त्रियां ङीप् वस्योत्वम् इटोनिट्त्वञ्च। आसेदुषी।

आसेद्दृ त्रि० आ+सिध-तृच्। व्यवहारे राजाज्ञया प्रतिवादिनो गत्यादिरोधकर्त्तरि वादिनि स्त्रियां ङीप्। आसेधयत्रे उदा०।

आसेध पु०आ+सिध-भावे घञ्। व्यवहारे राजाज्ञया वादिना प्रतिवादिनः स्थानान्तरगत्यादिवरोधे, तत्कालप्रकारभेदादिः सिता०नारदेनोक्तः। "वक्तव्येऽर्थे ज्ञातिष्वन्यसुत्क्रामतश्च सहचः। आसेधयेद्विवादार्थी यावदाङ्गा नदर्शनम्। स्थानासेधः कालकृतः प्रवासात् कर्म्म यस्तथा। चतुर्विधःस्मादासेधो नासिद्धः विलङ्घयेत्। आसेधकाल आसिद्धः आसेधं योऽतिवर्त्तते। स विनेयोऽन्यथा कुर्व्वन्नासेद्धा दण्डभाग् भवेत्। नदीसन्तार कान्तारदुर्गोपप्लवादिषु। आसिद्धस्तं परासेधमुत्क्रामन्नपराध्नुयात्। निर्वेष्टुकामोरोगार्त्तो वियत्कुर्व्वन्नसे स्थितः। अभियुक्तस्तयान्येन राजकार्य्योद्यतस्तथा। गवां प्रचारे गोपालाः यस्यावामे क्रषीयलाः। यिस्मिन्नापि तत्कालमायुधीयाच्च विग्रहे"। नासेद्धव्याइति शेषः

आसेवन न० सम्यक् सेवनम्। १सततसेवने २पौनःपुन्ये च। "निसक्तपतावनासेवने" पा०। "आसेवनं पौनःपुन्यम्" वि०कौ०।

आसेवा स्त्री आ+सेव-अ। १पौनःपुन्ये "पौनःपुन्यमासेवा" वि०कौ०। २सम्यक्सेवायाञ्च।

आसेवित त्रि० आ+सेव-क्त। १सम्यक्सेविते २पौनःपुन्येन सेविते च भावे क्त। २आसेवनञ्च न०। ततः इष्टा०इनि। आसेवितिन्। आसेवनकर्त्तरि त्रि० स्त्रियां ङीप्।

आस्कन्द पु० आ+स्कन्द-घञ्। १उत्प्लवने २आक्रमणे ३संरोधने ४तिरस्कारे घोटकानामास्कन्दिताख्ये ५गतिभेदे

आस्कन्दन न० आस्कद्यतेऽत्र आधारे ल्युट्। १युद्धे भावे ल्युट्। २तिरस्कारे ३आक्रमणे "चरणास्कन्दनमामिताचलेन्द्रः" किरा०। ४अश्वगतिभेदे च।

आस्कन्दित आ+स्कन्द्-स्वार्थे णिच-क्त आस्कन्दोजातोऽस्य तारका० इतच् वा। १अश्वानां गतिभिदे स च पञ्चविधः तल्लक्षणञ्च क्षेमचन्द्रेण। "गतयः पञ्च धाराख्यास्तुरङ्गाणां क्रमादिमाः। तत्र धौरितकं धौर्य्यं धोरणं धोरितञ्च तत्। वल्गुकङ्धिखिक्रोडगतिवद् वल्गितं पुनः। अपक्रायसलङ्घासात् कुञ्चिताख्यं ततिक्रम्। प्लुतं तु लङ्घनं पञ्चिन्नगयोरुत्प्लुतिक्रमम्। उत्तेजितं तैरितं स्यात् मध्यवेगेन या गतिः। उत्तेजितसुपक्रष्टमास्कन्दितमित्यपि। चतुर्भिश्च पदैः कोपादिव उत्प्लुत्य या गतिः"। संज्ञायां स्वार्थे या कन्। तत्रैव। तारः इतच्। २आस्कन्दनयुक्तमात्रे त्रि०।

आस्क्र त्रि० आ+क्रम-ड वेदे नि०ह्रस्वः। आक्रमके "आनोविश्वा आस्क्रा गमन्तु देवाः" ऋ०१,१८३,२। "आस्क्राः अलूषामाक्रमितारः" भाष्यम्।

आस्त त्रि० आ+अस+क्तिप्ते क्त। सम्यक्क्षिप्ते।

आस्तर पु० आ+स्तृ-कर्मणि अप्। १कृत्तिपृष्ठस्थकम्बले (झूल) इति ख्याते। २विस्तरणीये कटादौ "आसो वल्कलमास्तरः किसलयः" भा०य०। भावे अप्। ३स्तरणे विस्तारे

आस्तरण न० आस्तीर्य्यते कर्म्मणि ल्युट्। १आस्तीर्य्यमाणे कटादौ "दिवास्तरणसंकीर्णे विस्तीर्णे गमनोत्तमे"। "दर्भास्तरणमास्तीर्य्य" भा० प० २५० अ०। २आस्तरणप्रयोजने स्त्री ङीप्। भावे ल्युट्। ३विस्तारे। "निवेशनं पुनर्नवीकृत्य सेयनास्तरणोपस्तरणैः" आश्व०गृ०। आस्तरणे दीयते कार्य्ये वा ल्युट्+अण्। ४आस्तरणे दीयमाने ५तत्र कार्य्ये च त्रि०।

आस्तरणिक त्रि० आस्तरणं प्रयोजनमस्य ठक्। आस्तरण-साधने वस्त्रादौ। "अथास्तरणिकं सर्वं घृतानां समवेक्षयन्" रामा०। तस्येदम् ठञ्त्वात् क। आस्तरणीय आस्तरण सम्बन्धिनि त्रि०।

आस्तायन त्रि० अस्तीत्यव्ययम् अस्ति+विद्यमानस्य सञ्ज्ञिकट-देशादि पत्वा०फक्। विद्यमानसञ्ज्ञिकटदेशादौ। [च

आस्तार पु०आस्तीर्यते आ+स्तृ-घञ्। १विस्तार्ये २विस्तारे

आस्तारपङ्क्ति स्त्री कर्म०। वैदिके छन्दोभेदे सा च सर्व्वानु-क्रान्ता०दर्शिता यथा "पञ्चमं पङ्क्तिः पञ्चपदा। अथ चतु-ष्पदाद्या विराट् दशका। अयुजो जागतो ततोऽष्टावयुजौ तद्विपरीतादौ चेत् प्रस्तारपङ्क्तिरन्यौ चेदास्तारपङ्क्तिरा-द्यन्तौ चेत् संस्तारपङ्क्तिर्मध्यमौ चेद्विष्टारपङ्क्तिः"।

आस्ताव पु० आस्तुवन्त्यत्र आ+स्तु+आधारे घञ्। यज्ञे स्तोतॄणां स्तवनाधारे देशे। "ततोऽहातृनास्तावे स्तो-ष्यमाणानुपोपविवेश" छा०उ०। "उद्गातृन् उद्गातृपुरु-षान् आगत्य आस्तुवन्त्यस्मिन्निति आस्तावस्तस्मिन्-स्तावे" भा०। "उदङ्मुखोनत्वाऽऽस्तावमासाद्यासीनो यामित्वान् उदङ्मुखोनभोऽसंस्कृतः" द्राह्यायणः। "उदङ्मुखास्तिस्रः तत आस्तावदेशं चात्वालं यामित्रं च स्तुत्यादिभिर्मन्त्रैर्यथाक्रममनुपतिष्ठेरन्" ताण्ड्यब्रा० भा०। "बर्हिर्वेद्यास्तावे वा स्थापयेयुः" आश्व० श्रौ०। भावे घञ्। २सम्यक्स्तवे।

आस्तिक त्रि०अस्ति परलोक इति मतिर्यस्य ठक्। १परलोका-स्तित्ववादिनि "आस्तीत्युक्ता मतो यस्मादास्तिकस्तेन कथ्यते" इति निरुक्तसंज्ञके जरत्कारुतनिभूते २मुनिभेदे आस्तीकोत्पत्तिकथा आस्तीकशब्दे वक्ष्यते। "आस्तिकस्य सुनेर्माता भगिनी वासुकेस्तथा जरत्कारुसुनेः पत्नी मनसादेवि ते नमः" मनसाप्रणाममन्त्रः।

आस्तिकार्थद पु० आस्तिकायार्थं ददाति दा-क। जनमे-जये राजनि शब्दच०।

आस्तिक्य न० आस्तिकस्य भावः ष्यञ्। आस्तिकत्वे पर-लोकाभ्युपगन्तृत्वे "आत्मात्मन्यपि आस्तिक्यं सत्यं शौचं दयार्जवम्। विद्वद्भिः कथ्यते लोके पुराणैर्ऋषिसत्तमैः। भा०आ० १अ०। "भावितैः करणैः पूर्व्वमास्तिक्या-च्युति दर्शनात्" भा०व० ८५अ०। "आस्तिक्यगुप्तभ-वतः प्रियधर्म्मार्थ्यम्" किरा०।

आस्तीक पु० वासुकिभगिन्यां जरत्कारुनाम्न्यां जरत्का-रुमुनेःसुते मुनिभेदे तदुत्पत्तिकथा यथा।

"तत्र तां भैक्षकन्यां प्रादात्तस्मै महात्मने। नागेन्द्रो वासुकिर्ब्रह्मन् स तां प्रत्यग्रहीत। अस्त्वनामेति वै मत्वा भरणे चाविचारिते। मोक्षभावे स्थितस्यापि हृन्मूतः परिमुह्यते। ततो नाम स कन्यायाः पप्रच्छ मुनिसत्तम!। वासुकिं भरणं चास्या न कुर्य्यामित्युवाच ह। भा० आ० ४६अ०। "सौतिरुवाच। वासुकिस्त्वथोद्वाह्यं जरत्कारुमृषिं तदा। सनाम्नी तव कन्येयं स्वसा मे तपसाऽन्विता। भरिष्यामि च ते भार्य्यां प्रतीक्ष्येमां द्विजोत्तम। रक्षणञ्च करिष्येऽस्याः सर्वयत्नात्तपोधन!। त्वदर्थं रक्ष्यते चैषा मया मुनिवरोत्तम!। ऋषिरुवाच। न भरिष्येऽहमेतां वै एष वै समयः कृतः। अप्रियञ्च न कर्त्तव्यं कृते चैनां त्यजाम्यहम्। सौतिरुवाच। प्रतिश्रुते तु नागेन भरिष्येऽमिनीमिति। जरत्कारुस्तदा वेश्म भुजग-स्य जगाम ह" इत्युपक्रम्य। "उत्सङ्गेऽस्याः शिरः कृत्वा सुषुप परिखिन्नवत्। तस्मिंस्तु सुप्ते विप्रेन्द्रे सवितास्तमियाद्गिरिम्। अङ्कः परित्यजे ब्रह्मंस्ततः सोऽचिन्तयत्तदा। वासुकेर्भगिनी भीता धर्म्मलोपान्ममक्षिणी। किन्तु मे सुकृतं भूयाद्भर्तुरुत्थापनं न वा। दुःखशीलो हि धर्म्मात्मा कथं नाम्यापराधुयाम्। कोपो वा धर्म्म-शीलस्य धर्म्मलोपोऽथवा पुनः। धर्म्मलोपो गरीयान्वै स्वादित्यत्राकरोन्मतिम्। उत्थापयिष्ये यद्येनं ध्रुवं कोपं करिष्यति। धर्म्मलोपो भवेदस्य सन्ध्यातिक्रमणे ध्रु-वम्। इति निश्चित्य मनसा जरत्कारुर्भुजङ्गमा। तस्मिंं दीप्ततपसं ययाचमनलोपनम्। उवाचेदं वचः श्लक्ष्णं ततो मधुरभाषिणी। उत्तिष्ठ त्वं महाभाग! सूर्य्योऽस्त-मुपगच्छति। सन्ध्यामुपास्तुमव्यग्रः स्नातो यतव्रत!। प्रादुष्कृताग्निहोत्रोऽयं सुहूर्त्तो रम्यदारुणः। सन्ध्या प्रवर्त्तते चेयं पश्चिमायां दिशि प्रभो!। एवमुक्तः स भगवान् जरत्कारुर्महातपाः। भार्यां प्रस्फुरमाणौष्ठ इदं वच-नमब्रवीत्। अवमानः प्रयुक्तोऽयं त्वया मम भुजङ्गमे!। क्षमीयं ते न वत्स्यामि गमिष्यामि यथागतम्। यत्किंचिद्धि न वामोरु! मयि सुप्ते शिवावहः। अस्तं गन्तुं यथाकाल मिति मे हृदि वर्त्तते। न वाऽप्यवमतस्येह वासो रोचेत कस्यचित्। किं पुनर्ब्रह्मर्षीणस्य मम वा महिषस्य वा। एवमुक्ता जरत्कारुर्भार्या हृदयकम्पनम्। अन्वयोङ्गिनो तत्र वासुकेः सन्निवेशने। नावमानात्कृतवती तवाहं विप्रबोधनम्। धर्म्मलोपो न ते विप्र! स्वादिति तन्मया कृतम्। उवाच भार्यामित्युक्तो जरत्कारुर्महातपाः।

ऋषिः कोपसमाविष्टस्त्यक्तुकामो भुजङ्गमाम् । न मे वाग्-न्तं प्राह गमिष्येऽहं भुजङ्गमे ! । समयो ह्येष मे पूर्व्वं त्वया सह निथः कृतः । सुखमस्युषितो भद्रे ! ब्रूयास्त्वं भ्रातरं शुभे । इतो मयि गते भीरु ! गतः स भगवानिति । त्वं चापि मयि निष्क्रान्ते न शोकं कर्त्तुमर्हसि । इत्युक्ता साऽनवद्याङ्गी प्रत्युवाच मुनिं तदा । जरत्कारुं जरत्कारुश्चिन्ताशोकपरायणा । बाष्पगद्गदया वाचा मुखेन परिशुष्यता । कृताञ्जलिर्व्वरारोहा पर्य्यश्रुनयना ततः । धैर्य्यमालम्ब्य यामोरूर्व्वृत्तेन प्रवेपता । न मामर्हसि धर्म्मज्ञां परित्यक्तुमनागसम् । धर्म्मे स्थितां स्थितो धर्म्मे सदा प्रियहिते रताम् । प्रदाने कारणं यच्च मम तुभ्यं द्विजोत्तम ! । तदलब्धवती मन्दा किं मां वक्ष्यति वासुकिः । मातृपापाभिभूतानां ज्ञातीनां मम सत्तम ! । अपत्यमीप्सितं त्वत्तस्तच्च तावन्न दृश्यते । त्वत्तोऽपत्यलाभेन ज्ञातीनां मे शिवं भवेत् । संप्रयोगो भवेद्यावन्मम मोघस्त्वया द्विज ! । ज्ञातीनां हितमिच्छन्ती भगवंस्त्वा प्रसादये । इममभ्यक्तरूपं मे गर्भमाधाय सत्तम ! । कथयित्वा महात्मानं गन्तुमिच्छस्यनागसम् । एवमुक्तस्तु स मुनिर्भार्य्यां वचनमब्रवीत् । यदुक्तमनुरूपञ्च जरत्कारु तपोधनः । अस्त्ययं सुभगे ! गर्भस्तव वैश्वानरोपमः । ऋषिः परमधर्म्मात्मा वेदवेदाङ्गपारगः । एवमुक्त्वा स धर्म्मात्मा जरत्कारुर्महान्मुनिः । उग्राय तपसे भूयो जगाम कृतनिश्चयः" । "ततः प्रववृधे गर्भो महातेजा महाप्रभः । यथा सोमो द्विजश्रेष्ठ ! शुक्लपक्षोदितो दिवि । अथ काले तु सा ब्रह्मन् ! प्रजज्ञे भुजगस्वसा । कुमारं देवगर्भाभं पितृमातृभयापहम् । ववृधे स तु तत्रैव नागराजनिवेशने । वेदांश्चाधिजगे साङ्गान् भार्गवाच्यवनात्मजः । चीर्णव्रतो बाल एव बुद्धिसत्त्वगुणान्वितः । नाम चास्याभवत् ख्यातं लोकेषुास्तीक इत्युत । अस्तीत्युक्त्वा गतो यस्मात्पिता गर्भस्थमेव तम् । वत्सं तस्मादिदं तस्य नामास्तीकेति विश्रुतम्" । भा० आ० ४७ अ० "यो जरत्कारुणा जातो जरत्कारौ महायशाः । आस्तीकः सर्पसत्रे वः पन्नगान् योऽभ्यरक्षत । तं स्मरन्तं महाभागा न मां हिंसितुमर्हथ । सर्पापसर्प भद्रं ते गच्छ सर्प ! महाविष ! । जनमेजयस्य यज्ञान्ते आस्तीकवचनं स्मर । आस्तीकस्य वचः श्रुत्वा यः सर्पो न निवर्त्तते । शतधा भिद्यते मूर्ध्नि शिंशवृक्षफलं यथा" तत्रैव । "आस्तीकस्य कवेः साधोः सुश्रूषापरमाख्यानः" भा० आ० १५ अ० आस्तीकमधिकृत्य कृतोऽध्यायः अण् । २आस्तीकचरिताख्यापके भारतान्तर्गते अवान्तरपर्व्वभेदे । "पौष्यं पौलोममास्तीकमादिवंशावतारणम्" भा० आ० १अ० । "आयुष्मानिदमाख्यानमास्तीकं कथयामि ते" भा० आ० १५ अ० । आस्तीके भोजयेद्राजन् ! दद्याच्चैव गुडौदनम्" भा० स्वर्गा० प० ६ अ० । [जरत्कारुसुनिपत्न्याम् ।

आस्तीकजननी स्त्री ६त० । मनसादेव्यां वासुकिभगिन्यां

आस्तीर्ण त्रि० आ+स्तृ-क्त । विस्तीर्णे कृतप्रसारणे "आस्तीर्णतल्परचितावसथः शयेन" माघः । "आस्तीर्णाजिनरत्नासु" रघुः ।

आस्तृत त्रि० आ+स्तृ-क्त । विस्तीर्णे

आस्तेय स्त्री अस्तीत्यव्ययतत्वविद्यमाने भवः "हृतिकुशीत्यादि०" पा० ढक् । विद्यमानपदार्थभवे ।

आस्थ त्रि० अस्तस्येदम् अण् । अस्तसम्बन्धिनि । "त्वं त्यमिन्द्रत्यमास्थबुध्नाय वेन्यम्" ऋ० १०,७१,३ । "आस्थबुध्नाय अस्तास्तबन्धिसुखतल्यमूलाय" भा० ।

आस्था स्त्री आ+स्था-अङ् । १आलम्बने, २अपेक्षायां, ३श्रद्धायां, ४स्थितौ, ५यत्ने "ईषदादरे च "अनास्थया स्तनकरप्रसारिणीम्" नैष० । "स्त्री पुमानित्यनास्थेषा" "अनास्था वास्तवस्तुषु" इति च कुमा० । "अलंघास्थापराङ्मुखः" "पिण्डे ह्यनास्था खलु योतिकेषु" रघुः । "कास्याभवेऽस्मिन् तव राम ! रामे" भट्टिः । आधारे अङ् । ७सभायाम् आस्थाने ।

आस्थान न० आस्थीयतेऽत्र आ+स्था आधारे ल्युट् । १सभायाम् "तदायमास्थाननिकेतनाजिरम्" किरा० "राजानमास्थानमण्डपगतम्" काद० । २विश्रामस्थाने । आस्थानीत्यपि सभायाम् । टित्त्वात् ङीप् । आस्था नोर्ध्वूर्त्तः सभार्ध्वूर्त्तः । भावे ल्युट् । ३आस्थायां ४श्रद्धायाञ्च न० ।

आस्थापन न० आ+स्था-णिच्-युक् ल्युट् । १सम्यक्स्थापने । करणे ल्युट । २सुश्रुतोक्ते व्रणोपक्रमणीयवस्तिभेदे च । "द्विविधोवस्तिः नैरूहिकः स्नैहिकश्च । आस्थापनं निरूह इत्यनर्थान्तरम् । "सदोषनिर्हरणात् शरीररोगहरणाद्वा निरूहः वयःस्थापनादायुःस्थापनाद्वास्थापनम्"

आस्थापित त्रि० आ+स्था+णिच्-युक् क्त । सम्यक् स्थापिते आचितादिपाठात् अस्यानोदात्तता न ।

आस्थायिका स्त्री आ+स्था-भावर्थनिहवे ण्वुल् स्त्रीत्वात् टापि अत इत्त्वम् । १आस्थाने आस्थायौ । "जनकोऽहं वैदेह आसाञ्चक्रे का० उ० भाष्ये "आसाञ्चक्रे आस्थायिकां दत्त-

वानितिलुक्नम् कर्त्तरि ल्युल् । आस्यावकः २आस्यानकर्त्तरि त्रि० । स्त्रियां टाप् अत इत्वम् ।

आस्थित त्रि० आ+स्था–क्त । १अवस्थाने २प्राप्ते ३आरूढे "एकं स्कन्दमास्थितौ" रघुः । ४आश्रिते च ।

आस्थिति आ+स्था–क्तिन् । १स्तास्थायां २तात्पर्य्येण वर्त्तने च ।

आस्थेय त्रि० आ+स्था–कर्म्मणि यत् । अवलम्बे । "नह्येषा बुद्धिरास्थेया" रामा० । "यल्लालनमास्थेयम्" काश्यिका ।

आस्नात त्रि० आ+स्ना–कर्त्तरि क्त । स्नानकर्त्तरि स्नातानुलोमे ।

आस्नान त्रि० आ+स्ना–भावे ल्युट् । प्रक्षालनेन शुद्धौ । "आस्नाने तां नियुञ्जीत" अथ० १४,२,६५ । [आसभवे ।

आस्रेय त्रि० आस्रे भवः ढक् आसन्नादेशः अतोलोपः ।

आस्पद न० आ+पद–घञ् सुट् च । १प्रतिष्ठायाम्, २पदे, ३स्थाने, "ध्यानास्पदं भूतपतेर्विवेश" स्तनद्वयेऽस्मिन् हरिचन्दनास्पदे "सरागमस्या रशनागुणास्पदम्" इति च कुमा० । "तदास्पदं श्रीर्युवराजसंज्ञितम्" । रघुः "व्योम्नीव मुकुटोच्छ्रायेन वदने केतुश्चकारास्पदम्" माघः ४ क्षत्ये, ५प्रभुत्वे च ६अवलम्बने ७विषये च । "निधनता सर्व्वापदामास्पदम्" किरा० । "तस्मात् केवलप्रकृतास्पदा तुल्य योगितेति" माघस्य ५,२१ आ० मल्लि० । दृश्यवस्थाने उपगच्छास्पदञ्चैव" मनुः । ९लम्बावधिदृश्यमस्थाने । "कर्म्मस्थानञ्च दृश्यं मेरुरणमास्पदं खस्य" ज्योतिषम् ।

आस्यन्दन न० आ+स्यन्द–ल्युट् । ईषत्कम्पने ईषच्चलने

आस्पात्र न० आस्यरूपं पात्रं ष० । आस्यरूपे पात्रे "आस्यपात्रं जुहूर्देवानामिति" शत० ब्रा० १,४,२,१२ । "आस्यरूपं पात्रमास्यपात्रम्" भा० ।

आस्फाल पु० आ+स्फल–चाले घिञ्–अच् स्फुल+घञ् स्फालादेशः वा । १चालने २स्फालिकर्म्मचालने क्षारः ।

आस्फालन न० आ+स्फल–चाले–ल्युट् । १ताडने २चालने च । "ऐरावतास्फालनकर्कशेन" कुमा० सुरद्विपास्फालनकर्कशाङ्गौ" "ऐरावतास्फालनविक्लवं यः" "आसां जलास्फालनतत्पराणाम्" रघुः । अनवरतधनुर्ज्यास्फालनेति" शकु० । "एलालतास्फालनलब्धगन्धः" माघः । २आटोपे ३प्रागल्भ्ये च ।

आस्फालित त्रि० आ+स्फल+णिच्–क्त । १चालिते २आघट्टिते ३ताडिते च । "अजस्रमास्फालितबल्लकीगुणः" माघे पाठान्तरम्

आस्फुजित पु० आस्फुलति आ+स्फुल–मा० डुतं जयति जि–क्विप् । शुक्राचार्य्ये । "शुक्रोभृगुर्भृगुसुतः सित आस्फुजित्" "ज्यो० त०

आस्फोट पु० आ+स्फुट–णिच्–कर्त्तरि अच् । १अर्कवृक्षे शब्दरत्ना० २नवमल्लिकायां स्त्री । ३शूरादेर्वाद्यशब्दे (ताल ठोका) ४संघर्षणजातशब्दमात्रे "जानूस्वास्फोटशब्दाश्च चालिताः स महागिरिः भा० व० १३अ० ।

आस्फोटक पु० आ+स्फुट–णिच्–ण्वुल् । (आखरोट) १प्रसिद्धे पर्व्वतीयवृक्षभेदे २वाद्यशब्दकारके त्रि० ।

आस्फोटन न० आ+स्फुट–णिच्–भावे ल्युट् । १प्रकाशने २वाद्यादेः शब्दकरणे "आस्फोटननिनादांश्च बालानां खेलतां तथा" रामा० । ३शूर्पादिना धान्यादेस्तुषादि निरसने (आछड़ान) व्यापारे च । "कुञ्चनास्फोटनाधानवेपथुव्यथनैः" सुश्रु० ।

आस्फोटनी स्त्री आस्फोट्यते विदार्य्यतेऽनया आ+स्फुट–णिच्–करणे ल्युट् स्त्रीत्वात् ङीप् । (तुरपिन) वेधनास्त्रे ।

आस्फोटित न० आ+स्फुट–णिच्–भावे क्त । वाद्यादेः शब्दे २प्रकाशने च । कर्म्मणि क्त । विदलिते त्रि० ।

आस्फोत पु० आ+स्फुट–अच् पृषो० टस्य तत्वम् । १अर्कवृक्षे २कोविदारवृक्षे, ३पलाशवृक्षे च "आस्फोतजातिकरवीरपलैः" सुश्रु० । स्वार्थे कन् । आस्फोतकोऽर्कवृक्षे ।

आस्फोता स्त्री आ+स्फुट–अच् पृषो० । १अपराजितायां, सा च द्विविधा श्वेतपुष्पा नीलपुष्पा च तयोर्गुणपर्य्यायौ भावप्र० "आस्फोता गिरिकर्णी च विष्णुक्रान्ताऽपराजिता । अपराजिते कटुके शोते कण्ठसुखप्रदे । कुष्ठमूत्रकृमिदोषानाशयेत्त्रिदोषापहे । कषाये कटुपाके च सुतिक्ते कृमिवह्निदे । २सारिवायाम् (छापरमाछी) लतामेदे च ।

आस्माक त्रि० अस्माकमिदम् अस्मद्+हृदमर्थेऽण् अस्माकादेशः । अस्मत्सम्बन्धिनि । स्त्रियां ङीप् । "रामादितादात्म्याङ्गीकारे चास्माकीं सिद्धान्तशय्यामधिशय्य" सा० द० । [सम्बन्धिनि ।

आस्माकीन त्रि० अस्माकमिदम् खञ् अस्माकादेशः । अस्मत्-

आस्य न० अस्यते प्रक्षेपोऽत्र+असु–आधारे यत् । १मुखे "तदास्यदाक्षेऽपि गतोऽधिकार्द्रताम्" नैष० । "तं हि स्वयंभूः स्वादास्यात्" यज्ञास्येन सदाऽग्नि" "पाण्यास्योहि द्विजः स्मृतः" "नित्यमास्यं शुचि स्त्रीणाम्" इति च मनुः । २तन्मध्ये च । यज्ञादौ तद्विशयाजादौ अस्य स्थाने वा आसन्नादेशः । तदादेशपक्षे आस्ये भवः यति वा नासन्नादेशः यलोपः । आस्ये भवः यति वा नासन्नादेशः यलोपः ।

२सुखभवे त्रि० । "तुल्यास्यप्रयत्नम्" पा०आस्ये भवमास्यं तास्यादिस्थानम्" त्रि०को० ।

आस्यन्दन आ+स्यन्द्–भावे ल्युट् । ईषत्स्रवणे ।

आस्यमय त्रि० आस्यं धयति-धे–क–मुम्–उप०स० । मुख्य० । सुखाद्यास्यादके मुखचुम्बके ।

आस्यपत्र न० आस्यमेव पत्रमस्य । १पद्मे शब्दच० ।

आस्यलाङ्गल पु० आस्यं लाङ्गलमिव भूमिविदारकं यस्य । शूकरे । [(दाड़ि) ।

आस्यलोमन् न० आस्यभवं लोम । पुरुषसुखजाते लोम्नि

आस्यहास्य त्रि० अस्थिनाऽस्थ्याऽहसनम् ततः अस्त्यर्थे विनुत्रादि० अण् । अनुगतिका० द्विपदद्विः । खड्गेन हसनशून्ये ।

आस्या स्त्री आस–भावे क्यप् । १स्थितौ, गतिराहित्ये । "आस्या वर्षकरी स्थाल्यसौकर्य्यार्थ्यकरी शुभा" हेम० ।

आस्यासव पु० आस्यस्यासव इव । (ताल) इति ख्याताय्यास् लालायाम् ।

आस्र न० असमेव स्वार्थेऽण् । रुधिरे । ततः सुखादि०अस्त्यर्थे इनि । आस्रो रुधिरयुक्ते त्रि० स्त्रियां ङीप् ।

आस्रप पु० आस्रं रुधिरं पिबति पा–क उप०स० । १राक्षसे तद्देवताके २मूलनक्षत्रे च ।

आस्राव पु०आस्रवति मनोऽनेन करणे अण् ।१क्लेशे। कर्त्तरि अच् । २अर्हत्प्रतिबिम्बे यदर्घ्यभेदे । अर्हच्छब्दे २८।१४६ विवृतिः ।

आस्राव पु० आस्रवति रुधिरमस्मात् आ+स्रु–अपादाने घञ् । १क्षते "जातएष तवास्त्रावस्त्वन्तु मोहाद् बुध्यसे" भा०उ०५७अ० । भावे घञ् । २सम्यक्स्रवणे कर्त्तरि च । सम्यक्स्रवणयुक्ते त्रि० । आस्रवति आ+स्रु–अ । सुखलालायाम्" "श्रुतेरास्रावत् विद्यात् निगिरन्नेव तत् शुचिः" "आ०त०गोत०" "आस्रावोलाला" रघु० ।

आस्राविन् त्रि० आ+स्रु–णिनि । मद्यादिस्रवणशीले । "मद्यानजदास्रावी प्रभञ्जन् विविधान् द्रुमान्" भा०व०अ०१३६ आस्रावयुक्ते च "दुष्टयोषिन्नास्रावो दीर्घकालानुबन्धी चेति दुष्टस्त्रवनिङ्कानि" सुश्रु० ।

आस्रावित आ+स्रु–क्त पक्षे इट् । यद्धिते ।

आस्राद पु० आ+स्रद–कर्म्मणि घञ् । १मधुरादिरसे २मद्यादिरसे च । भावे घञ् । २रसानुभवे । "मध्वासवादिविश्वास्राद:, मनुः "न जायते तदास्वादो विना रत्यादिवासनाम् । "तदास्वादे विभावादेः परिच्छेदो न विद्यते" सा०द०"धूतास्त्रास्वादकषायकण्ठः" कुमा० । आस्वादश्चासौ आदिरस्यानुभवस्येत्यपारभेदः स च स्रोत्रे चर्व्वणादिः मद्यकारादिरस्यास्ते अन्यविधएव आपारः यथाह सा०द०। "न जायते तदास्वादोविना रत्यादिवासनाम् । वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः तत्र यदि आद्या न स्यात् श्रोत्रियजरन्नीलांसकादीनामपि सा स्यात् यदि द्वितीया न स्यात् रागिणामपि तेषामिदमुत्तमोत्तमोधीन इत्यते तत्र स्यात् उक्तञ्च धर्म्मदत्तेन 'सवासनानां सभ्यानां रसस्यास्वादनं भवेत् । निर्व्वासनास्तु रङ्गान्तःकाष्ठकुड्याश्मसन्निभाः"इति । ननु कथं रामादिरत्यादयुत्तमोत्तमकारणैः सीतादिभिः सामाजिकरत्यादयुत्तमोत्तमत्वमुच्यते । व्यापारोऽपि विभावादेर्नान्या साधारणीकृतिः । तस्यभावेन यस्यासन् पात्रोधिभूतत्वादयः । सभ्यानां तदभेदेन स्वात्मानं प्रतिपद्यते । ननु कथं अनुत्पन्नानस्य सत्यस्यङ्गनादावुत्पन्नोत्तमोत्तमत्वमुच्यते । उत्पादादिसत्तबोधः साधारणत्वाभिमानतः । तच्चासिद्धमपि सत्यमुत्पादिसङ्गनादौ न दुष्यति । रत्यादयोऽपि साधारणत्वेन प्रतीयन्ते इत्याह । साधारणत्वेन रत्यादिरपि तद्वत् प्रतीयते । रत्यादेरपि स्वात्मगतत्वेन प्रतीतौ सभ्यानां पीड़ादुद्भादिभवेत् परगतत्वेन स्वरसत्वाभावतः । विभावादयोऽपि प्रथमतः साधारणत्वेन प्रतीयन्ते इत्याह । परस्य न परस्येति ममेति न ममेति च । तदास्वादे विभावादेः परिच्छेदो न विद्यते । ननु तथापि कथमेवमलौकिकत्वमेतेषां विभावादीनामित्युच्यते । विभावनादिव्यापारमलौकिकमुपेयुषाम् । अलौकिकत्वमेतेषां भूषणं न तु दूषणम् । आदिशब्दादनुभावसञ्चारयोः । तत्र विभावनं रत्यादेर्विशेषेण आस्वादाङ्कुरयोग्यतानयनम् । अनुभावनमेवंभूतस्य रत्यादेः समनन्तरमेव रसादिरूपतया भावनम् । सञ्चारणं तथाभूतस्यैतस्य सम्यक्चारणम् । विभावादीनां यथासंख्यं कारणकार्य्यसहकारित्वे कथं त्रयाणामपि रसोद्बोधे कारणत्वमित्युच्यते कारणकार्य्यसञ्चारिरूपा अपि हि लोकतः । रसोद्बोधे विभावाद्याः कारणान्येव ते मताः । ननु तर्हि कथं रसास्वादे तेषामेकः प्रतिभासदित्युच्यते । प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते । ततः संवलितः सञ्जौविभावादिः सचेतसाम् । प्रधानकरणन्यायाच्चर्व्वणाया रसोभवेत् । यथा खण्डमरिचादीनां कुंचेलनादपूर्व्वरूप कश्चिदास्वादः प्रधानकरणे कुंचायते विभावादिसंचेलनादिरूपि तथैवार्थः" "ज्ञातास्वादो विवृतलचनां को विक्षातुं समर्थः" भेमद्रु० ल्युट् । आस्वादनमात्र न० उक्त सा०द०वाक्ये उदा०।

आस्वादक न० आ+स्वद-ण्वुल् । आस्वादनकर्त्तरि "दर्शयन् भक्तकोनैव रसस्यास्वादको भवेत्" सा०द० ।

आस्वादित त्रि० आ+स्वद-णिच्-क्त । कृतास्वादे भक्षिते पदार्थे "आस्वादितार्द्रकसुकाः सस्नुद्रात्" माघः ।

आस्वाद्य त्रि० आ+स्वद-णिच्-यत् । १आस्वादयोग्ये पदार्थे "ग्राह्येन न तदाघ्रेयं नास्वाद्यञ्चैव जिह्वया" भा०आ०प० १०अ० । "आस्वाद्यतोयाः प्रभवन्ति नद्यः सस्नुद्रमासाद्य भवन्त्यपेयाः" हितो० । आ+स्वद+णिच्-ण्यत् । २भक्षयितुमित्यर्थे अव्य० ।

आस्वान्त त्रि० आ+स्वन-क्तभावे दीर्घः । शब्दिते ।

आह अव्य०ब्रू अच् णि०आहादेशः उवाचेत्यर्थे तिपोऽलि ब्रुवादेशस्तु वर्त्तमानकथनवाची एतच्छब्दिनः तङ्क्रियापदम् अयन्तु क्रियाप्रतिरूपकमव्ययम् । "अथाह वर्षी विदितो महेश्वरः" कुमा० ।

आहक पु० आहन्ति आ+हन-ड संज्ञायां कन् । वैद्यकोक्ते ज्वरभेदे (नासाज्वर) "तनुना रक्तयोथेन युक्ता नासापुटान्तरे । गात्रसुप्तज्वरकरः श्लेष्मणा ह्याहकोज्वरः" वै० ।

आहत त्रि० आ+हन-क्त । १ताडिते, "आहताद्दिक्कुञ्जरबृंहितेषु" "मयनयुगनिमीलत्तावदेवाहतोऽसौ" माघः । २अस्त्रादिक्षतोत्पत्तौ क्षतार्थके वाक्ये न० । ३टङ्कायाम् पु० । "ईषद्धौतं नवं शुभ्रं सदशं यत्र धारितम् । आहतं तद्विजानीयात् सर्व्वकर्म्मसु पावनम्" वसिष्ठोक्तलक्षणे ४वस्त्रे न० । "आहतेन वसनेन तां परिदध्यात्" गोभि० । "आच्छादनं तु योदग्रादाहतं आहृतकर्म्मणि" वायु० पु० । "परिधाप्याहते शुक्ले वाससी क्षेमकुण्डले" कन्दो० ५पुराणवस्त्रे न० तस्य उपभोगेन मर्दितप्रायत्वात्तथात्वम् । ६आघातप्राप्ते ७मर्दिते त्रि० "घादाहतं यदुत्थाय मूर्द्धानमधिरोहति" माघः । ८आधूर्णिते । ९अभ्यस्ते १०गुणिते च त्रि० "सूर्य्याग्निसंख्यया हिति-सागरैरयुताहतैः" सू०सि० ।

आहतलक्षण पु०आहतमभ्यस्तं लक्षणं यस्य । गुणैः प्रसिद्धे अमरः प्रसिद्धगुणानां हि सर्व्वैर्ज्ञातत्वेन परिचितत्वाभ्यस्तगुणत्वात् तथात्वम् ।

आहति स्त्री आ+हन-क्तिन् । यज्ञहेतुसंयोगभेदे १आघाते २ताडने "प्रभातवाताहतिकम्पितालतां" भट्टिः ३आगमने अत्र श्लोके पक्षे आहतिरागतिरित्यर्थः ४गुणने "अंशाहतिश्छेदवधेन भक्ता" लीला० । ५मर्द्दने च ।

आहनन आ+हन-करणे ल्युट् । १ताडनसाधने दण्डादौ । तत्र भवः यत् । आहनन्यः । आहननदण्डादिभवे "नमो दुन्दुभ्याय चाहनन्याय च" यजु० १६,३५ । "आहन्यते वाद्यतेऽनेनाहननं वाद्यसाधनं दण्डादि तत्र भवस्तत्र" वेदटी० । भावे ल्युट् । २आहतिमात्रार्थे ।

आहनस् त्रि० आ+हन-असुन् । १आहननीये २निर्म्मोचे सौमादौ । "तदाहना अभवत् पिप्युषी" ऋ०२,२३,१ । आहनाः आहननीयः सोमादिः" भा०आहनसे साधु यत् । "आहनस्यं तत्साधने त्रि० । "आहनस्याद्रे रेतः सिञ्चते" ऐत०ब्रा० ।

आहर त्रि० आहरति आ+हृ-अच । सञ्चयकारके "वनान्नराद्युपाहर्त्तैः समित्कुशफलाहरैः" रघुः । ट्वचि तु कर्म्मोपदएव साधुनेति भेदः ।

आहरकरटा स्त्री आहर करट । इत्युच्यते यस्यां क्रियायां मयू० । करटं प्रति आहरणार्थायां निदेशक्रियायाम्

आहरचेटा स्त्री आहर चेट । इत्युच्यते यस्यां क्रियायाम् मयू० । चेटं प्रति आहरणार्थनिदेशक्रियायाम् ।

आहरण न० आ+हृ-भावे ल्युट् । स्थानात् स्थानान्तरप्रापणे १आनयने । "तदाहरणसंघट्टो प्रतिघाज्ञानमेवच" । देवीपु० "करणं त्वयोदशविधं तदाहरणधारणप्रकाशकरम्" सां०का० "समिदाहरणाय प्रस्थिता वयम्" यजु० २आयोजने अनुष्ठाने च "अश्वमेधस्य कौरव्य ! चकाराहरणे मतिम्" भा० आश्व० ७अ० । कर्म्मणि ल्युट् । ३आहियमाणे पदार्थे ४विवाहादौ उपढौकनद्रव्ये "सत्त्वानुरूपाहरणोक्ततश्री." रघुः । [यनीये ३उपढौकनीये च ।

आहरणीय त्रि० आ+हृ-अनीयर् । १आयोजनीये २आनयनीये च ।

आहरनिवपा स्त्री आहर निवप इत्युच्यते यस्यां क्रियायाम् मयू० । आहरणनिमित्तार्थं निदेशक्रियायाम् ।

आहरनिष्किरा स्त्री आहर निष्किर इत्युच्यते यस्यां क्रियायाम् मयू० । आहरणनिष्किरणनियोगक्रियायाम् । एवमाहरवितानो आहरवसनो आहरसेना इत्यादयोऽपि मयू० पठिता तत्तत्कर्म्मार्थं नियोगक्रियायाम्तु ।

आहर्त्तृ त्रि० आ+हृ-तृच् स्त्रियां ङीप् १अर्जके । "आहर्त्ता योधयेत् भुक्तिमागमञ्चापि संसदि" हरिः २आयोजके "आहर्त्ता तस्य सत्रस्य स्वस्यान्योऽस्ति नराधिप" भा०आ० ५अ० ३आनेतरि "आहर्त्ता सर्वरत्नानां सर्वेषां न सुखावहः" भा०व० १४अ० । ४अनुष्ठातरि "आहर्त्ता क्रतूनाम्" काद० योगार्थे हरिः तु कर्म्मणि न पठी । "आत्मनोवधमाहर्त्ता कामी विहगतस्करः" विक्रमो० ।

आहव न० आहूयन्तेऽत्रयोऽत्र आ+हू–अप् संप्रसारणे गुणः । १युद्धे । "एवं विधेनाहवचेष्टितेन" रघुः "प्राविशन्नाहवप्रज्ञा आहावसपलिप्लवः" भट्टिः "न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे" गीता । "उद्यतैराहवे शस्त्रैः क्षत्रधर्मेहतस्य च" "डिम्बाहवहतानाञ्च विद्युता पार्थिवेन च" इति च मनुः । आहूयतेऽत्र आ+हु–आधारे अप् । २यज्ञे "तत्र नाभवदसौ महाहवे" माघः "आहवोयागः" भल्लि० ।

आहवन न० आहूयतेऽस्मिन् आधारे ल्युट् । १यज्ञे "दृष्टमाहवनमग्निजन्मनाम्" माघः । भावे ल्युट् । २समन्ताद्धवने च "त्वे अग्ने आहवनानि भूरि" ऋ० ७,१,१७ ।

आहवनीय पु० आहूयते ३प्रणीयते प्रक्षिप्यते वा हविरत्र आ+हु–कर्मणि आधारे वा० अनीयर् आहवनमर्हति छ वा । १अग्निभेदे । तदुद्धरणप्रकारः आश्व० औ० उक्तः । "उत्सर्जेऽपराह्णे गार्हपत्यं प्रज्वाल्य दक्षिणाग्निमानीय विट्कृत्वा हिरण्यतो वा वैकयोनय एके म्रियमाण वा प्रज्वाल्यारणीमन्तं वा मथित्वा गार्हपत्यादाहवनीयमुद्धरेत्" सू० द्विरग्नेयचतुर्थयामे गार्हपत्यं प्रादुष्कृत्य दक्षिणाग्निं प्रज्वाल्य च वैश्यस्टकात् द्रव्यतोवाग्न्यर्थं स्टकात् गार्हपत्याद्वा आनयेत् । तथा च अग्निमन्थनादिनाऽन्यतमप्रकारेण दक्षिणाग्निं साधयित्वा गार्हपत्यात् उवलनमग्निमाहवनीयार्थं मुद्धरेत् पात्रान्तरेण पृथक् कुर्यादिति तदर्थः । तत्र मन्त्रादिकविनियोग उत्तरसूत्रादावुक्तः । "आहवनीये वैश्यानरं द्वादशकपालमधिश्रयति" तैत्ति० । "यस्य गार्हपत्याहवनीयौ मिथः संसृज्यातां" ऐत० ब्रा० । "पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः । गुरुराहवनीयस्तु साग्नित्रेता गरीयसी" मनुः । कर्मणि अनीयर् । २सम्यग् होतव्ये हविरादौ त्रि० ।

आहार पु० आ+हृ–घञ् । १आहरणे । उपसर्गयोगात् २भोजने "निराहारो यताहारो तन्मनस्को समाहितौ" देवीमा० आहारविधिश्च सुश्रुते उक्तः यथा "अथाहारविधिं वक्ष्यामः । विस्तरेणाखिलं शृणु । आप्लावितमसंक्लिन्नं शुचि चार्द्रं महानसम् । तत्राप्रगुणसम्पन्नमन्नं भक्ष्यं सुसंस्कृतम् । शुचौ देशे सुसंगुप्तं समुपस्थापयेद्भिषक् ॥ विघुष्टैरगदैः स्नातं प्रोक्षितं व्यजनोदकैः । सिद्धैर्मन्त्रौर्हुतविषं सिद्धमन्नं निवेदयेत् । वक्ष्याम्यतःपरं क्षुत्क्षमाहारस्योपकल्पनम् । हृतं आण्ढ्यावसे देयं मेध्या देया तु राजते । फलानि सर्वभक्ष्यांश्च प्रदद्याद्दलेषु च । परिशुष्कप्रदिग्धानि सौवर्णेषु प्रकल्पयेत् । प्रदद्याच्च रसांश्चैव राजतेषूपहारयेत् । कटूनाणि खड्गांश्चैव सर्वान् शैलेषु दापयेत् । दद्यात्ताम्रमये पात्रे सुधौतं सुस्थितं पयः । पानीयं पानकं मद्यं स्फटिकेषु प्रदापयेत् । काचस्फटिकपात्रेषु शीतेषु शुभेषु च । दद्याद्वैदूर्य पात्रेषु रावखाण्डकर्करान् । पुरस्ताद्विमले पात्रे सुविस्तीर्णे मनोरमे । स्फटं सूपौदनं दद्यात् प्रभेदांश्च सुसंस्कृतान् । फलानि सर्वभक्ष्यांश्च परिशुष्काणि वानि च । तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत् । प्रदद्याच्च रसांश्चैव पानीयं पानकं पयः । खड्गान् यूषांश्च मेद्यांश्च सर्व्यं पार्श्वे प्रदापयेत् । सर्व्यान् गुडविकारांश्च रावखाण्डकर्करान् । पुरस्तात् स्थापयेत्पात्रो द्वयोरपि च मध्यतः । एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम् । भोक्तारं विजने रम्ये निःसम्बाधे शुभे शुचौ । सुगन्धिपुष्पार्चिते समे देशेऽथ भोजयेत् । विशिष्टमिष्टसंस्कारैः पथ्यैरिष्टैरवादिभिः । मनोज्ञं शुचि मात्रावत् प्रत्यग्रमुपनीतं हितम् । पूर्व्वं मधुरमश्नीयान्मध्येऽम्ललवणौ रसौ । पश्चाच्चान् रसान् वैद्यो भोजनेष्वपचारयेत् । आदौ फलानि भुञ्जीत दाडिमादीनि बुद्धिमान् । ततः मेद्यांस्ततो भोज्यान् भक्ष्यांश्चित्रांस्ततः परम् । घनमूर्व्वं समश्नीयात् कोविदाङ्गविपर्ययम् । आदावन्ते च मध्ये च भोजनस्य तु यस्यते । निरत्ययं दोषहरं फलेष्वमलकं स्मृतम् । मृद्वाम्लविसमालूकबन्दलुप्रभृतीनि च । पूर्व्वं योज्यानि भिषजा नतु भुक्ते कथञ्चन । सुखसुप्तैः समासीनः समदेहोऽवृतत्वरः । काले सात्म्यं लघु स्निग्धं स्निग्रसृष्टं द्रवोत्तरम् । बुभुक्षितोऽश्नमश्नीयान्मात्रावद्धितागमः । काले भुक्तं प्रीणयति सात्म्यमन्नं न बाधते । लघु शीघ्रं व्रजेत्पाकं स्निग्धोष्टं च बलवर्द्धनम् । स्निग्रं भुक्तं समं पाकं वात्यदोषं द्रवोत्तरम् । सुखं जीर्य्यति मात्रावद्वातसाम्यं करोति च । अतीवा यतयामासु क्षपा येषूत्तु कृताः । तेषु तत्कालजीर्णान्नं भुञ्जीत प्रातरेव तु । येषु चापि भवेयुश्च दिवसा भयमायताः । तेषु तत्कालविहितमपराह्णे प्रशस्यते । रजन्यौ दिवसार्द्धं च येषु चापि समाः स्मृताः । ज्ञात्वा सममहोरात्रं तेषु भुञ्जीत भोजनम् । नाप्राप्तातीतकालं वा हीनाधिकमथापि वा । अप्राप्तकाले भुञ्जानः शरीरे क्षयशो नरः । तांस्तान् व्याधीनवाप्नोति मरणं वा नियच्छति । अतीतकाले भुञ्जानो वायुनोपहतेऽनले । जन्तुष्वादिप्यते भुक्तं द्वितीयञ्च न काङ्क्षति । हीनमात्रमसन्तोषं करोति च बलक्षयम् । आध्मानगौरवाटोपहृदयांश्च कृतेऽ-

धिकम् । तस्मात्सुसंस्कृतं युक्त्या दोषैरेतैर्विवर्जितम् । यथोक्तगुणसम्पन्नमुपसेवेत भोजनम् । विभज्य कालदोषादीन् कालयोरुभयोरपि । अधोक्तं (अपरिमितम्) दुष्टसुक्ष्टं पाषाणलशलोष्टवत् । हिष्टं व्युषितमस्वादु पूति चान्नं विवर्जयेत् । चिरसिद्धं स्थिरं शीतमन्नमुष्णीकृतं पुनः । अयान्नमुपदग्धञ्च तथा स्वादु न लक्ष्यते । यद्यत् स्वादुतरं तत्तत् विदध्यादुत्तरोत्तरम् । प्रज्ञालयेदङ्गिराख्यं भुञ्जानस्य मुखञ्चक्षुः । विशुद्धे रसने तस्मै रोचतेऽन्नमपूर्ववत् । स्वादुना तस्य रसनं प्रथमेनापि तर्पितम् । न तथा स्वादयेदन्यत्तस्मात्प्रज्ञाख्यमन्तरा । सौमनस्यं बलं पुष्टिमुत्साहं हर्षणं सुखम् । स्वादु सञ्जनयत्यन्नम स्वादु च विपर्ययम् । भुक्त्वा च यत्प्रार्थयते भूयस्तत् स्वादु भोजनम् । अधितप्तोदकं युक्त्या भुञ्जानश्चान्तरा पिबेत् । दन्तान्तरगतं चान्नं शोधनेनाहरेच्छनैः । कुर्यादनाकुलं तद्धि मुखस्यानिष्टगन्धताम् । जीर्य्यत्यन्ने वर्द्धते वायुर्यदिदग्धे पित्तमेव तु । भुक्तमात्रे कफश्चापि तस्माद्भुक्ते क्षरेत्कफम् । धूमेनामोद्य हृद्यैर्वा कषायकटुतिक्तकैः । पूगकक्कोलकर्पूरलवङ्गसुमनःफलैः । कटुतिक्तकषायैर्वा मुखवैशद्यकारकैः । ताम्बूलपत्रसहितैः सुगन्धैर्वा विचक्षणः । भुक्त्वा राजवदासीत यावदन्नक्लमो गतः । ततः पदशतं गत्वा वामपार्श्वं तु संविशेत् । शब्दरूपरसस्पर्शान् गन्धांश्च मनसः प्रियान् । भुक्तवानुपसेवेत तेनान्नं साधु तिष्ठति । शब्दरूपरसस्पर्शगन्धाश्चापि जुगुप्सितान् । अशुच्यन्नं तथाभुक्तमतिक्षारञ्च वामयेत् । शयनं चासनं वापि नेच्छेद्वापि दिवोत्तरम् । नाग्न्यातपौ न प्लवनं न यानं नापि वाहनम् । नचैकरससेवायां प्रसज्येत कदाचन । शाकाचारान्नभूयिष्ठमन्नञ्च न समाचरेत् । एकैकशः समस्तान् वा नाभ्यस्येद्गुणान् सदा । प्राग्भुक्ते त्वविविक्तेऽग्नौ हिरन्नं न समाचरेत् । पूर्वभुक्ते विदग्धेऽन्ने भुञ्जानो हन्ति पावकम् । मात्रागुरूं परिहरेदाहारं द्रव्यतश्च यः । पिष्टान्नं नैव भुञ्जीत मात्रया वा बुभुक्षितः । द्विगुणञ्च पिबेत्तोयं सुखं सम्यक् प्रजीर्य्यति । श्रेयस्तेऽद्याद्भजाग्राणां गुरु विद्याद्यथोत्तरम् । गुरूणामर्द्धसौहित्यं लघूनां तत्प्रिरिष्यते । द्रवोत्तरो द्रवस्थापि न मात्रागुरुरिष्यते । द्रवाढ्यमपि शुष्कन्तु सम्यगेवोपपद्यते । विशुष्कमन्नमभ्यस्तं न पाकं साधु गच्छति । पिण्डीकृतमसंक्लिन्नं विदाहमुपगच्छति । श्लोतस्सञ्चरते पित्तं पक्वो वा यस्य तिष्ठति । विदाहि भुक्तमन्यद्वा तस्यान्नं विदह्यते । शुष्कं विरूक्षं विष्टब्धि वक्ष्यमाणदमाश्रयेत् । आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः । अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः । अत्यम्बुपानाद्विषमाशनाद्वा सन्धारणात्स्वप्नविपर्य्ययाच्च । कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य । ईर्ष्याभयक्रोधपरिप्लुतेन लुब्धेन रुग्दैन्यनिपीडितेन । प्रद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक् परिणाममेति । माधुर्य्यमन्नं गतमामसंज्ञं विदग्धसंज्ञं गतमम्लभावम् । विस्रिद्विपक्वं भृशतोदशूलं विष्टब्धमाबद्धविरुद्धवातम् । उद्गारशुद्धावपि भक्तकाङ्क्षा न जायते हृद्गुरुता च यस्य । रसावशेषेण तु सप्रसेकं चतुर्थमेतत् प्रवदन्त्यजीर्णम् । मूर्च्छाप्रलापो वमथुः प्रसेकः सदनं श्रमः । उपद्रवा भवन्त्येते मरणं चाप्यजीर्णतः । तत्रामे लङ्घनं कार्य्यं विदग्धे वमनं हितम् । विष्टब्धे स्वेदनं पथ्यं रसशेषे शयीत च । वामयेदाशु तं तक्राद्रुणेन लवणाम्बुना । कार्य्यं चानशनं तावद्यावन्न प्रकृतिं भजेत् । लघुकायमतस्तेन लङ्घनैः समुपाचरेत् । यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा । हिताहितोपसंयुक्तमन्नं समशनं स्मृतम् । बलं श्लोकबलाके वा विस्तेयं विषमाशनम् । अजीर्णे भुज्यते यत्तु तदध्यशन मुच्यते । त्रयमेतत्क्रिरुन्त्याशु बलं व्याधीन् करोति च । अन्नं विदग्धं हि नरस्य शीघ्रं शीताम्बुना वै परिपाकमेति । तत्रास्य शैत्येन निहन्ति पित्तमाले दिभावाच्च नयत्यधस्तात् । विदह्यते यस्य तु भुक्तमात्रे दहेत् हृत्कण्ठगलञ्च यस्य । द्राक्षाभयां साक्षिकसम्युक्तां लोढ्राभयां वा स सुखं लभेत । भवेदजीर्णं प्रति यस्य श्रद्धा स्निग्धस्य जन्तोर्बलिनोऽह्नकाले । प्रातःस शुद्धोऽभयामशङ्की भुञ्जीत सम्यक्क्षुधि हितां हितार्थी । स्वस्थं यदा दोषविबद्धमाशं लीनं न तेजःपथमाश्रयोति । भवत्यजीर्णेऽपि तदा बुभुक्षा सा मन्दबुद्धिं विबधन्ति हन्ति" । "पञ्चभूतात्मके देहे आहारः पाञ्चभौतिकः । विपक्वः पञ्चधा सम्यगुणान् स्वानभिवर्द्धयेत् । अविदग्धः कफं, पित्तं विदग्धः, पवनं पुनः । सम्यग्विपक्वो निःसार आहारः परिकीर्त्तितः । विण्मूत्रमाहारमलः सारः प्रागीरितो रसः । स तु व्यानेन विक्षिप्तः सर्व्वान्धातून् प्रतर्पयेत् । कफः पित्तं मलः स्वेदः स्वेदश्च खरोम च । नेत्रविट्त्वक् च क्लेदो धातूनां क्रमशोमलाः । दिवाविबुद्धे हृदये जायतः पुण्डरीकवत् अन्नमल्पक्षधातुत्वादजीर्णे पिहितं निशि । हृदि सङ्कोचिते रात्रौ प्रबुद्धस्य विवेचतः । लिम्पविक्षधातुत्वादजी-

र्थं न हित दिवा" भाव० प्र० भोजनकालदेशपात्रादि-भेदैर्दर्शनपूर्वमेतद्व्याख्या प्रसङ्गात् स्मृता यथा। "आहारं पचति शिखी दोषानाहारः पचति। दोषक्षये धातुन्पचति पचति च धातुक्षये प्राणान्। आहारः प्राणिनां सद्यो-बलहृद्धृतिधारणः। स्मृत्यायुःशक्तिवर्णौजःसत्वशोभाविवर्द्धनः। यथोक्तगुणसम्पन्नस्तमुपसेवेत भोजनम्। विचार्य देशकालादीनुकालयोरुभयोरपि"। उभयोःकालयोः प्रातः सायं च। तथा च "सायंप्रातर्मनुष्याणामशनं श्रुतिबोधितम्" नान्तरा भोजनं कुर्यादग्निहोत्रसमोविधिः"। प्रातः प्रथमयामादुपरि द्वितीययामादर्वाक् तथा च "यामामध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत्। याममध्ये रसोत्पत्तिर्यामयुग्मान्नलङ्घय." अन्यत्र "लघु भवति प्रकोपं रसदे मलेषु च। काले वा यदि वाऽकाले सोऽन्नकालउदाहृतः"। रसादौ पाकज्ञानमाह "उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः। लघुता क्षुत्पिपासा च यदा कालः स भोजने" स्थानमाह "आहारन्तु नरः कुर्याच्छिहरिसपि सर्व्वदा। निर्जने लक्ष्म्युपेतः स्यात्प्रकाशे क्षीयते श्रिया। निर्हारो मलमूत्रोत्सर्गः। अन्यत्र "आहारनिर्हारविहारयोगाः सदैव सद्भिर्विजने विधेयाः" इति। भोजनमाह "दोषक्षुद्वृष्टिं पथ्यं क्षेमं भोजनभाजनम्। रौप्यं भवति चात्युष्णं पित्तकृत्कफवातजित्। कांस्यं बुद्धिप्रदं रुच्यं रक्तपित्तप्रसादनम्। पैत्तलं वातलघ्नत्वेऽप्यक्षमिकफप्रणुत्। आयसे कालपात्रे च भोजनं सिद्धिकारकम्। शोथपाण्डुहरं बल्यं कामलाप्लीहशूलजित्। शैलजे स्मृतमेवं पात्रे भोजनं त्रीनि वारणम्। दारुजत्वे विशेषेण रुचिदं श्लेष्मकारि च। पात्रं पलाशजं रुच्यं दीपनं विषपाप्मनुत्। जलपात्रं तु प्रागुक्तं तटभावे त्वदोहितम्। पवित्रं शीतलं पात्रं घटितं स्फटिकेन यत्। काचेन रचितं तद्वत्तथा वैदूर्य्यसंभवम्। (प्रागुक्तं सुश्रुते सौवर्णादुक्तं तच्चाम्बुगर्भे २१० पृष्ठे" दर्शितम्)। "भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम्। अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम्" लवणस्य पित्तजनकत्वादार्द्रकस्य कटुत्वेन पित्तलत्वात् बुभुक्षितस्य क्षुत्पित्तस्य क्रमं प्रथमं लवणार्द्रकभक्षणमुच्यते "लवणं सैन्धवं क्षेयं चन्दनं रक्तचन्दनमिति' वचनाल्लवणमात्रं सैन्धवं नक्तिदोषघ्नम् यत आह गुणरत्ने "सैन्धवं लवणं स्वादु दीपनं पाचनं लघु। स्निग्धं रुच्यं हिमं हृद्यं रुच्यं नेत्र्यं त्रिदोषजित्" आर्द्रकं तु पित्तविरोधि मधुरपाकित्वात् यत आह तत्रैव "आर्द्रिका भेदिनी गुर्व्वी तीक्ष्णोष्णा दीपनी च सा। कटुका मधुरा पाके रूक्षा वातकफापहा"। अन्यदपि लवणार्द्रकं च नात्यम्लपित्तविरोधि संयोगस्वभावात् संयोगस्वरूपकथनार्थं भोजनस्य पूर्व्वं लवणार्द्रकभक्षणबोधकवचनमेव प्रमाणयति। भोजनादौ दृष्टिदोषविनाशाय ब्रह्मादीन् स्मरेत्। तद्यथा "अहं ब्रह्मा रसोविष्णुर्भोक्ता देवो महेश्वरः। इति संचिन्त्य भुञ्जानं दृष्टिदोषो न बाधते। अङ्गुलागर्भसंभूतं कुमारं ब्रह्मचारिणम्। दृष्टिदोषविनाशाय स्मरेन्नित्यं गणाधिपम्" "अश्रीयात्स्वजनाभूत्वा पूर्व्वं तु मधुरं रसम्। मध्येऽम्ललवणौ पश्चात्कटुतिक्तकषायकान्। फलान्यादौ समश्नीयाद्दाडिमादीनि बुद्धिमान्। विना बोचाफलं तद्वज्जम्बीराच्च कर्कटी। मृणालबिसशालूककन्देक्षुप्रभृतीन्यपि पूर्व्वमेव हि भोज्यानि न तु भुक्त्वा कदाचन"। मृणालं पद्मनालं, बिसं बिसखण्डकं, शालूककन्दं प्रसिद्धम्। "गुरु पिष्टमयं द्रव्यं तरुणान्नं घृतुकानपि। न जातु भुक्तवान् खादेन्नात्रां खादेच्च भुक्तितः। हृतपूर्व्वं समश्नीयात्कठिनं प्रकृतौ लघु। अन्ये पुनर्दुर्बाग्नी तु बलारोग्ये न सञ्चति" अयमर्थः प्राक् हृतपूर्व्वं कठिनं समश्नीयात् यथाकाम्यादिवासिनः प्रथमं सव्यञ्जनां हृतपूर्व्वां रोटिकां भुञ्जते ततो मृदुलघ्वादिकमोदनं भुञ्जते अन्ये पुनर्दुर्बाग्नयः भोजनान्ते दधिदुग्धतक्रादि भुञ्जते। "यदात् खादुत्तरं तद्विद्यादुत्तरोत्तरम्। भुक्त्वा यत्प्रार्थ्यते भूयस्तदुक्तं खादु भोजनम्"। खाद्यस्य गुणमाह। "सौमनस्यं बलं पुष्टिस्तृप्तिः खाद्यं रसनासुखम्। खादु सञ्जनयत्यन्नमखादु च विपर्ययम्"। अत्युष्णात् बलं हन्ति शीतं शुष्कं च दुर्ज्जरम्। अतिस्निग्धं ग्लानिकरं युक्तियुक्तं हि भोजनम्। अतिद्रुततयाहारो गुणान् दोषान्न विन्दति। भोज्यं शीतमकृष्टं च स्याद्विलम्बितमश्नतः। त्रिविधं गुरु तत्रिवारयत्याह "अन्नमलो नरो द्रव्यं मात्रागुरु विवर्जयेत् स्वभावतश्च गुरु यत्तथा संस्कारतो गुरु। मात्रागुरुस्तु शुष्कादिर्मांसादि प्रकृतेर्गुरुः। संस्कारगुरु पिष्टाद्यं प्रोक्तमित्यष्टकायणम्। आहारः सहिधः सूप्यं पेयं लेह्यं तथैव च। भोज्यं भक्ष्यं तथा चर्व्यं गुरु विद्यादुत्तरोत्तरम्। सूप्यं इक्षुदाडिमादि, पेयं पानकयवकरोदकादि। लेह्यं रसालाकथितादि (कढी) इति लोके प्रसिद्धम्। भोज्यं भक्तरूपादि। भक्ष्यं लड्डुकखण्डकादि (खरं विषदमल्पवर्च्चार्थं भक्ष्यमितिपाठभा०)। चर्व्यं चिपिटचणकादि। स्वभावगुरुसंस्कारगुरुणोः स्वभावलघुनश्च भक्ष्यस्य भोजनपरिमाणमाह "गुरुणामर्द्धसौहित्यं

लघूनां हविर्निरिष्यते "अयमर्थः मांसपिष्टान्नादिभिरर्द्धं गौरित्यं कर्त्तव्य मुद्गादिभिः स्वाभाविक्या मात्रया हविः कर्त्त-व्यमिति। "इतोऽन्योत्तरेष्वपि न मात्रागुरुरिष्यते"। एवं पेया-दिभ्योत्तर तत्कादप्यधिक ओदनादिः मात्रातोऽधिकोऽपि मात्रागुरुर्न मन्तव्यः पेयस्य सर्वतोलघुत्वात् उक्तञ्च सुश्रुते "पेयलेह्यान्नभक्ष्याणां गुरु विद्याद्यथोत्तरमिति" पेयं क्षीरादि लेह्यं रसालादि अन्नाद्यम् ओदनरूपादि भक्ष्यं मोदकादि "इत्थादृग्मपि शुष्कं तु सम्यगेवोपपद्यते। विशुष्क-कमन्नमभ्यस्त न पाकं साधु गच्छति"। अयमर्थः शुष्कमपि स्नेतोरोधकरमपि इत्थादृग् सम्यक् पाकं याति। केवलस्य शुष्कस्यान्नस्य दोषमाह विशुष्कमन्नमित्यादि। अपक्व तत् किं भवतीत्यपेक्षायामाह "पिण्डीकृतमसंक्लिन्नं विदाहमुपगच्छति" पिण्डीकृतम् अपोलावङ्गृतम् असं-क्लिन्नमसम्यगार्द्रं विदाहमुपगच्छति विदग्धं भवतीत्यर्थः। शुष्कादीनां त्रैगुण्यमाह "शुष्कं विरूक्षं विष्टम्भि वह्निव्यापदमावहेत्" शुष्कञ्चिपिटादि विरूक्षं क्षीरमत्स्यादि, विष्टम्भि चणकमत्स्यादि, वह्निमान्द्यङ्कु-र्य्यात्। न भक्षा न रदैश्चित्वा न निशायां न वा वक्त्रन्। न जलान्तरितानद्भिःसक्तूनश्नीयाच्च केवलान्। पुनर्हविं पृथक्पानं सामिषम्भवथा निशि। दनच्छेदनमुष्णं च सप्त सक्तूपयुज्यते" विषमाशनस्य लक्षणमाह। "बद्धे स्तोकमकाले वा क्षेयं तद्विषमाशनम्" बद्धलाल्यस्य भक्षितस्य दोष-माह "आलस्यगौरवाटोपशब्दांश्च कुरुतेऽधिकम्। क्षीन-मांसमलस्नोतो करोति च बलक्षयम्" अधिकमन्नम्। अकाले भुक्तेर्दोषमाह "अप्राप्तकाले भुञ्जानो ह्यस-मर्थतनुर्नरः तांस्तान् व्याधानवाप्नोति मरणञ्चाधि-गच्छति" अप्राप्तकाले कालादतिप्राक् भुञ्जानः असमर्थ-शरीरो भवति तथा सति तांस्तान् व्याधीन् शिरोव्यथा-विसूचिकाजलभक्तविलम्बिकाटान् आप्नोति तेषामाधिक्ये मरणमपि प्राप्नोतीत्यर्थः "कालेऽतीतेऽशृतोजस्तोवायु-नोपहन्यतेऽनले। अत्युष्णाद्विपच्यते भोक्तुर्न स्याद्भोक्तुं पुनः स्पृहा"। कृच्छ्रेभागद्वयं भोज्यैस्तृतीये वारि पूरयेत्। वायोः सञ्चारणार्थाय चतुर्थमवशेषयेत्"। "रसेनान्नस्य रसना प्रथमे-नोपतर्पिता। न तथा स्वादुमाप्नोति यथा सैव्याम्बुनान्तरा" "अत्यम्बुपानान्न विपच्यतेऽन्नमनम्बुपानाच्च स एव दोषः। तस्मान्नरो वह्निविवर्द्धनाय मुहुर्मुहुर्वारि पिबेदभूरि। भक्तादौ जलं पीतं कार्श्यमन्दाग्निदोषकृत्। मध्येऽग्नि दीपनं श्रेष्ठमन्ते स्थौल्यकफप्रदम्। अन्यच्च "समस्यूलकथा भुक्तमध्यान्तप्रथमाम्बुपाः" इति वाग्भटः" भुक्तं भोजनम् "हृषितस्तु न चाश्नीयात् क्षुधितो न पिबेज्जलम्। हृषितस्तु भवेद्रुग्णी क्षुधितस्तु जलोदरी। नतु स्निग्धा भोजनान्ते दुग्धं पिबन्ति तत्कथमुचितं यतस्निग्धा विभक्तस्य भोजनकालस्य प्रथमो भागोवातस्य, द्वितीयः पित्तस्य, तृतीयः कफस्य, यत आह "अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसम्। मध्येऽम्ललवणौ पश्चात्कटुतिक्तकषायकान्" अस्यायमभि-प्रायः भोजने पूर्वं भुक्तो मधुरो रसो बुभुक्षितस्य वात-पित्तयोः शमको भवति। भोजनमध्ये भुक्ते अम्ललवणे पित्तोपशमनेन वह्निवृद्धिं कुरुत। भोजनान्त्यसमये भुक्ताः कटुतिक्तकषाया रसाः कफं शमयन्तीति। अतोभोजना-वसानसमयस्य कफकालत्वात् तत्र कथं स्नेहजनकं दुग्धं पातुचितं भवति। यतउक्तम्। "दुग्धं स्वादुरसं स्निग्धमोज-स्यं धातुवर्द्धनम्। वातपित्तहरं हृद्यं श्लेष्मलं गुरु शीतल-मिति" उच्यते विदाहीन्यन्नपानानि यानि भुक्ते हि मा-नवः। तद्विदाहोपशान्त्यर्थं भोजनान्ते पयः पिबेत्" अतएव ब्रह्मपुराणे "कृत्वात् क्षीरान्नमाहारं न दध्यन्नं कदाचनेति लवणाम्लकटून्यानि विदाहीन्यपि यानि तु। तद्दोषं हर्तु-माहारं मधुरेण समापयेदिति" भोजनावसानसमये दुग्-धादिमधुरभोजने वातकफोपशमनेन लवणाम्लकटुभोजनज-नितं पित्तस्य वृद्धिं नाशयति पित्तवृद्धिनाशनेन च पित्त-वृद्धिरूपक्षीणा भवतीति कफवृद्धिरग्निमान्द्यादीनुत्पादयितुं न शक्नोति"।

आङ्गिकतत्त्वेप्याहारविधिरुक्तो यथा विष्णुपु०। "स केवलमघं भुङ्क्ते योभुङ्क्ते ह्यतिथिं विना। अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्। इन्द्रियप्रीतिजननं हृद्यापाकं विवर्जयेत्" तथा "सुवासिनीर्दुःखिनश्च गर्भिणीर्बालकान् भोजयेत्। सङ्कतान्नेन प्रथमं चरमं त्वहं। अभुक्तवत्सु चैतेषु भुञ्जन् भुङ्क्ते तिदुष्कृतिम्। मृतश्च नरकं गत्वा श्लेष्मभुग्जायते नरः। अस्नात्वाशी मलं भुङ्क्ते अजप्त्वा पूयशोणितम्। अकृत्वा च ह्रीं भुङ्क्ते अदत्त्वा विषभोजनम् असंस्कृ-तान्नभुङ्मूत्रं बालादिप्रथमं भक्षत्। भुक्तस्य यथा पुंसः पापबन्धेन जायते। इह चारोग्यमतुलं बलवृद्धिस्तथा नृप"। तथा "प्रयतस्तत्रपाणिस्तु भुञ्जीत प्रयतोऽग्रहीः। अन्नं प्रशस्तं पथ्यञ्च प्रोक्षितं प्रोक्षणोदकैः। न कुत्सितान्नं नैव जुगुप्सावदसंस्कृतम्"। विष्णुपु०"मन्त्राभिमन्त्रितं शस्तं न च पर्युषितं नृप!। अन्यत्र फलमांसेभ्यः शुष्क-शाकादिकात्तथा। तद्वद्दारिकोभ्यश्च गुडपक्वेभ्यएव च।

भुञ्जीतोद्धृतसाराणि न कदाचिदरेश्वर ! । नाश्नेयं पुरुषोऽश्नीयादन्यत्र जगतीपते ! । मध्वाज्यदधिसर्पिर्भ्यः सक्तुभ्यश्च विवेकवान् । अश्नीयात्तन्मना भूत्वा पूर्वन्तु मधुरं रसम् । लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः । प्रागुक्तं पुरुषोऽश्नन् वै मध्ये च काष्ठनाशनः । पुनरन्ते द्रवाशी तु बलारोग्ये न सञ्चति । अनिन्द्यं भक्षयेदित्यं वाग्यतोऽन्नमकुत्सयन् । पञ्च ग्रासान् महौनं प्राणाद्याप्ययनाय तत्" । मन्त्राभिमन्त्रितमिति मन्त्रानादेशे गायत्रीति वचनात् गायत्राभिमन्त्रितम् । गारुडे "शाकं लूपञ्च भूयिष्ठं अत्यम्लञ्च विवर्जयेत् । नक्तंरससेवायां प्रसज्येत कदाचन" । छन्दोग० प० । "सुनिभिर्हि रशनमुक्तं विप्राणां मर्त्यवासिनां नित्यम् । अक्तनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः" । अक्तनि अचिरो दितास्तमितसूर्य्येतरदिनमात्रे । तत्राप्यायुर्वेदीये विशेषः । "याममध्ये न भोक्तव्यं त्रियामन्तु न लङ्घयेत्" । याममध्ये रसस्तिष्ठेत्त्रियामे तु रसक्षयः" । तत्रापि पञ्चमयामार्द्धासख्यकालो दत्तवचनात् (तच्छब्दे ८०६ पृष्ठे वक्ष्यते त्रियामन्त्वित्यद्वियाममित्यायुर्वेदीये पाठः । दत्तवचनानुरोधात् त्रियाममिति पाठकल्पनं बोध्यम्) । महौनं हुङ्कारादिरहितम् । तथाचाहि:"मौनव्रतं महाकष्टं हुङ्कारेणैव नश्यति । तथासति महान् दोषस्तस्मात्तु नियतश्चरेत् । एष क्रमः पौराणिकत्वात् सर्व्वसाधारणः । विष्णुः । "न क्षतीयमधाश्नीयादापद्यपि कदाचन" । गोतासु । "आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः । रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः । कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः । आहारा राजसस्येष्टा दुःखशोकामयप्रदाः । यातयामं गतरसं पूतिपर्य्युषितञ्च यत् । उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्" मनुः । "आयुष्यं प्राङ्मुखोभुङ्क्ते यशस्यं दक्षिणामुखः । श्रियः प्रत्यङ्मुखोभुङ्क्ते ऋतं भुङ्क्ते ह्युदङ्मुखः" । नियमे त्वेवम् अनियमे तु नोदङ्मुखः । हारीतः: "नोदङ्मुखोऽश्नीयात्" । निष्कामस्य तु प्राङ्मुखेनैव यथाह देवलः । "प्राङ्मुखोऽन्नानि भुञ्जीत शुचिः पीठमधिष्ठितः । विशुद्धवदनःप्रीतोभुञ्जीत न विदिङ्मुखः" । जीवन्मातृकस्य दक्षिणाभुखत्वनिषेधमाह व्यास० "दक्षिणाभुखोन भुञ्जीत एवंविधभोजनमनायुष्यं मातुरुपदिशति" । चित्रु "कृष्णान्नं तथाश्राद्धं तिलैस्तर्पणमेव च । न जीवत्पितृकः कुर्याद्दक्षिणामुखभोजनम्" इत्याचारत्नाकरधृताज्जीवत्पितृकस्यापि निषेध इत्याहुः । व्यासः "पञ्चार्द्रीभोजनं कुर्य्यात् प्राङ्मुखोमौनमास्थितः । हस्तौ पादौ तथैवास्यमेषु पञ्चार्द्रता मता" । व्यासः "अपेक्षपङ्क्त्यां नाश्नीयात् संहतः स्वजनैरपि । कोहि जानाति किं कस्य प्रच्छन्नं पातकं महत् । भक्षयन्त्यजलद्वारमार्गैः षड्क्रियञ्च भेदयेत्" । जलादिना षड्क्रियाभेदाकरणे तु शङ्खः । "एकषङ्क्त्युपविष्टानां विप्राणां सहभोजने । यद्येकोऽपि त्यजेत् पात्रं शेषमन्नं विवर्जयेत् । मोहात् भुञ्जीत यः षडन्नमुच्छिष्टसहभोजनम् । प्राजापत्यं चरेद्विप्रः तत्रतः सान्तपनन्तथा" । । एतत्समानार्थमभिधायाह गोभिलः । "भुञ्जानेषु तु विप्रेषु यस्तु पात्रं परित्यजेत् । भोजने विघ्नकर्त्तासौ ब्रह्महापि तथोच्यते" । आप० "दिवा पुनर्न भुञ्जीतान्यत्र फलमूलेभ्यः" । मनुः "नातिप्रगे नातिसायं न सायं प्रातराशितः" अतिप्रगेऽचिरोदितसूर्य्ये अतिसायं सूर्य्यास्तमितसमये एवं प्रातराशितः दिनभोजनेनातितृप्तः न सायं न रात्रौ भुञ्जीतेत्यर्थः । आप० "यस्तु भोजनशालायां भोक्तुकामउपस्पृशेत् । आसनस्थोनचान्यत्र स विप्रः पङ्क्तिदूषकः" बौधा० "उपलिप्ते समे स्थाने शुचौ लघ्वासनान्विते । चतुरस्रं त्रिकोणञ्च वर्त्तुलञ्चार्द्धचन्द्रकम् । कर्त्तव्यमानुपूर्व्येण ब्राह्मणादिषु मण्डलम्" । "अकृत्वा मण्डलं ये तु भुञ्जतेऽधमयोनयः । तेषान्तु यत्तरक्षांसि हरन्त्यन्नानि तद्बलात्" । आप० । "भिन्नकांस्ये तु योविप्रोयदि भुङ्क्ते तु कामतः । उपवासेन चैकेन पञ्चगव्येन शुद्ध्यति" तथा शूद्रादिभोजनेनापरिष्कृतपात्रेऽपि दक्षमनुः "ताम्रपात्रे न भुञ्जीत भिन्नकांस्ये मलाविले । पलाशपद्मपत्रेषु मृन्मयी भुङ्क्तेन्द्रियं चरेत्" । नव्यवर्द्धमानधृताग्निपु० "अर्कपत्रे तथा पृष्ठे आयसे ताम्रभाजने । करे कर्पटके चैव भुक्त्वा चान्द्रायणञ्चरेत्" । पृष्ठे कदलीपत्रादिपृष्ठे । पैठी० "ताम्ररजतस्रुवर्णाश्मशङ्खशुक्तिस्फटिकानां भिन्नमभिन्नमिति न दोषः" । अत्र पाषाणपात्रं भोजने विहितम् । "तैजसानां मणीनाञ्च सर्व्वेषामश्मनश्च । भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः" इति मनुना पाषाणपात्रस्य शुद्धिविधानाच्च । प्रचेताः "ताम्रलाभ्यञ्जने चैव कांस्यपात्रे च भोजनम् । यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्" । अत्रिः "आसने पादमारोप्य योभुङ्क्ते ब्राह्मणः क्वचित् । सुखेन चान्नमश्नाति तस्यं गोमांसभक्षणं" । सुखेन हस्तोन्नोलनं विना गवादिदर्शनेन । आश्वमेधिके "आर्द्रपादस्तु भुञ्जीत

प्राङ्मुखश्चासने शुचौ । पादाभ्यां धरणीं स्पृष्ट्वा पाद्येनैकेन वा पुनः" । बौधा० "भोजनं हवनं दानमुपहारः परिग्रहः । बहिर्जानु न कार्य्याणि तद्वदाचमनं स्मृतम्" हारीतः "भाजनाङ्गबलिकर्म्म भोजनानि दैवतैर्यथेन कुर्य्यात्" । पराशरभा० वृद्धमनुः "न पिबेच्च भुञ्जीत द्विजः सव्येन पाणिना । नैकहस्तेन च जलं स्फूर्त्तेणावर्जितं पिबेत्" । मार्क० पु० "पादप्रसारणं कृत्वा न च वेष्टितमस्तकः" । मनुः "पूजयेदशनं नित्यं चाद्याच्चैतदकुत्सयन् । दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनन्देच्च सर्व्वदा । अन्नं दृष्ट्वा प्रणम्यादौ प्राञ्जलिः प्रार्थयेत्ततः । अन्नाद्यं नित्यमस्येतदिति भक्ष्याय वन्दयेत्" । विष्णुपु० "नागः कर्क्कश्च कर्करो देवदत्तोधनञ्जयः । बहिःस्था वायवः पञ्च तेषां भूमौ प्रदीयते । अदत्त्वा बाह्यवायुभ्यः प्राश्नादियो न होमयेत्" । इति विरुद्धपठितवचनान्नागादिभ्योबलिदानमिति प्राचीनाचारः । तत्रान्नं देवेभ्योदत्त्वैव भोक्तव्यं तथा च गीता "इष्टान् भोगान् हि वोदेवा दास्यन्ते यज्ञभाविताः । तैर्दत्तानप्रदायेभ्यो योभुङ्क्ते स्तेन एव सः" । यज्ञैः भाविता संवर्द्धिताः सोयुष्मभ्यं भोगानन्नादीन् वृष्ट्यादिद्वारा दास्यन्ति अतो देवैर्दत्तान् अन्नादीन् तेभ्योऽदत्त्वा योभुङ्क्ते स चौर एव । स्मृतिः "निवेद्य प्राशनात् पूर्व्वं देवपादोदकाकृतिः । क्षोतव्या जठरे वह्नौ स्तेन पाणितलेन तु" । तेन पादोदकेनापोशानं कृत्वा प्राणाद्याहुतिर्नैवेद्येन कार्य्या । यदुक्तमैवेद्यभक्षणन्तु पश्चादुपपादयिष्यते । ब्रह्मपु० "आपोशानञ्च गृह्णीयात् सर्व्वतीर्थमयञ्च यत् । अमृतोपस्तरणमसि विष्णोरन्नमयञ्च यत्" । अत्र चास्तरणार्थन्तु प्राश्यते ह्यमृतं सकृत् । अमृतोपस्तरणमसि स्वाहेति च वसुद्धरेत्" । सन्ध्यापद्धतौ लिखितवचनं प्रमाणयन्योऽस्मीत्येतदनन्तरं स्वाहाकारं कुर्व्वन्ति । ब्रह्मपु० "हस्तेन वामकेनापि नोदकेन कदाचन । दक्षाद्योवामहस्तेनाद्यान्नं लिहते भवेत् । हृतञ्चान्नमभक्ष्यत्वं तस्य यान्ति दुरात्मनः । प्राणेभ्यश्चैव पञ्चभ्यः स्वाहाप्रणवसंयुताः । पञ्चाहुतीस्तु जुहुयात् प्रणवाग्निमुखेषु च । प्राणाहुतिस्तृतीयाच्च भौनकः । "तर्जनीमध्यमाङ्गुष्ठैर्मुद्रिता प्राणाहुतिर्भवेत् । मध्यमानामिकाङ्गुष्ठैरपाने जुहुयात्ततः । कनिष्ठानामिकाङ्गुष्ठैर्व्याने च जुहुयाद्बुधः । तर्जनीन्तु अङ्गुष्ठमूलं कृत्वा उदाने जुहुयात्ततः । समाने सर्व्वहस्तेन वसुदायाहुतिर्भवेत्" । स्मृत्यर्थसारे । "प्राणाहुतौ घृताभावे पश्चाद्भोक्ष्यामि नो घृतम्" । देवल "न भुञ्जीत घृतं नित्यं वृद्धस्त्री भोजनद्वये । पवित्रमथ जुहुयुः सर्पिरालिप्तपाणयः" । कार्षी० "दर्भपाणिस्तु योभुङ्क्ते तस्य दोषेण बाधते । केशकीटादिसम्भूतस्ततोऽग्नीयात् सदर्भकः । यावदेयान्नमश्नीयाच्च ब्रूयात्तदुगुणान्गुणान् । अतोमौनेनयोभुङ्क्ते स भुङ्क्ते केवलन्तमम्" । मनुः "स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत्" । उद्धरेदुद्धरेत्पाणिं कुर्य्यादित्यर्थः । बौधा० "आचम्य संहते देशे उपविश्यान्नं संगृह्य सर्व्वाङ्गुलीभिरश्नन्नश्नीयात्" । संगृह्य अन्नपात्रं सम्यक्सम्पूर्य्येत्यर्थः । कार्षी० "प्रदद्यान्मधु पतये भुवनपतये तथा । भूतानां पतये स्वाहेत्युक्त्वा भूमौ बलित्रयम् । आपोशानं विधानेन कृत्वाश्नीयात् सुधीर्द्विज" । ब्रह्मपु० "तेजोसीति जपस्त्वन्नं प्रणमेदमृतञ्च यत् । आपोशानञ्च गृह्णीयात् सर्व्वतीर्थमयञ्च यत् । अमृतोपस्तरणमसि विष्णोरन्नमयञ्च यत्" । अन्नमयस्य विष्णोर्यदास्तरणमसीत्यर्थः ततश्च तेजोसीति नमस्कृत्य भुञ्जीतेत्यर्थः । भविष्यो० "स्नातस्तु वरुणस्तेजो जुह्वतोऽग्निः श्रियं हरेत् । भुञ्जानस्य यमस्त्वायुस्तस्मात्त्र्याहरेत्क्षिपेत्" । मौने विशेषमाह आप० । "तत्र मौनिविद्वद्भिर्मुनिभिरन्यैराश्रमिभिर्बहुशस्तैर्दन्तैर्दन्तानसम्बाधान्मुख एव यावद्यावदर्थं भाषेत न मन्त्रलोपोभवतीतिविज्ञायते इति" मन्त्रलोपोमौनव्रतलोपः । ब्रह्मपु० "यस्तु पाणितले भुङ्क्ते यस्तु कुड्यसंयुतम् । प्रहृताङ्गुलिभिर्यस्तु तस्य गोमांसवद्भवेत् । करेण च पिबेत्तोयं यावन्नान्तं न भक्षयेत् । मांसलिप्तकरे तोयं तुल्यं गोमांसभक्षणैः" । अत्र मांसलिप्तकरेण जलपाननिषेधात् मांसलिप्तकरं प्रक्षाल्यैवापोशनं कर्त्तव्यम् । प्रत्यापोशाने तु हस्तप्रक्षालननिषेधात् मांसलिप्तकरं प्रक्षाल्य पुनरङ्गिप्त करेण प्रत्यापोशानं कर्त्तव्यम् । षट्त्रिं० "पिबतो यत् पतेत्तोयं भाजने हस्तनिःसृतम् । अभक्ष्यं तद्भवेद्दत्तं भुक्त्वा चान्द्रायणं चरेत् । वामपार्श्वे स्थिते तोये योभुङ्क्ते ज्ञानदुर्बलः । पार्श्वे पार्श्वे मलं भुक्त्वा पानीयं रुधिरं पिबेत् । विद्यमाने तु हस्ते तु प्राङ्मुखोज्ञानदुर्बलः । तोयं पिबति यस्त्वेष ऋषिर्जायेत नान्यथा । उद्धृत्य वामहस्तेन यस्तोयं पिबति द्विजः । सुरापानेन तुल्यं स्यात् मनुराह प्रजापतिः" । वामहस्तेन केवलवामहस्तेन । अतएव "पीतशेषन्तु यत्तोयं तत्पिबेच्च द्विजोत्तमः" । "पीतशेषं पिबेच्चैव" इति ब्रह्मपु० अविशेषात् सर्व्वं

निषिद्धम्"। ब्रह्म० "तिलकरञ्जं जलं क्षीरं दधि क्षौद्रं घृतानि च। न त्यजेदङ्गजग्धानि सक्तुं शाकं वदाचन"। भारते "पानीयं पायसं सर्पिर्दधिक्षौद्रघृतान्यपि। निरस्यं शेषमेतेषां न प्रदेयन्तु कस्यचित्"। एतच्च त्याज्यं अयज्ञौ कस्यचित् देयमित्यर्थः। निरस्यं निःशेषमपनोयमित्यर्थः। तथा "अन्नं प्रशस्तं पथ्यञ्च प्रोक्षितं प्रोक्षणोदकैः"। इति प्रागुक्तविष्णुपुराणाद्युक्तेतरभक्षणे दोषमाह मनुः "आत्मार्थादन्नदोषाञ्च क्षत्युर्वि प्राप्नु जिघांसति"। अन्नदोषश्चिविधः दृष्टद्वारकः अदृष्टद्वारकः दृष्टादृष्टद्वारकः। दृष्टद्वारकश्चायुर्ब्वेदोक्तः। अदृष्टद्वारकः स्मृत्युक्तः। उभयत्रोक्तास्तु बालवत्सादिवत्सादुग्धादिदोषा दृष्टादृष्टद्वारकाः। अतएव मनुनैवोक्तम् "स्वाध्याये चैव युक्तः स्यात् नित्यमात्महितेषु च" युक्त उद्युक्तः। हारीतः "पृथक् पानं पुनर्दानमामिषं पायसानि च। दन्तच्छेदनसक्तुञ्च सप्त सक्तुषु वर्जयेत्"।

सचाहारश्चिविधः सात्विकराजसतामसभेदात् यथोक्तं गीतायाम् "आहारस्त्वपि सर्वस्य त्रिविधोभवति प्रियः। यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु" इत्युपक्रम्य "आयुःसत्त्वेत्यादि" तत्र वाक्यम् आ०त० ६०१पृष्ठे दर्शितम्"। अत्र सर्व्वत्र "ऊदभिच्छितोभावोऽव्ययवत् प्रकाशते" इति भाष्योक्तेः आहियते भुज्यते कर्म्मणि घञि वा आहारशब्दस्य भक्ष्यपरत्वम् अतएव भावप्र० "आहारः षड्विधस्तूक्तस्त्यादि" ८६६पृष्ठे उक्तम्। स च षोढा "आहार्य्यं षड्विधं भोज्यं भक्ष्यं चर्व्यं तथैव च। लेह्यं चूष्यं तथा पेयं तदुदाहरणानि तु। भोज्यमोदनपूपादि भक्ष्यमोदनमण्डके। चर्व्यं पिष्टपिठानादि रसालादि तु लिह्यते। चूष्यमाम्रफलेक्षवादि पीयते पानकं पयः" भाप्रप्र०उक्तेः। आहियते इत्याहारः। २यज्ञादिविषयस्थाने च आहारशुद्धि यज्ञेया०भा० वाक्यम् उदा०।

आहारपाक पु० आहारस्य भक्ष्यस्य पाकः रसादिभावेन परिणामः। वैद्यशास्त्रोक्ते भुक्तस्याद्यादेराहारस्य रसादिरूपेण परिणामरूपे पाकभेदे तत्पाकप्रकारः पदार्थादर्शेऽष्टतयगार्ष्ण्यवाक्ये उक्तः तत्र अग्निशब्दे ४६पृष्ठे दर्शितम्। भावप्रकाशोक्तस्तत्प्रकारस्तु अन्नकरशब्दे ४५८ पृष्ठे उक्तः।

आहारशुद्धि स्त्री आहारस्य भक्ष्यादेः शुद्धिः। १भक्ष्यादिद्रव्यस्य २शुद्धौ सा च शुद्धिः स्मृत्युक्तदिग्या अवसेया। सा च अभक्ष्यभक्षणेन भक्ष्यभोजनरूपा भवति। अभक्ष्याणि च अभक्ष्यशब्दे २७४पृष्ठे उक्तानि। आहारदोषनिवारणार्थायां शुद्धिः।२दुष्टाहारजन्यदोषनिवारणार्थायां शुद्धौ प्रायश्चित्ते। "आहारशुद्धि वक्ष्यामि तन्मे निगदतः शृणु। आत्मारक्षणं भैक्ष्यं निवेदनमाद्यौ सुरार्च्चनम्" इत्यादिना अत्रिसं० दर्शिता। ३यज्ञादिविषयस्थानशुद्धौ च "आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः" छा०उ०। "आह्रियते इत्याहारः यज्ञादिविषयस्थानम् तद्धि भोक्तुर्भोगायाह्रियते तस्य विषयोपलब्धिलक्षणस्य विज्ञानस्य शुद्धिराहारशुद्धिः रागद्वेषमोहादीषैरसंस्पृष्टविषयविज्ञाननिमित्तमर्थान्तरं तस्याहारस्य शुद्धौ सत्यां तद्वतोऽन्तःकरणस्य सत्त्वस्य शुद्धिर्निर्मलत्वं भवति" भाष्यम्। आहारशब्दस्य भक्ष्यार्थतामपहाय तथा व्याख्यानं तु "रागद्वेषविमुक्तैस्तु विषयानिन्द्रियैश्चरन्" इति गीतोक्तिमनुसृत्यैवेति आनन्दगिरिः।

आहारसम्भव पु० आहारात् भोज्यद्रव्यात् सम्भवति सम्+भू-अच्। आहारपाकजे देहस्थे रसधातौ। रसस्य यथाऽऽहारजत्वं तथाऽन्नकरशब्दे ४५८पृष्ठे उक्तम्।

आहार्य्य त्रि० आ+हृ-ण्यत्। १आहरणीये "अथ मूलमनाहार्यं प्रकाशक्षयशोधनम्" मनुः। २व्याये "कार्य्यञ्च तस्य दग्धाहार्यं धार्यं प्रकाश्यञ्च" सा०का०। "आहार्य्यं आद्यं कर्म्मेन्द्रियाणां वचनादानविहरणोत्सर्गानन्दा यथा यथं व्याख्याते च यथायथं दिव्यादिव्यतया दग्धेत्याहार्य्यं दग्धेति" सां०को०। क्तेत्रिमे "आहार्य्यशोभारुहितैरभार्यैः" भट्टिः। स्वार्थे कन् तत्रैव "आहार्य्यकमपि तस्याः सहजमिवाशोधत" ७,२१, कुमा०मल्लि०। ४क्रौञ्चिके ५ औपासनिकेऽग्नौ च "आहार्य्येणाग्निहोत्रिणम्" "पत्नीञ्च" आश्व०औ०। "येनाहिताग्निना सर्व्वाधानं कृतं तस्य पत्नी लौकिकेन, यस्यौपासनमाहित तस्य पत्नीमौपासनिकेन दहेयुः" नारा०। इच्छाप्रयोजकारोपेण विषयीकार्य्यबाधनिश्चयकालिके तद्बुद्ध्यभावपदे तद्बुद्ध्यवच्छेदे। भावे क्त्र। ७तादृशज्ञाने न०। यथा निर्वह्निः पर्व्वतो वह्निमानिति ज्ञानं तत्र वह्न्यभावपदे पर्व्वते वह्निप्रकारकत्वात् इच्छाप्रयोज्यत्वाच्च आहार्य्यम्। तच्च प्रायशमेव तदभावपदेन निश्चितेऽपि धर्म्मिणि तद्बोधस्य इच्छाप्रयोज्यत्वात् "परोक्षज्ञानम् अनाहार्य्यम् निश्चयेति सिद्धान्तः" चिन्ता०। "शब्दबोधोऽप्याहार्य्योभवत्यालङ्कारिका यथा अयं मुखमित्यादौ चन्द्रभिन्ने मुखे चन्द्राभेदज्ञानम् तच्चाहार्य्यमेव ८०४पृ०आरो-

पशब्देऽधिकमुक्तम् । "भवेदभिनयोऽवस्थानुकारः स चतुर्विधः । आङ्गिकोवाचिकश्चैवमाहार्य : सात्विकस्तथा" सा० द० उक्ते नटादिभिरात्मनि कर्त्तव्ये रामाद्यारोपहेतुके दृश्याभिनयभेदे च । आ+हृ-कर्म्मणि ण्यत् उपसर्गयोगात् दृभस्ये "आहार्य्यं बहिधं भङ्ग्यमित्यादि" भाव० प्र० ।

आहाव पु० आ+ह्वे+घञ् संप्रसारणे ह्रस्वः । कूपसमीपे गवादीनां जलपानाय प्रस्तरादिना रचिते(खाल) १ क्षुद्रजलाशये निपाने "प्राविशच्चक्रवद्राजा आहावमिव लम्बुकः" भट्टिः । "आहावसदकाधारम्" जयद० "निपानमाहावः" मा० । २ युद्धे । भावे घञ् । ३आह्वाने आ+हु-आधारे घञ् । ४अग्नौ । "नाभिं यज्ञानां सदनं रयीणां महामाहावमभि संनवन्त" ऋ० ६,७,२ । आहूयतेऽस्मिन्नाहावमग्निम् इष्ट्युदकधारणमाहावं निपानास्थानीयं वा" भा० । आ+ह्वे-भावे करणे वा घञ् । ५मन्त्रविशेषेणाह्वाने ६आह्वानसाधने मन्त्रभेदे च "आदौ निविद्वानीयानां सूक्तानामनेकत्वेन प्रथमेषुाहावः" आश्व०औ० । "तस्यानेकत्वे प्रथम एवाहावः" श्रुतिः "तृतीयसवने यस्यादिमाहावः आश्व०औ० । "एषु आहावः प्रातःसवनेन शास्त्रादिषु" आ०औ० । "एषु स्थानेषु कृतसंस्करेणाह्वाने विहिते गोः सावोमित्यनेनैवाह्वानं कुर्य्यात् नान्येनेति नियम्यते" श्रुतिः "गो सामो दैवेत्याहावे" आश्व० औ० एतिगरसंज्ञार्थमिमे शब्दे ।

आहिंसि पुंस्त्री अहिंसस्यापत्यम् इञ् । अहिंसकापत्ये ततः युवापत्ये फक् तौल्व० तस्य न लुक् । आहिंसायनः तत्पौत्रे ।

आहिक पु० अहिरिव कन् स्वार्थे अण् । १केतुपक्षे हेमच० तस्य सर्पतुल्याकृतित्वात्तथात्वम् । २पाणिनिमुनौ च त्रिका० ।

आहिच्छत्र त्रि० अहिच्छत्रदेशे भवः अण् । अहिच्छत्रदेशे भवे

आहिण्डिक पु० निषादेन वैदेह्यां जनिते अन्त्यजवर्णे सङ्करभेदे "आहिण्डिकोनिषादेन वैदेह्यामेव जायते" मनुः । "बालसंरक्षणादावाहिण्डिकानाम्" औशनसस्मृतोक्ता तद्वृत्तिर्ज्ञेया ।

आहित त्रि० आ+धा-क्त ह्यादेशः । १न्यस्ते, २स्थापिते, ३अर्पिते । "व्यावर्त्तन्तेरहिपतेरयमाहिताग्नेः" किरा० ४कृते, ५कृताधानसंस्कारे च "प्रणीताद्याप्रणीतश्च यथाग्निर्दैवतं त्र्यहम्" मनुव्या० "आहितोऽग्नाहितोवाग्निरिति" कुल्लू० । [विख्याते २न्यस्तविशेषे च ।

आहितलक्षण त्रि० आहितं उत्तमं यस्य । १गुणादिहारा

आहिताग्नि त्रि० आहितोऽग्निर्येन । वेदमन्त्रादिना कृत संस्काराग्नियुक्ते तदाधानप्रकारः आधानशब्दे ७०८ पृष्ठे उक्तप्रायः । आश्व०औ० २प्र० २क० विस्तरेणोक्तः । "न दर्शेन विना श्रौतमाहिताग्नेर्द्विजन्मनः" मनुः । "गुरोरपीदं धनमाहिताग्नेः" रघुः । "आहिताग्निः सत्रमिदं चरेत्" तैत्ति० "न वाऽऽहिताग्निनाक्षतं वदितव्यम्" शत० ब्रा० २,२,२,२० । "देवान् वा एष उपावर्त्तते य आहिताग्निर्म्रियते" ऐत० ब्रा० । आहार्य्येणैवाहिताग्निम्" आश्व०औ० । वा परनिपाते अग्न्याहितोऽधम ।

आहिताग्निगण पु० पाणिन्युक्ते वा परनिपातार्थे शब्दसमूहभेदे । स च गणः आहिताग्नि जातपुत्र जातदन्त जातश्मश्रु तैलपीत घृतपीत मद्यपीत जग्धभार्य्य मृतभार्य्य" "आकृतिगणः तेनान्येऽपि" सि० कौ० ।

आहिति स्त्री आ+धा क्तिन् ह्यादेशः । १स्थापने २आधाने मन्त्रेणाग्न्यादेः संस्कारे ३आकृतौ च । "तस्मिन् यत्किञ्चात्पादध्यादाहितय एव ताः आहितयोह वै ता आकृतय इत्याचक्षते" शत० ब्रा० १०,६,२,२२, । [(सायुड्) ।

आहितुण्डिक त्रि० अहितुण्डेन दीव्यति ठक् । व्यालग्राहिणि

आहिमत त्रि० अहिमतोऽदूरभवः अण् । सर्पविषिष्टदेशादूरभवे ।

आहुक पु० यदुवंश्ये क्षत्रियभेदे स च वसुदेवएव । "केशवोऽपि सदा युक्तः प्रविवेश पुरोत्तमम् । पूज्यमानो यदुश्रेष्ठैरुग्रसेनसुखैस्तथा । आहुकं पितरं वृद्धं मातरंच यशस्विनीम् । अभिवाद्य बलञ्चैव स्थितः कमललोचनः" इति भा० सभा० २अ० । अत्र केशवपितृत्वेन कीर्त्तनात् वसुदेवस्य नामान्तरत्वं तस्य प्रतीयते "एवं आहुकश्चाहुकी चैव ख्यातौ ख्यातिमतांवरौ" हरि० १८अ० । एवमाहुकिन् तद्वंश्येक्षत्रिये पु० ।

आहुत न० उद्देश्यस्याभिसख्येन साक्षादेव हुतं दत्तम् आ+हु-क्त । गृहस्थकर्त्तव्येषु पञ्चसु यज्ञेषु १मनुष्ययज्ञे, २भूतयज्ञे चेत्यन्ये । कर्म्मणि क्त । १आभिमुख्येन हुते देवादौ त्रि० ।

आहुति स्त्री आ+हु-क्तिन् । देवोद्देशेन मन्त्रेणाग्नौ हविःक्षेपे । "अग्नौ प्राप्ताहुतिः सम्यगादित्यमुपतिष्ठते" मनुः । "वेत्थ सौम्य यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" छा० उ० । "प्रातराहुत्यां हुतायां पूर्णाहुत्यन्ते वरदानम्" कात्या० २०,१,२० । "जुह्वयात्सर्पिराहुतीः" मनुः "प्राणाद्याहुतिपञ्चकम्" स्मृतिः । आहूयते कर्म्मणि क्त । २आहूयमाने हवनीयद्रव्ये हविरादौ । "पुनाना मनवो-वूतैर्धूमैराहुतिगन्धिभिः" रघुः । "ब्रह्माहुतिहुतं यज्ञ" मनुः ।

आहुल्य न० आ+हुल-बा०ष्यञ् संप्रसारणञ्च । काश्मीरादौ (तरबट) इति प्रसिद्धे काञ्चनवर्णपुष्पे शिल्हीफले वृक्षभेदे ।

आहुव त्रि०आ+ह्वा-घञर्थे कर्म्मणि क संप्र०उवङ्। आह्वातव्ये "अनुल्लङ्घोनामवाङ्डवः" ऋ० ८,२२,१८, आङ्डवः आह्वातव्यः"भा०। [२आहूयमाने च ।

आह्व त्रि० आह्वयति आ+ह्वे-क्विप् संप्र० । १आह्वायके ।

आह्वत त्रि० आ+ह्वे-क्त । ह्लताह्वाने १आकारिते "आहूत इव मे गोष्ठम्" भाग०१०स्कन्धे । "नचाहूतोवदेत् किञ्चिन्नोदण्डोऽश्व सहूतः"या०स्मृतिः। "ययुश्चमाणेनाहूतः पार्थेनाथ हिषन्नुरम्"माघः।"आहूतो न निवर्त्तेत द्यूतादपि रणादपि"। आभूत+पृ०भस्य हः। २आभूतप्रलयपर्य्यन्ते "षटोलानि कटम्बानि इन्नाकसहितानि च। न त्यजेत् कार्त्तिके यस्तु यावदाहूतनारकी" ति०त०पु० "आहूतम् आभूतप्रलयपर्य्यन्तम्" रघु० ३नामह्लतव्यपदेशे विश्वे च । सृष्टिकाले हि भूतानां तत्तन्नामव्यपदेश इति विश्वव्यपदेश पर्य्यन्तमित्येव तस्यार्थोन्याय्यः । भावे क्त । ४आह्वाने ।

आहूतप्रपलायिन् त्रि०आहूतः वियादनिर्वाय राज्ञाहूतोऽपि प्रपलायते प्र+परा-अय-णिनि रस्य लः । व्यवहारे हीनत्वादिभेदे स च पञ्चविधः । "अन्यवादी क्रियाहेषी, नोपस्थाता निरुत्तरः। आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः"मिता०याज्ञ्यस्मृतेः ।

आहूतसंभव पु० आहूतस्य नाम्ना ह्लतव्यपदेशस्य विश्वस्य संभवोयत्र । प्रलयकाले तत्र हि ह्लतव्यपदेशस्य विश्वस्य व्यपदेशाभावेन व्यवहार्य्यत्वाभावः।"आहूतसंभवस्थानमह्लतत्वं भावते"इति पुराणे आभूतेत्यत्राहूतेति पाठान्तरम् ।

आहूति स्त्री आ+ह्वे-क्तिन् । आह्वाने (डाका) ।

आह्वय अव्य०आ+ह्वे-ल्यप्। आह्वानं ह्लत्वेत्यर्थे "आहूय दानं कन्याया ब्राह्मोधर्म्मः प्रकीर्त्तितः"मनुः ।

आहृत त्रि० आ+हृ-क्त । आनीते ह्लताहरणे ।

आहृति स्त्री आ+हृ-क्तिन् । आहरणे आनयने ।

आहृत्य अव्य० आ+हृ-ल्यप् । आहरणं ह्लत्वा आनीयेत्यर्थे "सगाहृत्यान्यतन्त्राणि" अमरः ।

आहेय त्रि०अहेरिदम् ढक् । सर्पसम्बन्धिनि विषचर्म्मास्थ्यादौ

आहो अव्य०आ+हन-डो ।१प्रश्ने, २विकल्पे, ३विचारे च । "यत्रायं पुरुषोम्रियत उदस्मात् प्राणाः क्रामन्त्याहो नेति" श्रुतः ब्रा०१४,६,२,१२, "आहो विद्वानसौ लोकं प्रेत्यकञ्चित् समश्नुते" कठो० । "आहो निवत्स्यति समं हरिणाङ्कनाभिः" शाकुन्तले सखीं प्रति दुष्मन्तप्रश्नः ।

आहोपुरुषिका स्त्री अहमेव पुरुषः शूरः मयू० अहो पुरुषः तस्य भावः वुञ् स्त्रीत्वात् टाप् । दर्पजन्ये आत्मनि उत्कर्षसम्भावने (बाहादुरी) "आहोपुरुषिकां पश्य मम सङ्ग्रहकान्तिभिः" भट्टिः ।

आहोस्वित् अव्य०आहो च स्वित्च ह्रस्वः । १विकल्पे, २प्रश्ने च "आहोस्वित् शाश्वतं स्थानं तेषां तत्र द्विजोत्तम ;"भा० स०५अ० । द्विपदमिलनेके ।

आह्न न० अह्नां समूहः खण्डि० अञ् । दिनसमूहे"अहोरात्रे वा अभिनिर्वृत्तमाने संवत्सरमाप्नुतः संवत्सर इदं सर्व्वमाह्नार्य्यैतामरिष्टिं स्वस्तिमाशास्ते" श्रुतः ब्रा०६,६, ४,३, अह्ना निर्वृत्तादि चतुरर्थ्याम् संकलादि० अञ् । दिननिर्वृत्तादौ त्रि० ।

आह्निक त्रि० अह्नि भवः अह्ना निर्वृत्तं साध्यं ठञ् स्त्रियां ङीप् । १दिनभवे २दिनसाध्ये च । "भरद्वाजस्तु कौन्तेय ह्लत्वा स्वाध्यायमाह्निकम्" भा०व०१३७अ० । "अतोह्निकं सुरश्रेष्ठोजपते समरुद्गणः"भा०व०१४२ अ० । दिनकर्त्तव्यानि आह्निकृतत्वे आह्निकह्लत्यप्रदीपादौ उक्तानि । दिवसकर्त्तव्यान्याचारयन्त्रे ६३१ पृष्ठे उक्तप्रायाणि दिनविभागेषु कर्त्तव्यभेदोदर्शनेन संक्षेपात् दर्शितो यथा । "प्रातरुत्थाय कर्त्तव्यं यद्द्विजेन दिने दिने । तत्सर्वं संप्रवक्ष्यामि द्विजानामुपकारकम् । उदयास्तमनं यावन्न विप्रः क्वचिकोभवेत् । नित्यनैमित्तिकैर्मुक्तः कामैश्चान्यैरगर्हितैः । यः स्वकर्म परित्यज्य यदन्यत् कुरुते द्विजः । अज्ञानाद्यदि वा मोहात् स तेन पतितोभवेत् । दिवसस्याद्यभागे तु ह्लत्यं तस्योपदिश्यते । द्वितीये च ह्लतीये च चतुर्थे पञ्चमे तथा । षष्ठे च सप्तमे चैव अष्टमे च पृथक् पृथक् । विभागेष्वेषु यत्कर्म्म तत्प्रवक्ष्याम्यशेषतः । उषःकाले तु संप्राप्ते शौचं ह्लत्वा यथार्थवत् । ततः स्नानं प्रकुर्व्वीत दन्तधावनपूर्व्वकम् । अत्यन्तमलिनः कायोनष्च्छिद्रसमन्वितः । स्वप्नत्येष दिवा रात्रौ प्रातःस्नानं विशोधनम् क्लिद्यन्ति हि प्रसुप्तस्य इन्द्रियाणि स्रवन्ति च । अङ्गानि समतां यान्ति उत्तमान्यधमैः सह । नानास्वेदसमाकीर्णः मयनादुत्थितः पुमान् । अस्नात्वा नाचरेत् कर्म जपहोमादि किञ्चन । प्रातरुत्थाय योविप्रः प्रातःस्नायी भवेत् सदा । समस्तजन्मजं पापं त्रिभिर्वर्षैर्व्यपोहति । उपस्पृश्य यतस्नानं सन्ध्यायामुदिते रवौ । प्राजापत्येन तत्तुल्यं महापातकनाशनम् । प्रातःस्नानं प्र-

यंसन्ति दृष्टादृष्टकरं हि तत् । सर्वमर्हति पूतात्मा प्रातः-स्नायी जपादिकम् । स्नानादनन्तरं तावदुपस्पर्शनमुच्यते । अनेन तु विधानेन आचान्तः शुचितामियात् । प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदम्बु वीक्षितम् । संहृत्याङ्गुष्ठमूलेन हिःप्रमृज्यात्ततोमुखम् । संहृत्य तिसृभिः पूर्वमाद्यमेवमुपस्पृशेत् । ततः पादौ समभ्युक्ष्य अङ्गानि मनुपस्पृशेत् । अङ्गुष्ठेन प्रदेशिन्या प्राणं पश्चादनन्तरम् । अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनःपुनः । कनिष्ठाङ्गुष्ठेन नाभिं हृदयञ्च तलेन वै । सर्वाभिस्तु शिरः पश्चाद्बाहू चाभ्येत्य संस्पृशेत् । सन्ध्यायाञ्च प्रभाते च मध्याह्ने च ततः पुनः । सन्ध्यां नोपासते यस्तु ब्राह्मणोहि विशेषतः । स जीवन्नेव शूद्रः स्यान्मृतः श्वा चैव जायते । सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु । यदन्यत् कुरुते कर्म न तस्य फलमश्नुते । सन्ध्याकर्मावसाने तु स्वयंहोमोविधीयते । स्वयं होमे फलं यत्तु तदन्येन न जायते । ऋत्विक् पुत्रोगुरुर्भ्राता भागिनेयोऽथ विट्पतिः । एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि । देवकार्य्यं ततः कृत्वा गुरुमङ्गलवीक्षणम् । देवकार्य्याणि पूर्वाह्णे मनुष्याणाञ्च मध्यमे । पितॄणामपराह्णे च कार्य्याण्येतानि यत्नतः । पौर्वाह्णिकन्तु यत् कर्म यदि तत् सायमाचरेत् । न तस्य फलमाप्नोति भ्रूण्यस्त्रीमैथुनं यथा । दिवसस्याद्यभागे तु सर्वमेतद्विधीयते । द्वितीये च तथा भागे वेदाभ्यासोविधीयते । वेदाभ्यासोहि विप्राणां परमं तपउच्यते । ब्रह्मयज्ञः स विज्ञेयः षड्ङ्गसहितस्तु सः । वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः । ततोदानञ्च शिष्येभ्योवेदाभ्यासोहि पञ्चधा । सवितृपुष्यकृशादीनां स कालः समुदाहृतः । तृतीये चैव भागे तु पोष्यवर्गार्थसाधनम् । पिता माता गुरुर्भार्या प्रजा दीनाः समाश्रिताः । अभ्यागतोऽतिथिश्चान्यः पोष्यवर्ग उदाहृतः । ज्ञातिर्बन्धुजनः क्षीणस्त्याऽनाथः समाश्रितः । अन्येऽप्यधनयुक्ताश्च पोष्यवर्ग उदाहृतः । भरणं पोष्यवर्गस्य प्रथमं स्वर्गसाधनम् । नरकं पीडने चास्य तस्मादुद्यत्नेन तं भरेत् । सार्वभौतिकमन्नाद्यं कर्म चान्यत् विशेषतः । ज्ञानविद्धः प्रदातव्यमन्यथा नरकं व्रजेत् । स जीवति यएवैकोबहुभिरुपजीव्यते । जीवन्तोऽतकाश्चान्ये य आत्मम्भरयो नराः । यद्धर्मे जीव्यते कैश्चित् कुटुम्बार्थे तथा परैः । आत्मार्थेऽन्योन शक्नोति खोदरेऽपि दुःखितः । दीनानाथविशिष्टेभ्योदातव्यं भूतिमिच्छता । अदत्तदाता जायन्ते परभाग्योपजीविनः । यद्दाति विशिष्टेभ्योयज्जुहोति दिने दिने । तत्तु वित्तमहं मन्ये शेषं कस्यापि रक्षति । चतुर्थे च तथा भागे स्नानार्थं क्रतमाहरेत् । तिलपुष्पकुशादीनि स्नानस्थानसन्निधौ जले । नित्यं नैमित्तिकं काम्य त्रिविधं स्नानमुच्यते । तेषां मध्ये तु यन्नित्यं तत्पुनर्भिद्यते त्रिधा । मलापहरणं पश्चात्स्नानावयवसंज्ञके क्रतम् । सन्ध्याङ्गानुभाभ्याञ्च स्नानभेदाः प्रकीर्त्तिताः । मार्जनं जलमध्ये तु प्राणायामोयतव्रतः । उपस्थानं ततः पश्चात् सावित्र्याजपउच्यते । सविता देवता यस्या मुखमग्निरिधा स्थितः । विश्वामित्रऋषिश्छन्दोगायत्री सा विधिष्यते । पञ्चमे च तथा भागे संविभागोयथार्हतः । पितृदेवमनुष्याणां कीटानाञ्चोपदिश्यते । देवैश्चैव मनुष्यैश्च तिर्यग्भिश्चोपजीव्यते । गृहस्थः प्रत्यहं यस्मात्तस्माल्लोकाश्रमी गृही । तयोर्मात्राश्रमाणान्तु गृहस्थो योनिरुच्यते । तेनैव सीदमानेन सीदन्तीहेतरे त्रयः । भूतप्राणोभवेत् स्नात्वः स्नात्वाच्छाखाः समन्वयाः । मूलेनैव विनष्टेन सर्वमेतद्विनश्यति । तस्मात् सर्व्वप्रयत्नेन रक्षितव्योगृहाश्रमी । राज्ञा, चान्यैश्च भिः पूज्योमाननीयश्च सर्व्वदा । गृहस्थोऽपि क्रियायुक्तो न गृहेण गृहाश्रमी । न चैव पुत्रदारेण स्वकर्मपरिवर्जितः । अस्नात्वा चाप्यकृत्वा चाजघ्राऽदत्त्वा च मानवः । देवादीनाहुती भूत्वा नरकं प्रतिपद्यते । एकएव हि भुङ्क्तेऽत्तमपरोऽन्नेन भुज्यते । न भुज्यते सएवैकोयोभुङ्क्तेऽन्नं ससाक्षिणा । विभागशीलो योनित्यं क्षमायुक्तोदयापरः । देवतातिथिभक्तश्च गृहस्थः स तु धार्मिकः । दया लज्जा क्षमा श्रद्धा प्रज्ञा योगः क्रतज्ञता । एते यस्य गुणाः सन्ति स गृही मुख्यउच्यते । स विभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत् । भुक्त्वा तु सुखमास्थाय तदन्नं परिणामयेत् । इतिहासपुराणाद्यैः षष्ठञ्च समं नयेत् । अष्टमे लोकयात्रा तु बहिःसन्ध्या ततः पुनः । होमोभोजनकञ्चैव यच्चान्यद्गृहकर्मकम् । कृत्वा चैवं ततः पश्चात् स्वाध्यायं किञ्चिदाहरेत् । प्रदोष पश्चिमौ यामौ वेदाभ्यासेन तौ नयेत् । यामद्वयं शयानोहि ब्रह्मभूयाय कल्पते । नैमित्तिकानि काम्यानि निषतन्ति यथा यथा । तथा तथैव कार्य्याणि न कालस्तु विधीयते । व्यक्तिश्चेव प्रयुञ्जानोहृद्धिश्चेव तु लीयते । तस्मात् सर्व्वप्रयत्नेन कर्त्तव्यं सुखमिच्छता । सर्वत्र मध्यमौ यामौ क्षुतशेषं हविश्चयत् । भुञ्जानश्च शयानश्च ब्राह्मणोनावसीदति" अङ्का पाठम् ठञ् । शूलपाणिकृतस्नानभाष्यस्य पादांशव्याख्याभेदे न० । यथा कणादगीतमपाणिनिस्नानभाष्यस्य

यादांश्चाख्याक्षादपि अक्षा यादवात् आक्षिकादि "तमधीष्टोभृतो भूतोवेति" या० ठञ्। दिवसे-तत्कालनिरोजिते २अक्षाधारे ३अक्षते वेतनेन क्रीते दासादौ ५भूते खचरवा व्याघ्रे व्यादौ च।

आक्षाद पु० आ+क्षुद-घञ्।। आनन्दे। "नन्दत्यात्मज उतपन्ने जातास्वादो महामनाः" भाग०।

आक्षादन द० आ+क्षुद-णिच्-ल्युट्। १आनन्दजनकादने वस्तुनि खु। २आनन्दजनकादके त्रि०। कर्त्तरि ल्युट्। ३आनन्दजनके त्रि०-स्त्रियां ङीप्।

आक्षादित त्रि०-आ+क्षुद-णिच्-क्त। १जातानन्दने। यस्यानन्दो जनितस्तत्रिभ्। आक्षादोजातोऽस्त्यस्य तारा० इतच्। २जाताक्षादे च।

आक्षादिन् त्रि० आ-क्षुद-णिनि १आनन्दयुक्ते णिच्-णिनि। २आनन्दकारके। स्त्रियामुभयतो ङीप्।

आक्ष त्रि० आक्षयति आ+क्षे-ड। आक्षानकारके।

आक्षय पु० आक्षैर्व्यवहारे प्राप्यते या-यजर्थे क २त०। १नागनि आक्षावर्त्तेहि नागोऽक्षरक्षेणैव आक्षूयते इति आक्षावक्षत्वप्राप्तौ नाग्न करत्वात्तथात्वम्। आ+क्षे वा० करणे घ ह्रस्वश्च "आक्ष्यं रामावक्षाक्षयम्' रामा०। गजाक्षयं मताक्षयं नागाक्षयम् इत्यादि। २प्राप्तिभिर्भेदादिभिः सपक्षद्यूतभेदे च सर्वाक्षदर्शविवादान्तर्गतः। "तेषामाक्षिकक्षादानम्" इत्युपक्रम्य "द्यूतमाक्षयश्च च। पदाक्षदर्शनानि व्यवहारस्थितावित्येते" मनूक्तेः। अस्य स्वरूपादिकमपि "अप्राप्तिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते प्राप्तिभिः क्रियमाणस्तु विज्ञेयः समाह्वयः" मनुना तथा प्रयोगात् तत्सङ्कल्पनं सिता० नार० "अक्षपक्षपणाद्दैवं क्षिप्तकारितम्। पञ्चक्रीड़ा वयोभिश्च पदं द्यूतसमाह्वयम्" व्याख्यातञ्च सिता० यथा "अक्षाः पाशकाः सप्तपर्णकृतिका यक्षाश्च इत्यादिमध्ये दीर्घचतुरस्राः आद्यपक्षात् अक्षरक्षादिक्रीड़ासाधनकरितुरगादिकं सङ्कल्पते। तैरप्राप्तिभिर्दैवं क्रीड़ा पक्षपूर्विकाक्रियते तथा वयोभिः पक्षिभिः कुक्कुटपारावतादिभिः पक्षयुद्धानुमेषादिभिश्च प्राप्तिभिर्वा पक्षपूर्विका क्रीडा क्रियते तदुभयं द्यूतसमाह्वयाख्यं विवादपदम्। द्यूतञ्च समाह्वयश्च द्यूतसमाह्वयम्। तत्प्रकारः तत्रैव दर्शितो यथा। "तत्र द्यूतसमाधिकारिणो दर्शयति। "ग्लहे पतितद्रव्येतु सभिकः पञ्चकं शतम्। सङ्गोवाद्यूनकितवादितराद्दशकं शतम्" या०। परस्परं सभ्यसमक्षा कितवैः परिकल्पितः पक्षोऽक्ष इत्युच्यते। तत्र ग्लहे तदात्मका पतिता शतपरिमितादधिकपरिमाणा वा द्रव्यविशेषौ पतितद्रव्यैः द्यूतकितवात्मकसंज्ञकैः शतसाहस्रार्थं सभिको दृष्ट्वा द्यूतात्। पञ्च पक्षावयवोऽस्मिन् शते तच्छतं पञ्चकं "तद्धिश्चुद्यावयवेत्यादिना" (पा०)कन्। जितस्य ग्लहस्य विंशतितमभागं दृष्ट्वादिरक्षैः। सभा कितवनिवासार्थो यस्याश्चसौ (ठन्) सभिकः कल्पिताद्यादिनिक्षिप्तक्रीड़ोपकरणद्रव्योपजीवी सभापतिरुच्यते। द्यूतरक्षादुत्तरपरिपूर्णशतिकद्रव्यैः कितवाहृतं शतञ्चितद्रव्यस्य दशमभागं दृष्ट्वादिति यावत्। एवं कृतप्रवृत्तिना सभिकेन किङ्कर्त्तव्यमित्यत आह। "ग स्वस्वरूपाक्षितोद्द्यूताङ्गे भागं यथा शतम्। जितद्रव्याहवेष्वेवं दद्यात्सभं यथःक्षमी" या०। अयं कृतप्रवृत्तिर्द्यूताधिकारी स राजा द्यूतं कितवेभ्यो रक्षितस्तस्मै राज्ञे यथा शतं सभापतिसभंगच्छेत्। तथा जितं यत् द्रव्यलहुद्यूताङ्गवेद्यक्षपक्षवेनादिना च पराजितसकाशाद्वरेद्धृत्वा च तद्गर्भं जेत्रे अक्षिणे सभिकोदद्यात्। तथा सभी भूत्वा सत्यञ्च वचोविन्यासार्थं द्यूतकारिणां वदेत्। तदुक्तप्रकारेण। "सभिकः कारयेद्द्यूतन्देवन्दद्याच्च यत्कृतमिति"। यदा पुनः सभिकोदायविलुप्तं भक्षयति तदा राजा दापयेदित्याह। "प्राप्ते ग्लपतिना भागे प्रसिद्धे धूर्तसंसदि। जितं सभिक्षे स्थाने दापयेद्दण्डयेत्तथा न तु" या०। प्रसिद्धे ऽप्रच्छन्ने राजाध्यक्षसमन्विते सभिके सभिकरक्षिते जितवस्तुभागे सभिकेन च राजभागे दत्ते राजा धूर्तजितवस्तुप्रतिपन्नं जितस्यचन्द्रापयेत्। अन्यथा प्रच्छन्ने सभिकरक्षिते अदत्तराजभागे द्यूते जितस्यचक्षेत्रे न दापयेत्। अत्रापराजयविप्रतिपत्तौ निर्णयोपायमाह। "द्रष्टारो व्यवहाराणां साक्षिणश्च तथैव हि" या०। द्यूतव्यवहाराणां द्रष्टारः सभ्याश्चैव जितवाद्यैव राज्ञा नियोज्याः न पुनःश्रुताध्ययनसम्पन्ना इत्यादिनियमोऽस्ति। साक्षिणश्च द्यूते द्यूतकारादेव कार्य्याः न वा तत्र स्त्रीबालवृद्धकितवेत्यादिनिषेधोऽस्ति। क्वचित् द्यूतक्षेत्रेऽनुज्ञामाह। "राज्ञा सचिवसिद्धिवाक्याः कूटाक्षोपधिदेविनः" या०। कूटैरक्षादिभिरुपधिना च प्रतिपक्षवञ्चनेन सभिकमक्षोपधादिना ये दीव्यन्ति तान् स्वपदादिनाक्षयित्वा राजा खराङ्गाद्विवासयेत्। नारदेन निर्वासने विशेष उक्तः। "कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत्। कक्षेऽजमाजामासक्तु मक्षेषां विनयः स्मृत" इति। यानि च मनुवचनानि द्यू-

तन्निषेधपराणि "द्यूतं समाह्वयञ्चैव यः कुर्य्यात्कारयेत वा । तान् सर्वान् घातयेद्राजा सूद्रांश्च द्विजलिङ्गिनः" इत्यादीनि तान्यपि कूटाक्षदेवनविषयतया राजाध्यक्षसभिकरक्षितद्यूतविषयतया च योज्यानि । किञ्च "द्यूतमेकमुखं कार्य्यन्तस्करस्थानकारणात्" या० । यत्पूर्वोक्तं द्यूतन्देकं मुखं प्रधानं यस्य द्यूतस्य तत्तथोक्तं कार्य्यम् । राजाध्यक्षाधिष्ठितं राज्ञा कारयितव्यमित्यर्थः तस्करस्थानकारणात् तस्करस्थानरूपप्रयोजनसम्पादनात्तथोक्तम् । प्रायशः चौर्य्यार्जितधना एव कितवा भवन्त्यतश्चौर विज्ञानार्थमेकमुखं कार्य्यम् । द्यूतधर्म्मं समाह्वयेऽतिदिशन्नाह । "एष एव विधिर्नृपैः प्राणिद्यूते समाह्वये" या० । ग्लहे प्रतिकृष्टद्रव्यादिना योद्यूते धर्म्म उक्तः सएव प्राणिद्यूते मल्लमेषसक्थिपादिनिर्वर्त्ते समाह्वयशब्दके ज्ञातव्यः" ।

आह्वयन न० आह्वयं करोत्यनेन आह्वय+णिच् करणे ल्युट् । नामादेयसाधने यज्ञभेदे । कर्त्तरि ल्यु । आह्वानकारके त्रि० "रामस्याह्वयना द्विजाः" रामा० ।

आह्वयितव्य त्रि० आह्वयं करोति आह्वय+णिच्-कर्म्मणि तव्य । आह्वानीये आकारणीये । "नैवमाह्वयितव्या ते शयने वार्षपर्वणी" भा० आ० ८२ अ० ।

आह्वर त्रि० आ+हृ-अच् । १कुटिले २उशीनरदेशोत्पन्ने च । तेन कन्याशब्दस्य षष्ठीसमासे ङीत्वम् । आह्वरकन्यम् । अलोत्तरपदस्यादुदात्तत्वम् ।

आह्वा स्त्री आ+ह्वे-अङ् । १आह्वाने । करणे अङ् । २संज्ञायाम् नामनि "ह्वेयश्च यश्चते (सक्थ्यशताङ्गौरसर्षपैः" सुश्रु० ।

आह्वान न० आ+ह्वे-ल्युट् । आकारणे (डाका) "दूराह्वाने च गाने च रोदने च प्रशस्यते" व्या० का० । करणे ल्युट् । २संज्ञायां नामनि नाम्नैवाऽऽकारणं हि क्रियते इति तथात्वम् । करणे ल्युट् । ३आह्वानसाधने राजकीयपत्रे । (तत्रवनामा) "यावदाह्वानदर्शनम्" भाषे ल्युट् । व्यवहारे विवादनिर्णयार्थं ४राज्ञाऽऽकारणे (तत्पर्य्याय करा) तत्र वर्ज्यावर्ज्यं प्रकारादि मिता० स्मृतिवाक्यात् दर्शितम् । यथा "ज्ञिष्यस्य कार्य्यं न्याय्यं चेदाह्वानार्थमेतः परम् । सुहृदां वा निवेशेत्तन्नृपं पुरुषं वा समादिशेत् । अकल्यबालस्थविरविषमस्थक्रियाकुलात् । मत्तोन्मत्तप्रमत्तार्त्तभीत्याह्वानमेत्यनृपः । न स्त्रीनपुंसां युवतिं कुलजातां प्रकृतिकाम् । सर्ववर्णोत्तमां कन्यां तां त्यक्तिप्रभुताः स्मृताः । तदधीनकुटुम्बिन्यः स्त्रैरिणीगणिकाश्च याः । निष्कुला यास्च पतितास्तासामाह्वानमिष्यते । काल देशञ्च विज्ञाय कार्य्याणाञ्च बलाबलम् । अकल्यादीनपि मनुर्यानैराह्वानयेन्नृपः । त्यक्ताभियोग येऽपि स्युर्व्यसने प्रव्रजितादयः । तानप्याह्वानयेद्राजा गुरुकार्य्येष्वकोपयन्निति" अत्र सर्व्वत्र आह्वानं-करोति यिचि आह्वानयेदिति सिद्धम् । "ऋतोलुक् प्रकृतिवच्च कारके मिति वार्त्तिकं तु नेह प्रवर्त्तते बहुलग्रहणात् ।

आह्वायक त्रि० आ+ह्वे-ण्वुल् युच् । आह्वानकारके आकारके ।

आह्वारक त्रि० आ+ह्वृ-ण्वुल् । कुटिले ।

रके । "आह्वायकेभ्यः स्रुतस्नुतृत्सिः" भट्टिः यिचि आह्वायीत्यत्र स्त्रियां ङीप् ।

आह्वृति स्त्री आ+ह्वृ-क्तिन् । १कौटिल्ये कर्त्तरि क्तिच् । २राजभेदे "रुक्मी चैवाह्वृतिश्चैव मालोनामदएव च" हरि० १४१ अ० "रुक्मी चैवाह्वृतिश्चैव तस्यतुर्निसितौ रणे" हरिवं० १४२ अ० "जरासन्धं समाश्रित्य तथैवाह्वृतिभीष्मकौ, हरि० १६० अ० ।

इति श्रीतारानाथतर्कवाचस्पतिसंकलिते वाचस्पत्ये आकारादिशब्दार्थनिर्णयः ।

ङ

ङ पु० अस्य विष्णोरपत्यम् अ+इञ् । १कामदेवे स हि रुक्मिण्यां विष्णोरंशात् प्रद्युम्नात् जातः तत्कथा यथा "रुक्मिण्यां वासुदेवाच्च सञ्जज्ञे कामोद्भतप्रभुः । यस्मरान्तकरो जज्ञे प्रद्युम्नः कामदर्शनः" हरि० १६३ अ० । एवं व्युत्पत्तिमत्त्वेन कामदेवस्यैव इञ्शब्दार्थता नाभिधास्येति बहवः । कामदेवदैवत्याच्च अभिलाषे औपचारिक इत्यन्ये । नञर्थकस्य अ इञेदम् अ+इञ् । २भेदे, ३रोगोक्तौ, ४निराकरणे, ५अनुकम्पायाम्, ६गदे, ७विक्रये, ८निन्दायाम्, ९सम्बोधने च अव्य० चादि । निपातैकाच्त्वात् अस्य प्रगृह्यसंज्ञा तेन इ इन्द्र इत्यादौ न सन्धिः

इ गतौ भ्वादि० पर० सक० अनिट् । अयति ऐषीत् इयाय इयतुः इयुः इययिथ इयेथ । अवन् इतः इतिः अयनम् । आयः इत्वा । "उदयति च तदङ्गसमाश्लिष्टः" नैष० "अयमुदयति सुहृदाश्रुजनः पक्ष्मनीलाम्" उद्भटः । "उदयति वितनोर्ति रश्मिरत्नौ" माघः । अयश्च धातुः

कटौ गतौ इत्यत्र इ ईदिति प्रश्लेषात् लभ्यः वि०कौ०

इक्ष् आरभेऽधिपूर्वोऽयं एवेत् क्तिक्तिकरणमधीगर्थेत्यादौ विशेषार्थम् अदादि०पर०सक०अनिट्। अध्येति अध्यैषीत् अध्यगात् इत्यन्ये इण इवाच्छ तिङि रूपं न लभते। अधीयत्। "सप्तीतयोराघयोरीयत्" भट्टिः। एतद्योगे कर्म्मणि संबन्धविवक्षायां षष्ठी। मातुरध्येति। प्रतिपदविहिततयाऽनया षष्ठ्या न समासः मातुरध्ययनम्। "क्रियत्खिदिन्द्रो अध्येति क्रियन्मासः क्रियत् पितुः" ऋ०४, १७,१२। "रामस्य दयमानोऽसावध्येति तव सत्कथाः" भट्टिः सम्बन्धाविवक्षायां तु द्वितीया। "अग्निं स्वर्य्यमध्येषि मृत्यो!" कठो०। "अयमाहवनीयः संप्रतीममात्मानं वैश्वानरमध्येति" छा० उ०। "अधीहि भगवन्" ब्रह्मेति" छा०उ०। [वंशाङ्कुरे

इक्कट पु०एति भूमिमङ्गित्वा गच्छति इ-कटच् वा गुणाभावः।

इक्कट पु०ईयते इ-किए् इत् लभ्यः कटो यस्मात् ष०तत्प्र कः। कटसाधने तृणविशेषे त्रिका० इक्कट इति शारा०। तस्य सन्निवेशोदेशादिः कुमुदा० चतुरर्थ्यां छच्। इक्कटिक तत्सन्निवेशोदेशादौ त्रि० स्त्रियां ङीष्। प्रेक्षा० चतुरर्थ्याम् इनि। तदर्थे स्त्रियां ङीष्।

इक्कवाल पु०"चेत् कण्टके (१ ४ ७ १०)यनकरे (२,५,८,११) तु यष्टाः समस्ताः स्यादिक्षवालदति राज्यसुखाप्तिहेतुः" नीलक० ता०उक्ते वर्षलग्नतः उक्तस्थानानामन्यतमस्थाने रव्यादिसमसप्तकस्थाः स्थितिहेतुके राजयोगभेदे।

इक्षु पु० इष्यतेऽसौ साधुत्वात् इष+क्सु। मधुररसयुते असिपत्रे स्वनामख्याते दृक्षे। तद्भेदगुणादिकमुक्तभावप्र०। इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूमिरसोऽपि च। गुडमूलोऽसितत्वक् तथामधुरत्वः स्मृतः। इक्षवोरक्तपित्तघ्नाबल्याद्याः कफप्रदाः। स्वादुपाकरसाः स्निग्धागुरवोमूत्रला हिमाः। अथेक्षुभेदाः "पौण्ड्रकोभीरुकश्चापि वंशकः शतपोरकः। कान्तारस्तापसेक्षुश्च काण्डेक्षुः सूचिपत्रकः। नैपालोदीर्घपत्रश्च नीलपोरोऽथ कोयकृत्। इत्येताजातयस्तेषां कथ्यन्ते गुणानपि। तत्र पौण्ड्रकभीरुकयोर्गुणाः वातपित्तप्रशमनोमधुरोरसपाकयोः। सुशीतोदृंहणोबल्यः पौण्ड्रकोभीरुकस्तथा अथ (कृशिया) कोयकतोगुणाः "कोयकारो गुरुःशीतोरक्तपित्तश्लेष्मापहः। अथ (काजला) कान्तारेक्षुगुणाः कान्तारेक्षुर्गुरुर्हृद्यः श्लेष्मलोदृंहणः सरः। (बडौवा) वंशकगुणाः "दीर्घपोरः सुकठिनः सस्तारो वंशकःस्मृतः। शतपोरकगुणाः "शतपर्वाभवेत्किञ्चित्कोयकारगुणान्वितः। विशेषात्किञ्चिदूनश्च सस्तारःपवनापहः" इक्षुते तु काण्डेक्षुरित्यत्र काण्डेक्षुरिति पाठः इतोऽवशिष्टानां गुणास्तुल्या यथा "कान्तारतापसाविक्षू वंशकास्तुकरौ गुणे। एवंगुणस्तु काण्डेक्षुःस तु वातप्रकोपणः। सूचीपत्रो नीलपोरो नैपालो दीर्घपत्रकः। वातलाःकफपित्तघ्नाः सकषाया विदाहिनः" भाव०प्र० "बालयुवद्वेक्षुगुणाः बालइक्षुः कफं कुर्याद्दोषेकरश्च सः। युवा तु वातकृत्स्वादुरीषत्पित्तश्च वातनुत्। रक्तपित्तकरोवृद्धः शतकृद्वृद्धवीर्यवत्। अथाङ्कभेदेन गुणभेदः मूले तु मधुरोऽत्यर्थं मध्येऽपि मधुरः स्मृतः। अग्रेक्षुषु विशेष इत्यूषां लवणोरसः। अथ दन्तपीडितेक्षुरसस्य गुणाः दन्तनिष्पीडितस्येक्षोरसः पित्तश्लेष्मनाशनः। शर्करासमवीर्य्यःस्यादतिदाही कफप्रदः। अथ यन्त्रपीडितेक्षुरस गुणाः मूलाग्रजन्तुसम्पर्काद्यन्त्रपीडनात्कश्मलत्वात्। तत्फाणिदाही विष्टम्भी गुरुः स्याद्वान्निकोरसः। अथ पर्य्युषितेक्षुरसगुणाः रसःपर्य्युषितोनेष्टोदृश्योबातापहोगुरुर्विकफपित्तकरः शोषी भेदनश्चातिमूत्रलः। अथपक्वस्येक्षुरसस्य गुणाः इक्षोर्विकारास्तृड्दाहमूर्च्छापित्तश्लेष्मनाशनाः। गुरवोमधुरा बल्याः स्निग्धा वातहराःस्मृताः। इत्यामोदहराःख्याता इंक्षवाविषहारिणः। अथ (ओला) फाणितस्य लक्षणं गुणाश्च इक्षोरसस्तु यः पक्वः किञ्चिद्गाढो बलद्रवः। सएवेक्षुविकारेषु ख्यातःफाणितसंज्ञया। फाणितं गुर्वभिष्यन्दि दृंहणं कफशुक्रकृत्। वातपित्तश्रमान् हन्ति मूत्रवस्तिविशोधनम्। अथ मत्स्यण्डिकाः(सारगुड) (राब) इति ख्यातायास्तस्याः गुणाश्च इक्षोरसोयः संपक्वोघनः किंचिद्द्रवान्वितः। मन्यन्तेमत्स्यन्दन्ते यस्मात् मत्स्यण्डीति ततः स्मृता। मत्स्यण्डी भेदिनी बल्या लघ्वी पित्तानिलापहा। मधुरा दृंहणी हृद्या रक्तदोषापहा स्मृता। अथ (तिमे गुड़) गुड़स्य लक्षणं गुणाश्च इक्षोरसोयः सम्यक्पाकायतेक्षोद्भवद्गुडः। स गुड़ोगौड़देशे तु मत्स्यण्ड्येव गुड़ोमतः। गुड़ोद्यवागुरुः स्निग्धोवातघ्नो मूत्रशोधनः। नातिपित्तकरो भेदःकफक्रमिवहप्रदः। अथ नवपुराणगुड़गुणाः गुड़ोनवः कफश्वासकासकृमिकरोऽग्निहृत्। पित्तघ्नो मधुरः स्निग्धो वातघ्नोऽक्तकप्रसादनः स पुराणोऽधिकगुणो बुधैः पथ्यतमः स्मृतः" द्रव्यभेदेन युक्तस्य गुड़स्य गुणाः श्लेष्माणमाशु विनिकृन्ति सदार्द्रं चैव पित्तं निकृन्ति च तदेव फरीतकीभिः। गुरुद्रा समं हरति वातमशेषमित्य दोषत्रयकराय नमो गुड़ाय" (खांड) खण्डस्य गुणाः

खण्डन्तु मधुरं ह्रस्वं चक्षुष्यं दन्तदार्ढ्यकृत्। वातपित्तहरं स्निग्धं बल्यं वातहरं परम्। (सितायाः) सितायाः खण्डं गुणाश्च खण्डन्तु सिताकृपं तुल्यं तं शर्करा सिता। सिता सुमधुरा रुच्या वातपित्तास्रदाहजित्। मूर्च्छाच्छर्दिज्वरान् हन्ति तृषी सा गुणकारिणी। अथ "(सितरि) सितोपलगुणाः भवेत् पुष्पसिता शीता रक्तपित्तहरी मता। सितोपलनिभा स्वच्छी वातपित्तहरा हिमा। शर्करा सर्व्वतोधारतरुदाहरक्तपित्तनुत्। यथा यथैव नैर्मल्यं मधुरत्वं तथा तथा। क्षेपणगौरवगैत्यानि सरत्वं च तथा तथा" इति भावप्र० इक्षुवर्गः। एतत्प्रसङ्गात् सुश्रुते खण्डादिजातद्रव्याणामन्यद्रव्यजातशर्करात्वाञ्च गुणा उक्ता यथा। "यो यो मद्यैरिक्षुजातखण्डशर्कराणां खलो गुणः। तेन तेनैव निर्देशात्तेषां विद्यादयं गुणः। सारस्थिता सुविमला निःक्षारा च यथायथा। तथा तथा गुणवती विज्ञेया शर्करा बुधैः। मधुशर्करा पुनर्ज्ज्वरतीसारहरी रुच्या छेदनी ग्राह्यदोषा यथा यमधुरा मधुरविपाका च। यवासशर्करा मधुरकषाया तिक्तानुरसा स्वल्पहरी सरा चेति। यावत्यः शर्कराः प्रोक्ताः सर्व्वा दाहप्रशमनाश्छर्दिमूर्च्छाहरणपटवः। रक्तपित्तप्रशमनाश्छर्दिमूर्च्छाहरणपटवः। रुच्यं मधूकपुष्पोत्थं फाणितं वातपित्तजित्। कफघ्नं मधुरं पाके बलायं बस्तिदूषणम्" "मन्दाक्रान्ता वितरति रसं नेक्षुयष्टिः कदाऽपि जन्तोः। श्रीफलस्येक्षुदण्डस्य विप्राणां न बलिर्मतः" वाक्षिकाय० "कृष्णाखण्डमिक्षुदण्डांश्च" देवी पु० इक्षोर्विकारः अण्। ऐक्षव गुणादौ त्रि०। "ऐक्षव गुणवर्जितम्" स्मृतिः। इक्षूणां भवनं क्षेत्रं शाकटच् शाकनच् च वा तद्भवने क्षेत्रे। इक्षूणां जाता। इक्षुक्षायम् न० "इक्षुक्षायानिशादिभ्य" स्मृतेः अत्र आनिशादिभ्य इतिच्छेदः त्रि०। इक्षूणां वनम्। अवनस्तित्वात् नित्यं षत्वम् इक्षुवनम्। २कोशिकाशब्दे च राजनि०। ३इक्षुक्षायाम् [इक्षुभेदे स्वार्थे कन्। २इक्षुवृक्षे

इक्षुक पु० इक्षुप्रकारः स्वार्था० कन्। १इक्षुतुल्यस्वादे (नडा)

इक्षुकाण्ड पु० इक्षोः काण्डइव काण्डोऽस्य। १काशशब्दे २तृणशून्यवृक्षे (सज) इक्षुः काण्डइव ३इक्षुदण्डे च। "क्षिप्रं पुरो न जगृहे मरुदिक्षुकाण्डम्" माघः।

इक्षुकीय त्रि० इक्षवः सन्त्यस्मिन् छ नडा० कुक् च। इक्षुयुक्ते देशे तत्र भवः अण् त्रिका० अस्य लुक्। ऐक्षुकक्षत्र भवे त्रि० स्त्रियां ङीप्।

इक्षुकुट्टक पु० इक्षून् कुट्टयतिकुट्ट—ण्वुल्तृचौ उप०। इक्षु क्षेदने गुडकारके जनोपकरणभेदे। [२काशवृक्षे स्त्री भावप्र०

इक्षुगन्ध पु० इक्षोरिव गन्धः यस्य बहु० अवयवो यस्य। १तृणशून्यवृक्षे

इक्षुगन्धा स्त्री इक्षोर्गन्ध इव गन्धोऽस्याः। गुडूचिवृक्षायाम्, इक्षुज त्रि० इक्षोरुत्पत्तिस्थानाज्जायते जन—ड ५त०। इक्षुविकारे गुडादौ "फाणितन्त्वैव मत्स्यण्डी गुडः खण्डश्चैव च। सिता सितोपलाचैते षड्भेदा इक्षुजातयः। इक्षुगन्धे पुष्पे तदुपयोगादिकमुक्तम्। [विशेषे २काशवृक्षे च।

इक्षुतुल्या स्त्री इक्षुवा तुल्या यत्नादिना। (जनार) १धान्य-

इक्षुदण्ड पु० इक्षुर्दण्ड इव दण्डाकारे दीर्घत्वे इक्षुयष्टिरप्यत्र स्त्री

इक्षुदर्भा स्त्री इक्षोरिव दर्भोऽवयवोऽस्याः। हस्यपलिकायाम् राजनि०। [इक्षुरसतुल्यस्वादवारिणि नदीभेदे।

इक्षुदा स्त्री इक्षुमिक्षुरसाख्यं ददाति जलेन दा—क। इक्षुनेत्र न० इक्षुर्नीयते पुनरुत्पादनायारोप्यतेऽनेन नी-इक्षोर्नेत्रमिव वा। इक्षुनेत्राकारे तदुपन्यौ।

इक्षुपत्र पु० इक्षोः पत्रमिव पत्रमस्य। (जनार) धान्यभेदे।

इक्षुपाक पु० इक्षोः पाकः पच्यमानोरसादिः। गुडादौ

इक्षुप्र पु० इक्षुरिव पूर्य्यते पॄ—कर्मणि बाहुलकात् कनि सुडागमः पररूपे रलयोः।

इक्षुबालिका स्त्री इक्षोर्बालः तेनेवबालः शीर्षं स्वपत्रादिरस्याः। इक्षुतुल्यशीर्षे कायशब्दे राजनि०।

इक्षुभक्षिती स्त्री इक्षुर्भक्षितो यया जातिशक्तिपूर्वपदभिन्नत्वात् ङीप् परनि०। इक्षुभक्षकजन्तौ स्त्रियाम्

इक्षुमती स्त्री इक्षुः इक्षुरसोऽस्त्यस्याम् मत्वा मतुप् ङीप्। नदीभेदे "शोता चेक्षुमती वेत्रा देविका च नडादरी" भा० आ० ८अ०। [हृत०। इक्षुमूले २तदुपन्यौ न०।

इक्षुमूल पु० इक्षोर्मूलं यस्मिन्निव मूलं यस्मिन्निवास्य। १वंशशब्दे।

इक्षुमेह पु० इक्षुरसतुल्योमेहः। सुश्रुतोक्ते प्रमेहभेदे तल्लक्षणादि विंशतिनिदानशब्दे दर्शितं यथा "दिवास्वप्नव्यायामाजस्रप्रसक्तं शीतस्निग्धमधुरमद्यान्नपानसेविनं पुरुषं जानीयात्प्रमेही भविष्यतीति। तस्य चैवं प्रकृतस्थाधिष्ठिता एव वातपित्तश्लेष्माणो यदा मेदसा सहैकात्मतामेत्य मूलबाह्यिकोतांस्यतुलत्याधो गत्वा वस्तेर्मुखमाश्रित्य निष्ठिवन्ते तदा प्रमेहान् जनयन्ति। तेषान्तु पूर्व्वरूपाणि कफप्रादुर्भावजादाः स्निग्धपिच्छिलगुरुता गात्राणां मधुरगुल्मूलता तन्द्रा स्वादुः पिपासा दुर्गन्धत्व चास्यस्यासु गच्छिच्छादनेषु मक्षोत्पत्तिर्जटिलीभावः केशानां हृद्विच नखानाम्। तस्मादिक्षुप्रभूतमूलजत्वाच्च वर्म्म एव वर्म्म

दोषसहिताः सप्त पिडकाभिः । तत्र कफाद्रक्तेक्षुसुरा-सिक्थतायसैर्मत्स्यपित्तसान्द्रशुक्रफेनमेहाः दश साध्या दोष-दूष्याणां समक्रियत्वात् । पित्तात्क्षीक्षरिद्राक्षाक्षारलक्षि-ताश्चोपचिताः मेहाः षट् याप्या दोषदूष्याणां विषमक्रिय-त्वात् । वातात्पिर्वसावाल्लौद्रकृत्तिमेहास्त्वारोऽसाध्यतमा मर्म्मास्थ्यधिकत्वात् । तत्र वातपित्तमेदोभिरन्वितः श्लेष्मा श्लेष्ममेहान् जनयति वातकफयोपितमेदोभिरन्वितं पित्तं पित्तप्रमेहान् । कफपित्तवसामज्जमेदोभिरन्वितो वायुर्व्यापन्नप्रमेहान् । तत्र श्वेतमेदनहृदकमेही मेहति दुग्धरसतुल्यमिक्षुमेही, सुरामेही सुरातुल्यं, सर्व-रसं सिक्थतायुक्तं सिक्थतामेही मद्यैः सकफ रक्तुल्यं मद्यमेही, विशदं सलवणतुल्यं लवणमेही, कृष्णरोमा पिट-रसतुल्यं पिष्टमेही, आविलं सान्द्रं सान्द्रमेही, शुक्लतुल्यं शुक्रमेही स्तोकं स्तोकं सफेनं फेनमेही मेहति । अत ऊर्द्धं पित्तनिमित्तान्वक्ष्यामः । सफेनमच्छं नीलं नीलमेही मेहति सदाहं कृरिद्राभं कृरिद्रामेही, अक्षारसगन्धमम्लमेही, क्षुत क्षारप्रतिमं क्षारमेही, मक्षिकोदकप्रकाशं मक्षिकामेही । योषितप्रकाशं योषितमेही मेहति । अत ऊर्द्धं वात-निमित्तान्वक्ष्यामः । सर्पिः प्रकाशं सर्पिर्मेही मेहति वसाप्रकाशं वसामेही, क्षौद्ररसवर्णं क्षौद्रमेही, अत्तमात्रक्ष-दक्षुमदं क्षिप्तमेही मेहति । मक्षिकोपसर्पणमात्रक्षं मांसोपचयः प्रतिच्छायः ग्रंथिस्थारोचकाविपाकाः कफप्र-सेकच्छर्द्दिनिद्राऽऽलस्याऽऽस्येति श्लेष्मजानामुपद्रवाः । द्व-योरवदरक्षं वस्तिमेढ्रौ मेढ्रतोदो वृद्धिर्मूत्रमन्थीकाऽवदा-रोऽवारोचका वमथुः परिधूपायनं दाहो मूर्च्छा पिपासा निद्रानाशः पाण्डुरोगः पीतविण्मूत्रनेत्रत्वचेति पैत्ति-कानाम् । रूक्षरुषो लौल्यमनिद्रा स्तब्धः शुष्कं मूत्र-पुरीषत्वचेति वातजानाम् । एवमेते विंशतिः प्रमेहाः सोपद्रवा व्याख्याताः । तत्र वसामेदोभ्यामभिपन्नशरीरस्य लिंगैर्दोषानुगतधातोः प्रमेहिणो दश पिडका जायन्ते । तद्यथा । शराविका सर्षपिका कच्छपिका जालिनी विनता सुनिम्नो मसूरिका अलजी विद्रधिका चेति । शरावसमा तनूपा निम्नमध्या शराविका । गौरसर्षप-संस्थाना तन्मात्रा च सर्षपी । बदरास्थि कूर्मसंस्थाना श्लेष्मा कच्छपिका बुधैः । जालिनी तीव्रदाहा तु मांस-जालसमावृता । मसूरी पिडका नीला पिडका विनता स्मृता । मसूरसमसंस्थाना श्लेष्मा सा तु मसूरिका । रक्तावृता स्फोटवती दारुणा त्वलजी भवेत् । विदारी कन्दसङ्काशा कठिना च विदारिका । विद्रधेर्लक्षणैर्युक्ता श्लेष्मा विद्रधिका बुधैः । ये यन्मयाः स्मृता मेहास्तेषामेतास्तु तन्मृताः । हृदि वृद्धि शिरस्यंसे पृष्ठे मर्म्मसु चोत्थिताः । सोप-द्रवा दुर्णामस्था पिडकाः परिवर्जयेत् । क्षतक्षीणं शरीरं निर्मांसमेदोमज्जवसायुतः । अधः प्रक्रमते वायुस्तेनासाध्यास्तु वातजाः । प्रमेहपूर्वरूपाणामाक्षतिर्यत्र दृश्यते । किञ्चिच्चाप्यधिकं मूत्रं तं प्रमेहिणमादिशेत् । क्षतक्षाण्ड-क्षोणि वा यस्मिन् पूर्वरूपाणि मानवे । प्रदृश्यमूत्रमत्यर्थं तं प्रमेहिणमादिशेत् । पिडकाधीक्षितं गाढमुपक्षुद्य-मुपद्रवैः । मधुमेहिनमाचष्टे स चासाध्यः प्रकीर्त्तितः । स चापि गमनात् स्थानं, स्थानादासनमिच्छति । आसनाद्भु-क्षते शय्यां, शयनात् स्वप्नमिच्छति । यथाहि वर्ष्माणां वल्मी-कानामुत्कर्षापकर्षक्षतेन संयोगविशेषेण शयनशमुकपिलकपो-तमेचकादीनां वर्ष्माणामनेकेषामुत्पत्तिर्भवति । एवमेव दो-षधातुमलाकारविशेषेणोत्कर्षापकर्षक्षतेन संयोगविशेषेण । भवति चात्र । सर्वएव प्रमेहास्तु काले नाप्रतिकारिणः । मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति हि" तत्रैव चिकित्-सास्थाने सर्वप्रमेहस्य प्रकारान्तरेण द्वैविध्यमुक्तम् । यथा "द्वौ प्रमेहौ सहजोऽपथ्यनिमित्तश्च भवतः तत्र सहजोनाम पित्तबीजदोषजतः । अक्षिताकारजोऽपथ्यनि-मित्तः । तयोः पूर्व्वोपद्रुतः क्रमोत्क्रमोऽन्यायी पिपासुर्भृशं परिसरणशीलश्च भवति उत्तरेण स्थूलोपचायी स्निग्धः-मध्यासनशय्याप्रावेणेति" "तत्रोदकमेहिनं पारिजात-कषायं पाययेत् इक्षुमेहिनं वैजयन्ती कषायम्" च सुश्रु० दुष्प्रयत्न न० दुष्प्रोत्क्षिप्तं यत्नम् या० त०। दुष्प्रणिक्षिप्तके यत्ने (मङ्गायाम्) "गोकुले कन्दुयाखायां तैलयन्त्रेषु यत्नयोः । अमीमांस्यानि यौवानि" स्मृतिः ।

दुष्प्रयोनि पु० दुष्टोरिव योनिर्यस्य । पुरुषके दुष्टौ राजनि०

दुष्फुर् पु० दुष—बा०—फुरच् । १कौक्किकाहत्ते (कुकेयारा) रत्ना० २गोखुरे (गोखुरो) ३दुष्टौ च मल्लिनाथः ४काशे राजनि० । संज्ञायां बहु । १कौक्किकाहत्ते । २काशवृक्षे ३स्थूलखरे च राजनि० ।

दुष्फुरस पु० दुष्टोः रस दुष रसो वस्य । (नडा) इति ख्याते काशे १वृक्षभेदे । "काशःकाशेक्षुदर्भेषु दुष्फुरादिषु रसवत् । दुष्फुरादिर्गुणवान्च तथा पोटगलः स्मृतः । काशः-स्वाम्लमधुरस्निग्धः स्वादुपाको हिमः सरः । मूत्रकृच्छ्राश्म-रीदाहरक्तपित्तास्रदोषजित्" भाव० प्र० । दैत० ।

इक्षोः रसे प्र० । तस्य गुणादिकमिक्षुशब्दे उक्तम् ।

इक्षुरसक्काथ पु० इक्षुरसस्य काथः पाकभेदः । खाण्डितादौ ।

इक्षुवल्ली(ल्लरी) स्त्री इक्षुरिव सुस्वादा वल्ली वल्लरी वा लता । क्षीरविदार्य्याम् । (क्षीरकन्द) । राजनि० ।

इक्षुवालिका स्त्री इक्षुरिव वलति वल-ण्वुल् । (ताजमा-खना) इतिख्याते १ इक्षे २ काशे च ।

इक्षुवाटी स्त्री इक्षोर्वाटीव । पृषो० के इक्षौ राजनि० । ङीप० । २ इक्षूत्पादकक्षेत्रे । स्वार्थे कन् । उभयत्र ।

इक्षुविकार पु० ङीप० । इक्षुजन्यद्रव्यादिके षड्विधे गुड़ादौ

इक्षुवेष्टन पु० इक्षोरिव वेष्टनमस्य । भद्रमुञ्जे । "भद्रमुञ्जः शरो-बातवेतन इक्षुवेष्टनः । मुञ्जद्वयं तु मधुरं तुवरं शिशिरं तथा । कफपित्तहरं हृद्यं मूत्रकृच्छ्रास्रदाहजित् । दोष-त्रयहरणं मेखलासूत्रयुज्यते" भावप्र० ।

इक्षुशर पु० इक्षुरिव शृणाति शॄ-अच् । ४ बाणभेदे तद्धने हि गन्तुर्गात्रक्षतेर्दृष्टत्वात् तस्येक्षुवत् हिंसकत्वम् ।

इक्षुशाकट न० इक्षूणां भवनं क्षेत्रम् इक्षु+शाकट्च् । (दोकल) इति ख्याते इक्षुभवनयोग्ये क्षेत्रे । तदर्थे शाकिनच् । इक्षुशाकिनशब्देऽप्यत्रार्थे न० ।

इक्षुसमुद्र पु० इक्षुरसस्वादूदकः समुद्रः । सप्तसमुद्रभेदे । "लवणेक्षुसुरा-सर्पिर्दधिदुग्धजलान्नकाः" पुरा० तत्स्वरूपम् सि० शि० उक्तम् । "भूमेरर्द्धं शाररसिन्धोरर्द्धमस्य जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः । अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य वाच्ये, शारसीरास्यम्बुधीनां निवेशः" "दध्नोऽतस्त्वेक्षुरसस्य तस्मात्तस्यास्य च स्वादुजस्य चाम्ले" ।

इक्षुसार पु० ङीप० । खाण्डितादौ ।

इक्ष्वाकु पु० इक्षुमिक्ष्वाकारोति इक्षु+आ+कृ-डु । १ कटतृ-ण्याम् २ सूर्य्यवंश्ये आदिराजे च । "यस्मै त्वेष्वाकवः पशवते" ऋ० १०, ६१, ४ । स च वैवस्वतमनोः पुत्रः । "मनोर्वैवस्वत-स्यासन् पुत्रा वै नव सत्तमाः । इक्ष्वाकुश्चैव नाभागोधृष्णुः शर्य्यातिरेव च । नरिष्यःप्रांशुधृष्टाश्च नाभागारिष्टसंज्ञकाः कवषश्च पृषध्रश्च नवैते भरतर्षभ" ! । "इक्ष्वाकुर्ज्येष्ठदा-यादोमध्यदेशमवाप्तवान्" हरिवं० १० अ० "तस्योत्पत्तिप्रका-रस्तत्रैवोक्तः शुचेस्तु मनोः पुत्रइक्ष्वाकुरभवत्ततः" । "तस्य पुत्रशतं चासीदिक्ष्वाकोर्भूरिदक्षिणम् । तेषां ज्येष्ठो विकुक्षिस्तु विकुक्षित्वादयोधिनाम्" "इक्ष्वाकुस्तु विकुक्षिर्वै अष्टकायामघादिषत्" हरि० । इक्ष्वाकोरपत्यम् । अण् दक्षि० ञि० । ऐक्ष्वाकस्तदपत्ये बहुषु तस्य लुक् इक्ष्वाकवः-"इक्ष्वाकूणां दुरापेऽर्थे" "गतिरयसामिक्ष्वाकूणामिदं हि कुलव्रतम्" "इक्ष्वाकुभिः पुरुषवरैरेतानि" इति च रघुः ।

इक्ष्वारि पु० इक्षुरिव क्षमलाद्दक्षति आ+क्ष-इन् । काय-फले । [इक्षुरिवाक्षति अक्ष-क्वुण् वा । कायफले भावप्र० ।

इक्ष्वालिका स्त्री इक्षूणामालिरिव कायति प्रकाशते कै क-

इख गतौ भ्वादि० पर० सक० सेट् । इखति ऐखीत् । इखेच ऐखतुः । एखिता एखेष्यति ऐखिष्यत् ।

इख गतौ इदित् भ्वादि० पर० सक० सेट् । इङ्खति ऐङ्खीत् । इङ्खाम्-बभूव-आस-चकार । इङ्खिष्यति । इङ्खिता ऐङ्खिष्यत् । प्रेङ्खन् प्रेङ्खितम् प्रेङ्खणम् ।

इग गतौ इदित् भ्वादि० पर० सक० सेट् । इङ्गति ऐङ्गीत् । इङ्गित्वत् । इङ्गितम् । "त्वया खल्विदं विश्वं यच्चेङ्गं यच्च नेङ्गति" भा० व० ४२ अ० । तस्मात्मनेपदित्वमपि "योऽवतिष्ठति नेङ्गते" यथा दीपोनिपातस्थो नेङ्गते सोपमा स्मृता" गीता । अत्र खन्दनमात्मपरतायामकर्म्मकत्वम् । णिच्-इङ्गयति चालयतीति प्रेर-यतीति वार्थः । उदु-प्रेरणे "शुनमङ्गास्रुदिङ्गय" ऋ० ४, ५७ ५७, । सम्+सम्यक् चालने । "युष्मरिणीं समिङ्गयति सर्व्वतः" ऋ० ४, ७, ७,

इङ् अध्ययने अधिपूर्व्व एव ङित् अदा० आत्म० सक० अनिट् । अधीते अधीयीत अध्यैष्ट-अध्यगीष्ट । "अधिजगे, अध्यै-ष्यत-अध्यगीष्यत "योऽधीते यक्तितोऽन्वहम्" स्मृतिः । "नाधीयीत कदाचन" मनुः । "अध्यैष्ट वेदांस्त्रिदशानवट्ट" भट्टिः शानच् अधीयानः । अकर्त्तरि कर्त्तरि यङ् अधीयन् "अधीयन्नात्मविद्यां धारयन् मस्करिव्रतम्" भट्टिः अध्येतव्यम् "श्रोतव्यमिह सूद्येन नाध्येतव्यं कदा-चन" । "स्वाध्यायोऽध्येतव्यः" स्मृतिः । अध्ययनीयम् । अध्येयः "वेदएव सदाऽध्येयः" स्मृतिः । अध्येता । अधीतः "अधीतवेदवेदाङ्गस्तेन" वेदन्ता० । स्वार्थत्वात् कर्त्तरि क्त अधीतः "अधीते यतसाहस्रम्" स्मृतिः "अधीतिः "अ-धीतिबोधाचरणप्रचारणैः" नैष० । अध्येष्यमाणः । "पीत्वापोऽध्येष्यमाणस्तु स्वाचमेत् प्रयतोऽपि सन्" मनुः भावे अधीतम् । अधीतमनेन इनि अधीती । "त्वयुक्त-रासङ्गतोमधीतिनोम्" कुमा० अधीत्य "अनधीत्य द्विजोवे-दान् योऽन्यत्र कुरुते श्रमम्" स्मृतिः । "अधीत्य चतुरोवे-दान्" पुरा० । अध्ययनम् । "अध्ययनेनाविप्रलुप्तः" पा० । "यत्नाच्चवैरध्ययनं विनार्थि" भट्टिः । अध्यायः "स्वाध्या-योऽध्येतव्यः" स्मृतिः णिच् अध्यापयति "अध्यर्धं ब्राह्मण-मुपनयीत तमध्यापयीत" स्मृतिः अध्यापिपत् अध्यजिगपत्

"अध्यापयामास पितॄन्" मनुः णिच्-सन्। अध्यापिपयिषति-ते अधिजिगापयिषति-ते क्रियासात् सन्। अधिजिगांसते। अध्यापकः अध्यापकयच्छे उदा०अध्यापितः "अध्यापितस्त्रीयनसापि नीतिम्" कुमा०। "भृतकाध्यापको यश्च भृतकाध्यापितस्तथा" मनुः।

इङ्गः पु० इगि भावे घञ्। १चलने कम्पने २इङ्गिते च। कर्त्तरि अच्। २जङ्गमे "त्वया स्पृष्टमिदं सर्व्वं यच्चेङ्गं यच्च नेङ्गति" भा०व०४२अ०। ४अङ्गुते च त्रि० मेदि०।

इङ्गन न०इगि भावे ल्युट्। १इङ्गिते २चलने ३स्थाने च। णिच्-ल्युट्। ४चालने। "उपांशुसवनस्यानिङ्गनमचालनम् श्रूयते "अनिङ्गयमानानि हरे आहवनीयसवनात्" स्मृतिः। कर्म्म०। यच् इङ्गना यत्र स्त्री।

इङ्गिः(ङ्गि)ल पु०इगि-इलच् वा लस्य डः। इङ्गुदवृक्षे। "वीरणानूलमिस्रमिङ्गिड़प्रपुटेन जुहोति" श्रुतिः।

इङ्गित न० इगि-भावे क्त। १चलने २स्पन्दनभावाभिव्यञ्जके चेष्टाविशेषे "इङ्गितं स्पन्दतो भावः इति" सज्जनोक्ते ३हृदयस्थे भावे। "अगूढसद्भावमितीङ्गितज्ञया" कुमा०"बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम्। स्वरस्मितेङ्गिताकारैश्चक्षुषा चेष्टितेन च" मनुना तस्य अन्तर्गतभावाभिव्यञ्जकत्वमुक्तम्। "तत्र खरो गद्गदादिः, वर्णोऽस्खाभाविकः इङ्गितं खेदवेपथुरोमाञ्चादि" व्यव०त० रघु०। "स विद्वान्दक्ष लक्ष्याणि निगूढेङ्गितचेष्टितैः" आकारमिङ्गितं चेष्टां भक्ष्येषु च चिकीर्षितम्" "इङ्गिताकारचेष्टाभ्यां शुचिं दक्षं कुलोद्गतम्" मनुः। "तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च" रघुः। कर्त्तरि क्त ४चलिते त्रि०।

इङ्गुः पु० इङ्गति चलत्यनेनेगि-उण्। रोगे।

इङ्गुद पु० इङ्गुः रोगस्तम् द्यति दो-क। १तापसतरौ "इङ्गुदः कुष्ठभूतादिपङ्कप्रणविषक्रमीन्। हन्त्यु-ष्णः श्लिष्मशूलघ्नश्चक्षुष्यः कटुपाकवान्" भाव०प्र०। गौरा० ङीष् इङ्गुदीत्यपि स्त्री। "तादङ्गुदीस्नेहलतप्रदीपम्" रघुः तस्याःफलम् अण् प्लक्षादि० न लुक्। ऐङ्गुदं तत्फले न०। अस्याः पर्य्यायद्वारा लक्षणं दर्श्यते। स्निग्धपत्रता विषघ्नारिता वातनाशकता तैलफलत्वम् तीक्ष्णकण्टकता पूतिगन्धिता क्रोष्टुफलत्वम्। २ज्योतिष्मतीवृक्षे पु०रत्नमा०।

इङ्गेज पु० इङ्गते भोगार्थम् इगि-रन् इङ्गः लक्ष्यं देशस्तत्र जायते जन-ड अलुक् स०। लक्ष्यस्थजने। "पूर्व्वाम्नाये नवयतं षड्शीतिः प्रकीर्त्तिताः। फिरङ्गभाषया मन्त्राक्षेषां संसाधनात् कलौ। अधिगानखड्गलाभाच्च संग्रामेषुपराजिताः। इङ्गेजाः नवषट्पञ्च लक्षजापादि भाविनः" मेरुत० २२प्रकाशे।

इच्छक पु० इच्छा+अल्पत्वेऽर्थे अच् इच्छकमिव रूपोऽस्य कप्। (टावाबेलु) इति ख्याते १वृक्षे। अल्पार्थे अच् स्वार्थे कन्। २इच्छायुक्ते त्रि०।

इच्छा स्त्री इष-भावे अ। इदं मे भूयादिति वेदान्तादिमते मनोधर्म्मभेदे सुखतत्साधनविषयचिन्तायां व्यापयते, सुखादिज्ञानेन तत्साधनत्वज्ञानेन च जायमाने इदं मे भूयादित्येवंरूपे आत्मधर्म्मे २अभिलाषे च। "आत्मजन्या भवेदिच्छा इच्छाजन्या भवेत् कृतिः। कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत् क्रिया" न्यायसिद्धान्तः। "कामः संकल्पोविचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्व्वं मन एवेति" श्रुतेः मनोधर्म्मत्वमिति सांख्यवेदान्तिनः। "विगतेच्छाभयक्रोधाः" गीता "जन्मनि क्लेशबहुले किं न दुःखमतः परम् इच्छासंपद्यतो नास्ति यतश्चेच्छा न निवर्त्तते" हितो०। "गीतो रात्रिः लक्षदय मया सार्द्धमिच्छारतैर्यया" मेघ०। "मह्यं मनेरिच्छः परिक्रीय सूनौ" "विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया" रघुः। "योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया" "देवदत्तां पतिर्भार्य्यां विन्दते नेच्छयात्मनः" "लक्षं यस्यभृतां वासाद्विद्युन्मिच्छयात्मनः" इति च मनुः। "स्वेच्छया विभजेत् सुतान्" दायभा०स्मृतिः। सा च द्विविधाफलोपायरूपविषयभेदात् यथाह भाषा०। "सुखन्तु जगतामेव काम्यं धर्म्मेण जन्यते। अधर्म्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम्। निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते। इच्छातु तदुपाये स्यादिष्टोपायत्वधीर्यदि। चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा च या भवेत्। तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत्। बलवद्दृष्टहेतुत्वमतिः स्यात् प्रतिबन्धिका। तदहेतुत्वबुद्धेस्तु हेतुत्वं क्वचिदिष्यते"। व्याख्यातं च तर्का०। "इच्छा हि फलविषयिणी उपायविषयिणी च। फलन्तु सुखं दुःखाभावश्च। तत्र फलेच्छां प्रति फलज्ञानं कारणम्। अतएव ज्ञातः पुरुषार्थः सम्भवति। यज्ज्ञातं सत् स्वतश्चिकीर्षते यत् स्वतः पुरुषार्थः इति तल्लक्षणात्। इतरेच्छानधीनेच्छाविषयत्वं फलितोऽर्थः। उपायेच्छां प्रतीष्टसाधनताज्ञानं कारणम्। कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयिणीच्छा चिकीर्षा यागं कृत्वा स्वर्गमयामीति तदनुभवात्।

चिकीर्षां प्रति ज्ञातिसाध्यतावच्छेदकावच्छिन्नसाधनताज्ञानस्य कारणत्वम्। अतएव इच्छां ज्ञातिसाध्यतावच्छेदकावच्छिन्नसाधनताज्ञानाभावाच्च चिकीर्षा। बलवदिति बलवदनिष्टसाधनताज्ञानं तत्र प्रतिबन्धकम्। अतो मधुविषसंपृक्तान्नभोजने न चिकीर्षा। बलवदनिष्टेः प्रतिबन्धकत्वमन्ये। कस्यचिन्मत इति। बलवदनिष्टजनकत्वज्ञानं कारणमित्यर्थः। ज्ञातिसाध्यतावच्छेदकावच्छिन्नतो बलवदनिष्टसाधनताज्ञानशून्यस्य बलवदनिष्टजनकत्वज्ञानं विनापि चिकीर्षायां विरुद्धाभावात् कस्यचिन्मत इत्यरसो दर्शितः"।

विटतमेतत् दिनक०यथा "तत्र तयोर्मध्ये। अतएव फलज्ञानस्य फलेच्छां प्रति हेतुत्वादेव पुरुषार्थः संभवतीति सुखं दुःखाभावश्च पुरुषार्थः संभवतीत्यर्थः। ननु यज्ज्ञातं सदित्यादेः स्वविषयज्ञानजन्येच्छाविषयत्वमपेक्षया चोपादेऽतिव्याप्तिः तस्यापि स्वविषयकेष्टसाधनताज्ञानजन्येच्छाविषयत्वात् अत आह। इतरेच्छेति"।

अत्र ऐश्वरेच्छाव्यावृत्त्यर्थं हितीयेच्छायां जन्यत्वं विशेषणीयम्। असत्प्रवृत्तिवारणाय आद्येच्छायामपि जन्यत्वं विशेषणीयम्। भवति च सुखेच्छायाः इतरविषयकेच्छाजन्यत्वम् उपायेच्छायाश्च फलेच्छाजन्यत्वम्। इष्टसाधनस्य फलेच्छाधीनेच्छाविषयित्वात् न तत्र लक्षणप्रसरः। पुरुषान्तरीयेच्छाव्यावृत्त्यर्थं समवायद्वयघटित ज्ञानाधिकरणं निवेशनीयम् वस्तुतः स्वसमवायिसमवेतत्वप्रयोज्यत्वोभयसम्बन्धेन स्वज्ञानाश्रयाभिन्नाया जन्येच्छाविषयत्वं तत्त्वम् स्वपदमिच्छापरम् इत्यन्यत्र विस्तरः। तत्रेदं बोध्यं फलेच्छायां कारणं यत् सुखज्ञानसत्त्वं तत् कारणान्तरनिरपेक्षादिसाधारणम्। प्रत्यक्षत्वे प्रत्यक्षं प्रति विषयस्य हेतुतया विषयज्ञानजन्यसुखादेर्वर्त्तमानत्वे एव तत्सम्बन्धेन वर्त्तमानस्य सुखस्य सिद्धत्वात् सिद्धे च इच्छाविरहात् न तद्विषयकेच्छासम्भव इति स्थितं चैतत् कथादण्डयोरुपस्करयोः" यथा। "सुखाद्रागः" वा० सू०। "सकृच्चेन्नवनितासेवनजन्यनः सुखादुत्तरोत्तरं तज्जातीये सुखे तत्साधने वा राग इच्छा जायते" उप०"तन्मयत्वात्" सू० विषयासङ्गजनितो दृढतरः संस्कारविशेषस्तन्मयत्वम् तद्वशात् कामातुरस्य कामिनीमयजगतस्तत्र सर्व्वत्र कामिनीदर्शनम्" उप०। "तन्मयत्वे तत्प्रकाशो बाह्याभ्यन्तरतस्तथा" इत्यत्रोक्तम्। अत्र संस्कारादेव इच्छा जायते इत्युक्तेः संस्कारसाध्यस्मृतिहारेव संस्कारस्य हेतुत्वमवधीयते। क्वचिद्दृष्टवशात् क्वचित् जातिभेदवशाच्च इच्छावैलक्षण्यं तदप्युक्तम् तत्रैव "अदृष्टाच्च" "जातिविशेषाच्च" सू०। यद्यप्यदृष्टं साधारणं कारणं तथापि क्वचिदसाधारणकारणतामनुभवति यथैव तज्जन्यानुभूतकामिनीसेवनसुखस्यापि यौवनोद्भेदे कामिनीरागः" उप०। न च तत्रापि अद्यप्रकृतबालकस्य कन्यापानरागवत् जन्मान्तरीयततत्संस्कारजन्यत्वमेव हेतुत्वमस्तु किमदृष्टस्य साधारणकारणस्यासाधारणकारणताकल्पने गौरवं चेत् तत्कल्पनेऽपि तत्र लौकिकादृष्टस्येव अत्रापि अदृष्टविशेषस्यैवोद्बोधकस्यानौचित्यतया अवश्यकल्पनीयत्वे तस्यैव हेतुत्वौचित्यात्। यदार्थभेदे जातिभेदकृत एव रागः। यथा मनुष्यजातीतानामङ्गदौ रागः खगजातीयानां तृणादौ, करभजातीयानां कण्टकादौ, शूकरादेर्विष्ठादौ रागोत्पत्तिः। तथा च विषयविशेषरागं प्रति जातिविशेष एव कारणतया कल्पनीयः। नन्वत्रापि जातिविशेषोत्पादकतयादृष्टस्यैव कारणत्वेऽपि जातिविशेषस्य कारणत्वमस्त्येव तमनुत्पाद्यादृष्टस्याकारणत्वादिति बोध्यम् सुखं मे भूयादिति दुःखं मे मा भूदित्येवं रूपः सुखदुःखाभिलाषः।

उपायेच्छां प्रति तु इष्टसाधनताज्ञानं हेतुः। भवति च पाके भोजनसाधनतया, भोजने च क्षुन्निवृत्तिसाधनतया ज्ञानात् इच्छा। तदुक्तं विवाक्यन्तु पाको जायतामू इत्येवं रूपम्। सेयमिच्छा ज्ञानजन्यत्वादिवत् स्वविषया तद्विषयत्व द्विविधः बाधिताबाधितभेदात्। यत्र इष्टसाधने वस्तुनि इष्टसाधनत्वज्ञानादिच्छा सद्विषयिणी यत्र तु अनिष्टसाधने वस्तुनि इष्टसाधनत्व भ्रमजा असद्विषयिणी। सा च प्राचिमात्रसाधारणी ऐश्वरेच्छा तु सदा सद्विषयिणी तस्या बाधितपदार्थविषयकत्वाभावादेव तथात्वम् तेन तस्या नित्यत्वेन इष्टसाधनत्वज्ञानाधीनत्वाभावेऽपि न क्षतिः। योगिनां तु प्राकाम्यकामावसायिताख्यैश्वर्य्ययोगात् कामानुसारित्वेन विषयाभवन्तीति नासद्विषयिणीति भेदः यथोक्तं सां० कौ०। "प्राकाम्यमिच्छानभिघातः यतो भूमावुन्मज्जति निमज्जति यथोदके। कामावसायित्वं सा सत्यसङ्कल्पता। यथाऽस्य सङ्कल्पो भवति भूतेषु, तथैव भूतानि भवन्ति। अन्येषां निश्चया निश्चेतव्यमनुविधीयन्ते योगिनान्तु निश्चेतव्याः पदार्थाः निश्चयम्"। निश्चेतव्यनिश्चयशब्दौ काम्यकामावसायवतः तथा च यथाकामं तेषां विषया भवन्तीति न असद्विषयकत्वं तेषां कामानामिति विवेच्यम्। इयमिच्छा

प्रवृत्तौ हेतुः इच्छाया बाधितविषयकत्वे प्रवृत्तिविषयत्वादिनो तदुत्तरं फलाभावेन तस्याः विसंवादित्वात्। सहिषयकत्वे संवादित्वेति भेदः तथा च प्राणिमात्राणां प्रवृत्तौ इच्छा हेतुर्नैश्वरस्य प्रवृत्तौ तस्या नित्यत्वात्। गवादीनामपि हरितदर्शनादिना जायमानायाः प्रवृत्तेरुपलम्भात् तत्कारणमिच्छास्तीत्यनुमीयते इत्यास्तु भेदः तेषां वस्तुतः सदसद्विषयैकमूल्यतया-ऽसद्विषयेऽपीच्छा जायते। सेयमिच्छा सुबन्तोत्तरविहित काम्यच्कम्यजादिना, धातूत्तरविहितसनादिना च वाच्या। तत्र पुत्रकाम्या, अध्ययनाया, उदन्या इत्यादौ काम्यजादिवाच्या, पिपासा बुभुक्षा जिज्ञासा इत्यादौ सनुवाच्या। सर्वत्र च इष्टसाधनताज्ञानादेव नवसदविषयेषु इच्छा जायते सनुप्रत्ययवाच्यायां चिकीर्षायां तु नैवं किन्तु तत्र मनभेदे कारणान्तरमप्यस्ति तथा हि कृतिसाध्यत्वप्रकारकेच्छा चिकीर्षा पाक. कृत्या साध्यतानिरूपिका। तत्र च कृतिसाध्यत्वज्ञानं कारणमिति गुरवः तेन दृष्टिजलादौ कृतिसाध्यत्वाभावेन न तत्र चिकीर्षा। कृतिसाध्येष्टसाधनत्वज्ञानं बलवदनिष्टानुबन्धित्वज्ञानस्य हेतुरिति नैयायिकाः। तेन इष्टाजलताडनादौ कृतिसाध्यत्वप्रकेऽपि न चिकीर्षा तत्र इष्टसाधनत्व-प्रकाभावात्। विषमिश्रितान्नादेरिष्टसाधनत्वप्रकेऽपि बलवदनिष्टसाधनत्वप्रकात्र चिकीर्षा। तदेतत् सूक्ता- उक्तं तच्च प्राक् दर्शितं तत्तद्दिनकरोशेनो यथा।

"ननु कृतिसाध्यताज्ञानस्य स्वातन्त्र्येण चिकिर्षां प्रति हेतुत्वे मानाभावः। तद्धर्मावच्छिन्नविशेष्यकेष्टसाधनताज्ञानस्य तद्धर्मप्रकारकेच्छां प्रति हेतुतायां. कृप्यत्वात् कृतिसाध्यपाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानादेव चिकीर्षायाः सम्भवादिति चेन्न यत्र कृतिसाध्यपाकत्वेनेष्टसाधनत्वं न स्फोतमपि तु गुरुपाकत्वेन कृतिसाध्यत्वं गुरुपाकत्वेनेष्टसाधनत्वं च स्फोतं तत्रापि पाकगोचरप्रवृत्तेरानुभाविकतया तदनुरोधेन चिकीर्षाया व्याप्यायत्वकल्पने तन्निर्वाहाय कृतिसाध्यताज्ञानस्य स्वातन्त्र्येण हेतुतायां आवश्यकत्वात्। अथ कृत्यसाध्यताज्ञानस्य प्रतिबन्धकत्वादेव इष्टादौ चिकीर्षानुत्पादात् कृतिसाध्यताज्ञानस्य चिकीर्षां प्रति हेतुत्वे मानाभावइति चेन्न कृतिसाध्यत्वाभावस्य तद्व्याप्यतद्वच्छेदकधर्मज्ञानानां प्रतिबन्धकत्वकल्पनापेक्षया कृतिसाध्यताज्ञानस्य हेतुत्वे लाघवात्। इष्टसाधनताज्ञानमिति। अन्यथा निषृष्टत्वज्ञानेऽपि चैत्रवन्दनादौ चिकीर्षापत्तिरिति भावः। अत्रेदमवधेयम्। पाकविशेष्यकेष्टसाधनताज्ञानस्य कार्यतावच्छेदकं न कृतिसाध्यपाकगोचरचिकीर्षात्वम् कृतिसाध्यत्वप्रकारकत्वनिवेशे प्रयोजनविरहात् पाकोजायतामितीच्छाया असंभवापत्तेश्च किन्तु पाकत्वावच्छिन्नसुखविशेष्यकेच्छात्वम् पाकसाध्यं सुखं जायतामितीच्छायां व्यभिचारवारणाय सुखेति। इष्टसाधनतेत्यत्रेच्छा स्वरूपसती विशेषणम्। तेनेच्छाज्ञानशून्यकालेऽपि चिकीर्षानिर्वाह इति। अतएव कृतिसाध्यताज्ञानस्य हेतुत्वादेव। बलवद्विरुद्धेति। द्विरं द्वेषविषयभूतं द्वेषश्च दुःखे तादूप्येण ज्ञानात्, सर्पादौ तत्साधनताज्ञानात्। द्वेषे बलवत्त्वं च जातिविशेषः। प्रतिबन्धकमिति। ननु बलवद्द्वेषविषयसाधनत्वज्ञानस्य प्रतिबन्धकत्वे चैत्रस्यागम्यागमनजन्यनरके यदा बलवान् द्वेषस्तदा मैत्रस्य ताडयद्द्वेषभूयस्त्वज्ञानव्यालम्बने ताडयनरकसाधनत्वज्ञानवतश्चिकाप्रवृत्त्योरनुपपत्तिः एवं चैत्रस्यैव कालान्तरे ताडयद्वेषसत्त्वेऽपि। न च तत्कालीनतत्पुरुषीयेच्छां प्रति प्रवृत्तिं प्रति च तत्कालीनतत्पुरुषीयबलवद्द्विष्टजनकत्वज्ञानस्य प्रतिबन्धकत्वं कल्प्यते। यत्पुरुषस्य यदा न कापि द्वेषस्तत्कालपुरुषान्तर्भावेन ताडयप्रतिबन्धकत्वस्वाकृष्यत्वात् तत्र ताडयप्रतिबन्धकाप्रसिद्धिरतस्तदभावरूपकारणस्याभावात् प्रवृत्त्यनुपपत्तिरिति वाच्यम् यत्पुरुषस्य यदाऽगम्यागमनजन्यनरके बलवद्द्वेषदा तत्पुरुषस्य तत्रेच्छानुत्पादादगम्यागमनगोचरतत्पुरुषीयतत्कालीनेच्छाया अप्रसिद्ध्या तत्पुरुषतत्कालज्ञानाभावेन ताडयकार्यकारणभावस्याभावेन तत्र तत्पुरुषीयागम्यागमनगोचरेच्छानुत्पादप्रयोजकस्य दुर्निरूपत्वेति चेन्न तद्धर्मप्रकारकद्वेषविशिष्टस्य तद्धर्मावच्छिन्नजनकत्वज्ञानस्य तत्र प्रतिबन्धकत्वकल्पनेनोक्तदोषाभावात्। तद्धर्मप्रकारकद्वेषानुत्तरताडयेच्छायां ताडयद्वेषः भावः, ताडयद्वेषोत्तरतद्गोचरेच्छायां तद्धर्मावच्छिन्नजनकत्वज्ञानाभावः कारणम्। बलवद्द्वेषेति। पाकादिगोचरेच्छायां बलवद्द्वेषविषयसाधनत्वज्ञानजन्यः पाकगोचरद्वेषः प्रतिबन्धकः पूर्वोक्तप्रतिबन्धकत्वद्वयकल्पनापेक्षया लाघवादिति भावः यत्र लोकटसुखोत्कटदुःखजनकमेवक्रियाकर्म स्फोतं तत्र सत्प्रतिपक्षत्वात् द्वेषेच्छाहेत्वोरनुत्पत्तेस्वीक्रियते तत्र कार्यकाले द्वेषाभावस्य वक्तव्येच्छोत्पादापत्तिः। न च यत्र बलवद्द्विष्टसाधनताज्ञानेन द्वितीयक्षणे द्वेषोजनित इदुत्तरक्षणे इच्छोत्पादापत्तिरेव-

पीति वाच्यम् । तत्रेच्छोत्पादहेत्वत्वात् प्रणविलम्बस्य प्रयत्ननिर्वर्त्यत्वादिति अत्यल्पत्वेनेत्यक्षरस्य सूचितः । बलवदनिष्टाजनकत्वज्ञानमिति । अत्रापि तद्धर्मप्रकारक हेयोत्तरेच्छायां तद्धर्मावच्छिन्नाजनकत्वज्ञानं कारणं तादृश हेयानुत्तरेच्छायां तु तद्धर्मप्रकारकहेयाभावः कारणमिति विषक्षणीयम् । मूले कस्य चिन्मत इत्यनेनाक्षरस्य सूचितः । न च बलवदनिष्टाननुबन्धित्वज्ञानत्वस्य हेतुतावच्छेदकत्वे बलवदनिष्टजनकत्वप्रकारतानिरूपिताभावविशेष्यतायाश्चालित्वादेस्तादृशनिरूप्यनिरूपकभावघटितत्वेन गौरवात्तदघटितबलवदनिष्टसाधनत्वज्ञानाभावत्वेनैव हेतुत्वं युक्तम् । मत्ताप्रामाण्यज्ञानाभावोल्लन्दितबलवदनिष्टानुबन्धित्वज्ञानत्वापेक्षया प्रामाण्यनिश्चयाभावोल्लन्दिततदनुबन्धित्वज्ञानत्वस्य प्रतिबन्धकतावच्छेदकत्वे गौरवमिति वाच्यम् । युक्तादौ बलवदनिष्टसाधनत्वसन्देहेऽपीच्छाप्रवृत्त्योरुत्पत्त्यनुबन्धित्वसंशयस्यापि प्रतिबन्धकतायाश्च वाच्यतया च विपरीतगौरवादिति । न च बलवदनिष्टानुबन्धित्वज्ञानस्याप्रवर्त्तकत्वे तद्विषयस्य विध्यधीत्यभावात् "न कलञ्जं भक्षयेदित्यादि"-वाक्यानामप्रामाण्यापत्तिरिति वाच्यम् । तज्ज्ञानस्य प्रवृत्तिजनकत्वाभावेऽपि प्रवृत्तिप्रतिबन्धकबलवदनिष्टसाधनत्वज्ञानविषयत्वेन प्रवृत्तिप्रयोजकत्वात् प्रवृत्तिप्रयोजकज्ञानविषयस्य विध्यधीत्वानापत्तेः । अत्र यद्यपि यत्र प्रयत्नजन्ये हेयः हितीयक्षणे फलेच्छा तृतीयक्षणे प्रवृत्तिरित्यनुभवसत्त्वात् तत्र तृतीयक्षणे हेयजनकाया द्वितीयक्षणे फलेच्छाया उत्पत्तेः प्रवृत्तिप्रयोजकत्वात् ; यत्र फलेच्छादिकमेवंजातीयमुत्पत्तिकालेऽपि फलेच्छारूपकारणाभावादेव नोत्पद्येच्छा । एवमन्यत्रापि । आकस्मिकेश्वरज्ञानं योगजधर्मानङ्गीकारादिति बलवदनिष्टानुबन्धित्वज्ञानस्य हेयस्य वा प्रतिबन्धकत्वं न युक्तं न युक्तञ्च बलवदनिष्टानुबन्धित्वज्ञानस्य हेतुत्वं तथापि द्वितीयक्षणादिरेवापि हेये इच्छाप्रवृत्त्योरनुदयवत्यामुभयविकलतया ज्ञानयोरेव वा योगजधर्मत्वमभ्युपगम्याह पूर्वोक्त प्रतिबन्धकत्वस्य हेतुत्वस्य वावश्यकत्वमिति ध्येयम्" ।

यद्वचिन्तामणौ तु प्रपञ्चः । तत्र कृतिसाध्यत्वनिश्चयस्य चिकीर्षाहेतुत्वम् पूर्वं पक्षीकृत्य व्यतीत्यते इत्यादिना स्वमतसिद्धं कारणं दर्शयित्वा सिद्धान्तितं यथा । "विधिभक्षणादिप्रयोजकं कृतिसाध्यत्वज्ञाने इष्टसाधनत्वं विषय तावच्छेदकं लाघवात् न तु स्वविशेषणत्वसाप्रतिसन्धानजन्यत्वं गौरवात् न च सिद्धासिद्धयोरन्यतरत्वज्ञानस्य प्रवर्त्तकत्वे तद्विषयस्य विध्यधीत्वाभावात् "न कलञ्जं भक्षयेदित्यादि"-वाक्यानामप्रामाण्यापत्तिरिति वाच्यम् । तज्ज्ञानस्य प्रवृत्तिजनकत्वाभावेऽपि प्रवृत्तिप्रतिबन्धकबलवदनिष्टसाधनत्वज्ञानविषयत्वेन प्रवृत्तिप्रयोजकत्वात् प्रवृत्तिप्रयोजकज्ञानविषयस्य विध्यधीत्वापापात् । अत्र यद्यपि यत्र प्रयत्नजन्ये हेयः हितीयक्षणे फलेच्छा तृतीयक्षणे प्रवृत्तिरित्यनुभवसत्त्वात् तत्र तृतीयक्षणे हेयजनकाया द्वितीयक्षणे फलेच्छाया उत्पत्तेः प्रवृत्तिप्रयोजकत्वात् ; यत्र फलेच्छादिकमेवंजातीयमुत्पत्तिकालेऽपि फलेच्छारूपकारणाभावादेव नोत्पद्येच्छा । एवमन्यत्रापि । आकस्मिकेश्वरज्ञानं योगजधर्मानङ्गीकारादिति बलवदनिष्टानुबन्धित्वज्ञानस्य हेयस्य वा प्रतिबन्धकत्वं न युक्तं न युक्तञ्च बलवदनिष्टानुबन्धित्वज्ञानस्य हेतुत्वं तथापि द्वितीयक्षणादिरेवापि हेये इच्छाप्रवृत्त्योरनुदयवत्यामुभयविकलतया ज्ञानयोरेव वा योगजधर्मत्वमभ्युपगम्याह पूर्वोक्त प्रतिबन्धकत्वस्य हेतुत्वस्य वावश्यकत्वमिति ध्येयम्" ।

यद्वचिन्तामणौ तु प्रपञ्चः । तत्र कृतिसाध्यत्वनिश्चयस्य चिकीर्षाहेतुत्वम् पूर्वं पक्षीकृत्य व्यतीत्यते इत्यादिना स्वमतसिद्धं कारणं दर्शयित्वा सिद्धान्तितं यथा । "विधिभक्षणादिप्रयोजकं कृतिसाध्यत्वज्ञाने इष्टसाधनत्वं विषय तावच्छेदकं लाघवात् न तु स्वविशेषणत्वसाप्रतिसन्धानजन्यत्वं गौरवात् न च सिद्धासिद्धयोरन्यतरत्वज्ञानस्य प्रवर्त्तकत्वे तद्विषयस्य विध्यधीत्वाभावात् "न कलञ्जं भक्षयेदित्यादि"-वाक्यानामप्रामाण्यापत्तिरिति वाच्यम् । तज्ज्ञानस्य प्रवृत्तिजनकत्वाभावेऽपि प्रवृत्तिप्रतिबन्धकबलवदनिष्टसाधनत्वज्ञानविषयत्वेन प्रवृत्तिप्रयोजकत्वात् प्रवृत्तिप्रयोजकज्ञानविषयस्य विध्यधीत्वानापत्तेः । अत्र यद्यपि यत्र प्रयत्नजन्ये हेयः हितीयक्षणे फलेच्छा तृतीयक्षणे प्रवृत्तिरित्यनुभवसत्त्वात् तत्र तृतीयक्षणे हेयजनकाया द्वितीयक्षणे फलेच्छाया उत्पत्तेः

धस्य विषयलक्षणादौ चिकीर्षाप्रसङ्गात् । अथोपायचिकीर्षायां तत्कारणं इच्छाकारणसुखत्वज्ञाने ज्ञातिसाध्यत्वं यदा विषयस्तदा सुखे चिकीर्षा नो चेदिच्छामात्रमिति द्वयमेव चिकीर्षाहेतुरिति चेत् तर्हीच्छाहेतुज्ञाने यदा ज्ञातिसाध्यत्व भासते तदा चिकीर्षा नो चेदिच्छामात्रमिति सुखतदुपायचिकीर्षाकारणमस्तु लाघवात् सुखत्वज्ञानवदिष्टसाधनताज्ञानस्यापीच्छाकारणत्वात् । अतएव पाके इष्टसाधनताज्ञाने ज्ञातिसाध्यत्वं विषय इति चिकीर्षा न तु इच्छादिज्ञाने तद्विषयत्वमितीच्छामात्र सुख चिकीर्षायामिच्छाकारणज्ञाने ज्ञातिसाध्यताविषयके चिकीर्षाजनकत्वावधारणात् अन्यथा तत्र चिकीर्षा नुत्पत्तेः । वस्तुतस्तु उपायचिकीर्षा इष्टसाधनताज्ञानसाध्या उपायेच्छात्वात् दृष्टीच्छावत् न च भोगचिकीर्षावत् तेन विनापि स्वादिप्रयोक्तृत्वात् उपायेच्छाया ज्ञातव्यव्यतिरेकानुविधानात् दृष्टे च स्वतोऽनुकूलत्वेन इच्छानुत्पत्तेः। अनुगतोपायेच्छायामनुगतस्य प्रयोजकत्वे सम्भवति बाधक विना त्यागायोगाच्च । न च चिकीर्षान्यत्वेसति उपायेच्छात्वमिच्छात्वं वा तज्जन्यत्वे प्रयोजकं गौरवात् सुखेच्छायां तदभावाच्च । एवञ्चोपायचिकीर्षायामिष्टसाधनताज्ञाने प्रवृत्तेरतिप्रसङ्गवारणार्थं ज्ञातिसाध्यत्वप्रकारकत्वनिर्वाहार्थञ्च ज्ञातिसाध्यत्वमपि विषयतयावच्छेदकमस्तु न तु तद्विहाय तत्प्रकारं विना कार्यानुत्पत्तेः। अत एव स्नानपानप्रवृत्तावप्युपायेच्छाकारणत्वेन दृष्टज्ञातेष्टसाधनताज्ञानस्यापि कल्पनं दृष्टानुरोधित्वात् कारणतायाः। ननु साधनत्वमिच्छाविरोधि तस्य सिद्धधर्मत्वात् इच्छादौ तत्साध्येष्टज्ञानादिप्रत्येति चेत् न निर्विशेषितयोः सिद्धत्वासिद्धत्वयोरविरोधेनेच्छासाधनत्वयोरविरोधात् तदा असिद्धत्वं तत्सिद्धत्वञ्च नेच्छासाधनत्वयोः प्रयोजकमिति तथा नोपायत एव । वस्तु तत्साध्येष्टज्ञानात् इच्छादाविच्छेति तत्तुच्छं असिद्धावस्थादुच्छादेरिष्टानुत्पत्तेरवश्यं सिद्धत्वमवगन्तव्यमिच्छाविरोधित्वान्नासिद्धत्वमिति तत्रापि विरोधएव दृष्टौ संशयामिदं तथा विना नेत्यन्वयव्यतिरेकसहकृत दृष्टिसिद्धत्वमात्राय दृष्टिनिरूपितेषु साध्यत्वस्याकल्पनात् । किञ्च चिकीर्षाजन्यज्ञातिसाध्यं मयत्नकृतीकरणमित्यर्थप्रतिपादकं मयत्नकृतीत्यादितिशब्दं प्रमाणं स्यात् विषयाबाधात् । एतेन नवीनमतमपास्तं यदस्य हि ज्ञातिसाध्यत्वेदनकालनावत्वेष्टसाधनताज्ञानानां ज्ञानं तत्रान्यस्य ओदनकालनावत्वेष्टसाधनताज्ञानस्य ज्ञानं न प्रवृत्तिकारणं गौरवात् किन्तु मत्कृतिसाध्यत्वे सति मदिष्टसाधनताज्ञानमेव लाघवात् तथा च साध्यसाधनत्वयोर्न विरोधोऽनागतस्य पाकादेः ज्ञातिसाध्यताज्ञानञ्च यथा, तथोपपादितं पुरस्तात् । किञ्च स्वज्ञातिसाध्यत्वमन्तरेणापि स्वकृतिसाध्येष्टसाधनताज्ञानात् स्वकल्पितेच्छादौ, यौवने कामोद्रेकात् संभोगादौ प्रवृत्तेश्च अदृष्टं प्रवर्त्तकम् । वस्तुतस्तु सिद्धविषयकज्ञातिसाध्यताज्ञानात् कथं "पाकं कृत्वा भोक्ष्यामीतीच्छा"? सिद्धे इच्छाविरहात् असिद्धस्याज्ञानात् अथ सिद्धविषयादेव ज्ञातिसाध्यताज्ञानादसिद्धविषया ज्ञातिसाध्यत्वेनेच्छा जायते इच्छाया असिद्धविषयत्वस्वभावत्वात् । एकप्रकारकत्वेन ज्ञानचिकीर्षयोः कार्यकारणभावोनत्येकविषयत्वे सति गौरवात् इच्छाया अनागतविषयत्वात्तस्य चात्मानास्था कल्पनात् सुखादीच्छायामप्येवमिति चेत् न असिद्धविषयेच्छानुरोधेनानागतोपायज्ञानस्य दर्शितत्वात् । अस्तु चैवं तथापि ज्ञातिसाध्यताज्ञाने इष्टसाधनत्वमेव व्यावर्त्तकमस्तु स्वपरकीयेष्टसाधनताज्ञानस्य फलकामनाज्ञानापेक्षया लघुत्वात् ज्ञानज्ञानस्य फलकामनाज्ञानस्य हेतुत्वे मानाभावाच्च"।

सेयमिच्छा अन्तःकरणधर्मोऽात्मधर्मः इति वेदान्तिनः प्रतिपेदिरे । आत्मनो निर्गुणत्वात् प्रागुक्तया "कामः सङ्कल्पः इत्यादि श्रुत्या मनोधर्मत्वावगमाच्च तथात्वम् । यथा च कामादीनां नात्मधर्मत्वं तथा शङ्कापूर्वकं ६० उ० भाष्ये समर्थितम् । यथा

"सुखित्वदुःखित्वादिदर्शनाच्चेति चेत् न "न ह्यिष्यते ज्ञोक्तदुःखेन वाच्य" इति श्रुतेः । प्रत्यक्षादिविरोधादयुक्तमिति चेत् न उपाध्यात्मयजनितविशेषविषयत्वात्तस्याः "न दृष्टेर्द्रष्टार पश्येर्विपरिलोपस्तरे तेन विजानीयादविज्ञातं विज्ञातं" इत्यादिश्रुतिभ्यो नात्मविषयं विज्ञानम्, किन्तर्हि बुद्ध्याद्युपाध्यात्मप्रतिच्छायाविषयमेव सुखितो दुःखितोऽहमित्येवमादिप्रत्यक्षविज्ञानमयमहमिति विषयेच्छ विषयिणः सामानाधिकरण्योपचारात् "नान्यदतोऽस्ति द्रष्टृ" इत्यन्यात्मप्रतिषेधाच्च । देहावयवविशेषत्वाच्च सुखदुःखयोर्विषयधर्मत्वम् 'आत्मनस्तु कामाय' इत्यात्मार्थत्वश्रुतेरयुक्तमिति चेत् । "अत्र वा अन्यदिव स्यात्" इत्यविद्याविषयात्मार्थत्वाभ्युपगमात् "तत्केन कं पश्येत्" "नेह नानास्ति किञ्चन" "तत्र को मोहः कः शोक" इत्यादि विद्याविषये तन्निषेधाच्च नात्मधर्मत्वम्।तार्किकसमयविरोधादयुक्तमिति

चेन्न युक्ताप्यात्मनो दुःखित्वानुपपत्तेः। न हि दुःखेन प्रत्यक्षविषयेणात्मनो विशेष्यत्वं, प्रत्यक्षाविषयत्वात्। व्याकाशस्य शब्दगुणवत्त्ववदात्मनो दुःखित्वमिति चेन्न एकप्रत्ययविषयत्वानुपपत्तेः। न हि सुखमाहंकेण प्रत्यक्षविषयेण प्रत्ययेन नित्यानुमेयस्यात्मनो विषयीकरणमुपपद्यते। तस्य च विषयीकरणे आत्मन एकत्वादिव्यवस्थाभावप्रसङ्गः। एकस्यैव विषयविषयित्वं दीपवदिति चेन्न युगपदसम्भवादात्मन्यभ्युपपत्तेश्च। एतेन विज्ञानस्य स्वाश्रयाहंकत्वं प्रत्युक्तम्। प्रत्यक्षानुमानविषययोश्च दुःखात्मनोर्गुणगुणित्वेनानुमानम् दुःखस्य नित्यमेव प्रत्यक्षविषयत्वाद्रूपादिसामानाधिकरण्याच्च मनःसंयोगजत्वेऽध्यात्मनि दुःखस्य, सावयवत्वविक्रियावत्त्वानित्यत्वप्रसङ्गात्। न ह्यविक्रियं संयोगि द्रव्यं गुणः क्वचिदुपयुक्तपयन्वा दृष्टः क्वचित्। न च निरवयवं विक्रियमाणं दृष्टं क्वचित् व्यनित्यगुणाश्रयं वा नित्यम्। न चाकाश व्यागमवादिभिर्नित्यतयावगम्यते। न चान्यो दृष्टान्तोऽस्ति विक्रियमाणमपि तत्प्रत्ययानिवृत्तेर्नित्यमेवेति चेन्न द्रव्यस्यावयवान्यथात्वव्यतिरेकेण विक्रियानुपपत्तेः। सावयवत्वेऽपि नित्यत्वमिति चेन्न सावयवस्यावयवसंयोगपूर्वकत्वे सति विभागोपपत्तेः। वज्रादिपुद्गलानामिति चेन्नानुमेयत्वाच्च योगपूर्वकत्वस्य। तस्माच्चात्मनो दुःखाद्यनित्यगुणाश्रयत्वोपपत्तिः। परस्माद्दुःखित्वेऽन्यस्य च दुःखिनोऽभावे दुःखोपशमनाय शास्त्रारम्भानर्थक्यमिति चेन्नाविद्याध्यारोपितदुःखित्वस्वभावार्थत्वात्"।

यथा च कामस्य क्षुदाद्यात्मितत्वं तथाऽऽप्तकामशब्दे ७।८।८ दर्शिते इ०भा०वाक्ये प्रपञ्चितम्। एवमेव सांख्याः पातञ्जलाश्च क्षुदादिवत् सुखदुःखेच्छाद्वेषयत्न धर्माधर्मावपि बुद्धेरेव धर्मा इत्याहुः। ईश्वरेच्छा तु समूहालम्बनात्मिका सर्वं जगत् भूयादित्याकारिका। "सोऽकामयत बहु स्यां प्रजायेयेत्यादि" श्रुतिः। "सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः" इति स्मृतिश्च तस्य तत्रापि प्रमाणम्। सा च नित्येति नैयायिकादयः नित्यत्वाच्च नैव तस्य कारणमपेक्ष्या। व्योमादिवदनित्येति वेदान्तिनः। नित्यत्वादिमतेऽपि सुखज्ञानजीवाहंकृतिप्रकारेणैव तत्तत्कार्योत्पत्तिरिति ईश्वर शब्दे वक्ष्यते। मनोधर्मत्वादिमते मनसश्चिगुणात्मकत्वेऽपि रजस एव तत्कारणत्वम् "काम एष क्रोध एष रजोगुणसमुद्भवः" गीतायां कामस्य रजोगुणकार्यत्वोक्तेः। ततश्च बुद्धेश्चिगुणात्मकत्वेन – रजःकार्यं कामस्य सङ्गुणत्वमेवोचितम्। अतएव ज्ञानशक्तिक्रियाशक्तिभागशक्तिस्वरूपिण्यादौ प्रकृतेरिच्छाशक्त्यादिरूपत्वकथनमपि सङ्गच्छते शक्तिशक्तिमतोरभेदात् प्रकृतिशक्तित्वाच्च तस्या बुद्धिगुणत्वमवगम्यते। अतएव "या देवी सर्वभूतेषु इच्छारूपेण संस्थिता" देवीमा०सर्वभूतेषु इच्छारूपेण प्रकृतिस्थितिरुक्ता

ईश्वरोपाधिमायाया इच्छादिसर्वनैश्वरस्य महत्त्व' स्वतत्त्वपरीक्षायामुक्तं यथा "नित्यं निर्दोषमत्यं निरतिशयं सुखं ब्रह्म चैतन्यमेकं धर्मीधर्मीति अद्वितयमपि पृथगभूय मायावशेन। धर्मी सत्तानुभूतिः सकलविधशक्तीं सर्वकार्यानुकूला शक्तिरेच्छादिरूपा भवति गुणगुणत्वाश्रयस्तूक एव। कर्तृत्वं तत्र धर्मी शक्नोति जगतां सृष्टीच्छादिजन्ये धर्मः पुंरूपमाप्ता सकलजगदुपादानभावं बिभर्त्ति। स्त्रीरूपं प्राप्य दिव्या भवति च शक्तिरी स्वाश्रयस्यादिकर्तुः, प्रोक्तौ धर्मी प्रभेदावपि निगमविदा धर्मिवत् ब्रह्मकोटौ" इति तथा च एकमेव ब्रह्मानादिसिद्धया मायया कर्मी धर्मी चेति द्विविधमभूदित्यर्थः। तन्मोक्षे कालिकायाः २पीठशक्तिभेदे। "इच्छाशक्तिक्रियाशक्तिरूपे कामिनी कामदायिनी। रतीरतिप्रिया भन्द्रा मध्ये चैव मनोन्मनी" तन्त्रसा०कालिकापीठशक्तिकथने।

इच्छाकृत त्रि० इच्छया कृतः। "कामकृते। व्यप्तीतिभागो बुद्धिः स्यात्" इत्युक्तात्तिकमेण अधमर्णेन यथेष्टं लतायां २ङ्यौ स्त्री "इच्छे इच्छिष्यकृत्ति प्रतिभाषन्त कालिकी। इच्छाकृता कामकृता कायिका कायकर्मणा" स्मृ०त० याज्ञवल्क्यवचनेन धृतम्। मिताक्षरायां तु नैतद्वचनं दृश्यते। तत्र कात्यिना इच्छिनारदवचनेन दर्शिता "इच्छिः सा कात्यिना नाम यर्णकेन स्वयंकृतेति"

इच्छानिवृत्ति स्त्री ६त०। पित्रादीनां धनादिभोगलक्ष्यो परमे.। "पितर्युपरतस्पृहे इत्यादि" स्मृतेः तादृशस्पृहा निवृत्तौ पित्रादेः स्वत्वहानिः, पुत्रादेः स्वत्वोत्पत्तिश्च; तेन पुत्रादीनां तत्र पैत्रादिधनविभागः।

इच्छावत् त्रि० इच्छाऽस्त्यस्य मतुप् मस्य वः। धनादिस्पृहायुक्ते स्त्रियां ङीप्। सा च धनादिस्पृहायुक्तायां कामुकायां स्त्रियां रमणेच्छायुक्तायां तु कामुकीति भेदः।

इच्छावसु पु० इच्छयैव वसु यस्य। कुबेरे जटा०

इच्छित त्रि० इच्छा जातास्य तारका० इतच्। स्पृहायुक्ते

इच्छु त्रि० इच्छति इच्छ–उ नि० इच्छादेशः। इच्छार्थाके "यस्यपर्णमयी जुहूर्भवति" "उभयेचुच्छुभयोः" याज्ञा०१८,५,१५,१६

इज्जल पु० इयते कर्म्मणि–क्विप् इत् सञ्चिष्टुप्तया गतं जलमनेन । (हिज्जोल) तत्रे तस्य जलसञ्चिलष्टदेशजातत्वात् तथात्वम् ।

इज्य पु० इज्याऽस्यास्य अर्श० अच् । १बृहस्पतौ "जीवाकिभानुजेज्यानां क्षेत्राणि सूरजादयः" ज्यो०त० "वित्तसितेज्यदिवसे" सु० चि० । जीवदेवताके २पुष्यनक्षत्रे च "लक्ष्मा हराज्येदुकरान्यनैलेयादि दीपि० ३गुरौ ४परमेश्वरे ५विष्णौ च । "यज्ञैरज्यो महेज्यश्च" विष्णु० स० । "यज्ञैर्योऽयमेवेज्यः" ये यजन्ति च सावणि दैवतानि पितॄनपि । आत्मानमात्मना नित्यं विष्णुमेव यजन्ति ते ४हरिवंशोक्तेः" भा० ६पूज्यमात्रे त्रि० । सुरेज्यः

इज्या स्त्री यज–भावे क्यप् स्त्रीत्वात् टाप् । १यज्ञे, "सोऽहमिज्याविशुद्धात्मा" । "जगत्प्रकाशं तदशेषविस्मयया" रघुः यजेर्दानाद्यर्थत्वात् २दाने, ३सङ्गमे च । कर्म्मणि क्यप् । ४प्रतिमायाम् ५कृष्टिनन्द्याञ्च । [जूके अमरः ।

इज्याशील पु० इज्या शीलमस्य । सततयजनशीले याय-

इड्याक पु० चङ्गा दीर्घाऽस्यास्य आकन् पृ० । (चिङ्गिड़ि) मत्स्यभेदे त्रिका० २जलदधिके इति केचित् ।

इट् गतौ स्वादि० पर० सक० सेट् । एटति ऐटीत् । इयेट ईटतुः "त्वं त्यमिटतो रथमिन्द्र प्रावः सुतावतः" ऋ० १०,१७१,१।

इटसून न० इट–क इटं सूनं सूनं श्वि–क पृ० शस्य सः । शाखामये कटे । "वैतसे इटसून उत्तरतोऽस्यशयीत" शत० ब्रा० १३,२,२,१८, "इटसूने शाखामये कटे" भा०

इट्वर पु० इष–संपदा० भावे क्विप् इषा कामेन चरति चर–अच् । गोपतौ (साँड़) वृषभे

इड् (ल) स्त्री इल–क्विप् वा लस्य डः । १हविषि ऋग्वे "होता दविषः प्रथमं यतध्यै" ऋ० २,३,२, "इडो हवीरूषण्यानि" भा० "इडस्पतिर्मघवा दक्षवर्चाः" ऋ० ६,५८, ४, "इडः पशूनां पतिः" भा० २भूमौ "इन्द्रपानभूर्मिव जखनेडः" ऋ० ७,४७,१, "इडड्डाया भूमेः" भा० ईड्यते ईड–क्विप् पृ० ३अन्ने ४वर्षासौ ५प्रजाश्च दर्शपौर्णमासाङ्गेषु पशुषु प्रयाजेषु तृतीये ६प्रयाजे च । प्रयाजाश्च "समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीति" श्रुत्युक्ताः पञ्च । तेषां प्रयाजत्वनिर्वचनपूर्वकं पञ्चानामृतुरूपत्वसाधनम् यथा "ऋतवो वै प्रयाजाः तस्मात् पञ्च भवन्ति पञ्च ऋतव" इत्युपक्रम्य "ततो देवा अमन्यन्त ऋतवात् प्रयाजान् इष्ट्वाऽर्वाञ्चं यजन्ते ऋतून् संवत्सरं प्राजयन्नृतुभ्यः संवत्सरात् सपत्नानन्तरायंस्तस्मात् प्रजया प्रजया ह वै नामैतत् यत् प्रयाजाः इति तथो एवैष एतैर्ऋतून् संवत्सरं प्रजयत्यृतुभ्यः संवत्सरात् सपत्नानन्तरेति तस्मात् प्रयाजैर्यजते" इति प्रयाजनिर्वचनेन ऋतुरूपत्वमेषां समिधाद्यनुयाजान्तेषु वसन्तादिरूपत्वसाधनं तत्रैव यथा "समिधो यजति तद्वसन्तं, समिन्धे स वसन्तः समिद्धोऽग्निर्ऋतून् समिन्धे ऋतवः समिधाः प्रजाय प्रजनयन्त्योषधीश्च पचन्ति तद्वै खलु सर्वानृतूनिराह्याथ यजयजेत्येवोत्तरानाहाऽऽमितायैजामिमिह कुर्यादित्तनूनपातं यजेड़ो यजेति ब्रूयात्तस्मादृतुयज यजेत्येवोत्तरानाह, स वै समिधो यजति । वसन्तो वै समिद्वसन्तमेव तद्देवा अवरुन्ध वसन्तात् सपत्नानन्तरायन् वसन्तं वेव एतदृक्षे वसन्तात् सपत्नानन्तरेति तस्मात् समिधो यजति । अथ तनूनपातं यजति । योग्यो वै तनूनपादृग्योग्यो ह्यासां प्रजानां तनूस्पतिर्योग्यमेव तद्देवा अवरुन्ध योग्यात् सपत्नानन्तरायन् योग्येवेष एतदृक्षे योग्यात् सपत्नानन्तरेति तस्मात्तनूनपातं यजति । अथेड़ो यजति । वर्षा वा इड़ इति हि वर्षा इड़ो यदिदं क्षुद्रं सरीसृपं योग्यक्षेमाभ्यां नित्यक्तं भवति तद्वर्षा ईड्यमित्याहुस्मिन्क्षमाणं चरति तस्माद्वर्षा इड़ो, वर्षा एव तद्देवा अवरुन्ध वर्षाभ्यः सपत्नानन्तरायन् वर्षा उ एवैष एतदृक्षे वर्षाभ्यः सपत्नानन्तरेति तस्मादिड़ो यजति । अथ बर्हिर्यजति । यद्वै बर्हिरिति हि यद्वृक्षिर्वा इमा ओषधयो योग्यक्षेमाभ्यां नित्यक्ता भवन्ति ता वर्षा वर्धन्ते ताः यद्वि बर्हिषो रूपं प्रक्षीर्णाः यदे तच्छान्तद्वर्हिः यद्वै तद्देव तद्देवा अवरुन्ध यद्वः सपत्नानन्तरायच्छद्वै तद्देव एतदृक्षे यद्वः सपत्नानन्तरेति तस्माद्बर्हिर्यजति । अथ स्वाहाकारेति यजति । अग्नौ वै एष यज्ञस्य स्वाहाकारोऽग्नौ खलु वै सर्वमन्नं क्रियते तदन्नं देवा अवरुन्धतान्नेनान्नात् सपत्नानन्तरायन्नग्नौ एवेष एतदन्नं दृक्षेऽग्नेरन्नात् सपत्नानन्तरेति तस्मात् स्वाहाकारेति यजति" शत० ब्रा० १,५,२,११। समिदादीनां निरुक्तमन्त्रप्रदर्शनपूर्वं प्रजारूपत्वमिड़ान्तानाम् यथा "स वै समिधो यजति । प्राणा वै समिधः प्राणानेवैतत् समिन्धे प्राणैर्ह्यं पुरुषः समिद्धस्यादभिक्षेति ब्रूयाद्यदुपयामी स्याद्य यद्युष्णः स्यादेव तायङ्कंसेत समिधो हि स तावद्भवति यदु शीतः स्यात्तायंसेत । तत्प्राणानेवाग्निऽतद्दधाति तस्मात् समिधो यजति । अथ तनूनपातं यजति । रेतसैवैतत् तनूनपाद्रेत एवैतत्सिञ्चति

तस्मात्तनूनपातं यजति । अथेडो यजति प्रजावा इडो यदा वै रेतः सिक्तं प्रजायतेऽथ तदीड़ितमिवाद्यमिच्छमानं चरति तत् प्रैवैतज्जनयति तस्मादिडो यजति । अथ बर्हिर्यजति । भूमा वै बर्हिर्भूमानमेवैतत् प्रजनयति तस्माद्बर्हिर्यजति । अथ स्वाहाकारस्वाहेति यजति । हेमन्तो वा ऋतूनां स्वाहाकारो हेमन्तो हीमाः प्रजाः स्वं वयसमुपनयते तस्माद्धेमन्तान्नाय्यस्योषधयः प्र वनस्पतीना पलाशानि सृज्यन्ते प्रतितरामिव वयांसि भवन्त्यधस्तरामिव वयांसि पतन्ति विपतितलोमेव वापः पुरुषो भवति हेमन्तो हीमाः प्रजाः स्वं वयसमुपनयते' । शत० ब्रा० १,५,४,२ । ऋतूनां पञ्चप्रयाजभागित्वमन्वित्य प्रार्थनयैव जातम् इत्युक्तं तत्रैव "ऋतवोऽह वै देवेषु यज्ञे भागमीयिरे आनो यज्ञे भजत मा नो यज्ञादन्तर्गतास्त्वेव नोऽपि यज्ञे भाग इति । तद्वै देवा न जज्ञुः । त ऋतवोऽदेवेष्वजानन्तेऽब्रुवन्नृषीनुपावर्तन्तामुप्रियान्देवानां हविषो भाक्ष्यान् । ते वैतामेधितुमेधामशक्नुवन् । यानेवामेतामनु प्रहरन्ति क्षयतो ह वा एव पूर्ष्णे पयस्वतीयन्ति क्षुण्णोऽरे क्षयणः यश्चैवेऽयोऽक्षरपक्ष्या एवौषधयः मेचिरे । तद्वै देवानामागच्छत् । कर्तव्यदक्षतोद्विषन्तिषतेऽरातीयति किमेतावन्मात्रमुपजानीत यष्टव्यमितोऽन्यदा सदिति । ते होचुः ऋतूनेवानुमन्त्रयामहा इति के नेति प्रयमानेवैनान् यज्ञे यजामेति । सहाग्निरुवाच । आयव्यमां पुरा प्रथमं यजध क्रतूं भयानीति न त्वामायतनाद्बुभूषयम इति ते यद्वसतीवरीभिरुपयन्त्याग्नेयायतनाद्वाऽऽप्यायन्तेऽथादग्निरच्युतोनो ह वा आयतना भ्रूयते यद्विस्रायतने भवति य एवमेतमग्निमच्युतं वेद । ते देवा अब्रुवन् । परे होवांक्षमेवानुमन्त्रयध्वे इति स होवाग्निरुवाच,ऋतवोऽहं वै वो देवेषु यज्ञे भागमिति कथं नोऽविद इति प्रयमानेव वो यज्ञे यक्ष्यन्ति । त ऋतवोऽग्निमब्रुवन् आ वयं त्वमस्मासु भजामो यो नो देवेषु यज्ञे भागमविद इति स एवोऽग्निर्ऋतुभ्यो भक्तः समिधो अग्ने तनूनपादन इडो अग्ने बर्हिरग्ने स्वाहाग्निमिति"शत०ब्रा०१,६,१,७,८ । प्रयाजैश्चरन्तीत्युपक्रम्य"इड आगन आजस्व व्यन्विति हतोयः"आश्व०श्रौ० । "इडस्पदे समिध्यसे"यजु०१५,३०"इड:पृथिव्याः"वेददी० ।

इड़ा (ला)स्त्री इल–अच् वा लस्य डत्वम् । १गवि, २वाचि, ३भूमौ "प्रबुध्यते नूनमिड़ासखस्थः भा०व० २३५ अ० । "इडा पिन्वते विश्वदानीम्" ऋ०४,५०,८, "इडा भूमिः"भा० । इल+गतौ करणे घञर्थे क । देहस्थे ४नाडीभेदे । "इडा च पिङ्गला चैव सुषुम्णा च सरस्वती अलम्बुषा कुहूश्चैव यश्विनी चित्रिणी तथा । विश्वोदरी विश्वसखी व्याप्त्याहेतासप्तदश" इति तन्त्रोक्तासु प्रधानासु चतुर्दशसु नाडीषु तिस्रः 'प्रधानाः तथा हि ।"शिरः श्रितानि सप्तैव" या० "शिरः नाभिसंबद्धाश्चत्वारिंशत् वातपित्तश्लेष्मवाहिन्यः सकलकलेवरव्याप्तिशोभानाशाखाः सन्यः सप्त श्रितानि भवन्तीति"मिता० ।"सप्त शिराश्रितानि, इत्यु० । तेन देहमध्ये सप्त श्रितानि नाड्यः तन्मध्ये एतासप्तदश प्रधानतयोक्ताः । तासु मध्येऽपि तिस्रः प्रधानाः देहस्थनाड़ीरुपक्रम्य । शारदा० "नाड्यस्तत्र समुद्भूतास्तासु ख्यातास्तिस्रः समीरिताः । इड़ा वामे स्थिता नाड़ी पिङ्गला दक्षिणे मता । तयोर्मध्यगता नाड़ी सुषुम्णा च समाहिता । मादाङ्कुहृदयं याता शिखाभ्यां शिरसा पुनः। ब्रह्मस्थानं समापद्य सोमसूर्याग्निरूपिणी । तस्या मध्यगता नाड़ी चित्राख्या योगिवल्लभा । ब्रह्मरन्ध्रं विदुस्तत्र पद्मसूत्रनिभं परम् । इड़ायां सञ्चरेच्चन्द्रः पिङ्गलायां दिवाकरः । ज्ञातौ योगनिदानज्ञै: सुषुम्णायास्तु तावुभौ"तत्स्थानमुक्त्वा कार्य्यमाह "इड़यार्कपथेहाथ वायुं षोडशमात्रया । धारयेत्पूरित योगी चतुःषष्ट्या तु मात्रया। सुषुम्णामध्यगं सम्यक् हार्तिवन्मात्रया मनैः। नाड्या पिङ्गलया चैनं रेचयेद्योगवित्तमः । प्रणायामिमं प्राहुर्योगशास्त्रविशारदाः"२५ पटले । "पिङ्गलायां स्थिता नाड्या इड़ायां सङ्गताः परे (दीर्घाः)। सुषुम्णामध्यगा ह्येताश्चत्वारो वे नपुंसका"शार०५,८० । दीर्घादिरयमित्यके । ५कविरत्ने च"यजमानपत्नी इड़ां भजयन्ति" श्रुतिः । इडा शब्दे व्यत्ययेन"इड़ां नोमित्रावरुणोत इष्टिम्" ऋ०७,६४,२ "इड़ामग्नम्" भा० "घृतैर्गव्यूतिमुक्षतमिडाभिः" ऋ० ७,६४,४। "इड़ाभिरग्ने:" भा०।६देवीभेदे"श्रुतिः प्रीतिरिडा कान्तिःयान्तिः पुष्टिःक्रिया तथा । शिष्टाश्च देव्यः" इत्युपक्रम्य ।"उपतस्थुर्महात्मानं वसिष्ठिन्द्र मरुद्गणम्" हरिवं०२५६ अ० "इड़ा देवी भारती विश्वतूर्त्तिः"ऋ० ५,२,८ । "अभि न इड़ायुवस माता"ऋ०५,४१,६ । "इडागोरूपधरा मनोः पुत्री माध्यमिको वाक् वेति" भा० । बुधस्य जायायां पुरूरवसो मातरि पत्यात्मसुतत्वे हेतूक्तितया ख्यातायां मित्रावरुणयोरप्सरोजातायां कन्यायाञ्च तत्कथा हरिवं० "अकरोत् पुत्रकामस्तु मनुरिष्टिं प्रजापतिः । मित्रावरुणयोर्यज्ञे पूर्वमेव

विद्यन्ते ! । अनुत्पन्नेषु नवसु पुत्रेष्वेषु तु भारत ! । तस्मात्तु वर्त्तमानायामिच्छां भरतसत्तम ! । मित्रावरुणयोरग्रे मनुराकृतिमाजुहोत् । आहुत्यां हूयमानायां देवगन्धर्वमानवाः । तुष्टिञ्च परमां जग्मुर्मुनयश्च तपोधनाः । अहोऽस्य तपसो वीर्य्यमहो श्रुतमहोऽद्भुतम् । तत दिव्याम्बरधरादिव्याभरणभूषिता । दिव्यसंहननाचैव इडा जज्ञे इति श्रुतिः । तामिलेत्येव होवाच मनुर्हृष्टवरलदा । अनुगच्छस्व मां भद्रे तमिला प्रत्युवाच ह । धर्मयुक्तमिदं वाक्यं पुत्रकामं प्रजापतिम् । इडोवाच । मित्रावरुणयोरग्रे जातोऽस्मि वदतांवर ! । तयोः सकाशं यास्यामि न मां धर्मो हनोऽवधीत् । मैवमुक्ता मनुं देवं मित्रावरुणयोरिला । गत्वाऽन्तिकं वरारोहा प्राञ्जलिर्वाक्यमब्रवीत् । कोंऽयेऽस्मिन् युवयोर्जाता देवौ ! किं करवाणि वाम् । मनुना चाप्युक्ता वै अनुगच्छस्व मामिति । तां तथा वादिनीं साध्वीमिलां धर्मपरायणाम् । मित्रश्च वरुणश्चोभावूचतुर्यज्ञिबोध तत् । अनेन तव धर्म्मेण प्रत्ययेन दमेन च । सत्येन चैव सुश्रोणि ! प्रीतौ स्वो वरवर्णिनि ! । आवयोरयं महाभागे ख्यातिं कन्येति यास्यसि । मनोर्वंशकरः पुत्रस्त्वमेव च भविष्यसि । सुद्युम्न इति विख्यातस्त्रिषु लोकेषु शोभने । जगत्प्रियो धर्म्मशीलो मनोर्वंशविवर्द्धनः । निष्क्रान्ता सा तु तच्छ्रुत्वा गच्छन्ती मित्रवरुणिकम् । बुधेनान्तरमासाद्य मैथुनायोपमन्त्रिता । सोमपुत्रात्मजाराजन्यस्यां जज्ञे पुरूरवाः । जनयित्वा सुतं सा तमिला सुद्युम्नतां गता" ।

टदुगीवाच्च "आचार्य्यो मदिरां चक्रेऽमिलां मलयवासिनीम्" हरिवं० १७८ अ० दुर्गाख्यः । इड एव स्वार्थेकन् तत्रार्थे

इडाविका स्त्री इडावत् स्वल्पं मध्यभागम् अटति अच—एवुल् ह्रस्वः टापि अत इत्त्वम् । वरटायाम्"(शोलता) शब्दच०

इडिक्ष पु० वनभवे छागे क्षेम० [अण् । इडे क्षीरेऽस्या०

इडुर पु० इडामेति इट् इडस्वती तया प्रियते इ—कर्म्मणि

इडीय त्रि० इडाया अदूरभवादूरदेशः छत्करा० क । अदूरादूरदेशादौ

इण् त्रिप् इङोभेदार्थम् अदा० परo सक० अनिट् । एति इतःअन्ति । इयात् इहि ऐत् आयन् अगात् इयाय ऐयतुः ऐयुः इयजिथ इयेथ ऐविव । एता एष्यति ऐष्यत् एतव्यम् अवनीयम् इत्यम् । एता,आयकः इतः इतिः अवनम् अयः आवः'वनु ऐयिगान् ऐयुषो । इत्वा इत्वा उपेत्य । 'अनवन्नेति नानदत्' ऋ०१,१४०,५, "इतः का मैत्रावरुणौ किमेतौ ?" भट्टिः "अकृच्छ्रं भाष्यकारश्च कृपायोयधियावुभौ, नैव शब्दाम्बुधेः पारम्" कलापप० "एमीदेषां निष्कृतं जारिणीव" ऋ०१०,३४,५, "आयन्नापोऽयनमिच्छमानाः" ऋ० २,३३,७, "अगात् सराजं जलमभ्ययोध्यम्" "ईयुर्भरद्वाजसुनेर्निकेतम्" "ततः पृष्ठतः प्रस्थिताय मन्त्रः" भट्टिः "शुद्धद्रुघोवर्त्तते यन्" ऋ० १,१८३,२ "यन्ति वा आप एतादित्य एति चन्द्रमा यन्ति नक्षत्राणि" शत०ब्रा० ११,७,१० "मामेवैष्यत्य संशयम्" "मामेवैष्यति कौन्तेय !" इति च गीता "अपीतानां स धर्म्मात्मा दद्यान्नेर्दयनम् रहः" भा०आ० ८२ अ० कर्म्मणि ईयते "इन्द्रोमायाभिः पुरुरूपईयते" श्रुतिः "वनितयाऽनितया" रजनीवधूः" रघुः

अति+अतिक्रमे सक० "नात्येति सकृदाकृता" स्मृतिः "यद्गीतिसखेऽतीते" "अतीते चोत्तरायणे" स्मृतिः "अ. चेत् पञ्चमी रात्रिमतीत्य परतोभवेत्" शुद्धित० स्मृतिः अभि+अति+अभिसुख्येनातिक्रमे सक० "योऽस्य स्वर्गोलोकोऽजितोभवेत् तमभ्यतीति" शत० ब्रा० १२,५,२,८, । वि+अति+विशेषेणातिक्रमे "व्यतीतकालस्तद्गमभ्यु पेतः"

अधि+चिन्तेने गत्यर्थस्य प्राप्त्यर्थत्वात् ज्ञानार्थनाच्च लाभे ज्ञाने च । इकवत्

अनु+अनुगमने सक० । "आदित्यं वा अस्तंयान्तमन्वे देवा अनुयन्ति" शत०ब्रा० ११,६,२,४ । "श्रुत्वाऽथितो दशरथ इत्युदाहृतः" भट्टिः सन्ततसम्बन्धे अन्वयः । "तदन्वये शुद्धिमति" रघुः शाब्दबोधोपयोगिसम्बन्धभेदे च । "साकाङ्क्षयद्धैर्यो बोधस्तदर्थान्वयगोचरः "शब्दशक्ति० **सम+अनु** सम्यगन्वये । "तत्तुल्यमन्वयात्" पा०सू० ।

अन्तर्+अन्तर्गतौ अन्तरायः अन्तरेति इड शब्दे१६१०७८ इदा०

अप+अपगमने अपसरणे अक० "अतुपेतमपेतकल्मषम्" भाग० "ध्रुवमपायेऽपादानम्" "अपाये यदासीनम्" भट्टि० "सर्वे निर्गतेऽर्थेति" भाष्यका० **वि+विशेषेण** विगमे "व्यर्थेति ददतः स्वधा" स्मृतिः "कृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः" या० स्मृतिः ।

अपि+प्राप्तौ सक० "जनयोतो भवतीति स्वपितीत्याह ते" श्रुतिः "यच्च नद्यः सरस्वतीमपियन्ति सस्रोतसः" वाजु० **लये** अक० अव्ययः अपीतिः "अपीतौ दर्शनात्" "स्वाप्ययात्" या० सू०

अभि--आभिमुख्येन गतौ सक० "देहान् यथेष्टमभ्येति हित्वेमां मानुषीं तनुम्" **अभि+उप+आभिमुख्ये**न प्राप्तौ सक० ।

"व्यतीतकालस्तदहमभ्युपेतः" रघुः 'यच्चेतसानर्णितं तदिहाभ्युपैति" उद्भटः क्षीरे "अभ्युपेत्य चतुरूधाम्" स्मृतिः अव–अवगमे, ज्ञाने, सक०"अवैमि ते सारमतः खलु त्वाम्" कुमा०।अधीगतौ अक०। अनु+अव+अन्ततसम्बन्धे । अन्वायः । वि+अव+व्यवधाने "गार्हपत्यादवनीयो न व्येति" कात्या० १,८,२२ । "नान्तरा यज्ञाङ्गानि व्येयात्" श्रुतिः"अनुमत्या व्येयात्" स्मृतिः स्त्रीपुंसयोः संभोगार्थव्यापारे व्यायः । सम्+अव+सम्यक्सम्बन्धे अयुतसिद्धरूपसंबन्धे । स चावयवावयविनोः, गुणगुणिनोः, क्रियाक्रियावतोः जातिव्यक्तयोश्च सम्बन्धः । समवेतः समवायः । "संयुक्तसमवायतः तत्रापि समवेतानाम्" भाषा० । सम्बन्धमात्रे च "एते हि वैरातौ सर्व्वारालयः समवयन्ति" यत०ब्रा०११,१,७,४,सांख्ये,"सेनायां समवेतायां सैन्यास्ते" अमरः 'धर्म्मक्षेत्रे कुरुक्षेत्रे समवेतायुयुत्सवः" गीता ।

आ–आगमने सक० । "यज्ञालनां समितिमेयाय" "तत्प्रत्ययाय" तस्माल्लोकात् पुनरैत्यस्मै लोकाय" छा० उ० 'यूनः स्थविरआयति" मनुः अनु+आ+सन्यगमने सक० । अभि+आ+अभ्यागमने आभिमुख्येनागतौ "गङ्गामभ्येहि सततं प्राप्तुमे सिद्धिमुत्तमाम्" भा०अनु० २९अ०। उद्+आ+उद्गमने । उप+आ । समीपागमने । प्रति+आ+प्रत्यागमने "प्रत्यायत्यां रात्रौ" यत०ब्रा०२, १,४.२ । "नैनमेते रश्मयः प्रत्यायन्ति" यत०ब्रा०१४, ८,९,२ ।

उद्–उद्गतौ अक० । "उदेति सविता ताम्रस्ताम्र एवास्तमेति च" छा०उ० । उदयः । उत्क्रमणे अक० । उदेति पूर्वं सर्वेभ्यः प्राणेभ्योऽव एवं वेद" छा०उ० । अभि+उद्+आभिमुख्येनोद्गतौ "किञ्चिदभ्युदितेरवौ" भ०त०पु०। प्रति+उद् प्रत्युद्गमनेन गतौ"प्रत्युदियाय पार्व्वती"कुमा० सम्+उद् सम्यगुदये"यदादित्यः सहस्रांशुः पूर्वं व्यधोक्षति" भा०व० २०९अ० । "एकाकार्य्यं सहस्रांशौ क्षणौ वृत्तेऽपराजितौ" भा०सभा०१अ० । सांख्ये च सहोदयः उप+समीपगमने प्राप्तौ च "उपेयुषां मोक्षपदं मनीषिणाम्" माघः "योगो परं स्थानमुपैति दिव्यम्" गीता उपायः दुर+दुर्गमे । [ऋक्षकक्षं त्वम्" भट्टिः निर्–निर्गमने । "निर्यदन्त्रविभूषितम्" दुर्गाध्यानम् । निरगादरा–प्रेतभावप्राप्तौ परेतः । पलायने च "यः परैति स जीवति" प्रतिपत्तौ "नैव त्रेधो भारतराट्टः परैति" भा०वन० ५अ० ।

परि–व्याप्तौ सक० परीतः"परित्वं पर्य्येषि विश्वतः"ऋ० ७, १०६,१४, परिक्रमणे "प्रदक्षिणमग्निं परीत्य" स्मृ० । परिपाठाम् पर्य्यायः "जिह्वा पर्य्येति मे सुखम्" भा० आदि० १५२ अ० । [यन्ति" अथ०१५,१७,८ ।

अनु+परि+परिपाठ्या अनुगमने "सवत्सर एतदतपोऽनुपरिआ+परि अभिमुख्येन व्याप्तौ वि+परि+व्युत्क्रमप्राप्तौ विपर्य्ययः "विपर्य्यस्तौ वा एतावन्नि अवतः" यत० ७,२,१,१५ ।"विपरीतमतोन्यथा"ज्योति० । "निमित्तानि च पश्यामि विपरीतानि केशव !" गीता

प्र+परलोकगतौ अक० प्रेतः "प्रेत्य संज्ञास्ति"कठो० अपगतौ च "तस्मात्तदाहरात् प्रैति रयः" बृह०उ० । प्रकर्षेण गतौ सक०"प्रयन्ति सर्वबीजानि रोप्यमाणानि चैव हि" भा०व० १९१ अ०।

अभि+प्र+अभिलाषे "कर्मणा यमभिप्रैति स सम्प्रदानम्" पा०अभिप्राय.' 'अभिप्रेतार्थसिद्धिर्मङ्गलम्"रघु० ।

प्रति+प्रतिगमने "सरस्ततोहैतवं प्रतीयुः" "राज्ञः प्रतीयाय गुरोः सकाशम्" रघुः प्रतीयुषा पूर्वदृष्टेन जनेन" भट्टिः । ज्ञाने प्रत्ययः प्रतीतिः । "उच्चावचा जातपदधर्मा यामधर्माश्च तान् विवाहे प्रतीयात्" आश्व० प०"सर्वोऽयमात्मेति प्रत्येति न नाहमस्मीति" "सर्वोलोको नाहमस्मीति प्रतीयात्" भा०भा०"कलहंसमालाः प्रतीयिरे श्रोत्रसुखैर्निनादैः" भट्टिः । विश्वासे "सोऽयं वटःश्यामइति प्रतीतः" रघुः "तं प्रतीतं स्वधर्मेण" मनुः "चतुर्वर्गफलप्राप्तिर्हि काव्यतः–प्रतीतैव" सा०द० विश्वासे "पतिः प्रतीतः प्रणयोन्मुखी प्रियाम्" रघुः"बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः" "बलवदपि दूयमानं प्रत्ययपयतीव मां हृदयम्" शकु० "ताः स्वचारित्रसंदिग्धा प्रत्याययतु मैथिली" रघुः।

सम्+प्रति+सम्यग्ज्ञाने निश्चये सम्यग्विश्वासे च । "किं तत्कष्टं वेत्युपलब्धसंज्ञाविकल्पयन्तोऽपि न संप्रतीयुः" भट्टिः ।

वि+विगमे करिष्ये "पितरः कामं"व्येतु वोमानसोज्वरः"भा० आ०९६अ० "अनुमानं हिविधं वीतमवीतञ्च" सा०कौ० "वीतशोकभयो विप्रो ब्रह्मलोके महीयते" "भियतो वीतवत्सरः" मनुः । "वीतशोकभयक्रोधः" गीता ।

सम्+सङ्गमे मेलने अक० "आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यम्" ऋ०१,९१,१६,"पार्थिवाः सर्वे समीयुस्तत्र भारत!" भा०आ०१८०अ०"राजसौ क्षत्रियुग्माभ्यां समराय समीयतुः" "क्षिप्रञ्चौ राजसैन्येन समीयुर्मागधैः सह" रामा०

अभि+सम् आभिमुख्येन सम्यगर्थनतौ सक० "तं जातमभिसमेति देवाः" अत्र १।५।२, क्विपि अवबोधने गमादेशः। अभिसमेति ते अजीगमत् त बोधनेन प्रत्या(प)याययति ते प्रत्यापिपत् त-प्रत्यापिपत् त। क्तिन् अवबोधने गमादेशः अभिसमितिः बोधे तु प्रतीतिर्भवति। उपसर्गस्यायज्ञात् परस्य गुरुभावेन एवं प्राप्तौ वृद्धिरेकादेशः। अवैति अवैसि उपैति।

इरण्ड पु०न० इदि-रक् पृ०। उष्णजलेन संदग्धाकारे पदार्थे "अर्धमिरण्डकाभ्यां परिगृह्णाति अर्धो वा आदित्य एषोऽग्निरिरोरात्रे इरण्डे अन्तं तदादित्यमहोरात्राभ्यां परिगृह्णाति तस्मादेषोऽहोरात्राभ्यां परिगृहीतः यद्वैवमग्निरिरण्डाभ्यां परिगृह्णाति अर्धो वा आदित्य एषो अग्निरिमा उभावेवोरिरण्डे अन्तं तदादित्यमाभ्यां लोकाभ्यां परिगृह्णाति तस्मादेष आभ्यां लोकाभ्यां परिगृहीतः परिमण्डले भवतः परिमण्डलौ ह्यमौ लोकौ लोकौ ह्येतौ तस्मा एवोल्लोऽयो अनतिदाहाय" शत० ब्रा० ६,७,१,२५-२६, "परिमण्डलाभ्यामिरण्डाभ्यामुखां परिगृह्णाति" कात्या०१६, ५,२,१, "उखा याभ्यां भ्रस्यते तौ इरण्डौ" कर्क०।

इरत् त्रि०एति भक्षति इ-क्विप्।मत्वरे व्याकरणोक्ते प्रक्रियाकालोद्धारिते प्रयोगकालेऽध्यायिनि वर्णवेदे यथा तिप् क्विप् इत्यादौ प्रकारादि ते च "उपदेशेऽजनुनासिक इत्" "हलन्त्यम्" "न विभक्तौ तुस्माः" "आटिज्झिटुडवः" "मः प्रत्ययस्य" "चुटू" "लशकतद्धिते" पा०स्त्रेषु सापवादं दर्शिताः तस्य लोपः" इत्यनेन तस्य प्रयोगेऽदर्शनञ्च विहितम् "आदिरन्त्येन सहेता" पा० १ अनन्तरार्थे ३अवधारणार्थे च अव्य० "यदेदना अदइन्न पूर्व आदिद्" यजु०१७,२५,, "आत् इत् इति च्छेदः इत् एवार्थे" वेदद्दी० "उपोषेषु मघवन् ! भूय इत्नु" यजु०२,२४, इत् एवार्थे" वेदद्दी० ५इत्यनित्यर्थे च "सन्त्यादिभ्येक्तानि वचनस्य प्रतानि" यजु०४,२०, इदित्यव्ययमित्यनित्यर्थे" वेदद्दी०

इत त्रि०इ-क्त।गते"वनितानितम्बा रजनीवधूः"रघुः भावे क्त। २मतौ "तदितादिवादयो मयः" शत०ब्रा०६,२,१,१२। ३ज्ञाने च व०। "बोतमवीतमुवेति" सां०कौ०।

इतर त्रि०इत्वा ज्ञानेन तीर्यते इ-अप् तरति पचाद्यच् वा। १लोके पामरे "इतरइव परिभूय ज्ञानम्, अविगणय्य तपःप्रभावम्, उल्लङ्घ्य गाम्भीर्यं, मन्यमेन जड़ीकृतः" काद०। ह्येतेऽनेन इतः विभेषक रात्रि रा क। २भेदान्वये। "इतरतापयतानि यथेच्छया वितर तानि रुचे चतुरानन !" उद्भटः। "यत्र हि द्वैतमिव भवति तत्रेतर इतरम् पश्यति" श्रुतिः। "ते यतध्वं परं यत्ना विजयायेतराय वा" भा०आ०१०अ०। वर्ण्यानामेतराणां नो ब्रूहि धर्म्यानशेषतः" या० स्मृ० "इतराणि च रत्नानि प्रेतुर्वानरकोटिषु" "इतरेतरहृते स्वकर्मणाम्" रघुः "तस्मिन् कुरु दाशरथेतरम्" कथा०। अस्य सर्वनाम कार्य्यम्। इतरे इतरस्मै इतरस्मात् इत्यादि। "विजयायेतराय वै इत्यादि छान्दसम् न तत्कार्य्यम्। वर्ण्यानामेतराणामित्यत्र बहुव्रीहिः तेन न सर्वनामकार्य्यम्। एवं "परं मर्त्येतरे भुजे" रघुश्लोकेऽपि बहुव्रीहिः। तस्मिन् इतरतः। "जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्" भाग०। पाल् इतरथा "एवं देवलेतरथा मानुषे" शत०ब्रा ६ ८।१,८, इतरेण निर्वृत्तम् संकलादि०अञ्। ऐतरः। इतरनिर्वृत्ते त्रि० इतरस्या पत्यम् गुरुवा० ढक्। ऐतरेयःतदपत्ये पुंस्त्री।

इतरेतर त्रि०इतर+द्वित्वं समासवद्भावश्च। अन्योन्यशब्दार्थे। "स्त्रीनपुंसकयोरुत्तरपदस्थायाविभक्तेरात्मादयो वा वक्तव्याः" वार्त्ति० इतरेतरान् इतरेतर वा इमे ब्राह्मणयो वुद्धे वा भोजयतः"सि०कौ०। समासवद्भावात् दृच्छिसाले पुंभावः इतरेतरेण "टाङसिङसामिनात्स्याः क्लीबे आड्डिरङसोः स्मोः। समासे सोरलुक् चेति सिद्धं बाहुलकात्प्रयमित्यत्र कार्य्यं तेन क्लीबे इतरेतरमित्येव। "इतरेषां तु वर्ण्यानामितरेतरकाम्यया" मनुः। "यथा नाभिचरेतां तौ वियुक्तावितरेतरम्" मनुः। परमतादिवत् सर्वनामकार्य्यम्। किन्तु नादुड इति भेदः"व्यूढावुभौ तावितरेतरस्मात्" रघुः

इतरेतरयोगः पु०इतरेतरस्य योगः अन्वयः। प्रत्येकप्राधान्येन सर्वेषामन्वये। तदर्थे हि द्वन्द्वसमास इष्यते सचानेकवत् प्रत्येकप्राधान्यात्। धवश्च खदिरश्च इति वाक्ये हि धरखदिरौ इत्यत्र भिन्नलोत्यादि क्रियायां प्रत्येकस्य प्राधान्ये नैवान्वयः तथा च एकजातीयक्रियान्वयितावच्छेदक विशिष्टे प्रत्येकान्वयबोधकत्वे इतरेतर योगाख्यः द्वन्द्वः संकलितप्राधान्ये तु समाहारद्वन्द्वः इति भेदः। २परस्परसम्बन्धे च।

इतरेतराश्रय पु० इतरेतरमाश्रयति आ+श्रि-अच्। अन्योन्याश्रये तर्कदोषभेदे अन्योन्याश्रय शब्दे २१७५ पृष्ठे विवृतिः।

इतरेद्युस् अव्य० इतरस्मिन्नह्नि इतर+एद्युस्। इतरदिवसे इत्यर्थे

इतस्त्वतस्त्व अव्य०। इतस्त्व द्वित्वम्। अनियतदिग्भागादौ।

"इतश्चेतश्च विचरन् तस्मिन् मुनिवराश्रमे" देवीभा०।

इतस्ततस् अव्य० इदम्+तसिल् इदादेशः। १अस्मादित्यर्थे "इतस्त दैत्यः प्राप्तश्चेन्न एवार्हति क्षयम्" कुमा०। २अस्मिन्नित्यर्थे च। "इतोनिषोदेति विकृष्टभूमिः" कुमा०। "प्रयुक्तमप्यस्त्रमितो वृथा स्यात्" रघुः।

इति अव्य० इण-क्तिच्। १हेतौ, २प्रकाशने, ३निदर्शने, ४प्रकारे, ५अनुकर्षे, ६समाप्तौ, ७प्रकरणे, ८स्वरूपे, ९व्यवस्थायाम्, १०विज्ञानियमे, ११भेदे, १२प्रत्यये, १३अवधारणे, १४व्यवस्थायाम्, १५परामर्षे, १६मानें, १७इत्यर्थे, १८प्रकर्षे, १९उपक्रमे च। तत्र स्वरूपद्योतकता त्रिधा शब्दस्वरूपद्योतकता प्रातिपदिकार्थद्योतकता वाक्यार्थद्योतकता चेति भेदात्। तत्र शब्दस्वरूपद्योतकत्वे तद्योगे न प्रथमा। "शब्देति मङ्गल नाम यस्य वाचि प्रवर्त्तते" पुरा० "अतएव गविलाद्द भूसत्तायामितीदयम्" भर्तृहरिः "रामरामेति रामेति कूजन्तं मधुरं वचः" रामा० "रामेति रामभद्रेति रामचन्द्रेति वा जपन्" रामरक्षास्तम्। प्रातिपदिकार्थद्योतकत्वे प्रथमा। "चक्षुश्चित्रमित्यवधारितं पुरस्तात् शरीरेति विभाविताकृतिम्। विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः" माघः। "इयत्य इत्युदाहृतः" भट्टिः। "वदन्त्यप्रत्ययेति च तां पुराविदः" कुमा०। वाक्यार्थद्योतकत्वे न प्रथमा निपातेनाभिहिते प्रतिपादिकार्थे एव प्रथमाविधानात् वाक्यस्य च प्रत्या जात्या वा एकार्थबोधकत्वाभावेन प्रातिपदिकत्वाभावात् "भूसत्तायामितीदयम्" भर्तृ०। "श्रुतार्थस्य परित्यागादश्रुतास्तार्थस्य कल्पनात्। प्राप्तस्य बाधादित्येवं पारंपर्या विदोषिका" मीमांसाका०। तत्र हेतौ "इतोव धारासवधीर्य्य" नैष०। "इति ब्रुवन्ति काश्मीरेष्वेखितम्" नैष०। प्रकारे "इति मदमदनाभ्यां रागिणः स्मरदारुणः" माघः। प्रकाशार्थे इतिकरि इत्यादौ अव्ययेऽदवर्णे "विरोधिसिद्धमितिकर्त्तुमुद्यतम्" प्रकरणे इतिशब्दमितिकर्त्तव्यम्। इतिदत्तम्। भावे क्तिन्। २०गतौ २१ज्ञाने च स्त्री "प्राप्तावीदितुपत्रं चतुष्पदित्यै" ऋ० १,१२४,१"। २२ऋषिभेदे पु०।

इतिका त्रि० इत्र गमनमस्त्यस्य ठन्। मतिमति ततः स्त्रियां टाप्। ऐतिकायनः तद्गोत्रापत्ये पुंस्त्री

इतिकथ त्रि० इति इत्थं कथा यस्य। अर्थशून्यवाक्यप्रयोक्तरि अश्रद्धेयवचने।

इतिकथा स्त्री इति इत्थं कथा। अर्थशून्यवाक्ये भेदि०।

इतिकर्त्तव्य त्रि० इति इत्थं कर्त्तव्यम्। इत्थंकर्त्तव्ये परिपाटीयुक्ते कर्तव्ये। "एवं सर्व्वविधावेदमितिकर्त्तव्यमात्मनः" मनुः "संदिदेशेतिकर्त्तव्यम् वज्रवेगप्रभाधिनौ" भा०व०२८५अ०"स च व्यवहारः कोदृशः कतिविधः कथञ्चेतिकर्त्तव्यताकलापोभाभिधित्सितः"इति मिता०"कथञ्चित्थं कर्त्तव्यं स्यादिति कर्त्तव्यं स्यादकाले करणमेव" भा० आ० १६५ अ०। "धर्म्मे प्रयीयमाणे हि वेदेन करुणात्मना। इतिकर्त्तव्यताभागं मीमांसा पूरयिष्यति" पुरा० इतिशब्दाद्बोध्यम्। "तेषु तेष्वितिवृत्तेषु हि पुरुषस्य समाप्यते" मनुः। "ततोऽर्जुनस्य कृष्णश्च विनिश्चित्येतिकृत्यताम्" भा० आ०२२० अ०।

इतिवृत्त न० इत्थं वृत्तम्। इदंप्रकारान्विते चरिते। "इतिवृत्तं नरेन्द्राणामृषीणाञ्च महात्मनाम्" भा० आ०२अ० उपचारात् तज्ज्ञापके २पुराणादौ च। "अभेतिवृत्तं किल मेयमद्भुतम्" रामा०। "दूरानुवर्त्तिनि स्यातं तस्य प्राप्तक्रियेतिवृत्ते तु" सा०द०।

इतिश्र पु० ऋषिभेदे। तस्य गोत्रापत्यम् नडा० फक्। ऐतिशायनस्तद्गोत्रापत्ये पुंस्त्री।

इतिह अव्य० इति एवं ह किल हन्तः। उपदेशपरम्पराद्याम् यथाऽत्र वटे यक्ष इत्युपदेशपरम्परयैव न तु केनापि दृष्टा तथा ज्ञापितम्। इति तस्य प्रसिद्धिमात्मता "इति क्रोष्टुर्हृता" सा०कौ०।

इतिहास पु० इतिह पारम्पर्य्योपदेश आसेऽस्मिन् आस-आधारे घञ्। इत०। "धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्। पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते" इत्यलङ्कारे पुराइत्तप्रकाशके भारतादिग्रन्थे। "इतिहासपुराणाद्यैः सर्वं सम्यग्भवेत्" दक्षः "स्वाध्यायं श्रावयेत् पित्र्ये धर्मशास्त्राणि चैव हि। आख्यानानीतिहासांश्च पुराणानि खिलानि च" मनुः। "वाकोवाक्येतिहासपुराणः यजुर्वेदानां वेदः" छा०उ० "इतिहासोत्तमाद्ग्राह्यं जायन्ते कवयो नवाः। पञ्चभ्य इव भूतेभ्योलोकसंविधयस्त्रयः। भारतस्येतिहासस्य पुराणां सम्भवैर्वृताम्। संस्कारोपगतां ग्राह्यां नानाशास्त्रोपबृंहिताम्" भा०आ०१अ०इत्युक्ते, भारतस्येतिहासरूपत्वम्। "इतिहासपुराणाद्यैर्वेदं समुपबृंहयेत्" स्मृतिः। २अस्यस्मिन् पुराइत्ते च च भारते ग्रन्थिक-

ऋग्वेदौ "अलाप्युदाहरन्नोमजितिहासं पुरातनम्" इत्यनेन बहुशो दर्शितः । "नवमेऽहनि तार्क्ष्यो वैपश्चितस्य यथांशि विगलानोमान्यासत इति यथांशि ब्रह्मचारिण इत्युपसमानीतः खलु वानुपदिशतीतीतिहासोवेदः सोयमितीतिहासमाचक्षीत" आश्व०श्रौ०वेदभागविशेषस्यैवेतिहासरूपत्वलक्षणम् । तत्र पुराकल्पप्रतिपादकत्वात् तथेति बोध्यम् तदभिप्रायेणैव "वाकोवाक्येतिहासपुराण इति" छान्दोग्यवाक्यमिति द्रष्टव्यम् । पौराणिकमतसिद्धे ३ऐतिह्ये प्रमाणे च ।

इतिहासपुराण न० इतिहासवेदकं पुराणम् । आथर्वणवेदभागभेदे समा०६०२इतिहासपुराणसमाहारे च ।

इत्कट पु०इतं गन्तारं जनं कटति आवृणोति खगिकास्यफलेन कट—आवरणे अच् ईत० (ओकड़ा) इके तत्समीपगन्तृत्वादौ हि तत्फलसंयोगात् गतिनिरोध इति लोकप्रसिद्धम् ।

इत्किला स्त्री किल—औक्ष्ये क किलः इत् गतः किलः औक्ष्यात् । रोचनायाम् गन्धद्रव्यभेदे यद्ध च० ।

इत्थम् अव्य०इदम्+थम् । १इदंप्रकारे इत्थम्भावः इत्थम्भूतः। २अनेन प्रकारेणेत्यर्थे च "इत्थमसुविधपन्नमसत्सु" नैष० । "इत्थं व्रतैः किमपि भूतमदभ्रकल्पम्" कुमा० "इत्थं व्रतं धारयतः प्रजार्थम्" रघुः । "इत्थमाराध्यमानोऽपि" कुमा० "इत्थ स्थितीवेन वसिष्ठधेनुः" रघुः । "सिद्धाप्रयोगे एतस्मिन् उपपदे यत्तसु । इत्थंकारम् इत्थम्भावमित्यादि ।

इत्थम्भाव पु० इत्थं भावः प्राप्तिः भू—प्राप्तौ घञ् । कस्यचित् प्रकारस्य प्राप्तौ ।

इत्थम्भूत त्रि०इत्थं कञ्चित् प्रकारं भूतः प्राप्तः भू—कर्त्तरि क्त । कञ्चित् प्रकारं प्राप्ते "इत्थम्भूतलक्षणे" कस्येत्थम्भूतास्वाख्यानभागीत्याख्याति" च या० ।

इत्थयाल पु० इत्थं यल—अच् पृ० । नीलक०ता०उक्ते योगभेदे तद्विवृतिः यथा "योऽस्येत्थमार्गवैकुण्ठमार्गमन्वेऽभस्ये निजं तेज उपादत्ते खादित्यमण्डोऽयमथो विलिम्पाखिलार्द्रीलोयदि पूर्ण्यमेतत् । पीलोयदा भास्वत्तस्थितः सन् मन्वेऽभस्ये निदधाति तेजः । खादित्यमण्डोयमथैव दोग्ध्रीमधाखिलार्द्रैरिह मन्दपृष्ठे । तदा भविष्यद्बलयोयमित्यवार्द्रं निधेयं सुधयोपमाङ्गैः" । "मन्वेऽभस्यार्द्रीधियवोर्दवैव योगस्तदा कार्य्यसिद्धयन्ति सन्तः । मन्वेऽभस्यार्द्रीधियतृपकावत्र खादित्यं पतितौम्बदृष्टे । तदा बलाढ्यं कथयन्ति योग विशेषतः क्षेत्रदशाऽतिसक्तः । खादित्यस्थानगतः शुभैश्चेत् युतेक्षितोभूद्वयितमथाशे । तदा शुभं प्रागभवत् सुपूर्ण्यमथे भविष्यत्यपवर्त्तते च । व्यत्यस्तमस्राहिपरीतभावेऽधेऽक्षितोऽनिष्टपदं प्रपन्नः । अभूच्छुभं प्रागशुभं चिदानीं संयातकाले न च भावि वाच्यम्" नीलक०ता० । "प्राग्भिक्षवाशोऽपर इन्दुवारक्षेत्यवाशोऽपर ईश्वराः" "चेटस्मेयेन क्षतेत्यवाशः" नीलक०ता० कम्बूवादौ विशेषः ततश्चन्द्रे वक्ष्यते अत्यर्थं इनि । इत्थयाली तादृग्योगवति यद्धे ।

इत्था अव्य०इदम्+थाल्—इदादेशः । इत्थमित्यर्थे । "क इत्था वेद यत्र सः" कठो० "इन्द्रमित्थागिरोमताः" ऋ० २०२,४,२ । २सत्ये निरु०इदम्+थम् इदादेशः । ३इदंप्रकारेत्यर्थे । "इत्थाधिया यज्ञवन्तः" ऋ० ३,२७,६,

इत्य त्रि० इण—कर्म्मणि क्यप् । गम्ये । "इत्यः शिष्येण गुरुवत्" भट्टिः । "इत्येऽभ्यासस्य" वार्त्ति० सम् अभ्यासमित्यः दूरतः परिहर्त्तव्यः" सि०कौ० । भावे क्यप् । २गतौ स्त्री । "क्षेनस्येत्यामन्विहि तस्करस्य" यजु०१२,२१ "इत्यां गतिम्" वेददी० ।

इत्यक पु० इत्यार्थं कायति शब्दायते कै—क इत्यायां गतौ राजभवनप्रवेशे अधिकृतोया कन् लुक्तः । प्रतीहारादिकारिणि द्वारपाले । [दैवरी ।

इत्वन् त्रि० इण—क्वनिप् । गन्तरि स्त्रियां ङीप् वनोरच ।

इत्वर त्रि०इण—करन् । १पथिके, २नीचे, ३क्रूरकर्म्मणि च । ४वरुडे पु० । स्त्रियां क्रूरवत्त्वात् ङीप् । सा चाभिसारिकायां ५स्त्रियाञ्च "सपत्नीवरं स्वा जगत्" ऋ० १०,८८,४ । [इन्द्रे उ० ।

इद् अव्य० इदि क्विप् वा० नलोपः । इत् इत्यस्यार्थे एवकारार्थे

इद ऐश्वर्ये इदित् भ्वा० पर० अक० सेट् । इन्दति ऐन्दीत् इन्दाम्—बभूव आस चकार । इन्दूः ।

इदंयुग न० कर्म्म० । एतद्युगे । इदंयुगे साधुः प्रविद्युगा० खञ् । ऐदंयुगीनः एतद्युगसाधौ त्रि० ।

इदङ्कार्य्या स्त्री इदं कार्य्यं यस्याः । १इदाकाराभावां यद्धच० २एतद्रूपकार्य्यान्विते त्रि० ।

इदन्तन त्रि०अस्मिन् काले भवः ट्युल् तुट् च । इदानीन्तने "यच्चिक्षेपेरिदन्तनैः" इक०स्मृतिः ।

इदन्ता स्त्री इदमो भावः । इदंशब्दार्थभावे अजादिदर्शनीव्यतायाम् "अनिर्द्दिश्यमिति" धृतिदर्शाख्याने "इदन्तयानिर्द्दिश्यमक्षम्" भाष्यम् ।

इदन्द्र पु० इदं पश्यति दृश—क्विप् इदम् ईत० । परमात्मनि तस्य निरुक्तिरैतरेये दर्शिता यथा "स एतमेव पुरुष ब्रह्म

ततमनपश्यदिदमदर्शमिति तच्चादिदिन्द्रोनाम इदन्द्रोऽयं नामैतमेवेदमिन्द्रं सर्व्वान्तिमाचक्षते परोक्षेण, परोक्षप्रिया हि देवाः" ऐत० उ० विदतमेतदानन्दगिरिणा "तच्चेदिन्द्रनामप्रसिद्धापि तच्च ज्ञानाऽपरोक्षत्वमिति यत्तु तच्चादिन्द्रइति वाक्यम् तद्व्याचष्टे । यच्चादिति ॥ यच्चात् सर्व्वान्तरं ब्रह्म इदमिदमपरोक्षं प्रत्यगात्मत्वेनावाऽपश्यदित्यन्वयः । अथमिदन्द्रनामत्वमत आह । इदन्द्रो ह वा इति । तच्चिन्द्रो मायाभिरित्यादाविन्द्रप्रसिद्धेन त्विदन्द्र इत्यत आह । तमेवमिति । इदन्द्रस्त्वेव ततः परोक्षत्वार्थम् अपरोक्षोपनेन्द्र इत्याकूतमित्यर्थः । परोक्षोक्तेः प्रयोजनमाह । पूज्यति । पूज्यानां परोक्षतयैव नाम ग्रहणमित्यस्य प्रमाणमाह । तथा चोक्तं । देवा इति पूज्या इत्यर्थः । अत एवाचार्या उपाध्याया इत्युक्तावेव प्रीतिं कुर्व्वन्ति लोके, न तु विष्णुमित्रादिनामग्रहण इति भावः । नाम्नः परोक्षत्वं नाम यथार्थनाम्नो रूपान्तरकरणेन अरूपाच्छादनमिति ज्ञेयम्" ।

इदम् त्रि० इदि-क्मि नलोपश्च ; पुरोवर्त्तिनि दृश्ये शब्दयोगव्यवच्छेदे "इदमस्तु सन्निकृष्टं समीपवर्त्ति चैतदो रूपम् । अदस्तु विप्रकृष्टम् तदिति परोक्षे विजानीयात्" इत्युक्तेः सन्निकृष्टत्वाविप्रकृष्टत्वञ्च अतएव "अस्येति प्रत्यक्षादिसन्निधापितस्य जगत इदमादिदृश्य." भा० भा० उक्तम् । सन्निकृष्टत्वञ्च बुद्धिमात्रेण, तच्च ज्ञानजन्यया स्मरणादिना च भवति तेन "औत्सदीयं विरच्यते" रघुत्व भाविन्यामपि औत्सद्यां बुद्धा सन्निधापितत्वेन इदंशब्दप्रयोगः । अतएव तदादेः बुद्धिस्थत्वोपलक्षितधर्म्मावच्छिन्ने शक्तिरिति नैयायिकादयः । तात्पर्य्यपरत्वे एतस्य सर्व्वनामता शब्दस्वरूपपरत्वे तु न । "इदमोऽन्वादेशे" पा० "इदमो निर्देशः" भा० भा० "इदमस्तु सन्निकृष्टम्" "अयमुदयति वितनोतीरश्मिजोजः" भाघः । "अयमसुति पशुपरावरज्ञः" सा० द० टी० "इदं किञ्चाव्याजमनोहरं वपुः" भक्तु० "अयमसौ भगवानुत पाण्डवः" किरा० । "इदं वियच्चते लोकम्" गीता "इदं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम्" मनुः । अन्यादेशे एनादेशः हितीयाटोस्तु "एनं युवानं पतिं वः" इति ह्यौत्सर्गमन्त्रः" । "यद्येनमनुजक्षसि तदा कतरोवरत्रे" मैत्र० । "अनेन यूना सह पार्थिवेन" रघुः । अनयोः एनेन । एवम् अनयोः एनयोः । सर्व्वनामसार्व्वम् । इमे अक्षी अक्षात् एवाम् अक्षिन् स्त्रियाम् इयम् । "इयं मघेन्द्रा भवतीत्यधिस्त्रियः" कुमा० "इतीयं वैदिकी श्रुतिः" मनुः । अस्याः अस्याः आसाम् । आत्वाच्च । इमनो इमनेत्यादि प्रत्यक्षविषयतयावाच्यत्वार्हेऽस्य क्वचित् वृत्तिः "अयं जनः प्रष्टुमनास्तपोधने" "जनोऽयमुच्चैः पदलङ्घनोत्सुकः" "इतः स दैत्यः प्राग्ग्रीवमेतत्पश्यति त्वयम्" कुमा० । इदृक् । अस्तु इदमस्तु त्यक् इदया । दानीम् इदानीम् । त्यदादित्वात् दः । अयम् अव्ययमपि । तेन श्रुत्व तदृच । इदन्तनः । मयट् इदमयः । स्त्रियां ङीप् । वति इदावान् स्त्रियाम् ङीप् इदवती ।

इदा अव्य० इदम् दाच् वेदे नि० । इदानीमित्यर्थे "इदाकिते च विषत." ऋ० ६,२१ "इदा इदानीमिति भा० । इदम् आ इदा० । सम्बन्धवचारत्वादौ तदुक्ते इदमेवंरूपे । इदावत्तरः । तस्य निरुक्तिरुक्तच्छन्दे वक्ष्यते ।

इदानीम् अव्य० इदम्-दानीम् इदा च । सम्प्रत्यर्थे । "इदानीमायवोर्मध्ये सरित्सागरभूधराः" उद्भट० । "सा चेदानीं प्रचेतसः" रघुः "इदानीञ्चेन्नातः लिपसि यमनाथेव द तदा" जगन्नाथ० । भवार्थे श्रुत्व तदृच् । इदानीन्तनः वर्त्तमानकालभवे त्रि० स्त्रियां ङीप् । "वासना चेदानीन्तनी प्राक्तनी वेति" सा० द० ।

इदावत्सर पु० इदाविशिष्टः वत्सरः । वत्सरपञ्चकान्तर्गते वत्सरभेदे तदानयनप्रकारो यथा "यत्काष्ठात् पञ्चभिःशेषात् समाद्याद्यासु वत्सराः । संवत्सरोदावत्सरौ तथोदावत्सरौ मताः" ज्यो० तथा च एकाङ्के स्थिते संवत्सरः, द्व्यङ्के परिवत्सरः, त्र्यङ्के इदावत्सरः, चतुरङ्के अनुवत्सरः, पञ्चाङ्के स्थिते उदावत्सरः । स्त्रियां फलन्तु मत० त० विष्णुध० । "संवत्सरे तथा दानं तिलस्य तु महाफलम् । परिपूर्व्वे तथा दानं यथान्नस्तु द्विजोत्तम ! । इदापूर्व्वेऽक्षयं क्षीरं धान्यानान्तुपूर्व्वके । उदावत्सरके दानं रजतस्य महाफलम्" उदावत्सरस्थाने इदृक्वत्सरोऽपि "परिवत्सरोऽथोदावत्सरेऽथेदृक्वत्सरोऽपि" राज० नृ० "नक्षोभयन्नुभयं सह द्यावापृथिव्योर्महताभ्यां वातर्क्षेण सह मुञ्जीत तं, वातं संवत्सरं परिवत्सरमिदावत्सरमनुवत्सरमुद्व-

स्वरमिति भानोर्मान्द्यशैघ्र्यसमागतिभिः समाननन्नि" भाग०५ स्क०। "मण्डलाभ्यां चन्द्रार्कमण्डलाभ्यां सङ्भुक्तीतेन यदा सूर्यस्य शुक्लप्रतिपदि संक्रान्तिर्भवति तदा सौरचान्द्र्योर्मासयोर्युगपदुपक्रमो भवति स संवत्सरः। ततः सौरमानेन वर्षे षट् दिनानि वर्द्धन्ते चान्द्रमानेन च षट् क्षयन्नीति द्वादशदिनव्यवधानादुभयोरप्युपक्रमाद्वायो भवति एवं पञ्च वर्षाणि गच्छन्ति तत्र द्वौ मलमासौ भवतः। ततः पुनः षष्टः संवत्सरः" श्रीधरः। तथा च समकालारब्धसौरचान्द्रमासयुक्तोवत्सरःसंवत्सरः चान्द्रसौरमासयोरारम्भे समत्वपरिवर्त्तिमासारब्धोवत्सरः परिवत्सरः। इदु इदं परिवत्, आरम्भे समत्वपरिवर्त्तनवत्त्वेऽपि अन्ते तयोः समत्वव्यागतिमान् वत्सरः इदावत्सरः। अनुगतः सौरसंक्रान्तिं चान्द्रोमासो यत्र तादृशोवत्सरः अनुवत्सरः। अस्य वर्षस्यासंक्रान्तमासस्यत्वतया संक्रान्त्यनुगतचान्द्रमास घटितत्वेन तथात्वम्। उत्क्रान्तो रविसंक्रान्तिं चन्द्रमासोऽत्र पुनः समकालारब्धागतिमांश्च योवत्सरः स उदावत्सरः। अत्रैव इदुर्वत्सं चान्द्रसौरयोर्मासयोरारम्भे समकालप्राप्त्यैव। एवमेवामन्यत्रकता द्रष्टव्या। पञ्चमवर्षे मलमासद्वयपातस्वयमपि "पञ्चमे पञ्चमे वर्षे द्वौ मासावधिमासकौ। तेषां कालातिरेकेण पक्षाभ्यामतिचारतः" एतत्र प्रायिकं "द्वात्रिंशद्भिर्गतैर्मासैः दिनैः षोडशभिस्तथा। घटिकानां चतुष्केण पतति ह्यधिमासकः" काल० धृतसिद्धान्तवाक्यात् तेन प्रागुक्तभारतवाक्यं "मलमासः स विज्ञेयोमासे त्रिंशत्तमे भवेदिति" काठकस्तत्प्रामाण्यन्तु ज्योतिःशास्त्रोक्तलक्षणमानमाश्रित्यैव। सिद्धान्तवाक्यं तु स्फुटमानमाश्रित्योक्तमतयोरविरोधः। एवमेव माधवाद्यैः

इदुवत्सर पु०इदु—उ वत्सरः। इदावत्सरे। "इदुवत्सराय परिवत्सराय संवत्सराय" अथ०६,५५,२।

द्रुघ न० द्रुध-भावे क। १आलस्ये, २दीर्घौ, ३आलस्ये। च। अस्त्रि—क्त। ४दीर्घे ५दग्धे च त्रि०। "समिद्धरवादोग्रा" भट्टिः। "तमिद्धमाराधयितुं सकर्णकैः" माघः। "द्रुघावोधैरिति" भट्टौ बोधे द्रुघ्वं सर्वमालस्यदुःखाद्यैर्व्याप्तिम् यासने द्रुघ्वमप्रतिकृतत्वम्। [भट्टो ददाति" भाग०।

द्रुघ्वा अव्य० द्रुघ-धाच् त्रि०। प्राग्राग्ये खरादि:"समिद्धमिद्धेव।

द्रुघ्म न० द्रुध्यतेऽनिरनेन द्रुघ-मक्। १काष्ठे "यस्य द्रुघ्म जतरत् सिन्धिदानः" ऋ०४,२,६, "द्रुघ्मं काष्ठभारम्" भा०। २यज्ञियवर्षभिद्भेदे पु०। वत्सप्रभाचक्रचक्रप्रकारादि आत्मा०श्रौ०दर्शितम्। "अयुग्धात्रूनि यूनानि" ऋ०। "द्रुघ्मबन्धनबर्हिर्बन्धनार्थानि यूनानि संनद्धनानि रज्जवोऽयुग्धात्रूनि भवन्ति। धातवस्तृणसृष्टिप्रक्षेपाः अयुजो विषमा एकत्रिपञ्चसप्तनवादिविषमसंख्या धातवोऽस्येषां तान्ययुग्धात्रूनि। तथा चापस्तम्बः "त्रिधातु पञ्चधातु वा शुल्बं करोतीति" शुल्बं रज्जुमित्यर्थः। "पञ्चविंशतिकुशमयानि यूनानि" इति यज्ञपार्श्वे। तथा "समूलानामसूलानां वा दर्भाणां पूर्ववत् शुल्बं कृत्वोदगग्रं निधायेति" द्रुघ्मप्रस्तावे। मानवे च"शुल्बं प्रतिदधात्ययुग्धातु प्रदक्षिणमिति"। तित्तिरिरहस्ये। "अथत्रिरन्वाकृतं शुल्बं कृत्वेति" कर्क०। बर्हिषो बन्धन प्रकारमाह।"प्रागग्रे यूनउदग्रं बर्हिराचिनोति"सू०। प्रागग्रे यूने प्रागग्रे संनद्धने बन्धनार्थायां रज्जौ उदग्रं बर्हिराचिनोति बन्धनार्थं स्थापयति"कर्क०। अथेध्मबन्धनस्य प्रकारमाह। "उदग्रे प्रागग्रमिध्मम्"सू०। आचिनोतीत्यनुवर्त्तते उदग्रे यूने संनद्धने प्रागग्रमिध्माचिनोति बन्धनार्थं निदधाति"कर्क०। "प्रत्यग्रन्योनवगूहति" सू०। द्रुघ्मबर्हिर्बन्धनार्थानां यूनानां मध्येन् प्रत्यग्रवगूहति यूने गाढं बद्धा यूनस्थाग्रमूले संकल्प्य प्रदक्षिणमावेष्ट्य द्रुघ्मबर्हिषोरग्रभागे प्रोतयित्वा पश्चादिति तयोर्मूलभागे अवगूहति प्रेरयति प्रत्यक्सूत्रेण द्रुघ्मबर्हिषोःपश्चाद्भागो मूलभाग इत्युच्यते दिग्वाचिनोबर्हिरुदग्रे निक्षिते असम्भवात्। काठके "यस्मि ह्वा पुरस्तात् प्रत्यञ्चमपकर्षतीति"। मानवे "शुल्बस्थानौ समाबध्य "यूपा ने यन्थिमिति प्रदक्षिणमावेष्टयति पश्चात् प्रत्यञ्चमपकर्षतीति" तैत्तिरीयेऽपि "पश्चात्प्राञ्चमवगूहतीति"। आपस्तम्बः "पुरस्तात् प्रत्यञ्चं यन्थिमवगूहति पश्चाद्वा प्राञ्चमिति"। "अष्टादशेध्मं परिधिदक्षाणाम्" सू०। "परिधीनां दक्षाः पक्षाग्रखदिरविकङ्कतादयः परिधिदक्षाः तेषां परिधिदक्षाणां सम्बन्धिनः अष्टादशसंख्याकाष्ठमिध्मं कुर्यात्। मानवे "समूलैर्दर्भैः पालाशं खादिरं रौहितकं वाष्टादशदार्विध्मं संनह्यति लौप परिधीन् योवस्थितश्चरन्नास्ते"। काठके "अष्टादशदारु शुल्बं समानदक्षस्य संनह्यति विंशतिमिष्टौ पञ्चदर्वे चेति"। अतएव खादिरेलौविदक्षो काष्ठदर्भवति क्वासे च क्वासो न भवति पिलवादौ, तथाचापस्तम्बः "खादिरेलौविदक्षो काष्ठानि विकङ्कते प्रकृतिसो क्वसमानाश्च प्रकृतिवदिति"। उपवस्तु तु "आत्मावदिध्मा

वर्हिरिति" वचनात् छान्दसः। "द्रुघ्नप्रमाणं चारत्निरिति खड्गः प्रकीर्तितमिति" कात्यायनः(कर्मप्रदीपे) तथा "खमित्यविलं वेदं च कुर्य्यात् प्रादेशसंमितम्। द्रुघ्नस्तु द्विगुणः कार्य्यः परिधिस्त्रिगुणः स्मृतः" "खातैं प्रादेश द्रुघ्नो वा द्विगुणः परिधिस्तत" इति। "एकविंशति वा" सू०। अथ वा एकविंशतिमेकविंशतिसङ्ख्याकाङ्कमिध्मं कुर्य्यात् तथा चापस्तम्बः "खादिरं प्राक्षाग्रं वैकविंशतिदारुकमिध्मं करोति"। "ततः परिधीनेके" सू०। एके आचार्या-स्तत एकविंशतिसंख्यकाङ्कादिध्माख्योधि काष्ठान्यरणि भागाग्र्येषोपादाय परिधीन् परिदधति "तद्वैकद्रुघ्नखैतान् परिधीन् परिदधतीति" श्रुतेः। अथ वैकमेवेदं सूत्रम् "एकविंशति वा ततः परिधीनेके" इति एके आचार्या विकल्पेन एकविंशतिसंख्यकाङ्कमिध्मं कर्वन्ति तत इति तस्मादेवैकविंशतिकाष्ठोधात् परिधीन् परिदधति च। एतदेव युक्ततरम् आपस्तम्बसूत्रे एकविंशतिकाष्ठानां विभागदर्शनात्। तथाचाहापस्तम्बः "खादिरं प्राक्षाग्रं वैक-विंशतिदारुकमिध्मं करोति त्रयः परिधयः पाक्षाग्रकाष्ठकाः खादिरोदुम्बरविल्वरोहितकविकङ्कतानां ये वा यज्ञिया इध्मा आर्द्राः शुष्का वा सत्वक्काः,स्वविलो मध्यमोऽथो-दाल्लाभोदाल्लिखिताधौ द्वावित्र उत्तराधौ द्वे, आधार समिधावनुवाज समिदेकविंशतिः समूलानामग्रानां वा दर्भाणां पूर्णबन्धनं त्रयोदशं निधायेति"। अथ एवंविधमेकोवमतम् यदेकविंशतिकाष्ठकः द्रुघ्नः। तस्मिन् पक्षे चेध्मादेव तीणि काष्ठान्यादाय परिधिपरि-धानमिति। वत्सलाभलक्षणमिध्मवर्हिषोर्भूमौ निधानं न आवश्यम् आपस्तम्बसूत्रे अनधोनिदधातीत्युक्तत्वात्। तद्वैक द्रुघ्नखैतान् परिधीन् परिदधतीत्यत्र फरिखाभिः तदु तथा न कुर्य्यादनवक्लृप्ता हि तस्यैते भवन्तीति वाक्यशेषात् परिधिभिराहुर्वै च भवितव्यम्। द्रुघ्न स्तु द्रुघ्नः द्रुघ्नत्वादेव द्विप्रादेशत्व तेन ते द्रुघ्नवदेशभूताः परिधिवाचावाचकयोः स्तुः तदिदमाह अध्याधानाय क्रीति गृह्यो ह्याहावाग्नेयः यावत्खरं जानुजाघवन्नीचे खरे खल्वयन्नीत्यभिप्रायः यत्तु परिधिवद्भूता आहरति सोऽवध्यवेष्टनीयादग्निखरादति-रिक्तमेवाहरति अग्निवेष्टनं च दाहभयाच्च गुल्वमिति तऽएवावद्भूता इति" कात्या० १,१,१४,२१।

'अपरिमितं प्रथमनीयं त्रियूनम' सू०। "प्रथमनस्यायं प्रथ-मनीयः तं प्रथमनीयमग्निप्रथमनार्थमिध्ममपरिमितमपरि-मितकाष्ठं त्रियूनं तिसृभिः संनद्धनरज्जुभिर्वेष्टितं कुर्य्यात् तीणि यूनानि बन्धनानि यस्य स त्रियूनः तं त्रियूनमिति। अपरिमितत्वं च प्रायुक्तेध्माष्टसंख्यायेष्वतिशयेनाधिकसंख्यकाष्टकत्वम्। तेन चतुर्विंशतिसमिधेनीको बहुदक्षायशुक्लः सप्तविंशतिः काष्ठानि भवन्ति। ततश्च प्रथमनीये ततो ऽप्यधिकानि अष्टाविंशतिप्रभृतीनि बहुदक्षसंख्यानि काष्ठानि भवन्ति"कर्क०।

छन्दोगप० "प्रादेशद्वयमिध्माख्य प्रमाणं परिकीर्त्तितम्। एवंमिताः स्रुवेवेह सविधः सर्व्वकर्म्मसु। समिधोऽष्टा-दशेध्मस्य प्रवदन्ति मनीषिणः। दर्शे च पौर्णमासे च क्रियाख्यास्तु विंशतिः। समिदादिषु होमेषु मन्त्रदैवतवर्जिता। पुरस्ताच्चोपरिष्टाच्च द्रुघ्नमार्धं समिद्भवेत्। द्रुघ्नोऽर्ध्वे-धार्धमाचार्यैर्विराड्डतिषु स्मृतः। यत्र चाज्य निरुक्तिः-ख्यात्तत् स्रुटीकरणाख्यकृम्। अङ्गहोमसमिस्तम्बशोध्नाख्येषु कर्म्मसु। येषां चैतदुपर्य्युक्तं तेषु तत्सदृशेषु च। अग्नभक्षादिविषदि जलहोमादिकर्म्मणि। होमाहुतिषु सर्व्वासु नैतेष्विध्मो विधीयते। "द्रुघ्नजातीयकाष्ठार्द्रप्रमाणं मेक्षणं भवेत्"। "सुन्वन्क्षोतिरिध्मभृतिः यक्ष्यन्नै." ऋ०६,२०,१२।"द्रुघ्नानां काष्ठानां भृतिः"भा०। तुमि-तदेवगणभेदे स च भाग० ४स्क०१अ०। दर्शितो यथा "तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिडस्पतिः। द्रुघ्नः कविर्विभुः खाद्रुः सुदेवो रोचनोद्दिषट्। तुषिता नाम ते देवा आसन् स्वायम्भुवेऽन्तरे" भाग०।

द्रुघ्नजिह्व पु० द्रुघ्नं काष्ठं जिह्वेवास्य। वह्नौ।

द्रुघ्नवाह पु० सोमाहुतिगर्भजाते अगस्त्यपुत्रे ऋषिभेदे "सह-स्रसम्मितः पुत्र एकोऽप्यस्तु तपोधन!" इति सोमाहुत्या-प्राप्तितोऽगस्त्यलक्षा पुत्रस्तत्पादप्रयाच तस्य नाम दृढस्यु-द्रुघ्नवहनाच्च द्रुघ्नवाह इति नामान्तरं तदेतुकं भा०व०। ९९।"तत आधाय गर्भन्तमगमत् वनमेव सः" "तस्मिन् वन-गते गर्भोवहधे सप्त शारदान्। सप्तमेऽब्दे गते काय प्रा-प्यवत् स महोल्बणः। ज्वलदग्निप्रभावेन दृढस्युर्नाम भारत!। साङ्गोपनिषदान् वेदान् जग्राहैव महातपाः। तस्य पुत्रोऽभवद्वेदः स तपस्वी महाद्विजः। स बालएव तेजस्वी पितुस्तस्य निदेशने। द्रुघ्नानां भारवहनाद्द्रुघ्न-वाहस्ततोऽभवत्"।

द्रुण गतौ तना०पर०सक०सेट्। निष्ठायां द्रुन्वतीति वङ्गवचनात् इति केचित् द्रुणोति द्रुणुतः द्रुन्वन्ति द्रुणोषि द्रुन्थः द्रुणुथः द्रुनुवात् द्रुणोत द्रुणु द्रुणवानि द्रुणवाव द्रुणवाम। निष्ठायां द्रुन्वति इति यङ्वचनात्तेन द्रुन्धातुरेवायमिति

बहवः स च भ्वादि० प० सेट् । दृन्वति ऐन्वीत् दृन्वामास तद्दूनम् । "ऋधानमाण दृन्वसि" ऋ०१,१७६,१ ।

दून पु० दूय-क्त । १ खेदे, "नन्दलिषड्डलग्नभवस्थपुत्रव्ययो दूनाद्यपद खभोक्षम्" जोड० ता० १ २प्रभौ "न न मद्दीनमदीनपराक्रमम्" रघुः । २क्लपविशेषे च ।

दूनस्त्र अक गतौ क्षान्दस दकारोपसर्जनः भ्वा०पर०स०नक्षत्रम् दूनसति "दूरेचित्तावजन्त सद्मदूनं यदिनक्षत्" ऋ०१,१२२,६, "दूनसत् व्याप्नोति कल गतौ क्षान्दसस्कारोपसर्जन इति भा० "शुक्रेण योचिषाद्यामिनक्षत्, ऋ०१०,४५,७, [दृक्षे राजनि० ।

दूनानी स्त्री दूनमानयति अन-क्विप्-अण् गौरा० । वटपत्नी

दून्यिच्छा स्त्री ताजकोक्तायां शुभेच्छायाम् । तदानयनप्रकारादि नीड० ता० उक्तम् यथा "खजन्मलग्नात् प्रतिवर्षमेकैकराशिभोगा शुभेच्छा क्रमेण । खजन्मलग्नं रविनिष्टवार्तगरदुयुतं सा भक्तेच्छिका स्यात् । प्रत्यहं गरविप्राभिर्वर्द्धते सानुपातत: । सार्द्धसंग्रहयं मासरत्नाङ्कः केऽपि सूरयः । खामिसौम्येक्षणात् सौम्यं शुभदृष्ट्या भयं रजः । भावाङ्कोनसंयोगात् फलमेषा निरूप्यते । वर्षलग्नात् शुभाद्यान्त्यरिपुरन्ध्रव्ययोभगा । पुण्यकर्मायगा खाम्यं दृक्षेऽन्यत्रोद्यमादनम् । यत्तनुर्यवानसप्तदृष्टिभं प्रतापदृद्धि ऋणैः प्रसादम् । गरोरपुष्टिं विविधोद्यमांश्च ददाति सौख्यं शुभेषा तनुस्था । उच्चाद्गतोऽर्थागमनं यशश्च खबन्धुसख्यानसुपाश्रयाच्च । मित्राम्बभोगोबलपुष्टिसौख्यं स्यादर्थभावे शुभेषा यदाबदे । पराक्रमाद्दित्तयशःसुखाग्निः सौन्दर्यसौख्यं द्विजदेवपूजा । सर्वोपकारस्तनुपुष्टिकान्तिर्लाभाश्रयश्चेत्सुभेषा स्थतीये । शरीरपीड़ा रिपुभीः खबन्धैर्जनक्षतापनिहत्यमत्वे । स्थानुबन्धाद्यां सुखभाग्यगाद्यां जनापवादाभयदृद्धिदुःखम् । यदीन्दिच्छा पञ्चमगाद्दवेधे बहुबुद्धिसौख्याल्लभवित्तलाभः । प्रतापदृद्धिर्विविधाविलासा देवद्विजार्चा रूपतिप्रसादः । क्षतत्रयस्थेषु रिपूदयस्थं भयं रजस्वस्थरतो नृपाद्वा । कार्य्यार्थनाशो सुखहाऽरिगा चेत् दुर्बुद्धिवृद्धिः खजनैरुतापः । कलत्रबन्धुव्यसनारिभीतिरुत्साहभङ्गो धनधर्म्महानिः । अरोगगा चेन्मुखहा तनोः स्याद्रुजा मनोमोहविरुद्धचेष्टा । भयं रिपोश्चस्थरतोविनाशो धर्मार्थयोःसुव्यसनाभवश्च । खलुस्थिता चेन्मुखहा नराणां बलक्षयः स्याद्धनमं विदूरे । खामित्वमर्थोपगमो नृपेभ्योधर्म्मोन्नयः पुत्रकलत्रसौख्यम् । देवद्विजार्चा परमं यशश्च भाग्योदयो भाग्यगतेच्छिका स्यात् । नृपप्रसादं च जनोपकारं सत्कर्मसिद्धिं द्विजदेवभक्तिम् । यशोऽभिवृद्धिं विविधार्थलाभं दत्तेऽन्यस्था सुखहा धनाप्तिम् । यदीच्छिका लाभगता विलासश्रीभाग्यनैरन्तमनःप्रहादाः । भवन्ति राजात्रयतोधनाप्तिः सन्मित्रपुत्राभिमतान्नवस्त्र । व्ययोऽधिको दुष्टजनैश्च सङ्गोरुजस्तथा विक्रमतोऽप्यसिद्धिः । धर्मार्थहानिर्मुखहा व्यवस्था यदा तदा सज्जनतोऽपि वैरम् । क्रूरैर्दृष्टःसुतहा यो भावो सुखहात्र चेत् । शुभं तद्भावजं नश्येदशुभञ्चापि वर्द्धते । शुभखामियुक्तेक्षिता वीर्य्ययुक्सेच्छिका खामिसौख्येत्यथार्थं प्रयच्छा । शुभं भावजं योवयेद्भावाशुभं साऽन्यथात्वेऽन्यथा भाव ऊहोविमृश्य । जनुर्लग्नतोऽस्तान्त्यषष्ठस्थबन्धुस्थिताद्दे हता क्रूरखेटैस्तु चेत् । विनश्येत् स यत्नेच्छिका भाव एवं शुभखामिदृष्टा न नाशः शुभं च । यदोभयत्रापि कृतो भावोनश्येत् स सर्वथा । उभयत्र शुभत्वेऽपि भावोऽसौ वर्द्धतेतराम् । वर्षेत्वनिष्टनेक्षया यत्नाभे जनुषि स्थिता । क्रूरोपघातासंभावं नाशयेत् शुभयुक् शुभा । जनुर्लग्नतस्तुर्यगा सौम्ययुक्तावद्वेधे पितुर्व्यत्ययाभं विधत्ते । नृपाद्धीतिदा पापयुक्तातिकष्टात्मादावधीत्थं विमृश्याभिधेयम् । यत्किन्तु भावे खामिसौम्येक्षिता सा भावोऽजन्मन्येव यत्तस्य दृद्धिः । एवं पापैर्नाश उक्तस्तु तस्येत्यूह्यं वीर्य्यार्हगतः सौख्यमेव । यदीच्छिका सूर्य्यभटे युतेक्षिता सूर्य्यैश्च राज्यं नृपसङ्गमञ्च । दत्ते सुखानां परभागमाप्तिं स्वानान्तरस्था फलदा हयेति । कुजेन युक्ता कुजभे कुजेन दृष्टा च पित्तोष्णदृजन्मनोति । यत्खामिघातं रुधिरप्रकोपं सौरेक्षिता सौरगटे विशेषात् । चन्द्रेण युक्ते न्दुगटेऽथ दृष्टेन्दुनापि वा धर्मयशोऽभिवृद्धिः । नैरन्त्यसन्तोषमतिप्रवृद्धिं ददाति पापेक्षणतोऽतिदुःखम् । बुधेन शुक्रेण युतेक्षितापि तद्वेऽपि वा स्त्रीमतिलाभसौख्यम् । धर्मं यशस्त्वाप्तयुतं विधत्ते कष्टं च पापेक्षणयोगतः स्यात् । युतेक्षिता वा गुरुणा गुरोर्भे यदीच्छिका पुत्रबलसौख्यम् । ददाति हेमाम्बररत्नकोषं शुभेक्षणाद्यादिह राजलाभः । यनैर्गृहे तेन युतेक्षितापि यदीच्छिका यातबलं विधत्ते । मानत्वयं वह्निभयं धनस्य हानिं च जीवेक्षणतः शुभाप्तिम् । तथोसुखे चेन्मुखहा धनाप्तिर्व्ययःसुखं धर्मसन्नतिश्च । सितेज्ययोगेक्षणतः पदाप्तिः सुवस्त्ररत्नाम्बरलब्धयश्च । भोग्या राज्ञोर्लवाक्षस्य सुखं पुष्टं गता खवाः । ततः शुभमभं पुष्कं विमृश्येति फलं वदेत् । ततशुभभागेन शुभा यदा स्यात्तत्पुष्कभागप्रतिपुष्टिदुःखम् । पापेक्षणादर्थसुखस्य हानिश्चेऽन्यत्रगोत्थं सदृक्चिन्तनाद्यः । ये जन्म-

काले बलिनोऽदृष्टफले चेद्दुर्बलास्तैरशुभं समाने। विपर्य्यये-पूर्व्वमनिष्टसूक्तं तुल्यं फलं स्यादुभयत्र साम्ये। षष्ठेऽष्टमेऽन्त्ये भवि चेन्विधेयोऽस्तगोऽथ वक्रोऽशुभदृष्टयुक्तः। क्रूरास्तुर्यास्तगतश्च भव्योन स्याद्गुजं यच्छति वित्तनाशम्। यद्यष्टमेशेन युतोऽथदृष्टःक्षुताख्यदृष्ट्या न शुभस्तदापि। योगद्वये व्याधिधनं यदुक्तोयोगस्तदा ह्यशुभत्वमाहुः। सुपक्वान्नतत्पतिरोपि जन्मलोग्निसंयुक्त शुभैः। वर्षारम्भे शुभं दत्तेऽदृष्टेदन्तेऽन्यथा शुभम्"।

इन्दुश्वर इदि-क्विप् इन्द् ऐश्वर्य्यान्वितमम्बरमिव नीलवर्ण-त्वात्। नीलोत्पले" मयूरव्यं०।

इन्दि (न्दी) स्त्री इदि-इन्। लक्ष्म्याम् वा ङीप् तत्रैव।

इन्दिन्दिर पु० इन्दि-किरच् नि०। भ्रमरे त्रिका०।

इन्दिरा स्त्री इदि-किरच्। लक्ष्म्याम्"इन्दिरा लोकमाता च लक्ष्मीस्तवः। [वल्लभ० २पद्मे ६त० । ३लक्ष्मीवृक्षे।

इन्दिरामन्दिर न० इन्दिरायामन्दिरमिव। १विष्णौ राज-

इन्दिरालय पु०६त०। १पद्मे २नीलोपले च। क्लीवत्वमपि।

इन्दिवर न० इन्दिलक्ष्मीसख्यावरं वरणीयम्। नीलोत्पले वा ङीप् इन्दीवरमप्यत्र। "इन्दीवरदलश्यामसिन्दिरानन्दवर्द्धनम्" विष्णुस्तवः "इन्दीवरैस्तृप्तचित्तानरेव" रघुः २उत्पलमालतौ च "नीलेन्दीवरलोचनवयुताम्"तत्त्व०[३तद्युक्तलतायाञ्च।

इन्दीवरिणी स्त्री इन्दीवर+समूहे इनि। १उत्पलसमूहाये,

इन्दीवरी स्त्री इन्दीं लक्ष्मीं दृणाति इ-अच् गौरा० ङीष्। शतमूल्याम्। मेदि० इन्द्रचिर्भक्त्यां टाबन्तः राजनि०।

इन्दीवार पु० इन्दावलक्ष्म्यावारो वरणमत्र। नीलोत्पले।

इन्दु पु० उनत्ति चन्द्रिकया भुवं क्लिन्नां करोति उन्द-उ आदेरिच्च। १ चन्द्रे, "टिलोप इति राज्ञेन्दुरिन्दुः क्षीरनिधाविव"रघुः"तस्याः प्रसन्नेन्दुमुखप्रसादम्" मनोदधेः पूरइवेन्दुदर्शनात्"रघुः "राजश्चेन्दोरिव प्रिय"रघुः "न नर्म्मसाचिव्यमकारि नेन्दुना""क्षिप्तादवेन्दोः सदृशोऽधिवेलम्"माघः"करैरिन्दोरन्तर्हित इव वसिक्तमृगकुलः" वेणी० अमृतकरः सकलतापनवारणेनास्य इन्दुत्वम्। २सहदेवताके नक्षत्रगिरोनक्षत्रे "लक्ष्मा करीव्येन्दुकरान्यजेत्" दीपिति ३एकसंख्यायुक्ते, नवेन्दुवेदेषुकृताग्रलक्ष्म्या" वि०गि०। ४कर्पूरे च।

अयं नक्षत्रमण्डले राशिचक्रे अश्वानां मध्ये सर्व्वोपरि वक्रात् स्थितः यथाह सू० सि०। "चन्द्रमारेवत्यभूषुत सूर्य्यगुश्चेन्द्र जेन्द्रवः। परिभ्रमन्त्यधोऽधस्थाः"। तस्य कक्षामानमुक्तम्। सि० शि० यथा "वाह्वाद्रिगोमनु सुराश्विमिताक्षकक्षा (३३२१४६७। ३०) चान्द्री सङ्ख्य गुणिता जिनरामसंख्या"(३२४०००)। एतस्मिन्नयोजनानि इन्दुकक्षामानम्। अनुक्षण गच्छतां अश्वानां राशिचक्रे दृष्टसमये कोदृगग्रेऽस्थितिरिति ज्ञानाय अर्कर्क्षणेन तस्य स्फुटीकरणप्रकारादि तत्रैव दर्शितं यथा।"अब्धेब्धिभाङ्गजकृत्तुरगोऽद्रिपक्षा" (२५६८८६८५ -) कक्षां स्वस्वनि गणका भगणस्य चेमाम्। "अत्र रविकक्षातो भक्षा यद्दि गुणा, एवं भकक्षाया यच्छेषं तत्रैवकक्षा" प्रभि० "कल्पोद्भवैः खितिदिनैर्गगनस्य कक्षा भक्षा भवेद्दिनगतिर्गगनेचरस्य। "पादोनगोऽब्ध्यृतिभूमितयोजनानि (११-८५८४० । खेटा व्रजन्त्यनुदिनं निजवर्त्मनीमे" सि०शि० "यदि कुदिनैर्नक्षत्रमितयोजनानि गच्छन्ति तदैकेन किमिति फल दिनगतियोजनानि। तानि च स्युत्वेन तावत् पादोनगोऽब्ध्यृतिभूमितानि स्युः" प्रभि०। अश्वानयनमाह। "अर्कर्क्षात् कृत्तिकावाद्यन्तिकात् (६६२१) नवेन्दुवेदेषुकृताग्र (२५४१६) लक्ष्मा। अर्कर्क्षहीनो गोऽब्ध्यृतीन्दु (११ ८५६) निघ्नो विवर्जितः स्वर्गतयोजनानि" खखाखया तानि पृथक् च कक्षया हृतानि वा स्वर्भगणादिकाग्रहाः" सि० शि०। "अर्कर्क्षे भूनेत्रनवनन्द ६६२१ गुणे नवाग्नियुतिवाणाग्निभि· ३५४११ भक्ते यल्लब्धं तेन विवर्जितः कार्य्य। कः ? नन्देन्द्रियघृतीन्दु ११८ गुणोऽर्कर्क्षगणः। एवं गतयोजनानि स्युः तेभ्यः पृथक् पृथक् खया खया कक्षया भाजितेभ्यो भगणादिका यच्छेषाभ्यस्ते अत्रोपपत्तिः। टिनगतियोजनैरर्कर्क्षे गतयोजनानि लभ्यन्ते इति त्रैराशिकम्। अत्र सुखार्थं गोऽब्ध्यृतीन्दुभिः११८५६ संपूर्णैरर्कर्क्षगणो गुणितः। सोऽधिको जातः। यदधिकं तच्छोध्यम्। तस्याधिकस्य ज्ञानार्थमुपायः। परमोऽर्कर्क्षगणः कुदिनतुल्यः। तेन गुणकेन गुण्यः। एवं गोऽब्ध्यृतीन्दुनिघ्नः स्वन खकक्षातोऽधिको भवति। तस्मात् खकक्षां विशोध्य शेषेणानुपातः। यदि कुदिनतुल्येनार्कर्क्षगणेनैतावदधिकं भवति तदिष्टेनार्कर्क्षगणेन किमिति। अत्र कुदिनानां तस्य शेषस्य च पञ्चपञ्चद्युगवेदैरपवर्तिते ४३५ ५०००रपवर्तिते सति शेषस्थाने कृत्तिकावाद्या उत्तमाः कुदिनस्थाने नन्देन्दुवेदेषुकृताग्राः। एव त्रैराशिकेन यल्लभ्यते तेन स्वल्पगतिगुणितेऽर्कर्क्षे वर्जिते गतयोजनानि भवन्ति। सर्वेषां अश्वानां तान्येव गतेस्तुल्यत्वात्। अथ अश्वार्थमनुपातः। यदि कक्षातुल्येनार्क-

तयोर्जन्मरेको भगणस्तदैभिः किमिति फलं गतभगणाद्याः सर्वे यहा भवन्तीत्युपपन्नम्" प्रमिता०। "यहस्य कर्णैव हि तत्क्रमातयोः पृथक् च कल्पात्तदोयसिद्धये। अर्कस्य कर्णैव सितत्वयोः सा ज्ञेया तयोरानयनार्थमेव। उक्ते तयोर्ये चलकर्णके तत्रैव तौ च भ्रमतोऽर्कगत्या" सि० शि०"अतोऽस्य पातस्य च या कला गच्छति सा तयोरानयनार्थमेव कल्पिता। अन्यथा या यहस्य कला सैव तयोरपि। यतो यहकलायाः उन्नतप्रदेशस्योन्नत्यपदेशः। यत्र च विम्बखण्डेन यह संपातस्य प्रदेशस्य पातसंज्ञेति गोले सम्यक् प्रतिपादितमस्ति। तथा बुधशुक्रयोरत्र ये अर्ककलातुल्ये कर्णे आगच्छतस्ते तयोरानयनार्थमेव। किन्तु तयोर्ये चलकर्णे तत्रैव तौ च भ्रमतः परमर्कगत्या। एतदुक्तं भवति भूमध्यादर्कं प्रति नीतं सूत्रं यत्र चलकलायां लगति तत्र बुधो यत्र शुक्रश्च चलकलायां लगति तत्र शुक्रो भ्रमतीत्यर्थः" प्रमि०।

अत्र गगनकला च कल्पार्केगणः। यथाहार्य्यभट्टः। "योयत्र भ्रमति खगस्तदृक्तं भवति तस्य कलाख्यम्। अम्बरकला कल्पार्केगणनाभा भवेद्युगतिः"। स्वस्वकलायां स्थितानामपि यहाणां नीचोच्चस्थानस्थितिवशतः परिधिभेदादिकं भवतीति यहयुद्धे वक्ष्यते। अत्र बुधशुक्रकलयोः रविकलातुल्यत्वं यदुक्तं तन्मध्यकलया फलानयनार्थम्। श्रीपतिना तु यहाणां कलामिधिरुक्ता यथा।"अष्टाहतखनुगजाः (८।१४६८।६) क्षितिनन्दनस्य, तक्षे शदस्रतखेन्दुमिताश्च (१०४२११।) जैवी। रूपाग्निनाग युगशैलगुणेन्दुबाणाः (५।१२७४८२।) खाम्बुत्रिसागर रसोत्तमतयः (२६६४६२०) सितस्य। भूधराहिनगनागरसर्त्तुखाधरार्त्तिशयिनः (१२७६६८७८७) शनिकक्षा। एतच्च खगोलयन्त्रे विस्तरेण वक्ष्यते।

इन्दुश्च जलमयः सूर्यसम्पर्कात् उज्ज्वलितो भवति तेन च दिने दिने यथा यथा शुक्ले पक्षे रविवियोगभेदात्तेजः सम्पर्कविशेषस्तथा तथा वर्द्धते क्षीणे तु रविमण्डलसन्निकृष्टतया क्रमशो दिने दिने तत्तेजः सम्पर्कविशेषाभावस्तेन क्रमेण दिने दिने ह्रस्व इत्यादिकमभ्युक्तं सि० शि०। "तरणिकिरणसङ्गादेष पीयूषपिण्डो दिनकरदिशि चन्द्रश्चन्द्रिकाभिश्चकास्ति। तदितरदिशि बालाकुन्तलश्यामलश्री घंट इव निजमूर्त्तिच्छायया तातपस्यः। सूर्य्यादधःस्थस्य विधोरधःस्थमर्धं कृष्णं सूत्रं खकलाऽसितं स्यात्। दर्शेऽथ भार्धान्तरितस्य शुक्लं तत् पौर्णमास्यां परिवर्त्तनेन। कलाचतुर्थे तरणेर्हि चन्द्रः कर्णान्तरे तिर्यगितो यतोऽतः। पादोनषट्कात् (८५।४५) खलान्तरेऽतो दृक्कर्णस्य दृक्क्रमं शुक्लम्। उपर्यधस्तिष्ठति यौक्त्या मिन्दोरुच्चजतूर्णं व्रजतश्च मेचकत्वम्। जलमयजलजस्य गोलकत्वात् प्रभवति तोक्ष्णविषाणरूपताश्च। यद्याब्धोदक् तपनयमिनोरन्तरे सोऽच बाहुः कोटिस्तूर्ध्वाधरमपि तयोर्यश्च तिर्यक्स कर्णः। दोर्मूलेऽर्कैः यमिहदिशि भुजोऽन्याङ्ग कोटिस्तदग्रे चन्द्रः कर्णो रविदिगनया दीयते तेन यौक्त्याम्"।

"प्राग्वद्भिन्ने दक्षिणपार्श्वे चन्द्रकलां रविकलां च विलिख्य ततोर्ध्वरेखां तिर्यग्रेखां च कृत्वा चन्द्रकलोर्ध्वरेखासंपाते चन्द्रबिम्बं विलिख्येदं दर्शयेत्। तिर्यग्रेखाया उपरि चन्द्रकलाव्यासार्धमितेऽन्तरेऽन्यां तिर्यग्रेखां कुर्यात्। सा रेखा प्रत्यग्विकलायां यत्र लग्ना तत्र स्थित एवार्कै ऊर्ध्वरेखावच्छिन्नचन्द्रबिम्बार्धं पश्चिमतः शुक्लं भवति। तस्यार्धमधस्तनं मनुष्यक्षेत्रम्। तत्रस्थेऽर्के व्यर्केन्दुसपादचतुर्भागोने(८५।४५)राशितुल्यं भवति। एतावत्येव व्यर्केन्दुभुजे बिम्बार्धं पश्चिमं पूर्वं वा शुक्लं भवितुमर्हति प्रमि०"धात्रा धामनिधेरयं जलमयो धत्ते सुधादीधितिः सद्यःक्षत्तृषालक्तन्दिवियद्विकायां विस्खलिद्दिधि। कृत्स्नं घर्मघृणेः करैर्घटदवान्यस्मिन् विभागे पुनर्बालाकुन्तलकालतां कलयति स्वच्छां तनोम्कायया" श्रीपतिः। "भानुस्थेत् प्रतिबिम्बितो जलमये शीतांशुगोले दिवा निर्लेजा निशि सुप्रभः क्षयमयो किं सूर्यबिम्बासमः। गोलार्धं रविगोऽच्छलं च सकलं न स्यात् तडागे यथा मासार्धेऽखिलदृश्यतेति गणकान् ज्ञानाङ्कुरः पृच्छति" ज्ञानराजः।

इन्दु० सं० यौक्त्यादि प्रकारादि प्रदर्श्य तच्छारादिफलमुक्तं यथा"नित्यमधःस्थस्येन्दोर्भाभिर्भागोः सितं भवत्यङ्गम्। स्वच्छायया न्यदसितं कृष्णस्येवातपस्थस्य। सलिलमये यमिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम्। क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्थान्तः। त्यजतो ऽर्कलं यमिनः प्रभादलक्ष्यते यथा यौक्त्याम्। दिनकरवशात्तथेन्दोः प्रकाशते ऽधःप्रभूत्युदयः। प्रतिदिवसमेवमर्कात् स्थानविशेषेण यौक्त्यपरिवृद्धिः। भवति यमिनोऽपरार्द्धे पश्चाद्भागे घटवेव। ऐन्द्रस्य शीतकिरणो मूलाषाढाद्वयस्य वा यातः। बाध्येन, बीजजलचरकाननहा वह्निभयदश्च। दक्षिणपार्श्वेन गतः श्रवी विशाखानुराधयोः पापः। मध्येन तु प्रशस्तः पित्रस्य विशाखयोश्चापि। अङ्गागतानि यौष्णाद् हृदय रौद्राच्च मध्ययोगोत्थि। ज्ञात्वाद्यानि

नवर्क्षाण्यङ्कुपतिमातीत्य युध्यन्ते । उच्चतमोच्चकृत् नौसंस्थाना विशालता चोक्ता । नाविकपीडा तस्मिन् भवति शिवं सर्वलोकस्य । अर्धोक्षते च लाङ्गलमिति पीडा तदुपजीविनां तस्मिन् । प्रीतिश्च निर्निमित्तं मनुजपतीनां सुखितं च । दक्षिणविषाणमर्धोक्षतं यदा दृश्यलाङ्गलाख्यं तत् । पाखण्डनरेश्वरनिधनक्षुद्रोपद्रवकरं बलानां च । समयधियि सुखितश्चेन्महत्यः प्रथमद्विपसङ्घटया: स्युः । दण्डवदुदिते पीडा गवां रूपसोपदण्डो ऽस्त । कार्मुकरूपे युद्धानि यत्र तु ऊर्ध्वा ततो जयस्तेषाम् । स्थानं युगमिति वाच्योत्तरायतं भूमिकम्पाय । युगमेव वाच्यकोष्ठां किञ्चिन्नुन्नं च पर्ज्यायाति । विनिम्नन्ति सार्धवाक्यान् दृष्टेश्च विनिपातं कुर्यात् । अभ्युच्छ्रायादेकं यदि शशिनोऽवाङ्मुखं भवेच्छृङ्गम् । आवर्जितमिव सुखितकारि तद्बोधनस्यापि । अभ्युन्निद्धा रेखा समन्ततो मण्डला च कुण्डाख्यम् । अस्निग्धाश्वलिकानां स्थानत्यागो नरपतीनाम् । प्रोक्तस्थानाभावादुदयुङ्नः सङ्घट्टिद्वट्टिकरः । दक्षिणतश्चन्द्रो दुर्भिक्षभयाय निर्दिष्टः । शृङ्गेणैकेनेन्दुं विलीनमध्याश्रयाभ्युत्थम् शृङ्गम् । सम्पूर्णं चाभिनवं दृष्ट्वो लोकितारुयं पश्येत् । संस्थानविधिः कथितो रूपाख्यश्चन्द्रमसः । खलोदुर्भिक्षकरो मङ्गानुसुखितावहः प्रोक्तः । मध्यतनुर्वज्राख्यः क्षुद्भयदः सस्यनाश राज्ञां च । भन्द्रो वृत्तकरूपः क्षेमसुखितावहो भवति । श्येतो विद्याख्यमूर्तिर्नरपतिवक्षोविवृद्धये चन्द्रः । स्यूलः सुखितकारी प्रियधान्यकरस्तु तनुमूर्तिः । प्रत्यन्तान् कुरुपांश्च हन्त्युडुपतिः शृङ्गे कुजेनाहते, यद्यस्तुङ्नयजह्यमेन, यशिजेनादृष्टिदुर्भिक्षकृत् ! श्वेतान् क्षत्रियरूपान्महेन्द्रगुरुवा, शुक्रेण चाप्यायनान्, शुक्ले वाच्यमिदं फलं शशिकृतं क्षेमे यथोक्तागमम्। भिन्नः सितेन मगधान् यवनान् पुलिन्दान् नेपालभद्रिमरुकच्छसुराष्ट्रमद्रान् । पाखण्डकैवयकुलूतकपूरुवादान् हन्यादुशीनरजनानपि सप्त मासान् । गान्धारसौवीरकसिन्धुकोरान् धान्वानि यैलान्द्रविड़ाधिपांश्च ।द्विजांश्च मासान्दश शोतरश्मिः सन्तापवेद्दाक्षुपतिना विभिन्नः । उद्युक्तान् सह वाहनैर्नरपतींश्चैगर्तकान्मालवान् कौलिन्दान् गणपुङ्गवानथ शिबीनायोधकान् पार्थिवान् । हन्यात् कौरवमत्स्यगुप्तमधिपतीन् राजन्यसङ्घानपि प्राचेयांशुरुदग्व्यक्षे तनुगते वयसामयादवा । यौधेयान् सचिवान् सकौरवान् प्रानीयानथ चार्जुनायनान् । हन्यादर्कजभिन्नशृङ्गजः शीतांशुर्दयमाक्षपीडवा । मगधान्धरां च पीडवेद् वरणावास्य तटं यथाङ्गजः।अपरत्र ऋतं युगं वदेद् यदि भित्त्वा यशिनं विनिर्गतः । ज्ञेआरोऽभ्युभिन्नविनाशी शीतांशुः शिखिना यदि भिन्नः । कुर्यादायुधजोविविनाशं चौराणामधिकेन च पीड़ाम् । उक्तवया वदा यशी यत्र एव हन्यते । हन्यते तदा रूपो यस्य जन्मनि स्थितः । भञ्जनिभः पुरुषो ऽस्यमूर्तिः शीतकरः किरणैः परिक्षीणः। म्लानतनुः स्फुटितः स्फुरणो वा क्षुत्समराजयचौरभयाय । प्रालेयकुन्दस्फटिकावदातो वज्रादिशाङ्गिसुतया परिवृत्तश्च चन्द्रः। उच्चःक्रतो गिरि भविष्यति मे शिवाय योद्यते स भविता जगतः शिवाय । यदि कुमुदकुवलयहारगौरस्तिथिनियमात् जयमेति वर्धते वा । अविक्षतगतिमण्डलांशुयोगी भवति ऋणां विजयाय शीतरश्मिः । शुक्ले पक्षे सम्प्रदृष्टे प्रदृष्टिं मण्डलं यातिदृढं प्रजाय । क्षीणे क्षानिस्तुल्यता तुल्यतायां क्षणे सर्वं तत्फलं न्यायेन" । "भूमध्यात् चन्द्रादेरुच्छ्रितियोजनमपि" सि०शि० उक्तं यथा"नगनगाग्निनवाष्टरसा(६८६३७७) रवेः रसरन्ध्रेषु महीभुमिता ५१५६६ विधोः । निगदितावनिमध्यत उच्छ्रितिः स्फुटितिरियं किल योजनसंख्यया"।"अक्षोपपत्तिः कक्षाध्याये चन्द्रार्कयोः कक्षे कथिते किन्तु व्यासौ नोक्तौ तौ त्रैराशिकेनानेयौ । यदि भगन्द्राग्निमित १६२७ परिधेः अक्षाक्षजुर्व्यासितोरे२५०व्यासः (नीलाक्षजुदिशा आनीतः तदा) ४२२१४६७ । ३० मितायाः क्रान्त्यंशकलयाः, १२४०००मितचन्द्रक्रान्त्या वा कीदृश इत्यनुपातेन व्यास आनेयः तदर्द्धमेव स्फुटिः। इयमेव भूमध्यात् चन्द्रार्कयोः उच्छ्रितिः प्रमि०" इयं मध्यस्फुटिः, उच्चनीचकोरन्ध्रैव यथा "मन्दस्फुटिर्दृक् स्फुटिवत् प्रसाध्या" सि० शि० उच्चनीचवृत्तपरिधिना उच्छ्रितिः साध्या त्रैराशिकेनानेया" प्रमि० युक्तमेतदस्माभिः स्वस्वकक्षाया स्वस्वादिस्थानविशेषाऽस्ति तत्रोच्चस्थानस्थितौ परिधेरधिकं नीचस्थाने तु न्यूनता मध्ये मध्यता इति तदनुसारेण परिधेर्वक्षत्वात् उच्छ्रितेर्वक्षत्वमिति । एवमन्येषां यक्षाणामपि स्वस्वकक्षाभिरनुपातेन व्यासमानीय तदर्द्धं मध्य स्फुटिरित्याद्यायत्तम्य । अनेदं सूक्ष्ममीक्षणीयम् यत्र भूमध्यादिति भूमिव्यासार्द्धमध्यादित्येवार्थकं न तु भूपृष्ठमध्यत इत्यर्थकम् । तथा च भूव्यासार्द्धस्य तत्तदुच्छ्रितेर्वर्जने भूपृष्ठादुच्छ्रितिर्भवति भूपृष्ठात्तु उच्चः उच्चायोः नैव युक्तते यक्षाणां कक्षाधरपरिधेर्व्यासार्द्धस्य भूगोलार्द्धक्रान्तत्वेन तदर्द्धपर्व्यन्तमेव तद्भूव्यासार्द्धत्वोचितत्वादिति

एवं सौरागमादिभिः चन्द्रमण्डलस्य सूर्यमण्डलाधः स्थायित्वे सिद्धे" भाग० पृक्ष०। "एवं चन्द्रमा अर्कगमस्थिभ्य उपरिष्टात् लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं, पञ्चाभ्यां मासभुक्तिं, सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमुपचारो द्रुततरगमनोभुङ्क्ते अथापूर्य्यमाणाभिरपक्षीयमाणाभिश्च कलाभिः पितॄणामहोरात्राणि पूर्व्वापरपक्षाभ्यां वितनन् सर्व्वजीवनिवहप्राणो जीवस्य एकमेकं नक्षत्रं त्रिंशता मुहूर्त्तैर्भुङ्क्ते य एष षोड्शकलः पुरुषो भगवान्सोमयोऽमृतमयोदेवपितृमनुष्यपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात् सर्व्वमय इति वर्णयन्ति"। अत्र अर्कगमस्थिभ्य इत्यत्र हेतौ पञ्चमी अन्वयव्यतिरेकाभ्यां उपलभ्यमान इत्यत्र। यथा च सूर्यकिरणैरेव चन्द्रसोपलभ्यिश्च प्रागुक्तवचनैः समर्थितम्। न तु अपादाने पञ्चमी उपरिष्टात् इत्यत्रान्वयिनी। तथात्वे सौरागमविरोधः स्यात्। उपरिष्टात् इत्यत्र भूमेरित्यध्याहार्य्यं लक्षयोजनमिति बहुयोजनपरमिति न काचिदनुपपत्तिः। एवमन्यान्यपि सौराधिकवचनानि व्याख्यातव्यानि। चन्द्रपक्षद्वयेन यथा पित्र्यादिनस्य सम्पादनं तदप्युक्तम्" सि० शि०। "विधुर्भागे पितरो वसन्तः स्वधासुधादोधितिमामनन्ति। पश्यन्ति तेऽर्कं निजमण्डलोर्द्ध्वं यतोऽस्मात् दृदृक्षं तदेषाम्। भार्द्धान्तत्वात्र विधोरधःस्थं तत्कस्मिन्नोधः खलु पौर्णमास्याम्। लक्ष्ये रविः पञ्चदशेऽभ्युदेति शुक्लेऽखमेत्यर्धत एव सिद्धम्" अतोधःस्थत्वमर्कस्य पित्र्यापेक्षया बोध्यम् तद्विषयमेव वा सौराधिकं सूर्य्यस्याधःस्थत्ववचनमिति न किञ्चिदनुपपन्नम्"। चन्द्रस्याधःस्थितत्वं च यथा तिथ्यादिसम्भवः तथोक्तम् कालमाधवीये "अर्कांशैनिःसृतः प्राचीं वहन्यात्यरुरुः शशीति" वक्ष्यमाणव्याख्याने।

"अयमर्थः अधः प्रदेशवर्त्ती शीघ्रगामी चन्द्रः ऊर्द्ध्वप्रदेशवर्त्ती अशीघ्रगामी सूर्य्यः। तथा सति तयोर्गतिविशेष यथार्हं चन्द्रमण्डलमन्यूनमनतिरिक्तं सत् सूर्य्यमण्डलाधो भागे व्यवस्थितं भवति तदा सूर्य्यरश्मिभिः बाहुल्येनाभिभूतत्वाच्चन्द्रमण्डलशोदपि न दृश्यते। उपरितने दिने शीघ्रगत्या प्राचीं याति रात्रेर्ह्रदिभिर्भः सूर्य्यश्चोर्द्ध्वं गच्छति। तदा चन्द्रस्य पञ्चदशसु भागेषु प्रथम भागोदर्शनयोग्योभवति। सोऽयं भागः प्रथमकलेत्यभिधीयते तत्कालनिष्पत्तिपरिमितकालः प्रतिपत्तिथिर्भवति इयं द्वितीयादितिथिव्यवस्थानव्यपेति"। तदेतद्विष्णुधर्म्मोत्तरे विस्पष्टमभिहितम्"चन्द्रार्कगत्या कालस्य परिच्छेदे यदा भवेत्। तदा तयोः प्रवक्ष्यामि गतिमाश्रित्य निर्णयम्। भगणेन समप्येत क्षेया द्वादश राशयः। त्रिंशांशश्च तथा राशेर्भाग इत्यभिधीयते। आदित्याद्विप्रकृष्टस्तु भाग-द्वादशकं यदा। चन्द्रमाःस्यात्तदा राम! तिथिरित्यभिधीयते" "सेयं द्वादशभिर्भागैः सूर्य्यसङ्क्रान्तवतो प्रथमा चन्द्रकला ग्रहकक्षयोपेतसूक्ष्मरेखाकारा शौक्ल्यमोषदुपयाति उत्तरोत्तरदिनेषु सूर्य्यमण्डलविप्रकर्षात् तारतम्यात् सारेण शौक्ल्यमुपचीयते। अनयैव रीत्या सन्निकर्षतारतम्येन मेचकत्वमुपचीयते तदेतदुक्तम्" सि० शि०। उपचयस्तुपयाति शौक्ल्यमिन्दोरित्यादि।१२१पृष्ठे उक्तम्। सूर्य्याचन्द्रमसोर्यैः सन्निकर्षविप्रकर्षौ तयोरवसानन्दर्शपूर्णिमयोः संपद्यते तदाह गोभिलः। "यः परोविप्रकर्षः सूर्य्याचन्द्रमसोः सा पूर्णमासी यः परः सन्निकर्षः सामावास्येति" नन्वत्र चन्द्रकलानां सूर्य्ये प्रवेशनिर्गमौ प्रतीयेते सोमोत्पत्तौ ८२४पृ० तु वक्ष्यादिदेवतासु। नायन्दोषः। अक्षदादिदर्शनापेक्षया ज्योतिःशास्त्रस्य प्रवृत्तत्वात् सोमोत्पत्तौ तु वक्ष्यादिदेवतानान्तत्कालप्रयुक्ता तत्प्रविवक्षिता तत्र यदि सूर्य्ये प्रवेशनिर्गमौ यदि वा वक्ष्यादिदेवतादिषु सर्व्वत्रापि कलाप्रयुक्ता एव प्रतिपदादितिथयः" कालमाधवीयाः कलानुसारेणैव स्वस्वकलास्थराश्यादिमानम् तथा च स्वल्पकलायां स्थितस्य राश्यंशकलादिकं स्वल्पं महत्यां स्थितस्य महत् यतोऽल्पमार्यभट्टेन।"यद्या सूर्य्याद्दानां प्रपूरयन्ति यद्या भपरिचारम्। दिव्येन भपरिधिं सर्वं भ्रमनः स्वकलासु। भगणकलल्पमधस्तात् कालेनाल्पेन पूरयति चन्द्रः। उपरिष्टात् सर्व्वेषां महच्च महता भगणेनापि। अल्पे हि भगणेऽल्पोमहति महान्तस्य राशयोऽल्पेषां। अंशाः कलाश्चैवं विभागतल्याः स्वल्पेषु। भागाभधःभगणेश्वर गुरुशौभार्कभृगुबुधचन्द्राः। एषामधस्त भूमिर्मध्यीभूता च मध्यस्था"। तेन यद्यां प्रागुक्तस्वकलां द्वादशभिर्भक्तां राशिप्रभाक्षयोजनानि। ते च पुनस्त्रिंशद्भक्ता अयमानयोजनानि। ते यद्या भक्ता कलाभितयोजनानि एव यद्याभागे विकलादियोजनानि। अधिकं भास्करे द्रष्टव्यं तत्। एतन्मण्डलाधिकारे चन्द्रोत्पत्तिरत्रिजातयन्त्रे ११११पृष्ठे उक्ता।

चन्द्रक पु० चन्द्रइव शुभत्वात् कन्। अश्वनखरोगे। राजनि०

चन्द्रकला स्त्री इत०। चन्द्रस्य राशिचक्रस्थे परिधौ तत्प्रमाणभिन्नेषु चन्द्रे ८२१ पृ० उक्तम्।

इन्दुकमल न० इन्दुरिव शुभ्रं कमलम्। श्वेतोत्पले राजनि०
इन्दुकला स्त्री ऐत०। चन्द्रस्य षोडशभागैकभागे। कलाश्च षोडश। अमावस्ये १२० पृष्ठे दर्शितालाभ्य ज्ञापयते क्रमेण वसुप्रादिभिः पीयन्ते अतोऽत्र कालमा० सोमोत्पत्तिवाक्यम् "प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः। विश्वे देवास्तृतीयां तु चतुर्थीं वल्लिकाधिपः। पञ्चमीं तु षडट्कारः षष्ठीं पिबति वासवः। सप्तमीञ्चयोदिश्या अष्टमीमजएकपात्। नवमीं ज्ञापयत्यज यमः प्राश्नाति वै कलाम्। दशमीं पिबते वायुः पिबत्येकादशीं सुमा। द्वादशीं पितरःसर्वे समं प्राश्नन्ति भागशः। त्रयोदशीं धनाध्यक्षः कुबेरः पिबते कलाम्। चतुर्दशीं पशुपतिः पशूदशीं प्रजापतिः। निष्पीतः कलया षोडश्चन्द्रमा न प्रकाशते। कला षोडशिका वा सा स्वयं प्रविशते सदा। अमायां तु सदा सोमस्त्वोषधीः प्रतिपद्यते। तमोषधिगतं गावः पिबन्त्यनुगतं च यत्। तत्क्षीरमक्षतं भूत्वा ब्रह्मभूतं द्विजातिभिः। हुतमग्निषु यज्ञेषु पुनराप्यायते शशी। दिने दिने कलावृद्धिः पौर्णमास्यान्तु पूर्यते" इति। "पुनश्च ताः पीताः कलारूपेण क्रमेण वह्न्यादिदेवताभ्यो निर्गत्य चन्द्रमण्डलं पूरयन्तीति" माधवः। यथा च कलापानसम्भवस्तथा इन्दुशब्दे दर्शितेन ८३३ पृ० कालमा० वाक्येनसमर्थितम्। तासांकलानां यद्यपि तिथिविशेषरूपता तथापि नामान्तराणि शारदा० उपासनार्थसङ्ख्यानि यथा। "अमृता मानदा पूषा तुष्टिः पुष्टिरतिर्धृतिः। शशिनश्चन्द्रिका कान्तिः ज्योत्स्ना श्रीः प्रीतिरङ्गदा। पूर्णा पूर्णामृताङ्गा च कामदा खरजाः कलाः"। तथा च षोडशभ्यः स्वरेभ्य आसाप्तपक्षिरपि ध्येयाः" "यतस्मिन्कलाक्षये" श्रुतिः।
इन्दुकलिका स्त्री इन्दुरिव शुभ्रा कलिका यस्याः। १केतकाम्। ईत० स्वार्थे कन्। २चन्द्रकलायाम्।
इन्दुकान्त पु० इन्दुःकान्तइव निष्यन्दकारित्वात् प्रियोऽत्र। १चन्द्रकान्ते मणौ इन्दुःकान्तः पतिःस्वोदयेन कारकत्वादीयो यस्याः। २रात्रौ। इन्दुःकान्तइव प्रकाशकत्वात् यस्याः। ३केतक्याम्। ६त०। ४चन्द्रप्रियायाञ्च स्त्री।
इन्दुक्षय पु०। इन्दुःक्षीयतेऽत्र लि—आधारे अच् ऐत०। १दर्शे तत्र हि इन्दोः कलानां क्षयं किरणाक्षयात् क्षयइव भवतीति इन्दुकलाशब्दे दर्शितम् "यतस्मिन्दु लये पुण्यं चक्रुस्तु दिनक्षये" भट्ट०त०पु०। भावेघञ्। २चन्द्रस्य क्षये।
इन्दुज पु० इन्दोर्जायते जन—ड। बुधग्रहे तत्पतिभार्य्यातारागर्भे चन्द्रेणोत्पादिते बुधे तदुत्पत्तिकथा हरिवं० २६ अ० सोमस्य राजसूययज्ञकरणानन्तरमैश्वर्येण मत्तस्य पतिभ्रात्तिरूपवर्णं "बृहस्पतेः स वै भार्य्यां तारां नाम यशस्विनीम्। जहार तरसा सर्वानवमत्याङ्गिरःसुतान्" इत्यनुक्रम्य ऋचोर्यां तत्र युद्धं वर्णयित्वा तत्र युद्धोपद्रवेण उपद्रुतदेवैः प्रार्थितेन ब्रह्मणा यत् कृतं तदुक्तं तत्रैव "ततोनिवार्य्यौशनसं तं वै रुद्रं भयङ्करम्। ददावङ्गिरसे तारां स्वयमेव पितामहः। तामन्तःप्रसवां दृष्ट्वा तारामाह बृहस्पतिः। मदीयायां न ते योनौ गर्भो धार्य्यः कथञ्चन। योनेरुद्वहतस्तं वै कुमारं दस्युहन्तमम्। इत्युक्तास्तत्समासाद्य ज्वलन्तमिव पावकम्। जातमात्रः स भगवान् देवानामभिपद्यत। ततः संशयमापन्नास्तारामूचुः सुरोत्तमाः। सत्यं ब्रूहि सुतः कस्य सोमस्याथ बृहस्पतेः। पृच्छ्यमाना यदा देवैर्नाह सा साध्वसाधु वा। तदा तां भगवान्रुद्रः कुमारोदस्युहन्तमः। तं निशार्य्य ततो ब्रह्मा तारां प्रपच्छ संशयम्। यदत्र तथ्यं तद्ब्रूहि तारे! कस्य सुतोऽयम्। सा प्राञ्जलिरुवाचेदं ब्रह्मणं वरदं मुनेः। सोमस्येति महात्मानं कुमारं दस्युहन्तमम्। तं मूर्ध्न्युपाघ्राय तदा सोमोधाता प्रजापतिः। बुध इत्यकरोन्नाम तस्य पुत्रस्य धीमतः"। अस्यैव पुरूरवःप्राप्तिः काशी० वर्णिता यथा "हरिवंशतः बुधस्योत्पत्तिं वर्णयित्वा। "ततः सर्व्वेभ्योदेवेभ्यस्तेजोरूपमधिकः। बुधः सोमं समासृज्य तपसे धृत निश्चयः। जगाम काशीं निर्वाणराशिं विश्वेशपालिताम्। ततो लिङ्गं प्रतिष्ठाप्य स्वनाम्ना स बुधेश्वरम्। तपश्चचार चात्युग्रं संशीलयन् हृदि"। इति तत्रैवोक्तितम् तत्तपसा तोषितस्तं महादेवस्तस्मै वरूपेण गगनेस्थित रूपं वरं ददौ" यथा "ततः प्राह भवेयानक्षत्रस्तुत्या परितोषितः। रौहिणेय! महाभाग्य! सौम्य! सौम्यबोधिने:। नक्षत्रलोकादुपरि तव लोको भविष्यति। मध्ये सर्व्वग्रहाणाञ्च सपर्य्यां लप्स्यसे पराम्" राशिचक्रे तत्स्थानञ्च ब्रह्मवै० "मन्दारेज्यभृगूत्तरस्यां शुक्रेन्दुजेन्दवः। परिभ्रमन्त्यधोऽधःस्थाः सिद्धविद्याधरावनाः" इत्यनेन चन्द्रस्थानादुपरि शुक्रात्पाधः प्रदेशे उक्तम्। तत्कक्षामानञ्च। इन्दुशब्दे पृ० ८१३ श्रीपतिवाक्ये उक्तम् तस्य चारप्रकारः बृहत्संहितायां दर्शिता यथा।

"नोत्पातपरित्यक्तः कदाचिदपि चन्द्रजो व्रजत्युदयम्। जलदहनपवनभयक्षान्यार्क्षक्षयविद्युतं वा। विचरन्क्षुब्ध-

धनिष्ठाप्राजापत्येन्दुविश्वदेवानि । ब्रह्मन् द्विजरतनयः करोत्यदृष्टिं सरोगभवाम् । रौद्रादीनि नवाऽन्यु पात्रिते चन्द्रजे प्रजापीड़ा । यस्त्रनिपातक्षुद्भयरोगानावृष्टिसन्तापैः । हस्तादीनि विचरन् षड्नक्षत्र्युपरोधयन् गवामशुभः । क्षेत्ररसार्घविवृद्धिं करोति चोर्वीं प्रभूतशस्याम् । आर्यमणं कौशभुजं भाद्रपदाश्वत्तरा यमेयं च । चन्द्रस्य सुतो निघृन् प्राणभृतां घातसङ्क्षयकृत् । आश्विनयारुणमूलान्यु पक्षद्वन् दैवतौ च चन्द्रसुतः । पश्यभिवन्नौजोविक्लवक्लिन्नजतरगोपघातकरः । पूर्वाद्यृक्षत्रितयादेकमपीन्दोः सुतोऽभिवृद्धौ वात् । क्षुच्छ्वसतस्त्रारामयभयप्रदायी चरन् जगतः । प्राकृतविभिश्रसङ्क्षिप्तयोगान्तघोरपापाख्याः । सप्त परावरतन्त्रे नक्षत्रैः कीर्तिता गतयः । प्राकृतसंज्ञा वायव्यवाय्यपैतामहानि वरुणस्य । मिश्रा गतिः प्रदिष्टा यमाग्निपित्र्यभगदैवानि । सङ्क्षिप्तायां पुष्य पुनर्वसु फल्गुनीद्वयं चेति । तीक्ष्णायां भाद्रपदाद्वयं यमाक्राग्न्ययुक्त पौष्णम् । योगान्तिकेति मूलं हे चाषाढे गतिः सुतस्येन्दोः । घोरा श्रवणस्वाद्वं वसुदैवं वारुणं चैव । पापाख्या सार्पित्रं मैत्रं यमाग्निदैवतं चेति । उदयप्रवासदिवसैः स एव गतिलक्षणं प्राह । चत्वारिंशच्चिद्रहं द्विसप्ततेना विंशतिर्द्विनवकं च । नव मासार्धं दश चैकसंयुताः प्राकृतादानाम् । प्राकृतगत्यामारोग्यवृष्टिसस्यप्रदुद्भवः क्षेमम् । सङ्क्षिप्तभिश्रयोर्भिश्रमेतदन्यासु विपरीतम् । ऋक्ष्यर्तिवक्रा वक्रा विकला च मतेन देवलस्यैताः । पञ्चचतुर्द्व्येकाहा ऋक्ष्यादीनां षड्भ्यस्ताः । ऋक्षी क्षिता प्रजानामतिवक्रार्थं गतिर्विनाशयति । यस्त्रभयदा च वक्रा विकला भयरोगसङ्क्षमनी । पौषाषाढाश्वयुजीशाखेन्दुजः समाधेषु । दृष्टो भयाय जगतः शुभकृच्छुक्रत् प्रोदितस्तेषु । कार्त्तिके ज्येष्ठयुजि वा यदि मासे कृष्णते तनुभवः शिशिरांशोः । यस्त्रचौरकृतभूमृद्दतोयक्षुद्भयानि च तदा विदधाति । कृत्तानि सौम्ये ज्वलिते पुराणि याम्यृक्षते तान्युपयान्ति लोपम् । अन्येतु पद्मादुदिते वदन्ति लाभः पुराणां भवतीति तज्ज्ञाः । क्षेमकालिरथ वा शुक्रवर्णः सस्यकेन सदृशो वा । स्निग्धमूर्तिरसुचु स्थिताय व्ययाय न शुभश्चक्षिपुलः" । गगने बुधस्थानसंज्ञं भा० ५ स्क० । "ततो बुधः सोमसुत उच्चस्थानत उपरिष्टात् प्रायेण शुक्रवत् । यदाकाशं व्यतिरिच्येत तदातिभयप्रायानावृष्ट्यादिभयमाशंसते" । इन्दुजातेन्दुनन्दनेन्दुपुत्रादयोऽत्र । २नर्मदायां नद्यां स्त्री सा च मेकलकन्यका सोमसुता सुनियापात् नदीत्यमाप्ता । दूर्वं च प्रतीच्यामवन्तिषु स्थिता प्रत्यक्स्रोतोवहा च यथा । "अवन्तिषु प्रतीच्यां वै कीर्त्तिष्यामि ते दिशि । यानि तत्र पवित्राणि पुण्यान्यायतनानि च । प्रियङ्गुखाण्डवोपेता वासीरफलशालिनी । प्रत्यक्स्रोता नदी पुण्या नर्मदा तत्र भारत ! । कैलोक्ये यानि तीर्थानि पुण्यान्यायतनानि च । सरिद्वराणि सर्वेन्द्रा देवाश्च सपितामहाः । नर्मदायां कुरुश्रेष्ठ ! वसन्ति सिद्धचारणैः । स्नातुमायान्ति पुण्यैर्वैः सदा वारिषु भारत" भा० आ० ८६ अ० ।

इन्दुजनक पु० ईत० । १ऋक्षिसुतौ तस्य ततस्तत्पत्तिकथा ऋक्षिजातशब्दे १११ पृष्ठे दृश्या । २सप्तर्षे ततस्तस्रोतपत्तिकथा "ततः प्रतस्रुरुर्गुर्भ्यमानासु तासु तासु । प्रसक्तात्मा समुत्पन्नः सोमः श्वेतांशुरुज्ज्वलः" भा० आ० १८ अ० । दृश्या । [जाकुलीहले ।

इन्दुपुष्पिका स्त्री इन्दुरिव शुभ्रं पुष्पमस्याः । (विष्वक्सेनकान्ता)

इन्दुभ न० इन्दोरिन्दुस्य भं नक्षत्रं राशिर्वा । चन्द्रदेवताके १मृगशिरोनक्षत्रे अस्मे शब्दे ४६८पृष्ठे नक्षत्रनामोद्धा दर्शिताः । २कर्कटराशौ च "कुजशुक्रबुधेन्दुकसौम्यशुक्रावनी भुवाम्—क्षेत्राणि सुरजादयः क्रमेण" । [२चन्द्रप्रभायाम् ।

इन्दुभा स्त्री इन्दुना भाति भा—क ३त० । १कुसुदवल्याम् । ईत० ।

इन्दुभृत् पु० इन्दुं बिभर्त्ति भृ—क्विप् । शिवे । तस्य चन्द्राधारत्वमिन्दुशब्दे ३२६पृष्ठे सप्रमाणं दर्शयिष्यते ।

इन्दुमणि पु० इन्दुः कान्तोऽस्य तत्करेण स्यन्दनात् तादृशो मणिः शाक० त० । १चन्द्रकान्तमणौ तस्य चन्द्रोदये निष्यन्दात् तन्मणित्वम् । ततृप्रियोमणिः स इव शुभ्रोमणिर्वा । २मुक्तायाम् ।

इन्दुमण्डल त्रि० ईत० । चन्द्रस्य बिम्बे मण्डलाकारे पदार्थे "कृत्वा स्तुत्वा नमस्कृत्य विष्णुजेटिन्नमण्डले" तन्मण्डा० । तन्मण्डलमानञ्च त्रि० यि० दर्शितं यथा । "बिम्बं रवेर्विद्विगुणर्तु (६५२२) संख्यानीन्दोः खनागाब्धि(४८०) योजनानि । भूव्यासहीनं रविबिम्बमिन्दुकर्णाहतं भास्करकर्णभक्तम् । भूविस्तृतिर्लब्धफलेन हीना भवेत् कुभाविस्तृतिरिन्दुमार्गे" "रवेर्योजनलक्षकं बिम्बं मध्यमं द्वियमबाणषट्कतुल्यानि (६५२२) योजनानि इन्दोस्तु न्यूनवसुवेद (४८०)मितानि । अथ राकोच्यते । रविबिम्बं भूव्यासेन (१५८१) हीनं (१५१) क्रत्वेन्दुकर्णेन स्फुटेन योजनात्मकेन संगुण्य रविकर्णेन स्फुटेन भजेत् फलेन भूव्यासतो वर्जितचन्द्रकक्षाव भूभाव्यासो भवति ।

फलानि योजनविस्तारि । अतोऽपपत्तिः यस्मिन् दिने अर्कस्य मध्यतस्त्वेव स्फुटा गतिः स्यात् तस्मिन् दिने उदयास्ते चक्रस्वस्थाभ्यार्धघटितेन यष्टिहितेन वृत्त-मिश्रितेन तत्रस्थदृष्ट्या तदभाभ्यां बिम्बप्रान्तौ विध्येत् । वा यद्यपरोरात्रस्वस्थात् रविबिम्बस्था भवन्ति मध्यगाः। तान्य हानि यत् किञ्चिदधिकैकत्रिंशद्गतिकलाधिकाः ३२ २१ । ३२ । एवं विधोरपि पौर्णमास्यां यदा मध्यैव गतिः स्फुटा तदा विध्येत् तस्यैवं हानि यत् कलाः ३२। ०। ६ । उत्पद्यन्ते । बिम्बकलानां योजनीकरणा-वानुपातः । यदि त्रिंशद्व्यासार्ध एतावत्प्रमाणं बिम्बं तदा षष्ठतन्त्रुतियोजनैः किमित्येवमुत्पद्यन्ते हिहिय-र्तुं (६५२२)संख्यानि योजनानि । विधोस्तु खनागा ब्धि (४८०) हितानीति"। प्रमि० । बिम्बमेव गोलस्य व्याख्यत्ते नाभिधीयते "व्याख्यानोन्नतिगोलकानां क्रमेण तेजोजलखण्डानाम् । खद्युयोजनव्याकृतिवाद्यभूमि(६५२२) खाँशाष्टवेदैः (४८०) हृतजेषचन्द्रैः । (१५८१) इति श्रीपतिना बिम्बस्थाने व्याख्यत्प्रयोगात् । तस्यैव बिम्ब-स्यैव इति संज्ञा । "बिम्बस्थमानं किल यत्र यत्र" इति लोका०व्याख्यत्ते बिम्बस्थत्प्रयोगात् अतएवार्यभटेन व्याख्यिरुपत्ते । "यस्मिन्बिम्बस्थविवर्जितमित्युक्तम् ।"व्यासे भनन्दाग्नि(१६२७) हृते विभक्ते खवाक्षसूर्यैः (१२५० परिधिः स स्फुटः" इति लोका०उक्तादिदा रविचन्द्र-योरुक्तव्यासमानेन परिधिरानेयः । स च रवेः किञ्चिदून (२०४६६) योजनमितः, चन्द्रस्य किञ्चिदूनम्(१५०८) योजनमितः । तथा च मण्डलगतस्य व्यासपरत्वे (४८०) योजनानि परिधिपरत्वे किञ्चिदूनं (१५०८) योजनानि इन्दोर्मण्डलस्य मानमित्यवधेयम् ।

चन्द्रमती स्त्री चन्द्रःप्रशस्योऽस्त्यस्याम् प्राशस्त्ये मतुप् । १पौर्णमास्याम् २अजन्मपत्न्यां विदर्भराजभगिन्यां च । "अत्रेत्यरेच क्रथकैशिकानां स्वयंवरस्थं स्वसुरिन्दुमत्याः" रघुः । "मनोभूरेन्द्रमतीरितम्" रघु० । सा च फरिथो नाम सुराङ्गना हत्यविन्दुयोगात् मानुषजन्मप्राप्ता तदेतत् वर्णितं रघौ । "चरतः किल दुश्चर तपश्चण्ड-विन्दोः परिधृष्टितः पुरा। प्रजिघाय समाधिभेदिनीं फरि-रत्नै फरिथीं सुराङ्गनाम् । स तपःप्रतिबन्धमन्यना प्रमदा विघ्नतयाचकम्पिरे । अगमत्प्लव मानुषं प्रति तां यमवेला-मनयोर्व्यपि भुवि । भगवन् ! परवानयं जनः प्रतिकूला-चरित्र शमस्य मे। इति चोपनतां क्षितिस्पृशं ज्ञतवानासु-रप्रमदर्शनात् । अथकैशिकवंशसम्भवा तव भूत्वा महिषी चिराय सा । उपलब्धवती दिवश्च्युतं विधया यामविह-स्तिकारणम्"इति अजं प्रति वसिष्ठवन्द्येः ।

चन्द्रमौलि पु० चन्द्रो मौलावस्य । महादेवे स हि चन्द्रतपसा तुष्टस्तत्कलां शिरस्येवा धारयेति कथा० यथा "तुष्टेन देवदेवेन स्वमौलौ या धृता यदा । आदाय तां कलामेकां जगत्संजीवनीम् पराम् । प्रयात् दक्षेण यज्ञोऽपि मासान्ते त्वयमाप च । आप्यायतेऽसौ कलया पुनरेव तया यथा"।

चन्द्ररत्न न० ऐत० चन्द्रइव शुभ्रं रत्नम् वा । शुक्रायां तस्या चन्द्रदेवताकत्वात् चन्द्रदीप्तिप्रधान्यर्थत्वेन तत्प्रीतये दीप्यमानत्वात् तद्दक्षुभत्वाच्च तद्रत्नत्वम् । अष्टपञ्चके अष्ट-रत्नानि वक्ष्यन्ते ।

चन्द्रलेखा स्त्री चन्द्रोलेखेव ।१चन्द्रकलायाम् २तदंशजन्यार्या-१लोमशतायाम्, तस्याः लोमादुद्भवकथा चन्द्रवल्लीशब्दे ६१६पृष्ठे दृश्या। तद्दाध्यायनकारिकायाम् ३अक्षतायां, तद्-लक्षणगुणत्वात् ४यमानिकायाञ्च । तस्य रः। चन्द्ररेखाशब्दे।

चन्द्रलोक पु०ऐत० । चन्द्रलोके । स हि कर्म्मिणामुपभोग-स्थानतया श्रुत्यादिषु कथितः । चन्द्रलोके कर्म्मिणाम् आप्ययरोरं जायते तच्च कर्म्मसमवायिजलसङ्घाऽऽप्य एवेति निरूपणाय छा०उ०पञ्चाग्निविद्या प्रस्तावितो यथा

"असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समित्, रश्मयो धूमो,ऽहरर्चि,श्चन्द्रमा अङ्गारा,नक्षत्राणि विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा सम्भवति १। पर्जन्यो वाव गौतमाग्निस्तस्य वायुरेव समिद्भ्रं धूमो, विद्युदर्चिरशनिरङ्गारा, ह्रादु-नयो विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं राजानं जुह्वति तस्या आहुतेर्वर्षं सम्भवति २। पृथिवी वाव गौतमाग्निस्तस्याः संवत्सर एव समिदाकाशो धूमो, रात्रिरर्चिर्दिशोऽङ्गारा, अवान्तरदिशो विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवा वर्षं जुह्वति तस्या आहुतेरन्नं सम्भवति ३। पुरुषो वाव गौतमाग्निस्तस्य वागेव समित्, प्राणो धूमो,जिह्वाऽर्चिश्चक्षुरङ्गाराः, श्रोत्रं विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुतेरेतः सम्भवति ४। योषा वाव गौतमाग्निस्तस्या उपस्थ एव समिद्यदुपमन्त्रयते स धूमो, योनिरर्चिर्यदन्तः करोति तेऽङ्गारा, अभिनन्दा विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः सम्भवति ५। इति

तु पञ्चम्याहुतावापः पुरुषवचसो भवन्तीति स उल्बावृतो गर्भो दश मासान् वा मासानन्तः शयित्वा यावद्वाथ जायते स जातो यावदायुषं जीवति तं प्रेतं दिष्टमितोऽग्नय एव हरन्ति यत एवेतो यतः सम्भूतो भवति" ऋ० भ०। "असौ वाव लोकोऽग्निर्वै गौतम! यथाऽग्निर्द्युलोकाधिकरणम् आहवनीयम् इह तस्याग्नेर्द्युलोकाख्यस्यादित्यएव समित् तेन हीद्धोऽसौ लोको दीप्यते अतः समिन्धनात् समिदादित्यः। रश्मयो धूमस्तुल्यानात् समिधो हि धूम उत्तिष्ठति। अङ्गारर्चिः प्रकाशसामान्यात् आदित्यका अंशवश्च। चन्द्रमा अङ्गाराः अङ्गः प्रथमेऽभिव्यक्तेः अर्चिषो हि प्रथमेऽङ्गारा अभिव्यज्यन्ते। नक्षत्राणि विस्फुलिङ्गाश्चन्द्रमसोऽवयवा इव विप्रकीर्णत्वसामान्यात्। तस्मिन्नेतस्मिन् यथोक्तलक्षणेऽग्नौ देवाः यजमानप्राणा अग्न्यादिरूपाः अधिदैवतं श्रद्धाम् अग्निहोत्राहुतिपरिणामावस्थरूपाः सूक्ष्मा आपः श्रद्धाभाविताः श्रद्धा उच्यन्ते "पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इत्यां स्त्रीप्यतया प्रेम श्रुतत्वात्। "श्रद्धा वा आपः श्रद्धामेवारभ्य प्रथमेव प्रचरन्तीति"च विज्ञायते। तां श्रद्धामयूपां जुह्वति। तस्या आहुतेः सोमो राजा। अपां श्रद्धाद्रव्याणां द्युलोकाग्नौ हुतानां परिणामः सोमो राजा सम्भवति। यथा ऋग्वेदादिपुष्परसा ऋगादिमधुकरोपनीताश्च आदित्ये मध आदिकार्यं रोहितादिरूपवज्रपञ्चमारभन्त इत्युक्तम्। तथेमा अग्निहोत्राहुतिपञ्चमाविद्याः सूक्ष्माः श्रद्धाभद्राद्याः आपोद्युलोकमनुप्रविश्य चान्द्रं कार्यमारभन्ते फलहेतवग्निहोत्राहुतयः। सोमिरर्चिर्द्योतितत्वात्। अहरतः इरोति तेजोरा अभिव्यञ्जनात्। अभिनन्दाः हुतत्वेन विस्फुलिङ्गाः हुतत्वात्। तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः सम्भवतीति ५। एवं श्रद्धासोमवर्षाऽन्नरेतोरूपपञ्चकीयक्रमेणाप एव गर्भीभूताः। तत्रापामाहुतिहुतत्वाविशेषात् प्राधान्यविवक्षया आपः पञ्चम्याहुतौ पुरुषवचसो भवन्तीति। तत्राप एव देवताः सोमादिकार्यमारभन्ते। न चापोऽतिहुतत्वतः सन्तीति। लिङ्गतत्तत्वेऽपि विशेषसम्बन्धाभावो दृष्टः पृथिवीवर्जिता आपोऽन्यत्राग्निरित्यन्यतमवाहुल्यनिमित्तः। तस्मात्पञ्चदितावभूतानि वाहुल्यात्तत्तच्छब्दवाचीनि सोमादिकार्याख्यानयाप इत्युच्यन्ते। उक्तं च हुतवाहुल्यं सोमउष्णरेतोदेहेषु बहुत्वेन, शरीरं अद्यापि पार्थिवं तेन पञ्चम्याहुतौ हुतायां रेतोरूपा आपो गर्भीभूताः। इति तु हुतन्त पञ्चम्याहुतावापः पुरुषवचसो भवन्तीति आचार्यादेव एवः प्रायुः। अस्तु द्युलोकादीनां मन्त्रोक्तदेवोरा-

विस्फुलिङ्गाः। छान्दसो गर्भितमन्त्राः सेवानां विप्रकीर्णत्वसामान्यात्। तस्मिन्नेतस्मिन्नग्नौ देवाः पूर्ववत् सोमं राजानं जुह्वति। तस्या आहुतेर्वर्षं सम्भवति। अन्नाद्या आपः सोमाकारपरिणता द्वितीये पर्याये पर्जन्याग्निं प्राप्य दृष्टिरूपेण परिणमन्ते २। पृथिवी वाव गौतमाग्निरित्यादि पूर्ववत्। तस्याः पृथिव्याख्याग्नेः संवत्सर एव समित् संवत्सरेण हि खलु समिद्धा पृथिवी शीतादिनिघ्नत्वे भवति। आकाशो वायुः पृथिव्या ऊर्ध्वोत्थित आकाशो दृश्यते यथाऽग्नेर्धूमो, रात्रिरर्चिः, पृथिव्याख्यप्रकाशात्मिकाया आहुतेरूपा रात्रिः तमोरूपत्वात् अग्नेरिवाहुतरूपार्चिः। दिशोऽङ्गारा उपयोगत्वसामान्यात्। अवान्तरदिशो विस्फुलिङ्गाः क्षुद्रत्वसामान्यात्। तस्मिन्नित्यादि समानम्। तस्या आहुतेरन्नं ब्रीह्यादि सम्भवति २। पुरुषो वाव गौतमाग्निः तस्य मनोरेव समित् वाचा हि खलु समिध्यते पुरुषो न मूकः। प्राणो धूमो धूम इव तत्त्वाविर्णमनात्। जिह्वार्चिर्द्योतितत्वात्। चक्षुरङ्गारा ज्ञान आश्रयत्वात्। श्रोत्रं विस्फुलिङ्गाः विप्रकीर्णत्वसाम्यात्। वचनमन्नम्। अन्नं जुह्वति ब्रीह्यादि संस्कृतम्। तस्या आहुतेरेतः सम्भवति ३। योषा वाव गौतमाग्निः। तस्या उपस्थ एव समित् तेन हि वा उपस्थाद्युपस्थादाभ्यां समिध्यते। बहुफेनसम्भवते स धूमः स्त्रीलक्षणबाहुल्यमनसश्च। योनिरर्चिर्द्योतितत्वात्। यदन्तः इरोति तेजोरा अभिनन्दनात्। अभिनन्दाः हुतत्वेन विस्फुलिङ्गाः क्षुद्रत्वात्। तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः सम्भवतीति ५। एवं श्रद्धासोमवर्षान्नरेतोरूपपञ्चकीयक्रमेणाप एव गर्भीभूताः। तत्रापामाहुतिहुतत्वाविशेषात् प्राधान्यविवक्षया आपः पञ्चम्याहुतौ पुरुषवचसो भवन्तीति। तत्राप एव देवताः सोमादिकार्यमारभन्ते। न चापोऽतिहुतत्वतः सन्तीति। लिङ्गतत्तत्वेऽपि विशेषसम्बन्धाभावो दृष्टः पृथिवीवर्जिता आपोऽन्यत्राग्निरित्यन्यतमबाहुल्यनिमित्तः। तस्मात्पञ्चदितावभूतानि बाहुल्यात्तत्तच्छब्दवाचीनि सोमादिकार्याख्यानयाप इत्युच्यन्ते। उक्तं च हुतबाहुल्यं सोमउष्णरेतोदेहेषु बहुत्वेन, शरीरं अद्यापि पार्थिवं तेन पञ्चम्याहुतौ हुतायां रेतोरूपा आपो गर्भीभूताः। इति तु हुतन्त पञ्चम्याहुतावापः पुरुषवचसो भवन्तीति आचार्यादेव एवः प्रायुः। अस्तु द्युलोकादीनां मन्त्रोक्तदेवोरा-

द्युलोः पृथिव्याः पुरुषं स्त्रियं क्रमेणाविश्य द्योषं प्रत्युत्थादौ भवतीति वाजसनेयके उक्तं तत्प्रासङ्गिकमिहोच्यते । इह च प्रथमे प्रभु उक्तं वेत्थ यदितोऽधि प्रजाः प्रयन्तीति । तस्य चायमुपक्रमः । स गर्भोऽयं पञ्चमः परिणामविशेषः आकृतिवर्णसंस्थायिनोमं ब्रह्मयज्ञावाच्यानाम्, उलबावृत उल्बेन जरायुणाऽऽवृतो वेष्टितो दश वा नव वा मासानन्तर्मातुः कुक्षौ यथित्वा यावता कालेन न्यूनेनातिरिक्तेनानन्तरं जायते । उल्बावृत इत्यादिवैराग्यहेतोरिदमुच्यते । कटं हि मातुः कुक्षौ मूत्रपुरीषवातपित्तश्लेष्मादिपूर्णे तदनुलिप्तस्य गर्भस्योल्बावृतशुचिपूयावृतस्य क्लेदितरेतोऽशुचिबीजस्य मातुरग्नितपोतरसानुप्रवेशेन च विवर्धमानस्य निरुद्धप्रसृतिबलवीर्यतेजःप्रज्ञाचेष्टस्य शयनम् । ततो योनिद्वारेण पीड्यमानस्य कष्टतरा निःसृतिर्जन्मेति वैराग्यं व्याहन्यते । सप्तदशमासस्य दश वा मासानतिदीर्घकालमन्तः यथित्वेति । स एवं जातो यावदायुषं पुनर्घटीयन्त्रवद्गमनागमनाय कर्म कुर्वन् कुलालचक्रयष्ट्या तिर्यग्भ्रमणाय यावत्कर्मणोपात्तमायुस्तावज्जीवति । तमेवं क्षीणायुषं प्रेतं मृतं दिष्टं कर्मणा निर्दिष्टं परलोकं प्रति । यदि चेज्जीवन् वैदिके कर्मणि स्याने वाधिकृतस्तमेनं मृतमितोऽग्नाद्यादग्नयेऽन्वग्नयेऽन्वग्निजो हरन्ति पुत्रा वान्यकर्मणे, अत एव हृत आगतोऽग्नेः सकाशाच्छ्रद्धाद्याकृतिक्रमेण, यतश्च पञ्चभ्योऽग्निभ्यः सम्भृत उत्पन्नो भवति तस्मा एवाग्नये हरन्ति स्वामेव योनिमग्निमापादयन्तीत्यर्थः" भा० । एवं चन्द्रभावप्राप्तिप्रकारमुक्त्वा तत्प्राप्तानुगुणं कर्मभेदं प्रदर्श्य तस्य गतिप्रकारमाह "अथ य इमे ग्रहस्थाः ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभि सम्भवन्ति, धूमाद्रात्रिं, रात्रेरपरपक्षम्, अपरपक्षाद्यान् षड्दक्षिणैति मासांस्तानैते संवत्सरमभिप्राप्नुवन्ति, मासेभ्यः पितृलोकं, पितृलोकादाकाश, आकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति । तस्मिन् यावत्सम्पातमुषित्वाऽथैतमध्वानं पुनर्निवर्तन्ते" भा०उ० । "अथेत्यर्थान्तर प्रस्तावनार्थो व इमे ग्रहस्थाः । ग्राम इति ग्रहस्थानामसाधारणं विशेषणमरण्यवासिनो व्यावृत्त्यर्थम् । यथा वानप्रस्थपरिव्राजकानामरण्यं विशेषणं ग्रहस्थेभ्यो व्यावृत्त्यर्थं तद्वत् । इष्टापूर्ते इष्टमग्निहोत्रादि वैदिकं कर्म पूर्तं वापोद्यानतडागाराम्रादिकरणम् । दत्तं च बहिर्वेदि यथाशक्तेभ्यो द्रव्यस्वभागो दत्तम् इत्येवंविधं परिचरण-परिवाणाद्युपासते इतिशब्दस्य प्रकारदर्शनार्थत्वात् । ते दर्शनवर्जितत्वाद्धूमं धूमाभिमानिनीं देवतामभिसम्भवेन सम्भवन्ति प्रतिपद्यन्ते । तयाऽतिवाहिता धूमाद्रात्रिं रात्रिदेवतां, रात्रेरपरपक्षदेवताम्, एवमेव कृष्णपक्षाभिमानिनीम्, अपरपक्षाद्यान् षण्मासान् दक्षिणा दक्षिणां दिशमेति सविता तान्, मासान् दक्षिणायनान् षण्मासाभिमानिनोर्देवताः प्रतिपद्यन्त इत्यर्थः । सञ्चारिणी हि षण्मासदेवता इति मासानिति बहुवचनप्रयोगस्तासु । नेते कर्मिणः प्रकृताः संवत्सरं संवत्सराभिमानिनीं देवतामभिप्राप्नुवन्ति । कुतः पुनः संवत्सरप्राप्तिप्रसङ्गो यतः प्रतिषिध्यते । अस्ति हि संवत्सरस्य प्रसङ्गोऽवयवभूते दक्षिणोत्तरायणे तत्रार्चिरादिमार्गप्रतिपन्नानामुदगयनमासेभ्योऽवयविनः संवत्सरस्य प्राप्तिरुक्ता । अत इहापि तदवयवभूतानां दक्षिणायनमासानां प्राप्तिमुक्त्वा तदवयविनः संवत्सरस्यापि पूर्ववत्प्राप्तिरापद्येतत एतत्प्राप्तिः प्रतिषिध्यते नैते संवत्सरमभिप्राप्नुवन्तीति । मासेभ्यः पितृलोकं, पितृलोकादाकाशमाकाशाच्चन्द्रमसम् । कोऽसौ यज्ञैः प्राप्यते चन्द्रमा य एष दृश्यतेऽन्तरिक्षे सोमो राजा ब्राह्मणानां तदन्नं देवानां तं चन्द्रमसमन्नं देवता इन्द्रादयो भक्षयन्ति । अतस्ते धूमादिना गत्वा चन्द्रभूताः कर्मिणो देवैर्भक्ष्यन्ते । अन्नमर्थायेष्टादिकरणं यद्यन्नभूता देवैर्भक्ष्येरन्, नैष दोषः अन्नमित्युपकरणमात्रस्य विवक्षितत्वात् । न हि ते केवलोत्पत्तेरेव देवैर्भक्ष्यन्ते, किं तर्ह्युपकरणमात्रं देवानां भवन्ति ते, स्त्रीपशुभृत्यादिवत् । दृष्टवाक्यशब्द उपकरणेषु स्त्रियोऽन्नं पशवोऽन्नं राजानित्यादि । न च तेषां स्त्र्यादीनां पुरुषोपभोग्यत्वेऽप्युपभोगो नास्ति । तस्मात्कर्मिणो देवतानामुपभोग्या अपि सन्तः सुखिनो देवैः क्रीडन्ते । शरीरञ्च तेषां सुखोपभोगयोग्यं चन्द्रमण्डले आरभ्यते । तदुक्तं पुरस्ताच्छ्रद्धाशब्दा आपोद्युलोकाग्नौ हुताः सोमो राजा सम्भवतीति । ता आपः कर्मसमवायिन्य इतरैस्तु भूतैरनुगताः द्युलोकं प्राप्य चन्द्रत्वमापन्नाः शरीराद्यारम्भिका इष्टाद्युपासकानां भवन्ति । अन्यायाञ्च शरीराहुतावग्नौ हुतायामग्निना दह्यमाने शरीरे तदुत्था आपो धूमेन सहोर्ध्वं यजमानभावेच्छ चन्द्रमण्डलं प्राप्य शुभमृत्तिकास्थानीया ब्राह्म्यशरीरारम्भिका भवन्ति । तदारब्धेन च शरीरेणेष्टादिफलमुपभुञ्जाना आसते यावत्तदुपभोगनिमित्तस्य क्षयः कर्मणः । सम्भवन्ति येनेति सम्भृतः कर्मणः क्षयो या-

वस्तुमात्रं यावत्कर्मणः क्षय इत्यर्थः । तावत्किं चन्द्रमण्डले उषित्वा अथाऽनन्तरमेतमेव वक्ष्यमाणमध्वानं मार्गम् पुनर्निवर्त्तन्त इति प्रयोगात्पूर्वमध्वसञ्चन्द्रमण्डलं गता निष्क्रामन्तीति गम्यते । तस्मादिह लोके इष्टादिकर्मोपचित्य चन्द्रं गच्छन्ति तत्क्षये चावर्त्तन्ते । क्षणमात्रमपि तत्र स्थातुं न लभ्यते स्थितिनिमित्तकर्मक्षयात् स्नेहक्षयादिव प्रदीपस्य । किं तत्र येन कर्मणा चन्द्रमण्डलमारूढस्य सर्वस्य क्षये तस्मादवरोहणं किं वा शरीरेण इति । किन्तत: । यदि सर्वस्यैव क्षयः कर्मणश्चन्द्रमण्डलस्थस्यैव भोक्तुः स्यात् न चेति तत आगतस्येह शरीरोपभोगादि न सम्भवति । ततः श्रेयेत्यादिश्रुतिविरोधश्च स्यात् । तस्मिन्पुण्यदुष्कृतव्यतिरेकेणापि मनुष्यलोके शरीरोपभोगनिमित्तानि कर्माण्यनेकानि सञ्चितानि न च तेषां चन्द्रमण्डल उपभोगः । अतः शास्त्राणि यन्निमित्तं चन्द्रमारूढास्तान्येव शास्त्राण्यविरोधः श्रेयश्चेह सर्वेषां कर्मसामान्यादविरुद्धः" भा० । एवं चान्द्रायणादिकं तत्प्राप्तिहेतुः ।

इन्दुलौह न० ईत० । इन्दुदेवताके, लौहे धातौ रौप्ये धातुभेदे तस्येन्दुदेवत्वात् इन्दुदोषोपशान्त्यर्थं देयत्वाच्च तथात्वम् । स्वार्थे कन् । तत्रैव ।

इन्दुवदना स्त्री "इन्दुवदना जजसभैः सगुरुयुग्मैः" इत्तः० उक्ते चतुर्दशाक्षरपादके वर्णवृत्तभेदे

इन्दुवल्ली स्त्री ६त० । चन्द्रनामिकायां सोमलतायाम् । तत्प्राप्तिस्थानसङ्गं सञ्जते यथा "नैवासादयितुं शक्या सोमाः सोमसमास्तथा । पीतावशेषसम्भक्तं देवैर्ब्रह्मपुरोगमैः । निहितं सोमवीर्य्यासु सोमे चाप्योषधीगतौ । देवछन्दे छदवरे तथा सिन्धौ महानदे । दृश्यते च जलान्तेषु मध्ये ब्रह्मर्षयोऽजाः" तत्समास ओषधिशब्दे वक्ष्यते

इन्दुवार पु० "आर्पोक्षिके (३,६,६,१२,) यदि वागाः स किमेन्दुवारो न स्याच्छ्रुतः 'क्षणं ताजकशास्त्रगीतः" नी० ता० उक्ते वर्षलग्नतः (३,६,६,१२,) स्थानानामष्टमस्थाने सूर्य्यक्षस्थितिरूपयोगभेदे ।

इन्दुव्रत न० इन्दुलोकप्राप्त्यर्थं व्रतम् शाक०त० । चान्द्रायणे व्रते तस्य चन्द्रलोकप्राप्तिसाधनत्वात् चन्द्रह्रासवद्दिवसानुसारेण भोजने ह्रासवद्दिवसत्वाच्च चान्द्रायणत्वम् तदेतत् पञ्चविधं तत्सङ्क्षेपविभागादि प्रा०वि० दर्शितं यथा । "एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत् । उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं चरेत् । एतदेव विधिं कृत्वा आचरेत् यवमध्यमे । शुक्लपक्षादि नियतश्चरेच्चान्द्रायणव्रतम्" । "अष्टावष्टौ समश्नीयात् पिण्डान्मध्यदिने गते । नियताऽऽत्मा हविष्याशी यतिचान्द्रायणं चरन् । चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः । चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं व्रतम् । अष्टावष्टौ समश्नीयात् पिण्डान्मध्यदिने गते । नियतात्मा हविष्याशी यतिचान्द्रायणं चरन् । आसेनाश्नन् हविष्याशी चन्द्रस्यैति सलोकताम्" मनुः । एतत् पञ्चविधं चान्द्रायणम् पिपीलिकातनुमध्यम् यवमध्यं, यतिचान्द्रायणम्, सर्वतोमुखं शिशुचान्द्रायणञ्च । यथाह जाबालः "पिपीलिकायवमध्यं यतिचान्द्रायणन्तथा । चान्द्रायणन्तथा श्रेष्ठं चतुर्थं सर्वतोमुखम् । पञ्चमं शिशुचान्द्रञ्च तुल्यं पुण्यफलोदयम्" । कृष्णप्रतिपदमारभ्य मासमेकं यदा क्रियते तदा पिपीलिकामध्यं भवति, शुक्लप्रतिपदारम्भे यवमध्यमुभयत्रापि शास्त्रावासमभोजनं कृष्णप्रतिपदि चतुर्ग्रासभोजनारम्भे ह्रासक्रमेण चतुर्दश्यामेकग्रासः अमावास्यायामभोजनम् एवं प्राप्नोति तथा च वसिष्ठः । "मासस्य कृष्णपक्षादौ यावानश्नाति पूरुषः । तावतः प्रतिमासं त्वं पिण्डान् कवलान् कुरु" । नन्वेवं क्रमेण पञ्चदशग्रासोत्तरं शास्त्रयतद्वयं स्यात् न चत्वारिंशदधिकं शतद्वयम् तच्च याज्ञवल्क्योक्तम्" "यथा कथञ्चित् पिण्डानां चत्वारिंशच्छतद्वयमिति" । "यथा कथञ्चित् पिण्डानां तिस्रोऽशीतीः समाहितः" इति मनुनाप्युक्तम् । उच्यते संयमदिवसे पौर्णमास्याम् अमावास्यायां वा पञ्चदशग्रासभोजनेन संख्यापूरणसम्भवात् अथ वा पञ्चदशग्रासादिक्रमेवेदं व्रतम् न प्रतिपदादिकं चतुर्दश्यामेव व्रतसङ्कल्पः । यथाह गौतमः पौर्णमास्यां पञ्चदश ग्रासान् भुञ्जीत कैश्चिदपचयेनापरपक्षमश्नीयात् अमावास्यायामप्येष एवैकोपचयेन पूर्वपक्षम्, विपरीतमेकेषाम्" यद्धलिखितौ "अमावास्यां व्रतोपायनं यवमध्यम् अमावास्यां पञ्चदश पिण्डान्भुञ्जीयात्" उपायनमारम्भः । युक्तञ्चैतदमावास्यामपि पञ्चदशकलात्मकस्य चन्द्रमसः सूर्य्यप्रविष्टत्वात् तत एकैककलानिर्गमस्य प्रतिपदादिषु दृष्टियोग्यत्वात् । जाबालः "एकैकं वर्द्धयेद्ग्रासं शुक्ले कृष्णे च ह्रासयेत् । अमावास्यां न भुञ्जीत यवमध्यमृषिव्रतम् । एकैकं ह्रासयेद्ग्रासं कृष्णे शुक्ले च वर्द्धयेत् । पौर्णमासीं न भुञ्जीत पिपीलिकातनुमध्यमम्" । अत्र कल्पतरुराह्यानम् । एकैकं ह्रासयेदिति कृष्णप्रतिपदि पञ्चदशग्रासमारभ्य एकैकापचयेनामावास्यायामेकोग्रासः तदनन्तरं शुक्लप्रतिपदि द्वौ ग्रासावेवं दृष्टिक्रमेण चतुर्दश्यां पञ्चदश ग्रासाः सम्पद्यन्ते पौर्णमास्यामुपवास इति' पिपीलिका

तनुमध्यं चान्द्रायणम्"। अविचान्द्रायणमाह यमः "त्रीँस्त्रीन् पिण्डान् समश्नीयात् नियतात्मा दृढव्रतः। हविष्यान्नस्य वै मासस्त्रिचान्द्रायणं स्मृतम्"। अत्र चत्वारिंशच्चतुर्थसंख्या नास्ति। मासपरिमाणमाह पराशरः "कुक्कुटाण्डप्रमाणन्तु यावद्वा प्रविशेन्मुखम्। एवं ग्रासं विजानीयाच्छुद्ध्यर्थं कायशोधनम्"। सकलचान्द्रायण एव चतुर्थ्यासप्रवासं कृत्वाऽपरदिने पञ्चदश्यां संयमः कार्य्यः। यथा बौधायनः "शुक्लां चतुर्दशीमुपवसेत् कृष्णचतुर्दशीं वा केशश्मश्रुनखलोमानि वापयित्वा" इत्यादिभिधाय "तिथिनक्षत्रादिहोमं प्रत्यहमुक्त्वान्" विस्तरभयात् लिखितम्। अत्र सामान्यव्रतधर्म्माः कर्त्तव्याः। विशेषमाह यमः "आर्द्रवासाश्चरेत् कृच्छ्रं स्नात्वा वस्त्रं न पीडयेत्। अकुल्यपस्थितं ग्रासं गायत्र्या चाभिमन्त्रयेत्। भक्षयित्वा उपस्पृश्य पुनरेवाभिमन्त्रयेत्। कांस्यं तैजसं पात्रं चक्रोत्पन्नं विवर्जयेत्। असुराणां हि तत् पात्रं पात्रापात्रमचक्रजम्" अचक्रजं कुलालचक्रानिष्पन्नम्। अपरे धर्म्मा बौधायनादिषु द्रष्टव्याः। तेन एकत्रिंशद्दिनसाध्यं चान्द्रायणव्रतम्"। या० स्मृ०। "तिथिद्वया चरेत् पिण्डान् शुक्ले पिण्डचतुष्टयम्। एकैकं ह्रासयेत् कृष्णे पिण्डं चान्द्रायणं चरन्। अथाकृष्णेन पिण्डानां चत्वारिंशच्चतुष्टयम्। मासेनैवोपभुञ्जीत चान्द्रायणमथापरम्। कुर्य्यान्निशायां स्नायी कृच्छ्रं चान्द्रायणं तथा। अनादिष्टेषु पापेषु गुह्यचान्द्रायणेन तु। धर्म्मार्थं यश्चरेदेतच्चन्द्रलोकं स गच्छति। सलोकतां" अत्र (२४०) ग्राससंख्योक्तेर्मध्ये नोपवास इति प्रतीयते तथा हि प्रतिपदादिपञ्चदशसु ग्रासवर्द्धनेन भक्षणे "सैकपञ्चपदाद्रिभक्षैकाद्यद्युतिः किल सङ्कलिताख्येति" लीला० उक्तादिया (१२०) ग्राससंख्या, पुनः कृष्णे ह्रासेन तथैव संख्येति (२४०) भोज्यग्राससंख्या। तथाच समग्रासमर्थभेदेन अनयोर्व्यवस्थेति सिद्धान्तः।

इन्द्रगोश्वर पु० इन्द्रः गोश्वरे यस्य। महादेवे इन्द्रगोपि यन्दे ६३९६ट० विवृतिः। चन्द्रगोश्वरादयोऽप्यत्र।

इन्द्रचूड पु० उन्द्रचूड+पृ० उच्चम्। मूषिके जटाधः।

इन्द्र पु० इदि-रन्। १परमेश्वरे। "इन्द्रोमायाभिः पुरुरूप ईयते" श्रुतिः। द्वादशादित्यमध्ये २आदित्यभेदे। ते च अदित्यां कश्यपेनोत्पादिताः "धाताऽर्य्यमा च मित्रश्च वरुणोंऽशुर्भगस्तथा। इन्द्रोविवस्वान् पूषा च पर्জ্জन्यो दशमः स्मृतः। ततस्त्वष्टा ततोविष्णुरजघन्यो जघन्यजः" विष्णुध०। भा०आ०६५अ० तु इन्द्रस्थाने शक्रनाम्ना पठितः यथा "अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः। ये राजन्नामतस्तांस्ते कीर्त्तयिष्यामि भारत!। धातामित्रोऽर्यमा शक्रो वरुणस्त्वंशुरेव च। भगो विवस्वान् पूषा च सविता दशमः स्मृतः। एकादशस्तथा त्वष्टा द्वादशोविष्णुरुच्यते। जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः"। कल्पभेदान्नामभेद इति न विरोधः। २कटजवृक्षे ४रात्रौ च धरणिः ५ भारतवर्षोपद्वीपभेदे भाग० इन्द्रदेवताके ऐन्द्रेयनक्षत्रे विष्कम्भादिषु योगेषु ७षड्विधे योगे छन्दोग्यन्यप्रसिद्धे षण्णान्ता प्रस्तावे आद्यान्तगुरुद्वयेन लघुद्वयमध्येन युते ८चतुर्थे भेदे। ९देवराजे स च मन्वन्तरभेदात् चतुर्दशविधः यथा "मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वराः। ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते" भाग० ८स्क०१अ०। इत्थं मन्वन्तरे षड्विधकीर्त्तनायसुपक्रम्य मन्वन्तरभेदेन तत्तन्नामानि कथितानि अतीतानामभेदात्तस्य चतुर्दशसंख्या तत्रोक्ता यथा "तुषिता नाम ते देवाः आसन् स्वायम्भुवेऽन्तरे। मरीचिमिश्राक्षय योयज्ञः सुरगणेश्वरः" भाग० ८स्क०१अ०। १मन्वन्तरे यज्ञ०। "स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोऽभवत्" इत्युपक्रम्य "तस्यैन्द्रोरोचनस्त्वासीत् देवाश्च तुषितादयः" तत्रैव। २म० रोचनः। "तृतीय उत्तमोनाम प्रियव्रतसुतो मनुः" इत्युपक्रम्य "सत्यावेदश्रुता भद्राः देवा इन्द्रस्तु सत्यजित्" तत्रैव। ३म०सत्यजित्। "चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः" इत्यु० "सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः" तत्रैव। "ईश्वरइन्द्रः" श्रीधरः। ४म०त्रिशिखः। "पञ्चमो रैवतोनाम मनुस्तामससोदरः" इत्यु० "विभुरिन्द्रः गुरगणा राजन्! भूतरयादयः" तत्रैव ५अ०।५म०विभुर्नाम। "षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः", इत्यु० "इन्द्रो मन्त्रद्रुमस्तत्र देवा आद्यादयो मताः" तत्रैव ५अ०। ६म०मन्त्रद्रुमः। "मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः। सप्तमो वर्त्तमानोऽयम्" इत्यु० "आदित्यास्सवसोरुद्रा विश्वे देवा मरुद्गणाः। अश्विनावृभवो राजन्निन्द्रस्तेषां पुरन्दरः"। तत्रैव अ०१३। ७म०पुरन्दरः। "अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः" इत्यु० "तत्र देवाः सुतपसो विरजा अमृतप्रभाः। तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति" १२अ०। ८म०बलिः। "नवमो दक्षसावर्णिर्मनुर्वरुणसम्भवः" इत्यु० "परोमरीचिगर्भाद्या देवा इन्द्र

श्रुतः क्रतुः" तलवे १२अ०। ६म०श्रुतः। "दशमोब्रह्म-सावर्णिरुपश्लोकश्रुतोमहान्" इत्यु० "सुवासनविरु-द्धाद्या देवाः शम्भुः सुरेश्वरः" १२अ०। १०म०शम्भुः। "मनुर्वै धर्मसावर्णिरेकादशम आत्मवान्" इत्यु० "विरु-द्धमाःकामगमानिर्वाणरुचयः सुराः। इन्द्रस्तु वैधृतस्तेषां सत्यसत्यादयः" १२अ०। ११म०वैधृतः। "भविता रुद्रसा-वर्णिर्नाम द्वादशमो मनुः" इत्यु० "ऋतधामा च देवेशो देवास्तु हरितादयः" १२अ०। ११म०ऋतधामा। "मनुस्त्व-योदशोभव्यो वेदसावर्णिरात्मवान्" इत्युप० "देवाः सुक-र्मसूत्रामसंज्ञा इन्द्रोदिवस्पतिः" १२अ०। १२म०दिव-स्पतिः। "मनुर्वा इन्द्रसावर्णिश्चतुर्दशम एष्यति" इत्यु० "पवित्रास्थाक्षुषादेवाः शुचिरिन्द्रो भविष्यति" १२अ०। १४म०शुचिः। पुराणान्तरादौ नाम्नां भेदाः सन्ति तत्तत्कल्पभेदादविरुद्धानि। विस्तरभयान्नात्र नोक्तानि। एवंशक्र-नामसंख्यासाम्यात् १० चतुर्दशसंख्यायाम्। स च शचीपतिः इत्यादिहेत्वा, पूर्वदिग्पालः, सृष्टिदायक, अमरेशः मेघवृषणः तस्य पुत्रो जयन्तः, वनं नन्दनं हयउच्चैःश्रवाः गजऐरावतः, पुरी अमरावती नेत्राणि सहस्रं वज्रमस्त्रम् हरीवाहः। विष्टतिस्तत्तच्छन्दे दृश्या। तस्यानेकविधानि कार्याणि पुराणादौ वर्णितानि विस्त-रभयान्नोक्तानि मनुकालपर्यन्तं तस्याधिकारकालस्तत्-समाप्तौ तस्य प्रजापतेः सकाशात् ब्रह्मविद्याप्राप्तेरग्रे वक्ष्यमाणत्वात् कैवल्यप्राप्तिः "योयो देवानां प्रत्यबुध्यत" इत्यादिश्रुतेः। इत्येतत् नानाशास्त्रश्रुतीतिहासेषु प्रसिद्धम् स्वकालमध्येऽपि त्वष्टृपुत्रविश्वरूपवधजनितब्रह्महत्या-स्वन्दनभिया तस्य स्वपदच्युतिः। तत्पापस्य विभज्यान्यत्र सक्रामणे पुनः स्वपदप्राप्तिः। असुरादिभिरपि बलाधिक्य-वशात् तं युधि निर्जित्य कियत्कालपर्यन्तं तत्पदेऽधिकारिता प्राप्ता इत्यपि पुराणादौ प्रसिद्धम् "जित्वा च सकलान् देवान् इन्द्रोऽभूत्त्रिदिवासुरः" देवीभा०। "शतात्रमेधकरणे अन्यस्यापि इन्द्रत्वप्राप्तियोग्यतेत्यत्र इन्द्रलोकयज्ञे प्रमाणं वक्ष्यते।

इन्द्रश्च प्रजापतिसकाशात् एकशतवर्षं ब्रह्मचर्य्याचरणेन ब्रह्मविद्यां प्राप्येति छा०उ० वर्णितं यथा "यदाकुरेकशतं हैवं वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्य्यमवास तꣳ होवाच। मघवन्! मर्त्यं वा इदं शरीरमात्तं मृत्युना तद्-स्यामृतस्याशरीरस्यात्मनोऽधिष्ठानमात्मा वै सशरीरः प्रिया-प्रियाभ्यामात्तो न वै सशरीरस्य सतः प्रियाप्रिययोरपह-तिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः इत्यादि। 'मघवन्! मर्त्यं वै मरणधर्म्मि शरीरम्। यन्मृत्युरेष्याधारादिलक्षणः सम्भवादिलक्षण आत्मा मयोक्तो विनाश-मेवापीतो भवतीति। शृणु तत्र कारणम्। यदिदं शरीरं वै पश्यसि तदेतन्मृत्यु विनाशि। तच्चात्तं मृत्युना यस्तं सन्तत-मेव। कदाचिदेव म्रियत इति मर्त्यमित्युक्तं न तथा सन्त्यासो भवति यथा यस्तमेव सदा व्याप्तमेव मृत्युने-त्युक्तं इति वैरग्यार्थं विशेष इत्युच्यते आत्तं मृत्यु नेति। कथं नाम देहाभिमानतो विरक्तः सञ्जिवर्त्तत इति। शरीरमित्यत्र सङ्घेन्द्रियमनोभिरुच्यते। तच्छ-रीरमस्य सम्भवादस्य तिस्थानतया गम्यमानस्यामृतस्य मरणादिदेहेन्द्रियमनोधर्म्मवर्जितस्येत्येतत्। अमृतस्येत्य-नेनैवाशरीरत्वे सिद्धे पुनरशरीरस्येति वचनं वायुादित्या वयवत्वमूर्त्तिमत्त्वेभ्यो भूतानीति। आत्मनो भोगाधिष्ठानम् आत्मनो वा सत इच्छितृत्वोजोबलादिकमेणोत्पन्नमधि ष्ठानम् जीवरूपेण प्रविश्य सदेवाधितिष्ठत्यस्मिन्निति वाधि-ष्ठानम्। यस्येदमीदृशं नित्यमेव मृत्युग्रस्तं धर्म्माधर्म्म-जनितत्वात्प्रियाप्रियवदधिष्ठानं तदधिष्ठितस्तस्मात् सशरीरो भवति। अशरीरस्वभावस्यात्मनस्तदेवाऽहं शरीरं शरीरमेव चाहमित्यविवेकादात्मभावः सशरीरत्वम्। अत एव स-शरीरः सन्नात्तो यस्तः प्रियाप्रियाभ्याम्। प्रसिद्धमेतत् तस्य च न वै सशरीरस्य सतः प्रियाप्रिययोर्बाह्यविषयसंयोग वि योर्निमित्तयोर्बाह्यसंयोगवियोगौ समेति मन्यमा-नस्यापहतिर्विनाश उच्छेदः सन्ततिरूपयोर्नास्तीति। तं पुनर्देहाभिमानादशरीरस्वरूपविज्ञानेन निर्वर्त्तितविवेक-ज्ञानमशरीरं सन्तं प्रियाऽप्रिये न स्पृशतः। स्पृशिः प्रत्येकं सम्बध्यते प्रियं न स्पृशत्यप्रियं न स्पृशतीति वाक्यद्वयं भवति। न ह्येच्छाशुच्यधार्म्मिकै सह सम्भा-षेतेति यद्वत्। धर्म्माधर्म्मकार्य्ये हि तावुच्येते, यतोऽ-शरीरता एतत्स्वरूपमिति। तत्र धर्म्माधर्म्मयोरसम्भवात्त-त्कार्य्याभावो दूरत एवेत्यतो न प्रियाप्रिये स्पृशतः। ननु यदि प्रियमप्यशरीरं न स्पृशतीति यन्मघवतोक्तं सुषुप्तस्य विनाशमेवापीतो भवतीति तदेवेहाप्यापन्नम्। नैष दोषो धर्म्माधर्म्मकार्य्ययोः शरीरसम्बन्धिनोः प्रिया-प्रिययोः प्रतिषेधस्य विवक्षितत्वात् "अशरीरं न प्रिया-प्रिये स्पृशतः" इत्यादिहेत्वा। आगमापायिनोर्हि सुख-दुःखे इष्टे यथा शीतस्पर्शे उष्णस्पर्शे इति। न त्वन्ने-रुष्णप्रकाशयोः स्वाभाविकयोरग्निना कार्य्य एव भवति। तथाग्नेः सवितुर्वोष्णप्रकाशवत्स्वरूपभूतस्य नित्यस्य प्रियस्यापि

नेह प्रतिषेधो "विज्ञानमानन्दम्" "आनन्दो ब्रह्मेति" श्रुतिभ्यः इहापि "भूमैव सुखम् नाल्पे सुखमस्ति" भा०। इत्युपक्रम्य बहूपदेशः कृतः। प्रपञ्चस्तत्र द्रष्टव्यः।

इन्द्रश्च देवानां मध्येऽतिशयेन ब्रह्मविन्तमः तथाहि। केनोपनिषदि असुरविजये देवानां महिमाभिमाने जाते तदभिमानापनोदनार्थं यक्षभूतेनाविर्भूतेन परब्रह्मणा अग्निवाय्वोरभिमाननिरसने तयोर्निष्टप्तौ दृढभक्तिमिन्द्रं प्रत्येव कैमवत्युपदेशेन तस्मादतिशयमहिमा सूचितः ततो द्वितीयात् तद्ब्राह्मण्यदर्शयते। "ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानन्त किमिदं यक्षमिति। तेऽग्निमब्रुवन् जातवेदः! एतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तमभ्यवदत् कोऽसीति अग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति। तस्मिंस्त्वयि किं वीर्यमित्यपीदं सर्वं दहेयं यदिदं पृथिव्यामिति। तस्मै तृणं निदधावेतद्दहेति तदुपप्रेयाय सर्वजवेन तन्न शशाक दग्धुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति" के० उ०। एवं वायोरभिमाननिरसनमुपवर्ण्य "अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तस्मात्तिरोदधे। स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं तां होवाच किमेतद्यक्षमिति। सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव विदाञ्चकार ब्रह्मेति। यस्माद्वा एते देवा अतितरामिवान्यान्देवान् यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पर्शुस्ते ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति तस्माद्वा इन्द्रोऽतितरामिवान्यान् स ह्येनन्नेदिष्ठं पस्पर्श स ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति" के० उ०। "तथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि इत्यादिपूर्वं वदिन्द्रः परमेश्वरो मघवान् बलवत्त्वात्तत्रेनि तदभ्यद्रवत्तस्मादिन्द्राद्यात्मसमीपगतात्तद्ब्रह्म तिरोदधे तिरोभूतमिन्द्रत्वाभिमानोऽतितरां निराकर्त्तव्य इत्यतः संवादमात्रमपि नादात् ब्रह्मेन्द्राय। तदात्म यस्मिन्नाकाशे आकाशप्रदेशे आत्मानं दर्शयित्वा तिरोभूतमिन्द्र ब्रह्मणस्तिरोधानकाले यस्मिन्नाकाशे आसीत् स इन्द्रस्तस्मिन्नेवाकाशे तस्थौ। किं तद्यक्षमिति ध्यायच्च निवहतेऽग्न्यादिवत्तस्थेति यत्ते भक्तिं बुद्धा विद्या उमारूपिणी प्रादुर्भूता स्त्रीरूपा। स इन्द्रस्तासां सर्वेषां हि शोभमानानां शोभनतमां विद्यां तदा बहुशोभमानेति विशेषणमुपपद्यते। हैमवतो हैमलताभरणवतीमिव बहुशोभमानामित्यर्थः। अथवा उमैव हिमवतो दुहिता हैमवती नित्यमेव सर्वज्ञेन ईश्वरेण सा वर्त्तत इति ज्ञातुं समर्था इति कृत्वा तामुपजगाम इन्द्रस्तां ह उमां किलोवाच यत्पृच्छ ब्रूहि किमेतद्यक्षमिति तिरोभूतं यक्षमिति। सा ब्रह्मेति होवाच ह किल ब्रह्मण ईश्वरस्यैव विजये ईश्वरेणैव जिता असुरा यूयं तत्र निमित्तमात्रं तस्यैव विजये यूयं महीयध्वं महिमानं प्राप्नुथ। एतदिति क्रियाविशेषणार्थम्। मिथ्याभिमानस्य युष्माकमेव महिमेति। ततस्तत्प्रादुर्भावाच्च एव विदाञ्चकार ब्रह्मेतीन्द्रोऽवधारणात्ततो हैवेति न स्वातन्त्र्येण। यस्मादग्निवायुरिन्द्रा एते देवा ब्रह्मणः संवाददर्शनादिना समीपमुपगतास्तस्मादैश्वर्यगुणैरतितरामिव यक्षिगुणादिभिर्हाभ्यां ऐन्द्रान्देवानतितरामतिशयेन प्रेरते इवैते देवाः। इवशब्दोऽनर्थकोऽवधारणार्थो वा। यदग्निर्वायुरिन्द्रस्ते हि देवा यस्मादेतद्ब्रह्म नेदिष्ठमन्तिकं सर्वेषां प्रियतमं पस्पर्शुः स्पृष्टवन्तो यतोऽतैर्ब्रह्मणः संवादादिप्रकारैस्ते हि यस्माच्च हेतोरेतद्ब्रह्म प्रथमः प्रथमाः प्रधानाः सन्त इत्थेतद्विदाञ्चकार विदाञ्चकृरित्येतद्ब्रह्मेति। यस्मादग्निवायू अग्नीन्द्रवाक्याद्देव विदाञ्चक्रतुः इन्द्रेण ह्युमावाक्यात्प्रथमं श्रुतं ब्रह्मेत्यतस्ताभ्यां इन्द्रोऽतितरामतिशयेन प्रेते इवान्यान्देवान्, स ह्येतन्नेदिष्ठं पस्पर्श यस्मात् ह्येनत्प्रथमो विदाञ्चकार ब्रह्मेति" भा० ११ अन्तरात्मनि "इन्द्रियमिन्द्रलिङ्गमित्यादि" पा० १२ ऐश्वर्यास्मिते वि०। भावे रन्। १३ऐश्वर्ये। १४इन्द्राणस्यां स्त्री टाप्। राजनि०। "इन्द्रायेन्दो! पवस्वते" ऋ०९,६४,२२। "तदिन्द्रसन्दिदृक्षुपेन्द्र! यद्वः" माघः। "हरो इन्द्रस्य" निरु०। १५रूपमाले "महीमहेन्द्रसमवेक्ष्य लक्ष्मीम्" नैष०। "राष्ट्रस्यैतत् लक्षयतमं राष्ट्रां चैवाभिषेचनम्। अभिन्द्रमवलं राष्ट्रं दधतो ऽभिभवन्युत" भा०या०६७अ० "देवताहन्द्वे उत्तरपदस्यस्य नेन्द्रस्य परस्य न हविः आग्नेन्द्रम् कर्म ञि० कौ० छिक्कादार्थे घ। इन्द्रियम्। इन्द्रियशब्दे विवृतिः। इन्द्रोजीविकास्य देवपथा० कन् तस्य लुप्। इन्द्रस्तनूर्मूर्त्तिर्जीविकायति लुपि व्यक्तिवचनत्वात् पु०। इन्द्रोदेवताऽस्य अण्। इन्द्रदेवताके हविरादौ "ऐन्द्रं दध्यमावस्यायाम्" श्रुतिः। स्त्रियां ङीप्। "ऐन्द्रा माहेयमनुपतिष्ठते" श्रुतिः। 'ऐन्द्रीतमसुरेश्वरम्"

देवोभा० ऐन्द्रो दिक् "उपमितसमासे उत्तरपददस्यः श्वेतद्योतकः मनुजेन्द्रः वारणेन्द्र इत्यादि ।

इन्द्रक न० इन्द्रस्य राज्ञः कं सुखं यत्र । १सभाभेदे हेम० । २त० । २इन्द्रसखे ।

इन्द्रकर्मन् पु० इन्द्रस्येव ऐश्वर्यान्वितं कर्म अस्य । विष्णौ "इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः" विष्णुस० ।

इन्द्रकील पु० इन्द्रस्य कील इव अत्युन्नत्वात् । १मन्दरपर्वते इन्द्रस्य कील इव । २इन्द्रध्वजे न० "विधमेन्द्रकीलवत्-अथस्वभाषासुपरिष्टात्" सूत्र० ।

इन्द्रकुञ्जर पु० ६त० । ऐरावते तस्योद्भूतमन्थनकाले इन्द्रेण मुद्गोलनात् तथात्वम् यथाह "श्वेतैर्दन्तैश्चतुर्भिस्तु महाकायस्ततः परम् । ऐरावणो महानागोऽभवद्गजगजाधिपः" भा० आ० १८अ० । इन्द्रगजयूथगजादयोऽप्यत्र ।

इन्द्रकूट पु० इन्द्र ऐश्वर्यान्वितः कूटोऽस्य । पर्वतभेदे "ततस्तु पर्वताः सप्त केयूरं समपस्थिताः । जयन्तो वैजयन्तोऽथ नीलो रजतपर्वतः । महामेरुः सकैलास इन्द्रकूटश्च नामतः" हरि० १७१ अ० ।

इन्द्रकृष्ट न० कृष्टं कर्षणं भावे क्त ततः अस्यर्थे अच् इन्द्रेण इन्द्रहेतुककर्षणेन कर्षणजातम् । वृष्टिजलसम्भवे धान्यभेदे "इन्द्रकृष्टैर्वपेयन्ति धान्यैस्तैर्व नदीमुखे" भा० स० ५अ० ।

इन्द्रकोष पु० इन्द्रस्य कोषइव सुखदायकत्वात् । १मञ्चे, २खड्गायाञ्च । [पर्वतादयोऽप्यत्र ।

इन्द्रगिरि पु० इन्द्रनामा गिरिः । महेन्द्रपर्वते । इन्द्र-

इन्द्रगुरु पु० ६त० । बृहस्पतौ इन्द्राचार्यादयोऽप्यत्र ।

इन्द्रगोप पु० इन्द्रो गोप इव रक्षकोऽस्य वर्षाभवत्वात्तस्य । वर्षाकालिके कीटभेदे शक्रगोपादयोऽप्यत्र । "अविरलवसुधारुरेन्द्रगोपाः" किरा० । "इन्द्रगोपकसङ्काशां शुक्लवर्णां मनोजवाम्" भा० स० ४० अ० । शुक्लतया वर्णनात् "कृष्णयोनयया शक्रगोपकालोहितरागेणांशुकेन" कादं० रक्ततया वर्णनाच्च तस्य कीटस्य द्वैविध्यं श्वेतभेदात् ।

इन्द्रघोष पु० इन्द्र इतियच्छब्देन विख्यातं घुष्यते घुष-कर्मणि घञ् । इन्द्रे "इन्द्रघोषस्त्वा वसुभिः पुरस्तात् पातु" यजु० ५,११ । [श्वेतचन्दने राजनि० ।

इन्द्रचन्दन न० इन्द्रप्रियं चन्दनम् या० त० । हरिचन्दने

इन्द्रचाप पु० इन्द्रे इन्द्रस्वामिके मेघे चापइव । १शक्रधनुषि । "विद्युल्लेखललितवनिताः सेन्द्रचाप सचित्राः" मेघ० दू० । "विद्युता सचित्रः सूर्य्यः सेन्द्रचापे घने यथा" भा० व० २२० अ० । तदुत्पत्तिप्रकारादि हरफ० स० उक्तम्

इन्द्रायुधशब्दे विस्तृतिः दैत० । २शक्रस्य धनुषि च

इन्द्रचिर्भिटी इन्द्रस्यात्मनः प्रिया चिर्भटीवा० त० । लताभेद । सा च इन्द्रतुल्यवर्णकुसुमा पुष्पान्वितमञ्जरीका दीर्घवल्ली युग्मफलान्विता कटी शीतवीर्या पित्तश्लेष्मकासव्रण-दोषक्षयिनाशिनी चक्षुष्या च राजनि० ।

इन्द्रच्छन्दस् न० इन्द्र इव सह त्रयेण सङ्ख्यायुक्तेन छन्दसा यत्र । ऋक्-असुन् नि० नुट् । सङ्ख्यायुक्ते छन्दोभेदे हेम० ।

इन्द्रजनन न० इन्द्रस्यात्मनः जनन देहसम्बन्धभेदः । आत्मनोदेहसम्बन्धभेदे । तदधिकृत्य कृतः ग्रन्थः अ । इन्द्रजननीयं तदधिकारेण कृते ग्रन्थभेदे न० ।

इन्द्रजाल न० इन्द्रेण कौशलादौश्वर्य्येण जालं दृष्टेर्नेत्रावरणं यथास्थितवस्तुदर्शनाङ्गमलसाधनात्, इन्द्रस्य परमेश्वरस्य जालं मायेव वा । मन्त्रौषधादिना अन्यथास्थितस्य वस्तुनोऽन्यथात्वेन दर्शनसाधने (कुहक) (बाजी) १पदार्थे २मायारूपे जाले च । "ऽतएव महानोऽस्याः प्रवर्तन्ते-न्द्रजालतम्" एतस्मात् किमिवेन्द्रजालमपरं यद्भवानाशङ्क्य रेतश्चेतसि तिरस्कृतमलकपटोद्भूतनानाकुहकम् । पर्य्यायेण शि-शुत्वयौवनजरावेशैरनेकैर्नृत्यत्यसौ प्रत्यहमिति जिह्मति तथा गच्छत्यधागच्छ[illegible]... देहवटधानाम्नि सुविचार्याबोध्यताम् । के धानाः के च वा इत्यात्मानमावेति निश्चिनु" प० द० "स्थूणाकणेन्द्रजालञ्च सौरभ्यापि तथार्जुनः । आग्नेयमपि सौम्यञ्च ससर्ज कुसुदनन्दनः" भा० व० २७४ अ० । इन्द्रेण इन्द्रकृतेन योगविशेषेण जालम् । २लताद्योपायभेदे च । इन्द्रजालञ्च द्रव्यविशेषसंयोगेन अद्भुतवस्तुदर्शकव्यापारः (किमाकरि) इति इंलण्डभाषा प्रसिद्धः मन्त्रद्रव्यविशेषेण वस्तुनोऽन्यथा करणञ्च । तच्च दृष्टान्ते यतन्ते मन्त्रविशेषसाध्यम् विस्तरस्त्वाभिधानिकम् । इन्द्रजालतन्त्रे तु ओषधिविशेषे च तत्प्रकारश्च बहुधा ततोदिङ्मात्रं प्रदर्श्यते । "अथातः संप्रवक्ष्यामि चेन्द्र-जालमनुत्तमम्" इत्युपक्रम्य

"अथातः संप्रवक्ष्यामि ओषधीनां विधिं वरे ! येन विज्ञा-नमात्रेण सर्व्वसिद्धिमवाप्नुयात् । महाकालस्य बीजानि प्रथम मेकं समाहरेत् । धात्रीरसेन देवेशि ! सप्त वारान् विभावये-त्तेन । कर्षमात्रां गुटिकां तां तु [illegible] निक्षिप्य पार्व्वति ! आचरेत्पि कालेन सप्त पातालतो भवेत् । अथातः संप्रव-क्ष्यामि शृण्वन्तं मम वल्लभे ! । कालस्य योगं सर्व्वत्र तत्र कर्णसहस्रेषु [illegible] पुनर्धत्तूरबीजानि वापये यत्काले तानि पुष्पाणि भवन्ति तदा बद्धोषां

निक्षिपेत् स रागो भवति । मयूरशीर्षमादायकृष्ण-चतुर्दश्यां मृत्तिकां पूरयेत् धणशीजानि वापयेत् यदा फलितः पुष्पितो भवति तदा धणबीजानि पौषायां वपयेत् मयूरो भवति । कृष्णचतुर्दश्यां मयूरशीर्षमादाय कृष्णमृत्तिकां पूरयेत् कार्पासबीजानि वापयेत् तदा फलिताः पुष्पिता भवन्ति पुष्पफले संगृह्य समस्तं मेषयित्वा चूर्णं विलिप्य पानीयमध्ये प्रविश्य यदा जले तिष्ठति तदा मयूरो भवति । कृष्णकाकशीर्षमादाय काकमाचीबीजानि वापयेत् यदा फलिता पुष्पिता भवति तत्फलं संगृह्य मुखे प्रक्षिप्य काको भवति । काक इव गच्छति मनुष्यान्मुखेन भोजनं । पारावतशीर्षमादाय कृष्णमृत्तिकां पूरयित्वा तिलबीजानि वापयेत् क्षीरोदकेन सेचनीयं यदा पुष्पितो भवति तदा मुखे संस्थाप्य अन्तर्हितो भवति । तेषां फलानां चूर्णं कृत्वा तेन चूर्णेन यं स्पृशति स किङ्करो भवति । सर्वस्वं ददाति । तानि तिलानि संगृह्य नेत्राञ्जनेन सह पिष्ट्वा कपिलादुग्धेन गुटिकां कारयेत् सप्तरात्रं पाचयेत् तां गुटिकां मुखे निक्षिप्य अन्तर्हितो भवति देवैरपि न दृश्यते मनुष्याणां का कथा । उष्ट्रीर्षं पुरुषो भवति । जीवेद्वर्षशतं स्त्रियः सर्वे जनाश्च वश्या भवन्ति । गृध्रशिरः समादाय कृष्णचतुर्दश्यां कृष्णमृत्तिकायां निक्षिपेत् लशुनबीजानि वापयेत् यदा फलं पुष्पं भवति तदा पुष्यनक्षत्रे पुष्पं गृहीत्वा अञ्जनेन सह कपिलाघृतेन कज्जलं पातयेत् चक्षुरञ्जनीयं यावत् तावत् योजनशतं पश्यति भेदिन्यां, दिवा नक्षत्राण्यपि पश्यति । एवं उष्ट्रगर्दभमहिषादीनां दृष्ट्वजीवानां शिरसि यत् यत्बीजं यस्य शिरसि वापयेत् यदा पुष्पितः फलितो भवति तदा यस्य बीजानि मुखे निक्षिप्यन्ते स जीवो भवति नात्र सन्देहः । मातुलङ्गस्य मूलन्तु धुस्तूरबीजकेन च । पलाण्डु पुष्पमादाय सूक्ष्मचूर्णन्तु कारयेत् । योऽस्य गन्धं समाघ्राति स च क्षेत्रेण पश्यति । दुन्दुभिं पटहांश्चैव शङ्खांश्चैव तु लेपयेत् । एष भूतोपसृष्टानां कुमारीणां गृहेषु च । भूपतिं सेवमानानां तथा तत्कर्मजीविनाम् । न चाग्निर्दहते वेश्म यत्रैष सोऽगदो भवेत् । पारावतस्य हृदयं चतुर्जिह्वा च शोणितम् । अञ्जनं रोचनायुग्मं वनितावशकृत् परम् । कपालं मानुषं गृह्य तत्रस्थं फलानि च । कर्पूरं मधुसंयुक्तं निधृत्य तिलकेन च । नारी वा पुरुषोऽनेन वश्यो भवति निश्चयः ।

एष कापालिको योगो वशिष्ठस्य शुभं मतम् । नरजिह्वां समुद्धृत्य सूक्ष्मचूर्णन्तु कारयेत् । जलेन च सुधीतेन दापयेत्तद्विचक्षणः । पाने फले च पुष्पे च भक्ष्ये भोज्ये च दापयेत् । प्रजापतिकुलोद्भूता यदि साक्षादरुन्धती सापि रक्ता प्रियं याति नान्यं पुरुषमिच्छति । हरितालं श्मशाने कृष्णचतुर्दश्यां लिखित्वा कृष्णविभिन्नं याह्यम् अवश्यं वशीभवेत् स नरः । नरतैलं प्रेताब्जवर्त्तिकं कृत्वा पात्रे रात्रौ प्रज्वाल्यार्कदुग्धस्थे कज्जलं कृत्वा चक्षुषी अभ्यञ्जेत् यं पश्यति स वश्यो भवति । कर्णेदत्तलं लाला स्वदेहाच्चिमलत्रयम् । नासिकोद्भवरक्तञ्च चूर्णमेतद्बलायुतम् । एतत् सर्वं समुद्धृत्य गुटिकां कारयेद्बुधः । पानभोजनके देयं वशीकरणमुत्तमम् । काकाजङ्घा वचा कृष्णमात्मनो रुधिरं स्त्रियः । तद्वासदत्तं कृत्वा तगरं गौरसर्षपाः । शिवनिर्माल्यसंयुक्तं समभागानि कारयेत् । भोज्ये पानेऽथवा देयं स्त्रीणान्तु वशकारकम् । नित्यं पुरुषमिच्छन्ती मृतमप्यनुगच्छति । कृष्णसर्षपाङ्गुलप्रमाणं शिरश्छित्त्वास्थ्यं सर्षपादिभिः । पूरयित्वा छायाशुष्कं शोषयेत् । परतः सर्षपान् याचयित्वा तानि यस्मै दीयते स वश्यो भवति । पूगीफलं गिलित्वाऽपानमार्गेण निर्गतं संगृह्य धुस्तूररसान्वितं कृत्वा सप्त दिनानि पूजयेत् । पुनः कङ्कुमचन्दनैरधिवास्य यस्मै दीयते स वश्यो भवति । दर्दुरयुग्मं गृहीत्वा तड्डूमेन दाहयेत् । तद्भस्म सह पानेन वश्यकृत् परमो मतः । अजगन्धस्य पत्राणि वचां कुष्ठेन भावयेत् । श्मशानभस्मसंयुक्तं चूर्णमेतेषु दुर्लभम् । अनेनैव तु चूर्णेन योजयेत् त्रीणि पादपान् । पुष्पितं फलितं दृष्ट्वा चूर्णं दत्त्वादिलग्नयेत् । तत् क्षणात् फलते दृष्टो नरनारीषु का कथा । जिह्वामूले समुद्धृत्य सैन्धवेनापि मिश्रितम् । दत्तं यस्य पानेषु सोऽपि वश्यो भवेत् क्षणात् । गोपितं सैन्धवञ्चैव दृष्टतीफलमेव च । लेपमेतत् प्रयोक्तव्यं नरनारीवशङ्करम् । उद्धृतः पद्ममूलेन आत्मनो रुधिरान्वितम् । स्त्रीपुंसयोः प्रदातव्यं वशीकरणमुत्तमम् । श्वेतार्कं रोचनायुक्तमाज्यमूलेन मेषयेत् । ललाटे तिलकं कृत्वा त्रैलोक्यं क्षोभयेत् क्षणात् । दृष्टमात्रेण नेत्रेण सर्वो भवति किङ्करः । श्वेतार्कं चन्दनेनैव रञ्जयेत् सह लेपयेत् । दीयते कस्य चिद्यापि पश्चात् दासो भविष्यति । मधूकं सह तैलेन सार्षपेण तु मेषयेत् । एतेन पाणिमभ्यञ्ज्य भर्त्रा सा सङ्गता स्वपेत् ।

संयुक्ते मैथुनीभावे पतितोसौ भविष्यति"। "यानि कानि च बीजान्यङ्कोलतैलेन लेपयेत्। सफलो जायते तस्याः सिद्धियोग उदाहृतः। भल्लुके विन्दुमात्रं तत्तैलं निःक्षिपेद् यदि। एकयामं भवेत् जीवो नान्यथा शङ्करोदितम्। शिग्रुबीजसंस्थं तैलं यावत पुरीषकम्। वराहस्य वसायुक्तं गृहीत्वा च समं समम्। गर्दभस्य वसायुक्तं हरितालं मनःशिलाम्। एभिस्तु तिलकं कृत्वा यथा लङ्केश्वरोऽभवत्। उलूकविष्टां गृहीत्वा त्वेरण्डतैलेन लेपयेत्। यस्याङ्गे निक्षिपेत् विन्दुं सक्षिप्रो जायते ध्रुवम्। सर्पदन्तं गृहीत्वा तु कृष्णदन्तिककण्टकम्। कङ्कालरक्तसंयुक्तं सूक्ष्मचूर्णन्तु कारयेत्। यस्याङ्गे निक्षिपेच्चूर्णं सद्यो याति यमालयम्। सिन्दूरं गन्धकं तालं समं पिष्ट्वा मनःशिलाम्। तल्लिप्तवस्त्रं शिरसि अग्निवत् दह्यते ध्रुवम्। अर्कक्षीरं वटक्षीरं क्षीरं डुम्बरसम्भवम्। गृहीत्वा पात्रके क्षिप्ते जलपर्णं करोति च। दुग्धं तत्र भवेत् सद्यो महाकौतुककौतुकम्। अङ्कोलतैलसिक्ताङ्गो दह्यते राजसाक्षितः। पलायन्ते नराः सर्वे पशुपक्षिगजा हयाः। अङ्कोलस्य तु तैलेन दीपं प्रज्वालयेन्नरः। रात्रौ पश्यति भूतानि खेचराणि महीतले। बुधे वा धनिवारे वा कङ्कालं ग्राह्य यत्नतः। यत्र भूमौ यते यत्र कङ्कालं तत्र निःक्षिपेत्। निखनेद्भूमिमध्येषु उड्डते च पुनः सुखी। नपुंसकं भवेत् सद्यं नान्यथा शङ्करोदितम्। गन्धकं हरितालञ्च गोमूत्रञ्च विषं तथा। सूक्ष्मचूर्णमयं कृत्वा किञ्चिद्दक्षिं विनिःक्षिपेत्। विप्राः सर्वे पलायन्ते यथा युद्धेषु कातराः" दत्तात्रेय तन्त्रे ११प०

इन्द्रजालिक त्रि० इन्द्रजाल विद्यतयाऽस्त्यस्य ठन्। इन्द्रजालकारके। इनि इन्द्रजालीत्यत्र स्त्रियां ङीप्।

इन्द्रजित् पु० इन्द्रं जितवान् जि-भूते क्विप्। दितिवंशोये असुरभेदे चाक्षुषमन्वन्तरे "दित्याः पुत्रद्वयं जज्ञे काश्यपादिति विश्रुतम्। हिरण्यकशिपुर्यश्च हिरण्याक्षश्च वीर्यवान्" । इत्युपक्रम्य तत्पुत्रपौत्रादिवर्णने "इन्द्रजित् सर्वजिच्चैव वज्रनाभस्तथैव च" हरिवं० २अ०। २रावणपुत्रे मेघनादे च "पुत्रमिन्द्रजितं वीरं रावणः प्रत्यधावत। जहि रामसमित्यत्र सुषेणवच्च सलक्ष्मणम्। त्वया हि मम सत्पुत्र! यशोदीप्ततपार्जितम्। जित्वा वज्रधरं संख्ये सहस्राक्षम् यशोपतिम्" भा०व० २८७। "तौ वीरौ शरबन्धेन बद्धाविन्द्रजिता रणे" भा०व० २८८ अ०।

इन्द्रजित्त पु० इन्द्रजितं हन्ति हन-क्त्र् तैत०। दशरथात्मज लक्ष्मणे। तद्जननकथा। "अविध्यदिन्द्रजित्तीक्ष्णैः सौमित्रिं मर्मभेदिभिः। सौमित्रिस्तानलक्ष्यैरविध्यद्रावणिं शरैः"। इत्युपक्रम्य "एकेषाक्ष धनुश्छन्नं बाहुं देहादपातयत्। द्वितीयेन शरेणाक्ष भुजं भूमौ न्यपातयत्। तृतीयेन तु बाणेन पृथुधारेण भास्वता। जहार सुनसञ्जातं शिरो भ्राजिष्णुकुण्डलम्। विनिकृत्तभुजस्कन्धं कबन्धं भीमदर्शनम्। तं दृष्ट्वा सूतमभ्यर्क्षजयिनं बलिनां वरः" भा०व०२२८अ०।

इन्द्रतापन पु० इन्द्रं तापयति तप+णिच्+ल्यु। १असुरभेदे "इन्द्रतापनवातापी केतुमान् बलदर्पितः" असुरनामोत्कीर्त्तने हरिवं० २६अ०। २मेघनादे च। दशग्रीवस्य बाह्वो च मेघराजो दशाधरः। टिट्टिभीविटभूतश्च संज्ञादेवेन्द्रतापनः" भा०स०प००अ० वरुणसभावर्णने।

इन्द्रतूल न० इन्द्रस्येव तूलमाकाशे उड्डीयमानत्वात्। आकाशे भ्रमता वाल्यमाने कार्पासे वृक्षे तिका०।

इन्द्रतोया स्त्री इन्द्रमैश्वर्य्यान्वितं तोयमस्याः, इन्द्रेण पूरितं तोयमस्या वा। गन्धमादनसमीपस्थे नदीभेदे। "इन्द्रतोयां समासाद्य गन्धमादनसन्निधौ" भा० अनु० प० २४।

इन्द्रदमन पु० "बाणस्य चेन्द्रदमनो लौहित्यास्तदपद्यत" हरिवं० २अ० उक्ते बाणासुरपुत्रभेदे।

इन्द्रदारु पु० इन्द्रस्य तद्ध्वजस्य साधनं दारु। देवदारुवृक्षे। इन्द्रध्वजशब्दे ८४६ पृष्ठे तस्य तद्ध्वजसाधनत्वम् दृश्यम्। इन्द्रद्रुमादयोऽप्यत्र।

इन्द्रद्युम्न इन्द्रस्येव द्युम्नं धनमस्य। भारतोक्ते १ऋषिभेदे २असुरावतारराजभेदे ३राजभेदे च। तत्र असुरस्योपदेशः कृष्णेन कृतः यथा।"इन्द्रद्युम्नोहतः कोपाद्युवनश्च ससैन्यमान्। कृतः सौभपतिः पात्यस्त्वया सौभं च पातितम्" भा० व० १२ अध्याये कृष्णं प्रति व्यासवाक्यम्। ऋषिभेदस्तु।"ततस्ते ब्राह्मणाः सर्वे यज्ञं दाल्भ्यस्य पूजयित्वोपक्रम्य "हैपायनो नारदश्च जामदग्नेः पृथुश्रवाः। इन्द्रद्युम्नोभालवित्र ऋतचेताः सकश्यपात्"इति कतिचित् ब्राह्मणानभिधायाह।"एते चान्ये च बहवोब्राह्मणा संशितव्रताः। अजातशत्रुमानर्चुः पुरन्दरमिवर्षयः" भा० व० २६ अ०। राजभेदस्तु मार्कण्डेयादपि प्राचीनः तत्कथा भा०व० १६८अ०। युधिष्ठिरं प्रति मार्कण्डेयवाक्यम्।"स तानुवाचाति खलु राजर्षिरिन्द्रद्युम्नो नाम क्षत्र-

पुरुषस्त्विदिवात् प्रच्युतः कीर्त्तिर्म्मे व्युच्छिद्येति स मानुषादितिदृश्य प्रत्यभिजानाति मां भवानिति। तमहमब्रवं न वयं वार्षायणिकाः कार्य्यचेष्टाकुलत्वाच्च प्रत्यभिजानाम्यात्मनोऽर्थानामनुष्ठानं न शरीरोपतापेनात्मनः समारभामोऽर्थानामनुष्ठानं स मानुषाच्च अक्ष्यन्यस्त्वत्तस्थिरजात इति तमहमब्रवम् अस्ति खलु क्षिमवति प्राचारक्षसो नामोलूकः प्रतिवसति स मत्तस्थिरजातो भवन्तं यदि जानीयादितः प्रभृते चाध्वनि क्षिमवांस्तत्रासौ प्रतिवसतीति। ततः स समाश्वो भूत्वा तत्रावहदात्म बभूवोलूकः अथैनं स राजा पप्रच्छ प्रतिजानाति मां भवानिति। स मुहूर्त्तमिव ध्यात्वाऽब्रवीदेनं नाभिजानामि भवन्तमिति। स एवमुक्तो इन्द्रद्युम्नः पुनस्तमुलूकमब्रवीद्राजर्षिः। अथात्ति कश्चिद्भवतः सकाशात्स्थिरजात इति स एवमुक्तोऽब्रवीदस्ति खल्विन्द्रद्युम्नं नाम सरस्तस्मिन्नाड़ीजङ्घो नाम वकः प्रतिवसति सोऽस्मत्तस्थिरजाततरस्तं पृच्छेति। तत इन्द्रद्युम्नो मान्धोलूकमादाय तत्सरोऽगच्छदात्मासौ नाडीजङ्घो नाम वको बभूव। सोऽस्माभिः दृष्टो भवानमभिन्द्रद्युम्नं राजानमभिजानाति स एनं मुहूर्त्तं ध्यात्वाऽब्रवीन्नाभिजानाम्यहमिन्द्रद्युम्नं राजानमिति ततः सोऽस्माभिः पृष्टः कश्चिद्भवतो ज्यस्थिरजाततरोऽस्तीति स सोऽब्रवीदस्ति खल्वस्मिन्नेव सरस्यकूपरो नाम कच्छपः प्रतिवसति स मत्तस्थिरजाततरः स यदि कथञ्चिदपि जानीयादिमं राजानं तमकूपारं पृच्छध्वमिति। ततः स वकस्तमकूपारं कच्छपं विज्ञापयामास। अस्त्यत्राकमभिप्रेतं भवन्तं कञ्चिदर्थमभिप्रष्टुं साध्वागम्यतां तावदिति तच्छ्रुत्वा कच्छपस्तस्मात् सरसः स्थायाभ्यगच्छदात्म तिष्ठामो वयं तस्य सरसस्तीरे आगतञ्चैनं वयमपृच्छाम भवानमभिन्द्रद्युम्नं राजानमभिजानातीति। स मुहूर्त्तं ध्यात्वा वाष्पसम्पूर्णनयन उद्विग्नहृदयो वेपमानो विसंज्ञकल्पः प्राञ्जलिरब्रवीत्। कथमहमेनं न प्रत्यभिज्ञास्यामीदृशेन सदृशत्वत्रितिषु यूपा आहिताः। सरस्वदमस्य दक्षिणाभिर्हुत्ताभिर्गोभिरतिक्रममाणाभिः कृतम्। अत्र चाहं प्रतिवसामीति। अथैतत् सकलं कच्छपेनोदाहृतं श्रुत्वा तदनन्तरं देवलोकाद्देवरथः प्रादुरासीदाहाचश्चाम्बूयन्त इन्द्रद्युम्नं प्रति प्रस्तुतस्त्वर्गो यथोचितं स्थानं प्रतिपद्यस्व कीर्त्तिमानसव्ययो याहीति"।

एतत्सरस्योल्लवाक्ये वर्णितं तच्चाधिकृत्य। "इन्द्रद्युम्नसरः प्राप्य हंसकूटमतात्म च। यत्रेष्ट्वा महाराज तापसः समतप्यत" इत्युक्तेः शतशृङ्गपर्व्वतसमीपे हंसकूटानन्तरं तत्सरः इति गम्यते। "हंसकूटस्य यच्छृङ्गमिन्द्रद्युम्नसरः प्रति" इति हरिवं० १५७ अध्याये हंसकूटसन्निकृष्टत्वमस्यावगम्यते। पुरुषोत्तममूर्त्तिप्रकाशकत्वात्तरः पुरुषोत्तमशब्दे तद्विवृतिर्द्रष्टव्या।

इन्द्रद्रु पु० इन्द्रस्य इन्द्रध्वजार्थोद्रुः। अर्जुनवृक्षे। तस्य तद्ध्वजनिर्म्माणे प्रथमोपात्तत्वात् तथात्वम्। इन्द्रध्वजशब्दे विवृतिः। इन्द्रनामा द्रुः। २कटजवृक्षे राजनि०।

इन्द्रद्रुम न० इन्द्रद्रुवत् वियवृक्षः। अर्जुनवृक्षे शब्दर०।

इन्द्रधनुस् न० इन्द्रे इन्द्रस्वामिके मेघे धनुरिव। इन्द्रायुध शब्देवच्छब्दार्थे "विद्युतोऽशनिमेघांश्च रोहितेन्द्र धनूंषि च" मनुः। तस्य ऋजुत्वे रोहितत्वम्। वक्रत्वे इन्द्रधनुरिति भेदः।

इन्द्रध्वज पु० इन्द्रस्य तत्सन्तोषार्थोध्वजः। भाद्रशुक्ल द्वादश्यां स्वराज्ये वृष्ट्यादिशस्यवृद्ध्यर्थं तत्प्रीतये राज्ञा क्रियमाणे ध्वजे तदुत्पत्तितत्करणप्रकारादि दर्शितं बृहत्संहितायां यथा

"ब्रह्माणमूचुरमरा भगवन्छक्राः स्म नासुरान् समरे। प्रतियोधयितुमतस्त्वां शरण्यं शरणं समुपयाताः। देवानुवाच भगवान् क्षीरोदे केशवः सवः कोतुम्। यं दास्यति नं हत्वा राजौ स्थास्यन्ति वो दैत्याः। लब्धवराः क्षीरोदं गत्वा ते तुष्टुवुः सुराः सेन्द्राः। श्रीवत्साङ्कं कौस्तुभमणिकिरणोद्भासितोरस्कम्। श्रीपतिमचिन्त्यमसमं समन्तः सर्व्वदेहिनां सूक्ष्मम्। परमात्मानमनादिं विष्णुमविज्ञातपर्यन्तम्। तैः संस्तुतः स देवस्तुतोष नारायणो ददौ चैषाम्। ध्वजमसुरगुरुबधूसुखकमलवनतुषारतीक्ष्णांशुम्। तं विष्णुतेजोभवमष्टचक्रे रथे स्थितं भास्वति रत्नचित्रे। देवीप्यमानं शरदीव सूर्य्यं ध्वजं समास्थाय सुरोऽथ चक्रः। सकिङ्किणीजालपरिष्कृतेन स्वकृत्तघण्टापिटकान्वितेन। ससुच्छ्रितेनामरराड् ध्वजेन निघ्ने विनाशं समरे ऽरिसैन्यम्। उपरिचरस्यामरपो वसोर्ददौ चेदिपस्य वेणुमयीम्। यष्टिं तां स नरेन्द्रो विधिवत्प्रभूजयामास। प्रीतो महेन्द्र मघवान् प्राहैवं ये नृपाः करिष्यन्ति। वसुवसुहेमयष्टयस्ते भुवि सिद्धार्था भविष्यन्ति। सुदिताः प्रजाश्च तेषां भयरोगविवर्जिताः प्रभूताश्च। ध्वज एव चाभिधास्यति जगति निमित्तैः फलं सदसत्। पूजा तस्य नरेन्द्रैर्बन्धुहृद्विजयार्थिभिर्यथा पूर्वम्। शक्राज्ञया प्रयुक्ता तामागमतः प्रवक्ष्यामि। तस्य विधानं शुभकरणदिवस-

नलतलमङ्गलमूर्तैः । प्रास्थानिकैर्वलभियाद्दैवतैः कृतधारस्य । उद्यानदेवताजयपिहवनवल्मीकमार्गचितिजाता । कुलोर्ध्वशुष्ककण्टकिवल्लीवन्ध्याकशुक्लाश्च । बकुविहगालयकठोरपवनानलपीडिताश्च ये तरवः । ये च सु स्त्रीसञ्ज्ञा न ते शुभाः यक्षकोत्यर्थे । श्रेष्ठो ज्ज्वलो ज्वकर्णः प्रियकश्चोद्धस्वराश्च पक्षैते । एतेषामन्यतमं प्रशस्तमधवाऽमरं दृश्यम् । नीरासितक्षितिभवं सम्पूज्य यथाविधि द्विजः पूर्व्वम् । विजने समेत्य रात्रौ स्मृत्वा ब्रूयादिमं मन्त्रम् । "यानीह दृश्ये भूतानि नेत्र्यः खलु नमो ऽस्तु वः । उपहारं गृहीत्वेमं क्षिप्रतं वासपर्य्यायः । पार्थिवस्त्वां वरयते खलि ते ऽस्तु नगोत्तम ।। ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यताम्" । द्विजात् प्रभातसमये दृश्यमटक प्राङ्मुखो ऽपिधा भूत्वा । परशोर्जर्जरयष्टौ नेष्टः स्निग्धो घनश्चितः । रूपजयदमविध्वस्तं पतनमनाकुञ्चित च पूर्व्वोदक् । अविलम्बं चान्यतरौ विपरीतमतस्त्यजेत्पतितम् । कृत्वाग्रे चतुरङ्गुलमूलौ मूले जले क्षिपेद्दृष्टिम् । उद्धृत्य पुरद्वारं यक्टेन नयेन्मनुष्यैर्वा । अरभङ्गे बलभेदो नेत्र्या नाशो बलस्य विज्ञेयः । अर्द्धक्षयो ज्वभङ्गे तथाग्निभङ्गे च वर्धकिनः । भाद्रपदशुक्लपक्षस्याष्टम्यां नागरेष्टितो राजा । दैवज्ञसचिवकञ्चुकिविप्रप्रमुखैः सुवेषधरैः । कृताम्बरसंवीतां यष्टिं पौरन्ध्रीं पुरं पौरैः । लग्नन्धूपयुक्तां प्रवेशयेच्छङ्खदुन्दुरवैः । रुचिरपताकातोरणसमालालङ्कृतं प्रहृष्टजनम् । सम्माजितासिक्तपथं सुवेषगणिकाजनाकीर्णम् । अभ्यर्चितापणगृहं प्रभूतपुष्पाक्षवेदनिर्घोषम् । नटनर्तकगेयवरैराकीर्णचतुष्पथं नगरम् । तत्र पताका श्वेता विजयाय भवन्ति रोगदा पीताः । जयदाश्च चित्ररूपा रक्ताः यक्षप्रकोपाय । यष्टिं प्रवेशयन्तीं निपातयन्तो भयाय नागादाः । बालानां तलयुद्धे सङ्ग्रामः सक्थयुद्धे वा । सन्तक्ष्य पुनस्तक्षा विधिवद्यष्टिं प्ररोपयेद्यन्त्रे । जागरमेकाटश्यां नरेश्वरः कारयेज्ज्ञाग्राः । सितवस्त्रोष्णीषधरः पुरोहितः याक्षवैष्णवैर्मन्त्रैः । जुहुयादग्निं सांवत्सरो निमित्तानि लक्षयेत् । दृष्टोदयाकारः सुरभिः स्निग्धो घनो ज्वलो ऽर्चिष्मान् । शुभकृतो ज्यो नेष्टो यात्रायां विस्तरोऽभिहितः । स्वाक्षावसानसमये स्वयमुज्ज्वलार्चिः स्निग्धः प्रदक्षिणशिखो हुतभुग् नृपस्य । गङ्गादिवाकरसुताजलचारुहारां धात्रीं वसुंधरसनां वशगां करोति । चामीकरायोकुरुवृक्षकाञ्चनैर्दूर्यनीलोत्पलसन्निभैश्च नैः । विभ्राजमानमभवनेऽवकाशं करोति रक्षांसुहृतं नृपस्य । येषां रक्षोघाणयमेषदन्तिनां संक्रन्दनो ऽग्निर्यदि वापि दुन्दुभेः । तेषां मदान्धेभघटाविघट्टिता भवन्ति याने तिमिरोपमा दिशः ।। ध्वजकृन्मूर्द्धभभूद्भतामनुरूपे वपुर्भेति भूभृताम् । उदयाद्रिधराधराधरा स्थिरविघ्न्यधरोधरा धरा । हिरटमटमर्कशेरोजलाजार्द्रतमधुना च कृतायने रणे । प्रथतरूपगिरोमणिप्रभाभिर्भवति पुरन्ध्रितेव भूर्द्धस्थ । उक्तं यदुत्तिष्ठति यक्षकेतौ शुभाशुभं सम्भरीचिरूपैः । तज्ज्ञानायत्तपत्त्यालियात्राविवाहकाले ऽपि चिन्तनीयम् । गुडपूपपायसाद्यैर्विप्रान्भक्ष्यैश्च दक्षिणाभिश्च । श्रवणेन द्वादश्याम् उपोष्योऽन्यत्र वा श्रवणात् । यक्षकर्माण्यः कार्याः प्राङ्मनुसप्तपञ्च वा तज्ज्ञैः । नन्दोपनन्दसञ्ज्ञौ पादेनार्धेन चोच्छ्रायात् । षोडशभागाभ्यधिके जयविजये द्वे वसुन्धरे चाग्ये । अधिका यक्षजनित्वा मध्ये ऽष्टांशेन चैतासाम् । प्रीतैः कृतानि विबुधैर्यानि पुरा भूषणानि सुरकेतोः । तानि क्रमेण दद्यात् पिटकानि विचित्ररूपाणि । रक्ताशोकनिकाशं चतुरस्रं विश्वकर्मणा प्रथमम् । रसना स्वयम्भुवा यद्वरेण चानेकवर्णधरा ! अष्टास्रि नीलरक्तं द्वितीयमिन्द्रेण भूषणं दत्तम् । असितं यमस्तृतीयं मरुद्रकं कान्तिमदयक्षत् । मञ्जिष्ठाभं वरुणः षडस्रि तप्तश्लक्ष्णं जलौर्मिनिभम् । मायूरं कायूरं षष्ठं वायुर्जलदनीलम् । स्कन्दस्य केयूरं सप्तमसदृद्ध्वजाय वसुचित्रम् । अष्टममनलस्याग्नेयं रक्तं हव्यभुग्दत्तम् । वैदूर्यमष्टयमिन्दुनवम् धनेयकं ददावन्यत् । रथचक्राभं दशमं त्वष्टा प्रभाचयैर्युक्तम् । एकादशसहस्रं विश्वे देवा मनोजसङ्ग्रामम् । द्वादशमपि च निवृत्तं सनयो नीलोत्पलाभासम् । क्षिप्तुर्द्ध्वजोर्ध्वनिर्गतसुपरि विशालं त्रयोदशं केतोः । गिरिसि दृश्यतिशुक्लो लाजारससन्निभं ददत् । यद्यद्येन विनिर्मितमसुरेण विभूषणं ध्वजस्यार्थे । तत्तत्तर्हि बलविज्ञातव्यं विपश्चिद्भिः । ध्वजपरिमाणत्रयः परिधिः प्रथमस्य भवति पिटकस्य । परतः प्रथमात्त्रयमादष्टाग्रांशहीनानि । कुर्यादृक्षि चतुर्थे प्रथमेन्द्रध्वजस्य यास्तत्तः । मनुना चागमगीतान् मन्त्रानेतान् पठेच्चियतः । "हरार्कधेवस्वतयक्षसोमैर्धनेयवैश्वानरपाशभृद्भिः । सप्तर्षिसिद्धैः सदिगग्नरोभिः यक्षाङ्किरःस्कन्दगरुडैश्च । यथा त्वमूर्जस्कर । नैकरूपैः समर्चितस्त्वाभरणैरुदारैः । तथेह ताभ्याभरणानि देव । शुभानि सम्प्रीतमना दधाहि । अजो ऽव्ययः शाश्वत एकरूपो विष्णुर्वराहः पुरुषः पुराणः । त्वमन्तकः सर्वहरः क्षयान्तः सक्तस्त्रयीषां यतमस्त्वरीह ।

कपि सम्प्रजिह्वं त्वाष्टारं त्वाम् इन्द्रमवितारं सुरेशम् । यक्षं हतघ्नं सुषेणम् अक्षाक्षं वीरा उत्तरे भवन्तु"। प्रपूरणे चोक्तयजे प्रवेशे स्नाने तथा मार्गविधौ विसर्गे । पठेदिमान्नृपतिः सोपवासो मन्त्राञ्छुभान् पुरुहूतस्य हेतोः । कृतध्वजादर्शफलाधिचन्द्रविचित्रमालाकदलीद्रुदण्डैः । स व्याकसिद्धे पिटकैर्गवाक्षैरलङ्कृतं दिक्षु च लोकपालैः । अक्षिस्फरज्या दृढसाधमाल्कं विधिश्रुत्यन्मार्गलपादतोरणम् । उत्थापयेच्छक्रमथ सकल्पचक्षुषः सारदुमाभ्रनकुमारिकाभिः । अविरतजनरावं मङ्गलाशीःप्रयामैः पटुपटहरवद्भैः शङ्खभेर्यादिभिश्च । स्तुतिविहितवचोभिः पापठद्भिश्च विप्रैरगुरुसहितगन्धं केतुसत्थापयेत्तं । फलदधिदलताजाताद्रपुष्पाक्षतैः प्रणिपतितगिरीभिस्तुष्टवद्भिश्च पौरैः । हुतसमिनिमिषभर्तुः केतुमीयं प्रजानाम् अरिनगरनतायं कारयेद्विड्वधाय। नातिहृतं न च विस्तरिततमप्रकाश्यैः अन्वक्तमाल्यपिटकादिविभूषणं च । उत्थानमिष्टमृगं यदतो ऽन्यथा स्यात् तच्छान्तिभिरवदेः शमयेत्पुरोधाः । क्रव्यादकौशिकशपोतककाककङ्कैः केतुस्थितैर्महदुपैति भयं नृपस्य । चाषेण चापि युवराजभयं वदन्ति ग्रेनो विलोचनभयं निपतन् करोति । ऋक्षभ्रुपतने नृपवल्लभस्तरादृक्षं करोति निधनम् । कृन्तिश्चाथ पुरोहितस्य कथा पार्थिवस्य महिषीमयनिश । राज्ञो विनाशं पतिता पतत्रा करोत्यहर्दिं पिटकस्य पातः । मध्याह्नभूमेषु च केतुभङ्गो निहन्ति मन्त्रिक्षितिपालपौरान् । धूमाहते स्निग्धिभय तमसा च मोहो व्याधैश्च भग्नपतितैर्न भवन्त्यमात्याः । म्लायन्त्युदग्रभृति च क्रमशः द्विजाद्या भङ्गे च यद्विविधः कथितः कुमार्याः । रज्जूत्थद्रुच्छेदने बालपीडा राज्ञो मातुः पीडनं मातृकायाः । यद्यत्कृषेबालकाश्वारथा वा तत्तत्तादृग्भावि पापं शुभं वा । दिनचतुष्टयस्तुत्थितमर्चितं समभिपूज्य यूपो ऽर्कनिम्नः ; प्रकृतिभिः सह लक्षं विसर्जयेद् बलभिद् यत्रवाभिविहङ्गे । उपरिचरवसुप्रवर्त्तितं नृपतिभिरप्यनु सन्ततं कृतम् । विधिमिममनुमन्य पार्थिवो न रिपुकृतं भयमाप्नुयादिति" ध्वज प्रमाणादि तं० क्षत्रि० पु० उक्त यथा । "अर्जुनोऽप्यस्त्रकार्यस्य प्रियकोधपरश्च, औद्धत्यस्य पङ्क्तेः केतवर्थे सत्तमाः स्मृताः । अन्ये च देवदार्वाद्याः शालाद्याश्चरवस्तथा । तच्च दृष्टं तदेदाद्यौ स्थापा मन्त्रमिमं पठेत्" । तुहेत् छेदयेत् । "यानि दुष्टे तु भूतानि तेभ्यः सन्ति नमोऽस्तु वः । उपहारं गृहीत्वेमं क्रियतां वा-सपर्यया" । पार्थिवस्यं वदयते खलि तेऽस्तु नमोऽस्तु ते ॥ ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यताम्" । ततोऽपरे क्षिप्तं क्षिप्त्वा मूलमष्टाङ्गुलं पुनः । जले क्षिपेत्तदग्रस्य च्छिन्नपर्वं चतुरङ्गुलम् । ततो नीत्वा पुरद्वारं केतुं निर्माय तत्रैव । शुक्लाष्टम्यां भाद्रपदे केतुं वेदिं प्रवेशयेत् । द्वात्रिंशद्धस्तमानस्तु ध्वजः केतुरुच्यते । द्वात्रिंशत्तु ततोऽष्टाग्र द्वाचत्वारिंशदुत्तम । क्रमार्ध्व पञ्च कर्तव्याः यक्षस्य नृपसत्तम । मालमय्यस्तु ताः सर्वाश्चत्वरः यक्षमातृकाः । केतोः पादप्रमाणेन कार्या. यक्षकुमारिकाः । मातृकार्द्धप्रमाणात्तु यन्त्रं हस्तद्वयं तथा । एवं कृत्वा कुमारीश्च मातृका केतुमेव च । एकाष्टम्यां स्थिते पक्षे यक्षीणामधिवासनम् । अधिवास्य ततोयष्टीं गन्धद्वारादिमन्त्रकैः । हरदत्तं मन्त्रेण कृत्वा वासवं विस्तृतात्मकम् । अच्युत पूजयित्वादौ यक्षं पश्चात् प्रपूजयेत् । यक्षस्य प्रतिमां कुर्यात् कानकीं दारवीं तथा" कानकीं कनकमयीम् "अन्यतेजसभूतां वा सर्वाभावे तु मृण्मयीम् । तां स्नापयित्वा विधिवत्पूजयित्वा विधानतः । ततः शुभे मुहूर्ते तु केतुमत्यापरेद्युः । "वज्रहस्त । सुरश्रेष्ठ । वृत्रशत्रो पुरन्दर । अंकार्थं सर्वलोकानां पूजेयं प्रतिगृह्यताम् । एष्यहि सर्वामरसङ्घसङ्घैरभिष्टुतोवज्रधरामरेश । । समुत्थितस्त्वं अवधार्यपादे स्थित्वा पूजा भगवन्मयस्ते" । इति मन्त्रेण तन्त्रेण नानावेद्यवन्दनैः । षटसु दश दिक्पालान् यक्षस्य परिपूजयेत् । साध्यादीन् सकलान् देवान् मातॄ सर्वास्वनुक्रमात् । तत शुभे मुहूर्ते तु शान्तिघोषयुतः । केतुपत्यानभूमिस्तु यत्नवेद्यास्तु पश्चिमे । विप्रै पुरोहितैः सार्द्धं गन्धैर्द्वाजा समङ्गलैः । रज्जुभिः पञ्चभिर्बद्धं यन्त्रलिप्तं समाहतम् । कुमारीभिश्च सयुक्तं दिक्पालानां च पट्टकैः । यथावर्णैर्यथादेवैर्यथालिङ्गैर्विचेष्टितं युतं तं किङ्किणीजालकैः षट्कषष्टाढ्यचामरैः । चित्रमाल्याम्बरैश्चापि चतुर्भिः परिवारितैः । उत्थापयेच्छक्रकेतुं राजा मान्यै यत्नैः यत्नैः । प्रतिमां तां मनोमूल केतौ शक्रं विचिन्तयन् । यजेत्तु पूर्ववत्तत्र शचीं मातलिमेव च । जयन्तं तनयं तस्य वज्रमैरावतं तथा । महासार्थांश्च दिक्पालान् सर्वांश्च गणदेवता । पूजितानान्तु देवानां वह्नौ होमं समाचरेत् । होमान्ते तु बलिं दद्यात् वासवाय महात्मने । तिलं हतं चाक्षतञ्च पुष्पं दूर्वां तथैव च । एतैस्तु जुह्वयादेतान् स्वैः स्वैर्मन्त्रैर्नरोत्तमः । ततोऽहो-

भावस्थाने तु ब्राह्मणानपि भोजयेत्। एवं प्रयुञ्जवेच्चित्र सप्तरात्रं दिने दिने। लोकारक्षिति मन्त्रोऽय वासवस्य वरः प्रियः। एवं कृत्वा दिवाभागे यज्ञोत्थापनमादितः। श्रवणर्क्षयुतायाञ्च द्वादश्यां पार्थिवः स्वयम्। अलपादे भरण्यान्तं निशि यज्ञं विसर्जयेत्। सुप्तेषु सर्वलोकेषु यथा राजा न पश्यति। "सार्द्धं सुरासुरगणैः पुरन्दर! यतक्रतो!। उपहारं गृहीत्वेमं मह्येन्द्रध्वज गम्यताम्" उत्थाप्य सप्तरात्रान्ते तथोपस्थवदर्शने। व्यतीत्य यमिभौमौ च अन्यर्क्षेऽपि विसर्जयेत्। यस्मिन्कस्मिन् दिने चैव स्रुतकाले विसर्जयेत्। तथा रत्नोपः केतुं न पतेच्छक्रनिर्यया। शनैः शनैः पातयेत्तं यथोत्थापनमादितः। विसृष्टं यज्ञकेतुं तं सालङ्कार तथा निशि। क्षिपेदनेन मन्त्रेण अगाधे सलिले नृपः।"तिष्ठ केतो! महाभाग! यावत्संवत्सरं जले। भयाय सर्वलोकानामन्तरायविनायक!"। उत्थापयेन्नृपश्रेष्ठः सर्वलोकस्य वै पुरः। एवं यः कुरुते पूजां वासवस्य महात्मनः। न तस्य राज्ये दुर्भिक्षं नतयो नाधर्मकृत्"। "इन्द्रध्वजसमुत्थान प्रमादाच्च कृतं यदि। तदा द्वादशमे वर्षे कर्त्तव्यं नान्तरा पुनः" ति०त० भविष्य०। पञ्चमाष्टमदिनयोर्विसर्जने यज्ञमेतया व्यवस्था। इन्द्रकेतुयज्ञाध्वजादयोऽत्र।

इन्द्रनक्षत्र न०। इन्द्रस्वामिकं नक्षत्रम्। १ज्येष्ठानक्षत्रे तस्य तत्स्वामिकत्वात् तथात्वम्। अस्मे धायुष्टे ४६६पृष्ठे नक्षत्रेश्वरा उक्ताः। इन्द्रनामकं नक्षत्रम्। २फल्गुनीनक्षत्रे च। फल्गुनीनक्षत्रस्य इन्द्रनामकत्वमाह शत०ब्रा० २,१, २,११। यथा "फल्गुनीष्वग्नी आदधीत। एता वा इन्द्रनक्षत्रं यत्फल्गुन्योऽस्य प्रतिनाम्न्योऽर्ज्जुनोरूवै नामेन्द्रो यदस्य गृह्यं नामार्ज्जुन्योर्वैनमार्द्रमाख्या एतत् परोक्षमाचक्षते फल्गुन्य इति कोऽस्मेतस्या गृह्यं नाम गृहीतम् इन्द्रोवै यजमानस्तस्य एवैतन्नक्षत्रे अग्नी आधत्ते"

इन्द्रनेत्र न० ६त०। १यज्ञनेत्रे २सहस्रसंख्यायाञ्च।

इन्द्रनील पु० इन्द्रइव नीलः श्यामः। (पान्ना) इति ख्याते जरकतभेदमणौ तल्लक्षणञ्च रत्नपरीक्षायाम् "क्षीरमध्ये क्षिपेन्नील क्षीरञ्चेन्नीलतां व्रजेत्। इन्द्रनील इति ख्यातः सर्व्वरत्नोत्तमोत्तमः"। अस्य नीलवर्णत्वं च रत्नौ गङ्गायमुनासंगमे यमुनायाइत्याह वर्णितम् यथा "क्वचित् प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव" "प्रायेन्द्रनील किमुतोन्मयूखम्" रघुः। "एकं सुक्ताशुक्तिमिव भुवः स्थूलमध्येन्द्रनीलम्" "मेघैश्चेरिन्द्रनीलैः" मेघदू०। अस्य किंवदन्तीप्रसङ्गत्वे महानीलसंज्ञा यथा हि 'महामहानीलशिलाकवः पुरः" माघव्याख्यायां मल्लिनाथेन "सिंहस्याकारोऽस्तु ता महानीलास्तु ते पुनः" इति अग्रस्थवाक्यं प्रमाणतयोपन्यस्तम्। "वापीष्वन्तर्महानीलटलासु" माघः व्याख्याने तेन तथैवोक्तम्।

इन्द्रपत्नी स्त्री ईत० १पुरोमाजायां यज्ञाम्। "उताकृण्वन्नीरिरिन्द्रपत्नी मरुत् सखा विश्वकाटिन्द्र उत्तरः" ऋ० १०८६,६। इन्द्रस्य पतिः पालयित्री "सपूर्व्याच्चेति" या० ङीष् नुक् च। २इन्द्रपालयित्रीषु दुर्गादिषु विरुद्धासु देवीषु च "होता यक्षत्तिस्रोदेवीर्न भेषजं त्रयस्तिधातवोऽपस इडासरस्वती भारती महीः। इन्द्रपत्नीर्बृहद्विभृतीः" यजु० २८,८। "इन्द्रपत्नाः इन्द्रस्य पालयित्र्यः वेददी० भाषो तु शुक्लयजुष प्रत्यधिदेवता "यजो प्रत्यधिदैवतमिति शुक्लध्यानम्। विवाहादौ पूजनीयषोढ़यमातृकान्तर्गता च।

इन्द्रपर्णी स्त्री इन्द्र इव लोकं पर्ण मस्याः जातित्वात् ङीष्। ओषधिभेदे। "कालानुसार्य्य गुरुकोवल्लुआरास्नायात त्रिवेन्द्रपर्ण्यः" सुश्रु०।

इन्द्रपर्व्वत पु० इन्द्रनामकः पर्व्वतः। १मलेन्द्रपर्व्वते इन्द्रवर्णः पर्व्वतः। २नीलपर्णे गिरिभेदे "वैदेहस्यस्तु कौन्तेय इन्द्रपर्व्वतवासिनः। किरातानामधिपतीनजयत् सप्त पाण्डवः" भा०स० २८ अ०।

इन्द्रपुत्रा स्त्री इन्द्रः पुत्रो यस्याः। अदितौ। तस्या इन्द्रजननीत्वात् तथात्वम्।

इन्द्रपुष्पी स्त्री इन्द्र इव नीलं पुष्पमस्याः जातित्वात् ङीष्। (विष्णुक्रान्ता) जाङ्गलीदेशे। "अर्कार्कर्करक्षुद्रयनागदन्तीमयूरकभार्गीराक्षेन्द्रपुष्पीक्षुद्रकेत्यादि" सुश्रुतः। वा कपि अतइत्त्वे इन्द्रपुष्पिकाप्यत्र

इन्द्रपुरोहित पु० ७त०। सुराचार्य्ये बृहस्पतौ

इन्द्रप्रमति पु० ऋग्वेदाध्ययनार्थं व्यासेन शिष्यत्वेन गृहीतस्य पैलस्य ऋचे शिष्यभेदे। "प्रथमं व्यासशिष्यस्तु पैल ऋग्वेदपादपम्। इन्द्रप्रमतये प्रादात् विभज्य पञ्च संहिताः" अग्नि पु०। "एकैकां संहितां ब्रह्मन् एकैकस्मै ददौ विभुः। पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह"। इत्युपक्रम्य "पैलः स्वसंहितामूचे इन्द्रप्रमतये मुनिः" भाग० १२स्क० ६अ०।

इन्द्रप्रस्थ न० इन्द्रस्य इन्द्रस्थानमेरोः प्रस्थइव (दिल्लीति) ख्याते पुरे। "इन्द्रप्रस्थगमत्तावत् कारि मा सन्तु वेदयः" माघः। "इन्द्रप्रस्थं जकप्रस्थं माकन्दं वारणावतम्। इति

मे चतुरोपामात्कश्चिदेकश्च पञ्चमम्" वेणी० खाण्डव प्रस्थे युधिष्ठिरेण यदभिनवपुरं निर्म्मितं तदिन्द्रप्रस्थतया विख्यातम्। तदेतत् भारते आ०२०६अ० वर्णितम्। "प्रतिष्ठन्तु तत्राद्य रूपं सर्व्वैः प्रणम्य च। प्रतस्थिरे ततो वीरं वनं तन्मनुजर्षभाः। अर्द्धं राज्यस्य सम्प्राप्य खाण्डवप्रस्थमाविशन्। ततस्ते पाण्डवास्तत्र गत्वा कृष्णपुरोगमाः। मखण्डयाञ्चक्रिरे तत्रं पुरं स्वर्गादवच्युताः। ततः पुण्ये शिवे देशे यात्वा कृत्वा मङ्गलाः। नगरं मापयामासुर्देवतुल्यपुरोगमाः। सागरप्रतिरूपाभिः परिखाभिरलङ्कृतम्। प्राकारेण च सम्पन्नं दिवमावृत्य तिष्ठता। पाण्डुराभ्रप्रकाशेन सोमरश्मिनिभेन च। शुशुभे तत्पुरश्रेष्ठं नागैर्भोगवतो यथा। हिमपाण्डरकूटाभैर्हारैः सौधैश्च शोभितम्। गुप्तमभ्रचयप्रख्यैर्गोपुरैर्मन्दरोपमैः। विविधैरपि निर्य्यूहैर्यन्त्रोपेतैः सुसंवृतैः। यक्षैरभिसमाविष्टं तद्वि हिजिह्वैरिव पन्नगैः। तत्प्रवाभ्यासिकैर्युक्तं शुशुभे शैलसन्निभम्। तीक्ष्णाङ्कुशगतप्रीतिर्यन्त्रजालैश्च शोभितम्। विरोचमानं विविधैः पाण्डुरैर्भवनोत्तमैः। तच्चित्रपटसङ्काशमिन्द्रप्रस्थं व्यरोचत। मेघसन्निभवाकाशे विद्युत्प्रभाभिरुच्छ्रितम्। तत्र रम्ये शिवे देशे कौरवस्य निवेशनम्। शुभे धनसमृद्धं धनाध्यक्षनिवेशनम्" "एवं सम्प्राप्य राज्यन्तदिन्द्रप्रस्थं तपोधन!" तत्र२०७अ०।

इन्द्रप्रहरण न० ईत०। वज्रास्त्रे तच्च दधीचोस्थिनेरस्थिनिर्म्मितं तत्कथा अर्थनि शब्दे ४६४५ पृ० उक्ता।

इन्द्रभूति पु० हेमचन्द्रोक्ते गौतमगोत्रजे जिनभेदे।

इन्द्रभेषज न० इन्द्रेण प्रकाशितं भेषजम्। ६त। वर्षायां शब्दरत्ना०।

इन्द्रमख पु० इन्द्रस्य तत्पूजार्थोमखः। वर्षादौ यक्षतोषार्थे यज्ञभेदे। स च मखोनन्दादिभिः प्रवर्त्तितः कृष्णेन निवर्त्तितश्च तत्र तत्करणे नन्देन हेतूक्तः भा० १० स्क०२३अ० "पर्জन्यो भगवानिन्द्रो मेघास्तस्यात्ममूर्त्तयः। तेऽभिवर्षन्ति भूतानां प्रीणनं जीवनं पयः। तं तात! वयमन्ये च वार्मुचां पतिमीश्वरम्। द्रव्यैस्तद्रेतसा सिद्धैर्यजन्ते क्रतुभिर्नराः। तच्छेषेणोपजीवन्ति त्रिवर्गफल हेतवे। पुंसां पुरुषकारार्थां पर्জन्यः फलभावनः" इति नन्दोक्तौ कृष्णेन तन्मखनिवारणेन गोवर्द्धनमखस्य प्रवर्त्तनं कृतम् तदपि तत्रैवोक्तं यथा "सत्वं रजस्तमइति स्थित्युत्पत्यन्तहेतवः। रजसोत्पद्यते विश्वमत्स्योन्यं विविधं जगत्। रजसा नोदितामेघा वर्षन्त्यम्बूनि सर्व्वतः। प्रजास्तैरेव सिद्ध्यन्ति किं मघेन्द्रः करिष्यति न नः पुरोजनपदा न ग्रामा न वयम्। वनौकसस्तात! नित्यं वनशैलनिवासिनः। तस्मादेषां ब्राह्मणानामद्रेर्गोरक्षतां मखः। यइन्द्रमखसम्भारास्तैरयं साध्यतां मखः"। भाग० १०स्क० २४अ०। अधिकं गोवर्द्धनधरशब्दे वक्ष्यते। "मयाते ऽकारि मघवन्! मखभङ्गोऽनुगृह्णता। मदनुस्मृतयेनित्यं मत्तस्येन्द्रश्रिया भृशमिति" २७अ०।

इन्द्रमह पु० इन्द्रस्य सन्तोषार्थोमहः। इन्द्रसन्तोषार्थे वर्षादौ कर्त्तव्ये उत्सवभेदे। इन्द्रस्य महोत्सव। वर्षाशरत्कालयोः। इन्द्रोत्सव शक्रोत्सवादयोऽप्यत्रभवत्र।

इन्द्रभक्तकामुक पु० इन्द्रभक्ते वर्षादिकाले कामुकः कामयिता। कुक्कुरे वर्षादावेव तेषां व्यवायधर्म्मोलोकप्रसिद्धः।

इन्द्रमार्ग पु० इन्द्रलोकप्राप्त्यर्थोमार्गः। बदरीपाचनसन्निहितस्य तीर्थभेदे। "बदरीपाचनं गच्छेत्सिद्धस्थाश्रमं गतः" इत्युपक्रम्य "इन्द्रमार्गं समासाद्य तीर्थसेवी नराधिपः!। अष्टोरात्रोषितस्तत्र शक्रलोके महीयते" भा० व० ८३अ०। तत्र जलमयं तीर्थम् "देविकामिन्द्रमार्गञ्च स्वर्गबिन्दुं विगाह्य च। सप्तगङ्गे त्रिगङ्गे च इन्द्रमार्गे च तर्पयन्" भा०व०२५अ० तत्र अवगाहनतर्पणोक्तेः।

इन्द्रयव न० पु० इन्द्रस्य कुटजवृक्षस्य यवाकृतिबीजत्वात् यव इव बीजम्। कुटजवृक्षस्य यवाकारे तिक्तरसे बीजे खनामख्याते। "ऐन्द्रोयवस्त्रिदोषघ्नः संग्राही कटुशीतलः। ज्वरातिसाररक्तार्श कृमिवीसर्पकुष्ठहृत्। दीपनो गुदकीलाघ्नवातान्त्रश्लेष्मगुल्मजित्" भा०म०।

इन्द्रलाजी स्त्री इन्द्रस्य कुटजस्य लाजाइव लाजावल्लाजातत्वात् ङीष्। ओषधिभेदे ततः कुर्वा०ख्य। ऐन्द्रलाजवल्लवे त्रि०

इन्द्रलुप्त न० इन्द्र इन्द्रवर्त्तीलोकः तेन लुप्तोयत्वात्। तेन नाम्ने (टाक) ख्याते रोगभेदे। तल्लिदानादि "रोमकूपानुगं रक्तं पित्तेन सह मूर्च्छितम्। प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः। कृणद्धि रोमकूपास्तु ततोऽन्येषां समुद्भवः। तदिन्द्रलुप्तं खालत्यं श्मश्रुण्यपि च विभाव्यते" निदा० उक्तम्। निदानलाक्षणता तु इन्द्रलुप्तं श्मश्रुण्यपि भवति। खालत्यं शिरोरहेष्वेव दृष्ट्वा सर्वेदमेति तेषां भेद उक्तः। वा कप्। इन्द्रलुप्तक तत्रैवार्थे।

इन्द्रलोक पु० इन्द्रस्य लोकः भोगभूमिः। अमरावतीनामपुरीयुक्ते स्वर्गस्थानभेदे तत्स्थानममरावतीशब्दे ३२० पृष्ठे उक्तं तत्सरूपप्राप्तिकारणादिकञ्च तत्रैव०। "लोकेऽस्मिन्नरमते विप्र! सङ्कल्पाद्यः, पुरी त्वियम्। तपोबलेन महता विहिता विश्वकर्म्मणा। दिवापि कौशिकी यस्यां

सौधर्म्ये सौश्रियम् अयेत् । यदा कल्पाधिपः क्वापि दर्पेऽ
इन्द्रत्वमावहेत् । तदा स्वर्गेषु सौधर्म्ये सौधर्म्येषु-
निगूहयेत् । यदच्छन्तौ वाञ्छ्य स्वमन्यत्रोविहिंसयद्विता ।
सुधा नाशु विधेद्विद्यमपि स्वां चित्तयाधिकाम् । दुर्म्यैषु
सौख्यमधिभिनि मितेर्धीत्व निर्भयम् । स्वर्गोसिमानमाधाय
तमोऽहःस्वपि तिष्ठति । चन्द्रकान्तशिलाजालस्तमात्मा-
मलं जलम् । तत्र चादाय कल्पैर्नैष्कल्यव्यञ्जकं जनाः ।
कुविन्दा न च सन्त्यत्र न चात्र पश्यतोहराः । चेलान्यत्रेऽ-
तान्यत्र यतः कल्पद्रुमार्पणात् । गणका नाम विद्यन्ते
चिन्ताविद्याविशारदाः । यतश्चिन्तन्ति सर्वेषां चिन्तां चिन्ता-
मणिर्दुतम् । रूपकारा न सन्त्यत्र रसपाकविचक्षणाः ।
दुग्धे सर्वरसानेका कामधेनुरतोऽनिशम् । कीर्त्तिरत्नैः अवाः
अस्य सर्वतो वाजिराजिषु । रत्नसृष्टेः अवाः सोऽत्र रू-
वानां पौरुषाधिकः । ऐरावतो दन्तिवरस्तदेन्द्रोऽत्र
राजते । द्वितीय इव कैलासोजङ्गमः स्फटिकोज्ज्वलः ।
तरुरत्नं पारिजातः स्त्रीरत्नं चोर्वशी त्रिषु । नन्दनं वन-
रत्नं च रत्नं मन्दाकिनी स्रपाम् । तत्यञ्चिंशत् सुराणां या
कोटिः श्रुतिसमीरिता । प्रतीक्षते सावसरं सेवायै प्रत्यहं
त्रिषु । स्वर्गेषिन्द्रपदादन्यत्र विधिर्यत्र किञ्चन । यद्यत्रि
लोक्यामेश्वर्यं न च तुल्यमनेन हि । अश्वमेधशतक्रतु-
शब्दं विनिमयेन यत् । किन्तेन तुल्यमन्यत् स्यात् पवित्र-
मथवा महत् । अर्च्यिजतो संयमनो पुण्यवत्यनिलावती ।
मन्यवत्यक्रैयी च नैतत्तुल्या महर्द्धिभिः । अयमेव सह-
स्राक्षस्त्रयमेव हरयश्वतिः । यतमन्युरयं देवोनामाग्ने-
यमि नामतः । सप्तापि लोकपाला ये तत्रं सप्तमावते ।
नारदाद्यैर्ऋषिवरैरयमाद्योभिरिज्यते । एततस्यैर्यमेव
सर्वेषां लोकानां स्वैर्यमिष्यते । पराजयान्मघोनस्तु त्रै-
लोक्यं स्यात् पराजितम् । दनुजा मनुजादित्यास्तपस्यन्त्य
यसंयताः । गन्धर्वयक्षरक्षांसि नाघेन्द्रपदलिप्सवः ।
समराद्यामहीपालवाजिमेधविधायकाः । ज्ञातवन्तो महा-
बलं यत्रैश्वर्यं जिहासवः । निश्प्रत्यूहं क्रतुशतं वः
कश्चित् कुरुतेऽवनौ । जितेन्द्रियोऽमरावत्यां स प्राप्नोति
सुखोमजाम् । अश्वमाग्नक्रतुशता यजन्त्यत्र महीभुजः ।
ज्योतिष्टोमादिभिर्यागैर्यजन्त्यपि ते द्विजाः । तुलापुरु-
षदानादि महादानानि षोडश । ये कुर्वन्त्यमलात्मा-
नस्ते जयन्ते ऽमरावतीम् । अक्षीणवादिनोवीराः संग्रामेष्व-
पलायिनः । विश्रान्ता वीरशयने तेऽत्र तिष्ठन्ति भूभुजः
त्यहेयात् सनाख्याता महेन्द्रनगरीस्थितिः । यावज्जू-
कावशन्यत्र यज्ञविद्याविशारदाः" १० अ० । "अतिथि-
स्त्विन्द्रलोकेशः" इति मनुना अतिथिपरिचर्य्याभिरपि
तत्प्राप्तिरुक्ता । एवं राजसूययज्ञेनापि तत्प्राप्तिः
भा० स० उक्ता । यज्ञलोकादयोऽप्यत्र

इन्द्रवंशा स्त्री "स्यादिन्द्रवंशा यदि तौ जगौ गः" छन्दः र०
उक्ते द्वादशाक्षरपादके वर्णवृत्तभेदे ।

इन्द्रवज्रा स्त्री "स्यादिन्द्रवज्रा यदि तौ जगौ गः" छन्दः र०
उक्ते एकादशाक्षरपादके वर्णवृत्तभेदे ।

इन्द्रवल्ली स्त्री इन्द्रप्रिया वल्ली शाकत० । पारिजात गायत्री
"सोमवल्लीमिन्द्रवल्लीं यमीं विश्वस्य वस्टकात्" मन्त्रः ।
(राखालससा) २ इन्द्रवारुणीलतायाम् इन्द्रवल्लरीत्य त्र ।

इन्द्रवस्ति पु० इन्द्रस्यालयो वस्तिरिव । द्वारमध्यभागे । इन्द्र-
वस्तिपरिक्षारं पीठकूर्परान्तरायाम् योऽत्यायकुरुः"
सांक्खसर्म्माणि । प्रतत्र कूर्परो बृहत्कन्द्रवस्ति-
जानुवीजोहितानाणि विटपश्चेति" विश्व च "पार्ष्णि
प्रति जङ्घाभाग इन्द्रवस्तिनाम तत्र योनिसन्धये मरुत्यम्"
इति च सुश्रु० । अतोऽस्य जीववस्तितुल्यत्वात्तथात्व ।

इन्द्रवारुणी स्त्री इन्द्रस्यालयोवारुणीव प्रिया (राखालससा)
तिक्तरसायां श्वेतमूलायां श्वेतपुष्पायां लतायाम् । स्वार्थे
कन् । इन्द्रवारुण्यपि अत्रैवार्थे ।

इन्द्रवीज न० इन्द्रस्य कुटजस्य वीजम । इन्द्रयवे । "वृष्ये-
न्द्रवीजं त्रिफलासर्पिर्मांसरसाम्बुभिः" सुश्रु० ।

इन्द्रवृक्ष पु० ६त० देवदारुवृक्षे अटाधरः । तस्य इन्द्र वृक्षहेतु-
त्वात्तथात्वम । तस्येन्द्रध्वज साधनत्वेनेन्द्रध्वजत्वम उक्तरू ।

इन्द्रवृद्धा स्त्री "अथात क्षुद्ररोगान् व्याख्यास्याम इत्यु-
पक्रम्य । "वल्मीकमिन्द्रवृद्धेत्यादि विभज्य" । "मृत्पुष्प-
करवन्मध्ये पिडकाभिः समाचिताम् । इन्द्रवृद्धान्तु तां
विद्याद्दारुणोत्पत्तितां भिषक्" सुश्रुतोक्तलक्षणे क्षुद्रो-
गभेदे । "विष्टतामिन्द्रवृद्धाञ्च गर्हभीं जालगर्दभम् ।
दूरिविद्धां गन्धनाम्नीं कक्षां विस्फोटकांक्षया । पित्तजस्य
विसर्पस्य क्रियया साधयेत् भिषक्" इति सुश्रु० ।

इन्द्रव्रत न० इन्द्रस्येव वर्षणे व्रतम् । "वार्षिकांस्तरो मासान्
यथेन्द्रोऽभिवर्षति । तथाभिवर्षेत् स्वं राष्ट्रं जामैरिन्द्र
व्रतं चरन्" इति स्मृत्युक्ते प्रजापालने राज्ञोव्रतभेदे ।

इन्द्रशत्रु पु० इन्द्रः शत्रुः यातयिता वस्य । दैत्यासुरे । इन्द्रा-
सुरस्य तथात्वमुक्तम् यथा "स त्वष्टा पुत्रोध । कुविन्मेऽसुय-
धूतः सोमपमधादिति स खलमेव वज्रवधाय चक्रे स ओदोष-
कल्पे युक्तः परिशिष्ट आ यतं प्रक्लप्तता चकारेन्द्रशत्रु-

वर्धस्वेति सोऽग्निमेव प्राण्य सम्भूयात्मानमेव सम्भावयत्युक्थेन प्राङ्क: अग्नीषोमाभ्यामि सम्भूय सर्वाविद्याः सर्वं यशः सर्वमन्नाद्यं सर्वं स्वीम् । स यद्वर्तमान समभवत् । तस्मादृत्विजोऽथ यदयात् समभवत्तस्मादृत्विक् दनुच दनायुच । मातेव च पितेव च परिजग्रहतुस्तस्माद्दानव इत्याहुः अथ यदब्रवीदिन्द्रश्च वर्धस्वेति तस्मादाहैनमिन्द्र एव जघान यद्व यत्त्वदवक्षदिन्द्रश्च यत्तर्वर्धस्वेति यत्तद्वृत्र एवेन्द्रमब्रूतिम्" शत० ब्रा० १, ६, २, ८, ६, १०. "इन्द्रयतुरिति पूर्वपदोदात्ततयेन्द्रः यत्तुर्यस्येति बहुव्रीहिसमासं कृत्वा तस्मिं प्रयुक्त तत्रास्मिन्द्रो जघान । यदयमौ अन्योदात्त या तत्पुरुषसमासेन, इन्द्रस्य यत्तुरिति व्यख्यानिष्टैरेव वा ब्रूयात्तदा निश्चितमेवेन्द्रं हन्यात्" इति भा० भा० तथा च बहुव्रीतत्पुरुषेऽन्तोदात्त स्वरः तथात्वे इन्द्रस्य यत्तुरित्यर्थके भवेत् बहुव्रीहौ तु पूर्वपदस्वरतेति तथा तेन प्रयोगात् तमेव इन्द्रोजघान "अतएव वेदे स्वरक्षीनतयोच्चारणे य त्रमानस्यानिष्टं फलं भवति यथाऽसौ शिक्षयावाम् । "मन्त्रहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह : स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" । उक्तशत्रुसारिणी कथा भा० यथा त्वष्टः पुत्रस्य विश्वरूप त्र्यादिकसुपवर्ण्य "तस्याश्वन् विश्वरूपस्य शिरांसि त्रीणि भारत । सोमपीथं सुरा पीथमन्नादमिति शुश्रुम । सर्वे वर्हिषि देवेभ्यो भागं प्रत्यक्षमुचुर्वै । अवदद्यस्य पितरो देवाः सम्प्रत्यक्षवत् । स एव हि ददौ भागं परोक्षमसुरान् प्रति । यजमानो ददद्भाग मात्मनेऽवयानुगः । नहेवहेनं तस्य धर्मा लोक हरेश्वरः । आलक्ष्य तरसा भातस्तस्यौर्वोऽथच्छिनद्वृषा । सोमपीथं तु यत्तस्यशिर आसीत् कपिञ्जलः । कलविङ्कः सुरापीथमन्नादं यत् स तित्तिरिः । ब्रह्महत्याभ्यलिना जग्राह यदपीश्वरः । संवत्सरान्ते तद्वं भूतानां स विशुद्धये । भूम्यम्बुद्रुमयोविद्ध्यत्तस्मै व्यभजन्नरि । भूमिस्तुरीयं जग्राह खातपूरणेन वै । दीर्णिं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते । तुर्यं क्लेदविरोहेण वरेण जगृहुर्द्रुमाः । तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते । यत्तत् कामवरेणाप्सुरोय जग्राहुः स्त्रियः । रजोरूपेण तास्वंशमाप्तिमा प्रदृश्यते । इत्यमूयोवरेणापस्तुरीयं जग्राहुर्ध्रुवम् । तासु बुद्बुदफेनाभ्यां दृष्टं तत्तरति क्षिपन् । हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय गत्रवे । इन्द्रशत्रुर्विवर्द्धस्व मा चिरं जहि विद्विषम् । अथान्याहार्थपचनादुत्थितो घोरदर्शनः । ज्वलन्त इव लोकानां युगान्तसमयो यथा । विष्वग्विवर्द्धमानं तमिषुमात्रं दिने दिने । दग्धदेवप्रतीकाशं सन्ध्याभ्राभोगवर्चसम् । तप्तताम्रशिखाश्मश्रुं मध्याह्नार्कोल्बलोचनम् । देहेनाक्रममाणे विधिस्थे भूत आरोप्य रोदसी । ज्वलज्जटाकलापेन भासयन्तं पदा महीम् । दीर्घगम्भीरनाभेन पिबता च नभस्तलम् । विहसता जिह्वयर्क्षाणि ग्रसता भुवनत्रयम् । महता रौद्रदंष्ट्रेण जृम्भमाणं मुहुर्मुहुः । लिलसादुद्वहन्तीका वीक्ष्य सर्वे दिशो दश । येनाहता दृते लोकास्तप्यसा त्वाष्ट्रमूर्त्तिना । स वै हत इति प्रोक्तः पापः परमदारुणः भा० ६ स्क० ८ अ० । ततः "स इन्द्रशत्रो : पितरोऽभ्यं तपसा मद्वधेप्सया । यतोऽपचितिमान् यज्ञे यतो लोकेश्वरोऽव्ययः । यतो धर्मस्ततो ह्रीस्त्री यतः क्षमा ततोऽच्युतः । यतो ज्ञानं तो भक्तिर्यतो नारायणो गुणा

विचारे। अमरे इन्द्रसुरिरिति पाठान्तरे पु०। तत्रैव

इन्द्रसुरा स्त्री इन्द्रस्यात्मनः सुरेव प्रिया। (राजाहस्सखा) इन्द्रवाहकत्वात् राजनि०"वाहाकुयिग्वीन्द्रसुरापटोलेत्यादि" सूत्र०। "गुडचीन्द्रसुरा छत्रा कुलसर्षपनागरैः। तैलमेभिः समैः पक्वं सुरास्नादिरसाह्वयम्"सुश्रु०।

इन्द्रसूक्त न० इन्द्रदेवताकं सूक्तम्। ऋग्वेदान्तर्गते सूक्तभेदे तच्च "इन्द्रं विश्वा अवीवृधन्"इत्यादि एकादशर्चम्। ऋ०१म०११सूक्तम् एतच्च तत्तत्कर्मणि इन्द्रस्तुत्यर्थं पठनीयं तथा द्वारपालेन तुलादानादौ मण्डपस्य पूर्वदिशि शास्त्रञ्च "ओसूक्तं पावमानञ्च सोमसूक्तं सुमङ्गलम्। वास्त्यं शान्तेन्द्रसूक्तं रक्षोघ्नं चेति षट्कृचौ। पूर्वं द्वारं समाश्रित्य पठेतामिति निश्चयः" विधानपारि०पु०। तत्र सूक्तं तुलादानादिपद्धतौ ६२-६६ऋचामिः प्रदर्शितम्।

इन्द्रसेन पु०इन्द्रस्य सेना इव सेना यस्य।१ नृपभेदे स च परिक्षितः पुत्रभेदः"परिक्षितोऽभवत् पुत्राः सर्वे धर्मार्थकोविदाः। जनसेनोग्रसेनौ च चित्रसेनस्तथैव च। इन्द्रसेनः सुषेणश्च भीमसेनश्च नामतः" भा०आ०९४अ० अयञ्च प्रसिद्धात् परिक्षितः प्राचीनः कश्चिदेव इन्द्राभगवद्भेदे विज्ञातः। युधिष्ठिरस्य २ भृत्यभेदे।"इन्द्रसेनादयश्चैव भृत्याः परि चतुर्दश। रथैरनुययुः शीघ्रैः स्त्रिय आदाय सर्वशः" भा०व०१अ०"इन्द्रसेनो विशोकश्च पुरुषार्जुनसारथिः। अन्यांश्चाहरणे सन्तु मत्प्रियकारिणः"भा०व०२२अ०

इन्द्रसेना स्त्री ६त०। इन्द्रस्य १सेनायाम्। २बभ्रुसुमातरि सौदास्यस्य ऋक्षपुत्रपत्न्याम्। "सौदास्यस्य सुतो ऋक्षो बभ्रुर्ऋषिः सुमहायशाः। इन्द्रसेना वतीगर्भे बभ्रोर्भार्या व्यजायत" हरिः१२अ० "नारायणीवेन्द्रसेना बभूव बभ्रोर्भार्या सुव्रतस्याजमीढे" भा०व०११२अ०।

इन्द्रसेनानी पु० इन्द्रसेनां नयति नी-क्विप् ६त०। यज्ञस्य सेनापतौ कार्त्तिकेये तत्कथा। कार्त्तिकेन पराजितेनेन्द्रेण कार्त्तिकाय इन्द्रत्वपदं दातुमीक्षमाणेन सह तस्य उक्तिप्रत्युक्तिवर्णनेन तेन तत्सेन अयमसङ्कीर्णतत्वेन भा०व०२८अ० दर्शितं यथा "यज्ञउवाच भवस्वेन्द्रो महाबाहो! सर्वेषां नः सुखावहः। अभिषिच्यस्वचैवाद्य प्राप्तरूपोऽसि सत्तम। यावद्धि त्वमेव लोकानां पालयोविजये रतः। अक्षन्ते किङ्करः यज्ञोनममेन्द्रत्वमीप्सितम्। बलं तवाद्भुतं वीर! त्वं देवानामरीन् जहि। अवधीस्त्वां मां लोका धार्य्यैष तव विनिश्चितः। इन्द्रत्वं तु स्थितं वीरे! बलहीनं पराजितम्। आवयोश्च विशेषेण प्रत्ययिष्यन्ति सन्निधौ। अर्दिते च त्वयि विभो! लोकोऽर्दिष्यति। द्विधाभूतेषु लोकेषु निश्चितेषु वयोत्तरा। विपक्षः संप्रवर्त्तेत भूतभेदान्महाबल। तत्र त्वं मां रणे तात। यथाशक्ति विजेष्यसि। तस्मादिन्द्र भवानेव भविता मा विचारय। स्कन्द उवाच। त्वमेव राजा भद्रन्ते लोकस्य सचराचरे च। करोमि किन्तु ते यज्ञ! यासनं तदुपदीहि मे। इन्द्र उवाच। अक्षमिन्द्रो भविष्यामि तव वाक्यान्महाबल!। यदि सत्यमिदं वाक्यं निश्चयाद्भाषितं त्वया। यदि वा यासनं स्कन्द! कर्तुमिच्छसि मे प्रभो। अभिषिञ्चस्व देवानां सेनापत्ये महाबल! स्कन्द उवाच। दानवानां विनाशाय सेनापत्ये ऽभिषिञ्चु माम्"। भा०व०२२८अ० यज्ञसेनापतियज्ञसेनाधिपादयोऽप्यत्र। "यज्ञसेनापतिः स्कन्दः" प०

इन्द्रसुत् पु० इन्द्रः स्तूयते ऽत्र। इन्द्रस्तुत्यधिकरणे उक्थ्ये यज्ञे द्वितीयाह्ने "इन्द्रसुदुक्थो द्वितीयमहर्भवति। इन्द्रोवै सर्व्वदेवाः सर्व्वेषां देवानामाप्त्यै तस्मैन्द्रायैवैता भवन्त्यैन्द्राः पुरोरुच सर्व्वमैन्द्रमसदिति"श्रुतः,१२,७, १,४, अयमुक्थ्यसाध्यः तदुपक्रमएव कात्या०२,१,४०। "तत्र उक्थ्या नामिन्द्रस्तुत इन्द्रस्तुत् स्तुत्य स्तुत"इत्यभिधानात्

इन्द्रस्तोम पु० अतिरात्रे यागभेदे स च कात्या०२४ ४,६,। अतिरात्रोपक्रमेण "इन्द्रस्तोमो विश्वजिता" विश्वजितः स्थाने इन्द्रस्तोमः कार्य्यः" कर्क०। पूर्वोक्तसपक्रमस्य तत्प्रकारादि तत्र दर्शितम्। अयञ्चराज्ञा कार्य्यः"इन्द्रस्तोमो राजयज्ञ" "सहस्रं दक्षिणा"कात्या० २२,१,१५,१६, न च उक्थ्यसाध्यः "उक्थ्यः" कात्या० १२,११,१० सूत्रैः।

इन्द्रहू स्त्री इन्द्रः हूयतेऽनया हू-क्विप् ६त०। यज्ञाङ्गदाने यज्ञभेदे। कर्त्तरि क्विप्। २तदङ्गदानकर्त्तरि ऋत्विग्भेदे च। ततो गर्गा० अपत्ये यञ्। ऐन्द्रह्यस्तद्गोत्रापत्ये पुंस्त्री।

इन्द्रा स्त्री इदि-रन्। (कणिज्झकरञ्जे (काटाचणीरोहिणि:) (राखालससा) २इन्द्रयाकरणाम्। राजनि० ३यवागाम् शब्दर०।

इन्द्राग्नि पु० द्वि०व०। इन्द्रश्चाग्निश्च देवताद्व०। यज्ञाग्नीषोमयोर्देवयोः। "इन्द्राग्नी यत्र हूयेते" मन्त० स्मृतिः "पुरोहितश्चाग्नीन्द्राग्नी सोमः" कात्या०२२, ४,२०,२१ उक्त। तत्र सोमे पुरोहितस्य राज्ञो वा सह याज्ञिकस्य तत्र ब्राह्मणस्य दक्षिणा चतुर्षु गोशतानि राज्ञः अश्वचतुःशतानि कर्क०। तौ देवते अस्य अण्। ऐन्द्राग्न तद्देवताके हविषि यज्ञे च। इन्द्रस्य यज्ञस्य-

स्वामिनः । ३ मेघभेदे विद्युदग्न्यादौ पु० । २इन्द्राग्निधूमः ।

इन्द्राग्निधूम पु० इन्द्राग्नेः पर्ज्जन्याग्नेर्धूम इव । हिमे धूमस्य यथाऽग्निधूमत्वम् तथा जलमयहिमस्य पर्ज्जन्याग्निसम्भवादेव जायमानत्वात् तथात्वम् ।

इन्द्राणी स्त्री इन्द्रस्य स्त्री-ङीप् आनुक् च । १इन्द्रपत्न्यां शच्याम् "अदितिर्द्यौरदितिरन्तरिक्षमदितिर्मातासपितासपुत्रः । विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्" यजु० २१।५ "नैवेन्द्राणी न रुद्राणी न मनायी न रोहिणी" भट्टि, "यथेन्द्राणी हरिहये स्वाहा चैव विभावसौ" भा० आ० ८९ अ० । "आजगाम सहेन्द्राण्या शक्रः सुरगणैर्वृतः" भा० व० ४१अ० । इन्द्रं परमैश्वर्यमानयति आ+नी-ड+ङीप् । "ऐश्वर्यं परमं यस्या वशे चैव सुरासुराः । इदि च परमैश्वर्ये इन्द्राणी तेन सा स्मृता" इति देवीपु० उक्तनिरुक्तिश्च । २दुर्गायाञ्च भेदे । "ब्रह्माणीन्द्राणि । रुद्राणि । भूतधात्रि । यशस्विनि । त्राहि मां सर्व्वदुःखेभ्यो नारायणि । नमोऽस्तु ते" हरिवं० १७८अ० "सा च अष्टमार्क्षकालगता ऐन्द्रीयपरपर्य्यायेति तस्यां इन्द्रकृतानुकूलादि रित्यादि तथात्वम् । इन्द्रदेव आनयति जीवयति रोगोपशमनेन अन-णिच्-अच् पूर्व्वपदा० णत्वम् । ३स्थलीलायां राजनि० । ४स्त्रीणां करणे पुंलिङ्गसिन्दुवारवृक्षे (सेम्बाल) मेदि० । (निसिन्दा) इ इन्द्रे अमरः, स्वार्थे कन् । इन्द्राणिकाप्युत्र्यर्थेषु ।

इन्द्राद्दृश पु० । इन्द्रस्येवादर्शनमस्य अ+इव-टक् ईत० । इन्द्रगोपे कीटे ततः तस्य० विकारे अञ् । ऐन्द्राद्दृश-। तद्विकारे त्रि० ।

इन्द्रानुज पु० ईत० । १ वामने स हि अदित्यामिन्द्रजनकेन कश्यपेनोत्पादितः, तदनारयुक्ते २ नारायणे च "इन्द्रानुजानुचरभूपतयाधिवासम्" माघः । इन्द्रावरजादयोऽप्यत्र ।

इन्द्राभ पु० कुरुवंश्यधृतराष्ट्रस्य पुत्रभेदे अयञ्च धृतराष्ट्रः आग्नेयादन्यः तथा हि "ततः संवरणात् सौरी सुषुवे तनयं कुरुम्" इत्युपक्रम्य तस्य "अविक्षितमभिष्यन्तमित्यादिना" अष्टौ अविक्षिदादीन् सुतानुक्त्वा "अविक्षितः परिक्षितं" इत्यादिना तस्यापि परिक्षिदादीनष्टौ सुतानुक्त्वा "जनमेजयस्य तनवो भवितारो महाबलाः । धृतराष्ट्रः प्रथमजः पाण्डुर्वीक्ष्योऽथ च । निषधश्च महातेजास्तथा जाम्बूनदो बली" इत्यादिना जनमेजयस्याष्टौ पुत्रानुक्त्वा धृतराष्ट्रोऽथ राजासीत् तस्य पुत्राश्च कुण्डिकः हस्ती वितर्कः क्राथश्च कुण्डिनश्चापि पञ्चमः । हरिश्चाजातशत्रुश्चेन्द्राभः सुमन्युश्चापराजितः" इति भा० आ० ९४अ०उक्तः ।

इन्द्रायुध न० ईत० । १ शक्रशस्त्रे वज्रे "शमाद् मेघमनादस्य धनुश्चेन्द्रायुधप्रभम्" रघुः । इन्द्रे तदधिष्ठितमेघे वायुधमिव । सूर्य्यकिरणसंपर्कात् मेघे जायमाने २धनुराकारे पदार्थभेदे तल्लक्षणादुक्तं दृ०स० "सूर्य्यस्य विविधवर्णाः पवनेन विघट्टिताः करा: साभ्रे । वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः । केचिदमन्तकुलोरगनिःश्वासोद्भूतमाकुराचार्याः । तद्यायिनां नृणामभिमुखमवनायावहं भवति । अक्षिसमवनिगतं द्युतिमत् स्निग्धं वर्णं विविधवर्णम् । हिरुदितमनुलोमं च प्रशस्तमन्यं प्रयच्छति च । विदिग्भूतं दिक्स्थायिनायनं व्यभ्रजं मरकारि । पाटलपीतकनीलै यस्यान्यिन्द्रधनुःकृता दोषाः । जलमध्येऽनावृष्टिर्भुवि यस्यधनुस्तरौ स्थिते व्याधि । वह्नसीके यस्यभयं निधि सचिवबधाय धनुरैन्द्रम् । दृष्टिं करोत्यवृष्टां दृष्टिं दृष्ट्वा निवारयत्यैन्द्राम् । पश्चात् सदैव दृष्टि कुलिशभृतस्यापमाचष्टे । चापं मधोः करुते निशायाम् आखण्डलायां दिशि भूपपीड़ाम् । या व्यापरोदकप्रभवं निहन्त्यात् सेनापतिं नायकमन्त्रिणौ च । निधि सुरचापं सितवर्णाभं जनयति पीड़ां द्विजपूर्व्वाणाम् । भवति च यस्यां दिशि तद्दृश्यं नरपतिहस्य न चिराद्भन्यात्" । "न हिन्द्रायुधं दृष्ट्वा कस्यचिद्दर्शयेद्बुध" मनुः "इन्द्रायुधद्योतिततोरणाङ्कम्" रघुः । ततः तस्यादि० विकारे अञ् । ऐन्द्रायुधस्तद्विकारे त्रि० ।

इन्द्रारि पु० ईत० । असुरे ।

इन्द्रालिङ्ग पु० इन्द्रमिन्द्रधनुरालिङ्गति लिङ्ग-तौच्छी-क; इन्द्रगोपे कीटभेदे तस्य विकारः तस्या० अञ् । ऐन्द्रालिङ्गस्तद्विकारे त्रि० ।

इन्द्रावसान पु० इन्द्रस्य पर्जन्यस्यावसानमत्र । मरुदेशे । ततः तस्यादि० भवार्थे अञ् । ऐन्द्रावसान, मरुभवे त्रि० ।

इन्द्राशन पु० इन्द्राय ऐश्वर्याय अश्यते भुज्यते अश-कर्म्मणि ल्युट् । (सिद्धि) १ भक्षायाम् शब्दर० । तत्सेवने हि राज्यमपि तुच्छं भवतीति तस्याऽशनत्वम् । इन्द्रः इन्द्रधनुरिव अश्नुते अर्द्धरूक्षवर्णफलत्वात् । (कुश गुडादौ क्षीरा० ।

इन्द्रासन पु० इन्द्र आत्मा अस्यते विक्षिप्यतेऽनेन अस-करणे ल्युट् । (सिद्धि) १ सर्षपवृक्षे तत्सेवने हि आत्मनोविक्षिप्तत्वात्तस्य तथात्वम् । पञ्चमात्रिकस्य प्रस्तारे आदि लघुके मेरुगुरुद्वयात्मके २ प्रथमे भेदे न० ।

इन्द्रिय न० इन्द्रस्य आत्मनो लिङ्गं इन्द्र+घ । घ्राण-

क्रियासाधने ? चक्षुरादौ २कृत्वादौ च । "इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा" पा० तस्या नेत्रादिधार्थकता दर्शिता इतियच्छब्दः प्रकारार्थे इन्द्रेण दुर्जयमिन्द्रियमित्यपि" सि० कौ०। अत्र सूत्रे इन्द्रेण परमात्मना दृष्टमित्युक्तिरपि इन्द्रियस्य चक्षुरादीनां प्रत्यक्षागोचरतां निरस्यति । यद्वा इन्द्रेणात्मना दृष्टात्मलेनाभिमतं काणोऽहं बधिरोऽहमित्याद्यभिमतम् । "एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि चेति" श्रुतेः इन्द्रियस्य ऐश्वरकृतत्वम् । इन्द्रदत्तमिति इन्द्रः ऐश्वर्यं दत्तोऽहं स्वस्वकार्ये हि तेषामैश्वर्यमीश्वरेण दत्तम् अतएव तानि बलादिव गृहीत्वा विषयेषु प्राणिनं स्वस्वविषयव्यवहाराय प्रवर्त्तयन्ति । असति ह्यैश्वर्ये न तद् वर्त्तयति । चक्षुरादीनामात्मानुग्रापकत्वञ्चेत्यम् । करणव्यापारः सकर्तृकः करणव्यापारत्वात् छिदिक्रियायां वास्यादिव्यापारवदिति करणव्यापारेण कर्त्तुरनुमानगम्यत्वे ततश्चाज्ञानात् ज्ञानक्रियाकरणमपि सकर्तृकं करणत्वादिति चक्षुरादिना ज्ञानसाधनेनात्मनोऽनुमानम् । तथा इन्द्रियस्याप्रत्यक्षत्वेऽपि ज्ञानक्रिया सकरणिका क्रियात्वात् छिदिक्रियावत् इत्यनुमानम् तदसत्त्वे प्रमाणम् । तस्मात्तभेदेन इन्द्रियस्य भौतिकत्वाभौतिकत्वसर्वगतत्वासर्वगतत्वप्राप्यकारित्वाप्राप्यकारित्वादिकम् आत्मशब्दे ६६५ पृष्ठे प्रपञ्चेन परीक्षितम् । इन्द्रियञ्च द्विविधं ज्ञानकर्म्मेन्द्रियभेदात् तत्र श्रोत्रादीनि ज्ञानेन्द्रियाणि कृत्वादीनि कर्म्मेन्द्रियाणि । "श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी । पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता" मनुः । "नासिकालोचने जिह्वा त्वक् श्रोत्रं चेन्द्रियाणि च । हस्तौ पायुरुपस्थञ्च वाक्पादौ च दशैव तु" शारदा०। "बुद्धीन्द्रियाणि श्रोत्रत्राणरसनत्वगाख्यानि । वाक्पाणिपादपायूपस्थानि कर्म्मेन्द्रियाण्याहुः" सां० का० । एतानि च बाह्येन्द्रियाणि । "उभयात्मकमत्र मनः संकल्पकमिन्द्रियञ्च साधर्म्म्यात्" सां०का० मनस्तूभयविधकरणोपकारित्वात् करणम् । तच्च ज्ञानकर्म्मव्यापारसामान्ये कारणमपि न तत्र करणम् असाधारणकारणस्यैव करणत्वात् कुपादिज्ञाने चक्षुरादीनामिव तस्य असाधारणकारणत्वाभावात् किन्तु सहकार्युपलब्धौ असाधारणत्वात् तत्रैवास्य करणत्वमिति नैयायिकादयः। वेदान्तिनस्तु मनसोऽनेन्द्रियत्वमङ्गीकुर्व्वन्ति तच्च आत्मशब्दे दर्शितम् । अतएव "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति" मनोबुद्धीरिन्द्रियात् पृथगनिर्देशैः । सांख्यमते "सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात् । भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्" सां०का० रजोगुणोपबृंहितसात्त्विकादेवाहङ्कारात् एकादशेन्द्रियोत्पत्तिरुक्ता तेनाहङ्कारिकाण्येन्द्रियाणि । "प्राच्यरसनचक्षुस्त्वक्श्रोत्राण्येन्द्रियाणि भूतेभ्यः" गौ०सू० भौतिकानीति नैयायिकाः । "एतस्माज्जायते प्राणः मनः सर्वेन्द्रियाणि चेति" श्रुतेः आत्मोपादानानीति वेदान्तिनः। अत्र इन्द्रियेभ्यः मनसः पृथगनिर्देशादपि मनसोऽनेन्द्रियत्वम् अतएव कठोपनिषदि गीतायाञ्च "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः" "इन्द्रियाणि पराण्याहुर्मनः प्रयक्ष एव चेति" च इन्द्रियमनसोर्भेदनिर्देशः"। यथा च तदुत्पत्तिः तथा पञ्चदश्यां दर्शितम् यथा । "तमःप्रधानप्रकृते स्तद्भोगायेश्वरेच्छया । वियत्पवनतेजोऽम्बुभुवो भूतानि जज्ञिरे । सत्वांशैः पञ्चभिस्तेषां क्रमाद्बोन्द्रियपञ्चकम् । श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते । तैरन्तःकरणं सर्वैर्वृत्तिभेदेन तत् त्रिधा । मनोविमर्शरूपं स्याद्बुद्धिः स्यान्निश्चयात्मिका । रजोंशैः पञ्चभिस्तेषां क्रमात् कर्म्मेन्द्रियाणि तु । वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे" १दीपे । तेषां स्थानकार्य्यादिकमुक्तं तत्रैव २दीपे "श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चेन्द्रियपञ्चकम् । कर्णादिगोलकस्थं तत्प्राप्यं धावेत् बहिर्मुखम् । कदाचित् पिहिते कर्णे श्रूयते शब्द आन्तरः । प्राणवायौ जाठराग्नौ जलपानेऽन्नभक्षणे । व्यक्ष्यन्ते ह्यान्तराः स्वयोमीलने चान्तरं तमः । उद्गारे रसगन्धौ चेत्यन्ताणामान्तरग्रहः । पञ्चीकृताद्गगनमनविसर्गानन्दकाः क्रियाः । ऋषिवाक्यस्यसेवाद्याः पञ्चस्वन्तर्भवन्ति हि । वाक्पाणिपादपायूपस्थं कर्म्मेन्द्रियपञ्चकम् । मनो दशेन्द्रियाण्यस्य सूत्रपञ्चगोलकस्थितम् । तच्चान्तःकरणं बाह्येष्वनुवर्त्तनत्वं विनेन्द्रियैः । अन्येषूर्ध्वादिनेष्वेव गुणदोषविचारकम् । सत्वं रजस्तमश्चास्य गुणा, विक्रियते हि तैः । वैराग्य शान्तिरौदार्य्यमित्याद्याः सत्वसम्भवाः । कामक्रोधौ लोभमोहाविर्त्याद्या रजउत्थिताः । आलस्यभ्रान्तितन्द्राद्या विकारास्तमउत्थिताः । सात्त्विकैः पुरुषनिष्ठैः प्रायोत्पत्तिश्च राजसैः । तामसे नोभयं किन्तु दृश्यायुःक्षपणं भवेत्"। तत्रेन्द्रियाणां कार्य्यभेदा अपि सां०का०दर्शिताः यथा "यद्वारादिषु पञ्चानामालोचनमात्रमिष्यते द्वारः। वचनादानविहरणोत्

स्पर्शानन्दाश्च पञ्चानाम्''। आदिपदात् स्पर्शरूपरसगन्धानां ग्रहणम् तथा च श्रोत्रस्य शब्दग्रहणम्, त्वचः स्पर्शग्रहणम्, चक्षुषो रूपग्रहणम्। जिह्वाया रसग्रहणम्। घ्राणस्य गन्धग्रहणमसाधारणं कार्यं भवति। एवं वागादीनां वचनादिकर्म्मोपयुक्तानि। "अन्तःकरणं त्रिविधं दशधा बाह्यं त्वयस्य विषयाख्यम्। साम्प्रतकालं बाह्यं, त्रिकालमाभ्यन्तरं करणम्" सां० का०। "अन्तःकरणं त्रिविधं बुद्धिरहङ्कारो मन इति। शरीराभ्यन्तरवृत्तित्वादान्तरकरणम्। दशधा बाह्यमिन्द्रियं त्वयस्यान्तःकरणस्य विषयाख्यं विषयमाख्याति विषयसंकल्पाभिमानाध्यवसायेषु कर्त्तव्येषु द्वारीभवति। तत्र बुद्धीन्द्रियाण्यालोचनेन, कर्म्मेन्द्रियाणि तु यथास्वं व्यापारेण" सा०कौ०। "विषयाणां महीतृत्वे मनः पञ्चेन्द्रियाणि च" मनुः। "गौचमिन्द्रियनिग्रहः" मनुः। "इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ" "इन्द्रियाणि प्रमाथीनि" गीता०। पञ्च बाह्यानि ज्ञानेन्द्रियाणीति मनुष्याद्यभिप्रायम् क्वचित् जीवे ऋषदवयात् ततो न्यूनताऽपि। यथा दक्षाणाम् स्पर्शसाधनत्वगिन्द्रियमात्रम् चक्षुःश्रोत्राणीनाम् त्वग्जिह्वे इन्द्रिये महीलतादीनां त्रीण्येन्द्रियाणि। सर्पादीनां चत्वारीन्द्रियाणि तेषां श्रोत्राभावात् कृमीणस्य च चत्वारि तस्य जिह्वाभावात् इत्यवधेयम्। एतेषाञ्च जीवानां लिङ्गशरीरसत्त्वेऽपि तत्तद्गोलकस्यानन्यत्वात् तत्तत्कार्य्यार्थं वृत्तिः। बौद्धमते गोलकान्येवेन्द्रियाणीति। तन्मतं विवरणोपन्यासे दूषितं तच्च ६६६६ दर्शितम्। २रेतसि ३ वीर्य्ये च। "इन्द्रियकामस्य" स्मृतिः "समावदिन्द्रिया भवन्ति' ताण्ड्य० समानसामर्थ्याः" भा०

इन्द्रियगोचर पु० इन्द्रियस्य गोचरः विषयः। यद्यादिषु विषयेषु ते हि प्रतिनियतमेकैकस्येन्द्रियस्य याह्या यथा श्रोत्रस्य याह्याः शब्दः, त्वगिन्द्रियस्य स्पर्शस्तद्विशिष्टद्रव्यञ्च, चक्षुषोरूपं तदाश्रयद्रव्यञ्च, रसनायाः रसः, घ्राणस्य गन्धः इत्यादि। एवमन्यान्यपि व्याख्यादिभते तत्तदिन्द्रियग्राह्या यथा ज्ञानानि यथा "घ्राणस्य गोचरोगन्धो गन्धत्वादिरपि स्मृतः। तथा रसेरसत्तायास्तथा शब्दोऽपि च श्रुतेः"। आदिपदात् सुरभिदुर्गन्धत्वयोर्ग्रहणम्। तथा रसत्वमाधुर्य्यादिसहितः। एवं शब्दत्वतारत्वमन्द्रत्वादिसहितः "उद्भूतरूपं नयनस्य गोचरोद्रव्यादि तद्भिन्नं पृथक्त्व संख्ये। विभागसंयोगपरापरत्वस्नेहद्रव्यत्व परिमाणयुक्तम्। क्रियां जातिं बोध्यदृष्टिं समवायं च ताद्दृश्यम्। स्पृष्टानि चक्षुः, सम्बन्धादालोकोद्भूतरूपयोः। उद्भूतस्पर्शवद्द्रव्यं गोचरः स्पोऽपि च त्वचः। रूपाग्न्यक्षुषो योग्यं रूपमत्रापि कारणम्" भाषा० सोऽपि उद्भूतस्पर्शोऽपि चकारात् तद्वृत्तिस्पर्शत्वमृदुत्वकठिनत्वादि ग्राह्यम्। एते च बाह्येन्द्रियाणां विषयाः। तेषां मते मनस इन्द्रियत्वात् तद्ग्राह्याज्ञातैवोक्ता यथा "मनोग्राह्यं सुखं दुःखमिच्छा द्वेषोमतिः कृतिः"एवं सुखत्वदुःखत्वादिकमपि

इन्द्रियग्राम पु० ६त०। इन्द्रियसमुदाये "बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति" मनुः। इन्द्रियवर्गादयोऽप्यत्र। "निर्व्वार मधुनीन्द्रियवर्गः" माघः।

इन्द्रियज त्रि० इन्द्रियाज्जायते जन–ड। इन्द्रियसन्निकर्षजाते प्रत्यक्षे। "तदिन्द्रियजतद्बुद्ध्यभेदसामग्र्यापेक्षते" भाषा०। इन्द्रियजाताद्योऽप्यत्र इन्द्रियाणि च विषय सन्निकर्षद्वारा ज्ञाने करणानि विषयसन्निकर्षस्य तत्र व्यापारः व्यापारश्चैव तेषां जनकत्वात् ज्ञानानां तज्जन्यत्वम्।

इन्द्रियज्ञान न० इन्द्रियेण जनितं ज्ञानम्। प्रत्यक्षे ज्ञाने।

इन्द्रियनिग्रह पु० इन्द्रियाणां निग्रहः यथेष्टं प्रवृत्तानां स्वस्वविषयेभ्यः निवर्त्तनेन निरोधः। इन्द्रियाणां यथेष्टं प्रवृत्तानां स्वस्वविषयेषु प्रसङ्गनिवारणे। स च सर्व्ववर्णसाधारण धर्म्मः "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्" मनुः। इन्द्रियनिग्रहः अप्रतिषिद्धेऽपि विषयेऽनतिप्रसङ्गः" एका० त० रघु०। २योगसाधनाङ्गे श्रोत्रादीनां ज्ञानेन्द्रियाणां वागादीनां च कर्म्मेन्द्रियाणां स्वस्व व्यापारेषु अनियोजनरूपे रोधने च। सर्वेषामनिरोधे योगसिद्ध्यभावोभङ्गो गीतायामुक्तः"। "इन्द्रियाणान्तु सर्व्वेषां यद्येकं क्षरतीन्द्रियम्। तदस्य हरति प्रज्ञां दृतेः पात्रादिवोदकम्" मनसोनियन्तृदेवान्येषां नियन्तृ भवति नान्यथा "इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते। तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि" गीतायां तथोक्तेः। मनोनियन्तृपायश्च "असंशयं महाबाहो! मनोदुर्निग्रहं चलम्। अभ्यासेन तु कौन्तेय! वैराग्येण च गृह्यते" गीतोक्तेः अभ्यासवैराग्यरूपः। यथेच्छमिन्द्रियप्रसङ्गे प्रायश्चित्तम् "विहितस्यानुष्ठानात् निन्दितस्य च सेवनात्। अनियहाच्चेन्द्रियाणां नरः पतनमृच्छति" या०स्मृ०। इन्द्रियजयोऽत्र इन्द्रियजये च यौगमेव हेतुः। यथा हि पात०सूत्रभाष्ययोः "यौगात् योगमुपेत्य योगेन योगो विभजितव्यः" "सत्त्वपुरुषयोरत्यन्तासंकीर्णयोः प्रत्ययविशेषो भोगः परार्थस्यान्यकृतसंघातस्य भोगः" "तदर्थ एव दृश्यस्यात्मा" "कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात्" "एकमनेकार्थं कारणमनेककार्यं करणमिति" "द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम्" "तदसंख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात्" "विशेषदर्शिन आत्मभावभावनानिवृत्तिः" "तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम्" "तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः" "हानमेषां क्लेशवदुक्तम्" "प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्म्ममेघः समाधिः" "ततः क्लेशकर्म्मनिवृत्तिः" "तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्याज्ज्ञेयमल्पम्" "ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम्" "क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः" "पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति" इत्यादिषु सूत्रेषु भाष्ये च विस्तरेण विवृतम्।

इन्द्रियनिग्रहवत् त्रि० इन्द्रियनिग्रहोऽस्त्यस्य मतुप्। इन्द्रियनिग्रहयुक्ते।

इन्द्रियनिग्रहिन् त्रि० इन्द्रियनिग्रहोऽस्त्यस्य इनि। इन्द्रियनिग्रहवति।

इन्द्रियनिग्राह्य त्रि० इन्द्रियैर्निग्राह्यः। इन्द्रियैर्निरोद्धव्ये।

इन्द्रियनिग्राह्यक त्रि० इन्द्रियनिग्राह्य–स्वार्थे कन्। इन्द्रियनिग्राह्ये।

इन्द्रियनिग्राह्यिन् त्रि० इन्द्रियनिग्राह्यमस्त्यस्य इनि। इन्द्रियनिग्रहवति

च" सू० "शुचेः सत्त्वशुद्धिस्तः सौमनस्यं तत ऐकाग्र्यं तत इन्द्रियजयस्तत आत्मदर्शनयोग्यत्वम् बुद्धिसत्त्वस्य भवतीति" भा०एव च बाह्य उपायः। आभ्यन्तर उपायस्तत्रैवोक्तः। "अकृष्णसहकृपाक्षितान्वयार्थवत्त्वसंयमादिन्द्रियजयः" पा०सू०'सामान्यविशेषात्मा शब्दादिर्ग्राह्यः तेषु न्द्रियाणां वृत्तिर्ग्रहणं(१रूपम्)न च तत्सामान्यमात्रग्रहणाकारम् कथमन्यथोचितः सविषयविशेष इन्द्रियेण मनसानुव्यवसीयेतेति। स्वरूपं पुनः प्रकाशात्मनोबुद्धिसत्त्वस्य सामान्यविशेषयोरयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमिन्द्रियम्। (२रूपम्)तेषां वृत्तिर्यं रूपम्। अस्मितालक्षणोऽहङ्कारः तस्य सामान्यस्येन्द्रियाणि विशेषाः। चतुर्थं रूपं व्यवसायात्मकाः प्रकाशक्रियास्थितिशीला गुणाः, तेषामिन्द्रियाणि साहङ्कारणि परिणामः। पञ्चमं रूपं गुणेषु वदनुगतं पुरुषार्थवत्त्वमिति पञ्चस्वेतेषु इन्द्रियरूपेषु यथाक्रमं संयमः; तत तत जयं कृत्वा पञ्चरूपजयादिन्द्रियजयः प्रादुर्भवति योगिनः"भाष्यम् तत्फलमपि तत्रोक्तम्। "ततो मनोजवित्वं विकरणभावः प्रधानजयश्च" पा० सू० "कायस्य मनोवदनुत्तमगतिलाभो मनोजवित्वम्। विदेहानाम् (देहानपेक्षाणाम्) इन्द्रियाणामभिप्रेतदेशकालविषयामेक्षी वृत्तिलाभः अतीतानागतदूरस्थबाह्यार्थविषयश्च वृत्तिलाभो विकरणभावः। सर्वप्रकृतिविकारवशित्वं प्रधानभावः इत्येतास्तिस्रः सिद्धयो मधुप्रतीका उच्यन्ते एताश्च करण पञ्चकरूपजयादधिगम्यन्ते" भा० एताश्चाबाह्यसिद्धीनां पारम्पर्येण सत्यपुरुषान्यताख्यातिरेव तु मुख्यं फलमिति तत्रैव प्रसिद्धम्।

इन्द्रियवध पु० इन्द्रियाणां वधः स्वस्वकार्येषु शक्तिविघातः। इन्द्रियाणां स्वस्वकार्यानुकूलशक्तिप्रतिघाते ते च एकादशधा यथाह सां०का०कौण्डी०: "एकादशेन्द्रियवधाः सह बुद्धिवधैरिष्टविहता" का० एकादशेन्द्रियवधाः स्वस्वकार्ये वैकल्यरूपाः तत्र "बाधिर्यमित्यादि कौ०वाक्यम् अशक्तिग्रन्थे ४७२ पृष्ठे उदाहृतम्

इन्द्रियबोधन त्रि०इन्द्रियं बोधयति स्वज्ञानसाध्यवैकल्यं बुध+णिच्+ल्यु। स्वज्ञानसाध्यवैकल्यबोधके मद्ये गद्यपाने हि इन्द्रियमात्रस्य स्वस्वार्थव्यापाराघाटवकरणात् आत्मवीर्यं तानि बोधयतीति तस्य तथात्वम्। "सर्वं पित्तकरं मद्यम्"इत्युपक्रम्य'पाके लघु विदाह्यूष्णं तीक्ष्णमिन्द्रियबोधनम्"। "कषायमधुरं मद्यं गुरुश्चेन्द्रियबोधनम्"। "वातघ्नो मधुरप्रायोहृद्य इन्द्रियबोधनः" सुश्रु०।

इन्द्रियवत् त्रि०इन्द्रियं वश्यतया प्राशस्त्येन वाऽस्यास्ति मतुप् मस्य वः। १वश्येन्द्रिये २प्रशस्तेन्द्रिये च स्त्रियां ङीप्। इन्द्रियेण तुल्यम् इन्द्रियस्येव इन्द्रिये इव वा वति। इन्द्रियतुल्ये अव्य० इन्द्रियं वीर्यमस्यास्य मतुप् मस्यवः वेदे पूर्वपद त्रि०दीर्घः। वीर्यान्विते। "तेजः पशूनां हविरिन्द्रियावत्" वाज०। हविष्य इन्द्रियवान् मंटनातम" वाज०। क्वचित् वेदे दीर्घोन। मर्त कृतमिन्द्रियवत" यजु०१४,२,

इन्द्रियवृत्ति स्त्री इत०। "शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः। वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्" सांख्योक्ते श्रोत्रादीनां शब्दादिषु प्रकाशनार्थे व्यापारे कर्मेन्द्रियाणां वचनादानादिव्यापारे च। तत्र बुद्धीन्द्रिय वृत्तिश्च इन्द्रियजन्या बुद्धेस्तदाकारेण परिणामः सा च निर्विकल्पकस्थानीया इति सा० कौ०समर्थितं तच्च ८२६पृ० आलोचनशब्दे दर्शितम् कर्मेन्द्रियवृत्तिस्तु वचनादानादिरूपोव्यापारः। मनोरूपेन्द्रियवृत्तिस्तु संकल्पविकल्पाध्यवसायरूपा मनोबुद्धेः परिणामभेदः।

इन्द्रियसंप्रयोग पु० इन्द्रियाणां संप्रयोगः स्वस्वविषयेषु प्रयोगःव्यापारणम्। विषयेरिन्द्रियसम्बन्धे असतख्यातिशब्दे ५२३पृष्ठे उदा०।

इन्द्रियसन्निकर्ष पु० इन्द्रियस्य स्वस्वविषयैः सह सन्निकर्षः सम्बन्धभेदः। प्रत्यक्षसाधने इन्द्रियस्य स्वस्वविषयैः सम्बन्धभेदरूपं प्रत्यक्षजनकव्यापारे। स च न्यायमते षोढा यथा "विषयेन्द्रियसंबन्धोव्यापारः षोऽपि सविध। द्रव्यप्रकृस्तु संयोगात् संयुक्तसमवायतः द्रव्येषु समवेतानां, तथा तत्समवायतः तत्रापि समवेतानां, शब्दस्य समवायतः। तद्वृत्तीनां समवेतसमवायेन तु स्पृष्टः। विशेषणतया तद्गतभावानां यष्ठो भवेत्" भाषा०। तथा च द्रव्यस्य प्रत्यक्षे इन्द्रियसंयोगः कारणम् द्रव्यसमवेतगुणकर्मजातीनां प्रत्यक्षे इन्द्रियसंयुक्तसमवायः। द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवायः। शब्दस्य प्रत्यक्षे श्रोत्रसमवायः शब्दवृत्तिशब्दत्वादेः, श्रोत्रसमवेतसमवायः कारणम्। "अभावप्रत्यक्षे समवायप्रत्यक्षे च इन्द्रियसंयुक्तविशेषणविशेष्यभावः हेतुः। वैशेषिकमते तु समवायस्य न प्रत्यक्षम्। अत्र यद्यपि विशेषणता नानाविधा तथा हि भूतलादौ घटाभावः संयुक्तविशेषणता रूपादौ समवायः संयुक्तसमवेतविशेषणतया, संख्यादौ रूपाद्यभावः संयुक्तसम-

वेवतमवेतविशेषणतया । गन्धाभावः केवलश्रोत्रावच्छिन्न-विशेषणतया । कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेत-विशेषणतया । एवं कत्वावच्छिन्नाभावे खत्वाभावादिकं विशेषणविशेषणतया । एवं घटाभावादौ घटाद्यभावः संयुक्तविशेषणविशेषणतया । एवमन्यदप्यूह्यम् तथापि विशेषणतावच्छेदकेनैव सा गण्यते अन्यथा गौठा सन्निकर्ष इति प्राचां प्रवादो व्याहन्यतेति' सप्ता० । इन्द्रिय सयोगादयोऽप्यत्र

इन्द्रियस्वाप पु० इन्द्रियाणां स्वस्वविषयेषु स्वाप एव अप्र वृत्तिरत्र । १सुषुप्तावस्थायाम् तत्र हि मनःसहितसर्वे-न्द्रियाणामुपरमः स्मृत्यादावुक्तः 'सुषुप्तिकाले सकले प्रलीने' इति स्मृत्या "यत्र सुप्तो न कञ्चन पश्यतीति" श्रुत्या इन्द्रियमात्रलयश्रवणात् । इन्द्रियैःस्वस्य स्वकारणभावस्यापः प्राप्तिर्यत्र । इन्द्रियाणां स्वरूपतः स्वकारणलयकाले प्रलये । मरणे तु न स्वरूपतस्तेषां लयः । "तस्मात्क्रामन्त प्राणोऽनुत्क्रामति प्राणमुत्क्रामन्तं सर्वेऽनुक्रामन्तीत्यादि" श्रुतेः "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधन" मिति स्मृतेश्च प्राणा-नामाप्रलयस्थायित्वावगतेः । तत्र गोलकाभावेन वृत्तिलाभ न भवति पुनर्देहान्तरे गोलकोदये वृत्तिलाभ इति भेदः "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्त" इति या० सू० भाष्ययोर्विवृतिः एवं सांख्यमतेऽपि किन्तु तन्मते लिङ्गदेहे प्राणपञ्चकं विहाय पञ्चभूतानां प्रवेश इत्येतावन्मात्रभेदः ।

इन्द्रियात्मन् पु० इन्द्रियमेवात्मा । १इन्द्रियस्वरूपे कर्मधा० । २इन्द्रियेषु ।

इन्द्रियादि पु० ईत० । सात्त्विकमतसिद्धे इन्द्रियकारणे अहङ्कारे "सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात्" सा०का०

इन्द्रियाधिष्ठातृ ईत । इन्द्रियाणामचेतनानां स्वस्वकार्येषु व्यापारसम्पादनाय ईश्वरनियोजिते देवभेदे । तेच देवाः "दिग्वातार्कप्रचेतोऽग्निवह्नीन्द्रोपेन्द्रमित्रकाः"। भारता० दर्शिताः पदार्थादर्शे एतद्वा० "एते इन्द्रियाधिष्ठातृदेवाः। यदाहुः वैकारिकादिगाद्याच्च चन्द्रैकादय स्मृताः । इन्द्रियाणामधिष्ठातृदेवास्ते सात्त्विकाः मता' इति तथा च श्रोत्रस्याधिष्ठातृदेवता दिक् । त्वचः वायुः, चक्षुषः अर्कः । रसनायाः प्रचेताः, घ्राणस्याश्विनौ. वचः अग्निः पाणेः शक्रः, पादस्य उपेन्द्रः (विष्णुः), पायोः मित्रः उपस्थस्य कः ब्रह्मा । मनसः चन्द्रमाः ।

इन्द्रियायतन ईत० । श्रोत्राद्याधारे देहे तस्य इन्द्रियाधा-रत्वसाधात्वम् । स च सूक्ष्मएव देहः । यथाह सा०का० "पूर्वोत्पन्नम (श) सक्तं नियतं महदादिसूक्ष्मपर्यन्तम । संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्"। "प्रधाने-नादिसर्गे प्रतिपुरुषमेकैकमुत्पादितम् आ चादिसर्गात् आ च महाप्रलयाद्यवतिष्ठते महदादिसूक्ष्मपर्यन्तं महदहङ्कारै-कादशेन्द्रियपञ्चतन्मात्रपर्यन्तम् एवं समुदायः सूक्ष्मश-रीरं धानधोरभूदैरिन्द्रियैरन्वितत्वाद्विशेषः । नन्वस्त्वेत-देव शरीरं भोगायतनं पुरुषस्य, किं तद्व्यतिरेकेण षाट्कौशि-केन शरीरेणेत्यतआह संसरतीति उपात्तमपात्तं च शरीर जहाति हायंहायं चोपादत्ते, कस्मात् ? निरुपभोगं यतः, षाट्कौशिकं शरीरं विना सूक्ष्मं निरुपभोगं, तस्मात्संस-रति । ननु धर्माधर्मनिमित्तः संसारः न च सूक्ष्मशरीर-स्यास्ति तद्योगः, तत्कथं संसरतीत्यत आह भावैरधिवा-सितं धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्याणैश्वर्याणि भा-वास्तदन्विता बुद्धिः तदन्वितञ्च सूक्ष्मशरीरमिति तदपि भावैरधिवासितं यथा सुरभिचन्दनसम्पर्कादृश्यं तदभा-वेनाधिवासितम्भवति तथाभावैरेवाधिवासितत्वात्संसरति । क स्मात्पुनः प्रधानमिव महाप्रलयेऽपि तच्छरीरं न लिङ्गता-त्यत आह लिङ्गम् लयं गच्छतीति लिङ्गं हेतुमत्त्वेन चास्य लिङ्गत्वमिति"भाव: । सा०कौ० । "पञ्चप्राणमनोबुद्धिदशे न्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसा-धनम्" स्मृतिः । पञ्चद० दृष्टमेव वाक्यमुपन्यस्तम् । न्यायादिमते स्थूलदेहएव इन्द्रियायतनं तैः सूक्ष्मदेहा नङ्गीकारात् इति भेदः जीवादृष्टवशादेवापूर्वदेह एव तत्तदिन्द्रियाण्यपि तत्तद्देहे उत्पद्यन्ते मनांसि तु अन-न्तानि तानि च नित्यानि तेषाञ्च अदृष्टवशात् एकक स्मिन् देहे एकैकस्य प्रवेश इति हि तेषां सम्मतम् । २ आत्मनि च "आत्मेन्द्रियाद्यधिष्ठतो" लिङ्गशरीरशब्दे एतेषां युक्तायुक्तत्वपरीक्षणम् करिष्यते ।

इन्द्रियाराम त्रि० इन्द्रियेषु आरमति आ+रम-घञ् । इ न्द्रियार्थभोगप्रसक्ते "अघायुरिन्द्रियारामो मोघं पार्थ स जीवति" गीता० ।

इन्द्रियार्थ पु० ईत० । इन्द्रियगोचरशब्दार्थे शब्दादौ "इ न्द्रियार्थेषु सर्वेषु न प्रसज्जेत कामतः" मनुः । इन्द्र इ न्द्रिये तल्लिङ्गे च हि०व० । "इन्द्रियार्थसन्निकर्षोत्पन्न-त्वम्" गो०सू० । इन्द्रियेणार्थस्य सन्निकर्षे इत्यत्र तत्र विवरिष्यते न्यायः ।

इन्द्रियाविन् त्रि० इन्द्रिय प्रशस्तत्वेन प्राशस्त्येन योऽस्यास्ति सो

विनि वेदे पूर्वपददीर्घः । १वश्येन्द्रिये २प्रधानेन्द्रिये च । "श्रोत्रत्वाक्चक्षुरिन्द्रियं दधा तन्द्रियाण्येव भवति" श्रुतिः ।

इन्द्रियेश पु० ६त० । १जीवे तदधिष्ठानेनैव तेषा तत्त्वात्तथात्वम् २इन्द्रियाधिष्ठातृदिगादिदेवादिषु च ।

इन्द्रेज्य पु० ६त० । इन्द्रयतौ यक्षेज्येन्द्रपूजादयोऽस्यत

इन्द्रेश्वर पु० इन्द्रेण स्थापित ईश्वर ईश्वरलिङ्गम् । मेरे-न्द्रपर्वतस्थे इलावृतवधजनितब्रह्महत्याविघातार्थं यक्षेण स्थापिते शिवलिङ्गभेदे तत्कथा प्रा० वि० काशि० पुरा-णम् । "दत्तं कृत्वा ततः यक्षोमाशैलेन्द्रे स्थाप्य यक्षेश्वरम् । लिङ्गं विख्यातः पापौघैर्मुक्तः स त्रिदिवं गतः । अद्यापी-न्द्रेश्वरं दृष्ट्वा तथा रामेश्वरं प्रभुम् । मुच्यते ब्रह्महत्या-या नरो वै नात्र संशयः" ।

इन्ध दीप्तौ रुधा० आ०अक० सेट् निशायामनिट् । वर्त्त-मानेचाऽतोनिषा । इन्धे, इन्धाते,इन्धते, "यं त्वां जनास इन्धते ऋ०८,४,२ इन्धोत, इन्धाम् । इन्न इन्धम् । ऐन्ध ऐन्धिष्ट इन्धाम्-बभूव । आस चक्रे इन्धिष्यते ऐन्धि-ष्यत । इन्धितव्यम् । इन्धिता इन्धनम् । इद्धोक्तौ ते । क्विप् समित् इन्धानः "अग्निमिन्धानो मनसा धियम् सचेत मर्त्यः" ऋ० । भावे इध्यते ऐन्धि । "परो यदिध्यते दिवि" छा०उ०त् पदगणव्याख्यासः ।

इन्ध इ०इन्ध+करणे-घञ् । १काष्ठे इन्ध-अच् । २दीप्तियुक्तौ । ३तन्नामके ऋषिभेदे पु० ततः गोत्रे नडा०फक् । ऐन्धा-यनस्तद्गोत्रापत्ये पुंस्त्री । दीप्तियुक्ते दक्षिणनेत्रे विशेषेण स्थिते ४परमात्मनि पु० । तस्य तदेतत्त्वञ्च समर्थितम् इ०उ०भा० । "इन्धोह वै नामैष योऽयं दक्षिणेऽक्षन् पुरुषस्तं वा एतमिन्धं सन्तमिन्द्र इत्याचक्षते परोक्षेणैव, परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः" "इन्धोह वै नाम इन्ध इत्येवं नामायं "चक्षुर्वै ब्रह्मेति" आदि-त्यान्तर्गतः पुरुष एषः, योऽयं दक्षिणेऽक्षन् अक्षिणि विशे-षेण व्यवस्थितः । स च सत्यनामा तं वा एतं पुरुषं दीप्तिगुणत्वात् प्रत्यक्षं नामास्य इन्ध इति तमिन्धं सन्तमिन्द्र इत्याचक्षते परोक्षेण, यस्मात् परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः प्रत्यक्षनामश्रवणं द्विषन्ति" भा० "इन्धयति दीपयति इन्ध-णिच्-अच् । ५दीपके त्रि० । एतस्मात् पूर्वस्यो । आङ्गाम्नोः समासे सुम् । भा-ङ्गिमन्यः अग्निमिन्धः । "होत्राध्वर्युरावया अग्निमिन्धो ग्रावग्राभ" यजु० २५,२८, अग्निमिन्धश्च अग्नीत् नाम ऋत्विक् ।

इन्धन न०इध्यतेऽनेन इन्ध+करणे-ल्युट् । १काष्ठे "इन्धनौघ यथाग्निस्तृप्तिमा नात्येति पूरुषम्" भाग० । "काम्यानीह विवाहेषु नित्यं भक्ष्ये तथेन्धने" मनुः । इन्धने इन्धना-पहारे इत्यर्थः "इन्धनार्थमशुष्काणाम्" प्रा० वि० स्मृतिः । इन्धयति इन्ध-णिच्-ल्यु । २दीपनकर्त्तरि त्रि० । भावे ल्युट् । ३प्रज्वालने न० ।

इन्धन्वन् त्रि० इन्धन+मत्वर्थीयः । मेधे वनिप् त्रि० वर्त्त-मीयः । इन्धनयुक्ते । "इन्धन्वभिर्यजुभिर्ब्राह्मणेभिः" ऋ० २,३४,५ "इन्धन्वभिः समिद्भिर्वा" भा० ।

इन्ध गतौ भ्वा० निक० । इत्यधातौ ६२८ पृष्ठे विवृतिः ।

इन्धका स्त्री इन्धति इन्ध-अक् स इव कायति कै-क । खग-गिरीनक्षत्रोपरिस्थे इक्ष्वाकाख्यतारासु अमरटीका ।

इभ पु० इण्-भ किच्च । १हस्तिनि, "वन्येभदानाविलगन्ध-दुर्द्धराः" माघः २तत्संख्यानुख्यसंख्याके अष्टसंख्यान्विते च । गजादि अष्टसु दिक्षु स्थिता ऐरावतादयोऽष्टौ वर्त्तन्ते इति तेषामष्टत्वम् । ते च "ऐरावतः पुण्डरीकः वामन. कुमुदोऽञ्जनः । पुष्पदन्तः सार्व्वभौमः सुप्रतीकश्च दिग्गजाः" अमरोक्तक्रमेण पूर्व्वादीशानान्तदिक्षु स्थिता । अस्य च उत्तरपदस्थत्वे श्रेष्ठार्थद्योतकता आह्नादेराकृतिगणत्वात् उपमितसमासः । स्त्रियां ङीप् । जातित्वात् मोटाग्रहणेन समासेऽस्य पूर्वनिपातः दुःबद्धावस्था इभपोटा

इभलक्षणविभागादि हस्त्यायु० "मध्याभद्राः सुविभ-क्तदेहा न चोपदिग्धाश्च लघ्वः समाश्च । गात्रैः समैश्चाप-समानवंशा वराहतुल्यैर्जघनैश्च भद्राः॥ वक्षोऽथ कक्षावलयः स्थाश्च लम्बोदरं त्वग्दृढता गलश्च । स्थूला च कुक्षिः सह प्रेक्षणेन सैंही च दक्षस्मदमत्कजश्च ॥ खगास्तु रूक्षाधरबालमेढ्रास्तन्द्रिप्लवग्रहिणश्वसार्काः। स्थूलेक्ष-णास्तेति यथोक्तचिह्नैः सङ्कीर्णनागा व्यतिमिश्र चिह्नाः ॥ पञ्चोन्नतिः सप्त खगस्य दैर्घ्यमष्टौ च हस्ताः परिणाहमानम् । एकद्विहस्तावथ मन्दभद्रौ सङ्कीर्णनागौ क्रमनियतप्रमाणः ॥ भद्रस्य वर्णो हरितो मदश्च मन्दस्य हारिद्रकसन्निकाशः । कृष्णो मदस्राभिहितो खगस्य सङ्कीर्णनागस्य मदो विभिन्नः ॥ ताम्रौष्ठतालुवदनाः कलविङ्कनेत्राः, स्निग्धोन्नतायतशिरोदशनाः पृथुस्थाय-ताक्षाः। चापोन्नतायतशिगूदनिभग्नवंशास्त्वेकरोमचित-कूर्मसमानकुम्भाः । विस्तीर्णकर्णकृतनाभिललाटशुण्डाः कूर्मोन्नतैर्द्विनवविंशतिभिर्नखैश्च । रेखालयोपचितहस्तकराः सुजाताः धन्याः सुगन्धिमदपुष्करमारुताश्च । दीर्घोरु-

स्तिरश्चपुष्करा: सजलाम्भोदनिनादहृष्टिद: । हृद्दावतदुत्तकन्धरा धन्या भूमिपतेर्मतङ्गजा: । निर्मदाभ्यधिकक्षीणनखाक्षान् कुब्जवामनकमेषविषाणान् । हस्यकोपफलपुष्करक्षीणान् ह्रस्वनीलयवलाञ्छिततालून् । खल्वबल्लाहृष्टमत्कुणषण्ढान् कृष्णिनीं च गजलक्षणयुक्ताम् । गर्भिणीं च यति: परेषां प्रापयेदतिविरूपफलानि" ।

ऐषा०मरि०ख०खलखसस्त्रये विष्णुध०। "नागा: प्रयत्ना धर्म्यास्च ! प्रमाणादधिकास्च ये । दीर्घहस्ता महोच्छ्राया-ऽवामनास्च विशेषत: । निगूढवंक्षणाभध्वजा व्यूढा व्यूढोरु मत्ताका:"(व्यूढा विपुला:)"विंशत्यङ्गादयनखा:। प्रीतकालमदास्च ये । ते प्रयत्नामहानागा: ये तथा सप्तसङ्ख्यिता:। दन्तच्छदेषु दृश्येत येषां खल्लिकलक्षणम् । भृङ्गारवालव्यजना वर्द्धमानाङ्गुयात्तथा । धार्य्या नैते तथा धार्या वामना ये च मत्कुणा: । कृष्णिन्योयास्च गर्भिण्योये च मूढा मतङ्गजा: । अपाकलास्च कुब्जास्च सह्नाएव भार्गव ! । कुदन्तास्च तथा वर्ज्या वामकूटास्च वल्गत: । अस्वस्थस्य कूटास्च ये चक्षता विकटास्च ये" । राम उवाच वामनाद्यास्च ये नागा: प्रोक्तास्त्वन्दितलक्षणा: । तेषां तु श्रोतुमिच्छामि लक्षणं वदतां वर ! । पुष्कर उवाच । आनाहायामसंपूर्णोयोऽधिहस्तो भवेद्गज: । वामन: स समाख्यातोमतङ्गकुदन्तवर्जित: ।(आनाह:स्थूलता) (आयामो देर्घ्यम्)दृशां चतुर्थी संप्राप्य वर्द्धते यस्य न द्विजौ । स्थूणावनायतौ स्यातां स मूढो हि गजोऽधम: । अपाकलो विशालेन दन्तेनैकेन वारण: । संक्षिप्तयष्टीजघन: पृष्ठमध्यसमुन्नत: । प्रमाणहीननाभिश्च स कुब्जोवारणाधम: । अनुन्नताभ्यां सहन्त: कुदन्त:स्यात्ततो बहि: । (बहिर्दन्तसोमनि) । वामदन्तोन्नतो नागो वामकूट इति स्मृत: । दन्तावसुस्पृशौ यस्य सोऽसुस्पृगिति कीर्तित: । एकदन्तस्तथा नाग: कूट दन्तभिधीयते । पादयो: सन्धिकर्षे: स्यात् यस्य नागस्य नक्षत: । स वक्षणोऽध्वनि यूहे च नक्षण्य इति पूजित: । अरत्यभ्यधिकं यस्य विस्तरेऽन्तरान्तरम् । विकट: सविनिर्दिष्टो दुर्गतिर्निन्दितोगज: । राम उवाच । श्रोतुमिच्छाम्यहम् देव! कुक्कुरं सप्तसङ्ख्यितम् । यं प्राप्य क्षिप्रं राजानोजयन्ति वसुधां नृपा: । पुष्कर उवाच । वर्च: सत्वञ्च रूपञ्च शीलं सहननञ्च व: । सप्तैतानि वदा यस्य स गज: सप्तसङ्ख्यित: । ये वामवह्निचपलार्च्चिभानेनाप्रातृखाभा:पिटकोत्तरवापि । ते नागयुग्या विजयाय युद्धे भवन्ति राज्ञां न हि संशयोऽत्र" तस्मैव वराहसंहिता । "कृष्णिनां जातिदेशवर्णाकृतिप्रमाणचेष्टादिलक्षणमनुव्याख्यास्याम: । तत्र जातयश्चतस्रो भवन्ति । भद्रा मन्द्रा मृगा मिश्रेति तत्परिज्ञानमाकृतिचेष्टादिभिरुपदिश्यते । तत्र भद्रा जातिर्वारुह्यायतसुखोच्छ्रयो-न्नमस्तक: उदग्रसत्वोऽनुद्वत्तकर: श्रोता दीर्घपुष्करावृत्तिर्वाग्मी: महानखोरोमशपोष: । स्थूलनेत्रोदरताम्रतालुजिह्वौष्ठ: सुपार्श्व: स्निग्ध: सवर्णमृदुरोमा कूर्म्मपाद: स्वच्छस्थितिश्चितांस: पृथ्वाननः सूक्ष्मबिन्दुचित्रोवङ्क्षनुरोमोपचितश्रोत्र:सुनखो धनु:पृष्ठवंशो मधुवर्णतालुर्यूथाधिरूढिता सक्ष्णिण्यन्यर्थवेदो बलवान् कालातुरोदत्तावमर्दी स्तब्धोपायेन साध्य आत्मपदे श्यावी च भवति"। (उदग्रो उच्च: अनुद्वत्तकर: अनुक्रमेण उद्वत्तकर: पुष्कर: कराग्रं मन्द्रा धमनी अन्यर्थवेदी अर्थे वक्ष्यते) । मन्द्रजाति: संक्षेताभिख्य: सुमुखो महोदरकरश्रोता: स्थूलदन्तसतृष्टवंश: स्थूलकक्षजिह्वांसपोष:, पृथुकक्षमस्तक: सुविभक्तोर:पिराःसुवृद्धवक्त्रश्रोत्र: स्थूलास्थिकरवापोविलपाद: सूक्ष्मनाभिस्तनुताम्रवर्णकट: दीर्घोन्नमेट्टाकुक्षिर्वाग्मीबाहुधिर्मुष्करस्थूलवरणोपदिग्धोष्ठवर्णश्च: सुवद्धजघन: सहस्रोरश्लोमशोरवेदी मन्दजाति: जातयश्चोद्दामनखश्चोच्छ्वासाध्योयूथानुगाभी यष्टिगतोपि नारिभवमाविशति। (गम्भीरवेदी वक्ष्यते उपदिग्धो लिप्त:) खगजातोव: पुनर्लुप्तपुष्करोऽल्पहनुहृत्फलबालमेहनसुदत्तनखपृथुवंशग्नीवाक्षोदरमेढ्रतनुर्विषाखनेत्रवक्षोदत्ततनुश्रोत्र: कुण्ठोष्ठो घनायताग्रकाय: संक्षिप्तकराक्षो ह्रस्वमसकोद्दीर्घजिह्वोविषाणोपनीत: श्रीश्रोवङ्क्षनोभारक्षो मनस्वी दुर्दम: स्थूलपर्व्वनानुचारी भिन्नपुरीषोऽतिक्रमवेदी क्रोशाह्व: क्रन्दनश्चेति । मिश्रास्तु तेषां परस्परसंयोगजा: सर्वसङ्कलक्षणा इति। भद्रा श्रेष्ठा भवन्त्यासां मन्द्रा मध्या कनीयसी । मृगा मिश्राऽधिके त्रैवा गुणदोषै: समायुत: । अथ वनभेदेन गजभेदा: । अथैषां प्राच्यकाङ्क्षदार्ष्टमार्गे षे यकक्षाङ्गिकुक्षापरान्तिकसौराष्ट्रपञ्चनदाख्यास्त्वष्टौ वनानि वासस्थानानि तेषां पृथक् पृथक् कर्म्मलक्षणमुपदेक्ष्याम: तत्र हिमवद्गङ्गाप्रयागगोपालान्तरे प्राच्यवनमुत्पन्ना: कपिला: अल्पपा: कृशखपार्ष्णयोवारणास्वल्पपृथुपेचकवंशपिच्छका: पृथुकक्षा-मन्दवेगाल्पाश्वपदाश्चतयो भवन्ति । (पेचक: पुच्छमूलम्) मेकलो मत्स्यो गङ्गावतारश्चेति काङ्काख्यवनमतोत्पन्ना: श्यामाश्वखुरा: शुचरणाङ्गुलान्ता:-

यताः शोभोदयाढ्यङ्गिरुहाभैर्ह्रस्वैर्ह्रस्विनो भवन्ति । मङ्गलिरिद्यार्यविन्ध्याटवीरावतीनां मध्ये दर्शार्हं वनमभिख्यातमत दीर्घाङ्गुलिपुष्करः प्राप्तभाः श्यामा वा दुर्धर्षाः सुवृत्तजघनाग्राः सितसूक्ष्मबिन्दुचित्रा-सूतफलतरुप्रभद गन्धिनोविशाखोत्सङ्गदन्ताः स्थूलकुम्भाक्षिराशीर्षा मध्यताः खासनाःसत्ववन्तश्च । मारिमालवैदिशवनप्रस्थावन्तीनामन्तर्गोचरेयकं वनमतोदन्नाः शीघ्रदीर्घक्रमेणोपदिग्धाङ्गाः बलवन्तोऽभिजाताः सुप्रमाणाः मध्यप्रहृदुत्वचः कचाविलप्राया अल्पमेचकाक्षिरिष्यावाक्षसङ्क्षाः सुवृत्ताः स्निग्धरोमाणः स्थिराः सुपरोराः करेणूनामधिपतयः खल्वताधार्याश्च । विपुलसङ्गदन्तिधारणयोत्कलानां मध्ये कालिङ्गकं वनमत कलविङ्काभाः सर्वश्वेताः स्थिरपदाः शीघ्राः सूक्ष्मचरोमाण्यसत्तुलगुदरादीर्घकेशवालधयो दीर्घक्रमाः बलवन्तोऽल्पमेचकाः पद्मप्रभा यातूदग्ना धनुःपृष्ठवंशारक्षतानुजिह्वौष्ठाः सुप्रयोगपक्षसुखाःवराङ्गजघनाः नीचदन्तनखा स्थिरचरणाः आयुसुवेदिनोमधूदयनाः पीतसुखशिरोधराः मङ्गोरगदृङ्कराः ह्रस्वदीर्घसुखाङ्गिनो भवन्ति । नर्मदोदधिसेवेद्यानोपकारवामनरतोऽपरान्तिकं वनमत मानिनो धीराः श्यामाःसुप्रमतिष्ठिताः दक्षजघनशिरोधरा पीनायतविषाणाः खाखवा ह्रस्वत्वच उदग्रादीर्घरक्षतास्योजिह्वामङ्गोत्सङ्गाः पद्मगन्धिनो धनुःपृष्ठवंशाविद्धत्वास्थाभाग्यवनविचारिणः । हारकार्बुदावर्तनर्मदान्तरत: सौराष्ट्रकं वनमतोत्पाद्यायुसखाः पिङ्गायताक्षाः मध्यायताङ्घ्रयोऽल्पमेचका ह्रस्वविभक्तमात्राप्रतिलोमलोमगोचरवास्तुलक्षणवन्तः सूक्ष्मदन्ताः शिक्षाभाज इति । शिखवल्लिस्थुकुलाङ्गलकानामभ्यन्तरे वनं पञ्चनदाख्यं तत स्फुटितरक्तश्वेतांशुदन्तास्तनुबिन्दूपचितकराः सुगन्धयोह्रदयोमङ्गपेचकदेशाङ्गप्रमाणाःसूक्ष्मदृक्तुत्वचोदुर्विनेयाध्यानशीलाः कलहरुचो भवन्त्यपि । वनेषूत्तेषु जातेषु प्रधानमध्यमोत्तमाः । प्रशस्ता निन्दितास्यापि तेषां लक्षणमि लक्षयम् । नष्यजतुकाटसङ्काशं सुखमल्पाङ्गुष्पुपुरं दुर्गन्धं कर्कशत्वयोमाषमातत्तलध्यस्थूलविरलपर्वाणं हस्तिनो हस्तमध्यन्यविघातधन्यं पीतं ह्रदरोमाक्षमनुपूर्वपतितं चाल्पदीर्घाङ्गुलिपोनं पृथुपुष्करंह्रदवस्थितम् । सुगन्धिदृत्तं पञ्चहस्तावतं हिरण्यं दृक्तुण्डोतोपोदृक्षाग च । कलमस्फुटिताशुसमविनविषमचक्रवक्त्रसूक्ष्मदन्तावपूजितौ पूजितौ च स्निग्धसूक्ष्मप्रदक्षिणोद्धतामस्निग्धसमसंहितौ मधुपवर्णौ सुकुसिताग्रावावामध्यायतावल्पादयाङ्गुलपरिणाहौ । अथ विरूपविषमे वराङ्गकुलध्याङ्गुलागराभे कृष्णविच्छिन्नलेखे सन्निपीडिते शोषणे न पूजिते पूजिते च कलविङ्काभसदृश्यं मन्दि पङ्क्तिलक्ष्ये खनुपहिते च । प्रशस्तं समाहितमायतपृथु बाहित्यमवस्थितरक्षतानुजिह्वौष्ठाग्रसूक्ष्मसूक्ष्मबिन्दूपचितं सर्वसंपूर्णम् । ह्रदुह्रदुनिर्यापीडितपुष्करं विषमन्यासनात् षडङ्गुलावागल्यनाभावेन नतकक्षालक्ष्मनातिरिक्त प्रमाणं षट्टाधनपिङ्क कृष्णास्थूलह्रस्वरोमोपचितमपूजितं शिरोवारणानां पूजितं महोदयस्थानसुपवितसुप्रकमनिम्नखरनिर्यापं पृथुपुष्करं स्निग्धह्रदुसूक्ष्मयुग्मरोमसुविभक्तोष्णीषविताभावपाङ्गं वा सुखोत्कटोपकण्ठौ दन्तौ खड्गौ तनुविषमसिरातती पीडितान्तावतिरक्तप्रमाणौ संहतच्छिद्रौ सान्द्रह्रदुसूक्ष्मप्रमाणसिराजालावपाठितपुटसंविपुलमूलिकौ, पृथुच्छिद्रौ दुन्दुभिस्वनौ वा । क्लेशावहाच्छिद्रातिदीर्घातुपचितपीडिका सुसंहतौ पृथ्वाक्ष्मनात्युन्नतायतास्थानावपीडिता ग्रीवा वारणस्याप्रशस्ता यस्ता तु मङ्गोपरि पिण्डिका दृढारक्षीति बलि; सान्तारक्षिपरीणाहा हाटयाङ्गुलायता सर्वसम्पूर्णा वा । विषमसमवायं संस्थिप्रलम्बं संपुटमानसं विगर्हितं स्थिरं च विनतमल्पोन्नतं वक्षं पृष्ठवंशयशोभनम् । शोभनसुपचितसूक्ष्मं धनुःप्रमाणमेवं संस्थानं विद्यात् । अथ पूर्वशास्त्रिच्छेदोक्तांसं विकसितकक्षतयोर्दृसं शिराजालमनं लक्ष्यव्याधिह्रदोद्वहनिर्लग्नं विषमकायिकम् प्रमाणहीनमनिष्टम् दृष्टमनुपूर्व्योपचितं स्थिरविभक्ताजिलसत्कोटमनुपविम्बसुखमच्छिद्रम्बोपचितमधोरङ्गं वा । अथ जघनं वनसच्छिद्रतास्थि निर्मांसमेचकं कलाहीनातिरिक्तप्रमाणं बालध्यनुबाधि शमनर्धकरम् । अर्धकरमत्यमेचकं प्रशस्तोपचितमहाध्यशुष्कास्थसंहतसरलभावतान्तं चारुवालधिपरिपूर्णाण्डकोषावततया नाभिरालपल्लवाकारमेकनमजघनसन्धयनं च श्यावाल्पकूक्षिस्फुटितनखक्लिष्टखलि, परघासारतलसङ्गा न पूजिताः पादाः; अल्पे भवन्त्यपि च । विंशत्यङ्गादशनखाः स्थिराः कूर्मसंहिताः । गजानां पूजिताः पादा वेत्र सुविवृत्ताविद्धाः । पादाः कचाविला रूक्षविवर्णाः परुषाः खराः । वारणानान्तु शस्ताः स्थूलं वा स्निग्धतनुरुहाः । सूक्ष्मबिन्दुचितां स्निग्धां त्वचं संवहन्ति दन्तिनाम् । आस्यस्थौ

विशालश्च विषाणौ पार्श्वे उन्नतौ । उद्वाहितो विषाणेन दन्तेनैव वारणः । अनुन्नताभ्यां संपन्नःकुदन्तः स्यान्नतावधिः । जर्जरं वल्गान्तराक्षं प्रतिमानसमौ द्विजौ । क्षुद्वस्त्यूजातिदीर्घेण दन्तेनैकेन वा गुणाः । वर्जयेत्तं शुभ कामेन सर्वत्र एवातिगर्हितः । अवद्वये नदीजानां पञ्चमेऽवद्वे वनौकसाम् । दन्तमूलपरीणाहान् द्विगुणानूनत्वयेत्परे । परयक्षिधनुश्चक्रशूलयूपसमत्वचः । दन्तायराजयो यस्य स रूपं वोढुमर्हति । रोमशां तु संश्रयो यस्य पिटक स उदाहृतः । स ज्येष्ठः सप्तभागोनोमध्यमोऽसौ मतङ्गजः । अन्यः षड्भागहीनःस्यादतोऽप्योहि न पूजितः । सुखाय मेचके दैर्घ्यं पृष्ठपार्श्वोदरान्तरम् । आनाहउच्छ्रय पादाद्विप्रो यावदासनम्" । वनविशेषेण गजलक्षणं तत्रैव वार्हस्त्यसंहिता । "वनानां मध्ये प्राच्यं काञ्चिकुक्कमापरान्तिकं च त्रीणि वनान्यतिशोभनानि । तत्रापमपि प्राच्यं वनं मध्यवनमपरेषामिव शोभनम् । तत्रैरावतकुलप्रसूतिसम्पन्नाः प्रायेण ऋगभिन्नभद्रलक्षणाः मङ्गकायाः करिणो भवन्ति । विनयसत्वयक्षिसम्पन्नाःपुंगफलप्रभाक्षाश्चक्षिषः प्रविरलमदा गजा युद्धेचापसर्पणोपसर्पणनीरवा भवन्ति नातिक्रोधनाः सस्तहेजिताः स्वयं दर्शयन्ति । ते च दृष्टैः कवलैः कायोपघातातिशयेन मदाभिसुखाः कर्त्तव्याः । कालिङ्गके वाऽपरान्तिके च त्रेतायुगोत्पन्नाः मन्द्रा महागजान्वयजा मन्द्राभिधानाः प्रायशो मृगावयवाः सङ्कीर्णा गजाः सस्तमद्यन्ते । नात्युदग्रा जलदप्रभा नातिस्थिरा मन्द्रा युद्धप्रियाश्च गजा भवन्ति । तथा काक्षदाशार्णमार्गेयकाभिधानेषु मध्यमा गजाः सस्तमद्यन्ते मृगमन्द्रजातयः ते च चार्ववयवाः मध्यमबलामध्यम प्रमाणाः स्थूलरोमाबिलशरीरोरुकुरदा मन्द्रगतयः । तथा सौराष्ट्रे पाञ्चनदाभिधाने द्वापरयुगोत्पन्ना मृगमतङ्गजान्वया मृगप्राया गजाभवन्ति भीरवः कल्पिताङ्गाः नातिचण्डादुर्मदाः दुर्दान्तास्च एवंविधा गजाः सस्तमद्यन्ते वनाच्च वनान्तरे गतेषु दुर्दान्तेषु गजेषु धेनुकासम्बर्केण गुप्तवनेऽपि कालिङ्गकेऽपि । त्रासशीलस्च भीरुश्च क्षुद्र वामनसत्वकः । हीनाद्यभोगो दुःशीलक्लसंहतशरीरकृत् । सस्तच्छिन्नत्वनायामी परीणाहविवर्जितः । मृगखरूपोदीनश्च मृगजातिर्गजाधमः । अतः परं प्रवक्ष्यामि संकीर्णस्य च लक्षणम् । पशुत्वाद्धारणाच्चैव शक्कतां च वियोनिषु । धेनुकासु भवन्त्येते गजा संकीर्णलक्षणाः । भद्रोमन्द्रोमृगोवाथ शुद्धजातिः प्रजायते । तस्मान्निमित्तरूपाणि गदतोमे निबोधत । आनन्त्यान्निमित्तजातानां निश्चयोनोपपद्यते । तथापि किञ्चिदुद्देशान्निमित्तलक्षणमुच्यते । भद्रमन्द्रो भद्रमृगो भद्रमन्द्रमृगस्तथा । एक भेदत्रयं मन्द्रमृगयोरपि जायते । भद्रादीनां च सर्वेषां रूपं संकीर्णसंज्ञितम् । जर्जरः कार्यभेदेन तज्ज्ञानि निर्दिशेत् द्विधा । त्रिधा च भिद्यतेसूय एकैकस्तु यथाक्रमम् । एवमष्टादशविधं कीर्त्तितं मिश्रलक्षणम् । शुभाशुभं विशालेन साम्प्रतम् निगदाम्यहम् । भद्रमन्द्रोभवेद्दिष्टोमृगमन्द्रस्तथाधमः । भद्रमन्द्र मृगश्चैव मध्यमः परिकीर्त्तितः । भद्रजाति र्मङ्गकायोगजोमध्ये तु दन्तिनाम् । मन्द्रोऽवयवलेशेन स शुक्लो भवति द्विपः । मृगस्यापि हि रूपेण किञ्चिच्चानुगतेन वै । अशुभत्वं न भद्रस्य जायते शोभनोहि सः । लोचनानां प्रधानत्वं यस्माच्छास्त्रेषु कीर्त्तितम् । तस्मान्मृगाक्षिसंशुक्लोभद्रोऽपि हि न यस्यते । भाद्रेणो परिकायेन मान्द्रेनाधोगतेन वा । उन्नतोहि गजानान्तु भद्रमन्द्रोभवेद्गजः । अनेनैव हि रूपेण विपर्य्यासेन यो गजः । सोऽपि शोभन एव स्यान्मन्द्रभद्रइति स्मृतः । एवं विधात् मृगे चापि लक्षणान्मिश्रलक्षणम् । महावयवबाहुल्यात् मृगरूपस्य लेशतः । भद्रावयवनिर्मुक्तोमध्यमोऽसौ गजो भवेत्" कायेन यो भवेद्धस्ती सन्द्रोवापि मतङ्गजः । मृगगालोऽपरस्यैव स भवेद्धस्तवान् गजः । मृगरूपाधिकत्वं च दृश्यते यस्य दन्तिनः । अधमस्तु स विज्ञेयः सत्वयक्षिविवर्जितः । करदन्तान्त्रिकुम्भश्च यो मृगेजायते गजः । शेषावयवभद्रोऽपि हीन एव भवेदसौ । एवमेष्वभावेन मिश्रभेदा मयोदिताः । मोदिता येऽपि तेऽत्रापि मिश्रा ज्ञेया मनीषिभिः । मिश्रलक्षणसंयोग उक्तः यस्य दृश्यते । रूपन्नामधेयोऽसौ जायते हि मतङ्गजः । अतः परम्प्रवक्ष्यामि लक्षणं गिरिचारिणाम् । तथा नदी चराणां च तथैवोभयचारिणाम् । मङ्गला मङ्गकायान्वितांसा गिरिचारिणः । सुपार्श्वास्थारुदिग्धाङ्गादृढपादागतक्लमाः । उदग्रानिर्भयास्चैव सल्लकीकवलप्रियाः । तटाघातविधौ भुग्नदन्तदारित भूतलाः । शार्दूलादिमहासत्वसंक्षोटातङ्कवर्जिताः । मदस्रावक्लतोत्साहादुर्दमावारिभीरवः । पांशुक्रीडारता नित्यं द्रुमोन्मूलनतत्पराः । विषाणवेष्टनाशीलाः खेदसन्तापनीरकाः । कराग्रस्फोटनिरता सोत्कारकरणप्रियाः । अनुदग्रावनग्रामाः शीकरोद्गिरणप्रियाः । तोयकर्म्मणि निःशङ्कामतङ्गाश्च नदीचराः । उभयेषुचर-

ष्येते नरोपर्व्यतरानुषु । ये गजाकृष्टमनसस्ते भवन्त्यतिशोभनाः । सर्वेषामेव नागानां छायालक्षणमुत्तमम् । यद्यया जायते यस्य तत्तथैवाभिधीयते । सत्वांशकत्वाद्बहुरुक्ष पाटला भवति प्रभा । नरपङ्क्तिसच्छाया स्निग्धा तनुतनूरुहा । तथातमोंऽशकत्वाच्च कृष्णा मन्दस्य जायते । तरुच्छाम्बुदसंकाशा स्थूलकृष्णकचाचिता । रजोंऽशकत्वाच्च तथा मृगस्यापि हि धूसरा । अलिनाम्बुदसंकाशा रूक्षा तनुतनूरुहाः । एवं छायाविशेषाः स्युर्भद्रादीनामुदीरिताः । छाया संमिश्रभावाच्च मिश्रा भवति दन्तिनाम् । वनजातिगुणैर्भद्रः गजश्रेष्ठो नरोत्तम ! । तमोऽशकत्वं मन्दस्य यद्यदुक्तं निबोध मे । दुर्मनस्त्वं तथाऽऽलस्यं निद्रालुत्वं च मूढता । गम्भीरवेदिता चेति मन्दस्य तम उत्थितेः । एवं रजोगुणो राजन् मृगस्येह रजोंऽशकः । धैर्यं स्थैर्यं पटुत्वं च विनीतत्वं सुकर्मता । अस्वर्थवेदिता चैव भवत्यनेषु मूढता । सुभगत्वं च धीमत्त्वं सत्वस्थैते गुणाः स्मृताः । अतः सत्वांशकोराजन् भद्रजातिरुदाहृतः । चिलत्वं बालुधिरसोरन्मक्षिगतं तथा । दन्तयोर्मधुवर्णत्वं नेत्रयोर्मधुपिङ्गता । आसनस्य पृथुत्वञ्च पूर्णता कुक्षिपार्श्वयोः । पृथुत्वं पृथुभागस्य घनत्वं समसन्धिता । स्निग्धच्छाया त्वचायामः परिणाहोच्छ्रयौ तथा । स्त्रीकत्वं गुरुत्वं च कार्यस्थैते गुणाः स्मृताः । सर्वलक्षणसंपूर्णो दृश्यते न मतङ्गजः । प्रधानावयवे लोके यत्नः कार्यो मनीषिभिः । हीनं क्षणं च कल्माषं पुष्करं न प्रशस्यते । संपूर्णं मांसलं रक्तं सुकुमारं शुभं स्मृतम् । लाङ्गुलमुभवेद्धीनं हीनमतिविनाशनम् । क्षणं भर्तुर्विधातायत्कल्माषं भर्तृरोगदम् । संपूर्णं सिद्धिदं भर्तुः पुष्करं चतुरङ्गुलम् ॥ सौभाग्यदं मांसलन्तु सुकुमारं तथार्थदम् । रक्तपद्मदलच्छायं तथा मिष्टान्नपानदम् । अतः परं शुभैस्तेये श्रोतसी पाटलोदरे । पद्माकुलप्रमाणेन वर्तुलत्वेन चार्थदे । अवाङ्मुखं च ताम्रं च कर्णतालं सुखप्रदम् । रूक्षा स्थूला च विपुला चिलिणी श्यामलोन्नता । कुत्सिता च तथा दृष्टिः सप्रधा दन्तिनां मता । तारां तु तारकच्छायामाहुः सत्वेस्यभिसंज्ञिता । रूक्षा करोति कपर्तेर्विनाशं शोभनेव हि । स्थूल दुर्भिक्षकरणी श्यामला कपदूःखदा । करोति चिलिणी चिलं तस्येव तु वसत्त्रयम् । भुग्ना दृष्टिर्विनाशाय राज्ञोऽनविनाशिनी । कुत्सिताऽलीनयोश्चैव युद्धकाले रिपोर्जयम् । अतः परं प्रवक्ष्यामि क्रमेण करलक्षणम् । न करं दीर्घमिच्छन्ति बालधेः शास्त्रपण्डिताः । न बालधिसमं रूक्षं नातिदीर्घं क्रमायतम् । न तनुं नातिकायं च न रूक्षं न क्षतव्रणम् । नाक्रमेण क्षतोत्थेन न हीनं दृश्यतेऽन्तरम् । न रूक्षाकुक्षिसंयुक्तं नातिसंकटपुष्करम् । एतल्लक्षणसंयुक्तं करं शंसन्ति कोविदाः । बालधेः सुखसोपानः समोवा दन्तिदुःखदः । अतिदार्घोभवेद्भर्तुरायुषः अवकारकः । तनुव्याधिकरो यातुरतिकायोऽधिनायनः । रूक्षोव्याधिव्रणङ्कुर्याद्यातुर्विक्षतां व्यथाम् । प्रतिलोमेन च स्थूलोगजस्य सुखनाशनः । असमश्लक्ष्णरोम्नश्च असमश्लक्ष्ण वर्तुलः । दुःखयोक्तभवायासकर्त्ता भवति निश्चयः । दशनान्तरहीनश्च जायते दन्तिरोगहृत् । कथितं पूर्वमेवेषु पुष्करान्तुलिक्षणम् । अतो मया न कथितं साम्यतत्पुरलक्षणे । निर्बलोकोटरोमा क्रमसत्त्वसंयुतः । अणुबिन्दुविचित्रश्च दैर्घ्ये च यतांकुशः । बालधेः पुष्करं यावदायामोलाङ्गले तथा । अरत्निचयाऽऽनाहश्च हीनहीनतरक्रमात् । युक्तप्रमाणेन मानेन करः पूज्यतमो भवेत् ॥ निर्बलोके च सोभाग्यन्दीर्घरोमार्थदः स्मृतः । क्रमसत्त्वोत्थयं कुर्याद्विन्दुचित्रोधनम् । सुप्रमाणं भवेद्राज्ञः करस्य परिवर्तनः । आनाहश्चाऽऽयतं राज्यकीर्तिकरोभवेत् । करस्य कीर्त्तितं ह्येतल्लक्षणं शुभसंयुतम् । अतःपरं प्रवक्ष्यामि लक्षणं दन्तवेटयोः । कवहीनावतिस्थूलौ विषमौ शिथिलौ तथा । दन्तवेटौ सदा भर्तुः प्रमाणाभ्याससौख्यदौ । दन्तमूले सुसम्बद्धौ सकपौ किञ्चिदुन्नतौ । दृष्टौ सदा तथा भर्तुर्हितदौ परिकीर्त्तितौ । अतःपरं प्रवक्ष्यामि लक्षणन्तु विषाणयोः । व्यस्तता स्फुटत्वं च प्रांशुता भक्षणुभ्रता । वक्रत्वं रूक्षता चैव धूसरत्वं च रूक्षता । लघुताऽधोगतित्वञ्च हीनता मूलमध्ययोः । प्रान्तयोः स्थूलता चैव दीर्घता चातिमात्रता । सर्पच्छत्रकसंकाशत्वं दोषास्त्वेते चतुर्दश । दन्तयोस्तु समाख्याताः फलं तेषामिबोध मे । व्यस्तौ च सहजौ दन्तौ मदहानिकरौ तु तौ । दन्तिनश्चतुरायुषौ व्याधिदौ परिकीर्त्तितौ । भक्षणुभ्रौ तथा भर्तुर्मेधा क्लेशकरौ मतौ । वक्रौ चार्थविनाशाय रूक्षौ च परिकीर्त्तितौ । धूसरौ रूक्षतायुक्तौ गजस्यायुर्विनाशनौ । मृदुत्वयुक्तौ नागस्य शस्त्रव्रणकरौ मतौ । स्थूलायाधोगतित्वे च भर्तुर्यात्रय दुःखदे । अशुभं लक्षणं ह्येतद्दन्तयोः कथितं मया । शुभं च साम्प्रतमद्ये यथावदनुपूर्वशः । स्निग्धौ सजौ सुनिष्क्रान्तौ संपूर्णौ ह्रस्वसंज्ञितौ । सुकुलाग्रौ दृढौ वापि ताम्रच्छौ श्लक्ष्णाग्रौ । दन्तिन्यायुष्मतौ किञ्चित् मृणालकुसुदप्रभौ । मुचकुन्ददलच्छायौ हेमचम्पक-

पिङ्गरौ । मधुपिङ्गौ घृतच्छायौ पीयूषसदृशप्रभौ । केतकीकुसुमाभौ च मृगाङ्किरणप्रभौ । अध्यर्द्धारत्निमानौ च तदर्द्धनाहसंयुतौ । अमीभिर्लक्षणैर्युक्तौ दन्तौ नागस्य सम्मतौ । स्निग्धौ धनप्रदौ भर्तुरायुषश्च करौ मतौ । अरिष्टौ तु सुनिष्क्रान्तौ संपूर्णौ राज्यदौ मतौ । निर्व्रणौ राज्यलाभाय सुकुटार्थौ जयप्रदौ । दृढौ रोगविनाशाय ताम्रवर्णौ फलोपमौ । अरिसंघविनाशाय कीर्त्तितौ शास्त्रपण्डितैः । दक्षिणाभ्युन्नतौ भर्तुः कीर्त्तितौ भाग्यकारकौ । शृगालकुलदच्छायौ सुशिखारोग्यकारकौ । हेमचम्पकसङ्काशौ वज्राभरणदौ स्मृतौ । कुरुतो मधुपिङ्गौ च निःसपत्नं महीतले । पयुलाभकरौ श्वेतौ घृतपीयूषसन्निभौ । केतकीकुसुमाभौ च भर्तुर्वंशविवर्द्धनौ । अध्यर्द्धारत्निकौ दन्तौ सुतभृत्यजयप्रदौ । आनाहमानसंयुक्तौ सदाश्लोतिकरौ मतौ । इदं शुभकरं राजन् ! दन्तयोर्लक्षणं मतम् । अतःपरं प्रवक्ष्यामि नेत्रयोरपि लक्षणम् । मार्जारनकुलक्रौञ्चयाखामृगनिभेक्षणान् । सर्वदोषकरान् राजन् ! गजान् दूरेण वर्जयेत् । स्निग्धे मधुनिभे दीप्ते कलविङ्कात्तिसन्निभे । रक्तपद्मदलच्छाये पद्मरागमणिप्रभे । निर्धूमाग्निशिखाकारे इन्द्रनीलसमप्रभे ; सौम्यदृष्टिसमायुक्ते लघ्वङ्गुले लोचने शुभे । स्निग्धे दृढिकरे भर्तुर्मधुपिङ्गे जयप्रदे । दीप्ते दीप्तिकरे चैव प्रतापायतने तथा । कलविङ्कात्तिरूपे च धनधान्यविवर्द्धने । चामीकरकरे नित्यं रक्तपद्मदलप्रभे । पद्मरागनिभे चैव रत्नालङ्कारकारके । निर्धूमाग्निशिखाकारे प्रतिपत्तभयङ्करे । मानयुक्ते च सौम्ये च लोचने बलवर्द्धने । अग्निकूटकटोद्देघनिम्नौ राज्यविनाशनौ । संपूर्णौ च बलोत्साहमददृढिकरौ मतौ । दन्तास्यं भवेन्नित्यं तालुकं षोडशाङ्गुलम् । षडङ्गुलं पृथुत्वेन वंशं गच्छगतं भवेत् । तथा शुभाशुभं चैव लक्षणज्ञैः प्रकीर्त्तितम् । लघरम्परिदग्धञ्च कृष्णं कलमाषमेव वा । चतुर्विधमनिष्टं स्यादृग्यायदभिधीयते । कृष्णं मसीसमं श्वेतं कलमाषं लघुलोहितम् । मांसलं घूम्रवर्णं च परिदग्धं प्रकीर्त्तितम् । लघरञ्च तिलच्छायं कथितं शास्त्रवेदिभिः । गर्भस्थस्य यदा पित्तं पीयते तालुकं भृशम् । कृष्णतालुयदा नागोजायते पापलक्षणः । व्याधिभिः पीड्यते नित्यं वातपित्तकफोद्भवैः । तृतीयां वा चतुर्थीं वा दृशं प्राप्य विनश्यति । संग्रामे वा पलायेत बद्धयत्नक्षतव्रणः । यस्य सङ्क्रातपूर्णाङ्गः कृतान्तभवनं व्रजेत् । वातपित्तकफा यस्य कुर्वन्ति तालुके गदम् । गर्भस्थस्यैव कलमाषतालुकं तस्य जायते कृष्णतालुनि ये दोषा रक्ते चैव गुणाः स्मृताः । कलमाषतालुनश्चैव भवन्ति च द्वयोरपि । रक्तच्छायं यदा वंशे पार्श्वयोश्चसितं भवेत् । तदा मध्यफलं श्रेयं गुणदोषसमात्मथात् । यदा वंशे च कृष्णं स्यात्पार्श्वयोश्चाऽसिता भवेत् । भर्तुरुद्वेगजनकं कलमाषं तालुकं तदा । किञ्चिद्धीनं तु यत्तालु परिदग्धं तदा भवेत् । नागस्याधोरणस्यापि बलक्षयकरं हि तत् । लघरं च भवेत् तालु पित्तकोपसमुद्भवम् । महामात्रविनाशाय वारणस्योपजायते । (महामात्रोहस्तिपकः) कृष्णतालोरपि यदा दक्षिणावर्त्तनं भवेत् । दृश्यते नित्यमेवं हि तदासौ दोषवर्जितः । यथा गृह्णाति नो दोषान् सुलोकः सुसमाहितः । गुणान् करोति हृदये न तथा कथितानपि । दोषघ्नं लक्षणं यत्तं यदाचार्यैरुदाहृतम् । तत्तथैवावगन्तव्यं नान्यथावादिभाषितम् । एवं जिह्वापि मन्तव्या तालुनः समलक्षणा । अरत्निमात्रा दैर्घ्येण विस्तारेऽष्टाङ्गुला मता । अशुभं लक्षणं ह्येतत्तालुकस्य मयोदितम् । शुभं च साम्प्रतं वक्ष्ये लक्षणं शृणु चानघ ! । रक्तं श्वेतं कषायं च तालुकंस्यात् शुभप्रदम् । रक्तं दृढिकरं भर्तुस्तथा चायुर्विवर्द्धनम् । दन्तिनोऽशोकपुष्पाभं रिपुक्षयकरन्तम् । श्वेतं पुष्टिकरं चापि वा रणक्षोपजायते । चम्पकाभं तथा भर्तुरारोग्यस्य विवर्द्धनम् । कषायं सर्वदा ख्यात प्रयातः सौख्यवर्द्धनम् । एवं जिह्वापि रक्ताभा सर्वसौख्यप्रदा मता । अतःपरं प्रवक्ष्यामि शुक्लरक्ताश्रितं लक्षणम् । दन्तिनो मानहीने च शुक्लक्षणी मानवर्जिते । (शुक्लक्षणी ओष्ठसन्धी) सुखरोगकरे नित्यं पण्डितैः परिकीर्त्तिते । सर्वसौख्यप्रदे तस्य संपूर्णे द्वादशाङ्गुले । अतःपरं च प्रवक्ष्यामि लक्षणं चिबुकोष्ठयोः । अरोमयश्मश्रुयुक्तमाताम्रं च तथा लघु । गजस्यौष्ठं न मंसन्ति मुनयो दन्तरोगदम् । दीर्घरोमा सुसंपूर्णं ओष्ठः पद्मदलप्रभः । षोडशाङ्गुलमानस्य हस्तार्द्धं वायतः शुभः । भर्तुरायुःकरोदीर्घो दीर्घरोमा च कीर्त्तितः । पूर्णैः पूरयते कोशं रक्तः सौभाग्यदोभवेत् । अरोमयं तथाहीनं चिबुकं न प्रशस्यते । तद्धि वारणनाथस्य सुखरोगकरन्मतम् । चतुरङ्गुलमानन्तु स्थूलं रोमाविलं यत् तत्प्रशस्तं गजेन्द्राणां सुखाबलकारकम् । निम्नं च विषमं चैव हीनं चैवाशुभं मतं । मदहानिकरं नित्यं सगदं कर्षरोगदं । यत्प्रविनादयुक्तं च समं चैव सुखप्रदं । मानं च कर्णपाल्यास्तु मूलादारभ्य गृह्यते । वाहित्थावधि कर्णं च हीनं निन्द्यं च गर्हितम् । सुखरोगकरं नित्यं

वत्सकानिकरं च तत् । पूर्णं चैवोन्नतं वार्द्धक्षत्वमालायतं भवेत् । तद्धि वारणनाथस्य सुखरोगकरं मतम् । चतुरङ्गुलमानं तु स्थूलम् रोमाविलक्षं यत् । तत् प्रशस्तं गजेन्द्राणां सुखालङ्कारकारकम् । अरत्निपरिणाहस्तु करिणां सत्वशक्तिदम् । वामनं हस्तहीनस्तु परिणाहविवर्जितम् । अव्यक्तस्तु न शंसन्ति वातकुम्भं विषत्करम् । द्वादशाङ्गुलविस्तारन्दैर्घ्येणाष्टादशाङ्गुलम् । व्यक्तं शुक्तिपुटाकारं तद्भर्तुर्जयकारकम् । गर्त्ताकारे च निर्याते कठिने चातिकुत्सिते । शिरसोरोगजनने गजस्यारोहकस्य च । संपूर्णे सुकुमारे च सुप्रशस्ते प्रकीर्त्तिते । राज्यवृद्धिकरे नित्यं भर्तुर्विजयकारके । एतमेव हि विज्ञेयं लक्षणं कटपार्श्वयोः । अतःपरं प्रवक्ष्यामि लक्षणं कुम्भयोरपि । विषमत्वमरोमत्वं देहच्छायाविवर्णता । समता कण्ठपृष्ठाभ्यां समाधिक्यमपूर्णता । व्यक्तता वामनत्वं च परिणाहविहीनता । तनुभावः शिखरयोः कुम्भदोषा दश स्मृताः । भर्तुः क्षयकरौ श्रेयौ विषमौ रोमवर्जितौ । देहच्छायाविवर्णौ तु यत्नलोकविवर्द्धनौ ; कण्ठपृष्ठसमौ चैव प्रथातुः प्रविनाशनौ । मानाधिकौ च हीनौ च भर्तुरुच्छेदकारकौ । व्याप्तौ च वामनौ चैव भर्तुः कीर्त्तिविनाशनौ । परिणाहविहीनौ च कोशक्षयकरौ मतौ । शिखरस्य तनुत्वेन युक्तौ कुम्भौ तु रोगदौ । अशुभं लक्षणं ह्येतत्प्रोक्तं शुभ दृष्टवा । समौ दीर्घकवाक्रान्तौ विस्तीर्णशिखरौ तथा । कर्णमूलात्समारभ्य हस्ताङ्गुलमितोच्छ्रयौ । सुसंहतौ च पीनौ च कामिनीकुचसन्निभौ । समाक्रान्तललाटौ च देहच्छाया समप्रभौ । आरोहकशरीरार्द्धदर्शनावरणक्षमौ । सश्रीकौ च सुहृत्तौ च शुभौ कुम्भौ प्रकीर्त्तितौ । समौ च दीर्घरोमाढ्यौ भर्तुः श्रीसौख्यकारकौ । समानौ रिपुनाशाय तथैव च ससुव्रतौ । सुसंहतौ च पीनौ च वरस्त्रीलाभकारकौ । यत्ननाशकरौ श्रेयौ कामिनीकुचसन्निभौ । समाक्रान्तललाटौ च सुखदौ रोगनाशनौ । आरोहिण्यगितार्द्धौ च सश्रीकौ च जयप्रदौ । हस्तौ च हस्तिनां कुम्भौ पुष्पालङ्कारकारकौ । अतःपरं प्रवक्ष्यामि कर्णयोरपि लक्षणम् । निर्लोमयौ क्षतसाकीर्णौ तनुच्छिद्रौ तनुत्वचौ । (क्षता सिरा) सङ्कटौ विषमौ कर्णौ तनुटिताग्रौ च निष्ठुरौ । लम्बौ च वर्तुलौ चैव कर्णौ नागस्य निन्दितौ । फलस्य साम्प्रतं वक्ष्ये यथावदनुपूर्वशः । निर्लोमयौ क्षतसाकीर्णौ गजस्य कर्णरोगदौ । निष्ठुरौ तनुटिताग्रौ च यातुःकोशकरौ मतौ । लम्बौ च वर्तुलौ चैव गजस्यायुर्विनाशनौ । अतःपरं प्रवक्ष्यामि शुभकर्णविनिश्चयम् । द्विरत्निमानसंयुक्तौ सिराजालविवर्जितौ । समत्वचौ महाच्छिद्रौ स्निग्धौ दुन्दुभिस्वनौ । कपोलमण्डलाक्रान्तौ सुकुमारौ । कर्णौ चामरसंकाशौ क्षुद्ररोमलतार्चनौ । अजर्जरक्षुद्रप्रान्तावीषदुन्नामचूलिकौ । मयूरताल्वाभौ सुविस्तीर्णसमौ शुभौ । द्विरत्निमानसंयुक्तौ भर्तुरायुःकरौ मतौ । क्षतजालविनिर्मुक्तौ शिरोरोगविनाशकौ । समत्वचौ महाच्छिद्रौ गजलाभकरौ मतौ । स्निग्धौ कान्तिकरौ नित्यं जयदौ दुन्दुभिस्वनौ । यत्ननाशकरौ प्रोक्तौ क्षुद्ररोमीलतार्चनौ । अजर्जरक्षुद्रप्रान्तौ प्रयातुः सौख्यकारकौ । गजस्योपचयायैव दैर्घ्यक्षुन्नामचूलिकौ । मयूरताल्वाभौ तुरङ्गबलवर्द्धनौ । सुविस्तीर्णौ समौ भर्तुर्भूमिलाभकरौ मतौ । कर्णयोस्तु समाख्यातं मयैतत्शुभलक्षणम् । कण्ठस्य साम्प्रतं वक्ष्ये यथावदनुपूर्वशः । अवक्रोन्नतो दीर्घश्च कण्ठश्च शुभदोभवेत् । आरोहकप्रभूणाञ्च क्रमशः कुञ्जरस्य च । अवक्रः परिणाहेन सप्तदशाधिकं शतम् । अङ्गुलानां तथायामे द्वादशैवाङ्गुलानि तु । सम्पूर्णपिण्डितोदग्रवान्तर्मणिविभूषितः । कण्ठोवारणनाथस्य एवं भूतः सुपूजितः । ऋजुः प्रमोदजननः सम्पूर्णःकार्यसिद्धिदः । अक्षतश्चोजयत्कर्तुः कीर्त्तितः पूर्णपिण्डकः । उदग्रोवंशवृद्धिं च प्रतापं कुरुते तथा । अन्तर्मांसिसमायुक्तोमणिरत्नप्रदो भवेत् । कराक्षतिनिभं च आसनं न प्रशस्यते । कराभं यातुरशुभं निम्नं च व्रणकारकम् । दैर्घ्येण हस्तमात्रं तु विस्तीर्णस्य शुभं स्मृतम् । विस्तीर्णं विपुलं राज्यं सम्पूर्णं कुरुते जयम् । वंशस्याथ प्रवक्ष्यामि लक्षणं तु शुभाशुभम् । अत्युच्छ्रितोनिम्नपारः क्षुद्रो वंशोनशस्यते । राज्ञां च पादरोगाणां कर्त्ता च स भवेत्प्रदा । वक्षस्थलकुक्षायासभासनात्पृथिमासनम् । यावत् प्रपूर्यते पार्श्वं वंशोऽश्वफलकालतिः । शुभो श्रेयो गजेन्द्राणामायामः कुरुते सुखम् । पूर्णपार्श्वस्तु लाभाय धनुःपृष्ठः श्रियं नयेत् । अरत्निहयमानं तु मेचकात्पृथिमासनम् । धनास्थि विषमं निम्नकुत्सितं दुःखरोगदम् । मांसोपचयपूर्णं च विस्तीर्णस्तु शुभं मतम् । जघनोपरि रोगाणां तद्धि नाशकरं मतम् ।(मेचकात्पुच्छमूलात्)। पुच्छोगजस्य नो यस्तो वक्रदीर्घोऽतिलम्बितः । करोति मरुतीं पीडां राजबाधोरुवस्य च । ह्रस्वकुलस्तु पृष्ठत्वेन दैर्घ्येणाष्टादशाङ्गुलः । संपूर्णः मेचकोश्रेयो गजभर्तुः सुखप्रदः ।

वक्त्रं स्थूलञ्च रूक्षं च मुष्कं कवचविवर्जितम् । समानाङ्गं च नागस्य सर्व्वदोषकरं भवेत् । अवक्त्रं ऋजुदीर्घञ्च पञ्चिहीनः सुपेचकः । गोपुच्छवालप्रतिमकवचजातविभूषितः । भूमिं तु न स्पृशेत् यस्तु चतुर्भिश्चाङ्गुलैः सदा । स शुभो बालधिर्ज्ञेयो गजभर्तृसुखप्रदः । अतिप्रमाणं रूक्षं च कर्बुरं विगतप्रभम् । सिरालं चाशुभं मेढ्रं राजहस्तिपदुःखदम् । यस्य अङ्गुलायामं नाहतः षोड्याङ्गुलम् । सिराजालविनिर्मुक्तमाढ्यपल्लवसप्रभम् । हृद्याङ्गुलं स्रोतसा युक्तं बिन्दुमात्रविवर्जितम् । मेढ्रं प्रशस्तं विज्ञेयं भर्तुर्जीवितवर्द्धनम् । अतःपरं प्रवक्ष्यामि लक्षणं गात्रयोरपि । हीने तनूच दीर्घे च समसंस्थोच्छ्रये तथा । विषमे च कवाक्रान्ते गात्रे नागस्य निन्दिते । हीने तनूच करुतः प्रयातुर्विनिपातनम् । समसंस्थोच्छ्रये यातुर्विषमे च विपत्करे । कवाविले गजार्थैव गात्ररोगकरे तथा । अतःपरं प्रवक्ष्यामि मात्रयोः शुभलक्षणम् । सार्द्धद्विरत्निस्त्रिरत्निः प्रताङ्गुलसमानता । एवंविते स्फुटे गात्रे भर्तुरारोग्यसौख्यदे । समे च कवहीने च गजलाभकरे तथा । गजस्य पुष्टिदे नित्यं मांसले चघने स्फुटे । गात्रे वारणनाथस्य एवंभूते शुभे सते । चिपिटे वा सफलके गात्ररोगकरे सदा । संपूर्णे राज्यदे भर्तुर्गजस्य वसुसुप्रदे । तथैव रोमनिचिते गजस्य गलोरुदे । अतःपरं प्रवक्ष्यामि नखानाञ्च शुभाशुभम् । हीनाःक्षणाश्च खरुक्षाश्च कृष्णाश्च न नखाः शुभाः । सदा च रोगदा हीनाःक्षणा भर्तृविनाशनाः । खण्डाङ्गुलागजस्यैव पादव्याधिविवर्द्धनाः । स्निग्धाश्चन्द्रार्द्धसङ्काशा मानेनैव पुरोनखाः । सम्पादिपञ्च संख्यानि अङ्गुलानि क्रमेण हि । एवं विधा नखाः यस्य भर्तुरारोग्यकारकाः । अतःपरं प्रवक्ष्यामि पादयोरपि लक्षणम् । हीनौ सुतलौ रूक्षौ चरणौ दन्तिदुःखदौ । रूक्षप्रभाषौ दैर्घ्येच कूर्माकारौ सुखप्रदौ । अतःपरं प्रवक्ष्यामि लक्षणञ्चापरान्वितम् । अलुञ्छिते च हीने च निन्दिते चापरे तनू । सम्पूर्णे च शुभे क्षेत्रे लम्बत्वायामसंयुते । निन्दिते रोगदे क्षेत्रे पूजिते प्रभुसौख्यदे । हृदयाङ्गुलं हीनं तु आसनात्यधिकासनम् । अपरपादवोचापि आयामोऽरत्निमात्रकः । नखानां च तथा मानं षड्यादिचतुरङ्गुलम् । प्रधानावयवानान्तु लक्षणं कथितं तथा । उत्सेधायामनाहानां साम्यं कथयाम्यहम् । समतन्त्रसमायुक्ततनुना वर्त्तितेन च । सम्प्रयत्नं दिने नित्यं मानं कुर्यात् मानवित् । सम्प्रारब्धं गजेन्द्राणां प्रमाणं वनजन्मनाम् । आसनं यावदुत्सेधलक्षसंख्यासु कीर्त्तितः । प्रेक्षालक्षप्रतिमानन्तु आयामोरत्नयो नव । मध्यदेशे तदानाहो दशरत्निः प्रकीर्त्तितः । मानमेतद्धि भद्रस्य सुनिभिःपरिकीर्त्तितम् । सप्तमेन तु भागेन हीनं मन्द्रस्य जायते । मन्द्राहीनं मृगाख्यस्य षड्भागेन प्रकीर्त्तितम् । एवं क्रमेण वक्तव्यं मानं मानविशारदैः । किञ्चिन्मानाधिके वापि न दोषः संप्रपद्यते । दोषाणां च गुणानाञ्च इच्छयैव फलप्रदा । सत्वं हि वारणेन्द्राणां नित्यं तत्रैव संस्थितम् । स्निग्धे मधुनिभे दीप्ते कलविङ्कात्तिसन्निभे । रक्तपद्मदलच्छाये पद्मरागसमिप्रभे । नीलच्छाये अतीक्ष्णे च गजे सत्वं प्रतिष्ठितम् । मार्जारवानरादीनां सदृशे नीचले गजे । हीनसत्वास्तु जायन्ते गिरिकूटोपमा अपि । अधिकं पुष्करं यस्य मांसलत्वेन जायते । प्रभयाच कषायं स्यान्मानेनाङ्गुलपञ्चमम् । किञ्चिदूने च विज्ञेये स्रोतसी चतुरङ्गुले । स्थूलपञ्चाङ्गुलायामा लम्बुका नाह मानता । हस्तोऽपि पूर्वमानस्य स्थूलत्वेनाधिकोभवेत् । रोमशोनातिहस्वश्च पृथुवः षड्भिरङ्गुलैः । आयामेन च हीनःस्यात् पूर्वमानात् षडङ्गुलैः । नातिगोपुच्छसंस्थानःक्षणबिन्दुविभूषितः । आनाहे रत्निमानो तु सार्द्धहस्तहयायतौ । गोपुच्छसदृशच्छायौ किञ्चिन्मध्यकपिञ्जलौ । स्निग्धौ मृदुतमावेव दन्तौ नागस्य कीर्तितौ । दन्तावेष्टावतिस्थूलौ कवाक्रान्तौ सुनिष्ठुरौ । पञ्चाङ्गुलौ कटौ श्रेयौ मांसोपचयपूरितौ । श्रेये कटोपरि तथा स्रोतसी द्व्यङ्गुलान्तरे । एकाशीत्यङ्गुलानाहे द्वाविंशत्यङ्गुलायते । किञ्चिन्नतं कवाक्रान्तं वाहित्थं परिकीर्त्तितम् । प्रतिमानं तु विज्ञेयं हस्तः सचतुरङ्गुलः । अध्यर्द्धरत्निमानं च प्रमाणान्तरभेदतः । आयामस्तु विज्ञेयश्चधरस्तु दशाङ्गुलः । विंशत्यङ्गुलानस्तु परिणाहोऽभिधीयते । पञ्चाङ्गुलं तु चिबुकं क्षत्रिणी तु नवाङ्गुले । षड्विंशद्दङ्गुलायामे सङ्गते परिकीर्त्तिते । अध्यर्द्धरत्निकौ कर्णौ विस्तारेण कवाचितौ । कषायपल्लवौ स्थूलौ लम्बबिन्दुविचित्रितौ । सप्तङ्गुलकरायामावश्चधरौ कवाचितौ । पञ्चाङ्गुलान्तरौ पीनावुभावोष्ठौ दशाङ्गुलौ । कर्णात् कर्णान्तरं यावत् चक्षुषश्चक्षुरं शिरः । वातकुम्भं तथा श्रेयं स्थूलं सप्तदशाङ्गुलम् । अङ्गुलानां शतं साग्रमानाद्धि हृद्यङ्गुलाधिकम् । आयतत्वं चक्षुषश्च दशाङ्गुलमिति स्मृतम् । भद्रस्यैवासनं श्रेयं तदर्द्धन सम्प्रकल्पितम् । षडङ्गुलोच्छ्रितं स्थूलं तुल्यं चाङ्गूलनखतः । हस्तमूलाद्धि विस्तीर्णन्तु जायते पविमासनम् । चक्रवेध

ह. हीनं स्यादासनं षड्भिरङ्गुलैः । पेचकस्याङ्गुला-
वानोत्तमत्वे नाङ्गुलत्रयम् । विंशत्यङ्गुलमाने भवेत् पु-
च्छोत्थमागमम् । प्राग्वत्पादक्रमेणैव तथायामेऽङ्गुलत्रयम् ।
दैर्घ्येण तु स विज्ञेयो भूमेरष्टाङ्गुलोच्छ्रितः । इदं बाल-
धिमानं तु मन्दस्य परिकीर्त्तितम् । सार्द्धद्व्यरत्निके मूले
अपरे सप्रकीर्त्तिते । उदरे चातिमात्रं स्यान्मेढ्रं हस्तद्वया-
यतम् । विंशत्यङ्गुलमाने तु लक्षणज्ञाय सदा भवेत् । पञ्च
चत्वारि च त्रीणि अङ्गुलानि नखाः क्रमात् । आपादाङ्गुवि-
वराः कुन्दाभासास्थापरपादयोः । अनेनैव तु मानेन गात्र-
पादसमाश्रयाः । नखा मन्दस्य विज्ञेयाश्चरणास्य कथा-
विदाः । अतिस्थूलः पृथुत्वेन सार्द्धहस्ताधिकः करः । अरत्-
निकं वा, दैर्घ्येण प्रमाणं गात्रयोरपि । उरोमणि
स्तथा श्रेयोरत्निमात्रोऽतिमांसलः । विंशत्यङ्गुलमानस्तु
अन्तर्गलमणिर्भवेत् । अनेनैव हि मानेन वातकुम्भाः
प्रकीर्त्तितः । एते प्रशस्ता मन्दस्य मूनाथ ! कथिताश्चाव ।
नीक्षा ये तेऽपि भद्रस्य विज्ञेयाः समलक्षणाः । मृगस्य
साम्प्रतं वक्ष्ये प्रदेयान् लक्षणान्वितान् । त्र्यङ्गुलं पुष्करं
तस्य त्र्यङ्गुले श्रोतसी तथा । अङ्गुलानि च चत्वारि
कीर्त्तितास्य चाङ्गुलाः । तनुः करः त्र्यरत्निः स्याद्-
दण्डाग्रे सार्द्धरत्निकः । बाहित्यात् पुष्करं याव
न्मानं सद्भिरुदाहृतम् । तथा तनुतरौ दन्तौ दीर्घौ
सार्द्धद्व्यरत्निकौ । हस्तौ च मस्तकौ स्यातान्नयोः सप्त-
दशाङ्गुलौ । प्रतिमानं तथा ज्ञेयं निम्नं पञ्चदशा-
ङ्गुलम् । द्व्यङ्गुलं चिबुकं तस्मादधरस्तु षडङ्गुलः ।
अष्टादशाङ्गुलायामे ह्यकर्णौ तु षडङ्गुले । स्यातां
अङ्गुलविंशत्यौ कपोलौ निम्नमध्यगौ । कटौ द्व्यङ्गुलमानौ
तु नियोज्यौ चतुरङ्गुले । नेत्रे चापि तथा स्यातान्निष्प्रभे स्थू-
लतारके । नातिव्यक्तं समांसं स्याद्दातकुम्भं दशाङ्गुलम् ।
गर्त्ताकारस्तु निम्नं च कटकुम्भं तथैव तु । अष्टाङ्गुलान्तरं
कुम्भ आयामे षोड्शाङ्गुलः । विंशत्यङ्गुलकौ कर्णौ लम्बौ हस्तौ
च वर्त्तुलौ । वक्षस्यङ्गुलानाह्य आयामे षोड्शाङ्गुला ।
ग्रीवा मृगस्य विज्ञेया कराललासनं भवेत् । सार्द्धद्व्यरत्नि-
कायामः कृशतङ्गोऽतिमात्रया । वंशोमृगस्य विज्ञेयो निम्न-
तल्पनिभप्रभः । स्थूलास्थि विषमं निम्नं पुच्छमध्यर्द्धरत्नि-
कम् । आसनेन समं चैव मृगस्य पक्षिणासनम् । पञ्चाङ्गु-
लस्तु विज्ञेयः पेचकोदरसंस्थितः । कक्षाप्यक्षिसमाकीर्णैः
स्थूलोत्तुङ्गश्च बालधिः । अपरापादपार्ष्णिभ्यां हस्त-
मात्रसमुच्छ्रयः । दीर्घतनुरुरुहच्छ्रोद्विघप्रत्यङ्गायतः ।

ततूप्रमाणे तथा गात्रे चिपिटे चापि निम्नभे । चरणास्य गत-
च्छायैस्तस्निद्वाङ्गुलैर्नखैः । संयुक्ताः स्फुटिता निम्ना माने
नाष्टादशाङ्गुलाः । एतदुद्देशमात्रेण कथितं मृगलक्षणम् ।
अतःपरं प्रवक्ष्यामि तेषां बलपरीक्षणम् । गजान बलहीनेन
सुरूपेणापि शोभनाः गुणेषूपि बलं श्रेष्ठं तत् परीक्षीत
पण्डितः । शरीरान्तर्गतः प्राणो बलगन्धेन वीक्ष्यते । क्रियते
वारणस्याथ तस्योपायैः परीक्षणम् । जाम्बूनदस्य ताम्रस्य
प्रवालानां रजतस्य वा । अष्टादशसहस्राणि युक्ता सं-
ख्यस्य वेगवान् । दशयोजनमध्वानं गच्छति श्रमवर्जितः ।
यो गजो गजमध्ये तु स उत्तमबलः स्मृतः । यश्चतुर्दश-
साहस्रभारमादाय गच्छति । सप्तयोजनमध्वानं स मध्य-
बलोमतः । दशसाहस्रिकं भारं वहीत्या पञ्चयोजनम् ।
अध्वानं योहि संयाति स हीनबल उच्यते । सन्निभा-
गहिरस्तेन परिणाहेन संयुतम् । चतुर्हस्तनिखातं तु
योभिनत्त्युत्तमोहि सः । अथ वोत्पाटयेद्यापि बलेन
महता युतः । सार्द्धत्रिहस्तखातन्तु सप्तहस्तोच्छ्रितं
तथा । पञ्चायदङ्गुलीकेन परिणाहेन संयुतम् । भिनत्ति
योगजः शीघ्रं निपत्यभूत्य वा पुनः । स गजानान्तु
सर्वेषां मध्ये मध्यबलो मतः । हस्तत्रयनिखातन्तु
षड्हस्तोच्छ्रयमेव वा । युक्तं स्थूलतया चैव पूर्वस-
ख्यार्द्धमात्रया । भिनत्ति हेलया यस्तु उत्खातं वा क-
रोति वा । खलं कुञ्जरमध्ये तु स हीनबल उच्यते । गु-
रुत्वं च यतः श्रेष्ठं गुरुत्वादधिकं बलम् । बलादभ्यधिकं
सत्वं तस्मात्सत्वं निरूपयेत् । गुरुस्फटितसङ्घाश्च सत्वं स्फुटि
शरीरिणाम् । दुर्लक्ष्यं विद्यते सम्यगुपायैस्तद्धि लक्षयेत् ।
सुप्रशस्ते दिने लग्ने गजोगैरिकमण्डितः । कर्णे
चामरगङ्गादिसुखाभरणभूषितः । पादान्दोलनसंजात-
घण्टारवनिभस्वनः । आरोहकराश्चालकृतोत्साहोत्सवा
ननः । अत्यन्तं ढोकयेच्छ्रीघ्रं पार्श्वकोलाहलाकुलः ।
वेगोत्थानकृतास्फोटदन्तसंघट्टमर्दनैः । कृतां कामपि न
हस्तस्य वेदनां यो न मन्यते । यो हि मर्दैः कृतास्फालैः स्वकटं
भर्त्तुमिच्छति । नामसर्पति भीत्यानोप्रतियातं रणात् क्वचित् ।
कण्ठगर्जितनादेन परिपूरितदिङ्मुखः । निवर्त्यते च
दुःखेन स भवेत् सत्ववान् गजः । प्रत्यूषसमूहं या
गजमालातिभीषणम् । रागोत्थानशतङ्गतमञ्जारकल-
काकुलम् । उत्थाय समरे गच्छेद्योपरक्षितलोचनः ।
दन्तदारणरागेण प्रतिनागकृतेक्षणः । प्रसारितैरतिस्तब्धै-
र्निःशङ्कं कर्णपङ्कवैः । यो गच्छत्यतिवेगेन स भवेत् सत्ववान्-

गजः । शार्दूलादितिसत्त्वानां त्रासवर्जितमानसः। कृतकं च तथा नागं योभिनन्द्युत्तमो हि सः । दावानलग्रिखिश्रेणीयद्भसंत्रासवर्जितः । वनेषु विचरत्येष स सत्त्वसहितो गजः । कृतयद्भावशाद्यस्तु न वारोहिणमीयते । सङ्कुचन् मस्तकं दीनोमन्दान्मन्दतरो भवेत् । आलोकयति पार्श्वानि चीत्कारकरणप्रियः । आलोकयति सोद्वेगां लोचनाभ्यामतिदिग्धम् । पदात्यश्वसमूहं वा स्खलन्तमिव मन्यते । अधमस्तु सुविज्ञेयो गजः सः श्रमवर्जितः। यस्तु संघटते मन्दं घटितस्त्रापसर्पति । तथापसर्प्य वेगेन दन्ताघातं प्रयोजयेत् । किञ्चित्तिर्यग्मुखीभूत्वा कृतचीत्कारनिस्वनः । कुरुते दन्तसंघातम् स विज्ञेयोऽधमोगजः" ।

प्रथमादिपञ्चमुद्दशासु मदविकारभेदमुक्त्वाह तत्रैव ।

"तटतरुभवनोन्मूलनरतस्तु षष्ठाङ्गजो भवति । करवदनात्रिकटस्थल गलन्मदसलिलसिक्तभूमितलः । संग्रामे रिपुभरकरविमुक्तशरनिकरगलक्षतदेहः । करवीरपुष्पलोहितनयनः स चारुदारुणाकारः । प्रतिनागसंघदारणप्रकृतिरंगलस्त सप्तम्याम् । न शृणोति नैव पश्यति च न भयं जानाति सर्वसत्त्वकृतम् । यस्य घनास्खलितं सुस्खरितं चानने पतति कारयन् । न सहन्ते तस्य गन्धं सङ्कोचितनासाकुञ्जकरकटाः करिणः । महितनिजबला विमुक्तनादाः प्रणश्यन्ति । न तथा शङ्खाभरणैर्न चामरैर्नालिमालाभिः । भवति यथा मदसारैर्मुखस्य शोभा गजेन्द्राणाम् । क्रमविरहिता भवति हि षष्ठी या पञ्चमी चतुर्थी वा । दीनावस्था करिणां सत्त्ववतां मदविशेषेण । अतिदृढमदविकारे स्खलन्ति शिशुमदेऽपि मातङ्गाः । सप्तातिरेकयुक्तावलस्य शोभां परां प्राप्ताः" । स्थूलभेदे न मदोद्गमफलं तत्रैवाह । "कुरुते नरपतिदृष्टिं दक्षिणगण्डस्थलोद्गतन्द्रानम् । रोमोद्गतं च यातुर्विशेषसुखदं सदा भवति । उभयकटस्थलसमनिर्गतं च विषयस्य दृद्धिकरम् । शिशिरसुगन्धिपरिमलं सुखप्रदं जायते भर्तुः । माङ्गल्यं श्रीजननं सौभाग्यकरं सत्त्वजननं च । मात्यन्ति यत्र देशे दशाविपाकेन बलकृतानन्दाः । करिणस्तस्मिन् राजा वर्द्धतयशः सुखं वसति । कृतकबलकेलापरिमलस्य सुखदोमदो भवति । मूलपुरीषस्खेदास्रकफरसोमादितोऽगन्धवरः । अशुभकरोऽसौ नरपतियातव्याज्ञायते मदः । जायन्ते ये भावा राजन् ! मदखण्डमण्डितसुखस्य । नागस्य मदविशेषात्तांस्तान् प्रवक्ष्यामि । चालयति दुर्गन्धनिवाताय पुष्करं क्षिपति प्रेरयति । लेढिजिह्वाग्रेण च स्फुटी विघटितोष्ठपुटः । संपीड्य पुष्करायेण चाक्षुषि निःश्वसन्नधोवदनः । तिर्यक्प्रेक्षी भवति मीलिताक्षः क्षणं स्थित्वा । तिर्यक् चालितवदनश्चकुल्या पुष्करप्रकम्पेन । किञ्चित्सुप्तसुप्ताक्षः कर्णस्खञ्चयनं करुते । किञ्चिच्च दर्शयित्वा मेढ्रं नाशयति कोपकलमूलम् । क्षुब्धः क्रीडति परिवर्त्ताननो बन्धनस्तम्भं कृतमत्सरः । प्रधावति संवेष्ट्य करं विषाणमुद्यम्य गर्जति सलिलपूरितजलधरगम्भीरनादेन । उद्गमितायष्टिशुण्डः स्वच्छन्दङ्कृष्टिकापि । गुरुमल्लिकस्य भवति वनतरुगुल्मोन्मूलनातुरतः। वागङ्कुशसुखजातं बाधनं न सहते क्षमिसत्त्वोयः। तिर्यग्विकलत्वात्स तथा सगजो गुरुमल्लिकोज्ञेयः । रमते च पांशुविकरणकर्दमावगाहाद्यैः । एवंविधस्वभावो मदभेदवशाद्गजो भवति । यो यस्मिन्नेव मतौ मदमाप्नोति मदप्रभेदजः सुखदम् । स च तस्मिन्नेव पुनः प्रभिद्यते दानयुक्तस्य । इति मदद्विविशेषाः कथिताश्चैव भूतेश ! तत्त्वेन । परिवर्त्तते मदोयैर्हेतुभिरशुभैस्तु तान्वक्ष्ये । प्रतिवारणाभियानाद्गुराध्वगमनात्कुभोजनाच्चापि । बन्धनदोषाच्च तथा तृष्णाक्षुत्पीड़नाच्चापि । शार्दूलादित्रासाद्दावानलोल्कायनिःप्रपतनाच्च । (अयनिरत्र विद्युत्)। नश्यति मदोगजानां शीघ्रं वर्त्मविप्रतश्च तथा । मातापितृजदोषैर्मन्दमदानन्दवर्जिताश्च तथा । जायन्ते हिरदा यैर्यथा तथा साम्प्रतं वक्ष्यामि । मन्दमदेन हि करिणा जातः किञ्चिन्मदोगजो भवति। मदविरहितेन तथा जनितोमदविवर्जितोऽप्येव । समदेन तु योजातोगजो गजेन्द्रेण भवति तस्य मदः । एवं मदप्रकारा मातङ्गानां समुद्दिष्टाः । शृणु साम्प्रतं नरेश्वर ! मदापसरणोद्भवानि चिह्नानि । यानि भवन्ति गजानां मन्दमृदुमदविगलितसमुदयानाम् । कृतच्छायायुक्तोनिम्नोचितगण्डस्थलगतश्रीः। कुर्यति येभ्यः शङ्काङ्कुरोति तेभ्योऽपि सत्त्वस्थः। गण्डस्थलेन जिघ्रति करेणुकां स्पृशति नैव हस्तेन । मूत्रपुरीषाणि च नो जिघ्रति वारणकृतानि यातुर्वा गर्वेणगच्छति। सततं परिमृष्टदानराजिपरीकीर्णकटोहस्तेनातीव सङ्कुचर्यं कुरुते । सङ्कुरभिनन्दति निद्रामलसो मनसा न तुष्टिमुपयाति । लिङ्गान्येतानि करिणो मदेन सूच्यमानस्य जायन्ते । प्रतिकूलरयुद्धतो बलहर्षदयावयोभ्यस्तशुभः । भवति मदोनागानां तापादिसमुद्भवस्य शुभः"। "रूपवानुदसमश्लोविन्ध्यशैलसमप्रभः। जायते सत्त्वहीनस्तु कुञ्जरः केन हेतुना। केन वा रूपहीनोऽपि मदोद्भूयविवर्जितः। सत्त्ववान्

जायते नागो एतदाख्यातमर्हसि" इति नकुलपुटो हृष्टरूपति स्वाच । "यथा जातकयोगेन जन्तूनां च शुभाशुभम् । तथा बन्धनकालोत्थलक्षणानामपि जायते । सुसंस्थानावस्थितैः सौम्यदृष्टैः पीडाविवर्जितैः । बन्धनं यस्य जायेत स भवेत् सत्ववान् गजः । स्त्रीनक्षत्रेषु दृष्टाने ये गजाः क्रूरदृष्टिभिः । ये चालोकितनक्षत्रास्ते भवन्ति भयाकुलाः" । उक्तश्च यत्नेन "मृगजातयोऽपि हि शूरा भवन्ति मधुपिङ्गललोचनाः स्निग्धाः । दृषसिंहमीनदृश्चिकलग्नेषु स्त्रीकृताः करिणः" । पुनर्नकुलप्रश्ने गुरोः प्रत्युक्तिश्चैव । "राजन् पञ्चविधं चैव गजानां विदितं मतम् । अत्यर्थं प्रथमं ज्ञेयं प्रत्यर्थं च तथापरम् । अत्यर्थं चैव गम्भीरसत्तानं पञ्चमं भवेत् । प्रतोदाङ्कुशदण्डाद्यैर्विद्यादुद्वेजितानि यः । तोत्रप्रहृष्टचित्तस्तृष्टः स ह्यादत्यर्थवेदितः । स्तोकं बहु बहु स्तोकं ह्यतं मन्यते योगजः । वागङ्कुशादिभिर्नित्यं सहि प्रत्यर्थवेदितः । जानात्यङ्कुशतोदाद्यैर्यद्यथा तत्तथैव हि । ह्यतङ्कायभयैर्युक्तोऽत्यर्थत्रस्तः स गजोभवेत् । अङ्कुशादिव्रणान् राजन्! यश्चिरेणावगच्छति । तोत्रानपि स गम्भीरवेदी भवति वारणः । रोमणामयं दृष्ट्वानापि स्पृष्टवेत्ति तु यो गजः । उत्तानवेदिनं तन्तु गजं विद्धि महाभुज ! सर्वाणि वेदितव्यानि भद्रादीनां भवन्ति वै । प्रकृतिस्थस्य सततं भद्रस्यान्यर्थवेदिता । गम्भीरवेदिता चापि मन्दस्यैव प्रकीर्तिता । उत्तानवेदिता नित्यं मृगस्यैव भवेन्नृप ! । वेदित्वं गजजातीनां तिसृणामपि जायते । साम्प्रतञ्च यथाशास्त्रं कथ्यते वेगलक्षणम् । तिसृणामपि जातीना सत्तमाधममध्यमम् । न चाल्पं न च दृढं द्विपञ्चपदसंस्थितम् । गजोत्थानसकोत्थानं नरं प्राप्नोति येन तु । रयाविष्टेन मनसा स वेगउत्तमोमतः । (द्विपञ्चपदसंस्थितं दृषपदस्थितं गजोत्थानसकोत्थानं गजधावनसमसयधाविनम्) येन वेगेन गृह्णाति नरं सप्तपदान्तरम् । पदानां शतमात्रन्तु स मध्यमजवो भवेत् । येन पञ्चपदस्थं हि नरं गृह्णाति नोदितः । पदाशान्तु शतं सार्द्धं स हीनोजव उच्यते । शतद्वयं वा धनुषां गच्छेद्दृश्यमितानन: । हात्रिंशता च मात्राभिः स उत्तमजवो भवेत् । पञ्चाशता च मात्राभिः याताद्यस्तु शतद्वयम् । स मध्यमोऽधमोज्ञेयो मात्राणाञ्च शतद्वयात् । एवं परीक्ष्यते राजन् । वेगो वीथिषु दन्तिनाम् । अतःपरं प्रवक्ष्यामि गजस्य गुणलक्षणम्" ।

तत्र कल्याणशीलः "भारार्हितोवा दृषितः क्षीणः श्रान्तोबुभुक्षितः । रात्रौ वा दिवसे वापि निर्विकारस्तु यो भवेत् । कल्याणशीलः स ज्ञेयो समस्तगजलक्षणैः. विकारं कुरुते यस्तु पीड्यमानःक्षुधादिभिः । तमकल्याणिनं राजन् गजन्दुष्टं प्रकल्पयेत् । कोपोऽपि द्विविधोज्ञेयः शिशुश्चैवाशिशुस्तथा । द्विविधस्यापि राजेन्द्र! यथावच्छृणु लक्षणम् । उद्वेजितोऽपि कालेन कोपं बध्नाति निर्भरम् । क्षिप्रं गृह्णाति च क्रोधं दुर्निवारं सुदुःसहम् । शिशुक्रोधः स विज्ञेयो गजलक्षणकोविदैः । वार्द्धमाणोऽपि यत्नेन न शमं याति मुञ्चति । स ज्ञेयस्त्वशिशुक्रोधो राजन् ! स हि रयाप्रियः । साम्प्रतं चैव वक्ष्येऽहमायुर्लक्षणमुत्तमम् । आभ्यन्तरं च बाह्यञ्च लक्षणं द्विविधं स्मृतम् । आभ्यन्तरं योगसाध्यं बाह्यं किञ्चिच्च लक्ष्यते । तेनान्तरं परित्यज्य बाह्यं लक्षणमुत्तमम् । क्षेत्रसत्वसमायोगा । भवन्ति हादशैव हि । एकं हस्तगतं क्षेत्रं हितीयं वदनाश्रितम् । तृतीयञ्च विषाणस्थमुत्तुर्थं शिरसिस्थितम् । पञ्चमं नयनस्थं च षष्ठं कर्णाश्रितं भवेत् । कण्ठस्थं सप्तमञ्चैव अष्टमङ्कालसंस्थितम् । नवमं चरणे ज्ञेयं शेषाङ्गस्थंहिपञ्चमम् । एकादशञ्च कान्तिस्थं हादशं सत्वसंस्थितम् । एवं हादश क्षेत्राणि मातङ्गानां भवन्ति हि । हादशैव हात्रेयाः शेषाङ्गेष्वभिलक्षिताः । विंशोत्तरं वर्षशतमङ्गस्यायुः प्रकीर्तितम् । अष्टान्यशीतिर्मन्दस्य चत्वारिंशत् मृगस्य च । मिश्रस्य चायुषः संख्या जातिभावेन जायते । प्रदेशज्ञानतत्त्वज्ञोजातिं सम्पलक्षयेत् । सर्वक्षेत्रैः सुसंपूर्णः संपूर्णायुर्गजो भवेत् । हीनैश्च हीयते चायुर्यथावदभिधीयते । दशावद्दानां त्वयं कुर्याद्विलक्षलक्षणवर्जितः । विंशत्यवद्विनाशश्च हीने क्षेत्रहये भवेत् । क्षेत्रत्रयावहीने च त्रिंशदवद्परिक्षयः । चत्वारिंशत्समाहानिर्हीने क्षेत्रचतुष्टये । (समासंवत्सरः) । पञ्चाशदवद्दाहीयन्ते हीने तु क्षेत्रपञ्चके । षट्क्षेत्रहीनतायान्तु षष्टिवर्षविनाशनम् । सप्तत्यवद्विनाशाय सप्तक्षेत्रविहीनता ॥ अशीतिरष्टभिर्हीने वर्षाणाञ्च विनश्यति । नवतिर्नवभिर्हीने क्षेत्रैर्नाशं हि प्रयान्ति । दशभिश्च तथा हीनैर्नश्यत्यवद्दयतं ध्रुवम् । दशोत्तरं शावद्दयतं हीना छाया विनाशयेत् । विंशोत्तरं शावद्दयतं हीने सत्वे विनश्यति । एवं दशावद्दनाशं च क्षेत्रं कुर्यादलक्षणम् । एवमायुःक्षयं विद्यात् गजस्य गजकोविदः । सामान्यलक्षणं ह्येतत् जीवितस्य परीक्षणे । विशेषलक्षणं यावद् अष्टलक्षणजातितः । एवमेहेमभालेन गजायुर्लक्षणं तव । कथितं साम्प्रतं राजन् ! दोषन्तु वक्ष्यामि लक्षणम् । पादानां लक्षणं सम्यक् दन्तदोषं प्रचा-

-येत् । दन्तयोर्लक्षणं कृत्स्नं दोषान् बाह्यित्वसंश्रितान् । बाह्यित्वलक्षणैः सम्यक् नेत्रदोषलयो भवेत् । नेत्रयोर्लक्षणं कृत्स्नं दोषांस्त्वालुसमाश्रितान् । कृकदोषविनाशस्य क्रियते तालुलक्षणैः । कृकाणां लक्षणं कुर्यात् सगदंदोषनाशनम् । कपोलकटदोषघ्नः सगदस्यागुणा नृप ! । निर्याणवानकुम्भानदोषघ्नः करयोर्गुणः । कुम्भदोषविनाशाय तयोरेव गुणो भवेत् । कर्णदोषविनाशस्तु क्रियते कुम्भलक्षणैः । कण्ठदोषविनाशाय कर्णलक्षणमेव हि । आसनस्य हि ये दोषास्तान् हरेत्कर्णजोगुणः । पंचदोषलयकर आसनस्य गुणो भवेत् । गुणाघ्नन्ति हि वंशस्य दोषान् तत्स्थलसंश्रितान् । पश्चिमासनदोषघ्नं लक्षणं तत्स्थलश्रितम् । कुक्षिप्रेक्षकदोषघ्नं पश्चिमासनलक्षणम् । गुदाः प्रेक्षककुक्षिस्थाः पुच्छदोषविनाशनाः । मेढ्रदोषलयं कुर्यात् पुच्छलक्षणमेव हि । मेढ्रलस्य गुणा घ्नन्ति दोषांश्चैवापराश्रितान् । अण्डकोषगतं दोषमपरालक्षणं हरेत् । नाभिदोषलयं कुर्यादण्डकोषस्य लक्षणम् । नाभेर्गुणश्च घ्नन्ति दोषास्तनसमाश्रिताः । उरोमण्डिगतान् दोषान् नाशयेत् स्तनलक्षणम् । चिबुकस्य हरेद्दोषान् उरोमण्डिगतोगुणः । यथा दोषलयो राजन् ! लक्षणैः क्रियते शुभैः । दोषातिरेकोऽपि तथा प्रदेशगुणनाशकः । प्रदेशोऽन्तरस्थैव प्रदेशस्य गुणान्वितः । कुरुते दोषनाशं हि स दोषोगुणभाजनः । करकुम्भविषाणात्रिकर्णलक्षणसंयुतः । सर्वैरेवाशुभैरन्यैर्लक्षणैश्चाशुभोगजः । स्थूलं चन्द्रांशुशुभ्रं स्याद्रक्तं च ज्वलनप्रभम् । वज्रं काञ्चनसङ्काशं दलदण्डः सुपिङ्गलः । एतेषां च समायोगाद्दन्तानां मधुपिङ्गता । यतो गजविषाणानामतो मधुनिभाः शुभाः । भद्रजातेर्गजस्यैतन्मन्दस्य च मृगस्य च । घृतपीयूषकुन्देन्दुकेतकीच्छविपञ्चकम् । एवं जातिलयस्यापि सामान्यं शोभनं मतम् । कपोतधूमभस्माख्यिसर्षपच्छलकसन्निभाः दन्तयोर्ज्ञशुभा राजन् ! छाया पञ्चविधा अपि । अध्यर्धारत्निकं राजन् प्रमाणं दन्तयोः शुभम् ।

अत ऊर्द्धं प्रवक्ष्यामि गजानां वर्णलक्षणम् । आहारस्य विशेषेण वातपित्तकफैस्तथा । देशलक्षणगुणैश्चैव बीजयोनिवशेन । अकालोकलनक्षत्रलग्नराशिवशेन च । पूर्वकर्मवशाच्चापि धातूनाञ्च विपर्ययात् । भवन्ति कारणैरेभिर्वर्णानामविधा नृप ! । दिव्यसत्वाः शुभैर्भेदैर्विविधास्ते भवन्ति हि । सिन्दूरगन्धपैदूर्यविद्युज्जाम्बूनदप्रभाः । इन्द्रनीलसमानाभा भवन्ति शुभकालयः । अतिस्निग्धाश्च रक्ताश्च शुकवर्हिणसप्रभाः । एते देवगजाः सर्व्वे मृत्तले न भवन्ति हि । अतिस्निग्धाश्च रक्ताश्च शुकबर्हिणसप्रभाः । दैवयोगाद्दने प्राप्ते कचिदेव भवन्ति हि । वन्दनीयश्च पूज्योऽसौ नाथो नाथोनराधिपैः । इङ्कारोङ्कारभस्माख्यिसर्षपकुसुमाङ्गिसन्निभाः । ज्ञातपुत्रसवर्णाश्च गजास्ते तेऽतिनिन्दिताः । एवं वर्णविशेषास्तु कथितास्तव सुव्रत ! । गजमेकादशगुणं वज्रप्रभाणं निबोध मे । मधुसन्निभदन्तश्च श्यामोमधुनिभेक्षणः । उदरेषाश्च वर्णेश्च वक्त्रे च कमलप्रभः । द्विरेफसमवालश्च कुन्देन्दुहरितैर्नखैः । स्थूलतारोमयुक्तश्च येषेषुक्षेषु पीतकः । विचित्रश्च सुखं यस्य रक्तैः श्वेतैश्च बिन्दुभिः । स नागोगजयूथानां मध्ये राजाऽत्र जायते । तं प्राप्य क्षपतिर्भुङ्क्ते सागरान्तं महीतलम् । नीलसवर्णसंस्थानः स गजोयूथनायकः । मुखे मदे च कृष्णे च कर्णोदरशिरस्त्रयः । कैश्चैः शुभैः बलिभिर्बिन्दुभिः परिमण्डलैः । सवर्णोयो भवेद्दन्तो कैलासः सोऽभिधीयते । अतःपरं प्रवक्ष्यामि निःश्वासस्य तु लक्षणम् । निःश्वासोद्विविधोज्ञेयः शुभश्चैवाशुभस्तथा । शुभः सुरभिगन्धः स्यात् पूतिगन्धोऽशुभोमतः । विशेषेण तयोश्चैव लक्षणं भूप ! कीर्त्यते । स्निग्धता दीर्घता चैव समता च सुगन्धिता । सौकुमार्यं मृदुत्वं च निश्वासस्य तु षड्गुणाः । स्थूलता रुक्षता चैव दुर्गन्धत्वं तथोष्णता । पारुष्यं विषमत्वञ्च दोषाश्चापि भवन्ति षट् । दशरात्रिप्रमाणं च रेणुकं पित्तलक्षणम् । यो निश्वसिति दीर्घं च स दीर्घायुर्गजो मतः । अरःपरं प्रवक्ष्यामि गजानोकित लक्षणम् । स्निग्धं स्थिरं च सौम्यं च वारिजोत्पुल्लतारकम् । सलक्षं प्रतिनागं तु प्रेक्षितं शुभकारणम् । उद्विग्नञ्चक्षुषं दीनमविकाशिततारकम् । ऊर्द्धाधः पार्श्व दृष्टञ्च निर्लक्षं निन्दितं भवेत् । कथानां लक्षणं भेदान् वक्ष्यामाख्यिबोध मे नेत्रयोः पुटपालिक्याः कथाः शुभफलाः स्मृताः । संख्या तस्यैव लक्षन्तु रोम्णां चैव प्रकीर्त्तितम् । देहच्छायासवर्णत्वं मृदुत्वं च तथा परम् । अनाविलत्वं घनता नम्रा च स्फुटितायता । अंगुलस्य च सूक्ष्मत्वं रोम्णां सप्त गुणा स्मृताः । दोषाश्च सप्तसंख्याः स्युर्गुणानां च विपर्य्ययात् । शुभानि शुभकर्म्माणि दुःखदान्यशुभानि च । अतःपरं प्रवक्ष्यामि लक्षणं पुच्छसंश्रयम् । बालोत्तालानि कृष्णानि दीर्घाण्यायतनानि च । मृदूनि पिङ्गवर्णानि पक्ष्माणि करिणः सदा । स्निग्धच्छायानि लक्ष्णानि समानि च दृढानि च । अग्रतानि सक्थि दक्षिणं पक्ष्माग्र्यतिशुभानि च । गजानां स्वामिनः

सौख्यं कुर्वन्ति रमणीयतराम् । दृढाः स्निग्धाश्चलत्वाच्च सुहृन्नाद्य च्छदप्रभाः । तालद्वन्द्वसमाकारा बाला भर्तुर्जय प्रदाः । गुनःपुष्करसमा रूक्षाः कपिलाः स्फुटितास्तथा । घनत्वातिशयोपेताः सुहृत्तास्त्वतिनिन्दिताः । भर्तुरारोहिणजानान्तु निस्त्रोहेनकरास्तु ते । अतःपरं प्रवक्ष्यामि लक्षणानामपि लक्षणम् । अभिन्ना ऋजवः स्निग्धा घना मधुकरप्रभाः । लोमा वारणनाथस्य क्षेमदृद्धिकरा मताः । रूक्षास्तु निष्ठुराः पिङ्गाः स्फुटिताश्च जुगुप्सिताः । कुर्वन्ति दन्तिनां नित्यं क्षयं नाथस्य चाशुभम् । पक्ष्मणां लक्षणं कथितं मया । कर्णमार्जारमण्डूकगोनसैश्च समप्रभम् । वानरस्य समं चैव सुखं नागस्य निन्दितम् । स्निग्धान्यापूर्णगण्डानि गिरिकूटनिभानि च । आपूर्णमेघरूपाणि पूजितानि सुखानि च । अदृश्यानं लघु सुखं वाहित्थनिःप्रभं तथा । वराहलोचनाक्रान्तमदृष्टचिबुकं तथा । ललाटतटपर्य्यन्तगर्त्तालीतिभिरन्वितम् । सगदं हीनतायुक्तं सुखं नागस्य निन्दितम् । सुखस्य लक्षणं सम्यक् कथितं तव सुव्रत ! । अतःपरं प्रवक्ष्यामि मातङ्गगतिलक्षणम् । समा च लघुपादा च वेगेऽत्यतिशुभा मता । दीर्घक्रमा सुखोत्क्षिप्ता गात्रसंवरहारिणी । शुभलक्षणसंयुक्ता पुरुषस्य वकस्य च । मातङ्गदर्पसिंहानां गतिर्मुख्या शुभा मता । क्लेशचालितगात्रा या विषमा सुलघुक्रमा । वेगेऽपि मन्दसञ्चारा विशेषान्दोलितासना । मृगस्य लक्कलासस्य जम्बूकस्य खरस्य च । गमनेन समा या, सा शुभा नो दन्तिनाकृतिः । कथितं तव राजेन्द्र ! गजानां गतिलक्षणम् । स्थितानाञ्च यथायोगं साम्यं लक्षणं ब्रह्मे । पञ्चस्थितसमस्थित नवस्थित द्वादशस्थिताश्चैव । पुराणवतां जायन्ते राज्ञां गिरिसन्निभाः करिणः । लक्षणसहितैः स्निग्धैः करकल्पविषाणकर्णनयनैश्च । संयुक्तो भवति गजो वसुदः पञ्चस्थितो नागः। (वसुदःधनदः) परिणाहायामोच्छ्रयलक्षविक्रमधैर्य्यकान्तिसम्पन्नः । भर्त्तुः प्रतापजननो ज्ञेयः सप्तस्थितो हस्ती । उत्साहवेगसाहसमदसत्यगुरुत्वदक्षतायुक्तः । करदन्तकर्मसु कुशलो नवस्थितः करी भवति । बुद्धिर्मेधा सत्वं यत्नःकर्मौ तथाऽऽलिखी हृदयम् । रोमाणि चक्षुर्विषादाः तथासनं पृष्ठवंशश्च । द्वादश चैतानि सदा स्थितानि दृश्यन्ते यस्य नागस्य । स द्वादशस्थितोर्वं भवति गजः सर्व्वसौख्यकरः । सञ्चारस्थितभेदाः कथिता गुणसंज्ञया गजेन्द्राणाम् । दिव्यानलक्षणानां लक्षणमिह साम्प्रतं वक्ष्ये । निहतद्विपदचतुरदक्षपाद्म स्फुटति च न यो मुञ्चति । न च जिघ्रति भूत्वादीन् स वारणोदिव्यसत्त्वस्तु । दत्तश्च योऽत्ति मांसं सत्वानां सर्वं तु लोभेन । जिघ्रति मूत्रपुरीषाणि पिशाचसत्त्वः स विज्ञेयः। एवं सत्वपरीक्षा क्रियते नरनाथ ! वारणेन्द्राणाम् । खरलक्षणमिदानीमशुभं शुभञ्च वक्ष्यामि । स्थानान्यष्टौ कथ्यते ! भवन्ति यस्स्थ वारणेन्द्राणाम् । तालोष्ठगिरवरःकरजिह्वामूलं गलकपोलौ च । गम्भीरसौम्यदृष्टास्तथाश्रमोरितास्तथा स्निग्धाः। नादाः शुभाःनराधिप ! षडेव कथिता गजेन्द्राणाम् । चत्वारस्त्वशुभा रौद्राभयशोकसङ्कोचोत्पन्नाः। एवं शुभाशुभाश्च दशप्रकाराःस्वरा ज्ञेयाः । अन्येऽपि गलवल्गनाभिलाष्फालनोद्भवा बहवः । यद्भावभवन्ति करिणां शुभाशुभं न तैर्भवति । निस्त्रोचितचिबुकायितविदलितकूजितस्वरोपघातादिभाः। वायसजम्बूककपिकाश्वभङ्गसदृशारावास्त्वशुभाः । ज्ञेयानि शुभानि सदा मृदङ्गजीमूतदुन्दुभिनिभानि । पातायितगर्जितहसितानि हुंहितानि नागानाम् । पातायितञ्च तालोष्ठसम्भवं गर्जितकं चैव । जिह्वासमुद्भवं च फेनायितमित्यभिख्यातम् । हसितं कपोलजनितं पुष्करविरोद्भवञ्च नागानाम् । भवति धनधान्यवाहनभूलाभकरं नरेन्द्रस्य । हसितेन मृदङ्गरवं तु कर्णाभ्यां दुन्दुभिस्वनञ्चैव । दर्दुरवं तु घेचकेन करोति योऽसौ जयकरः । सर्वस्थानसमुत्था यद्वा नरनाथ ! वारणेन्द्राणाम् । आचार्यैः सर्वे हसितसंज्ञा रवाः शुभा ज्ञेयाः । एते च जयपराजयकथनसमर्था भवन्ति भूपानाम् । गर्हितशुभप्रदेशस्थानाकृतिपरिवर्जिता नादाः । शुष्कतृणकाष्ठकण्टकवल्मीकास्थिरूक्षभस्मादुष्टासु । पाषाणाङ्गारादिषु भूमिषु यदि संस्थिताः करिणः । हुंहन्ति हीनलक्षणमेतद्भवति सदाऽशुभं भवति । प्रभूतमदङ्करवं तु यदि हुंहन्त्यानन्दपूरिताः करिणः । प्रख्यातं भवति तदा नराधिपस्य विजयसदा राजन् ! । सभामध्ये च यदा हुंहन्ति गार्दूलवत् गजाश्रेष्ठाः । भवति ससैन्यस्य तदा विजयः संख्ये नरेन्द्रस्य । (संख्ये संग्रामः) कलहंसनाद मधुरं किञ्चिदिवोत्क्षिप्तपृथुकरस्तु यदा । हुंहति सदा च हृष्टो तदापि जयोभवेद्भर्त्तुः। सुखविदरकपोलगतं हुंहत्यसकृत् गजो यदा हृष्टः । मधुरकृजहसितञ्च जयप्रदं भवति भूपानाम् । स्तोनं वारान् क्रौञ्चरवं हुंसरवं हसितं यदा कुरुते । एतदपि नागहसितञ्जयप्रदम्भवति भूपानाम् । गर्जति घनवत् सततं यदि वारणः प्रहृष्टमनाः सुखरन्ध्रनिविष्टकरस्तदाऽरिविजयोऽभवेद्भर्त्तुः । घनरव

स्टक्रीतसन्निभं सक्रीत्करं दृंहितं यदा कुरुते । भवति तदा वारणनाथस्य भवति मृत्युनाथः खलवेव । कथितान्येतानि मया शुभानि गजदृंहितानि नरनाथ ! । अशुभानि च नागानामतःपरं प्रवक्ष्यामि । शङ्काचालितनयनोवराङ्घ्रिरतिनिःस्वनं कुरुते । तत्प्रतिबलस्य नूनम् तदा क्षयो भवति । भूपाल ! वेष्टितभूतलदृष्टो नदति यदा धरणिप्रकम्पनाद्वनम् । नरपतिराष्ट्रविनाशो भवति तदा मृत्युसंभवतः । मदस्रुदित्वरतरवदनं निःस्वनं यदि करी कुरुते । जनयति विजयविनाशात् पुरराष्ट्रपीडनं च तदा । वल्गितभुग्नलिखन्वदनं यदि वा सस्तुत्फाल्यं च दृष्टम् । वामान्दोलितचरणोयदा करी दृंहति सनिःश्वासम् । आत्मानगतः कुरुते तदा बलोयातावैरिभिःपार्थैः । एवं प्रकृतिस्थायदि मतङ्गजा दृंहितानि कुर्वन्ति । आत्यन्तिकानि राज्ञां चैव भवन्ति नान्यानि" । "यदि रिपुगजाभिमुखो निवार्यमाणोऽपि याति रभसेन । विगतिपदानि नागस्तत्रापि जयोभवत्येव । ऊर्ध्वदोष्टस्थाति मदं दुर्गन्धमदग्ध सुरभिमदम् । दृष्टगजानां प्रथमन्दुलक्षणमेवं सकथितम् । हस्वतनुर्मधिवदनोऽपि महाशिराश्चक्रकर्णयुगलश्च । नातिस्थूलोऽसिसमस्तु लक्ष्मणानि च गात्रवदनरोमाणि । व्याघ्रः स भवति कृष्णो दुष्टात्मा दुष्टशीलश्च । स्थूलाक्षिपार्श्वदृष्टो दीर्घविषाणोनामितसुखश्रोणिः । पृष्ठपादःस्यादनखो वक्रोष्ठनुष्टदण्डेन । विस्तृतकुक्षिश्चोदरश्च कृष्णोवराङ्घ्रिनयनश्च । श्वेतोवत्सोनामा ख्यातोऽयं सर्वदोषकरः । अतिसुखापरगात्रो दृष्टन्मुखः काकक्षण्णनयनश्च । स्थूलतरोधोसक्थदन्तीनसुबलस्फुटितबर्हिनखपादः । स्थूलनखःस्थूलपुच्छकरश्च वामन संज्ञो गजाधमो दुष्टशीलश्च । विषाणे चातिदृढे हस्वे परिमण्डलौ तथा कर्णौ । वदनश्च मांसलं स्यादधोगतस्थूलनयनश्च । समसंस्थितयुग्मो हस्वो हस्वाङ्गुलिः करो यस्य । नाम्ना च विश्वरूपमुख इति ख्यातो दुष्टमातङ्गः । करकर्णशिरोबालधिधिषाणागात्राणि यस्य हीनानि । आदग्धभोऽतिवामनाङ्गः पापात्मा स स्वामिनाशकरः । मदनादुत्थाय बलाद्दृहावपि पादौ करोति लक्ष्येण । प्रत्युपसि गच्छति पुनः क्वापि समुपस्थापितमुखश्च । अनिष्टतमालिखिहिल्लति तस्याननं च कर्णाभ्याम् । स श्रेयो घातकरः पापात्मा सर्वपापकरः । यस्य च विलोलं मेढ्रं हस्वं हस्वाङ्गुलिसमुद्गं वा । अतिनिम्नश्च वाहित्थं कर्णौ च मनुष्यवौ हस्वौ । गात्रापरश्च दीर्घं नखाश्च मलिनाःसरागाश्च । सर्वाणि च कायाभपक्ष्मरोमाणि च विदग्धानि । उदरश्चाजघ्न्या स्यात् श्रोणी तन्वायताश्च वक्षाश्च । वंशिकनामा मतोऽसौ दुष्टगजोवर्जनीयश्च । यस्य करालौ दशनौ स्थूलौ मालान्तरस्थौ हस्वम् । अस्निग्धशुक्लवर्णःकपिलश्मश्रुकलोचनोऽतिविक्रमततनुः । पापात्मायं कृष्णो राज्ञा क्षेयः प्रयत्नेन । द्विषमपि यत्र तिष्ठति तं देशं दहति यावदप्रक्षयः । राज्ञा विन्ध्याटवने वा पररष्ट्रे वा स मोक्षव्यः । अतिखरपरिचितनुर्नकुलच्छायाक्षनूर्कृष्णाक्षैः । यो कृष्णो मातरं स मातयित्वा विनाशयति । भग्नाक्षदृग्युगोयः कर्णक्षयवक्त्रकर्णाकृष्णाः । कृष्णाकृष्णाक्षोऽसौ भर्तुर्विपदेव मातङ्गः । रोमभिरधोमुखनतैः काकाक्षो दीर्घवक्त्रश्च । स्थिरहस्वकर्णयुगलः स राजयोकृष्णो कृष्णेषु । तिर्यक्प्रेक्षणनिरतोदुर्गन्धः काककुम्भवदनश्च । मूलपरोषघुष्टे सस्तत्सुको भवति चक्षुषोः । कृष्णौ यस्य विषाणौ विलिप्त स्थूलतरौ के च नेत्रे । तन्वायतं तिलं स्यात् बालविबालास्तु वडवाप्राः । रक्तौ प्रेक्षकनेत्रौ मेढ्रोपरिसंस्थितोदरश्च महत् । चलपक्ष्मकस्तु कृष्णो स भवति नाम्ना मङ्गादृष्टः । अक्षं प्रसार्य वदनं विधुय चाधोरथं निपातयति । स जघ्ने स्थले च नागो विवर्जनीयः प्रयत्नेन । हस्वकराङ्गुलिबालतनुदशनत्वाल्लायामगात्रश्च । मतकुक्षजातिः स गजः सुदृष्टशीलश्च दृष्टश्च । कालनखो स्फुरिवर्णोहृष्यणो हस्वबालधिश्चैव । वक्रपक्ष्मा दुर्गन्धिर्मक्षिसन्निभनासाकुहैः । अतिपिङ्गकर्णचक्षुरोमगतकृष्णो वराङ्घ्रिनयनश्च । तनुनखशिरालकर्णोनखान्तरैर्दुष्टचरश्चैव । विक्षुरोनाम गजोऽसौ खार्क्षैः सर्वत्र वर्जनीयाज्ञोः । वक्रपार्श्वकर्णयुग्मो व्यालानामधमोयम् । कृष्णोबाहित्यभागो विषमौ दन्तौ च यस्य नागस्य । धूम्रमिश्रेव च्छाया स निन्दितो वर्जनीयश्च । दन्तौ चातिहस्वौ स्थूलौ कृष्णौ च मांसलौ कृष्णः । चिबुकं मांसविशुष्कं स्थूलतरे तारके यस्य । स्थूलसुखो दुष्टात्मा नासौ सांग्रामिको भवेद्दुहिरदः । अति दुष्टकर्मनिरतो भयालुको वर्जनीयश्च । कृष्णा कृष्णा च्छाया वायसजङ्घा च दृश्यते यस्य । मूतोदनस्तु कृष्टे निःशङ्कं यः करापेक्ष । निःशेषं यद्यांश करोति यः सकृत्सनिश्चेष्टम् । परिकरणीयो राज्ञायाने रथे स मङ्गता प्रयत्नेन । अतीवविरलपक्ष्मा ध्यानपरः शङ्करश्चनिरतश्च । द्विगुणीकृत्य करायन्नुदात च भूतलम् नित्यम् । वाशेन च लिखति मङ्गोम्भाहेन कुत्सितायेच । जर्जरविरूपकर्णः पापात्मा निन्दितो कृष्णो । आनाकाबाहोच्चवसत्वसत्वो महाशिराश्चविडः । हस्वाङ्गुलिबालकरो हस्वापरगात्रकर्णश्च ।

एकोऽपि वामनःस्याद्यद्यपि भवेद्वृद्धप्रियोऽसौ हिरदः। राज्ञा तथापि वर्जनीयो वर्जनीयश्च। स्थूलसुखकृष्णकर्णोविष्कोनजघनागरत्नानूरुकः। नकुता मेढ्रेण युतो नरमदः कोपनश्चांस। मन्दालोकनिरतोमहाशिराः पृथुविषाणनयनश्च। कृष्णो नपुंसकोऽसौ विवर्जनीयश्च संग्रामे। अल्पायुषो भवन्ति हि सङ्कुचजिह्वोष्ठतालुकानागाः। नरपतिभिस्ते सततं विवर्जनीयाः प्रयत्नेन! आयामपरिहीनं समनाकोच्छ्रायसुखेन नमितम्। उच्छ्रितवक्त्रं कुब्जं विषमकुम्भं कुक्कुरसमानहीनकृष्णं च। एवंभूतं तु गजं राजा दूरेण वर्जयेन्नातिमान्। स्फुटयति मन्दबुद्धिर्यस्य कुलजयो भवति। लक्षण्यश्चोऽपि गजो हानिमेव कवियतिनखश्च। एकोनविंशतिनखः सप्तदशनखश्च वो भवति। षोडश यस्यदश वा नखान् धत्ते युक्तो वा चतुर्भिः। एकादशत्रयोदशनवदशभिर्दशनखैश्च। संकुक्षयुगमकरः सप्ताष्टाभिश्च मानवखैः। हिरदाश्चाष्टादशनखाः विंशतिनखयुक्ताश्च शुभाः। कुरुते स्वामिविनाशं द्वाविंशतिनखोयश्च। एकोनविंशतिनखो युवराजविनाशं कुरुते। सप्तदशनखस्तु गजो नरपतिपालविनाशने समर्थः। षोडशनखमातङ्गोनायकनाशं ध्रुवं कुरुते। यस्यदशनखश्च योऽसौ सेनापतिनिधनलक्षजो भवति। कुरुते चतुर्दशनखोव्याधिं पुरवासिनां हस्ती। त्रयोदशनखो राष्ट्रविप्लविनाशङ्करोति भूपस्य। द्वादशनखस्तु कुरुते पदातिसुरनलवं संख्ये। एकादशनखयुक्तो गजकारिनाशको भवेत् स गजः। हरदाङ्गे च दशनखः करोति स्त्री दुराचारोकम्। चतुरङ्गस्य बलस्य नाशमेत्य नवनखो गजः कुरुते। अष्टनखश्च पुरोहितसंघवस्त्रालङ्कारमर्दकः। सप्तनखः प्रतिहारं नाशयति च मङ्गलखोऽमात्यम्। षड्नखो भक्षिकारं चतुर्नखो द्वारपालञ्च। त्रिनखोविषयाद्येषं द्विनखश्चान्तःपुरानुबन्धञ्च। एकनखोनखराङ्कितोराष्ट्रविनाशं ध्रुवं कुरुते। एवंभूतनखाढ्ये नरपतिना न ते गजाग्राह्याः। लक्षणमङ्गिताभोऽतिखोमयोऽहीनवर्णकरवालः। हस्ती विवर्जनीयो हीननखः पूतिखोमा च। व्यञ्जनलक्षं मङ्गलक्षं दुर्भिक्षलक्षं मङ्गल्यं कुरुते। यस्मिन् देशे वसति नाशयति वलं च दुष्टात्मा। यस्य न भवतोदन्तौ व्यञ्जनलक्षं दुर्भिक्षलक्षं मङ्गल्यं कुरुते। यस्मिन्देशे स वसति नाशयति वलं च दुष्टात्मा। यस्य न भवतो दन्तौ कुलरूपवतीऽपि गर्भदोषेण। स गजोमतङ्गनामा न तं रक्षे योजयेद्राजा। कुक्कुरघटागतोऽसौ करोति गजानां वलं च सत्यञ्च। अतएव समरकाले नराधिपैर्वर्जनीयश्च। तनुत्वक्सदीर्घदन्तोन्नतिसङ्कटवक्त्रविघटितविषाणः। एकदशनखोष्ठकरदनश्च गजः प्रभंजनं जनयति। रदनविहीनो हस्ती निःशेषलक्षणयुतोऽपि। भवति न नृपतियोग्योमदजलसंसिक्तगण्डोऽपि। दूषितविरहितदीने वलरहिते विवर्णे च। निष्प्रभकुक्षिकुक्करे राजा नारोहति वलाकरे स्थिते च। एवंभूताश्वारूढा: मित्रनाशका रणे कथिताः। अधिष्ठानमुज्झितं निपतति नागस्य यस्य नित्यं हि। व्यसनव्याधिवियुक्तस्तस्य भर्त्ता रणे जिवते। वहनयोगाश्च नखा भर्तुश्चैव संबाधनकराः। जिह्वानखसुखमेढ्रनयनानि भवन्ति यस्य लक्षणानि। वाहित्थचित्रलक्षणः स गजोभर्तुः जयं कुरुते। वाह्यांसफलकपीठो राजन्! लक्षेण पृथुवंशेन। वदनेन च कपिवदनालुकारिणानिन्दितोहस्ती। वर्णौ दन्तौ च समौ न नतौ भवतो यस्य नरनाथ!। स नराधिपवलविनाशकरः करो जायते समरे। चित्रौ रोमचितौ वा स्थूलौ वातिप्रलम्बितावौ वा। कोपौ कोपविनाशं स करोति नागस्य भूपानाम्। सितबिन्दुभिश्चित्रं श्वेतं वा यस्य जायते मेढ्रम्। स गजःयश्चि विनाशङ्करोति भूपस्य संग्रामे। लाङ्गूलेद विचित्राणि यस्य देहे भवन्ति रोमाणि। स गजःप्रतिगजबलेन विरहितो निजबलं दहति। सुप्रोन्नितवस्त्र वदनात् यस्य गजेन्द्रस्य गलति रुधिरजालम्। व्यञ्जनलक्षं सत्यति यद्यदौ भर्तृनाशकरः। इति कथितं तव नृपते! दुष्टमातङ्गलक्षणं सम्यक्। पापकरिणोलक्षणमतः परं संप्रवक्ष्यामि। यल्लक्षणं मयोक्तम्प्रशस्तदीनां शुभं च दुष्टं च। तत्करिणोष्वपि योज्यं जातिविभागेन च युक्तात्। सुखलक्षेण खचितानि करेणुकायामङ्गानि भवन्ति। युवतिसदृशानि पुरुषोचितानि च तथा पीनाग्यङ्गानि करेणूनाम्। गजसंस्थाना करिणो निर्मलटन्तर सुपीनकाया च। स्थूलायता च सततं प्रभूतदया मताश्च करिणीनाम्। प्राच्यवनसंभूताः प्रायेण लक्षणयुता भवन्ति करिणः। सुलक्षणेषु च स्त्रीषु लक्षणं प्रधानं तच्च षड्विधं भवति। पृथिव्यप्तेजोवायुाकाशात्मकम्। तत्र पृथिव्यप्तेज आत्मकं प्रशस्तं वायुाकाशात्मकमप्रशस्तम्। क्रमेण च्छायाभिधीयते वलोपचयप्रभेण वसतपद्मते। तस्यैव देहोद्योतजननी, स्थिरा प्रकाशभिधीयते। छायाफलस्य त्रिगुणमानसमादृगसमर्था प्रभा

भवति। छाया देहसमाश्रिताः स्थिरप्रभावाऽस्थिरा च्छाया बलोपचयवर्णेन सुखदुःखते। नरेन्द्रसैवोद्योगकाले शुभकर्मफलसूचनार्थं गजस्य प्रभा प्रकटीभवत्येव। एवं छायागतो भेदोऽवगन्तव्यः। साम्प्रतं छायारूपमभिधीयते। स्निग्धा गम्भीररूपा पार्थिवी च्छाया भवति। स्निग्धाजीमूतसन्निभा च सलिलसम्भूता, स्निग्धा रक्ता च ताम्रा च तेजसी च्छाया। त्रयं चैतल्लक्षणं शुभमशुभलक्षणानि गजस्य लक्षयित्वा सुखप्रदं भवति। अथाशुभा कथ्यते निःप्रभा परुषा रूक्षा भस्मनाकुलवर्णा च वायवी। रूक्षा तन्वीछायादिविधवर्णा चाकाशात्मिका। इत्थं छायाद्वयमति गर्हितम् गजलक्षणानि तिरस्कृत्याशुभप्रदत्वेनैव प्रकारेण च्छायालक्षणमुत्तमं भवति। विकटसुखबालदन्तद्वयाङ्कुशीनाङ्गेषु व्याधिपीडितविकलाङ्गेषु गजेषु नारोहति राजा भक्तासैन्येष्वारोहयति। यादृशं च समरकाले मातङ्गं राजा समारोहति तादृशस्य लक्षणमभिधीयते। वलं कण्ठं स्थितं नित्यं कुञ्जराणां नरेश्वर!। अतःसंपूर्णकण्ठस्तु त्रिस्थिपिङ्गललोचनः। घनमांसचितांसस्तु दिशोऽवलोकयत्यरः। वराहजघनश्चैव सुविस्तीर्णोवरानघः। सुप्रतिष्ठितपादस्तु यः स्यादगुरुमस्तिकः। प्राजापत्योगजोह्येष संग्रामार्हः प्रकीर्तितः। मधुपिङ्गलदन्तोऽयं किंशारुणोत्पलच्छविः। रोमाणि चैव रूपाणि सुखं च कमलप्रभम्। रक्तोत्पलदलच्छाये सूक्ष्मे तीक्ष्णे च लोचने। ऐन्द्रोगजस्तु विज्ञेयोरिपुवृन्दविनाशनः। ताम्रतालुकजिह्वोष्ठसुजातनिविड़ाधरः। पीनोन्नतकरीरस्तु रक्तांशुकनदच्छविः। आवर्तेन तु दन्तेन करेण सुखशोभिना। पीयूषपिण्डदन्तो हि गजःसौवेर उच्यते। तस्याम्बुदसंकाशोन्नतप्रभविषाणभृत्। संपूर्णकक्षपादस्तु संपूर्णसमलक्षणः। वृद्धकुम्भनिगम्भारनादापूरितदिङ्मुखः। आवर्तेन च दक्षेण शीकरोत्किरणप्रियः। वारुणोऽयं गजोराजन् संग्रामेषूत्तिपूजितः। कण्ठस्त्रिवलिसंयुक्तः संपूर्णोयस्य दृश्यते। लोचने ताम्रपिङ्गे च दन्तौ श्वेतसप्रभौ। पादौ च वलिनौ यस्य पीनगात्रसमांसलौ। पृथुश्रोणिर्विपुलिनौ कर्णौ चातास्पन्दनौ। ऐशानोऽयङ्गजो राजन्! रक्षकर्मणि युज्यते। तालुजुरसि वक्षे च मध्यदेशे उभयोरपि। ज्ञाताज्ञा यस्य दृश्येत च्छाया बहुतनूरुहा। अत्यौ सौम्यस्तु विज्ञेयः कुञ्जरः समरोचितः। अग्निपिङ्गल रोमा यः सोमैत्र श्वेतपिङ्गलः। पिङ्गलालिविभागश्च रक्त पुष्करतालुकः। आग्नेयः स गजोज्ञेयस्तेजसाग्निसमप्रभः। राज्ञा वह्निसुता नित्यं धार्य्यः समरकर्मणि। कृष्णवर्त्म युताग्नि सुखश्रोतांसि लोचने। निर्घृणाग्निसमच्छाये मूलमस्य करत्रया। कायश्च पीनगात्रःस्याद्वेगे वायुसमः शुभः। राजन्! वायव्यमिच्छन्ति तमुज्जं शास्त्रकोविदाः। संख्ये नियुक्तश्च गजोनाशयेद्रिपुवाहिनीम्। निरङ्कुशत्वं चपलत्वं तस्य दोषद्वयं भवेत्। निरङ्कुशत्वं यमयेत् प्रयोगाभ्यासनादिभिः। चपलत्वं च तथा नित्यं सुकुमारक्रियादिभिः। रोमाण्यरुणकृष्णानि नखाः शशसमप्रभाः। निस्त्रिंशविमलच्छायः स भवेद्वैष्णवोगजः। स वैरिणं जयेद् राजन्! रिपुसैन्यविमर्दनः। कृष्णवक्त्रः कटौ यस्य निस्त्रिंशयवसंनिभौ। बिन्दुभिश्चित्रितं यस्य स विचित्रध्वजो गजः। तेन संग्रामकर्माणि कुरुते यो नराधिपः!। नित्यं चारित्रजं तेन स राजा फलमश्नुते। लुदन्तो दीर्घकुम्भस्य दृढदङ्गुलिपुष्करः। घनमांसशरीरश्च कूर्माकारोऽहि सत्तम!। संग्रामिकोगजोह्येष जीवत्यपि समायतम्। संग्रामविजयो नित्यं प्रतापजननक्षमः। महाशिरा महाकायो महामेढ्रो महाकरः। महादन्तोदरश्चैव महानागोवरानघः। महानेत्रो महौष्ठश्च महाकर्णोमहास्वरः। महामदो महाकण्ठोभवेत्सांग्रामिकोगजः। बहुदुःखक्षयं पूर्वसूक्तं खलु तच्छुभमेव हि। मन्दस्यापि हि यत्नं स्यादाद्यावेतौ च महागजौ। संपूर्णलक्षणोपेतो न भवेच्च महीपते। अनयोरेव भेदास्तु नागानां सप्तदाकृताः। सांग्रामिका द्विपा राजन्! शुभलक्षणलक्षिताः। कथिताश्चैव तत्त्वेन राजसौख्यकरागजाः"। आग्नेयेचनिगजलक्षणं तत्रैव। "पीनमांसचितांसस्तु कूर्माकारनखस्तथा। समवर्तितसांसस्तु सुहस्तः कल्पनापरः। आनकुक्षिः सुपार्श्वश्च रोमाणाकृसमन्वितः। ज्वलनोज्ज्वलनेत्रस्तु सुविषाणो महाकरः। संपूर्णचिबुकश्चैव क्षमायामोरुसन्वितः। बलसत्त्वसमायुक्तः स्निग्धच्छविमनोरमः। सांग्रामिको भवेद्राज्ञ आग्नेयेचनिको गजः"।

तत्रैव पालकाव्ये गजहृदये। "आयुः सविंशति यतं नागं स्यात् सामजन्मनाम्। राजपुत्र! दिशाम्येवमायुर्वृद्धादि दशादय। लक्षणानि यदे तेषां शेलाख्येवं विधायिनाम्। लक्षणालक्षणं शेयमायुर्वृद्धादिकाफलम्। शेलाख्ये कृष्णौदन्तौ दन्तौ शीर्षं च चक्षुषी। अत्यौ ग्रीवा च नागस्य वक्षः कार्यस्य भेदतः। लक्षणं सन्निकृष्टं यद्विप्रकृष्टस्य वक्ष्येत् अतस्तत्सलक्षणेमेतं प्रभूतञ्च मनीषिभिः। लक्ष्ये कृष्णे वने जातौ प्रभारे वस्तु लक्षणम्। दृणावाश्च तदाख्यानं

प्रभूतमिति सूरिभिः। दक्षिणहस्तिशावं च हस्तिन पुण्यदं मतम्। तथा वामं च वामाङ्गं हस्तिनीफलदं मतम्। लक्षणं दक्षिणाङ्गोत्थं फलं भूमिभुजां मतम्। मध्यदेशं भवेद्यच्च लक्षणं तन्मध्यफलम्। यद्यत्समप्रकायस्य तद्यत्फलदं मतम्। मध्यमानफलं सम्यं लक्षणं तु समादिशेत्। शुभाशुभेन मिश्रेण बहुत्वेनादिशेत् फलम्। कदाचित् शुभदं चास्य गजानामध्वलक्षणम्। शुभकर्म्माणमाख्याद्यराजानमथ वा द्विजम्। यथा हि सर्वचरितः मस्तूं सप्तमेव हि। स्वरसेन विशुध्यन्ते भवन्ति सवलाश्वसः। एवमाद्यं भर्त्तारं बहुलक्षणलक्षितम्। भवन्ति बाधितानोह दुर्लक्षणफलानि च"। इत्युपक्रम्य गजदेहस्थानविभागनामभेदलक्षणं दर्शितः। यथा "विषाणयोर्यस्त्रिंशत्कस्तादावतार्यो यष्टोऽपि सः। किविवा च यष्टस्याधःकुम्भोपरि च बिम्बकं। अथ यष्टोपरिस्थोऽपि पुरुषकरोऽपि भवेत्तथा। तथा यष्टोपरिस्थे च किविर्योपरिभागके। वाहिलेपरि केयाश्च मस्तकं च तथा मतम्। स्यातां मस्तकपिण्डौ च मस्तकस्थश्च विन्दुकः। तथा विन्दूपरि स्यातां वितानौ विन्दुपार्श्वतः। ततोऽन्तरवितानं च पृष्ठं तत्र विनिर्दिशेत्। विन्दुवितानयोस्थान्तः पुरस्तात् पार्श्विकौ किल। नीचे मस्तकपिण्डाद्वि वितानविन्दुपार्श्वकः। निर्याणं च वितानोर्द्धं कर्णौ वापि ततः कटौ। कटयोः श्रोतसी वापि कटस्थावस्तयोरधः। पृष्ठतः कटिसंधी च गण्डौ च कटयोरधः। कटगण्डान्तसङ्गते घाटसन्धी च घाटकौ। घाटासन्ध्युपरिष्टाच्च कर्णसन्धिसमीपगे। अग्रे गात्रगण्डाधःकपोलौ च तदन्तरे। रोमकूपौ च पादौ च कपोलाधस्तथा मतौ। ततः सगदसन्धी च सगदान्तरमत्र च। आसगदात् कुम्भबाधः प्रदेशः शिरशोभतः। ऊर्ध्वकूटाग्रपर्य्यन्तावधुपरि वै तयोः। गुरुवाक्याधरः स्यात्तु नेत्रस्थावौ तयोरधः। अपाङ्गावक्षिबाह्ये च तत्सन्धी चाक्षिपृष्ठतः। पक्ष्मणोर्मण्डले चाथ तत्सन्धी वर्त्म मण्डलौ। वर्त्ममण्डलसन्धी च ततश्च श्वेतमण्डले। श्वेतमण्डलसन्धी च ततः कृष्णे च मण्डले; तत्सन्धी च ततः कृष्णे सत्सन्धी वर्त्ममण्डले; तयोरपि तथा सन्धी प्राग्भागे चक्षुषोरपि। कनीनिके समाख्याते सन्धी तत्र तथानयोः। इत्यङ्गिगतदेशानां सम्बन्धो भवेदिह। किञ्च विन्यौ च कर्णौ च कर्णयोलूलिका ततः। ततश्च: कर्णपिण्पल्यौ चक्रिके द्वे प्रदेशगे। कर्णमस्तकसन्धी च पश्चात् कर्णापवर्त्तयः। तदन्तश्च समाख्यातावुदुखलौ परिकीर्त्तितौ। कर्णचूलिकयोरग्रे पिङ्गलाख्यौ च भागितौ। पुरस्तात् कर्णपिण्पल्याः कर्णसंवेशचर्मणी। कर्णान्तः कर्णनाड्यौ च सम्बेतां तस्य भागतः। तदधोऽक्षिकवस्थश्च सशङ्खमध्यकर्णयोः। कर्णसन्ध्योरधस्ताच्च तथाधःसन्धिसंज्ञितौ। तदधः कर्णपाल्यौ च प्राक् कर्णोपरितस्तयोः। नाड़ीपार्श्वगतौ चात्र मध्यकर्णौ तयोरधः। अधःकर्णौ समाख्यातौ बहिःकर्णोपवर्त्तयोः। पार्श्वकर्णौ बहिःकर्णौ कर्णयोश्च क्रमाद्बहिः। अन्तरान्तरकर्णौ च पश्चिमकर्णपार्श्वयोः। अधस्तात्तेति भागाः स्युः कर्णयोः करिणोऽपि च। ग्रीवायाः प्राग्भयोभागो ग्रीवा सन्धिस्ततस्तथा। ग्रीवापृष्ठं ततस्थाच्च मध्ये तच्च लकाटिका। ग्रीवापृष्ठं तथाधस्ताद्गलमाङ्गर्द्धिपश्च। अधःकण्ठसयोर्योर्द्धं मन्ये ते गलकण्ठयोः। धमन्यौ कण्ठपार्श्वे च तयोश्चावलिपिण्डिका। गलस्य पार्श्वयोर्द्धं दर्दुरौ चात्र निर्दिशेत्। शुद्धे मन्योपरिस्थातामुपरिष्टात्तयोरधा। किविकौ च तथा चोक्तौ पश्चादुपरि चैतयोः। पार्ष्णिघातौ च संख्यातौ पार्ष्णिघातान्तरे तथा। उत्सङ्गावुपरि स्यातां स्कन्धाद्यूर्द्धं तथानयोः। तन्मध्ये पण्डवस्थोर्द्धमिति ग्रीवांशसंग्रहः। (कक्षिपक्षेण पार्ष्णिभ्यां वौ देशौ कथ्येते तौ पार्ष्णिघातौ) गात्रमात्रमायतं च भवेदाखमादितः। तत्पार्श्वयोः प्रतोकाग्रौ तावंसौ च तयोरधः। तदधःप्रत्यंसौ च तथैवांसफले तथा। तदधस्तात्ततोबाहू ततोबाहूत्तरं तथा। अवांगत्र गुह्ये तत्र बाहुपृष्ठोद्भवे अपि। अपारे च तदूर्द्धं च तयोस्कन्धाविकौ तथा। पाल्यावथाकूर्दादूर्द्धमु तयोरायामपृष्ठतः। पाल्यन्ताद्र पुरस्ताच्च भुजयोरुदितौ वबौ। वबभागोपरि तथा पुरस्तात् फलकोच्छ्रितौ। पिण्डिकाधश्च वेमाख्यौ विशोचौ वयोरधः। उत्सङ्गौ च विशोधाधः प्रष्ठौ चापि तयोरधः। तत्सन्धी च ततः पर्व्वसन्धानौ तदधोमतौ। तदधः पालिपादौ वै कूर्चौ चानु तयोरधः। तदधोमस्कूर्चास्य ततो नखशिखादय। पुरःपुरोनखौ नाम्ना सनखौ चैव विस्तृतौ। तत्पश्चात् नखग्रीवा विशोधाः पार्श्वतोनताः। अन्तःपार्श्वबहिःपार्श्वे स्यातां पार्श्वनखेषु च। कथाश्च राजयश्चात्र पादनाड्याविकाकथा। तलसन्धी ततः स्यातां तले च तदनन्तरम्। तलप्रदेशपुरतस्तत्परा नखवृन्दतः। तलकर्णौ ततः पश्चात् तलग्रन्थौ ततःपरौ। तलयोरन्तरे चैव हृदये च करीरके। किंविनोराजयश्चेति तलसङ्गाविका अपि। पल्लवस्थो ततः स्यातामन्तर्बाहू ततोऽन्तरे। बहिर्बाहू बहिश्चोर्द्धं गात्रं सर्वं ततोऽपि च। कक्षौ गात्र

प्रष्ठोर्द्ध च तयोरन्तरं ततः । इति प्रदेशा गदिता गजानां गात्रगोचराः। कण्ठस्थान्तर्मणिः पूर्वं ग्रीवापर्व समाश्रयः । उरोमणिः समाख्यातस्ततः स्यादुरसः स्थितिः। याऽधोभा पार्श्वगा तत्र गात्रबन्धिसमाश्रिता । आवर्त्तमणि रख्यात विज्ञो भास्करसङ्कतः। ततः बन्धिकरस्तु स्यात्तस्याधः स्तनयोः पुरः । गात्रयोरन्तरं चापि चतुरङ्गान्तरं भवेत् । अधःस्तनौ च स्तनयोरन्तरे चाथ चूचुके । स्तनान्तौ स्तनकूर्चौ च स्रोतिको चापि कूर्चके । चतुरङ्गान्तरात्तं च भवेच्चूचुकयोरधः । स्तनयोरग्रधस्ताच्च पुरस्तात् स्तनयोर्भवेत् । हृदयं चास्य पार्श्वस्थावाभौ च वक्षिसंज्ञकौ । स्यातामावामसंज्ञौ च तदधोविवधौ ततः । ततः क्रोडं महाधस्तात् पश्चाच्चाङ्गकण्डयोः । रन्ध्रे चापरवक्षित्र स्तनयोरन्तरम् । जठरे नाभिरित्येते प्रदेशाः खिल वत्तस्तः । आपराङ्गिपरःशेफोरेतःस्रावाधिः स्मृतः । ततोऽण्डकोषसन्धिः स्यात् कोषसन्धिश्च शेफतः । क्रमान्मेढ्रमतः स्यात् मेढ्रसंज्ञो भवेदपि । आनिर्गमात्तथा तस्य वाङ्क्षपार्श्वगतौ मतौ । अग्रतस्तत्र कथितं तस्मात्री पार्श्वयोरपि । मेढ्रस्य पुरःस्रोतो वङ्क्षणौ कोषपार्श्वगौ । अपरान्त्रयिणौ शुक्रे तथा वङ्क्षणसंज्ञके । दृत्यण्डकोषभागाः स्युः क्रमादाचक्षतेऽधुना । तदनन्तासनस्त्रोणी वङ्क्षवंशस्य पृष्ठतः । भवेदपरवंशश्च ततोऽन्त्रस्त्राध आसनम् । पश्चिमासनसंज्ञश्च पृष्ठतः परतश्च सः । अत आस्फिप्रदेशश्च ततो वंशश्च वाक्षिः । (आस्फिराचक्षते) । आन्त्रेत्यभिधानाच्च भागाः पञ्चास्थिसंहिताः । स्यातां च तत्पञ्चकाख्यात् पञ्चसन्धी तथा ततः । स्यातान्त्र पञ्चपार्श्वे च नर्मसंज्ञे च कथ्यते । पञ्चाधोजत्रुकौ चानुकूची पञ्चसमाह्वयौ । विम्बौ मध्यगौ तत्र यकृच्चैवोर्द्धमध्यतः । कक्षाभोगौ कक्षपक्षौ यकृच्छायाकरौ ततः । उत्कण्टौ कुक्षिपक्षाच्च तत्स्थित्यर्थमतावपि । कालकोत्कण्टदेशानां पार्श्वकस्य पार्श्वयोः । कालके पिण्डिकेचाधो विद्याद्वापरयोः स्थिते । उत्कण्टपिण्डिका तत्स्थित्यागमेवालम्बनम् । अथनं यद्गतोऽन्त्रात् एवं कालवका दध । भवेत् पायुस्य पार्श्वेस्तु गुदमध्यनरं तथा । वर्द्धिगुदस्य वर्त्म स्यात् गुदान्तः कन्दरं विदुः । विलपायन्तरे कट्यौ तथा पिण्डिकयोरपि । अधस्तादन्तरे विद्यान्तरं तस्य संस्थितिः । पिण्डिकाश्रय मण्डूक्याख्यौ पिण्डिकान्तरे" । अवयवप्रमाणभेदास्तर्लक्षणं । "पिण्डिकारत्निकामाना पुष्करोपरि भवेत्तथा । कर्णसन्धिर्भवेच्चापि तच्चारत्निप्रमाणतः । कर्णावपत्रौ पार्श्वौ च स्यातां कृत्तसन्निभौ । कर्णाश्रौ च तथा विद्याद्विस्तारे द्वादशाङ्गुले । कर्णाश्रावपि कृत्तौ द्वावायामे परिकीर्तितः । कर्णपर्त्तिं विद्धि कर्णप्रमाणेन च रत्निकाम् । शिरः आसनसंदिष्टं मानेन त्रिकृतक्रमम् । शिरस्तु प्रमाणेन स्यात् षड्कुक्षमासनात् । आसनेन समं शीर्षं कक्ष्याकरमित्यपि । यत्तासनं च नीचेन शिरसः स्यात् षड्कुक्षम् । अवाग्रो नाम स प्रोक्तो गजोनिन्दितलक्षणः । शिरो यस्य भवेदुच्चमासनाद्द्वादशाङ्गुलम् । सोऽभ्युद्यताभिधानेन लक्षणादासनं भवेत् । आसनं वङ्क्षणोद्देशाद्यत्राक्षस्य पतद्भागतः । मध्यसमानफलकः उत्कण्टोऽत्रोच्यितोऽपि च । अष्टोत्तरं समाख्यातं लक्षणादासनं भवेत् । कुक्षिहृत्प्रमाणेन प्रेषकात् पश्चिमासनम् । द्वादशाङ्गुलनिम्नं स्यादासनात् पश्चिमासनम् । सार्द्धकुक्षित्रयं चाधः प्रमाणमपि वाजिनः । सप्ताङ्गुलप्रमाणेन पायुस्य परिमण्डलः । अरत्निपरिमाणेन विद्युल्लहृदयान्तरम् । अरत्नितोऽधिकं यस्य विस्तारेण स्तनान्तरम् । तिर्य्यग्गोमयः गात्रपरिभ्यः गोवदोगजः । अरत्नित्रयमानेन नाभिर्देयस्तनान्तरम् । नाभिश्च मूलकोषश्च गुदारत्नार्द्धमानतः । अण्डकोषश्च कुक्षार्द्धप्रमाणेन समन्वितः । ह्रे चारत्नी तथार्द्धं च कोषमार्गं भवेदपि । सोऽर्द्धकुक्षिहृदायाभोकुक्षानाकृयुतोमतः । प्रौढे तु परिवाङ्गः स्यादरत्निद्वितयं तथा । कुक्षयोस्तार्द्धमार्गं स्यात् चतुर्भागेन संयुतम् । तलस्य पार्श्वतः प्रौढावरत्निप्रमितौ मतौ । चतुर्भागयुतारत्निर्भवेच्चतलोपरि । अष्टाङ्गुलप्रमाणेन स्यातां ततः पुरोनखौ । सप्ताङ्गुलत्रयायनखः पार्श्वे पञ्चाङ्गुलानखाः। चतुर्विंशत्यङ्गुलञ्च भवेद्वालापरे तथा। अपराभ्यां भवेदुच्चिररत्न्यर्द्धेन मानतः। अरत्निश्च तदायामोभवेच्च करयोरपि । सप्ताङ्गुलास्तु डंशोभाः पार्श्वोः पार्श्वनखात्तथा । पञ्चाङ्गुलाच्चाङ्गुलाच्च नवापि नखा मताः । दृत्यङ्गमानं नागस्य दिव्यात्मभिर्दर्शितम् । समाङ्गा अपि मातङ्गा दृश्यन्ते दुःखदाः क्वचित् । दृश्यन्ते विषमाङ्गाश्च क्वचित् कल्याणदायिनः । तस्मात् प्रमाणं कोषाख्यैः प्रमाणतया मतम् । प्रमाणं ज्ञतशास्त्रार्थैः सर्वलक्षणवेदिभिः । अथाङ्गसङ्गमात्तावत् मातङ्गानां गुणागुणाः । भूयोऽभ्यगुणदोषाभ्यां प्रसङ्गात् कथिताः पुनः । उपरिक्रमतो दृष्टो नातिस्तब्धोद्धतस्थितिः । दृक्तभिन्नघाच्छरोमा च लोहिताङ्गिपुष्करः । सर्व्वव्यक्तप्रमाणश्च गजः कल्याणकारकः । भाग्यप्रदो बालदृक्तसंघातततनूरुहः । अर्थदो क्षीणविन्दुश्च गजो दुःख-

प्रदो मंत: । द्विपाद्यक्षरा क्षुद्रा क्षीणपार्श्वाच्च दर्दिदाः। पुष्करं क्षीणमध्यं विद्याद्भृङ्गैर्विनाशनम् । युक्तमाने निगाढे च निर्मलस्रोतसी शुभे । सुसमाहिते च स्नातासत् पक्ष्माग्रसमद्युती । उन्नतौ क्रमवृत्तौ च स्निग्धावभ्युदितौ समम् । दक्षिणौ च समानौ च प्रकारप्रगुणच्छवी । तत: प्रदक्षिणावर्त्तावुदासौ दन्तिनां रदौ । करस्थगाङ्गुलौ चापि श्वेतास्थिसदृशद्युती । विषाणे च तथा स्यातां चापाग्रे वारणस्य च । वो दक्षिणैकदन्तस्य श्रिया तु रहितो गज: । वामैकदन्तो दन्ती च दु:खद: सादिनोमत: । दशां प्राप्य चतुर्थीं च हितीयां यस्य न हिलौ । स्थूलावनायतौ स्नातां स मूढो नाम दुर्गज: । जर्जरसंस्थानवक्त्रौ च प्रतिमानगतौ न वा । युयुत्सामिव कुर्व्वाणा यस्य वाक्ता: सदुर्हिप: । दन्तौ हस्तोपमौ यस्य दीर्घौ पार्श्वेन चोन्नतौ । दक्षिणेन विषाणेन वामदन्तदरन्तथा । कारयेद्यस्तु मातङ्गो वामदारी स वै भवेत् । तथा दक्षिणदारी च दक्षिणदरणं तथा । वामेन कारयेद्भीतो यात: स्वामिनएव स: । तथा हस्तविषाणेन दन्तेनैकेन दन्तिन: स्थूलेनाखर्वदीर्घेण दु:स्थिताभ्योऽपि वर्ज्जित: । अन्तर्नताभ्यांसहन्त: कुद्दन्तोऽपि नतावत: । कूपे वामोन्नतिस्थापि रदाभ्यां हिरद: क्वचित् । दन्तदुर्वासनाख्यो हि हिरदोमध्यलक्षण: । बर्हिनतोऽस्तलम्बौ रदौ यस्य स दुर्गज: । लक्ष्मावतौ रदौ मूले विनाम्निसमदागतिम् । श्यामलाकार रदनायस्विमहृषनासया । दुर्जाता विषमा वक्त्रफलकास्य क्षयास्तथा । आतदीर्घातिरुक्षाक्ष वदनेनाघशंसिन: । स्थिरस्थिमितमेढ्रस्य पङ्कस्थस्थिमितोरद: । यष्टिदन्तोलुकथितो राजपुत्र ! मनोजिभि: । प्रपूर्णं प्रतिमानस्य तारामं वर्ज्जवर्जितम् । सूक्ष्मबिन्दु समानद्धं मृदुस्निग्धकायरोमचयम् । स्नायतं पृथुबाहित्वं सर्व्वगात्रसमाहितम् । रक्तौष्ठतालुदशनजिह्वन्तस्तस्थस्थितिम् । तं राजा वर्जयेत् युद्धे शुभलक्षणवर्जितम् । बालार्कसदृशे यस्य स्फरिवर्णविलोचने । मन:शिलाप्रभे वापि स्निग्धलोमसुभिन्नद: । पद्मापाङ्के च विपुले सुप्रसन्ने सितासिते । यस्यान्तिमौ सचाक्षिभ्यां विभक्ताख्यो स्थितप्रद: । यस्य तृक्षे च नयने महती दृष्टिमण्डले । स्निग्धनिर्मलवर्त्मा च तारकाक्ष: स सम्मत: । यस्याक्षज: समाभाशे दृक्ताकारे विलोचने । पारावताक्षं नागं तं प्रयंस्यन्ति श्रियप्रदम् । सुखे नात्यायते नेत्रे प्रसन्ने सूक्ष्मदर्शने । यस्य स्नातां सचाभ्यक्षौ वक्त्रं: शुभलक्षण: । रेखाभिरिक्तवर्त्मायं दृश्यते यस्य चाक्षिणी । भ्राजमान: स विनिर्दिष्टो दुर्भिक्षारिभयावह: । लक्षणाढ्ये शुभे नेत्रे कांस्यसदृशप्रभे । यस्य स्यातां भवेत्सोयं भूपराज: स गर्हित: । समन्ततो नोपचिते संहृष्टे च मनागुदग्रौ प्रौढाक्षिकूटौ यस्यापि विलगत: स दुर्भग: । वैषम्याद्विषमप्रेक्षी नेत्रे स्फुरितया दृशा । तथा निष्प्रभया दृष्ट्या वर्ज्जित: कालपिङ्गल: । तन्दीर्घस्यानुदृश्येत विरूपं विषमं तथा । तथैव तिर्य्यगूर्ध्वक्ष्णी तिर्य्यक्प्रेक्षी न दूषण: । अध:प्रेक्षी च यो य: स्यादुर्भगामिविलोचभ: । सदृशो बभ्रुमार्जारप्रभास्यमतचक्षुषाम् । स स्यादनिष्टदृक् क्ष्णी तिर्य्यक्प्रेक्षी च दूषण: । अध:प्रेक्षी च सन्नेयो दृदुर्भगामिदर्शन: । दृष्टि: स्निग्धा प्रफुल्ला च सुस्थितामलतारका । ऊर्द्धपक्ष्म प्रसन्नस्य वारणस्य विलोक्यते । उदग्रतारको नाम्ना सान्ना पार्श्वविसर्पिणी । विलम्बाचलपक्ष्मा तु कुपिताऽनेकपस्य दृक् । सर्वाक्षलक्षणेभ्योऽपि चक्षुर्लक्षणमुत्तमम् । इत्येवं लक्षणज्ञानां पूर्वेषामनुशासनम् । प्रयत्नतेन हिरदे लक्षणेभ्यधि प्रयुज्यते" मतङ्गादिलक्षणन्तु प्रायेण वार्क्षसलोक्तलक्षणसमानित्वतस्तदुक्तं यत्र विशेषस्तदुच्यते । "एकरूपप्रजातानि स्निग्धानि च मृदूनि च । रोमाण्यीदानि रोमज्ञास्तु मेचको दक्षिणाङ्गज: । वामाङ्गलक्ष्यैव रोमाणि दक्षिणे यस्य कथितानि विचिन्तानि स पूज्यो वारणोत्तमे ।"

करिणो वामनत्वादौ कारणान्तरं तत्फलञ्चोक्तं तत्रैव "वायुकाशगुणाधिक्यदुधिवीगुणक्षयत्वतात् । जायते किल मातङ्ग: कुब्जो वा वामनोऽपि च । अतो भूतगुणोऽन्योन्यमधिकेति मातङ्ग: । तैर्गुणै र्जायते खर्वो दन्तीति मुनयो विदु:। क्षीणाङ्गोङ्गाधिकारी स्याद्धिकाङ्गोऽधिकं हरेत् । राङ्गहितौ भवेतान्तु खङ्गकुब्जाविति स्थिति:। आबाधानाङ्गसंयुक्तो क्षुद्राकारो हि वामन: । नतोन्नतरदिनाशो महास्थिसदृशोऽपि च । अस्थिस्नेतौ च क्ष्णौ च दन्तौ यस्यान्वितौ करम् । स मातङ्गित्वा राजानं हत्वा बाधयायते । क्षुद्रमेढ्रकुलिङ्गर: श्रोत्रास्थिस्नेतरोमयुक् कपिकौशिककाकाक्षिनकुलप्रख्यलोचन: । कालाघक्ष्णनेत्रश्च तन्नामनफलस्तथा । वल्या समानविषय: प्रलम्बपृथुपेचक: । मण्डूकाभश्चिपिट च सान्नासाग्रश्च नोऽपि च । परिमण्डल कर्णश्च स्फटभ्रूश्च शिवभ्रुव: । प्रौढोन्नताक्षिकूटाद्य: कल्पिताक्षकृत्रिमेक्षण:' व्याख्यातमन्यत्र निर्देशो दन्तिदूषक: । सबली यस्य सदाभौ प्रौढौ चापि समाचितौ । विपुले यावतस्थूले सर्वत्र तनुराविला । अधोवक्त्राणि रोमाणि

रूनू च क्षयरोगिणे। सुउच्चाङ्गुलयः पादा दिग्वद्दूरमपि विस्तृतः। आस्यौष्ठतालुरसना: काल कल्माषकालयः। कर्णौ कपोलौ चिबुकौ नासा च वर्णेन बाधिः। कराभिघ्रेष्वासक्तौ मानोन्नाङ्गुलिपुष्करौ। स्थूले च पद्मपर्णाभे नेत्रप्रभे दुष्प्रेक्षणे तथा। दुर्बलानि तथाङ्गानि बलीमुखनिभं मुखम्। रेणुद्विरेफानुरूपा मलिकाभिश्चितानतिः। अरलिमानौ दन्तौ च शुष्कावक्षनिगूहितौ। कर्णौ च कठिने यस्य नीलगोपकविद्युति। विवर्णं कठिनं रूक्षं भिन्नभिन्नतनुरुहम्। नपुंसकस्य मातङ्गो न दूरे त्यागमर्हति। मक्षिकारागभावेन यत्तत्सुवर्णरोपमा। स पूतनोऽग्निभयदो यूथहा परिवर्जितः। तिर्यक्प्रेक्षी वाधःप्रेक्षी दुर्गन्धमदसंयुतः। कालपिङ्गोदरोनेष्टो मातङ्गः स्यात् मतङ्गजः। पुष्करे लवणमध्ये च वामकुक्षे मतङ्गजः। किलासैराहतः स्याच्च तद्दृष्टे दुर्नयं दिशेत्। पश्चात्सम्मुखितावापोन्नित्यशोणितलोचनः। बाहित्यसंज्ञिप्तसक्थोनिबद्धाक्षो मतङ्गजः। नूनं विगतविषण्णे दन्तौ यस्य प्रधावतः। अतिमात्रौ न वै ख्यातां नागोनागसमस्तु सः। क्षीणातिरिक्तदशनो यस्य वै तस्य ह्रत्सुदः" इत्यवयवदोषाः।

"अथ वर्त्मलतावर्त्ताः पुष्पपाशाभा रोमतिः। वलं सत्वमनूकस्य गन्धोबोधितमङ्कितम्। स्याद्भूतगुणवैशेष्याद् वर्णवैशेष्यमेव हि। वातादिभ्योऽपि दोषेभ्योवर्णवैशेष्यमिष्यते। रौक्ष्यं परातिरेकेण सर्वं वातस्य वैभवेत्। सोष्णता शोणितात्. पित्तात् रौद्रता, सौम्यतेन्दुजा" इत्युपक्रम्य "कफो गर्भशयानस्य स्निग्धतां प्रतिपद्यते। पित्तं गर्भशयानस्य सभ्यत्वं प्रतिपद्यते। तत्करी कथितः कालस्तथैव स्निग्धदर्शनं। पित्तं कफश्च युगपद् वेविष्टि तु ततस्ततः। श्यामवर्णोऽपि मातङ्गो जायते स्निग्धएव वै। गर्भे च मांसरुधिते कफरक्ते वटा स्थिते। चिरं गर्भशयानस्य हरिस्निग्धस्ततोऽथसौ। रक्तपित्तकफानाञ्च सङ्करत्वगतो तथा। हरितारुणपीताद्या नानावर्णा भवन्ति हि। सर्वत्वानुगतेनैव शीलनाद्रूक्षता भवेत्। पारुष्य धूसरत्वं च स्निग्धत्वं भवेत्तथा। क्वचिद्दृष्टविभेदाच्च पूर्वसम्भवकारणात्। अरुक्षलक्षचारात्च पित्तबीजवशात्तथा। तत्रापि श्वेतवर्णाश्च शुकपर्हिसन्निभः। शुद्धहेमरुचस्तेभाः सुरेषु प्राचि च क्वचित्। श्यामान्ता हरयः कृष्णाः श्यामाश्च करिणः स्मृताः। हरिमेघसवर्णश्च कृष्णाच्चानलसन्निभः। न कालो न हरिनीलोमश्यामः श्याम दृश्यते। एतेषु त्रिषु वर्णेषु हरिवर्णो वरोमतः" । इति वर्णभेदकारणादिनिरूपणम्।

"आवर्त्ताः षड्विधश्चैव त्वग्लोमदशनभङ्गजः। कोषजः पद्मजातश्च बालजो रोमजोऽपि च। कोषरोमभवौ यस्यौ दलकल्पनजः शुभः। शोकानर्थप्रदाः प्रोक्ताश्चत्वारजपद्मजबालजाः। भूमिदोरोमजावर्त्तः कोषावर्त्तोऽजयप्रदः। दशनसम्भवावर्त्तः सुतदारप्रदस्तथा। कथितः पद्मजावर्त्तोऽतिजातभयप्रदः। प्रणतह्रालजावर्त्तः सामन्ता रोमसम्भवः। प्रशस्तोदक्षिणावर्त्तौवामावर्त्तौ विगर्हितः। मतो व्यक्तो बहुस्निग्धः सवर्णः पोतरोमजः। वामाङ्गे दक्षिणावर्त्तौवामावर्त्तश्च दक्षिणे। आवर्त्तः सम्मतोऽभीष्टो द्विजराजसमप्रभः। शुभोऽप्यक्षेत्रजातोऽसौ शुभं नैव प्रयच्छति। अशुभक्षेत्रजातस्य नात्यिष्टफलदः शुभः। अक्षयक्षे पक्षतले स्तनयोरन्तरे तथा। शीर्षाया मस्तिकूटोर्द्धं कुक्ष्मयोरन्तरे तथा। उत्पले दलवेष्टे च कर्णमध्ये च वक्षसि। आवर्त्ता वारणानां हि सुनिश्चेया. शुभप्रदाः। स्तनान्तरे शिरोमध्ये कक्षान्तरूलिकान्तरे। वक्षस्यावर्त्तसम्पन्नः कुञ्जरः पद्मभङ्गजः। शीर्षावर्त्तोऽभिषेकाय स्तनावर्त्तोजयाय च। सुखाय चूलिकावर्त्तः कुम्भोरोरोमजः स्त्रिये। बंधे प्रौढ्येऽथ बाहित्थे मन्याया सगडे कटे। कर्णेऽक्षिकूटे नाभौ च कक्षपक्ष्मांसकूल्लिषु। बालधौ मेचके मेढ्रे रम्भ्वस्त्रिकलासु च। आवर्त्ता न प्रशस्यन्ते कर्णभागगताश्च ये। कोणप्रमाणलघवोमर्मपर्वप्रदेशगाः। अशुभक्षेत्रजाताश्च सकिलासान्तरोत्थिता। मनोनेत्राभिरामो हि सुरूक्षोगदितो महान्। जङ्घाप्रवृत्तोर्द्धगश्च रोमजोऽधजयावहः। मर्मभागेषु नागस्य निष्टाक्षे रोमजाटवः। समभागगतावर्त्ताः सर्वतः सुखदा मताः"। इत्यावर्त्तः।

"स्वस्तिकादिसुसंस्थानं पुष्पं दर्शनदेहजम्। स्निग्धं भवेत् शुभच्छायमच्छिन्नं वाञ्छितप्रदम्। कबन्धादिकसंस्थानं विषतन्तुसमं स्फुटम्। रूक्षं क्षणञ्च कुसुमं तानार्थकसंज्ञकम्। दद्यात् सुतं स्थितं पुष्पं स्निग्धपीतञ्च हेमदम्। नीलोत्पलाभं शीताग्रं स्निग्धकालञ्च वृत्तिदम्। यदि स्यात् पूजिते भागे कुसुमं स्निग्धपाण्डुरम्। सरघायसमाकारं तद्भनेद्भूमुजः शुभम्। शक्रचापनिभं पुष्पं दन्तोपरि च दन्तिनः। दिशेद्दिष्टं सुमित्रं च क्षेमं च क्षितिरक्षिणः। स्तनान्तः स्निग्धरूक्षे च पुष्पे नाग समे तथा। पुष्पे श्रीवान्तःकाले च स्त्रानिहर्द्धिं विनिर्दिशेत्। श्रीवृक्षादिनिभाकारे वैजयन्तीध्वजोपमे। शैलप्रा-

वादवद्दये ऋतचामरवीचिभिः । सोमच्छत्र्यसमाभासे त्रिविधोत्थानमूर्त्तिभिः । दिष्टे शुभाय नृपतेर्निन्द्यमहिषवाजाति । चक्रव्यादनिभाकारं रणापसरकारणम् । धूमाभं पुष्पमिच्छन्ति सत्यवेऽग्निभयाय च । कृष्णं पुष्पं तथा नेष्टं हिंस्रोद्योगविवर्द्धनम्" । इति पुष्पम्

"भूक्षाम्नाभ्यु मरुच्छाता भवेच्छाया विजाणिनाम् । यक्षा भूजलवक्त्रुत्या न यक्षा खानिलोद्भवा । छायायाः सम्भवः पूर्वं, परतः परितः प्रभा । छायायाः सम्भवः पूर्वं प्रभा तत्परमश्नुते । वर्णमालम्बिता च्छाया प्रभा वर्णस्य नाश्रयः । सत्यपापि तु नामानां पापानि च शुभानि च । छायावयात् फलन्त्येव छाया तेनातिलक्षणम् । यस्य स्याद्भक्षणं भद्रं छाया भद्रा भवेत्तु । न चासौ शुभदोऽक्षो छायोपहतलक्षणः । पापलक्षणयुक्तोऽपि शुभच्छायायुतो भजः । फलं लक्षणजं हित्वा छायाफलमवाप्नुयात् । नीराजनेऽभिषेके च ध्वजोच्छ्राये रणोदये । तेषु तेषु च कालेषु भवेच्छाया च शोभना । वस्त्रेषु प्रतिमानेऽसौ कुम्भे कर्णे कटेषु च । निर्याणे मस्तकस्थाने वेदयोश्च क्षयोदयोः । पिण्डिकाजघनाभोगे तेषु तेषु प्रदेशेषु च । प्रदेशेषु प्रधानेषु छायाया वीक्षणं भवेत् । प्रशस्ता पार्थिवी छाया वह्निजा जलजापि च । नेष्यते व्योमजा छाया मातरिश्वभवापि च । पार्थिवी स्निग्धगम्भीरा सर्ववर्णे विभाव्यते । छाया छायां च रक्ता च स्निग्धा जाम्बूनदाग्निजा । छाया नीलाम्बुदाभासा स्निग्धा सलिलसम्भवा । अव्यक्तरूपा तस्करछाया गगनजा मता । धूम्रा रूक्षा च वायव्या भस्माभा निष्प्रभा तथा । एताश्छायाः रौद्रीक्ष्याः स्युर्मारके राजपूजिते । नीलाम्बुजेन्द्रनीलाभा नीलाञ्जननिभाऽपि च । काम्यक्षा पार्थिवी छाया सुभिक्षक्षेमकारिणी । बालार्कपद्मकिञ्जल्कशुकगोपकसन्निभा । ज्वालाभा तप्तहेमाभा वह्निजा विजयप्रदा । छायाश्चयो पयःशङ्खकुन्दरूप्यनिभद्युतिः । सौम्याख्यया प्रतीता च भक्तुरर्थप्रदा सदा । जलबुद्बुदसङ्काशा रूक्षद्युतिरतिस्थिरा । निन्द्या च व्योमजा छायानिर्योद्वेगकरी मता । सर्ववर्णैरुपेताऽपि निष्प्रभा भस्मसन्निभा । विच्छिन्ना विकृता छाया वायवी वा भयावहा । वैरिञ्ची वैष्णवी रौद्री छाया माहेश्वरी तथा । कौमारी राक्षसी सार्पी गान्धर्वी च तथाऽऽसुरी । पैशाची चेति याश्छाया श्छायाद्याः क्वचित् शुभाः । भूतोत्थलक्षणे तासां भेदोनेह तु कीर्त्तितः । तेजोऽतिरिक्ता भद्रस्य पाटला भवति प्रभा । छाया रक्तकणा रूक्षपक्षणनिभाऽपि वा । कृष्णा च मन्दकरिणश्छाया तु भृगकृष्णिनः । मलिनाम्बरधस्रेव गोर्वाणायुधदर्शना" इति छाया ।

"कृत्तिनां विविधा ध्वानाश्छिद्रेभ्यः करतोऽपि च । भवन्ति वायुयुक्तेन गात्राणां वेष्टनेन च । प्रयाणेऽभिषिक्तेषु ध्वजे जातिकृतेषु च । नागेषु दृंहितं यात्रां भक्तस्तब्धे न जातिषु । कृषितोऽत्यस्तनिद्रान्नकृषितो दृंहति क्वचित् । यदि दन्ती शुभे देशे समये च वसुप्रदः । दर्शयेद्दृंहितं भद्रं तत्फलं स्फीतमादिशेत् । सरोवरे तथाऽऽरामे गोष्ठे विबुधवेश्मनि । निकुञ्जे हृद्यदेशे हि विज्ञेयः शुभदो ध्वनिः । यात्रायामभिषेके च यज्ञादिसमये तथा । समवे चैव पुण्ये च दृंहितं ख्यातिप्रदम् । अक्षादिकाष्ठ स्त्रीकदुष्टस्थाने भयप्रदः । श्मशाने च प्रधूमे च प्रतिस्रोतोदिनेषु च अतियोतेऽतिघर्मे च प्रभाते चाशुभोरवः । मूतले न्यस्तहस्तो हि पर्यश्रुनयनोनागः । कुजनृ निर्व्यथनं कुर्यात् यदि वा मस्तकेश्वरः । करेण दृंहितोनागो दुश्चित्तान्युपरिस्तृतः । व्याधिशस्त्रान्निपातोनाशमथ वा पृथनापतेः । व्यायतश्चमरुत्क्षस्य साक्षाधोगतचक्षुषः । जघने वामतो बालं तथा निक्षिपतोऽक्षतम् । (बलं बालधिम्) । निर्भीदतो लक्ष्यतो रूक्षरोमणोविमूर्च्छतः । वामे निक्षिप्य गण्डूषं दृंहितं स्यादनर्घतम् । क्षेयः स्रवति नागानां धमतां यदि शोणितम् । (क्षेयः क्षिद्रेभ्यः)तथा मन्यान्तदेशे च प्राणिनां क्षयमादिशेत् । यद्याग्नेयीसुखोभूत्वा प्राच्यां वाऽर्कोदयं प्रति । दन्ती तीक्ष्णरवं कुर्याच्चदा स्यात् पावकाद्भयम् । करेण यदि मातङ्गो दृंहमाणस्तनं स्पृशेत् । आलाने बध्यमानस्तु संयुति क्षयमादिशेत् । (संयुति युद्धे) । आलाने बध्यमानस्तु गीत्कुर्वन् कुरुते ध्वनिम् । गात्रं प्रक्षोलयन्नागस्तत: प्रस्थानमादिशेत् । क्षिप्रा करं विषाणस्थं विषमं कुजते यदि । निरीक्षमाणो गगनं हतां हस्तिवदाहरेत् । यदाभ्युन्नतवक्त्रोच्च स्तनस्थानञ्च जिघ्रतः । तथा कुत्सितहस्तेन स्वं गात्रं च जिघ्रतः । कर्णतो दक्षिणं हस्तं यमैर्निक्षिपतोऽपि यत् । दृंहितं स्यान्नदिष्टञ्च तथाऽन्योन्यकरस्थयोः । स्फोटयित्वा शुभवस्तूनि कुसुमादीनि चेद् द्विपः । कुर्याच्छब्दं शुभं तेन फलं शुभतरं भवेत् । उच्चैरभिमुखः प्राप्तो यदा नदति वारणः । चक्षुस्तमध्यमानेन तदा तत्र जयो ध्रुवः । सुखेन मण्डूकरवान् कल्याणीयां दुन्दुभिध्वनिम् । करेण मुरजारावान् कुर्वन् कल्याणकारकः । कलगादिसमाकृष्ट

विकटाल समाः स्मृताः"। इति ध्वनिः। गतिवशे तु प्राग्वृत्ते एवात्र प्रायेण दर्शिते नातस्ते अत्रोदाहृते।

"सत्वं त्रिविधमिच्छन्ति श्रेष्ठमध्याधमैर्गुणैः। सात्विकं राजसं चापि तामसञ्च विचक्षणाः। एषामपि गुणानान्तु या वक्ष्यन्ते न कीर्त्तिताः। सत्वस्योक्तागुणा धैर्य्यं बुद्धिर्धैर्य्यं क्षमर्द्धता। रजसोये गुणाश्चेष्टा च क्रोधोत्साहा वपि क्वचित्। गुणाश्च तमसस्तन्द्रातमोमोहप्रमादिताः। क्लीमन्तः कान्तियुक्ताश्च प्राज्ञाश्च चिरजीविनः। क्रियालोपसहाः श्रान्ताः सात्विकाः सामसम्मताः। गिध्याश्च मध्यसाध्याश्च कीर्त्तितानिर्भयाः क्वचित्। क्रियायोगसहाः किञ्चिद्राजसा मध्यमायुषः। तामसा दुःखिता मूढा विरूपा लघुजीविताः। युक्तोऽभ्यन्यगुणैः सर्वैर्भुनक्ति सात्विकैर्गुणैः। श्रेयोगुणः स समरे तथाऽभ्येति मतङ्गजः। एषां वागीयनिर्दिष्टा विषयापेक्षया स्थितिः। भद्रे सन्निहितं सत्वं, रजोमन्द्रे, तमो मृगे। देवगन्धर्वयक्षाणां पन्नगासुररक्षसाम्। पिशाचानां कपीनां तृणं वेद्यं नागस्य चेष्टितम्"। इति सत्वम्।

"यत् पूर्व्वसम्भवं स्पष्टं सत्वं रूपं गतिः स्वरः। तस्मात्तत्करणात् युक्तमनूक्तमिति कोविदाः। सत्वरूपजवारावैः शुभानुकारिता शुभा। देवर्षिगणगन्धर्वनागानुकाराः शुभामताः। एवमेव च दुष्टानुकृतोदुष्टा प्रकीर्त्तिताः। दैत्यरक्षःपिशाचानामनूक्तं परिवर्ज्जितम्। दर्पसिंहतरक्षादि समानुकामता द्विपाः। नेष्टाः खरटस्पर्शादिसमानाकृतियोगिनः"। अनूक्तम्।

"आस्यान्निकुम्भकर्णेषु मदनिश्वासवायुषु। गण्डमधुसूत्रेषु गन्धं सप्तपलक्षयेत्। दृष्टगन्धान्विजेनेत वारणान् धरणीपतिः। दुष्टगन्धान् सदा भूपोबलतः परिवर्ज्जयेत्। सर्षिमेधुसुराक्षाजदधिक्षीरानुकारकः। आस्यस्रोतोरन्ध्रदिरापद्मकाद्यादिसन्निभः। मालतीकेतकीजातीचन्द्रमाधिकसौरभः। सुरसालफलामोदगन्धोनागस्य सम्मतः। अस्रङ्मूत्रपुरीषपूतिसवाकृष्णपङ्कयितः। पत्तिनोड्पलाण्डुदिसप्तपत्तिम्बविनिर्म्मितः। खरोष्ट्रशूकरसमः शुनमानधूमसन्निभः। मोनमत्कुणतुल्यश्च गन्धोनागस्य दुःखदः"। इति गन्धः।

"पञ्चधा विदितं स्याच्च वित्तेयं सामजन्मनाम्। अत्यर्थोत्तानगम्भीरप्रत्यर्थाग्यर्थभेदतः। वस्तुद्वातादुद्विजते दूरादंसादि संस्पृशेत्। अत्यर्थं सङ्कुचेत् स्पृष्टः स गजोऽत्यर्थवेदिता। योऽपि त्वक्स्पर्शमात्रेण रोमस्पर्शवशेन वा। विद्याद्दृष्ट्वाङ्कुशादींश्च स ह्यादृष्टानवेदिता। त्वग्भेदात् शोणितस्रावात् तीव्रप्रत्यग्यनादपि। अङ्कुशादीन् विजानाति स हि गम्भीरवेदिता। यत्नैर्हतोऽभयं वेत्ति यत्नैर्वेत्ति भयाहतः। विपरीतमतिर्नागो ज्ञेयः प्रत्यर्थवेदिता। प्रत्येति वार्य्यमाणो यो निग्रहीतश्च गच्छति। प्रतिलोमायते संज्ञां सोऽपि प्रत्यर्थवेदिता। यत्नैर्हतः यत्नैर्वेत्ति भयं वेत्ति भयाहतः। प्रत्येति प्रतिषिद्धश्च लोद्यमानश्च गच्छति। यथासंज्ञं विदध्याच्च सर्वकर्माणि योऽङ्कुशम्। अन्वर्थवेदिनं प्राज्ञोजानीयात्तं शुभं गजम्" इति विदितम्।

"मतङ्गजे क्षितं वक्ष्ये शृणु तदवधानतः। शुभलक्षानञ्च येन स्यात् यात्रादिसमये नृप!। अनुयात्रं गतोऽन्यात् किञ्चिद्रूपं यदि द्विपः। तज्जयः, प्रतियात्रं तु रूपाहत्या पराजयः। दृष्ट्वा रिपूनभिसृत्यान् वार्य्यमाणोऽपि चेद्गजः। व्रजेत्तद्विजयोनूनं यदि वा प्राप्नुयान् वधे। दक्षिणेनाग्रपादेन क्षितिसृत्पाटयेद्यदि। उत्तोलयेद्वामपादं तदा जयसृदीरयेत्। करेण वामपक्षेण यदा पृथ्वीं प्रमार्जयेत्। सिञ्चत्यनेन कर्णौ च तदा सौख्यं समादिशेत्। मेढ्रकं कुटिलं कृत्वा करं जिघ्रति चेत् द्विपः। प्रहृष्टहृदयाङ्गस्य तदाभ्युदयमादिशेत्। दक्षिणं तु यदा दन्तं दन्ती प्रसृदितेन्द्रियः। परिघृजति हस्तेन तदा स्यात् प्रियसङ्गमः। तथैव गलसन्धिञ्च पक्करेण परामृशन्। श्रीयोगसूपयातं तु वारणोविनिवेदयेत्। सङ्कोच्य दक्षिणं पादं वामपादेन वा भुवम्। विलिखेद्वारणः खिन्नस्तद्वर्त्तुः स्यात् पराजयः। यदा तु दुर्मनादन्तं वामं हस्तेन बोधयेत्। तदात्मनोवदेच्छायं यातुर्वाथ निषादिनः। करेण वामगात्रं च खिन्नगात्रः प्रमार्ष्टि चेत्। तदानिष्टं भवेद्भर्त्तुरन्यथा च शुभं भवेत्। व्यथमानः पतेत् तस्तः कलबन्धे यदा द्विपः। नाभिनन्देच्च भाण्डादि तदा परिभवो भवेत्। अकस्मादेव कुप्यन्ति भ्रमन्ति च पतन्ति च। करिणो यदि तद्विद्यात् विप्रकृष्टं सुसंस्थितम्। यदा पश्यति मातङ्गोविद्विश्च पराजयम्। प्रवासं परराष्ट्रं वा तदा भवति दुर्मनाः। अदंशत्रणपीड़ायां करेण परिवीजनात्। गण्डूषदेशनिक्षेपात् सन्ध्यालम्बसुपसर्पणात्। अकस्माच्च स्खलद्गत्वा धरण्यां प्रणिपातनात्। जलप्रतारवैसुख्यादङ्गितभङ्गसेवनात्। स्तब्धकर्णतया गत्वा पादाग्रवेधनादपि। द्रुतदङ्गादिपीडोत्पादकत्वाच्चकरः करी। आत्तपक्षोजलोत्तीर्णोरिपूणां वधं वदेत्" इङ्गितम्।

"जायते द्विविधः कोपः संज्ञासंज्ञ विधाधिनाम्।

शिष्यक्रोधोऽल्पभेदः स्यादनिष्टोऽशिष्यरोषवत्। यः क्रुध्यति चिरेणैव लघुक्रोधोऽभवेदपि। वाग्दण्डमात्रवर्त्ती च प्रतिषिद्धो न हन्यति। अनुशास्यति रोषाच्च स शिष्यक्रोधसंज्ञितः। दृश्यते सर्व्वकार्य्येषु शुभजातिर्मतङ्गजः। यः क्रुध्यत्यचिरेणैव भृशक्रोधी भवेदपि। प्रतिषिद्धश्च वाग्दण्डतीक्ष्णप्रजनकाङ्कुशैः। हन्यात्तेन चिरेणापि रोषाद्विरतिमेति च। अशिष्यक्रोधसंज्ञोऽसौ विज्ञेयो वारणाधमः" इति कोपः। विस्तरस्तु पालकाव्यादौ द्रष्टव्यः।

दुभकर्णा स्त्री० दुभोपपदा कर्णा यस्याः क० त०। गजपिप्पल्याम्।

दुभकेश्वर पु० दुभमद इव केशरोऽस्य। नागकेसरे "भल्लातकात्मगुप्तेभकेसरागुरुचन्दनैः" सुश्रु०।

दुभगन्धा स्त्री दुभस्य गन्ध एकदेशोद्भव इव पुष्पमस्याः"। नागदन्त्याम् सा च स्थावरविषभेदः यथा सुश्रुते "मूलं पत्रं फलं पुष्पं त्वक्क्षीरं सारएव च। निर्य्यासोधातवश्चैव कन्दश्च दशमः स्मृतः" इत्युपक्रम्य "कृष्णहरेणुकारक्तभल्लातकरक्तकर्कोटकरेणुकखद्योतकवर्च्चलीभगन्धा सर्पघातिनन्दनसारपाकादीनि द्वादश फलविषाणि" इति विभज्य "शुष्कश्लेष्मः फलविषदोषोऽसह्येष एव चेति" तद्विकारो दर्शितः।

दुभद्न्ता स्त्री दुभस्य दन्तइव शुभ्रं पुष्पमस्याः। गजदन्त शुभ्रपुष्पवत्यां १नागदन्त्याम्, सा च स्थावरफलविषा।

दुभनिमीलिका स्त्री दुभं कृष्णिनमपि निमीलयति शैवनात् निह्नापयति। १भल्लातायाम्। दुभस्येव निमीलिका। २नैद्रमद्र्याम्

दुभपालक पु० दुभं पालयति। (माङ्गत) कृष्णिपके।

दुभपोटा स्त्री पोटा पुंल्लक्षणा दुभी परनिपात पुंवद्भावश्च। पुंगजलक्षणयुक्तायां कृष्णिन्याम्।

दुभभर पु०६त०। गजसमूहे [सिंहे।

दुभमाचल पु० दुभमाचलयति आ+चल-णिच्-घा०क।

दुभया स्त्री दुर्भयायते भक्षतया प्राप्यते या-कर्म्मणि यक्प्रत्ये ड त०। स्वर्णकीरीटछत्ते रत्नमाला दुभयेति वा पाठः।

दुभयुवति स्त्री युवतिरिभी पूर्वनि० पुंवद्भावश्च। युवत्यां कृष्णिन्याम् वा ङीप्।

दुभाख्य पु० दुभस्याख्याख्या यस्य। नागकेसरे तिका०।

दुभानन पु० दुभस्याननमेवाननं यस्य। गजास्ये गणेशे तस्य यथा तदाननत्वं तथोक्तं "स्वयं गोलकनाथस्य पुण्यवस्य प्रभावतः। पार्व्वतीगर्भजातस्य तव पुत्रो भविष्यति। स्वयं देवगणाश्चास्य यज्ञादीयः जपादिषुः। गणेश इति विख्यातो भविष्यति जगत्त्रये। 'अनिष्टघ्ना शिरश्छेदात् गजवक्त्रेण योजितः। गजाननः शिशुस्तेन नियतिः क्षेम बाध्यते" ब्रह्मवै० ए० ६अ०। अनिष्टघ्ना तच्छिरश्छेदकथा तत्रैव १२अ०। "पार्व्वतीवचनं श्रुत्वा शोऽनुमेने हृदा स्वयम्। पश्यामि किं न पश्यामि पार्व्वतीसुतमित्यहो। यदि वलो मया दृष्टस्तस्य विघ्नो भवेद्ध्रुवम्। अन्यथा मे प्रलापस्तत्परतः स्यात्तरणम्। इत्यालोच्य च धर्म्मिष्ठो धर्म्मं ज्ञात्वा सनातनम्। बालं दृष्ट्वा मनश्चक्रे न बालमातरं मुनिः। विस्मयमानसः पूर्वं शुष्ककण्ठोष्ठतालुकः। सव्यलोचनकोणेन ददर्श च शिशोर्मुखम्। अनिच्छ दृष्टिमात्रेण चिच्छेद मस्तकं मुने!। चक्षुर्निवारयामास तस्यौ गजाननः मुनिः" एवं शिरश्छेदकथा। "तान् सर्व्वान् मूर्च्छितान् दृष्ट्वा चारुह्य गरुडं हरिः। जगाम पुष्पभद्रां च उत्तरस्यां दिशि स्थिताम्। पुष्पभद्रानदीतीरे ददर्श कानने स्थितम्। गजेन्द्रं निद्रितं तत्र यथानं कृष्णिनीयुतम्। दिक्षुत्तरस्यां शिरसं मूर्च्छितं सुरतश्रमात्। परितः शावकान् त्यक्त्वा परमानन्दमानसम्। शीघ्रं सुदर्शनेनैव चिच्छेद तच्छिरो हरिः। स्थापयामास गरुडे रुचिराङ्गं मनोहरम्"। गजशिरश्छेदकथा तत्पत्न्या स्तुतेन हरिणा तस्य कल्पान्तजीवनं वरोदत्त इत्युपवर्ण्य। "आगत्य बालकस्थानं बालं ज्ञात्वाऽथ वक्षसि। रुचिरं तच्छिरः त्यक्त्वा योजयामास बालके। ब्रह्मस्वरूपो भगवान् ब्रह्मज्ञानेन लीलया। जीवनं योजयामास हुङ्कारोच्चारणेन च। पार्व्वतीं बोधयित्वा तु दत्त्वा क्रोडे च तं शिशुम्। बोधयामास तां नाथ आध्यात्मिकविबोधनैः" "शैलाचरीभवद्विघ्ननदानवारिवासेन यस्य जनितासुरभीरवश्रीः" नैष०। दुभवक्त्रेभस्य गजाननादयोऽत्र। "तं नमामि गजाननम्" माधवः।

दुभारि पु० ६त०। सिंहे दुभारिलादयोऽत्र। [यत्रच०।

दुभोषणा स्त्री दुभोपपदा उषणा यस्याः क० त०। गजपिप्पल्याम्

दुभ्य त्रि० दुभं गजमर्हति दण्डा० यत्। १प्रचुरगजादिधनाढ्ये २गजे ३कृष्णिपके च पु०। "उशन्तिके चाक्रायण्य दुभ्यायणे प्रद्राणक उवास" छा०उ० तस्य भाष्ये दुभो हस्ती तमर्हतीतीभ्य रैभ्यरोहणवारोहोवेति। "जानिः शिल्पिनां भ्रातेव स्वजातिभ्यश्च राजा वक्ष्यति" क०१, ६५, ४, स्वार्थे कन्। दुभ्यकस्तत्रैव स्त्रियान्तु टाबि वा अत इत्वम् दुभ्यका-दुभिका। दुभाढ्यायां स्त्रियाम्।

दुभ्यतिस्त्रिल त्रि० दुभ्यस्त्रिलिङ्गः पृषो० इत्वम्। गजादिभिः प्रचुरे आढ्ये। "यदि प्रतीचीयादिभ्यतिस्त्रिल इव धान्यति-

स्थितो भविष्यतीति विद्यात्" शत०ब्रा० ४,५,८,११।

दूष्या स्त्री दूषमर्हति सेध्यत्वेन दण्डा० यत्। १कस्तिन्यां २यज्ञकीलके च मेदि०।

दृंहथा अव्य० दृहमु–प्रकारार्थे–थाल् "प्रत्नपूर्व्वविश्वेमात् थाल् छन्दसि" पा० सू० निर्देशात् नि० इमादेशः। दृढानीत्यर्थे। "तं प्रत्नथा पूर्व्वथा विश्वेमथा दृंह ओहते" ऋ० ५,४४,८। "प्रत्नथा पुरातनयजमाना इव पूर्व्वथाकादीया पूर्व्वे यथा। विश्वथा विश्वे सर्वे प्राचिनो यथा। इमथा इदानीं वर्त्तमाना यजमाना दृंह" भा० "दृंहक्" यजु०७अ०१च पठिता।

दृंहयन्तु नि० यज+सन उ वेदे नि संप्रसारणम्। यष्टुमिच्छौ "धन्वन्निव प्रपा असि त्वमग्न इयक्षवे" ऋ०१०,४,१, वेदे प्रायेण सर्वत्र नि० संप्रसा०। "सुन्वं वां स्तरिर्हविषा-वियक्षन्" १,१५२,२, देवानां इयक्षतो यजमान इयक्षति" ऋ०८, २१,११५,

दृंहयत् नि० दृढं परिमाणमस्य दृढम्–वतुप्। एतावदर्थे "नीतं यदि नवनीतं किमिदिति यशोदया पृष्टः। इदमिति गुरुजनसविधे विष्टब्धमिदापयोधरः पायात्" उद्भटः। "इयान् वाव किल पशुर्यावती वया" ऐत०"इयन्ति वर्षाणि तथा मयोपम्" रघुः"इति निश्चितमिति विश्वमिवता मन्यामहे दुःस्थितम्" सा०द०। अत्र साधनप्रकारः दृढम्+परिमाणार्थे वतुप् वस्य मः दृढम दृढ् "यस्येति" पा०प्रक्रतेोकारलोपे लघूपधगालक्षितिः। अतएवात्र वैयाकरणा औपसिदाद्य पठन्ति। "उदितवति परस्मिन् प्रत्यये मान्तयोनौ नतवति विहायसु प्राक्तनेऽपि नपुंसके। रूपदि यदमुदीतं वेदसं प्रत्ययोक्तं तदियदिति निर्मीते कोविदा पण्डितोऽपि"। स्त्रियां ङीप।

दृंहयत्तका स्त्री कुत्सिता दृंहयत्ता कुत्सितार्थे कन् ह्रस्वः। कुत्सितेयत्तायाम्। ततः अर्थ आ० अल्पार्थे अच्। कुत्सितेयत्तायुते अल्पप्रमाणे "दृंहयत्तक कुणुष्वकलकं भिनद्म्यहम्" ऋ०१,१६१,१५,

दृंहयत्ता स्त्री दृंहतो भावः तल्। १सीमायां, २परिमाणे, ३संख्यायाञ्च। "न सुखानामियत्तया" "यथः परिच्छेत्तुमियत्तया क्षमम्" "ईं कृतया रूपमियत्तया वा" इति च रघुः।

दृंहयस् नि० इ–कर्त्तरि असुन् किच्च। १गन्तरि भावे असुन्। २मतौ "तेषां दृंहयसेवास्ति किमिह कर्त्तव्यम्" शत०ब्रा०२, २,२,२,

दृ–दृर्यायां जक्षु०यङ् उभ०। दर्यति दर्यते।

दृरज्–दृर्यायां जक्षु०यङ् प०। दरज्जति। "दरज्जन्ये प्रथयस्व जन्तभिरज्रे रायः" ऋ०१०,१४०,४। "दरज्जन्त वज्रुधोविवाचि" ऋ०७,२२,२, वदेमाग्निं जगताभिरज्रम्" ऋ०१०,७५,२। "युवं विप्रस्य मन्मनामिरज्रथः" ऋ०१,१५१,६।

दृरण नि० दृरिण+पृ०। अमरभूमौ अमरटीका रमा०।

दृरभृद् पु०दृरया जवेन अश्वेन वा भाद्यति वहते दृरा–भृद–क्विप् नि० ह्रस्वः सुम् च। १वज्राग्नौ २वाडवाग्नौ च। "दृरभृदं हृदुक्थं यदस्ते" यजु०११,७४।

"दृरया अश्वेन भाद्यति उपं पश्चेत्यादि" पा०नि०"वेददी०। "हृदते हवारूपे इत्येतद्दिरभृदमितीरया ह्रस्वे मन्तः" शत०ब्रा०६,६,२,४।

दृरस् दरज्वस् जक्षु०दरसति "आलपूषसाश्च दरसः" ऋ०७,४०,६। "यका दरससीदम्" ऋ०१०,८६,२।

दृरा स्त्री दृ–रक् दृं कामं राति रा–क वा। १भूमौ, २वाचि, ३सुरायाम्, ४जले, ५अश्वे च। "दृरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवी रेतसावति" ऋ० ५,८८, १। "दृरामक्षा ओदनं पिन्वमानाः" शत०ब्रा०६,६,२,१। ह्रैकस्यस्य पत्नीभेदे। "वर्णपत्यः समाख्याताः कश्यपस्य वटाव्यकम्। अदितिर्दितिर्दनुःकाष्ठा अरिष्टा सुरभिःखसा" इत्युपक्रम्य "दृरा इक्षुलतावल्लीह्यजातीव वर्णजः"। अस्यतेति शेषः। गरुडपु०।

दृराक्षीर पु० दृरा जलं क्षीरमिवास्य। क्षीरवृक्षे।

दृराचर न० दृरायां जले भूमौ वा चरति चर–ट ह्रस्वः। १वर्षोपले त्रिका०२भूचरे ३जलचरे च त्रि०स्त्रियां ङीप्।

दृराज पु० दृरा सुरेव अजति विक्षिपति अज–अच् न वी भावः। कन्दर्पे त्रिका०। [त्रिका०।

दृराम्बर न० दृरा जलमम्बरमिव यस्य। वर्षोपले धरणायाम्।

दृरावत् दृरा+भूम्नि मतुप् मस्य वः। बहुत्वे तस्य भवः अच् ऐरावतः। अर्जुनेन नागलक्षावाहृतपादिते २गौरभेदे मनुत्पत्तिकथा" भा०भी० ६१अ०।

"अर्जुनस्यावजः श्रीमानिरावान्नाम गौर्वरान्। सुधायां नागराजस्य जातः पार्थेन भीमता। ऐरावतेन वा दत्ता ह्यनपत्या महात्मना। पत्यौ कृते सुपर्णेन जपया दीनचेतसा। भार्यार्थं तान्तु जग्राह पार्थः कालवशानुगाम्। एवमेव वहुत्वयुः परस्मैपदेऽर्जुनावजः। स नागलोके संवृद्धो नाना च परिरक्षितः। पित्रव्येण

इरिबल्लः पार्थहेषाद्रात्मना । रूपवान् बलसम्पन्नो युध्यवान् सत्यविक्रमः । इन्द्रलोकं जगामाशु श्रुत्वा तत्रार्जुनं गतम् । सोऽभिगम्य महाबाहुः पितरं सत्यविक्रमः । अभ्यवादयदव्यग्रो विनयेन कृताञ्जलिः । न्यवेदयत चात्मानमर्जुनस्य महात्मनः । इरावानस्मि भद्रं ते पुत्रस्त्वां तव प्रभो ! । मातुः समागमो यस्य तत्सर्वं प्रत्यवेदयत् । तस्य सर्वं यथान्यायमनुसस्मार पाण्डवः । परिष्वज्य सुतस्यापि सोऽत्यजनः सहस्रं गुणैः । प्रीतिमानभवत् पार्थो देवराजनिवेशने । सोऽर्जुनेन समादिष्टो देवलोके तदा नृप ! । प्रीतिपूर्वं महाबाहुः स्वकार्यं प्रति भारत । युद्धकाले त्वयाकार्यं सख्यं देयमिति प्रभो । वाढमित्येवमुक्त्वा च युद्धकाल इहागतः" ।

"इरावन्तं तु निहतं दृष्ट्वा पार्था महारथाः" भा०भी० ९२ अ० । "पुत्रं विनिहतं श्रुत्वा इरावन्तं धनञ्जयः ।" ९५ अ० । २नदीभेदे स्त्री ङीप् । भा० स० ८० ९अ० वरुणसभावर्णने । "इरावती वितस्ता च सिन्धुर्देवनदी तथा" "इरावत्यां हतो भोजः कार्त्तवीर्यसमो युधि" भा० व० १२अ० "अतङ्कामहं तीर्त्वा तथा रम्यामिरावतीम्" । भा०क० ४४ अ० । "इरावत्यां महाभोजावग्निसूर्यसमौ युधि" हरिवं० ३६१ । "इरावतो धेनुमतो हि भूतं" रघु० ७,९९,२। ४अश्वादिवृक्षे त्रि० "बाहिष्टं वर्हिरश्विनाविरावत्" ऋ० ७,४० ५ । "इरावत् कविरादिवृक्षम्" भा० । "सुरुतावन्तः सुभगा इरावन्तोहतप्रभाः" अथ० ७,६०,६ ।

इरावती स्त्री इरां भूमिम् अवति अव-घञ्अर्श ङीप् । वटपत्रीवृक्षे, सा हि पातालभेदनेनापि भूमिमाच्छादनात् पाण्डवतीति तथात्वम् ।

इरिकावन न० इरैव कनू अत इत्वम् इरिकाप्रधानं वनम् । कुमा० "इरिकादीनि वनोत्तरपदानि संज्ञायाम्" पा० न०क्ष० पाठात् न वत्वम् । खड़प्रधाने वनभेदे । इरिकादीनि च "इरिकाः तिमिर खसीर कुवेर फरि कर्कार" ।

इरिण न० ऋ-इनन् किच्च । १जलरहितभूमौ, २निरावरणे, ३शून्ये च । "यथा गौरो अपाकृतं तथ्यक्षेत्रवेरिणम्" ऋ० ८,४, २ । "क्षेत्रेरिणे बीजमुप्तं न वप्ता लभते फलम्" मनुः ।

इरिन् त्रि० इर-क्विप् + णिनि वलोपः । १प्रेरके । "न देवासिरो दधध्य दैष्टा" ऋ०५,८७,३। २ईर्ष्यके च ।

इरिमेद पु० इरौ रोगादौर्ध्यके मेदोनिर्व्यासो यस्य । विट्खदिरे । "इरिमेदः कषायोष्णो रुक्षदन्तगदास्रजित् । कृमि कण्डूविषश्लेष्मकुष्ठविस्फोटनाशनः" भावप्र० ।

इरिविल्लिका स्त्री इरिविल्ल्व कनू । "पिङ्कासक्तमरुस्थः इक्षासपरजाख्यराम् । सर्व्वालिकां सर्व्वलिङ्गां जानीयादिरिविल्लिकामिति" निदानोक्ते मक्तकस्थे व्रणभेदे । कनभावे इरिविल्लाप्यत्र । "इरिविल्लां गन्धनाकीं कलां विस्फोटकान्तथा । पित्तजस्य विसर्पस्य क्रियया साधयेद्भिषक्" सुश्रु० ।

इरीश पु० ईश० । १वह्नौ, २वाणीशे, ३भूमिपतौ, ४विष्णौ च

इर्गल न०स्त्री अर्गल+पृ० । द्वाररोधके काष्ठभेदे तस्य छिद्रम् अपूपादि० यत् । इर्गल्य. क इर्गलीयः । ततसाधने त्रिके ।

इर्य्य त्रि० इर-कण्ड्वा० अच् वेदे त्रि० न यलोपदीर्घौ । प्रेरके । "यूयं राजानमिर्य्यं जनाय विभ्वतिष्ठम्" ऋ०५,५८,४ ।

इर्वारु स्त्री उर्व्व-आरु पृषो० । (काकुड़) १कर्कट्याम् । २हिंसके त्रि० । "सिंह्यान्नद्रकतरक्षुद्वोपिमार्जारभृगालमृगेर्व्वारुकप्रभृतयो गुहाशयाः" सुश्रुतः । मृगेर्वारुकः मृगहिंसकः । आलु । इर्व्वालुरप्युक्तार्थे ।

इवारु(लु)शुक्तिका स्त्री इर्वारु(लु) शुक्तिकेव स्वयंस्फोटनात । (फुटी) (स्वयं भिन्नविषकर्कट्याम्) ।

इल गतौ अक० गतौ क्षेपे च सक० तुदा०पर० सेट् । इलति । ऐलीत्इयेल रेखतुः इलितः इलः ।

इल क्षेपण चुरा०उभ०सक० सेट् । एलयति ते ऐलिलत् त । ऐलयीत् ऐलिष्ट "कथं वातमेलयति कथं न रमते मनः" अथ० १०,७,२१ । "आसां देवतानां वांयां कामयते सा भूत्वेलयति" शत०ब्रा० १०,२,८,८ ।

इलविला स्त्री यक्षस्त्रसुनिषण्णाम् कुबेरजनन्याम् । एतत्सख्यमेवं कुबेरस्य ऐलविल इति नाम ।

इला स्त्री इल-क । १भूमौ, २गवि, ३वाचि, ४जम्बुद्वीपस्थनववर्षमध्ये वर्षभेदे तत्सीमा चेलाहृतशब्दार्थे वक्ष्यते । ५ वैवस्वतमनुकन्यायां बुधपत्न्याम् । सा हि विष्णुवरात् पुंस्त्वमासाद्य पुनः गुरुशापात् स्त्रीत्वं गता बुधस्तु तामुपगम्य पुरूरवसमुत्पादयामासेति पुराणे प्रसिद्धम् । तत्र इडाशब्दे उक्तप्रायम् ६ स्वप्नयोनौ त्रि० ।

इ(ए)ला कण्ड्वा० यक् प० अक० सेट् । इ(ए)लायति ।

इलाहृत न० इला पृथिवीमाहृत निबन्धादिभिः । नववर्षात्मकजम्बुद्वीपस्थ वर्षभेदे तच्च वर्षम् "पश्चान्मालयवतः, प्राच्यां गन्धमादनमैलतः । इलाहृतं नीलगिरेर्याम्यतो, निषधाद्वृतं" इलाया वृतः सीमावच्छिन्ने देशेऽपि । "मालयवांश्च

ष्यिको भविष्यतीति विद्यात्" शत०ब्रा० ४,५,८,११।

दृभ्रा स्त्री दृभमर्दृति सेव्यत्वेन दण्डा० यत्। १कृशिन्यां २यष्टिकीटके च मेदि०।

दृमथा अव्य० दृदम्-दृथार्थे-थाल् "प्रत्नपूर्व्वविश्वेमात् थाल् छन्दसि" पा० सू० निर्देशात् नि० इमादेशः। इदानीन्तनतुल्ये। "तं प्रत्नथा पूर्व्वथा विश्वेमथा दृव ऋधे शतानि वर्द्धिषद् खर्धिटम्" ऋ० ५,४४,८। "प्रत्नथा पुरातनयजमाना इव पूर्व्वथाऽऽदीया पूर्व्वे यथा। विश्वथा विश्वे सर्वे ग्राह्मिनो यथा। इमथा इदानीं वर्त्तमाना यजमाना इव" भा० "इमश्चक्" यजु०७ऋ०१७च पठिता।

दृयजु त्रि० यज+क्त उ वेदे नि संप्रसारणम्। यष्टुमिच्छौ "धन्वञ्चिव ग्रापा असि त्वमग्न दृयजवे" ऋ०१०,४,१, वेदे ग्रावेव सर्व्वत्र नि० संप्रसा०। "सुम्नं वां स्तरिर्द्दषाविषयजन्" १,१५२,२, देवानां दृयजनो यजमान दृयजति" ऋ०८, ३१,११५,

दृयत् त्रि० इदं परिमाणमस्य इदम्-यतुप्। एतावदर्थे "नीतं यदि नवनीतं क्रियदिति यशोदया पृष्टः। इयदिति गुरुजनसविधे विष्टतधनिष्ठापयोधरः पायात्" उद्भटः। "दृयान् वाव क्षिप्र पशुर्यावती वया" ऐत०। "दृयन्ति वर्षीणि तथा मरोपम्" रघुः "दृष्टि निक्षिपतीति विश्वमिवता मन्यामहे दुःस्थितम्" सा०द०। अत्र साधनप्रकारः इदम्+परिमाणार्थे यतुप् वस्य घः इदघ इय् "यस्येति" पा०प्रकृतेोकारलोपे त्यप्रत्ययस्थितिः। अतएवात्र वैयाकरणा ग्रौपसिदाद्य पठन्ति। "उदितवति परस्मिन् प्रत्यये ग्राद्यस्योनो गतवति विलयस्तु प्राकृतेऽपि ग्रपस्त्वे। रूपदि यदमुदीतं वेदं प्रत्ययोक्तं तदियदिति निर्मीते कोविदा पण्डितोऽपि"। स्त्रियां ङीप्।

दृयत्ता स्त्री कुत्सिता दृयत्ता कुत्सितार्थे कन् ह्रस्वः। कुत्सितेयत्तायाम्। ततः अर्थ आ० अच्प्रत्यये अच्। कुत्सितेयत्तायुते अल्पप्रमाणे "दृयत्तक कुणुष्व कलकं मिनक्ष्म इलना" ऋ० १,१६१,१५,

दृयत्ता स्त्री दृयतो भाव तल्। १सीमायां, २परिमाणे, ३संख्यायाञ्च। "न गुणानामियत्तया" "यथः परिच्छेत्तुमियत्तया क्षमम्" "ईं कृत्या रूपमिवत्तया वा" इति च रघुः।

दृयस् त्रि० इ-कर्त्तरि असुन क्रिच्च। १गन्तरि भावे असुन्। २मतौ "तेषा कृत्यसेवास क्रियमिह कर्त्तव्यम्" शत०ब्रा० २,२,२,

दृर-दृर्णायां भ्वा०उभ०। दृर्णाति दृर्णुते।

दृरज्-दृर्णायां भ्वा०दि०क्विप् प०। दृरज्यति। "दृरज्यवे प्रथयस्व जन्तुभिरह्ने रायः" ऋ०१०,१४०,४। "दृरज्यन् वज्रं दृधोविवाचि" ऋ०७,२३,२, वदेमाग्नं जगताभिरज्यसि" ऋ०१०,७५,२। "युवं विप्रस्य मन्मनामिरज्यथः" ऋ०१,१५१,६।

दृरण त्रि० दृरिण+पृ०। जवरभूमौ ग्रमरटीका रभा०।

दृरस्पृश् पु०दृरया जवेन ग्रन्नेन वा स्पृशति स्पृश-क्विप् ह्रस्वः सुम् च। १वह्नौ २वाडवानले च। "दृरस्पृशं हरिदृक्षं यदत्त" यजु०११,७४।

"दृरया जवेन ग्रन्नेन वा स्पृशति उप पचेत्यादि" पा०नि०"वेददी०। "हरते हवाऽन्ने इत्येतद्दिरस्पृदग्निरेवा स्रोत्र मन्तः" शत०ब्रा०६,६,२,४।

दृरस् दृरज्वन् कण्ड्वा०दृरस्यति "ग्रालपूषसाश्च दृरसः" ऋ०७,४०,६। "यक्षा दृरसमोदम्" ऋ०१०,८६,२।

दृरा स्त्री दृण्-रक् दृ कामं राति रा-क वा। १भूमौ, २वाचि, ३सुरायाम्, ४जले, ५ग्रन्ने च। "दृरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवी रेतसावति" ऋ० ५,८४, १। "दृरामक्षा ग्रोदनं पिन्वमानाः" शत०ब्रा०६,६,२१। ६कश्यपस्य पत्नीभेदे। "धर्मपत्न्यः समाख्याताः कश्यपस्य महात्मनः। ग्रदितिर्दितिर्दनुःकाष्ठा ग्ररिष्टा सुरभिःखसा मुनिः। कद्रूः प्राधा दृरा क्रोधा विनता तामसिःखसा" इत्युपक्रम्य "दृरा इक्षुलतावल्लीद्रुजातीव वर्ग्गः"। ग्रस्यतेति घेषः। गरडपु०।

दृराक्षीर पु० दृरा जलं क्षीरमिवास्य। क्षीरवृक्षे।

दृराचर न० दृरायां जले भूमौ वा चरति चर-ट ह्रस्वः। १वर्षोपले त्रिका०२भूचरे ३जलचरे च त्रि०स्त्रियां ङीप्।

दृराज पु० दृरा सुरेव ग्रजति विक्षिपति ग्रज-ग्रच् न वी भावः। कन्दर्पे हेमा०। [त्रिका०।

दृराम्बर न० दृरा जलमम्बरमिव यस्य। वर्षोपले वाचस्पत्यम्।

दृरावत् दृरा+भूम्नि मतुप् मस्य वः। बहुत्वे तस्य भवः अच् ऐरावतः। ग्रर्जुनेन नागकन्यायामुलूप्यादिते २ऐरावते नदृतृप्तिकथा" भा०भी० ६१ग्र०।

"ग्रर्जुनस्यात्मजः श्रीमानिरावान्नाम वीर्य्यवान्। सुषुवे नागराजस्य जातः पार्थेन धीमता। ऐरावतेन या दत्ता कन्यका नागकन्यका। पत्नी कृते सुपर्णेन ग्रपत्या दीनचेतसा। मात्सर्य्यात् तान्तु जग्राह पार्थः कालवशानुगाम्। एवमेव बलात्पार्थः परवीरोऽर्जुनात्मजः। स नागलोके संवृद्धो नागा च परिरक्षिताः। पितृव्येभ

इरित्यक्तः पार्थेनेषाहरात्मना । रूपवान् बलसम्पन्नो गुणवान् सत्यविक्रमः । इन्द्रलोकं जगामाशु श्रुत्वा तत्रार्जुनं गतम् । सोऽभिगम्य महाबाहुः पितरं सत्यविक्रमः । अभ्यवादयदत्यर्थं विनयेन कृताञ्जलिः । व्यवेदयत चात्मानमर्जुनस्य महात्मनः । इरावानस्मि भद्रं ते पुत्रस्त्वां तत्र प्रभो ! । मातुः समागमो यत्र तत्सर्वं प्रत्यवेदयत् । तच्च सर्वं यथावृत्तमनुसस्मार पाण्डवः । परिष्वज्य सुतञ्चापि सोलूपः सहसं गुणैः । प्रीतिमानभवत् पार्थो देवराजनिवेशने । सोऽर्जुनेन समादिष्टो देवलोके तदा नृप ! । प्रीतिपूर्वं महाबाहुः स्वकार्यं प्रति भारत । युद्धकाले त्वयाकार्यं सख्यं देयमिति प्रभो । बाढमित्येवमुक्त्वा च युद्धकाल उपागतः" ।

"इरावन्तं तु निहतं दृष्ट्वा पार्था महारथाः" भा०भी० ९२ अ० । "पुत्रं विनिहतं श्रुत्वा इरावन्तं धनञ्जयः ।" ९५ अ० । २नदीभेदे स्त्री ङीप् । भा० स० ५०९अ० वरुणसभावर्णने । "इरावती वितस्ता च सिन्धुर्देवनदी तथा" "इरावत्यां हतो भोजः कार्त्तवीर्य्यसमो युधि" भा० व० १२अ० "मरुद्गणमहं तीर्त्वा तथा रम्यामिरावतीम्" । भा०क० ४४ अ० । "इरावत्यां महाभोजावग्निसूर्य्यसमौ युधि" हरिवं० ३६१ । "इरावती धेनुमती हि भूतं" ऋ०७,९९,३। ४अच्छादिवृक्षे स्त्रि० "आसिक्तं वर्त्तिरश्विनाविरावत्" ऋ०७,४० ५ । "इरावत् इरिरादिवृक्षम्" भा० । "सुन्दतावन्तः सुभगा इरावन्तोऽतप्रभाः" अथ० ७,९०,६ ।

इरावती स्त्री इरां भूमिम् अवति अव-घञ्अत ङीप् । वटपत्रोहरे, सा हि पाषाणभेदनेनापि भूमिमाच्छादनात् पाण्डवतीति तच्छादनात्त्वम् ।

इरिकावन न० इरैव कनू अत इत्वम् इरिकाप्रधानं वनम् । कुमा० "इरिकादीनि वनोत्तरपदानि संज्ञायाम्" पा० न०क्लु० पाठात् न ह्रस्वत्वम् । अक्षप्रधाने वनभेदे । इरिकादीनि च "इरिकातिमिर खजीर कुवेर हरि कर्क्कार" ।

इरिण न० ऋ-इनन् किच्च । १जलरहिते भूमौ, २निराकृष्टे, ३शून्ये च । "यथा गौरो अपाकृतं तथा श्वेत्यवेरिणम्" ऋ०८,४, २ । "अवेरिणे बीजमप्या न वप्ता लभते फलम्" मनुः ।

इरिन् त्रि० इर-क्वनिप् णिच् वलोपः । १प्रेरके । "न देवासिरो दक्षस ईट्ट या" ऋ०५,८७,३। २ईर्ष्यके च ।

इरिमेद पु० इरौ रोगादौ मेदोऽस्यास्ति मेदोनिर्य्यासो यस्य । विट्खदिरे । "इरिमेदः कषायोष्णो सुखदन्तगदापहः । कृमि कण्डूविषश्लेष्मकुष्ठविस्फोटनाशनः" भावप्र० ।

इरिविल्लिका स्त्री इरिविल्लैव कनू । "पिण्डकासप्तमाङ्गुल्या इक्षासुपरजाख्यराम् । सर्व्वालिकां सर्व्वलिङ्गां जानीयादिरिविल्लिकामिति" निदानोक्ते मस्तकस्थे व्रणभेदे । कनभावे इरिविल्लापत्ये । "इरिविल्ला गन्धनाकौ कल्यां विस्फोटकान्तथा । पिप्पलस्य विसर्पस्य क्रियया साधयेद्भिषक्" सुश्रु० ।

इरेश पु० ६त० । १वरुणे, २वागीशे, ३भूमिपतौ, ४विष्णौ च

इर्गल न०स्त्री अर्गल+पृ० । हारस्रोतोभेदे तस्य स्थितम् अपूपादि० घत्व । इर्गलाः क इर्गलीयः । ततसाधने त्रिषु ।

इर्य्य त्रि० इर-कण्ड्वा० अच् वेदे त्रि० न यद्वोपदीर्घौ । प्रेरके । "यूयं राजानमिर्य्यं जनाय विभ्वतिष्ठम्" ऋ०५,५८,४ ।

इर्वारु स्त्री उर्व्व-आरु पृषो० । (काकुड) १कर्कट्याम् । २हिंसके त्रि० । "सिंह्याश्चाङ्कतरक्षुर्ऋक्षीपिमार्ज्जारव्याघ्रगोलङ्गूलेर्व्वारुकप्रभृतयो मृगाश्रयाः" सुश्रुतः । ऋगेवारुकः ऋगक्षिसकः । आलु । इर्व्वालुरप्युक्तार्थे ।

इर्वारु(लु)शुक्तिका स्त्री इर्वारुः(लुः) शुक्तिकेव स्वयंस्फोटनात । (फुटी) (स्वयं भिन्नविपक्वकर्कट्याम्) ।

इल गतौ अक० गतौ क्षेपे च सक०तुदा०पर०सेट् । इलति । ऐलीत्इयेल इलतुः इलितः इलः ।

इल क्षेपणे चुरा०उभ०सक० सेट् । एलयति ते ऐलिलत् त । ऐलयीत् ऐलिष्ट "कथं वातमेलयति कथं न रमते मनः" अथ०१०,७,११ । "आसां देवतानां यांयां कामयते सा भूत्वेलयति" शत०ब्रा० १०,२,८,८ ।

इलविला स्त्री पक्षत्वमुपपत्त्याम् कुबेरजनन्याम् । एतत्सख्यमेवं कुबेरस्य ऐलविल इति नाम ।

इला स्त्री इल-क । १भूमौ, २गवि, ३वाचि, ४जम्बुद्वीपस्थनववर्षमध्ये वर्षभेदे तत्सीमा चेलाहृतशब्दार्थे वक्ष्यते । ५ वैवस्वतमनुकन्यायां बुधपत्न्याम् । सा हि विष्णुवरात् पुंस्त्वमासाद्य पुनः शङ्करशापात् स्त्रीत्वं गता बुधस्तु तामुपगम्य पुरूरवसमुत्पादयामासेति पुराणे प्रसिद्धम् । तच्च इडाशब्दे उक्तप्रायम् । ६ स्वप्नशीले त्रि० ।

इ(ए)ला कण्ड्वा० यक् प० अक० सेट् । इ(ए)लायति ।

इलावृत न० इला पृथिवीवावृतं निषधादिभिः । नववर्षात्मकजम्बुद्वीपस्य वर्षभेदे तच्च वर्षम् "पञ्चाशत्प्लक्षवतः, प्राच्यां गन्धमादनश्चैवतः । इलावृतं नीलगिरेर्याम्यतो, निषधाद्वृक्" इत्युक्तचतुःसीमावच्छिन्ने देशेऽपि । "मालवांश्च

यमकोटिपत्तनाद्रोमकाश्च किल मध्यमाद्दनः । नीलवर्षलनिषधावधी च तावन्नरालमनयोरिलावृतम् । निषधनीलहुगन्धसुमाल्यकैरलमिलावृतमाश्रितमावभौ । जम्बूकेलिकुलायसमाकुलं रुचिरकाञ्चनचित्रमहीतलम्' 'सि० शि० । "एतेन भारतमिलावृतवद् विभाति" माघः । इलावृतस्यपर्व्वतादिसंस्थानम् । भाग० ५स्क० ६ अ० ।

"एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्व्वतः स्तोषणः कृत्स्नगिरिराजोमेरुर्द्वीपायामसमुच्छ्रायः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजनपृथितो भूमे षोडशसहस्रं तावत्तन्मूर्ध्न्यां प्रविष्टः । उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयोरस्यकर्णिकरूपस्य कृष्णां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयोद्विसाहस्रपृथव एकैकयः पूर्वस्मात् पूर्वस्मादुत्तरोत्तरेण दशांशाधिकायेन दैर्घ्येण एव हसन्ति । एवं दक्षिणेनेलावृतं निषधोहेमकूटो हिमालय इति प्रागायता यथा नीलादयः । अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम् । तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं प्रपृथतः । केतुमालभद्राश्वयोः सीमान विदधाते । मन्दरोमेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोच्छ्राहा मेरोश्चतुर्दिशमवष्टम्भगिरय उपकॢप्ताः । चतुर्ष्वेतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्व्वतकेतव इव द्विसहस्रयोजनोच्छ्राहास्तावद्विटपवितताः । शतयोजनपरिणाहाः । हृदाश्चत्वारः पयोमधुदुग्धसुपेक्षजलाः । यदुपस्पर्शिन उपदेवगणा योगैश्वर्य्याणि स्वाभाविकानि भरतर्षभ धारयन्ति । देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्व्वतोभद्रमिति । येष्वमरपरिवृढाः सहसुरललनालङ्घामयूपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति । मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतगिरेर्ो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि पतन्ति । तेषां विशीर्य्यमाणानामतिमधुरसुरभिगन्धवहकुक्षारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्वेणेलावृतमुपप्लावयति । यदुपजोषमाङ्कवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगन्धवातो दशयोजनं समन्तादनुवासयति । एवं जम्बूफलानामनुपतनविशीर्णानामनस्थिप्रायाणामभिमदकायनिभानां रसेन जम्बूनदी नाम मेरुमन्दरशिखराद्दशयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्पन्दति । तावदुभयोरपि रोधसोर्मृत्तिका तद्रसेनानुविध्यमाना च वायुसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति । यदु ह वाव विबुधादयः सकुण्डलेषु मुकुटकटकोरुमेखलाद्याभरणरूपेण खलु धारयन्ति । यस्तु महाकदम्बः सुपार्श्वपार्श्वनिरूढस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः सुमधुराः सुपार्श्वशिखरात् पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति । यान्युपयुञ्जानानां मुखनिर्वासितो वायुः समन्माच्छतयोजनमनु वासयति । एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्योनीचीनाः पयोदधिमधुघृतगुडान्नाद्याम्बरशय्यासनाभरणादयः सर्व एव कामदुघा नदाः कुमुदाग्रात् पतन्तस्तमुत्तरेणेलावृतमुपयोजयन्ति । यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यजरामयापमृत्वादयोपसर्गादयस्तापविशेषा भवन्ति । यावज्जीवं सुखं निरतिशयमेव कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिखरपतङ्गरुचकनिषधसितिकासकपिलशङ्खवैदूर्य्यजारुधिसंसर्षभनागकालञ्जरनीरदादयोगिरयो मेरोः कर्णिकाया इव केशरभूतामूलदेशे परित उपकॢप्ताः । जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रपृथुतुङ्गौ भवतः । एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ । एवमुत्तरतः त्रिशृङ्गमकरौ । अष्टाभिरेभिः परिष्कृतोऽग्निरिव परितस्काशते काञ्चनगिरिः । मेरोर्मूर्द्ध्नि भगवत आत्मयोनेर्महत्त उपकॢप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां यातकौम्भीं वदन्ति । तामनु परितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपकॢप्ताः"। भा० भी० ६ अ० जम्बूखण्डविभागे तु । "धनुःसंस्थे महाराज ! हे वर्षे दक्षिणोत्तरे । इलावृतं मध्यमन्तु पञ्च वर्षाणि चैव हि । उत्तरोत्तरमेतेभ्यो वर्षमृद्धिमच्यते गुणैः । आयुःप्रमाणं चारोग्यं धर्म्मतः कामतोऽर्थतः । समन्वितानि भूतानि तेषु वर्षेषु भारत ! । एवमेषा महाराज ! पर्व्वतैः पृथिवी चिता । हेमकूटस्तु सुमहान् कैलासो नाम पर्व्वतः । यत्र वैश्रवणो राजन् ! गुह्यकैः सह मोदते । अस्मादुत्तरेण कैलासात् मैनाकं पर्व्वतमपि । हिरण्यशृङ्गः सुमहान् दिव्यो मणिमयो गिरिः । तस्य पार्श्वे महद्दिव्यं शुभं काञ्चनवालुकम् । रम्यं विन्दुसरो नाम यत्र राजा भगीरथः । ह्रदा भागीरथीं गङ्गामाविशन्ति वसुधाः क्षमाः । यूपा मणिमयाश्चात्र वैडूर्य्यापि शिर-

ख्यताः । तत्रेडा तु गतः सिद्धिं सङ्ख्याता मङ्गायशाः । सदा भूतपतिर्यत्र सर्वलोकैः सनातनः । उपास्यते तिग्मतेजा यत्र भूतैः समन्ततः । नरनारायणौ ब्रह्मा मनुः स्थाणुश्च यत्नमः । तत्र दिव्या त्रिपथगा प्रथमन्तु प्रतिष्ठिता । ब्रह्मलोकादपक्रान्ता सप्तधा प्रतिपद्यते । वक्षोकसारा नलिनी पावनी च सरस्वती । जम्बूनदी च सीता च गङ्गा त्रिस्रश्च सप्तमी । अचिन्त्या दिव्यसङ्घाताः प्रभोरेवैष संविधिः । उपासते यत्र सत्रं सङ्क्षयुगपर्य्यये । दृश्यादृश्या च भवति तत्र तत्र सरस्वती । एता दिव्याः सप्त गङ्गा स्त्रिषु लोकेषु विश्रुताः" ।

इलिनी स्त्री चन्द्रवंश्यमेधातिथिसुपकन्यायाम् । "मेधातिथिः सुतस्तस्य यस्मात् कण्वोऽभवद्द्विजः । इलिनी नाम यस्यासीत् कन्या वै जनमेजय !" हरिवं० २२ अ० ।

इली स्त्री इल-गतौ क गौरा० ङीष् । करबाले (काटार)।

इलीविश्व पु० असुरभेदे "त्र्यधिष्ठदिलीविशस्य दृढाविष्टक्रिण मभिनक्ष्णमिन्द्रः" ऋ०१,३३,१२,

इलीश पु० इलीव करबालिकेव शोभते शुभ-ड । करबालिका सदृशावयवे क्षमानख्याते मत्स्यभेदे ।

इलिश पु० इलीश+पृ० । इलीशमत्स्ये (इलिश) ।

इल्वल पु० इल+स्वप्ने वलच्-नि० गुणाभावः । १मत्स्यभेदे २असुरभेदे च मेदि०स च सिंहिकापुत्रभेदः "सिंहिकाया दशोत्पन्ना विप्रचित्तेः सुतास्तथा । दैत्यदानवसंयोगाद्ख्याताश्चोग्रपराक्रमाः । सैंहिकेया इति ख्यातास्तयोदश महाबलाः । व्यंशः शल्यश्च बलिनौ नभश्चैव महाबलः । वातापिर्नमुचिश्चैव इल्वलः सृमरस्तथा । खाङ्गिकोनरकश्चैव (काखनेमि) कालनाभश्चतैव च । राहुरुच्यैस्तु तेषां वै ज्येष्ठ्यं चन्द्रग्रहं प्रति" हरि० २अ० । तद्भरितं यथा

"इल्वलो नाम दैतेय आसीत् कौरवनन्दन ! । मणिमत्यां पुरि पुरा वातापिस्तस्य चानुजः । स ब्राह्मणं तपोयुक्तमुवाच दितिनन्दनः । पुत्रं मे भगवानेकमिन्द्रतुल्यं प्रयच्छतु । तस्मै स ब्राह्मणो नादात् पुत्रं वामवसद्विभम् । चुकोध योऽसुरस्तस्य ब्राह्मणस्य ततो भृशम् । तदाप्रभृति राजेन्द्र ! इल्वलो ब्रह्महासुरः । मन्युमान् भ्रातरं ज्ञात्वा मायावी ह्यकरोत्ततः । मेषरूपी च वातापिः कामरूपोऽभवत् क्षणात् । संस्कृत्य च भोजयति ततो विप्रं जिघांसति । स चाक्रूयति यं वाचा गतं वैवस्वतक्षयम् । स पुनर्दैत्यमाख्याय जीवन् स प्रत्यवद्यत । ततो वातापिमहरं ज्ञात्वा सुसंस्कृतम् । तं ब्राह्मणं भोजयित्वा पुनरेव समाह्वयत् । तास्मिंस्तेन महता स्वरेण वाचमीरिताम् । श्रुत्वातिमायो बलवान् क्षिप्रं ब्राह्मणकण्टकः । तस्य पार्श्वं विनिर्भिद्य ब्राह्मणस्य महासुरः । वातापिः प्रहसन्नाजङ्घिसक्राम विनाशयन् । एवं स ब्राह्मणाभ्राजन् ! भोजयित्वा पुनः पुनः । हिंसयामास दैतेय इल्वलो दुष्टचेतनः" भा० व० १६३अ० ।

२मृगशिरोनक्षत्रगिरिःस्याच्च पञ्चसु तारासु स्त्रीव० । तत्र इल्वका इति पाठान्तरम् । इल्यन्ति प्रीण्यन्ति इलिप्रीणने कुन् इदित्त्वात् नुम् त्रिपादि० न अत इत्त्वम् इति भानुदीक्षितः । तेन इल्वका इति ककारमध्यपाठकल्पनं प्रामादिकमेव । [ऐन्वीत् । इल्वकाः ।

इल्व व्याप्तौ प्रीणने च इदित् भ्वा०पर०सक० सेट् । इल्वति

इल्व अव्य०इल्व-निरु० क । १साकल्ये, २उत्तरत्र च याम्, ३ऐश्वर्ये, वाक्यालङ्कारद्योतकता चास्य तत्र उपमायाम् "इल्वेन नित्यसमासोविभक्तिलोपश्चेति" वार्त्ति० उक्तेर्नित्यसमासः विभक्तेर्लोपाभावश्च स च समासस्वरार्थ एव । "वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये" रघुः । "हंसीव क्षण ! ते वार्त्तिः स्वर्गङ्गाभवगाहते" चन्द्रालोकः । एतत्प्रयोगे श्रौती उपमा "श्रौती यथेवशब्दादिरर्थे वा वर्तियेदि" सा०द० उक्तेः । उक्तेत्यायाम् । "गुणागुणान्वयित्वात् तस्य सप्रसवा इव" रघुः । "गङ्गास्त्रोत इव सरत्नाय ! त्वमाप्तस्त्व निःस्नेहः । ज्ञातीवारिवधूगर्भपातनपातकी" "सुखमेवोदयोभानि पूर्वचन्द्रइवापरः" सा०द० इवादियुक्तप्रयोगे उक्तप्रेक्षावाच्यत्वम् । "वाच्ये वादिप्रयोगे स्यादप्रयोगे धरा पुनः" सा०द० उक्तेः । वाक्यालङ्कारे "सर्वदा क इव वा सन्धिर्ध्यते" किरा० "किमिव हि मधुराणां मण्डनं नाकृतीनाम्" शकु० "सृजतिसा कियतीमिव न व्यथाम्" नैष० ऐश्वर्ये "तदस्तिपर्युषितमिव" शत० ब्रा० "आतर्जितो किञ्चिदिव ज्ञानाभ्याम्" कुमा० ४अवधारणार्थे च । "स्त्रिये पूर्वसिध्यन्ति वदेवाः" ऋ०१,१८४,३। "दृक्षतेव इवशब्दः यथार्थे" भा० । "क्षत्रेव तु वा ऐश्वरा" शत० ब्रा० । इवशब्दोऽवधारणार्थे" भा० ।

इवीका स्त्री इवीका पृ० । इषीकाशब्दार्थे अमरटीका ।

इष गतौ सर्पणे च दिवा०पर०सक०सेट् । इष्यति, ऐष्यत् । ऐषीत् इषितः एषित्वा । "इष्यन् वाचमुपक्लेव क्षोतः" ऋ० ६,६७,६ । "योऽभियाति इषितः प्रवाति" अथ० १०,८,३५ । "य तत्रुजीषितक्षूनमन्ने" अथ० ६,३५,५ । "क्षिप्तानो वाचमिष्यसि" ऋ० ८,६७,८ । इच्छा-

यामपि "अप इष्य कोतरित्यप इच्छ कोतरित्येवैतदाह" शत० ब्रा० ३,६,३,१५। गतौ तुदादिरपि इषति निरु०।

अनु+अन्वेषणे गवेषणे "अन्विष्यन्तस्तत सीताम्" रामा० "यावदेनामन्वेष्यामि" भक्तु०। "न रत्नमन्विष्यति मृग्यते हि तत्" कुमा०। "तस्मान्विष्यन् वेतसगृहं प्रभवं स." रघुः। स्वार्थे णिच्। तत्रैव "राममन्वेषयामि" सा०द०।

प्र+प्रेरणे। "अप्रैषीद्राजपुत्री मां सुराष्ट्रारीं तवान्तिकम्" भा०व०१६ अ०। "गत्वा प्रैषीच्च रावणम्" भट्टिः "अध्वर्युप्रेषितोमैत्रावरुणः प्रेष्यति" आश्व०श्रौ०। "गौनः शेफं च प्रेष्यति" कात्या०१२,६,१ "अग्नीषोमाभ्यां छागस्य वपाया मेदसे प्रेष्य" शत० ब्रा० ३,८,३,२७। घञ् प्रैष्यः। क्यप् प्रैष्यः। स्वार्थे णिच्। प्रेषयति प्रेषयामास। "स च मां प्रेषयामास" रामा०। [षित: पर्य्येषणा।

परि+सत्कारपूर्व्वकनियोजने पर्य्येषयति स्वार्थे णिच् पर्य्ये-

इष वाञ्छायाम् तुदा०पर०सक०सेट् वेट् कुः। १इच्छति, "इच्छामि संवर्द्धितमात्मयाते" कुमा०। इच्छेत् "यदीच्छेद्विपुलान् भोगान्" मनु० त०पु०। "राजान्तेवासिन्याच्ञेभ्यः सोदकोच्छेदनं क्षुधा" या०स्मृ०। ऐच्छत् ऐषीत् "ऐषीः पुनर्जनाजयाय यज्ञम्" भट्टिः इयेष "इयेष वा कर्त्तुमवध्यमात्मनः" कुमा०ईषतुः। इच्छन् "किमपेक्षन् कस्य कामाय किमर्थमनुसंज्वरेत्" स्मृतिः।

एषिता—ऐषा एषित्वा—इष्ट्वा। भावे य इच्छा "आत्मजन्या भवेदिच्छा" न्यायकोा०। इष्टः "इष्टोऽसि मे सखा चेति" गीता। कर्मणि इष्यते "तिरात्राच्छ्रद्धियते" श्रुतिः। एष्टव्यः एषितव्यः। "एष्टव्या बहवः पुत्रायद्येकोऽपि गयां व्रजेत्" पु०।

अनु+अन्वेषणे। "तं खलन्त इवान्वीषुः" शत०ब्रा०। "इच्छन्तमात्मानमन्विच्छामो यमन्वेषा" छा०उ०। "अनुपदमन्वेषा" मा० "वयं तत्त्वान्वेषात् मधुकर! कृतस्त्वं खलु कृती" भक्तु०

प्रति+ प्रतिपत्तौ प्रतीच्छति (प्रतिगृह्णाति)। "ततः प्रतीच्छ प्रहरेति वादिनी" नैष० "स्नुषां प्रतीच्छ मे कन्याम्" प्राप्तौ च "बुद्धौ शरणमिच्छ" गीता। स्वार्थे णिच् वेदे०नि० गुणाभावः। इषयति "इच्छंस्तटास्तरायेष मदन्त इषयेम ज्योतिः" ऋ०१,१८५,६। "इषयेम इच्छाम" भा०।

परि+अन्वेषणे च परीच्छति (अन्विष्यति) "भगवन्तं वा अहमेभिरात्विज्यैः पर्य्येषिषम्" छा०उ०।

अभि+सम्मतिप्रार्थनायाम् अभीष्टम्।

इष आभीक्ष्ण्ये क्रयादि० पौनःपुन्ये पर०सक० सेट् इष्णाति इष्णातु इषाण। "इष्णन्निषाणां मघवन्नस्मभ्यं सर्व्वलोकं मघवन्" यजु० ३१,२२,अ०। ऐषात् ऐषीत्। एषितः एषित्वा। प्रेरणे च। "भिनद्धि यत्सा वज्रमिषणन्" ऋ० ४,१७३। इष्णन् प्रेरयन्" भा०। इच्छार्थेऽपि "पूर्वीरिषश्चरति मध्व इष्णन्" ऋ० १,१८१,६। "मध्वः मधुनः इष्णन् इच्छन्" भा०। आभीक्ष्ण्यञ्च क्रियापौनःपुन्यम्। क्रिया च धात्वर्थविशेषः स च वाच्छागलाद्यादिरेव तस्यैवाभीक्ष्ण्यद्योतनेऽस्य साधुत्वम्

इष गतौ भ्वा० उभ०सक० सेट्। एषति ते। ऐषीत् ऐषिष्ट अनु—अनुसरणे। अन्वेषति। "अन्वेषन्तोवनं राजन्" "देशमन्यं दुराचारमन्वेषन् वानरात्मजा" रामा०।

इष् त्रि० इष—इच्छायां क्विप्। इच्छायुक्ते। इट्चरः। "विदाडूर्जं शतक्रतु विदादिषम्" ऋ२,१२,४। कर्मणि क्विप्। २इष्यमाणेत्रि०३अन्ने स्त्री "मधुमतीर्न इषस्कृधि" यजु० ७,२, "आश्विनायज्वरीरिषः १,३,१। "इषे त्वोर्ज्जे त्वा" यजु० १,१, १ इष्यतेइष—अन्नभूतस्तथर्थे कर्म्मणि क्विप्। ४एषणीये। "इषस्तुतो मरुद्गणे" ऋ० ५,५०,५, "इषः एषणीयस्य" भा०। इष—गतौ भावे क्विप्। ५यात्रायाम् स्त्री

इष पु० इष—गतौ क्विप्—इट् यात्रा साऽस्यां मासि जिगीषूणामस्ति अर्श आद्यच्। सौरे चान्द्रे च आश्विने १मासि। "आवरुधे भाद्रमासे युवतिरुहते चार्यलाभः प्रदिष्टः" राजमा०उक्तेः "सौरास्विनस्य यात्रायां चार्यलाभदत्वात्तथात्वम्"। अत एव रघौ "सरितः कुर्वती गाधाः पयसाह्रासमक्षयान्। यात्रार्थं नोदयामास तं यक्षे प्रथमं शरत्"। शरत्कालस्य राज्ञां यात्रार्थत्वमुक्तम्। शरदृतुश्च "इषश्चोर्जश्च शरदि" श्रुत्युक्त आश्विनकार्त्तिकमासरूपःकालः तस्य च सौरत्वमृतुशब्दे वक्ष्यते "आमेखलं सञ्चरतां घनानां छायामिषं सानुगतां निषेव्य" कुमा०पाठान्तरम्। "ध्वनिमिषेऽनिषेद्धयमयत" माघः। तत्र चान्द्रे "इषे माघसिते गते नवम्यामार्द्रयोगतः" तिथि० देवीपु०अत्र चान्द्रौसौरः "यच्छरद्यृजवे औषधः पच्यन्ते तेनोहैतामिषमूर्जमेव" शत० ब्रा० ऋ०४,१,१,१७, "अन्नभूतस्तथर्थे भावे ऊर्जवे क"। २प्रेरणे "इषवान् मम रेजति" ऋ०१,२६,६, "इषवान् प्रेरणवान्" भा०। इष—इच्छायां कर्मणि धञर्थे क ३अन्ने न०निघ०।

इषणि स्त्री इष—भावे अनि वेदे०नि० गुणाभावः। प्रेरणे

"इडाना धेनुरिडजनेषु कारवेलमना यतिनं पुरुरूपमिषणि" ऋ०२,२,६, इषणि एषणायाम् भा० । सप्तम्या लुक् । लोके तु एषणिः वा ङीप् । इषणिमिच्छति क्यच् । वेदे० नि० इलोपः इषण्यति "ऋतस्य बुध्न उषसामिषण्यन्" । ऋ०२,६१,७, ततः भावे अ । "इषण्या प्रेषणायाम् "इषण्यया नः पुरुरूपमाभेर" ऋ०८,४६,१८।

इषव्य त्रि०इषणा विध्यति इषौ कुशलो वा यत् । शरलक्षे, शरव्ये २शरत्यागकुशले च "आराद्दे राजन्य: शूर इषव्योतिव्याधी" यजु०ऋ०२२,२२ "इषुमिच्छति इषव्य: यद्वा इषौ कुशल" वेदटी० [धातयः" ऋ०६,७६,१,

इषि त्रि०इष–कि । इच्छावति "विचिदस्रा व्युषोव्य-

इषिका स्त्री इष–गत्यादौ कुन् अत इत्त्वम् । इषीकायन्दार्थे तूलगन्धपरे ह्रस्वः इषिकतूलम्" तदीयतूले ।

इषीका स्त्री इष–गत्यादिषु ईकन् कित् ह्रस्वश्च । गजनेत्रगोलके । २काशे, ३मुञ्जामध्यवर्त्तितृणे च तदालम्बनेव अस्त्यात्मा पाण्डवबधाय महास्त्रं प्रतियत्क्रम् यथा भा० प० १४अ० "व्यचिताताऽभवत् द्रोणिः प्राप्तक्षेममन्यत । तत दिव्यमहास्त्रात्मा परमास्त्रमचिन्तयत् । जग्राह च स चेषीकां द्रौणिः सर्व्वेण पाणिना । स तामाषदमासाद्य दिव्यमस्त्रमुदैरयत्" इत्युपक्रम्य "ततस्तस्यामिषीकायां पावकः समजायत । प्रधक्ष्यन्निव लोकांस्त्रीन् कालान्तकयमोपमः" इमामिषीकामधिकृत्य कृतोपन्यः अण् ऐषीक भारतान्तर्गतपर्वभेदे "मुञ्जा वेषीका तृणमिति" शत०ब्रा० "यदि नडानां यदि वेणनां यदि वेषीकाणाम्" शत०ब्रा० १,१,४,१६, ४शरशलाकायां ५वीरणकाष्ठिकायाञ्च उज्ज्व० "तांस्त्रास्त्रादिषीकास्त्रं रामोरामाववोधितः" रघुः ।

इषिर त्रि०इष–गतौ किरच् । १गतिशीले । "श न इषिरो अभिवा रातः" ऋ०७,३५,४, "इषिरः गतिशीलः"भा० २चलनशीले च "निसामनामिषिरामिन्द्र भूमिम्" ऋ०२, ३०,६। "इषिरां चलनीम्" भा० ४अग्नौ पु० उज्ज्व०

इषु इक्षी ईष्यते क्षिप्यतेऽनेन इष–उ ह्रस्वश्च । १बाणे "धतिस्त्वं इरक्षिषुम्" रघुः । "इषुमतिरघुसिद्धे दंदशूकान् क्षिणोमी" भट्टिः । "इषुभिः प्रतियोत्स्यामि" गीता स्त्रीत्व "तस्य साध्वीरिषवो यामिरस्यति" ऋ०२,२१,४,८ । "यामिषुं गिरिशन्त ! बिभर्ष्यस्तवे" यजु० १६,२ । तत्त्व्यसंख्ये २पञ्चसंख्यान्विते च । पञ्चशरशब्दे यज्ञमाखस्य कामयस्य पञ्चसंख्याकत्वानुसारेण शरशब्देन हि पञ्चसंख्या बोध्यते । "पञ्चपञ्चाशदिषुषु ज्ञेयभोजः स्तु राशिषु" ज्योति० । ३ वृत्तक्षेत्रान्तर्गते जीवावधिपरिधिपर्य्यन्तशरसरलरेखायाञ्च तदानयनप्रकारः सोदाहरणः लीला०दर्शितो यथा

'ज्यार्व्यासयोगान्तरघातमूलं व्यासच्छदूनोदलितः शरः स्यात् । व्यासाच्छरोनाच्छरसङ्गुणाच्च मूलं द्विनिघ्नं भवतीह जीवा । जीवार्द्धमेतो शरभक्तयुक्ते व्यासप्रमाणं प्रवदन्ति वृत्ते" उदा० दृश्यविस्तृतिवृत्तान्तर्यत्र ज्या धरिणिता भवेत् । तत्रेषुं वद वाणाज्ज्यां ज्यावाणाभ्याञ्च विस्तृतिम्" न्यासः । व्यासः १०, ज्या ६, अनयोर्योगः १६, अन्तरं ४ तयोर्घातो ६४, तस्य मूलं ८, तेनोनोव्यासः २, दलितः शरः१। तेन १०वृत्तव्यासके वृत्तक्षेत्रे यदि जीवमितिः ६ तदा शरमानम् १ एकवृत्त इति क्षेयम् । ज्ञातशरव्यासके वृत्तक्षेत्रे जीवानयनं यथा व्यासः १० वृत्तः, शरः १वृत्तः तेनोनितः व्यासः ६, तस्य मूलम् ३ । द्वाभ्यां गुणितम् ६, जीवामानम् । ज्ञाताभ्यां ज्यावाणाभ्यां व्यासानयनम् । यथा जीवा ६ तस्यार्द्धं ३, तस्य वर्गः ६। शरसंख्या १ भक्तो६ । शरसंख्या १ योगे व्यासमानम् १० । एवमन्यसंख्यकजीवादौ अनया दिशा शरादानयनम् । यद्वाणां क्रान्तिवृत्तक्षेत्रस्य शरानयनं संक्षेपेण दर्शितम् सि०शि०

"खतिराशियदृद्युज्यानिघ्नस्त्रिज्योद्धृतः शरः । स्फुटोऽसौ क्रान्तिसंस्कारे दक्कर्मण्ययनेऽजे तथा" भू० । "अयं संक्षिप्तो गौणप्रकारः । मुख्यस्तु पूर्वं व्याख्यात एव । तथापीह युक्तिमात्रमुच्यते । विषुवद्वृत्तात् क्रान्तिर्भुजाभिमुखी । क्रान्त्यग्राच्छरः कदम्बाभिमुखः । कथं तेन तिर्य्यक्स्थेन सा संस्कार्या । अतः क्रान्त्यग्रे यद्दृद्युज्याग्रवृत्तं तस्य शरायस्य चयदलरज्जु तेन संस्कृता सती स्फुटा भवति । तज्ज्यानरं कोटिरूपम् । शरः कर्णरूपः । तद्वर्गान्तरपदं द्युज्या वृत्ते भुजः । एतत् सूत्रं दिग्वलनजत्रासंभवम् । तत्र खतिराशियदृक्रान्तिः कदम्बाभिमुखः । तज्ज्यानरं । तद्द्युज्या कोटिरूपज्या कर्णः । यदि विक्षेपीयं कोटिस्तदा शरेण केत्युपपन्नम् । कोटिरूपस्यैव शरस्य ध्रुवेनुमुखस्यात्तज्ज्यायाजं दक्कर्म कर्त्तुं युज्यते" इति० विस्तरस्तत्रैव "विक्षेपलिप्ताः क्षितिजादिकानां खेषा ११० द्विवाणेन्दुमिता १५२ रसाग्न्याः ७६ । शरेन्दवः १२६, खाग्निभुवः १३० सितत्विषौ स्फुटौ क्षत्रल केन्द्रयुक्तौ" भू० "क्षितिजस्य खकृतमिता ११० मध्यमा

क्षिप्तलिप्ता । बुधस्य द्विबाणेन्दुमिताः १५२ । गुरोः षट्सप्तति ७६ । शुक्रस्य षड्विंशा २६ तुल्या । शनेः खर्तेन्दु १२० मिता वेदितव्या । तथा बुधशुक्रयोर्यौ गणितागतौ पातौ तौ स्वस्वशीघ्रकेन्द्रेण युक्तौ कार्यौ । एवं स्फुटौ स्तः । अत्रोपपत्तिः । मध्यभगतिशासनायां वेधप्रकारेण वेधवलये यत्क्षिप्तोपपत्तिर्दर्शितैव । किंत्वन्यफलज्ञार्धधनुषा सन्निहितेन तुल्यं यदा शीघ्रकेन्द्रं भवति तदा तिज्यातुल्यः शीघ्रकर्णो भवति तस्मिन् दिने वेधवलये यावान् परमो विक्षेप उपलभ्यते तावान् यत्क्षस्य परमो मध्यमविक्षेपः । एतेते भौमादीनामुपलब्धा पठिताः । अथ दृग्गुणको पातस्य स्फुटत्वमुच्यते । भगणाध्याये ये बुधशुक्रयोः पातभगणाः पठितास्ते स्वशीघ्रकेन्द्रभगणैरधिकाः सन्तो वास्तवा भवन्ति । ये पठितास्ते खल्वाः कर्मलाघवेन सुखार्थम् । अत पठितचक्रभवौ स्वशीघ्रकेन्द्रयुतौ वास्तवभगणनिष्पन्नौ स्फुटौ भवत । तथा चोक्तं गोले ।"ये चात्र पातभगणाः पठितास्ते ह्यभ्यधोस्ते शीघ्रकेन्द्रभगणैरिलादि"। इदानीं यत्क्षविक्षेपानयनमाह"प्रमि०।"मन्दस्फुटात् खेचरतः स्वपातयुक्ताद्भुजज्या पठितैषुनिघ्नी। स्वशीघ्रकर्णेन हृता शरः स्यात् स्वपातमन्दस्फुटगोलदिक्के" सू० । "मन्दस्फुटाद्यत्क्षात् स्वपातयुक्ताद्भुजज्या साध्या । सा यत्क्षस्य पठितेन शरेण गुणा स्वशीघ्रकर्णेन भाज्या फलं स्फुटविक्षेपः स्यात् । सपातो मन्दस्फुटो यत्क्षो यदि राशिघटकादूनस्तदोत्तरो विक्षेपोऽन्यथा दक्षिणः । अत्रोपपत्तिः । मन्दस्फुटो यत्क्षः स्वशीघ्रप्रतिमण्डले भ्रमति । तत्र च तस्य पातोऽपि । पातो नाम प्रतिमण्डलविमण्डलयोः संपातः । तस्मादारभ्य विक्षेपप्रवृत्तिः । इह सुखरत्नभंगशलाकया कक्षामण्डलं तत्प्रतिमण्डलं च लेख्यकोक्तविधिना विरचय्य तत्र शीघ्रप्रतिमण्डले मेषादेः प्रतिलोमं पातस्थानं च चिह्नयित्वा तत्र विमण्डलं निवेशयम् । पातचिह्नाद्राशिघटकान्तरे विमण्डलप्रतिमण्डलयोरन्तं सम्पातं कृत्वा पातात् पूर्वं तस्मिन्नन्तरे पतितविक्षेपप्रमाणेन प्रतिमण्डलादुत्तरतो विमण्डलं केनचिदाधारे स्थिरं कृत्वा मेषादेरनुलोमं मन्दस्फुटं यत्क्षं प्रतिमण्डले विमण्डले च दृष्ट्वा विक्षेपोपपत्तिं दर्शयेत् । तत्र तयोर्यत्क्षयोर्यावान् विप्रकर्षस्तावांस्तत्र प्रदेशे विक्षेपः । अथ तस्यानयनम् । पातस्थाने हि विक्षेपाभावः । ततस्तस्मिन्नन्तरे शरसो विक्षेपः । अन्तरेऽनुपातेन । अतः पातयत्क्षविक्षेपयोरन्तरं तावज्ज्ञेयम् । तच्च तयोर्योगे कृते भवति । यतो मेषादेरनुलोमं यत्क्षो दत्तः । पातस्तु प्रतिलोमम् । अतस्तयोर्योगः शरार्धं किल केन्द्रम् । तस्य दोर्ज्या साध्या । यदि त्रिज्यातुल्यया दोर्ज्यया पठितविक्षेपतुल्यं प्रतिमण्डलविमण्डलयोरन्तरं लभ्यते तदाऽभीष्टया यत्क्षस्थानभवया दोर्ज्यया किमिति फलं शीघ्रकर्णाग्रे विक्षेपः । अथ द्वितीयोऽनुपातः । यदि शीघ्रकर्णाग्रे एतावान् विक्षेपस्तदा त्रिज्याग्रे क इति । अत्र गुणभाजकयोस्त्रिज्यातुल्ययोस्तुल्यत्वाच्छरे कृते सति दोर्ज्यायाः पठितविक्षेपो गुणः शीघ्रकर्णो हरः । फलं कक्षाप्रदेशे विक्षेपो ज्यारूपस्य चापं स्फुटविक्षेप इत्यर्थः । भूविक्षे स्वतस्यैकमग्रं बद्ध्वा द्वितीयमग्रं विमण्डले यत्क्षस्थाने निबद्धं सूत्रं कर्णः । सूत्रकक्षमण्डलयोरन्तरं स्फुटः शर इत्यादि सर्वं कक्षायां दर्शनीयम् । इदानीं विक्षेपस्य क्रान्तिसंस्कारयोग्यतालक्षणमन्यत् स्फुटीकरणमाह" । प्रमि० "चिज्यावर्गादयनवलमज्ज्याकृतिं प्रोह्य मूलं यष्टिर्यज्या द्युचरविधिखस्राड्तिस्त्रिज्ययाप्तः । यद्वा राशित्रययुतखगद्युज्यकाघ्नस्त्रिभौर्व्या भक्तः स्फुटोभवति नियतं क्रान्तिसंस्कारयोग्यः" सू० । यत्क्षस्य "युतायनांशोद्गकोटिविश्लिनीत्यादिनायनं वलनं साध्यम् । अत्र वलनशब्देन वलनज्या ग्राह्या न धनुः । तथा इतः प्रभृति दृक्क्षज्ञाभिः कर्म कर्तव्यम् । यतो दृक्क्षज्ञाभिः शरज्या शरकलातुल्यैव भवति । तस्मानयनम् । वलनस्य यर्गं त्रिज्यावर्गादपास्य यन्मूलं लभ्यते तद्दृष्टिसंज्ञं ज्ञेयम् । तया यज्या यत्क्षविक्षेपो गुणितस्त्रिज्यया भक्तः स्फुटः क्रान्तिसंस्कारयोग्यो भवति । अथानुकल्प उच्यते । यद्वा राशित्रययुतखगद्युज्यकाघ्न इति राशित्रययुतस्य यत्क्षस्य यावती द्युज्या तया वा गुणयस्त्रिज्यया भक्तः स्फुटो भवति । अत्र भाजकस्वल्पत्वाद्गुणकस्याल्पत्वात् फलं स्वल्पान्तरमित्यतोऽनुकल्प उक्तम् । अत्रोपपत्तिः । क्रान्त्यभावात् किल शरो भवति । शराग्रे यत्क्षः क्रान्तिः शरेण संस्कृता स्फुटा भवति । अत्र गणितागतेनैव शरेण क्रान्तिः स्फुटा क्रियते तदयुक्तम् । यतः क्रान्तिर्विषुवन्मण्डलात् तिर्यग्भ्रुवाभिमुखी । विक्षेपस्तु क्रान्तिमण्डलात् तिर्यग्ध्रुवाभिमुखः । यथोक्तं गोले । "सर्वतः क्रान्तिसूत्राणां ध्रुवे योगो भवेद्यतः । विषुवन्मण्डलग्राह्या ध्रुवे याम्या तथोत्तरा" । सर्वतः क्षेपसूत्राणां ध्रुवाख्यनलवान्तरे । योगः कदम्बसंज्ञोऽयं ध्रुवो

वलनयोधकृत् । तत्रापमण्डलप्राच्या याम्या सौम्या च दिक् सदा । कटम्बभ्रमदृक्तं चेति" । अतो विक्षेपः कदम्बाभिमुखो भवति । ध्रुवाभिमुख्या क्रान्त्या सह कथं तस्य भिन्नदिक्कस्य योगवियोगावुचितौ । तयोर्यद्भिन्नदिक्कं तदायनवलनवशात् । अथ तल्लोपरि प्रदर्श्यते । यथोदितं गोलं विरचय्य क्रान्तिवृत्तं यद्यत्रकचिह्नं तस्मात् परितो नवतिभागान्तरेऽन्यत् त्रिज्यावृत्तं निवेशयम् । अथ यत्रकचिह्नाद्ध्रुवोपरिगामि सूत्रं तस्मिन् वृत्ते यत्र लगति तत्कदम्बयोरन्तरस्य ज्या त्रिज्या स कर्णः । तयोर्वर्गान्तरपदं कोटिः । सा च यष्टिसंज्ञा । क्रान्त्याख्यो विक्षेपः कदम्बाभिमुखः कर्णरूपः । तस्य कोटिरूपकरणायानुपातः । यदि त्रिज्याकर्णे यष्टिः कोटिस्तदा शरकर्णे का । फलं क्रान्तिसंस्कारयोग्यो विक्षेपो भवति । तेन संस्कृता क्रान्तिः स्फुटा । विक्षेपाग्रस्थस्य यत्रकस्य विषुवन्मण्डलस्य च यद्याग्र्योत्तरमन्तरं सा स्फुटा क्रान्तिरुच्यते अथानुकल्पेऽपीयमेव वासना । अत्र सप्तराशियत्रकक्रान्त्या भुजस्थाने कल्पिता स भुजः । सद्भुज्या यष्टिस्थाने कल्पिता सा कोटिः । तत्रापि त्रिज्या कर्ण इति सर्वसुपपन्नम्" प्रभि० । तत्रैव स्थानारेऽप्युक्तम् ।

"नाड़िकामण्डलात् तिर्यगन्तरापमः क्रान्तिदृक्तावधिः क्रान्तिदृक्ताक्करः । लेपदृक्तावधिस्तिर्यगेवं स्फुटो नाड़िकादृक्खेटान्तराक्षेऽपमः" भू० । "क्रान्तिदृक्ते यत् स्फुटयत्रकस्थानं तस्य नाड़िकादृक्तात् तिर्यगन्तरं सा क्रान्तिः अथ विषमण्डले च यत् यत्रकस्थानं तस्य क्रान्तिदृक्तावृत् तिर्यगन्तरं स विक्षेपः । अथ विषमण्डलस्थयत्रकस्य नाड़ीदृक्तावृत् तिर्यगन्तरं सा स्फुटा क्रान्तिः" प्रभि० ।

२सामवेदविहिते यज्ञभेदे । "इषुवज्यौ सामवेदे विहितौ" वि० कौ० । इषुप्रकारः स्वार्थे कन् । इषुकःशरप्रकारे

इषुकामशमी स्त्री शमीभेदे "पूर्व्येषुकामशमी" वि० कौ० ।

इषुकार पु० इषुं करोति कृ-अण् उप० । बाणकारके शिल्पिभेदे "पिङ्गला कुररः सर्पः सारङ्गोऽप्येवमेव च । इषुकारः कुमारी च षडेते गुरवोमताः" बौद्धोक्तं समवेक्ष्य पिङ्गलादीनां यथोपदेष्टृकारित्वात् गुरुत्वं तथा वर्णितम् अथा । "आशा बलवती राजन् ! नैराश्यं परमं सुखम् । आशां निराशां कृत्वा तु सुखं स्वपिति पिङ्गला । सामिषं कुररं दृष्ट्वा बध्यमानं निरामिषैः । आमिषस्य परित्यागात् कुररः सुखमेधते । सत्कारश्च हि दुःखाय न सुखाय कदाचन । सर्पः परबलं वेश्म प्रविश्य सुखमेधते । सुखं जीवन्ति मुनयोभैक्ष्यवृत्तिसमाश्रिताः । अयत्नेनैव जीवन्ति सारङ्गादव पक्षिणः । इषुकारो नरः कश्चिदिषावासक्तमानसः । समीपेनापि गच्छन्तं राजानं नावबुद्धवान्" बहूनां कलहोनित्यं द्वयोःसङ्घर्षणं ध्रुवम् । "एकाकी विचरिष्यामि कुमारीशङ्खको यथा" भा० शा० प० अ० १७८ इषुकृदादयोऽत्र ।

इषुकृत त्रि० इषुरिव शीघ्रगामी कृजगामी वा कृतः । बाणतुल्यं शीघ्रगामितया कृजगामितया च कृते । "त्रिये पूषन्निषुकृतेव देवा नासत्या" ऋ० १८४,३ । इषुकृतेव इवयुच् एवार्थे । आजिधावनाय इषुवच्छीघ्रकृजगामिनौ कृताविव सन्नौ" भा० इषुकृता इव नासत्या इत्यादौ सर्वत्र छान्दस आ । एतेन इषुकृच्छब्दोदाहरणतया एतस्या ऋचः उपन्यासः प्रामादिक एव ।

इषुध शरधारणे कण्डू प० अक० सेट् । इषुध्यति ऐषुध्यीत् इषुध्यिता-इषुधिता । याच्ञायामपि "विश्वो राय इषुध्यति द्युम्नं दधीत यज्ञियः" ऋ० ६,५०,१ । मतिं वो अग्नानां धेनूनामिषुध्य' ऋ० ८,५८,२ । भावे अ । इषुध्या प्रार्थनायां स्त्री । "दिवोवास्तोष्पतेरस्य वीरैरिषुध्येव मरुतो रोदस्योः" ऋ० १,१२२,१ । उण् इषध्यु प्रार्थने "इषध्यव ऋतमापः पुरन्धीः" ऋ० ५,४१,६ ।

इषुधर पु० इषुं धरति भृ-अच् ६त० । बाणधरे इषुभृदादयोऽत्र । "यथाहि सर्वेषुभृतां निरास्यत्" भट्टिः ।

इषुधि पुंस्त्री० इषवो धीयन्तेऽत्र धा-कि इषुध-इन् यलोपो वा । बाणाधारे बाणधारके वा तूणे । स्त्रीत्वे "धनुर्गोरूपमादाय तथाऽन्येषु महेषुधी" भा० व० । १८अ० । निर्वर्तयेन इषुधीरसृक्षः" ऋ० १,३३,३ । पुंस्त्वे "बह्वाऽऽश्चर्यो महेषुधी" रामा० । "बह्वीनां पिता बहूरस्य पुत्रश्चिरोदस्योति समनावगत्" । "इषुधिः सङ्का घृतनाच" ऋ० ६,७५,५ । "इषव इषवो धीयन्ते इषूणां निधानत्वात् "इषुधिरिषूणां निधानम्" यास्कः भा० ।

इषुप पु० इषुं पिबति पा० भावे क उप० प० । असुरभेदे वह्नि अंशावतारे नग्नजिन्नामा राजाक्षीत् यथाह भा० आ० ६७अ० "इषुपोनाम यक्षेशमसुराणां बलाधिकः । नग्नजिन्नाम राजाक्षीत् भुवि विख्यातविक्रमः" ।

इषुपुङ्खा स्त्री इषोः पुङ्खमिव पुच्छमस्याः । शरपुङ्खाख्ये ।

इषुपुच्छा स्त्री इषुरिव पुच्छमस्याः । शरपुङ्खायाम् ।

इषुमत् पु० इषवःसन्त्यस्य मतुप् । प्रशस्तबाणधरे । "इषुमति रघुसिंहे इन्द्रशत्रून् जिघांसौ" भट्टिः ।

दृषुमात्र न०दृषु प्रमाणमस्य दृषु+मात्रच्। १शरप्रमाणे कण्वेदिनां २कुण्डे कुण्डयज्ञे विहितेः।२दृषुप्रमाणमात्रे त्रि० स्त्रियां ङीप्। "यद्येकः पशुः स्यात् एकप्रादेशां कुर्य्यात् अथ यदि पञ्च पशवः स्युः पञ्चप्रादेशां कुर्य्यादिषुमात्रीं वा वीर्य्यां वा दृषुवीर्य्यसम्मितैव तद्भवति। पञ्चप्रादेशा हृदय एव पुरोडाशभवति" शत०ब्रा० ६,५,२,१०। दृढसख्यामधिकृत्य प्रवृत्तम्। उखां करोतीत्युपक्रम्य "पञ्चप्रादेशा शिषुमात्री वा तिर्य्यक् पञ्चपर्वा" कात्या० १६,२,२५, उक्तेः। दृषुमात्रं च अङ्गुष्ठपर्वाधिकाङ्गुलमूलपर्य्यन्तमानं तच्च प्रादेशत्रयम् याज्ञिकसम्प्रदायप्रसिद्धम्। ४शरगतिपर्य्यन्तमाने च।"अथ यदब्रवीत् वर्द्धस्वेति। तस्मादु ह एवंदृषुमात्रमेव तिर्य्यक् वर्द्धते दृषुमात्रं ह्याहुरोऽर्वावावरं समदृग् दृषावव" शत०ब्रा० १,६,३,११ इत्यासुरवर्द्धनप्रकारः। "दृषुमात्रं धनुषः सकाशात् बलात् प्रयुक्तेषुर्यावद्दूरं गच्छति तावन्मात्रं प्रतिज्ञयं तिर्य्यक् उभयपार्श्वतः अवर्द्धत" भा०। शरविक्षेपप्रमाणञ्च। दृषुविक्षेपशब्दे दृश्यम्।

दृषुविक्षेप पु०दृषोर्विक्षेपयोग्यदेशः। सार्द्धशतहस्तमिते शरविक्षेपयोग्ये देशे तन्मानमाह आ०त० पितामहः "मध्यमेन च यामेन प्रक्षिप्तेस्तु शरत्रयम्। हस्तानाञ्च शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः। तत्प्रमाणदेशादिक्रमेणैव पुरोडोत्सर्गः कार्य्यः। "ततः कल्यं समुत्थाय कुर्य्यात् मैत्रं नरेश्वर! नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः"। मैत्रं मित्रदेवताकपायुसम्बन्धात् पुरोडोत्सर्गं दृषुविक्षेपमतीत्य दृषुविक्षेपयोग्यदेशाद्बहिः" आ०त० रघु०।

दृषेत्वक पु० दृषे त्वा इतिभागोऽवसानानुवाके अध्याये वा गोपवा० बुन्। दृषेत्वा इतिशब्दयुक्ते अनुवाके अध्याये च। स च यजुर्वेदीयः प्रथमाध्यायः तस्यादौ दृषे त्वोर्ज्जेत्वेति मन्त्रद्वयत्वात् तस्य तथात्वम् एवं तदन्तर्गतोऽनुवाकोऽपि तथा।

दृष्कर्त्तृ त्रि० निस्+कृ-तृच् "निष्टक्षोदवकृतमिति" प्रातिपाख्यसूत्रेणोपसर्गकेदेशलकारलोपः। निष्कर्त्तरि। "दृषत्कर्त्तारमध्वरस्य प्रचेतसम्" ऋ० १०,१४०,५। दृषत्पदादगोऽयत्।

दृष्कृति स्त्री निस्+कृ-क्तिच् दृषत्कर्त्तृवत् नलोपः। गर्भान्निष्क्रमकारिण्यां मातरि जनन्याम्। "दृष्कृतिर्नाम वो माता वोयूयं स्थ निर्ऋतीः" यजु० १२,८३,। "दृष्कृतिर्नाम निर्ऋतिनाम्नी माता जननी" वेददी०।

दृष्ट त्रि० दृश-कर्म्मणि क्त। १अभिलषिते, २प्रिये "दृष्टोऽसि सखा चेति गीता० च। यज भावे क्त। ३यज्ञादौ न० कर्म्मणि, क्त। ४पूजिते ५एरण्डवृक्षे पु०। ईषत्कारे न०। 'एकाग्निकर्म्म हवनं त्रेतायां यच्च हूयते। अन्तर्वेद्यान्तु यद्दानमिष्टं तदभिधीयते। अग्निहोत्रं तपः सत्यं वेदानाञ्चानुपालनम्। आतिथ्यं वैश्वदेवञ्च प्राहुरिष्टमिति क्रतुम्" जातूकर्णोक्ते ७धर्म्मकार्य्ये न०। दृष्टञ्च दृष्टाविषयः तच्च द्विविधं गौणं मुख्यञ्च। तत्र दृष्टरेच्छानधीनेच्छाविषयोसुखं तत्साधनं गौणम्। तत्र मुख्यमिष्टं सुखं दुःखाभावश्च। तदिच्छाया दृष्टरेच्छानधीनत्वात्। तत्साधनं पाकभोजनादि गौणं सुखदुःखाभावेच्छयैव तदिच्छायाः सत्त्वेनात्। अधिकमिच्छाशब्दे ६१२ पृष्ठे उक्तम्। तत्रेच्छाविषये "सह यज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्"। "अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्म चोच्यते"। "दृष्टं हि वो देवा दास्यते यज्ञभाविताः" इति च गीता। यत्तु "पुरोडाशमभुजामिष्टमिष्टं कर्त्तुमलन्नराम्" माघः दृष्टं यागः दृष्टममीष्टं कर्त्तुमलन्नरामित्यर्थः।"दृष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात्" देवलः। दृष्टं यजनम्"शु०त०रघु० दृश्यते च "यष्टुरिष्टं क्रतुशतम्" विक्रमो० स्मृतिपरिभाषिते दृष्टकर्म्मणि द्विजातीनामेवाधिकारः न स्त्रीशूद्रयोः यथाह "दृष्टसूत्रं द्विजातीनां धर्मः सामान्य उच्यते। अधिकारी भवेच्छूद्रः पूर्त्ते धर्मे न वैदिके"जातूकर्णः "वैदिके वेदसाध्ये अग्निहोत्रादाविति"रत्नाकरः। "पितव्यगुरुकौशिलान् भर्त्तुः स्वकीयमातुलान्। पूजयेत् कन्यपूर्त्ताभ्याम् दृष्टानाचार्य्यतीन् स्त्रियः" दृष्टस्मृतिवचने स्त्रियां पूर्त्तमात्रेऽधिकारविधानात् तत्र "जलाशयोत्सर्गरूपपूर्त्ते गोरवतारव्याजेन लक्ष्मणयायजमानकर्तृकमन्त्रपाठविधानात् तत्र यजमानकर्तृकतया स्त्रीशूद्रयोरनधिकारेण लक्षति यानेऽपि तयोर्नाधिकारः विशेषोपदेशाभावात्"इति हेतुनिर्णयानुसारिणः। दृष्टोत्सर्गे तदङ्गहोम इव ब्राह्मण द्वारा तन्मन्त्रपाठसम्भवात्तयोरपि तत्राधिकारः इति रघुनन्दनादयः। "यजमानस्य तु शूद्रस्य विप्रोमन्त्रेण गृह्णते"वराहपु०"तद्वत्तमङ्गलाग्नौ न स्त्री जुहुयादनुमेतः" व्यास० वचनं तु स्वयंहोमविषयम्। "श्रौतस्मार्त्तक्रियाहेतोर्हैण्यादात्विजः स्वयम्"यात्त०श्रौत इव स्मार्त्तेऽपि कर्म्मणि ऋत्विग्वरणोक्तेः। अतएव "ऋत्विग्वरे नियुक्तस्य यमो संपरिकीर्त्तितौ। यज्ञे स्वाध्याय-

यात् पुरुषं क्रान्तं वाहेऽथ वा जयमिति" वृह० उक्तेः ६ "श्रौते कर्मणि न० "उद्बुध्यस्याग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते सं सृजेथामयञ्च" यजु० १५,५४ इष्टापूर्त्ते श्रौतस्मार्त्ते कर्मणी" वेददी० । १० इच्छया कल्पिते त्रि० "इष्टक्षतिरिष्टगुणिता व्येका दलिता विभाजितेष्टेन" लीला० ११यत्नेन तोषिते परात्मनि १२विष्णौ च पु० "इष्टोविशिष्टः शिष्टेष्टः" विष्णुस० "इष्टः परमानन्दात्मकत्वेन प्रियः यत्नेन पूजितो वेति" भा० । यज-करणे वा० क्त, भावे क्त अर्थे अच् वा । १३ इष्टकायां न० । "मरुतार्केण शुध्यन्ति पक्वेष्टरचितानि च" विष्णु० ।

इष्टकचित त्रि० इष्टकया चितः स्तृतः । इष्टकाभिर्व्याप्ते

इष्टकर्मन् न० इष्टप्रसिद्ध्यर्थं कर्म शाक० त० । लीलावत्युक्ते गणितभेदे तत्प्रकारो यथा "अभीष्टकर्मसु करणसूत्रं इष्टम् "उद्देशकालापवर्तिराशिः स्वल्पो वृतो ऽभीरहितो युतो वा । इष्टाहृत इष्टमनेन भक्तं राशिर्भवेत् प्रोक्तमितीष्ट कर्म । अत्रोद्देशकः । पञ्चघ्नः स्वत्रिभागोनोदशभक्तः समन्वितः । राशिस्त्र्यार्द्धपादैः, स्यात् कोराशिर्वृत्तसप्ततिः । न्यासः गुणः ५ । स्वत्रिभागः १/३ । हरः१० । राश्यंशाः १/३ १/२ १/४ । दृश्यम् ६८ । अत्र किल कल्पितराशिः ३ । पञ्चघ्नः । १५ । स्वत्रिभागोनः । १० । दशभक्तः । १ । कल्पित ३ राशेस्त्र्यार्द्धपादैः ३/३ ३/२ ३/४ समन्वितोहरोजातः १७/४ । अथ इष्टम् ६८ इष्टेन ३ गुणितम् २०४ । हरेण १७/४ भक्तं जातोराशिः । ४८ । एवं सर्वत्रोदाहरणे राशिः केनचिद्गुणितोभक्तोवा राश्यंशेन रहितोयुतोवा इष्टलब्धेष्टं राशिं प्रकल्प्य तस्मिन्नुद्देशकालापवर्तकर्मणि कृते यच्छिष्यते तेन भजेदिष्टगुणं फलं राशिः स्यात् । तत्र इष्टजात्युदाहरणम् । यूथार्द्धं सप्तभागं वनविचरणगं कुञ्जराधाञ्च दृष्टं द्वयभागंचैव नद्यां पिबति च सलिलं सप्तमांशेन मिश्रः । पञ्चम्या चाष्टमांशः स्तनभरसहितः क्रीडते सानुरागोनागेन्द्रोक्तिनीभिस्त्रिभिरनुगतः का भवेद्यूथसंख्या । न्यासः

१/२ १/४ १/८ दृश्यम् ४ । एषां सवर्णने १/२ १/७ १/८ हाभ्यामपवर्त्तितं २/३ । ४/२ । ५/३६ । पुनरेषां सवर्णितानामैक्यं नवभिरपवर्त्तितं २५१/२५२ इष्टोनं १/२५२ अनेन ४ हते इष्टगुणिते भक्ते जाता कक्षिसंख्या १००८ । अपरोदाहरणम् । कमलकलहरागेस्त्र्यंशपञ्चांशषष्ठैस्त्रिनयनहरिरुद्रार्यावेतुदैर्येण चार्या । गुरुपदमथ षड्भिः पूजितं शेषपद्मैः सकलकमलसंख्यां क्षिप्रमाख्याहि तस्य । न्यासः १ १/५ १/६ १/४ दृश्यम् । ६ । अत्रेष्टं राशिम् १ प्रकल्प्य प्रागुक्तजातोराशिः । १२० । अन्यदुदाहरणम् । हारस्तारस्तरुण्यानिधुवनकलहे मौक्तिकानां विशीर्णोभूमौ यातस्त्रिभागः शयनतलगतः पञ्चमांशोऽस्य दृष्टः । प्राप्तः षष्ठः सुकेश्या गणक ! दशसकः संगृहीतः प्रियेण दृष्टं षट्कञ्च स्तले कथय कतिपयैर्मौक्तिकैरेष हारः । न्यासः १/२ १/५ १/६ १/१० दृश्यम् । ६ । अत्रेष्टं राशिम् १ प्रकल्प्य प्रागवज्जातोराशिः १० । अथ शेषजात्युदाहरणम् । खार्द्धं प्राप्तात्मयागे नवलवयुगलं योऽवशेषाच्च काश्यां शेषार्द्धाङ्घ्रिं गुलक्षेतोः पथि दृशमलवान् षट् च शेषाङ्घ्रयायाम् । शिष्टा निष्कत्रिषष्टिर्निजगदहमनया तीर्थमान्यः प्रयातस्तस्य द्रव्यप्रमाणं वद यदि भवता शेषजातिः श्रुतास्ति । न्यासः ।

१/१ दृश्यम् ६२ । अत्र रूपम् १ राशिं प्रकल्प्य

१/२ भागान् शेषान् शेषादपास्य अथवा भागा-

२/६ पवाहविधिना सवर्णिते जातम् । ७/६ ०

१/४ अनेन १इष्टगुणिते ६२ हृते । भक्ते जातं

६/१० द्रव्यप्रमाणम् । ५४० । इदं विलोमसूत्रेणापि सिध्यति । अथ विलोमजात्युदाहरणम् । "पञ्चांशोऽलिकुलात्कदम्बमगमत्त्र्यंशः शिलीन्ध्रं तयोर्विल्वं षड्भिगुणोऽगात्ति ! कुटजं दोलायमानोऽपरः । कान्ते ! केतकमालतीपरिमलप्राप्तैककालप्रियादूताहूतइतस्ततोभ्रमति खे भृङ्गोऽलिसंख्यां वद । न्यासः १/५ १/३ २/५ दृश्यम् ।११ जातमलिकुलमानम् ।१५। एवम् अन्यत्रापि" ।

इष्टका स्त्री इष-तक्न् टाप् इष्टकेषीकामालानाम्" पा० निर्देशात्तत्त्वम् । (इट्) इष्टादिनिर्म्मिते १मृत्खण्डभेदे यज्ञिये अग्निचयनार्थे २मृदादिनिर्म्मिते द्रव्यभेदे च शत० ब्रा० तु निर्वचनान्तरमुक्तं यथा । "यावद्वाऽइमं जुह्वद्यात्तावत् भवतीति तदाहुः इष्टे कमभवत्तस्माद्वेष्टका" ६,१, २,२३ । "ते देवा अग्नेराकृतिमिरभिषज्यन् ते यां यामाकृतिमजुहवुः सार्षनं पक्वेष्टका भूत्वा समपद्यत तद्यदिष्टात् कमभवत्तस्मादिष्टकस्तत्कादग्निना इष्टकाः पचन्त्याकृतीरेवैनात्तत् कुर्वन्ति" इति च तत्रैव । इष्टकाकरणकालप्रकारादि" कालाव० शौ० १६,२क० दर्शित यथा । "इष्टकासम्भरणमष्टम्याम्" १सू० । "इष्टकायाश्चितां सम्भरणम् तदष्टम्यां भवति "अष्टकायाश्चितां सम्भरतीति

(६,२,२,२१) शत०ब्रा० वचनात्। उखा चोपलक्षणम् अघाटाद्यपि सम्भ्रियतएव ततश्चात्रापि तस्या अपि प्रयोक्तृत्वम्। सम्प्रदायस्तु फाल्गुनलक्षणाष्टम्याम्" कर्कः "आहवनीयस्य पुरस्तान्मात्या चतुरश्रे अभ्रे स्फ्यमिव भवदधाति भूमिसमम्" २सू०। "भूमिसममन्यूनानतिरिक्तम्" क०। "पिण्डमपरेण अभ्रे वल्मीकवपां क्रिष्टां निदधाति"१सू०। 'पिण्डाहवनीययोर्अभ्रे अर्धमध्ये" क०। "अभ्रे पिण्डाहवनीययोर्मध्ये, वल्मीकवपाम् उपदीकालक्तस्य स्फ्यस्य वपामिव वपाम् अन्तःपुटां क्रिष्टां क्रिष्टसंयुक्ताम्" संप०। "आहवनीयं दक्षिणेन त्रिरुन्मुञ्चन्पश्चाल्लोकंपृणाक्षिरुन्ति प्राङ्मुखोऽवगूर्तभागाः पूर्वापरा रासभोमध्येऽग्नेपूर्वाः" ४सू०। "आहवनीयस्य दक्षिणतः त्रिरुन्मुञ्चन्पर्वभिः पञ्चाङ्गुलीभिः पञ्चाङ्गुलो सुस्थिराभिः तामिर्वक्षाक्षिरुन्ति प्राङ्मुखाः अवगूर्तभागाः पूर्वापरोत्या रासभोमध्येऽग्नेपूर्वाः" क०। "उत्तरत आहवनीयस्यारत्निमात्र उभयतस्त्रीणा वैणवी सुस्थिराभिः कलमाभावेऽकलमाधी प्रादेशमात्रारत्निमात्रीवा" ५सू०। "आत्मन्यात्मानुसारतो मा भूदित्याहवनीयग्रहणम्" क०। "परिपाकवशात्कर्मुरा" संप०। "क्रिरण्मयीमेके" ६सू०। "एके आचार्या दक्षन्ति, अतश्च विकल्पः" क०। "अष्टस्रोतं जुहोति संततमुदञ्चन् युञ्जान इति (११,१) ७सू०। "अष्टस्रोतमाज्यद्रव्यं संततं जुहोति" क०। 'देवस्य त्वेति (११,१) अभिमादाय "स्फ्य आधारेणेनमभिमन्त्रयते"। (११,११) ८सू०। "अग्रप्रभृतीश्च प्रत्यृचं प्रत्यृचं युञ्जाथां योगे योगइति (११,१२,१३) ९सू०। "अभिमन्त्रयते" क०। "अनुपस्फ्यं गच्छतुक्रमयत्येनान् प्राचः प्रतिमन्त्रं प्रत्यृचमुर्वन्तरिक्षं पृथिव्याः सधस्थादिति" (११,१५,१६) १० सू०। "अग्निषु ज्वलत्सु पिण्डं गच्छन्त्यग्निं पुरीष्यमिति" (११,१६)। (६,१,२,१) शत०ब्रा० ११सू०। "दक्षिणतश्च पयवो युगपत्" १२सू०। "गच्छतां च दक्षिणतः पयवः, उत्तरतश्च स्रुचः युगपद्गमनं कुर्वन्ति"क०। "अनड्वा पुरुषमीक्षते देवपितृमनुष्यान्तर्धेकमग्निं पुरीष्यमिति"। (११,१६) १३सू०। "यो देवादीनावति स देवपितृमनुष्यार्थइडः" क०। "वल्मीकवपामादाय क्रिष्टेन पिण्डपीलुतेऽग्नाग्निरिति" (११,१७)१४सू०। "इडा निदधात्येनाम्। १५सू०। "वल्मीकवपाम्" क०। "आगस्त्येत्यभिमन्त्रयतेऽग्नम्" (११२८) १६सू०। "आक्रम्येत्येनेन (११,१८) पिण्डमधिष्ठापयति" १७ सू०। "एनेनेत्यस्योऽभिधीयते" क० "द्यौस्त इति (११,२०) पृष्ठस्योपरि पाणिं धारयन्नुपस्पृशन्नुत्क्रामेत्युत्क्रामयति (११,२१) १८सू०। "अश्वम्" क०। "उदक्रमीदित्यभिमन्त्रयते (११,२२) १९ क०।"अश्वमेव" क०।"आहवनीयवत् स्थापयति पिण्डस्य" २०सू०। "मन्थन्" क० "उपविश्य स्रुदमभिजुहोत्या त्वा जिघर्मीति (११,२२) 'व्यतिषक्ताभ्यामङ्गुष्ठाभ्यामाकृतो (११,२२,२३) स्रुवेणाश्वपदे" २१सू०। "स्रुतसंस्कारत्वादुपविश्येत्युच्यते, व्यतिषक्तस्य एकस्याः पूर्वार्धे इतरार्धः इतरयोरप्येवमेव" क०। "अभ्या पिण्डं त्रिः परिलिखति परि वाजपतिरिति (११,२५,२७) बहिर्बहिरुत्तरयोत्तरयाभ्या पिण्डं खनति देवस्य त्वेति (११,२८) २२सू०। "अभिपक्षणमभ्यालम्भनलिङ्गत्वार्थम् तथा चाह "अत्र सा वैणव्यभिघट्टसीदतीति "(६,५,४,३ शत०ब्रा० उत्तरया परया ऋचा पूर्वलिखितादक्षिणोत्तराग्रप्रदेशे परिलिखति"। क० "कृष्णाजिनमासीनोत्तरलक्षिण् पुष्करपर्णमयां पृच्छमिति' (११,२९) २३सू०। "तक्षिन्कृष्णाजिने" क०। "विमार्ष्टीहविरिति (११,२९) २४सू०। "पुष्करपर्णम्" क० "आलभत उभे यज्ञं च स्थ इति"(११,३०३१) २५सू०। "उभे कृष्णाजिनपुष्करपर्णे, यत्रत्यान्त्र युगपदालम्भनम्" क०। "पिण्डं पुरीष्योऽसीति (११,, ३२)। "२६ सू० 'आलभते" क०। "पाणिभ्यां परिगृह्णीयेन दक्षिणोत्तराभ्यां दक्षिणः साभिस्त्वामग्नइति" (११,३२ २८)। षड्भिः सर्वं सकृदृत्वा" २७सू० "यज्ञेन मन्त्रः "अग्नेर्नं परिगृह्णातीति' शत०ब्रा० (६,३,२,२) वचनात्"क० इति द्वितीया कण्डिका।

"पुष्करपर्णे निदधाति"१सू०। "अपः स्रुभ्येऽनयत्यपो देवीरिति (११,३८)२सू०। "स्रुभ्रः पिण्डावटः" क०। सं तदति (११,२९) वा तमपक्षिपति "३सू०। "स्रुभ्रएव" क०। "अनामिकया संयति पुरस्तात्प्रादक्षिणमुत्तरतश्च" ४सू०। "संवापश्चावटे पुरीषस्य" क०। "आक्षीर्ष्णयोरन्वातृत्तृणत्ति स्रुजात इति"(११,४०) ५सू०। "अक्षीर्ष्णयोः कृष्णाजिनयज्ञायज्ञीयोः" क०। "बन्धनायोभयोः प्राणान् सर्वत ऊर्ध्वान् करोति"६सू०। 'त्रिवृता स्रुचावुद्गृह्योपनक्षति वाघोऽवगूहति। (११,४०) ७सू०। 'उद्गृह्योत्तानान्" क०। "उत्तिष्ठति पिण्डादावोदु त्रिरिति" (११,४१) ७सू०। "अर्ध्वबाहु

प्राञ्चं प्रस्तृणात्यूर्ध्वं ज्ञ पुरुष इति" (११,४२) ८सू०। "प्रसारितबाहुः पिण्डम्" क०। "अवहत्यैव परिणाभि धारयन्नश्वप्रभृतीनभिमन्त्रयते स जातः स्थिरो भव शिवो भवेति"। (११,४२,४५)" ९सू०। "अवहत्य पिण्डं नाभेरुपरि धारयन्" क०। "धारयत्येवासनुपरि पिण्डमनुस्तृणन् प्रैतु वाजी हवाग्निमित्यक्षरयोः" (११,४६) १० सू०। "एवं पश्चुनासनुपरि पिण्डमनुपस्तृणन् धारयति प्रैतु वाजीत्यश्वस्य, हवाग्निमिति खरस्य" क०। "अग्न आयाहीत्याहुत्य (११,४६) खराक्रागस्यति सत्यमित्यानिधानात्" (११,४७) ११ सू०। "धारयत्यनुपस्तृणन्नेव" क०। "आयन्त्यावर्त्य पश्चुनजः पुरस्ताद्रासभो मध्ये" १२सू०। "स्वस्थानस्थितानामेवाहुतिः" क०। "अनड्वा पुरुषमोक्षते पूर्ववदग्निं पुरोध्यमिति"। (११,४७) १३ सू०। "अनन्यार्थत्वात् पूर्ववच्छब्दनामग्निषु प्रज्वलत्स्विज्यते (२,११)" क०। "उत्तरत आहवनीयस्योद्धृतावोक्षिते सिकतोपकीर्णे परिस्तृते प्राग्द्वारे निदधात्योषधय इति" (११,४७,४८)१४ सू०। "वि पाजसेति" (११,४९) प्रसव्येनमजलोमान्यादाय प्रागुदीचः पश्चुनुत्सृजति १५ सू०। "प्रसव्य पिण्डमजलोमानि गृहीत्वा प्रागुदीचीं दिशं प्रति पश्चुनुत्सृजति" क०। "आपो हि ष्ठेति (११,५०) पर्णकषायप्रक्षुदकमासिञ्चति पिण्डे" १६ सू०। "पर्णकषायं पलाशकषायम्" क०। पलाशत्वगभिःक्वथितसदकं पलाशकषायपक्वम्" संय०। "फेनं च तृणात् ततः हत्वा" १७ सू०। "तत एतोदकात् पूर्वतरं फेनं हत्वोदकमासिञ्चति चषवद्धात्फेनम्" क०। "अजलोमभिः संस्तृजति मित्रः संस्तृणातीति (११, ५१)" १८ सू०। "पिण्डम्"। "शर्कराथोरसाश्मचूर्णैश्च वेद्याः संस्तृणाति (११,५४)" १९सू०। "शर्करा प्रसिद्धा अयोरसो लोहसिङ्घाणः कोट इति यः प्रसिद्धः अश्मचूर्णैः पाषाणचूर्णैः चषवद्दारुभिः पिण्डं संस्तृजति" क०। "शर्कराः क्षुद्रपाषाणकन्दुकाः अयोरसो लोहरसो यत्राग्न्यमानाल्लोहात्पृथग्भवतीति कोट इति लोके प्रसिद्धः अश्मा दृढपाषाणः तैर्यं चूर्णैः संस्तृजति" संय०। "संस्तृणातीति" (११, ५५,५७) संवीति" २०सू०। "पिण्डं मिश्रयति आङ्गालयतीत्यर्थः" क०। "अषाढां करोति मस्तिष्को प्रथमविद्वा तदाख्या" २१सू०। "अषाढाख्यामिष्टकां मस्तिष्को करोति। मस्तिष्कशब्दस्याग्नेयाप्रविष्टत्वादाद्य प्रथमविद्वा तदाख्या" "तद्वै मस्तिष्को"ब्रा० (६,५,२,१) क०। "भार्यायां मध्ये प्रथमं लब्धा प्रथमपरिणीता या स्त्री सा तदाख्या" संय०। "यजमानपादमात्रीं तत्राङ्किताम्" २२सू०। "मस्तिष्कपादमात्री सा मूर्दिति यजमानपक्षम्" क०। "त्रिषु स्थानेषु लिखिताम्" संय०। "यजमान उखां करोति मृदमादाय मखस्य शिर इति (११,५७) २३ सू०। "मृदादाने मन्त्रः" क०। "प्रादेशमात्रीं तिर्यगूर्ध्वां च" २४ सू०। "तिर्यगायामप्रमाणे विस्तारप्रमाणे च" क०। "पञ्चप्रादेशमितां मुखमात्रीं वा तिर्यक्पञ्चपर्णां" २५ सू०। "ऊर्ध्वं तु प्रादेशमात्रीमेव पञ्चपर्णामपि" क०। "मखस्येति (११,५८) प्रथयति" २६ सू०। "आर्त्तं पिण्डम्" क०। "अन्तानुत्तीय सर्वतः प्रथमं धातुमादधाति मृदाख्येति" (११,५८) २७सू० "धातुशब्दानुत्तरप्रक्षेप एव" क०। "प्रथितस्य तत्प्रान्तानुत्तीय ऊर्ध्वानुगमयति, धातुं प्रथमपिण्डिकाम्" संय०। "संलिख्य शकृतां लात्वोत्तरमादित्याख्येति" (११,५८) २८सू०। "संलिख्य पिण्डिलया मृदा संलिख्य वारिणा संश्लक्ष्णां सुकुमारां कृत्वा" संय०। "विश्वे त्वेति (११, ५८) समीकरोति" २९सू०। (६,५,२,२) श्रुतः ब्रा०। "द्वितीयउत्तरे वर्तिं सर्वतः करोत्यदित्यै रास्नेति (११,५९) ३०सू०। उखाया ऊर्ध्वप्रमाणस्योत्तरे द्वितीये उपरि वर्त्तमाने तृतीये भागे सर्वतः सर्वासु दिक्षु कृष्णयीं वर्तिं दक्षाकारां रास्नां (काञ्ची गुणस्थानीयाम्) करोति"क०। "ऊर्ध्वमूर्णां प्रतिदधं' ३१सू०। "वर्त्तीः करोति चतस्रोऽपरावर्तिं प्राग्राः" ३२सू०। उखायाश्चतस्रोऽतिवचनत्वाद्दक्षिणोत्तरा भवति" क०। "सर्वासु दिक्षु पार्श्वमध्ये बाह्यप्रदेश अपरावसक्तो दक्षीकूर्ध्वामूर्णां करोति किण्वमाषाः मूलत आरभ्य दक्षिणां प्राग्राः तिस्रो रास्नां यावदुग्राः" संय० इति ३क्षिणिका

"स्नानिवाप्येषूच्यति" १ सू०। "ऊर्ध्ववर्त्तीनामेकैकस्याः" क०। "आसां चतसृणां दक्षीनामन्येषु तिरश्चा दक्षिणरूपेण स्नानिव स्नानसदृश्यानुद्वहनमुच्यति" संय०। "द्विस्नानमष्टस्नानमेके" २सू०। "ता वैके द्विस्नानमष्टस्नानमिति (६,५,२, १२) श्रुतेः द्विस्नानपक्षएकस्मिन्नेव वर्त्मन्ये क्रियते अष्टस्नानपक्षे तु द्वाविति क०। "बिलं मृच्छात्यदितिरिति"(११,५२) ३सू०। "मृच्छे मृच्छातीत्यर्थः" क०। "लात्वेति (११,५२) निदधाति उखाम्" ४सू०। "तिस्रएवे" ५सू०। "उखाः

(६,२,२,२१) शत०ब्रा० वचनात् । उखा चोपलक्षणम् अषाढाद्यपत्र सन्भ्रियतएव ततश्चात्रापि तस्या अपि त्रयोकृत्वम् । सम्प्रदायस्तु फाल्गुनलक्षणाष्टम्याम्" कर्क: "आहवनीयस्य पुरस्तान्मत्या चतुरश्रे अभ्रे स्फ्यमण्ड-मवदधाति भूमिसमम्" २सू० । "भूमिसमन्यूनानतिरिक्तम्" क०। "पिण्डमपरेण अभ्रे वल्मीकवपां छिद्रां निदधाति"३सू०। 'पिण्डाहवनीययोर्मध्ये अर्धपथे" क०। "अभ्रे पिण्डाहवनीययोर्मध्ये, वल्मीकवपाम् उपदी-कालक्षस्य स्फ्यस्य वपामिव वपाम् अन्तःपुटां छिद्रां छिद्र-संयुक्ताम्" संप० । "आहवनीय दक्षिणेन त्रिरन्मुञ्ज-पञ्चाक्रीवद्भाक्षिणन्ति प्राञ्चोऽन्यगर्दभाजा: पूर्वापरा रास-भोमध्येऽन्यपूर्वा:" ४सू० । "आहवनीयस्य दक्षिणत: त्रिरन्मुञ्जमयैभि: पञ्चाक्रीभि: पञ्चाक्रवो सुखरिका: ताभिर्वाक्षिणन्ति प्राञ्चुखा: अन्यगर्दभाजा: पूर्वापर-रीत्या रासभोमध्येऽन्यपूर्वा:" क० । "उत्तरत आहवनी-यस्यारत्निमात्र उभयतस्त्रीणा वैणवी सुषिराभि: कलमा-ञ्चभावेऽकलमाधो प्रादेशमात्रारत्निमात्रोवा" ५सू० । "आ-ननर्त्यात्मनासुत्तरतो मा भूदित्याहवनीयग्रहणम्" क० । "परिपाकस्थात्कर्बुरा" संप० । "स्त्रिरण्यवीमेके" ६सू० । "एके आचार्या दृष्ट्वन्ति, अतश्च विकल्प:" क० । "अष्ट-स्फ्योतं जुहोति संततमुदस्फ्यन् युञ्जान इति (११,१) ७सू० । "अष्टस्फ्योतमाज्यद्रव्यं संततं जुहोति" क० । 'देवस्य त्वेति (११,१) अभिमादाय "श्रुक्ष आधारेणाभि-मन्त्रयते" । (११,११) ८सू० । "अग्नप्रभृतींश्च प्रस्तृणं प्रस्तृणन् युञ्जाथां योगे-योगइति (११,१२,१७) ९सू० । "अभिमन्त्रयते" क० । "अनुपस्फ्यग्रक्षुत्रुक्समयत्येनान् प्राचः प्रतिमन्त्रं प्रस्तृणन्नुर्वन्तरिक्षं पृथिव्याः सधस्थादिति" (११,१५,१६) १० सू० । "अग्निषु त्वत्तस्तु पिण्डं गच्छन्त्यग्निं पुरीष्यमिति" (११,१६) । (६,२,२,१) शत०ब्रा० ११सू० । "दक्षिणतश्च पशवो युगपत्" १२सू० । "गच्छतां च दक्षिणतः पशव:, उत्तरतश्च पुरुषा: युगपद्गमनं कुर्वन्ति"क० । "अनड्वा पुरुषमीक्षते देवपितृमनुष्यानर्थकमग्निं पुरीष्यमिति" । (११,१६) १२सू० । "यो देवादीन्नावति स देवपितृमनुष्यार्थ-कृतः" क० । "वल्मीकवपामादाय छिद्रेण पिण्डपीत्ता-तेऽग्निरिति" (११,१७)१४सू०। "इडा निदधाति नाम। १५सू०। "वल्मीकवपाम्" क०। "आगस्त्येत्यभिमन्त्रयतेऽ-ग्नम्" (११२८) १६सू० । "आक्रम्यस्त्रेणेन (११,१८) पिण्डमधिष्ठापयति" १७ सू० । "एनेनेत्यग्नोऽभिधीयते" क० "द्यौस्त इति (११,२०) पृक्तस्योपरि यानि धारवत्र-तुपस्फ्यग्रक्षुत्रुक्कामेत्युत्क्रामयति (११,२१) १८सू० । "अश्वम्" क० । "उदक्रमीदित्यभिमन्त्रयते (११,२२) १९ क०।"अश्वमेव"क०।"आहवनीयवत् स्थापयति पिण्डस्य" २०सू० । "पञ्चभृ" क० "उपविश्य स्फ्यमभिजुहोत्या त्वा जिघर्मीति (११,२३) 'व्यतिषक्ताभ्यामङ्गाभ्यामाक्रमतो (११,२२,२३) स्फ्येनाश्वपदे" २१सू० । "स्फ्य-संस्कारत्वादुपविश्येत्युच्यते, व्यतिषक्तत्व एकस्याः पूर्वार्ध इतरार्धः इतरयोरप्येवमेव" क० । "अभ्या पिण्डं त्रिः परिलिखति परि वाजपतिरिति (११,२५,२७) बर्हि-र्बर्हिरुत्तरयोत्तरयाभ्या पिण्डं खनति देवस्य त्वेति (११,२८) २२सू० । "अभिपक्षणमभ्यन्तरनिखनार्थम् तथा चाह "अत्र सा वैष्णव्यऋगुत्तरीदीति "(६,५-४,२ शत०ब्रा० उत्तरया परया ऋचा पूर्वलिखिता-ङ्कितिर्बाह्यप्रदेशे परिलिखति"। क० "ब्रह्मणाजिनमास्तीर्योत्तरतस्तस्मिन् पुष्करपर्णमयां पृक्तमिति' (११,२६) २३सू० । "तस्मिन्ब्रह्मणाजिने" क० । "विमार्ष्ट्यनक्ति इति (११,२६) २४सू० । "पुष्करपर्णम्" क० "आ-लभत उभे वर्ष्म च स्थ इति"(११,२७) २५सू०। "उभे ब्रह्मणाजिनपुष्करपर्णे, यत्कृत्वाऽऽ युगपदालम्भनम्" क० । "पिण्डं पुरीष्योऽसीति (११,, २२) । "२६ सू० "आलभते" क०। "पाणिभ्यां परिगृह्णीतेन दक्षिणो-त्तराभ्यां दक्षिणः साभित्यालभनइति" (११,२२ २८) । षड्भिः सर्वं सकृद्वृत्या" २७सू० "यज्ञेन मन्त्रः "अथैनं परिगृह्णातीति" शत०ब्रा० (६,३,२,२) वचनात्"क० इति द्वितीया कण्डिका ।

"पुष्करपर्णे निदधाति"१सू०। "अपः स्रुभ्येऽपनयत्यपो देवीरिति (११,२८)२सू० । "स्रुभ: पिण्डवट:" क० । सं तदति (११,२९) वा तमपक्षिपति "३सू० । "स्रुभ-एव" क० । "अनामिकया संवपति पुरस्तात्प्रादक्षिणमुत्तरतश्च" ४सू० । "संवपत्रावटे पुरीषम्" क० । "आक्षीर्थयोरन्तानुवृत्यति सुजात इति"(११,३०) ५सू०। "अक्षीर्थयोः ब्रह्मणाजिनपक्षापक्षयोः" क० । "वल्मनायोभयोः प्रान्तान् सर्वत अध्वान् करोति"६५०। 'त्रिवता स्रुवेणोपोपनक्षति वाशोऽग्नइति । (११,३०) ६सू० । "उदृष्टकीतानन्तान्" क० । "उत्तिष्ठति पिण्ड-मादायोदु त्यमिति" (११,३१) ७सू० । "अर्ध्वमाद-

प्राङ्मुखं प्रस्तृणात्यूर्ध्वं ज्ञ पुरुष इति" (११,४२) ८सू०। "प्रहारितवाङ्मुखः पिण्डम्" क०। "अवहत्योपरिनाभि धारयत्यस्य प्रभृतीनभिमन्त्रयते स जातः स्थिरो भव शिवो भवेति"। (११,४२,४५)" ९सू०। "अवहत्य पिण्डं नाभेरुपरि धारयेत्" क०। "धारयत्येवासुपरि पिण्डमनुस्तृणन् प्रैतु वाजी हविरग्निमित्यक्षरयोः" (११,४६) १० सू०। "एवं पश्चुनाप्युपरि पिण्डमनुपस्तृणन् धारयति प्रैतु वाजीत्यस्य, हविरग्निमिति स्वरस्य" क०। "अग्न आयाहीत्याहुत्य (११,४६) स्वराज्ञागस्यतं सत्यमित्यानिधानात्" (११,४७) ११ सू०। "धारयत्यनुपस्तृणन्नेव" क०। "आयन्त्यापर्त्य पश्चुनः पुरस्तात्रासभो मध्ये" १२सू०। "स्वस्थानस्थितानामेवाहुतिः" क०। "अनड्वा पुरुषमीक्षते पूर्ववदग्निं पुरीष्यमिति"। (११,४७) १३ सू०। "अनन्यार्थत्वात् पूर्ववच्छब्दाग्निषु प्रज्वलत्सिद्धुच्यते (२,११)" क०। "उत्तरत आहवनीयस्योद्ततायोक्षिते सिकतोपकीर्णे परिस्तृते प्रागुद्वारे निद्धात्योषधय इति" (११,४७,४८)१४ सू०। "वि पाजसेति" (११,४९) प्रसव्यमंसलोमान्यादाय प्रागुदीचः पश्चुनुत्सृजति १५ सू०। "प्रसव्य पिण्डमंसलोमानि सृष्ट्वा प्रागुदीचीं दिशं प्रति पश्चुनुत्सृजति" क०। "आपो हि ष्ठेति (११,५०) पर्णकषायप्रकसदकमासिञ्चति पिण्डे" १६ सू०। "पर्णकषायं पलाशकषायम्" क०। पलाशत्वगभिःकथितसदकं पलाशकषायपक्वम्" संय०। "फेनं च तूष्णीं ततः स्रुत्वा" १७सू०। "तत एतोदकात् पूर्वतरं फेनं स्रुत्वोदकमासिञ्चति चमसाद्रफेनम्" क०। "अंसलोमभिः संसृजति मित्रः संसृज्येति (११, ५१)" १८ सू०। "पिण्डम्"। "मृकराथोरसाश्मचूर्णैश्च स्रुवः संसृज्येति (११,५४)" १९सू०। "मृकरा प्रसिद्धा अथोरसो लोहसिक्ताण· कोट इति यः प्रसिद्धः अश्मचूर्णः माषाणचूर्णः चमसादेतैः पिण्डं संसृजति" क०। "मृकराः क्षुल्लकन्दुकाः अथोरसो लोहरसो यत्राश्मानमाक्षोतात्पृष्ठगमवतीति कोट इति लोके प्रसिद्धः अश्मा दृढपाषाणः तेषां चूर्णैः संसृजति" संय०। "संसृष्टामिति" (११, ५५,५७) संयौति" २०सू०। "पिण्ड मिश्रयति आज्ञालयतीत्यर्थः" क०। "अषाढां करोति मक्षिको प्रथमविद्धा तदाख्या" २१सू०। "अषाढाख्यामिष्टकां मक्षिको करोति। मक्षिकोपलक्षणार्थत्वात्तस्याः प्रथमविद्धत्वादाह प्रथमविद्धा तदाख्या" "तद्वै मक्षिकोति"ब्रा० (६,५,२,१) क०। "भार्यायां मध्ये प्रथमं लब्धा प्रथमपरिणीता या स्त्री सा तदाख्या" संय०। "यजमानपादमात्रीं लक्षणलक्षिताम्"२२सू०। "मक्षिकापादमात्री सा मूर्दिति यजमानपदेशम्" क०। "त्रिषु स्थानेषु लक्षिताम्" संय०। "यजमान उखां करोति मुखादाय मुखस्य शिर इति (११,५७) २३ सू०। "मुखादाने मन्त्रः" क०। "प्रादेशमात्रीं तिर्यगूर्ध्वां च" २४ सू०। "तिर्यगायामप्रमाणे विस्तारप्रमाणे च" क०। "पञ्चप्रादेशमिषुमात्रीं वा तिर्यक्पञ्चपशौ" २५ सू०। "ऊर्ध्वं तु प्रादेशमात्रेव पञ्चपशावपि" क०। "ब्रह्मवनेति (११,५८) प्रथयति" २६ सू०। "आक्तं पिण्डम्" क०। "अन्तानुत्तीय सर्वतः प्रथमं धातुमाद्धाति मुखाख्यैति" (११,५८) २७सू० "धातुशब्दानुमन्त्रणेऽपि एव" क०। "प्रथितस्य तस्यान्तानुत्तीय ऊर्ध्वान् गमयति, धातुं प्रथमपिण्डिकाम्" संय०। "संलिख्य लक्षणां कृत्वोत्तरमादित्याख्यैति" (११,५८) २८सू०। "संलिख्य शिथिलया मुदा संलिख्य वारिणा संसृष्टां सुकुमारां कृत्वा" संय०। "विश्वे त्येति (११, ५८) समीकरोति" २९सू०। (६,५,२,२) यत० ब्रा०। "द्वितीयउत्तरे वर्तिं सर्वतः करोत्यदित्यै रास्नेति (११,५९) ३०सू०। उखाया ऊर्ध्वप्रमाणस्योत्तरे द्वितीये उपरि वर्त्तमाने तृतीये भागे सर्वतः सर्वासु दिक्षु मध्यस्थौ वर्तिं दृत्याकारां रास्नां (काञ्ची गुणस्थानीयाम्) करोति"क०। "ऊर्ध्वमूर्णां प्रतिदधं' ३१सू०। "वर्त्तीः करोति चतस्रोऽपरा वर्तिः प्राणाः"३२सू०। उखाशब्दस्याकृतिवचनत्वाद्दृत्तीरोखा भवति" क०। "सर्वासु दिक्षु पार्श्वमध्ये बाह्यप्रदेश अपरायत्तस्रो दृत्तीरूर्ध्वामूर्णां करोति किम्भूताः मूलत आरभ्य दृत्तिं प्राप्ताः तिरश्ची रास्नां यावद्दृत्ताः" संय० इति ३क्षिप्तिका

"स्तनानिवाप्येवमूनयति" १ सू०। "ऊर्ध्ववर्त्तीनानेकैकस्याः" क०। "आसां चतसृणां दृत्तीनामग्रेषु तिरश्ची दृत्तेरुपरि स्तनानिव स्तनसदृशानमृद्वयवानुन्नयति" संय०। "द्विस्तनामष्टस्तनामेकां" २सू०। "ता वै काः द्विस्तनामष्टस्तनामिति (६,५,२, १२) श्रुतेः द्विस्तनपक्षएकस्मिन्नेव वर्त्मन्यै क्रियते अष्टस्तनपक्षे द्वौ द्वाविति क०।"बिलं मृद्धात्वादितिरुदति"(११,५२) ३सू०। "मृत्ते मृद्धातीत्यर्थः" क०। "क्षात्रायेति (११,५२) सिद्धाति उखाम्" ४सू०। "तिस्रएके" ५सू०। "उखाः

कुर्वन्ति" (६,५,२,१२) ग०ब्रा०। "तथा च स्तृतिरण्ड-अरुणाद्येकैका निधानाल्ला क्रियते" क०। "इष्टकास्तिस्रो विश्वज्योतिषः पृथग्लक्षणास्त्रालिखिताः"६सू०। "तृयन्द्वयार्थे चयस्तोमसंयोग एव तिस्र इष्टकाः विश्वज्योतिःसंज्ञकाः पृथग्लक्षणाः करोति लक्षणकरणं च प्रयमाद्वितीयाप्रक्षप्रार्थमेवोपधानं यथा स्यादिति" क०। "मृदुसुपशयां निदधाति" ७सू०। "उखां क्रियमाणामुपशेतदित्युपशया तां मृदमतिरिच्यमानां निदधाति कार्यार्थम्" क०। "अवशिष्टां मृदुसुपशयसंज्ञां निदधाति" संय०। "सप्तभिरश्वशल्लिरूखां धूपयति दक्षिणाग्नादीम्नैरेकैकेन वसवस्त्वेति (११, ६०) प्रतिमन्त्रम् ८सू०। "शल्लिरश्वलेखैः" संय०। "ऊर्ध्वा श्वभ्रं चतुरश्रं खनत्यदितिर्वै (११, ६०) ६सू०। "अभिश्च पूर्वोक्तैव प्रकृतत्वात् अत्र सा वैष्णव्यभिरुत्सीदतीति (६,५,४,३) ग०ब्रा०वचनात्" क०। "अपगमात्सीर्य यथाकृतमवदधाति" १०सू०। श्वभ्रे, येनैव क्रमेण कृता अपादाद्याः उखायां तु विशेषः, "देवानां त्वेत्युखां (११,६१) न्युब्जाम्" ११सू०। "अवदधाति" क०। "अपगेनावच्छाद्य दक्षिणाग्निनाटीपयति धिषणास्त्वेति (११,६१) १२सू०। "निर्मन्थ्येन वा धूपनं अपगे" १३सू०। "कर्त्तव्ये" क०। "वरुत्रोद्वेतोल्मासो (११,६१) जपति" १४सू०। "उखाभीक्षमाणः" क०। "आचरति मित्रस्येति (११, ६२) १५सू०। "आचरणं च अपगप्रक्षेपः"क०। अषाढानामधस्तादुपरिष्टाच्च पुनः अपगं प्रक्षिपति" संय०। "यावद्वाचरेत्" १६सू०। "यावद्भिः प्रकारैः अपगं प्रक्षिपेत्तावद्वारानेनं मन्त्रेणाचरेत्" संय०। "द्विर्वै प्रदहनोद्धरणे"१७सू०। "कर्तव्ये" (६,५,४,१०) ग०ब्रा०। "प्रदहनं पचनम् उद्धरणं बहिर्निष्कासनम्" संय०। "उद्धरति अपगम्" १८सू०। "पदार्थतया"क०। "भस्मसाकृतं पराकरोति" संय०। देवस्त्वेत्युखाम्" १९सू० (११,२३)। "उद्धरति" क०। "उखानां करोत्यव्यथमानेति (११,६३) २०सू०। "उद्धरत्युखाम्" (११,६४) २१सू०। "ऊर्ध्वं यज्ञति"क०। "परिशिष्टं पात्रे करोति मित्रैतां तदति" (११, ६४, २२सू०। "अजापयसावसिञ्चति वसवस्त्वेति" (११,६५) प्रतिमन्त्रम्" २३सू०। "उखाम। त्रिचषले च उत्तानकरणाद्येकैका अजापयसावसेकाना कर्त्तव्या" क०। "इष्टकाक्रियातस्त्रालिखितानाम्" २४सू०। "अत ऊर्ध्वं मिष्टकास्त्रालिखिताः क्रियन्ते" क०। "अपरिमितालिखिता वोत्तरयोः" २५सू०। "द्वितीयाचतुर्थ्योः कुत एतत् ते हि प्रकृत्याम्नायते "रसो वै ते चिती अपरिमित उ वै रस इति" (८,७,२,७), ग०ब्रा०। "अतश्च विकल्पोऽयम्"क०। "पूर्ववदग्निः पाके" २६सू०। "इष्टकानां पाके भवति निर्मन्थ्यो दक्षिणाग्निर्वा"क० फाल्गुनाभावाच्चायां दीक्षाभावेन क्रत्वर्थेन तत्राह। "दक्षोच्छ्रयणान्तं क्रत्वाधर्यवयजमानयोरन्यतर उखामाहवनीयेऽधिश्रयति सुङ्मुकुलायायतनकुलायावसीर्णाम् अन्तरेण्यां मा सु भित्था इति (११, ६८) तिस्रश्चतुरश्राः" २१सू०। दक्षोच्छ्रयणान्तमाध्वरिकं कर्म कृत्वा उखामाहवनीयेऽधिश्रयति, सा च सुङ्मुकुलायायतनकुलायावसीर्णा भवति अन्तरेण्या। प्रागुदीचीं दिशमभिमुखं। अधिकारसमर्पकत्वाच्च"क०"रुक्मप्रतिमोचनविष्णुक्रमवात्मप्रेषु च"२२सू० प्रागुदीचीं दिशमभिमुखो भवति"क० "अन्नाषाड्ढे त्रयोदशास्यां प्रादेशमात्रीः समिधआदधाति"२३सू०।"उखाबान्नाषाड्ढे त्रयोदश समिधआदधाति, प्रादेशमात्रीप्रक्षणं च शिष्टानुस्करणप्रक्षप्रार्थम्" क०। "अनारोहत्यङ्कारालोपैके" २४सू०। अनारोहत्यनाबुखायाम् अङ्कारालोपैके समिदाधानं कुर्वन्ति" क०। तां इदानीमाह, "इतोऽग्नां कार्मुकीं कृत्व इति" (११, ७०) २५सू०। "आदधाति, ध्रुक्को धमनः तदीया कार्मुकी" क०। "वैकङ्कतीं परस्या इति (११,७१) २६सू०। "औदुम्बरीं परस्या इति" (११,७२) २७सू०।"अपरशुवृक्णां यदग्नइति"(११,७३) २८सू०। "या परशुना न छिन्ना" क०। "अकुठारच्छित्ताम्" संय०। "अधःशया यदत्तीति" (११,७४) २९सू०।"भूमिसंलग्ना या रुटा रूढा भवति" संय०। "पालाशीः प्रत्यूचमङ्गरङ्गरिति" (११,७५)। ३०सू०। "आदधाति अर्धेताःपालाश्यो भवन्तीति (६,६,१,७)ग०ब्रा वचनात्, एवं चापरशुवृक्णा अधःशया औदुम्बर्यावेव भवतः जात्यन्तराधिधानात्" क०। "उपोत्तमां ऋत्वियस्योक्षन्" ३१सू०। "उत्तमायाः समीपे उपोत्तमा द्वादशी, तां ऋत्वियस्य यजमानस्योक्षाद्यधाति, अन्यस्य ऋत्वियपुरोहितव्यतिरिक्तस्य उभे उपोत्तमोत्तमे दृक्ष्यधीयेते, एवं हि श्रूयते" ग०ब्रा० (६,६,१,१२) क०। "एवं ऋतति, उत्तमां पुरोहितस्य" ३२सू०। "दृक्ष्याद्यधाति" क०। "उत्तमाम् याकृतिं" (११,८२) संय०। "अन्यस्योभे" ३३सू०। "अन्यर्त्वियस्यापुरोहितस्य च

एकादश भवन्ति त्रयोदश वा" क० । "क्षत्रियपुरोहितव्यतिरिक्तस्य द्वादशीत्रयोदश्याविच्छया भवतः" संग्र० "स्वाहाकारः सर्वासूखायाम्" ४४सू० । "उखायामाधीयमानासु समित्सु, अतोऽन्यत्रापि स्वाहाकारो भवति सर्वोखाभिधानात्" क० । "उखायां सर्वासु समित्सु स्वाहाकारो भवति" संग्र० । "औदुम्बर्यादि दण्डान्तमेके" ४५सू० । "एवं सति प्रागौदुम्बरभक्षणहोमादुखाधिश्रयणादि" तान्यु ह्येकउखायामेवैतान्यौदुम्बरभक्षाणि जुह्वतीति वचनात्" (६,६,१,२२) क० । "अत्रावसरे" संग्र० इति ४ कण्डिका ।

"यजमानः कण्डे रुक्मं प्रतिमुञ्चते परिमण्डलमेकविंशतिपिण्डं कृष्णाजिननिधूतं लोमसु शुक्लकृष्णेषु यणस्थले त्रिवृत्योतमुपरिनाभि बर्हिष्मिण्डं दधानो रुक्मं इति"(१२,१) । "रुक्मं हि प्रकृत्य सर्वमेवैतच्छ्रयते (६,६,१,२), यजमानश्चकृषाश्च स्वयमेव यजमानः प्रतिमुञ्चते, द्वादशाहे च सर्वे यजमानाः प्रतिमुञ्चेयुः अत ऊर्ध्वं मिण्डाद्यन्यारब्धाः एवं हि सर्वैः कृतं भवति" क० । "परिमण्डलं वर्तुलम्, एकविंशतिपिण्डम् पिण्डं निर्बाधम् निर्बाध्यन्ते उच्यताः नि काश्यन्ते उच्यताः स्वरूपाद्बहिर्निःसृता भवन्ति, कृष्णाजिन शुक्लकृष्णेषु लोमसु निधूतं नितरां धूतम्, पुनः कीदृशम् त्रिवृत्ते त्रिवर्तते यणस्थले स्रुवे ओतं प्रोतम् तथा उपरिनाभि, पुनः बर्हिष्मिण्डं बर्हिर्निबर्धम्" संग्र० । "इण्डुश्चिक्यासन्दीषु शुक्लरज्ज्ववस्रिस्रतो बर्हिष्माः" २सू० उखा याभ्यां स्रवन्ति तौ इण्डुौ, चिक्यं प्रतिष्ठम्, आसन्दी च । अनुरक्ता रज्जवो बर्हिष्मा भवन्ति" क० । "बर्हिष्माः कर्दमलिप्ताः" संग्र० । "परिमण्डलाभ्यामिण्डुाभ्यामुखां परिगृह्णाति नक्षोषासेति" (१२, २) ३सू० । "करति स्रावाक्षामेति" (१२,२) ४सू० । "तामेवोखाम्" क० । "आहवनीयस्य पुरस्ताद्द्वात्रासन्दीवदासन्द्यां चतुरश्राक्षां चिक्यवत्यां निदधाति देवा अग्निमिति (१२,२) ५सू० । "उद्द्वात्रासन्दीवदिति प्राग्देशपादी गम्यते" (१२,४,२) क० । सा च चतुरङ्गी सह पादैः, तस्यां चिक्यवत्यामासन्द्यां च, निदधाति उखाम्" क० । "चिक्यपार्श्वं प्रतिमुञ्चते बडुायां त्विषा कृपाणीति" (१२,३) ६सू० "पीवायाम्" क० । "सचिक्यं प्राञ्चं प्रगृह्णाति सुपर्णोऽसीति" (१२,४) पिण्डवत् ७सू० । "सह चिक्येन प्राञ्चमग्निं प्रगृह्णाति, पिण्डवदित्यूर्ध्वबाहुः (१,६) । "धारणं च" ८सू० । "पिण्डवदेव उपरिनाभि" क० । अत्र ह्याभ्यामृग्भ्यां शुक्लयजुर्वेदस्याध्यायादि, त्रिभिरृङ्भिः कात्यायनश्रौतसूत्रस्याध्यायकण्डिकादि । चतुर्भिरृङ्भिः यतपथब्राह्मणस्याध्यायादि श्रेयं तेन तत्तत्प्रतीकमात्रगृहीतमन्त्रसूत्रादि तत्तत्स्थाने द्रष्टव्यम् विस्तरस्तु यत० ब्रा० ६ अ० द्रष्टव्या । लौकिकेष्टरचितप्राचीरादौ इष्टकाधनफलेन इष्टकाश्वाभ्रानोपायो दर्शितोलीला० यथा "चितौ करणकृत्वं सार्द्धसप्तम् । उच्छ्रयेण गुणितं चितेः किल क्षेत्रसम्भवफलं घनं भवेत् । इष्टकाधनकृते घने चितेरिष्टकापरिमितिश्च लभ्यते ॥ इष्टलोच्छ्रयकृदुच्छ्रितिस्थितेः स्युःस्तराश्च दृषदां चितेरपि ॥ उदाहरणम् । अष्टादशाङ्गुलं दैर्घ्यं विस्तारो द्वादशाङ्गुलः । उच्छ्रितिस्त्र्यङ्गुला यासामिष्टकास्तासितौ किल ॥ यद्दिस्मृतिः पञ्चकरोष्टदण्डं दैर्घ्यं च यस्यां त्रिकरोच्छ्रितिश्च । तस्यां चितौ किं फलमिष्टकानां सङ्ख्या च का ब्रूहि कति स्तराश्च ॥ इष्टकायाः घनफलमानम् २/३६ चितेः क्षेत्रफलम् ४० । उच्छ्रयेण ३गुणितं चितेर्घनफलम् १२० । यथोक्तकरणे लब्धा इष्टका सङ्ख्या २५६० । स्तरसङ्ख्या २४ । एवं प्राणाग्निचयेऽपि "व्यासात् षोड्शभागः सर्वेषां सङ्ख्यानां भवति भित्तिः । एकेष्टकाकृतानां दारुकृतानां च स विकल्पः । इष्ट०सं० । "नेष्टकारचिते पितॄन् संतर्पयेत्" शङ्खलि० । "मृण्मयात् कोटिगुणितं फलं स्याद्दारुभिः कृतात् । कोटिकोटिगुणं पुण्यं फलं स्यादिष्टकामये" मठ०त० पु० । वास्तुयागे 'आकाशपदे' इष्टकारोपाचारः वास्तुयागशब्दे द्रष्टव्य ।

इष्टकाचयन न० इष्टकयाऽग्नेश्चयनम् । इष्टकया अग्नेश्चयने तत्प्रकारः कात्या० श्रौ०सू० । "एतया विकृत्याभिमन्त्र्य कोऽन्यचितं चिन्वन्ति द्रोणचितश्चक्रचित्कङ्कचित्प्रउगचिदुभयतःप्रउग ससृज्य पुरीषः" ५,६,५,६ । "एते ह्यग्निविशेषाः तदाकारांश्चिन्वन्त्येके एके सुपर्णचितम् विनिङ्क्त्वाटस्या विकृतेरग्न्यन्तरेष्वप्राप्तिर्मा भूदित्युच्यते एवं हि श्रूयते "तं वै कंचएतया विकृत्याभिमन्त्र्यान्यां चितिं चिन्वन्तीति" (६,७,२,८ यत०ब्रा०) क० । "विकृत्या एतया ऋचा अन्यचितं षड्विधमन्यमग्निं चिन्वन्ति तमेवाह द्रोणचितित्यादि" संग्र० । "सृज्य पुरीषे प्रतिदिशं पुरीषाहरणम्" १० सू० । प्रतिदिशं पुरीषमाहृत्याहृत्य तेनैव चयनम्" क० । "विष्णुक्रमान् क्रमते विष्णो-

रिति" (१२,५ यजु०) "प्रतिमन्नमन्यु दृंहभयं च तस्मिं-स्त्वयि" ११ सू०। "तस्मिन् क्रमणे" क०। "अक्रमस्तूर्ष्णे" १२ सू०। "उदृषभं तु भवत्येव" क०। दिशो वीक्षते दिशोऽनुविक्रमस्वेति (१२,५) १३ सू० "प्रतिदिशं मन्त्रः" क०। "पिण्डवत्प्रागुदञ्चं प्रस्तृणात्यक्रन्ददग्निरिति" (१२,६) १४ सू०। पिण्डवदित्यूर्ध्वं बाहुः (१,८) क०। "अवरोहत्यग्नेऽभ्यावर्तिरिति" (१२,७) १५ सू० "प्रत्यवरोहत्यग्निम् यावत्त्वत्त अर्ध्वोऽवरोहतीति" (६,७,२,६) "श्रुतेश्चैतत्प्रत्यवरोहणम्" कर्क०। "उपरिनाभि धारयन्त्वाहार्षमित्यभिमन्त्रयते" (१२,११) १६ सू०। "अग्निम्" क०। "पाया उन्मुञ्चोदुत्तममिति" (१२,१२) "पिण्डवत्प्राग्दक्षिणा प्रस्तृणात्यग्ने दृंहतिति" (१२,१३) १७ सू०। "अवहरति हंसः शुचिषदिति" (१२,१४)। १८ सू०। "आसन्यां करोति दृंहदिति" (१२,१४) १९ सू०। "उपतिष्ठते सीद त्वमिति" (१२,१५) २० सू०। "वात्सप्रेण च दिवस्परोत्येकादशभिः" (१२,१८,२८) २१ सू०। "उपतिष्ठते" क०। "अनुवाकेनैके" (१२,१८,२९) २२ सू०। "उपतिष्ठन्ते" क०। "अत्र दीक्षितोऽयमिति" २३ सू०। "अक्षिण्वक्षरे दीक्षितोऽयमित्याह (७,४,११) "दक्षान्ते ह्याधिश्रयणाद्युक्तम् अतः प्राक्तनादुत्तरार्थमिदमुच्यते" क०। "आदित्तिरतः संवत्सरम्" २४ सू०। "अत अर्ध्वं यदुच्यते तत् संवत्सरं यावदावर्तते" क०। "अत अर्ध्वं यत्कर्मोच्यते अक्षोहपनादि तच्च संवत्सरं यावदादित्तिर्भवति" संप०। ५ कण्डिका

"उखाया अक्षोहपनमक्षमिते पात्रे" १ सू०। "तच्च प्राग्वाक्त्विग्वर्गात्" "अक्षोदुप्य वाचं विसृजत" इति श्रुतेः (६,७,४,१३) क०। "अक्षोहपनं अक्षोद्वरणम्" संप०। "वाचं विसृज्य समिदाधानं रात्रौ रात्रौमप्रयावमिति" (११,७५) २ सू०। "एवमुदिते अक्षोहपनादि" ३ सू०। "कर्तव्यम् अयं तु विशेषः" क०। "अहरहरित्याधानम्" (११,२५) ४ सू०। "विष्णुक्रमयात्प्रभे चाहर्व्यत्यासमुदिते समिधमाधाय" ५ सू०। "अहर्व्यत्यासेन कर्तव्ये" क० "अग्निन्दिने विष्णुक्रमाः उत्तरस्मिन्यात्सप्तम एवं यावद्दीक्षं कर्तव्यम्" संप०। "कक्षाप्तिमोचनादि प्राग्वाक्त्वात्प्राङ्विष्णुक्रमाः" ६ सू०। "तयोर्विभागमाह। साग्निके क्रतौ संवत्सरं दीक्षा आम्नाताः संवत्सरमित्यपक्रम्य विज्ञायेति (१०,२,६,९) पवित्रे गतस्तो दीक्षा आम्नाताः पवित्रचतुर्दीक्ष इति (१५,१,४) तत्राग्नौ सति विज्ञायते किमग्निनिमित्ता दीक्षा भवन्तु उत सौमिक्य इति उभयं चैतच्चरितार्थम् पवित्राद्धरिराग्निक्यश्चरितार्थाः अनग्निके च पवित्रे सौमिक्य इति तेन साग्निमति पवित्रं कथं भवत्विति नियमकारणाभावादनियमे प्राप्त आह" क० "सोमाविरोधेन वा तत्प्रधान्यात्" ७ सू०। "सोमस्य प्रधानभूतत्वात् तदीया एव दीक्षा भवन्ति" क० "सोमयागेनाविरोधः सोमाविरोधः तेनाविरोधेनैव दीक्षा भवति वाक्यशेषे कृतः ततुप्रधान्यात् सोमस्य प्राधान्यात् अग्नेश्च तदङ्गत्वात् तेन द्वादशाहे वाजपेये द्वादश सप्तदश वा भवन्ति नाग्निप्रयुक्तसंवत्सरदीक्षाः" संप०। "न्यञ्च समिधं व्रते व्रते-व्रतेऽवपतस्याधानम्। (११,८१) ८ सू० "उख्येऽग्नौ यजमानः करोति" संप०। "संवत्सरभृतिर्नोऽसंवत्सरभृतेऽपि" ९ सू०। पूर्वं अग्निहोत्रे साग्निके येनैकवारं संवत्सरमुख्योऽग्निर्भूतो भवति स संवत्सरभृतो तस्मात्संभृतेऽप्युख्येऽग्नौ चयनं भवति (६,५,१,६५) संप० "संवत्सरं सोमयतः" १० सू०। "संवत्सरमभिव्रतं करिष्यतः असंवत्सरभृतेऽपि चयनं भवति (६,५,१ ६६) क०। "संवत्सराद्विताग्नेः" ११ सू०। "असंवत्सरभृतेऽपि चयनमिष्यते" (६,६,१,६७) क०। "आतस्य च" १२ सू०। "संवत्सरे आतस्य च असंवत्सरभृतेऽपि चयनं भवति" (६,५,१,६८) क०। "गर्भाधानदिनादारभ्य संवत्सरे पूर्णेऽतीते वा यो आतस्य भवति" संप०। "याख्यास्यमन्यम्" १३ सू०। "अन्यं अपरमिदं पश्चान्तरम् यस्यासावुख्यभरणं कृत्वाग्निश्चीयत इति (६,५,१,६२) क०। "याख्यास्यं यस्यासावुख्यमग्निं भृत्वा चयनं भवति" संप०। "अचयनं वा परस्मै" १४ सू०। चयनं नेति विकल्पः एवं हि श्रूयते (६,५,२,१२) त्रयो ह वै" इत्युपक्रम्य परस्मै करोतीति निन्दार्थवादः प्रतिषेधार्थः तस्मादप्येवंवित् चयनं परस्मा अग्निं चिनुयादिति ६,५,२,३, प्रतिप्रवः अतः प्रतिषेधप्रतिप्रसवाभ्यां विकल्पः" संप०। "प्राणनः प्राच्योख्यस्योत्तरतः समिदाधानं समिधाग्निमिति (१२,६०) १५ सू०। "उख्यपुरतः प्राङ्मुखमनः प्राच्योख्यएव समिदाधानम्" क०। "सासन्दीकमुद्यम्योदुत्तमिति (१२,६१) दक्षिणतोऽग्नि करोति" १६ सू०। "सासन्दीकमुद्यमदुत्त्वेत्युत्क्षिप्यासनो दक्षिणतोऽग्निमुख्यं करोति" कर्क०। "स्याल्यां गार्हपत्यं पचात्" १७ सू०। "अनड्वाहौ युक्त्वा दक्षिणाग्निं च विहरतीवे करोति" क०। "अनड्वाहौ युक्त्वा

प्रेरेत्न इति (१६,२६) प्राङ् यात्वा यथार्थम्" १८सू०। "गच्छेत्" क०। "आरोहेत् पार्श्वतो गच्छेत्"१६सू०। "यजमानं संस्कारात्" क०। "अग्ने खर्जल्यक्रन्दद्गिरिति (११,२३) जपति" २०सू०। "खर्जनं च यज्ञस्करणम्" क०। "वासेऽवहरत्युद्वतावोक्षितउत्तरतः समिदाधानं प्र-प्रायमिति (१२,२४) २१सू०। "यत्र वासस्तत्रैवावहरणम् न प्रागवसतेः एवं ह्याह (६,८,१,१२) स यदि पुरावसथं विसृजेतानग्नेवाग्निः स्यादिति" वसत्यां तु उत्तरतोऽग्नेरवतार्य समिदाधानं "प्र-प्रायमिति"। उद्वतावोक्षितयज्ञं च परिसमूहनाद्युपसंयज्ञार्थमपि स्यात् ह्येतदनूद्यते (६,४,४,१८) उद्वते वाऽथोक्षितेऽग्निमादधातीति" एवं च सति तदपचारे स्यात् प्रायश्चित्तम्"क०। "वासार्थे रथे उत्तरस्यां दिशि अग्निमवतारयति" संय०। "वनीवाहनमेतर्हीत्तासु यदेच्छेत्" २२सू०। "वनीवाहनमिति" संज्ञास्य कर्मणः सा च संव्यवहारार्था "अङ्गै वनीवाहनादिति" (२५सू०) तच्च दीक्षासु कर्तव्यम्। यदेच्छोपजायते महावीरकरणयूपच्छेदनवनीवाहनानि दीक्षासु क्रियन्ते क्रमस्तु नैषाम् पाठाभावात्" क० "अप्रयूख्यभक्षावपनं क्रयणीयादौ" २३सू०। उख्यभक्षावपनमपि कर्तव्यम् आदौ क्रयणीयस्याङ्गः"क०। "अन्यत्र चेच्छन्" २४सू०। "करोति"क०। 'ऊर्ध्वं वनीवाहनात् क्रमयोगात्" २५सू०। अन्यत्रेच्छया कुर्वन् वनीवाहनादूर्ध्वं करोति मन्त्राणां पाठक्रमयोगात्" क०। "वनीवाहनादूर्ध्वं सोमक्रयदिने आदौ अन्यत्र दीक्षा भक्षावपनम्। कुतः क्रमयोगात् पूर्वं वनीवाहनमन्त्राः पश्चाद्भक्षापोऽभ्यवहरणस्य" संय० "पलाशपुटेनापो देवीरित्येकया (१२,२५) २६सू०। "पलाशपुटेन भक्षं गृहीत्वाऽवपति"क०। "ततो ह्याभ्यां" (१२,२६ २७) २७ सू०। "पुनरवपति ह्याभ्यामग्नभ्याम्"क०। "आद्याभ्यां (१२,६५-२६) वा पूर्वम्" २८सू०। "पूर्वमावपनं ह्याभ्यामग्नभ्याम् तत एकयर्चा" वाशब्दो विकल्पार्थः संख्यास्तुतित्वात्" क०। "अनामिकया प्राशादादत्ते प्रसद्येति (१२,२८-४१) २६सू०। "प्राशाङ्गुष्ठनः क्रियदभ्यनामिकयादत्ते" (६,८,२,७)। "प्राशोऽभ्युपतिष्ठते बोधा मदति" (१२,४२) ३०सू०। "यत्तदादत्ते भक्षा तत्प्राश" क०। "प्रायश्चित्तिं समिधोपकृत्य" ३१सू०। ६कण्डिका।

"आज्यं तिस्रऽभ्यघारयति (१२,४३) जुहोति" ३सू०। "प्रायश्चित्तिरित्यस्य होमस्य संज्ञा उपपूर्वस्य कृतिर्यज्ञार्थो दृष्टोऽन्यत्रापि "अथ स्रुचोपहत्याज्यमिति (३,४,१,२५)" क०। "समिधा करणभूतया स्रुक्स्थानीयया उपहत्य गृहीत्वा" संय०। "उत्थाय दधाति समिधं पुनस्त्वेति (१२,४४) २सू०। उत्थानमुपहृत्यं च प्रतिपत्तित्वात् गुणार्थं चेति। नैमित्तिकान्यत्रैव प्रकरणे पठ्यन्ते तदर्थमाह" क० "गार्हपत्येऽनुगते निर्मथ्य" ३सू०। "आदधाति मन्थनं प्राप्तप्रत्यादानाच्यम् उच्यते प्रायश्चित्तार्थम्'। "प्राजापत्ये उपशान्ते मथित्वा प्रायश्चित्तीं करोति" संय०। "तूष्णीमाहवनीये सांकाग्निना कृत्वा:" ४सू०। "तूष्णीमु वर्तमानासु आहवनीयेऽनुगते सांकाग्निना कृत्वा तमादधाति" सांकाग्निशब्दः प्रयुक्तमेव कृत्वेत्यर्थकः एतच्चोच्यते पूर्ववत्प्रणयनं मा भूदिति" क०। "आहवनीये ऽनिप्रणीतेऽनुगते सांकाग्निना कृत्वा स्रुचा सटोऽवि-धीनमध्यमार्गेणैव कृत्वा" संय०। "आग्नीध्रीयमुत्तरेण सदः" ५सू०। "कृत्वा निदधाति उत्तरेण सदो कृत्वेतीध्मव्युदासार्थः" क०। आग्नीध्रीयमग्निमनुगतं सदस उत्तरेणैव कृत्वा" संय०। "प्रदक्षिणादादत्तरोत्तरे" ६सू०। "उख्ये चानुगते पूर्ववत्प्रदक्षिणात् अयं तु विशेषः आहृता आहृत्यकृतं च मन्त्रनिष्पत्त्यर्थम्। "एतयैवाहृतानुपहरन् यजुरिति (६,६,४,६) श्रुतेः"क०। "उख्ये ऽग्नावनुगते गार्हपत्यादाहवनीयमग्निमित्याहृत्य (११,१७ समितमिध्मप्रभृत्याय (१२,५७ आहृता मन्त्रैरभिक्रियामात्रेण पूर्ववदुखां प्रदक्षिणात् उत्तरामाहवनीयेऽधिश्रित्योख्यमग्निमनुपादयेत्" संय०। "अध्वरप्रायश्चित्तिं च सर्वेषु यथाकालं पूर्वां-पूर्वाम्"७सू०। "अध्वरप्रायश्चित्तिं च करोति सर्वेषु निमित्तेषु तां च पूर्वाम् पूर्वां चयद्दादग्निकीं च। सर्वयज्ञकृत्यं च भक्षापोऽभ्यवहरणार्थम्। (२२) तत्रापि हि विधीयेते (६,८,२,११) उभे प्रायश्चित्ती "करोतिये एवाग्नावनुगते इति" वचनाच्चेति अध्वरप्रायश्चित्तार्थमुच्यते आग्निकी तु विश्वकर्मण इत्येव" क० "सर्वेषु पूर्वेषु पूर्वपूर्वतरेषु यथाकालं परमेष्ठ्यादिकालाकृति (२६,६१) पूर्वां पूर्वां जुहुयात् स्वादग्निप्रायश्चित्तिम् चकारात्" संय० "उक्षाभेदने नवत्यां महाशुक्लाशुक्लाकपालमवधायावपति" ८सू०। यद्येषोक्षाभिद्योतेति" (६,६,४,८) प्रकृत्य सर्वभिदमाह्या तम् एतच्चेकोक्षापक्षे भवति। द्वित्वपक्षे तु द्वयोरेवैकक्षावपनम्"(६,५,२,२२)क०।"उक्षोपघ्ने पिष्टा ह्रदा स-

क्रोडां करोत्याहुता" ६सू०। "उखाखण्डमेकमुखायां प्रक्षिप्यम् हितीयमुपधयया सह पिहा, आहुता मन्त्रमजम्, आहच्छन्देन क्रियामात्रमुच्यते तथा चोक्तम् (ई.ई.४, २) एतयैवाहुतानुपकरन् यजुरिति" क०। "आहुता मन्त्ररहितेतिकर्त्तव्यतया" संय०।"पक्वायामावपति कपालं च १०सू०। "पक्वायामुखायाम् अग्निं कपालं च" क०। 'उखोपधये पिहा संहृत्य निदधाति'११सू०। "उखा-कपालसहपधया च पिहा संहृत्य स्थापयति" क०।

इदानीं चयनप्रकारमाह। अध्यात्मं चयनमुपदिश्य' १२सू०। "आत्मनआभिमुख्येन चयनं कर्त्तव्यम् न परा-गिति, तथा च नैर्ऋतीषु वचनात्पराक्चयनमुक्तम् (७, २.१,१२)। अपरो विशेष·" "सव्यवाक्षमन्तर क्लृप्तोत्तर-लक्षणाभिरिष्टकाभिः" १३सू०" । "चेतव्यः" क०। "नित्ये सादनसृदटोहसाउपधानादुत्तरे तया देवतया ता अश्नेति (१२. ५३, ५५,)१४सू०। "सर्वास्विष्टकासु एते नित्ये भवतः तया देवतयेति सादनम् ता अश्नेति सृद-टोहसाधिवदनम्" क०। "अविशेषोपदेशात्" १५सू०। "अविशेषेण ह्यनारभ्य कस्मिंश्चिदिष्टकाविशेषमेते शूयेते"क०। "विशेषमनुपादाय सामान्येन तयोरुपदेशात् विधा-नात्" संय०। "अनाम्नातप्रतिषेधाच्च" १६सू०। "यत्र नैर्ऋत्यादिषु नाम्नायेते नित्ये संहितायां न पठ्येते तत्रापि प्रतिषेधः शूयते (७.१,१,१४) सादनसृदटोहसाधि-वदनेति" "अतः प्रतिषेधात् सर्वत्राप्येते भवतः" संय०। "एकनोदनाख्येकदेशासु तन्त्रेण" १७सू०। एकनोदना अपस्या वपस्या इत्येवमादि, एकनोदना अपि यद्येकदेशा भवन्ति, यथा तासामेव देशभेदः अपस्याः पञ्चपञ्चाश्कान्ते-ष्विति (७,ई,२) अतस्त्र प्रत्यक्षं नित्ये, देशभेदे त्वसति तन्त्रेणेति"क०। "एकनोदना एकं विधिवाक्यं यासां ताः। एको देश एकमुपधानस्थानं यासां ताः तत्र तन्त्रेण नित्ये भवतः" संय०। "आत्मनि यजमानोः" १८सू०। "इष्टका उपदधाति न पक्षपुच्छयोः" क० (८,७,२,३)। लोकम्पृणासु दशसु दशसु मन्त्रो लोकं पृणेति (१२, ५४)। (६,१,२१२) १६सू०। "आसा-दनं च" २०सू०। लोकं पृणानाम्, सृदटोहसाधिवदनं तु भवति अप्रतिषिद्धत्वात्" क०। 'प्रतिचिति हे-हे उप-धाय" २१सू०। लोकं पृणामन्त्रवचनम्, पुनर्दशसु दशसु। "प्रथमं हे-हे उपधाय ततो दश-दशोपदध्यात्" संय०। "अयुग्मगणमध्यमानके" २२सू०। अयुग्मो य इष्टकागणो यथा बालखिल्याः सप्त तासां मध्यमानके उपधेये" क०। "त्रिपञ्चसप्तादिगणः" संय०। "एका च" २३सू०। "या चैवेष्टका साध्यनूक एव, यथा विश्वज्योतिर्हियजु-ष्येवमादि" क०।"अभितो युग्माः"२४सू०।"अनूकमभि-तोऽर्धाधिकया युग्मा उपधीयन्ते"क०। "उदञ्चो वर्गाः पूर्वापरे" २५सू०। "यत्र पूर्वापरदृति देशव्यपदेशः तत्रोदग्लक्षणा इष्टकावर्गा उपधीयन्ते" क०। "ति-र्यगनूकमभितोऽञ्चयावधिके पूर्वापरे देशे इष्टकानां वर्गाः समूहाः उदग्लक्षणा उपधेयाः" संय०। "प्राञ्चो दक्षिणोत्तरे" २६सू०। "यत्र तु दक्षिणोत्तरव्यपदेश तत्र प्राग्लक्षणा इति" क०। "प्रागनूकमभितोऽञ्चाया-वधिके दक्षिणोत्तरे प्राञ्चः प्राग्लक्षणाः उपधेयाः" संय०। "भिक्षक्षणयोरचयनम्" (८.७,२, १६) २७ सू०। "टीक्षाणामत्तमेऽक्षनि वेद्यग्निमानम्" २८सू०। "कर्त्तव्यम्"क०। "उख्यस्यानेऽधिव्यामेन गार्हपत्यस्य परि-लिखति" २६सू०। "मण्डलमिति शेषः" क०। "मण्ड-लाद्वा प्रक्रमणमन्तःपात्यस्य" ३०सू०। "पूर्वार्धाद्व्यामस्य त्रीन् प्राचः प्रक्रमान् प्रक्रामतीति वचनात् (१०,२,३,१)। "पूर्वार्धादेव व्यामस्य प्रक्रमणम् न तस्माद्धि प्रक्रमणमग्नौ चरितार्थम्" क०। "वावधारणं, मण्डलादेवान्तःपात्यस्य क्रमणम् न पूर्वार्द्धात् तस्मात्" संय०। "पश्चात्पावमा-त्मादमात्रे क्षित्यस्य" ३१सू०। यूपावटे भवः शङ्कूय-पानस्यः तस्मात्पश्चात् प्रद्योतनमात्रे क्षित्यस्याग्नित्रेतस्य स्थानं भवति' संय०। "यजमानेनोर्ध्वबाहुप्रपदोच्छ्रि-तेन समस्थितेन वा" ३२सू०। (१०,२,१,६)। "प्रपदोच्छ्रितः पादाग्रे व्यवस्थितः समस्थितः प्रसिद्ध एव, तत्क्रियायानोदितत्वात्प्रक्रमणवदध्वर्युर्मा भूदिति यजमानग्रहणम्" क०। ७कण्डिका।

"द्विपुरुषां रज्जुं मित्त्वा" १सू०। "द्विपुरुषां रज्जुं भित्त्वेति निगदे व्याख्यातम्"। "उभयतःपाशाम्" २सू०। "मध्ये लक्षणम्" ३सू०। "अभितोऽर्धपुरुषयोश्च" ४सू०। "मध्य-मात्लक्षणात् पुरुषपञ्चमे" संय०"अर्धे च" ६सू०। "पुरुष-पञ्चमस्यार्धे" क०। "अनुपृच्छामायस्य पाशयोः शङ्कू मध्ये ऽर्धपुरुषयोश्च" ७सू०। "पाशावन्मुच्चार्धपुरुषीययोः प्रतिमुच्य दक्षिणाधाय्य मध्यमे नितोदं करोति"८सू०। "गर्तम्" संय० "उन्मुच्य पाशावेकं मध्यमे प्रतिमुच्य दक्षिणाधिनितोदमायस्य मध्यमे शङ्कुः" ६सू०। "तस्मिन् पाशं प्रतिमुच्य पूर्वार्धे च दक्षिणायस्य मध्यमे शङ्कुः"

०)सू० । "पश्चार्धपुरुषे च" ११सू० । "उल्मुच्य पूर्वार्द्धात् पश्चार्धं प्रतिमुच्य दक्षिणायम्य मध्यमे यजुः" १२सू० । "अभितोऽर्धपुरुषयोश्च" १३सू० । "एवमुत्तरोऽन्तः" १४सू० । "दक्षिणे पार्श्वे पूर्ववदायम्य पञ्चमभागीये यजुः" १५सू० । "तस्मिन् पार्श्वं प्रतिमुच्य पूर्वे चार्धपुरुषीये पञ्चमभागीयार्धपुरुषीययोः सन्धिपात्र तस्मिन्यजुः" १६सू० । "एवं पश्चात्" १७सू० । "एवमुत्तरः पक्षः" १८सू० । "तथा पुच्छं वितत्य" १९सू० । इष्टकान् पक्षपुच्छाध्यग्रेषु चतुरङ्गुलंचतुरङ्गुलं संकर्षति विकर्षन्नन्ते" २०सू० । "यत्र पक्ष आत्मानमध्येति स पक्षाध्ययः एवं पुच्छाध्ययः । अध्ययेषु पक्षयोः पुच्छस्य च आत्मसम्बन्धिसमीपे चतुरङ्गुलं चत्वारि-चत्वार्यङ्गुलान्युभयोः पार्श्वयोः संकर्षति सङ्कोचयति, तथा अन्ते पक्षपुच्छप्रान्ते उभयोः पार्श्वयोः चतुरङ्गुलं विकर्षति विस्तारयति" सं० । "पञ्चारत्नि-पुरुषो दशपदो द्वादशाङ्गुलं पदं प्रक्रमद्विपदं समविभक्तस्य" २१सू० । "पञ्चारत्नयोः यस्य यः पक्षभिरारत्निभिः पुरुषः दशभिः पदैः पुरुषो द्वादशभिरङ्गुलैः पदम् इत्येवमर्थो न भवति इतः प्रागरत्न्यादीनां लक्षणस्यानुक्तत्वेनासिद्धत्वात्, अतस्त्वेवम् पुरुषस्य समविभक्तस्य यः पञ्चमो भागः सोऽरत्निः तस्य दशमो भागः पदम्, पदस्य द्वादशो भागोऽङ्गुलम् त्रिभिः पदैरेकः प्रक्रमः इति तु भवति पदस्य सिद्धत्वात्" क० । "परित्यत्य रज्ज्वा सङ्कितं बहीरज्ज्वेकपदे यते परिश्रितो मिनोति" २२सू० । "रज्ज्वा परित्यत्य सर्वतोवेष्टयित्वा रज्ज्वाबहिर्भागे सङ्कितं रज्जुसंलग्नं यथा भवति तथा एकपदाधिके देशे यते परिमिनोति" क० "चतुर्णवतानि वा त्रीणि" २३सू० । चतुर्णवत्यधिकानि त्रीणि शतानि" क० । "कार्ष्वाः शर्कराः स्युः" २४सू० । "उत्तरेषु पुरुषीयेषूत्तरेषु" २५सू० । "उत्तरेषु अष्टविधादिषु चयनेषु वा एकयतविधात् एकयतविधचयनं यावत् एकाधिकशतपुरुषात्मकपञ्चमचयनपर्यन्तम् पुरुषोयेण एकैकपुरुषपदद्वया अग्निमान् भवति तस्माद् सप्तविधमेव प्रथमं चिदधीतेति" (१०,२,२,१८) क० "यथाग्निवेदीष्टकाप्रमाणम्" २६सू० । वेदिश्च इष्टकाश्च वेदीष्टकाः तासां प्रमाणं वेदीष्टकाप्रमाणम् तद्यथाग्नि भवति, अग्निमानसन्तिक्रम्य यथाग्नि, यथाग्निश्चोत्तस्य प्रमाणं वर्द्धते तथा वेदिप्रमाणं वर्धते इष्टकाप्रमाणं च वर्द्धते, न हि वेदिवृद्धिं विना तन्मध्ये वर्धितस्याग्नेर्मानं सम्भवति, नापि इष्टका न वर्धिता वर्धितमग्निक्षेत्रं पूरयितुं शक्नुवन्ति, अतः युक्तमुभयोर्वृद्धिः" क० । "अन्तःपात्यगार्हपत्ययोरिच्छन्" २७सू० । "पर्वार्धाद्यासस्य त्रीन् प्राचः स वेदान्तः प्रक्रम प्रक्रमति" (१०,२,२,१) यः प्रक्रमत्रयपरिमितो देशः सोऽन्तःपात्य उच्यते, तस्मान्तःपात्यस्य गार्हपत्यस्य गार्हपत्यचितेश्च इच्छन् इच्छया दक्षिणकर्ण्यात् इच्छया न कर्ण्यात् तद्वैकउत्तरा" श्रुतेः (१०,२,२,६) क०। "उत्तरपक्षस्यापरस्यां श्रोण्यां परिश्रितो मिनोति जङ्घामात्रीं नाभिमात्रीं मुखमात्रीमिति" २८ सू० । "अग्नेरुत्तरपक्षस्यापरस्यां पश्चिमकोणे एवमुत्तराक्षिण्यः परिश्रितो मिनोति" क० । अत्रसर्वत्र चतुरङ्गैः शतपथब्राह्मणाध्यायादि बोध्यम् । त्रिभिः कात्यायनौतसूत्राध्यायादि द्वाभ्यां शुक्लयजुर्वेदाध्यायादि तेन तत्तत्स्थाने तत्तोक्तप्रतीकयुक्तमन्त्रमूलवाक्यादिकं द्रष्टव्यमिति सङ्क्षेपतोज्ञापनम् । विस्तरस्तु शतपथब्राह्मणे लिखितान्नू सूचिताध्यायादौ द्रष्टव्यः ।

इष्टकापथ न० इष्टकायामपि पन्था यस्य अच् समा० इष्टकापथं यस्याधोमुखवायुकरणात् । १वीरणमूले । इष्टकया निर्मितः पन्था अच् समा० । इष्टकानिर्मिते २पथि पु० ।

इष्टकाव त्रि० इष्टका अस्त्यर्थे व । इष्टकायुक्ते ।

इष्टकावत् त्रि० इष्टका+चतुरर्थ्यां मध्वादि० मतुप् मस्य वः । इष्टकासन्निवेशदेशादौ स्त्रियां ङीप् ।

इष्टगन्ध पु० कर्मधा० । १सुमनसौ । इष्टोगन्धोऽस्य । २सुगन्धिद्रव्ये त्रि० ३वालुकायां न० मेदि० ।

इष्टतम त्रि० अतिशयेन इष्ट+तमप् । १प्रियतमे २अतिशयाभीष्टे "बहुयष्टिष्टतमं लोके" गीता । द्वयोर्मध्ये अतिशयेन इष्टः तरप् । इष्टतरः द्वयोर्मध्ये अतिशयेन इष्टे त्रि० ।

इष्टदेव पु० इज्यते यज-कर्मणि क्त कर्मधा० । १पूज्ये देवे तन्त्रादिविधानेन यस्य मन्त्र उपासनया सङ्गीतत्वाच्च २देवे च । इष्टदेवताद्योत्यत्व स्त्री ।

इष्टनि त्रि० यज-तनिक् संप्र० इष-तनिक् वा । १यष्टव्ये २एष्टव्ये च । "तुविष्वणिःप्रचेतोघृणिराखिष्टनिरार्क्ष" खिष्टनि." क० १,१२७,६ । "इष्टनिरेष्टव्योवयष्टव्यो वा" भा० । [व्याकरणोक्तसंस्कारानुसारेण प्रयोगे ।

इष्टप्रयोग पु० इष्टस्य यिष्टप्रयुक्ततया निश्चितस्य प्रयोगः ।

इष्टवत् न० यज-क्त वा क्वसु स्त्रियां ङीप् । १यजनकर्त्तरि २इष्टायुक्ते च । "इष्टं वेदाध्ययनादिः साध्यतयाऽस्यास्ति मतुप् मस्य वः । २इष्टकर्म कर्त्तरि । वेदे तु पूर्वपददीर्घः इष्टावान् "इष्टावन्वोरातिमाषोदधानाः" अथ० १८,१.

२० । "इष्टिभिः पशुबन्धैश्च चातुर्मास्यैस्तथैव च । अग्निष्टोमादिभिर्यज्ञैर्यैर्न चेष्टं स इष्टवान्" व्यासोक्ते ४रुच्यादि कारिणि त्रि० । स्त्रियां ङीप् ।

इष्टव्रत त्रि० इष्टं व्रतं यस्य । १व्रतयोगे इष्टानि कल्याणानि व्रतानि कर्म्माणि सिध्यन्ति येन । २इष्टकर्म्मसाधने अन्नादौ "इष्ट इष्टव्रता अकः" ऋ० ३,५९,६ । "इष्टानि कल्याणानि व्रतानि कर्म्माणि याभिः सिध्यन्ति ता इवः अन्नानि" भा० ।

इष्टसाधन न० ६त० । अभीष्टसाधने इच्छाशब्दे उदाहृतिः । ततो भावे त्व । इष्टसाधनत्व तद्भावे न० । तल् । इष्टसाधनता तद्भावे स्त्री ।

इष्टा स्त्री इष्यतेऽनया यज–क्तये टाप् । यज्ञीयेऽग्नौ राज त्रि० तत्समिधा क्षीयते इति तस्याः तथात्वम् कर्म्मणि क्त । अभिमतायां स्त्रियाम् ।

इष्टाकृत त्रि० अभिष्टमिष्टं कृतम् इष्ट+च्व्यर्थे डाच् कर्म्मणि क्त । इष्टीकृते "सतामिष्टाकृतं नाम पूर्वावरसङ्गिकम्" राजा० ।

इष्टादि उ० "इष्टादिभ्यश्च" पा० सूत्रेण तत्करणमनेनेत्यर्थे विहितेनिमित्तार्थवर्त्तिनिमित्तभूतशब्दसमूहे स च गणः । "इष्ट पूर्त्त उपवादित निगदित परिगदित परिवादित निकथित निवादित निपठित संकथित परिकथित संरक्षित परिरक्षित अर्चित नचित अवकीर्ण अयुक्त स्टहीत आम्नात श्रुत अधीत अवधान आसेवित अवधारित अवकल्पित निराकृत उपकृत उपाकृत अनुयुक्त अनुगर्हित अनुपठित आकृष्टि" आकृतिगणत्वेन "कृत्रेण पठितो माणिन् खलः खेलति" नैष० ।

इष्टापत्ति स्त्री ६त० कर्म्मधा० वा । १इष्टस्यापत्तौ इष्टाभावापत्तौ च वादिना दर्शितायां प्रतिवादिन इष्टत्वे हि सा भवति । "इष्टापत्तौ दोषान्तरमाह" जग० ।

इष्टापूर्त्त न० इष्टं च पूर्त्तञ्च द्वयोः समाहारः पूर्वपददीर्घः । इष्टशब्दोक्ते अग्निहोत्रादौ "वापीकूपतडागादि देवतायतनानि च । अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते" इति मनूक्ते पूर्त्ते च । "वितथन्त वदेद्यूर्ये धर्म्मं प्रच्छात् पृच्छते । इष्टापूर्त्तञ्च ते घ्नन्ति सप्त सप्तपरावरान्" भा० व० ६६अ० । "इष्टापूर्त्तेन च तथा वक्तव्यमनृतं नृतु" आ० प० १६५अ० । "इष्टापूर्त्तफलं न स्याद्यज्ञो न गुरुभक्तेतु" भा० व० २२अ० । क्वचित् इतरेतरद्वन्द्वोऽपि द्वि० व० । "इष्टापूर्त्ते संसृजेथामयञ्च" यजु० १०,५४ ।

इष्टार्थोद्यत त्रि० इष्टे अर्थे उद्युक्तः । तत्सुखे इष्टार्थ लाभाय त्वरमाणे कालाक्षमिणौ ।

इष्टाश्व त्रि० इष्टोऽश्वोयस्य । १प्रियहये २राजभेदे पु० । "किमिष्टाश्व इष्टरश्मिरेतः" ऋ० १,१२२,१२ । "इष्टाश्व एतन्नामको राजा" भा० ।

इष्टि स्त्री यज–क्तिन् । १यागभेदे । स च कात्या० श्रौ० सू० दर्शितः "कर्म्मशब्दो द्रव्यदेवतायुक्तो यजतिः" । ७,१,१,सू० "क्रियाशब्दः आख्यातप्रत्ययान्तो निर्वपत्यादिशब्दो यजतिः प्रत्येतव्य यागो ऽस्येय इत्यर्थः न निर्वापाद्यन्नादिरूपसंस्कारमात्रविधायकः यजतिशब्दोऽत्र तदर्थ्यागपरः । एवं यागत्वे सिद्धेऽपि इदं संदिह्यते सौर्यं चरुं निर्वपेदग्निषोमीयमजमालभेतेत्यादौ किं यागमात्रं भवति उत धर्मा अपि भवन्तीति यदा च धर्मा भवन्तीति पक्षस्तदापि संदेहः किं पूर्णाकृतिसम्बन्धिनो धर्मा भवन्ति उताग्निहोत्रसम्बन्धिनः, आहोस्विद्दर्शपूर्णमासयोः, अथवा ज्योतिष्टोमस्येति, अथवा दर्शपूर्णमासयोरेवेति, । धर्माणामभावान्नान्नाद्यार्थ्यं यागमात्रं कर्तव्यमिति प्राप्ते आह" क० "दर्शपूर्णमासधर्मा इष्टिपशुषु सामर्थ्यात्" २सू० । सौर्यादौ धर्मा भवन्ति न यागमात्रम् एवमेतानि विधिवाक्यानि समर्थान्यर्थवन्ति सम्प्रयोजनानि भवन्ति अन्यथा साकाङ्क्षत्वादर्थप्रतिपादनाभावेन निरर्थकान्येव स्युः । तथा हि सौर्येण यागेन ब्रह्मवर्चसं भावयेदित्यत्रांशतयवती भावना विधीयते किम्, केन, कथमिति, किमंशो ब्रह्मवर्चसम्, तत्र केनांशः सौर्येणेति, कथमंशस्तु वाक्यमध्ये नास्ति तेन कथं भावयेदिति वाक्यं कथमंशमपेक्षम् । यत्र सामेक्षं भवति तदध्याहारेणानुषङ्गेण वा पूरयित्वा निराकाङ्क्षं कर्तव्यम् । अन्यथा तस्यानर्थक्यापत्तेः न च वेदे मात्रामात्रस्य तदिष्यते तस्मात्तत्र निराकाङ्क्षीकरणाय सिध्यन्तिकर्तव्यतापरपर्यायः कथमंशोऽत्र क्वचिदनुषञ्जनीय इति सिद्धे आह "दर्शपूर्णमासधर्म्मा इष्टिपशुषु सामर्थ्यादिति" सर्वासु इष्टिषु अग्नीषोमीये पशौ च दर्शपूर्णमासयोरेव धर्मा भवन्ति सामर्थ्यात् पूर्वोक्त एव हेतुरत्रापि बोद्धव्यः । दर्शपूर्णमासधर्मा एव सौर्यादिविधीनां यागीभवितुं समर्थाः चरुपुरोडाशादयो ह्यवघातादिभिरेव सिध्यन्ति नाभिघारादिभिरिति । इष्टिपशुष्विति इष्टिषु सर्वासु अग्नीषोमीये पशौ च पञ्चत्रिंशत्सु ह्याग्नीषोमीयधर्मा भवन्ति" क० । इत्यारभ्य पञ्चत्रिंशत्या सूत्रैरिष्टिषेव उक्तस्तत्र विस्तरेणावसेयः । तथा च दर्शपौर्णमासेतिकर्तव्यताको यागभेद इष्टिरग-

नत्या ।तत्करणप्रकारः आश्व॰ श्रौ॰ सूत्रे दर्शितो "यथा पौर्णमासेनेष्टिसोमा उपदिष्टाः"। २,१,१, प्रथमेऽध्याये दर्शपूर्णमासौ व्याख्यातौ विध्यन्तरसहितौ। उत्तरत्रेष्टयः पशवश्च वक्ष्यन्ते विध्यन्तरविहिताः । तेषां विध्यन्तरापेक्षास्ति" "अतोऽयमर्थः सूत्रस्य, यच्चिच्छास्त्रे उपदिष्टा इष्टयः पशवश्चापि अविशेषिताङ्गभागास्ते सर्वे वार्त्रघ्नाङ्गभागा इति"। "पौर्णमासेनेत्यस्यायमर्थः, पौर्णमासेन व्याख्याता इति वार्त्रघ्नाङ्गभागा इत्यर्थः । तेन समाम्नातानामिष्टीनां पशूनाञ्च अग्न्यदेवतागमनात् सिद्धो भवति । तथा सोमाभिषवणप्रकरणे "असमाम्नाताख्यार्थात् तन्त्रविकारः" नारा॰ दृष्टिः तस्य कालस्तत्रैव दर्शितः यथा "तैरमावास्यायां पौर्णमास्यां वा यजेत" सू॰२,१,२, "तैरिष्टिपशुसोमैरमावास्यायां पौर्णमास्यां वा यागः कर्तव्य इति दृष्टिपशूनां प्रकृतिप्राप्त एवायं कालः पुनर्विधीयते ह्यङ्गकालतां निवर्त्य सत्यङ्गकालताप्राप्त्यर्थम्। किञ्च दर्शप्रकृतेरमावास्या पौर्णमासप्रकृतेः पौर्णमासीत्येवं नियमं निवर्त्य अनियमेन उभयकालताप्राप्त्यर्थम्। प्रकृतिविरोधात् पर्वसन्नहनस्फोरणे विकृतिः कर्तव्या । यङ्काः पूर्वभागे पर्व स्यात् तदा प्रकृतिं कृत्वा विकृतिः कार्या । यदा परभागे रात्रौ वा तदा विकृतिं कृत्वा प्रकृतिः कार्येति सोमस्यायमप्राप्तः कालो विधीयते । दृष्ट्यादिशब्दसम्बन्धादेव यजेतेत्यपि सिद्धे यजेतेतिवचनं सोमस्य याग एवानयोः कालयोः सम्भवतीयो नान्यत् दोषादीति"दृष्टिः।"राजन्यस्याग्निहोत्रं जुहुयात्" २सू॰। "अतियस्याग्निहोत्रहोमः पर्वण्येव कर्तव्यो नान्यस्मिन् काल इति चयश्चाहुर्योऽभ्यनुज्ञोरेव कालयोरग्निहोत्रं जुहुयात् नान्यस्मिन्नित्यवगम्यते । तत्र विशेषमाह"इष्टिः।"तपस्विने ब्राह्मणायेतरं कालं भक्षसुपकरेत्" ३सू॰।"तपस्वी कर्मनिरतस्तस्मै ब्राह्मणाय अतपस्विनेऽपि ब्राह्मणायैव दद्यात् न जात्यन्तराय तपस्विनेऽपीति । इतरं कालमिति, इतरेषु सर्वेष्वग्निहोत्रकालेष्वित्यर्थः । भक्षसुपकरेत्, भक्षं पक्वोदनं पक्वान्नसुपकरेत्, दद्यात् । एतदुक्तं भवति । राजन्यवैश्ययोः पर्वसन्नह्यग्निहोत्रकालद्वयं वर्जयित्वा इतरेषु कालेषु ब्राह्मणायोदनो दातव्योऽग्निहोत्रः कर्तव्य इति । अग्निधारवन्तु क्रियत एव" दृष्टिः । तत्रोऽग्न्याधानं प्रसङ्गादुक्तं तच्चाधानशब्दे पूर्वं दर्शितम् अग्न्याधानोत्तरं कर्त्तव्यमाह "यदि त्विष्वन्तनुषु:" २,१,१८, सू॰ "अग्नीनेनेति वाक्यशेषः । यद्यनधिकारत्वादाधानविधेर्विनियोजकस्य प्रकरणस्य व्याघारासम्भवादाधानाङ्गत्वमिष्टयो न स्युः, दृष्टीनाञ्चानधिकारत्वादिच्छाङ्गमाधानं न स्यात्, तथापि न क्रियाहीनः, अग्न्यर्थत्वेनैवोभयोरप्यनुष्ठानसिद्धेः"। "अथ्यङ्गत्वे सूत्रयोजना । यद्यासामिष्टीनामाधानाङ्गता स्यात् तथापि आहवनीयाद्यग्निसम्बन्धात् तानेवाग्नीनित्यस्तनुयुः विस्तारयेयुः कुर्युः साधयेयुरित्यर्थः । सूत्रकृत्तु साधनादिषु विशेषं दर्शयति । आधानेऽग्नीनां साध्यत्वेन सम्बन्धानामेव साध्यत्वम् । दृष्टिषु साधनत्वेन सम्बन्धानामपि कल्पनागौरवभयात् साध्यत्वमिति विशेषं स्फुटीभूतः एवं यद्याधानेनेष्टिभिश्चाग्नय एवार्थतः साध्या दृष्टयनधिकाराद्या कथमनुष्ठानसिद्धिरिति न्यायाविद्यामेव उपजीव्य नाचाक्रम् । अचाकं तु साध्यसाधनसम्बन्धेऽवगते तदर्थिनां कर्तृत्वेनावगतानां ब्राह्मणादीनां कथञ्चिदधिकारकल्पनयानुष्ठानसिद्धिः । अथवाऽनधिकाराद्यामनन्यशेषाणामपि तत्साधनसाध्यरूपेणोपकारकत्वेन कामं श्रुतिप्रयुक्तैर्वैविधानामनुष्ठानसिद्धिरित्यलमतिविस्तरेण" नारा॰दृष्टिः। ""प्रथमायामग्निरग्निः पवमानः" १६ सू॰। "प्रथमायामिष्टौ द्वे देवते । अग्निः प्रथमः केवलः । द्वितीयः पवमानगुणकोऽग्निः । केवलस्याग्नेर्नित्ये एव । "अग्न आयूंषि पवसेऽग्ने पवस्व स्वपाः" २०सू॰।"एते द्वितीयस्य पवमानगुणकस्य" इ०। "स क्रव्यादमत्साऽग्निर्हौता प्रतीक्षित इति खिष्टकृतः संयाज्ये इत्यूर्क सौविष्टकृती प्रतीयात्" २१सू॰ ।"सौविष्टकृत्योर्याज्यानुवाक्ययोर्मध्ये सौरेण संयाज्ये इति संज्ञा विधीयते" इ० । "सर्वत्र देवतागमे नित्यानामप्यायः" २२ सू॰ । "सर्वत्रेति प्रकरणान्तरेऽपीति दर्शयति । देवतागम इत्यत्र समासनिर्देशस्य तुल्यत्वाद्देवताद्वाः देवतयोर्देवतानां वा आगम इत्येवं भवति । नित्यानां प्राकृतीनामित्यर्थः । अपाय उद्धार इत्यर्थः । एतदुक्तं भवति। विकृतौ देवतायाः एकस्या आगमे द्वयोर्बहूनां वा अनागमेऽपि प्राकृतीनां सर्वासामुद्धार इति क्वां पुनर्विकृतौ दृष्टिनोदनां कृत्वा देवतां न विदधाति, तत्र नोद्धारः प्राकृतीनाम् । तत्रा एव देवता भवन्तीत्यर्थः । यथा सदितः सोमेन पशुना दृक्षा वा इत्यादौ" इ०।"याः खिष्टकृतमन्नराज्यभागौ च तासुत्सृजते" २३सू॰। "नित्यानामपाय उक्तः । तत्र किं सर्वा नित्या उद्धर्तव्याः उत काचिद्देवतेत्येतं संशयं निवर्तयति वा आज्यभागौ खिष्टकृतं चान्तरा देवता यष्टव्याः उद्धर्तव्याः । याः पुनर्विकृतौ विहिताश्चाकृतस्थाने उ-

कृतानां प्रांजलीनां स्थाने भवन्ति" इति वचनात्, तद्धर्मिकाश्च भवन्तीति गम्यते" इ०। "एष समानजातिधर्मः" २४ सू०। "योऽयमतिदिष्टो विधिर्देवताभ्योऽन्यत्रापि स समानजातीयेषु भवति। समानजातीय एककार्य इत्यर्थः" इ०। "हितीयस्यां दधन्वती अग्निः पावकोऽग्निः शुचिः स नः पावकादिवोऽग्ने पावकरोचिषाग्निः शुचिव्रततम उदग्ने शुचयस्तव" २५ सू०। "एकः पावकगुणकोऽग्निः, अपरः शुचिगुणकः। 'साङ्गान् विश्वा अभियुजोऽग्निमीले पुरोहितमिति संयाजे हृतीयस्यां सामिधेन्यावापते प्रायुनोत्तमायाः पृषुषाजा अमर्त्यइति हे" २६ सू०। "आवपते इति वचनात् अधिके एते सामिधेन्यौ भवतः। प्रथमायां हितीयस्यां हृतीयस्यामिति वचनात् यस्यामिष्टौ यत् तन्त्रं विहितं तस्यामेकदेवतायामपि तत् तन्त्रं भवति न यथोक्तनानादेवतायामेवेति" इ०। "ध्याये इत्यृक् एते प्रतीयात् पुष्टिमन्तावग्निना रयिमश्नवद्रयस्वानो अमीवहेति। अग्नाविष्णू महि तद्वां महित्वं वीळुपवीति वैकल्पिकानि" २७ सू०। "त्वयाग्निको गच्छते" इ०। "अदितिः" २८ सू०। अदितिर्द्यौरदितिरन्तरिक्षमदितिर्मातासपितासपुत्रः। विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्' इ०। "उत त्वामदिते सख्यतानामृतस्य पत्नीमवसे हुवेम तुविक्षत्रामजरन्तामुषर्बुधं मह्नि मर्ताभूषु मातरं सुशर्माणमदितिं सुप्रणीतिम्" २९ सू०। "एषा कल्पजा" इ०। "प्रेद्धो अग्न इडो अग्न इति संयाज्ये विराजावित्युक्त एते प्रतीयादिति तिस्रः" ३० सू०। "इत्येतास्तिस्र इत्योऽनुक्रान्ता इत्यर्थः। उक्तानुक्तोक्तसंग्रहार्थम्। यदाद्योत्तमे वैव स्यातामाद्या वेति पञ्चस्वपि तिसृणामिष्टीनां यावत्यो देवतास्ताः सर्वा यष्टव्या इत्येवमर्थम्। आद्योत्तमपक्षे मध्यमायां ये देवते ते आद्यायामेव प्रक्षेप्रक्ष्ये। यदा पुनराद्यैव तदा सर्वा देवता आद्यायामेव प्रक्षेप्रक्ष्या इत्येवमर्थम्' इ०। "आद्योत्तमे वैव स्याताम्' ३१ सू०। "दृष्टो दृष्टि शेषः। "आद्या वा" ३२ सू०। "आद्यैव-वेष्टिर्भवतीत्यर्थः' इ०। 'तथा सति तस्यामेव ध्याये विराजौ" ३३ सू०। "यद्याद्यैव भवति तदा हितीय-हृतीययोरपि देवताक्षत्र भवन्तीत्युक्तम्। अतस्तस्यामेव ध्याये विराजौ भवतः। ध्याद्याविराजामनुप्रवेशस्य निमित्तं हृतीयस्या दृष्टदेवतानुप्रवेश इत्येवमर्थं तथा सतीत्युक्तम्' इ०। "इतिमात्रे विकारे वैराजतन्त्रेति प्रतीयात्" ३४ सू०। "पौर्णमासतन्त्रायामिष्टौ ध्याविराण्मात्रे विकारे सति वैष्णिवैराजतन्त्रेति वेदितव्यम्' इ०। 'आधानाद्ध द्वादशरात्रमजस्राः" ३५ सू०। "आधानमिष्टीरोक्त्वा आधानादूर्ध्वं द्वादशरात्रमजस्रा इत्युक्तम्। तस्यायमभिप्रायः, यावता कर्मसमुदायेनाग्नीना सिद्धिर्भवति तावतः कर्मसमुदायस्याधानशब्दो वाचक इति ज्ञापयितुम्। तेनाग्न्याधेयं पुनराधेयं वेत्यत्र ऐष्टिकस्या धानस्य यत्कर्म भवतीति सिद्धम्। आधानेनेष्टिभिश्च सिद्धाग्नयो द्वादशाहोरात्राणि सर्वे खल्वपेक्षैव धार्यन्ते। एतदजस्रधारणमग्निहोत्रपर्व एवाधाने भवति, अग्निहोत्रस्यैवानन्तरसञ्च्यमानत्वात्। अनुष्ठानक्रमेणैव कर्मणां व्याख्यानमित्युक्तत्वाच्च" इति। एवमिष्टिसामान्ये प्रदर्श्य विशेषेष्टयस्तत्र दर्शिताः; तत्रादौ नवयज्ञेष्टिः सा चाधानशब्दे दर्शिता तत्र रात्र एवाधिकारः, त्रयाणां वर्षाणामविशेषेणैतिकल्पत्वे प्राप्ते रात्रौ विशेष उच्यते "दृष्टिस्तु रात्रः" "सर्वेषां चैके एके सर्वेषामिष्टिरेवेति मन्यन्ते" २,६,६,७,। "श्यामाकैस्त्र्यासोम्यचरुः स च वर्षासौ तत्र याज्यादिकं २,६,८,६,१०, सू०उक्तम्। अन्यत्रान्नभोजने जयमन्त्रादिकमुक्तम् १२, ३। एतानिष्ट्वा इष्टयः अथ काम्याः इष्टय २,१०,१२, सूत्रादौ। तत्र आयुष्कामेष्टिस्तत्र अग्निगुणभेदजीवातुमद्देवता २,१०,२ ३,४, सू०। स्वस्त्ययनेष्टि रक्षितवद्देवताका तत्र याज्यादिकम् ५,६,७, पुत्रकामेष्टिः पुत्रवद्गुणकाग्निदेवताका तत्र याज्यादि ८,१, १०, वैरूपेष्टिः विरूपगुणकेन्द्रदेवताका तत्र याज्यादिकं १२,१४,१५, सू०। आग्नेष्टिराग्नामाग्नदेवताका तत्र याज्यादिकम् १७,१८, सू०। लोकेष्टिः पृथिव्यन्तरिक्षदेवताकः तत्र याज्यादिकम् २०,२१,२२, सू० मित्रप्राप्तिकामेष्टिः अग्निसोमवरुणमित्रेन्द्रबृहस्पतिसवितृपूषन् स्वस्त्रतादेवताका तत्र याज्यादि १,२,३,४,५। इयमिष्टिः महावैराजीनामा। अभिचारकामेष्टिः कृष्णाश्वस्त्रीयनाम्नी क्रूरगुणकेन्द्रदेवताका तत्र याज्यादि १०,७,८,९। विभक्तसम्पत्तिकामेष्टिः संज्ञानो नाम वसुरुद्रादिगुणकाग्निसोमादि चतुष्टयदेवताका तत्र याज्यादि १०,११। भेदकामेष्टिः। इन्द्राग्नदेवताका तत्र याज्यादि १३,१४,१५,१६,सू०। सम्पत्तिकामेष्टिः ऐन्द्राग्नी संज्ञानोक्त याज्यादिकम्। १७,सू०। शत्रभिभवनिवृत्तिकामेष्टिः ऐन्द्राग्नदेवत्या तत्र याज्यादि १८।१६ सू०। पवित्रेष्टिः। अग्न्यादिदेवताका तत्र याज्यादि २,१२,१। "वैश्वानरीं व्रातपतीं पवित्रेष्टिं तथैव च। ऋतायतीं प्रयुञ्जान पुनाति दृषदौ इव" इति। [illegible]

नामादेवताका अग्निदेवताका वा तत्र याज्याादि २,१२,१,२, ४,५,६,७,८,९,सू० । सर्वाश्च एता दर्शपौर्णमासेनिकर्तव्यताका: । पशुगुणके कर्मणि पशोरुभयोऽन्यतरतो वा पशुकामेष्टि: सा च आग्नेयी आग्नावैष्णवी वा आश्व० श्रौ०सू० २,१,२,३,४ सू० । तस्यामितिकर्त्तव्यताया याज्यादि तदुत्तरसूत्रजातैरुक्तम् । विध्यपराधप्रायश्चित्तेष्टि: २, १०,१,सू० विध्यपराधस्वरूपकारणप्रदर्शनपूर्वकं तत्करणप्रकारादि तदुत्तरसूत्रजातैर्दर्शितम् । वारुणेष्टि: तत्प्रकारादि २,१२,५, प्रातः कालातिपत्तौ प्रातरिष्टि: तत्र देवताादि २,१२,१२, आत्मात्मुपाले च सैवेष्टि: २,१२,१५ निमित्तभेदेष्वेव प्रायश्चित्तेष्टा देवताभेदादि २,१२,१६, आरभ्य आध्यायात् सूत्रैरुक्तम् । उखासम्भरणीयेष्टि: तद्देवताादि ४,१,२१ २६सू० । दीक्षाप्रयोजनेष्टि: दीक्षणीया नाम तत्रदेवताादि ४,२,१,१८, सू०पर्यालोचनम् । प्रायणीयेष्टि: तत्र देवताादि ४,३, सूत्रादौ । आतिथ्येष्टि: तत्र देवताादि ४,४,सूत्रादौ । उदवसानीयेष्टि: तद्देवताादि ६,१४,१, सूत्रादौ उदवसनीयेष्टि: तद्देवताादि ६,१४, , २३, सूत्रादौ । अन्याः पुनरग्नयेष्टिप्रभृतयोऽपि इष्टय: विस्तरभयात्नोक्ता: आकरेषु द्रष्टव्या ।

शत०ब्रा० १,६,३,१२, इष्टिकरणप्रकारविशेषो दर्शितो यथा। "स यदाहि"कव्यात सप्तदश सामिधेनीरनुब्रूयादुषासु देवता यजति तद्धोष्टिकृतं, मूर्द्धन्यतो याज्यानुवाक्ये स्याता वातेधाराज्यभागौ, विराजौ संयाज्ये" "अग्नेरिष्टिमभिधाय अथ पृथक् प्रयोक्तव्याया आग्नेयेष्टेर्वैगेषिकमङ्गजातमाह । यदीष्टिं दर्शपूर्णमासाभ्यां पृथगेव कुर्वीत प्रधानदेवता उषासु यजेत तदुषासुच काम्येष्टि रूपं स्वतु । मूर्द्धन्वत्यौ "अग्निर्मूर्द्धा" "भुवो यज्ञस्य रजसो" इत्येते। (यजु०१२,१४,१५,) मूर्द्धन् शब्दवत्यौ प्रधानस्य याज्ये स्विष्टकृदाख्यानुवाक्ये, विराजौ विराट्छन्दस्के "प्रेद्धो अग्ने" "इमो अग्ने" इत्येते (यजु०१७,७६ ७७,) भवत:" भा० दर्शपौर्णमासयाग कृत्वा प्रायश्चित्तेष्टि: कार्य्या तत्प्रकार: शत०ब्रा० १,१,२,१,दर्शितो यथा।"पौर्णमासेनेष्ट्वा इन्द्राय विच्छेऽनुनिर्वपति तेन यथेन्द्रश्चैवं यजतआमावास्येनेष्ट्वा अदित्यै चरुमनुनिर्वपति तेन यथेन्द्रश्चैवं यजते १ । स यत्पौर्णमासेनेष्ट्वा इन्द्राय विच्छेऽनुनिर्वपतीन्द्रो वै यज्ञस्य देवतायैतदग्नीषोमीयं पौर्णमासं हविर्भवति तत्र नेन्द्राय त्वेति किं चन क्रियते एतेनो ह्यैतत् सेन्द्रं हविर्भवत्येतेन सेन्द्रो यज्ञोऽथ यद्विच्छेऽत्वेति वदति उ हि स्मो नाष्ट्राः पौर्णमासेन इति २ । अथ यदामावास्येनेष्ट्वा अदित्यै चरुमनुनिर्वपत्येष वै सोमो राजा देवानामन्न यज्ञन्द्रमा स यत्रैष एता रात्रिं न परस्तान्न पश्चाद्दृशे तेनैतदनृक्षेव हविर्भवति तेनाप्रतिष्ठितमिव वै पृथिव्यदिति: सैवमद्वा सेय प्रतिष्ठितेन हाक्षैतदृक्षेव हविर्भवत्येतेन नाप्रतिष्ठितमेतेन तद्यदादनुनिर्वपत्यथ तस्मादनुनिर्वपेत् ४ । स यत्पौर्णमासेनेष्ट्वा इन्द्राय विच्छेऽनुनिर्वपति सेन्द्रो मे यज्ञोऽमिति सर्वो वै यज्ञ इन्द्रस्यैव स यत्सर्वो यज्ञ इन्द्रस्यैतेनो ह्यैतत् सेन्द्रं हविर्भवत्येतेन सेन्द्रो यज्ञ: ४ । अथ यदामावास्येनेष्ट्वा अदित्यै चरुमनुनिर्वपत्यामावास्यं वा अनुनिर्वाप्यं पौर्णमासेन वा इन्द्रो हतमकृक्षता एतद्धत जघ्नुषे देवा एतद्धविरनुनिरवपन् यदामावास्यं किमनुनिर्वाप्येनुनिर्वपेदिति तस्मादनुनिर्वपेत् ५ । स यत् पौर्णमासेनेष्ट्वा अथान्यद्धविरनुनिर्वपत्यामावास्येनेष्ट्वाथान्यद्धविरनुनिर्वपति द्विपन्नं वै स आहुत्यं प्रत्युच्यतेऽथ यः पौर्णमासेनैव पौर्णमासीं यजतआमावास्येनामावास्यामेवपत्नी वैवास्यानुपधावा श्रीर्भवति ६ । पौर्णमासेन वै देवाः पौर्णमासीं यजमाना आमावास्येनामावास्यां क्षिप्रएव पाप्मानमपाघ्नत क्षिप्रे प्रायश्चित्ते स यो वैवं विद्वान् पौर्णमासेनैव पौर्णमासीं यजतआमावास्येनामावास्यां क्षिप्रएव पाप्मानमपहते क्षिप्रे प्रायश्चित्ते स यदनुनिर्वपेद्द्याद्दक्षिणां नादक्षिणं हविः स्यादिति स्याद्दर्शपूर्णमासयोर्ह्येषा दक्षिणा यदन्वाहार्यं इति स्यनुनिर्वाप्यस्याभ्युदितस्य७"]अधिकम्। "अद्यामावास्येति मन्यमान उपवसति। अथैष यज्ञाहुत्ये स वैष दिव्यः सा, स यजमानस्य पशूनभ्यवेक्षते तदपशव्यं स्यादप्रायश्चित्तिरत एतद्वादु वैतद्धोषावचन्द्रमसादिति"। । आयानुपधर्पन्ति । एतेनो वैतदुपतपदाचक्षते ऋत्विजमिक्षेतस्त वैवैतदाचक्षते २ । अथयच्चन्द्रमस इति । चन्द्रमा वै सोमो देवानामन्नं तं पौर्णमासमभिगच्छन्ति सोऽपरपक्षेऽप क्षीयते प्रविशति पशूनो वा अप औषधीरन्ति तदेनमेतां रात्रिं पशुभ्यः संयति ३ । सोऽद्यामावास्येति मन्यमान उपवसति । अथैष यज्ञाहुत्ये तद्यजमानो यत्र पशवेदेति तदाहु: अयं वृक्षादिदा यत्रपशवाद्यजेता न यजेता२ इति यजेत वैव न ह्यन्यदप्रकृतमवं भवति स: अ एवैष व्याख्यानुदेति स आमावास्यविधेनैवेष्टिमनुनिर्वपति तद्धविरेव सो वा ४ । तस्य लोष्टि हवींषि भवन्ति । अग्नये मथिक्षतेऽष्टाकपालं पुरोडाशम्, इन्द्राय हतघ्नेएकादशकपा-

नम, अग्नय वैश्वानराय द्वादशकपालं पुरोडाशम् ५। स यदग्नय प्रथिश्रेते निर्वपति। अग्निर्वै पशुः कर्ता स यस्मादेवाटो यजमानो यद्वपथादेति तमेनमग्निः पन्थानमापादयति ६। अथ यदिन्द्राय हवघ्ने। पाप्मा वै हवो यो भूतेर्वारयित्वा तिष्ठति कल्याणकर्मणः साधोरात्मनेतदिन्द्रश्चैव हवघ्नः पाप्मानं हवं हन्ति तस्मादिन्द्राय हवघ्ने ७। अथ यदग्नये वैश्वानराय द्वादशकपालं पुरोडाशं निर्वपति यत्र वा इन्द्रो हवमहंस्तमग्निना वैश्वानरेण समदहत्तदस्य सर्वं पाप्मानं समदहत्तथोएवैष एतदिन्द्रश्चैव हवघ्नः पाप्मानं हवं हत्वा तमग्निना वैश्वानरेण संदहति तदस्य सर्वं पाप्मानं संदहति स यो हैवं विद्वानेतेष्ट्या यजते न हास्यात्मयज्ञेन पाप्मा परिशिष्यते ८। तस्यै सप्तदश सामिधेन्यो भवन्ति। उपांशु देवता यजति याः कामयते ता याज्ञानुवाक्याः करोत्येवमाज्यभागावेव संयाज्ये ९। तिस्रो धन्वं दक्षिणा ददाति। धन्वना वै स्वानं बाधन्ते तदेतमेवैतद्बाधते यत्तिस्रो धन्वं दक्षिणा ददाति १०। दण्डं दक्षिणा ददाति। दण्डेन वै स्वानं बाधन्ते तदेतमेवैतद्बाधते यद्दण्डं दक्षिणां ददात्येषा ह्यादिष्टा दक्षिणा दद्याच्चेद्वाचमप्यन्यद्यादृतरा दक्षिणाभ्यां यत् सम्पद्येत सा सा हैषा पशव्येष्टिस्तयैवमन्यहतो यजेतैव" ४ क०। "दर्शयागे पुरस्ताच्चन्द्रदर्शनप्रायश्चित्तिरुक्ता अथ पश्चात्पूर्णमासे नैमित्तिकीमिष्टिं विधित्सुराह। अथानन्तरं सायंकाले एष चन्द्रमाः पश्चात् प्रतीच्यां दिशि दृश्ये दृश्यते। अभ्यवेक्षते अभ्यवहर्तुं पश्यति यथा ग्राम्यश्वको वने संचरतो मेषादीन् पशूनभ्यवजिघृक्षतीति। एतस्मादेव खलु चन्द्रसम्बन्धिस्वरूपेण पूर्वोक्तवत् स्वारः समाख्यानः तस्माच्चन्द्रादिति भीषा उक्तरूपया भीत्या, छायामुपगच्छन्ति गवाद्याः पशवः तिरोहिता यजमानस्य भवन्तीत्यर्थः पशूनासपतापकारि यदेतच्चन्द्रदर्शनं तत् स्खलु चितं शून्या रिक्तीकरणमित्याचक्षते २। एतमेव चन्द्रमसं दोषमेवमाचक्षते, चन्द्रमसः सम्बन्धी तस्मादस्तमध्यवर्त्ती यश्च इति श्रुत एव तस्य यशाङ्क इति प्रसिद्धिः। उपवसथकाले गतदेवात्मकं चन्द्रमसं पौर्णमासीकाले प्रत्यागच्छन्ति। पशव ओषधीर्जग्ध्वा अपश्च पीत्वात्मनि तं चान्द्रमसं क्षतं रसमभावास्याया धारयन्ति तत एनं रसमभावास्यासम्बन्धिन्यां रात्रौ पशुभ्यः सकाशात् संनयति सम्यक्पापयति। तत्सनयनं प्रतिपच्चन्द्रदर्शने सति नोपपद्यते। १दर्शयागस्यातिक्रान्तकालत्वे दोषरूपस्यस्य तन्नानुज्ञानप्रकारमाह। प्रकृतो दर्शयागः शीघ्रं समापनीयः अनन्तरमेवैतद्दोषपरिहाराय प्रायश्चित्तेष्टिः कर्त्तव्या। स आमावास्यविधेनैवेति यस्योदितकालेऽनुष्ठितोऽमावास्यायागस्तत्प्रकारेणैव प्रतिपदि प्रक्रान्तां दर्शेष्टिं समाप्य४। अयास्यामिष्टौ प्रकृतिवद्विकृतिः कर्त्तव्येति नोदकप्राप्तेष्वङ्गेषु विशेषं विधत्ते। प्रकृतो पञ्चदश अत्र नोदकप्राप्ताः पृथुवाजवत्यौ धाय्ये हे इति सप्तदश (सामिधान्यः) भवन्ति। प्रकृतौ प्रधानयागे उक्तोहधर्मः। प्रकृतदेवताभिद्युक्तायत्तः पशुर्यां दातव्यां समाम्नाता या ऋचताः कामयते। आज्यभागयोः खिष्टकृद्यागे च याथाकाम्यम् ६। तिसृभिरिषुभिर्युक्तं धनुः तिसृधन्वम् पूर्ववदकारः समासान्तः। एतं चन्द्रात्मकं दिव्यं स्वानम् १०। अदृश्यमानचन्द्रेऽपि" ११ भा०

"इष्टेः पार्वायणान्तीयाः कोयलानिर्वपेत् सदा" मनुः "प्राजापत्या निरूप्येष्टिम्"। "हेमन्ते नवशस्येष्टा" मनुः "आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः" रघुः। २"यागमात्रे च "कर्तुमिष्टिमभियाक्ष्यता मया" माघः राजसूयायागाभिप्रायमिदम्। इष-क्तिन्। ३इच्छायाम्। इष्टप्रयोगनिर्वाहाय प्रातश्चलभाष्यकृतः इच्छादोषके ४श्लोकात्मके वाक्यभेदे च। यथा। "द्विपर्य्यन्तानामेवेष्टिः" सर्वनाम्नोष्टृत्तिभावे पुंवद्भावे" इत्यादि। एतयेष्ट्या "ठक्छसोश्च" वार्त्ति० "एकतद्धिते चेति" स्वलञ्च गतार्थम्" सि० कौ०। "अनुत्स्वलपदन्यासेति" माघव्याख्यायाम् अनुत्स्वलाक्षरा इच्छुपसंख्यानैरपेक्ष्येण स्वलाक्षरैरेव" इति मल्लि०।

इष्टिका स्त्री इष-तिकन्। इष्टकाशब्दार्थे "उद्वर्षणं त्विष्टिकया करङ्कोटविनाशनम्" सुश्रु०। "इष्टिका काञ्चनीचाल चयनार्थं कृतोऽभवत्" भा० आश्व० ८८अ०।

इष्टिकापथिक न० इष्टिकायाः पथिकं तदुद्देशेनापि प्रभवत्वात्। नामब्रह्मकल्पे राजनि०। [कृतयागे।

इष्टिकृत् त्रि० इष्टिं यागं कृतवान् कृ-भूते क्विप् तुक्०। इष्टिन् त्रि० इष्टमनेन इष्ट० इनि। कृतयागे "अध्वरेष्टिनां पाता" भट्टिः।

इष्टिपच पु० इष्टये इच्छायै अभिलाषार्थं पचति न यज्ञार्थं पच-अच्-तुक्०। १ क्षत्रिये २ वैश्येच मल्लर०। स च खेच्छापूरणार्थमेव पचति न यज्ञार्थमिति तस्य तथात्वम्।

इष्टिपशु पु० तुक्०। यज्ञिये पशौ। त्रिका०।

इष्टिसुष् त्रि० इष्टिं यागं सुषोति सुष-क्विप् तुक्०। दैत्ये

इष्टियाजूक पु० इच्छा यायजूकः। "काम्येष्टियजनशीले।

"तस्मादिष्टियाजूकः स्यात् पशुभ्यः एकं प्रायच्छत्" पु० उ०।

इष्टियाजुकः इष्टियजनशीलः इष्टिशब्देन काम्या इष्टयः ज्ञातपथप्रसिद्धाः ताच्छील्ययोगात्काम्येष्टि यजनप्रधानो न स्यात्" भा० ।

इष्टोक्त त्रि० अनिष्टमिष्टं जातम् इष्ट+च्वि-कृ-कर्मणि क्त । अनिष्टे इष्टे जाते। अनिष्टिरिष्टिः जाता । इष्टिभेदे स्त्री न० । "सत्रमिष्टोक्तं नाम समुपास्ते महातपाः" भा० व० २५६ अ० ।

इष्टु स्त्री इष-भावे तुन् । इच्छायाम् उणादिकोषः ।

इष्ट्ययन न० इष्ट्ययनं गमनं यत्र । "यागविशेषाचरणभेदे" इष्ट्ययनञ्च आश्व० श्रौ० २,१४, स्त्रलादौ दर्शितं यथा "अत ऊर्द्धमिष्ट्ययनानि" १।"अत ऊर्द्धं यानि वक्ष्यन्तेऽस्मिन् अध्याये तानि इष्ट्ययनसंज्ञानीति विद्यात् । इष्टिभिरयनं गमनं येषु कर्मसु तानीष्ट्ययनानि" नारा० इ० । "सांवत्सरिकाणि २स्त्र० । "संवत्सरेण क्रियन्ते संवत्सरेऽपि क्रियन्त इत्युभयथा विधयः कर्तव्यः,दाक्षायणयज्ञचातुर्मास्यानामनेकसांवत्सरिकत्वविवक्षार्थम् इ० । "तेषां फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा प्रयोगः" ३स्त्र० । "फल्गुनीभिर्युक्ता पौर्णमासी फाल्गुनी, चित्रया युक्ता चैत्री । तेषां सांवत्सरिकाणां आगन्तुकानामस्मिन् काले प्रारम्भः कार्यः । दर्शपूर्णमासगुणविकारक्रूपाणां दाक्षायणयज्ञादीनामारम्भे कालनियमो नास्तीति तेषामित्युच्यते" नारा० इ० । "तुरायणम्" ४स्त्र० । "तुरायणं नामेष्ट्ययनमुच्यते" इ० । "अग्निरिन्द्रो विश्वेदेवा इति पृथग्विष्टयोऽनुसवनमहरहः" ५स्त्र० । "अग्निदेवत्या इन्द्रदेवत्या विश्वदेवदेवत्या चैतास्विष्ट्यः विषु सवनेषु यथासङ्ख्यम् एकैकेष्टिः कार्याऽहन्यहनि । अहरहरिति वचनं पौर्णमास्यमावास्ययोर्बाधनार्थम्" इ० । "एका वा त्रिष्टिः" ६स्त्र० "एताभिरेव देवतामिर्युक्ता एकैकेष्टिस्त्रिष्टिविधकाऽहन्यहनि प्रातः सवन एव कर्त्तव्या भवति" इ० । "इडादधोनामेष्ट्ययनं तत्र देवताटि २,१४,१-१०" व्यावाष्टथिव्योरयनं नामेष्ट्ययनं तत्र देवताटि २,१४,१२,१५" "वास्तुमरुत्वानि इष्ट्ययनानि तद्देवताटि २,१५,१ सूत्रादौ । एवमन्यान्यपि इष्ट्ययनकर्माणि आकरे द्रष्टव्यानि

इष्ट्वा अव्य० यज-क्त्वा । १यागं कृत्वेत्यर्थे । "अश्वमेधेन यष्ट्वा" कल्पतरुटिकम् । इष-क्त्वा । २अभिलष्येत्यर्थे च ।

इष्ण पु० इष्यति इच्छत्यनेन वा इष-गतौ इष-इच्छायां नक् वा । १वसन्तकाले २कामे च भावे नक् । ३गतौ । ततः अस्त्यर्थे इनि । इष्णिन् गतियुक्ते त्रि० स्त्रियां ङीप् । "ते वायोमन्त इष्णिनो अमीरवः" ऋ० १,२७,६। "इष्णिनः गतिमन्तः" भा० । इष-इच्छायां कर्मणि नक् । ४इच्छमाणे अस्त्यर्थे इनि अन्नादिमति "हिरण्यवाः खायुधास इष्णिनः" ऋ० ५,८, ७५। इष्णिनोऽन्नवन्तः" भा० ।

इष्ण पु० इष्यते इष-क्यप् । वसन्ते ऋतौ हेम० । तस्य ऋतूनां मध्ये इष्टतमत्वात्तथात्वम् "ऋतूनां कुसुमाकरः" गीतायां तस्य भगवद्रूपत्वोक्तेः इष्टत्वम् ।

इष्ण पु० इष-सर्पणे वन्-गुणाभावः । आवार्थे उद्देश्यार्थम् पक्ष्यमाणत्वात्तथात्वम् । उच्चलटत्तस्तु इष दाने इत्यस्यैव रूपं दीर्घादि इत्याहुः । उपदेयदानाच्च तस्य तथात्वम् ।

इष्वग्र न० ईत० । बाणाग्रे । गङ्गादिपाठात् भवार्थे छ । इष्वग्रीय तद्भवादौ त्रि० । [इष्वनीकीय तद्भवादौ त्रि० ।

इष्वनीक न० ईत० । बाणावयवे । गङ्गा० भवार्थे छ ।

इष्वसन पु० इष्वोऽस्त्यनेन अस-क्षेपे करणे ल्युट् ईत० । धनुषि । "रामभिष्वसनदर्शनोत्सुकम्" रघु० ।

इष्वास पु० इष्वोऽस्त्यनेन अस-क्षेपे करणे घञ् ईत० । १धनुषि "अत्र शूरा महेष्वासाभीमार्জ্জुनसमा युधि" "काश्यश्च परमेष्वासः शिखण्डी च महारथः" गीता । अर्शआदिपाठात् क्लीबत्वमपि । इषून् अस्यति अस-क्यप् उप० स० । २शरक्षेपके त्रि० (तीरन्दाज) मेदि० ।

इस् अव्य० इंकामम् स्यति सी-क्विप् नि० आलोपः । १सन्तापे २कोपे ३दुःखानुभवे च मल्लिः० ।

इह अव्य० इदम्+ह प्रत्ययेशः । अस्मिन् काले देशे दिशि वा १इत्यर्थे "एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन" श्रुतिः "इह जन्मनि जन्मान्तरे वा" वे० ना० । "नेह नानास्ति किञ्चन" "नेहाभिक्रमनाशोऽस्ति" गीता । "तदखिलमिह भूतं भूतनाथा जगत्याः" नैष० । प्रथमार्थेऽपि । २अनुभूयमाने लोके इहासुलाभ्यफलभोग विरागः वेदा० भा० च इहकालः । इह भवः विदितोवा कर्मा० ठञ् । ऐहिक इहभवे इहविदिते च त्रि० । "ऐहिकमप्रसूप्रमते दाक्षादिनिघेधात्" शु० त० रघु० । [वर्त्तमानकाले ।

इहकाल पु० इदम्+प्रथमार्थे ह इह कर्म० । एतत्काले वर्त्तमाने ।

इहतन त्रि० इहभव स्वञ् तट् च । इहभवे स्त्रियां ङीप् ।

इहत्य त्रि० इह भवः इह+त्यप् । इहकालादिजाते । स्वार्थे कन् । इहत्यक तत्रार्थे स्त्रियां नित्यमिच्छम् । इहत्यिका

इहद्वितीया स्त्री मय० स० । अत्यन्तद्वितीयायाम् ।

इहपञ्चमी स्त्री । मय० स० । अत्यन्तपञ्चम्याम् ।

इहल पु० इह भवं लाति ला-क । चेदिदेशे त्रिका० तद्वासिनि ब० व० ।

इहलोक पु० इदम्-प्रथमार्थे ह कर्म० । एतल्लोके अत्र-

भूयमाने लोके इहलोके भवः ठक् अनुप० द्विपदद्वि ऐहलौकिक तद्भवे त्रि० ।

दूहामुत्र अव्य० इह च अस्तं च इ० । एतस्मिंल्लोके परस्मिंल्लोके च "इहामुत्रार्थफलभोगविरागः" वेदा०सा० ।

इति वाचस्पत्ये ईकारादिवर्णशब्दार्थनिरूपणम् ।

ई

ई अव्य० इ क्विप् । १ विस्मये २ दुःखभावनायाम् ३क्रोधे ४अनुकम्पायाम् ५प्रश्ने ६सम्बोधने च । मेदि न्यासयं सान्ततया पठितः । पृषो०साधुः ।

ई स्त्री अस्य विष्णोः पत्नी ङीष् । लक्ष्म्याम् ।

ईक् कान्तौ (इच्छायाम्) गतौ व्याप्तौ क्षेपे भोजने सक० गर्भग्रहणे अक० अदादि अनिट् पर० । एति ईतः इयन्ति । ऐत् । ऐषीत् । इयाय इयतुः । एता एष्यति ऐष्यत् । "ईतः । अस्यात्मनेपदित्वमपि "न हि तरन्ति दुष्टीते" दिक्परार्धोनहस्तिः" कविक० टी०दुर्गा० ।

ईङ् याचने द्विक० आत्मने० अदादि अनिट् निक० । ईते इयीत ईताम् । ऐत । ऐष्ट । इक्षे । "आ वोऽदेवास ईमहे वामं प्रत्नधरे" यजु० ४,५ । "अजस्रं घर्ममीमहे" यजु० २६,३ ।

ईङ् गतौ दिवा०सक० अनिट् आत्म० । ईयते ऐष्ट । ईतः "पद्मैरन्वीतवधूमुखद्युतः" माघः । ईङ्—गतौ भ्वि० ।

ईक्ष दर्शने पर्य्यालोचने च भ्वा० आत्म० सक० सेट् । ईक्षते ईक्षेत ईक्षताम् ऐक्षत ऐक्षिष्ट ईक्षिषीष्ट ईक्षिषीष्ट ऐक्षिष्यत । ईक्षितव्यः ईक्षणीयः ईक्ष्यः ईक्षिता ईक्षितः ईक्षित्वा वीक्ष्य । ईक्षणम् ईक्षा । ईक्षमाणः । कर्म्मणि ईक्ष्यते ईक्ष्यमाणः । धात्वादेर्षः इत्यतिः ईक्षिः । "न धर्मदुष्टेषु वयः समीक्षते" न कामवृत्तिर्वचनीयमीक्षते" कुमा० । "तदैक्षत वसु स्यां प्रजायेय" श्रुतिः । "स प्रजापतिरीक्षां चक्रे" श्रुतिः "सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । ईक्षते योगयुक्तात्मा" गीता । "कथमीक्षामहे मर्म, दुर्योधन । तवेक्षितम्" भा०उ०२६८श्लो० । "ईक्षिष्ट पुंभिः प्रचिन्वान स गोभान्" भट्टिः वेदे पदव्याख्यायोऽपि "ऋषिर्दीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" कठो० । दृष्टेनशुक्लाशुभालोचने च तद्योगे शुभाशुभसंबन्धिनि चतुर्थी । "राधीक्ष्योर्यस्य विप्रश्न" पा० । "यदीयः विविधः प्रश्नः क्रियते तस्मिन् चतुर्थीस्यः । "क्षणाय ईक्षते गर्गः पृष्टो गर्गः शुभाशुभं पर्य्यालोचयतीत्यर्थः" सि०कौ० । "ईक्षतेर्नाशब्दम्" या०सू० । "कारके ईक्षितृत्वव्यवहात्" भा० ।

अधि+विवेचने अधीक्षते "कृष्णकर्कितलोलोकः सत्येऽप्यघाय मधीक्षते" क्षितौ० ।

अनु+अनुचिन्तने । "तामन्वीक्षत दृश्यं वै वस्त्रोकवमेयम्" शत०ब्रा० ६,३,३,५ । "अन्वीक्षमाणोरामस्तु विषण्णं भ्रान्तचेतनम्" रामा० ।

अप–आकाङ्क्षायामनुरोधे अवधिनियमे च । "अपेक्षते प्रत्ययसूत्रमेतम्" कुमा० "अपेक्षन्ते न च क्षेत्रं न पात्रं न दशान्तरम् । परोपकारनिरतामणिटीपा इवोत्तमाः" उद्भटः । "किमपेक्ष्य फलम् पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः" किरा० । "हित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजामताः" "अपेक्षावुद्धिनाशात्तेषां नाशः प्रकीर्तितः" भाषा० "शब्दोव्यङ्कत्वेऽर्थान्तरमपेक्षते" सा०द० । "सापेक्षत्वेऽपि गमकत्वात् समासः" पा०भा० "सा प्रक्रिया या कर्थमित्यपेक्षा" मीमा० । 'नदीयः परिपूर्णोऽपि मित्रोदयमपेक्षते" चन्द्रा० ।

वि+अप+विप्रेषेणापेक्षायाम् । "न व्यपैक्षत सस्तुल्यकाः प्रजाः" रघु० । "व्यपेक्षमाणौ सक्षीतयागतौ" रामा० "सभर्तृः पदविधि" पा०भा० व्यपेक्षाऽव्यपेक्षापक्षहृदयसमन्वयस्तम् । तत्र व्यपेक्षापक्षोमतान्तरेण उपन्यस्तः स च युक्तिविरुद्धत्वात् कैयटविरस्काटौ दूषितः "वाक्यवत् सा व्यपेक्षाऽपि इत्यादिना न क्रीयते" भर्तृ० । सा च शब्दबोधिपयोगिन्याकाङ्क्षारूपा आकाङ्क्षाशब्दे विवृतिः ।

अव+ चाक्षुषदर्शने । "योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः" गीता । "अवेक्षमाणोमकर्तो सुकुमंकुः" माघ. सम्यक्पर्य्यालोचने च । "यदवोचदवेक्ष्य सुन्दरी" किरा० ।

अनु+ अव+पर्य्यालोचने अनुसन्धाने च "सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः" मनुः ।

अभि+अव+भोजनार्थेक्षणे । "यजमानस्य पशूनभ्यवेक्षते" शत० ब्रा० १,१,१,५, २,"अभ्यवेक्षते अभ्यवहर्तुं पश्यति" भा० ।

परि+अव+सर्वतोदर्शने । "ततो वाचस्पतिर्जज्ञे तं मनः पर्य्यवेक्षते भा० अश्व०२१अ० ।

प्रति+अव+ प्रतीत्य पर्य्यालोचनया दर्शने । "अथैनं प्रत्यवेक्ष्य ब्राह्मणो जपति" शत०ब्रा० ५,२,४,२० ।

सम्+अव+सम्यग्दर्शने । "रूपोपमोऽयं समवेक्षते समाम्" भा०वि०२।८श्लो०। "यदि दृष्टं बलं वर्ष्म वयश्च समवेक्षिताः" भा०आ०२५।अ० । सम्यक्पर्य्यालोचने च "सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा" मनुः ।

आ+सम्यग्दर्शने । "सर्वत्रैवेक्ष्य पाञ्चालीम्" भा०स०२२८०१

उद्+अर्द्धदर्शने । "सहस्ररश्मिना साक्षात् सप्रणामसमुद्वीक्षिताः" कुमा० । अपेक्षायाञ्च "त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती" मनुः ।

उप+क्षेयत्वज्ञानेन परित्यागे "उपेक्षया स्वयंकृतानि.' दाय भा०टी० "ये मां यियक्षतां क्षुद्रैरुपेक्षध्वं विशोकवत्" भा० व०११अ० प्रतिक्रियाभावे "उपेक्षते यः क्षयवह्निनीटाः" कुमा० "नोपेक्षेत क्षणमपि राजा साङ्कसिकं नरम्" मनुः अपर्य्यालोचने असम्बन्धाभावे च "गूढेन चरता तत्त्वमुपेक्षितमिदं मया" रामा० ।

सम+उप+सम्यगपेक्षायाम् । "यत्पुण्यं समाधातुं सोमोऽप्यात् सप्तपेक्षते" भा०व०१०६० श्लो०।

निस्+निर्+निःशेषेण दर्शने निश्चयार्थे दर्शने च । "यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान्" गीता ।

परि+तत्त्वानुसन्धाने प्रमाणाद्युपन्यासेन वस्तुतत्त्वावधारणे च "परीक्ष्य लोकान् कर्म्मचितान्" श्रुतिः। न्यायसूत्रभाष्यादौ प्रमाणप्रमेयादि परीक्षा बहुशो दर्शिता । सम्यक्विवेचने च । "मैत्रं रूपं परीक्षन्ते मासां वपसि संस्थितिः। सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते" मनुः । लक्षणादिसम्बन्धेन ज्ञाने च अस्यविद्याविदश्चैव सूता विप्राश्च तद्विदः। मेध्यमश्वं परीक्षन्तां तव यज्ञार्थसिद्धये" भा०आश्व०१० २७ श्लो०। "यस्मात् परीक्षितः पुत्रो" या०स्मृ० । "सर्व्वत्र हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः" हितो०भक्षिमक्षणादिना ज्ञाने च । "मायां मयोद्भाव्य परीक्षितोऽसि" रघुः । विवादे सत्यत्वासत्यत्वादिसंशयनिरासाय स्वपक्षप्रामाण्यव्यवस्थापनाय यत्नकरणे तुलापरीक्षादि । परीक्षाशब्दे विस्तरः ।

प्र+प्रकर्षेण दर्शने "प्रेक्षन्ते सर्व्वभूतानि बकुलः पर्व्वसन्धिषु" भा०व०११६५७ । "यत् किञ्चिद्दूषयत्यग्निः सर्व्वमौ प्रेक्षते धनी" भा०व०मनुः। "उदायुधानायततस्थान् तमान् प्रेक्ष्य राघवः" रघुः । "पुनः प्रेक्ष्य च शूलिनम्" कुमा०।

अभि+प्र+आभिमुख्येन दर्शने । "प्राचीं दिशमभिप्रेक्ष्य भगवानृषिरब्रवीत्" भा० व०१६३अ० । "दह्यमानमभिप्रेक्ष्य स्त्रियश्चाः संप्रदद्रुवुः" भा०व०८८अ० ।

उत्+प्र+उत्प्रेक्षायां । कल्पितधर्म्मसाधर्म्येणान्यस्यान्यरूपतासम्पादने उद्भावने च । "उत्प्रेक्षामोऽयं तावन्मतिमन्विभीषणम्" रामा० । "तदुत्प्रेक्षोत्प्रेक्षा प्रियसखि गतांस्तांश्च दिवसान्" अमरुश० । "भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना" सा०द० । "अलङ्कारशब्दे २६५पृष्ठे विस्तरः।

सम्+प्र+सम्यग्दर्शने । "संप्रेक्ष्य नासिकाग्रं स्वं" गीता "योगक्षेमं च संप्रेक्ष्य वणिजोदापयेत् करम्" मनुः ।

अभि+सम्+प्र+आभिमुख्येन सम्यग्दर्शने । "अभिसंप्रेक्ष्य भर्त्तारं कृष्णा वचनमब्रवीत्" भा० आदि० प०२११ ।

प्रति+अनुरोधे अपेक्षायां पूजने च । "प्रतीक्ष्य तत् प्रतीक्ष्यार्थं पितरस्ते प्रतिस्थितम्" माघः "प्रथमं संस्थिता भार्य्या पतिं प्रेत्य प्रतीक्षते" भा०आ० २०२१ । नाभिनन्देत मरणं नाभिनन्देत जीवितम् । कालमेव प्रतीक्षेत" मनुः । "संवत्सरं प्रतीक्षेत दिष्टन्तो योषितं पतिः" मनुः ।

सम्+प्रति+सम्यक्प्रतीक्षायाम् "सकृत्सं संप्रतीक्षस्व" भा० आ० २६०२ । "एकत्वेनाधुना हि त्वां नगरी संप्रतीक्षते" रामा० ।

वि+विशेषेण दर्शने । "वीक्षन्ते त्वां विचित्रासुरैव सर्वे" गीता । "सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्य्ययम्" मनुः । "जङ्घालस्त्रस्तबल्कवीक्षणेन" रघुः ।

अनु+वि+सन्ततवीक्षणे पश्चाद्वीक्षणे च । "तस्माद्दिशोऽनुवीक्षमाणोऽजपति" शत०ब्रा० ५,२,१,२५ ।

अभि+वि+आभिमुख्येन वीक्षणे । "नयनं भुवि यत्नेन कश्चिदभिवीक्षितम्" मनुः ।

उद्+वि+ऊर्द्ध्ववीक्षणे । "उद्वीक्षमाणा भर्त्तारं सस्नेह परिगुप्यता" रामा० "पतिव्रतामिमां साध्वीं त्वयोद्वीक्षितमप्युत" भा० अनु० २अ० "उद्वीक्षितं स्फटिकभित्तिरतानुगाभिः" रघुः ।

सम्+उद्+वि+समन्तादूर्द्ध्वेक्षणे "निपेदुर्भूमिपाः सर्वे सस्नेहमुद्वीक्ष्य परस्परम्" रामा० ।

प्रति+वि+प्रतिदर्शने यत्कर्त्तृकं स्वदर्शनं तस्य स्वेन दर्शने । "ततः सराजा प्रतिवीक्ष्य ताः स्त्रियः" रामा० ।

सम्+वि+सम्यग्वीक्षणे ।

सम्+सम्यग्दर्शने पर्य्यालोच्य दर्शने । "पुरस्तादेव प्रतीचे समीक्षमाणायानुयायुः" शत०ब्रा० ११,५,४,१७ । "समीक्ष्य वसुधां चरेत्" मनुः । "अथ हस्तसमुत्क्षेपं भीकरेण स नागराट् । समैक्षत गुडाकेशम्" भा० आश्व०२२२१श्लो०। "तान् समीक्ष्य स कौन्तेयः सर्व्वान् बन्धूनवस्थितान्' गीता "अचिन्तयैवंसमीक्ष्यकमतान्मा-

दिश:" हितो० "समीक्ष्य कुलधर्म्माय स्वधर्म्मं प्रतिपादयेत्" मनुः ।

प्र+सम्+प्रकर्षेण सम्यगीक्षणे । "सह सर्व्वाः समुत्पन्नाः प्रसमीक्ष्यापदोऽभयम्" मनुः "कलं ख्यातिञ्च दत्तं च भुङ्क्ते तु प्रसमीक्ष्य च" भा० आ० ४२७४ श्लो० ।

ईक्षण न० ईक्ष-भावे ल्युट् । १ दर्शने । करणे ल्युट् । २ नेत्रे । तत्र दर्शने "खिन्नः कार्य्येक्षणे नृणाम्" मनुः नेत्रे । 'व्यभिसृखे मयि संहृतमीक्षणम्' शकु० "सदा संरक्षणयनो सदा चानिमेक्षणो" भा० आ० ३२ अ० । "इत्यद्रिणोभा प्रहितेक्षणेन" रघुः ।

ईक्षणिक त्रि० ईक्षणं दक्षरेखादीक्षणेन शुभाशुभदर्शनं शिल्पमस्य ठन् । शुभाशुभफलकथनोपजीविनि सामुद्रिके । स्त्रियां टाप् । "मङ्गलादेशदक्षाश्च भवन्त्येक्षणिकैः सह" मनुः"

ईक्षति पु० ईक्ष-धात्वर्थनिर्देशे क्तिप् । ईक्षणे । "ईक्षतेर्नाशब्दम्" शा० सू० ।

ईक्षा स्त्री ईक्ष-भावे अ टाप् । ईक्षणे दर्शने २पर्य्यालोचने च "स ईक्षां चक्रे" श्रुतिः, "अथणाटनु ईक्षा अन्योन्या" । न्यायसू० वृत्तिः । आन्वीक्षिकीशब्दे विवृतिः ।

ईक्षेण्य त्रि० ईक्ष-बा० एण्य । ईक्षणीये दृश्ये "ईक्षेण्यासोऽहोऽन." ऋ०६,७७,३ । "ईक्षेण्यासः ईक्षणीयाः" भा० ।

ईक्ष गतौ इदित् भ्वा० पर० सक० सेट् । ईक्षति ऐक्षीत् । ईक्षाम् बभूव आस चकार । ईक्षिता ईक्षिष्यति ऐक्षिष्यत् । ईक्षितः "सन्नाशसमितः यक्षः प्रेक्षश्च क्षुभिता क्षितिः" भट्टि "भुज्युं समुद्र आ रजसः पार ईक्षितम्" १०,१४३,५ । णिचि ईक्षयति । "य ईक्षयन्ति पर्वतास्तिरः समुद्रमर्णवम्" ऋ०१,१६,७ । "ईक्षयन्नोरपस्युव इन्द्रं जातसुषामणे" ऋ० १०,१५३,१ । "ईक्षयन् परिजना मविद्रया रघुः ।

ईग गतौ इदित् दुगिवत् । ईक्षति ऐक्षीत् ईक्षते इत्येके ।

ईज गतौ निन्दायाञ्च भ्वा० आत्म० सक० सेट् । ईजते ईजत ऐजिष्ट ईजाम्-बभूव आस चक्रे । ईजिता ईजिष्यते ऐजिष्यत ।

ईज गतौ निन्दने च इदित् भ्वा० आत्म० सक० सेट् । ईक्षते ऐक्षिष्ट । ईक्षाम्-बभूव आस चक्रे । ईक्षितम् । अथम् अपाणिनीयः कविकल्पद्रुमे तु पठितः ।

ईजान त्रि० यज-ताच्छील्ये कानच् द्वित्वम् । यजमाने यागशीले । "ततोमरुद्भिः क्रतुभिरीजानो भरतस्तदा" भा० आ० ९४ अ० । "यः सेतुरीजानानामक्षरं ब्रह्म यत् परम्" कठो० ।

ईड स्तुतौ अदा० आत्म० सक० सेट् । ईडे ईडिषे ईडिध्वे ऐडिष्ट ईडाम्-बभूव आस चक्रे । ईडिता ईडिष्यते ऐडिष्यत । ईड्यः ईडितः ईडनम् ईडा । "अग्निमीडे पुरोहितम्" ऋ० १,१,१ । डकारं लकारतया बह्वृचाः पठन्ति । "अजमध्यस्थडकारञ्च लकारं बह्वृचा जगुः । अजमध्यस्थडकारञ्च ळकारं तु यथाक्रममिति" ऋ०भा० वाक्योक्तेः । वङ्गदेशसम्प्रदायस्तु तयोः अजमध्यस्थयोः ळडकारतया पाठः इति भेदः । याज्ञिकास्तु "ईडिरध्येषणकर्म्मा पूजाकर्म्मा चेत्याह 'गन्धर्वाः सुरसङ्घास्च बहवश्च महर्षयः । अन्तरीक्षं गतं देवं गोभिरभ्राभिरीडिरे" रामा० "नेडिषे यदि काकुत्स्थम्" भट्टिः "ईड्यानो देवा इडानाम्" ऋ० १०,६६,१४ । "भवन्तमीड्यं भवतः पितेव" । "प्राचीनतामग्रजदीड्यमानः" इति च रघुः । "अग्निः पञ्चभिर्ऋषिभिरीड्योनूतनैरुत" ऋ० १,१,२ । णिचि ईडयति ते ऐडिडत् त ।

ईडा स्त्री ईड-भावे अ स्त्रीत्वात् टाप् । स्तुतौ ।

ईडित त्रि० ईड-क्त । स्तुते यस्य स्तवः कृतस्तस्मिन् ।

ईड्य त्रि० ईड-बा० एण्य । १स्तवनीये २पूजनीये च । "ईड्यो नमस्क्रियस्तासां दर्शतः" ऋ० १,१४९,७ ।

ईशमत् त्रि० ईश् अस्यस्य मतुप् स्त्रियां ङीप् । सम्बन्धे ईश्वरवति । ईशन्तमाचष्टे क्विप् मतोर्लुक् । ईशयति ।

ईति पु० ईयते ई-क्तिच् । १डिम्बे, २उत्पातादिते त्रि० ३प्रवासे, "अतिवृष्टिरनावृष्टिः शलभाः मूषिकाः खगाः । प्रत्यासन्नाश्च राजानः षडेतेऽईत्यः स्मृता" इत्युक्ते ४क्लेशरूपद्रवभेदे च स्त्री । "निरीतिभावं गमितेऽतिहृद्यः" नैष० "निरातङ्कानिरीतयः" रघुः "ईतयोव्याधयस्तस्मादीर्णाः क्रोधादयस्तथा । उपद्रवाश्च वर्त्तन्ते आधवः चुक्षयं तथा" भा० व० १४६ अ० ।

ईदृक्ष त्रि० अयमिव पश्यति इदम्+दृश-कर्म्मकर्त्तरि क्स इदादेशः दीर्घः । ईदृशे एतद्रूपदर्शने एवंविधे । "ईदृक्षास एताद्दक्षास उ षु णः सदृक्षासः" वाजसने० १७,८ ।

ईदृश् त्रि० अयमिव पश्यति इदम्+दृश-कर्म्मकर्त्तरि-क्विन् इदादेशः दीर्घः । एतादृगदर्शनवति एवंविधे "ईदङ् नाम्नादङ् च सदृङ् च प्रति सदृङ्" यजु० १७,८१ । "इमं पुरोडाशं गृहीत्वा पश्यतीति ईदङ् नेददी० व्याख्यानात् २तदर्थेऽपि । तस्य भावः त्व ईदृक्त्वं तद्भावे न० तल् । ईदृक्ता तस्य भावे स्त्री । "विष्णोरिवाख्यानवचारधीयमीदृक्तया रूपमिवत्तया वा" रघुः ।

ईदृश्य त्रि०अयमिव पश्यति दृश्+क्यच्-कर्मकर्तरि कञ् इयादेश० दीर्घः । एवंविधदर्शनवति । "ईदृश्येश्वरतेजाने सत्यं दोषाकरो भवान्" चन्द्रा० । "यच्चान्यत् किञ्चिदीदृश्यम्" । "न हीदृश्यमनायुष्यं लोके किञ्चन विद्यते" प्रत्येक चेदमा विप्रागर्ह्यान्ने ब्रह्मवादिभिः" मनुः । "तानीन्द्रदान ईदृशे" ऋ० १,१७,१ । "ईदृशे एवं विधे" भा० । स्त्रियां ङीप् "सर्व्वेषामीदृशो रसाभिव्यक्तिः" सा० द० । मुग्धबोधकारस्तु अयमिव दृश्यते इति विग्रहे कृसृदृशां चकार तच्च "कर्त्तरि कृदिति" पा० अनुशासनविरोधादुपेक्ष्यम् ।

ईप्सा स्त्री आप्तुमिच्छा आप-सन्-अ । १आप्तुमिच्छायाम् २दृच्छायाञ्च । "ईप्सेप्सा पितुर्मुखं शुश्रूषमाणं परिपालनम्" । भा० आश्व० ३७अ० ।

ईप्सित त्रि०आप-सन् क्त । १आप्तुमिष्टे क्रियाफलेन व्याप्तुमिष्टे "कर्त्तुरीप्सिततमं कर्म्म" पा० । "निर्वर्त्त्यञ्च विकार्य्यं च प्राप्यञ्चेति त्रिधा मतम् । तत्रेप्सिततमं कर्म्म चतुर्द्धान्यत्तु कल्पितम्" भर्त्तृ० "तमबभ्यर्हणं किमीप्सितमात्रे मा भूत" सि०कौ० । २दृच्छाविषये च ।

ईप्सु त्रि० आप्तुमिच्छुः । आप-सन्—उ । आप्तुमिच्छौ । "मन्दःकवियशःप्रेप्सुरिति" रघुः पाठान्तरं "यौवेच्छुः सर्व्वटाचामेत्" मनुः । "धर्म्मेप्सवस्तु धर्म्मज्ञाः" मनुः । "सौरभ्यलोभ्रुरिव तेसुखमास्तस्य" रघुः ।

ईम् अव्य० ई-वा क्विप् । १अथशब्दार्थे । "एमेनमग्ने मधुमन्तमूर्जया" यजु० ३३,६० । "आ ईम् शतो निपातौ अथार्थौ" वेदटी० २इदमर्थे च । "चयत ईमर्य्यो अप्रयुछन्" ऋ० १,६६७,८ । "इन्द्र ब्रवीत य ईमघ्न वेदस्य" ऋ० १,१६४,७ । "सोमेभिरीं पृणता भोजमिन्द्रम्" ऋ० २,१४,१० । "ईमिमम्" इति भा० ।

ईय त्रि० ई-वा० क्यप् । व्याप्ये । "आयद्वा ईयवसा" ऋ०५,६७,६ "ईयवसा व्याप्यदर्भनौ" भा० ।

ईयिवस् त्रि० इण्-क्वसु । "गतवति । क ईयिवान् सदम्" सायणो० "प्रतोयुषा पूर्वदृशे जनेन" भट्टिः । "उपेयुषो नोऽपयं मनस्विनः" माघः । "उपेयिवानित्यादि" पा० सू० उपेत्यु लक्षणात् अन्यत्रापि कसुः ।

ईर गतौ प्रेरणे च चुरा० उभ० पक्षे भ्वा० पर०सक०सेट् । ईरयति ते-ईरति ईरित्-त-ईरीत् । ईरयाम्-ईराम् वा बभूव आस चकार । ईरयिता ।ईरिता ईरयिष्यति-ईरिष्यति । ईरयन् । ईरितः ईरवन्-ईरन् । ईरः ईर्य्यमाणः । "आपः ससृक्मैरयन्" ऋ०८,६,१२। "अंशोर्न्नर्म्मिमीरय" ऋ०६,७६,१४ । "यदस्य शुष्ममैरयन्" ऋ०२,१७,२ "ऐरिरञ्च मक्षाक्रमम्" भट्टिः कथने च । "अथ वाचमीरयति" शत०ब्रा० "ब्रह्मा रथन्तरं साम ईरयति भगालिके भा० आश्व० १४अ० । विरोधवाक्यञ्च यथेर्य्यमाणम्" भा०व० १२२ अ० । "दमयन्त्या यथेरितम्' भा०व०२७४२। "हितं नरस्तृणन्ति सुकृद्भिरीरितम्" रामा० "इतीरिता पत्तरथेन तेन" इतीरयित्वा विरचय्य वाङ्मयम्" नैष० ।

उद् उत्क्षेपणे । "उदीरयामासुःसखीसमक्षात्" रघुः । उच्चारणे कथने च "यदग्नीकोऽप्यसुदीरियति" रघुः । "उदीरयामासुरिवोन्मदानाम्" रघुः ।

अभि+उद्+आभिमुख्येनोच्चारिते । "आस्तीकस्त्विहक्षित्रेति वाचस्तिस्रोऽभ्युदैरयन्" भा० आ० २।७१ ।

सम्+उद्+सम्यगुच्चारे सकृत्कीर्त्तिते च । वायवोऽपि कृजन्क्षेत्रे वायुना सकृदीरिताः" भा०व० ५०३० ।

प्र+प्रेरणे । प्रेरयति ।"समीरयः प्रेरयिता भवेति" कुमा० । "अपः प्रेरयसागरस्य बुध्नात्" ऋ०१०'८६,४।"किन्तिह्यि काग्रपेन मत्सकाग्रकृतयः प्रेरिताः स्यु:" यजु० "यातायै प्रेरयामास तं यज्ञेः प्रथमं सरत्" रघुः ।

सम्+ सम्यक्प्रेरणे सकृत्कारणे सम्यग्गतौ च "समीरयः । "समीरयाञ्चकारार्थ रात्रसस्य कपिः शिखाम्" भट्टिः । "ताभिराभरणैः शब्दक्षमाभिः समीरितः" भा० व० १२१८अ० ।

ईर अदा०आत्म०सक०सेट् । ईर्त्तेईराते ईरते ऐरत ऐरिष्ट ईराम् बभूव आस-चक्रे ईरिष्यति"इन्द्रा सधुमन्त ईरते" ऋ० ५,६३,१४ "दधदीर्त्ते मयो गोः" ऋ०६, ६१३ । "अग्ने राजाव ईरताम्" ऋ० ४,८,७ । वायुप्रच्युताटिवोऽटिरीर्त्ते" तैत्ति० । अकात् निशाया नेट् ।"न हि राज्ञामुदीर्ष्णानाम्" भा०आ० ५।३८ श्लो० । "उदीर्ण रागप्रतिरोधकम् सङ्गः" माघः । अस्यैव पक्षे चुरादित्वं तेन न तस्य आदित्वनियोगे ।

ईरण न०ईर-भावे ल्युट् । १प्रेरणे २गतौ च । वुच् । ईरणा तत्रैव स्त्री । नञ्या०ल्यु । ३प्रेरके त्रि०"समीरणः प्रेरयिता भवेति"कुमा० ।

ईरामा स्त्री ईर्यतेऽत्र रथ-आधारे घञ् ईत्व० । नदीभेदे । "ईरामाञ्च महानदीम्" भा०व० १८८अ० ।

ईरिण त्रि० ईर-इनन् । ऊषरभूमौ । मेदि० "ततस्तदीरिणं

जातं मसृष्टमस्मर्षिकम्" भा०अनु० ७२५७श्लो० । "वयिरस्यात्रमपदं शून्यमासीन्महात्मनः । मरुत्तेनैव निःशब्दमासीद्यज्ञसदिभम्" रामा० ।

ईरिन् त्रि०ईर-णिनि । १प्रेरके २गन्तरि च स्त्रियां ङीप् । खगच्छादस्य छर्डिरेका० खेरी खेरिणी । "रे रे खेरिणि ! निर्व्यापारकविते मामकत् प्रकाशीभव" चन्द्रा०२राजभेदे पु० । "धृतराष्ट्रार्द्धकायतमर्गातर्जनमेजयाः । यतश्च मन्मुदत्सानामीरिष्यास्तु यतं तथा" भा०स०८१०श्लो०यमसभासदर्थने

ईर्ष्य ईर्ष्यायां परश्रद्रुहिष्णुतायाम् भ्वा० पर० सक० सेट् । ईर्ष्यति ऐर्ष्यीत् । ईर्ष्याम् बभूव आस चकार । ईर्ष्यिता ईर्ष्यात् ईर्ष्यिष्यति ऐर्ष्यिष्यत् । ईर्ष्या ।

ईर्ष्सा स्त्री ऋध-सन्-अ । वर्द्धनेच्छायाम् ।

ईर्ष्सु त्रि० ऋध-सन्-उ । वर्द्धनेच्छौ ।

ईर्ष्मि न० ईर-मक् । श्रमे । लुखादिरयमिति बहवः । ईर्ष्मो लुखः । अस्य पुंस्त्वमपि । "तदाहुरीर्ष्म इव वा एषां होता यदच्छावाक्या" ता०ब्रा० ४,२,१० । "ईर्म इव वा एषा होत्राणां यदच्छावाकः" "ईर्म इव तृष्टवानाः" इति गाथा० "तस्य प्राची दिक् शिरोऽसौ चासौ चेर्माबधास्य प्रतीची दिक् पुच्छम्" शत०ब्रा० १०,६,५०,२। तेन "ब्रणोऽस्थियामीर्मसदः इत्यमरे ऽस्थियामिति संदंशपाठादुभयलान्वेतीति बोध्यम् । दन्त्यशब्दात् लुप्ययोगेन कृतत्रत्यार्थे अकान् अनिच् दन्तिरेमा आधेन कृतत्रणे लगे । "मृगयुमिव मृगोऽथ दन्तिरेमा" भट्टिः । २प्रेरिते त्रि० "ईर्माल्लासः सिलिकमध्यमानः" ऋ० १,२०३,१० । ईर्माल्लासः ईर्माईरिताः प्रेरिता अल्लायेषां ते" भा० ।

ईर्या स्त्री ईर-ईर्यायां कण्ड्वा० यक् रोपधत्वात् दीर्घाभावे अ स्त्रीत्वात् टाप् । १ईर्यायाम् । ईर्यते ज्ञायते परात्माऽनया ईर-गतौ यत् । २भिक्षुचर्य्यायां सा च ध्यानमौनादिरूपा । "चर्य्या चेर्य्यापथे स्थितिः" अमरः । "कल्याणी पुनरियं प्रव्रजितस्यैर्या" ।

ईर्य्यापथ पु०ईर्य्यारूपः पन्था कर्म्म०अच् समा० । ध्यानमौनादिरूपे परिव्राजकस्य ज्ञानसाधनोपायभेदे ।

ईर्वारु पुंस्त्री० ईर-भावे सम्प० किप् ईरमीरणं दधोति धारयति वा उण् । कर्कट्याम् शब्दर० ।

ईर्ष्य परगुणासहने भ्वा०पर०अक० सेट् । ईर्ष्यति ऐर्ष्यीत् । ईर्ष्याम्-बभूव आस चकार । ईर्ष्यिता ईर्ष्यिष्यति ऐर्ष्यिष्यत् । णिचि ईर्ष्ययति ते त ऐर्ष्ययत् ऐर्ष्यिषत् त । सनि ईर्ष्यिषयिषति । ईर्ष्या ईर्ष्यितः "पल्वर्वाङ्कमीर्ष्यितं प्रसवनं नाथस्य हेतः स्त्रियाः" हितो । ईर्ष्यितव्यम् । "तस्माद्भिक्षुषु दाराणां क्रमशेषु नेर्ष्यितव्यमिति" प्रबो० ।

ईर्ष्यक त्रि० ईर्ष्य-ण्वुल् । १ईर्ष्याकारिणि । "इहा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते । ईर्ष्यकः स तु विज्ञेयः" इति सुश्रुतोक्ते २क्लीवभेदे पु० । "आसेक्यश्च सुगन्धी च कुम्भीकर्ष्यकलक्षणा । सरेतस्कत्वमी स्त्रीया अशुक्राः षण्ढसंज्ञिताः" सुश्रु० । क्लीवत्वे विहृतिः ।

ईर्ष्या स्त्री ईर्ष्य-भावे अ स्त्रीत्वात् टाप् । अन्यमायाम् परश्रद्रुसहिष्णुतायाम् । "ईर्ष्यन्ति साहसं द्रोह ईर्ष्यास्त्रयार्थदूषणम् । वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः" मनुः एतेषाञ्च क्रोधप्रभवत्वात् क्रोधजत्वम् अतएव "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" पा० "द्रोहादयोऽपि कोपप्रभवा एव मन्यन्तेऽतो विशेषणं सामान्येन यं प्रतिकोपः" सि०कौ० । "ईर्ष्याशोकक्लमाभेता द्रोहमात्सर्य्यवर्जिताः" भा० व० २६० "त्यक्तेर्ष्यं त्यक्तमन्युञ्च अयमानोऽब्रवीदिदम्" भा० अनु० २अ० । अयं मन्योर्निर्यकार इति केचित् "ईर्ष्यतेस्तृतीयस्थेति" वार्त्ति० उक्तेः कविकल्पद्रुमे, पा० गणपाठे च यान्तत्वपाठात् निर्यकारपाठे मूलं चिन्त्यम् । तेन सकारस्य साधीयान् ।

ईर्ष्यालु त्रि० ईर्ष्या लाति ला-बा० डु । ईर्ष्यायुक्ते ।

ईर्ष्यु त्रि० ईर्ष्य-उण् । अन्यमायाशीले "ईर्ष्युर्गन्धर्वराजो वै जलक्रीडासुपागतः" भा० आ० १७० अ० । "पर्य्यधावत तामीर्ष्युः सुन्दोपगतमानसाम्" भा०२७६ अ० ।

ईला स्त्री ईड-क डस्य ल । १पृथिव्यां, २वाचि, ३गवि च । अस्य लुखादित्यमेवेति बहवोमन्यन्ते मद्धार्थचिन्तामण्यौ तु दीर्घपाठः । तन्मूलं चिन्त्यम् ।

ईलि(ली) स्त्री ईर्यते ईर-इन् रस्य लः वा ङीप् । १करपालिकायाम् (काठारी)२लुखगदाकारे कुलदण्डे च । भरतः ।

ईलित त्रि० ईड-क्त डस्य लः । स्तुते अमरः ।

ईलिन पु० ईड-इनन् डस्य लः । चन्द्रवंश्ये नृपभेदे । "ईलिनं तु सुतं तंसुर्जनयामास वीर्य्यवान्" "ईलिनोजनयामास दुष्मन्तप्रथमान् नृपान्" भा० आ० ९३अ० । "तंसुं खरस्वती सुतं मतिनारादजीजनत् । ईलिनं जनयामास कालिङ्ग्यां तंसुरात्मजम्" । "ईलिनस्तु रथन्त्र्यां दुष्मन्ताद्यान् पञ्चसुतानजीजनत्" भा० आ०९५अ० ।

ईवत् त्रि० ई-गतौ भावे क्विप् अस्यर्थे मतुप् वेदे नि० मस्य वः गतिमति "य ईवते ब्रह्मणे गातुमैरत" ऋ०

४,४,६ । "अस्य वामेर ईवतोऽग्नेरीशीत मर्त्यः" ऋ० ४,१५,५ "मन्नू हिमा गच्छथ ईवतो द्यून्" ऋ०४,४१,२ "प्राय वसुभ्य ईवदानमोवः" ऋ०५,४६,५ "जनाय चिद्य ईवत उ लोकं चकार" ऋ० ६,६३,२ । "उपस्तोतास ईवतोवचांसि" ऋ० ७,२२,१ । लोके तु ईमानिलेव स्त्रियां ङीप् ।

ईश ऐश्वर्ये अदा० आत्म० सक० सेट् । ईष्टे, ईशिषे ईशिध्वे ईशिट् । ईशाम्-बभूव आस चक्रे । ईशिता ईशिषोष्ट ईशिष्यते ईशिष्यत । ईशनम् ईशिता । ईशितः । ईशा । ईशित्वा । "धनानामीशते यस्मात्" । "यदीशिषे त्वं न मयि स्थिते च" भट्टिः । "पुरुषोवै पशूनामैन्द्रस्तस्मात् पशूनामीष्टे" शत० ब्रा० ४,५,५,७ । एतद्योगे कर्मणः सम्बन्धत्वविवक्षायां षष्ठी । वेदे तु क्वचित् णिचि न आत्म । "सकृत्स एषां पितरश्च नेमिरे" ऋ० १०,५६,७ । ताच्छील्ये चानश् ईशानः ।

ईश् त्रि० ईश-क्विप् । ईश्वरे "ईशावास्यमिदं सर्वम्" यजु० ४०,१, "नमो देवेभ्यो नम ईश एषां कृतं चिदेनोमनमा विवासे" ऋ० ६,४१,८ । "स देवानामीशां पर्य्येत स ईशानोऽभवत्" अथ० १५,१,५ । "सह एवैषामारण्यानां पशूनामवरुन्धे" शत० ब्रा० १२,७,२,८ ।

ईश ए० ईश-क । १ईश्वरे "वागीशं वाग्भिरर्थ्याभिः प्रपित्वोपतस्थिरे" कुमा० "वागीशाद्याः सुनयनसः सर्व्वार्थानामुपक्रमे" माघः "इत्थं स्त्रीतीयेन वक्ष्यमाणेन" रघुः १०रुद्रभेदेश्वरे पु० । "लोकेश ! चैतन्यमयादिदेव !" प्रातः कृत्ये पुरा० । "ईशश्चैव निवेशितः षट्युगे भक्तायमाणं अमत्" न्यायचर्चेयमीशस्य मनव्यपदेशभाक्" कुसुमा० । २महादेवे । "ब्रह्माच्युतेशार्कसुरेशतीनाम्" "खमस्रतोहोमचतुष्टयं स्यात्" छेमा० मत्स्यपु० । मल० त० "ब्रह्माच्युतेशानवसुरुद्रतीनामिति" पाठः । रुद्रसंख्यातत्सख्यसंख्याकत्वात् ४एकादशसंख्यायाम् । "तारोमाया वर्म्मबीजलक्ष्मिरीशखरान्विता" तन्त्रसारे स्वरितामन्त्रोद्धारे ईशस्वर एकादशस्वर एकार इति ख्याता ५तद्वति वाच्ये आर्द्धनलते च । "नेशेऽग्निविद्याखवाच्यक्रियायाम्" राजमा० ।

ईशकोण पु० ईशस्वामिकः कोणः । पूर्वोत्तराया विदिशि ईशदिगादयोऽध्यक्ष । तत्कोणस्य ईशाधिदेवत्वात् तथात्वम् । "इन्द्रोवह्निः पितृपतिर्नैर्ऋतोवरुणोमरुत् । कुबेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्" इत्यमरोक्तेः क्षयाद्यम् । ईशस्य तैत्तिदोषत्वं यात्राद्यर्थतया 'ज्योति०लग्नम्। "सूर्य्यः शुक्रः जमापुत्रः सैंहिकेय.शनिः यथा । सौम्यस्त्रिदशमन्त्री च पूर्व्यादिक्रमदिग्नाथाः" इति निरूप्य "दिगीशाद्दे शुभा यात्रा पृष्ठाद्दे मरणं ध्रुवमिति" तद्विपरीतदिशि यात्रा निषिद्धा ।

ईशन न० ईश-भावे ल्युट् । ऐश्वर्ये "य ईशेऽस्य जगतोनित्यमेव नान्योहेतुर्विद्यत ईशनाय" श्वेताश्व० उ० । ईशे ईष्टे इत्यर्थः । "सर्पिष ईशनमत्र न समासः" सि० कौ० ।

ईशपुरी स्त्री ईत० । काश्याम् ईशनगर्य्यादयोऽध्यक्ष ।

ईशबल न० ईशकृतं बलम् । पाशुपतमतसिद्धे पाशुपतानां हितीये भागे "तासां माहेश्वरी शक्तिः सर्व्वानुग्राहिका शिवा । धर्मानुवर्तनादेव पाश इत्युपचर्य्यते" इत्युक्तत्वे पाशुपतशब्दे विवृतिः ।

ईशसख पु० ईत० टच्समा० । कुबेरे । बहु० न टच् । ईशसखा इत्यपि । ईशमित्रादयोऽप्यत्र । ईशेन यथा ऽस्यसख्यं तथा भारते वर्णितं यथा । "पितामहो रावणस्य साक्षादेवः प्रजापतिः । स्वयम्भुः सर्वलोकानां प्रभुः स्रष्टा महातपाः । पुलस्त्यो नाम तस्यासीन्मानसोदयितः सुतः । तस्य वैश्रवणो नाम गवि पुत्रोऽभवत् प्रभुः । पितरं स समुत्सृज्य पितामहसमास्थितः । तस्य कोपात् पिता राजन् ! ससर्ज्जात्मानमात्मना । स जज्ञे विश्रवा नाम तस्यात्मार्द्धेन वै द्विजः । प्रतीकाराय सक्रोधस्ततो वैश्रवणस्य वै । पितामहस्तु प्रीतात्मा ददौ वैश्रवणस्य वै । अमरत्वं धनेशत्वं लोकपालत्वमेव च । ईशानेन तथा सख्यं पुलस्त्यस्य बभूवह । राजधानीं निवेशस्य लङ्कां रक्षोगणान्विताम् । विमानं पुष्पकं नाम कामगञ्च ददौ प्रभुः । यस्यामाधिपत्यञ्च राजराजत्वमेव च" भा० व० २७३अ० ।

ईशा स्त्री ईश-अ । ऐश्वर्ये । "ईशायै मन्यु राजानं बर्हिषिदधरिन्द्रियम्" यजु० २१,५७ । "ईशायै ईशनशीला" वेददी० । ईष्टे ईश-क । २ऐश्वर्यान्वितायां स्त्रियां २दुर्गायां च । ईशस्य पत्नीत्यर्थे ङीप् । ईशी ईशपत्न्यां दुर्गायाम् ।

ईशान त्रि० ईश-ताच्छील्ये चानश् । ऐश्वर्यशीले २रुद्रमूर्त्तिभेदे पु० । "तमीशानं जगतस्तस्थुषस्पतिम्" ऋ० १,८६,५ । "ईशानसंदर्शनलालसानाम्" कुमा० ३तद्देवताके आर्द्रानक्षत्रे तत्तुल्यसंख्यायाम् ४एकादशसंख्यायाम् । शिवस्य अष्टसु मूर्त्तिषु सूर्य्यमूर्त्तिरूपतया पूज्ये ५शिवमूर्त्तिभेदे अष्टौ मूर्त्तीरभिधाय "मूर्त्तयोऽष्टौ शिवस्यैता. पूर्व्यादिक्रमयोगतः । आग्नेयस्यान्तः प्रपूज्यासु वेद्यां लिङ्गे शिवं यजेत्" तिं० त० भविष्य पु० ।

ईशानादिपञ्चमूर्ति स्त्री ब०व० ईशानादयः पञ्च मूर्तयः । महादेवस्य "ईशानतत्पुरुषाघोरवामदेवसद्योजातरूपेषु पञ्चसु रूपेषु तत्प्राप्तप्रयोजनत्वात्तारे शिवप्रकरणे दृश्यः ।

ईशावास्य पु० ईशा वास्यमृषेरिति षदमत्वस्य अच् । "ईशावास्यमिदं सर्वमित्यादिके यजुर्वेदस्य४० अध्याये ब्रह्मविद्याप्रतिपादके उपनिषद्रूपे ग्रन्थे । "यजुर्वेदोपनिषद्व्याख्यानायाम् "ईशावास्य, बृहदारण्यक, जाबाल, हंस, परमहंसेत्यादि शुक्लि० उ० । तत्रोत्तरखण्डे ईशादि । "ईशा केन कठप्रश्नः सुरुमाण्डूक्यतित्तिरिः । ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा" शुक्लि०उ० । इयमेवेशावास्योपनिषदित्युच्यते ।

ईशित्र त्रि० ईष्टे ईश-क्त्र क्षियां ङीप् । ईश्वरे । "न तस्य कश्चित् पतिरस्ति नेशिता" श्वेता०उ० ।

ईशितव्य त्रि० ईश-तव्य ।१अधीने यं प्रति ऐश्वर्यं क्रियते तस्मिन् । भावे तव्य । २ऐश्वर्ये न० ।

ईशिता स्त्री ईशिनो भावः तल् । अणिमाद्यष्टैश्वर्यमध्ये सर्वेषां स्वामित्वरूपे १ऐश्वर्ये । त्व ईशितमप्यत्र न० । "ईशित्वञ्च वशित्वञ्च तथा कामावसायिता" सां०कौ० । "ईशित्वञ्च वशित्वञ्च तत्त्वं मनसश्च ते" भा०आ०२८अ० "येन स्थावरादिषर्वभूतानि वशीभूतानि भवन्ति तादृशे योगजन्ये २धर्मभेदे च । ऐश्वर्यशब्दे विवृतिः ।

ईशिन् त्रि०ईष्टे ईश-णिनि । १ईश्वरे २प्रभौ ३पत्यौ । "यं सेदुषामदमेयाय दक्षयोर्विभतीशिनम्" मनुः स्त्रियां ङीप् । "सर्वाङ्गी कालीशिनीभिः" श्वेता० उ० ।

ईश्वर पु०ईश-वरच् । १महादेवे २कन्दर्पे पातञ्जलोक्ते, क्लेशजन्यकर्मविपाकाशयैरपरामृष्टे पुरुषविशेषे ३चैतन्यात्मनि, "ईश एवाहमन्यो न च मामीदृशे परे । ददामि च यदैश्वर्यमीश्वरस्तेन कीर्त्यते" इत्युक्तलक्षणे ४परमेश्वरे, "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति" गीता प्रभवादिमध्ये ५एकादशे वत्सरे च तत्फलम् ।"सुमित्रं क्षेममारोग्यं कार्षसस्य महार्घता । सर्वं मधु गवाञ्च ईश्वरे दुर्लभं प्रिये !" ज्योति० ६आढ्ये, ७स्वामिनि च त्रि०स्त्रीत्वे गौरा०ङीष् । "ईश्वरीं सर्वभूतानामिति" श्रीसूक्तम् ।

आर्हता नित्येश्वरं न मन्यन्ते तच्च अर्हच्छब्दे १८२पृष्ठे दर्शितम् एवं सांख्यैरपि "ईश्वरासिद्धेः" सां०सू० । "नित्येश्वरो निमित्तः हैरण्येश्वरसिद्धः सिद्धा" "उपासासिद्धस्य प्रयोजनात्मम्" सां० सूत्राभ्यां प्रकृत्युपासकस्य जन्यैश्वर्यं दर्शितम्" सां० कौ० च नित्येश्वरस्य कर्तृत्वं निराकृतं यथा ।

"न च क्षीरप्रवृत्तेरपीश्वराधिष्ठाननिबन्धनत्वेन साध्यत्वात् साध्येन व्यभिचारदृष्टिः साध्यं प्रेक्षावत्प्रवृत्तेः स्वार्थकारुण्याभ्यां व्याप्तत्वात् ते च जगत्सर्गाद्यावर्त्तमाने प्रेक्षावत्प्रवृत्तिपूर्वकत्वमपि व्यावर्त्तयतः अन्यथाप्रसक्तेक्षितस्य भगवतोऽजगत्प्रजतः किमभिप्रेक्षितं भवति नापि कारुण्यादस्य सर्गे प्रवृत्तिः प्राक् सर्गाज्जीवानामिन्द्रियशरीरविषयानुत्पत्तौ दुःखाभावेन कस्य प्रहाणेच्छा कारुण्यं ? सर्गोत्तरकालं दुःखिनोऽवलोक्य कारुण्याभ्युपगमे दुस्तरमितरेतराश्रयत्वं कारुण्येन सृष्टिः सृष्ट्वा च कारुण्यमिति । अपि च करुणया प्रेरितः ईश्वरः सुखिन एव जन्तून् सृजेच्च विचित्रान् । कर्म्मवैचित्र्यादिति चेत् कृतमस्य प्रेक्षायतः कर्म्माधिष्ठानेन तदनधिष्ठानमात्रादेवाचेतनस्यापि कर्मणः प्रवृत्तिप्रपत्तेस्तत्कार्य्यशरीरेन्द्रियविषयानुत्पत्तौ दुःखानुत्पत्तेरपि सुकरत्वात् । प्रकृतेस्त्वचेतनयाः प्रवृत्तेर्न स्वार्थानुयत्नो न वा कारुण्यं प्रयोजकमिति नोक्तदोषप्रसङ्गावतारः" ।

नित्येश्वरस्य यथानुमानं तथा आन्वीक्षिकीयग्रन्थे ७२६ पृष्ठे सर्वदर्शनसंग्रहवाक्येन प्रदर्शितम् ईश्वरसाधनं च गौ० सूत्रसङ्ख्याद्युक्तं यथा "ईश्वरः कारणं पुरुषकर्म्माफल्यदर्शनात्" सू० । "गुणविशिष्टमात्मान्तरमीश्वरः" भा० । "गुणैर्नित्येच्छाप्रयत्नैर्विशेषयुक्तैः, सामान्यैः संयोगादिभिश्च विशिष्टमात्मान्तरं जीवेभ्यो भिन्नं आत्मा जनदाराध्यः सृष्ट्यादिकर्त्ता वेदद्वारा कृताकृतोपदेष्टेश्वरो जगतः पितेति । अनुमानन्तु नित्यादिकं सकर्तृकं कार्य्यत्वादुघटादिवदित्याद्युक्तम्" वृत्तिः । वाचस्पतिस्तु च "संज्ञाकर्म त्वदधिष्ठितानां सिद्धम्" "प्रत्यक्षप्रवृत्तत्वात् संज्ञाकर्मणश्च" सूत्राभ्यामीश्वरसाधनं दूषितं विवृतमेतदुपस्करे यथा ।

"शब्दः स्वार्थादिक्रियाव्यक्तेर्दार्ढ्यः संज्ञा नाम, कर्म्म कार्य्यम्" सिद्धादि तदुभयमधिष्ठितानाम् ईश्वरमकुर्वीणां सत्त्वेऽपि सिद्धम् कथमेतदित्यत आह । अत्रापि संज्ञा च कर्म्म चेति समाहारद्वन्द्वैकवद्भावः संज्ञाकर्त्तृकर्म्मभेदस्वरूपार्थः । तथाहि यस्य स्वर्गापूर्व्यादयः प्रज्ञप्ताः स एव तत्र स्वर्गापूर्व्यादिसंज्ञाः कर्त्तुभोक्तृ नेतरः एवञ्च घटपटादिसंज्ञानियमेऽपि ईश्वरसंकेताधीनमेव यद्यो यत्रेश्वरेच्छ सङ्केतितः स तत्र साधुः यथा वा वाचि-

दोषधिनैकलदंष्ट्रापत्यभूता सा सर्व्याऽपि सर्वविधं फलीत्येतादृशी संज्ञा अस्मदादिविशिष्टानां क्लिप्तमनुमापकं यावदपि मैत्रादिसंज्ञा पित्रा पुत्रे क्रियते सावदपि "द्वादशेऽह्नि पिता नाम कुर्यात्" इत्यादिविधिना नूनमीश्वरप्रयुक्तैव तथाच सिद्धं संज्ञाया ईश्वरक्लृप्तत्वम् । एवं कर्म्मापि कार्य्यमपीश्वरे क्लिप्तं तथाहि क्षित्यादिकं सकर्तृकं कार्य्यत्वात् घटवदिति अत्र यद्यपि शरीराजन्यं जन्यं वा जन्यप्रयत्नाजन्यं जन्यं वा सकर्तृकत्वासकर्तृकत्वेन विवादाध्यासितं वा सन्दिह्यमानकर्तृकत्वं वा क्षित्यादित्वेन न विवक्षितम् अदृष्टद्वारा क्षित्यादेरपि जन्यप्रयत्नजन्यत्वात् विवादसन्देहयोश्चातिप्रसक्तत्वेन पक्षतानवच्छेदकत्वात् किन्तु सकर्तृकत्वमपि यदि क्षितिमञ्जन्यत्वं तदाऽस्मदादिना सिद्धसाधनम् अस्मदादिक्षितेरप्यदृष्टद्वारा क्षित्यादिजनकत्वात् उपादानगोचरक्षितिमञ्जन्यत्वेऽपि तथा,-अस्मदादिक्षितेरपि किञ्चिदुपादानगोचरत्वात्, कार्य्यत्वमपि यदि प्रागभावप्रतियोगित्वं तदा ध्वंसे व्यभिचार इति तथापि क्षितिः सकर्तृका कार्य्यत्वात् अत्र च सकर्तृकत्वमदृष्टाद्वारकक्षितिमञ्जन्यत्वं कार्य्यत्वञ्च प्रागभावावच्छिन्नसत्ताप्रतियोगित्वं नचाङ्कुरादौ सन्दिग्धानैकान्तिकत्वं साध्याभावनिश्चये हेतुसत्त्वसन्देहे सन्दिग्धानैकान्तिकत्वस्य दोषत्वात् अन्यथा सकलानुमानोच्छेदप्रसङ्गः । न च पक्षातिरिक्ते दोषोऽयमिति वाच्यं राजाज्ञापत्तेः नहि दोषज्ञायं शक्ष्यति यत् पक्षं नाक्रामति तस्मादङ्कुरस्करदयादयां निश्चित्यग्निना हेतुना तत्र साध्यसिद्धेरप्रत्यूहत्वात् न सन्दिग्धानैकान्तिकता तदङ्कुरस्करदयावान्तु सुतरामिति संक्षेपः" ।

एवं व्यावकवादरत्नभाष्यादिषु प्रदर्शितेश्वरानुमानप्रकारमधिकृत्य कुसुमाञ्जलिकरिदाहटीकयोः दिग्मात्रमेव किञ्चित् विवक्षितञ्च यथा

"तस्माधकप्रमाणाभावात् इति पञ्चमविप्रतिपत्तिः नन्वीश्वरे साधकप्रमाणमेव नास्तीत्याह" इरि० । "कार्य्ययोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः । वाक्यात् संख्याविशेषाच्च साध्योविश्वविदव्ययः" का० "क्षित्यादि सकर्तृकं कार्य्यत्वात् घटवत् सकर्तृकत्वञ्च उपादानगोचरापरोक्षज्ञानाधिकीर्षाजन्यत्वम् । आयोजन कर्म एवञ्च वर्णाकाकाशीनद्व्यणुकारब्धकपरमाण्वद्वयसंयोगजनकं कर्म्म चेतनप्रयत्नपूर्व्वकं कर्म्मत्वात् अस्मदादिशरीरक्रियावत् । धृतीति ब्रह्माण्डादि धतनप्रतिबन्धकीभूतप्रयत्नवदधिष्ठित धृतिमत्त्वात् वियति विक्षेपमधृतकार्यवत् धृतिश्च गुरुत्ववतां पतनाभावः । धृत्यादेरित्यादिपदात् नाशपरिपन्थि ब्रह्माण्डादि प्रयत्नवदधिष्ठितं विनाशित्वात् यागमानघटवत् । पदात् पद्यतेऽनेनेतिव्युत्पत्त्या पदं व्यवहारः घटादिसम्प्रदायव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिकलिप्यादिव्यवहारवत् । प्रत्ययतः प्रामाण्यात् वेदजन्यज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत् । श्रुतेर्वेदात् वेदः पौरुषेयोवेदत्वात् आयुर्वेदवत् । किञ्च वेदः पौरुषेयोवाक्यत्वात् भारतवत् वेदवाक्यानि पौरुषेयाणि वाक्यत्वात् अस्मदादिवाक्यवत् । संख्याविशेषात् । द्व्यणुकपरिमाणं सङ्ख्याजन्यं परिमाणत्वे सति जन्यपरिमाणत्वात् तल्यपरिमाणकपाणद्वयारब्धघटपरिमाणात्, प्रकृष्टताद्वयकपालसदृशकपालद्वयारब्धघटपरिमाणवत् अणुपरिमाणञ्च न परिमाणजनकं नित्यपरिमाणत्वात् अणुपरिमाणत्वाद्वा एवञ्च स्वर्गादौ द्व्यणुकपरिमाणहेतुपरमाणुनिष्ठद्वित्वसंख्या च नास्मदाद्यपेक्षानुद्बिला अतस्मदादीच्छानामेवानुद्बिरीश्वरस्यैवेति । विश्वविदव्ययइति विशिष्टस्याव्ययत्वं तेन नित्यसर्व्व विषयकज्ञानसिद्धिः नन्तु शरीर विशिष्टस्य कर्तृतया विशेषणबाधात्तत्कोविशिष्टबाध इति कर्तृजन्यत्वव्यापकशरीरजन्यत्वाभावात् कर्तृजन्यत्वाभाव इति स्वप्रतिपन्नता च । यद्वा कर्त्ता शरीर्य्येव इति व्याप्तिर्विरोधिनी यद्वा व्याप्या यथादर्शनग्रहत्वया शरीरी कर्त्ता च उपनेयः, पक्षधर्म्मतया च क्षित्यादावशरीरीति साध्याप्रसिद्धिः विशेषणविशेष्यविरोधश्च यद्वा शरीरजन्यत्वाद्युपाधिना व्याप्त्यासिद्धिरिति कार्य्यत्वहेतौ पक्ष दोषाज्ञानाच्च "इरि० । "न बाधोऽस्योपजीव्यत्वात् प्रतिबन्धोन दुर्बलैः । विप्रसिद्धोविरोधेन नासिद्धिरनिबन्धना" का० "ईश्वरे धर्म्मिणि शरीरबाधात् कर्तृत्वबाधेन, अधिकरणज्ञानं विना अभावज्ञानासम्भवात् अस्य कार्य्यत्वस्य धर्म्मिसाधकस्याधिकरणज्ञानजनकतया अवश्यमपेक्षणीयत्वेन बलवत्त्वात् । एवञ्च न विशेषणबाधाज्ञोविशिष्टबाधः प्रत्यक्षादिकः । ईश्वरोन कर्त्ता अशरीरत्वात् इत्यनुमानबाधोऽपि नेत्यर्थः । क्षित्यादौ न सकर्तृकत्वं शरीराजन्यत्वात् इति न प्रतिबन्धकं सत्प्रतिपक्षहेतोः शरीरांशवैयर्थ्यात् व्याप्त्यसिद्ध्या दुर्बलत्वात् । तृतीयेऽपि कार्य्यत्वव्याप्तेः पक्षधर्म्मत्वसंस्कारात् विप्रतिपन्नबाधकतर्कावतारात्र बलवत्त्वम् । उपजीव्यायाः कर्त्ता शरीर्य्येवेति व्याप्तेर्दुर्बलतया न प्रतिबन्धः । चतुर्थे च यदि पक्षधर्म्मतया अशरीरो उपस्थितस्तदा न विरोधः

कर्तृत्वस्याशरीरत्वसमानाधिकरणस्योपलम्भात् तदनुपस्थाने तु न विरोधः विरोधाग्रयस्याप्सिद्धेः पक्षधर्मे च विपक्षबाधकतर्कसत्त्वात् तदभावनिबन्धनाज्ञानरूपाप्सिद्धि व्याप्यत्वाप्सिद्धिर्वा न शरीरजन्योपाधेरपि विपक्षबाधकाभावेनाप्रयोजकत्वात्। ननु यदीश्वरः कर्त्ता स्यात् शरीरी स्यादिति प्रतिकूलतर्कावतारस्तत्राह "तर्काभासतया त्वेषा तर्कशुद्धिरदूषणम्। अनुकूलस्तु तर्कोऽत्र कार्य्यत्वोपो विभूषणम्" का० "प्रतिकूलतर्काभावेऽीश्वरासिद्धा आश्रयासिद्धा इत्याभासाः। कर्त्तारं विना कार्य्यं न स्यादिति तर्कस्तु विभूषणं सत्कारकः। "अहं सर्व्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते" इत्यागमत्वात्। "आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते स धर्म्मं वेद नेतर" इति तर्कानुगृहीतस्यागमस्य बलवत्त्वम्" ननु कार्य्यत्वं प्रयत्नजन्यत्वेऽप्रयोजकम् अत्राह "स्वातन्त्र्ये अकृताकालनियतं दृष्टघातकम्। क्वेश्वराभावे फलाभावोविशेषस्तु विशेषवान्" का० "न हि कर्त्तारं हेतुं विना कार्यं परमाणोरेव यत्नवत्त्वेऽचेतनत्वानुपपत्तिः अचेतनस्य चेतनप्रेरितस्यैव जनकत्वात् कृतस्य दृष्टकारणसत्कारेणैव फलजनकत्वात्। न च चेष्टायामेव भोक्तृप्रयत्नोहेतुः न तु क्रियासामान्ये इति, चेष्टा विशेषप्रयत्नस्य हेतुत्वेऽपि क्रियासामान्ये प्रयत्नसामान्यस्य कारणत्वानपायात् अन्यथा बीजविशेषस्याङ्कुरविशेषे जनकत्वेनाङ्कुरसामान्यं प्रति बीजत्वेन हेतुतायामपि विशेषापत्तेः ननु घटादीनां प्रयत्नजन्यत्वे किं मानमित्यत्राह "कार्य्यत्वाच्चिरूपाधित्वमेव धृतिक्षितिनाथयोः। विच्छेदेन पदव्यापि प्रत्ययादिव पूर्व्ववत्" ।"धृतिविनाथयोः प्रयत्नजन्यत्वाच्चिरूपाधित्वं विच्छेदेनान्तरा प्रलयेन आदर्यादभावात् अव्याप्तदर्शो नाद्याप्यवहारमूलं व्यवहारानभिज्ञत्वादिति युगाद्यकालीन घटादिव्यवहारप्रवर्त्तकं पुरुषः सिध्यति। एवं प्रत्ययादेर्वेदजन्यधीप्रामाण्यादेरपि निरूपाधित्वम्" इति०।

विस्तरेणेश्वरानुमानमन्यस्य प्रायेण लुप्तप्रायतया कुसुमाञ्जलिग्रन्थे दिङ्मात्रेण तत्प्रकारस्य सत्त्वेऽपि न्यायकन्दल्याम् अनुमानचिन्तामणिशिरोमण्योश्च विस्तरेण वर्णितं तयोश्च प्रायेण लुप्तप्रायतया तयोः प्रचारार्थं सिद्धोपन्यासः क्रियते तत्रादौ

न्यायकन्दली। "किं पुनरीश्वरसद्भावे प्रमाणम् आगमश्चात्र अनुमानञ्च महाभूतचतुष्टयमनुपलब्धिमत्पूर्वकं कार्य्यत्वात् यत्कार्य्यं तदुपलब्धिमत्पूर्वकं यथा घटकार्य्यं, कार्य्यञ्च महाभूतचतुष्टयं तस्मादेतदप्युपलब्धिमत्पूर्वमिति। ननु प्रमाणेन पूर्वकोऽनुपलब्धेरसिद्धं पृथिव्यादिषु कार्य्यत्वमिति चेत् तदयुक्तं सावयवत्वात् तल्लिङ्गेः यत् सावयवं तत्कार्य्यं यथा घटः सावयवञ्च पृथिव्यादि तस्मादेतदपि कार्य्यमेव ॥ ननु व्याप्यपक्षधादनुमानप्रवृत्तिः कार्य्यत्वबुद्धिमत्पूर्वकत्वयोश्च व्याप्यपक्षधमयत्वं, घटादिषु कर्त्तृप्रतीतिकाले एवाङ्कुरादिषूत्पद्यमानेषु तदभावप्रतीतेः न चाङ्कुरादीनामपि बुद्धिमत्त्वमिति न्यायं संघट्टीतायां व्याप्तायनुमानप्रवृत्तिकाले प्रतिवाद्यपेक्षया पक्षादिप्रविभागः दृष्ट तु सर्व्वदैव प्रतिपक्ष प्रतीत्याक्रान्तत्वाद्व्याप्तिपक्षधमेव न सिध्यति। अत्र प्रतिसमाधीयते। यदि चैव हेतानुपलब्धाद्व्याप्तिपक्षधाभावः तदानीं भीमांसाभाज्यतोऽभिमत सामान्यतोदृष्टादिलिङ्गलनुमानमपि न सिद्धति तत्रापि देवदत्तगतिपूर्वकदेशान्तरप्राप्तिपक्षधत्वाच्च एव नक्षत्रादिप्रदेशान्तरप्राप्तिनोपलब्धात् अत्र तेषु देवविमर्कत्वेऽपि गतेरनुपलब्धौ सत्यवस्थां न तवा व्याप्तिपक्षधहेतोर्निश्चयाधिप्रहस्य सूर्योदर्शनस्य प्रतिरोधः तुल्यबलत्वाभावात् एवङ्कदमशरीरत्वेनाभ्युपेतस्य कर्त्तुः स्वरूप विप्रकर्षेणाङ्कुरादिषूपलब्धायोग्यत्वात् न तेन सिद्धयाधिप्रहस्य सूर्योदर्शनस्य सामर्थ्यप्रतिरुध्यते इति समानम्। अपि च भोः किमनेन कर्त्तृवादं बाधते पृथिव्यादिनिर्म्मितसमर्थो वा। कर्त्तृवादबाधने तावदभिप्रेतासिद्धिः तस्मादादिसिद्धयः कर्त्तारोऽभिप्रेतो भवतां तच्च तेनेदं पृथिव्यादिकार्य्यमवयवद्वया यत्कर्त्तृनिर्म्मीयम्, पृथिव्यादि निर्म्मीय समर्थस्तु न सिद्धति अनन्यत्वात् अन्यथाबलेन हि दृष्टान्त दृष्टकर्त्तृ सिध्यः सिध्यतीति नायं प्रपञ्चः। कर्त्तृविशेषस्याप्रसाधनात्। व्याप्तिसामर्थ्याङ्कुत्रिमपूर्वकत्वसामान्ये साध्यमाने पृथिव्यादिनिर्म्मीणसामर्थ्यलक्षणोऽपि विशेषः सिध्यत्येव निर्विशेषस्य सामान्यस्य सिद्धभावात्। ननु सा सिध्यतु सामान्यमिति चेत् कार्य्यत्वेन सह तस्याप्रतिक्षेपात्। यदि हि व्याप्तमपि न सिध्यति धूमादग्निसामान्यं न सिध्येत् अग्निविशेषस्यानन्वितस्यासिद्धेः निर्विशेषस्य वस्यात्। अथेदमुच्यते इदमनुमानस्य स्वरूपं व्याप्तिः पक्षधर्मता च तत्र व्याप्तिसामर्थ्यात् सामान्यं सिध्यति पक्षधर्मताबलेन चाभिप्रेतो विशेषः, पर्वताद्यवच्छिन्नवह्निसामर्थ्यात् सा सिद्धति अन्यथा पक्षधर्मतायाः कोपयोगः का वानुमानस्य स्फीतताप्रथिष्यः प्रामाण्यम्। एवङ्कृते ईश्वरानुमानेऽपि तुल्यमन्यत्राभिनिवेशात् अत्र अतं सिद्ध-

त्यनुमानेऽपि विशेषोऽपि यत्र प्रमाणविरोधोनास्ति। तथाहि धूमात् पर्वतनितम्बवर्तिवह्निविशेषसिद्धौ का नामानुपपत्तिः दृष्टो हि देशात् कालाभेदः खलक्षणानाम्। ईश्वरानुमाने तु विशेषेण सिद्ध्यति प्रमाणविरोधात्। तथाहि नास्य शरीरपूर्वकत्वं साधनीयं शरीरे सत्यवश्यमिन्द्रियप्राप्तावतीन्द्रियोपादानोपकरणादिकारकयन्निपरिज्ञानाऽसम्भवे सति कर्तृत्वासम्भवात्। अशरीरपूर्वकत्वञ्च अयत्नसाधनम् सर्वोऽपि कर्त्ता पूर्वं कारकस्वरूपमवधारयति ततः कारणान्यधितिष्ठति तत इच्छतीदमनेन निर्वर्त्तयामीति ततः प्रवर्त्तते तदनु कार्यं व्यापारयति ततः करणान्यधितिष्ठति ततः करोतीति। अनवधारयत्नलिङ्गप्रयतमानः कार्यमव्यापारयन्न करोतीत्यन्वयव्यतिरेकाभ्यां बुद्धिवच्छरीरमपि कार्य्योत्पत्तावपायभूतं निखिलोपाधिस्वरूपे व्याप्तिग्राहकप्रमाणादेवावधारितं न शक्यतेप्रहातुं यद्धरिवेन्धनविकारदाहसामर्थ्यं धूमानुमाने। तत्परित्यागे च बुद्धिरपि त्यक्ष्यतां प्रमाणातिशयादशरीरवदबुद्धिमानेवायमीश्वरः करिष्यति। उपादानोपकरणादिस्वरूपानभिज्ञोनायमीतीति चेत्। कुत एतत्? तथाऽनुपलम्भादिति चेत् फलितं तर्हि ममापि मनोरथकुलेषु,न तथा यावदिच्छाप्रयत्नाव्यवहितकार्य्योत्पत्तावुपयुज्यते यथेदमव्यवहितव्यापारं शरीरम्। एवं तर्हि का गतिरत्र,बुद्धिमत्कर्तृपूर्वकत्वसामान्यस्य, अगतिरेव उभयोरपि शरीरित्वाशरीरित्वविशेषयोरनुपपत्तेर्निर्विशेषसामान्यस्य सिद्ध्यभावात्। किमनुमानस्य दूषणं न किञ्चित्। पुरुष एवायं विशेषाभावाच्चयविषायमाणे साधनानर्हसामान्ये साधनं प्रयुञ्जानोनिगृह्यते यथा कश्चिच्चिन्तितं त्वमाम मच्छेदमाकाशं प्रति व्यापारयन्। अथानुमानदूषणं विना न तुष्यति भवान् तदिदमशरीरिपूर्वकत्वानुमानं व्याप्त्याभासकप्रमाणबाधितत्वात् कालात्ययापदिष्टं व्याप्तिबलेन चाभिप्रेतमशरीरित्वविशेषम् विरुन्धत् विशेषविरुद्धं ततश्च विरुद्धाव्यभिचारविशेष एवेति पूर्वपक्षसंक्षेपः"। अत्र प्रतिसमाधिः। किं शरीरित्वमेव कर्तृत्वस्य परिदृष्टसामर्थ्यकारकप्रयोजकत्वम् न तावच्छरीरित्वमेव कर्तृत्वं सुप्तमोदासीनस्य च कर्तृत्वप्रसङ्गात् किन्तु परिदृष्टसामर्थ्यकारकप्रयोजकत्वं तच्चिन्तु क्षति कार्य्योत्पत्तेः। तच्चाशरीरस्यापि निर्वहति यथा स्वशरीरप्रेरणायामात्मनः। अस्ति तत्राप्यस्य स्वतन्त्रीभावाज्जितं तदेव शरीरमिति चेत् सत्यमस्ति परं प्रेरणोपयोगो न भवति स्वात्मनि क्रियाविरोधात्। प्रेर्य्ये तथास्तीति चेत् ईश्वरस्यापि प्रेर्य्यः परमाणुरस्ति। ननु स्वशरीरे प्रेरणायामिच्छाप्रयत्नाभ्यामात्मतन्त्रस्येच्छाप्रयत्नयोश्च सति शरीरे भावादसत्यभावात् अस्ति तत्र स्वप्रेरणायामिच्छाप्रयत्नजननद्वारेणोपायत्वमिति चेत् न तस्येच्छाप्रयत्नयोरुपजननं प्रत्यकारकत्वात् अनपायात्मकयोरिच्छाप्रयत्नयोः प्रेरणाकरणकाले तु तदनुपायभूतमेव शरीरमकर्मत्वादिति व्यभिचारः। अनपेक्षितशरीरव्यापारेच्छाप्रयत्नमात्रसचिवस्यैव चेतनस्य कदाचिदचेतनव्यापारसामर्थ्यदर्शनात् बुद्धिमदव्यभिचरितकार्य्यत्वमिति चेन्नेश्वरसिद्धिः। इच्छाप्रयत्नोत्पत्तावपि शरीरमपेक्षणीयमिति चेत् अपेक्षातां यत्र तयोरागन्तुकत्वं यत्र पुनरिच्छा स्वाभाविकी वासाते तत्रास्यापेक्षणं व्यर्थम्। न च बुद्धीच्छाप्रयत्नानां नित्यत्वे कचिद्विरोधः दृष्टा हि गुणानां रूपादीनामाश्रयभेदेन ह्रयो गतिः नित्यताऽनित्यता च। तथा बुद्ध्यादीनामपि भविष्यतीति सेयमीश्वरवादे वादिप्रतिवादिनोः परा काष्ठा, अतः परं प्रपञ्चः। आत्माधिष्ठिताः परमाणवः प्रवर्त्तिष्यन्ते इति चेत् न तेषां स्वकर्मोपार्जितेन्द्रियगणाधीनसंविदां शरीरोत्पत्तेः पूर्वं विषयावबोधविरहात्। अथात्मनामपि सर्वविषयव्यापि सकृज्जैतन्यमिति चेत् न सकृत् शरीरसंबन्धभाजां तत् केन विलुप्तं येनेदं सर्वज्ञापूर्ववदुन्मीलयति। शरीरावच्छेदतिरोधानात्तदाऽस्यैव स्वभावीयते न वह्निर्मुखं भवतीति चेत् व्याप्यकत्वेन तस्य विषयसंबन्धानुच्छेदेन नित्यत्वेन च विषयप्रकाशस्वभावत्वानिहत्तौ कातिरोधानवाचोयुक्तिः? इच्छाप्रतिबन्धस्तैजसतिरोधानमिति चेत् कथं तर्हि शरीरिणां विषयग्रहणम्। कचिदस्य दृष्टयो न विरुध्यन्ते इति चेत् कस्तोयं विशेषः? इन्द्रियसन्निधानविशेषात् यद्येवमिन्द्रियाधीनश्चैतन्यस्य विषयग्रहेषु हन्त्रिच्छाभो न सन्निधिमात्रनिबन्धनः सत्यपि व्यापकत्वे सर्वार्थेषु दृष्टस्वभावात् इन्द्रियवैयर्थ्यप्रसङ्गाच्च साधूक्तं शरीरेणात्मनां न विषयावबोध इति। तथा चैके वदन्ति"परात्रिखानि व्यतृणत् स्वयम्भूस्तस्मात् पराङ् पश्यति नान्तरात्मन्निति"। अनवबोधे चैतन्य नाधिष्ठातमिति तेभ्यः परः सर्वार्थेदर्शी सकृज्ज्ञानमयः कर्तृस्वभावः कोऽप्यधिष्ठाता कल्पनीयः चेतनमधिष्ठानारम्भनरेणाचेतनानां प्रवृत्त्यभावात्। स किमेकोऽनेको वा? एक इति ब्रूमः बहूनामसर्वज्ञत्वेऽस्मदादिवदसामर्थ्यात् सर्वज्ञत्वे एकस्यैव सामर्थ्यादपरेणानुपयोगात्। न च संप्रयोगानां भूयसामेकमूले हेतुरस्तीति सदाचिदनुत्पत्तिरपि कार्यस्य स्यात् एकाग्निप्रायाहरोधेन

सर्वेषां प्रवृत्तावेकस्यैवेश्वरत्वं नापरेषां सदःपरिवृढादिव, कार्य्योत्पत्त्यनुरोधे प्रत्येकमनीश्वरत्वम् । तदेवं कार्यविशेषेण सिद्धस्य कर्तृविशेषस्य सर्वज्ञत्वाच्च तत्सिद्धस्तुल्ये विशेषानुपलम्भः । अतो न तत्सिद्धत्वमसिद्धं मिथ्याज्ञानं मिथ्याज्ञानाभावाच्च न तन्मूलौ रागद्वेषौ तयोरभावाच्च तत्पूर्विकाप्रवृत्तिः प्रवृत्त्यभावे च न तत्साध्यौ धर्माधर्मौ तयोरभावात्तत्फलयोरपि सुखदुःखयोरभावः सर्वदैव चानुभवसद्भावात् दृष्टसंस्कारावपि नाशाते इत्यदृष्टाधिकरणं भगवानीश्वर इति केचित् । अन्ये तु बुद्धिरेव तस्याश्चेतना क्रियायश्चिन्त्यमेवं वदन्त इच्छाप्रयत्नावनङ्गीकुर्वाणाः; बहुगुणाधिकरणमनभिलाषुकः । स किं बद्धोऽमुक्तो वा न तावत् बद्धोबन्धनसमाश्रित्य बन्धनहेतोः क्लेशादेरसम्भवात् मुक्तोऽपि न भवति बद्धविच्छेदपर्य्यायत्वान्मुक्तेः । नित्यमुक्तः स्यात् यदाह तत्रभवान् पातञ्जलिः "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषईश्वर" इति ।

अनुमानचिन्तायां तैश्वरवादो यथा

"एवमनुमाने निरूपिते तस्माज्जगत्सिर्माहपुरुषधौरेयसिद्धिः सिद्धादौ कार्य्यत्वेन घटवत् सकर्तृकत्वानुमानात् । ननु सिद्धादि प्रत्येकं न पक्षः तस्य स्वयं ज्ञानाभिधातुमशक्यत्वात् नापि मिलितम् एकरूपाभावात् अत एव सकर्तृत्वविचारारम्भसंशयविषयः, तथाविधविवादविषयोवा न पक्षः एकरूपाभावेन तयोरभावात् पक्षीकृतमशक्यत्वात् वादिनोर्निश्चितत्वेन संशयाभावात् । न च वाद्यनुमानोत्तरत्वेन मध्यस्थस्य संशयः । अनुमानाभ्यां तस्य संशयः मध्यस्थप्रत्यानन्तरङ्गानुमानमिति परस्परान्वयात् घटेऽपि कदाचित् तयोः सम्भवात्, प्रत्येकसंशये विवादाभावत्वेनानुमानेऽर्थान्तरतापत्तेश्च । न च शरीरापेक्षेश्वरे कर्त्रा यत्र क्वचित् शरीराजन्यं जन्यं वा पक्षः जन्यात्मविशेषगुणशब्दस्फुटत्वसर्गाद्यकालीनत्वेटघटादिलिङ्गादि संप्रदायाचार्यानीश्वरमात्रकर्तृकत्वमसंशयात् असिद्धेश्च अदृष्टद्वारा शरीरित्वेऽपि सिद्धादिकर्तृत्वात् । नापि जन्यज्ञानजन्यं जन्यम् उभयसिद्धक्षितिजन्यान्यजन्यं वा पक्षः सिद्धादीनामदृष्टद्वारा जन्यक्षितिजन्यत्वात् । नाप्यदृष्टजनकज्ञानजन्यं जन्यं क्षितिसाक्षाज्जन्यं वा पक्षः ईश्वरज्ञानेऽदृष्टजनकत्वेन सिद्धौ तदभावात् घटादावप्येवं पक्षत्वेनासंगतः सिद्धसाधनात् । न च क्षितिरेव पक्षः, अङ्कुरेण सन्दिग्धानैकान्तात् । न च सिद्धविपक्षे हेतुसन्देहात् न इति वाच्यं हेतौ साध्याभावव्यभिचारसंशयस्य दूषकत्वात् न च साध्याभाववति हेतुसन्देहात् हेतुमति साध्याभावसन्देहाद्वा उभयथापि दोषः । न चैवं पक्षेऽपि तत्, अनुमानमात्रोच्छेदकत्वेन तदितरत्र तस्य दूषकत्वात् । अङ्कुरे हेतोरनिश्चयेन सन्दिग्धानैकान्तिकं तस्निश्चयेन साध्यसन्देहवति साध्यानुमितिरेव पक्षवत् सामग्रीसत्त्वात् । अत एवाङ्कुरः पक्षसम इति चेन्न तस्यापक्षत्वेन हेतोः पक्षधर्मताविरहेण स्वार्थानुमानाविषयत्वात् । तदा तस्यापि पक्षत्वे प्रतिज्ञानुपपत्तेः । अत्र मानान्तराधीनतत्साध्यानुमित्यनन्तरञ्च पक्षेऽनुमितावितरेतराश्रयाच्चक्रमध्यनुमानम् । तत्रापि क्षित्या सन्दिग्धानैकान्तात्, क्षितेर्विवादविषयत्वेऽङ्कुरे साध्यमाने अर्थान्तरञ्च । किञ्चैवमेकैकोपादानाभिप्रसिद्धावपि नेश्वरसिद्धिः नापि सर्गाद्यकालीनं ह्यणुकं पक्षः परमाणु सर्गाद्यसिद्धेः इति" पक्षक्षेपः । "किञ्च सकर्तृकत्वं ? न तावत् क्षितिमत्त्वकृतभावः क्षितिमज्जन्यत्वं वा अङ्कुरादिना सिद्धसाधनात् । उपादानगोचरापरोक्षज्ञानजिकीर्षाकृतिमज्जन्यत्वं तर्हीति चेत् उपादानगोचरत्वं यदि यत्क्षित्युपादानगोचरत्वं तदा अङ्कुरादिनाऽर्थान्तरत्वं शालादीनामपि जनकत्वं विवक्षितं न च घटोपादानगोचरज्ञानादीनां क्षितिजनकत्वं सत्त्वेऽपि व्यभिचारादिति चेन्न क्षितिजनकादृष्टजनकज्ञानादीनाम् उपादानविषयनियमेनादृष्टद्वारा तैरेव सिद्धसाधनात् । न च शालासत्तजन्यत्वं विवक्षितं तद्धि न क्षितिजन्यत्वाजन्यत्वे सति क्षितिजन्यत्वं स्वजनकज्ञानव्यवहितोत्तरक्षणवर्त्तित्वं वा घटदृष्टान्तस्य साध्यविकलत्वापत्तेः घटादौ कुलालादिकर्तृकत्वाभावप्रसङ्गात् । न च शरीरक्रियादृष्टाम इति वाच्यं घटेनानैकान्तात् चेष्टावत्त्वोपाधित्वात् । नापि क्षित्यादुपादानगोचरत्वं विवक्षितं अप्रसिद्धेः न चोपादानशब्दस्य सम्बन्धिशब्दत्वेन घटक्षित्यादिसमभिव्याहारे तत्तदुपादानगोचरत्वं चैत्रोत्साहभङ्गोमैत्रवदिति वाच्यं शाब्दे हि बोधे तथा न चात्र शब्दः प्रमाणं वादिनोऽनाप्तत्वात् । अनुमाने त्वनुगतेन व्याप्यकत्वरूपेण व्यापकसिद्धिः तच्चोपादानत्वमेवेति कथं नार्थान्तरम् । किञ्चैवं घटादावपि तदुपादानत्वेनैवोपस्थित्यासामान्येन रूपेण कुलाद्यनुपस्थितेर्व्यभिचारेण न सङ्केतः । अपि च सामान्यलक्षणया ज्ञानजन्यया योगजधर्मरूपया वा प्रत्यासत्त्योपादानगोचरापरोक्षज्ञानतज्जन्यजिकीर्षाकृतिमता ऽङ्कुरादिना सिद्धसाधनम् तेषां क्षित्यवच्छिन्नपूर्वक्षणवासत्त्वेऽपि तद्वतः सत्त्वात् अदृष्टद्वारा

तेषामपि जनकत्वसम्भवात् । ज्ञानादिसाक्षात्कार्यत्वस्य निरस्तत्वात् । अथ योगजधर्मजन्यजन्यसविकल्पकजन्य सामान्यलक्षणाप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञान चिकीर्षाकृतिमज्जन्यमिति साध्यम् यद्वा अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यजन्यज्ञानादिमद्जन्यं जन्यम् अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यमिति साध्यम् ज्ञानाव्यवहितोत्तर समयवर्त्तीच्छाव्यवहितोत्तरक्षणवर्त्तिकृतीनां जनकत्वं विवक्षितं न तु ज्ञानादीनां यौगपद्यं मौवार्थं वाऽतो न साध्याप्रसिद्धिर्नवा क्षित्यादौ बाध इति नैवं योगजधर्मसामान्यज्ञानरूपप्रत्यासत्तीनामनागतगोचरसाक्षात्कारस्य च तज्जनकप्रत्यासत्तीनाञ्च परस्याप्रसिद्धतया तदजन्यस्य साक्षात्कारस्याप्यसिद्धत्वेन पक्षसाध्ययोर्विशेषणाऽसिद्धा परं प्रत्याश्रयासिद्धेः साध्याप्रसिद्धेः । तत्सिद्धौ वा पक्षे तदजन्यत्वासिद्धिः क्षितिजनकादृष्टजनककृतिचिकीर्षासाक्षात्काराणां योगजधर्मादिजन्यानामदृष्टद्वारा क्षितिजनकत्वेन सिद्धसाधनात् न च तादृशसाक्षात्कार्यत्वं विवक्षितं घटादिदृष्टान्ते तदसम्भवात् । दृष्टान्ते घटादौ जनकेच्छासाधनतासम्बन्धेन जन्यसविकल्पकव्याप्यिपक्षजन्यत्वेन साध्याप्रसिद्धेश्च । ननु व्याप्तिबलेन साध्यं सिध्यति व्याप्तिश्च यत्र यत्र कार्य्यत्वं तत्र तत्र तदुपादानाभिन्नकर्तृत्वमितिरूपा न तु यद्यत् कार्य्यं तत्तत् किञ्चिदुपादानाभिन्नजन्यमिति एवञ्च यत्र कार्य्यत्वं तत्र तदुपादानाभिन्नजन्यत्वमिति विधिरित्याश्रित्यादौ कार्य्यत्वं क्षित्याद्युपादानाभिन्नजन्यत्वमेव साध्यायत्तो न सिद्धसाधनमितिचेन्न घटे पटे च व्याप्तिपक्षः कार्य्यत्वस्य किं प्रत्येकं घटोपादानाद्यभिन्नजन्यत्वेन, तत्तदुपादानाभिन्नजन्यत्वेन, उपादानाभिन्नजन्यत्वेन वा आद्ये घटोपादानाभिन्नजन्यत्वादौ कार्य्यत्वस्य व्यभिचार एव । द्वितीयेऽननुगमः । तत्तच्छब्दाभिधेयघटाद्युपादानगतानुगतरूपाभावात् कथं व्यापकताग्रहः । तत्तच्छब्दस्य स्वभावात् समभिव्याहृतपरतया नायं दोष इति चेत् न अनुमानेशब्दस्वभावोपन्यासस्याप्रयोजकत्वात् । अतएवेदानीं देवदत्तोऽधिरूढ इति विद्यमानत्वे सति रूढ्यसत्त्वात् विद्यमानत्वे सति ओदनो यत्र नास्ति स तदा तदतिरिक्तदेशेऽस्तीति यथाऽरूढमेव वह्निरवत् रूढे प्रतिष्ठामीत्यत्र पक्षे दृष्टान्तसाधारण्यवचनत्वयोरनुगतयोरभावात्सान्वयी किन्तु व्यतिरेकान्युगम् । तृतीये सिद्धसाधनमेव । अथ सर्गाद्यकालीन द्व्यणुकं ज्ञानेच्छाकृतिसमानकालीनसामवायीजन्यं कार्य्यत्वात् घटवत् । अदृष्टसामवायीजन्यत्वं ऽदृष्टत्वापत्तिरिति चेन्न परं प्रति सर्गाद्यसिद्धेः ज्ञानादीनां सिद्धावपि द्व्यणुकाजनकत्वात् तदानीमसिद्धावप्रयोजकत्वाच्च । एतेन सर्गाद्यकालीनं द्व्यणुकं द्व्यणुकासमवायिकारणसमकालीनक्रियाजन्यमिति निरस्तं द्व्यणुकासमवायिकारणसमानकालीनक्रियात्वेन गौरवाप्रयोजकाभ्यामजनकत्वात्" साध्याशिपः । "किञ्च कार्य्यत्वं ? न तावत् योगोपस्थितत्वमसिद्धेः नापि पूर्वकालासत्त्वे सत्युत्तरकालसम्बन्धः, तत्तत्पूर्वकालस्यानुगतत्वात् सकलपूर्वकालस्याप्रसिद्धेः नापि कादाचित्कत्वं प्रागभावप्रतियोगित्वं ध्वंसेनानैकान्तात् । नापि सत्त्वे सति तत्त्वं सत्तायाः परं प्रत्यसिद्धेः स्वरूपसत्त्वस्य च ध्वंसेऽपि सत्त्वात् यत्तु अयं घटः एतदृष्टजनकाभिन्नज्ञानचिकीर्षाकृत्यतिरिक्तज्ञानादिजन्यः कार्य्यत्वात् घटवदित्यादि तत्र विपक्षे बाधकाभावेनाप्रयोजकत्वात् अन्यथाऽयं घटः एतदृष्टजनकाभिन्नाऽदृष्टातिरिक्ताभिन्नाऽदृष्टजन्यः कार्य्यत्वात् अपरघटवत् । एतत्सुखदुःखसाक्षात्कारौ एतज्जनकाभिन्नसुखदुःखाश्रयौ सुखदुःखसाक्षात्कारत्वादित्यादिना नित्यधर्मसुखदुःखाश्रयस्यापि सिद्धिप्रसङ्गात् । अयं घटः स्वजनकाभिन्नज्ञानाद्यतिरिक्ताभिन्नज्ञानाद्यजन्यः अपरघटवदित्यादिना सत्प्रतिपक्षाच्च । केचित्तु दृश्यते तावद्भिन्नविषयव्याकृष्यमाणेन्द्रिये मनोनिवेशवतः पुंसोऽनुकूलो यत्नः तथा च सर्गाद्यकालीनशरीरजन्यज्ञानध्वंसाधाराकाशाधाराभिन्नजनकात्ममनःसंयोगजनिका मनःक्रिया तन्मनोगोचरप्रयत्नाधारतन्मनोगोचरप्रयत्नतद्ग्राह्येतरसकलकार्याधाराकाशान्यतराकाशाधाराद्यत्ताका तन्मनःक्रियात्वात् अमतन्मनःक्रियावत् अर्थात् प्रयत्नाधाराकाशान्यतराकाशाधारा सा क्रिया सिद्धतीत्याहुः । तत्र सर्गाद्यकाले ज्ञाने जनकमनःसंयोगजनकक्रियायां मानाभावः पूर्वक्रियया एव संयोगसंभवात् । ईश्वरवादिनां तन्मनोगोचरप्रयत्नाधाराकाशोऽप्रसिद्धएव क्रियात्वस्यैव हेतुत्वे व्यर्थविशेषणत्वञ्च । किञ्चैवं प्रयत्नाधाराकाशान्यतराकाशाधारत्वम् अर्थात् तत्सिद्धौ मानान्तरादीश्वरासिद्धावर्थान्तरत्वमिति" हेत्वाशयः । "अत्रोच्यते अदृष्टाद्याकारोपादानगोचरजन्यज्ञानजन्यानि समवेतानि जन्यानि, अदृष्टप्रागभावव्याप्यप्रागभावाप्रतियोग्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि, स्वजनकादृष्टेश्वरोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि वा अपरोक्षज्ञानचिकीर्षाप्रयत्नविषयीभूतोपादानानि

सर्वेषां प्रत्यक्षावेद्यत्वेश्वरत्वं नापरेषां सदःपरिदृश्यमानत्व, कार्योत्पत्त्यनुरोधे प्रत्येकमनीश्वरत्वम् । तदेवं कार्यविशेषेण सिद्धस्य कर्तृविशेषस्य सर्वज्ञत्वान्न तत्र सिद्धसाधनम् विशेषानुपपत्तेः । अतो न तत्सिद्धयर्थं मिथ्याज्ञानं मिथ्याज्ञानाभावाच्च न तन्मूलौ रागद्वेषौ तयोरभावात्र तत्पूर्विकाप्रवृत्तिः प्रवृत्त्यभावे च न तत्साध्यौ धर्माधर्मौ तयोरभावात्तज्जयोरपि सुखदुःखयोरभावः सर्वदैव चात्मवत्त्वसङ्गावात् स्मृतिसंस्कारावपि नास्ते इत्यदृष्टाधिकरणं भगवानीश्वर इति केचित् । अन्ये तु बुद्धिरेव तस्याश्चेतना क्रियायामिच्छितिं वदन्त इच्छाप्रयत्नावनङ्गीकुर्वाणाः; अदृष्टाधिकरणमभिलाषुकः । स किं बद्धोऽमुक्तो वा न तावत् बद्धोबन्धनसमाप्तिप्रसङ्ग बन्धनहेतोः क्लेशादेरसङ्गावात् मुक्तोऽपि न भवति बुद्धिविच्छेदपर्यायत्वान्मुक्तेः । नित्यमुक्तः स्यात् घटादेश्च तत्प्रसङ्गात् पातञ्जलिः "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषईश्वर" इति ।

अनुमानचिन्तामणौ ईश्वरवादो यथा

"एवमनुमाने निरूपिते तस्माज्जगन्निर्माणपुरुषधौरेयसिद्धिः सिद्धादौ कार्यत्वेन घटवत् सकर्तृकत्वानुमानात् । ननु सिद्धादि प्रत्येकं न पक्षः तस्य स्वयङ्ग्राहाभिधातुमशक्यत्वात् नापि मिलितम् एकरूपाभावात् अत एव सकर्तृत्वविचारारम्भसंशयविषयः, तत्राविवादविषयोवा न पक्षः एकरूपाभावेन तयोरुद्धावत् पक्षीकर्तुमशक्यत्वात् वादिनोर्भिन्नितत्वेन संशयाभावात् । न च वादानुमानयोस्तुल्यत्वेन मध्यस्थस्य संशयः । अनुमानाभ्यां तस्य संशयः मध्यस्थप्रमाणान्तरस्यानुमानमिति परस्पराश्रयात् घटेऽपि कदाचित् तयोः सम्भवात्, प्रत्येकसंशये विवादाभावत्वेनानुमानेऽप्यप्रवृत्तेश्च । न च शरीरापेक्षेण कर्त्रा यत्र क्वचित् शरीराजन्यं जन्यं वा पक्षः जन्यात्मविशेषगुणयत्नस्फुत्कारसर्गाद्यकालीनत्वेन घटादिसिद्धादि संप्रदायाचार्यमीश्वरमात्रकर्तृकाणामसंशयात् असिद्धेश्च अदृष्टद्वारा शरीरिणोऽपि सिद्धादिकर्तृत्वात् । नापि जन्यज्ञानजन्यं जन्यम् उभयसिद्धज्ञानिजन्याजन्यं वा पक्षः सिद्धादीनामदृष्टद्वारा जन्यज्ञानिजन्यत्वात् । नाप्यदृष्टजनकज्ञानजन्यं जन्यं ज्ञानिसाक्षाज्जन्यं वा पक्षः ईश्वरज्ञानेतरादृष्टजनकत्वेन सिद्धौ तदभावात् घटादावप्येवं पक्षत्वेनासंगतः सिद्धसाधनात् । न च सिद्धिरेव पक्षः, अङ्कुरेव सन्दिग्धानैकान्तात् । न च सिद्धिविपक्षे हेतुसन्देहात् स इति वाच्यं हेतौ साध्याभावव्यभिचारसंशयस्य दूषकत्वात् स च साध्याभाववति हेतुसन्देहात् हेतुमति साध्याभावसन्देहाद्वा उभयथापि दोषः । न चैवं पक्षेऽपि तत्, अनुमानमात्रोच्छेदकत्वेन तदितरत्र तस्य दूषकत्वात् । अङ्कुरे हेतोरनिश्चयेन सन्दिग्धानैकान्तिकं तस्सिद्धयेन साध्यसन्देहवति साध्यानुमितिरेव पक्षवत् सामग्रीसत्त्वात् । अत एवाङ्कुरः पक्षसम इति चेन्न तस्यापक्षत्वेन हेतोः पक्षधर्मताविरहेण स्वार्थानुमानाविषयत्वात् । तदा तस्यापि पक्षत्वे प्रतिज्ञानुपपत्तेः । अत्र मानान्तराधीनतत्साध्यानुमित्यनन्तरञ्च पक्षेऽनुमितावितरेतराश्रयाच्चैकमप्यनुमानम् । तत्रापि जिज्ञासा सन्दिग्धानैकान्तात्, क्षितेर्विवादविषयत्वेऽङ्कुरे साध्यज्ञाने अर्थान्तरञ्च । किञ्चैवमेकैकोपादानाभिज्ञसिद्धावपि नेश्वरसिद्धिः नापि सर्गाद्यकालीनं ह्यदृष्टकं पक्षः परमिति सर्गादिसिद्धेः इति" पक्षान्तरम् । "किञ्च सकर्तृकत्वं ? न तावत् कृतिमत्त्वकृतभावः कृतिमज्जन्यत्वं वा अङ्कुरादिना सिद्धसाधनात् । उपादानगोचरापरोक्षज्ञानविषयीभूतिमज्जन्यत्वं तर्हीति चेत् उपादानगोचरत्वं यदि यत्किञ्चिदुपादानगोचरत्वं तदा अङ्कुरादिनार्थान्तरत्वं ज्ञानादीनामपि जनकत्वं विवक्षितं न च घटोपादानगोचरज्ञानादीनां क्षितिजनकत्वं सम्भवति व्यभिचारादिति चेन्न क्षितिजनकादृष्टजनकज्ञानादीनाम् उपादानविषयनियमेनादृष्टद्वारा तैरेव सिद्धसाधनात् । न च साक्षात्तज्जन्यत्वं विवक्षितं तद्धि न कृतिजन्यत्वाजन्यत्वे सति कृतिजन्यत्वं स्वजनकज्ञानव्यवहितोत्तरक्षणवर्त्तित्वं वा घटदृष्टान्तस्य साध्यधिकरणत्वापत्तेः घटादौ कुलालादिकर्तृकत्वाभावप्रसङ्गात् । न च शरीरक्रियादृष्टान्त इति वाच्यं घटेनानैकान्तात् चेष्टात्वस्योपाधित्वात् । नापि क्षित्यादुपादानगोचरत्वं विवक्षितं अप्रसिद्धेः न चोपादानशब्दस्य समवायिशब्दत्वेन घटक्षित्यादिसमभिव्याहारे तत्तदुपादानगोचरत्वं चैतन्योपाधिवदिति वाच्यं गाढे हि बोधे तथा न चात्र शब्दः प्रमाणं वादिनोऽप्रामाण्यात् । अनुमाने त्वनुगतेन व्याप्यकत्वरूपेण व्यापकसिद्धिः तच्चोपादानत्वमेवेति कथं नार्थान्तरम् । किञ्चैवं घटादावपि तदुपादानत्वेनैवोपस्थित्यासामान्येन रूपेण कुलाद्यनुपस्थितेर्व्याप्तिरेव न सेत्स्यति । अपि च सामान्यलक्षणया ज्ञानजन्यया योगजधर्मरूपया वा प्रत्यासत्त्योपादानगोचरापरोक्षज्ञानतज्जन्यचिकीर्षाकृतिमता ईश्वरादिना सिद्धसाधनम् तेषां नित्यव्यवहितपूर्वक्षणवासत्त्वेऽपि तद्वतः सत्त्वात् अदृष्टद्वारा

तेषामपि जनकत्वसम्भवात् । ज्ञानादिसाक्षात्कार्यत्वस्य निरस्तत्वात् । अथ योगजधर्मजन्यजन्यसविकल्पकजन्य सामान्यलक्षणाप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञान चिकीर्षाकृतिमज्जन्यमिति साध्यम् यद्वा अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यजन्यज्ञानादिमद्जन्यं जन्यम् अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यमिति साध्यम् ज्ञानाव्यवहितोत्तर समयवर्त्तीच्छाव्यवहितोत्तरक्षणवर्त्तिकृतीनां जनकत्वं विवक्षितं न तु ज्ञानादीनां यौगपद्यं पौर्वापर्यं वाऽतो न साध्याप्रसिद्धिरेवं चित्यादौ बाध इति चेन्न योगजधर्मसामान्यज्ञानरूपप्रत्यासत्तीनामनागतगोचरसाक्षात्कारस्य च तज्जनकप्रत्यासत्तीनाञ्च परस्याप्रसिद्धितया तदजन्यस्य साक्षात्कारस्याप्यसिद्धत्वेन पक्षसाध्ययोर्विशेषणाविशिष्टा परं प्रत्याश्रयासिद्धेः साध्याप्रसिद्धेः । तत्सिद्धौ वा पक्षे तदजन्यत्वासिद्धिः क्षितिजनकादृष्टजनकक्षितिचिकीर्षासाक्षात्काराणां योगजधर्मादिजन्यानामदृष्टद्वारा क्षितिजनकत्वेन सिद्धसाधनात् न च तादृशसाक्षात्कारजन्यत्वं विवक्षितं घटादिदृष्टान्ते तदसम्भवात् । दृष्टान्ते घटादौ जनकेऽदृष्टसाधनतायास्तत्रानुमितित्वेन जन्यसविकल्पकव्याप्यिपक्षजन्यत्वेन साध्याप्रसिद्धेश्च । ननु व्याप्यत्वेन साध्यं सिध्यति व्याप्ये यत्र यत्र कार्यत्वं तत्र तत्र तदुपादानाभिन्नकर्तृत्वमितिरूपा न तु यद्यत् कार्यं तत्तत् किञ्चिदुपादानाभिन्नजन्यमिति एवञ्च यत्र कार्यत्वं तत्र तदुपादानाभिन्नजन्यत्वमिति विधिदृष्ट्या क्षित्यादौ कार्यत्वं क्षित्याद्युपादानाभिन्नजन्यत्वमेव साध्यमस्यतो न सिद्धसाधनमितिचेन्न घटे पटे च व्याप्यिपक्षः कार्यत्वस्य किं प्रत्येकं घटोपादानाद्यभिन्नजन्यत्वेन, तत्तदुपादानाभिन्नजन्यत्वेन, उपादानाभिन्नजन्यत्वेन वा आद्ये पटोपादानाभिन्नजन्यत्वादौ कार्यत्वस्य व्यभिचार एव । द्वितीयेऽनुगमः । तत्तच्छब्दाभिधेयघटाद्युपादानगतानुगतरूपाभावात् कथं व्याप्यकताग्रहः । तत्तच्छब्दस्य स्वभावात् समभिव्याहृतपरतया नायं दोष इति चेत् न अनुमानेऽप्यदृष्टस्वभावोपन्यासस्याप्रयोजकत्वात् । अतएवेदानीं देवदत्तोऽधिरूढ इति विद्यमानत्वे सति दृष्टासत्त्वात् विद्यमानत्वे सति योयदा यत्र नास्ति स तदा तदतिरिक्तदेशेऽस्ति यथाऽधिरूढेऽधिरूढत्वं दृष्टे प्रतिभामात्रत्वं पक्षे दृष्टान्तसाधारण्यस्यसत्त्वयोरनुगतयोरभावाद्व्याप्ती किन्तु व्यतिरेकान्यूनत्वम् । तृतीये सिद्धसाधनमेव । अथ सर्गाद्यकालीन द्व्यणुकं ज्ञानेच्छाकृतिसमानकालीनसमवायीजन्यं कार्यत्वात् घटवत् । अदृष्टसमवायीजन्यत्वे ऽदृष्टत्वापत्तिरिति चेन्न परं प्रति सर्गाद्यसिद्धेः ज्ञानादीनां सिद्धावपि द्व्यणुकाजनकत्वात् तदानीमसिद्धावप्रयोजकत्वाच्च । एतेन सर्गाद्यकालीनं द्व्यणुकं द्व्यणुकासमवायिकारणसमकालीनक्रियाजन्यमिति निरस्तं द्व्यणुकासमवायिकारणसमानकालीनक्रियात्वेन गौरवाप्रयोजकाभ्यामजनकत्वात्" बाध्यापत्तिः । "किञ्च कार्यत्वं ? न तावत् योगोपस्थितक्रियाजन्यत्वम् असिद्धेः नापि पूर्वकालासत्त्वे सत्युत्तरकालसम्बन्धः, तत्तत्पूर्वकालस्यानुगतत्वात् सकलपूर्वकालस्याप्रसिद्धेः नापि कादाचित्कत्वं प्रागभावप्रतियोगित्वं ध्वंसेनानैकान्तात् । नापि सत्त्वे सति तत्त्वं सत्ताजातेः परं प्रत्यसिद्धेः स्वरूपसत्त्वस्य च ध्वंसेऽपि सत्त्वात् यत्तु अयं घटः एतद्घटजनकक्षितिज्ञानचिकीर्षाकृतिव्यतिरिक्तज्ञानादिजन्यः कार्यत्वात् घटवदित्यादि तत्र विपक्षे बाधकाभावेनाप्रयोजकत्वात् अन्यथाऽयं घटः एतद्घटजनकक्षित्यादृष्टातिरिक्तक्षित्यादृष्टजन्यः कार्यत्वात् अपरघटवत् । एतत्सुखदुःखसाक्षात्कारौ एतज्जनकक्षित्यसुखदुःखाभ्यौ सुखदुःखसाक्षात्कारत्वादित्यादिना नित्यधर्मसुखदुःखाश्रयस्यापि सिद्धिप्रसङ्गात् । अयं घटः स्वजनकाक्षित्यज्ञानाद्यतिरिक्तक्षित्यज्ञानाद्यजन्यः अपरघटपटादित्वादिना सतूप्रतिपत्त्या । केचित्तु दृश्यते तावदभिमतविषयव्याकृष्टेन्द्रिये मनोनिवेशवतः पुंसोयमनःक्रियानुकूलो यत्नः तथा च सर्गाद्यकालीनशरीरजन्यज्ञानध्यानाधारकालाधारज्ञानजनकात्ममनःसंयोगजनिका मनःक्रिया तन्मनोगोचरप्रयत्नाधारतन्मनोगोचरप्रयत्नतद्ग्राह्येतरसकलकार्याधारकालानन्तरकालाधाराद्य सत्ताका तन्मनःक्रियात्वात् समतन्मनःक्रियावत् अर्थात् प्रयत्नाधारकालानन्तरकालाधारा सा क्रिया सिद्धतीत्याहुः । तत्र सर्गाद्यकाले ज्ञाने जनकमनःसंयोगजनकक्रियायां मानाभावः पूर्वक्रिययैव संयोगसंभवात् । ईश्वरादिनां तन्मनोगोचरप्रयत्नाधारकालोऽप्रसिद्धएव क्रियात्वस्यैव हेतुत्वे व्यर्थविशेषणत्वञ्च । किञ्चैवं प्रयत्नाधारकालानन्तरकालाधारत्वम् अर्थात् तत्सिद्धौ मानान्तरादीश्वरसिद्धावर्थान्तरत्वमिति" हेत्वाभासः । "अत्रोच्यते अदृष्टाद्यारब्धोपादानगोचरजन्यज्ञानजन्यानि समवेतानि जन्यानि, अदृष्टप्रागभावाव्याप्यप्रागभावाप्रतियोग्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि, स्वजनकादृष्टेश्वरोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि वा अपरोक्षज्ञानचिकीर्षाप्रयत्नविषयीभूतोपादानानि

वा समवेतत्वे सति प्रागभावप्रतियोगित्वात् यदेवं तदेवं यथा घटः। तथा चैतानि तस्मात्तथा। उक्तपक्षे कस्यचिदनन्तर्भावेऽपि तदादाय निरुक्तस्य पक्षत्वनिर्देशे समुच्चालम्बनरूपेणानुमितिरुत्पद्यते। न च जन्यत्वजन्यत्वं तावत् अनुगतेऽवे कारणाभावेन यद्दीक्षुमयत्वमिति वाच्यं जन्यत्वजन्यत्वं हि जन्यकृतिजन्यान्यत्वमिति जन्यत्वेन रूपेण सामान्यलक्षणया तावतासुपस्थितेः न च जन्यत्वविशेषणव्यावृत्त्याप्रसिद्धिः प्रमेयो घट इति वदव्यावर्त्तकत्वेनापि तदुपरक्तबुद्धेरुद्देश्यत्वेन तस्योपरक्तकत्वात्। उक्तान्यतमत्वमेव सकर्तृकत्वम् अतएव घटभोक्ता न तत्कर्त्ता व्यवस्थितये एवञ्च यद्दृक्तृकारादीनां पक्षतैव ज्ञानेच्छादीनामपि पक्षत्वात् सन्दिग्धानैकान्तः उपादानस्य सिद्धत्वेऽप्युपादेयस्यासिद्धत्वात्सद्धत्वेन तत्रापि चिकीर्षा। यद्वा पक्षे हेतौ च समवेतत्वं न विशेषणं तेन ध्वंसोऽपि पक्षः साध्ये चोपादानपदं कारणमात्रपरमुपादेयमेव वा जन्येच्छाजन्यत्वञ्च पक्षे विवक्षितं तेन क्षतिध्वंसस्य क्षतिजन्यत्वेऽपीच्छाजन्यत्वाभावात् पक्षत्वम्। क्षितिरेव वा पक्षः न चाहुरे सन्दिग्धानैकान्तिकं पक्षपक्षसमनिरपेक्षत्वेन घटादौ सिषाधयिषाविरहसहकृतसाधकप्रमाणविरहवति लिङ्गज्ञानस्यानुमितिमात्रकारणत्वात्। तच्च क्षितौ पक्षावयवेनाहुरे खत एवेति न किञ्चिदिष्टम्। यदि च क्षितौ हेतुनिश्चयदशायां हेतुसत्तयाऽहुरस्य निश्चयस्तदा क्व सन्दिग्धानैकान्तिकम्? अथ पक्षसमे साध्याभावसामानाधिकरण्यसंशयाद्धेतौ व्याप्तिग्रह एव नोत्पद्यते उत्पन्नोऽपि वा बाध्यत इति चेत्तर्हि मत्कानसे धूमव्याप्तिग्रहो न स्यात् भूतोऽपि वा बाध्येत सन्दिग्धवह्निरूपर्वतावृत्तिधूमवत्तामेकधर्मभावेनोपस्थितत्वात् तस्मात्साध्यसन्देहवति हेतुनिश्चयो न दोषः किन्तु गुणएव। अन्यथानुमानमात्रमुच्छिद्येत। पक्षादन्यत्र दूषणमिति यदुक्तं तत्र पक्षान्यत्वं यदि, तदाऽनपेक्षितानुमितिर्न स्यात्। अथ सन्दिग्धसाध्यान्यत्वं साधकबाधकप्रमाणाभावविषयान्यत्वं वा विवक्षितं तदाऽहुरेऽपि तस्मात्तिष्ठ अथ प्रतीत्याविषयान्यत्वं तदा स्वार्थानुमितिच्छेदः नियतविषयज्ञानाजन्यत्वेन पक्षविशेषणात् सर्वविषयज्ञानसिद्धिः साध्ये च ज्ञानेच्छाप्रयत्नानां विशेषणत्वेन विशिष्टस्य साधनत्वं विवक्षितं तेन न तदोषलक्षितलक्षणेनार्थान्तरं सामान्यतोऽपि साध्यनिर्देशे पक्षधर्मतावलेनाभिमतविशेषसिद्धेः। नन्वादृष्टसाध्यद्वये घटाद्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतीनामेव जनकत्वमायातित्यर्थान्तरम्। न च तेषां व्यभिचारात् क्षित्यादावकारणत्वमिति वाच्यम्। अनादौ प्रवाहे कस्यचित् कदाचित् क्षितिद्व्यणुकादि पूर्वं घटाद्युपादानगोचरज्ञानादिसत्त्वात्। न च सर्गादिकालीनस्यापि पक्षत्वात्तत्रेश्वरसिद्धिः परं प्रति तदसिद्धेरिति चेत् न ज्ञानादीनां त्रयाणां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वावधारणेनैतदनुमानस्य तद्विषयत्वात् अतएवाद्योपादानगोचरापरोक्षज्ञानाद्यजन्यत्वेन पक्षविशेषणमपि न युक्तम्। तृतीयसाध्ये तु नार्थान्तरं क्षित्यादेर्घटाद्युपादानासमवेतत्वात्। ननु सामान्यलक्षणादिप्रत्यासत्त्या क्षित्याद्युपादानगोचरं यत् प्रत्यक्षं तज्जन्यमेवास्तु तथाचेश्वरे न प्रत्यक्षं न वेच्छाप्रयत्नौ तयोः समानाधिकतरज्ञानाविषयेऽसत्त्वात्। न च तादृशप्रत्यासत्त्यजन्यत्वं प्रत्यक्षे विशेषणं, परं प्रत्यसिद्धेरिति चेन्न द्रव्यत्वेन ज्ञानलक्षणया वा कपालगोचरप्रत्यक्षेऽपि घटादावकर्तृत्वात् क्षित्यादौ कर्तृत्वनिर्णायक ज्ञान सिध्यत्तद्विलक्षणमेव सिध्यति न चावयवविभागद्वारा क्षित्यादिप्रकृष्टलक्षणात् सक्तुप्रादिषु कृत्तत्वेपात् परमाणुद्वयसंयोगेन द्व्यणुकेष्वऽऽकाशादिकर्तृकत्वादिसतः सिद्धसाधनमिति वाच्यं तत्र हि क्षितिनाशे कर्तृत्वं न खण्डक्षितौ अवस्थितसंयोगेभ्य एव तदुत्पत्तेः सकलतदुपादानगोचरज्ञानेच्छाकृतीनामभावाच्च अत एव द्व्यणुकेऽपि न कर्तृत्वं जलक्षेत्रादधिकपरिमाणसक्तुप्रादेः सपक्षत्वमेव घटक्षेत्रे। ननु घटे साध्यविकलत्वम् अन्वयव्यतिरेकाभ्यां ज्ञानादेरेव जनकत्वात्, न तु तदाश्रयस्य धर्मिग्राहकस्यान्वयव्यतिरेकस्य वा ग्राहकस्याभावात्। न च घट आत्मजन्य उत्पत्तिमत्त्वात् ज्ञानवदिति वाच्यम् आत्मसमवेतत्वस्योपाधित्वात् घट आकाशजन्य उत्पत्तिमत्त्वात् शब्दवदिति यत् अप्रयोजकत्वाच्चेति चेन्नैवं प्रयत्नवदात्मसंयोगस्येष्टाद्वारा घटहेतुरतः प्रयत्नवानात्मापि हेतुः न चात्मसंयोगे सत्यपि प्रयत्नं विना न चेष्टेति प्रयत्न एव तत्कारणम् असमवायिकारणं विना कार्यानुत्पत्तेः न चात्मसंयोगस्य कारणत्वेऽपि संयोगपरिचायकमात्रमात्मेति वाच्यं संयोगमात्रस्याकारणत्वेन संयोगविशेषितस्य हेतुत्वात्। आत्मसंयोगव्यतिरेकप्रयुक्तक्रियाव्यतिरेकासिद्धेर्नात्मसंयोगः कारणमिति चेन्न या क्रिया व्यधिकरणयदीयगुणजन्या या तत्संयोगासमवायिकारणिका यथा स्पर्शवद्-

द्रव्यसंयोगजक्रियेति तत्सिद्धेः । न च क्रियायामूर्त्तमात्रसमवेतासमवायिकारणत्वनियमः कार्य्यमात्राभिप्रायेण ज्ञानादौ व्यभिचारात् विशेष्याप्रयोजकत्वात् असमवायिकारणसंयोगाश्रयस्य तत्कार्य्यजनकत्वनियमाच्च । अन्ये तु अनुकूलकृतिसमवायित्वं कर्त्तृत्वं न तु जनकत्वे सति, गौरवात् कर्त्तरि कारकव्यवहारस्याभियुक्तानां "अविशेषेण" इतिन्यायेन कृतिपर्य्यवसन्न एव । एवं ज्ञानेच्छाकृतिजन्यत्वमेव साध्यं तदाश्रयत्वमेवेश्वरस्य कर्त्तृत्वम् । अथ घटे कृतिसाध्येऽसाधनताज्ञानं चिकीर्षाद्वारा हेतुः तच्च न प्रत्यक्षं चिकीर्षाविषयेऽनागते इन्द्रियासन्निकर्षात् किन्वनुमितिरूपं तथा च साध्यविकलोदाहरणं साध्यप्रसिद्धिर्वेति चेन्न सिद्धस्यसिद्धविधया हि कृतिः सिद्धविषयप्रत्यक्षे सति भवति न हि स्थूलौदनयजमानां संस्थानविशेषे कृतिसाध्येऽसाधनतारूपकार्यस्य प्रत्यक्षेणोपस्थितिं विना प्रवृत्तिः अतएव यागे यद्दीक्षोपजीविक्रियाद्वारा कृतिसाध्येऽसाधनत्वेऽवगतेऽपि ऋविरादीनां प्रत्यक्षेणानुपस्थितौ न प्रवृत्तिः न चोपादानप्रत्यक्षं प्रवर्त्तकज्ञानोपजीव्यम् अप्रत्यक्षपरमाणौ तत्क्रियायामिष्टसाधनताज्ञानेऽप्यप्रवृत्तेः प्रवृत्तिविषयत्वद्वारेदं प्रत्यक्षत्वाच्च यद्दृष्टकारादिना व्यभिचारः न चाभिमतव्याहतेन्द्रियसंयोगान्नलिप्रयत्नजन्यक्रियाप्रदर्शनाद्व्यभिचारः अदृष्टसहकृतत्वगिन्द्रियेण हि मनोवहनाड्यालम्बनेन तद्गोचरप्रयत्नाद्भ्रामिक्रिया ततः स्वर्गवहनवत्नाड्या लोदनाद्यानयनक्रिया न तु प्रयत्नात् । अतएव जलाद्याध्यवहारमलोत्सर्गहेतुनाड्यालम्बनाद्याध्यासवासनावशादृष्टसहकृतत्वगिन्द्रियेणोपलम्भात् तद्गोचरः प्रयत्नः । नन्वेवं घटादावनुमिते र्जन्यत्वदर्शनादीश्वरेऽनुमितिरेव न सिद्धेत् यथा च प्रत्यक्षेन्द्रियजन्यत्वेऽपि नित्यं तदीश्वरे तथानुमितेर्नित्यं जन्यत्वेऽपि सा तत्र नित्यैव अनित्येनानादिद्वयणुकाद्यजननादिति चेन्न सुखदुःखाभावादिसाधनानुमिते तर्हि घटादौ हेतुत्वं गृहीतं न च तावता ईश्वरोऽदृष्टाभावेन सुखसम्बन्धो न सिद्ध्यादौ तस्यानुमितिर्यथार्थैव सम्भवति न च बाह्यानुमितेरनुभित्यन्तरस्य बाध्यत्वेन घटादौ कृतिविषयप्रत्यक्षत्वं हेतुत्वं गृहीतमतो नेश्वरेऽनुमितिः । नन्वहेतुजन्यकृतिसाध्ये चिकीर्षाविरहाद्व्यभिचारः तद्दृष्टान्तेन सिद्ध्यादौ हेषसाध्यत्वादीश्वरे द्वेषोऽपि स्यात् द्वेषवत्त्वं संसारित्वेन भगवतोऽपि तथा स्यादिति चेन्न हि सर्पादिद्वेषादेव तत्प्रयोजनव्यापारे कृतिरुत्पद्यते प्रयोजनं विना दुःखैकफले प्रेक्षावतां कृतेरनुपपत्तेः किन्तु दुःखसाधनध्वंसं तत्साध्यद्वारत्वात्तदा वा फलसहितस्य तत्साधनतापत्तेः, तथा चेष्टसाधनताज्ञानात्तत्रेच्छयेति सैव कृतिकारणं क्लृप्तत्वात् द्वेषस्तु परम्परया तदुपयोगः, कृतस्तर्हि द्वेषः, यत्नं द्वेषोति अबाधितप्रत्ययात् । न चाद्दष्टकर्तृत्वानुपलब्धिबाधः, अनुपलब्धिमात्रस्य बाधकत्वेऽतीन्द्रियोच्छेदात् योग्यानुपलब्धेरसिद्धेः परात्मनोऽयोग्यत्वनियमात् यथोपलब्धृप्रतिसन्धाने नाहंग्रहमात्रनिरासः परमात्मादिस्वीकारात् नाप्ययोग्यकर्तृकनिरासः चेष्टया ज्ञानादिमत. परात्मनोऽनुमानात् परं प्रति तस्य योग्यत्वात् । नापि द्वेषे पशुत्ववद् प्रयोजकं, कर्तृ कार्य्यमात्रे कारणत्वावधारणात् प्रतिबन्दिमात्रस्यादूषणत्वात् । यथे पशुत्वेनायोग्यद्वेषकृतिसिद्धेः कृतोनेति चेत् अर्थान्तरत्वात् विपक्षे बाधकाभावात् व्याप्यसिद्धेः द्वेषकृतत्वस्य योग्यसंस्थानविशेषव्यङ्ग्यत्वे योग्यस्य विरोधेन यद्धितमयत्नात्वात् यथे द्वेषकृत्यत्नाभाव इति सर्वेषामबाधितप्रत्यक्षबाधितत्वाच्च । अथ कृतिकार्य्यत्वयोर्नान्वयव्यतिरेकाभ्यां व्याप्तिग्रहः तन्नाते व्यापकत्वतेः सत्त्वेन हेतो समये वा कृतिमात्रव्यतिरेकानिरूपणात् नित्यकृतेरन्वयोऽपि दृष्टोतो न वह्निमात्रव्यतिरेकोऽस्ति दृष्टान्ते च । न चैवमाकाशात्मनोरप्यसिद्धिः समवायिमात्रस्य व्यतिरेकानिरूपणेन कार्य्य समवायिकारणजन्यमिति व्याप्तेरसिद्धेरिति वाच्यं समवायिकारणत्वपक्षे हि तत्संसर्गाभावोऽप्रयोजको निमित्तमात्रसाधारण्यात् किन्तु यत्समवायि तत्र कार्य्यं यत्र समवायि तत्र नेत्यन्योन्याभावसादाय कार्य्यं समवायिजन्यमिति व्याप्तिग्रहसम्भवात् । समवायित्वेन तयोरन्योन्याभावोऽस्ति दृष्टान्ते च । यद्वा भावकार्य्यं समवेतमिति व्याप्त्या तयोः सिद्धिरिति यथा हि यद्यद्वह्नेरन्वये धूमोदृष्टोतस्तत्तद्व्यतिरेके धूमव्यतिरेकग्रहात् वह्निधूममात्रयोर्व्याप्त्यैव ग्रहः न तु पर्वतीयवह्नेः अन्वयव्यतिरेकग्रहात् । न चान्वयव्यतिरेकाभ्यामन्यव्याप्तिग्रहेऽतिप्रसङ्गः यद्विशेषयोरन्वयव्यतिरेकग्रहः तत्सामान्ययोर्बोधक विना व्याप्तिग्रहात् स च वह्निधूमव्याप्तिग्रहे उत्पद्यमानः सकलधूमगोचरोधूमत्वपुरस्कारेण प्रसिद्धधूमगोचर एव न भवति । तथे कापि कृतिविशेषजन्यत्वविशेषयोरन्वयव्यतिरेकग्रहो बाधकं विना कृतिकार्य्यत्वमात्रयोर्व्याप्तिग्रह उपायः न तु पक्षधर्मताबलेन अविशेषान्वयव्यतिरेकग्रहः अनुमानमात्रो-

च्छेदप्रसङ्गात्। एतेन "कार्यत्वस्य विपक्षव्यतिरिक्तत्वे सत्ताव्यतेऽतीन्द्रियः कर्त्ता चेद्व्यतिरेकसिद्धिविधुरा व्याप्तिः कथं सिध्यति। दृश्योऽयं व्यतिरेकसिद्धिमनसा कर्त्ता समाधीयते तस्यात्मापि तदा दृश्यादिकमिति व्यर्थं विपक्षेत्यत्यमिति" निरस्तम्। ननु यदि कर्तृमात्रव्यतिरेकप्रहादृश्यकर्तृसिद्धिस्तदा वह्निमात्रव्याप्यधूमादृश्यजठर्यसिद्धिरपि स्यात्, न स्यात् अदृश्यवह्नेर्धूमात्मपपत्तेः दृश्यस्यैव तत्र हेतुत्वात्। ननु ज्ञानेच्छाप्रयत्नत्रयव्यतिरेकात् कार्यव्यतिरेकः किन्तु एकैकव्यतिरेकात् तथा च व्यर्थविशेषणत्वे विशिष्टव्यतिरेको न हेतुव्यतिरेकव्याप्य इति न हेतोर्विशिष्टसिद्धिः साध्याभावव्यापकाभावप्रतियोगिन एव साध्यगमकत्वादिति चेन्न यत एकैकव्यतिरेकात् कार्यव्यतिरेकोऽतएव कार्यत्वादेरेकैकं सिध्यत्त्रयमपि सिध्यति। आर्षस्तु समाजः।

स्यादेतत् अयरीरसर्वज्ञनित्यज्ञानादिमान् कर्त्ता पक्षे विवक्षितः घटादौ च कार्यत्वस्य तद्विपरीतकर्तृसहचारादिदर्शनाद्विशेषविरुद्धत्वमिति न हेतोर्विवक्षितसाध्यविपरीतसहचारमात्रसाद्धूषणत्वात् अन्यथानुमानोच्छेदप्रसङ्गात्। न चानित्यज्ञानासर्वज्ञशरीरकर्तृत्वेन समं कार्यत्वस्य व्याप्तिरस्ति येन तद्विपरीतसाधने विरुद्धं स्यात् तादृशव्याप्तिश्च त्वया मया वा नाङ्गीक्रियते अङ्कुरादौ योग्यानुपलम्भेन शरीरिकर्तृत्वाभावात्। अथ यथादर्शनबलप्रवृत्तव्याप्त्याऽनित्यज्ञानादिमान् कर्तोपनेयः पक्षधर्मतया च नित्यज्ञानादिमान् तथा चोपनेयविशेषयोर्विरोधेन व्याप्तिपक्षधर्मतयोर्विरोधात् परस्परसहकारिताविरहान्नानुमानविशेषविरोधादिति चेन्न अनित्यज्ञानादिकर्तृजन्यत्वेन व्याप्त्यभावात् ज्ञानादिमत्कर्तृजन्यत्वव्याप्तेः पक्षधर्मतावलेभ्यविशेषाविरोधात् केवलाया व्याप्तेश्च पक्षधर्मतायाश्च पृथगनुमानायकत्वाभावाच्च एकवैयर्थ्यप्रसङ्गाच्च तथा च निरपेक्षतायां विशेषानुपस्थापनादेव न विरोधज्ञानं सापेक्षतादशायाञ्च सहोपलम्भादेव विरोधप्रतियोगिनोः सिद्धसिद्धित्वाभ्यां विरोधभावज्ञानाभावाच्च। सिद्धविशेषेण साध्यविशेषेण च एव विरोधे न विशेषविरोधः यथा चन्दनप्रभवत्वह्रदप्रभवत्वयोः। ननु ज्ञानत्वनित्यत्वयोः कर्तृताशरीरितृत्वोश्च परस्परविरुद्धत्वेन एकधर्म्यसमावेशात् कथं नित्यज्ञानादिकर्तृसिद्धिः, न उपसंहारस्यानाभावात्। तथाहीश्वरे तद्बुद्धौ चाशरीरितृकर्तृबुद्धित्वे च उपसंहियमाणे विरुद्धे, न तु स्वाश्रयस्थिते उभयोच्छेदप्रसङ्गात्, न चेश्वरस्तद्बुद्धिर्वा स्थिता उपस्थितौ वा धर्मिग्राहकमानेन तयोर्विरोधाप्रहारात् अनुपस्थिते च तयोर्विरोधज्ञानमकिञ्चित्करमेव अन्यादादिबुद्धौ व्योमादौ कुविन्दे शुक्लात्मनि च उपस्थिते विरोधोपसंहारात्, बुद्धित्वतृत्वयोः कर्तृत्वाशरीरित्वयोरनधिगतेऽपि ईश्वरेऽशरीरिकर्तृत्वनित्यज्ञानादिसिद्धिरप्रत्यूहैव। अतएव नित्यतृत्ववत्तृयोर्विरोधज्ञानमकिञ्चित्करमेवेति परमाणुसिद्धिः। ईश्वरतद्बुद्ध्यादिकं तर्कितमिति चेन्न तर्कस्य प्रसङ्गनस्य संशयस्य वाऽज्ञानेऽन्तर्भावात्। स्यादेतत् घटादौ कृतिसाध्यता कृत्यादिव्यापारादिद्वारैव ननु साक्षात्, न च पितापुत्रयोरेकघटसाधकत्वमिव प्रयत्नकृत्यादिव्यापारयोः साधकत्वं वाच्यं घटार्थं कृत्यव्यापारादिना व्याप्रियमाणे कुलालसमीपदेशस्थस्य कृत्यादिव्यापारशून्यस्य तद्घटकर्तृत्वापत्तेः न च कृत्यादिव्यापारवत्ताऽशरीरस्य सम्भवति अन्यादृशी च कृतिसाध्यता न दृष्टा, शरीरतद्व्यापारौ चाङ्कुरे बाधिताविति कर्तुरपि बाधः। अन्यथा तदनुमानात् क्षेत्रज्ञ एव कर्त्ता क्षितौ च अनुमीयते बुद्ध्यादिमत्परमाणुयोग्यानुपलब्धिबाधाभावात् शरीरव्यापारद्वारैव क्षेत्रज्ञस्य हेतुत्वात् शरीरव्यापारस्य चाङ्कुरे बाधात् बाधितइति चेत्तर्हि कर्त्तृमात्रस्यापि तद्द्वारैव चेष्टेतरकार्यकर्तृत्वदर्शनात् तत्रापि कर्तृमात्रे बाधोऽपि। एवञ्च कृतिसाध्यत्वे शरीरव्यापारजन्यत्वं प्रयोजकमिति सएवोपाधिः। एवं ज्ञानेच्छयोरपीच्छाकृतिद्वारा जनकत्वमिति कथं द्वारं विना क्षित्यादौ जनकत्वमिति। उच्यते। जन्यमात्रे कृत्यादिजनकत्वेन न जनकत्वं चेष्टायां क्षित्यादौ च व्यभिचारात् घटादौ च तथा जनकत्वमिति जन्यमात्रे कृतिमात्रस्य जनकत्वविरोधिविशेषयोर्जन्यजनकभावे बाधकं विना सामान्ययोरपि तथाभावनियमात्। न हि विशेषे विशेषप्रयोजकत्वेन सामान्यप्रयोजकत्वविरोधः। चेष्टेतरकार्ये शरीरद्वारैव कृतेर्हेतुत्वात् तेन विना क्षित्यादौ न कृतिसाध्यत्वमिति चेत् चेष्टेतरकार्यमात्रे शरीरव्यापारकृतित्वेन जनकत्वे क्षित्यादौ व्यभिचारात्। किन्तु तद्विशेषघटादौ कृत्यकृत्वात्। न चैवमाममवातजङ्गीलतकलेवरस्य प्रयत्नादेव घटोत्पत्तिः स्यात् कृत्यादिव्यापारं विनैव कृतेर्हेतुत्वादिति वाच्यं घटे कृतौ कृत्यादिव्यापारस्यापि हेतुत्वात्। यदुक्तं क्षेत्रज्ञ एव कृतेरानुमीयत इति तत्र कृत्यादिव्यापारकृतिमान् यदि क्षेत्रज्ञोऽभिमतः तदा कृत्यादिव्यापारस्याङ्कुरे योग्यानुपलब्धिबाधात् अथ कृत्यादिव्यापाररहितकृतिमानभिमतस्तदोच्यते स एव

भगवानीश्वरः । अतएव सद्भावनिरूपकत्वे नियतपूर्ववर्त्तित्वं कारणत्वं समवायसमवायिनोस्तथात्वेन निमित्तेऽपि तथाभावात् अन्यथा प्रतिबन्धकाभावान्नन्तरं प्रतिबन्धकसत्त्वे कार्य्यं स्यात् प्रतिबन्धकाभावस्य पूर्वं सत्त्वात् न च कृतेः सद्भावनिरूपकत्वं स्वतः कार्य्यसमयेऽभावात् तथा चैतत्परिचायितव्यापारद्वारा तस्याः सद्भावनिरूपकत्वमतः शरीरव्यापारद्वारैव कृतेर्जनकत्वं न केवलायाः इत्यपास्तम् समवायसमवायिप्रतिबन्धकाभावानामविनष्टस्वरूपत्वेन कारणत्वात् तथैवान्वयव्यतिरेकात् तेन तेषामभावे विनाशत्वे च कार्य्यम्, अन्यथा प्रतिबन्धि कार्य्यसद्भावनिरूपणे कार्य्योत्पत्तेः प्राक्सद्भावस्य निरूपयितुमशक्यत्वात् कारणत्वानिश्चये क्वापि प्रवृत्तिर्न स्यादिति, तज्जातीयत्वस्यावश्यवाच्यत्वे विनष्टत्वस्य कथं सद्भावेनापि व्यवच्छेद्यम् अतः स्वरूपयोग्यतारूपा कारणता तत्रापि, कार्य्याभावस्तु सद्भावरिरहात् अन्यथा निमित्तानां प्रत्येकं कार्यसद्भावनिरूपकत्वेन जनकत्वे गौरवं प्रागभावस्य प्रतियोग्यजनकत्वप्रसङ्गात् अन्यथा उत्पन्नोऽपि पुनरुत्पद्येत सामग्रीसत्त्वात् । न च स एव तत्र प्रतिबन्धकः अभावान्तरस्याकारणत्वेन तत्र कारणीभूताभाव प्रतियोगित्वरूपस्य प्रतिबन्धकत्वस्य प्रागभावकारणत्व एव विश्रामात् । न चैकसामग्री एकदा एकमेव कार्य्यं जनयति स्वभावादिति वाच्यं सामग्रीतद्विरहस्य कार्य्यतदभाव प्रयोजकत्वेन सामग्र्यां सत्यां कार्य्यस्य, तदभावे सामग्रीविरहस्य कार्य्याभावस्य वज्रलेपायितत्वात् । स्यादेतत् कर्त्ता शरीर्य्येव ज्ञानमनित्यमेव बुद्धिरिच्छाहारैव कृतिहारैवेच्छा हेतुरित्यादि प्राथमिकप्रामाण्यविरोधात् नाशरीरत्वनित्यज्ञानादिकर्त्तृसिद्धिः । अतएव शरीरमनित्यमेवेति नियमाच्च कर्त्तृत्वेन नित्यातीन्द्रियशरीरसिद्धिरीश्वरे । न चाप्रयोजकं निरुपाधित्वेन शङ्काकलङ्कानवतारात् कार्य्यत्वसकर्त्तृकत्वयोर्यदि निरुपाधिकत्वमस्ति तदापि तुल्यबलत्वेन सत्प्रतिपक्षात् तत्प्रतिबन्धोऽस्तु । न च कार्य्यत्वं पक्षधर्म्मतासत्त्वाद्बोधकः कर्त्ता शरीर्य्येत्यादौ तत्राक्षीति वाच्यं ज्ञानमनित्यमेवेति व्याप्तेरेव ज्ञानजन्यत्वविरोधित्वात् एवं कार्य्यं ज्ञानजन्यं ज्ञानमनित्यमेवेत्यनयोर्विरोध एव अविरोधे तु ह्ययमपि स्यात् तथा च नित्यादौ शरीर्य्यं नित्यज्ञान पर्य्यवसाने विरोध एव स्यात् । किञ्च ज्ञानमनित्यमेवेत्यादौ नित्यज्ञानादेरप्रसिद्धेः तद्व्यावर्त्तकतया नोपाधिनिश्चयस्तत्संशयो वा कार्य्यत्वसकर्त्तृकत्वव्याप्तिग्रहायां शरीरव्यापारव्यभिचारात् उपाधेर्निश्चयः संशयोवाक्षीतितत्र ज्ञानमनित्यमेवेत्यादिव्याप्तेरसिद्धेः विपक्षे बाधकाभावेनाप्रयोजकत्वात् निरुपाधिसकृच्चारदर्शनव्यभिचारादर्शनादेव व्याप्तिग्रहः । निरुपाधित्वमेव विपक्षे बाधकमिति चेन्न अवयवोपहानेन तेज उद्भूतरूपमेवेत्यादि व्याप्तिग्रहात् परमाणुनेत्यादेरसिद्धिप्रसङ्गः । अतएव चाक्षुषत्वे अनेकद्रव्यवत्त्वस्य, साक्षात्कारे विषयेन्द्रियसन्निकर्षस्य हेतुत्वात् तन्मूलकविपक्षबाधकेन परमाण्वादिसाधकस्य बलवत्त्वात् परमाण्वादिसिद्धौ विरोधिव्याप्तेर्बाधः न तु वैपरीत्यं विपक्षे बाधकाभावेन तस्याबलवत्त्वादिति मन्यसे तर्हि ज्ञानादिकार्य्यकारणभावधारणात् तन्मूलकविपक्षबाधकेन निष्कलङ्कव्याप्तिग्रहात् पक्षधर्म्मतायाश्चरितार्थत्वात् ज्ञानादिसिद्धौ व्यभिचाराच्च व्याप्तिः । अन्यथा साध्यं पक्षातिरिक्त एवेत्यादि निरुपाधिसकृच्चाराद्व्याप्तिग्रहवत्त्वात् सकलानुमानोच्छेदः । वयन्तु ब्रूमः । पक्षधर्म्मतावलाच्चित्यं ज्ञानं सिध्यतु बुद्धिरनित्यैवेति व्याप्तिप्रत्यक्षेण न प्रतिबध्यतेऽस्मदादिबुद्धिविषयकत्वेन भिन्नविषयकत्वात् एकविषयविरोधिज्ञानस्यैव प्रतिबन्धकत्वात् नित्यत्वानित्यत्वयोरेकजातीये द्वये ऽविरोधात् । बुद्धिमात्रेऽनित्यत्वावगमात् कथं तद्विशेषनित्यत्वबुद्धिरिति चेन्न बुद्धिमात्रेश्वरानीश्वरबुद्धिपरत्वे विरोधात् व्याभिचाराच्च अस्मदादिबुद्धिपरत्वे च भिन्नविषयत्वेनाप्रतिबन्धकत्वात् । बुद्धित्वं नित्यावृत्त्यैवास्मदगतमतस्तत्र कथं नित्यवृत्तित्वावगम इति चेन्न उभयसिद्धनित्यावृत्तित्वावगतौ विरोधाभावात् । बुद्धित्वमनित्यत्वव्याप्यमवगतं नाभित्यत्वाभाववति ज्ञातव्यमिति चेत् अनित्यत्वव्याप्यमनित्यमात्रवृत्तित्वं तत्र चोक्तमेव । एतेन कर्त्ता शरीर्य्येत्यादापि ज्ञानं प्रतिबन्धकमिति निरस्तम् । नन्वेवं कर्त्रन्यत्वे अन्यत्वं नावच्छेदकं किन्तु घटत्वादिकमेव तेनैव रूपेणान्वयव्यतिरेकात् स्वावच्छेदकत्वाच्च अननुगतमपि जन्यतावच्छेदकं वह्निजन्यतायां धूमत्वादिवत् । अथ घटत्वादिवज्जन्यत्वमवच्छेदकं न हि विशेषोऽस्तीति सामान्यमप्रयोजकं तथा च वह्निजन्यत्वे धूमविशेषः प्रयोज्योऽस्तीति न धूमसामान्यमग्निं गमयेत् रूपादिहिंशेषयोः कार्य्यकारणभावः तत्सामान्ययोरपि बाधं विना तथात्वनियमः । न तत्र बाधकाभावात् अत्र ज्ञानमनित्यमेवेत्यादि प्राथमिकबलव्याप्तौ बाधात् तुच्छत्वेन व्याप्तिसंशयाधायकत्वात् । न च कार्य्यकारणभाव मूलकत्वेन कार्य्यत्वव्याप्तिर्बलीयसीति वाच्यं विरोधिग्राहकेण कारणाभावस्यैवासिद्धेः । एतेन धूमादौ वह्नित्वं जन

तावच्छेदकमनुगतं सम्भवतीति चेन्न जन्यत्वमनुगतमस्ततो बाधकं विना न सिध्यति इति, निरस्तम्। ज्ञानमनित्यमेवेत्यादिसङ्कोचावसाय्यस्य बाधकं विना पक्षधर्म्मव्याप्तिपर्य्यवसायितत्वेन बाधकत्वादिति चेवम् निरुपाधित्वेन सङ्कोचावसाय्यस्य साधकं बाधकं च विना साधारण्ये व्याप्तिसंशयाधायकत्वात्। अन्यथा साध्यं पक्षातिरिक्त एव स्यात् दुःखभिन्नमेवेत्यादि व्याप्यस्य कार्य्यकारणभावग्राहकबाधकत्वे तत्संशायकत्वे वा कारणानुमानोच्छेदप्रसङ्गो जागर्त्तीयात्। तस्माद्द्वित्वयोः कार्य्यकारणभावस्तत्सामान्ययोः कार्य्यकारणभावो बलवता बाधकेनापनीयते, न चात्र तदस्ति विरोधिव्याप्तिग्राहकस्य विपक्षबाधकस्याभावात्। नन्यास्तु कार्य्यं कर्त्तृजन्यमिति व्याप्तेरीश्वरनित्यज्ञानकर्त्तृपक्षितौ ज्ञानमनित्यमेवेत्यनेन विरोधप्रतिसन्धाने न तु तां विना प्रतियोग्यनुपस्थितौ विरोधोऽनिरूपणात्तथा चोपजीव्यबाधात् ज्ञानमनित्यमेवेति व्याप्तिज्ञानमकिञ्चित्करमेव। अतएव पक्षधर्मतादिविरहात् विरोधिव्याप्तिज्ञानं न हेत्वाभासतयोक्तं विरोधिप्रतियोगिसिद्ध्यसिद्धिपराहतत्वादिति

स्यादेतत् अस्तु शरीरजन्यत्वमुपाधिः न च पक्षेतरवृत्तिविपक्षबाधावच्छेदकविशेषणत्वात् साधनविशेषितत्वात् साधनतावच्छेदकसम्बन्धेन साध्यव्यापकत्वनिश्चयाच्च नोपाधित्वं, चेष्टेतरकार्य्येषु शरीरव्यापारद्वारैव कर्त्तुः कारणत्वात् न हि शरीरविरहितः कर्त्ता शरीरक्रियां घटादिकं वा जनयति। न च यत्कृतं यज्जनकम् तेन विना तज्जनकम् अतोऽस्मात्करीरान्यमेव कर्त्तृजन्यमिति साध्यव्यापकत्वनिश्चयात्। पक्षेतरवादी च विपक्षबाधकाभावान्न साध्यव्यापकतानिश्चय इति तेषामनुपाधित्वे बीजम्। अत एव बाधोद्धारेण यद्धूमवत्त्वे यद्धूमत्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभवत्वस्य रसवत्त्वेन गन्धवत्त्वे साध्ये पृथिवीत्वमुपाधिः विपक्षबाधकैरेतयोः साध्यव्यापकत्वनिश्चयात्। न च साधनविशेषितत्वमपि, जन्यत्वं प्रागभावप्रतियोगित्वं शरीरजन्यत्वञ्च शरीरकारणत्वमन्यानिरूढेः इतरपटसमभिव्याहारेण जन्यपटादितन्तुकारणकत्वेव प्रतीतिस्तदर्थत्वकल्पनादिति विधौ वक्ष्यते। अतएव शरीरिकर्त्तृत्वमुपाधिः शरीरसङ्कल्पस्यैव कर्त्तुः कारणत्वात् व्याप्यव्यापकभावोऽनिवेशयत एव प्रमाणस्य व्याप्तिग्राहकत्वात्। शरीरिकर्त्तृत्वकर्त्तृत्वयोर्न व्याप्तिग्रह इति चेन्न विशिष्टाविशिष्टभेदेन व्याप्यव्यापकभावाविरोधात्। अत एव जन्यत्वे कारणजन्यत्वमनुमीयत इति, नैवं कर्त्तर्हि शरीरसङ्कल्पिता किं घटादौ कर्त्तव्ये कार्य्यमात्रे वा स्वकार्य्ये वा आद्ये कर्त्ता शरीरं विना घटादिकं न करोतीति किमायातं कर्त्तुः कार्य्यमात्रकरणे। द्वितीये च कार्य्यमात्रं कर्त्तृजन्यमिति न त्वया स्वीक्रियते स्वीकारे वा शरीराजन्यमपि कार्य्यं कर्त्तृजन्यमिति साध्याव्यापकत्वम्। तृतीये तु न स्वजन्यत्वं स्वजन्यतावच्छेदकमात्माश्रयात्। तथापि यत्र कर्त्तृत्वमस्ति तत्र शरीरजन्यत्वमावश्यकमिति तस्य साध्यव्यापकत्वं तुल्ययोगक्षेमत्वेन हेत्वव्याप्तासंशयाधायकत्वेन सन्दिग्धोपाधित्वं मेति चेन्न साधनेन बाधकं विना कर्त्तृजन्यत्वे सति जन्यत्वमवच्छेदकं न तु शरीरजन्यत्वं गौरवात् तथा च शरीरजन्यत्वं न सकर्त्तृकत्वव्यापकं घटादौ स्वार्थसमाजात्, घटत्वेन शरीरजन्यत्वनियमात् न तु व्यापकत्वप्रयुक्तं मानाभावात्, शरीरजन्यत्वं न सकर्त्तृकत्वव्यापकं तद्व्याप्यजन्यत्वाव्यापकत्वात् नित्यत्ववदिति बाधकात् कुलालादिनापि कर्त्तृत्वनिर्वाहेण शरीरस्याप्रयोजकत्वात् साक्षात्प्रयत्ननिष्ठे यजन्यत्वस्य साधनव्यापकत्वाच्च। शरीरिकर्त्तृकत्वमपि नोपाधिः जन्यमात्रे कर्त्तुः शरीरसङ्कल्पितायाविरहात्। अथ यद्विशेषयोः कार्य्यकारणभावस्तत्सामान्ययोरपि बाधकं विना तथा नियम इति त्वया निरूप्यते तथा च कर्त्तृविशेषशरीरजन्यविशेषयोः कार्य्यकारणभावनियमात् कर्त्तृसामान्यशरीरजन्यमात्रयोरपि तथाभावः तथा च शरीरजन्यत्वं कर्त्तृतावच्छेदकमिति ध्वस्तोपाधिः। नचैवं घटत्वेश्वरजन्यत्वं सकर्त्तृकत्वव्याप्यं न व्यापकमपीति वाच्यं उभयसिद्धसकलसकर्त्तृवृत्तित्वेन साध्यव्यापकतानिर्णयात् जन्यत्वेऽपि सकर्त्तृकत्वव्यापकत्वग्राहकमस्तीति चेत्तर्हि उभयत्र व्याप्तिग्राहके विनिगमकाभावात् व्याप्तिसंशयाधायकत्वेन सन्दिग्ध उपाधिर्व्यधायीति वा। हेत्वव्याप्तासंशयाधायक एव सन्दिग्धोपाधिः न च साध्यव्यापकत्वे साधनाव्यापकत्वे वा, उभयथैवासन्देहात्। न च वाच्यं शरीरजन्यत्वयोरन्वयव्यतिरेकज्ञाने अन्यतरकर्त्तृकत्वयोस्तदभावे व्यभिचारे इति न्यायात् तयोरेव व्याप्तिग्रहो न तूपाधिसाध्ययोः हेतुसाध्ययोरन्वयव्यतिरेकज्ञानात् शरीरजन्यत्वानवगमेऽपि भवतीति विनिगमकमस्तीति, यतो न कर्त्तृमात्रजन्यमात्रयोरन्वयव्यतिरेकाभ्यां व्याप्तिग्रहः कर्त्तृमात्रस्य व्यतिरेकाभावात्। किन्तु विशेषयोरन्वयव्यतिरेकेण कार्य्यकारणभावेन वा सामान्ययोस्तदभावेऽपि च तुल्यावे-

नेति चेदुच्यते । अस्तु तावत् घटत्ववत् जन्यत्वशरीरजन्यत्वयोरपि कर्तृजन्यतावच्छेदकत्वेन सकर्तृकत्वव्याप्यत्वं व्याकृतसमानत्वात् विनिगमनाभावाद्विरोधाभावाच्च सकर्तृकत्वव्यापकत्वन्तु शरीरजन्यत्वस्य कृतः, घटत्ववद्व्यापकस्यापि जन्यतावच्छेदकत्वात् । उभयसिद्धसकर्तृकोऽन्वयव्यतिरेकाभ्यां शरीरजन्यत्वस्य व्यापकत्वमस्तु इति चेन्न शरीरजन्यत्वविनिवेशात्मेन तुल्यन्यायेन प्रथमं कर्तृजन्यत्वे जन्यत्वमवच्छेदकं लक्ष्यमिति तद्विरोधेन शरीरजन्यत्वस्य सकर्तृकत्वव्यापकत्वानवगमात्। अतएव न संदिग्धोपाधित्वम्। ननु घटादौ शरीरजन्यत्वे कर्तृजन्यत्वमनुगतमवच्छेदकं बाधकाभावात् न च लाघवाद्घटत्वाटिकमेव तथा, कर्तृजन्यत्वेऽपि जन्यत्वस्यातथात्वापत्तेः । एवं शरीरजन्यत्वस्य व्याप्यं सकर्तृकत्वं वह्नेर्धूमवत्त्वेति भवत्पक्षाधिकः । किञ्च कर्तृजन्यत्वे जन्यत्वं शरीरजन्यत्वे वा सकर्तृकत्वमवच्छेदकमिति संशयेऽपि न क्षतिः साध्यव्याप्यतानिश्चय इति चेत्तर्हि घटादौ कर्तृजन्यत्वे गृहीते तस्य शरीरावच्छेदकत्वं गृहीतव्यं घटे च घटत्वस्यजन्यत्वमपि बाधकं विना कर्तृजन्यतावच्छेदकं गृहीतमतोऽजन्यभावे कर्तृजन्यत्वात् शरीरजन्यत्वे तदवच्छेदकं प्रथमगृहीतोपजीव्यविरोधात् । अतएव न तस्य क्षतिः व्याप्तिसंशयाधायकत्वमपि । एतेनानणुत्वसक्रियत्वद्रव्यत्वान्यतादय उपाधयोऽपि निरस्ताः जन्यत्वस्य साध्यव्याप्यत्वेन तेषां साध्याव्यापकत्वात् । तथापि नित्यादिकं न कर्तृजन्यं शरीराजन्यत्वात् श्यामवदिति सत्प्रतिपक्षोऽस्त्विति चेत न अस्य प्रसिद्धकर्तृजन्यत्वाभावविषयकत्वात् अप्रतीतप्रतियोगिकस्याभावस्य निरूपयितुमशक्यत्वात् स्थापनानुमानस्य पक्षधर्मतावलात् प्रसिद्धकर्तृभिन्नकर्तृकत्वसाधकप्रतीतिभिन्नविषयकत्वात्र प्रतिबध्यप्रतिबन्धकभावः । अतएव तद्व्यापकरहितत्वादिकमभावसाधकं बाधकमपास्तं तस्य प्रसिद्धाभावविषयकत्वेनाप्रसिद्धाभावाविषयकत्वात् । व्यक्तिसाधकस्य विशेषतोऽप्रसिद्धव्यक्तिसाधकत्वनियमात् अन्यथानुमानवैयर्थ्यात् । कर्तृजन्यत्वमनुगतं घटादौ प्रसिद्धं यत् साध्यं तदभावो मया साध्यत इति चेत् कर्तृजन्यत्वमनुगतमपि पक्षधर्मतावलेन प्रसिद्धं कर्त्तारमादाय पर्यवस्यति तदभावस्तु प्रसिद्धस्य कर्त्तुरभावमादाय सिद्ध्यति नाप्रसिद्धस्य अनुगतस्यापि कर्तृजन्यत्वस्य तदभावस्य च, कर्तृव्यक्तिघटितत्वात् अन्यथा व्यक्तितदभावासिद्धिप्रसङ्गात् । अथैवं सत्प्रतिपक्षोच्छेदः तस्य नोत्पाद्यैकाभावाभावविषयकत्वात् । एतेन ज्ञानत्वं न नित्यावृत्ति ज्ञानमात्रवृत्तिधर्मत्वात् गतिमत्त्ववत्, ज्ञानं न नित्यगुणवृत्तिगुणत्वव्याप्यजातियोगि चेतनविशेषगुणत्वात् सुखवत् "आत्मा न नित्यविशेषगुणाधारवृत्तिद्रव्यत्वापरजातिमान् विभुत्वात् गगनवदित्यादयोऽपास्ताः, प्रसिद्धनित्ये व्योमादौ प्रसिद्धायाश्च रूपत्वलक्षणत्वादिजातेर्वैयर्थ्यप्रतिरेकविषयत्वात् अप्रयोजकत्वाच्च । किञ्च नित्यादौ शरीराजन्यत्वमसिद्धम् अदृष्टद्वारा तज्जन्यत्वात् नचादृष्टद्वारकजन्यज्ञानाजन्यत्वं हेतुः ज्ञाने जन्यत्वविशेषणस्यावैयर्थ्यकतया व्यर्थत्वात् । न च स्थापनायां पक्षविशेषणेऽप्येष दोषः प्रमेयोघट इतिवत्तदुपरक्तबुद्धेरहेयत्वात् अपि च शरीराजन्यत्वे वैयर्थ्यविशेषणत्वं लाघवेनाजन्यत्वस्यैव व्याप्यत्वात् । न च निष्प्रयोजनविशेषणमसिद्धं व्याप्रियमाणेऽप्युक्तविशेषणवत्, पक्षधर्मतौपयिकविशेषणस्यापि सप्रयोजनत्वात् व्यभिचारवारकस्यापि साध्यकत्वे ऽनुमितिप्रयोजकत्वस्यैव बीजत्वात् । व्यभिचारवारकविशेषणत्वेव व्याप्रियमाणे इति चेत् न निर्विशेषणेऽपि गोत्वादौ व्याप्रियमाणात् । तत्रापि व्यक्तिविशिष्टव्याप्रियमाणे इति चेन्न स्वतोव्यावृत्तगोत्वस्यावृत्तिव्यभिचारात् अन्यथानुमानाश्रयात् । अपि च व्यभिचारवारकविशेषणस्यैव व्याप्रियमाणेऽनुमित्यप्रयोजकं सहचारदर्शनादिसत्त्वे तद्भावेन व्याप्रियमाणत्वात् । व्यभिचारवारकविशेषणमूलमेव व्याप्रियमाणे इति चेन्न प्रमेयत्वेन हेत्वयमानेधूमे व्याप्रियमाणात् । अथ तत्तोपात्तव्यभिचारवारकविशेषणत्वं विवक्षितं न च तत्र प्रमेयत्वं विशेषणमुपात्तमिति चेन्न विरोधात् न हि तत्तोपात्तं तेन न्यूनमिति संभवति। यद्विषयकत्वेन परामर्शः कारणमनुमितौ तल्लिङ्गं प्रकृते च व्यभिचारादनन्यथासिद्धेश्च न विशेषणविषयकत्वेन तत्त्वमिति चेन्न धूमस्याप्यत्वापत्तेः व्यभिचारासङ्गिविषयत्वेनानुमित्यकारणत्वात् । अथैकमवच्छेदकमपरत्र व्याप्तिः तद्वा लाघवेन व्याप्तज्ञप्तिरेवेति व्यर्थविशेषणं व्याप्तिर्वा तत्र विशेष्यतावच्छेदकस्य व्याप्यत्वावच्छेदकत्वं विशेषणस्य तदवच्छेदकत्वमिति नियमात् । एकवृत्तित्वबाधे सत्येव व्याप्तज्ञप्तिरित्यपि व्याप्तिश्च न शरीरजन्यत्वाभावे नीलधूमादौ च व्याप्तिरिति विशेषणमात्रे सा, तथा च स्वरूपासिद्धिः । तद्वारणार्थं विशेषणाभिधाने व्याप्यत्वासिद्धिरिति चेन्न अव्यभिचारस्यानौपाधिकत्वस्य वा विशिष्टे नीलधूमादौ लक्ष्येण तद्व्यतिरेकसाधने बाधात् । न च विशेष्यत्वमुपाधिः साधनव्यापकत्वात्। किञ्च शरीरभ-

विशेषवह्नीरहितमिदं चन्दनप्रभववह्निरहितत्वात् निर्धू-मोऽयमारेचनप्रभववह्निरहितत्वादित्यादावपि विशेषा-भावेन कार्यविशेषानुमानं न स्यात् वह्निरहितत्वादि-रूपोपाधिर्भवेत् वह्यतिरेकिण्यद्रव्यवह्यतिरिक्तद्रव्यानाश्रि-तत्वं हेत्वभावव्याप्यं न स्यात् द्रव्यानाश्रितत्वस्यैव वह्याप्यत्वात् स्वमध्ये गन्धस्यैव वह्निकत्वादित्यादौ त्वया-प्यसिद्धिवारकविशेषणस्वीकारात्। अपि च गौरवेण विशिष्टस्य व्यापकतापि न स्यात् तथा च स्थापनानु-माने उपादानगोचरापरोक्षज्ञानचिकीर्षाविरहितमज्ञत्वात्। धूमेनार्द्रेन्धनप्रभववह्निर्घटत्वेन शरीरजन्यत्वमपि नानुमी-येत। यत्तु जन्यज्ञानजनकाभावामेत्यया शरीरजन्यज्ञानजो-न्यज्ञानाभावस्यात्यन्ताभावस्यैव व्याप्यत्वमिति विपरीतमेव लाघवमिति तन्न विरोधाभावेन कल्पनामात्रस्य च व्याप्यत्वात् स्नेहे शीतस्पर्शपत्त्वजलत्वयोर्गन्धाभावेऽपृथिवीत्वपृथिवी-त्वाभावयोरिव। अन्यथा नीलधूमस्यैव व्याप्यत्वे धूम-मात्रस्याव्याप्यत्वप्रसङ्गः किञ्च तत्रापि कल्पनजोन्या-भावामेत्यया जन्यत्वात्यन्ताभावस्यैव व्याप्यता स्यात् एक-त्वात् प्रमेयत्वादेरनन्तधर्मवद्विशिष्टे व्याप्तावपि प्रयोजनाभा-वान्नानुमाने तदुपन्यासः। अथ लाघवेन जन्यत्वस्य बी-जोपस्थितिकतया जन्यत्वाभावत्वेन बीजं व्याप्यमुक्तः न तु शरीरजन्यत्वाभावत्वेन विलम्बितप्रतीतिकत्वात्। यत्र विशेषणविशेष्यान्यतराभाववति साध्यं तत्र विशिष्टाभाव-स्यापि व्याप्तिरिति चेन्न एवं सति उत्पत्तिमत्त्वे सति सत्त्वादिकमनित्यत्वं सकर्तृकत्वव्याप्यतया न निर्णे-ष्यते बीजोपस्थितिकतया घटत्वादेरेव तथात्वात्। यदि च सामान्यविशेषभावाविरोधाभावेन नोभयस्यापि व्याप्यत्वं तदा शरीराजन्यत्वजन्यत्वाभावयोरपि तुल्यम्॥ किञ्च शरीरं जन्यत्वं विशिष्टबुद्धावपि विशिनष्टि न तु साक्षात्, तथा च शरीरजन्यत्वाभावोऽखण्ड एव हेतुरतो न वार्थ विशेषणता। न चात्र विशिष्टाभावो विशेष्याभावएव क्षि-त्यादावजन्यतापत्तेः। अतएव स्थापनायां शरीरजन्यत्व-सोपाधिः साध्याभाववद्व्याप्याभावप्रतियोगित्वेन साध्यव्याप-कत्वनियमात्। वार्थविशेषणेऽधिकं निष्कृष्याजमिति चेन्न हेतुद्वयोपन्यासे ह्यधिकम्। अत्र तु विशिष्टमेव हेतुरिति विरुद्धस्य उक्तमिति।

उच्यते। नीलधूमादौ वह्निरप्यर्थ एव अन्यथा विशेषा-णमव्याप्यत्वे निराश्रयो वह्निः स्यात् नीलत्वमपि न व्या-प्यतावच्छेदकं गौरवात् किन्तु धूमत्वमेव दण्डत्वेन कारणत्वे रूपमिव धूमत्वञ्च न नीलत्वे किन्तु तदाश्रये धूमे इति न नीलधूमस्य हेतुत्वम् नीलधूमे नीलस्य विशेषणत्वे तद्वि-शिष्टे न धूमत्वम्, उपलक्षणत्वे च धूमत्वमिति। किञ्च। व्याप्यतावच्छेदकस्यैव हेतुतावच्छेदकत्वमिति न नीलधू-मत्वं तथा। नचैवं धूमत्वस्यावच्छेदकत्वेऽपि सामग्रीस-त्त्वात् नीलधूमादनुमित्युत्पत्तौ हेत्वाभासत्वं न स्यात् अनुमितिप्रतिबन्धकस्य तत्त्वादिति वाच्यं तदभावेऽपि नी-लधूमप्रयुक्तसाध्यवत्प्रत्ययस्य भ्रमत्वेन तत्कारणत्वस्याभास-त्वस्यावश्यत्वादितिदिक्॥ एवञ्च शरीराजन्यत्वेऽपि न शरी-रमवच्छेदकं गौरवात् येन विशेषेण विना वह्निर्न घट-स्तत्रैव व्याप्यतावच्छेदकत्वनियमात्। अतएव गन्धस्यैव वह्निकत्वादित्यत्राप्रसिद्धेन गन्धादिषु मध्ये इति विशेषणं विना वह्निर्हेतुं न शक्यते इत्यसिद्धिवारकं विशेषणं सार्थकमेव। सुरभिधूमविशेषादौ च चन्दनप्रभवाग्न्यादेः कारणत्वात् कारणाभावस्य कार्याभावप्रयोजकतया व्याप्यत्व-निश्चयः व्यापके च न वार्थविशेषणता विशिष्टस्य कारण-त्वेन व्यापकत्वात् विशेषव्यतिरेकिण्यत्वे विपक्षबाधकेना-नन्यगतिकतया विशिष्टस्य व्यापकत्वात् विशिष्टाभावस्य हेत्वा-भासव्याप्यत्वं यत्र च विपक्षबाधकं नास्ति तत्र विशिष्टस्य व्यापकतापि न,यथा सकर्तृकत्वे। नापि शरीरजन्यत्वाभावो ऽखण्डोहेतुः यदि हि शरीरजन्यत्वं सकर्तृकत्वप्रयोजक स्यात् तदा तदभावप्रयुक्तः सकर्तृकत्वाभाव इति तस्य साध्यव्याप्यता स्यात् न चैवम्, जन्यत्वं लाघवात्तथा। तथा चाजन्यत्वमेवोपाधिः साध्यव्याप्याभावः साध्याभावव्यापक इति नियमेन तस्य साध्यव्यापकतानिश्चयात् सकर्तृकत्व शरीरजन्यत्वयोर्व्याप्यभावेन तदभावयोरपि व्याप्यभाव इति व्याप्यसिद्धत्वाच्च। अतएव शरीरजन्यत्वाभावस्या कर्तृकत्वव्याप्यत्वात् तदभावयोरपि व्याप्यव्यापकभाव इति निरस्तम् शरीरजन्यत्वस्य सकर्तृकताप्रयोजकत्वन्तु लाघवाजन्यत्वं पूर्वसाधनव्यतिरेकत्वेन नोपाधिः सत्प्रति-पक्षोच्छेदप्रसङ्गादिति वाच्यं स्थापनायां यत्नाभावत्वं तत्र विशेषादर्शनदशायां सत्प्रतिपक्षे पूर्वसाधनव्यति-रेकस्य साध्याव्यापकत्वेनानुपाधिकत्वात् यथा शब्दो-नित्योगुणत्वादित्यत्र शब्दोनित्यो द्रव्यैकगुणत्वादित्यादि-दिना सत्प्रतिपक्षे गुणत्वाभावो नोपाधिः जलपरमाणु-रूपे साध्याव्यापकत्वात्। नचैवमनैकान्तिकत्वमेव तदो-द्भावयं सत्प्रतिपक्षसमेच्छा तद्दोद्भावनकर्तृत्वात्। किञ्च प्रा-गभावप्रतियोगित्वे सति यमवेतत्वेन तत्प्रतियोगित्वे सति

सत्त्वस्य, सत्त्वे सति उत्पत्तिमत्त्वस्य वा हेतुत्वे, एवमन्यतरव्यतिरेक उपाधिरिति न पूर्वसाधनव्यतिरेकः। अतएव जन्यत्वस्य नोपाधित्वं ध्वंसे साध्याव्यापकत्वादिति न दोषः। अन्ये तु यस्मिन्वे यस्मिन्रूपिता व्याप्तिर्येन विशेषणेन विना न गृह्यते तत्र विशिष्टं व्याप्यतावच्छेदकम् अकर्तृकताभावनिष्ठव्याप्तौ च शरीरं विनैव प्रतियोगितया जन्यत्वमवच्छेदकं कल्पयन्तीति न शरीरजन्यत्वमवच्छेदकं धूमे नील इव अतोगौरवेण शरीरजन्यत्वं स्वप्रतियोगितया नावच्छेदकमिति व्याप्यतावच्छेदकाभावाच्च शरीरजन्यत्वाभावोऽकर्तृकत्वव्याप्यः। व्यभिचाराभावात्तथेति चेन्न क्षित्यादावव्यभिचारात्, अन्यथा क्षित्यादिकं नाहृष्टहेतुकं शरीरजन्यत्वाभावादित्यपि स्यात्। नन्वस्तु तावदशरीरनित्यज्ञानादिकर्तृकानुमितिस्तथापि सानुमितिरयथार्थैवाशरीरे कर्तरि ज्ञानत्वात् ज्ञानेच्छायत्नेषु नित्यज्ञानत्वात् शरीराजन्ये सकर्तृकत्वज्ञानत्वात् घटः कर्त्रा घटज्ञानादिकं नित्यं व्योम सकर्तृकमितिज्ञानवदिति साध्यं, नचोपजीव्यबाधः अनुमितिर्ह्युपजीव्या न तु तद्याथार्थ्यमपीति चेन्न कर्तृकार्य्ययोर्नित्यधीकार्य्यकारणभावेन तत्साध्ययोजकत्वात् अन्यथा पर्वते वह्नानुमितिरयथार्था उभयसिद्धवह्निमद्भिन्ने वह्नित्वज्ञानत्वादित्यादिना सकलान्वयव्यतिरेक्युच्छेदः। किञ्चानुमितेरयाथार्थ्यमनेन साध्यं, न तु कार्य्यं, तथा च दोषादुत्पन्नत्वेनेदं ज्ञापने तत्रायमेव दोषोदोषान्तरं वा नाद्यः अन्योन्याश्रयात् उत्पन्ने तस्मिन् ज्ञापनं ज्ञापकादेव तस्माद्दोषात्तदुत्पत्तिरिति। नान्त्योऽसिद्धेः। तर्कपरिशुद्धिस्तु न दूषणम्, यदीश्वरः कर्त्ता स्यात् शरीरी स्यात्, प्रयोजनवान् अनित्यज्ञानवान् स्यात्, क्षित्यादि सकर्तृकं स्यादिति तर्कांशां विपर्यये आश्रयासिद्ध्यरूपविशेषतादिना विपर्यायापर्यवसानेनाभासत्वात्।

नन्वेवं क्षित्यादावेककर्तृसिद्धिः कुतः? एककर्तृकत्वेन व्याप्तेरभावात् न च लाघवात्, तस्याप्रमाणत्वात्। सकर्तृकत्वमानादेव तत्सिद्धिरिति चेन्न तावदनुमितिमात्रे लाघवं सहकारि, व्यभिचारात् मानाभावाच्च न हि लिङ्गपरामर्शे सति तद्विलम्बेनानुमितेर्विलम्बेन तत् सहकारि स्यात्। नापि लब्धानुमितौ, अन्योन्याश्रयात्। नापि वह्नानुमितौ धूमेन वह्नानुमितावेकत्वादिसंशयाभावापत्तेः। बाधकाभावेन नानात्वासिद्धौ कर्तृसिद्धेरेककर्तृसिद्धिरिति चेन्न एकत्वसाधकाभावेनैकत्वासिद्धौ कर्तृसिद्धिरेव नानासिद्धिरित्यस्यापि सुवचत्वात्। अथ यमनालब्धज्ञानाऽनुमितिः पक्षे न साध्यसंसर्गं विषयीकरोति स पक्षधर्मतावलात् सिद्ध्यति न त्वधिकमपि तथा च द्वितीयं कर्त्तारं न विषयीकुर्वत्यपि कर्त्तारं विषयीकरोत्येवेति न द्वितीयमवगाहते। एकस्तु कर्त्ता सिद्ध्यति तद्विषयत्वेन कर्तृविषयैव न स्यात् एकविषयत्वाभावेन नानाविषयत्वाभावस्याप्यभावात् तदूघटितत्वात्तस्येति चेदेवं तर्हि कर्त्रेकत्वमपि न विषयः स्यात् एकत्वविषयत्वं विनापि कर्तृविषयत्वसम्भवात्। वस्तुगत्यैक इति चेन्न एकत्वासिद्ध्या वस्तुगत्यैक इति ज्ञातुमशक्यात् तथा चेश्वरे एकत्वानेकत्वयोर्नित्यसंशय इति।

उच्यते। यत्र प्रमाणे लघुगुरुविषयता सम्भवति तत्र लाघवसहकारेण कार्य्यताव्याप्यतापन्ने प्रत्यक्षे इच्छानिमित्तत्वाक्षेपके उपमाने शक्तिग्रहाक्षेपकेऽनुमाने च तथाविधप्रमाणमात्रे च सकलतार्किकैः सहकारित्वकल्पनात् एवं लाघवमेव गौरवमिति ज्ञानानन्तरं बाधकं विना लघूनामेव कारणत्वकार्यत्वव्याप्यत्वप्रवृत्तिनिमित्तत्वशब्दशक्यत्वानां ज्ञानदर्शनात्। तत्रापि लाघवादेरे शब्दशक्यत्वादिसंशये तन्मूलकव्यवहारोच्छेदो विनिगमकाभावात्, सोऽयं विचारमारभते लाघवञ्च तदङ्गं गाङ्गीकृत्य इति महासाहसम्। नन्वेवं वस्तुगत्या नानाकर्तृकेषु घटत्वेन कुलालकर्तृकत्वानुमानेऽपि बाधकाभावतादवस्थ्यात् लाघवादेककर्तृसिद्धिः स्यात् न चेष्टापत्तिः अनुमित्यनन्तरं नानात्वैकत्वे संशयादिति चेन्न तत्रापि लाघवेन कर्त्रैक्यमेव सिद्ध्यति तत्सन्देहस्तु ज्ञानप्रामाण्यसंशयादिति पक्षज्ञानाकर्तृकत्वसाधकप्रमाणादेवैककर्तृकतानुमानं तत्र बाध्यते न चैवं क्षित्यादिकर्त्तर्यपि प्रामाण्यसंशयादेकत्वानेकत्वसंशयोदुच्छेदः एकत्वबाधकस्वाभावेन प्रामाण्यसिद्धेः। नचैकत्वसाधकाभाव एव बाधः, अनुमितेरेव लाघवसहकारेणैकत्वसाधनात्। अन्ये तु क्षितिकर्त्ता अङ्कुरकर्तृभिन्नः अशरीरकर्तृत्वात् अङ्कुरकर्तृवदित्यनुमानादेव कर्तृसिद्धिः न च क्षितिकर्त्ता अङ्कुरकर्तृभिन्नः अङ्कुराकर्तृत्वात् कुलालवदिति मन्यन्तेऽपरे। अनित्यज्ञानानाश्रयत्वरूपोपाधित्वादित्याहुः तत्साध्यप्रयोजकत्वे भेदाभेदयोर्गौरवलाघवे एव शरणम्।

तथापि कथं नित्यसर्वविषयज्ञानसिद्धिः। पक्षधर्मतावला

दिति चेत् व्यापकत्वाद्यहात् न च विनानुपपत्तिं योऽपि विषयः व्यतिरेकविषयापत्तेः। अत्र प्राञ्चः यमर्थमनालम्बमानानुमितिः पक्षे साध्यसम्बन्धं विषयीकरोति स पक्षधर्मताबलात् सिद्ध्यतीति प्रतीत्यनुपपत्तिमूलकोऽन्वयी प्रतीत्यनुपपत्त्या च व्यतिरेकी तदिहानादिद्व्यणुकादिप्रवाहस्य पक्षत्वे तदुपादानस्यानादिज्ञानगोचरत्वं विनोपादानगोचरज्ञानजन्यत्वमनादिकार्यप्रवाहस्यानुमितिरालम्बते अनादित्वं च नित्यता सर्वज्ञकार्यपि तत्सत्त्वमनादिभावत्वात् पक्षतदुपादानविषयत्वेव सर्वविषयता बाधवात्, तावद्विषयकमनाद्येकमेव ज्ञानं सिद्ध्यति न तु नित्यानि नानाज्ञानानीति। नव्यास्तु अनित्यज्ञानाजन्यत्वेन पक्षविशेषणात् ज्ञानं सिध्यत् नित्यमेव सिद्ध्यति अनिष्टे बाधात्। वाचस्पतिमिश्रास्तु लाघवादेकज्ञानसिद्धावुत्पत्तिमतोऽनादिकार्यप्रवाहं प्रत्यजनकत्वात् परिशेषेण नित्यज्ञानादिसिद्धिः नियतविषयता च ज्ञानस्य कारणाधीना कारणञ्च नित्यज्ञानान्निवर्त्तमानं नियतविषयतामादाय निवर्त्तत इति सर्वविषयत्वसिद्धिरिति। षट्पदार्थीप्रतिपादकवेदकर्तृत्वेन ईश्वरस्य षट्पदार्थीगोचरसाक्षात्कारत्वेन वा सार्वज्ञ्यं घटाकाशसंयोगं प्रतीश्वरस्य कर्तृत्वात् घटादिगोचरमपि ज्ञानं सिद्ध्यतीति केचित्। ननु घटादीनां कथमीश्वरस्य कर्तृत्वं घटः ईश्वरकर्तृकः कार्यत्वात् क्षितिवदिति चेन्न घटस्य द्विकर्तृकतया सदृष्टान्तेन क्षित्यादेरपि द्विकर्तृकतापत्तेः तथा च घटवत् क्षितिः क्षितिवद्घट इतीश्वरानन्यकार्यकर्तृत्वेन कारणता न तु द्विकर्तृकत्वेनेति चेत् तर्हि नेश्वरकर्तृकत्वेन कारणता किन्तु कर्तृत्वेनेति सर्वं ज्ञानादीनां नित्यत्वेन सर्वविषयतया घटाद्युपादानविषयत्वसंपत्तिः कथं न तेषां घटादिकारणत्वं कुलालादिज्ञानतुल्यत्वात्। तदाहुराचार्याः "परमाण्वदृष्टाधिष्ठातृसिद्धौ ज्ञानादीनां नित्यत्वेन सर्वविषयत्वे वेदाद्यधिष्ठानस्यापि न्यायप्राप्तत्वात् न तु तदधिष्ठानार्थमेवेश्वरसिद्धिरिति "अहं सर्वस्य प्रभवोमत्तः सर्वं प्रवर्त्तते इत्यागमाच्चायमर्थोव्यवसेयः। अथेश्वरस्य सर्वज्ञत्वे सर्वविषयभ्रान्तेर्ज्ञाने ईश्वरोऽपि भ्रान्तःस्यात् भ्रमश्चेव तस्यापि भ्रमविषयविषयकत्वादिति चेत् रजतत्वप्रकारकज्ञानवानयमिति ज्ञानं न भ्रमः अभ्रान्तस्य तथात्वात्। इदं रजतमितिज्ञाने रजतत्वं प्रकारः तेन स भ्रमः ईश्वरज्ञाने च रजतत्वप्रकारकत्वं प्रकार इति न भ्रमः अतएवास्मदादिरपि भ्रान्तिशो न भ्रान्त इति। स्यादेतत् प्रयोजनं विना कथमीश्वरः प्रवर्त्तते? सुखस्याभावात् अधर्मस्याभावेन निर्दुःखत्वात्। करुणया प्रवर्त्तते इति चेत्तर्हि परसुखदुःखप्रक्षये प्रयोजने तथा च सुखिनमेव सृजेन्न नारकिणम्। धर्माधर्मपरतन्त्रत्वात् तदनुरूपं फलं प्रापयतीति चेत्तर्ह्यविद्यकत्वात् कर्मनिरपेक्षमेव जगद्वैचित्र्यमस्तु किमीश्वरेण अनपेक्षितकर्मादिज्ञानवता कर्मनिरपेक्षस्य चैकदैव सदा च सर्गप्रलयौ स्यातां ज्ञानादीनां नित्यत्वात् किञ्च तत्प्रयत्नस्य करुणाजन्यत्वेन शरीरादिजन्यतापत्तौ संसारितापत्तिः न। ईश्वरानभ्युपगमेन विचारस्याश्रयासिद्धत्वात् तमभ्युपगम्य पृच्छसि चेत् व्यक्तस्य जगतएव तद्दृक्षाविषयत्वेन स्वेच्छासाधनताज्ञानसत्त्वात्। वस्तुतस्तु नित्यादितत्तदसाधारणकर्मविशेषादिसामग्री ईश्वरज्ञानादयो यदा यदा भवन्ति नित्यादिकं करोतीति व्यवहारः सर्गप्रलयासाधारणकर्मविशेषादिसामग्र्यसमवर्त्तित्वमेव तदिच्छायाधिकीर्षासंज्ञिकीर्षायावे नचैवं किञ्चिज्ज्ञत्वं ज्ञानादिनेति वाच्यं नित्यादीनां कार्यत्वेन ज्ञानजन्यतया नित्यज्ञानादीनामपि जनकत्वं सुखादिषड्द्रव्योरात्माकाशादिवत्। नन्वशरीरात् कथं वेदघटादिषड्द्रव्यव्यवहारस्य प्रदायः। उच्यते सर्गादावदृष्टोपष्टब्धीभूतभेदान्नानाशरीरोत्पत्तावदृष्टवदात्मसंयोगादृष्टसहकृतप्रयत्नवदीश्वरसंयोगाद्वा सकलवेदार्थगोचरज्ञानाविच्छासहितान्नीलकण्ठेश्वरकण्ठताल्वादिक्रियाजन्यसंयोगाद्वेदोत्पत्तिः। एवं कुलालादिशरीरावच्छेदेनादृष्टसहकृतप्रयत्नवदीश्वरसंयोगात्तद्बुद्धीच्छासहितचेष्टोत्पत्तौ सकलघटानुकूलव्यापारो घटोत्पत्तिः। एवं प्रयोज्यप्रयोजकज्ञानाय व्यापाराभिमतशरीरावच्छेदेनापि अदृष्टसहकृतेश्वरज्ञानेच्छाप्रयत्नादेव वाग्व्यवहारः, ततस्तत्पुत्रीतो बालोव्युत्पद्यते सोऽयं भूताभेदन्यायः। यत्तु यथा क्षित्यादिना भौतिकोऽङ्कुराय पद्यते तथा सर्गान्तरोत्पन्नतत्त्वज्ञानवता भोगाय सर्गादावुत्पद्येन मन्वादिना सर्गादौ ईश्वराभिप्रायस्यवेदैः साक्षात्कृत्यानूद्यते ततोऽग्निमसंपदायः स एव कार्यमूहं कृत्वा वाग्व्यवहारं करोतीति मतं तच्च प्रतिसर्गादिनन्यसर्वज्ञकल्पनायां गौरवात् तेषामेव क्षित्यादिकर्तृत्वस्वीकारेण ईश्वरानङ्गीकाराच्च। एतेन सर्गादौ सर्गान्तरसिद्धयोगिनएव क्षितिकर्तारः सन्विति निरस्तं सर्गादावनन्तसर्वसिद्धिः किं प्रमाणान्तरात् क्षित्यादिकर्तृत्वाकृकाद्वा नाद्यस्तदभावात् नान्त्यः अनादिद्व्यणुकादिकार्यप्रवाहस्य सकर्तृकत्वानु-

मानादुद्भावयत्सङ्गतादेकस्यैव सर्वज्ञस्य सिद्धेः ॥ अथेश्वरज्ञानमूलकयद्यत्पदे प्रयोज्यव्यापारानुमितघटज्ञाने घटयद्यस्य कारणतापहोभ्रमः स्यात् तदीयज्ञानस्य नित्यत्वात् तथा च तज्जन्यघटयद्यशक्तियत्पदस्य भ्रमत्वे सकलयद्यज्ज्ञानं भ्रमःस्यात् भ्रमपरम्परामूलकत्वात् अनित्यसर्वज्ञमूलकयद्यत्पदे च नायं दोष इति चेन्न व्यापारानुमितमिदं घटज्ञानं घटपदजन्यमिति ज्ञानस्य यद्यशक्तियत्पदकारणस्य भ्रमत्वेऽपि घटपदं घटयद्यकर्मेति ज्ञानस्य यथार्थत्वात् विषयाबाधात् न च भ्रममूलकत्वेन तस्य भ्रमत्वमनुमेयं तदंशे व्याधिकरणप्रकाराभावेनाबाधात् बाधितविषयत्वस्योपाधित्वाच्च । अत्र घटमानयेति यद्यानन्तरं स्तम्भसञ्चाराधिष्ठितदारुणस्य घटानयनव्यवहारदर्शनाद्बालो घटपदे व्युत्पद्यते तन्मूलकयद्यज्ज्ञानमपि न भ्रमः तस्यापि भ्रमत्वे प्रयोज्यव्यवहारादिदानीं व्युत्पत्तिर्न स्यात् किमयं प्रयोज्यस्तेन व्यवहाराद्युत्पन्नोऽचेतनव्यवहाराहेति संशयस्य वक्तव्योपायमानत्वात् ॥ "विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतः पात् । सं बाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन्देव एकेत्यादि श्रुतयः" । "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । योलोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः" इत्यादयः स्मृतयश्च वक्तृदोषानवत्वेनानुसन्धेया इति" ।

स्वच्छन्दलता तु ईश्वरविषये प्रमाद्यनुपपत्त्युपन्यासेन व्यतिरेकमुखेन ईश्वरस्य प्रामाणिकत्वमुररीकृतं यथा "तथाहीश्वरसङ्गावे किं प्रमाणमिति ब्रुवाणः प्रतिवक्तव्यः किंशब्दोऽयमाक्षेपार्थो वा१ कुत्सितार्थो वा२ वितर्कार्थो वा३ प्रश्नार्थो वा४ स्यात् । तत्र यदि प्रथमः पक्षः तदेश्वरसङ्गावे नास्ति प्रमाणमित्युक्तं स्यात् तथा च सति न प्रतिज्ञामात्रात्साध्यसिद्धिरिति हेत्यादिकं वाच्यं भवति । तच्च भवता नाभ्युपायि तस्मान्मूलत्वं दोषः । अतएव न द्वितीयः, ईश्वरसङ्गावे कुत्सितं प्रमाणमित्यस्यापि प्रतिज्ञामात्रत्वात् । अपि च साध्यासाधकत्वाद्वा एतत् कुत्स्यते भवता अन्यथा वा । अन्यथा चेदलं तदुद्भावनया साध्यसिद्धेरप्रयोजकत्वात् । नापि प्रथमः प्रमाणञ्च साध्यासाधकञ्चेति व्याघातात् । गौणोऽयं प्रमाणशब्द इति चेन्न प्रमाणत्वयोगिनि यद्ययं प्रमाणशब्दप्रयोगः तदा गौणताव्याघातः सुस्थत्वात् । अथ प्रमाणाभासे तदा, अलन्तदुद्भावनया ईश्वरसङ्गावे यः प्रमाणाभासः स कुत्सितश्चत्वं परस्यापि सम्पतिपन्नत्वात्, ईश्वरसङ्गाव इति च विशेषोपादानं व्यर्थं स्यात् अन्यत्रापि हि विषये प्रमाणाभासः कुत्सितएव साध्यासाधकत्वात् । नापि तृतीयः तथा सति हि वितर्कस्य यत्तानन्तरमेवत्वेन यत्तानन्तरमपि वचनीयं भवति ईश्वरसङ्गावे किमेतत् प्रमाणमुतान्यदिति तच्च ? भवता नाभ्युपायि अतो न्यूनत्वं दोषः । नापि चतुर्थः प्रश्नार्थात् खलु किंशब्दात्कस्यचित् पदार्थस्य जिज्ञासमानता प्रतीयते सा चेह प्रमाणपदसमभिव्याहारात् प्रमाणविषयिणी प्रतीयते यद्विषयश्च प्रश्नस्तदुत्तरवादिनाभिधेयं तत् । अयं प्रश्न ईश्वरसङ्गावे प्रमाणसामान्यविषयस्तद्विशेषविषयो वाभिप्रेत आद्यपक्षेऽपीश्वरसङ्गावे प्रमाणमित्येवोत्तरमापद्येत यद्विषयो हि प्रश्नस्तदभिधेयं, प्रमाणसामान्यविषयश्च प्रश्नः तच्च प्रमाणशब्देनाभिधीयतएव । अथ द्वितीयः तथापीश्वरसङ्गावे प्रमाणमित्येवोत्तरमापद्येत यथा प्रश्नवाक्यं प्रमाणशब्दविशेषपरस्तथोत्तरवाक्येऽपि । कोऽसौ विशेष इति चेन्न पूर्ववदुत्तरत्वात् । किञ्च अस्यापि प्रश्नस्य विशेषोविषयः किंशब्दस्य विशेषशब्देन सामानाधिकरण्यात् तथाच सति विशेषएवोत्तरं स्यात् । स्यादेतत् विशेषशब्देन न विशेषमात्रमनिर्द्धारितमत्र विवक्षितं किन्त्वसाधारणो व्यक्तिरूपो विशेषशब्दस्य तात्पर्यं तस्मात्कासावसाधारणो प्रमाणव्यक्तिरिति प्रश्नार्थः तत्र च तादृश्याः प्रमाणव्यक्तेरभिधानस्तत्तरं युक्तं नैवंविधा प्रस्तावादिति नैतदेवं यतोऽत्रापि विशेषशब्देनोत्तरम् यथा प्रश्नवाक्यगतस्य विशेषशब्दस्य सर्वतोव्याद्यत्तस्वरूपायां प्रमाणव्यक्तौ तात्पर्यं तदुत्तरवाक्यस्थितस्यापि । एवञ्च सति यत्र विषये भवदीयस्य प्रश्नवाक्यस्य तात्पर्यं तदेवाक्यमुत्तरवाक्येन प्रतिपादितमिति युक्तमुक्तम् । अथ मन्यसे किमिह प्रमाणमिति पृच्छतोऽयमभिप्रायः अत्रार्थेऽनुमानं प्रमाणमितरद्वेति । अत्राप्यनुमानमित्युत्तरमयुक्तम् । किं तदनुमानमिति चेत् । अयमपि प्रश्नोऽनुमानमात्रविषयः उत तद्विशेषविषय इति विकल्प्य प्रमाणप्रश्नवदुत्तरं वाच्यमिति । अत्र च संग्रहश्लोकौ । "यथाविधं यं विषयं नियम्य प्रश्नस्य निर्वृत्तिपरो बभूवतुः । वाच्यस्तथैवोत्तरवादिनापि तथैव वाचा स तथाविधोऽर्थः । प्रश्नस्य यः स्याद्विषयः स वाच्यो वाचा तयाचैव भवेद्विरुद्धः । इदं त्वयाप्यास्थितमेतयैव गिरा खट्वाक्षविषयस्य वक्तृ ।" प्रश्नार्थाच्च किंशब्दाज्जिज्ञासाविषयतार्थस्य प्रतीयते जिज्ञासा च ज्ञातुमिच्छा इच्छा च नाज्ञाते भवतिप्रसङ्गात् तस्मादीश्वरविषयं प्रमाणं ज्ञातुमिच्छता तत्र स्वज्ञानमिच्छाकारणीभूतं वक्तव्यं तदयथार्थं

अर्थं वा स्यात् यथार्थश्चेत् तर्हि तेनैव ज्ञानेन स्वकीयो विषयः प्रमाणमुपस्थाप्यते विषये प्रमाणप्रवृत्तिसमन्तरेण तदीययथार्थत्वस्य वक्तुमशक्यत्वात्। तेनापि प्रमाणेन स्वगोचरेश्वरसद्भाव उपस्थाप्यतदुत्थानायासेनैव सिद्धोऽस्माकमीश्वरसिद्धिमनोरथः। अथायथार्थं तत्राप्यस्मदयथार्थज्ञानविषये यद्यस्माभिरयथार्थमेव ज्ञानमुत्पादनीयमिति भवतः पृच्छतोवाञ्छितं तदा नेयं स्वाधीनेऽर्थे परापेक्षा भवानेवायथार्थज्ञानोत्पादनक्रमलोपयैकं तत्र मिथ्याज्ञानमजोजनसंज्ञया परमभ्युपादयतु वयं पुनर्यथार्थज्ञानमुत्पादयितारोमिथ्याज्ञाने सर्वथैवाकृतिनः किमिह नियुज्येमहीति। अथ मदीयस्यायथार्थज्ञानस्य योविषयः स मदीययथार्थज्ञानविषयोभवता क्रियतामिति त्वदीयं याञ्छितं तदा व्याघातादीदृश्यर्थे भवतः प्रवृत्तिरेवानुपपन्ना शुक्तिका रजतत्वेन मम यथार्थज्ञानविषयोभवत्विति तदर्थं प्रेक्षावान् कथङ्कारं प्रयतेत येन रूपेणायथार्थज्ञानविषयत्वं तेनैव रूपेण यथार्थज्ञानविषयत्वे व्याघातात्। अथ मन्यसे स्वसिद्धान्तमनुरुध्यानेन त्वया यथार्थज्ञानं तत्रोत्पादनीयमतस्तदर्थं भवानुद्युक्तइति। नैवम् यदीश्वरसद्भावविषयोभवता प्रमाणाभासः प्रमाणतया भ्रान्त्या प्रतीतः तस्य प्रमाणत्वं अस्माभिर्व्युत्पादनीयमिति नास्माकमीदृशः सिद्धान्तः प्रत्युत ईश्वरसद्भावविषयं यत्प्रमाणं भवता प्रमाणाभासत्वेन भ्रान्त्या प्रतीतमस्ति तत्प्रमाणयितव्यमिति। ज्ञानमात्रं ईश्वरसद्भावविषयस्य प्रमाणस्य भवता ज्ञापनमात्रं क्रियतामित्यभिमतं पृच्छतामस्माकं, नतु प्रमाणेन प्रमाणेन वेति विशेषोऽभिमतइति न ज्ञापनमात्रस्याप्रमाणज्ञानमात्राद्व्यावृत्युपपत्तेः तत्र स्वाधीने ज्ञेये परापेक्षेत्यादुक्तमनुषज्यनीयम्। स्यादेतत् येयमीश्वरसद्भावविषया प्रमाणप्रतीतिरस्माकमुत्पन्ना सा व्यभिचारिणी सत्या वेति संशयोऽस्माकं नैवंरूपसन्निहितेऽर्थाधीनं यदिदं दूषणमवादि भवता तन्निश्चयकार्यमिति नैतदस्ति एवं हि तस्यां प्रतीतौ यथार्थत्वायथार्थत्वसंशयेन तस्याः प्रतीतेर्गोचरो यत्प्रकारः तस्यापि योऽसौ विषयईश्वरसद्भावस्तत्र सर्वत्रैव संशयानस्य भवतः प्रश्नोऽयं नतु विप्रतिपन्नस्येति स्यात् तत्राह स्वीकृत शिष्यभावं प्रमादय चिरं चरणशुश्रूषाभिरस्माकं क्षेत्रस्थानस्ते संशयमिति। विप्रतिपन्नाएव वयमस्मार्थः संशयोऽस्माकमिति चेत् तर्ह्यवधृतैककोटयएव वयं कार्यानुरोधात्तु संशयमाचक्षाणाश्च स्युः कुतश्चित् स्यात् एवं तर्हि तदर्थं कार्यमवधारयतां यथार्थं वेति विकल्पोक्तयुक्त्या दूषयीयम्। एतेनानध्यवसायेन तदस्माभिः प्रतिपत्तव्यमित्यपि निरस्तं वेदितव्यं, व्यभिचारिविषयमव्यभिचारविषयं वा तदिति विकल्पाभ्यां तस्यापि ग्रस्तत्वात् "परस्परविरोधे हि न प्रकारान्तरस्थितिरिति" न्यायात्। एवमीश्वराभिसन्ध्यादावपि तत्तत्स्थाने तिङन्तपर्यालोचनामान्तरस्खण्डनमनुदृष्टव्यम्" । तृतीयः परिच्छेदः ।

"ननु तथापि भावात्मके तस्मिन्नीश्वरे विधायकं किञ्चित्प्रमाणं वक्तव्यमिति चेत् किं पुनर्भावत्वं विधित्वमिति चेन्न पर्यायाप्रश्नात्। स्वरूपसत्त्वमिति चेत् अभावस्यापि तथाभावात् प्रतिस्वं व्यावृत्तत्वेनानुगतत्वापत्तेश्च। अस्तीतिप्रतीतिविषयत्वमिति चेन्न अभावोघटस्वाकारेति प्रत्ययसम्भवेनाभावस्यापि तथात्वप्रसङ्गात्। नास्तीतिप्रतीतिविषयत्वेऽपि च घटादेर्भावत्वानिवृत्तेः। अस्तीति चास्त्यर्थो वा शब्दोवा विवक्षितः स्यात्। तस्यानिरूक्तेः। सत्ता तदर्थइति चेन्न सामान्यादीनां तदभावादभावत्वापत्तेः स्वरूपसत्त्वञ्च निरस्तम्। नापि द्वितीयः अभावोऽस्तीतिप्रतीतेरुक्तत्वात् वर्त्ततइत्याद्याकारेण च प्रतीयमानस्याभावत्वप्रसङ्गात्। सोऽप्यस्ति पर्यायइति चेन्न उभयसाधारणैकार्थनिर्व्वचनमन्तरेण पर्यायत्वस्य प्रतिपादयितुमशक्यत्वात्। यत्रैकस्यास्तिपदप्रयोगः तत्रैवापरस्य वर्त्ततइति प्रयोगात्। सामान्येन तावत् पर्यायत्वं शक्याधिगममिति चेन्न प्रमेयाभिधेयादिशब्दानां तथात्वे ऽप्यपर्यायत्वात् यत्रेत्यस्य प्रवृत्तिनिमित्तार्थत्वे च तन्निर्व्वचनप्रसङ्गस्तदवस्थः सएवार्थोऽभावत्वमुच्यतां किं शब्दोल्लेखवैफल्यया। अपरप्रतिषेधात्मकत्वं भावत्वमिति चेन्न व्यवच्छेद्यासम्भवेनापरपदवैयर्थ्यात् भावाभावयोः परस्परप्रतिषेधात्मकताङ्गीकाराच्च। तथापि भावो नास्तीत्यभावप्रतिपत्तिवदभावोनास्तीति भावस्य प्रतीतिरिति चेन्न तावतापि लक्षणानिरूक्तेः। अपरप्रतिषेधमुखेन प्रतीयमानत्वमेव भावत्वमिति चेन्न चक्षुरादिभिर्भावत्वयत्नप्रसङ्गात्। न हि प्रतीयमानत्वं चक्षुरादिग्राह्यत्वमभावोनास्तीतिप्रतीतेर्निर्विषयत्वप्रसङ्गाच्च नहीयं भावविषया भवत्यपि परप्रतिषेधमुखेन प्रतीयमानत्वात्। नाप्यभावविषयैव तन्निषेधार्थत्वात्। नैवं प्रतीतिरेवास्तीति चेन्न शब्दात्प्रतीतेः सम्भवात् आकाङ्क्षादिभिः पदैः प्रतिस्वं संसर्गबोधनात् "अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि"। प्रत्यक्षप्रतीतिरस्तीत्यविवक्षितत्वादयमदोषइति चेन्न सर्व्वस्य भावस्य प्रत्यक्षत्वानङ्गीकारात् मीश्वरपक्षे सर्वं प्रत्यक्षमिति चेन्न तेन तेषामपरप्रतिषेधात्म-

तदा ग्रहणे प्रमाणाभावात् । तेषां विधिरूपतया तथैव ग्रहणमिति चेन्न विधिरूपत्वस्यानवधारणात् । यदपरप्रतिषेधात्मकतया शब्देनापि बोध्यते तत्तावत् भावरूपमिति चेन्न परपदवैयर्थ्यात् तत्त्यागेऽप्यवाचकादित्यापत्तेः । सुरभि चन्दनमित्यादाविवान्योपनीतभागवत् । तत्र चाक्षुषत्वं भविष्यतीति चेन्न तथाविधेनैव विधेयेन विशिष्टाया बुद्धेर्विशेषणतात्पर्यके स्वाश्रयोऽर्थ्यतः स्यात् । तेनोपलक्षितावस्तुत्वात्वे चाभावविशिष्टभावपदार्थस्याप्यभावस्य तथात्वापत्तेः । यदेवंविधं तद्भावरूपमिति यदनेवंविधत्वाद्भावत्वमन्यद्वाच्यम् अभेदे यदेवंविधं तद्भावरूपमिति नियमानुपपत्तेः। अस्योपलक्षणत्वे चोपलक्ष्यस्यान्यस्य वाच्यत्वात् अस्यैव भावार्थत्वे चाभावोनास्तीति कृत्वा प्रतीयमानस्य भावस्य भावत्वापसङ्गात् । भिन्नस्य भावत्वं न सम्भवति यत्पदार्थव्यतिरेकप्रसङ्गात् । यच्च किञ्चिद्भावत्वं तत्त्वात्मन्यस्ति नोवा अस्ति चेदात्मनि वृत्तिविरोधः नास्ति चेत्तस्यान्यप्रतिषेधमुखेन चाप्रतीयमानस्याभावत्वप्रसङ्गइति"। "नन्वेवमीश्वरे प्रमाणानुपपत्तेर्नात्तदभाव एवापद्यत इति चेत् अभावत्वं किमभिधीयते निषेधात्मकत्वमिति चेत् तद्यदि प्रतिषेधात्मकत्वं तदा भावेऽप्यस्ति भावाभावयोर्द्वयोरपि परस्परप्रतिषेधात्मकत्वस्वीकारात् । अथाभावत्वमेव तदा न निवृत्तः पर्यनुयोगः। एतेन निषेधमुखेन प्रतीयमानत्वमिति निरस्तम् । भावविरोधित्वमिति चेन्न सर्वभावविरोधित्वं तद्विधर्मविरोधित्वं वा । नाद्यः असिद्धेः नहि घटाभावोभूतलादि विरुणद्धि । न द्वितीयः भावानामपि कोषाञ्चित्तथाभावात् । अथासहानवस्थानं विरोधो विवक्षितः स भावानां नास्तीति चेन्न गोत्वादौ तस्यापि भावात् । एकविधावन्यनिषेधः स इति चेन्न भेदे विरोधिभावभेदयोरेव प्रसङ्गात् । एकविधिरेवापरनिषेधः स इति चेन्न निषेधस्याभावार्थत्वे भावार्थत्वे चासिद्धेः । नास्तीति प्रतीयमानत्वमिति चेन्न घटाभावोनास्तीति घटस्य तथाप्रतीयमानतया अभावत्वापत्तेः अस्तीति भावत्वनिरूढौ यदुक्तं दूषणं तदापत्तेश्च । प्रतियोगिनिरूपणाधीननिरूपणत्वमिति चेन्न प्रतियोगिनः परार्थत्वेऽतिप्रसङ्गात् विरोध्यर्थत्वे चैतदनिरूढेः अवदर्णत्वे नञर्थस्यासिद्धेः अतीतानागतत्वादौ विषयाद्नातिप्रसङ्गात् । यच्च किञ्चिदभावस्य लक्षणमुच्यते स भावोऽभावो वा स्यात् । नाद्यः भावस्याभावानाश्रितत्वात् विधिविधर्मेण च कथमपि तथात्वे तद्विरोधि स्यात् । अन्यदेव तदिति चेन्न तदभावस्याभावत्वे खड्डसिः भावत्वे च व्याघातात् । न द्वितीयः तस्यात्मनि वृत्तौ विरोधापत्तेः अवृत्तावव्यापकत्वप्रसङ्गादिति । प्रतिक्षेप्यविशिष्टमेव यत् प्रतिभाति सोऽभावइति चेन्न प्रतिक्षेपानिरूढौ प्रतिक्षेपानिरूढेः विशिष्टपदार्थश्च निर्वक्तव्यः स्यात् । तत्र विशिष्टं विशेषणविशेष्यतत्सम्बन्धेभ्यो भिन्नमभिन्नं वा । नाद्यः दण्डपुरुषसम्बन्धमन्तरेण दण्डिनोऽन्यत्राप्रतीतेः दण्डिनमानयेत्युक्ते तदानयनप्रसङ्गात् । तत्सम्बन्धेनोपलक्षितत्वात्तथेति चेन्न अनवस्थोपलक्षणत्वेऽतिप्रसङ्गात् । तद्वत्त्वान्नात्मा सम्बन्धोहेतुः सच तदधिकरण एवेति चेन्न सम्बन्धात्तदधिकरणसम्बन्धान्तरापत्तेरित्येवं न प्रान्याः । तत्सम्बन्धिनि तत्र व्यवहारइति चेन्न तथापि विशिष्टत्वेनान्तरापत्तौ व्यवहारविषयगतविशेषस्य वस्तुनश्चयत्वात् । एवं परस्पराकलनायामप्यनवस्थानात् नतु व्यवहार्यगतोविशेषः कश्चित् । द्वितीये तु प्रत्येकं दण्डिव्यवहारप्रसङ्गोविशेषाभावात् न ते प्रत्येकं दण्डिपदार्थाः किन्तु मिलिताइति चेत् मिलिता इति किं ते च मेलकं चाभिधीयते उत तेभ्योऽन्यएव कश्चित् आद्ये प्रत्येकं सएव प्रसङ्गः मेलकोऽधिकः। द्वितीयस्तु प्रतीतिव्यवहारविरोधात्मूर्खं निरस्तः"। इत्यादिना ४परि० विशिष्टपदार्थं निरस्य ईश्वरप्रमाणाभावस्य निर्वचनमपि निरासितम् अधिकं तत्र द्रष्टव्यम् ।

तत्र निरीश्वरसांख्यमते उपासाविद्वस्य प्रकृतिलीनस्य पुरुषस्य सन्निधिमात्रेण प्रधानप्रवर्त्तनेन वर्तृता । सेश्वरयोगरूपसांख्यप्रवचनमते नित्येश्वरस्यैव सन्निधिमात्रेण प्रधानप्रवर्त्तनेन तथात्वम् इति भेदः । प्रदर्शितेष्वेषु मतेषु ईश्वरोनिमित्तकारणम्, वेदान्तिमते तु उपादानकारणं निमित्तकारणञ्चेति भेदः तदेतत् या०कु०भाष्यवो दर्शितम् यथा"जन्माद्यस्य यतः" या० कु० प्रतिज्ञातस्य ब्रह्मणोजन्मादिकारणत्वस्य विशेषनिर्द्धारणाय प्रवृत्तम् "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" कु०।"यथाभ्युदयहेतुत्वाद्धर्मोजिज्ञास्य एवं निःश्रेयसहेतुत्वाद्ब्रह्मापि जिज्ञास्यमित्युक्तं ब्रह्म च "जन्माद्यस्य यतः" इति कथितं तच्च लक्षणं घटकटकादीनां मृत्सुवर्णादिवत् प्रकृतित्वे कुलालसुवर्णकारादिवन्निमित्तत्वे च समानमित्यतो भवति विमर्शः किमात्मकं पुनर्ब्रह्मणः कारणत्वं स्यादिति । तत्र निमित्तकारणमेव तावत् केवलं स्यादिति प्रतिभाति कस्मात् ? ईक्षापूर्वककर्तृत्वश्रवणात् । ईक्षापूर्वकत्वं हि ब्रह्मणः कर्तृत्वमवगम्यते "स ईक्षाञ्चक्रे स प्राण-

सृजत" इत्यादिश्रुतिभ्यः। ईक्षापूर्वकञ्च कर्तृत्वं निमित्तकारणेष्वेव कुलालादिषु दृष्टम् अनेककारकपूर्विका च क्रिया फलसिद्धौ लोके दृष्टा स च न्याय आदिकर्त्र्यपि युक्तः संक्रामयितुम्, ईश्वरत्वप्रसिद्धेश्च ईश्वराणां हि राजवैद्यखतादीनां निमित्तकारणत्वमेव केवलं प्रतीयत तद्वत् परमेश्वरस्यापि निमित्तकारणत्वमेव युक्तं प्रतिपत्तुम्। कार्य्यञ्चेदं जगत् सावयवमचेतनमशुद्धञ्च दृश्यते कारणेनापि तस्य तादृशेनैव भवितव्यं कार्य्यकारणयोः सारूप्यदर्शनात् ब्रह्म च नैवं लक्षणमवगम्यते "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" इत्यादि श्रुतिभ्यः। पारिशेष्याद्ब्रह्मणोन्यदुपादानकारणमशुद्धादिगुणकं कल्पितप्रसिद्धमभ्युपगन्तव्यं ब्रह्मकारणत्वश्रुतेर्निमित्तमात्रे पर्य्यवसानादित्येवं प्राप्ते ब्रूमः। प्रकृतिश्चोपादानकारणञ्च ब्रह्माभ्युपगन्तव्यं निमित्तकारणञ्च न केवलं निमित्तकारणमेव कस्मात् "प्रतिज्ञादृष्टान्तानुरोधात् एवं हि प्रतिज्ञादृष्टान्तौ श्रुतौ नोपरुध्येते। प्रतिज्ञा तावत् "उत तमादेशमप्राक्ष्योयेनाश्रुतं श्रुतम्भवत्यमतं मतमविज्ञातं विज्ञातमिति" तत्र चैकविज्ञानेन सर्वमन्यदविज्ञातमपि विज्ञातं सम्भवतीति प्रतीयते तच्चोपादानकारणविज्ञाने सर्व्वविज्ञानं सम्भवति उपादानकारणाव्यतिरेकात् कार्य्यस्य, निमित्तकारणादव्यतिरेकस्तु कार्य्यस्य नास्ति,लोके तन्तुवायाद्व्यतिरेकदर्शनात्। दृष्टान्तोऽपि "यथा सोम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येव सत्यम्,इत्युपादानगोचर एवाम्नायते "यथैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात्" "एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्यादिति" तथान्यत्रापि "कस्मिन्नु भगवोविज्ञाते सर्व्वमिदं विज्ञातं भवतीति" प्रतिज्ञा "यथा पृथिव्यामोषधयः सम्भवन्तीति" दृष्टान्तः "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्व्वं विदितमिति" प्रतिज्ञाय "स यथा दुन्दुभेर्हन्यमानस्य न बाह्यान्छब्दान् शक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीत इति" दृष्टान्तः एवं यथासम्भवं प्रतिवेदान्तं प्रतिज्ञादृष्टान्तौ प्रकृतिपक्षसाधकौ द्रष्टव्यौ। यत इतीयमपि पञ्चमी "यतो वा इमानि भूतानि जायन्ते" इत्यत्र "जनिकर्तुः प्रकृतिरिति" भा० विशेषकारणात् प्रकृतिलक्षणयोपादाने दृष्ट्वा। निमित्तत्वन्तु अधिष्ठातृत्वराभावादवगन्तव्यं यथा हि लोके मृत्सुवर्णादिकमुपादानकारणं कुलालसुवर्णकारादीनधिष्ठातृनपेक्ष्य प्रवर्त्तते नैव ब्रह्मण उपादानकारणस्य स्वतोऽन्योधिष्ठातापेक्ष्योऽस्ति प्रागुत्पत्तेः "एकमेवाद्वितीय" मित्यवधारणात् अधिष्ठातृत्वराभावोऽपि प्रतिज्ञादृष्टान्तानुरोधादेव नोदितो वेदितव्यः" अधिष्ठातरि ह्युपादानदर्शनञ्चाभ्युपगम्यमाने पुनरप्येकविज्ञानेन सर्व्वविज्ञानस्यासम्भवात् प्रतिज्ञादृष्टान्तोपरोध एव स्यात् तस्मादधिष्ठातृत्वराभावादात्मनः कर्तृत्वम् उपादानत्वराभावाच्च प्रकृतित्वम्। कृतस्वात्मनः कर्तृत्व प्रकृतित्वे" भा०। "अभिध्योपदेशाच्च" सू०। "अभिध्योदेशस्यात्मनः कर्तृत्व प्रकृतित्वे गमयति "सोऽकामयत बहु स्यां प्रजायेति" "तदैक्षतेति" च तत्राभिध्यानपूर्व्विकायाः खातन्त्र्यप्रवृत्तेः कर्तृत्वं गम्यते "बहु स्यामिति" पुत्रगात्रविषयत्वात् बहुभवनाभिध्यानाच्च प्रकृतित्वमपि गम्यते" भा०। "साक्षाच्चोभयाम्नानात्" सू०। "प्रकृतित्वस्यावयमभ्युच्चयः इतश्च प्रकृतिर्ब्रह्म यत् कारणं साक्षाद्ब्रह्मैव कारणमुपादायोभौ प्रभवप्रलयावाम्नायेते "सर्व्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्ति" "यदि वयात् प्रभवति यस्मिंश्च प्रलीयते तत् तस्योपादानं प्रसिद्धं यथा मृत्पिण्डयादीनां पृथिवी" साक्षादिति चोपादानान्तरानुपादानं सूचयति आकाशादेवेति। प्रत्यस्तमयश्च नोपादानादन्यत्र कार्य्यस्य दृष्टः" भा०। "आत्मकृतेः परिणामात्" सू०। "इतश्च प्रकृतिर्ब्रह्म यत् कारणं ब्रह्मप्रक्रियायाम्" "तदात्मानं स्वयमकुरुतेति" आत्मनः कर्म्मत्वं कर्तृत्वञ्च दर्शयति आत्मानमिति कर्म्मत्वं स्वयमकुरुतेतिकर्तृत्वम्। कथं पुनः पूर्व्वसिद्धस्य स्वतः कर्तृत्वेन व्यवस्थितस्य क्रियमाणत्वं शक्यं सम्पादयितुम् ? परिणामादिति ब्रूमः पूर्व्वसिद्धो हि सन्नात्मा विशेषेण विकारात्मना परिणमयामासात्मानमिति विकारात्मना च परिणामो ह्रदाद्यासु प्रकृतिषूपलब्धः। स्वयमिति च विशेषणात्सिद्धस्यान्यानपेक्षत्वमपि द्योत्यते। परिणामादिति वा पृथक्करणं तर्ह्योऽर्थः। इतश्च प्रकृतिर्ब्रह्म यत् कारणं ब्रह्मण एव विकारात्मनाय परिणामः सामानाधिकरण्येनाम्नायते" "सच्च त्यच्चाभवन्निरुक्तञ्चानिरुक्तञ्चेत्यादिनेति" भा०। "योनिञ्च हि गीयते" सू०। "इतश्च प्रकृतिर्ब्रह्म यत् कारणं ब्रह्म योनिरित्यपि सर्व्वत्र वेदान्तेषु "कर्त्तारमीशं पुरुषं ब्रह्म योनिमिति" यद्भूतयोनिं परिपश्यन्ति धीराः" इति च। योनिशब्दश्च प्रकृतिवचनः समधिगतोलोके "पृथिवी योनिरोषधिवनस्पतीनामिति। स्त्रीयोनेरप्यन्येषामपत्यादा

श्रुतं पुत्रुपादानत्वम् क्वचित् स्थानवचनोऽपि योनिशब्दो दृष्टः "योनिष इन्द्रनिषदे अकारोति" वाक्यशेषात् । तत्र प्रकृतिश्चेतना परिगृह्यते "यथोर्णनाभिः सृजते गृह्णते च" इत्येवं जातीयकात् । तदेवं प्रकृतित्वं ब्रह्मणः सिद्धम् । यत् पुनरिदमुक्तं हेत्वपूर्वकं कर्तृत्वं निमित्तकारणेष्वेव कुलालादिषु लोके दृष्टं नोपादानेष्वित्यादि तत् पुनरुच्यते, न लोकवदिह भवितव्यं नतुयमनुमानगम्योऽर्थः यद्यगम्यानुमानगम्यार्थस्य प्रकृतित्वं प्रतिपादयतीत्यलोचाम पुनश्चैतत् सर्वं विस्तरेण प्रतिवक्ष्यामः" भा० ।

तत्र चेतनकारणतावादे सांख्यादेपप्रदर्शनपूर्वकं ब्रह्मणोऽथा कारणत्वसम्भवस्तथा व्यवस्थापितं तत्रैव "इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः" भा०सू० ।

"अन्यथा पुनश्चेतनकारणवाद आश्रियते चेतनाद्धि जगत् प्रक्रियायामाश्रीयमाणायां हिताकरणादयोदोषाः प्रसज्यन्ते कुत ? इतरव्यपदेशात् इतरस्य शारीरस्य ब्रह्मात्मत्वं व्यपदिशति श्रुतिः "स आत्मा तत्त्वमसि श्वेतकेतो" इति प्रतिबोधनात् । अहा इतरस्य ब्रह्मणः शारीरात्मत्वं व्यपदिशति" तत्सृष्ट्वा तदेवानुप्राविशदिति" सृष्टेरेवाविकृतस्य ब्रह्मणः कार्यानुप्रवेशेन शारीरात्मत्वप्रदर्शनात् । 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति' परदेवताजीवमात्मशब्देन व्यपदिशन्ती न ब्रह्मणोभिन्नः शारीरइति दर्शयति । तस्माद्ब्रह्मणः सृष्टृत्वं तच्छारीरस्यैवेत्यतः स्वतन्त्रकर्त्ता स च हितमेवात्मनः सौभनसृकरं कुर्यात् नाहितं जन्ममरणजरारोगाद्यनेकानर्थजालम् । न हि कश्चिदपरतन्त्रोबन्धनागारमात्मानं कृत्वानुप्रविशति न च स्वयमात्मनिर्मलः सन्नात्मनं मलिनं देहयात्मत्वेनोपेयात् कृतमपि कथञ्चिदात् दुःखकरं तदिच्छया जातात् सुखकरं वोपादद्यात् करेच्च मयेदं जगद्विविधं विचित्रं विरचितमिति सर्वो हि लोकः सृष्टं कार्यं कृत्वा वदति मयेदं कृतमिति । यथा च मायावी स्वयं प्रसारितां मायामिच्छया अनायासेनोपसंहरति एवं शारीरोऽपीमां सृष्टिमुपसंहरेत् । स्वकोयमपि तावच्छरीरं शारीरो न शक्नोति अनायासेनोपसंहर्तुम् । एवं हितक्रियार्थमेवादात्मा चेतनाज्जगत् प्रक्रियेति मन्यते" भा० ।

"अधिकन्तु भेदनिर्देशात्" सू० । "तथाह्यः पूर्वपक्षं व्यावर्त्तयति । यत्सर्वज्ञं सर्वशक्ति ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं शारीरादधिकमन्यत् तस्य जगतः सृष्टृ ब्रूमः न तस्मिन् हिताकरणादयोदोषाः प्रसज्यन्ते । न हि तस्य हितं किञ्चित् कर्त्तव्यमस्ति अहितं वा परिहर्त्तव्यं नित्यमुक्तत्वात् । न च तस्य ज्ञानप्रतिबन्धः यत्प्रतिबन्धो वा कश्चिदर्थाप्तिः सर्वज्ञत्वात् सर्वशक्तित्वाच्च । शारीरस्वनेवंविधलक्षणेन प्रसज्यन्ते हिताकारणादयोदोषाः न तु तं वयं जगत स्रष्टारं ब्रूमः । कुत एतत् भेदनिर्देशात् "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्योनिदिध्यासितव्य" "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" "सता सौम्य ! तदा संपन्नोभवति" "शारीर आत्मा प्राज्ञेनात्मना अन्वारूढ" इत्येवं जातीयकः कर्तृकर्मादिभेदनिर्देशो जीवादधिकं ब्रह्म दर्शयति । अन्यभेदनिर्देशोऽपि दर्शितः "तत्त्वमसीत्येवंजातीयकः कथं भेदाभेदौ विरुद्धौ सम्भवेताम् ?। नैष दोषः । आकाशघटाकाशन्यायेनोभयसम्भवस्य तत्र तत्र प्रतिष्ठापितत्वात् । अपि च यदा "तत्त्वमसीत्येवंजातीयकेनाभेदनिर्देशेनाभेदः प्रतिबोधितो भवति, अपगतश्चभवति तदा जीवस्य संसारित्वं, ब्रह्मणश्च स्रष्टृत्वं, समस्तस्य मिथ्याज्ञानविजृम्भितस्य भेदव्यवहारस्य सम्यग्ज्ञानेन बाधितत्वात् तत्र कुत एव सृष्टिः, कुतो वा हिताकरणादयोदोषाः । अविद्यात्मव्यापितनामरूपप्रकृतिकार्यकारणसंघातोपाध्यविवेककृता हि भ्रान्तिर्हिताहितकरणादिलक्षणः संसारो न तु परमार्थतोऽस्तीत्यसकृदेवावोचाम जन्ममरणाद्यभिमानवत् । अबाधिते तु भेदव्यवहारे "सोऽन्वेष्टव्य इत्येवंजातीयकेन भेदनिर्देशेनावगम्यमानं ब्रह्मणोऽधिकत्वं हिताकरणादोषप्रसक्तिं निरुणद्धि" भा० । "अन्यादिषु तदनुपपत्तेः" सू० "यथा च लोके पृथिवीत्वसामान्यान्वितानामप्यश्मनां केचिन्मणयोवज्रवैदूर्यादयोऽन्ये मध्यमवीर्याः सूर्यकान्तादयोऽन्ये प्रहीणाःस्वव्यवस्थेयमार्हाःपाषाणा इत्यनेकविधं वैचित्र्यं दृश्यते यथा चैकपृथिवीव्यपाश्रयाणामपि बीजानां बहुविधं फलपुष्पफलगन्धरसादिवैचित्र्यं चन्दनचम्पकादिषूपलभ्यते यथा चैकरसाप्यन्नरसस्य लोहितादीनि रोमलोमादीनि च कार्याणि विचित्राणि भवन्ति एवमेकस्यापि ब्रह्मणोजीवप्राप्तसृष्टृत्वं कार्यवैचित्र्यं चोपपद्यत इत्यतस्तदनुपपत्तिः परपरिकल्पितदोषानुपपत्तिरित्यर्थः । श्रुतेश्च प्रागाख्याद्विकारस्य वाचारम्भणमात्रत्वात् स्वप्रलयभावैवचित्र्यवत्त्वेत्यभ्युच्चयः" भा० । "उपसंहारदर्शनाद्धेति चेन्न क्षीरवद्धि" सू० । "चेतनं ब्रह्मैवाहितेयं जगतः कारणमिति यदुक्तं तदुपपद्यते कस्मात् ? उपसंहारदर्शनात् । इह हि लोके कुलालादयो

घटपटादीनां कर्त्तारोऽदृष्टदण्डचक्रसूत्राद्यनेककारकोपसंहारेण संगृहीतसाधनाः सन्तस्तत्तत् कार्यं कुर्वाणादृश्यन्ते ब्रह्म चासहायं तदाभिप्रेतं तस्य साधनान्तरानुपसंग्रहे सति कथं खण्डत्वमुपपद्येत तस्माच्च ब्रह्म जगत्कारणमिति चेन्नैष दोषः यतः क्षीरवत् द्रव्यस्वभावविशेषादुपपद्यते यथा हि लोके क्षीरं जलं वा स्वयमेव दधिक्षिमभावेन परिणमते-ऽन्यमेव्य बाह्यं साधनं, तथेहापि भविष्यति। ननु क्षीरादयोऽपि दध्यादिभावेन परिणममानमन्यमपेक्षन्तएव बाह्यं साधनम् औष्ण्यादिकं, कथमुच्यते क्षीरवद्धीति नैष दोषः। स्वयमपि हि क्षीरं बाह्यं यावतीञ्च परिणाममात्रामनुभवत्येवं यावतीञ्चौष्ण्यादिना दधिभावाय। यदि स्वयं दधिभावशीलता न स्यात्नैवौष्ण्यादिनापि बलाद्दधिभावमापद्येत। न हि वायुराकाशो वौष्ण्यादिना बलाद्दधिभावमापद्येत। साधनसम्पत्त्या च तस्य संपूर्णता सम्पाद्यते। परिपूर्णशक्तिकञ्च ब्रह्म न तस्यान्येन केनचित् पूर्णता सम्पादयितव्या। श्रुतिश्च तत् भवति "न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति तस्मादेकस्यापि ब्रह्मणो विचित्रशक्तियोगात् क्षीरादिवद्विचित्रः परिणामोपपद्यते" भा०। "देवादिवदपि लोके" सू०। "स्यादेतत् उपपद्यते क्षीरादीनामचेतनानामनपेक्ष्यापि बाह्यं साधनं दध्यादिभाव-दृष्टत्वात् चेतसा पुनः कुलालादयश्च साधनसामग्रीमपेक्ष्यैव तत्तत्कार्याय प्रवर्त्तमाना दृश्यन्ते कथं ब्रह्म चेतनं सदनपेक्ष्यं प्रवर्त्तेतेति? देवादिवदिति ब्रूमः। यथा लोके देवाः पितरः ऋषयः इत्येवमादयः महाप्रभावाश्चेतना अपि सन्तोऽनपेक्ष्य किञ्चिद्बाह्यं साधनमैश्वर्यविशेषयोगादभिध्यानमात्रेण स्वतएव बहूनि नामसंख्यानानि शरीराणि प्रासादादीनि रथादीनि च निर्मिमाणा उपलभ्यन्ते मन्त्रार्थवादेतिहासपुराणन्यायाच्च। तन्नाभश्च स्वतएव तन्तून् सृजति वल्मीकाश्चान्तरेणैव शुक्लं गर्भं धत्ते, पद्मिनी चानपेक्ष्य किञ्चित् पुष्पाणसाधनं सरोन्तरात् सरोन्तरं प्रतिष्ठते। एवं चेतनमपि ब्रह्मानपेक्ष्य बाह्यं साधनं स्वतएव जगत् सृजति न यदि ब्रूयात् यएते देवादयो ब्रह्मणो दृष्टान्ता उपात्ताः ते दार्ष्टान्तिकेन ब्रह्मणा समानस्वभावा न भवन्ति शरीरमेव ह्यचेतनं देवादीनां शरीरान्नरादिविभूत्युपादानत्वमस्थान न तु चेतनः आत्मा, तन्नाभस्य च लूतस्तन्तुर्भक्षणाच्छ्लाघा कठिनतामापद्यमानो तन्तुर्भवति, वल्मीकाश्चन्दनयित्नुरेव स्वशरीरगर्भं धत्ते, पद्मिनी च चेतनप्रयुक्ता सत्यचेतनेनैव शरीरेण सरोन्तरात् सरोन्तरमुपसर्पतीति यद्भवेत् दृष्टं न तु स्वयमेव अचेतना सरोन्तरोपसर्पणे व्याप्रियते तस्मादेते ब्रह्मणो दृष्टान्ता इति, तं प्रति ब्रूयात् नायं दोषः। कुलालादिदृष्टान्तैर्बलक्षयमात्रस्य विवक्षितत्वादिति। यथा हि कुलालादीनां देवादीनाञ्च समाने चेतनत्वे कुलालादयः कार्यारम्भे बाह्यं साधनमपेक्षन्ते न देवादयस्तथा, ब्रह्म चेतनमपि न बाह्यं साधनमपेक्षिष्यते इत्येतावद्ध्यय देवादीन् दृष्टान्तेन विवक्षितः। तस्मात्सर्वैकस्य-सामर्थ्यं दृष्टं तथा सर्वज्ञत्वमेव भविष्यतीति नास्त्येकान्त इत्यभिप्राय" भा०। "कृत्स्नप्रसक्तिर्निरवयवत्वशब्दव्याकोपो वा" सू०। "चेतनमेकमद्वितीयं ब्रह्म क्षीरादिवदहेयतादिवच्चानपेक्षितबाह्यसाधनं स्वयमपरिणममानं जगतः कारणमिति स्थितम्। शास्त्रार्थपरियुद्ध्ये तु पुनरारभ्यते कृत्स्नप्रसक्तिः कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः प्राप्नोति निरवयवत्वात् यदि ब्रह्म पृथिव्यादिवत् सावयवमभविष्यत्ततोऽस्यैकदेशः पर्य्यापद्यत एकदेशश्चावास्थास्यत, निरवयवन्तु ब्रह्म श्रुतिभ्योऽवगम्यते "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" "दिव्योह्यमूर्त्तः पुरुषः स बाह्याभ्यन्तरोह्यजः" "इदं महद्भूतमनन्तमपारम्" "विज्ञानघन एव स एषेति नेत्यात्माऽस्थूलमनण्वह्रस्वमदीर्घः" सर्वविशेषं प्रतिषेधयितीभ्यः। ततश्चैकदेशपरिणामासम्भवात् कृत्स्नपरिणामप्रसक्तौ सत्यां मूलोच्छेदः प्रसज्यते दृष्टव्यत्वोपदेशानर्थक्यञ्चापद्यते अयत्नदृष्टत्वात् कार्यस्य। तद्व्यतिरिक्तस्य च ब्रह्मणोऽभावादजत्वादिशब्दव्याकोपश्च। अथैतद्दोषपरिजिहीर्षया सावयवमेव ब्रह्माभ्युपगम्येत तथापि ये निरवयवत्वस्य प्रतिपादकाः शब्दास्तदाकुलाः प्रसज्येयुः। सावयवत्वे चानित्यत्वं प्रसक्तं इति सर्वार्थाश्रयणो न घटयितुं शक्यत इत्याह "श्रुतेस्तु शब्दमूलत्वात्" सू० "श्रुतिशब्देनाक्षेपं परिहरति न खल्वेतत्पक्षे कश्चिदपि दोषोऽस्ति न तावत् कृत्स्नप्रसक्तिरस्ति कुतः? श्रुतेः तथाहि ब्रह्मणोऽवस्थानं श्रूयते प्रकृतिविकारयोर्भेदेन व्यपदेशात् "सैषानन्दस्यैतत् पूर्णमात्मानमेवानुसंविवेशेति" "तदात्मानं स्वयमकुरुत" "तत्सृष्ट्वा तदेवानुप्राविशत्" "तदनुप्रविश्य सच्च त्यच्चाभवत्" "तत्तेजोऽसृजत" "तासां त्रिवृतं त्रिवृतमेकैकामकरवत्" "तदात्मानं स्वयमकुरुत" "तदेतत्पुरुषे ब्रह्म तदमुष्मिन् स उ एव योऽयं पुरुषे यश्चासावादित्ये स एकः" "तदेतदेकं सन्नात्मानं बहुधा करवै

सम्पत्तिवचनाच्च । यदि च कृत्स्नं ब्रह्म कार्यभावेनोपयुक्तं स्यात् "यता वाचो निवर्तन्ते अप्राप्य मनसा सह" इति श्रुतिगतं विशेषणमनुपपन्नं स्यात् विकृतेन ब्रह्मणा नित्यं सम्बन्धत्वात् अविकृतस्य च ब्रह्मणोऽभावात् तस्येन्द्रियगोचरत्वप्रतिषेधाद्ब्रह्मणः, विकारस्य चेन्द्रियगोचरत्वोपपत्तेः । तस्मादस्ति अविकृतं ब्रह्म न च निरवयवत्वश्रुत्यादयोऽस्ति श्रूयमाणत्वादेव निरवयवत्वस्याभ्युपगम्यमानत्वात् । यच्छ्रुतञ्च ब्रह्म यच्छ्रुतप्रमाणकं नेन्द्रियादिप्रमाणकं तद्यथा-शब्दमभ्युपगन्तव्यम् । यच्छ्रोभयमपि ब्रह्मणः प्रतिपादयति अकृत्स्नप्रसक्तिं निरवयवताञ्च । लौकिकानामपि मणिमन्त्रौषधप्रभृतीनां देशकालनिमित्तवैचित्र्यवशात् शक्तयोविरुद्धानेककार्यविषया दृश्यन्ते ता अपि तावन्नोपदेशमन्तरेण केवलेन तर्केणावगन्तुं शक्यन्ते अस्य वस्तुन एतावत्त्वमेतच्छक्तया एतद्विषया एतत्प्रयोजनाश्च शक्तय इति किमुताचिन्त्यप्रभावस्य ब्रह्मणोरूपं विना शब्देन न निरूप्येत । तथाचाहुः पौराणिकाः "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् । प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणमिति" । तस्माच्छब्दमूलएवातीन्द्रियार्थ यथात्माधिगमः । ननु शब्देनापि न शक्यते विरुद्धार्थः प्रत्याययितुं निरवयवञ्च ब्रह्म परिणमते न च कृत्स्नमिति यदि निरवयवं ब्रह्म स्यान्नैव परिणमेत कृत्स्नमेव वा परिणमेत अथ कैश्चिदंशैः परिणमेत कैश्चिदंशैरवतिष्ठेतेति रूपभेदकल्पनात् सावयवमेव प्रसज्येत । क्रियाविषये "अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णाती-त्येवंजातीयिकायां विरुद्धप्रतीतावपि विकल्पात्समुच्चय विरोधपरिहारकारणं भवति पुरुषतन्त्रत्वादनुष्ठानस्य इह तु विकल्पात्समुच्चयेनापि न विरोधपरिहारः वस्तुवति अपुरुषतन्त्रत्वाद्वस्तुनः तस्माद्दुष्टमेतदिति नैष दोषः । अविद्याकल्पितरूपभेदाभ्युपगमात् । नह्यविद्याकल्पितेन रूपभेदेन सावयवं वस्तु सम्पद्यते । न हि तिमिरोपहतनयनेनानेक इव चन्द्रमा दृश्यमानोऽनेक एव भवति । अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वाच्येन ब्रह्म परिणामादिसर्वव्यवहारास्पदतां प्रतिपद्यते पारमार्थिकेन च रूपेण सर्वव्यवहारातीतमपरिणतमवतिष्ठते वाचारम्भणमात्रत्वाच्चाविद्याकल्पितस्य नामरूपभेदस्य, न निरवयवत्वं ब्रह्मणः कुप्यति । नचेयं परिणामश्रुतिः परिणामप्रतिपादनार्था तत्प्रतिपत्तौ फलाभावश्रवणात् । सर्व व्यवहारहीनब्रह्मात्मभावप्रतिपादनार्था त्वेषा तत्प्रतिपत्तौ फलावगमात् । "सएष नेति नेत्यात्मा" इत्यु पक्रम्याह "अभयं वै जनक प्राप्तोऽसीति" । तस्मादकृत्स्नपक्षेऽपि कश्चिदपि दोष प्रसङ्गोऽस्ति भा० । "आत्मनि चैवं विचित्राश्च हि" सू० । "अपि च नैवात्र विरुद्धमस्ति कथमेकस्मिन् ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः स्यादिति यत आत्मन्यप्येकस्मिन् स्वप्नेऽपि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः पठ्यते "न तत्र रथा न रथयोगा न पन्थानोभवन्त्यथ रथान् रथयोगान् पथः सृजते" इत्यादिना । लोकेऽपि देवादिषु मायाद्यादिषु च स्वरूपानुपमर्देनैव विचित्राहस्त्यश्वादिसृष्टयो दृश्यन्ते तर्कैकस्मिंश्चापि ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टि-र्भविष्यतीति" भा० । "स्वपक्षदोषाच्च" सू० । "परेषामप्येष समानः स्वपक्षदोषः प्रधानवादिनोऽपि हि निरवयवमपरिच्छिन्नं शब्दादिहीनं प्रधानं साध्यवस्य परिच्छिन्नस्य शब्दादिमतः कार्यस्य कारणमिति स्वपक्षः तत्रापि कृत्स्नप्रसक्तिर्निरवयवत्वात् प्रधानस्य प्राप्नोति निरवयवत्वाभ्युपगमव्यकोपोवा । ननु नैव तैर्निरवयवं प्रधानमभ्युपगम्यते सत्वरजस्तमांसि हि त्रयोगुणा तेषां साम्यावस्था प्रधानं तैरेवावयवैः तत् सावयवमिति, नैवं जातीयकेन सावयवत्वेन प्रकृतोदोषः परिहर्तुं पार्यते यत् सत्वरजस्तमसामप्येकैकस्य समानं निरवयवत्वम् एकैकमेवेतरद्वयानुत्कृष्टं स्वजातीयस्य प्रपञ्चस्योपादानमिति समानत्वात् स्वपक्षदोषप्रसङ्गस्य । तर्काप्रतिष्ठानात् सावयवत्वमेवेति चेत् एवमप्यनित्यत्वादिदोषप्रसङ्गः । अथ शक्तय एव कार्यवैचित्र्यादुचिता अवयवा इत्यभिप्रायः, नास्तु ब्रह्मवादिनोऽप्यविशिष्टाः । तथा अणुवादिनोऽप्यणुरवयवैरेव संयुज्यमानो निरवयवत्वादेव कार्त्स्न्येन संयुज्येत ततः प्रथिमानुपपत्तेरणुमात्रतापसङ्गः । अथैकदेशेन संयुज्येत तथापि निरवयवत्वाभ्युपगमव्यकोप इति स्वपक्षेऽपि समानएष दोषः । समानत्वाच्च नान्यतरस्मिन्नेव पक्षे उपालम्भोभवति । परिहृतस्तु ब्रह्मवादिना स्वपक्षे दोषः" भा० । "सर्वोपेता च तद्दर्शनात्" सू० । "एकस्यापि ब्रह्मणो विचित्रशक्तियोगादुपपद्यते विचित्रो विकारप्रपञ्च इत्युक्तं तत् पुनःकथमवगम्यते विचित्रशक्तियुक्तं परं ब्रह्मेति ? "तदुच्यते सर्वोपेता च तद्दर्शनात् सर्वशक्तियुक्ता परा देवतेत्यवगन्तव्यं कुतः ? तद्दर्शनात् तथा हि दर्शयति श्रुतिः सर्वशक्तियोगं परस्यादेवताया "सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः" "सत्य-

काम' सत्यसङ्कल्प'' ''यः सर्वज्ञः सर्ववित्'' ''एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ धृतौ तिष्ठत'' इत्येवञ्जातीयका'' भा०। ''विकरणत्वान्नेति चेत्तदुक्तम्'' सू०। ''स्यादेतत् विकरणां परां देवतां शास्ति शास्त्रम् ''अचक्षुष्कमश्रोत्रमवागमन'' इत्येवञ्जातीयकम्। कथं सा सर्वशक्तियुक्तापि सती कार्याय प्रभवेत्? देवादयोऽपि चेतना' सर्वशक्तियुक्ता अपि सन्त आध्यात्मिककार्याकरणसम्पन्ना एव तत्तत्कार्यार्थाय प्रभवन्तो दृश्यन्ते। कथञ्च ''नेति नेतीति'' प्रतिषिद्धसर्वविशेषाया देवतायाः सर्वशक्तियोगः सम्भवेदिति? चेत् यदत्र वक्तव्यं तत् पुरस्ताद्वक्ष्यते, श्रुत्यवगाह्यमेवेदमतिगम्भीरं परं ब्रह्म न तर्कावगाह्यम् न च यथैकस्य सामर्थ्यं दृष्टं तथान्यस्यापि सामर्थ्येन भवितव्यमिति नियमोऽस्तीति। प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणः सर्वशक्तियोगः सम्भवतीत्येतदप्यविद्याकल्पितरूपभेदोपन्यासेनोक्तमेव। तथा च शास्त्रम् ''अपाणिपादोजवनोगृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः'' इत्यकरणस्यापि ब्रह्मणः सर्वसामर्थ्ययोगं दर्शयति'' भा०। ''न प्रयोजनवत्त्वात्'' सू०। ''अन्यथा पुनश्चेतनकर्तृकत्वं जगतः व्याहन्यते, न खलु चेतनः परमात्मेदं जगद्विश्वं विरचयितुमर्हति कुतः? प्रयोजनवत्त्वात् प्रवृत्तीनाम्। चेतनो हि लोके बुद्धिपूर्वकारी पुरुष प्रवर्तमानो न मन्दोपक्रमामपि तावत् प्रवृत्तिमात्मप्रयोजनानुपयोगिनीमारभमाणोदृष्टः किमुत गुरुतरसंरम्भाम्। भवति च लोकप्रसिद्धानुवादिनी श्रुतिः ''न वा अरे सर्वस्य कामाय सर्वं प्रियम्भवत्यात्मनस्तु कामाय सर्वं प्रियम्भवतीति''। गुरुतरसंरम्भा चेयं प्रवृत्तिर्यदुच्चावच प्रपञ्चं जगद्विश्वं विरचयितव्यम्। यदीयमपि प्रवृत्तिश्चेतनस्य परमात्मन आत्मप्रयोजनोपयोगिनी परिकल्प्येत परिदृष्टप्रत्यवं परमात्मनः श्रूयमाणं बाध्येत प्रयोजनाभावे वा प्रवृत्त्यभावोऽपि स्यात्। अथ चेतनोऽपि सन्नज्ञानोच्चावचापराधात्तत्तदैश्वर्यानुरूपं प्रयोजनं प्रवर्तमानोदृष्टस्तथा परमात्मापि प्रवर्तिष्यत इत्युच्येत, तथा सति सर्वज्ञत्वं परमात्मनः श्रूयमाणं बाध्येत तस्मादज्ञिष्टा चेतनात् सृष्टिरिति'' भा०। ''लोकवत्तु लीलाकैवल्यम्'' सू०। ''तृणन्दृष्टान्तेनेयं परिहरति। यथा लोके कस्यचिदाप्तैषणस्य राज्ञो राजामात्यस्य वा व्यतिरिक्तं किञ्चित्प्रयोजनमभिसन्धाय केवलं लीलारूपा प्रवृत्तयः क्रीडाविहारेषु भवन्ति यथा वोच्छ्वासनिश्वासादयोऽनभिसन्धाय प्राणं किञ्चित्प्रयोजनान्तर स्वभावादेव भवन्ति एवमीश्वरस्याप्यनपेक्ष्य किञ्चित्प्रयोजनान्तरं स्वभावादेव केवल लीलारूपा प्रवृत्तिर्भविष्यति। नहीश्वरस्य प्रयोजनान्तरं निरूप्यमाणं न्यायतः श्रुतितो वा सम्भवति। न च स्वभावः पर्यनुयोक्तुं शक्यते। यद्यप्यस्माकमियं जगद्विश्वविरचना गुरुतरसंरम्भेवाभाति तथापि परमेश्वरस्य लोकवत्तु केवलेयम् अपरिमितशक्तित्वात्। यदि नाम लोके लीलास्वपि किञ्चित् सूक्ष्मं प्रयोजनमनुप्रेक्षित तथापि नैवात्र किञ्चित्प्रयोजनमनुप्रेक्षितुं शक्यते आप्तकामतायाश्चेः। नाप्यप्रवृत्तिरूपत्वात्प्रवृत्तेः श्रुतेः सर्वज्ञत्वश्रुतेश्च। नचेयं परमार्थविषया सृष्टिस्थितिश्रुतिः अविद्याकल्पित नामरूपव्यवहारगोचरत्वात् ब्रह्मात्मभावप्रतिपादनपरत्वाच्चेत्येतदपि न विस्मर्तव्यम्'' भा०। ''वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति'' सू०। ''पुनश्च जगज्जन्मादिहेतुत्वमीश्वरस्याच्यते स्यूणानिखननन्यायेन प्रतिष्ठातस्यार्थस्य दृढीकरणाय। नेश्वरो जगतः कारणमुपपद्यते कुतः? वैषम्यनैर्घृण्यप्रसङ्गात्। कांश्चिदत्यन्तसुखभाजः करोति देवादीन्, कांश्चिदत्यन्तदुःखभाजः करोति पश्वादीन्, कांश्चिन् मध्यमभाजोमनुष्यादीनित्येवं विषमां सृष्टिं निर्मिमाणस्येश्वरस्य पृथग्जनस्येवरागद्वेषापत्तेः श्रुतिसूत्रव्यवधारितस्वच्छत्वादीश्वरस्वभावविपरिलोपः प्रसज्यते। तथा खलजनैरपि जुगुप्सितं निर्घृणत्वमतिक्रूरत्वं दुःखयोगविधानात् सर्वप्रजोपसंहरणाच्च प्रसज्यते। तस्माद्वैषम्यनैर्घृण्यप्रसङ्गाच्चेश्वरः कारणमित्येवं प्राप्ते ब्रूमः वैषम्यनैर्घृण्ये नेश्वरस्य प्रसज्यते कस्मात्? सापेक्षत्वात्। यदि हि निरपेक्षः केवल ईश्वरोविषमां सृष्टिं निर्मिमीत स्यातामेतौ दोषौ वैषम्य नैर्घृण्यञ्च। न तु निरपेक्षस्य निर्मातृत्वमस्ति, सापेक्षो होश्वरोविषमां सृष्टिं निर्मिमीते। किमपेक्षत इति चेदृच्छाधर्माधर्मावपेक्षत इति वदामः। अत एव सृज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिरिति नायमीश्वरस्यापराधः। ईश्वरस्तु पर्जन्यवद्द्रष्टव्यः यथा हि पर्जन्यो व्रीहियवादिसृष्टौ साधारणं कारणं भवति व्रीहियवादिवैषम्ये तु तत्तद्बीजगतान्येवासाधारणानि कारणानि भवन्ति, एवमीश्वरोदेव मनुष्यादिसृष्टौ साधारणं कारणं भवति देवमनुष्यादिवैषम्ये तु तत्तज्जीवगतान्येवासाधारणानि कर्माणि कारणानि भवन्ति। एवमीश्वरः सापेक्षत्वान्न वैषम्यनैर्घृण्याभ्यां दुष्यति। कथं पुनरवगम्यते सापेक्ष ईश्वरो नीचमध्योत्तमसंसारं निर्मिमीते इति। तथा हि दर्शयति

श्रुतिः 'एष ह्येव साधु कर्म कारयति तं, यमेभ्योलोकेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयति तं, यमधोलोकं निनीषति' इति "पुण्यो वै पुण्येन कर्मणा भवति, पापः पापेनेति" च। स्मृतिरपि प्राणिकर्मापेक्षित्वमेवेश्वरस्यानुपलीलत्वं नियन्तृत्वञ्च दर्शयति "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इत्येवञ्जातीयका" भा०। 'न कर्माविभागादिति चेन्नानादित्वात्' सू०। "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति" प्राक्सृष्टेरविभागावधारणाच्चास्ति कर्म यदपेक्षा विषमा सृष्टिः स्यात्, सृष्ट्युत्तरकालं हि शरीरादिविभागापेक्षं कर्म। कर्मापेक्ष ईश्वरः प्रवर्त्तता नाम, प्राक् विभागाद्दृष्टिनिमित्तस्य कर्मणोऽभावात्कुतो वाद्या सृष्टिः प्राप्नोतीति चेन्नैष दोषः, अनादित्वात् संसारस्य। अनेन दोषोऽप्यादिमान्यं संसारः स्यात् अनादौ तु संसारे बीजाङ्कुरवद्धेतुहेतुमद्भावेन कर्मणः, सर्गवैषम्यस्य च प्रवृत्तिर्न विरुध्यते। कथं पुनरेतदवगम्यते अनादिरेष संसार इति? अत उत्तरं पठति" भा०। "उपपद्यते चाप्युपलभ्यते च" सू०। "उपपद्यते च संसारस्यानादित्वं आदिमत्त्वे हि संसारस्याकस्माद्बद्धानामपि पुनःसंसारोद्भूतिप्रसङ्ग अकृताभ्यागमप्रसङ्गश्च सुखदुःखादिवैषम्यस्य निर्निमित्तत्वात्। न चेश्वरो वैषम्यहेतुरित्युक्तम्। न चाविद्या केवला वैषम्यकारणम् एकरूपत्वात्। रागादिक्लेशवासनाविचित्रकर्मापेक्षा त्वविद्या वैषम्यकरी स्यात्। न च कर्म अन्तरेण शरीरं सम्भवति, न वा शरीरमन्तरेण कर्म सम्भवतीतीतरेतराश्रयदोषप्रसङ्गः 'अनादित्वे तु बीजाङ्कुरन्यायेनोपपत्तेर्नैष दोषो भवति। उपलभ्यते च संसारस्यानादित्वं स्मृतिश्रुतेः। श्रुतौ तावत् 'अनेन जीवेनात्मनेति, सर्गप्रस्तावे शरीरमात्मानं जीवशब्देन प्राणधारणनिमित्तेनाभिलपन्नादिः संसार इति दर्शयति। आदिमत्त्वे तु ततः प्राणनधारितः प्राणः स कथं प्राणधारणनिमित्तेन जीवशब्देन सर्गप्रस्तावेऽभिलप्येत। न च धारयितृनीतोऽभिलप्येत अनागतादि सम्बन्धादतीतः सम्बन्धो वा भवति व्यभिचारित्वात्। "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदिति" च मन्त्रवर्णः पूर्वकल्पसद्भावं दर्शयति। स्मृतावप्यनादित्वं संसारस्योपलभ्यते। "न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा" इति भगवद्गीता। पुराणे चातीतानागतानामतानाञ्च कल्पानां न परिमाणमस्तीति स्थापितम्" प्रभुरभाष्यम्।

ईश्वरस्य केवलनिमित्तकारणतापक्षोऽपि न्यायवैशेषिकादिभिः तर्कैव प्रत्याख्यातः यथा 'पत्युरसामञ्जस्यात्' इत्यादि सू०। "इदानीं केवलाधिष्ठातृत्वेश्वरकारणवादः प्रतिषिध्यते। तत्कथमवगम्यते?। "प्रकृतितिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" "अभिध्योपदेशाच्च" इत्यत्र प्रकृतिभावेनाधिष्ठातृभावेन चोभयस्वभावश्चेश्वरस्य स्वयमेवाचार्येण प्रतिष्ठापितत्वात्। यदि पुनरविशेषेणेश्वरकारणवादमात्रमिह प्रतिषिध्येत पूर्वोत्तरविरोधाद्व्याकृताभिव्याहारः सूत्रकार इत्यं तदापद्येत। तस्मादप्रकृतिरधिष्ठाता केवलं निमित्तकारणमीश्वर इत्येष पक्षो वेदान्तविहितब्रह्मैकत्वप्रतिपत्तिव्याघातेनात्र प्रतिषिध्यते। सा चेयं वेदबाह्येश्वरकल्पनानेकप्रकारा। केचित्तावत्साङ्ख्ययोगव्यपाश्रयाः कल्पयन्ति प्रधानपुरुषयोरधिष्ठाता केवलं निमित्तकारणमीश्वरः इतरेतरविलक्षणाः प्रधानपुरुषेश्वरा इति। माहेश्वरास्तु मन्यन्ते "कार्यकारणयोगविधिदुःखान्ताः पञ्च पदार्थाः पशुपतिनेश्वरेण पशुपाशविमोक्षायोपदिष्टाः। पशुपतिरीश्वरो निमित्तकारणमिति,। तथा वैशेषिकादयोऽपि केचित् कर्मसहित स्वप्रक्रियानुसारेण निमित्तकारणमीश्वरं वर्णयन्ति। अत उत्तरमुच्यते। "पत्युरसामञ्जस्यादिति"। पत्युरीश्वरस्य प्रधानपुरुषयोरधिष्ठातृत्वेन जगत्कारणत्वं नोपपद्यते कस्मात्? असामञ्जस्यात्। किं पुनरसामञ्जस्यम् हि नमध्यमोत्तमभावेन हि प्राणिभेदान् विदधत ईश्वरस्य रागद्वेषादिदोषप्रसक्तेरस्मदादिवदनीश्वरत्वं प्रसज्यते। प्राणिकर्मापेक्षत्वाददोष इति चेन्न कर्मेश्वरयोः प्रवर्त्यप्रवर्त्तयितृत्वे इतरेतराश्रयदोषप्रसङ्गात्। अनादित्वादिति चेन्न वर्त्तमानकालवदतीतेष्वपि कालेष्वितरेतराश्रयदोषाविशेषादस्यपरम्परान्याय्यापत्तेः। अपि च प्रवर्त्तनालक्षणदोषा इति न्यायवित् समयः। न हि कश्चिद्दोषमपश्यन् परार्थे स्वार्थे वा प्रवर्त्तमानो दृश्यते स्वार्थप्रयुक्त एव च सर्वोजनः परार्थेऽपि प्रवर्त्तत इत्येवमध्यवसातव्यम्। स्वार्थकत्वादीश्वरस्यानीश्वरत्वप्रसङ्गात्। पुरुषविशेषपत्वाभ्युपगमाच्चेश्वरस्य पुरुषस्य चौदासीन्याभ्युपगमादसामञ्जस्यम्" भा०। 'सम्बन्धानुपपत्तेश्च' सू०। 'पुनरप्यसामञ्जस्यमेव न हि प्रधानपुरुषव्यतिरिक्त ईश्वरोऽन्तरेण सम्बन्धः प्रधानपुरुषयोरीक्षितः। न तावत् संयोगलक्षणः सम्बन्धः सम्भवति प्रधानपुरुषेश्वराणां सर्वगतत्वात् निरवयवत्वाच्च।

मापि समवायलक्षणः, आश्रयाश्रयिभावानिरूपणात् । नाप्यन्यः कश्चित् कार्यगम्यः सम्बन्धः शक्यते कल्पयितुं, कार्यकारणभावस्यैवाद्याप्यसिद्धत्वात् । ब्रह्मवादिनः कथमिति चेत् न तस्य तादात्म्यलक्षणसम्बन्धोपपत्तेः । अपि चागमबलेन ब्रह्मवादी कारणादिस्वरूपं निरूपयति नावयवस्य यथादृष्टं सर्वमभ्युपगन्तव्यम् । परस्य तु दृष्टान्तबलेन कारणादिस्वरूपं निरूपयतोयथादृष्टमेव सर्वमभ्युपगन्तव्यमित्ययमस्त्यतिशयः । परस्यापि सर्वज्ञप्रणीतागमसद्भावात् समानागमबलमिति चेन्न इतरेतराश्रयप्रसङ्गात् आगमप्रत्ययात् सर्वज्ञसिद्धिः सर्वज्ञप्रत्ययाच्चागमसिद्धिरिति । तस्मादनुपपन्ना बाह्यप्रयोगादिनामीश्वरकल्पना । एवमन्याश्वपि वेदबाह्यास्वीश्वरकल्पनासु यथासम्भवमसामञ्जस्यं योजयितव्यम्" भा० । "अधिष्ठानानुपपत्तेश्च" सू० । "इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य । स हि परिकल्प्यमानः कर्ताकार एव क्षित्यादीनि प्रधानादीनि वाधिष्ठाय प्रवर्त्तयेत् न चैवमनुपपद्यते । नह्यप्रत्यक्षं रूपादिहीनञ्च प्रधानमीश्वराधिष्ठेयं सञ्जायते क्षित्यादिवैलक्षण्यात्" भा० । "करणवच्चेन्न भोगादिभ्यः" सू० । "स्यादेतत् यथा करणग्रामं चक्षुरादिकमप्रत्यक्षं रूपादिहीनञ्च पुरुषोऽधितिष्ठत्येवं प्रधानमपीश्वरोऽधितिष्ठतीति, तथापि नोपपद्यते भोगादिदर्शनाद्धि करणग्रामस्याधितृत्वं गम्यते न चात्र भोगादयो दृश्यन्ते । करणग्रामसाम्ये चाभ्युपगम्यमाने संसारिणामिवेश्वरस्यापि भोगादयः प्रसज्येरन् । अन्यथा वा दृष्टहृद व्याख्यायते । "अधिष्ठानानुपपत्तेश्च" । इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य साधिष्ठानो हि लोके सशरीरोराजा राष्ट्रस्येश्वरोदृश्यते न निरधिष्ठानः, अतश्च तदृष्टान्तदर्शनादृष्टमीश्वरं कल्पयितुमिच्छता ईश्वरस्यापि किञ्चित्शरीरं करणायतनं वर्णयितव्यं स्यात् न च तद्वर्णयितुं शक्यते क्षित्युत्तरकालभावित्वात् शरीरस्य प्राक्सृष्टेस्तदनुपपत्तेः । निरधिष्ठानत्वे चेश्वरस्य प्रवर्त्तकत्वानुपपत्तिः सर्वं लोके दृष्टत्वात् । "करणवच्चेन्न भोगादिभ्यः" सू० । "अथ लोकदर्शनानुसारेणेश्वरस्यापि किञ्चित्करणानामायतनं शरीरं कामेन कल्प्यते एवमपि नोपपद्यते सशरीरत्वे हि सति संसारिवद्भोगादिप्रसङ्गादीश्वरस्याप्यनीश्वरत्व प्रसज्यते" भा० । "अन्तवत्त्वमसर्वज्ञता वा" सू० । "इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य । स हि सर्वज्ञस्तेरभ्युपगम्यते अनन्तञ्च ज्ञानञ्च प्रधानं अनन्तास्च पुरुषास्तिस्रो अभ्युपगम्यन्ते । तत्र सर्वज्ञत्वेनेश्वरेण प्रधानस्य पुरुषाणामात्मनश्चेयत्ता परिच्छिद्येत वा न वा परिच्छिद्येत, उभयथापि दोषोऽनुषक्त एव । कथं? पूर्वस्मिंस्तावदाद्यिकल्पे दृश्यतापरिच्छिन्नं वस्तु घटादिवदन्तवत् दृष्टं तथा प्रधानपुरुषेश्वरत्वयमपीयत्तापरिच्छिन्नत्वादन्तवत् स्यात् । संख्यापरिमाणं तावत् प्रधानपुरुषेश्वरत्वयरूपेण परिच्छिन्नं, स्वरूपपरिमाणमपि तद्गतमीश्वरेण परिच्छिद्येतेति । पुरुषगता च महासंख्या । ततश्चेयत्तापरिच्छिन्नानां ये संसाराद्युच्यन्ते तेषां संसारोऽनवान् संसारित्वञ्च तेषामन्तवत् । एवमितरेष्वपि क्रमेण सृज्यमानेषु संसारित्वस्य चानन्तत्वं स्यात् । प्रधानञ्च सविकारं पुरुषार्थमीश्वराधिष्ठेयं संसारत्वेनाभिमतं सकृत्सृष्टायामीश्वरः किमधितिष्ठेत? किं विषये वा सर्वज्ञत्वेश्वरते स्याताम् ? । प्रधानपुरुषेश्वराणां चैवमनन्तत्वे सति, आदिमत्त्वप्रसङ्गः आद्यन्तवत्त्वे च शून्यवादप्रसङ्गः। अथ मा भूदेष दोष इत्युत्तरविकल्पोऽभ्युपगम्यते न प्रधानस्य पुरुषाणामात्मनोवेयत्तेश्वरेण परिच्छिद्यत इति । तत ईश्वरस्य सर्वज्ञत्वाभ्युपगमहानिरपरो दोषः प्रसज्येत । तस्मादयुक्ततस्तार्किकपरिकल्पितेश्वरकारणवादः" ।

ईश्वरकारणतादाढ्यार्थं अचेतनप्रधानकारणवाद खण्डनमपि शा०सू०भाष्ययोः । यथा "रचनानुपपत्तेर्नानुमानम्" सू० । 'तत्र साङ्ख्यानामन्यते यथा घटशरावादयो भेदाः मृदात्मकतयान्वीयमाना मृदात्मकसामान्यपूर्विकाः लोके दृष्टाः तथा सर्वे एव बाह्याध्यात्मिका भेदाः सुखदुःखमोहात्मकतयान्वीयमाना सुखदुःखमोहात्मकसामान्यपूर्विका भवितुमर्हन्ति । यत्तत् सुखदुःखमोहात्मकं सामान्यं तत् त्रिगुणं प्रधानं जडमचेतनं चेतनस्य पुरुषस्यार्थं साधयितुं प्रवृत्तं स्वभावभेदेनैव विचित्रेषु विकारात्मना विवर्त्तते इति । तथा परिमाणादिभिरपि लिङ्गैरेतदेव प्रधानमनुमिमते । तत्र वदामः यदि दृष्टान्तबलेनैवंतल्लिङ्ग्यते नाचेतनं लोके चेतनमनधिष्ठितं स्वतन्त्रबुद्धिहिंगिदपुरुषार्थमिर्वर्त्तनसमर्थान् विकारान् विरचयत् दृष्टम् । नेहप्रासादशयनासनविहारभूम्यादयो हि लोके प्रज्ञावद्भिः विलिप्सितार्थधारणं सुखदुःखप्राप्तिपरिहारयोग्या रचिता दृश्यन्ते तच्चेदं जगदखिलं पृथिव्यादि नानाकर्मफलभोगयोग्यं बाह्याध्यात्मिकञ्च शरीरादि नानाजात्यन्वितं प्रतिनियतावयवविन्यासनेककर्मफलानुसंधा-

धिष्ठानं दृश्यमानं प्रज्ञावद्भिः सम्भाविततमैः शिल्पिभिर्मनसाप्यालोचयितुमशक्यं सत् कथमचेतनं प्रधानं रचयेत् ? लोष्टपाषाणादिष्वदृष्टत्वात्। वृक्षादिष्वपि कुम्भकाराद्यधिष्ठितेषु विशिष्टाकाररचना दृश्यते तद्वत् प्रधानस्यापि चेतनान्तराधिष्ठितत्वप्रसङ्गः। न च वृक्षादावुपादानस्वरूपव्यप्राश्रयेणैव धर्मेण मूलकारणमवधारणीयं न बाह्यकुम्भकारादिव्यप्राश्रयेणेति किञ्चिन्निमित्तमस्ति न चैवं सति किञ्चिद्विरुध्यते प्रत्युत श्रुतिरनुगृह्यते चेतनकारणतासमर्पणात्। अतोरचनानुपपत्तेश्च हेतोर्नाचेतनं जगत्कारणमनुमातव्यमभवति। अन्वयाद्यनुपपत्तेश्चेति चशब्देन हेतोरसिद्धिं समुच्चिनोति। नहि बाह्याध्यात्मिकानां भेदानां सुखदुःखमोहात्मकतयाऽन्वय उपपद्यते सुखादीनाञ्चान्तरत्वप्रतीतेः; यष्ट्यादीनाञ्चातद्रूपत्वप्रतीतेः; तद्भिन्नित्वप्रतीतेश्च यष्ट्यादिविशेषेऽपि च भावनाविशेषात् सुखादिविशेषोपलब्धेः। तथा परिमितानां भेदानां मूलाङ्कुरादीनां संसर्गपूर्वकत्वं दृष्ट्वा बाह्याध्यात्मिकानां भेदानां परिमितत्वात् संसर्गपूर्वकत्वमनुमिमानस्य सत्वरजस्तमसामपि संसर्गपूर्वकत्वप्रसङ्गः परिमितत्वाविशेषात्। कार्य्यकारणभावस्तु प्रेक्षापूर्वं निर्मितानां शयनासनादीनां दृष्ट इति न कार्य्यकारणभावाद्बाह्याध्यात्मिकानां भेदानामचेतनपूर्वकत्वं शक्यं कल्पयितुम्' भा०। "प्रवृत्तेश्च" सू०। "आख्यानाद्यर्थं रचना तत्सिद्ध्यर्था या प्रवृत्तिः साप्यावस्थानात् प्रच्युतिः सत्वरजस्तमसामङ्गाङ्गिरूपापत्तिर्विशिष्टकार्याभिमुखप्रवृत्तिर्वा सापि नाचेतनस्य प्रधानस्य स्वतन्त्रस्योपपद्यते मृदादिषूदर्शनाद्दध्यादिषु च। न हि मृदादयोरदादयो वा स्वयमचेतनाः सन्तश्चेतनैः कुलालादिभिरस्मदादिभिर्वाऽनधिष्ठिता विशिष्टकार्याभिमुखं प्रवृत्तयो दृश्यन्ते। दृष्टाच्चादृष्टसिद्धिः। अतः प्रवृत्त्यनुपपत्तेरपि हेतोर्नाचेतनं जगत्कारणमनुमातव्यमभवति। ननु चेतनस्यापि प्रवृत्तिः केवलस्य न दृष्टा सत्समेतस्यापि चेतनसंयुक्तस्य रथादेरचेतनस्य प्रवृत्तिर्दृष्टा नत्वचेतनसंयुक्तस्य चेतनस्य प्रवृत्तिर्दृष्टा। किं ह्यत्र युक्तं यच्चिन्न प्रवृत्तिर्दृष्टा तस्य सेत्युत यत्संयुक्तस्य दृष्टा तस्यैव सेति। ननु यच्चिन्न दृश्यते प्रवृत्तिस्तत्तस्यैव सेति युक्तम् उभयोः प्रत्यक्षत्वात् नतु प्रवृत्त्याश्रयत्वेन केवलचेतनरथादिवत्प्रवृत्त्याश्रयदेहादिसंयुक्तस्यैव तु चेतनस्य सद्भावसिद्धेः केवलाचेतनरथादिवल्लक्षणं जीवद्देहस्य दृष्टमिति। अतएव प्रयत्नेदेहे सति चैतन्यदर्शनादसति तदर्शनात् देहस्यैव चैतन्यमपीति लौकायतिकाः प्रतिपन्नाः। तस्माच्चेतनस्यैव प्रवृत्तिरिति। तत्राभिधीयते न ब्रूमो यच्चिच्चेतने प्रवृत्तिर्दृश्यते न तस्य सेति भवति तु तस्यैव सा सापि चेतनद्रव्यतीति ब्रूमः। तद्भावे भावात्तदभावे चाभावात् यथा काष्ठादिव्यप्राश्रयापि दारुपुत्रिकादिलक्षणा विक्रियानुपलभ्यमानापि केवले ज्वलने ज्वलनादेव भवति तत्संयोगे दर्शनात्तद्वियोगे चादर्शनात्तद्वत्। लौकायतिकानामपि चेतनस्यैव देहोऽचेतनानां रथादीनां प्रवर्त्तकोऽदृष्टस्यविप्रतिषिद्धं चेतनस्य प्रवर्त्तकत्वम्। ननु तस्य देहादिसंयुक्तस्यात्मनोविज्ञानस्वरूपमात्रव्यतिरेकेण प्रवृत्त्यनुपपत्तेरनुपपन्नं प्रवर्त्तकत्वमिति चेन्न अयस्कान्तवद्रूपादिवच्च प्रवृत्तिरहितस्यापि प्रवर्त्तकत्वोपपत्तेः यथाऽयस्कान्तोमणिः स्वयं प्रवृत्तिरहितोऽपि अयसः प्रवर्त्तको भवति यथा च रूपादयो विषयाः स्वयं प्रवृत्तिरहिता अपि चक्षुरादीनां प्रवर्त्तका भवन्त्येवं प्रवृत्तिरहितोऽपीश्वरः सर्व्वगतः सर्व्वात्मा सर्व्वज्ञः सर्व्वशक्तिश्च सन् सर्व्वं प्रवर्त्तयेदित्युपपन्नम्। एकत्वात् प्रवर्त्त्याभावे प्रवर्त्तकत्वानुपपत्तिरिति चेन्न अविद्यापुत्र्युपस्थापितनामरूपमायावेशवशेनासङ्ख्यत्वात्। तस्मात् सम्भवति प्रवृत्तिः सर्व्वज्ञकारणत्वे न त्वचेतनकारणत्वे" भा०। "प्रयोक्तृत्वाच्चेत्तत्रापि" सू०। "स्यादेतत् यथा क्षीरमचेतनं स्वभावेनैव वत्सविवृद्धये प्रवर्त्तते यथा च जलमचेतनं स्वभावेनैव लोकोपकाराय स्यन्दते एवं प्रधानमप्यचेतनं स्वभावेनैव पुरुषार्थसिद्धये प्रवर्त्स्यतीति। नैतत् साधूच्यते, यतस्तत्रापि पयोम्बुनोश्चेतनाधिष्ठितयोरेव प्रवृत्तिरित्यनुमिमीमहे उभयवादिप्रसिद्धे रथादावचेतने चेतने प्रवृत्त्यदर्शनात्। यत्तूक्तं "योऽपां तिष्ठन्नद्भ्योऽन्तरोयोऽपोऽन्तरोयमयति" "एतस्य वा अक्षरस्य प्रशासने गार्गि! प्राच्योऽन्या नद्यः स्यन्दन्ते" इत्येवञ्जातीयकं समस्तस्य लोकपरिस्पन्दितस्येश्वराधिष्ठितत्वं श्रावयति। तस्मात् साध्यधर्म्मनिश्चितत्वात् पयोम्बुवदित्यनुपन्यासः। चेतनायाश्च धेनोःस्वेनेच्छया पयसः प्रवर्त्तकत्वोपपत्तेः वत्सविवृद्धये च पयसः श्रावयिष्यमाणत्वात्। नवाम्बुनोऽभ्यन्तरमनपेक्षा निम्नभूम्याद्यपेक्षत्वात् स्यन्दनस्य। चेतनापेक्षेत्वत्तु सर्व्वत्रोपदर्शितम्। "उपसंहारदर्शनाच्चेति चेन्न क्षीरवद्धीत्यत्र" तु वाक्यनिमित्तैरपेक्षमपि स्वाश्रयं कार्य्यमवतीत्येतल्लोकदृष्ट्या नि

दर्शितं यास्तदेच्छा पुनः सर्वज्ञेश्वरापेक्षत्वमापद्यमानं न पराणुद्यते" भा० । "व्यतिरेकानवस्थितेश्चानपेक्षत्वात्" सू० । "साङ्ख्यानां त्रयोगुणाः साम्येनावतिष्ठमानाः प्रधानं न तद्व्यतिरेकेण प्रधानस्य प्रवर्त्तकं निवर्त्तकं वा किञ्चिद्बाह्यमपेक्ष्यमवस्थितमस्ति पुरुषस्तदानीनो न प्रवर्त्तको न निवर्त्तक इत्यतोऽनपेक्षं प्रधानम् अनपेक्षत्वाच्च कदाचित् प्रधानं महदाद्याकारेण परिणमते कदाचिच्च परिणमत इत्येतदयुक्तम् । ईश्वरस्य तु सर्वज्ञत्वात् सर्वशक्तित्वान्महामायित्वाच्च पूर्वक्त्यपूर्वक्त्ती न विरुध्येते" भा० "अन्यथाभावाच्च न तृणादिवत्" सू० । "स्यादेतत् यथा तृणपल्वलोदकादि निमित्तान्तरनिरपेक्षं स्वभावादेव क्षीराद्याकारेण परिणमते एवं प्रधानमपि महदाद्याकारेण परिणमतीति । कथञ्च निमित्तान्तरनिरपेक्षं तृणादीति गम्यते निमित्तान्तरानुपलम्भात् । यदि हि किञ्चिन्निमित्तान्तरमपेक्षेत तदा यथाकामं तेन तेन निमित्तेन तृणाद्युपादाय क्षीरं सम्पादयेन्महिषी न तु सम्पादयामास । तस्मात् स्वाभाविकस्तृणादेः परिणामः तथा प्रधानस्यापि सादिति । अत्रोच्यते । भवेत्तृणादिवत् प्रधानस्य स्वाभाविकः परिणामो यदि तृणादेरपि स्वाभाविक परिणामोऽभ्युपगम्येत न त्वभ्युपगम्यते निमित्तान्तरोपलब्धेः कथं निमित्तान्तरोपलब्धिः अचेतनत्वात् धेन्वैव हृयुक्तं तृणादि क्षीरीभवति न गृहीतमनड्वाद्युपयुक्तं वा यदि हि निर्निमित्तमेतत् स्यात् धेनुशरीरसम्बन्धादन्यदापि तृणादि क्षीरीभवेत् । न च यथाकामं नरेण शक्यं सम्पादयितुमित्येतावता निर्निमित्तता सम्भवति, भवति किञ्चित् कार्यं मानुषसम्पाद्यं किञ्चिद्दैवसम्पाद्यम् । मनुष्या अपि च शक्तबन्धवोचितेनोपायेन तृणाद्युपादाय क्षीरं सम्पादयितुं प्रभूतं हि क्षीरं कामयमानाः प्रभूतं घासं धेनुभ्यारयन्ति ततश्च प्रभूतं क्षीरं लभन्ते । तस्मान्न तृणादिवत् स्वाभाविकं प्रधानस्य परिणामः" भा० । "अभ्युपगमेऽप्यर्थाभावात्" सू० । "स्वाभाविकी प्रधानस्य प्रवृत्तिर्न भवतीति स्थापितम् । अथापि नाम भवतः श्रद्धामनुरुध्यमानाः स्वाभाविकीमेव प्रधानस्य प्रवृत्तिमभ्युपगच्छेम तथापि दोषोऽनुषज्येतैव कुतः ? अर्थाभावात् यदि तावत् स्वाभाविकी प्रधानस्य प्रवृत्तिर्न किञ्चिदन्यदपेक्षते इत्युच्येत ततो यथैव सर्गकारि किञ्चिन्नापेक्षते एवं प्रयोजनमपि किञ्चिन्नापेक्षिष्यत इत्यतः प्रधानं पुरुषस्यार्थं साधयितुं प्रवर्त्तते इतीयं प्रतिज्ञा हीयेत । स यदि ब्रूयात् सर्गकार्यमेव केवलं नापेक्षते न प्रयोजनमपीति तथापि प्रधानप्रवृत्तेः प्रयोजनं विकल्प्यं भोगोवा स्यादपवर्गो वा उभयं वेति । भोगश्चेत् कोटयोऽनाधेयातिशयस्य भोगो भवेत् अनिर्मोक्षप्रसङ्गश्च । अपवर्गश्चेत् प्रागपि प्रवृत्तेरपवर्गस्य सिद्धत्वात् प्रवृत्तिरनर्थिका स्यात् ततश्चाद्यानुपलब्धिप्रसङ्गश्च । उभयार्थतायामप्यभोक्तव्यानां प्रधानमात्राणामनन्त्यादनिर्मोक्षप्रसङ्ग एव । न चौत्सुक्यनिवृत्त्यर्था प्रवृत्तिः, न हि प्रधानस्याचेतनस्यौत्सुक्यं सम्भवति न च पुरुषस्य निर्मलस्य, दृक्शक्तिसर्गशक्तिवैयर्थ्यभयाच्च । प्रवृत्तिस्तर्हि दृक्शक्त्यनुच्छेदवत् सर्गशक्त्यनुच्छेदात् संसारानुच्छेदादनिर्मोक्षप्रसङ्ग एव तस्मात् प्रधानस्य पुरुषार्था प्रवृत्तिरित्येतदयुक्तम्" भा० । "पुरुषाश्मवदिति चेत्तथापि" सू० । "स्यादेतत् यथा कश्चित् पुरुषो दृक्शक्तिसम्पन्नं दृक्शक्तिविहीनमन्धमधिष्ठाय प्रवर्त्तयति यथा वाऽयस्कान्तोमणिः स्वयमप्रवर्त्तमानोऽयः प्रवर्त्तयति एवं पुरुष प्रधानं प्रवर्त्तयिष्यतीति दृष्टान्तपूर्वेण पुनः पूर्वपक्षोपन्यासः । अत्रोच्यते तथापि नैव दोषान्निर्मोक्षोऽस्ति । अभ्युपेतहानिं तावदेष आपतति, प्रधानस्य स्वतन्त्रस्य प्रवृत्त्यभ्युपगमात् पुरुषस्य च प्रवर्त्तकत्वानभ्युपगमात् । अथाप्युदासीनः पुरुषः प्रधानं प्रवर्त्तयेत् । प्रवर्तयमपि चान्धं पुरुषं यानादिभिः प्रवर्त्तयति नैवं पुरुषस्य कश्चित् प्रवर्त्तनव्यापारोऽस्ति निष्क्रियत्वाद्विगुणत्वाच्च । नाप्यदर्शनात् सन्निधिमात्रेण प्रवर्त्तयेत् सन्निधिनित्यत्वेन पुंसः सर्गनित्यत्वप्रसङ्गात् । अथ कालस्य कादाचित्कः सन्निधिरस्ति स व्यापारसन्निधिपरिमार्जनाद्यपेक्षो वास्यास्तानुच्छ्वासः पुरुषाश्मवदिति । तथा प्रधानसंयोगश्चैतन्यात् पुरुषे चोदासीन्यात् तृतीयस्य च तयोः सम्बन्धस्याभावात् सम्बन्धानुपपत्तिः । योग्यतानिमित्तः सम्बन्ध इति योग्यतानुच्छेदादनिर्मोक्षप्रसङ्गः । पूर्वदृक्शक्त्यभावो विकल्पयितव्यः । परमात्मनस्तु स्वरूपव्यापाश्रयमोदासीन्यं मायाव्यापाश्रयञ्च पुरुषाकृतमित्यकृतिश्चयः" भा० । "अन्यथानुमितौ च ज्ञशक्तिवियोगात्" सू० । "अथापि

स्यात् अन्यथा वयमनुमिमीमहे यथा नायमनन्तरो दोषः प्रसज्यते । नह्यनपेक्षस्वभावाः कूटस्थाश्चाकार्यिणो अभ्युपगम्यन्ते प्रमाणाभावात् । कार्यवशेन तु गुणानां स्वभावोऽभ्युपगम्यते यथा यथा कार्योत्पादः उपपद्यते तथा तथैषां स्वभावोऽभ्युपगन्तव्यः । चलं गुणवृत्तमिति चास्याभ्युपगमः । तस्मात् साम्यावस्थायामपि वैषम्योपगमयोग्या एव गुणा अवतिष्ठन्त इति । एवमपि प्रधानस्य स्वशक्तिवियोगात् रचनानुपपत्त्यादयः पूर्वोक्ता दोषा स्तदवस्था एव । स्वशक्तिमपि स्वनुमिमानः प्रतिघातित्वाच्चिवर्त्तते चेतनमेकमनेकपुरुषस्य जगत उपादानमिति ब्रह्मवादपुरङ्गात् । वैषम्योपगमयोग्या अपि गुणाः साम्यावस्थायां निमित्तभावाच्चैव वैषम्यं भजेरन् भजमाना वा निमित्ताभावाविशेषात् सर्वदैव वैषम्यं भजेरन्निति पुरुषस्य एवायमनन्तरोऽपि दोषः" भाष्यम् ।

वेदान्तिपक्षपरिशुद्धौ साङ्ख्यादुद्भावितदोषनिराकरणमपि तत्रैव यथा "नन्वौपनिषदानामप्यसमञ्जसमेव दर्शनं तथ्यतापकयोर्जात्यन्तरभावानभ्युपगमात् एकं हि ब्रह्म सर्वात्मकं सर्वस्य पुरुषस्य कारणमभ्युपगच्छतामेकेषामात्मनोविशेषो तथ्यतापकौ न जात्यन्तरभूतावित्यभ्युपगन्तव्यं स्यात् । यदि चैतौ तथ्यतापकावेकस्यात्मनो विशेषौ स्यातां स ताभ्यामन्यतापकाभ्यां न निर्मुच्येत इति तापोपशान्तये सम्यग्दर्शनमुपदिश्यच्छास्त्रमनर्थकं स्यात् । नह्यौष्ण्यप्रकाशधर्मकस्य प्रदीपस्य तदवस्थस्यैव ताभ्यां निर्मोक उपपद्यते । बोऽपि जलावितरङ्गेणाद्युपन्यासस्तत्रापि जलात्मन एकस्य बीच्यादयो विशेषा आविर्भावतिरोभावकृमेण नित्या एवेति समानो जलात्मनो बीच्यादिभिरनिर्मोक्षः । एसिद्धश्चायं तथ्यतापकयोर्जात्यन्तरभावो लोके । तथा हि अर्थी चार्थश्चान्योन्याभिज्ञो लक्ष्यते यद्यर्थिनः स्वतोऽन्योऽर्थोन स्यात् यस्यार्थिनो यद्विषयकमर्थित्वं स तस्यार्थीनित्यसिद्ध एवेति तस्य तद्विषयमर्थित्वं न स्यात् । यथा प्रकाशात्मनः प्रदीपस्य प्रकाशाख्योऽर्थो नित्यसिद्ध एवेति न तस्य तद्विषयमर्थित्वमवति अप्राप्ते ह्यर्थेऽर्थिनोऽर्थित्वं स्यादिति । तथार्थस्याप्यर्थत्वं न स्यात् यदि स्यात् स्वार्थत्वमेव स्यात् न चैतदस्ति । सम्बन्धिशब्दौ ह्येतावर्थौ चार्थश्चेति द्वयोश्च सम्बन्धिनोः सम्बन्धः स्याच्चैकस्यैव । तस्माद्विज्ञावेनावर्थार्थिनौ । तथाऽनर्थार्थिनावपि । अर्थिनोऽनुकूलश्चोऽर्थः प्रतिकूलोऽनर्थः ताभ्यामेकः पर्यायेणोभाभ्यां सम्बध्यते तत्रार्थस्याप्योपयत्वाद्भूयत्वाच्चानर्थस्योभावप्यर्थावनर्थौ एवेति तापकः स उच्यते । तथस्तु पुरुषोऽयं एकः पर्यायेणोभाभ्यां सम्बध्यत इति तयोस्तथ्यतापकभावानुपपत्तेः । भवेदेष दोषो यद्येकात्मतायान्यतापकावन्योन्यस्य विषयविषयिभावं प्रतिपद्येयातां नत्वेतदस्ति एकत्वादेव । न ह्यग्निरेकः स्वात्मानमन्दहति प्रकाशयति वा सत्यौष्ण्यप्रकाशादिधर्मभेदे परिणामित्वे च किमु कूटस्थे ब्रह्माख्येकस्मिंस्तथ्यतापकभावः सम्भवेत् क्व पुनरन्यतथ्यतापकभावः स्यादिति उच्यते किं न पश्यसि ? कर्मभूतो जीवहेयस्तथ्यः तापकः सवितेति । ननु तन्निमित्तं दुःखं सा चेतयितुर्नाचेतनस्य हेयस्य यदि हि हेयस्यैव तन्निमित्तः स्याद्धेयनाशे स्वयमेव नश्यतीति तन्नाशाय साधनं नैषितव्यं स्यादिति । उच्यते हेयाभावे हि केवलस्य चेतनस्य तन्निमित्तं दृष्टा न च त्वयापि तन्निमित्तं विक्रिया चेतयितुः केवलस्येष्यते । नापि हेयचेतनयोः भेदतत्त्वमशुद्ध्यादिदोषप्रसङ्गात् । न च तन्नैरेव तन्निमित्तमभ्युपगच्छसीति कथं तवापि तथ्यतापकभावः । सत्त्वं तथ्यं तापकं रज एवेति चेन्न ताभ्यां चेतनस्य संहतत्वानुपपत्तेः । सत्त्वानुरोधित्वाच्चेतनोऽपि तथ्यत एवेति चेत् परमार्थतस्तर्हि नैव तथ्यत इत्यापतति इवशब्दप्रयोगात् न चेत्तथ्यते नेवशब्दोदोषाय । नहि दुग्धभुः सर्प इवेत्येतावता सविषो भवति, सर्पो वा दुग्धभुक् इवेत्येतावता निर्विषो भवति । अतस्त्वाविद्याकृतोऽयं तथ्यतापकभावो न पारमार्थिक इत्यभ्युपगन्तव्यमिति । नैवं सति समापि विच्छिद्यति । अथ पारमार्थिकमेव चेतनस्य तथ्यत्वमभ्युपगच्छसि तर्हि तरामनिर्मोक्षः प्रसज्यते नित्यत्वाभ्युपगमाच्च तापकस्य तथ्यतापकयोश्चानित्यत्वेऽपि सनिमित्तसंयोगापेक्षत्वापत्तेः संयोगनिमित्तादर्शननिवृत्तावात्यन्तिकः संयोगोपरमः ततश्चात्यन्तिको मोक्ष उपपन्न इतिचेन्न अदर्शनस्य तमसो नित्यत्वाभ्युपगमात्। गुणानामन्योन्याभिभवयोरनियतत्वादनियतः संयोगनिमित्तोपरम इति, वियोगस्याप्यनियतत्वात् साङ्ख्यैवानिर्मोक्षोऽपरिहार्यः स्यात् । औपनिषदस्य त्वात्मैकत्वाभ्युपगमादेकस्य च विषयविषयिभावानुपपत्तेर्विकारभेदस्य च वाचारम्भणमात्रत्वश्रवणाद्दनिर्मोक्षाशङ्का स्वप्नेऽपि नोपजायते । व्यवहारे तु यत्र यथा दृष्टतथ्यतापकभावस्तत्र तथैव स इति न मोदयितव्यः परिहर्त्तव्यो वा भवति" ।

"प्रधानकारणवादो निराकृतः परमाणुकारणवाद इदानीं निराकर्त्तव्यः । तत्रादौ तावद्वैशेषिका-

रणवादिना ब्रह्मवादिनि दोषउत्प्रेक्ष्यते स प्रतिसमाधीयते। तत्रायं वैशेषिकाणामभ्युगमः कारणद्रव्यसमवायिनो गुणाः कार्यद्रव्ये समानजातीयं गुणान्तरमारभन्ते शुक्लेभ्यस्तन्तुभ्यः शुक्लस्य पटस्य प्रसवदर्शनात्तद्विपर्ययाऽदर्शनाच्च। तस्माच्चेतनस्य ब्रह्मणो जगत्कारणत्वेऽभ्युपगम्यमाने कार्येऽपि जगति चैतन्यं समवेयात् तददर्शनान्नु न चेतनं ब्रह्म जगत्कारणमर्हतीति। इत्यमभ्युपगमन्नदोषमेव प्रक्रियया व्यभिचारयति"भा०। "महद्दीर्घवद्वस्वपरिमण्डलाभ्याम्"सू०। "एषा तेषां प्रक्रिया परमाणवः किल कञ्चित्कालमनारब्धकार्या यथायोगं रूपादिमन्तः पारिमाण्डल्यपरिमाणास्तिष्ठन्ति। ते च पञ्चादृष्टादिपुरःसराः संयोगसचिवाश्च सन्तो द्व्यणुकादिक्रमेण कृत्स्नं कार्यजातमारभन्ते कारणगुणाश्च कार्ये गुणान्तरम्। यदा द्वौ परमाणू द्व्यणुकमारभेते तदा परमाणुगता रूपादिगुणविशेषाः शुक्लादयो द्व्यणुके शुक्लादीनारभन्ते। परमाणुगुणविशेषस्तु पारिमाण्डल्यं न द्व्यणुके पारिमाण्डल्यमपरमारभते द्व्यणुकस्य परिमाणान्तरयोगाभ्युपगमात्। अणुत्वहस्वत्वे हि द्व्यणुकवर्त्तिनी परिमाणे वर्णयन्ति। यद्यपि हे द्व्यणुके चतुरणुकमारभेते तदापि समानं द्व्यणुकसमवायिनां शुक्लादीनामारब्धकत्वम्। अणुत्वहस्वते तु द्व्यणुकसमवायिनो अपि नैवारभेते चतुरणुकस्य महत्त्वदीर्घत्वपरिमाणयोगाभ्युपगमात्। यद्यपि बहवः परमाणवो बहूनि वा द्व्यणुकानि द्व्यणुकसंहितो वा परमाणुः कार्यमारभन्ते तदापि समानैषा योजना। तदेवं यथा परमाणोः परिमण्डलात् सतोऽणु ह्रस्वञ्च द्व्यणुकञ्जायते महद्दीर्घञ्च त्र्यणुकादि न परिमण्डलम्। यथा वा द्व्यणुकादणोर्ह्रस्वात्च सतोमहद्दीर्घञ्च त्र्यणुकादि जायते नाणु नोत ह्रस्वम् एवं चेतनाद्ब्रह्मणो ऽचेतनं जगज्जनिष्यत इत्यभ्युपगमे तव किं छिन्नम्। अथ मन्यसे विरोधिना परिमाणान्तरेणाक्रान्तं कार्यं द्रव्यं द्व्यणुकादि ततो नारभ्यकाणि कारणगतानि परिमाण्डल्यादीनि इत्यभ्युपगच्छामि न तु चेतनाविरोधिना गुणान्तरेण जगत आक्रान्तत्वमस्ति येन कारणगता चेतना कार्ये चेतनान्तरं नारभेत। न ह्यचेतना नाम चेतनाविरोधी कश्चिद्गुणोऽस्ति चेतनाप्रतिषेधमात्रत्वात् तस्मात् पारिमाण्डल्यादिवैषम्यात् प्राप्नोति चेतनाथा आरब्धकत्वमिति। मैवं मंस्थाः यथा कारणे विद्यमानानामपि पारिमाण्डल्यादीनामनारब्धकत्वमेवं चैतन्यस्यापीत्यस्यांशस्य समानत्वात्। न च परिमाणान्तराक्रान्तत्वं पारिमाण्डल्यादीनामनारब्धकत्वे कारणं प्राक् परिमाणान्तरारम्भात् पारिमाण्डल्यादीनामारब्धकत्वापत्तेः। आरब्धमपि कार्यद्रव्यं प्राक् गुणारम्भात् तत्समानगुणं तिष्ठतीत्यभ्युपगमात्। न च परिमाणान्तरारम्भे व्यणुके पारिमाण्डल्यादीनीत्यतः स्वसमानजातीयं परिमाणान्तरं नारभन्ते परिमाणान्तरस्यानुत्पत्तिहेतुकत्वेऽभ्युपगमात्। "कारणबहुत्वात् पृथक्त्वविशेषाच्च महत् तद्विपरीतमणु। एतेन दीर्घत्वह्रस्वत्वे व्याख्याते"। इति हि काणभुजानि सूत्राणि। न च सन्निधानविशेषात् कुतश्चित् कारणात् बहुत्वादीनि एवारभन्ते न पारिमाण्डल्यादीनीत्युच्येत द्रव्यान्तरे गुणान्तरे वारभ्यमाणे सर्वेषामेव कारणगुणानां स्वाश्रयसमवायाविशेषात्। तस्मात् स्वभावादेव पारिमाण्डल्यादीनामनारब्धकत्वं तथा चेतनाया अपि द्रष्टव्यम्। संयोगाच्च द्रव्यादीनां विलक्षणानामुत्पत्तिदर्शनात् समानजातीयोत्पत्तिव्यभिचारः। द्रव्ये पुनरुते गुणोदाहरणमयुक्तमिति चेन्न दृष्टान्तेन विलक्षणारब्धमात्रस्य विवक्षितत्वात्। न च द्रव्यस्य द्रव्यमेवोदाहर्त्तव्यं गुणस्य वा गुणएवेति कश्चिन्नियमे हेतुरस्ति। सूत्रकारोऽपि भवतां द्रव्यस्य गुणस्योदाजहार 'पृथक्त्वापृथक्त्वाभ्यामपृथक्त्वात् संयोगस्य पञ्चात्मकत्वं न विद्यते' इति। यथा पृथक्त्वापृथक्त्वयोर्भूम्याकाशयोः समवयत्वं संयोगोऽपृथक्त्वं एवं पृथक्त्वापृथक्त्वेषु पञ्चसु भूतेषु समवयत्वं शरीरमपृथक्त्वं स्यात् पृथक्त्वन्तु शरीरं दृश्यते तस्मान्न पाञ्चभौतिकमिति। एतदुक्तं भवति गुणश्च संयोगः द्रव्यं शरीरम्" इति भा०।

ईश्वरस्य सर्वकर्त्तृत्वेऽपि न स्वाभिलषितोत्पत्तिमिति निर्णयाय ईश्वरस्य जीवस्रष्टृत्वादिनैर्गुण्यस्य मतस्तुत्याप्य तत्रैव निराकृतं यथा। "उत्पत्त्यसम्भवात्"भा०सू०। "येषामप्रकृतिरधिष्ठाता केवलं निमित्तं कारणमीश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्यातः। येषां पुनः प्रकृतिश्चाधिष्ठाता चेत्युभयात्मकं कारणमीश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्यायते। नन्वनुमानसमाश्रयणेनाप्येवंरूप एवेश्वरः प्राक्निर्दिष्टः प्रकृतिश्चाधिष्ठाता चेति। सत्यनुसारिणी च स्मृतिः प्रमाणमिति स्थितिः। तत् कस्य हेतोरेष पक्षः प्रत्याचिख्यासितः? इति। उच्यते यद्यप्येवंजातीयकोऽयंसमानत्वान्न विसंवादगोचरोभवति अस्ति तु अंशान्तरं विसंवादस्थानमिति अतस्तत्प्रत्याख्यानायारम्भः। तत्र भागवता

मन्यन्ते । भगवानेवैको वासुदेवो निरञ्जनः ज्ञानस्वरूपः परमार्थतत्त्वं स चतुर्द्धात्मानं प्रविभज्य प्रतिष्ठितो वासुदेव व्यूहरूपेण, संकर्षणव्यूहरूपेण, प्रद्युम्नव्यूहरूपेण अनिरुद्धव्यूहरूपेण च । वासुदेवोनाम परमात्मोच्यते । सङ्कर्षणो नाम जीवः । प्रद्युम्नोनाम मनः । अनिरुद्धो नामाहङ्कारः । तेषां वासुदेवः परा प्रकृतिः अपरे संकर्षणादयः कार्य्यम् । तस्मिंश्च भूतं भगवत्समभिगमनोपासनेज्याख्याध्याययोर्मैर्धर्यगतमिह स्त्रीणक्लेशोभगवन्तमेव प्रतिपद्यत इति । तत्र यत्तावदुच्यते योऽसौ नारायणः परोव्यक्तात् प्रसिद्धः परमात्मा सर्व्वात्मा स आत्मानमनेकधा व्यूह्य व्यवस्थित इति तन्न निराक्रियते "स एकधा भवति त्रिधा भवतीत्यादि" श्रुतिभ्यः परमात्मनोऽनेकधाभवनस्याधिगतत्वात् । यद्यपि तस्य भगवतोऽभिभजनादिलक्षणमाराधनमजस्रमनन्यचित्ततयाभिप्रेयते तदपि न प्रतिषिध्यते स्मृतिस्रुत्योरीश्वरप्रणिधानस्य प्रसिद्धत्वात् । यत्पुनरिदमुच्यते वासुदेवात् संकर्षण उत्पद्यते संकर्षणाच्च प्रद्युम्नः प्रद्युम्नाच्चानिरुद्ध इति अत्र ब्रूमः न वासुदेवसंज्ञकात् परमात्मनः सङ्कर्षणसंज्ञकस्य जीवस्योत्पत्तिः सम्भवति अनित्यत्वादिदोषप्रसङ्गात् । उत्पत्तिमत्त्वे हि जीवस्यानित्यत्वादयो दोषाः प्रसज्येरन् ततश्च नैवास्य भगवत्प्राप्तिर्मोक्षः स्यात् कारणप्राप्तौ कार्य्यस्य विलयप्रसङ्गात् । प्रतिषेधिष्यति चाचार्य्योजीवस्योत्पत्तिम् "नात्माऽश्रुतेर्नित्यत्वाच्च" इति । तस्मादसङ्गतैषा कल्पना" भा० ।"न च कर्त्तुः करणम्" सू० ।"इतश्चासङ्गतैषा कल्पना यस्माच्हि लोके कर्त्तुर्देवदत्तादेः करणं परश्वाद्युत्पद्यमानं दृश्यते । वर्णयन्ति च भागवताः कर्त्तुर्जीवात् संकर्षणसंज्ञकात् करणं मनः प्रद्युम्नसंज्ञकमुत्पद्यते कर्त्तृजाच्च तस्मादनिरुद्धसंज्ञकोऽहङ्कार उत्पद्यत इति । न चैतद्दृष्टान्तमन्तरेणाध्यवसातुं शक्नुमः न चेदस्मातां श्रुतिसुपलभामहे" भा० ।"विज्ञानादिभावे वा तदप्रतिषेधः" सू० ।"अथापि स्यात् न चैते संकर्षणादयो जीवादिभावेनाभिप्रेयन्त किन्त्वीश्वरा एवैते सर्व्वे ज्ञानैश्वर्य्यशक्तिबलवीर्य्यतेजोभिरैश्वर्य्यधर्म्मैश्चान्विता अभ्युपगम्यन्ते । वासुदेवा एवैते सर्व्वे निर्दोषा निरधिष्ठाना निराबाधाश्चेति । तच्चायुक्तं यथायर्षिसमत्वस्य सम्भवोदोषः प्राप्नोतीति । स्मृत्योच्यते । एवमपि तदप्रतिषेध उत्पत्त्यसम्भवव्याप्रतिषेधः प्राप्नोत्येवायमुत्पत्त्यसम्भवोदोषः प्रकारान्तरे कथं न भवेदित्यभिप्रायः । परस्परभिन्ना एवैते वासुदेवादयः चत्वार ईश्वरास्तुल्यधर्म्माणो नैषामेकात्मत्वमस्तीति ततोऽनेकेश्वरकल्पनानर्थक्यम् एकेनेश्वरेणेश्वरकार्य्यसिद्धेः । सिद्धान्तहानिश्च भगवानेवैको वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात् । अथायमभिप्रायः एकस्यैव भगवतः एते चत्वारोव्यूहास्तुल्यधर्म्माणइति तथापि तदवस्थ एवोत्पत्त्यसम्भवः । न हि वासुदेवात् सङ्कर्षणस्योत्पत्तिः सम्भवति, सङ्कर्षणाच्च प्रद्युम्नस्य, प्रद्युम्नाच्चानिरुद्धस्य, अतिशयाभावात् । भवितव्यं हि कार्य्यकारणयोरतिशयेन यथा मृद्घटयोः । नह्यसतिशये कार्य्यं कारणमित्यवकल्पते । न च पञ्चरात्रसिद्धान्तिभिर्वासुदेवादिषु एकैकस्मिन् सर्व्वेषु वा ज्ञानैश्वर्य्यादितारतम्यकृतः कश्चिद्दोषोऽभ्युपगम्यते । वासुदेवा एव हि सर्व्वे व्यूहा निर्विशेषा इष्यन्ते । नचैते भगवद्व्यूहावतसंख्यायामेव व्यवतिष्ठेरन् ब्रह्मादिस्तम्बपर्य्यन्तस्य समस्तस्यैव जगतोभगवद्व्यूहत्वावगमात्" भा० । "विप्रतिषेधाच्च" सू० ।"विप्रतिषेधस्त्वस्मिन् शास्त्रे बहुविध उपलभ्यते गुणगुणित्वकल्पनादिलक्षणः ज्ञानैश्वर्य्यशक्तिबलवीर्य्यतेजांसि गुणाः आत्मन एवैते भगवतो वासुदेवा इत्यादिदर्शनात् । वेदप्रतिषेधश्च भवति । चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधिगतवानित्यादि वेदनिन्दादर्शनात् । तस्मादसङ्गतैषा कल्पनेति सिद्धम्" भा० ।

उपासनया प्राप्तैश्वर्य्यस्यानीश्वरस्य तु न जगत्कर्त्तृत्वमित्यपि तत्रैव व्यवस्थापितं यथा "जगद्व्यापारवर्ज्यं प्रकरणादसन्निहितत्वाच्च" भा० सू० । "ये सगुणब्रह्मोपासनात् सङ्कल्पेन मनसैश्वरसायुज्यं व्रजन्ति किन्तेषां निरवग्रहमैश्वर्य्यं भवत्याहोस्वित् सावग्रहमिति संशयः । किंलक्षणं प्राप्तं निरङ्कुशमेवैषामैश्वर्य्यं भवितुमर्हति "आप्नोति स्वाराज्यं सर्व्वेऽस्मै देवा बलिमावहन्ति" "तेषां सर्वेषु कामचारो भवतीत्यादि" श्रुतिभ्यः । इत्येवं प्राप्ते पठति "जगद्व्यापारवर्जमिति" । जगदुत्पत्त्यादिव्यापारं वर्जयित्वा अन्यदणिमाद्यात्मकमैश्वर्य्यं सङ्कल्पानां भवितुमर्हति जगद्व्यापारस्तु नित्यसिद्धस्यैवेश्वरस्य । कुतः ? तस्य तत्र प्रकृतत्वात् असन्निहितत्वाच्चेतरेषाम् । परएव ह्येश्वरो जगद्व्यापारेऽधिकृतः तमेव प्रकृत्योत्पत्त्याद्युपदेशाच्चित्यवद्धि निबन्धनत्वाच्च । तदन्येऽविजिज्ञासनपूर्व्वकमितरेषामादिमदैश्वर्य्यं श्रूयते तेनासन्निहितास्ते जगद्व्यापारे । समनस्कत्वादेव चैषामस्कमले कस्यचित् स्थित्यभिप्रायः कस्यचित्तु संहाराभिप्राय इत्येवविरोधोऽपि कदाचित् स्यात् । अथ कस्यचित्

सङ्कल्पमन्वस्य सङ्कल्प इत्यविरोधः समर्थ्यते ततः परमेश्वराच्छ्रुतनन्वत्वमेवेतरेषामिति व्यवतिष्ठते" भा०। "प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः" सू०। "अथ यदुक्तं आप्नोति स्वाराज्यमित्यादि प्रत्यक्षोपदेशाच्छ्रवस्यदृष्टमैश्वर्यं विदुषां स्यान्न्याय्यमिति तत्परिहर्त्तव्यम् अत्रोच्यते। नायं दोषः आधिकारिकमण्डलस्थोक्तेः आधिकारिकेषु सवितृमण्डलादिषु व्यवस्थितः परमेश्वरस्तदाप्तिर्वेयं स्वाराज्यप्राप्तिरुच्यते। यत्कारणमनन्तरम् "आप्नोति मनसस्पति मित्याह। योहि सर्व्वं मनसाप्नोति पूर्व्वं सिद्धेश्वरस्तं प्राप्नोति एतदुक्तं भवति। तदनुसारेण वाङ्मनसम् "वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिश्च भवतीत्याह। एवमन्यत्रापि यथासम्भवं नित्यसिद्धेश्वरायत्तमेवेतरेषामैश्वर्यं योजयितव्यम्" भा०। उपासासिद्धस्य यथा जगत्कर्त्तृत्वं न भवति तथानुमानचिन्तामणावुक्तपदं दर्शितम्। सांख्योक्तदोषनिरसनपूर्व्वकं तस्य सर्व्वविषयनित्यज्ञानत्वं तत्रैव समर्थितं यथा "यत्पुनरुक्तं ब्रह्मणोऽपि न मुख्यं सर्व्वज्ञत्वमुपपद्यते नित्यज्ञानक्रियत्वे ज्ञानक्रियां प्रति स्वातन्त्र्यासम्भवादिति। अत्रोच्यते इदं तावद्वक्तव्यं प्रष्टव्यः कथं नित्यज्ञानत्वे सर्व्वज्ञत्वहानिरिति ?। यस्य हि सर्व्वविषयावभासलक्षणं ज्ञानं नित्यमस्ति सोऽसर्व्वज्ञ इति विप्रतिषिद्धम्। अनित्यत्वे हि ज्ञानस्य कदाचिज्जानाति कदाचिच्च जानातीत्यसर्व्वज्ञत्वमपि स्यात्, नत्वसौ ज्ञाननित्यत्वे दोषोऽस्ति। ज्ञाननित्यत्वे ज्ञानक्रियां प्रति स्वातन्त्र्यव्यपदेशोनोपपद्यते इति चेन्न प्रततोष्णप्रकाशेऽपि सवितरि दहति प्रकाशयतीति स्वातन्त्र्यव्यपदेशदर्शनात्। ननु सवितृदाह्यप्रकाश्यसंयोगे सति दहति प्रकाशयतीति व्यपदेशः स्यात् न तु ब्रह्मणः प्रागुत्पत्तेर्ज्ञानकर्मसंयोगोऽस्तीति विषमोदाहरणम्, न असत्यपि कर्मणि सविता प्रकाशयत इति कर्त्तृत्वव्यपदेशदर्शनात्, एवमसत्यपि ज्ञानकर्मणि ब्रह्मणः "तदैक्षतेति" कर्त्तृत्वव्यपदेशोपपत्तेर्न वैषम्यम्। कर्मापेक्षायां तु ब्रह्मण ईक्षितृत्वश्रुतयः श्रुतरासुपपन्नाः। किपुनस्तत् कर्म ? यत् प्रागुत्पत्तेरीश्वरज्ञानस्य विषयो भवतीति तत्त्वान्यत्वाभ्यामनिर्व्वचनीये नामरूपे अव्याकृते व्याविक्रियेते इति ब्रूमः। यत्प्रसादादि योगिनामभ्यतीतानागतविषयं प्रत्यक्षं ज्ञानमिच्छन्ति योगशास्त्रविदः किमु वक्तव्यं तस्य नित्यसिद्धस्येश्वरस्य सृष्टिस्थितिसंहृतिविषयं नित्यं ज्ञानं भवतीति। यदप्युक्तं प्रागुत्पत्तेर्ब्रह्मणः शरीरादिसंबन्धमन्तरेणेक्षितृत्वमनुपपन्नमिति न तन्नोद्यमवतरति सवितृप्रकाशवत् ब्रह्मणोज्ञानस्वरूपनित्यत्वेन ज्ञानसाधनापेक्षानुपपत्तेः। अपि च अविद्यादिमतः संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात् न ज्ञानप्रतिबन्धकरणरहितस्येश्वरस्य। मन्त्रो चेमावीश्वरस्य शरीराद्यनपेक्षतामनावरणज्ञानतां च दर्शयतः। "न तस्य कार्य्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति" "अपाणिपादोजवनोग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तमिति च"।

अस्मादेव च जीवानां तत्तत्कर्म्मफलसिद्धिर्यथा तथा भा०सूत्रभाष्ययोर्वर्णितम् यथा "फलमत उपपत्तेः" सू०। "तस्यैव हि ब्रह्मणो व्यावहारिक्यामीयत्तीयत्तिव्यभिचारावस्थायामयमन्यः स्वभावोवर्ण्यते। यदेतदिष्टानिष्टव्यामिश्रलक्षणं कर्म्मफलं संसारगोचरं त्रिविधं प्रसिद्धं जन्तूनां किमेतत् कर्म्मणो भवत्याहोस्विदीश्वरप्रसादादिति ? भवति विचारणा। तत्र तावत् प्रतिपद्यते फलमतईश्वराद्भवितुमर्हति कुतः ? उपपत्तेः सहि सर्व्वाध्यक्षः सृष्टिस्थितिसंहारान् विचित्रान् विदधद्देशकालविशेषाभिज्ञत्वात् कर्म्मणा कर्म्मानुरूपं फलं संपादयतीत्युपपद्यते। कर्म्मणस्त्वनुरूपं विनाशिनः कालान्तरभावि फलं भवतीत्यनुपपन्नम् अभावाद्वावानुपपत्तेः।

स्यादेतत् कर्म्म विनश्यत् स्वकालएव स्वानुरूपं फलमर्जयित्वा विनङ्क्ष्यति तत्फलं कालान्तरितं कर्त्ता भोक्ष्यत इति तदपि न परिशुद्ध्यति प्रागभोक्तृसम्बन्धात् फलत्वानुपपत्तेः यत्कालं हि यत् सुखं दुःखं वात्मना भुज्यते तस्यैव लोके फलत्वं प्रसिद्धम्। नह्यसम्बद्धस्यात्मना सुखस्य दुःखस्य वा फलत्वं प्रतियन्ति लौकिकाः। अथोच्येत कर्म्म कार्य्यात् पूर्व्वात् फलमुत्पत्स्यत इति तदपि नोपपद्यते अपूर्व्वस्या चेतनस्य काष्ठलोष्टसमस्य चेतनाप्रवर्त्तनस्य ब्रह्मवदनुपपत्तेः तदस्तित्वे च प्रमाणाभावात्। अथापूर्व्वं प्रमाणमिति चेन्न ईश्वरसिद्धेरर्थापत्तिपरित्यक्तत्वात्" भा०। "श्रुतत्वाच्च" सू०। "न केवलमुपपत्तेरेवेश्वरं फलहेतुं कल्पयामः किंतर्हि श्रुतत्वादपीश्वरमेव फलहेतुं मन्यामहे तथाहि श्रुतिर्भवति "स वा एष महान्नज आत्माऽन्नादोवसुदान" इत्येवं जातीयका" भा०। "धर्म्मं जैमिनिरत एव" सू०। "जैमिनिस्त्वाचार्य्यो धर्म्मं फलस्य दातारं मन्यते अतएव हेतोः कृतेऽनुपपत्तेश्च, श्रूयते तावदयमर्थः स्वर्गकामोयजेतेत्यादिषु वा-

क्षेपः । तत्र च विधिश्रुतेर्विषयभावोपगमाद्यागः स्वर्गस्योत्पादक इति गम्यते अन्यथा ह्यननुज्ञातकोयाग आपद्येत तत्राप्युपदेशस्य वैयर्थ्यं स्यात् । नन्वनुत्पन्नविनाशिनः कर्मणः फलं नोपपद्यत इति परित्यक्तोऽयं पक्षः। नैष दोषः श्रुतिप्रामाण्यात् । श्रुतिश्चेत् प्रमाणं यथायं कर्मफल सम्बन्धः श्रुतउपपद्यते तथा कल्पयितव्यः नचानुत्पाद्य किमप्यपूर्व्वं कर्म विनश्यत्कालान्तरितं फलं दातुं शक्नोतीत्यतः कर्म्मणो वा सूक्ष्मा काचिदुत्तरावस्था, फलस्य वा पूर्व्वावस्थाऽपूर्व्वं नामास्तीति तर्क्यते । उपपद्यते चायमर्थः उक्तेन प्रकारेण ईश्वरस्तु फल ददातीत्यनुपपन्नम् अविचित्रस्य कारणस्य विचित्रकार्यानुपपत्तेः वैषम्य नैर्घृण्यप्रसङ्गादनुज्ञानवैयर्थ्यापत्तेश्च तस्माद्धर्म्मादेव फलमिति" भा० । "पूर्व्वन्तु बादरायणोहेतुव्यपदेशात्" सू०। "बादरायणस्त्वाचार्य्यः पूर्व्वोक्तमेवेश्वरं फलहेतुं मन्यते । केवलात् कर्म्मणोऽपूर्व्वाद्वा केवलात् फलमिष्यत इत्यस्मद्ग्रहणेन व्यावर्त्यते । कर्म्मापेक्षाद्वाऽपूर्व्वापेक्षाद्वा यथा तथाप्येश्वरात् फलमिति सिद्धान्तः । हेतुव्यपदेशात् । धर्म्माधर्म्मयोरपि कारयितृत्वेनेश्वरोहेतुर्व्यपदिश्यते फलस्य च दातृत्वेन "एष ह्येव साधु कर्म कारयति तं, यमेभ्यो लोकेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयति तं, यमधोलोकं निनीषते" इति । श्रूयते चायमर्थो भगवद्गीतासु ।"योयो यांयां तनुं भक्तः श्रद्धयार्च्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् । स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान् मयैव विहितान् हि तानिति"। सर्व्ववेदान्तेषु चेश्वरहेतुका एव सृष्टयो व्यपदिश्यन्ते तदेवेश्वरस्य फलहेतुत्वं यत् स्वकर्म्मानुरूपाः प्रजा सृजति । विचित्रकार्य्यानुपपत्त्यादयोऽपि दोषाः कृतप्रयत्नापेक्षत्वादीश्वरस्य न प्रसज्यन्ते"भा०।

मीमांसकैस्तु ईश्वरस्याचेतनताङ्गीकारेण न फलहेतुत्वं किन्तु कर्म्मण्य एव फलसिद्धिरित्यत्रोक्तं तच्च जैमिनीयमतत्वेन भा०सूत्रभाष्ययोर्दर्शितम् अविषक्षयशब्दे चेश्वरस्याचेतनत्वं यथा तथा ४५१पृष्ठे दर्शितम् ।

"कर्त्ता शास्त्रार्थवत्त्वात्" शास्त्रेण जीवानां कर्त्तृत्वेऽपि यस्मैव च कारयितृत्वं यथाह भा०सूत्रभाष्ययोः ।

"परात्तु तच्छ्रुतेः" सू०।"यदिदमविद्यावस्थायामुपाधिनिबन्धनं कर्त्तृत्वं जीवस्याभिहितं तत् किमनपेक्ष्येश्वरं, भवत्याहोस्विदीश्वरापेक्षमिति ? भवति विचारणा । तत्र प्राप्तं तावदेश्वरमपेक्षते जीवः कर्त्तृत्व इति । कस्मात् ? अपेक्षाप्रयोजनाभावात् । अयं हि जीवः स्वयमेव रागद्वेषादिदोषप्रयुक्तः कारणान्तरसामग्रीसम्पन्नः कर्त्तृत्वमनुभवितुं यत्नोति तस्य किमीश्वरः करिष्यति ? । न च लोके प्रसिद्धिरस्ति कृष्यादिकासु क्रियास्वनडुदादिसहायेश्वरोऽपरोऽपेक्षितव्य इति । कोयात्नेन च कर्त्तृत्वेन जन्तून् संसृजतः ईश्वरस्य नैर्घृण्यं प्रसज्येत, विषमफलसृष्टेश्च कर्त्तृत्वं विदधतो वैषम्यम् । ननु वैषम्यनैर्घृण्ये न सापेक्षत्वादित्युक्तम् । सत्यमुक्तं सति स्वीश्वरस्य सापेक्षत्वसम्भवे, सापेक्षत्वञ्चेश्वरस्य सम्भवति सतोऽजन्तूनां धर्माधर्मयोः, तयोश्च सद्भावः सति जीवस्य कर्त्तृत्वे, तदेव चेत् कर्त्तृत्वमीश्वरापेक्षं स्यात् किंविषयमीश्वरस्य सापेक्षत्वमुच्यते । अकृताभ्यागमश्चैवं जीवस्य प्रसज्येत । तस्मात् स्वतएव जीवस्य कर्त्तृत्वमिति । एतां प्राप्तिं तुशब्देन व्यावर्त्त्य प्रतिजानीते परादिति । अविद्यावस्थायां कार्यकरणसंघातविवेकदर्शिनोजीवस्याविद्यातिमिरान्धस्य सतः परस्मादात्मनः कर्माध्यक्षात् सर्वभूताधिवासात् साक्षिणस्तत्प्रतिरीश्वरात्तदनुज्ञया कर्त्तृत्वभोक्तृत्वलक्षणस्य संसारस्य सिद्धिः तदनुग्रहहेतुकेन च विज्ञानेन मोक्षस्य सिद्धिः भवितुमर्हति । कुतः ? तच्छ्रुतेः । यद्यपि दोषप्रयुक्तः सामग्रीसम्पन्नश्च जीवः, यद्यपि च लोके कृष्यादिषु कर्मसु नेश्वरकारणत्वं प्रसिद्धं तथापि सर्व्वास्वेव प्रवृत्तिषु ईश्वरोहेतुकर्त्तेति श्रुतेरवसीयते । तथा हि श्रुतिर्भवति "एष ह्येव साधु कर्म कारयति तं, यमेभ्यो लोकेभ्य उन्निनीषते, एष उ एवासाधु कर्म कारयति तं, यमधोलोकं निनीषते" इति "य आत्मनि तिष्ठन्नात्मानमन्तरोयमयतीति" चैवं जातीयका । नन्वेवमीश्वरस्य कारयितृत्वे सति वैषम्यनैर्घृण्ये स्याताम् अकृताभ्यागमश्च जीवस्येति नेत्युच्यते"भा० "कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः" सू०। "तुशब्दोनोदितदोषव्यावर्त्तनार्थः। कृतोयः प्रयत्नोजीवस्य धर्माधर्मलक्षणः तदपेक्ष एव चैनमीश्वरः कारयति ततश्चैते नोदिता दोषा न प्रसज्यन्ते । जीवकृतधर्माधर्मवैषम्यापेक्ष एव तत्फलानि विषमं विभजते पर्जन्यवदीश्वरोनिमित्तमात्रमेव । यथा लोके नानाविधानां यवसबीजादीनां गुच्छगुल्मादीनां वानस्पत्यानां साधारणनिमित्तं भवति पर्जन्यः, नह्यस्ति पर्जन्येरसपुष्पफलपत्रादिवैषम्यं तेषां जायते नाप्यसत्सु स्वबीजेषु, एवं जीवकृतप्रयत्नापेक्षेश्वरस्तेषां शुभाशुभं विदधातीति शिष्यते । ननु कृतप्रयत्नत्वमेवं जीवस्य

परायत्ते कर्तृत्वे नोपपद्यते । नैष दोषः । परायत्तेऽपि हि कर्तृत्वे करोत्येव जीवः कुर्वन् हि तमीश्वरः कारयति । अपि च पूर्वप्रयत्नमपेक्ष्येदानीं कारयति, पूर्वतरञ्च प्रयत्नमपेक्ष्य पूर्वमकारयदित्यनादित्वात् संसारस्यानवद्यम् । कथं पुनरवगम्यते कृतप्रयत्नापेक्ष ईश्वर इति ? विहितप्रतिषिद्धावैयर्थ्यादित्याह । एवं हि "स्वर्गकामोऽयजेत ब्राह्मणो न हन्तव्यः" इत्येवंजातीयकस्य विहितस्य प्रतिषिद्धस्य चावैयर्थ्यं भवति अन्यथा तदनर्थकं स्यात् [illegible] विधिप्रतिषेधवैयर्थ्यनिमित्तेन आत्मनः परतन्त्रत्वाज्जीवस्य । तथा विहितकारित्वसम्बन्धेन संसृजेत्, प्रतिषिद्धकारित्वसम्बन्धेन, ततश्च प्रामाण्यं वेदस्यात्मनियात् । ईश्वरस्य चात्मनापेक्षत्वे लौकिकस्यापि पुरुषकारस्य वैयर्थ्यं तथा देशकालनिमित्तानां पूर्वोक्तदोषप्रसङ्गश्चेत्येवंजातीयकदोषजातमादिपदेन दर्शयति" भा० ।

सेश्वरसांख्यमते तु ईश्वराधिष्ठितप्रधानस्य जगत्कर्तृत्वं तत्रेश्वरप्रसादाद्योगसिद्धितत्स्वरूपादिकं पातञ्जलसूत्रभाष्यविवरणेषु दर्शितं यथा ।

"किमेतस्मादेवासङ्गतरः समाधिर्भवति अथास्य लाभे किं भवतोऽप्यधिकश्चिदुपायो ? न वेति" भा०

"ईश्वरप्रणिधानाद्वा" सू० २३ । "प्रणिधानाद्भक्तिविशेषादाविर्भूतेश्वरस्तमनुगृह्णात्यभिध्यानमात्रेण तदभिध्यानानुग्रहादपि योगिनः आसन्नतरः समाधिलाभः फलञ्च भवतीति" भा० २३ । अथ प्रधानपुरुषव्यतिरिक्तः कोऽयमीश्वरोनामेति ?" भा० । "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" सू० २४ । "अविद्यादयः क्लेशाः । कुशलाऽकुशलानि कर्माणि । तत्फलं विपाकः । तदनुगुणा वासना आशयाः । ते च मनसि वर्त्तमानाः पुरुषे व्यपदिश्यन्ते स हि तत्फलस्य भोक्तेति । यथा जयः पराजयो वा योद्धृषु वर्त्तमानः स्वामिनि व्यपदिश्यते । क्लेशेन भोगेनाऽपरामृष्टः स पुरुषविशेष ईश्वरः । कैवल्यं प्राप्तास्ति सन्ति च बहवः केवलिनः ? ते हि क्लेशि बन्धनानि छित्वा कैवल्यं प्राप्ताः ईश्वरस्य च तत्सम्बन्धो न भूतो न भावी यथा मुक्तस्य पूर्व्वा बन्धकोटिः प्रज्ञायते नैवमीश्वरस्य, यथा वा प्रकृतिलीनस्योत्तरा बन्धकोटिः सम्भाव्यते नैवमीश्वरस्य, स तु सदैव मुक्तः, सदैवेश्वर इति । कोऽसौ प्रकृष्टसत्त्वोपादानादीश्वरस्य शाश्वतिकः उत्कर्षः स किं सनिमित्तः ? आहोस्विन्निर्निमित्तः ? इति तस्य शास्त्रं निमित्तं, शास्त्रं पुनः किंनिमित्तम् ? एतयोः शास्त्रोत्कर्षयोरीश्वरत्वे वर्त्तमानयोरनादिः सम्बन्धः । एतस्मादेतद्भवति सदैवेश्वरः सदैव मुक्त इति । तच्च तस्यैश्वर्यं साम्यातिशयविनिर्मुक्तं न तावदैश्वर्यान्तरेण तदतिशय्यते यदेवातिशयि स्यात् तदेव तत् स्यात् तस्य । यत्र काष्ठाप्राप्तिरैश्वर्यस्य स ईश्वरः, न च तत्परमैश्वर्यमस्ति । कस्मात् ? द्वयोरेकस्मिन् युगपत्कामितेऽर्थे नवभिरप्यस्तु पुरायमिदमस्त्विति एकस्य सिद्धावितरस्य प्राकाम्यविघाताद्दुःखं प्रसक्तं, द्वयोश्च तुल्ययोर्युगपत्कामितार्थप्राप्तिर्नास्ति, अर्थस्य विरुद्धत्वात् तस्माद् यस्य साम्यातिशयविनिर्मुक्तमैश्वर्यं स ईश्वरः, स च पुरुषविशेष इति" भा० २४ । किञ्च "तत्र निरतिशयं सर्व्वज्ञबीजम्" सू० २५ । "यदिदमतीतानागतप्रत्युत्पन्नप्रत्येकसमुच्चयातीन्द्रियग्रहणमत्र शङ्कति सर्व्वज्ञबीजमेतद्विवर्द्धमानं यत्र निरतिशयं स सर्व्वज्ञः । अस्ति काष्ठाप्राप्तिः सर्व्वज्ञबीजस्य, सातिशयत्वात् परिमाणवदिति यत्र काष्ठाप्राप्तिर्ज्ञानस्य स सर्व्वज्ञः स च पुरुषविशेष इति । सामान्यमात्रोपसंहारे क्लेशोपक्षयमनुमानं न विशेषप्रतिपत्तौ समर्थमिति । तस्य संस्कारादिविशेषप्रतिषेधसिद्धिरागमतः पर्य्यन्वेष्या । तस्मात्सानुग्रहाभावेऽपि भूतानुग्रहः प्रयोजनम् । ज्ञानधर्म्मोपदेशेन कल्पप्रलयमहाप्रलयेषु संसारिणः पुरुषानुद्धरिष्यामीति । तथाचोक्तम् "आदिविद्वान्निर्म्माणचित्तमधिष्ठाय कारुण्याद्भगवान् परम ऋषिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाचेति" भा० २५ । सगरः "पूर्व्वेषामपि गुरुः कालेनानवच्छेदात्" सू० २६ । "पूर्व्वे हि गुरवः कालेनावच्छिद्यन्ते यत्रावच्छेदार्थेन कालोपावर्त्तते स एष पूर्व्वेषामपि गुरुः यथास्य सर्गादौ प्रकर्षगत्या सिद्धः तथातिक्रान्तसर्गादिष्वपि प्रत्येतव्यः" व्यासभाष्यम् २६ ।

विस्तरमिदं वाचस्पतिना यथा "सूत्रान्तरमातन्वन् विस्मयति किमेतस्मादेवेति । नवाग्रन्थः संग्रथनिवर्त्तकः । ईश्वरप्रणिधानाद्वा । व्याचष्टे—प्रणिधानाद्भक्तिविशेषाज्ज्ञानसङ्गाधिकाल्लाभिकाद्वा आवर्जितोऽभिसन्धीकृतसमनुगृह्णातीति, अभिध्यानमनागतेऽर्थे कृच्छ्रा दृढसङ्गाभिप्रेतमस्त्विति, तन्मात्रेण न व्यापारान्तरेण, शेषं सुगमम्" २३ । ननु चेतनाऽचेतनाभ्यामेव व्याप्तं विश्वम्, नान्येन, ईश्वरश्चेदचेतनस्तर्हि प्रधानं, प्रधानविकाराणामपि प्रधानसध्यपातात्सधर्म्यं न तस्यावर्त्तनमचेतनत्वात् अथ चेतनस्तथापि चित्यशरीरादीन्या-

दस्संसारिनश्च चाक्षितादिविरुद्धात् कुतश्चावर्जनम् ? कुतश्चाभिध्यानम् ? इत्याशयवानाह, अथ प्रधानेति । अत्र सूत्रेणोत्तरमाह "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" । (न्यायकन्दल्यां क्लेशकर्मेत्यत्र जन्मोतिपदमधिकम् दृश्यते तच्च लिपिकरप्रमादकृतम्) अविद्यादयः क्लेशाः, क्लिश्नन्ति खल्वमी पुरुषं सांसारिकं विविधदुःखप्रकारैरिति । "कृशलाकृशलानेति" धर्माधर्मास्तेषाञ्च कर्मजत्वादुपचारात् कर्मत्वम् । विपाकोजात्यायुर्भोगाः विपाकानुगुणा वासनास्वाश्चित्तभूमौ आशेरत इति आशयाः नहि करभजातिनिर्वर्तकं कर्म प्राग्भवीयकरभभोगभावितां भावनां न यावदभिव्यनक्ति तावत्करभोचिताय भोगाय कल्पते, तस्माद्भवति करभजात्यनुभवजन्मा भावना करभविपाकानुगुणेति । नन्वमी क्लेशादयोबुद्धिधर्मा न कथञ्चिदपि पुरुषं पराभृशन्ति तस्मात् पुरुषप्रकृष्टादेव तदपरामर्शसिद्धेः कृतं क्लेशकर्मेत्यादिनेत्यत आह, " ते च मनसि वर्त्तमानाः सांसारिके पुरुषे व्यपदिश्यन्ते" कस्मात् ? "स हि तत्फलस्य भोक्ता चेतयितेति" । तस्मात् पुरुषत्वादीश्वरस्यापि तत्सम्बन्धः प्राप्त इति तत्प्रतिषेधउपपद्यत इत्याह, बोद्धृत्वेन बुद्धिस्थेनापि पुरुषमात्रसाधारणेन भोगेनापरामृष्टः । स पुरुषविशेष ईश्वरः, विशिष्यते इति विशेषः पुरुषमात्रराद्व्यवच्छिद्यते । विशेषपदस्यावर्त्यं दर्शयितुकामः परिनोदनापूर्वं परिहरति कैवल्यं प्राप्नुवन्ति हि इति । प्रकृतिलयानां प्राकृतोलयः, वैकारिकोविदेहानाम् दक्षिणादिदेवोदिव्यादिव्यविषयभोगभाजाम् । तान्यमूनि त्रीणिबन्धनानि । प्रकृतिभावनाबन्धकृतमनसोहि देहपातानन्तरमेव प्रकृतिलयतामापद्यन्तेतिनेषां पूर्वा बन्धकोटिः पुनायते तेनोत्तरकोटिविधानमात्रमिह तु पूर्वापरकोटिनिषेध इति संक्षिप्य विशेषं दर्शयति"स तु सर्वैव सृष्टः सर्वैश्वरः"इति । ज्ञानक्रियाशक्तिसम्बन्धेश्वर्यः । अत्र पृच्छति "योऽसाविति" ज्ञानक्रिये हि न चिच्छक्तेरपरिणामिन्याः सम्भवत इति । रजस्तमोरहितविशुद्धचित्तसत्त्वाश्रये वक्तव्ये । नचेश्वरस्याविद्याप्रभवचित्तसत्त्वसम्बन्धेन सह स्वस्वामिभावसम्बन्धः सम्भवतीत्यतउक्तं, प्रकृष्टसत्त्वोपादानादिति । नेश्वरस्य पृथग्जनस्येवाविद्यानिबन्धनचित्तसत्त्वेन स्वस्वामिभावः, किन्तु तापलयपरीतान् प्रेक्षभावमकार्ष्यात् अज्ञानुद्धरिष्यामीत्यनधर्मोपदेशेन । नच ज्ञानक्रियासामर्थ्यातिशयसम्भवमनरेण तदुपदेशः, नचेयमप्रकृतरजस्तमोमलविशुद्धसत्त्वोपादानं विनेत्याशोच्य सत्त्वप्रकर्षसिद्धये भगवानपराभृष्टोऽविद्याऽविद्याभिमानीवाविद्यावासनासम्बन्धविहान् भवति न पुनरविद्याभविद्यात्वेन सेवमानः, न खलु गैलपोरामत्वमारोप्य तास्वाश्वेटादर्शयन् भ्रान्तोभवति तटिदभाहार्यनसङ्कल्पन्तु तात्त्विकमिति । स्यादेतदुद्दिधीर्षया भगवता सत्त्वसृष्टेयं तदुपादानेन च तदुद्दिधीर्षा अस्या अपि प्राकृतत्वात्तथाचान्योन्यसंश्रय इत्यतउक्तं, यादृच्छिक इति । अवेदेतदेवं यदीदंप्रथमता सर्गस्य भवेत्, अनादौ तु सर्गसंहारप्रबन्धे सर्गान्तरसत्त्वसङ्कल्पोवाविषमये, पूर्वं मया सत्त्वप्रकर्ष उपादेय इति प्रणिधानं कृत्वा भगवान् जगत्संजहार, तदा चेश्वरचित्तसत्त्वं प्रणिधानवासनाभावितप्रधानसाम्यमुपगतमपि परिपूर्णे महाप्रलयावधौ प्रणिधानवासनासामर्थ्यवेश्वरचित्तसत्त्वभावेन परिणमते यथा चैत्रः पुःप्रातरेवोत्थातव्यं मयेति प्रणिधाय सुप्तस्तदैवोत्तिष्ठति प्रणिधानसंस्कारात्, तस्मादनादित्वादीश्वरप्रणिधानसत्त्वोपादानयोः शास्त्रतिकत्वेन नान्योन्यसंश्रयः । नचेश्वरस्य चित्तसत्त्वं महाप्रलयेऽपि न प्रकृतिसाम्यमुपैतीति वाच्यं ? यस्य हि न कदाचिदपि प्रधानसाम्यं न तस्याधानिकं नापि चितिशक्तिः आत्मा तत्त्वेऽर्थान्तरप्रामाणिकमापद्येत । तच्चायुक्तं, प्रकृतिपुरुषव्यतिरेकेणार्थान्तराभावात् । सोऽयमीदृश ईश्वरस्य शास्त्रतिक उत्कर्षः किं स्वनिमित्तः स्वप्रमाणकः ? आहोस्विन्निमित्तः निष्प्रमाणकः ? इति । उत्तरम्—तस्य शास्त्रं निमित्तं श्रुतिस्मृतीतिहासपुराणानि शास्त्रम् । नोदयति शास्त्रं पुनः किं निमित्तम् ? प्रत्यक्षानुमानपूर्वं हि शास्त्रम् ? नचेश्वरस्य सत्त्वप्रकर्षे कस्यचित् प्रत्यक्षमनुमानं वास्ति । नचेश्वरप्रत्यक्षप्रभवं शास्त्रमिति युक्तं, कल्पयित्वापि ह्ययं स्वयं ब्रूयादात्मैश्वर्यप्रकाशनायेति भावः। परिहरति प्रकृष्टसत्त्वनिमित्तम् । अयमभिसन्धिः मन्त्रायुर्वेदेषु तावदीश्वरप्रणीतेषु प्रवृत्तिसामर्थ्यादर्थाभिचारविनिश्चयात् प्रामाण्यं सिद्धम् । अथौषधिभेदानां तत्तद्योगविशेषाणाञ्च मन्त्राणाञ्च तत्तद्वर्णोपोद्धारेण सङ्कल्पेनापि पुरुषायुर्वैकल्पिकप्रमाणव्यवहारोयुक्तः कर्तुमन्वयव्यतिरेकौ । नह्यागमादन्वयव्यतिरेकौ ताभ्यां चागमस्य सत्सन्तानयोरनादित्वादिति प्रतिपादयितुं युक्तं, महाप्रलये तत्सन्तानयोर्विच्छेदात् न च तद्भावे प्रमाणाभावः । अभिन्नं प्रधानविकारि जगदिति हि प्रतिपादयिष्यते । सदृशपरिणामस्य पूर्वं सदृशपरिणाम मता दृष्टा । यथा क्षीरेणुरसादेर्दधिगुडादिरूपम् ।

विसदृशपरिणामस्य पूर्वसदृशपरिणामता च दृष्टा। तद्दिह प्रधानेनापि भङ्गदहङ्कारादिरूपविसदृशपरिणामेन सता भाव्यम्। कदाचित् सदृशपरिणामेन सदृशपरिणामश्चास्य सास्नावस्था स च भङ्गप्रलयः। तस्मान्नायुर्वेदप्रणयनात् तावद्भगवता रजस्तमोमलावरणतया परितः प्रद्योतमानं बुद्धिसत्त्वमास्थेयं तथा चाभ्युदयनिःश्रेयसोपदेशपरोऽपि वेदराशिरीश्वरप्रणीतस्तद्बुद्धिसत्त्वप्रकर्षादेव भवितुमर्हति। न च सत्त्वोत्कर्षे रजस्तमःप्रभवौ विभ्रमविप्लवौ सम्भवतस्तत्प्रकृष्टसत्त्वनिमित्तं शास्त्रमिति। स्यादेतत् प्रकर्षकार्यतया प्रकर्षं बोधयच्छास्त्रम् शेषवदनुमानं भवेन्न त्वागम इत्यत आह, एतैरिति। न कार्यत्वेन बोधयति अपि त्वनादिवाच्यवाचकभावसम्बन्धेन बोधयतीत्यर्थः। ईश्वरस्य हि बुद्धिसत्त्वे प्रकर्षोवर्त्तते, शास्त्रमपि तद्वाचकत्वेन तत्र वर्त्तते इति। उपसंहरति, एतस्मात् ईश्वरबुद्धिसत्त्वप्रकर्षवाचकाच्छास्त्रादेतद्भवति ज्ञायते विषयेण विषयिणोलक्षणात्। सदैवेश्वरः सदैव मुक्तः इति। तदेव पुरुषान्तराद्व्यवच्छेदेश्वरान्तरादपि व्यवच्छिनत्ति तत्र तस्येति। अतिशयविनिर्मुक्तिमाह न तावदिति। कुतः ? यदेवेति। कस्मात् सर्व्वातिशयविनिर्मुक्तं तदैश्वर्य्यम् ? इत्यत आह, तस्मादुत्कर्षेति। अतिशयनिष्ठामप्राप्तानामौपचारिकमैश्वर्य्यमित्यर्थः। साम्यविनिर्मुक्तिमाह न च तत्समानमिति। प्राकाम्यमविहतेच्छता तद्विघातादूनत्वम्, अनूनत्वे वा द्वयोरपि प्राकाम्यविघातः कार्य्यानुत्पत्तिर्वा विरुद्धधर्मसमाश्रितमेकदा कार्य्यमपश्यन्नेतावायथमानाह द्वयोश्चेति। अविरुद्धाभिप्रायत्वे वा प्रत्येकमीश्वरत्वे कृतमन्यैरेकेनैवेश्वरेणायाः कृतत्वात्, सम्भूयकारित्वे वा न कश्चिदीश्वरः परिवृढवत्, नित्येश्वरयोगिनाञ्च पर्य्यायायोगात्, कल्पनागौरवप्रसङ्गाच्चेति द्रष्टव्यं तस्मात् सर्व्वमवदातम्" २ ४वि०। एवमस्य क्रियाज्ञानशक्तौ शास्त्रं प्रमाणमभिधाय ज्ञानशक्तावनुमानं प्रमाणयति, किञ्च "तत्र निरतिशयं सर्व्वज्ञबीजम्"। व्याचष्टे यदिदमिति। बुद्धिसत्त्वावरकतमोऽपगममतारतम्येन यदिदमतीतानागतप्रत्युत्पन्नानां प्रत्येकञ्च समुच्चयेन च वर्त्तमानानामतीन्द्रियाणां ग्रहणं तस्य विशेषवत्त्वं वक्तुमिति सर्व्वज्ञबीजं कारणम्, कस्यचित् किञ्चिद्देवातीतादि गृह्णाति, कश्चिद्बहुतरं, कश्चिद्बहुतममिति यावज्ज्ञानप्रकर्षतया ग्रहणस्यात्यन्तं वक्तुं कृतम् एतद्विवर्द्धमानं यत्र निरुत्कर्षमतिशयात् स सर्व्वज्ञ इति तदनेन प्रमेयमात्रं कथितम्। अत्र प्रमाणयति अस्तिकाष्ठाप्राप्तिः सर्व्वज्ञबीजस्येति" साध्यनिर्देशः निरतिशयत्वं काष्ठा यतः परमतिशयवत्ता नास्तीति। तेन नावधिमात्रेण सिद्धसाधनम्, सातिशयत्वादिति हेतुः। यद्यत् सातिशयं तत्तत् सर्व्वं निरतिशयं यथा कृषलशामलकविल्वेषु सातिशयं महत्त्वम् आत्मनि निरतिशयमिति व्याप्तिं दर्शयति परिमाणवत्। न च परिमाणादिगुणैर्व्यभिचार इति साम्प्रतं न खल्वप्यवयवपरिमाणावयविनः, किन्त्वापरमाण्वभ्य अन्त्यावयविभ्यो यावन्तः कोचन, तेषामल्पेकवर्त्तिनो परिमाणः समाकृष्य परिमाणवर्धमानाभिमानः क्वानन्त्ये प्रतिष्ठेयं समाप्यत इत्येकत्रिबहुविषयतया युक्तं सातिशयमिति न व्यभिचारः। उपसंहरति, यत्र काष्ठा इति। ननु सन्ति बहवस्तीर्थकरा बुद्धर्षिकपिलर्षिप्रभृतयस्तत् कस्मात् ते एव सर्व्वज्ञा न भवन्यस्मादनुमानात् ? इत्यत आह, सामान्येति। कुतस्तर्हि तद्विशेषप्रतिपत्तिः ? इत्यत आह, तस्येति। बुद्धादिप्रणीत आगमाभासो नत्वागमः, सर्वप्रमाणबाधितत्वन्निरयनैरात्म्यादिमार्गोपदेशकत्वेन विप्रलम्भकत्वादिति भावः। तेन श्रुतिस्मृतीतिहासपुराणलक्षणादागमतः आगच्छन्ति बुद्धिमारोहन्ति अस्मादभ्युदयनिःश्रेयसोपाया इत्यागमः। तस्मात् संज्ञादिविशेषप्रतिपत्तिः। संज्ञाविशेषः शिवेश्वरादिस्तुत्यादिषु प्रसिद्धः। आदिपदेन षड्ङ्गतादृश्यते संगृह्यते। यथोक्तं वायुपुराणे "सर्व्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः। अनन्तशक्तिश्च विभो विधिज्ञाः षड्ङ्गाकुरङ्गानि महेश्वरस्य"। तथा "ज्ञानं वैराग्यमैश्वर्य्यं तपः सत्यं क्षमा धृतिः। सृष्टित्वमात्मसंबोधोऽधिष्ठातृत्वमेव च। अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे" इति। स्यादेतन्नित्यस्यैव भगवतश्चैश्वर्यातिशयसम्भवस्य स्वार्थं तृष्णासम्भवात्, कारुणिकस्य च दुःखैकतानजनसर्ज्जनपरस्य दुःखबहुलजीवलोकजननानुपपत्तेरप्रयोजनस्य च प्रेक्षावतः प्रवृत्त्यनुपपत्तेः क्रियाशक्तिशालिनोऽपि न जगत्क्रियेत्यत आह, तस्यात्मानुग्रहाभावेऽपीति। भूतानां प्राणिनामनुग्रहः प्रयोजनं शब्दाद्युपभोगविवेकख्यातिरूपकार्यकरणात् किल, चरितार्थं चित्तं निवर्त्तते तत्' पुरुषः केवली भवति अतस्तत्प्रयोजनाय कारुणिकोविवेकख्यात्युपायं कथयति तेनाचरितार्थत्वात् चित्तस्य जन्तून् ईश्वरः [illegible] दुःखदुःखे भावनयापि नाक्रान्तचित्तः। विवेकख्यात्युपायक

नाद भूतानुग्रहद्वारमाह ज्ञानधर्मोपदेशेनेति । ज्ञानञ्च धर्मश्च ज्ञानधर्मौ तयोरुपदेशेन ज्ञानधर्मसमुच्चयाच्छ्रवणविवेकख्यातिपरिपाकात् । कल्पप्रलये-ब्रह्मणोदिनावसाने यत्र सत्यलोकवर्ज जगदस्तमेति, महाप्रलये ससत्यलोकश्च ब्रह्मणोऽपि निधने, संसारिणः स्वकारणगामिनस्तदा मरणदुःखभाजः । कल्पेत्यादि प्रलक्षणम् । अन्यदापि स्वार्जितकर्मपाकवशेन जन्ममरणादिभाजः पुरुषानुद्धरिष्यामीति कैवल्यं प्राप्य पुरुषा भवन्त्वित्यर्थः । एतच्च करुणाप्रयुक्तस्य ज्ञानधर्मोपदेशेन कपिलानामपि सिद्धमित्याह, "तथा चोक्तं आदिविद्वान् कपिल" इति । आदिविद्वानिति पञ्चशिखाचार्यवचनम् आदिसूक्तखण्डनादि गुरुविषयं, सत्यादिसूक्तपरमगुरुविषयम, आदिसूक्तेषु कटाविन्मुक्तेषु विद्वत्सु कपिलेषु अस्माकमादिविद्वान् सूक्त स एव च गुरुरिति । कपिलस्यापि जायमानस्य महेश्वरानुग्रहादेव ज्ञानप्राप्तिः । श्रूयते हि कपिलोनाम विष्णोरवतारविशेषः प्रसिद्धः स्वयंभूस्तु हिरण्यगर्भः, तस्यापि साङ्ख्ययोगप्राप्तिर्वेदे श्रूयते इति "स एवेश्वरः आदिविद्वान् कपिलोविष्णुः स्वयम्भूरिति" स्वायम्भुवादीनामपीश्वर इति भावः २५ । "सम्प्रति भगवतो ब्रह्मादिस्थोविशेषमाह, 'स एव इति पातनिका न तु सूत्रम् "पूर्वेषामपि गुरुः कालेनानवच्छेदात्" । व्याचष्टे, पूर्वे इति । कालस्तु यतवर्षादि, अवच्छेदार्थेन अवच्छेदनप्रयोजनेनोपावर्त्तते, न वर्त्तते प्रकर्षस्य गतिः प्राप्तिः प्रत्येतव्या आगमात् । तदनेन प्रबन्धेन भगवानीश्वरोदर्शितः" २६ वाचस्पतिविवरणम् ।

तस्येश्वरस्य लक्षणम् "जन्माद्यस्य यतः" शा०सूत्रभाष्ययोर्दर्शितम् तत्रोपादाननिमित्तकारणोभयकारणपरतया समर्थितं तच्छ्रानुपदसूत्रकृतम् । तस्य लक्षणानि नवमितानि यथाह ब्रह्मसूत्रस्थलक्षणोद्धारश्च वेदा०परि०"प्रकृते च जगज्जन्मादिकारणत्वम् । अत्र जगत्पदेन कार्य्यजातं विवक्षितम् । कारणत्वञ्च कर्तृत्वम् अतो ऽविद्यादौ नातिव्याप्तिः । कर्तृत्वञ्च तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम् । ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे च "यः सर्व्वज्ञः सर्व्ववित् यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायते"इत्यादिश्रुतिर्मानम् । तादृशचिकीर्षासद्भावे च "सोऽकामयत बहु स्यां प्रजायेयेति-श्रुतिर्मानम् । तादृशकृतौ च "तन्मनोऽकुरुतेत्यादि" वाक्यम् । ज्ञानेच्छाकृतीनामन्यतमगर्भं लक्षणमितरद् विवक्षितम् अन्यथा व्यर्थविशेषणापत्तेः । अतएव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः । एतच्च लक्षणानि नव सम्पद्यन्ते । ब्रह्मणोजगज्जन्मादिकारणत्वे च "यतोवा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्तीत्यादि"श्रुतिर्मानम् । यद्वा निखिलजगदुपादानत्वं जगदाकारेण परिणम्यमानमायाधिष्ठानत्वं वा । एतादृशमेवोपादानत्वमभिप्रेत्य "इदं सर्व्वं यदयमात्मा""सच्चासच्चाभवत्""बहु स्या प्रजायेय"इत्यादिश्रुतिषु ब्रह्मप्रकृत्योस्तादात्म्यव्यपदेशः । घटः सन् घटोभवति घटस्तु इत्यादिलौकिकव्यपदेशोऽपि सच्चिदानन्दरूपब्रह्मण्यध्यासात्' । अतएव "अस्ति भाति प्रिय रूप नाम केत्यंशपञ्चकम् । आद्यं त्रयं ब्रह्मरूपं मायारूपं ततोद्वयमि"त्युक्तम् । श्रीधरस्वामिनाऽपि भाग०श्लो०टीकायाम "विश्वसर्गविसर्गादिनवलक्षणलक्षितम्" इत्यनेन ब्रह्मण सर्गादित्वस्य ज्ञानचिकीर्षाकृतिमत्त्वेन नव लक्षणान्युक्तानि । "मायोपाधिरयं जीवोह्यविद्योपाधिरीश्वर" इत्युक्तेः तस्याविद्योपाधित्वम् अविद्या च कार्य्यकारणभेदेन द्विविधा तत्र कार्य्यरूपा मायाशब्देन वाच्या कारणरूपा तु अविद्याशब्दवाच्या । तत्र कार्य्यरूपाभिप्रायेणैव "इन्द्रोमायाभिःपुरुरूप ईयते" श्रुतिर्दृष्टव्या । अविद्याभिप्रायेणैव तु "मायान्तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्" । "आजामेकां लोहितशुक्लकृष्णवर्णामि-त्यादि"श्रुतिश्च दृष्टव्या । तस्या एकत्वेऽपि सत्वरजस्तमोरूपगुणभेदात् त्रैविध्येन तदुपहितचैतन्यस्यापि त्रैविध्यम् । तदभिप्रायेणैव "स च परमेश्वरः एकोऽपि स्वोपाधीभूतमायानिष्ठसत्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वरादिशब्दवाच्यतां भजते" इति वेदा० परि० । "सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते । स्थित्यादये हरिविरिञ्चिहरेतिसंज्ञाः"भागवतम् । मत्स्यावतारप्रभृतयोऽपि ब्रह्मकोटय एव । अत एव विज्ञानविन्दो"पुमाकारविष्णुप्रभृतीनां ख्याकाराणाञ्च भारतीप्रभृतीनामीश्वररूपत्वमुक्तम् । तस्य नित्यतया निरवयवत्वेऽपि तत्तज्जीवादृष्टवशात् तैस्तैरुपासासिद्ध्यर्थं श्रुतिवेदपुराणप्रसिद्धाकारग्रहणम् "चिन्मयस्यादितीयस्य निष्कलस्याशरीरिणः । उपासकानां सिद्ध्यर्थं ब्रह्मणोरूपकल्पने-त्युक्तेः "योयो यां यां तनुं भक्तः श्रद्धयार्च्चितमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहमिति" गीतोक्तेश्च । ईश्वरविभूतिग्रन्थे च दर्शयिष्यमाण

तत्तत्स्थानेषु ईश्वरस्याराध्यता । "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्" गीतोक्तेः जीवानां कार्य्यवशात् तस्य विग्रहवत्त्वेनाविर्भाव । किन्तु स्वाटृष्टायत्तशरीरपरिग्रहस्यैव संसारित्वेन ईश्वरस्य शरीरपरिग्रहे जीवादृष्टस्यैव हेतुत्वेनेश्वरस्य न संसारित्वमिति भेद इति द्रष्टव्यम् । तत्र परमेश्वरे "यश्चिच्छीश्वर इत्यनन्यविषय शब्दोयथार्थोत्तरः" विक्र० "उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः" पुरा० । 'जगदाश्चर्यभीश्वरम्' गीता "न हीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम्" कुमा० । "क्लेशकर्म्मफलभोगैरपरामृष्टः पुंविशेषस्तमात्मेश्वर विदु" भाग० । आढ्ये "ईश्वरोऽहमहं भोगीत्योऽन्योऽस्ति सदृशो मम" गीता स्वामिनि । "न्यक्कारश्चरणयोर्न हि जातु विघ्नाः समाधिभेदप्रभवोभवन्ति" कुमा० । "प्रणम्य शीर्षाभिमतेश्वरश्रियं" रघु० । ऐश्वर्य्यान्वितस्त्रियां टाप् । "सविधे त्रयनेऽप्यनेकशः सफलीकर्त्तुमहो मनोरथान्" रघु० । दुर्गाया न ईश्वरपत्नीत्वाविवक्षयाऽत्रैव । "विन्ध्यमङ्गलमहौषधीश्वराया" किरा० ।

ईश्वरविभूति स्त्री ६त० । ईश्वरस्य विभूतौ संसारमध्ये स्थावरविशेषु तदीयांशभेदे । येषु येषु च भावेषु तत्र चिन्तनावता तत्तं दर्शितं गीताद्याम् । "हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतय: । प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे । अहमात्मा गुडाकेश ! सर्व्वभूताशयस्थित । अहमादिश्च मध्यञ्च भूतानामन्त एव च । आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् । मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी । वेदानां सामवेदोऽस्मि देवानामस्मि वासव । इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना । रुद्राणां शङ्करश्चास्मि वित्तेशोयक्षरक्षसाम् । वसूनां पावकश्चास्मि मेरु शिखरिणामहम् । पुरोधसाञ्च मुख्यं मां विद्धि पार्थ बृहस्पतिम् । सेनानीनामहं स्कन्दः सरसामस्मि सागर । महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् । यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालय: । अश्वत्थ: सर्व्ववृक्षाणां देवर्षीणाञ्च नारद । गन्धर्व्वाणां चित्ररथ: सिद्धानां कपिलोमुनि । उच्चै श्रवसमश्वानां विद्धि माममृतोद्भवम् । ऐरावतं गजेन्द्राणां नराणाञ्च नराधिपम् । आयुधानामहं वज्रं धेनूनामस्मि कामधुक् । प्रजनश्चास्मि कन्दर्प: सर्पाणामस्मि वासुकि । अनन्तश्चास्मि नागानां वरुणोयादसामहम् । पितॄणामर्य्यमा चास्मि यम: संयमतामहम् । प्रह्लादश्चास्मि दैत्यानां काल: कलयतामहम् । मृगाणाञ्च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् । पवन: पवतामस्मि राम: शस्त्रभृतामहम् । झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी । सर्गाणामादिरन्तश्च मध्यञ्चैवाहमर्जुन । अध्यात्मविद्या विद्यानां वाद: प्रवदतामहम् । अक्षराणामकारोऽस्मि द्वन्द्व: सामासिकस्य च । अहमेवाक्षय: कालोधाताहं विश्वतोमुख: । मृत्यु सर्व्वहरश्चाहमुद्भवश्च भविष्यताम् । कीर्त्ति: श्रीर्वाक् च नारीणां स्मृतिर्मेधा धृति क्षमा । बृहत्साम तथा साम्नां गायत्री छन्दसामहम् । मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकर: । द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् । जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् । वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जय । मुनीनामप्यहं व्यास: कवीनामुशना कवि: । दण्डोदमयतामस्मि नीतिरस्मि जिगीषताम् । मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् । यच्चापि सर्व्वभूतानां बीजं तदहमर्জ্জুন । न तदस्ति विना यत् स्यान्मया भूतं चराचरम् । नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप । एष तूद्देशत: प्रोक्तोविभूतेर्विस्तरोमया । यद्यद्विभूतिमत् सत्त्वं श्रीमदूर्জ্জितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् । अथ वा बहूनैतेन किं ज्ञातेन तवार्জ্জुन । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितोजगत् । इत्यादौ च ।

ईश्वरसाक्षिन् पु० ईश्वर एव साक्षी । वेदान्तिमतसिद्धे मायोपहिते चैतन्ये स च वेदान्तपरिभाषायां दर्शितो यथा "ईश्वरसाक्षी तु मायोपहितं चैतन्यं तच्चैकं तदुपाधिभूतमायाया एकत्वात् "इन्द्रोमायाभि: पुरुरूपईयत"इत्यादिश्रुतौ मायाभिरिति बहुवचनस्य मायागतशक्तिविशेषाभिप्रायतया मायागतसत्त्वरजस्तमोरूपगुणाभिप्रायतया चोपपत्ति: । "मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् । तस्यावयवभूतैस्तु व्याप्तं सर्व्वमिदं जगत्" इत्यादिस्मृतिषु एकवचनेन ज्ञानबलेनोत्कर्षितेन मायाया एकत्वं निश्चीयते । ततश्च तदुपहितं चैतन्यमीश्वरसाक्षी तच्चानादि तदुपाधेर्मायाया अनादित्वात् । मायावच्छिन्नं चैतन्यञ्च परमेश्वर: मायाविशेषत्वात् ईश्वरत्वं उपा-

धित्वे सान्तित्वम् । ईशीश्वरत्वसान्तित्वयोर्भेदः । तत्र धर्मिणोरीश्वरत्वम् । स च परमेश्वर एकोऽपि स्वोपाधीभूतमायानिःसत्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वरादिशब्दवाच्यतां भजते । तत्त्वाश्वरागादित्वे "तदैक्षत बहु स्यां प्रजायेय इत्यादौ सृष्टिपूर्वसमये परमेश्वरस्यागन्तुकमीक्षणमध्यास्यं कथमुपपद्यते ?। उच्यते । यथा विषयेन्द्रियसन्निकर्षादिकारणवशेन जीवोपाध्यन्तःकरणस्य वृत्तिभेदा जायन्ते तथा सृज्यमानप्राणिकर्मवशेन परमेश्वरोपाधीभूतमायया वृत्तिविशेषाः इदमिदानीं सृष्टव्यमिदमिदानीं पालयितव्यमिदमिदानीं संहर्त्तव्यमित्याकारावृत्तिभेदा जायन्ते तामाश्रित्य वृत्तीनां तत्प्रतिबिम्बितस्यस्य च सादित्वमिति"

ईश्वरी स्त्री ईश्वरस्य शिवस्य पत्नी ङीप् । दुर्गायाम् । 'ईश्वरोमाश्वरप्रियाम्" दुर्गास्तवः । ईश्व-वनिप् ङीप् रान्तादेशश्च । २निर्द्धनायां स्त्रियाम्, ३बन्ध्याकर्कश्याम्, ४चतुर्जटालतायाम्, ५नाकुलीवृक्षे च । ऐश्वर्यान्वितायां स्त्रियाम् च । "ईश्वरो सर्वभूतानां त्वामिहोपह्वयेश्रियम्" श्रीसूक्तम् ।

ईष उञ्छे (उद्धृतशस्यकणैरात्मानं पोषणे) तु०प०सक० सेट् । ईषति ऐषीत् । ईषाम् बभूव आस चकार । ईषिता ईष्यात् ईषिष्यति ऐषिष्यत् "विश्वाद्यीषतो यजमानस्य परिधिः" तैत्ति० ।

ईष टाने ईक्षणे, सर्पणे क्षिप्तौ च भ्वादि०आत्म०सक०सेट् । ईषते । ऐषिष्ट ईषास्त बभूव आस चक्रे । ईषिता ईषिषीष्ट ईक्षते ऐक्षिष्यत । ईषत् ईषा "सुरक्षेव त्वं यादीषतेऽयः" ऋ० १,१४१,८ । "अक्षादहं तनियादीषमाणः" ऋ०१,१७१ ४७ ।

ईष पु० ईष-क । उत्तममनोः पुत्रभेदे । "औत्तमेयान् महाराज ! दश पुत्रान् मनोरिमान् । ईष ऊर्जस्तनूर्ज्जश्च मधुर्माधव एव च । शुचिः शुक्रः सहश्चैव नभस्यो नभस्य एव च" हरिवं०७अ० ।

ईषत् अव्य०ईष-अति । १अल्पे, २किञ्चिदर्थे च । "ईषत्सहासममलं परिपूर्णचन्द्रबिम्बानुकारि" देवीमा० ईषदीषदनद्योतविद्यया तातमाहत्सटमाविर्ब्रुवन्" कुसुमा० । "ईषत् कृता" प्रा०समा० । ईषदुष्णः ईषत्पाण्डुः । ३सूक्ष्मार्थे च "ईषद्धौतं नवं शुक्लं सदृशं यस्य धारितम्" वसिष्ठः । "ईषत् सूक्ष्मतन्तुकमिति रघुनन्दन" एतदुपपदे धातोः खल् ईषत्करः ईषद्दमः । दृशादेस्तु युच् वा । ईषद्दर्शः ईषद्दर्शनः । एतत्पूर्वे आढ्ये उपपदे खल् ईषदाढ्यङ्करः "ईषदाढ्यङ्करोऽप्येषः भङ्गिः ईषदाढ्यम्भवम् ।

ईषत्कर न० ईषत् कृ-खल् । १लेशे, २अल्पे च । ३अल्पप्रयाससाध्ये त्रि० । [वर्षे २तहति त्रि०

ईषत्पाण्डु पु०"ईषदकृतेति" पा०स० । १अल्पपाण्डौ धूसरे

ईषदुष्ण पु० "ईषदकृतेति" पा०स० । अल्पतप्ते १सन्तोष्णे २तहति त्रि० [२तहति त्रि०

ईषद्वक्र पु०"ईषदकृतेति" पा०स० । अल्पवक्रवर्षे १अव्यक्तरागे

ईषा स्त्री ईष-क । १शकटस्य दार्घकाष्ठे "देवानामित्युपस्तम्भनस्य पशादीषाम्" कात्या० २,३,१४, "शकटस्य दार्घे काष्ठमीषा" वेदटी० । २रथावयवभेदे च "ईषामन्ये क्षयानन्ये सूतमन्ये न्यपातयन्" भा०७०२४०अ० "पाञ्चालस्य रथस्येषामाशूत्य सहसाऽपतत्" भा० आ० १२८अ० । ३हलयुगयोर्मध्यमकाष्ठे ४बालकलटखण्डे च ।

ईषादन्त पु०ईषेव दन्तोऽस्य । १दीर्घदन्तगजे २उदग्रदन्ते त्रि०

ईषिका स्त्री ईषेव "ईषे प्रतिकृतावि"ति पा०कन् । १गजाक्षिगोलके, २तूलिकायाम्, ३अस्त्रविशेषे च । "सोऽभिमन्त्र्य शरेषीकामीषिकास्त्रेण वीर्य्यवान् काकं तमभिसन्धाय ससर्ज पुरुषर्षभ" रामा० । फर्फरीकादि०नि० ईषीकापि । तूलिकायाम् तत्रभेदे "सोऽभिमन्त्र्य शरेषीकामीषिकास्त्रेण वीर्य्यवान्" ईषिकेति तालव्यमध्योऽप्यत्रार्थे ।

ईषिर पु० ईष क्षिप्तौ किरच् । अग्नौ उज्ज्वलदत्तः ।

ईष्म पु०ईष-सर्पणे करणे मक् । १कामदेवे ईष ईक्षणे कर्म्मणि मक् । २सन्तप्तौ च उज्ज्वल० ।

ईह चेष्टने भ्वादि०आत्म०सक०सेट । ईहते ऐहिष्ट ऐहिष्टाम् ऐहिध्वम् । ईहाम्-बभूव आस चक्रे ईहिता ईहिषीष्ट ईहिष्यते ऐहिष्यत । ईहनम् ईहा ईहमानः ईहितः "शक्यस्यानीहमानस्य किमिच्छन्त्या पृथक् क्रिया" स्मृतिः । "ऐहिष्ट न करणीयं कृतात्मा" भट्टिः । प्रियाणि वाक्यान्यसकृत् सभार्यः । "हन्तु क्रोधवशादीहान्नक्रान्तौ परस्परम्" इति च किरा० । अस्य इच्छापूर्वकचेष्टापरत्वे सक० "नेहेताधान प्रसङ्गेन" मनुः । "तस्याराधनमीहते" गीता ।

ईहा स्त्री ईह-अ । १चेष्टायाम्, २उद्यमे, ३वाञ्छायाञ्च । "ईहादेहार्थिनः स्याच्चन्द्रार्के उपतापिते । ज्योति० ।

ईहामृग पु० ईहां मृगयते अण् ईहाप्रधानो वा मृगः पशुभेदः । (नेकड़ावाघ) । १छले ईहया ईहामात्रो मृगः । २वृत्तिसमूहे अलङ्कारयाञ्चलक्षिते ३नाटकभेदे च साहि० ६परि० । यथा "ईहामृगो विश्रब्धत्तचतुरङ्गः प्रकीर्त्तितः ।

सुखप्रतिमुखे सन्धी तत्र निर्व्यूढं तथा । नरदिव्यादिनियमो नायकप्रतिनायको । ख्यातो धीरोद्धतान्यो गूढभावादयुक्तकृत् । दिव्यस्त्रियमनिच्छन्नीमपहारादिनेच्छतः । अपहारोभासमस्य किञ्चित् किञ्चित् प्रदर्शयेत् । पताकानायका दिव्या मर्त्यापि दयोद्धता । युद्धमानाय संरम्भः परं व्याजाच्चिवर्त्तते । महात्मानो बधं प्राप्ता अपि बध्याः स्युरत्र नो । एकाङ्कोदेव एवात्र नेतेत्याहुः परे पुनः । दिव्यस्त्रीक्षेत्रकं युद्धं नायकाः षड्विधेतरे । मिश्राणि ख्यातानि । अन्यः प्रतिनायकः पताकानायकास्तु नायकप्रतिनायकयोर्मिश्रिता दश । नायको मृगयवलभ्यां नायिकामत्र ईहते वाच्छतीत्यीहामृगः । अच् नायकेश्वर विजयादिः"

ईहाबृक पु० ईहाप्रधानो वृक । (नेकडियाबाघ) ईहामृगे ।

ईहित त्रि० ईह क्त । चेष्टिते २अभिलिते भावे क्त । ३उद्योगे ४चरिते न । "समीहितार्थसिद्धिःस्यात्" तन्त्रम् ।

इति वाचस्पत्ये ईकारादिशब्द-निरूपणम् ।

उ

उ शब्दे भ्वादि०अक०आ०अनिट् । अवते औट । उवे ओता ओषीष्ट ओष्यते औषत । अवनम् उतः । "उवे अस्य सुलाभिके यशेवाङ्क भविष्यति" ऋ०१०,८६,७।

उ अव्य० उ-क्विप् नुक् । १सम्बोधने २कोपवचने, ३अनुकम्पायां, ४नियोगे (अवधारणे) "उमेति मात्रा तपसे निषिद्धा पश्चादुमाख्यां सुमुखी जगाम" कुमा० । "उदु ष्य देवः सविता स वाय" ऋ०२,३८,१ । "उपो रुरुचे युवतिर्न योषा" ऋ० ७,७७,१ । "वेत्थो यथेमं लोकं पुनरापद्यते इति" छा०उ० । "एष उ एवासाधु कर्म कारयति तम्" स्मृतिः ५अङ्गीकारे ६प्रश्ने च "केमच० ७पादपूरणे । अवति सातत्येन तिष्ठति अत डु । दीर्घत्वे पु० । स्वरूपार्थे कारः उकारोऽपि शिवे "अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः । मकारस्तु स्मृतो ब्रह्मा प्रणवस्तु त्रयात्मकः" इति ओमित्यस्य अवयवार्थनिरूपणे पुरा० । उपचारात् स्वरूपार्थे कारः । उकारः । पञ्चमस्वरे । स च उच्चानुदात्तस्वरितभेदेन प्रथमं त्रिधा पुनः अनुनासिकाननुनासिकभेदेन प्रत्येक द्विधेति षड्विधः; कारतकारानुत्तरस्तु ह्रस्वदीर्घप्लुतभेदेन त्रिविधोऽपि प्रत्येकं प्रागुक्तभेदषट्कात् अष्टादशविधः । तस्य वर्णस्य कूरण्डलिनीरूत्वादिनाध्येयत्वमुक्तम् कामधेनतन्त्रे यथा "उकार परमेशानि । विद्धि कुण्डलिनीं स्वयम् । पीतचम्पकसङ्काशं पञ्चदेवं सदा शिवम् । पञ्चप्राणमयं देवि । चतुर्वर्गप्रदायकम्" तन्त्रान्तरे अकारोकारमकारात्मकप्रणवस्य मध्ये द्वादशकलात्मकार्कमण्डलरूपेण अकारस्य, षोडशकलात्मकचन्द्रमण्डलरूपेण उकारस्य, दशकलात्मकवह्निमण्डलरूपेण च मकारस्य ध्येयत्वोक्त्या अभेदोपचारात् षोडशकलात्मके, दशचन्द्रमण्डले च तत्र मकारान्तस्यैव तन्नामतेति बहवः । उ, इत्यस्य एकाज् निपातत्वात् प्रगृह्यसंज्ञा तेन अचि परे न सन्धिः । उ उमेशः" मि० को० । "एष उ वासाधुकर्म्म कारयति तम्" स्मृतिः । स चादिगणीयः ।

उकानह पु० पीतरक्तवर्णे कृष्णरक्तवर्णे च घोटके । हारा०

उकार पु० उ-स्वरूपार्थे कारः । १उस्वरूपे वर्णे । "अकारश्चाप्युकारश्च मकारश्च प्रजापतिः । वेदत्रयात् निरदुहत् भूर्भुवःस्वरितीति च" मनुः । २महेश्वरे च उशब्दे उ० ।

उक्त त्रि० वच-क्त० गौण कर्मणि क्त । यस्य ज्ञानाय कथ्यते तादृशे जने । "अनुक्तेऽपि वक्तव्य सुहृदा हितमिच्छता" नीतिः "तथेत्युक्त्वा च सा देवी" पुरा० गौणकर्मसमभिव्याहारे तु मुख्ये कर्मणि क्त । २कथिते वाक्यादौ ३शब्दबोधिते "उक्तानि प्रतिषिद्धानि पुनः सम्भावितानि च" स्मृतिः; "उक्तार्थानामप्रयोगः व्या०प० । भावे क्त कथने न० । "सम्यगुक्तमसाधुत वक्तुमुक्ते सुसज्जनैः" माघः । ४एकाक्षरपादके छन्दोभेदे स्त्री मेदि० "उक्तात्युक्ता तथा मध्येति" हेम० । कोविदस्तु "उक्थात्युक्थेति पठित्वा उक्थशब्दस्तदर्थे इत्याहुः । उक्तञ्च प्रायेण अभिधाशक्त्या बोधितार्थे एव । "प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते । यथा गुणे तथा तद्वदुक्तादपि प्रतीयते" भर्तृ० । शक्तिः कारकशक्तिरित्यर्थः ।

उक्ति स्त्री वच-भावे क्तिन् । कथने । "अतिसंक्षिप्तविचित्रनोक्तिभिः सुकृता०। उक्तिप्रत्युक्तिरूपं वाक्योक्त्याम्" छा०भा० २शब्दशक्तौ च "एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ" अमरः ।

उक्थ न० वच-थक् । अप्रगीतमन्त्रसाध्ये "स्तोत्रे "इन्द्राय नूनं मरुतोक्थानि च ब्रवीतनः" ऋ०१,८१,५ । "उक्था-

नि अप्रगीतमन्त्रसाध्यानि स्तोत्राणि भा० "अथ योऽसावन्तरक्षिणि पुरुषो दृश्यते सैवर्क् तत् साम तदजुं तदुक्थं तद्ब्रह्म" छा० उ० । तथा हि स्तोत्रं द्विविधं प्रगीतमन्त्रसाध्यमप्रगीतमन्त्रसाध्यञ्च तत्र प्रगीतमन्त्रसाध्यं शस्त्रम् अप्रगीतमन्त्रसाध्यन्तु स्तोत्रमिति तयोर्भेदः । गवामयने प्रायणीयसंज्ञकाहे पञ्चदशस्तोत्रात्मके २चतुर्विंशस्तोमभेदे उपचारात् ३तत्साध्ये उक्थ्ययागे च तद्विधानञ्च" ता० ब्रा० ४ अ० २ ख० उक्तं यथा "१प्रायणीयमहर्भवति" १ इत्युपक्रम्य "चतुर्विंशं भवति" ४ क० "इदमहरुक्थसंस्थन्तत्र सर्वेषु स्तोत्रेषु चतुर्विंशस्तोमः कार्य्यः ४ । तदेतत् प्रशंसति" भा० । "चतुर्विंशत्यक्षरा गायत्री तेजोब्रह्मवर्चसङ्गायत्री तेज एव ब्रह्मवर्चसमात्मन्यधत्ते" ५ । "अथञ्च स्तोमश्चतुर्विंशतिसंख्याकः गायत्री च चतुर्विंशत्यक्षरा सा च गायत्री तेजः, प्रजापतिमुखादग्निना सहोत्पन्नत्वात् अस्यास्तेजोरूपं ब्रह्मवर्चसं च तेजोऽक्षरभेद इति तेजोब्रह्मवर्चसरूपा गायत्री । एवं सति चतुर्विंशतिस्तोमं प्रथमतः प्रयुञ्जानाः साक्षादेव प्रत्यक्षमेव संवत्सरं प्रारभन्ते अस्मिन्नहनि प्रयुञ्जानाः संख्याहारेण तेजोब्रह्मवर्चसञ्चारभ्य अवरुध्य स्वर्ग्यन्ति स्वर्गं गच्छन्ति५। पुनरपि विहितं स्तोमम् अनूद्य प्रशंसति" भा० । "चतुर्विंशतिर्भवति चतुर्विंशो वै संवत्सरः साक्षादेव संवत्सरमारभन्ते" ६। "चतुर्विंशत्यक्षरमासात्मकत्वात् संवत्सरस्य चतुर्विंशत्वं तथा सति चतुर्विंशस्तोमं प्रथमतः प्रयुञ्जानाः साक्षादेव प्रत्यक्षमेव संवत्सरमारभन्ते ६। अथैनं स्तोमं स्तोत्रीयागतसंख्याहारेण प्रशंसति" भा० । "यावत्यस्तुर्विंशस्योक्थस्य स्तोत्रीयास्तावत्यः संवत्सरस्य रात्रयः स्तोत्रीयाभिरेव संवत्सरमाप्नुवन्ति"७। "पञ्चदशस्तोत्रे अस्मिन्नहनि पञ्चदशसु स्तोत्रेषु प्रत्येकं चतुर्विंशस्तोत्रीययुक्तेषु परिगणनायां मिलित्वा पञ्चोत्तरशतस्तोत्रीया भवन्ति । तथा सति चतुर्विंशस्तोमस्य यावत्यः स्तोत्रीयाः संवत्सरस्यापि तावत्यो रात्रयः एवं प्रयुञ्जानाः सविशेषेण चतुर्विंशेन स्तोत्रीयाभिरेव संवत्सरं प्राप्नुवन्ति७ । स्तोमसंख्ययापीदमहः प्रशंसति" भा० । "पञ्चदश स्तोत्राणि भवन्ति पञ्चदशार्द्धमासस्य रात्रयोऽर्द्धमासश एव तत्संवत्सरमाप्नुवन्ति८ "स्पष्टोर्थः८" । अथ स्तोत्रयस्त्राणि सप्तत्रिंशत् तत्संख्ययापीदमहः प्रशंसति" भा० "पञ्चदश स्तोत्राणि पञ्चदश शस्त्राणि समासो मासस्य एवं तत् संवत्सरमाप्नुवन्ति९" स्पष्टोऽर्थः९भा० । तत्राग्निष्टोमकर्त्तव्यतारूपं पूर्वपक्षमुपन्यस्योत्तरपक्षमाह "अथो खल्वाहुरुक्थमेव कार्य्यमङ्गः सम्पद्यै" १२। "अथो इति पक्षव्यावृत्त्यर्थः । उक्थसंस्थमेवैतदहः कार्य्यं किमर्थमङ्गः सम्पद्यै सम्पूर्णतायै इति ब्रह्मवादिन आहुः । अग्निष्टोमे हि पूर्वयोः सवनयोः पञ्च पञ्च स्तोत्राणि हतीये तु द्वे एवेत्यङ्गः सम्पद्यै न भवति, उक्थ्ये तु हतीयसवने पञ्च स्तोत्राणीत्यङ्गः सम्पद्यै भवति१२ । उक्थसंस्थाकारे युक्त्यन्तरमाह" भा० । "सर्वाणि रूपाणि क्रियन्ते सर्वं ह्येतेनाप्यते" १४ "उत्तरेषामहां सम्बन्धीनि यानि रूपाणि स्तोमपृष्ठविभक्त्यादीनि तान्यस्मिन्नुक्थे क्रियन्ते अतः सर्वं हि यत्तत्सम्बन्धिरूपं तेनाङ्गा उक्थसंस्थेन व्याप्यते प्राप्यते तत उक्थसंस्थैव कार्य्येत्यर्थः । सर्वरूपकरणञ्च सर्व्वाप्तिश्च सम्पादनहारेणेति निदानकारेणोक्तमस्ति, "अथो खल्वाहुः सर्व्वाणि रूपाणि क्रियन्त इति" व्याचार्य्याः एतेष्वेव सर्व्वान् स्तोमान् सर्वाणि पृष्ठानि सर्वा विभक्तीर्दशरात्ररूपा इति विभक्तिमात्रेण कल्पयन्त इति संक्षेपोक्त्या पुनस्तिष्ठन्पञ्चदशौ चतुर्विंशः सम्पद्यात इत्यादिना"१४ भा० । एतान्येव स्तोमपृष्ठादीनि प्रत्येकं क्रमेण विविच्य तत्र पूर्दर्शितानि तत्सर्वं तत एवागन्तव्यम् । तत्र च तस्मिन्नहनि यथा स्तोमादिकं विधेयम् तदपि तत्रैव दर्शितं ततएव तदवसेयम् । अत्र उक्थसाध्ययागे अभेदोपचार इति बोध्यम् ।

४स्तोत्रार्थां स्त्री उक्थ्यशस्त्रयज्ञे उदा० उच्यतेऽनेन करणे थक् । ५ उक्थसाधने प्राणे च 'यस्य त्रयविंशेन स्तोकोऽग्निप्रियदर्शनः । उक्थेन रक्षितोऽहेव ऋतवः प्रोच्यते यथा" भाग० स्क० १५ अ० ।

उक्थपत्र पु० उक्थानि अप्रगीतमन्त्रसाध्यानि स्तोत्राणि पत्रं वाहनमिव यस्य । १यज्ञे, स्तोत्रैरेव हि यज्ञोवाह्यते इति तस्य तथात्वम् । "समिद्धे अग्नावधिमामहान उक्थपत्र ईड्योऽभीतः" यजु० १७, ५५ । "यजमानोवै मामहान उक्थपत्र इत्युक्थानि स्तोत्रस्य पत्राणि" शत० ब्रा० ६, २, ३, ६ इत्युक्तेः २ यजमानेऽपि । [त्तथात्वम् ।

उक्थपात्र न० ६त० । यजमाने तस्य उक्थस्तावकत्वा-

उक्थभृत् पु० उक्थं बिभर्त्ति सम्यक्विभजते भृ-क्विप् ६त० । उक्थविभाजके ऋत्विभेदे "उक्थभृतं सामभृतं बिभर्त्ति वीवाधम्" ऋ० ७, ३२, १४ । उक्थभृतं उक्थानां स्तोत्राणां संभक्तारम्" ।

उक्थमर्दन पु० उक्थैः स्तोत्रैर्मर्द्यतेऽसौ मृद-णिच् कर्मणि

ल्युट्। स्तोमैर्वर्द्धनीये इन्द्रदेवे। "त्वं हि स्तोमवर्द्धन इन्द्राभ्युक्थवर्द्धनः" ऋ०८,१४,११। "उक्थैर्यस्मैर्वर्द्धनीयः" भा०। इन्द्रस्य यथा उक्थवर्द्धनीयत्वं तथोक्तं "उक्थमिन्द्राय शंस्यं वर्द्धनं पुरुनिष्षिधे" ऋ० १,१०,५, "इन्द्रायेन्द्रार्थं वर्द्धनं वृद्धिसाधनम् उक्थं शस्त्रम्" भा०

उक्थवाहस् पु०उक्थानि शस्त्राणि वहति वह-असुन् णिच्च। शस्त्रपाठके विप्रे "यं विप्रा उक्थवाहसोऽभिप्रमं दुरायवः" ऋ० ८,१२,१३,। उक्थवाहसः उक्थानां शस्त्राणां वोढारः" भा०।

उक्थशंसिन् पु० उक्थानि शस्त्राणि शंसति शंस-णिनि। शस्त्रस्तावके ऋत्विग्भेदे "नयसीति हिषः कण्वोष्णुक्थशंसिनः" ऋ० ६,४५,६। स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम्" ऋ० ८,१०२,४।

उक्थशस् पु०उक्थं शस्त्रं शंसति क्विप्। शस्त्रस्तावके। उक्थशास्यन्ते उदा०। पदकाले सर्व्वत्र तस्य ह्रसमध्यपाठः। स च कान्दसो ह्रसह्रति माधवः। क्विप् प्रत्ययेनैवोपपत्तौ न कान्दसत्वमित्यन्ये। "तस्मादुक्थशसं भूयिष्ठं परिचक्षते" शत०ब्रा०। १०,५,२,५।

उक्थशास् पु० उक्थानि शंसति शंस-क्विप् नि० नलोपः उप० स०। शस्त्रशंसके। "शुचीदयन्दीधितिमुक्थशासः" ऋ० ४,२,१६। "अस्य पदकाले ह्रसम्भ्रान्तः" माधवः। "नीहारेण प्रावृता जल्पाचासुतृप उक्थशासश्चरन्ति" ऋ०१०,८२,७। "नरः शंसन्युक्थशास उक्था" ऋ०७,१६,६।

उक्थशुष्म त्रि० उक्थं शस्त्रं शुष्मं बलं यस्य। उक्थरूपबलयुक्ते स्तुत्यादिवाक्ये "सप्तद्रं न सिन्धव उक्थशुष्मा उरुव्यचसम्" ऋ० ६,३६,३। "उक्थशुष्मान् वृषभरान्वृत्रप्रसक्तां" ऋ० १०,६२,३।

उक्थादि पु०६त०। तदधीते वेत्ति वेत्यर्थे विहित-ठक्प्रत्ययनिमित्ततया प्राणिन्युक्ते शब्दसमूहे स च गणः "उक्थलोकायत न्याय न्यास पुरुष्क निरुक्त निमित्त द्विपद ज्योतिष अनुपद अनुकल्प यज्ञ धर्म्म चर्च्चा क्रमेतर ब्राह्मण संहिता पद क्रम संघट्ट वृत्ति परिषद् संघट्ट गण गुण आयुर्वेद तन्त्रायुर्वेद"। "उक्थं सामविशेषस्तल्लक्षणपरो-ग्रन्थविशेषोलक्षणया तदधीते वेद वा औक्थिकः सुब्लुगुक्थशस्टठगणौ मेध्येते" सि०कौ०।

उक्थामद न०उक्था स्तोत्रया मादयति मद-अच्। उक्थासाधने स्तोमभेदे "अग्निर्यजुर्भिः सविता स्तोमैरिन्द्र उक्थामदैर्ऋक्सामभिर्वसिष्ठः" कठसं० "ऋक्सामैरुक्थामदानि शंसिषम्" ऐत०।

उक्थावो त्रि० उक्थानि अवति अव-ऽ। शस्त्रस्तावके "ऋक्षते वयस्त उक्थाव्यं वृक्षणासि" यजु०७,२२।

उक्थाशस्त न०उक्था स्तोत्रा च शस्त्राणि च द्वन्द्वः। स्तोत्रायामृचि शस्त्रे च। "छन्दोभिरुक्थाशस्त्राणि साम्नावश्च आप्यते" यजु० १६,२८।

उक्थिन् पु० उक्थं स्तुत्यतयाऽस्त्यस्य उक्थ+इनि। १शस्त्रस्तावके स्तोत्रादौ। "प्र वामर्च्चन्त्युक्थिनो नीथाविदोजरितारः" ऋ० ३,१२,५, "उक्थं शस्त्रं तद्वन्तः शस्त्रिणो स्तोत्रादयः" भा०। "तदद्याचित्त उक्थिनोऽनुष्टुवन्ति पूर्व्वथा" ऋ० ८,१५,६,। उक्थं स्तोत्रसाधनतयाऽस्त्यस्य इनि। २शस्त्रस्तुत्ये इन्द्रादौ। "हिरण्यपर्ण्यमुक्थिनं रयिनां बिभ्रतं वपुः भगमिन्द्रं ववोधसम्" यजु० २८,३२ उक्थं शस्त्रं संस्काराङ्गसाधनतयाऽस्त्यस्य इनि। ३शस्त्रसाध्ये संस्कारयुक्ते सोमादौ। "तुभ्येदिन्द्र! मरुत्वते सुताः सोमासो अद्रिवः हृदा हूयन्त उक्थिनः" ऋ० ८,७६,८। "उक्थिनोऽन्या स्तोत्रा उक्थिनः शस्त्रवन्तः सोमाः अतुक्था अन्याः" ऐत०।

उक्थ्य त्रि० उक्थमर्हति यत्। शस्त्रस्तुत्ये देवादौ। "इन्द्रः सहस्रदावां वरूथं संस्थानां क्रतुर्भवत्युक्थ्यः" ऋ० १,१७,५। "उक्थ्यः स्तुत्यः" भा० "होता यक्षीत उक्थ्यः" ऋ० १,७६,१२। २उक्थसाधने शस्त्रे च। "गाय गायत्रमुक्थ्यम्" ऋ०१,३८,१४। उक्थ्यं शस्त्रयोग्यं गायत्रसुक्थ्यम्" भा०। उक्थसम्बन्धित्वात् ३शस्त्रेऽपि। "उक्थ्यं वाचि सोमाद्यं त्वेति शस्त्रा जपेत्" आश्व०श्रौ०५,६,२६। "उक्थ्यं शस्त्रं शस्त्रसम्बन्धितया" नारा०वृत्तिः। "सोमयागात् परं कर्त्तृभेदेषु षट्सु यागेषु मेध्ये ४यज्ञभेदे स च। "प्रथमं सोमा" दूलुप्तस्य "षड्उत्तरे" "अत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्यामः कात्या० १०,६,२७,२८ विहितः। तत्प्रकारस्तु तत्रैव दर्शितः प्राक्। तस्य उक्थसाध्यत्वात् उक्थ्यमिति नाम।

"उक्थे तु स्तोत्रकाण्डाम्" १। "तृतीयसवनस्त्वनुवर्त्तते। उक्थे त्वयं विशेषः। तृतीयसवने स्तोत्रकाण्डामपि शस्त्राणि भवेयुः। तानीमानीत्याह" इत्तिः। "एह्यु ष्वाणि तत्राग्निरगामि भारतस्वर्षणीष्टतमस्तत्राह्वामहार इति ऋचाविन्द्रावरुणा युवमावां राजानाविन्द्रावरुणा मधुमत्त-

सक्षेति याज्या । वयमु त्वामपूर्व्य इन्द्रमिमं पुरेति प्रगाथौ । सर्वाः ककुभः प्रसंहिताश्चोदपुनोऽच्छाम इन्द्रं स्तृहसते युवमिन्द्रश्च वस्व इति याज्या । अथाहोन्द्र गिर्वण इत्यन्त इन्द्र गिर्वण क्रतुर्जनित्वीनू मर्त्तो भवामित्यः स वां कर्मणेन्द्राग्निषु मदपती मदानामिति याज्या"२ । "अत्र सर्वाः ककुभ इत्युक्तं किमनेनोक्तम् । ककुभेषु तावत् प्रगाथेषु तृतीयपञ्चमयोरभ्यासे सति ककुभ एव सर्वा भवन्ति । तथैव च स्तुवन्ति छन्दोगाः । अतोऽन्यत् प्रयोजनमन्वेषणीयम् । तदिदमुच्यते । होत्रकाश्च येषां प्रगाथाः स्तोत्रीयानुरूपा इतीन्द्रनिहवब्राह्मणाच्छंसनं विहितम् । तत्र वार्हतानामेवायं विधिरित्युक्तत्वात् ककुभेष्वनुप्राप्तो तद्विशेषार्थं ककुभ इति वचनम् । सर्वग्रहणं सर्वककुभप्रगाथसंग्रहार्थम् । नेम वार्हतेष्वेवासौ विधिरिति मन्तव्यम् । 'दृत्यन्त उक्थ्यः'३ । "एवमन्त उक्थ्यः क्रतुरित्यर्थः । इत्यन्तोऽग्निष्टोम इत्यस्मान्तरम् एतानि यस्मात्पृथक्थ्यः इत्यन्ते उक्थ्य इत्येतावत्युच्यमाने एतानि यस्मात्पृथक्थ्य एवेति गम्यते । तत् किमर्थमुक्थ्ये त्र होत्रकाणामित्यत्रोक्थ्यग्रहणम् । अयमभिप्रायः । अथ सोमेनेति त्रिषु ध्यायेषु ज्योतिष्टोमाख्यः सोमयागोऽभिहितः, स च संस्थाभेदात्नामभेदाच्चतुर्धा भिन्नो व्युत्पादितो भवति । तत्र सर्वत्र सोमेन यजेतेत्येतद्विधिविहित एवैको यागः केनचिदुपाधिभेदेनाभ्यस्तो भिन्नो नाम प्रतीयते । अतः सर्वेषां प्रकरणित्वे प्राप्ते अग्निष्टोम एव प्रकरणी, अन्ये तस्यैव गुणा विकारा इति ज्ञापयितुमुक्थ्य इत्युच्यते । उक्थ्य एतावदैपदेशिकं, अन्यत् सर्वमातिदेशिकमित्यर्थदृत्येवं आश्व०श्रौ०६,१,क० तस्य प्रकारोऽभिहितः उक्थेन संस्थार्थे षड्रूपे ५पात्रभेदे । 'उक्थ्यासुपयाम गृहीत, इति" कात्या०६,६,२१ ।'उक्थ्यादि" कात्या० १४.२.१० उक्थ्यषडहादि प्राकृतं कर्म भवति उक्थ्यस्थाख्या उक्थ्यसंज्ञकं यद्वं गृह्णाति" कर्कः । प्रागुक्थ्यान्नरत्नतीयक्रतुपात्रेण इन्द्रमरुत्व इति" कात्या० १०,१,१४ । आग्नेयषडहणानन्तरमुक्थ्यषडहात् प्रागिति कर्कः ।

उक्ष—सेचने भ्वा० सक०प० सेट् । उक्षति औक्षीत् उक्षाम्-बभूव आस चकार । उक्षिता उक्षितुम् उक्षितिष्यति औक्षिष्यत् । उक्षितव्यः उक्षणीयः उक्ष्यः । उक्षिता उक्षन् उक्षितः । उक्षा उक्षणम् । उक्षित्वा उक्षित्वा । कर्मणि उक्ष्यते औक्षि उक्ष्यमाणः "उक्षन्यज्ञै मरुद्भ्हितादृय" ऋ०१,१६६,३, "औक्षन् गोरितमस्मोदाः" भट्टिः ।"उक्षां प्रचक्रुर्नगरस्य मार्गान्" भट्टिः। अव्यवधाने एवासुप्रयोगविधानात् प्रयुक्तव्यवधानात्सासुप्रसक्तिरतोऽत्र जयमङ्गलेन उक्षान् प्रचक्रुरिति पठितम् उक्षान् सिक्तानिति तदर्थः "हतसुक्षता मधुवर्षुमर्चते" ऋ०१,८७,२, "गङ्गाप्रवाहोक्षितदेवदारु" कुमा० । "गन्धवदुरुचिरचन्दनोक्षिता" "किञ्चिदुक्षितशिखण्डकाभौ" रघुः । क्वचिदस्य पदव्यत्ययः । "अक्षमपो अभिक्षसुक्षमाणाः" ऋ० ४,४२,४ "तसुक्षमाणमव्यये वारे पुनन्ति" ऋ०९,६६,५' "प्रसव्यमात्मानमुदकैः पर्य्युक्षते" आश्व०श्रौ० । उक्षणञ्च द्रव्यद्रव्येण संयोगविशेषजनकव्यापारः । (सेचा) ।

अभि+अवतानप्राणिना सेचने । "उक्षानेनैव हस्तेनप्रोक्षणं परिकीर्त्तितम् । न्यञ्चताऽभ्युक्षणं प्रोक्षं तिरश्चाऽवोक्षणं स्मृतमिति" छन्दोप० उक्षेः तथार्थत्वम् । अभ्युक्षणशब्दे विहृतिः "परस्पराभ्युक्षणतत्पराणाम् रघुः । "शिरसि शकुनलाभमभ्युक्षा" शक० । "अथाङ्गिरभ्युक्षति, एष वा अपां सम्भारो यदङ्गिरभ्युक्षति"शत०ब्रा०२,१,१,२,।

अव+तिर्यक्प्राणिना सेचने "दृप्ता मधुमिश्रेणावोक्षति" तैत्ति० । "उक्षतमवोक्षितं भवति यत्तेनसुपावहरत्यृक्षते वा अवोक्षितेऽग्निमादधति" शत०ब्रा०६, ४,४,१८, "उक्षत्यावोक्षति यत्तेनसुपावहरति"शत०ब्रा० ६,८,१,१२, ।"तिरश्चाऽवोक्षणं स्मृतम्" छन्दोग० ।

आ+समन्तात् दैवद् वा सेचने "आ नोगमूतिमुक्षतं हतेन" ऋ०७,६२,५ व्यवहितत्वेति उपसर्गस्य व्यवधानम् ।

उद्+ऊर्द्ध्वदेशात् सेचने । "किं हतीयमेतां दिशमुदोक्षीः"? शत०ब्रा० ११,५,२,४। [ब्रा०२,७,४,६' ।

उप+सामीप्येन सेचने । "अधस्तादुपोक्षत्यापोदेवीः" शत० निस्+ निर्शेषेण सेचने । "यत्स्रुव्येणानीय निरौक्षिषम्" शत०ब्रा०११,५,२,७ ।

परि+वेष्टनाकारेण समन्तात् सेचने "प्रसव्यमुदकैरात्मानं पर्य्युक्षते" आश्व०६,१२, "प्रसव्यं वामावर्त्तेन वेष्टयित्वेत्यर्थः ना०हृ०।"आहवनीयं पर्य्युक्षोदधारां नित्यवत्या गार्हपत्यात्"कात्या०४,१२,१६, "पर्य्युक्ष हस्तसम्प्लुतेनोदकेन समन्तात् सिञ्चा"कर्कः।"पर्य्युक्षितं वनिदसि"कात्या० ४,१४,२०।

प्र+उक्षानहस्तेन सेचने"उक्षानेनैव हस्तेन प्रोक्षणं परिकी-

क्तितम् ऋन्दो० उक्तेस्तथार्थता "अधिधानं प्रोक्षितास्याम्" कात्या० ६,१०,४, । "तं यत्र बर्हिषि प्रौक्षन् पुरुषं जातमगतः" ऋ०१०,६०,७, "प्रोक्षिताः स्थ अग्नये त्वा जुष्टं प्रोक्षामि। अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि" यजु० १,१२, "क्रयोऽस्याखरेष्ठो अग्नये त्वा जुष्टं प्रोक्षामि। वेदिरसि बर्हिषे त्वा जुष्टां प्रोक्षामि। बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि" यजु०२,१, "रक्षोहणो वो बलगहनः प्रोक्षामि वैष्णवान्" यजु०५,२५, "संस्कारः पुंस एवैषः प्रोक्षणाभ्युक्षणादिभिः" कुसुमा० "द्रव्यस्य पुरुषसंस्कार इति नैयायिकाः। मीमांसकमते द्रव्यसंस्कारः इति भेदः अभ्युक्षणशब्दे विस्तरः। "प्रोक्षितं भक्षयेन्नासम्" मनुः। सम्+प्र+ सम्यक् प्रोक्षणे। "प्राणानायम्य संप्रोक्षेत्" वैखानसैस्तेन तु "या०स्मृतिः।

वि+विशेषेण सेचने "ज्यो वि रोरुवज्जठरे विश्वसुकृते" ऋ०१०,६२,५। "व्यवहितास्चेति" पा०उपसर्गव्यवधानम्। "क्षेत्रमिव्रेव हास तां व्यौक्षदोषं धयेति" शत० ब्रा० २,२,४,५ ।

अभि+वि+ आभिमुख्येन विशेषेण सेचने। "तत्तस्मादु तथैव संस्कृत्याम् यथाग्निं नाभिव्यृक्षेत्" शत०ब्रा० १,२,१,१०

सम्+सम्यक् सेचने। "समुक्षितं सुतं सोमम्" ऋ० ३, ६०,५ । "इदं ते अन्नं युज्यं समुक्षितम्" ऋ० ८,४,१२

उक्ष वि०उक्ष–अच् ।१सेक्तरि "सुप्रतिष्ठा मनोहरुद्भाव नः" बजु०७,८४,कर्मणि घञ्। २सिक्ते "उक्षान् प्रवक्ष्यः" भट्टिः

उक्षण न० उक्ष–ल्युट् । दृढ़त्वेन संयोजनव्यापारे "वक्षिष्ठमन्नोक्षणजात् प्रभावात्" रघुः । [नाक्षत्रे दृषे।

उक्षतर पु० अत्य उक्षा दृढ़त्वे तरप्। अप्राप्तवाह-

उक्षन् पु०उक्ष–कनिन् । १वृषे, २ऋषभौषधौ च । "विदलितमहाकूलासङ्काशं विषाणविघट्टनैः" माघः । "उक्षेव यूथा-परियन्नरायोत्" ऋ० ६,७१,६ । "उक्षा मिमाति प्रति यन्ति धेनवः" ऋ०६,६६,४। "परदृघनादृदीधितिमानिवोक्षणः" कुमा० "नवराहं न चोक्षाणं न लूनान् विविधांस्तथा" भा०व० १३१। "उक्षाणं पक्वा सक्थ ओदनेन तत्तात् जपेतात् प्रति ते नयेद्वा" भा० व० १९६ । "गोलं चोक्षाणं मेध्यमभ्याहभेत" भा० आश्व०११अ०। २सेचनकर्त्तरि । सेचके त्रि०। "उक्षा सस्रुष्टी अरुषः सुपर्णः" ऋ० ५,४७,२, उक्षा मिमर्त्ति भुवनानि वाजयुः" ऋ० ६,८२,२ । आत्मन उक्षाणं दृषमिच्छति उक्षायति वेदे तु न नलोपः । उक्षायति । "वयं हि वां हवामहे उक्षायन्तो व्यश्ववत्" ऋ०,६,६२ । तत. कर्त्तरि उ उक्षायु आत्मनोऽपेक्षौ "व्यश्वस्तावसुविदमुक्षायुरग्राणादृषिः" ऋ० ८,२३,१८। जातदृढभक्षङ्गाः परस्य अच् समा०। जातोक्षः दृढोक्षः महोक्षः "महोक्षं वा महजो वा श्रोत्रियाय प्रकल्पयेत्" स्मृतिः "विलोक्य दृढोक्षमधिक्षितं त्वया" कुमा०। उक्षणोऽपत्यम् अण् टिलोपः । औक्षण तदपत्ये तस्येदमित्यणि अनपत्ये तु नलोपः न टिलोपः । औक्ष स्त्रि०कौ० उक्षणां समूहः वुञ्। औक्षक दृषसंघे न० । कुरूपूर्ब्बंशे ४राजभेदे च । तस्य गोत्रापत्ये स्त्रियां न दृङ्गिः । उक्षायतृदृगोत्रापत्ये पुंस्त्री० । तदन्तत्वात् फक् उक्षायायनः "अज्यमुक्षायायने रजतं हरयाणे" ऋ०८,५,२,३२ । "उक्षनामा कश्चित् कुरोः पूर्व्वजः तस्य गोत्रापत्ये उक्षन् शब्दात् गर्गादित्वात् यञ्। संज्ञापूर्व्वकविधिरनित्य इति न वृद्धिः अयञ्च छान्दसः लोकेऽस्य न प्रयोगः" भा०।

उक्षवश्र त्रि० उक्षा वशा वशास्थानीयो यस्य । वन्ध्याऽलाभे वशात्वेन कल्पितरूपके ऋत्विजभानभेदे । तत्र वशारूपादिकमभिधाय दृषस्य तत्प्रतिनिधित्वम्" शत०ब्रा० ४,५,१,६, उक्तं यथा "मैत्रावरुणो वशा भवति यत्रवै देवाः रेतः सिक्तं प्राजनयंस्तदग्निमारुत" मित्युपक्रम्य पश्वादीनात्मत्वेनाभिधाय "अथ यदा न कथन रसः पर्य्यश्यित त एवा मैत्रावरुणो वशा अजनयत तस्मादेषा न प्रजायते रसाद्धि रेतसः पयश्चरुद् यदनतः श्यमभवत् तस्मादन्नं यच्चास्नुवन्ति तस्माद्वा एषात्म न प्रजायते मैत्रावरुणो वशाऽवक्लृप्ततमा भवति यदि वशां न निन्देदयुक्षय एव स्यात्"।२दृषायत्ते त्रि०। "उक्षवेहदपि वेहत्स्थानीयकल्पितदृषे यजमाने" शत०ब्रा०उद्विधिरुक्तः।

उक्षित त्रि० उक्ष–क्त । सिक्ते उक्षधातौ उदा० ।

उख गतौ भ्वादि० पर०सक० सेट् । ओखति औखीत् उखोख जखतुः ओखिता उख्यात् ओखिष्यति औखिष्यत् उखा ।

उख्य गतौ दृदित् भ्वादि०पर०सक०सेट् । उङ्खति औङ्खीत् । उङ्खाम्—बभूव आस चकार । उङ्खिता उङ्खात् उङ्खिष्यति औङ्खिष्यत् ।

उखर्वल पु० उख–वलच् दृङागमः किच्च । भूरिपत्रे दृषभेदे रा०नि० "बलदो रुचिकारी च पत्रूणां सर्व्वदाहितः"। अस्य गुणः राजनि० उक्तः ।

उखल पु०उख–कलच् । भूरिपत्रे दृषभेदे उखर्वलेराजनि०।

उखा स्त्री उख–क । १पाकपात्रे पिठरादौ । (हाँड़ि)।

"यन्नीक्षणं मांसपच्या उखाया उत पात्राणि यूषण आशेचनानि" ऋ० १,१६२,१३। ऋचमेतामाश्रित्यैव "मांसपच्या उखायाः" इति पा० भाष्यकृतोदाहृतम्। वह्नियेष्टकासाधने २चूल्लीरूपे पदार्थे ततत्करणप्रकारः कात्या० श्रौ० १६,१,१, स्रुवादौ उक्तः तच्च दृष्टकाशब्दे ६६१पृष्ठे दर्शितम्। "उखास्रुत्" सि० कौ० यत० ब्रा० तु स्थालीपरोडाशशब्दस्य निरुक्तिरन्यथोक्ता यथा। "अथैनमुखयाऽऽस्रं बिभर्त्ति इमे वै लोका उखा इमे या एतं लोका यत्समङ्क्ते एभिरेतं लोकं देवा अग्निभरेभिरैनमेतल्लोकैर्बिभर्त्त्येवा यदुखा नाम एतद्वै देवता वैतेन कर्मणैतयाऽतेमां लोकानुदखनन् यदुखनंस्तस्मादुखा उत्खा वैतामुखेत्याचक्षते परोक्षं, परोक्षकामा हि देवाः" ६,७,१,२२, २३। अस्य "न क्रोडादिबहुच" पा० क्रोडादिगणपाठात् स्त्रक्त्वाचिताऽपि तेन हृदुखेत्यत्र न ङीष्। उखायां संस्कृतं यत्। उख्य तत्र संस्कृते त्रि०। भवार्थे दिगा० यत्। उख्य उखाभवे त्रि०। तस्य वर्ष्मादि० कर्म्मधारयसमासे आद्योदाहृता।

उख्य त्रि० उखायां संस्कृतं यत्। उखासंस्कृते मांसादौ "सूक्ष्ममुख्यस्य क्षोमवान्" भट्टिः उखायां भवः दिगा० यत्। उखाभवे त्रि०। "उख्यान् स्रुक्षेषु बिभ्रतः" अथ० ४, १४,२। उख्यानग्नीन्। "अथ यद्येष उख्योऽग्निरनुनक्षेत्" शत० ब्रा० ६,६,४,१०। "प्रागग्नेरुत्तोख्यक्षोत्तरतः खनिद्वाधानम्" "अधूख्यभस्मावधानं क्रव्यादोवा" आश्वा० १६,६,१०,१५,२२। "संचिदां स्रुतोख्यं निरवपति खनितनिति" १७,१,१६। स्त्रियां टाप् ततः कर्त्रादि० जातौ ढक्। औख्येवः उख्याजाते त्रि०।

उगण त्रि० उद्गूर्णं उद्यायुधः गणो यस्य पृषो०। उद्यायुधगणोपेते "याः सेना अभीत्वरीराधिभिर्गणशा उत" यजु० ११, ७७, "उगणाभ्यस्तृंहतीभ्यश्च घोषमोषमः" यजु० १६,१४।

उग्र पु०उच-रक् नलोपादेशः। १महादेवे, वायुमूर्त्तिधारिणि शिवे त्रिलिङ्गात् अढाद्यां मूर्द्धाभिषिक्ते २संकीर्णवर्णे (आगुरी) उग्रपुत्रत्वात् ३योगाङ्गनष्टके, ४क्रोधदेवे, क्रूरवंशजे "उग्रः पूर्णमासजा" इति ज्योतिषोक्ते ५नक्षत्रपञ्चके च ६वह्निनामनि क्लीबे न०। ७उत्कटे त्रि०। ८वचायां, ९बलवति, १०मन्त्रादौ, ११उपजातेः स्त्रियां च स्त्री टाप्। तत्र "शिवश्चक्रोधजानजिनिद्रि" वैद्या "ब्रह्मणोदुग्रोऽसीति तद्यदेव तच्छान्ताकरोत् यावुग्रहूपमभवद्यावुर्वा उग्रस्तस्माद्यदा वह्नयद्दात्युग्रोवातोत्याहुः. सोऽग्रवोत् ज्यायान् वा अतोऽस्मि" शत० ब्रा० ६,१,३,१३। उक्तस्त्युत्पत्तिः १२याथौ पु०। उग्ररूपत्वादेवास्याष्टमूर्त्तिपूजने उग्राय वायुमूर्त्तये नम इति तिथितत्त्वे उक्तम्। भूतस्य विप्रकन्यायां जात उग्र इति स्मृतः" उशनसोक्ते १२चाण्डालरूपवर्णसंकरे च क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान्। क्षत्रभूद्रवपुर्जन्तुरुग्रनामा ततोऽभवदिति मनूक्तादयं भिन्नः" "क्षत्रात्यपुर्कसानान्तु बिलौकोबधबन्धनमिति" मनुः करणेन समा चास्य हस्तिभार्यायनिर्म्मिता" स्मृतिः अस्योग्रस्य। १३उत्कृष्टे त्रि०। "उग्रं गर्म महि श्रवः" यजु० २६,१६। १५असुरभेदे पु० "विप्रचित्तिः शिविः शङ्कुः" इत्युपक्रम्यासुरगणनायां "वेगवान् केतुमानुग्रः शोषव्यशोमहासुरः" हरिवं० २६२अ०। तत्र वचायाम् "वत्सास्रुग्रियङ्गुप्रायश्चाङ्गयरसाङ्गैः" "उग्रा कुष्ठम्" तीक्ष्णगन्धा विड्वङ्गं श्रेष्ठं नित्यं चावपोड्रे करङ्गम्"। "विड्वङ्गभल्लातकचित्रकोग्राकटुत्रिकाम्लोदसुराद्यजाद्य" इति च सुश्रु० १६तीक्ष्णवीर्य्ये त्रि०। १७कालिकावरणभेदे स्त्री। "विप्रचित्ता तथोग्रोग्रप्रभा दीप्ता घनत्विषः" कालीकवचम्। १८उग्रतारायोगिनीभेदे च। "महाकाल्यग्र रुद्राणी उग्रा भीमा तथैव च" कालिकापु०। १९दीर्घे च उग्रनासिकः। २०सर्व्वकार्य्येषु उद्यते "उग्राश्चोद्यतयोग्रवाहवः इति" ऋ०८,२०,१२। उग्राशः उद्यूर्ण्या सर्वकार्य्येषु उद्यताः" भा० उद्य-समवाये इति धातोर्निष्पन्नतया क्रोधतीक्ष्णरसादिना विशेषसम्बन्धात् एवं च सर्वेषाम् उग्रत्वम्। उग्रप्रभोग्रदंष्ट्रादियोगिनीभेदेऽपि उत्कटाद्यर्थता ज्ञेयम्" भा०।

उग्रक त्रि० उग्र+संज्ञायाम् कन्। नागभेदे। नागनामाख्याने "आर्य्यकश्चोग्रकश्चैव नागः कनकपोतकः" भा० आ० ३५ अ०। २शूरे च "उग्रपुत्रशब्दे उदा०।

उग्रकर्म्मन् त्रि० उग्रं कर्म्मास्य। १हिंस्रे पक्ष्यादौ २क्रौर्यहिंसके ३क्रूरादौ च। [इक्षुभेदे राजनि०।

उग्रकाण्ड पु० उग्रः काण्डोऽस्य। (करेला) कारविल्ले

उग्रगन्ध पु० उग्रः गन्धः पुष्पादावस्य। १चम्पके, २कटफले ३अर्जकवृक्षे ४लशुने च। ५हिङ्गुनि न०। ६उत्कटगन्धयुक्ते त्रि०। ७यवान्यां ८वचायाम्, ९अजमोदायाञ्च स्त्री टाप्। राजनिघण्टुभेदिनी।

उग्रचण्डा स्त्री० उग्रा चण्डा कोपना कर्म्म०। १देवीभेदे। तद्यथा विश्वसारतन्त्रे कालिका० पु० ५६,६० अ० उक्तः "उग्रचण्डा च या मूर्त्तिरष्टादशभुजाऽभवत्। सा नवम्यां

पुरा कृष्णपक्षे कन्यां गते रवौ। प्रादुर्भूता महाभागा योगिनीकोटिभिः सह"। अनयैव मूर्त्त्या दनुजयज्ञो विनाशितः। यथा "आषाढस्य तु पूर्णायां सत्वं द्वादश वार्षिकम्। दनुः कर्त्तुं समारेभे हताः सर्व्वे दिवौकसः। ततोऽस्मिन् न हतस्तेन दनुजेन दुरात्मना। कपालीति सती चापि तज्जायेति च नो हता। ततो रोषसमायुक्ता प्राणांस्तत्याज सा सती। त्यक्तदेहा सती चापि चण्डमूर्त्तिस्तदाऽभवत्। ततः प्रहृत्ते सत्वे तु तस्मिन् द्वादशवार्षिके। नवम्यां कृष्णपक्षे तु कन्यायां चण्डमूर्त्तिकम्। योगनिद्रा महामाया योगिनीकोटिभिः सह। सतीरूपं परित्यज्य यज्ञभङ्गमथाकरोत्। यज्ञेश्वरस्य गर्णैः सर्व्वैः सहिता यज्ञरेण च। स्वयं बभञ्ज सा देवी महासत्वं महाबलः"। "अनुचण्डा प्रचण्डा च चामुण्डोग्रा चण्डनायिका" इत्युक्ते दुर्गाभेरणभेदे च।

उग्रता स्त्री अस्य भावः कर्म्म वा तल्। उग्रस्य १भावे २कर्म्मणि च ३अत्यन्तक्रोधे व्यभिचारिगुणभेदे। तल्लक्षणं सा० द०। "शौर्य्यप्रभावादिभवं भवेदुग्रत्वमुग्रता। तत्र खेदगिरःकम्पतर्জ्जनादयः"। त्व। उग्रस्य तद्भावकर्म्मणोः न०। ष्यञ्। औग्र्य तत्रैव न०।

उग्रतारा स्त्री उग्रादपि भयात् तारयति भक्तान् तॄ-णिच्-अच् ऋत०। तारारूपायां देव्याम्। "तारकत्वात् सदा तारा महामोक्षप्रदायिनी। उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्त्तितेति तन्त्रोक्तास्य वा निरुक्तिः। तदाविर्भावः कालिकापु० ८१अ० "विनिःसृतायां देव्यास्तु मातङ्ग्याः कायतस्तदा। भिन्नाञ्जनचिभा कृष्णा साऽभूद्घोरी त्वणादपि। कालिकाख्याऽभवत् सापि द्वितीया चण्डरूपतास्या। तासुग्रतारारूपयो वदन्नीह मनीषिणः। उग्रादपि भयाद्रक्षेत् यस्मात् भक्तान् सदाम्बिका। अतैवैनजटाख्याति यस्मात्सा जटैकिका। स्मृतं चिन्तं चास्याः सद्यः वेतालभैरवौ"। यथा ध्यात्वा महादेवीं भक्तः प्राप्नोत्यभीप्सितम्। चतुर्भुजां कृष्णवर्णां सदृशमालाविभूषिताम्। खड्गं दक्षिणपार्श्वाभ्यां बिभ्रतीन्दुवरं त्वधः। कर्त्रीञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रतीम्। स्वं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम्। सदृशमालाधरां शीर्षे शीवायामपि सर्व्वदा। वससा नागहारञ्च बिभ्रतीं रक्तलोचनाम्। कृष्णवस्त्रधरां कट्यां व्याघ्रचालिनसन्निभाम्। वामपादं शवहृदि संस्थाप्य दक्षिणं पदम्। विन्यस्य सिंहपृष्ठे तु वैरिहृदां शवं स्वयम्। घोरदंष्ट्राकरालास्यां पिबन्तीं रुधिरं मुहुः। चतुर्दिक्षु शिवाभिश्च वेष्टितां घोररावयुक्ताभिरेव च। चिन्तयेदुग्रतारां करतं भक्तिमद्भिः सुरेश्वरैः" अन्यत्र च "रूपं शृणु नरश्रेष्ठ! येन ध्येया सदा शिवा। कृष्णा लम्बोदरी दीर्घा विरला रक्तदन्तिका। चतुर्भुजा कृपाकर्त्री तु दक्षे कर्त्रीकपर्परौ। खड्गं चेन्दीवरं वामे शीर्षे त्वेकजटां पुनः। वामपादं शवस्योर्ध्वे निधायोत्याप्य दक्षिणम्। शवस्य हृदये न्यस्य साट्टहासं प्रकर्त्तती। नागहारशिरोमालाभूषिता कामदा परा"। अस्यारूपविधये बहुविप्रतिपत्तिरस्तीत्यतस्तन्निरूपणं तावत् क्रियते

राधवभट्टे पञ्चकल्पतरौ मन्दारदृष्टप्रकरणे श्रीशङ्कराचार्य्य कृततदीयमूर्त्तिप्रकाशकस्तोत्रं यथा। "ज्वलत्पावकज्वालयोज्ज्वालभास्वच्चितामध्यसंस्थां सुपुष्टां सुखस्थाम्। शवं वामपादेन कण्ठे निपीड्य स्थितां दक्षिणेनाङ्घ्रिणोरु निपीड्य। दृषद्वीमलम्बोदरीं मेघवर्णां ससृक्कद्वयीनग्नना भोगरम्याम्। जवाराग्रागप्रहृत्तत्रिनेत्रां लसज्जिह्वया दंष्ट्रया भीषणास्याम्। लसद्दोर्द्विचर्म्माष्टसर्पैर्नितम्बे जटाजूटमध्यस्थितेन्दोरराकोम्। शिरोदेशभास्वत्सृपिपद्मभासर्पां जटाजूटमध्यस्थिताक्षोभ्यमूर्त्तिम्। शिवः कोपबन्धात् शिरश्छिन्नसद्योगलच्छोणितां मानवीं सुखमास्याम्। दधानां च पद्मोद्यदाख्यानसंख्याम् अतश्छिन्नसद्वालिसंनामिताक्षीम्। समाच्छिन्नमांसोत्करामूर्द्धदेशे स्फरत्पाणिना धारयन्तीं महासीम्। करे वाम ईषत्स्फुरद्रक्तनालं ससत्कीलयन्तेरुहं धारयन्तीम्। करे सव्य उच्चैरधस्ताद्दधानां शितां कर्त्तृकां वामपार्श्वे कपालम्। जगद्वर्त्तिसंसारसंजातजाड्यं स्रुतः कर्त्तृकाधारया खण्डयन्तीम्। विचित्रास्थिमालं करालं कपालं ललाटे च पद्मान्वितं धारयन्तीम्"। इति तत्रैव मन्त्रप्रदीपे "महाष्टसिद्धिप्रकटाद्रिभूषणाम् इत्यनेन अष्टनागानामष्टसिद्धिरूपत्वोक्त्या तेषां भूषणविशेषरूपतया यथा स्थितिस्तथा तत्रैव दर्शित यथा। "जटास्वनन्तः श्रवसोश्च तक्षको महादिपद्मौ हृदि हारभूषणम्। तथैव कर्कोटकतोपवीतकम् स मेखलाद्यामथ देवि! वासुकिः। स यज्ञसूत्रः किल कण्ठोद्गतः करेषु, पद्मः पदयुक्तसमाश्रयः। भुजेषु नागः कुक्षिकोऽङ्गदे मतः" इति "तेषां वर्णा अपि क्रमशोदर्शिताः सितोऽथ रक्तोधवलश्च मेचकः तथैव पीतोऽथसितश्च पाटल :। भुजङ्गमानामिह वर्णजातयो भवन्ति सर्वेषु नरेषुजन्तिताः"। तत्स्वायं निर्गलितार्थः। अभ्रंलिहपिशङ्गजटा लवाकृष्णसङ्घातसदृशनागकृतकुण्डला शुभ्रशेषनागकृतहारा कूर्म्मा-

ललज्जामनागलतयज्ञोपवीता नीलवस्त्रा लम्बोदरी खर्वा चतुर्भुजा तत्र उपरि दक्षिणे सरक्तमांसखण्डमण्डितमुष्टिनिविष्टजटाजूटसंलग्नोपखड्गविभूषितकरा उपरि वामे रक्तनागकिङ्किणिकखरनीलोत्पलकरा अधस्तात् दक्षिणे बीजभूषितकर्त्तृकाखड्गकरा अधस्तात् वामे त्रिजगज्जाड्यखण्डककपालमण्डितकरा भुजचतुष्टये धूम्राभनागलतकेयूरा कनकाभनागलतकङ्कणा गवाक्षढा प्रत्यालीढस्थानाधिष्ठिता निर्भरयन्त्रणाप्राप्तेव गवाक्षहृदयस्थितदक्षिणचरणा गवोरुहृदयस्थितप्रासारितवामपादा कुन्दाभनागलतकटीसूत्रा पाटलनागलतनुपुरालङ्कृता सद्यश्छिन्नगलद्रुधिरान्योन्यकेयूरघटितपादपद्मप्रलम्बित-पञ्चाशन्मनुष्यमुण्डमाला ज्वलदनलचिताभध्यस्थिता हीपिचर्म्मालङ्कृतकृष्णवस्त्रा योगिदक्षिणालङ्कारभूषिता नीलाब्जोभ्यरूपनागभूषिता पञ्चसंख्यान्वितकपालमालाभूषितललाटा ललज्जिह्वा दृष्ट्वा इत्येवं रूपा। अत्र प्रमाणवाक्ययोः गवाक्षहृदयस्थत्वे वामदक्षिणपादयोर्विकल्पस्तत्यतोमूर्त्तिद्वयमित्यन्ये। प्रत्यालीढपदादक्षिणगवाक्षहृदित्युक्तेः आलीढं दक्षिणं पादं प्रत्यालीढं तु वामकमित्युक्तेः आलीढशब्दे दर्शितवाक्याच्च प्रत्यालीढशब्दस्य आलीढविपर्य्ययरूपत्वात् वामचरणस्यैव गवाक्षहृदयस्थितिरिति तु न्याय्यम्।

उग्रधन्वन् पु० उग्रं धनुर्यस्य ब०स० अनङ् समा०। १शिवे २यदुभिरसह्यधनुष्के त्रि०। "स इन्द्रुष्टुभं स निभिर्भिर्वो संसृष्टा सयुध इन्द्रोगणेन। संसृष्टजित् सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता" ऋ०१०,१०३,२।

उग्रनासिक त्रि० उग्रा दीर्घा नासिका यस्य। दीर्घनासिके।

उग्रपुत्र पु० उग्रस्य शूरस्य पुत्रः। १शूरवंशजाते। "काश्यो वा वैदेहोवोग्रपुत्र उज्जां धनुरधिज्यं कृत्वा" शत०ब्रा०१४, ६,८। "उग्रपुत्रः शूरान्वयः" भा०। "उग्रस्य शिवस्य पुत्रः। २कार्त्तिकेये। उग्र ऊर्ण्वः पुत्रो यस्मिन्। ३ताटके गभीरजङ्घायां "आँ उग्रपुत्रे जिघांसतः" ऋ० ८, ६७,११। उग्रपुत्रे उग्राः ऊर्ण्वाः पुत्रा यस्मिन् तत्तस्मिन्हृदके" भा०।

उग्रप्रश्य त्रि० उग्रं पश्यति उग्र+दृश-खश् मुम्। पापापश्यतया क्रूरदृष्टियुक्ते उपजल्पौ व्याघ्रादौ "उग्रप्रश्याकुलेऽरण्ये" भट्टिः।

उग्रभद्य पु० असुरभेदे उग्रशब्दे उदा०।

उग्रशेखरा स्त्री उग्रस्य शेखरं वासस्थानत्वेनास्त्यस्याः अर्श० अच्। गङ्गायाम् यन्दरत्न० सा हि तस्य शिरसि स्थिता

उग्रश्रवस् पु० उग्रम् उत्कृष्टं श्रुतिधरं श्रवः कर्णौ यस्य। १रोमहर्षणे सौतौ। "लोमहर्षण उग्रश्रवाः सौतिः पौराणिको नैमिषारण्ये" भा० १अ०। २धृतराष्ट्रपुत्रभेदे च। तत्पुत्रनामाख्याने "उग्रश्रवा उग्रसेनः क्षेममूर्त्तिस्तथैव च" भा० आ० ६७अ० "उग्रश्रवा उग्रसेनः सेनाजीदुग्रराजयः" भा०आ० ११७अ०।

उग्रसेन पु० उग्रा सेना यस्य। १धृतराष्ट्रपुत्रभेदे, उग्रश्रवश्शब्दे उदा०। २कुरुवंश्ये नृपभेदे। "कुरोस्तु पुत्राश्चत्वारः सुधन्वा सुधनुस्तथा। परिक्षिच्च महाबाहुः" इत्युपक्रम्य "परिक्षितस्तु दायादो धार्मिको जनमेजयः। जनमेजयस्य दायादास्त्रय एव महारथाः। श्रुतसेनोग्रसेनौ च भीमसेनश्च नामतः" हरि० ३२ अ०। अयञ्च जनमेजयः अभिमन्युपौत्रात् भिन्नएव। अतएव "द्वाहत्यौ तव वंशेऽस्मिन् द्वावेव च परिक्षितौ। भीमसेनाग्रयोराजन्! द्वौ चापि जनमेजयौ" इति जनमेजयं प्रतितत्रोक्तम्। यदुवंश्ये २नृपभेदे च। "अन्धकञ्च महाबाहुं दृष्णिञ्च यदुनन्दनम्" इत्युपक्रम्य "अन्धकात् काश्यदुहिता चतुरोऽजभनात्मजान्। कुकुरं भजमानञ्च शमं कम्बलबर्हिषम्। कुकुरस्य सुतोधृष्णुर्धृष्णोश्च तनयस्तथा। कपोतरोमा तस्याथ तैत्तिरिस्तनयोऽभवत्। जज्ञे पुनर्वसुस्तस्मादभिजिच्च पुनर्वसोः। तथा वै पुत्रमिथुनं बभूवाभिजितः किल। आहुकश्चाहुकी चैव ख्यातौ ख्यातिमतां वरौ" इत्याहुकोत्पत्तिमभिधाय "आहुकस्य तु काश्यायां द्वौ पुत्रौ संबभूवतुः। देवकश्चोग्रसेनश्च देवगर्भसमावुभौ। नवोग्रसेनस्य सुताः तेषां कंसस्तु पूर्व्वजः" हरि० ३८अ०।

उग्रसेनज पु० जायते इति जन-ड ६त०। कंसे तस्योग्रसेन क्षेत्रेऽसुरजातत्वेन ततपुत्रत्वम्। कंसशब्दे विवृतिः

उग्रादेव पु० उग्रेणादीव्यति आ+दिव-अच् ३त०। राजर्षिभेदे "अग्निना तुर्वशं यदुं परावत उग्रादेवं हवामहे" ऋ० १,३६,१८, उग्रादेवनामकञ्च राजर्षिम्" भा०।

उग्रायुध पु०उग्राणि आयुधान्यस्य। १शौरये राजभेदे तस्योत्पत्तिर्भीमूहननकथादि हरिवं० २० अ०। "अजमीढस्य दायादः" इत्युपक्रम्य तद्वंशपरम्परा उक्त्वा "तस्य वै सप्ततेः पुत्राः क्रतो नाम महाबलः" इति क्रतोत्पत्तिमुक्त्वा। "कार्त्तिरुग्रायुधः सोऽथ वीरः शौरेव नन्दनः। बभूव येन विक्रम्य पृषतस्य पितामहः। नीपोनाम महातेजाः पञ्चालाधिपतिर्नृपः। उग्रायुधस्य दायादः क्षेम्यो नाम महायशाः। क्षेम्यात् सुवीरो नृपतिः

सुवीरास्तुग्रपक्षयः । ग्रपक्षयाद्भुरथ इत्येते पौरवाः स्मृताः । सवाग्युग्रायुधस्तात दुर्बुद्धिरभवत्तदा । प्रहृष्टचक्रो बलवान्क्षीणान्करणो महान् । स दर्पपूर्णोऽहंत्वाजौ नोपानत्यांस्त पार्थिवान् । पितर्युपरते मह्यं त्रायया मास किल्बिषम् । महामात्यैः परिवृतं शयानं धरणीतले । उग्रायुधस्य राजेन्द्र ! दूतोऽभ्येत्य वचोऽब्रवीत् । अद्य त्वं जननीं भीरु ! गन्धकालीं यशस्विनीम् । स्त्रीरत्नं मम भार्यार्थे प्रयच्छ करुनन्दन ! । एवं राज्यञ्च ते स्फीतं धनानि च न संशयः । प्रदास्यामि यथाकाम मह्यं वै रत्नभाग् भुवि । मम प्रज्वलितं चक्रं निश्चय्येदं सुदुर्ज्जयम् । यत्नवो विद्रवन्त्याजौ दर्शनादेव भारत राष्ट्रस्येच्छसि चेत् स्वस्ति प्राणानां वा कुलस्य वै । ग्रात्मनश्च मम तिष्ठस्व न हि ते शान्तिरन्यथा । अधःप्रस्तारशयने शयानस्तेन नोदितः । दूतोऽब्रवीत्तितमेतद्वै वाक्यमग्नि शिखोपमम् । ततोऽहं तस्य दुर्बुद्धेर्विनाय मतमच्युत ! । ग्रात्मापयं वै संग्रामे सेनाध्यक्षांश्च सर्वशः । विचित्रवीर्यं बालञ्च मदुपाश्रयमेव च । दृष्ट्वा क्रोधपरीतात्मा युद्धायैव मनोदधे । निश्चयीकृतस्तदाऽहं तैः सचिवैर्मन्त्रकोविदैः । क्षत्रियैर्भिर्हवैकल्यैश्च हृद्विद्वेषार्थदर्शिभिः । स्निग्धैश्च शास्त्रविद्भिश्च संयुगस्य निवर्त्तने कारणं श्रावितश्चापि युक्तरूपं तदाऽनघ ” । “प्रहृत्तस्तस्य तच्चक्रमधर्म निरतस्य वै । परदाराभिलाषेण सदाऽत्तात निवर्त्तितः। नत्वहं तस्य जाने तच्छिन्नं चक्रसत्तमम् । हृतं स्वकर्म्मणा तस्तु पूर्व्वं सङ्गिश्च निन्दितम् । ऋतयोधः शरो चापी रथो निषङ्गस्य वै पुरात् । ऋतस्त्रस्त्रयनो विप्रैः प्रायोधयमहं रिपुम् । ततः संसर्गमागम्य बलेनास्त्रबलेन च । ग्रात्मसन्नत्तवद्युद्धं देवासुरमिवाऽभवत् । स मयास्त्रप्रतापेन निर्हृग्धोरथमूर्द्धनि । पपातामिसुखः शूरस्त्यक्त्वा प्राणा नरिन्दम ! । एतच्छिन्नरे तात ! काम्पिल्यात् पृथतोऽभ्यगात् । हते नीपेश्वरे चैव हते चोग्रायुधे नृपे । अहिच्छत्रं स्वकं राज्यं पित्र्यं प्राप महाद्युतिः । द्रुपदस्य पिता राजन्नमैवानुमते तदा” भा०हरिव०२०ग्र० २क्षत्रराष्ट्रपुत्रभेदे । तन्नामकीर्त्तने भा०ग्रा० ६७ग्र०। “उग्रायुधोभीमधरः कनकायुर्दृढायुधः” ।

उग्रेशय पु०उग्राण्याक्षसत्कटकरूपाणां प्रमथानामीशयः । प्रमथाधिपे शिवे । “शङ्करं भवमीशानं पिनाकभृदुमापतिम्” भा० व०प० १०६ ग्र०।

उङ्कुण पु०उमिति ज्ञात्वा कण्डयते क्विप्यते कुण कर्म्मणि घञर्थे क। (उकुच) उत्कुणे । शब्दमाला ।

उच समवाये दि० पर०सक०सेट् । उच्यति इरित् ग्रौचत्,-ग्रौचीत् उवोच ग्रोचिता उच्यात् ग्रोचिष्यति ग्रौचिष्यत् उचितः उच्यः । “उवोचिथ हि मघवन् देष्णम्” ऋ० ७,३७,१ । उचतिः सेवाकर्म्मेति माधवः “ग्रभि वा एव एतानुच्यति” तैत्ति० । “नियो गवं गौरुवेयीमुवोच” ऋ० ७,४,२ । “तत्र सेदिर्न्युच्यत सर्वाश्च यातुधान्यः” ग्रथ० २,१४,२ ।

उचथ न० उच्यते स्तूयतेऽनेन वच-कथन् । स्तोत्रे “यद्वां मानास उचथमवोचन्” ऋ० १,१८२,८ । उचथम् स्तोत्रम्” भा० । “एवात इन्द्रोचथमश्रेम” ऋ० २,१६, ७ । “कुविन्नो न्यग्निरुचथस्य” ऋ० १,१४२,६ ।

उचथ्य त्रि०उचथं स्तोत्रमर्हति यत् । १स्तुत्ये २राजभेदे पु० “उचथ्ये वसुधि यः स्वराट्” ऋ० ८,४६,२८ । “उचथ्ये स्तुत्ये । यद्वा उचथ्यो वसुश्च राजानौ” भा० ।

उचित त्रि० उच-क्त वच-कितच् वा । १शस्ते २परिचिते, ३युक्ते । “ग्रमात्यैरिव नीवारभागधेयोचितैर्मृगैः”दिनानि दीनोद्धरणोचितस्य” “प्रविश्य भीमासुरगोचितोचितः” महोक्षपक्षव्यपरोपणोचितम्” रघुः “सार्द्धं कथञ्चिदुचितैः पिचुमर्द्दपत्रैः” । “स्त्रीशूद्रसुहृदुचितं दधच्छिखो”माघः । “वंशोचितत्वादभिमानवत्सा” किरा० ।

उच्च त्रि० उत्क्षिप्य वाहू चीयते, उपर्य्युपरिनिविष्टरचयवर्चीयतेऽसौ वा उद्+चि-क । १उन्नते । “पुरस्तादुच्चम्” काल्या०७,१,२१। “य तदुच्चकुचौ भवन् प्रभाकर-चक्रभिमातनोति यत्”नैषधम् । अत्यात् उत्कर्षे तरप् तमप् । “किंचित् गुरुतर भूमेः किं खिदुच्चतरञ्च खात्” भा०व० ३१ग्र० । उच्चतमम्” काल्या० ७,१, १५ । देवयजनवर्णने “परितः समीपदेशवर्त्तिप्रदेशेभ्यो यद तिशयेनोच्चम्” कर्क० । राशिचक्रमध्ये गृहविशेषाणां २राशिभेदे, यथा “मेषो वृषो मृगः कन्या कर्कमीनतुलाधराः । भास्करादेर्भवन्त्युच्चाः राशयः क्रमशस्त्विमे” ज्योति०त० । स्वोच्चमुक्तं तत्रैव “रविर्मेषे वृषे चन्द्रो गुरुः कर्के बुधः स्त्रियाम् । धनिर्युके (तुलायाम्) झषे (मकरे)भौमः शुक्रो मीने च तुङ्गिनः”। तेषां राशिभागभेदे परमोच्चतामाह तत्रैव “त्रिंशद्भागे दिशो (१०) रामाः (३)ऋतविंशतिभिस्तिथिः १५। तथेषुः (५) सप्तविंशश्च विंशतिरुच्चसंज्ञकाः” । तथा च रवेर्मेषस्य दशमे भागे,

प्रदक्षोत्तरा चन्द्रस्य दर्शे १अंशे. कुजस्य मकर २८भागे बुधस्य कन्यायाः १५भागे, गुरोः कर्के ५भागे, भृगोः मीन २७भागे शनेस्तुला २०भागे तथात्वम् । "खोच्चात् सप्तमं नीचं प्राग्वद्भागैर्विभिर्हीनेत् । उच्चात्तः कृच्छ्रसंज्ञः स्यात् नीचात्तु सुनीचकः" परिपूर्णबलः कृच्छे सुनीचे दुर्बलोपरः । कृच्छ्रसुनीचयोरल्पांशकारात् फलं दिशेत्" ज्योति०त० राहुबलोक्तु "उच्चं नवमुच्चं षष्ठं त्रिको यं बलाब्दकं शुक्रशनी च मित्रे । सूर्यः शशाङ्को-परशीतरश्मी राहुर्विनीतिकः परांशः । सिंहस्त्रि-कोणं धनुरुच्चसंज्ञं मीनोऽष्टकं शुक्रशनी विमूढौ । सूर्यार-चन्द्राः सुहृदः सखानौ जीवेन्दुजौ बद्धधिषिनः परांशाः" ज्यो०त०। राशिपरत्वेऽस्य पुंस्त्वं अपरत्वे स्त्रीत्वमिति भेदः । भागहारात् षड्बलसाधनं तदानयनप्रकारः सी०ता० कृष्णदैवज्ञादीष्वुच्चान्यभिप्राय "तत् सप्तमं नीचमनेन हीनो यः कोऽधिकस्तेन रवेरादृग्विशेष्यः । चक्रात्, तद्-यादुबलो बलं स्यात्" २तथा च ताजके खोच्चे २०कला बलं तेन षड्भिः राशिभक्तेषु पूर्ववत्तदा दृष्टांशैः मिमिति १८०,२०,१, लैंराशिकेन प्रत्येकार्थं १/६ बलमा-प्तति । ज्ञातके तु खोच्चे ६०कला बलं तेन प्रत्यंशं १/३ बलम् । सी०ताजके "स्वियतुच्चभे स्वियतिरुच्चभे खे" इति उक्तम् । ज्ञातके तु श्रीपतिः ६० कला बलमाह यथा "नीचोच्चयोरधिको यदि भवेत् षड्भात् तदाप्त-च्युतच्छात् लब्धकलाः फलाद्यत्कृभि (१०८०) र्भक्तो-बलं तुङ्गजम् । यादोनं तु बलं २/३,त्रिकोणष्टकेन्द्रगे खर्क्षे १/२ दृक्कं च लवो २/८ बलांशा क्षधिमित्रगेऽथ चरणो १/४ मित्रे बलर्क्षेऽष्टमः। १/८ । शत्रुभे भवति षोडशांशक ११६ खाधिपत्रुभवने दृष्टांशकः १/३२ । अतः त्रिकोणादौ पादोनादिबलसाधनात् खोच्चे पूर्णबल-मिति प्रतीयते तेन ६०कलात्मकं बलम् ।

८खाभिमानिनि षड्वर्गा गतिभेदकारके भगणस्थे २जीव-भेदे तेनैवार्कभक्तात् गुणाद्यास्तद्गतिसाधनम् ।

स च द्विविधः श्रीपतेः सम्मतेश्च तत्रश्रीपतेः कारणन्तु सू०शि० रङ्गनाथाभ्यां दर्शितं यथा "अहस्तद्रूपाः कालस्य मूर्तयो भगणाश्रिताः । श्रीपत-म्मतेश्चैतावता षड्वर्गा गतिहेतवः;"सू०शि०१। "श्रीपती-यं सम्मतेश्चैतावता पूर्वोक्तपदार्था जीवविशेषाः सूर्या-दिषड्वर्गा गतिकारणभूताः सन्ति । नन्वेवं कालेनैव षड्-बलं भवतीति कालो गतिहेतुर्नैत दुक्तम आह कालश्चेति । पूर्वप्रतिपादितकालस्य स्वरूपाणि तथा चैषां कालमूर्तित्वेन षड्गतिहेतुत्वं नास्त्यतीति भाव: । ननु कालस्य पञ्चादिमूर्तित्वादेषां तदात्मक-त्वाभावात् कथं कालमूर्तित्वमित्यत आह भगणाश्रिता इति । भगोदयकालिनक्षत्रानुक्रमतषड्गोदयकालिनक्ष-प्रदेशाश्रिता इत्यर्थः । तथा च षड्राश्यादिभोगानां कालवर्षेणैवोत्पन्नत्वात् तदात्मकानां कालमूर्तित्वमिति भाव । ननु ते दृश्यन्ते कुतो नेत्यत आह अदृश्यरूपा इति । वायवीयशरीरा अव्यक्तरूपत्वादप्रत्यक्षा इति भावः । एवं च षड्राश्यादिसम्भवात् अदृक्क्रियोत्पन्नेति तात्पर्यम् १। अथानयोरुच्चपातयोर्मध्य उच्चयोर्गतिहेतुत्वं प्रतिपादयति" इ०ना०। "तद्वारक्षिभिर्बलार्कैः सप्तेतरपाक्षिभिः। प्राक् पश्चादप्रक्षणे यथास्वं खदिक्तुलम्" २ सू०शि०। "तेषामुच्चसंज्ञकजीवानां वायुरूपा ये रज्जवो रज्जवस्ता-भिर्बद्धा विस्रासकपङ्क्तौ रज्जुसंज्ञकजीवैः सप्तसंख्यकै-रुच्चबलेन कृत्वाकृष्टाद्बलवचनं कृताभ्यामित्यर्थः । खदिक्तुलं स्वाभिमुखं यथास्यं भवति तथा प्राक् पश्चात् पूर्वपश्चिमलोकाभ्यामित्यर्थः । अपक्षणेन आकर्षणे । अयमभिप्रायः भचक्रगोलस्थक्रान्ति-वृत्तानुक्रतषड्राश्यगोलान्तर्गतक्रान्तिवृत्ते बलाढ्ये स्वस्व-प्रदेशे षड्गोदयसाधितक्रान्ति । तत्र विस्रस्यालोलकला-कारकत्वं प्रवहवायुमूर्तिरूपवायुरूपं खतोगतिस्थाने कल्पमानं षड्विध्यास्थि पूर्वापरे प्रोतसूत्रवलीवदूर्ध्व-क्रान्त्यन्तर्गतमस्ति । अथ षड्विधबलसाधनात् भगणा गच्छन्ति वामदक्षस्थितसूत्रे खोच्चस्थानात्, पूर्वक्षेत्रेण षड्-स्थानात् पश्चिमक्षेत्रेण दक्षवृत्तसूत्रावयवबलेन स्वस्था-नाद् पश्चात् स्वाभिमुखमाकृष्यते निरन्तरसूत्रदैर्घ्यतः स्व-स्थाना यावत् बद्धभास्तत्र तत्रोच्चरं तत्तार्क्षणाकर्षणस-म्भवात् पूर्वक्षेत्रे गच्छन्ति, तथापरक्षस्थितसूत्रे-खोच्चस्थानात् पूर्वक्षेत्रे स्वाभिमुखमाकृष्यते स्वस्थाना निरन्तरं यावद्भरावावसम्भवयोरिति"इ०ना०।"अनात एवैक-रूपा पूर्वाधिकारावगता गतिं लब्धा कुतः प्रत्यक्षविलक्षणां गतिं प्राप्ता अक्षा इत्यत आह । "प्रवहाख्यो भवेत् वायु-खोच्चाभिमुखमीरयेत् । पूर्वापरायताक्षाक्षे गतिं यान्ति ग्र-हास्विधाम्"सू०शि०१। "प्रवहाख्यः प्रवहसंज्ञको भवहायुः पश्चिमाभिमुखं भगं यात्, तुकारादुक्तानि खोच्चाभिमुखं खस्य प्रवहभमण्डलेनोच्चं भावप्रधाननिर्देशादुक्तता यस्यां दिशि तत् खोच्चं पूर्वदिक् पूर्वभाग एव अक्षाणां प्रवहभ्रमे-

ओजगमनदर्शनात् तत्सम्मुखं पूर्वदिगीति तात्पर्यार्थः । ईरयेत् पश्चिमाभिमुखभ्रमणसिद्धप्राग्युक्तपक्षावलम्बरूपेण चालयतीत्यर्थः । यतः कारणात् ते ग्रहाः पूर्वं पश्चिमदिशोराक्षसा प्रथमिकां प्रथमावगतैकरूपभिन्नप्रकारावगतां प्रतिक्षणविलक्षणां गतिं गमनक्रियां यान्ति प्राप्नुवन्ति । अवलम्बनाकर्षणाभ्यां प्रतिदिनं ग्रहाणां गतेरन्यादृश्यं तदनुसारेण गृहचारज्ञानं युक्तमिति गृहाणां स्वपक्रियोत्पत्तेरिति भावः । यद्वा तत्र वायुरज्जुभिः कर्षं गृहाणामाकर्षणं सम्भवति तदज्ञानां विरलतया घनीभूतत्वाभावेनाकर्षणायोग्यत्वादित्यत आह । प्रवाहाख्य इति । उज्जदेवताकृतहृदयस्थितकलाकारस्थलं वायुः प्रवहवायुसम्बन्धात् प्रवहसञ्ज्ञो न पश्चिमाभिमुखभ्रमत्प्रवहाख्यकलातो गृहान् स्वोज्जाभिमुखं स्वोज्जदेवतास्थानसम्मुखमीरयेत् प्रेरयति चालयति । तुकारादुज्जस्थानात् पूर्वस्थिते गृहे वायुः पश्चिमगत्या गृहं चालयति पश्चिमस्थे वायुः पूर्वगत्या गृहं चालयतीत्यर्थः । तथा च कलाकारस्थलं तदा तदा तथा तथा भ्रमतीति दैवतैरारोप्यत इत्युपचारादुच्यत इति भावः । अत एव गृहाणां स्वपक्रियोत्पत्तेरित्याह । पूर्वापरापक्रमा इति उज्जदेवतैः पूर्वापरदिग्यो गमना गृहाः पृथग्विधां भक्ष्यमाणिरिक्तप्रकारां गतिं भ्रमणक्रियां यान्ति । अतो न केवलं भक्ष्यक्रियया निर्वाहः" इ० ना० । अथ प्राक् प्रवाटपलक्ष्यन्न श्लोकं विवृणोति । "गृहात् प्राग्भगणार्द्धस्थः प्राङ्मुखं कर्षति गृहम् । उज्जसञ्ज्ञोऽपरार्द्धस्थस्तद्वत् पश्चान्मुखं भवम्" ४ श्लो० शि० । "गृहस्थानात् पूर्वभागस्थराशिषट्कस्थित उज्जसञ्ज्ञो जीवो गृहबिम्बं पूर्वदिगभिमुखं स्वाभिमुखं कर्षत्याकर्षति । अपरार्द्धस्थो गृहस्थानात् पश्चिमभागस्थराशिषट्कस्थितउज्जसञ्ज्ञो जीव इत्यर्थः । गृहबिम्बं पश्चान्मुखं पश्चिमदिगभिमुखं स्वाभिमुखं तद्वदाकर्षतीत्यर्थः" ४ इ० ना० । "अत्र पूर्वोक्तश्लोके फलितमाह । "स्वोज्जापक्रमा भगणैः प्राङ्मुखं यान्ति गृहकाः । तत्र तेषु भ्रमन्तिस्मृत्यर्थं भक्षाकृष्टेषु तु" श्लो० शि० ५ । "स्वोज्जौदाकर्षिता गृहाः पूर्वाभिमुखं भगणैः राशिभिर्भगोलस्थक्रान्तिवृत्तानुसारिभागैरोजभागकान्तिवृत्ते द्वादशराश्यन्तिके यद्राशिविभागैरित्यर्थः । यद् यत्संख्याभिर्भगणैश्चलन्ति तत् तत्षड्राश्यन्तिकं भागादिकं फलरूपं तेषु [illegible] तत्र [illegible] स्वोज्जस्य । अक्षाक्ष तेषु पश्चिमाकर्षितगृहपूर्वापरतराश्यादिभोगेषु तुकाराद्यत्स्वोज्जाभिमं फलरूपं पश्चिमतो गच्छन्ति तद्विलयर्थः । कर्णं क्षीणमिति एतत् पूर्वैः कथितम्" इ० ना० ५ । सि० शि० "ग्रहा भचक्रं कमलोद्भवेन गृहैः सहैतद्भगणादिसंख्यैः । यस्मद्भ्रमे विश्वसृजा नियुक्तं तदन्तरे च तथा भ्रमन्ते । ततोऽपराशाभिमुखं भपञ्जरे सखेचरे शीघ्रतरे भ्रमन्तः । तदल्पगत्यैन्द्रदिशं नभस्थराश्यन्ति नीचोच्चतरात्मवर्त्मसु" । "यद्येतद्भचक्रं गृहैः सह भ्रमद्भ्रम्यते तद्विश्वसृजा जगद्रत्नादर्शेन कमलोद्भवेन ब्रह्मणा सृष्ट्यादौ ग्रहा यत. यस्मद्भ्रमेऽनवरतभ्रमणे नियुक्तम् । एतदुक्तं भवति । काल्यस्निग्ध्यादीन्यन्यानि विशिष्टानि ज्योतींषि तेषां समूहरूपं गृहाश्च सूर्यादयस्तैः सह एकम् । तानि भानि प्राक्पंक्त्या सप्तनाडिवेशितानि । गृहास्तु भगणादायस्विनीमुखे निवेशिताक्ष उपर्युपरिसंस्थया । तत्रादौ तावद्धरन्द्रः तदुपरि बुधः, ततः शुक्रः, ततो रविः वक्राङ्गौरः, ततो गुरुः ततः शनिः । सर्वेषामुपरि क्रूरे भचक्रम् । एषां कक्षाप्रमाणानि मध्याध्याये प्रतिपादयिष्यन्ते । अहो यद्यूर्ध्वाधस्था गृहास्तेषूपरि दूरतो भगणस्तत् कथं भगणादिसंख्यैर्गृहैरिष्यते ? सत्यम् । यत्र भूमध्ये स्वस्वौकसगं ब्रह्मा द्वितीयमगं भचक्रेऽश्विनीमुखे किल निबद्धम् । तस्मिन् स्वस्वे प्रोता मणय इव चन्द्राद्यो गृहा मृष्ट्यादौ ब्रह्मणा निवेशिताः । भमण्डलं हादृशधा विभज्यैवं भूमध्यात् स्वस्वानि प्रतिभागं नीत्वा किल बद्धानि तैः स्वस्वैः सह गृहकक्षायां ये संपातास्तेषु कक्षासु राश्यन्ताः । सप्तप्रकारा राशय इति संज्ञिप्रमिद्धोक्तम् । कक्षाध्याये गोले च किञ्चिद्विस्तार्य वक्ष्यामः । एवंविधं भचक्रं ब्रह्मा ब्रह्मणा गगने निवेशितम् । यत्र निवेशितं तत्र प्रवहो नाम वायुः । स च नित्यं प्रत्यग्गतिः । तेन समाहृतं भचक्रं सखेचरं पश्चिमाभिमुखभ्रमे प्रवृत्तम् । यत् तस्य प्रत्यग्भ्रमणं तच्छीघ्रतरम् । यत एकेनाक्षा भ्रमण्डलस्य परिवर्त्तः । एवं तस्मिन् भपञ्जरे सखेचरे शीघ्रतरे भ्रमत्यपि खेचरा इन्द्रादिकं चरन्ति पूर्वाभिमुखं व्रजन्ति नीचोच्चतरात्मवर्त्मसु । अनन्तरकथितेषु स्वस्वमार्गेषु तेषां प्राग्भ्रमणम् । तत् तदल्पगत्या, प्रत्यग्गतेर्बलत्वात् प्राग्गत्या व्रजन्तो नोपलक्ष्यन्त इति भावः । तथा तस्य भपञ्जरस्य यो दक्षिणोत्तरावर्त्तौ तत्र ये तारे ते ध्रुवत्वे

नियुक्तो" प्रभा० । तथा च पारस्करः । "व्यत्यासात् प्राप्तानि खेटराणामूर्ध्वोपसर्गाद्याख्यातीभ्यापराणि । गोत्राभिधैः पञ्च यातानि तानि तेषामसङ्कान्त्यहेतूनि तानि । प्रत्यग्गतिः प्रवहवायुवशेन तेषां नीचोच्चवृत्तजनितोर्ध्वमधश्च सा स्यात् । याम्योत्तरा स्वपथदक्षिणगोलाभ्यां घोढा गतिर्निगदितैवमिह गृह्यताम्" उच्चता च मन्दफलव्यापगुणभेदः । सा च लघ्यर्थपरिधिसिद्धेषिनावयवानां मन्दफले भवति तस्य गुणफलत्वात् ततः भावेऽर्थे यञ् । औच्चम उच्चतायां न० । त्व । उच्चत्व तलार्थे न० तल् । उच्चता कर्म० । "उच्चस्थे गुरुपञ्चके हरगुरौ सेन्दौ नवम्यां तिथौ लग्ने कर्कटके पुनर्वसुदिने जेयं ते एतत्पि । निर्दग्धुं निखिलाः पलायसमिधः मध्यादयोध्यारणेराविर्भूतमभूदपूर्वविभवं यत्किञ्चिदेकं रहः" तिथित० पु० । "सूर्यस्यतः पञ्चमिकुजसंस्थितैरस्यर्थगैः सूचितभाग्यसम्पदम्" रघुः । "खोच्चस्थः खटहेऽपि वा खसुहृदां वर्गेऽपि वा" ज्योति० त० ।

उच्चकैस् अव्य० उच्च+ईसुच् । १उच्चतायां २तद्विशिष्टे च । "जनितमुदस्याद्युच्चकैरुच्चितोरः" "स्थितोदयाद्रेरभिसायमुच्चकैः" माघः । उत्कर्षार्थे तरबादि उच्च+इष्ठन् यलोपश्च ।

उच्चक्षुस् त्रि० उत्क्षिप्तमुत्पाटितं वा चक्षुर्यस्य प्रा० ब० । १ऊर्ध्वोत्क्षिप्तनेत्रे २उत्पाटितनेत्रे च । ततः च्वि कृञ्यूक्रोति उच्चक्षूभवति अच्चक्षूस्यात् ।

उच्चटा स्त्री उद्-चट-अच् । १कपुनभेदे, २ गुञ्जायां ३चूड़ालतायाम्, ४भूम्यामलक्याम् ५नागरङ्गलतायाञ्च ।

उच्चण्ड त्रि० उद्-चडि-अच् । १अत्यन्तोग्रे २अतिकोपने, ३लवणयुक्ते च मेदिनिधिते । ४प्रकारभेदे ई० ५ तद्वति त्रि० ।

उच्चतक न० कर्म० । कारिकेले वृक्षे । २उच्चभूभागे च ।

उच्चताल न० उच्चः तालः वृक्षतालः यत्र । १पानगोष्ठ्यां मत्ततया तत्र उच्चैर्वृक्षतालदानात्तथात्वम् । २उच्चतालवृक्षे च

उच्चदेव पु० उच्चः श्रेष्ठो देवः । वासुदेवे विष्णौ । तस्य "सर्वदेवमयो हरिः" इत्युक्तेः सर्वदेवमयत्वात् सत्वप्रधानत्वाच्च तत्तुल्यत्वम् अतएव भागवते "श्रेयांसि तत्र खलु सत्वतनोर्हरेर्या स्युरिति" सत्वप्रधानत्वात् तस्य श्रेयःसाधनत्वमुक्तम् ।

उच्चन्द्र पु० उच्चिष्टः खल्वाटयशिष्टचन्द्रो यत्र प्रादि० ब० शिष्टशब्दलोपः । दालिमेदे शब्दरत्ना० ।

उच्चय पु० उत्पाटनं चयः चि-अच् । १पुष्पादेरुत्तोलने । "पुष्पोच्चयं नाटयति" भट्ट० । "करिष्यामि परेलोकोच्चयं तव" रघुः । "प्रत्युपकृतमेकोच्चयेन कथा लाभे कृतप्रत्यवमर्शानाम्" काद० २,२,२० । उत्तरेषु पुष्पोच्चयैकैकवचनविधात् १६, ८,२१ । २नारीकुचयुगलयोः "नीविः स्त्रादुच्चयोऽध्ययम्" मार्क० पु० उत्तरकृष्णयः । ३दृष्टसमुदाये च अमरः । "वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" सा० द० । स निष्पाकृतिं रामोऽधी मनःशिलोच्चये" रामा० । "एकतः सरितः सर्वाः गङ्गाद्याः सरितोच्चयाः" भा० व० ८८ अ० । "भैकदेशोच्चयैर्तो सङ्कविमर्शापणाम्" भा० अनु० २० अ० । शिलोच्चयोऽपि क्षितिपालसख्यैः" रघुः । कर्मणि अच् । ४हस्ताभ्यामुद्धृत्यावस्थिते नीवारे" हारा० ।

उच्चल न० । उद्+चल-अच् । १मनसि क्षेमे च० तस्य "अर्थमग्रं महाबाहो ! मनोदुर्निग्रहं चलम्" गीतोक्तेश्चञ्चलस्वभावत्वात्तथात्वम् । २चञ्चलस्वभावयुक्ते त्रि० ।

उच्चलित त्रि० उद्+चल-क्त । गमनोद्यते प्रस्तुते गन्तुमुद्यते

उच्चललाटा स्त्री उच्चं ललाटं यस्याः । उन्नतललाटोपलक्षणायां स्त्रियाम् । स्त्रीणां च लक्षणम् कन्याशब्दे वक्ष्यते

उच्चनीच त्रि० उच्चं च नीचं च मयू० समा० । उन्नतावनतप्रदेशादौ "कूटारमुच्चनीचानां कर्मभिर्हेतिनां गतिम्" । भा० आश्व० १६ अ० ।

उच्चा अव्य० उद्+चि-क्विप् । १उच्चैःशब्दार्थे । "अमोघ शक्तिर्हता च उच्चा" ऋ० १,२४,८ । "उच्चा उच्चैःप्रदेशे" भा० । "उच्चा दिवि दक्षिणावन्तोऽअस्थुः" ऋ० १०,१०७,२ । "कृष्णाकं शुम्नमधिपत्र लदिमुच्चा" २,२,१० । "उच्चा उच्चैः" भा० । "अवतमुच्चाचक्रं परिजग्मानम्" ८,७२, १० । "उच्चाचक्रमुपरिस्थितचक्रम्" भा० उच्चाबुधं नीचाद्युच्चाचक्रुः पातवे वाः" ऋ० १,११६,२२ । २उन्नतायां स्त्रियां स्त्री "उच्चारणत्पक्षिगणाश्चटोत्तम्" माघः ।

उच्चाटन न० उद्-चट-णिच्-ल्युट् । १उत्पाटने स्वस्थानात् २विच्छेदने "उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्त्तितम्" इति या० ति० उक्ते २षट्कर्मान्तर्गतेऽभिचारभेदे च । उच्चाट्य तेजसेन करणे ल्युट् । तन्त्रोक्ते ३तत्साधनकर्मणि । तन्त्रसारे वगलाया अभिचारप्रयोगे कृष्णलक्षणमुपक्रम्य "वश्ये तु चतुरस्रं चाकर्षणे तु त्रिकोणकम् । तथोच्चाटने प्रोक्तं षट्कोणे मारणं स्मृतम् । वश्ये मेषासनं श्रेष्ठं कर्षणं व्याघ्रचर्मणि । शान्तौ मृगासनं प्रोक्तं स्तम्भो गोचर्मणि स्मृतः । उद्वासनं तथोच्चाटे विद्वेषे तुरगा

सनम्' भारते भक्षिणीचर्म मोक्षं च गजाजनम्। मधुमांसतिलाद्दीनि वह्न्यग्नित्वराणि च। आकर्षणे तथा क्षीरं सर्पितं मधुरान्वितम्। निम्बपत्रञ्च तैलाक्तं विद्वेषकरणं परम्। कृत्तिकां कृत्तिका च लवणेन च संयुता। सन्ध्यावेलासु देवेशि! प्रशस्तञ्चैव गर्हितं मतिम्। वाजिनाथस्य सारेण रुधिरेण च होमयेत्। मारणे तु रिपोर्देवि! श्मशानाग्नौ कुनेत्रिणि। शुक्लाद्यां कालपक्षाद्यां षट्कर्मभेन संयुतम्। राजानं तिमधुरोमेतान् सर्वरोगप्रशान्तये" तन्त्रसा०उच्चाटनप्रकारा बहवोदर्शिताऽत्र सामान्यप्रकारस्तत्राभिधीयते निजमते "शान्तिवश्यस्तम्भनानि विद्वेषोच्चाटने ततः। मारणं तानि संलिखेत् षट् कर्माणि मनीषिणः। रतिर्ब्राह्मी रमा ज्येष्ठा दुर्गा काली यथाक्रमात्। षट्कर्मदेवताः प्रोक्ताः तत्तादेताः प्रपूजयेत्। वैश्यचन्द्रेन्दुनिर्ऋतिवायुनीलां दिशोमताः। सूर्योदयं समारभ्य घटिकाद्वयं क्रमात्। क्षतवः सूर्यसन्ध्याद्या अष्टौ रात्रे दिनेदिने। वसन्तग्रीष्मवर्षाख्यशरद्धेमन्तशैशिराः। शान्तं शान्तिविधौ प्रोक्तं वश्ये वक्ष्यिदशाद्भुतः। शान्तने पृथिवी प्रोक्ता विद्वेषे व्योम कीर्त्तितम्। उच्चाटने क्षतौ वायुर्भीमाग्निर्मारणे मतः। तत्तद्भूतोदये सम्यक् तत्तत्कर्मसु संयुतम्। तत्तत् कर्म प्रकर्त्तव्यं मन्त्रिणा निश्चितात्मना। शीतांशुसूर्यभौमेज्यशुक्रवायुकुबिम्बजाम्। वर्ष्मायुर्मन्त्रयोगानि षट्कर्मसु यथाक्रमम्। गुणनञ्च विदर्भेच संपुटो रोधनं तथा। क्षोभः प्रबल एतेषु विज्ञातः षट्सु कर्मसु। मन्त्रान्ते विहृतान् ज्ञात्वा साध्यवर्णान् यथाविधि। गुणं तत् विजानीयात् प्रणवं शान्तिकर्मणि। मन्त्रार्द्धं हृदयमध्यं साध्यनामाक्षरं लिखेत्। विदर्भ एव विज्ञेयो मन्त्रिभिर्मन्त्रकर्मणि। आदावन्ते च मन्त्रः स्यात्साध्यो ऽसौ सम्पुटः स्मृतः। एष स्यात् सम्पुटे मन्त्रे मन्त्रं वेदविदो विदुः। नाम्न आद्यन्तमध्येषु मन्त्रः स्याद्रोधनं स्मृतम्। विद्वेषणविधाने तु प्रशस्तमिदमुत्तमम्। मन्त्रस्यान्ते भवेन्नाम योगः प्रोच्चाटने मतः। अन्ते नाम्नो भवेन्मन्त्रः प्रणवोमारणे मतः"। भूतानामुदयः या०चि०। "दण्डाकारा गतिर्भूमेः पुटयोरुभयोरधः। तोयस्य, भावयेद्भूतं गतिस्तिर्यक्तनभस्वतः। गतिर्ज्योतिषो भवेदाध्वे भूतानामुदयः स्मृतः। धरणेहृदये कुर्यात् सन्धानं वह्निमात्मनि। यानिकं लौकिकं कर्म तोयस्य, तेजसस्तथा। मारणादीनि मरुतोविषशोच्चाटनादिकम्। यत्तु विद्वेषं यक्षमुदये च विक्षायसः"। भूतमन्त्रसाधनं तत्रैवावसेयम्। षट्कर्मकरणनिमित्तमाह कूर्म्यापुराणे "उपस्थिते महाघोरे राष्ट्रपीडात्मके नृणाम्। भूमिविप्लवकृत्पाते भूतभीतिविपत्तिषु च। ततःपरतरं कर्म यत्नो यान्तिकरं प्रिये! मारणं मोहनं स्तम्भं विद्वेषणमथापि वा। वशीकरणकर्माणि तथोच्चाटनकर्म च। सर्वत्र साधयेद्धान्ता ततोनान्यत् सुधावहम्। विशेषतः शत्रुसंचरोगोपद्रवनाशनम्। यत्नं कर्मनाशे च तथा शत्रुपराजये। कालस्य विजये चैव ततःपरतरा क्रिया"। षष्ठ्। उच्चाटोऽस्त्री पु०। "उड्डासनं तथोच्चाटे" तन्त्रसारः।

उच्चार पु०उद्+चर-णिच्-घञ्। १उच्चारणे। "तस्यकार्य्योऽनुच्चारः" स्मृ०बो०"मन्त्रोच्चारपरायणः"पु०। उच्चार्य्यते अभ्यासवायुना उत्क्षिप्यते कर्म्मणि घञ्। २पुरीषे। विण्मूत्रोत्सर्गविधानप्रकारः आ० त० नागवलभट्टेनोक्तो यथा विष्णुधर्मोत्तरे "निद्रां जह्यादुत्कटो राम! निशमेवाद्यतोदये। वेगोत्सर्गं ततः कृत्वा दन्तधावनपूर्वकम्। अस्तोदयकालमाह स्कन्दपुराणम् "उदयात् प्राक् घटत्रयन्तु नाडिका अस्तोदयः। तत्र स्नानं प्रशस्तं स्यात्सद्भि पुण्यतमं स्मृतम्"। नाडिका दण्डः। "नाडीघट्या दिनामिश्रम्"इत्यमरः। विष्णुधर्म्मोत्तरे 'वेगरोधं न कुर्वीत अन्यत्र क्रोधवेगतः'। "वेगरोधं न कुर्वीत अन्यत्रेति तु यां दिशं गन्तव्यत्वेनेति भावात्सातिरेकत्वात् साधुत्वम्। आयुर्वेदादेऽपि "न वेगिनोऽन्यविद्विः स्यात् नाजित्वा साध्यमात्मजम्"। अङ्गिराः "उत्थाय पश्चिमे रात्रौ स्मरेत आत्मनः शुभम्। अन्तर्धाय शिरः प्रावृत्य वाससा। वाचं नियम्य यत्नेन शौचोच्छ्वासवर्जितः। कुर्य्यान्नगरुरीषे तु शुचौ देशे समाहितः" विष्णुपुराणम् "ततः कृत्वा मलत्यागं कुर्य्यान्नैर्ऋत्यं नरेश्वर!। नैर्ऋत्यामिषविण्मूत्रतीक्ष्णाध्यधिकं भुवः" तिथितत्त्वादिचिरं तत्रैवैव किञ्चिदुदीरयेत्"। कल्पतरुः कालम्, नैर्ऋतं निर्ऋतिदेवताकापायुसम्बन्धात् पुरीषोत्सर्गम्, नैर्ऋत्यासत्यानदेयमारभ्य उत्थायेत्यनेनोपक्षिप्तैः। दक्षिणेपश्चतोन्य दक्षिणेपश्चोच्चदेशाद्दक्षिः। तद्देशपरिमाणमाह पितामहः "अध्वमेन तु चापेन प्रक्षिप्तेन यदन्तरम्; कृत्वानान्तु मनेवाद्धं कृत्वा विचक्षणः"। आपस्तम्बः "मूत्रपुरीषे कुर्य्यात् दक्षिणां दिशं दक्षिणापराञ्चेति"। दक्षिणापरा नैर्ऋती। मनुः "मूत्रोच्चारवत्तत्सर्गं दिवा कुर्य्यादुदङ्मुखः। दक्षिणाभिमुखो

रात्रौ सन्ध्ययोश्च यथा दिवा"। उद्धारः पुरीषम्। यत्तु यमवचनं "प्रत्यङ्मुखश्च पूर्वाह्णे अपराह्णे च प्राङ्मुखः। उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः" इति तत् उदङ्मुखेन सन्ध्याविकल्पार्थं सूर्य्याभिमुखनिरासार्थञ्च न तु नियमार्थं देवलवचनविरोधात्। तथा च "सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणामुखः। विण्मूत्रे आचरेच्चित्यं सन्ध्यायां परिवर्जयेत्" इति। प्रातःसायाह्नग्रहौ दिवारात्रिपरौ पूर्व्वोक्तमनुवचनैकवाक्यत्वात्। सन्ध्यायां परिवर्जयेदिति तु प्रौक्तिनेतरपरम्। यमः "कृत्वा यज्ञोपवीतन्तु पृष्ठतः कण्ठलम्बितम्। विण्मूत्रे च गृही कुर्य्यात् यद्वा कर्णे समाहितम्"। पृष्ठतः पृष्ठे कण्ठलम्बितं निवीतम्। अत्र लम्बितं निवीतम्। "संवीतं मानुषे क्लेशे" इति तैत्तिरीयश्रुतेः। मानुषे मनुष्यादिकर्त्तव्ये। पृष्ठलम्बितं निवीतम्" इति बौधायनवचनाच्च। तथा च कारवत् कृत्वा पृष्ठलम्बितम् स्कन्धे इत्यर्थः। अत्र व्यवस्थामाह शांखायनः। "यद्येकस्कन्धे यज्ञोपवीतं कर्णे कृत्वा अवगुण्ठितः" इति कर्णे दक्षिणकर्णे। "पवित्रं दक्षिणकर्णे कृत्वा विण्मूत्रमाचरेत्" इति श्रुतौ तथा दर्शनात्। अवगुण्ठितः कृतशिरोऽवगुण्ठनः। मनुः "कायाग्नावग्नौ वा रात्रावकृत्वा द्विजः। यथाकथञ्चित् कुर्य्यात् प्राणबाधाभयेषु च" भट्टभाष्ये। "प्रत्यादित्यं प्रतिजलं प्रति गान्धं प्रतिद्विजम्। मेढ्रलिङ्गे ये च पथिषु ते भवन्ति गतायुषः"। प्रतिः शांखश्च। मनुः "न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे। न फालकृष्टे न जले न चित्यां न च पर्व्वते। न जीर्णदेवायतने न वल्मीके कदाचन। न ससत्त्वेषु गर्त्तेषु न गच्छन्नापि संस्थितः। न नदीतीरमासाद्य न च पर्व्वतमस्तके। वायुग्निविप्रादिसमवर्णसूर्य्यञ्चैव च। न कदाचन कुर्व्वीत विण्मूत्रस्य विसर्जनम्"। ससत्त्वेषु प्राणिमत्तृणेषु संस्थितः उत्थितः पर्व्वतमस्तकादिभेदोधिकदोषाच्च। वशिष्ठः। "आचारनिर्द्धारविहारयोगाः श्रुतस्मृता धर्म्मविदा तु कार्य्याः। वाग्बुद्धिकायाग्र्याणि तपस्तथैव धनायुषी शुभतमे तु कार्य्ये"। निर्द्धारो मूत्रपुरीषोत्सर्गः विहारः स्त्रीसम्भोगः। योगः समाधिः। वाग्बुद्धिरग्र्यभाषापालापः। बुद्धिर्ग्राह्यनिश्चिन्तालापः। कायेतः "आचारन्तु दृढः कुर्य्यात् निर्द्धारञ्चैव सर्व्वदा। युग्माभ्यां सन्ध्ययोर्नेतः स्यात् प्रकाशे क्रीयते तथा"। विष्णुपुराणम् "शौचाचम्यर्कविष्वायूनां पूजनानाञ्च न सम्मुखे। कुर्य्यात् शौचमविण्मूत्रसस्यस्वर्गद्विजोत्तमः"। आपस्तम्बः "न च शौचानन्तरो मूत्रपुरीषे कुर्य्यादिति"। हरिभद्रः "करण्डकीलपालेषु कृत्वा मूत्रपुरीषके। मूत्रितस्थानु पानीय शौचं वान्द्रायणञ्चरेत्"। भरद्वाजः "अथ विलख्य विण्मूत्रं शोष्टकाष्ठलवणादिना। उदकेनाशु तत्तिष्ठेद्दृढं विष्टभ्य मेढ्रकम्" उदकेनाशु तत्तिष्ठेदादृत्य च्छिद्रवत्" आ० त०। "मूत्रोद्धारौ च कारयेत्"। "यस्योद्धारं विना मूत्रं सम्यग् वायुश्च गच्छति" स्मृ०। "दाने तपसि शौर्य्ये च यस्य न प्रथितं यशः। विद्यायामर्थलाभे च मानुषेष्वेष एव सः" स्मृतौ०। उद्धृत्य चारोगतिः। २ यष्टादीनां राशिनक्षत्रान्तरसञ्चारे। "कक्षाद्वयं यतेनाह्नैर्यामेषु चित्रशिखण्डिषु। "उद्धारे संक्रिकाकारः" सि० रा० त०।

उद्धारण न० उद्धानेन कण्ठाद्यभिघातेन कार्य्यते निष्पाद्यते उद्+चर-णिच्-ल्युट्। कण्ठताल्वाद्यभिघातेन शब्दजनके व्यापारे तत्प्रकारस्तु "आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। सोदीर्णमूर्ध्वमाहतो वक्त्रमापद्य मारुतः। वर्णान् जनयते तेषां विभागः पञ्चधा मतः" इति शिक्षोक्तादिग्रावसेयः। वर्णोत्पत्तिस्थानानि चाष्टौ। "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च" शिक्षाकटुक्तानि। विवृतिर्विवृतस्पृष्टा। यथा च कण्ठताल्वाद्यभिघातेनोद्धारणसम्भवस्तथा" ईश्वरगीतायां अनुगी० चित्रा० १०२६ पृष्ठे दर्शितम्। "उद्धारणोऽथ गिरां दशमः" भाग०। "वेदोद्धारणकार्य्यार्थमयुक्तं तत्त्वदा धृतम्" भा० व० २१४ अ०। "सजातीयोद्धारणानपेक्षोद्धारविषयत्वं वेदस्यापौरुषेयत्वम्" मीमांसकाः वेदान्तिनश्च प्रतिपेदिरे।

उद्धारित त्रि० उद्धार-तारका० इतच्। ज्ञातविशोत्सर्गे। उद्+चर-णिच्-कर्म्मणि क्त। यस्योद्धारणं कृतं ताडेन वर्णादौ "तत्र यस्मिन्वैवस्वतप्रमादात्तडतादिभिः। अन्यथोद्धारिताःशब्दा अपशब्दा इतीरिताः" भर्तृह०। उद्+अन्तर्भूतण्यर्थे चर-क्त। उद्धरितोऽप्युद्धार्थे "शङ्कुद्धरितः शब्दः शङ्कुदर्थं गमयतीति" तत्पार्थक्यं न्यायः।

उद्धार्य्य अव्य० उद्+चर-णिच्+ल्यप्। १कण्ठताल्वाभिघातेन उत्पाद्येत्यर्थे। कर्म्मणि यत्। २उद्धारणीये वर्णादौ त्रि०।

उद्धार्य्यमाण त्रि० उद्+चर-णिच्-कर्म्मणि यानच्। यस्योद्धारणं क्रियते तस्मिन् वर्णादौ "अक्षैश्चित् आर्य्यावोद्धार्य्यमाणो वर्णदृतसंज्ञः, मुग्धबो०।

उच्चावच त्रि० उदक् उत्कृष्टञ्च अवाक् अपकृष्टञ्च मयू०नि०। उत्कृष्टापकृष्टात्मके नानाभेदे "उच्चावचैरपि गतैः सहस्रसंख्याम्" माघः "भवत्यतेव महाव्रीहूणां उतेरोच्चावचं निगच्छति" शत०ब्रा० १४,५,१,१६। अथ खलूच्चावचा जनपदधर्मा ग्रामधर्माश्च तान् विवाहे प्रतीयात्" आश्व०गृ० १,७,१। "उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः"। "उच्चवचानि भूतानि सततं चेष्टयन्ति याः" मनुः

उच्चिङ्गट पु० लवणगुडमत्स्ये, २लोपनपुष्पे च मेदि०।

उच्चिटङ्ग पु० विषकीटभेदे (उच्चिङ्गुडे) सुश्रुते "जङ्गमस्य विषस्योल्लाव्यधिष्ठानानि षोढ़ा" इत्युपक्रम्य "दर्विकरिञ्जमण्डराजीवमत्स्योच्चिटङ्गसर्षपदृष्टिकालर्कविषाः" इत्युक्ता तस्य मूकतण्डविषत्वमप्युक्तम् "मूकतण्डयोच्चिटङ्गवरटोद्यतपट्टे मूकबलभिकाभृङ्गीभ्रमराः मूकतण्डविषाः" तेषामुत्पत्तिस्थानमपि तत्रोक्तम् "सर्पाणां मुकविष्मूत्रलयवपूत्रवक्त्रसम्भवाः। वायुग्राह्यु प्रकृतयः कीटास्तु विविधाः स्मृताः" इत्युपक्रम्य "उच्चिटङ्गोऽग्निभामा तु विच्छिटिङ्गोमयूरिका" इत्यादीन् श्लोकादश कीटानभिधाय "अष्टादशेति वाच्याः कीटाः पवनकोपवाः" सुश्रु०। [वल्लवाख्ये।

उच्छूङ्(ल्ल) पु० उच्छ्रता चूड़ा यस्य डस्य वा लत्वम्। ध्वजोर्ध्वस्थे

उच्चैःशिरस् त्रि० उच्चैरुन्नतं शिरोऽस्य। उन्नतमस्तके मनुष्ये "समलउच्चैःशिरसा सलोम" कथा०। वा रोः लत्वम्।

उच्चैःश्रवस् त्रि० उच्चैरुन्नतं श्रवोऽस्य। उन्नतकर्णे पुनर्जाते श्वेतवर्णे इन्द्रस्य वाहनभूते सप्तमुखे २अश्वभेदे पु०। अस्य चोत्पत्तिकथा यथा "तत उच्चैःश्रवसामश्वानां क्षयोऽभूच्छन्दसाम्" भाग० ७स्क० ७अ०। "दक्षोत्तोऽश्वः सप्तमुखत्वेन रूपं बलात् किलेति" भागवतोक्तेरस्य सप्तमुखत्वम्। "धन्वन्तरिस्तथा मद्यं शौर्देवी कौस्तुभोमणिः। यद्यद्वो विस्मयकरं सर्वस्यैः समन्ततः। उच्चैःश्रवा हयोरत्नः पीयूषं तदनन्तरमिति" हरिवं० २२० अ०। "उच्चैरुच्चैःश्रवसेन हयरत्नमहारि च" कथा०। "उच्चैःश्रवाजलनिधेरिव जातमात्रः" "न चित्रमुच्चैःश्रवसः प्रकृष्टम्" माघः। "उच्चैःश्रवसमश्वानाम्" गीतायां भगवद्विभूतित्वमस्य। "उच्चैःश्रवःसुतानश्वान् बलादयानयद्भवः" हरि०१४५अ०। "दिग्गजसुतान्नागान् हयांश्चोच्चैःश्रवोऽश्वयान्" हरि०१५६अ०। अस्य वा विसर्गलोपे उच्चैर्गुश्रवा अप्यत्र। अस्य पृषो० यदन्तत्वमपि। "उच्चैःश्रवसंज्ञं तत् प्रणिपत्य समर्पितम्" देवीभा०।

[illegible] ज्वलं द्योतते सु-असुन्। १अधिरे त्रि०।

उच्चैर्घुष्ट न० घुष-भावे क्त उच्चैर्घुष्टम्। (डेकरा) घर्षजमश्राव्यघोषणायाम्।

उच्चैर्घोष पु० घुष-घञ् उच्चैर्घोषः। सर्वजनश्रवणशब्दे "यदुच्चैर्घोषस्तनयित्नुरिवदृहति" शत०ब्रा०। ७अ०। २उच्चैरुच्चारिते क्रन्दनादौ ६त०। ३बहुमूर्त्तिभेदे। "उच्चैर्घोषा गायं क्रन्दयते" यजु०१६,१६।

उच्चैस् अव्य० उद्+चि-डैसि। १तुङ्गत्वे, २उन्नते १मकृति ४जन्तुदेशजाते "उच्चैरुदात्तः" पा०। "उच्चैरुच्चैरवास्तेन" क्षमा० "शिलोच्चयोऽपि क्षितिपालसञ्चैः" रघुः "चित्रकर्म च संस्कृतेषु रुच्चैः" किरा०। "अक्षता श्वेतया वादसञ्चैर्भूमिं सुविधिताम्" माघः। "उच्चैरधःपातिपयोमुचोऽपि" "जनोऽयमुच्चैः पदलङ्घनोत्सुकः" "उच्चैर्हिरण्मयं शृङ्गम्" क्षमा०। या वः काले भक्तिर्वल्लिलोकारक्षणविधाना" मेघ०। "उच्चैरस्तित्व मन्दतामरसताम्" चन्द्रालो० अस्य यज्ञस्य गुणयाचितया प्रकर्षे तरप् तमप् च ततः स्वार्थे प्रकर्षे आमु। उच्चैस्तराम् उच्चैस्तमाम्। ओजस्तातिघये "उच्चैस्तरां वक्ष्यति शैलराजः" कुमा०। द्रव्यप्रकर्षे तु नाम। उच्चैस्तर उच्चैस्तम आसुपतङ्गजादौ ति०। अग्निस्तोमैः कथने उच्चैस्+ञ-ज्ञाणमुलौ ख्यप् च। उच्चैःकारम् उच्चैःकृत्वा उच्चैःकृत्य अग्निष्टोमाधिकारे" वि०को०।

उच्छ्रय त्रि० उद्-श्रि क। क्षुद्रप्राये आच्छादे। "उच्छ्रयप्रच्छदपन्थे वेदस्याचारमूलत्वेत्यादि विधिवादे मणरा० यथा च वेदस्य छिन्नमूलग्रन्थतया उच्छिन्नत्वेऽपि अविच्छिन्नविशिष्टाचारादेव तदनुमानंतथा समर्थनाय शङ्करवि० शङ्कराभाष्ये वादिपूर्वपक्षं निरस्य व्यवस्थापितं यथा; "स्यादेतत् स्मृत्याचारयोर्वेदमूलत्वे तयोच्छेदादिविघातदर्शनेन तस्यापि तथा हि वेदसमानार्था महाजनपरिगृहीता च स्मृतिः, स्वार्थोपस्थित्यनन्तरं स्मृत्यर्थानुभावकवेदानुमानेऽपि प्रतीतिप्राबल्यात् साध्यप्रसिद्ध्यर्थंसपजीव्यत्वाच्च स्मृतेरेवापूर्वादिवाक्यार्थज्ञानमस्तु किं वेदेन, तदर्थस्य स्मृतितश्च सिद्धेः अपर्याप्तस्य शब्दैकवेद्यत्वेन स्मृतिमोत्पादकत्वेनानुवादकतापत्तेश्च सा च स्मृत्युत्पत्तिरादिरेव स्मृतिधारावश्यकी, अन्यथा मनुस्मृतेः पूर्वं तदापि वेदानुमानं न स्यात्। सर्वा च स्मृतिः स्मृतिजन्यशाक्यार्थप्रमाजन्यत्वेन महाजनपरिगृहीतत्वेन च प्रमाणमिति नास्त्यनवस्था। प्रत्युत्ता च स्मृतिः स्मृतिमूलं नानुसिता अनुमितवेदवत् तस्या अनुभावकत्वात्।

वेदार्थस्मृतिताप्रसिद्धिस्तु प्रसिद्धवेदमूलस्मृतिसाहचर्य्यभ्रमात् प्रत्यक्षवेदाबोधितलोभव्यायमूलस्मृतावपि तान्त्रिकाणां लिङ्गाभासजन्यवेदमूलकत्वभ्रमात् सम्भवन्मूलान्तराणां वेदमूलत्वं कल्पयति। अथ स्मृतिनिबन्धहेतुवेदमूलकत्वप्रसिद्धिरपि महाजनपरिग्रहीता एवञ्च सा वेदमूलत्वनिबन्धना अविगीतमहाजनपरिग्रहीतवेदमूलत्वप्रसिद्धित्वात् प्रत्यक्षवेदमूलस्मृतौ तत्प्रसिद्धिवत्। एवं वेदार्थस्मृतिताप्रसिद्धिरपि अन्यथा महाजनपरिग्रहानादरे वेदस्मृत्योरपि प्रामाण्यं न स्यादिति चेत् न यूपस्थ्यादिस्मृतेस्तत्प्रसिद्धौ व्यभिचारात् लूप्रलोभादित एव तत्सम्भवात् विचारकाणां विप्रतिपत्तेश्च। मैवं तत्प्रसिद्धौ विगानं महाजनानामिति चेत् न तत्रापि मूलान्तरसम्भावहेतुप्रतिपत्तेश्च विगानमेव तेषाम्, अतएव स्मृतीनां न्यायमूलत्वे सम्भवति वेदमूलत्वप्रसिद्धावपि न वेदमूलत्वं, न च वेदमूलेयमिति ज्ञात्वा स्मृतेर्महाजनपरिग्रहात्तन्मूलत्वं वेदमूलेयमिति प्रथमं ग्रहीतुमशक्यत्वात् शक्यत्वे वा किमनुमानेन, न च वेदमूलत्वेन प्रकारेण महाजनपरिग्रहः, असिद्धेः, मन्वादिस्मृतित्वेन पूर्वं महाजनपरिग्रहेणोत्तरेषां परिग्रहादनुमानाद्युपपत्तेः। एवं लौकिकाचारेऽपि वेदलिङ्गेनैव कर्त्तव्यताज्ञानोपपत्तेः किं वेदेन, तदर्थस्य लिङ्गादेवोपपत्तेः, अविगीताशौकिकविषयकप्रवृत्ताचारस्य वेदमूलत्वदर्शनात् वेदानुमाने चाविगीताचारत्वेन भोजनाद्याचारोऽपि वेदमूलः स्यात् वेदं विनापि तत्कर्त्तव्यताधीसम्भवात् तदर्थवेदकृतिः कल्पनीया। आचारकर्त्तव्यतानुमानयोरादित्वेनाचाराणां कर्त्तव्यतानुमानमूलकत्वान्नान्धपरम्परा। न च पूर्व्वानुमानसापेक्षमुत्तरानुमानमिति स्वतन्त्रप्रमाणमूलकत्वाभावात् साध्यव्याप्तिपक्षधर्मतासत्त्वेन पूर्वेषां स्वतन्त्रप्रमाणत्वात्। नापीतरप्रामाण्याधीनं सर्वस्य प्रामाण्यमिति निरपेक्षत्वं, प्रत्यक्षादेरपि तथात्वापत्तेः। एतेन विवादपदमाचारो निरपेक्षप्रमाणमूलकः अविगीतमहाजनाचारत्वात् प्रत्यक्षवेदमूलाचारवदिति निरस्तम् अनुमानस्य निरपेक्षप्रमाणत्वात् प्रमाणमूलत्वेनैवयुक्तेरुपपत्तेः निरपेक्षत्वस्य गौरवेणाप्रयोजकत्वाच्च। न च सापेक्षत्वेन न प्रमाणता व्याप्त्यादिसत्त्वात् अन्यथा प्रमाणैरपेक्षस्य वैयर्थ्यात्। नचाचारे वेदमूलकत्वप्रसिद्धेस्तदनुमानम्, असिद्धेः व्यभिचारादन्यथोपपत्तेश्च। न च वेदमूलत्वेन महाजनपरिग्रहात्तथा। न हि वेदमूलोऽर्थ इति ज्ञात्वा महाजनानां तत्परिग्रहः वेदमूलत्वस्य प्रथमं ज्ञातुमशक्यत्वात् शक्यत्वे वा किमनुमानेन। न च वेदमूलत्वेन महाजनपरिगृहीतोऽयमाचारः इति ज्ञात्वा तत्र महाजनपरिग्रहः, गौरवात्, असिद्धेश्च पूर्व्वं महाजनपरिग्रहादेवोत्तरेषां परिग्रहानुमानोपपत्तेः। तादृशस्मृत्याचारयोर्वेदमूलत्वेन व्याप्तेर्वेदमूलत्वसिद्धिरिति चेत् न असम्भवन्मूलान्तरस्योपाधित्वात् अन्यथा लोभव्यायमूलस्मृतेरप्रसङ्गः। अस्तु स्मृत्याचारयोरादित्वं न चाचारात् स्मृतिः स्मृत्या चाचारः इत्यन्धपरम्परा मूलीभूतप्रमाणाभावादिति वाच्यं स्मृत्याचारयोरुभयोरपि प्रमाणत्वात्। अन्यथा न ततो वेदानुमानमिति।

उच्यते प्रलये पूर्व्वस्मृत्याचारयोरुच्छेदात् सर्गादौ नित्यसर्व्वज्ञेश्वरप्रणीतवेदमूलत्वं स्मृत्याचारयोः, अन्यथा मूलाभावेनान्धपरम्पराप्रसङ्गः। न च मन्वादीनामतीन्द्रियार्थदर्शित्वं तदुपायश्रवणादेस्तदानीमसम्भवात् पूर्व्वपूर्व्वसर्गसिद्धसञ्ज्ञा एव ते स्मृतिः इति चेत् न प्रमाणाभावात्। स्मृत्याचारयोः प्रमाणमूलकत्वमेव तत्कल्पकमिति चेत् न प्रतिसर्गं तेषामन्यान्यकल्पने गौरवमित्येकस्यैव नित्यसर्व्वज्ञस्य कल्पनात्। न च स्मृतय एव तत्प्रणीताः तासां मन्वादिकर्त्तृकत्वेन स्मृतौ बोधात्, स्मृतावेव स्मृतीनां वेदमूलत्वस्मरणाच्च। एवञ्च स्मृत्याचारयोर्महाजनपरिग्रहादवेदमूलत्वसाधकमपि भवति प्रमाणम्। अतएव "प्रतिमन्वन्तरं चैषा श्रुतिरन्याऽभिधीयते" इत्यागमोऽपि। एवञ्च पूर्व्वप्रत्यक्षवेदमूलाभावेऽपि स्मृताचारौ अप्येव कालक्रमेणायुरारोग्यबलशक्त्यादिक्षयधारणादिप्रकारैरुत्तरोत्तरापचीयमानत्वात् तदध्ययनविच्छेदात् वाक्योच्छेदात् स्मृत्याचाराभ्यामेव कर्त्तव्यतानधिगम प्रवृत्तिः। मन्वेवं स्मृतिरस्तु वेदमूला महाजनाचारस्तु कैश्चरादेव भविष्यति घटखिण्यादिसम्प्रदायवदिति चेत् न वस्तुव्यापारघटितस्य तत्तदाचारस्य गुरुत्वेन "मङ्गलमाचरेदित्यादिशास्त्रस्यैव लाघवेन कल्पनात्"।

"निबन्धाचार्य्यवैद्येषु परपाकोपजीविषु। उच्छन्नवर्त्तिभिक्षेषु भिक्षुकांस्तोपभोजिषु" स्मृतेः।

उच्छल त्रि० उद्-शल अच्। आधारातिक्रमेण सर्व्वतः स्रुते। शट। उच्छलत् तत्रैव "क्वटोच्छलच्छलुङ्खलाकुलेन" माघः "स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतरास्रुच्छटा" काव्यप्र०। ल्युट्। उच्छलन परितः प्लवने न०।

उच्छादन न० उद्-छद-णिच्-ल्युट्। आच्छादने

२गन्धद्रव्यद्वारा देहमार्जने च अमरटी० "स्नापनोच्छादनेन" रामा० ।

उच्छास्त्र त्रि० उद्गतं शास्त्रात् प्रा०स० । १अतिक्रान्तशास्त्रे २शास्त्रविरुद्धे धर्मभङ्गे च । उत्क्रान्तं शास्त्रं यत्र । शास्त्रातिक्रमयुक्ते उच्छास्त्रं यथा तथा वर्त्तते उच्छास्त्रवर्त्तिन् शास्त्रातिक्रमेण यथेष्टचारिणि स्त्रियां ङीप् । "न रात्रः प्रतिगृह्णीयात् क्रूरस्योच्छास्त्रवर्त्तिनः । भा० शु० । "क्रूरस्योच्छास्त्रवर्त्तिनः" भाग० ७स्कन्ध० अ० ।

उच्छासन त्रि० उत्क्रान्तः शासनम् । शासनातिक्रान्तरि ।

उच्छिख त्रि० उद्गता शिखा यस्य प्रा०ब० । १उद्गतशिखे २उर्द्ध्वशिखि वह्नौ पु० "शान्तस्योच्छिखस्य" रघुः । २तत्कुलजातकुलजाते नागभेदे पु० "तत्रभवस्य कुलेजातान् प्रवक्ष्यामि निबोध तान्" इत्युपक्रम्य "उच्छिखः प्रभोभङ्गोविल्वतेजा विरोहणः" भा० आ०५७ अ० ।

उच्छिङ्खन न० उद्+शिखि आधारे भावे ल्युट् । नाभिकायावुभावन्तःस्थितकफादिनिःसारणे । "उच्छिङ्खनेन कर्त्तव्योदृष्टिमण्डलजः कफः" । "नेत्रे विशल्यिनि विधिर्विहितः पुरस्तादुच्छिङ्खनं गिरिषु वार्य्यवसेचनञ्च" सुश्रु० ।

उच्छित्ति स्त्री उद्+छिद्-भावे क्तिन् । समूलोत्पाटने अत्यन्तसंमर्दने । "यद्वा तद्वा तदुच्छित्तिः पुरुषार्थः" सा०द० । "शूद्रः सर्ब्बवर्णानां प्रजानोधर्म्मकर्म्मणाम्" । प्रजानामपि योच्छित्तिर्न्नश्यत्यनपेक्षतः" स्मृतौ० "अविनाशी वा अरे अयमात्माऽनुच्छित्तिधर्म्मा" बृ० उ०२१ ।

उच्छिन्न त्रि० उद्+छद्-क्त । १समूलं नाशिते २विदलिते ।

उच्छिरस् त्रि० उद्गतं शिरोऽस्य । १उद्गते २आकाशादिना उन्नतप्रदेशे महिमाश्रिते "यैकात्मजापि पितृच्छिरसोऽभिलाषम्" कुमा० यौद्यादार्य्यादिना हि लोके उन्नतशिरा भवति अपकृष्टकर्म्मणा तु अवनतशिराः प्रसिद्धः

उच्छिलीन्ध्र त्रि० उत्थितं शिलीन्ध्रम् । १आलाके । २विकसितशिलीन्ध्रवृक्षे त्रि० । "उच्छिलीन्ध्रवनन्यायमिति" मेघदू० ।

उच्छिष्ट त्रि० उत्+शिष-क्त । १भुक्तावशिष्टे, २त्यक्ते च । अमरः । २अक्षतयोनौ भुक्तान्ने । तत्रोच्छिष्टस्याभक्ष्यता तापत्तादभक्ष्यप्रकरणे ३७६ पृष्ठे उक्ता तत्रायं भेदः वर्णविशेषेणोच्छिष्टभोजने पापतारतम्यात् प्रायश्चित्ततारतम्यं प्रायश्चित्तविवेकादावुक्तं यथा "स्वमुच्छिष्टन्तु यो भुङ्क्ते योभुङ्क्ते स्त्रीभाजने । एवं वैश्यस्तः प्राह भुक्त्वा चान्द्रायणञ्चरेत्" यमस्मृतिवचनम् । "तच्च स्नानाभ्यासविषयमिति" प्रा०वि० । "ब्राह्मणोच्छिष्टभोजने सङ्कल्पाक्षतिमिरभिमन्त्र्यापः पिबेत्, क्षत्रियोच्छिष्टभोजने ब्राह्मीरसविघसेन लाजं क्षीरेण वर्त्तयेत्, वैश्योच्छिष्टभोजने त्रिरात्रोपोषितो ब्रह्मपर्णचूर्णं पिबेत्, शूद्रोच्छिष्टभोजने सुरास्नाक्षीरपाने च षड्रात्रमभोजनं चान्द्रायणं वा अभिमन्त्रितं जलं पीत्वोपवसेत्" यमस्मृतिः "एतदुपलक्षणं एतदुब्राह्मणस्य ब्राह्मणाद्युच्छिष्टाशनेऽज्ञानतः सङ्कल्पं एवं क्षत्रियादेः समाधमवर्ण्योच्छिष्टाशने समाधमवर्ण्योत्कर्षमेतदेव यथायथमनुसृत्येयम् शूद्रोच्छिष्टाशने तु ब्राह्मणस्य ज्ञानतः सङ्कल्पियम् षड्रात्रभोजनम्" प्रा०वि० । यथा प्रस्तुत्य । "अज्ञानाद्दुर्यस्तु भुञ्जीत शूद्रोच्छिष्टं द्विजोत्तमः । त्रिरात्रोपोषितोभूत्वा पञ्चगव्येन शुद्ध्यति" "एतद्द्विजोत्तमपदमुपलक्षणमुब्राह्मणविषयम् । क्षत्रियादिपरत्वे वह्न्यग्निविष्णुवचनविरोधात् । एतदपि सङ्कल्पियं ज्ञाने च त्रिरात्रेऽधमर्णमपि जपनीयम्" प्रा०वि० । यथा शुनन्तुः । "शूद्रोच्छिष्टभोजने त्रिरात्रमधमर्णञ्च जपेत्" "चान्द्रायणन्तूभयत्रैव ज्ञानाभ्यासे क्षत्रियादीनान्तु त्रिपादपादकल्पनिरूढा । क्षत्रियस्य च ब्राह्मणोच्छिष्टाशने ब्राह्मणोक्तप्रायश्चित्तार्द्धं, वैश्यस्य ततोऽप्यर्द्धम् । एवं वैश्यशूद्रयोरपि ज्ञानेतरया पूर्ब्बवर्णक्रमेणोह्यम् उभयतो वचने वर्णक्रमेण हृतिप्रायश्चित्तदर्शनात्" प्रा०वि० । यथा "अज्ञानाद्भुञ्जतोयस्तु भक्षितोवैद्विजातिभिः । चान्द्रं कृच्छ्रं तदर्द्धञ्च क्रमात्तेषां विशोधनम्" । तथा विष्णुरपि व्याख्यान्तरमेवार्थमाह । "आमश्राद्धाशने त्रिरात्रं, वर्त्तते ब्राह्मणः शूद्रोच्छिष्टाशने वमनं कृत्वा सप्तरात्रं वैश्योच्छिष्टाशने षड्रात्रम्, राजन्योच्छिष्टाशने त्रिरात्रम्, राजन्यः शूद्रोच्छिष्टाशने पञ्चरात्रम् वैश्योच्छिष्टाशने । त्रिरात्रं वैश्यः शूद्रोच्छिष्टाशने च" "अत्र वमनं कृत्वा पयसा वर्त्तेतेति सर्ब्बत्रान्वेति" प्रा०वि० । "पतत्पतितादीनामुच्छिष्टान्नस्य भक्षणे । द्विजः शुध्येत् परावेण शूद्रः कृच्छ्रेण शुद्ध्यति" अङ्गिराः "एतच्चानधिगतविषयं ज्ञानतो ह्येषामुपादिकम् प्रा०वि० । अनुलोमेऽपि सामान्याभ्योऽन्यप्रकरणे । "शुष्कं पर्य्युषितं चैव शूद्रोच्छिष्टमेव च "क्रूरोच्छिष्टभोजिन" इति चोत्तरम् । शूद्रस्य तु द्विजोच्छिष्टभोजने न दोषः । द्विजोच्छिष्टन्तु भोजनमिति" तस्य मनुना तद्भक्षितयोक्तेः । एकपङ्क्तिस्थमध्ये

केनचिदन्ये भोजनपात्रत्यागे तत्पङ्क्तिस्थानां तदन्नमुच्छिष्टवत् यथा "अथैकपङ्क्त्यां नाश्नीयात् संहतः स्वजनैरपि कोऽपि जानाति किं कस्य प्रच्छन्नं पातकं महत् । भक्तस्तम्भजलद्वारमार्गैः पङ्क्तिञ्च भेदयेत्" व्यासः । जलादिना पङ्क्तिभेदाकरणे तु यङ्गः "एकपङ्क्त्युपविष्टानां विप्राणां भोजने क्वचित् । यद्येकोऽपि त्यजेत्पात्रं शेषमन्नं विवर्जयेत् । भोक्तारं भुञ्जीत यः पङ्क्त्यामुच्छिष्टसङ्कभोजनम् । प्राजापत्यं चरेद्विप्रः शतः स्नानपनन्तथा" । "विड्वालादिभिरुच्छिष्टं दृष्टमन्नं विवर्जयेत्, अन्यत्र क्षिप्तयोदकस्पर्शात्" देवलः अज्ञानादुच्छिष्टादिभोजने तदुत्तार्य्यमित्याह "अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता । अज्ञानाद्भुक्तवतार्य्यं शोध्यं वाप्यशु शोधनैः" वमनपक्षेऽपि अल्पमायश्चित्तं भवत्येव "आमश्राद्धायने विरात्रं पयसा वर्त्तेत ब्राह्मणः, सूद्रोच्छिष्टाशने वमनं कृत्वा सम्प्राशनमुपवसेत्" विष्णुना वमनोत्तरमपि प्रायश्चित्तविधानात् "अन्यान्नं भुक्तशेषन्तु भक्षयित्वा द्विजातयः । चान्द्रं कृच्छ्रं तदर्द्धं तु ब्रह्मस्वत्वविधां विधिः" मिताः आपः वचनन्तु ब्राह्मणस्य सकृदज्ञानविषयम् अन्यथा तत्कारानुसारेऽप्येवं तरतम्यकल्पादुच्छिष्टपरमिति" प्रा० त० रघु० । अन्यजैः बलात्कारिते उच्छिष्टादेर्भोजनेऽपि दोषएव । "दासीकृतोबलान्म्लेच्छश्चाण्डार्थं दस्युभिः । अशुभं कारितः कर्म गवादेः प्राणिकिल्बिषम् । उच्छिष्टमार्द्रनक्तञ्च तथा तस्यैव भक्षणम्" इत्यादयभिप्रायं मांसोक्षिते द्विजातौ तु प्रजापत्यं क्रियोधनम् । चन्द्रायणन्तु कर्त्तव्यं तेनेः पराकमथ वा भवेत्" देवलोक्तेः । उच्छिष्टचाण्डालादिस्पर्शेऽपि दोषः" प्रा० त० उक्तः यथा । "आपस्तम्बः 'भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः स्वपचैर्वा । प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्य्याद्विशोधनम् । गायत्र्यष्टसहस्रन्तु कृच्छ्रं वा यत्नं जपेत् । विरात्रोपोषितो भूत्वा पञ्चगव्येन शुद्धयति । भुक्तोच्छिष्टोऽन्त्यजैः स्पृष्टः प्राजापत्यं समाचरेत् । अर्द्धोच्छिष्टे कृतः प्रादः पाद आमाशने तथा" । "प्राजापत्यं स्नाने अर्द्धोच्छिष्टोवेनाद्यप्रासः आसे निखिलः न तु निगीर्णः" प्रा० त० रघु० । काश्यपः "म्लेच्छकरान्यचाण्डालमद्यमांसरजस्वलाः । यद्युच्छिष्टः स्पृशेत्तत्र कृच्छ्रं स्नानन्तु चरेत् । "एतज्ज्ञानाभ्यासे स्नानपने धेनुद्वयम्" । प्रा० त० ब्रह्मपुराणे "उच्छिष्टेन तु स्पृष्टेन विप्रः स्पृष्टस्तु ताद्दशः । उपवासेन शुद्धिः स्यात् स्नात्वा संस्पृश्य वा । उच्छिष्टेन तु विप्रेण विप्रःस्पृष्टस्तु ताद्दशः । उभौ स्नात्वा प्रकृतं सद्य एव समाहितौ" । "अनुच्छिष्टब्राह्मणस्य नक्तमिति" प्रायश्चित्तविवेकः ।

"सर्वमन्नमेकतोकृत्य उच्छिष्टसमीपे दर्भेषु" श्रा० त० गोभिलः । इष्टावशिष्टे च । "उच्छिष्टे सतिलान् दर्भान् दक्षिणाग्राद्विधापयेत्" श्रा० त० ब्रह्मपु० । "असंस्कृतप्रमीतानां, योगिनां, कुलयोषिताम् । उच्छिष्टं भागधेयं स्यात् दर्भेषु विकिरेत्तु यः" श्रा० त० ब्रह्मपु० । "प्रेतश्राद्धे यदुच्छिष्टं गृह्ये पर्य्युषितं च यत् । दम्पत्योर्भुक्तशेषञ्च न भुञ्जीत कदाचन" श्रा० त० स्मृतिः । "उच्छिष्टं पाकपात्रेऽग्निहुम्, गृह्ये उपरागे पर्य्युषितं, दम्पत्योराश्रमस्थानिभोजनानन्तरं पाकस्थाल्यामवशिष्टमिति" श्राद्धचिन्तामणिः । ४तत्पु० । मलिनोच्छिष्टत्वात्तस्य तथात्वम् । "उच्छिष्टं गिवनिर्माल्यम्—श्राद्धे प्रयच्छते" पु० । उच्छिष्टभोजनः ।

उच्छिष्टगणेश पु० तन्त्रोक्ते गणपतिभेदे । तस्य मन्त्रध्यानादिकं तन्त्रसारे दृश्यम् "भुक्तोच्छिष्टोजपेन्नित्यं गणेशस्य सदा प्रिय;" "उच्छिष्टश्चाशुचिर्भूत्वा जपयज्ञजपमाचरेत्" । अनुच्छिष्टो न सिध्येत्तु तस्मादेवं समाचरेत्" । "सदोच्छिष्टोगणेशानो यन्नराजेन धीमता" इति च तन्त्रे ।

उच्छिष्टचाण्डालिनी स्त्री तन्त्रोक्ते मातङ्गीदेवीमूर्त्तिभेदे । तस्या मन्त्रध्यानादिकं तन्त्रसारे दृश्यम् । "भोजनानन्तरं देवि ! विनैवाचमने कृते" इत्युपक्रम्य "उच्छिष्टेन बलिं दत्त्वा जपेत्सङ्कृतमानसः । उच्छिष्टेन च कर्त्तव्यो जपोऽस्याः सिद्धिमिच्छता । उच्छिष्टजा नरस्य जायन्ते सर्वसिद्धयः" इति च तन्त्रे ।

उच्छिष्टभोजन पु० उच्छिष्टं पञ्चयज्ञावशिष्टं भोजनमस्य । पञ्चयज्ञावशिष्टस्य भक्षके "यत्किञ्चिदाशिनः सन्तोऽच्यन्ते सर्वकिल्बिषैः" मनुना तथा भोजने किल्बिषहरत्वकीर्त्तनात् तथा भोजनस्य कर्त्तव्यत्वम् । उच्छिष्टं देवर्षिवेद्यावशिष्टं भोजनमस्य । ३देवर्षिवेद्यभोजके च । "तदेतत्समप्रदायैश्चयोयो भुङ्क्ते स्वेन एव सः" गीतायां देवार्पितेदृने दोषश्रवणात् देवाय दत्त्वैव भोज्यता ।

उच्छिष्टभोजिन् त्रि० उच्छिष्टं इतरस्य भुक्तावशिष्टं भुङ्क्ते भुज-णिनि । निषिद्धोच्छिष्टभोक्तरि" "क्रूरस्योच्छिष्टभोजिनः" मनुः । उच्छिष्टे सुट-लुट् । (भोम) सिक्तयुक्ते ।

उच्छिष्टमोदन न० उच्छिष्टं भ्रमरोच्छिष्टं मधु तेन मोदते

उच्छिष्य त्रि० उद्+शिष-भेदे क्यप् । अवशेषणीये

लोके तु गवादेः। उच्छेद्यम् अश्वशफीवेऽश्वादौ त्रि०।

उच्छोर्णक न० उत्थापितं शय्यातऽस्योत्थापितं शीर्षं यस्मिन् प्रा०व०कप्। शीर्षोपधाने (बालिश)। प्रा०व०। २उन्नतशीर्षके धान्यादौ त्रि० हला०। उच्छ्रितं शीर्षं कायति के-क। ३स्थिर प्रदेशे "उच्छोर्णके स्थिरं कुर्याद् भद्रकाष्ठं च पादतः" मनुः उच्छीर्णके वास्तुपुरुषस्य शिरः प्रदेशे" कुल्लूकभट्टः। [शुच्छे।

उच्छ्य त्रि० उद्गतः शुष्कम् प्रा०स०। उर्द्ध प्रदेशात्

उच्छ्रन त्रि० उद्-श्रि-क्त। १उन्नते २स्फीते च "हयोच्छ्रनैः क्रिमेभिर्भुजैः" मा०द०। "अमरतरुदितोच्छ्रनताच्छटि-महालम्" दण्डक०। भावे क्त। ३स्फीतताद्याम्। (फोला)

उच्छ्रुङ्कल त्रि०उद्गतं शृङ्खलातः निरा०स०। १बन्धनरहिते, २नियन्तृरहिते, ३अप्रतिबन्धे च।"अन्यदुच्छृङ्खलं सत्यमन्यच्चाखनियन्त्रितम्" "उच्छृङ्खलं तृच्छृङ्खलशृङ्खलनिखनः" माघः। [पाटवे ३अभावे च।

उच्छेत्तृ त्रि० उद्+छिद्-तृच् स्त्रियां ङीप्। १समूलखनृ-

उच्छेद पु०उद्+छिद्-भावे घञ्।१समूलोत्पाटने२विनाशने च "क्रिमिति सर्व्वमुच्छेदः क्रियते" हितो० "ततः सत्यत्यचिन्तयत् मा दीप्तलोर्वंश उच्छेदं व्रजेदिति" भा०आ०६५ अ०। "खलां भवोच्छेदकरः पिता ते" रघुः। भावे ल्युट्। उच्छेदनमप्यत्र न०"वस्तु नोच्छेदं चक्रे कृषिकानामुदारधीः" आ० प० १६३ अ०।

उच्छेद्य त्रि० उच्छेदमर्हति उच्छेद+अर्हार्थे यत्। १उच्छेदार्हे उद्+छिद्-कर्म्मणि यत्। २समूलखनृपाटनीये च।

उच्छेपण न०उच्छिप्यते उद्+क्षिप-कर्म्मणि ल्युट्। १उत्क्षिप्ते "उच्छेपणं भूमिगतमजिह्मस्याग्रस्य च" उच्छेपणन्तु नस्तिष्टेत् यावद्विद्या विसर्ज्जिताः" मनुः"वरस्त्रीमुखगृहीतोच्छेषोत्तोदनच्छद इव शुष्यन्तिम्"दण्डक०। भावे ल्युट्। २भुक्तावशेषणे।

उच्छेषण त्रि० उद्+शुष-णिच्-ल्यु। १मन्त्रपूते,२कृतशोधने च 'उच्छेषणमुच्छेषणमिन्द्रियाणाम्" गीता। भावे ल्युट्। ३सम्यक्शोषणे। "तरसा सेतुबन्धनेन सागरोच्छेषणेन च" रामा०। "उच्छेषणं समुद्रस्य पतनं चन्द्रसूर्य्ययोः" राजा०।

उच्छोषुक त्रि० उद्+शुष-वा०उक। ऊर्द्धशोषप्राप्ते, "स यद्येतावन्तरेणाग्नौ दार्व्योषधीस्तदेन लोकेन नानाकुर्य्यादुच्छोषुका ह स्युः" शत०ब्रा०१२,१,१,१

उच्छ्र(च्छ्रा)य पु०उद्+श्रि-करणे अच् घञ् वा। १उन्नतताद्याम् उन्नततया हि ऊर्द्धमाश्रीयते इति तस्याच्छायत्वम्। "दम्भो धर्म्मध्वजोच्छ्रयः" भा०व०३१२अ०। "यतनान्ताः समुच्छ्रयाः" नीतिः "अपरेद्युस्ततस्तस्याः क्रियतेऽभ्युच्छ्रयोदयः" भा०आ०६३अ०। प्रासादैः सुकृतोच्छ्रायैः" भा०आ०१८५अ०। "यक्षाधीना नरेन्द्राणामुच्छ्रायाः पतनानि च" या०स्मृतिः। "उच्छ्रायपातनं धनिनां दर्शयन्निव" कटस०। "दृष्टोच्छ्रायैः कुसुदविशदे योषितस्य स्थितः खम्" मेघदू०। "गुणार्जनोच्छ्रायविरूढबृद्धयः" किरा०। २ उच्चस्थाने "उच्छ्रयेण गुणितं चितेः फलम्" लीला०।

उच्छ्रयण न० उद्+श्रि करणे ल्युट्। १औत्सर्गे उद्+श्रि-कर्त्तरि ल्यु। २उत्कृष्टे त्रि०। "सर्व्वायतनोच्छ्रयाणि" आश्व० स्मृ०४,६,२१। उच्छ्रयाणि उत्कृष्टानि" नारा० हरिः।

उच्छ्रावण न० उद्+स्रु-णिच+ल्युट्। ऊर्द्धःस्रावणे हविषि "उद्दिश्य कृपितो यस्तु तोयितः स्रावयेत् पुनः। तस्मिन् भक्षिते न दोषोऽस्ति हयोच्छ्रावणे कृते" विष्णु०। "उच्छ्रावणसङ्कोषः" प्रा०त०रघुनन्दनः।

उच्छ्रित त्रि० उद्+श्रि-कर्त्तरि क्त। उद्गते १ऊर्द्धदेशं प्राप्ते। "उच्छ्रितैरुच्छ्रितैरः स्थगनलिनमिवस्याम्" माघः। २संजाते ३समुच्छ्रये ४प्रहृष्टे च मेदि०। ५उत्क्षिप्ते हेमच०।

उच्छ्रिति स्त्री उद्+श्रि-भा० करणे क्तिन्। १उच्छ्राये उच्चतायाम् २उत्कर्षे च "यस्यार्थ निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितीः पुनः" मनुः। "यतश्चाप्यधिकाद्यासु सर्व्वसिद्धोच्छ्रितीर्वदेत्" सुश्रु०। ३उच्चसंख्यायाम् "दृष्टोच्छ्रयच्छदुच्छ्रितिचितेः" लीला०।

उच्छ्वसित न० उद्+श्वस-क्त। १विकाशिते, २लोचिते, ३स्फुरिते "विषदोच्छ्वसितेव मेदिनिः रघुः। ४फाणेषु च "सा खलु भगवतः कपर्दस्य कुलपतेरुच्छ्वसितम्" भट्ट०। कर्त्तरि क्त। ५उच्छ्वासयुक्ते ईषच्छ्वासे युक्ते च त्रि०। "त्यासमुत्कण्ठोच्छ्वसितहृदया योच्य संभाव्य चैवम्" मेघदू०

उच्छ्वास पु० उद्+श्वस-घञ्। १अन्तर्मुखश्वासे, आख्यायिका या २परिच्छेदे, यथा दण्डकुमारस्य प्रथमोच्छ्वासादि प्राग्वायोर्दीर्घगत्या २बहिर्गतौ ४आश्वासे च। "दीर्घा कृतीषदुच्छ्वासप्रेरणबाकुलम्" काद्या० "वायोर्मार्गनिरोधान्न गर्भस्थः प्रतीदिति" निश्वासोच्छ्वाससंक्षोभभयान् गर्भोऽधिगच्छति" सुश्रु०। उच्छ्वासग्रहणाङ्गभेदासु तत्र दर्शिताः। "ऊर्द्धगाः ग्रहणेऽपरसगन्धप्रत्याख्योच्छ्वास-

लृम्पितलुम्बुसितकथितरुदितादीनि विशेषानभिवक्तन्यः शरीरं धारयन्ति "पीडयसरजोगाढः शोच्छ्वासः शिथिलः स्मृतः"। "शीतपादकरोच्छ्वासश्चञ्चलश्वासस्त्रयो भवेत्। काकोच्छ्वासस्त्रयो मर्त्यञ्च धीरः परिवर्जयेत्" सुश्रु०। "श्वसतोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः" सुश्रु०। उच्छ्वासश्च दीर्घनिश्वासः स च यावत्कालेन श्वासरूपप्राणक्रिया भवति ततोऽल्पकालेन, दीर्घदेशपर्य्यन्तप्राणवायोर्बहिर्गमने भवति। "उच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती" मेघदू०। "दुःखोच्छ्वासोऽहनं प्राण आदधे" कात्या० ४,८,२६।

उच्छ्वासिन् त्रि० उद्+श्वस-णिनि स्त्रियां ङीप्। १ऊर्द्धश्वासयुक्ते २दीर्घनिश्वासयुक्ते। "समधिकतरोच्छ्वासिना" मेघ०। ४उद्गते च "उच्छ्वासिकालाञ्जनरागमच्छलात्" कुमा० "समधिकतरोच्छ्वासिना" मेघ० "५ऊर्द्धश्वासयुक्ते मुमूर्षौ" "यत्नैतदूर्द्धोच्छ्वासी भवति" छ०उ०उत्क्रमणशब्दे दृश्यम्।

उछ उञ्छे (कणशआदाने) तुदा० इदित् पर०सक०सेट्। उञ्छति औञ्छीत्। उञ्छाम्-बभूव आस चकार। उञ्छिता उञ्छ्यात् उञ्छिष्यति औञ्छिष्यत्। उञ्छः उञ्छनम् उञ्छितः। प्र+मार्जने प्रोञ्छनं (पोछा) प्रोञ्छितः।

उछ वधे समापने च विरामे या० तुदा०पर०सक०सेट्। उञ्छति औञ्छीत् उञ्छाम् बभूव आस-चकार। उञ्छिता उञ्छ्यात् उञ्छिष्यति औञ्छिष्यत्। चिच् उञ्छयति ते औतिच्छत् औचिच्छत् त। सनि उतिच्छिषति उचिच्छिषति। इदित् तेन निष्ठाया नेट्। उष्टः।

उज्जय(यि)नी स्त्री विक्रमादित्यराजधान्याम् अवन्तीपुर्य्याम् अवन्तीशब्दे विवृतिः। "सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः" मेघदू०। दृश्यञ्च तद्भावधिमेरुपर्य्यन्तसरेखास्थपुरीमध्येनन्यतमा यथाह श्रीपतिः "लङ्का कुमारी नगरी च काञ्ची पानाटमद्रिश्च सितः षडास्यः। श्रीवत्सयुक्तं च पुरी ततश्च माहिष्मती चोज्जयिनी प्रसिद्धा। स्यादास्रमोऽवन्तिपुरं सुरस्य ततः पुरं पट्टशिवाभिधानम्। श्रीगर्गराटं च सरोहिताख्यं स्थानेश्वरं श्रीतगिरिः सुमेरुः। इतीव याम्योत्तरगां धरायां रेखामिमां गोलविदो वदन्ति। अन्यानि रेखास्थितिभाञ्जि लोके स्थेयानि तज्ज्ञैः पुटभेदनानि"। सू०सि०तु सामान्येनोक्तम् यथा "राक्षसालयदेवौकःशैलयोर्मध्यसूत्रगाः। रोहीतकमवन्ती च तथा सन्निहितं सरः"। "राक्षसालयो लङ्का देवानां स्मरूपः पर्वतो मेरुरनयोर्मध्ये सूत्रं तत्र स्थिता रेखा याम्योत्तरसूत्रस्थाः। लङ्कादक्षिणसूत्रस्थास्वनुपयुक्तात्र मनुष्यागोचरत्वादिति नोक्ताः। स्थानार्थमुदाहरति। रोहीतकमिति। यथा रोहीतकं नगरमवन्त्युज्जयिनी सन्निहितं सरः कुरुक्षेत्रम्। चकारस्तेषां व्यत्ययपरः। तथान्यानि परस्परं सन्निहिततया स्थेयानि" ए०भा०। "यथोज्जयिन्या कुजदृष्टभागे प्राच्यां दिशि खाद्यमकोटिरेव" सू०सि०।

उज्जयन्त न० उद्+जि-झ। रैवतपर्वते शैल०।

उज्जानक पु० उत्कृष्टमेरोरुन्नतिमालिङ्गे सप्तद्वीपविधे मद्भूमिषु वालुकामयदेशभेदे। यत्र हि मधुपुत्रो धुन्धुरुतद्भार्थितेन कुवलाश्वेन विष्णुतेजसा दंष्ट्रितवीर्य्येण निर्मातितः तत्कथा यथा भा०हरिवं०११अ०। "समाश्चमसमीपे वै समेषु मरुधन्वसु। सप्तद्वीपो वालुकार्णव उज्जानक इति श्रुतः। देवानामध्यवध्यश्च महाकायो महाबलः। अन्तर्भूमिगतस्तस्य वालुकान्तर्हितो महान्। राजसश्च मधोः पुत्रो धुन्धुर्नाम महासुरः। येते लोकविनाशाय तप आस्थाय दारुणम्"। इत्युपक्रम्य तद्वधोवर्णितस्तत् कथाधुन्धुमारशब्दे दर्शयिष्यते २उत्तरदेशस्थेऽपि देशभेदे "एतद्वारं महाराज! मानसस्य प्रकाशते" इत्युपक्रम्य "एष उज्जानकोनाम पावकिर्यत्र याज्ञवान्" भा०व०१३०अ० देशभेद उक्तः।

उज्जासन न० उद्+जस-णिच्-ल्युट्। मारणे वधे एतद्योगे कर्मणः संबन्धत्वविवक्षया षष्ठी प्रतिपदविहितत्वेन तया षष्ठ्या न समासः "चौरस्योज्जासनम्" सि०कौ०। "प्रतिपदविहिता षष्ठी न समस्यते" वार्त्ति०। "प्रोक्ता प्रतिपदा षष्ठी समासस्य निवृत्तये" भर्तृ०। तथैवोक्तम्

उज्जिघ्र त्रि० उद्+घ्रा-श। आघ्राणकर्त्तरि।

उज्जिति स्त्री उद्+जि-क्तिन्। उत्कृष्टजये "अग्नीषोमयोरुज्जितिमनुज्जेषम्" यजु० २,२५। "उज्जितिमनु प्रकृतविप्लव ऋविःश्लोकरूपसत्कृत्यजयम्" वेददी०। "सोमस्योज्जितिमित्यग्निर्वनस्पतिः" कात्या० १०,७,१४। "उज्जितिभ्यो वोत्तरो माहेन्द्रः" कात्या० १४,५,३१। अग्नीषोमयोरुज्जितिमनूज्जेषम्। "अग्नीषोमयोरुज्जितिमनूज्जयति" इन्द्राग्नोरुज्जितिमनूज्जयति" यत०ब्रा० १,८,३,१,२,३,४। २उज्जयतिरूपयुक्तमन्त्रकरणकाङ्क्षतौ च। "अथोज्जितोः" इत्युपक्रम्य "अग्निरेकाक्षरेण प्राणमुज्जयत्सप्तभिरुज्जेषम्" इत्यादि यत०ब्रा० २,२,१६,१७ उक्तम्।

उज्जिहान त्रि० उद्+हा-शानच्। उद्गच्छति।

उज्जीविन् त्रि० उद्+जीव-णिनि। नाशप्रायतापाप्तुपरं पुनरुज्जीवनवति।

उज्जृम्भ पु० उद्+जृभि-घञ्। १विकाशे २स्फुटने। उद्गता जृम्भा (हाइतोला) यस्मात्" प्रा० ब० गतलोपः। ३सुखविकाशनभेदे ४कर्त्तरि अच्। ५प्रकाशान्विते ६उज्जृम्भावति त्रि० "उज्जृम्भादमाम्भोजा भिनत्त्यङ्कानि साङ्गना" माघः

उज्जृम्भण न० उद्+जृभि-भावे ल्युट्। विकाशे सुखविकाशनभेदे व्यापारे (हाइतोला)। "उद्गारकासश्वयथुक्षीवनोज्जृम्भणानि च" सुश्रुतः। उद्+जृभि-अ। उज्जृम्भाऽप्यत्र स्त्री।

उज्जृम्भित त्रि० उद्+जृभि-क्त। विकासिते। भावे क्त। २चेष्टायाम् (हाइतोला) ३सुखव्यापारभेदे न०।

उज्जेष पु० उद्+जिष-गत्याम् भावे घञ्। १उत्कर्षप्राप्तौ उज्जिति गच्छे उद०। अच्। २उत्कृष्टे त्रि०।

उज्जेषिन् त्रि० उद्+जिष-गत्यां णिनि स्त्रियां ङीप्। उत्कर्षप्राप्ते "क्रीडी च शाकी चोज्जेषी" यजु०१७, ८५ "उज्जेषी उत्कृष्टजयसंपन्नः" वेददी०।

उज्ज्या न० उद्गता ज्या यस्य प्रा० वा गतलोपः। "आरोपितमौर्वीके धनुषि। उज्ज्यधन्वा" कात्या०२२,२, १७। "उज्ज्यधन्वा आरोपितज्यधनुष्काः" कर्क०। उत्क्रान्ता अवतारिता ज्या यतः प्रा० ब० वा क्रान्तलोपः। अवतारितमौर्वीके धनुषि "क्षणोत्वा वैदहोत्योपपुत्र उज्ज्यां धनुरधिज्यं कृत्वा" का०श्रौ०।

उज्ज्वल त्रि० उद्+ज्वल-अच्। १दीप्ते, २विशदे, ३विकाशिनि च। ४शृङ्गारे पु०। "स राशिरासीन्नृहसां मनोज्ज्वलः" "शृङ्गारभङ्गा मकराकाङ्क्षेत्यादौ नैषधीयचरिते सर्गोनिसर्गोज्ज्वलः" नैष०। "स्नातस्यानुज्ज्वलमवाप करेणु राजः" अविरतमुद्वर्तितमुज्ज्वलं दधानैः" माघ०। "अस्माकं सखि! वाससी न रुचिरे मैवेयकं नोज्ज्वलम्" सा०द०। "विचित्रोज्ज्वलवेषा तु वलद्भुजनिस्वनाः" सा० द०। "सुरुचः पल्वलोज्ज्वलाः" सुश्रु०। अस्य च रसान्तरत्वं गोस्वामिप्रभृतयो नेच्छन्ति। "उज्ज्वलं स्वर्णं न० राजनि० धातुमध्ये तस्योद्दीप्तोत्पात्तद्यावत्। तस्य भावः ष्यञ् औज्ज्वल्यं त्व। उज्ज्वलत्व तद्भावे न०। तल्। उज्ज्वलता स्त्री तयैव।

उज्ज्वलदत्त पु० उणादिवृत्तिकारके विद्वद्भेदे। तस्येदम्। अ। उज्ज्वलदत्तीय तत्कृतग्रन्थे पु० तत्कृतवृत्तौ तु स्त्री।

उज्ज्वलन न० उद्+ज्वल-भावे ल्युट्। १दीप्तौ २वैभवे च।

उञ्छ त्यागे तुदा० पर० सक० सेट्। उञ्छति 'औञ्छीत उञ्छाम्—बभूव आस चकार। उञ्छिता जञ्छात् उञ्छिष्यति औञ्छिष्यत्। उञ्छित। त्वमङ्ग यस्याः पतिरुञ्छितक्रमः" नैष०। "अद्यापि नोञ्छति करः किल कालकूटम्" चौरपञ्चाशिका। "प्राणानौञ्छीच्च खड्गेन छिन्नस्तैव मूर्द्धनि" भट्टिः। "सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार"। "अविरतोञ्छितवारिविषाङ्कुभिः" "परस्परालिङ्गनसाध्यमदूरोञ्छितवर्त्मसु मृगद्वन्द्वेषु" सेकान्ते मुनिकन्याभिस्तत्क्षणोञ्छितदृष्टकम्" "उदये मदशाच्यमुज्झता" इति च रघुः। अतः "भिदोऽनौ नदे" पा० नि०क्यप् नदे कर्त्तरि भस्य धत्वम्। "उदकमुज्झति उद्वोनदः" सि०कौ०।

प्र+प्रकर्षेण त्यागे। "स्वादुस्निग्धो प्रेयसापि प्रोज्झिता" प्र०बो०। "लिखितमपि ललाटे प्रोज्झितुं कः समर्थः" हितो०। सम्+ सम्यक्त्यागे।

उञ्छ त्रि० उञ्छति उञ्छ-अच्। त्यागिनि। "अक्षौञ्छनवेदमिन्द्रा कौटसाख्यं सुहृद्वधः। गर्हितान्नाद्ययोर्जग्धिः सुरायाणसमानि षट्" मनुः।

उञ्छ पु० उञ्छि-घञ्। "अबाधितस्यानेषु पथि लोकेषु च च अप्रतिहतावकाशेषु यत्र कुत्रौषधयो विद्यन्ते तत्राङ्गुलीभ्यामेकैकं कणं समुच्चिनोतीति" बौधा० स्वत्युक्तेः कणस्य आदाने। "गिलोञ्छमप्याददीत विप्रोऽजीवन् यतस्ततः" मनुः। "एवं दृप्तस्य नृपतेरुञ्छेनापि च जीवतः" मनुः। "तान्नुञ्छवृत्तिसंकीर्णान्" रघुः। "निराहारस्तु स मुनिरुञ्छं मार्गयते पुनः" "तयासुमुञ्छधर्म्माणं दुर्वासा मुनिसत्तमः" "गिलोञ्छवृत्तिधर्म्मात्मा मुक्तसंयतेन्द्रियः" भा०व० १५६अ०। "प्रतिपक्षाच्छिलः श्रेयांस्ततोऽप्युञ्छः प्रशस्यते" मनुः। "व्यालप्रक्रान्तमुञ्छवृत्तीनन्यांश्च वनचारिणः" मनुः। अस्य क्लीवतापि "उञ्छं भैक्षं यदन्यच्च तत्परिग्रहणम् कृतम्" निगमोक्तेः "प्रतिपक्षात् गिलं श्रेयस्ततोऽप्युञ्छं प्रशस्यते" स्मृत्यन्तरे चोक्तम्। उञ्छ गिलमिति समस्तमपि यद्वान्तरं केचिदिच्छन्ति। उञ्छेन पक्षिचञ्चूपहृतकणेन गिल्यते संचीयते इति तद्व्युत्पत्तेः "ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम्। मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम्" मनुः।

उञ्छ र० उञ्छि-भावे ल्युट्। आपणशेलादिपतिते शेलखामिगृहीतविक्रीतावशिष्टस्य धान्यादेः कणस आदाने

उञ्छशिल न० शिल-अपहारे क १त०। शेलखामिना गृहीतशस्यात् शेलात्कणशः समुच्चयरूपे आहरणे। अस्य

दन्त्यमकारमध्यतामपि केचित् पृषोदरादि० कल्पयन्ति ।

उट न० उ+टक् नेत्वम् । १क्षणे, २पर्व च ।

उटज पुंन०उटेभ्यो जायते जन+ड । पत्राद्दिनिर्मितशालायां मन्वादिष्टे । "उटजद्वाररोधिभिः" "स्रगेर्वल्लितरोमन्थ मुटजाङ्गनभूमिषु" रघुः "नवोटजाभ्यन्तरसंभृतानलम्" कुमा०

उठ गतौ भ्वा०पर०सक०सेट् । ओठति ओठीत् । उवोठ ऊठतुः ओठिता उठ्यात् ओठिष्यति औठिष्यत् ।

उड संकृतौ सौत्र० पर०अक० सेट् । ओडति औडीत् । उवोड ऊडतुः । ओडिता उड्यात् ओडिष्यति औडिष्यत् । उडु

उडु क्लो न० उड-बा० कु । १नक्षत्रे, २जले च क्लीबे वा ऊङ् । "इन्दु प्रकाशस्तिमितोडुतल्पाः" । "उत्तस्थिवोडुभिरतीवतरां गिरोभिः" माघः ।

उडुचक्र न० उडूनां चक्रमिव मण्डलम् । १नक्षत्रमण्डले भचक्रे तस्य संस्थितिर्व" सि०शि० उक्ता उडुयन्त्रे तच्च दर्शितम् । उडुचक्रस्वरूपादि क्ली० सि० उक्तम् यथा "ब्रह्माण्डमध्ये परिधिर्योमकक्षाभिधीयते । तन्मध्ये भ्रमणं भानामधोऽधः क्रमयत्तथा । मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दुजेन्दवः । परिभ्रमन्त्यधोऽधस्थाः सिद्धविद्याधरा यथा" । "ब्रह्माण्डान्तःपरिधिस्तुल्य मानं दत्तं व्योमकक्षा मध्यमाणाकाशकक्ष्योच्यते । तन्मध्ये ब्रह्माण्डमध्य आकाशे भानां नक्षत्राणां सर्वेषां सर्वतस्तुल्योर्ध्वान्तरितानां भ्रमणं भवति । तथा तुल्योर्ध्वान्तरेणाधोधोनक्षत्रेभ्यः शनिश्चरस्य तिथीश्वरार्कशुक्रबुधचन्द्राश्चयस्मात् परिभ्रमन्ति । सिद्धा विद्याधरागणाश्चाधस्थास्तेभ्यश्चन्द्रादधः स्थिता अधोऽधः क्रमेणाकाशे स्थिताः । प्रवहवायावेव स्थानाभावाच्चन्द्रवच्च तेषां परिभ्रमः" रं०ना० । तस्योत्पत्तिविभागस्तत्रैव । "पुनर्हादशधात्मानं व्यभजद्राशिसञ्ज्ञकम् । नक्षत्ररूपिणं भूयः सप्तविंशात्मकं वशी" स्कं० सि० । "पुनरमल रसात्मान हादशधा हादशस्थानेषु राशिसंज्ञकं व्यभजत् मनःकल्पितं दत्तं हादशविभागं राशिचक्रमकरोदित्यर्थः । भूयो द्वितीयवारमात्मानं नक्षत्ररूपिणं सप्तविंशात्मकं व्यभजत् । मनःकल्पितं तदेव दत्तं सप्तविंशतिविभागं चाकरोदित्यर्थः । ननु न्यूनाधिकविभागाः कथं न जाताः ? उत्तरत्रुट्यायां नियामकाभावादित्यत आह वशीति । वृत्त्याविषयं वशं विद्यते यस्येति वशी स्वतन्त्र इत्यस्य निशेषणमर्कस्यात् । स्वेच्छया तत्तत्त्रुट्याका विभागाः कृता इति भावः । सप्तविंशतिविभागस्तत्रुट्यादि नक्षत्राणि तारात्मकानि निर्मितानीत्यर्थस्तिद्धम्" रं०ना० । तत्र राशिनक्षत्रनामानि ज्योति०त०उक्तानि यथा "मिथुनमिथुनकर्कटसिंहाकन्यातुलाधरद्वयिकभम् । धनुरथ मकरः कुम्भोमीन इति च राशयः कथिताः" । "अश्विन्या सह भरणी कृत्तिकापादः कीर्त्तितोमेषः । वृषभः कृत्तिकायेषं रौहिण्यर्द्धस्य मृगशिरसः । मृगशिरसोर्द्धं चार्द्रा पुनर्वसोस्त्रिपादं मिथुनम् । पादः पुनर्वसोरन्त्यः पुष्योश्लेषा च कर्कटः कथितः । सिंहोऽथ मघा पूर्वफल्गुनीपादउत्तरायाः । तत्कन्येयं कृत्वा च चित्रार्द्धं कन्यकाख्यः स्यात् । तौलिनि चित्रार्द्धं स्वातिविशाखायाश्च पादत्रयम् । अलिनि विशाखापादस्तथानुराधाश्रिता ज्येष्ठा । मूलं पूर्वाषाढा प्रथमस्वाभ्युत्तरांशको धन्वी । मकरस्तत्परियेषं श्रवणार्द्धं धनिष्ठायाः । कुम्भोऽथ धनिष्ठार्द्धं शतभिषापौर्व्वभाद्रपदत्रयम् । भाद्रपदायाः शेषस्तथोत्तरा रेवती मीनः" अश्विन्यादिनक्षत्राणां तारासंख्यातत्सन्निवेशस्वरूपं च श्रीपतिनोक्तम् । "वह्निविक्रतिषुगुणेन्दुलतानि भूतवाणाश्विनेत्रशरभूकृगुणाग्निरामाः । कृष्णाग्निरामगुणवेदयतद्विगुणदन्ना वुर्क्षनिर्गदिताः क्रमशो भतारा: । तुरगमुखसदृक्षं योनिरूपं क्षुराभं शकटनिभमथैणस्योक्षमार्क्षेण तुल्यम् । मणिदृक्शरचक्राभानि याक्षोपमं च शयनसदृशमन्त्यद्वात् पर्य्यङ्करूपम् । कृताकारमजलमौक्तिकसमं चान्त्यत् प्रयाक्षोपमं विषाणं तोरणवत् स्थितं बलिनिभं स्यात् कृपाणाभं परम् । क्रुध्यत्केसरिविक्रमेण सदृशं गव्याक्षमानं परं चान्त्यद्वन्निविक्षासदृत् स्थितमतः पट्टाकटक्यक्षि च । त्रिविक्रमाभं च तदङ्गरूपं दत्तं ततोऽन्त्यद्वयसदृश्याभम् । पर्य्यङ्कतुल्यं तुरगासुकारभित्येवमन्त्यादिभचक्ररूपम्" ।

भचक्रपरिधिमानम् सि०शि० उक्तम् "अभ्रेषिभाद्भुजगरुद्रगोऽब्धिपक्षाः" (२५८८८८५०योजनानि कक्षां स्पृशन्ति गणका भगणस्य चेमाम्" । तस्य भूमध्यात्उच्छ्रितियोजनानि तु तत्तत्रोक्तानि यथा "नागाब्धिभद्वयरसाग्निकृभेदसंख्यो" (४१२६३६५८) नक्षत्रमण्डलभवः स्ववहो निरुक्तः" । अस्य च हादशधा विभक्तस्य प्रवहवायुना भ्राम्यमाणस्य दिने घणार्द्धत्रयः रात्रौ च घणामिति भेदः । "स्वादुक्रमो निजनिजोदयभानुतुल्ये सूर्य्येऽस्तभास्करसमोऽस्तमयस्य भानाम्" सि०शि० उक्तेः । २तारायां समूहे च "वृत्तेष्व पर्य्यन्तचरोडुचक्रः" माघः ।

उडु(डू)प पुं० उडुनि जले पाति पा-क । १प्लवे भेलायाम् ।

'उडुपप्लवसन्तारोयत्न नित्यं भविष्यति" भा०आ० ८०अ०। "वह्नेर्वारिवडुत्वं फेनोडुपपरिप्लुतम्। भा०व०१७६। "तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्" रघुः। उडुरूपजलसन्तारहेतुत्वादस्य उडुपत्वम्। चर्मावनद्धयानपात्रे न० तच्छोकव्याख्याने मल्लिनाथेन "उडुपेन चर्मावनद्धयानपात्रेणेत्यभिधाय "चर्मावनद्धसडुपं प्लवकाष्ठं कस्यचिदिति" सञ्जनोक्तिरुदाहृता। प्रघो०। अडपोऽपि प्लवे अमरटी०। उडुनि उडुर्मा नक्षत्राणि पाति पा-क। २चन्द्रे स हि ताराणां पतिरतस्तत्त्वम्। उडूनां दिवा हि सूर्यकिरणैरभिभवात्प्रकाशत्वेन रात्रौ च प्रकाशकत्वेन निशाधीशचन्द्रस्य तत्पतित्वम्। एवम् "नक्षत्राणामहोरात्रमोषधीनां तथैव चेति" का०ख० प्रजापतिना तदधीशत्वदानसूत्रम्"। गोतायामपि "नक्षत्राणामहं शशी" इत्युक्तेः तन्मध्ये तस्य श्रेष्ठत्वादपि तत्पतिता "सलिलमये शशिनि" दृह०सं० तस्य जलमयत्वोक्तेः उडुमयत्वात् जलमयत्वात् तस्य उडुपतित्वं वा बोध्यम् दक्षकन्याश्विन्यादितारापतित्वाद्वा तथात्वम्।

उडु(डू)पति पु० उडूनां पतिः। १चन्द्रे २जलेशे वरुणे च। "परिसुषतां वणिगिवोडुपतेः" माघः। "रसात्मकस्योडुपतेश्च रश्मयः" कुमा०।

उडुप्लव पु० उडूनां प्लवात्। आकाशे। तत्र हि उडूनां प्रत्यहं प्रवहवायुना भ्रमणात् तथात्वम्।

उ(डु)डुम्बर पु० उं जलं डुम्बति क्षिणोति ख उम्बरः उत्कृष्टः उम्बरः प्रा०स० पृषो० दस्य वा डत्वम्। (यज्ञ डुम्बर) १यज्ञाङ्गे इध्मे २ताम्रे च, यज्ञियवृक्षत्वात् २देवेऽप्यस्य ३कृतभेदे च म०। "उ(डु)डुम्बरो यज्ञफलो यज्ञाङ्गो हेमदुग्धकः। उदुडुम्बरोक्षितोऽक्षो गुरुपित्तकफाञ्जित्। मधुरस्तुवरोवर्ण्यो व्रणशोधनरोपणः" इति भा० प० उक्तगुणकः। तस्य विकारः अण्। औ(डु)डुम्बर तद्विकारे पात्रादौ त्रि०। स्त्रियां ङीप्। "गृहीत्वौडुम्बरं पात्रं जानुभ्यां धरणिं गतः" स्मृतिः। "औडुम्बरीं स्रुचं गायेत" स्मृतिः। [ङीष्। दन्त्योष्ठ्ये शब्दच०।

उडुम्बरपर्णी स्त्री उडुम्बरस्य पर्णमिव पर्णमस्याः गौरा०

उडुराज् पु०उडुषु राजते राज-क्विप्। चन्द्रे। अच्, उडूनां राजा टच् समा० वा। उडुराजोऽप्यत्र "तदोडुराजः ककुभः करैर्मुखं प्राच्याविलिम्पन्" भाग०१०, २८अ०।

उडुलोमन् पु० उडुरिव लोमास्य। ऋषिभेदे। तस्यापत्यम् बाह्वा०दञ्। औडुलोमि तदपत्ये पुंस्त्री०। बहुषु अकारः। उडुलोमाः। [विरूपेऽडुडयने निराशतायाम्" नैष०।

उड्डयन न० उद्+डी-ल्युट्। पक्षिणामूर्द्धगतौ "गतो

उड्डामर त्रि० उत्कटो डामरः प्रा०स०। १उद्भटे २श्रेष्ठे च ३तन्त्रभेदे पु०। [तिभेदे।

उड्डीन न० उद्+डी-भावे क्त। ऊर्द्धेनापतनरूपे खगग-

उड्डीयन न० उद्+डी-ड उडुःस्वाचरति क्यङ् उड्डीय-भावे ल्युट्। १ उत्पतने। "कथमुड्डीयनेऽशक्तान् पतने च समात्मजान्" भा० आ० २२३अ०। उड्डीय-कर्त्तरि ताच्छील्ये वा चानश्। उड्डीयमान उड्डयन कर्त्तरि तच्छीले च त्रि०।

उड्डीश पु० उद्+डी-क्विप् तस्य ईशः। उत्पतन कर्तृणामीश्वरे १महादेवे २तन्त्रभेदे च मेदि०। योगिनां हि उत्पतनं योगशास्त्रप्रसिद्धम् महादेवस्य च तदीशत्वात् तथात्वम्। उड्डीशतन्त्रस्य तु उत्पतनसाधनोपायविधायकत्वात् तथात्वम्।

उ(ओ)ड्र पु०उड-मौ० वा० रक् र वा उ-र-रक् वा डुगागमोवा। कूर्मविभागस्यप्राच्यदेशभेदे "सवङ्गाङ्गान् सपौण्ड्रोड्रान् सुचोलान् द्रविड्राम्बकान्" भा० ब० ५६ अ०। ओ(उ)ड्रदेशस्य कूर्मविभागे ह०सं० प्राच्यतयोक्तेः यथा "प्राच्यामित्युपक्रम्य मिथिलसमतटोड्राश्वदनदन्तुरकाः" इति। स च उत्कलात् भिन्नएव तत्रैवानन्तरम् "पौण्ड्रोत्कलकाशिमेकलाश्चड्राः इत्युक्तेः। भारते च सहदेवदक्षिणदिग्विजये "पाण्ड्रांश्च द्रविडांश्चैव सहितान्त्रोड्रकेरलैः स०३० अ० उक्तेस्तस्य कलिङ्गानन्तरोक्तेः दक्षिणत्वात् तथात्वम् कूर्मविभागे प्राच्यत्वमिति न विरोधः। सर्वत्र उड्रशब्दस्यवर्णात् उकारादित्वम् रघुनन्दनेन तु ओड्रादिदेश्यव्यवस्थितमित्युक्तत्वात् ओकारादित्वमपि। अस्य देशस्यादित्वात् तस्य राजा तदस्याभिजन इत्यर्थे च अण्। ओड्र तद्राजे तद्वासिनि च बहुषु तस्य लुक्। उड्राः तद्राजेषु तद्विवासिषु च।

उणक त्रि०ऊण-अपसारणे खुञ् गौरा०उणक इति पाठात् नि० ह्रस्वः। अपसारके। स्त्रियां गौरा०ङीष्। उणकी।

उणादि पु०उण्प्रत्यय आदिर्येषाम्। शाकटायनोक्ते उण्प्रभृतौ प्रत्ययसमुदाये। "उणादयो बहुलम्" "ताभ्यामन्यत्रोणादयः" पा०। "उणादयोऽव्युत्पन्नाः प्रातिपादिकानीति" पा०भा०। व्युत्पन्ना इति पाठान्तरम्। व्युत्पत्तिपक्षाभिप्रायेणैव "राघवस्य ततः कार्य्यं कार्ष्ण्यनरपुङ्गवः" इति भट्टौ कार्य्यमित्यत्र द्वितीया अव्युत्पन्नत्वे

सा च स्यादिति बोध्यम् उणादिवृत्तिश्च उज्ज्वलदत्तकृता प्रसिद्धा ।

उण्डुक पु० "गर्भस्य यकृत्प्लीहानौ शोणितजौ । शोणितफेनजः फुफ्फुसः शोणितकिट्टप्रभव उण्डुकः" इति सुश्रुतोक्ते रुधिरकिट्टजाते देहस्थमलाशये कोष्ठभेदे तन्मलविभाजकत्वं कलाभेदस्य तथोक्तं यथा "यकृत् समन्तात् कोष्ठञ्च तथान्त्राणि समाश्रिता । उण्डुकस्थं विभजते मलं मलधरा कला" सुश्रु० देहमध्यस्थविभागमुक्ता सुश्रु० "तस्य पुनः संस्थानम् त्वचः कला धातवो मला दोषा यकृत्प्लीहानौ फुफ्फुस उण्डुको हृदयमाशय" इत्युक्तम् । "स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च । फुप्फुसस्य कोष्ठ इत्यभिधीयते इति तस्य आमाशयपक्वमूलाद्याधारसङ्गम । यल्योद्धारे च तत्रैव । "अस्थियल्लमन्यद्वा तिर्यक् कण्ठासङ्गमवेक्ष्य कोष्ठोण्डुकं दृढैकस्तम्भवद्वम् कृत्वभक्तोपधिनं पाचयेत् ।

उत् अव्य०उ-क्विप् । १प्रश्ने २वितर्के ३संशये ४अस्त्यर्थे ५उञ्छे च । ६उदिते त्रि० । "तस्य उदितिनाम" छा०उ० । उद् इति वा छेदः ।

उत अव्य०उ-क्त । १विकल्पे, २समुच्चये, ३वितर्के ४प्रश्ने, ५अस्त्यर्थे च । "यदक्रन्दः प्रथमं जायमान उद्यन्त् समुद्रादुत वा पुरीषात्" यजु० २८,१२ । "मानाग्निहोत्रमुत मान मौनम्" भा० आ० ३६२अ० । "एतावन्ति च दासानां सहस्राण्युत सन्ति मे" भा०स०२२१अ० । "तत् किमत्र मातपदोषः स्यादुत यथा मे मनसि वर्त्तते" शकु० । "वीरोऽसः किमयमित्युत दर्पणेषः" वीरच० "प्रभुः प्रहर्त्तुं किमुतान्तकोऽपि" रघुः । "शारदेन विरोधी न स्वाभाषो भरवानुत" किरा० । "धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत" ज्ञानमाहत्म्य तु तमः प्रमादे सञ्जयत्युत" गीता । [प्रोतञ्च" श्रुतिः

उत त्रि० वेञ्-क्त । स्यूते ग्रथिते अमरः "ओतञ्चोतञ्च ।

उतङ्क पु० आयोदधैम्यशिष्यवेदनामकस्य मुनेः शिष्यभेदे तदुपाख्यानञ्च" भा० आ० ३अ० । वेदमुनिं प्रक्रम्य "स कदाचित् यात्रकार्य्येणाधिप्रस्थित उतङ्कनामानं शिष्यमियोजयामास" इत्युपक्रम्य "तत्तोस्य ! गम्यतामनुजाने भवन्तं श्रेयोऽवाप्तुहीति स उपाध्यायेनानुज्ञातो भगवानुतङ्कः कुण्डलाभ्यां प्रतिविधीर्षुर्हास्तिनपुरं प्रतस्थे" इत्यन्तेन विस्तरेण तद्वरितसुपवर्ण्य तम् । तस्यायं सङ्क्षेपः। गुरुदक्षिणादानार्थं गुरवे उतङ्केन निवेदिते गुरुणा स्वपत्नीवचनात् पौष्यन्तपबधृष्टतक्षकुण्डलद्वयमेव गुरुदक्षिणात्वेन कल्पितम् तच्च पौष्यन्तपत्नीधृष्टं कुण्डलद्वयं प्राप्य आनयतस्तस्य प्रमादतस्तत्रकेणापकृतम् अथ वञ्चितो लब्धवरप्रसादात् नागलोकं गत्वा धूमप्राचुर्य्येण नागलोकावरणे तद्वयाक्तकुण्डलद्वयं नागैर्दत्तमानीय गुरुपत्न्यै दत्तमिति

२भार्गवे गौतमस्य शिष्यभेदे च तत्कथा भारते "उतङ्को महता युक्तस्तपसा जनमेजय ! । गुरुभक्तः स तेजस्वी नान्यत् किञ्चिदपूजयत् । सर्वेषामृषिपुत्राणामेष आसीन्मनोरथः । औतङ्कीं गुरुवृत्तिं वै प्राप्नुयामेति भारत ! । गौतमस्य तु शिष्याणां बहूनां जनमेजय । उतङ्के ऽभ्यधिका प्रीतिः क्षेत्रज्ञत्वाभवत्तदा । स तस्य दमशौचाभ्यां विक्रान्तेन च कर्म्मणा । सम्यक् सेवोपचारेण गौतमः प्रीतिमानभूत् । अथ शिष्यसहस्राणि समनुज्ञातवान्मुनिः । उतङ्कं परया प्रीत्या नाभ्यनुज्ञातुमैच्छत । तं क्रमेण जरा तात ! प्रतिभेदे महामुनिम् । न चान्वबुध्यत तदा स मुनिर्गुरुवत्सलः । ततः कदाचिद्राजेन्द्र ! काष्ठान्यानयितुं ययौ । उतङ्कः काष्ठभारस्य महान्तं समुपानयत् । स तद्भाराभिभूतात्मा काष्ठभारमरिन्दम ! । निक्षिप्येव क्षितौ राजन् ! परिश्रान्तो बुभुक्षितः। तस्य काष्ठे विलग्नाऽभूत्फटा कृष्णसमप्रभा । ततः काष्ठैः सह तदा पपात धरणीतले । ततः स भारनिक्षिप्तः क्षुधाविष्टश्च भारत ! । दृष्ट्वा तां वयसोऽवस्थां रुदोदार्त्तस्वरं तदा । ततो गुरुसुता तस्य पद्मपत्रनिभानना । अभ्याक्रामत्पुनः सुश्रोणी करेण पृथुलोचना । पितुर्नियोगाद्धर्मज्ञा शिरसाऽवनता तदा । तस्या निमेततुर्दन्तौ करौ तैरक्षविन्दभिः । न हि तानश्रुपातांस्तु शक्ता धारयितुं मही । गौतमस्तत्रवोद्विग्नमुतङ्कं प्रीतमानसः । कच्चात्तात ! तवाद्येह शोकोत्तरमिदं मनः । सखैरं ब्रूहि विप्रर्षे ! श्रोतुमिच्छामि तत्त्वतः । उतङ्क उवाच । एवङ्गतेन मनसा भवत्प्रियचिकीर्षया । भवद्भिरगतेनेह भवद्भावानुगेन च । जरेयं नावजुष्टा मे नाभिज्ञातं सुखञ्च मे । यतवर्षोषितं मां हि न त्वमभ्यनुजानीयाः । भवता त्वभ्यनुज्ञाताः शिष्याः प्रत्यवरा मम । उपपन्ना द्विजश्रेष्ठाः यतयोऽद्य सहस्रशः । गौतम उवाच । त्वत्प्रीतियुक्तेन मया गुरुशुश्रूषया तव । अल्पकालमवज्ञातः कालो नावबुधो द्विजर्षभ !। किन्त्वद्य यदि ते श्रद्धा गमनं प्रति भार्गव ! । अनुज्ञां प्रतिगृह्यैव त्वं स्वगेहान् गच्छ मा चिरम् । उतङ्क उवाच। गुर्वर्थं कं प्रयच्छामि ब्रूहि

त्वं द्विजसत्तम। तमुपाहृत्य गच्छेयमनुज्ञातस्त्वया विभो'। गौतम उवाच। दृष्टिणा परितोषो वै गुरूणां सङ्किरुच्यते। तव त्वाचरतो ब्रह्मंस्तुष्टोऽहं वै न संशयः। दृष्ट्या परितुष्टं मां विजानीहि भृगूद्वह!। युवा षोड़शवर्षो हि यद्यद्य भविता भवान्। ददामि पत्नीं कन्यान्तु त्वां ते दुहितरं द्विज!। एवमुक्तेऽङ्गना नाम्ना त्वत्तेजोऽर्हति सेवितुम्। ततस्तां प्रतिजग्राह युवा भूत्वा यशस्विनीम्। गुरुणा चाभ्यनुज्ञातो गुरुपत्नीमथाब्रवीत्। कं भवत्यै प्रयच्छामि गुर्वर्थं विनियुङ्क्ष्व माम्। प्रियं हितञ्च कार्ङ्क्षामि प्राणैरपि धनैरपि। यद्दुर्लभं हि लोकेऽस्मिन् रत्नमत्यद्भुतं भवेत्। तदानयेयं तपसा न हि मेऽत्रास्ति संशयः। अहल्योवाच। परितुष्टाऽस्मि ते विप्र! नित्यं भक्त्याऽनयाऽनघ!। पर्याप्तमेतद्भद्रन्ते गच्छ तात! यथेप्सितम्। वैशम्पायन उवाच। उतङ्कस्तु महाराज पुनरेवाब्रवीद्वचः। आज्ञापयस्व मां मातः! कर्त्तव्यञ्च तव प्रियम्। अहल्योवाच। सौदासपत्नीविष्टब्धे दिव्ये ये मणिकुण्डले। ते समानय भद्रन्ते गुर्व्यर्थः सुकृतो भवेत्। स तथेति प्रतिश्रुत्य जगाम जनमेजय!। गुरुपत्नीप्रियार्थं वै ते समानयितुं तदा। स जगाम ततः शीघ्रमुतङ्को ब्राह्मणर्षभः। सौदासं पुरुषादं वै भिक्षितुं मणिकुण्डले। गौतमस्त्वब्रवीत् पत्नीमुतङ्को नाद्य दृश्यते। इति दृष्ट्वा तमाचष्ट कृतकृत्यार्थ मागतञ्च वा। ततः प्रोवाच पत्नी स न ते सम्यगिदं कृतम्। अयं स पार्थिवो नूनं ब्राह्मणं तं वधिष्यति। अहल्योवाच। व्रजात्मा नियुक्तः स भगवन्! ब्राह्मणोमया। भवत्प्रसादाद्व भयं किञ्चित्तस्य भविष्यति। इत्युक्तः प्राह तां पत्नीमेवमस्त्विति गौतमः। उतङ्कोऽपि वने शून्ये राजानं तं ददर्श ह"। आश्व० ५६ अ०। इतश्चैतत्तुकुण्डलधारणादिकं नागतत्त्वविज्ञानोपयोगं वह्निप्रसादात्तत् नागलोकादानीय गुरुपत्न्यर्थं तद्दानमुक्तमित्ययं संक्षेपो विस्तरस्तत्र द्रष्टव्यः। अस्यैव तोयाभिलाषपूरणार्थमीश्वरेण उतङ्कमेघः प्रवर्त्तितः तत्कथा उतङ्कमेघशब्दे द्रष्टव्या।

उतङ्कमेघ पु॰ उतङ्कार्थमीश्वरेण प्रवर्त्तितोमेघः। महदेश्वर्य्योतङ्कतोयाकाङ्क्षापूरणार्थमीश्वरेण कृष्णेन नियोजिते मेघे। तत्कथा भा॰ आश्व॰५५अ०। "उतङ्क उवाच। अवश्यकरणीयञ्च यदेतन्मन्यसे विभो'। तोयमिच्छामि यत्रेष्टं करुषेतद्धि दुर्लभम्। ततः संस्मृत्य तत्तेज प्रोवाचेतङ्कमीश्वरः। दृष्टव्ये सति चिन्योऽहमित्युक्त्वा द्वारकां ययौ। ततः कदाचिद्भगवानुतङ्कस्तोयकाङ्क्षया। ह्रदितः परिचक्राम मरौ सस्मार चाच्युतम्। ततो दिग्वाससं धीमान्नातङ्गमलपङ्किनम्। अपश्यत मरौ तस्मिन् शयूथपरिवारितम्। भीषणं वह्निनिश्वासं वाणकार्मुकधारिणम्। तस्याधः स्रोतसो दृष्ट्वा द्वारि भूरि द्विजोत्तमः। अरक्षेव च तं प्राह मातङ्गः प्रहसन्निव। एतु तङ्क! प्रतीच्छस्व मत्तो वारि भृगूद्वह!। त्वया हि मे सुमहती त्वां दृष्ट्वा तुष्टिरान्वितम्। इत्युक्तेन स तुनिस्तस्तोयं नाभ्यनन्दत। चिक्षेप च स तं धीमान् वाग्भिरूपाभिरच्युतम्। पुनः पुनश्च मातङ्गः पिबस्वेति तमब्रवीत्। न चापिबत् स सक्रोधः क्षुधितेनान्तरात्मना। स तयो निश्चयात्तेन प्रत्याख्यातो महात्मना। ऋषिभिश्च महाराज! तत्रैवान्तरधीयत। उतङ्कस्तं तथा दृष्ट्वा ततो व्रीडितमानसः। मेने प्रलब्धमात्मानं क्षुत्पीडितेनातिमायिना। अथ तेनैव मार्गेण यद्दृच्छगदाधरः। आजगाम महाबुद्धिरुतङ्कश्चैनमब्रवीत्। न दत्तं तादृशं दातुं त्वया पुरुषसत्तम। सलिलं विप्रमुख्येभ्यो मातङ्गस्तोयसा विभो। इत्युक्तवचनं तन्तु महाबुद्धिर्जनार्दनः!। उतङ्कं लक्षणया वाचा सान्त्वयन्निदमब्रवीत्। याहयेनेह रूपेण योग्यं दातुं हृतेन वै। तादृशं खलु ते दत्तं तच्च त्वं नावबुध्यथाः। मया त्वदर्थसक्तो वै वज्रपाणिः पुरन्दरः। उतङ्कायाहृतं देहि तोयरूपमिति प्रभुः। स मामुवाच देवेन्द्रो न मरौऽमर्त्यतां व्रजेत्। अन्यमद्य वरं देहीत्यवदद्भुगुनन्दन। अहृतं देयमित्येव मयैवोक्तः शचीपतिः। स मां प्रसाद्य देवेन्द्रः पुनरेवेदमब्रवीत्। यदि देयमवश्यं वै मातङ्गो हि महामते!। भूयोऽहृतं प्रदास्यामि भार्गवाद्य महामने। यद्येवं प्रतिगृह्णाति भार्गवोऽहृतमद्य वै। प्रदास्यामेव गच्छामि भार्गवस्याहृतं विभो!। प्रत्याख्यातस्त्वहं तेन दास्यामि न कथञ्चन। स तथा समयं कृत्वा तेन रूपेण वासवः। उपस्थितस्त्वया चापि प्रत्याख्यातोऽहृतं ददत्। चाण्डालरूपी भगवान्! तुभ्यङ्कस्ते व्यतिक्रमः। तच्च शक्यं मया कर्त्तुं भूय एव तपेप्सितम्। तोयेप्सां तव दुर्द्धर्षां करिष्ये सफलामहम्। येषूष्करास्तु ते ब्रह्मन्! स्थलिनेया भविष्यति। तदा मरौ भविष्यन्ति जलपूर्णाः पयोधराः। रसवच्च प्रदास्यन्ति तोयं ते भृगुनन्दन!। उतङ्कमेघा इत्युक्ताः ख्यातिं यास्यन्ति चापि ते। इत्युक्तः प्रीति-

मान् विप्रः कक्षीवान् स बभूव ह । अद्याप्युतङ्गमेधाच्च मरौ वर्षन्ति भारत" ।

उतथ्य पु० अङ्गिरसः अङ्गायां पत्न्यामुत्पन्ने गुरोर्ज्येष्ठभ्रातरि । "तयोरङ्गिरसः पुत्रा एते सर्वत्र विश्रुताः । बृहस्पतिरुतथ्यश्च संवर्त्तश्च धृतव्रतः" भा०आ० ६९अ० । तस्यापत्यम् अण् औतथ्यः स च उतथ्येन ममतायामुत्पन्नः बृहस्पतिशापात् जात्यन्धतां प्राप्तस्तत्कथा यथा

"अथोतथ्य इति ख्यात आसीद्भीमान्वितः पुरा । ममता नाम तस्यासीद्भार्य्या परमसम्मता । उतथ्यस्य यवीयांस्तु पुरोधास्त्रिदिवौकसाम् । बृहस्पतिर्बृहत्तेजा ममतामन्वपद्यत । उवाच ममता तन्तु देवरं वदतांवरम् । अन्तर्व्वत्नी त्वहं भ्राता ज्येष्ठोनारभ्यतामिति । अयञ्च मे सङ्गाभाग ! कुक्षावेव बृहस्पते ! । औतथ्यो वेदमत्यापि षडङ्गं प्रत्यधीयत । अमोघरेतास्त्वञ्चापि हयोर्नाऽत्यन्त सम्भवः । तस्मादेवञ्च नत्वद्य उपारमितुमर्हसि । एवमुक्तस्तदा सम्यग्बृहस्पतिरधीरधीः । कामात्मानं तदात्मानं न यशाक नियच्छितुम् । स बभूव ततः कामी तया सार्द्धमकामया । उत्सृजन्तन्तु तं रेतः स गर्भस्थोऽभ्यभाषत । भोस्तात ! मा गमः कामं हयोर्नास्तीह सम्भवः । अल्पावकाशो भगवन् ! पूर्व्वं चाहमिहागतः । अमोघरेताश्च भवान् पीडां कर्त्तुमर्हसि । अस्त्वेवं तु तदाख्यं गर्भस्थस्य बृहस्पतेः । जगाम मैथुनायैव ममतां चारुलोचनाम् । शुक्रोत्सर्गं ततो बुद्ध्वा तस्या गर्भगतो मुनिः । पद्भ्यामारोधयन्मार्गं शुक्रस्य च बृहस्पतेः । स्थानमप्राप्तमप्रतर्द्दृतः प्रतिहतं तदा । पपात सहसा भूमौ ततः क्रुद्धो बृहस्पतिः । तद्दृष्ट्वा पतितं शुक्रं गर्भाप्य स रुषान्वितः । उतथ्यपुत्रं गर्भस्थं निर्भर्त्स्य भगवान्मुनिः । यस्मात्त्वमीदृशे काले सर्व्वभूतेप्सिते सति । एवमात्थ वचस्तस्मात्तमो दीर्घं प्रवेक्ष्यसि । स वै दीर्घतमा नाम गर्भादृषिरजायत । बृहस्पतेर्बृहत्कीर्त्तेर्बृहस्पतिरिवौजसा । जात्यन्धो वेदवित्प्राज्ञः पत्नीं लेभे स विद्यया । तरुणीं रूपसम्पन्नां प्रद्वेषीं नाम भार्गवीम् । स पुत्रान्जनयामास गौतमादीन् महायशाः । अङ्गेरुतथ्यस्य तदा सन्तानकुलवृद्धये । धर्म्मात्मा च महात्मा च वेदवेदाङ्गपारगः । गोधर्म्मं गौरभेयाच्च गोधीत्य निखिलं मुनिः । प्रावर्त्तत तदा कर्त्तुं श्रद्धावांस्तमशङ्कया" । भा०आ० १०४अ० । "मूढ्वादेर्वो पतत्यत्रे कृतयूतनयस्य च" मनुः । "उतथ्यूतनथस्य गोतमस्येति" कुल्लू० । तस्य उतथ्यगोत्रापत्येऽपि तत्कुलवर्द्धनात्तथात्वं तस्य जात्यन्धतया स्मृतिकर्त्तृत्वाभावेन तत्पौत्रस्यैव गौतमस्य स्मृति कर्त्तृत्वात् तस्यैव सम्मतिकथनं युक्तमिति" "तथाप्युतथ्या नुवज्जगादाङ्गे गदाग्रजः" माघः । अयञ्च आङ्गिरसगोत्रप्रवरमध्यस्य ऋषिभेदः ८१७पृ० विवृतः ।

उतथ्यानुज पु० ६त० । बृहस्पतौ उतथ्यावरजादयोऽत्र । "तथाप्युतथ्यानुवज्जगादाङ्गे गदाग्रजः" । [चारे च

उताहो अव्य०उत च आहो च द्व० । १विकल्पे, २प्रश्ने ३विमर्शे च ।

उत्क त्रि० उद्गतं मनोऽस्य उद्+नि०-क । १उत्कण्ठिते २अन्यमनस्के । "अगमयदृश्यतासमागमोत्कः" कुमा० । "तच्छ्रुत्वा च श्रवणसुभगं गर्ज्जितं मानसोत्काः" मेघ०" । "उत्कं धरं दृष्टुमवेक्ष्य गौरिसत्कन्धरं दारुक इत्युवाच" माघः ।

उत्कच त्रि० उद्गतः उन्नतो-कचोऽस्य । १विकचे केशशून्ये २उन्नत केशे च "प्रथम्य विकचः पादावस्पृक्षात् स पितुस्तदा । मातुश्च परमेश्वासस्तौ च नामास्य चक्रतुः । घटोत्कोत्कच इति माता तं प्रत्यभाषत । अश्रौषीत्तेन नामास्य घटोत्कच इति श्रुत सा" भा०आ० १५६अ० ।

उत्कट पु० अतीव कटति उद्+कट-अच् । १रक्तौ, २शरे च शब्दरत्ने । (तेजपात) ४गुडत्वचि (दारचिनि) च न० । ४अविसंवादिविषये त्रि० । उत्ककोटिसम्भवना तत्तौत्कट्यं विषयतानिरूपकः स च अविसंवादिप्रवृत्तिप्रयोजकताप्रयोज्य इति नव्यनैयायिकाः । उद्गतः कटः आवरणं यस्य प्रादि०ब० । ५तीव्रे त्रि० । ६भिल्लकटे गजे पु० । "चन्द्रांशुनिकराभासाहाराः कासास्थिदुत्कटाः" रामा० । घटोत्कटः । "शुक्रयोनिसंयोगे यो भवेद्दोष उत्कटः" सुश्रु० "कितवा यानि दीव्यन्तः प्रलपन्त्युत्कटा इव" भा० स०६३अ० । ६विषमे त्रि० उत्कठाधनस् "कांश्चित्तु कूटजानान्तु विटमेषूत्कटानिव" भा०व० १५६अ० । ७सैन्ये नायाम् स्त्री ।

उत्कण्ठ पु० उद्गतः कण्ठं पादोऽस्य । "नारीपादौ च कृत्तेन धारयेद्बलके पुनः । स्त्रीनामितकरः कामी बन्धश्चोत्कण्ठसंज्ञितः" इति रत्यङ्गे बन्धभेदे उद्गतःकण्ठो यस्य । २उद्ग्रीवे त्रि० । "रथस्थमुत्कण्ठजनः" रघुः ।

उत्कण्ठा स्त्री० उद्+कठि-अ । इष्टलाभाय कालासहनरूपे १औत्सुक्ये २चिन्तायाञ्च । "वासत्यदा शकुन्तलेति कृतवं संस्मृत्यत्कण्ठया" शकु० । "उत्कण्ठायां हृदि न कुरुते कारणानां सकल्पम्" घटाकर्प० "त्वामत्कण्ठा विरचित-

मदम्" मेघातिथिवचनात् भवनमिति:" मेधदू०।

उत्कण्ठित त्रि० उत्कण्ठा जातास्य तारकादि० इतच्। १उत्कण्ठायुक्ते २नायिकाभेदे स्त्री। "साक्षेपाक्षुत्तनविरतोत्कण्ठमुत्कण्ठितेन" मेघदू०। नायिकाभेदस्तु "आगन्तुं कृतचित्तोऽपि दैवात्प्रायाति यत्प्रिय। तदनागमदुःखेन विरहोत्कण्ठिता तु सा" सा०द० उक्तः। "उत्कण्ठितास्मि तरले! न हि मह्यि सखि! पिच्छिलः पन्थाः सा०द०।

उत्कता स्त्री उत्कं तनोति तन-ड। गजपिप्पल्याम् शब्दच० उत्कस्य भावः तल्। २ उत्सुकतायाम्।

उत्कन्धर त्रि० उन्नतः कन्धरोऽस्य प्रा०ब० वा मतलोपः। उन्नतग्रीवे "उत्कन्धरं दारुकदत्तुवाच" माघः।

उत्कम्प पु० उत्कृष्टः कम्पः प्रा०त०। १ कम्पे २ कम्पने। "लोकम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि" मेघः। भावे ल्युट्। उत्कम्पनमप्यत्र न०। व्याधिजरा-"टिवीतार्द्धभ्रमीच्छोत्कम्पनादित्" शैत्यभवस्योत्कम्पनादयः" इति च सा०द०। उत्कम्पते अच्। २उत्कम्पान्विते त्रि०। "विश्लथोत्कम्पहृदया नाम चक्रुर्मुहुर्मुहुः" भा०प० ३० अ०। णिनि। उत्कम्पिन् स्त्रियां ङीप्। उत्कम्पान्विते, उत्कम्पयति णिजन्तात् णिनि उत्कम्पकारके च "किमिदं हृदयोत्कम्पि मनोमम विषीदति" रामा०।

उत्कर पु० उद्+कॄ-अप्। १धान्यादीनां राशीकरणे २ प्रसारणे, ३ हस्तापसारणे ४ हस्तपदादिविक्षेपे ५ समूहे च। "हस्तप्रसारोत्करयुतं कलुषं विषसंयुतम्" सुश्रु०। "क्षेत्रोत्करसंमिश्रमयोकालमिवोत्करम्" भा०व० १११५०। कर्मणि अप्। ६ उत्कीर्य्यमाणे धूल्यादौ "अथ खनति प्राञ्चमुत्करमित्किरति" शत०ब्रा० १,९,१,६,। उत्कीर्य्यतेऽत्र आधारे अप्। पांश्वादेरुत्क्षेपाधारे गर्त्तादौ, "चत्वालोत्करावन्तरेण सञ्चरः" कात्या० १,२,४२, सञ्चरोमार्गः चत्वालोगर्त्तः उत्करस्तत्क्षेपणगर्त्तस्तयोरन्तराले विहितकार्य्यार्थं सञ्चारमार्गः। "प्रणीतोत्करावग्निषु" कात्या० १,२,४२,।

उत्करादि पु० चतुर्य्याम् "उत्करादिभ्यश्च" पा०विहितप्रत्ययनिमित्ते शब्दगणे च गणः "उत्कर संफल शफर पिप्पल पिप्पलीसूत्र अश्वत्थ खदिर भूर्यवाव स्रावनाय नैवाकाय हस्त हस्त याक यकाय विलिमीया अनेक आतप फल सम्भर अर्क नर्त्त अग्नि वैराग्यक दृढ़ा अरण्य निधान पर्ण नीचायक शंकर अवरोहित ज्ञार विशाल वेत्र अरीहण खण्ड वातागर मन्त्रणार्ह इन्द्रहस्त निशान्ताष्ट आर्द्रहस्त"। ङ उत्करीय तत्संचिहितदेशादौ त्रि०।

उत्कर्ण त्रि० उन्नतःकर्णो यस्य यस्मिन् वा प्रा०ब० वा मतलोपः। श्रुतकर्णोत्तोलने "उत्कर्णमुद्गाहितकन्धरेण" माघः।

उत्कर्त्तन न० उत्+कृत-ल्युट्। १ छेदने २ उत्पाटने "दंशस्योत्कर्त्तनं कुर्यादल्पस्रावमुखस्य च" सुश्रु० उत्कर्त्तनस्य मूढगर्भचिकित्सोपायः। सुश्रुते दर्शितः यथा। "उत्कर्षणापकर्षणस्थानापवर्त्तनोत्कर्त्तनभेदनच्छेदनपीडनजूंकरणटारणानि"। उत्कर्त्तनकर्म्मयोग्यता च पुष्पफलालाबुकालिन्दकतपुसैर्यावकार्कवार्कप्रभृतिषु क्षेद्यविशेषान् दर्शयेदुत्कर्त्तनपरिकर्त्तनानि चोपदिशेत्" सुश्रु० उन्नतवस्तुषु उपरिशस्त्रचालने तदीसोपरिस्थ सूक्ष्मावयवखण्डन न त्वकखण्डन यथाभवति एवं गर्भरज्जुना उपरितनवस्तुमात्रच्छेदन यत्तदुत्कर्त्तनमिति तिलार्थमुत्कृत्तमिति तात्पर्य्यम्। २ उत्पाटनच्छेदने च।

उत्कर्ष पु० उद्+कृष-घञ्। १प्राबल्ये २अतिशये ३स्वकीयात् परकीयस्योत्कर्षव्यवहारे। यथा पतितमाषिकाणां स्वजाते दैवादकरणे मृतसजातीयपरमाषीयतिथौ करणम् "एकोद्दिष्टे तु संप्राप्ते यदि विघ्नं प्रजायते। मासिन्यस्मिन् तिथौ तस्मिन् तदा दद्यात् विचक्षणः" इति स्मृतौ-तथा विधानात्तस्य तथात्वम्। "पञ्चानामपि भूतानामुत्कर्षं पुरुषगुणाः" रघुः। स्त्रीणाञ्च उत्कर्षः भर्त्तृगुणैरेव "यादृग्गुणेन भर्त्रा स्त्री संयुज्यते यथाविधि। तादृग्गुणा सा भवति समुद्रेणेव निम्नगा। अतश्चाद्या वर्णेन संयुक्ताऽधमयोनिजा। शारङ्गी मन्दपालेन जगामाभ्यर्च्चनीयताम्। एतान्याद्यास्त्रयोऽप्युक्तास्त्रयस्तु प्रसूतयः। उत्कर्षं योषितः प्राप्ताः स्त्रैः स्त्रैर्भर्त्तृगुणैः शुभैः" मनुः। "उत्तमैरुत्तमैर्नित्यं संबन्धानाचरेत् सदा। निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत्" मनुः।

उत्कर्षः निश्चितबाधकस्य अच्। ४उत्कर्षनिमित्ते त्रि० "निमित्तभावत्वं जैमिन्युत्कर्षे च प्रयोजकम्। रजस्वलानुलासादेः सुरापाणसमानितु" या०स्मृ०। उत्कर्षमुत्कर्षनिमित्तं राजकुलादावधत्तवेद एव चतुर्वेदोद्धृम्" इत्यत्रतभाष्यम्" मिता०। उत्कृष्यते अपकृष्टेभ्योगुणविशेषेण विभज्यत इति व्युत्पत्त्या गुणविशेषहारेण

अपकृष्टात् विभजनम्। स च स्वस्वजातिषु उत्तमगुणे-नैव। तत्र विप्राणां विनयविद्यादिना, राज्ञां शौर्य्यवी-र्य्यादिना, वैश्यानां धनादिना, शूद्राणां नम्रतादिना। एवमन्यत्रापि यथायथमूह्यम्। द्वयोर्मध्ये एक-स्योत्कर्षेऽर्थे तरप् विद्वत्तरः शूरतरः बहूनां मध्ये तु तमप्। विद्वत्तमः शूरतमः इत्यादि। "उत्कर्षे हेतवः प्राक्ता गुणालङ्कारजातयः" सा०द०। "उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते" सा०द०। "यद्या वस्तुनामुत्कर्षा-पकर्षकृतेन संयोगविशेषेण" सुश्रु० भावे ल्युट्। उत्कर्षण-मत्र न०। उत्कृष्यते कर्षणि घञ्। ५उत्कर्षान्विते। उद्धृत्य कर्षः। ६उत्पाट्यकर्षणे उद्धरणे पु० "सन्धानमुत्कर्षमिव व्यदस्य" माघः। ल्युट्। उत्कर्षणमत्र न०। "स्फाटिकं स्थ-लमासाद्य जलमित्यभिधद्यया। वस्त्रस्योत्कर्षणं राजा कृतवान् बुद्धिमोहितः" भा०स० ४६अ०।

उत्कर्षक त्रि० उत्कर्षयति उत्+कृष-णिच् ण्वुल्। १उत्कर्षाधायके "काव्यस्योत्कर्षका उच्चले" सा०द० उद्+कृष-ण्वुल्। उत्पाद्य २कर्षणकारिणि। [त्कर्षे।

उत्कर्षित त्रि० उत्कर्षोजातोऽस्य तारका० इतच्। जातो-

उत्कर्षिन् त्रि० उत्कर्षति उत्तोल्य कर्षति। २उत्तोल्यकर्षके उद्धारके "अयं स रघनोत्कर्षी पीनस्तनविमर्दनः" सा०द० इतम्। २उत्कर्षान्विते च। स्त्रियामुभयतो ङीप्।

उत्कल पु० "जगन्नाथप्रान्तदेश उत्कलः परिकीर्त्तित" इत्युक्ते १उड्रदेशस्थे (उड़िष्या) इति ख्याते देशभेदे। स च देशः कूर्म्मविभागे प्राच्यतया दृष्ट०। उक्तः; तत्र उड्रशब्दे उक्तम्। अस्मद्देशमेतया च तस्य दाक्षिणात्यत्वमिति भेदः "उत्क-लादेशितपथः कलिङ्गाभिमुखं ययौ" रघुः। ४सुद्यु-म्नपुत्रे राजभेदे। "मनोर्वैवस्वतस्यैव पुत्रत्वमेव च भविष्यसि। सुद्युम्न इति विख्यातस्त्रिषु लोकेषु निश्चितः" इत्युपक्रम्य "सुद्युम्नस्य च दायादास्त्रयः परमधार्मिकाः। उत्कलश्च गयश्चैव विनताश्च भारत!। उत्कलस्योत्कला राजन्! विनताश्च यमिमा। दिक् पूर्व्वा भारतस्त्रेष मनस्य तु गया पुरी" हरिवं० १० अ० इत्युक्तेश्च तस्य उत्कला ख्या पुरी आसीत् तत्संबन्धित्वाच्च तद्देशस्योत्कलत्वम्। उत्कलोऽभिजनोऽस्य अण्। औत्कल तद्देशाभिजने तद्देशानां राजा अण्। औत्कल तद्देशानां राजनि। उभयत्र वस्तु अणो लुक्। "उत्कला मेकलाः पौण्ड्राः कलिङ्गान्ध्राय संयुगे" भा०औ० ४अ०। उत्कः वनुजातिः स्वा+क। २व्याधे, ३भारद्वाजके च गोत्रप्रव०। ४प्रवपुत्रभेदे पु०। "प्रजापतेर्दुहितरं गिरिशस्य वै प्रभोः। उप-येमे भवि नाम तत्सुतो कल्पवत्सरौ। दृढायामपि भार्य्यायां वायोः पुत्र्यां महाबलः!। पुत्रसुत्फलनामानं योधिदुत्तमजीजनत्" भाग० ४स्क० १०अ०। पञ्चगौड-मध्ये ५विप्रभेदे च। "सारस्वताः कान्यकुब्जाः गौडमैथिल-कोत्कलाः"।

उत्कलिका स्त्री उद्+कल-बुन्। १उत्कण्ठायाम्, कामादि-जातायां २स्मृतौ च। ३तरङ्गे कुला० "धनावलीरुत्क-लिकासदृक्षप्रतिमणोत्कूलितशैवलाभाः" माघः। ४कलि-कायां कोरके ५वेलायाञ्च हेमच०।

उत्कलिकाप्राय न० "भवेदुत्कलिकाप्रायं समासाद्य दृढाक्षरम्"। छ०म० उक्ते गद्यभेदे

उत्कलित त्रि० क्त उद्+कल-क्त। उद्गतपिते

उत्कषण न० उद्+कष-ल्युट्। कर्षणे। "सद्यःशीरोत्क-षणसुरभिक्षेत्रमारुह्य मानम्" मेघदू०।

उत्काका स्त्री उत्क्रोशति अक-अच्। प्रातवर्षप्रसूतायां गवि शब्दचि० तु उत्काशेति शब्दमाह।

उत्काकुद् त्रि० उन्नतं काकुदमस्य "उद्विभ्यां काकुदस्य" पा० अन्त्यलोपः समा०। उन्नततालुके।

उत्कार पु० उद्+कृ-"कृ धान्ये" पा० घञ्। धान्यादेः विक्षेपे "उत्कारेषु च धान्यानामनभीष्टपरिग्रहाः" भट्टिः।

उत्कारिका स्त्री उद्+कृ-ण्वुल्। सुश्रुतोक्ते शोफादिनि-वारके पाचनभेदे यथा "व्रणस्य बहिरुपक्रमा भवन्ति। अपतर्पणमालेप" इत्युपक्रम्य "निर्वापणमुत्कारिका कषाय" इत्यादीनि विभज्य उत्कारिकाविषयपाचनप्रकारोदर्शितः। "निर्वर्त्तते न यः शोफो विरेकान्नैरुपक्रमैः। तस्य संपा-चनं कुर्य्यात् समाहृत्यौषधानि तु। दधितक्काम्लराजुक्त धान्याम्लैर्योजितानि तु। स्निग्धानि लवणीकृत्य पचेदुत्-कारिकां शुभाम्"। "स्नैहिकेषु च बीजेषु पचेदुत्कारिकां शुभाम्"। "स्नैहिकफलसारोत्कारिका वा"। "स्नेहीभा-वितासुत्कारिकां दापयेत्" इति च सुश्रु०।

उत्कास पु० उत्कमस्यति अस-अण् उप०स०। व्रणि-भेदे तस्य गोत्रापत्यम् इञ्। औत्कासि तद्गोत्रापत्ये बहुषु तु अस्त्रियां तस्य लुक्। उत्कासाः। अस्यते क्षिप्यतेऽनेन अस करणे घञ् आसः ऊर्द्धस्य कस्य स्नेह-जलस्य आसः। २ऊर्द्धगतश्लेष्मोत्क्लेषकरोगभेदे च। स च अन्तःस्थितकफादेरूर्द्धवायुना उत्क्षेपसाधनं रोगःक्षमा-मख्यातः।

उत्कासिका उत्कमूर्द्धजमस्यति अस्य-ण्वुल्। जर्द्धलेप्रभेदे रोगभेदे।

उत्कासन न० उत् उर्द्धस्थस्य कस्य आसनं क्षेपणम् अस+ल्युट्। अन्तःस्थकफस्योर्द्धदेशेन निस्सारणरूपे व्यापारे। "आहारशेषस्त्रेष्मलानुगुण्यान्नि श्वासनोत्कासनप्रधमनैर्निर्हरेत्"। "सन्निगतः प्रीड्यमानो न प्रवर्त्तत आकुञ्चनप्रसारणोन्मथनविमथनप्रधावनोत्कासनप्रशमनैश्च शमति" सुश्रु०। (कासीकरान)

उत्किर त्रि० उद्-कॄ कर्त्तरि ड। उत्क्षेपके। "पुष्परेणूत्किरैर्वातैः" रघुः "निलाय सालमलिभिर्मोत्किरालिभाः। "आमुक्ताकीरमन्दार कुसुमोत्किरबीचिषु" कुमा० "शाखिभिः कुसुमोत्किरैः" भट्टिः

उत्कीर्ण त्रि० उद्+कॄ-क्त। १लिखिते २क्षतवेधे च "मणौ वज्रसमुत्कीर्णे" रघुः। २ऊर्द्धं क्षिप्ते च "रजोभिस्तुरगोत्कीर्णैः" रघुः। ३लिखिते "उत्कीर्णापि विमृज्यते" काद०।

उत्कीर्त्तन न० उच्चैः कीर्त्तनम्। देवनामादेः उच्चैः कथने।

उत्कीर्त्तित त्रि० उद्+कीर्त्त-क्त। उच्चैः कथिते। हारा०।

उत्कुट न० कुट-सङ्कोचे क उत्तमंकुटो यत्र। उन्नतप्रदेशे

उत्कुण त्रि० उत्कोत्य कुण्यते हिंस्यते कुण-हिंसने अदः चुरा० कर्म्मणि अच्। उत्कोत्य हिंस्ये (उकुच) खरते केशकीटे हेमच०।

उत्कूट पु० अवतं कूटमस्य। कूटे हारा०।

उत्कूल त्रि० उत्क्रान्तः कूलात् निरा०स०। १उत्क्रान्तकूले नदादौ। कूलसहितः अमरा०स०। २कूलप्राप्ते। तत्करोतीत्यर्थे णिचि कर्म्मणि क। उत्कूलित। कूल प्रापिते त्रि०। "प्रतिस्रोतोत्कूलितपर्यवस्थाभ्रः" माघः।

उत्कृति स्त्री षड्विंशत्यक्षरपादके छन्दोभेदे। "उक्तात्मुक्ते" सूत्रक्रम्य "विकृतिः सप्तविंशत्यतिकृतिरष्टाक्षरैः" वृ०र०

उत्कृत्य अव्य० उद्+कृत-ल्यप्। १उत्कर्त्तनं कृत्वेत्यर्थे। "उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधेत्यार्द्धं" मालतीमा०। कृदुपधत्वात् कर्म्मणि क्यप्। २उत्कर्त्तनार्थे छेदनीये त्रि०

उत्कृष्ट त्रि० उद्+कृष-क्त। १प्रयत्ने २उत्तमे ३उत्कर्षान्विते "हरासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः" "वसनस्य दशा पाट्या मुद्गरोत्कृष्टवेदने" "कन्यां भजन्नोत्कृष्टं न किञ्चिदपि दापयेत्" "बीजस्य चैव योन्यास्च बीजमुत्कृष्टमुच्यते" इति च मनुः ४कर्षयुक्ते खेलादौ च। अतः अतिशये द्रव्ये तमप् च उत्कृष्टतरः उत्कृष्टतमः।

उत्कृष्टभूम पु० उत्कृष्टा भूमिर्यत्र बा० अच् समा०। प्रशस्तभूमौ देशे जटा० अभिधानात् पुंस्त्वम्।

उत्कोच पुंस्त्री उद्गतः कोचः सङ्कोचः कार्य्यप्रतिबन्धोयेन। अन्यायकर्म्मकरणार्थं स्वार्थप्रतिबन्धनिरासाय वादिप्रतिवादिभ्यां दाने (घुस्) इति ख्याते। "तथोत्कोचपरीहासव्यालासच्छलयोगतः" अदत्तगणनायां नारदः। "उत्कोचजीविनो द्रव्यहीनान् कृत्वा प्रवासयेत्" बा० स्मृ०। उत्कोचदत्तस्यादत्ततैव यथा "दत्तं सप्तविधं प्रोक्तमदत्तं षोड़शात्मकमिति" सामान्यतोऽभिधाय "अदत्तं तु भयक्रोधेत्यादिना षोडशविधादत्तमदर्शा नारदेन दर्शिताः अदत्तशब्दे तच्छोदाहृतम् ।१२५४ हेमम् "उत्कोचेन कार्य्यप्रतिबन्धनिरासार्थमधिकृतेभ्योदत्तम्" मिता०

उत्कोचक पु० उत्कोचे उत्कोचद्रव्यप्रहणे प्रकृतः बा० कन्। १उत्कोचग्राहिणि "उत्कोचकाश्चोपधिका वञ्चकाः कितवास्तथा" इत्यमरस्य "एवमादीन् विजानीयात् प्रकाशाञ्छौकसूचकान्" मनुः। २धौम्यात्रभ्रात्रिके तीर्थभेदे "यवीयान् देवलस्येष वने भ्राता तपस्यति। धौम्य उत्कोचके तीर्थे तं हृष्टुध्वं यदीच्छत"। "तत्र उत्कोचकं तीर्थं गत्वा धौम्याश्रमं ततः" भा०आ०।८३अ०।

उत्क्रम पु० उद्+क्रम-घञ् अर्द्धर्चः। व्युत्क्रमे, विपरीतक्रमे "क्रमोत्क्रमाभ्यामेषतुलादिमासम्" ज्यो०त०। "अधोत्क्रमायानुपक्रमाय यतमानं भवति" शत०ब्रा० १२, ४,२,१०। उद्+क्रम-घञ्। २उत्क्रान्तौ ऊर्द्धगतौ।

उत्क्रमण न० उद्+क्रम-ल्युट्। १अपसरणे "सोमवदुत्क्रमणमपगमनञ्च" कात्या०१८,५,१७। २देहात् जीवादेरपसरणे "शतं चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभि निश्रितैका। तयोर्द्ध्वमायन्नमृतत्वमेति विष्वङ्न्या उत्क्रमणे भवन्ति" कठोप० अस्य भाष्यं यथा "तत्र शतञ्चैकाश्च हृदयस्य नाड्यो हृदयाद्विनिःसृता नाड्यः शिरास्तासां मध्ये मूर्द्धानं भित्त्वाभिनिःसृता निर्गता एका सुषुम्णा नाम तयाऽन्तकाले हृदये आत्मानं वशीकृत्य योजयेत्। तया नाड्योर्द्ध्वमुपरि आयन् गच्छन्नादित्यद्वारेणाऽमृतत्वमभरत्वधर्म्मत्वमामेत्यिष्यम्"। "आभूसंप्लव स्थानमनृतत्वं हि भाष्यते" इति स्मृतेः। ब्रह्मणा वा सह कालान्तरेण मुख्यममृतत्वमेति भुक्त्वा भोगानुपमान् ब्रह्मलोकगतान्, विष्वङ् नानाविधगतयोऽन्या नाड्य उत्क्रमणे निमित्तं भवन्ति संसारप्रतिपक्षार्था एव भवन्ती-

भवेयः"। तत्रोत्क्रमणप्रकारः बृ०उ०४,२,४,ब्रा० दर्शितो यथा "तद्यथाऽनः सुसमाहितमुत्सर्ज्जत्याद्वादेवमेवायं शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढ उत्सर्ज्जाति यत्रैतदूर्ध्वोच्छ्वासी भवति"२५क०। स यत्रायमधिमानं गच्छति जरया वोपतपता वाधिमानं निगच्छति तद्यथाऽयं वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्यत एवमेवायं पुरुष एभ्योऽङ्गेभ्यः प्रमुच्य पुनः प्रतिन्यायं प्रतियोन्यादुवति प्राणायैव"२६क०। "तद्यथा राजानं प्रविशन्त्युग्रपुत्राः प्रत्येनसः क्षत्तृसंग्रहणेऽभिसमायन्त्येवमेवैममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति" २८क०। "स यत्रायमात्माऽवश्यं ग्लायत्यथैनमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति स यत्रैष चाक्षुषः पुरुषः पराङ् पर्य्यावर्त्तते तथा रूपज्ञो भवति ?। एकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न रसयत इत्याहुरेकीभवति न वदतीत्याहुरेकीभवति न शृणोतीत्याहुरेकीभवति न मनुत इत्याहुरेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुरस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति, चक्षुषो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति। तं विद्याकर्म्मणी समन्वारभेते पूर्वप्रज्ञा च" ४ब्रा०१क०।

अत्र शाङ्करभाष्यं यथा। "इत ऊर्ध्वमस्य संसारोपवर्ण्यते। यथायमात्मा स्वप्नान्तादुत्क्रान्तिमागत एवमयमस्माद्देहाद्देहान्तरं प्रतिपद्यत इत्यस्यार्थस्य दृष्टान्तः। तत्र यथा लोके अनः शकटं सुसमाहितं सुष्ठु भग्नं वा समाहितं भाण्डोपस्करणेनोत्कूलसुसङ्गसूर्पपिठरादिनाद्येन च सम्यक् सम्भारेणाक्रान्तमित्यर्थः। तथा भाराक्रान्तं सदुत्सर्जनकृच्छ्रं कुर्य्याद्यथा यायाद्यत्रेच्छति शाकटिकेनाधिष्ठितं सत्। एवमेव यथोक्तदृष्टान्तोऽयं शारीरः शरीरे भवः। योऽसौ आत्मा विद्योपाधिर्यः स्वप्नवृत्तान्तावित्यं अन्नमरणाभ्यां पाञ्चभौतिकयोर्वियोगलक्षणाभ्यामविद्योपरक्तोऽवशमुत्सर्जति यथोक्तमनन्तरं प्राणायनस्य प्राणेन शरीरेणात्मना स्वयंज्योतिःस्वभावेनान्धीकृतो नीयेऽन्नाद्यात्मतया चोक्तम्" "आत्मनैवायं ज्योतिषाऽऽस्ते पायते" इति। उत्सर्जनं याति यत्र चैतन्याज्ञोतिषा आत्मे लिङ्गं प्राणप्रधाने गच्छति इति तदुपाधिरप्यात्मा गच्छतीव। तथा च स्मृत्यन्तरम् "कश्चिदूर्ध्वमित्यादि 'ध्यायतीवेति" च। अत एवोक्तं प्राज्ञेनात्मनान्वारूढ इत्यन्यथा प्राज्ञेनैकीभूतः शकटवत्कथमुत्सर्जनं याति तेन विद्योपाधिरात्मा उत्सर्जनमर्म्मसु निःक्रम्यमानेषु दुःखवेदनार्त्तः यद्यं कुर्व्वन् याति गच्छति। तत्कस्मिन्काले? इत्युच्यते। यत्रैतद्वत्त्वे तदिति क्रियाविशेषणमूर्ध्वोच्छ्वासो यत्रोर्ध्वोच्छ्वासित्वमस्य भवतीत्यर्थः। इदमस्याभ्यनुवदनं वैराग्यहेतोः। इदंयः कष्टः खल्वयं संसारो येनोत्क्रान्तिकाले मर्म्मसूत्क्रम्यमानेषु स्फुटितोपो दुःखवेदनार्त्तस्य पुरुषार्थसाधनप्रतिपत्तौ चासामर्थ्यं परवशीकृतचित्तस्य। तस्मादावदियमवस्था नागमिष्यति तावदेव पुरुषार्थसाधनकर्त्तव्यतायामप्रमत्ता भवतेत्याह काङ्क्षयाच्छ्वसितिः २५क०। तत्रोर्ध्वोच्छ्वासित्वं कस्मिन्काले? किं निमित्तं? कथं? निमित्तं? वा स्यादित्येतदुच्यते। सोऽयं प्राक्तनः शिरःपाणादिमान् पिण्डो यत्र यस्मिन् काले उपगमिष्यमाणमरणोभावमणुत्वं काश्यमित्यर्थः नि एति निगच्छति। किं निमित्तं जरया वा स्वयमेव कालपक्वफलवच्छीर्णः कार्श्यं गच्छति उपतपतीत्युपतपत् ज्वरादिरोगग्रस्तो वोपतपता वा उपतप्यमानो हि रोगेण विषमाग्नितयाऽन्नं भुक्तं न जरयति ततोऽजरसेनान्नेनोपचीयमानः पिण्डः कार्श्यमापद्यते तदुच्यते उपतपता वेति आधिमानं निगच्छति। यदात्मनाकार्श्यं प्रतिपन्नो ज्वरादिनिमित्तैस्तदोर्ध्वोच्छ्वासी भवति। यदोर्ध्वोच्छ्वासी तदा हृदयाग्रिसमारभ्यकदहुत्सर्जनं याति जराभिभवो रोगादिपीडनं काश्यापत्तिश्च शरीरवतोऽवश्यं भाविन एतेऽनर्था इति वैराग्यायोद्दिश्यते। यदाऽसावुत्सर्जनं याति तदा कथं शरीरं विसृजतीति दृष्टान्त उच्यते। तत्र यथाऽयं वा फलमुडुम्बरं वा फलं पिप्पलं वा फलं विपच्यमानेकदृष्टान्तोपादानं शरीरावयवनिमित्ततारूख्यापनार्थम्। अनियतानि हि शरीरस्य निमित्तान्यसङ्ख्यातानि च। एतदपि वैराग्यार्थमेव। यस्मादयमनेकशरीरनिमित्तवांस्तस्मात्सर्वदा बन्धनोद्विग्न इति। बन्धनाद्ध्यते येन बन्धनेन स बन्धनकारणो रसो यस्मिन् वा बध्यत इति बन्धनमेवोच्यते बन्धनम्। तस्मादुत्सृज्य इत्याह बन्धनात्प्रमुच्यते वातादिनेकनिमित्तम्, एवमेवायं पुरुषो विद्यात्मा विद्योपाधिः एभ्योऽङ्गेभ्यश्चक्षुरादिदेहावयवेभ्यः सम्यक्प्रमुच्यते सम्यक्छब्देन प्रमुच्यते न क्षुद्रप्राणमनस्काद्य इव प्राणेव रक्षन्। किन्तर्हि सह वायुनोपसंक्रम्य, पुनः प्रति-

न्यायं पुनःशब्दात्पूर्वमप्ययं देहाद्देहान्तरमसङ्कृतवान् यथा स्वप्नबद्धान्तो पुनः पुनर्गच्छति तथा पुनः प्रतिन्यायं प्रतिगमनं यथागतमित्यर्थः । प्रतियोनि योनिं योनिं प्रति कर्मश्रुतादिवशादाद्रवति । किमर्थम् ? प्राणायैव प्राणव्यूहायैवेत्यर्थः । सप्राण एव हि गच्छति ततः प्राणार्थमेव विशेषणमनर्थकं प्रीणिव्यूहाय हि गमनं देहाद्देहान्तरं प्रति । तेन तस्य कर्मफलभोगार्थसिद्धिः । न प्राणसत्तामात्रेण तस्मात्तदर्थायं युक्तं विशेषणं प्राणव्यूहायेति" २६। "तमेव जिगमिषुं के सह गच्छन्ति? येऽपि गच्छन्ति ते किं तत्क्रियाप्रयुक्ता ? आहोस्वित्तत्कर्मवशात्तत्रयमेव गच्छन्ति परलोकिकशरीरकर्तृत्वेऽपि भूतानीत्युच्यते दृष्टान्तः । तद्यथा राजानं प्रयियासन्तं प्रकर्षेण यातुमिच्छन्तमुग्राः प्रत्येनसः कृतप्रामरक्षा एवाभिसमायन्त्याभिमुख्येन समायान्त्येकीभावेन तमभिमुखा आयान्त्यनात्मना एव राज्ञा केवलतज्जिगमिषाभिप्राः । एवमेवेममात्मानं भोक्तारमन्तकाले मरणकाले सर्वे प्राणा वागादयोऽभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासो भवतीति व्याख्यातम्" २८।

"स यत्रायमात्मेति संसारोपवर्णनं प्रस्तुतम् । तत्रायं पुरुष एभ्योऽङ्गेभ्यः सम्मुच्चेत्युक्तम् । तत् सम्मोहेन किञ्चिन् काले कथं वेति ? सविस्तरं संसरणं वर्णयितव्यमित्यारभ्यते । सोऽयमात्मा प्रस्तुतो यत्र यस्मिन् काले अवल्यमबलभावं नि एत्य गत्वा यद्दैन्यं दौर्बल्यं तदात्मन एव दौर्बल्यमित्युपचर्यते अवल्यं नेत्येति । न ह्यसौ स्वतोऽमूर्त्तत्वाद्बलभावं गच्छति तथा सम्मोहमिव संमूढता संमोहोविवेकाभावः संमोहमिव नि एति निगच्छति न चास्य स्वतः संमोहोऽसंमोहो वास्ति नित्यचैतन्यज्योतिःस्वभावत्वात् तेनेवशब्दः संमोहमिव न्येतीति । उत्क्रान्तिकाले हि करणोपसंहारनिमित्तो व्याकुलीभाव आत्मन इव लक्ष्यते लौकिकैः तथा च वक्तारो भवन्ति संमूढः समूढोयमिति । अथ वोभयत्रैवशब्दप्रयोगो योज्योऽवल्यमिव न्येतीत्यसम्मोहमिव न्येतीति । उभयस्य परोपाधिनिमित्तत्वाविशेषात् समानकर्तृकनिर्देशाच्च । अथास्मिन् काल एते प्राणा वागादय एनमात्मानमभिसमायन्ति तदास्य शारीरस्यात्मनोऽङ्गेभ्यः सम्मोहनम् । कथं पुनः सम्मोहनं, केन वा प्रकारेणात्मानमभिसमायन्ति ? इत्युच्यते । स आत्मा एतास्तेजोमात्रास्तेजसो मात्रास्तेजोमात्रास्तेजोऽवयवा रूपादिप्रकाशकत्वाच्चक्षुरादीनि करणानीत्यर्थः । ता एताः समभ्याददानः सम्भिन्नैर्लेपेनाभ्याददानः आभिमुख्येनाददानः संहरमाणस्तत्प्रामेण्यया विशेषेण ग्रसमिति न तु स्वप्ने निर्लेपेन समभ्याददानमस्ति त्वादानमात्रम् ।"यद्गृहीता वाक् सर्वतो मात्रामुपादाय शुक्रमादायेत्यादि" वाक्येभ्यः हृदयमेव पुण्डरीकाकाशमन्ववक्रामन्त्यन्वव गच्छन्ति हृदयेऽभिव्यक्तविज्ञानो भवतीत्यर्थो बुद्ध्यादिविशेषोपसंहार इति । न हि तस्य स्वतस्तत्र विज्ञेयोपसंहारादिविक्रिया वा "ध्यायतीव लेलायतीव" इत्युक्तत्वात् । बुद्ध्याद्युपाधिद्वारैव हि सर्वविक्रियाध्यारोप्यते तस्मिन् । कदा पुनस्तस्य तेजोमात्राभ्याददानमित्युच्यते । स यत्रैष चक्षुषि भवत्यथ चक्षुषः आदित्यांशो भोक्तुः कर्मणा प्रयुक्तो यावद्देहधारणं तावच्चक्षुषोऽनुग्रहं कुर्वन् वर्त्तते। मरणकाले त्वस्य चक्षुषोऽनुग्रहं परित्यजति स्वमादित्यात्मानं प्रतिपद्यते । तदेतदुक्तम् "यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति, वातं प्राणश्चक्षुरादित्यमित्यादि" । पुनर्देहग्रहणकाले संश्रयिष्यति तथा स्वप्नान्तः प्रबुध्यतश्च । तदेतदाह । चाक्षुषः पुरुषो यत्र यस्मिन् काले पराङ् पर्यावर्त्तते परि समन्तात् पराङ् व्यावर्त्तत इति यथाऽस्मिन् काले ऽल्पप्रभो भवति समूर्णुहि रूपं न जानाति । तदायमात्मा चक्षुरादितेजोमात्राः समभ्याददानो भवति स्वप्नक इव । सएकीभवति करणजातं स्वेन लिङ्गात्मना । पार्श्वस्था आहुर्न पश्यतीति । तथा प्राणदेवतानिवृत्तौ प्राणमेकीभवति लिङ्गात्मना । तदा न जिघ्रतीत्याहुः । समानमन्यत् । जिह्वायां सोमो वरुणो वा देवता तन्निवृत्त्यपेक्षया न रसयत इत्याहुः । तथा न वदति न ह्यलीति न मन्तते न स्पृशति न विजानातीत्याहुस्तदोपलक्ष्यते देवतानिवृत्तिः करणानाञ्च हृदय एकीभावः तत्र हृदयमुपसंहृत्य तेषु योऽन्त्यांशः स उच्यते । तस्य ह एतस्य प्रकृतस्य हृदयस्य हृदयच्छिद्रस्येत्येतत् । अथं नाडीसृष्टं निर्गमनद्वारं प्रद्योतते स्वप्रकाश इव स्वेन भासा तेजोमात्रादानलक्षणेन स्वेनैव ज्योतिषाऽऽत्मनैव च तेनात्मज्योतिःप्रद्योतेन हृदयाग्रेणैष आत्मा विज्ञानमयो लिङ्गोपाधिर्निर्गच्छति निष्क्रामति । तथाऽऽथर्वणे "कस्मिन् नु त्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि ? कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति ? स प्राणमसृजतेति" तत्र चात्मचैतन्यज्योतिः सर्वदाभिव्यक्ततरं तदुपाधिद्वारा ह्यात्मनि जन्ममरणगमनागमनादिसर्वविक्रियालक्षणः संव्यवहारस्तदात्मकं हि हार्दविधं करणम् । बुद्ध्यादि

तत्सूक्ष्मं तल्लीनं सोऽन्तरात्मा जगतस्तस्थुषश्च। तेन प्रद्योतेन हृदयाग्रप्रद्योतेन निःक्रमतीत्यादिः। केन मार्गेण निष्क्रामतीत्युच्यते। चक्षुषो वाऽऽदित्यलोकप्राप्तिनिमित्तं स्थानं कर्म वा यदि स्यात्। मूर्ध्नो वा ब्रह्मलोकप्राप्तिनिमित्तं चेत्। अन्येभ्यो वा शरीरदेशेभ्यः शरीरावयवेभ्यो यथाकर्म यथाश्रुतमिति तं विज्ञानात्मानमुत्क्रामन्तं परलोकाय प्रस्थितं परलोकायोद्भूतामित्यर्थः। सर्व्वाधिकारस्थानीयोऽयं श्रुत्यनुत्क्रामति तच्च प्राणा अनूत्क्रामन्तं वागादयः सर्व्वे प्राणा अनूत्क्रामन्ति। यथाप्रधानाख्यायिकास्थितम् न तु क्रमेण सार्थवद्गमनमिह विवक्षितम्। एष आत्मा सविज्ञानो भवति स्वप्नइव विशेषविज्ञानवान् भवति कर्म्मवशादसतन्द्रः सातत्येन हि सविज्ञानत्वं सर्व्वः कृतकृत्यः स्यात् नैव तु तद्भवते अतएवाह व्यासः "सदा तद्भावभावितः" इति कर्म्मणानुद्भाव्यमानेनान्तःकरणवृत्तिविशेषाश्रितवासनात्मकविशेषविज्ञानेन सर्व्वोलोक एतस्मिन् काले सविज्ञानोभवति सविज्ञानमेव च गन्तव्यमन्यवक्तव्यमत्यनुगच्छति विशेषविज्ञानोद्भासितमेवेत्यर्थः। तत्कालतत्काले स्वातन्त्र्याद्यं योगधर्म्मानुसेवनं परिसंख्यानाभ्यासश्च विशिष्टपुण्योपचयश्च बहुधनैः परलोकार्थिभिरप्रमत्तैः कर्त्तव्य इति सर्व्वशास्त्राणां यत्नतोविधेयोऽर्थो दुरितान्नोपरमन्ति हि तत्काले यत्यते क्षिप्तुंसंपादयितुम् कर्म्मणामीयमानस्य स्वातन्त्र्याभावात् "पुरुषोवै पुरुषेण कर्म्मणा भवति यादृग् यादृगेन" इत्युक्तेः एतस्य ज्ञानस्योपयमोपायविधानाय सर्व्वशास्त्रोपनिषदः प्रवृत्ताः नहि तद्विहितोपायानुसेवनं सुकृतात्यन्तिकक्षयानर्थक्योपयमोपायोऽस्ति तस्मादमैवोपनिषद्विहितोपाये यत्नपरैर्भवितव्यमित्येष प्रकरणार्थः शकटवत्संस्कृतसंस्कार उपसर्ज्जनत्वादित्युक्तं किंपुनरस्य परलोकाय प्रस्थितस्य पथ्यदनं शाकटिकसंस्कारस्थानीयं गत्वा वा परलोकं बहुभुक्ते शरीरादारभ्यारब्धकर्म्म यत्तत् किम्? इत्युच्यते। तं परलोकाय गच्छन्तमात्मानं विद्या कर्म्मणी विद्या च कर्म्म च विद्याकर्म्मणी विद्या सर्व्वप्रकारा विहिता प्रतिषिद्धा अविहिता अप्रतिषिद्धा च तथा कर्म्म विहितं प्रतिषिद्धं चाविहितमप्रतिषिद्धञ्च समन्वारभेते समनन्वारभेते अन्वालभेते अनुगच्छतः पूर्व्वप्रज्ञा च पूर्व्वानुभूतविषया प्रज्ञा पूर्व्वप्रज्ञातीतकर्म्मफलानुभवावनेत्यर्थः। सा च वासनाऽ पूर्व्वकर्म्मारब्धे कर्म्मविपाके चारुं भवति। तेनाविद्यमन्वारभते नहि तदा वासनया विना केनचित् कर्म्म कर्त्तुं फलं चोपभोक्तुं शक्यते नह्यनभ्यस्ते विषये कौशलमिन्द्रियाणां भवति, पूर्व्वानुभवासना प्रज्ञानां त्विन्द्रियाणामिहाभ्यासमन्तरेण कौशलमुपयच्छते, दृश्यते च केषाञ्चित् कास्तुचित् क्रियासु चित्र कर्म्मादिलक्षणासु विनैवेहाभ्यासेन जन्मत एव कौशलम् कास्तुचिदत्यन्तसौकर्य्ययुक्तास्वप्यकौशलम् केषाञ्चित्, तथा विषयोपभोगेषु स्वभावत एव केषाञ्चित्कौशलाकौशले दृश्यते तच्चैतत् सर्व्वं पूर्व्वप्रज्ञोद्भवानुद्भवनिमित्तम्, तेन पूर्व्वप्रज्ञया विना कर्म्मणि वा फलोपभोगे वा न कस्यचित् प्रवृत्तिरुपपद्यते, तस्मादेतत्त्रयं शाकटिकभारस्थानीयं परलोकपथ्यदनं विद्याकर्म्मपूर्व्वप्रज्ञाख्यम्। यस्माद्विद्याकर्म्मणी पूर्व्वप्रज्ञा च देहान्तरप्रतिपत्तौ साधनं तस्माद्विद्याकर्म्मादि शुभमेव समाचरेत्। यथा दृष्टेह संयोगभोगोपभोगौ स्यातामिति प्रकरणार्थः" १क०।

शा०सू० भाष्योक्त उत्क्रमणप्रकार प्रपञ्चितो यथा "वाङ्मनसि दर्शनाच्छब्दाच्च" सू०। "अथापरास्तु विद्यास्तु फलप्राप्तये ऐदंयानं पन्थानमतारयिष्यत् प्रथमं तावद्यथायथमुत्क्रान्तिक्रममाचष्टे समाना हि विद्वदविदुषोरुत्क्रान्तिरिति वक्ष्यति। अस्ति प्राणविषया श्रुतिः "अस्य सोम्य। पुरुषस्य प्रयतोवाङ् मनसि सम्पद्यते, मनः प्राणे, प्राणस्तेजसि, तेजः परस्यान्देवतायामिति" किमिह वाच एव वृत्तिमत्ता; मनसि सम्पद्यते उतवाग्वृत्तेरिति? विषयः। तत्र वागेव तावन्मनसि सम्पद्यत इति प्राप्तं तथा हि श्रुतिरनुगृहीता भवति। इतरथालक्षणा स्यात् श्रुतिलक्षणायाश्च श्रुतिर्न्याया न लक्षणा तस्माद्वाच एवायं मनसि प्रविलय इत्येवं प्राप्ते ब्रूमः। वाग्वृत्तिर्मनसि सम्पद्यत इति। कथं वाग्वृत्तिरिति व्याख्यायते वावता वाङ्मनसीत्येवाचार्य्यः पठति। सत्यमेतत् पठिष्यति तु "परस्यात् अविभागोवचनादिति"। तस्मादत्र श्रुत्युपसंहारसामर्थ्यात् विवक्षितमिति गम्यते। तत्त्वमप्यवविवक्षयान्तु सर्व्वत्रैवाविभागसाम्यात् किं परत्रैव विभिन्नादविभाग इति। तस्मादत्र श्रुत्युपसंहारविवक्षायां वाग्वृत्तिः पूर्व्वमुपसंह्रियते मनोवृत्ताववस्थितायामित्यर्थः। कस्मात्? दर्शनात् दृश्यते हि वाग्वृत्तेः पूर्वोपसंहारोमनोवृत्तौ विद्यमानायाम्। न तु वाच एव वृत्तिमत्याभनस्युपसंहारः केनचिदपि दृष्टुं शक्यते। ननु श्रुतिसामर्थ्याद्वाच एवायं मनस्यय इत्युक्तं नेत्याह अनन्यप्रकृतित्वात् यस्य हि यत उत्पत्तिर्लक्ष

तत्र लयोनाव्योमदोष इत्यस्य । न च मनसो वागुत्पद्यत इति किञ्चन प्रमाणमस्ति । वृत्त्युद्भवाभिभवौ त्य प्रकृतिसमान्नयावपि दृश्येते । पार्थिवेभ्योऽन्नेभ्यस्तैजसस्याग्नेर्वृत्तिरुद्भवति अप्सु चोपशाम्यति । कथं तर्ह्यत्रापि पक्षे वाङ्मनसि सम्पद्यत इति शब्दः, इत्यत आह शब्दाच्चेति । शब्दोऽप्यत्रापि पक्षेऽवकल्पते वृत्तिवृत्तिमतोरभेदोपचारादित्यर्थः" भा० । "अतएव च सर्वाण्यनु" सू० । "तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः" इत्यत्राविशेषेण सर्वेषामेवेन्द्रियाणां मनसि सम्पत्तिः श्रूयते तत्रापि एव वाच एव चक्षुराद्योनामपि सदृत्तिके मनस्यवस्थिते वृत्तिलोपदर्शनात्तत्प्रलयासम्भवाच्छब्दोपपत्तेश्च वृत्तिद्वारैवैव सर्वाणीन्द्रियाणि मनोऽनुवर्त्तन्ते । सर्वेषामुत्क्रान्तौ मनस्युपसंहरणाविशेषे सति वाचः पृथग्ग्रहणं वाङ्मनसि सम्पद्यत इत्युदाहरणानुरोधेन" भा० । "तन्मनः प्राण उत्तरात्" सू० । "समधिगतमेतत् वाङ्मनसि सम्पद्यत इत्यत्र वृत्तिसम्पत्तिर्विवक्षितेति । अथ यदुत्तरं वाक्यम् "मनः प्राणदृति" किमत्रापि वृत्तिसम्पत्तिरेव विवक्षिता उत वस्तुसम्पत्तिरिति ? विचिकित्सायां वृत्तिमत्सम्पत्तिरेवेति श्रुत्यनुग्रहात्तत्प्रकृतितोपपत्तेश्च तथा हि "अन्नमयं हि सोम्य मन" आपोमयः प्राण" इत्यत्र अन्नयोनि मन आमनन्ति अब्योनिञ्च प्राणम् । आपश्चान्नमश्नतेति श्रुते' "अतश्च यन्मनः प्राणे प्रलीयते अन्नमेव तदप्सु प्रलीयते-अन्न हि मनः, आपश्च प्राणः, प्रकृतिविकारभेदादित्येवं प्राप्ते ब्रूमः तदप्यात्मगृहीतबाह्येन्द्रियवृत्तिमनोवृत्तिद्वारैवैव प्राणे प्रलीयत इत्युत्तराद्वाक्यादवगन्तव्यम् । तथा हि क्षुधोर्ध्वमूर्ध्वञ्च प्राणवृत्तौ परिस्पन्दात्तिकायामवस्थितायां मनोवृत्तीनामुपगमो दृश्यते । न च मनसः स्वरूपाव्ययः प्राणे सम्भवति अतत्प्रकृतित्वात् । ननु दर्शितं मनसः प्रकृतित्वम् । नैतत्सारं न हीदृशेन प्राणालिकेन तत्प्रकृतित्वेन मनः प्राणे सम्पत्तुमर्हति । एवमपि ह्यत्र मनः सम्पद्येत अप्सु चात्र अप्स्वेव च प्राणः । नन्वेतस्मिन्नपि पक्षे प्राणभावपरिणताभ्योऽद्भ्योमनोजायत इति किञ्चन प्रमाणमस्ति । तस्मान्न मनसः प्राणे स्वरूपाव्ययः । इत्यस्यये तु शब्दोऽवकल्पते वृत्तिवृत्तिमतोरभेदोपचारादिति दर्शितम्" भा० । "सोऽध्यक्षे तदुपगमादिभ्यः" सू० । "स्थितमेतदस्य यतोनोत्पत्तिरस्य तस्मिन् वृत्तिलयो न स्वरूपलय इति । इदमिदानीं प्राणस्तेजसीत्यत्र चिन्त्यते किं यथाश्रुति प्राणस्य तेजस्येव वृत्त्युपसंहारः किं वा देहेन्द्रियपङ्कराध्यक्षे जीवे ? इति । तत्र श्रुतेरतिबहुत्वात् प्राणस्य तेजस्येव सम्पत्तिः स्यात् अश्रुतकल्पनाया अन्याय्यत्वादित्येवं प्राप्ते प्रतिपद्यते सोऽध्यक्ष इति । स प्रकृतः प्राणोऽध्यक्षेऽविद्याकर्मपूर्वप्रज्ञोपाधिके विज्ञानात्मन्यवतिष्ठते तत्प्रधाना प्राणवृत्तिर्भवतीत्यर्थः । कुतः ? तदुपगमादिभ्यः । "एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासो भवतीति" हि श्रुत्यन्तरम् अध्यक्षोपगामिनः सर्वान् प्राणानविशेषेण दर्शयति । विशेषेणैव" तसुत्क्रामन्तं प्राणोऽनूत्क्रामतीति" पञ्चवृत्तेः प्राणस्याध्यक्षानुगामितां दर्शयति तदनुवृत्तिताञ्चेतरेषाम्, "प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति" । "सविज्ञानोभवतीति" चाध्यक्षस्यान्तर्विज्ञानवत्त्वप्रदर्शनेन तस्मिन्नुपोत्करणत्वमस्य प्राणस्यावस्थानं गमयति । ननु "प्राणस्तेजसीति" श्रूयते कथं प्राणोऽध्यक्ष इत्यधिक्षेपः क्रियते । नैष दोषः अध्यक्षप्रधानत्वादुत्क्रमणादिव्यवहारस्य श्रुत्यन्तरगतस्यापि च विशेषस्यापेक्षणीयत्वात् । कथं तर्हि "प्राणस्तेजसीति" श्रुतिरित्यत्र आह" भा० । "भूतेषु तच्छ्रुतेः" सू० । "स प्राणसंयुक्तोऽध्यक्षः तेजःसहचरितेषु भूतेषु देहबीजभूतेषु सूक्ष्मेष्ववतिष्ठत इत्यवगन्तव्यम् "प्राणस्तेजसि" इत्यतः श्रुतेः । ननु चेयं श्रुतिः प्राणस्य तेजसि स्थितिं दर्शयति न प्राणसंयुक्ताध्यक्षस्य । नैषः दोषः "सोऽध्यक्षः" इत्यध्यक्षाध्यक्षराज उपसंख्यातत्वात् । सोऽपि हि क्षुल्लाक्षुरां गत्वा मथुरायाः पाटलिपुत्रं व्रजति सोऽपि क्षुल्लात् पाटलिपुत्रं यातीति यक्ष्यते वहिष्ठम् । तस्मात् प्राणस्तेजसीति प्राणसंयुक्ताध्यक्षस्यैवंतेजःसहचरितेषु भूतेष्ववस्थानम् । कथं तेजःसहचरितेषु भूतेष्विति उच्यते यावता तेजः श्रूयते "प्राणस्तेजसि" इत्यत्र आह" भा० । "नैकस्मिन् दर्शयतोहि" सू० । "नैकस्मिन्नेव तेजसि शरं राजरथोऽवेक्षायां जीवोऽवतिष्ठते कार्यस्य शरीरस्यानेकात्मकत्वादर्शनात् । दर्शयतश्चैतमर्थं प्रश्नप्रतिवचने "आपः तदब्रवीत्" इति । तद्व्याख्यातं "तेजोमात्रत्वात् भूयस्त्वात्" इत्यत्र । श्रुतिस्मृती चैतमर्थं दर्शयतः । श्रुतिः "पृथिवीमय आपमयस्तेजसयो वायुमय आकाशमय" इत्याद्या । स्मृतिरपि "अव्यक्तोमात्रा ऽविनाशिन्यो दशार्द्धानान्तु याः स्मृताः । ताभिः सार्द्धमिदं सर्वं सम्भवत्यनुपूर्व्वशः" इत्याद्या । ननु चोपसं-

क्षुनेषु करणेषु शरीरान्तरप्रेक्षावेक्षायां क्रायत्नदा पुरुषो भवतीत्युपक्रम्य श्लुत्यन्तरं कर्म्माश्रयतां निरूपयति "तौ ह यदूचतुः कर्म्म हैव तदूचतुः अथ ह यत् प्रयशंसतुः कर्म्म हैव तत् प्रयशंसतुरिति"। तत्रोच्यते। तत्र कर्म्मप्रयुक्तस्य पञ्चप्रतिपक्षसंज्ञकेन्द्रियविषयात्मकस्य बन्धनस्य प्रवृत्तिरिति कर्म्माश्रयतोक्ता इह पुनर्भूतोपादानाद्देहान्तरोत्पत्तिरिति भूताश्रयत्वमुक्तम्। प्रयंसायशब्दादपि तत्र प्राधान्यमात्रं कर्म्मणः प्रदर्शितं न त्वाश्रयान्तरं निवारितम् तस्मादविरोधः"भा०।"समाना चा श्लुत्युपक्रमादमृतत्वञ्चानुपोष्य" सू० "सेयमनुक्रान्तिः किं विदुदविदुषोः समाना ? किं वा विशेषवतीति ? विद्ययानानां विशेषवतीति तावत् प्राप्तम्। भूताश्रयविशिष्टा ह्येषा पुनर्भवाय भूतान्याश्रीयन्ते न च विदुषः पुनर्भवः सम्भवति" "अमृतत्व हि विद्वानश्नुते" इति श्रुतेः। तस्मादविदुष एवैषोत्क्रान्तिः। ननु विद्याप्रकरणे समानानाद्विदुष एवैषा भवेत्, न ह्यपादिद्यधिगम्यानामुत्क्रान्तिरुक्तेः। तथा हि "यत्रैतत्पुरुषः स्वपिति नाम भवति नाम पिपासति नामेति" च सर्वप्राणिसाधारणा एव स्वापादयोनुक्रान्त्यन्ते विद्याप्रकरणेऽपि प्रतिपिपादयिषितवस्तुप्रतिपादनानुगुण्येन, न तु विदुषोविशेषवत्तोविधित्सयेति एवमियमप्युत्क्रान्तिर्मुक्तिजनगतैवानुक्रान्त्यते यस्यां परस्यां देवतायां पुरुषस्य प्रयतस्तेजः सम्पद्यते, "स आत्मा तत्त्वमसीति" प्रतिपादयितुम्। प्रतिपिद्धा चैषा विदुषः। तस्मादविदुष एवैषेत्येवं प्राप्ते ब्रूमः। समानेषोत्क्रान्तिः वाङ्मनसात्याद्या विद्वदविदुषोरा श्लुत्युपक्रमाद्भवितुमर्हति अविशेषश्रवणात्। अविद्वान् देहयात्रानिमित्तं भूतसूक्ष्माण्याश्रित्य कर्मप्रयुक्तो देहपरिणमनुभवितुं संसरति विद्वांस्तु ज्ञानप्रकाशितं मोक्षं नाडीद्वारमाश्रयते तदेतदा श्लुत्युपक्रमादित्युक्तम्। नन्वात्मतत्त्वं विदुषा प्राप्यं न च तद्देहान्तरायत्तं तत्र कुतो भूताश्रयत्वं श्लुत्युपक्रमो वेति"। अत्रोच्यते। श्रुतयोप्य चेदम् अदर्शनाच्छ्लमविद्यादोनू क्लेशानपरविद्यासामर्थ्यादपेक्षितमुक्ततत्वं प्राप्यते। सम्भवति तत्र श्लुत्युपक्रमोभूताश्रयत्वञ्च। न हि निराश्रयाणां प्राणानां गतिरुपपद्यते। तस्माद्दोषः" भा०। "तदाऽपीतेः संसारव्यपदेशात्"सू०।"तेजः परस्यां देवतायामित्यत्र प्रकरणसामर्थ्यात्सत्यया प्रकृतं तेजः साध्यत्वं सम्पाद्यं स्वरूपापन्नं भूतान्तरसहितं प्रयतः पुंसः परस्यां देवतायां सम्पद्यत इत्येतदुक्तं भवति। कीदृशीपुनरियं सम्पत्तिः स्यादिति चिन्त्यते। तत्रात्मनिरूपणावसरे स्वरूपप्रविलय इति प्राप्तं तत्प्रकृतिलोपपत्तेः। सर्व्वस्य हि जनिमतोवस्तुजातस्य प्रकृतिः परा देवतेति प्रतिष्ठापितम्। तस्मादात्मनिकोऽयमविभागापत्तिः इत्येवं प्राप्ते ब्रूमः। तत्तेजआदिभूतसूक्ष्मं श्रोत्रादिकरणाश्रयभूतमाऽप्रोतेरा संसारभोगात् सम्यग्ज्ञाननिमित्तादवतिष्ठते। "योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्" इत्यादिसंसारव्यपदेशात्। अन्यथा हि सर्वः प्राणबन्धनश्च एवोपाधिप्रत्यस्तमयादत्यन्तं ब्रह्म सम्पद्येत तत्र विधिशास्त्रं चानर्थकं स्यादिद्याशास्त्रञ्च। मिथ्याज्ञाननिमित्तश्च बन्धो न सम्यग्ज्ञानादृते विनिवर्तितुमर्हति। तस्मात्तत्प्रकृतित्वेऽपि क्षुद्रप्रविलयवद्देहजभावावश्यंभावैषैषा सम्पत्तिः" भा०। "सूक्ष्मं प्रमाणतश्च तथोपलब्धेः" सू०। "तच्छरीरभूतसहितं तेजोजीवस्याच्छरीरात् प्रवसत आश्रयभूतं स्वरूपतः परिमाणतश्च सूक्ष्मं भवितुमर्हति। तथा हि नाडीनिष्क्रमणावस्थादिभ्योऽस्य सौक्ष्म्यमुपलभ्यते। तत्र तत्सूक्ष्मात् संस्कारोपपत्तिः स्वच्छत्वाच्चाप्रतीघातोपपत्तिः अतएव च देहान्तिर्गच्छत्पार्श्वे नोपलभ्यते" भा०। "नोपमर्दनात्" सू०। "अतएव च सूक्ष्मत्वाच्चास्य स्थूलशरीरोपमर्दनं हार्दादिनिमित्तेनेतरत् सूक्ष्मशरीरमुपगच्छति" भा०। "अस्यैव चोपपत्तेरेष ऊष्मा" सू०। "अस्यैव च सूक्ष्मशरीरस्यैष ऊष्मायमेतस्मिन् जीवच्छरीरे संस्पर्शनोष्णिमानं विजानाति। तथा हि मृतावस्थायामवस्थितेऽपि देहे विद्यमानेषु च रूपादिषु देहगुणेषु नोष्मोपलभ्यते जीवदवस्थायामेव तूपलभ्यते इत्यत उपपद्यते प्रसिद्धशरीरव्यतिरिक्तरूपास्य एवैष ऊष्मेति। तथा च श्रुतिः "उष्ण एव जाविष्यंश्शीतो मरिष्यन्निति" भा०। "प्रतिषेधादिति चेन्न शारीरात्" सू०।"अमृतत्वञ्चानुपोष्येत्यतोविशेषणादात्यन्तिकेऽमृतत्वे गत्युत्क्रान्त्योरभावोऽभ्युपगतः तत्रापि कैश्चित् कारणैरुत्क्रान्तिमाशङ्क्य प्रतिषेधति। "अथाकामयमानोयोऽकामो निष्काम आप्तकाम आत्मकामोन तस्य प्राणाउत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येतीति"। अतः परविद्याधिषयात् प्रतिषेधात् न परब्रह्मविदोदेहात् प्राणानामुत्क्रान्तिरस्तीति चेदुच्यते। यतः शारीरादात्मन एष उत्क्रान्तिप्रतिषेधः प्राणानां, न शरीरात्। कथमवगम्यते। "न

तस्मात् प्राणाउत्क्रामन्तीति"शाखान्तरे पञ्चमीप्रयोगात्। सम्बन्धसामान्यविवक्षया हि षष्ठी शाखान्तरगतया पञ्चम्या सम्बन्धविशेषे व्यवस्थाप्यते। तस्मादिति च प्राधान्यादभ्युदयनिःश्रेयसाधिकृतो देही सम्बध्यते न देहः। न तस्मा दुत्क्रमिष्यतोर्जीवात्' प्राणाउत्क्रामन्ति सहैव तेन भवन्तीत्यर्थः। समाप्तश्च प्रकरणतो भवत्युत्क्रान्तिर्देहादित्येवं प्राप्ते प्रत्युच्यते"भा०।"स्पष्टो ह्येकेषाम्" सू०।"नैतदस्ति यदुक्तं परब्रह्मविदोऽपि देहादुत्क्रान्तिः प्रतिषेधश्च देहपादानत्वादिति। यतोदेहापादान एवोत्क्रान्तिप्रतिषेध एकेषां समाम्नातॄणां श्रुत उपलभ्यते। तथाह्यार्त्तभागप्रश्ने 'कतमायं पुरुषोऽियते तदस्मात् प्राणा. उत्क्रामन्त्याहोस्विन्न ?" इत्यत्र"नेतिहोवाच याज्ञवल्क्य" इत्यनुत्क्रान्तिपक्षं परिगृह्य न तर्ह्यत्रयमनुत्क्रान्तेषु प्राणेषु स्वपिति इत्यस्यामाख्यायाम्" "अतैव समवलीयन्ते" इति प्रविलयं प्राणानां प्रतिपाद्य तत्सिद्धये "सदुच्चयत्वाद्धायत्याद्यातोऽस्त मेत" इति सगुणपरामृष्टस्य प्रकृतस्योत्क्रान्त्यवधेरुच्चयनादीनि समामनति"देहस्य चैतानि स्थानानि देहिनः"। तत्सामान्यात् "न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवलीयन्त"इत्यत्राप्य भेदोपचारेण देहापादानस्यैवोत्क्रमणस्य प्रतिषेधः; यद्यपि प्राधान्यं देहिन इति व्याख्येयम्। येषां पञ्चमीपाठः येषान्तु षष्ठीपाठस्तेषां विद्वत्सम्बन्धिन्युत्क्रान्तिः प्रतिषिध्यत इति प्राप्तोत्क्रान्तिप्रतिषेधार्थत्वादस्य वाक्यस्य देहापादनैव सा प्रतिसिद्धा भवति देहादुत्क्रान्तिः प्राप्ता न देहिनः। अपि च"चक्षुषो वा मूर्द्ध्नोऽन्येभ्यो वा शरीर देशेभ्यस्तदुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति"इत्येवमविद्वद्विषये समपञ्चमुत्क्रमणं संसारगमनञ्च दर्शयित्वा"इति तु कामयमान"इत्युपसंहृत्याविद्वत्कथाम्"अथाकामयमान" इतिव्यपदिश्य विद्वांसं, यदि तद्विषयेऽप्युत्क्रान्तिमेव प्रापयेदसमञ्जस एव व्यपदेशः स्यात्। तस्माद्विद्वद्विषये प्राप्तयोर्गत्युत्क्रान्त्यो र्विद्वद्विषये प्रतिषेध इत्येवमेव व्याख्येयं व्यपदेशार्थवत्त्वाय। न च ब्रह्मविदः सर्वगतब्रह्मात्मभूतस्य प्रलीयमानस्य गत्यर्थ उत्क्रान्तिर्गतिर्वोपपद्यते निष्क्रियत्वात्। "अत्र ब्रह्म समश्नुत" इति चैवं जातीयकाः श्रुतयोगत्युत्क्रान्त्यो रभावं सूचयन्ति" भा०। "स्मर्यते च" सू०। स्मर्यतेऽपि च महाभारते गत्युत्क्रान्त्योरभावः। "सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः। देवा अपि च मार्गेषु मुह्यन्तेऽस्य पदैषिणः"इति। ननु गतिरपि ब्रह्मविदः स्मर्यते"शुकः किल वैयासकिर्ब्रह्मलोकपरायणमभिप्रतस्थे पिता त्वनुगम्याकूतोभौ कृषि प्रतिनिवर्तेते"। न शरीरस्यैवायं योगबलेन विशिष्टदेशप्राप्तिपूर्वकः शरीरोत्सर्ग इति द्रष्टव्यं सर्वभूतदृश्यत्वाद्यनुपपन्नत्वात्। नह्यशरीरं गच्छन्तं सर्वभूतानि द्रष्टुं शक्नुयुः। तथा च तत्रैवोपसंहृतम्। "शुकस्तु मारुताच्छ्रोत्रां गतिं ज्ञात्वान्तरिक्षगः। दर्शयित्वा प्रभावं स्वं सर्वभूतगतोऽभवदिति। तस्मादभावः परब्रह्मविदोगत्युत्क्रान्त्योः। गतिस्मृतीनान्तु विषयमुपरिष्टाद्व्याख्यास्यामः"भा०"तानि परे तथाह्याह"सू०।"तानि पुनः प्राणशब्दोदितानीन्द्रियाणि भूतानि च परब्रह्मविदस्तस्मिन्नेव परस्मिन्नात्मनि प्रलीयन्ते। कस्मात् ? तथाह्याह स्मृतिः "एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्तीति'। ननु "गता: कलाः पञ्चदश प्रतिष्ठा' इति विद्वद्विषयैषापरा स्मृतिः परब्रह्मादात्मनोऽन्यत्वापि कलानां प्रलयमाह स्म। न सा खलु व्यवहारापेक्षा पार्थिवादाः; कलाः पृथ्वीव्यादीरेव स्वप्रकृतीरपियन्तीति। इतरा तु विद्वत्प्रतिपत्त्यपेक्षा कृत्स्नं कलाजातं परब्रह्मविदो ब्रह्मैव सम्पद्यत इति तस्माददोषः." भा० "अविभागो वचनात्" सू०। "स पुनर्विदुषः कलाप्रलयः किमितरेषामिव सावशेषो भवत्याहोस्विन्निरवशेष ? इति। तत्र प्रलयसामान्याच्छ्रुत्यवशेषतापक्षो ब्रवीति अविभागापत्तिरिति। कुतः? वचनात्। तथाहि कलाप्रलयमुक्त्वा वक्ति"भिद्यते चासां नामरूपे पुरुष इत्येवं प्रोच्यते एषोऽकलोऽमृतो भवतीति"। अविद्यानिमित्तानाञ्च कलानां न विद्यानिमित्ते प्रलये सावशेषतोपपत्तिः। तस्मादविभाग एवेति"भा०।"तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः; शताधिकया" सू०। "समाना चासृत्युपक्रमादमृतत्वञ्चानुपोष्य पूर्वयोः। समाना ऽऽसृत्युपक्रमा चाविद्वद्विदुषोरुत्क्रान्तिरित्युक्तं तमिदानीं सृत्युपक्रमं दर्शयति। तस्योपसंस्कृतवागादिकलाप्रलयोऽस्ति क्रमिष्यतो विज्ञानात्मन ओक आयतनं हृदयम्। "स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामतीति" श्रुतेः। तदग्रज्वलनम्। ततः पूर्ववद्या चक्षुरादिस्थानापादाना चोत्क्रान्तिः श्रूयते "तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति "चक्षुषो वा मूर्द्ध्नोऽन्येभ्यो वा शरीरदेशेभ्य" इति। सा किमविशेषेणैव विद्वदविदुषोर्भवति ? अथास्ति कश्चिद्-

दुभो विशेषनियमः ? इति विचिकित्सायां श्रुत्यविशेषाद् नियममाप्राप्यावाचष्टे । समाने पि हि विद्वद्विदुषोर्हृदया ग्रद्योतेन तत्प्रकाशितद्वारत्वे च मूर्द्धस्थानादेव विद्वान्विष्वक्रामति स्थानान्तरेभ्यस्त्वितरे । कुतः ? विद्यासामर्थ्यात् । यदि विद्वानपीतरवत् यतः कुतश्चिद्धृदयाद्उत्क्रामेद्नैवोत्क्रमेत् लोकं लभेत तत्रानर्थिकैव विद्या स्यात् । तच्छेषगत्यनुस्मृतियोगाच्च विद्याशेषभूत च मूर्द्धन्यनाडीसम्बन्धा गतिरनुशीलयितव्या विद्या विशेषेषु विहिता तामभ्यस्य स तत्रैव प्रतिष्ठत इति युक्तम् । तस्माद्उदयालयेन ब्रह्मणा सूपासितेनानुगृह्यते ब्रह्मावसायसोविद्वान् मूर्द्धन्यैव शताधिकया शतादतिरिक्तया एकशततमया नाड्या निष्क्रामति इतराभिरितरे । तथा हि हार्दविद्यां प्रकृत्य समामनन्ति "शतञ्चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका । तयोर्द्ध्वमायन्नमृतत्वमेति विष्वङन्या उत्क्रमणे भवन्तीति" भा० । "रश्म्यनुसारी" सू० । "अस्ति दहरोऽस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म" इत्युपक्रम्य विहिता । तत्प्रक्रियायाम् अथ एताहृदयस्य नाड्य इत्युपक्रम्य सुषुम्णश्च नाडीरश्मिसम्बन्धमुक्तोक्तम् । "अथ यत्रैतद् आस्मात्शरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्द्ध्वमाक्रमत" इति । पुनश्चोक्तम् "तयोर्द्ध्वमायन्नमृतत्वमेतीति" । तस्माच्छताधिकया नाड्या निष्क्रमन् रश्म्यनुसारी निष्क्रामतीति गम्यते । तत्किमविशेषेणैवाहनि रात्रौ वा म्रियमाणस्य रश्म्यनुसारित्वमाहोस्विद्दहरे वेति संशये सति अविशेषश्रवणादविशेषेणैव तावद्रश्म्यनुसारीति प्रतिपाद्यते" भा० । "निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च" सू० । "अस्त्यहनि नाडीरश्मिसम्बन्ध इत्यहनि मृतस्य स्याद्रश्म्यनुसारित्वं रात्रौ तु प्रेतस्य न स्यात् नाडीरश्मिसम्बन्धविच्छेदादिति चेन्न । नाडीरश्मिसम्बन्धस्य यावद्देहभावित्वात् यावद्देहभावी हि गिरागिरत्वसम्बन्धः । दर्शयति चेतमर्थं श्रुतिः "अमुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते ता अमुष्मिन्नादित्ये सृप्ताः" इति । निदाघसमये च निशाप्यपि किरणानुवृत्तिरूपलभ्यते प्रतापादिकार्यदर्शनात् । लोकानुवृत्तेस्तु दुर्लक्ष्यत्वाल्लवलवरजसोष गवाक्षरेष्विव दृष्टिनेषु । "अहरेवैतद्रात्रौ विदधातीति" चैतदेव दर्शयति । यदि च रात्रौ प्रेतोविनैव रश्म्यनुसारेणोर्द्ध्वमाक्रमेत रश्म्यनुसारानर्थक्यं भवेत् । न ह्येतद्विशिष्याभिधीयते योदिवा प्रैति स रश्मीनमेवोर्द्ध्वमाक्रमते यस्तु रात्रौ सोऽनमेवैति" । अथ तु विद्वानपि रात्रिप्रायणाऽपराधमात्रेण नोर्द्ध्वमाक्रमेत पाक्षिकफला विद्येति अप्रवृत्तिरेव तस्यां स्यात् मृत्युकालानियमात् । अथापि रात्रावपरतोऽहरागमसुदीक्षेत । अहरागमेऽभ्यस्य कदाचिदुरश्मिसम्बन्धार्हं शरीरं स्यात् पावकादिसम्पर्कात् । "स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छतीति" च श्रुतिरनुदीक्षां दर्शयति । तस्मादविशेषेणैवेदं रात्रिन्दिवं 'रश्म्यनुसारित्वम्" भा० । "अतश्चायनेऽपि दक्षिणे"सू० । "अतएवोदीच्यानुपपत्तेः अपाक्षिकफलत्वाच्च विद्याया अनियतकालत्वाच्च मृत्योर्दक्षिणायनेऽपि म्रियमाणो विद्वान् प्राप्नोत्येव विद्याफलम् । उत्तरायणमरणप्राशस्त्यप्रसिद्धेर्भीष्मस्य च प्रतीक्षादर्शनात् "आपूर्य्यमाणपक्षादात्मान् षडुदङ्उदेति मासान् तानिति" च श्रुतेरमेक्षितत्वयुत्तरायणमितीमामाचक्षाणेन सूत्रेणापनुदति । प्रायण्यप्रसिद्धिरविहृद्विषया । भीष्मस्य प्रतिपालनमाचारपरिपालनार्थं पितृप्रसादलब्धस्वच्छन्दमृत्युताख्यापनार्थञ्च । श्रुतेस्त्वर्थवत्त्वात् आतिवाहिकलिङ्गात्" इति । ननु च "यत्र काले त्वनावृत्तिमावृत्तिञ्चैव योगिनः । प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभेति" कालप्राधान्येनोपक्रमस्याऽहरादिकालविशेषः श्रुतावनावृत्तये नियतः अयं रात्रौ दक्षिणायने वा प्रयातोऽनावृत्तिं यायादिति । अत्रोच्यते भा० । "योगिनः प्रति च स्मर्य्येते स्मार्त्ते चैते" सू० । 'योगिनः प्रति चायमहरादिकाल विनियोगोऽनावृत्तयेऽर्थ्यते स्मार्ते च ते योगसाङ्ख्ये न श्रौते । अतोविषयभेदात् प्रमाणविशेषाच्च नास्य स्मार्तस्य कालविनियोगस्य श्रौतेषु विज्ञानेष्ववतारः । "तत्र अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्" । "धूमोरात्रिस्तथा कृष्णः षण्मासादक्षिणायन मिति" श्रौतावेव देवपितृयाणौ प्रत्यभिज्ञायेते स्मृतावपीति । उच्यते । "तद्काल वक्ष्यामीति स्मृतौ कालप्रतिज्ञानाद्विरोधमाशङ्क्य परिहार उक्तः । यदा पुनः स्मृतावपि अग्न्याद्यादेवा एवातिवाहिका स्मर्य्यन्ते तदा न कश्चिद्विरोध इति भा०"

उत्क्रमणीय त्रि० उद्+क्रम-कर्मणि अनीयर् । अतिक्रमणीये "न वेदवेद्यमाक्षात्र न लोकयत्नादपि । गतिरुत्क्रमणीयाते प्रयासमरयं प्रति" भा० व० ८५ अ० । उद्क्रमणस्येदम् अ । उत्क्रमणसम्बन्धिनि त्रि० ।

उत्क्रान्त त्रि० उद्+क्रम-कर्त्तरि क्त। १अतिक्रान्ते देशादौ २व्यपक्रान्ते च। "उत्क्रान्तानामभिधायोपरिष्टात्" भाषः "उत्क्रान्तानां मृतानाम्" मल्लि०।

उत्क्रान्ति स्त्री उत्+क्रम-क्तिन्। देशादुत्क्रमणे व्यपसरणे च उत्क्रमणशब्दे दृष्टिः।

उत्क्रोश पु० उद्+क्रुश-अच्। १कुररीपक्षिणि। अयञ्च पक्षी सुश्रु० जलचरमध्ये प्लवत्वेन संघचारित्वेनोक्तः। "कुररसारसक्रौञ्चोत्क्रोशचक्रवाकहंसानां मद्गुक्रोशकाकोलूकानां" इत्यत्र "प्लवाः संघचारिणः" इत्यत्रेन। "उत्क्रोशरसशंखिड़ा मत्स्यक्षेत्रां यशाणं पाययेत्" सुश्रु०। २उच्चैःक्रन्दिनि त्रि०। ततः चतुरर्थ्यां उत्करा० ङ्। उत्क्रोशीय तत्सन्निहिते देशादौ।

उत्क्लेदिन् त्रि० उद्+क्लिद-णिच्-णिनि। अङ्गतः क्लेदकारके आर्द्रीकारके "लघु तोक्ष्णोष्णसुत्क्लेदि रूक्षं वातानुलोमनम्" सुश्रु०। स्त्रियां ङीप्।

उत्क्लेश पु० उद्+क्लिश-घञ्। अङ्गसंयुक्ते क्लेशे च "उत्क्लिश्याद्वं न निर्गच्छेत् प्रसेकश्चोपनेरितम्। हृदयं पीड्यते चास्य तमुत्क्लेशं विनिर्दिशेत्" इत्युक्तलक्षणः रोगभेदः। "गुरुपाकरूक्षदधिमूलतया कफोत्क्लेशेन च" "क्लिन्नसुत्क्लेशजननम्" "तृष्णाशूलकफोत्क्लेशच्छर्द्विश्वासनिशारणम्" सुश्रु० ल्युट्। उत्क्लेशनमप्यत्र न० "इत्याहुत्क्लेशनं पूर्वम्" सुश्रु०।

उत्क्लेशक त्रि० उद्+क्लिश-णिच्-ण्वुल्। १उत्क्लेशकारके "कौशिकुल्यकः करभक इत्युपक्रमे "क्लीतः क्लमिः शरारी च यश्चाप्युत्क्लेशकः स्मृतः"। एते ह्यग्निप्रकृतयश्चतुर्विंशतिरेव च" सुश्रुतोक्ते २अग्निप्रकृतिके कोटभेदे। उत्क्लिश्नाति उद्+क्लिश-णिनि। २अङ्गसंयुक्ते क्लेशकारके त्रि० स्त्रियां ङीप्। "अल्पीभूतं कफोत्क्लेशि न स्निग्धं तनु पिपासवे" सुश्रु०।

उत्क्षिप्त त्रि० उद्+क्षिप्-क्त। १ऊर्द्ध क्षिप्ते "क्षणं क्षणोत्क्षिप्तगजेन्द्रचिन्ता" "उत्क्षिप्तचक्रप्रतपांशुकरावलम्बैः" माघः २उद्घाटिते च। (रश्मिभिः) उत्क्षिप्तपुलकैश्च तथा कृत्यैश्च सपताकिभिः" भा०व० १५अ० "गुरुणो यत्र स्थितेन बोधयेन चतुर्हिगवस्थितारिपक्षोद्दृष्टु वाग्दण्डादिना प्रहर्त्तुं। गजस्कन्धे ताडयमुद्यस्थानमुत्क्षिप्तगुरुभैः परकीयगुरुमोद्घाटनकरैः" हेमच०। धुक्तूरे पु० गन्धर्व०। तस्य फलसेवने अज्ञानताधाजकत्वात्तथात्वम्।

उत्क्षिप्तिका स्त्री उत्क्षिप्त धुक्तूरत्व कन् स्त्रीत्वात् टापि अत इत्वम्। धुस्तूराकारे कर्णभूषणभेदे हेमचन्द्रः।

उत्क्षेप पु० उद्+क्षिप-घञ्। १ऊर्द्धक्षेपणे "पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णसारप्रभाणाम्" मेघ०। "पक्ष्मोत्क्षेपात् समोदितः" सुश्रु०। कर्त्तरि घञ्। २उत्क्षेपकारके त्रि०

उत्क्षेपक त्रि० उद्+क्षिप-ण्वुल्। १ऊर्द्धं प्रक्षेपके २उत्क्षिप्यापकारके चौरे च। "उत्क्षेपकग्रन्थिभेदौ करचंद्यक्षीनकौ। कार्य्यौ द्वितीयापराधे करपादैकक्षीनकौ" या० स्मृ० यद्यात्युत्क्षिप्यत्यपहरतीत्युत्क्षेपकः। यश्चादिद्वं स्वर्णादि विस्रस्योत्कृत्य वा योपहरत्यसौ ग्रन्थिभेदः तौ यथाक्रमङ्करेण सन्दंशसदृशेन तर्ज्जन्यङ्गुष्ठेन क्षीनौ कार्य्यौ द्वितीयापराधे पुनः करस्य पादस्य करपाद तस्य तदेकस्य करपादैकन्यूनीनं ययोक्तकरपादैकक्षीनकौ कार्य्यौ। उत्क्षेपकग्रन्थिभेदकयोरेकमेकं करम्पादञ्च छिन्द्यादित्यर्थः। एतदप्युत्तमसाहसप्राप्तियोग्यद्रव्य विषयम्। "तदङ्गच्छेद इत्युक्तोदण्ड उत्तमसाहस" इति नारदवचनात्। तृतीयापराधे तु बध एव। तथा च मनुः "अङ्गुलीं ग्रन्थिभेदस्य छेदयेत् प्रथमे यष्टे। द्वितीये हस्तचरणौ तृतीये बधमर्हतीति" मिता०।

उत्क्षेपण न० उद्+क्षिप-ल्युट्। १ऊर्द्धक्षेपणे। "उत्क्षेपणं तथावक्षेपणमाकुञ्चनं तथा। प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च" भाषा० "उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्म्माणि" कणा० सू० "इतिरवधारणार्थः भ्रमणादेरपि गमनान्तर्गतत्वात्। अत्र च उत्क्षेपणत्वावक्षेपणत्वाकुञ्चनत्वप्रसारणत्वगमनत्वानि कर्म्मत्वसामान्याद्व्याप्याः पञ्च जातयः। नन्वेतदूर्द्धप्रदेशगमनस्य कर्म्मपर्य्यायत्वात् सर्व्वत्र गच्छतीतिवदुत्क्षेपणादुत्क्षेपणत्वादीनां चतसृणां जातीनां परस्परात्मनाभावसमानाधिकरणानां सामानाधिकरण्यानुपपत्तेः चतस्र एव कर्म्मत्वव्याप्या जातय इति चेत् सत्यं कर्म्मपर्य्याय एव गमनं पृथगभिधानन्तु भ्रमणरेचनस्यन्दनोर्द्ध्वज्वलनमनोगमनादीनां भिन्नभिन्नबुद्धिव्यपदेशभाजामेकेन यत्नेन सङ्कलनार्थं यद्वा गमनत्वमपि कर्म्मत्वव्याप्यं पञ्चमी जातिरेव तेन भ्रमणरेचनादिष्वेव गमनप्रयोगो लक्ष्यः उत्क्षेपणावक्षेपणादिषु यदि गमनप्रयोगस्तदा भाक्तः स्वाश्रयसंयोगविभागासमवायिकारणत्वमेव गौणमुख्यसाधारणो धर्म्मः गमनत्वजातेस्त्वनियतदिग्देशसंयोगविभागासमवायिकारणत्वमेव व्यङ्गकं तच्च भ्रमणादिषु सर्व्वत्रेति गमनपदस्यैव तेषां पर्य्यायत्वम्। निष्कु-

मनत्वप्रमेयत्वादिका तु न जातिः एकस्मिन्नेव कर्म्मणि दृष्टादृष्टान्तरं गच्छति पुरुषे कस्यचित् दृष्टः प्रविशतीति प्रत्ययः कस्यचित्तु निष्क्रामतीति तत्र जातिसङ्करः स्यात् तथा भ्रमणादेरेकस्या क्रियायाश्च निष्क्रियापरां प्रविशति निष्क्रामति प्रविशतीति प्रत्ययद्वयदर्शनादुपाधिसामान्यमेवैतदध्यवसेयम्। उत्क्षेपणादौ तु मुसलमुत्क्षिपाणोलोष्टाजनितेन प्रयत्नेन प्रयत्नवदात्मसंयोगादसमवायिकारणाद्दण्डे तावदुत्क्षेपणं ततः उत्क्षेपणविशिष्टदण्डनोदनादसमवायिकारणात् मुसलेऽप्युत्क्षेपणाख्यं कर्म्म युगपद्भावि ततः अङ्गुलुत्क्षिप्रयोर्हस्तमुसलयोरवक्षेपणेच्छाजनितप्रयत्नवदात्मसंयोगाद्दण्डनोदनाच्च युगपदेव हस्ते मुसले चावक्षेपणम् उदूखलपर्यन्तानुकूलं संजायते ततो दृढतरद्रव्यसंयोगाद् यदूर्द्धमाकाशमुसलस्योर्द्ध्वगमनं भवति तत्र नेच्छा न वा प्रयत्नः कारणं किन्तु संस्कारमात्रादेव मुसलस्योत्पतनं तच्च गमनमात्रं नतूत्क्षेपणं, भाक्तस्तूत्क्षेपणव्यवहारः एवमनुलोमप्रतिलोमवायुद्वयसङ्कटप्रयाहाच्चोत्तरितृणतूलकादौ चोत्क्षेपणव्यवहारो भाक्तः। एवं स्रोतोद्वयसङ्कटप्रयाच्छ्रोतोर्द्ध्वगमनेऽपि। एवमुत्क्षेपणावक्षेपणव्यवहारः शरीरतदवयवतत्संयुक्तमुसलतोमरादिष्वेव मुख्यः। भवति हि हस्तमुत्क्षिपति तोमरमुत्क्षिपतीति एवमवक्षिपतीत्यपि उपस्करः।

उत्क्षेपश्च चौते कर्म्मणि गोप्राणायोन्यदेशक्षेपणे भवति तथा हि। "भूतयोः कृत्वा वेणुयष्ट्यां वा कुमे वाऽऽसञ्जयोभयतः स्थाणुहस्तसंयवलम्बीकानामन्यतमस्मिन्नुत्क्षेपणवदासञ्जयेत्तैः" कात्या०५,१०,२१। "उत्क्षेपणवदिति गोरप्राणदेशम्" कर्कः यजु० ३,६१ मन्त्रव्या० "गोभिरात्राप्तमशक्त्वादिति" वेददी० तत्पदं व्याख्यात्। "अतिमात्रलोहितततौ बाहू घटोत्क्षेपणात्" यजु०। करणे ल्युट्। २धान्यमर्दनकाष्ठादौ मेदि० ३उदञ्चने ४गोदण्डप्रभे च हेमच०। कर्म्मणि ल्युट्।५व्यञ्जने न०।

उत्क्षचित त्रि० उद्+क्षच-क्त। १उद्धृषिते २रचिते च। "कुसुमोत्क्षचितानू बलीभृतः" रघुः। [यङ्क्त च०।

उत्क्षला स्त्री उद्+क्षल-अन्यर्थे-अच्। सुरानामगन्धद्रव्ये

उत्क्षात त्रि० उद्+क्षन-क्त। १उन्मूलिते २उत्पाटिते "फलैः संवर्द्धयामासुरुत्क्षातप्रतिरोपिताः" रघुः। "रथेनातृत्क्षातस्त्रिमितगतिना यक्तु० भावे क्त। ३उत्खनने न०। उत्क्षातलेखिः।

उत्क्षातलेखि पु० उत्क्षातस्तृणवर्जमेव लेखि। "उत्क्षातलेखिः शष्कार्द्रैर्वप्रक्रीडा निगद्यते" हलायुधस्य शष्कादिना मृत्तिकाखननरूपक्रीडायाम्।

उत्क्षाय अव्य० उद्+क्षन-ल्यप्। उत्पाट्येत्यर्थे। "शक्रास्तृत्क्षाय तरसा" रघुः पक्षे उत्क्षन्येत्यर्थः। [अमरः।

उत्क्षेड पु० उद्+क्षिड-भावे घञ्। क्षेडने उद्+क्षेडधातौ उदा०।

उत्क्ष त्रि० उन्द्-क्षेदने क्त वा तस्य नः। क्लिन्ने आर्द्रवस्तुनि

उत्क्षंस पु० उद्+तंसि-अच्। १कर्णाभरणे, २शिरोभूषणे च। "नोत्क्षंसं क्षिपति क्षितौ श्रवणतः सा मे स्फुटेऽप्यागसि" सा०द०। अस्य कर्णभूषणवाचकत्वेऽपि कर्णपदसमभिव्याहारे भूषणमात्रपरता तत्काले कर्णस्थितत्वद्योतनार्थं वा कर्णादिशब्दप्रयोगः।

उत्क्षट त्रि० उत्क्रान्तं तटम् अत्या० त०। तटपर्य्यन्ताभावके "उत्क्षटा इव नदीरयाः स्थलीम्" रघुः।

उत्क्षम त्रि०उद्+तप-क्त। १संतप्ते २शुष्कांसे न०भावे क्त। ३उत्तापे न०। उद्गतं तप्तं तापो यस्य ।४स्नाते त्रि०मेदि०

उत्क्षय त्रि० उद्+क्षनभ-क्त। १जर्जरीकृते २जर्जरीभूते।

उत्क्षम त्रि०उद्+तमप्। १उत्कृष्टे। "ज्योतिषामुत्तमोदेव। दीपोऽयं प्रतिगृह्यताम्" दीपमन्त्रः "अदक्षवा हृत्तमनुत्तमं तमः" माघः "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" गीता। द्विजोत्तमः नरोत्तमः नृपोत्तम! "धर्म्मोऽधर्मविदुत्तमः" विष्णुसह०। उत्-उद्गतः अतिशये तमप्। २विष्णौ पु०। "अनादिनिधनो धाता विधाता धातुरुत्तमः" विष्णुसह०। "धातुरुत्तम इति वाक्यैक एवायं सामानाधिकरण्येन। सर्वधातुभ्यः पृथिव्यादिभ्य उत्कृष्टश्चिदात्मस्वरूपः आत्मविरिञ्चेत्कृष्ट इति वा। नामद्वयं वा कार्य्यकारणप्रपञ्चधारणात् धातुश्चिद्धातुः उत्तमः सर्व्वोत्तमतानासुरुत्तमाद्धातुरुत्तमः" भा०। ३अन्ये। "उत्तमैकाभ्यां च" पा०। "उत्तमशब्दोऽन्यार्थः" सि० कौ०। उत्तानपादस्य पुत्रभेदे ४ध्रुवसपत्नभ्रातरि पु० स च उत्तानपादस्य सुरुचो भार्य्यायास्तत्पुत्रः। "जाये उत्तानपादस्य सुनीतिः सुरुचिस्त्रियाः। सुरुचिः प्रेयसी यस्य नेतरा यत् सुतो ध्रुवः। एकदा सुरुचेः पुत्रमङ्कमारोप्य लालयन्। उत्तमं नाभ्यनन्दत्तं ध्रुवं राजाप्यनन्दत" भा०४स्क०८अ०। "उत्तमस्त्वजतोहार्क्षो जगवार्थां बलीयसा। कृतः पुण्यजनेनाजौ तन्माताऽस्य गतिं

गता" भा० ४ स्क० १० अ०। प्रियव्रतस्य ५ पुत्रभेदे स एव हतोयमनुः यथोक्तं भाग० ८ स्क० १ अ०। "हतीय उत्तमो नाम प्रियव्रतसुतोमनुः। पवनः सृञ्जयो यज्ञहोत्राद्यास्तत्सुता नृप!। वशिष्टतनयाः सप्त कपयः प्रमदादयः। सत्यावेदसुता भद्रादेवा इन्द्रस्तु सत्यजित्। धर्म्मस्य सूनृतायान्तु भगवान् पुरुषोत्तमः। सत्यसेन इति ख्यातः जातः सत्यव्रतैः सह"। हरिवं० ७अ० तु औत्तमित्येनाय पठितः यथा। "स्वायम्भुवोमनुस्तात! मनुः स्वारोचिषस्तथा। औत्तमिस्तामसश्चैव रैवतश्चाक्षुषस्तथा। वैवस्वतस्य कौरव्य! साम्प्रतोमनुरुच्यते" इति क्रममनुदिश्य। "इदं हतीयं वक्ष्यामि तन्निबोध नराधिप!। वसिष्ठपुत्राः सप्तासन् वासिष्ठा इति विश्रुताः। हिरण्यगर्भस्य सुता ऊर्जा नाम सुतेजसः। कपयोनाम सप्तैता प्रोक्ताः कीर्त्यमानान् निबोध तान्। औत्तमेयान् महाराज! दशपुत्रान् मनोरमान्। ऐषऊर्जस्वलस्तेषु मधुर्माधव एव च। शुचिः शुक्रः सहश्चैव नभस्यो नभएव च। भानवस्तत्र देवाश्च मन्वन्तरसुताकृतम्"। तत्र स्वार्थे दृञ् औत्तमिः। "ऋषिपुत्रादिनामभेदस्तु कल्पभेदादविरुद्धः"। तिलमा०।

उत्तमफलिनी कर्म्म० नित्यष०। (क्षीराई)। दुग्धिकाहक्षे

उत्तमर्ण पु० उत्तमस्य ऋणमस्य। ऋणप्रयोजके (महाजन)। उत्तमर्णलक्षणादियाज्ञवल्क्येनोक्तो यथा "अथोत्तमर्णोऽधमर्णाद्याचेदुत्तमर्णं ब्रूयात् द्विकं त्रिकं चतुष्कं पञ्चकञ्च यतं वर्णानुक्रमेण प्रतिमासम्। सर्वे वर्णा वा स्वप्रतिपन्नां वृद्धिं दद्युः। अकृतामपि वत्सरातिक्रमेण यथाविहिताम्। आधुपभोगे वृद्ध्यभावः। दैवराजोपघातादृते विनष्टमाधिरुत्तमर्णोदद्यात्। अन्यदृष्टौ प्रविष्टायामपि। न स्थावरमाधिमृते वचनात्। ब्रूयात्तीतधनप्रवेशार्थमेव यत् स्थावरं दत्तं तद्ब्रूयात्तीतधनप्रवेशे दद्यात्। दीयमानं प्रयुक्तमर्थमुत्तमर्णस्याब्रुवतस्तत्परं न वर्द्धते। हिरण्यस्य परा वृद्धिर्द्विगुणा, धान्यस्य त्रिगुणा, वस्त्रस्य चतुर्गुणा, वल्लतिः स्त्रीपशूनाम्। किण्वकार्पासवल्लचर्म्मायुधेष्टकाङ्गारधान्यलवणा, अनुक्तानां द्विगुणा। प्रयुक्तमर्थं यथा कथञ्चित् साधयन्न राज्ञोवाच्यः स्यात्। साध्यमानश्चेद्राजानमभिगच्छेत्तत्समं दण्डयः। उत्तमर्णश्चेद्राजानमियात्तद्विभावितोऽधमर्णोराज्ञे धनदण्डमागमसंज्ञितं दण्डं दद्यात्। प्राप्तार्थश्चोत्तमर्णोविंशतिनिशतमंशम्। सर्व्वमप्याधेरुद्धारेणविभावितोऽपि सर्वं दद्यात्। तस्य च भावनास्त्रिलोभवन्ति लिखितं साक्षिणः समयक्रिया च। ससाक्षिकमाप्तं सप्रातिभमेव दद्यात्। लिखितार्थमविष्टे लिखितं पाटयेत्। असमयदाने धेरुसन्निधाने चोत्तमर्णोलिखितं दद्यात्"। अधिकन्तूपरिष्टे वक्ष्यते। उत्तमं देयत्वेनाख्यस्य ठन्। उत्तमर्णिकोऽप्यत्र। "पञ्च पञ्चशतम् दाप्यः प्राप्तार्थोत्तमर्णिकः" या० स्मृ०। "यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः। तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकम्" मनुः "ते च उपाया बृहस्पतिना दर्शिताः यथा। "छद्मना याचितस्वार्थमानीय कृणिकाहृतैः। अन्याकृतादि वाऽऽकृत्य दाप्यते तत्र सोपधिः। दारपुत्रपशून् हत्वा लत्वा हारोपवेशनम्। यत्रार्थी दाप्यतेऽर्थं स्वं तदाचरितमुच्यते। बद्धा खण्टहमानीय ताडनाद्यैरुपक्रमैः। कृणिको दाप्यते यत्र बलात्कारः स कीर्त्तितः"।

उत्तमशाख पु० उत्तमा उत्कृष्टा शाखाऽस्य। उत्कृष्टशाखे द्रुमे गङ्गा० चतुर्थ्यां ङ्क।

उत्तमशाखीय तद्बन्धिकृताद्यौ त्रि०।

उत्तमश्लोक त्रि० उत्तमः श्लोकः चरितं यस्य। पुण्यकीर्त्तौ कर्म्म०। २ उत्तमे काव्ये पु०। स च ध्वनिरूपः "इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्यात् ध्वनिर्बुधैः कथितः" काव्यप्र० उक्तलक्षणः।

उत्तमस् त्रि० उत्क्रान्तं तमो येन प्रा० ब० वा क्रान्ततमोवा। उत्क्रान्ततमस्के २ तमोऽतीते च। "क उत्तमःश्लोकगुणानुवादात् पुमान् विरज्येत विना पशुघ्नात्" भाग० १० स्क० १ अ०

उत्तमसाहस पु० साहसमधिकृततयाऽस्त्यस्य अर्श० अच्+ कर्म्म०। स्वत्यूके साहसाधिकारेण विहिते उत्कृष्टे दण्डे। "पणानां हे शते सार्द्धे प्रथमः साहसः स्मृतः। मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः" मनुः "अनाख्याय ददद्दोषं दण्डयं उत्तमसाहसम्" या० स्मृ० नानाख्याने उत्तमदण्डविषयमाह विष्णुः यथा दण्डयं इत्युपक्रमे "परस्य पतनीयाङ्गे कृते तूत्तमसाहसम्"। "व्यङ्गतायुङ्गाङ्गे कार्षापणशतम्" "मातृयुक्ते तूत्तमम्" "पारजायी सवर्णागमने तूत्तमसाहसं दण्डयः"। "अदुष्टां (कन्याम्) दुष्टामिति ब्रुवञ्जुत्तमसाहसम्" "कलोपगमङ्गोच्छेदी कीटोपघाती तूत्तमसाहसं दण्डयः" (अवगोरिता) यस्त्वेणोत्तमसाहसं दण्डयः" नेत्रकन्धराबाहुसक्थ्यं सभङ्गे चोत्तमम्" (साहसं दण्डयः) "रत्नाद्यपहर्त्र्युत्तमसाहसम्"। "यस्तयोः (पितापुत्रयोर्विवादे) पाक्षरः

व्यात्तश्लोत्तमसाहसः "तुलामानकूटकर्तुषु तदकूटे कूटवादिनश्च द्रव्याणां प्रतिरूपविक्रयिकस्य च"। "संभूय वणिजां प्रणयमनर्घेणावरुन्धताम्" प्रत्येकं "विक्रीणताञ्च"। "यस्तूत्तमर्णान् दास्ये नियोजतिश्लोत्तमसाहसदण्ड्यः"। "सीमाभेत्तारस्तत्तमसाहसेन दण्डयित्वा पुनः सीमां कारयेत्" "अभक्ष्यस्याविक्रेयस्य च विक्रयी देवप्रतिमाभेदकश्चोत्तमसाहसम् दण्डनीयः। "भिषङ्मिथ्याचरन्नुत्तमेषु पुरुषेषु"। २ प्राणिहिंसादिरूपे बलकृते कर्म्मभेदे न०। तत्रोत्तमसाहसादिस्वरूपलक्षणविभागादि मिता० दर्शितं यथा। "सामान्यद्रव्यप्रसभहरणात् साहसं स्मृतम्" या०स्मृ०। "सामान्यस्य साधारणस्य यथेष्टं विनियोगानर्हत्वाविशेषेण परकीयस्य वा द्रव्यस्यापहरणं साहसम्। कुतः प्रसभहरणात् प्रसह्याहरणाद्बलावष्टम्भेन हरणादिति यावत्। एतदुक्तं भवति। राजदण्डभयाद्योगं चोक्त्वा राजपुरुषेतरजनसमक्षं यत्किञ्चिद्धरणमारण्यपरदारप्रधर्षणादिकं क्रियते तत्सर्वं साहसमिति साहसलक्षणम्। अतः साधारणधनपरधनयोर्हरणस्यापि बलावष्टम्भेन क्रियमाणत्वात्साहसत्वमिति। नारदेनापि साहसस्य स्वरूपं विहितम्। "सहसा क्रियते कर्म यत् किञ्चिद्बलदर्पितैः। तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते"। तदिदं साहसञ्चौर्य्यवाग्दण्डपारुष्यश्लोसंपक्षेषु व्याप्तमपि बलदर्पावष्टम्भोपाधितोभिद्यत इति दण्डातिरेकार्थं पृथगभिधानम्य दण्डवैचित्र्यप्रतिपादनार्थं प्रथमादिभेदेन त्रैविध्यमभिधाय तल्लक्षणान्येव विहितम्। "तत् पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमन्तथा। उत्तमञ्चेति साहसेषु तत्रोक्तं लक्षणं पृथक्। फलमूलोदकादीनां क्षेत्रोपकरणस्य च। भक्ष्यान्नपेयमद्यादेः प्रथमं साहसं स्मृतम्। वासःपशुसुवर्णानां गृहोपकरणस्य च। एतेनैव प्रकारेण मध्यमं साहसं स्मृतम्। व्यापादोविषयस्त्रीणां परदाराभिमर्शनम्। प्राणोपरोधि वस्त्राद्यदुत्तमसाहसम्। तत्र दण्डः क्रियालोपः प्रथमस्य यथावरः। मध्यमस्य तु पञ्चशतैर्दण्डः पञ्चशतावरः। उत्तमे साहसे दण्डः सहस्रावर इष्यते। वधः सर्वस्वहरणं पुराद्विर्वासनाङ्कने। तदुल्लङ्घने द्विगुणो दण्ड उत्तमसाहसे" इति। बधादयश्चापराधतारतम्यादुत्तमसाहसे समस्ता व्याख्या वा योज्याः"। तत्र परद्रव्यापहरणरूपे साहसे दण्डमाह" मिता०। "तन्मूल्याद्द्विगुणोदण्डोनिक्षेपे तु चतुर्गुणः" या०स्मृ०। "तस्यापहृतद्रव्यस्य मूल्याद्द्विगुणोदण्डः यः पुनः साहसं कृत्वा नाहमकार्षमिति निह्नुते तस्य मूल्यात्त्रिगुणो दण्डो भवति। एतच्चादेव विशेषदण्डविधानात् प्रथमसाहसादिसामान्यदण्डविधानमपहारव्यतिरिक्तविषयम्" मिता०

उत्तमस्त्रीसंग्रहण न० परस्त्रियाः संग्रहणं कर्म्म०। स्मृयुक्ते परस्त्रियामुत्तमे मिथुनाभावाय प्रवृत्तिरूपव्यापारभेदे तत्स्वरूपविभागादि मिता० दर्शितं यथा

"प्रथम साहसादिदण्डप्राप्त्यर्थं त्रेधा तत्स्वरूपं व्यासेन विहितम्। "त्रिविधन्तत्समाख्यातमधमं मध्यमोत्तमम्। अदेशकालभाषाभिर्निर्जने च परस्त्रियाः। कटाक्षावेक्षणं हास्यमधमं साहसं स्मृतम्। प्रेषणक्ष्वेलमाल्यानाम्बूपभूषणवाससाम्। प्रलोभनञ्चान्नपानैर्मध्यमं समुदाहृतम्। सहासनं विविक्तेषु परस्परमपाश्रयः। केशाकेशि यत्रैव सम्यक् संग्रहणं स्मृतम्"। स्त्रीपुंसयोर्मिथुनीभावः संग्रहणं संग्रहणज्ञानपूर्व्वकत्वात्तत्कर्तुर्दण्डविधानस्य तज्ज्ञानोपायान्तावदाह। "पुमान् संग्रहणे याज्ञः केशाकेशि परस्त्रियाः। सद्योधा कामजैश्चिह्नैः प्रतिपत्तौ हयोक्तया" या०स्मृ०। संग्रहणे प्रवृत्तः पुमान् केशाकेश्यादिभिर्लिङ्गैर्ज्ञात्वा गृहीतव्यः। परस्परकेशग्रहणपूर्व्विकाक्रीडा केशाकेशि "तत्र तेनेदमिति सरूपे" इति पा० ठञ्-क्रीडौ गति "दृक् कर्म्मव्यतिहारे" पा० इति समासान्तदृक् प्रत्ययः अव्ययत्वाच्च लुप्ततृतीयाविभक्तिः। ततश्चायमर्थः। परभार्यया वा सह केशाकेशिक्रीडनेनाभिनवैः कररुहदशनादिकृतव्रणैः रागलक्षणैश्चिह्नैर्द्वयोः सम्मतिपत्त्या वा ज्ञात्वा संग्रहणे प्रवृत्तो गृहीतव्यः। परस्त्रीग्रहणं नियुक्तादिव्युदासार्थम्। किञ्च। "नीवीस्तनप्रावरणसक्थिकेशावमर्शनम्। अदेशकालसम्भाषं सङ्केतस्थानमेव च" या०स्मृ०। यःपुनः परदारपरिभाषणप्रच्छन्नप्रदेशकुचप्रावरणजघनमूर्द्धरुहादिस्पर्शं साभिलाषमाचरति। तथा अदेशे निर्जने जनताकीर्णे वान्धकारकुड्यकाले संलापनङ्करोति। परभार्यया वा सङ्केतसङ्गादौ रिरंसयेवावतिष्ठते। सोऽपि संग्रहणे प्रवृत्तो याज्ञः। एतच्चायङ्कामतो दोषपुरुषविषयत्वमितरस्य न दोषः। यथाह मनुः। "यस्त्वनाचारितः पूर्व्वमभिभाषेत कारणात्। न दोषमाप्नुयात्किञ्चिन्न हि तस्य व्यतिक्रमः" इति यः परस्त्रिया स्पृष्टः भाषितोऽपि याज्ञ इति तेनैवोक्तम्। "स्त्रियं स्पृशेदहेयं वः स्पृष्टो भर्त्रेत्यथा। परस्परस्यानुमते सर्वं संग्रहणं स्मृतमिति" यच्च मयेयं विदग्धाऽसद्गृह्मि-

नेति ज्ञाघया भुजङ्गजनसमक्षङ्गापयत्यसावपि ज्ञाङ्गा इति तेनैवोक्तम् ।"दर्पाद्वा यदि वा मोहात् ज्ञाघया वा स्वयं वदेत् । पूर्वं मयेयमुक्तेति तच्च स'यक्तव' स्मृतम्"

उत्तमा स्त्री उत्कृष्टसौन्दर्य्यान्वितायाम् स्त्रियाम् अमर० ।

उत्तमाङ्ग न० कर्म्म० । मस्तके । "बभौ पतङ्गङ्ग इवोत्तमाङ्गे" कुमा० । "क्वचिद् द्विषत्खड्गगृहीतोत्तमाङ्गः" रघुः । "पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन" मनुः । मस्तकस्य अङ्गेषूत्तमत्वं चक्षुरादीन्द्रियाधारत्वात् प्राणवायुसञ्चारस्थानत्वात् सर्वेषामङ्गानामुपरिवर्त्तमानत्वाच्च । अतएव "गर्भस्य हि सम्भवतः प्रथमं शिरः सम्भवतीत्याह शौनकः शिरोमूलत्वाद्धेन्द्रियाणाम्" सुश्रुतः शौनकीयमते इन्द्रियमूलत्वमस्योक्तम् "तत्र शरीरम् षडङ्गं शाखाश्चतस्रो मध्यं पञ्चमं षष्ठं शिर" इति सुश्रुतः षडङ्गविभागे हस्तपादानां चतुर्णां शाखात्वेन मध्यमस्य मध्यत्वेन उपवर्ण्यसर्वशेषे शिरसः कथनं पूर्वोक्तहेतोः प्राधान्यात्तस्येति बोध्यम् । प्रत्यङ्गविभागेऽपि "मस्तकोदरेत्यादिना सुश्रुतः मस्तकस्य प्रथमनिर्देशः प्राधान्यादेव लोकेऽपि मस्तकच्छेदनेऽवशिष्टाङ्गैः न प्रत्यभिज्ञा छिन्नमस्तकमालोक्य तु प्रत्यभिज्ञा इत्यतो मस्तकस्य प्रत्यभिज्ञासाधनत्वादपि उत्तमत्वम्" कथमन्यथा देवदत्तादिदेहस्य हस्तादिषु च अङ्गेषु मध्ये हस्तादिना न प्रत्यभिज्ञा इत्यतः मस्तकस्य उत्कृष्टत्वम् । हस्तादिच्छेदनेऽपि जीवनसम्भवात् मस्तकस्य छेदने तदभावादपि मस्तकस्य प्राधान्यमित्यपि मन्तव्यम् ।

उत्तमाभ्यस् न० सांख्यशास्त्रप्रसिद्धे नवविधतुष्टिमध्ये तुष्टिभेदे "नापकृत्य भूतानि विषयोपभोगः सम्भवतीति हिंसादोषदर्शनात् विषयोपरमे या तुष्टिः सा पञ्चमी उत्तमाम्भ उच्यते" सा० कौ० । अम्भसोऽतिशयेन उत्कृष्टं प्रतीव विवेकख्यातिं प्रति हेतुत्वात्तथात्वम् ।

उत्तमाय्य त्रि० उत्तमं क्रियते उत्तम-च्वि-कर्म्मणि वा० आय्य त्रि० णिलोपः । उत्तमीकृते । "उतेदमुत्तमाय्यम्" ऋ० ६,२२,६, "उत्तमाय्यमुत्तमीकृतम्" भा० ।

उत्तमारणी स्त्री उत्तममृच्छति ऋ-अनि ङीप् । इन्द्रीयर्य्याम्

उत्तमौजस् त्रि० उत्तममोजो यस्य । १उत्कृष्टतेजस्के दशमन्वन्तराधिपमनोः २पुत्रभेदे पु० हरिवं० "दशमे त्वथ पर्य्याये सूत्यमुक्त्वा "मनोः सुतोत्तमौजाश्च दाक्षिः क्षुप्श्च वीर्य्यवान् । यतानीको निराभिलो द्युषसेनो जयद्रथः । सूरिद्युम्नः सुवर्चाश्च दशमे मनोः सुताः" ७अ० । सुतोत्तमौजा इत्यत्र सन्धिरार्षः । द्वापरयुगीये १युधामन्यु भ्रातरि ऋषौ पु० । "नेह पश्यामि विदुषा ! राधेयमिततेजसम् । भ्रातरौ च महात्मानौ युधामन्यूत्तमौजसौ" भा० स्वर्गा० २अ० । "युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्य्यवान्" गीता "उत्तमौजाश्च बल्यश्च कौरवाः कैकयास्तथा" हरिवं० ६२ अ० । "उत्तमौजास्तथा शाल्वः कैरलेयश्च कौशिकः" हरिवं० ६६अ० ।

उत्तम्भ पु० उद्+स्तन्भ-घञ् । १प्रहसितरोधिकायामनिष्टसाधनतोनिषेधे । (थामा) २अवलम्बे च ।

उत्तम्भन न० उ+स्तम्भ-ल्युट् । १अवलम्बने । करणे ल्युट् २तत्साधने । "वरुणस्योत्तम्भनमसि" यजु० १४, २२ । "समीमेऽन उपस्थाय्योत्तम्भनेन स्तम्भाति" काल्या० ७, ६,२२ ।

उत्तर न० उत्तीर्य्यते प्रकृताभियोगोऽनेन उद्+तॄ-अप्, उद्-तरप् वा । राजसभीये वादिकृताभियोगापनोदके उत्तरारूये १व्यवहाराङ्गे हितीयपादे "प्रश्नयोद्यधिया पृष्टो तस्य खण्डनमुत्तरमित्युक्तं" २दोषभङ्गनवाक्ये । ३जिज्ञासितविषयावेदके वाक्ये । ४उदीच्यां दिशि स्त्री । अनन्तरे ५देशे, ६काले च पु० । ७अनन्तरोत्तरादिदेशकालवृत्तौ त्रि० "अस्मिन्यादिषु १२,२१,२६: संख्येयेषु पूरणत्वेषु न० स्त्री । "उत्तरात्रययाम्यरोहिणीरुत्तरार्षभिन्नभे चाग्निभे" "रेवत्युत्तररोहिणी मृगशिरो मूलानुराधा मघा" "त्रीण्युत्तराणि स्वभूः" ज्यो० त० । तत्र वादे उत्तरतदाभासादिलक्षणादि मिता० दर्शितं यथा । "श्रुतार्थसोत्तरं लेख्यं पूर्वापेक्षसन्धौ" या० । "श्रुतोभयार्थोयेन प्रत्यर्थिनाऽसौ श्रुतार्थत्वात्तोत्तरं पूर्वपक्षादुत्तरत्व भवतीति उत्तरं लेख्यं लेखनीयम् । पूर्वापेक्षस्यार्थिनः समीपे उत्तरस्य यत्पूर्वोक्तस्य निराकरणन्तदुच्यते । यथाह । "पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् । अव्याख्यागम्यमित्येतदुत्तरन्तद्विदोविदुरिति" । पक्षस्य व्यापकस्थिराकरणसमर्थम् सारं न्याय्यं न्यायादनपेतम्, असन्दिग्धं सन्देहरहितम्, अनाकुलं पूर्वापराविरुद्धम्, अव्याख्यागम्यं अप्रसिद्धपदयोगेन दुःश्लिष्टविभक्तिवचनाध्याहाराभिधानेन वा अन्यदेशभाषाभिधानेन वा यद्वाक्यमेवार्थन्न भवति तदुत्तरम् । तच्चतुर्विधम् । सम्प्रतिपत्तिर्मिथ्या प्रत्यवस्कन्दनं पूर्वन्यायस्येति । तथाह

कात्यायनः । "सत्यं मिथ्योत्तरञ्चैव प्रत्यवस्कन्दनं तथा । पूर्व्वन्यायविधिश्चैवसुत्तरं ज्ञातृतर्विधमिति" । तत्र सत्योत्तरं यथा रूपकयतमस्मान्धारयतीत्युक्ते सत्यमधारयामीति । यथाह । "साध्यस्य सत्यवचनं प्रतिपत्तिरुदाहृता" । मिथ्योत्तरन्तु नाहमधारयामीति । तथा च कात्यायनः । "अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवम् । मिथ्या तत्तु विजानाद्युत्तरं व्यवहारतः" इति । तच्च मिथ्योत्तरञ्च तृविधम् । "मिथ्यैतन्नाभिजानामि तदा तत्र न सन्निधिः । अजातत्वाच्च तत्काल इति मिथ्या चतुर्विधमिति" । प्रत्यवस्कन्दनन्नाम सत्यं गृहीतं प्रतिदत्तं प्रतिपन्नञ्चमिति वा । यथाह नारदः "अर्थिना लेखितोवोऽर्थः प्रत्यर्थी यदि तन्नथा । प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं स्मृतमिति" । प्राङ्न्यायोत्तरन्तु यत्राभियुक्त एवं ब्रूयादस्मिन्नर्थे अनेनाहमभियुक्तस्तत्र चार्थं व्यवहारमार्गेण पराजित इति । उक्तञ्च कात्यायनेन "आचारेणावसन्नोऽपि पुनर्लेखयते यदि । सोऽभियोक्तोजितः पूर्व्वं प्राङ्न्यायश्च स उच्यते" इति । एवमुत्तरलक्षणे स्थिते उत्तरलक्षणरहितानाम् उत्तरषट्भाषसमानानामुत्तराभासत्वमर्थसिद्धं स्वहीतस्य गृहीत्यन्तरे । "सन्दिग्धमन्यत् प्रकृतादल्पमतिभूरि च । पक्षैकदेशव्याप्यन्यत्तथा नैवोत्तरम्भवेत् । यद्व्यस्तपदमव्यापि निगूढार्थन्तथाकुलम् । व्याख्यानन्यसमारब्धमुत्तरं स्वार्थसिद्धये" इति । तत्र सन्दिग्धम् सुवर्णयतमनेन गृहीतमिति उक्ते सत्यं गृहीतम्, सुवर्णयतमाधयत वेति । प्रकृतादन्यत् यथा सुवर्णयताद्याभियोगे पणयतमधारयामीति । अल्पन्तु सुवर्णयताभियोगे पञ्च धारयामीति । अतिभूरि सुवर्णयताभियोगे द्वियतमधारयामीति । पक्षैकदेशव्यापि हिरण्यवस्त्राद्याभियोगे हिरण्यं गृहीतमन्यदिति । व्यस्तपदम् । कृष्णादाना भियोगे पदान्तरेणोत्तरम् । यथा सुवर्णयताभियोगे अनेनाकृत्याङ्कित इति । अव्यापि देशस्थानादिविशेषवाच्यापि । यथा मध्यदेशे वाराणस्यां पूर्व्वस्यां दिशि क्षेत्रमनेनापहृतमिति पूर्व्वपक्षे लिखिते क्षेत्रमपहृतमिति । निगूढार्थं यथा सुवर्णयताभियोगे किमङ्गमेवाङ्कै धारयामीत्यत्र ध्वनिना प्राड्विवाकः सभ्योवार्थी वान्यङ्कै धारयतीति निगूढार्थम् आकुलं पूर्व्वापरविरुद्धम् । यथा सुवर्णयताभियोगे हते सत्यं गृहीतञ्च धारयामीति । व्याख्यानन्यस्तं दुःश्लिष्टविभक्तिवचनाध्याहारादिभिधानेन अन्यदेशभाषाभिधानेन वा । यथा सुवर्णयतविषये पितृव्यामभियोगे गृहीतं यत् वचनात् सुवर्णानां पितृव्येन जानामीति । अत्र पितृवचनात् सुवर्णानां यत् गृहीतमिति न जानामीति । अन्याय्यं न्यायविरुद्धम् । यथा सुवर्णयतमनेन दृष्ट्वा गृहीतं दृष्टिरेव दत्ता न मूल्यमिति अभियोगे सत्यं दृष्टिर्दत्ता न मूल्यं गृहीतमिति । उत्तरमिश्रवचननिर्देशादुत्तराणां सङ्करोनिरस्तः । यथाह कात्यायनः । "पक्षैकदेशे यत्सत्यमेकदेशे च कारणम् । मिथ्या चैवैकदेशे च सङ्कीर्णात्तदुत्तरमिति" । अनुत्तरत्वे कारणन्नैवोक्तम् । "नचैकस्मिन् विवादे तु क्रिया स्याद्दानादिनोर्हयोः । नचार्थसिद्धिरुभयोर्मे चैकत्र क्रियाद्वयमिति" । मिथ्याकारणोत्तरयोः सङ्करेऽपि प्रत्यर्थिनोर्हयोः क्रिया- प्राप्नोति । "मिथ्या क्रिया पूर्व्ववादे कारणे प्रतिवादिनोति कारणात् । तदुभयमेकस्मिन् व्यवहारे विरुद्धम् । यथा सुवर्णयतं रूपकयत चानेन गृहीतमित्यभियोगे सुवर्णं न गृहीतं रूपकयतं गृहीतं प्रतिदत्तञ्चेति । कारणे प्राङ्न्यायसङ्करे तु प्रत्यर्थिन एव क्रियाद्वयम् । "प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी लिखितेत् क्रियामिति" । यथा सुवर्णं गृहीतं प्रतिदत्तं रूपकं व्यवहारमार्गेण पराजित इति । अत्र च प्राङ्न्याये जयपत्रेण वा प्राङ्न्यायदर्शिभिर्वा भावयितव्यम् । कारणोत्तरे तु साक्षिलेख्यादिभिर्भावयितव्यमिति विरोधः । एवमुत्तरत्रयस्यापि सङ्करेऽपि द्रष्टव्यम् । यथाऽनेन सुवर्णं रूपकयतं वस्त्राणि च गृहीतानीत्यभियोगे सत्यं सुवर्णं गृहीतं प्रतिदत्तञ्च रूपयतं तु न गृहीतं वस्त्रविषये पूर्व्वन्यायेन पराजित इति । एवमुत्तरसङ्करेऽपि । एतेषामुत्तरत्वं जयपत्रेण । तस्य तस्यार्थस्य तेन तेन विनाऽसिद्धेः क्रमेणोत्तरत्वमेव । क्रमस्यार्थिनः प्रत्यर्थिनः सभ्यानाञ्चेच्छया भवति यत्र पुनरुभयोः सङ्करे यस्य प्रभूतार्थविषयत्वात्तत्क्रियोपादानेन पूर्व्वं व्यवहारः प्रवर्त्तयितव्यः पश्चादल्पविषयोत्तरोपादानेन व्यवहारो द्रष्टव्यः । यत्र च सम्भूतिपक्षे उत्तरान्तरस्य सङ्करस्तत्रोत्तरान्तरोपादानेन व्यवहारो द्रष्टव्यः । सम्भूतिपक्षे क्रियाभावात् । यथाकारणेन "मिथ्योत्तरकारणस्य ज्ञातामेकत्र वेदुभे । सत्यं वापि सङ्कल्पेन तत्र स्याद्धि क्रियोत्तरम्" इत्युक्तम् । "यत् प्रभूतार्थविषयं यत्र वा स्यात् क्रियाक्षमम् । उत्तरत्वात् तदुत्तेयमसङ्कीर्णमतोऽन्यथा" । सङ्कीर्णं न्यायतीति शेषः शेषादेवया ऐच्छिकः कृतो भवतीत्यर्थः । तत्र प्रभूतार्थं यथाऽनेन सुवर्णं

रूपकयुतं वस्त्वादि च स्टष्टीतानि इत्यभियोगे सत्यं सुवर्णं स्टष्टीतं रूपकयुतन्तु न स्टष्टीतं वस्त्वादि तु स्टष्टीतानि प्रतिदत्तानि चेति अत्र मिथ्योत्तरस्य प्रसूतविषयत्वादर्थिनः क्रियामादाय प्रथमं व्यवहारः प्रवर्त्तयितव्यः। पश्चादस्त्रविषयो व्यवहारः। एवं मिथ्याप्राङ्न्यायसङ्करे कारणप्राङ्न्यायसङ्करे च योजनीयम्। तथा नक्षिप्तेवाभियोगे सत्यं सुवर्णं रूपकयुतन्तु स्टष्टीतं न्यासादि वस्त्वादि तु न स्टष्टीतानि स्टष्टीतानि प्रतिदत्तानीति वा। वस्तुविषये पूर्व्वं पराजित इति वोक्ते सम्प्रतिपत्तेर्भूरिविषयत्वेऽपि तत्र क्रियाभावान्मिथ्या दुत्तरक्रियामादायैव व्यवहारः प्रवर्त्तयितव्यः। यत्र तु मिथ्याकारणोत्तरयोः क्रमव्यत्यासव्यापित्वम्। यथा प्रकृत्याहितया कस्मिंश्चिदहनि इयत्कौसीदीया असत्कमिनु काले नष्टा अथास्य स्टष्टे दृष्टेति। अन्यस्तु मिथ्यैतदेतत्प्रदर्शितकालात् पूर्व्वमेवाकाङ्क्ष्टे स्थिता मम स्टष्टे जाता चेति वदति। दृष्टान्तवत् पक्षनिराकरणसमर्थत्वाच्चानुत्तरम्। नापि मिथ्यैव कारणोपन्यासात्। नापि कारणम्। एकदेशस्याभ्युपगमाभावात्। तस्मात् सकारणं मिथ्योत्तरमिदम्" । अत्र कश्चिद्विशेषो व्यवहारदर्शितः यथा "कात्यायनः। "यद्यः क्रमेषु कार्य्येषु सद्यएव विवादयेत्। कालातीतेषु वा कालं दद्यात् प्रत्यर्थिने प्रभुः"। वादिनोक्तस्य साध्यस्य प्रतीपमर्थयते इति प्रत्यर्थी। नारदः "गृहत्वादि वादानामसामर्थ्यात् स्मृतेरपि। कृष्यादिषु हरेत् कालं कामन्तत्त्वबुभुत्सया" दा०। बृहस्पतिः। "यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना। दद्यात् ततूपक्षसम्बन्धं प्रतिवादी तदोत्तरम्" । सम्बन्धस्तूक्तम् अन्यथा अन्यवादित्वेन भङ्गप्रसङ्गात्। "अन्यवादी क्रियाहेतौ नोपस्थायी निरुत्तरः। आकूतः प्रच्छायी च क्षीणः पञ्चविधः स्मृतः"। प्रच्छायी लिपलेख नोक्तश्च सप्तभिर्दिनैः। क्रियाहेतौ तु मासेन सान्निभिस्तु ततूक्षयात्" इति नारदोक्तेः क्रिया लेख्यादिका, सान्निभिः पराजितः। वादिनोक्तस्य साध्यस्य प्रतीपं वदतीति प्रतिवादी उत्तीर्य्यते निर्णीयते प्रकृताभियोगोऽनेनेति उत्तरम्। उत्तरस्वरूपं तद्भेदांश्चाह नारदः। "पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम्। अव्याख्यागम्यमित्येवमुत्तरं तद्विदोविदुः। मिथ्याद्यं प्रतिपत्तित्वं प्रत्यवस्कन्दनन्तथा। प्राङ्न्यायश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः। अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवम्। मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः"। पक्षस्य साधार्थस्य व्यापकम् आच्छादम् अभियोगप्रतिकूलमिति यावत्। अतएव "पूर्व्वपक्षार्थसम्बन्धं प्रतिपक्षं निवेदयेदि"त्युक्तम्। न च विप्रतिपत्त्या न्यायोऽर्थ आगतस्य धारयसीत्यभियुक्तस्य धारयामीति संप्रतिपत्तेः कथमुत्तरत्वम् अभियोगाप्रतिकूलत्वादिति वाच्यम् भाषादिनोमूर्खत्वेनापटुकरणतया वा कदाचिद्भाषातिवादादेवार्थं क्षीयते इति भाषाविमर्षपर्य्यन्तं विप्रतिपत्त्याद्युत्तरवादिनोभाषार्थं सम्यगवगम्य तन्निषेधार्थं सम्बन्धोत्तरासम्भवात् विहत्यभाषां चासत्यवचनमप्यनाधर्म्मकारकम्। परोक्तिपराजये च दण्डग्रहं वादिना च वैरमित्यादि प्रतिसन्दधतः सम्प्रतिपत्तेरुत्तरत्वं सम्भवत्येव। एवम् एतेभ्य एवानिस्तारात् साध्यत्वेनोपदिष्टस्य पक्षस्य सिद्धत्वेनोपन्यासेन साध्यत्वनिवारणात् सिद्धसाधनेनापि वादिनः प्रत्यवस्थानाच्चोत्तरत्वं सम्प्रतिपत्तेः सिद्धमिति सारं प्रकृतोपयोगि अनाकुलं पूर्व्वापरविरोधशून्यं अव्याख्यागम्यमध्याहारादिकं विनैव प्रतीतम् अभियोगस्य अभियुज्यते इत्यभियोगः सहेतुकं साध्यं तस्यापह्नवमित्यर्थः"। "उत्तराभासमाह कात्यायनः। "प्रकृतेन त्वसम्बन्धमसत्यमतिभूरि च। पञ्चैकदेशव्याप्त्येवं तच्च नैवोत्तरं भवेत्। असत्यमसत्पदव्याप्ति निगूढार्थं तथाकुलम्। व्याख्यागम्यमसारञ्च नोत्तरं यच्चते बुधैः"। असत्यमसत्पदव्याप्ति अवस्तिार्थपदव्याप्तमिति व्यवहारतिलके भवदेवभट्टाः। मिथ्योत्तरभेदमाह पुनर्व्यासनारदौ। "मिथ्यैतन्नाभिजानामि मम तत्र न सन्निधिः। असाक्षिकमिदं तत्काले इति मिथ्या चतुर्विधम्"। मिथ्यैतदितियद्वदतोनाभिजानामीत्यादिक्रमेणतोऽपह्नवः। तथा च कात्यायनः। "श्रुत्वा भाषार्थमन्यस्तु यदि तं प्रतिषेधति। अर्थतः शब्दतोवापि मिथ्या तज्ज्ञेयमुत्तरम्"। त्वं मह्यं धारयसीति प्रतिज्ञायां न स्टष्टीतमिति शब्दतः। कालविशेषगर्भायां तस्यां सत्यां तदानीं जात इति अर्थतः। देशकालविशेषगर्भायां तदा तत्र नाहमासम् इत्यर्थतः। देशादिमात्रं तच्छून्यायां वा न जानामीत्यर्थतएव योग्याकारत्वेनार्थतस्तदपह्नवप्रतिपादनात्। अत्र चरमत्रयं अपह्नवावस्कन्दनसहेन अपह्नवाभावप्रतिपादकं सापदेशनिषेधोत्तरमात्रमस्य आद्यं मिथ्योत्तरमात्रम्। तच्च कारणोत्तरं त्रिविधं वस्तुस्त्रयं दुर्वस्तु तत्र वस्तूत्तरं यथा त्वत्तः अं स्टष्टीत-

मिति सत्यं किन्तु परिशोधितमिति अत्रोत्तरवादिन एव क्रियानिर्देशः । तथा च नारदः । "आधर्म्यं पूर्वपक्षस्य यत्किञ्चूर्ध्वमाचरेत् । विवादे साक्षिणश्चात्र प्रष्टव्याः प्रतिवादिनः" । आधर्म्यं दुर्बलत्वं पूर्वपक्षस्य । ततश्च स्थापकबाधस्य धार्ष्टर्याभावात्तस्य ध्वंसकारणं निर्यातनादि तदूर्ध्वमुत्तरं कारणोत्तरम् । अतएव मिथ्योत्तरादस्य भेदः तहि धार्ष्टर्याभावात्तस्यानाभावप्रयोजकमभ्युपगच्छन्नं न तु ध्वंसकृपम् । तत्त्वावबोधकारणोत्तरं यथा मदीयेयं भूमिः क्रमागतत्वादिति वादुके मदीयेयं भूमिः क्रमागतत्वादिति प्रतिवादिना तथोत्तरमिति तत्र पूर्ववादिनः साक्ष्युपन्यासः । तदसामर्थ्ये प्रतिवादिनः । तथा च याज्ञवल्क्यः । "साक्षिणश्चोभयतः सत्सु साक्षिणः पूर्ववादिनः । पूर्वपक्षेऽसमर्थीभूते भवन्त्युत्तरवादिनः" । दुर्बलकारणोत्तरं यथा ममेयं भूः क्रमागतत्वादिति वादुके ममेयं भूर्दशवर्षभुक्तिमानत्वादिति प्रत्युत्तरम्" व्य० त० रघु० ।

"बोधयेत् पूर्ववादं तु यावन्नोत्तरदर्शनम् । अवष्टब्धस्योत्तरेण निहत्तं बोधनं भवेत्" नार० । इत्यायायवयभेदेन० । "विषयो विषयश्चैव पूर्वपक्षस्योत्तरम् । निर्णयश्चेति सिद्धान्ताः शास्त्रेऽधिकरणं स्मृतम्" मीमांसा । तच्च सिद्धान्तानुकूलतर्कोपन्यासरूपम् ।१०प्रतिवचने न०"प्रचक्रमे च प्रतिवक्तुमुत्तरम्"रघु०।११उपरिस्थे,"समे देये प्रतिदाय चेद्वाजिनकुयोत्तरम्"गीता । "मृदुप्रवाहोत्तरपुष्पशय्याम्" रघुः १२अङ्गभागे"तद्वाहनादवनतोत्तरकायमीषत्" रघुः "पूर्वाङ्गुदयवद्भूतलमभिपुटोत्तरः इति रघुः । १३वस्त्रभागे ।"पिष्टपाके निधायार्घं व्यञ्जनोत्तरतोऽथसेत्" मत्स्य पु० । "व्यसेदित्यत्राख्यातोपस्थापितकर्तृकभागार्थे ण्यासः कर्तव्यः"आ०त०रघु० । तस्य तदर्थत्वे उदा० तत्रैव यथा "तच्चादृश्यत्व दक्षिणतो लक्ष्म भवति तं पुरुषलक्षणोक्तिन्यायेन उत्तरतः स्त्रियाः उत्तरायणा हि स्त्रीति" श्रुतयश्रुतिः। "उत्तरे चास्य सौवर्णं लक्ष्म पार्श्वे भविष्यति" भारतम् दिशि"अस्त्युत्तरस्यां दिशि देवतात्मा" कुमा०। "सर्वेषामेव वर्षाणां मेरूत्तरतः स्थितः" पु० अत्र तसौ पुंवद्भावः । दिङ्मात्रकालवर्त्तिपरत्वेऽपि अस्य स्वाभिधेया वधिनियमरूपव्यवस्थावाचित्वात् सर्वनामतया तत्कार्यम् उत्तरे आशाः उत्तरस्यां नगर्यां: उत्तरस्मिन् दिने, संज्ञायां तु न सर्वनामकार्यम् उत्तराः कुरवः। तत्रोत्तरकालस्तौ "अस्मिन्मन्वन्तरेऽतीते सप्तर्षीणामुत्तरः पूर्वसप्तर्षिसमयोऽतुसवः" रघुः "सप्तर्षिभिरुत्तरतोऽधिष्ठितमिवाम्" कुमा० । अवधित्व द्विविधःदेशिकः कालिकश्च तत्र दैशिकः "सप्तऋक्षोत्तरे तारे जन्मभा नाम राजर्षी" गर्भप्रसवमन्त्रः । अत्र दिगादेशावधिवाचित्वे उद्+अञ्चार्थे तरप् । तथा हि उदञ्चावधिमेरूपर्य्यन्तदेशानाम् भूवलये क्रमेण उन्नतत्वात् तत्तत्स्थितिदेशस्य उन्नत्वादुत्तरत्वम् "स्वामेक्षया मेरूस्थितित्वमेव उत्तरत्वमिति" शुक्ला० । अतएव तद्देशस्योन्नत्वादेव च क्रमशस्तस्य उत्तरभूखण्डोन्नतम्" सि०शि० उक्तम् "निरक्षदेशे क्षितिमण्डलोपरौ ध्रुवौ नरः पश्यति दक्षिणोत्तरौ । तदाश्रितं खे जलयन्त्रवत्सदा भ्रमद्भचक्रं निजमस्तकोपरि । उदग्दिशं याति नरो यथा यथा तथा तथा तत्तदुन्नतं भवेत् । उदक्ध्रुवं पश्यति चोन्नतं क्षितेस्तदन्तरे योजनजाः पलांशकाः" तद्विशः क्रमशः उन्नत्वाच्च दक्षिणस्या अधस्त्वम् । अतएव तद्विशोऽवाचीत्वम् । तद्विशक्रतदेशस्यापि उत्तरदिक्स्थत्वे नोत्तरत्वम् । कालिकस्य उत्तरत्वं तु स्वामेक्षया परत्वम् तच्च स्वामेक्षया ऽल्पसङ्ख्य क्रियासामानाधिकरण्यम् । सङ्ख्यक्रियायैव खण्डकालव्यवहारात् तत्र प्राग्वर्त्तिकालखण्डसङ्ख्य क्रियासामानाधिकरण्यात् तथात्वम् । तथा च एतदर्थपरत्वे उदः उत्तृन्ति प्रकर्षे तरप् । उत्तरकालवाचित्वेऽपि अव्यवहिते एवास्य वृत्तिरौत्सर्गिकी लक्षणया अधिककालोत्तरत्वमपि प्रतीयते । तेन स्याव्यवहितोत्तरत्वमवृत्तिकत्वमित्यादिप्रयोगोपपत्तिः । अधिकार्थे तु उदः उत्कर्षार्थत्वमिति विवेकः । १४प्रधाने "धर्मोत्तरं मध्यममाश्रयन्ते" रघुः "कक्षात्तात तवाद्येह योगोत्तरमिदं मनः" भा० अनु० १६२ अ० १५अधिके "देवीं तु मनसा ध्यात्वा यतमष्टोत्तरं जपेत्" तन्त्रम् । "सप्तोत्तर मर्मगतं हृदि च सन्निगते तथा" या० स्मृ० । उत्तीर्यतेऽनात् संसारः अपादाने अप् । १६विष्णौ पु० । "उत्तरोगोपतिर्गोप्ता" विष्णुस० "जन्मसंसारबन्धनादुत्तरन्यत उत्तरः विश्वस्मात् वा उत्कृष्टः-भा० । १७शिवे पु० तस्यापि तथात्वात् । भावे अप् । १८उत्तरणे उल्लङ्घने । १९विराटस्य पुत्रे पु० स च भूमिञ्जयापरनामा । २० तत्कन्यायां स्त्री तत्कथा यथा भा०विरा० अ०२५।१२६अ० । "इहा भूमिञ्जयं नाम पुत्रं मत्स्यस्य जानिमः" इत्युपक्रम्य "उवाच रुक्मिणं प्रीतः कन्यां सर्वार्थकोविदः । उत्तरं ब्रूहि कल्याणि ! क्षिप्रं सङ्ग्रहणादपि" । "उत्तरायाः प्रसूतेः सर्वं जान-

धरिन्दमः" "अथोत्तरा च कन्यास्य सुरक्षणमनुवँ स्वदा" "यद्युत्तरोऽयं संग्रामे विजेष्यति मद्दारयान्" इति च। उत्तरा च अभिमन्योः पत्नी तत्कथापि तत्रैव ७१ अ०। "उत्तरां प्रतिगृह्णातु सव्यसाची धनञ्जयः" इति विराटोक्तौ "प्रतिगृह्णाम्यहं राजन्! स्नुषां दुहितरं तव" "स्नुषार्थे उत्तरां राजन्! प्रतिगृह्णामि ते सुताम्" "तां प्रत्यगृह्णात् कौन्तेयः सुतस्यार्थे धनञ्जयः। सौभद्रस्यानवद्याङ्गीं विराटतनयां तदा। तत्रातिष्ठन् महाराजो रूपमिन्द्रस्य धारयन्। स्नुषां तां प्रतिजग्राह कुन्तीपुत्रो युधिष्ठिरः। प्रतिगृह्य च तां पार्थः पुरस्कृत्य जनार्दनम्। विवाहं कारयामास सौभद्रस्य महात्मनः" ७२ अ०। २१ अनुशासने "क्षत्रात् देवी वचनाधिकारिणी त्वमुत्तरं दासि! ददासि वा सती" नैष०। उत्तरकालभावित्वादुत्तरत्वाच्चास्य तथात्वमभिप्रायिकतयेति चास्य निपातस्थानत्वं तदभिप्रायेण उक्तश्लोकेन निपातार्थकालोक्तेः कृतः।

उत्तरकाण्ड न० वाल्मीकि रामायणान्तर्गते सप्तमे काण्डे।

उत्तरकाल पु० कर्म०। भविष्यत्काले क्रमिकर्म्मणा तस्य गौणकालत्वमाह "एवमागामिकालीयसख्यकालादधस्तनः। स्वकालादुत्तरोगौणः कालः पूर्वस्य कर्म्मणः" हरिहरः।

उत्तरकुरु पु० नवमवर्षात्मकस्य जम्बुद्वीपस्य वर्षभेदे। वर्षाणां संस्थितिः सि० शि० उक्ता

"सह्यादेवाद्रिगिरिरुदग्हेमकूटोऽथ तत्परात् तत्परान्यो निषध इति ते सिद्धपर्य्यन्तदैर्घ्याः। एवं सिद्धादुदग्पि पुराक्रूरवच्छ्रूयतोक्ता वर्षाख्येयं पाण्डुरिह बुधा अन्तरे क्षोणिदेयान्। भारतवर्षमिदं ह्युदगस्मात् किम्पुरुषवर्षमतो हरिवर्षम्। सिद्धपुरात्र तथा कुरु, तस्माद्विद्धि हिरण्मयरम्यकवर्षे। माल्यवांश्च यमकोटिपत्तनादोमकाच्च किल गन्धमादनः। नीलवर्षनिषधावधी च तावन्नरालमनयोरिलावृतम्। माल्यवच्छलधिमध्यवर्ति यत् तत् तु भद्रतुरगं जगुर्बुधाः। गन्धशैलजलराशिमध्यगं केतुमालकमिलावृतमावृतमावभौ। अमरकेलिकलायसमाकुलं कविरकाम्बुनचिलमङ्गोतलम्" "अत्र भूगोलस्यार्धमुत्तरं जम्बुद्वीपम्। तस्य चाराज्ये सन्निवेशनिर्देशः। तत्र लङ्कारोधकं सिद्धपुरं यमकोटिरिति पुरवत्तुल्यं भूपरिधिचतुर्थांशान्तरं किल कथितम्। तेभ्यः पुरेभ्यो यस्यां दिशि मेरुः सोत्तरा। अतो लङ्कायाः उत्तरतो हिमवान् नाम गिरिः स्नुषापरसिन्धुपर्य्यन्तदैर्घ्योक्तिः। तस्योत्तरे हेमकूटः। सोऽपि समुद्रपर्य्यन्तदैर्घ्यः। तथा तदुत्तरे नि षधः। तेषामन्तरे यथोत्तरम् भारतकिम्पुरुषहरिवर्षाणि। ए सिद्धपुरादुत्तरतः शृङ्गवान् नाम गिरिः। ततः श्वेतगिरिः ततो नीलगिरिरिति। तेऽपि सिन्धुपर्य्यन्तदैर्घ्याः तेषामन्तरे च वर्षाणि। तत्रादौ कुरुवर्षम्। तदुत्त हिरण्मयम्। ततो रम्यकमिति। अथ यमकोटेरुत्तरतं माल्यवान् नाम गिरिः। स तु निषधनीलपर्य्यन्तदैर्घ्यः तस्य जलधेश्च मध्ये भद्राख्यं वर्षम्। एवं रोमकादुत्तरत गन्धमादनः तस्य जलधेश्च मध्ये केतुमालम् एवं निषधनीलमाल्यवद्गन्धमादनैरावृतमिलावृतं नाम नवमखण्डम्। सा स्वर्गभूमिः। अतस्तत्र देवक्रीडा-ष्टहानि" प्रवि०। तत्र प्रधाना नदी भद्राख्या "चक्षुश्च केत मालञ्च भद्राख्या चोत्तरान् कुरून्"! सि०शि०। भा०भ०प०७अ०। तदर्षं वर्णितं यथा "दक्षिणेन तु नीलस्य मेरोः पार्श्वे तथोत्तरे। उत्तराः कुरवो राजन् पुण्याः सिद्धनिषेविताः। तत्र वृक्षा मधुफला नित्यपुष्पफलोपमाः। पुष्पाणि च सुगन्धीनि रसवन्ति फलानि च। सर्व्वकामफलास्तत्र केचिद् वृक्षा जनाधिप। अपरे क्षीरिणो नाम वृक्षास्तत्र नराधिप। ये क्षरन्ति सदा क्षीरं षड्रसञ्चान्नतोपमम्। वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च। सर्व्वा मणिमयी भूमिः सूक्ष्मकाञ्चनबालुका। मणिरत्ननिभं रम्यं वज्रवैदूर्य्यसन्निभम्। भूभागं दृश्यते तत्र पद्मरागसमप्रभम्। सर्व्वर्त्तुसुखसंस्पर्शा निष्पङ्का च जनाधिप। पुष्करिण्यः शुभास्तत्र सुखस्पर्शा मनोहराः। देवलोकच्युताः सर्व्वे जायन्ते तत्र मानवाः। शुक्लाभिजनसम्पन्नाः सर्व्वे सुप्रियदर्शनाः। मिथुनानि च जायन्ते स्त्रियस्ताश्चारुरोपमाः। तेषान्तु क्षीरिणां क्षीरं पिबन्त्यमृतसन्निभम्। मिथुनं जायते काले समन्तत प्रवर्द्धते। तुल्यरूपगुणोपेतं समवेशं तथैव च। एवमेषानुरूपञ्च चक्रवाकसमं प्रभो!। निरामयाश्च ते लोका नित्यं मुदितमानसाः। दशवर्षसहस्राणि दशवर्षशतानि च। जीवन्ति ते महाराज! न चान्योऽन्यं जघ्नुस्तु। भारुण्डा नाम शकुनास्तीक्ष्णतुण्डा भयानकाः। तास्तिर्हरन्तीह मृतान् दरीषु प्रक्षिपन्ति च। उत्तराः कुरवो राजन्! व्याख्यातास्ते समासतः"। तेनास्य पुंस्त्वं क्लीवात्वञ्च उक्तवाक्येभ्यः। भा०स०२७अ० अर्জ্জुनोत्तरदिग्विजये "इदं पुरं यः प्रविशेद्भवं न स भवेद्वरः। प्रीयामहे त्वया वीर! पर्य्याप्तो विजयस्तव। न चात्र किञ्चिज्जेतव्यम्-

ष्ठ्यमात्रं प्रदृश्यते । उत्तराः कुरवोऽस्तेते नात्र युद्धं प्रवर्त्तते । प्रविष्टोऽपि हि कौन्तेय ! नेह द्रक्ष्यसि किञ्चन । नहि मानुषदेहेन शक्यमत्राभिवीक्षितुम् । अथेह पुरुषव्याघ्र ! किञ्चिदन्यच्चिकीर्षसि । तदब्रूहि च करिष्यामो वचनात्तव भारत' । ततस्तानब्रवीद्राजन्नर्जुनः प्रहसन्निव । पार्थिवत्वं चिकीर्षामि धर्म्मराजस्य धीमतः । न प्रवेक्ष्यामि वो देशं विद्धं यदि मानुषैः । युधिष्ठिराय यत् किञ्चित् करपण्यं प्रदीयताम्" । "ततोदिव्यानि वस्त्राणि दिव्यान्याभरणानि च । क्षौमाजिनानि दिव्यानि तस्य ते प्रददुः करम्" । "तेऽवतीर्य्य बहून् देशानुत्तरांश्च कृत्स्नशः" । भा० व० १४५ अ० । "विजित्य यः प्राज्यमयच्छदुत्तरान् करूनकृष्यं वसु वासवोपमः" किरा० ।

उत्तरकोशला स्त्री कर्म्म० । अयोध्यानाम्न्यां नगर्य्याम् । "यदुपतेः क्व गता मथुरा पुरी रघुपतेः क्व गतोत्तरकोशला । इति विचिन्त्य कुरुष्व मनः स्थिरं न सदिदं जगदित्यवधार्य्यताम्" उद्भटः ।

उत्तरक्रिया स्त्री कर्म्म० । उत्तरकालकर्त्तव्ये कर्म्मणि "सर्व्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया । आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा" या० स्मृ० । "एकमेव क्षेत्रमेकस्याधि कृत्वा किमपि रुद्धीत्वा पुनरन्यस्याधायाधाय किमपि रुद्धाति तत्र पूर्वस्यैव तद्भवति नोत्तरस्य एवं प्रतिग्रहे क्रये च" मिता० । २ वार्षिके पिण्डदाने च । "प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु । क्रियन्ते याः क्रिया पित्र्याः प्रोच्यन्ते ता ह्यपोसराः" । विष्णु पु० । ३ अन्त्येष्टिक्रियायाञ्च ।

उत्तरङ्ग न० उत्तरमङ्गम् कर्म्म० शकन्ध्वा० । १ द्वारोर्द्ध्वस्थदारुणि । २ प्रा० ब० । उद्ततरङ्गे त्रि० । "भागैरर्द्धी शोणदूर्वोसरङ्गः" रघुः "अपामिवाधारमनुत्तरङ्गम्" कुमा० ।

उत्तरच्छद पु० कर्म्म० । शय्याया उपर्य्यास्तरणवस्त्रे । "शय्योत्तरच्छदविमर्दकृशाङ्गरागम्" । "सोत्तरच्छदमध्यास्त नेपथ्यग्रहणाय सः" रघुः ।

उत्तरज्योतिष पु० प्रतीचीस्थदेशभेदे भारते स० ३१ अ० नकुलप्रतीची विजये । "कृत्स्नं पञ्चनदञ्चैव तथैवामरपर्व्वतम् । उत्तरज्योतिषञ्चैव तथा दिव्यकटं पुरम् । द्वारपालञ्च तरसा वशे चक्रे महाद्युतिः । रामठान् हारहूणाश्च प्रतीच्यांश्चैव ये नृपाः" ।

उत्तरतन्त्र न० सुश्रुतान्तर्गते ग्रन्थभेदे । "इदानीमत्र प्रवक्ष्यामि तन्त्रमुत्तरसुत्तममिति" सुश्रु० ।

उत्तरतस् अव्य० उत्तर+प्रथमापञ्चमीसप्तम्यर्थेषु तसिल् । उत्तरस्मिन् उत्तरस्मात् उत्तर इत्यर्थे । तस् उत्तरताय्यत अव्य० ताभ्यां भवार्थे त्यप् । उत्तरतस्य उत्तरतत्य तद्भवे त्रि० ।

उत्तरदायक त्रि० उत्तरं ददाति दा+ण्वुल् । १ प्रत्युत्तरदायिनि । उत्तरेण वाक्येन दायति शोधयति निजदोषम् दैप्-शोधे-ण्वुल् । स्वामिना स्वकार्य्ये प्रमादकृतनेतृदोषस्यादोषत्वख्यापनेन निजदोषशोधके भृत्यादौ । "परुषाणि रता नारी भृत्यश्चोत्तरदायकः । सर्पश्च गृहे वासः मृत्युरेव न संशयः" चाणक्य० ।

उत्तरदिक्काल पु० ७त० । "रवावुत्तरतः कालः सोमे वायव्यभागके । भौमे तु पश्चिमे भागे बुधे नैर्ऋतकोणके । जीवे च याम्यदिग्भागे शुक्रे आग्नेयकोणके । शनौ तु पूर्वदिग्भागे कालचक्रं प्रकीर्त्तितम्" रत्नसारोक्ते रविवारे उत्तरदिग्वर्त्ति कालचक्रे । रात्रौ तु वैपरीत्यम् उत्तरदिक्पाशयन्त्रे द्रष्टव्यम् अन्यदिक्कालेऽप्युक्तदिशाज्ञेयः

उत्तरदिक्पाश पु० ७त० । "रवौ तु दक्षिणे पाशः सोमे आग्नेयकोणके । भौमे तु पूर्व्वदिग्भागे बुधे ईशानकोणके । जीवे चोत्तरदिग्भागे शुक्रे वायव्यकोणके । शनौ तु पश्चिमे भागे पाशचक्रं प्रकीर्त्तितम् । रात्रावेतौ वैपरीत्यात् पाशकालौ यथोदितौ" रत्नसा० उक्ते दुष्टस्थितिवारे उत्तरदिशि यात्रायुद्धादिनिषेधोपयोगिनि पाशचक्रे । एवमन्यदिक्शयुक्तदिशा पाशोबोध्यः ।

उत्तरदिक्शूल त्रि० उत्तरदिशि शूलमिवाक्षय्यत्वात् अच् "ज्येष्ठा पूर्व्वा भाद्रपदा रोहिण्युत्तरफाल्गुनी । पूर्व्वादिषु क्रमाच्छूलाः यात्रादौ मरणप्रदाः । शूलाख्यानि च धिष्ण्या शूलसंज्ञाश्च वासराः । यायिनां क्षत्पुदाः शीघ्रमथ वा आर्थनाशकाः" भरद्वाजोक्ते उत्तरदिशि यात्रादौ वर्ज्ये १ उत्तरफल्गुनीनक्षत्रे १४ वारे च दिक्शूलवारस्तु पृष्टदिगीश्वरः दिगीशाश्च उत्तरादिगीशशब्दे वक्ष्यन्ते । शूला इत्यत्र स्त्रीत्वं तारादित्वेनत्वात् ।

उत्तरदिगीश पु० ईत० । "इन्द्रोवह्निपितृपतिर्नैर्ऋतो-वरुणोमरुत् । कुबेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्" इत्युक्ते १ कुबेरे उत्तरदिक्पालादयोऽप्यत्र । "कुबेरगुप्तां दिशमुत्तरां सौ" कुमारे "कौबेरदिग्भागमपाङ्गमार्गम्" माघे च उत्तरदिशः कुबेरस्वामित्वप्रकारम् "सूर्य्यः शुक्रः क्षमापुत्रः सैंहिकेयः शनिः शशी । सौम्यश्चेदमनी च प्राच्यादिदिगीश्वराः" इत्युक्ते २ बुधे

एतच्च "दिगीशाहे शुभा वाला पृष्ठाहे मरणं ध्रुवम्" इत्युक्तेः उत्तरदिशः पृष्ठीभवनलक्षणायां बधवारे यात्रानिषेधाय "प्राच्यादिक्रमाः वाला: यथासंख्यं ग्रहलिखिताः । मेषाद्याः राशयो ज्ञेया स्त्रिराद्यन्तपरिभ्रमात् इत्युक्तेषु २कर्कटवृश्चिकमीनेषु राशिषु च तेषु लग्नेषु तत्स्थे चन्द्रे च उत्तरदिग्गमनं ग्रहलिखितमपि बोध्यम् ।

उत्तरदिग्द्वार न० उत्तरदिशि द्वारं सुखमस्य । "प्राच्यादिषु चतुर्दिक्षु सप्तसप्तान्तकर्क्षतः" ज्यो०उक्तसप्तविंशतिनक्षत्राणां विंशतिवलसमध्ये २२,२४,२५,२६,२७,१,२ । वलवत्सु तानि च यात्रादिषु तत्र दिशि ग्रस्तानि ।

उत्तरदिग्बलिन् पु० उत्तरस्यां दिशि बली । "प्राच्यां सौम्य सुराचार्यौ याम्यां भास्करभूमिजौ । प्रत्यक् सौरिर्बुधोऽन्यासु सितेन्दू दिग्बलान्वितौ" ज्यो०त० उक्त १८५, २८५ पृ० ।

उत्तरपक्ष पु० कर्म० । वादे पूर्वपक्षस्य भर्दनरूपे सिद्धान्तपक्षे । "प्रापयन् पवनब्धेर्निरमत्तरपक्षताम्" भाग० । २उत्तरविकल्पे २कृष्णपक्षे च शुक्लपक्षस्येव सारल्यकत्वात् कृष्णपक्षस्योत्तरत्वात् तथात्वम् ।

उत्तरपट पु० कर्म० । १उत्तरीये । ततः स्वयोत्तरपटः समस्तेदः सवेपथुः" भा० ११९५अ० । २स्वयोत्तरपटे च

उत्तरपथ पु० उत्तरः पन्थाः अच् समा० । १उत्तरस्थिते २अव्यवस्थिते च पथि । उत्तरः उत्तरायणचिह्नितः पन्थाः। ३देवयाने पथि येन हि अर्चिरादिमार्गेण विद्यावन्तो ब्रह्मलोकं गच्छन्ति तादृशे मार्गे । तत्र मार्गे च ये तदभिमानिनो देवास्ते अर्चिरादिशब्दे २६४ पृष्ठे उक्ताः तेषाञ्च यथा आतिवाहिकत्वम् तथा आतिवाहिक शब्दे ६५१ पृष्ठे उक्तम् । "उत्तरपथेनाहृतञ्च" पा० । ठञ् । औत्तरपथिक तत्पथेनाहृते त्रि० ।

उत्तरपथिक त्रि० पन्थानं गच्छति 'पथः ष्कन्' पा०पथिन उत्तरः तद्देशभव० पथिक । उत्तरदेशभवे १पथिके स्त्रियां ङीष् ।

उत्तरपद न० उत्तरस्तरवर्त्ति पदम् । १समासचरमावयवपदे २स्वोत्तरवर्त्तिपदे च । "एकाजुत्तरपदे णः" पा० । २समासयोग्ये पदे च । "प्राधान्यं हि विधेयत्वं प्रतिषेधेऽप्रधानता । पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्" मीमांसा । भवति च "यजतिषु ये यजामहं करोति नानुयाजेषु" इत्यत्र नञः समासयोग्यानुयाजेन सहितत्वात् पर्य्युदासपरता तथा रात्रौ श्राद्धं न कुर्वीतेत्यादौ नञो रात्रौ समासयोग्यत्वात्तथात्वम् "अदन्त्यां मांसं नाश्नीयादित्यत्र तु क्रियापदद्वयोगेन तस्य समासयोग्यत्वाभावेन न तत्रोत्तरपदयोग इति न पर्य्युदासपरता किन्तु प्रसज्यप्रतिषेधार्थकता "प्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता । प्रसज्यप्रतिषेधोऽत्र क्रियया सह यत्र नञ्" इति मीमांसकोक्तेः । "यदोत्तरपदात्" वार्त्ति० उत्तरपदमधीते वेत्ति वेलर्थे यत्र । उत्तरपदिक तदध्येतरि तद्वेत्तरि च त्रि० ।

उत्तरपश्चिमा स्त्री उत्तराच्चाः पश्चिमायाः अलराद्या दिग् दिक्स० । १उत्तरपश्चिमयोरन्तराद्यतिथि नैर्ऋतकोणे । सा विद्यतेऽस्य अच् । २नैर्ऋतविदिक्समन्विते देशे पु० "उत्तरपश्चिमे गार्हपत्यम्" आश्व० श्रौ० ४,२.१२ । ३तद्वर्त्तिनि त्रि० ।

उत्तरपाद पु० कर्म० । चतुर्थादाद्यस्य व्यवहारस्य द्वितीये पादे "पूर्वपक्षः स्मृतः पादो द्वितीयश्चोत्तरः स्मृतः । क्रियापादस्तृतीयः स्याच्चतुर्थो निर्णयः स्मृतः । निर्णीतौ तु चतुष्पात् स्यात् प्रत्यवस्कन्दने तथा । प्राङ्न्याये च स विज्ञेयोद्विपात् संप्रतिपत्तिषु" दक्षस्मृतिः ।

उत्तरपुरस्तात् अव्य० उत्तरस्याः पूर्व्वस्या अलराद्या दिक् उत्तरपूर्व्वा ततः प्रथमापञ्चमीसप्तम्यर्थे असाति पुंवद्भावः पूर्व्वस्य पुरादेशः । ईशानकोणे "उत्तरपुरस्तादाग्नेयस्य जातुधानं गत्वा खाता" आश्व० श्रौ० ४,४,८ ।

उत्तरपूर्व्वा स्त्री उत्तरस्याः पूर्व्वस्या दिशोऽलराद्या दिक् पुंवद्भावः दिक्स० । ईशानकोणे "आग्नेयस्तरपूर्व्वाद्" काद्या० २,१,२० । दिङ्नामसमासे वा इवाच्च सर्व्वनामकार्य्यम् योत्तरा सा पूर्व्वा यस्य लग्नस्य एवं बहुव्रीहौ तु न सर्व्वनामकार्य्यमिति भेदः । तेन तादृशार्थेऽपि अस्य इत्तित्वे त्रि० । "योत्तरा सा पूर्व्वा यस्या उत्पन्नधात्वर्थं उत्तरपूर्व्वायै" त्रि०को० ।

उत्तरफल्गुनी स्त्री फल्गति फल्ग्—निष्ठायां "फल्गेर्गुक् च" उषा० उनन् गुक् च गौरा० ङीष् कर्म्म० । अश्विन्यादिषु द्वादशे नक्षत्रे तस्याः स्वरूपम् उडुचक्रशब्दे १०७१ पृ० अङ्गेषाशब्दे ४९७ पृष्ठे च तदधिदेवादि उक्तम् । फल्गुनयुक्तात् स्वार्थे अच् ङीष् । फाल्गुनी कर्म्म० । तत्रैवार्थे । इदं प्रवणत्वात्फल्गुनता "प्रवणत्वक्षीणयुक्तराशि स्वभूः" इत्युक्तेः यथा चास्य फाल्गुनत्वं तथा समर्थितम्" भट० आ० । "फल्गुनीषुगते आदधीत एता वा इन्द्रस्यक्षत्रं यत् फल्गुन्योऽथास्य प्रतिमान्नयोर्जुनोरूपे नामेन्द्रो यदस्य शुक्लं नामार्जुनीवैनमेतन्नामतः परोक्षमाचक्षते फाल्गुन्य इति कौषीतकब्राह्मणे शुक्लं

ज्ञानमङ्गीकृतम्" २,१,२,११ ब्रह्मः प्रथमपादः सिद्धान्तादिः उत्तरपादत्रयं कल्पान्तादिः प्रमाणं उडुपकृष्णयज्वे दृश्यम् ।

उत्तरभाद्रपद् स्त्री भद्राय हितः भादृः पत् पादस्तुर्योंशो ब्रह्मा: ब० ततः कर्म्म० । अश्विन्यादिनक्षत्रेषु षड्विंशे नक्षत्रे । पदशब्देन समासे टाप् । उत्तरभाद्रपदाशब्द । स्वरूपादिकमुडुपकृष्णयज्वे १०७१ पृष्ठे उक्तम् । अधिपत्यादिकमङ्गेषाशब्दे चोक्तम् । इयं ध्रुवगणः "ध्रुवगस्त्री-ण्युत्तराणि खम्:" इत्युक्तेः मीनराशिघटिका ।

उत्तरमानस न० उत्तरस्तुत्तरस्यं मानसम् । तीर्थभेदे "काञ्चोदकं नन्दिकुण्डं तथाचोत्तरमानसम् । अभ्येत्य योजनशतादृश्यते विप्रमुच्यते" भा० अनु० २५ अ० । २ गयामध्ये उत्तरदिक्स्थे तीर्थभेदे "उत्तरे मानसे, स्नानं करोम्यात्मविशुद्धये" इति गयाश्राद्धपद्धतिः । दक्षिणमानसमपि तत्रत्यतीर्थभेदः "दिवाकर! करोमीह स्नानं दक्षिणमानसे" इति तत्रैव ।

उत्तरमीमांसा स्त्री उत्तरस्य वेदस्येषभागस्य उपनिषद्-रूपस्य मीमांसा पञ्चाङ्कन्यायोपेतवाक्यसमन्वयाद्यात्मकोविचारः । "अथातो ब्रह्मजिज्ञासा" इत्यादौ "अनावृत्तिः शब्दात्" इत्यन्ते चतुरध्यायोरूपे षोडशपादात्मके शारीरस्य ब्रह्मात्मत्वप्रतिपादके वेदव्यासरचिते शारीरकसूत्राख्ये ग्रन्थे । तत्र प्रतिपाद्यविषयादि संक्षेपतः वैयासिकन्यायावां भारतीतीर्थमुनिना दर्शितं यथा "शास्त्रं ब्रह्मविचारात्मकमध्यायाः चतुर्विधाः । समन्वयाविरोधौ द्वौ साधनं च फलं तथा" ४ । समन्वये स्वदलिङ्गमस्वदलमुपास्यगम् । श्रेयगं पदमात्मा च चिन्त्यं पादेषट् क्रमात्" ५ । द्वितीये स्मृतितर्काभ्यामविरोधोऽन्यदुष्टता । भूतभौक्तृश्रुतेर्लिङ्गश्रुतेरप्यविरुद्धता" ६ । द्वतीये विरतिश्चेत्यं पदार्थपरिशोधनम् । गुणोपसंहृति र्ज्ञानवह्निरङ्गादिसाधनम् ७ । चतुर्थे जीवतोमुक्ति रुत्क्रान्तिर्गतिरुत्तरा । ब्रह्मप्राप्तिर्ब्रह्मलोकावाप्तीः पादार्थसंग्रहः" ८ । "अध्यायचतुष्टयात्मकस्य शास्त्रस्य ब्रह्मविचारोऽयं सर्वेषां वेदान्तवाक्यानां ब्रह्मणि तात्पर्येण पर्यवसानं प्रथमाध्यायेन प्रतिपाद्यते । द्वितीयेन सम्भावितविरोधः परिह्रियते । तृतीयेन विद्यासाधननिर्णयः । चतुर्थेन विद्याफलनिर्णयः इत्येते अध्यायार्थाः ४। तत्र प्रथमाध्यायगतपादार्थान् विभजते । समन्वयेति । स्वदलिङ्गमुक्तं वाक्यजातं प्रथमे पादे चिन्त्यम् ।"अन्यस्तुर्योपदेशाद्" इत्यत्र सर्वप्रमाणाग्रगण्यं सर्वज्ञपरमेश्वरादिकं च ब्रह्मणोऽसाधारण्यतया स्वदलिङ्गम् । अस्वदलिङ्गमुक्तं सत्प्रधानविषयं वाक्यजातं द्वितीयपादे चिन्त्यम् । तद्यथा प्रथमाधिकरणविषये शास्त्रयोनित्वाधिकरणे मनोमयत्वप्राणशरीरत्वादिकं यो पाधिकब्रह्मणो जीवस्य च साधारण्यात्तदस्वदलिङ्गम् । द्वतीयपादे स्वस्वदलिङ्गमुक्ते सति श्रेयब्रह्मविषयं वाक्यजातं चिन्त्यं तद्यथा प्रथमाधिकरणे सुषुप्तिगतब्रह्मात्मत्ववाक्ये द्युभ्वाद्यधिकरणोक्तं ब्रह्मात्मन परब्रह्मत्व साधारण्यादस्वदलिङ्गम् । यद्यपि द्वितीयपादे कठवल्ल्यादिगतब्रह्मात्मत्ववाक्यानि विचारितानि । तृतीयपादे दहरोपासनावाक्यं विचारितं तथाप्यक्षरान्तर संगतिलोभेन तद्विचारस्य प्रासङ्गिकत्वात् पादार्थयोः साङ्कर्यापत्तिः दृश्यं पादत्रयेण वाक्यविचारः समाधितः । चतुर्थपादे स्वव्यक्तपदमजापदं चेत्येवमादिसन्दिग्धपदं चिन्त्यम्५। द्वितीयाध्यायगतपादार्थान्विभजते द्वितीये इति । प्रथमपादे सांख्ययोगकाणादादिकुतर्कभिः सांख्यादिप्रयुक्ततर्कैश्च विरोधो वेदान्तसमन्वयस्य परिहृतः । द्वितीयपादे सांख्यादिमतानां दुष्टत्वं प्रदर्शितम् । तृतीयपादे पूर्वभागेण पञ्चमहाभूतसृष्टीनां परस्परविरोधः परिहृतः उत्तरभागेण जीवसृष्टीनाम् चतुर्थपादे लिङ्गशरीरसृष्टीनां विरोधः परिहृतः ६। तृतीयाध्यायगतपादार्थान्विभजते तृतीये इति । प्रथमपादे जीवस्य परलोकगमनागमने विचार्य वैराग्यं निरूपितम् । द्वितीयपादे पूर्वभागेण स्वंपदार्थः शोधितः । उत्तरभागेण तत्पदार्थः । तृतीयपादेन सगुणविद्यायां गुणोपसंहारो निरूपितः निर्गुणे ब्रह्मणि च पुनरुक्तपदोपसंहारश्च । चतुर्थपादे निर्गुणज्ञानस्य वह्निरङ्गभूताश्वाश्रमवदादीन्यन्तरङ्गभूतशमदमनिदिध्यासनादींश्च निरूपितानि ७ । चतुर्थाध्यायगतपादार्थान्विभजते चतुर्थे इति । प्रथमपादे श्रवणाद्याहृत्या निर्गुणसुपास्यवा सगुणं वा ब्रह्म साक्षात्कृत्य जीवतः पापपुण्यलेपविनाशक्रमेण सुक्तिः प्रतिपादिता । द्वितीये पादे त्रियमाणस्योत्क्रान्तिप्रकारोनिरूपितः । तृतीयपादे सगुणविदो ह्युत्तरमार्गोऽभिहितः । चतुर्थपादे पूर्वभागेण निर्गुणब्रह्मविदो विदेहकैवल्यप्राप्तिरभिहिता, उत्तरभागेण सगुणब्रह्मविदो ब्रह्मलोकप्राप्तिर्निरूपिता"तद्व्या० । मीमांसा पि वेदतात्पर्यनिर्णयार्थः व्यावर्त्यभेदात्मकविचारः । सा च द्विविधा पूर्वमीमांसा उत्तरमीमांसा च तत्र पूर्वमीमांसा जैमिनिप्रणीता "अथातोधर्मजिज्ञासा" इत्यादिका, उत्तरमी

मांसा दर्शिता । इयमेव च ब्रह्ममीमांसात्वेन प्रसिद्धा

उत्तररामचरित न० उत्तरं रामस्य चरितं यत्र । भवभूतिप्रणीते नाटकभेदे ।

उत्तरवयस त्रि०उत्तरं वयः नि०बहु० अच् समा० । वृद्धावस्थायाम् "तस्मादुत्तरवयसे पुत्रान् पितोपजीवति" मत० मा० १२,२,३,४ । स्त्रीत्वे तु उत्तरवयस् इत्येव ।

उत्तरवस्ति पु० सुश्रुतोक्ते चिकित्साङ्गे यन्त्रभेदे । तत्स्वरूपप्रयोगप्रकारादि यथा तत्रैव

"वस्तेरुत्तरतन्त्रस्य विधिं वक्ष्याम्यतःपरम् । चतुर्हस्तान्तुलनेत्रमात्राङ्गुलसन्मितम् । मात्रतीषुमुष्टन्याद्यं छिद्रं सर्षपनिर्गमम् ; मेढ्यायामसमं केचिदिच्छन्ति खलु तद्विदः । स्नेहप्रमाणं परमं कुशत्वात् प्रकीर्तितः । पञ्चविंशादधोमात्रां विद्याद्वृद्धिकलिताम् । त्रिविष्टकर्णिकं मध्ये नारोणां चतुरङ्गुलम् । मूलस्रोतःपरीणाहसन्नाहिदशाङ्गुलम् । तासामग्रभागे तु निदध्यात्तुत्तरङ्गुलम् । द्व्यङ्गुलं मूलभागे तु कन्यानान्वेकमङ्गुलम् । विधेयं चाङ्गुलं तासां विधिवद्दृश्यते यथा । स्नेहस्य प्रस्थतस्त्रीणि स्वाङ्गुलीमूलसंमितम् । देयं प्रमाणं परमबलगुडुचिकल्पितम् । औरभ्रः शौकरो वापि वस्तिराजश्च पूजितः । तद्लाभे प्रयुञ्जीत गवाश्वं तु पक्षिणाम् । अस्थाभे हृते पादो वृद्धत्वं ततोऽपि वा । अथातुरमुपस्निग्धं सुस्निग्धं प्रथिताशयम् । यवागूं सप्तवलीरां पीतवन्तं यथाबलम् । निषण्णमाजानुसमे पीठे स्थानात्त्रये समे । स्वभ्यक्तवस्तिमूर्द्धानं तैलेनोष्णेन मानवम् । ततः समं स्थापयित्वा गात्रमस्य प्रहर्षितम् । पूर्वं श्लाकयाऽस्निग्ध ततो नेत्रमनन्तरम् । घनैःघनेर्ताभ्यक्तं विद्याद्वङ्क्षणानि षट् । ततोऽवपीडयेद्वस्तिं च नैनेत्रं च निर्हरेत् । ततः प्रत्यागते स्नेहमपराह्णे विचक्षणः । भोजयेत् पयसो मात्रां यूषेणाथ रसेन वा । अनेन विधिना दद्याद्वस्तीस्त्रींश्चतुरोऽपिवा । जर्जुजात्वै स्त्रियै दद्यादुत्तानायै विचक्षणः । कल्पोत्तरस्त्री कल्पार्थं दद्यात्पृष्ठं पीडितम् । तिलकल्किते नेत्रेण दद्याद्योनिगुदं प्रति । गर्भाशयविशुद्ध्यर्थं स्नेहेन द्विगुणेन तु । अप्रत्यागच्छति भिषक् वस्त्युत्तरसंज्ञिते । मूलोवस्तिं निदध्यात्तु संयुक्तं योधनैर्गणैः । गुदे वर्त्तिं निदध्याद्वा योधनद्रव्यसंभृताम् । प्रवेशयेद्वा मतिमान्लिङ्गहारणवर्त्मगी । पीडयेद्वाप्यधोनाभेर्वेगेनोत्तरसंज्ञिना । आरग्वधस्य पत्रेषु निर्गुण्ड्याः सुरसेषु च । कुर्याद्वोमूलपिष्टे तु वर्त्तीर्वापि सशैलवाः । सुस्नैर्हासर्षपसमाः प्रविभज्य वयांसि तु । वस्तेरागमनार्थाय ता निदध्याच्छलाकया । आगारधूमदग्धतीषिपूतीफलसैन्धवैः । कृता वा शुक्तगोमूत्रसुरापिष्टैः सनागरैः । अनुवासनसिद्धिस्तु वीक्ष्य कर्म प्रयोजयेत् । शर्करामधुसर्पिश्च पीतेन मधुकाम्बुना । दह्यमाने तदा वस्तौ दद्याद्वस्तिं विचक्षणः । क्षीरेक्षुरसपायेण पयसा पीतलेन च । शुक्रं दुष्टं शोणितं वाङ्गनानां पुष्पोद्भेदं तस्य नाशयेत्कृत्स्नम् । मूलाघातान्मूलदोषान् प्रदद्यान् योनिव्यापिं संस्थितिं चापरायाः । शुक्रोत्लेकं शर्करामधुसरीरांश्च मूलं वस्तौ वङ्क्षणे मेढ्रने च । घोरानन्यान् वस्तिजांश्चापि रोगान् हित्वा मेढ्रान्तुत्तरो हन्ति वस्तिः । सम्यग्दत्तस्य लिङ्गानि व्यापदः क्रम एव च । वस्तेरुत्तरतन्त्रस्य समानं स्नेहबस्तिना" ।

उत्तरवादिन् त्रि० उत्तरमुत्तरपक्षं वदति वद्-णिनि । वादे प्रतिवादिनि (आशामी) "साक्षिणभूयतः सत्सु भवन्ति पूर्ब्बवादिनः । पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः" या०स्मृ० ।

उत्तरवेदि स्त्री कर्म्म० वा ङीप् । 'तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानाञ्च मचक्रुकस्य च । एतत् कुरुक्षेत्रसमन्तपञ्चकं पितामहस्योत्तरवेदिरुच्यते" भा० व० ८३अ० उक्ते कुरुक्षेत्रान्तर्गते समन्तपञ्चकरूपे तीर्थे । कुरुक्षेत्रञ्च "उत्तरेण दृषद्वत्या दक्षिणेन सरस्वतीम् । ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिविष्टपे" इत्युक्तस्थले तीर्थभेदः । इयमेव ब्रह्मवेदीत्युच्यते "ब्रह्मवेदी कुरुक्षेत्रं पुण्यं ब्रह्मर्षिसेवितम्" तत्रैवोक्तेः । यज्ञेऽग्निस्थानार्थं २वेदिभेदे तत्स्वरूपादि दाक्षा० दर्शितं यथा । "तत्र ब्रह्मवेदिपश्चिमरेखामध्यात् पूर्व्वतः, समित्र्यमितां, प्राचीरेखा मध्यात् पश्चिमतः समित्र्यात्तां, दक्षिणरेखामध्यात् उत्तरस्थासुत्तररेखामध्यात् दक्षिणस्थां तथैव समित्र्यात्तां भूमिं त्यक्त्वा कुण्डादिमध्ये समिद्दृढमितदीर्घविस्तारां समचतुरस्रासुत्तरवेदिमग्निस्थापनाय वेदिमध्ये कल्पयेत्" । "उत्तरवेद्यग्निप्रणयनमन्वग्नयुदवाह्यं वरुणप्रघासादधः" कात्या०५,७,१५ । "दक्षिणेन निर्हृत्य दक्षिणस्थासुत्तरवेदिरूपौ निदधाति ८,६,१८ । "अथात आहवनीयादेव नोपकिरन्त्युत्तरवेदिम्" शत० ब्रा० २,३,१, १८ । "तद्दे दे वेदी द्वावग्नी भवतः । तद्यद्दे वेदी द्वावग्नी भवतस्तद्दुभयतस्तद्भवत एवैतत् वरुणपाशात् प्रजाः प्रमुञ्चमीतश्चोर्द्ध्वा दृतयावाचीस्तादु दे वेदी द्वावग्नी भवतः । स उत्तरस्यामेव वेदौ उत्तरवेदिम् उप-

'क्षिपति न दक्षिणेनास्" यत०ब्रा०१,५,२,५,६ ।

उत्तरग्रलक्षुट पुंस्त्री ष०त०।उत्तरस्य ग्रावलक्षुटस्य इव०। ततः गौरादित्वात् ङीष्। उत्तरग्रावलक्षुटोलूखले ।

उत्तरजङ्घ न० उत्तरः जङ्घः एकदे०स० टच्समा० । जङ्घोपरि उत्तरभागे

उत्तरतादिन् त्रि०"तादिन्यादयपि यः कार्यं प्रथमं परिभाषणात् । प्रथमान्यायवाहापि च कार्युत्तरसंज्ञम्"इति भाष्योक्ते तादिभेदे ।

उत्तरसाधक त्रि० उत्तरः वस्तु साधयति क्षिप्-क्षिप् वा-आदेयः खुञ् । उत्तराने उत्तरवादिनि । स हि प्रतरवादप्रोक्तस्य तदुत्तरवर्त्तिनं वस्तु कार्यं साधयति ।

उत्तरा अव्य० उत्तर+प्रथमाद्यनुक्तोत्तमार्थे आप् । उत्तरस्यां दिशि आदे देशे वेत्याद्यर्थे । १प्रथमायुत्तराद्यः"भा०व० २८अ० । २उत्तरस्यां दिशि ३विराटकन्यायां स्त्री ।"प्रेते पितृव्यभ्रातृपत्ये वधिष्णीवरवादहु । स्त्रियस्ते वाः स्त्रियाः पितृव्याः प्रोच्यन्ते उत्तरा हि ता"इत्युक्ते वधिष्णोवरपत्नीत्वात् पितृव्यभ्रातृस्त्रियाञ्च स्त्री ।

उत्तरात् अव्य० उत्तर+दिग्देशयोगविषये आति । उत्तरस्यामुत्तरस्मिन्नित्यर्थे । "पश्चादीत्तराधरादाहुरुत्तरात्" ऋ० ६,१८,६ । "त्वं नः पश्चादधरादुत्तरात् पुरः" ऋ० ८,६१,१६ ।

उत्तरात्तात् अव्य०उत्तरात्+वा० तेदे०त्रि० तति । उत्तरादित्यर्थे ।"तव वीरासोऽधरादुदायन्नुतोत्तरात्तात् उतमध्यिदर्न" ऋ० १०,२७,१५ । "पुरस्तात् पश्चितोत्तरात्तात् पश्चिताऽधरात्तरात् १०,२९,१३ ।

उत्तराधर त्रि० कर्म० उत्तरश्च अधरश्च । उद्गाग्रे उत्तरा-धरा एव भवन्त्योषधि" यत०ब्रा०५,३,३,२१ । उपरितनोऽधे पु० "पुनर्दिवसुः स्फुरिलोत्तराधरः" कुमा० ।

उत्तराधिकारिन् त्रि० उत्तरं पूर्वं स्वामिस्वत्वोपरभान-नारभधिकरोति तच्छीले स्वाम्यादीति-अधि+कृ-णिनि । पूर्वं स्वामिस्वत्वोपरमे तच्छीले स्वामिनाग्रे पूर्वं स्वामिव-न्धिकृतादौ स्त्रियां ङीप् । तस्य कर्त्तव्ये तत्राधिकारः।

तत्र यावत् तत्प्रेत्यप्रथमितदायभागसंबन्धिकारित्वमोऽधि-कोयते तत्र तद्व्या० श्रीकृष्णोक्तम् यथा । "जनाय' स्वतन्त्रतत्राधिकारित्वम् । तत्र प्रथमं पुत्रः तदभावे पौत्रः तदभावे प्रपौत्रः, स्वतपितृकपौत्र-मृतपितृकपितामह-क्रमप्रपौत्रयोस्तु पुत्रेण सह युगपदधिकारः । प्रपौत्रय-र्यन्तानामभावे पत्नी सा च प्राग्मर्त्तृदाया मर्त्तृकृतं तदभावे पितृकृतं वा दत्तमाधिता वनी यदीरस्यार्थं भ-र्त्तृदायं भुञ्जीत तथा भर्त्तृव्यवहारार्थं यथासंयच्छिद्यादि-वमपि कुर्वीत न तु स्त्रीधनवत् स्वच्छन्दं विनियु-ञ्जीत । तदभावे दुहिता तत्र प्रथमं कुमारी तदभावे गाढ्ढा, तदभावे जठा वा च पुत्रवती तत्प्रावितपुत्रा च ते द्वे युगपदेवाधिकारिण्यौ, वन्ध्या पुत्रहीना विधवा च नाधिकारिण्यौ । जठायाश्चभावे दौहित्रः । तदभावे पिता । तदभावे माता, तदभावे भ्राता, तत्रापि प्रथमं सोदरः तदभावे वैमात्रेयः, स्वतस्य भ्रातृसंसृष्टत्वे तु सोदरभ्रातृविषये प्रथमं संसृष्टसोदर एवाधिकारी तद-भावे चासंसृष्टसोदरः, एवं वैमात्रेयभ्रातृविषये प्रथमं संसृष्टवैमात्रेयः तदभावे चासंसृष्टवैमात्रेयः, यदा तु संसृष्टसोदरवैमात्रेयः सोदरश्चासंसृष्टः तदा तावुभौ तुल्य-वदधिकारिणौ । भ्रातृणामभावे भ्रातृपुत्रः, तत्रापि प्रथमं सोदरभ्रातृपुत्रः तदभावे वैमात्रेयभ्रातृपुत्रः, संसर्गे तु सोदरभ्रातृपुत्रभ्रातृविषये प्रथमं संसृष्टसोद-रभ्रातृपुत्रः तदभावे चासंसृष्टसोदरभ्रातृपुत्रः, वैमात्रेय-भ्रातृपुत्रभ्रातृविषये प्रथमं संसृष्टवैमात्रेयभ्रातृपुत्रः तद-भावे चासंसृष्टवैमात्रेयभ्रातृपुत्रः, यदा तु सोदरभ्रात-पुत्रोऽसंसृष्टो वैमात्रेयभ्रातृपुत्रस्तु संसृष्टः तदा तौ भ्रातृवत्तुल्याधिकारिणौ । भ्रातृपुत्राभावे भ्रातृपौत्रः तत्रापि भ्रातुः सोदरसोदरक्रमः संसर्गासंसर्गक्रमश्च बोध्यः । तदभावे पितृदौहित्रः स च सोदरभगिनीपुत्रः वैमात्रेयभगिनीपुत्रश्च, तदभावे पितामहः, तदभावे पिता-मही, तदभावे पितुः सहोदरः तदभावे पितृवैमात्रेयः । तदभावे पितृसोदरपुत्रपितृवैमात्रेयपुत्रपितृसोदरपौत्रपि तृवैमात्रेयपौत्राणां क्रमेणाधिकारः । तदभावे पितामह-दौहित्रः तत्रापि पितृसोदरभगिनीपुत्रः पितृ-वैमात्रेयभगिनीपुत्रश्च, यद्यप्यमी प्रपितामहदौहित्राधिकारे-ऽन्तर्भवन्ति, तदभावे प्रपितामहः तदभावे प्रपितामही तदभावे पितामहसहोदरभ्रातृवैमात्रेयभ्रातृतत्पुत्रपौ-त्रप्रपितामहदौहित्राः क्रमेणाधिकारिणः । एता-वत्पर्य्यन्तानां धनिभोग्यपिण्डदातृणामभावे धनिदेय पिण्डदातृणां मातामहभ्रातृजादीनामधिकारः तत्रापि प्रथमं मातामहसहोदरभ्रातृवैमात्रेयभ्रातृतत्पुत्रपौत्राणां क्रमेणा-धिकारः तदभावे चाधस्तनसप्तकस्यानां धनिभोग्यत्वेऽदा-तॄणां प्रतिग्रहप्रभृत्यसिपुरुषत्वयाणां क्रमेणाधिकारः, तदभावे पुनरूर्द्धतनसप्तकस्यानां धनिदेयत्वेऽप्युपगृहप्रपिता-

ब्रह्मादिसत्सन्तानाभावसन्निकर्षेणाधिकारः, तदभावे समानोदकानामधिकारः। तेषामभावे आचार्यस्य तदभावे शिष्यस्य तदभावे सब्रह्मचारिणोऽधिकारः, तदभावे वैश्यकामस्थसगोत्रसमानप्रवरयोः क्रमेणाधिकारः। उक्तपर्य्यन्तानां सर्वेषां सम्बन्धिनामभावे ब्राह्मणधनवर्ज्जं राजा गृह्णीयात्, ब्राह्मणधनन्तु त्रैविद्यादिगुणयुक्ता ब्राह्मणा गृह्णीयुः। एवं वानप्रस्थधनं भ्रातृत्वेनानुमतोऽपरवानप्रस्थ एकतीर्थी गृह्णीयात्। तथा यतिधनं सच्छिष्यः। नैष्ठिकब्रह्मचारिणोधनमाचार्य्यः उपकुर्व्वाणस्तु ब्रह्मचारिणोधनं पितादिर्गृह्णीयादिति सङ्क्षेपः"।

दायक्रमसन्दर्भे भ्रातृदौहित्रदौहित्रपितामहसोदरदौहित्राणामधिकारोऽभिहितः। विवादभङ्गार्णवमते पुत्रपौत्रदौहित्रयोरधिकारः। दत्तकौमांसायां पितृधनविभागे जनन्याः पुत्रसत्त्वाभावेऽधिकारः। पितामहधनविभागे च पितृजनन्याःपौत्रत्वाभावेऽधिकारः। जीवच्छ्राद्धे तु पिता पितामहेन वा भागदयं दत्त्वा अप्राप्तदीधव्यानां सर्वासां सवर्णपत्नीनां पुत्रस्य मृतपितृपौत्रस्य चैकैकोऽंशोदेयः, अवरेकदिवसकार्य्यां तु पितृतोभागकल्पना एव न कर्त्तव्या पितामहीधनेऽपि पितृतोभागकल्पना इति। व्यवहारे तु विशेषः "अविभक्तं स्थावरं यत् सर्वेषामेव तद्भवेत्" इत्युक्तत्वात् मृतभ्रातॄणां सोदरासोदराणां समानाधिकारः। स्त्रीधने विशेषस्तत्रैव "भ्रातॄणां स्त्रीधनाधिकारस्त्वविभक्तविषयः। तत्र कर्त्तव्ये प्रथमं सोदरभ्रातृसद्भावे भ्रातृसद्भावे पितुरधिकारः। वरदराजस्तिरिक्तव्याख्यानेऽप्येवं, वरदस्तत्र तु वरस्याधिकार इति। जडावा यौतकधने प्रथमं कुमारी, तदभावे वाग्दत्ताऽधिकारिणी, एतदुभयाभावे जठरोः पुत्रवतीसन्धावितपुत्रयोर्युगपदधिकारः। एतस्या अभावेऽपरायाः, एतदुभयाभावे वन्ध्याविधवयोस्तुल्याधिकारः, एकाभावे चापरायाः, । ततः पुत्रदौहित्रपौत्रप्रपौत्रसपत्नीपुत्रपौत्रप्रपौत्राणां क्रमेणाधिकारः। अन्यत्रकर्त्ते तु सपत्नीपुत्रपौत्रयोः दौहित्रस्याधिकार इति विशेषः। तत्रोशनाऽपि-स्त्रीधनं दुहितॄणामप्रजसामप्रजसां यौतकधने माता पिता भ्राता पिता वेति क्रमः आसुरादिविवाहकन्यासम्बन्धयौतकधने माता पिता भ्राता अपरा वेति क्रमः। ततो देवरः ततोऽपरपुत्रश्वशुरपुत्रौ, ततोऽग्निजोपुत्रः, ततोऽग्न्याधेयः, ततोऽग्निहोत्रपुत्रः ततो भ्राता, ततः श्वशुरः, भ्रातृश्वशुरः, । ततश्चानन्तर्य्यक्रमेण सपिण्डाः ततः सकुल्याः, ततः समानोदका इति। यौतकातिरिक्तेऽपि पितृदत्ते प्रथमं कुमारी, ततः पुत्रः, ततः पुत्रवतीसन्धावितपुत्रे, ततः पौत्रदौहित्रप्रपौत्रसपत्नीपुत्रपौत्रप्रपौत्राः। ततो वन्ध्या विधवा च युगपदधिकारिण्यौ, ततोभ्रात्रादिक्रमेणैव पूर्ब्ववत् क्रमः। पितृदत्तातिरिक्ते अयौतकधने तु पुत्रकन्ययोर्युगपदधिकारः, तयोरभावे पुत्रवतीसन्धावितपुत्रयोः, ततः पौत्रदौहित्रप्रपौत्रसपत्नीपुत्रपौत्रप्रपौत्राः क्रमेणाधिकारिणः। ततो वन्ध्या विधवा च युगपदधिकारिण्यौ ततः पूर्ब्ववत् भ्रात्रादिक्रमः"। अत्र सर्वत्र प्रमाणं दायभागेऽनुसन्धेयम्।

चिन्तामणिमते पुत्रमृतकपौत्रमृतपितापितामहक्रमप्रपौत्राधिकारं दायभागमतवत् सप्रपञ्चं निरूप्य अपुत्रधने विशेषोऽभिहितो यथा।

"अनन्तरः सपिण्डाद्यस्तस्य तत् धनं भवेत्" मनुः। "आपत्सम्भवः अपुत्रधनाधिकारी आसप्तमपितृसन्तदभावे व्यवहितसन्तदभावे आचार्य्यसन्तदभावेऽन्तेवासी"। याज्ञवल्क्यः "पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुतो गोत्रजोबन्धुः। शिष्यस्साब्रह्मचारिणः। एषामभावे पूर्ब्वस्य धनभागुत्तरोत्तरः। स्त्रीप्रसूस्त्रीसम्बन्धश्च सर्ब्वत्रैवयं विधिः"। पितरावित्यत्र क्रमाकाङ्क्षायामादौ माता तदभावे पिता विष्णुस्मृत्योरमूलत्वात्। तत्सुतो भ्राहपुत्रः अपुत्रस्य पुत्रपौत्रप्रपौत्रशून्यस्य। कात्यायनः "विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत्। भ्राता वा जननी वापि भ्राता वा तत्पितुः क्रमात्"। पितर्य्यूर्द्धं पिता, भ्रात्राद्यूर्द्धं भ्रात्रादिरिति व्यवस्थितोविकल्पः। पैठीनसिः "अपुत्रस्य स्त्रियातस्य भ्रातृगामि धनं तदभावे पितरौ गच्छेताम्"। देवलः "ततोदायमपुत्रस्य विभजेरन् सहोदराः। तुल्यादुहितरोवापि स्त्रियश्चापः पितापि वा। सवर्णाभ्रातरोभ्राता भार्य्या चेति यथाक्रमम्। एषामभावे स्वर्हारः सकुल्याः सकुलाशिनः"। तुल्याः सहोदराश्च सवर्णाभ्रातरोऽत्र ज्ञेयाः। अत्र च देवलोक्तक्रमेण सह विष्णुयाज्ञवल्क्योक्तक्रमयोर्विरोधमाशङ्क्य व्यवस्थामाह यदा याज्ञवल्क्योक्तक्रमानतिक्रमेणेति कल्पतरुधृतं व्याख्यातम्। देवलवचनलिखनानन्तरं विष्णुयाज्ञवल्क्योक्तवचने लिखितवतः कल्पतरुकृतोऽप्येवमेवाशयः। एतच्च न मनोरमं न हि स्त्रीक्रमसङ्कोचः परोक्तक्रमोत्थापकत्वमिति स्त्रीक्रमार्थं भविष्यत्पुराणोक्ति उपस्थितं विश्वास्यानुपस्थितपरित्यक्तगोरवात् एवमपि पैठीनसिवचनविरोधापरीहाराच्च। तत्कात्यायनभ्रातृदायाभ्यां धने विष्णु-

पौत्रसक्थोक्तक्रमस्तदन्यधने तु पैठीनस्याद्युक्तक्रम इति रत्नाकरः। बौधायनः "सपिण्डाभावे साध्व्याः तदभावे आचार्यः अनेवाधे क्षत्रियः क्षरेत् तदभावे राजा"। सगौत्रजाभावे बन्धु. याज्ञवल्क्यवचनात् स च स्वबन्धुः पितृबन्धुः मातृबन्धुश्च। "आत्मपितृःभ्रातृः पुत्रा आत्ममातृःभ्रातृः सुताः। आत्मभातृजपुत्राश्च विज्ञेया-स्त्वात्मबान्धवाः। पितुः पितृःभ्रातृः पुत्राः पितृमातृः-भ्रातृः सुताः। पितृभ्रातृजपुत्राश्च विज्ञेयाः पितृबान्धवाः। मातुः पितृःभ्रातृः पुत्रामातृमातृःभ्रातृः सुताः। मातृभ्रातृजपुत्राश्च विज्ञेयामातृबान्धवाः"। एतेषां क्रमेणाधिकारः। तदयं संक्षेपः। आदौ पुत्रसदभावे-पौत्रसदभावे प्रपौत्रसदभावे साध्वी भार्या तदभावे दुहिता तदभावे माता तदभावे पिता तदभावे दौहित्रसदभावे भ्राता तदभावे तत्पुत्रसदभावे आसप्तसपिण्ड-सदभावे यथाक्रमं व्यवहितसपिण्डसदभावे आसप्तसकुल्य-सदभावे व्यवहितसकुल्यसदभावे मातृसपुत्रादिः सर्वाभावे ब्राह्मणधनवर्ज्यं राजगामि ब्राह्मणधने तु ब्राह्मणान्त-रमेव धनत्रयेऽधिकारीति। याज्ञवल्क्यः "वानप्रस्थयति ब्रह्मचारिण्यमृक्थभागिनः। क्रमेणाचार्यसच्छिष्यधर्म्म-भ्रातृसगोत्रिणः"। क्रमेण प्रतिलोमक्रमेण तेन ब्रह्मचारि-योगुरुकुलस्थस्याचार्यः, यतेः सच्छिष्यः, वानप्रस्थस्य भ्रातृत्वे मातृमतोऽपरोवानप्रस्थश्च"।

अधिकारिक्रमे पितृदौहित्रादेरौर्ध्वदैहिकात् तस्य नाधिकार इति विशेषः।

स्त्रीधने विशेषः "तत्र मनुः अनपत्यायां संस्थितायान्तु सर्वं सर्वे सहोदराः। भजेरन्मातृकं रिक्थं भगिन्यश्च समाभयः। याज्ञवल्क्यः दुहितरस्तासामपि यथांशतः। मातामह्याधनात् किञ्चित् प्रदेयं प्रीतिपूर्वकम्"। समभविभ-क्तांशम्, समाभयः सहोदराः, भगिन्यः कुमार्य्यश्च समांशा-स्तदाह हारीतः "स्त्रीधनं स्यादपत्यानां दुहिता च तदंशिनी। अप्रजा चेत्सुतां तु सा भजेत मातृमातृकम्"। अपत्यानां पुत्राणां तदंशिनीति विशेषात्सुता समत्व आभः समूढा विवाहिता मातृमातृकं द्रव्यात्तुरीयेण किञ्चित्। गौतमः "स्त्रीधनं दुहितृणामप्रजसामप्रतिष्ठि-तानाञ्च"। "अप्रतिष्ठिता अनपत्या निर्धनभर्तृका दुर्भ-गा" चेति रत्नाकरादयः। एता अपुत्रा अपि पुत्रवन्मातृ-धनभाजः। मनुः "मातृष्वसृगतं यत्स्यात्तु दौहित्रेष्वेव तद्धनम्"। यौतकं विवाहकाले पित्रादिनो दत्तम्। वसिष्ठः "मातुः पारिणाय्यं स्त्रियोविभजेरन्"। पारिणाय्यं यौ-तकादर्थकृतिकादि। याज्ञवल्क्यः "मातुर्दुहितरः सेष-मप्यादायाप्रजसः स्वयः"। मातृधनं तदाख्यं धनं दौहित्रा-दयोऽनपत्ये दुहितरोऽभजेरन्, नाम्ना धनं दुहितृणामभावे-ऽन्वयः दौहित्रीदौहित्रौ मनुवचनात्तुरीयाः। मातृमा-तृष्वसृकादिकं परिच्छदादिकञ्च यन्मातृधनं तद्विषयमेतत्। कात्यायनः "दुहितृणामभावे तु कृत्स्नमन्वयबन्धुषु तद्भवेत्। बन्धूनामप्यभावे तु भर्तृगामि तत् स्मृतम्। भगिन्योभ्रातृभिः सार्द्धं विभजेयुः समन्ततः। स्त्रीधनस्येति धर्म्मोऽयं विभागस्तु प्रकल्पितः"। दुहितृणामिति पारिणाय्यं विवाहकाले यौतकञ्च पितृदत्तञ्च यन्मातृधनं तत्सर्वा. पुत्रभावे पुत्रगामि भवतीत्यर्थः तदतिरिक्तन्तु स्त्रीधनं तस्या अभावे पुत्रीपुत्रोभयगामि इत्युक्तमेव प्राक्। यत्पुनर्दत्तमिति पित्र-तिरिक्तेन दत्तं यत्तत्तु भ्रातृभगिन्यौ किन्तु कन्या तत्स-मांशा विवाहिता तु किञ्चिद्भागमाप्नोतीति भगिन्य इत्यादे-रर्थः। अभावे पुत्रीपुत्राद्यभावे स्त्रियाधनं पतिगामी-त्यर्थः मनुः "ब्राह्मदैवार्षगान्धर्व्वप्राजापत्येषु यद्धनम्। अतीतायामप्रजायां भर्तुरेव तदिष्यते। यच्चास्याः स्याद्-धनं किञ्चिद्विवाहेष्वासुरादिषु। अतीतायामप्रजायां मातापितोरपीष्यते"। अप्रजायामनपत्यायाम्। गौतमः "भगिनीशुल्कं सोदर्याणामूर्द्धं मातुः पूर्वं चेत्येके"। आसु-रादिविवाहफलयत्तद्विषयमेतत्। बौधायनः "अक्षतं क्षता-याः कन्यायाश्चेष्टीयुः सोदराः स्वयम्। तदभावे अभे-म्मातृसदभावे अभेत्मितुः" विष्णिः। अत्र यस्य भर्तृ-गामित्वञ्च तदभावे, तत्सपिण्डानामासप्तमक्रमेणाधि-कारः। यस्य तु पितृगामित्वोक्ता तत्र तदभावे तत्माता-सप्तसपिण्डा अधिकारिण इति बोध्यम्।

पितामहस्तु तु जन्माधीनस्वत्वाङ्गीकारेण पैतामहे पित्रे च धने पितापुत्रयोः पितामहपौत्रयोश्च तुल्याधिकारः। पितुः पितामहस्य चोपरमे पुत्रस्य, पौत्राणाञ्च स्वपितृ-योग्येऽधिकारः। जीवद्विभागे तु स्वार्ज्जिते पितृद्रव्यङ्का-रिता पैतामहे तुल्यांशिता। धनिकतरविभागे तदुपरमे पुत्रा-दिक्रमविभागे च धनिपितामहैकांशेऽधिकारः। दुहि-तृणान्तु प्रत्येकं स्वजातीय कल्पितभागचतुर्थांशभागिता। सासदयिकस्वत्वाङ्गीकारेण च भ्रात्रादीनामपुत्रादीनामपि भक्तत्वे संसृष्टत्वे च एकस्य मरणे इतरस्य स्वत्वस्थितेः तत्र पत्न्यादीनां न स्वत्वसृष्टयने तथा च विभक्तासंसृष्टधनएव पत्न्यादीनामधिकारः। पत्नीदुहितरश्चेत्यादि याज्ञवल्क्य-वचनात्

तत्र वचनं चिन्तामणिगते ११००पृष्ठे दर्शितम् तच्च वचनस्य व्याख्यायाम् मिता० तत्क्रमोदर्शितो यथा "तस्मादपुत्रस्य स्वर्यातस्य विभक्तस्यांशहरणे मातरि पितामही स्त्री संयता सकलमेव धनं गृह्णातीति स्थितम्। तदभावे दुहितरः। दुहितर इति बहुवचनं समान जातीयानामसमानजातीयानाञ्च सकलधनांशप्राप्त्यर्थम्। तथा याज्ञवल्क्यः।"पत्नी भर्तुर्धनहरी वा स्याद् व्यभिचारिणी। तदभावे तु दुहितरो यद्यनूढा भवेयुरिति" हरदत्तोऽपि "भर्तुर्धनहरी पत्नी तां विना दुहितरः सुताः" अङ्गादङ्गात्सम्भवति पुत्रवद्दुहितरः श्रुत्याम्। तस्मात्पितृधनं लब्ध्वा कन्यां गच्छति मानवः"इति। तत्र चोढानूढासमवाये ऽनूढैव गच्छति। "तदभावे तु दुहितरो यद्यनूढा भवेयुरिति" विशेषश्रवणात्। तथा प्रतिष्ठिताऽप्रतिष्ठितासमवाये ऽप्रतिष्ठिता तदभावे प्रतिष्ठिता "स्त्रीधनं दुहितॄणाम् अप्रतिष्ठितानामप्रतिष्ठितानाञ्चेति" गौतमवचनस्य पितृधनेऽपि समानत्वात् मनुनापि तस्मिन्नविशेषेणेति मन्तव्यम्। "तत्समः पुत्रिकासुतः" इति पुत्रियाश्चपुत्रतुल्य औरसक्षेत्रजत्वेन पुत्रप्रकरणेऽभिधानात्। यद्यप्यदुहितृभावे दौहित्रो धनभाग् यथाह विष्णुः। "अपुत्रदौहित्रसन्तानो दौहित्रा धनभाजः स्मृताः" इति मनुरपि। "अजाता वाऽजाता वापि यं विन्देत्तदवाप्नुयात्। दौत्री माता मातृकुलेन दद्यात्पितृकुलेनेति"। तदभावे पितरौ मातापितरौ धनभाजौ। यद्यपि युगपदधिकरण वचनतायां द्वन्द्वस्यात्तदपवादत्वादेकशेषस्य धन सम्बन्धे पितुः क्रमो न प्रतीयते। तथापि विप्रकृष्टवाक्ये मातृशब्दस्य पूर्वनिपातादेकशेषाभावपक्षे च मातापितरौ इति मातृशब्दस्य पूर्वं श्रवणात्पाठक्रमावगमाच्चक्रमसम्बन्धे ऽपि क्रमापेक्षायां प्रतीतक्रमातुरोधेनैव प्रथमं माता धन भाक्, तदभावे पितेति गम्यते। किञ्च पिता पुत्रान्तरेऽपि साधारणो माता तु न साधारणीति प्रत्यासत्तियत्वात् "अनन्तरः सपिण्डोदद्यात्तस्य तस्य धनमवेदिति" वचनाच्चातुरेव प्रथमं धनग्रहणं युक्तं न च सपिण्डेनैव प्रत्यासत्तिर्नियामिका अपि तु समानोदकादिभूय विशेषेण धनग्रहणे प्राप्ते प्रत्यासत्तिरेव नियामिकेत्यादेव वचनादवगम्यत इति। मातापितृभ्यामतुरेव प्रत्यासत्तियत्वात् धनग्रहणं युक्ततरम्। तदभावे पिता धनभाक्। पितृभावे भ्रातरो धनभाजः। तथा च मनुः। "पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वेति अनपत्यस्य पुत्रस्य भ्राता दायमवाप्नुयात्। मातर्यपि च हृतायां पितुर्भ्राता हरेद्धनमिति" मनुवचनाच्चौरसत्वेऽपि पितरि मातरि हृतायां पितुर्भ्राता पितामह्यौ धनं हरेत्। पिता। यतः पितृगृहीतस्वं विजातीयेष्वपि पुत्रेषु गच्छति। पितामह्यौ गृहीतं तु सजातीयेष्वेव गच्छतीति पितामह्येव गृह्णातीति। एतदभ्याश्यैनानुसन्धत्ते। विजातीय पुत्राभावेऽपि धनग्रहणयोग्यत्वात् "यत्तस्त्रियाऽधिगम्": इत्यादिनेति। यत्पुनः "अङ्गाद्" इत्यादिश्रुत्या राज्ञा नियमनिति स्थितिः" इतिमनुस्मरणम् तदपि नाभिप्रायं न पुत्राभिप्रायम्। भ्रातृष्वपि सोदरा: प्रथमं गृह्णीयुरिति सोदराणां भ्रातृविशेषणात्। "अनन्तरः सपिण्डोदद्यात्तस्य तस्य धनं भवेदिति" स्मरणात्। सोदराणामभावे भिन्नोदरा धनभाजः। भ्रातृणामप्यभावे तत्सुताः पितृव्यसुताश्च धनभाजः। भ्रातृभ्रातृपुत्रसमवाये भ्रातृपुत्राणामनधिकारः भ्रातृभावे भ्रातृपुत्राणामधिकारवचनात्। यदा स्वयं भ्रातरि स्वर्याते तद्भ्रातृभ्रातृविभवेन धनसम्बन्धे जाते भ्रातृधनविभागात्प्रागेव यदि सविभ्राता मृतस्तदा तत्सुताणामप्यविभक्तोऽधिकारे प्राप्तेनैषां भ्रातृत्वाच्च विभक्त एकस्मिन् पितृतोभागकल्पनेति युक्तम्। भ्रातृपुत्राणामप्यभावे गोत्रजा धनभाजः गोत्रजाः पितामहादयः सपिण्डाः समानोदकाश्च तत्र पितामह्यौ प्रथमसम्बन्धात्। "मातर्यपि च हृतायामप्यतुर्मातां धनं हरेदिति" मातृशब्दं पितामह्या धनग्रहणे प्राप्ते विभक्तानां भ्रातृसुतपर्यन्तानां बहुक्रमत्वेन कल्पेऽनुप्रवेशाभावात्पितुर्माता धनं हरेदित्यस्य धनग्रहणाधिकारप्राप्ति मातृपरत्वादुक्तं तत्सुतानन्तरम् पितामह्यौ गृह्णातीत्य विरोधः। पितामह्याद्यभावे समानगोत्रजाः सपिण्डाः पितामहादयोधनभाजः भिन्नगोत्राणां सपिण्डानां बन्धुत्वेन एकत्वात्। तत्र च पितृसन्तानाभावे पितामह्यौ पितामहः पितृव्यात्तत्सुताच्च क्रमेण धनभाजः पितामहसन्तानाभावे प्रपितामह्यौ प्रपितामहस्तत्सुताच्चेत्यनेन वचनेनैवमासप्तमात्तत्सन्तानगोत्राणां सपिण्डानामनन्तरक्रमं वेदितव्यं तेषामभावे समानोदकानामनन्तरः। ते च सपिण्डानामुपरि सप्त वेदितव्या जन्मनामशौचा वधिका वा। यथाह हरदत्तः। "सपिण्डता तु पुरुषे सप्तमे विनिवर्तते। समानोदकभावस्तु निवर्तते चतुर्थात्। जन्मनाम्नोः श्रुतेरेके तत्परकल्पोऽवगम्यते" इति।

गौतमाभावे बन्धवोधनभाजः। बन्धवश्च त्रिविधा आत्म-बन्धवः पितृबन्धवो मातृबन्धवश्चेति । यथौशनम् । आत्म-पितृबन्धु भ्रातृ दुहित्रादि विभागधिगते ११०१ पृ०दर्शितम् तत्र चात्मरक्तत्वात् प्रथममात्मबन्धवोधनभाजस्तदभावे पितृबन्धवस्तदभावे मातृबन्धव इति क्रमोवेदितव्यः। बन्धू-नामभावे आचार्यस्तदभावे शिष्यः "सुतानावे वः प्रोक्ता-स्तः सपिण्डस्तदभावे आचार्यः आचार्याभावेऽन्तेवासी" इत्यापस्तम्बस्मरणात् । शिष्याभावे ब्रह्मचारी धनभाज् तेन सर्वेणजातीयाचार्योपनयनाध्ययनतदर्थज्ञानप्राप्तिः स ब्रह्मचारी तदभावे ब्राह्मणस्वं यः श्रोत्रियो ब्रह्मीयात् "श्रोत्रिया ब्राह्मणस्यानपत्यस्य ऋक्थभाजे-दक्षिति"गौतमस्मरणात् । तदभावे ब्राह्मणमात्रम् यथा-ह मनुः "सर्वेषामप्यभावे तु ब्राह्मणारिक्थभागिनः । सर्वे विद्याः श्रुतोदाहरणाच्चा धर्म्यान् क्षीयत"इति । न चाहा-चिदपि ब्राह्मणस्वं राजा ब्रह्मीयात् "अकार्यं ब्राह्म-णस्वं राज्ञा नित्यमिति स्थितिरिति"मनुवचनात् । नारदेनाप्युक्तम् "ब्राह्मणार्थेषु सर्वेषु दायादर्क्षेषु सत्सु च । ब्राह्मणार्थेन दातव्यमिच्छन्ती ह्यात्मनोऽन्यथेति"। बलिनाहि-धनं ब्रह्मचारिपर्य्यन्तानामभावे राजा हरेन्न ब्राह्मणं। यथाह मनुः । "एतदेवान्तु सर्वेषां सर्वाभावे हरेन्नृपः" इति ।"सुताः पौत्राश्च दायं ब्रह्मन्ति । तदभावे पत्नीदाद इत्युक्तत्वादीनामनुभयाप्यदाहार्य । "वानप्रस्थयतिब्रह्मचा-रिणां रिक्थभागिनः। क्रमेणाचार्यशिष्यब्रह्मचर्यभावेतरोत्तरिनः" आप० ।"वानप्रस्थश्च यतेश्चब्रह्मचारिणश्च क्रमेण प्रतिलोम क्रमेणाचार्यः शिष्यो धनभाजौ यतीनां च रिक्थस्य धनस्य भागिनः । ब्रह्मचारी नैष्ठिकः उपकुर्वाणश्च धनं ज्ञा-नादयएव ब्रह्मन्ति । नैष्ठिकश्च धनत्यदपदाहत्वेनाचार्यो ब्रह्मति इत्युच्यते । यतेस्तु धनं शिष्यो ब्रह्मति । शिष्यः पुनरध्यात्मयाजनाध्यापनतदर्थानुज्ञानजः पुर्वब्रह्मचार्यादेरपि भागार्हत्वात् । वानप्रस्थधनत्वर्ण्यभा-जौ यतीनौ ब्रह्मति धर्मभ्रातापत्नीयोश्चाजनी धर्मभ्रातापौत्र-यतीनौ च धर्मभ्रातृयतीनौ । एतेषामाचार्यादीनामभावे दुहित्रादिषु ब्रह्मचेयतीनौ च ब्रह्मति"मिता०। "दौहित्रश्चोभयत्र नैवाद्रेयश्च संहरत्वे ह्यस्याधिकारः। अत्रेदं बोध्यं"अप-त्नीकस्य" इति वदता विष्णुना पत्नीदाद्याधिकारः ब्रह्मितः तत्रापि तत्सम्बन्धत्वात् सपिण्डत्वाच्च अन्यथा अधिकारिविशेषकत्वात् उपरितनानामेव दौहित्रात् तत्रान-धिकारप्रसङ्गः। अतएव आचाद्दानप्रकरणे तत्सुतः गौत-मः प्रथोक्तक्रमकीर्तनविशिष्टःप्रपितामहकुलतत्सर्पण दत्त्वादिति वदता पितामहकुलता प्रपौत्रस्याधिकारः सूचितः । तदभ-क्तत्वसम्बन्धस्य च प्रपितामहकुलपर्य्यन्ताभावेऽधिकारः तेषा-मसपिण्डत्वेऽपि गोत्रजसम्बन्धोदकत्वाविशेषात् सपिण्डाधि-कारे अधस्तनानामेव प्रथमभक्षयत् गोत्रजाधिकारेऽपि-अधस्तनानामेव ऊर्द्धतनानामेवया प्रथमं भक्षणीयमित्यादिति दत्तस्ते च असगोत्रसपिण्डमध्ये, दौहित्रस्तैव भक्षणात् पितामहदौहित्रादेर्नाधिकारः । बन्धुशब्दश्च असगोत्र, सपिण्डपरत्वेऽपि बन्धुशब्दश्च मातृविभागिपरत्वेन तेन दौर्लभ्यादिति वक्तव्यः । वीरमित्रोदये तु विभक्तपितृभिन्ना मातृजाहीनाधिकारोऽभ्यधायिः तन्मते तेषां बन्धुदेन भक्षणात् इति भेदः । तथा दायलक्षणे पत्न्याद्य-क्तं दानभोगादावधिकारः इति मिता० वीर० मते तु स्वामिन उपकारादाभावे गर्हादौ दानेऽधिकार इति भेदः । "आधिवेदनिकाद्यङ्केति" याज्ञवल्क्यवच-नेन स्त्रिया भक्तृविभागजादिलक्षणधनलक्षणं स्त्रीधनत्वं व्यवस्थाप्य तद्विभागः मिता० दर्शितो यथा "अतीतायामप्रजसि भ्रातृभावाद्धनभुजः" या० । तत्पूर्वोक्तं स्त्रीधनमप्रजसधवायां दुहितृहीन-दौहित्रपुत्रपौत्ररहितायां स्त्रियामतीतायां भ्रातृभावा भ्रातृ-दयोवक्ष्यमाणा ब्रह्मीयुः । याज्ञवल्क्येन भ्रातृभावधनभक्षणे-ऽधिकारिणो दर्शिताः। एतदनु विवाहभेदेनाधिकारिभेद-माह । "अप्रजःस्त्रीधनं भर्तुर्ब्राह्मादिषु चतुर्ष्वपि । दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत्"या०। अप्रजः-स्त्रियाः पूर्वोक्तब्राह्मादैवार्षप्राजापत्येषु चतुर्षु विवाहेषु भार्यात्वं प्राप्ताया अतीतायाः पूर्वोक्तधनं प्रथमं भर्तुर्भ-वति । तदभावे तत्सन्तानजानां सपिण्डानां भवति । शेषेषा-मासुरगान्धर्वराक्षसपैशाचेषु विवाहेषु तदप्रजःस्त्रीधनं पितृ-गामि । माता च पिता च पितरौ तौ गच्छतीति पितृगामि एकशेषनिर्दिष्टाया अपि मातुः प्रथमं धनभ-क्तृत्वं पूर्वमेवोक्तम् । तदभावे तत्सन्तानजानां धनभक्तृ-त्वम् । सर्वेषु विवाहेषु प्रसूताऽपत्यतो चेत् दुहितॄणां तद्धनं भवति । अत्र दुहितृशब्देन दुहितृदुहितर उच्यन्ते । याज्ञावल्क्यदुहितृत्वात् "मातुर्दुहितरश्चैवम्" इत्यत्रोक्तत्वात् । अतश्च मातरि मृतायां प्रथमं दुहितरोभक्तृन्ति । तत्र चोढाक्षतयोनयश्चेत् मृता ब्रह्मन्ति । तदभावे परिणीता तत्रापि प्रतिष्ठिताऽप्रतिष्ठितासत्त्वेऽप्रतिष्ठिता ब्रह्मन्ति तदभावे प्रतिष्ठिता । यथाह गौतमः "स्त्रीधनं

दुहितृणामप्रसानामप्रतिष्ठितानां चेति" । तत्र यथेच्छा-प्रतिष्ठितानाञ्च । अप्रतिष्ठिता अनपत्या निर्धना वा । एतच्च गुरुवचनव्यतिरेकेण । गुरुवचन तोदर्य्याणामेव "अभिनीतस्य तोदर्य्यामूर्द्धं मातुरिति" गौतमवचनात् । सर्वासां "दुहितृणां प्रसूता चेत्" इत्यग्रेतनवचनात् तासां भिन्नमातृकाणां समवाये दौहित्रीणां किञ्चिदेव दातव्यम् । यथाह मनुः "मातामह्यापि दुर्दुहितरस्तासामपि यथार्हतः । मातामह्याधनात् किञ्चित् प्रदेयं प्रीतिपूर्वकमिति" । दुहितृणामभावे दौहित्राधनहारिणः । यथाह नारदः । "मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः" इति तच्छब्देन सन्निहितदुहितृपरामर्शात् । दौहित्राणामभावे पुत्रा हरन्ति । "माता यस्य गृहे नास्ति" इत्यादेः प्रायिकत्वात् मनुरपि दुहितॄणां पुत्राणाञ्च समधनसम्बन्धं दर्शयति । "अनपत्यां संस्थितायां तु सर्वे सहोदराः । भजेरन्मातृकं रिक्थं भगिन्यश्च समांशतः" इति मातृकं रिक्थं सर्वे सहोदराः समभजेरन् समांशयोर्भगिन्यश्च समं भजेरन् इति सम्बन्धः न पुनः सहोदरा भगिन्यश्च संभूय भजेरन् इति इतरेतरयोगस्य हन्द्वैकशेषाभावादप्रतीतेर्विभागार्हत्वान्नैवमपि चशब्दोपपत्तेर्यथा देवदत्तश्च हरिं कुर्य्यादुपसदत्तश्चेति । समग्रहणमुद्धारविभागनिवृत्त्यर्थम् । सोदरग्रहणं भिन्नोदरनिवृत्त्यर्थम् । अनपत्यग्रहणमजातिस्त्रीधनन्तु भिन्नोदराध्युत्तमजातीयदुहिता लभते तदभावे तदपत्यं तथा च मनुः "स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथञ्चन । ब्राह्मणीतदृहरेत् कन्या तदपत्यस्य वा भवेदिति" । ब्राह्मणीग्रहणमुत्तमजात्युपलक्षणम् । अतश्चानपत्यैवेत्याधनं क्षत्रियाकन्या लभते । पुत्राणामभावे पौत्राः पितामहीधनहारिणः । "तत्पुत्रभाज ऋणं प्रतिपद्युरिति" गौतमस्मरणात् "पुत्रपौत्रैर्ऋणं देयमिति" पौत्राणामपि पितामहऋणापाकरणेऽधिकारात् । पौत्राणामप्यभावे पूर्वोक्ताभावादौ बान्धवा धनहारिणः" । अत्रापि द्वंद्वसमासः स्त्रीधनेऽपि प्रयोक्तृधिकारो वेदितव्यः, अन्यहीतवित्तस्य प्रयोक्तस्य ऋणापाकरणनिमेधेन द्वंद्वस्य इव स्त्रीधनेऽपि तदधिकारस्य उचितत्वात् इति दिक्तमम् ।

उत्तरापथ पु० उत्तरा उत्तरस्यां दिश्यः अच् समा० । १उत्तरस्यां दिशि स्थिते पथि २देशभेदे च । "उत्तर पथजनस्यानः कीर्त्तिधिष्ण्यानि तानपि । कौशिकाश्चोशगास्तारः किरातबर्बरैः सह" । यद्यर्थोचि० पुरा० ।

उत्तरापरा स्त्री उत्तरस्याः अपरस्यादिशोऽन्तराला दिक् दिग्भाग प० । वायुकोणे "उत्तरापराभिसृष्टोऽन्यदृष्टदिशामनालक्षदर्शनम्" भा० त० आख्या० ५८० । "उत्तरापराभिसृष्ट वायुकोणाभिसृष्टः" रघु० ।

उत्तराभास पु० उत्तरमिवाभासते या+भास-अच् । दुष्टोत्तरे उत्तरशब्दे १०६० पृष्ठे तल्लक्षणादि ।

उत्तराम् अव्य० उद्+उत्कर्षे तरप् आम् । अतिशयेनोत्कर्षे "उदेनमुत्तरं नयाग्ने घृतेनाहुतः" यजु० १७ ५० । "अतिशयेन उत् उत्तराम्" वेददी० । एवम् तमप् आम् । उत्तमामप्यत्र अव्य० ।

उत्तरायण न० उत्तरा उत्तरस्यामयनं सूर्य्यादेः "पूर्व्वपदात् संज्ञायाम्" या० णत्वम् । सूर्य्यादेः उत्तरदिग्गमने भेदोचारात् ७अ० दा । वर्षार्द्धे सूर्य्यस्य दक्षिणात उत्तरदिग्गमनसम्बन्धे ६ वर्षात्मके काले सूर्य्यादेः दक्षिणोत्तरयोरयनञ्च अयनसंक्रान्तिशब्दे ३१८ पृ० उक्तम् तत्र च दक्षिणोत्तरायणसंक्रमावधि षण्मासाः उत्तरायणकालः । "कर्कटादिस्थिते भानौ दक्षिणायनमुच्यते । उत्तरायणमभ्युक्तं मकरस्थे दिवाकरे" म० त० विष्णुपु० । "एतन्मकरकर्कटादिसंक्रमेऽयननिरूपणम् औतस्मार्तकर्म्मार्थं मनुरादौ सूर्य्यसिद्धान्ताभिहितोदगयनादिनिरूपणन्तु रविगत्यनुसारेण दिनमानादिज्ञानार्थम्, इत्ययनयोर्न विरोधः" म० त० रघु० । "ततश्च मकरस्थिरसंक्रान्त्यवधिषण्मासाः स्थूलमुत्तरायणं चक्रमकरसंक्रान्त्यवधि तु सूक्ष्ममिति भेदः । अस्य प्रामाण्येऽपि "स यत्रोदगावर्त्तते देवेषु तर्हि भवति देवानां' इति गोपथश्रुत० ब्रा० २,१,२,१ । "यदुत्तरायणं तदहर्देवानाम् दक्षिणायनं रात्रिः संवत्सरोऽहोरात्रः" विष्णुः "अग्निर्ज्योतिरहः शुक्ल षण्मासा उत्तरायणम्" गीता । यथाश्रुतं चैतत्तथाऽयनशब्दे २१५ पृ० ब्राह्मणावयवोद्धृतप्रमाणादिना व्यवस्थापितम् । उपचारात् इतरायणमारब्धसंक्रान्तौ "कृशकर्कटसंक्रान्तौ हेतूदग्दक्षिणायने" सूर्य्य० सि० । तत्पुण्यकालतादिविषये "यावद्विग्रहजा भुक्तातत्पुत्रं चोत्तरायणे" "निरये भास्करे हस्ते दिनान्तं दक्षिणायने" म० त० भवि० पु० "भविष्यत्रयने पुण्यमतीते चोत्तरायणे" इति नि० त० देवीपु० । रात्रिसंक्रान्त्यभिप्रायमिदं वचनम् इति रघुनन्दनादयः । माधवादयस्तु चक्र संक्रान्तिपरमेतत् विषेयपुरुषकालत्वं चाङ्गीचक्रुः । तच्च

अयनसंज्ञालिपयन्ते १२६दर्शितम् । उत्तरायणकालाभिमानिनि स्मृतविग्रहादिभिनां ब्रह्मादिलोकप्रापणाय अतिवाहनायेश्वरनियुक्ते चेतने ४पुरुषभेदे "आतिवाहिकास्तल्लिङ्गात्" या० सू० भाष्ययोक्तथा व्यवस्थापितं तच्च आतिवाहिकशब्दे ६५१ पृ० दर्शितम् । तत्रैवमेव अग्निर्ज्योतिरित्यादिगीताव्याख्याने "अग्न्यादयस्तदभिमानिनोदेवा" इति श्रीधरोक्तम् ।

उत्तरार्क पु० काशीस्थे उत्तरस्यां दिशि अर्कस्य षड्भिधौ सूर्य्यमूर्त्तिभेदे । तद्विवृतिर्यथा "इति त्रयी प्रभावस्तो जगत्त्रयस्यमोऽन्हा । लोला द्वादशधात्मानं काशीपुर्य्यां व्यवस्थितः । लोलार्कं उत्तरार्कश्च साम्बादित्यस्तथैव च । वृद्धादित्यो मयूखादित्यश्च । खखोल्कादित्यादित्यो द्वादशैवमसंशयः । दर्शनेऽस्य सर्वदित्यो गङ्गादित्यस्तथैव च । द्वादशार्क्यमादित्यः काशीपुर्य्यां घटोद्भव ! ! ४६ अ० इति द्वादशसूर्य्यभेदाभिधाय तत्स्थानानि तत्र क्रमशोऽभिहितानि ।"अथोत्तरस्यामाशायां कृत्तिकर्क्षाण्यसूत्तरा । तत्र नाम्नोत्तरार्कोऽसौ रश्मिमाली व्यवस्थितः" ४७ अ० ।

उत्तरार्द्ध न० उत्तरमर्द्धम् उत्तरमर्द्धञ् एक दे० त० वा । देशपूर्व्यार्द्धे । तस्योत्तरत्वात्तथात्वम् "अस्तु स्थितः क्षितिदिशोत्तरार्द्धम्" रघु० । कर्म्म० । २भेदार्द्धे च "अथ मध्येनैवोत्तरार्द्धेनाग्नयधेयते" यत०ब्रा० १,१,१,१२

उत्तराशा स्त्री कर्म्म० । उत्तरस्यां दिशि । उत्तराधाधीयादयः उत्तरदिगीयशब्दे पृ०१०८१ दृश्याः ।

उत्तरायण न० कर्म० । उत्तरप्रसिद्धमकरभेदे तत्र क्रियाः० चतुरश्रास्रे च । उत्तरायणक तत्रभवस्तिलदेवादौ त्रि० ।

उत्तराषाढा स्त्री कर्म० । अस्मिन्यादिनक्षत्रेषु एकविंशतितमे नक्षत्रे "उषः पूर्व्वमघान्मघाभुवणस्त्रीणत्तराणि अमूः" ज्यो० उक्तेरियं ध्रुवणयः । तस्याः ऋक्षपादि उडुचक्रशब्दे १०७१ पृष्ठे उक्तम् इयं विश्वदेवताका ऋक्षेषाशब्दे ४६७पृ० उक्ता ।

उत्तरासङ्ग पु० उत्तरे ऊर्द्धभागे आसज्यते आ+षञ्ज-कर्त्तरि घञ् । उत्तरीयवस्त्रे "शुक्लोत्तरासङ्गवतीमधीतिनीम्" कुमा० । "क्षणोत्तरासङ्गकृत्यम् विदधुर्द्विजपुङ्गवीम्" माघः । उत्तरस्यां दिशि २आसङ्गे च ।"शिशिरसमयसूर्य्य इव क्षतोत्तरासङ्गम्"माघ० । एवेश यथा शिशिरसमये माघादौ उत्तरस्यां दिशि गतिप्रवोत्तरायणशब्दे ११०४ पृष्ठे उक्तम् ।

उत्तरासद् पु० उत्तरा उत्तरस्यां दिशि सीदति सद्-क्विप् । उत्तरदिशि भागार्हेषु मित्रावरुणप्रधानेषु ऋक्षेषु च देवेषु "देवा मित्रावरुणेत्रा मरुद्भेत्रा बोत्तरासद्भ्योभ्यः स्वाहा" मित्रावरुणेभ्यो मरुद्भ्यो वा देवेभ्य उत्तरासद्भ्यः स्वाहा" यजु० ६,२६,२७ ।

उत्तराह्न पु० उत्तरमनन्तरमह्नः टच् समा० । अनन्तरदिने

उत्तराहि अव्य० उत्तर+अहन्शब्दे दिगर्थेऽकारान्तोऽयमेव आहि । उत्तरस्मिन् उत्तरस्मात् उत्तर इत्यर्थे । "आहि च दूरे" पा० अहोः दूरएवाहः प्रवृत्तिः । "उदीचीमेव दिशम् प्राजनंस्तस्मादुत्तराहि वाग्वदति" शत०ब्रा० १,२,३, १५ । "अव्ययात्त्यप्" पा० "स्तसिलेभ्य एव" इति वार्त्तिके नियमात् अतो भवार्थे अणेव । अ० स्वार्थिक तद्धिते त्रि० ।

उत्तरादिक त्रि० उत्तर उत्तरस्मिन्नवयवेऽस्याः ठन् । उत्तरार्द्धनदादौ नदीभेदे स्त्री ।"अनुज्ञातस्तु भरतो वाहिनीः चतुरङ्गिणीः । ततः शीघ्रतरं प्रायादुत्तरीर्नदीरिकां नदीम्" रामा० ।

उत्तरीय न० उत्तरस्मिन् देहभागे भवः छ० । अर्द्धदेहभागार्थे वस्त्रे "धौतोत्तरीयप्रतिमञ्जयोनि" माघः "क्षौमोत्तरीयाणि भवन्ति सायात्" "अथाह रजयचित्रोत्तरीयम्" रघुः । प्रतिनिधिपर्य्यायोत्तरीयधारणावश्यकतोक्ता आ० त० यथा । "विकल्पोऽनुत्तरीयस्य मन्त्रवाक्यस्य एव च । औतं आर्त्तं तथा कर्म न मन्त्रलिङ्गवेदवित्" भरतः तद्धारणप्रकारश्च "यथा यज्ञोपवीतत्वं धार्य्यते च द्विजोत्तमैः । तथा संधार्य्यते यत्नादुत्तरीयाच्छादनं शुभम्" स्मृतिः । "छायार्द्धं वाससो धौते अक्लिष्टे परिधाय च । अभावे क्षौमवस्त्राणां शाणक्षौमादिकानि च । कृतयोः क्षोमपट्टं वा द्विवासा येन वा भवेत्" या०स्मृ० । "येन वेति उपवीतेन तत्प्रतिनिधिभूतेन कुशरज्ज्वादिना" आ०त० रघु० । "यज्ञोपवीते द्वे धार्य्ये औतआर्त्तेषु कर्मसु । तृतीयमुत्तरीयार्थे वस्त्रस्यात्मतिदिश्यते" स्मृतिः । वस्त्रव्यवस्थाह "न क्षौमेन न दुकूलेन पारक्येण विशेषतः । सूचिलोमकृतीर्णेन कर्म्म कुर्य्यादिचक्षणः" आ० त० भारतम् । "न रक्तवस्त्रं वासो न नीलञ्च प्रशस्यते । मलाक्तं च दयाशीलः वर्जयेद्दर्शने बुधः" नरसिं० पु० । "दयाशीलेन वस्त्रेण कुर्य्यात् कर्म्मापनोदनम्" उश० । "वस्त्रं स्नानादृतं धार्य्यं न रक्तं मलिनं तथा । जीर्णं वाऽपहृतञ्चैव नेतं धार्य्यं प्रदक्षत" विष्णुध० पु० ।

उत्तरेण अव्य० उत्तर+एनप्। आवश्यदिग्देशकालानां प्रथमापञ्चमीसप्तम्यन्तानामर्थेषु "तत्रागारं धनपतिरलकादुत्तरेणास्मदीयम्" मेघ०। एतद्योगे द्वितीया। "त्रिंशत्पथात् ब्रज वटुगतिर्भूयएवोत्तरेण" मेघ०। "कुटजवेणीसनाथमेतोत्तरेण" आश्व०श्रौ०१,२०६,"एतस्मिन् काले प्रथमाक्षाबाहवत्तरेणाग्नीध्रीयम्" आश्व० श्रौ० ५,७,१।

उत्तरेद्युस् अव्य० उत्तरस्मिन् दिने उत्तर+एद्युस्। अनन्तरदिवसे इत्यर्थे।

उत्तरोत्तर उत्तरादुत्तरः। अनन्तरोद्दिष्टानन्तरे। "यस्तो दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुतो गोत्रजो बन्धु शिष्यः सब्रह्मचारिणः। एषामभावे पूर्वस्य धनभाक्तदुत्तरोत्तरः" या०स्मृ०। २क्रमेण उत्तरे। "उत्तरोत्तरतुल्यौ वस्तुनः वार "उच्यते वा०६०।

उत्त(री)रीष्ठ पु० उत्तरः उपरितनः ओष्ठः वा ष्ठिः। उपरितने ओष्ठे। "अधरो(रौ)ष्ठं दशति उत्तरो(रौ)ष्ठं वा हेठि" "उत्तरौष्ठश्च नोच्चिद्यादुदारांश्च वदेत्क्वचित्" स्मृ०

उत्तर्जन न० उत्+तर्ज्+ल्युट्। उत्तर्भर्त्सने। तच्च क्रोधजन्यो व्यापारः या०६०।"निन्द्याद्येषामसाधारणैरनैमित्तिकैरभिनिविष्टा। नेत्ररागशिरःकम्पभ्रूभङ्गोत्तर्जनादिभिः"

उत्तलित त्रि० उत्+तल+क्त। उत्क्षिप्ते।

उत्तान त्रि० उत्+तन+घञ्। उच्छ्रायः। (चित) भूमिलग्नपृष्ठतया अधोभावेन स्थिते २अधोमुखे च। "उत्तानपाणिहृदयमभिधेयात् प्रफुल्लराजीवाभिरामम्" कुमा०। "उरःस्योत्तानपाणेः सख्ये व्यक्तेतरं करम्" उत्तानं शिशुरुन्नाम्य मुखं विश्वमथोरवा" या०स्मृ०। "पिङ्गाभं तृणजातं जाता विप्राय विक्रयं देयं वा० स्मृतिः "प्रत्येकप्रकारे निम्नस्थ उत्तानपृष्ठा दक्षिणोत्ताना वा" आपा० ८,२,६। "उत्तानार्थं विवक्षवः" स्मृ०

उत्तानक पु०उत्+तन+ण्वुल्। उच्चटाङ्के रत्नमा०। [राजनि०

उत्तानपञ्चक पु०उत्तानभूतं पञ्चकं मध्यमत्व कर्म०। दक्षे करस्थे

उत्तानपाद पु० आत्मभ्रुवनयोः पुत्रे ध्रुवपितरि ।स्वयंभुवे। "वैराजात् पुरुषात् वीरं यमुवाच मनुस्वयम्। प्रियव्रतोत्तानपादौ वीरात् आत्मा व्यजायत" हरिः २अ०। "आत्मभ्रुवश्च मनोर्देवहूत्यां शतरूपायाः। प्रियव्रतोत्तानपादौ यज्ञपुरुषौ। पादयोर्देवस्य यज्ञस्य रक्षायां जगतः स्थितौ। आद्ये उत्तानपादस्य सुनीतिः सुरुचिर्द्वयोः। सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः" भाग० ४स्क० ८अ०। इतश्चरं तच्चरितं तत्र वर्णितम्। उत्तान। उच्छ्रितः पादोऽस्य। १परमेश्वरे पु०"पादोऽस्य सर्वाभूतानि त्रिपादस्यामृतं दिवीति" श्रुतेरस्य तथात्वात्। तथात्वम्। अस्य जगतो वा अन्यतोभावे उत्तानपादपि तथैव"भूमिश्च उत्तानपादोऽथ आपो अजायन्त"। "तदुत्तान पदध्वरि" ऋ० १०,७२,१,४, अत्र सर्वं पादः पदादेयः। २उत्तानपादपुत्रे विष्णुभक्तौ त्रि०।

उत्तानपादज पु० उत्तानपादात् जाते जन-ड। ध्रुवे तच्चरितं भागवते ४स्क० ८अध्यायादौ वर्णितम्।

उत्तानशय त्रि० उत्तानः अर्द्धशयः शये शी-अच्। अतिथिभौ तदानीमवसाने शयनार्थाभावाद्धेतोस्तथात्वम्।

उत्तानशयीवत् त्रि० उत्तानः शवं शेते शी-क्विप्' अतिथिभौ २उत्तानस्थिते च। स्त्रियां ङीप् वनोरच्च। उत्तानशयीवरी "ये पर्वताः सोमपृष्ठा आप उत्तानशयीवरीः"ऋ०१,२१,१०।

उत्ताप पु० उत्+तप-घञ्। १उष्णतायाम्, २घर्मे च।

उत्तार पु० उत्+तॄ-णिच् अच्। १उद्धरणे २उल्लङ्घने ३पारगमने च। "उत्तारणादरोत्तारतरणिः" प्रबोध० "उत्तीरायाधरं प्राप्तोत्तारमधिरुरुक्षति" भा०व०१२६अ०। उत्तारः प्रा०व०। ४अन्नलोमग्रहाहो त्रि०।

उत्तारक त्रि० उत्+तॄ-णिच् ण्वुल्। पारगामके।

उत्तारण न० उत्+तॄ-णिच्-ल्युट्। पारगामके। उत्तरि ल्युट्। २पारगामके त्रि० ३क्रियो पु० "उत्तारणोद्युक्त शिक्षा"विक्रमो०"ये उत्तारणादुत्तारयतीत्युत्तारणः"भा०

उत्तार्य त्रि० उत्+तॄ-णिच्-ण्यत्। १उल्लङ्घनीये। "अत्तानमुक्तं तूत्तार्यं शोभं वाप्यां शोभनैः" भट्टः। ण्यत्। २उल्लङ्घनं जाते तदर्थे अव्य०। उत्+तॄ-ण्यत्। ३उल्लङ्घनीये त्रि०।

उत्ताल त्रि० उत्+तल+घञ्। प्रतिष्ठिते उन्नते। "उत्तालताडीवनसंकटस्थः" माघः।

उत्तिष्ठद्दोस् पु० अतिसंस्तुतविशेषे स्तोभे साम। अद्वयविशेषणमङ्गोक्ते अजातिदृष्टे आगमेदे। तत्र कुलोपविष्टे न कुलवा उत्तिष्ठता स्तोमः करणीय इति विचिकित्सायां अजातिमुक्तोर्द्वेदृदर्शनेन तत्क्रियेति आत्मा० १,२,५,९,७, कल्पेषु "अजातीनां जातीनां कुलोत्तीनां स्तोमानाञ्च यो विशेषः स्तोमेदः इति ब्रह्मः" कर्कः। तिष्ठतोना; यद्वदारभ्यमाना; यद्वादारोपणमाश्रित्य अजातयः" छ०। अन्यत्र इति भेदः। त्रिवृता स्तोम

भ्येषु ते तिरोभा; स्वट्कारेण प्रदानं भ्येष ते स्वट्कार प्रदाना तथा याज्ञावल्क' पुरोनुवाक्यावत्सच भ्ये ते यज्ञ तय उच्यते कर्म' । 'उपविष्टोभा खाङ्काराद्यो ना जुहोतय "कृ०।'उपविष्टेन कर्त्रा क्षोभोत्येष ते उप विष्ट'भा खाङ्काारेण प्रदानं भ्येषु ते जुहोतय उच्यते" कर्म तिरस्पदस्तु उत्तिरत्परम

उत्तिष्ठमान पु० उद्+स्था-शानच् । वर्त्तमाने 'उत्तिष्ठमानस्तु परैर्नमेच्छ यथुमिच्छता" भार० । ऊर्द्ध चेष्टायां तु यज्ञ । उत्तिष्ठत अनुपविष्टे दण्डायमाने त्रि० स्त्रियाम ङीष् नुम' । उत्तिष्ठन्ती [क्रि । ऋत्विग्भेदे महादौ त्रि० ।

उत्तीर्ण त्रि० उद्+तॄ कर्तरि क्त । १पारङ्गते २पारङ्गते कर्त्तरि

उत्तुङ्ग त्रि० उत्+तुङ्ग पृषो० स० । अत्युन्नते । 'उत्तुङ्गगैल शिखरस्थितपादपानां काक जयोऽपि फलमाहरते सपक्ष । सिंहो बली द्विरदशूकविदारणोऽपि शीलस्थितो तरतले खलु पञ्चपंम' उद्भट "खगादुत्तुङ्गमसह्य विषाणं यत्र सूचिन' भा०व०८८अ० । "करप्रचेय मरुता प्रभुणक्ति पृथीयसीम" "सच्चालसत्तङ्गतया विलेहम्" 'उत्तुङ्गमातङ्गमिवालघण्डम् माघ ।

उत्तुण्ड पु० उद्गत कण्डनाभावेपि तुण्डोत्पात । प्रा०ब० वा गतश्चलोप । खाजाख्ये (खट) भूरुहान्ये

उत्तेजना स्त्री० उद्+तिज-णिच् युच् । १प्रेरणायाम २व्यथनकरणे, ३उद्दीपने ४तर्जनकरणे च । 'व्याघ्र कृतोत्तेजनया मधीनाम्' माघ ल्युट् । तत्रैवम ।

उत्तेजित त्रि० उद्+तिज णिच् क्त । १प्रेरिते, २उद्दीपिते च । भावे क्त । ३प्रेरणायाम ४उद्दीपने च न० 'उत्तेजितं मध्यवेग योजनं लघवलाया" इत्यमरे ५अश्वगतिभेदे न० ।

उत्तेरित न उद् तॄ भावे क्त णिच् न० एत्वम । अश्व गतिभेदे । अर्थ आद्युदि । 'उत्तेरितोऽतिवेगाढ्यो न हृष्णोति न धावति' इत्यश्वगतियुक्ते २अश्वे पु० ।

उत्तोरण त्रि० उद्गत तोरणमस्य प्रा०ब० वा मतुलोप । १उद्गत पुरद्वारयुक्ते नगरादौ । "उत्तोरणान्वयराजधानीम्" रघु० । "उत्तोरण राजपथं प्रपेदे' कुमा० उद्गत तोरणम् प्रा०स० । २उद्गे तोरणे पुंन० ।

उत्तोलन न० उद्+तुल-उल्लाघे भावे ल्युट् । ऊर्द्ध नीत्वा तोलने । [ज्ञातोलने च

उत्तोलित त्रि० उद्+तुल-क्त । १उत्क्षिप्ते, २उत्क्षिप्य

उत्त्यक्त त्रि० उद्+त्यज-क्त । १ऊर्द्धक्षिप्ते, २परित्यक्ते च ।

उत्त्रास पु० उद्+त्रस-घञ् । अतिभये ।

उत्था स्त्री० उद्-स्था-क । १स्थाने २समूहे ३न । 'रजसि रजनीरुद्धि रक्षोगणानुदस्थिरा' रघु० । "अवस्थाप्रयोत्थाय परिशोषाय कल्पते यथा" "निद्रालस्य प्रमादोत्थ तत्र तत्रावसदृशम् 'गीता' तथा "प्रयश्चित्ते ऽरादेशोत्थचेष्टितम्" भा०ट० ।

उत्थान न० उद्+स्था ल्युट । ऊर्द्धगतौ, २उद्यमे ३ऊर्द्धभा वचेष्टायाम्, ४उद्भवे च, करणे ल्युट ५उच्चाङ्गे ६ऊर्द्धदेशे च । अधिकरणे ल्युट् । ७रणे ८राज्याभिषेकसमये ९लग्ने १०प्रारम्भे, ११खेले च 'इन्द्र नीथानमिवन्दवम्" ऋ० १०।४८।१ सायणभाष्यम् उत्थान भवत सज्ज भवतु । "अथ धर्मार्थकुशलं भ्रातरं लक्ष्मणोग्रज' रामा० ७ त्यानमभिजानन्ति सर्वभूतानि भारत । प्रत्यक्षमनुमानं च कर्मणा लोकसाक्षिकम्' भा०व० ६ अ० । मेदिनीकरे जयोदर जय भवत्युत्थ मङ्गल्य वस्तु" भार० "उद्भू सम्र चाहुरुत्थ यैरुद्यम न सङ्कुचि त" १५अ० ६ । "मङ्गल्यने महत्याने मत्यर्थ परिकल्पने ति त्रि० ।

उत्थानैकादशी स्त्री० उत्थानस्य प्रबोधनस्य काल एकादशी । चान्द्रकार्त्तिकशुक्लैकादश्या तत्र कृ व्रतस्य व्यवस्था-ति०त० रघुनन्दनेन दर्शिता यथा कार्त्ते "यत्ते विष्णु सदाशार्ङ्गे भार्ङ्गे च परिवर्त्तते, कार्त्तिके परिबोधेत शुक्लपक्षे हरेदिने अविघ्नमस्तु तत्सर्वं "नैवाद्यपादे स्वपिति कदाचिन्नारायण परिवर्तते च, दौवारिकत्वे च सुरक्षितो हरिश्चतुर्मासमतुर्मासेन भविष्ये 'निशि स्वपोदयोत्थाने सन्ध्यायां परिवर्तनम । अन्यत्र पादयोगेपि हरिस्वप्नेन कारणे । अन्यत्र स्वापादिविशिष्टतत्तत्पादोत्थानेन दशमीप्रतिपदोश्च ।' क लक्ष्मीवाद्यपादान दशम्या यदि । न प्रतिपदुच्यते तिथिरुभयत्र दशम्या अयोयत्र पादे तत्र । य प्रतिपदि न सम्प्रत्तेन वर्त्तिक । अत्र दशमीप्रतिपदोरिवनात तदितरैकादश्या दशम्यु तिथिषु भैवादिनक्षत्रपादविशेषलाभे द्वादशी त्रिष्वपि यवनादिरिति प्रतीयते । वचनान्तरम "रेवत्यन्तो यदा रात्रौ द्वादश्या च सम । तदा विबुध्यते विष्णु दिनान्ते प्रथ रेवतीम दिनान्ते त्रिषाविभक्तान्ति तृतीयभागे दिशोत्तानमत्यन्तहरीधात्" । विष्णुधर्म्मत्तरे "विष्णुर्दिशा न स्वपिति रात्रौ प्रबुध्यते । द्वादश्या मूलसंयोगे पादयोगो न कारणम । अप्राप्ते द्वादशदिने उत्थानशयने हरे । पादयोगेन कर्त्तव्ये भाद्रोर त्र

विचिन्तयेत् वराहपुराणम् । "द्वादश्यां सन्निवसये न-क्तव्रतानामसम्भवे । आषाढकार्त्तिकफाल्गुनीनां शयनादिकं तिथिकम्" आषाढकानाम् आषाढभाद्रकार्त्तिकानाम् । ततश्च द्वादश्यां निशादौ नक्तव्रतमात्रयोगात् द्वादश्यामहोरात्राभावे तिथ्यन्तरे निशाव्यापादेन पादविशेषयोगात्, तदभावे द्वादश्यां सन्ध्यायामेव शयनादिकं बोधनन्तु द्वादश्यां रात्रौ रेवत्यन्तपादयोगे दिनत्रयीयभाग इति विशेषः" ।

उत्थापन न० उद्+स्था-णिच्-ल्युट् । १उत्तोलने उन्नतीकरणे २चालने ३प्रबोधने ४उद्गमने च । "एवं यन्त्रोपायान्न्यस्य शिरोत्थापनहेतून् बुद्ध्या वेद्य" सुश्रु० ।

उत्थाप्य त्रि० उद्+स्था-णिच् कर्म्मणि यत् । १उत्तोलनीये २चालनीये । ल्यप् । ३उत्तोल्यार्थे ४मिश्रीकृत्यार्थे "आहृत्य प्रणवेनैव उत्थाप्य प्रणवेन च" उत्थाप्य मिश्रीकृत्य प्रा०त० रघु० । ५उत्तार्य्यार्थे च अव्य० ।

उत्थित त्रि० उद्+स्था-क्त । १ऊर्द्ध्वयुक्ते, २उत्पन्नयुते, अनुपविष्टे । "अङ्कोचिता सत्वरमुत्थितायाः" कुमा० रघुश्च "न यावदेतावुदयप्रतीक्षादुत्थितौ" "भिन्नोत्थितं भूमिभिवो-गिनाम्" माघ । ३उत्पन्ने ४उद्गते च ।

उत्थिताञ्जलि पु० उत्थिता उद्गता अञ्जलयो यत्र । (चापड्) विस्तृताञ्जलिके करतले चपेटे यच्च० ।

उत्पचनिपचा स्त्री उत्पच निपचेल्लुप्यते यस्यां क्रियायाम् मयू० । उद्भृत्य पाकादिनिष्पाद्यार्थक्रियायाम् ।

उत्पचिष्णु त्रि० उद्+पच-ष्णुच् । १उद्भृत्य पचनशीले । प्रायः विक्लित्तिरूपपाकपरत्वे । अर्द्धतः पाकशीले २अर्द्धपाके ।

उत्पट पु० उत्पटति उद्+पट-गतौ अच् । एलादीनां त्वचस्तुल्ये वृक्षे निर्य्यासे । 'त्वच एलाया वृक्षिर प्रस्थ-स्थि त्वच उत्पटः' यजु० १४,६-९-२१, "उत्पटः वृक्षनिर्य्यासः" भा० । [त्रिका० २उत्पतनकर्त्तरि त्रि० ।

उत्पत पु०उत्पतति ऊर्द्धं गच्छति उद्+पत-अच् । १पक्षिणि

उत्पतन न०उद्+पत-ल्युट् । १ऊर्द्धगमने, २उत्क्षेपणे च । उत्क्षेपणयन्त्रे उदा० ।

उत्पतनिपता स्त्री उत्पत निपत्यते यस्यां क्रियायाम् मयू० । उत्पतनादिनिष्पाद्यार्थक्रियायाम् ।

उत्पताक त्रि० उत्क्षिप्ता पताका यत्र प्रा० ब० वा उत्क्षिप्तपताकोपेत । उत्क्षिप्तपताके पुरादौ । "पुरन्दरश्रीः पुरमुत्पताकम्" रघुः

उत्पतित त्रि० उद्+पत-क्त । ऊर्द्धगते ।

उत्पतिष्णु उद्+पत-ष्णुच् । उत्पतनशीले । 'यश्चक्षुर-न्मनसो जवीयानेतानासत्पतिष्णवः" ऋ० "उत्पतिष्णु वृक्षि-ष्णु च वेरहः खरदूषणौ" भट्टिः ।

उत्पत्ति स्त्री उद्+पत+क्तिन् । १ऊर्द्धपतने ऊर्द्धगतौ । उत्पद्यते प्रथमतो ज्ञायतेऽनेन उद्+पद-करणे क्तिन् । प्राथमिकप्रतीतिविषयप्रवृत्तिसाधनेष्टसाधनताबोधके वर्णसङ्घरूप-वाक्ये २विधिर्बोध्ये यथा "स्वर्गकामोऽश्वमेधेन यजे-तेत्यादि" वाक्यम् प्रथमं यागादौ इष्टसाधनत्वं बोध-यत् तत्र प्रवर्त्तयतीति तस्य तथात्वम् विधिशब्दे वि-वृतिः । "योगसिद्धिर्वा अर्थस्योत्पत्त्यवोगित्वात्" जैमि०सू० । उद्+पद०क्तिन् । आद्यक्षणसम्बन्धरूपे ३उद्भवे । उत्पत्तौ वादिविप्रतिपन्नाः सन्ति तथाहि असतः सदुत्-पद्यते इति बौद्धाः । प्रागुत्पत्तेरसत्कारणव्यापारा-दुत्पद्यते इति नैयायिकादयः । प्रागुत्पत्तेः सदपि कारणव्यापारादभिव्यज्यते इति सांख्या वेदान्तिनश्च प्रतिभे-दिरे तयोरवान्तरभेदः सतो विवर्त्त इति वेदान्तिनः परि-णाम इति सांख्याः । तदेतत् सांख्य०कौ० । प्रदर्शितं यथा कोचिदाक्षिपति:"सज्जायत इति, एकस्य सतो विवर्त्तः कार्य्यजातं न वस्तु सदिष्यते । अन्ये तु सतो-ऽसज्जायतइति । सतः सज्जायते इति हेतुः । तत्र पूर्व्व-स्मिन् कल्पत्रये प्रधानं न सिध्यति । सुखदुःखमोहभेदव-त्सुखरूपपरिणामयत्वाद्यात्मकत्वं हि जगत्कारणस्य प्रधा-नत्वं सत्त्वरजस्तमःस्वभावत्वम् । यदि पुनरसतः सज्जायेत असन्निरूपाख्यं कारणं कथं सुखादिरूपयत्वाद्यात्मकं स्यात् सदसतोस्तादात्म्यानुपपत्तेः । अथैकस्य सतो विवर्त्तः यद्भादिप्रधानमपि सतः सज्जायत इति न स्यात् । नचाद्यस्य प्रपञ्चात्मकत्वमपि स्वप्नसुप्त्य प्रपञ्चात्मक-तया प्रतीतिर्भ्रम एव । येषामपि क्षणभङ्गि ज्ञानरूपा-दीनां सतश्च कारणादसतो जन्म तेषामपि सदसतोरेकस्या-दुपपत्तेर्न कार्य्यात्मकं कारणमिति न प्रधानसिद्धिः । अतः प्रधानसिद्ध्यर्थं प्रथमं तावत्सत्कार्य्यं प्रतिज्ञायते" बौ० । "असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात् । शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्य्यम्" सा० "सत्कार्य्यं कारण-व्यापारात् प्रागपीति शेषः । तथा च न सिद्धसाधनं नैया-यिकमतेऽङ्गीकारार्हमेव । यद्यपि बीजङ्कुरादिप्रध्वं सा-नन्तरङ्कुरादयुत्पत्तिः प्रमाणसिद्धा तथापि न प्रध्वंसस्य कारणत्वमपि तु भावस्यैव बीजादेरवश्यत्वात् । अभावात्तु भावोत्पत्तौ तस्य सर्वत्र सुलभत्वात्सर्वं सर्वार्थोत्पाद

प्रसङ्ग इत्यादि न्यायवार्त्तिकतात्पर्यटीकायामभिहितमनाभिः। अपञ्चमत्ययसाध्यते बाधके न यक्ष्योभिधेयेति यक्ष्मिति कथमज्ञातचरमतमवधिष्यते। तस्मेदं प्रतिज्ञातं सत्कार्यमिति। अत्र हेतुमाह असदकरणात्। असच्चेत्कारणव्यापारात् पूर्वं कार्यं नास्य सत्त्वं केनापि कर्तुं शक्यं न हि गोत्वं गिरिसरिदरण्येष्वपि शक्यं गोत्वं कर्तुम्। सदकरणे घटस्य धर्मोऽपीति चेत् तथाप्यसति धर्मिणि न तस्य धर्म इति सत्त्वं तदवश्यमेव तथा च नासत्त्वम् असत्त्वेनात्मना वाऽसत्त्वेन कथमसन् घटः। तस्मात्कारणव्यापारादूर्ध्वमिव ततः प्रागपि सदेव कार्यमिति। कारणाच्च ततोऽभिव्यक्तिरेवावधिष्यते। सतश्चाभिव्यक्तिरुपपन्ना। यथा पीडनेन तिलेषु तैलस्य, अवघातेन धान्येषु तण्डुलानां, दोहनेन सौरभेयीषु पयसः। असतः करणे तु न निदर्शनं किञ्चिदस्ति। न खल्वभिव्यक्ष्यमाणं चोत्पद्यमानं वा क्वचिदवेक्षितम्। इतश्च कारणव्यापारात् प्राक् सदेव कार्यमित्याह उपादानग्रहणात् उपादानानि कारणानि तेषां ग्रहणं कार्येण सम्बन्धः उपादानैः कार्यस्य सम्बन्धादिति यावत्। एतदुक्तं भवति कार्येण सम्बद्धं कारणं कार्यस्य जनकं सम्बन्धश्च कार्यस्यासतो न सम्भवति तस्मात् सदिति। स्यादेतत् असम्बद्धमेव कारणं किमात् कार्यं न जन्यते? तथा चासदेवोत्पत्तेरित आह सर्वसम्बन्धाभावात्। असम्बद्धस्य जन्यत्वे असम्बद्धत्वाविशेषेण सर्वं कार्यजातं सर्वस्मादुत्पद्येत नचैतदस्ति तस्मात्सम्बद्धसम्बन्धेन जन्यते अपि तु सम्बद्धं सम्बन्धेन जन्यते इति। अथाऽऽहुः वृद्धाः "असत्त्वे नास्ति सम्बन्धः कार्यैः सत्त्वसङ्गिभिः। असम्बद्धस्य चोत्पत्तिर्नियन्तृतो न व्यवस्थितिरिति"। स्यादेतत् असम्बद्धमपि तदेव तत् करोति यत् यत्कारणं यस्मिन् च कार्यदर्शनादवगम्यते अतो नाव्यवस्थेति अत आह यक्ष्यश्च यक्षकरणात्। या यस्मिन् यत्नकारणव्यवस्था सर्वत्र वा स्यात्कचे वा। सर्वत्र चेत्तदवस्थैवाव्यवस्था शक्ये चेत्तत्रैवेति शक्ये तदिति वक्तव्यम्। यस्मिन्नेव च तादृशो यतः किञ्चिदेव कार्यं जनयेत् सर्वमिति चेत् कुत्र भोः यस्मिन्विशेषैः कार्यसम्बन्धो वा स्यादसम्बन्धो वा, सम्बन्धे आशता उत्पन्नमिति तत् कार्यम्। असम्बन्धे वैवाव्यवस्थेति सुष्ठूक्तं यक्ष्यश्च यक्षकरणादिति। इतश्च सत्कार्यमित्याह कारणभावात् कार्यस्य कारणात्मकत्वात् न हि कारणाद्भिन्नं कार्यं कारणञ्च सदिति कथं तदभिन्नं कार्यमसद्भवेत्' सा० की०। उत्पत्तेश्च यथा विभाविरूपता तथाविर्भाव यत्ने ८१० उक्तम्।

व्याख्यातं छन्दस्याभिरुद्दीपायां यथा असतः—सत्त्वेन वक्तुमशक्यात् निरुपाख्यात् अभावात् सत्-भावरूपं वस्तु, जायते जाततया व्यवह्रियते तथा हि अङ्कुरादिकं बीजनाशानन्तरमेव, दध्यादि दुग्धनाशानन्तरमेव उत्पद्यमानं दृश्यते अतोऽनुमीयते कार्यभावा अभावकारणकाः कार्यत्वात् बीजनाशोत्तरजाताङ्कुरादिवत्। यत्रापि च तन्वादिषु पटकारणेषु स्वरूपेण नाशो न दृश्यते तत्राप्यनुमानेनैव तज्ज्ञानं जननीयम्। युक्तं चैतत् उत्पन्ने पटे यदि तन्तवो न नश्यास्तदा तन्तवस्ते इति व्यवहारविषयतां पटेरन् न च तथा, यतस्तत्र तन्तुव्यवहाराभावात् पटरूपेण व्यवहाराच्च तन्तुनिष्ठा इत्यनुमातव्यम्। नच कारणनाशे दग्धतन्तुषु पटदाहवत् पटनाशापत्तिरित्यनुद्यमम्, तन्तूना पटकारणत्वस्याद्यापि असिद्धत्वात्, ये हि भावकारणका इति वदेयुस्तान् प्रत्येवैतद्दूषणमवतरेत् नाभावकारणतावादिनं प्रतीति सुस्थितमभावकारणवादिबौद्धादिमतम्। सतः त्रैकालिकाबाधरहितात् कूटस्थपरिणामिनः विवर्त्तः स्वात्मानकल्पितः स्वज्ञाननिवर्त्त्यः परेणानिर्वचनीयः, अन्यथाभावाभावात्। उपचारात् तथा उत्पद्यमानं कार्यजातमपि विवर्त्तः न वस्तु सदिति वस्तुतः पारमार्थिकेन सत्त्वेन सत्त्वितं किन्तु व्यवहारयोग्यसत्त्वयान्वितम्। तथा हि शुक्तिकादौ रजतादिज्ञानं सर्वानुभवसिद्धं तच्च प्रत्यक्षमेव रजतं साक्षात्करोमीत्यनुभवात् प्रत्यक्षे च विषये इन्द्रियसन्निकर्षः कारणत्वात् देशान्तरस्थितस्य च चक्षुरसंयुक्तत्वेन प्रत्यक्षाविषयता। न च पूर्वज्ञातस्य रजतस्य स्मरणेन उपपत्तेः शुक्तिसाक्षात्कारे पुरोभूतं रजतं स्मरामीति वाच्यम् स्मरणोपनीतस्य स्मर्यमाणस्य साक्षात्कारानुभवाभावप्रसङ्गात्। अतएव न पूर्वानुभूतरजतसंस्कारजन्यस्मरणमात्रमनुभवविरोधात्। अतोऽगत्या तत्र शुक्तिकायामसद्रजतमुत्पद्यते इत्येव कल्पनीयम्। तदुत्पत्तौ च शुक्तिकादिविषयकमज्ञानं कारणं रजतविषयसंस्कारश्च सहकारितया कल्पनीयः। तदेव ऊर्ध्वज्ञानम् अदृष्टवशात् तज्ज्ञानतो रजतस्य शुक्तिकासाक्षात्कारेण तत्प्रत्यक्षविषयता। तत्रोत्पन्नेऽपि रजते शुक्तिकाया स्वरूपेणापि व्यवहारिसत्त्वस्य अभावतो न भवतीति यथा, एवं कूटस्थे अपरिणामिनि आत्मनि स्वात्मैवाद्वैते विवर्त्तादिरूपव्यवस्तु-

तथाहि तत्र च तदसत्त्वं हेतुः तत्संस्कारश्च सहकारीति तथा च विवादाध्यासिता घटादय इति अध्यक्षं सत्त्वज्ञानमात्मके इति सत्त्वं ज्ञानेन प्रतीयमानत्वात् शुक्तिका दर्शनेन प्रतीयमानशुक्तिज्ञानमात्मरजतवदित्यनुमानात् अध्यक्षत्वं घटादीनां सिद्धम्। अध्यक्षत्वे च साक्षात्कारि प्रत्यक्षविषयत्वं प्रागुक्तं तच्च तस्यासतोऽप्यनुपपन्नं प्रत्यक्षविषयता न स्यादिति अध्यक्षत्वहेतावंशेकिञ्चित्पक्षिरस्कृत्या कार्या। ज्ञानमात्रत्वं च तेषां मिथ्यात्वात् शुक्तिज्ञानमात्मरजतवदित्यनुमानव्यभिचारस्तत्र विस्तरेण इति वेदान्तिमतम्। सतो भावात् विद्यमानादेवेत्यर्थः। असत् उत्पत्तौ, कारणव्यापारात् पूर्वमविद्यमाने कारणव्यापारादुत्तरक्षणे जायते सङ्गच्छतीति काणदनैयायिकादय। सत सत्त्वात् अयमत्र भावोदेव सत कारणव्यापारात् प्रागपि, कारणाव्यापारोपसङ्गमरूपेण विद्यमान जायते कारणव्यापारानुविधेयत्वं व्यक्तयोग्यतायापादाते इति यत्वदिति एवा सङ्गादय। एवमसत्पक्षविषये चतुर्षु पक्षेषु स्थितेषु चार्वाकस्तत्र अनुभवितकार्यात्मकारणरूपप्रधानासिद्धिक्रमेण प्रतिक्षिपन् क्रमप्राप्तं बौद्धपक्षमाह यदि पुनरिति। निरुपाख्यमनिर्वचनीयमिदन्तया वक्तुमशक्यमिति अयमत्र इति हि लक्षणे वस्तु तल्लक्षणयत्वेन वक्तुं शक्यम अनभ्युपगमे च लक्षणाभावात् कथङ्कार वक्तव्यता। यद्यपि नाभावस्तत्त्व सत्त्वेन प्रतीतिर्हेतुत्व असत्त्वेन प्रतीतिर्हेतुत्व वा तल्लक्षण कांक्षदुच्यते तानि च सर्वाण्यपि अभावज्ञानसापेक्षतया दुर्ज्ञेयत्वादन्योन्याश्रयदोषग्रस्तत्वात् न लक्षणान्येव। सुखादे खलोकात्मकस्यार्थस्य दर्शनात् कारणव्यापारे तथाभूतात्मकत्वमनुभवितुं तच्च भावस्यैव कारणव्यापारे हेतुरसति नाभावस्य भावाभावयोर्विरोधादात्मप्राप्तुपपत्तिरिति भाव। विरोधाद च कार्यं तत्राध्यासेन न दोषमुपैतीति यदपि चोद्यं स्वेन रूपेणोत्पादात्मा सुपपन्नस्य पश्चात् तुच्छीकृतप्रध्वंसद्वितीयाद्यात्मा कथमेकस्मिन्नित्यादि। सत्ता सत्त्वमात्मके इति पक्षेऽपि तदसत्त्वेनात्मानुपपन्नत्वेन च प्रध्वंसस्य तुच्छीकृतस्य सदसत्त्वेनात्मानुपपत्तेः

मयुक्तिकतया निरस्य द्वयुक्तिकस्य कणादादिपक्षस्य निरसनीयतयाऽवयवेषतां दर्शयति कणभक्षेत्यादि कणमक्षकणं भक्षयतीति कणभक्षः कणादः । अन्नं चतुरत्रे यस्येति अनत्रण्यो गौतमस्तदनुसारिमतमित्यर्थः

ननु भावस्य सत्त्वमसत्त्वं च कादाचित्को धर्मो न तु स्वाभाविक तथा च उत्पत्तेः प्राक् असत्त्व परतस्तु सत्त्वम् यथा घटे प्राक्तात् पूर्वं ध्वाक्षता, प्राक्षोत्तरं दृष्टता, तद्वत् कालविशेषे धर्मविशेषो भविष्यतीति असत्कार्यपक्षेऽपि न कांचित् क्षतिरिति मन्यते सदसत्त्वे इति । पारिहरति तथाप्यसतीति । अयमागम असत्त्वस्य भावधर्मत्वे उत्पत्ते प्रागपि तस्य धर्मिण सत्त्व स्वीकर्तव्य तथा हि धर्मसत्त्वं धर्मिसत्त्वं विनानुपपद्यमानं धर्मिसत्त्वमपि तदाक्षिपति तथा चापादकेन असत्त्वरूपधर्मसत्त्वेन आपाद्यस्य धर्मिसत्त्वस्य सिद्धि इति । सत्त्व कार्यसत्त्व तदस्य उत्पत्ते प्रागपि स्थितमिति न तदानीं धर्म्यसत्त्वसिद्धिरित्याह तथा च नासत्त्वमिति असत्त्वधर्मिणस्तदानीमपि सिद्धत्वात् धर्म्यसत्त्वमित्यर्थः । तदेवोपपादयति असम्बद्धेनेत्यादि । असम्बद्धेन धर्म्मिणा सहेति शेषः असत्त्वेनेत्यत्राध्याय । अतदात्मना अतत्स्वरूपेण वा असत्त्वेन कथमसत् स्यात् असत्त्वाश्रय व्यक्तिरित्यर्थः धर्म्मिणा सह सम्बन्धेन धर्मेण तदाश्रयत्वनियमात् असम्बद्धस्य च तादात्म्येन तथात्वनियमात् प्रकृते अत्र सत्त्वस्य घटेन सह सम्बन्धाभावात् तत्तादात्म्याभावाच्च न तदाश्रयत्वमिति भावः । सत्कार्यपक्षमुपसंहरति तस्मादिति । तैलस्य, तण्डुलानां, पयसस्त्वाभिव्यक्तिरित्यादानुलक्ष्यादेयः । असत्त्वे कार्यस्य उत्पत्तेः प्रागसत्त्वे सत्त्वशक्तिभिः सत्त्वाश्रयैः कारणैः सह सम्बन्धोमास्ति । असम्बद्धस्य चोत्पत्तौ प्रागुक्ता अव्यवस्थितिः सर्वस्मात् सर्वोत्पत्तिरित्येवं रूपा अव्यवस्था । प्रथमं तत्पदं द्वितीयान्तं कार्यपरम्, द्वितीयं तु कारणपरं प्रथमान्तम् । कार्यानुकूला कारणनिष्ठा यक्ति कार्यजननियामिकेत्यवधेयम् तथा च कार्यसत्त्वे कथं तदनुकूलत्वं तस्मात् स्यादिति समर्थयितुं यक्तेरितरनित्यत्वं विकल्प्य दूषयति सा यक्तिरिति" ।

यथा च असतोन सदुत्पत्तिः सतश्चाभिव्यक्तिः तथा छा०उ०भाष्यतो समर्थितं यथा "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम् । तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतःसज्जायते । कुतस्तु खलु सौम्येवं स्यादिति ? होवाच कथमसत सज्जायेतेति ? । सत्त्वेव सौम्येदमग्र आसीत् एकमेवाद्वितीयम् । तदैक्षत बहु स्यां प्रजायेयेति' छा०उ० "सदेव सदित्यस्तितामात्रं वस्तु स्वरूपं निर्विशेषं सर्वगतम् । एकं निरञ्जनं निरवयवं विज्ञानं यदवगम्यते सर्ववेदान्तेभ्य । एवशब्दोऽवधारणार्थः । किन्तदभिप्रेयते ? इत्याह । इदं अनन्तनामरूपक्रियाव्यक्षिप्तमुपलभ्यते यत्तत्सदेवासीदित्यासीच्छब्देन सम्बध्यते । कदा सदेवेदमासीदित्युच्यते अग्रे जगत प्रागुत्पत्तेः । किं नेदानीमिदं सद् येनाग्रग्रहणमासीदिति विशेष्यते, न, कथं तर्हि विशेषणम् ? इदानीमपीदं सदेव किन्तु नामरूपविशेषणसदिदंशब्दबुद्धिविषय चेतदस्य भवति । प्रागुत्पत्तेस्त्वग्रे केवलसच्छब्दबुद्धिमात्रगम्यमेवेति सदेवेदमग्र आसीदित्यवधार्यते । ननु प्रागुत्पत्तेर्नामरूपव्यवहर्तृपुरुषाभावे कथं सतः सृष्टिकाल इव । यथा सुषुप्तादुत्थितः सत्त्वमात्रमवगच्छति सुप्ते सन्मात्रमेव केवलं वस्तिति तथा प्रागुत्पत्तेरित्यभिप्राय । यदेतदुच्यते लोके पूर्वाह्णे घटादिसृष्टुणा कुलालेन मृत्पिण्डं प्रसारितमुपलभ्य मध्यान्तर गत्वा प्रत्यागतोऽपराह्णे तत्रैव घटशरावाद्यनेकभेदभिन्नं कार्यमुपलभ्य सदेवेदं घटशरावादि केवलं पूर्वाह्णे आसीदिति तदेतदुच्यते सदेवेदमग्र आसीदिति । एकमेवेति । स्वकार्यपतितमन्यन्नास्तीत्येकमेवेत्युच्यते । अद्वितीयमिति । मृद्द्रव्यं हि केवलं मृदो यथाऽन्यद्घटाद्याकारेण परिणमयितृकुलालादिनिमित्तकारणं इदं तथा सद्द्रव्यतिरेकेण सत सहकारिकारणं द्वितीयं वस्त्वन्तर प्राप्त प्रतिषिध्यते । अद्वितीयमिति नास्य द्वितीयं वस्त्वन्तर विद्यत इत्यद्वितीयम् । ननु वैशेषिकपक्षेऽपि सत्सामानाधिकरण्यं सर्वस्योपपद्यते । द्रव्यगुणादिषु सच्छब्दबुद्ध्यनुवृत्तेः । सद्द्रव्यं सत् गुणः सत् कर्मेत्यादिदर्शनात्, सत्त्वमेव स्यादिदानीम्, प्रागुत्पत्तेस्तु नैवेदं कार्यं सदेवासीदित्यभ्युपगम्यते वैशेषिकैः प्रागुत्पत्ते कार्यस्यासत्त्वाभ्युपगमात् । न चैकमेव सदद्वितीयं प्रागुत्पत्तेरिच्छन्ति । तस्माद्वैशेषिकपरिकल्पितात् ततोऽन्यत्कारणमिदं सदुच्यते सदादिवाक्येभ्यः । तत् तत्र कैतत्किन्तु प्रागुत्पत्तेर्वस्तुनिरूपणे एके बौद्धाधिका आहुर्वस्तु निरूपयन्तोऽसदभावमात्रं प्रागुत्पत्तेरिदं जगदेकमेवाद्वितीयमासीदिति । सदभावमात्रं हि प्रागुत्पत्तेरत्वं ब्रुवन्ति बौद्धाः । ननु सत्प्रतिइन्द्विवस्त्वन्तर-

मिच्छन्ति। यथा सच्चासदिति गृह्यमाणं यथाभूतं तद्विरीतं तत्त्वं भवतीति नैयायिकाः। ननु सद्भावमात्रं प्रागुत्पत्तेस्तेऽभिप्रेतं वैनाशिकैः कथं प्रागुत्पत्तेरिदमासीदसदेकमेवाद्वितीयमित्येति कालसम्बन्धः सङ्गासम्बन्धोऽद्वितीयत्वं चोच्यते तैः। वाढम्। न युक्तं तेषां भावाभावमात्रमभ्युपगच्छताम्। असत्त्वमात्राभ्युपगमोऽप्ययुक्त एवाभ्युपगन्तुरनभ्युपगमानुपपत्तेः। इदानीमभ्युपगन्ताभ्युपगम्यते न प्रागुत्पत्तेरिति न प्रागुत्पत्तेः सद्भावस्य प्रामाण्याभावात्। प्रागुत्पत्तेरसदेवेति कल्पनानुपपत्तिः। ननु कथं वस्त्वाक्षिप्ते शब्दार्थत्वे ऽसदेवमेवाद्वितीयमिति पदार्थवाक्यार्थोपपत्तिस्तदनुपपत्तौ चेदं वाक्यमप्रमाणं प्रसज्येतेति चेत् नैष दोषः सङ्कल्पनिष्पत्तिपरत्वाद्वाक्यस्य। सन्निधयं तावच्छब्दः सदाख्यातिवाचकः। एकमेवाद्वितीयमित्येतौ च समानाधिकरणौ। तथेदमासीदिति च। तत्र नञ् सङ्काक्षे प्रयुक्तः सङ्काक्षमेवावलम्ब्य सङ्काक्षार्थविषयां बुद्धिं सदेकमेवाद्वितीयमिदमासीदित्येवंलक्षणां ततः सङ्काक्षार्थान्निवर्त्तयति। अस्माद्धेतोरवाङ्मनसगोचरं तदभिलक्ष्यविषयान्निवर्त्तयति तद्वत्। न तु पुनः सद्भावमेवाभिधत्तेऽतः पुरुषस्य विपरीतग्रहणनिवृत्त्यर्थं परमिदमसदेवेत्यादि वाक्यं प्रयुज्यते। दर्शयित्वा हि विपरीतग्रहणं ततो निवर्त्तयितुं युक्तम् इत्यर्थवत्तासदादिवाक्यस्य श्रौतत्वं प्रामाण्यञ्च सिद्धमित्यदोषः●। तस्मादसतः सर्व्वाभावरूपात्सद्विद्यमानमजायत सदुत्पन्नम्। अतश्चाभावान्नास्त। तदेतद्विपरीतग्रहणं सङ्काक्षेनायिकपक्षं दर्शयित्वा प्रतिषेधति। कुतस्तु? प्रमाणात् खलु हे सौम्य! एवं स्यादसतः सज्जायतेऽत्यन्तं कुतो भवेत् न कुतश्चित्प्रमाणादेवं सज्जायतीत्यर्थः। यदपि बीजोपमर्द्देनाङ्कुरो जायमानो दृष्टोऽभावादेवेति तदप्यभ्युपगमविरुद्धं तेषाम्। कथं? ये तावद्बीजावयवा बीजसंस्थानविशिष्टास्तेऽङ्कुरेऽप्यनुवर्त्तन्त एव न तेषामुपमर्द्देनाङ्कुरजन्मनि। यत्पुनर्बीजाकारसंस्थानं तद्बीजावयवव्यतिरेकेण वस्तुभूतं न वैनाशिकैरभ्युपगम्यते यद्बीजावयवव्यतिरेकेण वस्तुभूतं तथाच सत्यभ्युपगमविरोधः। अथ संस्थानाभ्युपगतं बीजसंस्थानरूपमुपमृद्यत इति चेत्। नैवं सदुत्पत्तिर्नाम विसदृशावभाव उत भाव इति। यद्यभावो दृष्टान्ताभावः। अथ भावस्तथापि नाभावादङ्कुरोत्पत्तिः बीजावयवेभ्यो ह्यङ्कुरोत्पत्तेः। अवयवा अभ्युपमृद्यन्त इति चेत्। न तदवयवेषु दृश्यत्वात्। यथा वैनाशिकानां बीजसंस्थानरूपोऽवयवी नास्ति। तथावयवा अपीति नैषामभ्युपमर्द्दानुपपत्तिः। बीजावयवानामपि सूक्ष्मावयवावास्तदवयवानामभ्यन्ते सूक्ष्मास्तदवयवा इत्येवं प्रसङ्गाऽनुवृत्तेः सर्व्वत्रोपमर्द्दानुपपत्तिः। सङ्कुङ्कुरोत्पत्तेः सत्त्वानिवृत्तिं सेति सद्भावानां सत एव सदुत्पत्तिः सिद्ध्यति। न त्वसद्भावानां दृष्टान्तोऽस्त्यसतः सदुत्पत्तौ। मृत्पिण्डाद्घटोत्पत्तिर्दृश्यते सद्भावानां, तद्भावे च भावाभावे चाभावात्। यद्यभावादेव घट उत्पद्येत घटार्थिना मृत्पिण्डो नोपादीयेत। अभावशब्दस्वङ्कुरोत्पत्तिश्च घटादौ प्रसज्येत न त्वेतदस्त्यतो नासतः सदुत्पत्तिः। यदप्याङ्कुमृद्बुद्धिर्घटबुद्धेर्निमित्तमिति मृद्बुद्धिर्घटबुद्धेः कारणमुच्यते न तु परमार्थत एव मृद्घटो वास्तीति तदपि मृद्बुद्धिर्विद्यमाना विद्यमानाया एव घटबुद्धेः कारणमिति नासतः सदुत्पत्तिः। मृद्बुद्धिर्घटबुद्धेर्निमित्तनैमित्तकतयाऽनन्यत्वमात्रं न तु कार्य्यकारणत्वमिति चेत् न बुद्धीनां नैरन्त्यं गम्यमाने वैनाशिकानां दृष्टान्ताभावात्। अतः कुतस्तु खलु सौम्येवं स्यादिति होवाच कथं केन प्रकारेणासतः सज्जायेतेति? असतः सदुत्पत्तौ न कश्चिदपि दृष्टान्तप्रकारोऽस्तीत्यभिप्रायः। एवमसद्वादिपक्षमुन्मथ्योपसंहरति सत्त्वेव सौम्येदमग्र आसीदिति स्वपक्षसिद्धिः। ननु सद्वादिनोऽपि सतः सदुत्पद्यत इति नैव दृष्टान्तो ऽस्ति। 'घटादृष्टान्तरोत्पन्नदर्शनात्। सत्यमेवं न सतः सदन्तरसदुत्पद्यते किं तर्हि सदेव संस्थानान्तरेणावतिष्ठते। यथा मृत्पिण्डः कुशूलो भवति। यथा च मृत्कूर्म्मे पिण्डघटकपालादिप्रभेदैः। यद्येवं सदेव सर्व्वप्रकारावस्थं कथं प्रागुत्पत्तेरिदमासीदित्युच्यते। ननु न श्रुतं त्वया सदेवेत्यवधारणमिदंशब्दवाच्यस्य कार्य्यस्य। प्राग्मृत्पिण्डाद्घटोत्पत्तेरसदेवासीदेवं शब्दवाच्यमिदानीमिदं जातमिति, न सत एवेदंशब्दवृद्धिविषयतयावस्थानात् यथा सदेव पिण्डघटादिशब्दबुद्धिविषयेत्येवावतिष्ठते तद्वत्। ननु यथा सद्घटेवं पिण्डघटाद्यपि तद्वत्सद्बुद्धेरन्यबुद्धिविषयत्वाभावात्। अर्थक्रियासामर्थ्यं हि ततोऽन्यत्वलक्षणं स्यात्कार्य्यजातं यथाऽश्वाद्गौः, न पिण्डघटादीनामितरेतरव्यभिचारेऽपि सत्त्वाव्यभिचारात्। यद्यपि घटः पिण्डं व्यभिचरति पिण्डस्य घटं तथापि पिण्डघटौ सत्त्वं न व्यभिचरतस्तस्मात्सत्त्वात् पिण्डघटौ, व्यभिचरत्वं गौरश्वो वा गाम्, तस्मात्सदादि संस्थानमात्रं घटादयः। एवं सत्संस्थानमात्राभिन्नं सर्व

मिति युक्तं प्रागुत्पत्तेः सदेवेति वाचारम्भणमात्रत्वादिकारसंस्थानमात्रस्य । ननु निरवयवं सत् "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" "दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यज" इत्यादिश्रुतिभ्यो, निरवयवस्य सतः कथं विकारसंस्थानसम्भवः । नैष दोषो रज्वाद्यवयवेभ्यः सर्पादिसंस्थानवद्बुद्धिपरिकल्पितेभ्यः सदवयवेभ्यो विकारसंस्थानोपपत्तेः। "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" "एवं सदेव सत्यमिति" श्रुतेः । एकमेवाद्वितीयं परमार्थत इदंबुद्धिकालेऽपि तत्सत् ऐक्षतेक्षां दर्शनं कृतवान् । अतश्च न प्रधानं साङ्ख्यपरिकल्पितं जगत्कारणम् प्रधानस्याचेतनत्वाभ्युपगमात् । इदन्तु सङ्चेतनमीक्षितृत्वात्तत्कृत्यमैक्षतेत्याह बहु प्रभूतं स्यां भवेयं प्रजायेय प्रकर्षेणोत्पद्येय । यथा मृद्दु घटाद्याकारेण यथा वा रज्वादि सर्पाद्याकारेण बुद्धिकल्पितेन । असदेव तर्हि सर्वं यदुत्पद्यते रज्जुरिव सर्पाद्याकारेण, न, सत एव ह्येनभेदेनान्यथाभूतस्य त्वाद्यासत्त्वं कस्यचित् क्वचिदिति ब्रूमः । यथा सतोऽन्यद्वस्त्वन्तरं परिकल्प्य पुनस्तस्यैव प्रागुत्पत्तेः प्रध्वंसाद्वोत्तमसत्त्वं ब्रुवते तार्किका न तथाऽस्माभिः कदाचित्कस्यचिदपि सतोऽन्यदभिधानमभिधेयं वा वस्तु परिकल्प्यते सदेव तु सर्वमभिधानमभिधीयते च बुद्ध्या यथा रज्जुरेव सर्पबुद्ध्या सर्प इत्यभिधीयते यथा, वा पिण्डघटादिर्मृदोऽन्यबुद्ध्या पिण्डघटादिशब्देनाभिधीयते लोके । रज्ज्वविवेकदर्शिनां तु सर्पाभिधानबुद्धी निवर्तेते यथा च मृद्विवेकदर्शिनां घटादिशब्दबुद्धी तद्वत्सद्विवेकदर्शिनामन्यविकारशब्दबुद्धी निवर्तेते ।'यतो वाचो निवर्तन्तेऽप्राप्य मनसा सहेति' "अनिरुक्तोऽनिलयन" इत्यादिश्रुतिभ्यः"भा० ङ०उ० भाष्ये अभावादिकारणवादनिराकरणेन उत्पत्तेः प्रागपि सत्कार्यं कारणव्यापारादभिव्यज्यते इति स्थिरीकृतम् यथा । "नैवेह किञ्चनाग्र आसीत् मृत्युनैवेदमावृतमासीत् ङ०उ०। 'नैवेह किञ्चनाग्र आसीत् । इह संसारावस्थायां किञ्चन किञ्चिदपि नामरूपप्रविभक्तं विशेषं नैवासीत् न बभूव । प्रागुत्पत्तेर्मृदादेः किं शून्यमेव स्यात्, नैवेह किञ्चनेति श्रुतेः न, कार्यं कारणं वासीदुत्पत्तेश्च । उत्पद्यते हि घटः । अतः प्रागुत्पत्तेर्घटस्य नास्तित्वम् नतु कारणस्य नास्तित्वं मृत्पिण्डादिदर्शनात् । यद्योत्पद्यते तत्तथैव नासीता । अस्तु कार्यस्य, नतु कारणस्य, उपलभ्यमानत्वात् न प्रागुत्पत्तेः सर्वानुपलब्धात्, अनुपलब्धिसमेदभावो हेतुः सर्वस्य जगतः प्रागुत्पत्तेर्न कारणं कार्यं वोपलभ्यते । तस्मात्सर्वस्यैवाभावोऽस्तु, न मृत्यु नैवेदमावृतमासीदिति श्रुतेः । यदि हि किञ्चिदपि नासीत् येनावियते यच्चावियते तदा नावच्छन्मृत्युनैवेदमावृतमिति । न हि भवति गगनकुसुमच्छन्नो वन्ध्यापुत्र इति ' ब्रवीति च मृत्युनैवेदमावृतमासीदिति । तस्माद्योऽवृतं कारणेन यच्चावृतं कार्यं प्रागुत्पत्तेस्तदुभयमासीच्छ्रुतेः प्रामाण्यात् अनुमेयत्वाच्च । अनुमीयते च प्रागुत्पत्तेः कार्यकारणयोरस्तित्वम् कार्यस्य हि सतो जायमानस्य कारणे सत्त्वोत्पत्तिदर्शनात् असति चादर्शनात् । जगतोऽपि प्रागुत्पत्तेः कारणास्तित्वमनुमीयते घटादिकारणास्तित्ववत् । घटादिकारणस्याप्यसत्त्वमेवानुपमृद्य मृत्पिण्डादिकं घटाद्युत्पत्तेरिति चेन्न मृदादेः, कारणत्वात्। मृत्सुवर्णादि हि तत्र कारणं घटरुचकादेः, न पिण्डाद्याकारविशेषः तदभावे तदभावात् । असत्यपि पिण्डाकारविशेषे मृत्सुवर्णादिकारणद्रव्यमात्रादेव घटरुचकादिकार्योत्पत्तिर्दृश्यते । तस्मान्न पिण्डाकारविशेषो घटरुचकादिकारणम् । असति तु मृत्सुवर्णादिद्रव्ये घटरुचकादिर्न जायत इति मृत्सुवर्णादिद्रव्यमेव कारणं नतु पिण्डाकारविशेषः । सर्वं हि कारणं कार्यस्योत्पादयत् पूर्वोत्पन्नस्यात्मकार्यस्य तिरोधानं कुर्वत् कार्यान्तरमुत्पादयति । एकस्मिन् कारणे युगपदनेककार्यविरोधात् । न च पूर्वकार्योपमर्दे कारणस्य स्वात्मोपमर्दो भवति । तस्मात् पिण्डाद्युपमर्दे कार्योत्पत्तिदर्शनमहेतु । प्रागुत्पत्तेः कारणसत्त्वे पिण्डादिव्यतिरेकेण मृदादेरसत्त्वादयुक्तमिति चेत् पिण्डादिपूर्वकार्योपमर्दे मृदादिकारणं नोपलभ्यते । घटादिकार्योत्तरेऽप्यनुवर्तत इत्येतदयुक्तम् । पिण्डघटादिव्यतिरेकेण मृदादिकारणस्यानुपलम्भादिति चेन्न मृदादिकार्याणां घटाद्युत्पत्तौ पिण्डादिनिवृत्तावनुवृत्तिदर्शनात् । साङ्ख्यादयस्तु दर्शनं कारणानुवृत्तेरिति चेन्न पिण्डादिगतानां मृदाद्यवयवानामेव घटादौ प्रत्यक्षत्वेऽनुमानाभासात्साङ्ख्यादिकल्पनानुपपत्तेः । न च प्रत्यक्षानुमानयोर्विरुद्धा व्यभिचारिता प्रत्यक्षपूर्वकत्वादनुमानस्य सर्वत्र तद्बाधाशङ्कासम्भवात् । यदि च क्षणिकं सर्वं, तदेवेदमिति ज्ञायमानं तदबुद्धेरपि अन्यत्वबुद्ध्यभेदत्वे तस्या अप्यन्यत्वबुद्ध्यभेदत्वमित्यनवस्थायां तत्प्रत्यभिज्ञानमित्यस्या अपि बुद्धेर्भेदाद्वा सर्वत्राश्वासाभावः । तदिदमुद्धारेऽपि

कर्तव्ये सत्यवस्तुपपत्तिः । सादृश्यात्साध्यस्य इति चेन्न तदृष्टत्वेऽप्यतिप्रसङ्गात् । असति चेतरविषयत्वात्तदुपपत्तेः । असति चेतरविषयं सादृश्यमप्रमाणमनुपपत्तिः । असत्येव सादृश्ये तद्बुद्धिरिति चेन्न । तदृष्टत्वेऽपि सादृश्यबुद्धि-दर्शनविषयत्वप्रसङ्गात् । असन्निधानमेव सर्वबुद्धीनामसत्त्वमिति चेन्न बुद्धिबुद्धेरप्यसन्निधानप्रसङ्गात् । तदधिष्ठितमिति चेन्न । सर्वबुद्धीनां मृषात्वेऽसत्यबुद्धयनुपपत्तेः तस्मादसदेतत् सादृश्यात्तद्बुद्धिरित्यत्र किञ्चित्प्राक्कालीनमसत्त्वं कार्यस्य वाभिव्यक्तिलिङ्गत्वात् । कार्यस्य च सद्भावः प्रागुत्पत्तेः किञ्चित्कारणमभिव्यञ्जकं लिङ्गत्वात् कम्भिव्यक्तिलिङ्गमस्तीत्यभिव्यक्तिः सत्ताहेतुत्वलक्षणत्वात् प्राप्तेः । यद्धि लोके प्राप्तं तस्य आदित्यप्रकाशादिना आवरणतिरस्कारेण विद्यमानस्याभिव्यक्तस्य प्राप्तस्य प्राक्सद्भावं न व्यभिचरति । तथेदमपि जगत् प्रागुत्पत्तेरित्यवगच्छाम । न हि अविद्यमानो घट उत्पत्तेः उपलभ्यते । नन्वसौ तेऽविद्यमानत्वाभावादुपलभ्यतेऽनेनेति चेन्न । न हि तव घटादिकार्यं कदाचिदप्यविद्यमानमित्यादित्य उपलभ्येत । मृत्पिण्डे त्वसन्निहिते तस्य आद्यावरणे चाग्नौ विद्यमानत्वादिति चेन्न हि विद्यमानत्वादावरणस्य घटादिकार्यस्य हि विद्यमानं आवरणं कुठारेरभिव्यक्तस्य तस्य कुठारादि प्राक्तनदृष्टेरभिव्यक्तं मृदादावयवानां पिण्डादिसंस्थानरूपेण संस्थानम् । तस्मात् प्रागुत्पत्तेर्विद्यमानश्चैव घटादिकार्यस्यावृतत्वादनुपलब्धिः । नष्टोत्पन्नभावाभावयोस्तत्प्रत्ययभेदस्याभिव्यक्तितिरोभावयोर्विपर्ययेण । पिण्डकपालादेरावरणधर्मकस्य तस्यादयुक्तमिति चेत् तस्य कुठारादि हि घटाद्यावरणं घटादिभिन्नदेशे दृष्टं न तथा घटादिभिन्नदेशे दृष्टे पिण्डकपाले तस्मात्पिण्डकपालसंस्थानयोर्विद्यमानस्यैव घटस्यावृतत्वादनुपलब्धिरित्ययुक्तमावरणधर्मवैलक्षण्यादिति चेन्न क्षीरोदकादौ क्षीरादावरणेनैकदेशत्वदर्शनात् । घटादिकार्ये कपालचूर्णादिवयवानामनभीमादनावरणात्दिति चेन्न विभक्तानां कार्यान्तरत्वादावरणत्वोपपत्तेः । आवरणाभाव एव यत्र कर्तव्य इति चेन्न पिण्डकपालावस्थयोर्विद्यमानमेव घटादिकार्यमावृतत्वादनुपलभ्यत इति घटादिकार्यार्थिना तदावरणविनाश एव यत्न कर्तव्यो न घटाद्युत्पत्तौ । न चैतदस्ति तस्माद्युक्त विद्यमानस्यैवावृतत्वादनुपलब्धिरिति चेन्न अनियमात् । न हि विनायकादयत्नादेव घटाद्यभिव्यक्ति-नियता तस्य आद्यावरणे घटादौ प्रदीपाद्युत्पत्तौ सर्वत्रदर्शनात् । सोऽपि तमोनाशनेति चेत् न दीपाद्युत्पत्तावपि य प्रयत्न सोऽपि तमस्तिरस्करणाय । तस्मिन्नष्टे घट स्वयमेवोपलभ्यते न हि घटे किञ्चिदाधीयत इति चेत् न प्रकाशवतो घटस्योपलभ्यमानत्वात् । यथा प्रकाशविशिष्टो घट उपलभ्यते प्रदीपकरणे, न तथा प्राक् प्रदीपकरणात् । तस्मात् न तमस्तिरस्कारायैव प्रदीपकरणम किन्तर्हि प्रकाशवत्त्वाय । प्रकाशवत्त्वेनैवोपलभ्यमानत्वात् । क्वचिदावरणविनाशेऽपि यत्नः स्यात् यथा कुठ्यादिविनाशे । तस्माच्च नियमोऽस्ति अभिव्यक्तेरविनाशावरणविनाश एव यत्न कर्तव्य इति । नित्य कार्यत्वाच्च । कारणे वर्तमान कार्य कार्यान्तरापाये सत्यभिव्यज्यमानत्वात् तस्य यदि पूर्वाभिव्यक्तस्य कार्यस्य पिण्डस्य व्यवहितस्य वा कपालस्य विनाश एव यत्न क्रियेत तदा विदलचूर्णादिकार्यमपि जायेत । तेनाप्राप्तो घटो नोपलभ्यत इति पुन प्रयत्नान्तरापेक्षैव । तस्मादुत्पाद्यमेवार्थिनो नियत एव कारकव्यापारोऽर्थवान् । तस्मात् प्रागुत्पत्तेरपि सदेव कार्यम् । अतीतानागतप्रत्ययभेदाच्च । अतीतो घटोऽनागतो घट इत्येतदोष प्रत्यययोर्वैतिक नघटप्रत्ययवच्च निर्विषयत्व प्रसज्यम । अनागतार्थिप्रवृत्तेश्च । नह्यसत्यर्थितया प्रवृत्तिर्लोके दृष्टा । योगिनां चातीतानागतस्यापि सत्यत्वात् अस्मदेकविषयदृष्ट ऐश्वरज्ञानविषयदृष्टघटविषय प्रत्यक्षज्ञान मिथ्या स्यात् । न च प्रत्यक्षमप्रमाणमुपपद्यते । घटसद्भावे ह्यनुमानमवोचाम विप्रतिषेधाच्च यदि घटो भविष्यतीति कुलालादिषु व्याप्रियमाणेषु घटार्थी प्रमाणेन निश्चितम् । येन च कालेन घटस्य सम्बन्धो भविष्यतीत्युच्यते तस्मिन्नेव काले घटोऽस्तीति प्रतिषिद्धमभिधीयते भविष्यद्घटोऽस्तीति न भविष्यतीत्यर्थ अय घटो न वर्त्तत इति यद्वत् । अथ प्रागुत्पत्तेर्घटोऽस्तित्युच्यते घटार्थ प्रवृत्तेषु कुलालादिषु तत्र यथा व्यापारूपेण वर्त्तमानाद्यावत् कुलालादयस्तथा घटे न वर्त्तत इत्यसच्छब्दस्यार्थस्तेन विरुध्यते कथ तस्मात् स्वेन हि भविष्यद्रूपेण घटो वर्त्तते । न हि पिण्डरूपेण वर्त्तमानता कपालरूपेण वा घटस्य भवति । न च तद्रूपो भविष्यता घटस्य । तस्मात् कुलालादिव्यापारवर्त्तमानतायां प्रागुत्पत्तेर्घटोऽस्तीति न विरुध्यते । यदि घटस्य तत्स्वभाविष्यत्कार्यं रूपं तत् प्रतिषिध्यते । तत्प्रतिषेधे विरोधः स्यात् । नन्वेतन्नास्तीति प्रतिषेधति । न च सर्वथा

क्रियावतामेवैव वर्त्तमानता भविष्यत्त्वं वा । अपि च चतुर्विधानामभावानां घटस्येतरेतराभावो घटादयो हटो यथा घटाभावः पटादिर्न घटस्वरूपमेव । न च घटाभावः खलु पटोऽभावात्मकः किन्तर्हि भावरूप एव घटस्य प्राक्प्रध्वंसात्यन्ताभावानामपि घटेन व्यपदिश्यमानत्वात् घटस्येतरेतराभाववत् तथैव भावात्मकता अभावानाम् । एवञ्च सति घटस्य प्रागभाव इति न घटस्वरूपमेव प्रागुत्पत्तेर्नास्ति । अथ घटस्य प्रागभाव इति घटस्य वस्तु स्वरूपं तदेवोच्यते, घटस्येति व्यपदेशानुपपत्तिः । अथ कल्पयित्वा व्यपदिश्येत शिलापुत्रकस्य शरीरमिति वदत् । तथापि घटस्य प्रागभाव इति कल्पितस्वाभावस्य घटेन व्यपदेशो न घटस्वरूपत्वेन । अथार्थान्तरं घटाद्घटस्याभाव इति उक्तोत्तरमेतत् । शिलाभ्यात्मानुपपत्तेः यथविषाणवदभावभूतस्य घटस्य स्वकारणसत्तासम्बन्धानुपपत्तिः द्वित्वित्वात् सम्बन्धस्य । अयुतसिद्धानामदोष इति चेत् न भावाभावयोरयुतसिद्धत्वानुपपत्तेः । भावभूतयोर्हि युतसिद्धता-युतसिद्धता वा व्याप्ता न भावाभावयोरभावयोर्वा : तस्मात् सदेव कार्यं 'प्रागुत्पत्तेरिति सिद्धम्' एतदभिप्रेत्य सोलाङ्गम् "नासतो विद्यते भावो नाभावो विद्यते सतः" इति

अथ भूतोत्पत्तिप्रकारः कार्यादभ्यन्यायबन्धुत्वोर्दर्शनेन यथा "ततः प्राताः प्राणिनां भोगभूतये भूतेष्वेवं सिसृक्षया-नरं सत्त्वाख्यगतद्वितीयाद्वयोरुत्कटयोरेकतमोद्रेकेण परमाणुषु क्रमेणोत्पन्नौ तयोः परस्परसंयोगेभ्यो द्व्यणुकादिक्रमेण महान् वायुः सञ्जत एवोदीर्यमानो नभस्याकाशे दोधूयमान क्वचिदप्रतिहतत्वायद्वेगातिशययुक्तत्वति क०। "तदनन्तर" तस्मिन्नाधेय- परमाणुभ्यस्तेन क्रमेण महान् सलिलनिधिरत्र मोक्षूयमाण," भा०"प्रतिरोधकाभावात सर्वत्र प्रधमानत्वति क०।"ततस्तस्मिन्नेव पार्थिवेभ्यः परमाणुभ्यो द्व्यणुकादिक्रमेण सञ्जत एवा महापृथिवी-स्थिरस्वभावा तिष्ठति । तत्तस्तेजसेभ्यः परमाणुभ्य सञ्जत एवो महांस्तेजोराशिर्दहेत्यमानत्वति" भा० । "तदनन्तरं सलिलनिधेरुत्पद्यमानस्तस्मिन्नेव जलनिधौ पार्थिवेभ्यः परमाणुभ्यो महापृथिवी संहता स्थिरस्वभावाऽवतिष्ठते तदनन्तरं तस्मिन्नेव महोदधौ तैजसेभ्योऽणुभ्यो द्व्यणुकादिक्रमेणोत्पन्नो महांस्तेजोराशि तेन चिदग्निभूतमाहृदीप्यमानत्वति यद्यपि यस्तावत् कल्पः स्वाभाविकोविरोधोऽग्नि तथापीश्वरसङ्कल्पाधारत्वेन भस्मीभावानुपपत्तः" क०।" एवं सञ्जत एवेश्वर चतुर्षु महाभूतेषु सर्वेश्वरस्याभिध्यानमात्रात्तैजसेभ्योऽणुभ्यः पार्थिवपरमाणुस्थितेभ्यो महदण्डमारभते । तस्मिंश्चतुर्दशभुवनसहितं सुरासुरनरनागं सिसृक्षुः" भा०। "एवमनन्तरोक्तेन क्रमेणोत्पन्नेषु महाभूतेषु सर्वेश्वरस्याभिध्यानमात्रात्तैजसेभ्योऽणुभ्यः पार्थिवपरमाणुस्थितेभ्योऽण्डमारभते । तस्मिंश्चतुर्दशभुवनसहितं सुरासुरनरनागं सिसृक्षुर्भगवान्

धर्मो यथावत् प्रत्येति । वैराग्यादपक्षपातेन प्रवर्त्तते । ऐश्वर्यात् कर्मफलं भोजयति । प्राणिनां कर्मविपाकं विदित्वेति विविधेन प्रकारेण पाकोविपाकः कर्मणां विपाकः कर्मविपाकस्तं विदित्वा एतावदस्य कर्मफलं भविष्यतीति ज्ञात्वा कर्मानुरूपाणि ज्ञानभोगायुषि तेषां तान् प्रजापतीन् दक्षादीन् मानसान् मनःसंकल्पप्रभवान् मनुदेवर्षिपितृगणान् मनून् देवान्दक्षान् पितृगणान् सप्तब्राह्मरूपान्सप्तऋषीन्सुखात् ब्राह्मणान्, बाहुभ्यां क्षत्रियान्, ऊरुभ्यां वैश्यान्, पद्भ्यां शूद्रान्, अन्यानि चोच्चावचानि क्षुद्रक्षुद्रतराणि भूतानि क्षुद्राशयानुरूपैराशेते फलोपभोगकालं यावत् आलम्बयतित इत्याशयः कर्म तदनुरूपैस्तानिधर्मवैराग्यैश्वर्यैः संयोजयतीति मातृव्यायन्यथा न योजयतीत्यर्थः" । यतु खल केचिदेवमाचक्षिरे प्रेक्षावत्प्रवृत्तिरिष्टार्था वा स्यादनिष्टपरिहारार्था वा नचेदानिष्टप्राप्तिपरिहारार्था, न चेदानिष्टप्राप्तिपरिहारवीश्वरे समस्तावाप्तकामे सम्भवत् तेनास्य जगत्सर्गे प्रवृत्तिरनुपपन्ना तत्रोत्तरं प्राणिनां भोगभूतय इति परार्था विभुत्वाद्या प्रवृत्तिर्न स्वार्थनिबन्धनेत्यभिप्रायः । नन्वेवं तर्हि सुखमयमेव सृष्टिं कुर्यात् न दुःखबहुलां करुणया प्रवृत्तत्वादित्यत्रैवं परिहारः प्राणिनां कर्मविपाकं विदित्वेति । परार्थं प्रवृत्तस्येऽपि न सुखमयीमेव करोति विचित्रवस्तुशक्तियोगस्य कर्तृत्वादित्यर्थः नचैवं सति करुणाविरोधोदुःखोत्पादस्य वैराग्यजननद्वारेण परमसुखप्राप्तिहेतुत्वात् यदि धर्माधर्मापेक्षः करोति नाद्य स्वाधीनं कर्तृत्वमिति अनीश्वरतादोष इत्यस्यायं परिहारः । आशयानुरूपैः धर्मज्ञानवैराग्यैश्वर्यैः संयोजयति स हि सर्वप्राणिनां कर्मानुरूपं फलं प्रयच्छन् कथमनीश्वर इत्यादि भावः । न हि योग्यतानुरूपेण भूतानां फलविशेषदः प्रभुरप्यधर्मभवति । कल्पादावप्यज्ञानां प्राणिनां सर्वज्ञस्यार्थे सत्यु त्पत्तावां सद्भूतस्याक्षुद्रकरणाच्छुद्धव्यक्तानुपपत्तिरिति चोदनाद्वा प्रत्यवस्थानमेवोक्तमिदं मानसानीति । रोगिजघरोर् हि भङ्गता सर्वधात्वादिदोषवत्त्वेन विनष्टसंस्कार आलम्बनानुभूतस्य सर्वस्य न स्मरति । अयमयः प्रजापतयो मनस्सु मानसा अयोनिजशरीरविशिष्टा इन्द्रियविशेषा इतरसंस्काराः अत्यन्ताभावभूत सर्वथैव ब्रह्मविदुषोऽकारं सुप्रतिबुद्धत्वात् प्रतिबन्धक्षये प्रतिबन्धाभावात् परत्वं ब्रह्मणो व्यवहरन्ति । तेषां व्यवहाराङ्ग तत्कालवर्त्तिनां प्राणिनामुत्पत्तिः तद्व्यवहाराङ्गापरेषामिति सुष्ठूक्तं व्यवहारपरम्परया यद्वार्थं व्युत्पत्तिरित्यर्थ." इति ।

वेदान्तिमते भूतोत्पत्तिप्रकारो वेदान्तदर्शितो यथा । "तत्र सर्गाद्यकाले परमेश्वरः क्षुब्धमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्मसकलतापरिमितानिरूपितशक्तिविभेदविशिष्टमायासहितः सङ्कल्पयति "तदैक्षत बहु स्यां प्रजायेयेति" श्रुतेः । तत आत्मन आकाशादीनि पञ्चभूतानि अपञ्चीकृतानि तन्मात्रपदप्रतिपाद्यानि तत्पञ्चके तत्राकाशस्य शब्दोगुणो, वायोस्तु शब्दस्पर्शौ तेजसस्तु शब्दस्पर्शरूपाणि, अपान्तु शब्दस्पर्शरूपरसाः, पृथिव्यास्तु शब्दस्पर्शरूपरसगन्धाः । न तु शब्दाकाशमात्रगुणत्वं वाय्वादावपि तदुपलम्भात् । नासौ भ्रमः बाधकाभावात् । एतानि भूतानि त्रिगुणमायाकार्याणि अतस्त्रिगुणात्मकानि । एतेषु सत्त्वगुणोपेतैः पञ्चभूतैः श्रोत्रत्वक्चक्षूरसनघ्राणानि पञ्चेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्तानि च जायन्ते । श्रोत्रादीनां पञ्चानां क्रमेणैव दिग्वातार्कवरुणाश्विना अधिष्ठातृदेवताः मनआदीनां चतुर्णां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युताः अधिष्ठातृदेवताः । एतैरेव रजोगुणोपेतैः पञ्चभूतैर्यथाक्रमेण वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि जायन्ते । तेषां च क्रमेण वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः । रजोगुणोपेतैः पञ्चभूतैरेव पञ्च वायवः प्राणापानव्यानोदानसमानाख्याजायन्ते । तत्र प्राणनवान् वायुः प्राणोनासाग्रस्थानवर्त्ती । अवागमनवानपानः पायुादिस्थानवर्त्ती । विभूतनवान् व्यानः सर्वशरीरवर्त्ती । ऊर्ध्वगमनवानुदानः कण्ठस्थानवर्त्ती । अशितपीताद्यादिसमीकरणः समानः नाभिस्थानवर्त्ती । तैरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतभूतानि जायन्ते "तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति" त्रिवृत्करणश्रुतेः पञ्चीकरणोपलक्षणार्थत्वात् । पञ्चीकरणप्रकारश्चेत्थम् । आकाशमादौ द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषां चतुर्णामंशानां वायादिषु चतुर्भूतेषु संयोजनम् । एवं वायुं द्वेधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषां चतुर्णां आकाशादिषु संयोजनम् । एवं तेजोऽप्पृथिव्यांश्चानामपि । तदेवमेकैकभूतस्यार्धं स्वात्मकमर्धमितरेषु चतुर्विधभूतमयमिति पृथिव्यां दौ

खांगाधिक्यात् पृथिव्यादिव्यवहारः । तदुक्तम् "वैधेऽव्याप्तेरहदहादः" (या०कु०)इति । पूर्वोक्तैरपञ्चीकृतभूतैर्लिङ्गशरीरं परलोकयायानिर्वाहकं भोगपर्यन्तस्थायि मनोबुद्धिभ्यास्पदमेतं ज्ञानेन्द्रियपञ्चककर्मेन्द्रियपञ्चकप्राणादिपञ्चकसंयुक्तं जायते । तदुक्तम् । "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति" । तच्च द्विविधं परमपरञ्च । परं हिरण्यगर्भलिङ्गशरीरं महत्तत्त्वरूपम्, अपरमहदादिलिङ्गशरीरस्याङ्कुरतत्त्वमित्याख्यायते । एवं तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्योभूर्भुवस्तरिक्षसंज्ञमहर्लोकपर्यन्तसप्तलोकस्थूलशरीराणि जायन्ते । तत्र सप्तलोकेषु अतलवितलसुतलतलातलरसातलमहातलाख्येष्वधोलोकसप्तकस्य ब्रह्माण्डस्य जरायुजाण्डजस्वेदजोद्भिज्जाख्यचतुर्विधस्थूलशरीराण्युत्पत्तिः । तत्र जरायुजानि जरायुभ्योजातानि मनुष्यपश्वादिशरीराणि । अण्डजानि अण्डेभ्यो जातानि पक्षिपन्नगादिशरीराणि । स्वेदजानि स्वेदाज्जातानि यूकमशकादिशरीराणि । उद्भिज्जानि भूमिमुद्भिद्य जातानि वृक्षादिशरीराणि । वृक्षादीनामपि पापफलभोगायतनत्वेन शरीरित्वम् । तत्र परमेश्वरस्य पञ्चतन्मात्रादुत्पत्तौ सप्तप्रदायपयवसीयेतलिङ्गशरीरोत्पत्तौ हिरण्यगर्भस्थूलशरीरोत्पत्तौ च साक्षात्कर्तृत्वम् । इतरनिखिलप्रपञ्चोत्पत्तौ च हिरण्यगर्भद्वारा "इन्द्राक्षमिमाश्चिक्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति"श्रुतेः हिरण्यगर्भोनाम मूर्त्तिमयादद्यः प्रथमोजीवः "स वै शरीरी प्रथमः स वै पुरुषउच्यते । आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत" । "हिरण्यगर्भः समवर्त्तताग्रे" इत्यादि "श्रुतेः" ।

सांख्यमते प्रकृतिरेकानित्याचेतना साम्यावस्थापन्नसत्त्वरजस्तमस्यात्मिका, पुरुषास्तु बहवश्चिन्मात्रा अपरिणामिनः कूटस्था नित्याः । सृष्टिकल्पे प्रकृतिपर्य्यन्तसाङ्गतारिणा प्रकृतिलीनोपाधिकेन आदिविदुषा हैरण्यपदाभिधेयेन स्वस्मिन्नावरूपसंयोगवती स्वलीनानन्तबुद्धित्वनिष्टपञ्चकल्पार्ज्जिताष्टसर्गिका प्रकृतिः सर्गाद्यकाले सत्त्वादिगुणक्षोभमापन्ना महदाद्याकारेण परिणमते । यथा च परिणमते तथा दर्शितम् सां०कु०प्र० भाष्यद्वोः यथा । "सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोऽहङ्कारोऽहङ्कारात् पञ्च तन्मात्राण्युभयमिन्द्रियं तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गणः"कु० । "इत्यादीनि इत्यादि न वैशेषिकादिदृष्टगुणाः संयोगविभागवत्त्वात् लघुत्वचलत्वगुरुत्वादिधर्मकत्वाच्च । तेभ्यत्र सांख्ये सुखादौ च गुणशब्द पुरुषोपकरणत्वात् पुरुषप्रयोजकत्वगुणात्मकमहदादिरज्जुनिर्माणत्वाच्च प्रयुज्यते । तेषां सत्त्वादित्रयाणां या साम्यावस्थान्यूनातिरिक्तावस्था न्यूनाधिकाभावेनासंहतावस्थेति यावत् अकार्य्यावस्थेति निष्कर्षः । अकार्यावस्थोपलक्षितं गुणसामान्यं प्रकृतिरित्यर्थः । यथाश्रुते वैधम्यावस्थायां प्रकृतिनाशप्रसङ्गात् । "सत्त्वं रजस्तम इति गुणैर्वैषम्यं प्रकृतिः सदा । एवंच संसृतिर्जन्तोरस्याः पारे परं पदम्" इत्यादिस्मृतिभिर्गुणसाम्यस्यैव प्रकृतित्वकथनाच्च । सत्त्वादीनामनुगमाय सामान्येति । पुरुषव्यावर्त्तनाय गुणेति । महदादिव्यावर्त्तनाय चोपलक्षितान्निति । महदादयोऽपि हि कार्य्यसत्त्वादिरूपाः पुरुषोपकरणतया गुणाय भवन्तीति । तदत्र प्रकृतेः स्वरूपमेवोक्तम् । अस्या विशेषस्तु पश्चाद्वक्ष्यते । प्रकृतेः कार्य्यो महान् महत्त्वम् । महदादीनां स्वरूपं विशेषश्च वक्ष्यते । महतश्च कार्य्योऽहङ्कारः । अहङ्कारस्य कार्य्यद्वयं तन्मात्राण्युभयमिन्द्रियं च । ततोऽभयमिन्द्रियं बाह्याभ्यन्तरभेदेनैकादशविधम् । तन्मात्राणां कार्य्याणि पञ्च स्थूलभूतानि । स्थूलत्वात् तन्मात्राणां सूक्ष्मभूतत्वमभ्युपेयम् । पुरुषस्तु कार्य्यकारणविलक्षण इति इत्येवं पञ्चविंशतिर्गणः पदार्थाश्च एतदतिरिक्तः पदार्थो नास्तीत्यर्थः । अथ वा सत्त्वादीनां प्रत्येकव्यक्तानन्त्यं गणशब्दो वक्ष्यति । अयं च पञ्चविंशतिको गणोऽव्यक्तरूप एव । धर्मैक्यभेदात् तु गुणकर्मसामान्यादीनामत्रैवान्तर्भावः । एतदतिरिक्तपदार्थसत्त्वे हि ततोऽपि पुरुषस्य विवेक्तव्यतया तटस्थत्वे न्यूनतापद्येत" ।

प्रकृतेरचेतनत्वेऽपि पुरुषभोगापवर्गार्थं यत्सन्निधिमात्रेणतत्तीरणात् प्रवृत्तिः । यथोक्तं सां०का० कौ० । "पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य । पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः" का० "प्रधानस्येति कर्म्मणि षष्ठी प्रधानस्य सर्व्वकारणस्य यद्दर्शनं पुरुषेण तदर्थं, तदनेन भोग्यता प्रधानस्य दर्शिता ततश्च भोग्यं प्रधानं भोक्तारमन्तरेण न सम्भवतीति युक्त्यास्य भोक्तृपेक्षा । पुरुषस्यापेक्षां दर्शयति पुरुषस्य कैवल्यार्थम् । तथा हि प्रकृत्यनाद्यविवेकनिमित्तः पुरुषाश्रयः दुःखत्रयं स्वात्मन्यविद्यमानं कैवल्यं प्रार्थयते तच्च सत्यपुरुषान्यताख्यातिः प्रधानमन्तरेण न सम्भवतीति प्रधानमपेक्षते । अतश्चैवं सति प्रधानस्य पुरुषः प्रधानमपेक्षते । अतश्चैवं सति प्रधानस्य पुरुषः

भोगाय संयुक्तोऽपि कैवल्याय पुनः संयुज्यते इति युक्तम् । ननु भवत्मतयोः संयोगोऽदृष्टादिसर्गेषु कृतस्य इत्यत आह तत्कृतः सर्गः संयोगो हि न अदृष्टादिसर्गजनकः किं भोगाय पर्य्याप्त इति संयोगश्च भोगापवर्गार्थं सर्गं करोतीत्यर्थः" कौ० तथाऽचेतनायाः प्रकृतौ इदानीमज्ञानोत्पत्तौ "वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य । पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य" सां० का० ।

पातञ्जले तु प्रतिकल्पमनेकेषां प्रकृतिलीनानां सर्गहेतुत्व कल्पने गौरवात् एकस्यैव ईश्वरस्य तदधिष्ठातृत्वाङ्गीकारेण प्रकृतेस्तथा परिणाम इत्यङ्गीकृतं यथा च एकस्यैव सर्व्वोत्कर्षं सार्व्वज्ञं तथा ईश्वरशब्दे १०५२ पृष्ठे सूत्रभाष्यविवरणेषु दर्शितम् । ४ अभिव्यक्तौ च अभिव्यक्तेर्यथा उत्पत्तिरूपता तथा अभिव्यक्तिशब्दे २०० पृष्ठे दर्शितम् । एवं भूतभौतिकोत्पत्तिप्रकारः मतभेदेन निरूपितः । अथ विशेषभौतिकोत्पत्तौ कारणविशेषत्वादभिधीयते तत्र जन्यजालोत्पत्तौ ईश्वरः अदृष्टं कालश्च निमित्तकारणमिति नैयायिकादयः । वेदान्तिमते ब्रह्मणोऽविद्याद्वारा निमित्तोपादानरूपोभयकारणता । सांख्यमते प्रकृतेरुपादानता । जन्यभावोत्पत्तौ द्रव्यमुपादानकारणं यथा घटे कपालम् पटे तन्तवः, कुण्डले, सुवर्णम् समवायिकारणम् । तत्तद्द्रव्यसंयोगश्चासमवायिकारणम् । गुणोत्पत्तौ द्रव्यं समवायिकारणम् अवयवगुणोवाऽऽदिसंयोगो वा असमवायिकारणं यथा घटरूपे कपालरूपं, पटरूपे तन्तुरूपम्, श्यामघटे रक्तोत्पत्तौ अग्निसंयोगः । एवमात्मनि ज्ञानाद्युत्पत्तौ मनःसंयोगादि असमवायिकारणम् । संयोगविभागोत्पत्तौ क्रिया असमवायिकारणम्, इत्याद्यूह्यम् । ध्वंसप्रागभावोत्पत्तौ प्रतियोगी निमित्तकारणम् । वायुादौ रूपाद्यभावश्च बाह्यलाभावतया नित्यत्वम् घटाभावश्च नाशे तु भूतले घटाधारत्वं तदुभयं च तदुत्पत्तौ निमित्तकारणं तैलायुत्पत्तिनिमित्तग्राही चक्षुर्यः संयोगाभावः इति न्यायैकदेशिनः ।

देहोत्पत्तिप्रकारः कार्यखण्डे, गर्भोत्पत्तिप्रकारश्च गर्भखण्डे वक्ष्यते । "उत्पत्तिमात्रे कर्तृत्वं सर्वत्रैवाहुः कारके । व्यापारभेदापेक्षायां करणत्वादिसम्भवः" भट्टकृ० । "उत्पत्तिसिद्धौ कारकोपः" सां० सू० । "न निरोधो नोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वा मुक्त इत्येषा परमार्थता" अभियुक्तोक्तिः । जीवोत्पत्तिस्तु देहाद्देहान्तर उत्पन्न एव तन्निमित्तप्रकारादि । इ० उ० भा० दर्शितं यथा "तद्यथा राजानमायान्तमश्वाः प्रत्येनसः सूतग्रामण्योऽक्षैः पार्ष्णिरावपद्यैः प्रतिकल्पन्तेऽश्वमायान्तमश्वजघनाच्छतोत्येवं कैवंविदं ब्रह्मायान्तमेतदन्नमागच्छतीति" "तत्लोष्टं शरीरं परित्यज्य गच्छतो नास्य देहान्तरोपादाने सामर्थ्यमस्ति देहेन्द्रियवियोगात् । न चान्येऽस्य ब्रह्मज्ञानीया दृष्टमिव राज्ञे शरीरान्तरं लब्धा प्रतीक्षमाणा विद्यन्ते । अथैवं सति कथमस्य शरीरान्तरोपादानमिष्यते । सर्वं ह्यस्य जगत्सत्कर्म्मफलोपभोगायत्तं कर्म्मफलोपभोगाय चायं ब्रह्मणो देहाद्देहान्तरं प्रतिपित्सुः । तस्मात्सर्वमेव जगत्सत्कर्म प्रयुङ्क्ते तत्कर्मफलोपभोगयोग्यं साधनं लब्धा प्रतीक्षत एव । "लब्धं लोकं पुरुषोऽभिजायत इति" श्रुतेः । यथा स्वप्नजागरितं प्रतिपित्सोः । तत् कथमिति ? लोकप्रसिद्धो दृष्टान्त उच्यते । तत्र यथा राजानं राज्याभिषिक्तमायान्तं स्वराष्ट्रे उग्रा जातिविशेषा; क्रूरकर्म्माणो वा प्रत्येनसः प्रति प्रत्येनसि पापकर्म्मणि नियुक्ताः प्रत्येनसस्तस्करादिदण्डनादौ नियुक्ताः सूताश्च ग्रामण्यश्च सूतग्रामण्यः सूता वर्णसङ्करजा जातिविशेषा ग्रामण्यो ग्रामनेतारश्च पूर्व्वमेव राज्ञ आगमन बुभुक्षाभैक्ष्यभक्ष्यादिप्रकारैः पार्ष्णैर्दिरादिभिरावपद्यैश्च प्रासादादिभिः प्रतिकल्पन्ते निष्पन्नैरेव प्रतीक्षन्तेऽयं राज्ञ. आयान्तमागच्छतीत्येवं वदन्तः । एवं ह एवंविद् कर्म्मफलज्ञ वेदितारं संसारिणमित्यर्थः । कर्म्मफलं हि प्रस्तुतं तदेवंशब्देन परामृश्यते । सर्व्वाणि भूतानि शरीरकाद्यणि करणान्तःकरणादीन्द्रियादिनि तत्कर्म्म प्रयुञ्जानानि जातैरेव कर्म्मफलोपभोगसाधनैः प्रतीक्षन्ते । इदं ब्रह्म भोक्तृ कर्तृ ब्राह्मणमायाति । तच्चेदमागच्छत्येवमेव लब्धा प्रतीक्षन्त इत्यर्थः भाष्यम् । तत्र विस्तरस्तत्रैवोक्तो यथा ।

"तद्यथा तल्पजायुका तल्पस्थानं शनकैरभ्यारोहन्त्यभ्यारोहन्तमेवमेवाजायमानमेतं शरीरं निष्पाद्यविद्या गमयित्वाऽन्यतमजमजमात्मानमनुसंक्रामति । तद्यथा मेषश्चारी मेषश्चारीणमादायान्यतरं लब्धाप्यतरं रूपं तनुतएवमेवायमात्मेदं शरीरं निष्पाद्यविद्यां गमयित्वाऽन्यतरं लब्धाप्यतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वाऽन्येषां वा भूतानाम् । स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजस्कः कामयः क्रोधमयः क्रोधोधर्म्ममयोऽधर्ममयः सर्व्वमयस्त-

ह्येतदिहान्यथोऽदोभव इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन । अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यते"इ० उ०।

"एवं विद्यादिसम्भारसम्भृतो देहान्तरं प्रतिपद्यमानो लब्ध्वा पूर्वं देहं पक्षीव इवान्तरं प्रतिपद्यते, अथ वाऽऽतिवाहिकेन शरीरान्तरेण कर्मफलजन्मदेशं नीयते किं बालस्थवृद्धेषु सर्वगतानां करणानां इत्थिताभो भवत्यूर्ध्वोत्क्षिप्तशरीरस्य सङ्कुचितानि करणानि क्षतस्य भिन्नघटप्रदीपप्रकाशवत्सर्वतो व्याप्य पुनर्देहान्तरारम्भे सङ्कोचमुच्छन्ति किं वा मनोमात्रं वैशेषिकसमय इव देहान्तरारम्भदेशं प्रतिगच्छति किं वा कल्पनान्तरमेव वेदान्तसमय इत्युच्यते ।"त एते सर्वएव सभाः सर्वज्ञना" इति श्रुतेः । सर्वज्ञत्वानि तावत् करणानि सर्वात्मकप्राणसंश्रयाच्च तेषामाध्यात्मिकाधिभौतिकपरिच्छेदः प्राणिकर्मज्ञानभावनानिमित्तः । अतश्चैतद्भावात् प्रभावतः सर्वगतानामनन्तानामपि प्राणानां कर्मज्ञानवासनानुरूप्येणैव देहान्तरारम्भवशात् प्राणानां इत्थिः सङ्कुचति विकसति च । तथाचोक्तम् । "यथः मृ विद्या सभो भगवेन सभो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेणेति" । तथाचेदं वचनमनुकूलम् "स योऽतैतानन्तानुपास्ते"इत्यादि"तं यथा यथोपासत" इति च । तत्र वासनापूर्वप्रवृत्ता विद्या कर्मतन्त्रा लब्धावस्थान्तरैव स्वप्रकाश एव कर्मजात देहाद्देहान्तरारम्भे हृदयस्थैव पुनर्देहान्तरं पूर्वमयं विसृजतीत्यतस्तस्मिन्नर्थे इदमुपादीयते तत्रत्य देहान्तरसञ्चार इदं निदर्शनम् । यथा येन प्रकारेण तृणजलायुका तृणजलौका तृणस्यान्तमवसानं गत्वा प्राप्यान्यत्तृणं तृणान्तरमाक्रमणायाक्रम्य तृणाग्रमक्रमणाक्रमणायाक्रम्याक्रान्तायाक्रमणाग्रमात्मनः पूर्वावयवसंहरत्यात्मावयवस्थाने । एवमेवायमात्मा यः प्रज्ञातो यः संसारो दृढं शरीरं पूर्वोपात्तं निहत्य अन्यं प्रतिपित्सुरिव पातयित्वा विद्या मनसिता चेतनं कृत्वा स्वात्मोपसंहारेणान्यमात्मानं तृणान्तरमिव तृणजलौका इव शरीरान्तरं सङ्कीर्य प्रहारितया वासनयाऽऽत्मानमुपसंहरति । तत्रात्मभावमारभते । यथा खल्वे देहान्तरमारभते । खल्वेहान्तरस्य इव शरीरान्तरभेदे आरभ्यमाणे देहे जङ्गमे स्थावरे वा । तत्र च कर्मवशात्करणानि कञ्चदृश्मीनि संकृष्यन्ते वायुनेव कुसुमवृक्षिकास्थानीयं शरीरमारभ्यते । तत्र च करणव्यूहमेवेयं वागाद्यनुपरहः । या अन्नाद्यादिदेवताः संश्रयन्ते एव देहान्तरारम्भविधिः"।

तत्र देहान्तरारम्भो नित्योपात्तमेवोपादानमनुपलक्ष्योपलक्ष्य देहान्तरमारभते आकोखिदपूर्वमेव पुनः पुनरादत्त इत्यलोच्यते दृष्टान्तः । तत्रतैतन्निदर्शनं यथा मेथकारो मेथः सुवर्णं तत्करोतीति मेथकारो सुवर्णकारः मेथतः सुवर्णस्य भावाभावपादावापच्छिद्य गृहीत्वाऽन्यत् पूर्वकाकृतनामविशेषादन्यन्नवतरमभिनवतरं कल्याणात् कल्याणतरं रूपं तनुते निर्मिमीते एवमेवायमात्मेत्यादि पूर्ववत् । नित्योपात्तान्येव पृथिव्यादीन्याकाशान्तानि पञ्चभूतानि यानि "द्वे वाव ब्रह्मणो रूपे" इति चतुर्थे व्याख्यातानि मेथःस्थानीयानि । तान्येवोपसृज्योपसृज्यान्यदन्यच्च देहान्तरं नवतरं कल्याणतरं रूपं संस्थानविशेषं देहान्तरमिमीते । कुरुते पितृन् वा पितृभ्यो हितं पितृलोकोपभोगयोग्यमित्यर्थः । गान्धर्वं गन्धर्वाणामुपभोगयोग्यम् । तथा दैवानां दैवम्, प्राजापत्यं प्राजापत्यम्, ब्राह्मं ब्राह्मं वा, यथाकर्म यथाश्रुतमन्येषां वा भूतानां सम्बन्धि शरीरान्तरं कुरुत इत्यभिसम्पद्यते । यस्य यज्ञनसङ्कल्पा उपाधिभूता यैः संयुक्तस्तत्कर्मयोऽयमिति विभाव्यते ते पदार्थाः पुच्छीलत्वेनेहैव प्रतिनिर्दिश्यन्ते । स वा अयं य एवं संसारात्मा ब्रह्मैव पर एव योऽयमात्मेत्युक्तोऽतो विज्ञानमयो विज्ञानं बुद्धिज्ञानोपलक्षणप्राणसमूहः । कतम आत्मेति । योऽयं विज्ञानमयः । प्राणेष्विति श्रुतं विज्ञानमयो विज्ञानप्रायो यज्ञश्चेत्यर्थमस्य विभाव्यते "ध्यायतीव लेलायतीवेति"। तथा मनोमयो मन एवेत्यनोमयः । तथा प्राणमयः प्रायः पञ्चवृत्तिरित्यर्थो येन चेतनवत्तयैव लक्ष्यते । तथा चक्षुर्मयोऽदर्शनज्ञाने । एवं श्रोत्रमयः शब्दश्रवणज्ञाने । एवं तत्र तत्रेन्द्रियेषु व्यापारोन्मुखे तत्तन्मयो भवति । एवं बुद्धिप्राणशरीरेषु चक्षुरादिकरणमयः सन् शरीरारम्भकपृथिव्यादिभूतमयो भवति । तत्र पार्थिवादिशरीरारम्भे पृथिवीमयो भवति तथा वरुणादिलोकेष्वाप्यशरीरारम्भे आपोमयो भवति । तथा वायव्यशरीरारम्भे वायुमयो भवति । तथाकाशशरीरारम्भे आकाशमयो भवति । एवमेतानि तैजसानि देवशरीराणि । तैजारभ्यमाणेषु तत्तन्मयस्तेजोमयो भवति । अतो व्यतिरिक्तानि पञ्चादिशरीराणि नरकप्रेतादिशरीराणि भौतिकानि :

तान्यमेवाऽऽत्मानमेवोभय इति एवं कार्यकारणसङ्घातमयः सन्नात्मा प्राप्तं वस्त्वन्तरं पश्यन्निदमयः, अदोमय इत्यप्राप्तमिति। एवं विपरीतप्रत्ययत्वादभिलाषः कामयो भवति। तस्मिन् कामे दोषं पश्यतस्तद्विषयाभिलाषोपशमे चित्तं प्रसन्नमकलुषं शान्तं भवति तन्मयोऽकाममयः। एवं तस्मिन्विकृते कामे केनचित्तु कामः क्रोधत्वेन परिणमते तेन तन्मयो भवन् क्रोधमयः। स क्रोधः केनचिदुपायेन निवर्त्तितो यदा भवति तदा प्रसन्नमनाकुलं चित्तं यदक्रोध उच्यते। एवं तेन तन्मयः एवं कामक्रोधाभ्यामकामक्रोधाभ्याञ्च तन्मयो भूत्वा धर्म्ममयोऽधर्म्ममयश्च भवति। न हि कामक्रोधादिभिर्विना धर्माद्यभिसन्धित्वमुपपद्यते। "यद्यद्धि कुरुते कर्म तत्तत्कामस्य चेष्टितमिति" श्रुत्यात्। धर्म्ममयोऽधर्म्ममयश्च भूत्वा सर्वमयो भवति। सकलं धर्माधर्मयोश्च कार्यं यावत्किञ्चिद्ब्राह्मणं तत्सर्वं धर्माधर्मयोः फलम्। तत्प्रतिपद्यमानस्तन्मयो भवति किं बहुना तदेतत् सिद्धमस्य यदयमिदमयो ऽहमाद्यविधयादिमयस्तस्मादयमदोमयः अद इति परोक्षं कार्य्येण ऽहमादेन निर्दिश्यते। अनन्ता ह्यन्तःकरणे भावनाविशेषाः। नैव ते विशेषतो निर्देष्टुं शक्यन्ते। तस्मिंस्तस्मिन् क्षणे कार्यतोऽवगम्यन्ते। ऽदमस्य ह्यदि वर्त्तते ऽदोऽस्येति। तेन ऽहमादेन कार्य्येणेदमादितया निर्दिश्यते। परोक्षोऽन्तःस्थो व्यवहारोऽयमिदमोमदोमय इति। सङ्क्षेपतस्तु यथा कर्त्तुं यथा वाऽऽचरितुं शीलमस्य सोऽयं यथाकारी यथाचारी स तथा भवति। करणं नाम नियता क्रियाविधिप्रतिषेधादिगम्या, आचरणं नाम अनियतमिति विशेषः। साधुकारी साधुर्भवति। यथाकारीत्यस्य विशेषणम्। पापकारी पापो भवति च। यथाचारीत्यस्य ताच्छील्यप्रत्ययोपादानात् अत्यन्ततात्पर्यतैव तन्मयत्वं न तु तत्कर्म्ममात्रेणेत्याशङ्क्याह। पुण्यः पुण्येन कर्म्मणा भवति पापः पापेनेति। पुण्यपापकर्म्ममात्रेणैव तन्मयता स्यात् तु ताच्छील्यमपेक्षते। ताच्छील्ये तु तन्मयत्वातिशयदर्शनं विशेषः। तत्र कामक्रोधादिपूर्वकपुण्यापुण्यकारिता सर्वमयत्वे हेतुः संसारस्य कारणं देहाद्देहान्तरसञ्चारश्च। एतन्मयुक्तो ह्यन्यदन्यद्देहान्तरमुपादत्ते। तस्मात्पुण्यापुण्ये संसारस्य कारणमेतत्। विधयो हि विधिप्रतिषेधावेव शास्त्रस्य साफल्यमिति। अथोऽथवा ब्रह्मणोऽनुशासनाः खल्वाप्तः सत्यं कामादिपूर्वके पुण्यापुण्ये शरीरारम्भकारणम्। तथापि कामप्रयुक्तो हि पुरुषः पुण्यापुण्यकर्म्मणोपचिनोति। कामप्रक्षये तु कर्म्म विद्यमानमपि पुण्यापुण्योपचयकरं न भवति। उपचिते अपि पुण्यापुण्ये कर्म्मणी कामशून्ये फलारम्भके न भवतः। तस्मात्काम एव संसारस्य मूलम्। तथाचोक्तमाथर्वणे "कामान् यः कामयते मन्यमानः स्वकर्म्मभिर्जायते तत्र तत्रेति"। तस्मात्कामनय एवायं पुरुषो यदध्यवसायस्तदकारणं विद्यमानमपोह्यतोऽवधारयति काममय एवेति। स च काममयः सन् यादृशेन कामेन यथाकामो भवति तत्क्रतुर्भवति सकाम ईदृशमिलाषमात्रेणाभिव्यक्तो यस्मिन्विषये भवति स विशेष्यमानः स्फुटीभवन् क्रतुत्वमापद्यते। क्रतुर्नामाध्यवसायो निश्चयो यदनन्तरा क्रिया प्रवर्त्तते यत्क्रतुर्भवति यादृक्कामकार्य्येण क्रतुना यथारूपः क्रतुरस्य सोऽयं यत्क्रतुर्भवति तत्कर्म्म कुरुते। यद्विषयः क्रतुस्तत्फलनिर्वृत्तये यद्योग्यं कर्म तत्कुरुते निर्वर्त्तयति। यत्कर्म्म कुरुते तदभिसम्पद्यते तदीयं फलमभिसम्पद्यते" भा०।

उत्पत्तिक्रम पु० उत्पत्तौ क्रमः। जगतामुत्पत्तिपरिपाट्याम्। स च क्रमः "ब्रह्मोति प्रजाप तैत्ति० उ० भाष्ययोर्दर्शितो यथा।

"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधिभ्योऽन्नम् अन्नाद्रेतसः पुरुषः। स वा एष पुरुषोऽन्नरसमयः" उप०। "तस्मादिति मूलवाक्यस्थितं ब्रह्म परामृश्यते। एतस्मादिति। मन्त्रवाक्येन, अनन्तरं यथा स्थितं यद्ब्रह्मैव ब्राह्मणवाक्येन स्थितम् यच्च सत्यं ज्ञानमनन्तं ब्रह्मेत्यनन्तरमेव स्थितम् तस्मादेतस्माद्ब्रह्मण आत्मन आत्मशब्दवाच्यत्वात्। आत्मा हि तत्पदस्य "तत् सत्यं स आत्मेति" श्रुत्यन्तरादतो ब्रह्मात्मा। तस्मादेतस्माद्ब्रह्मण आत्मस्वरूपादाकाशः सम्भूतः सन्नित्यन्नः। आकाशो नाम शब्दगुणोऽवकाशकरो मूर्त्तद्रव्याणां, तस्मादाकाशात् स्वेन स्वगुणेन पूर्व्वेण च कारणगुणेन शब्देन द्विगुणो वायुः सम्भूत इत्यनुवर्त्तते। वायोश्च स्वेन रूपगुणेन पूर्वाभ्याञ्च त्रिगुणोऽग्निः सम्भूतः। अग्नेः स्वेन रसगुणेन पूर्वैश्च त्रिभिश्चतुर्गुणा आपः सम्भूताः। अद्भ्यः स्वेन गन्धगुणेन पूर्वैश्चतुर्भिः पञ्चगुणा पृथिवी सम्भूता। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नाद्रेतोरूपेण परिणतात्पुरुषः शिरःपाण्याद्याकृतिमान्। स वा एष पुरुषोऽन्नरसमयोऽन्नरसविकारः। पुरुषाकृतिभावितं हि सर्वेभ्योऽन्नेभ्योऽन्नः

सम्भूतं रेतो बीजं तस्माद्यो जायते सोऽपि तथा पुरुषाजातिरेव स्यात् सर्वजातिषु जायमानानां जनकाजातिनियमदर्शनात् सर्वेषामप्यङ्गरसविकारत्वे ब्रह्मवंश्यत्वे चाविशिष्टे। कस्मात्? पुरुष एवेत्यादेः प्राधान्यात्। किं पुनः प्राधान्यं कर्मज्ञानाधिकारः पुरुष एव हि यज्ञत्वाद्दीक्षित्वाच्च अर्थी विद्वान् समर्थः कर्मज्ञानयोरधिक्रियते। "पुरुषत्वे वा विरजात्मा स हि विज्ञानेन सम्पन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद ज्ञानं वेदलोकालोकौ मर्त्यैर्नाप्नुतमोक्षतीत्येवं सम्पन्नोऽपेतरेषां पशुभावमनापिपाषे इत्याभिज्ञानलिङ्गादिभ्यश्चान्तरदर्शनात्" भा०।

एतेषाञ्च ब्रह्माधिष्ठितानामेव तत्तत्कार्यकरणेषणाविर्भावः भा०सू०भाष्ययोर्निरूपितो यथा।

"तदभिध्यानादेव तु तल्लिङ्गात् सः" सू०।"किमिमानि विबदादीनि भूतानि स्वयमेव स्वविकारान् सृजन्त्याहोस्वित् परमेश्वर एव तेन तेनात्मनावस्थितश्चाभिध्यायन् तं तं विकारं सृजतीति सन्देहे सति प्राप्तं तावत् स्वयमेव सृजन्तीति कुतः?'आकाशाद्वायुर्वायोरग्निरित्यादि''श्रुतत्वाच्छ्रुतेश्च। नन्वचेतनानां श्रुतत्वाद्यां प्रवृत्तिः प्रतिषिद्धा,नैष दोषः। "तत्तेजऐक्षत ता आपऐक्षन्तेति च भूतानामपि चेतनत्वश्रवणादित्येवं प्राप्तेऽभिधीयते। स एव परमेश्वरस्तेन तेनात्मनावस्थितश्चाभिध्यायंस्तं तं विकारं सृजतीति कुतः? तल्लिङ्गात्। तथा हि श्राह्मम्"यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरोयमयत्येष त आत्मान्तर्याम्यमृतः" इत्येवमाद्याध्यायेन भूतानां प्रवृत्तिं दर्शयति। तथा "सोऽकामयत बहु स्यां प्रजायेयेति" प्रस्तुत्य"सच्च त्यच्चाभवत् तदात्मानं स्वयमकुरुतेति"च तस्यैव सर्वात्मभावं दर्शयति। यत्तु चैतन्यश्रवणमग्नेरुक्तं,तत् परमेश्वरावेशवशादेव द्रष्टव्यं "नान्योऽतोऽस्ति द्रष्टा"इत्युक्तिभ्यन्तरप्रतिषेधात् प्रकृतत्वाच्च सत ऐक्षितः "तदैक्षत बहु स्यां प्रजायेयेत्यात्मा"। "भूतानामप्युत्पत्तिक्रमश्चिन्तितः" भा०भा०।

उत्पत्तिमत् त्रि० उत्पत्तिर्विद्यतेऽस्य मतुप् झिलां जीप्। उत्पत्तिविशिष्टे "विपदुत्पत्तिमतामुपस्थिता" रघुः।

उत्पत्तिविधि पु० उत्पत्तिः कर्मरूपत्पत्तिपक्षो विधिः। "स्वर्गकामोऽग्निमेयेन यजेतेत्यादौ कर्मरूपत्पत्तिपक्षे विधौ। विधिशब्दे विवृतिः। उत्पत्तिप्रयोजनमस्य न०।

उत्पत्तिव्युत्क्रम पु० उत्पत्तेर्व्युत्क्रमः। उत्पत्तिक्रमात् विपरीते क्रमे। स च भा०सू० भाष्ययोर्दर्शितः यथा "भूतानामप्युत्पत्तिक्रमश्चिन्तितोऽपेक्षातोऽभ्ययक्रमश्चिन्त्यते "विपर्ययेण तु क्रमोऽतउपपद्यते च" भा०सू०। "किमनियतेन क्रमेणाभ्ययः,उतोत्पत्तिक्रमेणाथ वातद्विपरीतेनेति?। नयोऽपि चोत्पत्तिस्थितिप्रलया भूतानां ब्रह्मायत्ताः श्रूयन्ते "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्तीति"। तत्रानियमोऽविशेषादिति प्राप्तम्। अथ चोत्पत्तेः क्रमस्य श्रुतत्वात् प्रलयस्यापि क्रमाकाङ्क्षणः स एव क्रमःस्यादित्येवं प्राप्ते ततोब्रूमः विपर्ययेण तु प्रलयक्रमोऽत उत्पत्तिक्रमाद्विपरीतक्रमेण। तथा हि लोके दृश्यते येन क्रमेण सोपानमारूढस्ततो विपरीतेन क्रमेणावरोहतीति। अपि च दृश्यते बदोजातं घटाद्यवयवजाते ब्रह्मावयवेति अङ्कुरश्च जातं छिन्नकरकादि अवभासमध्ये तीत्यतश्चोपपद्यते यत्,यत् पृथिव्यङ्कुरोजाता सती स्थितिकालव्यतिक्रमावपोऽपीयात्, आपश्च तेजसोजाताः सत्यस्तेजोऽपीयुः,एवं क्रमेण सूक्ष्मसूक्ष्मतरसूक्ष्मतमान्तरमनन्तरं कारणमेतीत्य सर्वं कार्यजातं परमकारणं परमसूक्ष्मं ब्रह्माप्येतीति वेदितव्यम्। न हि स्वकारणव्यतिक्रमेण कारणकारणे कार्याध्यवोह्याः। स्वतावप्युत्पत्तिक्रमविपर्ययेणैवाभ्ययक्रमस्तत्र तत्र प्रदर्शितः। "जगत्प्रतिष्ठा देवर्षे! पृथिव्यप्सु प्रलीयते। ज्योतिःभापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते"इत्येवमादौ। उत्पत्तिक्रमस्तूत्पत्तावेव श्रुतत्वाद्याध्ये भवितुमर्हति न चावयोर्व्यत्वादध्येनाकाङ्क्षते। न हि कार्ये म्रियमाणे कारणाध्ययोयुक्तः कारणाध्ये कार्यस्याव्यवस्थानानुपपत्तेः। कार्याध्ये तु कारणावस्थानं युक्तं मृदादिषूदं दृष्टत्वात्" भा०।तदेतत् वेदा०प०श्लोकेनाह यथा।"भूतानां भौतिकानाञ्च न कारणक्रमेण लयः कारणक्रमलये कार्याणामवयवनरेष्वावस्थानानुपपत्तेः किन्तु सृष्टिक्रमविपरीतक्रमेण तत्तत्कार्यनाशे तत्तज्जनकादृष्टनाशस्यैव प्रयोजकतया उपादानाशस्याप्रयोजकत्वात् अन्यथा व्यायमतेऽपि महाप्रलये पृथिवीपरमाणुगतरूपरसादेरविनाशापत्तेः। तथा च पृथिव्या अप्सु, अपां तेजसि, तेजसोवायौ, वायोराकाशे, आकाशस्य जीवाहङ्कारे, तस्य चाविद्याभिलीनरूपएव प्रलयः। तदुक्तम् विष्णुपुराणे "जगत्प्रतिष्ठा देवर्षे! पृथिव्यप्सु प्रलीयते। तेजस्यापः प्रलीयन्ते तेजोवायौ प्रलीयते। वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते। अव्यक्तं पुरुषे ब्रह्मन्निष्कले सम्प्रलीयते। पुरुषाच्च परं विप्रनिष्ठा साक्षा सा परा गतिः"।

उत्पत्य अव्य० उत्+पत-ल्यप्। ऊर्द्धं गतित्वेऽर्थे उत्पतनकर्त्ता मयू०। जन्मप्रभृत्युक्ते

उत्पथ पु० उत्क्रान्तः पन्थानम् आश्रा० समा० अच्। गत्यपथातिक्रान्ते २न्याय्यरीत्यतिक्रान्ते च। भिन्नपर्य्यादतया अपशब्दः मन्थाः उद्भावे प्रा०स० अच् समा० कदर्य्ये पथि "गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः। उत्पथप्रतिपन्नस्य न्याय्यं भवति शासनम्" भा० आ० १५०अ०। "प्रसदात्युत्पथं नेतुं कामक्रोधव शानुगम्" मनुः। "क्लिष्टावरोधाक्लमतत्पथेन गाम्" माघ०

उत्पन्न त्रि० उद्+पद्-क्त। उद्भूते। "औरसे पुनरुत्पन्ने ततोयांशहराः सुताः" स्मृ० "उत्पन्नस्य पुनरुत्पादः" न्यायप्र० उत्पन्नेन हरति उत्पन्ना० ठञ्। औत्पत्तिके तेन हारके त्रि०।

उत्पल न० उद्+पल-अच्। १नीलपद्मे, २कुमुदादौ, ३कुष्ठौषधौ च। उत्क्रान्तं पलं मांसम् आश्रा० समा०। ४मांसशून्ये त्रि०। "गण्डस्वेदापनयनकृज्जाल्मलग्रन्थिभेदनोत्पलानाम्" भैष०। "यत्रोत्पलदलश्यामाश्चाषाक्षुरहरिद्राम्" "शुकपुच्छनिर्णोत्पलतां प्रपेदे" "नवपलाशं कमलादिरोत्पलम्" रघुः "अन्योन्यसक्तपीडयदुत्पलाक्ष्या:" कुमा०। तच्च त्रिविधं नीलं रक्तञ्च तच्च "ध्रुवं नीलोत्पलपत्राक्ष्या" मनु०।

उत्पलगन्धिक न० उत्पलस्य गन्धइव गन्धोऽस्य इत् समा० संज्ञायां कन्। गोधीवाक्ष्ये वल्मीके।।

उत्पलपत्र न० उत्पलस्य पत्रमिव। १तिलकभेदे स्त्रीत्वं लक्षणादौ २लक्षिते च। ङीप्। इन्दीवरख्ये वृक्षे।

उत्पलपत्रक न० उत्पलपत्रमिव कन्। उत्पलपत्राकारे शस्त्रतोक्ते शस्त्रभेदे। अङ्गधारशब्दे २७५ पृष्ठे तल्लक्षणादि दर्शितम्। "छिन्द्युत्पलपत्रमुद्धिनोत्पलपत्रधाराभिः छेदने भेदने च" शब्द०।।

उत्पलभेद्यक पु० शस्त्रतोक्ते कर्णवेधाङ्गतिभेदे। स च पञ्चदशविधः। तल्लिङ्गलक्षणादि शब्द० दर्शितं यथा।

"तत्र समासेन पञ्चदशकर्णवेधाङ्गतयः। तद्यथा नेमिवेधाभेद्य उत्पलभेद्यको वल्लूरक आसङ्गिकोगण्डकर्ण व्याघ्रार्गो निर्व्यूढिको व्यायोजिमः कपाटसन्धिकोऽर्द्धकपाटसन्धिकः संक्षिप्तो स्त्रीकर्णो वल्लीकर्णो वल्लिकर्णः लाकोडक इति। तेषु पृथुलायतसमोभयपार्श्वभेदिनेमिवेधाभेद्यः। इत्यायतसमोभयपार्श्वोत्पलभेदाङ्गः। शुद्ध इत्तसमोभयपार्श्वभल्लूरकः। अभ्यन्तरदीर्घैकपार्श्वनिरायतक्षिप्तः। बाह्यदीर्घैकपार्श्वनिर्गतशल्कर्क्षः। अपार्श्वद्वयभयतोऽभ्याकार्यः। पीठोपमपार्श्वद्वयतः, क्षीणपुच्छाश्रितो निर्व्यूढिमः। स्थूलाणुसमविषमपार्श्व्योर्योजिमः। अभ्यन्तरदीर्घैकपार्श्वनिरितरालपार्श्वः कपाटसन्धिकः। बाह्यदीर्घैकपार्श्वनिरितरालपार्श्वोर्द्धकपाटसन्धिकः। तत्र हेयते कर्णबन्धविकल्पाः साध्यानेषां लक्षणमिरेवाङ्गतयः प्रायेण व्याख्याताः। संक्षिप्तादयः पञ्चाशाध्यालक्षणमुक्तलक्षितत्तत्पार्श्वनिरितरालपार्श्वाः संक्षिप्तः। अनधिष्ठानपार्श्वाः पर्य्यन्तयोः क्षीणमांसौ क्षीणकर्णः। तत्र विषमाल्पपार्श्वस्त्रीकर्णः। अचिरसंस्थलम्बशिरायत क्षुद्रपार्श्वर्यदिकर्णः। निर्मांसक्षिप्तार्द्धाल्पपार्श्वोन्नतपार्श्वः लाकोडकपार्श्वरिति"। "अत्रेऽपि तु पोकदाहरणपाकपिडकाद्यावयुक्ता न सिद्धिसुपयान्ति"।

उत्पलपा(सा)दिया त्रि० उत्पलं तदाकारपुष्पमस्त्यस्याः अर्श० अच् मत्वर्थी०। अनन्तमूलायां प्रियङ्गुलतायाम्। "इक्षादनी पयस्या च सता चोत्पलसा(पा)दिका" शब्द०।

उत्पलषट्क न० उत्क्रान्तोसारचिकित्साङ्के षट्क० अङ्के औषधभेदे। यथा "ज्वरातीसारे पेयादिक्रमः व्याख्यातेस्थितः। ज्वरातिसारी पेयां वा पिबेत् शाल्यां पृश्निपर्णीबलाविल्वनागरोत्पलधान्यकैः"।

उत्पलावती स्त्री उत्पलमस्त्यस्यां नेत्रमस्त्यस्या. मतुप् मस्य वः संज्ञायां ङीष्। अप्सरोभेदे "जाधीश० ६अ० अप्सरोकोत्पलवत्यने"। "अस्त्युत्तराजात् क्षीरोदात् पूर्वमुत्पलवत्यसौ। निःस्तता त्रिजगज्जेतुर्मोहनास्त्रं मनोभुवः। "उर्व्वशी मेनका रम्भा चन्द्ररेखा तिलोत्तमा। वपुष्मती कान्तिमती लीलावत्युत्पलावती। अमरवती पुण्यवती स्थूलकेशी कलावती। कलानिधिर्मुखनिधिः कर्पूरतिलकोर्व्वरा। अनङ्गवतिका चापि तथा कटनलोचिनी। चकोराक्षी चन्द्रवक्त्रा तथा कुलिशलोचना; प्रावड्गा तपोदेवी चारुनासा सुकर्णिका। दाक्षायणी-बली लक्ष्मीः क्षमाशुक्ला शुभानना। तपःपूजा तीर्थपूजा दानशुक्ला क्रियावती। पद्मात्मभेधिका चैव राजलक्ष्यार्थिनी तथा। अग्न्यग्निशोभिका तद्वद्राजमेधयशोभुजा। कार्त्तिक्यादिरतिर्दी च हविर्दा हुतभुक्प्रिया। इत्यादयस्तवेवं शतसंख्यातम्। एतच्छतगुणो दोषे वसन्तस्या अपि स्त्रियः"।

उत्पलिनी स्त्री उत्पलानि सन्त्यस्मिन् इनि ङीप्। १उत्पलयुक्ततायां, २कुमुदसमुदाये च। "वसुधे

वा महाराज बिभर्ती रूपमुत्तमम् । अग्निर्द्योतं पवित्रेणी योऽग्नमन्नेरिव शिखा शुभा" भा०व०८६ अ०। २तत्पवत्तुल्ये त्रि०।

उत्पवन न० उद्+पु-ल्युट्। यज्ञियपात्रादिव ज्ञारभेदे स च आश्व० श्रौ० १,३,२,३ सूत्रयोर्दर्शितो यथा। "पवित्राभ्यामाज्यस्योत्पवनम्" २सू०। "अग्निर्ज्ञाभ्यावनन्वर्णौ प्रादेशमात्रौ कुर्यो नात्यन्तयोर्गृहीत्वाङ्गुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यां पाणिभ्यां "सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति" प्रायुत्पुनाति सकृन्नन्वेव, द्विरुत्पुनाति" २सू०। "कार्यमिति शेषः। अथ किं कुर्यात्? पवित्रे कर्ये वा उत्पवनं? कार्यमित्याह तद्धयं निर्वर्तयितुमाह। प्रयच्छः सूक्ष्मच्छिद्रापवित्रेत्यर्थः। न विद्यते अन्तर्मध्ये गर्भो ययोस्तौ तथोक्तौ प्रादेशमात्रौ कुर्यौ। एवंलक्षणयुक्तौ कुर्यौ पवित्रसंज्ञौ। नानेत्यस्य सर्वार्थम्। पवित्रे अन्तरोसंस्पृष्टे अङ्गुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यां पाणिभ्यां गृहीत्वा प्रायुत्पुनाति सकृन्नन्वेव, द्विरुत्पुनाति" भा०टी०। तत्र यमन्यत्कामयेत तमन्यत्कामयेत्यवस्थारा०ऽनुक्तौ दर्शिता पूर्वेषामनुक्तमुत्पवनं विधीयते। अनेन तु यमन्यत्कामं। तत्र वैतानिके यमन्यं गृह्यो कर्मणि यमन्यत्कामयेत्येवं विनियोगः" इति। "उत्पवनप्रकारः" यत० आ०। "प्रोक्षणीषु पवित्रे भवतः। ते तत आदत्ते, ताभ्यामाज्यमुत्पुनातीत्येको वाऽउत्पवनस्य बन्धुर्मेध्यमेवैतत्करोति। स उत्पुनाति "सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिरिति" योऽवाचेवमुत्" । "अथाज्यशिष्टाभ्यां पवित्राभ्याम् प्रोक्षणीरुत्पुनाति "सवितुर्वः प्रसवऽ उत्पुनामि" एको वा उत्पवनस्य बन्धुः" २२,२३,२४,१,३,१, "द्रव्याणां त्वेव सर्वेषां शुद्धिरुत्पवनं स्मृतम्" मनुः "प्रादेशप्रमाणौ कुशमयाभ्यामुत्पवनेन शुद्धिः" कुसू०।

उत्पश्य त्रि० उद्+दृश-क्यप्। १ऊर्ध्वं प्रेक्षके। २उन्मुखे ३ऊर्ध्वदृष्टौ हेम०।

उत्पाटन न० उद्+पट-णिच्+ल्युट्। १उन्मूलने सुश्रुतोक्ते २व्रणभेदनाभेदे च। यथा 'अत ऊर्ध्वं सर्वव्रणभेदना वक्ष्यामः तोदनभेदनताडनच्छेदनावमथनमन्थनविलेखनोत्पाटनव्यधनसूचिविधनसूचिविलेखनविदारणोत्पाटनक्षयण विधिसूचिविलेखविदारणपूरणसन्धानव्रणकृमिनाशकृमिक्षिताः सन्धयन्ति"।

उत्पाटक पु० उद्+पट-भेदने णिच्-ण्वुल्। १उन्मूलके सुश्रुतोक्ते २पाल्यासपद्रवभेदे उत्पुटगन्दे विदतिः।

उत्पाटिका स्त्री उद्+पट-णिच् ण्वुल् टाप् अत इत्त्वम्। इक्षुक्षणीरन्ध्रायां त्वचि "तस्य लोमानि पक्ष्माणि त्वगुत्पाटिका बहिः। त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः" सु०उ०। उत्पाटनकर्त्र्यां स्त्रियां च।

उत्पात पु० उद्+पत-घञ्। १ऊर्ध्वपतने। उद्+पत-ण। अकस्मादागते प्राणिनां शुभाशुभसूचके दैवनिमित्ते २भूकम्पादौ ३सुश्रुतोक्ते विक्षाव्यपाल्यासवभेदे च।

"पाल्यासवास्तु विक्षाव्या दारुणाः प्राणिनोऽपि तान्। परिपोटक्षतोत्पात उत्क्लेदो दुःखवर्द्धनः। पक्ष्मणः परिवेष्टी च कर्णपाल्या गदाः स्मृताः। स्तोकमाद्यांश्चिरोत्थः दुष्टसाभिप्रवर्द्धते। कर्णशोफो भवेत्पाल्यां सरुजः परिपोटवान्। क्षणादत्यनिभः स्रस्तः स वातात् परिपोटकः। गुर्व्याभिरत्यं योगाच्छाडनोद्वर्षणादपि। शोफः पाल्यां भवेच्छ्यावो दारुपाकरुजान्वितः। रक्तो वा रक्तपित्ताभ्यामुत्पातः सगदो मतः। क्षणाद्वर्द्धतः कर्णं पाल्यां वायुः प्रकुप्यति। स्फोट्या सकर्णं कुर्याच्छोफं तद्वच्च वेदनम्। उत्क्लेदकः सकण्डूको विकारः कफवातजः। वर्द्धमाने यदा कर्णे कण्डूदारुरुजान्वितः। शोफो भवति पाल्यस्य त्वक्स्थोऽसौ दुःखवर्द्धनः। कफाच्छ्वयथुः कुर्यात् सर्वपाल्याविकारिणीः। पाल्यां स्फोटकाः पाल्यां कण्डूदारुरुजान्वितः। कफाच्छ्वयथुसिस्नग्धः पक्ष्मविपर्यासितस्ततः। छिन्नाल्पयथुकर्णां पाल्यां परिवेष्टीति स च स्मृतः"।

शुभाशुभसूचकोत्पातश्च दिव्यान्तरीक्षभौमभेदात् त्रिविधः। स च ह०सं० दर्शितो यथा "बालवेदज्ञातान् गर्गः प्रोवाच तानहं वक्ष्ये। तेषां शुक्रेणोऽङ्गं प्रकृतेरन्यत्वस्तूत्पातः। अपचारैश्च नराणामतिगर्हणः यापयत्यायुरुपति। संस्पृष्टवह्नि दिव्यान्तरिक्षभौमाश्चतुरुत्पाताः। मनुजानामपचारादपरान् देवताः खलु क्लमयन्ति तान्। तत्प्रतिघातार्थं ऋषयः शान्तिं राज्ञे प्रयुञ्जते। दिव्यं यत्कर्मवैगुण्यम् उल्कानिर्घातपवनपरिवेषाः। गन्धर्वपुरपुरन्दरचापादि यदान्तरिक्षं तत्। भौमं चरस्थिरभवं भूकम्पाग्निभिराहतं यमलक्षणैति। नाभवतीति खलुतां शान्तिं यो दिव्यमित्यके। दिव्यमपि यमलक्षणैति प्रभूतजलवाताग्नीमहीदाहैः। बहुायतने भूमौ गोदोहात् कोटिकोलात्। आस्रावतोयपाकपुरदारपुरोहितेषु कोशेषु। पाकलक्षयति दैवं परिकल्पितमेधा ऋषयः। अनिमित्तभङ्गपवनक्षेदाम्बुनिपातजल्पनाद्यानि। छिन्ना-

चायतनानां नाशाय नरेन्द्रेणानाम् । दैवतब्राह्मणकटाश्चक्रयुगेतुभद्रपतनानि । सम्यग्यांसमसादनसङ्काश न देशन्द्रपशुभद्राः । ऋषिधर्म्मपितृब्रह्मप्रोद्भूतं द्विजातीनाम् । यद्ब्रह्मलोकयाजोद्भवं यन्मूनामनिष्टं तत् । गुरु द्विजनैश्वरोत्यं पुरोधसां, विष्णुजं च लोकानाम् । स्कन्द विशाखसत्यं मातृद्विजानां नरेन्द्राणाम् । वेदव्यासे जन्मणि विनायके वैक्लवं चमूनाथे । धातरि सविश्वकर्म्मणि लोकाभावाय निर्दिष्टम् । देवकुमारकुमारीविनिताप्रेष्येषु वैक्लवं यत् स्यात् । तच्चरपतेः कुमारकुमारिकाल्लोपरिजनानाम् । रक्तःपिशाचगुह्यकमातृणामेतदेव निर्देष्टव्यम् । मासैस्त्राष्टाभिः सर्वेषामेव फलपाकः । बुद्धा देवविकारं शुचिः पुरोधाश्चक्रे [illegible] स्नानकुसुमानुलेपनवस्त्रैरभ्यर्चयेत् प्रतिमाम् । मधुपर्केण पुरोधा भर्त्तारं लिखित्वा विधिवदुपतिष्ठेत् । स्थालीपाकं जुह्वयाद्विधिवन्मन्त्रैश्च तल्लिङ्गैः । इति विबुधविकारे शान्तयः सम्पराये द्विजविबुधगणार्चा गीतस्तोत्रवाद्य । विधिवदविधिपार्थैर्वैः प्रयुक्ता न तेषां भवति दुरितपाको दक्षिणाभिश्च दक्षः" देवप्रतिमावैक्लवम् । "राष्ट्रे यस्याग्निः प्रदीप्यते दीप्यते च नेत्रवान् । मनुजेश्वरस्य पीडा तस्य वराष्ट्रस्य वित्तेया । . जलमांसार्द्रज्वलने नृपतिवधः प्रहरणे रणो रौद्रः । सैन्यामयपुरुषे च नाशो वह्निर्भयं कुलते । प्रासादभवनतोरणकेतवादिष्वनलेन दग्धेषु । नष्टिता वा यस्यात्मात् परचक्रागमो निधनात् । धूमो जग्निसमत्थो रजसमवाङ्निजं महाभयदम् । अभ्रे निष्प्रभनाशो दर्शनमपि चाङ्गि दोषकरम् । नगरवनुद्यादाग्रजमनुजानां भयकरं ज्वलनमाहुः । धूमाग्निविस्फुलिङ्गैः यस्याभ्रकेतुर्गर्भमृत्युः । आयुधज्वलनसर्पदष्टनाः कोपनिमग्नवेपनानि वा । वैक्लतानि यदि वायुधे प्रहरणाग्रे रौद्ररवसङ्गुलं वदेत् । मन्त्रविद्भिः क्षीरद्रुवात्मनिङ्गितव्यो ग्निः सर्षपैः सर्षिपा च । अग्न्यादीनां वैक्लते शान्तिरेवं देवं चाग्निं ब्राह्मणं ब्राह्मणेभ्यः" । इत्यग्निवैक्लतम् । "शाखाभङ्गे स्कन्धाद् द्वयोर्वा निदिशेद्दोर्योगम् । फलने देशभंगं दृढिने च व्याधिबाहुल्यम् । राष्ट्रविभेदश्चलतो बालवधो ऽतीव कुसुमिते बाधे । दृष्ट्वात् क्षीरस्रावे सर्वद्रव्यनाशो भवति । मद्ये वाहननाशः संग्रामः शोषिते मधुनि रोगः । क्षेत्रे दुर्भिक्षभवं मरुद्भयं निःसृते द्रविडे । गुरुविरोधे दीर्घाध्वभङ्गः शोषे च विद्युताम् । पतितानामुत्थाने क्षयं भयं दैवजनितं च । पूजितदृष्टे स्रुतौ कुसुमफलं नृपवधाय निर्दिष्टम् । धूमलक्षिन् व्याख्यायां भवेद्रूपवधार्थम् । सर्षपेषु तरुषु वापि, जलसङ्क्षयो विनिर्दिष्टः । दृष्टानां वैक्लवे दृष्टमिमांसैः फलविपाकः । स्नानगन्धधूपाम्बरपूजितस्य स्रुवं निधायोपरि पादपस्य । लात्वा शिवं रुद्रजपो स्त्र कार्यो रुद्रेभ्य इत्यत्र षड्रुद्रहोमः । पायसेन मधुना च भोजयेद्ब्राह्मणान् हुतशेषेण भूपतिः । भेदिनो निगदितान् द्विजा वैक्लते तरुवते मरुद्गणैः" । इति वृक्षवैक्लतम् । "नखे ऽजयवादीनामेकाक्षिन् द्विजिसम्भवो मरणम् । कथयति तदधिपतीनां यमसं जातं च कुसुमफलम् । अतिदृष्टिः शस्यानां नानाफलकुसुमभवो दृष्टे । भवति हि वल्लेक्षिन् परचक्रस्यागमो निधनात् । अर्घेन यदा तैलं भवति तिलानामतैलता वा स्यात् । अस्रस्य च वैरस्यं तदा च विन्द्याद्भयं सुमहत् । यत्कृतकुसुमं फलं वा यामादधश पुरारुहिः कार्यम् । सौम्यो स्त्र चरुः कार्यो निर्वापो वा पशुः यान्यं । यस्मे च दृष्टा विक्लवं प्रदेयं तत् क्षेत्रमेव प्रथमं द्विजेभ्यः । तस्यैव मध्ये चरुमत्र भौमं जात्वा न दोषान् समुपैति तज्ज्ञः" । इति शस्यवैक्लतम् । "दुर्भिक्षमनावृष्ट्यामतिवृष्ट्यां क्षुद्भयं सपरचक्रम । रोगो स्रुतृक्षुभयायां नृपवधो जलभ्रजातायाम् । शीतोष्णविपर्य्यासे नो सम्यक्तुषु च दुष्टासु । शस्यासाद्दृष्टभयं रोगभयं दैवजनितं च । अन्यर्तौ सम्पाद्यं प्रबन्धवर्षं प्रधानरूपमरणम् । रक्षो यक्षोद्योगो मांसास्थिवसादिभिर्भरश्च । धान्यहिरण्यात्यक्फलकुसुमादूर्ध्वविनिर्भेदं विन्द्यात् । अङ्गारपांशुवर्षं विनाशमायाति तद्गरम् । उपला विना जलधरैर्विक्लता वा प्राणिनो यदा दृष्टाः । क्लिन्नं वाप्यतिदृष्टौ शस्यानामीतिसङ्क्षयम् । क्षीरदतक्षौद्राणां दृष्टो रुधिरोष्णवारिणां वर्षे । देवविनाशो क्षेत्रो ऽस्रवर्षे चापि नृपयुद्धम् । यद्यग्नेर्ज्वे ज्वाला न दृश्यते दृश्यते प्रतीपा वा । देवस्य तदा सङ्क्षयमाजातं विनिर्देष्टव्यम् । अभ्रे नभसीन्द्रधनुर्दिवा यदा दृश्यते उथश रात्रौ । प्राच्यामपरस्यां वा तदा भवेत् क्षुद्भयं सुमहत् । सूर्येन्दुगजस्यसमीरणानां योगः स्फुटो दृष्टिविकारकाले । धान्यद्रुगोक्षाश्वनदक्षिणाश्च देवाद्यतः शान्तिमुपैति पापम्' । इति दृष्टिवैक्लतम् । "अपसर्पणं नदीनां नगरादग्नेश्च शुन्यतां कुरुते । गोधाश्वोष्ट्राजाखरमन्थेषां वा वृद्धादीनाम् । क्षेत्रोषधृक्षमांसवसा-

सङ्कुलकलुषाः प्रतोषणाद्यापि । परचक्रस्यागमनं नदा कथयन्ति परमार्थात् । ज्वालाधूमकणा रुदितोत्कुष्टानि चैव कूपानाम् । गीतप्रजल्पितानि च जनमरणाय प्रदिष्टानि । तोयोत्पत्तिरखाते गन्धरसविपर्ययं च तोयानाम् । सलिलाप्लवयष्टिलतौ वा महद्भय तत्र शान्तिरियम् । सलिलविकारे कुर्यात् पूजां वरुणस्य वारुणैर्मन्त्रैः । तैरेव च जपहोमं शुभमेव प्राप्नुयादिति । इति जलवैकृतम् । "प्रसवविकारे स्त्रीणां द्विजिह्वचतुष्पदिसम्भवतौ वा । कर्णनिष्क्रिकाले च देशकुलसङ्क्षयो भवति । बहुवोष्ठमक्षिगोष्ठस्त्रिस्तनीषु यमलोद्भवे मरणमेषाम् । परमासात्कृतिफलं शान्तौ श्लोकौ च गर्गोक्तौ । नार्दः परस्य विषये त्यक्त्वाप्यात्मा हितार्थिना । तर्पयेच्च द्विजान् कर्म शान्तिं चैवात्र कारयेत् । चतुष्पदाः खयंजग्धकृत्ति परभृमिषु । नगरं स्वामिनं यूथस्थया हि विनाशयेत् । इत्यद्भुतप्रकरणं समाप्तम् । "परयोनावभिगमनं भवति तिरश्चामरण्येषु वेलुनाम् । उलाया वाप्योऽन्यं पिबति खा वा खुरेण युतम् । भासलयेष्ठ विन्द्यात् तस्मिन्नि सयं परागमनम् । तत्प्रतिघातायैतौ श्लोकौ गर्गेण निर्दिष्टौ । त्यागो विवासनं दानं तस्यास्तु शुभं भवेत् । तर्पयेद्ब्राह्मणांश्चात्र जपहोमांश्च कारयेत् । व्याहृतीपाकेन धातारं पशुना च पुरोहितं । प्राजापत्येन मन्त्रेण यजेद्वडवदक्षिणम्" । इति चतुष्पादवैकृतम् । "यानं वाहनियुक्तं यदि गच्छेच्च व्रजेच्च वाहयुतम् । राष्ट्रभयं भवति तदा चक्राणां स्यादभङ्गे च । अनभिहततूर्यनादः शब्दो वा तेषां ताडितेषु यदि नायात् । व्युत्पत्तौ वा परागमो नृपतिमरणं वा । गीतरवतूर्यनादा नभसि यदा वा चरस्थिरान्यत्वम् । मृत्युनदा गदा वा विस्वरतूर्ये पराभिभवः । गोखाङ्गजयोसङ्गे दर्वीशूर्पादुपस्करविकारे । क्रोष्टुकनादे च तथा यक्षभयं मुनिवचनेदम् । यायव्येषु नृपतिर्यायुं सङ्कुशिरर्यजेत् । आ वायोरिति पञ्चौ जप्यात्र प्रयतैर्द्विजैः । ब्राह्मणान् परमान्नेन दक्षिणाभिश्च तर्पयेत् । यज्ञदक्षिणा होभाः कर्तव्याश्च प्रयत्नतः." । इति वाह्यवैकृतम् ।"पुरपक्षिणां वनचरा वन्या वा निर्भया विशन्ति पुरम् । नक्तं वा दिवचरा: जपाचरा वा चरन्त्यकृति । सन्ध्याद्वयेऽपि मण्डलमाक्रमतो मृगा विकृता वा । दीप्तां दिशमनवा क्रोशन्तः संकृता भयदाः । श्वानः प्रहृष्टरवा द्वारे वाशन्ति जम्बुका दीप्ताः । प्रविशेद्वारेन्द्रभवने कपोतको यदि वा । कङ्कुटकं प्रदोषे हेमन्तादौ च कोकिलालापाः । प्रतिलोममण्डलचराः श्येनादयाश्चाम्बरे भयदाः । स्फटचैत्यतोरणेषु द्वारेषु च पक्षिसङ्कसम्पातः । मधुवर्ष्मकाम्बोरुहसमुद्भवाद्यापि नाशाय । अभिरभ्यवयवप्रवेशनं मन्दिरेषु मरकाय । पशुयक्षव्याहारे नृपमृत्युर्मुनिवचनेदम् । मृगपक्षिविकारेषु कुर्याद्धोमान् यदर्चिषान् । देवाः कपोत इति च जप्या: पञ्चभिर्द्विजैः । सुदेवा इति चैकेन देवा गातस्य दक्षिणा । जपेच्छाकुनसूक्तं वा मनोवेदशिरांसि च" । इति मृगपक्षाद्यैवकृतम् । "यक्षध्वजेन्द्रकीलकतोरणद्वारप्रपातभङ्गेषु । तद्वत्कपाटतोरणकेतूनां नरपतेर्मरणम् । सन्ध्याह्वयस्य दीप्तिर्धूमोत्पत्तिश्च कानने ज्वलनौ । जिह्वाभावे भूमेर्दरणं कम्पश्च भयकारी । पापण्डानां नास्तिकानां च भङ्गः साध्वाचारप्रोज्झितः क्रोधमोहः । दैन्यं क्रूरो विप्रकृतासङ्गेता यस्मिन् राजा तस्य देशस्य नाशः । प्रस्फुर स्फुर छिन्धि भिन्धीत्यायुधकालाङ्गप्रपातयो वाक्यं । निगदन्त प्रस्फुरन्ते तत्रापि भयं भवत्यायुः । अङ्गारगैरिकाद्यैर्विकृतप्रेताभिषेचनं यस्मिन् । नायकचिन्तितनाथ वा क्षये क्षयं याति न चिरेण । लूतापटाकृतयश्च न सन्ध्ययोः पूजितं कल्पयुक्तम् । निर्लोच्छिष्टस्त्रीकं च यदुद्दिष्टं तद्भय याति । दृष्टेषु यातुधानेषु निर्दिशेन्नरकमाशु सन्त्रासम् । प्रतिघातायैतेषां गर्गः शान्तिं चकारेमाम् । मङ्गल्यान्योऽथ बलयो भोज्यानि खमङ्गलानि च । कारयेत नक्षेष्टं च माहेन्द्रीभिः समर्चयेत्" । इति यक्षध्वजेन्द्रकीलकादिवैकृतम् । "नरपतिदेयविनाशे केतोरुदये ज्वरे वा महेर्ज्वलोः । उत्पातानां प्रभवः खर्तुभवत्वाद्यदोषाय । ये च न दोषान् जनयन्त्यृतुजातास्तद्वदुत्पभावकृतान् । ऋषिपुत्रकृतैः स्त्रीकैर्विद्याद्देवैः कृतोत्पैः । वल्मीकाग्निमहीकम्पसन्ध्यानिर्घातनिःस्वनाः । परिवेषरजोधूमरक्तार्कोद्वमनोदयाः । कृष्णेभ्यो ज्वरसक्ते कबन्धपुष्पफलोद्गमाः । गोपक्षिमद्दहिंस्र शिवाय मधुमाधवे । नारीव्यापातवधूं ऋक्षिकार्केन्दुमण्डलम् । अनभिज्ञातनक्षत्रोदधूमरक्तनिशाकृतम् । रक्तपद्मादयं वाच्यं नभः शुभार्कोदयम् । चरितं चाम्बुसंयोगं हृद्या योषे शुभं वदेत् । मद्यायुध शरीरेभविद्युच्चक्षुष्कविरोकृतम् । कल्मोहर्तनवैकल्यं रक्तं दरणं क्षितेः । शरीरनाशुदपानानां हृद्वर्णान्तरवह्नयः । सरघं चाङ्गिरेफाणां वर्षासु न भवावहम् । दिव्यस्त्रीभूतगन्धर्वविमानाद्भुतदर्शनम् । लघरतानां भवेत्

दर्शनं च दिवाचरे। गीतवाद्यस्निग्धोषा वनपर्वतसानुषु। वस्त्रहरिणा क्षालिरघाघाः परदि स्रुताः। घीतालोलतु वारत्वं नर्दनं मृगपक्षिणाम्। रक्तोत्पलादिसच्छायां दर्शनं वाससामपी। दिशो धूमान्धकाराश्च सनभोवनपर्वताः। उच्चैः स्निग्धेंद्रवाक्षो च हेमन्ते शोभनाः स्मृताः। स्निग्धपातालीलोत्पाता विरूपाङ्गुतदर्शनम्। लक्षाङ्गुलमभ्रमाकाशं तारोल्कापातपिङ्गरम्। चित्रगौरुक्षाः स्त्रीषु गोऽजाश्वद्विपपक्षिषु। पत्राङ्कुरकृतानां च विकाराः शिशिरे शुभाः। स्रुतस्नेहभावजा स्निग्धे दृष्टाः स्त्रीणां प्रभप्रदाः। स्रुतोरन्यत्र चोत्पाता दृष्टाश्चे भयदारुणाः। उत्पातानां च या गाथाः शिष्टानां भाषितं च यत्। स्त्रियो यच्च प्रभाषन्ते तस्य नास्ति व्यतिक्रमः। पूर्वं चरति देवेषु व्याहरन्ति मानुषान्। वाचोदिता वाग्वदति सत्या स्त्रीव सरस्वती। उत्पातानू नक्षितविवर्जितोऽपि बुद्धा विख्यातो भवति नरेन्द्रवल्लभश्च। एतत्सन्निवचनं रूक्षमुक्तं मयोत्पाता भवति नरक्षिकालदर्शी" ४६ अ०। "दिव्यान्तरिक्षान्त्रयमुक्तमादौ मया फलं शुभमोभनं च। प्रायेण चारेषु समानवेषु युद्धेषु भागादिह विस्तरेण। भूयो वराङ्गमिहि रूक्ष न युक्तमेतत् वर्तुं समासतदसाविति तस्य दोषः। राजूर्मे वाच्यमिदमेव फलानुलोतिर्वृद्धिचिन्तमिति प्रथितं वराङ्गम्। स्वरूपमेव तस्य तत् प्रकीर्तितानुकीर्तनम्। ब्रवीम्यहं न वेदिदं तथापि मे श्रुत वाच्यता। उत्तरदीधिनता द्युतिमन्तः सोमसुभिश्चियाव समताः। स्निग्धवर्णगता द्युतिश्रीणाः स्रुतयतस्करस्नुकराक्षे। लोकानारमते भयुक्षे एवस्ये च गिरान्त्रभविष्णौ। निर्घेराः क्षितिपाः सुखभाजः संस्तुताच जना सतरोगाः। पोढ्वन्ति यदि स्निग्धां मघां रोहिणीं श्रवणमैन्द्रमेव वा। प्रोक्ष्या सूर्यसपरे पक्षाद्दा पश्चिमा दिनत्रयेण पीडयते। प्राच्यां चेद्वजवद्वस्थिता दिनान्ते प्राच्यानां भवति हि विप्रकोपपाचाम्। मध्ये चेद्भवति हि मध्यदेशपीडा स्रुतैर्मेघैस्तु रुचिरैमयूखवद्भिः। दक्षिणां वस्तमाश्रितेषु तैर्दक्षिणापथपतीनां स्रवः। क्षीणस्रुततनुभिश्च विपक्षः स्रुतदेवकिरणाश्चितैः शुभम्। उत्तरार्णे स्रुतमयूखाः पालिकराक्षे तत्पतीनाम्। ब्रह्मणोरा भवत्यर्घा दोषकरा; स्रुतैर्वस्तपाचाम्। नक्षत्राणां तारकाः स्यस्तारा धूमच्छायाविस्तुकिरणाश्चिनाचेत्। आलोकं वा निर्मिमित्ते न याति याति ध्वंसं सर्वलोकः समूहः। दिवि भाति यदा तृप्तिनां युगं द्विजहरितीव तदाशु शुभा। तदनलरवर्णरुचो र्कयुगे जगतः प्रलयक्षितः प्रभवति। तनीनभिजितं ध्रुवं मघवतश्च भं संस्तृयतु शिखी घनविनाशजात् कुपक्षकर्मेक्षा शोकदः। भुजङ्गमघ ऋक्षेयुवति वृष्टिनाशो ध्रुवं क्षयं व्रजति विद्रुतो जनपदश्च बालाकुलः। प्रागद्वारेषु चरन् रविसुतो मघत्रयेषु करोति च वक्रम्। दुर्भिक्षं कुरुते भयसस्यं मित्राणां च विरोधमवृष्टिम्। रोहिणीयकटमर्कनन्दनो यदि भिनत्ति रुधिरोऽथवा शिखी। किं बहाभि यदनिष्टसागरे जगदेषमुपयाति सङ्क्षयम्। उदयति सततं यदा शिखी चरति भयक्रममेवमेव वा। अनुभवति पुराकृतं तदा फलमशुभं सचराचरं जगत्। धनुःस्थायी स्रुतो रुधिरसदृशः क्षुद्भयकरो बलोद्योगं चेन्दुः कथयति जयं लाक्ष्य च यतः। अवाक्शृङ्गो गोघ्नो निधनमपि सस्यस्य कुरुते ज्वलन्धूमायन् वा नृपतिमरणायैव भवति। स्निग्धः स्रुतः समशृङ्गो विशालस्तुङ्गोदग्विचरत्सागवीथ्याम्। दृष्टः सौम्यैरशुभैर्विप्रयुक्तो लोकानन्दं कुरुतेऽतीव चन्द्रः। पित्र्यमैत्रपुरुकृतविधाताष्ट्रमेत्र च युनक्ति यदाशुः। दक्षिणेन न शुभो स्थितलक्ष्याद् यद्युदक् चरति मध्यगतो वा। परिघ इति मेघरेखा यातिर्यग्भास्करोदयेऽस्ते वा। परिधिस्तु प्रतिसूर्यो दण्डस्त्वृजुरिन्द्रचापप्रभः। उदये ऽस्ते वा भानोर्यदि दीर्घा रश्मयस्तमोघाते। सुरचापस्तृतु यद् रोहितमैरावतं दीर्घम्। अङ्गारमयाल्लक्ष्या व्याप्तीभूता न तारका यावत्। तेजः परिस्थानिमस्त्वाद् भानोरुदयं यावत्। तस्मिन् सन्ध्याकाले चित्रैरैतैः शुभाशुभ पाक्यम्। सर्वैरेतैः स्निग्धैः सद्योवर्षं भयं रूक्षैः। अच्छिन्नः परिघो वियच्च विमलं ग्रामा मयूखा रवेः स्निग्धादीधितयः सितं सुरधनुर्विद्युच्च पूर्वोत्तरा। स्निग्धो मेघतरङ्गविवाकरकैरालिङ्गितो वा यदा वृष्टिः स्याद्यदि वार्कमण्डलसमये मेघो मङ्क्षाच्छादयेत्। जराद्गो वक्रः क्रतुस्तो रूक्षः काकादीर्वा चित्रैर्विद्धः। यस्मिन्देशे रूक्षवाक्कलभावः प्रायो रात्रः। वाहिनीं समुपयाति पुरतो मांसभक्ष जगणनो युयुत्सतः। यस्य तस्य बलविद्रोवक्षान् अपगैस्तु विजयो विपक्षजैः। आलोहटते यदि वाजमये गन्धर्वपुरप्रतिमा ध्वजिनी। चित्रं निर्घातश्च तदा भवतेः प्राप्तं समरं समयं प्रवदेत्। यस्या यात्रा द्विजरुक्षमयुक्ता रूक्षा स्निग्धा स्रुतपवना च। यात्रुभारवा

जनपदानां वस्तेरुक्ता रुधिरनिभा वा। यद्विस्तरेणोक्तमिहं मुनिभिस्तद्विचिन्त्यं सर्वं मया निगदितं पुनरुक्तवर्जम्। श्रुत्वापि कोकिलरुतं बलिभुग्विरौति यत्तत्स्वभावजनितस्य किमत्र जेतुम्" ४७अ०। एवमन्येऽप्युत्पाताः सन्ति विस्तरभयान्नोक्ता आकरे दृश्याः उत्पात विषये मङ्गणकर्मवर्ज्यकालव्यवस्था रघुनन्दनेन दर्शिता यथा "गर्गः। दाहे दिशाञ्चैव धराप्रकम्पे वज्रप्रपातेऽथ विदारणे वा। धूमे तथा पांशुकरप्रपाते न कारयेन्मङ्गलिकादि कार्यम्। उल्कापाते च निर्घाते तथैवाकालवर्षणे। छिन्ने सूर्ये विनिर्दिष्टे न कुर्यान्मङ्गलक्रियाम्। धूमकेतौ सप्तरात्रे पक्षणे चन्द्रसूर्ययोः। पक्षाणां सङ्करे चैव न कुर्यान्मङ्गलक्रियाम्। छिन्ने सूर्ये वा विसूर्ये वा दृष्टा गगनमण्डले। रात्रौ यत्रधनुर्वच्च मङ्गलानि विवर्जयेत्। दिग्दाहे दिननेकन्तु पक्षे सप्त दिनानि च। भूमिकम्पे च सम्भूते त्र्यहाणि परिवर्जयेत्। उल्कापाते च नित्यं धूमे पञ्च दिनानि च। वज्रपाते दिनमेकं वर्जयेत् सर्वकर्मसु" ! भोजराजः "पक्षे रवीन्दोरवनिप्रकम्पे केतूद्गमोल्कापतनादिदोषे। व्रते दशाहानि वदन्ति तज्ज्ञास्त्र्योदशाहानि वदन्ति केचित्"। "पक्षणकाले भूकम्पोल्कापातवज्रपातादिदोषसमाहारे त्रयोदशाहं अशुद्धम्। किञ्चिदूनतत्समाहारेऽपि दशाहम्। पक्षणाद्योत्पातदोषे त्र्यहमिति" वाचस्पतिमिश्राः। अत्र स्मृतिसागर धृतवारसंग्रहे। "राज्यादिमहासिद्धौ यज्ञदानतपःसु च। क्षौमस्वाध्याययोश्चैव वर्जयेद्ग्रहणत्रयम्। जलहोमे महादाने वर्जयेत् सोमजे मखे। तपःस्वाध्याययोश्चैव चिरात्रे त्रयोदश" इति व्यवस्था अन्यत्र। "उल्कापाते भवेत् क्षय्ये अकालवर्षगर्जिते। वज्रकेतूद्गमोत्पाते पक्षणे चन्द्रसूर्ययोः। प्रवासात्तु व्रजेत् व्रतः सप्तरात्रमतः परम्। ब्राह्मणः क्षत्रियो वैश्यस्त्रयोदश कर्म त्रिरात्रकम्। शूद्रस्त्र्यहं च चैकरात्रं सर्वं कर्म समाचरेत्"। परायरः। "प्रवासे सप्तरात्रं स्यात् त्रिरात्रं व्रतवन्धने। एकरात्रं परित्यज्य कुर्यात् पाणिग्रहं पक्षे"। भृगुः। "राजन्यानां तु सप्ताहं ब्राह्मणानां त्र्यहन्तथा। शूद्रस्यार्द्धदिनं प्रोक्तं सर्वकार्येषु वै भृगुः"। शूद्रस्यापद्विषयम्। अस्य दत्तुपक्षत्वम्। पक्षणादावप्येवमेवाशौचं व्रत पठितत्वात्" मद०त०। गौडधारायां तु विशेष उक्तः। नारदः "अनिष्टे त्रिविधोत्पाते सिंहिका सुतदर्शने सप्तरात्रं न कुर्वीत बालोद्वाहादि मङ्गलम्" यविष्ठः सर्वगासे दिनान्यष्टौ सर्वकार्येषु वर्जयेत्। षट्दिनानि त्रिभागोने अर्द्धमासे चतुर्दिनम्। चतुर्थांशे त्रिरात्रं स्यात् पक्षणे चन्द्रसूर्ययोः" नारदः "उत्पातपक्षणादूर्द्धं सप्ताहं निखिले त्यजेत्"। अङ्गिराः "सर्वग्रासे तु सप्ताहमर्द्धग्रासे दिनत्रयम्। त्रिभागे कादुलतोग्रासे दिनमेकं तु वर्जयेत्" "अनयोर्विषयव्यवस्था देशभेदेनाचारभेदेन चावगन्तव्या" मी०भा०। अत्यावश्यककार्ये परिहारस्तत्रोक्तः ज्योतिर्निबन्धे "दिनानि पञ्च वह्निस्थदिनं गर्गस्तु कौशिकस्त्वेकम्। यवना चर्य्यस्य मते पञ्च मुहूर्त्तांश्च दूषयति"। प्राशुशुक्रराहुप्रदर्शित शुभोत्पातेदुंष्टमेव दिनं वर्ज्यम्। "शुभदोत्पातेषु दुष्टं दिनम्" मुहूर्त्तचि० उक्तेः। एवञ्च आत्मादिव्यवस्थापितं विवाहे पक्षणे एकदिनवर्जनम् अल्पपापविषयमापद्विषयं वा उक्तवचनजातसामञ्जस्यात्। यस्त्वादिविषये विशेषः पक्षणशब्दे वक्ष्यते "एकतालद्वयोत्पातपवन प्रेरितोगिरिः" रघुः। ओषाग्रासे मतस्तरोत्पातवातः" माघः। "उत्पातेन ग्रामिते च" भा०। "उत्पातगृहदुष्टञ्च" ज्यो०।

उत्पातक त्रि० उत्पातयति उत्पातं जनयति उद्+पत-णिच् ण्वुल् ।उत्पातजनके उद्+पत-ण्वुल्। २ऊर्द्धपतनशीले च। "दंशोत्पातकभल्लूकमल्लिकामशकाहतम्"। भा० स्वर्गा० २अ०।

उत्पाद पु० उत्+पद-भावे घञ्। १उत्पत्तौ "दुःखे च योषितोत्पादे शाखाक्रच्छेदने तथा" भा० उत्पत्तिशब्दे विवृतिः उत्क्लिष्टप्रभृतीनामेन। "उत्क्लिष्टप्रभृते त्रि०।

उत्पादक पु० ऊर्द्धस्थिताः पादा अस्य कप्। अष्टपदे शरभाख्ये गजारातौ ।पशुभेदे तस्य पृष्ठस्थचतुरश्चत्वादूर्द्धपादत्वम्। उत्-पद-णिच्-ण्वुल्।२पितरि पु०। ३उत्पादनकर्त्तरि त्रि०। "उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता" "आकुरुत्पादकं केचिदपरे जनिमं विदुः" "नोत्पादकः प्रजाभोगी तत्रैवाण्डनाखपि" मनुः। स्त्रियां टापि अत इत्वम्। उत्पादिका ४उत्पादकस्त्रियां ५छिन्नोच्चिटायां वाच०चि० ६पूतिकायां भरतः ७हेक्किकानामकोटे च स्त्री त्रिका०।

उत्पादन न० उद्+पद-णिच्-ल्युट्। जनने उत्पत्तिकरणे "उत्पादनमपत्यस्य जातस्य परिपालनम् तथा" मनुः

उत्पादशय पु०उत्पादः ऊर्द्धस्थितपादः शम् शेते शी-क्विप्। (टिटिर) ।टिट्टिभपक्षिणि हेमच०। २शिवौ च। त्रयोः

उत्तानपादतया शयनात्तथात्वम् । उत्पादं शयनमस्य उत्पादशयनोऽश्वत्थः ।

उत्पाटित त्रि० उद्+पट्–णिच्–कर्मणि क्त । जनिते । "अध्वनारभमाणस्य विभोरुत्पाटिता: परैः" माघः ।

उत्पाटिन् त्रि० उद्+पट्–णिनि । १उत्पत्तिशीले । "सर्व्व-सुत्पादि भङ्गुरम्" हितो० । उत्पादयति णिच् णिनि । २उत्पादके । "दु:खोत्पादि यदेहे इदं क्षिपन् प्राणकर-जन्मा" वा०रा० उभयतः स्त्रियां ङीप् ।

उत्पाद्य अव्य० उद्+पद्–णिच्–ल्यप् । १जनयित्वेत्यर्थे "क्री-त्वा स्वयं वाप्युत्पाद्य" मनुः । "पुत्रानुत्पाद्य संस्कार-दक्षे चैवं प्रकल्पयेत्" स्मृतिः । कर्म्मणि यत् । जननीये त्रि० । "स्तावश्य उत्पाद्य ध्रुवास्तल:" कुमा० ।

उत्पाली स्त्री उत्पति पालयति पाल–अण् गौरा० ङीष् । आरोग्ये शब्दच० ।

उत्पाव पु० उद्+पु "उदि श्रयतियौतिपूङ्भ्य:" पा० अप् बाधित्वा वञ् । उत्पवने यज्ञियपात्रादेः संस्कारभेदे

उत्पिञ्जर(ल) त्रि० उद्+पिञ्ज अलच् वा ह्रस्व र:। अत्यर्थ-कृते । "कुर्व्वाणस्तृणिञ्जरजातपत्रै:" माघः । उत्-पिञ्जरीभूतदन्तैरित्यर्थ: रक्तयोरभेदः" मल्लि० । "तदुत् पिञ्जलकं युद्धमाखेटवासुरोपमम्" भा०द्रो०२५अ० ।

उत्पिब त्रि० उद्+पा–ब । उद्गत्य पायिनि ।

उत्पिष्ट त्रि० उद्गतः पिष्टं उद्+पिष–क्त । उद्गत ज्ञत मेषजे १उन्माथिते । "यन्त्रिसुक्ततृपिष्ट विच्छिष्ट विव-र्त्तितवल्लिप्रमतिच्छिन्नं तिर्य्यक्छिन्नमिति यड्विधम्" सुश्रुतोक्ते यड्विधयन्त्रिसुक्तकपेऽस्त्रिभङ्गे तत् कार्य्यं तत्रैव "विशेषेणोत्पिष्टे यन्त्रावुभवतः शोफावेदनाप्रादुर्भावो-विशेषतस्तत्र नानाप्रकारा वेदना रक्तौ प्रादुर्भवन्ति" ।

उत्पीड त्रि० उद्–पीड–अच् । संघर्षणे १पीडने २संघा-धके च । भावे घञ् । ३उत्प्रथने । "न तु बाधवरोत्-पीडाहिंसावत्सङ्गुलक्षणम्" भा०व०२१अ० "आबाह्वन्तौ नयनसलिलोत्पीडरुद्धावकाशाम्" मेघ० । ख्युट् । उत्-पीडन तत्र न० । क । तत्रैव स्त्री । अच् उत्पीडवत् उत्पीडाकारके । "अन्योन्यसत्पीडवदुत्पलाक्ष्या:" कुमा० । स्त्रियां ङीप [पुष्कयते ।

उत्पुच्छ नामधातुः पुच्छमुद्गच्छति उद्+पुच्छ+णिङ् उत्-

उत्पुच्छ पु० उत्क्षिप्तः पुच्छोवेन प्रा०व० वा क्षिप्तपुच्छोवः । ऊर्द्धक्षिप्त पुच्छे पशौ ।

उत्पुट त्रि० उद्घाटितं पुटमस्य प्रा०व० वा घाटितपुटोवः । पुटभुक्ते प्रफुल्ले । तेन निर्वृत्तम् सङ्घादि०अण् । औत्-पुट तेन निष्पाद्ये त्रि० । तेन हरति उत्सङ्कादि० ठञ् औत्पुटिक तेन हारके त्रि० स्त्रियां ङीप् ।

उत्पुटक पु० उद्+पुट–कन् । सस्यतोक्ते धान्यासपदार्थभेदे । "अतऊर्द्ध नामलिङ्गे वक्ष्ये धान्यासपदार्थान् । उत्पाटक-श्चोत्पुटक: प्रोक्त: कणडुयुतोभटम् । अवमन्थ: सक-णडुको धान्यिको जम्बुलस्तथा । खारी च दाक्षवार्षं च द्रोणेषा क्रमश: क्रियात्" । लेपस्तूत्पुटके दद्यात् तैल मेभिश्च साधितम्" सुश्रु० ।

उत्पुत त्रि० उद्+पु–क्त । पवित्रादिना शोधनसंस्कारे पात्रादौ । स्फुटपुटे उत्पवितोऽश्वत्थ त्रि० । तेन हरति उत्सङ्कादि० अण् । औत्पुत तेन हारके त्रि० ।

उत्पेय त्रि० उद्गतं पेयम् । उद्गतपेये जलादौ ।

उत्प्रभ त्रि० उद्गता प्रभाऽस्य प्रा०व० मतलोप: । १उद्गत प्रभान्विते २उदर्च्चिषि वह्नौ पु०हेम० ।

उत्प्राग्रन न० उद्गतं प्राग्रम् । उक्तोक्ष्ण भोजने

उत्प्रास पु० उद्+प्र+अस–दीर्घादित्वात् घञ् । उपहासे । "प्रियं शोत्प्रासवक्रोक्त्या मध्याधीरा दहेद्यथा" सा०द० ।

उत्प्रेक्षण न० उद्+प्र–ईक्ष–भावे ल्युट् । १उद्भावने २चिन्तादिना कस्यचित् पदार्थस्य सम्भावने । ३उद्भा-वके च । णिनि । उत् प्रेक्षिन् तत्कारके त्रि० स्त्रियां ङीप्

उत्प्रेक्षा स्त्री उद्+प्र+ईक्ष–अ । उद्भावने अर्थालङ्कारभेदे अलङ्कारशब्दे पृष्ठे २८५विवृतिः । [मज्जने

उत्प्लवन न० उद्+प्लु–ल्युट् । उपरि प्लवने (भासा) अनि

उत्प्लवा स्त्री उत्प्लवति उद्+प्लु–अच् । नौद्यवां शब्दच०

उत्फाल पु० उद्+फल–घञ् । १उल्लम्फे २उद्गतोविदारके च

उत्फुल्ल त्रि० उद्+फल–क्त नि० । १विकसिते द्रव्यानाम-न्योन्यविश्लेषेण प्रकाशिते "उत्फुल्लनीलनलिनोदर तुल्यभास:" माघः । २उत्थाने त्रि० ३स्त्रीयां गुप्तेन्द्रिये न० मेदि० ।

उत्स पु० उनत्ति क्लेदेन उन्द्–स किच्च नलोप: । पर्व्वताद्रे: १झरणस्थाने । २जलप्रवाहे च "आविद्धिद्युत्स्वजं गौतमाय तण्डुलै" ऋ०१,५,४,५, "विष्णो: पदे परमे मध्व उत्सव:" ऋ० १,५४,५ यत्र सायं विष्णुपद-मुदाहृतम्" २,२४,४, "उत्सो वा तत्र जायतां हृदो वा पुण्डरीकवान्" यजु०६,१०६,१, उत्से भव: उत्सा० अञ् । औत्स तद्भवे त्रि० ३अम्बुभेदे तत: गोत्रे अत्रादि०फक् औत्सायन तद्गोत्रे युवा० स्त्रियां ङीप्

उत्सक्थ त्रि॰ऊर्द्धं गते सक्थिनी अस्य ब समा॰ स्त्रियां ङीष्। ऊर्द्धसक्थे "उत्सक्थ्या अवगुदंधेहि समक्षि चारया दृषत्" यजु॰ २१,२१।

उत्सङ्ग पु॰ उत्पन्न सजतेऽत्र उद्+सन्ज आधारे घञ्। १मध्यभागे "दरीष्टेहोत्सङ्गनिषक्तभासः" कुमा॰ "दृषदोवासितोत्सङ्गाः" रघुः। "तत्सङ्गकृतोत्सङ्गबलिक्रियाभिः" रघुः "यच्चोत्सङ्गे निहितमसकृद्दुःखदुःखेन गात्रम्" मेघ॰। २क्रोडे "तस्योत्सङ्गप्रणयिन इव स्रस्तगङ्गादुकूलाम्" "उत्सङ्गे वा मलिनवसने सौम्य! निक्षिप्य वीणाम्" मेघ॰ऊर्द्धं तया सजतेऽत्राधारे घञ्। ३उपरिभागे "सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः" मेघ॰ उत्क्रान्तः सङ्गम् अत्रा॰ स॰। ४सन्यासिनि सङ्गरहिते तत्त्वज्ञे हा॰स॰। ५ऊर्द्धगतः संसर्गे च।

उत्सङ्गादि स्त्रीतीत्यर्थे ठञ्निमित्ते "स्त्रीत्युत्सङ्गादिभ्यः" पा॰ उक्ते गह्यसमूहे स च गण उत्सङ्ग उदुप उत्पुत उत्सङ्ग उत्पुट पिटक पिटाक" औत्सङ्गिकः त्रि॰कौ॰।

उत्सङ्गिन् त्रि॰उत्सङ्ग ऊर्द्धंसर्गः अस्त्यस्य इनि स्त्रियां ङीप्। ऊर्द्धसंसर्गयुक्ते।

उत्सङ्गित त्रि॰ उत्सङ्गिनः उत्संसृष्टाः कृताः उत्सङ्गिन्+तत्करोतीत्यर्थे णि-कर्मणि क्त। संसर्गयुक्तीकृते। "उत्सङ्गितोत्तुङ्गतरङ्गबाहुः" माघः।

उत्सञ्जन न॰ उद्+सन्ज-णिच् ल्युट्। १ऊर्द्धतः संयोजने उत्क्षेपणे। "सम्भाजनोत्सञ्जनाचार्यकरणेत्यादि" पा॰ तत्र उत्सञ्जने "दण्डमुद्यच्छति उत्क्षिपतीत्यर्थः" गि-कौ॰।

उत्सत्ति स्त्री उद+सद-क्तिन्। उच्छेदे।

उत्सधि पु॰ उत्सः जलप्रपाहोधीयतेऽस्मिन् धा-कि उप॰ स॰। जलप्रपाहवति कूपादौ "अर्केरूर्द्धं नुनुद उत्सधिं पिबध्यै" ऋ॰१,८८,४,

उत्सन्न त्रि॰उद्-सद-क्त।१उच्छिन्ने समूलमुच्छिन्ने २नष्टे च "मकरध्वजदुरोत्सन्नविग्रहः" काद॰ ३अत्यायासाध्ये च "उत्सन्नयज्ञ इव वा एष यज्ञातुर्मास्यानि" शत॰ब्रा॰२, ५,२,४८, दर्शपौर्णमासयज्ञातुर्मास्यानामनुष्ठानबाहुल्याभावादुत्सन्नयज्ञत्वम्" भा॰ तेन हरति उत्सन्न॰ ठञ्। औत्सन्निक तेन हारके त्रि॰।

उत्सर्ग पु॰उद्+सृज-कर्मणि घञ्। १सामान्यविधाने, तस्यापवादे बाधके सर्व्वतः प्रसृतत्वात्तथात्वम्। "क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते" पात॰भा॰। "अपवादैरुत्सर्गाः-क्षतत्राणवत्तः परैः" कुमा॰ २अन्त्ये। भावे घञ्। ३अपानवायोर्व्यापारे विण्मोत्सर्गः ४त्यागे ५दाने "तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च" मनुः "श्रीलक्षणोत्सर्गविनीतवेषाः" कुमा॰ ६समाप्तौ व्रतोत्सर्गः। "उत्सर्गमेके तुल्योपगुणत्वात्" आश्व॰श्रौ॰१,४, २१,० "स्रोतोत्सर्गो वैकस्याङ्गः" काल्या॰२४,७,२५, ७वार्षिकवेदपाठसमाप्तौ। वेदाध्ययनोत्सर्गकालश्च मिता॰ दर्शितो यथा "पौषमासस्य रोहिण्यामष्टकायामथापि वा। जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बुधः" या॰ "पौषमासस्य रोहिण्यामष्टकायां श्रावणहस्तेजलसमीपे छन्दसां वेदानां स्वाष्टौक्तविधिना उत्सर्गं कुर्यात्। यदा पुनर्भाद्रमासे उपाकर्म तदा भाद्रशुक्लस्य प्रथमदिवसे उत्सर्गं कुर्यात्। यथोक्तं मनुना "पौषे तु छन्दसां कुर्यादुत्सर्गमथ बाह्यतः। माघशुक्लस्य वा प्राप्ते पूर्वार्द्धे प्रथमेऽहनीति"। तदनन्तरमत्रिणोक्तौ रात्रौ वा विरम्य शुक्लपक्षेषु वेदान् कृष्णेष्वङ्गान्यधीयीत। यथाह मनुः "यथाशास्त्रन्तु कृत्वैवमुत्सर्गं छन्दसां बहिः। विरमेन्मासिकीं रात्रिं यद्वाप्येकमहर्निशम्। अत ऊर्द्धं तु छन्दांसि शुक्लेषु नियतः पठेत्। वेदाङ्गानि तु सर्वाणि कृष्णपक्षेषु सम्पठेदिति"। अत्रानध्यायमाह या॰ "त्र्यहं प्रेतेषुनध्यायः शिष्यर्त्विग्गुरुबन्धुषु। उपाकर्मणि चोत्सर्गे स्वशाखश्रोत्रिये तथा" "उत्सर्गे जलरूपत्विगग्नहोत्राभ्यां सहास्य विकल्पः" इति मिता॰"स्त्रीपूर्वा व्याहृतीः सावित्रीञ्च विरम्यास्य वेदादिधारभेत्" "तथोत्सर्गे" आश्व॰गृ॰३,५,१२,१३,उत्सर्जनमप्यत्र विहितः।

उत्सर्गिन् त्रि॰ उत्सर्गोऽस्त्यस्य इनि। उत्सर्गयुक्ते। "अयनमुत्सर्गिणाम्" २४,४,२२, त्रिषुभिन्नविशेषु एकस्याहेस्त्रीन्निष्टोमस्योत्सर्गेणास्योत्सर्गित्वम्" कर्कः। अयनं गयामयनम्।

उत्सर्जन न॰ उद्+सृज-ल्युट्। १दाने, २त्यागे, च। वेदोत्सर्गरूपे यज्ञासङ्कर्त्तव्ये वैदिकानां क्रियाभेदे स च आश्व॰ गृ॰ उक्तो यथा "मध्यमाष्टकायामेताभ्यो देवताभ्योऽन्नेन कृत्वाऽपोऽभ्यवयन्ति" २०सू०। "मध्यमाष्टकायकृत्यं यज्ञसाङ्गोपसंहरणार्थम्"। तेन तस्याः समीपे माघ्यां पौर्णमास्यामित्यर्थः याज्ञवल्क्येन चैवं दृश्यते। 'एताभ्यो देवताभ्यो कृत्वा सावित्र्यादिश्च अन्नम्, इत्युक्तम्। अग्निमीड इत्यादिभ्योऽन्नेन कृत्वा स्वाङ्गोपाकपदेषु मन्त्रलिङ्गात्पदे नेति बलेन नुषम् स्वदयित्वा मन्त्रं व्याख्यमिति दर्शयति, ततः क्षिप्तम्, ततो वेदारम्भ-

थम्। ततो होमशेषं समाप्यापोऽवगाह्य इत्यर्थः। भारा० "एता एव तद्देवताः प्रीणयन्ति" २१ सू०। "स्नात्वा सावित्र्याद्या नव अग्निमीड इत्याद्याश्च विंशतिं तर्पयन्तीत्यर्थः। यद्यद्देवता आदिश्य तर्पयेयुः। द्वितीयान्तं कृत्वा तर्पयामीत्येकाग्नविंशद्वाक्यानि कृत्वा तावत्कृत्वस्तर्पयेयुः" भा० ह०। "आचार्यान् ऋषीन् पितॄंश्च" २२ सू०। यश्च ब्रह्मयज्ञाङ्गं तर्पणसूक्तं तदेतद्ब्रह्मयज्ञेनैवानीतमपि आर्षमित्यर्थः। यद्यप्यो देवतातर्पणं समुच्चयार्थः। तेन प्रजापत्याद्या अपि तर्प्याः। देवतास्तर्पयन्तीत्यत्र देवताशब्दस्यापि समुच्चयार्थम् क्रमस्य तन्त्रोक्त एव" भा० ह०। "एतदुत्सर्जनम्" २३ सू०। "अस्येयं संज्ञा। ततः षण्णामानां षड्ङ्गान्यधीयीत। षण्णामानमधीयीनेत्यारभ्य एतस्मात् धर्मा यड्ङ्गाध्ययन एनेत्याकरेके। अन्ये त्वविशेषेणेत्याहुः" भा० ह०। उत्सर्गशब्दे दर्शितेऽत्र आश्वलायनेन विकल्पः आश्विनेयेन अवश्याप्यः "यौवे तु छन्दसां कुर्यादुत्क्रिरुत्सर्जनं बुधः" स्मृतिः। [स्नाने च

उत्सर्पण न० उद्+सृप्-ल्युट्। १उत्सृज्य पुरतोगतौ, २उद्ध-

उत्सर्पिन् त्रि० उत्सर्पति णिनि। उत्पतिष्णौ "पयोधरोत्सर्पिषु यौवनादयः" रघुः। "उत्सर्पिभिः प्रांशुभिवांशुजालैः" किरा० २अतिशयिते स्त्रियां ङीप्। "उत्सर्पिणी खलु मरुतां प्रार्थना" शकु० सा च हेमचन्द्रोक्ते कालचक्रान्तर्गते १कालगतिभेदे "सागरकोटिकोटीनां विंशत्या च समाप्यते। अवसर्पिण्यां मरुतां उत्सर्पिण्यां तथैव विपरीताः। एवं द्वादशभिरेर्विवर्त्तते कालचक्रमिदम्" हेम०। [पक्षायां गवि जटा०

उत्सर्या स्त्री उत्+सृ-यत्। १कृतसत्यां गर्भयोग्यावस्था-

उत्सव पु०उद्+सु-अप्। आनन्दजनकव्यापारे विवाहादौ। "कल्पिमन्नमधिकर्द्धिरुत्सवः पूर्णसत्सवमपोहनुत्तरः" "स स्नात्वा विरतोत्सवान्" रघुः। "धर्मसेतुसमाकीर्णां यज्ञोत्सवसतां शुभाम्" "कृष्णोत्सजनाकीर्णां नित्योत्सवसमाकुलाम्" भा० व०२०६ अ०

उत्सवसङ्केत पु०उत्सव आनन्दजनकः सङ्केतः स्त्रीपुंसयोः रत्यर्थमनुरागादाङ्कानम् यस्य। अस्येयं स्त्रीत्वं दाम्पत्यनियमभङ्गे स्त्रीपुंसयोरनुरागमात्रहेतवस्तैरविकारग्राहिणि पार्वतीये जातिभेदे। भा०स० अर्जुनस्योत्तरदिग्विजये "पौरवं युधि निर्जित्य दस्यून् पर्वतवासिनः। गजानुत्सवसङ्केता गजवत् यत्र पार्श्वयः, २६अ० अत्र नीलक० दर्शितरीत्यैव व्याख्या। तद्धर्मज्ञे प्रतीचीस्थेऽपि जातिभेदे "गजानुत्सवसङ्केतान् व्यजयत् भुरुवर्णभः" नकुलस्य प्रतीचीविजये २१अ० "शरैरुत्सवसङ्केतान् स जित्वा विरतोत्सवान्" रघुः।

उत्साद्न उद्+सद्-णिच्-ल्युट्। १उत्सारणे, २उद्धर्त्तने कषाय द्रव्येण क्लेदाद्यपसारणे ३उच्छेदकरणे "उत्साद्नार्थं लोकानां रात्रौ स्नन्ति ऋषीनिह" भा० व० १०२ अ०। "उत्साद्नार्थं लोकानां धुन्धुनाम महासुरः" भा० व०१००अ०। "न हि द्वैतवने किञ्चित् विद्यतेऽन्यत् प्रयोजनम्। उत्साद्नमद्य ते तेषां वनस्थानां महात्मनाम्" भा० व०२३७ अ०। स्थानान्तरनयने "क्रयणवेद्यारब्धाग प्रवर्ग्योत्साद्नेत्या०" कात्या०१४,१,१२, "उपसद्दने प्रवर्ग्योत्साद्नम्" कात्या०१८,२,१०। उत्साद्नेऽत्र उद्+सद्-णिच् आधारे ल्युट्। महावीरादिपरित्यागदेशे। "उत्साद्नदेशं गच्छन्ति सामगानामनन्तरम्" कात्या० २६,७,१०,उत्साद्नदेशं प्रति आगच्छन्ति उत्साद्नं महावीराणां परित्यागः स यत्र देशे विहितः श्रुतौ" कर्क०

उत्साद्नीय त्रि०उद्+सद्-णिच्-अनीयर्।उच्छेदे २उन्मूलनीये उच्छर्त्तनीये कषादिद्रव्ये। "कुर्याद्वृत्साद्नीयानि सर्षीच्या लेपनानि" च सुश्रु०।

उत्सादि पु०भवाद्यर्थे "उत्सादिभ्योऽञ्" पा० अञ् प्रत्ययप्रकृतिगणे। स च उत्स उदपान विकर विनद महानद महानस महाप्राण तरण तलुन (वध्यकाऽसे) पृथिवी धेनु यक्ष्म जगती त्रिष्टुप् अनुष्टुप् जनपद भरत उशीनर श्रोत्र पोलुकृष्ण(उदः स्थानदेशे) पृथद्यं भल्लकीय रथन्तर मध्यन्दिन बृहत् महत् सवत् कुह पश्चात् इन्द्रावसान उष्णिह् ककुभ् सुवर्ण देव (योन्नादक्कन्त्रयि) औत्स तडाग तृ०।

उत्सादित त्रि०उद्+सद्-णिच्-क्त। उन्मूलिते उद्धर्त्तिते च "भद्रासनेऽपविष्टः परिघाबाहुरं वभुः। सखी चन्दनसंयुक्तैः पाणीवैरभिमर्शितैः। उत्साद्तः कषायेण मलक्लिन्नैः सुशिक्षितैः" भा०द्रो०८२अ०।

उत्सारक पु०उद्+सृ-णिच्-ण्वुल्। द्वारपाले हेमच० तेन हि प्रभुद्वारतो जना दूरीक्रियन्ते इति तस्य तथा व्यपदेशः तृ०। [२क्षालने, ३स्थानान्तरकरणे च।

उत्सारण न० उद्+सृ-णिच्-ल्युट्। १दूरीकरणे

उत्सारित त्रि०उद्+सृ-णिच्-क्त। दूरीकृते चालिते "गुरुस्थानन्यस्तं गुरुत्वेन कृच्छादुत्सारितेनैवशून्यालयादिनू" शैवा०

उत्साह पु०उद्+सह्-घञ्। १उद्यमे, २प्रभावशाले, ३उत्तम

ज्ञत्वेषु २स्थिरतरे प्रयत्ने "उत्साहो बलमूर्जं स्यादिति नीतिविदां मतम्। प्रभुशक्तिर्मन्त्रमूला तस्मादुत्साहवान् भवेत्" इत्युक्ते राज्ञां ४गुणविशेषे, "चारैश्चोत्साहयोगेन क्रियायैं च कर्मणाम्" मनुः। "नीताविधोत्साहगुणेन सम्यक्" कुमा०।५कल्पने, यज्ञरत्नावली ईक्षते, मेदिनी "कार्यारम्भेषु संरम्भः स्थैर्यमुत्साह उच्यते" सा०द० उक्तलक्षणके वीररसस्य ७व्यभिचारे। स च वीररसस्य स्थायी भावः "रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेयमष्टौ प्रोक्ताः शमस्तथा" स्थायिनो विभावस्य "उत्तमप्रकृतिर्वीरः उत्साहस्थायिभावकः" तल्लक्षणं। तत्र उद्यममाने "मन्त्रोत्साहः प्रतोऽपि खगयापदादिना साधयेत्" यतुः। "सन्नद्धोऽनद्धवादी च सत्यत्साहसमन्वितः" गीता "मन्त्रोत्साहः स्मृतस्तज्ज्ञैः कृतसैन्यनिवेशकः" या०स्मृ० अस्त्यर्थे मत्वा०मतुप् इनि वा उत्साहिन् उत्साहवत् तद्विशिष्टे त्रि० स्त्रियां ङीप्।

उत्साहक त्रि०उद्+सह-ण्वुल्। उत्साहान्विते "हृज्ञाकाभ्यामिति" पा० षष्ठीनिषेधेऽपि वाजसा० षष्ठ्या समासः। कार्योत्साहकः।

उत्साहन न० उद्+सह-णिच्-ल्युट्। उत्साहजनने

उत्साहवर्द्धन पु०उत्साहं वर्द्धयति वृध-णिच्-ल्यु। वीररसे। वृध-ल्युट् वैत०। उत्साहस्य वृद्धौ न०।

उत्साहशक्ति स्त्री उत्साहएवशक्तिर्बलम्। राज्ञां विक्रमहेतौ बले। "षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साह मन्त्रजाः" अमरः। "कर्मस्थेषु कर्मसु स्त्रियाम् प्रयत्न उत्साहः" भरतिः।

उत्सिक्त त्रि० उद्+सिच-क्त। १उद्रिक्ते अतिशयिते २हृष्टियुक्ते ३उद्धते गर्विते च। "आनीवाद्स्थिरां वाचमुत्सिक्त मनसां तथा" मनुः।

उत्सुक त्रि० उत्सुवति सु प्रेरणे अितङादि० कु कन्। १दृष्टावाग्रहे काङ्क्षायां स्पृहायां २दृष्टार्थोद्युक्ते च "दिनावसानोत्सुकबालवत्सा" "श्रुत्वा राजः पिबोदन्तं मेने तत्सङ्गमोत्सुकः" "यत्नोत्सुकापि स्खलिता सपर्य्यासु" "आयङ्गोत्सुकतारकां चिरकुटस्थौ अक्षी" रघुः। उत्सुकस्य भावः अञ्। औत्सुक्य तद्भावे न०। "दृष्टाप्तवाग्रेरौत्सुक्यं कालक्षेपासहिष्णुता। चित्तसंभ्रम राखेदोर्घनिश्वसितादिकृत्" सा० द०। "औत्सुक्येन त्वरता कृतमुत्सवं व्यावर्त्तमाना स्त्रिया" रत्ना०। भट्टा० अभूततद्भावार्थे क्यङ्। उत्सुकायते उत्सुकायमाना "यस्योत्सुकायमाना त्वं न प्रतीपायसेऽल्पिके" भट्टिः

उत्सूत्र त्रि० उत्क्रान्तः सूत्रम् अत्या० स०। विधानसूत्रातीते "अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना" माघः।

उत्सूर पु० उत्क्रान्तः अतिक्रान्तः सूरं सूर्य्यम् अत्या० स०। दिनात्यये शेषस०उत सूर्य्यादयोऽव्यय। "श्रोत् सूर्यमन्यानृत स्वापयाव्युषम्"। अथ०४,५,७, "उत सूर्य्यायिनवासत सर्व्वं वासन् प्रगे निशा" भा०मा०२२८अ०

उत्सृज्य अ० उद्+सृज-ल्यप्। १त्यक्त्वेत्यर्थे "ऋदुपधात् कर्म्मणि क्यप्। २त्यक्ते त्रि०

उत्सृष्ट त्रि०उद्+सृज-क्त। १त्यक्ते २दत्ते च। "ब्राह्मणानाञ्च यत्किञ्चित् अनोत्सृष्टं तु निर्ज्जने। तत् किञ्चिदन्यो न लभेत् विभाज्यत्वं यथाक्रमम्। न वाच्यं न च तत्तीर्थे दातव्यं केनचित् क्वचित्"। ब्रह्म पु०। "मन्त्रोत्सृष्टपथः सृतिकागन्तुकादयः" या०स्मृ०।

उत्सेक पु० उद्+सिच-घञ्। १गर्व्वे, "उपदा विविधुः सम्यक् नीतसेकाः कोशलेश्वरम्" रघुः। "नीतसेकमगमद्वेदं कदाचिदिह नः कुलम्" भा० आ० ११०अ०। २उद्रेके "पातव्यं त्वासवास्वाद लोभोत्सेके गलत्यपे" सुश्रु०। ३उद्वृत्ते वस्तिः सेचने च।

उत्सेकिन् त्रि० उत्सेक+अस्त्यर्थे इनि। १अतिगर्विते २गर्वयुक्ते च स्त्रियां ङीप्। "भाग्येष्वनुत सेकिनी" भट्टिः

उत्सेचन न०उत्कृष्य आधारमतिक्रम्य सेचनम्। आधारातिक्रमेण प्लवने (उपचान)

उत्सेध पु० उत्सेधति कारणमतिक्रम्य वर्द्धते उद्+सिध-गञ्। १देहे तस्य शुक्रशोणितरूपसूक्ष्मकारणातिक्रमेण वर्द्धनात्तथात्वम्। भावे घञ्। २उन्नतौ तस्य तदभिहितभावत्वात् "पुत्रवित्तार्ज्जनात् पितेत्यादौ, पुत्रार्जितवित्त इव उत्सेत्यात्रयेऽपि इतिः तथात्वेऽपि विशेषणसमासे ब्राह्मणश्रमणादिवत् परनिपातः स्त्रियनिष्यन्दयाक्षर इत्यादिवदिति भेदः। यथा "पयोधरोत्सेधनिपातचूर्णिताः इति कुमा०। "तस्य प्रमाणमार्द्राक्षिपक्ष्मोत्सेधसदृशानि" सुश्रु०। "उत्सेधनिर्द्धूतमहोदरां भ्रजैः" माघः "तस्कायाश्चमसा दीर्घाः प्राग्रेयाश्चतुरङ्गुलाः। तथैवोत्सेधतोऽश्वत्थरन्ध्रास्तु दशभिर्यवैः" छन्दोगप० "पयोधरोत्सेधविशीर्णसंहतिं" कुमा०। कर्त्तरि अच्। ३उन्नते त्रि०। "वाक्यं श्लेष्मपुञ्जे उत्सेधमेव तं जुहुते तस्मादुत्सेधं प्रजाभयेऽभि संत्र-

यान्ति" यत०ब्रा०१२,२,२,६, "उत्तरेभ्यश्च पर्व्वतादिकं प्रासादं वा" भा०।

उत्खन पु०उद्+खन:। १उद्धरणे। व०। २गर्त्तयति लि०।

उत्खप्र लि०उत्क्रान्त: अतिक्रान्त: खप्र तस्मात्खादात् आत्मा० ब०। निद्रायां बाह्येन्द्रियाणां विकीनत्वेनमनसैव सर्व्व-व्यवहारनियमेन तद्गतिमनेव आपदवस्थावत् अतएव-नादिव्यवहारे। उत्खप्रमिव चरति क्यङ् उत्खप्रायते यथा ब्रह्मवटिके "विदूषक उत्खप्रायते" खप्रदट-घटार्थस्य उदवाचा व्यवहरतीत्यर्थ:। एवमुत्तररामः चरितेऽपि "अत्रि एत्य अज्जअत्त" इत्यादिना सीतावा उत्खप्रो वर्णित:।

उद् अव्य०उ-क्विप् तुक्"उदोऽनूर्द्धवेष्टावाम्" पा०लि०पूर्वो०द-त्वम्। १प्रकाशे, २विभागे, ३खामे, ४कर्षे, ५उत्कर्षे, ६प्राबल्ये, ७आधिक्ये, ८पूजनो, ९प्राधान्ये, १०बन्धने, ११अभावे, १२मोक्षे, "तस्य उदिति नामेति" श्रुते: १३अनुमतौ च। शब्दरत्ने उद: अर्थानभिधाय उदाहृतं यथा "उत् प्राबल्यवियोगोर्द्धकर्म्मलाभप्रकाशार्थ्य-मोक्षताभावदत्तप्राधान्यबन्धेषु" तत्र प्राबल्ये उद्भट: विद्वांसो उद्गच्छन्ति। अनूर्द्धवेष्टायां उत्तिष्ठति। लाभे पाणात् यतस्तृप्यन्ति। प्रकाशने उद्धरति पाचयेत्यर्थे उत्तुदः। मोक्षे उद्गतः। अभावे उत्पथः। दत्तने उत्तुदः। प्राधान्ये उद्दिष्टः यज्ञो उद्गाद्यः"

उदक न० उन्द-ण्वुल् नि०नलोपश्च। जले "अनीत्वा घ-तुतां धूलिमुदकं नावतिष्ठति" माघः। "यद्यत् प्रविश्य-त्युदकं नामगोत्रेच वाच्यतः। प्रोक्षिते वाजयेत्: स्यात् पूर्वं दत्तोदकः शुचिः"। वा० स्मृ०"दायानर्थं उदपाने-वर्त्मनः संप्लुतोदके" गीता। "उदकस्योद: संज्ञायाम्" पा०समासे संज्ञायामुदकस्योदादेश उदपान: उदधि: उदमेघः। क्षीरोद:। "मेघर्त्तुसाधनाकर्त्तृनधिषु" पा०। पूर्वपदस्य उदादेशः। उदमेघं मिनोति उदवासः "सप्तस्वरालोदवासततृपरा" शुभा० उदवाहनः उद-धिर्घटः पूरयितव्ये उदकवाहो घरे वा। उदकुम्भ उदकस्नाः। "यान्युदकुम्भकन्या:" भट्टिः पूर्व-पितव्य इत्यादयुक्ते: उदकपर्वत उदकस्थाली इत्यादौ न। "अन्नौदनसक्तुबिन्दुदध्नामारकारवीर्बधगाक्षेषु च" पा०। उदकन्य: उदकमन्य: (अन्यविशेषणम्)। उदौदन: उदकौदन: (उदकेन सिक्त: ओदन:)। "उदौदन" प्राप्यविद्या वर्षिष्ठमन्नमीशात्" यत०ब्रा०१३,६,३,१५। उदक्षवः (उदकमिश्रितक्षवः)। उदावन्दुः उदवन्दुः उदधारः उदकारः (जलकारकः) उदजीवः उदगाहः (जलावगाहः)पक्षे न।२उदकसाध्ये तर्पणे च। "अनड्वर्षं निखनेत् न कुर्य्यादुदकं ततः"। "ज्ञातोदकान् यस्त-स्तीर्थान्" "ज्ञानोदकं यस्मिन्नाकाशोदकमुपरिष्टा-ज्जातु "न ब्रह्मचारिण: कुर्य्युरुदकं पतिताय वै। "नाधौतोदकभाजनम्" इति च वा०स्मृ०।

उदकच्छ पु० "उदकस्नाभ्यां नाताभ्यवहारेणौदक-च्छ:" इति विष्णुसं प्रतभेदे।

उदकक्रिया स्त्री उदकेन क्रिया तर्पणम्। याज्ञवल्क्यिते जलादित्तर्पणे "एवं मातामहाचार्य्य प्रेतानामुदकक्रिया" वा०स्मृ०। "अपुत्रेणैव कर्त्तव्य: पुत्रप्रतिनिधि: सदा। "पिण्डोदकक्रियाहेतो:" श्रुति "उदकर्मोदकाद्यार्थ-दयोऽप्यत्र न०। उदकदानमप्यत्र न०। "तोयकर्मणि-चारब्धे राज्ञामुदकदायिके" भा०आ०१अ०।

उदकपरीक्षा स्त्री विवादादौ लौकिकप्रमाणाभावे कार्य्ये दिव्यप्रपञ्चभेदे ततप्रकारस्य मिता०अ०। "खलेकु माभिरक्षं वक्ष्येत्यभिधाय कम्। नाभिदघ्नोदकस्थस्य स्कन्धोपरि जलं क्षिपेत्" या० उक्तः। प्रपञ्चस्तु मिता० अ०। दि० तत्त्वे च अनुसन्धेयः।

उदकम् अव्य०उन्द्-अकमु किच्च। क्षेत्रे नगर०। क्षाया० ज्ञजि वा गतिषम्। उदकंजलमुदकंजलवा क्षेत्रं जायतेऽत्रैः।

उदकमेह पु० उदकमिव मेहः। शुक्रतोक्ते मेहभेदे। तल्लक्षणं तत्रैव "तत्र यत्तमवेदनमुदकसदृशमुदकमेही मेहति"। इत्युमेहयुक्ते ६त० पूर्वे विहितः तद्धः अस्यर्थे इनि। उदकमेहिन् तद्युक्ते लि० स्त्रियां ङीप्।

उदकल लि० उदकमस्यस्य सिध्मा०वा लच्। उदकयुक्ते व्रजभावे मतुप् मस्य वः। उदकवत् तत्रार्थे स्त्रियां ङीप्। पिच्छा० इलच्। उदकिल तत्रार्थे लि०।

उदकशुद्ध लि० उदकेन शुद्धः। १स्नाते २उदकस्पर्शेन शुद्धे च। ततः भवार्थे अण् अनुशति०हि पदवृद्धिः। औदकशौद्ध तद्भवे लि०।

उदकषट्पल न० "क्षारैः पञ्चपलैस्तु पलिकैस्त्रि गुणोदकैः। समक्षीरं घृतप्रस्थं जुहुयात्क्षीरकाखतु" चक्रदत्तोक्ते घृतभेदे।

उदकान्त पु० उदकमेवान्तः सीमा। उदकसर्व्वान्ते। "उद-खाताः पश्चिमे उदकान्ते दीक्षेरन्" आप० औ० १२, ६,२, "श्रोदकान्तात्तृतीयकुञ्जनोऽनुगमनम्" भट्ट०।

उदकीय वि० नामधातु आत्मन उदकमिच्छति उदक+क्यच्। उदकीयति अतितर्षायान्तु उदन्यति।

उदकोर्ष्य(र्य) पु०उदकेन कीर्ष:(र्य:) संज्ञायाम् उदादेश:। मद्राकरक्षे राजनिर्घ० व्यान्तः रत्नमा०।

उदकेचर पु० उदके जले चरति अच् वा सप्तम्या अलुक्। जलचरे मत्स्यादौ। "अथर्क्षमत्स्य सामद्रोराजत्वाच्च तस्योदकेचरा विषक्त इव आसत इति मत्स्याच्च" भत०मा० १२,४,२,१२ जलचरे "पणिकूर्मादौ च ते च सुस्रुते विभाजिताः ते च ज्ञानूपग्रन्थे ७२१ पृष्ठे दर्शिताः। सामान्यात्तु उदकचरोऽत्र, स्त्रियां ङीप्।

उदकोदर न० तुन्दरोगे उदरव्याधिकारकरोगे। उदरग्रन्थे विवृतिः "उदकोदरिणस्तु वातकफरक्तेज्याभ्यामित्यादि" सुश्रु०

उदक्त त्रि० उद्+अञ्च्–क्त। कूपादित उत्तोलिते। "उदक्तमुदकं कूपात्" त्रि०को०।

उदक्प्रवण त्रि० उदक् उत्तरा प्रवणं निम्नम्। क्रमोदक्षिणत उत्तरनिम्ने। "अथर उदक्प्रवणे समे वा" आश्वा० २,१,४। २उत्तरमार्गगतिहेतौ च "एष वा उदक्प्रवणोवत्तो यत्रैवंविदु ब्रह्मा भवति" आ०ब्रा०। "उदक्प्रवणः उत्तरमार्गं प्रति हेतुरित्यर्थः" भा०। "प्राचो हि देवानां दिगतो उदक्प्रवणोदीची हि मनुष्याणां, दिग्दक्षिणतः पुरोभं प्रत्यङ्मुखत्वेन वै दिक् पितॄणां सा यद् दक्षिणा प्रवणा स्यात्" शत०ब्रा०। १,२,५,१७।

उदक्य त्रि०उदकमर्हति दण्डा०यत्। १जलार्हे स्त्रीग्रादौ। २ततस्नानार्हेऽशुचौ ३अशुद्धत्वात् त्याज्ये स्त्री। तस्याश्च स्नानदिवसपर्यन्तमशुद्धे. ततः शुद्धत्वेऽप्युदक्यात्वात् तत्याज्यम्। "उदक्या खलतिका वापि अन्यजं संस्पृशेद्यदि। तिरात्रेणैव शुध्येत इति ज्ञातापोऽब्रवीत्" शु०त० उद्वाहरा०। "उदक्यया च संभाषां न कुर्वीत कदाचन" भा०अ०प० १०४ अ०। "उदक्यावाहते ये च द्विजाः केचिदन्नयः" भा० शान्ति०१६५ अ०। अथ प्रसङ्गात् प्रथमरजोदर्शनतिथ्यादिभेदतदीयधर्मभेदा उच्यन्ते ते च विधाप्रकारिकाते दर्शिता यथा। "प्रथमेऽह्नि द्वितीये वा शुभाशुभनिरीक्षणम्। कर्त्तव्यं ज्ञातिभिः सम्यक् धर्मशास्त्रविधानतः"। मनु रजस्वलम्। वराहसंहितायाम् "शुभगा श्वेतवस्त्राढ्या रोगिणी रक्तवाससा। नीलाम्बरधरा नारी विधवा जायते ध्रुवम्। भोगिनी पीतवस्त्रा स्यात्सवस्त्रा पतिव्रता। दुर्भगा मीर्यवस्त्रा च शुभगा सौमवस्त्रिणी"।रजोवर्षफलम्। "आरोहिते भवेद्वन्ध्या श्वेतवर्षे च पुत्रिणी। कृष्णे च विधवा नारी रजस्येतत्तु लक्षणम्" विवाहोत्तरकालभेदफलम् "जठानां वत्सरार्धेन मासे पञ्चे तथा खलु। रजोदर्शनं स्त्रीणां सर्वदैवाशुभावहम्"। अथ तिथिफलम् "आद्यर्क्षे विधवा नारी प्रतिपद्याढतांऽहजा। वैधव्यदा प्रतिपदा द्वितीया पुत्रवर्द्धिनी। सौभाग्यदा तृतीया च चतुर्थी सुखनाशिनी। पञ्चमी सुभगा चैव षष्ठी सर्वसिद्धिदायिनी। सप्तमी धनदायाय, पुत्रदा सौख्य दाष्टमी। नवमी क्लेशदा स्त्रीणां दशमी च सुखप्रदा। एकादश्यर्थलाभाय द्वादशी रतिवर्द्धिनी। त्रयोदशी शुभाख्येया दुर्भगा च चतुर्दशी। पौर्णमासी कुलाधारा दुःखरोगविवर्द्धिनी"। अथ मासफलम् तत्रैव "चैत्रे मासि विशेषेण वैधव्यं लभते ध्रुवम्। वैशाखे बन्धुलाढ्या स्यात्ते रोगाढ्या भवेत्। आषाढी कुलदा प्रोक्तः श्रावणोधनदा भवेत्। भाद्रे तु दुर्भगा क्लीवा ह्याश्विने च तपस्विनी। कार्त्तिके निर्धना बाला मार्गशीर्षे बहुप्रजा। पौषे स्यात् पुंश्चली नारी माघे पुत्रसुखान्विता। फाल्गुने सर्वसम्पन्ना प्रथमर्त्तौ फलं श्रुतम्"। अथवारफलम्। "आदित्ये विधवा नारी सोमे दैन्यमवाप्नुयात्। मङ्गले ह्यग्निघाताद्वा वुधे च धनिनी भवेत्। गुरौ च भर्तृसुखदा कन्याप्रसवकर्त्रिणी। भौमस्यकारिणी मन्दे म्रियते भर्तुरन्ततः"। अन्यलाभ्यथापि "दक्षया पतिव्रता दुःखपुत्रिणी भोगभागिनी। पतिव्रता क्लेशभोगा सूर्यवारादिषु क्रमात्" अथ नेक्षाफलम्। "प्रातःकाले रजः स्त्रीणां प्रथमं शोकवर्द्धनम्। सङ्गवे सुखसम्पत्तिं मध्याह्ने धनसम्पत्ति। अपराह्णे धनावाप्तिः सायाह्ने मध्यमं फलम्। पूर्वरात्रे सुखायाब्दं मध्यरात्रे धनक्षयः। परारात्रेऽर्थनाशाय प्रथमर्त्तुफलं श्रुतम्"। अथ स्थानफलम्। "स्टकमध्ये सुखावाप्तिर्ऋक्षद्वारे वियोगिनी। मञ्चावां सुखदा भूशयनेऽपत्यसन्ततिः"। दृष्टफलम्। "पुरुषा दृश्यते यत्तु रजः स्त्रीणां सुखाय तत्। विपक्षयोस्तु बहुदृष्टं रजो वैधव्यदं श्रुतम्। रजः पश्यति चेत्कन्या सुमान्या तत्सुखं भवेत्। स्वयं दृष्टं तया स्त्रीया मालयाताय कल्पते"। अथावासफलम्। "पितृगृहे रजो दैन्यं विदधाति पितुः कुले। देवस्थाने पितृस्थाने धनस्थानेऽन्यवस्तुनि। मार्गे भर्तृवियोगे च चक्रवाकाढ्य श्रुतप्रजा"। अथ नखत फलम्। "अश्विनी सुखदा स्त्रीणां भरणी कामवर्द्धिनी। कृत्तिका दैन्यदा श्वेता रोहिणी

सुखदा भवेत् । अगस्तु कामभोगाय सुखदं वरदैवतम् । अदित्यृक्षं सुखं दद्याद्गुरुभं सुखवर्द्धनम् । अश्लेषा शुभनाशाय भोगायाद्रा मघा मता । वैधव्यं फल्गुनीहस्ते हस्तः पुत्रविवर्द्धनः . चित्रा चित्रतनुं नारीं कुरुते नात्र संशयः । स्वातौ शुभाय नारीणां विशाखा सुखनाशिनी । अनुराधार्थभोगाय ज्येष्ठा मर्त्तृवियोगदा । शुभकृच्छुभं मूलं पूर्व्वषाढार्थनाशिनी । सुखदा चोत्तराषाढा श्रवणः सुखवर्द्धनः । धनिष्ठापञ्चकं स्त्रीणां प्रथमर्त्तौ सुखप्रदम् । तिथिरेकगुणा प्रोक्ता नवतं च चतुर्गुणम् । वारः षड्गुणो ज्ञेयो मासश्चाष्टगुणः स्मृतः । वस्वं दशगुणं विद्याद्दर्शनं ततोऽधिकम् । अशुभं चेद्रजः स्त्रीणां प्रथमर्त्तौ हि दृश्यते । विधानं तत्र कर्त्तव्यमरिष्टघ्नं विशेषतः" इति । अथ योगादिफलम् । परिघस्य तु पूर्व्वार्द्धे व्यतीपाते च वैधृतौ । व्याघातशूलयोर्विष्कम्भशुभं प्रथमार्त्तवम्" । विशिष्टविधिभङ्गेत्यर्थः । अन्यत्रापि : "शुभा संक्रान्तिविष्टादौ व्यतीपाते च वैधृतौ । परिघस्य तु पूर्व्वार्द्धे षट्च नाड्यातिमध्यतः । व्याघाते नव, शूले तु नाड्यः पञ्चदशैव तु । वैधव्यमर्थहानिञ्च तनयं मरुतं भवम् । वैधव्यं गण्डयुद्दिष्ट दारिद्र्यं वीक्ष्यजीवनम् । तेजोहानिं समायाति शुक्ल शुक्लपक्षात् । अथ रात्रिफलम् । "मेषे सञ्जभिचारा स्याद्वृषभे परभोगिनी । मिथुने धनभोगाढ्या कर्कटे व्यभिचारिणी । सुखाढ्या सिंहराशौ तु कन्यायां क्षीणती तथा । विलग्ना तुलायां तु दम्पत्ति तु पतिव्रता । दुश्चारिणी धनुःपूर्व्वे त्वपरे च पतिव्रता । मकरे मानहीना च कुम्भे निर्द्धन बन्धता । मीने विलग्ना लग्ने षष्ठसंस्था विवाहवत्" । अथ लग्नफलम् नारसिंहीये । "लग्नस्थ सप्तमस्थाने क्रूरो वैधव्यकारकः । सुखहानिकरश्चारो बुधः सत्पुत्रदो भवेत् । दुश्चस्थतिर्धनायुर्यं शुक्रः सापत्न्यकारकः । मर्मस्थरे च बन्धा स्याद्राहौ तु मरणं ध्रुवम्" । अथ शुक्रशुद्धिफलम् । "आयुः श्रीः प्रीतिरारोग्यमुदिते शुक्रभार्गवे । मध्योदये विरोधः स्यात् क्षयः स्यात्तमसोदये । तामसो राक्षसः । अन्यच्च । "संमार्जनीकाञ्चनपाणिशूर्पान् कृत्वे दधाना कुलटा तदा स्यात् । तल्पोपवीते तमसि स्थिता चेद्दुष्टः रजो भाव्यती तदा स्यात्" इत्यादि सर्वं ज्योतिःशास्त्रतोऽवगन्तव्यम् ।

अथ ऋतुलक्षणम् । "नाभिमूले स्थितं पुष्पमृतुर्दर्शनमिष्यते । नाड्यः सर्वाश्च दृश्यते तमर्वगम्यवचारकम् । अधोमुखं स्थितं स्त्रीणां तद्दृक् सृक्कायति । वायुप्रेरयत्र प्राप्तौ सृक्कं विकसद्भवेत् । उत्फुल्लं कुसुमं स्त्रीणां स्वभावात् प्रस्रवेद्रजः । तदा प्रभवति सर्वासां भावि भाविऋतुर्भवेदिति" । अथ प्रथमर्त्तौ गर्भाधारः प्रयोगपारिजाते ऋतिचन्द्रिकायाम् । "प्रथमर्त्तौ तु पञ्चिमटाः पतिपुत्रवती स्त्रिया: । अन्यतैरात्मनं कुर्यात्तस्मिंस्तासु प्रवेशयेत् । दरिद्रागम्यपुत्रादीन् दद्यात्ताभ्यूह्यकल्पजः । आश्विनोवाचयेयुस्ताः पतिपुत्रवती भव । दार्षैर्नीराजनं कुर्यात्तदीपे वासयेद्गृहे । ताः सर्वाः पूजयेत्पश्चान्नग्नपुत्रादिभिः । खण्डापूपघृतगुडादि दद्यात्ताभ्यः स्वशक्तितः" । अन्यच्च दक्षः । "आर्त्तवाभिप्लुता नारी नैका वेश्मनि संविशेत् । न संसर्गं व्रजेद्विद्वान्ज्ञात्वा पापात्प्रसज्यते । अज्ञानाच्चाज्ञाने ज्ञानं प्रवासं दर्शनावधम् । न कुर्वीतार्त्तवा नारी पक्षाद्वीक्षणं तथा । नखानां छेदनं रज्जुनाखण्डादिच्छनम्" । नेत्रतुल्यौ वदेव "दृष्टे वदावे भुञ्जीत येवं चाकुलिना पिबेत्" । अथ रजस्वलाकर्त्तव्यविधानम् ऋतिरत्नावल्यां दक्षः "उदक्ये हे सगोत्रे वा सवर्णे वाऽथवा पुनः । तयोः स्नानं मिथः कार्यं पञ्चगव्यं ततः पिबेत् । सवर्णे योनिसम्बन्धे सगोत्रे च रजस्वले । मिथः संभूयतोऽन्यत्र स्नानमात्रेण शुद्धतः । मलैकरात्रं नाऽश्नीतः पञ्चगव्यं पिबेत्ततः । उदक्यायोर्दान्योन्यवस्त्रयोः सवर्णयोः । आवेदनात्रा स्नात्वा च तस्मिन्नाद्यात् शुचिर्भवेत्" । तस्मिन् सवर्णदिने । "अत्रा तु नाऽद्यादाद्यहे भुञ्जा चेत् प्रतिवासरम् । उपोषणं तदा कैश्चिदाद्युक्तदिनसंख्यया । उपवासेत्यन्यत्रा चेत्तत्पयं दानमाचरेत् । सम्भावेतां भूयेतां वा ब्राह्मण्यौ च रजस्वले । आत्मानमात्मात्मात्मीतोद्वहे नत्रा मिथः क्षिपेत् । स्नात्वोपवासं कुर्यातां पञ्चगव्येन शुध्यतः । एवमभ्यसतस्ताभ्यः प्रायश्चित्तं समाचरेत् । नत्रा रजस्वलान्योन्यं दक्षो ब्राह्मणी भूयेत् । आत्मानमात्मात्मात्मीयादतिक्रुद्धं समाचरेत् । चाण्डालं वार्त्तवा नारी संभूयेत भोजनाग्रतः । वान्यता बहिराशीनाऽऽत्मानमात्मादुपोषणम् । प्राजापत्यव्रतेत् यत्नात् पञ्चगव्यं ततः पिबेत् । विप्रान् द्वादशसंख्यान्नान् भोजयित्वा विशुध्यति । युग्मिनी संभूयेतोद्वाहदुष्टं वा नरं स्त्रियम् । स्नानादर्वाङ् न भुञ्जीत भूत्वा शुद्धं समाचरेत् । भूतोदया पञ्चगव्यात् द्विपर्वणपवासात् पुनः । अन्यानि च सर्वाणि नाड्यादा स्नानवाचरेत्" । तदा-

घरः । "रजस्वला यदा दृष्टा पुना जन्मकरासनैः । पञ्चरात्रं निराहारा पञ्चगव्येन शुद्ध्यति । उर्ध्वं तु त्रिगुणं नाम्ने वैश्ये तु त्रिगुणं तथा । चतुर्गुणं क्षत्रे मूर्ध्नि दंपेऽप्यन्नाप्तता भवेदिति" ।

तथा नैमित्तिकस्नानशुद्धिस्नानप्रकारस्तत्रैव दर्शितः यथा । तत्र नैमित्तिकस्नानप्रकारस्तु स्मृत्यर्थसारे । "स्नाने नैमित्तिके प्राप्ते रजोदर्शने पात्रान्तरिततोयेन स्नात्वाद्भिः सिक्तगात्रा शाटीपाटं वस्त्रं संनिधीयान्यवस्त्रधारणं कृत्वा मनसरेदिति" । अथ शुद्धिस्नानं स्मृत्यर्थसारएव । "रजस्वला चतुर्थ्यादिः शौचं कृत्वा अयं प्रजाभ्य इत्यधोवस्त्रपूर्वकं संभवे स्नायात्" इति । अथ स्नानानन्तरमपि रजःस्रवे विशेषोऽभिधीयते । कात्यायनेन "रजस्वला यदा नारी निरालभ्यशुचिर्भवेत् । प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी । तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुद्ध्यति । अन्तः शुद्धा चतुर्थेऽह्नि स्नाता नारी रजस्वला" । दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुद्ध्यती"त्युक्त्वाधिकृतम् । "रागश्च रोगलक्षणेन द्रव्यं कायश्च तथा । यद्रागरोगशब्दयोर्यं तद्रक्तं प्राह धार्मः । कायश्च तु रजःसंज्ञं तस्मात् तत्रैव साऽशुचिः" । एवं बह्वयश्च । "यत्तावत् प्रसूतेरत्यन्तं मेदोवच्याच्चत्वात् यत् । तद्रागलक्षणमिति प्रोक्तं प्रजोद्देशसमुद्भवम् । रोगेण यद्रजः स्त्रीणामन्यत्र संप्रवर्तते । नाऽशुचिः स्त्री ततस्तेन यतो वैकारिकं मलम् । अन्यादिदोषवैषम्यादसृक्प्रवर्त्तते । रोगजं तत्पुनर्दृष्टमथ द्रव्यजमुच्यते । द्रव्यजं धातुवैषम्यहेतुद्रव्योपभोगजमिति" । "आरभ्य चार्तवदिनादेकत्रिंशदिवासरे । आसाद्दूर्ध्वं रजोवत् स्यात्स्त्रीजन्मुदाहृतम् । रजस्वला यदा नारी पुनरेव रजस्वला । सा त्रिंशदिनमाद्दूर्ध्वं निरालभ्यशुचिर्भवेत्" । ततः पूर्वं तु "रजस्वला यदि स्नाता पुनरेव रजस्वला । अष्टादशदिनादर्वागशुचित्वं न विद्यते । एकोनविंशतेर्वर्षाणेकाह्नं स्यात् ततोऽह्नकम् । विंशत्यब्दमतिक्रम्य तिरालभ्यशुचिर्भवेदिति" । तच्च यथा । 'रजस्वला ततो नारी पुनरेव रजस्वला । अष्टादशाद्दात् प्राग्वापि शश्वदशुचिः स्त्रीत्रिरात्रकम् । तदूर्ध्वमष्टादशाद्दूर्ध्वं रजसा दुष्यते यदा । अष्टादशाद्दात् प्राग्वापि त्रिरात्रमशुचिर्भवेत्' इति निगदः । एकादशेवत्सरोऽत्रात्रिरात्रं द्वादशेऽप्यहि । उर्ध्वं त्रिरात्रं विज्ञेयमिति कृष्णविनोदितनिबन्धादि' परत्वरविरहवचनम् 'आत्रिद्वयवयोऽतीतं स्यादेवमहरेव त्वस्यापवादोऽयम्' । स्नानकालोत्तरकालस्तत्रैव व्यवस्थापितः रघ० । रजःकालात्प्राक् प्रजापतिराह "अविज्ञाते बले सा च मलवहनका यदि । तदा तेष्वेषु जुष्टं स्यादृद्धिकस्या; त्रिरात्रतः । रजः प्राप्तकालसंदेहेऽपि सएवाह । "त्रिःसंदेहे परिज्ञाने चार्त्तवे शुद्धिकारणम् । संदेहधार्त्ते स्नानं स्यादित्यत्र प्रजापतिरिति" । अथ रात्रौ रजोदर्शने विशेषः । "अर्द्धरात्रपर्यन्तं पूर्वदिनविद्धायां परदिनगतायां वा त्रिभागायां रात्रेर्भागद्वयं पूर्वदिनत्वेनात्तव्यं । सूर्योदयावधिपूर्वदिनविद्धायां । तदाह काश्यपः । "उदिते तु यदा सूर्ये नारीणां दृश्यते रजः । जनयं वा विपत्तिर्वा ब्रह्महत्यासमं भवेत् । अर्द्धरात्रावधिः स्नानः घृतादौ विधीयते । रात्रिं कुर्वन्निशायां तु द्वौ जनौ पूर्वगामिनौ । उन्मेषः यः प्रवातेव दृश्यते ऋतसूनवे । रात्रावेव तमस्यत्र दृश्ये रजसि घूतके । पूर्वमेव दिनं ग्राह्यं यावन्नाभ्युदितोरविरिति" । अत्रापि देशाचारादिना व्यवस्था द्रष्टव्या । अथ रजस्वलायां व्यतीतदोषसंभवे शुद्धिविधानं स्मृत्यर्थसारे । रजस्वलां चतुर्थेऽहनि सचेलनद्यामाप्लाव्य दशसोदकदशकृत्वो मार्ष्टा सा शुद्धाचमेदिति' । उशनापि "अतीतमृतुजा वा नारी रजसापि परिप्लुता । अथ तस्या भवेच्छौचं शुद्धिः स्यात् केन कर्मणा ? । चतुर्थेऽहनि संप्राप्ते स्नपेदन्या तु तां स्त्रियम् । सा सचेलाप्लवाप्लावः स्नात्वा स्नात्वा पुनः स्नपेत् । दशवारादशवारो वा चाचामेच्च पुनः पुनः । अन्ये च मासवां आसतः शुद्धा भवेत्तु वा । दद्यात्तस्यास्ततोदानं सुवर्णादेन विशुध्यति । आतुरार्थां तु वर्षेऽप्येवं शुद्धिर्विधीयत" इति । अथोदकाप्लुतानां चेतनवतां सचेलं स्नानम् अचेतनपीठादीनां प्रक्षालनं, तत्रोदकादिस्पृष्टाचेतनवस्त्रे आचमनम् "उदकाप्लुतिभिः स्नायात्स्पृष्टे वस्त्रेऽप्यचेतिहि" वाक्यशब्दाच्चरत्वात् उदकादिस्पृष्टचेतनवस्त्रे तु द्वितीयवस्त्रादि स्नानेन विनाऽपि यद्वाह यमः. "द्विवासोर्त्तिमुदकां च पतितं सूतिकां तथा । अवलम्ब्यापि चैवं स्नात्वा स्नानेन शुद्ध्यति" इतीयस्य स्नानस्य तत्र विधीयते । अर्द्धस्नानं प्रोक्षणं इत्याचां प्रोक्षणं तथा" एतदमतिविषयं शुद्धिपूर्वकर्मे तु ततोऽन्यत्रापि स्नानमेव "पतितवस्त्रावधूतिलोदकाप्लवस्त्रर्द्धितस्त्रस्त्रीपस्पर्शने चैवमेवमुपस्पर्शनाच्छुद्धिरिति"गौतमस्मरणात् । चतुर्थीस्नानस्य विधानं देवलः "अथ-

स्पृष्ट्वाशुचिस्पृष्टं तृतीयं चापि मानवः । दक्षो यादौ च तोयेन प्रक्षाल्यास्य शुद्ध्यति" अशुद्धस्योदकादिस्पर्शे तु देवलः "अशुद्धान् स्वयमप्येतानशुद्धस्तु यदि स्पृशेत् । स शुध्यत्युपवासेन तथा कृच्छ्रेण वा पुनः । श्राद्धिस्पर्शे तूपवासः कृच्छ्रस्तु स्पर्शादिके" इति । अधिकमार्त्तण्डग्रन्थे ८०८पृष्ठे उक्तम् । [ज्यत्न ।

उदगद्रि उदगुत्तरस्यामद्रिः । हिमाचले । उदक्पर्वतादयो-

उदगयन न० उदक् उदीच्यामयनम् । उत्तरायणे । ७त० । माघादिके मासषट्के "उदगयने आपूर्य्यमाणे पक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहा" आश्व० गृ० १,४,१, "अहस्तदुदगयनं रात्रिः स्याद्दक्षिणायनम्" मनुः । उत्तरायणशब्दे ११०४पृ० विवृतिः ।

उदग्दृश् न० उदक् उत्तरा दृग् यस्य । उत्तरार्थे वस्त्रे "उत्तीर्य्यान्यानि वासांसि परिधाय सकक्षेणान्यापीड्योदग्दृशानि विस्रब्धासत आचमनवर्जनात्" आश्व० गृ० ४,४,१०, "उदग्दृशानि उदगग्राणि" नारा० गृ० । "अथ वासो द्विगुणं वा चतुर्गुणं वा प्राग्दृशं वोदग्दृशं वोपसृजीत" श्रुत० आ० २,२,२,६, [ऋतभूमिके देशे जटा०

उदग्भूम त्रि० उदक् उद्गता भूमिर्यस्य अच् समा० । उत्-

उदग्र त्रि० उद्गतमग्रं यस्य । १उच्चे उन्नते २दक्षे "परिस्थिल्लामसदग्रविग्रहः" किरा० "नयन् मधुच्छिदः सौमसदग्रदर्शनात्" "आक्रम्य संस्थितसदग्रविशालवक्षसम्" माघः "अवलिनाथोऽवसदग्रबाहुः" "संदधे शयसदग्रतारकाम्" "शतात् त्रिव त्रायत इत्युदग्र" रघुः । "वीर्य्योदग्रे राजशब्दे त्रुगे च" "सन्नक्तलोदग्रतरप्रभावः" "आविष्कृतोदग्रतरप्रभावम्" रघुः । २उन्नते च । "मदोदग्रा वनद्विपाः" रघुः । [उन्नतदन्ते

उदग्रदत् त्रि० उदग्रा दन्ता यस्य दन्तादेशः क्विवां ङीप् ।

उदग्राभ पु० उदकं व्यक्तति यक्-अण् उप० स० संज्ञायां सुटादेशः वेदे दृश्य भः । १मेघे "एवा पवस्व मदिरो मदायोदग्राभस्य नमयन् वधस्नैः" ऋ० ९,९७,१५, "उदग्राभमुदकमाहितं मेघम्" भः० श्रौते तु उदग्राह इत्येव । उदग्रा उन्नता आभायस्य । २मङ्गलग्रहे त्रि० ।

उदङ्क पु० उद्यते उह्यतेऽत्र उद्+अनच-वक्र । "उदङ्कोऽनुदके" मा० णि० कु: १धर्मभये इतादिगन्ते (कपो) तैलोदङ्कः घृतोदङ्कः । उद्यते आहृयतेऽनेन करणे वक्र । आकर्षणसाधने २संदंशे "कृदवोदङ्कसंस्थानं ज्ञातानामवलम्बनम्" भट्टिः । ३ऋषिभेदे पु० "अत्रदीर्घ उदङ्कः गौरुयावनः" भत० ब्रा० १४,९,१०,४, अस्य इन्द्रे अहन्ये च उपकारकत्वे गोत्रप्रवरत्वञ्च वा वुञ् । औदङ्कायनाः उदङ्काः ।

उदङ्मुख त्रि० उदक् उत्तरा मुखमस्य । उत्तरमुखे "मनसूपं कारयेत्तत्र प्राङ्मुखं वाप्युदङ्मुखम्" अन्नाचमनमण्डपे पुरा० "कृतं भुक्तेष्वुदङ्मुखः" "यथाशास्त्रमुदङ्मुखः" "भूमौ शास्त्रमुत्सृजं दिवा कुर्य्यादुदङ्मुखः" मनुः । "उदङ्मुखान् प्राङ्मुखान् वा पूर्वाह्णे वै शुचिः शुचीन्" मनुः । "उदङ्मुखः शोऽक्षविदक्षमन्नम्" रघुः । "स्थानादासं सरसनिचुलादुत्पतेदुदङ्मुखः कम्" मेघ० ।

उदङ्चमस पु० उदञ्चस्य उदकधारणार्थचमसः संज्ञायां तुदादेयः । उदकस्थापनार्थे चमसरूपे पात्रभेदे "अथान्तरेणोदङ्चमसं निनयति" शत० ब्रा० ७,२,१,१७ । "चतसृषु चतसृषु दोक्षीनुदङ्चमसान्निनयति" आश्वा० १७,१,४,

उदञ्च् त्रि० उद्+अञ्च-क्विप् । १ऊर्द्ध गते उत्तरे २देशे ३अवाचीने ४काले उत्तरदिग्देशकालवर्त्तिनी च । ५उत्तरदिशि स्त्री ङीप् अधोऽञ्चोपे उद्यादेशे दीर्घः उदीची "तेनोदीचीं दिशमनु रवेः" मेघ० । ततः अञ्चति तत्र वुञ् । प्रथमावस्थानीयप्रत्ययलाभे दिग्देशवाचके अव्य० "अयने हे गतिरुदग् दृक्षिणार्कस्य षण्मुखः" अमरः "उपवीतविद्वं यज्ञो रवेरुदगाद्दक्षिणेयेन मारुतः" रघुः "संपूजोत्पुलनाद्रुदगपाभ्याम् पथिभ्याम्" "उदग्रमे दक्षुजस्य कुर्यर्ज कारयन्ति" वं० त० लोधि० । "प्राग्मुदग्वा भौतं यज्ञं प्रसारयेत्" वि० धा० पृ० । "आचम्योदक्पराङ्मुख्यं" मनुः । "आरक्षिभ्योदक्पुरुषम्" वि० शि० ।

उदज पु० उद्+अज-अच् अभावः । पशुप्रेरके ।

उदजिन न० उत्क्रान्तमजिनम् अत्या० स० । चर्म्मातीते निरुदकादि० अजाजिनोदजिनता ।

उदञ्च पु० उदकं जायति या-क संज्ञायां उदादेयः ऋषिभेदे तद्गोत्रापत्यम् शिवा० फिञ् । औदञ्चायनि तदपत्ये ङ्यां ङीप् ।

उदञ्च् त्रि० उद+अनच-क्विप् । उदक्शब्दार्थे । भत्वे उदङ्कः उदङ्का इति भेदः । ततः प्रथमाद्यर्थे अञ्चति तत्र वुञ् । उदक् प्रथमाद्यर्थे दिग्देशादौ अव्य० "आनु यदुदक्नेति तानु आवानु" आ० श्रौ० । उदक् उत्तरस्याम् ।

उदञ्चन न० उद्+अनच-क्विप् करणे ल्युट् । १सिधानार्थे पात्रे (डाकना) । "प्रतिग्रस्याता संस्रवावनयत्युदञ्चनेन वोदक्चमसेन वा" श्रुत० आ० ७, २,५, २१,

"प्रतिप्रस्थाता च संस्रवाशाधवनीयादुद्गेतोदञ्चनेन चमसेन वा" कात्या० १०,५,१। भावे ल्युट्। २जर्त्तुक्षेपणे। कर्त्तरि ल्यु। ३उत्क्षेपके त्रि०। "ऋतुपतिर्विश्वासामूधः स धिवामुदञ्चनः" ऋ०५,४४,१२। "उदञ्चन जर्जुराणस्त्रयिता" भा०।

उदञ्चित त्रि०उद्-अञ्च-पूजायां क्त। १पूजिते। णिच्-क्त। २जर्जुगमिते ३उत्क्षिप्ते। क्षेम० "उदञ्चिताश्चोऽञ्चि तदक्षिणोरुः" भट्टिः।

उदञ्चु त्रि० उद्+अञ्च-उन्। उद्गतिर्यस्ये। वाक्षा० अ-मत्रे ङीप्। औदञ्चवि तदपत्ये पुंस्त्री०।

उदञ्चनपाल पु० उदञ्चनमण्डं पलति गच्छति कारणतया प्राप्नोति पल-गतौ अण् उप०स०। १मत्स्ये २सर्पे च मेदि० तयोरण्डोद्भेदेन जातत्वात्तथात्वम्। [र्थवि०।

उदञ्चा स्त्री उद्+अद-वा० यत्। तैलपिण्डीलिकायां शब्दा-

उदञ्चान पु० उदकं धीयतेऽत्र आधारे ल्युट्। उदाधेयः। १कुम्भे २मेघे च।

उदधि पु० उदकानि धीयन्तेऽस्मिन् धा-आधारे कि उदा-देयः। १समुद्रे, २घटे च। "उदधेरिव निम्नगाशतैः" "चन्द्रोदय इवोदधेः" रघुः। "यैः कृतः सर्व्वभक्षोऽग्निरपेयश्च महोदधिः" मनुः। समुद्रसामान्यस्येयं संज्ञा तत्तत्-पदवर्त्तमिव्याहारे तु विशेषस्य बोधः। यथा क्षारोदधिः क्षीरोदधिः सुरोदधिः। ३मेघे च। "क्षुद्रय मघवन्युरुषो दृतोदधिं भिन्त" यजु० १८,५४। ४उदकधानकर्त्तरि त्रि० "संवत्सरश्च दिशुतदुदधिर्मेधिः" यजु०१८,२२ भाष्ये च "जलपूर्णोदुम्बराभिनवकुम्भिजलाकर्षणेन सहारम्भात्तथात्वं यथा च तस्मादुताधावकत्वम्" तथा-ऽऽकृतग्रन्थे १२२ पृष्ठे उक्तम्।

उदधिक्रम त्रि० उदधिं क्रामति क्रम-वि क्विप्। समुद्र-क्रामके।

उदधिगल पु० उदधेर्गलइव दृश्य। समुद्रफेने राजव०।

उदधिमेखला स्त्री उदधिर्मेखलइव यस्याः। मध्यस्थाने समु-द्रवेष्टितायां पृथिव्याम्। भूगोले "भूमेरर्द्धं चारभिन्धो-रुदक्स्थं जम्बूद्वीपं प्राहुराचार्य्यवर्य्याः। अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य वाम्भे चारलीराद्यम्बुधीनां निवेशः" सि०शि० भूगो०। वाम्याद्धे एवाद्यम्बुधीनां निवेशात् तेषां पृथिवी मध्यवेष्टकतया मेखलात्वम्।

उदधिसुता स्त्री ईत०। १लक्ष्म्याम् तस्या उदधिजातत्वात् तथात्वम्। उदधितनयादयोऽस्य २चन्द्रे पु०।

उदन् न० उन्द्+कनिन्। उदके। "उदकशब्दादेशोऽयमि-त्यन्ये अन्यपदार्थ यन्द्र दृश्यपरे। "धारावर्षेणोदभि र्धुन्दन्ति भूम" ऋ०१,८५,५ "अव त्मना भरते केनम्-दन्" ऋ०१,१०४,२, । उदन् उदनीयर्थः परमे व्योमन् इति यत् सप्तम्या लुक् नलोपाभावश्च

उदन्त पु० उद्गतोऽन्तोनिर्णयो यस्मात्। १वार्त्तायाम् वृत्तान्ते कृत्यलादिकथने, । "सुतरां रामः प्रियोदन्तम्" रघुः "कान्तोदन्तः सुहृदुपनतः संगमात् किञ्चिदूनः" मेघ० "एवंप्रायेण चास्योदन्तेन" काद०। २साधौ, मे स्वार्थे कन्। तत्रैव उद्गतोऽन्तोऽस्य प्राकरणात् प्रा०ब०गतोऽपि। ३प्राकरणात् प्राप्तान्ते त्रि० "यदतमसदिति तदाकुर्य्यादु-दन्तं तर्हि जुकुयादिति तद्वैनोदन्तं कुर्य्यादुप ह दर्शे-द्वादुदन्तं कुर्य्यादमावास्यां वै रेत उपदधं तस्मात्तोदन्तं कुर्य्यात्" शत०ब्रा०२,३,१,१४, "अधिश्रितं वाह्मणमुदन्तं मौष्णम्" कात्या० २५,२,३,

उदन्तिका स्त्री उदन्तमुद्गतान्तं करोति उदन्त+णिच्+ण्वुल् टाप् अत इत्वं। तन्त्री वीणा०।

उदन्य नामधातु अतिगर्द्धोनोदकमिच्छति क्यच् निपा०उद-न्यति औदन्यीत् उदन्याम्-बभूव आस चकार। उदनिता-उदन्विता उदन्या।

उदन्या स्त्री अतिगर्द्धोन उदकमिच्छति क्यजन्तात् अ। १पिपासायाम्। "अश्वस्तृदन्यां विशिरैः पयोभिः" भट्टिः क्वेः वा०नयजर्थेऽपि क्यच्। २उदकनयने च "अश्व-वत्तैतत्पुरुषः पिपासतिनाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येव तत्तेज आचष्ट उदन्येति" छा०उ० यथा च पुरुषस्य पिपासा भवति तद्भाष्ये समर्थितं यथा

"यत्र यस्मिन् काल एतन्नाम पिपासति पातुमिच्छतीति पुरुषो भवति। अग्निशिषतीतिवदिदमपि गौणमेव नाम भवति। द्रवीकृतस्याग्नितप्तस्यान्नस्य नेत्र आपोऽन्नरसरूप देहं क्लेदयन्त्यः पिपासिकोर्कुर्य्युरभ्याकुल्याद्यादि तेजसा न शोष्यन्ते। नितरान्तु तेजसा शोष्यमाणास्वप्सु देह-भावेन परिणममानासु पातुमिच्छा पुरुषस्य जायते तदा पुरुषः पिपासति नाम तदेतदाह। तेजश्च तप्तदा पीतमन्नादि शोषयेद्देहेगतशोणितप्राणभावेन नयते परि-णमयति। तद्यथा गोनाय इत्यादि समानमेव। तत्तेज आचष्ट श्लोकः। उदन्येति उदकं नयतीत्युदन्या उद न्येतीति छान्दसम्"। पिपासा च प्राणस्य धर्म्मः तथाच

या०ति० "बभ्रुश्च पिपासा च मारिष, मनसः ऋतौ। घोरमोहौ, शरीरस्य अग्निहस्तु, वह्निमयः"। उद्भः अयम् उदन्य उदकसम्बन्धिनि त्रि० "विश्वा उदन्यवा वर्षाधारा उदन्या इव" ऋ०२,७,१, "उदन्या उदकसम्बन्धिनी"भा०

उदन्यु त्रि० उदन्य-मत्वर्थातोः उनु। पिपासौ "दृतयो न दिव उद्वा उदन्यवे" ५,५७,१, "हरिं नवं ते अतसे उदन्युवः" ऋ०१,८४,२७, उदन्युवः उदके च्युत्पन्नः"भा० उवङ् छान्दसः।

उदन्वत् पु०उदकानि सन्त्यस्मिन् मतुप् उदन्भावः मस्य वः। समुद्रे "उदन्वदब्धिपरिवीतमूर्त्तिः" भाग०। निरु० चन्द्रपादैः" कुमा० "व्यक्तायां किलोदन्वान्" ते च प्राप्तदन्वत्व बुबुधे वादिपूरुषः" रघुः। वेदे त्रि०। २उदकयुक्तमात्रे त्रि०" स्त्रियां ङीप्। "उदन्वता परिदीया रथेन" ऋ०५,८२,७,"उदन्वता उदकयुक्तेन रथेन" भा० "उदन्वतीरुतदकात्र याः" ऋ०७,५४,४, [औदीपीत्।

उदप आघाते चौरा० पर० सक० सेट्। उदपति। औदपीत्।

उदपात्र न० उदकपूर्णं पात्रम् उदादेयः। जलपूर्णे पात्रे "भिक्षाञ्चोदपात्रं वा सदृक्षत्व विधिपूर्वकम्" मनुः।

उदपान पु०न० उदकं पीयतेऽस्मिन् पा ल्युट् उदादेयः। कूपसरोवरे स्थाने जुहुजलाधारे। "तडागा उदपानानि वाप्यः प्रस्रवणानि च" निरुक्तेषु च वेदेषु स्थानसामान्यवचनम्। उदपानान्" रामा०। "अल्पवर्षप्रवर्षोदपानोदकप्राय." सुश्रु०। ७त०।उदपानमवगाहते डः पात्रेसमितादिः ७स०युक्तारोहिण्या०। स्वार्थेदाजादा।

उदमान पु० "कृष्णा स्थादभिधेयैर्द्वैर्द्वाभ्यां हे च मागधे। अस्मात् धृतिक्षोभाग उदमन उदाहृतं द्वत्वे च मानभेदे।

उदय पु०उद्+इ-अच्। ज्योतिषोक्ते राशेरुदयरूपे लग्ने। आधारे अच्। "यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः" दृश्यत्वलक्षणे रवेर्द्वितीयस्थाने २लग्नाचले पूर्वं पर्य्यते। "उदयाचलयद्वत्तिनेन्दवपुः" माघः "उदयगिरिमालीवालमन्दारपुष्पम्" उद्भटः। भावे अच्। २प्रथमदर्शनयोग्यभवने। ४क्षौ, ६उद्भवे ७उत्तरगमे "आलोदयः परस्तानि" माघ. "प्रभातसमयमिव पूर्वदिग्भाग रागानुमेयमिनोदयम्" काद०। "सवोदय माघमिवोषधीनाम्" "निशातस्त्रिमितां वेलां चन्द्रोदय इवोदधेः" "उटजमण्डलमयस्य रघुवृत्तिः" रघुः। "अपमेघोदय" वर्षमदृष्टकुसुम फलम्"। "यो स्व स्वभावयोगौ तौ मूलानां प्रलयोदयौ"। कुमा० "उदये सदृशाश्लेषजाता"। "आयमैः सदृशारब्ध आरम्भसदृशोदयः"। "प्रकृतावुदयापवर्गयोः" रघुः। "वीक्षाङ्कुरा प्रागुदयादिवाम्भः" कुमा०८सर्गे। "विजितजनकोदयम्" भाघः। पक्षाधीनमुदयत्व स्वाधिष्ठितराशीनामुदयात्। "अश्विनीनोदयाम्बुसमुद्गमे सहदयोऽपि अवेक्षनभःसदाम्" शि० त्रि०। राशीनां देशभेदेनोदयकालविशेषैः शि० त्रि०। तत्प्रादो निरक्षदेशवासादौ तज्ज्ञानसाधन यथा "एकस्य राशेर्वृत्तेऽस्मिन् क्षितिजसम्पातात् या द्वयोस्त्रिभस्यापि क्षितिजसम्पातात्। खखाग्रमक्षजाक्षितिजसम्पातात् भूलानि तासां त्रिगुणा ११३८ कृतानि। खखद्युभौर्व्या विभजेत् फलानां चापान्यधोऽधः परिशोधितानि। क्रमोत्क्रमस्थानि निरक्षदेशे मेषादिकानामुदयासवः स्युः" शि०। "एकस्य राशेर्वृत्तेऽस्मिन् क्षेत्रस्थे या। द्वयोरिति षोड़शी या। त्रिभस्थेति त्रिंशा। तासां क्रमेणोदयानां स्वकीयस्वकीयक्रान्तिज्यावर्गैर्वर्जितानां मूलानि त्रिज्यागुणितानि स्वस्वद्युज्यया विभजेत्। फलानां चापान्यधोऽधः परिशोधितानीति क्षितीयात् द्वितीयात् प्रथमं शोध्यम्। प्रथमं तथाविधमेव। एवं लङ्कोदयासवः स्युः। अत्रोपपत्तिः। अत्रोक्तक्रान्तिज्यानां तिर्यक्स्थितत्वात् क्रान्त्यक्षाणि क्षेत्रायतुत्पन्ने। तद्यथा। मेषान्तस्थ या क्रान्तिर्वृत्ते कर्णः। तत्क्रान्तिज्याभक्तात्रिज्याहते भुजः। तद्भोनरपदं मेषान्तेऽक्षोन्नतहृते कोटिः। एवं राशिद्वयस्थ ज्या कर्णः। तत्क्रान्तिज्या भुजः। तद्भोनरपदं द्वयमान्तेऽक्षोन्नतहृते कोटिः। एवं तिरश्चिज्या कर्णः परमक्रान्तिज्या भुजः। परमक्रान्त्युज्या कोटिः। एताः कोटयक्षापकरणार्थं त्रिज्याहृते परिणामिता त्रिज्यागुणाः स्वस्वद्युज्यया लङ्कासवः चापानि। प्रथम मेषोदयस्य कालः। द्वितीयं राशिद्वयस्य। तृतीयं राशित्रयस्य। अतो विश्लेषितानीत्युपपन्नम्। इदानीं प्रकारान्तरेणाह" ग्रन्थः। "कोटादिराक्षजकोटिजीवाक्षिज्या २४३८ गुणाः स्वस्वदिनज्यया भाज्याः। चापीकृताः प्राग्वदधो विशुद्धाः कोटादिकानासवो वा" शि०।"कोटादिराक्षजकोटिजीवाक्षा एकहिताराशिज्या भवन्ति ।७१६।२६७७ ।२४३८। एताक्षिज्यया गुणाः स्वस्वदिनज्यया भक्ता इति। यैव द्वयमान्ते द्युज्या सैव कोटान्तेऽपि ११२८। यैव मेषान्तेद्युज्या सैव सिंहान्तेऽपि ११६६। वस्यान्ते द्युज्या सि-

ब्धैव ३४३८। आभिस्ता भाव्याः। फलानां चापान्ध्योऽधः शुद्धानि कीटादीनासुदयासवः स्युरित्ये वा। त एव मिथुनहृषभमेषापाभित्यर्थः। अत्रोपपत्तिः। क्रान्तिहृत्ते वधभान्ते खलक्रैकमध्यं वृत्वा द्वितीयमध्यं कोटान्ते निबध्यते तस्य खलस्यार्द्धमेकारायेर्ज्या भवति। एवं खलक्रैकमध्यं मेषान्ते वृत्वा द्वितीयं बिन्दौ तस्य खलस्यार्धं राशिहृदयस्य ज्या भवति। एवं मेषतुलादौ बहुखलस्यार्धे ज्ये। एता एव दृग्भानमेषानयनेऽभीष्टान्तरोत्क्रमज्यासमा ज्या भवन्ति यतस्तत्संपातेषु क्रान्तिहृत्ते खलानि बहूनि। अतस्तासां भिन्नाहृत्तपरिणतानां चापान्तराणि कीटादिक्रान्तासुदया भवन्तीति गोले प्रदर्शयेत्। इदानीं पुनः प्रकारान्तरेणाह प्रभि०। "मेषादिजीवाक्षिलवहृद्भौर्व्या २।४। लुप्ता हृताः खखदिनज्यया वा। चापोद्धृताः प्राग्वदधो विशुद्धा मेषादिक्रान्तासुदयासवो वा" धि०। स्पष्टार्थमिदम्, अक्षोपपत्तिर्गोले कथितैव सुगमा च अथ मिथुनक्रान्तानयनमाह" प्रभि०।' "तेऽभ्रादिभक्ता १९७० गुणगोऽद्रिचन्द्राः १७८१ सम्मानिनन्देन्दुमिता १८३७ अर्थते। क्रमोत्क्रमस्थाश्चरखण्डकैः स्वैः क्रमोत्क्रमस्थैश्च विलोनयुक्ताः। मेषादिषट्कोदयाः स्वदेशे लङ्कादितोऽधो च विलोमसंस्थाः। उदेति राशिः समयेन येन तल्लग्नमेकं समुदेति तेन" धि०। "अत्र यत् करणे क्रोवाक्यं स्पष्टं तच्चाद्यद्वितीयतृतीयावुदयौ नाम्नैः स्पष्टमुपपद्यते। अत्र प्रथमप्रकारेण प्रथम उदयो व्यक्तते। द्वितीय द्वितीयप्रकारेण द्वितीयतृतीयौ। येषं स्पष्टार्थम्। अत्रोपपत्तिः। निरक्षक्षेत्रार्क्षोदययोरन्तरं चरम्। निरक्षे क्षेत्रे च मेषादिः समसुदेति। मेषान्त आदौ क्षितिजे, तत उन्नतखण्डे गतः। अतश्चरखण्डोनो मेषोदयः स्पष्टोदयो भवति। एवं वृषमिथुनयोरपि। कर्क्यादौ तु चरखण्डानामुपचीतत्वमानत्वाद्धनं तानि परिणमन्ति। तुलादौ तूनखण्डखण्डाधःस्थितत्वाच्चरखण्डानि धनं भवन्ति। मकरादौ तु चरखण्डनामपचीयमानत्वाद्ऋणं परिणमन्ति। इत्यादि गोले प्रत्यग्विलोक्यते" प्रभि०। "चरखण्डाश्च तत्र बोद्धा यथा 'स्वदेशजैस्वचरखण्डकैर्या लघुलङ्कावन्तीदोदयभागात्। मेषादिराशिलितयस्य यानि चरास्यधोऽधः परिशोधितानि। तानि स्वदेशे चरखण्डकानि दिङ्नागसत्रा'यगुणै१०।८। १/२० र्विनिघ्नाः। पलप्रभा तोयपलात्मकानि स्थूलानि वा सूक्ष्मचरखण्डकानि। स्थूलं चरं चालुपलात्मकं तैस्तत्प्राणचापं यदि वापि सूक्ष्मम्" धि०। "अथ वा वक्ष्यमाणैर्द्धिः स्वखण्डकैः स्वदेशजैर्लघुलङ्कासंस्थैरुदयासवः साध्याः। कक्यादिस्थाद्द। रविदोःक्षिभागात्। चर्कस्य सायनांशस्य यो भुजस्तस्य यच्चरखण्डं तदधःस्थितदृग्भानिलग्नादिना साध्यम्। अथ खण्डकानि। मेषादिराशिलवखेत्यादि सुगमम्। अथ स्थूलखण्डकैर्यद्यं तत् स्थूलं पानीयपलात्मकं भवति। ततः षड्गुणं प्राणात्मकम्। तत्कालादि धनुः क्रियते तदा सूक्ष्मं चरार्धं स्यात्। अत्रोपपत्तिः। एकमङ्गुलं पलभा मत्कल्पा एकहिलिरार्शानां पृथक् चरास्यानीव तानि षड्भिर्विनष्ट पानीयपलात्मकानि कृत्वा यावद्धोऽधो विशोध्यन्ते तावद्दिङ्नागसत्रा'यगुणा उत्पद्यन्ते। अतोऽनुपातः। यदेकाङ्गुलया पलभयैतानि चरखण्डानि तदेष्टया किमिति। एवं चरखण्डानि स्युः। एवं तानि स्थूलात्मकानि यतः पूर्वं स्वल्पत्वात् स्थूलोत्पन्नम्। अत एव तत्प्राणचापं यदि वापि सूक्ष्मम्" इत्युक्तम्। खण्डकैश्चरकरणे लघुलङ्कासाधनमहासमा। तत्र लघुलङ्कायां खण्डकानि नव चरखण्डकानि क्षीणि परमे राशिक्षये भुक्ते यथा क्षीणि लभ्यन्ते। तदर्थं रविदोःक्षिभागादित्युक्तम्' प्रभि०।

गोलाध्याये च उदयान्तरकर्मोपपत्तियुक्तं देशान्तर स्फुटिकं स्पष्टतया ततुपाधनमुक्तं यथा "स्पष्टर्णयो रध्ययनावनेश कालस्वलात् स्फुटसाधनस्य। तदुत्थखेटा उदयान्तराख्यकर्मैक्यवैलोमवृताः फलेन। लङ्कोदये सूर्य क्षणात्मकार्द्धगतेष्टनाडीघटिकल्पकं" धि० योऽयमर्णय आनीतः स मध्यमसावनेनैव कृतः? स्फुटसाधनस्य चलत्वात् तत्रविधेनानुपातेन स्फुटो नायातीत्यर्थः युगादेरारभ्य वर्तमानरविवर्षादेः प्राक् यावान् मध्यमसावनस्तावानेव स्फुटसाधनः स्यात् किन्तु रविवर्षादेरूर्ध्वं यावान् मध्यमसावनस्तावान् स्फुटः अतस्तदुत्थखेटा उदयान्तराख्यकर्मैक्यवैलोमेन फलेनानुताः सन्तो लङ्कोदये सूर्यान्यथा लङ्कायां माध्याह्नोदये मध्या इति यदर्थदृक् तदवत्। अथोदयान्तरकर्माह" प्रभि० "मध्यार्कभुक्त्याप्तसवोनि रजे ये ये च मध्यार्ककलासमाताः। तदन्तरं यत् स्फुटमध्ययोस्तत् द्युपिण्डयोः स्याद्विवरं गतिघ्नम्। हृतं द्युरात्राधिरात्रलिप्ता हीनाधिकाश्चेदसवोऽल्पकाः स्युः। तदन्यथाऽऽस्तु निजोदयैक्यं लङ्कासु पूर्वं विहितं तदानीम्। हृतं तथा स्याच्चरकर्मभिन्नं कर्म स्फुटाप्तासुदयान्तराख्यम्" धि०। "यायनांशेन रविणा मेषादेरारभ्य ये भुक्तराश्ययस्तत्रावन्तिजो ये निरक्षोदयासवो गगनभूधरघट्क-

चन्द्राः १९७०। इत्यादयस्तेषामैक्यं कृत्वा भुज्यमान राशेर्यै भुक्तभागास्तांस्तदुदयासुभिः सङ्गुण्य लिप्तीकृता २० विभज्य लब्धासवोऽपि तत्र ज्ञेयाः एवं मध्यार्कभुक्तासवः स्यु। भदिनात्प्राग्दूर्ध्वं तावत्प्रमाणके काले लङ्कायां मध्यमार्कस्योदयः। तत्काले हि यत्रेष्टा साध्या अथ चार्कगोल के सिद्धान्ते मध्यमार्ककलाभिस्तेष्टप्रमाणके काले भदिनात्प्राग्दूर्ध्वं ज्ञाताः, अतोऽहनां कलानां च यदन्तरं तेनार्कोदयोऽन्तरितः। अतस्तदुदयान्तराख्यं कर्मोच्यते तैरन्तरासुभिर्युक्तानि सङ्गुण्यार्कासवानष्टोत्तरासुभि २१६५६ र्विभज्य लब्धकला यत्रे भग्नं कार्यः यदि कलाभ्योऽसवोऽल्पकाः स्युः, अन्यथा ऋणं, यदि तु स्वदेशोदयै मध्यमार्कभुक्तासूनानीयेदकर्म कृतं तदौदयिकानां यत्रानां चरकर्मापि कृतं स्यात् यदि तु स्फुटार्कभुक्तासून् स्वोदयासुभिरानीयेदं कर्म कृतं तदोदयान्तरभुजान्तर सञ्ज्ञकर्णाख्यं क्रियापि कृतास्यु तर्हि कथमिदमुदयान्तराख्य कर्माद्यैर्न कृतं तदाह यतोऽन्तरं तत्सलल्पकत्वं उर्ध्वरेखानीचे चतुर्ष्वपि अन्तराभावः तन्मध्येऽन्तरस्य दर्शनात्। इदानीं देशान्तरस्वरूपमाह प्रमि० "येऽनेन लङ्कोदयास्तेषां देशानां खपुरोदये स्यु"। देशान्तरं प्राग्दूरं यल्लङ्कोदयास्तेभ्यः तच्चरसंस्कृतम्" यि०। "ये ऽनुदयान्तरकर्मणा लङ्कायामौदयिका यत्रा ज्ञातास्ते देशान्तरकर्मणा खपुरौदयिका स्युः। तच्च देशान्तरं द्विविधम् एकं पूर्वापरमध्यान्योत्तरं तच्चरसंस्कृतं सङ्ग्रहवाक्यवीजरूपाह" प्रमि०। "यल्लङ्कोज्जयिनीपुरोपरिकुरुक्षेत्रादिदेशान् स्पृशत् सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः। आदौ प्राग्वत्तोऽपरत्र विषये यद्यद्धि रेखोदयात् खात्तत्क्षयात् क्रियते तद्धनरूपं स्फुटं ज्ञेयं फलम्" यि०। "लङ्काया मेरुसूत्रं मेषकर्कादिगा या रेखा उज्जयिनीकुरुक्षेत्रादिदेशान् स्पृशती यदि सा मध्यरेखोच्यते। रेखातो यदार्कोदय लङ्कातः पूर्वदेशे भवति रेखोदयकालादनन्तरं घटिकादेर्ऽकोदयः। तल्लङ्काकुरुक्षेत्रान्तरयोजनैः खल्वभूवेष्टाद्यानुपातेन यदि स्फुटपरिधियोजनैः यदि ६० घटिका लभ्यन्ते तदा रेखा स्फुटपुरोऽन्तरयोजनैः किमितीति त्रैराशिकेन देशान्तरघटिकाः लभ्यन्ते मध्यमाष्टशतीसाधनात् भिन्नमुपात्तः यदि घटीष्कृता फलस्य गतिकला लभ्यन्ते तदा देशान्तरघटीभिः किमिति अथ योजनैरेवानुपातः। यदि स्फुटपरिधियोजनैर्मिति. प्राप्यते तदा देशान्तरयोजनैः किमिति फलं कलाः प्राग्वत्, यतस्तदा दोदयः पश्चात्कर्म यतस्तत्र रेखोदयादनन्तरमर्कोदय इत्युपपन्नम्। इदानीं भूगोले स्फुटपरिधिप्रदेशं स्फुटसानुपातं चाह" प्रमि० "खदेशमेवं नरयोजनैर्यल्लङ्कांयजैर्मेरुगिरेः समन्तात्। हृत्तं स्फुटो भूपरिधिर्यतः स्याच्चिज्ज्याहृतो लम्बगुणः क्रमोऽत्र" यि० "खपुरस्य मेरुगर्भस्य चान्तरे यावन्ति योजनानि तावन्ति लङ्कायंजानि यतो निरक्षदेशखपुरान्तरयोजनभाज्यलङ्कायंजानि, भागेष्टे योजनानि च व्यस्तमित्युपपन्नम् इत्यर्थः; तैर्लङ्कायंजैर्योजनैर्मेरुगिरेः समन्ताद्वृत्तमुपपद्यते स स्फुटभूपरिधिः यो मध्यपरिधिः पठितः स निरक्षदेशोपरि। अयन्तु खपुरोपरि, अतः किञ्चिन्न्यूनो भवति अथ तदानयन मध्यपरिधेरभीष्टनिरक्षाक्षज्या व्यासार्धे प्रकल्प्य तस्मिन् व्यासार्धे खपुरे यावती लम्बज्या तावत् स्फुटपरिधेर्व्यासार्धं भवितुमर्हति अतस्तैर्राशिकं यदि त्रिज्याव्यासार्धे मध्यम. परिधिर्लभ्यते तदा लम्बज्यामिते कः इति फलं स्फुटपरिधिरित्युपपन्नम्" प्रमिताक्षरा।

इष्टकाले लग्नाद्यानयनम् अत्रप्रश्ने १९६५ इष्ट लङ्कोदयप्रमाणदर्शनपूर्वकलक्षप्रायम् विशेषस्तु यि०यि०। "तात्कालिकार्केण युतस्य राशेर्भुक्तभागैर्गणितोदयासुः स्यात्। भोग्यासवः, खाग्निहृतादयाप्ता भुक्तासवो भुक्तलवैः स्फुरेषम्। इष्टासुषड्भादधनीय भोग्यासदयतो राश्युदयांश्च शेषम्। ऋणेऽहृते खाग्निगुणं लवाद्यमशुद्धपूर्वैर्भवनैरलाद्यैः। युक्तं तनुः स्यादयनांशहीनमिष्टासवोऽल्पा यदि भोग्यकेभ्यः। त्रिभङ्गणाः खोदयभाजितास्ते लम्बांशयुतो रविरेव लग्नम्" यि०। "यस्मिन् काले लग्नं ज्ञेयं तस्मिन् काले तात्कालिकोऽर्क आयनांशः कार्यः। तेनार्केण युतस्य राशेर्यै भोग्यांशास्तैस्तदुदयासवो गुणाख्यांशयता भाज्याः। ये लब्धास्ते भोग्यासवः स्युः। अथेष्टासुभ्यो भोग्यासून् विशोध्य तदयतो यावन्त उदयाः शुध्यन्ति तावन्तः शेषाः। ततः शेषात् खरामगुणादशुद्धोदयेन भक्ताद्यल्लब्धमंशाद्यं तदशुद्धोदयात् पूर्वं यावन्तो मेषाद्या उदयास्तावद्भी राशिभिर्युतमयनांशैश्च रहितं तल्लग्नं स्यात्। अथ यदीष्टासवो भोग्यभ्योऽल्पाः तदेष्टासवस्त्रिभंशुणासदुदयासुभिर्भाज्याः। फलेनांशाद्येन युतो रविर्लग्नं स्यात्" प्रमि० लग्नाद्यादिना कालानयनं तत्रैव दर्शितं यथा "अर्केण भोग्यासनुभुक्तयुतो मध्योदयाढ्यः समयो विलग्नात्। यदैकभे लग्नरवी तदा तद्भागान्तरखोदयखाग्निभागः। लग्नेऽल्पके तु द्युनिशात् स भोग्यसात्कालिक-

कार्कादवलक्ष कालः । चेत् सायनाः षट्भोग्यभागाद्यूनस्तदैव तात्कालिकांतिमस्वर्क्षेः ॥ व्याख्यां यद्येष्टघटिका विलग्नं कालश्च तदौदयिकात् स्वल्पश्च"इति०।"अर्कस्य प्राग्यद्भोग्यकालः साध्यः । लग्नस्य सायनांशस्य भुक्तकालः साध्यः तयोरैक्यमर्कोदयतो लग्नपर्यन्तं ये भक्ष्ये राश्यवयवेषा-मुदयाश्च तेषामानयनं च । एवं लग्नात् कालो भवति । अत्र यदैकराशौ लग्नार्की भवतस्तदा तयोरन्तरांशैः खो-दयं संशुद्ध्य लिप्तादि मजेत् फलमिष्टकालः स्यात् । परं यद्यर्कोल्लग्नमधिकम् । यद्यल्पं तदा स कालोऽहोरात्राच्छो-ध्यः । शेषमिष्टकालः स्यात् । अत्रैकालसाधनेऽर्कस्य भोग्यमौदयिकादेव क्रियते । यतः, कालज्ञानात् तात्का-लिकत्वमर्कस्य कार्यम् । अतः स्पष्टः काल आयाति । अनेन कालेन तात्कालिकमर्कं कृत्वा स्पष्टः कालः साध-यितुं युज्यते । परं यदि प्रष्टुः सायनघटिका दृष्टाः । एतदुक्तं भवति । उदक्षामलग्नमेतावतीष्वर्कसायनघटिकासु कीदृग् लग्नं भवतीत्यतदभीष्टं तदैव तात्कालिकार्कोल्लग्नं साध्यते तदैव च लग्नादवलक्षं कालः । यदा पुनरिष्टघटिका यार्कोल्लग्नोदयिकादेवार्कोल्लग्नं लग्नात् कालः स्वल्पश्च । असोपपत्तिः सुगमा । तात्कालिकीकरणकारणात्तु गोले कथिता व्याख्याता च । इदानीं विलोमेन लग्नसाधनमाह" ग्रहि० । "भुक्तात् शुद्धेर्विपरीतलग्नं भुक्तांशनेष्टात्प्रलयोनि-तोर्कैः" गि० "यदोदयात् पूर्वघटीषु लग्नमिष्टं तदा शेषासुभ्यो विशोध्य तत्कालिकमर्कं कृत्वा तस्य भुक्तासवः साध्यास्तानिष्टासुभ्यो यावन्न तदया विशुध्यन्ति तावतो विलोमेन विशोधयेत् । शेषात् खरामशुन्यादविशुद्धो दयभक्तात् ये लब्धा अंशास्तैस्तावद्भुक्तांशैश्च तथा विशुद्धोदयतुल्यैर्राशिभिर्लोमतो रविर्लग्नं भवति ग्रहि० । होरार्द्धैकाणोदयसाधनमपि तत्रैव यथा "क्षेत्राणां स्थूलत्वात् स्थूला उदया भवन्ति राशीनाम् । सूक्ष्मार्थी होराणां कुर्याद्धोरैकाणकानां वा"गि०"यथा राश्युदयाः साधितास्तथा होरोदया अपि साध्याः । त यथा पञ्चदशादिपञ्चदशभागोत्तरभागाणां ज्या होरा-ज्याः षट् भवन्ति । ताभिर्निशुण्यान्यद्ज्या २१४१ पृथक् पृथग्गुण्या स्वस्वद्युज्यया भाज्या । फलानां धनुर्ज्यधो-ध्वः शुद्धानि । यतः पञ्चमं पञ्चमाद्यर्ध-मित्यादि । शेषाणि होरोदयासवो भवन्ति । एवं दृगादिद्रेष्काणोत्तरभा-गैर्द्रेक्काणोदया भवन्ति । ते च नव । तथा होरांशा-नाह षड् चराद्यि । ज्यधोध्वः शुद्धानि तानि तैर्भा धरखण्डानि ते क्रमोत्क्रमस्थं. क्रमोत्क्रमस्थ ऊनयुताः खलः खदेशे होरोदया भवन्ति । मेषादीनां द्वादश ते च व्यस्तास्तुलादीनाम् । एवं चतुर्विंशतिः२४। एवमेव द्रेक्काणोदया षट् त्रिंशत् । तथा चार्कस्य सायनांशस्य भागाः पञ्चदश १५ हृता गता होराः स्युः । शेषांशाद्ये भुक्तासवे पञ्चदशघ्नाः शुद्धा भोग्यांशाः स्युः । भोग्या-भ्रान्तः खदेशहोरोदय पञ्चदशहृताः फलं भोग्यासवः स्युस्ता-निष्टासुभ्यो विशोध्य तदगतो होरोदयांश शोधयेत् ॥ शेषं पञ्चदशगुणमशुद्धहोरोदयेन भजेत् फलं लवाः । अशु-द्धपूर्वाणां होरोदयानां संख्यया शुद्धिर्न, पञ्चदशभि-र्हृताः सन्तो लब्धांशा भवन्ति । एवं लग्नात् कालसाध-नेऽपि । शेषमेव द्रेक्काणोदयैरपि लग्नसाधनम् । तत्र पञ्चदशस्थाने दश १० गुणने भजने च कल्प्याः । एवं होरोदयैर्द्रेक्काणोदयैर्वा साधित लग्नादिकहृदयान्तराख्यं कर्म च सूक्ष्मं भवति अन्यथा स्थूलम्" ग्रहि० ।

अहर्गणादयान्तरकर्म यत्रोक्तम् "भानोः फलं गुणि-तमर्कयुतस्य राशेर्यत्तोदयेन खखनागमहो १८०० विभ-क्तम् । गत्या यदृक्षं गुणितं द्युनिशासु भक्तं स्वर्णं यदे-र्कवदिदं तु भुजान्तराख्यम्" गि० । "अर्कस्य यद्भुजफलं खलु राशौ रविर्यत्ते तस्य राशेः सम्बन्धी यो निरक्षोदयस्तेन तद्गुणितराशिकलाभि १८०० र्भक्तं पुनर्यद्गत्या गुणितमहोरात्रासुभि २१६४ र्भक्तं यत् फलं तद्गुणैक्यवत् धनर्णं कार्यम् । यदार्कस्य भुजफ-लमृणं, तदा स्वर्णमन्येषां च धनम् । यदि धनं तदा ऋणमित्यर्थः । अत्रोपपत्तिः । ये मध्यमार्कौ-दयिकाः स्फुटार्कौदयिकाः क्रियन्ते । तत्रार्कफलसंस्कार-करणायानुपातः । यदि राशिकलाः१८०० निरक्षोद-यासुभिरेतत्फलानि तदा फलवलाः कतिभिरिति । लब्धं भास्वत्फलेभ्यो ज्यवो भवन्ति । अथाभीष्टानु-पातः । यदि द्युनिशासुभिर्गतिकला लभ्यन्ते तदैभिः किमिति । ताः कला ऋणं धनं च यतो मध्यमार्कोद-यात् प्राक् स्फुटार्कोदयः स्यादृणे तत् फलं संयतेऽस्मन्-रविलग्नयोरन्तरम् । इदमीषदयान्तरमाह"इति० । "युक्तायनां यस्य तु मध्यमस्य भुक्तासवोऽर्कस्य निरक्षदेशे । मेषादि-भुक्तोदयसंयुता ये तत्रायनांशास्थितमध्यभागाः । क्षिप्रा-गणस्तद्विवरेण निघ्नो गतिर्गुणस्तद्द्युनिशासुभक्ता । स्वर्णं यदृक्षे चेदसवोऽधिकेभ्यो हृदं तदृक्षासुहृदयान्तराख्यम्"गि० "मध्यमार्कस्य सायनांशस्य ये राशेर्भुक्तभागास्तैर्हृदयं

निरक्षदेशीय भुक्तिर्लिप्ता विभजेत् फलं तस्य राशेर्भुक्तांशवः। अथ मेषाद्या येऽर्केण भुक्ता राशयस्तेषां च निरक्षोदयासवस्तत्र योज्यास्ते मेषादिभुक्तोदयासवः स्युः। अथ मध्यमार्कस्य सायनांशस्य कलाः कार्याः। तासां कलानां तेषामसूनां च यदन्तरं तेन व्यगतिगुणया द्युनिशासुभिर्भाज्या लब्धाः कला यत्र धनं कार्याः यदि कलाभ्योऽसवोऽधिकाः स्युः, यदि न्यूनास्तदा ऋणम्। अत्रोपपत्तिः। इह यः पूर्वमकर्मगुणः कृतः समध्यमसायनमानेन स्फुटसावनस्य चलत्वात्। रविमध्यगतिकलातुल्यासुभिः सङ्गिता नाक्षत्राः षष्टिघटिकाः ६०,५६,८। इदं मध्यममर्कसावनम्। ता गतिकला यैरसुभिरुच्यन्ति तद्युताः षष्टिघटिकाः स्फुटसावनम्। तच्चलम्। प्रायेण गत्यन्यत्वात् प्रतिमासं राश्युदयान्यत्वच्च। तादृशोऽकर्मगुणः कर्तुं नायातीति मध्यमः कृतः, तेन सध्यमर्कोदये यद्वा न भवन्ति कदाचिदर्कोदयात् प्राक् कदाचिदनन्तरम्। अत एव प्रागुक्तम्। "दृग्गिरः पुरि मध्यमभास्करे क्षितिजसन्निधिगे सति मध्यम" इति। अथ स्फुटमध्यार्कगुणयोरन्तरानयनम्। मेषादेरारभ्य येऽर्कभुक्ता राशयस्ते वैरसुभिरुच्यन्ति त एकीकृताः। तावत्यस्मात्काले भदिनान्तादूर्ध्वमर्कगुणेन भवितव्यम्। अथ च मेषादिभुक्तकलाहत्यैक्यैरेव कृतः। अतोऽसूनां कलानां च यदन्तरं तावद्भिरसुभिरर्कगुणोऽन्तरितः। यद्भोगांशासुभिर्गतिर्लभ्यत तदैभिरन्तरासुभिः किमिति। फलं यत्रेष्टं खं यदासवोऽधिकाः। अन्यथा ऋणमित्येतदुक्तं युक्तमेव"। इदानीं येऽस्योदयान्तरस्य वासना न बुध्यन्ते तेषां प्रतीत्यर्थमन्यदप्याह"प्रमि०।"येषु खोदयैः स्फुटरवेरवं कृतास्ते विक्षेपितास्च यदि मध्यरवेः कलाभिः। बाह्यन्तराख्यमुदयान्तरकं चराख्यं कर्मत्रयं विहितमौदयिके तदा स्यात्"यि०।"यदि स्फुटरवेः खोदयेन भुक्तासवः कृता मेषादिखोदयैश्च युतास्तेभ्यस्तथा मध्यमार्ककलानां च यदन्तरं तेन भुक्तिर्गुणिता द्युनिशासुभिर्भक्ता यद्यासवोऽधिकास्तदा फलं यत्रे खम्। अन्यथा ऋणम्। एवं कृते सति भुक्तान्तरमुदयान्तरं चराख्यं च कर्मत्रयमपि कृतं स्यादौदयिके यत्रे। इदानीं प्रकारान्तरेणौदयिककर्माह"प्रमि०। "मध्याद्रवेरयनभागयुतादिनिघ्नाद्धोर्ज्या खगैतिगुणा खनगाग्नि २७० भक्ता। खर्णं यत्रे युगयुजोः पदयोर्विलग्नात्खेचं स्फुटं खलु भवेदुदयान्तरं वा"यि०। "मध्यार्कस्य सायनांशस्य द्विगुणितस्य या लब्धखण्डकैर्दोर्ज्या तया गुणिता व्यगतिः खनगघ्नं २७० हृता फलं विलग्नादि यत्रे धनम्। एवं युग्मपदस्थितेऽर्के। अयुग्मपदस्थिते त्वृणम्। अत्रोपपत्तिः। क्रान्तिवृत्तस्य चत्वार्यपि पदानि पृथक् पृथक् पञ्चदशभिः पञ्चदशभिर्घटिकाभिरुदयन्ति। परं नैकैको राशिः पञ्चभिरत उदयान्तरकर्म पदमध्यं यावदुपचीयते ततोऽपचीयते। अत एव पदान्तरेषु तत्साम्यम्। पदमध्येषु परमता। यदत्र निरक्षोदयैः कर्म दर्शितं तल्लाघवबोधार्थम्; तत् स्थूलम् उदयानां स्थूलत्वात्। अत एवार्यभट्टादिभिः सूक्ष्मत्वार्थं द्वयक्षोदयाः पठिताः"। इदमुदयान्तरं कर्म यथा जायते तथोच्यते। मध्यार्कस्य सायनांशस्य द्वेर्ज्या द्युज्या च लाभा तया द्युज्यया सा द्वेर्ज्या भाज्या मिथुनान्तद्युज्यया गुणयेत्। तस्या धनुषो येऽसवस्तैर्मध्यार्कस्य सायनांशस्य भुजकला जाताः सत्यः स्फुटा अन्तरासवो भवन्ति। तैरुदयैरन्तरित इष्टयः एवं पदमध्ये षड्विंशतिः पलानि किञ्चिदधिकानि भवन्ति। तानि व्यापप्रकारेण साधयितुमर्को द्विगुणितः। द्विगुणितस्यार्कस्य यावद्भुजः क्रियते तावत् पदमध्ये राशित्रयं भवति। तद्वेर्ज्यया लब्ध्या षड्विंशत्या चालयात्; यदि स्वार्कमितया द्वेर्ज्यया षड्विंशतिर्लभ्यते तदाभीष्टया किमिति। अत्र षड्विंशत्या स्वार्का अपवर्तिता गुणकस्थाने रूपम्। हरस्थाने साधीस्त्रयोदशः। फलं पलीयपलादि। पुनरन्योऽनुपातः। यदि पलीयपलत्रयेण गतिकलातुल्या विकला लभ्यन्ते तदैभिः किमिति। पूर्वं लब्ध्या द्वेर्ज्या गुणः साधीत्रयोदशः हरः। इदानीं षष्टिहरः; अतोऽपवर्तिते गुणः। हरोर्धातो हरः खनगाग्निः २७० इत्युपपन्नम्। ओजपदेष्वयं कलाभ्यश्चेत् एव भवन्त्यतस्तत्र ऋणम्। युग्मपदे त्वधिका अतस्तत्र धनम्" प्रमि०

ग्रहाणां द्रव्याद्रव्ययोः, चन्द्रे विशेषस्य च निरूपणं तत्रैव "निशीथलग्नादुदयासलग्ने न्यूनाधिके यस्य खगः सहस्रः। दिनेऽपि चन्द्रो रविसन्निधानाच्छशं गतश्चेत् सति दर्शने भा"यि०। "दिनक्षरेऽस्तंगते यदिष्टकाले लग्नं तदिष्टलग्नम्। तस्मादुपरुद्योदयाख्यलग्नं न्यूनमल्पाख्यं चाधिकं यदि भवति तदा यत्रे द्रव्यं; इतोऽन्यथा वेदद्रव्यं:। एवं सत्यत्रे सति चन्द्रो दिवसेऽपि द्रव्यः। यदि यत्रो द्रव्यस्तदा यत्रस्य छाया साध्या" प्रमि०।

तारायग्रहाणामुदयास्तमययोर्यत्रेणैवं यथा सू०सि० रङ्गना०।"अयोदयास्तमययोः परिज्ञानं प्रतीक्ष्यते। दिवा-

करकराक्रान्तमूर्त्तीनामल्पतेजसाम्" सू० । "अथ नक्षत्रग्रहयुत्यधिकारानन्तरम् । सूर्यकिरणाभिभूता मूर्त्तिर्बिम्बं येषां तेषां चन्द्रादिषड्ग्रहाणां नक्षत्राणां च । अतएवाल्पतेजसां न्यूनप्रभावतासुदयास्तमययोः अधिमकाले सूर्यादधिकासन्निहितसन्निहितत्वसम्भावनया क्रमेणोदयास्तयोः सूर्याग्निःसृतस्य यस्मिन् काले यदन्तरेण प्रथमदर्शनं सम्भावितं स उदयः । सूर्याद्दूरस्थितस्य यस्मिन् काले यदन्तरेण प्रथमादर्शनं सम्भावितं सोऽस्तः । अनेन नित्योदयास्तव्यवच्छेदस्तयोरित्यर्थः । परिज्ञानं सूक्ष्मज्ञानप्रकारः प्रक्रीर्त्यते अति सूक्ष्मत्वेन मयोच्यत इत्यर्थः । तथा च ग्रह इत्युद्देशेऽस्तमनसहितमपि तस्य पूर्वमेव सूर्यासन्नत्व एव सम्भवात् तद्विलक्षणतया ग्रहयुतिप्रसङ्गे नोक्तम् । नक्षत्रग्रहयुतिस्तु ग्रहयुतिवदिति तदनन्तरसङ्गा । अतः प्रतिबन्धकजिज्ञासापगमेऽवश्यवक्तव्यत्वादस्यावसरसङ्गतित्वात् तत्सङ्गत्या नक्षत्रग्रहयुत्यधिकारानन्तरं प्रागुद्दिष्टमस्तमनं तत्प्रसङ्गादुदयश्च प्रतिपाद्यत इति भावः । तत्र प्रथमं ग्रहनक्षत्राणां पश्चिमास्तपूर्वोदयाह "र० ना० । "सूर्यादभ्यधिकाः पश्चादस्तं जीवकुजार्कजाः । जनाः प्रागुदयं यान्ति शुक्रस्तौ वक्रिणौ तथा" सू० । "बक्रगती शुक्रबुधौ तथा सूर्यादधिकौ पश्चिमास्तं गच्छतः । सूर्यादस्तौ पूर्वोदयं प्राप्नुतः । शेषं स्पष्टम् । अथ चन्द्रबुधशुक्राणां पूर्वास्तपश्चिमोदयावाह र० ना० । "जना विवस्वतः प्राच्यामस्तं चन्द्रज्ञभार्गवाः । व्रजन्त्यभ्यधिकाः पश्चादुदयं शीघ्रयायिनः" सू० । "शीघ्रयायिनः सूर्यगत्यधिकगतय इत्यर्थः । एतेन बुधशुक्रावर्कगत्यल्पगती सूर्यादस्तौ पूर्वास्तमधिकौ च पश्चिमोदयं न प्राप्नुत इत्युक्तम् । शेषं स्पष्टम् । अत्रोपपत्तिः । रविगतितोऽल्पगतिर्यतोऽर्कादूनखेटः प्राच्यां दर्शनयोग्यो भवितुमर्हति । यतः सूर्यस्याधिकत्वेन बक्रगतित्वाच्छीघ्रतरमधिकविप्रकर्षात् प्रवहवशेन न्यूनस्य पूर्वसदयादधिकस्यानन्तरसदयमियमात् । ग्रहस्य कान्तिसंलग्नताकालानन्तरं यावत् सूर्यस्य तादृशः कालस्तावत्पर्यन्तं विप्रकर्षे दर्शनसम्भवात् । एवं यदाल्पगतिः सूर्यादधिकस्तदा प्रवहवशेनार्कस्य पूर्वसदयादनन्तरसदितग्रहस्य दर्शनासम्भवात् प्रवहवशेनादौ न्यूनार्कस्यास्तसम्भवादनन्तरमधिकग्रहस्यास्तसम्भवात् सूर्यास्तानन्तरं पश्चिमभागे ग्रहदर्शनसम्भवेऽभ्यधिकगतिसूर्यस्य पूर्वस्थितत्वेनोत्तरोत्तरमधिकसन्निकर्षात् पश्चिमायामदर्शनं सम्भवत्येव । ते तु भौमगुरुशनयः । वक्रत्वे न्यूनगतित्वाद्बुधशुक्रौ चेति । अथार्कगतितोऽधिकगतिग्रहः । सूर्यादूनस्तदोत्तरोत्तरमधिकसन्निकर्षात् पूर्वस्मिन्नदर्शनं याति । यदा सूर्यादधिकस्तदोत्तरोत्तरमधिकविप्रकर्षात् पश्चिमायासदयः । ते तु शीघ्रा-चन्द्रबुधशुक्रा इत्युपपन्नम् । अथाभीष्टदिन आसन्ने सूर्योदयास्तकालिकौ सूर्यदृग्ग्रहौ तत्कालज्ञानार्थं कार्यावित्याह "र० ना० । "सूर्यास्तकालिकात् पश्चात् प्राच्यासदयकालिकौ । दिवाकरग्रहौ कुर्याद्दृक्कर्मार्थं ग्रहस्य तु" सू० । "पश्चात् पश्चिमास्तोदयसाधनेऽभीष्टदिन आसन्ने सूर्यग्रहौ सूर्यास्तकालिकौ कुर्याद्दृक्कर्मकः । पूर्वास्तोदयसाधने सूर्योदयकालिकौ कुर्यात् दिनेऽभीष्टकाले कुर्यात् । चकारो विकल्पार्थकः । अनन्तरं ग्रहस्य दृक्कर्म व्यायनात्तदृक्कर्मद्वयं कुर्यात् । तुकार आत्तदृक्कर्मसंस्कारपूर्वार्द्धोक्तमिति विशेषार्थकः । अत्रोपपत्तिः । पश्चादस्तोदयसाधने पश्चिमायां तदृदर्शनमिति सूर्यास्तकालिकौ सूर्यग्रहावधिष्टकालांशसाधनार्थं सूक्ष्मौ । पूर्वोदयास्तसाधने पूर्वदिशि तद्दर्शनमिति सूर्योदयकालिकौ सूर्यग्रहावधिष्टकालांशसाधनार्थं सूक्ष्मावन्यकाले तु किञ्चित्तयोर्न्यूनावपि कृतौ दृक्कर्मसंस्कृतयग्रहसूर्यवत् क्षितिजसंलग्नतायोग्यत्वाद्दृक्कर्मसंस्कृतो ग्रहः कार्य इति । अथेष्टकालांशानयनमाह "र० ना० । "तत्रोलग्नान्तरप्राणाः कालांशाः षष्टिभाजिताः । प्रतीच्यां षड्भयुतयोस्तद्वल्लग्नान्तरासवः" सू० । "ततस्ताभ्यां सूर्यदृग्ग्रहाभ्यां लग्नान्तरप्राणाः "भोग्यासूनूनकस्याथ" इत्युक्तप्रकारेणान्तरकालासवः षष्टिभक्ता इष्टाः कालांशा भवन्ति । प्रागुदयास्तसाधने प्रतीच्यां, पश्चिमोदयास्तसाधने षड्भयुतयोः षड्राशियुक्तयोः सूर्यदृग्ग्रहयोर्लग्नान्तरासवः । अनन्तरासवस्तद्वत् षष्टिभक्ता इष्टकालांशा भवन्तीत्यर्थः । अत्रोपपत्तिः । दृग्ग्रहसूर्ययोर्यामलग्नकालो ग्रहस्य सूर्योदयकाले दिनगतं पूर्वोदयास्तनिमित्तमुपयुक्तम् । एवं पश्चिमोदयास्तनिमित्तं सूर्यदृग्गुहाभ्यामस्तकालासुभिरन्तरकालः सूर्यास्तकाले ग्रहस्य दिनशेषकाल उपयुक्तः तत्रास्तकालानामनुक्तेरुदयासुभिः साधनार्थं सयहौ सूर्यदृग्ग्रहौ कृतौ स कालोऽस्तात्मकः । यदि अहोरात्रासुभिस्तत्कलातुल्यैश्चक्रांशा लभ्यन्ते तदेष्टासुभिः क इत्यनुपाते प्रमाणफलयोः फलापवर्त्तनेन हरस्याने षष्टिः । अतोऽस्तात्मकान्तरकालः षष्टिभक्त इष्टकालांशा इत्युपपन्नम् । अत्रेदमवधेयम् । सूर्योदयकालि-

काभ्यामर्कदृग्गृहाभ्यामानीतेन दिनगतेन भूयो भास्वो दृग्गृह । सूर्यांशकाभिलाभ्यां षष्टभ्यामयनकदृग्गृहाभ्यामानीतेन दिनशेषायो भास्व सदृशो दृग्गृह' । क्रमेण यद्गोदयासकाले प्राक्पश्चिमहग्गृहौ भवत । तस्या सूर्यषष्टभसूर्यांशया च क्रमण सूर्योदयास्तकालो ऽहस्य सूर्योदयास्तकाले क्रमेण दिनसंज्ञो भास्वतो दृष्टिमतो कालव्यापिनौ उच्यते । अथैवमुक्तिकाभ्यामानीतकाले पर्वसन्धिगतस्य ग्रहस्यैतिष्यग्रहाभ्या सूर्यषष्टभसूर्यांशाभ्या चानीतेनो भास्करोक्ति सदृशौ' । सूर्योदयास्तसम्बन्धाभावाद् हृदयदा स्वाभ्या व्याख्यया । अथ सायोदयासके [illegible] नैकवार कालात् कालाया स्फुट दृक्कर्म [illegible] नीतैकवारकालात् कालाया क्षतिस्फुटा. उभयत्र कारणसाधनत्वात् । न हि सायनपरिघटीभिश्चक्रपरिधृत्तिर्दैवज्ञैरुक्ता सिद्धान्तोक्ति । अथ यै कालांशैरदयोऽस्तो वा भवति तानृविवक्षु प्रथम सूर्यानयनमाह । कालाया [illegible] र०मा०।'एकादयामरेक्ष्यातिथिसङ्ख्यार्कजस्य च । अदया भूमिसुतस्य दृग्गतप्राणोद्धृतं' स्फु०।"तत दृक्कालायागमानन्तरमस्तस्या । अस्तो यैरंशैर्भवति ते. प्र स्तोदयसंज्ञादृदया ज्ञेया । कस्मादेव सूर्यस्यैव दृग्गतकालाया । यते. पञ्चदय सङ्ख्या कालाया कालम् । " दृक्कालये । भौमस्य सप्ताधिका दय पञ्चदय कालाया दृक्कर्म अथशुक्रस्याह"र०मा०।'पञ्चादस्तसमोऽहोरात्रिदृदय प्राङ्नक्षत्रतया । प्रागस्तसदय. पञ्चादस्तत्वाद्दृदयभिर्गो "स्फु० "शुक्रस्य मन्दत्वेन वक्रत्वेन नीचासन्नत्वात् स्थूलगतिमत्तया पश्चिमायामस्तोदयानि: कालार्धं प्राच्यामदयद तै: साधिके । प्राच्या शुक्रस्याल्पत्वादल्पबिम्बत्वाद्दृदयभि' कालार्धेरस्त गणक: कुर्यात् नान्यै । पश्चिमायामुदयस्तस्याल्पबिम्बस्य दृदयभि: कालार्धेरेव ज्ञेय । अथ बुधस्याह"र०मा०।'एवं बुधो द्वादशभिस्तदर्धाभरर्कके । शुक्रो शीघ्रगतिसाम्यात्करोत्यस्तमयोदयौ"स्फु०।'शुक्रो शीघ्रगति, च समुच्चये । बुध: सूर्याद्द्वादशभिस्तदर्धभिश्च कालार्धैरस्तोदयौ एवं शुक्रवत्या करोति । पश्चादस्त प्रागुदय च द्वादशभि: कालार्धैरुक्तविलम्बतया बुध: करोति । प्रागस्तं पश्चादुदय च चतुर्दशभि: कालार्धैरुक्तबिम्बत्वाद्बुध: करोतीत्यर्थ: । अथ मोक्षेष्टकालांशाभ्यामक्षोदयज्ञ वा गतैष्यलग्नानयनमाह" र० मा०।"एभ्योऽधिकै: कालभागैर्हृता व्यूनैरदर्शना: । अर्वाक् लोके यदा भानुभागमूर्त्यै" स्फु०। "एष्य एवाहोरात्रेऽस्मिन्नेति गोलयोरुभयोरप्येकैरिष्टकालांशै र्हृता दर्शनयोग्या अभीष्टकाले गृहा भवन्ति । तथा पश्चात्साधने ह्यस्य एव ग्रहा ग्राह्या: । उदयसाधने ह्यत्र उदयो गत इति भाव. । अल्पैरिष्टकालांशैर्गृहा लोके भूलोके यदर्शना न विद्यते दर्शन दृष्टिगोचरता येषा ते अदृश्या. अभीष्टकाले भवन्ति । अन्यत्स्पष्टा. कृतो ग्रहानीत स्फु० । भानुभागमूर्तमूर्त्यै इति 'सूर्यांशकेन सूर्यकिरणैर्हृत्य. गुणा अभिभूता सूर्यकिरणप्रतिबन्धेनाकाशव्यापिन्या मूर्त्तिर्विग्रहरूप येषा ते हृत्यर्थ. । [illegible] नीत. । उदयसाधनेऽत्र उदय एव ग्रह इति भाव । अत्र दृ०।"उक्तम्य ऊनाधिको यदीष्ट खेटोदयो गम्यगतस्तदा स्यात् । यतोऽन्यथा चात्रभवेऽप्यगम्य," इति भास्कराचार्योक्तं स्मृयते । यथोपपत्ति तत्रोच्यते । तत्रोपपत्ति कालांशयोरल्पत्वात्कालार्धे यत्काले गृहो दृश्यते तत्काले स गृह्योदयोऽस्तो वार्कजस्य । उक्तकालांशाना सूर्यसान्निध्यजनितादल्पगृहादर्शने हेतुत्वात्तिरोधानात् । तथा चेष्टकालाया उक्तेभ्योऽल्पत्वाद्दृग्गृहसाधनतुल्यमेवेष्टदृक्साधन दृष्टकालाया उक्तेभ्योऽल्पत्वेष्टकालादृग्गृहोदय । यदीष्टकालाया उक्तेभ्योऽधिकत्वेष्टकालाद्दृग्गृहोदय पूर्वं जात: । एवमस्तसाधन दृष्टकालाया अधिकत्वेष्टकालादृग्गृहास्तं । यदीष्टकालाया न्यूनत्वेष्टकालात् पूर्वं गृहास्तो जात इत्युपपन्नमुक्तम् । अथोदयास्तयोर्गतैष्यदिनाद्यानयनमाह" र०मा०। 'तत्कालायान्तरघ्ना भुक्त्यन्तरविभाजिता:। दिनादि ततृफलं स्वं भुक्तियोगेन वक्रिण:"स्फु०। "उक्तेष्टकालांशयोरन्तरस्य कला: सूर्यगृहयोर्गत्यो: कलालब्धान्तरेण भक्ता:। दिनादिकमुदयास्तयो: फलमुदयास्तयोर्गतैष्यदिनाद्यं भवतीत्यर्थ:। वक्रगतिगृहस्य विशेषमाह । तत्रभिति । वक्रिणो वक्रगृहस्य भुक्तियोगेन सूर्यगृहयो: कलालब्धगतियोगेन भक्ता. फलं गतैष्यदिनाद्यं ज्ञेयम् । अत्रोपपत्ति । यदा सूर्यपक्षयोर्मध्यान्तरकलाभिरेकं दिनं तदेष्टोक्तकालांशयोरन्तरकलाभि: किमित्यनुपातेनोदयास्तयोरभीष्टकालान्तरैष्यदिनाद्यागम । वक्रगृहे तु सूर्यवद्गृहयोर्गतियोगेन मध्यफलमन्तरदृङ्नतियोगाद्दृक्पात उपपन्न इत्युपपन्नमुक्तम् । अथ गृहगतिकलयो: क्रान्तिदृक्क्षयोर्वा कालांशान्तरसाधोरात्रदृक्क्षयाद्यानुपात: प्रायेणैव्यो वैजात्येनायुक्त इति मनसि धृत्वा तयोरैक्यातिरेक्यसमा-

दनार्थं गृहगत्योरिच्छाजातीयत्वं यदंशदन्तरेणानुपपन्नं तत्र युक्त एवेत्याह" इ० ना०। "तत्तन्नाक्षत्रहते भुक्तौ अष्टादश्यतोद्भूते। स्वाभ्यां कालगतौ ताभ्यां दिनादि गतगम्ययोः" सू०। "भुक्तौ रविगृहयोर्गत्यौ कलात्मिके तत्तन्नाक्षत्रहते कालसाधनार्थे गृहस्य यो राश्युदयो लङ्कीतस्तेनाक्षात्मकोदयेन गुणिते अष्टादश्यतेन भक्ते फले सूर्यगृहयोः कालांशवत् आक्षगती स्याताम्। ताभ्यां गतिभ्यां गतगम्ययोरहर्गणयोर्दिनादि पूर्वोक्तप्रकारेण साध्यम्। न तु पूर्वोक्तप्रकारेण, तथासत्यतिगतिभ्यां भूलताप्रसङ्गः। अत्रोपपत्तिः। यदि एकस्मिन् कलाभोगराश्युदयासवस्तदा गतिकलाभिः का इष्टनाड्यात्मकोदयासवस्तदेत्यनुपातेनाक्षात्मकं गत्यन्तरं फलमासन्नं इष्टनाड्यात्मकम्। अत्र नक्षत्राणां सूर्यसान्निध्यवशादष्टादश्यन्तरं कलात्मकं विशुद्धं प्रथममेवानीतमाह" इ० ना०। "स्वात्मगम्यहतलग्नाधिक्यात्तद्योः पुनर्वसु। अभिजिद्वह्निहृदयं लवोदयभिरंशकैः" सू०। "मृगव्याधो लुब्धकः। तयोर्दक्षिणोत्तरयोः कालांशैर्ग्रहाद्यानि नक्षत्राणि भवन्ति। शेषं स्पष्टम्। अथान्येषामाह" इ० ना०। "क्रान्तिकालैक्यमूक्षाणि सार्पं रोद्रर्क्षमेव च। दश्यन्ते पञ्चदशभिराषाद्वाद्वितयं तथा" सू०। "क्रान्तिकानुराधामूलनक्षत्राणि पञ्चदशभिः कालांशैर्दृश्यन्ते। उपलक्षणत्वान्न दृश्यन्तेऽपि। इवकारो व्यधिकव्यवच्छेदार्थः। अक्षेषार्द्रा। चासमुच्चये। आषाढाद्वितयं पूर्वोत्तराषाढाद्वयं तथा पञ्चदशकालांशैर्दृश्यत इत्यर्थः। अथान्येषामवयविनामाह" इ० ना०। "अश्वीतिश्रवौभान्यि सौम्यात्प्राग्लिप्तषट्कांशकैः। शेषाणि षट्पञ्चदशभिर्ग्रहाद्दृश्यानि भानि तु" सू०। "तिस्रः पुष्यः सोमदैवं मृगशिरो नक्षत्रमेतानि नक्षत्राणि सौम्यात्प्रागुदग्विस्तृतत्वात् लिप्तषट्कांशकैरेकविंशतिकालांशैर्ग्रहाद्दृश्यानि। उदितान्यस्तङ्गतानि च भवन्तीत्यर्थः। शेषाणि पूर्वाधिकारोक्तनक्षत्रेभ्यो भिन्नातिरिक्तानि यततारापूर्वोत्तराभाद्रपदारेवतीश्वानि नक्षत्रापवत्तापसव्यस्थानि च षट्पञ्चभिः कालांशैर्ग्रहाद्दृश्यानि भवन्ति। तकारो दृश्यादृश्यानीत्यत्र वस्तुत्वार्थकः। अथ दिनाद्यानयनार्थमिष्टच्छाया एव प्रसाधनजातीयत्वकरणमाह" इ० ना०। "अष्टादश्यगताभ्यस्ता दृश्यांशाः खोदयासुभिः। विभज्य लब्धाः खेलांशार्कैर्ग्रहाद्दृश्यतां यथा" सू०। "दृश्यांशाः कालांशा अष्टादश्यगतगुणितास्तान् खोदयासुभिर्गृहराश्युदयासुभिर्भक्ता लब्धाः खेलांशाः क्रान्तिवृत्तखांशार्कैर्यथैर्ग्रहादृश्यता उदयास्तौ प्रकारान्तरेणोक्तरीत्या स्यातौ। कालांशाभ्यः खेलांशावानीय तदन्तरकाले यथास्थितगत्योरन्तरेण योगेन वा भक्ताः फलमिष्टदायास्तयोर्गत्योर्दिनाद्यं पूर्वागतमेव स्पष्टार्थं। अत्रोपपत्तिः। यदि राश्युदयासुभिरेकराशिकलोदयास्तदा कालांशकलात्मकैरसुभिः कास्तीति क्रान्तिवृत्ते कलात्मकाः षष्टिभक्ता अंशा इति पूर्वमेवोक्तस्थाने कालांश एव हृतो लाघवात्। तत्फलमसुपदम्। गृहांशासुभिरेवमिष्टकालासुभिरेव इत्युक्तम्। तथा नक्षत्राणां भोगभावाद्दियोगयोगासन्नेन गत्यन्तरेणाक्षात्मकेन गत्यन्तरमासन्नमवश्यं स्यात् आह" इ० ना०। "प्राग्वदुदय्यादुदक्कर्म पूर्ववत्। गत्यन्तरदिनप्राप्तिर्भुक्त्य सदृशे हि" सू०। "एषां नक्षत्राणां प्राच्यासुदयः प्रतीच्यामस्तो गत्यभावादन्यगतिगृहवत्। एषां नक्षत्राणां हक्कर्मानयनकर्म पूर्ववत् पूर्वप्रकारेण कार्यम्। परन्तु श्लोकपूर्वार्धोक्तमिति ध्येयम्। सदा नित्यम्। एवकारात् कदाचिदप्यन्यथा नेत्यर्थः। हि निश्चयेन। रविगत्या गतैष्यदिनानां लब्धिः स्यात्। नक्षत्रगत्यभावात् योगे गृहगतिवत्। अथ कतिपयानां नक्षत्राणां सूर्यसान्निध्यवशादस्तो नास्तीत्याह। "अभिजिद्ब्रह्महृदयं स्वातीवैष्णवयोः सवाः। अर्कर्क्षभुक्तहक्कर्म्यत्वान्न लुप्यन्तेऽर्करश्मिभिः" सू०। अभिजित्। ब्रह्महृदयम्। अनेनैकदेशस्य ब्रह्मणोऽपि ग्रहणम्। स्वातीश्रवणधनिष्ठाः। अर्कर्क्षभुक्तहक्कर्म्यत्वादुत्तरदिक्स्थत्वादुत्तरविक्षेपाधिक्यादित्यर्थः। सूर्यकिरणैर्न लुप्यन्ते अस्तं न यान्तीत्यर्थः। अत्रोपपत्तिः "यस्योदयार्कादधिकोऽस्तभानुः प्रजायते सौम्यगतेरतिदैर्घ्यात्। तिग्मांशुसान्निध्यवशेन नास्ति धिष्ण्यस्य तस्यास्तमयः कथञ्चित्"। इति भास्कराचार्योक्तेः। परमिदमुक्तमस्माभाभ्याम्। अन्यथा पूर्वाभाद्रपदाया अपि तथात्वापत्तेरिति दिक्" इ० ना०। "यथा भौमादीनां सूर्यसान्निध्योदयास्तसन्ने दीप्तासकलबिम्बदर्शनं तथा चन्द्रस्य खोदयास्तकाले सकलबिम्बदर्शनं शुक्लत्वेन न भवति। किन्तु बिम्बैकदेश एव शुक्लत्वेन दृश्यत इति भौमादिविलक्षणत्वं चन्द्रस्य कुत इत्याशङ्का-

या: पूर्वाधिकारे सप्तपस्थितेस्तदुत्तरभूतषट्कोन्नमनाधिकारोऽयमुपस्थित आरब्धो व्याख्यायते । तत्र षट्कोक्ते रुदयकालात् पूर्वकालेऽस्तकालात्परकाले चासन्नतिपयदिवसेषु दर्शनात् पूर्वाधिकारे चन्द्रस्य कालांशानुक्त्या तदुदयास्तानन्तरेषु प्रथममुपस्थितचन्द्रोदयास्तयोः साधनमभिदधति" र० ना० । "उदयास्तविधिः प्राग्वत् कर्त्तव्यः भौतगोरपि । भागैर्हीनयभिः पश्चाद्दृश्यः प्राग्यात्यदृश्यताम्" सू० । "चन्द्रस्य अपिशब्दः पूर्वाधिकारोक्तैर्गृहनक्षत्रैः समुच्चयार्थकः । उदयास्तविधिरुदयास्तयोः साधनप्रकारः प्राग्वत् पूर्वाधिकारोक्तरीत्या गणकेन कार्यः । नन्वत्र कालांशानां पूर्वमनुक्तेः कथं तद्विद्धिरत आह । भागैरिति । हीनयभिरंशैश्चन्द्रः पश्चिमायां दृश्य उदितो भवति । प्राच्यामदृश्यतामक्षं प्राप्नोति । अत्र पश्चात् प्रागिति पुनरुक्तमपि पूर्वं बुधशुक्रयोः साकल्येन चन्द्रोदयास्तदिगुक्ता तत्साकल्येन चन्द्रस्य पश्चिमास्तपूर्वोदयौ वर्तेते इति कस्यचिन्मन्दबुद्धेर्भ्रमस्य वारणायेति ध्येयम्"।

सूर्योदये विशेषः गु० त०ट०सं० । "रेखामात्रं च दृश्येत रश्मिभिश्च समन्वितम् । उदय तं विजानीयाद्धोमं कुर्यात् विचक्षणः" "उदयादोदयाद्भानोर्भौमसावन वासर" सू० सि० । "सावनः स्यादहोरात्रसूदयादोदयावधेः" काल०मा० ब्रह्म० सि० । शुक्रशुक्रोदये च सर्व्वं मङ्गलकार्य्याणि कर्त्तव्यानि । अगस्त्योदयः अगस्त्यशब्दे उक्तः । "प्रसादोदयादभ्रः कुम्भयोने मंहोजसः" रघुः ।

उदयगामिनी स्त्री उदयं सूर्योदयं गच्छति सूर्य्यादिना व्याप्नोति गम-णिनि ङीप् । "सूर्योदयावधिसूर्य्यादिकालव्याप्तिमत्यां तिथौ । कर्मानुष्ठाने उदयकाले कियत्कालस्य व्याप्तता तन्निर्णीतम्" का०मा० । "व्रतोपवासनियमे षष्टिकैका यदा भवेत् । उदये सा तिथि ग्राह्या विपरीता तु पैतृके" ब्र०पु० । "व्रतोपवासस्नानादौ षष्टिकैका यदा भवेत् । उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनी" विष्णु०ध०पु० । "आदित्योदयवेलायां यास्त्यापि च तिथिर्भवेत् । पूर्व्वा सैव सा ज्ञेया प्रभूता नोदयं विना" देवल: । "यां तिथिं च समुद्याप्य उदयं याति भास्करः । सा तिथिः सकला ज्ञेया स्नानदानजपादिषु" देवलः । "उदयस्थे सवितरि यां तिथिं प्रतिपद्यते । सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु" व्यासः । "पञ्चघटयेऽपि तिथयस्तिथिं पूर्व्वां तथोत्तराम् । तिस्रिर्मुहूर्त्तावित्यन्ति सामान्योऽयं विधिः स्मृतः" पैठी० । "उदिते दैवतं भानौ पैत्र्यं चास्तमिते रवौ । हिमुहूर्त्तं विरूपं च सा तिथिर्हव्यकव्ययोः" बौधा० । "भानावुदिते सप्तमुत्तरकालेऽक्षोमुहूर्त्तद्वयं दैवत्यम् । तस्मिंश्चास्तमिते ततः पूर्वकालीनमक्षोमुहूर्त्तद्वयं पित्र्यं दैवत्यमतस्तावत्कालव्यापिनी या तिथिर्भवति सैव क्रमेण हव्यकव्ययोर्ग्राह्या" अत्रायङ्गापूर्वकं साधनेन समाहितम् । नन्वस्त्वेवं क्षतरूदिवसाभ्यनुज्ञातथाप्युत्तरविद्धयास्तिथेर्मुहूर्त्ते कियत्परिमाणमुदयेऽपेक्षणीयमिति विवेचनीयम् । तत्र बौधायनेन अल्पापीत्यभिधानात् निमेषमात्रं प्रतिभाति, व्यासेन उदयस्थेत्यभिधानात् तथैव प्रतिभाति । भविष्यत्पुराणे तु घटिकामात्रं बौधायनवचनान्तरे हिमुहूर्त्तमित्येवं विरोधमाशङ्क्य "अत्रोच्यते "पौर्वाह्णिकयस्तु तिथयस्त्रिमुहूर्त्ताः फलप्रदाः" इ० या० वचनेन दैवे पूर्वाह्णव्याप्तायास्त्रिमुहूर्त्तमितायास्तिथेर्ग्रहणम् । त्रिमुहूर्त्तन्यूनायास्तिथेः पूर्वाह्णव्याप्त्यभावात् पूर्वाह्णस्य च षड्धा विभक्तस्य मुख्यत्वात् उदिते भानौ त्रिमुहूर्त्तातिथिर्ग्राह्या । यत्तु "त्रिमुहूर्त्ता न कर्त्तव्या या तिथ्युदयगामिनी"ति न तत् त्रिमुहूर्त्तव्याप्तेर्बाधकं प्रत्युतोहोलकमेव । तथा हि प्रतिषेधः सर्वत्र प्रसक्तिपूर्व्वकः प्रसक्तिश्च यथोक्तरीत्या पौर्व्वाह्णिकवाक्यात् त्रिमुहूर्त्तविधिविधायिपैठीनसिवाक्याद्वा भवति तस्य प्रसक्तं त्रिमुहूर्त्तत्वं समतिथौ बाधकाभावात्तस्यैव तिथित्रये त्वधिकव्याप्तिविधित्सया प्रतिषिध्यते अतश्च तत्र चतुर्मुहूर्त्तस्पर्शिनी तिथिर्ग्राह्या तिथिसाम्यात् । तिथित्रयेऽपि मुहूर्त्तत्रयमेव मुख्यं मुहूर्त्तद्वयं त्वनुकल्पम् । एतदेव सूचयितुं द्विमुहूर्त्तापीत्यत्र अपिशब्दः प्रयुक्तः" । ततः प्रासङ्गिकमभ्यत् समाधाय उपसंहृतम् यथा "प्रकृते तु खण्डोदये मुहूर्त्तत्रयव्यापिनी प्रतिपदादितिथयोर्ग्राह्या एवं सत्युदयमात्रव्याप्तिग्राह्यं घटिकामात्रव्याप्तिग्राह्यं च वैश्वानराधिकरणन्यायेनाव्यवस्थानादुपादेयतया त्रिमुहूर्त्तव्याप्तिं प्रयंसति । अथवा यदा पूर्वेद्युरुदयकालं परित्यज्योपरि सर्वत्र व्याप्नोति परेद्युरुदयकालमात्रं व्याप्नोति तदानीमुदयानन्तरभाविन्यामुख्यायास्त्रिमुहूर्त्तव्याप्तेर्दिनद्वयेऽप्यभावेन द्वयोरपि दिनयोर्गौणकालत्वे सति किं ग्राह्यमिति चेत्तायां पूर्व्वदिने गौणकर्मकालव्याप्तेर्भूयस्त्वात्तस्यैव ग्रहणं न्यायतः प्राप्तं केनापि निमित्तेन तत्प्रत्यूहे सति परेद्युः कर्मकालव्याप्तिसम्पादनाय पूर्णत्वमभिधायोदयविशेषस्य

व्याप्तिवाक्यस्य शेषत्वोक्तिव्याजेन तदेव प्रपञ्चयते । "आदित्योदयवेलायां यात्यापि च तिथिर्भवेत् । पूर्णा इत्येव मन्तव्या प्रसूता सोदयं विनेति" । यदा पूर्वेद्युः सङ्कल्पमारभ्य परेद्युरुदयात्प्रागेव तिथित्रयसम्बन्धात्प्रतिपत्त्वमात्रा तदा यद्यपि दिनद्वये सोदयमुहूर्त्तत्रयस्पर्शो नास्ति तथापि पूर्वेद्युरेवानुष्ठेयम् । "सा तिथिः सकला ज्ञेया यस्यामस्तमितोरविः" इतिवचनेन सम्पाद्यायाः सोदयत्रिमुहूर्त्तायाः व्याप्तेर्विधानात्वात् । यदा न परेद्युरुदयमुहूर्त्तव्याप्तिरस्ति तदा पूर्वेद्युरेवानुष्ठानम् । अस्तमयव्याप्तेरधिकत्वात् । अतएव पद्मपुराणेऽभिहितम् । "द्वैते स्नाने तथा नक्ते पित्र्यार्थे विशेषतः । यस्यामस्तङ्गतोभानुः सा तिथिः पुण्यभागभवेदिति" । तत्रैव द्वितीयाप्रकरणे च दैवं यद्विधत्ते उपवासैकभक्तनक्तायाचितदानव्रतभेदेन, तीर्थस्नानजपहोमादयस्तु ब्रह्मण्येवैव संगृहीताः । पित्र्यं द्विविधम् एकोद्दिष्टं पार्वणं चेति । तत्र सर्व्वत्र कर्म्मकालव्याप्तिर्ग्राह्या । अव्याप्तिस्तु गौणः । तिथिव्याप्तिश्च द्विविधा स्वाभाविकी तिथिव्याप्तिः साकल्यापादितातिथिव्याप्तिश्चेति । तद्यथा यदा सङ्कल्पपर्य्याप्तावाह्नो तदानीमुपरि[illegible]ग्राह्यो मुख्यवैव प्रतिपदा व्याप्तो भवति । यदा मध्याह्नादिमारभ्य तिथित्रयसम्बन्धात् परेद्युः सङ्कल्पान्ता प्रतिपद्भवति तदा पूर्व्वेद्युर्गौणीसाकल्यव्याप्तिमुपजीव्यैकभक्तानुष्ठानाय तत्सङ्कल्पे कृते मध्याह्नेऽस्वस्थानुष्ठेयत्वात् तत्र च स्वाभाविकप्रतिपद्व्याप्त्यभावेऽपि साकल्यसम्बन्धापादितप्रतिपद्व्याप्तिः स्वीकृता एवञ्च सति कर्म्मकालव्याप्तौ सर्व्वकृतीनामन्यत्र निबन्धदर्शनात् कर्म्मकालव्याप्तिग्राह्यमितरेभ्यः प्रबलमिति निर्णीयते । तदनुसारेण द्वितीयाद्याश्चापि तिथयस्तत्तद्दैवादौ देवे; एकोद्दिष्टादौ पित्र्ये च कर्म्मकालव्याप्तियुक्ता: स्वीकर्त्तव्याः । उपवासस्तु सर्व्वतिथिषु नारदीये दर्शितः;"शुक्ला वा यदि वा कृष्णा प्रतिपत्प्रभृतीन् तिथीन् । उपोष्यैव व्यतिक्रम्य विधिना त्वपरे दिने । ब्राह्मणान् भोजयित्वा तु सर्व्वकामैः समृध्यते" इति । उपवासस्य कालः कर्म्मकालः । तत्राभङ्गव्याप्तिनी तिथिर्ग्राह्या तदलाभे खण्डतिथिरपि । तत्र वा व्याप्तेति लिख्यते । तत्र सूर्य्योदये त्रिमुहूर्त्ता ततोऽधिका वा प्रतिपद्भवति उत्तरदिनेचासमग्रादर्वाक् त्रिमुहूर्त्ता ततोऽधिका वा तृतीया भवति सैवमुभयविद्धा द्वितीया । तत्र वेधकतिथेरुदयेऽस्तमये वा त्रिमुहूर्त्तत्वं वेधप्रयोजकं न तु ततोन्यूनत्वे । तदेव पैठिनसिव्याक्येन पूर्वमुदाहृतम् । वेध्यतिथेश्च त्रिमुहूर्त्तसङ्गतोऽपेक्षित इति "त्रिमुहूर्त्तं तिरश्चेत्" इत्यनेन लघून्वचनेन दर्शितम् । "उदयास्तमयोरेव वेधः" इत्यस्यायमर्थः "उदये सा तिथिर्ग्राह्या विपरीता तु पैठिने" इत्यादिभिः कात्यायनवचनैरवगन्तव्यः । एवं सति उदाहृतविषये द्वितीया उभयवेधेऽपि उत्तरविद्धैवोपाद्या युग्मादिवाक्येनान्वयव्यतिरेकाभ्यासत्तरवेधस्य प्राशस्त्याभिधानात्" इति । पाद्मोत्तरखण्डपदैवविषयं तदप्युक्तं तेनैव । "यद्यप्युपोष्यत्वं वाक्यादाभिहितं तथापि अस्मिन्नरविशेषानुपादानादुपवासविषयत्वं परिशेष्यते तथा हि न तावत् पित्र्यविषयत्वं सम्भवति "द्वितीयादिकयुग्मानां पूर्व्वाह्णनियमादिषु । एकोद्दिष्टादिवृद्धयादौ ह्रासश्चादिदेशनेति" व्यासेन युग्मादिवाक्यस्य खण्डादिवाक्यस्य च दैवकर्म्मविषयकत्वेन व्यवस्थापनात् इति" । एवञ्चोपवासेतरदैवकर्म्मणि उदयगामिन्या ग्राह्यत्वं तदपवादकं युग्मवाक्यम् । तत्र च पैठिनसिवचनेन त्रिमुहूर्त्ततिथेरेव वेधप्रयोजकतयाभिधानेन ततो न्यूनकालिकतिथ्या वेधाभावात् गौड़देशीया यत् सार्द्धमात्रेण वेधं कल्पयन्ति तन्नादरणीयम् रघुनन्दनेन कुत्रापि तथा वेधानुक्तेः कालमाधवहेमाद्रिप्रभृतिषु त्रिमुहूर्त्तादिव्याप्तावेव वेधकत्वव्यवस्थापनात्, युग्मवाक्यस्य सामान्यवाक्यतया वेधसामान्यप्रतिपादनेऽपि पैठिनसिना तस्य विशेषाभिधानात्तेनैव बलवत्त्वस्य युक्तत्वमित्युपपद्यते । युग्मादिवाक्यस्य बाधकत्वन्तु "युगाद्या वर्षवृद्धिश्च तथा मन्वादयः स्मृताः । एवेरुदयमीक्ष्यन्ते न तत्र तिथियुग्मता" तिथितत्त्वे देवीपुराणे "अगस्त्याः प्रवेशादिविसर्गान्ताश्च याः क्रियाः । तिथावुदयगामिन्यां सर्व्वास्ताः कारयेद्बुधः" दुर्गोत्सवतन्त्रे पुराणे "शरत्काले महापूजा क्रियते या च वार्षिकी । सा कार्य्योदयगामिन्यां न तत्र तिथियुग्मता" तत्रैव पुराणे "पूर्व्वाह्णे तु सदा कार्य्याः शुक्ला मन्वादयः । दैवे कर्म्मणि पित्र्ये च कृष्णा चैवापराह्णिके । हेमाद्रौ नारदीयम् "शुक्लादिमध्यादिकाह्नादिषु शुक्लपक्षे उदयव्यापिनी तिथिर्ग्राह्या कृष्णपक्षे परदिनेऽपराह्णव्यापिनी ग्राह्या; कृत्यार्थसारेच दिनद्वये तु तथा लाभे परवेति हेमाद्रिः । विधानपारिजातादयोऽप्येवम् । निर्णयसिन्धौ "सर्व्वेषु तिथ्यन्तीयातो युगलक्षणादयस्तथा । सम्मुखा उपवासेषु दानादावल्पिका स्मृता" अनन्तभट्टेनैतद्वचने व्याख्यादात् आह्नसंयुक्ता इत्याह । इदन्त्वधेयम् । "कृष्णपक्षे

यस्य यः कालस्तत्कालव्यापिनी तिथिः । तया कर्माणि कुर्वीत ह्रासवृद्धौ न कारणम्" कर्म्मणोविहितकालव्यापिन्या एव याज्ञवल्क्याभिधानेन यत् तिथिक्षयवशात् उभयदिने स्मृत्युक्तप्रतिपदादितृतीयायारूपपूर्व्वाह्णाव्याप्तित्वं प्रतियोगिवैयधिकरण्यघटितव्याप्तेः प्रवेशनेन मुहूर्त्तकालव्याप्तावपि पूर्व्वाह्णव्यापकतया अहर्गणमित्येव रघुनन्दनन्यायः। तथा च "आरभ्य तस्यां दर्शस्य च यावत्" इत्यादौ यथा पूजायान्तथीनां प्रतियोगिवैयधिकरण्यघटितव्यापकतावशेन एवमत्रापि मुहूर्त्तव्यापकतानातोन्यूनदण्डादित्यापने यात्राता । भवति च द्वित्रमुहूर्त्तव्याप्तिन्यायेनापि मुहूर्त्तव्याप्तिरिति सर्व्वं सुस्थम् । तेन मुहूर्त्तन्यूनतायां न याह्यता द्वित्रमुहूर्त्तादित्यादिस्तु मुख्येति । एवञ्च युग्मादिद्यास्वाविषये क्षणप्रतिपदादौ उभयदिने पूर्व्वाह्णमुहूर्त्तव्याप्तित्वेऽपि त्रिमुहूर्त्तायां एव याह्यतेति विवेकः । एवमन्यत्रापि ज्ञेयम् । अस्तादर्वाक् त्रिमुहूर्त्तायास्तिथेः । पतने याह्यतेत्यपि बोध्यम् ।

उदयगिरि पु० उदय उदयस्यानं गिरिरिव । सूर्य्यादेरुदयस्थाने पर्व्वतवदाच्छादके भूवृत्तपादे "उदयगिरिवनालीबाल मन्दारपुष्पम्" उद्भटः उदयगिरिशिखरसंस्थिते प्रतप्तकनकनिकरपीतलोहिते सवितरि" शुश्रु० उदयाचलादयोऽप्यत्र । "श्रितोदयाद्रेरभिषायमुच्चकैः" माघः। भूगोलपादस्यैव यथा सूर्य्यादेराच्छादकत्वम् तथा सिद्धान्तग्रन्थे स्थितम् । यद्यपि सूर्य्योदयस्य देशविशेषे विशेषस्थाने एव सम्भवः तथापि निरक्षदेशाधिकएव देशे मुख्यत्वम् "लङ्कापुरेऽर्कस्य यदोदयः स्यात् तदा दिनार्द्धं यमकोटिपुर्य्याम् । अधस्तदा सिद्धपुरेऽस्तकालः स्याद्रोमके रात्रिदलं तदैव । यतोदितोऽर्कः खलु तत्र पूर्व्वा तत्रापरा यत्र गतः प्रतिष्ठाम् तद्व्याप्यतोऽन्ये च ततोऽखिलानासदक्षस्थितोमेरुरिति प्रसिद्धम्" सिद्धान्तशिरोमणौ तथैव व्यवस्थापितम् ।

तथा च लङ्कादिपुरीचतुष्टयस्य भूवृत्तपादान्तरस्थितत्वेन द्वितीयपुर्य्युपरिस्थे सूर्य्यादौ प्रथमं दृश्यता ततपूर्व्वादिस्थदेशे तु ततः पश्चम् । पश्चात् स्थितदेशेषु च ततः पश्चात् दृश्यता एवञ्च भूवृत्तपादेनाच्छादने तदतिक्रमे दर्शनयोग्यत्वादुदयः । ततश्च यत्र देशे यदा दर्शनं तत्र तदा तद्देशापेक्षया सूर्य्यादेर्भूविम्बपादोपरिस्थितत्वेन तत्स्थानस्य उदयगिरित्वम् यत्र चादर्शनं तद्देशवासिनामस्तगिरित्वं शास्त्रेषु कल्पितम् । एवञ्च निरक्षदेशावधि भूवृत्तपादान्तरेषु स्थित लङ्कापुरवासिनां यमकोटिरेवोदयस्थानमेवमन्यत्र कल्पाम् । लिङ्गपुराणे तु अन्याः पुरीरुक्ता तत्रोदयादित्यव्यवस्थामाह "मानसोपरि माहेन्द्री प्राच्यां मेरोः स्थिता पुरी । दक्षिणे भानुपुत्रस्य यमस्य तु वारुणे । सौम्ये सोमस्य विपुला तासु दिग्देवताः स्थिताः । अमरावती संयमिनी सुखा चैव विभा क्रमात् । लोकपालोपरिष्टात्तु सर्व्वतो दक्षिणायने । कालाकृतस्य सूर्य्यस्य गतिर्या तां निबोधत । दक्षिणां प्रक्रमेद्भानुः त्रिभेषुरिव धावति । पुरान्तगो यदा भानुः यमस्य भवति प्रभुः । सर्व्वैः संयमनैःसौरो ह्युदयो दृश्यते द्विजाः ! । स एव सुखवत्यान्तु निशान्तस्थः प्रदृश्यते । अस्तमेति तदा सूर्य्यो विभायां विश्वदृग्विभुः । मया प्रोक्तोऽमरावत्यां यथाऽसौ याति भास्करः । तथा संयमिनीं प्राप्य सुखाञ्चैव विभां खगः । यदा पराङ्मुखस्तस्यां पूर्व्वाह्णेनैर्ऋते द्विजाः ! । तदा त्वपररात्रस्य वायुभागे सुदारुणः । ऐशान्यां पूर्व्वरात्रस्तु गतिरेषास्य सर्व्वतः" इति । व्याख्यातञ्च ज्ञा० उ० आनन्दगिरिणा "तथा चोपरिष्टादमरावत्यास्तिऽन्नध्याह्नं तत्रैव ग्रकोणस्थानां तृतीययाममध्याह्नेग्नेयकोणस्थानामाद्ययामं संयम्यिन्याउदयं च करोति सवितेति । एवं यदा याम्ये मध्याह्ने तिष्ठति तदैन्द्रे अस्तमयः, आग्नेये तृतीययामः, नैर्ऋतिकोणे प्रथमो यामः, वारुणे उदयः । यदा च वारुणे मध्याह्नस्तदायाम्येऽस्तमयः, निर्ऋतिकोणे तृतीयो यामः, वायव्ये प्रथमयामः, सौम्ये उदयः । यदा च सौम्ये मध्याह्नस्तदा वारुणेऽस्तमयः, वायव्ये तृतीययामः, ऐशानकोणे प्रथमो यामः, ऐन्द्रे उदयः । तथाग्नेयकोणे वर्त्तमानस्तत्स्थानं मध्यं दिनम्, यमेन्द्रपुर्योरादितृतीययामौ, नैर्ऋतैशानकोणयोरुदयास्तमयौ च करोति" एतच्च मानसापेक्षयैवोदयास्तमयकीर्त्तनात् पूर्व्वोक्तेन विरुद्धम् "अथ यदादित्यः पुरस्तादुदेता पश्चादस्तमेता हित्वा द्यूर्द्वमुदेताऽर्वागस्तमेता इत्यादि" ज्ञा० उ० भाष्ये "पश्चादुत्तरतो जर्द्धमुदेता विपर्ययेणास्तमेता । पूर्व्वस्मात्पूर्व्वादहर्गुणोत्तरोत्तरेण कालेनोदयौरात्यं दर्शनम् । सवितुश्चतुर्दशभिन्द्रयमवरुणसोमपुरीषूदयास्तमयकालस्य तुल्यत्वं हि पौराणिकैरुक्तम् । मानसोत्तरस्य मूर्द्धनि मेरोः प्रदक्षिणादृतेरतुल्यत्वादिति" इत्याचक्षते । अलोकः परिहार आचार्यैरमरावत्यादीनां पुरीणां द्विगुणोत्तरोत्तरेण कालेनोद्भासः स्यात् । उदयश्च नाम सवितुस्तद्विवासिनां प्राणिनां चक्षुर्गोचरतापत्तिस्तदन्यथात्वाभावं न परमार्थत उदयास्तामयेस्तः । तद्विवासिनाञ्च प्राणिनामभावे तानु प्रति तेनैव

मार्गेण मच्छन्नपि नैवोदेता भास्वमेतेति चक्षुर्गोचरता-पत्तेस्तदत्ययस्य चाभावात् । तथाऽमरावत्याः सकाशाद्दक्षिणस्यां सांयमिनीं पुरीं वसन्यतस्तन्निवासिनः प्राणिनः प्रति दक्षिणतः दक्षोदेत्युत्तरतोऽस्तमेतीत्युच्यते ऽस्मदुबुद्धिसाम्येऽप्य तथोत्तरास्वपि पुरीषु योजना । सर्वेषाञ्च मेरूत्तरो भवति । यदाऽमरावत्यां मध्याह्नगतः सविता तदा सांयमिन्यास्तदानु दृश्यते तत्र मध्याह्नगोवरो वारुण्यास्तदुच्यते । तथोत्तरस्यां प्रदक्षिणाद्दक्षत्वेनुल्यत्वात् । इत्यादतवासिनां सर्वतः पर्व्वतप्राकारनिवारितादित्यरश्मीनां सवितोर्द्ध दक्षोदेतार्वागस्तमेता दृश्यते पर्वतोर्द्धच्छिद्रप्रवेशात्सवितृप्रकाशस्य । तथर्गादाद्यतोपजोपिनामस्मदादीनाञ्च द्विगुणोत्तरोत्तरपौर्व्यवक्त्वमनुभीयते भोगकालहेतुगुणयोगेन" ज्या०उ०भाष्यम् ।

उदयन पु०उद्+इ-ल्यु । १अग्रऋषे मुनौ, कुसुमाञ्जलिप्रभृतिग्रन्थकारके २उदयनाचार्य्ये च । "व्याप्तेन किरणावलीसदयन:" दृव्यकिरणावली । अयञ्च आत्मतत्त्वविवेकादिनाऽऽप्यन्थकर्त्ता । ३दशभराजे "उदयनमिवानन्दितवत्सकुलम्" काद०४वत्सराजे च । वत्सराजचरितञ्च दृहत्कथायां विस्तरेण वर्णितम् । "आख्यायन्नुदयनकथाकोविदग्रामवृद्धान्" मेघ० उद्+इ-भावे ल्युट् । ५उदये न० "पूर्वतः सागरस्येव चन्द्रस्योदयनं प्रति" भा०भी०५८अ० "एषा युक्ते परावतः सूर्य्योदयनादधि" ऋ०१,४८,५, "सप्तर्षीणामुदयनमादित्यस्य" शत०ब्रा०१२, ८,१६ । ६समाप्तौ च "सैषा विहृत्प्रायणा विहृदुदयना" ता०ब्र०२, १५,१ विहृत् छन्दनक्रम् उदयने समाप्तौ यस्याः" भा० ।

उदयनीया स्त्री उदयने समाप्तौ विहिता तन्निमित्तत्वेन तत्सम्बन्धिनी वा इ । समाप्तिनिमित्ते १दृष्टिभेदे "गार्हपत्य उदनीयामाचरति" आश्व०श्रौ० ६,४,१,१, नेदमादिषु सार्व्वसमांगुदयनीयाया." ४,२,६, । चरुमेलणवर्हिर्निधानादुदयनीयायै" कात्या० ७,५,१६, । अवभृथादुत्थाननिमित्ते २अतिरात्रे पु० "दृक्षावेवोदयनीयोऽतिरात्रः" शत०ब्रा०१२,१,१,१, अवभृथादुदेत्योदयनीयेन चरित्वानुवभृथस्य पशुपुरोडाशमन्त दैविकानां हवींषि निर्व्वपति" ६, ५,१,१४। "प्रायणीय एवातिरात्रे युञ्जन्त्युदयनीये विसृजन्ति" । "अथो यथा प्रायणीयेऽतिरात्रे सन्धिमेनीरन्वय मूयादुदनीयएवातोऽनुवक्षाऽऽगीति" ६, ४, ४, १५, १६

उदयवेला स्त्री सूर्य्यस्य तन्निरूपणस्य वा उदयस्य वेला समयः । १सूर्य्योदयकाले २अरुणोदयकाले च "माघेमाघसिते पक्षे रटन्त्याख्यचतुर्दशी । तस्यामुदयवेलायां स्नात्वा मानवेच्छते यमम्" म०त०यमः । "उदयवेलायाम् अरुणोदयवेलायामिति" म०त०रघु० । या०ति० उक्ते १भूतानामुदयसमये च भूतोदयशब्दे विवृतिः ।

उदयान्तर न०उदयस्योदयस्थानार्थम् अन्तरं यत्र । ब०वि० उक्ते यज्ञाद्यामुदयस्थानार्थं संस्कारभेदे उदयशब्दे विवृतिः ।

उदयास्तसूत्र न० "क्षेत्रे दूरात्समगणितमध्यभागजीवायका भवति पूर्वपरागयोः सा । अपापयोः प्रगुणमत्र निबन्धसूत्रं यत्तद्वदन्ति गणका उदयास्तसूत्रम्" सि० शि०उक्ते क्षितिस्वाहोरात्रवृत्तसम्पातयोर्बन्धे सूत्रे

उदर न० उद्+व-अप् । १जठरे नाभिस्तनयोर्मध्यभागे । "दश स्थानानि दण्डस्य पुंसः प्रोक्तानि तत्त्वतः । उदरं पादौ च पञ्चमी । चक्षुर्नासे च कर्णौ च मनं हेह स्तथैव च" मनुः । "मस्तकोदरवृषणनाभिललाटनासाचिबुकवस्तिमीवाहृत्स्तनेता एकैकाः" भरीरविभागे सुश्रुतः । "उदरञ्च गुदौ कोष्ठौ विस्तारोऽयसदाहृतः" या०स्मृ० । "उदरेऽग्नयक्तिः" शत० ब्रा० ८,६,२१,२ । "उदरं पारिमाति सुदिना" "वदसत्संयमगोचरोदरी" नैष० आधारे अप् । २युद्धे । ३मध्यभागमात्रे च "तान्योदरेषु तरुपल्लवेषु" रघुः "लतादिविष्टितोदरे" अम० "कुसुमभिव पिनद्धं पाण्डुपत्रोदरेण" शक० उद्+इ-अप् पृषो० दकोपश्च. उदरस्यात्वाद्धोदरयद्भावाद्यता "तात्स्थ्यात्तद्व्यपदेशाच्च तत्सभीपतयापि च । तद्धाकर्ण्यात् यद्धानां दृष्टिरुक्ता चतुर्विधा" भा० म०उक्तेः। ४उदररोगे । उदररोगनिदानादि सुश्रुते उक्तं यथा "अथात उदराणां निदानं व्याख्यास्यामः । धन्वन्तरिर्धर्मभृतां वरिष्ठो राजर्षिरिन्द्रप्रतिमो बभूव । अङ्गानि पुत्रं विनयोपपन्नं शिष्यं शुश्रुषमन्यवाक्यः । पृथक् समस्तैरपि चेह दोषैः प्लीहोदरं वङ्क्षगुदं तथैव । आगन्तुकं सप्तममष्टमञ्च दकोदरं चेति वदन्ति तानि । क्षुद्रमेकाग्नेरहिताशनस्य संशुद्धकोष्ठस्य निषेवणाद्वा । क्षेत्रादिमिथ्याचरणाच्च जन्तोर्द्धिं गताः कोष्ठमभिप्रपन्नाः । गुरुमालतिव्यञ्जितलक्षणानि कुर्वन्ति घोराण्युदराणि दोषाः । कोष्ठादुपक्षिप्तवदन्नसारो निःसृत्य दुष्टोऽनिलवेगमुक्तः । त्वचः ससृज्यस्य गतैः समन्ताद्विवर्द्धमानो जठरं करोति । तत्पूर्व्वरूपं वलवर्णभङ्गाग्निक्लीथिनाशो जठरे हि राज्ञः । जीर्णाधिरिष्टानविदाहवत्सो वस्तौ रुजः पादगतश्च शोफः । सङ्कृष्ण पार्श्वोदरवृषणाभीर्यद्वर्द्धते क्षिप्रसिराततञ्च ।

सम्मूलमाहृत्य दुष्यद्यद्वं सतोदभेदं पवनात्मकं तत् ॥ यच्छोषतृष्णाज्वरदाहयुक्तं पैत्तं सिरा यत्र भवन्ति पीताः ॥ पीतानि विण्मूत्रनखाननस्य विस्फोदरम् ३ तत्पित्तविद्यभिहृद्धि । यच्छीतलं शुक्लसिरावनद्धं गुरुस्थिरं शुक्लनखाननस्य । स्निग्धं महच्छ्लेष्मयुतं सवाहं कफोदरम् ४ तच्च चिराभिवृद्धि । स्त्रियोऽम्बुपानं नखरोमसूत्रविड्वर्चसैर्युक्तमसाधुदृष्टाः ॥ यत्तैः प्रयच्छन्त्यरयो गरांश्च दुष्टाम्बुदूषीविषसर्पदाहाः । तेनाम्बुना तस्य विकारसङ्घा दोषाः कुर्वन्ति घोरं जठरं विलिङ्गम् ५ । तच्छीतवाताभ्यसनङ्गवेषु विशेषतः कुप्यति दह्यते च । स चातुरो मूर्च्छति सम्प्रसक्तं पार्श्वद्वयं शूयति हृष्यते च । प्रक्षीर्त्तितं दूष्युदरन्तु घोरं प्लीहोदरम् कीर्त्तयतो निबोध । विदाह्यभिष्यन्दितस्य जन्तोः प्रदुष्टमत्यर्थमसृक् कफश्च । प्लीहाभिवृद्धिं सततं करोति प्लीहोदरम् ५ तत्प्रवदन्ति तज्ज्ञाः । वामेच पार्श्वे परिवृद्धिमेति विशेषतः सीदति चातुरोऽत्र । मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः क्षीणबलोऽतिपाण्डुः । उच्चैस्तरक्षिनृ यकृति प्रदृष्टे क्लेदं यकृद्दाल्युदरं तदेव । तस्मान्नमन्नैरुपलेपिभिर्वा बालाम्लभिर्वा सहितैः पृथग्वा । सञ्जीयते तत्र बलः सदोषः क्रमेण नाड्यामिव सङ्करोहि । निरुध्यते श्वास गुदे पुरीषं निरेति कृच्छ्रादपि चाल्पमल्पम् । क्षुन्नाभिमध्ये परिवृद्धिमेति यच्छोदरं विट्समगन्धिकञ्च । प्रक्कर्दयत् बद्धगुदं ६ विभाव्यं ततः परिस्राव्युदरं निबोध । यस्य यदश्नोपचितं तदन्नं भिनत्ति यस्मागतमन्यथा वा । तस्मात् क्षुतान्नात्खिलप्रकाशः स्रावः स्रवेद्वै गुदतस्तु मूयः । नाभेरधश्चोदरमेति वृद्धिं निस्तुद्यतेऽतीव विदह्यते च । एतत्परिस्राव्युदरं ७ प्रदिष्टं दकोदरं कीर्त्तयतो निबोध । यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽप्यथ वा निरूढः । पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दुष्यन्ति हि तद्धानि । स्नेहोपलिप्तेष्वथ वापि तेषु दकोदरमूर्ध्वमधश्च याति । स्निग्धं महत्प्यरिहरन्नाभिं श्वयोन्नतं पूर्णमिवाम्बुना च । यथा हृतिः क्षुभ्यति जम्यते च यच्छ्वयते चापि दकोदरं ८ तत् । आध्मानं गमनेऽयशक्तिर्दौर्बल्यं दुर्बलाग्निना । शोफः सदनमङ्गानां सक्थोर्वातपुरीषयोः । दाहस्तृष्णा च सर्वेषु जठरेषु भवन्ति हि । अन्ने सक्तिः स्वभावस्तु भजन्ते जठराणि तु । सर्वाण्येव परीपाकात्तदातानि विवर्द्धयेत्" । विस्तरस्तु भा० प्र० द्रष्टव्यः । गर्भपातनजारोगा यक्तप्लीहजोदराः दृत्तान्तेः पुंस्त्वमपि । ५अल्पे त्रि० "उदरमलरं कुरुते" स्मृतिः

उदरग्रन्थि पु० उदरे ग्रन्थिरिव । गुल्मरोगे क्षेम० । गुल्मशब्दे विवृतिः उदरगुल्मोऽत्र पु० "दुष्टोर्विकारकारी च भवेदुदरगुल्मवान्" माधा० स्मृतिः । [उदरबन्धवस्त्रे क्षेम०

उदरत्राण न० उदरं त्रायतेऽनेन त्रै–ल्युट् । (कमरबन्ध)

उदरथि पु० उद्+कृ–घञिन् । सस्ये उच्चनदत्तः ।

उदरपिशाच त्रि० उदरे तत्पूर्त्तौ पिशाच इव । सर्व्वान्नभक्षके क्षेमच० । [ल्यब्लोपे पञ्चम्यन्तं ।

उदरपूरम् अव्य० उदर+पूर–साकल्ये णमुल् । उदरं साकल्येन पूरयित्वेत्यर्थे ।

उदरभरि त्रि० उदरं बिभर्त्ति भृ–क्विप् मुम् च । पञ्चयज्ञाद्यकरणेनात्मोदरमात्रपोषके ।

उदररोग पु० ईत० । (उदरी) इति ख्याते रोगे । उदरशब्दे विवृतिः । उदरव्याधिरप्यत्र "कदन्नोपयसारन्तु पानीयेन प्रबाधितम् । तदाखादेन नश्यन्ति उदरव्याधयोऽखिलाः" गरु० पु० ।

उदरवत् त्रि० बृहदुदरमस्त्यस्य तुन्दादि० इलतायाम् मतुप् मस्य वः । बृहदुदरयुक्ते । पक्षे–उन् । उदरिक इनि । उदरिन् पिच्छा० इलच् । उदरिल उक्तार्थे त्रि० इलो मतौ ङ्यां स्त्रियां ङीप् ।

उदरशय पु० उदरे शेते शी–पार्श्वा० अच् । गर्भशये

उदरशाण्डिल्य पु० ऋषिभेदे "कृष्णश्चोदरशाण्डिल्यः पाराशर्य्य ऋषीवलः" भा० स० ७अ० । "तं कैतमतिधन्वा यौधञ्जयः उदरशाण्डिल्यायोक्तवान्" छा० उ० ।

उदराध्मान न० ईत० । (पेटकाँपा) रोगभेदे । तत्कारणमुक्तं सुश्रु० "जठराग्नेः संधारको रोपणः स्नेहनः शोधनो लेखनः शोषणः पोड़नः क्लेदोपशोषणक्षयेति स एवं गुणोऽप्येकएवात्यर्थमुपसेव्यमानोकुतपीड़ाद्यशोदराध्मानवाक्यग्रहमन्याक्षेपस्फुरणपुरुषुमायनाकुञ्चनाक्षेपणप्रभ्रमतीर्जनयति" । तच्चाजीर्णस्य लिङ्गं तदध्यायं सुश्रुते तत्र उदरिणशब्दे वक्ष्यते ।

उदरामय पु० उदरस्थामं रोगं याति नयति या–क । खलाभख्याते रोगे अतिसारशब्दे १० विवृतिः । "शीतं मधुयुतं कृत्वा पाययेतोदरामये" "यकरोपहितं शीतं पाययेच्चोदरामये" सुश्रु० ।

उदरावर्त्त पु० उदरे आवर्त्त इव गभीरत्वात् । नाभौ ।

उदरिणी स्त्री० उदरं तत्सदृशगर्भोऽस्त्यस्याः इनि ङीप् । लक्षिस्त्रियाम् ।

उदर्क पु० उद्+ऋर्ज–अर्च–वा घञ् । उत्तरकाले २भाविफलके शुभाशुभकर्म्मणि च । "तद्भवत्युत्तरोदर्कं जीवतश्च मृतस्य च"

'सोऽनुभूयासुखोदर्कान्" प्रमेलेख च सुखोदर्कान् प्रजाधर्मान् निबोधत" मनुः। "नन्वयमुदर्कः प्राक्तनस्य दुष्कृतस्य" दशकु०। "नाणीप्रभृतयः समानोदर्का अतनो वा अस्कन्दन" यत०ब्रा० ८,७,१,१।

उदर्चिस् पु० उद् ऊर्ध्वमर्चिः शिखाऽस्य। १उच्छिखे वह्नौ। उत्कृष्टकान्तित्वात् २कदर्पे ऊर्ध्वरेतस्त्वात् ३शिवे च। ४ऊर्ध्वगशिखान्विते त्रि०"प्रदक्षिणप्रक्रमणात् क्रयाणोदर्चिषमन्त्रिमुखं चकाशे" "अग्नेवोदर्चिषं सूर्य्यम्" रघुः। "स्फुरदुदर्चिः सहसा तृतीयादृक्" क्रयात् किल निष्प्रभात" कुमा०। मा०स०। ५ऊर्ध्वगायां शिखायां न०स्त्री०।

उदर्द पु० उद्+अर्द-अच्। "वरटादंशसंस्थानः शोथः संजायते बहिः। सकण्डूकोदवदलस्फोटवरविदाहवान्। उदर्दमिति तं विद्यात्पीतपित्तमथापरे। वातादधिकं पीतपित्तसदर्दश्च कफाधिकम्" इति निदानोक्ते रोगभेदे।

उदर्य्य त्रि०उदरे भवः उदर+यत्। जठरभवे "यदुदर्यस्य मेदसः परिशिष्यते" यत०ब्रा० १,८,४,५, "घृतौतता नभ, उदर्य्येण चक्रवाकौ" यजु० २५,८।

उदलावणिक त्रि० उदकीभूतं लवणमुदलवणम् उदादेयः। तेन पक्वम् ठञ् उत्तरपदवृद्धिः उदकीभूतलवणपक्वे व्यञ्जनादौ फलादौ०।

उदवसित न० उद्+अव+सि-सो-वा क्त। गृहे अमरः।

उदवाप पु० उदकं वपति पिण्डस्थानीयतया वप-अण् उदादेयः उप० स०। जलमात्रेण १आद्धकर्त्तरि २तर्पणकारिणि च। तस्यापत्यम् दृञ्। औदवापि तदपत्ये पुंस्त्री ततः तस्येदमित्यर्थे रैवति० छ। औदवापीय तत्सम्बन्धिनि त्रि०।

उदवास पु० उदके व्रतार्थं वास उदादेयः। व्रतार्थे जलवासे। "अवाक्शिरास्तु योऽम्भोदे उदवासं च योवसेत्। शतं चैकमायौ वः स ब्रह्मलोकं गतिम्" भा०आनु० १७अ०"वक्ष्यन्तालीदवासतत्परा" कुमा०।

उदवाह पु०उदं उदकं वहति वह-अण् उप०स०। जलवाहके १मेघे। "दिवा चित्तम तमस्यति पर्जन्येनोदवाहेन" ऋ०१, १८,६, २उदकवाहकमात्रे त्रि०"आ वोयन्तूदवाहासो अद्य हवं ये विश्वे मरुतो जुनन्ति" ऋ०५,५८, "उक्षा बहन्तु मरुत उदवाहा उदप्रुतः" अथ० १८,२,२२,

उदश्वराव पु०उदकपूर्णः शरावः मा०त०पूरयितव्ये एवमादौ उदादेयः। जलपूर्णे शरावे "उदश्वरावे आत्मानमवेक्ष्य यदात्मनो न विजानीयात्तन्मे प्रब्रूतमिति तौ होदशरावेऽपेक्षाञ्चक्राते" छा०उ०६प्र०।

उदश्वुद्धि त्रि० उद्गा उदकेन शुद्धिः। स्नाते तस्यापत्यम् दृञ्। औदश्वुद्धि तदपत्ये पुंस्त्री ततः यूनि इञन्तत्वात् फिञ् तस्य लोपः।

उदश्रु त्रि० उद्गतमश्रु यस्य प्रा०ब० गतलोपः। उद्गत नेत्रजले "तस्य पश्यन्तु स सौमित्रिरुदश्रुर्वसतिं गतान्" रघुः।

उदश्रित् न० उदकेन जलेन श्रयति वर्द्धते श्रि-क्विप् संज्ञायाम् उदादेशः। अर्द्धजलेन मथिते तक्रे अमरः। "प्राने मूलमुदश्रित्र दधि शुक्रस्य भोजने"। महीनं दध्युदश्रित्रं मथ्वा तक्रं लघ्वनु" सुश्रु०।

उदसन न० उद्+अस-ल्युट्। १निरसने २उत्क्षेपणे च।

उदस्थान न० उद्गा प्लावितं स्थानं याक० त०। १उदक प्लाविते स्थाने। ततः भवार्थे उत्सा० अञ्। औदस्थान तद्भवे त्रि०। उदनि स्थानं वासः। २जलवासे। तत् शीलमस्य अत्सा० ण। औदस्थान जलवासशीले त्रि०।

उदहरण पु० उदकं ह्रियतेऽनेन हृ-करणे ल्युट् उदादेशः। कुम्भे। "प्रायेणैवधनानयुग्मानुदहरणाश्चिप्रभक्षा पञ्चटगभ्यः" कात्या० ६,२,२१। "उदहरणाः कलसाः" इति कर्कः। "निधायोदहरणे त्रिविधिस्थयते" "अथैतमग्निमुदहरणेऽवधाय" यत०ब्रा०६,१,२,५,६,६।

उदहार त्रि० उदकं हरति हृ-अण् उप०स० उदादेयः। १जलहारके "प्रविविक्षां नदीं रात्रावुदहारोऽहमागतः" दशक० स्त्रियां ङीप्। "उतेव गोपा अहमस्य मूढ उदहार्य्ये बहवो मनुष्याः" यजु०१६,७। तेन सि०कौ०"टिड्ढाणञित्यादि" सूत्रे तन्त्रितावन्त्यस्यैव पक्षणोक्तिरित्या अतएव सुबधनो० कर्म्मण्यण्"पा०सूत्रपरिवर्त्तनेन "ठात् वण्" इति सूत्रे ङीषर्थं विघ्नं कृतम्। तथा च कुम्भकारीलोक साधु न तु कुम्भकारा। प्रयुज्यते च नाटकादौ प्रतिहारीलोक तत्र च प्रतिशब्दस्य प्रत्येकार्थत्वात् कर्म्मोपपदत्वं सुलभम्। भावे घञ् ह्रैत०। २जलहरणे च।

उदाज पु० उद्+अज-घञ् न कुत्वं अभावः। पशुप्रेरके

उदात्त पु० उद्+आ+दा-क्त। वर्णोत्पत्तिस्थानेषु ऊर्द्ध्वं दत्तारिते १स्वरे २तद्युक्ते त्रि०। "ऊर्द्धदात्तः" पा०। "तालादिषु सभागेषु स्थानेषूर्द्धभागे निष्पन्नोऽनुदात्तः" सि०कौ०। "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरा अमी" शिक्षाग्रन्थे; अत्रामेव नैपुण्यम्। अनेकाच्कपदे "अनुदात्तं

पदमेकवर्जम्" पा० एकश्रुतिवर्जितस्य अन्यस्य चानुदात्तस्योक्ता । तस्मादौ सामान्यत उदात्तविधायकं सूत्रं दर्श्यते । "अङ्गेभ्यस्तस्यर्क्षु नामस्थानम्" पा० । अङ्गेभ्यः परस्य विभक्तिरुदात्ता । प्रतीचोबाहून् । "जसिदम्यदाद्यपुम् रैदाभ्यः" पा० जस् इदम् यदादि अप् पुम् रै दिव् इत्येभ्योऽर्क्षु नामस्थानविभक्तिरुदात्ता । प्रतीचः । एभिर्भिभिः । षड्दोषाम् क्षुत्रिय इति षट् पदादयः । षड्भ्याम् । दृङ्भिः । नसा भासि । क्षुदा निया । पुंसः । रायो । दिवः । "अष्टनो दीर्घात्" पा० । दीर्घान्नादुत्तरस्य अष्टनः परः भसादिरुदात्तः । अष्टभिः । "यतरनुभोनञ्त्राजादौ" पा० अनुम् यः यत्प्रत्ययस्तदन्तान्नोदात्तात् परा नदी अजादिश्च भसादिर्विभक्तिरुदात्ता । जानती जानतः । दृशती दृशतः इत्यादौ तु अन्त्यस्यानादिरित्यादुदात्तत्वविधानेन अन्तोदात्तत्वाभावात् न तथा । सनुमस्तु तदन्तोत्तरादौ न । "उदात्तयणोहलूर्व्यात्" पा० उदात्तस्थाने योयण् हलूर्व्यस्तस्मात् परा नदी भसादिर्विभक्तिश्च उदात्ता । नेत्री, नेत्रा, क्षयता सवित्रा । "नोङ्धात्वोः" पा० अनयोर्यणः परे भसादय उदात्ता न स्युः । मन्त्रवन्त्रा सुभ्वा । "क्षुक्षतुड्भ्यां मतुप्" पा० क्षुक्षान्तादुत्तरस्य उट्च परो मतुप् उदात्तः । अग्निमान् उदधिमान् । लुट् अलवनः । "रैगन्ताच्च" वा० रैवान् । "नामन्यतरस्याम्" पा० । मतुपि योक्षुक्षतुदन्तादुत्तरात् परोनाम् उदात्तोवा । क्षुमतीनाम्" "ऊधाच्छन्दसि" पा० ऊधाः परोनाम् उदात्तो वा । अभिभक्षुतीनाम् । "षट्त्रिचतुर्भ्यो हलादिः" पा० एभ्योहलादिर्विभक्तिरुदात्ता । षड्भिः त्रिभिः । "न गोश्वन्साववर्ष्वराडङ्क्रुङ्भ्यः" पा० एभ्यः परं प्रागुक्तं सावेकाचस्तृतीया विभक्तिरिति न कार्यम् । "दिवोभक्त्" पा० दिवः परा भक्तादिर्वोदात्ता । "क्रचान्यतरस्याम्" पा० । तुः परा भक्तादिर्वोदात्ता । क्रुभिः । "उपोत्तमं रिति" पा० रित्प्रत्ययान्तस्योपोत्तममुदात्तम् । आहवनीयः । "मतोः पूर्वमात् संज्ञायां स्त्रियाम्" मतोः पूर्वमाकारः उदात्तः संज्ञायां स्त्रियाम् । उदुम्बरावती घरावती अमरावती "एकादेशउदात्तेनोदात्तः" पा० । उदात्तेन सहैकादेश उदात्तःस्यात् । क्रतोऽस्याः । "क्षरितोवानुदात्ते पदादौ" पा० अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः क्षरितो वा पक्षे उदात्तः । "वोदंडयोतिर्हृदये" । "उङ्गैरां वा वषट्कारः" पा० यज्ञकर्मणि वषट्यङ्क्रियमाणे उङ्गैरां अन्तोदात्तः एकश्रुतिर्वा "सुब्रह्मण्यायां स्वरितस्योदात्तः" पा० । सुब्रह्मण्याख्ये निगदे एकश्रुतिर्न स्यात् स्वरितस्य उदात्तः स्यात् । "भस्युपोत्तमम्" पा० षट्त्रिचतुर्भ्यो वा भक्तादिर्विभक्तिरुदात्ता उपोत्तमनुदात्तम् । पञ्चभिः दशभिः । "विभाषा भाषायाम्" पा० । उक्तविषये लोके वोदात्तः । "अन्तश्च तवै युगपत्" पा० तवै प्रत्ययान्तस्यादन्तो युगपदुदात्तो । दातवै । "अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः" पा० । दध्नादेशोऽनङुदात्तः "वतरनडुहोरात्तुदात्तः" पा० एतदादीनि उदात्तविधायकानि । तत्र ब्रह्मचक्रे पदे कर्मोदात्ततेति निर्णयाय आद्युदात्तादिभेदेन" पा० त्रैविध्ययुक्तं तथा च केचिदाद्युदात्ताः केचिदन्तोदात्ताः केचित् मध्योदात्ताः । तत्राद्युदात्ततविधायकसूत्राणि आद्युदात्तशब्दे ७०६ पृ० उक्तानि अन्तोदात्तविधायकानि अन्तोदात्तशब्दे २०६ पृ० दिङ्मात्रमुदाहृतानीत्यतः प्रसङ्गात्सम्प्रति प्रदर्श्यन्ते "उच्छादीनाम्" पा० अन्त उदात्तः स्यात् उच्छादयश्च । उच्छ च्छ जञ्ज जल्प जप वुच युग (गरोदूध्ये) (वेदवेष्टनबन्धाः करणे) (सुयुवुश्वन्दसि) (वर्त्रचिःस्तोत्रे) (दरःभये) (सान्त्वतापौ भावगर्हायाम्) (उत्तमसत्तमौ सर्व्वत्र) भल गन्ध-भोग मन्थ । अतैव निपातनात् युगवुधयोर्धअन्तत्वेऽपि न गुणः" । "अतरः यसि" पा० । अतरोऽन्तउदात्तः यसि परे । अतरः । अतेररक्षिति निरुक्तादाद्युदात्तत्वेऽपि यसि अन्तोदात्ततैव । "अन्तोऽवत्याः" पा० अवतीयदन्तस्थान्त उदात्तः । वेलवती । "रैवत्याः" पा० रैवत्यन्तस्थापि अन्त उदात्तः । अक्षीवती सुनीवती । "चितः" पा० चित्प्रत्ययान्तस्थान्त उदात्तः स्यात्" । "चितः सप्रकृतेर्बहुव्रजर्थम्" वार्त्ति० । चिति प्रत्यये यसि प्रकृतिप्रत्ययसमुदायस्थान्त उदात्तः । "नक्षत्रान्नञ्जे लुबे "यजे सरूपति"तकतु कुरुते "तद्धितस्य" पा० चितस्तद्धितस्यान्त उदात्तः पूर्वेण सिद्धे जित्स्वरबाधनाय । चपञ्चौड्डायनाः । "चितः" पा० चितस्तद्धितस्यान्त उदात्तः । ढक् आग्नेयः । "तिङ्भ्योऽसः" पा० अन्त उदात्तः । तिङः । "अन्तोदात्तादुत्तरपदादन्यतरस्याम्" पा० नित्याधिकारसमासादन्यत्र यदुत्तरपदमन्तोदात्तमेवाङ् ततः परा तृतीया विभक्तिरन्तोदात्ता वा । परमवाचा । "यजिच श्रैष्ठीयत्वे वा" पा० श्रैष्ठि यजि परे हृदुदात्तः हृदन्तोवाऽऽदिर्वा । हृदुविध चत्वारोऽपि पक्षेवोदात्ताः ।

फिट्सूत्रेषु १पादे केचित् घट्टा अन्तोदात्ताः दर्शिता यथा। "फिषोऽन्तउदात्तः"१। प्रातिपदिकं फिट् तस्यान्तउदात्तः स्यात्। उर्वः। "पाटलापालङ्काम्बासागरार्था नाम्" २। एदर्थान्मन्तउदात्तः। पाटला फलेरुहा तुरुपा पाक्लेति पर्यायाः। लघावन्त इति प्राप्तः। पालङ्कोऽधिघातआरेवतआरग्वध इति पर्यायाः। अम्बार्थः माता। उनर्वन्तानामाद्युदात्ते प्राप्ते। सागरः। समुद्रः। "गेहार्थानामस्त्रियाम्"३। गेहम्। नब्विषयस्येति प्राप्ते। अस्त्रियां किम् शाला आद्युदात्तोऽयम् हृदेव पर्युदासाज्ज्ञापकात्। "गुदस्य च" ४। अन्तउदात्तःस्यात्तु स्त्रियाम्। गुदम्। अस्त्रियां किम् "आन्त्रेभ्यस्ते गुदाभ्यः"। खाङ्गशिटामदन्तानामित्यन्तरङ्गाद्युदात्तत्वम् ततष्टाप्। "ध्रुपूर्वस्य स्त्रीविषयस्य"५। धकारयकारपूर्वीयोऽन्योऽच् स उदात्तः। अन्तर्धा। स्त्रीविषयस्येति प्राप्ते। छाया। माया। जाया। यानस्यान्त्यात् पूर्वमित्याद्युदात्तत्वे प्राप्ते। स्त्रीति किम् ब्राह्मम् यजनत्वादाद्युदात्तम्। विषयग्रहणं किम् दृश्या। जतिया। यतोऽनाव इत्याद्युदात्तदृश्यशब्दः। जतियशब्दस्तु यानस्यान्त्यात्पूर्वमिति मध्योदात्तः। "खान्तस्यासादेः"६। नखम्। उखा। सुखम्। दुःखम्। नखस्य खाङ्गशिटामित्याद्युदात्ते प्राप्ते। उखा नाम भाण्डविशेषस्तस्य क्रत्रिमत्वात् खयुवर्णं क्रत्रिमाख्या चेदित्युवर्णोदात्तत्वे प्राप्ते। अस्यादेः किम् शिखा। सुखम्। सुखस्य खाङ्गशिटामिति नब्विषयस्येति वा आद्युदात्तत्वम्। शिखायास्तु गौरुः खो निङ्खखेति उणादिषु निपातोक्तेः अन्तरङ्गत्वाङ्गापः प्रागेव खाङ्गशिटामिति वा बोध्यम्। 'बहिलसंवत्सरतिथत्यानानाम्'७। एषामन्त उदात्तः स्यात्। अतियथेन बहुलो बंहिष्ठः। निष्वादाद्युदात्ते प्राप्ते। "बंहिष्ठैरश्वैः सुहता रथेन"। "यद्बंहिष्ठमिष्वति विधे" इत्यादौ व्यत्ययादाद्युदात्तः। संवत्सरः। अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यते इत्याङुः। मप्रतिः। अयीतिः। लघावन्त इति प्राप्ते। चत्वारिंशत्। इहापि प्राग्वत्। अभ्युत्या। "नाभ्यस्तस्य" ८। अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यते इत्याङुः। घाघादिसूत्रेण गतार्थमेतत्। "दक्षिणस्य साधौ" ९। अन्त उदात्तः स्यात्। साधुवाचित्वाभावे तु व्यवस्थायां सर्वनामत्वेन खाङ्गशिटामित्याद्युदात्तः। अर्थान्तरे तु लघावन्त इति गुरुरुदात्तः। दक्षिणः सरलोदारपरश्छन्दानुवर्त्तित्विति कोशः। "खाङ्गाख्यायामादिर्वा"१०। इह दक्षिणस्याद्यन्तावुदात्तौ। दक्षिणो बाहुः आख्यायामहणं किम्। प्रत्यङ्मुखमासीनस्य वामपार्श्वदेशिनो भवति। "छन्दसि च" ११। अस्याङ्गार्थमिदम्। दक्षिणः। इह पर्यायेणाद्यन्तावुदात्तौ। "कृष्णखाङ्गाख्या चेत्" १२। अन्तउदात्तः। वर्णानान्तेत्याद्युदात्ते प्राप्ते अन्तोदात्तो विधीयते। कृष्णानां श्रेष्ठीणाम्। "कृष्णो नो नाव इषभः"। खाङ्गाख्यायान्तु 'कृष्णो रात्र्यौ"। "वा नामधेयस्य"१३। "कृष्णशिवेव। "अयं वा कृष्णोऽग्निना"। कृष्णऋषिः। "शुक्लगौरयोरादिः"१४। नित्यमुदात्तः स्यादित्येके। वेत्यनुवर्त्तत इति तु युक्तम्। "सरो गौरा यथापि वेत्यत्रान्तोदात्तदर्शनात्"। "अङ्गुलेोदकवणयानां छन्दसन्तः"१५। अङ्गुलस्य खाङ्गानामकृत्र्यादीनामिति द्वितीयसोदात्तत्वे प्राप्तेऽन्तोदात्तार्थं आरम्भः। वषाग्रहणं नियमार्थं छन्दस्येवेति। तेन लोके आद्युदात्तस्तेत्याङुः। "पृषस्य च"१६। छन्दस्यन्तउदात्तः स्यात् भाषायां वा। पृषम्। "अर्जुनस्य हणाख्या चेत्"१७। उनर्वन्नानामित्याद्युदात्तस्यापवादः। "अर्थस्य स्वाम्याख्या चेत्" १८। यानस्यान्त्यात् पूर्वमिति यतोऽनाव इति वाद्युदात्ते प्राप्ते वचनम्। "आयाया अदिगाख्या चेत्"१९। दिगाख्याव्याहत्यर्थमिदम्। अतएव ज्ञापकाद्विकृपर्यायस्याद्युदात्तता। "इन्द्र आशाभ्यस्परि"। "नक्षत्राणामाबविषयाणाम्"२०। अन्तउदात्तः स्यात्। अश्लेषाऽनुराधादीनां लघावन्त इति प्राप्ते। ज्येष्ठाश्विष्ठाधनिष्ठानामिश्वन्नन्तत्वेनाद्युदात्ते प्राप्ते वचनम् "न कृपूर्वः क्रत्तिकाख्या चेत्" २१। अन्तउदात्ता न। क्रत्तिका नक्षत्रम्। केचित्तु कृपूर्वो य आप् तद्विषयाणामिति व्याख्याय आर्थिका बहुलिका इत्यत्रायन्तोदात्तो नेत्याङुः। "शतादीनाञ्च" २२। "इतं मित्रेऽर्यमणि" आकृतिगणः। 'ज्येष्ठकनिष्ठयोर्वयसि' उदात्तः स्यात्। "ज्येष्ठ आह चमसा"। "कनिष्ठ आह चतुरः"। वयसि किम् ज्येष्ठः श्रेष्ठः, कनिष्ठोऽल्पिष्ठः। इह निष्वादाद्युदात्त एव। "विख्यतिख्ययोः खरितो वा" २४। अनयोरन्तः खरितो वा स्यात्। पक्षे उदात्तः। सि० कौ०। फिट्सूत्रे ३पादे येषां द्वितीयाद्यचामुदात्तताऽभिहिता तत् प्रदर्श्यते "अथ द्वितीयं प्रागीषात्"१। ईषान्तस्य फलादेरित्यतः प्राक् द्वितीयाधिकारः। "त्रयाणां प्राङ्नकारात्"२। नकारवरुडेत्यतः प्राक् त्रयाणामित्यधिकारः। "खाङ्गानाम-

कुर्वादीनाम्" २। अवर्णेरेफवकारादीनि वर्जयित्वा तदन्तानां खान्तानां द्वितीयस्तदात्तम्। ललाटम्। कुर्वादीनान्तु कपोलः। रसना। वदनम्। "मादीनाञ्च" ४। मलयः। मकरः। "यादीनां यकाराणाम्"५। यौतन्या यतपुरुषा। "यान्तानां गुर्वादीनाम्" ६। यादवः आतपः। लघ्वादीनान्तु अनूपम्। "युतान्यण्यन्तानाम्" ७। युत अयुतम्। अनि धमनिः। अणि विपणिः। "मकरवरुडपारेवतवितस्तेऽजिह्माकलोमाकाश्यायतप्लाक्षीणामादिर्वा" ८। एषामादिर्द्वितीयो वोदात्तः। मकरः। वरुड इत्यादि। "छन्दसि च" ९। अमकरादयश्च आरभ्याः। लक्ष्यानुसारादादिर्द्वितीयं वोदात्तं ज्ञेयम्। "कर्ष्मादीनाञ्च"१०। आदिर्द्वितीयं वोदात्तम्। "तुगञ्जितेजनस्य ते वा"११। आदिर्द्वितीयस्तेजनशब्देति त्रयः पर्य्यायेणोदात्ताः। तुगञ्जितेजनाः। "नपः फलान्तानाम्"१२। आदिर्द्वितीयश्चोदात्तम्। राजादनफलम्। "यान्तस्यान्त्यात् पूर्व्वम्" १३। कुलायः। "यान्तस्य च नालघुनो"१४। नाघट्टो लघु च उदात्तं स्तः। सनाथा सभा। सरघा सेना "शिशुमारोदुम्बरबलीवर्दोद्धारपुरुषवसाञ्च" १५। अन्त्यात् पूर्व्वस्तदात्तं द्वितीयं वा। "साङ्काश्यकाम्पिल्यनासिक्यदार्वाघाटानाम्" १६। द्वितीयस्तदात्तं वा। "ईषान्तस्य फलादेरादिर्वा"१७। फलीषा। फालीषा। ४पादे"यकटिशकलेरत्नरमत्तर पर्य्यायेण"१। उदात्तम्। यकटिः। यकटी। "गोष्ठजस्य ब्राह्मणनामधेयस्य" २। अत्तरमत्तरं पर्य्यायेणोदात्तम्। गोष्ठजः ब्राह्मणः अन्यत्र गोष्ठजः पशुः। क्रतुत्तरपदप्रकृतिस्वरेणान्तोदात्तः। "पारावतश्येनोत्तमवर्जम्" २। श्येनं क्रमेणोदात्तम्। पारावतः। "धूम्रजालुशुक्लकेयकालबालस्थालीपाकानामधूम्रजस्थानाम्" ४। एषामुत्तरपदानामूनभतीश्चतुरो वर्जयित्वा शिष्टानि क्रमेणोदात्तानि। धूम्रजालुः शुक्लकेयः कालबालः स्थालीपाकः। "कपिकेयकरिकेययोश्छन्दसि" १५। कपिकेयः करिकेयः।

समासस्य बहुपदघटिततया कस्योदात्तेति निर्णयाय केचित् पूर्व्वपदप्रकृतिस्वराः केचित् उत्तरपदप्रकृतिस्वराः केचित् पूर्व्वपदे आद्युदात्ताः केचिच्च तदान्तोदात्ताः केचित् उत्तरपदे आद्युदात्ताः केचिच्च तदान्तोदात्ताः इति विभागं मनसि निधाय पाणिनिना ६अध्याये समासस्वरप्रकरणमारब्धं यथा "समासस्य" पा०अन्त उदात्तः। वज्रश्रियम्। इति सामान्यतोविधाय विशेषमाह।

तदादौपूर्व्वपदप्रकृतिस्वरः। "बहुव्रीहौ प्रकृत्या पूर्वपदम्" पा०। उदात्तस्वरितयोर्यिपूर्व्वपदं प्रकृत्या स्यात् ब०व्री०। अन्तोदात्तताप्यपवादः। "सत्यखिलखत्वस्तः"। सर्वान्तुदात्ते पूर्वपदे तु अन्तोदात्तएव। समपादः। "तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाऽव्ययद्वितीयाकृत्याः"। पा०। सप्तैते पूर्व्वपदभूतात्तत्पुरुषे प्रकृतिस्वराः। तुल्यश्चेतः समश्चेतः। किरिणा काणः किरिकाणः। मदयत्यक्षः। मदयति मादके इन्द्रे सखा। यक्ष्मोष्ठ्यामः यक्ष्मयामः। "अव्यये नञ्सुभ्यामिति वाच्यम्" वार्त्ति०। अयत्नः। नञित्याद्युक्तेः प्रोच्यपायीयानित्यादौ न। द्वितीया श्रितसुखम्। कृत्या भोज्योष्णम्। "वर्णोवर्णेष्वेते" पा० वर्ण्यवाचिन्युत्तरपदे एतवर्ज्जिते वर्ण्यवाचि पूर्व्वपदं प्रकृत्या तत्पुरुषे। कृष्णसारङ्गः। वर्ण्यः किं परमकृष्णः कृत्यादौ, वर्णेषु किं कृष्णतिक्या कृत्यादौ च न, एवं कृष्णेत इत्यत्रापि। "गाधलवणयोः प्रमाणे"पा० एतयोरुत्तरपदयोः प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या। अरित्रगाधम् तत्प्रमाणमित्यर्थः। गोत्रवणम् यावद्वणे दीयते तावदित्यर्थः। "दायाद्यं दायादे" पा० धनदायादः। "प्रतिबन्धि चिरकृच्छ्रयोः" पा०। प्रतिबन्धिवाचि पूर्व्वपदं प्रकृत्या एतयोः परयोः। गमनचिरम्। कथनकृच्छ्रम्। गमनादिकारणविकलतया चिरकालभावि कृच्छ्रयोगितया चात्र प्रतिबन्धः। अन्यत्र मूलकृच्छ्रमित्यादौ न। "पदेऽपदेशे" पा० व्याजवाचिनि उत्तरपदे प्रागुक्तम्। मूलपदेन प्रख्यितः। अन्यपदेशे तु विष्णुपदम् अत्र न "निवाते वातत्राणे" पा० पार्श्ववाचिनिवाते परे वातत्राणवाचिनि तत्पुरुषे प्रागुक्तम्। कुटीनिवातम्। वातत्राणाभावे तु राजनिवाते वसतीत्यत्र न "पारदेऽनार्त्तवे" पा० आर्त्तवभिन्नवाचिनि पारदे परे प्रागुक्तम्। रज्जुपारदस्तदन्तम्। रज्ज्वाः सद्य उत्तमित्यर्थः। आर्त्तवार्थत्वे तु उत्तमपारदमित्यादौ न। अध्वर्युकषाययोर्जातौ"पा० एतयोः परयोर्जातिवाचकत्वे प्रागुक्तम्। कठाध्वर्युः दौवारिकजायम्। अजातेस्तु परमाध्वर्युरित्यादौ न "सदृशप्रतिरूपयोः सादृश्ये" पा० पितृसदृशः पितृप्रतिरूपः। असादृश्ये तु परमसदृश इत्यादौ न। सादृश्यमत्र पूर्व्वतुल्या न तु सादृश्यमात्रम् सि० कौ०। "द्विगौ प्रमाणे" पा० द्विगौ प्रमाणवाचिनि परे पूर्वपदं प्रकृतिस्वरम्। प्राच्यशतम्।

षष्ठ समाः प्रमाणमस्य षष्ठसम्; ततः कर्म०"गन्तव्यपण्यं वाणिजे" पा०वाणिजगच्छे परे एतदर्थको प्राग्वत् ततुरुच्छे। महद्वाणिजः; गोवाणिजः। अगन्तव्यादौ तु परमवाणिज इत्यादौ न। "मात्रोपज्ञोपक्रमच्छाये नपुंसके" पा० "मात्रादिषु परतः नपुंसकवाचिनि ततुरुच्छे प्रकृत्या। भिक्षामात्रम्। पाणिन्युपज्ञम्। नन्दोपक्रमम्। इक्षुच्छायम्। नपुंसके किम् इक्षच्छाया इत्यादौ न।"सुखप्रिययोर्हिते" पा०। गमनसुखं गमनप्रियम्। "प्रीतौ च" पा० प्रीतौ गम्यायां प्रागुक्तम्। ब्राह्मणसुखं भवःयानम्। ब्राह्मप्रियोऽनध्यायः। "खं खामिनि" पा०। गोस्वामी। अन्यत्र परमस्वामीत्यादौ न।"पत्यावैश्ये"पा०। भूकृपतिः। "न भूवाक्चिद्दिधिषुषु"पा०"प्रागुक्तं न। भूपतिः वाक्पतिः; चित्तपतिः दिधिषुपतिः। "वा भुवनम्"पा०। प्रागुक्तं वा। भुवनपतिः। "आशङ्कायामनेदीयसि सम्भावने" पा०। गमनमाशङ्कते गमनाशङ्कम् गमनमनेदीयः। गमनमाशङ्कते आवाध्यते निकटतरमिति सम्भाव्यते इत्यर्थः। असम्भावने तु परमनेदीय इत्यादौ न। "पूर्वे भूतपूर्वे" पा० भूतपूर्वार्थे पूर्वशब्दे परे पूर्वपदं प्रकृत्या। आढ्यपूर्वः। "सविधसमीपसमर्यादसवेशसदेशेषु साकल्ये" पा०। महत्सविधम्। एवं समीपादिषु। असाकल्ये तु सह मर्यादया समर्यादं चेलम् चैलसमर्यादमित्यादौ न। "विस्पष्टादीनि गुणवचनेषु" पा०। विस्पष्टकटुकम्। विस्पष्टं विचित्रं व्यक्तं समग्रं प्रगल्भं कुशलं चपलं निपुणं" एते विस्पष्टादयः। अगुणवचने तु विस्पष्टब्राह्मण इत्यादौ न। "अकृत्यार्थतृणवत्तुल्ये भावः कर्मधारये"पा०। तृल्ये, अधमःकन् इत्यादेशवति पापिवाचिनि च परे भाववाचि पूर्वपदं प्रकृत्या। गमनतुल्यः गमनतुल्यायः गमनावमम् गमनकल्पिष्ठम्। गमनपापिष्ठम्। "कुमारश्च" पा०। कर्मधारये पूर्वपदं प्रकृत्या। कुमारश्रमणः। "आदिः प्रत्येनसि" पा० कुमारस्त्रादिरुदात्तः प्रत्येनसि परे कर्म०। कुमारप्रत्येनाः। "पूगेष्वन्यतरस्याम्" पा० कुमारघातकाः कुमारजीवनाः। "दृनस्मशानजघनभवनगहनरीरेषु हिंसौ" पा०। दृघ्ने पञ्चारत्निः। काले पञ्चमाद्यः दशमाद्यः। पञ्चवर्षाद्यः पञ्चभगाद्यः।(भगाद्यः बालभेदः)। पञ्चशरीरः। "बहुव्रीह्यतरस्याम्"पा०। प्रकृत्या वा। बहुरत्निः बहुमाद्यः। "द्विदिवित्रिदिवेत्र्यहे" पा०। प्रकृत्या वा। पञ्चदिदिः पञ्चदिवसिः। "सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात्"पा०। अकालवाचि सप्तम्यन्तम् इतु परेषु प्रकृत्या। सकालाद्यसिद्धः आतपशुष्कः आदृपक्वः चक्रबन्धः। काले तु पूर्वाह्णसिद्ध इत्यादौ न। परिपूत्यपापा वर्ज्यमानाक्षेरालावयवेषु" पा०। एते प्रकृत्या वर्ज्यमानाक्षेरालावयववाचिनि परे। परिलिगर्त्तं दृष्टोदेवः। प्रतिपूर्वाह्णम्। प्रत्यपरारात्रम्। उपपूर्वरात्रम्। अपलिगर्त्तम्।"उपसर्गा आद्युदात्ताः; अभिवर्ज्यम्" इति बहुव्रीहितत्पुरुषयोः सिद्धत्वादव्ययीभावार्थमिदम्"सि०कौ०।"राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु" पा०। बहुवचनान्तानां राजन्यानामन्धकवृष्णिषु वर्त्तमाने द्वन्द्वे पूर्वपदं प्रकृत्या। मित्रिसुदेवाः। "संख्या"पा०। द्वन्द्वे संख्यावाचि पूर्वपदं प्रकृत्या "द्वादशत्रयोदश। "आचार्योपसर्जनश्चान्तेवासी" पा०। द्वन्द्वे प्रागुक्तम्। पाणिनीयशैडीयाः

"कार्त्तकौजपादयश्च"पा०। द्वन्द्वे एषां पूर्वपदं प्रकृत्या। ते कार्त्तकौजपौ सावर्णिकमाण्डूकेयौ अवन्त्यप्रकाराः पैलस्थाप्यौथाः कपिस्थापर्ण्यौथाः यौतिकाक्षपाञ्चालेयाः कटूकवाधूलेयाः याकलगुणकाः याकलयणकाः यणकबाभ्रवाः आङ्गाभिमौद्गकाः कुन्तिसुराष्ट्राः चिन्तिसुराष्ट्राः तण्डवतण्डाः अविमसकामविद्धाः बाभ्रवयाज्ञदायनाः बाभ्रवदानञ्युताः कठकालापाः कठकौथुमाः कौथुमलौगाक्षाः स्त्रीकुमारम् शौद्रपैप्पलादाः। वत्सजरन्तः सौश्रुतपार्थवाः जराबन्धा याज्ञायनाकाः। 'मक्षान् ब्रीह्यपराह्णष्टौषुखलावालभारभारतहैलिहिलरौरवप्रवृद्धेषु" पा०। एषु परेषु मक्षच्छब्दः प्रकृत्या। मक्षाब्रीहिः; "सञ्ज्ञाकृदिति प्रतिपदोक्तसमास एवायं स्वरः न षष्ठीसमासे" सि०कौ०। "शुक्लकृष्णैत्तिरिभ्यः" पा०। शुक्लकृष्णैत्तिरिवैश्वदेवम् शुक्लवैश्वदेवम्। शुध्यं याति शुक्लः ततः कन्। "उरः सादिभ्यो:" पा० उरसादिः उरसाभिः। "गोःसादसादिसारथिषु" पा०। गोसादः गोसादिः गोसारथिः। "कुरुगार्हपतरिक्तगुर्वसूतजरत्यक्षीलदृढरूपापरेवडवातैतिलकटुः पण्यकम्बलोदासीभाराणाञ्च"पा०। एषां सप्तानां षष्ठ्यन्तानां दासीभारादेश्च पूर्वपदं प्रकृत्या। ईत०। कुरुगार्हपतम्। "दृजरिति वाच्यम्" वार्त्ति०दृजिगार्हपतम्। कर्म०रिक्तगुरुः। कर्म०असूतजरती। क०अक्षीलदृढरूपा। पारेवडवेव इवार्थे क० विमलयलोपश्च नि०। क०तैतिलकटुः। क०पण्यकम्बलाः। ईत०। दासीभारः देवकृतिः; देवभोतिः देवलातिः वसुनीतिः ओषधिचन्द्रमाः आञ्जतिगणः। "यस्य ततपूरुषस्य पूर्वपदप्रकृतिस्वर इष्यते न विग्रह्य विधानं स सर्वोऽपि दासीभारादिषु द्रष्टव्यः"सि०कौ०"चतुर्थी तदर्थे" पा०। चतु-

र्थ्यनार्थाय यत् तदाचिनि परे पूर्वपदं प्रकृत्या । ४त०। यूपदारु।"अर्थे"पा०। अर्थे परे चतुर्थ्यन्तं प्रकृत्या । देवार्थम् ।"क्ते च"पा०। क्तान्ते परे चतुर्थ्यन्तं प्रकृत्या ।४त० गोहितम् । "कर्मधारयेऽनिष्ठा" पा०। क्तान्ते परे पूर्वनिष्ठान्तं प्रकृत्या । श्रेणिकृताः पूगकृताः श्रेण्या कृतमित्यादौ न । निष्ठान्तस्यापि न, कृताकृतम् । "अक्षीने द्वितीया" पा० । अक्षीनवाचिनि समासे क्तान्ते परे द्वितीयान्तं प्रकृत्या । कष्टं श्रितः कष्टश्रितः। आगमतः "अनुपसर्गं इति वक्तव्यम्"वार्त्ति०। नेह सुखप्राप्तःकष्टाश्रितः । "तृतीया कर्मणि" पा०। कर्मवाचकक्तान्ते परे तृतीयान्तं प्रकृत्या । हरिकृतः मल्लराजकृतः । कर्मणि किं रथेनायातः रथायात इत्यादौ न । "गतिरनन्तरः" पा०। कर्मार्थक्तान्ते परेऽव्यवहितोगतिः प्रकृत्या । पुरोडाशितम् । व्यवधाने तु न अभ्युद्धृतः । "तादौ च निति कृतौ" पा० । तकारादौ निति सुपद्भिन्ने कृति परे गतिरनन्तरः प्रकृत्या । "प्रभूतौ सम्भृतिः गौः" कृत्स्वरापवादः । तौ तु न, आगन्तुः। "तवै चान्तश्च युगपत्"पा० तवै प्रत्ययान्तश्चान्त उदात्तः गतिश्चानन्तरः प्रकृत्या तच्च युगपत् । अन्तेतवै । "अनिगन्तोञ्चतौ वप्रत्यये पा० । अनिगन्तगतिर्वप्रत्ययान्तोञ्चतौ परे प्रकृत्या । "शेषराजुस्यात्" "न्यधौ"पा०। तस्मिन् परे न्यधौ गतौ प्रकृत्या । न्यङ् अध्यङ् । "शेषतृतीयात्स्यात्"पा०। शेषतृकडारः । शेषकृद इत्यादौ तु कृत्स्वरएव ।"क्विरतिपरिमाणं धने" पा० । वा प्रकृत्या । हिरण्यवर्णधनं कर्मधारयः ।"प्रथमोऽचिरोपसम्पत्तौ" पा०। प्रथमः प्रकृत्या नूतनत्वे । प्रथमवयाकरणः । सम्प्रति व्याकरणमध्येतुं प्रवृत्त इत्यर्थः । तुमर्थत्वे तु न । "कृतकृत्यौ कर्मधारये" पा०। वा प्रकृत्या । कृतकृत्यः । "आर्योब्राह्मणकुमारयोः" पा० । कर्म० प्रकृत्या । आर्यब्राह्मणः आर्यकुमारः ।"राजा च" पा०। राजब्राह्मणः राजकुमारः।"षष्ठी प्रत्येनसि" पा० षष्ठ्यन्तोराजा प्रत्येनसि परे वा प्रकृत्या । राजप्रत्येनाः । कर्म० न । "क्ते नित्यार्थे" पा० । क्तान्ते परे नित्यार्थे समासे पूर्वं प्रकृत्या । नित्यकृक्षितः "आमः शिल्पिनि" पा०। वा प्रकृत्या । आमनापितः । अशिल्पिनि न, आमरण्या । "राजा च प्रशंसायाम्" पा०। शिल्पिवाचिनि परे प्रशंसार्थं राजपदं वा प्रकृत्या । राजक्षापितः राजकुक्षाकः। अशिल्पिनि तु राजकृक्षोत्यादौ न।

एवम् अन्तोदात्तापवादं पूर्वपदप्रकृतिस्वरमभिधाय आद्युदात्तस्वरमपि तदपवादतयाऽभिदधे ।

"आदिरुदात्तः"पा०।अधिकारोऽयम् ।"सप्तम्यधिकरणे च"पा० सप्तम्यन्तं कारिवाचि च आद्युदात्तं स्यात् धर्म्ये परेऽकरणे । देयं यः स्वीकरोति स कारीत्युच्यते धर्म्यमित्याचारनियतं देयम् । सकृटेकार्षापणम् । कृतेद्विपदिका । संज्ञायामिति सप्तम्योसमासः कारणाग्नि चेत्यत्वम् । याज्ञिकाग्र्यः वैयाकरणश्रेष्ठी । क्वचिदयमाचारः सकृटादिषु कार्षापणादि श्रुतित्वेन देयम् याज्ञिकादीनां स्वम्यादिरिति तत्र याज्ञिकादीनां धर्म्यरूपदेयस्य स्वीकारित्वात् याज्ञिकादिपदस्यो दात्तत्वम् । बीजनिषेकादुत्तरकालं देहपुष्ट्यर्थं यदुदीयते तद्धरणं तस्मिन् परे न । वाडवहरणम् । वडवाया अयं वाडवः तस्मिन् हरणमित्यर्थः । परोऽपि कृत्स्वरो हारिस्वरेण बाध्यते इत्यहरणनिषेधेन ज्ञापितम् । "युक्ते च" पा०। युक्तवाचिनि समासे पूर्वमाद्युदात्तम् । गोरक्षकः । कर्तव्ये तत्परश्चेद् युक्तः । "विभाषाध्यक्षे" पा० । अध्यक्षे परे प्रागुक्तं वा । गवाध्यक्षः । "पापपक्षे शिल्पिनि" पा०। पापनापितः । पापापाक इति प्रतिपदोक्तस्यैव अकर्मणः षष्ठीसमासे न । "मोक्षाभक्षे वाक्षिमाषवराह्मणेषु क्षेपे" पा० । क्षेपे गम्ये एषु पूर्वपदमाद्युदात्तं स्यात् । तत्र गोक्षे भार्यासौनुतः । सुनुतायास्तस्य भार्यप्रधानतयेह क्षेपः । अक्षेवाक्षिनि । कुमारीदाक्षाः ओदनपाणिनीयाः । कुमार्यादिशब्दा अनर्थका दाक्ष्यादिप्रतीतयाक्षाध्यायिनां क्षेपः । भिक्षामाषवः भिक्षां कक्षेऽक्षमिति माषवः इति क्षेपः । भवद्राह्मणः भवेन ब्राह्मणः सम्पादते इति क्षेपः । "अकर्णि भेरेये" पा० मधुभेरेयः मधुनो मद्यकृत्वात् तत्परे तथात्वम् । "भक्ष्याच्छादनदर्थेषु" पा०। भिक्षादयोऽत्रविशेषाः कंसादिरूपपात्रस्य तदर्थत्वात् तत्परे भिक्षादीनां प्रागुक्तम् । भिक्षाकंसः भाजीकंसः । "गो विडालसिंहसैन्धवेषूपमाने" पा० । उपमानवाचिषु एषु पूर्वपदमाद्युदात्तम् । धान्यगवः धान्यं गौरिवेति वाक्ये गवाक्षत्वा सन्निविशेतं धान्यं धान्यगवः । गोविडालः । तृणसिंहः सक्तुसैन्धवः ।"अके जीविकार्थे" पा०। अकान्ते परे जीविकार्थवाचिनि समासे पूर्वपदमाद्युदात्तम् । दन्तलेखकः । दन्तलेखनेन जीविकावान् । "प्राचां क्रीडायाम्" पा०। प्राच्यानां क्रीडावाचिनि समासे अकान्ते परे प्रागुक्तम् । उद्दालपुष्पभञ्जिका ।

"अधि नियुक्ते" पा०। अधस्ते परे नियुक्तवाचिनि समासे प्रागुक्तम्। अधिधारः। "खिलिनि चाऽजः" पा०। खिलिवाचिनि अजः परोऽन्ते परे प्रागुक्तम्। तन्तुवायः : अखिलिनि तु न, कुम्भकारः। ऋणोऽपि न, कुम्भकारः। "संज्ञायाञ्च" पा०। अणन्ते प्रागुक्तम्। तन्तुवायो नाम जूताऽधिः। अजऽ इत्येव रथकारोनाम ब्राह्मण इत्यत्र न। "गोतन्तियवं पाले" पा०। गोपालः तन्तिपालः यवपालः। अनियुक्तार्थोऽयमारम्भः नियुक्ते तु पूर्वेण सिद्धः। "खिनि" पा०। खिन्यन्ते परे प्रागुक्तम्। सुखप्रहारी। "उपमानं शब्दार्थप्रकृतावेव" पा०। उपमानवाचि पूर्वपदं खिन्यन्ते परे आद्युदात्तम्। उष्ट्रक्रोशी श्वाऽऽक्षरावी। अशब्दार्थे तु एकशृङ्गीत्यादौ न। प्रकृतिपक्षेण उपसर्गेण शब्दार्थत्वे गर्हभोच्चारीत्यादौ न। "युक्तारोऽाद्यन्यत्" पा०। एते आद्युदात्ताः। युक्तारोही आगतरोही आगतयोधी आगतपङ्क्ती आगतनन्दी आगतपुरोगी। आगतमातृकः क्षीरक्षोता अग्निचित्का यामगोधुक् अश्वतिरात्रः गर्गतिरात्रः व्युष्टितिरात्रः गणपादः एकर्चितिपादः पात्रेसमिताद्यश्च युक्तारोहादिः। "दीर्घकाशतुषभ्राड्वटं जे" पा०। जे परे एतानि आद्युदात्तानि। दीर्घजः काशजः इत्यादि। "अन्यात् पूर्वं बह्वचः" पा०। बह्वचः पूर्वस्मान्न्यात् पूर्वपदं जे परे आद्युदात्तम्। उपसरजः। आमलकीजः। "ग्रामेऽनिवसन्तः" पा०। ग्रामे परे अनिवसन्ताद्यं पूर्वपदमाद्युदात्तम्। मल्लग्रामः, (मल्लसमूहः) देवग्रामः (देवसम्बन्धिकः ग्रामः)। निवसतस्तु दाक्षिग्राम इत्यादौ न। "गोषादिषु च" पा० गोष इत्येवमादिषु गोत्तरपदेषु पूर्वपदमाद्युदात्तं स्यात्। गोष कट वङ्ग अश्व वदरी पिङ्ग पिण्ड माला रक्षा शाला कूट शाखी अश्वत्थ तृण शिल्पी सनि प्रेक्षा गोषादि। दाक्षिगोषः। "शालाद्यः शालायाम्" पा०। शालिशाला व्याडिशाला। ते च शालि मेलि भाण्डि व्याडि आक्षिण्ड आटि गोमि। "प्रस्थेऽवृद्धमकर्क्यादीनाम्" पा०। प्रस्थपरे अवृद्धं (यस्यादाचः वृद्धिर्न) तादृशपूर्वपदमाद्युदात्तं न तु कर्क्यादीनाम्। इन्द्रप्रस्थः। अवृद्धस्य तु दाक्षिप्रस्थ इत्यादौ न। कर्क्यादयश्च कर्की भल्ली मकरो कर्कन्धु यमी करीर कन्दुक कवल वदरी। "शालादीनाञ्च" पा०। वृद्धार्थमिदम्। शालाप्रस्थम्। शालादयश्च। शाला शाला शोणा द्राक्षा द्राक्षा द्राक्षा शाखी एक शाम। "अमहज्जं नगरेऽनुदीचाम्" पा०। ब्रह्मनगरम्। महत्त्वयोस्तु महानगरं नवनगरमित्यादौ न। उदीचान्तु कार्त्तिनगरमित्यादौ न। "अर्धे चावर्णं द्व्यच्त्र्यच्" पा०। अर्धे परे ह्रस्वकं त्र्यच्कं वाऽवर्णान्तं पूर्वपदमाद्युदात्तं स्यात्। शुभ्रार्धम्। कुक्कुटार्धम्। अनवर्णस्य वृक्षदर्भमित्यादौ न। अधिकाच्चेऽपि कपिञ्जलार्धमित्यादौ न। अमहत्त्वमितेत्यत्र तेन महार्धम् नवार्धमित्यादौ न। "न भूताधिकसञ्जीवमद्राङ्कवज्जलम्" पा०। अर्धे एतानि नाद्युदात्तानि। भूतार्धम्।

एवं समासे पूर्वपदस्य आद्युदात्तताभिधाय तस्यैव अन्तोदात्ततामपि तत्र उक्त्वा यथा "अन्तः" पा० अधिकारोऽयं प्रागुत्तरपदादिपरिभाषात्। "सर्वं गुणकात्स्न्यें" पा०। सर्वशब्दरूपं पूर्वपदमन्तोदात्तं स्यात् गुणसाकल्ये गम्ये। सर्वश्वेतः सर्वश्वेतः। श्वेतत्वमहत्त्वगुणाभ्यां कृत्स्नव्यापकताद्योतनादस्य तथात्वम्। सर्वशौक्ल्यं इत्यादौ तु गुणेन व्याप्त्यभावात्। अशाकल्ये तु सर्वेषां श्वेतः सर्वश्वेत इत्यादौ तरलोपे न। "संज्ञायां गिरिनिकायर्योः" पा०। एतयोः पूर्वमन्तोदात्तम्। अञ्जनागिरिः मौखिखनिकायः। असंज्ञायान्तु परमगिरिः ब्राह्मणनिकाय इत्यादौ न। "कुमार्यां वयसि" पा०। कुमारीपरे पूर्वपदमन्तोदात्तम् वयसि। वृद्धकुमारी जरत्कुमारी। कुमारीशब्दः पुंसा सङ्ग सङ्गमाभाववतीपरः वृद्धादिसामानाधिकरण्यात् वयोवाचित्वमत्र। अवयसि तु परमकुमारी इत्यादौ न। "उदकेऽकेवले" पा० अकेवलं भिन्नं तद्वाचिनि समासे उदके परे पूर्वपदमन्तोदात्तम्। गुडोदकम्। गुडमिश्रितवृदकमित्यर्थः स्वरे कृतेऽत्र एकादेशे स्वरितेनानुदात्ते पदादाविति पक्षे स्वरितः। अभिश्रे तु शीतोदकम् इत्यादौ न। "द्विगौ क्रतौ" पा० द्विगावुत्तरपदे क्रतुवाचिनि समासे प्रागुक्तम्। गार्ग्यत्रिरात्रः। अद्विगौ तु अतिरात्र इत्यादौ न "सभायां नपुंसके" पा० क्लीवान्न सभापरे प्रागुक्तम्। गोपालसभम्। अक्लीबे राजसभेत्यादौ न। तत्पुरुषस्यैव पक्षे तेन रथर्षभसभं ब्राह्मणकुलमित्यादौ न। "पुरे प्राचाम्" पा०। देवदत्तपुरम्। नान्दीपुरम्। अप्राचि तु शिवपुरमित्यादौ न। "अरिष्टगौडपूर्वे च" पा०। अरिष्टपुरम्। गौडपुरम्। पूर्वपक्षणात् अरिष्टाश्रितपुरं गौडभक्तपुरमित्यत्रापि स्यात्। "न हास्तिनफलकमार्हेयाः" पा०। पुरे परे एतानि नान्तोदात्तानि। हास्तिनपुरम्। फलकपुरम्। मार्हेयपुरम्।

"कुक्कुलकूपकुम्भशाल बिले" पा०कुक्कुलबिलम् । कूपबिलमित्यादि "दिक्छब्दा ग्रामजनपदाख्यानचानराटेषु" पा० । एषु परेषु दिग्वाचकशब्दाः अन्तोदात्ताः । पूर्वेषुकामशमी । अपरकृष्णवर्त्तिका । पूर्वपश्चाताः पूर्वचानराटम् । इह पूर्वकालवाचिनेऽपि पूर्वादेः दिशि दृष्टत्वाद्दिक्छब्दत्वम् "आचार्योपसर्जनश्चान्तेवासिनि" पा० आचार्योपसर्जने अन्तेवासिनि परे दिक्छब्दाः अन्तोदात्ताः । पूर्वपाणिनीयाः आचार्यस्येमे पूर्वान्तेवासीत्यादौ न । "उत्तरपदस्यौ सर्वञ्च" पा० । उत्तरपदस्थे तदधिकृत्य या सप्तमी विहिता तदन्तरपदे परे सर्वशब्दः दिक्शब्दश्चान्तोदात्तः । सर्वपाञ्चालः पूर्वपाञ्चालः । "बहुव्रीहौ विश्वं संज्ञायाम्" पा० । ब० ओ० विश्वशब्दः पूर्वपदमन्तोदात्तं संज्ञायाम् । पूर्वपदप्रकृतिस्वरत्वेन प्राप्तस्याद्युदात्तस्यापवादः । विश्वकर्मा विश्वदेवः । कर्म०विश्वेदेवा इत्यादौ न । अव्ययीभावात् बहुव्रीहावित्यधिकारः । "उदराश्वेषुषु" पा० । एषु परेषु पूर्वपदमन्तोदात्तं स्यात् बहुव्रीहौ । दृषोदरः दृषीवः महेषुः । "क्षेपे" पा० । निन्द्ये गम्ये प्रागुक्तम् । घटोदरः कटुकाश्वः चलाचलेषुः । अनुदर इत्यत्र नञ्सुभ्यामिति पूर्वप्रतिप्रतिषेधेन भवति"सि०कौ० । "नदी बन्धुनि"पा० । गार्गीबन्धुः । "निष्ठोपसर्गपूर्वान्यतरस्याम्"पा० । निष्ठान्तसुपसर्गपूर्वपदमन्तोदात्तं वा । प्रधौतपादः ।

एवं समासे आदिपदस्याद्यन्तोदात्ततां विधाय उत्तरपदस्याद्युदात्ततामाह यथा । "उत्तरपदादिः" पा० । उत्तरपदाधिकारः आपादान्तम् । आद्यधिकारस्तु प्रकृत्या भगालमित्यवधिकः । "कर्मोपसर्गे लक्षणात्"पा० । वर्णवाचिनः लक्षणवाचिनश्च परः कर्मशब्दः आद्युदात्तो बहुव्रीहौ । शुक्लकर्णः शङ्कुकर्णः । अन्यत्रास्तु शोभनकर्ण इत्यादौ न । "संज्ञौपम्ययोश्च" पा० । उत्तरपदस्थः कर्ण आद्युदात्तः । मणिकर्णः गोकर्णः । "कण्ठपृष्ठग्रीवाजङ्घस्य" पा० । संज्ञौपम्ययोर्बहुव्रीहौ । संज्ञायाम् यिति कण्ठः काण्डपृष्ठः सुग्रीवः नाडीजङ्घः । औपम्ये खरकण्ठः गोपृष्ठः अश्वग्रीवः गोजङ्घः । "हस्तिमस्थायाञ्च" पा० । अवस्थायाम् उद्गतहस्तः हस्तिलुप्तहस्तः अत्र हस्तोऽवयवादिना वयो ज्ञाप्यते । संज्ञायाम् अश्वहस्तः । औपम्ये मेघहस्तः । "नञोजरमरमित्रताः" पा० । नञः परा एते आद्युदात्ता बहु० अजरम् । अमरम् । अमित्रम् अहृतम् । "सोमनसी अलोलोपसी" पा० । सोः परे लोमोपसी त्यक्त्वा मनसन्मनस्शब्दौ चाद्युदात्तौ बहु० । सुकर्मणः सुयुजः । सुमनाः सुमनस्कः सुवर्चाः सुपेशसः । लोमोपसोस्तु सुलोमा सूपा इत्यादौ न । "क्रत्वादयश्च"पा० । सोः परे एते आद्युदात्ताः । सुक्रतुः सुप्रतीकः । क्रतु इयीक प्रतीक प्रतूर्त्ति इत्यभग ।"आद्युदात्तं द्व्यच छन्दसि"पा० । यदाद्युदात्तं द्व्यच् तत् सोरुत्तरं बहुव्रीहौ तदेव स्यात् वेदे लोके तु न । स्वाः सुरथाः । आद्युदात्तं किम् सुबाहुः । द्व्यच् किं सुगुः सुश्चिरण्य इत्यादौ न । "वीरवीर्यौ च" पा० । वेदे सुवीरः सुवीर्यः लोके तु न । अत्र वीर्यशब्दस्य यीर्यशब्दस्य यदन्तत्वेऽपि यतोनावइत्याद्युदात्तं नेति ज्ञापितम ।"कूलतीरतूलमूलशालसमसमव्ययीभावे" पा० । बहुव्रीह्यधिकारोनिवृत्तः । अव्ययीभावे कूलादीन्याद्युदात्तानि स्युः । उपकूलम् उपतीरम् उपशालम् । उपाक्षं सुषमम् निःषमम् । तिष्ठद्गवादि०स० । "कंसमन्थ्यूर्ध्वपाय्य कार्ष्ण द्विगौ"पा० । द्विगौ एतानि आद्युदात्तानि । द्विकंसः द्विमन्थः द्विऊर्ध्वः द्विपाय्यम् द्विकार्ष्णम् । "तत्पुरुषे शालायां नपुंसके"पा० । क्लीवशालान्ते तत्पुरुषे उत्तरपदमाद्युदात्तम् । ब्राह्मणशालम् । "कन्या च" पा० । क्लीवविशिष्ट कन्यान्तस्तत्पुरुषः प्राग्वत् । सौशमिककन्यम् । "आदिश्चिह्नणादीनाम्" पा० । कन्यान्ते तत्पुरुषे क्लीवविशिष्टे चिह्नणादीनामादिरुदात्तः । न तु कन्याशब्दरूपस्योत्तरपदस्य पूर्वापवादः । चिह्नणकन्यम् । चिह्नादिश्च चिह्नण मड्डर मड्डुर वैतल पटत्क वैडालिकर्णक वैडालिकर्णि कुक्कुट चिह्नण चिक्कण । "चेलखेटकटुककाण्डं गर्हायाम्" पा० । निन्दायां चेलादीन्युत्तरपदान्याद्युदात्तानि । पुत्रचेलम् । नगरखेटं दधिकटुकम् । पुत्रकाण्डम् । चेलादिग्रहणे न पुत्रादीनां निन्दा व्याघा० स० । "वीरप्रशंसायाम्" पा० । उत्तरपदस्थप्रशंसायां वीरम् आद्युदात्तम् । वह्निं वीरमिव वह्निवीरम् । अग्नौपम्ये तु वरमवीरम् इत्यादौ न । "पलल्लूपधाकं सिध्रे"पा० सिध्रार्थे समासे उत्तरपदस्थानामेषां प्राग्वत् । इतपललं इतल्लूपः इतधाकः । भक्ष्येण मिश्रीकरणमिति समासः । अमिश्रे तु परमपललमित्यादौ न । "कूलसूदस्थलकर्मा संज्ञायाम्"पा० । उत्तरपदस्थानामेषामादिरुदात्तः संज्ञायाम् । दाक्षिकूलम् । शाखिसूदम् । दाक्षायणस्थली । दाक्षिकर्मः ग्रामभेदश्च एतत्संज्ञाः । असंज्ञायां तु परमकूलमित्यादौ न । "अकर्मधारये रा-

ऽग्रिम्" पा०। ब्राह्मणराजम् कर्मधारये तु परमराजमित्यादौ न। "वर्ण्यादयः" पा०। अकर्मधारय इत्येव। अर्जुनवर्ण्यः वासुदेवपत्र्याः कर्मधा० परमवर्ण्य इत्यादौ न। वर्ण्यादिह दिगाद्यन्तर्गण्यः तत्रऽन्ते ह्रस्वः। "पुत्रःपुम्भ्यः" पा०। पुंगन्देभ्यः परः पुत्र आद्युदात्तस्तत्पुरुषे। दासकिपुत्रः माक्षिपुत्रः। स्त्रीभ्यस्तु दात्तीपुत्र इत्यादौ न। "नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः" पा०। एभ्यः पुत्रोनाद्युदात्तः। आचार्यपुत्रः उपाध्यायपुत्रः। राजपुत्रः ईश्वरपुत्रः नन्दपुत्रः। ऋत्विक्पुत्रः याजकपुत्रः। संयुक्ताः सम्बन्धिनः। ज्ञातिपुत्रः। ज्ञातिपुत्रः भ्रातृपुत्रः। "चूर्णादीन्यप्राणिषष्ठ्याः" पा०। एतानि प्राण्यिभिन्नषष्ठ्यन्तात् पराण्याद्युदात्तानि तत्पुरुषे। सक्तुचूर्णम्। प्राणिनस्तु मत्स्यचूर्णमित्यादौ न। चूर्णादयस्तु। चूर्ण कर्वि कर्षि याकिन याकट द्राक्षा तुल कुन्दम दलप चमसी चक्रन चौल। "षट् च काण्डादीनि" पा०। काण्ड चीर पलल खल याक कूल इत्येतानि षट् अप्राण्यिषष्ठ्यन्तात् आद्युदात्तानि। दूर्वाकाण्डं दर्भचीरम् तिलपललम् सुद्गखलः मूलकयाकम् नदीकूलम्। "कुण्डं वनम्" पा०। वनवाचिनि तत्पुरुषे कुण्डमाद्युदात्तम्। दर्भकुण्डम् कुण्डशब्दोऽत्र शाटशब्दे।

अथ उत्तरपदे प्रकृतिस्वरविधानसूत्राणि। "प्रकृत्या भगालम्" पा०। भगालवाच्युत्तरपदं ततपुरुषे प्रकृत्या। कुम्भीभगालम्। कुम्भीनदालम् कुम्भीदासालम्। मध्योदात्तायते। प्रकृत्येत्यधिकारः अन्त इति यावत्। "गितेर्णिन्यावङ्कच् वकुत्रोष्ठावभसत्" पा०। गितेः परं नित्यावङ्कच्कं प्रकृत्या वकुत्रोष्ठौ। गितिपादः। गितंशः। पादः दृषा० आद्युदात्तः अंशश्च नित्स्वरवान्। गितेराद्युदात्तत्वात् वकुत्रोष्ठौ पूर्वं पदप्रकृतिस्वरापवादेन उत्तरस्य प्रकृतिस्वरविधानात्तस्य बाधः। "गतिकारकोपपदात् कृत्" पा०। एभ्यः कृदन्तं प्रकृतिस्वरं स्यात्तत्पुरुषे। मतेः, प्रकारकः प्रकरणम्। कारकात् ईषत्प्रकरणः। उपपदात् उच्चैःकारम्। ईषत्करः। मेघपटोष० तु देवस्य कारकः देवकारक इत्यादौ न। "उभे वनस्पत्यादिषु युगपत्" पा०। एषु पूर्वोत्तरपदे युगपत् प्रकृत्या। वनस्पतिः वृक्षस्पतिः। ते च वनस्पति वृक्षस्पति पचीपति तनूनपात् नराशंस सुगःधेष यज्ञसामानौ तृणाद्यूलौ वस्त्वाद्यिवयवौ नर्मणू। "देवताद्वन्द्वे" पा०। उभे युगपत् प्रकृत्यास्तः। इन्द्रावरुणौ। "नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु" पा०। पृथिव्यादिश्चक्लिनेऽनुदात्तादायुत्तरपदे प्रागुक्तम्। "इन्द्राग्निभ्यां कं वृषणः" पृथिव्यादौ तु द्यावापृथिव्यौ इत्यादौ स्यादेव। तत्र नि० आद्युदात्तः द्यावा, पृथिवीत्यन्तोदात्तः। एवं रुद्रसौमौ इन्द्रापूषणौ इत्यादौ।

अथोत्तरपदे अन्तोदात्ततादिधायकसूत्राणि यथा "अन्तः" पा०। अधिकारोऽयम्। "यायवयज्ञकाजबित्रकाणाम्" पा० य, अय, यञ् ञ, अच्, अप् इत्, क, एतदन्तानाम् उत्तरपदस्थानां गतिकारकोपपदात् परेषामन्त उदात्तः। तत्र य अपभृत्यः। अय आवसथः। यञ् प्रभेदः। ञ पुरुहूतः। अच् प्रलयः। अप् प्रलयः प्रलयः। इत्र प्रलयित्नम्। क गोष्ठयः मूल० क। गतिकारकोपपदमिश्रे तु सस्तुवदृतयादौ न सोः पूजार्थत्वेन गतित्वाभावात्। "स्तूपमानात् क्रः" पा०। सोरूपमानाच्च परं क्रान्तमन्तोदात्तम्। सुकृतम् यथाश्रुतः। "संज्ञायामनाचितादीनाम्" पा०। गतिकारकोपपदात् क्रान्तमन्तोदात्तं न तु आचितादौ। "उपचूतः याकल्यः" आचितादौ न। आचितादयस्तु ६।२।९ सू० दर्शिताः। "प्रहृद्वादीनाञ्च" असंज्ञार्थमारम्भः। प्रहृद्वं यानं प्रहृद्वोढ्यवलः। प्रयुतालूखयः। आकर्षे अवस्थितः (अवस्थितो भोगेषु)। खट्वारूढः कविधस्तः आकृतिगणोऽयम्। प्रहृद्वयानम्। अप्रहृद्वो दृषद्वतो रथः। "कारकाद्दत्तश्रुतयोरेवाशिषि" पा०। कारकपदादुत्तरपदस्थयोर्दत्तश्रुतशब्दयोरेव संज्ञायामन्तोदात्तः आशीर्वादे गम्ये। देवदत्तः विष्णुश्रुतः। अनयोरेवेति नियमात् देवपालित इत्यादौ न। "इत्थम्भूतेन कृतमिति च" पा०। इत्थम्भूतेन कृतमित्यस्मिन्नर्थे यः समासः कृतः ततः क्रान्तश्चरपदमन्तोदात्तम्। सुप्रमथितम्। अत्र कृतमिति सामान्यक्रियावाचि। तृतीया कर्मणीत्यस्यापवादः। "अनोभावकर्मवचनः" पा०। कारकात् परमनप्रत्ययान्तं भाववचनं कर्मवचनञ्चान्तोदात्तम्। भावे नयःपानम्। कर्मणि राजभोजनाः याजयः। "मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिकीताः" पा०। कारकात् पराण्येतानि तत्पुरुषेऽन्तोदात्तानि। कृत्स्वरापवादः। मन् रत्नधर्म। क्तिन् पाणिनिकृतिः। करणे ल्युट् छन्दोव्याख्यानम्। तेन न पूर्वेण गतार्थः। राजशयनम् राजासनम् अन्यस्थानम् एषु आधारे ल्युट्। ब्राह्मणयाजकः। याजकादिषु याजकादिशब्दे वक्ष्यते

गोक्रीताः । कर्कभिन्नात्तु प्रभृतिः सङ्कृतिः इत्यादौ तादौ निर्गतीति स्वरः । "सप्तम्याः पुण्यम्" पा० । अन्तोदात्तम् । अध्ययनपुण्यम् । तृतीयातत्पुरुषे तु वेदपुण्यमित्यादौ न । "जनार्थकलहं तृतीयायाः" पा० । तृतीयायाः परावेतौ अन्तोदात्तौ तत्पुरुषे । माधोनम् माधविकलम् । वाक्कलहः । तृतीयापूर्वपदप्रकृतिस्वरापवादः । अर्थेति खरूपग्रहणं तेन धान्यार्थ इत्यत्रापि अर्थशब्दस्य तत्त्वात्वम् । जनशब्देन तदर्थग्रहणमिति केचित् । "मिश्रश्लक्ष्णानुपसर्गमसन्धौ" पा० । तृतीयायाः परम् अनुपसर्गं मिश्रं प्राग्वत् । तिलमिश्रम् सर्पिर्मिश्रम् । मिश्रग्रहणेऽन्यत्र सोपसर्गस्य यत्नग्रहणमिति अनुपसर्गं विशेषणात् ज्ञापितम् । सन्धौ तु ब्राह्मणमिश्रो राजा इत्यादौ न, ब्राह्मणैः सह ऐकार्थ्यमापन्न इत्यर्थः । "नञोगुणप्रतिषेधे सम्पाद्यर्हितालमर्थास्तद्धिताः" पा० । सम्पाद्यादयस्तद्धितान्ता गुणनिषेधार्थकनञः परेऽन्तोदात्ताः । न कर्णवेष्टनाभ्यां सम्पादितं सुखं सपत्रं अकर्णवेष्टनिकम् । न च्छेदमर्हति अच्छेदिकः । न वत्सेभ्योहितः अवत्सीयः । न सन्तापाय प्रभवति असन्तापीयः । "यथतोस्तादर्थ्ये" पा० । तदर्थार्थाभ्यां यथतौ यौ तद्धितौ तदन्तस्योत्तरपदस्य गुणनिषेधाद्यात् नञः परस्यान्त उदात्तः । पाशानां समूहः पाश्या न पाश्या अपाश्या । अदन्तम् । तदर्थार्थान्ते तु अपादग्रमित्यादौ न । यत्र सान्तबन्धस्य ग्रहणात् इतरान्तबन्धस्य यस्य अवामदेव्यमित्यादौ न । अत्र वामदेव इदमिदमिति ज्ञात्वा वा । "अचकावशक्तौ" पा० । अजन्तात्तु नञः परमन्तोदात्तमसामर्थ्ये गम्ये । अपचः पक्तुं न शक्तः । अजिघ्यः । सामर्थ्ये तु अपचोदीक्षित इत्यादौ न । दीक्षितस्य न पाकासामर्थ्यं किन्तु निषेधादपचत्वम् । "आक्रोशे च" पा० । नञः परावच्छब्दान्तावन्तोदात्तौ स्तोमे । अपचोजाल्मः पक्तुं न शक्नोतीत्येवमाक्रुश्यते । अजिघ्यः । "संज्ञायाम्" पा० । नञः परमन्तोदात्तं संज्ञायाम् स्तोमे । अदेवदत्तः "ज्ञाश्रोरुणच्चार्वादयश्च" पा० । नञः परे एतेऽन्तोदात्ताः स्युः । ज्ञात्र अकर्त्तव्यः । उक्त अनागास्क । इष्णुच् अनलङ्करिष्णुः । खिष्णुचोऽपि । अनाढ्यम्भविष्णुः । अचारुः । चार्वादयश्च चारु साधु औधकि अनङ्गमेजय वदान्य अकत्थात् (वर्त्तमानवर्त्तमानान्तरभाविष्यमाणक्षियमाणरोचमानशोभमानाः संज्ञायाम्) (विकारसदृशे व्यक्तसमस्ते) शूद्रपतिः शूद्रपतिक (राजाऽहोस्वन्हि) अराजा अनड्वान् । भाषायां तु अव्ययस्वरः । "विभाषा तत्पुरुषतोऽशुचिषु" पा० । तत्पु अकर्त्ता । अनलम् । अतोऽणम् अशुचिः । पक्षे अव्ययस्वरः । "बहुव्रीहावविदूरेतत्तद्गुः प्रथमपूरणयोः क्रियागणने" पा० । एभ्य एतयोरन्त उदात्तः बहुव्रीहौ । इदं प्रथमं यस्य इदं प्रथमः । एवम् एतद्द्वितीयं तत्पञ्चमम । द्रव्यगणने तु अयं प्रथमः प्रधानं येषां ते इदंप्रथमा इत्यादौ न । बहुव्रीहावित्यधिकारः । "संख्यायाः स्तनः" पा० । द्विस्तना चतुःस्तना । "विभाषा ऊर्ध्वे" पा० । "द्विस्तनं करोति वामदेव्यः" । पक्षे न "संज्ञायां मित्राजिनयोः" पा० । देवमित्रः कृष्णाजिनम् । अवज्ञायां प्रियमित्रः इत्यादौ न । "ऋधिप्रतिषेधोमित्रे" वार्त्ति० । विश्वामित्र ऋषिः अत्र न । "व्यवायिनोऽन्तरम्" पा० । व्यवधावयवात् पर मन्तरमन्तोदात्तम् । वस्त्रान्तरः । "सुखं खात्रम्" पा० । गौरसुखः । अखात्रे तु दीर्घसुखा शाला इत्यादौ न । "नाव्ययदिक्शब्दगोमहत्स्थूलसुष्टिपृथुवत्सेभ्यः" पा० । एभ्यः परं सुखं नान्तोदात्तम् तेन पूर्वपदप्रकृतिस्वरः । उर्ध्वमुखः । प्राङ्मुखः गोसुखः । गोऽतिवत्सपूर्वपदस्योपमानलक्षणोऽपि विकल्पोबाध्यते पुरस्ताद्पवादन्यायात् । "निष्ठोपमानादन्यतरस्याम्" पा० । निष्ठान्तादुपमानाच्चिनश्च परं खात्रं सुखं नान्तोदात्तम् । प्रज्ञादित्वसुखः पक्षे निष्ठोपसर्गेति पूर्वपदान्तोदात्तत्वम् । पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरोऽपि भवति । सिंहमुखः । पक्षे पूर्वपदप्रकृतिस्वरः । "जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः" पा० । सारङ्गजग्धः मांसभूतः सुखभूतः । सुख दुःख कृच्छ्र अकृच्छ्र आढ्य अलीक प्रतीप कृच्छ्र सोढ इत्येतानि सुखादीनि । आच्छादनात्तु वस्त्रच्छन्न इत्यादौ न । कृच्छ्रगतः कृच्छ्रमितः कृच्छ्रप्रतिपन्न इत्यादौ च न । वा जाते" पा० । एभ्यो जातियच्छोऽन्तोदात्तः । दन्तजातः मांसजातः । पक्षे पूर्वपदप्रकृतिस्वरः "नञ् सुभ्याम्" पा० । आभ्यां परमन्तोदात्तं बहुव्रीहौ । अप्रीहिः सुमाषः । "कपिपूर्वम्" पा० । नञ् सुभ्यां परमुत्तरपदञ्च पूर्वमुदात्तं कपि परे । अकपिञ्जलकः । सुकुमारीकः । "सुखान्ते अन्यात्पूर्वम्" पा० । सुखान्ते उत्तरपदे समासे अन्यात् पूर्वपदमुदात्तं नञ्सुभ्यां बहुव्रीहौ । अप्रीहिकः सुमाषकः । "बहोर्नञ्सुभ्युत्तरपदभूम्नि" पा० । उत्तरपदार्थे बहुत्वविशिष्टोबहुः परस्य पदस्य नञः परस्येव स्वरःस्यात् । बहुव्रीहिकः बहुमितः । अबहुत्वे तु बहुषु मानोऽस्य बहुमान इत्यादौ न । "न गुणादयोऽवयवाः" पा० । अवयवं-

वाचिनो बहोः परे गुणादयोऽन्तोदात्ताः ब०व्री०। बहुगुणा रज्जुः। बहुतरं पदम्। गुणादयश्च गुण अक्षर अध्याय छन्द आत्म। गुणादिराकृतिगणः। अनयजने तु अध्ययनश्रुतसदाचारादिगुणपरत्वे बहुगुणोऽद्रिज इत्यादौ न। "उपसर्गात् खल् घञमपसर्गे" पा०। प्रपूतः। अप्रजे तु उद्वाहरित्यादौ विपर्यरित्यादौ च न। "वनं समासे" पा०। समासमात्रे उपसर्गात् परं वनमन्तोदात्तं स्यात्। प्रवणम्। "अन्तः" पा०। अन्तर् शब्दात् परं वनमन्तोदात्तम् समासमात्रे। अन्तर्वणोदेशः। "अन्तश्च" पा०। उपसर्गादन्तशब्दोऽन्तोदात्तः। पर्यन्तः समन्तः। "न निभ्याम्" पा०। न्यन्तः व्यन्त इत्यादौ न। पूर्वपदप्रकृतिस्वरे यणि च कृते उदात्तस्वरितयोर्येण इति स्वरितः। "परेरभितोभावि मण्डलम्" पा०। परेः परम् अभितोभावतो भावि कुलादि, मण्डलं चान्तोदात्तम्। परिकुलम् परिमण्डलम्। "प्रादस्क्" संज्ञायाम्" पा०। प्रवटस्कम्। स्काङ्के तु प्रपदमित्यादौ न "निरुदकादीनि च" पा०। निरुदक निरुपल निर्मक्षिक निर्मशक निष्कालक निष्कालिक निष्पेष दुष्करीप निस्तरीक निरजिन उदजिन उपाजिन (परेर्हस्तपादक्षेपकर्मणः) निरुदकादिराकृतिगणः। एतानि अन्तोदात्तानि। निरुदकम्। "अभेर्मुखम्" पा०। अभिमुखा यात्रा। "अपाङ्" पा०। अपसृतम् अत्यादि पूर्ववदारभ्य। अपसृता यात्रा "स्त्रिगपूतवीणाम्भोऽध्वकुक्षिसीरनासनाम च" पा०। अपादिमान्यन्तोदात्तानि। अपस्त्रिगम् अपपूतम्। अपाम्भः। अपाध्वा समासान्तविधेरनित्यत्वात् नेह समा०। अपकुक्षि। अपसीरम् अपफलम्। अपनासं। स्त्रिगादिपक्षमबहुव्रीह्यर्थम् अभ्रुवार्थमस्वाङ्गार्थञ्च। "अधेरुपरिस्थम्" पा०। अध्यारूढोऽन्तोऽधिदन्तः दन्तश्चोपरिजातोदन्त इत्यर्थः। अनुपरिस्थे अधिकरणमित्यादौ न। "अनोरप्रधानकनीयसी" पा०। अनोः परमप्रधानवाचि कनीयस्यन्तोदात्तम्। अल्पतोऽल्पेऽर्थे अनुल्लोटइत्यादि। अत्र पूर्वपदार्थप्राधान्यात् ल्लेऽर्थशब्दस्याप्रधानत्वम्। अनुगतः कनीयान् प्रा०स०। अनुकनीयान्। अत्र उत्तरपदार्थप्राधान्यम्। प्राधान्यार्थमेव कनीयसः पृथग्ग्रहणम्। "पुरुषश्चान्वादिष्टः" पा०। अनोः परः अन्वादिष्टवाची पुरुषः अन्तोदात्तः। अन्वादिष्टः पुरुषः प्रा० स०। अनुपुरुषः। "अतेरकृत्पदे" पा०। अतेः परमकृदन्तं पदं पदमन्तोदात्तम्। अत्यक्षुरो-नागः। अतिपदा गायत्री। कृत्पदे तु अतिचार इत्यादौ न। "अतेर्धातुलोप इति वाच्यम्" वार्त्ति०। "प्रादिभ्योधातुजस्य वा वोत्तरपदलोप इति अत्यादयः क्रान्त्याद्यर्थे द्वितीययेति यत्र धातुलोपस्तत्रैवायं स्वरः। तेन शोभनोगार्ग्यः प्रा०स०। अतिगार्ग्यः अत्र न। अतिक्रान्तः कारकम्। अतिक्रान्तकारकम् इत्यत्रापि स्यात् कारकशब्दस्य कृदन्तत्वेऽपि धातुलोपएव कृदन्तनियमनात् अतिकार इत्यादौ तु धातुलोपाभावादेति भेदः। "नेरनिधाने" पा०। निधानमप्रकाशः तद्भिन्ने प्रकाशार्थे नेरुत्तरपदमन्तोदात्तम्। निमूलम् न्यूलम्। निधाने तु निक्षिप्तो दण्डः निर्दण्ड इत्यादौ अप्रकाशितः गुप्तोदण्ड इत्यर्थके न। "प्रतेरंऽशुयत्तृपुरुषे" पा०। प्रतिगतोऽंशुः प्रत्यंशुः प्रतिजनः प्रतिराजा समासान्तविधेरनित्यत्वान्न टच्। बहुव्रीहौ तु न। आंशुदायश्च १७५० दर्शितः। "उपाद्दृजजिनमगोरादयः" पा०। उपात् परं दृज्जनमजिनञ्चान्तोदात्तम् न तु गौरादयः। ते च गौर तैष तैल लेट लोट जिह्वा कन्या युध कल्य पाद। उपदेयः उपेन्द्रः उपाजिनम्। गौरादौ उपगौर इत्यादौ न। "सोरवक्षेपणे" पा०। आक्षेपे गम्ये सोः परमन्तोदात्तम्। क्षुत्प्रत्यवसितः क्षुरत्नपूजार्थः वाक्यार्थस्तु निन्दा अक्षुत्यथा तथाऽभिधानात्। "विभाषोत्पुच्छे" पा०। उत्पुच्छे शब्दे वान्तोदात्तः। उत्क्रान्तः पुच्छात्, पुच्छमुदस्यति उत्पुच्छयतेर्वा यरच्। उभयस्याप्यत्र ग्रहणम्। उत्पुच्छः। "द्वित्रिभ्यां पद्दन्मूर्धसु बहुव्रीहौ" पा०। आभ्यां परेष्वेषु अन्तोदात्तो वा बहुव्रीहौ। द्विपाद् द्विपात्। द्विमूर्धा। समासान्तविधेरनित्यत्वान्नायकमिदम्। तत्पुरुषे तु द्वयोर्मूर्ध्नोर्द्विमूर्धेत्यादौ न। "सक्थ्यक्ष्णोरात्" पा०। कृतसमासान्तसक्थस्य अक्ष्णश्च अकारान्तात् परस्य वान्तोदात्तः। गौरसक्थः शुक्लसक्थः। क्रान्तात्तु चक्रसक्थ इत्यादौ न किन्तु पचसमासान्तस्य चित्त्वात् नित्यमन्तोदात्तता। "पादादिष्वन्यतरस्यां बहुलम्" पा०। भेदे उत्तरपदस्थस्य यकृल्लादि अदात्तो बहुलम्। "अङ्गुलिसक्थ्यमासमेत" बहुलग्रहणात् "परादिश्छन्दसि बहुलम्" पा०। परादेरन्तस्य पूर्वान्तस्यापि दृश्यते। पूर्वादेरयं दृश्यते व्यतयो बहुलं तत" वार्त्ति०। इति समासस्वराः। एवमुदात्ते विहिते क्वचित्तस्य निघातेनानुदात्तता स्यात् तत्र निघातशब्देनापवादः वक्ष्यते।

"निष्कुलारीनेकपदे यउदात्तः खरादिव" माधः। "अवि-

कलनः क्षमावानतिगम्भीरो अक्षोभ्यत्वः । स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः" सा०द० २अङ्के (पूर्वपदलोपेन) नायकभेदे । भावे क्त । २दाने ४वाद्यभेदे मल्लर०५ अलङ्कारभेदे पु० । स च अलङ्कारचन्द्रे २६६पृष्ठे दर्शितः । कर्त्तरि क्त ईषदूनार्थे ७समर्थे ८दातरि च त्रि० ।

उदात्तराघव न० नाटकभेदे ।

उदान पु० अन-घञ् अर्त्तिमानोऽस्य । अर्त्तिगतियोगे कण्ठादिदेशवर्त्तिनि प्राणवृत्तिभेदे वायौ । "अथ योऽयमूर्द्ध्वमुत्क्रामति स उदानः स वायुः समाकाशः" छा०उ० । "आपादतलादारभ्योर्द्ध्वमुत्क्रमात् उत्कर्षार्थञ्च कर्म्म कुर्वन्निति उदानः" छा०उप०भा० । पदार्थादर्शे योगशास्त्रे तत्स्थानाद्युक्तम् "स्यन्दयत्यधरं वक्त्रं गात्रनेत्रप्रकोपनः । उद्वेजयति मर्म्माणि उदानो नाम मारुतः । विद्युत्प्रावकवर्षुः स्यादुत्थानसनकारकः । पादयोर्हस्तयोरापि सर्वसन्धिषु वर्त्तते" । सुश्रुते च "यथाग्निः पञ्चधा भिन्नो नामस्थानात्मकर्म्मभिः । भिन्नोऽनिलस्तथा ह्येको नामस्थानक्रियामयैः । प्राणोदानौ समानश्च व्यानश्चापान एव च । स्थानस्था मारुताः पञ्च यापयन्ति शरीरिणम् । वायुर्यो वक्त्रसञ्चारी स प्राणो नाम देहधृक् । सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते । प्रायशः कुरुते हृष्टो हिक्कोच्छ्वासादिकान् गदान् । उदानो नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः । तेन भाषितगीतादिविशेषोऽभिप्रवर्त्तते । अर्जस्रं गतान् रोगान् करोति च विशेषतः । आमपक्वाशयचरः समानो वह्निसङ्गतः । सोऽन्नं पचति तञ्चापि विवेचयति किट्टगम् हि । गुल्माग्निसङ्गतोसारप्रमेहानुपकुरुते गदान् । व्यानस्तु देहचरो व्यानो रससंवहनोदितः । खेदासृक्स्रावयो वापि पञ्चधा चेष्टयत्यपि । क्रुद्धश्च कुरुते रोगान् प्रायशः सर्व्वदेहगान् । पक्वाशयाशयो ऽपानः काले कर्षति चाप्ययम् । समीरणः सक्थ्यण्डवृक्कगर्भाशयबन्धः । क्रुद्धश्च कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् । शुक्रदोषप्रमेहांस्तु व्यानापानप्रकोपजान् । युगपत्कुपितावापि देहं भिन्द्युरसंशयम्" ज्ञान्दोग्ये च भोजनस्याग्निहोत्रस्यानीयतया तस्यादानेन प्राणादिपञ्चकाकुतेर्नित्यं कर्त्तव्यता तत्फलञ्चोक्तम् यथा । "उरएव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्य्यपचन आत्मा आहवनीय इत्युपक्रम्य" । (तद्भाष्ये च आहुत्यै हूयते ऽग्निज्वलनिमाहवनीयत्वमुक्तम्) आहुतिप्रकारः फलसहितो दर्शितो यथा ।

"तद्यदुक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात् प्राणाय स्वाहेति प्राणमेवाप्यायति, प्राणं तृप्यति चक्षुस्तृप्यति चक्षुषि तृप्यत्यादित्यस्तृप्यत्यादित्ये तृप्यति द्यौस्तृप्यति दिवि तृप्यन्त्यां यत्किञ्च द्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्मात्तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति१ । अथ यां द्वितीयां जुहुयात्तां जुहुयाद्व्यानाय स्वाहेति व्यानस्तृप्यति, व्याने तृप्यति श्रोत्रं तृप्यति श्रोत्रे तृप्यति चन्द्रमास्तृप्यति चन्द्रमसि तृप्यति दिशस्तृप्यन्ति दिक्षु तृप्यन्तीषु यत्किञ्च दिशश्च चन्द्रमाश्चाधितिष्ठन्ति तत्तृप्यति तस्मात्तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति२ । अथ यां तृतीयां जुहुयात्तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यति, अपाने तृप्यति वाक्तृप्यति वाचि तृप्यन्त्यामग्निस्तृप्यत्यग्नौ तृप्यति पृथिवी तृप्यति पृथिव्यां तृप्यन्त्यां यत्किञ्च पृथिवी चाग्निश्चाधितिष्ठतस्तत्तृप्यति तस्मात्तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति३ । अथ यां चतुर्थीं जुहुयात्तां जुहुयात् समानाय स्वाहेति समानस्तृप्यति, समाने तृप्यति मनस्तृप्यति मनसि तृप्यति पर्জन्यस्तृप्यति पर्জन्ये तृप्यति विद्युत्तृप्यति विद्युति तृप्यन्त्यां यत्किञ्च विद्युच्च पर्জन्यश्चाधितिष्ठतस्तत्तृप्यति तस्मात्तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति४ । अथ यां पञ्चमीं जुहुयात्तां जुहुयादुदानाय स्वाहेत्युदानस्तृप्यति, उदाने तृप्यति वायुस्तृप्यति वायौ तृप्यत्याकाशस्तृप्यत्याकाशे तृप्यति यत्किञ्च वायुश्चाकाशश्चाधितिष्ठतस्तत्तृप्यति तस्मात्तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति५ । स य एतमविद्वानग्निहोत्रं जुहोति यथाङ्गारानपोह्य भस्मनि जुहुयात्तादृक् तत्स्यात् । अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्व्वेषु लोकेषु सर्व्वेषु भूतेषु सर्व्वेष्वात्मसु हुतं भवति । तद्यथेषीका तूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्व्वे पाप्मानः प्रदूयन्ते य एतदेवं विद्वानग्निहोत्रं जुहोति । तस्माद्धैवंविदप्यद्यापि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य तदग्नौ हुतं स्यादिति तदेष श्लोकः । यथेह क्षुधिता बालाः मातरं पर्य्युपासते । एवं सर्व्वाणि भूतान्यग्निहोत्रमुपासत इत्यग्निहोत्रमुपासत इति" ।

उदायु पु० उद्+आय-उनु । जरासन्धपौत्रे क्षत्रियभेदे । "जरासन्धस्य पुत्रोऽयं सहदेवः प्रतापवान् । सहदेवात्सुजः

श्रीमानुदापुः समहायशाः । उदापुर्जनयामास पुत्रं परमधार्मिकम्" । हरिव० २२ अ० ।

उदार त्रि० उद्+आ+रा क । १दातरि, २महति, ३सरले, ४दक्षिणे, ५गम्भीरे, ६असाधारणे च । "मङ्गल्यदारा गुणभेऽर्जुनस्य" "सतथेति विनेतुरुदारमते" साकेतो-पवनसुदारमध्युवास" "रघुः उदारमनसं कलभाधिकस्वरैः" माघ । "हितार्थक्रियोदारं तेऽभिनन्द्य गिरैव" "तथा हि ते शीलसदारदर्शने" कुमा० । ततो भावे ष्यञ् औदार्य न० तत्र उदारता स्त्री त्व उदारत्व न० तद्भावे ।

उदारथि उद्+आ+रभ—अथिन् । अर्जुनागस्तरि । "करम्भ ओषधे भव पीवो इव उदारथिः" ऋ० १,१८७,१०, "करम्भं कृत्वा तिर्यं पीवस्काभसुदारथिम्" अथ० ४,७,१ ।

उदारधी स्त्री उदारा धीः । १उत्कृष्टबुद्धौ उदारा धीर्यस्य । २उत्कृष्टबुद्धिमति त्रि० "धियः समर्थं स गुणैरुदारधीः" । रघुः । उदारा महती सर्वार्थविषयत्वात् धीर्यस्य । ३विष्णौ पु० । "निमेषोऽनिमिष स्रग्वी वरूथ्यश्रीरुदारधीः" विष्णुस० "यः सर्वत्र समं पश्यति" श्रुतेरस्य सर्वार्थविषयबुद्धिमत्त्वात्तत्त्वम् ।

उदावर्त्त पु० उद्+आ+वृत घञ् । रोगभेदे तत्कारणादि सुश्रुते दर्शितं यथा

"अथातः उदावर्त्तप्रतिषेधमध्यायं व्याख्यास्यामः । यथोवाच भगवान् धन्वन्तरिः । न वेगान् धारयेत्प्राज्ञो वातादीन् जातिलक्षणान् । आतस्तिमूत्रपुरीषाणां क्षवथोरुद्गारयोरपि । व्याकुलमनसां दुःखशोकाभ्यां चिरकर्षणात् । क्षुत्तृष्णाश्वासनिद्राणामुदावर्त्तो विधारणात् । तस्योदावर्त्तस्य धीमान् व्यासेन लक्षणञ्च चिकित्सितम् । त्रयोदशविधस्यापि भिन्न एतेषु कारणैः । अपथ्यभोजनाद्यापि वक्ष्यते च तथापरैः । आध्मानमूलौ हृदयोपरोधं गुरोरुजं श्वासमतीव हिक्काम् । कासप्रतिश्यायगलग्रहञ्च वक्त्रादपित्तप्रसरञ्च घोरम् । कुर्यादुदावर्त्तविकारसङ्घं स्वमार्गमुत्क्रम्य पुरीषमुल्बणम् । विशेषा । आटोपशूलौ परिकर्त्तनञ्च सङ्गः पुरीषस्य तथोर्द्ध्ववातः । पुरीषमाख्यादपि वा भिनत्ति पुरीषवेगेऽभिहते २नरस्य । मूत्रस्य वेगेऽभिहते ३नरस्य जन्तोश्च मूत्रं कुरुतेऽश्मसङ्गम् । मेढ्रे गुदे बङ्क्षणवृष्णयोश्च नाभि प्रदेशेष्वथ वापि मूर्द्धनि । आनद्धबस्तित्व भवन्ति तीव्राः शूलाश्च शूलैरिव भिन्नमूर्त्तेः । मध्यागलत्यग्निरुदीरितोऽयं वातोल्बणत्वात् ४पवनात्मकाः स्युः । श्रोत्रानलप्राणविलोचनोत्था भवन्ति तीव्राश्च तथा विकाराः । आनद्धजोक्षसङ्घर्षं वा नेत्रोदकं ५प्राग्भक्षयतो हि । शिरोगुरुत्व नखमास्यवैरस्य भवन्ति तीव्राः सह पीनसेन । भवन्ति शब्दं श्रवयोर्विघातात् ६शिरोऽक्षिनासास्रवणेषु रोगाः । कण्ठास्यपूर्णत्वमतीव शोथः क्लेदश्च वक्त्रस्य तथा प्रसक्तिः । उद्गारवेगेऽभिहते ७भवन्ति जन्तोर्विकाराः पवनप्रसूताः । छर्देर्विघातेन च भवेच्च कुष्ठं तेनैव दोषेण विदग्धमन्नम् । मूत्राघाते वा गुदसङ्कथोच्च शोफो रुजा मूत्रविनिग्रहश्च । शुक्राश्मरी तत्सदृशं भवेद्वा तैस्तैर्विकारैर्विहते तु शुक्रे ६ । तन्द्राक्लमश्छर्दिरुचिः श्रमश्च क्षुधोऽभिघातात् १०क्षुधा च दृष्टेः । कण्ठास्यशोषः श्रवणावरोधस्तृष्णाभिघातात् ११क्षुदये व्यथा च । आलस्य निश्वासविनिग्रहेण १२ हृल्लोमशोफोदयथू वापि गुल्मः । अन्नाङ्कमर्दैः कृमिरोगजाश्च विड्भेदविघातसद्य १३वमिश्च मन्दा । हलासकः परिकृत्तकोष्ठः शूलैरभिद्यतम । शकृन्मलं मतिमान् सुदारुणैर्वातात्मकं जेत् । सर्वेष्वेतेषु 'क्रियाद्यादशेषु कृत्स्नेषु । मध्ये क्रियाविधातव्या स्वमार्गप्रतिपत्तये" । उद्र उदकस्यावर्त्तः । २जलस्य स्वतोभ्रमणे । ३वर्णसङ्कर-दोषभेदे स्त्री स च सुश्रुते दर्शितो यथा 'त्रिभिर्विप्रादीनां दोषैर्निर्दिष्टा रोगसङ्कृतैः । मिथ्याचारेण ता स्त्रीषु प्रदुष्टैर्मार्गवैगुण्येन च । जायन्ते दोषदोषाभ्यां देयाभ्यां प्रदुष्टा तु पृथक्, उदावर्त्ता तथा कन्या विप्लुता च पतिप्लुता । वामला चेति तासां स्यात्पित्तोल्बा रुधिरेक्षणा । वर्त्मनी कपिले चापि पुच्छयौ पिच्छिला च या । अत्यावर्त्ता च या नारी कपिलं करभाक्षवत् । क्लेदिका सक्थिनी स्थूलौ यस्याश्च फलिनौ तथा । भवतो स्फुटिचक्रौ च सा दुर्भगा स्त्रिलोकजा" । "सफेनिलसदावर्त्तां रजः कृच्छ्रेण मुञ्चति" ।

उदावसु पु० निमिवंश्ये नृपभेदे । 'निमि परमधर्मात्मा सर्वभूतदया वरः तस्य पुत्रोमिथिर्नाम बभूवामितविक्रमः । तस्यापि जनकोजात जनकक्षाधुदावसुः" रामा० निमिवंशवर्णने । अयञ्च जनकः प्रतिवत्सरजनकाङ्कित एव तत्रवाच्ये "स्वर्ण-रोमणोऽभवन्नापि हस्वरोमा सुतोऽजनि । तस्य पुत्रोयं जातो हस्वरोमस्य भूपालः । ह्रस्वरोमसुतश्चायं भ्राता मम कृतध्वज इति" दशरथं प्रति स्वकुलकीर्त्तने जनकोक्तौ स्वकं यज्ञेनात्मनः कीर्त्तनेन ततो भेदप्रतीतेः । त्रियाञ्च ।

उदास पु० उद्+अस—घञ् । १उत्क्षेपणे २निरसने ३त्यजेला

उदासीन त्रि० उद्+आस—खानच् । १मध्यस्थे, २विवदमानयो रेकतरपक्षानवलम्बके, जिगीषोर्नृपतेः शत्रुमित्रभूमितो व्यवहिते परतरे, अमरटीकायां ३५५ पृ० दर्शिते "मण्डला-

दुष्करेतरादुदासीनोऽवस्थाधिकः" इत्युक्तलक्षणे १रालभेदे। ४उपेक्षके च "उदासीनदासीनः" गीता०।

उद्गस्थित पु० उद्+आ+स्था-क्त। १द्वारपाले २चरे ३अध्यक्षे च हेम० प्रव्रज्याच्छद्मपतिते ४प्रव्रज्यावसिते चरे च स च पञ्चविधचरान्तर्गतः। प्रव्रज्यावसितः प्रव्रज्याच्छद्मपतित एव। तल्लक्षणादि "लुप्तं चाष्टविधं कर्म पञ्चवर्गञ्च तत्त्वतः" इति मनुवचनस्य कुल्लू० व्याख्यायाम्

"कापटिकोदास्थितगृहपतिवैदेहिकतापसव्यञ्जनात्मकं पञ्चविधं चारवर्गं पञ्चवर्गसंज्ञकाख्यं तत्त्वतश्चिन्तयेत्" इति संक्षेपेणोक्ता। तत्र परमर्म्मज्ञः प्रगल्भश्छात्रः कापटिकस्तीक्ष्णबुद्धिकस्तं दुर्व्यसनेषु व्यसनिनं ज्ञात्वा रक्षसि राजा मृयात् 'यस्य दुश्चरितमस्मासु तत्तदानीमेव मह्यं वक्तव्यमिति'। प्रव्रज्याच्छद्मपतित उदास्थितः तं लोकेषु विदितदोषं प्रगल्भोचितयुक्तं दुर्व्यसिनं ज्ञात्वा रक्षसि राजा पूर्ववद्भूयात् बहूपत्तिकर्मठे व्यापयेत् प्रचुरमहोत्पत्तिकर्म्मण्यन्यत्रस्थं तद्दुर्व्यसनप्रकाशयेत् सचान्येषामपि पञ्जिकानां राजचारकर्मकारिणां व्यासाच्छादनादिकं दद्यात्। कर्षकः श्रीषण्डकः प्रगल्भोचितयुक्तो गृहपतिव्यञ्जनस्तमपि पूर्ववदुक्त्वा स्वगृहे क्षत्रियकर्म्म कारयेत्। वाणिजकः स्त्रीषण्डकः वैदेहिकव्यञ्जनस्तमपूर्ववदुक्त्वा अनर्घलाभाद्यामीलोभं वाणिज्यं कारयेत्। मुण्डोजटिलोऽपि दुश्चिकित्स्यतापसव्यञ्जनः शोऽपि क्वचिद्राज्ये वसन् कुमुक्षुजटिलान्तरकपटशिष्यगणवृतो मुग्धराजोपस्थितस्तदुक्तिः तपस्या कर्त्तव्यं मासद्विमासान्तरितं प्रकाशं यदादिमुक्तिमर्म्मीयात् रक्षसि च राजोपकल्पितं यत्नेन भाण्डारं कल्पयेत्। विश्वास्योक्तीतानागतज्ञाद्यादिकं दर्शयेत्। तेन सकलोकवेदनमासाद्य सर्वेषां विश्वसनीयत्वात् सर्वे कार्य्यकार्य्यञ्च पृच्छन्ति। एवंरूपं पञ्चवर्गं यत्नावच्छिन्नयेत्" विष्णुधर्मोक्तम्।

उदाहरण न० उद्+आ-हृ-भावे ल्युट्। एकदेशप्रसिद्धया साधर्म्यसिद्ध्यै कथने। कर्मणि ल्युट्। दृष्टसिद्ध्यर्थमुक्तवाक्ये २दृष्टान्ते, "तदुदाहरणाकाङ्क्षो गुणा इति सांख्यसूत्रिकसारसूत्रणा" नैष० प्रकृतसिद्ध्यर्थं निदर्शनरूपे ३उपोद्घाते च। उदाहरिष्यते आप्तप्रसिद्धधर्म्मा येन करणे ल्युट् न्यायसूत्रे प्रतिज्ञादिपञ्चावयवे वात्स्यायनेन प्रयुक्तप्रतिज्ञादिपञ्चकान्तर्गते व्याप्तिप्रसिद्धधर्म्मतादर्शके ४वाक्यभेदे प्रतिज्ञादय गौ० सू० दृष्टान्तादिर्यथा यथा

"प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः"; कर्त्तरि ल्युट् विभागेन प्रतिज्ञाद्यन्यतमत्वमिति लक्षणं क्वचित्तम् लक्षणं च प्रतिज्ञादीनां पञ्चानामवयवत्वकथनाद्दशावयवत्वादीष्वदत्त इति मन्तव्यं तेषु च भाष्ये दर्शिता यथा "जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदासश्चेति" एते प्रतिज्ञादिसंज्ञिता दश" व्याख्यातं चेदं तात्पर्य्यटीकायाम् "प्रयोजनं फलादिमुखं; तत्प्रवर्त्तिका जिज्ञासा, तज्जनकः संशयः, शक्यप्राप्तिः प्रमाणानां ज्ञानजननसामर्थ्यं, संशयव्युदासस्तर्कः, अवयवैर्योनिबन्धे निरूपितः। जिज्ञासा विमतिपर्यन्तेति केचित् एतेषाञ्च न न्यायावयवत्वं न्यायाघटकत्वात्। न न्यायजन्यबोधानुकूलत्वेनैवावयवत्वं एकदेशस्यापि तत्त्वप्रयुक्तात् प्रयोजनेतिवाक्ये" इति:। तत्र उदाहरणलक्षणविभागौ तत्रैव दर्शितौ यथा

"साध्यसाधर्म्म्यात्तद्धर्म्मभावी दृष्टान्त उदाहरणम्" सू०। "दृष्टान्तउदाहरणमिति लक्षणं दृष्टान्तवचनं दृष्टान्तलक्षणयोर्व्याप्तयव दृष्टार्थः तेन दृष्टान्तस्य साधर्म्यवैधर्म्यविकल्पेनाविशेषेऽपि न क्षतिः। योऽयंतावच्छेदकस्तु अवयवान्तराक्षोभान्वितार्थकावयवत्वं तच्च द्विविधं अन्वयिव्यतिरेकिभेदात्तत्रान्वयुदाहरणं लक्षयति साध्यसाधर्म्म्यात्तद्धर्म्मभावीति अन्वयुदाहरणमिति शेषः; परे तु सम्पूर्णलक्षणमन्वयुदाहरणलक्षणमेव सामान्यलक्षणं तूक्तमित्याहुः; साध्यसाधर्म्म्यात् साध्यसहचरितधर्म्मात् प्रकृतसाधनादित्यर्थः तं साध्यरूपं धर्म्मं भावयति तथा च साधनवत्तायत्नसाध्यवत्तानुभावकोऽवयवः साध्यसाधनव्याप्त्युपदर्शकं उदाहरणमिति यावत्। व्यतिरेक्युदाहरणं लक्षयति" इ०। "तद्विपर्य्ययाद्वा विपरीतं व्यतिरेक्युदाहरणम्" सू०। तद्विपर्य्ययात् साध्यसाधनव्यतिरेकव्याप्तिप्रदर्शनात्तथा च साध्यसाधनव्यतिरेकव्याप्त्युपदर्शकोदाहरणं व्यतिरेक्युदाहरणं यथा जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् यत्रैवं तत्रैवं यथा घट इति। वाक्यारः प्रयोगमपेक्ष्य तथा चान्वयुदाहरणं व्यतिरेक्युदाहरणं वा प्रयोगव्यतिरिक्तार्थः इ०। चिन्तामणिकृता तु तल्लक्षणादिकृतं यथा

"हेतावुक्ते वचनस्य गमकत्वसिद्धाकाङ्क्षायां व्याप्यपक्षधर्म्मतयोः प्रदर्शनप्राप्तौ व्याप्तेः प्राधान्यात् तत्प्रदर्शनायोदाहरणं तत्रानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानजनकव्याप्त्यवाभिमतपक्षनियतव्याप्यकत्वाभिमतसव्यत्वबोधजनकयद्वत्त्वसदाहरणत्वं सामान्यलक्षणम् साध्यसाधनसम्बन्धबोधकत्वं, साध्यसाधनाभावसम्बन्धबोधकत्वञ्च विशेषलक्षणद्वयम्। न्यायावयवदृष्टान्तयत्नसदाहरणमिति तु

न दृष्टान्तप्रयोगस्य सामयिकत्वेनाशार्वत्रिकत्वात्, योयो धूमवान् सोऽग्निमानित्येव व्याप्तिप्रतीतेः । नापि प्रकृतानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यत्वानधिगतव्याप्त्युपनायकं वचनं तत्, उपनयातिव्याप्तेः । उपनयाभिधानप्रयोजकजिज्ञासाजनकबाक्यत्वादुदाहरणम एतदेवाभ्यव्यतिरेकिव्याप्तिविषयत्वविशेषित विशेषलक्षणहृदयमित्यन्ये, अत्र च व्यभिचारवारणाय वीप्सामाहुः यत्र च सामानाधिकरण्यादेव व्याप्तिलाभ न वीप्सा केवलान्वयिन्यभेदानुमाने च वीप्सायामपि व्यभिचारतादवस्थ्यमिति तु वयं, वीप्सा च व्यर्थम्, न तत्रेऽपि विद्वद्बुद्धयोपस्थितयोरपि तत्पदेन परामर्शादुद्बुद्धस्यार्थस्य वाचकत्वादिति न व्युत्पत्तिविरोधः यथा "प्रयत् पाप प्रतिजहि जगन्नाथ! नमस्य तन्न इत्यादौ"।

दीधितिकृता तु निगमनस्योक्तम्। इतरार्थान्वितस्वार्थबोधकन्यायावयवत्वमदाहरणत्वम् अन्वयव्याप्तिबोधकमवयवं व्यतिरेकव्याप्तिबोधकतत्पक्षं च विशेषलक्षणहृदयमिति" । उपन्यासप्रसङ्गे च। "अथाङ्गिरसमभ्यवयमुदाहरणवस्तुम्" कुमा०"उदाहरणानि कथाप्रसङ्गा: तान्येव वस्तूनि"मल्लि०। भावे ल्युट्। ५कथनमात्रे। ऐतिह्यलक्षणसम्बद्धतया प्रामाणिकयाक्योपन्यासे च। [उदाहृति तत्रार्थे उक्तौ च स्त्री।

उदाहार पु० उद्+आ+हृ-घञ्। उदाहरणार्थे। क्लिनु।

उदाहृत त्रि०उद्+आ+हृ-क्त। १दृष्टान्तत्वेनोपन्यस्ते, २कथिते च "श्रुतान्विता दशरथ इत्युदाहृतः" भट्टिः। प्रामाणिकप्रयुक्ततया २उपन्यस्ते च।

उदित त्रि०यद-क्त। १कथिते। "श्रुतिस्मृत्युदितं धर्मम्"मनुः भावे क्त। २कथने न०। "प्रियः कियद्दूरमिति त्वयोदिते" रघ०उद्-इण्-क्त। ३उत्थिते, "तदुदितः स हि यो यदनन्तरः" नैष०। ४उदयं प्राप्ते "उदिते जुहोति अनुदिते जुहोति"श्रुतिः "उदितेऽनुदिते चैव समयाध्युषिते तथा" मनुः। "उदिते जगतामाद्ये यः कुर्यादष्टनायकम्" स्मृतिः। "उदितं सोममण्डलम्" इत्या उदाः प्रविर्भवेत्"। पारस्क० उदयप्राप्तिश्च यष्टादौ भुक्तपादान्तरितदेशोपरिस्थे एव भवति सा च दिवा न भवति सङ्कल्पांशुकराभिभूतत्वेन दर्शनयोग्यत्वाभावात्। तथा च दर्शनयोग्ये यष्टादौ नक्षत्रस्य स्थितिः। "उदिते स्तमिते सन्ध्ये" नील०क० "चतस्र्यासूदितस्तन्द्रोनेक्षितव्यः कदाचन" इति व्याख्याने "उदितः कथितः" इति अर्द्धोदितव्याख्यानपरं वेति ति०त० उक्ते ५सम्पूर्णोदिते च त्रि० भावे क्त। ईरार्थोक्तोदये क्लीबे। कर्त्तरि क्त। उदयं प्राप्ते ७रार्थे च। "अस्तमेकन्तु दोषाणां द्वन्द्वाद्वैवोदिते गुरुः" ज्योति०दशरथिजयचर्यायां स्वरभेदे स च भुक्तावशिष्टःस्वरः यथा। हादयाद्यादिनाद्यान्ताः स्वस्यानाद्यैव कालतः। उदयन्ते पुनस्तस्मान्ते एकादशोदयैः। वर्षमासदिवाराडीपक्षाणि च क्रमादिकम्। कालमानं मया प्रोक्तं पञ्चधा च स्वरोदये। यत् भुक्तं स्वस्वभोगेन लब्धं शेषोदितं भवेत्। लब्धे भुक्ताः स्मृता शेषाः शेषाङ्के तूदितस्वराः। आद्यान् षष्ठा विभक्ते तु भुक्तं स्याद्दितस्वरे। उदितस्य स्वरस्य सुनामस्वरवशेन तत्'। अधिकं चक्रशब्दे बालादिचक्रे वक्ष्यते। पञ्चस्वरोक्ते ६ स्वरभेदे च। तच्चेषन प्रकारस्य बालादिचक्रवत् ज्ञेयः। तदुक्तं तत्रैव "तिथिप्रतिपदादिषु कृजादिवारानर्घयेः। नन्दा भद्रा जया रिक्ता पूर्णा चापि यथाक्रमम्। क्रमेणाङ्काः प्रदातव्या आब्धिबाणसमुद्भवः। चन्द्राग्नी ८१ प्रथमे देया नगनागं ८७हितीयके। तृतीये चाग्निनवकं ९३ चतुर्थे तु यक्षपक्षाः ९९। पञ्चोत्तरशतं १०५ देयम् क्रमेण पञ्चकोष्ठतः। अङ्कयेषणन्तु "वयोराशिं स्वराङ्कञ्च एकीकृत्य विभाजयेत्"। इत्यादि सप्तादिशून्यगणनार्थं, सप्तभून्यशब्दे विवृतिः। एतेषां पञ्चकोष्ठस्थवर्षादीनां संज्ञा तत्रैवोक्ता यथा "उदितं भणितं भ्रान्तं सन्ध्यान्तं तदनन्तरम्" सं ज्ञान्तरमपि तत्रैव "जन्म कर्म च आधानं निधनं छिद्रं तथैव चेति "उदिते विजयोनित्यं भ्रमिते लाभ एव च। भ्रान्ते तु सिद्धिमाप्नोति सन्ध्यान्ते मरणं ध्रुवम्। यत्र नामाक्षरं प्राप्तं तत्रैव उदितस्वरः। १०सन्ध्ये। "पुरोदितञ्च कुर्व्वीत दैवज्ञमुदितोदितम्' या०स्मृ०। विद्याभिजनवान्शालादिभिरुदितैः शाकोक्तैरुदितं सन्नद्धम्" भिता०।११बालनामगन्धद्रव्ये खोवेरे(बाला) न०अमरः।

उदिति स्त्री उद्+इ-क्तिन्। उदये उद्गमने "यस्य वा निमितं वोदितिं वा" ऋ०६,७५,११।

उदीक्षण न० उद+ईक्ष-ल्युट्। १ऊर्द्धदर्शने २ऊर्द्धावलोके च।

उदीक्ष्य अव्य०उद्+ईक्ष-ल्यप्। १ऊर्द्धं दृष्ट्वेत्यर्थे २ऊर्ध्वे-त्यर्थे च। कर्मणि यत्। ३ऊर्द्धावलोके ४उदीक्षणीये च त्रि०

उदीचीन त्रि० उदीचि उदीच्यां वा भवः खः उद्यादेशे अञ्जेरपे पूर्ब्बदीर्घः। उत्तरदिग्देशकालभवे। "उदीचीनप्रवणे करोत्युदीची वै मनुष्याणां दिक्" शत०ब्रा०१२८,१,६। "उदीचानदशं वै तत्पवित्रं भवति" शत०ब्रा० १,७,१,१२।

उदीच्य त्रि० उदच्+भवार्थे यत् उद्यादेशः अलोपे दीर्घः

उत्तरदिग्देशकालभवे । "यरैरुक्तैरिवोदीच्यानुदरिष्यन् रथानिव" रघुः । २कर्मसमाप्तौ कर्त्तव्ये दक्षिणादिटादिप्रभृतिके कर्मादौ च । "अश्वतरीरथानुदीच्येषु"कात्या० २२,२,२५ । "अश्वतरीयुक्तान् रथानुदीच्येषु ददाति" कर्कः । यथा होमादौ प्रकृतहोमानन्तरं कर्त्तव्योदकाङ्गलिसेकादि । यथाह सं०त० "कर्मणोऽन्ते तथा गोभिलः । "समिधमाधायानन्वारब्धे जुहोत्यप्रदक्षिणं तूष्णीमुदगवसृज्य सिञ्चेत् अन्वारब्धे"इति यथायथमूह्यम् । उदीच्यदेशाद्यराबल्याः पश्चिमोत्तरस्या देशभेदादेव मत्स्यपुराणेऽपि तथा "वाह्लीका वाटधानाश्च आभीरा: कालतोयका । परम्ब्राश्चैव शूद्राश्च पह्लवास्तामसास्तथा । गान्धारा अवनाश्चैव सिन्धुसौवीरमद्रकाः । यका दर्वा: पुलिन्दाश्च पारदा हारभूमिकाः । रामठाः कण्ठकाराश्च वैकया देशवासिनकाः । क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च । आत्रेयोऽथ भरद्वाजः प्रस्थलाः सटणेरका । कम्बकाश्चलगानाश्च सैनिकाः सहसाकजैः एते देशा उदीच्यासु पुराणे परिकीर्त्तिताः"। बृहत्सं० कूर्म्मविभागेतु अन्योऽयं ते उक्ता यथा "उत्तरतः कैलासो हिमवान्सुसान् गिरिश्चतुष्पाद । क्रौञ्चो मेरः कुरवस्योत्तराः कुरुसीमानश्च । केकयसातियासुनभोगप्रस्थार्जुनायनाग्नीध्राः । आदर्शान्तर्हीपिलिगर्तत्रिगर्तानाम्बष्ठाः । कैकयरुचिपिटनासिकदासेरकाश्वटधानधुरधानाः । तक्षशिलाप्रोक्षलायतकैलायनकण्ठधानाश्च । अम्बरमद्रकमालवपौरवकक्षारदण्डधिक्कटकाः । माण्डव्यलवणोत्कोचकोतकमाण्डव्यभूतपुराः । गान्धारयोधतिक्षेणशाकलाख्यचरगव्याश्च । यौधेयदासमेयाःह्याभाराः क्षेमधूर्त्ताश्च" अनयोरीरोधपरिकारः अपेक्षाभेदात् सामान्यरात्तर्क्षाश्च द्रोह्याः ।

उदीच्यवृत्ति स्त्री "षड्विंशेऽहो समे कलास्तास्त्र समे द्यूनौ निरन्तरा । न समास परान्विता कला वैतालीयेऽन्ते रलौ गुरुः" वृत्तपक्रम्य "उदीच्यदक्षिणद्वितीयतः सलोऽथेष भवेदुपज्ञयो"इ०र०उक्ते वैतालीयभेदे जक्षणि । [देखे ।

उदीच्य त्रि० उत्तरा आपोयतः अच् समा० ष्यञ् । उत्तरस्थे

उदीरण न० उद्+ईर-ल्युट् । १उच्चारणे "उदीरणात् प्रणवोयाद्यं व्याहृतित्रिवदीरणम्"कुमा०वृ० तत्रैव स्त्री ।

उदीरित त्रि०उद्+ईर-क्त । १कथिते २उद्गिरे ३प्रेरिते च । "अभिजात्यमुदीरितैस्त्रिभिः"कुमा०।भावे क्त । ४जपने न० ।

उदीर्ण त्रि० उद्-ऋ-क्त । १उदिते २सदृशे ३उद्गिरे च । "उद्दीर्णरागप्रतिरोधकं जुक्तः" माघः । "भवन्नभवरोदीर्ण्यस्त्रारकाख्यो महासुर:" कुमा० । ४विष्णौ पु० । "उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतःस्थिरः" विष्णु०स०।

उदुत्य न० उदुत्यमितिपदयुक्तम् । ऋग्वेदोक्तस्यानार्षे मन्त्रे स च मन्त्यप्रयोगे दृश्यः "उदयनसुदुत्यञ्च चित्रं देवेति तत्परम् । तच्चक्षुरित्युपस्थानं मन्त्रा ब्रह्मस्य सिद्धिदाः । काशीख० ।

उदुम्बर पु० उदुम्बरयति । (यस्यस्पर० ।डुदे । २देवन्यां २मण्डले ४कृतभेदे च ५ताम्रे न० । ६अशीतिरक्तिकापरिमिते वर्षे पु० । उदुम्बरयज्ञे उदा० । "यदुदुम्बरवणोना षष्ठीषु मण्डलं भवेत् । शीतं न गमयेत् स्वर्गं किमत्र कृतुरत्न गमेत्" । सौत्रमणीयागे सुरापाणदुष्टत्वबोधकम् । "हीवेरल्कमञ्जिष्ठोदुम्बरत्वक् साधितम्" । कच्छुरामूलकल्कं वा उदुम्बरफलोपमम्" सुश्रुतः । ओलाज्जनमहाशयवे च । "शाल्वाश्वयवेत्यादि" पा० ततोऽभवार्थे यञ् । औदुम्बरि तद्भवे त्रि० "शाल्वाश्वयवा उदुम्बराद्यः"सि०कौ० उदुम्बर एव स्वार्थे अण् तस्मिन् धामे । "औदुम्बरकापिलभाजाङ्घयवेति मध्यमिदम्" इ०सं० । उदुम्बरे लक्ष्मिः पात्रेसमि० स० । उदुम्बरलक्ष्मिः तन्मध्यस्थलक्ष्मी । उदुम्बर इव मशकः पात्रेसमिता०स । स्थूलमशके पु०

उदुम्बरदला स्त्री उदुम्बरस्येव दलमस्याः दलीत्वे राजानि०

उदुम्बरपर्णी स्त्री उदुम्बरपर्णीवत् पर्वस्म न ङीत्वम् । तदर्थे

उदुम्बरालती स्त्री उदुम्बरफलानि शाकत्वेन सन्त्यस्यां मत्वा मतुप् संज्ञायां दीर्घः । लतीभेदे ।

उदुम्बल पु० उदुम्बरमन्त्रे रस्य लः । उदुम्बरे "उपेन्द्रमनसुद्युम्नम् तुग्द्रेवसुहवाम्युदुम्" अ०८,६,१७, । उदुम्बलमस्य प्रयो० । २विस्तीर्णबलयुक्ते त्रि०अङ्गुष्ठावच्छेदेन उदुम्बलौ यमस्य दूतौ चरतोजनौ अनु"अ०१०,१४, १५, "उदुम्बलौ उदम्बली विस्तीर्णबलौ" भा०।

उदूखल न० अर्त्ति खनति खा-क प्रषो०लि० । तण्डुलादि कण्डनार्थे काष्ठादिरचिते १द्रव्ये, २युगगुडौ च । "सधान्यमुदूखलं मुसलेनाभिकण्डयात्" स्मृतः । सुश्रुतोक्ते शारीरे २अस्थिभेदे पु० सन्त्यस्य इनि० दर्शिताः "क्रोडोदूखलसासक्षप्रतरतलक्षिपणी वायवहनुकमण्डल गल्लाबर्हाः" बृहद्विधानं सन्नीतञ्च "अथोलूखलदर्शनेमूर्द्धजत्व इति उदूखलाजातित्वाच्च तद्विशेषकरणं तथात्वम् ।

उदूढ त्रि०उद्+वह-क्त । १जडे, २मूढे, ३धृते च । "उदूढशोकशिथिलेनेति" माघः । "उदूढवस्त्रःस्खलितैकहस्तमुक्ते"किरा० ४विवाहितस्त्रियां स्त्री ।

उद्गृच् स्त्री उत्कृष्टा ऋक् समासान्तविधेरनित्यत्वात् न समा० । उत्कृष्टायामृचि । "या पातमाश्च यत्तस्रोऽचः या पाङ्क्ते आश्च यत्तस्रोऽचः" यजु० ४,६,१० "उद्गचः उत्तमाया ऋचः पर्यन्तम्" वेददी० । यजुर्भिर्यत्तस्रोऽचं गच्छन्ति यत्तस्रोऽचं गच्छतीति" शत० ब्रा० २,१,१,१२ उद्+ऋच-क्तिनौ क्विप् । २उद्गये "सन्तु यजमानस्य कामाः इत्याहैष वै कामो यजमानस्य यदनार्क्ष उद्गचं गच्छति" तैत्ति० "स्वस्ति ते देव सोम सुत्यामहमसौय" देत० ।

उद्गेजय त्रि० उद्+एज-णिच्-ल्यप् । उद्वेगकारके "उद्गेजयानू भूतगणान् व्यधेधीत्" भट्टिः । [उद्कथद्वे उद्गा० ।

उद्गीर्ण पु० उदकेन सिक्त ओदनः उदादेयः । जलमात्रसिक्ते

उद्गत त्रि० उद्+गम-क्त । १उदिते, २उत्पन्ने, "वयोऽतिपातोद्गतयातवेधिते" नैष० । २ऊर्द्धगते, ३उद्गते च ।

उद्गतमृत्यु पु० उद्गतमृत्युरिव ऋक्षमस्य । जातभल्लकायस्यपक्षी

उद्गति स्त्री उद्+गम-क्तिन् । १उदये २ऊर्द्धगतौ ३उत्पत्तौ च ।

उद्गन्धि त्रि० उत्कटो गन्धोऽस्य प्रा० ब० ङीषभावः इत्समा० । १उत्कटगन्धाढ्ये २उत्कटगन्धयुक्ते च । "विलम्बयोद्गन्धिषु कुड्मलेषु" रघुः ।

उद्गम पु० उद्-गम-घञ् अमन्तत्वात् न वृद्धिः । १उदये २ऊर्द्धगतौ ३उद्भवे ४उन्नतौ च । "रोमोद्गमः प्रादुरभूदुमायाः" कुमा० "फलेन सहकारस्य पुष्पोद्गम इव प्रजा" रघुः । "करितरुणोद्गमदृश्या ललनीभिः" किरा० भावे क्विप् । उद्गमनमत्र न० "आङ उद्गमने" पा० ।

उद्गता स्त्री "सजसादिमे सलघुके च नसजगुरुकेऽब्धयोऽत्र । अक्षिगतमनजलगागयुताः सजसा जगौ च चरणमेकतः पठेत्" छ० द० उक्ते विषमवृत्ते छन्दोभेदे ।

उद्गमनीय न० उद्+गम-अनीयर् । औतपक्षद्वये "उद्गीतप्रस्तुतमनीयवस्तुनि" कुमारः । "तत् स्यादुद्गमनीयं यत् औतपीयेक्ष्वयोर्युगम्" इत्यमरव्याख्यायां युगमित्यविवक्षितमुदिति प्रायः बहुत्र तद्देवेति व्याख्याय क्षीरस्वामी उद्गमेव श्लोकमुदाजहार । "उद्गीतं पतिं प्रति उद्गमनीयं वस्त्रं यस्येति मल्लि० । स्त्रीणामौद्वहनिकवस्त्रधारित्वं लोकप्रसिद्धं वैदिके वर्त्मनि एव द्विवक्तृता अतएव पतिं प्रतीतीत्यध्याहृत्य व्याख्यातम् । "औतोद्गमनीयवाससी" दमयन्ती० ।

उद्गाढ त्रि० उद्-गाह-क्त । १अतिमग्ने २अत्यन्ते । ३अतिमग्नवस्तुनि त्रि० । "प्रेमार्द्राः प्रणयक्रुधः परिचयादुद्गाढरागोदयाः" मा० ६० ।

उद्गाढ पु० ऊर्द्धं गायति वाम उद्+गै-क्त । १सामवेदगायके । अस्य च उद्गीथकृत्यसामावयवस्योर्द्धगानादुद्गाढत्वम् । यथा चास्य तथात्वं तथा उद्गीथशब्दे वक्ष्यते । षोडशस्तु ऋत्विक्षु मध्ये २ऋत्विग्भेदे । ते च ऋत्विजः अध्वावाकशब्दे ५४५० दर्शिताः । "रथं क्रीडेत्याध्वर्यु र्ब्रह्माधाने च वाजिनम् । होता चापि क्रीडेत्सप्तहोता याज्यनः क्रमे" मनुः । राजसूये तस्य च दक्षिणाभेद उक्तः "सोमक्रयी ऋगुद्गाताः" आश्व० ६,४,६ । उद्गातृप्रशंसनपूर्व्वं तत्कर्म्म च शत० ब्रा० दर्शितं यथा । "अथाति ह वा एतद्धोता यज्यंसति । तथा एतदृत्विजे प्रत्यवाध्वर्युराह्यति तस्मात् प्रतिगरोनाम । तं वै प्राङ्मासोन्नमाङ्क्रयते सर्वे वा अन्य उद्गातुः प्राङ्ग आर्त्विज्यं कुर्वन्ति तथो ह्यासैतत् प्राणेवार्त्विज्यं कृतं भवति । प्रजापतिर्वा उद्गाता । योषाऽगर्भिणी स एतत् प्रजापतिरुद्गाता योषायामेव होतरि रेतः सिञ्चति यत् स्तुते तद्धोता यस्तेन प्रजनयति तच्छ्रोत्र यज्ञस्य पुरुषः गीतस्तद्येनच्छ्रुति तस्माच्छ्रुत्रं नाम" ४,३,२,१, २,३, । उद्गीथगानकर्त्तृत्वाच्च यथाऽस्योद्गातृत्वं तथोक्तं ब्रा० उ० । "तस्यर्क् च साम च गेष्णौ तस्मादुद्गीथकृत्स्वाक्त्वेवोद्गातवास्य हि गाता" "एवमेवोद्गातारस्तुवाचोद्गातः । या देवतोद्गीथमन्वायत्ता ताञ्चेदविद्वान् उद्गास्यसि मूर्द्धा ते विपतिष्यतीति" च । तथासामपूर्व्वमुद्गातृत्वं फलमपि तत्रोक्तं यथा "य एतदेवं विद्वान् साम गायति उभौ स गायति सोऽसावेव स एष ये चामुष्मात् परास्रोलोकास्तानाप्नोति देवकामांश्च अथानेनैवमेवैतत्सादयाँस्रोलोकांस्तानाप्नोति मनुष्यकामांश्च । तस्मादुहैवं विदुषोद्गातव्यं वै तं कामयमानोनीति एष ह्येव कामागानस्तदेष य एतदेवं विद्वान् साम गायति" ब्रा० उ० ।

उद्गार पु० उद्+गृ+घञ्तोरप् वाधित्वा उकारोर्द्धः" पा० घञ् । उद्गमने । "खर्जुरीस्तम्बरम्भाणां मदोद्गारसुगन्धिषु" रघुः । "सलिलोद्गारमुद्गैर्विमाना:" "धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति" मेघ० । "सलिलोद्गार इवाद्रिराजः" रघुः । (ढेकर) इति २वमनशब्दभेदे च । "धूमोद्गारे तथा वान्ते क्षुरकर्मणि मैथुने । क्षतके क्षतके चैव नित्यं नैमित्तिकं त्यजेत्" आ० त० स्मृतिः । वमनप्रकारः निदानादिशब्दे दर्शितो यथा

"अथातो वमनविरेचनव्यापच्चिकित्सितं व्याख्यास्यामः । वैद्यातुरनिमित्तं वमनं विरेचनं च यद्यदुभयथा व्यापद्यते तत्र वमनव्यापत्तिमुद्दिश्य विरेचनमेवेति पृथक् । वमन-

मयोः साग्नेयौषधस्य जीर्णौषधस्य क्षीराधिकदोषाणां तत्र वातानुलोमयोगातियोगौ जीर्णादानमाघ्राणं परिवर्त्तिका परिषेकाभ्यङ्गिका त्रुटयोपस्करणं विवन्ध. इति । तत्र बुभुक्षापीडितस्यातितीक्ष्णाग्नेर्मृदुकोष्ठस्य चाबलिनमाशं दुर्बलस्य वा गुणसामान्यभावाद्बृंहणमधोगच्छति । तत्रेषितानवाप्तिर्दोषोत्कर्षश्च तमाशु क्लेदयित्वा मृदुकोष्ठतरैर्वामयेत् । अपरिशुद्धामाशयस्योत्तरस्य दोषः शमनस्य वाऽशुद्धमतिप्रभूतविरेचनं पीतमूर्द्धं गच्छति तमाशु-द्धामाशयस्त्रवणेऽपाणाग्नौ वामयित्वा भूयस्तीक्ष्णतरैर्विरेचयेत् । सामान्ये त्वामवत् विधानम् । अशुद्धोऽतिप्रभूते च हृद्यं प्रमाणं युक्तञ्च । अतजर्जुक्तिस्तौषधे च तृतीयं पाययेत् । ततस्त्रेधं मधुघृतफाणितयुक्तैर्लेहैर्विरेचयेत् । दोषविच्युतिमल्पमौषधमवस्थितमूर्द्धभागिकमधो-भागिकं वा न क्लेशयति दोषान् । तत्र हृत्पार्श्वमूल-ऊर्द्धमूर्द्धपर्वभेटोच्छ्वासारुचिहृद्गौरवाविशुद्धिर् भवति । तमुष्णाभिरद्भिराशु वामयेत् । साग्नेयौषधमतिप्रधावित-दोषमतिबलमसह्यक्रियाक्षमञ्चेदं वामयेत् । क्रूरकोष्ठस्याति-तीक्ष्णाग्नेरल्पमौषधमल्पगुणं वा भक्षयत्याकमूर्द्धति तत्र समुदीर्णा दोषा यथाकालमनिर्हृतयोगा व्याधिं बल-विभ्रमञ्चापादयन्ति । तमनल्पमनल्पौषधञ्च पाययेत् । आस्कन्धिकेनाल्पगुणं वा भेषजमुपयुक्तमल्पान्दोषानुत्क्लिन्ति । तत्र वमने दोषयत गौरवमुत्क्लेशं त्रुटयाविशुद्धिं व्याधि वृद्धिं करोति तत्र यथायोगं पाययित्वा वामयेद्दृढतरम् । विरेचनं गुदपरिकर्त्तनमाध्मानं शिरोगौरवमतिसारणं वा वायोर्व्याधिवृद्धिं करोति । तमुपरिष्टाद् भूयः स्नेहस्वेदाभ्यां विरेचयेद्दृढतरम् । दृढं बद्धप्रवलितदोषं वा तृतीये दिवसेऽल्पगुणं चेति । अस्निग्धस्विन्नेन रूक्षमौषधमुपयुक्त-मन्नकालचारिणा वा वायुं कोपयति । तत्र वायुः प्रकुपितः पार्श्वपृष्ठश्रोणिमन्याभर्त्सभुग्नं मूर्द्धानं भ्रमं संघातमाशु करोति । तमभ्यङ्गस्नेहेन स्नेहयित्वा यष्टीमधुक-विपक्वेन तैलेनानुवासयेत् । स्नेहस्वेदाभ्यामविभावितशरी-रेणाल्पमौषधमल्पगुणं वा पीतमूर्द्धमधोगा नाभेति दोषा-स्तस्मिंस्तं यक्ष्म वलयमापादयति । तस्माद्यान हृदय-रुक्ष्णा मूर्द्धा दारुण भवति तमयोगमित्याचक्षते तमाशु वामयेन्मदनफलसर्षपाभ्यामिरिवेचयेत्तीक्ष्णतरं फला-द्यैश्च । दुर्बलस्य तु समुत्क्लिष्टा दोषा व्याप्य शरीरं कण्डूपिडकाज्वराङ्गमर्दनिस्तोदनानि कुर्वन्ति । ततस्तानवयेत्पाणाग्नौषधेनोपक्रमेत् । अस्निग्धस्विन्नस्य मृदु-विरिक्तस्याधोनाभेः सञ्चयप्रवृत्तिरता शूलं वातपुरीषसङ्ग-कण्डूपिडकाप्रादुर्भावो भवति तमास्थाप्य पुनः स्नेहैर् विरेचयेत्तीक्ष्णेन । नातिप्रवर्त्तमाने तिष्ठति वा दशयो-धने तत्सन्नं जलार्थसृष्टोदकं पाययेत् पाणितापेन पार्श्वो-दरमुपसेवेत । ततः प्रवर्त्तन्ते दोषाः । अनुप्रवृत्ते-ष्वल्पदोषे जीर्णौषधं रूक्षदोषमल्पदोषं बलवानेव भूयोमात्रां विदध्यात् । अप्रवृत्तदोषं दयरात्रादूर्द्धमुपसं स्नातदेहं स्नेहस्वेदाभ्यां पुनः शोधयेत् । दुर्विरेच्यमाश्याप्य पुनः स्नेहैर्विरेचयेत् । स्त्रीभयशोभैर्वेगाघातशीला-प्रायश स्त्रियो राजसमीपस्थाश्च भीरवो भवन्ति । तस्मादेते दुर्विरेच्या बहुवातत्वादत एव तासतिस्निग्धानां स्नेहोपपन्नान् शोधयेत् । स्निग्धस्विन्नस्यातिमात्रमतिबद्ध-कोष्ठस्य वा तीक्ष्णाधिकदोषमौषधमतियोगं कुर्यात् । तत्र यमनातियोगे पित्तातिप्रवृत्तिर्व्यलिकसो वातकोपश्च बलवान् भवति तं घृतेनाभ्यञ्जनावगाहाभ्यामाहृत्य शीतास्वप्सु शर्करामधुभिश्चैलेक्षुरसैरुपाचरेत्तावद्यावत् । विरेचनातियो-गफलप्रातिलोम्यकरकाक्षयकरस्य सन्नापि बलविस्र-सो वातकोपश्च बलवान् भवति तमतिशीताम्बुभि पर-षिञ्चेद्वावगाहं वा शीतेक्षुरसाम्बुभिर्मधुभिश्चैलेक्षुरसै-र्वेत् । पिच्छावस्तिं वापि दद्यात् क्षीरसर्पिषा चैनमनुवा-सयेत् प्रियङ्ग्वादि वापि तण्डुलाम्बुना वातु मयि-च्छेत् । क्षीररसयोश्चान्नतरेण भोजयेत् । तस्मिंश्चेत् वमना-तियोगे प्रवृद्धे शोणित छर्दयति वा तत्र जिह्व-गि सरणमञ्जोव्यञ्जनस्निग्धमुष्णं लघ्वी क्षिप्रकाजरा वै संसृष्टमिश्रयुक्ता भवन्ति तमजाशृङ्गचन्दनोशीराङ्गलाज चूर्णैः सघृतक्षौद्रकर्षमेव पाययेत । पलरसैर्वा सघृतक्षौद्र शर्करैः शुक्लाभिर्वा यवागूभिर्वा मेद्याः सिद्धाः सशौद्रां वर्त्तो-याश्छिन्नाभिर्वा यवसाजाङ्गलरसेन वा भोजयेत् अतिक्षतशो-णितविधानेनोपचरेत् । जिह्वामतिसर्पितान्त्रिकटुकलवण-चूर्णेप्रघृष्टां सिक्तवाताग्निलिप्तां वा पीडयेत् प्रविरायामस्य-मध्ये तस्य पुरस्तात्सादयेयुः । व्याहते चास्थिनी घृता-भ्यक्ते पीडयेत् । कृमुसंक्षमने वातक्षयहृद्ग्रहे नस्यं स्नेहा-दीन् विदध्यात् । कृम्यादिषु च यथास्वं प्रतिकुर्वीत । विस्रंसे वेणुवीणागीतस्वनं श्रावयेत्"।

उदावर्त्तसाध्यीर्ष्यरोगाक्षिकूटभिन्नित्यभेदे वक्ष्यते। व्यपद्या-दिभोजनरूपकारणसहितानीह खरूपादि सुश्रुते उक्तम् । "प्राग्भुक्ते लघुविस्रब्धो हितं न समाचरेत् । पूर्वभुक्तो विदग्धेऽन्ने भुञ्जानो हन्ति पावकम् । मात्रागुरुं परिहरे-

द्गारं द्रव्यतश्च । विष्टब्धं नैव भुञ्जीत मात्रया वा बुभुक्षितः । द्विगुणश्च विवेकोऽयं सुखं सम्यक् प्रजीर्यति । मेथलेखाद्यभक्ष्याणां गुरूं विद्याद्यथोत्तरम् । गुरुण्यामर्द्रशीतिलं लघूनां तद्विपरीयते । द्रवोत्तरो द्रवस्थापि न मात्रागुरुरिष्यते । द्रवाढ्यमपि शुष्कन्तु सम्यगेवोपपद्यते । विशुष्कमप्यसम्यक्तं न पाकं साधु गच्छति । पिण्डीकृतमसंक्लिन्नं विष्टब्धत्वमुपैति च । क्लेदसञ्जवहे पित्तं पक्वौ वा यस्य तिष्ठति । विदाहि भुक्तमन्यद्वा तस्याध्यशं विदह्यते । शुष्कं विरूक्षं विष्टब्धं वह्निव्यापदमावहेत् । आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः । अजीर्णं कोचिदिच्छन्ति चतुर्थं रसशेषतः । अन्यच्च प्राक्तिक्षमायसाद्या सन्धारणात्वप्रसिद्ध्यर्थाच्च । कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य । ईर्ष्याभयक्रोधपरिप्लुतेन लुब्धेन रुग्दैन्यनिपीडितेन । अध्येषुणा च सेव्यमानमन्नं न सम्यक् परिणाममेति । माधुर्यमन्नं गतमामसंज्ञं विदग्धसञ्ज्ञं गतमम्लभावम् । किञ्चिद्विपक्वं भृशतोऽन्नमन्नं विष्टब्धमाहुर्विरुजं वातम् । उद्गारशुद्धावपि भक्तकाङ्क्षा न जायते हृद्गुरुता च यस्य । रसावशेषेण तु सप्तमेकं चतुर्थमेतत्प्रवदन्त्यजीर्णम् । मुखप्रसेकोऽङ्गविमर्दः प्रसेकः सदनं भ्रमः । उपद्रवा भवन्त्येते मरणं चाप्यजीर्णतः । तत्राम लङ्घनं कार्यं विदग्धे वमनं हितम् । विष्टब्धे स्वेदनं पथ्यं रसशेषे प्रयोजयेत् च । वामयेदाशु तत्राढ्यरोगेण लवणाम्बुना । कार्यं चामगमं तावद्यावन्न प्रक्लमं भजेत् । लघुकायमतस्तस्मै लङ्घनं सम्प्रयाचरेत् । यावन्न प्रक्लमेत्याहोषतः प्राणतस्तथा । क्षिताक्षितोपसंयुक्तमन्नं समगमं स्मृतम् । मक्षु स्रोतोमलाले वा विष्टब्धं विषमाशनम् । अजीर्णे भुज्यते यत्तु तदध्यशनसञ्ज्ञितम् । त्रयमेतत्क्षिपन्त्याशु बहून् व्याधीन् करोति वा । अन्नं विदग्धं हि नरस्य शीघ्रं पीताम्बुना वै परिपाकमेति । तच्छ्लेष्मणा लिप्तमिहाल्पवह्नि-भावाच्च नात्यर्थबलात् । विदह्यते यस्य तु भुक्तमात्रे हृल्लास कण्ठगलत्व यस्य । द्राक्षाऽभयां मालिकसम्भ युक्तां क्षौद्राऽभयां वा य सुखं लभेत । अवेदजीर्णं प्रति यस्य यत्नो स्निग्धस्य अन्नोर्वलिनोऽश्नतोऽते । प्रातः स गुरुतोमभयामयुक्तो भुञ्जीत सम्याज्य स्निग्ध हितार्थी । अस्य यदा दोषविदह्यमानं लोनं न तेजः प्रथमादधोति । भवत्यजीर्णेऽपि तदा बुभुक्षा सा मन्दवृत्तिं विषवच्चिरन्ति ।

दृत्यजीर्णताकारणप्रदर्शनपूर्वमुद्गारशुद्धेः प्रकारस्तत्रैव दर्शितः यथा 'या माला परिजार्य्यते चतुर्भागगतेऽहनि । सा माला दीपयत्यग्निमल्पदोषे च पूजिता । या माला परिजीर्य्यते तथार्द्धदिवसे गते । सा ह्यया हृद्गुणो चैव मध्यदोषे च पूजिता । या माला परिजीर्य्यते चतुर्भागावशेषिते । स्नेहनाया च सा माला बहुदोषे च पूजिता ॥ या माला परिजीर्यते तथा परिणतेऽहनि । ग्लानिमूर्च्छामदान्-हित्वा सा माला पूजिता भवेत् । अहोरात्रादसन्दुष्टा या माला परिजीर्यति । सा तु कुक्षिविशोद्गादपक्वापक्वाशयानुगो । यथाग्नि प्रथमां मात्रां पाचयेत् विचक्षणः । पीतो हृत्तिवद्धस्नेहो जनयेन्मारुतसंचयम् । मिथ्याचाराद्बुभुक्षा-हा यस्य स्नेहो न जीर्यते । विदग्धं चापि जीर्यन्तं वारि-णोष्णेन वामयेत् । जीर्णाजीर्णविशुद्धायां स्नेहस्वेदोदकं पिबेत् । तेनोद्गारो भवेच्छुद्धो भक्तं प्रति रुचिस्तथा । स्वः पच्यमाने हृद्दाहभ्रममुद्गारतिक्तता; । परिविच्छा-द्विकृताभिजीर्णस्नेहं ततो नरम् । यवागूं पाययेत्क्षीणां कामं क्लिन्नात्यतण्डुलाम् । देयो यूषरसौ वापि सुगन्धी स्नेहवर्जितौ । क्षतौ वात्यल्पसर्पिष्कौ यवागूवौ विधीयते । पिबेच्चूतं चतुरहं पञ्चाहं षडहं तथा । सप्तरात्रात्परं स्नेहः सात्मीभवति सेवितः" ।

उद्गारश्च नागवायुकार्य्यम् यथोक्तं पदार्था० योगार्णवे "उद्गारे नाग इत्युक्तो नीलजीमूतसन्निभः । उन्मीलने स्थितः कूर्म्मोभिन्नाञ्जनसमप्रभः । लक्षणस्तु क्षुते चैव जयाकुसुम-सन्निभः । जृम्भणे देवदत्तःस्यात् शुद्धस्फटिकसन्निभः । धनञ्जयस्तथा घोषे मकारजलवर्णकः । ललाटे चोरसि स्कन्धे हृदि नाभौ त्वगस्थिषु । नागाद्या वायवः पञ्च-हेहे तु परिवेष्टिताः" । [जिरके गच्छति० ।

उद्गारशोधन पु० उद्गारं शोधयति शुध-णिच्-ल्यु । जण्-

उद्गारिन् त्रि० उद्+गृ-णिनि स्त्रियां ङीप् । उद्गारयुक्ते । "यत्ते मौलौ कनकरुचिरं सौरभोद्गारि वासः" उद्भवदू० । "धाराखनोद्गारिदरीसुखोऽसौ" रघुः । "यः पद्मखोद्गारि परिमलोद्गारिभिर्नागराजाम्" मेघ० ।

उद्गिरण न० उद्+गृ-ल्युट् त्रि० दूरक्षम् । १छर्द्दनके । उद्गारे (ढेकुर) २कण्ठस्वरभेदे च । "आध्मानमुद्गिरण्यम-धरसो विदाहोऽजीर्णस्य लक्षणजनितस्य भवन्ति चिह्नम्" सुश्रु० । उद्गारशब्दे विवृतिः ।

उद्गीति स्त्री उद्+गै-भावे क्तिन् । १उद्गाने कर्मणि क्तिन् । "आर्य्याग्निकलक्षितयं व्यत्ययरचितं भवेद्यस्याः । सोद्गीतिः किल गदिता तद्दुष्यत्यंशभेदसंयुक्ता" इ०र०उक्ते मात्रा-

दृत्तभेदे। उद्+गै–भावे क्त। उद्गीत उच्चैर्गाने न०। उद्गीथ पु०उद्+गै–थक्। सामगानावयवभेदे।

"उद्गीथस्यपदपाठवताञ्च साम्नाम्" देवीभ०। साम्नोहि पञ्चविधाः सप्तविधा वा अवयवाः। "प्रस्तावस्तत उद्गीथः प्रतिहार उपद्रवः। निधनं पञ्चधेत्याकुर्हिङ्कारः प्रणवस्तथ,"साध०भाष्यधृतवाक्यात्। तत्र साम्न आद्योभागः प्रस्तोता गेयः प्रस्तावनामा। द्वितीयोभागः उद्गाता गेय उद्गीथनामा। तृतीयोभागः प्रतिहर्त्ता गेयः प्रतिहारनामा। चतुर्थोभागः पुनरुद्गाता गेय उपद्रवनामा। पञ्चभिर्यगपत् गेयः निधननामा इति पञ्चविधः। गानकाले सर्वैरृत्विग्भिर्मिलित्वा हुङ्कारकरणरूपो हिङ्कारः, ओङ्कारपूर्व्वकत्वात् सर्वेषां वेदानां प्रणवरूपः प्रथमावयवः इति सप्तावयवत्वं तद्देतुः ब्रा०उप०दर्शितम् यथा "समस्तस्य खलु साम्न उपासनं साध"इति साधुत्वोपन्यासेन "अग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्य प्रतिहारो द्यौर्निधनमित्यूर्द्धेषु अधात्मेषु द्यौर्हिङ्कार आदित्य प्रस्तावोऽन्तरिक्षमुद्गीथोऽग्निः प्रतिरित्यूर्द्धोऽग्निः प्रतिहारः पृथिवी निधनम्। कल्पन्ते ह्यस्मै लोका ऊर्द्धा यन्त्यस्य य एतदेवं विद्वाङ्सोऽमेध्य पञ्चविधं साम्नोपास्ते" इत्यौ पञ्चविधस्योपासनफलं तत्रैव

"इत्यौ पञ्चविधं साम्नोपासीत पुरोवातो हिङ्कारो, मेघो जायते स प्रस्तावो, वर्षति स उद्गीथो, विद्योतते स्तनयति स प्रतिहारः, उद्गृह्णाति तन्निधनं, वर्षति ह्यस्मै वर्षयति ह य एतदेवंविद्वान् इत्यौ पञ्चविधं साम्नोपास्ते। ऋक्षु खल्वृक्षु पञ्चविधं साम्नोपासीत मेघो यत्र समुप्लवते स हिङ्कारो, यद्वर्षति स प्रस्तावो, याः प्राच्यः स्यन्दन्ते स उद्गीथो, याः प्रतीच्यः स प्रतिहारः समुद्रो निधनम्। न ह्यस्मै प्रेत्यभूमानं भवति य एतदेवंविद्वान् सर्व्वासु ऋक्षु पञ्चविधं साम्नोपास्ते"।

ऋत्वादिषु पञ्चविधस्योपासनं तत्रैवोक्तम्

"ऋतुषु पञ्चविधं साम्नोपासीत वसन्तो हिङ्कारो, ग्रीष्मः प्रस्तावो, वर्षा उद्गीथः, शरत्प्रतिहारो, हेमन्तो निधनम्। कल्पन्ते ह्यस्मा ऋतव ऋतुमान् भवति य एतदेवंविद्वानृतुषु पञ्चविधं साम्नोपास्ते"।

"पशुषु पञ्चविधं साम्नोपासीताजा हिङ्कारो, ऽवयः प्रस्तावो, गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम्। भवन्ति ह्यस्य प्रजाः, पशुमान् भवति य एतदेवंविद्वान् पशुषु पञ्चविधं साम्नोपास्ते"

"प्राणेषु पञ्चविधं परोवरीयः साम्नोपासीत प्राणो हिङ्कारो, वाक् प्रस्ताव,श्चक्षुरुद्गीथः, श्रोत्रं प्रतिहारो, मनो निधनं, परोवरीयांसि वेदानि। परोवरीयो ह्यस्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवंविद्वान् प्राणेषु पञ्चविधं परोवरीयः साम्नोपास्त इति स पञ्चविधस्य"। वाचि सप्तविधस्य साम्न उपासनं तत्रैवोक्तम्

"अथ सप्तविधस्य वाचि सप्तविधं साम्नोपासीत यत्किञ्च वाचो ह्रस्वं इति स हिङ्कारो, यत्प्रेति स प्रस्तावो, यदेति स आदि, (प्रणवः)। यदुदिति स उद्गीथो, यत्प्रतीति स प्रतिहारो, यदुपेति स उपद्रवो, यद्वीति तन्निधनम्। दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतदेवं विद्वान्वाचि सप्तविधं साम्नोपास्ते"।

आदित्ये सप्तविधस्योपासनं तत्रैवोक्तम्

"अथ खल्वमुमादित्यं सप्तविधं साम्नोपासीत सर्व्वदा समस्तेन साम। सा वा एषा प्रतीति सर्व्वेण समः तेन साम। तस्मिन्नेतस्मिन् सर्व्वाणि भूतान्यन्वायत्तानीति विद्यात्तस्य यत्पुरोदयात् हिङ्कार,स्तदस्य पशवोऽन्वायत्तास्तस्मात्ते हिङ्कुर्वन्ति हिङ्कारभाजिनो ह्येतस्य साम्नः। अथ यत्प्रथमोदिते स प्रस्ताव,स्तदस्य मनुष्या अन्वायत्तास्तस्मात्ते प्रस्तुतिकामा एव साकामाः प्रस्तावभाजिनोह्येतस्य साम्नः। अथ यत्सङ्गवेलायां स आदित्यः (ओङ्कार) तदस्य व्यानस्यान्वायत्तानि तस्मात्तान्यन्तरिक्षेऽरम्भणान्यादायात्मानं परिपतन्त्यादिभाजीनि ह्येतस्य साम्नः। अथ यत्सम्प्रति मध्यन्दिने स उद्गीथ,स्तदस्य देवा अन्वायत्तास्तस्मात्ते सर्व्वस्माद्भोजादाप्यायानमुद्गीथभाजिनो ह्येतस्य साम्नः। अथ यदूर्द्धं मध्यन्दिनात् प्रागपराह्णात् प्रतिहार,स्तदस्य गर्भा अन्वायत्तास्तस्मात्ते प्रतिकूला जायन्ते प्रतिहारभाजिनो ह्येतस्य साम्नः। अथ यदूर्द्धमपराह्णात् प्रागस्तमयात् उपद्रव,स्तदस्यारण्या अन्वायत्तास्तस्मात्ते पुरुषं दृष्ट्वा कक्षं श्वभ्रमित्युपद्रवन्त्युपद्रवभाजिनो ह्येतस्य साम्नः। अथ यत्प्रथमामास्मिते तन्निधनं तदस्य पितरोऽन्वायत्तास्तस्मात्तन्निदधति निधनभाजिनो ह्येतस्य साम्नः। एवं खल्वमुमादित्यं सप्तविधं साम्नोपास्ते"।

अतिमृत्युफलाय सप्तविधसाम्नोपासनं तत्रैवोक्तम्

"अथ खल्वात्मसम्मितमतिमृत्यु सप्तविधं साम्नोपासीत हिङ्कार इति त्रयक्षरं प्रस्ताव इति त्रयक्षरं तन्मिथुनम्। आदित्य इति त्रयक्षरं प्रतिहार इति चतुरक्षरं तन्मिथुनम्। उद्गीथ इति त्रयक्षरमुपद्रव इति चतु-

क्षरं त्रिभिस्त्रिभिः समं भवत्यक्षरमतिरिच्यते त्र्यक्षरं तत्समम् । निधनमिति त्र्यक्षरं तत्सममेव भवति, तानि ह वा एतानि द्वाविंशतिरक्षराणि । एकविंशत्यादित्यमाप्नोत्येकविंशो वा इतोऽसावादित्यो द्वाविंशेन परमादित्यात्त्रयति तत्त्राकं तद्विशोकम् । आप्नोतीत्यादित्यस्य जयं परो ह्यस्यादित्यजयात्त्रयो भवति य एतदेवं विद्वानक्षरसम्मितमतिमत्यु सम्पिबं सामोपास्ते सामोपास्ते" ।

पुनः पञ्चविधस्य मनआदिनाम्न उपासनं तत्रोक्तं यथा "मनो हिङ्कारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो निधनमेतद्गायत्रं प्राणेषु प्रोतम् । स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, महामनाः स्यात्तद्व्रतम् । अभिमन्थति स हिङ्कारो धूमो जायते स प्रस्तावो ज्वलति स उद्गीथोऽङ्गारः शान्ति स प्रतिहार उपशाम्यति तन्निधनं संशाम्यति तन्निधनमेतद्यदनरमग्नौ प्रोतम् । स य एवमेतद्यदनरमग्नौ प्रोतं वेद ब्रह्मवर्चस्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, न प्रत्यङ्ङग्निमाचामेन्न निष्ठीवेत्तद्व्रतम् । उपमन्त्रयते स हिङ्कारो रपयते स प्रस्तावः स्त्रिया सङ्गेते स उद्गीथः प्रतिरभ्यते स प्रतिहारः कामं गच्छति तन्निधनं पारं गच्छति तन्निधनमेतद्वामदेव्यं मिथुने प्रोतम् । स य एवमेतद्वामदेव्यं मिथुने प्रोतं वेद मिथुनीभवति मिथुनान्मिथुनात् प्रजायते सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, न कांचन परिहरेत्तद्व्रतम् । उद्यन् हिङ्कारः उदितः प्रस्तावो मध्यन्दिन उद्गीथोऽपराह्णः प्रतिहारोऽस्तं यन्निधनमेतदादित्ये प्रोतम् । स य एवमेतदादित्ये प्रोतं वेद तेजस्व्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, तपन्तं न निन्देत्तद्व्रतम् । अभ्राणि समुत्पतन्ते स हिङ्कारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनमेतद्रूपं पर्जन्ये प्रोतम् । स य एवमेतद्रूपं पर्जन्ये प्रोतं वेद विरूपांश्च सुरूपांश्च पशूनवरुन्धे सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या वर्षन्तं न निन्देत्तद्व्रतम् । वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत् प्रतिहारो हेमन्तो निधनमेतद्राजमृतुषु प्रोतम् । स य एवमेवंराजमृतुषु प्रोतं वेद विराजति प्रजया पशुभिर्ब्रह्मवर्चसेन, सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, महद्व्रत निन्देत्तद्व्रतम् । पृथिवी हिङ्कारोऽन्तरिक्षं प्रस्तावो द्यौरुद्गीथो दिशः प्रतिहारः समुद्रो निधनमेताः शक्वर्यो लोकेषु प्रोताः । स य एवमेताः शक्वर्यो लोकेषु प्रोता वेद लोकी भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, लोकान्न निन्देत्तद्व्रतम् । अजा हिङ्कारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनमेता रेवत्यः पशुषु प्रोताः । स य एवमेता रैवत्यः पशुषु प्रोता वेद, पशुमान् भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, पशून्न निन्देत्तद्व्रतम् । लोम हिङ्कारस्त्वक् प्रस्तावो मांसमुद्गीथोऽस्थि प्रतिहारो मज्जा निधनमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतम् । स य एवमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतं वेदाङ्गी भवति नाङ्गेन विहिंसति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, संवत्सरं मज्ञो नाश्नीयात्तद्व्रतं मज्ञो नाश्नीयादिति वा । अग्निर्हिङ्कारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहारस्चन्द्रमा निधनमेताद्राजनं देवतासु प्रोतम् । स य एवमेताद्राजनं देवतासु प्रोतं वेदैतासामेव देवतानां सलोकतां सार्ष्टितां सायुज्यं गच्छति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, ब्राह्मणान्न निन्देत्तद्व्रतम्। त्रयी विद्या हिङ्कारस्त्रय इमे लोकाः स प्रस्तावोऽग्निर्वायुरादित्यः स उद्गीथो नक्षत्राणि वयांसि मरीचयः स प्रतिहारः सर्पा गन्धर्वाः पितरस्तन्निधनमेतत्साम सर्वस्मिन् प्रोतम् । स य एवमेतत्साम सर्वस्मिन् प्रोतं वेद सर्वं ह भवति । तदेष श्लोको भवति 'यानि पञ्चधा त्रीणि तेभ्यो न ज्यायः परमन्यदस्ति । यस्तद्वेद स वेद सर्वं सर्वा दिशो बलिमस्मै हरन्ति' सर्वमस्मीत्युपासीत तद्व्रतम्" ।

एवं सामावयवानां तत्तद्भक्त्योपासनमुक्त्वा उद्गीथरूपावयवस्य ओङ्कारादिदेवोपासनमुक्तं तत्रैव यथा "ओमित्येतदक्षरमुद्गीथः तद्वा एतस्मियुनं यद्वाक्च प्राणश्च साम च । तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम् । आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते । तद्वा एतदनुज्ञाक्षरं यद्ध किञ्चा-

नुजानात्योमित्येव तदाह एषो एव सङ्कर्षियदनुज्ञा समर्द्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते । तेनेयं त्रयी विद्या वर्त्तते ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यै महिम्ना रसेन । तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद । नाना तु विद्या चाविद्या च । यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्य्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति"। तस्य प्राणदृष्ट्या उपासन मुक्त तत्रैव 'देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्यास्तद्ह देवा उद्गीथमाजहुरमेनेनानभिभविष्याम इति । त ह नासिक्य प्राणमुद्गीथमुपासाञ्चक्रिरे तं ह्यासुराः पाप्मना विविधुः तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्धः । अथ ह वाचमुद्गीथमुपासाञ्चक्रिरे तां ह्यासुराः पाप्मना विविधुस्तस्मात्तयोभयं वदति सत्यञ्चानृतं च पाप्मना ह्येषा विद्धा । अथ ह चक्षुरुद्गीथमुपासाञ्चक्रिरे तद्ह्यासुराः पाप्मना विविधुस्तस्मात्तेनोभयं पश्यति दर्शनीयं चादर्शनीयं च पाप्मना ह्येतद्विद्धम् । अथ ह श्रोत्रमुद्गीथमुपासाञ्चक्रिरे तद्ह्यासुराः पाप्मनः विविधुस्तस्मात्तेनोभयं शृणोति श्रवणीयञ्चाश्रवणीयञ्च पाप्मना ह्येतद्विद्धम् । अथ ह मन उद्गीथमुपासाञ्चक्रिरे तद्ह्यासुराः पाप्मना विविधुस्तस्मात्तेनोभयं सङ्कल्पते सङ्कल्पनीयञ्चासङ्कल्पनीयञ्च पाप्मना ह्येतद्विद्धम् । अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे तं ह्यासुरा ऋत्वा विध्वंसेरते सर्य्यथाश्मानमाखणमृत्वा विध्वंसेत । एवं यथाश्मानमाखणमृत्वा विध्वंसत एवं ह वै स विध्वंसते य एवं विदि पापं कामयते यश्चैनमभिदासति स एषोऽश्माखणिः । नैवैतेन न सुरभि न दुर्गन्धि विजानात्यपहतपाप्मा ह्येष तेन यदश्नाति यत्पिबति तेनेतरान् प्राणानवति । एतमु एवान्ततोऽवित्वोत्क्रामति व्याददात्येवान्तत इति" । अङ्गिरस्त्वेन तस्योपासन तत्रैवोक्तम् यथा ।

"तं ह्याङ्गिरा उद्गीथमुपासाञ्चक्र एतमु एवाङ्गिरस मन्यन्ते अङ्गानां बहुसः । तेन त ह दृङ्क्षतिरुद्गीथमुपासाञ्चक्र एतम् एव दृङ्क्षतिं मन्यन्ते वाग्वि दृङ्क्षतो तस्या एष पतिः । तेन तं ह्यायास्युद्गीथमुपासाञ्चक्र एतमु एवायास्यं मन्यन्त आयास्ादयदयते । तेन तं ह वको दाल्भ्यो विदाञ्चकार । स ह नैमिषीयाणामुद्गाता बभूव स ह स्वैर्यः कामागागायति । आगाता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यध्यात्मम् अथाधिदैवतं य एवासौ तपति तमुद्गीथमुपासीतोद्यन् वा एष प्रजाभ्य उद्गायति । उद्यंस्त्रोभयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति य एवं वेद । समान उ एवायञ्चासौ चोष्णोऽयमुष्णोऽसौ स्वर इतोममाचक्षते स्वर इति प्रत्याक्षर इत्यमुं तस्माद्वा एतमिममुमुद्गीथमुपासीत" ।

तस्य व्यानत्वेनोपासनं तत्रैव यथा

"अथ खलु व्यानमेवोद्गीथमुपासीत यद्वै प्राणिति स प्राणो यदपानिति सोऽपानः । अथ यः प्राणापानयोः सन्धिः स व्यानो यो व्यानः सा वाक् । तस्माद्प्राणन्नपानन्वाचमभिव्याहरति । या वाक् तत्साम तस्माद्प्राणन्नपानन्नृचमभिव्याहरति यर्क्तत्साम तस्माद्प्राणन्नपानन् साम गायति यत्साम स उद्गीथस्तस्मादप्राणन्नपानन्नुद्गायति । अतो याग्यन्यानि वीर्य्यवन्ति कर्म्माणि तानि मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्नपानंस्तानि करोत्येतस्य हेतोर्व्यानमेवोद्गीथमुपासीत" ।

उद्गीथाक्षराणां प्राणादित्वेनोपासनं तत्रोक्तम् ।

"अथ खलूद्गीथाक्षराण्युपासीत उद्, गी थ" इति प्राण एवोत्, प्राणेन ह्युत्तिष्ठति वाग्गी, वीर्त्तो ह गिर इत्याचक्षते अन्नं धम्, अन्ने हीदं सर्वं स्थितम् । द्यौरेवोत्, अन्तरिक्षं गीः, पृथिवी धम्, आदित्य एवोत्, वायुर्गीरग्निर्धम्, सामवेद एवोत्, यजुर्वेदो गीः, ऋग्वेदस्थं, दुग्धेऽर्कं वाग्वोहं यो वाचो दोहः अन्नवानन्नादो भवति य एतान्येवं विद्वानुद्गीथाक्षराण्युपास्त उद् गी थ इति"।तस्य प्रणवत्वेनोपासनं तत्रैव "अथ खलु य उद्गीथः स प्रणवः स उद्गीथ इति होवाचैतदनाद्वैवापि दुरुद्गीतमनुसमाहरतीत्यनुस आहरतीति" । तस्य परोवरीयस्त्वेनोपासनं तत्रोक्तं यथा

"त्रयो ह वै उद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति ते होचुरुद्गीथे वै कुशला स्मो हन्तोद्गीथे कथां वदाम इति । तथेति समुपविविशुः स ह प्रवाहणो जैवलिरुवाच भगवन्तावग्रे वदतां ब्राह्मणयोर्वदतोर्वाचं श्रोष्यामीति । स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच हन्त त्वा पृच्छानीति पृच्छेति होवाच । का साम्नो गतिरिति स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य का गतिरित्यन्नमिति होवाचान्नस्य का गतिरित्याप इति होवाच । अपां क गतिरित्यसौ लोक इति होवाच असुष्य लोकस्य का गतिरिति न स्वर्ग लोक

मतिनयेदिति होवाच स्वर्गं वयं लोकं सामाभिसंस्थापयामः स्वर्गसंस्तावं हि सामेति । तं ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाचाप्रतिष्ठितं वै किल ते दाल्भ्य ! साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति । हन्ताहमेतद्भगवत्तो वेदानीति विद्धीति होवाच अस्य लोकस्य का गतिरित्ययं लोक इति होवाच अस्य लोकस्य का गतिरिति न प्रतिष्ठां लोकमतिनयेदिति होवाच प्रतिष्ठां वयं लोकं साम-भिसंस्थापयामः प्रतिष्ठासंस्तावं हि सामेति । न ह प्रवाहणो जैवलिरुवाचान्तवद्वै किल ते शालावत्य ! साम, यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति हन्ताहमेतद्भगवत्तो वेदानीति विद्धीति होवाच । अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम् । स एष परो वरीयानुद्गीथः स एषोऽनन्तः परोवरीयो ह्यस्य भवति परोवरीयसोह लोकान् जयति य एतदेवं विद्वान् परोवरीयांसमुद्गीथमुपास्ते । तं ह नैमतिनिर्धन्वा शौनक उदरशाण्डिल्यायोक्त्वोवाच यावत्त एनं प्रजायामुद्गीथं वेदिष्यन्ते परोवरीयो हैभ्यस्तावदस्मिँल्लोके जीवनं भविष्यति । तथा मुष्मिँल्लोके लोक इति स य एतमेवंविद्वानुपास्ते परोवरीय एव ह्यास्मिँल्लोके जीवन भवति तथाऽसुष्मिँल्लोके लोक इति लोके लोक इति" उद्गीथस्य देवताऽपि तल्लोक्या "अथ हैनमुद्गातोपससादोद्गातः या देवतोद्गीथमन्वायत्ता ताञ्चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति स भगवानवोचत् कतमा सा देवतेति । आदित्य इति होवाच सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैः सन्तं गायन्ति मेघा देवतोद्गीथमन्वायत्ता ताञ्चेदविद्वानुद्गास्यो मूर्धा ते व्यपतिष्यत्कपोऽस्य भवेति"। अत्राकाशादित्यशब्दौ ब्रह्मपरौ आकाशस्त्रिलिङ्गादित्यादि" भा० सू० भा० व्यवस्थापितम् ।

उद्गोर्ण त्रि० उद्+गृ-क्त । १उद्गते २उद्गमिते । "प्रथमादर्शियामेतदुद्गोर्णसुरायुधम्" कुमा० "वलय कुलिशोद्घट्टनोद्गीर्णतोयम्" मेघ० । [गुडाद्गमिः स्मृतिः

उद्गूर्ण त्रि० उद्+गुरो-क्त । उद्यते उत्तोलिते "उद्गूर्णल

उद्ग्रथित त्रि० उद्+ग्रन्थ-क्त । उत्क्षिप्य ग्रथिते

उद्ग्रन्थ त्रि० उद्गतोग्रन्थात् निरा० ब० । १उन्मूले २खण्डनोन्मूले । उद्+ग्रन्थ-घञ् । २उत्क्षेपणे पु० ।

उद्ग्रभण न० उद्+ग्रह-ल्युट् वेदे ह्रस्व वा भः । १उद्धरणे २ऊर्द्ध विक्षेपे दाने च "प्रतिमन्त्रञ्चोद्ग्रभणं तत्रं स्तिन्" कात्या० १६,५,११, भत्वाभावे उद्ग्रहणम् यत्र । "तस्योद्ग्रहणायैव स्यात्" शत० ब्रा० १४,५,४,६ ।

उद्ग्राभ पु० उद्+ग्रह-घञ् वा वेदे ह्रस्व भः । १उद्धरणे २ऊर्द्ध विक्षेपदाने च । "वाजस्य नाप्रसव उद्ग्राभेणोदग्रभीत्" यजु० १७,६२, "उद्ग्राभेण ऊर्द्ध विक्षेप्त्रा दीयते तद्ग्रभणम् दानम्" वेददी० । भत्वाभावे उद्ग्राहोऽप्यर्थे २वादभेदे च । उद्ग्राहमल्लः ।

उद्ग्राहिणी स्त्री उद्+ग्रह-णिनि ङीप् । पाशाख्यरज्जौ स्वार्थे कन् अतइत्त्वम् । उद्ग्राहिणकाख्यत्र ।

उद्ग्राहित त्रि० उद्+ग्रह-णिच-क्त । १उपन्यस्ते २वद्धे ३उद्गीर्णे, ४प्रत्यायिते, ५आहिते च मेदि० ।

उद्घ पु० उद्+हन-अप् नि० । १हस्तपुटे, २वक्त्रौ, ३कवाये, ४प्रशंसायां ५प्रशस्ते च "पित्रायादृग्गुरोपघ्नानुद्घान संघसमागताम्" भट्टि० । अस्य च प्रशंसावचनतया जातिवाचकेन "प्रशंसावचनैश्च" पा० समासे जातिवाचकस्य पूर्वनिपाते गवोद्घः अजोद्घ इत्यादि "उद्घादयश्च नियतलिङ्गा न तु विशेष्यलिङ्गाः" सि० कौ० ।

उद्घट्टन न० उद+घट्ट-ल्युट् । उद्घर्षणेन चालने । युच् । उद्घट्टनापि तत्रार्थे स्त्री । "तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयम्" मेघ० ।

उद्घन पु० ऊर्द्धं निवेश्य हन्यतेऽत्र उद्+हन-आधारे अप् नि० । काष्ठादिलक्षणसाधनेऽधःस्थकाष्ठादौ यदुपरि निधाय काष्ठादिकं हन्यते तत्र । "लौहोद्घनघनस्खलन्ति ललितायघनां स्त्रियम्" भट्टि० ।

उद्घर्षण न० उद्+घृष-ल्युट् । दृढकाष्ठिकठिनादि द्रव्यैः गात्रादिमार्ज्जने । "उद्घर्षणं तु विज्ञेयं करङ्कोटमलापहम्" सुश्रु० "शिरामुखविविक्तस्य त्वक्स्थस्यानेन तेजनम् । उद्घर्षणोत्सादनाभ्यां जायेयातामसृग्भयम्" सुश्रु० । घञ् उद्घर्षोऽप्यत्र पु० ।

उद्घस न० उद्+घस कर्म्मणि अच् । मांसे शब्दर० ।

उद्घाट पु० उद्घाट्यते प्रच्छादितवस्तु दर्शनार्थमत्र उद्+घट-णिच-आधारे अच् । प्रच्छादितस्य परावृत्य दर्शनार्थोद्घाटनाधारे राजमार्गादिपार्श्वे मञ्चभेदे (चौकीघर)

उद्घाटक पुंन० उद्+घट-णिच-ण्वुल् । कूपात् जलोद्धरणार्थे (अरहट्) (घुरना) इति ख्याते यन्त्रभेदे । उद्घाटनकारिणि त्रि० णिनि तत्रैव स्त्रियां ङीप् । "उद्

घाटिनी कुड्किका" प्रसन्नरा० करणे ल्युट्। उद्घाटन तत्साधने न०। भावे ल्युट्। उद्घाटन प्रतिबन्धनिरासे, कृतबन्धस्य बन्धापकरणे च न० (खोला)।

उद्घाटित त्रि० उद्+घट-णिच्-क्त। १अपावृते आच्छादनरहिते प्रकाशिते आवरणरहिते कृतोद्घाटने।

उद्घाटितज्ञ पु० उद्घाटितं प्रकाशितं यथा तथा जानाति ज्ञा-क। विष्णौ।

उद्घात पु० उद्+हन-घञ्। (ठोकरलागा) १प्रतिघाते। "यथावदुद्घातसुखेन मार्गम्" रघुः। "यथावदुद्घातसुखेन सोऽध्वना" माघः। "उद्घातिनो भूमिरिति रश्मिसंयमनात्" मल्लि०। "प्राणेन प्रेर्यमाणेन अपानः पीड्यते यदि। गत्वा ऊर्द्धं निवर्त्तेत एतदुद्घातलक्षणम्" इत्युक्ते २प्राणवायुनाऽपानाभिघाते। नाभिमूलात् प्रेरितस्य वायोर्वैरिच्यमानस्य शिरस्यभिहननमुद्घात इत्युच्यते। ३आरम्भे "उद्घातः प्रणवोयासाम्" कुमा० "आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः" रघुः। ४उक्तयुक्ते ५मन्त्रे ६शास्त्रसम्बन्धारम्भे।

उद्घुषित त्रि० उद्+घुष-रवे क्त। १कृतोद्घोषे २प्रकटिताभिप्राये वाक्ये न० अमरः तु उद्घुष्टः। उद्घुष्टे मेदि०।

उद्घोष पु० उद्+घुष-घञ्। उच्चशब्दकरणे "दोषोद्घोष भ्रूविभेदावज्ञाक्रोधेङ्गितादिकृत्" मा०द०।

उद्ग्र पु० उद्गयति उद्+दृग्य-अच्। (मस्तकटंगके उकुच) कीटभेदे।

उद्दण्ड त्रि० दण्डोद्यमनं नियमनम् उत्क्रान्तोदण्डम् अत्रा०स०। १प्रचण्डे। उन्नतो दण्डो यस्य। २उन्नतदण्डयुक्ते त्रि० "उद्दण्डपद्म रुद्दण्डिकाणाम्" रघु०। "उद्दण्डध्वजकाञ्चनः" हितो०। प्रा०स०। ३उन्नतदण्डे पु०

उद्दण्डपाल पु० उन्नतदण्ड उद्दण्डः सन् पाल्यते पालकर्मणि घञ्। उन्नतदण्डाकारे १सर्पभेदे २मत्स्यभेदे च मेदि०

उद्दन्तुर त्रि० उन्नते। १उन्नते २उद्वदन्वान्विते च।

उद्दान न० उद्+दो-भावे ल्युट्। १बन्धने अमरः "उद्दाने क्रियमाणे तु मत्स्यानां तत्र रज्जुभिः" भा०शा०१३७अ० २उद्यमे ३चूडायां ४बाडवानले ५मध्ये ६खण्डे च पु०विश्व०

उद्दाम त्रि० उद्+दम-क। अतिदमिते।

उद्दाम त्रि० उद्गतं दाम्नः अच्समा०। १बन्धनरहिते, "गन्धस्तुतमुदामो वने मत्त इव द्विपः" भा०व०१४६अ०। अप्रतिनियमे २स्वतन्त्रे ३अत्युच्चे च। "उद्दामानि प्रयतति शिखायेन्द्रभिर्यौवनानि" मेघ० "तदत्याकाश गङ्गाया स्रोतस्युद्दामदिग्गजैः" रघुः उत्कृष्टं श्रेष्ठं दाम पाशाख्यमस्त्रं यस्य। ४वरुणे पु० ५गम्भीरे त्रि० "उद्दामभावपिशुनामलवद्गुणाख्यानि" भाग०। ६स्कन्दभेदे पु० "अदितेर्युगलं ततः सप्तरेफाद्यदा दण्डद्वयं प्रयातो भवेदुद्दण्डकः। प्रतिचरणविष्टद्वरेफाः क्षुरस्यार्क्षेव व्यालजीमूतलोलाकरोटदामयङ्काद्यः" इति छन्दः०।

उद्दाल पु० उद्+दल+णिच्-अच्। १बकुलवृक्षे, २वनकोद्रवे "भोज्याः पुराण्यश्यामाकनीवारोद्दालयावजाः" सुश्रु०

उद्दालक पु० उद्दलयति भूमिमुद्भिनत्ति+उद्+दल-णिच्-ण्वुल्। १वनकोद्रवे उत्पन्ने तु गिलाजत्वित्यादिपक्षस्य "मङ्कोरदूषकश्यामाकोद्दालकादीनां विरुद्धगुणच्छेदनीयानाञ्च द्रव्याणां विधिवदुपयोगः" "अथ सर्वेषां प्राणिनामयमाहारार्थं वर्ग उपदिश्यते। तद्यथा रक्तशालिषष्टिकगवेधुकनीवारकुलत्थकपोतकप्रमोदककालकाशनकपुष्पकर्दमककर्कटकनाम्नां तण्डुलगन्धकलमशालिवारकोद्दालकश्यामाकगोधूमवेणुयवादयः" इति च सुश्रुतः। आयोदधौम्यशिष्ये आरुणौ २ऋषिभेदे। तस्य तत्नामकत्वप्राप्तिः भा० आ० ३अ० उक्ता "यथा एतस्मिन्नन्तरे कस्मिंश्चिदृषिधौम्योनामायोदधौम्यस्य शिष्यास्त्रयो बभूवुः उपमन्युरारुणिर्वेदश्चेति। स एकं शिष्यमारुणिं पाञ्चाल्य प्रेषयामास गच्छ केदारखण्डं बधानेति। स उपाध्यायेन सदिष्ट आरुणिः पाञ्चाल्यस्तत्र गत्वा तत् केदारखण्डं बद्धुं नाशक्नत्। स तत्र क्लिश्यमानोऽपश्यदुपाय भवत्वेवं करिष्यामीति। स तत्र संविवेश। केदारखण्डे शयाने च तथा तस्मिंस्तदुदकं तस्थौ। ततः कदाचिदुपाध्याय आयोदौ धौम्यः शिष्यानपृच्छत् क्व आरुणिः पाञ्चाल्यो गत? इति। ते तं प्रत्यूचुर्भगन्! प्रेषितो गच्छ केदारखण्डं बधानेति। स एवमुक्तास्तान् शिष्यान् प्रत्युवाच तस्मात् तत्र सर्वे गच्छामो यत्र स गत इति। स तत्र गत्वा तस्याङ्गानाय यत्नमकार। भो आरुणे! पाञ्चाल्य क्वासि वत्स! एहीति। स ततस्तूष्णीमुपाध्यायवाक्यं तस्मात् केदारखण्डात् सहसोत्थाय तस्योपाध्यायस्योपतस्थे। प्रोवाच चैनमयमस्म्यत्र केदारखण्डे निःसरमाणस्तदकमवारणीयं संरोद्धुं संविष्टो भगवन्कञ्चन सुप्त्वैव सञ्चसा विदार्य्य केदारखण्डं भवन्तमुपस्थितः। तदभिवादये भगवन्मात्ताप्तं भवान् यमर्थमकरवाणीति। स एवमुक्त उपाध्यायः प्रत्युवाच यस्मात् भवान् केदारखण्डं विदार्योत्थितः तस्मादुद्दालक एव

नाम्ना भवान् भविष्यतीति उपाध्यायेनात्मगृहीतः"। "उद्दालकोऽहरणिः श्वेतकेतुः पुत्रमुवाच" छा०उ० "उद्दालकादुद्दालकोऽस्यादहरत्" इति ह०उ०।

उद्दालकपुष्पभञ्जिका स्त्री० उद्दालकानां पुष्पाणि भञ्जन्ते यत्र क्रीड़ायाम् ब०व्र०। क्रीड़ाविशेषे यत्र उद्दालकपुष्पभञ्जनं क्रियते तस्यां क्रीड़ायाम्।

उद्दालकव्रत न०उद्दालकं पापनाशकं व्रतम्। पतितसाविलीकस्य कार्य्ये वशिष्ठोक्ते व्रतभेदे "पतितसाविलोक उद्दालकव्रतं चरेत्। द्वौ मासौ यावद्येन वर्त्तयेन्नासं मासिकेनाष्टरात्रं वृतेन षड्रात्रमयाचितं त्रिरात्रमभ्यक्षोरात्रमुपवसेत् इति"वशिष्ठः। मिता०या०वि० उद्दालव्रतमित्येव पाठः संक्षिप्तग्रन्थे उद्दालकेति पाठः प्रामादिकः।

उद्दालकायन पु० उद्दालकस्य गोत्रापत्यं फक्। ऋषिभेदे श्वेतकेतौ। तस्य तत्पुत्रत्वमुद्दालकशब्दे उक्तम्।

उद्दालवत् पु० उद्दालो मूलेदारभेदः प्रकाशस्थानतया विद्यतेऽस्य मतुप्। उद्दालके ऋषौ। "यवमान् ऋषिरुद्दालवान् धानावांश्च" यत०ब्रा० ११,२१,८।

उद्दास पु०उद्द+दास-घञ्। उत्पीड़ने ततः बहु०अस्त्यर्थे मतुप् इनिर्वा। उद्दासवत् उद्दासिन् तद्वति त्रि० स्त्रियां ङीप्।

उद्दित त्रि० उद्द+दो-क्त। बद्धे भरतः

उद्दिष्ट त्रि०उद्द+दिश-क्त। १उपदिष्टे, २अभिलषिते "तत्समुद्दिष्टं कर्म" संक्षिप्तसारः छन्दःशास्त्रोक्ते निर्द्धारितगुर्वादिस्थितिकभेदस्य प्रस्तारे कतमसंख्यकत्वज्ञानार्थे २उद्दावभेदे न०। तत्प्रकारो यथा "उद्दिष्टं द्विगुणानाद्यादुपर्यङ्कान् समालिखेत्। लघुस्था ये तु तत्राङ्काः सैकैर्मिश्रितैर्भवेत्" इत्तर०। आद्यात् आद्यवर्णमारभ्य उपरि यथोत्तरं द्विगुणान् द्विगुणान् अङ्कान् समालिखेत् तत्र लघुवर्णोपरिस्थाङ्कैर्मिलितैः एकेन युक्तैः उद्दिष्टं स्यात्। यथा त्र्यक्षरप्रस्तारे मध्यगुरुको भेदः प्रस्तारे द्वित्वसंख्यक इति प्रश्ने यथोत्तरं द्विगुणान् द्विगुणान् अक्षरसंख्यया अङ्कान् दद्यात् तत आद्यलघूपरिस्थेनैकाङ्केन तृतीय लघूपरिस्थचतुरङ्केन योगे पञ्चाङ्कः एकेन युक्तः षडङ्कः संपद्यते एवञ्च षष्ठोऽयं भेदस्तृत्तरम्। एवमन्यत्र कल्प्यम्। सर्वगुरुकभेदे तु लघुवर्णाभावात् योजकाङ्काभावेन एकमात्रेण योगेनाङ्केन प्रथमोभेद इत्युच्येयम्। मात्राछन्दे उद्दिष्टं विस्तरभयान्नोक्तमाकरे द्रष्टव्यम्।

उद्दीपक त्रि० उद्द+दीप-णिच्-ण्वुल्। उद्भावके प्रकाशके।

उद्दीपन न० उद्द+दीप-णिच्-ल्युट्। १प्रकाशने, २उत्तेजने च। ल्यु। अलङ्कारोक्ते रसाद्युद्दीपके "उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये" "रसाद्युद्बोधकाहेतवे विभावाः काव्यनाट्ययोः। आलम्बनोद्दीपनाख्यौ तस्य भेदौ द्वौ स्मृतौ" आलम्बनस्य चेष्टाद्या देशकालादवस्था" सा०द० उक्ते आलम्बनस्य श्वेष्टादौ विभावे यथा चन्द्रालोके रसे "चन्द्रचन्दनरोलम्बकुवलाद्युद्दीपनं मतम्" काव्ये "विज्ञताकारवाक्चेष्टं यदालोक्य कृसेज्जनः। तदालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम्"। कल्पे "गोऽश्वोऽज स्यादिभावः स्याच्चोद्यमालम्बनं मतम्। तस्य दाढ्यादिकावस्था भवेदुद्दीपनं पुनः"। वीरे "आलम्बनविभावास्तु विजेतव्यादयोमताः। विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः"। भयानके "यत्काद्युत्पद्यते भीतिस्तदालम्बनं मतम्। चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः"। जुगुप्सायाम् "दुर्गन्धमांसपिशितमेदांस्यालम्बनं मतम्। तत्रैव कृमिपातादयुद्दीपनमुदाहृतम्"। अद्भुते "पीतवर्णो, वस्तु लोकातिगमालम्बनं मतम्। गुणानां तस्य महिमा भवेदुद्दीपनं पुनः"। शान्ते "परमात्मस्वरूपं वा तस्यालम्बनमिष्यते। पुण्याश्रमहरित्वेलतीर्थरम्यवनादयः। महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः" सा०द०।

उद्दीप्त त्रि० उद्द+दीप-क्त। प्रकाशान्विते।

उद्दीप्र पु० उद्द+दीप्-रन्। १शुण्ठ्यौ वाच २उद्दीप्ते त्रि०।

उद्दृप्त त्रि० उद्द+दृप-क्त। उद्धते गर्व्वान्विते

उद्देश पु० उद्द+दिश+घञ्। १अनुसन्धाने, २अन्वेषणे, ३अभिलाषे ४उपदेशे च। आधारे घञ्। ५उपदेश्यदेशे "यथोद्देशं संज्ञापरिभाषम्" या०परिभाषा। व्याख्यातैषा नागेशेन "उद्देशमनतिक्रम्य यथोद्देशम्। उद्देश्य उपदेश्यदेशः। अधिकरणसाधनत्वात्। यत्र देशे उपदिश्यते तद्देश एव वाक्यार्थबोधेन गृहीतसत्तया गृहीतपरिभाषार्थेन च सर्वत्र शास्त्रे व्यवहारः। देशयोश्चारयत्काल एवात्र शास्त्रे व्यवक्षियते। तत्तद्वाक्यार्थबोधे जाते भविष्यति किञ्चिदनेन प्रयोजनमिति ज्ञानमात्रेणासन्नध्यानाद्यपेक्षिप्रतिपत्त्यपेक्षोऽयम्" इति "इदितः"पा०१,३,११ सूत्रे कैयटः। केचित्तु परिभाषाविषये "तस्मिन्"पा०१,१,६६ इत्यादिवाक्यार्थबोधे अग्नेर्भोनिर्देशादि कोति पर्य्यालोचनायां सकलतद्विध्युपस्थितौ सकलतत्संस्काराय गुणभेदं परिकल्प्य कथाक्रमतश्चैव नियमः। कार्य्यकालपक्षे तु तिपाद्यानामप्युपस्थितिरिति विशेषः। एतदेवाभिप्रेत्य "अधिकारो नाम त्रिप्रकारः क्वचिदेवेदेश्यस्यः सर्वशास्त्रमभिव्याप्नोति यथा प्र-

दीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयतीति"''यत्री स्याने" [१,१,७६ इति पा०सूत्रे भाष्य उक्तम् । अधिकारग्रन्थेन पारार्थ्यात् परिभाषाप्युच्यते ।''क्वचित्परिभाषारूप''इति कैयटः । दीपो यथा प्रभाहारा सर्वतेजप्रकाशक एवमेतत्सूत्रबुद्धिजननद्वारा सर्वशास्त्रोपकारकमिति तत्तात्पर्यम् । एतच्च पञ्चहत्वसाधारणं भाष्यं, पञ्चहत्वेऽपि प्रदेशैकवाक्यतायां दृतः प्रतीतेः । तत्रैतावान्विशेषः । यत्रोद्देश्ये परिभाषादेशे सर्वविधिसम्बन्धभावात्मभेदं परिकल्प्य तैरेकवाक्यतापरिभाषणम् । तदुक्तं''क्ङिति च" १,१,५ पा० इति सूत्रे कैयटेन । ''यत्रोद्देश्ये प्रधानान्यात्मसंस्काराय संनिधीयमानानि गुणभेदं प्रयुञ्जन इति''। कार्यकाले तु तत्तद्विधिप्रदेशे परिभाषानुद्धोकतेति । अत्रैकदेशस्य इत्यनेन तत्र तत्र तत्तद्भावापि तत्तद्धस्यत्वं धारयति यथा व्यवस्थितानां कार्याणामनेकदेशगमनेऽपि न तत्तद्देशीयत्वव्यवहारः किं तत्रिजनदेशीयत्वव्यवहार एव तद्वत्" ।

ईदंसंक्षेपे "एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरोमया" गीता "समासकथनमुद्देशः इति सुश्रुतोक्ते ७तत्पुरुषाधिकरणभेदे । उत्कृष्टोद्देशः प्रा०स० । ७ऽवकृष्टदेशे च "नवमे नन्दनोद्देशे न चैत्ररथसंश्रये"रामा० । "अस्ति क्वचिद्वनोद्देशे" स्त्रियो०भूरिप्रयोगः ततस्तसिल् । उद्देशादित्यादौ अव्य०।

उद्देशक पु० उद्+दिश-ण्वुल् । १उपदेशके २उद्धारणवाक्ये च । "अत्रोद्देशक इति" स्त्रीका० भूरिप्रयोगः । ३प्रकृष्टे "उद्देशकालापवदिष्टराशिः" स्त्रीका० दृष्टकर्मग्रन्थे ६६१पृ० दृश्यम् । "उद्देशेन पूजाभिसन्धिना रोपितः वनु । पूजाद्यभिसन्धिना रोपिते वृक्षादौ "चैत्यमायतने बहुविधोद्देशकवृक्षयोः" त्रिका० इति केचित् उद्देश्यशब्देन बहुव्रीहौ कप् इति तु न्याय्यम् ।

उद्देश्य त्रि०उद्+दिश-ण्यत् । १अभिसन्धेये यमुद्दिश्य विधेयप्रवृत्तिस्तत्किम् २अनुवाद्ये । उद्देश्यविधेयभावश्चैवं "अनुवाद्यमनूद्यैव न विधेयमुदीरयेत्" इति नियमात् उद्देश्यवाचकस्य प्राक् प्रयोगः यथा पर्वतो वह्निमान् । वह्निः पर्वतो वह्निरेवोद्देश्यत्वं पर्वतवृत्तित्वं तत्र विधेयम् । अतएव"न्यक्कारोऽयमेव मे यदरयः" इत्यादौ अयंपदस्य उद्देश्यवाचित्वादौ प्रयोगौचित्येन परतः प्रयोगात् वाक्यगतविधेयाविमर्शदोष इति समर्थितमालङ्कारिकैः । ''इदमिदंत्व इति'' पा० सूत्रेऽपि तथैव भाष्यकृताऽऽलोच्य मङ्गलार्थमेव तथाप्रयोग इत्युक्तम् यथा ''एतदेकमाचार्यस्य मङ्गलार्थं श्रूयताम् । माङ्गलिक आचार्योभवतः शाब्दौघस्य मङ्गलार्थं इदमित्थम्भावादित्यत्र प्रयुङ्क्ते । मङ्गलादीनि च शास्त्राणि प्रथन्ते वीरपुरुषवत्' इत्यादीनि भवन्त्यायुष्मत्पुरुषाणि च अध्येतारस्तद्वियुक्ता यथा स्युरिति । सर्वत्रैवं हि व्याकरणे पूर्वोच्चरितः संज्ञी परोच्चारितः संज्ञेति "अदेङ् गुणः" इति यथेच्छालक्षणे । उद्देश्यविधेयभावेनान्वयस्थले विवक्षया उभयलिङ्गवचनानुसारेण प्रयोगः यथा वेदाः प्रमाणं भवन्ति भवन्ति वा ।''अजानि तन्त्रेण निजायशोयुगं द्विकाखवङ्गाश्चिकुराः शिरःस्थिताः" "मुखश्रोत्रनासरोपि मनोभुवा तदुपमाः कुसुमान्यखिलाः शरा:" इति नैषधे उभयथैव प्रयोगः । व्युत्पत्तिवादे तु गदाधरेण उद्देश्यवचनानुसारेणैव वचनादिप्रयोग इति मङ्गतायासेन व्यवस्थापितं तच्च तत एवावसेयम् । "उद्देश्यप्रतिनिर्देश्यातिरिक्तविधेयत्वात्"सा०द० । उद्देश्यमेव प्रतिनिर्दिश्यम् प्राग् विधेयस्योद्देश्यतया पुनर्निर्देशकर्म इत्यर्थः यथा "उदेति सविता ताम्रस्ताम्र एवास्तमेति च" इत्युदाहृतौ प्राक् विधेयस्य ताम्रस्य अस्ततागुणविधानार्थं पुनः प्रतिनिर्देशात् कथितपदत्वं न दोषायेति तदाशयः । तदभावे तस्य दोष इति बोध्यम् ।

अनुवाद्यता च प्रमाणान्तरसिद्धस्य किञ्चिद्धर्मविधानार्थम् पुनरुपन्यासता यथा पर्वतोवह्निमान् इत्यादौ पर्वतरूपोद्देश्यस्य सिद्धत्वेऽपि वह्निमत्त्वरूपधर्मविधानार्थमुपन्यासः । ततो भावे तल् । उद्देश्यता स्त्री त्व । उद्देश्यत्व न० । विधेयताविशेषे स्त्री च अनुमितौ शाब्दबोधे च विशेष्यतारूपा प्रवृत्तौ तु स्वजनकेच्छाविषयत्वरूपा "स्वर्गकामो यजेतेत्यादि" वाक्यजनितेष्टसाधनताज्ञानतः स्वर्गफलोद्देशेनैव यागे प्रवृत्तेः इति स्वर्गस्य तत्रोद्देश्यता एवमन्यत्रापि बूम । इच्छाविषयत्वे च "अवच्छेदावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे" गदा० । [मितदोषभेदे

उद्देश्यासिद्धि स्त्री ईत० । अनुमितिप्रतिबन्धके अनुमितिविशेषे ।

उद्देहिका स्त्री उद्गतो देहोऽस्य कप् अत इत्त्वम् । कीटभेदे कारा० ।

उद्(द्यो)द्योत पु० उद्+द्युत-घञ् वा दस्योः । शिखिप्रकाशे "त्रिभिर्नेत्रैः कृतोद्द्योतं त्रिभिः स्कन्धैरिवोदितैः" भा० अनु० १४ अ० । "निरवद्यविद्योद्द्योतेन द्योतितस्वतोऽयमर्थः" दायभा० उद्+द्युत-णिच्-अच् । २किरणावलोक्याख्याने ३नागेश्वरतीर्थे काश्यदक्षेश्वराख्याने

४महाभाष्यप्रदीपव्याख्याने च ग्रन्थे पु० ५उदक्कोतके त्रि०

उद्द्राव पु० उद्-द्रु-घञ्। १पलायने अमरः। उत्कृष्टो द्रावोयस्य प्रा०ब०। २उत्कृष्टगतियुक्ते। "यते स्वाहा धावते स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा" यजु०२२,८, 'उद् अधिकोद्रावोयस्य सउद्द्रावः" वेददी०"उदि अयतियौति प्रुद्रुवः" पा०उत्पूर्व्वकादेव घञ् विधानात् केवलात्तु "ह्रदोरप्" पा० अप्येव। तेन तथाविधकल्पनं निर्मूलमेव। तत्र संज्ञाया कर्त्तरि घञ् इत्येवोचितम्।

उद्धत पु० उद्-हन-क्त। १राजभल्ले। २वाक्यादिदण्डके, ३अविनीते, ४प्रगल्भे ५उद्यते च त्रि०। "परिगतोऽवलदुद्धतबाहुधिः" भट्टिः "मदोद्धताः प्रत्यनिलं विचेरुः" कुमा० "सहजचापलदोषसमुद्धतः" "जलावरुद्धोद्धतचित्रभानुरंरुक्षताम्" प्रचुरोद्धतध्वजविलम्बिवाससः "अयानुद्धतसद्भटः" माघः। ५क्षतोल्लेखने च। "उत्तरत आहवनीयस्योद्धतावोक्षिते सिक्तोपकीर्णे परिहृते प्रागग्रारे पिण्डं निदधात्योषधय इति" कात्या०१६ १,१४, "परिहृते उद्धते क्षतोल्लेखने अवोक्षिते सिक्ते" यजु०११,४७मन्त्रे वेददी०। ततो भावे घञ्। औद्धत्य न०। तल्। उद्धतता स्त्री, त्व, उद्धतत्व न०,तद्भावे भाक्त्वाद्यौ।

उद्धतमनस्कत्व न०उद्धतं मनोयस्य कप् तस्य भावः त्व। अभिमाने गर्वे ग्रन्थचन्द्रिका।

उद्धति स्त्री उद्-हन-गतौ-क्तिन्। १उद्धतौ २उद्धतौ। हन-आघाते क्तिन्। २पाषाणादिनाऽऽघाते(ठोकरलामा)"अभूतलस्खलितया निरुद्धतिस्खलावतीर्णोऽपि न लक्ष्यते रथः" यजु०। [रेभिः" भट्टिः।

उद्धम त्रि०उद्-धमा-क. धमादेयः। ध्मातग्रन्थे "ध्मनीनामुद्धमे

उद्धमचूड़ा स्त्री उद्धम-चूडे! क्रियते यस्यां क्रियायाम् मयू०स०। चूडां प्रति उद्धमानार्थनिर्देश्यक्रियायाम्। एवं उद्धरचूड़ा उद्धमविधमा अपि मयू० स०। तत्तत्क्रियार्थं निर्देश्यक्रियायाम्। [र्थम्" भट्टिः।

उद्धय त्रि०उद्-धेट-य। उद्धृत्य पानकर्त्तरि। "मधूनामुद्धयं

उद्धरण न० उद्-हृ-भावे ल्युट्। १क्षतौ, २वमने, ३क्षयशुद्धौ, ४उन्मूलने ५उत्तारणे। "दिनानि दोषोद्धरणोचितस्य"रघुः। "तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्" वायुपु०। "कण्टकोद्धरणे नित्यमातिष्ठेत् यत्नमुत्तमम्" भट्टः। ६उत्त्यापने। "प्रतिकर्मोद्धरणसंप्रहृष्टे" कात्या० १,२,२६ "आहवनीयदक्षिणाग्न्योर्गार्हपत्याद्युद्धरण' कर्त्तव्यम्"भर्त्तृः। ७उद्धृत्य हरणे परिवेषणे च। "ब्रह्मणेवोद्धरणं वामयोर्वाम्" कात्या०४,१,१०, "उद्धरणं परिवेषणम्" कर्कः। ८बर्हिर्निष्क्रयणे। "दिवैव प्रदक्षिणोद्धरणे" कात्या० ०१६,४, उद्धरणं बर्हिर्निष्क्रयणम्" कर्कः। ९उत्पादने। "आहवनं यजमानरूपे तत एवोद्धरणम्" कात्या० २५, १,५, "तत्र वाहवनीयोद्धरणम्" कर्कः। आग्नेयोद्धारग्रन्थे तत्प्रकारः ६१ पृ० उक्तः। कर्मणि ल्युट्। १०वान्तेऽन्नादौ।

उद्धरणीय त्रि०उद्-हृ-कर्मणि अनीयर्। १उन्मूलनीये २उत्त्यापनीये ३आहरणीये च। तव्य उद्धर्त्तव्योऽप्यत्र त्रि०।

उद्धरावसृजा स्त्री उद्धर अवसृज क्रियतेऽसौ यस्यां क्रियायाम् मयू०स०। उद्धरणावसर्जनार्थनिर्देश्यक्रियायाम्।

उद्धर्त्तृ त्रि०उत्-हृ-तृच् स्त्रियां ङीप्। १उद्धारकारके २उन्मूलके ३तारणकारके च। "विधोतभर्तुस्तु पथि चौरोद्धर्त्तुरीतके" वा०ङीप्। स्त्रियां ङीप्। ण्वुल्। उद्धारक उद्धार्थे त्रि०

उद्धर्ष पु०उत्कृष्ट उद्भूतोवा हर्षः प्रा०स०। १उत्कृष्टे २हर्षे उद्भूतहर्षे च। उद्भूतोहर्षः यस्य प्रा०ब०। ३जातहर्षे त्रि० "उद्धर्षय मघवन्नायुधानि" यजु०७।४२ "उद्धर्षय उद्भूतहर्षयुक्तं कुरु" वेददी० नामधातूद्धर्षम्। तत्र हेतुणिजन्तरूपमत्रेव ग्राह्यम्।

उद्धर्षण न०उद्-हृष-णिच-ल्युट्। १हर्षयुक्तकरणे २प्रोत्साहने च "हितसुहृदर्षणं चैव उवाच प्रथितं वचः"रामा० "एवमेतन्महाबाहो! यथा वदसि वानघ!। ज्ञातमुद्धर्षणं पूर्वम्" इत्यादिषु भा० आश्व० १७ अ० बहुशस्तत्र प्रयोगः। आधारे ल्युट्। २रोमाञ्चे हेम०।

उद्धर्षिन् त्रि०उद्-हृष-णिच्-णिनि। उद्धर्षकारके स्त्रियां ङीप्। सा च वसन्ततिलकाख्ये वर्णवृत्तभेदे। "उक्ता वसन्ततिलका तभजा जगौ गः। सिंहोन्नतेयमुदिता मुनिसप्तयेन। उद्धर्षिणीयमुदिता मुनिसैतवेन" ह०र०।

उद्धव पु०उद्-हु-आधारे अप्। १यज्ञाग्नौ,२उत्सवे अमरः। ३कृष्णदयिते यादवविशेषे च। उद्धवस्य यादवविशेषः। दक्षिणदेशवर्णने। "उद्धवो देवभागस्य, मङ्गलाग्र! श्रुतोऽभवत्। पश्चिमानां वरं प्राप्तोदेवश्रवसमुद्धवम्" हरिवं० २५अ०। "भारतीमाहितभरामवाप्तोद्धतमुद्धवः" माघः। भाग०११स्क० एवं प्रत्येव भगवतोक्तानोपदेशो वर्णितः स एव उद्धवसंवादत्वेन प्रसिद्धः पाद्मायणे च बहुदिने तत्पर्य्यन्ताध्येयता"यावदुद्धवसंवादं मर्त्यलोकं परित्यजेत्" इत्युक्तेः

उद्धवदूत न०उद्धवोदूतोयत्र। दूतत्वेन उद्धवं परिकल्प्य गो-

व्युत्पिरूपे काव्यभेदे उद्धवसन्देशोऽपि काव्यभेदे पु० ।

उद्धस्त त्रि० उत्तिष्ठतौ हस्तौ येन प्रा०व० । उत्तिष्ठहस्ते उद्धाहौ "उद्धस्तः क्षणपरुषविरप्रकाशो दुर्गन्धो भृशमशुचिस्तथाऽतिलोलः । बद्धाशो विजनकृमिप्रपूरालिसेवी व्याचेष्टन् भ्रमति हदन् पिशाचजुष्टः" सुश्रु० ।

उद्धान न० उद्धीयतेऽस्मिन्नग्निः धाञ्-आधारे ल्युट् । चूल्लाम् । कर्मणि ल्युट् । २वह्निने, ३उद्वहने च । [२वह्निते रमा०

उद्धान्त पु० उद्+धा-क्त । सद्मभेदे १फलिनि अमरः

उद्धार पु० उद्धियते उद्+धृ-भावे-घञ् । १मुक्तौ, २क्षणपटौ ३उद्धारणे । कर्मणि घञ् । सर्वधनादुद्धृत्य व्येयादिभ्योदेये ४अंशभेदे यथा चोद्धारस्तथा मनुना दर्शितः यथा "ज्येष्ठस्य विंशउद्धारः सर्वद्रव्याच्च यद्वरम् । ततोऽर्द्धं मध्यमस्य स्यात्तुरीयन्तु यवीयसः ।" "ज्येष्ठस्यैव कनिष्ठस्य संहरेतां यथोदितम् । येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्याद्मध्यमन्धनम् । सर्व्वेषान्धनजातानामादद्यादग्र्यमप्रजः । यच्च सातिशयं किञ्चिद्दशतश्चाप्नुयाद्वरम् । उद्धारो न दशवर्षाणि सम्भक्तानां सकर्मसु । यत्किञ्चिदेव देयन्तु ज्यायसे मानवर्द्धनम् । एवं सप्तकृतोद्धारे समानंशान् प्रकल्पयेत् । उद्धारेऽनुद्धृते त्वंशमियं स्यादंशकल्पना ।" अन्योऽपि विशेषः स्मृत्यन्तरे उक्तः किन्तु "तथोद्धारविभागस्तु नैव संप्रति वर्त्तते" मिता० स्मृत्युक्तेः पूर्वानीतोद्धारो नास्तीति सर्व्वनिबन्धकर्तॄणामैकमत्यात्तथोक्तम् "ज्यायसोऽभ्यधिकान्तराले येन श्रुतपदस्य परित्यागे यथा गां बधान अश्वमानयेत्यादौ आवापोद्धाराभ्यां गोशब्दस्य साधादिमानर्थः" सा०द० । अन्वयव्यतिरेकाभ्यामेवापोद्धाराविति तु तत्त्वम् । "जगन्नाथस्यायं सुरधुनि ! सप्तोद्धारसमयः" गङ्गास्तवटीकायां च "यत्र्यं सप्तकृतोद्धारं विक्रेयं वित्तवर्द्धनम्" मनुः "उद्धृतोद्धारमित्यस्य "वर्जनीयवर्जितम्" कुल्लू० व्याख्या । ७उत्कर्षे च "सगुणानामेव कर्मणामुद्धार उपजने" आश्व०श्रौ० १२,४,१४ "यस्मात् प्रधानकर्म्मणामुद्धारे उपजने उत्कर्षे च सगुणानामेव सर्वलोद्धरणम्" ना०द०

उद्धारण न० उद्+धृ+णिच्-ल्युट् । १उत्थापने 'लाङ्गूलोद्धारणोद्युरः' भा०व० १४७अ० । हृ-णिच् ल्युट् । २उद्धारसम्पादने ।

उद्धि पु०उद्+धा-कि । ऊर्द्धधारके । "पुरोडाशाः यथा अलरित्तमुद्धिः" अथ०८,६,२२, "उद्धारको दशरात्र उद्धिः पुरुषाभिमुखो यज्ञे" मत०ब्रा०१२,२,२,२ ।

उद्धुर त्रि० उद्गता धूरस्मात् प्रा०व० अच् समा० । १निरस्ते २भारशून्ये २हृष्टे । "प्रसक्ताक्षकृपश्चस्युरोद्धुरोरः" माघः । "जघनमंसबन्धोद्धुरम्" मालतीमा० । "यत्नवानपि तु श्रीमाङ्गूलोद्धारणोद्धुरः" भा०व० १४७ अ० । ४ उद्धे च "यस्यादुद्वहभुजं पितरस्तुरध्वनिमङ्गजनाहयातमानीय" दशकु० ।

उद्धूत त्रि० उद्+धू-क्त । उत्क्षिप्ते "उद्धूतसप्तार्च्चिर्जिनोभिरंशुभिः" माघः । "पुनानं पवनोद्धूतैः" रघुः । [२उत्कम्पने च ।

उद्धूनन न० उद्+धू-णिच्-ल्युट् भावे ल्युट् । १तत्क्षेपणे

उद्धूपन न० उद्+धूप-आयाभावपक्षे भावे ल्युट् । १द्रव्यविशेषेण ऊर्द्धसन्धापनरूपे व्यापारे (भावप्रदेशोया) "स्टष्ट्वोलूकपुरीषाणि कोशा कृत्तिनखाहतम् । दृषभस्य च रोमाणि योज्ञाय्युद्धूपनेऽपि च" सुश्रु० । (करणे ल्युट्) २तत्साधने द्रव्ये । "सर्षपाः सर्षपिर्म्मोको वचाकाकादनीहतम् । उद्धाजाविगवाश्वैव रोमाण्युद्धूपनं त्रियोः । स्टष्ट्वोलूकपुरीषाणि यवा यवफलो हतम् । सन्ध्ययोरुभयोः कार्य्यमेतदुद्धूपनं त्रियोः" सुश्रु० ।

उद्धूलन न० धूलिमुद्धूलयति उद्+धूलि-णिच् । उद्धूलयति ततः भावे ल्युट् । १धूलिवत्मर्दने २याज्ञार्थीपकरणभेदे च । (मशाखाचूर्णे) "चूर्णस्योद्धूलनं देयं भोज्ये क्षीरेक्षुसम्भवे । व्यञ्जनेषु च सर्व्वेषु शाकजेष्वम्लजेषु च । मांसमत्स्यभवेष्वेवं प्रलेहेक्षुरसादिषु । आदावेव पचेत् क्षेत्रे ततोऽग्निदूर्वं क्षिपेत् । वेसवारं सलवणं क्षिप्त्वा तत्र घृतं पचेत् । अर्द्धसिद्धे क्षिपेत्तक्रमथ वा दाडिमीरसम् । सिद्धे शाके च दातव्यं चूर्णमुद्धूलनस्य तत्" पाकशास्त्रम् ।

उद्धूषण न० उद्+धूष-ल्युट् । रोमाञ्चे हला०

उद्धृत त्रि०उद्+हृ-क्त । १उत्क्षिप्ते, २भक्षोज्झिते, ३उच्छलिते, ४पूर्वकृते, ५उच्छेदिते च । "दर्पाद्वा वाक्यैर्जिनेन दर्पितैः पयोधिरोधस्यमुद्धृतं रजः" नैष० "उद्धृतासि पितृकिना" हरिवंशे भाषा० । "पयोऽनुद्धृतसारङ्ग" "मृष्टेऽप्युद्धृततल्पलैः" आ०त०५० "उद्धर्त्तुमैच्छत् प्रस्थोद्धृतारिः" रघुः ।

उद्धृतपाणि त्रि० उत्तरीयात् उद्धृतः बहिष्कृतः पाणिर्येन । उत्तरीयबहिष्कृतहस्ते । श्राद्धाये भोजने चैव दक्षिणं पाणिमुद्धरेत् मनूक्तकर्म्मण्येव तथा भवनम् ।

उद्धृति स्त्री उद्+हृ-क्तिन् । १उत्क्षेपणे २उच्छलने च । "यस्योद्धृतिर्भ्रूक्षणमात्रं कृतान्तभ्रमिदर्शनम्" सुश्रु० ।

उद्धान न० उद्धमति वह्निरत्र उद्+धा-ल्युट् ।१ चूल्लाम्

उद्धा पु० उज्झ-क्यप् "भिद्योद्धौ नदे" पा०नि० । नदभेदे "शूद्रं भिद्योद्धवन्ध्रिभौ" भट्टिः "तोयदागमदधीद्धाभिद्यवोः" रघुः ।

उद्धन्धक पु० । (धोपा)वर्षसङ्करभेदे । "आयोगवेन विप्रायां जातास्त्वाभ्योपजोदिनः । तस्यैव नृपकन्यायां जातः क्षत्रिय उच्यते । क्षत्रियस्य नृपायान्तु जाता उद्धन्धकाः स्मृताः। निर्वेजनेयुर्व्याधाश्च अश्मधाश्च भवन्त्यतः" उशना ।

उद्धन्धन न० उद्+बन्ध-भावे ल्युट् । अङ्गतः मायादिना गलादिबन्धने । "उद्धन्धनमृता ये च गतिर्येषां न विद्यते । तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्" वायु पु० नवश्राद्धात्मके "विषमुद्धन्धनं चैव यच्चमन्निप्रवेशनम् । करिष्येन हि तान्सर्वान् पुनर्दृष्टिमितोत्सृजे" भा०व० ७अ० । "अन्यान्यु द्धन्धनभ्रष्टाः प्रपतज्ज्ञानयन्त्रयुताः । विषप्रपतनप्रायादात्मघातच्युताश्च ये । सर्वे ते प्रत्यवसिताः सर्वे धर्मबहिष्कृताः । चान्द्रायणेन शुद्ध्यन्तु प्रकृच्छ्रद्वयेन वा" प्रा०वि०धृतः । भावे घञ् उद्धन्धोऽप्यत्र पु० ।

उद्धा(द्धा)कु त्रि० उत्तोलितो(वा)बाकुर्वेन प्रा०त० । उत्तोलितबाहौ "प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः" रघुः ।

उद्बुद्ध त्रि० उद्+बुध-क्त । १विकसिते न्यायादिमते ज्ञातवस्तुनः संवन्धिज्ञानादिना २कृतोद्बोधने संस्कारे च । यथा कल्पितदर्शनात् अनुभूतकल्पितपक्षसंस्कारश्च उद्बोधकत्वे उद्बोधने कृते कल्पितपक्षः अर्थ्यते इति । २प्रबुद्धे ४जागरिते च "उद्बुद्धं च जगद्धात्री पूजयेद्दीपमालया" तिथ्या०पु० येन येन वस्तुना संस्कार उद्बुध्यते तथा उद्बोधकमपि वक्ष्यते । "उद्बुद्धकारणैः खैः खैर्बह्निभावं प्रकाशयेत्" सा०द० ।

उद्बोध पु० उद्+बुध घञ् । १किञ्चिद्बोधे न्यायादिमते स्मृतिजनने २संस्कारोद्दीपने च । "उद्बोधादिस्मृतेर्बोधः स्वाकारस्याभिलाषतः" "नन्वेवं राजादिरत्नाद्युद्बोधकारके लोष्टादिभिः स्वाभाविकानां रत्नाद्युद्बोधः" इति "रत्नाद्युद्बोधका लोष्टे विभावाः काव्यनाट्ययोः इति" च सा०द० ।

उद्बोधक त्रि० उद्बोधयति उद्+बुध-णिच्-ण्वुल् । १उद्दीपके २उद्बोधकारके ३कर्मणि पु० उद्देन सर्वेषां प्रबोधकत्वात्तस्य तथात्वम् । उद्बोधकानि च न्यायरत्नावल्यादिभिरुक्तानि यथा "प्रतिधानमनिष्टाभ्यासबिलङ्घनमनिष्टदर्शनपरिपाकाभ्यामितरथाज्ञानानर्थविरोधैकार्थविरोधातिशयप्राप्तिभ्यश्च दुःखदुःखे ह्यादेषबाधिते विवारानधर्माधर्मौ ।निमित्तेभ्यः" सू० "अरण्यनिलयुवर्त्ते निमित्तशब्दश्च इत्यात्मरं स्मृतश्च प्राक्तेभ्यो भेदेनान्वयः। प्रतिधानं मनसोविषयान्तरसञ्चारणम् । निबन्धः एकधर्म्युपनिबन्धनं यथा प्रमाणेन प्रमेयादिकरणम् । अभ्यासः संस्कारगाढत्वम् एतस्य यद्यपि नोद्बोधकत्वं तथापि तादृशे शीघ्रमुद्बोधकसमवधानं स्यादित्याशयेन तदुपन्यासः । अभ्यासोदृढतरसंस्कारः उद्बोधकत्वे नोक्तदूषितं केचित् । विक्रः व्याधं व्यापकस्य स्मारकम् । लक्षणं यथा कपिध्वजादि अर्जुनादेः । सादृश्यं देवदत्तादेः । परिपक्वः स्वीकारस्तस्य स्वस्वामिभावोऽर्थः तदेकतरेत्यन्यतरस्मारकम् । आश्रयाश्रितौ राजादितत्परिजनौ परस्परस्मारकौ । सम्बन्धोगुरुशिष्यभावादिः गोदृष्टन्यायात् पृथगुक्तः । आनन्तर्यं प्रोक्षणावघातादेः । वियोगोयथा दारादेः । एकार्थीभूते वाक्यिप्रभृतयः परस्परस्मारकाः । विरोधादहिनकुलादेरन्यतरेणापरस्मारणम् । अतिशयः संस्कारजनयनादिराचार्यादिस्मारकः । प्राग्निर्धनादेर्दातारं स्मारयति । व्यवधानभावरणं यथा खड्गादेः कोषादि । सुखदुःखयोरन्यतरेणापरस्य ताभ्यां तत्प्रयोजकस्य वा स्मरणम् । इच्छाद्वेषौ यद्विषयकतया गृहीतौ तस्य स्मारकौ । भयं स्मरणादेर्भयहेतोर्वा स्मारकम् । अर्थित्वं दातुः । याचादेः क्रिया वाक्यादेः, रागात्प्रीतेः पुत्रादेः स्मरणं, धर्माधर्माभ्यां जन्मान्तरानुभूतसुखदुःखसाधनयोः प्रागनुभूतसुखादेश्च स्मरणमिति उक्तेषु च किञ्चित्स्वरूपसत्किञ्चिच्च ज्ञातमुद्बोधकं शिष्यव्युत्पादनाय वाच्यं प्रपञ्चः" ह० ।

उद्भट पु० उद्+भट-स्मरणे-अच् । तरङ्गादेः प्रस्फोटनहेतौ १सूर्ये, तदाकारत्वात् २कङ्कपक्षे, ३श्रेष्ठार्थवे भक्षार्थवे, ४प्रवरे, च "प्रहेपहे सन्ति भटारणोद्भटाः" नैष० उद्भतो भटात् पञ्चात्" निरा०त०। पञ्चबर्हिभूते लोकप्रसिद्धे ज्ञातवक्तृके श्लोके ।

उद्भव पु० उद्+भू-भावे अप् । १उत्पत्तौ । "स्वर्गे यद्भवं सौख्यानां पद्मभे योगिनोद्भवः" वा०रा० । कर्तरि अच् । २उत्पत्तिमति । "दिव्यौषधसुतर्मणिराकरोद्भवः" "सोमोद्भवाश्च सरितो रसोमः" रघुः । "जुम्भायुद्दयोर्ऽग्निमतेन अध्ये सोमोद्भवाश्च सरन्निम्नगायाः" भट्टः। "विष्णुपादोद्भवा गङ्गा" पुरा० "सत्यमालोद्भवत्वात्ते भिन्ना अप्यनु भावतः" सा०द० । अपादाने अप् । ३उत्पन्नेऽपादाने । "अक्षमन्तव भूतानामुद्भवश्च भविष्यताम्" गीता । उद्भतो भवात् निरा० स० । ४संसारातीते ५विष्णौ पु० । "उद्भवः क्षोभणो देवः" विष्णुस० "प्रपञ्चोत्पत्त्युपादानकारणत्वात् उद्भवः, उद्भतः संसारादिति वा" भा० उभयथा वाक्यम् ।

ईश्वरतत्वे विशेषगुणगते जातिभेदे उद्भूतशब्दे विवृतिः।

उद्भावन न० उद्+भू–णिच्–ल्युट्। १कल्पने, २उत्पादने च उद्+भू+ल्युट्। ३चिन्तने ४उत्प्रेक्षणे च "उद्भावनमजर्ल्लनौ विदुरस्य मते स्थिताः" भा० आ० १४१ अ०

उद्भास पु० उद्+भास–भावे घञ्। उद्दीप्तौ। ततः अस्त्यर्थे "नैकाच्चारात् क्रतो जातेः सप्रत्ययाच्च तौ स्मृतौ" वार्त्ति० बहुरूपकाच्चरात् इनेरप्राप्तौ बाहा० पाठात् मतुप् इनि वा। उद्भासवत् उद्भासिन्–तद्युक्ते त्रि०। "विभूषणोद्भासि मिनद्मभोगि वा" कुमा० स्त्रियां ङीप्।

उद्भिज्ज पु० उद्भिनत्ति क्विप् उद्भित् तथा सन् जायते जन–ड कर्म०। भूमिमुद्भिद्य जाते १तद्गुल्मादौ "उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः" इति मनुः। पदा० योगार्थे च। "देहस्तुर्विधोद्भिज्जोर्ध्वं तत्पत्तिभेदतः। उद्भिज्जाः स्वेदजोण्डोत्थजरायुजाः। उद्भिद्य भूमिं निर्गच्छन्त्युद्भिदः स्थावराश्च याः" इति विभज्य तदुत्पत्तिप्रकारस्तत्र दर्शितः "उद्भिज्जाः स्थावरा ज्ञेयाः बीजगुल्मादिरूपिणः। तत्र सिद्धा जलैर्भूमेरुद्भूमित्व विपाचिताः। वायुना व्यूह्यमानासु बीजत्व प्रतियन्ति ते। तथाचोप्तानि बीजानि संसिक्तान्यम्भसा पुनः। उच्छूनतां स्फुटत्वं च मूलभावं प्रयान्ति च। तन्मूलादङ्कुरोत् पत्तिरङ्कुरात् पर्णसम्भवः। पत्रात्कलकलः काण्डः काण्डाच्च प्रसरः पुनः"। एतेषां च यथा पापभोगायतनदेहत्वात् देहत्वं तथाऽयोनिजशब्दे २४७५ पृष्ठे उक्तम् "शरीरजैः कर्मदोषैर्याति स्थावरतां नरः" या० स्मृतौ शारीरपापेन तेषां देहोत्पत्तिश्रवणात् भोगायतनदेहत्वसम्भवेयम्। अतएव शङ्खावस्याम् चेष्टाश्रयत्वं शरीरलक्षणतया "वृक्षादीनामपि चेष्टासत्त्वाच्चाग्नेः। न च वृक्षादीनां शरीरित्वे किं मानम्? इति वाच्यम् आध्यात्मिकवायुसम्बन्धस्य प्रमाणत्वात् तत्रैव किं मानम्? इति चेत् भानसतसंरोहणादिना तदनुमानात्" इत्युक्तम्। यथा च स्थावराणां स्वकर्मभोगदेहत्वम् तथाऽवरोहशब्दे ३४० पृष्ठे या० स्मृ० भाष्येण दर्शितम्। तेषां विभागोन्यायकन्दल्याम् दर्शितं यथा "स्थावराश्च यावतावनस्पतय इति" भा०। "तृणगुल्मवीरुदोषधय फलपाकान्ता गोधूमादयः, ये न पुष्पफलास्ते वृक्षा कोविदारप्रभृतयः लता गुडूच्यादयः। अतस्तन्त्रि वनस्पतिवनस्पतिभ्यां विशेषाद्वनस्पतिः केतकीपीलुपूरादयः ये विना पुष्पं फलन्ति ते वनस्पतय ओदुम्बरादयः"। न्या० क०। २भूमिमुद्भिद्य जातमात्रे त्रि० स्वार्थे कन्। "उद्भिज्जकं तृणं पूर्वं ततो गुल्मं ततो द्रुमः" भा० व० २१२ अ०

उद्भिद् पु० भूमिमुद्भिनत्ति उद्+भिद्–क्विप्। १इक्षुवेत्रगुल्मवल्लीलतारूपे पञ्चविधे स्थावरभेदे उद्भिज्जशब्दे उदा०। उद्भिनत्ति पशून्। २यागभेदे "उद्भिदा यजेत" श्रुतिः उद्भिदादिशब्दानां यथा कर्मनामधेयता व्युत्पत्तिसङ्गतिं जै० सू० भाष्ययोर्लक्षणा दर्शित यथा

"उक्तं समाम्नायार्थवत्त्वं तस्मात् सर्वं तदर्थं स्यात्" १,४,१, सू०। "उद्भिदा यजेत" "बलभिदा यजेत" "अभिजिता यजेत" "विश्वजिता यजेत" इति समामनन्ति, तत्र सन्देहः, किमु उद्भिदादयो गुणविधयः, आहोस्वित् कर्मनामधेयानि इति। कुतः संशयः? उभयथाऽपि प्रतिभाति वाक्यात्, उद्भिदा इत्येष शब्दो यजेतइत्यनेन संबध्यते, स किं वैयधिकरण्येन संबन्धमुपैति, उद्भिदा द्रव्येण यागमभिनिर्वर्त्तयेदिति, उत सामानाधिकरण्येन, उद्भिदा यागेन यजेत इति हेधाऽपि एतस्मिन् प्रतिभाति वाक्ये, यस्मात् भवति संशय।

किं तावत् प्राप्तम्? उक्तमस्माभिः समाम्नायस्तदर्थः, क्वचिदस्य भागोविधिः, योऽविदितमर्थं वेदयति, यथा 'सोमेन यजेत' इति क्वचिदर्थवादः, यः प्ररोचयन् विधिं स्तौति, यथा 'वायुर्वै क्षेपिष्ठा देवता' इति, क्वचित्मन्त्रः, योविदितमर्थं प्रयोगकाले प्रकाशयति, यथा 'बर्हिर्देवसदनन्दामि' इत्येवमादि, तत्रादुद्भिदादयोऽमीषां प्रयोजनानामन्यतमस्य प्रयोजनाय भवेयुः, तत्र तावत्सार्थवादः, वाक्यशेषो हि स भवति विधातव्यस्य, न च मन्त्रः, एवंजातीयकस्य प्रकाशयितव्यस्य अभावात्, पारिशेष्यात् गुणविधिः, उद्भिदुक्ता यागस्य विधीयते प्रसिद्धेरनुपहात्, गुणविधेरर्थवत्त्वात्, प्रवृत्तिविधेयकरत्वाच्च। न च, एषां यागार्थता लोकेऽवगम्यते! न च, वेदेन परिभाष्यते! अतोगुणविधयः। 'यदि गुणविधिः, न तर्हि कर्म विधीयते, अविहिते च कर्मणि

तत्र गुणविधानमनर्थकम्' । न इति ब्रूमः, प्रकृतौ ज्योतिष्टोमे गुणविधानमर्थवदुभविष्यति, यदि नामधेयं स्यात्, यावदेव यजेत इति, तावदेव उद्भिदा यजेत इति, न प्रकृतौ कश्चित् गुणविधेः स्यात्। गुणविधौ च गुणसंयोगात् अभ्यधिकमर्थं विदधत उद्भिदादयः यद्वा अर्थवन्तो भविष्यन्ति तस्मात् गुणविधय इत्येवं प्राप्तम्" भा० "अपि वा नामधेयं स्यात् यदुत्पत्तावपूर्वमविधायकत्वात्" १,४,२,सू०"अपि वा इति पक्षो विपरिवर्त्यते। नामधेयं स्यात् इति प्रतिजानीमहे, एवमविहितमर्थं विधास्यति ज्योतिष्टोमात् यागान्तरं, श्रुतिर्वैवं यागमभिधास्यति, इतरथा श्रुतिरुद्भिदादीनां वक्ष्यन्ती उद्भिदादिभतो लक्षयेत् 'उद्भिदा यागेन कुर्यादिति। यागेन कुर्यात् इति यजेतेत्यर्थः करणं हि यागः। उद्भिदादयपि हतीयानिर्देशात् करणं, तत्र उद्भिदा यागेन इति कर्मनामधेयत्वेन सामानाधिकरण्यसामञ्जस्यं, द्रव्यवचनत्वे मत्वर्थलक्षणया सामानाधिकरण्यं स्यात्। श्रुतिलक्षणा विषये च श्रुतिर्ज्यायसी। तस्मात् कर्मनामधेयम्। 'अनुप्रसिद्धं द्रव्यवचनत्वमपक्रूयेत, अप्रसिद्धं कर्मवचनत्वं प्रतिपद्येत' उच्यते, हतीयानिर्देशात् कर्मवचनता। कुतः ? करणवाचिनो हि प्रातिपदिकात् हतीया भवति, करणं च यागः, तेन यागवचनमिममनुमास्यामहे।

"नैतदुक्तं यदि हतीयानिर्देश इति उद्भिदादिभ्यः यज्ञेभ्यो यागे बुद्धिरुत्पद्यते, स्यादेतदेवं, न हि नो बुद्धिरुत्पद्यते, तस्मात् अयुक्तम्। हतीयावचनम् अन्यथा नोपपद्यते" इति चेत्, कामं नोपपादि, न जातुचित् अनवगम्यमानेऽपि यागवचनो भविष्यति, तस्मात् गुणविधयः। लक्षणेति चेत्, वरं लक्षणा कल्पिता, न यागाभिधानं, लौकिकी हि लक्षणा, रूढेऽप्रसिद्धकल्पनेति। अपि च यदि नामधेयं विधीयते, न यागः,अथ यागः, न नामधेयम्, उभयविधाने वाक्यभेदः" इति। उच्यते, न नामधेयं विधायिष्यते, अनुवादो हि उद्भिदादयः। कुतः प्राप्तिः ? इति चेत्। ततोऽभिधीयते, उक्तशब्दसामर्थ्यात् भिक्षशब्दसामर्थ्याच्च उद्भिच्छब्दः क्रियावचनः, उद्भेदनं प्रकाशनं पशूनामनेन क्रियते इत्युद्भित् यागः, एवमाभिमुख्येन जयात् अभिजित्, विश्वजयात् विश्वजित्, एवं सर्वत्र। अतः कर्मनामधेयम्। यत्त्वप्रवृत्तिविशेषकरोऽनर्थकः इति, नामधेयेऽपि गुणफलोपबन्धे नार्थवत्, तस्मात् कर्मनामधेयान्येवैतानीतरेतराणि—इति सिद्धम्" भा० गवामयने यत्ते सप्तममासिकोत्तमाभिप्लविकस्थाने २एकादशे दिने। "सप्तमस्य मासस्योत्तमयोरभिप्लवयोः स्थाने विषद्व्यूहोदयनात् उद्भिद्बलभिदौ" आश्व०श्रौ० १२, १,५,"सप्तमस्य मासस्य ये त्रयोऽभिप्लवाः तेषां द्वौ उत्तमाभिप्लवौ तयोः स्थाने विषद्व्यूहोदयनाद्रः उद्भिद्बलभिदौ च ते अहनी इत्येतानि हादशाहानि" नारा०१८। गवामयनयज्ञे विहतिः।

उद्भिद् पु० उद्+भिद्-क। १छत्राकौ पक्षुविशे स्थावरे। २उद्भेदके त्रि० "होता यक्षत्तनूनपातमुद्भिदम्" यजु० २८,२५ "उद्भिदं यज्ञफलानामुद्भेदकारम्" वेददी०।

उद्भिद्य त्रि० उद्+भिद्-क्य। १उत्पत्तौ कर्मणि क्य। २विदारणे दलने च। "योवनोद्भिद्यगंधवा"।

उद्भूत त्रि० उद्+भू-क्त। १उत्पन्ने "शिवलिङ्गतयोद्भूतः कोटिसूर्यसमप्रभः" ति०त० पु० "समुद्रमथनोद्भूतः" कालसमन्त्रः न्यायते २प्रत्यक्षयोग्ये "उद्भूतरूपं नयनस्य गोचरः" उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्रयः" भाषा०। उद्भूतत्वञ्च उद्भवापरपर्य्यायो रूपादिविशेषगुणगतोजातिभेदः कणा० वृत्तौ उक्तः यथा "अनेकद्रव्यसमवायात् रूपविशेषाच्च रूपोपलब्धिः" क०सू०। "तेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यातम्" सू०। "रूपगतोविशेषोरूपविशेषः तच्चोद्भूतमनभिभूतत्वं रूपत्वञ्च तच्चाद्रूपोपलब्धिः। नन्वेवं परमाणोर्द्व्यणुकस्य च रूपं स्यात्तेनेत्यत उक्तमनेकद्रव्यसमवायादिति अनेकपदं भूयस्त्वपरं तेनानेकानि भूयांसि द्रव्याणि आश्रयतया यस्य तदनेकद्रव्यं त्रसरेणुप्रभृति तत्समवायात्, घटादयोऽवयवद्वयारब्धाः परमपरयाऽनेकद्रव्याश्रया एव, रसगन्धादौ रूपत्वविरहात् चाक्षुषत्वाभावः चाक्षुषे तेजसि च उद्भूतत्वविरहात्, । उद्भूतः रूपादिविशेषगुणगतो जातिविशेष एव रूपत्वादिव्याप्यः। नन्वेवं शुक्लत्वसुरभित्वकटुत्वादिभिरपि परस्परमाश्रयानुपपत्तिरेव तत्तद्व्याप्यत्वानात्मकत्वेन तु कल्पनागौरवम् उद्भूतपदस्य नानार्थत्वस्थिति चेन्न वाङ्मनैकेन्द्रियग्रहणयोग्यगुणत्वस्यैवोपाधेरुद्भूतत्वात् तदुपाधिविरहस्यैवानुद्भूतत्वात्, । अनुद्भूतत्वाभाव एव उद्भूत इति वोचित्। तद्धि न्यूनं अनुद्भूतस्यान्येवं व्यवस्थापयितुमशक्यत्वात्। अतीन्द्रियत्वविशेषगुणत्वमनुद्भूतत्वमिति चेत् एवं तर्हि ऐन्द्रियकत्वविशेषगुणत्वस्यैवोद्भूतत्वापत्तेः। ऐन्द्रियकत्वाभावश्चक्षुर्दृक्कं किमिति चेत् तुल्यम्, विशेषगुणेष्वेकैकोद्भूतत्वं जातिः गुणगतजातौ परस्पर-

भावानुपपत्तिर्न दोषावेत्यपि वदन्ति । तेनेति रूपप्रत्यक्षज्ञानेनेत्यर्थः यथा रूपविशेषात् रूपवानभिभूतत्वोद्भूतत्वलक्षणात्, रूपोपलब्धिस्तथा रसविशेषात् रसवानभिभूतत्वोद्भूतत्वलक्षणात् रसोपलब्धिः एवमितरत्रापि योज्यम् । अनेकद्रव्यसमवायात्तिदेश्यः । घ्राणरसनत्वगिन्द्रियाणामनुद्भूतत्वाद्गन्धरसस्पर्शानामप्यप्रत्यक्षम् पाषाणादावनुद्भूतगन्धरसयोः। तद्भावे तयोरुपलम्भात् तयोः पाषाणादावुपलब्ध एव न तु स्पर्शः इत्येके । विभक्तावयवाभावद्रव्यरूपानुद्भूतत्वात्तदप्रत्यक्षम् एवं रसेऽपि । उष्णजले तेजोरूपस्पर्शानुद्भूतत्वात् अग्नेश्च अभिभवात् विततवर्षूरत्वमकादौ रूपरसस्पर्शानामनुद्भूतत्वादनुपलब्धः । कनकादौ रूपस्पर्शानुद्भूतमेव शुक्लत्वभास्वरत्वे परमभिभूते । रूपमप्यभिभूतमित्येके कनकप्रकृष्यन्तु रूपान्तरसंस्कार्यत्वात् । अभिभवश्च बलवज्जातीयप्रकृष्टतमप्रकृष्यं न तु बलवज्जातीयसम्बन्धमात्रम्, बलवज्जातीयसम्बन्धस्याप्रकृष्यनिरूप्यतया अप्रकृष्यस्यैवोपजीव्यत्वात् नचाप्रकृष्यप्रयोजकत्वेन बलवज्जातीय एवोपजीव्यः, अप्रकृष्यस्य प्रकृष्यप्रागभावस्य तदुत्पन्नाभावस्य वा तदप्रयोज्यत्वात् प्रकृष्यध्वंसस्य च तन्नाभावात् । तथापि तर्हि बलवज्जातीयप्रकृष्टतमप्रकृष्यमनुपपन्नमेवेति चेत् अस्त्येवं तथापि सजातीयस्य बलवत्त्वे दुर्वचत्वे वा तादृशसम्बन्धत्वे वा प्रकृष्याप्रकृष्ये एव प्रयोजके यथेति स एवाभिमतपदार्थः"।

उद्भूति स्त्री॰ उद्+भू–क्तिन् । १उत्पत्तौ । उत्पन्ना भूतिः । २उत्तमविभूतौ ३ऐश्वर्ये च । "उमा बभूवात्महितार्थिनी सती दृशे वयम् । वरः खलु स्वं क्षोभ एव तत्कृतोद्भूतये विधिः" कुमा०।

उद्भेद पु॰ उद्+भिद–अच् । १रोमाञ्चे । भावे घञ् । २उद्भिद्योत्पत्तौ ३प्रकाशे च । "उमाननोद्भेदरसेन हर्षजः" कुमा० । "तं बोधनोद्भेदविशेषकालम्" रघुः । "पुलकोद्भेदं सह किसलयैर्भूरुहाणां विशेषात्" मेघ० । "अम्भोद्भेदाद्वैदूर्यमारिणीव" माघः । "क्षितिरंह इवाकाशो बोधनोद्भेदसम्भवः" "यद्भोहि नखधोद्भेदलक्षदाशनखक्षतः" भा०द० । २भेदने च "गण्डोद्भेदं समाद्याद्य शिरालोपोत्थितोत्करः" भा०व०८५अ०। ख्युट् । उद्भेदनमप्यत्र न०। "नखोद्भेदं विधास्यामि वधयन्त्युत" भा० व०८८अ०। "उद्भेदनं प्रकाशनम्" उद्भिन्दे भरतः ।

उद्भोजन न॰ उद्+भुज–भावे ल्युट् । १उद्भुक्तभोजने । २बलनाम्नि भोजने । भावे ल्युट् । उद्भुक्तभोजनमत्र न॰

उद्भ्रान्त न॰ उद्+भ्रम–भावे क्त । १उद्भ्रमणे अम॰ स्वार्थे कन् । घूर्णितगतौ भक्तः । अन्तर्भूतण्यर्थे भावे क्त । २बाह्यमुद्भ्रम्य खड्गभ्रामणे । उद्+भ्रम–कर्त्तरि क्त । १भ्रान्तियुक्ते ४अर्द्धं भ्रमणकर्त्तरि च त्रि० । "भारोद्भ्रान्तकारोताः, रघु०

उद्य त्रि॰ वद–क्यप् । कथनीये "अनृतोद्यं न तत्साक्षि" मनुः । सुष्ठु पद एवास्य साधुत्वम् न पृथक्प्रयोग इति ।

उद्यत् त्रि॰ उद्+या–शतृ । उद्गच्छति "उद्यता अर्चिषि कामिनोऽस्मिन् तेन साक्षमनुष्ठितं पुनः" मा०प्र० "उद्यन् सवितृदाद्रुत वा पुरीषात्" यजु०२६,१२ । "नेजेतोद्यन्नादित्यम्" मनुः । स्त्रियां ङीप् । सा च २विद्युत्तिभेदे च सा च ताण्ड्य०ब्रा० दर्शिता

"तिसृभ्योऽङ्गिरोभ्यः स प्रथमया, तिसृभ्योऽङ्गिरोभ्यः स मध्यमया, तिसृभ्योऽङ्गिरोभ्यः स उत्तमयोद्यती लिहतो विद्युतिः" । "एकैकस्य साम्नः यत्र विभक्तयः प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनाख्याः, तत्र हिङ्कारस्त्रिभिरुद्गादिभिः सर्वत्र कर्त्तव्यः अतएव स्तुतस्तोमेऽत्युक्ते "साम्ने साम्ने हिङ्कुर्यादिति" तिसृभ्य इति "क्रियाजौपपदस्य च कर्मणि स्थानिनः" पा० कर्मणि चतुर्थी तिसृकृत्वो गातं हिङ्कुर्यात् एकवचनमतन्त्रम् उद्गातृदेवतोत्तेः" अतस्त्रयोऽप्युद्गातारो हिङ्कुर्युरित्यर्थः । एवमुत्तरत्रापि हिङ्कारविधायकेषु वाक्येषु योजना । स हिङ्करोति स हिङ्कर्त्ता प्रथमया लिहक्रिया गायेत् अयं प्रथमः पर्यायः । तिसृभ्यो हिङ्करोति स हिङ्कर्त्ता मध्यमया लिहक्रिया गायेत् अयं द्वितीयः पर्यायः, पुनरपि तिसृभ्यो हिङ्करोति स हिङ्कर्त्ता ह्यस्तोत्तमया अन्त्या तया लिहक्रिया गायेत् एषः तृतीयः पर्यायः । अनेन पर्यायेण लिहतृस्तोमः सम्पद्यते उद्गप्रकारेण लिहा वर्त्तत इति लिहत् स्तोमः तस्य विद्युत्तिरेवा उद्गाती अर्द्धं गच्छन्ती उक्तेषु पर्यायेषु प्रथममध्यमोत्तमक्रमेण अनुगमनादन्वर्थसंज्ञेयमेवा लिहतः प्रथमा विद्युतिः" भा० सायणं०भाष्ये माधवेनोद्गातीनामविद्युतेः प्रकारः स्पष्टं दर्शितो यथा "पठितानां नवानाञ्चां गानं लिभिः पर्यायैः कर्त्तव्यम् तत्र प्रथमपर्याये त्रिषु स्तोभेषु आद्याक्षिषु अयं, द्वितीये पर्याये मध्यमाः, तृतीये पर्याये चोत्तमाः । तिसृभ्य इति तृतीयार्थे पञ्चमी, हिङ्करोति गायतीत्यर्थः । एवं नवोद्गप्रकारोक्ता गीतिस्त्रिलृत्स्तोमस्य विद्युतिः (स्तुति-प्रकार-विशेषः), अस्याः विद्युतेरुद्गाती नामेति,भा० यद्यदयस्तोमेऽपरा उद्गाती विद्युतिः ता०ब्रा०दर्शिता यथा

"तिसृभ्यो द्विहरोति स पराचीभिः, पञ्चभ्यो द्विहरोति स एकया स तिसृभिश्च एकया, सप्तभ्यो द्विहरोति स तिसृभिस्च एकया स तिसृभिरुद्यतो यज्ञदत्तस्य विष्टुतिः" भा०"त्रिषु पर्यायेषूत्तरोत्तरसंख्योत्कर्षमेत्युद्यतो यज्ञदत्तस्य विष्टुतिरिति। त्रिषु पर्यायेषूत्तरोत्तरसंख्योत्कर्षमेतोत्युद्यतीत्युच्यते" भा०।

सप्तदशस्तोमस्यापराभ्युद्यतौ तत्रैव दर्शिता

"अथोद्यत्याख्यां सप्तदशस्तोमस्यापरां विष्टुतिमाह" भा०। "तिसृभ्यो द्विहरोति स पराचीभिः, पञ्चभ्यो द्विहरोति स एकया स तिसृभिश्च एकया, नवभ्योद्विहरोति स तिसृभिस्सतिसृभिश्च तिसृभिरुद्यतो सप्तदशस्य विष्टुतिः" भा०। 'तिसृभ्यः पञ्चभ्यो नवभ्य इति क्रमेण संख्याया ऊर्द्धं गमनमुद्यतौ ऊर्द्धं गच्छन्ती एतत्संज्ञा एषा सप्तदशस्तोमस्य विष्टुतिः" भा०।

अयं संक्षेपः गवामयने त्रिरुदादयः स्तोमाः विहिताः तेषां त्रिरुदादिस्तोमानां तिस्रोविष्टुतयः (यस्मिन्नेयमिति क्रमेण लक्षणानि) तत्र यद्भिरात्रमानसाधनस्य त्रिरुत्स्तोमस्य तिस्रो विष्टुतयः उद्यतौ कुसीदिनी परिवर्त्तिनी चेति तत्राद्या दर्शिता अन्ये तत्तच्छब्दे वक्ष्यते।

उद्यत त्रि० उद्+यम-कर्त्तरि-क्त। १उद्यमयुक्ते ज्ञतोद्यमे "आततायी वधोद्यतः" अमरः। भावे क्त। २उद्यमे न०। यमेर्नियमनार्थत्वे कर्मणि क्त। ३उत्तोलिते ४उद्यमिते "ग्रहक्लेज उद्यत आश्विनः" यजु०२६,५। "उद्यम्यते स्मोद्यतः" वेददी०। "पर्यायोद्यतकार्मुकौ" रघुः।

उद्यति स्त्री उद्+यम-भावे क्तिन्। उद्यमे। "वैश्वदेवानि जुहोत्यन्नमेवोद्यतिं" शत०ब्रा० १२,१,८,१।

उद्यम पु० उद्+यम-घञ् न ह्रस्वः। १प्रवासे प्रवत्तभेदे २उद्योगे। "निश्चम्य चैनां तपसे कृतोद्यमाम्" "यथाक्षेमा न नियन्तुरुद्यमात्" कुमा०। ३उत्तोलने च "विपदस्तोद्यमे ज्ञक्रमतिज्ञक्र निपातने" या०स्मृ०।

उद्यमन न० उद्+यम-ल्युट्। १उत्क्षेपणे २उत्तोलने।

उद्यमित त्रि० उद्+यम-णिच्-क्त। १उत्तोलिते २उद्यमाय प्रेरिते। "आत्मनोधर्मदोद्यमितानाम्" किरा०।

उद्यान पुंन० उद्वायतेऽत्र उद्+वा-आधारे ल्युट् ऊर्द्धं चादि। आरामे। तत्करण्यप्रकारादि आरामशब्दे ८०१पृ० उक्तम्। "वाप्युद्यानस्थितफरशिरस्त्रिकाधौतहस्ता" "उद्यानानां नवजलकणैर्यूथिकाजालकानि" मेघ०

उद्यानपाल त्रि० अद्यानं पालयति पाल-अण् उप०स०। (माली) उद्यानरक्षके "उद्यानपालस्तामाख्यदृतवस्तत्रपायते" कुमा०। ख्वुल्। उद्यानपालकोऽप्यत्र। स्त्रियां टाप् अतइत्त्वम्। "ततः प्रविशति उद्यानपालिका" मालविकाग्निमित्रनाटकम्।

उद्यापन पुंन० उद्+या-णिच्-ल्युट् ऋद्ध्यर्थादि। व्रतादिसमापने व्रतप्रतिष्ठायाम्। फेमाद्रौ व्रतखण्डे "उद्यापनं प्रवक्ष्यामि" इत्यारभ्य व्रतभेदे प्रयोगः। प्रतिष्ठा च कर्म्मान्तरं न तदङ्गमिति रघु०। अस्येतिकर्त्तव्यतासामान्यप्रकारः व्रततत्त्वादौ अनुसन्धेयः। विशेषतस्तु तत्तद्व्रतोक्तविधायवाक्येभ्योऽवसेयः विस्तरस्तु फेमाद्रौ व्रतखण्डे द्रष्टव्यः। तत्र तिथि० त० व्रतारम्भप्रतिष्ठयोर्विहितं कालमाह ज्योतिषे "गुरोर्भगोरस्तगाल्ये वार्धके सिंहके गुरौ। वक्रिजीवास्तविंशेऽह्नि गुर्वादित्ये दशाह्निके। पूर्वराद्यावनायातिचारिगुरुवत्सरे। प्रायायिगन्नृजीवस्य चातिचारे त्रिपक्षके। कन्याद्यङ्गत सप्ताहे मीनस्थेज्ये मकिरुचे। भानुलङ्घितके माघि त्रये राङ्कुयुते गुरौ। पौषादिकचतुर्मासे चरणाङ्कित वर्षगे। एकेनाङ्का चैकदिने द्वितीयेन दिनत्रये। तृतीयेन तु सप्ताहे माङ्गल्यानि शुभान्विताः। विद्यारम्भव्रतारम्भवेधौ चूडोपनयनोद्वहान्। तीर्थस्नानमनाद्यन्तं तथानादिस्थरेज्यम्। परीक्षाऽऽरामयत्तांश्च पुरश्चरणदीक्षणे। व्रतारम्भप्रतिष्ठा च स्टकारम्भप्रवेशने। प्रतिष्ठारम्भणे देवकूपादेर्वर्जयन्ति च। द्वात्रिंशद्दिवसाद्यन्ते जीवस्य भार्गवस्य च। द्वासप्तर्निशकल्पन्ते पादाद्ये द्वादश क्रमात्। अस्तात् प्राक् परयोः पञ्च गुरोर्भार्गवस्य च। पञ्च वृद्धोक्षयाद्ये तु भृगुजीवोदयादिकः। पादाद्ये तु दशाद्यानि वृद्धःशुक्रो दिनत्रयम्"। एवं व्रतारम्भप्रतिष्ठयोरुक्तकालोक्तेः सिंहस्थरवौ तदकर्त्तव्यतासत्त्वं साङ्गसमेऽपि स्फुरितादिदुष्टे तद्वर्जनस्यावश्यात्तस्य सिंहस्थरविकर्त्तव्यत्वेनैव निमित्तत्वात् तत्र स्फुरितादिकाभावे वक्ष्यते। सिंहस्थरविकालस्यागुद्विबोधकवाक्यस्य व्रतारम्भप्रतिष्ठाव्यतिरिक्तविषयकत्वेनाप्युपपत्तेः। "पूर्णे काले व्रतानां तु प्रतिष्ठां विधिवच्चरेत्। न तत्र कालनियमस्तत्र विघ्ने परादिके इति" वचनात् पूर्णकाले न समयाशुद्धिर्बाधिकेति केचित्। एतद्वचनस्यामूलकत्वमाकुरन्ये।

उद्याम पु० उद्यम्यतेऽनेन उद्+यम-करणे घञ् वा ह्रस्वः। ऊर्द्धनियमनसाधने रज्ज्वादौ। "शिक्यपार्श्वं प्रतिमुञ्चते

षड्द्यामं विश्वाङ्पाशोति" कात्या० १६,५,६, उद्गर्ङ्यं यम्यते नियम्यते यैस्ते उद्यामाः षड्द्यामारज्जवः जङ्घाकर्षणहेतवोयस्य" यजु० १२,१० ३मन्त्रव्या० वेददी० "षड् द्यामं भवति षड्दिशो मौञ्जं त्रिवृत् "संवत्सर एषोऽग्निर्यत्तयः शिक्याश्चतुर्भिर्हि संवत्सरः शक्नोति स्यात् यच्छक्नोति तच्छिक्याश्चतुर्भिरेवैनमेतद्विभर्त्ति षड्द्यामं भवति षड्ऋतवः" शत० ब्रा० ६,७,१,१६,१८,

उद्याव पु० उद+यु- अप् बाधित्वा "उदि अयतियौतिप्रत्ययः" पा० घञ्। जङ्घातोनिम्नभागे अनुदि तु अवेव।

उद्यास पु० उद+यस-घञ्। १उद्यमे कर्त्तरि संज्ञायां घञ्। २देवभेदे पु०। "आयासाय स्वाहा प्रयासाय स्वाहा संयासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा" यजु० १६,११, "आयासादयो देवविशेषाः" वेददी०।

उद्योग पु०न० उद+युज-घञ् अईचादि। १उद्यमे कर्म्मकरणार्थं प्रयासभेदे "उद्योगादनिष्टस्य सुखक्षयस्य धीमतः। क्षयेवानुगता तस्य नित्यं श्रीः सहचारिणी" नीति०। "यत्नादिविषयोद्योगकर्म्मणा मनसा गिरा" या०स्मृति०। "उद्योगं सर्व्व सैन्यानां दैन्यानामादिदेश ह" देवीभा०। भोजसेनवत् उत्तरपदलोपे २उद्योगपर्व्वणि च। "उद्योगः सैन्यनिर्याणं श्वेतोपाख्यानमेव च" भा०आ० १अ० "उद्योगे भरतश्रेष्ठः मध्ये कामगुणान्वितम्। भोजनं भोजयेद्विप्रान् गन्धमाल्यैरलङ्कृतान्" भा०स्वर्गा० ६अ०

उद्योगपर्व्वन् न० उद्योगस्य प्रतिपादकं पर्व्व। व्यासरचितभारतान्तर्गते पञ्चमे पर्व्वणि। "उद्योगपर्व्व वित्तेयमतऊर्द्धं महाद्भुतम्"। "उद्योगपर्व्व वित्तेयं पञ्चमं पुण्यसंज्ञितम्" तत्तत्पदोत्तान्तसुपवर्त्यं। "उद्योग पर्व्व निर्द्दिष्टं सन्धिविग्रहसञ्चितम्" भा०आ० १अ०।

उद्योगिन् त्रि०उद+युज-घिणुन्। उद्योगयुक्ते। "उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति। दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः" हितो०।

उद्योजक त्रि० उद+युज- ण्वुल्। प्रवर्त्तके।

उद्र पु० उनत्ति क्लिदति उन्द-रक्। जलविड़ाले। (उहिराल)

उद्रङ्क(ङ्ग) पु० सौभपुरे व्योमचारिपुरभेदे जटाधर।

उद्रथ पु० उद्गतोरथो यस्मात्। १रथशीले। उद्गतरथ तुल्यः पक्षो यस्य। ताम्रचूडविहङ्गे। मेदिनि०।

उद्रपारक पु० "इतराङ्गुलेः जातान् शृणु नागान् यथातथम्" इत्युपक्रम्य "भैरवोसुण्डवेटाङ्गः पिशङ्गश्चोद्रपारकः" भा०आ०५७अ० सर्पसत्रेऽहुतनागउक्ताः। [च

उद्रिक्त त्रि० उद्+रिच-क्त। १अतिशयिते,२अधिके, ३स्फीते

उद्रेक पु० उद+रिच-घञ्। १दर्पे, २अतिशये, ३उपक्रमे च। "गतोभस्यु द्रेकः प्रतिपत्तिमसौ चक्रवपुषा" पुष्पदन्तः। "प्रतीयते धनोद्रेको जनानामविजानताम्" भा०व० १६२ अ०। "स्नेहोरागश्च तन्त्रा च मोहोद्रेकश्च केवलः" भा०अनु०२अ०। ४महानिम्बे स्त्री राजनि०।

उद्रंशीय न० सामभेदे। "तदाकुरीर्ष्म एव वा एषा होत्रा यदच्छावाक्या यदच्छावाकमनुसन्तिष्ठत ईश्वरैर्वा भवितोरिति यद्यु कथं स्यात्तदैकधनश्चोद्रंशीयश्चान्ततः प्रतिष्ठाप्ये वीर्य्यं वा एते सामनी वीर्य्यएवान्ततः प्रतितिष्ठन्ति"। ब्रा० "अतोयदीयमुक्थम उक्थसंस्थं स्यात् उक्तदोषपरिहाराय तदैकधनं चोद्रंशीयं चोभे सामनी अन्ततस्तोयसवनस्यान्ते प्रतिष्ठाप्ये तदैकधनं ब्रह्मसाम उद्रंशीयमच्छावाक्यसामैत्येवं कर्त्तव्ये इत्यर्थः" सा० ब्रा० भा०।

उद्वत् त्रि०उद् उत्कर्षितस्वभावोऽस्यास्य वा मतुप् मस्य वः। १उत्कृष्टे २उन्नते च। "स उद्वतोनिवतोयाति वेविषत्" ऋ०३,२,१०। "उद्वतः उच्छ्रायवतः" भा०"उद्वत्स्वञ्चा अकृणोतना" १,१६१,११। "उद्वत्स्वञ्चतेषु" भा०।

उद्वत्सर पु०उत्क्रान्तोवत्सरविक्रान्तिं वान्द्रोमासोयत्र प्रा०ब०। वत्सरपञ्चकान्तर्गते वत्सरभेदे इदावत्सरहावद्वे विहितः इदावत्सरोऽप्यत्र।

उद्वपन न०उद्+वप-ल्युट्। १दाने २उत्क्षोलने (तोला)। "उखायामवोद्वपनमस्मिते पात्रे" "अनुदिते भक्षोद्वपनादि" कात्या० १६,६,१,२। उत्क्रान्तोवपनम् अत्या० स०। ३उत्पाटने च।

उद्वमन न० उद्+वम-ल्युट् उद्उपसर्गस्य धात्वर्थानुगमनात्तथात्व। वमने। उद्गारयत्वे विहितः।

उद्वयस् त्रि० उद्गतं वयोऽस्य यस्मात् प्रा०ब०। अक्षोत्पाटके वायौ "अपां रसमुद्वयसं सूर्य्ये सन्तं समाहितम्" यजु० ६ १, "उद्वत वयोऽस्य यस्मात् वायोः स उद्वया वायु वायुनैव हि धान्यानि निष्पद्यन्ते" वेददी०। उत्क्रान्तो वयः कालिकावस्थाम् अत्या०स०। अतिक्रान्त वयसि वृद्धे त्रि०।

उद्वर्त्त पु० उद्+वृत-घञ्। १अतिशये २आधिक्ये च। (उपचान) णिच्-घञ्। चूर्णविशेषैः २देहस्थमलाद्यपसारणव्यापारे।

उद्वर्त्तन न० उद्वर्त्यतेऽनेन उद्+वृत-णिच् करणे-ल्युट्।

शरीरनिर्मलीकरणद्रव्यादौ। चूर्णैरुद्वर्त्तनैः पालीं तैलाक्तामवचूर्ण्येत्" सुश्रु०। "नाकमेद्रक्तविण्मूत्रलोवनोद्वर्त्तनादि च" या०स्मृतिः। भावे ल्युट्। २द्रव्यभेदैः क्लेदापहारार्थे व्यापारे च। "उद्वर्त्तनं वातहरं कफमेदोविनाशनम्। स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम्" "यवान्नगव्याय्याङ्गैलिलेपोद्वर्त्तनं हितम्। यतावर्य्यश्च गव्याभ्यां प्रयस्यैरण्डजीवनैः" "ततोऽस्य बलातैलमभ्यङ्गार्थेऽवचार्य्यम् यवपिष्टमुद्वर्त्तनार्थे" सुश्रु०। ३विलेपने, ४घर्षणे च। उद्+वृत-ल्युट्। ५उत्पतने ६उल्लुण्ठने च "गात्रस्योत्तर्त्तनञ्चैव हितं संवाहनानि च" सुश्रु० "चटुलशफरोद्वर्त्तनप्रेक्षितानि" मेघ०।

उद्वर्त्तनीय त्रि०उद्वर्त्तनाय हितम् छ। उद्वर्त्तनसाधने द्रव्ये "दृष्टमुद्वर्त्तनीयं गोधूमचूर्णमिति" दुर्गाचार्यवृत्तिः।

उद्वर्त्तन न० उद्+वृध-ल्युट्। १अन्तर्धौ त्रिका०। णिच्-ल्युट्। २वृद्धिसम्पादने। ल्यु। ३वृद्धिसम्पादके त्रि०।

उद्वर्हण न०उद्+वर्ह-ल्युट्। १उन्मूलने २उत्पाटने ३उद्धरणे। क्त। उद्वर्हित उन्मूलिते त्रि०

उद्वह पु०उद्वहति जन्तुं नयति उद्+वह-अच्। पुत्रे "पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः" स्मृतेस्तस्य नरकत्राणकर्त्तृत्वात् तथात्वम् २वंशकारके "उदयमत्तमतङ्ग रघूद्वहात्" "पार्थिवोद्वहवृद्धहः" रघुः ३कन्यायां स्त्री जन्तुं प्रवहवायोरूपरिवहति अच्। वायुसप्तमार्गगते ४तृतीयस्कन्धस्थे वायौ पु०। आवहश्चन्द्रे विवृतिः "आवहः प्रवहश्चैव विवहश्च समीरणः। परावहः संवहश्च उद्वहश्च महाबलः। तथा परिवहः श्रीमानुत्पातभयदर्शिनः। एते ते क्षुभिताः सप्त मारुता गगनेचराः" हरि०२२६अ०। वा० भावे अप। ५विवाहे "यूढ्रोपनयनोद्वहान्" राजमा०।

उद्वहन न० उत्तोल्य वहनम्। उत्तोल्य स्कन्धादिना वहने। "लक्ष्मणेन देव्युद्वहनाय मेघः" कुमा० "कैलासनाथोद्वहनाय भूवः" "आपीनभारोद्वहनप्रयत्नात्" रघु० २विवाहे च "भुवः प्रयुक्तोद्वहनक्रियायाः" रघुः। "अपिदृश्यः पितादद्यात् सुतसंस्कारकर्म्मसु। पिण्डानोद्वहनान्नेषां तदभावेऽपि तत्कृतात्" स्मृतिः।

उद्वादन न० उद्+वद-णिच्-ल्युट्। १उच्चैरावेदने। "उपदीक्षी खेऽग्निषु नखनिकृन्तनाद्युद्वादनान्तं सान्निपातिकम्" कात्या०२५,१४,२, "उपदीक्षी नेदिदः स्नानग्नीन् विसृज्य नखनिकृन्तनाद्युद्वादनान्तं सान्निपातिकं कर्म कुर्य्यात्' कर्कः। उद्वादनप्रकारश्च मन०आ० १,२,१,१६, दर्शितो यथा "अथैक उद्वदति दीक्षितोऽयं ब्राह्मणोदीक्षितोऽयं ब्राह्मण इति निवेदितमेवैनमेतत्सत्रं देवेभ्यो निवेदयत्यथ महादेवोर्थीयोयत्तं प्रापदित्ययं युष्माकंकोऽभूत्तं गोपायतेत्येवैतदाह त्रिषुक्त्याह"। "उद्वदति उच्चैरावेदयति" भा० २उच्चैर्वाद्यकरणे च उद्+वच-णिच् ल्युट्। उद्वाचनमप्यत्र न० "यत्रेन्द्र उद्वाचनं लक्ष्मा चक्रे वधस्यदम्" ऋग्० ५,८,८,

उद्वान पु० उद्+वन-संभक्तौ घञ्। १उद्वमने णिच्-कर्म्मणि अच्। २उद्वामते त्रि० रायमुकुटः।

उद्वान्त न० उद्+वम-क्त। छर्दितोद्वमने उद्गीर्णे अमरः।

उद्वाप पु० उद्+वप-भावे घञ्। १उन्मूलने २उद्धरणे। ३भूयमाणे परिपरित्यागे पश्चात् "आवापोद्वापाभ्याम्" मुक्ता०। कर्म्मणि घञ्। उद्वाप्य सञ्जीयमाने ४भक्षार्हो। "कपालानि भक्षोद्वापे कुर्य्यात्" कात्या० ५,२,६, भक्षोद्वापशब्देन प्रत्यहं गार्हपत्यादिखरेभ्यो भक्षोद्धृत्य यो राशिः क्रियते स उच्यते कर्कः"। णिच् भावे अच्। ५लवणे।

उद्वाय पु० उद्+वा-घञ्। १उद्वासने २उपशमे। तत आचारे क्विप्। उद्वायति। "वायुर्वाव संवर्गोयदा वा अग्निरुद्वायति वायुमेवाप्येति" छा०उ०। "उद्वायति उद्वासनं प्राप्नोत्युपशाम्यति" भा०। गणव्यत्ययोवात।

उद्वास पु० उद्+वास-घञ्। स्वस्थानात्किञ्चिन्न्यूनप्राप्तौ "अमरावत्यादीनां पुरीणां द्विगुणोत्तरोत्करेण कालेनोद्वासः" छा०उ०भा०। ततः बलादिभ्यः मतुप् वा। उद्वासिन् उद्वासवत् तद्वति त्रि० स्त्रियां ङीप्।

उद्वासन न० उद्+वस-ल्युट्। १मारणे उद्+वस+णिच्-ल्युट्। २विसर्जने। स्रुगादीनाम् उद्वोत्तलनेनान्यत्र स्थापनरूपे अन्नप्राधानाङ्गे ३संस्कारभेदे "अथ उपस्तृण्य शाखाहार्य्ये परिस्तरणपात्रसंसादनप्रोक्षणाद्यनिर्वपणाधिश्रयणस्रुक्संमार्जनोद्वासनावेक्षणानि कृत्वाग्नीध्र उपस्तृण्य प्रसादाद्यपकरणम्" कात्या०६,१,२, "अग्नेरुद्वासनमाहवनीय आग्नेयः २,७,८, "आद्याधिश्रयणस्रुक्संमार्जनोद्वासनावेक्षणानि" कात्या० ८,६,३१, ४स्थानान्तरनयने च "दक्षिणतोऽधिश्रयणोद्वासने" २५,८,६, अस्मिन् अधिश्रयणस्थानोद्वासनं च गार्हपत्याद्दक्षिणस्यां दिशि हृर्य्यात्" कर्कः।

उद्वास्य अव्य० उद्+वस-णिच्-ल्यप्। विसृज्येत्यर्थे "उद्वास्य देवं खेधाम्नि" तत्त्वम्। २स्थानान्तरं नीत्वेत्यर्थे च कर्म्मणि यत्। ३उत्तोलनीये ४उद्धरणीये च त्रि०।

उद्वाह पु० उद्+वह घञ्। विवाहे स च ज्ञानविशेष इति रघु० येन ज्ञानेन ममेयं भार्या, अस्याय पतिरिति व्यवहारो भवति तादृशं ज्ञानम्। तच्च सम्बन्धभेदेनोभय निरूप्। चरमसंस्कार इति नव्यनैयायिकाः। चरमत्वञ्च संस्कारप्रागभावासहचरितत्वम्। द्वितीयविवाहस्य संस्कारत्वाभावात् तत्प्रागभावस्यत्वेऽपि आद्यविवाहे चरमत्वात्। तत्र च स्त्रियाः संस्कारकृपतया विवाहत्वव्यवहारः। यस्य पुरुषस्य विवाहात् प्रागेव चूडादिषु जातेषु मरणम् तत्र पुरुषे चूडादौ संस्कारप्रागभावासहचरितत्वात् अतिव्याप्तेर्नैतत् लक्षणम्। किन्तु शास्त्रविहितसंस्कारान्तिमत्वमेव चरमत्वमिति युक्तम्। शास्त्रेषु च संस्कारेषु विवाहस्यैवान्तिमतया विधानादितरेषामनन्तिमत्वादिनेति नातिप्रसङ्गः। यथाङ्गवनीयादौ यथा संस्काराद्देव तत्तच्छब्दप्रवृत्तिः एवं शास्त्रविधिना हुतसंस्कारयोरेव दम्पत्योरुद्वहशब्दप्रवृत्तिः। संस्कारश्चालौकिकत्वात् तत्तत्कर्मकलाप साध्य इति न आदानमात्रेण तत्सिद्धिः। अतएव "अविप्लुत ब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेदिति" या० स्मृतौ "उद्वहेत द्विजोभार्याम्" इत्यादौ च विधिरूपम्, आदानमात्रस्य प्रमाणान्तरप्राप्तत्वया तदंशे विधित्वासम्भवात् अप्राप्तप्रापकत्वेन विधित्वात् अतएव "पाणिग्रहणिकामन्त्रा नियतं दारलक्षणम्। तेषां नित्या तु विप्रेभ्यो विद्वद्भिः सप्तमे पदे" इति मनुना मन्त्रविशेषाणामेव भार्यात्वरूपसंस्कारप्रयोजकत्वमभिहितम्। आदानमात्रस्य विवाहत्वे तस्य च लौकिकत्वात् स्पर्शोतेतरद्रव्यवत् तद्दानविक्रयापत्तिःस्यात् "न विक्रयाधिसर्गाभ्यां भर्तुर्भार्या विमुच्यते" इति कात्यायनेन दानविक्रयाभ्यां भार्यात्वविगमाभावं वदता च विवाहस्य लौकिकत्वं निराकृतम्। किन्तु विवाहसंस्कारस्य वैधत्वे यथाविधानमेव तत्र प्रवर्त्तितव्यम्। विधानातिक्रमे च कर्तुः प्रत्यवायोऽनिष्टं च फलं भवतीति गम्यते। तद्विधानप्रकारस्तु आश्व० गृ० १,४, कण्डिकादौ दर्शितः अन्येऽपि प्रकारास्तत्तद्गृह्यकारैरुक्ताः। स च ततोऽवसेयः। उद्वाहे वर्ज्यनीयकन्याः स्मृतिषु दर्शिता यथा। "असपिण्डा च या मातुरसगोत्रा च या पितुः सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने" मनुः। असपिण्डात्व असपिण्डशब्दे ५४१५० मतभेदेनोक्ताः। "अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम्। अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम्" याज्ञ०। अन्यपूर्वात्व। "सप्त पौरुषेयाः कन्या वर्जनीयाः कुलाधमाः। वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला। उदकस्पर्शिता या च या च पाणिगृहीतिका। अग्निं परिगता या च पुनर्भूप्रभवा च या। इत्येताः शास्त्रयेनोल्लादकृत्सु कुलमग्निवत्" शाङ्ख०। "तत्र सपिण्डासगोत्रासज्ञाप्रवरासु भार्यात्वमेव नोत्पद्यते रोगिण्यादिषु भार्यात्वे उत्पन्नेऽपि दुष्टदोष एव" मिता०। एवमेव रघुनन्दनादयः। समानार्षत्वं आश्वलायने ८।१२ पृष्ठे दर्शितः। "सगोत्रां मातुरप्येके नेच्छन्त्यूढ्वाकर्म्मणि। अत्यन्तान्तरविज्ञाने उद्वहेदविशङ्कितः" इति उ० त० व्यासः। "मातुस्तु युता मूढ्वा मातृगोत्रां तथैव च। समानप्रवरां चैव गत्वा चान्द्रायणं चरेत्" मिता० स्मृ०। "आ सप्तमात् पञ्चमाच्च मातृभ्यः पितृमातृतः। अविवाह्या सगोत्रा च समानप्रवरा तथा। पञ्चमे सप्तमे वापि तेषां वैवाहिकी क्रिया। ते च सन्तानिनः सर्वे पतिताः स्मृतां गताः" नारदः। मातृस्वसृ उत्तराधिकारशब्दे १०६६५० दर्शितः। "सगोत्राश्चेदमन्त्रोपयच्छेन्मातृवदेनाम् विभृयात् समानार्षेयां विवाहयेच्चान्द्रायणं चरेत्" सुमन्तुः। "समानगोत्रप्रवरां सप्तमाद्योपगम्य च। तस्यासुतपात्र चाण्डालं ब्राह्मण्यादेव क्षीयते। आप०। "सर्व्वाः पितृपक्षयो मातरस्तद्भ्रातरो मातृष्वसृदुहितारश्च भगिन्यस्तदपत्यानि भागिनेयानि ता धर्म्मतोऽविवाह्याः अन्यथा सङ्करकारित्वात्तथाध्यापयितरिति" मनुः। "अध्यापयितुरेतद्विवाहमन्त्रपाठविद्वद्रेतत् सङ्करकारित्वमिति" रत्नाकरादयः। अध्यापयितुर्गुरोः कन्या अविवाह्येति रघुनन्दनेनोक्तम् "समानप्रवरा वापि शिष्यसन्ततिरेव च। ब्रह्मदातुर्गुरोश्चैव सन्ततिः प्रतिषिध्यते" मत्स्यपु०। "मातुर्व्वा भ्रातुर्वा स्वात् सप्तमिश्रमथापि वा। तत्राग्नौ या भवेत् कन्या मातृनाम्नीं प्रचक्षते। प्रजादात् यदि सङ्कीर्यात् प्रायश्चित्तं समाचरेत्। ततश्चान्द्रायणं कृत्वा तां कन्यां परिवर्ज्जयेत्" मत्स्य पु०। तथा ज्ञातिकायुक्ता अपि पुत्र स्थानिकतया अविवाह्यत्वमुक्तं दत्तकमी० दृश्यम्। अत्र सपिण्डविषयेऽपवादः "सन्निकर्षेऽपि कर्त्तव्यं लिंगोत्पात् परतो यदि"। मत्स्य पु०। "असम्बन्धा भवेन्मातुः पितुश्चैवोदकेन वा। सा विवाह्या द्विजातीनां लिंगोत्पान्तरिता च या"। मनुः। सूढ्वाद्यन्त अतिदिष्टादिष्टगोत्रभागिनेय सगोत्राविवाहो न सिद्धः इति रघुनन्दनादयः। "द्विजानामसवर्णासु कन्यामुपयमक्रिया" इत्यमरः उक्तेः असवर्णाविवाहनिमेधात्सिद्धेयोगाभिधानम्। द

निरूक्षां मातृलक्षयोद्वाहस्तु गिरैरपि क्रियते तस्य स्मृतिविरुद्धत्वेऽपि किञ्चित् श्रौतं लिङ्गमास्थाय तेषांतथाचरणमिति वक्ष्यः। तस्य श्रौतलिङ्गस्यान्यार्थपरता परागर भाष्यादौ दर्शिता। अनण्य द्वारकाकृपदक्षिणदेशवासिनां तथाचरणे भाग०१०स्कन्दे। "यदाथनुस्करन् वैरं रुक्मी लक्ष्मणोद्वहनत। व्यतरत् भागिनेयाय सुतां कर्वन् स्वसुः प्रियम्"। "दौहित्रायानिरुद्धाय पौत्रीं रुक्माददद्वरैः। रोचनां बद्धवैरोऽपि स्वसुः प्रियचिकीर्षया जानन्नधर्मं तद्दौत्रं स्नेहपाशयतानुगः"। अधर्मं जानन्नित्यनुक्तं तेन तस्याधर्मत्वम्। "मातुलस्य सुतामूढ्वेति प्रागुक्तवचनात्तस्याधर्मत्वम् सुव्यक्तमेव। स च विवाहोऽष्टविधः "ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः। गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः"मनुः एतेषां लक्षणं तत्तच्छब्दे द्रष्टव्यम्। "येन भार्या कृता पूर्वं कृतोद्वाहा परस्य वै"हरिवं०।

उद्वाहन न० उद्+वह्+णिच्-ल्युट्। १पुनर्विवाहसंस्कारे २उत्सवने ३स्थानान्तरनयने। उद्वाह्यते स्थानान्तरं नीयतेऽनेन उद्+वह्-णिच्-करणे ल्युट्। ४उद्वारणसाधने "उद्घाटनं घटीयन्त्रं सलिलोद्वाहने प्रभेः"अमरः। उद्+वह्-स्वार्थे णिच्-भावे ल्युट्। ५विवाहे। वाहनस्य वृक्षाकर्षणस्योपरि वाहनं कर्षणं यत्र। ईहिहल्ये क्षेत्रे यत्र प्रथममेकवारं हला पुनः कर्षणं क्रियते तादृशे क्षेत्रे क्षेम०। [टके (कड़ि) क्षेम०।

उद्वाहनी स्त्री उद्वह्यते स्वार्थे णिच्-कर्मणि ल्युट्। वरा-

उद्वाहिक त्रि० उद्वाहः प्रयोजनमस्य ठक् संज्ञापूर्वकविधेरनित्यत्वात् न वृद्धिः। विवाहसाधने मन्त्रादौ "नोद्वाहिकेषु मन्त्रेषु विधिरावेदनं क्वचित्" मनुः। वृद्धौ ओद्वाहिकोऽप्यत्र त्रि०।

उद्वाहित पु०स्त्री उद्वाहोजातोऽस्य तारका० इतच्। जातविवाहे "बाले वृद्धे तथैवार्ते गते च दैत्यमन्त्रिणि। उद्वाहितानां कन्यानां दत्त्वमोरेकनायनम्" राजमा०।

उद्वाहिनी स्त्री उद्वाहः उद्वरणं साध्यतयाऽस्त्यस्या इनि ङीप्। रज्ज्वो मेदिनि:।

उद्विग्न त्रि० उद्+विज-कर्तरि क्त। उद्वेगयुक्ते, "निम्नोद्विग्नसंस्थोर्वः पद्मे दोनैव मेदिनी" भट्टिः। दुःखपरिहाराजनतया२त्रासयुक्तचित्ते,३क्षुभिते च।

उद्वीक्षण न०उद्+वि+ईक्ष-भावे ल्युट्। १ऊर्ध्वदृष्टौ। करणे ल्युट्। २तत्साधने नेत्रे "उद्वीक्षणोद्वीक्षणकौतुदीक्षणम्" रघुः।

उद्वीत त्रि० उद्+वि+इ-क्त। विगतेऽधोद्गते। (क्षयलापिकयोश्च) समन्तात् प्लाविते "ततोयुधिष्ठिरोलोकस्तद्वीतार्णवनिस्वनम्" भा० द्रो० १६अ०।

उद्वृत्त त्रि०उद्गतो वृत्तात् निरा०स०। १दुष्टवृत्ते। उद्+वृत-क्त। २उत्क्षिप्ते ३प्रकोपिते। ४अधिके। "उद्वृत्तोहि यत्नः समधिकफलमाचष्टे" व्या० न्यायः। "कल्पत्रयोद्वृत्तभिवार्णवान्तः" भा० आ० प०७। ५क्षुभिते च "उद्वृत्तनक्रात् सहसोन्मजन्त्यै रघुः।

उद्वेग पु० उद्+विज-घञ्। १व्याकुलचित्ततायाम् २विरक्तजन्ये दुःखोद्भवे, "मनोभिः सोद्वेगैः प्रणयविकृतिभ्रंशरुचयः" किरा०। "सहसोद्वेगमियं व्रजेदिति" रघुः। "शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्याः"मेघ०। "श्रोत्रिद्वारं बाधते उद्वेगं जनयति शिरोऽरुजांते नासिकाञ्च स्रावयति स कटुकः" सुश्रु०। "शुक्लोभेष्वप्यनुद्वेगो माधुर्यं परिकीर्त्तितम्" सा०द०। ३भये च। ४गुदाकफलेन०। उद्वतोवेगोऽस्मात्। ५निश्चले ६स्थिमिते ७शीघ्रगामिनि च त्रि०।

उद्वेजन त्रि० उद्+विज-भावे ल्युट्। १उद्वेगे अमरः "परदारान्निवर्त्तेत पुरुषं पुरुषं नृपः। उद्वेजनकरं दण्डं विधिवत्स्थापयेत्"मनुः तत्र साधु ङ। उद्वेजनीय उद्वेजके त्रि० "परिरक्षेदुद्वेजनीयात्मकथाः"सुश्रु०।

उद्वेजित त्रि० उद्+विज-णिच्-क्त। कृतोद्वेगे "उद्वेजिता इतिभिरात्मवन्ते" कुमा०।

उद्वेदि त्रि०उद्गता वेदिर्यस्य प्रा० ब० नलोपः। उद्गतवेदिके। "विमानं नवसप्तभूमिदि चतुःकल्पप्रतिष्ठितम्" रघुः

उद्वेध पु०उद्+व्यध-भावे घञ्। १उत्कल्पने। कर्तरि अच्। २तदुक्ते त्रि०। ततः तेन निर्वृत्तमित्यर्थे ठक्छुञ्। अस्यौद्वेधं तद्विदन्ति त्रि०। स्त्रियां ङीप्।

उद्वेल त्रि० उत्क्रान्तोवेलाम् अत्या० स०। १वेलातिक्रान्ते २मर्यादातिक्रान्ते "भयमप्रलयोद्वेलादाचक्ष्युर्मेघमैथिलाः" रघु

उद्वेष्टन न० उद्+वेष्ट-ल्युट्। १फलपाद्यवोन्मूलने, २उपक्लेदे च। "वल्के मधुरता तन्त्रा त्वग्दोषोद्वेष्टनं भ्रमः" "त्वग्दोषोद्वेष्टनं तन्द्रा दाहाक्षुत्तिरोचकः" सुश्रु०। उद्गतं वेष्टनात् निरा०त०। ३उत्कुलनस्थाने त्रि०। "क्वचिद्विद्वेष्टनं वाल्लाक्षाद्या" रघुः कुमारस्व

उद्वोढृ पु० उद्+वह्-तृच्। परिणेतरि। "उद्वोढारि भवेत् भार्यो सुसर्गात् कुलनायिके!। वेश्यागमनजं पाप तस्य पुंसोहिनेदिने" भरतः त०।

उध्रस उञ्छे क्या० पर० अक० सेट्। उध्रसाति औध्रासीत्

उन्नसाम्-बभूव आस चकार । [वसति ते । औदिम्नसत्त उन्नस्य उत्तरेये उन्ने (वसतीवरीहाने) चु०सक०सेट् । उन्न-उन्द् क्लेदने चुरा०उभ०सक०सेट् । उनत्ति उनः उन्दन्ति उन्यात् उनसु । औनत् औनाम् औन्दम् औनः—औनस् । औन्दीत् । उन्दाम्—बभूव आस चकार । उन्दिता उन्दिष्यति औन्दिष्यत् । उन्दनं उन्दनम् उक्तिः उन्नः—उन्तः । "घृतप्रुषा मनसा हव्यमुन्दन्" ऋ० २,१,२ । "अब क्ष्णाप उन्दन्त्यस्मिन्नेतदोषधयोजायन्ते" शत० ७,५,२,१ । भ्वादित्वमपि । "गिरक्षिदुन्दति कविः" वेदानां वचनात् उन्दन्तुवर्चसः इति आत्म० ट० १,१७, ७ । क्विप् उन्दयति-ते औन्दिदत्-त वनु उन्दिदिषति ।

उन्दुर(क्) पु० उन्द्-उर-उदुवा । मूषिके मूषिकभेदाश्चाहुंचोपद्रवाश्च सुश्रुतोक्ताः सुश्रु०दर्शिता यथा । "अथातो मूषिकवर्गं व्याख्यास्यामः । पूर्वसङ्गाः मुञ्जबिला मूषिका वे समाख्याताः । नागलवणभेषजैर्व्याख्यातादय निर्दोष तान् । जाङ्गलः पुनरुक्तः जन्तो क्षिप्तविक्षिरक्षया । क्षुद्रुन्दरोऽवसर्पश्च वनाश्रयश्चोऽपि च । कृष्णिकृष्णाक्षितर्षश्च चपलः कपिलक्षया । गोधिकोऽरुणवर्णश्च मक्षाक्षणक्षतोन्दुरः । श्वेतेन मक्षता चार्द्धं कपिलेनाधुनाक्षया । मूषिकश्च कपोताक्षवैषाक्षादय स्मृताः । मुखं यतति यत्नेन मुखदष्टैः क्षतेऽपि वा । नखदन्तादिभिर्जन्तुं गात्रे रक्तं प्रदुष्यति । जायन्ते चात्र दोषाः पोका अर्चिका नखदानि च । पिडकोपचयश्चोपा विसर्पाः क्षिप्तिकानि च । पूर्वभेदोदयश्चोपा ज्वरोमूर्च्छा च दारुणा । दोर्बल्यमरुचिः श्वासो वमथुर्वेदनार्दनम् । दष्टरूपं वलासोल्लेखस्तृड् व्याधतः क्षतु । दाहाधाधो दाहजेन क्षिप्ताक्षर्दिश्च जायते । तत्रतु क्षीयवचस्तन्तु क्षिप्तासन्न समाक्षिप्तम् । पुच्छजेषाङ्गदाहश्च पाण्डुवर्णश्च जायते । पीयते पन्थिभिर्वाक्षमाधुपायकवस्तिभिः । गिरीक्षुदन्दशस्तन्तु क्षिप्तासन्न समाक्षिप्तम् । क्षणेना क्षत दर्शयति दुर्दिनेषु विशेषतः । गिरीपकक्षुद्रजन्तु विषेत् क्षिप्तवचनाना । क्षिप्तिरेषाधविद्वेषो जृम्भा क्षोभाङ्गमर्दभम् । विषेदारुणदाहिन्तु क्षुधाक्षयक्षत यानः । क्षिप्तिरेष गिरीदुःक्षं क्षोभो क्षिप्ता वनो तथा । आक्षिनीक्षदनाक्षोठक्षयार्थवनाक्षेत तनु । क्षुद्रुन्दरेष क्षुद्रर्दिन्यतोऽ क्षायक्षतेष च । पीयाक्षयः क्षुद्रक्षेत्रो नखाऽक्षतं क्षिक्षिका । यत्र क्षरीसर्पी क्षुद्रौ क्षिप्तं गिक्षूषकौ नखु । वदनार्दनक्षतं दष्टक्षायाक्षत दाक्षेत् । पीयाऽक्षतो ऽक्षक्षेत्रोर्द्वाबुदेषे दृजा ज्वरः । मक्षाक्षतं वसर्पिवर्णं क्षिप्तासन्न समाक्षिप्तम् । निद्रा क्षयाक्षतेन क्षुच्छोषः आर्द्धभेद च । क्षौद्रोपेताः गिरीक्षस्य क्षिप्तात् सारफलत्वचः । कृक्षिक्षेन दृजः क्षोभो राक्षस दंशमक्षते । क्षते क्षक्षिक्षुसारे च क्षिप्तासन्न समाक्षिप्ते । अक्षितेन वमी मूर्च्छा क्षुद्रुपक्षः क्षणेनक्षता । तत्र क्षुक्षीक्षीरपिष्टां क्षाक्षिन्नीं क्षधना क्षिक्षेत् । चपक्षेन क्षमेक्षर्दिर्मूर्च्छा च सक्ष क्षणया । क्षमक्षक्षां क्षजटां क्षौद्रेण क्षिफलां क्षिक्षेत् । क्षपिक्षेन क्षये क्षोभो ज्वरो क्षन्युपद्रवक्षया । क्षौद्रेण क्षिक्षाक्षिफलां क्षेतांचापि पुनर्वयाम् । क्षन्यक्षः क्षोक्षिक्षेत्रोभो ज्वरो दाक्षक्ष दाक्षणः । वर्षाभूनीक्षिनीक्षाक्षक्षिक्षं तत्र हतं पिबेत् । क्षरक्षेनाक्षिक्षः क्रुद्धो वातजान् कुरुते गदान् । क्षक्षाक्षणेन पित्तस्तु क्षेत्रेण सक्ष एव च । क्षक्षता क्षपिक्षेना क्षुद्र क्षपोतेन चतुष्टयम् । भवन्ति चैवां दंशेषु पन्थिनक्षुक्षक्षर्क्षिका: । पिडकोपचयक्षोपाः क्षोभश्च भक्षद्दाक्षः" ।

उन्दूर(क्)कर्षी स्त्री उन्दुरस्य कर्षः इव पर्षन्नखाः गौ०ङीष् । आखुकर्षायाम् । (उन्दुरकानी) खार्थे वुञ् तत्रैव

उन्दूरु पु० उन्द्-ऊरु । मूषिके । [पचे उन्न आर्द्रे त्रि० । उन्न त्रि० उन्द्-क्त । क्लिन्ने (भिजे) २दवादरे च । उन्नत त्रि० उद्+नम्-क्त । १उन्ने, २नम्रे च । "उन्नतेन स्थितिमता धुरुद्वहता भुवः" कुमा० "स्थितः सर्वोन्नतेनोर्वीम्" रघुः । "वन्नुरं क्षुन्नतानतम्" अमरः । "अधरोन्नतयुक्तिस्तु द्वयोः" भावः ।

त्रि०वि० उन्ने दिगभागस्थानवाधने २उपाधभेदे न० । "उन्ना प्रभाभिस्तदिक्षुभेन तावत् ताभेव वाक्षनिक्षेन च वक्ष्मि सूत्रः । व्याहृतं द्युगतश्चेवकोर्वेदन्तं तेनोन्नित दिनदक्षं नतसंज्ञं च । अधोन्नताद्भुनवृत्ताद्रेष क्षणाद्वदृद्दिक्षवनोन्नवोर्ज्ञा । स्यात् क्षत्रनेतद्भुक्षितं द्युभौर्ध्वा आवार्धभक्षं च वक्षाभिधानम्" सि० । "दिवस्य यद्गतं यच्च येषं तयोर्वदक्ष तद्भुक्षतसंज्ञं भवेत् । तेनोन्नतेनोन्नीतं दिनदक्षप्रमाणं नक्षतसंज्ञं भवति । अधोन्नताद्भुनवृत्ताद्भुक्षरगोले च तैर्नाम्निता हृक्षिक्षे युताद्या ज्ञा तद्भुक्षतम् । ज्ञा क्षतसंज्ञैर्लवैः । तद् क्षतं द्युज्ञवा शुक्षितं क्षिज्ञवा भक्षं नक्षत्रसंज्ञं भवति । क्षतोपपत्तिः । क्षक्षिन् याम्ये ज्ञावा याम्या वक्षिन् याम्ये क्षाक्षेरालक्षते ज्ञावतीभिर्दिभिः क्षितिज्ञाद्भुक्षतो रविक्षाक्षाद्भुक्षतसंज्ञा । येन

आवेन मध्याह्नात्तत्वञ्च नतसंज्ञा । अथ चरेष्वोनयुतस्रोत्तनाख्यञ्च त्रिज्या छाया । सा च छाया मध्यावधिर्भवति । स च मध्यप्रदेशोऽक्षोरालग्नस्रोन्नयुक्तसंपाते भवति । यत उन्नयुक्तसंपातात्स्थानाद्ध्रुवमक्षोरालग्नस्रोधर्मधोऽधर्मम् । अत उन्नयुक्तछायाधर्मजीवा छाया । क्षितिजोन्नयुक्तस्रोरन्तरं चरार्धम् । अतश्चरार्धेन वर्जितादुन्नतादुत्तरगोले, दक्षिणे तु युतात् । यत उत्तरगोले क्षितिजादुपर्युन्नयुक्तं, दक्षिणेऽधः । तस्मात् नतच्छाया छाया साधिता सा लम्बाग्रस्पर्शिता । सा च स्फुटसंज्ञा । अथ यदि लम्बाग्रस्थं एतावती तदा द्युज्याग्रस्थे किमित्यनुपातेन द्युज्याग्रस्पर्शिता । सा च नतछायासंज्ञा" ग्रन्थि० ।

सि०शि०उन्ने यन्नाचार्यमतखण्डनार्थं ३उपपत्तिभेदे च । "चन्नमेषविधिना ध्रुवोन्नतिर्या नतस्य भवतोऽक्षजन्यकौ । नौ क्रमाद्विषुवद्भाक्दृक्क्षमेवेऽथ वा नतस्योन्नता छाया:" शि० "चक्रवन्मेष यत्रमेषवद्ध्रुवं विध्येत् । तत्र चन्नमेष्यां च उन्नतांशाकोऽक्षांशा: । ये नतास्ते कर्क्यांशा: । अथ वा विषुवद्दिङ्मण्डलं मेषक्षं नतोन्नतांशाकोऽक्षजन्यांशा इति वृत्तिविरुद्धम्" ग्रन्थि० । "उन्नतं द्युनिशमण्डले क्षितेरुपरि खस्थं द्युनिधौ हि तत्प्रभा । तिर्यगक्षवशतोऽक्षजन्यवच्छेदको न तु नर: स जन्यवत्" शि० । "दक्षमण्डले क्षितिजादुपरि यद्भपर्यन्तं मेषांशात् उन्नता: खमध्याद्धरे नता: । उन्नतांशानां छाया ध्रुव: । नतांशछाया दृग्ज्या ध्रुव: कापालिकाभिप्रायेण: आर्य: । दृष्ट: कदम्बनोच्छ्रितत्वात् । अयमर्थो यद्भच्छायाधिकारे व्याख्यात एव" ग्रन्थि० ।

"उदग्दृग्यं याति छाया यथा नरस्तथा तस्य खात्तनतमण्डलस्थम् । उदग्दिशं पश्यति योजनं क्षितेस्तटस्थे योजनजा: शलाकाया:" शि०शि० ।

ततः भावे अञ् औन्नत्य न० । तस्य उन्नता स्त्री । त्व उन्नतत्व न०, तद्भावे "तद्धेय नैसर्गिकमुन्नतत्वम्" रघु:

उन्नतकाल पु० शि०शि० उन्ने छायातः कालसाधने ग्रन्थिभेदे "यस्त्रुतिज्ञक्षितिगुणस्य वर्गोद्युज्ये दृक्कर्याकृतिहृद्भवेद्या । दृष्टान्त्यछाया तद्दृक्षिताग्र्यछाया वा भवन्ति या उत्क्रमजीवाघटिका: । नतोनयुक्तं खरदृग्दलं तैर्ऊनोन्नतं योजनकाल एवम्" शि० । "लम्बाग्रवर्ग: षष्टिकर्णेन गुणित: द्युज्यया दृष्टकर्णस्य च घातेन भाज्य: यत्फलं लब्धमेष्टच्छाया । तयेष्टान्त्यया दृष्टिजया अन्यया स्पष्टेष्टं तत्रोन्नतमेव यद्य: कार्यं तत्र यद्यनोवायत्त: यद्यक्षावलम्बज्ञिन आवेन नतावनोन्नेवा: तैर्नतसाधनभिन्नगोलसादिदक्षाक्षज उन्नतावय: स्यु: । प्रकारान्तरेण लंकादिक्षितिजमेवोपपत्ति: । यदोष्टच्छायाकर्णेन द्वादशाङ्गुलशङ्कुर्लभ्यते तदा लम्बाग्रकर्णेन क इति । अत्र लम्बाया द्वादश गुण इष्टकर्णो हर: । फलं शङ्कुर्य: । अथ तत्र स्फुटिकरणार्थमनुपात: । यदि द्वादशाङ्गुलशङ्कोर्विषुवत्कर्ण: कर्णलब्धस्य शङ्कोर्य: क इति । पूर्वं लम्बाया द्वादश गुण इष्टच्छायाकर्णो हर: । अतस्तुल्यत्वाद्द्वादशाङ्घ्योर्गुणहरयोर्नाशे कृते सति लम्बायाः पञ्चकर्णो गुण इष्टच्छायाकर्णो हर: फलमिष्टस्फुटि: । अथेष्टान्त्याकरणायानुपात: । यदि द्युज्यया लम्बा लभ्यते तदिष्टच्छया किमिति । इदानीं लम्बा गुणो द्युज्या हर: । हरयोर्नाशे कृते इष्टकर्णाकृतिर्भवति । गुणयोर्घाते लम्बावर्ग: पञ्चकर्णगुणितो भवति । एवं जातमिष्टान्त्यज्या । तथा बलिताया जात्याया यदवयवं या नतस्योन्नतज्या चरसंज्ञा । अतस्तया धनुरुन्नतमेव न नतकाल: स्यात् । नतकालो दिनार्धात् पतित उन्नतकाल: स्यादित्युपपन्नम्" ग्रन्थि०

उन्नतानत न० उन्नतं च तदानतञ्च । उन्नतोपलक्षितानते । "वक्रुरं तून्नतानतम्" अमर: ।

उन्नति स्त्री उद्+नम-क्तिन् । १वृद्धौ, २उदये, ३गणितज्यार्थाच्च तत्र चन्द्रग्रहोन्नति: सि०शि० उक्ता यथा "लाघवान्मासे प्रथमेऽर्के वेन्दो: ग्रहोन्नतिर्यद्दिवसेऽवगम्या । तदोदयेऽस्ते निशि वा प्रसाध्य: शङ्कुर्विधोः खोदितनाडिकाद्यै:" शि० । "लग्नात्पञ्चमी उपरि प्रथमेऽर्के वा शुक्लात्पञ्चम्या: प्रातेर्व यस्मिन्नहोदिने यस्मिन् ग्रहोन्नतिर्ज्ञातुमभीष्टा तस्मिन् दिने लाघवान्मासाद् औदयिकौ चन्द्रार्कौ स्फुटौ कार्यौ । प्रथमचरणे त्वसकृत्क्रियौ ततः ग्रहोन्नतिर्ज्ञेया । निशि वा । एतदुक्तं भवति । मासाल्लाघवाद् उदयकाले यस्मिन्ग्रहोन्नतिः साध्या । प्रथमा चरणे त्वसकृत्काले । अथ वा सिद्धदृग्ज्ञानसिद्धेन । चन्द्रोदये तत्रोदयात् प्राणिघटीशुद्धयुदयकाले वा चन्द्रात्ते तत्कालादुपरोक्षे घटीषु वा ग्रहोन्नतिः साध्या । तत्र तात्कालिकौ चन्द्रार्कौ कृत्वा चन्द्रस्य क्रमभोगभुक्त्याक्षजन्योन्नत घटिकादिभिरनुपातश्चन्द्रः साध्यः । क्षितीषपलभा: । चन्द्रग्रहार्कोनेऽहे तत्कोटौ शङ्कुकारे ग्रहः । तत्रेष्टकाले क्षितरा शङ्कोन्नतिर्भविष्यतीति पाटीगणितम् । तत्र शङ्कुश्च शङ्कुकारतार्कोनेऽहे शुद्धे । तद्वार्कोनभोगे लाघवान्मासे प्रथमे च संभवति । क्षितीषपलभीयचरघटीर्ग्रहभुक्त्यादिभिः लब्धशङ्कोन्नतिरागोला वा एव च लब्ध-

ता । नहि नरैः लक्ष्यगृह्योन्नतिः स्वरोपलक्ष्यते । प्रसिद्धा तु गुरुगृह्योन्नतिः। अत उक्तं मात्रान्तपादे प्रथमेऽध्व वेति। "वक्षोजौ करिकुम्भ विभ्रकरीमत्युन्नतिं, गच्छतः" । स्तोकेनोन्नतिमायाति" इति च सा०द०

उन्नतोश पु० ईत० । गरुडे त्रिका० ।

उन्नत्त त्रि० उद्+नद्-क्त । १उद्भटे । उत्कटे च । "अद्य स्खलेज उन्नत्तमस्खलोऽद्यस्खलेजसा" भा० १स्क०। उन्नतं उत्कटम्" । श्रीधरः ।

उन्नमन न० उद+नम-ल्युट् ।१उन्नतौ। णिच्-ल्युट् न हृद्धिः। २उत्कोचने सुश्रुतोक्ते २यन्त्रकर्म्मभेदे च। तानि चतुर्विंशतिः। यथोक्तं तत्रैव । "यन्त्रकर्म्माणि तु निर्यातनपूरणबन्धनबन्धनवर्त्तनचालनविवर्त्तनविवरणपीडनमार्गविशोधनविक्षेपणाकरणाकुञ्चनोन्नमनविनमनभञ्जनोन्मथनाचूषणैषणदारणसंकरणप्रच्छालनप्रधमनप्रमार्जनानि चतुर्विंशतिः" । उन्नमनञ्च व्रणरुधिरस्रावसाधनं यथोक्तं तत्रैव "सन्निगतः पोतमार्गो न प्रवर्त्तते आकुञ्चनप्रसारणोन्नमनविनमनप्रधावनात् कार्यनप्रवादैश्च सुश्रुतः" ।

उन्नमित त्रि० उद्+नम-णिच्-क्त । १उत्क्षिप्ते, २अर्जीकृते च "अथ प्रयत्नोन्नमितानमत्फणैः" कुमा० "क्वचिदुन्नमिताननो" रघुः । [मस्तिष्कं तत्र' माघः

उन्नम्र त्रि० उद्+नम-रन् । उन्नते "उन्नम्रनाम्रपटमण्डप

उन्नय पु० उद्+नी-"क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते"इत्युक्तेः अच् । कुपादितो जलादेरुत्क्षेपणे अमरः ।

उन्नयन न० उद्+नी-ल्युट् । १वितर्के, २अर्जने च । "अनादिष्टांशेदोन्नयनश्रुतेः कात्या०" ६,५,२४ उन्नयन श्रुतिश्च । "अतोहिदेवेभ्य उन्नयन्त्यतोमनुष्येभ्यः" शत०ब्रा० ४,५,६,१, "चमसोन्नयनकाले बाहुल्य दर्शोन्नाद्य तन्नमसेनोन्नयेत्' कात्या० १०,६,२१, "तेष्वेवोन्नयनमभ्यभि सोमानुन्नयन्तीति श्रुतेः" कात्या०२२,१०, ५, "उन्नयत्यस्मात् अपादाने ल्युट्" । १पूतभृत्पात्रे । "उन्नयने च" कात्या०२५,१२,१४, तत्रैव भवति उन्नयनाद्यिन्नुन्नयनम् पूतभृदुच्यते" कर्कः । उन्नमित नयनं तेन प्रा०ब० । उन्नमितनेत्रे त्रि० ।

उन्नस त्रि०उन्नता नासा यस्य अच् समा० नसादेशः । उन्नतनासिके । "उन्नसं दधतो वक्त्रम्" भट्टिः ।

उन्नाद पु० उद्+नद-घञ् । उच्चशब्दे "शरभोन्नादसंजृम्भम् नानाद्रुगनिवेवितम्" भा०व०१५८अ० ।

उन्नाभ पु० उन्नता नाभिर्यस्य अच् समा० । ऊर्ध्वनाभ्ये रूपभेदे "उन्नाभ इत्युद्धतनामधेयः"रघुः अर्शआद्यच् । उन्नाभिरित्यपि त्रि० । उन्नता नाभिः प्रा०ब० । उन्नतनाभौ पुंस्त्री० ।

उन्नाय पु० उद्+नी-"अपोदोर्नियः" पा०घञ् । १उन्नयने २वितर्के २उन्नये च "उन्नायानधिगच्छन्तः प्रह्लादेवसुधा भृताम्" भट्टिः । [क्षेमच० ।

उन्नाह पु० उद+नह-घञ् । १उत्तोल्यबन्धने २वाङ्मिके न० उन्निद्र त्रि०उद्गता निद्रा सुप्ता यस्य । १विकसिते निद्रायाश्च मुकुलीभावरूपनेत्रनिमीलनाभावेन तथात्वम् । "उन्निद्रपुण्डरीकवक्त्रपुण्यभासा" माघः । २निद्रारहिते च । "तासुन्निद्रामवनिशयनां सौधवातायनस्थाम्' मेघ० । "मध्याह्नालविवर्त्तनेर्विगमयत्युन्निद्रएव क्षपाः" शक० । उन्निद्रता च जागरणं तच्च विप्रलम्भशृङ्गारे कामशास्त्रदृष्टविधावस्थाभेदः तास्वावस्थाः ४४७पृ० उक्ताः ।

उन्नीत त्रि० उद्+नी-क्त । १अर्जिते नीते २वितर्किते च ।

उन्नेतृ त्रि० उद्+नी-तृच् स्त्रियां ङीप । १अर्जयितरि २उद्भावके च योऽयज्ञ ऋत्विग्भिः २ऋत्विग्भेदे पु० स च श्रौताधानप्रयोगे ८५पृ० दर्शितः। तस्य च गीते ऋत्विगधिकारात्तादृशकार्य्यात्तस्योन्नेतृत्वम् "उन्नेतैनान्नयति" "उन्नेतरुन्नयोन्नयेतर्क्षो अभ्युन्नयान इत्युन्नीयमानाजपन्ति" आश्व० श्रौ० ६,१२,११,१४ । "उन्नेता स्वयोक्तविधिना सर्वानुत्कादुत्तारयति" "उन्नेतरिन्नेतं मन्त्रं जपन्ति" ना०ह० "आहृतमुन्नेता क्रोणकलशमिडामिव प्रतिप्रस्थोपकल्पमिहोपवेष्टेत" आश्व० श्रौ० ६,१२,१ । "अथोन्नेत उपांशुसवनं प्रयच्छत्यथाक्षोन्नेतारमाकूज आवप्च" इति संप्रैषद्वारा प्रतिप्रस्थाता संख्यानुज्ञेता चमसेनोदुम्बरेण वा"शत०ब्रा० ४,२,५,१८,२१ । ततः उन्नाता० अण् न वृद्धिः । उन्नेत उन्नेतृसम्बन्धिनि त्रि० । "प्रतिप्रस्थातान्नीध्रोन्नेते" कात्या० २४,४,४६ । स्त्रियां ऊङ्नेत्यपि तत्रैव त्रि० ।

उन्नेय त्रि० उद्-नी-यत् । १अर्जनीये २उद्भावनीये च ।

उन्मज्जक पु०उद्+मज्ज-ण्वुल । "कथंदद्मे जले स्थित्वा" तपः कुर्वन् प्रवर्त्तते । उन्मज्जकः स विप्रेयस्तापसोऽत्रोक्त पूजितः" इत्युन्मज्जनप्रसङ्गे १तापसे । जलादेरुपरि २उत्प्लावके त्रि० । [(भासा) प्लवने ।

उन्मज्जन न० उद्+मज्ज-ल्युट् । मज्जनविपरीतव्यापारे उन्मण्डल न० उन्मग्नं मण्डलम् । शि० शि० उक्ते दिनरात्रोः क्षयवृद्धिसाधने मण्डलभेदे । यथाह तत्रैव ।

"पूर्वापरक्षितिजसंगमयोर्विलग्नं याम्ये ध्रुवे यदखलैः क्षितिजादधःस्थे। सौम्ये कुजादुपरि चालखलैर्ध्रुवे तदुन्नखलं दिननियोः क्षयवृद्धिकारि" सि०। "समहत्तक्षितिजयोर्यौ पूर्वापरौ संपातौ तयोर्ध्रुवविच्छ्रयोश्च सूत्रं यत्रिबध्यते तदुन्नखलसंज्ञम्। दिनरात्रार्द्धक्षितिजयो तद्ग्रहेण भवत." प्रमि०। सूर्य्यसिद्धान्ते रङ्गनाथेन च यदुक्तं यथा "प्राक्पश्चिमाश्रिता रेखा प्रोच्यते समभखलम्। उन्नखलं च विषुवन्नाखलं परिकीर्त्यते" रङ्ग०। "प्राक्पश्चिमाश्रिता पूर्वपश्चिमसंज्ञा साधिता रेखा समहत्तसूत्रमुच्यते। सैव रेखोन्नखलं विषुवन्नाखलम्। चः समुच्चये। उभयसंज्ञं कथ्यते। अत्रोपपत्तिः। क्षितिजपूर्वापरहत्तसंयोगौ पूर्वापरे तत्स्थूलं पूर्वापरसूत्रमिति। पूर्वापरहत्तस्य भूमाबूर्ध्वाधरासूत्राकारहत्तत्वे नादर्शनाद्गोलाकारतयैव दर्शनाच्च पूर्वापरहत्तमपि तत्स्थूलम्। पूर्वापरहत्तस्य समभखलत्वे नाभिधानात् तद्रेखा समभखलसञ्ज्ञोक्ता। अथ खनिरक्षदेशक्षितिजहत्तसंज्ञोन्नखलाक्षस्य तत्संयोगयोः संलग्नत्वात् तन्मध्यसूत्रतया पूर्वापरसूत्रत्वापि सत्त्वात् पूर्वापरसूत्रमुन्नखलसञ्ज्ञम्। एतेनान्यदेशक्षितिजसञ्ज्ञया स्वदेशक्षितिजसञ्ज्ञा सुतरां सिद्धेति पूर्वापरसूत्रस्य क्षितिजवृत्तसञ्ज्ञा द्योतिता। पूर्वापरस्थानयोः क्षितिजहत्तस्य संलग्नत्वादुच्छ्रितहत्तस्य क्षितिजानुकारित्वाच्च" रङ्ग०। "उद्गतादयोऽत्र। परोऽत्र वोट्टङ्कते रवौ स्तुतिः" सि० शि०। प्रा०व०। २अर्द्धखण्डे त्रि०।

उन्नखण्डलक्षणी पु० स्त्रि०शि० उन्ने आयया दिनच्छायार्द्धे उन्नखण्डस्यार्कस्य छायार्द्धे। तदानयनं तत्रैव यथा "युतायनांशार्कवृहद्गुजज्या खरामतिघ्नभ्रुवो" (१०१५२०) हृता परः। पक्षद्युतिघ्नः पक्षभाविभाजितः परोऽत्र वोट्टङ्कते रवौ स्तुतिः" सि०। "अर्कस्य सायनांशस्य वृहती भुजज्या साध्या। नतखण्डखण्डज्येत्यः। तथा ज्यया पूर्वाग्नितिथिन्यूनयमिनो (१०१५२०) भाज्याः। यद्यल्पमसौ परास्यः। स परः पक्षकर्णेन गुण्यः पक्षभया भाज्यः। फलसंस्कारखण्डनतस्यार्कस्य छायार्द्धो वा भवति" प्रमि०।

उन्नखण्डलम्ब पु०स्त्रि०शि० उन्ने अक्षजेलप्रदर्शनार्थे उन्नखण्डलम्बो। "अक्षादिखण्डं क्षितिजा च कोटिरुट्टङ्कना दोः अवशोऽपमज्या। उट्टङ्कना कोटिरथाक्षकाष्ठखण्डं भुजस्तच्छ्रवणः क्षितिज्या। खण्डं वहुर्द्युं समहत्तसंस्थोयत् तद्वृत्तेक्षावध कोटिकर्णौ। अक्षादिखण्डं भुज एवमत्रो क्षेत्राक्षसूत्रभगणि तावत्" सि०। "अत्र क्षिप्त निरक्षदेशे यदेव विषुन्नाखण्डं तदेव समभखण्डम्। तथा क्षितिजादन्यदुन्नखण्डं नाम वस्तु नास्ति। तत्र ध्रुवौ च क्षितिजसंज्ञौ। अत्र निरक्षदेशादुट्टङ्कना यथा यथोत्तरमुन्नं गच्छति तथा तथोदग्ध्रुवस्तुतं पश्यति। तथा यैर्भागैर्ध्रुव उन्नतस्तैरेव भागैरक्षसंज्ञैः खस्वस्तिकादक्षितिजतो विषुवन्नाखण्डं नतं पश्यति। विषुवन्नाखण्डस्य तिर्यक्स्थितत्वात् तदाश्रितान्यक्षोन्नतहत्तानि खस्वाने तिरश्चीनानि भवन्ति। अतः साक्षे देशे खगोलवलयानां तिरश्चीनखगोलवलयानां च संपातात् लम्बाक्षक्षेत्राण्युत्पद्यन्ते। तान्यक्षक्षेत्रसंज्ञान्युच्यन्ते। अक्षभा नाम पलभा प्रसिद्धा सा भुजः। द्वादशाङ्गुलः शङ्कुः कोटिः। अक्षकर्णस्तत्र कर्णः" प्रमि०। उट्टङ्कनाक्षत्र। एवमुन्नखण्डादिशङ्कुरत्र।

उन्नत पु० उद्+नद्–कर्त्तरि क्त। १धूसरे "विस्फोटरयखार्कवर्षाभूदधिसोन्नतक्षयुभिः" सुश्रु०। २सचक्रवृत्ते च। कर्त्तरि क्त। २उन्नादवति, ४अङ्गीकरोति च त्रि०। "आत्मसूत्राक्षतन्मार्त्तमसोन्नतापवर्जितम्" नारदः। "उन्नतेन वातिकान्युन्मादयुन्मोन" भिता०। "उन्नतानाञ्च वा गाथा विष्णुनांकेतिं च यत्। स्त्रियो यत्र प्रधावन्ते नास्ति तत्र व्यतिक्रमः" म०त० मत्स्यपु०। ४उद्गते च उन्नमत्तगङ्गम्। अतिशयेन मत्तः। ५अतिमत्ते "मदोन्नमत्तस्य भूपस्य कुञ्जरस्य च गच्छतः" पञ्चतन्त्रम्।

उन्नतक पु०उन्नत एव कन्। १तापसभेदे। अवधूतगीते ४२८ पृष्ठे दृष्टिः। स्वार्थे कन्। २उन्नतार्थे। "लोकोऽत्र पतितस्तत्र पङ्कस्तत्रोन्नतको जडः" याज्ञवल्क्यः।

उन्नतगङ्ग अव्य० उन्नता उन्नता गङ्गा यत्र संज्ञायाम् अन्यपदार्थत्वे अव्ययी०। देशभेदे। "उन्नतगङ्गं नाम देशः" सि०कौ०।

उन्नतगीत त्रि० उन्नतेन गीतम् "तृतीयसूतेन ततमिति" पा० ३त०। उन्नतेन गीते एवम् उन्नतप्रगथितादयपि उन्नतेन प्रगथितादयर्थे त्रि०।

उन्नथन न० उद्+नथ–भावे ल्युट्। १उन्नर्हणे २हिंसने। "अन्योन्यसूतोन्नथनादभूताम्" रघुः "वायुनोन्नथनं चापि भ्रमश्च क्षयतस्तया" सुश्रु०। सुश्रुतोक्ते २यन्त्रकर्मभेदे च उन्नतनयन्त्रे ११६०पृ० दृश्यम्। कर्त्तरि ल्युट्। ४उन्नर्हणकारके त्रि०। "विषद्धिचित्तोन्नथना नक्षत्रयाः" शिरा०

उन्नथित त्रि० उद्+नथ-क्त। उद्गते महिते।

उन्नद पु० उन्नतोनदोनत्ताऽस्य प्रा० व० गतजोषः।

२उद्गतमदे। "उन्मदक्षगमदरभसवशंवदनवदक्षनाक्षतमाले" जयदेव: "उद्दीरयामासुरिवोन्मदानाम्" रघु: "अघोषि-लोकोन्मदराजहंसै" रघु:। २ब०। २उद्गतमदसाधने "मधु-मदराक्षनया सकुरुमाटध्वनिभृता निभृतारवरसज्ञमे" माघ।

उन्मदन त्रि० उद्+मद्+णिच्+ल्युट्। उद्भूतमदकारके। "तदाप्रभृत्युन्मदना बभूव" कुमा०।

उन्मदिष्णु त्रि०उद्+मद्+ताच्छील्ये ष्णुच्। उन्मादशीले।

उन्मनस् त्रि० उद्भावं मनोऽस्य। १उत्कण्ठायुक्ते, २अन्य-मनस्के च। "पयोधरेष्वोरसि काचिदुन्मना:" माघ:। "उन्मना: प्रथमजन्मखेदितान्यस्करस्पि बभूव राजभ:" रघु: वा कप्। उन्मनस्कोऽप्यत्र। भावे० अप्ततद्भावे क्वच् सलोपश्च उन्मनायते उन्मनायमान: "भयसन्मनायितम्" चिव-क्वब्लिषु सलोपश्च उन्मनीकरोति उन्म-नीभवति उन्मनीस्यात्"।

उन्मनी स्त्री उन्मनस्+ङीष्। योगिनामवस्थाभेदे। "उन्मन्यव-स्थाधिगमाय विहितोपायमेकं तव निर्दिशामि। पश्यन्नुदा-सीनतया प्रपञ्चं सकुल्यसुन्मील्य सावधान:" आचार्य:।

उन्मन्थ पु०उद्+मन्थ-भावे घञ्। बधे २क्षिप्तने २उन्मर्दने च।

उन्मन्थन न० न० उद्+मन्थ-ल्युट्। अङ्गुलो दण्डादिना विलोडने। करणे ल्युट्। ततृसाधने २दण्डादौ।

उन्मर्दन न० उद्+मृद-ल्युट्। १उद्वर्त्तने सुश्रुतोक्ते वायु-प्रसादनार्थे २व्यापारभेदे। वायौ दुष्टे पक्वे सुश्रु०"त्वङ्-मांसास्रक्क्रियां प्राप्ते कर्य्याद्वातघ्नविलोडनम्। क्षेपोपना-हाग्निकर्म बन्धनोत्पीडनानि च" सूक्ष्मोपद्रवनिवारणार्थे सुश्रुतोक्ते ३व्यापारभेदे च"वातघ्नोत्पीडनक्षेदलङ्घनस्वप्न-क्रियाः"। करणे ल्युट्। ४उत्पीडनसाधने दण्डादौ। "अर्धतान्युपकल्पयेत् समाक्षौ माषे मणिं कण्डके वस्त्रयुगं जलसुपानदुपं दण्डं खजस्त्रार्टम्मनुलेपनमाञ्जनशलाकी-मित्यात्मने आवश्यकाय च" आह्निक १,८, "उन्म-र्दनमभिषेकोऽवगाह्यैके" काला० १२,४,८। "उन्मर्दन-चन्दनादि" अमरे।

उन्मा स्त्री उद्+मा-क। अङ्गुलीमाने। "षड्भिरुन्मासि साङ्गुलोऽसि" यजु० १५,६५; "उन्मा" उन्मान तुलादि वेदटी०।

उन्माथ पु० उन्मथ्यतेऽनेन उद्+मथ-करणे घञ् १आमिष दानेन क्षुधादिबन्धार्थं निवेशिते भूतयन्त्रे (फांद) इति ख्याते। भावे घञ्। २विलोडनोत्थापने, ३क्षिप्तने च। तत्पर्याय: पाशुकोद्धारस्ते क्षतकेतनः। प्रवोजयति चोन्माथं निद्रामस्तं गते रवौ" भा०शा० १३८ अ०।

उन्माद पु०उद्+मद-अधारे घञ्। रोगभेदे स च सुश्रुते दर्शितो यथा "अथात उन्मादप्रतिषेधमध्यायं व्याख्यास्याम:॥ मदवन्त्युद्धता दोषा यस्मादुन्मार्गमाश्रिता:। मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तित:॥ एकैकश: समस्तैश्च दोषैर-त्यर्थमूर्च्छितै:। मानसेन च दु:खेन स पञ्चविध उच्यते॥ विषाद्भवति यस्त्वन्य: स चागन्तुरुदाहृत:। स चापि द्विविधो मदसंज्ञो विभ्रमी च॥ मोहोद्वेगौ खल: शोको मालाज्ञान-दर्शनम्। अत्युत्साहोऽरुचिश्चास्मे स्वप्ने बहुविभोजनम्॥ वायुलोकक्षयश्चापि भवत्य क्षतसंज्ञा। यस्य स्याद्धरि-र्यत्वसृक्त्वाद् लोऽधिगच्छति॥ कृष्णश्चविः परुषश्च भवनो ततोवा त्वाचातुर: क्षयतनु: स्फुरितक्रुञ्चिः। आस्फोट-यन् पठति गायति नृत्यशीलो विक्रीयति भ्रमति चाप-निलप्रकोपात्॥ दृष्ट्वेददारुणकृतो बहुभुग्विनिर्ह्र स्व याहिमानिलजसान्तविकारसेवी। तोक्षो हि मारुत-निषेवणेऽपि स बलिग्रहो पित्तादिहा नभसि वह्नति तारकाश्च॥ कर्य्यो निसादसदनादधिकासयुक्तो योनिद्वि-द्विरतिरत्यमतिप्रचार:। निद्रापरोऽल्पकथनोऽल्पभुगुष्ण-सेवी रात्रौ भयं भवति चापि कफप्रकोपात्॥ सर्व्वात्मके त्रिभिरपि व्यतिमिश्रितानि रूपाणि वातकफपित्तकृतानि विद्यात्। सम्पूर्णलक्षणमसाध्यमुदाहरन्ति सर्व्वात्मकं क्वचिदपि प्रवदन्ति साध्यम्॥ चौरैर्नरेन्द्रपुरुषैरभिशस्यते वै त्रिवासितस्य धनबान्धवसंक्षयाद्वा। गाढं क्षते मनसि च प्रियवा रिरंसोर्जायेत चोत्कटतरो मनसो विकार:॥ चित्रं च जल्पति मनोऽनुगतं विसञ्ज्ञो गायत्यथो रुदति रोदिति चापि मूढ:। रक्तेक्षणो रुधिरलेपितुल्यभास: स्तब्धोन: म्लानवदनो विषक्षतेन भवेत् परासु:॥ स्निग्धं स्विजन्त् मनुजसङ्गादसंविबोधयेत्"। एतद्व्याख्याञ्चक्रेण तत्रत्यविभागादि चोक्तं भावप्रकाशे "तत्र उन्मादस्य निदानमाह। "मदवन्त्यु द्धता दोषा" सुश्रुतवाक्यम् यस्मादुत्तो-द्धताः प्रबला दोषा उन्मार्गमाश्रिताः मदवन्ति चित्तं विलिपन्त्यस्मिन्। अतोऽयमुन्माद इति कीर्त्तितः। स उन्माद: मानसोव्याधि: मनोवैकल्यकरत्वात्। तस्यैवाव्याभेदेन लक्षणान्तरमाह। "स चापि द्विविधस्तत्रेत्यादि" सुश्रु० "उन्मादस्य विप्रकृष्टनिदानमाह। "विद्युद्दुष्टाशुचिभोजना-नि प्रधर्षणं देवगुरुद्विजानाम्। उन्मादहेतुर्भवतीति पूर्वो मनोऽभिघातो विषमाश्च चेष्टाः"। दुष् धञ् रूपं जादिह-स्थितम्। अशुचि रजस्वलादिदुष्टम्। प्रधर्षणमभिभवः।

विषमाश्च चेष्टाः बलवद्विषादयः। सन्निकृष्टं निदानमाह। "एकैकशः दुष्टादि" सूत्र०। तस्य सम्प्राप्तिमाह। "नैरुक्तस्तस्य मलाः प्रदुष्टा बुद्धेर्निवासं हृदयं प्रदूष्य। स्रोतांस्युपधिष्ठाय मनोवहानि प्रमोहयन्त्याशु नरस्य चेतः"। अल्पसत्वस्य दुष्टसत्वगुरुणश्च। मलाः वातादयः। बुद्धेर्निवासं हृदयं प्रदूष्येति। एतेनास्यस्य दुष्ट्या तदाश्रितायां बुद्धेरपि दुष्टिरुक्ता। मनोवहानि स्रोतांसि हृदयाश्रितानि दश एतानि विशेषतो बोद्धव्यानि। यतश्चरकेण सकलशरीरस्रोतांस्येव मनोधिष्ठानत्वेनोक्तानि। प्रमोहयन्ति विभ्रमं कुर्वन्ति। उन्मादस्य सामान्य रूपमाह। "धीविभ्रमः सत्वपरिप्लवश्च पर्यायेणा दृष्टिरधीरता च। अबद्धवाक्त्वं हृदयस्य शून्यं सामान्यलक्षणादुदयं लिङ्गम्"। धीविभ्रमः शुक्तिकायां रजतज्ञानम्। सत्वपरिप्लवः सत्वं मनस्तस्य चाञ्चल्यम्। अबद्धवाक्त्वम् असम्बद्धभाषित्वम्। शून्यं स्मृतिशून्यम्। वातिकोन्मादस्य निदानपूर्विकां सम्प्राप्तिमाह। "क्रूरात्यशीतारुक्षविरुद्धाहृतयोपयोगैरनिलोऽतिवृद्धः। चित्तानिदुष्टं हृदयं प्रदूष्य बुद्धिं स्मृतिं वाप्युपहन्ति शीघ्रम्"। प्रदूष्य प्रकर्षेण दूषयित्वा। तस्यैव रूपमाह। "अस्थानकोपस्मृतिविभ्रमत्वगीतवागङ्गविक्षेपणरोदनानि। पारुष्यकार्श्यारुणवर्णताश्च जीर्णे बलस्यानिलजस्य रूपम्"। अस्थाने अनवसरे क्रोधादीनि रोदनान्तानि। जीर्णे आहारे। बलं व्याधेः। पैत्तिकस्य निदानपूर्विकां सम्प्राप्तिमाह। "अजीर्णभुक्तस्य विदाह्यशीतैर्भोज्यैर्विदग्धेषु च पित्तमेव। उन्मादमत्युग्रमलक्षणस्य क्षिप्रं क्षिपेत् पूर्ववदाशु कुर्यात्"। क्षिप्रं क्षिपेत् पित्तं क्षिप्तं सन्क्षिप्तम् पुनः अजीर्णभुक्तस्य विदाह्यशीतैर्भोज्यैर्विदग्धेषु सत् उन्मादं कुर्यात् पूर्ववत् दुष्टं हृदयं प्रदूष्य दुष्टबुद्धेः। तस्य रूपमाह "। अस्थानसंस्थाविनयस्मृतीनां बलक्षयाभिद्रवबोधनाशः। प्रज्ञावहीनाक्षजकाभिघातः पीतावभासं पित्तसमस्य लिङ्गम्"। अस्थानेऽवस्थितता। संस्थाः आरम्भटी आकूर इति यावत्। बलक्षयं परलाघवम्। अभिद्रवणं पलायनम्। बोध्यं गात्रे। बोधो दाढ्यविशेषः। प्रज्ञावहेत्यादि आवाद्यं, पीतबोरजजयोरभिघातः। श्लैष्मिकस्य निदानपूर्विकां संप्राप्तिमाह। "सम्पूरकैर्मेद्यविचेष्टितस्य बोद्धा कफो मर्मणि संप्रदुष्टः। बुद्धिं स्मृतिं वाप्युपहन्ति चित्तं प्रमोहयन् सज्जनवेद्विकारम्"। संपूरकैर्भोजनादिभिः। मेद्यविचेष्टितस्य व्यायामरहितस्य। बोद्धा कफ इति कफोऽप्युन्मादं करिष्यन् पित्तं वदाय मनोवहानि व्याधिस्वभावात्। मर्मणि अत्र मर्मशब्देन हृदयमुच्यते। विकारहेतुत्वादुपचारः। तस्य रूपमाह। "वाक्चेष्टितं मन्दमरोचकत्वं नारीविविक्तप्रियता च नित्या। हर्षश्च लाभा च बलस्य भूम्नो लक्षादियौक्तात्च लक्षात्मके स्यात्"। वाक्चेष्टितं मन्दं वचनमल्पम्। नारीविविक्तप्रियता नारीप्रियता विजनप्रियता च। भूम्नो सति बलं व्याधेः। सान्निपातिकस्य निदानपूर्वकं लक्षणमाह। "यः सन्निपातप्रभवोऽतिघोरः सर्वैः समस्तैः स तु हेतुभिः स्यात्। सर्वाणि रूपाणि विभर्त्ति तस्मिन्विरुद्धमैश्वविधिविवर्ज्यः" स सान्निपातिक उन्मादः। सन्निपातप्रकोपेण सर्वात्मकत्वं लक्ष्यम्। पुनः सर्वैरिति बलवत्तरं तदुक्तं लक्षणप्राप्यर्थम्। तेन रजस्तमोभिर्मिश्रितैरित्यर्थः। तेन वातादयो रजस्तमोभिर्मनोदोषैर्मिश्रिताः समस्तैश्च निदानैः कुपिता उन्मादं जनयन्ति। सर्वैर्हेतुभिः समस्तैर्मिश्रितैः स्यात्। यतोऽन्योन्याधिः सर्वैर्हेतुभिर्मिश्रितैरेव भवतीति नियमो नास्ति। अथवा व्याधिस्वभावात् सर्वैर्हेतुभिर्मिश्रितैः स्यात्। तादृगुन्मादः विरुद्धमैश्वविधिः विरुद्धमैश्वविधिरिति कोऽर्थः। त्रिदोषजे प्रत्येकं वातादिप्रत्यनीका कार्या। सा च परस्परविरोधिनी त्रिदोषं कुर्यात् किञ्चिदेव दृश्यमानलक्षादि तन्त्रान्तरीयकम्। अतएव विवर्ज्यः न चिकित्स्या इत्यर्थः"। मनोदुःखजस्य विप्रलम्भं निदानमाह। "शोकैर्नरेन्द्रसुरबैरिमाद्यैः" सूत्र०। आद्यैर्हिंसादिभिः। नाडजनितयत्नेन। यत्ते अभिकृते प्रियवा प्राप्तुमयत्नया रिरंसोः सुखस्य विकारः उन्मादरूपः। तस्य रूपमाह। "चित्तं प्रजल्पत्यतिमात्रमेवं"सूत्र०। चित्तमात्रार्थम्। मनोदुःखगतं शोच्यमपि। विसंज्ञो विस्मृतज्ञानः। अतीव मूढः अतीवज्ञानशून्यः। अत्र विसंज्ञो बोद्धव्यः। विषजस्य रूपमाह। "रक्तेक्षणं दुष्टादि" सूत्र०। परासुः मृतः। आरिष्टमाह। "अवाक्शुक्लक्लमुखो वा शोचमांसवलो नरः। आगन्तुशोकसन्दृष्टलक्षणेन विनश्यति"। अथ देवादिजनस्योन्मादस्य सामान्यं लक्षणमाह। "अमर्त्यवाग्विक्रमवीर्यचेष्टो ज्ञानादिविज्ञानबलादियुक्तः। प्रकोपकालो नियतश्च यस्य देवादिजन्मा स मनोविकारः"। अमर्त्यवाग्विक्रमवीर्यचेष्टः न मर्त्यलोके मनुष्यलोके वातादयो यस्य सः। विक्रमः पराक्रमः। वीर्यं शौर्यम्। ज्ञानादि विज्ञानबलादियुक्तः। ज्ञानं बुद्धिः। आदिपदेन तद्भेदा मेधाविचारणाद्यन्तादयो लक्ष्यन्ते। विज्ञानं वि-

त्यादिविषयकं ज्ञानम् । चेष्टा चाटवम् । आदिपदेनाभिमानादि गृह्यते । नियतः वक्ष्यमाणोऽतिशयादिभिः । मनोविकारः उन्मादः । तत्र देवादिष्वस्य लक्षणमाह । "सन्तुष्टःसुचिरंतिदिव्यमाल्यगन्धो निस्तन्द्रोऽपितवर्षशततुल्यभावी । तेजस्वी स्थिरनयनो वरप्रदाता ब्रह्मण्यो भवति नरः सदेवजुष्टः"। अतिदिव्यमाल्यगन्धः अतिशयो दिव्यमाल्यस्येव गन्धो यस्य सः । निस्तन्द्रः निरारङ्कितः । अपितवर्षशतम् । ब्रह्मण्यः ब्राह्मणभक्तः। दैत्यादिष्वस्याह । "संक्लेदो हिंसगुरुदेवदोषभक्तो निष्ठाष्ठो विगतभयो विमार्गदृष्टिः । वन्तुष्टो भवति न चाल्पपानजातैर्दुष्टात्मा भवति स देवशत्रुजुष्टः"; विमार्गदृष्टिः कुमार्गरतः । दुष्टात्मा दुष्टस्वभावः । गन्धर्वादिष्वस्याह । "दुष्टात्मा पुरुषिण वनान्तरोपसेवी स्वाचार [illegible] । सज्जन वै पक्षति चाल्पशब्दं सन्तर्जयत्यपरिषोक्षितो मनुष्यः" । दुष्टात्मा दुष्टजीवात्मा । पुरुषिणं तोयोत्थितं तटम् वनान्तरं वनमध्यम् सेवी । स्वाचारः अनिन्दिताचारः । निद्रायां परि सज्जनतोभावेन गीत गन्धर्वाद्यानि वक्ष्यते तथा । चाह चाल्पशब्दमिति दुर्जनक्रियाद्यभिधेयम् । यक्षादिष्वस्याह । "ताम्राक्षः स्निग्धतनुरक्तवस्त्रधारी गम्भीरोद्भुतगतिरल्पवाक् सहिष्णुः। तेजस्वी वदति च किं ददामि कस्मै वो वक्ष्यत्यपरिषोक्षितो मनुष्यः" । पित्र्यादिष्वस्याह । "प्रेतानां स दिशति संस्तरेषु पिण्डान् श्राद्धात्मा जलमपि वाऽप्यसञ्चयस्थः । मांसेषुलिखगुरुपायसाभिकामस्तृप्तो भवति पितृव्यदोषजुष्टः"। प्रेतानां मृतानां पिण्डान् । दिशति ददाति । अपसञ्चयस्थः दक्षिणाग्न्याहृतोत्तरीयः । नागादिष्वस्याह ।"यस्मात्सा प्रसरति सर्पवत् कदाचित् क्रुद्धस्यैवं मुख रपि जिह्वावलेढि । क्रोधाद्भुतंतनुदुग्धपायवद्वैषुविशेषः स खलु भुजङ्गमेन जुष्टः" । प्रसरति सर्पवत् उरसा चलति । क्रुद्धस्यो ओष्ठप्रान्तौ । राक्षसादिष्वस्याह ।"यांसाक्षुगविधिरुरावहारविद्युन्निर्लज्जोऽप्यतनितिरुरोऽतिशूरः । लोधाद्भुर्विपुलवधो निशाविहारो यौवद्विट् भवति स राक्षसैर्गृहीतः" । अतिनिष्ठुरोऽतिनिर्दयः । ब्रह्मराक्षसादिष्वस्याह । "देवद्विग्रथवहनो वेदवेदाङ्गविच्छुचिः । आत्मपोऽजस्रोऽहिंस्रो ब्रह्मराक्षसैर्वितः । अहिंस्रः अहिंसाशीलः । पित्राद्यादिष्वस्याह । "दक्षः क्षमवपुषो विरुद्धभावी दुर्गन्धो भयमुचितजातिलोकः । वह्वाशी विजनवनान्तरोपसेवी व्याचेष्टन् भवति यदन् पिशाचजुष्टः" । उद्वक्षः नग्नः । दिगम्बर इति विशेषवचनात् । (सु०सूत्र० उद्वस्त्र इति पाठः) क्षयो निर्मांसः । प्रक्षयो रूक्षः । अतिलोलः सर्वत्रिनृ अन्नपाने लोलुपः । व्याचेष्टन् विरुद्धमाचेष्टन् । यक्षा क्रिंसाक्रीडापूजार्थं गृह्णन्ति । अतएवोक्तम् । "अशुचिं भिन्नमर्यादं क्षतं वा यदि वाऽक्षतम् । क्रिंसु क्रिंसाविहारार्थं सत्कारार्थमथापि वा । तत्र क्रिंसार्थं गृहीतस्य लक्षणमाह । "स्थूलाक्षो दृतमटनः सफेणवामी निद्राक्षः पतति च जम्भते च योऽति । यस्माद्विहरद् गणादिविच्युतः स्यात् सोऽसाध्यो भवति तथा त्वयोटथेऽद्दे । यस्माद्गीत्यादि यः पर्वतादिपतितः सन् यक्षैर्गृहीत इत्यर्थः । आदिपदेन भित्तिप्रासादादयो गृह्यन्ते त्वयोटथेऽद्दे सर्व एव देवादिभिर्गृहीतोऽसाध्यः । देवादीनां आवेशसमयमाह ।"देवयक्षाः पौर्वाह्णिकास्तासुरा सन्ध्ययो रपि । गन्धर्वाः प्रायशोऽस्यां यक्षाश्च प्रतिपद्यपि । पितरः कृष्णपक्षे च पञ्चम्यामपि चोरगाः । रक्षःप्रियाचारात्रौ च चतुर्दश्यां विशन्ति हि" । कृष्णपक्षे अमावास्याम् । प्रायशःपदादन्यत्रापि । तिथ्यभिधानप्रयोजनं लक्षणार्थं तत्र तिथौ बलिदानार्थञ्च । ननु यदि देवादयो विशन्ति तदा विशन्तस्ते दृश्यन्ते कथं नेत्यत आह । "दर्पणादीन् यथा छाया शीतोष्णं प्राणिनो यथा । खमणिं भास्करार्चिश्च यथा देहञ्च देहभृक् । विशन्ति न च दृश्यन्ते यक्षरक्षहवरूपिणम्" । दर्पणादीत्यादि ग्रन्थेनान्यदपि निर्मलद्रव्यं गृह्यते । छाया प्रतिबिम्बम् । खमणिं सूर्यमणिम् । देहभृक् जीवात्मा" । भा०प्र० । एतानि च वाक्यानि सुश्रुतोत्तरतन्त्रस्थानि । तत्र हि "शुक्राणागतविज्ञानमनवस्था सहिष्णुता । क्रियाद्वाऽसाधुषी वक्तुं स यक्षः परिकीर्त्यते"इति यक्षग्रहं परिभाष्य"असक्थेया यक्षगणा गणाधिपतयश्च ये । व्यस्तान्ते विविधाकारास्तान्ते तथाष्टधा देवासुरा यक्षा वै नाम गन्धर्वयक्षाः पितरोभुजङ्गाः । रक्षांसि वा चापि पिशाचजातिरेषोऽष्टधा देवगणयक्षाख्यः" इति विभज्य"संतुष्टः सुचिरंतिदादिना तल्लक्षणानां लक्षणमाह । तानि भा०प्र०सुश्रुतोदाहृत्य व्याख्यातानीति दृष्टव्यम् । अन्ये च ग्रहतदेवादीनां न कश्चित् प्रवेशः किन्तु तत्परिचारकाणामेव देवाद्याचरतां प्रवेश इत्युक्तं यथा सुश्रु० उक्त०।"तथापि लोकाधिष्ठिता च दानं व्रतानि धर्मो निजमस्य बलम् । गुणाश्चयादापि तेषु लिङ्गा व्यक्ताः बलाच्च

यथाप्रभावम् । न ते मनुष्यैः सह संविशन्ति न वा मनुष्यान् कचिदाविशन्ति । ये वा विशन्ति वदन्ति मोहात्ते भूतविद्याविषयादपोहाः' । तेषां यक्षाणां प्रतिचारका ये कोटीसहस्रायुतशतसङ्ख्याः । अक्षुब्धसामान्यभुजः शुभाशा निर्माविकारास्त्व समाविशन्ति । नियाचराणां तेषां हि ये देवगणसंस्तुता । ते तु तत्सत्त्वसंसर्गाद्विद्येयास्तु तदङ्गनाः । देवपक्षा इति पुनः प्रोच्यन्ते शुचयश्च ये । देवत्वं नमस्यन्ते प्रत्यर्थान्ते च देववत् । स्वामिसार्थाकक्रियाचाराः क्रमशश्च सुरादिषु । नैर्ऋतेया दुष्टितरक्षासा स प्रसवः स्मृतः । सत्यशौचपरत्वेषु दृष्टिस्नेहाः सखे कृता । हिंसाविकारा ये केचिद्दिव्य भावमुपाश्रिताः । भूतानीति कृता संज्ञा तेषां संज्ञा प्रकल्पिभिः । यक्षसंज्ञाभिभूतानि यस्माद्देहेक्षनया भिषक् । विद्यया भूतविद्यात्वमतश्च निरुच्यते"। अथोन्मादस्य सामान्यचिकित्सा

'वातिके स्नेहपानं प्राक् विरेकः पित्तसम्भवे । कफजे वमनं कार्यं परे वक्ष्यादिकक्रमः । यश्चोपदेक्ष्यते किञ्चिदपस्मारे चिकित्सितम् । उन्मादे तच्च कर्त्तव्यं सामान्याद्दोषदूष्ययोः । अज्ञादिदूषणेभ्यो विषमेभ्यश्च तं सदा । रक्षेदुन्मादिनं यस्मात् सद्यः प्राणहरा हि ते । ते जन्मादयः" । विशेषचिकित्सा भा०प्र०व्याधौ द्रष्टव्या । सचायं रोगः। मङ्गपातकर्मविपाकजः । "उन्मादस्त्वगदोषो राजयक्ष्मेत्यादि" सु० त० नारदोक्तेः 'चित्तसंमोह उन्मादः कामशोकभयादिभि" । सा०द० उक्तेः २व्यभिचारिभावभेदे ।

उन्मादक पु० उद+मद-णिच् ण्वुल् , -ञ :चन्द्रके धत्तूरादौ । [उन्मादकारके त्रि० ।

उन्मादन पु०उद्+मद-णिच्-ल्यु । १कन्दर्पबाणभेदे त्रिका० ।

उन्मादवत् त्रि० उन्मादोऽस्त्यस्य मतुप् मस्य वः । उन्मादयुक्ते स्त्रियां ङीप् । [मादिनं यस्मात्" हस्तु० ।

उन्मादिन् त्रि० उद्+णिनि स्त्रियां ङीप् । उन्मत्ते "रक्षेदुन्मादिनं यस्मात्" हस्तु० ।

उन्मान न०उद्+मा—भावे ल्युट् । अर्द्धमाने तच्च प्रथितगुरुत्वेन पलादितिपाषाणादिना तुलाधारफलके एकपार्श्वे स्थितेन अन्यपार्श्वस्थद्रव्यवस्तूदेशमानादिना गुरुत्वविशेषज्ञापनव्यापारः (ओजनकरा)"अर्द्धमानं किलोन्मानम्" वार्त्तिकोक्तेः २अर्द्धतः प्रमाणे च । अस्त्रियाञ्चे "प्रमाणे द्वयसदृघ्नजमात्रचः" पा० "प्रथमश्च द्वितीयश्च अर्द्धमाने मतौ वत्" वार्त्तिकोक्तेः द्वयच् दघ्न् । अर्द्धद्वयः अर्द्धदघ्नः "गजपतिद्वयसेरिति" माघः । सामान्यप्रमाणे तु मात्रजेव । अर्द्धमात्रं मध्यमात्रम् । ४करणे ल्युट् । २तुलादौ । ३द्रोणपरिमाणे पु० वैद्यकम् ।

उन्मार्ग त्रि०उत्क्रान्तः मार्गात् निरा०स० । मार्गातिक्रान्ते मार्गस्य पन्थाः रीतिश्च" "नाशयति च दिङ्मोहनिवोन्मार्गः" काद० । २विरुद्धपथे च "मदोन्मत्तस्य भूपस्य कुञ्जरस्य च गच्छतः । उन्मार्गे वाच्यतां यान्ति महामात्राः समीपगाः" पञ्चतन्त्रम् । उन्मादशब्दे उदा० ।

उन्मित त्रि० उद्+मद-क्तिन् । अर्द्धमाने ।

उन्मिष त्रि०उद्+मिष-क । १प्रफुल्ले २किञ्चिन्मकाशयुक्ते च

उन्मिषित त्रि० उद्+मिष-क्त । १प्रफुल्ल, विकसिते २किञ्चित् प्रकाशिते च । "व्यलोकयत्पुन्मिषितैस्तडिन्मयैः" कुमा० ।

उन्मीलन न०उद्+मील-ल्युट् । १विकाशे २चक्षुरादेः पुटविभेदे (ताकान) "ज्ञानाञ्जनशलाकाभिर्नेत्रोन्मीलनकारकः" भा०आ०८४अ० । "सम्मीलनं न्मीलनञ्च तदेव" त्रि० शि० । भावे घञ् उन्मीलोऽप्यत्र पु० ।

उन्मीलित त्रि० उद्+मील-क्त । १विकसिते "ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः" सा०द० । २चक्षुरुद्घाटिते च णिच्—कर्मणि क्त । ३प्रकाशिते "उन्मीलितं तूलिकयेव चित्रम्" कुमा० । ४भेदितसुदृढे नेत्रादौ "अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः" गुरुनतिमन्त्रः ।

उन्मुक्त त्रि० उद्+मुच-क्त । बन्धनरहिते

उन्मुख त्रि० उद्+मुख-अच् । १अर्द्धस्थे,२उद्युक्ते च । "अन्यमुखा स्यैनिता" "रुमा०; "तस्मिन् मयमिनामादेशाने परिणयोन्मुखे" कुमा० । "विपुलतरोन्मुखशोभनावस्थम्" "दन्तान्यनभिमुखयोदमुखाः" माघः । "अयो यरणयः परणोन्मुखानाम्" "या गोतमीरा खपदोन्मुखेन" । "मनोऽभिरामा मुखवल्लरी रचनेभिखनोन्मुखैः" रघुः स्त्रियां ङीप् । "धृतयष्टिरिवाभ्यासे मधौ परभृतोन्मुखी" कुमा० "प्रतिपद्यापि कैकेया लक्ष्मीरिव गुणोन्मुखी" "प्रतिः प्रतीतः प्रसवोन्मुखीं प्रियाम्" "अहेः मुक्तं स्फुरति पवनः किंचिदुन्मुखीभिः" "दृष्ट्याक्षाते पवनतनयं मैथिलीवोन्मुखी सा" मेघ० ।

उन्मुद्र त्रि०उद्गता मुद्रा यस्मात् प्रा०ब०।१त्यक्तमुद्रे,२विकसिते च

उन्मूल नामधा०मूलत उत्पाटयति उद्+मूल-णिच्। उन्मूलयति ते "उन्मूलयन् मुहुरहल्लतान्" भा०ब०१४६अ०

उन्मूलन न० उन्मूल+णिच्-ल्युट । उत्पाटने उद्धृतमूलकरणे । "न प्रादपोन्मूलनशक्तिरंहः" रघु ।

उन्मूलित त्रि० उन्मूलि-नामधा० क्त । उत्पाटिते "उन्मूलिता हलधरेण यदूद्यमातैः" उद्भटः "दूरे फलानि फलिन भवता तन्मूलमुन्मूलितम्" उद्भटः ।

उन्मृजावमृजा स्त्री० उन्मृज अवमृज इत्यृच्यते यस्यां क्रियायां मयु० स० । उन्मार्जनावमार्जनार्थनिर्देशक्रियायाम् ।

उन्मृग्य त्रि० उद्+मृग-क्यप् । "हृक्लमुक्तोत्तमृग्ये" । "इत्युन्मृग्या हैव द्यौरास" यत०ब्रा० १,४,१,२२, क्यप् । २जर्जुतः स्पृहणीयार्थे अव्य० ।

मेय त्रि० उद्+मा-यत् । १परिमेये "आचितः शकटोन्मेये" त्रिका० । २उन्मानमेये सुवर्णादौ च ।

उन्मेष पु० उद्+मिष-घञ् । १चक्षुरादेरुन्मीलने, किञ्चित्प्रकाशे च । "स्फटिकरणपरिवेषोन्मेषमूल्याः प्रदीपाः" रघुः । "दीर्घिकाकमलोन्मेषायावन्मालेव साध्यते" कुमा० "विद्युदुन्मेषदृष्टिम" मेघ० । भावे ल्युट् । उन्मेषणमप्यत्र न० "मन्मथोन्मेषणातिविस्तार्णा योनेव कान्तिः" सा०द० ।

उन्मोचन न० उद्+मुच-ल्युट् । बन्धनात् उद्गत्य विस्रंसने । "उन्मोचनप्रमोचने उभे वाची वदामि" अ०५,२०,१,

उप अव्य० वप-क । १अधिकार्थे, २हीने, ३आसन्ने, ४सामीप्ये, ५सादृश्ये, ६प्रतियत्ने सतो गुणान्तराधाने, ७व्याप्तौ, ८पूजायाम् ९यत्नौ, १०आरम्भे, ११दाने, १२दोषाख्याने, १३आचार्यकरणे १४अत्यये, १५निदर्शने च । गतिरत्ने "उप सामीप्यसामर्थ्यव्याप्त्याचार्यकृतिक्षतिदोषदानक्रियावीप्सारम्भाध्ययनपूजनेषु" इति उपार्थानुक्त्वा क्रमेणोदाजहार तत्र सामीप्ये उपकूपम् । सामर्थ्ये उपकरोति । व्याप्तौ उपकार्षम् । आचार्यकृतौ उपदिशति । क्षतौ उपरतः, दोषे उपघातः (इन्द्रियाणां स्वयात्यपहानासामर्थ्यम् दाने उपकरति । क्रियाभेदे उपचरति । वीप्सायां द्वयं देवसुपचरति । आरम्भे उपक्रमते भोक्तुम् । अध्ययने उपाध्यायः । पूजने उपचरितः पिता पुत्रेण" इति । प्रतियत्ने (संस्कारे) "उपत्वाग्नेधे समिधमाहरेति" आ०उ०सामीप्ये "उपोपविश्य प्राणान् संसृजन्" श०त०गो० । सादृश्ये उपदेवः उपधातुः । "उपोऽधिके च" पा० "१ईषाधिक्ये "उप च त्वयोदयं मामः" यत०ब्रा० ६,२,२, अस्य होनेत्या धिक्ये च कर्मप्रवचनीयता तत्र होनार्थयोगे तत्सम्बन्धिनि द्वितीया । उप फरिं हराः-फरेर्हीना इत्यर्थः । अधिकार्थयोगे सप्तमी । उप परार्द्धे फरेर्नुन्नाः परार्द्धादधिकादित्यर्थः । सामीप्येऽव्ययीभावः उपकुल्यम् उपकूलम् । "उपसर्गाः क्रियायोगे" पा० क्रियायोगे उपसर्गता अन्यत्र गतिता ततः भवार्थे त्यकन् उपसर्गका ।

उपक पु० उप+संज्ञायां कन् । १ऋषिभेदे ततः नडा० फक् । औपकायनः तस्य अहन्दे द्वन्दे च बहुत्वे वा लुक् । अहन्दे औपकाः औपकायनाः । द्वन्दे उपकलमकाः औपकायनकालमकायनाः । अनुकम्पितः उपेन्द्रदत्तादिः "प्राचामुपादेरडजबुचौ" पा० बुच् "ठाजादावूर्द्धं द्वितीयादचः" पा० इन्द्रदत्तलोपे । उपक २अनुकम्पिते उपेन्द्रदत्तके पु० । पक्षे अडच् उपडः । चात् ठच् घन् इलच् च । तत्र ठचि औपकिकः घनि औपिय: इलचि औपिलः । तदर्थे पु० अजादाविलुक्के: कनि न लुक् । उपेन्द्रदत्तकः । एवमन्यत्रापि उपपूर्वकस्य संज्ञाशब्दस्य रूपं बोध्यम् । तेन तत्रापि उपकादिशब्दवृत्तिः ।

उपकण्ठ त्रि० उपगतः कण्ठम् अत्या० स० । १निकटे, २कण्ठासन्ने च "तस्योपकण्ठे धननीलकण्ठः" कुमा० । "आक्रम्य चापं श्रवणोपकण्ठे" "उपकण्ठं मरुद्वेधः" रघुः २श्यामाके ४अश्वानामाक्रन्दितगतौ च न० । विभक्त्यर्थे सामीप्ये वा अव्ययी० ।५कण्ठ इत्यर्थे "रथाङ्गभर्त्रोऽभिनवं वरस्य यस्याः पितेव प्रतिपादितायाः । प्रेम्णोपकण्ठं सुकरङ्कभाजो रत्नावतंसस्य चिरावबन्धं" माघः । उपकण्ठम्-कण्ठे पक्षे त्रिलिङ्गे इत्यर्थः ईकण्ठसामीप्ये च अव्य०

उपकनिष्ठका स्त्री उपगता कनिष्ठिकाम् अत्या० स० । अनामाङ्गुलौ "अप्रक्षिप्तोपवलनर्गमौ प्रादेशमात्रौ कथानानान्यार्थं स्यात्वाङ्गुष्ठोपकनिष्ठिकाभ्याम्" आ० श्रौ० ८ १,३,२ "अङ्गुष्ठोपकनिष्ठिकाभ्यामेकैकमस्यासंहादयन्तः" ४,५,४ ।

उपकन्या स्त्री उपगता कन्याम् अत्या० स० । कन्यासदृशादौ अस्य गौरा० पाठात् उपाद्दृश्यदृत्वेऽपि नान्तोदात्तता ।

उपकरण न० उपक्रियतेऽनेन उप-कृ-ल्युट् । १प्रधानसाधके अङ्गे यज्ञाङ्गभोजनादौ व्यञ्जनादि, शयने खट्वादि, स्नानेऽनुलेपनादि, पूजायां पुष्पादि यागे पश्वादि । "यच्च नेष्ट्रः शुभं दद्यात् सर्वोपकरणान्वितम्" शु०त०नन्दिपु० । "अङ्गावयवसाधन्युकरणव्ययेषु" भा० शल्य० । २रूपादीनां ज्ञानसाधनादिपरिच्छेदे च । उपगतः करणम् अत्या० स० । ३इन्द्रियानुगते त्रि० विभक्त्यर्थे सामीप्ये वाऽव्ययी० । ४करणे इत्यर्थे ४इन्द्रियसामीप्ये च अव्य० ।

उपकर्ण अव्य० विभक्त्यर्थे सामीप्ये वा अव्ययी० । १कर्ण इत्यर्थे २श्रोत्रसामीप्ये च । तत्र प्रायभवः ठक् औपकर्णिकः तत्र प्रायभवे त्रि० "वः खामो मम कान्तावौपकर्णिकलोचन" भट्टिः ।

उपकर्त्तृ त्रि० उप-कृ-तृच् स्त्रियां ङीप्। उपकारके आनुगुण्यकारके "उपकर्त्तारिया सन्धिर्न मित्रेणापकारिणा" माघः। "क्षीणान्युपकर्त्तृणि प्रहरणानि विकुर्वते" रघुः।

उपकलाप अव्य० विभक्त्यर्थे सामीप्ये वाऽव्ययी०। १कलापे इत्यर्थे २ततसामीप्ये च ततो भवार्थे परिखा० अण्। औपकलाप्य तद्भवे त्रि०।

उपकल्प त्रि० उपगतः कल्पम् अया०स। कल्पोपगते। गौरा० पाठात् उपात् ह्रस्वकत्वेऽपि नास्तोदात्तता।

उपकल्पन न० उप+कृप-णिच्-ल्युट्। १सम्पादने २आयोजने च "वक्ष्याम्यतः परं सम्यगाहारस्योपकल्पनम्" सुश्रु० युच्। तत्रैव स्त्री। "एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम्" सुश्रु०।

उपकादि पु० हन्तेऽहन्ते च वर्त्तमाने गोत्रप्रत्ययलुगनिमित्ते पाणिन्युक्ते शब्दसमूहे। स च उपक लमक भल्लक कपिल कृष्णाजिन कृष्णसुन्दर चूडारक आडारक गड्डक उट्ट सुधायुक अवल्गक पिङ्गलक पिष्ट सुपिष्ट मयूरकर्ण खरीजङ्घ शलाघल पतञ्जल पटञ्जल कठेरणि कपीतक कायशलनख निदाघ कलशीकण्ठ टामकण्ठ कृष्णपिङ्गल कर्णक प्रर्णक जटिलक बंधरक जन्तुक अनलोम अनुपद प्रतिलोम अपजघ्य प्रताल अनभिहित कमक वटारक लेखाभ्र कमन्दक पिङ्गलक वर्ष्णक मस्करकर्ण भटाघ कबलक कमलक कटामल।

उपकार पु० उप+कृ-भावे घञ्। प्रधानस्यानुगुण्यसंपादने, उपक्रमे "उपकारापकारौ हि लक्ष्यं लक्षणभेतयो" माघः। "क्रमोपकारेव रतिर्भुवं क्रमा०" "उपकारमहास्तात कृतोऽयं मम खेचरैः" भा०व०१५०अ०। तस्योपकार्यारचितोपका(चा)रा 'रघु'। उपकारस्य सत्कारिभिः कारणस्य कार्योत्पादनार्थमानुगुण्यभेदः यथा दर्शादियागस्य प्रधानापूर्व्वसाधनेऽङ्गादीनां प्रयाजादीनां कर्त्तृकाण्वर्व्वसाधनद्वारा तदानुगुण्यम्। स च बौद्धैः कर्त्तृदृष्टान्तरूपस्य बीजादेरङ्कुरत्वस्य सम्पादनरूपातिशयाधानमुच्यते सर्व्व० दर्श०। "तथाहि सत्कारिभिः सलिलपवनादिभिः पदार्थैर्बीजाधीयमाने बीजस्यातिशये बीजमङ्कुरकर्मण्यमुपेयम् अपरथा तदभावेऽप्यतिशय प्रादुर्भवेत्। बीजस्यातिशयमाधान सत्कारिसापेक्षमेवाधत्ते अन्यथा सर्व्वदोपकारान्तो अङ्कुरस्यापि सदोदयः प्रसज्यते; तस्मादतिशयार्थमपेक्षमाणैः सत्कारिभिरतिशयान्तरमाधेयं बीजे, तस्मिन्नप्यपकारे पूर्व्ववन्न्यायेन सत्कारिसापेक्षस्य बीजस्य जनकत्वे सत्कारिसम्पाद्यबीजगतातिशयानवस्था प्रथमा व्यवस्थिता। अथोपकारः कार्य्यार्थमपेक्ष्यमाणोऽपि बीजादिनिरपेक्षं कार्य्यं जनयति तत्रापेक्षो वा। प्रथमे बीजादेरकेतत्वमापतेत्। द्वितीये अपेक्ष्यमाणेन बीजादिना उपकारे अतिशय आधेयः एवं तत्र तत्रापीति बीजादिजन्यातिशयनवातिशयपरम्परापातः इति द्वितीयानवस्था स्थिरा भवेत्। एवमपेक्ष्यमाणेनोपकारेण बीजादौ धर्म्मिण्युपकारान्तरमाधेयमित्युपकाराधेयबीजातिशयाश्रयातिशयपरम्परापातइति तृतीयानवस्था दुरवस्था स्यात्। अथ भावादभिन्नोऽतिशयः सत्कारिभिराधीयत इत्यभ्युपगम्यते तर्हि प्राचीनो भावो ऽनतिशयात्मा निष्पन्नः अत्यन्तातिशयात्मा कर्त्तृदृष्टान्तादिपदवेदनीयो जायत इति फलितम्।

उपकारक त्रि० उप+कृ-ण्वुल्। १उपकारकर्त्तरि। "आगन्तवोऽपि कदाचिदुपकारका दृश्यन्ते" हितो०। स्त्रीत्वे टापि अतइत्त्वे उपकारिका। सा च २न्यायालये, ३घटनिर्म्मिते गृहेच्च। ४कारणमात्रे त्रि०। "स्वर्गस्त्वग्निन्द्रियाद्यस्त्वेव स्यादुपकारकः" भाषा०। णिनि। उपकारिन् उपकारके त्रि०। "तदुपकारीणि शारीरकसूत्राणि" वेदा० भा०। "दातव्यमिति यद्दानं दीयतेऽनुपकारिणे" गीता "मात्रापित्रोर्गुरौ मित्रे विनीते चोपकारिणि" दक्षः। स्त्रियां ङीप्।

उपकार्य्य त्रि० उप+कृ-ण्यत्। १उपकारे साधे। २राजालये, ३घटनिर्म्मितराजसदने च स्त्री टाप्। "तस्योपकार्य्यारचितो पका(चा)रा" रघु। "तीरोपकार्य्या गतमात्र एव" शाकु० प्रतिबिम्बितोपकार्य्यामार्य्यः" रघु राजभवने "दृश्यां रघु प्रतिनिधिः स नवोपकार्य्याम्"। "उपकार्य्या राजसद्मन्युपचारचितेऽन्यदिति विश्वोक्तेः ५उपचार्य्याप्रे त्रि०

उपकिरण न० उप+कृ-ल्युट् नि० इत्वम्। १व्याप्तौ २समन्तात् विक्षेपे च "आस्तृकरोत्किरणं वा" कात्या० २५,१०,२५। समन्तादौ अव्ययी०। २किरणसामीप्यादौ अव्य०।

उपकीचक पु० उपगतः कीचकम् अया०स०। विराटरूपश्यालककीचकानुजे विराटसैन्यभेदे "समवेतेषु सर्व्वेषु तामूचुरुपकीचकाः। क्षुण्णतां शीघ्रमसतो यत्नते कीचकोहत"। ते च पञ्चाधिकशतसंमिताः कीचकत्वेनापि प्रसिद्धा "हतं ते निहनो राजन्। शतं पञ्च च कीचकाः। स च सेनापतिः पूर्व्वलिखितः हतभट्टशतम् भा०वि०२२,२३अ०।

उपकुक्षि स्त्री उप+कुक्ष-इ। कक्षजीरके।

उपकुक्षिका स्त्री उप+कुक्ष-ण्वुल् अतइत्त्वम्। १तत्स्थायां

(हुँते) २कर्म्मणि घञ्। स्वार्थे कन्। ३क्षणजीवके।

उपकुर्व्वाण पु० उपकरोते गुरोर्दक्षिणादानादिना उप+कृ-यानच्। समावर्त्तनयोग्ये स्वाध्यायपरिसमाप्त्यवधिकब्रह्मचर्य्यवति १ब्रह्मचारिणि "न पूर्व्वं गुरवे किञ्चिदुपकुर्व्वीत धर्म्मवित्। स्नास्यंस्तु गुरुणाऽऽज्ञप्तः शक्त्या गुर्व्वर्थमाहरेत्" मनुना स्नास्यतएव गुरूपकारविधानेन ततः पूर्व्वमुपकारकर्त्तृत्वनिषेधेन चाश्रौतोपकर्त्तृत्वात्तस्यात्वम्। ब्रह्मचारी हि द्विविधः नैष्ठिक उपकुर्व्वाणश्च। यो निरवधि गुरुकुलान्तम् उपनयनादूर्द्धं गुरौ वसति स नैष्ठिकः। यस्तु स्वाध्यायपरिसमाप्तौ गुरोरनुज्ञातः गुरोरुपकारं कृत्वा स्नानार्थं वा करोति स उपकुर्व्वाणः। स्नास्यतो ब्रह्मचारिणः स्नानं च मनुनोक्तं यथा "क्षेमं स्थिरं गामश्व लक्षणोपेतमासनम्। धान्यं शाकञ्च वासांसि गुरवे प्रीतिमावहेत्"। आश्व० गृ० १,८,३,२ तु "अथैतान्युपकल्पयेत समावर्त्तमाने मधुपर्कं कुण्डले वस्त्रयुगं छत्रमुपानद्युगं दण्डं खड्गमञ्जनं हेममणिलेपनमाङ्गनमणीन्मित्यात्मने चाचार्य्यं च" "यद्युभयोर्न विन्देताचार्य्यायैव"। एकादश द्रव्याण्युक्तानि एतच्चोपलक्षणं गुरोरभिलषितं दद्यादित्यलमेव तात्पर्य्यम् अत एव या०स्मृ० "गुरवे तु वरं दत्त्वा स्नायात् तदनुज्ञया" तद्दरदानमेवोक्तम् "गुरवे पूर्वोक्ताय वरमभिलषितं यथाशक्ति दत्त्वा स्नायात् तदयञ्चौ तदनुज्ञयाऽदत्तवरोऽपि" मिता०। संज्ञायां कन् तत्रैव। "उपकुर्व्वाणकास्तु स्वाध्यायपरिसमाप्तौ" स्मृ० उ० भा०। तात्कौल्ये वाच्यम्। २उपकारशीले त्रि०।

उपकुल्या स्त्री उप+कुल-अच्+टाप्। १पिप्पल्याम् (पिपुल) अम० "हरिद्रोपकुल्याविशालेत्यादि" सुश्रु० तत्पर्य्यायगुणादि भा०प्र० दर्शितं यथा

"पिप्पली मागधी कृष्णा वैदेही चपला कणा। उपकुल्योषणा शौण्डी कोला स्यात् तीक्ष्णतण्डुला। पिप्पली दीपनी दृष्या स्वादुपाका रसायनी। अनुष्णा कटुका स्निग्धा वातश्लेष्महरा लघुः। पित्तला रेचनी कृमि श्वासकासोदरव्रणान्। कुष्ठप्रमेहगुल्मार्शःश्लीपदश्लेष्मशोफहृतान्। आर्द्रा कफप्रदा स्निग्धा शीतला मधुरा गुरुः। पित्तघ्नी सा तु शुष्का पित्तप्रकोपिनी। पिप्पली मधुसंयुक्ता श्लेष्मघ्नी कफविनाशिनी। श्वासकासज्वरहरी दृष्या मेधाग्निवर्द्धिनी। जीर्णज्वरेऽग्निमान्दे च यक्ष्मणे गुडपिप्पली। कासप्लीहार्शरुचिश्वासकृत्वाऽनिलरोगनुत्। द्विगुणः पिप्पलीचूर्णाद्गुडोऽत्र भिषजां मते" ॥ उपगतः कुल्यां कुल्लिमस्मरः अव्या०स०। कुल्योपगते त्रि०। २सामीप्यादौ अव्ययी०। ३कल्याणसामीप्ये द्वौ अव्य०।

उपकुश पु० सुश्रुतोक्ते १मुखरोगभेदे। "मुखरोगाः सप्तपञ्चाशत् तत्र दन्तेषु" इत्युपक्रम्य ओष्ठादीनि सप्तायतनानि उक्त्वा "दन्तमूलगतास्तु शीतादो दन्तपुप्पुटको दन्तवेष्टकः शौषिरो मकराशौषिरः परिदर उपकुशोदन्तवैदर्भौ वर्त्मनोऽधिमांसो नाड्यः पञ्चेति" दन्तमूलगतानुक्त्वा "वेष्टेषु दारुः यावत्तेभ्योदन्तास्तन्ति च। आवर्त्तिताः प्रस्रवन्ति शोणितं भन्द्रवेदनाः। आध्मायन्ते क्षुते रक्ते सुखं प्रति च जायते, यस्मिन्नुपक्रमः स स्यात् पित्तरक्तकृतागदः"। लक्षितः। "वर्णोष्ठोभयतः कार्य्यं शिरस्योपकुशे तथा" सुश्रु०। सामीप्यादौ अव्ययी०। २कुश इत्यर्थे २कुशसामीप्ये च अव्य०। उपगतः कुशम् अव्ययी०स०। ४कुशोपगते त्रि०।

उपकूप त्रि० उपगतः कूपं अव्ययी०स०। १कूपोपगते देशे सामीप्यादौ अव्ययी०। २कूपसामीप्ये ३कूप इत्यर्थे च अव्य०।

उपकूल न० कूले कूलस्य समीपं वा अव्य०। १कूलेऽत्यर्थे। २तीरसामीप्ये च अव्य०। "उपकूल स काङ्क्षन्त्या पुरीं पौरुषभूषणः" रघुः ततो भवार्थे अण् "अव्ययीभावाच्चेति" पा० "परिसुखादिभ्य एवेति" वार्त्तिके नियमनाच्च अत्र। औपकूलः तद्भवादौ त्रि०।

उपकृत त्रि० उप+कृ-क्त। १कृतोपकारे यस्योपकारः कृत इत्यर्थे। भावे क्त। २उपकारे न० "उपकृतं बहु तत्किमुच्यते सुजनता प्रथिता भवता परम्" मा० द०। उपकृतमनेन दृष्टा० इनि। उपकृतिन् येनोपकारः कृतस्तस्मिन् त्रि० स्त्रियां ङीप्।

उपकृष्ण त्रि० उपगतः कृष्णम् अव्ययी०स०। १कृष्णोपगते उपाद्गुह्यकृत्वेऽपि गौरा० पाठात् नान्तोदाहृतता। सामीप्यादौ अव्ययी०। २कृष्णसामीप्यादौ अव्य०। [समर्थं च।

उपकॢप्त त्रि० उप-कृप-क्त। १नियते २विच्छिन्ने ३उपभोगाय-

उपकोसल पु० कोसलापत्ये ऋषिभेदे। "उपकोसलोऽग्नेः कोसलायन सत्यकामे जाबाले ब्रह्मचर्य्यमूषतुः" छा० उ० "उपकोसलोनामतः कोसलस्यापत्यं कोसलायनः" भा०।

उपक्रम पु० उप-क्रम-घञ् न वृद्धिः। १उपायज्ञानपूर्वकारम्भे, २प्रथमारम्भे "ज्योतिरुपक्रमात्तु तथाह्यधीयत एके" "समानाश्चाकृत्युपक्रमादमृतत्वं चानुपोष्य" भा० सू०। "तत्र च प्रतिकर्व्वन्ति यदि पश्यन्त्युपक्रमात्" भा० व० २१५ अ०। "उपक्रमोपसंहारौ—क्षेत्र-

तात्पर्यनिर्णये" वेदान्तिमते तात्पर्यनिर्णायके २ हेतुभेदे तत्र उपक्रमोपसंहाराभ्यां ह्यभ्यासेन तात्पर्यं निश्चीयते नत्वेकैकेनेति बोध्यम् । करणे घञ् । १ सामाद्युपाये "सामादिभिरुपक्रमैः" मनुः । "उपक्रमैरक्षलितैश्चतुर्भिः" रघुः । कर्मणि घञ् । ४ आरभ्यमाणे पु० तदादित्वविवक्षायाम् तदन्ततत्पुरुषस्य क्लीवता "नन्दोपक्रमं द्रोणः" भा० भा० "रामोपक्रममाचख्यौ रक्षःपरिभवं नवम्" रघुः । करणे घञ् । ५ चिकित्सायाम् सुश्रुते भूरिप्रयोगः ।

उपक्रमण न० उप+क्रम-भावे ल्युट् । १ आरम्भे करणे ल्युट् । २ तत्साधने सुश्रुतोक्ते दीर्घायुष्यादिज्ञानपूर्वकचिकित्सायाम् ३ भूमिकायां स्त्री ङीप् । स्वार्थे कन् अत इत्वम् । उपक्रमणिका । यन्त्रप्रस्तावने सुश्रुतः ।

उपक्रमणीय त्रि० उप+क्रम-अनीयर् । १ आरम्भणीये । उपक्रमणे साधु-छ । २ चिकित्सार्हे दीर्घायुष्यादिज्ञानसाधने लक्षणभेदे । आतुरचिकित्सार्थं यथोपक्रमणं कर्त्तव्यं तदा वेदके २ भन्दे च । तत्प्रकारादि सुश्रुते दर्शितं यथा । "अथात आतुरोपक्रमणीयमध्यायं व्याख्यास्यामः । आतुरमुपक्रममाणेन भिषजायुरेवादौ परीक्षितव्यम् । सत्त्वेवायुषि व्याध्यृत्वग्निवयोदेहबलसत्त्वसात्म्यप्रकृतिभेषजदेशान् परीक्षेत । तत्र मक्षापाणिपादास्यं पृथुललाटदशनपटलस्निग्धललाटभ्रूकक्षिपर्वोच्छ्वासप्रेक्षणबाहुं विस्तीर्णभ्रूललाटोरस्कं हस्तजङ्घामेढ्रौष्ठगम्भीरसत्त्वस्वरनाभिमनुद्धतैर्बद्धलक्षणमुपचितमक्षारोमशकक्षं प्रशस्तक्षिक्कं स्नातानुलिप्तं मृष्टानुपव्यं विशुद्धमाणशरीरं प्रशस्त विशुद्धमाक्षद्दयं पुरुषं जानीयाद्दीर्घायुः खल्वयमिति । तमेकान्तेनोपक्रमेत् । एभिर्लक्षणैर्विपरीतैरल्पायुर्भिर्मध्यमायुरिति । गूढसन्धिसिराजालायुः संहताङ्गः स्थिरेन्द्रियः । उत्तरोत्तरसुखेनो यः स दीर्घायुरुच्यते । गर्भात् प्रभृत्यरोगो यः यत्नैः समुपचीयते । शरीरज्ञानविज्ञानैः स दीर्घायुः समाप्तः । मध्यमस्यायुषोज्ञानमत ऊर्द्धं निबोध मे । अधस्ताद्भ्रुवोर्यस्य लेखा स्युर्व्यक्तमायताः । ह्रे वा तिस्रोऽधिका वापि पादो कर्णौ च मांसलौ । नासायमूर्द्ध्नश्च भवेदूर्द्ध्वलेखाश्च पृथुतः । यस्य सुप्तस्य परमायुर्भवति सम्प्रति । अधस्ताच्चायुषो ज्ञानमत ऊर्द्धं निबोध मे । ह्रस्वानि यस्य पर्वाणि समहृद्यापि मेहनम् । तयोरस्य वलीढानि न च स्यात् पृथमायतम् । ऊर्द्ध्वं श्रवणौ स्यातामक्षणा चोच्चा शरीरिणः । हसतो जल्पतो वापि दन्तमांसं प्रदृश्यते । प्रेक्षते यस्य विभ्रान्तं स जीवेत्तच्च विंशतिम् । अथ पुनरायुषो विज्ञानार्थमङ्गप्रत्यङ्गप्रमाणसारानुपदेक्ष्यामः । तत्राङ्गान्यन्तराधिष्ठकुक्षिवाङ्मुखिरांसि तदन्यानि प्रत्यङ्गानीति । तत्र खरङ्गुलेः पादाङ्गुष्ठप्रदेशिन्यौ ह्यङ्गुलायते । प्रदेशिन्यास्तु मध्यमाऽनामिका कनिष्ठिका यथोत्तरं पञ्चमभागहीना । चतुरङ्गुलायते पञ्चाङ्गुलविस्तृते प्रपदपादतले । पञ्चचतुरङ्गुलायतविस्तृता पार्ष्णिः । चतुर्दशाङ्गुलायतः पादः । चतुर्दशाङ्गुलपरिणाहानि पादगुल्फजङ्घाजानुमध्यानि । अष्टादशाङ्गुला जङ्घा जानूपरिष्टाद्दार्ढ्यं यदङ्गुलमेव पञ्चाशत् । जङ्घायामसमावूरू । द्व्यङ्गुलानि दशचविंशदङ्गुलनासापुटभागकर्णमूलनयनान्तराणि । चतुरङ्गुलानि मेढ्रललाटान्तरनासाकर्णललाटपीवोच्छ्रायहनुान्तराणि । हृदयाङ्गुलानि भगविस्तारमेढ्रनाभिहृदयपीवान्तरमुखायाममणिबन्धप्रकोष्ठस्थौल्यानि । इन्द्रबस्तिपरिणाहांसपीठकूर्परान्तरायामः षोडशाङ्गुलः । चतुर्विंशत्यङ्गुलो हस्तः । हास्तिंयदङ्गुलपरिमाणौ भुजौ । हास्तिंयदङ्गुलपरिणाहावूरू । मणिबन्धिकूर्परान्तरं षोडशाङ्गुलम् । तलं षट्चतुरङ्गुलायामविस्तारम् । अङ्गुष्ठमूलप्रदेशिनीव्यधापाङ्गान्तरमध्यमाङ्गुल्यौ पञ्चाङ्गुले । अर्द्धपञ्चाङ्गुले प्रदेशिन्यनामिके । सार्द्धाङ्गुलौ कनिष्ठाङ्गुष्ठौ । चतुर्विंशतिविस्तारपरिणाहं मुखमुच्यते । त्रिभागाङ्गुलिविस्तारा नासापुटमर्य्यादा । नयनत्रिभागपरिणाहा तारका । नवमस्तारकांशो दृष्टिः । केशान्तललाटान्तरमेकादशाङ्गुलम् । मस्तकादष्टाङ्गुलान्ते दशाङ्गुलः । कर्णावट्टान्तरं चतुर्दशाङ्गुलम् । पुरुषोरःप्रमाणविस्तीर्णा स्त्रीश्रोणिः । अष्टादशाङ्गुलविस्तीर्णमुरः । तत्प्रमाणा पुरुषस्य कटी । सविंशत्यङ्गुलायतं पुरुषायाम इति भवन्ति चात्र पञ्चविंशे ततो वर्षे पुमान् नारी तु षोडशे । समत्वागतवीर्य्यौ तौ जानीयात् कुशलो भिषक् । देहः स्वैरङ्गुलैरेव यथावदनुकीर्त्तितः । युक्तः प्रमाणेनानेन पुमान् वा यदि वाऽङ्गना । दीर्घमायुरवाप्नोति विपरीतस्तु मध्यमम् । मध्यमैरायुषश्चिह्नं हीनैस्त्वल्पायुरुत्तमम् । अथ सारान् वक्ष्यामि । कृतिभक्तिप्रज्ञौदार्य्यगौरवोपेतं कल्याणाभिनिवेशं सत्त्वसारं विद्यात् । स्निग्धं संहतसंश्लिष्टनिचितं बहुलं कामप्रजं शुक्रमेव । अङ्गप्रसादप्रबलं स्निग्धगम्भीरस्वरं सौभाग्योपचयं महानेत्रत्वं मज्ञां । महाशिरःस्कन्धहृदयललाटवक्षस्थिनखमस्थिभिः । स्निग्धमूर्त्तसंहतस्थिरं दृढच्छरीरमायासक्षमिणं मेदसा । अक्षिकूटगात्रं गूढास्थिसन्धिं मांसोप-

चितञ्च मांसेन । स्निग्धताम्रनखनयनतालुजिह्वौष्ठपाणिपादतलं रक्तेन । सुप्रसन्नस्निग्धत्वग्लोमाणं त्वक्सारं विद्यादिलेषां पूर्वं पूर्वं प्रधानमायुःसौभाग्ययोरपि । भवति चात्र सामान्यतोऽङ्गप्रत्यङ्गप्रमाणाद्यं सारतः। परीक्ष्यायुः सुनिपुणो भिषक् सिध्यति कर्मसु ।

व्याधिविशेषास्तु प्रागभिहिताः सर्व एवैते त्रिविधाः साध्या याप्याः प्रत्याख्येयाश्च तत्रैतान् भूयस्त्विधा परीक्षेत किमसाधारणनैसर्गिकः प्राकृतेवलोऽन्यलक्षण इति । तत्रौपसर्गिको यः पूर्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरूपद्रवति स तन्मूलएवोपद्रवसंज्ञः । प्राकृतेवलो यः प्राग्वेलोत्पन्नो व्याधिरपूर्वरूपोऽनुपद्रवश्च । अन्यलक्षणो यो भविष्यद्व्याधिरूपद्रवकः स पूर्वरूपसंज्ञः । तत्र सोपद्रवमन्योन्याविरोधेनोपक्रमेत बलवन्तमुपद्रवं वा प्राकृतेवलं यथास्वं प्रतिकुर्वीत । अन्यलक्षणे त्वादिव्याधौ प्रयतेत । भवति चात्र । नास्तिरोगो विना दोषैर्यस्मात्तस्माद्विचक्षणः । अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत् ।

प्रागभिहिता ऋतवः । शीते शीतप्रतीकारउष्णे चोष्णनिवारणम् । कृत्वा कुर्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत् । अप्राप्ते वा क्रियाकाले प्राप्ते वा न कृता क्रिया। क्रियाहीनाऽतिरिक्ता वा साध्येष्वपि न सिध्यति । या तु दोषान् शमयति नान्यं व्याधिं करोति च । सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत् ।

प्रागभिहितोऽग्निरस्य पाचकः (ग्रहणस्य) स चतुर्विधो भवति दोषानभिपद्य एको विक्रियामापद्यस्त्रिविधो भवति विषमो वातेन, तीक्ष्णः पित्तेन, मन्दः श्लेष्मणा, चतुर्थः समः सर्वसाम्यादिति तत्र यो यथाकालमन्नमुपयुक्तं सम्यक् पचति स समः, सर्वदोषैः । यः कदाचित्सम्यक्पचति कदाचिदाध्मानशूलोद्गारवर्त्मोत्तिसारजठरगौरवान्नकूजनप्रवाहणानि कृत्वा स विषमः । यः प्रभूतमप्युपयुक्तमन्नमाशु पचति स तीक्ष्णः, स एवाभिवर्द्धमानोऽग्निरित्याभाष्यते स चातिभुक्तः प्रभूतमप्युपयुक्तमाशुतरं पचति प्राकाले च गलतालुोष्ठशोषदाहसन्तापान् जनयति । यः स्वल्पमप्युपयुक्तमुदरगौरवकासश्वासप्रसेकच्छर्दिगात्रसदनानि कृत्वा महता कालेन पचति स मन्दः । विषमो वातजान् रोगान् तीक्ष्णः पित्तनिमित्तजान् । करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् । तत्र समे परिरक्षणं कुर्वीत विषमे स्निग्धाम्ललवणैः क्रियाविशेषैः प्रतिकुर्वीत तीक्ष्णे मधुरस्निग्धशीतैर्लघिरैश्च । एवमेवात्मनौ विशेषेण साक्षिपेच्च क्षीरदधिसर्पिर्भिर्मन्दे कटुतिक्तकषायैर्यवैश्च । जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः । सौम्यत्वाद्रसादादानो विवेक्तुं नैव शक्यते । प्राणापानसमानैस्तु सर्वतः प्रवर्त्तिभिः। घ्मायते प्राप्यते चापि स्वे स्वे स्थाने व्यवस्थितैः ।

वयस्तु त्रिविधं बालं मध्यं वृद्धमिति । तत्रोनषोडशवर्षा बालास्तेऽपि त्रिविधाः क्षीरपाः क्षीरान्नादा अन्नादा इति तेषु सवत्सरपराः क्षीरपा द्विसंवत्सरपराः क्षीरान्नादाः परतोऽन्नादा इति । षोडशसप्तत्योरन्तरे मध्यं वयस्तस्य विकल्पो दृढिर्यौवनं संपूर्णता हानिरिति । तत्र विंशतेर्द्विरात्रिंशतो यौवनमा चत्वारिंशतः सर्वधात्विन्द्रियबलवीर्यसम्पूर्णता । अतऊर्द्धमीषत् परिहाणिर्यावत्सप्ततिरिति । सप्ततेरूर्द्धं क्षीयमाणधात्विन्द्रियबलवीर्योत्साहमहन्यहनि वलीपलितस्खलितजुष्टं कासश्वासप्रभृतिभिरुपद्रवैरभिभूयमानं सर्वक्रियासु असमर्थं जीर्णागारमिवाभिदृष्टमवसीदन्तं वृद्धमाचक्षते । तत्रोत्तरोत्तरास्तु वयोऽवस्थास्वुत्तरोत्तरा भेषजमात्राविशेषा भवन्त्यृते च परिहाणेस्तत्तावापेक्षया प्रतिकुर्वीत । भवन्ति चात्र । बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु । भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत् । अग्निसारविरेकैस्तु बालवृद्धौ विवर्जयेत् । तत्साध्येषु विकारेषु मृदुं कुर्यात् क्रियां यत्नैः ।

देहः स्थूलः कृशो मध्य इति प्रागुपदिष्टः । कर्शयेद्बृंहयेच्चापि सदा स्थूलकृशौ नरौ । रक्षणञ्चैव मध्यस्य कुर्वीत यततं भिषक् ।

बलमभिहितगुणं दौर्बल्यञ्च स्वभावदोषजरादिभिरवेक्षितव्यम् । यत्कालबलवतः सर्वक्रिया प्रवृत्तिस्तत्कालबलमेव प्रधानमधिकरणानाम् । केचित् कृशाः प्राणवन्तः स्थूलाश्चाल्पबला नराः। तस्मात् स्थिरत्वव्यायामैर्बलं वैद्यः प्रतर्कयेत् ।

सत्त्वन्तु व्यसनाभ्युदयक्रियादिस्थानेषुर्वैकल्यकरम् । सत्त्ववान् सहते सर्वं संस्तभ्यात्मानमात्मना । राजसः स्तभ्यमानोऽन्यैः सहते नैव तामसः ।

प्रकृतिं भेषजं चोपरिष्टाद्वक्ष्यामः (प्रकृतिं शारीरस्थाने, भेषजं तत्तत्प्रकरणे) ।

सात्म्यानि तु देशकालजात्यृतुरोगव्यायामोदकदिवास्वप्नरसप्रभृतीनि प्रकृतिविरुद्धान्यपि यान्यबाधकराणि भवन्ति । यो रसः कल्पते यस्य सुखायैव निषेवितः। व्यायामजात्मन्यद्वा तत् सात्म्यमिति निर्दिशेत् ।

देशस्त्वानूपो जाङ्गलः साधारण इति । तत्र बहूदकनि-

ज्योत्स्नातनदोवर्षगर्हणो हृद्योतानिलो वक्त्रमहापर्व्वतष्टल्लो हृद्दुःक्रमारोपचितगरं रमनुष्यायः कफवातरोगभूयिष्ठस्थानूपः। आकाशसमः प्रविरलात्यकण्टकिद्रुमप्रायोऽल्पवर्षप्रस्रवणोदपानोदकपाय उष्णादारुणवातः प्रविरलात्पर्णैलः स्थिरद्रुगणशरीरमनुष्यप्रायो वातपित्तरोगभूयिष्ठश्च जाङ्गलः। उभयदेशलक्षणः साधारण इति। भवन्ति चात्र। समाः साधारणे यस्माच्छीतवर्षोष्मसंभृताः। दोषाणां समता जन्तोस्तस्मात्साधारणो मतः। न तथा बलवन्तः स्युर्जलजा वा स्थलाश्रिताः। स्वदेशे निचिता दोषा अन्यस्मिन् तोपमागताः। उचिते वर्त्तमानस्य नास्ति देशकृतं भयम्। आचारस्वप्नचेष्टादौ तद्देशस्य गुणे सति देशप्रकृतिसात्म्यर्तुविपरीतोऽचिरोत्थितः। मन्यस्तौ भिषगादीनां बलसत्वायुषा तथा। केवलः समदेहाग्नेः सुखसाध्यतमो गदः। अतोऽन्यथा त्वसाध्यः स्यात् कृच्छ्रो व्यामिश्रलक्षणः। क्रियायासु गुणालाभे क्रियामन्यां प्रयोजयेत्। पूर्व्वस्यां यान्त्वेवायां न क्रियासङ्करो हितः। गुणालाभेऽपि सपदि यदि सैव क्रिया हिता। कर्त्तव्यैव तदा व्याधिः कृच्छ्रसाध्यतमो यदि। यत्नमेनं विधिमेकरूपं बिभर्त्ति कालादिवशेन धीमान्। स मृत्युपाशान् जगतोगदौघान्छिनत्ति भैषज्यपरश्वधेन"।

उपक्रान्त त्रि॰ उप+क्रम-क्त। १आरब्धे २विस्तृते च तद्वत्यर्थेत्रि॰

उपक्रिया स्त्री उप+कृ-भावे य। उपकारे "तमपीह गुरुं विद्यात् शुश्रूषोपक्रियया तया" मनुः।

उपक्रोश पु॰ उप-क्रुश-घञ्। निन्दायाम्। "नायं विभेत्युपक्रोशादधर्म्माद्धि पुरारुणः" भा॰ आ॰ १४५ अ॰ "राज्ञेनकिं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीनसत्वैः" रघुः अत्या॰स॰। २उपगतक्रोशे आसन्नक्रोशे त्रि॰। अव्ययी॰। ३क्रोशसमीपे अव्य॰। भावे ल्युट् उपक्रोशनञ्च तत्। "बालस्त्वनर्थकोपक्रोशनैः" दशक॰। "कुलोपक्रोशनकरी कुलाङ्गारी निराश्रया" हरि॰ १७६ अ॰। [स्त्रियां ङीप्।

उपक्रोष्टृ पु॰ उप+क्रुश-तृच्। १गर्हके २निन्दके त्रि॰।

उपक्लेश पु॰ उपक्लिश्नाति अनेन उप+क्लिश-करणे घञ्। मदादिषु। [घञ्पक्षे अप्। वीणानिनादे।

उपक्व(क्वा)ण पु॰ उप+क्वण-शब्दे "क्वणोवीणायाञ्च" पा॰वा

उपक्षय पु॰ उप+क्षि-अच्। १अपचये हानौ। सामीप्यादौ अव्ययी॰। २निवाससमीपादौ, अव्य॰। २क्षयम् अत्या॰स॰। ३क्षयं प्राप्ते त्रि॰। तत्पुरुषे उपादृह्यच्कत्वादन्नोदात्तता।

उपक्षित् त्रि॰ उप+क्षि-क्विप्। समीपनिवासिनि। "यस्त्वे अग्ने अन्ये अग्नय उपक्षितो वया इव" ऋ॰ ८, १६, २२। [२सकार्य्योद्यतसामर्थ्ये प्राप्ते च।

उपक्षीण त्रि॰ उप+क्षि-क्त तस्य न, दीर्घश्च। १अपचयप्राप्ते

उपक्षेप पु॰ उप+क्षिप-भावे घञ्। १आक्षेपे, "कर्णनासाक्षेदोपक्षेपभीषिताभ्याम्" दशक॰। २समीपे निक्षेपणे च।

उपक्षेपण न॰ उप+क्षिप-ल्युट्। मूढस्वामिकाद्रव्यस्य विप्रलम्भेन पाकार्थं समर्पणे। "उपक्षेपणधर्म्मेण यस्तु पाचयते द्विजैः। अभोज्यं तद्भवेदन्नम्" शाम्ब॰पु॰। "उपक्षेपणधर्म्मेण मूढस्वामिकादेः पाकार्थं ब्राह्मणादेः समर्पणरूपेणेति" कल्पतरुः। २समर्पणमात्रे च।

उपखात अव्य॰ सामीप्यादौ अव्ययी॰ १खातसामीप्ये २ख्याते इत्यर्थेच। उपगतः खातम् अत्या॰स॰। ३खातानुगते। उपादृह्यच्कत्वेन तत्पुरुषपक्षे अन्नोदात्ततेतिभेदः

उपग त्रि॰ उप+गम-ड। उपगन्तरि "ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः" मनुः। "लोतायां भावसंकल्पाः क्रियादानफलोपगाः" भा॰व॰ १४६अ॰। "केन्द्रोपगा नवमपञ्चमगाश्च सर्वे" ज्यो॰त॰।

उपगण त्रि॰ उपगतो गणो येन प्रा॰ब॰ संख्यावचनत्वेऽपि "अबहुगणादति" पा॰ निषेधात् न डच्। प्राप्तसमुदाये डचि तु चित्त्वात् अन्नोदात्तता स्यात्। अतस्तस्य पूर्वपदप्रकृतिस्वरार्थं डचोनिषधः। "कूपातिप्रसङ्गाभावेऽपि स्वरभेदार्थमेव पर्य्युदासः" सि॰ कौ॰ स्थितम्।

उपगत त्रि॰ उप+गम-क्त। १स्वीकृते, २उपस्थिते, ३ज्ञाते ४प्राप्ते च "सर्व्वोहि नोपगतमभ्युपचीयमानं वर्द्धिष्णुमाश्रयमनागतमभ्युपैति" माघः भावे क्त। ५प्राप्तौ न॰ उपगतं प्राप्तिः स्वाङ्गत्वेनास्य अच्। ६प्राप्तिस्वीकृते पत्रे च (रसिद)। "धनी वोपगतं दद्यात् स्वहस्तपरिचिह्नितम्" या॰ स्मृ॰। "उपगतं प्राप्तमिति यद्वा उपगतम् प्रवेशयत्रं स्वहस्तलिखितचिह्नितमधमर्णायोत्तमर्णोदद्यात्" मिता॰।

उपगति स्त्री उप+गम-क्तिन्। १प्राप्तौ २ज्ञाने ३स्वीकारे च

उपगन्तृ त्रि॰ उप+गम-तृच्। १प्राप्तरि २स्वीकर्त्तरि ३ज्ञातरि च।

उपगम पु॰ उप+गम-भावे घञ् ऋदृशि॰। १समीपगमने, २अङ्गीकारे ३ज्ञाने, च "सोमन्ते च त्वदुपगमजं यत्तु नीपं वधूनाम्" मेघ॰। "व्याव्यो॰पगमात् कुमारी" भाग॰ "वनोपगमनश्रमवेशभृत्" । भावे ल्युट्। उपगमन

मयत्न। "यथा कर्म्म ए॰ कृत्वा स्वर्गोपगमनं भवेत्" भा॰ आ॰ १०३अ॰।

उपगम्य(त्य) अव्य॰उप+गम–ल्यप् वा मलोपे तुक्। १समीपं गत्वेत्यर्थे। कर्म्मणि यत् उपगम्य। २सामीप्येन गम्ये त्रि॰।

उपगहन पु॰ ऋषिभेदे "मङ्कानविश्च कपिलस्तथर्षिर्लाङ्गकायनः। तथैव चोपगहनस्तथर्षिर्वामुरायणिः" भा॰आ॰ ४अ॰।

उपगा पु॰ उप+गै–क्विप्। यज्ञे १उपगातरि ऋत्विग्भेदे। भावे अङ्। २उपगाने स्त्री "उपगादर्शनाच्च" कात्या॰ ६,७,१, "उपगानदर्शनाच्चैवमवसीयते कर्कः।

उपगातृ पु॰ उपगायति उप+गै–तृच्। यज्ञे उद्गातृसमीपे १गातरि ऋत्विग्भेदे "एकस्यातिरुद्गाता विश्वेदेवा उपगातारः" तैत्ति॰। "ऋत्विग्व्यतिरिक्तानामुपगातृणामनुपक्रमत्वादृत्विज एवोपगातारः" कात्या॰ ६,७,१, कर्कः। "स वडवा उपहन्ति संयिक्षते यथोपगातार उपगायन्ति" शत॰ब्रा॰१२,२,३,२। समीपगानकर्त्तरि त्रि॰ (दोयार) स्त्रियां ङीप्।[गन्तरि २स्तोकर्त्तरि ३श्रातरि च

उपगामिन् त्रि॰ उप+गम–णिनि स्त्रियां ङीप्। समीप-

उपगिर (रि) अव्य॰सामीप्यादौ अव्ययी॰ वा अच्समा॰। १पर्व्वतसामीप्ये २पर्व्वते इत्यर्थे च। गिरिसुपगतः अत्या॰स॰। उत्तरदिक्स्थे गिरिसन्निकृष्टे देशभेदे पु॰ "प्रयथामुत्तरां तस्माद्दिशं धनदपालिताम्। अन्तर्गिरिञ्च कौन्तेयस्तथैव च बहिर्गिरिम्। तथैवोपगिरिञ्चैव विजिग्ये पुरुषर्षभः" भा॰स॰२६ अ॰। अन्तोदात्तोऽयम्।

उपगीति स्त्री "आर्य्याद्वितीयकार्द्धे यदुद्गदितं लक्षणं तत् स्यात्। यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते" वृ॰र॰ उक्ते मात्रावृत्तभेदे।

उपगु त्रि॰उपगतो गौरस्य लुप्तः गोशब्दोनार्थः। १प्राप्तकिरणादौ २गोपाले च "उपगोरिदम् अण्। औपगव तत्सम्बन्धिनि त्रि॰। "सामीप्येऽव्ययी॰। २गोः सामीप्ये अव्य॰। [स्त्रियां गौ॰ ङीष्।

उपगुध त्रि॰ उप+गुध–रोधने क। सामीप्येन रोधके।

उपगुरु पु॰उपगतः सामीप्येन गुरुम् अत्या॰स॰अन्तोदात्तः। तन्त्रोक्ते गुरुसदृशे उपदेशादिकारके। सामीप्यादौ अव्ययी॰। २गुरोः सामीप्ये ३गुरावित्यर्थे च अव्य॰।

उपगूढ न॰उप+गुह–भावे क्त। १आलिङ्गने "उपगूढानि सवेपथूनि च" कुमा॰। "विश्रमार्थमुपगूढमजस्रम्" माघः। कर्म्मणि क्त। २आलिङ्गिते त्रि॰। ततः अच्या॰ यत्-

रथ्यां क। उपगूढक तत्सन्निकृष्टदेशादौ त्रि॰।

उपगूहन न॰ उप+गुह–ल्युट् ओकृत्। आलिङ्गने "करक्रुकन्दाङ्घ्रयुपगूहनं पुनः" भा॰स्व॰ ५अ॰।

उपगोह्य त्रि॰उप+गुह–ण्यत् अत्वविधौ अच एव यहणात् अत्वम्। १आलिङ्गे, २व्याह्ये च। भावे ण्यत्। २आलिङ्गने। पक्षे क्यप् उपगुह्यमभवत्।

उपगौर त्रि॰ उपगतो गौरम् अत्या॰स॰। गौरवर्णोपगते उपादुह्यच्कत्वेऽपि गौरादिपर्युदासात् मान्तोदात्तता

उपग्रह पु॰ उप+ग्रह–अप्। १कारावन्धने, २वन्दीकरणे, ३उपयोगे, ४आनुकूल्ये च। कर्म्मणि घञ्। ५कारारुद्धवन्द्याम्। उपगतोपग्रहं शाद्वलेन अत्या॰स॰। ज्योतिषोक्ते दैवहतुल्ये ज्योतिःपदार्थे राहुकेत्वादौ "यहाः सोपयहाश्चैव दृष्टाः परिवृतां गयाः। एते चान्येच बहवो घोरास्तिदिववासिनः। परिवार्य्य महासेनं स्थिता भारतगोः सह" भा॰व॰२२६अ॰ "उपयहाः राहुप्रभृतयः नीलक॰ "सूर्य्यभात् पञ्चमं धिष्ण्यं त्रिघ्नं विद्युन्मुखाभिधम्। सूत्यक्षाद्यमगं प्रोक्तं सन्निपातं चतुर्हतम्। केतुरष्टाग्रं प्रोक्तसुल्का स्यादेवविंशतिः। द्वाविंशतितमं कम्पस्त्रयोविंशश्च वज्रकम्। निर्घातश्चतुर्विंशमुक्ता अष्टावुपयहाः" ज्यो॰ त॰ उक्ते सूर्य्याक्रान्तनक्षत्रात् पञ्चमादिषु विद्युन्मुखादिसमाख्येषु ७नक्षत्रेषु। तत्फलञ्च "प्रस्थाने विघ्नदा प्रोक्ताः सर्वकार्य्येषु सर्वदा क्रूरवेधसमायोगे यहोपयहसम्भवः। तस्य सूत्युर्न सन्देहो रोगाद्वाऽथ रणादपि ज्यो॰ त॰। ८उपयहणगर्हार्थे च।

उपग्रहण न॰उप+ग्रह–ल्युट्। १सामीप्येन यहणे २स्वीकारे "वेदोपग्रहणार्थाय तावग्राहयत प्रभुः" रामा॰बालाय॰ ओक्ते आज्याधारकरणभेदे। "एकद्रव्ये साज्ये वेदेनोपयहणम्" कात्या॰ १,१०,६, "दक्षिणहस्तस्थस्य साज्यस्यैकद्रव्यस्य हस्तकम्पनादिनास्कन्दनावरणार्थं सव्यहस्तगृहीतवेदेनाधारकरणमुपयहणमुच्यते" कर्कः। अप् उपयहोऽयत्र। "न सव्येन वेदोपग्रहः" तत्रैव कर्कः।

उपग्राह पु॰ उप+ग्रह–णिच्–अच्। १उपढौकने उपहारे (भेटदेओया) कर्म्मणि घञ्। २उपहारद्रव्येच देये "उशनावचनादेतान् राजभिः प्रापितान् बहून्" भा॰स॰५१अ॰ "उपग्राहान् उपहारान्" नीलक॰।

उपग्राह्य त्रि॰ उप+ग्रह–णिच्–यत्। समीपे ग्राहयितुमुपस्थाप्ये १उपढौकनीयद्रव्ये(भेटी)भावे यत्। २उपहारे न॰

उपघात पु॰उप+हन–घञ्। १नाशने, २कर्म्मावोन्यतासम्पादने

"काकेभ्यो रक्ष्यतामन्नमिति बालोऽपि देशितः। उपघातप्रधानत्वात् न श्वादिभ्योऽपि रक्षति" मीमां० का०। "बीजदोषोपघातेन फले दोषमुपागते" या० स्मृ०। २अपकारे। "स्त्रीणाञ्च प्रेक्षणालम्भनसुपघातं परस्य च" मनुः। ३इन्द्रियाणां स्वस्वकार्यजननासामर्थ्ये च "तथात्वञ्चेन्द्रियाणामुपघाते क्रमं स्मृतिः" भाषा०। इन्द्रियाणामुपघातस्य एकादशेन्द्रियभेदेन बाधिर्य्यादिभेदात् एकादशविधः। अस्मिन्शब्दे ४७२पृ० विवृतिः। करणे घञ्। ५रोगे "ईषापसमूहे च "रेतोरक्तगर्भोपघातः पञ्चगुणोजातकर्मणा प्रथममपोहति" अष्टाभिःसंस्कारैः गर्भोपघातात् पूतो भवति" हारीतः "उपघातः पापसङ्घः पञ्चगुणः पञ्चप्रकारः उपपातकजातिभ्रंशोकरसङ्करोकरणापात्रीकरणमलिनीकरणाख्यपापपञ्चकसंघः" सं० त० रघु० "पाणिना मेक्षणेनाथ स्रुवेणैव तु यद्धविः। हूयते चानुपस्तीर्य उपघातः स उच्यते" श्राद्धसंघहोक्ते ७होमभेदे। "अनुपस्तीर्य्यहोमेन स्रुचि बह्वल्पतरायत्तं पञ्चावत्तं वा हुतोपस्करणादिकं तदत्र नास्ति मेक्षणादिना सकृद् हुत्वोत्वा होमः" व्र० त० रघु०। "चरौ तु बह्वल्पत्वे होमः, स्यादुपाघातवत्" कल्पतरुः।

उपघातक त्रि० उप+हन-ण्वुल्। १नाशके २पीडके च काकाख्यस्य दध्युपघातकत्वेन काकाकोभयवृत्तिः, आङ्गारिकाः "पुंसा सह समायोगो न स धर्मोपघातकः" भा० आ० ७२अ० "कथं सकृन् यहीष्यामि भूत्वा धर्मोपघातकः" भा० आश्व० ६० अ०।

उपघातिन् त्रि० उप+हन-णिनि स्त्रियां ङीप् १नाशके २पीडके च "शस्त्रं पातयेन्मर्म्मशिराम्नायुसन्धीनां वानुपघाति" सुश्रु०।

उपघ्न पु० उप+हन-घञर्थे-क। आसन्ने आश्रये "क्रेदादिवोपघ्नतरोर्व्रततयौ" रघुः "पिप्पायाद्विगुहोपघ्नान्" भट्टिः।

उपच(ज) त्रि० उपचिनोति उपजायते वा उप+चि-जन-वा ड। चान्नपाठे वृद्धिकारके जान्तः अनन्तरजाते। "व्रीहियवयोर्वा एतदुपचं (जं) यच्छमीधान्यं तद्व्रीहियवावेतेन भूयांसौ करोति" यत०ब्रा० १,१,१,१०। भाष्यकृता तु अत्र उपचमिति पठित्वा यमीधान्यम् तिलमाषादि उपचिनोति उपचम् अल्पमाषपिष्टेन मिश्रितं व्रीहिपिष्टं त्रिचतुरमात्रं आरोपितम् उपचितं बहु भवतीति" व्याख्यातम्

उपचक्र पु० उपगतः सादृश्येन चक्रं चक्रवाकम् अत्या० स०। चक्रवाकभेदे पक्षिभेदे "भङ्गराजोपचक्राश्च लोहपृष्ठाः पतत्रिणः" भा० व० १५८अ०। "चकोरैरुपचक्रैश्च पत्रिभिर्जीवजीवकैः" भा० १७८अ०। तत्पुरुषे उपादृद्वाचकत्वादुदात्तः। सामीप्यादौ अव्ययी०। २चक्रस्य सामीप्ये २चक्रे इत्यर्थे च अत्र चक्रशब्दो नानार्थः।

उपचक्षुस् न० उपगतञ्चक्षुर्दर्शनानुगुण्यार्थम् अत्या० स०। उपनेत्रे (चश्मा) काचादिनिर्म्मिते दर्शनसाधने द्रव्यभेदे

उपचतुर त्रि० उपगताश्चत्वारो यस्य प्रा० ब० गतलोपः ऽचोबाधकोऽच्। १चतुर्षां समीपवर्त्तिनि। चतुरस्य सामीप्यादौ अव्ययी०। २दक्षसामीप्यादौ अव्य०।

उपचय पु० उप+चि-भावे अच्। १वृद्धौ २उन्नतौ "स्वयम्भूपचये केचित् परस्य व्यसने परे" माघः। "तदेतेषामस्मत्पुत्राणां शानोपचये भवन्तः प्रमाणम्" छिलो० "बहूतवो भवन्ति दोषोपचयप्रकोपोपशमननिमित्तम्" सुश्रु०। "षष्ठिदशलाभाश्च लग्नादुपचयाः स्मृताः" इति ज्योतिषोक्ते ३लग्नात् षष्ठादिस्थानेषु च। [च।

उपचरित त्रि० उप+चर-क्त। १उपासिते २लक्षणया बोधिते

उपचर्म(न्) अव्य० चर्मणः सामीप्यादौ अव्ययी० वा अच्समा०। १चर्मसमीपे २चर्मणोऽर्थे च उगतश्चर्म अत्या० स०। नान्तः। चर्मोपगते त्रि० स्त्रियां वा ङाप् मनन्तत्वान्न ङीप्।

उपचर्य्य त्रि० उप+चर-कर्मणि यत् ततः उपपदेन अचतरेत्यादिवत् सुपीति समासः सोपसर्गात्तु ण्यदेव स्यात्। १सेवनीये "ये च यैरुपचर्य्याःस्युर्स्त्रियमैस्तान्निबोधत"। उपचर्य्यः स्त्रिया साध्वा सततं देवयत् पतिः" मनुः "अग्निवच्चोपचर्य्या वै ब्राह्मणाः कुरुनन्दन!" भा० आनु० ८अ०। २चिकित्सनीये च। भावे यत् तथा समासः। ३चिकित्सायाम् ४सेवने च न० [कृत्या०

उपचर्य्या स्त्री उप+चर-भावे क्यप्। १सेवने २चिकित्सायां

उपचाकु त्रि० उप+चक प्रतीघातहिंसयोः उण्। १प्रतिघातके २प्रीते च ततः बाह्वादि० अपत्यार्थे इञ्। औपचाकवि तदपत्ये पुंस्त्री०।

उपचायिन् त्रि० उपचिनोति उप+चि-णिनि स्त्रियां ङीप्। उपचयकारके वृद्धिकारके। "इतो वृद्धोपचायित्वात् शिशुं मामद्य बोधय" भा० आश्व० ७६अ०।

उपचाय्य पु० उपचीयतेऽग्निरत्र उप+चि-आधारे ण्यत्। यज्ञे इष्टकादिनिर्म्मिते अग्निधारणार्थे स्थलविशेषे "कथाभीरमसे नित्यमुपचाय्यवतां शुभे!" भट्टिः।

उपचार पु० उप+चर-घञ्। १चिकित्सायां, २सेवायां, "ते चिरायास्खलितोपचारम्" । "उपचाराङ्गविक्षिप्त-

कृत्वा" रघु० । २व्यवहारे, "भूते उपचारात् अन्यार्थदर्शनाच्च" मीमां० भाष्यप्रयोग अविद्यमानशब्द ४।१ पृष्ठे दर्शित । ३उत्कोचे ५ लक्षणया यत्किमर्थत्यागेनान्यार्थबोधने ६अयथार्थवाक्येन सन्तोषकरणे च "उपचारपदं न चेद्दृश्यमिति" कुमार० ७धर्म्मानुष्ठानमात्रे "वैश्यस्तूपोपचारश्च" "व्रतचर्योपचारश्च" मनु । "प्रयुक्तपाणिग्रहणोपचारो" कुमा० । करणे घञ् । ८पूजासाधने द्रव्यभेदे "यन्मन्त्रलोपचाराणां सर्वादिरचनाऽभवत्" रघु पञ्चाङ्गोपचाराश्च नानाविधा तत्र सर्वोपचारमन्त्रास्तु श्रीतारपूर्व्वा०, कल्पयामि नम इत्यन्ता, कार्य्या । "सिद्धजामले "श्रीतारञ्च समुच्चार्य्य दद्यात् पाद्यं ततः परं । कल्पयामि नमः पश्चादुपचारेष्वयं विधिः" तन्त्रसारे "चतुःषष्ट्युपचारा दर्शिताः यथा आसनमारोपणम् १। सुगन्धितैलाभ्यङ्ग २। मज्जनशालाप्रवेशनम् ३। मज्जनमणिपीठोपरिवेशनम्४ । दिव्यस्नानीयसहस्रनम् ५ । उष्णोदकस्नानम् ६ । कनककलसस्थितसकलतीर्थाभिषेचनम७। धौतवस्त्रपरिमार्জ্জनम् ८। अक्षतदुकूलपरिधानम्९ अक्षतदुकूलोत्तरीयम्१०। आलेपनशुष्कप्रवेशनम् ११ । आलेपनमणिपीठोपवेशनम्१२ । चन्दनागुरुकुङ्कुमकर्पूरकस्तूरीरोचनादिव्यगन्धसर्व्वाङ्गानुलेपनम १३ । जोषभारस्य कालागुरुधूपसन्निकाशमालतीजातीचम्पकाशोकपत्रपन्नगकेशरीपुन्नागकङ्कारवृथासर्व्वकुसुममालाभूषणम् १४ । भूषणमण्डपप्रवेशनम १५ । भूषणमणिपीठोपवेशनम् १६ । नवमणिमुकुटम् १७ । चन्द्रार्कलम्१८ । सीमन्तसिन्दरम् १९ । तिलकरत्नम् २० । काजाञ्जनम् २१ । कर्णपालियुगलम्२२ । नासाभरणम् २३ । अधरद्यावकम् २४ । प्रपदभूषणम् २५ । कनकचित्रपादुका २६ । सङ्घापादका२७ । शङ्खावलि २८ एकावलिः २९ । देवकन्दक ३० । केयरयुगलवलयचतुष्टयम्३१ । वलयावलि. ३२ । ऊर्म्मिकावलिः ३३ । काञ्चिदाम३४ कटीसूत्रम्३५ । शोभाव्याभरणम्३६। पादकटकम् ३७ । रत्ननूपुरम् ३८ । पादाङ्गुलीयकम् ३९ । एककरे दाप. ४० । अन्यकरे अङ्कुश ४१ । पूर्व्वेणुचामरम् ४२ । अपरकरे पुष्पमाला ४३ । श्रीमन्माणिक्यपादुका ४४ । खसमानवेशाभिरावरणदेवताभिः सहसिंहासनारोहणम् ४५ । कामेश्वरपर्य्यङ्कोपवेशनम् ४६ । अङ्गतालवृन्तचमरम् ४७ । आचमनीयम् ४८ । कर्पूरवटिका४९ । आनन्दोल्लासः५० । सविलासहास्य५१ । मङ्गलारात्रिकम् ५२ । श्वेतच्छत्रम् ५३ । चामरयुगलम ५४ । दर्पणः ५५ । तालवृन्तम् ५६ । गन्धः५७ । पुष्पम् ५८ । धूपः ५९ । दीपः ६० । नैवेद्यञ्च ६१ । एतानि कल्पयेत् एषामुपचाराणामभावे तन्मन्त्राज्या । "तदुक्तं नवरत्नेश्वरे । "व्रत यच्चोपचाराणामभावे तन्मनुं जपेत् । तत्तदेव फलं विन्देत् साधकः स्थिरमानसः"।"आचमनीयं प्रदातव्यमुपचारान्तरान्तरे" तन्त्रसारे तानि च त्रीणि "स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् नरसिंहपुरातेन चतुर्षष्टिपरत्वम् । एतच्च श्रीविद्याप्रकरणे यथात्तद्वयम् । अन्यत्र यथागम कल्पनीयम् । गङ्गाचार्य्येण तु स्तोत्रच्छलेन अन्यविधा चत यच्चोपचाराद्दर्शिता विस्तरभयात्र ते दर्शितास्तत्स्तोत्रेऽवसेयाः । अथाष्टादशोपचाराः । "आसनम् १ स्वागतम् २ पाद्यम्३ अर्घ्यम ४ आचमनीयकम् ५ । स्नानम् ६ वस्त्रोपवीतञ्च ७ भूषणानि च सर्व्वशः ८ । गन्धम ९ पुष्पम् १० तथा धूपम ११ दीपम १२ अन्नञ्च १३ तर्पणम्१४ माल्यानुलेपनैश्चैव १५ -६ नमस्कारविसर्জ্জने १७ १८ । अष्टादशोपचारैस्तु मन्त्री पूजा समाचरेत्" । अथ षोडशोपचारा । "पाद्यमर्घ्यन्तथाचाम स्नानं वसनभूषणे। गन्धं पुष्पधूपदीपं नैवेद्याचमनन्तत । ताम्बूलमर्घ्यने स्तोत्रं तर्पणञ्च नमस्क्रियाम् । प्रयोजयेत् प्रपूजायामुपचारांस्तु षोड्श"अथ दशोपचाराः । "पाद्यमर्घ्यं तथाचामो मधुपर्कश्चमो तथा । गन्धादयोनिवेद्यान्ता उपचारा दश क्रमात्। अथ पञ्चोपचारा । "गन्धपुष्पं तथा धूपं दीपं नैवेद्यमेव च । अनयैव फलमाद्यन्तेषत् लभते ध्रुवम्" तन्त्रसा० विधानयो० विष्णुतिलके अन्यविधा षोडशोपचारा दर्शिताः ते च तत्तन्मन्त्रसहिता मत्कृततत्तुलादानादिप्रयोगे २२८पृष्ठे दर्शिताः । आ०त० "आसन स्वागतं पाद्यमर्घ्यमाचमनीयकम् । मधुपर्कोचमं स्नानवसनाभरणानि च । गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा" एते षोड्शोपचाराः पठिता भक्तिभेदात् भेद उन्नेयः । तत्रासनादिकं यथा देवं तथोक्तं कालि० पु० "आसनं प्रथमं दद्यात् पौष्यं दारवजेव वा" । (दारवात् रजतात्मासनम्) । "पाद्यार्घ्यमुदकं पाद्यं केवलं तोयमेव तत् । तत्तैजसेन पात्रेण भक्त्यैनाथ प्रदापयेत्" । (अर्घ्यमर्घ्य चन्दे उक्तम्) । "उदकं दीयते यत्तु प्रसन्नं फेनवर्জ्जितम् । आचमनाय देवेभ्यस्तदाचमनमिष्यते । तत्तैजसेन पात्रेण भक्त्यैनापि प्रदापयेत् । स्वर्णरत्नोदकं स्नानं कर्पूराद्य

धिवासितम् । तैजसैः कांस्यपात्रैर्वा गन्धेनाथ प्रदापयेत् । यद्दीयते देवताभ्यो गन्धपुष्पादिकं तथा । अर्घपात्रस्थितैस्तोयैरभिषिच्य समुत्सृजेत् । नैवेद्यं दक्षिणे वा मे पुरतो वा न पृष्ठतः । दीपं दक्षिणतो दद्यात् पुरतो वा न वामतः । वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे । निवेदयेत् पुरोभागे गन्धपुष्पञ्च भूषणम्" नरसिं०पु० । "कार्पासं सर्वतोभद्रं दद्यात् सर्वेभ्य एव हि । नैकान्तरक्तं दद्यात्तु वासुदेवस्य चेलकम् । तत् पूर्व्वं पूजयित्वैव मन्त्रैर्देवाय चोत्सृजेत् । निर्दग्धं मलिनं जीर्णं छिन्नं गात्रावलिङ्गितम् । परकीयं चाणुदृष्टं क्लेदोविद्धं तथोषितम् । उपक्लेदं विधूतञ्च क्लेदमूलादिदूषितम् । वर्जयेत् क्षोपयोगे च यत्नाद्यावुपयोजने" । (उपक्लेदं क्लेदेन सह वापितम्) । "पताकाध्वजवस्त्रादौ स्यूतं वस्त्रं नियोजयेत् । पट्टवैयकादि संसक्तं सौवर्णं राजतञ्च वा । निवेदयेत्तु देवेभ्यो नान्यतंजससम्भवम् । प्रावरः प्रान्तपातञ्च गरुडो वस्त्रमेव च । पर्य्यङ्कादि यदन्यच्च सर्व्वं तदुपभूषणम्" । गन्धविशेषो गन्धशब्दे वक्ष्यते ।

उपचारच्छल न० वाद्युक्तवाक्यस्य तत्तात्पर्य्यविषयार्थान्तरपरत्वकल्पनेन खण्डनकारूपे दूषणभेदे । छलस्य सामान्यलक्षणविभागोपचारलक्षणोदाहरणानि गौ०सू०४न्यायोदर्शितानि यथा । "वचनविघातोऽर्थविकल्पोपपत्त्या च्छलम्" सू० । "अर्थस्य वाद्यभिमतस्य योविकल्पोविरुद्धः कल्पो अर्थान्तरकल्पनेति यावत् तदुपपत्त्या युक्तिविशेषेण योवचनस्य वाद्युक्तस्य विघातोदूषणं तच्छलमित्यर्थः वक्तृतात्पर्य्यविषयार्थकल्पनेन दूषणाभिधानमिति फलितं तात्पर्य्यविषयत्वं विशेषे विशेषणे संसर्गे वा यथा नेपालादागतोऽयं नवकम्बलत्वादित्यत्र नवसंख्यापरत्वकल्पनया ऽसिद्धत्वाभिधानं, प्रमेयं धर्म्मित्वादित्यत्र पुरुषार्थकल्पनया भागासिद्धत्वाभिधानं, वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानम्" इ० । "इत्तिविध वाक्छलं वाक्सामान्यच्छलमुपचारच्छलञ्च" सू० । "धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम्" सू० । "धर्मशब्दस्यार्थेन सम्बन्धस्य विकल्पो द्विविधः कल्पः सम्भवतोन्यतरथा च सम्भवतोरेकतरत्वेन प्रवृत्ते शब्दे तदपरत्वेन वः प्रतिषेधः स उपचारच्छलं यथा मञ्चाः क्रोशन्ति गौरोघट इत्यादौ मञ्चस्था एव क्रोशन्ति न तु मञ्चाः, एवं घटस्थ कर्म्म संयोगरूपभेदः, एवं अहं नित्य इति शब्दा प्रवृत्ते आत्मकाद्रव्यत्वसम्बन्धं अयं नित्य इति प्रतिषेधोऽप्युपचारच्छलम् । वाद्यभिप्रेतार्थस्यादूषणेन दूषणस्यासदुत्तरत्वम् । न च क्लिष्टकल्पनाप्रयोगाद्वादिन एवापराधः स्यादिति वाच्यं तत्तदर्थबोधकतया प्रसिद्धस्य शब्दस्य प्रयोगे वादिनोऽनपराधात् अन्यथा पर्व्वतोवह्निमानित्युक्ते पर्व्वतोऽयं कयमवह्निमानित्यादिदूषणेनानुमानाद्युच्छेदः स्यात्" ।

उपचार्य्य त्रि० उप+चर–कर्म्मणि ण्यत् । १सेवनीये २चिकित्सनीये च भावे ण्यत् । ३चिकित्सायां हेम० ४सेवायाञ्च न० ।

उपचित् त्रि० उपचिनोति देहम् उप+चि–क्विप् । देहवर्द्धके क्लीपदादौ "नाशयित्री बलासस्यांसस उपचिताससि" यजु० १२,९७ । "उपचितः श्वयथुगण्डक्लीपदाद्यः" वेददी० ।

उपचित उप+चि–क्त । १सञ्चये "अगरुयोगसंयोपचितं वसनम् रघुः । २दिग्धे च मेदि० ३लेपनादिना पुष्टिप्राप्तौ त्रिलिङ्गे अमरः ४समाहिते हेम० ५सञ्चिते च "प्रयतत्वादोपचितमशुभं नाशयतीति प्रायश्चित्तम्" कारीतः । "उपचितं सञ्चितम्" प्रा०त०रघुनन्दनः । [२उच्चतौ च ।

उपचिति स्त्री उप+चि–क्तिच्-चिभावो वा भावे क्तिन् । १वृद्धौ

उपचित्र न० "उपचित्रमिदं ससखाजगौ" ऋ० २० उक्ते १सप्तदशवर्णवृत्तभेदे । "विषमे यदि सौ सलगा दले भौ युजि भादगुरुकावुपचित्रम्" तल्लक्षे अर्द्धसमे २अर्द्धवृत्तभेदे च । ३पृतराष्ट्रपुत्रभेदे "चित्रोपचित्रो चित्राङ्गश्चारुचित्राङ्गदश्च" पृतराष्ट्रपुत्रनामकथने । भा० आ० ६७ अ० ।

उपचित्रा स्त्री उपगता चित्रं वर्णम् चित्रां वा । मूषिकपर्य्याम् (उन्दुरकानि) अमरः चित्रातारासमीपस्थायां २स्त्रातौ ३रुद्रायाञ्च । राशिचक्रे तयोस्तिस्रोनुगतत्वात्तथात्वम् । ४दन्तोष्ठे राजनि० "द्विगुणितरसुखदुरचरुषष्टितिरिष्ठे" दृश्यपक्षस्य 'वाचाटनवसु यदि रुचिरा उपचित्रा भवसे वरवृत्ते' इ०र० उक्ते षोडशमात्रात्मके ५मात्रावृत्तभेदे च ।

उपचेय त्रि० उप+चि–कर्म्मणि यत् । अङ्गुष्ठादिना विनाम्य चयनीये पुष्पादौ ।

उपच्छन्दन न० उप+छदि–णिच् भावे ल्युट् । सान्त्वेन प्रार्थने (फुसलान) "तथा निवेदितस्य नरपतिरभिमानिनोऽस्योपच्छन्दनेनैव स्वं ते दापयितुं प्रयतिष्यते" दृश्यपक्षः । २उपमलक्षणे च "उपमन्नाणमुपच्छन्दनमिति" सि० कौ० ।

उपच्यव पु० उप+च्युङ्–गतौ भावे अप् । स्वल्पात् निर्गमे । "अत्र नार्थपच्यवमुपच्यवञ्च विद्यते" ऋ०१,२८,२ । "यावान्निर्गमनमुपच्यवः" भा० ।

उपजन न० उपजायते जन–अच् । स्त्रीपुंसयोगेन जायमाने देहे । "नोपजनं स्मरन्निदं शरीरं स यथा प्रयोग्य आचरणे युक्तः" ऋा०उ० । "मनसैव नोपजनं स्मरन् स्त्रीपुंसयोरन्योन्योपगमेन जायते इत्युपजनम् आत्मभावेन वात्मसामीप्येन वा जायते इत्युपजनमिदं तन्न स्मरन्" भा० । भावे घञ् अवृद्धिः । २सोमादि दृष्टौ पु० । "तत्रोपजनस्तार्क्ष्यवर्ज्जमग्ने सूक्तानाम्" आश्व०श्रौ०६,१,१५ "तत्र सोमदृष्टावुपजनस्थानमुच्यते नारा० दृ० "सोमातिरेके स्तुतशस्त्रोपजन: ६,७,१ "तदा स्तुतशस्त्रयोरुपजनोभवति" नारा०दृ० । इतपक्षिभाषे च "योगोहि प्रभवाप्ययौ" कठोप० भाष्ये योगोहि प्रभवाप्ययौ उपजनापायधर्म्मकौ" इति उक्तम् ।

उपजप्य त्रि० उप+जप–कर्म्मणि ण्यर्थे यत् । भेटनीये उपपूर्ब्बकाज्जपतेर्भेदार्थकत्वात्तथात्वम् । "उपजप्यानुपजपे बुध्येतैव च तत्कृतम्" मनुः । [जरासामीप्ये ।

उपजरस अव्य०जरायाः समीपम् अव्ययी० समा०जरसादेशश्च ।

उपजला स्त्री उगगतो जलम् अत्या०स० । यमुनापार्श्वस्थे नदीभेदे "जलाङ्गोपजलाञ्चैव यमुनामभितो नदीम्" भा०व०१२०अ० ।

उपजल्पिन् त्रि० उप+जल्प–णिनि । उपदेशके । "अनाकृतोपदिष्टानामनाकृतोपजल्पिनाम् । ये लोकास्तान् कृतः कर्म्म ! मया त्वं प्रतिपत्स्यसे" भा०आ०१२६अ० ।

उपजाति स्त्री "अनन्तरोदितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः । इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम" वृ०र० उक्ते वर्णवृत्ते विभिन्नजातिद्वय पादद्वययोगात् चतुर्दशप्रकारभिन्ने छन्दोभेदे । यथा उपेन्द्रवज्रेन्द्रवज्रयोः पादद्वयादियोगे १४ भेदाः । तत्र चतुश्चरणप्रस्तारे १६भेदा भवन्ति तत्र गुरुा एकैका तत्तन्नामभाक् गिरा चतुर्दश उपजातिसंज्ञाः । दिङ्मात्रं दर्श्यते । उ उ उ उ । ह उ उ उ । उ ह उ उ । ह ह उ उ । उ उ ह उ । ह उ ह उ । उ ह ह उ । ह ह ह उ । उ उ उ ह । ह उ उ ह । उ ह उ ह । ह ह उ ह । उ उ ह ह । ह उ ह ह । उ ह ह ह । ह ह ह ह । अनयोरुपेन्द्रवज्रयोः गुरुतया तल्लिङ्गानां चतुर्दशानां भिन्नजातीयचरणद्वयसङ्गत्यैयोगात् उपजातित्वम् । यथा "अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्यामित्यादि" रघुः । एवं वंशस्थेन्द्रवंशयोरपि । यथा "इत्थं रथाङ्गेभनिभादिनां प्रगे गणो मृगाणामथ तोरणाङ्गणैः" माघः तुल्यसंख्यकवर्णपादयोरेवोपजातित्वमिति न नियमः किन्तु भिन्नसंख्यकवर्णपादयोरपि । "रामं लक्ष्मणपूर्व्वजं रघुवरं सीतापतिं सुन्दरं काकुत्स्थं करुणामयं गुणनिधिं विप्रप्रियं धार्म्मिकम् । राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्त्तिम् । वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम्" इति पद्ये शार्दूलविक्रीडितेन १६ वर्णविषमपादकेन सह २१ एकविंशत्यक्षरपादक स्रग्धरायाः पादद्वयेन मिश्रणात् उपजातित्वम् । एवं "मक्षिप्रेक्षुरणामधिपे देवानाञ्च पुरन्दरे" इति देवीभा० अनुष्टुब्बृहतोः सङ्करादुपजातित्वम् ।

उपजानु अव्य० जानुनः समीपम् अव्ययी० । जानुसमीपे । "भीष्मोधनुष्मानुपजानुवर्त्मनि" भट्टिः । तत्र प्रायभवेऽर्थे ततः ठक् उगन्तत्वात् ठस्य कः । औपजानुक तत्प्रायभवे त्रि० "प्राणी यस्योपजानुकौ" भट्टिः ।

उपजाप पु० उप+जप–घञ् । १भेदे, अनैक्यसम्पादके व्यापारे । "उपजापः कृतस्तेन तानाकोपवतस्त्वयि" माघः "तेषु तेषु चाक्रमेषु प्रासरन् परोपजापाः" दशकु० । २उपांशुजपे च ।

उपजापक त्रि० उप+जप–ण्वुल् । १भेदके "घातयेद्विविधैर्दण्डैररीणाञ्चोपजापकान्" मनुः । [भेदे ।

उपजापसह त्रि० उपजापं भेदं सहते सह–अच् । भेदार्हे

उपजिह्वा स्त्री उपगता जिह्वामूलो जिह्वा यस्याः । १काकोले । प्रा०स० । २उपरिस्थायां जिह्वायाम्(आलजिभ) "उपजिह्वास्त्रिकौ बाहू" कायविभागे या०स्मृ० । सुश्रुतोक्ते मांसदोषजे २रोगभेदे "अधिमांसार्ब्बुदार्शोऽधिजिह्वोपजिह्वोपकुशगलगण्डगुण्डिकालजीमांससंघातौष्ठप्रकोपगलगण्डमालाप्रभृतयोमांसदोषजाः" स च सप्तसुखरोगेषूपजिह्वाधिजिह्वोपकुशदन्तवैदर्भप्रभृतिषु जिह्वागतसुखरोगभेदः। सुखरोगविभागे"सुश्रु०।"जिह्वागतास्तु कण्टकाख्यविधाख्यिभिर्दोषैरक्तासउपजिह्विकेति च सप्तधा विभज्य "जिह्वाभंरूपः भवयुर्दृढि जिह्वानुज्ञाय जातः वफरक्तयोनिः । प्रवेकखण्डूपरिदाहयुक्ता प्रकथ्यतेऽसावपजिह्विकेति" सुश्रुतः। अत्र स्वार्थे कन् । "उपजिह्विकां तुण्डिकेव क्षारेण प्रतिसारयेत्"सुश्रु० । उपजिह्वे व स्वार्थे कन् ।३कीटभेदे स्त्रियां० वराटकादतन्तुत्वात्तथात्वम्

उपजीक त्रि०ड+जीव–क्विप् स्वार्थे कन् वलोपः। उपजीवके "उड्डयन्ति पतङ्गीका वसन्तादधिभेजसम्" अथ०२,२,४,

"उपजीका आसिञ्चन् धन्वन्युदकम्" । ६,१००,२,

उपजीव त्रि० उपगतो जीवं जीवनम् अत्रा०स०। जीवनोपगते। "उपजीवाः स्थो जीव्यासम्" अथ०१९,६९,२, उपाद् ह्राच्कर्त्रर्थेन तत्पुरुषेऽन्योदात्तोऽयम्।

उपजीवक त्रि० उप+जीव–ण्वुल्। १उपजीवनोपायवति "क्षुधकाः सेतुभेत्तारः परद्रव्योपजीवकाः। अक्षतत्राश्च मिक्षाणां ते वै निरयगामिनः" भा०आ०२२अ०। उपजीव्यतया २इतरान्यवके ३प्रयोज्ये "उपजीव्योपजीवकभावः" न्यायप्र० उपजीव्यशब्दे विवृतिः।

उपजीवन न०उप+जीव–करणे ल्युट्। १जीविकायाम्। "क्षत्रियस्यैतदेवाहुर्धर्मं क्षयोपजीवनम्" भा०व०२१अ०। "उपजीवनञ्च पर्जन्योदानमस्य परायणम्" भा०व० ३१ अ०। भावे ल्युट्। २हत्याद्यर्थमाश्रये "स्त्रीभ्रूहविट्क्षत्रवधोनिन्दितार्थोपजीवनम्" या०स्मृ० "आत्मप्रदानं सौम्यत्वमङ्गत्रयैवोपजीवनम्" भा०स०७६अ०।

उपजीवनीय त्रि० उप+जीव–कर्मणि अनीयर्। हत्याद्यर्थमाश्रयणीये "यत् वा अस्यै वल्कतया ओषधयस्तदस्या उपजीवनीयतमम्" शत०ब्रा०१,२,३,१०, रसवतीमुपजीवनीयामकुर्वत" १,२,५,११,

उपजीविका स्त्री उपजीवति उप+जीव–करणे कर्त्रर्थे ण्वुलन्तात् टाप् अत इत्त्वम्। जीवनोपायभूतायां हत्तौ।

उपजीविन् त्रि० उप+जीव–णिनि। १आश्रिते २हत्याद्यर्थमाश्रयणे च "श्रीमत्कान्तैर्मृगपतेः इव बभूवोपजीविनाम्" रघुः। "अव्रतानामनन्नानां जातिमात्रोपजीविनाम्। नैषां प्रतिग्रहोदेयेन धिक्षाम् तारयेच्छ्रियम्" "जातिमात्रोपजीवी वा कामं स्यात् ब्राह्मणव्रुवः" मनुः। स्त्रियां ङीप्

उपजीव्य त्रि० उप+जीव–यत्। १आश्रये। २ज्ञानसत्ताहत्याद्यर्थम् अवश्यज्ञानीये "अवश्यमुपजीव्यानां ज्ञानानामाश्रये घटात्तन्निरूपेये" सा०द०। "उपजीव्यव्रुभाषाच्च चिंचतेर्हिंसुचोदमः" वा०स्मृ०। "उपजीव्यवाधायत्तेः" भट्टचि०। उपजीव्यत्वञ्च स्वसत्ताप्रयोजकत्वम् स्वज्ञानप्रयोजकत्वञ्च। उपजीव्योपजीवकभावश्च ज्ञानसत्तयोः प्रयोज्यप्रयोजकभावः। यथा एकस्यान्यसत्ताप्रयोजकत्वमपरस्य च तत्प्रयोज्यसत्ताकत्वम्। एवम् अन्यज्ञानप्रयोजकत्वम् च यथायथं प्रयोक्तृव्यवहारे बोध्यम्। [उपजीव्यमन्यत्र न०।

उपजोष पु०उप+जुष–प्रीतौ घञ्। १प्रीतौ २सेवने च। ल्युट्।

उपजोषम् अव्य० उप+जुष–प्रीतौ वा० अम्। १प्रीतौ १कल्याणे २यथाकर्म्मभोगमित्यर्थे च। तत्र प्रीतौ "यथो पजोषं सर्व्वस्य जनस्यिक्रीड भारत"। भा०आ०११२अ०। "यथोपजोषं विक्रिडन्तिह कृष्णा" भा०आ०१९९अ०। अत्र सर्व्वत्र उपजोषशब्देनापि यथाशब्दस्याव्ययीभावोऽपि भवितुमर्हति। उप–स्वामीप्ये जोषम् औनम्। ४स्वामीप्येन औने च "किमिदमुपजोषमास्यते" भट्ट०।

उपज्ञा स्त्री उप+ज्ञा–कर्म्मणि अङ्। विनोपदेशेन स्वयमुद्भाव्ये १प्रथमं ज्ञायमाने। उपज्ञाशब्दस्य तु तदादित्व विवक्षायाम् उत्तरपदस्यस्य तत्पुरुषे क्लीवता। "पाणिन्युपज्ञं व्याकरणम्" सि०कौ०। "अथ प्राचेतसोपज्ञं रामायणमितस्ततः" रघुः। "कैकय्युपज्ञं वत वञ्चनार्थम्"। भट्टिः भावे अङ्। २आद्यज्ञाने तत्पुरुषे स्त्री न क्लीवता

उपज्ञात त्रि० उप+ज्ञा–क्त। विनोपदेशेन ज्ञातेऽर्थे।

उपज्योतिष न० उपगतं सामस्त्येन ज्योतिषमत्रा०स०। ज्योतिषशास्त्रानुकारिणि गणितादिशास्त्रे।

उपढौकन न० उप+ढौक–भावे ल्युट्। १उपहारे राजादेः संतोषार्थं द्रव्यादिप्रापणे (भेटदेओया) कर्म्मणि ल्युट्। २उपस्थितमात्रे उपायनद्रव्ये।

उपतन्त्र न० उपगतं तन्त्रम् अत्रा०स०। शिवोक्ततन्त्रसदृशे विष्णुधिक्षते तन्त्रभेदे तच्च नारायणीतन्त्रे दर्शितं यथा "सैद्धोक्तान्युपतन्त्राणि कपिलोक्तानि यानि च। अङ्गुतानि च तन्त्राणि जैमिन्युक्तानि यानि च। वशिष्ठः कपिलश्चैव नारदो गर्ग एव च। पुलस्त्यो भार्गवः सिद्धो यास्तवल्क्यो भृगुस्तथा। शुक्रो बृहस्पतिश्चैव अन्ये ये मुनिसत्तमाः। एभिः प्रणीतान्यन्यानि उपतन्त्राणि यानि च। न संख्यातानि तान्यत्र धर्म्मविघ्नकराणि भिः। सारात् सारतराण्येव सङ्गृहीतानि निबोधतेति"।

उपतप्त त्रि०उप–आधिक्ये–तप–क्त। सन्तप्ते। "अरोपतप्तोऽपि भयं न स प्रभुः" नैष०।

उपतप्तृ त्रि० उप+तप–ण्वा०भावे तृच्। १सन्तापे। अमरे भावप्रकरणे "खारः खर्यः स्फुटोपतप्तेति" पाठात् भावे एव तृच् इति क्षीरस्वामी। तेन यद्यद् अत्युष्णे तापकपर्य्यवसाकथनं प्रामादिकमेव। कर्त्तरि तृच् स्त्रियां ङीप्। २तापके २रोगादौ च।

उपताप पु० उप+आधिक्ये तप–आधारे घञ्। १त्वरायां भावे घञ्। २सन्तापे यत्नतपेरच् ३रोगे भेदि०। करणे घञ् ४अशुभे ५पीडने च रत्नाबली। "दीक्षितानुपतापे" आश्व०श्रौ०९,८,१,दुःखोपघातेन्द्रियोपतापात् तथा तस्या-

क्षिपाकरक्तपित्तवातशोणितास्त्रीकाप्रभृतीनामादर्शयति" सुश्रु०। "मानसागन्तुभिस्त्रीणुरुपतापैः प्रपीड़ितः "बन्धोपतापैश्च भवेद्विशेषगिरोऽभितापः ससमीरणेन" सुश्रु०। [जनके।

उपतापक त्रि० उप+आधिक्ये तप-णिच् ण्वुल्। सन्ताप

उपतापन त्रि० उप+आधिक्ये तप+णिच् ल्यु। सन्तापके।

उपतापिन् त्रि०उप+आधिक्ये तप+णिनि। १सन्तप्ते २रोगिणि च। "गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थंश्चपतापिनः" मनुः "उपतापी रोगी" कुल्लू०। णिच् णिनि। ३सन्तापकारके। "दातापरेभ्यो न परोपतापी" भा० आ० १३अ०। उभयतः स्त्रियां ङीप्।

उपतारक त्रि०उप+तॄ णिच्-ण्वुल्। सन्तारके।

उपतिथ्य न०उपगतं तिथ्यम् अत्या०स०। पुण्यसमीपगे १पुनर्भूसुतारके २अश्लेषानक्षत्रे च तयोः नक्षत्रचक्रे पुण्योपगतत्वात् तथात्वम्। उपाद् ह्रच्कत्वादन्तोदात्तोऽयम्।

उपतीर अव्य०सामीप्यादौ अव्ययी०। तीरसामीप्यादौ आद्युदात्तता एवम् उपतूल उपमूल उपशाल उपाल इत्यादि नक्षत्रसामीप्यादौ अव्य०। अव्ययीभावे आद्युदात्तत्वञ्च

उपतैल त्रि०उपगतस्तैलम् अत्या०स०। अभ्यक्ततैले उपाद् ह्रच्कत्वादन्तोदात्तता स्त्रियां गौरा०ङीष्

उपत्यका स्त्री उप+भवार्थे त्यकन् त्यकनो निषेधात् मातृकत्वम्। पर्वतस्याससन्नायां भूमौ। "मलयोपत्यकेवोपत्यका" रघुः। प्राग्भागतापतदृष्टेष्टसुपत्यकासु" माघः। "कान्तारेषु गजपाषाणपत्युपत्यका" दशकु०।

उपदंश पु०उप+दन्श-कर्मणि घञ्। १मद्यपानरोचके (चाटनी) भक्ष्यद्रव्ये, २भक्ष्यद्रव्योपकरणभाण्डे, च। "तथानुदिते च तथा हिताशनोपदंशानुपपाद्य" दशकुमा०। भावे घञ्। संदंशने (कामडान) "दिदङ्क्षौ उपदंशेच्छावतीति" माघ टीकायां मल्लि०। कर्मणि घञ्। ४समलिङ्गदष्टे ५शिश्नदष्टे च पु० राजनि०। ६उपस्थरोगभेदे (बाऊो) (गरमि) तल्लिदानादि सुश्रुते उक्तं यथा।

"तत्रातिमैथुनादतिव्रह्मचर्याद्वा तथा ब्रह्मचारिणीं चिरोत्सृष्टां रजस्वलां दीर्घरोमां कर्कशरोमां सङ्कीर्णरोमां निगूढरोमामल्पहारां मल्पाहारामप्रियामकामामचौक्ष्यसलिलप्रक्षालितयोनिमक्षालितयोनिं योनिरोगोपसृष्टां स्वभावतो वा दुष्टयोनिं वियोनिं वा नारीमत्यर्थमुपसेवमानस्य तथा करजदशनविषसूकनिपातनादर्दनाद्वाभिघाताच्छुष्कोपशोषणादचौक्ष्यसलिलप्रक्षालनादवपीड़नाच्छुक्रमूत्रवेगविधारणाच्छुनाश्वोष्ट्रमार्जारखरगोमायुमण्डूकनकुलगृध्रकाकोलूकगृहगोधिकाशल्यकशशकसरीसृपानां मैथुनोपसेवनाद्वा तस्य प्रकुपिता दोषाः क्षतेऽक्षते वा स्वयमुपजनयन्ति तमुपदंशमित्याचक्षते। स पञ्चविधस्त्रिभिर्दोषैः पृथक् समस्तैरसृजा चैकः। तत्र वातिके पारुष्यं त्वक्परिपुटनं ज्वरभेदता मरुषशोफता विविधाश्च वातवेदनाः। पैत्तिके ज्वरःस्यादुः पक्वोदुम्बरसङ्काशस्त्रीव्रदाहः क्षिप्रपाकः पित्तवेदनाश्च। श्लैष्मिके स्यादुः कण्डूमान् कठिनः स्निग्धः श्लेष्मवेदनाश्च। रक्तजे क्षणात्स्फोटप्रादुर्भावोऽत्यर्थमसृक्प्रवृत्तिः पित्तलिङ्गान्यत्यर्थं जूरदाहौ शोषश्च याप्यश्चैव कदाचित्। सर्व्वजे सर्व्वलिङ्गदर्शनमवदरणं शेफसः क्रमिप्रादुर्भावो मरणं चेति"।एतद्व्याख्यास्त्रेण भावप्र०उक्तं यथा "तत्रोपदंशस्य विप्रकृष्टनिदानमाह"। हस्ताभिघातात्क्षतदन्तघातादाधर्षणात्कृत्युपसेवनाद्वा। योनिप्रदोषाच्च भवन्ति शिश्ने पञ्चोपदंशा विविधाश्चरोगैः"। हस्ताभिघातात् हस्तेन मैथुनात्। नखदन्तघातात् नखदन्तयोर्घात स्थानत्वेनानुल्बणोऽपि मेढ्रे नखदन्तघातो बलवदनुरागोदयात्। उक्तञ्च कामशास्त्रे। "शास्त्रस्य विषयस्त्वावद्यावन्मन्त्रो रसः। रतिचक्रे प्रवृत्ते तु न शास्त्रं नापि च क्रमः"। कलहे दुष्टस्त्रीकृतो वा मेढ्रे नखदन्तघातः। उत्कलादौ स्त्रियो सुखयोनयो भवन्ति। ताभिर्व्वा मेढ्रे, नखदन्तघातः। योनिप्रदोषात् दीर्घकर्कशयोनिलोमयोगात्। योनिश्चिद्रस्रातिस्थूलत्वाद्वा वातादिकृताद्वा योनिदोषात्। विविधाश्चरोगैः। दुष्टजलप्रक्षालन ब्रह्मचारिणीगमनादिभिः पञ्चोपदंशाः। वातिकः पैत्तिकः श्लैष्मिकः सान्निपातिकः आगन्तुजश्चेति। तत्र वातिकस्य पैत्तिकस्य चोपदंशस्य लक्षणमाह। "सतोदभेदस्फुरणैस्तु कृष्णैः स्फोटैर्व्यथेन्मारुतोपदंशम्। पीतैर्व्यथाक्लेदयुतैः सदाहैः पित्तेन रक्तैः पिडितावभासैः"। व्यथेत् जायेवात् पीतैः रक्तैर्वेति विकल्पः। श्लैष्मिकं सान्निपातिकञ्चाह। "सकण्डुरैः शोफयुतैर्महद्भिः शुक्लैर्घनैः स्रावयुतैः कफेन। नानाविधस्रावकृजोपपन्नमसाध्यमाकृच्छ्रिमलोपदंशम्"। असाध्यमाह। "विशीर्णमांसं कृमिभिः प्रजग्धं शुष्कावशेषं परिवर्ज्जयेत्तम्"। विशीर्णमांसं गलितमांसं प्रजग्धं खादितं शुष्कावशेषं विशीर्णसमस्तमेढ्रमांसत्वेनावशिष्टफलकोषमात्रम्। उत्पन्नमात्रस्य चिकित्सायामकरणे दोषमाह "सञ्जातमात्रे न करोति मूढः क्रियां नरो यो विषये प्रसक्तः। कालेन शोफज्वरदाहपाकैः प्रपीड्यते स च तेन"। विषये प्रसक्तः अतिस्त्रीरतः। क्षिप्रार्शसमाह "अङ्कुरैरिव संजातैरुपर्युपरि संस्थितैः। क्रमेण

जायते वर्त्तिस्तालचूडधिखोपमा । कोषस्याभ्यन्तरे सम्बौ पर्वसन्धिगतापि च । सवेदनः पिच्छिला च दुश्चिकित्स्या त्रिदोषजा । शिङ्घवर्त्तिरिति ख्याता शिङ्घार्थ इति चापरे"। शिङ्घं वर्त्तेः स्थानम् । कोषाभ्यन्तरे अण्ड-कोषाभ्यन्तरे । सम्बौ शिङ्घस्यसम्बौ पर्वसन्धिगता ग्रन्थि-पर्वणोः सन्धिगता"। तच्चिकित्सादि सुश्रु०चिकि० १६अ०। "उपदंशेषु साध्येषु स्निग्धस्विन्नस्य देहिन"इत्यादि उक्तम्

उपदर्शक पु० उप+दृश-णिच्-ण्वुल् । १द्वारपाले । २दर्शयितरि त्रि०उप सामीप्ये दृश-ण्वुल् । समीपस्थतया दृश्यते इत्युपदर्शकः । तस्य कार्य्यानुपयुक्तत्वाभावादुपदृष्टृत्वम् ।

उपदश त्रि० ब०व० दशानां समीपवर्त्तिनः ब०स्त्री० डच् समा० । दशसंख्यासमीपवर्त्तिषु नवैकादशसंख्याकेषु ।

उपदा स्त्री उप-दा-भावे अङ् । १उत्कोचे, २उपदौकने च । "तदस्मिन् दृष्ट्वायलाभशुल्कोपदा दीयते"भा०अदभिक्षि-तोभावो द्रव्यवत् प्रकाशते इत्यर्थः;"३उपस्थियमाणे द्रव्ये च। "उपदा विदितः गन्धस्तोत्सेकाः कोसलेश्वरम्""वन्येतरा जानपदोपदाभिः" "प्रलभ्य पजामुपदाच्छलेन" रघुः । भावे ल्युट् उपदानमप्यत्र न० । स्वार्थे कन् । तत्रैव उत्कोचे च । उपदा+अभूततद्भावे भ्वादौ क्विप् । उप-दीभूतः उपदीकृतः "तस्य रत्नमुपदीकृतं त्वया" माघः । उपददाति उप+दा-कर्त्तरि क्विप् । उपदाद्रव्यदातरि त्रि० "वस्त्रीयासुरुधं वनावोपदाम्" यजु० २०,६,"उपदाम् उपदानदातारम्" वेददी०

उपदानवी स्त्री स्वर्भानुदानवस्य प्रभानामकन्याजे पुलोम्नः कन्या-भेदे । "स्वर्भानोस्तु प्रभा कन्या पुलोम्नस्तु सुतात्मजम् । उपदानवी हयशिरा वार्षपर्व्वणी" । हरि०१अ०"उपदानवी सुतानृ जेभे चतुरस्त्रैलिकात्मजान् । दुश्चलमथ सुश्चन्द्रं प्रवीरमनघं तथा"हरि०३२अ०।

उपदि(ग)ग् अव्य०दिशि, दिशोः समीपं वा वा अच् समा०। १दिशीत्यर्थे २दिशोः सामीप्ये च०उपगता दिशौ आश्रा० समा०। दक्षत्वाद्वा टाप् ।दिशोर्मध्यवर्त्तिन्यां विदिशि कोणे स्त्री"चाहयन् सर्व्वतोऽमात्य दिशश्चोपदिशस्तथा" भा० ब० १७१ अ०।

उपदिग्ध पु० "भगिन्यां वसुदेवस्य सुतमग्रहि जज्ञिरे । शिशु-पालो दमघोषोरैभ्योऽथोपदिग्धो बली" हरिव० ११७अ० उक्ते शिशुपालभ्रातरि वसुदेवस्य भागिनेये ऋषभेदे

उपदिश अ०उप+दिश-क्विप् । १उपदेशं कृत्वेत्यर्थे । उप-दिशि भवः दिशो०यत् । २विदिग्भवे त्रि० ।

उपदिष्ट त्रि०उप+दिश-कर्म्मणि क्त । यस्य जनस्य उपदेशः कृतस्तस्मिन् १जने उपदेशेन २ज्ञापिते च । "उपदिष्टा-तिदिष्ट गोत्रस्यैव निषेधः" उद्वा०त० रघुनन्दनः ।

उपद्दी स्त्री उपेत्य दृश्यते खराड्यते उप+दो-घञर्थे क गौरा० ङीष् । (परगाछा) वन्दायां राजनि० स्वार्थे कन् । वा ह्रस्वः । उपदिका उपदीकाप्यत्र क्षेमचन्द्रः । "इमा वम्प्रो यदुपदीका" यत०ब्रा०१४,१,१८, अत्र वम्प्रो-शब्दस्यैव वन्दापर्य्यायत्वश्रवणात् क्षेमचन्द्रे वम्रीतिपाठ कल्पनेन शब्दकल्पद्रुमे तत्पर्य्यायताकथनं प्रामादिकमेव २कीटभेदे च मेदिनिः ।

उपदीक्षित् पु० उपगतोदीक्षितं सामीप्येन अत्रा०स० । यज्ञे दीक्षितस्य निकटस्थे "उपदीक्षी स्वेष्वग्निषु नखनि कृन्तनाद्युद्वाहनान्तं सन्निपातिकम्" कात्या० २५,१४,२, "उपदीक्षी नेदिष्ठः" कर्क० ।

उपदृश् त्रि०उपरिस्थः सन् पश्यति उप+दृश-क्विन् । उपरि-स्थतया दृश्यते सान्निध्ये सूर्य्यचन्द्रादौ । "अयं सूर्य इ-वोपदृश्यं सरांसि धावति" ऋ०६,५४,२, "अयं सोमः सूर्य्य इवयथा सूर्य्यः सर्व्वस्य लोकस्योपदृष्टा तत्तत्कर्म्मणा मुपदृशुपदृष्टा"भा०।"भद्रा सूर्य्य इवोपदृश्यः"। ८,१०२,१५।

उपदृषद्(द्) अव्य० सामीप्यादौ अव्ययी० वा अच्समा० । इषदः पाषाणस्य सामीप्यादौ

उपदेव पु० उपगतोदेवम् सादृश्येन अत्या०स० । "देवकस्या भवन् पुत्रास्त्वारक्षिदयोपमाः । देववानुपदेवश्च सुदेवो देव-रक्षितः"हरिवं०३८अ०उक्ते १देवकनृपपुत्रभेदे । "अक्रू-रेक्षोपसेनायां सुगात्रायां कुरूनन्दन" । प्रसेनश्चोपदेवश्च जज्ञाते देववर्चसौ" हरि० ३४अ० उक्ते २अक्रूरपुत्रभेदे च । देवतुल्यतेजस्कत्वाज्ज्ञानयोगाच्चात्मम् । देवसदृशालौकिक सामर्थ्ययुक्ते १पिशाचादौ । अन्नोदात्तोऽयम्, उपदेवाश्च दृश्य "विद्याधरोऽप्सरोयक्षोरक्षो गन्धर्वकिन्नरौ । पिशाचो गुह्यकः सिद्धोभूतोऽमी देवयोनयः" इत्यमरोक्ताः बोध्या एवाप्यलौकिकदृश्यिकत्वात्तथात्वम् । उपदेवतादयोऽप्यत्र ।

उपदेवी स्त्री "याः पत्न्योवसुदेवस्य चतुर्हैव वराङ्गनाः । पौरवी रोहिणीनाम मदिराऽपि२ तथा धरा३ । वैशाखी च तथा भद्रा४ सुनाम्नी५ चैव पञ्चमी । सप्तदेवा१ शान्तिदे-वा२ सन्देवा३ देवरक्षिता४ । सप्तदेव्युपदेवी५,६,च देवकी चैव सप्तमी७। १२ । सुतनुर्वडवा चेति ह्येते परिचारिके"१४। हरि० ३७उक्ते वसुदेवस्य पत्नीभेदे । जातौ ङीष् २विद्याधरादिजातिस्त्रियाम् ।

उपदेश पु० उप+दिश-घञ्। १अनुशासने, २स्मृतिकथने, प्रवर्त्तकवाक्ये च। "चन्द्रसूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये। मन्त्रमात्रप्रकथनमुपदेशं प्रचक्षते" म० त० रामार्च्चनचन्द्रिकोक्ते १दीक्षाभेदे। तद्विस्तारस्तु तन्त्रसारे कलावत्यादिदीक्षाप्रकरणे द्रष्टव्यः। तदङ्गत्वे तु "तत्राप्ययक्षः कश्चिद्देवजमभ्यर्च्च्य साधकम्। तदस्यु नाभिषिञ्चाष्टधार मूलेन के करम्। निधायाष्टौ जपेत् कर्म्म उपदेशे स्वयं विधिः"। विश्वसारतन्त्रोक्तः प्रकारोऽनुसन्धेयः। अजम् अङ्गं के मस्तके।"यथासंख्यमुपदेशः समाना," पा०। "वधनिर्धूतपापस्य कबन्धस्योपदेशतः" रघुः। "स्थितोपदेशासनदेशकाले" "तपस्विनामप्युपदेशतां गतम्" कुमा०। "आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना। यस्तर्केणानुसंधत्ते स धर्म्मं वेद नेतरः"। "धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्व्वतः" मनुः। प्रायश्चित्तोपदेश प्रकारस्तु मिताक्षरादर्शितो यथा। "विख्यातदोषः कुर्व्वीत पर्षदेऽनुमतं व्रतम्" या०स्मृ०। "योदोषो यावत्कर्त्तृसम्बाद्यत्वतोऽन्यैर्विख्यातो विज्ञातो दोषो यस्यासौ पर्षदुपदिष्टं व्रतं कुर्य्यात्। यद्यपि स्वयं सकलशास्त्रार्थविचारचतुरत्वात्यापि पर्षत्समीपमुपगम्य तया सह विचार्य तदनुमतमेव कुर्य्यात्। तदुपगमने चाङ्गिरसा विशेष उक्तः। "क्षते निःसंशये पापे न भुञ्जीतानुपस्थितः। भुञ्जानो वर्द्धयेत् पापं यावन्नाख्याति पर्षदि। सचेलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः। पर्षदोऽनुमतस्तच्च सर्व्वं विख्यापयेत्ततः। व्रतमाधाय भूयोऽपि तथा स्नात्वा व्रतञ्चरेदिति"। विख्यापनञ्च पर्षद्दक्षिणादानानन्तरं कार्य्यम्। यथाह पराशरः। "पापमाख्यापयेत्पापी दत्त्वा धेनुन्तथा दक्षमिति"। एतच्चोपपातकविषयम्। महापातकादिषुधिक्कृत्याम्। यत्तूक्तम्। "तस्माद्द्विजः प्राप्य पापः सकृदाप्तुतत्र वारिणि। विख्याप्य पापं वक्तृभ्यः किञ्चिद्दत्त्वा व्रतञ्चरेदिति"। तत्प्रकीर्णकविषयम्। पर्षत्स्वरूपञ्च मनुना दर्शितम्। "त्रैविद्योहैतुकस्तर्की नैरुक्तो धर्म्मपाठकः। त्रयश्चाश्रमिणः पूर्व्वे पर्षदेषा दशावरा"। हैतुकोमीमांसार्थतत्त्वज्ञः। तर्की न्यायशास्त्रकुशलः। तथान्यदपि पर्षद्दूषणमेव दर्शितम्। "ऋग्वेदविद्यजुर्व्वेदी सामवेदविदेव च। तत्रयरा पर्षद्विज्ञेया धर्म्मसंशयनिर्णये" इति। तथा।"एकोऽपि वेदविद्धर्म्मं यं व्यवस्येद्द्विजोत्तमः। स विज्ञेयः परोधर्म्मो नाज्ञानामुदितोऽयुतैरिति"। आसाञ्च पर्षदां सम्भवापेक्षया व्यवस्था। महापातकाद्यपेक्षया वा। यत्तु स्मृत्यन्तरेऽभिहितम्। "पातकेषु यतस्वर्षत्सङ्ख्यं महदादिषु। उपपापेषु पञ्चाशत्सङ्ख्ये स्वल्पा तथा भवेदिति"। तदपि महापातकादिदोषानुसारेण पर्षदो गुरुलघुभावप्रतिपादनपरं न पुनः संख्यानियमार्थं मन्वादिमहास्मृतिविरोधप्रसङ्गात्। तथा देवलेन चात्र विशेषो दर्शितः। "स्वयन्तु ब्राह्मणा मूयुरल्पदोषेषु निष्कृतिम्। राजा च ब्राह्मणार्थेव महत्सु सुपरिक्षितमिति"। तथा च पर्षदा अवश्यं व्रतमुपदेष्टव्यम्। "आर्त्तानां मार्गमाणानामुपायश्चित्तानि ये द्विजाः। जानन्तो न प्रयच्छन्ति ते यान्ति समतां तु तैः"इत्यङ्गिरःस्मरणात्। तथा तया पर्षदा स्नात्वैव व्रतमुपदेष्टव्यम्।"अज्ञात्वा धर्म्मशास्त्राणि प्रायश्चित्तान्ददाति यः। प्रायश्चित्ती भवेत् पूतः किल्बिषम्पर्षदं व्रजेदिति" वशिष्ठस्मरणात्। ज्ञातियादीनान्तु व्रतेनसां धर्त्तोपदेशे विशेषोऽङ्गिरसा दर्शितः। "न्यायतो ब्राह्मणः शिष्यं ज्ञातियादेः व्रतैनसः। अन्तरा ब्राह्मणं कृत्वा व्रतं सर्व्वं समादिशेत्। तथा मूढं समासाद्य सदा विप्रपुरस्सरम्। प्रायश्चित्तमुदातव्यमुपहोमविवर्जितमिति"। तत्र च यागाद्यनुष्ठानशीलानाञ्चादिकं वाच्यमितरेषान्तु तपः।"कर्म्मनिष्ठातपोनिष्ठाः कदाचित् पापमागतम्। जपहोमादिकल्पेभ्यो विशेषेण प्रदीयते। ये नामधारका विप्रा मूर्खा धनविवर्जिताः। कृच्छ्रचान्द्रायणादीनि तेभ्योदद्याद्विशेषतः" तत्र च सत्येगप्रजनप्रदक्षिणे कर्त्तव्ये इति विधानपरिज्ञानादयः तन्मूलं तत्र द्रष्टव्यम्। मनूक्ततुलादानादिप्रकृतौ च प्रायश्चित्तप्रकरणे तत्प्रकारोद्रष्टव्यः। प्रा०त०"तोषयित्वा द्विजोत्तमान्" देवलवचने तोषयित्वेति श्रवणात् तस्यानतिक्रमत्वेन तद्दूषणे न दोषः प्रायश्चित्तद्रव्यदूषणे च दोष इति"व्यवस्थापितम्। प्रा०वि०तत्प्रपञ्चितं यथा "नन्वेतद्द्रव्यदूषणस्य पापजनकत्वे प्रमाणं नास्ति। न च पापजन्यार्थत्वात् पापजनकत्वं, प्रमाणाभावात् लक्षणदूषकप्रतिपक्षस्यापि गर्हितत्वापत्तेः। तत्र च"अज्ञातः संप्रवक्ष्यामि महापातकनाशनम्" इत्यनेन पापक्षयश्रवणात्। अथ प्रायश्चित्तश्रवणात् पापजनकत्वं यथा यात्रवल्क्यः। "पात्रे धनं वा पर्य्याप्तं दत्त्वा शुद्धिमवाप्नुयात्"आदावुक्त विशुद्ध्यर्थमिष्टिर्वैश्वानरी स्मृता"। एतस्य महापातकविषयत्वादन्यस्य गर्हितत्वं न स्यात्। अत एव"नादद्यात् क्वचित् साधुर्म्महापातकिनोधनमिति" राज्ञोधनग्रहणनिषेधो महापातक एव मनुनोक्तः। एतिद्रव्यदूषणञ्चैव

पापजनकत्वम् "पतितानां सङ्गं गत्वा भुक्त्वा च प्रतिग्रह्य चेति" दक्षस्मृतिवचनादिति चेन्न पातकेतरप्रायश्चित्त द्रव्यस्य याज्ञवल्क्यापत्तेः, उच्यते । "आदातुर्विशुद्ध्यर्थमिति" महापातके श्रवणेऽपि लाघवात् सामान्यस्मृतिरेव कल्पनीया पापक्षयमात्रसाधनत्वेन बहुतरकृच्छ्रं तत् प्रायश्चित्तद्रव्यं न याज्ञवल्क्यमिति, होलाकाधिकरणन्यायात् । अत एव न तुलापुरुषादावतिव्याप्तिग्रस्तस्य पापक्षयमात्रफलत्वाभावात् स्वर्गादिफलस्यापि तस्य श्रुतत्वात् अत उक्तन्यायत्वस्मृतिवचनान्महापातकिप्रायश्चित्तद्रव्यपक्षे सङ्गच्छते वैश्वानरोदितः । अत्यल्पत्वेन द्रव्यत्यागश्च जले क्षेपणीयः ब्रह्मचारिणे वा देयः । यद्यपि प्रायश्चित्तेतरपतितद्रव्यपक्षेऽपि दक्षस्मृतिना चान्द्रायणमासोपवासौ विहितौ तथापि तावभ्यासविषयौ क्षेत्रौ लघुपापप्रायश्चित्तद्रव्यपक्षे तु "यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम् । तस्योत्सर्गेण शुद्ध्यन्ति जप्येन तपसैव चेति" मनुक्तगायत्रीसहस्रजपमासैकगोदोषवासपयःपानव्रतमाचरणीयम् । लघुतरपापप्रायश्चित्तपक्षे तु "प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितम् । जपंस्तरत्समन्दीयं मुच्यते मानवस्तृहादिति" मनूक्तं दिनत्रयं तरत्समन्दीयजपपरं कल्पादिति" । तरत्समन्दीयञ्च मानवस्तुत्यानन्तरं सूक्तं तच्च मत्कृततुलादानादिपद्धतौ १८०।१ पृष्ठे द्रष्टव्यम् ।

उपदेशाक्ष त्रि० उप+दिश खुञ् । उपदेशकर्त्तरि । "उपदेशकमाचार्य्यादीर्घत्वाच्च पाणिने" भट्टा०र० ।

उपदेशसाहस्री स्त्री वेदान्तप्रकरणभेदे तत्र हि उपदेशाः सहस्रं सन्तीति तथात्वात्तथात्वम् ।

उपदेशिन् त्रि० उपदिशति उप+दिश-णिनि । उपदेशकर्त्तरि स्त्रियां ङीप् । "गतानुगतिको लोकः कुट्टिनीमुपदेशिनीम्" । प्रमाणवति नो धर्म्मे यथा गोप्रत्यये द्विजम्" हितो० ।

उपदेश्य त्रि० उप+दिश-कर्म्मणि यत् । ज्ञापनीये । यस्य प्रवर्त्तनार्थमुपदेशः क्रियते तस्मिन् २उपदेशार्हे ब्राह्मणादौ च "विद्यास्तु वा अविद्यास्तु यज्ञाय्यदुपदेश्यम्" श्रुत्य० ११, ८, २२

उपदेष्टृ पु० उप+दिश-तृच् । गुरौ कर्म्मोपदेशके २आचार्य्ये "चत्वारोवयस्त्विजः स भगवान् कर्म्मोपदेष्टा [illegible] ज्ञेयो० । "तस्मोपदेष्टारमपि पूजयेच्च ततोऽधिकम् । न पूज्यते गुरुर्यत्र सर्व्वाः स्युर्निष्फलाः क्रियाः" ति० त० धृत० । "उपदेष्टानुमन्ता च लोके तुल्यफलौ स्मृतौ" आ० त० पु० । २उपदेशदातरि त्रि० स्त्रियां ङीप् ।

उपदेह पु० उपदिह्यते उपचीयतेऽनेन उप+दिह-घञ् देहादिदहौ गण्डमांसास्त्रीपदादिमर्दे दक्षस्तोतायाम् "करण्डूर्गुरुत्वं क्षुद्रत्वमुपदेहोऽल्पवेदनं लक्ष्मः गौरव यत्तं श्लैष्मिकमिति विद्यात्" भावविभागे सुश्रु० "गुदोपदेहयोर्यौ तु क्लेदोऽपक्वः करोति हि" तद्दौर्गन्ध्योपदेहौ तु क्लेद्याश्वस्यापकर्षति" सुश्रु० । [क्षेम०

उपदेहिका स्त्री उपदेहोविद्यतेऽस्याः ठन् । कीटभेदे (दीमक

उपदोह पु० उपदुह्यतेऽत्र उप+दुह-आधारे घञ् । दोहनपात्रे "दद्यादि यो वै कपिला सवेलां कांस्योपदोहां दक्षिणां चत्वरीयैः" भा० व० १८६ अ० । "वदन्त्यां काञ्चनपात्रदक्षां कांस्योपदोहाम्" । "नाः कांस्योपदोहाश्च कन्यास्च वस्त्रसङ्गताः" इति च हरि० ऐक्य० ।

उपद्रव पु० उप+द्रु-भावे घञ् । उत्पाते । रोगारम्भके धातुवैषम्यजनिते २विकारभेदे च । (उपसर्ग) तस्य लक्षणसङ्ख्ये वैद्यके । "यो व्याधि स्तस्य यो हेतुर्दोषस्तस्य प्रकोपतः । योऽन्योविकारो भवति स उपद्रव उच्यते" सुश्रुते चोक्तं "साध्ययाप्यासाध्यरोगभेदेनोपक्रम्य । "तत्रौपसर्गिको यः पूर्व्वोत्पन्नव्याधिं जघन्यकालजातो व्याधिरुपद्रवति स तन्मूल एवोपद्रवसंज्ञक" । तेन उपसर्जकत्वात्तस्य तथात्वं अत्रार्थे कर्त्तरि अच् इति" विवेकः । स च व्याधिभेदेन नानाविधः । रोगभेदे तद्भेदाश्च तत्रैवोक्ता बहवः । तत्र त्रयोदशे "अतिदग्धे मर्म लक्षणनाशविक्षेपविरागास्रावपुंसत्वस्त्रियाद्यानमतिमात्रं व्यवदाहपिपासामूर्च्छास्वेदप्रदरा भवन्ति" पानीरोगे च "अत ऊर्द्धं नानालिङ्गैर्वक्ष्यमाणमुपद्रवान् । उत्पाटकं चोत्पुटकः स्रावः कण्डूयुतो भ्रमम् । अवमन्थः सकण्डूको ग्रन्थिको जन्मलक्षया । स्रावी च दाहज्वरौ च हस्त्वेषां क्रमशः क्रियाम्" इति, विभज्य, तल्लक्षणचिकित्सा उक्ता । व्याध्यादौ प्राणसंशयादय उपद्रवाः, यथा "उपद्रवे जुष्टाव्याधयो यान्त्यसाध्यताम् । रसायनादिना बल्यं तान् हस्त्वेऽक्षमता मम । वातव्याधिः प्रमेहस्य कुष्ठमर्शोभगन्दरः । अश्मरी मूढगर्भस्तथैवोदरमष्टमम् । अष्टावेते महारोगा दुश्चिकित्स्या मङ्गलदाः । प्राणसंशयकाश्चाष्टौ व्याधयोऽमोजुषः । मूर्च्छातिसारहिक्काभिः पुनश्चैतेऽपद्रुताः । वर्ज्यलोपाविशेषेण भिषजा सिद्धिमिच्छता" सुश्रु० । एवमन्येऽपि रोगभेदे उपद्रवा स्तत्तत्रोक्ता ग्रन्थाविस्तरभयान्नोक्ताः ।

उपद्रष्टृ त्रि० उप+दृश-तृच्-अम् । उपदर्शके साक्षिणि

"अग्निर्वा उपद्रष्टा वायुरुपश्रोतादित्य उपख्याता" तैत्ति० "उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः"। गीता "उपद्रष्टा पृथगभूत एव समीपे द्रष्टा साक्षीत्यर्थः श्रीधरः "नमः प्रथमो नम उपद्रष्टे" आश्व० श्रौ०१,२,१ सोऽयं प्रजानामुपद्रष्टा प्रविष्टः" शत०ब्रा०१,२,४,२,५ "उपद्रष्टा साक्षी" भा० [सुश्रु०।

उपद्रुत त्रि० उप+द्रु-क्त। जातोपद्रवे "पुनश्चैत उपद्रुताः"

उपधर्म्म पु० उप+धर्म्म-घञ्। अप्रधानधर्म्मे "वेदमेवाभ्यसेन्नित्यं यथाकालमतन्द्रितः। तं ह्यस्याहुः परं धर्म्ममुपधर्म्मोऽन्य उच्यते" "एष धर्म्मः परः साक्षादुपधर्म्मोऽन्य उच्यते" मनुः "उपधर्मो जघन्यधर्म्मः" कुल्लू०।

उपधा स्त्री उप+धा-अङ्। उपधाने स्व [illegible] मोक्षेऽन्य प्रत्येकं परिशाधने। उपेत्य धीयते यस्मादुपधा नेम कीर्त्तिता" इत्युक्ते धर्म्मार्थादुपन्यासेन मन्त्रिणां २परीक्षणे "चिन्वन्तः कवयो यद्वदुपधाभेदभीरवः" भट्टिः "अपेक्षाभोपधिभ्यां तु भार्य्यां पुत्रांश्च बोधयेत्। धर्म्मोपधानविघ्नांश्च सर्व्वाभिः सविधान् पुनः" कालिका पु०। ३छले च। "उपधाभिश्च यः कश्चित् परद्रव्यं हरेन्नरः" मनुः "तत्रापि शुत्वा भूयोभूय उपधाभिः" दायकु०।४उपाये च। "अयमोभिदुराल्लोके कोपधा मरणावहे" माघ। "अल्पोऽन्त्यात् पूर्व्व उपधा" पाणिन्युक्ते अन्त्यवर्णात् पूर्व्ववर्णे च। "अनुपधालोपिनोऽन्यतरस्याम्" "कोपधाच्च" पा०। खिजादिगणसूत्रे कोपधात् स्त्रीप्रत्ययादिस्यादि सूरिप्रयोगः ६उपाधौ च। उपधाभूतः।

उपधातु पु० उप साहश्ये प्रा०स०। स्वर्णादिप्रधानधातुसदृशेषु "सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम्। तुत्थं कांस्यञ्च रीतिश्च सिन्दूरञ्च शिलाजतु" भावप्र०उक्तेषु सप्तसु १द्रव्येषु। "उपधातुषु सर्व्वेषु तत्तद्धातुगुणा अपि। सन्ति किन्त्वेषु ते गौणास्तत्तदंशाल्पभावतः" भावप्र०। तत्र कृतमस्य द्रव्यस्य कृतमोपधातुत्वं तस्मिन्नीत तत्रैव। "किञ्चित् स्वर्णसादृश्यात् स्वर्णमाक्षिकमीरितम्। उपधातुः सुवर्णस्य किञ्चित् स्वर्णगुणान्वितम्"। तारमाक्षिकमन्यत्तु तद्वदेवोज्जतोपधम्। किञ्चिदुज्जतसादृश्यात् तारमाक्षिकमीरितम्' २ "तुत्थं (तूँते) तामोपधातुर्हि किञ्चित्ताम्रेण तद्वदेत्। किञ्चित्ताम्रगुणं तस्माद्दृश्यमाणगुणञ्च तत्" ३। उपधातूभवेत् कांस्यं द्वयोस्तरशिखरयोः। कांस्यस्य तु गुणाश्चेयाः स्वयोनिसदृशा गुणैः" ५। रीतिरप्युपधातुः स्यात्तामस्य यदृशञ्च। सिन्दूरस्य गुणाश्चेयाः स्वयोनिसदृशा गुणैः" ५। सौवीरोपधातुः सिन्दूरं गुणैस्तत् सौवीरजातम्। संयोगज प्रभावेन तस्याप्यन्ये गुणाः स्मृताः" ६। निदाघे धर्म्मसन्तप्ता सप्तधारं धराधराः। निर्यासवत् प्रसुस्रुस्ति तच्छिलाजतु कीर्त्तितम्। सौवर्च्चलं राजतं ताम्रमायसं तच्चतुर्विधम्" ७। इति चतुर्थां स्वर्णादीनामुपधातुत्वात् शिलाजतुनश्चतुर्द्धा भेदः। एतेषामन्यान्यगुणकर्त्तृत्वञ्च वक्ष्यते। भावप्र०एतदेवोपधातुत्वेन गणिताः शब्दकल्प० स्वर्णमाक्षिकतुत्थकपूरकासालाञ्जनमनःशिलाहरितालरसाञ्जनरूपा उपधातव इत्युक्तं तन्मूलं ज्ञेयम्। शरीरस्थेषु रसादिजन्येषु २स्तनदुग्धादिषु च। देहस्थाः रसादयः सप्त धातवः तेभ्यो जातास्तु षडुपधातवः। तत्र रसात् स्तनदुग्धम्, रक्तात् स्त्रीरजः २ मांसात् वसा३ मेदसो धर्म्म ४। अस्थ्नोदन्तः५। मज्जतः कोषः ६। शुक्रात् ओजः७। यथोक्तं शार्ङ्गधर। "स्तन्यं रजोवसाखेदो दन्ताः केशास्तथैव च। ओजश्च सप्तधातूनां क्रमात् सप्तोपधातवः"। तत्र भावप्र० स्तन्यादि स्वरूपसङ्ख्या यथा "वनितानां प्रसूतानां धमनीभ्यां स्तनौगतात्। रसादेव हि जायेत स्तन्यं स्तनयुगाश्रयम्। शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्त्तिता। मेदसस्साध्यमानस्य स्नेहो या कथिता वसा"।

उपधान न० उपधीयते शिरोऽत्र उप+धा आधारे ल्युट्। (बालिश) १शिरोधाने। करणे कर्मणि वा ल्युट्। २प्रणये, व्रतभेदे, हेम०। ३विशेषे ४प्रणये च विश्वः "सोपधानां श्रियं धीराः स्थेयसीं मन्वते बुधाः" माघः। "सोपधानां सविशेषां, पक्षे सशेन्दुकामिति" मल्लि०। "पट्टोपधानाध्यासितशिरोभागेषु" काद०। "आसन्दी सोपधाना दलिशानद्धान् यवान्च" कात्या०२१,४,२०। ५विधे भेदि० भावे ल्युट्। ६समीपस्थापने न०। करणे ल्युट्। ७उपधानसाधने मन्त्रे पु०"तद्वानासासुपधानोमन्त्रः" या०

उपधानीय न० उपधीयते शिरस उपरि उप+धा-कर्मणि अनीयर्। १उपधाने (बालिश) २समीपे स्थापनीये त्रि०।

उपधाभूत त्रि० उपधया उपाधिना भूतः। "जातयस्त्रिभागस्तु स्फोतसोपधाभूतः" हरिः उक्ते करभेदे।

उपधायिन् त्रि० उपदधाति शीर्षभागे उप+धा-णिनि स्त्रियां ङीप्। शीर्षभागे उपधानत्वेन धारिणि। "अथैत सा बालुकलोपधायिनी" कुमा०।

उपधारण न० उप+धृ-णिच्-ल्युट्। उपरिस्थितस्य वस्तुनः

अङ्कुशादिना (आकर्षणे । "अङ्कुशं प्रोचमित्याङ्कुरधीनासुपधारणे। आनाय्य फल्गितां याखां पक्वं पक्वं प्रयातयेत्"१४०। २सम्यक्चिन्तने च । युच् । उपधारणा योगाङ्गे चित्तस्य एकविषये स्थापनार्थव्यापारभेदे स्त्री ।

उपधावन न० उप+धाव-ल्युट् । १उपसरणे २ध्वनुचिन्तने

उपधि पु० उप+धा-आधे कि । अन्यथास्थितस्य वस्तुनोऽन्यथा प्रकाशनरूपे व्यापारे । "योगाधमनविक्रीतो योगदानप्रतिग्रहम् । यत्र वाप्युपधिं पश्येत् ततस्तत्र विनिवर्त्तयेत्" मनुः २छले अमरः "अरिष्ट हि विजयार्थिन: क्षितीशाः विदधति सोपधि सन्धिदूषणानि" किरा० । "बलोपधिविनिर्हसान् व्यवहारान् निवर्त्तयेत्" या० स्मृतौ दीपकलिकायां पाठः । उपधिरुच्यतमिति मूलपा० बलोपाधीति" मिता० पाठः उपाधिर्धर्मवादिरिति व्याख्यातञ्च । "बलोपधिकृतम्" या० स्मृ० । "पणं वितथमास्याय सर्वरूपधिना कृतम्" भा० अ० २७अ० । "कृत्वा चैवोपधिकृतं मातुर्दृश्यं निमित्तः" २४अ० । आधारे कि । १रथचक्रे हेम० । उपधिना छलेन जीवन्ति ठक् । औपधिक भक्षादिदर्शनेन बलोपजीविनि "उत्कोचकाश्चौपधिका वञ्चकाः कितवास्तथा" मनुः औपधिका ये भक्षादिदर्शनादिनाबलमुपजीवन्तीति कुल्लू० । उपधिका इति पाठोऽशुद्धः ।

उपधूपित पु० उप+धूप-क्त । १सुखौ २सन्तापयुते त्रि० ।

उपधूमित त्रि० धूमोजातोऽस्य तारका० इतच् दाहकायोगात् अल्पं धूमितं भा० स० । १जातधूमे (धोकोयान) यात्रादौ वर्ज्यनीये ज्योतिषोक्ते सूर्य्यगन्तव्यदिग्भागे स्त्री "दग्धा दिगैन्द्री जुहिता दिगैशेयपधूमिता चानलदिक् प्रभाते प्रत्येकमेवं प्रहराष्टकेन क्रमादृक्षीशऽर्कौ सविता क्रमेत । दग्धा दिगुक्ता दिनमाद्ययुक्ता विवस्वटाप्ता भवति प्रदीप्ता । संधूमिता यां सविता प्रयाता प्रेषा दिगन्ताः खलु पञ्चधाताः" पेवू० वसन्तराजः । तद्विदर्शनचक्रं यथा ।

	दग्धा	दीप्ता	उपधूमिता	५धान्ताः
१यामे	ऐशी	पूर्व्वा	आग्नेयी	याम्यादिसौम्यान्ताः
२यामे	पूर्व्वा	आग्नेयी	याम्या	नैर्ऋत्यादीशानान्ताः
३यामे	आग्नेयी	याम्या	नैर्ऋती	पश्चिमादिपूर्व्वान्ताः
४यामे	याम्या	नैर्ऋती	पश्चिमा	वायव्यादिदक्षिणान्ताः
५यामे	नैर्ऋती	पश्चिमा	वायवी	सौम्यादियाम्यान्ताः
६यामे	पश्चिमा	वायवी	उत्तरा	ऐशादिनैर्ऋत्यान्ताः
७यामे	वायवी	उत्तरा	ऐशी	पूर्व्वादिपश्चिमान्ताः
८यामे	उत्तरा	ऐशी	पूर्व्वा	आग्नेयादिवायव्यान्ताः

तत्र प्रहरभेदेन दग्धादित्रिके न गच्छेत् यात्रासु प्रभुर्न गच्छेत् । एवं प्रधूमिता संधूमितादयोऽप्यत्र ।

उपधृति स्त्री उप+धृ-क्तिन् । १सम्भारणे २किरण हेम० ।

उपधेय त्रि० उप+धा-यत् । मन्त्रभेदेन स्थापनीये इष्टकादौ "वयःयद्वत्स्वन्तोपधेयाश्चिदकासु" शि० कौ० ।

उपध्मान पु० उपर्य्युपरि पत्र ध्मायतेऽनेन उप+ध्मा-करणे ल्युट् । ओष्ठे "तालव्या ओष्ठजावुपू" "उपध्मानीयावोष्ठौ" शि० कौ० उक्तौ. तस्य उपर्य्युपर्योच्चारस्थानत्वात्तथात्वम् । उपध्मान इति केचिदाहुः ।

उपध्मानीय पु० उपाध्माने ओष्ठे भवः छ । एकप्रकारे विसर्गस्थानिके गजकुम्भाकृतितया लेखनीये वर्णभेदे उपध्मानशब्दे उदा० । उपाध्मानीय इति केचिदाहुः ।

उपध्वस्त त्रि० उप+ध्वनुष-क्त । १नष्टे २मिश्रिते च । "क्षणयोषा आग्नेया बभ्रवः सौम्याः उपध्वस्ताः सावित्रा वस्तव्यं" यजु० २४,२४ उपध्वंसनमधःपतनम्" वेददी० "यतद्वाऽस्यै रूपमभिवेति रोहिणी ह स्मैवोपध्वस्ता" शत० ब्रा० ४,५,८,२ । "सहस्रदक्षिणे विराजे प्रतिविभज्य नयन् रोहिणीमुपध्वस्ताम्" कात्या० १२,४,१५ । "उपध्वस्तां मिश्रिताम्" संग्रहवृत्तिः ।

उपनक्षत्र न० उपगतं नक्षत्रम् अत्या० स० । अश्विन्यादिसप्तविंशतिनक्षत्राणां प्रत्येकं सप्तविंशत्यानुगतेषु ७२९ संख्यातेषु राशिचक्रस्थेषु तारकभेदेषु । "तानि वा एतानि सप्तविंशतिः, नक्षत्राणि सप्तविंशतिः, सप्तविंशतिर्वै नक्षत्राणामेकैकं नक्षत्रमनुपतिष्ठन्ते तानि च सप्त शतानि विंशतिश्चाधि" शत० ब्रा० १०,५,४,५ । आधीत्वनेन नवाधिकत्वं गम्यते सप्तविंशत्या सप्तविंशतिगुणने ७२९ संख्यासम्भवात् श्रुतौ स्पष्टाक्षरेण तथानुक्तिस्तु दृष्टकानां ७२० संख्यकत्वात्तत्संख्यासाम्यसम्भवादार्षेति बोध्यम्

उपनख न० उपगतमधिष्ठानतया नखं नखमांसम् अत्या० स० । क्षुद्रतोक्तेषु चतुश्चत्वारिंशत्क्षुद्रोगेषु चिप्याख्ये रोगभेदे । तल्लक्षणं तु तत्रोक्तं "नखमांसमधिष्ठाय पित्तं वातश्च वेदनाम् । करोति दाहपाकौ च तं व्याधिं चिप्यमादिशेत् । तदेव क्षतरोगाख्यं तत्रोपनखमित्यपि" ।

उपनत त्रि० उप-नम-क्त । १नम्रे "धौरेः प्रतापोपनतैरितस्ततः" माघः २उपगते च "अधिरोपनतां स मेदिनीम्" रघुः । ३उपस्थिते च हेम० ।

उपनति स्त्री उप+नम-भावे क्तिन । १नमने २उपगमे ३उपस्थितौ आधारे क्तिन् । उपनत्याधारे "आसं न उप-

नतिर्वस्थि, मज्जा म आनतिः" यजु० २०, १२ । "उपनमन्ति भूतानि यत्र" उपनतिः वेददी० । [सामीप्ये ।

उपनद्(दि) अव्य० नद्याः सामीप्यम् वा अच्समा० । नद्याः

उपनन्द पु० उपगतोऽनुगतोनन्दम् आत्मा० स० । गोकुलाधिपनन्दभ्रातरि ।

उपनन्दक त्रि० उप+नन्द-णिच्-ण्वुल् । आनन्दजनके धृतराष्ट्रपुत्रभेदे पु० । "जघनाभः पद्मनाभस्तथानन्दोपनन्दकौ" धृतराष्ट्रपुत्रनामोक्तौ भा० आ० ६७अ० ।

उपनय पु० उप+नी-करणे अच् । उपनयने "मन्त्रोक्तकर्मणा येन समीपं नीयते गुरोः । बालो वेदाय तद्योगाद्बालस्योपनयं विदु"रिति स्मृत्युक्ते संस्कारजनककर्मविशेषे । "नीचस्थितेऽरिष्टगेऽथ वा [illegible] जीवे भृगावुपनयः क्षतिकर्मकोनः" ज्योति० [illegible] यो वो धूमवान् स वह्निमान् अयमपि तथेत्याद्यिलक्षण [illegible] न्यायावयवभेदे, परार्थानुमानसाधकपञ्चावयवान्तर्गतावयवविशेषोपनयलक्षणभेदो न्यायसूत्रवृत्त्योर्दर्शितो यथा -

"उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः" सू० "साध्यस्य पक्षस्य उदाहरणापेक्षादुदाहरणानुसारी य उपसंहार उपन्यासः प्रकृतोदाहरणोपदर्शितव्याप्तिविशिष्टहेतुविशिष्टपक्षविशिष्टबोधजनकोन्यायावयवः तदर्थः निगमनं हेतुविशिष्टत्वेन न पक्षबोधकं किन्तु पक्षप्रसिद्धिहेतुबोधकमिति तद्व्युदासः । अत्र चान्वयव्यतिरेकव्याप्त्योरन्यतरत्वादिनानुगमः कार्य्य उदाहरणोपदर्शितेति तु परिचायकमात्रमिति तु न वाच्यम् उदाहरणविपरीतव्याप्त्युपदर्शकोपनयवारकत्वात् वस्तुतोऽवयवपदेनैव तद्व्युदासः । स चोपनयोद्विविधोऽन्वयिव्यतिरेकिभेदात् । तथेति साध्योपसंहारोऽन्वय्युपनयः न तथेति साध्योपसंहारोव्यतिरेक्युपनयः अत्र च तथायद्वह्नयोगावच्छेदकत्वे न तात्पर्यं किन्तु व्याप्तिविशिष्टत्वबोधे, तथाच वह्निव्याप्यधूमवांश्चायमिति वा तथाचायमिति वोपन्यासः एवं व्यतिरेकिण्यपि वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवांश्चायमिति वा न तथेति वोपन्यासः" वृत्तिः

उपनीयते उपस्थाप्यते ज्ञानविषयतामापाद्यतेऽनेन करणे ल्युट् । न्यायमतसिद्धे ज्ञानलक्षणारूपे २अलौकिकप्रत्यक्षसाधने सन्निकर्षभेदे । तथा हि सन्निकर्षरूपया पूर्व्वज्ञातवस्तुनोऽलौकिकप्रत्यक्षं जन्यते । यथा सुरभि चन्दनमिति चाक्षुषे चन्दनस्य चक्षुर्ग्राह्यत्वेऽपि सौरभस्य तदग्राह्यत्वात् पूर्व्वज्ञातस्य सौरभस्यालौकिकं प्रत्यक्षं जन्यते तथा च सुरभि चन्दनमित्यत्र सौरभांशेऽलौकिकत्वं चन्दनांशे तु लौकिकत्वमिति भेदः ।

ज्ञानलक्षणाकार्य्यकारणभावश्चेत्थं दीधितिकृतोक्तम् । "इयञ्च धर्म्मविषयकं ज्ञानं धर्म्मिणा प्रत्यासत्तिरितरा तु यद्विषयकं तस्य प्रत्यासत्तिः । अतएव सुरभि चन्दनमित्यादौ सौरभत्वादेरपि भानमिति" व्याख्यातञ्चैतत् जगदीशेन । "नन्वेवं सामान्यं यदि न प्रत्यासत्तिः किन्तु तज्ज्ञानं तदा ज्ञानलक्षणया सह तस्याः कोभेद इत्यत आह इयञ्चेति सामान्यलक्षणा चेत्यर्थः । इतरा ज्ञानलक्षणा तस्येति प्रत्यासत्तिरित्यनुषज्यते तथा च कार्य्यकारणभावभेदादेव प्रत्यासत्त्योः भेद इति भावः । अतएव ज्ञानलक्षणातएवेत्यर्थः अन्यथा यत्र सौरभत्वजात्युपस्थित्यनन्तरं सुरभिगन्ध इति वत् सुरभिचन्दनमित्याकारकं सौरभत्वप्रकारेण चन्दनस्य भानात्मकं चाक्षुषं तत्र सौरभत्वजातेर्भानं न स्यात् न हि तत्र सुरभिगन्धस्य भानसम्भवो येन सामान्यलक्षणायास्तद्धर्म्मप्रकारकतदाश्रयप्रत्यक्षं प्रत्येव हेतुतया सौरभत्वप्रत्यासत्तेः कार्य्यतावच्छेदकतयैव सौरभत्वज्ञानेभानं भविष्यतीति सम्भावनीयम् चक्षुषो बहिरिन्द्रियत्वेन स्वायोग्यसंख्याविशेष्यकज्ञानाजनकत्वनियमात् पूर्व्वानुपस्थितस्य सुरभिगन्धस्य तत्र भानसम्भवेनोक्तरीत्या तद्गतजातेरपि तत्र भानात्सम्भवादिति भावः । इत्यादावित्यादिपदेन भ्रमान्तरस्य तदनुव्यवसायस्य च परिग्रहः । यस्तु ज्ञानस्य तदिन्द्रियजन्यत्वं नियामकमिति पूर्वमतेनायं ग्रन्थः । तथा च सौरभत्वेन सौरभत्वज्ञानानन्तरं जायमानायां सुरभिचन्दनमित्याकारकचाक्षुषप्रमायां सामान्यप्रत्यासत्त्या न सौरभत्वस्य भानसम्भवः कारणस्य सौरभत्वचाक्षुषस्यासम्भवादतो ज्ञानलक्षणा पृथक् प्रत्यासत्तिरिति मतं तन्मन्दं ज्ञानस्य तदिन्द्रियजन्यत्वापेक्षायां सुरभिगन्धस्यापि तत्र भानसम्भवे सौरभत्वजातिपर्य्याप्तानुसरणस्य सन्दर्भविरोधापत्तेः सौरभत्वादेरित्यादिपदात् सौरभस्य परिग्रहः तेन न सन्दर्भविरोधदोष इति विभावनीयम् । अत्रेदं तत्त्वं यद्यपि घटत्वादिप्रत्यक्षे तदलौकिकप्रत्यक्षे वा तद्गोचरज्ञानत्वेन ज्ञानलक्षणाया न हेतुत्वं घटत्वादिनिर्व्यिकल्पके प्रमेयत्वादिसामान्यलक्षणाजन्यघटत्वादिप्रत्यक्षे च व्यभिचारात् तथापि लौकिकसाधारणं घटत्वादिप्रकारकप्रत्यक्षमात्रं प्रत्येव घटत्वादिगोचरज्ञानत्वेन हेतुत्वमतएव प्राथमिकघटत्वचैलत्वादिप्रकारकप्रत्यक्षस्य घटत्वचैलत्वादिनिर्व्यिकल्पकं

विमानुपपत्तेः तत्सन्निधिस्वावश्यकी पूर्वानुभूतवस्तुमात्रस्यैव तथात्वेन घटत्वाद्यात्मकतत्तात्प्रत्यभिज्ञानानुरोधेनैव परैरप्यूक्तकार्य्यं कारणस्याभ्युपेयत्वात् । न चैवं जन्यस्वविषयकसविकल्पकस्यैव प्रत्यासत्तित्वमिति प्राचीनगाथाविरोधः तस्या अकिञ्चित्करत्वात् सप्तम्यन्तघटादेरुपनीतभानस्थाने एव तथा नियमसम्भवाच्च द्रव्यत्वादिप्रकारेण घटादेरुपनयसत्त्वेऽपि घटत्वप्रकारेण तस्योपनीतप्रत्यक्षानुदयेन घटत्वादिना तद्घटादिप्रकारकप्रत्यक्षं प्रति घटत्वादिप्रकारस्यैव तद्घटाद्युपनयस्य हेतुत्वादतएव घटघटत्वयोर्निर्विकल्पकानन्तरं घटे घटत्वस्यैव घटत्वेऽपि घटस्य न वैशिष्ट्यावगाहि प्रत्यक्षं घटत्वद्रव्यत्वादिप्रकारेणैव घटादीनां विशिष्टबुद्धेः पारमार्थिकतया तद्वैशिष्ट्यभूतस्य घटत्वादिप्रकारेण घटादिज्ञानस्य तदानीमसत्त्वात् न चैवं निर्विकल्पकोत्तरं विशेष्ये विशेषणमित्यादिकमेणापि घटवदित्याकारप्रत्यक्षं न स्यात्, इष्टत्वात् जातीतरनिष्प्रकारतायां किञ्चिदवच्छिन्नत्वनियमात् द्रव्यगुणकर्म्मणां निरवच्छिन्नप्रकारतानभ्युपगमात् । न च निर्विकल्पकस्य प्रत्यासत्तित्वे स्वविषयीभूतघटत्वाद्युपधानेन तस्य प्रत्यक्षापत्तिः विषयानुपधानेन ज्ञानादिप्रत्यक्षस्यालीकतया विषयोपनायकविरहादेव तस्यातीन्द्रियत्वोपगमादिति वाच्यम् सत्यपि सन्निकर्षे प्रत्यक्षसामान्यं प्रत्यवाहृष्टत्वादिनेव निर्विकल्पकत्वेनापि तादात्म्यसम्बन्धेन विरोधितत्कल्पनादेव निर्विकल्पकस्यापि प्रत्यक्षत्वात्तथा सुखत्वादिनिर्विकल्पकस्य स्वविषयीभूतसुखत्वाद्युपधानेन साक्षात्कारस्य दुर्व्वारत्वापत्तेः सुखत्वस्य निर्विकल्पक एव सुखत्वेऽपि लौकिकस्यैव मनःसन्निकर्षस्य सत्त्वात् तदुपधाने तन्निर्विकल्पकस्य प्रत्यक्षे बाधकाभावादिति । यत्तु घटादिप्रकारकप्रत्यक्षं प्रत्येव घटादिज्ञानत्वेन हेतुत्वे घटादिविशेष्यकघटोद्द्रव्यमित्याकारमानसोपनीतभानं न स्यादिति तत्र घटादिधर्म्मिकद्रव्यत्वाद्यसंसर्गाग्रहादिवायादेव मानसधियो घटादिविशेष्यकत्वसम्भवात् घट द्रव्यमेतन्मात्राकारस्य बाधनिर्णयाप्रतिबध्यमानसप्रत्यक्षस्यासत्त्वेऽपि तत्यभावात् । न चैवं घटादेरनुपस्थितिदशायामपि तद्विशेष्यकं मानसप्रत्यक्षं स्यात् तद्धर्म्मिकासंसर्गाग्रहस्य तदानीमपि सत्त्वादिति वाच्यं घटत्वप्रकारकप्रत्यक्षत्वस्य घटनिष्ठालौकिकविशेष्यताकप्रत्यक्षत्वव्यापकतया तदवच्छिन्नं प्रति हेतुभूतस्य घटत्वज्ञानस्य विरहादेवानुपस्थितघटादेर्विशेष्यविधया मानसप्रत्यक्षजन्यत्वात् घटोद्द्रव्यमित्यादिमानसस्य घटप्रकारकत्वनियमात् अतएव "उपनीतं विशेषणतयैव भासते" इत्यभिधाय "मानसे तु नायं नियमः" इति प्राचीनैरप्युक्तमित्यलं पल्लवितेन"। भाषा० मुक्तावल्यां च "विषयो यस्य तस्यैव व्यापारोज्ञानलक्षणा" "ननु ज्ञानलक्षणा प्रत्यासत्तिर्यदि ज्ञानरूपा सामान्यलक्षणापि ज्ञानरूपा यदा तयोर्भेदो न स्यादत आह। विषयी यस्येति सामान्यलक्षणा प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति । ज्ञानलक्षणा प्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति"। "एवं ज्ञानलक्षणाया अस्वीकारे सुरभि चन्दनमिति ज्ञाने सौरभस्य भानं कथं स्यात्? । यद्यपि सामान्यलक्षणयापि सौरभभानं सम्भवति तथापि सौरभत्वस्य भानं ज्ञानलक्षणया । एवं यत्र धूमत्वेन धूलीपटलं ज्ञातं तत्र धूलीपटलस्याप्युद्व्यवसाये भानं ज्ञानलक्षणया" । अत्र दिनकरः । "ज्ञानलक्षणास्वीकारे बीजमाह । एवमित्यादिना कथं स्यादिति । चन्दनसम्बन्धस्य चाक्षुषे जायमाने उपस्थितसौरभभानं न स्यात् सौरभांशे चक्षुःसन्निकर्षाभावादित्यर्थः । सौरभत्वप्रकारकलौकिकप्रत्यक्षसामग्र्याः सहकारिण्याविरहेण सौरभत्वसामान्यलक्षणयापि सौरभभानं न सम्भवतीति भावः । सुरभि चन्दनमित्यादौ सौरभादेर्भानं सौरभत्वादिसामान्यलक्षणयैव सम्भवति । सौरभत्वप्रकारकलौकिकप्रत्यक्षसौरभत्वावच्छिन्नप्रकारकप्रत्यक्षान्यतरसामग्रीसहकारेणैव तस्याः फलजनकत्वाङ्गीकारात् प्रकृते च द्वितीयसामग्र्याः सहकारिणयाः सत्त्वादित्यभिप्रायेणाह यद्यपीति सौरभत्वस्य भानमिति स्वरूपतः सौरभत्वस्य भानमित्यर्थः । ज्ञानलक्षणया ज्ञानलक्षणयैव । तदानीं सौरभत्वांशे धर्म्मान्तरस्याप्रकाशिततया सामान्यलक्षणया तज्ज्ञानानिर्वाहादिति भावः । ननु धर्म्मान्तरस्य सौरभांशेऽप्रवेशेऽपि सौरभत्वसामान्यलक्षणयैव सौरभत्वादेर्भानमस्तु सौरभत्वप्रकारकसौरभविशेष्यकत्वस्यैव तत्कार्य्यतावच्छेदकत्वादिति चेन्न सौरभत्वादिविषयतायाप्रयोजिकायाः सामान्यलक्षणायाः स्वविषयसौरभत्वादिमत्त्वरूपस्य सम्बन्धस्य सौरभत्वेऽभावेन सामान्यलक्षणया तज्ज्ञानानिर्वाहात् सौरभत्वसामान्यलक्षणायाः कार्य्यतावच्छेदके सौरभत्वप्रकारत्वनिवेशे प्रयोजनाभावाच्च । न च ज्ञानलक्षणायाः कारणत्वान्तरकल्पने गौरवमित्येव सामान्यप्रकारत्वस्य कार्य्यतावच्छेदके प्रवेश इति युक्तम् विशेषणज्ञानहेतुतयैव निर्वाहे ज्ञानलक्षणायाः कारणत्वान्तरकल्पना विरहादिति । ननु विशेषणज्ञानजन्यतावच्छेदक

विशिष्टवृत्तित्वं ज्ञानलक्षणत्वात्तु विशिष्टप्रत्यक्षत्वमिति न कृत्स्नेन निर्वाहः, एवं यत्र ज्ञानलक्षणया स्वविषय मुख्यविशेष्यकं ज्ञानं तत्र विशेषणज्ञानकारणतया न निर्वाह इत्यत आह एवमिति ज्ञानलक्षणया ज्ञानलक्षणयैव, तत्र धूमवत्तज्ञानरूपसामान्यलक्षणायाः स्वविषयधूमत्वाश्रयत्वसम्बन्धेन धूलीपटलेऽभावेन सामान्यलक्षणयानुव्यवसाये धूलीपटलभानासम्भवादिति भावः"। उपनयेन निर्वृत्तः ठक्। औपनयिक ज्ञानलक्षणाजन्ये अलौकिके प्रत्यक्षे "अथ सार्थो यदि भवेत्तेनस्तर्हि प्रत्यक्ष एवौपनयिके" शब्दर०

उपनयन न० उप+नी-ल्युट्। कर्त्तव्ये संस्कारभेदे (उपनयार्हे >समीपप्रापणे च। तत्रोपनयसंस्कारविभागकालादिरुच्यते। स च संस्कारः त्रिविधः नित्यःकाम्योनैमित्तिकश्च। तत्र द्विजातीनामधिकारः। तत्र नित्यः अष्टमवर्षादिकाले विहितः, ब्रह्मवर्चसादिकामस्य पञ्चमादिवर्षविहितः काम्यः, नैमित्तिकस्तु पुनःसंस्कारप्रयोजकपापापनोदनार्थं प्रायश्चित्तात्मकः। तत्र नित्यस्य कालोऽपि द्विविधः मुख्योगौणश्च। तेषु मुख्यकालः "गर्भाष्टमेऽब्दे वाब्दे ब्राह्मणस्योपनायनम्। राज्ञामेकादशे सैके विशामेके यथाकुलम्" मनुः। "गर्भादित्यस्य सर्वत्रानुषङ्गः यथाह आपस्तम्बः "गर्भाष्टमेषु ब्राह्मणमुपनयेत् गर्भैकादशे राजन्यम् गर्भद्वादशे वैश्यम्"। अत एव "अष्टमे वर्षे ब्राह्मणमुपनयेत् (गर्भाष्टमे वा> । एकादशे क्षत्रियम्२। द्वादशे वैश्यम्४। आश्व०सूत्रे तु "जन्मप्रभृत्यष्टमे वर्षे ब्राह्मणमुपनयेत्(। गर्भप्रभृत्यष्टमे वा> । जन्मप्रभृति गर्भप्रभृति वा एकादशवर्षे क्षत्रियमुपनयेत्२ । जन्मप्रभृति गर्भप्रभृति वा द्वादशे वर्षे वैश्यम्४ इति नारायणोपाध्यायः। यत्तूक्तं याज्ञ०। "गर्भाष्टमाब्दे कर्त्तव्यं ब्राह्मणस्योपनायनम्। गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः"। तत्रापि गर्भाष्टमादिरेव मुख्यःकालः अत एव मनुना यथाकुलमित्यनेन जन्मतोऽष्टमादीनां कुलानुसारेण ब्राह्मणमात्रमुक्तम्। तेनास्य कुलानुसारेण उभयोरपि मुख्यत्वमपरे आहुः। व्यवस्थानयोः प्रयोगोऽपि दृश्यते। "प्राप्ते गर्भाष्टमे वर्षे शुद्धिर्यस्य न विद्यते। तस्योपनयनं कार्यं चैत्रे भीमगते रवौ" व्यवहारचन्द्रिकारः। "शुचिर्नैव गुरुर्यस्य वर्षे प्राप्तेऽष्टमे यदि। चैत्रे भीमगते भानौ तस्योपनयनं शुभम्" नि०सि० कृ०। अत्र शुद्धिश्च "रविगुरुशुक्रौ व्रतोद्वाहौ" इत्युक्ता रविगुर्वोर्गोचरशुद्धिः। किञ्च "अष्टमैकादशे चैव द्वादशाब्दे व्रतस्य च। मुख्यं कालं विजानीयाद् ब्रह्मक्षत्रविशां क्रमात्" वचने अष्टमादिवर्षाणां वर्षभेदेन मुख्यत्वमाह। "गर्भाष्टमेषु ब्राह्मणमुपनयेत गर्भैकादशेषु क्षत्रियस्य गर्भद्वादशेषु वैश्यम्" गोभिलः "व्यक्तमाह माण्डव्यः "व्रतबन्धविवाहे च वत्सरपरिगणनं माङ्गराचार्याः। आधानपूर्व्वमेके प्रकृतिपूर्वं सदान्ये तु"। काम्यकालः। "ब्रह्मवर्चसकामस्य कार्यो विप्रस्य पञ्चमे। राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे" मनुः। "षष्ठे तु बलकामस्य विद्याकामस्य सप्तमे। अष्टमे सर्वकामस्य, नवमे कान्तिमिच्छतः" नि०सि०विष्णुः। अथ काम्यानि, पञ्चमे ब्रह्मवर्चसकामम्, अष्टमे आयुष्कामं नवमे तेजस्कामं दशमेऽन्नाद्यकामम्, एकादशे इन्द्रियकामम्, द्वादशे पशुकामम् उपनयेत्"पैठी०। गौणकालोऽपि द्विविधः मध्यमोऽधमश्च स्वप्राधिकप्रायश्चित्तनिमित्ततामेदात्। ब्रह्मक्षत्रियविशामुपक्रमे "द्वादश षोड़श विंशतिरेतीता अवरुद्धकालाभवन्ति" पैठी०। ब्राह्मणस्य द्वादशवर्षात् क्षत्रस्य षोड़शवर्षात् वैश्यस्य विंशत्यब्दात् उत्तरं अवरुद्धकालतादोषश्रवणात् तत्र महाव्याहृतिहोमरूपं प्रायश्चित्तं विप्रादेः षोड़शाद्यतीतत्वे चान्द्रायणादि गुरु प्रायश्चित्तमिति भेदः एवमेव सं० त० रघु०। तथा च गौणकालमध्ये द्वादशाद्ब्दो मध्यः तदुत्तरमधम इति भेदः तत्राधमगौणस्तु। "आषोड़शाद् ब्राह्मणस्य सावित्री नाति वर्त्तते। आ द्वाविंशात् क्षत्रबन्धोरा चतुर्विंशतेर्विशः" मनुः "आ षोड़शाद्वर्षात् द्वाविंशाच्चतुर्विंशाच्च वत्सरात्। ब्रह्मक्षत्रविशां काल औपनायनिकः परः" या०स्मृ०। तत्र आ इत्यस्य सर्वत्रान्वयः आङ् चात्राभिविधौ न मर्यादायाम् "षोड़शाब्दो हि विप्रस्य राजन्यस्य द्विविंशतिः। विंशतिः सवतुर्थी च वैश्यस्य परिकीर्त्तिता" विष्णुध०सूत्रे। अतः षोड़शाद्यब्दानामुपनयनकालता। "अत ऊर्द्धं त्रयोऽप्येते यथाकालमसंस्कृताः। सावित्रीपतिताः व्रात्या भवन्त्यार्यविगर्हिताः" मनुः। अत्र सर्वत्र गर्भावधिषोड़शाद्यब्दाप्राप्ता:"सावित्रीपतिता यस्य दश वर्षाण्यपञ्च च। ब्राह्मणस्य विशेषेणेति" यमवचने पञ्चदशवर्षौत्तरक्रमे गुरुप्रायश्चित्तविधानात्" एतच्च जन्मावधिपरं तेन षोड़शाब्दादिभिः समभवविरुद्धम् एवमेव सं०त०रघु०। पञ्चदशपदञ्च द्विजसाधिकपञ्चदशपरमिति कल्प्यते सर्वसामञ्जस्यात् अतएव "पञ्चदशवर्षादूर्द्धमपि कियत्कालातिक्रमे तूष्णीव्रतमिति" यदता मितात्तराक्षता तथैव सूचितम्। एवं तत्तद्भेदेन सामान्यप्राप्ते निरूपिते इदानीं शुभमूचक

विशेषकालोऽभिधीयते । तत्रादौ वर्णभेदेन तद्भेदस्य मुख्यता यथा ह प्रभि० काश्यपः । "ब्रह्मतो वसन्ते विप्राणां गीष्मे राज्ञां शरद्व्ययो । विशां सुख्यञ्च सर्व्वेषां द्विजानामुपनायनम्" । नारदः "शरदुष्णेषु वसन्तेषु व्युत्क्रमाच्च द्विजन्मनाम् । मुख्यं साधारणं तेषां व्रतं माघादिषट्सु" । नि० सि०गर्गः । "विप्रं वसन्ते क्षत्रियं निदाघे वैश्यं घनान्ते व्रतिनं निदध्यात् । माघादिशुक्लान्तपञ्चमासाः साधारणं वा सकलद्विजानाम्" । शुक्लोज्झैतः । माघादिमासप्राशस्त्यमाह हेमाद्रौ ज्योतिषे" । "माघादिषु च मासेषु मौञ्जी पञ्चसु शस्यते" । कन्यत्वापि । "ब्राह्मणक्षत्रवैश्यानां माघादिष्वपि पञ्चसु । साधारणं तु सर्व्वेषां व्रतोपनयनं विदुः" । तत्र मासभेदे फलभेदः यथाह व्यव०च०सुरेश्वरः" । "माघे मासि भवेद्गुणोधनपतिः प्राज्ञोधनी फाल्गुने मेधावी भवति व्रतोपनयने चैत्रे च वेदान्वितः । वैशाखे सुभगः सुखी प्रटुमतिर्ज्येष्ठे वरिष्ठोबुधोऽप्याषाढेऽपि महाविपत्तिविजयी ख्यातो महापण्डितः" । कृत्यचि० "माघे दृविणवानाढ्यः फाल्गुने च दृढव्रतः । चैत्रे भवति मेधावी वैशाखे कोविदोभवेत् । ज्येष्ठे गहनमीतिश्च आषाढे क्रतुभाजनम् । श्रेषेष्वन्येषु रात्रिः स्यान्निषिद्धं तिथि च व्रतम्" । निषिद्धमिति विप्रक्षत्रियविषयं न वैश्यपरं तस्य "शरदि वैश्यमिति" श्रुत्या प्रागुक्तकाम्यत्वेन च शरद्युपनयनविधानात् । यत्तु "विप्रस्य क्षत्रियस्यापि व्रतं स्यादुत्तरायणे । दक्षिणे च निशां कार्य्यं मानध्याये न संक्रमे" इति गर्गवचने चकारात् विप्रक्षत्रयोर्दक्षिणायने उपनयनविधानं तत् प्रायश्चित्तोपनयनपरमिति स्म० त० रघु० । वस्तुतः चकारेण दक्षिणायने तु वैश्यस्य सख्योपनयनपरम् "उदगयने आपूर्य्यमाणपक्षे कल्याणे नक्षत्रे चूडोपनयनगोदानविवाहाः" आश्व० सूत्रं तु विप्रक्षत्रविषयम् । प्रायश्चित्तोपनयनपरत्वे "नानध्याये न संक्रमे" इति पर्य्युदासानुपपत्तिः अन्ये प्रदर्शयिष्यामो गर्गवचनेन प्रायश्चित्तोपनयनस्यानध्यायेऽपि कर्त्तव्यतावगमात् । "जन्मक्षत्रजन्मतारामासरात्रिषु उपनयनप्राशस्त्यमाह" कल्पचि० सङ्ग्रहः । "जन्मोदये जन्मसु तारकासु मासेऽथवा जन्मनि जन्मभे वा । व्रतेन विप्रो न बहुश्रुतोऽपि विद्याविशेषैः प्रथितः पृथिव्याम्" । "विवाहे मेखलाबन्धे जन्ममासं विवर्जयेत् । विशेषाज्जन्मपक्षन्तु वर्षिकाद्यं सदा हृतम्" गर्गवाक्यं तु क्षत्रियवैश्यपरम् न तु ब्राह्मणविषयं क्षत्रवाक्यविरोधात्" । अथ पक्षनिर्णयः व्य० च० । "श्रेष्ठं पक्षमुशन्ति शुक्लसहितास्तद्वत् त्रिभागं तथा रिक्तां प्रोज्झ्य तिथिं तथा त्रयनयोः सन्धिञ्च शेषाः शुभाः" इति आपूर्य्यमाणे पक्षे इत्यादिप्रागुक्तशाखायनसूत्रम् "पक्षे च कृष्णेतरे" भज्जभट्टीमः । तिथिनिर्णयः । निर्णया० "तृतीयैकादशी पञ्चमी द्वादशी तथा" । "द्वितीयेषु शुक्लविद्धिक्रमिते तिथौ च कृष्णादिमत्तिलयकोऽपि न चापराह्णे" सु०चि० । निर्णया० व्यव०चम० । "न च षष्ठ्यामथाष्टम्यां पञ्चदश्यां न पर्व्वणि । रिक्तासु च न कर्त्तव्यं व्रतोद्वाहप्रवेशने तथा" । अष्टमीपञ्चदश्योरनध्य । यत्तेऽपि पृथगुपादानं नैमित्तिकविषयमेवमर्थेऽपि । "षष्ठ्यामशुचिर्भार्य्या रिक्तासु बन्धुदोषभाक्" सं०त० । "रिक्तायामर्थहानिः स्यात् पौर्णमास्यान्तथैव च । प्रतिपद्यपि चाद्यायां कलुषबुद्धिविनाशनमिति" । अन्यत्रापि "सप्तम्यामष्टम्यामिति यदि रिक्तात्रयोदश्याम् । आयुर्व्विद्यानाशोव्रतबन्धे पञ्चदश्यां च" । "द्वितीया पञ्चमी षष्ठी सप्तमी दशमी तथा । त्रयोदशी तृतीया च शुक्ले श्रेष्ठाः प्रकीर्त्तिता" इत्यत्र सप्तमीत्रयोदश्योर्यत् प्राशस्त्यसङ्कं तद्वसन्ताभिप्रायेण । नि० सि० नारदेन व्यतिरेकमुखेन वसन्ते गलपक्षादिप्रतिप्रसवोक्तेः । यथा "विनर्त्तुना वसन्तेन कृष्णपक्षे गलपक्षे । अपराह्णे चोपनीतः पुनः संस्कारमर्हति" । गलपक्षमाह भद्दनरत्ने नारदः । "कृष्णपक्षे चतुर्थी च सप्तम्यादितिनत्रयम् । त्रयोदशी चतुष्कञ्च अष्टावेते गलग्रहाः" । रा०मा० "आरभ्यानन्तरं यत्र प्रत्यारम्भोन विद्यते । मासादिमुनयः सर्व्वे तमेवाहुः गलग्रहम्" । दैवज्ञमनोहरे । "प्रदोषे निशमध्याये सन्ध्यागर्ज्जे गलग्रहे । मधुं विनोपनीतस्तु पुनः संस्कारमर्हति" । एवं दिशाचतुर्दीगलग्नयोरेषां यदा भवेत् । द्वादशी तत्र वर्ज्या स्यात् गलग्रहतया मतेति व्यो० वचनात् तादृग्द्वादश्यावर्ज्यता । दृढगर्गः । "ऋतिपूर्व्वानध्यायान् सप्तमीञ्च त्रयोदशीम्" वर्ज्ययेदित्यनुसङ्गः । तत्रानध्यायप्रदीपकाशौ अनध्यायग्रन्थे १४५ पृ० दर्शितौ "अनध्यायेऽपि कर्त्तव्यं यस्य नैमित्तिकं भवेत्" दृढगर्गवचनात् "प्रायश्चित्तोपनयनेऽनध्यायस्य न दूषकताऽधिकारात् कृष्णपक्षगलग्रहाणां समुच्चयः । "नो जीवाख्यातिचारे सितगुरुदिवसे काशशुक्लौ व्रतं स्तः" दीपिकोक्तेः समयाशुद्धिमात्रं वर्ज्यनीयम् । शुक्रशुक्लास्तादिदूषणवत्ते दोष-

माह तत्रैव । "अस्तङ्गते दैत्यगुरौ गुरौ वा वक्रेऽपि वा पापयुतेऽप्यनुक्ते । व्रतोपनीतो दिवसैः प्रणाशं प्रयाति देवैरपि - रक्षितोऽपि" । नक्षत्रनिर्णयः सं०त०भुजङ० "खातीयकर्णवसुशिखिलकरभे पौष्णे ज्यचित्राहरिच्छिन्दौ तोयपतौ भगे दितिसुते भाद्रहये सागरे" १५,१८,२१, १,१७,१२,२७,८,१४,२२,५,२४,११,१२, २५,२६,२० एतत्संख्यकेषु स्वप्रदयसु नक्षत्रेषु उपनयनं सत् । सु०चि० प्रभि० विशेषः "त्रिपूर्वाद्वाहित्रवरमूलबहुलिपूर्वारोहिर्क्षविद्यगृक्षतिथेन्दुदिने व्रतं सत्" अत्र व्याख्या प्रभि० "हस्तपत्राहि चतुर्ष्वे भगर्क्षादिषु पञ्चसु । मूलादित्रयके चैव सप्तमे व्रतबन्धनम्" । तेन २२ द्वाविंशतिर्नक्षत्राणि विहितानि । अत्र पुनर्वसुपुष्यहस्तं क्षत्रियवैश्यविषयं न तु ब्राह्मणविषयम् "पुनर्वसौ व्रतोविप्रः पुनः संस्कारमर्हतीति राजमा० । "ब्रह्मवर्चसि मखे मासि मृदुत्वमधिगच्छति । पुनर्वसौ व्रतोविप्रः पुनः संस्कारमर्हतीति" सारसंग्रहे च विप्रोपनयननिषेधात् । तथा च "भरणीकृत्तिकारोहिणीविशाखाज्येष्ठोत्तरोपनयनं न कार्य्यम् एतानि नक्षत्राणि च सर्वशाखानक्षत्रप्रायाणि यथोक्तं तत्रैव "भरणी कृत्तिकारोहिणीविशाखाज्येष्ठकानि च । सर्वशाखानं प्रोक्तं व्रतं तत्र विवर्जयेत्" । वेदिभेदे नक्षत्रभेदो यथा ज्योतिर्निबन्धे व्यव०च०च । "मूलकृत्तिकात्रये सार्पे त्रये पूर्वात्रये तथा । "ऋग्वेदाध्यायिनां कार्यं मेखलाबन्धनं बुधैः", ६, १२, १४, १५, ६, ६, ११, २०, २५, एतन्नक्षत्रेषु ऋग्वेदिविषयाणि "पुष्ये पुनर्वसौ मौष्णे २७हस्ते मैत्रे १७ यजुषाम्भसि । ध्रुवेषु १२, २१, २६, ४ च प्रशस्तं स्यादृयजुषां मौञ्जीबन्धनम्" । पुष्यरासव २१हस्तास्विश्विषट् कर्णोत्तरात्रयम् २२,१२,२१,२६। प्रशस्तं मेखलाबन्धे वटूनां सामगायिनाम्" । भगो ११मैत्रा१७ श्विनीहस्तारेवत्यदिति ७शासवम् २१। अथर्वपाठिनां यज्ञोपवीतोऽयं व्रतार्थके" । नि०सि०।"पूर्वा ११,२०,२५, हस्तात्रये१२,१७,१५, सार्पे ६श्रुतिमूले"च २२,२६,वटूपनयने । यजुषां पौष्णमैत्रार्कादित्यपुष्यब्रह्मदैवैः । सामगानां हरीशार्कैस्तुपुष्योत्तरास्विनी । धनिष्ठादितिमैत्रार्कीन्द्रेन्द्रपौष्णे व्रतबन्धनम्"५,२७, । अन्यत्रापि । "पूर्वा हस्तत्रयाश्लेषाधिष्ण्यमूलानि भानि च । ऋग्वेदाध्यायिनां यज्ञोपवीताध्ययनव्रतबन्धने । उत्तरारोहिणीयुग्मपुष्यश्रोष्णकरादितौ । मैत्रे यजुर्विदाद्योपनयनन्तु प्रशस्यते । उत्तराश्वत्थपूर्वाश्विपुष्याहस्ताधनेषु च । सामगानां व्रतं यज्ञोपवीतं बुधैः स्मृतम्" । अश्विनी रेवती हस्ता भगमैत्रधनादितौ । अथर्ववेदिनाञ्चोपनयनन्तु शुभनक्षत्रमिति" प्रभि०धृतप्रागुक्तवचने ज्येष्ठायामन्त्ये नोक्तावपि प्रागुक्तभुजङ्गादिवचने "अश्विनीहस्तचित्रासु हस्ते स्वात्यान्तु शक्रभे । पुष्ये च पूर्वफल्गुन्यां श्रवणे पौष्णभे तथा । वासवे शततारासु व्रतबन्धः प्रशस्यते" श्रीपतिवचने च ज्येष्ठायाः प्रकरणसन्नायाद्विधयम् । वेदभेदेन विहित नक्षत्रेषु तथा अकार्त्तनेऽपि वेदभेदेन प्राशस्त्यमात्रत्व प्रतीतेरुत्कटलाभे न्यूनवेदिविहितनक्षत्रस्यापि ग्रहणार्थं मुहू० चि०हारादिग्रन्थिनक्षत्राणां सामान्यतो ग्रहणवदत्रापि नक्षत्रं बोध्यम् ।ज्येष्ठायामन्त्यत्वाद्विधय एवाभूता केषुपि वेदिषु तदनुक्तेः व्य०च०गुरु ।"त्रिपूर्वारेषु रोहिण्यां हस्ते मैत्रे च वासवे । त्याज्ये सौम्यपुनर्वीरुत्तमं त्रौपनायनम् । वारुणे वैष्णवे पुष्ये वायव्ये पौष्णभे तथा । अश्विन्यां षट्सु भेषूक्तं मध्यमं तु चतुर्मुखे । शेषेषु वर्जयेद्धीमान् द्विजानामौपनायनम्" अत्रान्त्येषां वर्ज्यत्वोक्तिरपि व्यनाद्विधया" एतदरिक्तनक्षत्राणां प्रागुक्तानैर्विहित्वात् । ज्योतिर्निबन्धे नारद । "श्रेष्ठान्यर्क्षत्रयान्त्येज्य ब्रह्मादित्योत्तरात्रयम् । विष्णुत्रयाश्विमित्राजयोनिभान्युपनायने" । वर्जनीययोगनाह व्य०च०गुरु । "व्याघात परिघं वज्रं व्यतीपातञ्च वैधृतिम् । गण्डातिगण्डौ शूलञ्च विष्कम्भञ्च विवर्जयेत्" अन्यत्रापि । "विष्कुम्भ मूलपरिघव्यतिपातगण्डव्याघातवैधृतियुतं त्यतिगण्ड व्रजम् । योगं विहाय कुजमन्दपराङ्गसंख्यां हित्वानिरं शमशुभञ्च व्रतं प्रशस्तम्" प्रभिता० । "क्षीणचन्द्रेऽस्तगे शुक्रे निरंशे चैव भास्करे । कर्त्तव्यं नोपनयनं नाध्याये गलयज्ञे" । निरंशसूर्यमाह तत्रैव । "रात्रे० प्रथमभागस्थो निरंशः सूर्य उच्यते"। तेन रघुनन्दनेन निरंशयन्त्रस्य संक्रान्तिपरत्वस्य कल्पनं विलम्बम् । वारनिर्णयमाह नारदः । "आचार्यसौम्यकाव्यानां वाराः शस्ताः यथोत्तरम् । वारौ मध्यफलौ प्रोक्तावितरौ निन्दितौ व्रते" तत्राप्यस्तमितस्य बुधस्य वारोवर्जनीय । "अस्तं गतस्य सौम्यस्य वारो वर्ज्यो द्विजन्मनामिति" नारदोक्तेः । अन्यत्र तु । "शुभो बुधोनास्तमितः पापयुक्तयुतो न चेति" । चन्द्रवारस्तु कृष्णे वर्जनीयः । "पापयुक्तानां वाराः स्युर्न शुभाश्चन्द्रवासरः । सितपक्षे प्रशस्तः स्यात् कृष्णे वारोविधीयतेति" व्य०च० उक्तेः । सामगानां कुजवारेऽप्युपनयनमुक्तं श्रीपतिना । "शाखाधिपे बलिनि

केन्द्रगतेऽथवाच्छिन्नु वीरेऽस्त्र चोपचयनं कथितं द्विजानाम्। नीचस्थितेऽरिस्थगेऽथ पराजिते वा जीवेऽगावुपचयः सूतिकर्मक्षीणः"। ज्योतिर्निबन्धे नारदः "सर्वेषां जीवशुक्रवारात् प्रोक्ता व्रते शुभाः। चन्द्रार्कौ मध्यमौ त्रेयो सामवेदुजयोः कुजः। भास्वाधिपतिवाराच्च भास्वाधिपबलं तथा। भास्वाधिपतिलग्नञ्च दुर्लभं त्रितयं व्रते"। मु० चि० "भास्वेयवारतनुर्वार्ष्यमतेव शस्तं भास्वेयमर्क्षयगिजीवबले व्रतं सत्। जीवे भगौ रिपुस्थे विजितेऽथ नीचे स्वाद्दयाच्चविधिना रक्षितोव्रतेन"। वसिष्ठः "भास्वेयगुरुशुक्राणां मौढ्ये बाल्ये च वार्द्धके। नैवोपनयनं कार्यं वर्षेणैके दुर्बले सति"। तेन भौमबुधयोरस्तादिषु सामगायत्रवणभास्विनोरुपनयनादि न भवतीति गम्यते। तत्र नीचाद्यवस्थितत्वे लग्नवांशकोच्चांशस्थितत्वेन भास्वेयादेरपवादमाह वसिष्ठः "यद्यपि नीचांशगतुस्थे स्वांशे वा स्वोच्चभागगे। भास्वेये वा गुरौ शुक्रे न नीचफलमश्नुते"। भास्वेयवर्णशास्त्र। "विप्राधीशौ भागवेज्यौ कुजार्कौ राजन्यानामोषधीयोविशाञ्च। शूद्राणां सर्वान्त्यजानां शनिः स्याच्छास्वेयाः स्युर्जीवशुक्रारसौम्याः" मु०चि० "ऋग्वेदाश्च यजुर्वेदः सामवेदोऽथर्वणः। वेदानामधिपोजीवशुक्रौभौमबुधाः क्रमात्" गुरुः। "ऋग्वेदाधिपतिर्जीवोयजुर्वेदाधिपो भृगुः। सामवेदाधिपो भौमः शशिजोऽथर्ववेदराट्" दीपिका। लग्नभेदे फलमाह व्यव० च० वसिष्ठः। "मेषे भवति वाक्कुशलो वित्तविद्यार्जितो वृषे। युग्मे वेदार्थदर्शी च कुलीरे च षड्गुरुवित्। सिंहकर्मकरः सिंहे षष्ठे भवति पण्डितः। तुलायां विनयप्राप्तः कारुस्कृद्धोऽथ वृश्चिके। सर्वत्र पूजितस्थाने धनुर्मृगे तथा। राजप्रेष्यान्वितः कुम्भे मीने वेदान्तपारगः"। लग्नकेन्द्रस्थत्वादि षड्फलमाह सु०चि० "राजसेवी वैद्यवृत्तिः यज्ञवृत्तिश्च पाठकः। प्राग्दोर्यवान् स्वेक्षसेवो केन्द्रे स्वर्यादिखेचरे" व्यव० च० गुरुः। "रवौ लग्नादिकेन्द्रस्थे दोषः स्फुरितसंज्ञकः। तत्रोपनीतस्य शिशोः कुलनाशो भवेत् तदा, कुजे लग्नादिकेन्द्रस्थे दोषः कुपितसंज्ञकः। तत्रोपनीतं वस्त्रारं कृन्ति वर्षाब्ज संशयः। शनौ लग्नादिकेन्द्रस्थे दोषोदहितसंज्ञकः। करोति मरणं पीडां व्रतिनो वा गुरोस्तथा। राहौ लग्नादिकेन्द्रस्थे दोषोरन्ध्राह्वयोभवेत्। व्रतबोजननीं कृन्ति चाथवा धनसञ्चयम्। केतौ लग्नादिकेन्द्रस्थे दोषश्च पापसंज्ञकः। पलयं व्रतिनोवित्तविद्याविनाशनम्"। लग्नषष्टमान्त्यस्थः करोत्येव निशाकरः। व्रतिनोदेहमथनं निधनं दुःखसञ्चयम्"। वसिष्ठः "विशेषाच्छिधनस्थाने पक्षाच्चेक्कनि सर्व्वदा। आचार्य्यस्यशुभा ह्येते शिष्यं ह्यन्यशुभेतराः"। "केन्द्रत्रिकोणगे जीवे भानौ शुक्रेऽथवा व्यये। द्वितीये त्रे शुभोयोगो द्विजानामौपनायने"। लग्नावधिकस्थानभेदे षड्विधेषस्थितौ फलभेदमाह काश्यपः "षष्ठाष्टमं विना जीवः सर्व्वत्र शुभकृत् सदा। सर्व्वत्र शुभकृच्छुक्रः षष्ठसप्ताष्टमं विना। भास्करोलग्नगः कुर्य्याद्दुष्टं भूपतिसेवकम्। वसुस्थः स्वर्णरहितं भ्रातस्थः सुखिनं सदा। बन्धुगोदुःखितं नित्यं सुतगोमतिवर्ज्जितम्। शत्रुगोरोगरहितं सप्तमे मार्गवर्ज्जितम्। अष्टमे दृष्टिरहितं नवमे धर्म्मकारिणम्। व्यापारगोभिषग्वृत्तिं दीर्घायुष्यं तथा दशगः। रिपुफगोऽनियुक्तश्च फलमेतदुराहृतम्। सिते चन्द्रे लग्नसंस्थे शुभं स्यादसितेऽशुभम्। वसुगे स्यात्तनुप्राप्तिस्तृतीये सुखसंस्थितिः। चतुर्थे बुद्धिवृद्धिं च पञ्चमे सौख्यसत्तमम्। षष्ठे तु व्याधिपीड़ा स्यात् सप्तमे सुखसन्ततिः। अष्टमे निधनः प्राप्तो नवमे धर्म्मसञ्चयः। दशमे स्यात् सदाचारो लाभे स्यात्तनयप्रदः। दारिद्र्यं रिपुफगे विद्याचन्द्रे फलमुदाहृतम्। व्रतिनोमृत्युः सुखं कार्य्यहानिर्दृष्टिर्द्वितीयगे। अधर्म्मोदुःखतिर्दृष्टिर्नाशो लग्नात् क्रमे फलम्। बुद्धिर्दृष्टिर्वित्तनाशो लाभः पुत्रोन्नतिः सुखम्। आयुःक्षयो धर्मसौख्ये कोषलाभः क्षयः क्रमात् सौम्ये लग्नादिराशीनां फलमेतदुदाहृतम्। निन्द्यं हानिं सुखं रोगं द्यूतक्रामं जड़ं मतिम्। विपत्तल्पेयं सुखं क्षयमुदयात् कुरुते शनिः। चन्द्रे विशेषमाह लल्लः; "पापात् सप्तमगश्चन्द्रः पापग्रहेण वा युतम्। व्रते विघ्नं वेदुबलाद्दोषमाचष्टे मनीषिणः। तत्फलं तत्रैव "पापपक्षात् सप्तमगं यदाहुः पापग्रहेणापि युतञ्च किंवा। व्रतं प्रयत्नं मुनयोवदन्ति नोचेत्सदा क्षतुमुपैति शीघ्रम्"। गुरुस्तु। "पापग्रहेक्षिते लग्ने जीवितार्थी न कारयेत्। चन्द्रो वा क्रूरदृग्युक्तो मृत्युं संप्रयच्छति"। वर्ज्ययोगमाह मु० चि० "अरीज्यचन्द्रलग्नपारिपौ व्रतौ व्रतेऽधमाः। व्यवेऽब्जभार्गवौ तथा तनौ व्रतौ सुते खलाः"। अन्यत्रापि; "लग्नाधिनाथसहितजीवनिशाधिनाथान् षष्ठाष्टमे व्ययगतानपि चन्द्रशुक्रौ। लग्नाष्टपञ्चमगतानशुभग्रहांश्च यत्नात् त्यजेद्व्रतविधौ मुनयोवदन्ति"। सारसंग्रहे। "मेखलाबन्धकाले तु सर्व्वदा

पञ्चमकृत्वम् । शुभयुक्ते प्रयंक्ष्यन्ति तदालोकितमेव वा" । योगान्तरमाह प्रभि० मङ्केश्वरः । "जीवे लग्नमधिष्ठिते भृगुसुते धर्मात्मजस्थे विधौ शुक्रांशेऽखिलवेदविद्विभुतस्यांशे जन्मोऽथम्" । तत्रैव स एव । "विधौ सितांशगे गुरौ तनौ त्रिकोणगे भृगौ । समस्तवेदविद्व्रतो यमांशकेऽतिनिर्घृणः" । नवांशफलमाह व्यङ्क० गुरुः । "गुरुशुक्रांशकगे च चन्द्रे विद्याधनायुःसुखवान् द्विजन्मा । माहेयमन्दार्कनवांशकस्थे क्लिन्नो जड़ो मूर्खतरोऽतिनिःस्वः" बृ०चि० । "क्रूरो जड़ो भवेत् पापः षट्कः षट्कर्मजीवनः । वक्रार्थभाक् तथा मूर्खोरव्यादांशे तनौ क्रमात् । विद्यानिरतः शुभराशिस्थे पापांशगते हि दरिद्रतरः । चन्द्रे खलवे बहुदुःखयुतः कर्णादितिभे धनवान् खलवे" । प्रभि० नारदः "अवणादितिनक्षत्रे कर्कांशस्थे निशाकरे । तदा व्रती वेदशास्त्रधनधान्यसमृद्धिमान्" । एतच्छ्लोकपञ्चविंशयम् "शुक्रे स्वांशे निशानाथे वित्तवान् यज्ञजन्मवेत् । लग्ने स्वांशगतचन्द्रोजातिभ्रंशकरोति हि" बृहज्जातकोक्तः "रविगुरुशुक्रौ व्रतोद्वाहौ" इत्युक्तेर्व्रते गुरुशुक्रावश्यकौ । तत्र गुरुशुक्रौ विशेषमाह" बृ० चि० "षट्कत्र्याजगरांशेस्थिकोणायद्विसप्तगः । श्रेष्ठोगुरुः स षट्त्रयाद्ये पूजयाऽन्यत्र निन्दितः" । "खोच्चे स्वभे स्वर्मतेवा स्वांशे वर्गोत्तमे गुरुः । रिष्फाष्टत्र्यंशगोऽरीष्टो नीचारिस्थः शुभोऽप्यसत्" अत्र जीवस्य नीचस्थत्व एव अरिष्टस्थत्वेऽपि वर्ज्यता प्रतीयते अतएव "जन्मभादष्टमे सिंहे नीचे वा यत्र भे गुरौ ! जौञ्जीबन्धः शुभः प्रोक्तश्चैत्रे मीनगते रवावि" निर्णयसिन्धुधृतवचने मीनगतरविकालएव प्रतिप्रसवार्थकम् । एतेन "शाखाधिपे बलिनि" इत्यादिवाक्ये उपक्रमे शाखाधिपत्वबलात् गुरोरनिष्टस्थत्वे तस्य ऊर्ध्वेदाधिपतया तद्दिनमेवोपनयननिषेधकत्वमपि निरस्तम् "शाखेशस्तूर्ध्वगोजीवश्चे" त्यादिप्रागुक्तवचने शाखेशात् पृथक्त्वेन जीवस्य अष्टमेनारिष्टस्थत्वेऽपि सर्ववेदिनां दोषप्रत्यवायकत्वात् एतेन "नीचस्थितेऽरिष्टगेऽथ पराजिते वा जीवे भृगौ" इत्यादिवचने क्रमात्त्रयं वदन् पराशरः तथात्वे प्रतिप्रसवार्थकमापत्तेः । अन्यदाकरे द्रष्टव्यमिति दिक् तत्तद्विद्याप्रकर्षार्थं एकस्मिन्भेदे तत्र चिकित्साविद्याङ्गो यज्ञयनप्रकारो दर्शितः सुश्रुतेन यथा ।

"अथातः शिष्योपनयनीयमध्यायं व्याख्यास्यामः । ब्राह्मणक्षत्रियवैश्यानामुपनयनमन्त्रवत्सः शीलशौर्यशौचाचारविनयशक्तिबलमेधाधृतिस्मृतिमतिप्रतिपत्तियुक्तं तनुजिह्वौष्ठदन्तास्यहनुजत्रुनासिकानां प्रसन्नचित्तवाक्चेष्टं क्लेशसहं स्निग्धं शिष्यमुपनयेत् । ततो विपरीतगुणं नोपनयेत् उपनयनीयस्तु ब्राह्मणः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु प्रयत्नायां दिशि शुचौ समे देशे चतुर्हस्तं चतुरस्रं स्थण्डिलमुपलिप्य गोमयेन दर्भैः संस्तीर्य पुष्पैर्लाजभक्तैरन्नैश्च देवतां पूजयित्वा विप्रान् भिक्षयेत्, ततोऽग्निमाधुक्ष्य च दक्षिणतो ब्रह्माणं स्थापयित्वाग्निमुपसमाधाय खदिरपलाशैरेवदारुबिल्वानां समिद्भिश्चतसृणां वा क्षीरवृक्षाणां व्यघोषोदुम्बराश्वत्थमधूकानां दधिमधुघृताक्ताभिः, दर्व्या कौशिकेन विधिना स्रुवेणाज्याहुतीर्जुहुयात् । सप्रणवाभिर्महाव्याहृतिभिश्चतुर्थ्या प्रतिदैवतमृषींश्च स्वाहाकारेण कुर्यात् शिष्यमपि कारयेत् । ब्राह्मणस्यैषां वर्णानामुपनयनं कर्त्तुमर्हति राजन्यो हयस्य, वैश्यो वैश्योर्ध्वस्येति । शूद्रमपि कुलगुणसम्पन्नं मन्त्रवर्जमनुपनीतमध्यापयेदित्येके । ततोऽग्निं निःसरणीयाग्निसाक्षिकं शिष्यं ब्रूयात् । कामक्रोधलोभमोहमानाहङ्कारेर्ष्यापारुष्यपैशुन्यानृतालस्यायज्ञानि हित्वा नीचनखरोमण्या शुचिना कषायवाससा सत्यव्रतब्रह्मचर्याभिवादनतत्परेणाऽध्यं भवितव्यं महत्तमतस्थानगमनशयनासनभोजनाभ्यवपरेण भूत्वा मातियहितेषु वर्त्तितव्यमतोऽन्यथा ते वर्त्तमानस्याधर्मो भवत्यफला च विद्या न च प्राकाम्यं प्राप्नोति । अर्हं वा त्वयि सम्यग्वर्त्तमाने यदन्यथादर्शी स्यामेनोभागभवेयमफलविद्यश्च । द्विजगुरुदरिद्रमित्रप्रव्रजितोपनतसाध्वनाथाभ्युपगतानां चात्मवान्यथाबलमिव स्वभेषजैः प्रतिकर्त्तव्यमेव साधु भवति । व्याधशाकुनिकपतितपापकारिणां न च प्रतिकर्त्तव्यमेवं विद्या प्रकाशते मित्रयशोधर्मार्थकामांश्च प्राप्नोति" एवं मन्त्रविद्याफलाकाङ्क्षयोपनयनं द्रष्टव्यम् । उपनयनाय हितम् छ । उपनयनीव उपनयनावेदके शाखेति० तत्र साधु छ । उपनयनीय उपनयनकारके गुरौ यु० । उभयस्य उटा० उक्त सुश्रुतवाक्ये दर्शितम् ।

उपनहन न० उप+नह्–ल्युट् । १बन्धने करणे ल्युट् । २बन्धनसाधने वस्त्रादौ । "प्रेष्यति च सोमोपनहनमाहर" कात्या०७,७,१ । सोम उपनह्यते बध्यते येन तत् सोमोपनहन वास" कर्क० । "आसन्दीनमवभृत्य हृत्वाध्वर्यु सोमोपनहनेन" कात्या०२२,६,१२ । "अथ संप्रेष्यति सोमोपनहनमाहर" यजमानो वा सोमोपनहनमादत्ते" शत०ब्रा० ३,२,२,१,४ ।

उपनागरिका स्त्री "माधुर्य्यव्यञ्जकैर्वर्णैरुपनागरिकेष्यते" इत्युक्तलक्षणे वृत्त्यनुप्रासवृत्तिभेदे। यथा 'अपसारय घनसारं कुरु हारं दूरएव किं कमलैः। अलमलि ! हन्त मालैरिति वदति दिवानिशं बाला" ।

उपनामुक त्रि० उप+नम–बा० उकञ्। १समनमर्णाके २फलानुगुण्याय प्रस्तुते "यदिदृष्टिर्भयं जेतोपनामुक एवं यत्तः स्यात् यमाप्नोत्युपनामुक मनम्" श्रुतः ब्रा० १२, २,६,६,७ ।

उपनाय पु० उपनाययति उप+नी–णिच् करणस्य कर्तृत्वविवक्षायाम् कर्त्तरि अच्। उपनयसंस्कारे हेम० तस्य आचार्य्यसमीपनयनसम्पादनकरणत्वात्तथात्वम् ।

उपनायक पु० उपगतोनायकम् अत्या० स०। १नायकसदृशे उपपतौ "नायकस्य गुणोत्कर्षकथका उपनायकाः" संगीतोक्ते २नायकसहायभेदे उप+नी–ण्वुल्। ३उपस्थापके त्रि० ज्ञानलक्षणाख्यसन्निकर्षे पु०। उपनयशब्दे उदा० ।

उपनायन न० उप+नी–स्वार्थे–णिच्–ल्युट् करणे कर्तृत्वविवक्षायां कर्त्तरि नन्दा० ल्युट् वा। उपनयसंस्कारे। उपनयनशब्दे बहुप्रयोगो दृश्यः। "ब्राह्मणस्योपनायनम्" मनुः। उपनायनं प्रयोजनमस्य ठक्। औपनायनिक उपनयनप्रयोजने विधाने त्रि०। "एष प्रोक्तो द्विजातीनामौपनायनिकोविधिः" मनुः औपनायनिक इत्यत्र कृञ्० अनुपतिकादिकादित्वकल्पनमनाकरमेव उपनायनशब्देनैव तद्बोधसिद्धेस्तथाकल्पनानौचित्यात् ।

उपनाह पु० उप+नह–घञ्। १बीधायामन्त्रीबन्धनस्थाने, २व्रणाद्युपशमार्थे लेपनद्रव्ये च। "आदौ विस्रावणं कार्य्यात् हितं वमनरेचनम्। ततोयसुपनाहञ्च चतुर्थे पाटनक्रियाम्" "गोफणोपनाहन्तु कुर्य्यादामविदग्धयोः" "तिलोपनाहं कुर्य्याच्च सर्व्वदा वातरोगिणाम्" "शास्त्रणमुपनाहार्थे बलातैलमनुवासनार्थे" इति च सुश्रुतः।

उपनाहन न० उप+नह–स्वार्थे णिच्–भावे ल्युट्। व्रणे पादिबन्धने "प्रथमवेत् स्नेहस्वेदोपनाहनैः"। "वेष्टयारैः सक्षारैः स्निग्धैः स्यादुपनाहनम्" सुश्रुतः ।

उपनिक्षेप पु० उप+नि–क्षिप–कर्म्मणि घञ्। १रूपसंख्याप्रदर्शनेन रक्षणार्थं परस्य हस्ते निक्षिप्ते द्रव्ये "आधिसीमोपनिक्षेपजडबालधनैर्विना। तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि" या० स्मृ०। "उपनिक्षेपो नाम रूपसंख्याप्रदर्शनेन रक्षणार्थं निक्षिप्तमिति" मिता० भावे घञ्। २तथार्पणे ।

उपनिधातृ त्रि० उप+नि+धा–तृच्। उपनिधित्सेनान्यसमीपे १स्वद्रव्यस्थापके २स्थापकमात्रे च। "याचितोपनिधातारं सूत्रं देवाः" यत० ब्रा० १,१,२,१७ । उप+नि+धा–ल्युट्। उपनिधायकोऽत्यत्र ।

उपनिधान न० उप+नि+धा–भावे ल्युट्। उपनिधित्सेन १स्थापने "उपनिधानमुपनिधिः" मिता०। २समीपे स्थापने "हृदभिहितोभाव" इत्यादिसूत्रे उपनिधीयमाने २द्रव्ये च ।

उपनिधि क० उप+नि+धा–भावे कि। रूपसंख्ये अप्रदर्शं परस्यान्यके रक्षणार्थं स्वधनस्थापने "हृदभिहितोभावोद्रव्यवत् प्रकाशत" इत्युक्तेः तथा निधीयमाने २द्रव्ये च। उपनिधिस्वरूपतत्स्वकर्त्तव्यविशेषौ मिता० दर्शितौ यथा "यासनस्थमनाख्याय हस्ते न्यस्य यदर्प्यते। द्रव्यन्दैवोपनिधिकं प्रतिदेयं तथैव तत्" या० स्मृ०। "निक्षेपद्रव्याधारभूतन्द्रव्यान्तरं यासनङ्करण्डादि तत्स्थं यद्द्रव्यं रूपसंख्यादिविशेषमनाख्यायाकथयित्वा सुरक्षितमस्येत्यर्थं विश्वस्याद्यते तद्द्रव्यमौपनिधिकं सञ्ज्ञयते यथाह नारदः। "असंख्यातमविज्ञातं समुद्रं यन्निधीयते। तज्ज्ञानोयादुपनिधिं निक्षेपकुशलं विदुरिति" प्रतिदेयन्तथैव तत् यस्मिन् स्थापितन्तेनैव पूर्वमुद्रादि चिह्नितमर्पितन्तस्यैव स्थापकाय प्रतिदेयं प्रत्यर्पणीयम्। प्रतिदेयमित्यस्यापवादमाह "मिता०। "न दाप्योऽपहृतन्तस्तु राजदैविकतस्करैः" या० स्मृ०। "तमुपनिधिं राज्ञा दैवेनोदकादिना तस्करैर्वोपहृतं नष्टं न दाप्योऽसौ राज्ञा तदुपनिहितस्यानिन एव तद्द्रव्यम् नष्टं यदि जिह्मकारितं न भवति यथाह नारदः। "रक्षीतु सह योऽर्थेन नष्टोनष्ट स दायिनः। दैवराजहृते तद्वच्चोज्जिह्मकारितमिति" मिता०। अस्यापवादमाह। "भेषजेन्नाग्निते दत्ते दाप्योदण्डञ्च तत्समम्" या० स्मृ०। "स्वामिना मार्ग्गिते याचिते यदि न ददाति तदा तदुत्तरकालं यद्यपि राजादिभिर्भ्रंशोनाय सङ्क्रामतस्तथापि तद्द्रव्यं मूल्यकल्पनया धनिने यच्छेता दाप्यो राज्ञे च तत्समन्दण्डम्। भोक्तारमाह दण्डमाह" मिता०। "आजीवन् स्नेहया दण्डोदाप्यस्तं वापि सोदयम्" या०। "य स्नेहया स्वामिनमनुत्साद्य उपनिहितन्द्रव्यमाजीवन्नुपभुङ्क्ते व्यवहरति वा प्रयोगादिना स्वार्थं वसायुपभोगानुसारेण दण्डयस्तस्योपनिधिं सोदयमुपभोगे सद्वृद्धिकं व्यवहारे स्वाभव्यनिने दाप्यः। वृद्धिप्रमाणञ्च कात्यायनेनोक्तम्। "निक्षेपं वृद्धियेच्चैव क्रयं विक्रयमेव च। याच्यमानो न चेद्दद्याद्वर्द्धते पञ्चकं शतमिति"। एतच्च भक्षिते द्रष्टव्यम्। उपेक्षाज्ञाननष्टे तेनैव विशेषो दर्शितः "भक्षितं सोदयं

दाय समन्दाय उपेक्षितम् । किञ्चिन्यूनं प्रदाय प्रदाय खाद्व्यञ्जनानीत्यर्थः" । किञ्चिन्यूनमिति चतुर्थांशकोनम्" मिता० । "एष एव विधिर्हीने याचितान्वाहृतादिषु । मिश्रितेषूपनीतौ न्यासे प्रतिन्यासे तथैव च" नारदः । "स जातमात्रान् पुत्रांश्च दारांश्च भरतामिह । प्रदायोपनिधिं राजा पाण्डुः स्वर्गमितोगतः" भा० आ० १२६ अ० । उपनिधिमर्हतीति प्रहृतस्य तदस्य प्रयोजनमिति वा ठक् । औपनिधिक तदधिकारेण प्रहृते व्यवहारे तत्साधनदृष्टौ च ।

उपनिधान न पु० उप+नि-धा-ल्युट् । १समीपे आगतौ २कृताङ्गीकरणे "कृतताच्छीलनिपातवेगग्रह" किरा० ।

उपनिपातिन् त्रि० उप+नि-पत-णिनि । १कृताङ्गीकारे आगतिकोपगतियुक्ते "रज्ज्वोपनिपातिनोऽर्थाः" ।

उपनिबन्धन न० उप+नि+बन्ध-करणे ल्युट् । १सम्यादनसाधने । "प्रत्ययोपनिबन्धनः" "सर्व्वदः भावे ल्युट् । २यत्नने ।

उपनिमन्त्रण न० उप+नि+मन्त्र-ल्युट् । उपेत्य आवश्यके कर्म्मणि प्रवर्त्तनाव्यारूपे निमन्त्रणे ।

उपनिवपन न० उप+नि+वप-ल्युट् । अग्निप्रणयनकर्म्माङ्गभूते इष्ट्याध्याधानादिव्यापारे" औपनिवपनात् कृत्वा इविर्धाने स्थापयति" ८,५, २० । "औपनिवपनात् "इष्ट्याध्याधानादि उपयमनन्यूप्तिवपनान्तमग्निप्रणयनाख्यं कर्म्म कृत्वा" कर्कः ।

उपनिवेशित त्रि० उप+नि+विश-णिच्-क्त । १निवासिते २व्यवस्थितिविषयत्वेन स्थापिते च । "स्वर्गाभिष्यन्दमनं कृत्वोपनिवेशिता" कुमा० । २निवेशितमात्रे च ।

उपनिषद् स्त्री उपनिषीदति प्राप्नोति ब्रह्मात्मभावोऽनया उप+नि-सद-क्विप् । १ब्रह्मविद्यायां, २तत्प्रतिपादके वेदशिरोभागे वेदान्ते च । तु० भा० उपनिषच्छब्दार्थव्युत्पत्तिर्दर्शिता यथा । "सेयं ब्रह्मविद्योपनिषच्छब्दवाच्या तत्परायणां सङ्क्षेतोः संसारस्यात्यन्तावसादनम् उपनिपूर्व्वस्य सदेस्तदर्थत्वात् तादर्थ्याद्ग्रन्थोऽप्युपनिषद्युच्यते । सुबाल० भा० "यथा च इमां ब्रह्मविद्यामुपयन्यात्मभावेन श्रद्धाभक्तिपुरःसराः सन्तस्तेषां गर्भजन्मजरारोगाद्यनर्थपूगं निशातयति परं वा ब्रह्म गमयति अविद्यादिदृढसंसारकारणज्ञानतमसादयति विनाशयतीत्युपनिषद् उपनिपूर्व्वस्य सदेरेयमर्थक्रियारूपात् ।" "अत्र चोपनिषच्छब्दो ब्रह्मविद्यैकगोचरः । तच्छब्दवाच्यवर्थस्य विद्यायामेव सम्भवात् । उपोपसर्गः सामीप्ये तत्प्रतीचि समाप्यते । सामीप्यातिशयस्य विज्ञानेः स्वात्मनीत्यतः । त्रिविधस्य सदर्थस्य नियन्द्रोऽपि विशेषणम् । उपनीय तमात्मानं ब्रह्मापास्तहृयं यतः । निहन्त्यविद्यां तज्ज्ञस्य तत्कार्य्यादुपनिषद्भवेत् । निहन्त्यनर्थमूलं स्वाऽविद्यां प्रत्यक्तया परम् । नयत्यपास्तसम्मोहमितोवोपनिषद्भवेत् । प्रहृत्तिहेतूच्छिन्नेषांसन्म्लोच्छेदकृत्वतः । यतोऽसादयेद्विद्या तस्मादुपनिषद्भवेत् । यथोक्तविद्याहेतुत्वाद्ग्रन्थोऽपि तदैक्यतः । भवेदुपनिषद्भाषा लाक्षणं जंवनं यथेति" तस्यानिबन्धनाचार्य्यैर्दर्शितः । उपनिषद्वेदाश्च शुक्लकोपनिषदि दर्शिता यथा । "ईशा १केन २कठ ३प्रश्न ४मुण्ड ५माण्डूक्य ६तित्तिरि' । एतेषामेषां शुक्लान्तोक्तं १०हृदयादारभ्यकं तथा । ११ ब्रह्म १२ कैवल्य १३ जाबाल १४ श्वेताश्वो १५हंस १६आरुणि: । १७गर्भ १८नारायणी १९हंसो २०विन्दु २१नादं २२शिरः ३ २३शिखा । २४मैत्रायणी २५कौषितकी २६ कृष्णवाराह २७तापनी । २८ कालाग्निरुद्र २९ मैत्रेयी ३०सुबाल ३१क्षुरि ३२ मन्त्रिका । ३३सर्व्वसार ३४निरालम्ब ३५रुद्रहृय ३६ वज्रसूचिकम् । ३७तेजो ३८नादो ३९ध्यान ४०विद्या ४१,४२योगतत्त्वात्मबोधकम । ४३परिव्राट् ४४त्रिशिखी ४५ सीता ४६चूडा ४७निर्व्वाण ४८मण्डलम । ४९दक्षिणा ५०शरभं ५१स्कान्दं ५२ महानारायणाह्वयम् । ५३रहस्यं ५४रामतपन ५५वासुदेवञ्च ५६सुदर्शनम् । ५७याज्ञिकञ्च ५८पैङ्गलं ५९भिक्षु ६०हंसपरमहंसशारीरक शिखाहि ६२ । ६३तुरीयातीत ६४संन्यास ६५ परिव्राजा ६६उज्जसालिका । ६७अव्यक्त ६८क्षर ६९पूर्णा७० ७१सूर्य्याक्ष७२अध्यात्म७३कुण्डिका । ७४सावित्र्या ७५सत्या ७६पाशुपत ७७परब्रह्म ७८अवधूतकम् । ८०त्रिपुरातापन ८१देवी ८२त्रिपुरा ८३काठ ८४भावना । ८५हृदय ८६कुण्डली ८७भस्म ८८रुद्राक्ष ८९गण ९०दर्शनम् ।९१तारसार९२महावाक्य ९३पञ्चब्रह्म ९४अग्निहोत्रकम् ।९५गोपालतापनं ९६कृष्ण ९७याज्ञवल्क्य ९८वराहकम् । ९९शाट्यायनी १००हयग्रीव १०१दत्तात्रेयं च १०२गारुड़म् । १०३कालि ७ १०४जाबालि १०५सौभाग्य १०६रहस्य१०७बह्वृच १०८मुक्तिका" तासाञ्च मध्ये यासां यद्दर्शनत्वं तदपि ग्रन्थिपाठमन्त्रसङ्कलितं तत्रैव दर्शितं यथा ।

"१ऐतरेय२कौषकी३।४नादविन्दात्मप्रबोध५निर्व्वाण ६मुद्गल७ अक्षमालिका ८त्रिपुरा ९सौभाग्यं १०बह्वृचा

ऋग्वेदगतानां दशसङ्ख्याकानामुपनिषदां "बाङ् मे मन-सीति" शान्तिः । १ऐतरेय २कौषीतकि ३जाबाल ४हंस ५परमहंस ६सुबाल ७मन्त्रिका ८निरालम्ब ९त्रि-शिखी" १०ब्राह्मणमण्डल ११ब्राह्मणाहृयतारक १२पैङ्गल १३भिक्षु १४।१५तुरीयातीताध्यात्म १६तारसार १७या ज्ञवल्क्य १८याज्ञायनी १९मुक्तिकानां शुक्लयजुर्वेद गतानामेकोनविंशतिसङ्ख्याकानामुपनिषदां "पूर्णमदः" इति शान्तिः । २०कठवल्ली २१तैत्तिरीयक २२ब्रह्म २३कैवल्य २४कालाग्निरुद्र २५गर्भ २६।२८नारायणामृतबिन्दु २९अमृतनाद ३०कालाग्निरुद्र ३१क्षुरिका ३२सर्वसार ३३शुकरहस्य ३४तेजोबिन्दु ३५ध्यानबिन्दु ३६ब्रह्मविद्या ३७योगतत्त्व ३८दर्शनोपनिषत् ३९ध्यानबिन्दु ४०मण्डलब्राह्मण ४१प्रवज्या ४२मैत्रायणी ४३कुण्डिका ४४भस्म ४५त्रिपुरातपन ४६अक्षमालिका ४७बटुक ४८शाण्डिल्या ४९अवधूत ५०कठरुद्र ५१रुद्रहृदय ५२योगकुण्डलिनी ५३पञ्चब्रह्म ५४प्राणाग्निहोत्र ५५वराह ५६कलिसन्तरण ५७सरस्वतीरहस्यानां कृष्णयजुर्वेदगतानां द्वात्रिंशत्सङ्ख्याकानामुपनिषदां "सह नाववत्विति" शान्तिः । १केन २।३छान्दोग्यारुणि ४मैत्रायणी ५मैत्रेय ६वज्रसूचिक ७योगकुण्डामणि ८वासुदेव ९महत् १०संन्यास ११अक्ष १२कण्ठरुद्र १३सावित्री १४रुद्राक्ष १५जाबालदर्शन १६जाबालीनां सामवेदगतानां षोड-शसङ्ख्याकानामुपनिषदाम "आप्यायन्विति" शान्तिः । १अग्न २मुद्गल ३मात्रङ्क्या ४अर्वशिरो५अर्वशिखा ६बृहज्जाबाल ७नृसिंहतापनी ८नारदपरिव्राजक ९सीता १०शरभ ११महानारायण १२रामरहस्य १३रामतापनी १४गारुड १५परमहंस १६परिव्राजकाऽऽरुणी १७सर्वोपनिषत् १८पाशुपत १९परब्रह्म २०त्रिपुरातपन २१देवी २२भावना २३भस्म २४जाबाल २५गणपति २६महावाक्य २७गोपालतपन २८कृष्ण २९हयग्रीव ३०दत्तात्रेय ३१गारुडानामथर्ववेदगतानामेकत्रिंशत्सङ्ख्याकानामुपनिषदां "भद्रं कर्णेभिरिति" शान्तिः" । पूर्वोत्तरवाक्ये नामभेदः नामान्तरपरतया समाधेयः । ३योगे च । "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरम्" छा०उ० "उपनिषदा योगेन युक्तश्चेत्तदर्थः" भा० "योगो देवतादिविषयमुपासनम्" आनन्दगि० ४धर्म ५ निर्ज्जनस्थाने भेदि० ६सभोपसदने निका० । ७द्विजातिकर्त्तव्ये चत्वारिंशत्संस्कारमध्ये वेदव्रतभेदे तच्च व्रतं गोदानाख्यकेशान्तकर्म्मणः प्राक् कर्त्तव्यं यथाह आश्वलायनगृह्यकारिका "प्रथमं स्यान्मुण्डनाख्यो द्वितीयस्तु महाव्रतम् । तृतीयं स्यादुपनिषद्व्रतादानं च ततः परम् ततश्च विप्रस्य जन्मतस्त्रयोदशे वर्षे मौञ्जीबन्धनं, चतुर्दशे महाव्रतं, पञ्चदशे उपनिषद्व्रतं, षोड़शे वर्षे गोदानम्, चतुस्त्रि जन्मविंशादिवर्षचतुष्के, वैश्यस्य एकविंशादिचतुष्के यथाक्रमं महानाम्न्यादिवेदव्रताख्यकर्म्मचतुष्टयं कर्त्तव्यम् । तत्र चूड़ादिनक्षत्रादिकमेव ज्ञात्वम्" यथाह मी०भा० श्रीधरः । "तिथिनक्षत्रवाराश्च वर्णोदयनिरीक्षणम् । चौलवत् सर्वमाख्यातं सगोदानव्रतेषु च" यदा तु दैवादतीतकालानि महानाम्न्यादिव्रतानि स्युस्तदा समावर्त्तनेन सह कार्य्याणि "यद्वागग्निक्रियासूक्ष्मकालस्याप्यनर्थवत् । गौणकालत्वमिच्छन्तीत्याद्युक्तेः । उपनिषत्सु व्युत्पत्तिः अण् । औपनिषद वेदान्तमात्रवेद्ये परब्रह्मणि । "तत्त्वौपनिषदं पुरुषं वेद" छा०उ० । उपनिषदं वेत्ति अण् । वेदान्ताभिज्ञे "शुद्धबुद्धस्वभाव इत्यौपनिषदः" कुल्लू० ।

उपनिषादिन् त्रि० उप+नि+षद्-णिनि स्त्रियां ङीप् । सभीपे स्थायिनि "तद्दिशमधस्तादुपनिषादिनीं करोति" शत० ब्रा० ६,४,३,२ ।

उपनिष्कर न० उप+निस्+कृ-करणे संज्ञायां घ । मञ्चकृति राजमार्गे अमरः । तत्र हि मञ्चस्थानामपि सैन्यानामसंबाधेन निष्क्रमणात्तथात्वम् । [अमरः ।

उपनिष्क्रमण न०उप+निस्-क्रम करणे ल्युट् । राजपथे ।

उपनिहित त्रि० उप+नि-धा-क्त । १उपनिधित्वेन स्थापिते द्रव्ये उपनिधिशब्दे मिता० उदा० २स्थापिते च ।

उपनीत त्रि० उप+नी-क्त । १कृतोपनयनसंस्कारे "अथोपनीतं विधिवद्विधिज्ञः" रघु० । २ज्ञानलक्षणासंस्कर्म्मेण ज्ञाते च "उपनीतं विशेषणतयैव भासते मान सेतु नायं नियमः" प्राचीनगाथा उपनयशब्दे दृश्या ३समीपे प्रापिते । ४प्रत्यर्पिते च ।

उपनेतृ पु० उप+नी-तृच् । १उपनयकर्त्तरि गुरौ २उपढौ ककर्त्तरि त्रि० स्त्रियां ङीप् । "नियमविधिज्ञलाना ब र्हिषां चोपनेत्री" कथा० ।

उपनेत्र न०उपगत नेत्रम् अत्या० स० । नेत्रसमीपे धार्य्यकाचादिनिर्म्मिते नेत्रतिमिरोपकारके द्रव्यभेदे (चसमा)

उपन्यास पु० उप+नि+अस-घञ् । १वाक्योपक्रमे २वाक्य प्रयोगे उपचारच्छलशब्दे उदा० । "तत्काद्यङ्ग-जिज्ञासोपन्यासश्लेषेण" मारी०भा० । "मालविकायामय-मुपन्यासः सङ्घटयति" मालवि० । ३विचारे पुनरुपन्यासं निबोधत" मनुः । "उपन्यासं विचारम्" कुल्लू० ।

४विश्वासेनान्यसमीपे स्वद्रव्यन्यासे उपनिधौ च ।

उपपति पु० उपगतः पत्या अवा०स०। जारे। "उपपतिरिव नीचैः पश्चिमाभ्येन चन्द्रः" माघः। तस्य पतिवत् स्त्रिया रतिहेतुत्वात्तत्समत्वम्। "यश्च चोपपतिर्गेहे" "वहन्ति ये चोपपतिम्" मनुः "सन्धये जारं गेहायोपपतिम्" यज्ञ०१०,६। गुप्तव्यभिचारभावे जारत्वम् पतिसमीपे तस्य गेहस्थित्या व्यभिचारे उपपतित्वमित्यनयोर्भेदः।

उपपत्ति स्त्री उप+पद-क्तिन्। १युक्तौ, २सङ्गतौ ३हेतौ च "श्रोतव्यः श्रुतिवाक्येभ्योमन्तव्यश्चोपपत्तिभिः" "उपपत्तिभिर्हेतुभिरिति मथुरानाथः। "उपपत्तिमदुज्झितं वचः" "प्रियेषु यैः पार्थ! विनोपपत्तेः" किरा०। "लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः" भाषा०। "हिंसाविधानेऽप्युपपत्तेः" मी० सू०। "उपक्रमोपसंहाराभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च हेतुस्तात्पर्यनिर्णये" इत्युक्तेस्तस्याः प्रकरणप्रतिपाद्यार्थनिर्णायकत्वं यथा। ज्ञानोद्धवे दैप्र०। "यथा लौल्यैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृण्मयं विज्ञातं भवति वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येव सत्यम्" इत्यादिना विकारमात्रस्य वाचारम्भणकथनरूपा युक्तिः। ४उपाये च "अथोपपत्तिं लक्षणापरीक्षणम्" भाषः। "अपेक्षितान्योन्यबलोपपत्तिभिः" भाषः। ५प्राप्तौ दैवज्ञौ च "स्वार्थोपपत्तिं प्रति दुर्विधाय" "असंशयं प्राक् तनयोपपत्तेः" रघुः। युक्तयश्च नानाविधाः सुश्रुते दर्शिताः तास्तत्तच्छब्दे दर्शयिष्यन्ते। "असद्भाक्यप्रयुक्तानां वाक्यानां प्रतिषेधनम्। स्वभाक्यसिद्धिरिति च क्रियते तन्त्रयुक्तिभिः" सुश्रुते तत्फलमुक्तम्।

उपपद न० उपोच्चारितं पदम् मा०स०। समीपोच्चारिते पूर्वसङ्गार्थे शब्दे "तस्याः सराजोपपदं निशान्तम्" रघुः। "फलन्ति कल्पोपपदास्तदेव" माघः। राजनिशान्तं कल्पद्वयं दृत्तार्थः। २नामोत्तरसमुच्चारिते गर्भवत्प्रतिरूपके शब्दे, (उपाधि) व्याकरणे प्रत्ययादिविधायकसूत्रे ३सप्तम्यन्तपदेन निर्दिश्यमाने पदे च। यथा कर्मण्यण् इत्यादौ कर्मण्यितिसप्तम्यन्तं पदम् अण्प्रत्ययविधाने उपपदम्। "उपपदमतिङ्" पा०। "गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेः" वार्त्ति०उक्तेः कृत्प्रत्ययादौ सुबुत्पत्तेः प्राक् समासे उपपदसमासः। उपपदेन समीपस्थपदेन योगे विभक्तिरुपपदविभक्तिः "उपपदविभक्तेः कारकविभक्तिर्बलीयसीति" व्या०प०

उपपन्न त्रि०उप+पद-क्त। १युक्तियुक्ते, "उपपन्नं तनु शिवमिति" रघुः। २प्राप्ते च "अतीन्द्रियेष्वप्युपपन्नदर्शनः" रघुः ३संस्कारान्तराधानरूपसंस्कारयुक्ते "अयन्तु त्रिवृत् पिण्डोर्ध्वं नाम्नोपपन्नसंस्कारः" दशकर्मा० ४उत्पन्ने च।

उपपात पु०उप+पत-घञ्। १कटादागतौ २फलोन्मुखत्वे ३नाशे च। "कर्मोपपाते प्रायश्चित्तं तत्कालम्" कात्या० २५,१,१। "उपपातो विनाशोभेद इत्यनर्थान्तरम्" कर्क०

उपपातक न० पातयति नरके पत-णिच्-ण्वुल् उप अल्पार्थे साहश्ये वा प्रा०स०। पातकसदृशे ततोल्पफलके पापभेदे। "महापातकसंयुक्तान्युपपापान्यतानि तु। तानि पातकसंज्ञानि तत्समानीति नारदः। पतनञ्च "द्विजातिकर्मभ्योहानि पतनं परलोकादिसिद्धिसाधनेषु नरकम्" गोभिलोक्तम्। तस्य न्यूनत्वञ्चाल्पफलदातृत्वेन तस्यात्यफलदातृत्वमाहाङ्गिराः "पातके तु सकृत्स्नानं सकृत्तप्तं हिरण्यं तथा। उपपापे तृतीयं स्यात् नरकं वर्षसंख्यया"।

कैश कैश कर्मणा च तज्जन्यते तन्निरूपितं प्रा०वि०। तत्र मनुः। "गोवधोऽयाज्ययाजनमयाज्यपारदार्यात्मविक्रयः। पितृमातृगुरुत्यागः स्वाध्यायाग्नेः सुतस्य च। परिवित्तिता चानुजेन परिवेदनमेव च। तयोर्दानञ्च कन्यायास्तयोरेव च याजनम्। कन्याया दूषणञ्चैव वार्द्धुषित्वं व्रतच्युतिः। तडागारामदारागामपत्यस्य च विक्रयः। प्रायतोब्रह्मस्वत्यागो भृताध्यापनन्तथा। भृताञ्चाध्यनादानमपण्यानाञ्च विक्रयः। सर्व्याकरेष्वधीकारो महायन्त्रप्रवर्त्तनम्। क्रियालोपधीनां स्त्रीराजोपजिवनं तथा। इन्धनार्थमशुष्कानां द्रुमाणामवपातनम्। आत्मार्थञ्च क्रियारम्भो निन्दितादनन्तथा। अनाहिताग्निता स्त्रीमृताशौचस्यानपक्रिया। असच्छास्त्राधिगमनं कौशीलव्यस्य च क्रिया। धान्यकुप्यपशुस्त्रीयं मद्यपस्त्रीतिलक्रयणम्। स्त्रीशूद्रविट्क्षत्रवधोनास्तिक्यञ्चोपपातकम्"। "अयाज्ययाजनं याज्यमिति प्रतिषिद्धाध्यापनङ्कथयति। त्यागो योनेरसाकरणम्। अनिमित्तं स्वाध्यायत्यागोऽधीतवेदविस्मरणम्। अग्नित्याग आहिताग्न्यादिना। सुतत्यागः पोष्यविनयाधानाद्यकरणेन चकाराद्भार्य्यात्यागोऽपि। परिविविक्तिता कनिष्ठस्य भ्रातुर्दाराग्निहोत्रसंयोगे सति ज्येष्ठस्य भ्रातुर्दाराग्निहोत्रसंयोगप्रागभावः। कनिष्ठस्य परिवेदनं, चकारात् कन्याया अपि तथाभूताया परिवेदनीयत्वम। परिविक्तिपरिवेदयोर्वरत्वेन कन्यादानम्। तयोरेव विवाहादौ श्रुतिस्मृतौ प्रसिद्धे। कन्याया दूषणमकन्यात्वोक्तिः अक्षुण्णा योनिविदारणं वा

वार्द्धुषिकत्वं ब्राह्मणक्षत्रिययोः । व्रतच्युतिरवकीर्णित्वम् । दारागारापि परिणीतानामपि विक्रयः । अपत्यस्यानेकविधस्य । बालता यथाकालमनुपनयनमसोमयाजित्वञ्च । बान्धवत्यागो बान्धवस्य सपिण्डादेरनिमित्तत्यागः । भृतकाध्यापनम् मूल्येन वेतनादिना विद्यार्पणम् । भृताङ्ग वेतनपरिक्रीताहेतादि विद्याग्रहणम् । अपण्यानां लाक्षाटीनां सङ्गत, गोरसादीनां च सङ्गत, ब्राह्मणेन विक्रयः । सर्वाकरेषु सुवर्णोद्गुत्पत्तिस्थानेषु नियोगः । तैलादियन्त्रस्य यन्त्रतेजनादियन्त्रस्य च प्रवर्त्तनम् । धान्यादीनां यथा कथञ्चिन्नाशनं स्त्रियार्ज्जितधनजीवनम् । अभिचारः परहिंसार्थं जपादिकर्म, मूलकर्म वशीकरणं मूलादिक्रिया । इन्धनार्थम् द्रुमाणामशुष्कानां छेदनम् । आत्मार्थं पाकक्रिया न वैश्वदेवाद्यर्था । गणदेवलकतक्षारादीनां विक्रयः । सा मार्ष्ट्यपि अतस्मात्तन्निष्पत्तिरिति । स्तेयं क्षेमनराश्वरजतभूमिमणिनिक्षेपेतरद्रव्यहरणम् । देवर्षिपितृसम्बन्धिन कृष्णशकुनपक्षिवधनम् । असच्छास्त्राभिगमनम् पाषण्डशास्त्राभ्यासः । कृपणत्वस्य कर्म तीर्थार्थिकं तस्य सततानुष्ठानम् । कृष्णयासारद्रव्यसतामुत्कांक्षादेः क्षेयम् मद्यपस्त्रिया मद्यपायाश्च स्त्रिया निषेवणम् ब्राह्मणेन । स्त्रियाः स्त्रीद्वेष्यस्त्रीत्वियाणाञ्च वधः । नास्तिक्यं नास्ति परलोक इति व्यवसितिः । उपपातकमेकैकम् "एकैकमुपपातकमिति" याज्ञवल्क्यवचनात् । एवञ्च गोवधादिनास्तिक्यान्तानि पञ्चाशदुपपातकानि । विष्णुना "अन्तवचनसत्कर्मे राजगामि च पैशुन्यम । गुरोरालीकनिर्बन्ध वेदनिन्दाध तस्य च त्याग" इत्यानि च मनूक्तानि उक्ता "उपपातकिनं सैते कथयान्त्यार्या नरा;" इति उपपातके दर्शितम् । तत्र ऋषादिसभासु परापकारव्यतिरेकेणात्मन उत्कर्षख्यापनं तथा रात्रः पुरतः परापकारव्यतिरेकेण परदोषकीर्त्तनम् । श्रुतमात्रोपकारकगुरोर्निष्ठ्याभियंसनम् । तथा परिक्षादिना वेदनिन्दा तथाऽसच्छास्त्राभियोगेनाधीतवेदविस्मरणञ्च यत्नतु तदुपपातकं गुरुणां पुनरेतेषां मनुनाऽनुपातके दर्शितत्वात् । अन्यानि चोपपातकानि कृत्यान्तरेऽनुसन्धेयानि" ।

"गोवधो ब्रात्यतास्तेयब्रह्मणाक्षानपक्रिया । अनाहिताग्निताऽपण्यविक्रयः परिवेदनम् । भृताद्ध्ययनाटानं भृताध्यापनञ्चया । पारदार्यं पारिवित्त्यं वार्द्धुष्यं लवणक्रिया । स्त्रीद्वेषिदृष्टजीवधो निन्दितार्थोपजीवनम् । नास्तिक्यं व्रतलोपश्च सुतानाञ्चैव विक्रयः । धान्यकुप्यपशुस्तेयमयाज्ययाजनञ्च याजनम् । पिण्डात्सुतत्यागस्तड़ागारामविक्रयः । कन्यासन्दूषणञ्चैव परिवेदक्रयाजनम् । कन्याप्रदानलञ्चैव कौटिल्यं व्रतलोपनम् । आत्मनोऽर्थे क्रियारम्भो मद्यपस्त्रीनिषेवणम् । स्वाध्याग्निसुतत्यागो बान्धवत्याग एव च । इन्धनार्थन्द्रुमच्छेदः स्त्रीहिंसौषधजीवनम् । हिंस्रयन्त्रविधानञ्च व्यसनाद्यात्मविक्रयः । स्त्रुप्रेष्यं क्षीणसख्यं क्षीनयोनिनिषेवणम् । तद्वदाश्रमे वासः परात्मपरिपुष्टता । असच्छास्त्रादिगमनमाकरेष्वधिकारिता । भार्य्याया विक्रयश्चैषामेकैकमुपपातकम्" या० । "गोवधोगोपिण्डव्यापादनम् । कालेऽनुपनीतत्वं ब्रात्यता । ब्राह्मणस्वस्मृतत्वमव्यतिरिक्तपरद्रव्यापहरणं स्तेयम् । स्त्रीतस्य सुवर्णादेरप्रदानलक्षणानामनपाकरणम् तथा देवर्षिपितॄणां सम्बन्धृणस्यानापाकरणञ्च । तत्त्वधिकारे अनाहिताग्नित्वम् । ननु ज्योतिष्टोमादिकामश्रुतय; स्वाङ्गभूताग्निनिषेधपरत्वेऽसाधानमप्रयुञ्जत इति श्रीमांसकप्रसिद्धिरत्र यस्याग्निभि: प्रयोजनस्य तदुपायभूताधाने प्रवृत्तिर्नोत्पाद्यधिनश्च धनार्जने यस्य पुनरग्निभि: प्रयोजनं नास्ति तस्याप्रवृत्तिरिति कथमनाहिताग्नितादोषः उच्यते । अस्मादेवाधानस्यावश्यकत्वबचनादित्यश्रुतयोऽपि साधिकारत्वाविधेषादाधानस्य प्रयोजिका इति प्रकृतिकाराणामभिप्रायो लक्ष्यत इत्यदोषः । तथा अपण्यस्य लवणादेर्विक्रयः । सहोदरस्य ज्येष्ठस्य तिष्यतः कनीयसोऽग्न्युदाहाग्निसंयोगः परिवेदनम् । षण्मूर्ध्वाध्यापकाध्ययनपक्षणम । षण्मूर्ध्वाध्यापनम् । परदारसेवनक्रूरदारतत्त्वमव्यतिरेकेण । पारिवित्त्यं कनीयसि कृतविवाहे ज्येष्ठस्य विवाहराहित्यम् । वार्द्धुष्यमुत्तिद्वद्धृद्धिजीवित्वम् । लवणक्रिया लवणोत्पादनम् । स्त्रियावधो ब्राह्मण्या अपि आत्मेतरव्यतिरेकेण । स्त्रीद्वधः । अदीक्षितदृष्टजीवधः निन्दितार्थोपजीवनम् अराजन्याद्यर्षितार्थोपजीवनम् । नास्तिक्यं नास्ति परलोक इत्याद्यभिनिवेशः । व्रतलोपो ब्रह्मचारिणः स्त्रीपक्षजः । सुतानामपत्यानां विक्रयः ध्यान्यं व्रीह्यादि कुप्यमसारद्रव्यमाशुशीर्यादि पशवोगवाद्यबलोमापहरणम् । "गोवधो ब्रात्यतास्तेयम्" इत्यनेन तेषामपक्षणेनैव सिद्धे पुनर्धान्यकुप्यादिस्तेयपक्षणं निन्दार्थमतो धान्यादिव्यतिरिक्तद्रव्यस्तेये नावश्यमेतदेव प्रायश्चित्तमपि तु ततोऽल्पमपि. भवतीत्यपि । एतेन बान्धवत्यागपक्षे-

नेव सिद्धे पुनः पितृग्रहणं व्याख्यातम्। अयाज्यानाञ्चातिकर्मदुष्टानां शूद्रव्रात्यादीनां याजनम्। पतितसावित्रसुतानामपतितानां त्यागो यज्ञाग्निभ्यः। तडागसारामस्य चोद्यानोपवनादेर्विक्रयः। कन्यायादूषणमङ्गक्षतादिना योनिनिदारणं न तु सम्भोगस्य "षष्ठिभार्या कुमारीष्विति" गुरुतल्पसमत्वस्योक्तत्वात्। परिविन्दक्रयाजनस्य च कन्याप्रदानम्। कौटिल्यकुरोरन्यत्र गुरुविषयस्य तु कौटिल्यस्य सुरापानसमत्वसङ्गम्। पुनर्व्रतलोपप्रकृतं पितृप्रतिषिद्धेष्वपि हरिचरणकमलप्रेक्षणात्माकाम्यकादिकस्य भक्तयामिनेयवर्जकेषु प्राप्तार्थं न तु स्नातकव्रतप्राप्तार्थत्वात् "लुप्तक्रियालोपे च प्रायश्चित्तं भोजनमिति" मनुना लघुप्रायश्चित्तस्य प्रतिपादितत्वात्। तथार्थस्य याज्यत्वेऽपि "ब्रह्मक्षत्रविशां शूद्रः शश्वत् कैवल्यभक्तिभाक्। यतस्तदात्मकारणादिति" तत्रैव [illegible] स्थानात्। क्रियामात्रविषयत्वे तु प्रतिषेधकल्पनागौरवं स्यात्। मद्यपायाः स्त्रियोजायाया अपि निषेधस्यप्रयोजनं। स्वाध्यायत्यागो व्याख्यातः आलीनाञ्च श्रौतस्मार्त्तकर्म्मत्यागः श्रुतत्यागः संस्कारादिकरणम्। बान्धवानामित्यत्र्यमातुलमातुलानीनां त्यागः सति विभवे अपरिरक्षणम्। पाकादिदुष्टस्यौजनस्यिद्धार्थमार्द्रेन्धनछेदेन त्वाहवनीयपरिरक्षणार्थमपि। स्त्रिया हिंसया औषधेन च जीवनं वर्त्तनं स्त्रीहिंसौषधजीवनम्। तत्र स्त्रीजीवनं नाम भार्य्यामिषेण भावेन प्रयोज्य तल्लब्धोपजीवनम स्त्रीधनोपजीवनं वा। हिंसया जीवनाग्निधेन जीवनम्। औषधजीवनं वणीकरणेन। हिंसयत्वस्य तिलेक्षुपीडनकरण्य प्रवर्त्तनम्। व्यसनानि मृगयादीन्यष्टादश। आत्मविक्रयोदृव्यगृहणेन परदासकरणम्। भृतसेवनं क्षीणेषु मैत्रीकरणम्। अनृतस्वर्णदारस्य कैवलक्षीणवर्णदारोपयमनम्, साधारणस्त्रीसम्भोगश्च। अनात्मवेदः अनृतोक्तात्मविस्मरणम्। परपाकरतित्वम्। असच्छास्त्रस्य वार्याकादि पञ्चस्वाधिगमः। सर्वाकरेषु सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञयाधिकारित्वम्। भार्य्यायाधिक्यः। चण्डालान्त्यास्त्रीभिरतिपूर्व्वकगुदादिभक्षणादेर्दूषणम्। एषां गोवधादीनामतेषूक्तमुपपातकसंज्ञावेदितव्या "मिता०। उपपापमध्यत्व।"जलोदरं यक्ष्मप्लीहाश्मकुष्ठरोगव्रणानि च। श्वासजीर्णज्वरच्छर्द्दि भ्रमशोफमदप्रदाः। रक्तार्बुदक्षिप्तोन्मादा उपपापोद्भवा गदाः" मिता०।

उपपातिन् त्रि० उप+पत-णिनि स्त्रियां ङीप्। १कुठाराघाते। २अतर्कितोपस्थिते च। "रक्ष्युपपातिनोऽनर्थाः" हितो०

उपपाद पु० उप+पद-घञ्। १उपपत्तौ। उपगतः पादमत्रा० समा०। २पादोपगते त्रि०। स्त्रियां गौरा० ङीष्।

उपपादक त्रि० उपपादयति उप+पद-णिच्-ण्वुल्। उपपत्तियुक्तकारके पद-ण्वुल्। उपपत्तियुक्ते २युक्तियुक्ते च।

उपपादन न०उप+पद+णिच् ल्युट्। १युक्त्या समर्थने २सम्यक्प्रतिपादने ३प्रीतियुक्तकरणे च। "लोहपिण्डं यथा वह्निः प्रविश्य त्वतिपादयेत्। तथात्मपि जानीहि गर्भे जीवोपपादनम्" भा० आश्व०८अ०।

उपपादित त्रि० उप+पद-णिच्-क्त। १युक्त्या समर्थिते, "उपपादितश्चैतत् पुरस्तात्" जग० २सम्यक् प्रतिपादिते च

उपपादुक त्रि० उपपद्यते उप+पद-उकञ्। दुष्कर्मणा निरपेक्षतया अदृष्टमात्रसहकृतेभ्योऽण्डेभ्यो जायमाने देवदेहे नारकिदेहे च "हेम०टिप्पोपपादुका देवा "अमर"।

उपपाद्य त्रि०उप+पद-णिच्-यत्। १युक्त्या समर्थनीये २प्रतिपाद्ये च। ल्यप्। २उपपत्तियुक्तं कृत्वेत्यर्थे अव्य०।

उपपुर न०समीपस्थं पुरं प्रा०स०। पुरसमीपस्थे शाखानगरे। उपपुरे भवः अण् उत्तरपदवृद्धिः। उपपौर तद्भवे त्रि०।

उपपुराण न० उपतमनुगतं पुराणम् अव्ययी०स०। व्यासोक्ताष्टादशपुराणसदृशेषु नानामुनिप्रणीतेषु नानाविधेषु पुराणेषु। तानि यथा। आद्यं सनत्कुमारोक्तं नारसिंहमतःपरम्। तृतीयं नारदोक्तं कुमारेण तु भाषितम्। चतुर्थं शिवधर्माख्यं साक्षान्नन्दीश भाषितम्। दुर्वासोक्तमाश्चर्य्यं नारदीयमतः परम्। नन्दिकेश्वरयुग्मञ्च, तत्पश्चौशनसेरितम्, कापिलं वाक्यं[illegible] शाम्बं [illegible] कालिकाद्वयमेव च १२। माहेश्वरं १३ तथा भागवं १४ दैवं १५ सर्व्वार्थसाधकम् पराशरोक्तमपरं १६ मारीचं १७ भास्कराद्वयम् १८। भक्त०कूर्मपु०। हेमाद्रौ तु एतद्वचनमन्यथा पठितम् यथा "अन्यान्यपि पुराणानि मुनिभिः कथितानि तु। आद्यं सनत्कुमारोक्तं नारसिंहमतःपरम्। तृतीयं नारदोक्तं कुमारेण तु भाषितम्। चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम्। दुर्वासोक्तमाश्चर्य्यं नारदोक्तमतःपरम्। कापिलं मानवं चैव तथैवोशनसेरितम्। ब्रह्माण्डं वायवं चाथ कालिकाद्वयमेव च। माहेश्वरं तथा याम्यं सौरं सर्व्वार्थसञ्ज्ञयम् पराशरोक्तमपरं तथा भागवताह्वयम्। हृदमहादयं प्रोक्तं पुराणं कौर्मसंज्ञितम्। चतुर्व्वा संख्यितं पुण्यं संहितानां प्रभेदतः"। अत्र हरिवंशपुराणे भागवत

इत्यभिति पाठोऽसङ्गत उपपुराणेषु भागवतद्वयाप्रसिद्धेः। तच्चाग्ने व्यक्तीभविष्यति। पुराणोपपुराणलक्षणं च १२स्क० भागवते सामान्यत उक्तं यथा "सर्गोऽस्याथ विसर्गश्च वृत्तीरक्षान्तराणि च। वंशोवंशानुचरितं संस्था हेतुरपाश्रयः। दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः। केचित् पञ्चविधं ब्रह्मन्। महदल्पव्यवस्थया"। "अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः। भूतसूक्ष्मेन्द्रियार्थानां सम्भवः सर्ग उच्यते। पुरुषानुगृहीतानामेतेषां वासनामयः। विसर्गोऽयं समाहारो बीजाद्बीजं चराचरम्। वृत्तिर्भूतानि भूतानां चराणामचराणि च। कृता तेन नृणां वृत्तिः क्षत्रात्त्राणाय सा पुनः। रक्षा ह्यच्युतावतारेहा विश्वस्यानुयुगे युगे। तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैस्त्वयोद्विजः। मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वराः। ऋषयोंऽशावतारास्च हरेः षड्विधमुच्यते। राज्ञां ब्रह्मप्रसूतानां वंशस्त्वैकालिकोऽन्वयः। वंशानुचरितं तेषां वृत्तं वंशधराश्च ये। नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः। संस्थेति कविभिः प्रोक्तचतुर्धास्य स्वभावतः। हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः। यं चानुशयिनं प्राहुरव्याकृतगुणोपरे। व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु। मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः १०। पदार्थेषु यथा द्रव्यं तन्मात्रं रूपनामसु। बीजादिपञ्चतान्तासु ह्यवस्थासु युतायुतम्। विरमेत यदा चित्तं हित्वा वृत्तित्रयं स्वयम्। योगेन वा तदात्मानं विद्वेहात्मा निवर्त्तते। एवंलक्षणलक्ष्याणि पुराणानि पुराविदः। मुनयोऽष्टादश प्राहुः क्षुल्लकानि महान्ति च"। अत्र क्षुल्लकानीत्युक्तेः उपपुराणस्यापि उक्तदशलक्षणवत्त्वं पञ्चलक्षणादिमत्त्वं बोध्यम्। तेषाञ्च संख्यादिनिरूपणम् पञ्चलक्षणवत्त्वञ्च मत्स्यपुराणे उक्तं यथा। "पाद्मे पुराणे वा प्रोक्ता नरसिंहोपवर्णना। तत्राष्टादश साहस्रं नारसिंहमिहोच्यते। नन्दाया यत्र माहात्म्यं कार्त्तिकेयेन वर्ण्यते। नन्दीपुराणं तल्लोके व्याख्यातमिति कीर्त्यते। यत्र शाम्बं पुरस्कृत्य भविष्यति कथानकम्। प्रोच्यते तत्पुनर्लोके शाम्बमेव मुनिव्रताः!। एवमादित्य संयुक्तं तत्रैव परिपठ्यते" इत्युपक्रम्य अष्टादशस्तु पृथक् पुराणं यत् प्रदृश्यते। विज्ञानीध्वं द्विजश्रेष्ठास्तदेतेभ्यो विनिर्गतम्। पञ्चाङ्गवत् पुराणं स्यादाख्यानमितरत् कृतम्। सर्गश्च प्रतिसर्गश्च वंशोमन्वन्तराणि च। वंशानुचरितञ्चेति पुराणं पञ्चलक्षणम्। ब्रह्मविष्णुकरुद्राणां माहात्म्यं भुवनस्य च। सम्प्रकार प्रदृश्येत पुराणे पञ्चवर्णता। धर्मार्थश्च कामश्च मोक्षश्च परिकीर्त्यते। सर्वेष्वपि पुराणेषु तद्विरुद्धे च यत्फलम्। सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः। राजसेषु कल्पेषु च माहात्म्यं ब्रह्मणो विदुः। तद्वदग्नेश्च माहात्म्यं तामसेषु शिवस्य च। सङ्कीर्णेषु सरस्वत्याः पितृणाञ्च निगद्यते"। "हेमाद्रौ कालिकापुरा० कस्य किंमूलकत्वमिति कथनप्रस्तावे नारसिंहस्य पाद्ममूलकत्वसङ्गा "इदम् यत् कालिकाख्यन्तु मूलं भागवतन्तु तत्" इत्युक्तं तत्र भागवतं तत्तच्च कालिकाख्यस्य मूलमित्यर्थः। भागवतशब्देनात्र देवीभागवतं ग्राह्यं तयोरुभयोरपि कालिकादेवीमाहात्म्यकीर्त्तनेन एकदेवताप्रतिपादकत्वेन एकमूलत्वौचित्यात्। न तु वैष्णवभागवतं तस्य विष्णुदेवताकत्वेनैकदेवताकत्वाभावेन तन्मूलत्वासम्भवात्। एवञ्च देवीभागवतमेव महापुराणमिति केचित्। विष्णुभागवतमेव महापुराणमिति तु बहवः। तत्र हेमाद्रौ मत्स्यपुरा० "इत्यासुरबधोपेतं तद्भागवतमुच्यते। सारस्वतस्य कल्पस्य मध्ये ये स्मुर्नरामराः। तदुत्पन्नोद्भवं लोके तद्भागवतमुच्यते। लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम्। पौर्णमास्यां प्रोष्ठपद्यां स याति परमं पदम्। अष्टादश सहस्राणि पुराणं तत् प्रकीर्त्तितम्" इति महापुराणान्तर्गतभागवतलक्षणसङ्गं वैष्णवे भागवते तु सारस्वतकल्पोद्भवनरादिकथाऽभावात् तल्लक्षणाऽभावेन नैतत् महापुराणं किन्तु उपपुराणम्। देवीभागवतं तु सारस्वतकल्पोद्भवनरादिकथाश्रवणेन उक्तलक्षणवत्त्वेन महापुराणमिति पूर्वेषामाशयः। देवीभागवतं विष्णुभागवतञ्चोभयमपि अष्टादशसाहस्रं ह्यादशस्कन्धयुक्तञ्चेति ह्ययोर्महापुराणत्वसंशये विष्णुभागवतस्य कथात्वे बहूनां विवादात् तन्निर्णयाय देवीभागवतटीकायां यथा व्यवस्थापितं तत् प्रदर्श्यते "तत्र तावत् पुराणेषु भागवतद्वयं प्रसिद्धमेकं महापुराणान्तर्गतमपरमुपपुराणान्तर्गतं लोकेऽप्युपलभ्योर्ह्ययोर्देवी भागवतनाम्ना विष्णुभागवतनाम्ना चाख्यैव तत्रैकं महापुराणान्तर्गतमन्यदुपपुराणान्तर्गतमित्यपि निर्विवादमेव। तथापि किन्देवीभागवतं महापुराणमन्यदुपपुराणं अथ वा विष्णुभागवतं महापुराणमन्यदुपपुराणमिति संशये केचिद्विष्णुभागवतमेव महापुराणमिति वदन्ति केचिद्देवीभागवतमेव महापुराणमिति वदन्ति। तत्र प्रथमपक्षैकदेशिनः केचिदुपपुराणेषु द्वितीयस्यागवतं नाख्यैव महापुराणेषूक्तैकं भागवतं प्रसिद्धं तच्च विष्णु

भागवतमेव न देवीभागवतं देवीभागवतं तु निर्मूलमेवेति वदन्ति। द्वितीयपक्षैकदेशिनोऽपि विष्णुभागवतं वोपदेवकृतमिति वदन्ति। वस्तुतस्तूभयोरपि पुराणयोः पुराणमतभेदेन महापुराणत्वेनोपपुराणत्वेन च। ननु पुराणेष्वेकैकमागवतं प्रसिद्धं न तूपपुराणेषु द्वितीयमस्तीति चेन्न कूर्मगरुडपाद्मादिषु द्वितीयस्य श्लोकपरिगणनात् तथा हि पाद्मे दानप्रस्तावे कूर्मपुराणे' अष्टादश पुराणान्युक्त्वा "अन्यान्युपपुराणानि मुनिभिः कथितानि तु। आद्यं सनत्कुमारोक्तं नारसिंहमतः परमित्यादि" पराशरोक्तं प्रवरत्वेन भागवतान्युक्तमिति" तथा गारुडे तत्त्वरहस्ये द्वितीयांशेऽष्टमाध्याये प्रथमतो महापुराणानां सात्त्विकादिभेदेन विभागसंज्ञा सप्तपुराणानां च तत्रैवादि भेदेन विभागप्रदर्शनपरे ग्रन्थेऽयुक्तं "पुराणमागवतन्त्रौर्गं नन्दीप्रोक्तं तथैव च। पाशुपत्यं रैणुकत्वं भैरवं च तथैव चेति"। तथा तत्पूर्वमपि "विष्णुधर्मोत्तरं चैव तत्र भागवतन्त्वेति"। तन्त्रमागवतन्त्वेति पाठेऽपि तन्त्रं शास्त्रमित्यर्थः तद्विशेषणेन चोत्तमत्वं सूचितं तथा पाद्मे यक्षनपरीक्षायां "आत्मात्मा वैष्णवश्च भागवतं नारदेरितमित्यादि"। तथैव गदितं राम चराचाद्यादिखिलमथा। वाराहं ब्रह्मवैवर्तं यक्षनेषु प्रगद्यते। गैवमागवतन्त्रौर्गमग्नेयोत्तरमेव चेति"। तथा पाद्मे भागवतमाहात्म्ये एकोनविंशेऽध्याये उपपुराणेषु "गैवमादिपुराणञ्च देवी भागवतन्तथेति" तथा मधूकदनसरस्वतीकृतसर्वशास्त्रार्थसंग्रहेऽप्युपपुराणमध्ये भागवतस्परिगणितं नागोजीभट्टादिभिश्च, धर्मशास्त्रग्रन्थेषु एवमन्यैरपि निबन्धकारैरिति। ननु देवीभागवतस्य "तत भागवतस्यास्य पञ्चमं वेदसंमितम्" इति प्रथमाध्यायस्थस्ववचनेनाष्टादश महापुराणेषु पञ्चममिदं पुराणमिति स्वस्य महापुराणत्वं बोधयतस्तस्य कथमन्यपुराणवचनसमुपपुराणत्वं बोधयेत्तथैवं क्वचित् दृष्टत्वादिति चेन्न नारदीयशिवरायव्यादित्य पुराणानां स्वदृष्टेनान्यसूत्रेण वा महापुराणत्वेन प्राय मानानामन्यपुराणेषूपपुराणत्वस्य व्यवस्थापनात् पुराण मतभेदेनैकस्यापि पुराणस्य महापुराणत्वोपपुराणत्व सिद्धेर्या तद्विरोधाभावात्। पुराणभेदेन मतभेदस्य बहुशः प्रसिद्धः। वैष्णवपुराणेषु सात्त्विकत्वं गैवपुराणेषु तामसत्वं, वैष्णवपुराणमतेन, गैवपुराणेषु सात्त्विकत्वं, वैष्णव पुराणेषु, तामसत्वं "दश गैवपुराणानि सात्त्विकानि विदुर्बुधाः। तामसानि च चत्वारि वैष्णवानि प्रचक्षते"। इति स्कान्दे गैवपुराणमतेनेत्थं प्रकारेणेति"।

ततः प्रसङ्गागतमन्यदुक्त्वा इदानीमवधोपेतमित्यनेन पुराणे प्रतिपाद्यदेवकर्तृकत्वं एवाभिप्रेत इति व्यवस्थाप्य तत्रोक्तं यथा "देवीभागवतातिरिक्तसर्वपुराणेषु देवीकृततोऽसुरवधो न क्वचिदप्यस्ति इन्द्रकृतस्यैव तस्य सत्त्वात् केवलं देवीभागवत एव देवीकृतः सोऽस्ति तदुपरूढेन तु देवीभागवते स्वसम्मतिर्दर्शितेति युक्तमेव, अनन्तरं च तत्रैव पुराणदानप्रस्तावे "ददाति सूर्यभक्ताय यस्तु भागवतं द्विजाः। सर्वपापविनिर्मुक्तः सर्वव्याधिविवर्जितः। जीवेद्वर्षशतं साग्रमन्ते वैष्णवतां पदमिति" पठितम्। अत्र च स्वसम्मतं भागवतमेव गृहीतसूचितम्। किञ्चेदं वचनं देवीभागवतपक्षे एव स्वरसतः संगच्छते प्रथमश्लोके, एकादशद्वादशस्कन्धयोश्च सविस्तरं गायत्रीविधानसङ्कथनात्तस्य सूर्यस्य च गायत्रीदेवतात्वात्। श्रीभागवतपक्षे तु वैकुण्ठं गच्छेदित्येव वदेदिति किञ्च "यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः"। इत्यादिमात्रप्रवचनमपि देवीभागवतस्यैव महापुराणत्वं बोधयति वेदे "त्रिपदा गायत्रीति" गायत्रीलक्षणं श्रूयते तेन च त्रिपाच्छन्दोधिकृत्य यत्र धर्मविस्तरो वर्ण्यते यद्भागवतमिति तदर्थः। त्रिपाच्छब्दश्च देवीभागवते प्रथमश्लोके "सर्वचैतन्यरूपान्तामाद्यां विद्यां च धीमहि। बुद्धिं या नः प्रचोदयादिति" श्रूयते। न च विष्णुभागवते तच्छन्दोऽस्ति सूर्यार्घसम्बन्धे गायत्रीपदस्य लक्षणया धीमहीत्यर्थकरणेन विष्णुभागवतपरत्वकल्पनमस्य वचनस्य तु साकृतमेव। क्वचित् पुराणेषु यदि तादृग्न्येव विष्णुभागवतपराणि वचनानि सन्ति तत्र गत्यन्तराभावादस्तु लक्षणा उदाहीने मात्स्यवाक्ये तु सूर्यविषयत्वसम्भवे साऽनुचिता। यत्तु गायत्र्यर्थस्य विष्णुध्यानं न तु शिवसंकल्पसूर्यादिध्यानमित्युक्तं तत्तु नास्तिकत्वमूलकमेव मैत्रायणीयानां "भगोदेवस्य" इति श्रुतौ प्रपञ्चसारादिसर्वतन्त्रेषु पुराणादिषु च शिवसूर्यगणेशादिरूपार्थस्योक्तत्वाच्च। किञ्च "कथमीदृशविद्या यत्र दत्तवधस्तथा। गायत्र्या च समारब्धस्तद्भागवतं विदुरिति" पुराणान्तरवाक्यमपि देवीभागवतस्यैव महापुराणत्वबोधकं तथा हि कथमीदृशमासुरो देवीभागवते प्रथमस्कन्धे निबन्धेनोपासिता ब्रह्मप्रतिपादिका विद्या स्त्रीदैवतो मन्त्रः सा विद्या यत्र वर्त्तते तद्भागवतमित्यर्थः। स दैत्यकृतोपासिता विद्या केत्यभ्यपि तत्रैव प्रथमस्कन्धे दर्शितम् "जपन्नेकाक्षरं मन्त्रं मायाबीजात्मकं मनेत्यादिना"। ननु विष्णुभागवते प्रथमस्कन्धेऽपि कथ-

पीवमन्नस्य चत्वादिदं वचनमुभयभागवतसाधारण्यमिति चेन्न नारदीये भागवतादिकादिनिबन्धेषु च "मन्त्राः पुंदेवताः प्रोक्ता विद्याः स्त्रीदेवताः स्मृताः" इत्यादिवचनैः स्त्रीदैवत्यमन्त्रेष्वेव विद्यापदप्रयोगो न पुंदैवत्यमन्त्रेषितिप्रतिपादनात्"क्वचित् पुंदैवत्यमन्त्रे तथा प्रयोगस्तु गौणः न च गौणार्थमादाय तद्वचनस्य विष्णुभागवतपरत्वं कल्पवित्तसुचितं लक्षणाक्षेपदोषापत्तेः तस्मात् तद्वचनमुभयसाधारण्यमिति देवीभागवतस्यैव महापुराणत्वं बोधयति किञ्च"सारस्वतस्य कल्पस्येति" मात्स्यवचनादपि देवीभागवतमेव महापुराणं अत्र हेयं प्रकरणगुप्तिं कृत्वय जगुः।"पुराणसंख्यामाचक्ष्व सूत! विस्तरतः क्रमादिति" मुनिप्रश्नोत्तरं "ब्रह्मणाभिहितं पूर्वं यत्तद्ब्राह्मं, पद्मकल्पवृत्तान्ताश्रयं पाद्मं, वराहकल्पवृत्तान्ताश्रयं वैष्णवं श्वेतकल्पवृत्तान्ताश्रयं वायवीयमित्येवं तत्तत्कल्पवृत्तान्ताश्रयाणि पुराणान्युक्त्वा तदुत्तरं "यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तर इत्युपक्रम्य "सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः। तद्वृत्तान्तोद्भवं लोके तद्भागवतमिष्यते"इत्युक्त्वा ततोऽन्यान्यपि महापुराणान्येव तत्तत्कल्पवृत्तान्ताश्रयाणि दर्शयतीति पद्मादिपुराणक्रमनार्थम् "उपभेदान् प्रवक्ष्यामीति" प्रतिज्ञाय पद्मपुराणात्सारसिंहं निर्गतमेवं मन्दियाख्यादित्यसंज्ञकान्युक्त्वा अन्योपपुराण्यपि महापुराणेभ्य एव निर्गतानीति "अष्टादशभ्यस्तु पृथक्पुराणं यत् प्रख्यते। विज्ञानीध्वं द्विजश्रेष्ठास्तदा तेभ्यो विनिर्गतमिति वचनेन" सूत ऋषिरुक्तवान्। ततः"सर्गश्च प्रतिसर्गश्च वंशोमन्वन्तराणि च"इत्यादिना पुराणलक्षणसङ्गा "सात्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः। राजसेषु च कल्पेषु माहात्म्यं ब्रह्मणो विदुः। तद्वदग्नेश माहात्म्यं तामसेषु शिवस्य च। सङ्कीर्णेषु सरस्वत्याः पितृणाञ्च निगद्यते"इति वचनेन पुराणप्रतिपाद्यहरिब्रह्माग्निहरसरस्वतीपितृणां माहात्म्यसम्बन्धात् कल्पानां सात्विकराजसतामससङ्कीर्णत्वभेदैश्चातुर्विध्यमङ्गीकारेति तत्र कल्पानां तत्तद्देवतासम्बन्धात्वं तु तत्तत्कल्पाश्रितत्तत्पुराणप्रतिपाद्यमुख्यदेवतात्वेनैव बोध्यम् अन्यप्रकारस्य क्वचिदपि पुराणेषु अनुपलम्भात्। तत्रैवं सति"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः इत्यादि वचनं भागवतस्य लक्षणप्रतिपादकं प्रतिपादितम्। तदर्थस्तु "यथा गारुडकल्प इत्यत्र गारुडस्यायं गारुड: यथा च वाराहकल्प इत्यत्र वराहस्यायं वाराह इति व्युत्पत्तेः प्रसिद्धा तद्वदेव "सरस्वत्याश्चथा कल्पो गौरीकल्पश्चथैव चेति" कल्पनामसु सरस्वतीकल्पत्वमेव कथितत्वात्, मत्स्यपुराणे उषान्याध्याये "सङ्कीर्णेषु सरस्वत्याः पितृणां कल्प उच्यते" वचनेन तथैवोक्तत्वाच्च ब्रह्मविष्णुरुद्राणां कल्पवद्गौरीकल्पस्य कल्पवच्च सरस्वतीकल्पस्यार्थतः प्राप्तत्वाच्च तादृशसारस्वतकल्पसम्बन्धिनो ये देवमनुष्याद्यास्तदृत्तान्तोद्भव उत्पत्तिर्यस्मात् तत्पुराणं भागवतं विदुः तदुक्तत्वान्महदर्शकं यत्पुराणं तद्भागवतसंज्ञकमिति यावत्। अत्र च तत्तद्देवतानामाविर्भावाश्रया ये ये कल्पास्ते तत्तन्नाम्ना व्यवह्रियन्ते एतच्च तत्तन्नामककल्पाश्रितेषु पुराणेषु तत्तद्देवतया एव मुख्यत्वेनोत्पत्तिप्रदर्शकवाक्यैर्लक्ष्मीकल्पादिकल्पाश्रितकूर्मपुराणादिषु सर्वत्र प्रसिद्धमेव तथा च मुख्यत्वेन सरस्वत्या आविर्भावप्रतिपादकं पुराणं यत्तद्भागवतमित्यतिरहस्यार्थः। तत्र सारस्वतकल्प इति पदेनैव कल्पस्य सरस्वतीसम्बन्धे बोधिते तस्य सङ्कीर्णत्वं "सङ्कीर्णेषु सरस्वत्याः" इति वचनेन ईश्वरप्रेरणां विनापि सिद्धागतमेव। अस्मिंश्च वचने भागवतपदेन विष्णुभागवतस्य ग्रहणं बन्ध्यापुत्रोपमेव तस्य मुख्यत्वेन सरस्वत्याविर्भावस्यासत्त्वात् विष्णुभागवते द्वितीयस्कन्धे "पाद्मं कल्पमथो ब्रह्मन्" इति वचनेन स्वमुखेनैव स्वस्य पाद्मकल्पकथाश्रयत्वस्योक्तत्वात् तद्विरोधाच्च। न च पाद्मकल्प एव सारस्वतः सरस्वान् समुद्रस्तस्माज्जातं कमलं सारस्वतं तस्य कल्प इति व्युत्पत्त्येति वाच्यं "पद्मकल्पस्य वृत्तान्तं तत्र यत्कीर्तितं मया। तत्तस्मात् पाद्मं समाख्यातं इति" पूर्वोदाहृतशिवपुराणवचनेन "एतदेव यदा पद्ममभूद्विश्वमभूयं जगत्। तद्वृत्तान्ताश्रयं तद्वत् पाद्ममित्युच्यते बुधैः। पाद्मं तत्पञ्चपञ्चाशत्सहस्राणीह कथ्यते" इति मत्स्यपुराणवचनेन "सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः" इति वचनेन च पाद्मकल्पसारस्वतकल्पयोः पृथक्कथनात् किञ्च सारस्वतकल्पपाद्मकल्पयोरैक्ये पद्मकल्पप्रतिपादकं पुराणत्वं पाद्मं भागवतं चेत्येव वदेत् किञ्च पद्मकल्पस्य वृत्तान्तमित्यत्र"अभिव्यक्तपदार्था ये स्वतन्त्राश्लोकविस्तृता" इति न्यायेन पूर्वं बृहद्रूपेण प्रसिद्धं पद्मग्रन्थं विहायाप्रसिद्धं सारस्वतग्रन्थं पद्मग्रन्थस्य वाचकं ज्ञात्वा सारस्वतपदघटितकल्पने प्रयोजनाभावः। किञ्च "सरस्वत्याश्चथा कल्प इत्यादेः"पूर्वोक्तस्य सारस्वतपदनिरूपितार्थकथनवचनसङ्गस्य विरोधश्च। न च पाद्मकल्पसारस्वतकल्पयोः पृथक्त्वे, तिंशत्कल्पेषु मत्स्यपुराणादिनाभ्याये कीर्त्ति-

तेषु सारस्वतपदेन पाद्मस्य ग्रहणं न स्यादिति वाच्यम् प्रभासखण्डे त्रिंशत्कल्पेषु विष्णुजकल्पार्थिकल्पसुपुष्कल्पानां ग्रहणेऽपि तेषां कल्पानां यथा मात्स्यादि माध्यायेन ग्रहणं तथा पाद्मस्यापि न ग्रहणमित्यस्य तुल्यत्वात् । यदि तेषां पर्यायत्वेन कुत्रचिदन्तर्भावः क्रियते तर्ह्यत्रापि कुत्रचिदन्तर्भावोऽस्तु अतएव विष्णुभागवतस्य प्रबन्धटीकाकारेण "पिङ्गकल्पे एव पूर्वार्धान्ते पद्मस्योद्भवात् पिङ्गकल्पपदेन पाद्मत्वमपि बोद्धव्यम्" इत्युक्तम् पुराणकथनप्रस्तावे सारस्वतकल्पपाद्मकल्पयोः पृथक्करणेन सारस्वतपदेन पाद्मस्य सर्वथा न ग्रहणम् । वस्तुतस्तु त्रिंशत्कल्पाब्रह्मणश्चतुर्दशप्रजापतिख्यातकाः त्रिंशत्तिथिषु प्रतिपदादितिथिषु [illegible] भूर्भुवः स्वः भूर्भुवः स्वः इत्यादयस्त्रिंशत्कल्पा [illegible] ाणोक्ता दिनकल्पा ब्रह्मणः प्रतिदिवसेषतया [illegible] कल्पतिथिकल्पानां सुतरां भेदात् तिथिकल्पेषु दिनकल्पानां पाद्मादीनां न ग्रहणमिति सिद्धान्तः । यत्तु विष्णुभागवतस्यारम्भतः पाद्मकल्पकथाश्रयत्वेऽपि ब्रह्मजन्मखण्डस्यैव सारस्वतकल्पभवत्वेन तस्य च दशमस्कन्धे सप्तत्वात् 'सारस्वतस्य कल्पस्य मध्ये ये सुरनरामराः' इति' वचनस्य विष्णुभागवते विषयोऽस्त्वित्याद्युक्तदिशत् ब्रह्मजन्मखण्डस्य सारस्वतकल्पभवत्वप्रतिपादकानां वचनानां निर्मूलत्वात् समूलत्वेऽपि यस्मिन् पुराणे यस्य कल्पस्य प्रथमतः प्रतिपादनं तत्कल्पप्रतिपादकमेव तत्पुराणमिति नियमः । सर्वपुराणे तथा दृष्टत्वात् तथा च ब्रह्मजन्मखण्डस्य दशमस्कन्धे विद्यमानत्वेऽपि प्रथमतस्तत्कथायाः अभावात् पाद्मकल्पकथायाः प्रथमतो विद्यमानत्वस्य स्वेनैवोक्तत्वाच्च न "सारस्वतस्य कल्पस्येति" वचनस्य विष्णुभागवतं विषयः । किं च ब्रह्मजन्मखण्डस्य यथा दशमस्कन्धे कथनं तथा सर्वपुराणेषु तत्कथनं वर्तत एवेति सर्वपुराणानां तद्वचनविषयत्वं स्यात्तथा च सर्वपुराणानि भागवतपदवाच्यानि-युक्तात् सारस्वतकल्पस्य यत्र प्रथमतः प्रतिपादनं स एव तद्वचनस्य विषयो वक्तव्यस्तादृशं च देवीभागवतमेवास्तीति देवीभागवतमेव तद्विषयो वक्तव्य इति । किं च शिवपुराणे उमासंहितायाम् "ब्रह्मणा संस्तुता सेयं मधुकैटभनाशने । महाविद्या जगद्धात्री सर्वविद्याधिदेवता । द्वादश्यां फाल्गुनस्यैव शुक्लायां समभूदियं"वचनात् फाल्गुनशुक्लद्वादश्यां देव्या उद्भवस्तद्दिन एव च सारस्वतकल्पोद्भवस्तदुक्तं हेमाद्रौ" कल्पारम्भप्रकरणे नागरखण्डे "सारस्वतस्तु द्वादश्यां शुक्लायां फाल्गुनस्य चेति" तथा च सरस्वत्याः कल्पत्वार्थकस्य "सारस्वतस्य कल्पस्य मध्ये ये सुरनरामराः" इति वचनस्य सर्वथा देवीभागवतमेव विषयो न विष्णुभागवतमिति बोध्यं किं च तस्य ग्रहणे तस्य हरिमाहात्म्यप्रतिपादकत्वात् तदाश्रितकल्पस्य सात्त्विकत्वमेव यास्यति 'सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेरिति'वचनात् । ततश्च "संक्षोभेषु सरस्वत्या" इति वचनेन सारस्वतकल्प इति नाम्ना च परमहंसस्य सामर्थ्येन कर्त्तव्या स्यात् अतो विष्णुभागवतं विहाय देवीभागवतमेवास्य वचनस्य विषयोऽस्त्विति युक्तमेव वक्तव्यस्तात् सारस्वतस्य कल्पस्येति वचनात् देवीभागवतमेव महापुराणम् अस्ति चात्र सरस्वत्याविर्भावप्रतिपादकं वचनं तदुक्तं देवीभागवते प्रथमस्कन्धे "तस्मात्सु सात्त्विको यक्षीराजसी तामसीतथा । महालक्ष्मीः सरस्वती महाकालीति ताः स्त्रियः । तासां तिसृणां यक्षीनां देहाङ्गीकारलक्षणः । सृष्ट्युपक्रम समाख्यातः सर्गः शास्त्रविशारदैरिति""अम्बरीष शुकप्रोक्तं नित्यं भागवतं शृणु"इति वचनमपि शुकाय प्रोक्तमिति व्युत्पत्त्या देवीभागवतपरमपि संगच्छते । भवति हि देवीभागवतं शुकायैव प्रोक्तं व्यासेनेति । किं च अष्टादशपुराणानि कृत्वा सत्यवतीसुतः । भारताख्यानमखिलं चक्रे तदुपबृंहणमिति" मात्स्यवचनमपि देवीभागवतस्यैव महापुराणत्वं बोधयति अष्टादशपुराणोत्तरं भारतस्य जातत्वात् भारतोत्तरं च विष्णुभागवतस्य जातत्वात् भारतोत्तरकालं निर्विशो व्यासश्चकारेति विष्णुभागवते स्कं० एवोक्तत्वात् । ननु "वेदशाखाः पुराणानि वेदान्तभारतं तथा । कृत्वा संमोहमुभवं राजन्नरकमेयुषीति"देवीभागवते तृतीयस्कन्धे एवोक्तत्वात् तत्रापि स विरोधस्तदवस्थ एवेति चेन्न मन्यते तदानीं व्यासोनैव जातः किन्तु जनमेजयं प्रति एवं वक्ष्यतीति ज्ञानचक्षुषा ज्ञात्वा भारतात् पूर्वमेव देवीभागवतं कृतमित्यर्थस्य कल्पनात् । तन्मते तु तथा कल्पयितुं न शक्यते चतुःश्लोक्या भागवतोपदेशस्य जायमानत्वात् उपदेशात् पूर्वं तज्ज्ञानाभावस्यावश्यं कल्पनीयत्वात् यदि तत्रापि पूर्वं व्यासस्य ज्ञानमस्तीति स्वीक्रियते तदा वक्ष्यमाणः सर्वोऽप्यर्थवादः स्यात् ततश्च पञ्चलक्षग्रन्थप्रसङ्ग इत्यास्तां तावत् । वस्तुतस्तु वेदशाखाः पुराणानीति पाठोऽसङ्गत इति वक्ष्यते तृतीयस्कन्धे तदा न कोऽपि विरोधः । यत्तु पाद्मे भागवतमाहात्म्ये श्रीमद्भागवतकथाश्रवणाय समागतानां परिगणनप्रसङ्गे "वेदान्तानि च वेदाश्च मन्त्राख्यानानि संहिताः। दश सप्त पुराणानि षट् शास्त्राणि समाय

यु:" इत्युक्तं तत्र व्यासकृतपुराणानामष्टादशत्वादष्टादशेति वक्तव्ये सप्तदशत्वोक्तिः श्रीमद्भागवतस्याष्टादशत्वक्षयति तस्याष्टादशान्तर्गतत्वे देवीभागवतस्याष्टादशान्तर्गतत्वे वा अष्टादशानां श्रीमद्भागवतानां पुराणानां अष्टादशत्वानुक्तेर्निर्बीजत्वप्रसङ्गात् एवं पाद्मे "दश सप्त पुराणानि कृत्वा सत्यवतीसुतः । नाप्रवान्मनसा तोषं भारतेनापि भामिनि" । चकार संहितामेतां श्रीमद्भागवतीं पराभिधां" सप्तदशत्वोक्तिः श्रीमद्भागवतस्यैव एतां संहितामिति निर्दिष्टस्याष्टादशत्वक्षयति देवीभागवतस्याष्टादशत्वेऽष्टादशपुराणानीत्यनुक्तेर्निर्बीजत्वप्रसङ्गादित्याङ्क्षुत्सत् तेषामेव वचनैर्विष्णुभागवस्याष्टादशपुराणान्तर्गतत्वं न सिद्ध्यति किन्तु देवीभागवतस्यैवेति धार्ष्टयिकत्वं कुर्वाणो मूलमेव विनाशयतीति न्याय आगत: । तथा हि भारतं व्यासस्याच्छ्रुत्वा तत्र संहितान: क्रौष्टुकिर्मार्कण्डेयं मत्प्रागत्य सन्देहं पृष्टवान् तच्छ्रुं मार्कण्डेयोमार्कण्डेयपुराणमुक्तवान् तदुक्तं मार्कण्डेयपुराणे "तटिदं भारताख्यानं बह्वर्थं श्रुतिविस्तरम् । तत्त्वतोऽज्ञातकामोऽहं भगवन्समुपस्थितः" इति तथा च भारतोत्तरं मार्कण्डेयपुराणमभवत् तथैव त्वदुक्तरीत्यैव विष्णुभागवतमपि तथा च भारतात् पूर्वं षोडश पुराणान्येव सिद्धानि तथा च पूर्वोक्तवचनमध्ये षोडशेत्येव वक्तव्ये सप्तदशेत्युक्तत्वात् देवीभागवतमेव महापुराणमन्यथा सप्तदशत्वपूर्त्तिर्न स्यात् तस्मात् तद्वचनप्रामाण्यात् देवीभागवतमेव महापुराणमिति सिद्ध्यति न तु विष्णुभागवतं, भारतात् पूर्वं सप्तदशसंहितानि मार्कण्डेयसप्तदशसंख्यमेव विष्णुभागवतस्य भारतोत्तरं जायमानत्वेन तन्मध्ये तस्यावस्थानस्यसम्भवादित्येवं लाघनेनापि दोषाभावादिति सुधियो विभावयन्तु । यत्तु पाद्मे "वैष्णवं नारदीयञ्च तथा भागवतं शुभम् । गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने !। सात्विकानि पुराणानि विज्ञेयानि शुभानि वै" इत्युक्त्वा भागवतस्य सात्विकत्वमुक्तं सात्विकेषु पुराणेषितिकौमोक्त्या च सात्विकपुराणानां विष्णुपरत्वमुक्तम् अतो विष्णुपरमेव भागवतमष्टादशपुराणान्तर्गतं न तु देवीभागवतमिति अपि च स्कान्दे प्रभासखण्डे "चतुर्भिर्भगवान् विष्णुर्ह्याभ्यां ब्रह्मा तथा रविः। अष्टादशपुराणेषु येषु भगवान् भवः" इत्युक्तं स्कान्दे सौरसंहितायां च "कथ्यते दशभिर्विप्राः। पुराणैः परमेश्वरः । चतुर्भिर्भगवान् विष्णुर्ह्याभ्यां ब्रह्मा प्रकीर्त्तितः । एकेनाग्निस्तथैकेन भगवांश्चण्डभास्करः" इत्युक्तमतोऽपि विष्णुभागवतमष्टादशान्तर्गतत्वमस्तीत्याङ्क्षुत्सत् तन्न ते मात्स्योक्तसात्विकराजसतामससंकीर्णपुराणेषु मध्ये तयाणां व्यवस्था पूर्ववचनैरुक्ता संकीर्णपुराणानान्तु नोक्ता तेषाङ्केषु पुराणेष्वन्तर्भाव इति वद क्वचिद्व्याभि कुत्रचिदिति चेत् अत्रापेऽपि श्रीभगवत्या विष्णुशक्तिस्वाभिमानेन "विष्णु मन्त्राधिष्ठात्रीं देवतां वेदमातो दुर्गां दुर्गाधिष्ठात्रीं गुरुं चेति श्रीमदादिपुरुषोक्त्या प्रकारेण विष्णुमन्त्राणां दुर्गाया अधिष्ठातृत्वेन तयोरैक्याद्वा तत्प्रतिपादकभागवतस्य वेषणवेषेष्वन्तर्भावात् अतएव "हरिर्हाभ्यां रविर्ह्याभ्यां ह्याभ्यां चण्डीविनायको । ह्याभ्यां ब्रह्मा समाख्यातः येषेषु भगवान् शिवः इति वचनं सङ्गच्छते" वस्तुतस्तु ह्ययोरपि भागवतयोरक्यात् प्रमाणत्वात् विष्णुभागवतपक्षपातिनां वचनानामक्यं विरोधाभावेन तत्स्थापने प्रयोजनाभावएव । तथा च नारदीयादिपुराणगते श्रीविष्णुभागवतं महापुराणलक्षणानि प्रसिद्धान्येवेति न लिखितानि देवीभागवतं तु तन्नास्ते उपपुराणम् । यैवमात्स्यपुराणादिगते तु देवीभागवतं महापुराणं विष्णुभागवतमर्वाचीनपुराणमिति सिद्धम्" ।

वृहद्धा० ६ अ० महापुराणप्रतिपाद्यविषयवर्णने "श्रीब्रह्मोवाच, मारीचे ! शृणु वक्ष्यामि वेदव्यासेन यत् कृतम् । श्रीमद्भागवतं नाम पुराणं ब्रह्मसम्मितम् । तदष्टादशसाहस्रं कीर्त्तितं पापनाशनम् । 'सुरयादपरूपोऽयं स्कान्धेहादिशभिर्युतः । भगवानेव विप्रेन्द्र ! विश्वरूपी जगद्गुरुः । तत्र तु प्रथमे स्कन्धे कृतर्षीणां समागमः । व्यासस्य चरितं पुण्यं पाण्डवानां तथैव च । परीक्षितस्तथाख्यानमितीदं सप्तदाकृतम् । परीक्षित्शुकसंवादे स्तुतिहयनिरूपणम् । ब्रह्मनारदसंवादेऽवतारचरितानुकृतम् । पुराणलक्षणं चैव सृष्टिकारणसम्भवः । द्वितीयोऽयं सप्तदितः स्कन्धो व्यासेन धीमता । चरितं विदुरस्याथ मैत्रेयस्य समागमः । सृष्टिप्रकरणं प्रधानपुरुषस्य परमात्मनः । कापिलं शास्त्रमध्यात्मं तृतीयोऽयमुदाहृतः । सत्याचरितमादौ तु ध्रुवस्य चरितं ततः । पृथोः पुण्यसमाख्यानं ततः प्राचीनबर्हिषः । दक्षस्य सूर्य्यो गदितो विसर्गे स्कन्ध उत्तमः । प्रियव्रतस्य चरितं नाभेश्चापि पुण्यदम् । ब्रह्माण्डगर्भतानाञ्च लोकानां वर्णनन्ततः । नरकस्थितिरित्येव संस्थाने प्रथमो मतः । अजामिलस्य चरितं दक्षदुहितृणामपि । इलाख्यानं ततः पश्चान्नृगतं ब्रह्म पुण्यदम् । षष्ठोऽयमुदितः स्कन्धो व्यासेन परिपोषणे । प्रह्लादचरितं पुण्यं

वर्णाश्रमनिरूपणम् । सप्तमो गदितो वत्स । वासनाकर्म्मकीर्त्तने । गजेन्द्रमोक्षणाख्यानं मन्वन्तरनिरूपणम् । समुद्रमथनञ्चैव बलिबंधवधस्तथा । मत्स्यावतारचरितमष्टमोऽयं प्रकीर्त्तितः । सूर्य्यवंशसमाख्यानं सोमवंशनिरूपणम् । वंश्यानुचरिते प्रोक्तो नवमोऽयं महामते !। कृष्णस्य बालचरितं कौमारञ्च व्रजस्थितिः । कैशोरं मथुरास्थानं यौवनं द्वारकास्थितिः । भूभारहरणञ्चात्र निरोधे दशमं स्मृतः । नारदेन तु संवादो वसुदेवस्य कीर्त्तितः । यदोश्च दत्तात्रेयेण श्रीकण्ठेनोद्धवस्य च । यादवानां निधोऽन्तश्च मुक्तावेकदशः स्मृतः । भविष्यकल्पनिर्देशो मोक्षो राज्ञः परीक्षितः । वेदशाखाप्रणयनं मार्कण्डेयतपः स्मृतम् । सौरी विभूतिरुदिता सात्वती च ततः परम्" । इत्युक्तेः विष्णुभागवत एव तेषां पदार्थानां सत्त्वात् महापुराणत्वं देवीभागवते तदभावात् न महापुराणत्वम् । एवञ्च मतभेदेन कस्यचित् पुराणत्वं कस्यचिदुपपुराणत्वं तच्च कल्पभेदादविरुद्धम् । एतेन विष्णुभागवतस्य वोपपुराणत्वशङ्का निर्मूलैव । वोपदेवेन "चतुरेष चतुर्वर्गचिन्तामणि र्गणिज्यया हेमाद्रिर्वोपदेवेन मुक्ताफलमचीकरत्" इति मुक्ताफलग्रन्थे स्वयं लक्षितत्वेन तस्य हेमाद्रिसभासदत्वप्रतीतेः हेमाद्रौ च नानास्थानेषु विष्णुभागवतवचनस्य प्रमाणत्वेन धृतत्वेन न तत्कृतत्वमिति प्रतिभाति ।

उपपुष्पिका स्त्री उपगता पुष्पमिव विकाशभावम् अत्वा० स० संज्ञायां कन् टापि अत इत्त्वम् । जृम्भायाम् (हाइतोला) हारा० तत्र हि मुखस्य पुष्पस्येव विकाशभावात् तथात्वम् ।

उपपृच् त्रि० उप+पृच्-क्विप् । उपरि सामीप्येन संपृक्ते "विहृक्त्वाहिः मयत उपपृक् पृथिव्याः" ऋ० १,१२,५,

उपपौर्णमास(सि) अव्य० सामीप्ये अव्ययी० वा अच् समा० । पौर्णमास्याः समीपे ।

उपप्रदान न० उप उपाधौ तेन प्रदानम् । १उत्कोचे स्वकार्य साधनार्थं तत्प्रतिबन्धकोच्चाटनाद्यर्थोदाने (घुसदेओया) २सन्ध्यर्थं भूम्यादेर्दाने च हेम० "तस्योपप्रदानेन सन्धिरेव युक्तः" हितो० "उपप्रदानं क्षितिभूनामेकं स्वाकर्षणौषधम्" कठस० "साम चोपप्रदानं च भेदोदण्डस्तथैव च" रामा० । प्रलोभनार्थं ३द्रव्यदाने "उपप्रदानैर्मार्जारोऽक्षितलत् प्रार्थ्यते नरैः पशुवत्० । समीपे दाने च ।

उपप्रलोभन न० उप+प्र+लुभ-ल्युट् । १सम्यक्प्रलोभने "असम्य चोपप्रलोभनाय" दशकु० । करणे ल्युट् । २सम्यक्प्रलोभनसाधने द्रव्ये "उद्भावयामुपप्रलोभनानि" दशकु० ।

उपप्लव पु० उप+प्लु-अप् । गगनादुल्कापातादिरूपे १उपद्रवे, "उपप्लवाय लोकानां धूमकेतुरिवोत्थितः" कुमा० । "छद्मभिक्षित" इत्यादौ २उत्पातसूचके वायुादौ "त्यागसारप्रयमितवलोपप्लवं साधु मूर्ख्या" मेघ० । "कश्चित्र वायुादिरुपप्लवोऽयः" रघुः ३भये "न्यपा दृशोपप्लविनः परेभ्यः" रघु "उपप्लविनो भयवन्तः" मल्लि० । ४विघ्ने "जीवन् पुनः शश्वदुपप्लवेभ्य" रघुः । उपप्लवेभ्यः विघ्नेभ्यः' मल्लि० । ५औपसर्गिकात्यन्तमरकपीडने ६राजविप्लवे "दुर्भिक्षे चाप्युपप्लवे" कूर्म्मपु० । "उपप्लवे राजविप्लवे औपसर्गिकात्यन्तमरकपीडने" शु० त० रघु० । ७उपरोधे वेष्टने "अमेघोपप्लवे यस्य यक्षचापमतडिद्गुणम्" सुश्रु० । ८चन्द्रसूर्य्ययोर्ग्रहणे "उपप्लवे चन्द्रमसोरवेक्ष्य" स्मृतिः । ९विपत्तौ "अथ मदनबधूरुपप्लवान्तम्" कुमा० । १०समीपे प्लवने गतौ च । "तन्नीमसत्साध्यजन युद्धमासीदुपप्लवे ०भा० स० २२ अ० । "कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम् । विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः इति बौद्धमतसिद्धे ११विकल्पे च च संसारिणां सविकल्पज्ञानमात्रेऽस्ति ईश्वरज्ञानं तु निरुपप्लवम् । उपप्लवति लोकानुपप्लवति उप-प्लु-कर्त्तरि अच् ।१२राहौ मेदि० । "केतूपप्लवभौमसन्ततयः षष्ठे तृतीये शुभाः" ज्यो० त० ।

उपप्लव्य न० उप+प्लु-आधारे या० यत् ।१विराटनगरस्यसमीपस्थे पुरभेदे । "उपप्लव्ये निविष्टेषु पाण्डवेषु जिगीषवा" "आगम्य फाल्गुनपुरादुपप्लव्यमरिन्दम" भा० आ० १ अ० "ततस्त्रयोदशे वर्षे निहत्य पशु पाण्डवाः ॥ उपप्लव्यं विराटस्य समपद्यन्त सर्व्वशः" भा० वि० ७२ अ० । "विराटनगरसमीपस्थं नगरान्तरम्" नील० । "राज्ञस्तु वचनं श्रुत्वा धृतराष्ट्रस्य सञ्जयः । उपप्लव्यं ययौ शीघ्रं पाण्डवानमितौजसः" भा० उ० २२ अ० । कर्म्मणि यत् । २उपप्लवनीये त्रि० । आवश्यके तु यत् । उपप्लाव्य आवश्यकोपप्लवनीये त्रि० ।

उपप्लुत त्रि० उप+प्लु-क्त । उपद्रवयुक्ते "उपप्लुतं पाहुमदो महोद्भवैः" माघः ।

उपबन्ध पु० उप+बन्ध-घञ् । १बन्धनदार्ढ्यार्थं तत्समीपे बन्धनान्तरबन्धने । उपमितः बन्धेन अर्था० स० । २पञ्चावयवरूपवाक्यसमूहे अवान्तरवाक्यभेदे ३सङ्ख्याविशेषेण सम्बन्धप्रतिपादने च "नोदनाद्युपबन्धाभ्याम्" जैमि० १,८,२२, "स्तोमस्य प्रकृत्युपबन्धाच्च" जैमि० अत्र उपबन्धच संख्याविशेषेण सम्बन्धप्रतिपादनं तत्संख्या च शत० ब्रा० २,२,२,१८, दर्शिता यथा "अथ यदपानक्ते

क्रीणाति रसो वा आपः स रसमेवैतत् क्रीणात्यथ यद्गिरव्रजं भवति स शुक्रमेवैतत् क्रीणात्यथ यद्दासो भवति सत्यत्वमेवैतत् क्रीणात्यथ यदजा भवति स तपसमेवैतत् क्रीणात्यथ यद्वेनुर्भवति सा श्रिरमेवैतत् क्रीणात्यथ मिथुनौ भवतः स मिथुनमेवैतत् क्रीणाति तं वै देवयजिरेव क्रीणीयाद्गर्भिणीवरा वै विराड्वैराजः सोमक्रयाद्दयभिरेव क्रीणीयाद्दयभिः" ।

उपबर्हे पु० उपबर्ह्यते आस्तीर्यते उप+बर्ह-क्तौ कर्मणि घञ् । (बालिश) १उपधाने बर्ह-हिंसायाम् भावे घञ् । २उपपीड़ने च ।

उपबर्हण न० उपबर्ह्यतेऽनेकर्मणि ल्युट् । १उपधाने "पुराणा यवाः पुराणाश्चसन्ह्रः सोमबर्हणाश्चादिष्टा दक्षिणा" यत० ब्रा० १३,८४,१० बर्ह हिंसायां भावे ल्युट् । २उपपीड़ने च

उपबर्हु त्रि० उपगता बर्हवो यस्य संख्यात्वेऽपि पर्य्युदासात् न डच् । बहुसंख्यासमीपवर्त्तिनि ।

उपबाधा स्त्री उप+बाध-अ । समीपीडने ।

उपबाहु पु० उपगतो बाहुम् अत्वा० । १बाहोः समीपवर्त्तिनाङ्गभेदे ततः हृदयर्थे बाह्वादि० हृञ् । औपबाह्वकि तत्सम्बन्धिनि त्रि० । सामीप्यादौ अव्ययी० । २बाहुसामीप्यादौ अव्य० ।

उपब्दे पु० उपगत शब्द. प्रा०स० पृषो० । 'सोमाभिषवशब्दे "प्राशणो घृन्तु रत्नव उपब्दैः" ऋ०७,१०४,७, "उपब्दैः अभिषवशब्दैः" भा०

उपब्दि पु० उप+शब्द-इन् पृषो० । श्रोतुमर्हे शब्दे "न योरुपब्दिरश्वयोः" ऋ०१,७४,७, "उपब्दिः श्रवणार्हः" भा० "मरुतां शृण्वे यायतामुपब्दिः" ऋ०१,१६६,७, ततोऽस्त्यर्थे मतुप् । उपब्दिमत् श्रोतुं योग्ये शब्दयुक्ते "सशब्दमब्दिमत्" तैत्ति० "उश्मैव उपब्दिमान् ज्ञात्मस्य रूपम्" ऐत०ब्रा० । [सम्यग् भजने २ब्दैधीभावे च ।

उपभङ्ग पु० उप+भञ्ज घञ् कुत्वम् । १युद्धादितः पलायने

उपभुक्त त्रि० उप+भुज-क्त । ज्ञातोपभोगे वस्तुनि

उपभुक्ति स्त्री उप+भुज क्तिन् । उपभोगे

उपभूषण न० उपमिनं भूषणेन अत्वा०स० । घण्टाचामरादौ "घण्टाचामरकन्थादिपात्रोपकरणादिकम् । तद्भूषणान्तरेदद्यादुपभूषणम्" पु० । उपचारशब्दे २०२६० दृश्यम्।

उपभृत् स्त्री उप+भृ-आधारे क्विप् । आज्यस्थे यज्ञपात्रभेदे रूढि "आज्यस्योपभृत्" काया० १,३,२५, उपभृत्संज्ञका क्रुक् आज्यस्थी" कर्क:"पाणिभ्यां स्रुचं परिगृह्योपभृत्या ब्रह्मन्" १०,६"सव्यउपभृत्" आश्व०श्रौ० ४,२ ।

उपभोग पु० उप+भुज-घञ् कुत्वम् । विषयसेराजन्य सुखभेदे "स्त्रीणां स्वपतिदायस्य भोगफलः स्मृतः" दा०भा०धृ० । "न जातु कामः कामानामुपभोगेन शाम्यति" मनुः भारतञ्च । "आगमेनोपभोगेन भवं भाव्यमतोऽन्यथा" । "इह कर्मोपभोगाय तैः संस्मरति सोऽवशः" या०स्मृ० । "प्रियोपभोगविघ्नेषु मौरोभाव्यमिवाचरत्" इत्युपभोगोत्सुकयेव लक्ष्म्या' रघुः भोगश्च विषयसंसर्गजन्यसुखभेदः । अधिकं भोगशब्दे वक्ष्यते । ततः अस्त्यर्थे इनि । उपभोगिन् तद्वति त्रि० "ब्राह्मणांश्च क्षणिष्यन्ति ब्राह्मणस्वोपभोगिनः । भा० व० १६० अ० स्त्रियां ङीप् ।।

उपभोग्य उप+भुज-ण्यत् अनन्तार्थत्वे कुत्वम् । उपभोगयोग्ये वस्तुनि अन्ने तु न कुत्वम् । उपभोज्यशब्देऽस्य । "अक्षतं सा नागवधूपभोग्यम्" कथा० । "क्षिप्तृत्काक्षोपभोग्यानि यौवनानि धनानि च" पञ्चत० । "विविधान्नपानानि पुरुषा ये नुयायिनः । ते वै स्वर्गोपभोज्यानि ब्राह्मणानां ददुश्च ह" भा० आश्व० ८५ अ० ।

उपभोजिन् त्रि० उप+भुज-णिनि । उपभोगकारके । "शिल्पाचारशौचेषु परपाकोपभोजिषु" "उच्छिन्नवस्त्रिभिक्षेषु भिक्षुकांस्त्वोपभोजिषु" स्मृ० ।

उपम त्रि० उपमीयते उप+मा-घञर्थे क । १उपमेये । यद् यद्दिष्णोरुपमं निधायि" ऋ०५,३,३ । "उपमसुपमेयमिव" भा० । उपमीयते समीपे क्षिप्यते मि-बा० ड । २अन्तिके निरु० "यत् कोतुमुपमं समत्सु" ऋ०७,३०,३ । "उपमन्तिकम्" भा० । ३अन्तिकस्थे त्रि० । दिवश्चिदन्ती उपमा" ऋ० १०,८,१ । 'उपमान् समीपस्थान्' भा० "राजानि क्षत्रेरूपमस्य वर्चसः" ऋ०४, ४२, १ ।

उपमद्गु पु० "अक्रूरःसुषुवे तस्मात् सुफल्काद्गूरिदक्षिणः । उपमद्गुस्तथा मद्गुर्मंदरानारिमेजयः" हरिवं० ३५ अ० इत्युक्ते सुफल्कसुते अक्रूरानुजे यदुवंश्ये क्षत्रियभेदे ।

उपमन्त्रण न० उप+मन्त्र-ल्युट् । आमन्त्रणे कर्त्तव्यकरणाय प्रार्थनापूर्व्वकप्रवर्त्तनारूपे व्यापारभेदे । "भाषणोपसम्भाषणज्ञानयत्नविमत्युपमन्त्रणेषु वदः" पा० । "उपमन्त्रणमुपच्छन्दनम्" त्रि० कौ० । २उपच्छन्दने । (खोसामदी) ततः अस्त्यर्थे इनि उपमन्त्रिन् । (खोसामुदिया) उपच्छन्दनकारके मर्म्मसचिवे । "कृसनामुपमन्त्रिणः" ऋ० ८,११२,४ । 'उपमन्त्रिणः उपमन्त्र-

ज्ञानोत्पत्त्यर्थमुपहासयुक्तां वाचमिच्छन्ति" भा०

उपमन्यवी स्त्री उपमन्यतेऽनया उप+मन्य-करणे ल्युट् ङीप् । अग्निमन्थनसाधनदण्डे "चतुरौदुम्बरो भवति औदुम्बरश्चमस औदुम्बर. स्रुव औदुम्बर इध्म औदुम्बर्या उपमन्थन्यौ" शत० ब्रा० १४, ६, २, २१ ।

उपमन्यु पु० आयोदधौम्यशिष्ये ऋषिभेदे । "धौम्योनामायोदधस्य त्रयः शिष्या बभूवुरुपमन्युरारुणिर्वेदश्चेति" भा० १अ० तद्वरितञ्च तत्र वर्णितं यथा ।

"अथापरःशिष्यस्तस्यैवायोदधौम्यस्योपमन्युर्नाम । तं चोपाध्यायः प्रेषयामास वत्सोपमन्यो ! गा रक्षस्वेति । स उपाध्यायवचनादरक्षद्गाः स चाक्षान्ति गा रक्षित्वा दिवसक्षये गुरुगृहमागम्योपाध्यायस्यागतः स्थित्वा नमश्चक्रे । तमुपाध्यायः पीवानमपश्यदुवाच चैनं वत्सोपमन्यो ! केन वृत्तिं कल्पयसि पीवानसि दृढमिति । स उपाध्यायं प्रत्युवाच भो भैक्ष्येण वृत्तिं कल्पयामीति तमुपाध्यायः प्रत्युवाच । मय्यनिवेद्य भैक्ष्यं नोपयोक्तव्यमिति । स तथेत्युक्तोभैक्ष्यं चरित्वोपाध्यायाय न्यवेदयत् । स तस्मादुपाध्यायः सर्व्वमेव भैक्ष्यमगृह्णात् । स तथेत्युक्तः पुनररक्षद्गाः अहनि रक्षित्वा निशामुखे गुरुकुलमागम्य गुरोरग्रतः स्थित्वा नमश्चक्रे । तमुपाध्यायस्तथापि पीवानमेव दृष्ट्वोवाच वत्सोपमन्यो ! सर्व्वमेवैतत्ते भैक्ष्यं गृह्णामि केनेदानीं वृत्तिं कल्पयसीति । स एवमुक्त उपाध्यायं प्रत्युवाच भगवते निवेद्य पूर्व्वमपरं चरामि तेन वृत्तिं कल्पयामीति तमुपाध्यायः प्रत्युवाच । नैषा न्याया गुरुवृत्तिरन्येषामपि भैक्ष्योपजीविनां वृत्त्युपरोधं करोषि वृत्त्येवं वर्त्तमानो लुब्धोऽसीति । स तथेत्युक्त्वा गा अरक्षत् रक्षित्वा च पुनरुपाध्यायगृहमागम्योपाध्यायस्यायतः स्थित्वा नमश्चक्रे । तमुपाध्यायस्तथापि पीवानमेव दृष्ट्वा पुनरुवाच वत्सोपमन्यो ! अहं ते सर्व्वं भैक्ष्यं गृह्णामि नचाश्नन्नसि पीवानसि भद्रं केन वृत्तिं कल्पयसीति । स एवमुक्तस्तमुपाध्यायं प्रत्युवाच भो एतासां गवां पयसा वृत्तिं कल्पयामीति तमुवाचोपाध्यायो नैतन्न्याय्यं पय उपयोक्तुं भवतो मया नाभ्यनुज्ञातमिति । स तथेति प्रतिज्ञाय गा रक्षित्वा पुनरुपाध्यायगृहमेत्य गुरोरग्रतः स्थित्वा नमश्चक्रे । तमुपाध्यायः पीवानमेव दृष्ट्वोवाच नन्वसोपमन्यो ! भैक्ष्यं नाश्नासि नवाश्नन्नसि पयो न पिबसि पीवानसि भद्रं केनेदानीं वृत्तिं कल्पयसीति । स एवमुक्त उपाध्यायं प्रत्युवाच भो फेनं पिबामि यमिमे वत्सा मातॄणां स्तनान् पिबन्त उद्गिरन्ति । तमुपाध्यायः प्रत्युवाच एते त्वदनुकम्पया गुरुवत्सो वत्सा: प्रभूततरं फेनमुद्गिरन्ति तदेषामपि वत्सानां वृत्त्युपरोधं करोष्येवं वर्त्तमानः फेनमपि भवान्न मातृमर्त्तीति स तथेति प्रतिश्रुत्य पुनररक्षद्गाः । तथा प्रतिषिद्धोभैक्ष्यं नाश्नाति नचाश्नन्नसि पयो न पिबति फेनं नोपयुङ्क्ते स कदाचिदरण्ये क्षुधार्त्तो र्कपलाशमश्नन्नयत् । स तैरर्कपत्रैर्भक्षितैः क्षारतिक्तकटुकोष्णैस्तीक्ष्णविपाकैश्चक्षुष्युपहतोऽन्धो बभूव ततः सोऽन्धोऽपि चङ्क्रम्यमाणः कूपे पपात । अथ तस्मिन्नागच्छति सूर्य्ये चास्ताचलावलम्बिनि उपाध्यायः शिष्यानवोचत् नायात्युपमन्यु: तं जघ्नुषकृतो गा रक्षितुमिति तानाह उपाध्यायः । मयोपमन्युः सर्व्वतः प्रतिषिद्धः स नियतं क्वापिस्तस्तोभागच्छति चिरं ततोऽन्वेष्य इत्थोवमुक्त्वा शिष्यैः सार्द्धमरण्यं गत्वा तस्याह्वानाय शब्दं चकार, भो उपमन्यो ! क्वासि वत्सेहीति । स उपाध्यायवचनं श्रुत्वा प्रत्युवाचोच्चैरयमस्मिन् कूपे पतितोऽस्मीति तमुपाध्यायः प्रत्युवाच कथं त्वमस्मिन् कूपे पतित इति । स उपाध्यायं प्रत्युवाच अर्कपत्राणि भक्षयित्वाऽन्धीभूतोऽस्मृतः कूपे पतित इति । तमुपाध्यायः प्रत्युवाच । अश्विनौ स्तुहि तौ देववैद्यौ त्वां चक्षुष्मन्तं करिष्यत इति स एवमुक्त उपाध्यायेनोपमन्युरश्विनौ स्तोष्यमाणक्रमे देवावश्विनौ वाग्भिर्ऋग्भिः" । अश्विस्तुतिमुपवर्ण्य कथां समापयामास यथा "इत्येवं तेनाभिष्टुतावश्विनावाजग्मतुराकृतुश्चैनं प्रीतौ स्व एवं तेऽपूपोऽयमनेनेति । सएवमुक्तः प्रत्युवाच नान्नतपूर्व्वमूचतुर्भगवन्तौ । नत्वकृमेतमपूपमुपयोक्तुमुत्सहे गुरवेऽनिवेद्येति । ततस्तमश्विनावूचतुः आवाभ्यां पुरस्ताद्भवत उपाध्यायेनैवमेवाभिष्टुताभ्यामपूपोदत्त उपयुक्तः स तेनानिवेद्य गुरवे, त्वमपि तथैव कुरुष्व यथाह्यतमुपाध्यायेनेति । सएवमुक्तः प्रत्युवाच एतत्प्रत्युनये भवन्तावश्विनौ नोत्सहेऽहमनिवेद्य गुरवेऽपूपमेनमुपयोक्तुमिति । तमाश्विनावाचतुः प्रीतौ स्वस्तवानया गुरुभक्त्या उपाध्यायस्य ते काञ्चनयष्टा दन्ता भवतोऽपि श्रिरण्मया भविष्यन्ति चक्षुष्मांश्च भविष्यसि श्रेयश्चावाप्स्यसीति । सएवमुक्तोऽश्विभ्यां लब्धचक्षुरुपाध्यायसकाशमागम्योपाध्यायमभ्यवादयत आचचक्षे च स चास्य प्रीतिमान् बभूव आह चैनं यथाश्विभ्यामाहृतस्तथा त्वं श्रेयोऽवाप्स्यसीति । सर्व्वे च ते वेदाः प्रतिभासन्ति सर्व्वाणि च धर्म्मशास्त्रा-

ऊतीति एषा तस्यापि परीक्षोपमन्योः"। उपमन्योरपत्यम् विदा० अञ्। औपमन्यव तदपत्ये बहुत्वे तु तस्य लुक्। उपमन्युप्रवः "उपमन्युपराशरकृष्णेभ्यः" "उपमन्यूनां वासिष्ठाभरद्वसिकूप्रमदेति" आश्व० औ० सू० १२।१५।१,२,

उपमर्द पु० उप+मृद्-घञ्। १आलोडने, २क्षिपने, पूर्व्वधर्म्मविनाशनेन २धर्म्मान्तरोत्पादने। यथा अक्षैर्भूः चक्षिङो वचिः स्वा-तिङ् इत्याद्यादेशे। ३निष्पीडने "अन्यान्तावदुपमर्द्दभङ्गाय भङ्ग" सा० द०। धान्यादेः ४निष्पत्तौ-करणे च। (धानमाडा) भावे ल्युट् उपमर्द्दनमप्यर्थे न०। कर्त्तरि ण्वुल्। उपमर्द्दक तत्कारके त्रि०।

उपमा स्त्री उप+मि-अ। १सादृश्ये, "अतुल्योपमाभ्याम्" या० उक्तेः तद्योगे उपमानवाचकात् षष्ठी नत्र तृतीया च। "स्फटोपमं भूतिसितेन मन्युना" माघे तु सदृशार्थे तृतीया मल्लि०। २अर्थालङ्कारभेदे च अर्थालङ्कारभेदस्य २६६ पृ० विवृतत्वात्। न्यायमतसिद्धे उपमानलक्ष्ये ३गवयादिपदशक्तिज्ञानरूपे, वैदान्तिकमतसिद्धे ४गवादिसादृश्यज्ञानरूपे अनुभवभेदे च उपमानशब्दे विवृतिः। करणे या० अ। ५उपमाने च। "अपि बाहुमतमध्यानं बुबुधे न बधोपमः" रघुः। "यथा टीपो निपातस्यो नेक्षते शोपमा कृता" गीता "व्रजते शोपमा दिवः" ऋ० १,२१,१५, स्वार्थे यञ्। औपम्य उपमाने न०।

उपमात् स्त्री उपमीयते प्रक्षिप्यते उप+मिञ्-क्षेपे-बा०अति। स्थूणायाम् वत्सबन्धनसाधने स्तम्भे "सानुमुपमाहिव द्यौः" ऋ० ६,६७,६,। "उपमीयते प्रक्षिप्यते इत्युपमात् स्थूणा" सा यथा वत्सं धारयति तद्वदित्यर्थः" भा०।

उपमाति स्त्री उप+मि-क्तिन् वेदे नि०आत्। १उपमायाम्। "पूर्वीष्टे इन्द्रोपमातयः" ऋ० ८,४०,६, लोके तु उपमितिरित्येव भाषार्थे। उप+मीङ्-वधे-क्तिन् वा०आत्। २क्षिपने उपमातिवनिः। "रिचे भादक्षाक्षं भूदुपमात वनिः" ऋ० ५,४१,१६, उपमातये वनति वसु व्याप्नुतीति क्विन्। क्विन्व्याप्त इत्यर्थः उपमातिवनिर्हिना" भा०।

उपमाद् स्त्री उपमिता माता अवा० स०। १धात्र्याम् अमरः। सा हि मातृतुल्यं प्रतिपालयतीति तत्सादृश्यात्तथात्वम् २मातृतुल्यात्तु मातृघुसादिषु च। तानि "मातृघुसा मातृस्वानी पितृष्वस्त्री पितृघुसा। चाचूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिता" दाक्षभा० ६६० ऋ० उक्ताः। स्वस्रादिपूर्व्वदाद्यात् ङीदन्तत्वेऽपि स्त्रियां न ङीप्। उप+मा-क्विप्। २उपमानकर्त्तरि त्रि०। स्त्रियां ङीप्।

उपमाद् त्रि० उपमादयति उप+मद्-णिच् क्विप्। उपमादके हर्षजनके "देवानामुपमादकृद्भुः" ऋ० १,५,५, "उपमादमुपमादकं यज्ञम्" भा०।

उपमान न० उपमीयतेऽनेन उप+मा-भावे ल्युट्। १सादृश्यज्ञाने। करणे ल्युट्। २सादृश्यज्ञानसाधने सादृश्यप्रतियोगिनि, येन सादृश्यं भवति तस्मिन्, यथा चन्द्र इव मुखमित्यादौ चन्द्र उपमानम्। प्रसिद्धत्वेनोपमानत्वम् प्रसिद्धत्वोपमेयत्वम्। उपमानमभूद्विद्यासिनाम्" कुमा० "उपमानमनुज्ञामहीदक्षाध्वरम्" माघः। ३उपमितिप्रमाकरणे उपमानलक्षणञ्च न्या० सू० इत्युद्दर्शितं यथा "प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्" सू०। "प्रसिद्धस्य पूर्व्वप्रमितस्य गवादेः साधर्म्यात् सादृश्यात् तज्ज्ञानात् साध्यस्य गवयादिपदवाच्यत्वस्य साधनं सिद्धिरुपमानमुपमितिर्यत्र-व्यापारेण करणत्वलक्षणम् अथ वा साध्यसाधनमिति करणल्युटा करणलक्षणमेतदुक्तम् अत्र च वैधर्म्म्योपमितिं मन्यन्ते टीकाकृतः यथा अतिदीर्घगोत्वादिपदमत्रवैधर्म्म्यज्ञानादुष्ट्रे करभपदवाच्यताधीः। एवमन्योऽप्युपमानस्य विषयदर्शनं भाष्यं यथा सुरूपपर्णीसदृशी ओषधी विषं कृन्तीत्यतिदेशवाक्यार्थे ज्ञाते सुरूपपर्णीसादृश्यज्ञाने जाते दृश्यमोषधी विषहरत्वोक्त्युपमिता विषघ्नोक्तियतदृच्छादि'।

उपमानचि० सादृश्यपदार्थनिरूक्तिपूर्व्वकस्योपमानस्य प्रमाणान्तरत्वं व्यवस्थापितं यथा। "तत्र सादृश्यप्रमाकरणमुपमानमिति केचित्। सादृश्यञ्च पदार्थान्तरम्। तथा हि। सदृशव्यवहारादधिगतस्य सादृश्यं तच्च न प्रतिपदार्थमेकं सर्व्वत्र सर्व्वसदृशव्यवहारापत्तेः। सदृशव्यवहारश्च सदृशयमनदृशव्यवहारस्य तद्देशत्वेऽनुपपत्तेश्च। न च व्यक्तयभूयःसामान्यात्मत्वभूयस्त्वाभ्यां नदीरिति वाच्यं बहुभिरर्थैश्च व्यवहारादौ व्यक्तयादेरुपरि सादृश्यस्य व्यक्त्याभिमतादेव व्यवहारसिद्धौ अतिरिक्तासिद्धेश्च। नापि संयोगवत् व्याप्यवृत्त्यनेकम्, गोत्वोपलक्षितसादृश्यात्मकत्वात् गवयवत्, गोरपि सदृशत्वप्रसङ्गात् गोरवच्छिन्नसंयोगवत्प्रत्यक्षत्वप्रसङ्गाच्च। प्रत्यक्षत्वे वा गवयनिरूपित-ज्ञेयविशिष्टवेद्यत्वेन गोनिष्ठतया चानुगतत्वप्रसङ्गः। किन्तु प्रत्यक्षाभ्यं भिन्नम्। नचैकैकव्यक्तिज्ञानतदुपायाभावात्तानुगतप्रत्ययः सादृश्यपदव्युत्पत्तिश्च न स्यादिति वाच्यम् अनुगतविशिष्टवेद्यसादृश्यत्वसामान्यात् सप्रपदार्थातिरिक्तत्वाद्वा जातिवदन्त्यविशेषवच्च सदृशव्यवहारोपपत्तेः। तच्च दृश्ये न गुणः कर्म वा, गुणकर्मदृष्टित्वात् न च सदृशान्यव-

वृत्तित्वादेव तत्र व्यवहारः स्वाश्रयवैसादृश्येऽपि तत्र तत्प्रतीतेः । अतएव नाश्रयसादृश्यात्तत्, सामयोरभावात्तत्, वाधकाभावादविशेषेण वैपरीत्यसम्भवाच्च । नापि सामान्यं तद्धि न सर्व्वत्रैकमनभ्युपगमात् सुसदृशमन्दसदृशव्यवहारानुपपत्तेश्च । अथ विजातीयत्वे सत्यवयवगुणकर्मवृत्तिभूयःसामान्यं तत्, अतएव दूरस्थे प्रतियोगिनि भूयःसामान्यज्ञानात्र तत्र सादृश्यप्रत्ययः वर्म, प्रासादतिरस्तु बकुलस्य सुसदृशमन्दसदृशव्यवहारः । यदुच्यते । "सामान्यान्येव भूयांसि तुल्यावयवकर्मणाम् । भिन्नं प्रधानसामान्यव्यक्तं सादृश्यमिष्यते" इति साजात्येऽप्यरविन्दह्रयवत् यमलयोरवयवादिभेदेऽपि गुणादौ जातौ च सदृशप्रत्ययात् विसदृशयोः क्षणभङ्गरयोरतुल्यत्वाच्च । नापि धर्म्यन्तरे धर्म्यन्तरवृत्तिधर्मवाकुल्यम् असाधारणधर्मशून्यत्वे सति तद्गतभूयोधर्मवत्त्वं वा स्वनिष्ठात्यन्ताभावप्रतियोगिधर्मवत्समानाधिकरणभूयोधर्मवत्त्वं वा त्रिचतुः पञ्चादिभेदेन भूयस्त्वस्यानुगतत्वात् । नापि कपिकुक्कुटत्वादिपर्य्यवसन्नं विसदृशयोरपि वृत्तिमयकयोः सादृश्यप्रसङ्गात् । तदुक्तं "एवं जातिगुणद्रव्यक्रियायक्तिषु धर्मतः । एकैकद्वित्रिसाधर्म्यभेदादेकत्व चिन्तेति"। अथ व्यावर्त्तकधर्मांशे यथा तद्गतधर्मवाकुल्यं सादृश्यवाकुल्यञ्च त्रिचतुरादिष्वनुगत कृत्रिमयमकयोस्तु बकुल्यावर्त्तकं साधारणन्तुल्यमतएव भेदाधिष्ठानमुच्यते इति चेन्न व्यावर्त्तकसमसङ्ख्यानाल्पेनाधिकेनापि सादृश्यव्यवहारात् । किञ्च सामान्यान्तात्र्यभेदेनाभिन्नानि सादृश्यानन्तु भिन्नम् । सामान्यं नित्यप्रतियोगिकं तदनिरूप्यञ्च । सादृश्यानन्तु सप्रतियोगिकं तन्निरूप्यञ्च । अथ भेदे सति तद्गतभूयःसामान्यवत्त्वं सादृश्यं भेदस्य प्रत्ययाश्रयमन्यः सप्रतियोगिकत्वेति चेत्तर्हि सादृश्यस्य भेदघटितत्वेन तस्मात् सदृश इति स्यात् नतु तेन तस्य वा सदृश इति स्यात् । नच सादृश्यस्यापि सप्रतियोगिकत्वेन तस्मात् सदृश इति स्यात्, अवधौ हि तथाप्रतीतिप्रयोगौ न तु प्रतियोगिनि, अभावेऽपि घटाद्येति प्रतीतिप्रसङ्गात् । अपि च तद्भवत्त्वं यदि सादृश्यं तदा तस्मात्तद्वत्त्वयोः सङ्करप्रसङ्गात् । तद्भवत्ता हि तस्मा तदन्या च तद्वत्ता यदि च तस्मै तद्वत्ता तदा तदेव तद्वदिति स्यात् । तथा च तद्भवत्तास्थाने प्रत्यभिज्ञानवत् सोऽयमिति स्यात् नतु तद्वदिति । एवं तद्वत्त्वे हि तत्तेति गवयेऽपि गोबुद्धिव्यपदेशौ स्याताम् गोगतसाधारण्ययोगित्वेन गोवत्तासाधारण्यात् । नापि विशेषः प्रत्ययत्वात् । न समवायः, वृत्तित्वात् वृत्तिरिक्तं सादृश्यम् यत्तु सादृश्यं भावोऽभावो वा भावोऽपि सगुणं निर्गुणं वा, निर्गुणमप्याश्रितमनाश्रितं वा । आश्रितमपि सामान्यवद्विःसामान्यं वा सामान्यवत्त्वे अन्योऽन्यो वा निर्गुणं निःसामान्याश्रितमनाश्रितमनेकाश्रितम् वा । इति यथायथं सप्तपदार्थान्तर्गतमिति तत्र व्यवहारानुपपत्त्या तद्बहिर्भावात् अन्यथैतादृशविकल्पेन सामान्यविशेषसमवायानामपि द्रव्यादित्रयधर्मोत्तदन्तर्गतत्वं स्यादिति । उच्यते । असाधारण्यान्वतद्गतबकुलधर्मवत्त्वं तत्सादृश्यं यमलादिसाधारणं भेदाघटिततया च निरवधि, तद्गतबकुलधर्मवत्त्वं तच्चिरुप्यमिति तच्चिरुप्यत्वमेव तस्य सप्रतियोगिकत्वं तवापि सादृश्ये तदेव सप्रतियोगिकत्वं न तु भेददीर्घादित्वावधित्वं तस्मात् सदृश इति प्रत्ययानुपपत्तेः । बकुलत्वञ्च त्रिचतुरादिसाधारण्यमिति नानुगमः । न चातिप्रसङ्गः कृत्रिमयमकयोरपि प्राणित्वसुखित्वदुःखित्वादिना सादृश्यात् । अतएव वैसादृश्येऽपि आह्लादकत्वादिना चन्द्र इव मुखं, बकुलशीरत्वादिना महिषीव गौरिति । बकुलगतगतधर्मवत्त्वेन सुसदृशमन्दसदृशत्वम् । अतएव गवये गोसादृश्यं मन्दतद्धर्मवत्त्वमेव विवेचयति । वराहं गावोऽनुधावन्तीत्यत्र गोसदृशं वराहेऽभ्युक्तम् । तत्तद्धर्मवत्त्वे नोपमेयव्यवहारः काव्यादौ, साध्यसाधनवत्त्वमात्रेण दृष्टान्ते पक्षसादृश्यवाचकवति प्रयोगः परीक्षकाणाम् । न चैते गौणा मुख्ये बाधकाभावात् । तस्मात् क्वेनचित् कस्यचित् क्वचित् सादृश्यं नत्वनुगतमस्ति ॥ किञ्च सादृश्यबकुलतद्धर्मवत्त्वज्ञानं सादृश्यव्यङ्गकं तदेव तद्व्यवहारनियामकमस्तु किमधिकेन । अन्यथा त्रिचतुरादित्वे न व्यङ्गकमपि बहुधर्मवत्त्वमनुगतं स्यात् । व्यङ्गकमनुगतमपि वह्नौ प्रत्यक्षादिवदिति चेन्न तत्र व्याप्तीनां वैजात्यात् धूमादौ वह्निव्याप्यत्वमेवानुगतम् । अत्रापि तद्व्याप्यत्वमस्तीति चेत् सादृश्यं तद्व्याप्यं तदेव बहुव्यवहारनिमित्तं न तु तद्गतबकुलधर्मवत्त्वज्ञानं, न व्यङ्गकमेवानुभवविरोधात् तद्गतभूयोधर्मस्य बकुलत्वज्ञानं विना सुसदृश-मन्दसदृशत्वज्ञानाभावाच्च । अथ तद्गतबकुलधर्मवत्त्वं न सप्रतियोगिकं, सादृश्यं तु तथेति व्यवहारस्यधिकमिति चेन्न सादृश्यवत्तास्थापि सप्रतियोगिकत्वात् वस्तु तत्तातद्वत्तयोः सङ्करः स्यादिति तत्र तत्रैव

तद्धर्मवत्ता तद्भेदो वा तत्ता सा च सोऽयमिति प्रत्यभिज्ञाने भासते। भेदे भासमाने तदन्यस्मिन् तद्धर्मवत्ता तद्वत्ता यतो भवति तद्वदयं न तु स इति तयोर्भेदात्। नन्वेवं व्यक्त्यन्तरे गोत्वपक्षे तद्गोपदव्यमिति ज्ञानात्क्वयमपि गौरिति चेन्न गोत्वमात्रस्य तदन्यव्यक्तिवृत्तित्वपक्षे वस्तुत्वः, एकत्र नानासम्बन्धावगमात्। तद्गोवृत्तित्वधर्मज्ञाने भवत्येव यवलावद्वलेति। तथाप्ययमपि ऋक्षादिमानिति सदृश्यधीः स्यात् न तु गोसदृश इति चेन्न एकगोभयसम्बन्धः सदृश्योऽन्यगतभूयोधर्मवत्त्वमन्यत्र सादृश्यमिति विवेकात्।

नवोनास्तु। विलक्षणसुखहृदये कृतसकलव्यावृत्तसादृश्यमनुभूयते न तु तद्दृश्यमात्रहेतुजातिरस्ति तद्व्यभावे जातेरनाश्रयत्वे नानित्यत्वप्रसङ्गात्। नापि जन्यं धर्मान्तरमलौकिकं सादृश्यमुपेयं तवापि समानधर्मवत्त्वयुक्तं विना कथं तत्र सादृश्याभिव्यक्तिरिति चेन्न प्रतीतिबलात् दृश्ये तथा, गुणादौ तु व्यभिचारात् अतएव न व्युत्क्रमेणान्यथासिद्धितदभावेऽपि सादृश्यानुभवादित्याहुः। तन्नु-खं विलक्षणं सुखहृदयं न सुखमात्रहेतुजन्यं सुखान्तरस्यापि सदृशत्वापत्तेः किन्तु विलक्षणादृष्टजन्यं तच्चादृष्टं विहितत्वेतरक्रियाविशेषानुष्ठानजन्यं तेषामप्यस्तीति तेषामपि तादृश्यानि सुखानि भवन्तीति तेषु कारणविशेषप्रयोज्या विलक्षणसुखसिद्धिस्तच्चादात्मनामानन्त्यात् अनादिनिधनत्वादुत्पन्नागतविजातीयं न सुखमस्ति एवं दुःखान्तरकार्येऽपि नवानुत्पन्नमनुपपन्नसमानजातीयं कार्यमस्ति। यत्र व्यक्तिनाशे जातेरनित्यत्वमापादितं तदपि न विनाशकाभावात् अतएव प्रलयेऽपि तदवस्थानम्। अपि चैकत्र प्रतियोगिभेदेन सादृश्यं भिन्नं नवेक्षम्, सुखदृश्यमन्दसदृश्यव्यवहारात् तथा च योग्यत्वादेकत्वे सर्वत्रैकप्रसङ्गात्। प्रतियोगिगतभूयोधर्मज्ञानस्य व्युत्क्रमेण क्रमाक्रमे तदेव व्यवहारनिमित्तमित्युक्तम्। किञ्चैवं वैलक्षण्यमपि स्यात्। नन्वेवं सादृश्याभावस्तत्, वैपरीत्यादि सम्भवात् सादृश्याभावत्वे नैव प्रतीतिर्विशेषत्वं निषेधार्थत्वादिति चेन्नर्हि गौरिव महिषोऽपि यावत्सदृशीरत्वादिना विषयिसदृश्यज्ञानाच्चये .नवये वैलक्षण्यं न स्यात् न हि तत्र गोसादृश्यं तदभावत्व। तस्मात् साधर्म्यवैधर्म्ये सादृश्यवैसादृश्ये। यत्तु तद्दृश्यनैकधर्मवत्त्वं सादृश्यं तेनाभेदेऽपि "गगनं गगनाकारं सागरः सागरोपमः। रामरावणयोर्युद्धं रामरावणयोरिव" इत्यादौ सादृश्यं, न चैवं गोरपि गोसदृशत्वे गवयपदाभिधेयत्वाद्गौरुः तत्र सह यदृश्य विशेषे तात्पर्यात्। अन्यथा महिषेऽतिप्रसङ्ग इति तत्र तस्य तेन वा सदृश इति प्रतीतिप्रयोगात् न चाभेदे सम्बन्धः सम्बन्धो वा सम्भवति। गगनं गगनाकारमित्यादौ तु गगनाद्येवैतादृशधर्मवत्त्वान्यदित्यत्र तात्पर्यम्। यद्वा सर्गान्तरीयगगनसागरयोरुपमानत्वं तयोर्युद्धविशेषे तयोरेव युद्धान्तरमुपमानमिति। नन्वयं देवदत्तसदृशो वा भवतु तत्सदृशस्तादृश्यमिति भेदाभेदसंशयेऽपि सादृश्यनिश्चयात् अतिरिक्तं सादृश्यमिति चेन्न देवदत्ताभिप्रायेणैकदेशे सादृश्यपदप्रयोगात् अथवान्यथा व एवायं न तु सदृशस्य इति, सदृशोऽयं न तु स इति प्रतीतिप्रयोगौ। न चात्र सदृशपदं भेदमात्रपरमिति युक्तं सदृशे सम्भवति लक्षणाया अयोगात्। तस्मात् पदार्थान्तरं सादृश्यमिति। स्यादेतत्। मा भूत् पदार्थान्तरं तथापि प्रत्यक्षाच्छब्दाद्वा गवये गोसादृश्यज्ञानात् गवयसदृशो गौरितिज्ञानमुपमितिः। न चैतदत्यन्तं विशेषाशङ्किकत्वात् नानुमानं लिङ्गाभावात्। न च गवयगतं सादृश्यं लिङ्गम् अपक्षधर्मत्वात्। अथ सदृशपदान्तरदर्शने यो यद्गतसादृश्यप्रतियोगी स तत्सदृश इति प्रत्यक्षेण व्याप्तिपक्षे सति गवयगतसादृश्यप्रतियोगित्वात् गौर्गवयसदृश इत्यनुमितिरिति चेत् व्याप्तिग्रहं विनैव प्रथममपि प्रत्यक्षाच्छब्दाद्वा गोसदृशं गवयं ज्ञात्वा गवि गवयसादृश्यज्ञानोदयात्। किञ्च गवि गवयसादृश्यं न साध्यं प्रथमतस्तदप्रतीतेः गवयगतसादृश्यप्रतियोगित्वञ्च गवि न प्रत्यक्षं विशेष्यासन्निकर्षादिति नानुमितिगम्यं तल्लिङ्गस्यापि तद्गतत्वेनाप्रत्यक्षत्वं लिङ्गान्तरगम्यत्वेऽनवस्थानात्। न च गौरेतद्गवयसदृशः गवयगतभूयोऽवयवादिसामान्यवत्त्वात् गवयान्तरवदिति गवयान्तरज्ञानेऽपि गवि गवयसादृश्यं विनानुपपद्यमानं लक्षयति। न हि गोसदृशो गवय एतद्विसदृशो गौरिति वाच्यम्। गवयनिरूपितगोसादृश्यप्रसिद्धौ तेन विनानुपपत्तिज्ञानाभावात्। किञ्च तदर्थापत्तिव्यतिरेकानुमानं न च गवयगतसादृश्यप्रतियोगित्वं गवि प्रत्यक्षादिना ज्ञातुं शक्यमित्युक्तम्। नन्वेवं करभे गोवैधर्म्यज्ञानात् गवि करभवैधर्म्यज्ञानमपि सामान्यं स्यादिति चेत् गवि करभवैधर्म्यं यदि करभवृत्तिधर्माभावत्वं तदाऽसिद्धे गवि प्राङ्नास्तावदनुपलब्धिगम्यमेव अथ करभव्यावृत्तधर्मवत्त्वं तदा गोधर्मा गविगता एव इदानीं श्रुतगोधर्म्माणां करभेऽभावज्ञानमधिकं गम्यं तच्च प्रत्यक्षादेव। अथ तत्प्रतियो-

निमित्तसन्निकर्षादृग्रे भासमाने समानसंवित्संवेद्यतया एतत् प्रतियोगिकतरि सदृशे वैधर्म्यं च ज्ञातमिति चेन्न विषयविशेष्यप्रतियोगिभेदेन समानसंवित्संवेद्यत्वासिद्धेः। एतत्सदृश एतद्विधर्मा च इत्यत्र तद्विशेष्यकप्रत्ययानुदयाच्च तद्विशेष्यकप्रत्यक्षे तत्सन्निकर्षस्य हेतुत्वात्। ननु प्रत्यक्षे विशेष्यसन्निकर्षोऽहेतुर्न तु यावद्विशेष्यसन्निकर्षो गौरवात् अन्यथातीतानागतव्याप्तविशेष्यकव्याप्तिप्रत्यक्षं न स्यादिति चेन्न अतीतानागतविशेषे सामान्यलक्षणायाः सत्त्वात्। अथ गवयसादृग्रं गवि गवयगतसङ्ख्यादिसमत्वं तच्च गवये गोसदृग्रे भासमाने गवि ज्ञातमेव यद्वा गोगतसङ्ख्यात्वादेर्गवयगतत्वं गवये गोसादृग्रम् एवं तस्यैव गवयगतस्य गोगतत्वं गवि गोसादृग्रं तच्चेन्द्रियेणैव ज्ञातं सामान्यमुखेन। त्वेनेन्द्रियसन्निकृष्टत्वात् अयं न स इति विपरीतप्रत्यभिज्ञायामिति चेत् सत्यम् गोविशेष्यकगवयगतसङ्ख्यात्वादिज्ञानं नेन्द्रियजन्यं गोरसन्निकर्षात् तस्माद्देवदत्तसदृश एतद्विधर्मा एतज्ज्ञातीयः स इति ज्ञानं नानुमानात् विशेष्यासन्निकर्षे तदनुत्पत्तेश्च। एवञ्च स्वप्रतियोगिकपदार्थज्ञानेन तत्प्रतियोगिकपदार्थज्ञानजन्यमानं प्रत्यक्षादिकं विनार्थापत्तौ पूर्वेषामनुपजनतेति वार्त्तिकेनैतत् तथा हि। परस्परसदृशं कृष्णादिकं प्रत्यक्षमतो यो यत्सादृग्रप्रतियोगी स तत्सदृश इति सामान्यतो व्याप्तिज्ञाने सति गौर्गवयसदृशः तत्सादृग्रप्रतियोगित्वात् यथा भ्राता भगिनी। गवयगतसादृग्रप्रतियोगित्वञ्च गोगवयगतसादृग्रविशिष्टमेव सादृश्यं गोः प्रतियोगित्वेनैव ज्ञानात् अन्यथा सादृश्ये गौरनन्वयापत्तिः यत्सङ्ख्यां सामान्यतोव्याप्तिपक्षं विना एतत्सदृशः स इति फलासिद्धेः यत्सङ्ख्यां व्याप्तिपक्षेऽप्यावश्यकं व्यतिरेकी परेषामर्थापत्तिरित्यन्यदेतत्। सादृग्रस्योभयवृत्तिधर्मत्वञ्च किञ्चिद्विशेष्यसन्निकर्षात् प्रत्यक्षेण भानं यावद्विशेष्यसन्निकर्षं तावत्प्रयोजकत्वात्। अन्यथा अयं स इति भ्रान्तिविपरीतप्रत्यभिज्ञायां का गतिः। अनयैव चैतन्निष्ठसादृग्रप्रतियोगित्वरूपः प्रत्यक्षविशेष्यकत्वं परामर्शे न प्रयोजकमालम्बनम्। ईदृशो गवय इति जिज्ञासया यथा गौस्तथा गवयश्च इति श्रुतोत्तरवाक्यस्य तथा भूते पिण्डे दृष्टे तथा गवय इत्यतिदेशवाक्यार्थानुसन्धानेऽयं गवयशब्दवाच्य इति मतिरुपमानफलम्। न चेयं वाक्यजन्यात्, अप्रत्यक्षीकृतपिण्डस्यापि प्रसङ्गात्। नापि प्रत्यक्षजन्यात् अश्रुतवाक्यस्यापि प्रसङ्गात्। नापि तदोः समुच्चयात् न हि प्रमाणसमुच्चयो वा फलसमुच्चयो वा आद्यो प्रमाणत्वे सति समुच्चयः समुच्चयतयो र्वा प्रमाणत्वं, फलानेकत्वे समुच्चयानुपपत्तेः तस्य परस्परसहकारिरूपत्वात्। नान्त्यः वाक्यप्रत्यक्षयोर्भिन्नकालत्वात् वाक्यतदर्थयोः स्मृतिद्वारोपनयेऽपि गवयपिण्डसम्बन्धेनापि इन्द्रियादिना तन्नसादृग्रानुपनये समयपरिच्छेदासिद्धेः। फलसमुच्चये च तदन्तर्भावे यद्वानुमानयोरपि प्रत्यक्षत्वप्रसङ्गः। तत् किं तत्फलस्य प्रमाणवह्निर्भाव एव अन्तर्भावे वा क्रियतां सीमा। तत्तदसाधारणेन्द्रियादिसाहित्यम् अस्तीति तर्हि सादृग्रज्ञानेऽपि विस्मारितस्य चक्षुषो व्यापारः। न तस्मिन् सति तस्यानुपयोगात् उपलब्धगोसादृग्रविशिष्टगवयपिण्डस्य वाक्यार्थस्मृतिमतः कालान्तरेऽप्यनुसन्धानसम्भवात् समयपरिच्छेदोपपत्तेः। तस्मादागमप्रत्यक्षाभ्यामन्यदेवेदमागमस्मृतिसहितं सादृग्रज्ञानमुपमानमप्रमाणमिति जरन्नैयायिकाजयन्तप्रभृतयः। तन्न वैधर्म्यं नोपपत्तेः। यदोदीच्येन क्रमेलकं निन्द्योक्तं धिक्करभमतिदीर्घमिदं प्रलम्बचपलौष्ठं कठोरतीक्ष्णकण्टकाशिनं कुत्सितावयवसन्निवेशमपसदं पश्यूनामिति, तदुपश्रुत्य दाक्षिणात्य उत्तराग्रयं गतस्तादृशं वस्तूपलभ्य नूनमसौ करभ इति प्रत्येति। तत्र किं मानं न तावदुपमानं सादृग्राभावात् न च प्रमाणान्तरं सम्भवति। उच्यते। न तावदनुभवं प्रवृत्तिनिमित्तसमूहज्ञानं विना, प्रागभिज्ञानतः शरीरैकत्वादीनां शरीरविशेषे चैत्रादिपदवदेकैकगुरूपाधिकया गवयपदशक्तिग्रहे गवयान्तरेऽपि सम्भवात्। नाप्यनध्यक्षे पदान्तरोपस्थिते परिभाषाऽऽख्यादिपदवत्, अतएवानध्यक्षत्वाच्च उपलक्षणस्य च शक्तौ बहिर्भावात् तद्वत्। नापि योगनिर्वचनात् पाठकादिवत् योपलक्षणे, अन्यथा पठिक्रियानुपक्षिते पठतिप्रयोगः स्यात्। अतस्तद्दृग्गुणसम्बन्धादिबोधिनि शक्तिः। अवच्छेदकतया तूपलक्षणेऽपीति योगाभावात्। नाप्युपस्थितनिमित्तसङ्कीर्तनात् खर्गादिपदवत् तदभावात्। अतो गच्छादुपलक्षिते पृथिवीत्वेन निमित्तेन पृथिव्यादिपदवत् सादृग्राद्युपलक्षिते गवयत्वादौ गवयादिपदानां शक्तिरिति परमार्थतः। अन्यथा फलज्ञानाभासत्वे मानत्वविरोधात् न च पूर्वं गवयत्वमुपस्थितमुपस्थापकाभावात् न च गवयपदादेव तदुपस्थितिरन्योन्याश्रयात् अथ वाक्यादेवानेन समयः परिच्छिन्नः केवलमये प्रत्यभिजानाति योगोसदृशो गवयपदवाच्यत्वेन मयावगतः सोऽयमिति नोपमानस्य विषय इति चेन्न हि सादृग्रमेव निमित्तसम्बन्धीतगुणाभ्यवहारप्रयुक्तात् गौर-

वाच्यं नापि गवयत्वं तदनुपस्थितेः । अतएव नोभयं स्वयं प्रतीतसमयसंकान्तयेऽतिदेशवाक्यप्रयोगानुपपत्तेश्च । गवयत्वेच्छया व्युत्पन्नो न गोसादृश्येन निमित्तस्य गवयत्वस्य प्रतीतेः । नच यदा यद्वाक्यं समयपरिच्छेदं पूर्वं नाजीजनत् तदा तदेव वाक्यं स्मृतं तत्प्रवृत्तिनिमित्तं लक्षयतीति अध्ययनसमयस्मृतीत एव वेदराशिरशेषोपाङ्गपर्यवदातस्य कालान्तरे गवयवाक्यस्येवास्य प्रागेव बोधितत्वात् पर्यवसित इति वाच्यं गोः सादृश्योपलक्षणत्वनिमित्तत्वयोः सन्देहात् पश्चाद्गवयत्वे ऽवगते तर्कपुरस्कारात् । सादृश्यस्योपलक्षणत्वे गङ्गायां घोषः स्यात्तीरे वाच्यो भविष्यतीति चेत् न उपलक्षणनिमित्तत्वसन्देहेऽपि यो गोसदृशः स गवयपदवाच्य इति सामानाधिकरण्यमात्रेणान्वययोपपत्तौ मानान्तरोपनीतानपेक्षणात् रक्षाराक्षसन्देहेऽपि घटो भवतीति वाक्यवत् अन्यथा पर्यवसितेऽपि वाक्ये मानान्तरसंस्कारात् तत्तदन्वयबुद्धौ वाक्यभेदापत्तेः । गङ्गायां घोष इत्यत्र तु पदार्थैकदेशान्वयबोध्य इति युक्तं तत्र मानान्तरापेक्षणम् । यदि च प्रतीतसंसर्गबलायातोऽप्यर्थो वाक्यस्यैव तदा वाक्यभेदापत्तिः । अथ तात्पर्यानुपपत्त्या यष्टेः प्रवेशवेतिवल्लक्षणायास्तु गवयपदाद्व्युत्पन्नं प्रति तदुत्पत्तये वाक्यमात्रमेवोक्तं तत्र न प्रवृत्तिनिमित्तबोधादानं विना । न च गोसादृश्यं तदिति तात्पर्यतो गोसादृश्यरूपेण गोसमानाधिकरण्यं गवयत्वमुपलक्षितं कल्प्यते । न तु यथा धूमोऽग्नीयत्वे वह्नौ तात्पर्यमनुमानेन निर्वहतीति न लक्षणा न चात्र प्रमाणान्तरमस्तीति येन लक्षितलक्षणा अनुमानस्याश्रिद्धेः । अन्यथान्योन्याश्रयात् न च वाक्ये न लक्षणा, तस्याः पदधर्मत्वादिति वाच्यं एकपद एव लक्षणा पदान्तरस्तु नियामकमित्यत्र वक्ष्यत्वात् । अथ गवयत्वेन लक्षणया तदुपस्थितावपि व्यक्तौ वाच्यतां न त्यजेत यद्वादिति विपरीतवाच्यता ग्राहकमानान्तरमवश्यं स्वीकरणीयम् । न च यस्मिन्नो धर्मो अत्यदवाच्यः सोऽपि तदुवाच्य इति नियमः । जातिपदे व्यभिचारादिति चेत् न प्रवृत्तिवृवाच्यत्वबोधतात्पर्यकत्वेन जातौ नेत्यत्रवाक्ये गवयत्वविशिष्टव्यक्तेरेव लक्षणात् । अत्र यदा गवयत्वे वाक्यात् तात्पर्यं गोसादृश्यग्रहस्य स्मर्यते, तदा लक्षणा न च वाक्यात् तात्पर्यमवधृतम् अन्यथा धूमोऽग्नीयत्वेऽपि वाक्यादिति चेत् न उपस्थापकमानान्तराभावे तात्पर्यस्यैव वाक्यात् तात्पर्यकत्वात् नचोपमानमेव तथा, अन्योन्याश्रयत्वात् । एवं यत्र प्रवृत्तिनिमित्तविषयबोधने न तात्पर्यं योगोसदृशः स गवयशब्दवाच्य इति स्वरूपाख्यानमात्रं तत्रापुरुषाभ्युपगतः समयपरिच्छित्तिसंभवत्येव न च व्युत्पित्सुव्युत्पत्तये प्रवृत्तिनिमित्तविशेषे तात्पर्यं यदनुपपत्तिर्लक्षणाबीजं स्यात् । अपि च धिक् करभमतिदीर्घग्रीवमित्यादिवाक्यस्य करभनिन्दातात्पर्यकस्य प्रवृत्तिनिमित्तपरत्वाभावेऽपि तादृग्पिण्डमनुभवतः करभत्व वाक्यार्थम् अयं करभशब्दवाच्य इति भवति मतिः । न च तत्र प्रवृत्तिनिमित्तविशेषे तात्पर्यमस्ति लक्षणाया बीजं, निन्दापरत्वात् । किञ्च सर्वत्रान्वयानुपपत्तिरेव लक्षणाबीजं यष्टीः प्रवेशवेत्यादावपि प्रकरणादिना पुरस्कारादिप्रयोजनकत्वं प्रवेशनसाधनत्वं तादृशे च प्रवेशनादौ यष्ट्यादेरनन्वयात् तात्पर्यानुपपत्तेरपि तात्पर्यभ्रमात्वा त्तात्पर्यभ्रमकत्वात् । अथ प्रकरणादेरननुगमः तात्पर्यव्याप्यत्वेन तदननुगमे तात्पर्यानुपपत्तिरेव तद्बीजमस्तु लाघवादिति चेत् न धूमादिवदननुगतस्यापि व्याप्यत्वाविरोधात् । तस्मात् गवयशब्दः कस्मिंश्चिद्वाचकः शिष्टप्रयुक्तत्वादिति सामान्यतो निश्चितेऽपि गवयत्वविशिष्टो धर्मी गवयपदवाच्य इति लाघवान्निर्णेयम् । तत्र प्रमाणसंस्कारि न च तस्मिन् दृश्यावं प्रमाणान्तरमस्त्येव यत् प्रमाणसंस्कारि तत्प्रमाणान्तरमास्थेयम् । अस्त्यनुमानं तथा हि गवयशब्दो गवयत्वविशिष्टवाचकः असति इत्यन्तरेऽभियुक्तैः प्रयुज्यमानत्वात् गवि गोशब्दवदिति चेत् न गवयत्वविशिष्टो यो धर्मी तस्य वाचकत्वेऽपि गवयत्वप्रवृत्तिनिमित्तत्वसिद्धेः । न च यस्मिन्सत्त्वा दुत्तरं क्वापि अवधारयितुं शक्यते सामानाधिकरण्यमात्रस्य निमित्तोपलक्षणतासाधारण्यात् । अथ गोसादृश्यनिमित्तताशैरवस्यानवतारेणोपमानस्याप्यनवतारः । तथा च तस्य तत्र प्रवृत्तिनिमित्तकत्वेऽवगते गवयपदं गवयत्वप्रवृत्तिनिमित्तकम् इतरप्रवृत्तिनिमित्तकत्वे सति तत्प्रवृत्तिनिमित्तकत्वात् यत्रैवं तत्रैवमिति चेत् न तर्कस्यानिबन्धकत्वात् न चायं तर्को व्याप्तिग्रहमूलको येन विपर्यवस्थानुमानाद्व्याप्तिसिद्धिः । अथ गवयपदं स्वप्रवृत्तिनिमित्तकमिति सामान्यतो दृष्टमेव तर्कसहकृतं गवयपदस्येतरप्रवृत्तिनिमित्तकत्वं परिच्छिनत्ति न तु मानान्तरं कल्पयित्वा तर्कः सहकारी कल्प्यते इति चेन्न इदं स्वप्रवृत्तिनिमित्तकमन्यच्च न प्रवृत्तिनिमित्तमिति बुद्धावपि गवयत्वप्रवृत्तिनिमित्तकं गवयपदमिति मानान्तरं विना प्रतीतेः अनुमितेर्व्याप्यतावच्छेदकत्वप्रकारताकत्वनियमात् । अथ वयेच्छावां

सामान्यतो दृष्टेन विशेषबाधसहकृतेनान्यदृष्यानाश्रितत्वं प्रतीयते अन्यथा विशेषबाधस्य तन्निर्णयस्य वा प्रमाणत्वात् बाधकाभा पृथिव्यादौ केवलान्वयिव्यतिरेकविषयकत्वं जन्यद्रव्यानाश्रितत्वं केन साध्यम्, तथापि गौरवाख्य तर्कसहकृतसामान्यतो दृष्टादिना पृथक्त्वनिमित्तत्वं साध्यते पश्चाद्व्यतिरेकी स्यात् साध्यप्रमाणान्तरापेक्षयो पक्षधर्मतासहकारित्वस्य युक्तत्वादिति चेन्न दृष्टान्तयोर्मेकबाधसहकृतपरापरबाधकैरेव तात्त्विकपरिशिष्टवैशिष्ट्याद्व्यदृष्यानाश्रितत्वपरिच्छेदात् न तु सामान्यतोदृष्टेन, विशेषबाधतदोषनिर्णयौ विशिष्टवैशिष्ट्यबोधनिर्वाहात् तर्कानवतारदशायां तस्य तदपरिच्छेदकत्वाच्च । न च व्याप्तिपरमिदं वाक्यं यो गोसदृशः स गवयपदार्थ इति वाक्यादवगतव्याप्तिरनुमिनुयादयं गवयपदवाच्यो गोसदृशत्वात् अतिदेशकालावसनपिण्डवदिति वाच्यं न हि गोसदृशं ज्ञात्वाऽनेन पृष्टः स किंशब्दवाच्य इति किन्तु सामान्यतो गवयपदार्थमवगम्य कीदृगिति तथा च यद्योगप्रावण्याज्ज्ञानं तस्यैवार्थत्वं ततः किं तेन । अथ तत्सदृशपरमिदं वाक्यं किंसदृशोऽसाविति प्रश्नार्थः एवञ्च प्रयोक्तव्यम् अयमस्मौ गवय इति व्यवहर्त्तव्यो गोसदृशत्वात् वस्तु न तथा नासौ गोसदृशः यथा कृष्णोऽयमिति चेन्न हि कृष्णादीनां विषयत्वे प्रमाणमस्ति सर्वप्रयोगस्य दुर्ज्ञानत्वात् कतिपयव्यवहारस्यैवान्निश्चितत्वात् अथ कीदृक् किंसिक्षुः इति प्रश्नार्थो नञ्समेन सिक्षुसदृशात्मा गवयपदस्य वाचकत्वं कस्यचिद्वाक्यस्यावगमयतीति तेन तदर्थः प्रश्नः । अथ प्रवृत्तिनिमित्तविशेषे किंसिक्षुप्रश्नो गवयपदं केन निमित्तेन वर्त्तते तस्य किं सिक्षुसित्यर्थ इति चेत्न हि तदनुमेयभेदेनानेन निश्चितं येन तथा स्यात् ज्ञानहेतुसामान्यप्रश्ने तद्विशेषोत्तरमिति चेन्न अविशेषादिन्द्रियसन्निकर्षमपेक्षत्तरयेत् वनं गतो दृष्टवति तत्रान्निमित्तभेदे एवायं प्रश्नः कीदृग् गवयः केन निमित्तेन गवयपदं प्रवर्त्तते, गवयत्वञ्च सास्नादिपदार्थवित्तमयत्वात् पृष्ट उपलक्षणं सादृश्यमाचष्टे यत्सादृश्येऽपि पिण्डेऽतिदेश्यवाक्यं स्मरतस्तत्कर्मसहकारेण गवयत्वविशिष्टो धर्मी गवयपदवाच्य इति प्रवृत्तिनिमित्तविशेषः परिच्छिन्नरूपमानफलम्" इत्यन्नेन

वेदान्तपरिभाषायाम् "सादृश्यप्रमाकरणमुपमानम् । तथाहि नगरेषु दृष्टगोपिण्डस्य पुरुषस्य वनं गतस्य गवयेन्द्रियसन्निकर्षे सति भवति प्रतीतिरयं पिण्डोगोसदृशः इति तदनन्तरं च भवति निश्चयोऽनेन सदृशो मदीया गौरिति । तत्रान्वयव्यतिरेकाभ्यां गवयनिष्ठगोसादृश्यज्ञानं करणं गोनिष्ठगवयसादृश्यज्ञानं फलम् । नचेदं प्रत्यक्षेण सम्भवति गोपिण्डस्य तद्देन्द्रियासन्निकर्षात् नाप्यनुमानेन गवयनिष्ठगोसादृश्यस्यातल्लिङ्गकत्वात् । नापि सदृशो गौरेतद्गवयसदृशी एतन्निष्ठसादृश्यप्रतियोगित्वात् योयत्सादृश्यप्रतियोगी स तत्सदृशः यथा मैत्रनिष्ठसादृश्यप्रतियोगी चैत्रो मैत्रसदृश इत्यनुमानात् तत्सम्भव इति वाच्यम् एवं विधानुमानावतारेऽप्यनेन सदृशो मदीया गौरिति प्रतीतेरनुभवसिद्धत्वादुपमितेरोत्सर्गिकत्वाच्च । तस्मादुपमानं नानान्तरम्" ।

सां० त० कौ० तस्य प्रमाणान्तरत्वं निराकृतं यथा "उपमानं तावत् यथा गौस्तथा गवय इति वाक्यं तज्ञानिना धीरागमेव योऽयं गवयशब्दो गोसादृश्यस्य वाचक इति प्रत्येष्यतीत्यनुमानमेव, यो हि यस्मिन् यत्र शब्दैः प्रयुज्यते सोऽसति तत्स्मरणे तस्य वाचको यथा गोशब्दो गोत्वे, प्रयुज्यते चैवं गवयशब्दो गोसदृशे इति तस्यैव वाचक इति ज्ञानमनुमानमेव । यत्तु गवयस्य चक्षुःसन्निकृष्टस्य गोसादृश्यज्ञानं तत् प्रत्यक्षम् । अतएव अर्थापत्त्यायां नवि गवयसादृश्यज्ञानं प्रत्यक्षत्वं गवि सादृश्यमन्यत्र गवये, भूयोऽवयवसामान्ययोगो हि जात्यन्तरवर्त्ती जात्यन्तरे सादृश्यमुच्यते सामान्ययोगश्चैकः स चेद्वयवे प्रत्यक्षो गव्यपि तथेति नोपमानस्य प्रमेयान्तरमस्ति यत् प्रमाण्यमुपयायात् भवेदिति न प्रमाणान्तरमुपमानम्" ।

एतन्मतं च सविस्तरेण निराकृत्य तस्य प्रमाणान्तरत्वं समर्थितम् । तदेतत् सर्वमिह भाषा० उक्तं यथा "यामीमांसकप्रथमतः पक्षतो गवयादिकम् । सादृश्यधीर्गवादीनां वा स्यात् सा करणं मतम् । वाक्यार्थस्मृतिर्देयस्य स्मृतिर्व्यापार उच्यते । गवयादिपदात्तस्य भक्तिर्धीरुपमाफलम्" । अतएव प्राचीनैरपि उपमानस्य भक्तिव्याकृतया खोक्तया यथा "भक्तिपक्षे व्याकरणोपमानात् खोक्तप्रमाव्याद्वयवहारतश्च । वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य धीवृत्तेः" ।

उपमानचिन्तामणि पु० नञ्रोधोपाध्यायकृते उपमानप्रामाण्यव्यवस्थापके ग्रन्थभेदे उपमानशब्दे प्रायेण स एव ग्रन्थ उपन्यस्तः स एव ग्रन्थ उपमानखण्डत्वेन प्रसिद्धः ।

उपमारत्न न० उप—रम्—क्विप्—ल्युट् । वस्त्रप्रवाणे वस्त्रेऽवभोदकसमीपं गत्वा कविभोऽनु प्रक्षेपे "उपमारत्नप्रकारत्व मत० ना० २,५,२,३ वै० उक्तः "तस्मीमेव प्रतिप्रस्तावा स्तुवं

प्रस्तुयाति तद्वै वैश्वदेवेन यजमानयोर्वाससी परिहिते स्यातां ते एवात्रापि स्यातामथास्मै वारुण्यं पयस्यायै ग्रामकर्षभिश्रमादायावभृथं यन्ति वरुणं वा एतस्निर्दग्धवार्यं तत्र न साम गीयते न स्तुत शस्त्रा किञ्चन क्रियते तूष्णीमेवेत्याध्वर्यवेत्योपमारयति" "यजमानयोर्यजमानतनूपत्योः। ग्रामकर्षभिश्रं ग्रामोऽतिपाकेन दग्धः पाके संसक्तः कृष विलेखने क्रुच्यत इति कर्षः ग्रामश्चासौ कर्षश्चेति ग्रामकर्षस्तेन भिश्रं हविरादाय अवभृथमुद्दिश्य प्रति यन्ति एतत् ग्रामकर्षभिश्रं हविः वरुणपयम्। सौमिकावभृथवत् प्रसक्तं सामगानं निषेधति तत्र न सामेति न स्तुतशस्त्रप्रयोगे साम्ना किमपि प्रयोजनं क्रियते अवभृथसमीपमध्वर्यवेत्य हविरुपमारयति अधु प्रक्षिपति"भा०। एतदर्थोपमारयणाभिप्रायेण कात्या० २०,८,२१,कर्कवृत्तौ "अतः कृत्स्नोपमारयणान्तमेव पूर्वयोरङ्गोः कर्त्तव्यमित्युक्तम्" अर्वेव।

उपमास्य न० उपमासं प्रतिमावं भवं यत्। प्रतिमासमभवे पितरां श्राद्धे "विराड् वा इदमग्र आसीत्" इत्युपक्रम्य "सोऽनुकामात् स्त्रा पितृनागच्छत्तां पितरोऽन्वत स्त्रा आसि समभवत् तस्मात् पित्र्योमास्यमुपमासं इदति प्र पित्र्यावं पन्थां जानाति व एवं वेद" शत०८,१०,१६।

उपमित् त्रि० उपमीयते जिज्ञते उप+मि-क्विप्। १उपनिधाते २उपस्थापयितरि च "स्यूषेव जघाँ उपमित्यवन्ध" ऋ० १,५६,१, "उपमित् उपस्थापयिता वह्ना उपनिधुपनिधाता स्यूषेव" भा० १स्यूषावाम् "ग्रामायदुपमित्र रोधः" ऋ० ४,५,१, "उपमित् स्यूषा"भा० "उपमितां प्रतिनिधामधोपरिनिधातृत आत्मानं विश्वस्मादात्मनो नक्षत्राणि वि चृतामसि" आत्मानिमन्त्रणे, शत० ६,२,१। कर्त्तरि क्विप्। ७उपमातर्त्तरि।

उपमित त्रि० उप+मि-क्त। १सादृश्यानुयोगिनि। यथा चन्द्र इव मुखमित्यादौ मुखं, तस्य चन्द्रसादृश्यानुयोगित्वात् "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" पा० नरव्याघ्रः नरो व्याघ्र इव वाक्ये व्याघ्र उपमानं नर उपमितः। अत्र समासे व्याघ्रशब्दस्य व्याघ्रसदृशे लक्षणा व्याघ्रसदृशोनर इति बोधः उपमितस्य विशेषत्वेऽपि समासविधिसूत्रे प्रथमान्ततया निर्देशात् पूर्वनिपातः। अनेन सूत्रेण विहितसमास उपमितसमास इत्युच्यते।

उपमिति स्त्री उप+मि-क्तिन्। १उपमानज्ञानरूपे सादृश्यज्ञानजन्ये गवयादिपदशक्तिबोधरूपे २उपमानरूपे बोधभेदे "प्रत्यक्षमथानुमितिस्तथोपमितिशब्दजे" भाषा० करणे क्तिन्। ३सादृश्ये च "यन्नयोपमितिसाम्यसपत्नम्" सा० द०। "तदाननस्योपमितौ दरिद्रता"नैष०।

उपमेत त्रि०उपमानमुपमानभावं सर्व्वदृश्येभ्योदीर्घत्वात् इतः २त०। शालदृश्ये एतावां मध्ये तस्य सर्व्वोत्कृत्वात् अन्यस्योपमानतां प्राप्तत्वात्तथात्वम्। "शालप्रांशुर्महाभुज." रघौ तस्योच्चतायामुपमानत्वं वर्णितम्।

उपमेय त्रि०उपमीयतेऽसौ उप+मि-यत्। सादृश्यानुयोगिनि यथा चन्द्रइव मुखमित्यादौ मुखम्। "अत्र पुरश्चैक कुक्षोपमेयम्" कुमा० "भूविडम्बासोदुपमेयकान्तिः। "नवेन्दुना तन्मुखसोपमेयम्"रघुः "सा पूर्व्वा यदि सामान्यधर्म्म औपम्यवाचि च। उपमेयं चोपमानं भवेदाक्षिप्य पुनः" सा० द०।

उपमेयोपमा स्त्री अर्थालङ्कार भेदे। २८८पृष्ठे विवृतिः।

उपयज् पु०उप-यज-भावे क्विप् स्त्रीत्वे तु क्तिन्। पशुयागाङ्गे यागभेदे "स्त्रीणि ह वै पयोरूपाणि एकादश प्रयाजाः एकादशानुयाजा एकादशोपयजः" शत० ब्रा० १,८,४,४, इत्युपक्रमे "अथ यद्यजन्तमुपयजतित्तदाहुपयजोनाम"इति तन्नामनिरुक्तिं प्रदर्श्य एकादश उपयजः क्रमेण दर्शिताः।

उपयन्तृ पु० उप+यम-तृच्। विवाहकर्त्तरि पत्यौ। "अथोपयन्तारमसं समाधिना" कुमा० "अथोपयन्ता वदनेन युक्तम्" रघुः।२संयमनकर्त्तरि त्रि०स्त्रियां ङीप्।

उपयन्त्र न० उपगतं यन्त्रम् अच्स०। सुखतोऽल्पोद्धारणोपाययन्त्रभेदे। यथा "तत्र मनःशरीराबाधकराणि यन्त्राणि तेषामाहरणोपायो यन्त्राणि तानि च षट्प्रकाराणि तद्यथा स्वस्तिकयन्त्राणि, संदंशयन्त्राणि, तालयन्त्राणि, नाडीयन्त्राणि, पद्माकायन्त्राणि, उपयन्त्राणि चेति" विभज्य। "उपयन्त्राण्यपि रज्जुवेणिका मृदुचर्म्मोल्बवल्कतावल्लाष्टीलाङ्गुलसंदंशपाणिपादतालुजिह्वोद्दालनखमुखवाङ्नासाकटकयाष्टीवमथप्रवाहकुर्पासयन्त्रोत्तमयानि शारीरिभेषजानि चेति" तानि दर्शितानि। "एतानि देशे सर्व्वाणि देशज्ञोवयवे तथा। यन्त्रौ कोष्ठे यमन्यान्तु यथायोगं नियोजयेत्" सुश्रु०।

उपयम पु० उप+यम-अप्। विवाहे। "कन्या त्वजातोपयमा सवर्ज्या नवयौवना"सा० द०। उपयमस्य भेदादिकमुद्वाहशब्दे ११८६५० उक्तं तत्प्रसङ्गे वरकन्यालक्षणादि विशेषोनिरूप्यते। तत्र द्विजातीनां समावर्त्तनानन्तरं

विवाहकालः मनुना "चतुर्थमायुषोभागमुषित्वाद्यं गुरौ द्विजः। द्वितीयमायुषोभागं कृतदारो गृहे वसेत्" आयुर्द्वितीयभागे विवाहकाल उक्तः" कुल्लूकभट्टेन तु पूर्वापरविरोधभागद्भ्रा ब्रह्मचर्यकालोत्तरत्वमस्य समर्थितं यथा "चतुर्थं भागमिति ब्रह्मचर्यकालोपलक्षणार्थम् आनयतपरिमाणत्वादायुषश्चतुर्थभागस्य दुर्ज्ञानत्वात् न च "शतायुर्वै पुरुषः" इति श्रुतेः पञ्चविंशतिवर्षपर्य्यन्तपरत्वम्, "षट्त्रिंशदाब्दिकं चर्य्यमित्यादिना विरोधात्। आश्रमसमुच्चयपक्षमाश्रितो ब्राह्मण उक्तं ब्रह्मचर्यकालं जन्मावेत्यादा यथायक्ति गुरौ स्थित्वा द्वितीयमायुषश्चतुर्थभागं कृतदारो गृहस्थाश्रममनुतिष्ठेत् "गृहस्थस्तु यदा पश्येत् वलिपलितमात्मनः। पुत्रेषु दारान् निक्षिप्य वनं गच्छेत् सहैव वा" (मनुः) इत्यनित्यकालत्वात् द्वितीयमायुषोभागमित्यपि गार्हस्थ्यकालमेव। "गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि। उद्वहेत द्विजोभार्यां सवर्णां लक्षणान्विताम्" मनुना समावर्त्तनोत्तरमेव विवाहकालोविहितः। समावर्त्तनकालश्च "षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम्। तदर्द्धिकं पादिकं वा ग्रहणान्तिकमेव वा" मनुना षट्त्रिंशद्वर्षाद्युत्तरकालः उक्तः। स च ब्रह्मचर्येतया युगभेदेन वा व्यवस्थाप्यः तथा च सत्ययुगे २५वर्षाः त्रेतायामष्टादश वर्षाणि द्वापरे नव वर्षाणि कलियुगे वेदपर्य्यन्तकालपर्य्यन्तं ब्रह्मचर्य्यं कार्यं ततःसमावर्त्तनम्। युक्तञ्चैतत् मनुनासत्ये नराणां चतुःशतायुष्कत्वेन त्रेतायां त्रिशतायुष्कत्वेन द्वापरे द्विशतायुष्कत्वेन कलौ शतायुष्कत्वेन चोक्तेः आयुरुत्तमत्वादिभेदेन व्रतकालाधिक्यादि। अतएव "दीर्घकालं ब्रह्मचर्यं धारणञ्च कमण्डलोः" इत्यादिपुराणे कलौ आयुर्होनत्वाभिप्रायेणैव दीर्घकालब्रह्मचर्य्यनिषेधः। तत्रायं भेदः। "केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते। राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः" मनुना स्वस्वोपनयनद्विगुणितकालएव गोदानाख्यस्य केशान्तसंस्कारस्य विधानात् वेदव्रतस्नस्य वक्ष्यमाणस्य समावर्त्तनादिकैशान्तरूपस्यानन्तरं विवाहस्य कर्त्तव्यतायाःसर्वनिबन्धभिर्व्यवस्थापितत्वेन स्वस्वोपनयनद्विगुणकालोत्तरं विवाहस्य कर्त्तव्यता नावाक्। तथा च ब्राह्मणस्य १६वर्षात् क्षत्रियस्य द्वाविंशतेः वैश्यस्य चतुर्विंशतेरूत्तरं विवाहकालः। अतएव रघौ वर्णितम् "अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्त्तयत् पिता" सूत्राणान्तु "वैश्यस्यैकैकवर्षेत्युक्ते वैश्यधर्मातिदेशात् चतुर्विंशतिवर्षोत्तरमेव विवाहकालः "त्रिंशद्वर्षोवहेद्भार्यां कन्यां द्वादशवार्षिकीम्। त्र्यष्टवर्षोऽष्टवर्षीयां धर्मे सीदति सत्वरः" इति मनुना ब्रह्मचर्यरक्षणाशक्तौ सत्वरतोक्तेः अशक्तौ ततोऽर्वागपि कर्त्तुं शक्यते इति भेदः। स तु न श्रेयानिति बोध्यम्। अतएव शु० त० रघुनन्दनेन। "अनृढभार्य्यः सूत्रस्तु षोड्शाद्वत्सरात् परमिति" शङ्खवचनार्थमीमांसायां "तद्विशेषेण न्यायवर्त्तिनां सूत्राणां षोड्शवर्षोपरि विवाहकालः कल्प्यते" इति व्यवस्थाय तत्समर्थनाय वैश्यस्यैकैकवत्सरेति चकारादूर्द्ध्वं यद्यधर्ममात्रस्यातिदेशसङ्गा अतिदेशेन सूत्रस्याप्युपनयनप्राप्तौ "विवाहमात्रं संस्कारं सूद्रोऽपि लभते सदेति" ब्रह्मपु० तस्य विवाहस्योपनयनस्थानीयतासङ्गा तत्कालाकाङ्क्षायां "गर्भाष्टमेऽब्दे वादे ब्राह्मणस्योपनयनम्। राज्ञामेकादशे सैके विशामेके यथाकुलम्" या० स्मृतौ। उत्तरोत्तरवर्षिककालस्योक्ता वैश्योपनयनकालापेक्षयाऽधिकालत्वं सूद्रविवाहस्योक्तम्। तत्रापि यथाकुलमित्यतिदेशेन षोड्शाद्वर्षात् प्रागपि विवाहो दृश्यते स तु न प्रकृत इत्यस्माभिरुक्तरीत्यैव व्यवस्थापितम्। द्विजातिस्त्रीणान्तु यद्यपि कारीतेन "द्विविधाः तत्र ब्रह्मवादिन्यः सद्योवधूश्च तत्र ब्रह्मवादिनामुपनयनं वेदाध्ययनं भिक्षाचर्या च, सद्योवधूनां तु उपस्थिते विवाहे स्त्रियो ब्रह्मवादिन्यः सद्योवधूश्च यथा कथञ्चिदुपनयनं विधाय विवाहः कार्य्यः" सद्योवधूनामप्युपनयनं विहितम्। तथापि तथा विधीयमान उपनयनेन वर्णभेदेनोक्तकालापेक्षा उपस्थिते विवाहे इति कथनात् विवाहकालस्यैव तत्कालता। वस्तुतः स्त्रीणामुपनयनं कल्पान्तरविषयम् यथाह यमः "पुराकल्पे हि नारीणां मौञ्जीबन्धनमिष्यते। अध्यापनञ्च वेदानां सावित्रीवचनन्तथा। पिता पितृव्यो भ्राता वा नैनामध्यापयेत्परः। स्वगृहे चैव कन्याया भैक्षचर्या विधीयते" इति। ननु यद्यपि कलौ मुख्यमुपनयनं स्त्रीणां नास्ति तथापि आतिदेशिकमस्ति यदाह मनुः "वैवाहिको विधिः स्त्रीणामौपनायनिकः परः। पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रियेति" तेन कालभेदः सेत्स्यतीति सत्यम् अतिदेशोयमुपनयनधर्म्मप्राप्तेः यथा ब्राह्मणादीनामुपनयनात् प्राक् कामचारकामवादकामभक्षाद्याचाराप्राप्तौ तदुत्तरन्तूपनयनधर्माणां सन्ध्यास्नानादीनां प्राग् धर्मनिरूपणपूर्वकमनुष्ठानपूर्वकं यथाह तथा स्त्रीणा-

मपि विवाहात् प्राक् कामचारादिधर्मो न दोषं कुर्वन्ति विवाहस्य तु द्विजत्वसिद्धिकरत्वादनुचिते विवाहे कामचारादिधर्मनिरासपूर्वकं पतिसेवा गुरौ वास इत्यादिकमनुष्ठानं भवेदिति। सर्ववर्णस्त्रीणां षड्वर्षोत्तरं विवाहकालः वक्ष्यमाणवचनात्। एवं वरकन्ययोः सामान्यकाले निरूपिते इदानीं विशेषकालोऽभिधीयते। तत्र तयोः व्यष्टिशुद्धेरावश्यकता यथाह "गुरुशुद्धिवशेन कन्यकानां समवर्षेषु षडब्दकोपरिस्तात् ।रविशुद्धिवशाच्छोभनराशुभयोश्चन्द्रविशुद्धितोविवाहः" स्म० चि० पी०धा०व्या०"कन्यकानां विवाहः षड्वृद्धकोपरिस्तात् षड्वर्षातिक्रमानन्तरं समवर्षेषुयुग्मवर्षेषु सत्सु, गुरुशुद्धौ सत्यां विवाहः शुभः । अर्थात् पुरुषाणां विषमवर्षेषु रविशुद्धौ विवाहः शुभः । तदाह व्यासः । "षड्वर्षमध्येनोद्वाह्या कन्या, वर्षद्वयं यतः । सोमोभुङ्क्ते त्रयं गन्धर्वस्तत्पश्चाद्धुताशनः" इति जन्मानन्तरं वर्षद्वयं सोमः कन्या भुङ्क्ते । तदनन्तरं त्रीणि वर्षे गन्धर्वस्तदनन्तरमग्निस्ततो मनुष्याधिकारःषडब्दतः प्राग्विवाहो न कार्यः । तत्र षड्वर्षानन्तरं समवर्षे विवाहः शुभः । यदाह नारद ।"युग्मेऽब्दे जन्मतः स्त्रीणां शुभदं पतिपोडनम् । एतत्पुंसामयुग्मेऽब्दे व्यत्ययेनाशुभत्वयोरिति"। काश्यपः "विवाहो जन्मतः स्त्रीणां युग्मेऽब्दे पुत्रपौत्रदः । अयुग्मे श्रीप्रदः पुंसां विपरीते तु मृत्यदः' इति । एवं च सति स्त्रीणां विवाहोऽष्टमदशमवर्षयोर्भवतीत्यर्थः । यथाह व्यास "अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी । दशवर्षा भवेत् कन्या ह्यतऊर्ध्वं रजस्वला भवेति" । अस्य फलभेदमाह वात्स्यः 'गौरीं ददद्ब्रह्मलोकं सावित्रं रोहिणीं ददत् । कन्यां ददत् स्वर्गलोकमतः परमसंशयम्' । प्राप्नोतीति शेषः । "गौरी विवाहिता सौख्यसम्पन्ना स्यात् पतिव्रता। रोहिणी धनधान्यादिपुत्राढ्या सुभगा भवेत् । कन्या विवाहिता सम्यक्समृद्धा स्वर्गमृच्छतीति" । नन्वयुग्मवर्षायां रोहिण्यां व्ययुग्मवर्षत्वाद्विवाहः कथं सम्भवति गर्भतोनववर्षाष्टकरणे व्ययुग्मवर्षत्वापरिहारात् स दोषस्तदवस्थ एव ये तु "अयुग्मे दुर्भगा नारी युग्मे च विधवा भवेदिति" चतुरब्दोत्तरमेव विवाहमाहुः तन्मते सुतरां विवाहः । उच्यते ।"युग्माब्दे सम्पदः सौख्यं विद्याधर्मायुषः सदा । भर्तुर्हानिर्न भवति निषेकात्तावत संशय" इति पराशरवाक्याद्गर्भकरणं यथावसीयते नारददिवाक्ये तथा जन्मत इत्यपि । तत्र षडब्दानन्तरं जन्मतोविषमवर्षीयमासत्रयानन्तरं नव मासाः शुभाः । समवर्षीयसामत्रयञ्च । इदमेव च मासत्रयं नारदादिमते स्वल्पते इति शुक्ला व्यवस्थेति युक्तमत्पश्याम: । एतदेवाभिप्रेत्योक्तं श्रीपतिनिबन्धे । "मासत्रयादूर्ध्वमयुग्मवर्षे युग्मे तु मासत्रयमेव यावत् । विवाहशुद्धिं प्रवदन्ति सन्तोयात्स्याद्यो गर्भवराब्दसंख्या" इति । "अयुग्मे दुर्भगा नारी युग्मे तु विधवा भवेत् । तस्माद्विवाहयेत् युग्मे विवाहे सा पतिव्रतेति" चतुरब्दोत्तरेऽपि सार्धिका । एवं नववर्षस्या युग्मत्वप्रयुक्तनिषेधोऽष्टमवर्षानन्तरं मासत्रयमेव । एवं निरूपितवर्षे यस्मिन् काले गुरुशुद्धिर्भवेत् तद्ग्रहेण विवाहः कार्यः गरुशुद्धिस्तु 'षट्कन्याजन्मराशेस्त्रिद्वादशराशिगोवाद्विसप्तग । स्वोच्चगुरुः स्वगृहत्रिकोणे पृथ्वीनाथस्य निर्दिष्ट" मु०चि० अभिहिता । यदाह गुरुः "स्त्रीणां गुरुबलेनैव विवाहः शोभनः स्मृत । रविलाभबलं प्राहुर्मन्दलाभमयोरपि" "सुरगुरुबलमबलाना पुरुषाणा तीक्ष्णरश्मिबलमेव। चन्द्रबलं तदुभयं वलोक्य विबोधयेज्ञानमिति" । वराहोक्तेश्च । एतच्चावश्यकत्वार्थमभिहितम्। यदा द्वयोरपि गुरुबलमस्ति भवेत् तदा पाणिग्रहः शुभदः । द्वयोरन्यतरस्य गुरुकेगुर्द्धौ विवाहकालानारम्भे च तत्सिद्धिदिना पञ्चाङ्गशोधनेन 'रविशुद्धौ सत्करणं रविगुरुशुद्धौ व्रतोद्वाहौ । क्षौरजातारुणौ प्राग् चन्द्रार्कितं कर्मेति' राजमार्त्तण्डोक्तेः । पराणां विवाहे ना पुंसां रविगुरुशुद्धिवशेन विवाहः शुभ । उभयोः स्त्रीपुंसयोश्चन्द्रार्कशुद्धितोविवाहः शुभः स्मृत अत्र सम्मतिः प्रागुक्ता । यदा तु कन्या कालातिक्रान्ता भवति तदा गुरुबलसमावश्यकमित्याह व्यासः 'दशवर्षं व्यतिक्रान्ता कन्या शुद्धिविवर्जिता । तस्या स्तारेन्दुलग्नानां शुद्धौ पाणिग्रहो मतः" इति । "अष्टगुद्धिं भवदृद्धिं शुद्धिं सम्पत्तनुद्दिवसानाम् । अर्वाक् दशवर्षेभ्यो सुबल [illegible] कन्यकानाम्' भुजबलः सा च गुरुरविचन्द्रशुद्धिं चन्द्रकरणेऽभिधास्यते ।"गोचरबलाभावेऽष्टकवर्गादिबल यात्रासम्पाह नारदः "गोचर वेधज चाष्टवर्गजं बलम् । यतोनरं बलाधिक्य स्यात् गोचरमार्गजमिति" पी०धा०।

तत्रादौ अयनविरूपणम् । विवाहोपक्रम "हरौ प्रबुद्धे न च दक्षिणायने तिथौ च रिक्ते शशिनि व्ययस्थे" राजमा०। "उदक्प्रयाणे आपूर्यमाणे पक्षे कल्याणनक्षत्रे चूडोपनयनगोदानविवाहाः, विवाहः सर्वकालिक इत्येके" आश्व० गृ० १,४,१, सू० । सार्वकालिक इति दक्षिणायन-

कृष्णपक्षविषय. न तु अशुद्धकालपरत्वस्यानुपस्थितेः अयनपत्नयारेव प्रक्रान्तत्वात्तद्विषयता सर्व्वशब्देन तथैव परामर्शयोग्यतया अन्यस्य चाप्रक्रान्ततया तेन परामर्शायोगात्। अत एव भजबलभी० अशुद्धिमित्यादिकं प्रागुक्तमभिधाय "एतत्परन्तु विप्रेयमङ्करोवचनं यथा। कालात्प्रये च कन्यायाः कालदोषो न विद्यते। मलमासादिकालानां विवाहादौ प्रयत्नतः। पुंसः प्रति सदा दोषात् सर्वदैव हि वर्ज्यता" इत्युक्तम्। ततश्च वरकन्ययोर्मध्ये कन्याया दशवर्षातीतत्वे अशुद्धादिनामेवात्र समयाशुद्धिश्च उभयसाधारण्यादपेक्षितैव। एतदेव भङ्गान्तरेणोक्तं ल्यो० त०"राजग्रस्ते तथा युद्धे पितर्यां प्राप्तसंज्ञके। अतिप्रौढा च या कन्या - ते। अतिप्रौढा च या कन्या कालधर्मविरोधिनी। अविशुद्धापि सा देया चन्द्रबलबलेन तु"। "एतत्परमेव दशमासाः प्रशस्ता नेत्यपीषविवर्जिताः" राजमा० वाक्यम् "सार्वकालिकमिच्छन्ति विवाहं गौतमादय इति सिंहिरवचनमप्येतत्परम्। वस्तुतः सार्वकालिक इत्यं तदासुराद्यधर्म्यविवाहविषयम्। प्रभि०"प्राजापत्यब्राह्मदैवार्षसंज्ञाः कालेपूक्तेष्वेव कार्याः विवाहाः। गान्धर्वाख्यश्चासुरो राक्षसश्च नैशाचो या सर्वकाले विधेयः" श्रीपत्युक्तेः "धर्म्येष्वेव विवाहेषु कालश्चैव परीक्षणम्। आधर्म्येषु विवाहेषु नक्षत्रपरिशिष्यते"। तत्र सौरादिमासनिरूपणम् "मिथुनकुम्भगालिष्टभाजगे मिथुनगेऽपि रवौ तिलवे शुचे"। अलिष्टगाजगते करपीडनमस्यति कार्त्तिकीयमधष्यपि" मु०चि०। "मिथुनकुम्भौ प्रसिद्धौ। ऋगोमकरः अलिष्टैचिकः एव प्रसिद्धः अजोमेषः। एतद्राशिगते रवौ सति तत्रापि मिथुनस्थिते स्वर्येऽपि शुचेराषाढस्य तिलवे तृतीयायां आषाढशुक्लप्रतिपदमारभ्य दशमीपर्य्यन्तं करपीडनं विवाहो भवति। अर्थादितरराशिगते सूर्य्ये सति आषाढशुक्लदशम्यनन्तरं हरिशयने च सति विवाहो न स्यात् यदाह कश्यपः।"उत्तरायणगते सूर्य्ये मीनं चैत्रञ्च वर्जयेत्। अजगोद्वन्दकुम्भालिङ्गराशिगते रवौ। सूर्य्यं करस्थञ्च त्यन्यराशिगे न कदाचनेति" वसिष्ठः। "दिनाधिपे मेषवृषालिकुम्भन्यूनयुग्मनक्राख्यधटर्क्षसंस्थे। माघद्वये माधवशुक्रयोश्च सूर्य्योऽथ वा कार्त्तिकसौम्ययोश्चेति। धटसुला। शुक्रोऽस्तेऽः सौम्यो मार्गशीर्षः सूर्य्यो विवाह इति मेषः। "आर्द्रोदयादुर्द्विनिरस्य कार्य्यं नक्षत्रवृन्दे दृषके कदाचित्। माघोक्तकर्मेतरसङ्कलार्थं कुर्य्यात्र सूर्येऽपि तथा सुरार्चा"। एतेन हरिशयनात्प्राक्काल: साधीयानित्यभिहितं भवति। अत्र सामान्यतोमासशब्देन चान्द्र एव मासो गृह्यते "इन्द्राग्नी यत्र गूयेते" इत्यादौ। अत्र तु सौरचान्द्रमासद्वयोपादानादुभयोरैक्ये विवाहफलमधिकं भवति। तदुक्तं कौशवार्कौ "प्रायःसौरं मानमिह विवाहे केचिच्चान्द्रं मानमाहुः फलेन। तस्मात् सम्यक् तत्फलाप्तिस्तदैक्ये सौरोमासः केवलः किञ्चिदूनः" इति। अस्यार्थः। काश्यपादिभिः सौरा एव मासाः उक्ताः तेषां च प्राशस्त्यम्। "विवाहादौ स्मृतः सौरो यज्ञादौ सावनोमत" इति हज्जगर्गस्मरणात्। नारदादिभिस्तु "माघफाल्गुनवैशाखज्येष्ठमासाः शुभप्रदाः। मध्यमाः कार्त्तिकोमार्गशीर्षौ वै निन्दिताः परे" इति चान्द्रा एवोक्ताः। एतत्प्राशस्त्यं च वशिष्ठेनोक्तम्। "उद्वाहयज्ञोपनयप्रतिष्ठातिव्रतं सौरमहोत्यवाद्यम्। पर्वक्रियावास्तुगृहप्रवेशः सर्वं हि चान्द्रेण हि गृह्यते तदिति"। अतोद्वयोः सौरचान्द्रमासयोरैक्ये विवाहादि शुभमेकतरपक्षाश्रयणे मध्यममिति निष्कृष्टोऽर्थः। एवं च मकरसंक्रान्तौ माघः, कुम्भे फाल्गुनोमेषे वैशाखः वृषे ज्येष्ठः,मिथुने आषाढ इतीयांश, तुलायां कार्त्तिको देवोत्थानादुत्तरः, वृश्चिके मार्गशीर्षः, शुभ इत्यर्थः। केचित्तु चान्द्रमासं मुख्यमाहुस्तेनायमर्थः। फाल्गुनो विहित इति मीनसंक्रमणसद्भावेऽपि शुभः, चैत्रो निषिद्ध इति मेषसंक्रान्तिसद्भावेऽप्यशुभः। तदुक्तं विवाहवृन्दावने। "अधीन निन्द्यो यदि फाल्गुने स्याद्व्रजस्तु वैशाखगतो न निन्द्यः। मध्यास्त्रितौ द्वावपि वर्जनीयाविति आदिशास्त्रियमेव युक्तिरिति" "व्रजस्तु वैशाखगतो न निन्द्य इति तु निर्मूलमेव। न हि मेषसंक्रमः क्वचित् निषिद्धोऽस्ति। तदेतदविचारितरमणीयं कृतः? यतोयस्मात् सौरमासस्यैव मुख्यत्वं तस्मात् मेषः प्रशस्त इति चैत्रेऽपि विवाहप्रसङ्ग इति विपरीतं तस्मादपि वक्तुमशक्यत्वात्। उक्तञ्च चूडारत्ने।"मीनेऽपि मकरस्थेऽर्के चैत्रे मेषगते रवौ। आषाढे मिथुनादित्ये केऽप्याहुः करपीडनमिति"। किञ्च वशिष्ठवाक्ये "दिनाधिपे मेषवृषेत्यादौ, सौरचान्द्रमासयोरुपादानस्य वैयर्थ्यापातात्। तस्मात् द्वयोरैक्ये विवाहः प्रशस्तः। तत्र माघफाल्गुनवैशाखज्येष्ठासख्याः। यत्र तु निषेधानन्तरं प्रतिप्रसवो यथा हरिशयने विवाहं निषिद्ध कार्त्तिकमार्गशीर्षौ विहितौ तत्र मध्यमत्वम् अतएव कार्त्तिकसौम्ययोश्च वशिष्ठेन प्रशस्तं

नारदवाक्यं स्पष्टमेव मध्यमत्वम् अतो विवाहपटले गर्गः "पुत्रोपेता तु कार्त्तिके धनधान्यसुतोपेता सौम्ये भर्तृपरायणा" इत्युक्तवान् तदपि धनुःसंक्रान्तिव्यतिरिक्तविषयं द्रष्टव्यम् । हरिशयनात्प्रागाषाढतृतीयांशश्च मध्यमः हरिस्वापान्तर्गताः आषाढश्रावणभाद्रपदाश्विनकार्त्तिकाः पौषश्चैते निषिद्धाः । धनुषि पौषस्त्वत्यन्तं निषिद्धः । 'भाने धनुषि सिंहे च स्थिते सप्तरङ्गमे । चौरमन्त्रं न कुर्वीत विवाहं सत्कर्म चेति' गार्ग्योक्तेः । अत्रमन्त्रप्रागनं विहितकालातिक्रान्तम्, चौरं चौनञ्च स्वतन्त्रम् 'यत्तूपनयनाङ्गं चौरं तस्य न निषेधः "चत्रे मीनगते रवाविति" विहितोपनयनस्य विषयालाभात् । अथोत्तरार्द्धं व्याख्यायते । अनीति । अस्मिन्मुगाजाः प्राग्व्याख्याताः । एतद्राशिगते सूर्ये सति कार्त्तिकपौषमधष्वपि करपीडनं भवति यथा दृश्चिके कार्त्तिकः मकरे पौषः मेषे चैत्रोऽपीत्यर्थः इदं तु सौरमासव्यतिरिक्तानां मतम् । अतएवाधुनोक्तचूडारत्नस्यवाक्ये "कौम्याब्दः करपीडनं नियुक्तिः। श्रीधरोऽपि । "पौषे च कार्य्यान्मकरस्थितेऽर्के चैत्रे भवेन्मेषगतो यदा स्यात् । प्रयत्नमाषाढगतं विवाहं वदन्ति गर्गा मिथुनस्थितेऽर्के इति तदेतत्प्रागभिहितन्यायादुपेक्ष्यम् अथवा कौथुमताङ्गीकारेण मध्यमत्वमङ्गीकृत्य कालान्तरानपेक्ष्यवश्यदेयकन्याविषयम्"। पी०धा० ।प्रमिता० तु देयभेदात् मासभेदस्य व्याख्यातोक्ता 'तपतीक्षणयोर्मध्ये चान्द्रोमासः प्रशस्यते । अन्येषु सर्वदेशेषु सौरो व्रतविवाहयोः। विन्ध्यादेर्दक्षिणे भागे चान्द्रोमासः प्रशस्यते । उदग्भागे तु विन्ध्यस्य सौरमानं विधीयते । अन्येषु सर्वदेशेषु मिश्रमानं प्रकल्पयेत्"। मासभेदे फलभेदमाह ज्यो०त० भुजबलः "आषाढे धनधान्यभोगरहिता नष्टप्रजाः श्रावणे वेश्या भाद्रपदे दुष्टे च मरणं रोगान्विता कार्त्तिके । पौषे प्रेतवती वियोगबहुला चैत्रे महोन्मादिनी" निर्ण०सि० व्यासः । "माघफाल्गुनवैशाखे यद्यूढा मार्गशीर्षके । ज्येष्ठे वाषाढमासे वा सुभगा वित्तसंयुता । श्रावणे वापि पौषे वा कन्या भाद्रपदे तथा चैत्रान्वयुक्कार्त्तिकेषु यातिं वैधव्यतां खलु" अत्राषाढस्य शुभता दर्शनात् प्राक्, तदुत्तरमशुभत्वम् अतः प्रतिसरः प्रागुक्तः । अत्र जन्ममासादिनिषेधः "आद्यगर्भसुतकन्ययोर्द्वयोर्जन्ममासभगिनौ करग्रहः। नोचितोऽथ विबुधैः प्रशस्यते चेद्वितीयजनुषोः सुतप्रदः" मु०चि० "यस्मिन् चान्द्रे मासे जन्म स जन्ममासः नक्षत्रतिथिसाम्यात्मको मासो जन्ममासोऽभिधीयते । इयमप्यादिप्रकरणे "जन्मर्क्षमासतिथय" इति पद्यव्याख्यावसरे विविच्य व्याख्यातमस्माभिः, यस्मिन्नृक्षे जन्म तज्जन्मभं यस्यां तिथौ जन्म सा जन्मतिथिः । समाहारद्वन्द्वः आगमशासनस्य नित्यत्वात्तुल्यभावः । उपलक्षणत्वात्तन्मुहूर्त्तोऽपि । तत्राद्यगर्भसुतकन्ययोर्द्वयोः करग्रहो विवाहो नोचितो निषिद्ध इत्यर्थः । यदाह वसिष्ठः । "स्वजन्ममासर्क्षतिथिलग्नेषु वैनायिकाद्युद्गणेषु चैवम् । नोद्वाहमात्माभ्युदयाभिकाङ्क्षी नैवाद्यगर्भद्वितये कदाचित्"। क्षणोसुकूर्त्तः नारदोऽपि "न जन्ममासे जन्मर्क्षे न जन्मदिवसेऽपि वा । आद्यगर्भसुतस्याथ दुहितुर्वा करग्रहः"इति । जन्मदिवसे जन्मतिथौ । आवश्यकत्वेऽपवादो जगन्मोहने "जातं दिनं दूषयते वसिष्ठः पञ्चैव गर्गस्त्विदिनं तथात्रिः । तज्जन्मपक्षं किल भागुरिश्च व्रते विवाहे गमने क्षुरे चेति" पी०धा० ।ज्यो०त० तु "चाष्टौ च गर्गस्त्रयनोदशाहम् । जन्माख्यमासं किल भागुरिश्च व्रते विवाहे क्षुरकर्णवेधे" तृतीयपादादि पाठः "ऋक्षेति द्वितीयजनुषोरनाद्यगर्भयोर्द्वितीयोद्वाहः तर्हि सुतप्रदो विबुधैः पण्डितैः प्रशस्यते । एतच्च तृतीयगर्भादावपि द्रष्टव्यम् । सर्वथाद्यगर्भराहित्यं विवक्षितम् । केचित् "चेदनाद्यजनुषोरिति" पठन्ति । यदाह च्यवनः "जन्मर्क्षे जन्ममासे वा तारायामथ जन्मनि । जन्मलग्ने भवेद्दूढा पुत्राढ्या पतिवल्लभेति" । चण्डेश्वरः "जन्ममासे तु पुत्राढ्या धनाढ्या जन्मभोदये । जन्मलग्ने भवेद्दूढा दृष्ट्वा सन्ततिसौख्यभागिति" एतच्चानाद्यगर्भविषयम् । "आद्यगर्भे साक्षान्निषेधाभिधानात्" पी०धा० । ज्यो०त०तु कन्याविषयमिदं न वरविषयम् । "उद्वाहश्च कन्याया जन्ममासे प्रशस्यते"इति श्रीपतिवचनात् इति समर्थितम् । अथ जन्मर्क्षादिमासे विवाहे विशेषः । "ज्येष्ठद्वन्द्वं मध्यमं संप्रदिष्टं त्रिज्येष्ठत्वे नैव युक्तं कदापि । केचित्तूर्यं वह्निगं भोग्यचान्द्रैर्नान्योन्यर्क्षैरन्ययोः स्याद्विवाहः" मु०चि० "पुत्रोज्येष्ठः कन्या च ज्येष्ठा मासोऽपि ज्येष्ठः इत्येतत्त्रिज्येष्ठम् । इदं ज्येष्ठत्वयुक्तं तत् कदापि नैव युक्तं नैव प्रशस्तम् । ज्येष्ठे मासे ज्येष्ठवधूवरयोर्नैव विवाहः कार्य इत्यर्थः । यदात्वेकतरज्येष्ठत्वं तदा ज्येष्ठमासेऽपि भवति । यदाह गुरुः "न ज्येष्ठे ज्येष्ठयोः कार्यं जनार्योः पाणिपीडनम् । तयोरन्यतरे ज्येष्ठे ज्येष्ठमासेऽपि कारयेत्" इति । एतच्चान्यतरज्येष्ठत्वं द्विविधं ज्येष्ठमासो ज्येष्ठोवरश्च, ज्येष्ठोमासः कन्या च ज्येष्ठा एतच्च द्वन्द्वं मध्यमं संप्रदिष्टमगतिविषयकमित्यर्थः । एकोज्येष्ठोऽन्यद्वयमज्येष्ठमुत्तममेव यदाह व्यासः "द्वौ ज्येष्ठौ मध्य-

मौ प्रोक्तावेक ज्येष्ठ [illegible]। ज्येष्ठत्वं न कुर्वीत विवाहे सर्वसम्मतमिति। [illegible] "अज्येष्ठा कन्यका यत्र ज्येष्ठपुत्रोवरो यदि। व्यत्ययेना तयोस्तत्र ज्येष्ठमासः शुभप्रदः" इति। केचित्तु ज्येष्ठमासाभावेऽपि परकन्योद्वाहत्वमपि मध्यमाकुत्सितम्। यथाऽन्यतरज्येष्ठता दार्ढ्यं विवक्षितम्। तदयुक्तं प्रायुक्तं। किन्तु जन्ममास ज्येष्ठमासयोरभावेऽपि ज्येष्ठयोर्वधूवरयोः सर्वथा निषिद्धो विवाहः। यदाह गर्गः "ज्येष्ठाया कन्यकायाश्च ज्येष्ठपुत्रस्य वै मिथः। विवाहो नव कर्त्तव्यो यदि स्यान्निधनं तयोरिति"। तदेतदुक्तं [illegible] "नैवान्योन्यं ज्येष्ठयोः [illegible]" इति। [illegible] स्त्वितदोषाधिक्यकथनं। अतएव [illegible] ज्येष्ठवाचकत्वं समर्थितम्। अत्राश्वपतिवाक्यं उच्यते [illegible] "ज्यायसकत्वे सूर्य [illegible] यद्भरद्वृत्तिकाभ्यां [illegible] [illegible] ज्येष्ठस्य वरस्य कन्यायाश्च विवाहः शुभः [illegible] कैश्चिच्च एतच्च तुल्यन्यायत्वाज्ज्येष्ठापत्यस्य [illegible] इति सामान्यतो मङ्गलकृत्यनिषेधेऽपि द्रष्टव्यं यदाह भरद्वाजः "ज्येष्ठे ज्येष्ठस्य कुर्वीत भास्करे वानलस्थिते। नीलसप्तमी कार्याणि दिनानि च वर्जयेत्"। विशेषमाह स एव। दशाह ज्यैव गर्भस्तत्पितरौ वृद्धयति। अर्कभौम्यानलस्थितो सुनि त्याह पराशरः इति। तच्चान्यैरपि। "शक्तिकार्य रविलग्नकृत्वा ज्येष्ठे ज्येष्ठस्य कारयेत्। उत्सवादीनि कार्याणि दिनानि दश वर्जयेत्। अतएव विवाहश्च चूडाकर्मश्च वेधनम्। ज्येष्ठमासे न कुर्वीत कल्याणञ्चोद्वहेत्सुतमिति"। यत्र ज्येष्ठपुत्रदुहित्रोर्ज्येष्ठमासस्यागर्गार्थेऽपि मङ्गलकृत्यनिषेधमाह वासिष्ठः, 'मार्गशीर्षे तथा ज्येष्ठे विवाहञ्चौलमेव च। ज्येष्ठपुत्रदुहित्रोश्च न कुर्वीत व्रतत्रयं'। भरद्वाजोऽपि "मार्गशीर्षे तथा ज्येष्ठे चौरं परिणयं व्रतम्। आद्यपुत्रदुहित्रोश्च यत्नतः परिवर्जयेत्" इति। जैमिनिः। "आद्यगर्भभवपुत्रकन्ययोर्ज्येष्ठमासि न च जातु मङ्गलम्" इत्युक्तम्) स्वयं च "अन्यकर्मा ज्येष्ठे कैश्चिन्मार्गेऽपि नेष्यते इत्युक्तं प्राक्, कैश्चिदुपेक्षणं विवाहाचाराभ्यं स्वयमितुकृतम्" मी० भा०। "सुतपरिणयात् षण्मासान्तः सुताकर्णवेधनं न च निजकुले तद्वद्वा मण्डनादपि सुमुण्डनम्। न च सहजयोर्द्वयं भ्रात्रोः सहोदरकन्यके न सहजसुतोद्वाहोऽब्दार्धे शुभे न पितृक्रिया" स्मृचि०। "देहलीदीपन्यायेनात्रापि निजकुल इति सम्बध्यते निजकुले स्वगे सुतस्य परिणयाद्विवाहात् परतः सौरमासषट्कमध्ये सुतायाः कन्यायाः विवाहो न स्यात्। उक्तञ्च वसिष्ठेन। "पुत्रोद्वाहाच्चैव पुत्र्याः कदाचिदा षण्मासात्कार्यमुद्वाहकर्मेति"। नारदोऽपि। "पुत्रोद्वाहात्परं पुत्रीविवाहो न प्रशस्यते। व्यत्ययेन व्रतमुद्वाहं मङ्गलाद्यापि मङ्गलमिति" (ऋतूना सौरत्वात् सौरषण्मासवर्जनमुक्तम्) अयञ्च निषेधः कुलपरोऽवगन्तव्यः। यदाह व्यासः। "स्वीविवाहः कुले निर्गमः कथ्यते पुत्रविवाहः प्रवेशो वसिष्ठादिभिः। निर्गमादादितो न प्रवेशोक्तितस्तत्र संवत्सरान्नोऽवधिः कीर्त्तितश्च" इति। निजकुल इति। स्वगे पुत्रस्य कन्यायाश्च वा मण्डनाद्विवाहान्मण्डनञ्चौलसुपनयनं मङ्गलान्नान्दीव्रतचतुष्टयं समावर्त्तनं वा तद्वत् षण्मासान्तर्न कार्यम्। यदाहुः "कुले व्रतत्रयादर्वाक् मुण्डनान्न तु मुण्डनमिति"। तस्मान्मुण्डनान्मुण्डनं कार्यं तथा कन्या विवाहादनन्तरं पुत्रस्य विवाहः कार्य इत्यर्थः। यदाह नारदः। "सुमुण्डनान्मुण्डनं कार्यं मङ्गलाद्यैव मुण्डनमिति"। वसिष्ठः "पुत्रीविवाहात् परतः सदैव शुभप्रदः पुत्रविवाहकर्मेति" नचैवं, सहजयोः सोदरयोर्भ्रात्रोः स्वकोदरकन्यके न देये नोढ्वाद्ये। उक्तं च नारदेन "नचैकजन्मनो पुत्रीरेकजन्ये तु कन्यके। नानुद्वाहो निकट मण्डनद्वय मिति" "एकजन्मे तु कन्ये द्वे पुत्रयोर्नैकजन्मयोरिति" श्रीदत्तोपाध्यायः। अत्र चकारोऽनुक्तसमुच्चयार्थः। तेनैकस्मै वराय सहोदरकन्याद्वयमपि न देयमित्यर्थः। "न पुत्रीद्वयमेकस्मै प्रदद्यात् कदाचनेति" वसिष्ठोक्तेः नारदोक्तेश्च। "प्रत्युद्वाहोनैव कार्योनैकस्मै दुहितृद्वयमिति"। प्रत्युद्वाहोविनिमयविवाहः मतपत्न्यां चेत्तया कन्या दीयते तदा मयापि त्वत्पुत्राय कन्या देयत्वेन पणबन्धरूपः। (परिवर्त्त) एतादृशः पणबन्धोऽग्न्यादिदानेऽपि द्रष्टव्यः। सुतस्य सुतश्च सुतौ सकृत्पाणिग्रहणेऽवगेषः। सुता च सुता च सुते पूर्ववदवगेषः। सुता च सुतश्च सुतौपुमान् स्त्रियेत्यवगेषः। सुतौ च सुते च इति द्वन्द्वैकशेषाणां सन्धः अत्रापि पुमान् स्त्रियेत्यवगेषः। सहजाश्च ते सुताश्चेति कर्मधारयः। तेषां सोदरभ्रातॄणां विवाहः अब्दार्धे वर्षार्धे सौरषण्मासमध्ये न कार्यः। यदाहुनारदः "विवाहश्चैकजन्यानां षण्मासाभ्यन्तरे यदि। असंशयं त्रिभिर्वर्षैस्तत्कर्ता विधवा भवेत्"। विवाह इत्युपलक्षणम्। तेन समानसंस्कार एकमाहजयोः पुत्रयोः कन्ययोर्वा पुत्रकन्ययोर्वा न कार्यः

त्यर्थः । तथा च वृद्धमनुः "एकमात्रजयोरेकवत्सरे पुरुषस्त्रियोः । न समानक्रियाङ्कुर्य्यान्मात्रभेदे विधीयते" इति । समानक्रिया चूडाकरणादिका एकवर्षमध्ये निषिद्धेत्यर्थः । एकवत्सर इति सावकाशकालद्योतनाय । षण्मासमध्ये तु सर्वथैव न कार्य्या । "विवाहस्त्वेकजन्यानां षण्मासाभ्यन्तरे यदीति" नारदवाक्यस्वरसात् । पराशरोऽपि "एकोदरप्रसूतानामेकस्मिन् वत्सरे यदि । पाणिग्रहोभवेच्चूनं तत्रैका विधवा भवेदिति" तुल्यन्यायत्वाद्यज्ञोपवीतसंस्कार्य्यत्वात् तयोरन्यतरस्य नाश इत्यर्थः "नैकदा सप्तजन्मद्वयमिति" वसिष्ठोक्तेः । एकदा एकस्मिन्वर्षे सप्तजन्मचौलसुपनयनं वा" "पुत्रीपरिणयादूर्ध्वं यावद्दिनचतुष्टयम् । पुत्रान्तरस्य कर्त्तव्यं नोद्वाहमिति सूत्र्य इति" गर्गवाक्यन्तु भिन्नमात्रविषयमुपेक्ष्यपराशरवाक्यस्वरसात् । "समानामपि क्रिया कार्य्या मात्रभेदे तथैव च । विवाहे दुहितुः कार्य्यो न विवाहस्तनुद्भवेति" नारदोक्तेश्च । वसिष्ठेन तु विशेषोऽभिहितः । "एकोदरप्रसूतानां मात्र कार्य्यत्रयं भवेत् । भिन्नोदरप्रसूतानां नेति शातातपोऽब्रवीदिति" । चौलोपनयनविवाहरूपं कार्यत्रयम् । तदुक्तं व्यासेन । "आदौ चौलं ततो मौञ्जी विवाहश्च शुभप्रदः । मात्रभेदे बुधैरेतो मातृरेको न कर्हिचिदिति" । एवं स्थिते भिन्नोदरमङ्गलं सत्यावश्यकत्वे एकस्मिन् मण्डपे न कार्य्यम् । किञ्च गर्भभेदादाचार्य्यभेदाद्वा कार्य्यं यदाह वसिष्ठः । "द्वियोनिजं त्वेकगर्भेऽपि नेष्टं शुभं तु पश्चाच्चाभिदिनेश्च । आवश्यकं शोभनसत्रसो वा द्वारेऽथवाचार्य्यभिदेतोऽपि" इति ! द्वारे द्वारभेदे ।

यमलजातयोस्त्वपत्ययोर्नियतकालानां जातकर्मादिकर्मणामेकक्रियानिषेधाभावो वर्षभेदेन तदसम्भवात् । अतो यमलजातयोरुक्तनिषेधो नास्ति । "एकस्मिन् वत्सरे प्राप्ते कुर्याद्यमलजातयोः । चौरञ्चैव विवाहञ्च मौञ्जीबन्धनमेव चेति" पराशरोक्तेः । चौरञ्चौलम् । भट्टकारिकायां च "एकस्मिन् वत्सरे चैव वासरे मण्डपे तथा । कर्त्तव्यं मङ्गलं स्त्रीणां भ्रातृणामेव चेति" । तत्रापि ज्येष्ठानुक्रमेण । "जन्मज्येष्ठेन चाह्नान् सुव्रताश्वयुग्यापि स्मृतम् । यमयोश्चैव गर्भेषु जन्मतोज्येष्ठता मतेति" मनूक्तेरादौत्पन्नस्य ज्येष्ठत्वम् । "यस्य जातस्य यमयोः पश्यति प्रथमं मुखम् । सन्तानः प्रथमस्यैव तस्मिन् ज्येष्ठ्यं प्रतिष्ठितमिति" । सन्तानोवंशः । शुभे इति शुभे विवाहादिमङ्गलकार्य्ये पितृक्रिया श्राद्धक्रिया न कार्य्या विशेषेणाभिधानात् कुलेऽयं निषेधः मङ्गले नाप्यमङ्गलमिति" नारदोक्तेः । अमङ्गल श्राद्धम् । तु किन्तु समाप्ते एव मङ्गले कार्य्यमित्यर्थः । अथवा श्राद्धदिने समीपस्थिते तदनन्तरं लग्नमवधार्य्य विवाहादिमङ्गलं तत्र कार्य्यमित्यर्थः" "पी०धा० । "बध्वा वरस्यापि कुले त्रिपूरुषे नाशं व्रजेत्कथन निश्चयोत्तरम् । मासोत्तरं तत्र विवाह दृश्यते यान्यास्य वा सूतकनिर्गमे परैः" पु०चि० "निश्चयोत्तरं वाग्दानानन्तरं यदि वध्वाः कन्यायास्तथा वरस्यापि कुले वंशे तत्रापि त्रिपूरुषमध्येकस्य सपिण्डोनाशं व्रजेत् प्राप्नुयात् तत्र मासोत्तरं मरणदिनादारभ्य त्रिंशद्दिनं प्रतिकूलं ततः परान्या स्वनुष्ठिता विवाहः शुभेनेष्यते । उक्तञ्च स्मृतिचन्द्रिकायाम् । "ऋते वाङ्निश्चये पश्चान्मृत्युर्भवति गोत्रिणः । तदा न मङ्गलं कार्य्यं नारीवैधव्यदं ध्रुवमिति" । विशेषमाह मेधातिथिः । "पुरुषत्रयपर्य्यन्तं प्रतिकूलं सगोत्रिणाम् । प्रमेयनिर्णयौ तद्वत् तथा सप्तजनमण्डने" । इदं तु पित्रादिभिन्नविषयं यथोक्तं माण्डव्येन "अन्येषां तु सपिण्डानामाशौचं मासमिष्यते । तदन्ते शान्तिकं कृत्वा ततो लग्नं विधीयते" इति । पित्रादिमरणे तु विशेषमाह गौतमः । "वरबध्वोः पिता माता पितृव्यश्च सहोदरः । एतेषां प्रतिकूलञ्च महाविघ्नप्रदं भवेत् । पिता पितामहश्चैव माता वापि पितामही । पितृव्यः स्त्रीसुतोभ्राता भगिनी वा विवाहिता । एभिरेव विपन्नैश्च प्रतिकूलं बुधैः स्मृतमिति । अन्यैरपि विपन्नैश्च केचिदूचुर्न तद्भवेत्" । अन्यैः उक्तेभ्योऽन्यैः । प्रतिकूलस्य नियतं कालमाह माण्डव्यः "वाग्दानानन्तरं यत्र कुलयोः कस्यचिन्मृतिः । तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत् । पितुराशौचमध्ये स्यात् तदर्द्धं मातुरेव हि । मातृव्यस्य भार्य्यायास्तदर्द्धं भ्रातृपुत्रयोः" । दैवज्ञमनोहरे विशेषः "प्रतिकूले सपिण्डस्य मासमेकं विवर्जयेत् । विवाहस्तु ततः पश्चात् तयोरेव विधीयते । दुर्भिक्षे राष्ट्रभङ्गे च पितोर्वा प्राणसंशये । प्रौढायामपि कन्यायां प्रतिकूलं न दुष्यतीति मेधातिथिः ।" दीर्घरोगाभिभूतस्य दूरदेशस्थितस्य च । उदासवर्त्तिनश्चैव प्रतिकूलं न विद्यते । सङ्कटे समनुप्राप्ते यात्रावल्लग्नेन योगिना । शान्तिकृत्वा गणेशस्य कृत्वा तां शुभमाचरेत् । अकृत्वा शान्तिकं यस्तु विवाहे सति दारुणे । यः करोति शुभं तावद्विघ्नं तस्य पदेपदे" इति । अथावश्यकत्वेऽपवादमाहाथवेति । "स्वस्वर्णपुरस्कारेणाशौचनि-

र्गमे मरणाद्यौचनिर्गमे सति शान्त्या च स्वनुष्ठितया विवाहः कार्य्य इति परैराचार्य्यैरिष्यते । यदाह मेधातिथिः । "प्रेतकार्य्याग्न्यनिवर्त्य चरेन्नाभ्युदयक्रियामिति" ज्योतिःप्रकाशेऽपि । "प्रतिकूलेऽपि कर्त्तव्योविवाहोमासमन्तरा । शान्तिं विधाय गां दत्त्वा वागृद्यादि चरेद्बुधः" इति । सत्यामप्यशक्तत्व स्वस्याद्यौचादनन्तरं मासमध्येऽपि शान्तिं विधाय विवाहः कार्य्य इत्यर्थः मी०धा०"चूडा व्रतस्थापि विवाहतोव्रताच्चूडा नेष्टा पुरुषत्रयान्तरे । बधूप्रवेशाच्च सुतादिनिर्गमः षण्मासतोवाऽब्दविभेदतः शुभः स्मृ०चि० "चूड़ा चौलं व्रतमुपनयनञ्च अपिशब्दात् महानाम्न्यादिसमावर्त्तनञ्च विवाहात् परतः पुरुषत्रयान्तरएव नेष्टम् । तथा व्रतादुपनयनाच्चूड़ा पुरुषत्रयपर्य्यन्तं नेष्टा । तथा बध्वाः सुतायाः कन्यायाः विनिर्गमोऽपि पुरुषत्रयपर्य्यन्ते नेष्टः एतन्मूलवाक्यं "पुरुषत्रयपर्य्यन्तमित्यादि""आदौ चौलं ततो मौञ्जीत्यादि"च प्राग्लिखितम् । तत्रानुमूलपुरुषस्य चतुर्थादौ नायं दोषः । स चायं दोषः पुरुषत्रये षण्मासपर्य्यन्तमेव अतः षण्मासत इति मासषट्कानन्तरमयं व्यत्यस्तोऽपि विवाहादिः सर्वोविधिः शुभः । एतन्मूलवाक्यम् "कुले व्रतत्रयदर्वाक्" इत्यादि प्रागुक्तम् । अत्रापवाद उच्यते वेति अथवाऽब्दभेदात् वर्षभेदात् षण्मासमध्येऽपि शुभः । यथा माघे माघि विवाहो वैशाखे चौलं यज्ञोपवीतं वा भवत्ये वेत्यर्थः । तदुक्तं संक्षितासारावल्याम् "फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनायने । भेदादब्दस्य कुर्वीत नर्त्तुत्रयविलङ्घनमिति" अत्र फाल्गुनपदं प्रागब्दव्रातमासानन्तरस्याप्युपलक्षणं चैत्रपदं चोत्तरवर्षगतवैशाखाद्युपलक्षणं तत्र कैश्चित्कन्यायेन यत्र खल्पव्यवधानान्तरं तत्रापि निषेधाभावस्तत्रौषधिकल्पव्यवधाने किं वाच्यम्, अब्दभेदस्यैव प्रयोजकत्वात्" मी०धा०। अथ प्रसङ्गानुमूलादि भूतप्रसूयोर्बधूवरयोः श्वशुरादिपीडकत्वमाह "श्वश्रूविनाशमग्निजौ सुतरां विधत्तः कन्यासुतौ निर्ऋतिजौश्वशुरं कृतम् । ज्येष्ठाभजाततनया खधवाप्यजञ्च शक्राग्निजा भवति देवरनाशकर्त्री" स्मृ०चि० । "अग्निजावाक्षे भोत्पन्नौ कन्यासुतौ श्वश्वाः साक्षात्कर्त्तृमातृविनाशं विधत्तः कुरुतः तथा निर्ऋतिजौ मूलोत्पन्नौ कन्यासुतौ श्वशुरं कृतोमारयतः । उक्तञ्च वसिष्ठेन "मैत्रेत्यभोद्भूतसुतः सुता वा माताद्यवश्यं श्वशुरं निहन्ति । तदन्यपादे जनितो निहन्ति मैत्रोत्क्रमेणाग्निभवः कलत्रमिति" अग्निभव इति पुंस्त्वमविवक्षितम् । सुतः सुता वेति पूर्व्वोक्तैः "मूलजा श्वशुरं हन्ति व्यालजा च तदङ्गनामिति"नारदोक्तैश्च तस्य श्वशुरस्याङ्गनां पत्नीम् । वरस्य कन्यायाश्च साक्षान्मातरं न तु सापत्नमातरं हन्तीत्यर्थः । तदेव स्पष्टयन्नङ्गं वसिष्ठेन । "जनकं जननीं हन्ति भर्त्तुर्मूलाग्निधिष्ण्यजा" । तुल्यन्यायत्वात् कन्याया अपि साक्षान्मातरम् । ज्येष्ठेति ज्येष्ठानक्षत्रोत्पन्नकन्या स्वश्वश्रूं भर्त्तुर्ज्येष्ठभ्रातरं हन्ति । शक्राग्निजा विशाखानक्षत्रोत्पन्नकन्या देवरस्य भर्त्तुः कनिष्ठभ्रातृपत्नीं भवति" । यदाह वसिष्ठः । "सुरेज्यताराजनिता धवाश्वजं द्विदैवताराजनिता तु देवरमिति"। हन्तीत्यनुवर्त्तते । नारदोऽपि । "ऐन्द्री पत्यश्वजं हन्ति देवरन्तु द्विदैवजेति"मी० धा०अत्र विशेषः"हीशाद्यपादत्रयजा कन्या देवरसौख्यदा । मूलान्त्यपादसार्पाद्यपादजातौ तयोः शुभौ" । स्मृ०चि० "हीयं विशाखा । यदाह व्यासः । "विशाखा तुलयायुक्ता देवरस्य शुभावहा । विशाखा वृश्चिकोद्भूता देवरं हन्त्यसंशयमिति"। वृद्धनारदोऽपि "न हन्ति देवरं कन्या तुलाभिश्रद्विदैवजा । चतुर्थपादजा त्वाद्या दुष्टा वृश्चिकपुच्छवत्" । तस्माद्विशाखाचतुर्थपादे निषेधः फलित" इत्यर्थः । मूलेति । तयोः श्वशुरश्वश्वोः मूलचतुर्थचरणोत्पन्नौ तौ कन्यासुतौ श्वशुरसौख्यदौ । आश्लेषाद्यचरणोत्पन्नौ कन्यासुतौ तयोः सौख्यदौ तदुक्तं नारदेन ।"सुतः सुता वा नियतं श्वशुरं हन्ति मूलजः । तदन्यपादजोनैव तथाऽश्लेषाद्यपादजः" अत्र पुंस्त्वमविवक्षितं हेतुः स एव"मी०धा०। इति बधूवरयोः सामान्यतोगुणदोषविचारः

अथ बधूवरयोर्भेलकम् । तत्र कूटान्यनेकविधानि तत्र केचिद्दृश कूटान्याहुः । तदाह नारदः । "दिनं गणश्च माहेन्द्रं स्त्रीदीर्घं योनिरेव च । राशिराश्यधिपौ रज्जु र्वश्यं वेधो दश स्मृताः" । "पुनश्च वर्णकूटश्च माहेन्द्रं वा ततः परम् । एते द्वादश योगाश्च प्रोतिभेदाः प्रकीर्त्तिताः" । अन्येऽष्टादशकूटान्याहुः । यदाह गर्गः "माहेन्द्रं गणकूटञ्च दिनकूटञ्च योनिजम् । स्त्रीदीर्घं रज्जुकूटञ्च वश्यं वर्णाख्यकूटकम् । राशिराश्यधिपाख्ये च वेधौ नाड्याख्यकूटकम् । भूतलिङ्गाख्यकूटञ्च जात्याख्यं पक्षिकूटकम् । योगिनीगोत्रकूटन्तु कूटान्यष्टादशैव तु । दम्पत्योर्हृद्विकारीणि यत्राश्विन्यानि शास्त्रतः"इति । तत्र दयादिकूटानां तत्तद्दोषविशेषप्रसिद्धत्वात् तानि विहाय

सर्वदेशप्रसिद्धान्यष्टकूटानि सलक्षणानि व्याह पी०धा०

"वर्णैक्यं तथा तारा योनिश्च ग्रहमैत्रकम् । गणमैत्रमभकूटञ्च नाडी चेते गुणाधिकाः" मु०चि०।

"एते राशिकूटभेदवर्णादिमैत्र्यां सत्यां गुणाधिका एकादिगुणाधिका स्युः । वर्णमैत्र्यामेकगुणः, वश्ये द्वौ गुणौ, तारायां त्रयोगुणाः, योनिमैत्र्यां चत्वारः, ग्रहमैत्र्यां पञ्च, गणमैत्र्यां षट्, मङ्गकूटे सप्त, नाडीभेदेऽष्टौ इत्यर्थः । तदुक्तम् "वर्णैक्यं तारा योनिग्रहभकूटनाडिकाश्चेति । क्षेया यथोत्तरं ते बलिनः स्त्रीपुंसयोर्घटन" इति । दैवज्ञमनोहरेऽपि । "नाड्यैक्ये गुणा अष्टौ सप्त मङ्गाभिकूटके । षट् गुणा गणमैत्र्याञ्च सौहार्दे पञ्चकं तयोः । योनिमैत्र्याञ्च चत्वारस्त्रयस्ताराबले गुणाः । वश्यत्वे द्वौ गुणौ प्रोक्तौ वर्णैक्यः प्रकीर्त्तितः इति" पी०धा०। तत्रादौ वर्णकूटमाह

"द्विजाभ्रवालिकर्कटास्ततो नृपा विशोऽङ्घ्रिजाः । वरस्य वर्णतोऽधिका वधूर्न वश्यते बुधैः" मु०चि०।

"मीनवृश्चिककर्कराश्योर्द्विजाः ब्राह्मणाः। ततोऽनन्तरमन्ये मेषसिंहधनूराश्योर्नृपाः क्षत्रियाः । वृषकन्यामकराश्रिणो वैश्याः । मिथुनतुलाकुम्भा अङ्घ्रिजाः शूद्राः । ततश्च वधूवरराश्योर्वर्णौ ज्ञात्वा वरस्य वर्णतः ब्राह्मणादिकाद्वधूरधिका उच्चवर्णा बुधैर्न वश्यते । किन्तु समा हीना वा वश्यत इत्यर्थः। यदाह नारदः । "भ्रवालिकर्कटाविप्रास्तदूर्ध्वाः क्षत्रियादयः । पुंवर्णराशेः स्त्रीराशौ समे हीने तथा शुभम् । वर्णश्रेष्ठा तु या नारी वर्णहीनस्तु यः पुमान् । विवाहं यदि कुर्वीत तस्या भर्त्ता विनश्यति"। अत्रैको गुणो वर्णाधिके वरे वर्णसमे वा वर्णहीने तु गुणाभावः तदुक्तं दैवज्ञमनोहरे । "एकोगुणः सदृग्वर्णे तथा वर्णोत्तमे वरे । हीनवर्णे वरे शून्यं केऽप्याहुः सदृशे दलमिति । दलमर्द्धम् । पी० धा० । अथ वश्यकूटम् । "क्षित्वा मृगेन्द्रं नरराशिवश्याः सर्वे तथैवं जलजाश्चभक्ष्याः । सर्वेऽपि सिंहस्य वशे विनालिं क्षेयं नराणां व्यवहारतोऽन्यत्" मु० चि० । "नरराशयो मिथुनकन्या तुलाः एषां सर्वेऽपि मेषादयः सिंहं त्यक्त्वा वश्याः नरा मनुष्याणां जलचराः कर्कमकरकुम्भलीनास्तु भक्ष्याः किं पुनर्वश्या इति सूचयितुं तुशब्दः । सिंहस्य वशे अलिं वृश्चिकं विना सर्वे राशयोवश्याः अन्यदुक्तं चतुष्पदानां स्थलचराणां चतुःपदजलचराणां वा परस्परं वश्यावश्यं, नराणां मनुष्याणां व्यवहारतो ज्ञेयं यदाह वसिष्ठः 'वश्याख्यक्ष्या राशयोऽन्ये नृभानां सिंहन्यक्षाऽप्येवमन्ये विधेयाः । कीटन्यक्त्वा लोकतोन्यत्प्रसिद्धम् वश्यावश्यं नैव तोयालयाख्योः" तोयालया जलचराः अलिश्च ते परस्परं वश्या नैव स्युरित्यर्थः । अत्र गुणविभागो दैवज्ञम० "सख्यं वैरं च भक्ष्यं च वश्यमाकृतिधा बुधाः । वैरे भक्ष्ये गुणाभावोद्वयोः सख्ये गुणद्वयम् । वश्यवैरे गुणस्त्वेको वश्यभक्ष्ये गुणोऽर्द्धक इति" यत्पुनर्वधूवरयोः परस्परं तुल्यमेवोक्तं तथापि सत्यावश्यत्वे वरं प्रति भक्ष्यत्वं वश्यत्वं वा स्त्रियोऽपेक्ष्यं न तु विपरीतं "वर्णज्येष्ठा तु या नारीत्यनेन" समानन्यायत्वात् "अन्योन्यवश्यत्वे तूत्तममेव"पी०धा०। अथ ताराकूटम् ।

"कन्यार्क्षाहरभं यावत् कन्याभं वरभादपि । गणयेच्चवहृच्छेषे त्रीण्यृक्षाण्यसत् स्मृतम्"मु०चि० "कन्याजन्मनक्षत्रात् वरजन्मनक्षत्रं यावद्गणयेत्तथा वरजन्मनक्षत्रादपि कन्याजन्मनक्षत्रं गणयेत्ततोऽवगतेऽङ्के नवभिर्भक्ते यदवशिष्टं तच्चेत् त्रिपञ्चसप्तमितमभवेत्तदाऽसत् अशुभदं स्मृतमन्यथा द्वित्रिचतुःषडष्टनवमितश्चेत्प्राप्तदा शुभमित्यर्थादुक्तमवति यदाह नारदः "स्त्रीभमारभ्य गणने नवपर्व्वाप्तयः क्रमात् । जन्मतिपञ्चसप्तस्थम्शुभं स्याद्दरजन्मभम् । पुंभमारभ्य गणने स्त्रीभञ्जन्मादिके स्थले । स्त्रीविभागो भवेत्तस्माद्विकूटं विवर्जयेत्" दिनकूटं ताराकूटम् । याज्ञवल्क्येऽपि "नरर्क्षाद्गणयेद्यावत्कन्यर्क्षं कन्याभादपि । वरभं न वहृच्छेषास्तारा: सन्ति परस्परम् । लब्धा त्रिपञ्चसप्ताख्याः शेषोद्वाहे मिथः शुभाः"इति यत्तु कश्यपेन "गणयेत्कन्याधिष्ण्यादारभ्य वरजन्मभम् । जन्मतिपञ्चसप्तस्थं क्षित्वाऽन्यर्क्षं शुभप्रदमिति" । कन्यानक्षत्रादेव गणनोक्ता । अत एव "भौकभादचलपञ्चसप्ततीयाः शोकवैरविपदेव च तारा"इति केशवार्कैणाप्युक्ता सा त्वावश्यकद्योतनार्था । तथाहि । द्वयोरपि परस्परजन्मनक्षत्रगणने शुभत्वे ऋक्षभेवाशुभत्वे दशुभमेव तत्रैकस्मादन्यतरजन्मनक्षत्रगणनयाऽशुभत्वेऽपि स्त्रीजन्मनक्षत्रादुत्तरजन्मनक्षत्रं त्वशुभं नाभेप्सितव्यमेवेति भावः । अत्र गुणविभागो दैवज्ञम० । "एकतोलभ्यते तारा शुभाचैवाशुभाऽन्यतः । तदा सार्द्धो गुणश्चैव ताराशुद्धा मिथ स्त्रयः । उभयोर्न शुभा तारा तदा शून्यं समादिशेदिति" अत्र यद्यपि नारदादिभिर्जन्मतारा निषिद्धेत्युक्तम् । तदुपन्यस्यता एकजन्मनक्षत्रे तावत् "राक्षसैक्ये चेद्विजन्मनक्षत्रयोः

स्वाश्लेषार्द्रयोः राशियुग्मनर्थवैरिति" वक्ष्यमाणत्वाद्योक्तम्। दशमैकोनविंशतितारयोस्तु निषेधो दुष्टभकूटे ज्ञेयः। सङ्कूटे तु दोषाभावएव"। पी०धा०योनिकूटमाह"अश्विन्यश्वयोर्हयोनिगदितः स्वात्यर्कयोः कासरः, सिंहोवस्त्र जपाद्वयोः समुदितोवाय्वान्ययोः कुञ्जरः। मेषोदेवपुरोहितानलभयोः कर्णाम्बुनोर्वानरः,स्यार्द्रेज्याभिजितोस्तथैव नक्तञ्चराद्राजयोन्योरहिः। ज्येष्ठामैत्रभयोः करङ्ग उदितो मूलार्द्रयोश्चा तथा, मार्जारोऽदितिसार्पयोरथ पचाशोन्योस्तथैवोन्दुरुः। व्याघ्रोद्वीशभचित्रयोरपि च गोरार्यमण्यब्भगार्द्रयोर्योनिः पादगयोः परस्परमहावैरं भयोन्योरुच्यते" स०चि० "अश्विनीशततारयोर्हयः स्वात्यैश्वयोनिरुक्तः१ स्वातीहस्तयोः कासारोमहिष.२। वस्वजपाद्वयोर्धनिष्ठापूर्वाभाद्रपदयोः सिंहः३। याम्यान्त्ययोर्भरण्यरेवत्योः कुञ्जरोहस्ती४। पुष्यकृत्तिकयोः मेषः५ कर्णाम्बुनोः श्रवणपूर्वाषाढयोर्वानरःस्यात्६। उत्तराषाढाभिजितोर्नकुलः७। चान्द्रं मृगः अजयोर्निर्ऋक्षा सङ्गं रोहिणी तयोरहिः सर्प.८। ज्येष्ठानुराधयोः क्रूरक्षो हरिणउदितः९। मूलार्द्रयोश्चा कुक्कुरः१०। तथा पुनर्वस्वाश्लेषयोर्मार्जारः ११। मघापूर्वाफल्गुन्योरुन्दुकमूषिकः१२। द्वौशं विशाखा चित्रा तयोर्व्याघ्र.१३। आर्यमृणम् उत्तरफल्गुनी बभ्रूत्तरभाद्रपदा तयोर्गौ१४। तत्फलमाह पादगयोरिति। एकस्मिन् पादे श्लोकचरणे उक्तनक्षत्रयोर्न्योः परस्परं महावैरं भवेदन्यथा नेत्यर्थः। यथा। "अश्विन्यश्वयोर्हयोनिगदितः स्वात्यर्कयो. कासरः" इतिपादस्थितोक्तयोर्न्योरश्वमहिषयोर्महावैरं भवेत्। एवं सिंहकुञ्जरोरित्यादिष्वपि द्रष्टव्यम्। यदाह वसिष्ठः।"अश्वेभमेषभुजगहयकुक्कुरोतुमेषौतुमूषकमथोन्दुकगोनुलापाः। शार्दूलमाहिषगवारिमृगहयं स्या कीशोऽथ बभ्रुयुगकीशगवाश्वसिंहाः। गौःकुञ्जराविति यथाक्रममाश्विनादिभानामजवलि खलु कल्पितयोनिरूपाः"। नुलापो महिषः, गवारिर्व्याघ्रः कीशोवानरः बभ्रुर्नकुलः।"बभ्रुरगं श्वेणमिभेन्द्रसिंहमोत्राखुसंज्ञस्वजवानरौ च। गोव्याघ्रमश्वोत्तरमाहिषञ्च वैरं भगार्यानृपभल्लयोश्चेति" एतत्फलं सापवादमाहात्रिः। "एकयोनिषु सम्यस्यै दम्पत्योः सङ्गमः सदा। भिन्नयोनिषु मध्यःस्यादरिभावो न चेत्तयोः। योनेरभावे नोद्वाहः स तु कार्य्यो विजोगदः। राशिर्वश्यश्च यद्यस्ति कारयेच्च तु दोषभाक्"। अत्र गुणविभागोदाहृतम० "अष्टाविंशतितारायां योनयस्तु चतुर्दश। मैत्रं चैवातिमैत्रञ्च विज्ञेये नरयोषितोः। महावैरे च वैरे च स्वभावे च यथाक्रमम्। मैत्रे चैवातिमैत्रे च खेन्दुद्वित्रिचतुर्गुणाः" पी०धा०। अथ यद्भमैत्री "मित्राणि दुभगेः कुजेज्यरविनः शुक्रार्कजौ वैरिणौ, सौम्यश्चास्य समो, विधोर्बुधरवी मित्रे, न चास्य द्विषत्। शेषाश्चास्य समाः, कुजस्य सुहृदश्चन्द्रेज्यसूर्याः, बुधः शत्रुः, शुक्रशनी समौ च, भृगोः सितार्कस्करौ। मित्रे, चास्य रिपुः शशी, शनिरजाजाः समा, गोऽस्तेमित्रार्कारकुजेन्दवोबुधसितौ शत्रू समः सूर्यजः। मित्रे सौम्यशनी, कवेर्यमरवी शत्रू, कुजेज्यौ समौ। मित्रे शुक्रबुधौ शनेः शशिरविक्ष्माजा द्विषोऽन्य समः"सु०चि०

एतत्फलं सापवादमाह जगन्मोहने वसिष्ठः "अन्योन्यमित्रं भवेत् स्वात् सममित्रं तु मध्यमम्। उदासीनं कनिष्ठं स्यान्मृतिदं शात्रवं स्मृतम्। शत्रुमित्रञ्च विज्ञेयं दम्पत्योः कलत्रप्रदम् अन्योन्यसमशत्रुत्वं दम्पत्योर्निरुपद्रवम्'अस्यापवादस्तत्रैव "राशिनाथे विरुद्धेऽपि सबलावंशकाधिपौ, तन्मैत्रेऽपि च कर्त्तव्यं दम्पत्योः शुभमिच्छता। अत्र गुणभेदो दैवज्ञैरम०। "यद्भमैत्रं समुद्दिष्टं गणाः पञ्च प्रकीर्त्तिताः। तत्राधिपतित्वे च मित्रत्वे गुरुपञ्चकम्। चत्वार. सममित्रत्वे द्वयोः साम्ये त्रयो गुणाः। मित्रवैरे गुणश्चैकः समवैरे गुणार्द्धकम्। परस्परद्वेषवैरे गुणशून्यं विनिर्दिशेत्। असङ्गे सममित्रादौ श्लोका स्वाम्नायघोदिताः"पी०धा०। अथ गणकूटम्। "रक्षोनरामरगणाः क्रमतोमघाश्विस्वात्यन्तमूलवरुणानलतज्जराधाः। पौष्णोत्तरात्रयधिपाश्रयभेषु मैत्रादीन्दुहरिपौष्णमरुद्धनि" सु० चि०।

"क्रमत रक्षोनरामरगणाः वाक्यत्रयेणोच्यन्ते। मघा प्रसिद्धा अश्विरश्लेषा वसुर्धनिष्ठा इन्द्रोज्येष्ठा मूल प्रसिद्धं वरुण शततारका अनलः कृत्तिका तज्जा चित्रा राधा विशाखा एतानि भानि रक्षोगणः। पौष्णत्रयम् उत्तरात्रयं चेत्येवं षड्भानि विधाता रोहिणी यमोभरणी इंशः आर्द्रा एतानि भानि नरगणोमनुष्यगणः। मैत्रमनुराधा अदितिः पुनर्वसुः इन्दुर्मृगः हरिः श्रवणः पौष्णं रेवती मरुत् स्वातिः धनिष्ठा अश्विनोरुत्तराषाढाश्च एतानि भान्यमरगणो देवगण इति। यदाह नारदः। "रक्षोगणः पितृत्वाद्रुद्रदैवत्येन्द्रतारकाः। वसुवारोडुमूलाहिवृत्तिकाभिधुतारकाः। तिस्रः पूर्वोत्तराधात्रयमाक्षेणनारकाः। इति मर्त्यगणोज्ञेयः स्वाद्-

मर्त्यगणः परे। हर्यादित्यार्कवायव्यमित्राग्नीज्येन्दुतारकाः" पी०धा०। फलमाह। "निजनिजगणमध्ये प्रीतिरत्युत्तमा स्यादमरमनुजयोः सा मध्यमा संप्रदिष्टा। असुरमनुजयोश्चेन्मृत्युरेव प्रदिष्टो दनुजविबुधयोः स्याद्वैरमेकान्ततोऽत्र" सु०चि०। "असुरमनुजयोः राक्षसमनुष्यगणयोः स्त्रीपुंसयो मृत्युरेव प्रदिष्ट उक्तः इयोरन्यतरस्य वेलाकाङ्क्षायां प्रबलेन दुर्बलं बाध्यते इति न्यायेन मनुष्यगणस्यैव नाश, यदाह नारदः। "दम्पत्योर्जन्मभे चैकगणे प्रीतिरनेकधा। मध्यमा देवमर्त्यानां रक्षोनृणां तयोर्मृतिः" काश्यपः "खगणे चोत्तमा प्रीतिर्मध्यमाऽमरमर्त्ययोः। मर्त्यराक्षसयोर्वैरमसुरासुरयोरपीति" जयमर्थः पुरुषोरक्षोगणः स्त्री मनुष्यगणा तदा वैरं यदि वैपरीत्यमुदा मृत्युः। तथा पुरुषोरक्षोगणः स्त्री देवगणा तदा वैरं वैपरीत्ये मृतिः। उक्तं च। "राक्षसी यदि वा नारी नरो भवति मानुषः। मृत्युस्तत्र न सन्देहो विपरीतः शुभावहः"। याज्ञवल्क्ये। "रक्षोगणः पुमान् स्याच्चेत्कन्या भवति मानवी। कोऽपीच्छति तदोद्वाहं व्यस्तयोऽपीह नेच्छतीति"। एतन्मूल्यन्यायस्याद्वैराक्षसयोरपि दृष्टत्वम्। अत्र गुणाभावो दैवज्ञम०। "षड्गुणा गणसाहस्ये पञ्च स्युः सुरमानुषे। नार्या देवोनरः पुंसस्त्यारोवा गुणास्त्रयः। देवराक्षसयोः शून्यं तथैव नरराक्षसोः। पुंसो रक्षोगणो यत्र नार्यादेवोऽथ वा नरः। गुणौ द्वौ क्रमतस्तत्रैको गुणोधाक्षोऽन्यथा न हीति"। अस्यापवादमाह गर्गः। "यत्रैकमैत्री च राशीशविद्यते नियतं यदि। न गणाभाव जनितं दूषणं स्याद्विरोधनम्"। अत्रापि 'राशीशयोः सुहृद्भावे मित्रत्वे सति नाथयोः। गणादिदोषो न्यूनः स्याद्वाह पुत्रपौत्रवर्द्धन'"। अमुं परिहारं ग्रन्थकृत्स्वयमग्रे वक्ष्यति। मनुरपि। "यत्रैकमैत्री च रज्जुस्थ यदि नाड्यो पृथक् तयोः। विवाहः शुभदः कन्या राक्षसी वा नरोनरः" इति पी०धा०। रज्जुकूटमन्यत्र दृश्यम। अथ नाडीकूटम्"मृत्युः षट्काष्टके ज्ञेयो प्रत्यरिर्नवपञ्चमे। द्विद्वादशे निधनतं द्वयोरन्यत्र सौख्यकृत्" सु०चि०। "स्त्रीपुंसराश्योः परस्परं षडष्टमराशित्वे सति मृत्युर्ज्ञेयः। यथा मेषकन्ययोः वृषधनुषोः। एवं नवपञ्चमेऽपत्यानां बालानां हानिर्ज्ञेया स्यात्। यथा सिंहधनुषोः एवं द्विद्वादशे सति निर्धनत्वं दारिद्र्यं स्यात्। यथा मेषवृषयोः अन्यत्र तृतीयैकादशे चतुर्थदशमे समसप्तमे वा सति सौख्यलक्ष्मीपीडनं स्यात्। यदाह नारदः 'षट्काष्टके मृतिर्नन्दनभे त्वनपत्यता। नैस्वं द्विद्वादशेऽन्येषु दम्पत्योः प्रीतिरुत्तमेति"। अत्र विशेषोऽद्योतिः प्रकाशे। "पुंसोऽष्टहात् सुतगृहे सुतहा च कन्या धर्मे स्थिता धनवती पतिवल्लभा च। द्विद्वादशे धनगृहे धनहा च कन्या रिपुक्षे स्थिता धनवती पतिवल्लभा चेति"। अन्यच्च। "भृगुः कुलीरेण घटेन सिंहोवैरमदः स्यात् समसप्तकोयम्। तुला भृगेणाथ वृषेण सिंहो मेषेण कर्कोमिथुनेन मीनः। चापेन कन्या घटभेन चालिर्दीर्भाग्यदैन्ये दशतुर्यकोऽन्यानिति" पी०धा०। अत्रापवादः "प्रोक्ते दुष्टभकूटके परिणयस्त्वेकाधिपत्ये शुभोऽथो राशीश्वरसौहृदेऽपि गदितो नाड्यात्मशुद्धिर्यदि। अन्यर्क्षंऽपयवैरवित्वसहिते नाड्यात्मशुद्धौ तथा तारा-शुद्धिवशेन राशिवशताभावे निरुक्तो बुधैः" सु०चि। "प्रोक्ते दुष्टराशिकूटे सत्यपि द्वयोः स्त्रीपुंसराश्योरेकाधिपत्ये एकस्वामित्वे परिणयो विवाहः शुभोगदितः। यथा षट्काष्टके मेषवृश्चिकयोस्तुलावृषयोर्वा। नवपञ्चमे त्वेकाधिपत्याभावः। द्विद्वादशे मकरकुम्भयोः। अथ वा राशीश्वरयोः राशिस्वामिनोः सौहृदे मैत्रे परिणयः शुभोगदितः। यथा षट्काष्टके मीनसिंहयोरित्यादौ नवपञ्चमे मेषधनुषोरित्यादौ। द्विद्वादशे मीनमेषयोरित्यादौ। यदाह वसिष्ठः "द्विद्वादशे वा नवपञ्चमे वा षट्काष्टके राक्षसयोगितोर्वा। एकाधिपत्ये भवनेऽथमैत्रे शुभाय पाणिग्रहणं विधेयमिति" राजमा०। "भवेच्चिरं क्लेशे बहुपुत्रवित्तं द्विद्वादशे चार्थमुपैति कन्या। षट्काष्टके सौख्यफलं विधत्ते स्त्रीणां विवाहे यदमैत्रीभावे" इति एकाधिपत्ये पीति शेषः। अतएव यदमैत्रैकाधिपत्याभावे वैरषट्काष्टकमित्यादि वदन्ति। यदाह नारदः "वैरषट्काष्टकं मेषकन्ययोर्घटमीनयोः। चापोलूकयोर्नृयुक कीटभयोः कन्यकलीरयोः। पञ्चास्यहृद्भयोर्जन्मराशे नाड्यात्मशुभदं" इति। उक्ता इयं चापोलूकयोरित्यकारान्तनिर्देशेनोक्तानुसः। एतद्भिन्नं मित्रषट्काष्टकमित्याहुः। तदुक्तं जगन्मोहने "मित्रषट्काष्टकं कीटमेषयोर्हरिपद्मजयोः। ककिचापभयोर्मीनसिंहयोर्मृगयुग्मयोः। कन्यकाकुम्भयोरन्यत् प्रयत्नादेव वर्जयेदिति"। एवञ्च यदमैत्र्यभावे वैरनवपञ्चमसमित्याहुः। तथा च शार्ङ्गधरोशुक्रः। "मीनान्त्यां युते कीटे कुम्भे मिथुनसंयुते। मकरे कन्यकायुक्ते न कुर्याच्चनवपञ्चमे" इति। एतादृशस्य नवपञ्चमस्य फलान्तरमुक्तं कैश्चित् यथा ज्योतिर्निबन्धे शार्ङ्गधरः। "वरबध्वोर्मीनसिंहयोर्जीवमीनो-

स्तद्विनाशकम् । त्रिकोणमीनकीटाढ्यं न स्यादन्यत्र दोषदमिति" । एतत्फलमनार्षत्वादुपेक्ष्यम् । इतोऽन्यत्र मेषसिंहादिकं नवपञ्चमं अष्टमैतीसत्त्वान्नित्यं नवपञ्चममिति ननु मीनकर्कादिकमपि त्रिकोणं अष्टमैतीसत्त्वान्नित्यनवपञ्चममस्तु, कार्यं ? गुरोश्चन्द्रोमित्रमेव चन्द्रस्य तु गुरुः समोऽपि नित्यमित्र "अपदोषतैव विगुणस्य गुणः" इति न्यायात्तथा सति त्रिकोणदोषोच्छेदापत्तिः स्यादिति चेत् उच्यते यत्र ह्येकस्य नित्यत्वमपरस्य समत्वन्तत्र दुष्टनवपञ्चममिति व्यवहारः । तादृशं मीनकर्कादिकं त्रिकोणचतुर्थमेव सम्भवति । यत्र तूभयोरपि अष्टमैतौ तत्रैव मेषसिंहादिके नित्यनवपञ्चममिति व्यवहृतिः । अयञ्च परिहारो वरबध्नोर्मार्तण्डिनोर्न व्यवहारे नैसर्गिकस्य सत्त्वसति वा समुच्चये नाशको भवति तुल्यन्यायत्वात् । ज्ञमातापितृकयोस्तु वरबध्नोर्नायं दोषोऽपि त्वं एवं द्विद्वादशेऽपि । तथा जगन्मोहने वसिष्ठः कश्यपो । "द्विद्वादशं शुभं प्रोक्तं मीनादौ युग्मराशिषु । मेषाद्यायुग्मराशौ तु निर्दुष्टत्वं न संशयः । "आयुष्यसम्पत्सुतनीगनम्यपुत्रार्थसम्पत्पतिसौख्यसम्पत् । सौभाग्यसम्पद्धनधान्यसम्पत् क्रमादियुग्मे क्रमतः फलानि । व्यत्ययादियुग्मे क्रमत फलानि वैधव्यसत्पुत्रधनव्ययानि । वियोगसन्तापमतीव दुःखं वसिष्ठगर्गप्रमुखैः स्मृतानि" इति । अथैवविधोऽपि प्रीतिषट्काष्टकादिविधेये नाडीदोषः सर्वथा त्याज्य एवेत्याह नाड्यामुद्वियदीति । वक्ष्यमाणानां त्रिविधनाडीनक्षत्राणां शुद्धिः स्त्रीपुरुषनक्षत्रस्थितिरेकस्यां कस्यामपि नाड्यां यदि न भवति तदा प्रीतिषट्काष्टकादि भवति तदा विवाहः कार्यः । यद्येकस्यां नाड्यां स्त्रीपुरुषनक्षत्रस्थितिस्तदा तु नैव विवाहः । उक्तञ्च रत्नमालायाम् "भवनपतिसुहृत्त्वं स्यात्तथैकाधिपत्यं यदि भवनवयित्वञ्चैव षट्काष्टकेऽपि । शुभऋक्षे विवाहोऽन्योन्यतारावियुद्धौ यदि खलु फणिचक्रे स्यान्न नाड्यां समत्वं" इति । अपिशब्दान्नवपञ्चमद्विद्वादशयोरपि । अत्र केचित् षडष्टकस्यैव मरणरूपानिष्टफलत्ववशात्तस्यापवादकः षट्काष्टकेऽपीति परिहारः, किन्तु निन्दां प्रतिपादयतोऽपिशब्दस्य वाक्यस्याधिपतिमैत्रादिगुणप्रशंसाहारा नवपञ्चमद्विद्वादशयोरेव दुष्टभकूटयोर्विधानपर्यवसानात्तयोरेवापवादक इति यथा "ब्रह्मक्षत्रिय नरः पूज्यो यदि स्याद्विपुलं धनमिति" अत्र वाक्ये धनस्तुतिर्धनवन्नरपूजापरा न तु धनवद्विप्रनरपूजापरापीति नैवं बोधः; 'द्विद्वादशे वा नवपञ्चमे वा षट्काष्टके' इत्यादि वसिष्ठादिवाक्यानि दुष्टभकूटापवादभूतान्यधिपतिमैत्र्यादिविधिं षडष्टकादि विदधते । षट्काष्टके ह्यन्तुरित्यादीनि निन्दार्थवादवाक्यानि-अष्टमैरप्यशुभषडष्टकादिविधयोपि अन्यथा दुष्टफलषडष्टकनिराकरणस्य नवपञ्चमस्य द्विद्वादशयोरपि तुल्यत्वेनापवादकवाक्यानां विषयाभावात् । दृष्टान्ते तु ब्रह्मक्षत्रप्रायश्चित्तविधानस्य वैयर्थ्यापातात् धनस्तुतिर्धनवत् प्रशस्तनरेति युक्तमुत्पश्याम. । अथ नाड्यैक्यसमाजपदव्याख्यामर्थः । अश्विन्यादितिसंख्यगणनया त्रिविधानां नाड्यो यत्तारायां वेधो नाड्यैक्यसमाजः । यदाह श्रीपतिः "नाडयृक्षस्त्रीपुंस्यन्तरिक्षाग्नेयधिष्ण्याख्यास्त्र्यादिभ्य एव प्रसृताः । सर्पाकाराश्चक्रे नाड्यैक्यसमाजो नक्षत्राणामेकनाड्यैक्यभृतां स्यादिति"। एवञ्च यत्र भकूटादयः सप्तभेदाः शुभा भवन्ति । तत्र नाड्यैक्यवेत्तदा विवाहो न विधेयः । उक्तञ्च सप्तर्षिमते विवाहपटले । "यदा नाशयत्येक नाडीसमाजो भकूटादिकान् सप्तभेदान् प्रशस्तानिति"। अत्र केचित् । नाडीसमाजशब्दोपादानात् समाजशब्दस्य समुदायवाचित्वात् यदा त्रिचतुःपञ्चपर्वनाडीत्वयसमुदाये स्त्रीपुरुषनक्षत्रयोरेकनाड्यां पातस्तदा समसप्तकाद्यष्टगुणसत्त्वे विवाहोनैव भवेत् । यदा त्रिचतुःपञ्चपर्वनाडीष्वेकैव नाडी स्त्रीपुरुषयोःस्यात्तदा भवत्येव विवाहः । अतएव "भकूटादिकान् सप्तभेदांश्च ते तामिति" वीपरीतं वचनमनुकूलम् । अस्यायमाशय " ते इति बहुत्वात्सप्त भकूटादयः शुभास्तामित्येकवचनानुरोधादेकामेव नाडीं परिहरेयुः न तु नाडीसमाजमिमाम् । तच्चिन्त्यम् । यतश्चतुस्त्रिद्व्येकभोत्पाया." इति वाक्यात्चतुश्चरणनक्षत्रोत्पन्नायाः कन्यायाः स्त्रिपर्व्वैव, त्रिचरणनक्षत्रोत्पन्नायाः कन्यायाःद्विपर्वैव द्विचरणनक्षत्रोत्पन्नायाः कन्यायाः पञ्चपर्वैव नाडी गणनीयेति नियमाद्युगपन्नाडीत्रयविचारासम्भव एव । किञ्च रत्नमालादिवाक्येषु पार्थक्येन नाडीत्रयाभिधानात्तत्त्रयसमाजपदं नाडीसंस्थनक्षत्रसमुदायपरं तथाहि "अश्व्यादिभ्यस्त्रिभ्य एव नक्षत्रेभ्यः प्रसृता ह्यग्नेयधिष्ण्या सर्पाकाराश्चिलोनाह्याख्याः; तत्रैकनाडीस्थानां नक्षत्राणां समाजो नाडी स्यात् इति । नन्वेवमनर्थकलक्षणमक्षत्रयः खुः पाणिग्रहादनु तयोः खलु नाडीयोगे । तच्चाश्वत्रिभ्यमलाङ्घ्रिषु भेषु नूनं नाडीसमाजइतिचिन्त्यमनुक्रमेणेति" ह्युद्गर्गवचनाच्चाडीसमाजएव स्थिते दोष नै-

कस्यां नाड्यामिति चेत् उच्यते । स्वयमेव चतस्रिष्वेव सप्तसु नाड्येषु इति परिगणितविषयत्वेनाभिधानात् नाडीसंस्थानसत्तासमुदायविषयकमिति । किञ्च यत्र पर्वचतुष्टयं पर्वनाड्योर्दैर्घ्यविशेषविषयत्वेन लिङ्गात्सु सर्वदेशसमयत्वादेतस्या एव निषेधोयुक्तः । तानि च देशविशेषवाक्यान्यप्येऽभिधास्ये । अतः "भकूटकान् सप्तभेदांश्च ते तामिस्रतापठे प्रगस्तानिति पठन्ति अभियुक्ताः भार्कधरीयज्योतिर्निबन्धकारादयः । तस्मान्नाडीसमाजभकूटस्य प्राग्वदेव व्याख्यानं न्याय्यम् । ननु यत्र नाडीनक्षत्रं शुद्धिरस्ति । यथा भरणीकृत्तयोः षट्काष्टकञ्च वर्तते यकूमैत्रमपि नास्ति तत्र किं कार्य्यमत आह । अन्यर्क्षेऽपि नेष्टयोरिति । अन्यर्क्षं प्रोक्तषट्काष्टकादिभ्योऽन्यराशौ, कोष्ठे? राशिस्थमित्रोः परस्परं शत्रुत्वे या समत्वे वा षट्काष्टकादौ च सति अंशपयोस्तद्राशिनवांशस्वामिनोर्बलित्वस्थित्वे चेत् स्याताम् । बलित्वं सबलत्वसप्तादिस्थितत्वेन, सख्यिता परस्परमैत्री ते उभे चेद्भवतः सख्यिताया उपलक्षणत्वादेकाधिपत्यमपि तदा विवाहः शुभोनिरूक्तः । उक्तञ्च जगन्मोहने वसिष्ठेन । "राशिनाथे विरुद्धेऽपि सबलावंशकाधिपौ । तन्मैत्रेऽपि च कर्त्तव्यं दम्पत्योः सुखमिच्छतेति" नन्वयमपरिहारो राशिनाथे विरुद्धेऽपीत्यनुवादात्केवलं यकूटौल्लापवादको न तु दुष्टभकूटयकूवैरस्य । उच्यते "खेटारित्वं नाथयेत् षड्कूटम्" अग्रे वक्ष्यति । तत्र च "नभोगारिभावं कूरेत् षड्कूटमिति" सप्तर्षिमतविवाहपटलीय वाक्यं सम्मतित्वे नाड्याभिरभिधास्यते । तदेव केवलयकूवैरापवादकमिति न विदमपि । ननु द्वयोर्वाक्ययोर्यथाश्रुतयद्यस्वरसेनार्थे जिज्ञासिते एकस्मिन्नेव यकूटौल्लाकूपे परिहारद्वयं दृश्यते । अर्थैकस्मिन्नेव दुष्टभकूटके भवनपतिसंज्ञकमित्यादिनानेकपरिहाराभिधानमित्यतोऽत्र वचने न किञ्चिल्लाघवं विषयं पश्यामः सत्यम् । "नभोगारिभावं कूरेत्षड्कूटमिति तु निःसन्देहं यकूवैरस्यापवादकम् परन्तु "राशिनाथे विरुद्धेऽपि मैत्रत्वे चांशनाथयोः । विवाहद्वारवेद्मीमान्त्यभ्योः सौख्यवर्द्धनमिति" जगन्मोहनस्थवसिष्ठवाक्येन प्रागुक्तवसिष्ठवचः समानार्थकं दुष्टभकूटपक्षयकूवैरापवादकम् । तथाहि । न्यूनार्थे एकस्मिन्वाक्ये राशिनाथयोः परस्परविरोधे सति तद्राशिनवांशस्वामिनोः परस्परमैत्री चेद्भूभो विवाहः इत्यर्थः । अत्रांशनाथयोः सबलत्वविचारोनास्ति । यत्र त्वंशनाथयोरुक्तादिस्थितत्वेन सबलत्वं परस्परमैत्री चेति द्वयमस्ति तद्दुष्टभकूटपक्षयकूवैरापवादकमित्यधिकार्थवचनस्यार्थः । एवञ्च "नभोगारिभावं कूरेत्षड्कूटमित्यपि" वाक्यं यकूवैरापवादकन्तुल्यबलत्वाद्बोद्धियवत् । अंशनाथबलत्वाभिधायकं तु "राशिनाथे विरुद्धेऽपीत्येतद्वाक्यं दुष्टभविरोधपरिहारार्थकम् । तथाहि । राशौ च नाथौ च एतेषां समाहारो राशिनाथलक्षणम् राशिनाथे दुष्टे यदि समाहारद्वन्द्व आश्रीयेत तथा सत्ययमर्थः । राशौ विरुद्धौ षट्काष्टकादिना, नाथौ विरुद्धौ कयोर्भाधाधिष्ण्याङ्कात्तायां ययोः षट्काष्टकादिविचारस्तयोरेव सन्निहितत्वादृक्षपदमिति तयोः राशयोर्नाथौ विरुद्धौ "मित्राधिष्ण्यमण्डेरित्यादिना परस्परं शत्रू स्यातां तद्राशिनवांशस्वामिनोः सबलत्वे मित्रत्वे च समुद्भिते सति विवाहः शुभदः । नन्वतिक्लिष्टे समाहारद्वन्द्वे किं प्रयोजनम् ? उच्यते । अंशनाथस्य सबलत्वस्याधिक्यकरणमेव । तच्च युगपदुत्पन्नस्य दोषद्वैविध्यस्य राशिविरोधयकूविरोधरूपस्य परिहारोऽतएव ज्योतिःशास्त्राभियुक्ताः एवंविध उभयविरोधे एवंविधं समाधिमाश्रित्य विवाहद्वारत्वेनोक्तवन्तः प्रसक्तानुप्रसक्तम् । अस्मिन्नपि पक्षे नाडीशुद्धिरपेक्षितैवेत्याह । नाड्यशुद्धौ तथेति प्रागुक्तप्रकारेण नाडीनक्षत्रेषु स्त्रीपुंसनक्षत्रयोरेकनाड्यामवस्थितिभावश्चेत्तदा विवाहः शुभः । यथा भरणीकृत्तयोः सबलत्वविधविरोधे राशिनवांशयोः क्रमेण पञ्चमचतुर्थयोर्यौ स्वामिनौ सूर्यभौमौ तयोर्मैत्र्यपि स्वनवांशस्थितत्वात्सबलत्वमपि तत्र विवाहः शुभफलदोनिगदितः । यतोऽत्र स्त्रीपुंसनक्षत्रयोरेकनाड्यामवस्थितभावः । वटात्वन्त्रिनोक्तस्थाने एव दुर्योनक्षत्रे स्यातां तदा नाडीनक्षत्रशुद्धभावात् सकलगुणवत्त्वेऽपि विवाहो न भवति । किं पुनरेवंविधविषये इति "सदा नाथवशेनाडीसमाजोभकूटादिकान् सप्तभेदान् प्रगस्तान्" इत्युक्तेः । अर्थं तत्परिहारासम्भवे परिहारान्तरमाह । तारागुद्धिवशे इति । अत्रान्यर्क्षं इत्यनुवर्त्तते । प्राग्वदेव व्याख्येयमिदम् । एवंविधे विषये षट्काष्टकादौ च सति यदि स्त्रीपुंसनक्षत्रयोः परस्परन्नाराशुद्धिवशे कन्यार्क्षादूरं यावद्दिनादिना ताराशुद्धिरूपे वशे वक्षसे द्वितीयचतुर्थषष्ठसप्तमनवमतारासंज्ञके सति बुधैर्विवाहः शुभोनिगदितः । अत्रोदाहरणानि बुधैर्ज्ञेयानि । अत्र संमतिः "अन्योन्यतारागुद्धौ इत्युक्ता । राजमार्त्तण्डेनायमर्थः आत्मभिहितः । "मैत्री क्षेत्रपयोर्द्वयोरपि तयोरेकाधिपत्येऽपि क्षेत्रारा

मित्रसुमित्रजन्मशुभदा क्षेमा च संपत्करी । षष्ठाष्टे नव पञ्चमे व्ययधने योगेषु पुत्रोचिता: प्रीत्यायु:सुतदृद्धि-मित्रजनकः कार्यो विवाहस्तदेति" । चकारात् षष्ठी च । जन्मतारा यद्युत्पत्तितारा तदा राशिभेदे चरणभेदे वा शुभा ध्येया । दशमैकोनविंशतितारे शुभे एव । अत्रापि पक्षे नाडीशुद्धिरपेक्षितैव । नाडीशुद्ध्यभावे विवाहोनैव भवेत् । उक्तं च तत्रैव "नाडीशुद्धिं विना यत्र विवाहं कुरुते नर:" इति । अथ तस्यापि परिहारस्य सत्त्वे परिहारान्तरमाह । अथ राशिवश्यताभाव इति । अत्रापि द्वयो: स्त्रीपुंसयो राशिनाथविरोधादिके विषये षट्काष्टकादौ सति "त्रिंशत् क्षणेन्द्र नरराशिवश्या" इत्यादिना पुरुषस्यैव राशे: स्त्रीवश्यताभावे सति विवाह शुभोक्तिगदित: । "यदि भवनवश्यत्वमिति श्रीपत्युक्तेश्च अस्मिन्नपि पक्षे नाडीशुद्धिरपेक्षितैवोक्तादेव-हेतो: । तदयमत्र निष्कर्ष: । सप्ताष्टकनवमपञ्च-महिद्वादशाख्येषु दुष्टभकूटेषु सत्सु परस्परं षड्मैत्रे, एक परिहार: । एकाधिपत्ये त्रिंशत्य । षड्वर्गैक्ये शुभयो: सबलत्वे मैत्रे च तृतीय: । नाशयुक्तौ चतुर्थ: । राशिवश्यत्वे पञ्चम: । सर्वेष्वपि परिहारेषु नाडी शुद्धिरपेक्षितैव । नाडीविरोधभङ्गे तु विवाहोनैव श्रीपतिरि-त्येवञ्च मन्यकर्त्रा "भवनपतिशुद्धत्वमित्यस्य" श्रीपतिश्लोक-स्य वाक्यचतुष्टयमङ्गीकृत्य तत्परिहाराभिधानङ्कृतम् । तट्टीकाकृन्महादेवोप्येवमेव व्याख्यत् । यत्र हि प्रत्येकं परिहारकम् तत्र गुणसमुदाय: परिहारक: स्यादिति किं वाच्यम् । वस्तुतस्तु । "मैत्री क्षेत्रपयोर्द्वयोरपि तयो-रेकाधिपत्येऽपि चेत्तारामित्रसुमित्रजन्मशुभदा क्षेमा च सम्पत्करीत्यादि प्राग्लिखितेन राजमार्त्तण्डवाक्येन दुष्ट भकूटे षड्मैत्र्या सह तथैकाधिपत्येन सह ताराशुद्धिरेव परिहारिका समुचिता । अर्थादैक्ये मित्रत्वेऽपरस्य सम त्वे वश्यत्वापेक्षा अतएतद्वाक्यं ज्योतिःसारसागरे विहतम् "तत्साम्येन्यमित्रत्वे तुल्याधिपतित्वे वा ताराशुद्धिरेव चिन्त्या । एकमित्रतायान्तु वश्यत्वादि गुणान्तरापेक्षा । शत्रुत्वे तु सर्वथा त्याग इति" । अत एवैतस्मिन् पक्षे चेत्पदाभिधानादेवाक्यतावसाय: । एवं श्रीपतिवाक्यमपि व्याकर्त्तव्यमेकवाक्यतावलात् । तत्र षट्काष्टके पुनर्भवनपति-शुद्धत्वमिति सकलगुणसत्त्वमेव परिहारकम् । अनयो-र्दुष्टभकूटयोर्द्वयमेव । यदाह ज्योतिर्निबन्धे गर्ग:"ष-ड्मैत्रे शुभा तारा राशिवश्ये त्रिभि: शुभम् । षडष्ट-कन्वुधा: प्राहुर्द्वाभ्यां दुर्भकूटेष्वेक मिति" । "द्वा-र्कैन्दिद्वादशम् । "द्विद्वादशे वा नवपञ्चमे वेत्यादीनि' वसि-ष्ठवाक्यानि तूपलक्षणपरतया व्याख्येयानि । अत्र यद्यास-म्प्रदायं व्यवस्था ध्येयेत्यलमियता" प्रौ०धा० ।

अथापवाद: । "मैत्र्यां राशिस्वामिनोरंशनाथहृद्यस्यापि स्याद्गणानां न दोष: । खेटारित्वं नाशयेत् सद्भकूटं खेट-प्रीतिस्यापि दुष्टं भकूटम्" । मु०चि० "स्त्रीषु सत्सु राशिस्वामि-नोर्मैत्र्यां सत्यां तथा राशिनवांशयोर्हृद्यं युग्मं तस्यापि मैत्र्यां सत्यां गणानां दुष्टगणानां दोषो न स्यात्, स्त्री-रज्जोर्गणात् पुमान् मनुष्यगणोदेवगणो वा तदा गणदोषो न स्यादित्यर्थ" । यदाहात्रि: "राशीशयो: सुहृद्भावे मित्रत्वे वाप्यनाथयो: । गणादिदोषो ज्युह्याह: पुत्र-पौत्रप्रवर्द्धन:" । अथ सद्भकूटं शुभफलदत्वात्कूटं राशि-कूटं तृतीयैकादशादिकं खेटारित्वं यत्रयो: सत्यो-स्तस्मिन्नपि दोषं नाशयेत् । एवमेव खेटप्रीतिर्यत्रमैत्री चापि दुष्टं भकूटं षडष्टकादिसम्बन्धिनं दोषं नाशयेदित्यर्थ:" तदुक्तं सम्प्रति मते विवाहपटले । "नभोनाथभावं हरेत् सद्भकूटं विरुद्धं भकूटं हरेत् खेटमैत्री । सदा नाशय त्येकनाडीसमाजोभकूटादिकान् सप्तभेदांश्च तेषाम्" । (मु०चि०) चतुर्थचरण:"प्रोक्ते दुष्टभकूटक इत्यादिना पुन-रुक्तोऽपि स्मरणायाधिक्येदार्थं पठित:" । यत्तूक्तं नारदेन "एकाधीशे मित्रभावे शुभदं परिणीवनम् । द्विद्वादश त्रिकोण च न कदाचित् षडष्टके" इति । एतन्नाडीदोषे सत्येव द्रष्टव्यम् । अधुनोदितवाक्यबलात् । "भवन-पतिसुहृत्त्वं स्यात् तथैकाधिपत्यं यदि भवनवश्यत्व चैव षडष्टकेऽपि । शुभकृदिह विवाहोऽन्योऽन्यतारात्रिशुद्धौ यदि खलु फणिचक्रे स्याच्च नाडीसमाज" इति श्रीपत्युक्ते: "अन्यथा प्रागभिहितषडष्टादिवाक्यान्यनर्थकान्यापद्येर-न्निति" । प्रौ०धा० ।अथ नाडीकूटमाह । "ज्येष्ठार्यम् णेशनीराधिपभगुगुरुन्द्राग्नभश्चैकनाडी पुष्येन्दुत्वाष्ट्रमित्रान्त्यबसुजलभं योनिभुग्रे च मध्या । वायुघ्न्यन्त्यालयि श्वोडुगुगुगमयोर्याम्यभश्चापरा स्याद्भ्यस्तोरेकनाड्यां परि णयनमसन्मध्यनाड्यां हि मृत्यु:" मु०चि० ज्येष्ठा प्रसिद्धा । अर्यमृक्षस्तत्तराफल्गुनी । इज्य आर्द्रा । नीराधीशोवरुण-स्तद्भं शततारका एभ्यो नक्षत्रेभ्यो युगयुगं द्वयं द्वयम् । ज्येष्ठामूलं उत्तराफल्गुनीहस्ताऽऽर्द्रा पुनर्वसुश्च । शततारकापूर्वभाद्रा चेत्यर्थ: । दासभमश्विनी च एतन्न-क्षत्रनवकं परस्परमेकनाडीत्युच्यते । अथ पुंस: प्रसिद्ध: कृष्णमृग: स्वाङ्गं चित्रा मित्रोऽनुराधा अन्त्यं भरणी व-

सुधेनिधा, अलभं पूर्वाषाढा, योनिः पूर्वफाल्गुनी, बुध्नोऽहिर्बुध्न्य उत्तरभाद्रपदा, एतच्चतुष्टयं परस्परं मध्यनाड्यभ्युच्यते । अथ वायु स्वाती, अग्निः कृत्तिका, व्यालोऽश्लेषा, पश्चोत्तराषाढा, एभ्यो युगयुगं स्वाती विशाखा च, कृत्तिका रोहिणी च अश्लेषा मघा च उत्तराषाढाश्रवणश्चेत्यर्थः । अथ पौष्णभं रेवती च, एतच्चतुष्टयमन्त्यनाडीत्युच्यते । एतत्फलमाह । दम्पत्योः स्त्रीपुंसयोरेकनाड्यां परिणयनमसदृदुष्टफलं स्यात् । मध्यनाड्यां हि निश्चयेन मृत्युर्द्वयोरपि स्यात् । "मूलेन्द्वग्निपाशब्रह्मकरणादित्यार्यमेषाश्विभेषाग्न्येष्वेकाभिजिन्मैत्रभाग्यवसुभत्वाष्ट्रभैः । अन्त्यैर्नाड्यां त्रिकेनाडिकायां स्यातां द्वित्रे वैनृतिगोदाद्विलिखितं क्वचिन्नृपसुखे पार्श्वैकनाडी हिता" । गोद दक्षिणतः सर्ववर्णेषु पार्श्वैकनाडी हिता, क्वचित् अन्यकन्याया अलाभे पार्श्वैकनाडी हितेत्यर्थः" । यदाह गर्ग । "नाड्यां कुटं त संपाद्यां कूटानां तु शिरोऽन्तिमं । मध्यगा कन्यका कण्ठसूत्रत्वेन विनिर्मिता मति" । वराह "आद्यैकनाडीकुरुते वियोगं मध्यान्यनाड्यासुभयोर्विनाशम् । अन्त्या च वैधव्यमतीव दुःखं तस्मात्त्रिधा परिवर्जनीया" इति । अत्र चक्रन्यासोक्तदोषाः । "आद्यत्तिभिर्भैस्त्रिभिरश्विभाद्यं क्रमोत्क्रमात् स्वगणयेद्दुष्टम् । यदैकपर्वव्ययुभयोश्च धिष्ण्ये नेष्टा त्वनादौ भूमेकनाडी" । फलेऽपि विशेषमाह वसिष्ठः "सा मध्यनाडी पुरुषं निहन्ति तत्पार्श्वनाडी खलु कन्यकां तु । आसन्नपर्यायसमागतत्वे दुर्वेण साध्यन्तरिता त्रिवर्गैः" । उत्तरार्द्धस्यायमर्थः । आसन्ने समीपस्थिते पर्याये आवृत्तौ चेदेकनाडी समागता । यद्यश्विन्यार्द्रयोर्भरणीमृगशीरोक्तिगयाश्लेषयोर्वा सा नाडी वर्षैरेकेन स्त्रीपुंसयोरुक्ताऽशुभफलदात्री स्यात् । यदा त्वश्विन्युत्तरफाल्गुन्योरितरकृतव्यवधाना सा नाडी त्रिभिर्वर्षैरुक्ताऽशुभफलदात्री स्यात् । इयञ्चाश्विन्यादितिकगणना कन्यावाचतुरश्रे जन्मनक्षत्रे सति यदा तु त्रिचरणं नक्षत्रं तदा कृत्तिकामारभ्य स्वाभिजिच्चतुःपञ्चगणना द्विचरणे जन्मनक्षत्रस्य ज्ञातव्या. पञ्चपञ्चगणना । यदाह नारदः । चतुश्चिदाद्यश्विभोत्थायाः कन्यायाः क्रमशोऽश्विभात् । वह्निभादिन्दुभाच्चाड्यां त्रिचतुःपञ्चपर्वसु । गण्येत् संख्यया चैकनाड्यां मृत्युर्न संशयः" । अस्यार्थं स्पष्टमाह गर्गः । "चतुःपात् कन्यकाक्षं गण्येदश्विभादिकम् । त्रिभं सव्यापसव्येन भिन्नं पर्व मुखाद्यकम् । कन्यकर्क्षं त्रिपाच्चेत् स्याद्गण्येत् कृत्तिकादिकम् । चतुर्भि पर्वभिरादृदभिजित्तारकान्तिमम् । कन्यकर्क्षं द्विपाच्चेत् स्याद्गण्येत् सौम्यभादिकम् । पञ्चभिस्त्वपरोक्षे तु पञ्चमात् त्रिकवर्जिते" एतत्फलमप्याह गर्गः । "संक्षिप्ता मध्यनाड्यां तु पुरुषं हन्ति वेगतः । संक्षिप्ता पार्श्वनाड्यां तु कन्यकां हन्त्यसंशयम् । आसन्ना त्वेकनाडी स्यादासन्नमृतिदायिनी । दूरस्था चैकनाड्यां स्याद्दूरान्निष्टस्य कारिणीति" । अगस्त्योक्ते नारदः । "एकनाडीस्थितं गुर्वीः सर्वैः समन्वितः । वर्ज्जनीयः प्रयत्नेन दम्पत्योर्निधनं यतः" । आसां नाड्यीनां देशभेदेन व्यवस्थामाह अगस्त्योक्ते नारदः । "चतुर्नाडी तदूर्ध्वायां पाञ्चाले पञ्चनाडिका । त्रिनाड्यां सर्वदेशेषु वर्ज्जनीया प्रयत्नतः" इति । अधूर्ध्वायां पाञ्चाल्यां देशविशेषौ । तस्मादृषिवसिष्ठादिभिर्देशभेदेन भसत्रभेदेन चानित्यप्रवृत्तिके चतुःपञ्चनाड्यावुपेक्ष्य सकलदेशव्याप्तित्वात् सकलनक्षत्रव्याप्तित्वाच्च त्रिनाडीवेधोक्ता । नचैतावता चतुःपञ्चनाड्यो स्वस्वदेशव्यतिरिक्तदेशेषु नैवावलोक्ये किन्तु सर्व्वत्रापि देशेषु विचार्य्ये तत्र स्वदेशे दोषमकृत्वान्यदेशे दोषाभावता त्रिनाडी तु सर्व्वत्रैव समानदोषा" यदाह मनुः । "अधूर्ध्वायां चतुर्नाड्यां संयोगः कालमृत्युदः । एष योगोऽन्यदेशेषु ह्यपमृत्युफलप्रदः । पञ्चनाड्यां समायोगः पाञ्चाले कालदण्डदः । इतरत्र समायोगो दुःखदारिद्र्यदोषदः । त्रिनाड्यां तु समायोगः सर्व्वत्रानिष्टकारकः" इति । यत्तु ज्योतिर्निबन्धे ज्योतिःप्रकाशे अश्विन्यादितिनाड्यां प्रवृत्त्यभिधित्सया 'निधनं मध्यमनाड्या दम्पत्योर्नैव पार्श्वयोर्नाड्योः' अत्र पार्श्वनाड्यां मृत्युरूपमहादोषाभावं मत्वा विवाहादिकरणं शुभायेत्यर्थः । तत् त्रिनाड्यादिविषयं गोदावरीतोदक्षिणदेशवासिविषयं वा । तदुक्तं तत्रैव । "करणे पुनर्नाडी न निन्द्येति यदुक्तं । तत्त्रिनाड्यादिविषयं गौतम्यायाम्यतस्त्वेति" । गौतमी गोदावरी । अतार्थे आर्षं मूलं लक्ष्यम् । "इयं चाश्विन्यादितिनाड्यादिषु भरण्यादिषु प्रथमपञ्चकनाड्यादौ तु शुभैव" । उक्तञ्च स्वरोदये "एकनाडीस्थिता यत्र गुरुमन्दास्त्र देवताः । तत्र दूरं व्रजं मृत्युं क्रमेण फलमादिशेत् । प्रभुः पञ्चात्मना भित्वं देशो यामः पुरं सदम् । एकनाडीस्थितं भव्यं विरुद्धं वेधवर्जितमिति" । अत्र नाडीवेधे चरणवेधोऽधिकदोषः, आवश्यकेऽप्येवं त्याज्यः" एतदप्युक्तं तत्रैव । "आद्यांशेन चतुर्थांशं चतुर्थांशेन चादिमम् । द्वितीयेन तृतीयञ्च तृतीयेन द्वितीयकम्

एवं भांशयधो यथा जायते वरकन्ययोः । तेषां स्वल्पेन सन्देहः शेषांशाः स्वल्पदोषदा इति" तत्राप्यांशयुक्तत्वे गुरुः "दोषापनुत्तये नाड्या स्वल्पयजपादिकम् । विधाय ब्राह्मणांश्चैव तर्पयेत् काञ्चनादिना । हिरण्मयीं दक्षिणाञ्च दद्याद्वर्षादिकूटके । गावोऽन्न वसनं देयं सर्व्वदोषापहारकमिति" । एवं सर्व्वसम्मतत्वादष्टौ कूटभेदा अभिहिता नानेन । "माहेन्द्रं गौडदेशे च मालवे रज्जुसंज्ञकमित्यादिना वाटरायणवाक्येनान्यकूटानां तत्तद्देशविषयतापाटनात् । ते च कूटभेदा वसिष्ठसंहितायां तोडलानन्दे च सामान्यविशेषभावसहिता द्रष्टव्याः" धी० धा० । अथ नाडीदोषापवादः "राश्यैक्ये चेद्भिन्नभं हयोः स्याद्भैक्यमेकं राशियुग्मं तथैव । नाडीदोषोनोगणानां च दोषो नक्षत्रैक्ये पादभेदे शुभं स्यात्" सं० चि० । "द्वयोः स्त्रीपुंसयोरेकराशित्वे सति यदि भिन्नभं स्यात् तदा नाडीदोषोगणानाञ्च राक्षसमनुष्यगणानाञ्च दोषो नास्ति । यथा एकस्मिन्नपि कृत्तिकाराशौ प्रथमतारकापूर्वभाद्रपदापादत्रयं च ग्रहैः क्रूपोभक्षत्रभेदः । तथैव नक्षत्रैक्ये राशियुग्मं राशिद्वयं चेत् स्यात् तदापि प्रागुक्तो दोषो न स्यात् । उपलक्षणत्वात् तारादोषोऽपि न भवेत् । यथा । एकस्मिन्नेव नक्षत्रे पूर्वाभाद्रपदाख्ये पूर्वभाद्रपदायाः प्रथमपादत्रयं कुम्भे चतुर्थचरणस्य मीने इत्येवंरूपो राशिभेदः" । यदाह नारदः । "एकराशौ पृथग् भिन्नौ दम्पत्योः पार्ष्णिपीडनम् । उत्तमं मध्यमं भिन्नराशीक्यर्क्षगयोस्तयोः । एकर्क्षे चैकराशौ च विवाहः प्राणदानिदः" । वसिष्ठः । "दम्पत्योर्जन्मभे चैक्ये राशौ च निधनं तयोः । एकस्य च तयोर्वाहे किञ्चिद्भेदे पि वा नया" । किञ्चिद्भेदे नक्षत्रभेदे राशिभेदे च । गर्गः "एकराशिं विना नाडीयोगमादौ विवर्जयेत् । न दोषस्त्वेकराशिस्थे भकूटेऽन्येषु मृत्युदेति" । भृगुरपि "दम्पत्योरेकराशिस्थेत् पृथग्भं यदा भवेत्" । वसिष्ठोक्तो विवाहः स्यान्नक्षनाड्यौ न योजयेदिति । "अतएवाह केशवार्कः "नक्षत्रमेकं यदि भिन्नराश्योरभिन्नराश्योर्यदि भिन्नभं तत् । प्रीतिस्तदानीं निबिड़ा भवेत्तयोस्तिर्यक्तिकारोहिणिवन्न नाड़ीति" । चतुर्थचरणस्थायमर्थः चेद्यदि कृत्तिकारोहिणीवत् स्यात् तदापि नाड़ीदोषो न स्यात् । उपलक्षणत्वान्नक्षदोषोऽपि । यथा कृत्तिकारोहिण्योरेकनाड़ीस्थत्वेऽपि गणदोषाद्यभावेऽपि तत्तद्दूषिताशुभफलं नैव स्यात् । अत्रापि प्रथमतः शुक्रतारामेलिता द्वितीयतः क्षीतारेत्यपि विवेचोध्येयः । यदाह गर्गः "एकराशौ पृथक् भिन्नौ पुंतारा प्रथमा भवेत् । अतीव शोभना प्रोक्ता स्त्रीतारा चेत्तयोर्भवेति" । तदेवं कैमुतिकन्यायेन यत्र नाड़ीगणदोषाद्यभावो यथा रोहिण्यामृगयोर्हस्तचित्रयोर्वा तत्र पाणिपीड़नं शुभं स्यादिति किं वाच्यमित्यर्थः । अथैकराशिनक्षत्रत्वेऽपवादमाह । नक्षत्रैक्ये इति । स्त्रीपुंसयोः राश्यैक्ये नक्षत्रैक्ये च यदि चरणभेदो यथा भरण्याः प्रथमपादे पुंसोजन्म द्वितीयपादे स्त्रियास्तदापि शुभं कल्याणं स्यात् । तदुक्तं केशवार्केण । "पराशरः प्राह-नवांशभेदादेकर्क्षराश्योरपि शोभनमस्मिति" । सौमनस्य प्रीतिः । वसिष्ठेनापि "एकनक्षत्रसम्भवानां भवति विवाहः सुतार्थसम्पत्त्यै । यद्युभयोरेकर्क्षं भवति यदा चांशको भिन्न" इति । एतच्च सङ्कोचविषयं वेदितव्यम् । तथा च जगन्मोहने । "एकर्क्षे चैकराशौ च विवाहस्त्वशुभः स्मृतः । सङ्कोचे तु तदा कार्यो भिन्नपादोदयौ तयोरिति" । अत्रापि विशेषो ज्योतिर्निबन्धे विधिरत्ने । "रोहिण्यार्द्रामघेन्द्राग्नी तिस्रश्चरणपौष्णभम् । उत्तराप्रोष्ठपार्श्वं च नक्षत्रैक्येऽपि शोभना" इति । इन्द्राग्नी विशाखा तदेतत् स्वस्वसंज्ञं तत्रैव विधिरत्ने । "विशाखिकार्द्रश्रवणप्रजेयतिष्यान्यतत्पूर्व्वमघाः प्रशस्ताः । स्त्रीपुंसतारैक्यपरिग्रहे तु शेषाविवर्ज्या इति सङ्गिरन्ते" इति । शेषास्तारा इत्यर्थः । अत्र द्वयोरन्यतरस्य वा जन्मराशिनक्षत्राद्यज्ञाने उपायमाह । वसिष्ठः । "अज्ञातजन्मनामर्क्षं नामभे परिकल्पना । तेनैव चिन्तयेत् सर्वं राशिकूटादि जन्मवत् । जन्मभं जन्मधिष्ण्येन नामधिष्ण्येन नामभम् । अत्यल्पेन सदा योज्यं दम्पत्योर्निधनप्रदम् । कुर्य्यात् षोड़श कर्माणि जन्मराशौ बलान्विते । सर्वाण्यन्यानि कर्माणि नामराशौ बलान्विते" इति । इदमेव तत्रैव । "व्यवहारराजसेवा संग्रामयात्रामन्त्रेषु । ज्ञातेऽपि जन्मराशौ फलमुक्तं नामराशिवशादिति" । नाम्नः सकाशाज्जन्मनक्षत्रज्ञानं स्वोदयाभिधितपदचक्रान्तर्गतस्वीयनामादिवर्णवशात् स्पष्टमिति । यस्तु कवर्गादिवर्णं चवर्गादिनामसु दृश्यते तत्र यथासम्प्रदायं व्यवस्था" धी० धा० । नाड़ीभेदेऽष्टौ गुणाः प्रागुक्ताः ।

ज्यो० त० नाड़ीचक्रप्रवेशनतद्विभेदौ दर्शितौ यथा स्वरोदये । "अश्विन्यादि लिखेच्चक्रं सर्पाकारं तिनाड़िकम् । तत्र वेधवशात् त्याज्यं विवाहादौ शुभाशुभम् । तिनाड़ीवेधनक्षत्रं अश्विन्यार्द्राश्लेषोत्तराः । हस्तेन्द्रमूलवा-

रणम् । पूर्वभाद्रपदादिका । याम्या सौम्योगुरुर्योनिश्चित्रा-स्वित जलाङ्कयम् । धनिष्ठा चोत्तरा भद्रा मध्यनाड़ी व्यवस्थिता । कृत्तिका रोहिणी सर्पोमघा खातविधाखके । उत्तराश्रवणापौष्णं पृष्ठनाड़ी व्यवस्थिता । अश्व्यादि-नाड़ीवेधर्क्षे षष्ठं द्वितीयकं क्रमात् । याम्यादिकिं तुर्यञ्च कृत्तिकादिद्विषट्कक्रमम् । एवं निरीक्षयेद्वेधं कन्या-मन्ये सुरे गुरौ । परयस्वास्वामिमित्रेषु देये श्यामे पुरे सति । एकनाड़ीस्थधिष्ण्यानि यदि स्युर्वरकन्ययोः । तदा वेधं विजानीयात् गुर्वादिषु तथैव च । प्रकटं यस्य जन्मर्क्षं तस्य जन्मर्क्षतोव्यधः । प्रणष्टं जन्मभं यस्य तस्य नामर्क्षतोवदेत् । द्वयोर्जन्मभयोर्वेधे दुर्योनीमभयोस्तथा । नामजन्मर्क्षयोर्वेधे न कर्त्तव्यं कदाचन । एकनाड़ीस्थिता चेत् स्यात् भर्त्तुर्नाशाय चाङ्गना । तस्मान्नाड़ीव्यधोर्योगो विवाहे शुभमिच्छता । प्राङ्नाड्या वेधतोभर्त्ता मध्य-नाड्योभयं तथा । पृष्ठनाड़ीव्यधे कन्या म्रियते नात्र संशयः । एकनाड़ीस्थिता यत्र गुरुर्मन्त्रस्य देवता । तत्र द्वेषं रुजं मृत्युं क्रमेण फलमादिशेत् । प्रभुं परयङ्गना मित्रं देयोगामः पुरं सृष्टम् । एकनाड़ीगता भव्या अभव्या वेधवर्जिताः' । अस्यापवादः ज्यो० त० । 'एकराश्यादियोगे तु नाड़ीदोषो न विद्यते" एकरा-श्यादिषु "एकराशौ च दम्पत्योः शुभं स्यात् समसप्तके । चतुर्थे दशमे चैव तृतीयैकादशे तथा" इत्युक्तं । समसप्तक-द्विसप्तमसप्तके दोषः । तथा च "षोटके सप्तके मेषतुले युग्मकयौ तथा । सिंहघटौ सदा वर्ज्यौ स्मृति तत्त्वाब्धी-क्षिरः" । ज्योतिर्व्यवहारनिर्णये । "सुहृद्देकाधिप-योगे तारावले वश्यराशौ वा । अपि नाड़्यादिवेधे भवति विवाहोचितार्थाय,राजमार्त्तण्डे च ।"न राजयोगे यत्रैव-रितो च न तारगुद्विर्नगणत्रयं स्यात् । ननाड़ीदोषो न च वर्णदुर्गिगोदयस्ते सुनयोवदन्ति"अत्र देशभेदात् व्यवस्था । अन्यत्रोक्तम् ।"लग्ने व्यये च पाताले जामित्रे चाष्टमे कुजे । भर्त्ता कन्याविनाशाय कन्याभर्त्तृविनाशकृत्" । अस्यापवादः । "व्यये वा गुणवाहुल्ये कुजे वा तादृशे द्वयोः" प्रागुक्तरीत्या अष्टानां कूटानां मध्येषाङ्गानां सङ्गतने अष्ट-दशतोऽधिकत्वे उभयोर्वरकन्ययोरुक्तलग्नादिस्थाने मङ्गलस्य स्थितौ च न दोषः एवमन्योऽपि वैधव्ययोगोनिन्द्नीयः स च जातकग्रन्थे वक्ष्यते । एवं विवाहे वर्षादिशुद्धिं दम्पत्यो-रानुकूल्याद्वा चोक्तदानीं निर्दोषदिनलग्नादि निरूप्यते । "तत्रैकविंशतिः सर्वसम्मता दोषा नारदेन परिगणि-ता । "एकविंशतिदोषाणां नामरूपफलानि च । पिता-महोक्तं संक्षिप्य तानि वक्ष्ये समासत । पञ्चाङ्गशुद्धिरहितो दोषस्त्वाद्यः प्रकीर्त्तितः । उदयास्तशुद्धिरहितो द्वितीयः सूर्यसंक्रमः । तृतीयः पापषड्वर्गो भवेषष्ठः कुजाष्टमः । गण्डान्तं कर्त्तरी रिष्फषड्दुष्टैक्यञ्च संयुतः । दम्पत्योरष्ट-मं लग्नं राशिर्विषघटी तथा । दुर्मुहूर्त्तो वारदोषः खार्ज्जूरिकसमुद्भिन्नम् । यमघण्टोत्पातभं क्रूरविद्धं क्रूरसंयुतम् । कनयांगो मकापातो वैधृतिश्चैकविंशतिः" इति" अन्यैस्तु दश दोषा उक्ताः "वेधश्च लत्ता च तथा च पातः,ऋक्षार्ज्जूरयोगोऽदशयोगचक्रम् । युतिश्च ईजामित्र७ मृषमृहाश्च एवाणाख्यषष्ठौ८दश चैव दोषा इति व्य-वहारोक्तयेऽभिधानात् । तत्र"दुर्मुहूर्त्तो रवायर्यमित्यादिः । वार दोषः कुलिकादिः, क्रूरसंयुतमित्यस्योपलक्षणत्वादकाल दुष्टिनामकोऽपि दोषो मन्यते । यदाह वसिष्ठः । "प-ञ्चाङ्गशुद्धिरहितास्त्रोत्पाताऽकालदुष्टिजाः" इति । एवं दोषाणां कर्मविशेषे फलमाह वसिष्ठः "एकविंशत्-यदोषास्त्वेते ब्रह्मसखोदिताः । कदाचित्त्वेव सीदन्ति गुणानां कोटिकोटिभिः । तस्मादेतेषु दोषेषु कदाचि-च्चारचेत्कुशम् । विवाहे विधवा नारी मरणं व्रतमश्नते । यामनाथः प्रतिष्ठायां सीमन्ते गर्भनाशनम् । मयाङ्ग-भोजने मृत्युः क्रूरो तत्फलनाशनम् । कर्त्तुर्नाशो मृत्यु-रन्ध्रे प्रवेशे पतिनाशनम् । यात्रायां कर्त्तृनाश स्याद्यु-द्धयाने विशेषतः । लभ्यते सुमहत्पुण्यमेषु आद्वादिकर्म-भिरिति" मी० धा० ।

तत्र सर्वकर्मोपयि गिषड्वर्गे वक्ष्ये आटौ जैत्रनवांशपावाह "कुजशुक्रसौम्यगुरिसूर्य्यचन्द्रजाः कविभौमजीवशनिसौ-रयोगुरुः । इह राशिपाः, त्रियमृक्षगास्तौलिकेन्द्भतो नवांशविधिरुच्यते बुधैः" मु० चि० ।

"अत्र लग्नादीनां लक्षणं नारदोक्तम् ।"त्रिंशद्भा-गात्मकं लग्नं होरा तस्यार्द्धमुच्यते । लग्नत्रिभागो-द्रेष्काणो नवमांशो नवांशकः । द्वादशांशोद्वादशांशस्त्रिंशां शस्त्रिंशदंशकः । षड्वर्गः कथितास्तेते- तेषामीशा इमे स्मृताः' इति । तत्रैते मौमशुक्रबुधचन्द्रसूर्य्यबुधशुक्र-भौमगुरुशनिगुरवः, क्रमेणेह षड्वर्गे राशिपा मेषादिरा शीनां स्वामिनः । क्रियेति । क्रियो मेषः वृषाख्यो मकरः तौलिकं तुला इन्द्भं कर्कः एभ्यो राशिभ्यो द्वादशस्वपि राशिषु नवांशबोधर्थमुच्यते । मेषे मेषादेव, वृषे मक-रादेव मिथुने तुलातः कर्के कर्कादेव, एवं सिंहेऽपि मे-

"पादेव एवं कन्यादिषु अपि राशिषु मकरादित एव। एवमेव धनुरादिष्वपि इत्यर्थः। यदाह नारदः। "सिंहस्याधिपतिर्भानुस्तन्द्रः कर्कटकेश्वरः। मेषवृश्चिकयोर्भौमः कन्यामिथुनयोर्बुधः। धनुर्मीनयोर्देवेज्यः शुक्रोऽवतुलेश्वरः। शनिर्मकरकुम्भेश इत्येते राशिनायकाः"। "नयमाशामेषसिंहवाये, मेषादयः क्रमात्। क्रमाद्धोमगकन्यासु त्रयाः स्युर्मकरादयः। तुलामिथुनकुम्भेषु स्युः क्रमेण तुलादयः। अलिकर्कटमीनेषु क्रमात् स्युः कर्कटादयः" इति पी० धा०। अथ क्षोरेष्टकथनम्

"मध्ये यत्रिरविक्षीरा विषमभमध्ये रविर्शशिनोः ष" सु०चि०। "पञ्चदशभागात्मकैका क्षीरा समराशिमध्ये प्रथमा चन्द्रस्यापरा सूर्यस्य। विषमराशिमध्ये प्रथमा रवेः परा चन्द्रस्येत्यर्थः। "क्षीरार्केक्षीरोजराशौ समभे चन्द्रसूर्ययोरिति नारदोक्तेः" पी० धा०। अथ त्रिंशांशैक्काणेशाः। "शुक्रसूर्जावयनिभूतनयस्य बाणशैलाष्टपञ्चविशिखाः समराशिमध्ये। त्रिंशांशकोविषमभे विपरीतमस्माद्रेष्काणकाः प्रथमपञ्चनवाधिपानाम्" सु० चि०। समराशिमध्ये क्रमेण प्रथमतः पञ्चाग्निभागानां शुक्रः स्वामी ततः शैलानां सप्तानां क्षीधुधः। ततोऽष्टानां जीवो गुरुः। ततः पञ्चानां शनिः। ततो विशिखबाणाः पञ्च तेषां भूतनयो भौमः। शुक्रस्त्वादित्यसमाहारहन्द्वः। विषमभे तु अस्मात्समराशेर्विपरीतं ज्ञेयम्। यथा प्रथमत पञ्चानां भौमः ततः पञ्चानां शनिः ततोऽष्टानां गुरुः। ततः सप्तानां बुधः ततः पञ्चानां शुक्रः इत्यर्थः। अयमेव त्रिंशांशकसंज्ञः इति। यथाह नारदः। "कृजार्कीजशुक्राणां बाणेष्टाद्रिमार्गणाः भागाः स्युर्विषमे ते तु समरात्रौ विपर्ययात्" इति। द्रेक्काणा राशिदशांशाः द्वादशसु राशिषु प्रथमोद्रेक्काणः प्रथमस्य स्वराश्यधीशस्य, द्वितीयोद्रेक्काणः पञ्चमराशीश्वरस्य, तृतीयः स्वराशितो नवमराशीश्वरस्य। यथा दृषे प्रथमोद्रेक्काणो वृषाधीशशुक्रस्य. स्वापेक्षपञ्चमकन्याधीशबुधस्य द्वितीयः, तृतीयः स्वापेक्षनवममकराधीशशनेरित्यर्थः। "स्युर्द्रेक्काणा लग्नपञ्चनवराशीश्वराः क्रमादिति" नारदोक्तेः पी० धा०। द्वादशांशेशानाह।

"स्याद्द्वादशांश इह राशित एव नेहं क्षोराश द्रेक्कनवमांशकसूर्यभागाः। त्रिंशांशकस्य घटिके कथितास्तु वर्गाः सौम्यैः शुभं भवति चाशुभमेव पापैः" सु०चि०। "इह षड्वर्गे द्वादशांशः सार्द्धनवांशकत्रयं तत् स्वराशित एवेष्टांशान्तं गणितं यद् यस्तद्राशिस्वामी स द्वादशांशेश्वरः "आरभ्य लग्नराशेस्तु द्वादशांशेश्वराः क्रमादिति" नारदोक्तेः। अन्यच्चरणत्रयं स्पष्टतरम्। तदुक्तं वसिष्ठेन। "लग्नं तदर्द्धं च ततस्त्रिभागो नवांशकस्य द्विदशांशकस्य। त्रिंशांशकस्येति हि वर्गषट्कं शुभं शुभव्योमचराधिपत्यम्। यः पापषड्वर्गभवो हि दोषः पञ्चाङ्गसौम्यफललग्नजातम्। गुणोत्तमस्थोधमसोधवाप्तः शुभत्वमेषं खलु राघवस्येति"। तस्मात् सौम्यपापषड्वर्गशाद्धर्ये सति सौम्यषड्वर्गस्थिभ्योऽधिकस्वेक्षुभः स्थिभ्योहीनस्वेदशुभ इत्यर्थः" पी० धा०। अथ गण्डान्तदोषः। "ज्येष्ठापौष्णभसार्पभान्त्यघटिकायुग्मं च मूलाश्विनीपित्र्याद्यौ घटिकाद्वयं निगदितं तद्भस्य गण्डान्तकम्। कर्काल्यबृश्चिकभान्ततोऽर्धघटिका सिंहाश्व मेषादिगा पूर्णा त्रीणि घटिकात्मकं त्वशुभदं नन्दातिथेस्तादृशम्" सु० चि०।

"गण्डान्तं नाम सन्धिविशेषः स चायनैकविधः नक्षत्रसन्धिस्तिथिसन्धिर्लग्नसन्धिश्च तथा योगसन्धिः करणसन्धिर्वर्षसन्धिरयनसन्धिर्ऋतुसन्धिर्माससन्धिः पक्षसन्धिर्दिनसन्धीरात्रिसन्धिमध्याह्नसन्धिः प्रातःसायंसन्धिर्निशीथसन्धिश्च। तत्र तिथिनक्षत्रलग्नविशेषाणां यः सन्धिर्नियतकालः स गण्डान्तसंज्ञः। अन्येषां तु सन्धिर्नियतकालः सन्धिशब्दवाच्य एव। तत्रादौ नक्षत्रगण्डान्तमुच्यते। ज्येष्ठा प्रसिद्धा पौष्णभं रेवती सार्पभक्लेषा एषामन्ते घटिकाद्वयम् (४दण्डाः)। तथा मूलाश्विन्यौ प्रसिद्धे पित्र्यं मघा। एषामादौ घटिकाद्वयं च गण्डान्तनाम। तथा च रेवत्यश्विन्योरन्तेऽश्लेषामघयोर्ज्येष्ठामूलयोरन्तरालयोर्घटीचतुष्टयं नक्षत्रगण्डान्तमशुभदम् तदुक्तं रत्नमालायाम्। "पौष्णाश्विन्योः सार्पपित्र्याख्ययोश्च यच्च ज्येष्ठामूलयोरन्तरालम्। तद्गण्डान्तं स्याच्चुनर्नाडिकं हि यात्राजन्मोद्वाहकालेष्वनिष्टमिति"। यत्तु वसिष्ठेनोक्तम् "यदन्तरालं पित्रसार्पयोश्च मूलेन्द्वोरश्विनपौष्णयोश्च। सप्तघ्नि गण्डान्तमिति त्रयं तद्यामप्रमाणं शुभकर्महन्तृ इति"। यामः प्रहरो नक्षत्रभोग्यस्येति शेषः। नारदोऽपि "सार्पेन्द्र पौष्णधिष्ण्यान्ते षोड्शांशा भसञ्ज्ञयः। तदग्रभेष्वाद्यजाताः पापागण्डान्तसंज्ञकाः। उक्तं सन्धितित्रयजं गण्डान्तत्रितयं महत्। ह्रस्वं जन्मयानादिविवाहस्यापनादिषु"। षोड्शांशो नक्षत्रभोगस्यार्द्धप्रहर इति यावत्। आद्यजाताः षोड्शांशाः। तदेतद्दोषभङ्गत्वात्प्रसङ्ग-

नार्थम् । तथा हि । चतुर्घटिके नक्तनृगण्डान्ते महान् दोषः, तदधिके त्रिघटिकात्मके मध्यमदोषः। ततोऽधिके घरणावधिके त्वल्पदोषः । अतएवोक्तं सूर्यसिद्धान्ते "सार्पेन्द्रपौष्णधिष्ण्यानामन्त्याः पादा भसन्धयः । तदग्रभेषु सार्द्धांशो गण्डान्तं नाम कीर्त्यते । व्यतीपाततृयं घोरं गण्डान्तत्रितयं तथा । एतल्लग्नत्रितयं सर्वकर्मसु वर्जयेदिति" । अर्द्धांशश्चरणार्द्धं प्रहर इत्यर्थः । दीपिकायाञ्च । "आद्ये मघाचतुर्भागे मूलपादाद्य एव च । रेवत्यन्यचतुर्भागे विवाहः प्राणनायकः" इति । अथ लग्नगण्डान्तमुच्यते । कर्कीति कर्क. प्रसिद्धः अलिर्वृश्चिकः अब्जोमीनः एषामन्तानां लग्नानामन्त्यार्द्धघटिका, तथा सिंहमेषौ प्रसिद्धौ अम्बोधनुः एषां लग्नानामादिभूतार्द्धघटिका गण्डान्तं नाम । तथा च कर्कसिंहयोर्वृश्चिकधनुषोर्मीनमेषयोर्वा लग्नयोरन्तरालवर्त्तिन्येका घटिका लग्नगण्डान्तमशुभमित्यर्थः । यदाह कश्यपः "सिंहकर्कटयोः सापकीटयोर्मीनमेषयोः । गण्डान्तमन्तरालं तन्नाडिका निधनप्रदेति" । यत्तु नारदेनोक्तम् "कुलीरसिंहयोः कीटचापयोर्मीनमेषयोः । गण्डान्तमन्तरालं स्यात् घटिकार्द्धं त्वतिप्रदमिति" । वसिष्ठेनापि । "लग्नान्तरालं घटिकार्द्धमेतत्कुलीरसिंहयोरलिचापयोश्च । मीनाजयोः सर्वगुणान्विहन्ति लोभो यथा सर्वगुणान्नरस्येति" । तद्दोषाधिक्यस्मरणार्थम् । अथ तिथिगण्डान्तमुच्यते । पूर्णान्त इति । पूर्णाः पञ्चमीदशमीपञ्चदश्यस्तासामन्ते घटिकैका, तथा नन्दाः प्रतिपत्षष्ठ्येकादश्यस्तासामादिभूतैका घटिका तिथिगण्डान्तं नाम । तथा च पञ्चमीषष्ठ्योर्दशम्येकादश्योः, पञ्चदशीप्रतिपदोर्वा तिथ्योरन्तरालवर्त्तिघटीद्वयं तिथिगण्डान्तमशुभमित्यर्थः । यदाह नारदः "पूर्णानन्दाख्ययोस्तिथ्योः सन्धिर्नाड्यो द्वयं सदा । गण्डान्तं तत्तु दं जन्मवाताद्धात्रतादिषु" इति । यत्तु कश्यपेनोक्तम् "पूर्णानन्दाख्ययोस्तिथ्योः सन्धिर्नाडीचतुष्टयम् । उद्वाहजन्मयात्रेषु गण्डान्तं निधनप्रदमिति" । तद्दोषातरत्यस्मरणार्थम् । एवं गण्डान्तसंज्ञः सन्धिरुक्तः । तत्र तिथिलग्नगण्डान्तपरिहारः शाकल्यसंहितायाम् । "तथैव तिथिगण्डान्तं नाक्षीन्दौ बलवत्यपि । तथैव लग्नगण्डान्तं नास्ति जीवे बलान्विते" इति । अथात्र प्रसङ्गादन्येषामपि सन्धिरुच्यतेऽस्माभिः । यदाह गुरुः "घटिकाद्वयमृक्षान्ते मासान्ते तु दिनत्रयम् । वर्षान्ते वर्जयेत्तस्मं ऋक्षाहिनमृक्षमिति" । तिथ्यादिसन्धिमप्याह वसिष्ठः "पक्षोऽवदसन्धिस्त्रिदिनञ्च माससन्धिस्त्रिरात्रः खलु सन्ध्ययोश्च । नाड्यन्तसन्तिथिकरणयोगनक्षत्रदर्शं करणस्य सन्धिः" । वर्षेषु विशेषमाह स एव "सौराब्दान्ते त्यजेत्पक्षं चान्द्रे तु नवभन्त्यजेत् । सावनान्तेऽष्टभन्त्याज्यं नाक्षत्रे पौष्णभात् त्रयङ्घटिमिति" । अत्रापि विशेषमाह स एव । "अब्दाः स्युस्त्रिविधा जीवसौरचान्द्राख्याः सदा । तेषामादौ तथा चान्ते त्रिदिनं वर्जयेच्छुभे" इति । अयञ्च सर्वकार्यसाधारणो निषेधः अन्यथा मौनादित्ये विवाहप्रसङ्गाभावादेव वर्षान्तनिषेधस्य वैयर्थ्यापातात् । गुरुः "मृत्यन्ते पुत्रनाशः स्यान्मासान्ते तु धनक्षयः । वर्षान्ते वर्गनाशः स्यादृक्षगणात् सर्वनाशनमिति" । आवश्यकत्वे तु "नक्षत्रयोगतिथिसन्धिषु नाड्यैकैका तिथ्यर्क्षगतिपलैः सहितोभयत्र । कर्कालिमीनतनुसन्धिषु टिक्पलानि त्याज्यानि शेष विवरेषु च पञ्च पञ्चेति" वासनासिद्धं कैश्चवार्कैश्चवाक्यमनुसर्त्तव्यम् । वासना च सिद्धान्तशिरोमणावभिहिता । "ग्रहितनुविकलाभ्यस्तेन्दुभुक्तेन्दुभान्योर्गतिविवरकलाभिर्भूय एवाभिरेव । पृथगथ गतिगुण्या नाडिकाः सन्विराप्ता भतिथिकरणयोगानां फलं तत्र मिश्रमिति" । सन्धिफलमध्याह कैश्चवार्कैः ।"सन्धौ पुरन्ध्रो शुचमेति बध्या मृतप्रजा वा यदि सन्धिसन्धिः । यदन्ति वात्स्या ऋतुनाविमूढां निशीथमध्यं दिनसन्धिपृढाम्" तत्रार्द्धरात्रमध्यन्दिनसन्धिः "मध्ये निशाक्षोर्घटीत्रयम्" भु०चि० । इत्यादौ प्रकरणेऽभिहितः । सन्धिसन्धिस्तु कैश्चवार्कैरुक्तः।"रवेर्भवेदेकगटाधिकस्य यदंशवृन्दं खलु सायनस्य । तदत्र राशिद्वयभागतटं स्पष्टं वसन्नाहतवो भवन्ति । तत्सन्धयोगाङ्घटीसमाः स्युर्हि सङ्क्रान्तिसंज्ञे द्विघुवायनीया" । स सन्धिसन्धिः खलु यत्र शेषं शून्यं भवेद्वेद विशेषपुरुषः" इति मीनसंक्रान्तिमारभ्य वसन्तर्तुनक्षत्रेति पञ्चमक्षीलक्षैकगटाधिकस्येत्युक्तम् । गण्डान्तदोषपरिहारमाह वसिष्ठः "गण्डान्तदोषमखिलं हरतीऽभिजिदाख्यः। हन्ति यदृक्षगव्याधः पञ्चसङ्ख्यियाखिलम्" । तदेतद्दोषापवादाख्यस्य प्रकारस्य नियामकत्वाद्विवाहविषयं न ज्ञातकादौ" धी०धा० । अथ कर्त्तरीदोषः। "लग्नात् पापाद्व्ययगे व्ययार्थस्थौ यदा तदा। कर्त्तरी नाम सा ज्ञेया मृत्युदारिद्र्यशोकदा"। सु०चि० "यदा पापग्रहौ लग्नाद्व्ययार्थस्थाद्व्ययगद्व द्वादशस्थः पापग्रहोऽमार्गी, द्वितीयस्थः पापग्रहो वक्री स्यात्तदा कर्त्तरी नाम दोषः

कृन्तति स्त्रीपुंसयोः प्राणांश्छेदयतीति कृती च्छेदने इति धात्वर्थानुसारादत्वर्थो सम्मुखकर्त्तरीयं मृत्युदारिद्र्ययोः कदा भवेत् । यदाह नारदः "लग्नाभिमुखयोः पापयहयोर्जामुकयोः । सा कर्त्तरीति विज्ञेया दम्पत्योर्मरणलकर्त्तरी । कर्त्तरीदोषसंयुक्तं यल्लग्नं तत् परित्यजेत् । अपि सौम्ययहैर्युक्तं गुणैः सर्वैः समन्वितमिति"। गर्गोऽपि ।"व्यये मार्गगतिः क्रूरो वक्री क्रूरो धने यदि । तौ च लग्नांशतुल्यौ च तदा घोराख्यकर्त्तरी" । यदा तु द्वितीये मार्गी द्वादशे च वक्री अथ वापि क्रूरौ व्ययार्थस्थौ सन्तौ शीघ्रिणौ वा स्यातां तदा कर्त्तरी नास्त्येव । यदाह वसिष्ठः "लग्नस्य पृष्ठाग्रगयोरसाध्वोः सा कर्त्तरी स्याद्जुवक्रगत्योः। तावेव शीघ्रौ यदि व्यक्तचारौ न कर्त्तरी चेति पितामहोक्तिरिति" । इयं कर्त्तरी चन्द्रस्यापि द्रष्टव्या । यदाह कश्यपः "चन्द्रस्य कर्त्तरी तद्वच्छुभ दृष्टा न दोषदेति"। परन्तु लग्नस्य चन्द्रस्य वा क्रूरयहमध्यगतत्वदोषोऽस्त्येव कर्त्तरीतोऽल्पफलः कन्यानाशकरत्वात् । यदाह वसिष्ठः ।"क्रूरयहमध्यगते लग्ने चन्द्रेऽथ वा करग्रहणम् । ते यमसदनाभिमुखं गमनञ्चेच्छन्ति कन्यायाः" इति कर्त्तरीदोषेऽन्यदप्यपादान्तरं "पापौ कर्त्तरिकारकावित्यादिना स्वयं वक्ष्यति । अत्र लग्नादित्युपलक्षणात् सर्वेषामपि भावानां कर्त्तरीदोषोऽध्यवसेयः 'यो यो भावः स्वामिदृष्टोयुतोवेत्यादिना" तुल्यन्यायत्वात् । तत्र लग्ने कर्त्तरी सद्दोषकरी लग्नभङ्गाधायकत्वात्सस्या अन्यत्र तादृग्दोषाभाव इति तु तत्त्वम्"पी०धा०। अतःपरं राहुकेत्वोः पापग्रहत्वं व्यवस्थापितं तच्च केतुग्रहे विस्तरेण वक्ष्यते । अथ युतयोगापरपर्यायसंयहदोषः।"चन्द्रे सूर्यादिसंयुक्ते दारिद्र्यं मरणं शुभम् । सौख्यसापत्यवैराग्यं पापहययुते मृतिः"स०चि०"सूर्ययुक्ते चन्द्रे दारिद्र्यं स्यात् । भौमादियोगे मरणादि फलं क्रमेण स्यादित्यर्थः पापयहराहित्येऽप्यशुभफलं राहुकेत्वोरपि द्रष्टव्यम् । यथाह नारदः "यथाङ्के यहसंयुक्ते दोषःसंयहसंज्ञकः । सूर्येण संयुते चन्द्रे दारिद्र्यमुच्यते ध्रुवम् । कुजेन मरणं व्याधिः सौम्येन स्वजनत्यता । दौर्भाग्यक्रूरया युक्ते सापत्यान्मार्गवेण तु । प्रव्रज्या सूर्यपुत्रेण राहुणा कलहः सदा । केतुना सयुते चन्द्रे नित्यं कष्टंदरिद्रता । तस्मिन् संयहदोषे तु विवाहं नैव कारयेत्" । सापत्यं पुत्रवन्ता भार्या स्यात् । अत्र गुरुबुधसहितफलमशुभफलञ्च यन्मकर्त्रा तु वसिष्ठवाक्ये कस्यचिन्मताभिप्रायेण शुभफलमुक्तम् । यथोक्तं वसिष्ठेन "दारिद्र्यं रविणा कुजेन मरणं सौम्येन न स्युः प्रजा दौर्भाग्यं गुरुणा सितेन सहिते चन्द्रे ससापत्यकम् । प्रव्रज्यार्कसुतेन सेन्दुजगुरौ वाञ्छन्ति केचिच्छुभं ह्यादौ नैर्ऋतसङ्गरैः शशियुतैर्दीर्घः प्रवासः शुभैरिति" । अत एव श्रीपतिनोक्तम् । "शुभञ्च दम्पोर्लिष्टदीक्ष्यविद्वांसमिति" दम्पोर्लिष्टदीक्ष्योजीवः । पापेति । पापद्वयेन युते उपलक्षणत्वात्पापत्रयादियुते मृतिरेव स्यात् । "पापद्वययुते चन्द्रे दम्पत्योर्मरणं ध्रुवमिति" नारदोक्तेः । बहुसौम्ययहयोगे तु बहुकालं पत्युर्देशान्तरेऽवस्थानं स्यात् तद्दाक्यमधुनैवाभिहितम् । अथास्य परिहारो नारदोक्तः । "स्वक्षेत्रगः स्वोच्चगोवा मित्रक्षेत्रगतो विधुः । युतिदोषाय न भवेद्द्वयोः श्रेयसे तदेति" । क्वचिद्वर्गोत्तम इति पठ्यते । कश्यपेनापि । "तुङ्गमित्रस्वराशिस्थः शुभयुक्तः शुभप्रदः । एवंविधः क्रूरयुतः सम्पूर्णफलदःशशीति" पी० धा० ।

अथ जन्मराशिलग्नयोरष्टमलग्नदोषं सापवादमाह ।

"जन्मलग्नभयोर्मृत्युराशौ नेष्टः करग्रहः । एकाधिपत्ये राशीशे मैत्रे वा नैव दोषभृत्" मु०चि० ।

"जन्मलग्नजन्मराश्योः सम्बन्धिनि मृत्युराशावष्टमलग्ने करग्रहो नेष्टः । यदाह नारदः "दम्पत्योरष्टमं लग्नं त्वष्टमोराशिरेव च । यदि लग्नगतः सोऽपि दम्पत्योर्निधनप्रदः । स राशिः शुभयुक्तोऽपि लग्नं वा शुभसंयुतम् । लग्नं विवर्जयेत् यत्नात् तदंशांश्च तदीश्वरान्"इति । अत्र जन्मलग्ने जन्मराशौ च विशेषमाह कश्यपः । "इष्टं खजन्मलग्नं तज्जन्मराशिरनिष्टदः । लग्नगस्तु तयोः स्थानाच्छुभान्युपचयानि वै" इति । नारदोऽपि "जन्मराश्युडुभोनैव जन्मलग्नोदयः शुभः । तयोरुपचयस्थानं यदि लग्नगतं शुभमिति" । अथाष्टमलग्नदोषपरिहारमाह । एकेति जन्मराशिजन्मलग्नयोरन्यतरस्य विवाहलग्नस्य च स्वाम्यैक्ये सति यथा मेषवृश्चिकयोः, तथा तयोराशीश्वरयोः मैत्रे यथा सिंहमीनयोः । अत्र हि सूर्यगुर्वोरन्योन्यप्रीतिरस्ति । एतादृग्विषये विवाहो लग्नाष्टमदोषभृत् न स्यात् । यदाह कश्यपः "जन्मे गाष्टमलग्नेऽौ मिथो मित्रे व्यवस्थितौ । जन्मराश्यष्टमर्क्षोत्थदोषो नश्यति भावत"इति पी०धा०। परिहारान्तरमाह "मीनोक्षकर्कालिमृगस्त्रियोऽष्टमं लग्नं यदा नाष्टमगेहदोषभृत् । अन्योन्यमित्रत्वबलेन सा वधूर्भवेत्सुतायुर्धनसौख्यभागिनी" । "उक्ता दृषः स्त्री कन्या अन्ये प्रति-

ज्ञाः एते राशयो यद्यष्टमलग्नं स्युः यथा सिंहाम्भोनः तुलातोऽष्टमः धनुषः कर्कः मेषात् वृश्चिकः मिथुनान्मकरः कुम्भात्कन्याऽष्टमलग्नम् । तदाष्टमगेहदोषश्च भवेत् । कुत इत्यत आह । अन्योन्येति । प्रागुक्तपरस्परप्रीतिवशे । दृढत्वोपलक्षणम् । मेषवृश्चिकयोस्तुलावृषयोरेकाधिपत्यात् । एवं सति सा बधूः परिणीता कन्या सुता यूर्दृढसौख्यभागिनी स्यात् । उक्तञ्च "भगकुलीरदलालिमृगाङ्गना जननराशिविलग्नगदृष्टमाः । शुभफला भगुणा कथितास्त्वयोरधिपती सुहृदौ हि परस्परमिति" । परिहारान्तरमप्याह गुरुः । "लग्नादष्टमराशीशः केन्द्रगः शुभवीक्षितः । यद्यष्टमगतस्तोक्त दोषमाशु व्यपोहति । रन्ध्रेशः स्वशुभांशस्थस्तुङ्गः स्वक्षेत्रमित्रगः । अष्टमस्थानदोषोहि विनश्यति न संशय" इति ।

अथ लग्नेऽष्टमेशादियोगफलम् । "मृतिभवनांशेयदि च विलग्ने तदधिपतिर्वा न शुभकरः स्यात् । व्ययभवनं वा भवति तदंशस्तदधिपतिर्वा कलहकरः स्यात्" मु०चि० । "अष्टमभवनवांशोयदि विलग्ने स्यादथ वाष्टमभवनस्वामी विलग्ने स्यात्तदा शुभकरो न स्यात् । यदाह कश्यपः । "दम्पत्योरष्टमे लग्ने रात्रौ वापि तदंशके । तद्रोगे वा लग्नगते तयोर्मृत्युर्न संशय" इति । अथ व्ययभवनऋक्षलग्नजन्मराशिभ्यादाद्यमभवनम् अथवा व्ययांशो व्ययस्वामी यदि लग्ने स्यात्तदा कलहकृत् स्यात् । उक्तञ्च कश्यपेन "तथैव हादशे लग्ने तदंशे वा तदीश्वरे । विवाहे लग्नगे नैवां नित्यं स्यात् कलहोद्वयोरिति" । नारदेनापि "दम्पत्योर्दादयं लग्नं राशिर्वा यदि लग्नगः । अर्थहानिस्तयोस्स्यात्तदंशस्वामिनन्यजेदिति" ।

अथ विषघटीदोषः । "खरामतो१०ऽन्त्यादितिवह्निपित्र्यभे खवेदतः४० के, रदत २२श्च सार्पभे । खवाणतो ५०ऽर्क्षे, भ्रुतितो१८र्यमाम्बुपे, क्रतेर२० भंगत्वाद्र भविष्यजीवभे । मनो १४ह्यदैवानिलसौम्यशाक्रभे कुपक्षतः२१ शैवकरेऽष्टि१६ नोऽजभे । युगाग्निनो२४ वसुभ्रुभतोयवास्यभे, खचन्द्रतो१० मित्रभवासवन्तुतौ । मूलेऽङ्कबाणाद्रु ५६ विषनाडिकाः क्रमात४ वर्ज्याः शुभेऽधोविषनाडिकाधुवाः । निघ्ना भभोगेन खतर्कहृ०भाजिताः स्युटाभवेयुर्विषनाडिकास्तथा" मु०चि० । "रेवतीपुनर्वसुवृत्तिकामघानलेषु खरामतः त्रिंशद्घटिकोत्तरं क्रमात्तस्तो घटिकाविषनाडिकाः शुभकार्ये वर्ज्याः स्युरिति" तृतीयस्कोक्तेनान्वयः । एवं सर्व्वत्र व्याख्येयं कोरोहिण्यां क्रमेर्बिंधतेः । अजभे पूर्व्वभाद्रपदायासु अन्यानि पदानि स्पष्टानि । तद्देवं षष्टिघटीरूपे नक्षत्रभोगे ध्रुवकास्तत्तो विषनाड़िकाः प्रोक्ताः न्यूनाधिकत्वे तु स्पष्टीकरणमुच्यते । अथो इति । विषनाडीनां ध्रुवा खरामतः इत्येवमादायो नक्षत्रभोगेनेष्टेन निघ्नाः खतर्कैः षष्ट्या भाजिताःसतोविषनाडिका ध्रुवाः स्पष्टा भवेयुरित्यर्थः । अतोपपत्तिस्तैरायिकेन । यदि घटीषष्ट्यात्मकभभोगेनेमे ध्रुवका इमास्तत्तो विषनाडिकाश्च लभ्यन्ते । तदेष्टभभोगेन किमपि, ध्रुवाविषनाडिकास्चेष्टभभोगेन गुणाः षष्ट्या भाज्या फलितम् । यदाह कश्यपः "वियद्बाणा५० वेदद्वाः२४ खरामा३० व्योमसागराः४० । वेदचन्द्रा१४ चन्द्रदस्राः१२ खरामा३० व्योमबाहवः२० । नेत्राग्नयो३२ व्योमगुणाः३० शून्यद्वा२० गजेन्दवः१८ । त्र्यम्बाहवो२१ वियद्दस्राः२० शक्रा१४ वेन्द्राः१४ खभूमयः१० । वेदचन्द्रा १४ स्तर्कबाणा५६ वेदद्वाः२४ खबाहवः२० । व्योमेन्दवो१० व्योमचन्द्रा१० धृतयः८ स्तर्कभूमयः१६ वेदाश्विनः२४ खरामाः ३० स्फुटस्त्यक्तात् घटिकाःक्रमात् । आभ्यः परस्तत्क्रमशस्तत्तो विषनाडिकाः । कृताद्यान्घटीनिघ्नाः षष्टिभक्ताः स्फुटाः स्मृताः । विषनाडीदोषदुष्टं लग्नं सर्व्वगुणान्वितम् । शुभैः सर्व्वैश्च संयुक्तमपि पञ्चैकं त्यजेदिति" । वसिष्ठः कुर्व्वन्त्युद्वाहितां कन्यां विधवां वत्सरत्रयात् । अन्यर्क्षान् भङ्गलेतास्य निधनं याथ निर्द्वनमिति" । ताः विषनाडिकाः ।

अथ प्रसङ्गात् अन्यान्तरोक्तास्तिथिवारविषनाडिकाः प्रोच्यन्ते यस्याभिः देवज्ञम० । "तिथी१५ षु ५ नागाऽद्रि७गिरी७षु ७ वारिधि४गजाऽद्रि७दिक्१०पावक३ विश्व१३ वासवाः१४। सुनोभ७,दसंख्याप्रथमा तिथेः क्रमात्परं विषं स्यात् घटिकाचतुष्टयम् । नखा२०हयं२हादग१२दिक्१० च शैलाऽवाणाश्च ५७त्र्यक्षि २५यथाक्रमेण । सूर्य्यादिवारेषु परं चतस्रोनाड्योविषं स्यात् खलु वर्जनीयम्" । ज्योतिः सारे । "विवाहव्रतचूडासु गृहारम्भप्रवेशयोः । यात्रादिशुभकार्य्येषु विघ्नदा विषनाड़िकेति" । अस्य परिहारमाह दैवज्ञम० गुरुः "चन्द्रोविषघटीदोषं हन्ति केन्द्रतिबोगगः । लग्नं विना शुभैर्दृष्टः केन्द्रे वा लग्नपस्तथेति" फलप्रदीपे "विषनाड्युत्थितं दोषं हन्ति सौम्यर्क्षगः शशी । मित्रदृष्टोऽथ वा स्वीयवर्गस्थो लग्नपो भवेत्" पी०धा० । अथ सुहूर्त्तेशाः । "गिरिशभुजगमित्राः पित्र्यवस्वम्बु विश्वेऽभिजिदथ च विधाताऽप्येन्द्र इन्द्रानलौ च । निर्ऋतिरुदकनाथोऽप्यर्यमाऽथो भगः स्युः क्रमश इह सुहूर्त्ता वासरे बाणचन्द्राः" मु०चि० ।

"अत्र वाणचन्द्रा इत्युक्तेः मुहूर्त्तस्य पार्थक्येनात्र लक्षणं नोक्तम् । गिरिशो महादेवः भुजगः सर्पः मित्रः सूर्यविशेषः पित्र्यवस्वम्बुविश्वे प्रसिद्धाः अहमोऽभिजित् ततो विधाता ब्रह्मा, इन्द्रः इन्द्राग्नी अत्र समुदितयोर्व्यासज्यवृत्तिदेवतात्वम् अत्र तूर्य्यमुहूर्त्तस्वामिनः पितर इत्यपेक्षितम् पित्र्यमिति नक्षत्रतदोषयोरभेदोपचारात् तस्य स्वामिनि वृत्तिः । निर्ऋतीराक्षसः उदकनाथो वरुणः अर्य्यमा भगश्चैतौ सूर्यविशेषौ । इत्येतद्दोषा वाणचन्द्राः पञ्चदश वासरे मुहूर्त्ताः स्युः यदाह नारदः "दिवामुहूर्त्ता रुद्राहिमित्रा पित्र्यवस्वुदकम् । विश्वे विधात्रब्रह्मेन्द्रा इन्द्राग्न्यर्क्षेषु ताः । अर्य्यमाभगसंज्ञस्य विज्ञेयाः दश पञ्च चेति" पी० धा० ।

"गिरीजपादाष्टौ सुभेगा अदितिर्जीवकौ । विष्णुर्कत्वष्टमरुतौ मुहूर्त्ता निशि कीर्त्तिताः" मु०चि० ।

"प्रथममुहूर्त्तस्वामी शिवः ततोऽजपादात् पूर्व्याभाद्रपदादष्टौ भेगा नक्षत्रस्वामिनोमुहूर्त्तेशाः स्युः । यथा "अजपादः अहिर्बुध्न्यः पूषा अश्विनौ यमः अग्निर्ब्रह्मा सोम इत्यष्टौ भेगाः । ततोदग्भेगेऽदितिः जीवको गुरुः । विष्णुर्कत्वष्टमरुतः प्रसिद्धाः एतद्दोषा निशि मुहूर्त्ता प्रकीर्त्तिताः यदाह नारदः "इगाजपादहिर्बुध्न्यपौष्णाश्वियमवह्नयः । धातृचन्द्रादितीज्याख्यविष्णुर्कत्वष्टवायवः" इति । मुहूर्त्तलक्षणं कथ्यमेनोक्तम् । "अङ्गः पञ्चदशोभागोमुहूर्त्तोऽथ तथा निशः" इति । प्रयोजनमाह नारदः । "यस्मिन्वृत्ते हि यत्कर्म कथितं निखिलं च यत् । तद्वृत्ते तन्मुहूर्त्ते कार्य्यं यात्रादिकं सदेति" यात्रेत्युपलक्षणं देवस्थापनाद्यपि कार्य्यम् । पी०धा० । एवं मुहूर्त्तेशे निरूपिते तद्दोषमाह ।

"रवावर्य्यमा ब्रह्मरक्षस्य सोमे कुजे वह्निपित्र्ये बुधे चाभिजित् स्यात् । गुरौ तोयरक्षो भगो ब्रह्मपित्र्ये शनौ वीशसार्पौ मुहूर्त्ता निषिद्धाः" मु०चि० ।

"रवेर्वारेऽर्यमा लक्षणया अर्य्यमस्वामिकचतुर्दशसंख्याकोमुहूर्त्तोनिषिद्धः । एवं सोमवारे ब्रह्मरक्षः इन्द्रैकवह्नयः । ब्रह्मरक्षःस्वामिकौ मुहूर्त्तौ निषिद्धौ एवं सर्वत्र व्याख्येयम् । ईशो महादेवः । यदाह नारदः । "अर्य्यमा राक्षसब्राह्मौ पित्र्याग्नेयौ तथाभिजित् । रक्षःसार्पौ ब्राह्मपित्र्यौ भौजङ्गेशाविनादिषु । वारेषु वर्जनीयास्ते मुहूर्त्ता शुभकर्म्मणि" पी० धा० ।

"अथ वेधदोषं विवक्षुर्विहितनक्षत्रादिकमभिजिन्मानमाह

"निर्ऋतेः यमिकरमूलभैत्रपित्र्याब्राह्म्यान्योत्तरपवनैः शुभोविवाहः । रिक्तामारहिततिथौ शुभेऽह्नि वैश्वभान्त्याङ्घ्रिस्तुतितिथिभागतोऽभिजित् स्यात्" मु०चि० ।

"मृगशिराश्लेषाहस्तानुराधा मघारोहिण्युत्तराफाल्गुन्युत्तराषाढोत्तराभाद्रपदारेवतीनक्षत्रैः निर्वेधैः वेधाख्यदोषरहितैः विवाहः शुभः शुभफलप्रदः यदाह वसिष्ठः । "स्वातीमघायां नितृतौ ध्रुवान्त्यमित्रेन्दुहस्तेषु च कन्यकानाम् । पाणिग्रहस्त्रिष्टफलप्रदः स्यादविद्धभेषुवे गुणान्वितानामिति" । नारदोऽपि "पौष्णधात्रुत्तरामैत्रमरुद्वह्नीन्द्रार्कपित्र्यभैः । समूलभैरविद्धैस्तैः स्त्रीकरग्रह इष्यते" अर्कोश्लेषाः पी०धा० । वसिष्ठवाक्ये इष्टफलदइत्युक्ते अन्येषामपि यद्गणमाप्रहिषये सूचितम् तेन "कमायाः पाणिं गृह्णीयात्त्रिषूत्तरादिषु" पारस्करसूत्रे चित्राश्रवणाधनिष्ठाश्विनीनां ग्रहणं तच्च तस्य यजुर्वेदीयगृह्यसूत्रकरत्वेन तद्वेदविषयमाप्रहिषयं वेति ज्यो०रघु०अतएव भीमपराक्रमे अन्यान्यनक्षत्रेऽभिहितं यथा

"पूर्वात्रिये विशाखायां शिवाद्ये भवतुत्थे । जठा चाशुभवेत् कन्या विधवाऽतो विवर्जयेत् ; विष्णुभात्तु त्रिके चित्रे ज्येष्ठायां त्वक्षनेयमे । एभिर्विवाहिता कन्या भवत्येव सुदुःखिता" ।अत्र चित्रादिवर्जनात् यजुर्वेदिनामप्यत्रनाप्रहिषयेव ग्राह्यता । तिथिनिर्णयमाह रिक्तेति । रिक्तामाः प्रसिद्धाः आभिर्वर्जिततिथिषु शुभेऽह्नि शुभग्रहयासरेऽपि विवाहः शुभः । यदाह वसिष्ठः । "शुक्लद्वितीयादित एव लक्ष्ये पक्षे दशम्यन्तगताः प्रशस्ताः । ताखष्टमीरुद्रगणैश्चतुर्दशी चापि तिथिर्विवर्जिता । वाराः प्रशस्ताः शुभखेचराणां सूर्य्यार्किवारौ खलु मध्यमौ तु । त्याज्याः सदा भूमिसुतस्य वारः कामार्कतिथ्योरपि तौ प्रदोषाविति" तौ सूर्य्यार्कीवारौ तूयोदशीद्वादश्यौ प्रदोषौ प्रकृष्टदोषावित्यर्थः। गणेशयत्तुर्थी दुर्गा नवमी । अत्र यदि विचारितविवाहदिनमारभ्य चतुर्थीकर्मपर्य्यन्तं पित्र्याद्यावश्यकश्राद्धदिनमभावाद्या वा भवति तदा विवाहो न कार्य्यः । उक्तञ्च "विवाहमारभ्य चतुर्थिमध्ये श्राद्धं दिनं दर्शदिनं यदि स्यात् । वैधव्यमाप्नोति तदापु कन्या जीवेत् पतिस्तेदनपत्यता स्यादिति । अन्यच्च ।"विवाहमध्ये यदि तत्क्रियाङ्गतावाद्यसुखस्थाः पितरो न यान्ति । हस्ते विवाहे परतस्तु कर्य्यात् श्राद्धं स्वधाभिर्न तु दूषयेत् तमिति । पी०धा०। तेन लक्ष्णपक्षे द्वादश्यादिदिनचतुष्टये आपद्यपि विवाहो न कार्य्यः। रिक्तानां वर्जनेऽपि यमिवारयुक्तायास्तासां ग्राह्यता इति गौड़ा अनार्षमूलत्वात्तच्चिन्त्यम् "न

वारदोषाः प्रभवन्ति रात्रौ सूर्यावनीसूनुशनैश्चरणामिति"। गौड़ास्तदन्ति तन्मूलमपि ग्राह्यम्"। अथाभिजित्प्रमाणम्। वेदेति पी०धा० 'अभिजिच्छब्दे २२७पृ० तद्विवृतिः।

अथ पञ्चशलाकचक्रे विद्धनक्षत्राणि। "वेधोऽन्योन्यमसौ विरिञ्चभिजितोर्याम्यानुराधर्क्षयोर्विश्वेन्द्वोर्हरिपित्र्ययोर्मैत्रक्षतेज्यस्तोत्तराभाद्वयोः। स्वातीवारुणयोर्भवेच्चित्रर्क्षमादित्ये।स्तयोरुक्तयोरुक्तयोः खेटे तत्र गते तुरीयचरणाद्योर्वा तृतीयद्वयोः" सु०चि०।

"विरिञ्चिः रोहिणी रोहिण्यभिजितोर्यमर्क्षैः क्रूराक्रूरैः क्रूरतोवेधोऽन्योन्यं परस्परं भवेत्। रोहिणीस्थे चन्द्रे अभिजिद्विद्धः अभिजित्स्थे रोहिणी विद्धेत्यर्थः। एवं सर्व्वत्र ऊहा उत्तरफल्गुनी। तत्प्रासप्रकारमाह नारदः। "तिर्य्यक् पञ्चोर्द्धगाः पञ्च रेखे द्वे द्वे च कोणयोः। शुभ्रकोणे द्वितीयेऽग्निधिष्ण्यं चक्रे च विन्यसेत्। भान्यतः साभिजित्यैकरेखाकोणे च विद्धमिति"। चक्रे तत्रिरेखैकरेखास्थितेन तद्विद्धं खेचरेण प्रदिष्टम्। क्रूरैर्विद्धं सर्वधिष्ण्यं विवर्ज्यं सौम्यैर्विद्धं नाखिलं पाद एवेति"। नन्वष्टाविंशतिर्नक्षत्राणि चक्रे तत्र द्वयोर्द्वयोः परस्परवेधे चतुर्दश युग्मानि वक्ष्यानि स्युः कथमष्टावेवाभिहितानि उच्यते विवाहे ह्येकादशनक्षत्राणामेव प्रायस्त्याभिधानात् तद्वेधोपयोगीत्येतावन्त्येव युग्मानि सम्भवन्तीति तावतामेवाभिधानम्। अतएव दैवज्ञम० "रोहिण्यभिजितोर्मूलादित्ययोर्मृगवैश्वयोः। रेवत्युत्तरफाल्गुन्योर्मघाश्रवणयोर्भवेत्। हस्तोत्तराभाद्वयोः स्वातीवारुणयोर्मिथः। अनुराधाभरण्योश्च वेधोऽयं पञ्चरेखजः" इति तथैवोक्तम्। वाराहविवाहपटले प्रत्येकवेधफलानि "रविवेधे वैधव्यं पुत्रनाशं करोति कुजवेधे। बन्ध्या पण्डितवेधे दीक्षाकरणं करोति गुरुवेधः। भृगुसुतवेधेऽपुत्रा दासी रविजातराक्षसम्भूते"इति। पण्डितो बुधः दीक्षाकरणं प्रव्रज्याम् चरणवेधमाह खेट इति। तत्र तत्रिनृ नक्षत्रे विद्यमाने चक्रे सति यदि चतुर्थपादेऽस्ति तदा विद्धनक्षत्रस्य प्रथमपादे वेधः। यदि तृतीयपादे तदा द्वितीयचरणस्य वेधः एवं यदि द्वितीयपादस्थः तदा तृतीयपादे वेधः यदि प्रथमपादे तदा चतुर्थपादस्य वेध इत्यर्थः। यदाह वसिष्ठः "अतोऽन्यपादमादिगोद्वितीयगस्तृतीयकम्। तृतीयगोद्वितीयकञ्चतुर्थगस्तु चादिमम्। भिनत्ति वेधकृद्धीनचान्यपादमादिशेत्"। एतद्यद्यपि शुभाशुभयुक्तसाधारणं प्रतीयते तथापि सौम्ययुक्तपरन्द्रष्टव्यम्। यतोवसिष्ठेनैव खार्जूरदोषाभिधानावसरे "विषप्रदिग्धेन कृतस्य पत्रिणा मृगस्य मांसं सुभृशं क्षतादते। तथैव पादो न शुभोऽवशिष्टपादाः शुभास्तेति पितामहेन"इत्याशङ्क्य समाहितम् "पादएव न शुभः शुभयुक्तैर्विद्ध इत्यखिलशास्त्रसंमतम्। क्रूरविद्धं भयुतं न शोभनं शोभनेषु गदितं न पादतः इति। नारदः। "पादमेव शुभैर्विद्धमशुभैश्चैव कृत्स्नभम्" इति। कश्यपोऽपि। "क्रूरविद्धं युतन्त्विष्ण्यं क्रूराक्रान्तञ्च कृत्स्नभम्। मणिश्चेममयं हर्म्यं भूताक्रान्तमिव त्यजेत्" इति कृत्स्नभं सकलनक्षत्रम्। तस्मात्क्रूरयुक्तविद्धे संपूर्णनक्षत्रत्यागः शुभयुक्तविद्धे चरणत्याग इति सिद्धान्तः। तत्र विवाहे पञ्चशलाकावेध एव यदाह वसिष्ठ "पञ्चशलाकाचक्रे पाणिग्रहणे भवेधविधिरुक्तः। शस्तः शुभमित्रकृतः सप्तशलाकाजडृतरत्नेति"। श्रीपतिः "बधूप्रवेशने दाने वरणे पाणिपीडने। वेधः पञ्चशलाकाख्योऽन्यत्र सप्तशलाकक" इति पी०धा०। अत्र केचित् सप्तशलाकाचक्रवेधमाहुः। तत्र विद्धनक्षत्राणि यथा "शक्रेज्ये, शतभानिशे, जलधिजे, पौष्णार्यमर्क्षे, वसुहीशे, वैश्वसुधांशुभे, हयभगे, सार्पानुराधि, तथा। हस्तोपान्तिमभे, विधातृविधिभे, मूलादितौ त्वाष्ट्रभाजाङ्घ्रौ, याम्यभगे, क्षणातृहरिभे, विद्धे कुभद्रेधवे"सु०चि०"कुभद्रेखजे सप्तशलाके चक्रे शक्रेज्येज्येष्ठापुष्यनक्षत्रे मिथः क्रूराधिष्ठितत्वेन विद्धे ज्ञेये। एवं जलधिजे पूर्व्वषाढार्द्रे विद्धे ज्ञेये एवं सर्व्वत्र। वैश्वसुधांशुभे उत्तरषाढामृगशिरसी, हयभगे अश्विनीपूर्व्वफाल्गुन्यौ, उपान्तिमभं उत्तराभाद्वयं, अत्र मूलवाक्यं स्वरोदयस्थं यज्ञोपवीतप्रकरणे भिक्षितम्। चक्रोद्धारो व्यवहारसञ्जये "सप्त सप्त विनिपात्य रेखिकास्तिर्यगूर्ध्वमथ लक्षिकादिकम्। लेखये दभिजिता समन्वितञ्चैकरेखखगमेन विध्यते" दीपिका। "यस्याः पत्यौ सप्तशलाकभिन्नः पापैरपापैरथवा विवाहे। उद्वाहवस्त्रेण तु संवृताङ्गी श्मशानभूमिं रुदती प्रयाति"। तथा च भोजः। "विद्धे सप्तशलाकाख्ये विधवा लग्नवाससा। पुनर्व्यावृत्तिचिराद्धारी सख्याग्नौ सुखचन्द्रिकाम्"। वैधव्यञ्च नक्षत्रसंख्यातुल्यार्द्धवर्षैर्भवति तदुक्तं वराहेण "नक्षत्रजसुहृद्विवाहे फलमर्द्धं स्वाम्यामितैः सदसदिति"। अत्रापि तुल्यन्यायत्वात् क्रूरवेधे पूर्णं नक्षत्रन्त्याज्यम्, शुभयुक्तवेधे पादत्याज्यः इति ध्येयम्। भो० धा०। "सप्तशलाकाजडृतरत्नेति" प्रागुक्तवचनात्

'भक्तभोग्यलग्नाक्रान्तं विद्धं पापयुक्तेन च । शुभाशुभेषु कार्येषु वर्जनीयं प्रयत्नतः' स्वरोदयवाक्यांश्च अस्य कर्मकार्येषु यज्यर्थतया चतुर्दशयुग्मानामिकोक्ति.''अत्रापवादः ''कल्याणि क्रूरविद्धानि क्रूरयुक्तादिकानि च । भुक्ता चन्द्रेण भक्तानि शुभाहीणि प्रचक्षते' । मु०चि०'क्रूरपूर्वविद्धानि लग्नाणि तथा क्रूरभुक्तानि लग्नानि । आदिपदात् क्रूरैराक्रान्तानि क्रूरैर्गलग्नानि च त्रिविधोत्पातैर्दूषितानि ज्ञेयानि तानि यदि चन्द्रेण भुक्तानि सक्तानि तदा शुभार्हाणि प्रचक्षते बदन्ति मुनय इति शेषः । यदाह वासि- ''भुक्तभोग्यलग्नाक्रान्तं विद्धं पापयुक्तेन भग्न । मङ्गलेषु च कार्येषु यत्नतः परिवर्जयेदिति' । वसिष्ठोऽपि ''उत्पातभङ्गदुष्टभङ्गरविद्धस्थितञ्च यत् । दग्धलेव शुभं कर्म राघवाग्निशरोम्बुधिमिति''। भार्गवीये 'क्रूरास्थितक्रूरविभुक्तविद्धक्रान्तव्यधियुक्तेषु क्रमादरिकाणाम् । वदन्ति पाणिग्रहणे मुनीन्द्रावैधव्यमवैस्त्रिभिरेवमाद्यैरिति''। अस्यापवादमाह कश्यपः । 'उत्पातपापग्रहदूषितं च यदोन्दुराक्रान्तथ पुनर्भुनक्ति । तदा तदर्क्षद्विल मङ्गलेषु त्यजेत्समाक्रान्तधनूरवीन्दोरिति' । अयमवधिराक्रान्तलग्नत्रिविधयो वेदितव्यस्तत्र हि चाण्डालधूतलग्नस्नानश्चन्द्रभोगस्यानिर्णेजकत्वात् । तदुक्तं भार्गवीय 'यद्विक्षान्दोषसंयुक्तं व्याक्तपापोन्दुसंयुतम । शुभकार्येषु तत्त्याज्यमन्यकर्मसु सिद्धिदम् । यथा हि चाण्डालधृतैकवस्त्रो मज्जत्यगाधेऽपि सरित्प्रवाहे । भवेत्तथा शशिभोगगतोऽपि तथा न शुध्येदुडुपापयुक्तम् । व्यङ्गा गते तु चाण्डाले शुद्धिरालम्बनाद्यथा । तथा भुक्त्वा गते क्रूरे चन्द्रभोगादिशोधनमिति । अतएवोक्तं वसिष्ठेन ''गन्तव्यधिष्णाद्विलु भक्तभं यत् क्रूरैर्मिश्रोत्पातविदूषितञ्च । चन्द्रोपभोगादमलन्तदानीं शुभेषु कार्येषु शुभप्रदं चेति । एतच्च सामान्यन्यायत्वात् क्रूरविद्धे भे चन्द्रभोगादपि शुद्धिर्नास्तीत्युक्तम् यत्तु नारदेनोक्तम् ''यदृक्षोत्पातभन्त्याज्यं मङ्गलेषु कृतत्वयम् । यावच्च रविणा भुक्त्वा सक्तनक्षत्रधक्काश्रवदिति' 'तद्यावद्वचनं बाधनिकमिति न्यायेन ऋक्षोत्पातभयो' भग्नासपर्यन्तं निषेधस्तत्तोऽपि यावद्रविणा भुक्त्वा न त्यक्तनक्षत्रत्यजेत् तत्रापि चन्द्रगृक्ष एव सूर्यगृक्षोयनक्षत्रस्य तु भग्नासानन्तर सूर्यभोगासक्तत्व एव अतो न क्रूरसक्तादौ रविभोगापेक्षा उत्पातभङ्ग चन्द्रोपभोगोऽप्यावश्यको वसिष्ठवाक्यालोचनात् । अत्र क्रूरत्वेन निखिलभं ग्रह्य न चरण एव । तदुक्तं कश्यपेन 'क्रूरविद्धयुतन्विष्णं निखिलं नैव पादतः । अन्यैरपि गुणैर्युक्तं सर्वदोषविवर्जितम् । त्यजेदनर्घमाणिक्यं इलङ्कोपहतं यथेत' अयञ्च क्रूराधिष्ठितत्वे दोषः क्रूरग्रहचन्द्रयोरेकराशिस्थत्वे वेदितव्यः । यदा तु चन्द्रः प्रथमपादे क्रूरगृक्षस्य तृतीयपादे एवं सति राशिभेदोऽपि जायते तदा क्रूरग्रहाधिष्ठितत्वदोषोनास्तीति ध्येयम् । उक्तञ्च ज्योतिर्निबन्धे ।''एकर्क्षस्थेऽपि विष्णेऽर्के भिन्ने राशौ खलग्रहे सूर्यभे । तद्वन्दर्क्षे कुर्याद्विवाहयात्रादिकं सर्वमिति'' यथा कृगशिरसि प्रथमे पादे चन्द्रः तृतीये क्रूरग्रहः तत्र सत्यर्क्षे कनक्षत्रत्वे राशिभेदोऽस्तीति धी० भा० ।

अथ लग्नदोषः । ''नराक्रूपर्णेन्दुसिता. स्वपृष्ठे भं सप्तगोजातिगरैर्मितैर्हि । संलक्षयन्ते रविनीच्यभौमाः सूर्याष्टकाग्निस्थितं पुरस्तात्'' मु०चि० ।

''सप्त प्रसिद्धाः गावोनव जातयोद्वाविंशतिः शराः पञ्च एतैर्मितम्भं स्वाक्रान्तलग्नत्वात् नराक्रुपूर्णेन्दुसिताः स्व पृष्ठे संलक्षयन्ते यथा बुधः सप्तमं, राक्रुनवमं, पूर्णेन्दुः पूर्णिमान्तचन्द्रोद्वाविंशम्, तञ्च गतलग्नपञ्चे पञ्चमी षष्ठीसप्तमीनामन्यतमायां सम्भवति । शुक्रः पञ्चमं स्वपृष्ठे लक्षयतीत्यर्थः अर्कगनीच्यभौमाः क्रमेण पुरस्ताद्यथे सूर्याष्टकाग्निस्थितं संलक्षयन्ते यथा सूर्यः स्वाक्रान्तलग्नत्वाद्दादशं, शनिरष्टमम्, गुरुः षष्ठम्, भौमस्तृतीयम् अपतोलक्षयतीत्यर्थः । यदाह नारदः ''पुरतः पृष्ठतोऽर्कादा दिनर्क्षं लक्षितञ्च यत् । अर्काद्गतिगुणाङ्कर्तुयाणाष्टनवसङ्ख्यमिति, सूर्यः पुरतः, चन्द्रः पृष्ठतः एवं क्रमेण भौमादयोपि पुरतः पृष्ठतश्च लक्षयन्तीत्यर्थः । वराहोऽपि ''सूर्योद्दादशगं लग्नं षष्ठं गुरुरविनिजक्षतीयगत । संलक्षयति दिनकरपुत्रोऽष्टममपतः पादैः । पश्चाद्द्वाविंशतिमम्भोर्णिमचन्द्रस्तु पञ्चमं शुक्रः । स्वभानुरपि नवमं सप्तममृक्षं शशाङ्कसुत'' इति प्रत्येकं वेधफलमाह सएव ।''रविलग्ना वित्तकरी मित्यङ्गौजी विनिर्दिशेन्नरणम् । चान्द्री नाशङ्कार्यौधौ नार्थं वदत्येव । सौरी मरणं कथयति बन्धुविनाशं ऋक्षलग्नतैलग्ना । मरणं लग्ना राहोः कार्यं विनाशमङ्गगोर्दत्तीति''नन्वयलग्ना वा पृष्ठलग्ना वा वक्तव्या किमिति न हृद्यकथनम् । अत्र समाधत्ते कोषकारः;'' ''इति सति तु सदामिलग्ने यदनुलग्ननसङ्गमधिन्नर्जः । तदुपचिनगृह्यविभागर्क्षलग्नमधिकाधिकदोषयिलग्नेयति'' । अत्र राहोः सदा वक्रिवाक्षवमगणना क्रमेणैव ग्राह्या यथाश्विन्यां राहुः तदा अश्लेषां लक्षयति । तन्मुखलग्ना

धादिमतेऽपि वङ्कगामिना राहुणा सप्तमस्थसूर्यनीरेवतीत्वादि-गणनया विंशतिभसु अन्यैव नत्वन्यथाश्वितयमिति साम्प्रदायिकाः" पी०धा० ।

अथ पातदोषः । "हर्षणवैधृति साध्यव्यतिपातकगण्डमूलयोग नाम् । अन्ते यन्नत्वं पातेन निपातितन्तत् स्यात्" । मु०चि० । "हर्षणेत्यादि षड्योगानां अन्ते यन्नन्दनत्वं भवेत् तत्पातेन चण्डीशचण्डायुधाख्येन निपातितं स्यात् यदाह त्रिविक्रमः "साध्यहर्षशूलानि वैधृतिव्यतिपातयोः । षड्भक्तस्य चान्ते स्यात्तत् पातेन निपातितमिति" । नारदेन प्रकारान्तरेणैतत्प्रकारसम्मादकः पातोऽभिहितः । "सूर्यभात्पापैपित्रान्त्यत्वाष्टमित्रोऽविष्णुभे । सङ्ख्या दिनभे तावदाश्विभात्पातदुष्टभम्" । वसिष्ठेनापि "रविभादहिपित्रमित्रत्वाष्टभरिपौष्णभेषु गणितेषु । आश्विनभादिन्दुयुतौ तावति वै पतति गणनया पातः । अयमपि पातोदोषश्चण्डीशचण्डायुधाख्योज्ञेयः । अखिलेषु भङ्गलेष्वपि वर्ज्योऽयमाह्निनाशदः कर्त्तुरिति" यद्यपत्र हर्षणादीनामुपादानं नास्ति तथाप्यभिहितानां षादिनक्षत्रसाहित्येन पाताभिधानात्तत्तुल्य सङ्ख्याकेष्वेव योगेषु पातसम्भवो जायते इति मत्वा हर्षणादीनामनुक्तिः । एवञ्च प्रागुक्तेषु दण्डस्य विरुद्धयोगेषु वज्रपातयोः पृथक् कीर्त्तनम्' । ज्यो०त० रघुनन्दनेन "अन्यं द्वादशसप्तरश्विरवनीक्षत्रत्रितीयं गुरुः षष्ठं चाष्टयमर्कजस्तु शुरतोऽन्ति स्फुटं वज्रतया" इत्यादि रत्नमालावाक्यं लक्ष्या "वज्रपातोऽयमिति,यदुक्तं तच्चिन्त्यमूलम् अयोर्विभिन्नदोषत्वात् अन्यथा प्रागुक्तव्यवहारोच्छेदवाक्ये-वर्ज्यदण्डसंख्यानुपपत्तेः तद्वाक्ये पातशब्दस्याश्रवणाच्च । अथ क्रान्तिसाम्यम् "पञ्चास्याजौ गोमृगौ तौलिकुम्भौ कन्यामीनौ कर्कलो चापयुग्मे । तत्रान्योन्यक्षेत्रभान्योर्निरुक्तं क्रान्तेः साम्यं नो शुभं मङ्गलेषु" मु०चि० । "पञ्चास्याजौ सिंहमेषौ अन्ये प्रसिद्धाः । एषु राशियुग्मेषु चन्द्रभान्योः पाठक्रमेण व्युत्क्रमेण वा स्थितयोः क्रान्तिसाम्यं निरुक्तन्तन्मङ्गलेषु नो शुभं स्यात् । अत्र पञ्चास्याजाविति वचनादीनामङ्कृत्यसूदाहरणादिकमप्रदर्शनार्हत्वान्नार्थ्यं सूर्याचन्द्रमसोः अयनयोर्योगः षड्राशिगतो द्वादशराशिगतो वा विवक्षितस्तदैव क्रान्तिसाम्यस्य सम्भवात् । अतः सप्ततिवाक्यस्थानवसरः अन्यैतावन्त एव षड्राशियोगा द्वादशराशियोगा वा सम्भवन्तीति चेन्न राश्यन्तरस्थक्रान्तिसाम्यस्यापि सम्भवात् प्रतिसंवत्सरं कलाविकलान्तस्थितयेनानन्तभेदसम्भवाच्च । प्रागुक्तं व्याख्यानं ज्यायः । क्रान्तिसाम्यस्य च महापात इति नाम । एतस्य निन्द्यतामाह वसिष्ठः "दोषो महापात इति प्रसिद्धः सर्वेष्टतोऽन्ति बधं वरं च । तं रक्षितुं लग्नगुणास्त्वयुक्ताः स्वबान्धवा नाऽग्निनिशोऽग्रघातम्" । अग्निर्विज्ञम् । नारदोऽपि "यस्मिन् दिने महापात स्तस्मिन् वर्जयेत् शुभे" इति अतएव पतनात्पातः सकलशुभकर्मणामित्यन्वर्थतापि । सा च सप्तधा सोमसिद्धान्ते । "यज्ञभानां विनाशाय नदन्निव पतत्ययम् । व्यतीपातः प्रसिद्धोऽत्र संज्ञाभेदेन वैधृतिः" इति । महापातशब्दस्य रूढिस्तु रवीन्दुक्रान्तिसाम्य एवेत्यन्येषां महतां क्रान्तिसाम्ये । यथा जलजशब्दस्य रूढिः कमले न तु मेकादौ । क्रान्तिर्नाम महतां दक्षिणोत्तरत्वे गमनम् । या च सूर्यस्य क्रान्तिः सा यदा चन्द्रक्रान्त्या तुल्या स्यात्स पातमध्यकालः । तत्रोत्तरगतोरवीन्दुक्रान्त्योः समानत्वं भुजसाम्ये सति भवति । भुजोनाम 'त्रिभूनं भुजः स्यात् त्रिभाधिकेन हीनं भार्द्धञ्च भार्द्धादधिकं विभार्द्धम् । नवाधिकेनोनितमर्कभं चेति" लल्लवचनात् तत्साम्यं तु सूर्याचन्द्रमसोर्योगे षड्राशितुल्ये द्वादशराशितुल्ये वा सति भवति । अतएव ग्रन्थकृता तादृग्योगा एव पठिताः । "विनाशपातेन्दुमिहायनाशकैर्युतेरविः शीतकरश्च गम्यते । समापमत्वे व्यतिपातवैधृताख्यास्तदैक्ये रसभेऽर्कभे क्रमात्" इति भास्कराचार्योक्तिमनुकूलत्वेन सामान्यतः क्रान्तिसाम्यदिवसस्य शीघ्रोपस्थित्यर्थं भुजसाम्यप्रतिपादनम् । तदुक्तं वसिष्ठेन स्वसिद्धान्ते "चक्रे चक्रार्द्धतुल्ये वा क्रियङ्गामाधिकोनके । सायनार्केन्दुयोगे चेत्तदा पातस्य सम्भवः । शुभमङ्गलकर्माणि लोकानां च विनाशयेत् । स्नानदानादिकं तत्र जपस्नाद्धादिकाः क्रियाः । कदापि कुरुतेमर्त्यः सुमहत् फलमश्नुते । सूर्यभक्षे कुरुक्षेत्रे कोटिस्वर्णेन फलम् । तत् फलं लभते पाते स्नानश्राद्धजपादिना । उत्पत्तौ लक्षगुणितं भ्रमणे कोटिसङ्गुणम् । पातेऽर्बुदगुणं पुण्यं पतिते दत्तमक्षयमिति" । तथा सूर्यसिद्धान्तेऽपि । "एकायनगतौ स्यातां सूर्याचन्द्रमसौ यदा । तद्युतौ मण्डले क्रान्त्योस्तुल्यत्वे वैधृताभिधः । विपरीतायनगतौ चन्द्रार्कौ क्रान्तिविप्रिकाः । समासदा व्यतीपातोभगणार्द्धान्तयोर्युतौ । तुल्यांशुजासमक्रांत्योस्तु प्रवक्ष्यते । तादृक् क्रीधेऽक्षयोर्विक्षेपाभावाय जायते," इति । अतएवानन्तरोत्पन्नक्रान्तिसाम्ये महापातदोषो

नास्त्येव । तदुक्तं गणेशदैवज्ञैः "पूर्वं तत् स्यात् पातमध्यं द्वितीयं पूर्वैर्नोक्तं तदतोऽतिदुष्टमिति" । अनेनैवाभिप्रायेण वसिष्ठेनखंडितायामुक्तम् । "शास्त्रात् समानीत महातिपातः सर्वेष्टतोऽन्ति वधूं परं च । त्रिःसप्तवारानिव जामदग्न्यक्रोधोऽचिरात् क्षत्रकुलं समस्तमिति" । शास्त्रादृषितयास्त्रोक्तान्महापाताधिकारादित्यर्थः । तत्र हि योगादेव महापातस्यानिष्टत्वात्तस्यैव दोषत्वं नान्यस्येत्यर्थादुक्तं भवति । किञ्चपञ्चाङ्गीयोऽपि योगः सूर्याचन्द्रमसोर्योगादेव साधितः स्वाधिकारेऽतस्तस्मादेव महापातोऽपि साधयितुमुचित एव "मी०धा० ।

अथ खार्जूरापरपर्यायैकार्गलदोषः

"व्याघातगण्डव्यतिपातपूर्वे शूलान्त्यवज्रे परिघातिगण्डे एकार्गलाख्योऽभिजित्समेतोदोषः यथी चेद्विषमर्क्षगोऽर्कात्" इ० चि० । "अन्योर्वैष्टतिः। अन्ये प्रसिद्धाः। यस्मिन्दिने व्याघातादिके विरुद्धे दुष्टयोगे सति अर्काद्र्कनक्षत्राच्छ्रवणो चन्द्रोऽभिजित्समेतोविषमे विषमसंख्याके च्छत्रे नक्षत्रे स्यात्तदा खार्जूरचक्रोत्पन्न एकार्गलाख्योदोषः स्यात् । यदा समे स्यात्तदा न दोषः इत्यर्थः । यदाह त्रिविक्रमः "विरुद्धनामयोगेषु साभिजिद्विषमर्क्षगः । अर्काद्दिन्दुस्तदा योगेनिन्द्य एकार्गलाभिधः" इति वसिष्ठेन तच्चक्रमभिहितम् । "अन्यातिगण्डपरिघव्यतिपातपूर्वव्याघातगण्डवज्रशूलमहापातेषु । चित्रानुराधपिष्टपक्षगदस्तभेषु साभिजित्समूलश्रविष्ठासूरिषु मूर्द्धभेषु । "रेखामेकामूर्द्धगां षट् च सप्त तिर्यक् कृत्वाग्रतः खार्जूरचक्रे । तिर्यग्रेखा संस्थयोश्चन्द्रभान्वोर्द्वयोस्सम्पातोदोषः एकार्गलाख्यः । "खरकरतुहिनांशोर्द्वित्रिसम्पातजातस्त्वनलमयशरीरस्तूल्किसन्निभः स्यात् । भुवि पतति जनानां सङ्कुलध्वंसनाय युधमरणगतसङ्घैरप्यसावैकोऽग्निकोपः" इति अत्र वसिष्ठवाक्येऽभिजित्साहित्यमास्त न वेति सन्देहः नारदस्त्वभिजिद्वर्जितं चक्रमाह "व्याघातशूलपरिघपातपूर्वेषु सतृक्षेषि । गण्डातिगण्डकुलिशवैष्टत्या सहितेषु च । अदितीन्द्वग्न्याद्यामूलमैत्रेज्याभानि च । त्रीण्यानि सकृत्तिकाभिर्मूर्ध्नि भानि यथाक्रमम् । लिखेदूर्ध्वगतामेकान्तिर्यग्रेखां त्रयोदश । तत्र खार्जूरिके चक्रे कथितं मूर्ध्नि भं न्यसेत् । भान्वोरेखागतयोः सूर्याचन्द्रमसोर्भिधः । एकार्गलो ह्यदिपातात्त्वाभिजिद्वर्जितानि वै । खार्जूले कमठे चक्रे फणिचक्रे तिनाडिके । आभिजिद्गणना नास्ति चक्रे खार्जूरिके तथेति" । कश्यपेनापि एकार्गलोऽदितिपातस्याभिजिद्वर्जितानि वै" इति । तत्र त्रिविक्रमनारदयोर्वाक्ययोः समूलत्वस्य त्रिष्टसन्मतत्वात्तारादादिवाक्यैः सह विकल्पः ततोऽनयोः पक्षयोर्यथादेशाचारादुव्यवस्थेति युक्तं प्रतोमः" मी०धा० । खार्जूरवेधे ज्यो०ति०

"एकामूर्द्धगतां त्रयोदश तथा तिर्यग्गतां स्थापयेत् । रेखाश्चक्रमिदं बुधैरभिहितं खार्जूरिकं तत्र तु । व्याघातादि तु मूर्ध्नि भन्तु कथितं तत्रैकरेखास्थयोः सूर्याचन्द्रमसोर्भिधोनिगदितो दक्पात एकार्गल." "व्याघातादीति व्याघातयोगसंख्याङ्कक्षयोदशाङ्कः । तथा च हस्तादीनि नक्षत्राणि देयानीत्यर्थः" इति यद्व्याख्यातं तच्चिन्त्यसूत्रव्याख्यैः व्याघातादिदुष्टयोगयुक्तदिवसे एव खार्जूरवेधप्रतिपादनात् तत्र लेख्यनक्षत्रादीनां च नारदेन विशेषाभिधानाच्च ।

अथोपग्रहदोषः स च उपग्रहशब्दे १२०२ पृ० उक्तप्रायः विशेषार्थं पुनरुच्यते ।

"शराष्टदिक्शकनगातिहत्यक्षिवेदतिथ्य प्रकृतेश्च पञ्च । उपग्रहाः सूर्यभतोऽजतारा गुभा न देशे कुरुवाह्लिकानाम्" । "सूर्यभतः सूर्यर्क्षान्नक्षत्रादजतारा चन्द्रनक्षत्राणि पञ्चाष्टद्यचतुर्दशसप्तैकोनविंशतिपञ्चदशाष्टादशैकविंशतिद्वाविंशतित्रयोविंशतिचतुर्विंशतिपञ्चविंशतिसंख्याकाश्चेत्युक्तदोषनामकाटोषाः स्युः प्रकृतिरेकविंशतिः ततः पञ्च । यदाह नारदः "भूकम्पः सूर्यभात्पञ्चमर्क्षे विद्युच्च पञ्चमे । शूलोऽष्टमे च नवमेऽशनिरष्टादशे ततः । केतुः पञ्चदशे द्वाभ्यामुल्का एकोनविंशतौ । निर्घातपातसंज्ञश्च त्रयः स नवपञ्चमे । मोक्षनिर्घातकम्पाश्च कुलिशं परिवेषकम् । विज्ञेयाश्चैकविंशाद्यादारभ्य च यथाक्रमम् । चन्द्रर्क्षभेषु गुभकर्म न कारयेदिति" । पराशरः "उपग्रहर्क्षेषु विवाहिता स्त्री सूर्यक्षतो दुर्भगतामुपैति" । अन्यत्रापि । "स्पृष्टप्रवेशे दारिद्र्यं विवाहे मरणं भवेत् । प्रस्थाने विपदः प्रोक्ता उपग्रहदिने यदीति" । एवं सामान्यतो निषेधमभिधाय देशभेदेन परिहारमाह । गुभा इति । "वाह्लिके कुरुदेशे च वर्जयेदुपग्रहमिति" वाक्यमोक्तैः" मी०धा० । अलमधिकेन ।

"पातोपग्रहलत्ताश्च नेष्टोऽक्ष्णिः खेटपतृक्षजः" इ० चि० ।

"पातक्षयोग्रचण्डायुधाख्योदोषः उपग्रहः प्राग्युक्त एव । लत्ता शराङ्कपूर्वेन्दु सिताः" इत्यादिनोक्ता, तत्र खेटपतृक्षजः अष्टचरणत्वेन नक्षत्रचरणोऽनिष्टः अक्षार्थः

पाते उपग्रहे च रविर्यस्मिन् स्यात्तत्संख्यचरणस्थ नवांशस्य वर्ज्यानाह्य; लग्नायान्त लग्नाकारिणोग्रहा - यश्चरणे स्युस्तत्संख्य एव पादो वर्ज्यानाह्य: । उक्तं च मुहूर्त्तदीपिकायाम् "उपग्रहेषु लग्नायां तथा चण्डायुधाख्ये यद्दोषस्थि यत्प्रमाणांशे विद्धांशस्तत्प्रमाणक:" इति उपग्रहचण्डायुधयोः सूर्यलग्नोऽङ्कुर्याद्दारुस्थस्य सम्भवात् । अयञ्च परिहारस्तुल्यन्यायत्वात् खार्जूरकेऽपि द्रष्टव्य: । सूर्यो यस्मिन् पादे भवेत्तत्समसंख्यस्थरण एकरेखास्थितचन्द्रनवांशस्य वर्ज्य इत्यर्थ: "खार्जूरिकसमाख्यमिति" नारदोक्ते: ज्योतिर्निबन्धे गर्ग: "पूर्वार्द्धे दण्डदोष: स्यादपरार्द्धे तु मोहज: । उल्का चैवार्द्धरात्रे तु कम्पोऽहोरात्रदूषक:" । तत्रापि "कम्पे लग्नादण्डमेकं हानामङ्कुमिति" नारदोक्ते: कालभेद एव वर्ज्य: "खरमार्तण्डदण्डैर्वै ७,१२,१०,६, आदितो घटिकास्तेषु वर्जनीया: परा: शुभा" पी० धा० ।

अथ वारदोष: । स च अर्द्धयामकुलिकयमघण्टभेदात् त्रिविध: । ते च कश्यपेनोक्ता: यथा "शैलाक्षयुत: सूर्ये चन्द्रे षड्देवपर्वता: । भौमे वाणाग्निनेत्राणि सौम्ये वेदाक्षिवायव: । गुरुवारेऽग्निचन्द्रेभा: शुक्रे नेत्राक्षिरुद्रय: । शनौ चन्द्रेभकर्काख्य: कुलिकोयमघण्टक: । अर्द्धप्रहरसंज्ञश्च मङ्गलेषु विवर्जयेत् । वारदोषेण दुष्टलग्नं सर्वगुणान्वितम् । त्यजेद्यथा पुरोडाशं वायसोपहतन्नवेति" । फलमाह वसिष्ठ: "निधनं प्रहरार्द्धे तु निखिलं यमघण्टके । कुलिके सर्वनाश: स्यात्तावेते न दोषदा:" पी० धा० । दिवसाष्टमभागात्मकौ स्यातै । तत्र अर्द्धयामशब्दे ३७६ पृ० अर्द्धयामविशेष उक्त: । मुहूर्त्तचिन्तामणिकृत्तु कुलिकशब्दे वक्ष्यते तत्र कुलिकमुहूर्त्तमुपक्रम्य श्रीपतिना "यात्रायां मरणं काले वैधव्यं पाणिपीड़ने । व्रते ब्रह्मवध: प्रोक्त: सर्वं कर्म ततस्त्यजेत्" उक्तम् ।

अथ जामित्रदोष: । "लग्नाच्चन्द्राच्चतुर्भवनगे खेटे न स्यादिह परिणयनम् । किंवा वाणाग्निमितलग्ने जामित्रं स्यादशुभकरमिदम्" मु० चि० । "विवाहलग्नाच्चन्द्राद्वा सप्तमं भवनं गतं जामित्रं तत्र गते खेटे परिणयनं न स्यात् । उक्तञ्च 'जामित्रं द्विविधं प्रोक्तं गर्गगालवगौतमै: । तस्माल्लग्नाच्च चन्द्राच्च जामित्रं परिवर्जयेदिति" । तत्स्वरूपमाह महेश्वर: "लग्नाच्छीतकरादुपग्रहा द्यूनगता नेष्टा विवाहे सुता:" इति । वसिष्ठ: लग्नप्रकरणे "सर्वं जामित्रसंस्थाविद्धति मरणम्" इत्याह च । लल्ल: "पापात् सप्तमग: यदि भवेत् पापेन युक्तोऽथवा यत्नेनापि विवर्जयेन्नु मिथते दोषोऽपि संकथ्यते । उद्वाहे विधवा, व्रते तु मरणं, चूलञ्च पुंस्कर्मणि, यात्राया विपदो, गृहेषु दहन:, क्षौरेऽपि रोगो महान्" । भुजबल: "चन्द्रात् सप्तमराशिगे दिनकरे त्यक्ता धनै: कन्यका, भौमे च प्रमदा प्रयाति विलयं, सौरे च मध्या सरुक् । जीव: शुक्रयशाङ्कजौ शुभकरा: केचिद्वदन्ति क्रमात् भर्तृप्रेक्षितदोक्षितास्तभवने नित्यं प्रशस्यन्विते" । अस्यापवादमाह । किंवाथच्छोविकल्पे पूर्वपदाधिष्ठितराशे: सप्तमराशिस्थितत्वं यद्वागालवोक्ते लग्नेऽपि चन्द्रोनिषिद्ध इत्युक्तमिदानीन्दधिष्ठितराशिनवांशमारभ्य वाचाशुगा: पञ्च पञ्चाशत् तन्मितनवांशगे लग्ने चन्द्रे सति जामित्रं स्यात् । यथा मेषराशौ पञ्चमनवांशे भौमोऽस्ति तस्मात् तुलायां पञ्चमनवांशस्थं लग्नं तत्र चन्द्रो वा निषिद्धोऽन्येऽपि नवांशा: शुभा: । एवंविधं सूक्ष्मं जामित्रमिदमशुभकरं स्यात् । यदाह महेश्वर: "कैश्चित् कामनवांशकादिषु गरैस्तुल्ये नवांशे स्थिता:" इति । केचनार्कस्तु चन्द्रनवांशा: देवाह । "हिमरश्मिनवांशकात् खलो यदि खेट: शर: सायकांशके । अयमत्यशुभैर्न हन्यते निखिलैरप्युपसर्गडम्बर:" अपवादान्तरमाह राजमार्त्तण्ड: "तत्कुलिकोदयभवने भवने निजे वा सौम्याधिमित्रलग्नेऽगोऽपि तदीक्षितो वा । जामित्रवेधजनितानपहृत्य दोषात् दोषाकर: सुखमनेकविधं विधत्ते" इति । व्यवहारसमुच्चयेऽपि । "खेऽङ्गेऽथवा स्वभवने स्फुरदंशुजाल: सौम्यालये स्थितगते शुभवर्गगो वा । जामित्रकारिपरिसंस्थितदोषराशिं हृत्वा ददाति बहुय: सुखमेव चन्द्र:" । कालप्रकाशे वात्स्यायन: "गुरुचन्द्रस्य जामित्रे तिष्ठेदादि बलान्वित: । धनसौभाग्यपुत्रांश्च लभते नात्र संशय:। मणिमुक्ताप्रवालैश्च सुवर्णाभरणैश्च शुभै: । शोभिता तु सदा तिष्ठेद्गुरुणापि निरीक्षिते । सा तु भर्तु: प्रिया नित्यं बुधे चन्द्रस्य सप्तमे" पी० धा० ।

"एकार्गलोपग्रहपातलग्नजामित्रकर्त्तर्युदयास्तदोषा: । नश्यन्ति चन्द्रार्कबलोपपन्ने लग्ने यथार्काभ्युदये तु दोषा" मु० चि० । "एकार्गलः खार्जूरचक्रोक्तः उपग्रहः गराटेत्यादिनोक्तः पातखण्डीयचण्डायुधम् लग्ना त्तरांशुलादिनोक्ता, जामित्रमधुनोक्तम् । कर्त्तरी, लग्नात् पापादित्याद्युक्ता उदयास्तदोषा वक्ष्यन्ते । एवंविधादोषा नश्यन्ति । कदा विवाहलग्ने चन्द्रार्कयोर्बलं खेऽङ्गमित्यादिराधि-

स्थितत्वरूपं विहितस्थानस्थितत्वञ्च तेनोपपन्ने सहिते सति । अर्कस्य सूर्यस्याभ्युदये दोषा रात्रिर्यथा नश्यतीत्यर्थः । गादान्वयकार्यकृत्यपि रात्रिरेकाकिना सूर्यस्योदयेन स्वयमेव नश्यतीति यथा" भी० धा० ।

प्रसङ्गादन्यान्यदोषस्य देशान्तरविषयत्वमाह "उपयच्छं कुरुवाह्लिकेषु कलिङ्गवङ्गेषु च पातितम्भम् । सौराष्ट्रगाल्वेषु च लक्षितम्भं त्यजेत् तु विद्धं किल सर्वदेशे" इ० चि० ।

"वरोत्तरार्द्धकाश्च पश्चिमदेशास्तेषूपयच्छदोषाक्रान्तम्भं त्यजेत् तदरिक्तसर्वदेशेषु तेषु शुभमेवेत्यर्थः । कलिङ्गोत्कलश्च प्रागुदेशौ बङ्गवचनान्मगधाङ्गादयोऽपि । तेषु चरज्येष्ठचरहस्तायुपापरपर्यायं पातं त्यजेत् । न तु क्रान्तिसाम्यरूपं पातं तस्य महापातत्वव्यपहारात् । सौराष्ट्रगाल्वदेशः पश्चिमदेशविशेषः बङ्गवचनाद्ग्यामबाह्लव्यं तेषु लक्षितं लक्षसंज्ञातारम्भं तद्धं परित्यजेत् । विद्धं क्रूरेण शुभेन वा पञ्चशलाकादिवक्रद्वारा भिन्नम्भं भूतभवर्त्तिसर्वदेशेषु त्यजेत् । किन्तु नित्ययेन नत्यस्य देशभेदेन परिहारः एतदपि वाक्यं सम्मत्यन्तरं नार्हति । विवाहपटलेऽपि "लक्षितामालवङ्गे देशे पातः कोशलेके तथा । एकार्गलन्तु काश्मीरे वेधं सर्वत्र वर्जयेदिति" । वराहः । "धृतिदोषस्तु विख्यात्ये देशे नान्येषु केषु चेति" । दृश्योगो भवेद्गौडे जामित्रस्य च यामने । वेधदोषश्च शैलेषु" इत्यादि वाक्यानां यथादेशाचारात् व्यवस्था" भी० धा० ।

अथ दृश्योगः "यशाङ्कसूर्यर्क्षयुतेर्भशेषे खं भूयुगाङ्गानि दृशोऽतिथ्यः नागेत्वभोऽन्ध्रुषिता नखाश्वैर्द्र भवन्ति चैते दृश्योगसंज्ञाः" इ० चि० । "वेदादि चन्द्रसूर्यनक्षत्रयोर्युतेर्योगाङ्कैः सप्तविंशत्याभक्ताद्यत्क्षिप्तं शून्येभवतः षड्दृशैकादशपञ्चदशाष्टादशैकोनविंशतिविंशतिसंख्याके सति एते अङ्काः दृश्योगसंज्ञा भवन्ति नान्ये इत्यर्थः । शिष्टानां दशानामङ्कानामभिहितत्वाद्दृश्योग इत्यन्वर्थसंज्ञा तदुक्तं दीपिकायाम् "तिथ्यङ्कवेदैकादिगुनविंशभैकादशाष्टादशविंशसंख्याः । दृष्टोडुना सूर्ययुतोडुना वा योगादमी चेद्दृश्योगदोषः" । लल्लोऽपि "यस्मिन्नृक्षे रविस्तिष्ठेद् यस्मिन्नृक्षे शशी तथा । द्विष्पाद्दे दृश्योर्योगस्तृते शेषः स्यात् वादिदोषद । शून्यवेदत्रिरूपाणि दिग्भूतिथ्योदृतिः । अनविंशानखाश्वेति दृश योगाः प्रकीर्तिता" इति भी० धा० तत्पक्षस्तु "घातान्धाग्निसशैपचोरसरसं रुग्दञ्जवादाः क्षतिर्योगाङ्के इलितो सभे मनुयुतेऽब्धौ तु सैकेऽर्द्धिते । भन्द्राक्षादश सम्मितास्तु मनुभीरेखाः क्रमात् संलिखेद्वेधोऽस्मिन् शुक्लचन्द्रयोर्न शुभदः स्यादेकरेखास्थयोः" इ० चि० ।

"शून्यवेदे वातदोषः स्यात् एकवेदेऽग्न्याघात, चतुर्थ्यवशिष्टेष्वनेः, षट्सु महीपाद्राजः, दशसु चौरात्, एकादशसु मरणं हयोरन्यतरस्य वा, पञ्चदशसु रुक् अष्टादशसु वज्रम् एकोनविंशतिविंशे वादः कलहः त्रिंशतिशेषे क्षतिः द्रव्यनाशः स्यात् । यदाह लल्लः "मरुत्वमेधाग्निभूपालचौरवृत्तरुजोऽशनिः । कलिर्हानिर्दशोद्दाहे दोषाख्याज्याः सदा बुधैः" । विवाहादौ प्रतिष्ठायां व्रते पुंसवने तथा । कर्णवेधे च चूड़ायां दृश्ययोगं विवर्जयेदिति" । अथापवाद उच्यते । योगाङ्क इति । योगाङ्के समे युग्मसंख्याके सति दलिते सत्यर्द्धीकृते मनुभिश्च चतुर्दशभिर्युते योगाङ्के तदा दास्राद्यश्विनीतोभं नक्षत्रं स्यात् । यथा समङ्के अङ्कयोग दशाङ्कः १० अर्द्धितः ५ मनुयुतः १९ मूलनक्षत्रं जातम् । अथ योगाङ्के अयुग्मसंख्याके सति सैके एकयुते ततोऽर्द्धिते अश्विनीतोभं स्यात् । यथा विषमाङ्को योगः पञ्चदश सैकः १६ अर्द्धितः ८ पुष्यनक्षत्रं जातम् । तत्रैकं यथा अथ मनुभिः सम्मिताश्चतुर्दश रेखास्तिर्यक् क्रमात् संलिखेत् । अनेन प्रकारेण यन्नक्षत्रमागतं ततः आरभ्य साभिजित्नक्षत्रचन्द्रमसिंश्चक्रे लेख्यं तत्र स्थाक्रान्तनक्षत्रे स्थाप्या । दिननक्षत्रे च चन्द्र एवं सति यदि शुक्लचन्द्रावेकरेखास्थौ स्यातां तयोस्तादृग्ययोः परस्परावलोकनरूपोवेधोन शुभदः । उक्तञ्च ज्योतिःसागरे "योगाङ्के विषमे सैके समे सप्तदशोद्धने २८ दलीकृतेऽश्विनीपूर्वदृश्ययोगसदाकृतम् । दृश्ययोगे शुक्लचक्रे प्रमादाद्यदि विध्यते । क्रूरैः सौम्यैर्युतैः दम्मलोरेकनायनमिति" दृश्ययोगापवादान्तरमाह भरद्वाजः । "गुरौ लग्नाधिपे शुक्रे सप्तमेऽर्के लग्नगेन्दुगे । दृश्य दोषा विनश्यन्ति वयाग्नौ तूलराशयः" । आशोऽपि "शुक्रेण गुरुणा वापि संयुतं दृष्टमेव च । दृश्ययोगसमायुक्तमपि लग्नं शुभावहमिति" भी० धा० । अपवादान्तरं ज्यो० त० । "आद्यपादस्थिते सूर्ये तृतीयांशः प्रदुष्यति । द्वितीयस्थे तृतीयस्थो विपरीतमतोऽन्यथा" । विपरीतं चतुर्थस्थे आद्यः तृतीयस्थे द्वितीयो दुष्यति नान्यस्थे नान्यपादो दुष्यतीत्यर्थः ।

अथ वाणदोषः "लग्ने नाड्यायातस्तिथ्योऽङ्गतष्टाः शेषे नागह्नश्चित्तर्केन्दुसंख्ये रोगोवह्नीराजचौरौ च लग्नुर्वाणाख्यं दाक्षिणात्यप्रसिद्धं" इ० चि० । "शुक्लपक्षप्रतिप-

दमारभ्य गतितिथ्याद्यैर्नवभिस्ताडिताः शेषे नागसंख्येऽष्टसंख्ये रोगाख्योवाणः । एवं द्विसंख्ये शेषे वज्राख्यः चतुःसंख्ये शेषे राजा । तर्कः षट्तत्संख्ये शेषे चौराख्यः एकसंख्ये शेषे मृत्युसंज्ञोवाणः । अयं च दाक्षिणात्येषु महाराष्ट्रदेशेषु प्रसिद्धः तेन देशाचारात् व्यवस्थया वाणस्य त्यागः । न तु प्राच्योदीच्यपाश्चात्यानाम् । तदुक्तं सम्प्रदिमते विवाहपटले । "गततिथियुतलग्नं पञ्चधा स्थापनीयं तिथि १५रवि १२दग१०नागै८र्वेद ४युक्तं क्रमेण । नवहृतशरशेषे वाणसंज्ञाः क्रमेण रुगनलनृपचौराः पञ्चमोमृत्युसंज्ञ इति" यो०धा० अथ प्राच्याख्यवाणापवादौ

"रसगुणयमिनागाब्ध्याढ्यसंक्रान्तियातांशकमितिरथ तद्वार्क्षैर्यदा पञ्चशेषाः । रुगनलनृपचौरा मृत्युसंज्ञश्च वाणो नवहृतशरशेषे शेषकैक्ये सशल्यः" मु०चि० । "रसगुणयमिनागाब्धिभिराढ्याचासौ संक्रान्तियातांशकमितिश्चेति स्पष्टनिरयनांशस्थैर्यसंक्रान्तिभुक्तांशानामभितिः संख्या पञ्चधा स्थाप्या कलादिकतुपेक्षया क्रमम् । सा क्रमेण षट्त्रैकाष्टयुतैर्भिराढ्या संयोज्यार्क्षैर्नवभिस्ताडिता सती यदा पञ्चशेषा यस्मिन् स्थले पञ्चावशिष्यन्ते तत्र क्रमेणरुगादिवाणोज्ञेयः । यथा आद्यो पञ्चशेषे रोगवाणः द्वितीये पञ्चशेषेऽग्निवाणः तृतीये पञ्चशेषे राजवाणः चतुर्थे पञ्चशेषे चौरवाणः पञ्चमे पञ्चशेषे मृत्युवाणः तस्मात्तस्माद्भयं भवतीत्यर्थः । यदाह कश्यपः "संक्रान्तियातांशकनन्दशेषसङ्ख्याग्निहृताष्टयुग्मैः समेतः । तद्वाप्यहै रोगरुताशभूपक्लेशमृतिश्चेति च पञ्च वाणाः । इति पञ्चेति पृथक् पृथक् पदं शिष्यते तदा वाणाः स्फुरित्यर्थः । तत्र वाणोद्विविधः एकः काष्ठशल्योऽपरोलोहशल्यः तत्राभिहितो वाणः काष्ठशल्य उच्यते । अस्य नाम प्राच्याख्यो वाण इत्याहुः । तेन ताडिते वाणे लग्ने तथा पीडा न भवेत्तदर्थं तदपवादमुक्तो लोहशल्यसहितो वाण उच्यते न वेति । यानि प्रागागतानि शेषाणि तेषामेको नवहृते प्रस्ताक्षरशेषे सति सशल्यः लोहसहितोवाणः स्यात् । पञ्चव्यतिरिक्ते शेषे शल्यसहितो दुष्टवाणः । अयं तुल्यन्यायत्वात् प्राक् पद्योक्तेऽपि वाणे सशल्यो वाणोज्ञेयः ज्योतिस्चिन्तामणावन्यथा वाणोऽभिहितः । "तिथियारभलग्नाक्षोरसाग्न्यब्ध्याढ्यभेदयुक् ६,३,१,८,४, नन्दाघ्न पञ्चशेषे रुगग्निराट्चौरमृत्युरुदिति" यो०धा० । अथ समवादिभेदेन वाणापवादः "रात्रौ चौरस्त्रजौ दिवा ऽग्निनृपती त्याज्यौ सदा सन्ध्ययोर्मृत्युश्चाथ मनौ रुजोविदि मृतिर्भौमेऽग्निचौरौ रवौ । रोगोऽथ व्रतगेहगोपनृपसेवायानपाणिग्रहे वर्ज्याश्च क्रमतो बुधैरुगनलक्ष्मापालचौरा मृतिः" मु०चि० ।

"रात्रौ चोरस्त्रजौ वाणौ त्याज्यौ,दिवा दिवसेऽग्निनृपती वह्निराजवाणौ त्याज्यौ सन्ध्ययोः प्रातःसायंसन्ध्ययोः सदा मृत्युर्वाणस्त्याज्यः । ज्योतिःप्रकाशे "रोगश्चौरन्यजेद्रात्रौ दिवा राजाग्निपञ्चकम् । उभयोः सन्ध्ययोर्मृत्युमन्यकाले न निन्दितः" । अथ मनौ मन्दिवारे नृपवाणः, विदि बुधवारे मृतिवाणः, भौमेऽग्निचौरवाणौ रवौ रोगवाणः त्याज्यः । उक्तञ्च दैवज्ञम० "रवौ रोगं, कुजे वह्निं, मनौ च नृपपञ्चकम् । वर्जयेच्च कुजे चौरं, बुधवारे च मृत्युदम्" । एतेषु शुभकर्म्मसु एते वाणा वर्ज्याः यथा व्रते यज्ञोपवीते रुक्, गेहं गृहं तस्य गोप आच्छादनं तत्रानलोऽग्निः, नृपसेवायां क्ष्मापालोराजा, याने यात्रायां चौरः पाणिग्रहे मृतिर्वाणो वर्ज्य इत्यर्थः । तदुक्तं ज्योतिःप्रकाशे "नृपाख्यं राजसेवायां गृहगोपेऽग्निपञ्चकम् । याने चौरं, व्रते रोगं न्यजेन्मृत्युं करग्रहे इति" । केचिदेवं पाठमाहुः । व्रते विवर्जगेहेरोगं गृहगोपेऽग्निपञ्चकम् । यात्रायां राजचौराख्यौ विवाहे मृतिपञ्चकमिति" यो०धा० ।

अथ लग्नसप्तमयोः शुद्धायुपयोगिपञ्चदृष्टिभेदः "त्र्यायं त्रिकोणं चतुरस्रमस्तं पश्यन्ति खेटाश्चरणाभिदृष्ट्या । मन्दोगुरुर्भूमिसुतः परे च क्रमेण संपूर्णदृशो भवन्ति" मु०चि० ।

"खेटाश्चरणाभिदृष्ट्या पाददृष्ट्या पश्यन्ति तद्यथा त्र्यायं तृतीयं दशमञ्चैकचरणदृष्ट्या पश्यन्ति त्रिकोणं नवपञ्चमं द्विचरणदृष्ट्या पश्यन्ति । चतुरस्रं चतुर्थमष्टमं च त्रिचरणदृष्ट्या पश्यन्ति । अस्तं सप्तमस्थानं चतुश्चरणदृष्ट्या पश्यन्ति । अनेन तत्तद्भावोद्भवशुभफलं चरणाभिदृष्ट्यैव भवतीत्यपि सूचितम् । तदुक्तं वराहेण "दृगमतनीये नवपञ्चमे चतुर्याष्टमे कलत्रं च । पश्यन्ति पाददृष्ट्या फलानि चैवं प्रयच्छन्तीति" । मन्द इति । मन्दः शनैश्चरः स्वस्थानात् त्र्यायं संपूर्णदृक् चतुश्चरणदृष्टिः । एवं गुरुस्त्रिकोणं, भूमिसुतः चतुरस्रं, परे चन्द्रबुधशुक्राः क्रमेण सप्तमे संपूर्णदृश इत्यर्थः यदाह गार्गिः । "दृश्यिकादशमान्, सौरिस्त्रिकोणस्थान् दृक्स्मृतिः । चतुर्थाष्टमगान् भौमः शेषाः सप्तमसंस्थितान् । भवन्ति वीक्षणे नित्यमेवाधिकफला अहा" इति । वराहोऽपि "पूर्णं पश्यति

रविजक्षतीयद्यूने त्रिकोणमपि जीवः । चतुरस्रं भूमिसुतः सितार्कबुधक्ष्मिकराः कलत्रं चेति" पी०धा०। अत्रापि यद्भात् सप्तमस्थानेऽपि पूर्णदृष्टिः एवं शनिकुजयोः। अतएव सु०चि०परे चेत्युक्तम् तत्प्रमाणञ्च पञ्चदृष्टिग्रन्थे वक्ष्यते।

अथ लग्ननिरूपणम्। दीपिका कन्यातुलाभ्रन्मिथुनेषु साध्वी मेषेषुसाध्वी धनवर्जिता च। निन्द्योऽपि लग्ने द्विपदांशदृष्टः कन्यादिलग्नेषुपि नान्यभागः"। कन्यादिलग्नेषुपि द्विपदांशएव दृष्टोनान्य इत्यर्थः। वक्ष्यमाणवचने चरे चरांशवर्ज्जनात् चरलग्नेऽपि तुलातिरिक्तद्विपदांशस्य ग्राह्यता "धनुषि कुलटा तत्पूर्व्वार्द्धे सतीत्यपरे जगुः" विवाहपटले धनुरुत्तरार्द्धनिषेधात् पूर्व्वार्द्धस्य ग्राह्यतैव। मासभेदे लग्नभेदानां शून्यत्वात् तत्तन्मासे शून्यलग्ने विवाहो नेष्टः यदाह व्यव०च०"घटमृगुहृदा युग्मेषकन्यालयस्थिता। चापः कर्की मृगः सिंहश्चैत्रादौ शून्यराशयः"षड्भादिलग्नानि यानि वक्ष्यन्ते तान्यपि तत्तत्काले वर्ज्यानि।

अथ लग्नसप्तमशुद्धौ "यदा लग्नांशेशोलवमथ तनुं पश्यति युतोभवेद्वाऽयं वोढुः शुभफलमनल्पंरचयति। लवद्यूनस्वामी लवमदनभं लग्नमदनं प्रपश्येद्वा बध्वाः शुभमितरथा क्षेयमशुभम्" सु०चि०। "यदा लग्नांशेशोलग्नांशस्वेशः स्वामी लवं नवांशं पश्यति। अथ वाऽयं नवांशेन सह युतो वा भवेत्तदा वोढुर्वरस्यानल्पं बहुशुभफलं रचयति। यथा मेषलग्ने मिथुनांशस्थदशीयो बुधः तुलायां मिथुनं पश्यति तत्र तिष्ठति वा अयमस्तशुद्धेः प्रथमः कल्पः। तदलाभे तु लग्नांशेशस्तनुं लग्नं पश्यति लग्नेन सह युतो वा भवेत्तदापि वोढुः शुभफलमनल्पं स्यात् यथा मेषलग्न एव मिथुननवांशस्वामी बुधोमकरे स्वनवांशं न पश्यति किन्तु लग्नं पश्यति अथवा मेष एव तिष्ठति। अयं लग्नशुद्धेः द्वितीयः प्रकारः। लवेति। लवद्यूनस्वामी लवाद्यूनांशात् द्यूनं सप्तमनवांशस्तत्स्वामी लवमदनभं लवान्मदनभं सप्तमनवांशं पश्यति तेन सह युतो वा भवेत् तदा बध्वा अनल्पं शुभं रचयति। यथा मिथुननवांशात् सप्तमोधनुरंशस्तदधीशोगुरुर्मेषे धनुः पश्यति तत्र तिष्ठति वा अयमस्तशुद्धेः प्रथमः प्रकारः। तदलाभे तु लवद्यूनस्वामी लग्नमदनं सप्तमभवनं पश्यति सप्तमभवनेन सह युतो वा भवेत्तदा बध्वाः शुभं यथा मेषलग्ने गुरुः कर्कं सप्तमतुलागतं स्वनवांशं धनूरूपं न पश्यति किन्तु सप्तमभवनं तुलां पश्यति अथवा तुलायामेवास्ति। अयमस्तशुद्धेर्द्वितीयः प्रकारः। इतरथेति इतरथा यदा लग्नांशेशोलवमन्तु वा न पश्यति तत्र युतो वा न स्यात्तदा वरस्याशुभं मृत्युः स्यात्। यदा वस्तांशेशोऽस्तांशमस्तभवनं वा न पश्यति तत्र युतो वा न स्यात्तदा कन्याया अशुभं मृत्युरित्यर्थः। यदाह कश्यपः"स्वस्वेनोदयास्तांशौ वीक्षितौ यदि संयुतौ। लग्नं वास्तगतं तत्तदंशेनेक्षितं युतमिति" तदाऽशुभमित्यनुषङ्गः। वसिष्ठः इष्टोदयांशे निजपत्यदृष्टे वरस्य मृत्युस्तनुसंयुते च। अस्तांशके ऽप्येवमदृष्टयुक्ते स्वस्वामिना नाशमुपैति कन्येति"। तुल्यन्यायत्वाल्लग्नेऽप्यस्तलग्नेऽपि उदयलवांशास्तांशस्वामिनोर्द्दृष्टभावेऽप्येतदेव फलं ध्येयम्। "लवेशोलवं लग्नपोलग्नगेहं प्रपश्येन्निधो वा शुभं स्याद्वरस्य। लवद्यूनपोऽयं द्यूनं लग्नपोऽस्तं मिथोवेक्षते स्याच्छुभं कन्यकायाः" सु०चि०। "नवांशस्वामी नवांशं प्रपश्येल्लग्नस्वामी लग्नं प्रपश्येत्तदा वरस्य शुभं स्यात्। अथ वा मिथः परस्परं लवस्वामी लग्नं लग्नेशोलवकं प्रपश्येत् तदाऽपि वरस्य शुभम् एवं लवद्यूनपोनवांशात्सप्तमनवांशस्वामी अयं द्यूनमेषं सप्तमराशिमीक्षते लग्नपः लग्नस्वामी अस्तं लग्नात्सप्तमभवनमीक्षते तदा कन्यायाः शुभं स्यात्। वा अथवा मिथः सप्तमाधीशोलग्नसप्तमं वीक्षते लग्नात्सप्तमाधीशस्यांशसप्तममीक्षते तदापि कन्यायाः शुभं स्यात्। अत्रान्यथात्वे दम्पत्योरशुभमित्यर्थः। यदाह नारदः "लग्ननवांशकौ स्वस्वपतिना वीक्षितौ युतौ। न चेद्दान्योऽन्यपतिना शुभमित्रेण वा तथा। वरस्य मृत्युः स्यात्ताभ्यां सप्तमप्रोदयांशकौ। एवन्तौ वीक्षितौ युक्तौ मृत्युर्बध्वाः करग्रहे"। वसिष्ठोऽपि "उदयांशः स्वस्वामी मित्रसौम्येन वा युतः। प्रेक्षितो वा तथास्तांशो दम्पत्योः पुत्रपौत्रदः"इति। परस्परवीक्षणेऽप्येतदेव फलं ध्येयं नारदवाक्यबलात् पी०धा०।

"लवपतिशुभमित्रं वीक्षतेऽयंलग्नं वा परिणयन करस्य स्याच्छुभं नास्तदृष्टम्। मदनलवपमित्रं सौम्यमद्यूनं वा तनुमदनदृष्टं वेक्षते यर्भ बध्वाः" सु०चि०। "अथ पूर्वोक्तप्रकारेष्टोदयास्तशुद्धेरभावेऽपि तृतीयप्रकार उच्यते। लवपतीति शुभमित्रं शुभञ्च तन्मित्रं चेति कर्मधारयः। लवपतेर्लग्ननवांशेशस्य शुभयुक्तः सौम्यबुधगुरुशुक्रानामन्यतमेनेक्षितं स्यात्तु चेदंशं स्वनवांशलग्नं लग्नं वा वीक्षते तदा परिणयनकरस्य वरस्य

यास्यदृष्टं वसिष्ठोक्तपुत्रपौत्रादिप्राप्तिरूपं शुभं फलं स्यात् अथ वा एवं सदनलग्नस्थांशेशस्य मित्रं सौम्यं चेत् स्यात्तदांशात् द्यूनं सप्तमनवांशं चेद्दीप्ते वा अथ वा तनुसदनगदृष्टं लग्नात्सप्तमभवनञ्चेद्दीप्ते तदा बध्वाः यास्यदृष्टं मर्म स्यात्। यद्युभयत्रापि नवांशस्वामिनो मित्रं पापयुक्तदृष्टस्य दृष्टिरशुभेवेति फलितार्थः। यदाह वराहः "शुद्धस्त्रिंशे स्यात्त यदोदयांशोलग्ने नवांशमुपैति शुद्धिम्। तदा सुहृत्सौम्यनिरीक्षितोयः शुभाय स स्यात्प्रदन्ति सन्तः" इति। कश्यपः "राश्यंशौ मित्रसौम्यैर्न वीक्षितौ वाथ संयुतौ। उदयास्तांशयोः शुद्धिस्त्रिविधा मङ्गलप्रदेति"। वसिष्ठः "लग्नास्तशुद्धा रहितः सदोषः करोति दुःखं वरकन्ययोश्च। तात् तदा लग्नगुणास्तगस्तं बन्धुगो दृष्ट सर्वदृष्टमिति"। केचित्तु विवाहादौ वध्वयोगं निषिद्धमाहुस्तन्न तथम्। "तिथिवारं च नक्षत्रं नवमिश्च समन्वितम्। सप्तभिस्तु हरेद्भागं शेषाङ्के फलमादिशेत्। त्रिशेषे तु जन्मं विद्यात् पञ्चशेषे प्रमङ्गलः। सप्तशेषे वज्रपातोऽष्टशेषे वज्रस्य लक्षणमिति टोडरानन्दे" पी०धा०

अथ सूर्य्य संक्रांतिदोषः "विषुवायनेषु परपूर्व्व मध्यमान्दिवसांस्त्यजेदितरसंक्रमेषु हि। घटिकास्तु षोड्श शुभक्रियाविधौ परतो पि पूर्व्वमपि सन्त्यजेद्बुधः" स०चि०। "विषुवन्तुलामेषसंक्रान्तौ अयन कर्कमकरसंक्रान्तौ एतच्चतुष्टयेषु विषुवायनाख्येषु संक्रान्तिषु परपूर्व्वमध्यमान् दिवसान्बुधः शुभक्रियाविधौ विवाहयज्ञोपवीतादि शुभकार्य्येषु त्यजेत्। इतरास्तदसंक्रान्तिषु संक्रमकालात्परतोऽपि पूर्व्वं प्रागपि षोड्श घटिकाः मित्वा ह्यतिगद्यघटिकास्त्यजेत्। यदाह वसिष्ठः "विषुवतोरयनयोर्दिवसत्रयं हरिपदे षड्शीतिसुखेषु च। पूर्वतोऽपि परतोऽपि संक्रमाद्यादिकाश्च खलु षोड्श त्यजेत्। संक्रान्तिदोषे त्यचिरात् क्षतं यदुद्वाहपूर्वाखिल मङ्गलादम्। लाक्षासमूहज्वलिताग्निमध्ये विलीयते तद्दशमेवमेतदिति" उद्वाहादिगृहणात्सङ्क्रमादावनिषेधः। तद्वाक्यानि संक्रान्तिप्रकरणेऽस्माभिरुक्तानि। किन्तद्दिनत्रयं त्याज्यं किं संक्रान्तिकालात् प्राग्दिनत्रयस्तत बदनन्तरमुत मध्यमं वेति पञ्चत्रयसम्भवे निर्णयमाहुरुदः। "अयने विषुवे पूर्व्वम्परं मध्यन्दिनन्त्यजेत्। अन्य संक्रमणे पूर्व्वाः परा षोड्श नाडिका इति"। अयञ्च निषेधः स्नानसंक्रान्तिरपि ध्येयः। यदाह वसिष्ठः "यदाऽयनप्रवेशः स्यात्तदा तद्राशिसंक्रमः। तस्मिन्नपि दिने त्याज्या नाड्यः षोड्श षोड्शेति"। यौनक. "अयनद्वये समूढा भर्त्तारं नाभिनन्दते नारी। विषुवद्वयेऽपि विधवा षड्शीतिसुखेषु सा म्रियते। विषुपदेषु विशीता कन्या विकलेन्द्रिया व्यतीपाते। वैधृतिविष्कुम्भेषु सुभगा शेषेषु करोषिषुति" पी० धा०।

अथ पङ्ग्वादिलग्नदोषः "घस्रे तुलालौ बधिरौ झषाजौ रात्रौ च सिंहाजवृषा-दि यान्याः। कन्यान्त्यवृश्चिकटका निशान्या दिने घटोऽन्यो निशि पङ्गुसंज्ञः" मु० चि०। "घस्रे दिवसे तुलाद्यश्विकौ बधिरौ स्यातौ, झषाजौ मकरधनुषौ रात्रौ न तु दिवसे, सिंहाजवृषा दिवान्या दिवसे बधिरा न तु रात्रौ। कन्या नृयुकर्कटा निशान्यारात्रान्या न तु दिवान्याः। घटः कुम्भोदिने पङ्गुसंज्ञो न तु रात्रौ। अन्योमीनो निशि पङ्गुसंज्ञो न तु दिने। यदाह वसिष्ठः "मेषादिचान्यर्क घटं चत्वारोबधिराः स्मृताः। द्वौ पङ्गू चेति विज्ञेयावित्येतद्राशिलक्षणम्। मेषो वृषो मृगेन्द्रश्च दिवसेऽन्याः प्रकीर्त्तिता। नृयुकर्कटकन्यास्च रात्रावन्याः प्रकीर्त्तिताः। तुला च वृश्चिकश्चैव दिवसे बधिरौ तथा। धनुश्च मकरश्चैव बधिरौ निशि कीर्त्तितौ। कुम्भमीनौ च पङ्गू द्वौ दिवारात्रौ यथाक्रममिति"। कुम्भोदिषा पङ्गुमीनो रात्रौ पङ्गुः, अनेन यस्मिन्काले लग्नस्य योऽन्यपङ्ग्वादिदोषः उक्तस्तस्मिन्नेव काले तल्लग्नन्दोषावहं न कालान्तरे" पी० धा०। तत्फलम्। "दारिद्र्यान्धबधिरतनौ दिशान्यलग्ने वैधव्यं विगुणमरणं मिथान्यलग्ने पङ्गौ निखिलधनानि नाशयोयुः सर्वत्राधिपगुरुदृष्टिभिर्न दोषः" स०चि०।

"वसिष्ठः "अन्धे वैधव्यमाप्नोति दारिद्र्यं बधिरे तथा। अथ नाशो भवेत् पङ्गाविति धात्रा विनिर्म्मितम्"। व्यासः "मासशून्याङ्कयास्तारा राशयो बधिरादयः। गौडमालवयोर्ज्याज्यास्त्वन्यदेशे न गर्हिता इति पी०धा०।

अथ नवांशशुद्धिः। "कार्ष्णकतौलिकन्यायुग्मलग्ने झषगे वा। यर्हि भवेदुपयामस्तर्हि सती खलु कन्या" मु०चि०। "कार्ष्णकं धनुस्तौलिकं तुला स्त्र्युग्मं मिथुनम् एषामंशे नवांशे झषगे मीनगते यावद्भवेत्कीयमस्तूचनार्थं; धनुरादिनवांशाः सर्वसुनिसम्मता इत्यर्थः तेष्वंशेषु यर्हि यदा उपयामो विवाहो भवेत्तर्हि कन्या विवाहोत्तरं सती पतिव्रता खलु यदाह वसिष्ठः "लग्ने हि सर्वे शुभराशयश्च शुभेक्षिता वाथ युताः शुभाः स्युः। नवांशकस्तौलिधनुर्युग्मकन्याचापाद्यु-

भाग: शुभदो न चान्ये । द्विभर्तृका मेषनवांशके स्यात् ऋ
क्षांशके सा पशुशीलयुक्ता । धनान्विता पुत्रवती तृतीये कुली-
रकांशे कुलटाप्यजस्थम् । सिंहांशके सा पितृमन्दिरस्था क-
न्याशके विरसयुता सुशीला । तुलांशके सर्व्वगुणास्पदा सा
कीटांशके निःस्वनरा विशाला । चापांशकात्ते धनिनी हि-
तीये भागेऽन्यसक्ता मलिना गदाढ्या । नि स्वाङ्गगांशे वि-
गुणा घटांशे विभर्तृका योगरता झषीशां । मीनांशके भर्तृ-
हतार्थहीना शुभयुक्तै र्युक्तनिरीक्षिते या । तस्मात्सदैवो-
द्वहनवांशकेषु कुर्याद्विवाहङ्कुशसद्दृढं । नवांशदोषः ,
मकलङ्कुणीयं लग्नोदयसौम्यषड्भसंस्थञ्च । ध्रुवं निह
न्त्येव दृकोऽजसङ्कुंषड्वर्गजं सौम्यवियच्चराणाम्" । पशु
शीलयुक्ता पशुचारपरा गदोरोग एते एव च
नवांशाः सकलमुनिभिरुक्ताः "तुलासिंयुनकन्यां-
शाधनुराद्यार्द्धसंयुता: । एते नवांशाः शुभदा यदि नान्यां-
शकाः खल्विति नारदोक्तेः । यौनकन्तु मीनांशकमपि
शुभमाह "सुतनौ सौभाग्यगतौ प्रहसितवदना च मीनांशे"
इति । तत्र निषेधस्तुल्यबलत्वात्षोड्शांशफलाधिक्यफल-
वद्विकल्प इत्याहुः तन्न एकबाधेनोपपत्तावनेकबाधोन-
न्याय्य इति वक्ष्यमुनिवचनप्रामाण्यात् मीनांशत्याग एवो
चितोन त्वेकमुनिवचनानुरोधात्पाल्लिकोक्तिकल्पविधिस्त-
स्याष्टदोषग्रस्तत्वात् । का तर्हि यौनकवाक्यस्य गतिरिति
चेत् गुणबहुत्वोपलक्ष्यो लग्नान्तरासक्तवे मीनांशको निषि
द्धोऽपिप्रशस्त इत्येवं विध्या गतिर्युक्ता" यो०धा० ।
"अन्यनवांशे न च परिणेया काचन वर्गोत्तममिह हित्वा ।
नो चरलग्ने चरलवयोगे तौलिद्वयगस्थे शशभृति कुर्यात्" मु०चि०।" विहितनवांशेष्वपि यथा मेषलग्ने धनु-
र्नवांशोऽन्तिम इत्येवं विधिविधये लग्नान्तिमनवांशे काचन
कन्या न परिणेया न विवाह्या । परन्तु वर्गोत्तमं नवांशं
हित्वा तत्र विवाह उचित एव । यथा मिथुनलग्ने मिथु
नांशोऽन्तिमोऽपि वर्गोत्तमः । यदाह कश्यपः "अन्यांशका
अपि श्रेष्ठा यदिवर्गोत्तमाश्रयाः । अतुर्क्षांशास्तु न प्रा-
ह्या यतस्ते कुनवांशकाः" इति । वसिष्ठोऽपि "वर्गोत्तमं
विनान्यांशे विवाहो न शुभप्रदः । वर्गोत्तमश्चेदन्त्यांशः
पुत्रपौत्रादिवृद्धिदः" इति । अन्यत्र तु चरलग्ने इति ।
तौलिद्वयगस्थे तुलाप्रकरम्भे शशभृति चन्द्रे सति चरलग्ने
विहितचरलवयोगे नो कुर्यात् । यथा मेषलग्ने तुलांशे
उक्तञ्च जीवशर्केण "चरलग्नं चरवेश्मगतेन्दुं त्यजेन्नृगतुला
मरगे लग्नसप्तमे । युवतिरत्र भवेत् क्षतकौतुका मदन-
वत्सवत्सजनोत्सर्वाति" । अन्यो जीवोभर्त्ता तस्य त्यजने
त्यागे उन्मुखी परपुरुषरता स्यादित्यर्थः" यो०धा० ।
अथ लग्नादिस्थ ग्रहदोषः "व्यये शनिः खेवनिजस्तृतीये
भृगुस्तनौ चन्द्रसुतो न शस्तः । लग्नेट् कविर्लौभ्य रिपौ
हृतौ ग्लौलग्नेटगुणाश्च सप्ते च सर्वे" मु०चि० ।
"व्यये द्वादशस्थाने स्थितः शनिः न शस्तः "सोम-
पालेऽपि हि जातां द्वादशगे मद्यपां कुरुते" इति यौन-
कोक्तेः । अत्र रविसुते दलमुक्तं । "खे दशमेऽवनिजो
मङ्गलो न शस्त । "शंकिना व्योम्नि यज्ञे" इति कश्य-
पोक्तेः । तृतीयो भृगु शुक्रः न शस्तः "धन्या धनगे
शुक्रे लक्षणज्ञं प्राप्नुयात्पतिं । दुश्चिक्यगते तु कन्या
लोलाद्दुर्भगा कनीयसा त्यजते" इति यौनजोक्तेः । तनौ
लग्ने चन्द्रः खलाः पापयुक्ताश्च न शस्ताः । "लग्नस्थे-
र्के कन्या विधवा संवत्सरेऽष्टमे भवति । लग्नस्थो हिम-
रश्मिर्मर्त्यं कुर्यात् त्रयोदशे मासे । भौमः शठो विधवां
लग्नस्थोऽवश्यं सौम्यदृगयोगात् । कामयति नीचवर्णाञ्च
लग्नस्थे रविसुते वक्तुं पुरुषान् । शनिवद्विधुन्तुदस्य
तु विज्ञेयं सदसदिति विज्ञैरिति"यौनकोक्तेः । लग्नेट् लग्नस्वामी, कविः शुक्रः ग्लौश्चन्द्रश्च रिपौ षष्ठस्थाने
न शस्ताः । "रन्ध्रे कुजे सौम्यखगे च हत्यूः पत्यौ
लग्नपतौ च हत्यूरिति" ज्योतिर्निबन्धोक्तेः । "भृगु-
षट्काष्टयो दोषोलग्नात् षष्ठगते सिते । उच्चगे शुभ-
संयुक्ते तल्लग्नं सर्वदा त्यजेदिति" नारदोक्तेः । "अष्ट-
चतुष्काष्टान् मृत्युर्दम्पत्योः षष्ठगे चन्द्रे" इति यौनकोक्तेः ।
ग्लौश्चन्द्रः लग्नेट् शुभाशुभबुधगुरुशुक्राः आरोभौम-
र्क्षे मृताष्टमस्थाने न शस्ताः"मासत्रयेण विधवां निधन-
गश्चन्द्रमाः करुते"। मासत्रयेण कन्या निधनस्थे याति पञ्च-
त्वम्"। बुधइत्यनुवर्त्तते।"दम्पत्योर्निधनस्थः सप्तदशाब्दा-
द्वियोगदो जीवः । पञ्चत्वं लभते भृगुर्निधनस्थः सप्त-
भिर्वत्सरैरिति" यौनकोक्तेः । नारदः "कुजाष्टमो मङ्गा-
दोषो लग्नाद्दशमे कुजे । शुभत्रयुतं लग्नं त्यजेत् तत्सुक्षेत्रे यदि" । अत्र सम्मतिः प्रायुक्ता । लग्नेट् च
पुनः सर्व्वे ह्युदयोपरि सदे सप्तमस्थाने न शस्ताः
निषिद्धाः । "सर्वे जामित्रसंस्थाविहगति मरणायेति"
वसिष्ठोक्तेः । कश्यपोऽपि "सप्तस्थानगाः सर्वे पापाः
कुर्वन्ति शोभ्रतः । तस्मात्तीर्थं यत् स्नाहेच्च च
न संशयः" इति अर्थात्सप्तमेषु स्थानेषु पापाः क्षयो-
चीनात्तत्र केषुचित् स्थानेषु शुभा एव केषुचिच्छुभा

एवमेवेतदपि वक्ष्यति । अतोऽसमर्थमतिसंधित्य तिथि कर्मेण निधिस्थानान्येवोक्तानि । "त्याज्या लग्नेऽब्धयो मन्दात्, षष्ठे शुक्रेन्दुलग्नपाः। रन्ध्रे चन्द्रादयः पञ्च सर्व्वेऽस्ते ऽजगुरू समाविति"। (मन्दाद्व्यय चत्वारो मन्दरवि चन्द्रकुजा इत्यर्थः)। अजगुर्वोः समत्वं यौनकमतेन तादृशविरूपफलाभावात् । यदाह "कन्यास्तिस्रो जनयति सापत्नं चैव सप्तमे शनिनि" । "शीलवरित्योमेनाङ्करोति पत्यु कलत्रगे दोष्यामिति" । गुरुरित्यनुवर्त्तते अत्र वचनद्वयप्रामाण्याद्विकल्पः । यत्त्वत्रिणोक्तं "जामित्रगो यदि भवेदगुना बुधो वा गीर्वाणनाथसचिवः सितचन्द्रपुत्रे । कन्याविवाहसमये परिहृत्य दोषान् सौभाग्यपुत्रसहितां वनितां करोतीति" तच्चन्द्रजामित्रविषयम् । तथा च भृजबलः "स्त्रीणां विवाहे तु बलैरुपेता पत्युः प्रणाशं विहगा विदध्युः । लक्षाबुधं दैत्यगुरुं गुरुं च निशाकरात्तत्सुतप्रपन्ना" इति । अतएव दीपिका "रविभन्दकुजःक्रान्तं मृगाङ्कात् सप्तमं त्यजेत् । विवाहयात्रा चूड़ाकृत्यकर्म्मप्रवेशने" इतिपो०भा० अथ लग्नतःस्थानविशेषे यद्भेदानां यस्तता "त्रयायाष्टषट्सु रविकेतुतमोऽर्कपुत्रारूढायारिगः क्षितिसुतो द्विगुणायगोऽजः । सप्तव्ययाष्टरहितौ शुक्रगुरू सितोऽष्टत्रिद्यूनषड्व्ययगश्चान् परिहृत्य यस्त" सु०चि० ।

"तृतीयैकादशाष्टमषष्ठस्थानेषु रविकेतुतमोऽर्कपुत्राः यस्ताः शुभफलदातारः । यदाह यौनकः 'बन्धुजनेभ्यः प्रजां त्रिंशद्वर्षाणि सहजगे त्वर्के । प्राप्नोति धनं षष्ठे त्रयस्त्रिंशद्दुर्द्धं सुतार्थं च । दम्पत्योः सह मरणं निधनस्थेऽर्केऽष्टसप्तत्या । कारयति धनविहीनं त्रयस्त्रिंशद्दुर्द्धं तथा व्ययगः सवितेति" (रवे) धनधान्यपत्नयुक्तां पञ्चमसंवत्सरात्तृतीयस्थः । षष्ठः षड्भिर्मासैरसपत्नीं कन्यकां करुते । निधनगतार्किः कुर्यादमरणादामयविमुक्ताम् । आयगतार्किः कन्यां त्रिवर्गयोग्यां करोति षण्मासादिति" यनेः) अत्र राहुकेत्वोश्च फलं शनिवदेवेति "स्वर्भानौ व्याध्य थ त्रिंशनि वा लग्नभावादिसंस्थे" इति वसिष्ठोक्तेः त्र्यायारिगः तृतीयैकादशषष्ठस्थानस्थितः क्षितिसुतो भौमः यस्तः।"सहजस्थो भूमिसुतः सौभाग्यकरस्तु यावदायुष्यम् । संवत्सरेण विपुल धनागमं यत्नसंस्थस्तु । मणिकाञ्चनरत्नाढ्यामेकादशगः वृजोऽष्टदशजेन" इति यौनकोक्तेः । अजचन्द्रोद्विगुणायगोद्वितीयगतौ यैकादशस्थः यस्तः।"अव्दाद्दशसंयुक्तां करोति चन्द्रो धने नार्य्याः । चन्द्रस्तृतीयरायौ सौभाग्यकरस्तु यावदायुष्यम् । लग्नादेकादशग कन्याभिन्दुधनान्वितां कुरुते"इति यौनकोक्तेः । सगुरु बुधसहस्थतौ सप्तमद्वयाष्टमातिरिक्तस्थानस्थितौ यस्तौ । उक्तस्थानानाम् अशुभत्वादन्येषां शुभदातृत्वात् । यदाह वसिष्ठः । "प्रीतिर्दृष्टिः सगुणानिरतिर्बन्धुपजा सुताप्तिः सद्दैपत्यं तनयरहितं त्वन्यथा भर्त्तृनाशः । धर्मे बुद्धिर्भवति धरणीलब्धिरत्नेव दृष्टिर्हानिः स्त्रीणां हिमकरसुते लग्नभावादिसंस्थे" इति । "लक्ष्मीप्राप्तिर्भवति सुतयाः प्रीतिरन्योन्यदृष्टिरिष्टप्राप्तिर्बहुविधमयं चाश्रमाणां विरक्तिः। पापासक्तिः सुहृत्तविरतिर्भूरिलाभः सुरेज्ये स्त्रीणां सौख्यं रिपुकृतभयं लग्नभावादिसंस्थे" इति अयं शुभदैवं अयः शुभभावहो विधिरित्यमरः । क्लीबत्वं त्वार्षम् कैश्चिद्बहुविधमयमिति" पठन्ति तन्मकारे भकारभ्रान्तेः "उभयकुलानन्दकरो करोति न चिराद्गुरुः षष्ठे" इति षष्ठस्थानस्थितगुरोः यौनकेनापि सम्यक्फलाभिधानात् । सित इति अष्टमतृतीयसप्तमषड्द्वादशस्थानानि परिहृत्य त्र्यक्षाचेषु स्थानेषु सितः शुक्रः यस्तः । तदुक्तं वसिष्ठेन "भोगप्राप्तिर्विविधविभवं स्वैरवृत्तिर्महत्त्वं द्यूनाधिक्यं भवति निधनं सर्व्वनाशोऽसुतत्वम् । यद्यप्रीतिर्बहुविधगुणाः सर्वसम्पत्समृद्धिरस्त्रं स्त्रीणामुगनसि तथा लग्नभावादिसंस्थे इति द्यूनं दूषणम् । अवसुत्वं दरिद्रता । अस्वं दारिद्र्यम् । यसिष्ठः "मृत्युर्नैस्वं बहुविधधनं भ्रातृहानिः प्रजानां व्याधिः सौख्यं बहुविधमतोभर्त्तृहानिश्चिरायुः । श्रेयोहानिर्भवति हृदयव्याधिरर्थागमश्च भामौ स्त्रीणामतिशयरुजा लग्नभावादिसंस्थे ।(रवेः)नाशः सम्यग्बहुविधयशोबन्धुवृद्धिः प्रजाप्तिः यस्तानुग्रस्तो भवति न चिरादूर्ध्वसापत्यबाधा । प्रव्रज्यात्वं दुश्चिकित्सजनं वर्द्धनं भोगभाक्त्वं दास्यं स्त्रीणां तुहिनकिरणे लग्नभावादिसंस्थे (इन्दोः)। अत्र चतुर्थचन्द्रस्य प्रजाप्तिः फलमभिहितम् श्रीपतिनापि "सुखे तु कथितो बन्धुसुखः कैश्चनेत्येकीयमतमनुसृत्योक्तमिति व्याख्यता चतुर्थस्थानस्य मध्यमत्वमङ्गीकृतम् । "बन्धूं श्वशुरवियुक्तां चतुर्थस्थः यथो त्वाद्दादिति" यौनकः । विरुद्धार्थयोः का गतिरिति चेत् । बालचन्द्रविषयमशुभफलम् तद्भिन्नचन्द्रविषयं शुभफलम् । उक्तञ्च कोशवार्कैण "बालोऽजः प्रियविरहं शनिः क्षतास्रः शून्यत्वं सृजति सुखे सुवासिनीनामिति" वसिष्ठः "मृत्युः शोको बहुविधधनं भ्रातृवैरं कुबुद्धिर्लक्ष्मीप्राप्तिर्भवति मरणक्लेशयोर्वेगनाशः। स्त्रीणां द्वेषो व्यसनानि

रतिः पुत्रपौत्रादिसिद्धिर्भीतिर्भूमेर्बलिनि तनये लग्नभावादिसंस्थे" (कृजस्य)। स्वक्रूरत्वं कदर्यनरतिर्वक्रभत्वं शिशीलं व्याधिः सुस्त्रीमूर्तिरथ सुखं गर्भपातप्रवृत्तिः द्यूनासङ्गिर्भवति रविजे वैभवं वक्रारोगं स्वभानौ वाग्यथ शिखिनि वा लग्नभावादिसंस्थे" पी०धा० बुधादीनामनुपदमुक्तम् ।

अथ लग्नादिभङ्गकर्त्तर्यादिदोषापवादः

"पापौ कर्त्तरिकारकौ रिपुगते नीचास्तगौ कर्त्तरीदोषेणैव सितेऽरिनीचगतगे तत्पक्षदोषोऽपि न । भौमेऽस्ते रिपुनीचगे न हि भवेद्भौमोऽष्टमो दोषकृत्नीचनवांशके शशिनि रिपुफाष्टादिदोषोऽपि न" मु०चि० ।

"तत्र कर्त्तरीयोगलक्षणं लग्नात् पापावित्यादिनोक्तं यौ क्रूरौ यद्वा कर्त्तरिकारकौ रिपुगृहे शत्रुगेहे स्थितौ नीचेऽस्तगौ स्वनीचराशिस्थितौ अस्तं गतौ वा तदा कर्त्तरीनैव स्यात् यदाहुः कश्यपनारदवसिष्ठाः; "पापयोः कर्त्तरीकर्त्रोः शत्रुनीचगृहस्थयोः । यदा चास्तगयोर्वापि कर्त्तरी नैव दोषदा" इति इदं विशेषणं शत्रुगृहस्थत्वादिकं समुच्चित्य व्यस्तं समस्तं वा ध्येयम्, अपवादान्तरमुक्तं दैवज्ञम० गर्गेण । "क्रूरकर्त्तरिसंयुक्तं लग्नं चन्द्रं च न त्यजेत् । केन्द्रत्रिकोणसंस्थेषु गुरुभार्गवबिल्लेषु च" । "विधौ धनोपगे शुभगृहेऽथवान्यगे गुरौ । न कर्त्तरी भवत्यूहोजगाद बादरायणः । क्रूरहृयस्थान्तरगं विलग्नं मृतिप्रदं चन्द्रमसञ्च रोगदम् । शुभैर्धनस्थैरथ वाऽन्यगे गुरौ न कर्त्तरी स्यादिह भार्गवाविदुरिति"।

अथ षड्गुक्रापवाद उच्यते । "सिते शुक्रेऽरिगृहगे नीचगृहगे वा सति तत्षड्दोषो भृगुषट्कदोषोऽपि न स्यात् यदाह कश्यपः "नीचराशिगते शुक्रे शत्रुक्षेत्रगतेऽपि वा । भृगुषट्कोत्थितो दोषो नास्ति तत्र न संशयः" अथाष्टमभौमदोषापवाद उच्यते । भौमेऽस्ते अस्तं गते रिपुनीचगे शत्रुगृहे वा स्वनीचगृहगे वा सत्यष्टमो भौमो न दोषकृत् स्यात् । उक्तं च कश्यपेन "अस्तगे नीचगे भौमे शत्रुक्षेत्रगतेऽपि वा । कुजाष्टमोद्भवोदोषो न किञ्चिदपि विद्यते" इति । अथ षडष्टहादशस्थान चन्द्रापवाद उच्यते । शशिनि चन्द्रे नीचनवांशके वा सति रिपुफाष्टादिदोषोऽपि हादशाष्टमशत्रुस्थानस्थित चन्द्रदोषोऽपि न स्यात् । "नीचराशिगते चन्द्रे नीचांशकगतेऽपि वा । चन्द्रे षडादिरिपुफस्थे दोषो नास्ति न संशयः इति" कश्यपोक्तेः पी०धा० ।

अथावृद्याद्यादिदोषापवादः "अवृद्यायनर्तुतिथिमासाब्दपञ्च दग्धतिथ्यब्दकाणब्धिराङ्कसुखाश्च दोषा । नश्यन्ति विधुरिसितेष्विह केन्द्रकोणे तद्वच्च पापविधुयुक्तनवांशदोषाः" मु०चि० ।

"अवृद्दोषः१ अयनदोषः२ ऋतुदोषः३ तिथिदोषो रिक्तादिः४ मासदोषः५ वर्षदोषः क्रूरसङ्क्रान्तादिः६ । पक्षदोषस्त्रयोदशदिनात्मकादि ७ दग्धा तिथिः प्रसिद्धा चापान्त्यगेत्यादिनोक्तात् । अब्धिकाणब्धिराख्योलग्नदोषः८ तन्मुखात्तदादयोऽन्ये अकालवृष्ट्याद्या दोषा विधुरे सितेषु केन्द्रकोणे केन्द्रे सप्तमस्थानरहिते विलग्नितं जामित्रदोषस्य सत्त्वात् । अतएवोक्तमग्रे "त्रिकोणे केन्द्रे वा मदनरहिते" इति कोणे नवपञ्चमे सत्यु नश्यन्ति । उक्तञ्च कश्यपेन "अब्दायनर्त्तुमासोत्थाः पक्षतिथ्यृक्षसम्भवाः । ते सर्वे नाशमायान्ति केन्द्रसंस्थे शुभग्रहे । काणाब्धिबधिरोद्भूता दग्धलग्नतिथेर्भवाः । ते दोषानाशमायान्ति केन्द्रसंस्थे शुभग्रहे" इति । "अकालजास्त्र नीहारविद्युत्पांशुभसम्भवाः । परिवेषप्रतिसूर्यशक्रचापध्वजादयः । दोषप्रदा भवन्तेषु कालजास्वेव दोषदाः । गुरुरेकोऽपि केन्द्रस्थः शुक्रो वा यदि वा बुधः । हरेः स्मृतिर्यथा हन्ति तद्वदोषानशेषजान् । लक्षोपपक्षचण्डीशचन्द्रजामित्रसम्भवान् । तत् केन्द्रगो गुरुर्हन्ति सुपर्णः पन्नगानिवेति" । तद्वचेति तथा यदि पापः क्रूरोविधुयुक्तरायेनवांशे स्याद्यथा सचन्द्रे मेषे सूर्यनवांशस्तद्दोषोऽभिहितो यद्दोषोत्तरप्रकरणे, तदा तत्कृतदोषो नश्यति । उक्तञ्च संहितायां "सचन्द्रराशेरशुभोनवांशः प्रोक्तः सपापोऽपि विलग्नसंस्थः । त्रिकोणकेन्द्रेषु गुरुः सितो वा यदा तदाऽसावशुभोऽपि शस्तः पी०धा० ।

अथ बहुविधदोषापवाद "केन्द्रे कोणे जीव आये रवौ वा लग्ने चन्द्रे वापि वर्गोत्तमे वा । सर्वे दोषानाशमायान्ति चन्द्रे लाभे तद्वद्भूर्तांशदोषाः" मु०चि० । "केन्द्रं प्रसिद्धं कोणं नवपञ्चमं तत्र च जीवो गुरुः स्यात्तदा सर्वे दोषानाशमायान्ति उपलक्षणत्वाद्भृगुशुक्रावपि । यदाह नारदः 'उक्तानुक्ताश्च ये दोषास्ताञ्छिन्ति बली गुरुः केन्द्रसंस्थः सितोवापि पन्नगान् गरुडो यथेति" सितो बुधस्योपलक्षकः । उक्तञ्च कश्यपेन "काव्ये गुरौ वा सौम्ये वा यदा केन्द्रत्रिकोणगे । नाशं यान्त्यखिलादोषाः पापानीव हरिस्मृतेरिति" तत्रापि लग्नाख्यकेन्द्रस्थातिबलत्वात्तत्र स्थितो जीवः सर्वारिष्टहरं तदुक्तं वसिष्ठेन "कुजवांश

दोषाः ये लग्नदोषाः पापैः लता दृष्टिनिपातदोषाः। लग्ने शुक्रस्तात्त्विनक्षीकरोति लग्नं लग्नाधः लतकर्तृत्वमेति"। अथवा आत्मे एकादशे रवौ सति दोषनाशः। "लग्नेऽष्टमे सूर्ये दोषा नाशं वदुस्तदा। लग्नादेव दरुक्षं पापं लक्षयतेऽत्रवर्णिति"। अथवा लग्ने वर्गोत्तमे स्वनवांशयुक्ते लग्ना सिद्धे सिद्धनांशः तदा दोषनाशः। अथवा चन्द्रे वर्गोत्तमे स्वनवांशस्थिते वा सति दोषनाशः। द्वितीयवराहवाक्यस्वरसार्थत्वात्। चन्द्रो लग्नादुपचयद,१०,११ स्थाने वेत् स्वात्तदापि सर्वदोषनाशः। एवं क्रमेण परिहारवचनं वदाह लक्षपः "वर्गोत्तमगते लग्ने वर्गदोषा सर्व लयः। चन्द्रे दोषवधे वापि पीडो कुजरितो यथेति"। चन्द्रे इति तद्वत्तैव प्रकारेण दुर्मुहूर्त्ता रात्रिवर्जनेत्यादयः, अंशदोषाः पापयुक्तनवांशाद्यास्ते सर्वे चन्द्रे लग्ने एकादशस्थिते सति नाशमायान्ति। "दुर्मुहूर्तलग्नषड्वर्गकुनवांशयुक्तदोषाः। ये दोषास्तानिह-स्थेव वर्गोत्तमगतः शशीति"। अन्यदप्याह लक्षपः "लग्नाद्दःस्थानलग्नेशचरोक्तं दोषषट्कम्। शुभः केन्द्र-गतोऽखिलं हरत्यग्निरिवेन्धनं यथेति" वी०धा०।

"त्रिलोके केन्द्रे वा लग्नरहिते दोषशतकं हरेत् सौम्यः शुक्रोऽपि शतं हरगुरुः। भवेदाये केन्द्रेऽथ शत सप्तमो यदि तदा वसूनं दोषाणां दहन इव तूलं शमयति" रु०चि०। "त्रिलोके ५,९ केन्द्रे सप्तरहिते १,४,१०, यदि सौम्यो बुधस्तिष्ठेत्तदा दोषशतकं हरेत्। उक्तस्थानस्थितः शुक्रोऽपि द्विशतं दोषशतकं दोषद्वितयं हरेत्। तथोक्तस्थानस्थितो गुरुरपि शतं दोषान् हरेत्। यदाह नारदः "दोषाणां हि शतं हन्ति बलवान् केन्द्रगो बुधः। अथवाऽपि शुभं शुक्रोऽद्विशतं सकलान्हरेत्"। अत्र शतशब्देनानेकसंख्यात्वं विवक्षितम्। अतएवाह लक्षपः 'बलवान् केन्द्रगः सौम्यो हन्ति दोषशतत्रयम्। शुभं विहाय दैवज्ञः सकलं सकलान्हरेत्" इति। अथेदानीं लक्षणोक्तलग्नाभी शत शब्दोक्तवर्गे स्वनवांशलग्नतांशनाथो वा आत्मे ११केन्द्रे १, ४,१० यदि भवेत्तदा च दोषाणां वसूनं शमयति तत्र दृष्टान्तः दहनोऽनिलयुक्तं वापार्थमिव शमयति। तद्वत्तं नारदेन "लग्नेट् लग्नांशनाथो वा यावत् केन्द्रगोऽपि वा। तावत्तं निहन्ति दोषाणामग्निवातोद्यं यथा"

अथ लक्षणेन चन्द्रादिशुभाशुभनिरूपणम्"चन्द्रः त्रिलोकेऽर्कः चन्द्रः,शुक्रश्च,जामित्रपः स्वाद्यस्तो, लग्नः शमी। एतदुक्तं संप्रतिभाव्यतान्त्रिकलोकां सुखं संप्रवदेदुविवाकृतः"रु०चि०। "शुक्रः चन्द्रः, सूर्यः गुरुः, अत्र लग्नान्निमित्तशुभाशुभफल विचाराय्यदनात्तस्थाः कल्पाः। चन्द्रस्तरमाता गुरुरोवरपिता, तनुर्लग्नं तनुः स्वशरीरं, जामित्रपः सप्तमाधीशोदयितो भर्त्ता ज्ञेयः, शमी शनैश्चरः एतदुक्तम् एतेषां शुक्रादीनां बलं विचार्य तान्त्रिकः तन्त्रविद्वान्विद्वत् विवाकृतो विवाकादनन्तरं तेषां चन्द्रादीनां सुखं ब्रूयादिति प्रवदेत्। यदाह यौनकः "गुरुः सकलविरत्यः चन्द्रभृगुनन्दनो विनिर्दिष्टः। होरागमार्थकुशलैर्जामित्रपतिः पतिः स्त्रीणाम्। शरीरं लग्नवशात् सुखदुःखं मानवं यथाह्यवदादिति"। मान्त्रीयेऽपि"गुरुरोर्कः, क्षितिः चन्द्रः, स्त्रीणामस्तपतिः पतिः। एभिरुक्तोपगैरेषां शुभं स्त्रीणादिगैरवदिति" विशेषान्तरमभ्युक्तं मान्त्रीये "सूर्यात्पतिः, स्त्री च विधो,सवाराद्विज्ञं, सुतो ज्ञाच्छुक्रं गुरोश्च। भर्त्ता क्षितादर्कसुताच्च वेद्यः, क्रूरात्सुहृच्चाकविधौ खशुक्रा, एतैर्नीचस्थितैः शत्रुगतैर्वाकादिकं न वत्। स्वस्वोच्चत्रिकोणस्थैः शुभमेषां यथोदितमिति"।

अत्र संकीर्णजातीनां विवाहे नियतकालविशेषः "लग्ने पक्षे सौरिकुलार्केऽपि च वारे वर्ज्ये नक्षत्रे यदि वा स्यात्करपीडा। संकीर्णानां तर्हि सुतायुर्धनलाभप्रीतिप्राप्यै सा भवतीह स्थितिरेषा" रु०चि० "लग्नपक्षे मन्दभौमार्कवारे विवाकोक्तनक्षत्रादिभिन्नलग्नेषु चरवाराद्व्याघातन्यूनेत्यादि दुष्टयोगेष्वपि यदि संकीर्णानाम् अनुलोमप्रतिलोमजानां करपीडा विवाकः स्यात्। तर्हि सा करपीडा सुतायुर्धनलाभप्रीतिप्राप्यै भवति। एषा स्थितिराचारोऽस्ति, अनुलोमजासूद्वाविवाहादयः प्रतिलोमजासाद्वाहादयः। वाक्यपक्षपक्षनेतदन्यत्रे विवाकाद्यर्थलग्ने च प्राप्तुक्तादिनेऽपि स्यादिति सूचनार्थम्। तदुक्तं मान्त्रीये "लग्ने भानुभौमार्कजानां वारे योगे चापि विष्ट्यां निषिद्धे। संकीर्णानां दारकर्म प्रशस्तं प्रीत्यर्थायुःप्राप्तये यौनकाद्याः" इति। लोचनार्कः "प्रायेण सकूरशुभाशुभर्क्षलग्नक्रूरवर्षेषु शुभलग्ने करपीडनं स्यात्" इति

अथ लग्ने वक्ष्यमे तदन्यभे लोधूक्षिनिरूपणप्रसंगे "लाक्षालवणं न तिथिवारर्क्ष नैव लग्नस्थ चिता नो वा वारो न च लवविधिर्नोक्तदुर्मुहूर्त्तस्य चर्या। नो वा योगो न खलितभवं नैव जामित्रदोषो लोधूक्षिः वा खनिभिरहिता सर्वकार्येषु शस्ता" रु०चि०।

"यदवं न लग्नलिप्तादिं च स्तुत्यर्थयाद्यः तेन गोधूल्याः प्रयंलायां तात्पर्यं न तु विधिरन्यथा निषिद्धेषु लग्नावास्थाभङ्गाभरणीत्रादिष्वपि गोधूलिलग्नं भवितुं युक्तं स्यात्। लग्नावस्थैवाप्यपेक्षितापस्तिरपि वक्ष्यमाणया। तस्मादभिहितातिव्याप्तिदोषे एव यावच्छब्दाश्रितदोषपरिहारपूर्वकघटीलग्नं कार्यं तदभावे गोधूलिलग्नं कार्यम्। यदाह वसिष्ठः "लग्नं यदा नास्ति विशुद्धलग्नयोर्गोधूलिकां साधु तदा वदन्ति। लग्ने विशुद्धे सति कर्मयुक्ते गोधूलिका नैव न लग्नं विधत्ते। शुभाशुभयुतं सर्वं रागेदोषान्वितं स्मृतम्। विवाहलग्नवच्चैव गोधूलीं प्राह भागुरिरिति" किन्तु "कुलिकं क्रान्तिसाम्यं च मूर्तौ यदाहुः मयी। पक्षे गोधूलिके त्याज्या अन्ये दोषाः शुभावहाः" इति दैवज्ञमनोहरोक्तवाक्यमपि कार्यम्। गोधूल्यधिकारे व्यास नारद "प्राच्यानां च बलिष्ठानां सख्यं गोधूलिकं स्मृतम्। सन्ध्यार्दिविवाहेषु वैश्योद्वाहे चायोजयेत्। चतुर्थमभिजिल्लग्नसदृक्षत्वात्तु लग्नकम्। गोधूलिकं हि भवति कन्यापुत्रादिसौख्यदमिति"। दैवज्ञम० "घटीलग्नं यदा नास्ति तदा गोधूलिकं शुभम्। मूढादीनां शुभाः प्राकूर्ण द्विजानां यदावन। मूढादीनात् परित्यज्य प्रोक्तधिष्ण्यादिकेषु च। कारयेद्वोरजोवावत्सावल्लग्नं शुभावहमिति। लग्नशुद्धिर्यदा नास्ति कन्या यौवनमालिनी। तदा वै सर्ववर्णानां लग्नं गोधूलिकं शुभमिति"। अतएव भूपालवल्लभे "विप्रेषु घटिकाऽऽभावे हानत्रं गोरजो बुधैः। क्षत्रियेषु गोरजः श्रेष्ठं वैश्येषु गोरजं शुभमिति" तत्र गोधूलिलक्षणमाकाशसमवेतं गोधर्मोत्थोत्पन्नं "आकाशवत्र घटिकादर्शनिष्टमाकुर्यात् तद्व्यवस्थेरपि चार्वविद्यादिति" केचित् यावद्विमाने दिवि पक्षिणां पक्षेणतीवं रविबिम्बमालम्ब्य। तत्तात्परं नाडीवलनेत्रे गोधूलिकाद्यं लग्नमेवदलीति, तदेतदेवः पक्षयोर्गधादेयाचार्य अवज्ञा धी०चा०।

"पिण्डीभूते दिनकृति क्षेत्रसन्धौ खाद्रांके तपसमये गोधूलिः। संपूर्णांके जलधरजालाद्यावे लेखा दोज्ञा वलक्षशुभे यावदी"त्त०चि०। "क्षेत्रमात्रे स्थितो क्षेत्रसन्धिः न प्रीतयाद उपलक्षाते मार्गशीर्षादिमासचतुष्टये दृश्यर्थः तत्र दिनकृति सूर्ये पिण्डीभूते ओदनगोलवत्तुल्ये सन्ध्यायां नीहारान्धकारतत्वेन निःप्रभे दृश्यर्थः। तस्मिन् समये गोधूलिर्ज्ञेया तथा तपसमये उच्यमाने क्षेत्रादिचतुष्टये सूर्येऽर्धांके अर्धनिमग्ने दृश्यमाने च सति गोधूलिः। जलधरजालेवाकाशे नालावलम्बकलोत्पादके काले सर्वाकाशे आवच्छादितावयवदृष्टे सूर्ये संपूर्णांकेऽर्धमग्ने सति गोधूलिः। केवलमिदं न विवाहे एव किन्तु वलक्षशुभे वलक्षशुभकार्यादिष्वपि ज्ञेया। यदाह वराहः "गोधूलिं त्रिविधां वदन्ति मुनयो नारीविवाहादिके क्षेत्रमे गिरिरे प्रयाति सहसा पिण्डीकृते भास्करे। पीतेऽर्धास्तमिते वलक्षसमये भानौ गते दृश्यतां सूर्ये चास्तमुपागते मनसि प्राहुर्धरत्नाकरयोरिति"। गो०धा०।

अथ गोधूलिसमयेऽवश्यवर्ज्यदोषाः "अस्तं याते गुरुदिवसे सौरे सार्के लग्नान्मृत्यौ रिपुभवने लग्ने चन्द्रे। लग्नान्नाथक्षतमदलस्थे भौमे गोदुर्भगे मनसिजे चन्द्रे सौख्यम्" मु०चि०।

"गोधूलिरिष्टमुदयति गुरुदिवसे दृक्पथातिचारे, सूर्येऽस्तं याते सूर्यास्तादनन्तरं गोधूलिः शुभा स्यात् न तु सूर्यास्तात्पूर्वमर्द्धघटिकागोधूलिलग्नं कार्यमर्द्धास्तमयत्वाभावात्। तथा सौरे शनिवारे कार्ये सूर्येऽर्धमग्नस्थिते गोधूलिः शुभा। न तु सूर्यास्तादनन्तरमुदयमत्वाभावात्। उपलक्षणत्वात् क्रान्तिसाम्यमपि ज्ञेयम्। तथा लग्नात्यावद्बलीनलग्नान्मृत्यावष्टमे रिपुभवने वष्ठे वा लग्न एव वा चन्द्रे सति कन्यालाभः स्यात्। तदुक्तं दैवज्ञ० "कुलिकं क्रान्तिसाम्यं च मूर्तौ यदाहुः मयी। पक्षे गोधूलिके त्याज्या अन्ये दोषाः शुभावहाः"। अत्र कुलिकयद्वेन तत्कालवर्त्याद्यर्द्धलग्नदोषो लक्ष्यते अन्यथान्यवलभ्य एव। लग्नस्थे सहजस्थे मृत्यौ वा भौमे सति वोढुर्वरस्य नाशो भवति तदुक्तं ज्योतिःसंहितायां "वष्ठेऽष्टमे मूर्तिगते मयाङ्के गोधूलिके लग्नयुतेऽथ लग्ने। कन्या वरस्य नाशं प्रवदन्ति सर्गाः" अन्योऽपि विशेषस्तत्रैव "यदाष्टमे चन्द्रजवन्मूर्तीवे चौणोदुते वा लग्नसहजे वा। मूर्तौ च चन्द्रे निजवेन लग्नेगोधूलिकं त्यादिह वर्जनीयमिति"। "त्रिण्यादुदयुतत्यात्यां मूर्तौ यदाहुः मयी। गोरजस्तत्र यत्रेति लग्नः सनिदिनं विनेति"। उक्तञ्च "क्षेत्रयोर्नेव गोधूलिकेऽपि विधुरस्थमवमूर्तौ लग्नोदयन्ति तदधो खदधिं प्रपन्नाः। यद्यान्मुहूर्तिमवनेव विवाहधिष्ण्यैर्वैधव्यादिदं सततलक्षणज्ञे वदन्ते। नांशो न लग्नमिह दृश्यतं लग्नभा नार्कारोदितलग्नमपि वक्ष्यमाणः। किन्तूच्चारभवनेवलिनाथु किन्तु नाल प्रमाणवचनाद्विलग्नमपि मतं नः"। कार्ये मयी विद्यविधिन

थिक्यखिलकूनीतत्तोरवक्रू,खिलवामदक्षोपक्षत्वादिति'। चन्द्रे लाभस्थे वित्ते द्वितीयस्थे सहजस्थे वा सति क्षीणचन्द्रयोः; क्षीणं स्यात्। तदुक्तं संहितासारे "यत्रैकादशगश्चन्द्रोद्वितीयो वा तृतीयगः। सोधूलिका च विज्ञेया सेवा भूरिति कथ्यते"श्री०भा०

ज्यो०त०लाघवभेदः। "मार्गे गोधूलियोगे प्रथमतिथिवधा, माघमासे तथैव, पुत्रायुर्धनजीवनेन सहिता कुम्भस्थिते भास्करे। वैशाखे सुभदा, प्रजावलवती, ज्यैष्ठे पतेर्मारका आषाढे धनधान्यपुत्रवसुका, पाल्गिपक्षे कन्यका।

अथ विवाहादौ वर्ज्यदोषसंज्ञाः "उत्पातान् सह पातदग्धतिथिभिर्दुष्टांश्च योगांस्त्यजेच्चन्द्रज्योतनक्षत्रचरणत्रयवर्जं तिस्राः त्रयस्त्रीं तथा। नक्षत्राणस्तु सविष्टि संक्रमदिनं तन्मध्यपादं तथा तन्मध्येषविधूनषष्टिघटिकान् पापस्य वर्गांस्त्यजेत्। सेन्द्रक्रूरखगोदयांस्तदुत्पातायुद्विषण्डायुधम्। आर्क्षं दग्धयोगयोगसहितं आभिलक्षत्राख्यधम्। वाक्षोपपक्षपापकर्तरि तथा तिथ्यृक्षयोगोत्थितं दुष्टं योगमर्धार्धवामकुक्षिकाद्यान् वारदोषानपि। क्रूराक्रान्तविलग्नभं पक्षभं यत् क्रूरगलग्नभं तेषोत्पातदुष्टत्वं केतुदुष्टभं सन्ध्योदितभं तथा। तद्वच्च पक्षभिन्नयुद्गतभं सर्वानिमान् सन्त्यजेदुद्वाहे शुभकर्मसु पक्षकृतान् लग्नस्य दोषानपि" मु०चि०। "उत्पातादीन्दोषान् दुर्वाहे यज्ञोपवीतादिशुभकर्मसु च सन्त्यजेदिति तत्तीव्रक्लेशनाश्यः। उद्वाहपक्षणं गोवलीवर्द्दन्यायेन सुखसंलक्षनार्थम्। उत्पातान् त्रिविधान् दिव्यान्तरिक्षभौमान् तज्जन्यया तत्सम्बन्धिनः सप्त वर्ज्यदिवसांस्त्यजेत्। यदाह गुरुः "दिग्दाहे वा अकालादपतने चाभ्रवर्षणे। उल्कापाते अकालाते अकालनिर्घातपतने। अनभ्रायनिर्घाते च भूकम्पे परिवेषतः। आकोत्पाते विनाशन्ते दुर्निमित्ते नयोभने। केतवो यत्र दृश्यन्ते च धूमा वा पृथग्विधाः। चन्द्रसूर्यग्रहे चैव वर्जयेद्दिनसप्तकमिति"। अतो अकालपातः अकालिकाभ्रमिति यावत् तद्रचितप्रश्नतन्त्रम्। दग्धतिथयः "चापान्मीने मोघटगे दग्धाद्योगाः स्युः सर्वं त्यजेदिति सन्त्यजः तथा दुष्टान् योगान् अतीचार वैधृतिविष्कुम्भादीन्। अथ चन्द्रज्योतनक्षं चन्द्रयुक्तं नक्षत्राणां चरणत्रयं च तिस्राः त्रयस्त्रीं तिथित्रयं तिथिसहितं च दुष्टर्क्षजातं नक्षत्रतिथिवर्गैः; तिथिभं विष्टिभैश्च संक्रमदिनं तद्दिवसे वर्ज्या घटिकाः, त्रयमेषु विषुवेषु च पूर्वापरं त्रितिथमिति विभेदोऽवेयः। ताभ्यां सहितमिति पूर्वेण सम्बन्धः। तन्मध्यमसुर्यभम् अंशोनलग्नगतत्रिंशत्तमांशः तौ पातः; तन्मध्यौ तयोरर्कं लग्नाधीयांशं लग्नगतनवांशाधीयांशं वेत्यर्थः तथा तन्मध्येषविधून् लग्ननवांशचन्द्रान् अष्टरिष्टगान् अष्टमगतान् वर्जयेत् इन्दुश्च क्रूरखगश्चेन्दुक्रूरखगौ उदयो लग्नञ्च अंशो नवांशश्च उदयांशमिति समाहारद्वन्द्वैकवचनं इन्दुक्रूरखगाभ्यां सहितस्तदयांशम्। इन्दुसहितं लग्नं लग्नांशं च क्रूरपक्षेण सहितं लग्नं लग्नांशं चेत्यर्थः। पापस्योत्थे कर्मसहितं पापानां वर्गोत्थितं पापानां वर्गोत्थितैः उदयायुद्विरक्तायुद्विश्च उदयात्तायुद्विः षण्डायुधम् "षण्ढायुधं कर्मणवर्द्धतिक्षाध्येत्यादिनोक्तम्। आर्क्षं भाधातगण्डेत्यादिनोक्तं दग्धयोगः "सूर्यार्कचन्द्रर्क्षयुतैरित्यादिनोक्तः, योगो यक्षयुतिश्च तत्सहितं आभिलक्षत्राख्यधम् समाहारद्वन्द्वैकवचनं आभिलक्षद्विविधं लग्नजाभिलं चन्द्रजाभिलञ्च लग्नाच्चन्द्रेत्यादिनोक्तं तत्र "शराक्षपूर्णेन्दुहिता" इत्युक्ता व्यधम् वेधं सप्तशलाकोक्तं यन्त्रशलाकोक्तञ्च। वाक्षाः यन्त्रकम् उपपक्षः प्रसिद्धः; शराक्षदिक् यक्केत्यादिः पापकर्त्तरी क्रूरपक्षकर्त्तरी समाहारद्वन्द्वैकवचनं तिथ्यृक्षवारोत्थितं दुष्टं योगं तिथिनक्षत्रवारैरुत्थितं उत्पन्नं दुष्टयोगम्। तथा तिथिनक्षत्रोद्भवं वैधृत्यादिकं इत्यादि। तिथिवारोद्भवं सूर्य्यपक्षेत्यादिनक्षत्रवारोद्भवं व्याघ्यत्याद्भित्यादि अनेकं दुष्टयोगम् अर्धार्धवामकुक्षिकाद्यान् वारदोषानपि अष्टार्थम् आदिशब्देन दुर्मुहूर्त्तादिकान्। क्रूराक्रान्तविलग्नभं क्रूराक्रान्तं क्रूरविलग्नञ्च भं पक्षभं यस्मिन् भे सूर्य्य चन्द्रोपरागो जातस्तद्भं यत् क्रूरगलग्नभं क्रूरेण जिगमिषितं यद्भं नक्षत्रं तेषोत्पातदुष्टत्वं भस्य। त्रिविधोत्पातैर्दिव्यभौमान्तरिक्षैर्दुष्टं तत्सम्बन्धिषट्कं त्याज्यमेव पक्षभिन्नयुद्गतमपि। केतुदुष्टभञ्च केतुना दुष्टभञ्च। सन्ध्योदितभम् यत्र सन्ध्यासम्बन्धेन सायंसन्ध्या स्पृश्यते। तत्रोदितं तदुत्तरे यद्यपि तत्र क्षितिजे उदयस्तु सूर्य्यस्यास्तमयः नक्षत्रस्येत्यर्थः। न तु प्रातःसन्ध्यायां तत्र हि सूर्य्येणानुल्लङ्घनात्तत्रत्वसम्बन्धात्। उद्वाहं वेधवर्जेच "तत्रोदितार्कतोऽपि चतुर्दशं तदक्षितेऽपि खिलं शुभकर्मणीति"। तारकषट्कः क्षीणेऽपि। अनूपपक्षत्वादेव निषेधे सिद्धे पुनर्दोषाभिधानं विमर्शम् उच्यते उपपक्षदोषस्य सत्त्वापत्त्यभावे कुलक्षयादिकदेवविवाहात्मकदोषस्य च दोषाधिक्यसूचनादावश्यकेऽपि सर्वदेवविवाहेन निषेधो यथा स्यादिति। पक्षभिन्नयुद्गतभं पक्षेण भेदितं पक्षयुद्गतञ्च यत्पाप

निन्द्यं तथा व्यङ्गतातू कन्यस्य दोषान् । "व्यङ्गे गणिःखे ऽधिजदुस्यादिकान् लग्नस्थभेन्दिदोषान् सन्त्यजेत्" । पी०मा० । ज्यो०त० ज्योतिःसारसंग्रहाक्रमम् "विवाहे तु दिवाभागे कन्या स्यात् पुत्रवर्जिता । विरुद्धानक्षदग्धा सा नियतं स्वामिघातिनी" एतद्वचनस्यार्धमूलानुपलम्भात् पाश्चात्यादिभिरप्रामाणिकत्वमुररीकृत्य दिवाऽपि विवाह आचर्यते । कन्यादानं च रात्रावपि कर्त्तुं शक्यते यथाह ज्यो०त० भारतम् "रात्रौ दानं न कुर्वन्ति विना चाभयदक्षिणाम् । विद्यां कन्यां द्विजश्रेष्ठाः दोषसङ्घं प्रतिक्षयम्" । तत्रैव व्यासः रिक्तासु विधवा कन्या दर्शेऽपिग्रहाद् विवाहिता । यमैश्वरदिने चैव यदा रिक्ता तिथिर्भवेत् । तस्यां विवाहिता कन्या पतिसन्तानवर्द्धिनी" इत्युक्तेः मतिवारे रिक्तायामपि विवाह इति गौडाः । पाश्चात्यादिभिरेतद्वचनमूलकमेवेति मत्वा गणियुक्तरिक्तायां न तदा चर्च्यते । अथ विवाहास्योगुणागुणकथनाय्युच्यते । बृह० ७०अ० "स्निग्धोन्नतापतहुताग्रनखो कुमार्याः पादौ शुभोरतिचयाद्यनिमूढगुल्फौ । स्निग्धाङ्गुली कमलकान्तितलौ च हस्तौ प्रशस्यावहतेद्यदि भर्तृ ऽधिपतित्वमिच्छेत् । मत्तद्विपाङ्गुष्ठसमाङ्गुलिकावलेखौ वृत्तौ चरणौ प्रथमौ । जङ्घे च रोमरहिते विपुले सुवृत्ते जानुद्वयं समनतुल्यचलन्निदेश्यम् । ऊरू घनौ करिकरप्रतिमावरोमायत्नलभ्यसदृशं विपुलं च गुह्यम् । श्रोणीतटाट मुरुकूर्मसमुन्नतं च गर्तो नभिश्च विपुलां श्रियमाद्धाति । विस्तीर्णमांसोपचितौ नितम्बौ गुरुत्व मर्त्रे दयतावलापम् । नाभिर्गभीरा विपुलाकृतानां प्रदक्षिणावर्तनता प्रशस्ता । मध्यं त्रिवलिविलिनाजमरोमयं च हस्तौ घनावविषमौ कठिनाङ्गुरस्रौ । रोमावलिर्जलमुरो बहु चारुनानां ग्रीवा च कम्बुनिचिता शुभलक्षणानि धत्ते । कम्बुग्रीवसुशोभनो ऽधरो मांसलो रुचिरविम्बफलप्रकाशः । कुन्दकुड्मलनिभाः समा हिता दन्ताः पतिसुखान्विताया वैद्याः । दाक्षिण्यबुद्धिमयठं वरपुटं ववक्तु प्रभाषितं मधीजनमनश्चमोक्षम् । नासा समा समपुटा रुचिरा प्रशस्ता दन्मौक्तिकोदकसुतिकारिणी च । नो सङ्कते नातिपृथू न कृशे चक्षे भ्रुवौ बालयशाकृषके । अर्द्धेन्दुसंस्थानसदोसमं च भव्यं ललाटं न नतं न तुङ्गम् । कर्णौ तुल्यमपि वृत्तसंस्थं शस्यते बहु समं समाहितम् । स्निग्धोलतबहुकुञ्चितैजसा मूर्धजाः सुकरराः समं शिरः। भृङ्गारावनवाजिछत्रचमरीरथसूपेधुमिलाकुलचक्रवाराङ्कुशयवैः मेखैर्ध्वजैर्वज्रैरथैः । मत्तद्विपक्षितिवेदिव्यजनकैः पद्माताम्बुजैः पादे पार्थिवते ऽपि वा युवतयो गच्छन्ति राज्ञीपदम् । निगूढसन्धिबन्धनौ तत्त्वमग्नगोपमौ करौ ऋपतिबोधितां तनुविद्युत्पर्वाङ्गुली । न निम्नमति नोन्नतं करतलं सुरेखान्वितं करोत्यधिकां चिरं सुतसुखार्थसम्भोगिनीम् । मध्याङ्गुलिं वा मधिवन्नमोत्था रेखा गता पार्थिवते ऽङ्गनायाः । ऊर्ध्वस्थिता पादतले ऽथवा या पुंसो ऽथवा राज्यसुखाय सा स्यात् । कनिष्ठिकामूलभवा गता या प्रदेशिनीमध्यमिकान्तराले । करोति रेखा परमायुषः सा प्रमाणमूना तु तदूनमायुः । अङ्गूष्ठमूले प्रथमस्य रेखाः पुत्रा बृहत्यः प्रमदास्तु तस्याः । अच्छिन्नदीर्घा बृहदायुषां ताः खण्डायुषां छिन्नलघुप्रमाणाः । इतीदमुक्तं शुभलक्षणानामतो विपर्ययजमनिष्टमुक्तम् । विशेषतो ऽनिष्टफलानि यानि समासतस्तान्यनुकीर्तयामि । कनिष्ठिका वा तदनन्तरा वा यदीं न मुञ्चः स्मृयती स्त्रियाः स्यात् । गताऽथवाङ्गुष्ठमतीत्य मध्याः प्रदेशिनी सा कुलटातिपापा । उद्वृद्धाभ्यां पिण्डिताभ्यां गिरालं गुल्फे जङ्घे रोमशे चातिमांसे । वामावर्तं निम्नमग्नं च गुह्यं कुम्भाकारं जघनं दुःखितानाम् । कुक्षयाऽतिनिःखताः दीर्घया कुक्षयः । पीवर्या पृथूत्तमया योषितः प्रवरुक्षता । नैते मध्याः क्षेत्रे पिङ्गले वा सा दुःशीला श्यावलोलेक्षणा च । कूपौ यस्या गण्डयोश्च स्थितेषु नि सन्दिग्धं बन्धकीं तां वदन्ति । प्रविलम्बिनि देवरं ललाटे श्वशुरं कन्यु दरे स्त्रियोः पतिं च । अतिरोमचयान्वितोत्तरोष्ठी न शुभा भर्तृरतेषु या च दीर्घा । स्तनौ सरोमौ मलिनोल्बणौ च क्लेशं दधाते विपदौ च नर्दौ । स्थूलाः कराङ्गा विषमाश्च दन्ताः क्लेशाय चौर्याय च कन्यकायाः । क्रव्याद्वृकैर्वृकलाकाखरोल्लूकशृगालमानविधैः । शुष्कैः शिरालैर्विषमैश्च कृत्तैर्भवन्ति मार्गाः सुखवित्तहीनाः । या त्वत्तरोष्ठेन समुन्नतेन कृष्णाग्रजेभी सकचप्रिया वा । प्रायो विरूपासु भवन्ति दोषा बलाद्धतिस्तास्तु शुभा भवन्ति । पादौ च शुष्कौ प्रथमं प्रदिष्टौ जङ्घे द्वितीयं च सजानुचक्रे । ऊरूत्तमाङ्गं च ततस्तृतीयं नाभिः कटिश्चेति चतुर्थमाहुः । उदरं जघनं वक्षः हृदयं वदनतः क्रमान्वितम् । अथ वक्षसंस्थलक्षणी कथयन्त्यत्तमोत्तमान्वरे । नयनं नयने च सम्भवी ललाटं दशनं शिरस्तथा । अशुभेष्वशुभं दृशाकर्षं चरणाद्येषु शुभेषु शोभनम्"।

सामोक्तखण्डे १७ अध्याये स्त्रीणां शुभाशुभलक्षणान्युक्तानि यथा "सदा सुखी सुखं भुङ्क्ते स्त्री लक्षणवती यदि । अतः सुखलक्षणाध्यायादौ लक्षणमोक्षयेत् । वपुरावर्त्तोन्नतत्वं छाया स्वरं खरोमता: । वर्णश्चेत्यष्टधा मोक्षा बुधैर्लक्षणभूमिका । आपादतलमारभ्य यावन्मौलिरुहं क्रमात् । शुभाशुभानि वक्ष्यामि लक्षणानि मुने शृणु । आदौ पादतले रेखा ततोऽङ्कुशाङ्कुलीलताः । पृष्ठं गुल्फद्वयं पार्ष्णी जङ्घे रोमाणि जानुनी । ऊरू कटिर्मितव: स्फिग् भगोजघनबस्तिके । नाभिः कुक्षिहृदं पार्श्वोदरमध्यबलित्रयम् । रोमाणि स्तनहृदयं वक्षो बाहुद्वयं भुजकम् । जत्रुस्कन्धांसबाहवोर्ग्रीवाचुबुकरदनम् । ओष्ठिपुटं दन्तिका रेखाङ्कुशाङ्कुलीलताः । पृष्ठं ललाटिकाकण्ठे चिबुकं कर्णकुण्डलम् । भ्रमोर्ध्वबन्धुमधरोत्तरौष्ठहिजजिह्विकाः । घण्टिकातालुकुक्षितं नासिका श्रुतमक्षिणी । पक्ष्माभ्रूवर्त्मभागानि मौलिसीमन्तमौलिजाः । वृद्धिः षड्उत्तरा योषित्कुलक्षणसत्फलानि: । स्त्रीणां पादतलं स्निग्धं मांसलं सदृढं समम् । अरुणं सुखमरुणं वक्षभोगोचितं सुतम् । रूक्षं खिन्नं परुषं खण्डितप्रतिबिम्बकम् । स्फोटकारं विशुष्कं च दुःखदौर्भाग्यलक्षकम् । चक्रं खलिनयङ्कुशाब्जशङ्खमीनातपत्रवत् । यस्याः पादतले रेखा सा भवेत् क्षितिपाङ्गना । भवेद्दक्षभोगार्हा या मध्याङ्कुशिसङ्गता । रेखाकुसर्पकाकाभा दुःखदारिद्र्य सूचिका । उन्नतोमांसलोऽङ्कुशो वर्त्तुलोऽतिभोगदः । वक्षो सुखस्य चिपिटः सुखसौभाग्यभङ्गजः । त्रिधवा विपुलेन स्याद्दीर्घाङ्कुशेन दुर्भगा । मृदवोऽङ्कुशयः यस्या वनाद्यास्ताः प्रशस्यताः । दीर्घाङ्कुशीभिः कुचटा जयाभिरति निर्धना । सुखबुध्या च सुखाभिर्भुग्नाभिर्भुग्नवस्तिनी । चिपिटाभिर्भवेद्दासी विरलाभिर्दरिद्रिणी । परस्परं समाः कुचटा यदाङ्कुरो भवन्ति हि । कृत्वा बहूनपि पतीन् परप्रेष्या तदा भवेत् । यस्याः पयि समावान्ता रजोभूमेः प्रशस्यते । सा पांसुला प्रजावेत सुखलक्षविनाशिनी । यस्याः खलिखिता भूमिं न लङ्घन्ता: परिस्पृशेत् । सा निहत्य पतिं भावा द्वितीयं कुरुते पतिम् । अनामिकाच लम्बा च यस्या भूमिं न संस्पृशेत् । पतिहन्त्री भवेत्सा द्वितीया च पतिव्रतम् । पतिक्षीणत्वकारिण्यौ क्षीणे तेहे यमे यदि । प्रदेशिनी भवेद्यस्याङ्गुष्ठातिरेखिणी । अन्येन कुचटा सा स्यादेषण्ड विनिवर्तकः । स्निग्धाः वपुःसुताताम्राश्चताः प्रशस्ताः शुभाः । राज्ञीवक्त्रवत्तुल्यं स्त्रीणां पादपृष्ठं सुलक्षणम् । अखेदमविराढं च मसृणं मृदुमांसलम् । दरिद्रा मध्यमध्येव विरलेन सदाध्वगा । रोमाढ्येन भवेद्दासी निर्भोगेण च दुर्भगा । पृष्ठी गुल्फौ गुणोन्नावविरलौ सुवर्त्तुलौ । सुपृष्ठौ विपिठौ दग्धौ ख्यातां दौर्भाग्यसूचकौ । वलयाङ्किः गुणानारी पृथुपार्ष्णिश्च दुर्भगा । कुकटोन्नतपार्ष्णिश्च दीर्घपार्ष्णिश्च दुःखभाक् । रोमशैर्ने चले स्निग्धे वल्गुजङ्घे कुमवर्त्तुले । सा राजपत्नी भवति विविधे सुमनोहरे । एकरोमा राजपत्नी द्विरोमापि सुखास्पदम् । त्रिरोमा रोमशैर्भवेद्दुःखभाक् । इत्थं पिण्डितसंज्ञं जानुयुग्मं प्रशस्यते । निर्मांसं खैरचारिण्या दरिद्राया च विस्तृतम् । विषमैः जानुजानुभिर्भवेद्दुर्भगा । सुवर्त्तुलोरुरुक्तिर्भवेद्भूपपत्नया: । वैपक्षं रोमभवेद्दासी दौर्भाग्यं चिपिटैरपि । मध्यस्थिर्भवेद्दुःखं दारिद्र्यं कठिनत्वचैः । चतुर्भिरङ्कुशैः प्रोक्ता कटिर्भवति संवृतैः । समुन्नतनितम्बाढ्या चतुरस्रा नृपोद्वाह्या । विस्तृता चिपिटा दीर्घा निर्मांसा लघुटा कटिः । कुक्षरोगयुता नार्या दुःखवैधव्यसूचिका । वितस्त्यन्तिमो नाभेरुत्तमोनांसलः पृथुः । मध्यभोगाय संप्रोक्तस्तद्ध्वोऽधर्मचे मतः । वपित्फलवद्वृत्तौ लघुकौ मांसलौ घनौ । स्निग्धौ वल्गितनिर्मुक्तौ रतिसौख्यप्रवर्त्तनौ । शुभः कठपृष्ठाभोगलक्षान्मोपलोमलः । वामोन्नतस्तु वन्ध्याः दक्षिणोन्नतः । वामरोमा गूढनाभिः कुक्षिः संवृतः पृथुः । शुभः वलयवर्णाभः शुभोऽच्छदलाञ्छितः । तरङ्गवरूपोऽवक्षीरोदरलक्षिणः । रोमशैर्विरलताक्षश्च दक्षनाभोऽतिदुर्भगः । मङ्गलावर्त्तनाभोवक्षाः सा गर्भमिह नेच्छति । चिपिटः वर्यराकारः शिखरीपदृढो भगः । वंशवेतसपत्राभो मजरोमोपमाक्षिकः । विवटः कुटिलाकारो लम्बलम्बस्तथा शुभः । भगस्य भाजं जघनं विस्तीर्णं तुङ्गमांसलम् । लघुकं लघुरोमाढ्यं दक्षिणावर्त्तरोमितम् । वामावर्त्तं च विषमं भुग्नं वैधव्यसूचकम् । बहुटस्थूलं रूक्षं जघनं दुःखदं सदा । वस्तिः प्रशस्ता विपुला बहो लोमवर्जिता । रोमशा च विरलाच रेखाङ्का नैव शोभना । गम्भीरा दक्षिणावर्त्ता नाभी स्यात् सुखसम्पदे । वामावर्त्ता समुत्तानाव्यक्तपक्षिणी शोभना । स्तने स्तनाः बहूचारी पृथुकुक्षिः सुखास्पदम् । जिनीयं जनयेत् पुत्रं जन्तुनामेन कुक्षिका । उन्नतेन मनोज्ञाता यावत्तेनापि कुक्षिका । यस्या मग्नजिता हानी

कृशाङ्गीवा भवेद्दिह्म । धर्मैः धर्मार्थैर्मृदुभिर्वोचिन्नाख्यिभिः गुणैः । पार्श्वैः शोभाम्बुसुखबोधिधानं खादसंशयम् । यस्या हस्तशिरे पार्श्वे उन्नते रोमसंयुते । निरपत्ना च दुःखार्ता सा भवेद्दुःखवेधिः । उदरेखातितन्वेन विशिरेव मृदुत्वया । बोधिन्नवति भोग्याढ्या-निन्दितास्वेरिनी । कुशाकारं दरिद्राया जठरं च मृदूत्तरम् । कृशाच्छाद्यवर्णं च दुःपूरं लभते स्त्रियाः । सुविभाक्तोदरी नारी निरपत्ना च दुर्भगा । प्रलम्बजठरा क्लिन्नं चापुरं चापि देवरम् । मध्यक्षामा च सुभगा-भोगाढ्या सर्वसिद्धया । कृष्णो तन्वो च रोमाढ्यो यस्याः सा नर्मगर्भभूः । कपिला जटिला स्थूला मुष्किसा रोमराजिका । वैरूपैधव्यदौर्भाग्यं विद्ध्यादिह योषिताम् । निर्लोम हृदयं यस्याः सम निम्नलसन्नितम् । ऐश्वर्यं चाप्यवैधव्यं प्रियभेदं च सा लभेत् । विस्तीर्णहृदया बोधा दुःखिता निर्दया तथा । उन्निम्नरोमहृदया पतिं क्लिन्नं विनिर्दिशेत् । जटादाढ्यकृशतनुरोमरुक्षतम् । दुःखाय, दुःखाय भवेद्रोमभं विषमं पृथु । घनो दृष्टो दृढो पाणौ घनो घनो पयोधरौ । स्थूलाग्रौ विरलौ कृष्णौ वामोरुष्वां न धर्मदौ । दन्तिचोन्नतवक्षोजा पुत्रिणीश्चिरपत्नीमता । वामोन्नतकुचा सूते कन्यां सौभाग्यसुन्दरीम् । अवनकुचटी क्षुद्रौ कुचौ दोःशीर्षसूचकौ । पीवरार्द्धौ खालराढौ दुर्भगाम्नो न शोभनौ । सूक्ष्मस्थूलौ कृमकृशावपत्नीतोऽशुभौ पयोधरौ । सुवृत्तौ पूर्वभागे तु पश्चादल्पदुःखदौ । सुवृत्तं चूचुकयुग्मं यस्याः स्यात् सुवर्तुलम् । अन्तर्मग्नं च दीर्घं च क्षयं क्षोभाय जायते । पीवराभ्यां च वाहुभ्यां धनधान्यनिधिर्वधूः । क्षयाक्षिभ्यां च निम्नाभ्यां विषमाभ्यां दरिद्रिणी । अवन्नावनतौ कृष्णावदीर्घावजयौ शुभौ । यस्याः स्यूलौ च रोमाढ्यौ प्रेष्यैधव्यसूचकौ । निगूढसन्धी सुताढ्यौ शुभावंसौ सुसंहतौ । वैधव्यदौ वहुव्यापौ निर्मांसावसिदुःखदौ । अंसे दुःखक्षयोन्मे च हस्ते क्लिन्ने च मांसले । मृदू, न मृदू मणीरे विरोले खेदमेदुरे । खाता हीनौ खनिद्रोणौ मूढास्थिपर्व्वसंधिकौ । विपिटौ च विरोमाद्यौ करौ दरिद्रोद्यमम् । वैधव्यं स्थूलरोमाद्यौ दुःखौ दोर्भाग्यसूचकौ । दरिद्रेयाव नारीणां दरिद्रस्थविरोभुजौ । अस्थीनमकृशाकारमकृष्टाकृष्टि यस्यचम् । कृशत्वं मृगाक्षीणां वक्षभोगाय जायते । मृदुमध्योन्नतं रम्यं तन्वं पारावतोररुचम् । प्रथमं यस्य-रेखाढ्यमस्थिरेखं शुभाश्रयम् । विधवा वक्षरेखेव विरेखेव दरिद्रिणी । भिन्नकी शुषिराढेव नारी करतलेन वै । विरोम विशिरं यस्य पाणिपृष्ठं समुन्नतम् । वैधव्यदेव रोमाढ्यं निर्मांसं स्नायुमत् त्यजेत् । व्यालाव्यालगभीरा च स्निग्धा पूर्णा च वर्तुला । करेरेखाकृताद्याः स्याच्छुभा भाग्यानुसारतः । मत्स्येन सुभगा नारी खड्गेन च सुप्रजाः । पद्मेन भूपतेः पत्नी जनयेच्चक्रवर्तिनं सुतम् । चक्रवर्त्तिस्त्रियाः पाणौ नन्द्यावर्त्तः प्रदर्शितः । यस्यास्तलकमठा देवमातृत्वसूचकाः । तुलामालाङ्कितो रेखा वणिक्पत्नीत्वहेतवा । गजवाजिद्वयाकाराः करे वामे मृगीदृशाम् । रेखाः प्राग्दक्षजाभा नृयुग्मोर्ध्वकराः शुभम् । छत्रोपेतस्य पत्नी स्याच्चक्रेण युगेन वा । तोमराङ्कुशकोदण्डं राजपत्नी भवेत् ध्रुवम् । अङ्कुशमूलाविर्गत्य रेखा याति कनिष्ठिकाम् । यदि सा पतिहन्त्री स्याद्दूरतस्तां त्यजेत् सुधीः । त्रिशूलाविगदायष्टिदुन्दुभ्याकृतिरेखया । नितम्बिनी कीर्त्तिमती पादेन पृथिवीतले । कङ्कजम्बूकलशदृढचिह्नभोगिनः । राजभोग्यविढ़ाद्याः स्युः करस्था दुःखदाः स्त्रियाः । शुभदः करजाकुम्भो हस्तोद्वत्तनखोल्लसः । अङ्कुशश्च सुपर्व्वाणो दीर्घा हस्ताः क्रमात् क्रमाः । विपिटाश्चपुटा हस्वाः पुरुरोमयुजोः शुभाः । अतिह्रस्वाः क्षया वक्रा विरला रोगदेशगाः । दुःखाद्याङ्गुलयः स्त्रीणां वक्रपर्व्वसमन्विताः । अरेखाः सधिकास्थूलाः करजाः सुखदा शुभाः । स्निग्धा विस्तीर्णाः स्वच्छाभाः पीता दारिद्र्यदायकाः । नखेषु विन्दवः श्वेताः प्रायः स्युः स्त्रैरिणीसुताः । हृदया अपि जायन्ते दुःखिनः पुत्रिभिर्नखैः । अन्तर्निमग्नवर्णाग्निः पुष्टिः स्नानांशका शुभा । पुष्टेन रोमवृक्षेण वैधव्यं लभते ध्रुवम् । भुग्नेन विगतेनापि वधिरेः नापि दुःखिता । अल्पो ललाटिका श्रेष्ठा यस्यांसा च वलवता । शुष्का शिराका रोमाढ्या विधवा कुटिलाऽशुभा । मांसलो वर्त्तुलः स्कन्धः प्रथमवयसुखः । यस्या पीवा शिरेखाढ्या स्वच्छास्थिसुसंहता । निर्मांसा चिपिटा दोर्घा खण्डिता न शुभप्रदा । स्थूलपीवा च विधवा वक्रपीवा च विद्वरी । कन्या हि चिपिटग्रीवा कृशग्रीवा च निःस्वता । चिबुकं ह्रस्वकृशं यस्य हस्तमीन सुखोज्झितम् । स्थूलं द्विधा संभिन्नमायतं रोमभं त्यजेत् । वृत्तचिबुकसंयुक्ता निर्लोमा सुखना शुभा । यस्या स्थूला लघा दीर्घा रोमशा न शुभप्रदा । यस्यौ घनौ वामाक्ष्याः श्रीमौ हस्तौ वलवन्तौ । रोमशौ यस्यौ

स्निग्धौ निर्मांसौ परिवर्जयेत् । एवं लक्षणं दुश्चिह्नं ज्ञात्वोद्वहनं वर्जयेत् । अनेनैवहननाद्यं ज्ञात्वानिष्टं ज्ञापयेत् । गाढौ वर्तुलः स्निग्धोरेखासूचितलक्षणः । शोभनलिंगोनाभयो भराजानिग्रिया भवेत् । जघः प्रलम्बः स्फुटितौ दृढौ दीर्घाण्यलक्षणः । ह्रस्वः स्थूलोऽधरौष्ठः ज्ञातैश्वर्यलक्षणप्रदः । लम्बोत्तमाधिष्ठाश्रोत्तरोष्ठः शुभोदयः । स्निग्धिलक्ष्योन्नतोऽ रोमा विपरीतो विरुद्धलत् । गोक्षीरसन्निभाः स्निग्धा ह्रालिंगहृदनाः शुभाः । अधस्ताद्गुपरिष्टाच्च वलयोपवलन्विताः । पीताः ह्रस्वाश्च दशनाः स्थूला दीर्घा द्विपङ्क्तयः । शुक्लाकाराश्च विरला दुःखदौभाग्यकारिणः । अधस्ताद्धिकैर्दन्तैर्भर्त्तारं भक्षयेत् स्फुटम् । प्रतिष्ठीला च विकटैः कुकटा विरलैर्भवेत् । स्निग्धेष्टमिष्टभोक्त्री स्याच्छोचाच्छन्ती तथा स्थिता । दुःखाय मध्यसंकीर्णा पुरोभागसविस्तरा । स्थिता तोयसरं ह्रासवा सक्थप्रिया । दरिद्रिणी सांसखदा कन्यवाऽभक्ष्यभक्षिणी । विषाखवा रसनवा प्रमदातिप्रमादभाक् । स्निग्धं शोभनदाभासं प्रथमं तालु शोभनम् । सिते तालुनि वैधव्यं पीते प्रव्रजिता भवेत् । कृष्णे ऽप्यल्पवियोगार्त्ता रूक्षे चौरकुटुम्बिनी । वराटे स्थूला सुदृत्ता च क्रमतोच्चा च वोन्नता । अवस्थाभा वराटा स्थूला ह्रस्वा च दुःखदा । अवस्थितस्निग्धं किञ्चित् किञ्चित्फुल्लपोलकम् । स्थितं प्रथमं सुदृश्यमनिलोत्तिलोचनम् । समदृत्तपुटा नासा वसुच्छिद्रा शुभावहा । स्थूलाग्रा मध्यनम्रा च न प्रथमा सलक्षता । आकुञ्चितारुणाग्रा च वैधव्यक्लेशदायिनी । परप्रेक्षा च विपिटा क्षुद्रा दीर्घा अक्षिप्रिया । दीर्घं लक्षत् सुतं दीर्घं युगपद्दृत्तिपिण्डितम् । लक्षणोन्नते मक्षे रक्षाले ह्रस्वतारके । गोक्षीरवर्णविषये स्निग्धे ह्रस्वे ह्रस्वमध्यगे । ह्रस्वताक्षीण दोषादुर्दृशाधो कुकटा भवेत् । लेखाधो मध्यगाधो च वैधव्यदा न शोभना । ह्रासप्रक्षिप्ता नितरां लोपिताधो सुदुर्दृता । पारवताधो दुःखोद्या रक्ताधो भर्तृघातिनी । कोटरानवना दृष्टा लक्षलेखा न शोभना । दुःखदो वामताधो वन्ध्या दक्षिणताधिका । अनुविद्धाधो रक्तो धनधान्यलक्षद्धिप्रदः । पक्ष्मभिः सुदृग्भिः स्निग्धैः ह्रस्वैः ह्रस्वैः सुदृश्यलक्षैः । वर्तिवैरिवैः स्थूलैर्लिंग्धा भवति भाविनी । भ्रुवौ सुवर्तुले तन्वी स्निग्धे ह्रस्वे सुसंगते । प्रथमे सदृशरोमाधो सुभगः वार्तुलाकृती । वरारोमा च पृथुला विरीर्णा वरला स्त्रिया: । न भ्रूः प्रथमा लिखिता दीर्घसोमा च पिङ्गला । ह्रस्वलक्षणौ शुभावर्त्तौ सुखदौ च शुभप्रदौ । मध्यसंकीर्णितौ स्निग्धौ विरागौ कुटिलौ जयौ । भ्रुवः विरावि-रहितौ निर्लोमार्द्धेन्दुसन्निभः । अनिम्नस्थाग्रकुशोन्नाभ्रूः शोभाभ्रारोभ्यकारकम् । व्यक्तलक्ष्मिरेखस्तु ललाटं राज्यलक्षये । प्रलम्बमधिकं यस्या देवरं हन्ति सा भ्रुवम् । रोमहीन विरावेण प्रांशुना रोमिणी मता । शोभनः वरवः मध्येलोमि: मक्षः सलक्षतः । नम्रकृष्णस्निग्धो ह्रस्वः शोभाभ्यैश्वर्यसूचकः । स्थूलसूत्रौ च विषमा दीर्घरोमौ च वन्ध्यकौ । विषाखेनापि विरला भवेद्दौर्भाग्यलालनम् । लेखा अविकुलच्छायाः सूक्ष्माः स्निग्धाः सुलोमशाः । स्निग्धदाकुञ्चितापाङ्गा कुटिला अतिशोभनाः । पक्ष्माः स्थूलितापाङ्गा विरलाश्च विरोधकाः । पिङ्गाक्षवलयोरुक्षा दुःखदारिद्र्यवन्ध्रदाः । तिलकं लाञ्छनं वापि स्निग्धं शोभाभ्यवारकम् । यस्या दक्षिणवक्षोजे मोक्षे तिलक उच्यते । वामोपरिष्टव स्तने स्तने सा च सुतप्रदम् । भ्रुवोरन्तर्ललाटे वा मक्षोरोमाङ्कलक्षणः । वामे कपोले मलकः मोक्षोक्षिप्ताग्रदः स्त्रियाः । तिलकं लाञ्छनं मोक्षं यस्या वामकुचे भवेत् । एकं पुत्रं प्रसूयादौ ततः सा विधवा भवेत् । गुह्यस्य दक्षिणे भागे तिलकं यदि शोभितः । तदा क्षितिपतेः पत्नी सूते वा क्षितिपं सुतम् । नाभ्यास्ये मक्षणः मोक्षो लक्ष्मिणा एव जायते । ह्रस्वाः स एव भर्तृघ्न्याः दुःखाय प्रकीर्त्तितः । नाभेरधस्तात् तिलकं मक्षणो लाञ्छनं शुभम् । मक्षलक्षितलक्षिप्तं गुह्यफेशे दरिद्रलत् । ऊरेर्वामे कपोले वा वक्षसे वामे भवेद् यदि । एवां लक्षणसंयोगस्तु प्राग्गर्भे पुत्रदं भवेत् । भागेन लिम्पुलेन निर्लोमेन मक्षस्थुवा । तिलस्थितो वर्द्धयाधां ज्ञापित्वं बोधिदाम्रुवात् । सुप्ता परक्षरं वा तु दन्तान् खटखटायते । सुलक्षणापि न सा यस्या यत् किञ्चित् प्रलपेत् सदा । याधो प्रदक्षिणावर्त्तौ धर्म्यौ वामौ न शोभनः । लाभौ सुतादुरसि वा दक्षिणावर्त्त ईरितः । शुभाय दक्षिणावर्त्तः पुत्रवंश्य दक्षिणे । वामःपुत्रे नाभिस्थो ह्रस्वायुःपुत्रवर्द्धनः । राजपत्न्याः प्रसूतेश्च अवौलौ प्रदक्षिणः । न चेत्र वटिभागे स्याद्वृषलक्षणप्रदः । वटितोयुग्मवेधेन वलयत्वनिपातनः । ज्ञातासुदरवेधेन शुभावर्त्तौ न शोभनौ । एकेन कुक्षि भर्त्तारं भवेदन्येन पुंश्चली । मक्षलोहक्षिणावर्त्तौ दुःखवैधव्यहेतुकः । शोभनलेख

उद्वाहे वा भाव्यो दूरात् प्रवसतः । वा पतिं कृत्वि-र्यवेव वरुणा मध्येऽवाटिकम् । प्रदक्षिणो वा वामो वा रोमुखाभावर्त्तकः स्त्रियाः । एको वा सूर्व्वनि द्वौ वा वामे वामतो अपि । आदधाद्वं पतिघ्नो तौ भाव्यौ दूरादि हुवहिना । कश्यावर्त्ता च कुकटा भाव्यावर्त्ता पतिघ्नता । घृतावर्त्ता च भर्त्तृघ्नो कुकटा वाऽथ जायते" । अथ कन्यायाः समवविशेषे जन्मऋक्षात् विषमस्थात्व होरः यथाह जातकाभरणे । "औडुक्षे ६ क्षिति-भावां यतभिषजि तथा मूर्व्यमन्दारवारे भद्राख्ये तिथौ वा मनु जननभिधात् वा कुमारी विवाह्या । कन्यस्थो दौम्यखेटावशुभगगनगर्वभाक्षे ततो हौ वैरिक्षेत्रानुवासौ यदि जनुषि तदा सा हि कन्या विवाह्या । मन्दाक्षेवाहितीवा यदि तदनु कुजे वह्निगे वाऽथवार्के २४ द्वादश्यां वा द्वितीये १९ दिनमणि दिवसे ब्रह्मनिः वा विवाह्या । धर्म्मस्थो भूमिसूनु-स्तनुसदनगतः सूर्य्यसूनुस्तदानीं भार्त्तण्डः सूनुजातो यदि जनिदिवसे वा कुमारी विवाह्या । कन्या-दिन्दोः शुभो वा यदनभदृक्षपतिर्दौनवाद्यो विवाह्यं दोषं वैधव्यपत्यं तदनु च नियतं कृन्ति वैधव्यदोषम्" । अन्योऽपि वैधव्यादियोगोऽन्यलोक्तः यथा कोरागम-रत्ने "लग्ना भवेन्योक्षकरेऽस्तसंस्थे भाव्येऽपि भौमे विधवा प्रदिष्टा । पापग्रहाकोकनवर्गयाते कर्म्मेव कन्या भवतीति सूतौ । वैधव्यं क्रूरक्षेटैर्भदनभृगतैः शिखिगतैः स्यात् पुनर्भूः पापैर्लग्नैर्विधुक्तैर्भवति परि-क्षुना प्रेक्षता सौम्यदृष्टे । अन्योन्यांशस्थयोश्च क्षिति-सुतसितयोर्वन्ध्यो योषिद्भृगा चन्द्रोर्व्वीसुतयुक्ता यदि भदनभदृष्टे प्रेक्षणेऽस्तुत्या क्षेति" "लग्ने व्यये च पाताले दृक्काणे" प्रागुक्तम् । एवमन्येऽपि वैधव्यादियोगा आकरे द्रष्टव्याः । स्त्रि० तत्पतिकारादि विधि-रुक्तः यथा "लग्नोत्थं च विलोक्य बालविधवायोगं विधाय व्रतं सावित्र्या व्रत पैप्पलं हि कृत्वा दद्या दिनां वा रहः । यद्वाग्नेऽच्युतमूर्त्ति पिप्पलवटे: कृत्वा विवाहं, क्रुटं दद्यात्तां विरजोविनेऽत्र न भवेद्वोरः पतिर्भूभवः" संहिताकारे "अवैधव्यकरैर्योगैर्विवाहपट-लोदितैः । वराबायुष्मते देया कन्या वैधव्ययोगजा" ज्ञानभास्करे "बलवद्दधवायोगे बालके सति अने-कशः । पिता रहसि कुर्वीत तस्याः पाणिग्रहं व्रतम्" मार्क० पु० "बालवैधव्ययोगेऽपि कुम्भाद्रु प्रतिमा-दिभिः । कृत्वा लग्नं रहः पश्चात् कन्योद्वाहं प्रकारयेत्" । तत्र सावित्रीपिप्पलार्कादिव्रतविष्णुप्रतिमादिविवा-हप्रयोगादयश्च" श्रीधा० विधानपारिजातादौ च द्रष्टव्याः ।

उपयमन न० उप+यम-ल्युट् । विवाहे २संयमने रथस्थे रथः स्थापने च । करणे ल्युट् । ४वन्धनसाधने कुशादौ ।

उपयमनी उपयम्यते कर्म्मणि ल्युट् । अग्न्याधानाङ्गे क्रि-यातादौ "उभयमनीरुपकल्पयन्ति" यत० ब्रा० १,५, १,१ । "उप अग्नेरधस्तात् यम्यन्त इत्युपमन्त्र्याः स्त्रियाः" भा० । "उपयमनीरुपनिधत्ते" कात्या० ५,४,२० । "आहवनीयस्योपयमनीभ्याग्नीध्रीयस्योपाञ्जने च" ८,६,१,

उपयष्टृ पु० उप-यज-तृच् । षोडशसु ऋत्विक्षु मध्ये प्रति-प्रस्थातारख्ये ऋत्विग्भेदे । "मनोमे हार्दि यच्छेति ततोऽहो-पयष्टारमानुमन्त्रयते" यत० ब्रा० ३,८,५,५ ।

उपयाचक त्रि० उपगम्य याचकः उप+याच-ण्वुल् । समीपे आगम्य याच्ञाकर्त्तरि । [दिग्दर्शने ।

उपयाचन न० उपगम्य याचनम् । देवादिसमीपे अभीष्टा-

उपयाचित त्रि० उपयाच्यतेऽनेन वा० करणे क्तच् । अभीष्टसिद्धये देवेभ्योदेये पशवादौ । "उपयाचितदानेन यतो देवा अभीष्टदाः" पद्मपु० । कर्म्मणि क्त । २उपगम्य याचिते च । भावे क्त । ३उपगम्ययाचने न० "उपयाचि-तात्र हितम् अनु । खेटसिद्ध्यर्थं देवेभ्योदीयमाने पशवादौ । "सिद्धायतनानि कृतविविधदेवतोपयाचितकानि" काद० ।

उपयाज पु० उप+यज-घञ् यज्ञाङ्गत्वात् प्रयाजादि-वत् न कुत्वम् । उपयजि एकादशप्रभेदे, यागाङ्गे याग-भेदे । २काश्यपगोत्रे ऋषिभेदे । "तथैव च महाभाग: सोऽपश्यच्चकितस्तदा । याजोपयाजौ ब्रह्मर्षी याज्यनौ परमेष्ठिनौ । संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ । तौरथेयौ वीर्य्ययुक्तौ ब्राह्मणाद्विसत्तमौ" भा० आ० १९७ अ० । "ताभ्यामेव याजनेन द्रुपदेन पुत्रयोः-प्राप्तिः "पुत्रार्थेनयजद्राजा वधाव मम भारत ! । याजोप-याजतपसा पुत्रं लेभे च पावकात् । धृष्टद्युम्नं द्रौपदीञ्च वेदिमध्यादनिन्दिताम्" भा० आ० ७८ अ० ।

उपयात पु० त्रि० उप+या-कर्त्तरि क्त । समीपागते । "उपयातायार्च्यमिति लोकपालाः" गोभि० । "उपयाता-चार्य्यसमीपमागतान्" भ० त० रघुनन्दनः

उपयान न० उप+या-ल्युट् । उपपदे "त्वरिता वधूव" कुमा० ।

उपयाम पु० उपयामयजनेन उप+यम-घञ्

पदरूपे पातभेदे। "उपयामगृहीतोऽसि" यजु० ७, ४,११,२०। उपचारात् २तद्वेत्रे च। "वातं प्राणेनापानेन नासिके, उपयाममधरेण" यजु० २५,२। उप+यम–घञ् वा दीर्घः। २विवाहे। "यर्हि भवेदुपयामस्तर्हि सतो खलु कन्या" स्मृ०वि०। मत्वा० अस्त्यर्थे वा मतुप्। उपयामवत् तद्विशिष्टे त्रि०। पक्षे ङीप् उपयामिन् तत्रैव उभयत्र स्त्रियां ङीप्।

उपयुक्त त्रि० उप+युज–क्त। १न्याय्ये, २रचिते, ३भुक्ते च।

उपयोग पु०उप+युज–घञ्। १आचरणे २भोजने, "पर्य्यागते मदनफलमञ्जवदुपयोगः" सुश्रुतः। ३इष्टसिद्धिसाधने व्यापारे आनुकूल्ये च। "अथवा कार्य्यनिर्वृत्तेरुपयोगो यथाक्रमम्" सुश्रु०"अनङ्गलेखक्रियायोपयोगम्" कुमा०।

उपयोगिन् त्रि० उप+युज–घिणुन्। १इष्टसाधनायानुकूले २उपयुक्ते च। "तदुपयोगीनि शारीरकसूत्रादीनि"वेदा० सा०। स्त्रियां ङीप्। तस्य भावः तल् उपयोगिता स्त्रीत्व उपयोगित्व न० आनुकूल्ये।

उपर त्रि० वप–करन्। १उप्ते स्थापिते "दिवरज उपरमस्तभात्", "उपक्षरे यदुपराः अभिग्मन्" ऋ० १,६२,५,६। "उपरा उप्ताःस्थापिताः" भा०। "त्रिकोभूमीरुपरा षड्विधानाः" ऋ० ७,८७,५। उप+रम–घा० आधारे ड। २उपरमाधारे। "ते नः पूर्व्यास उपरास इन्दवः" ऋ० ९,७७,२, "उपरासः उपरा; उपरता यत्रेत्युपराः" भा०। कर्त्तरि ड। ३उपरते "पुरः सतीरुपरा एतशे कः" ऋ०५,२९,५ "उपरा उपरताः" भा०। उपरि अन्नसमयत्वेनास्त्यस्य अर्श आ० अच्। उपरिकालोत्पन्ने। "ये पूर्व्यासोव उपरासऽईयुः" १०,१५,२, "उपरासः यजमानजन्मन उपर्युत्पन्नाः" भा०। ऊदवोरैक्यात्। ४उपरते प्रस्तरे च।

उपरक्त पु० उप+रञ्ज–क्त। १राहुग्रस्ते चन्द्रे सूर्य्ये च। २व्यसनेष्वासक्ते, ३रङ्गनद्रव्येण रक्ते ४उपाधिसान्निध्याद्-उपाधिगुणवत्तया प्रतीते च।

उपरक्षण पु० उप+रक्ष–ल्युट्। सन्नीपस्थित्वा रक्षके सैन्यादौ (याड़िगार्ड)। [(पहारा)।

उपरक्षण न० उप+रक्ष–ल्युट्। रक्षार्थं सैन्यादिस्थापने

उपरत त्रि० उप+रम–क्त। १विरते, २निवृत्ते, ३मृते, "पितर्युपरते पुत्राविभजेयुर्धनं पितुः" दा० क्र०। "पितर्युपरतक्रूरे" या० स्मृ०। "सत्यपि जीवने निवृत्तस्वकामे दृष्टार्थे। ४उपरतियुक्ते "मान्नोदान्त उपरतस्तितिक्षुः श्रद्धावान् समाहितो भूत्वात्मन्यात्मानमवलोकयेत्" श्रुतिः।

उपरताति स्त्री ताय–कर्मणि क्तिन्। १तृ० लक्ष्म वा रः। १युद्धे "अर्थ उपरताति वन्वन्" ऋ०७,४८,३। "उपरैरुपलैः पाषाणतुल्यैः परैरायते विस्तार्यते उपरताति युद्धम्" भा० सप्तम्या लुक्। २उपलरूपकरकैराच्छादो अन्तरिक्षे च। "स्तनन्ति ता उपरताति" ऋ०१०,५१,५। उपरताति मेघकरकाच्छादो अन्तरिक्षे सप्तम्या लुक्।

उपरति स्त्री उप+रम–क्तिन्। १विरतौ, २मृतौ ३लब्ध प्राप्तावैदान्तीन्ये विषयेभ्य इन्द्रियाणां ४निवारणे, ५विहितकर्मत्यागे विधानतस्त्यागरूपे संन्यासे "पुत्रैषणः कर्मणा नेति धीरा शोपरतिमेवेत्" इत्युक्तरूपायां ईश्वरौ च। सैचतुपरतिर्बाह्यविचाराङ्गसाधनचतुष्टयान्तर्गतसाधनविशेषः तानि च साधनानि विवेकचूडामणौ सलक्षणमाचार्येण दर्शितानि यथा "साधनान्यत्र चत्वारि कथितानि मनीषिभिः। येषु सत्स्वेव सन्निष्ठा यदभावे न सिद्ध्यति। आदौ नित्यानित्यवस्तुविवेकः परिगण्यते। इहामुत्र फलभोगविरागस्तदनन्तरम्। शमादिषट्कसम्पत्तिर्मुमुक्षुत्वमिति स्फुटम्। ब्रह्म सत्यं जगन्मिथ्येत्येवंरूपो विनिश्चयः। सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः। तद्वैराग्यं जिहासा या दर्शनश्रवणादिभिः। देहादिब्रह्मपर्य्यन्ते ह्यनित्ये भोग्यवस्तुनि। स्वलक्ष्ये नियतावस्था मनसः शम उच्यते। विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके। उभयेषामिन्द्रियाणां स दमः परिकीर्त्तितः। बाह्यानालम्बनं वृत्तेरेषोपरतिरुत्तमा। सहनं सर्वदुःखानामप्रतीकारपूर्व्वकम्। चिन्ताविलापरहितं सा तितिक्षा निगद्यते। शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यवधारणम्। सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते। सर्व्वदा स्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्व्वदा। तत्समाधानमित्युक्तं न तु चित्तस्य लालनम्। अहङ्कारादिदेहान्तान् बन्धानज्ञानकल्पितान्। स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता। अनन्यभावरूपापि वैराग्येण, शमादिना, प्रसादेन गुरोः, सेव प्रवृद्धा सूयते फलम्। वैराग्यञ्च मुमुक्षुत्वं तीव्रं यस्य तु विद्यते। तस्मिन्नेवार्थवन्तः स्युः फलवन्तः शमादयः। एतयोर्मन्दता यत्र विरक्तत्वमुमुक्षयोः। मरौ सलिलवत् तत्र शमादेर्भानमात्रता। मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी। स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते। ज्ञातस्वस्वात्मानुसन्धानं भक्तिरित्यपरे जगुः। उक्तसाधनसम्पन्न-

सत्त्वजित्तासुरात्मन । उपसीदेत् गुरुं प्राज्ञं यतो बन्धविमोक्षणम्"

उपरञ्जक त्रि०उप+रञ्ज-णिच्-ण्वुल् ।।उपरागकारके । "न बाह्यान्तरयोरुपरञ्ज्योपरञ्जकभावोऽपि देशव्यवधानात्" सां०सू० । [रागाश्रयतया करणीये ।

उपरञ्जा त्रि० उ+रञ्ज-णिच्-यत् । उपरञ्जनीये उप०

उपरत्न न० उपमितं रत्नेन अवा०त० । मणिसदृशेषु काचादिषु 'उपरत्नानि काचश्च कर्करोऽश्मा तथैव च । शुक्ता शुक्तिस्तथा शङ्ख इत्याद्योनि बहून्यपि । गुणा यथैव रत्नानामुपरत्नेषु ते तथा । किन्तु किञ्चित्ततोहीना विशेषोऽयमुदाहृतः" भा०प्र० ।

उपरम पु०उप+रम-घञ् अवृद्धिः । १विषयवैराग्ये, २निद्रायाञ्च । "तथैव फेनोपरमे कल्कभ्यः निर्जयेत्" वैद्य० "ऋभिगतेऽस्तिवत्ते दृष्टापरमे दृश्ये०" । "हिंसायोपरमे काले व्यतीते मृगयातः" भा०व० २८अ० । भावे ल्युट् उपरमण । उपरतौ न० ।

उपरव पु० उप+रु-आधारे घञ् । सोमाभिषवपात्रे गवीकारे देशभेदे । तत्करणप्रकारश्च" शत० ब्रा० ३,५,४,१-१२ उक्तः यथा "ह्यं वा अभ्युपरवाः खायन्ते । शिरो वै यज्ञस्य कृविर्धानं तद्य इमे शीर्षण्यास्तारः कूपा इमावेव द्यावापृथिवी ह्यौ तानेवैतत् करोति तस्माद्दुपरवान् खनति । देवाश्च वा असुराश्च उभये प्राजापत्याः पस्पृधिरे । ततोऽसुरा एषु लोकेषु ह्यं यज्ञस्य रक्षांसि चक्रुरेतयैव चिह्नानभि भवेमेति । तद्ध देवा अस्पृधन्त । त एतैः ह्यां यज्ञानुदखनन् यदा वै ह्यामुत्खनन्त्यथ सालसा भोषा भवति तथो एवैष एतद्यज्ञस्या अत्र कञ्चिद्विषन् भ्रातृव्यः ह्यां यज्ञानि खनति तानेवैतद्दुपरैः करोति तस्माद्दुपरवान् खनति यद्दक्षिणस्य कृविर्धानस्याधोऽधः प्रउगं खनति । सोऽभिमादत्ते "देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादद्दे नार्यसीति" समान एतस्य यजुषो बन्धुर्योनो वा एषा यदभिमशनादाह नार्यसीति । तान् प्रादेशमात्रं विना परिलिखति । इदमहं रक्षसां ग्रीवा अपिकृन्तामीति वज्रो वा अभिर्ज्यैवैतद्रक्षांसि रक्षसां ग्रीवा अपिकृन्तति । तस्याग्नेयौ पूर्वौ त्रयोदक्षिणमेवाग्रे परिलिखेदथापरोत्तरमथापरोदक्षिणमथ पूर्वोत्तरम् । अथो इतरथाहुः अपरोदेवाग्र उत्तरं परिलिखेदथ पूर्वोदक्षिणमथापरोदक्षिणमथ पूर्वोत्तरमिति यो ह्येव एवं परिलिखेदेतं त्वेवोत्तमं परिलिखेद्य एवं पूर्वयोरुत्तरोभवति तान् यथापरिलिखितमेव यथापूर्वं खनति । दृक्षस्यसि दृक्षदृवा इत्यृषयो वै नानानेतन्त्र क्रूयन्येव यदाह दृक्षस्यसि दृक्षदृवा इति दृक्षतीमिन्द्राय वाचं वदेतीन्द्रो वै यज्ञस्य देवता वैष्णवं कृविर्धानं तस्मादेनेन्द्रो करोति तस्मादाह दृक्षतीमिन्द्राय वाचं वदेति रक्षोहणं वलगहनमिति रक्षसा ह्येते वलगानां वधाय खायन्त वैष्णवीमिति वैष्णवा हि कृविर्धाने वाक् तान् यथाखातमेवोत्किरति । इदमहं तं वलगमुत्किरामि यं मे निष्ठ्योयममात्यो निचखानेति निष्ठ्योवा अमात्यो वा ह्यां वलगानिखनति तानेवैतदुत्किरति इदमहं तं वलगमुत्किरामि । यं मे समानो यमसमानो निचखानेति समानोवा असमानो वा ह्यां वलगानिखनति तानेवैतदुत्किरति । इदमहं तं वलगमुत्किरामि । यं मे सबन्धुर्यमसबन्धुर्निचखानेति सबन्धुर्वा असबन्धुर्वा ह्यां वलगानिखनति तानेवैतदुत्किरति । इदमहं तं वलगमुत्किरामि यं मे सजातो यमसजातो निचखानेति सजातोवा असजातोवा ह्यां वलगानिखनति तानेवैतदुत्किरत्युत्ह्यां किरामीत्यन्तत उद्यति तदुह्यामुत्किरति तस्माद्धुमात्मानं खनेत् । अन्तो वा एषोऽन्नेनैवैतत् ह्यां भोक्ष्यति तानह्यया संहन्ति यदह्यया न ग्रक्षुयादपि समीचस्तस्मादिमे प्राणाः परः संहस्राः तान् यदाखातमेवावमर्शयति" "सोमा भिषवायोपरवाणां खननं विवक्षुः खननस्योभयार्थतामाह इमामिति । कर्णच्छिद्रे हे नासिकाच्छिद्रे हे । हेम्न्य बधार्थे भूमौ स्थापिताः ह्यां विशेषा वलगाः । अक्षूखतः स्फिंसितवन्तः । मध्ये मध्ये प्रादेशमात्रानन्तरान् विहाय समचतुरस्रे खननप्रदेशे चतुरोऽवटान् प्रादेशमात्रान् परिलिखेत् खननमपि परिलेखनक्रमेण कर्त्तव्यम् । खातायाञ्च उद्गमनेऽपि खननक्रम एव । अङ्गुलिप्रादेशाद्यपेक्षया बाहुल्यमाणस्यान्तत्वम् ततोऽधिकात् प्रदेशात् स्थूलत्वगुणाद्यन्यथानुपपत्त्या बाहुल्यमाणस्यान्तत्वम् तावतीमया संहन्ति पूर्वयोर्दक्षिणस्थापरोत्तरस्य चान्तरालदेशम् । अन्तःप्रदेशनिक्षेपतत्परिहाराय संहन्येत संहन्यते परस्परसंलग्नं कुर्यातां" । भा० "उत्तरपूर्वे अकोत्युपरवे" काल्या०२५,१२,१०, "उपरवेभ्यात् खन्यजुर्हरति" ८,२,१२,

उपरस पु०उपनिरोरसेन अवा०त० । पारदसंस्कारेषु गन्धकादिषु ।

"गन्धोच्छिष्टलमभ्रताजकगिलाखोतोऽञ्जन टङ्कणं राजायर्त्तकचुम्बको स्फटिकः शङ्खः खटी गैरिकम् । कासीसं रसकं कपर्दिकरोलाद्य कङ्कुष्ठक सौराष्ट्रो च मता अमी उपरसाः क्षुतस्य किञ्चिदूनगुणैः" भा०प्र०। अथैषां शोधनविधिः "सूर्य्यावर्त्तो वज्रकन्दः कटनो देवटालिका । शिग्रु कोषातकी बल्या कर्कमाची च वाराहकम् । एषामेकरसेनैव त्रिवारैर्लवणैः सह । भावयेटस्त्रागैश्च दिनमेकं प्रयत्नतः । ततः पचेच्च तद्वार्दौलायन्त्रे दिनं सुधीः । एवं शुद्धयन्ति ते सर्वे प्रोक्ता उपरसा हि ये" । विशेषश्च । "कङ्कुष्ठं गैरिकं शङ्खः कासीसं टङ्कणं तथा । नीलाञ्जनं शुक्तिभेदाः चुल्लका सवराटिकाः । जम्बीरवारिणा खिन्नाः क्षालिताः कोष्णवारिणा । नित्यमायान्त्यमी योज्याभिषगभिर्योगसिद्धये" भावप्रकाशः ।

उपराग पु० उप+रञ्ज-घञ् । १समीपस्थिता स्वनिष्ठगुणादेरन्यतारोपे, यथा स्फटिकस्थान्तिकस्थितजवादिगतलोहित्यं स्फटिके आरोप्यते" स चारोप उपाधिकृतत्वादौपाधिकः असत्युपरागसाश्रित्यैव सांख्यादयः बेदान्तिनश्च बुद्धिगतकर्त्तृत्वादेः पुरुषे, पुरुषगतचैतन्यस्य च बुद्धौ औपाधिकत्वं कल्पयन्ति "उपरागात् कर्त्तृत्वं चितिसान्निध्यात्" सां०सू० "पुरुषस्य यत् कर्त्तृत्वं तद्बुद्धेरुपरागात् बुद्धेश्च या चित्तता सा पुरुषसान्निध्यात् एतदुभयं न वास्तवं यथाऽन्ययोः परस्परसंयोगविशेषात् परस्परधर्मव्यवहार औपाधिक यथा च जलसूर्य्ययोः संयोगात् परस्परधर्मारोपस्तयैव बुद्धिपुरुषयोः" प्र० भा० "तद्गुणसारत्वात्" सां०सू० "बुद्धेर्गुणेनैव आत्मनोगुणवत्त्वारोप इति समर्थितम्"। बौद्धा अपि बाह्योपरागात् ज्ञानस्य तत्तदाकारता भवतीति मन्यन्ते तत्सर्वं तत्तज्ज्ञानावसरे वक्ष्यते अनेनैवोपरागेण बाह्यान्तरयोरुपरञ्ज्योपरञ्जकभावः । २सतोगुणान्तराधानरूपे वासनारूपे संस्कारे "नानादिविधयोपरागनिमित्तोऽध्यस" सां०सू० "अध्यासात्मनः प्रवाहरूपेणानादिर्विषयप्रसङ्गो न तत बन्धः" प्र०भा०।३रविचन्द्रयोर्ग्रहणे तत्रापि छादकसान्निध्यात् चन्द्रार्कयोः स्वदूषारोप एवेति तस्य तथात्वम् । यत्रापि राहुधिष्ठितभूमिच्छायया चन्द्रस्य, तदधिष्ठितचन्द्रमण्डलेन च रवेर्मण्डलस्य च्छादनमिति सिद्धान्ते स्थितम् । तत्र सि०शि० यत्रेयं कथं ? भवेदित्येतच्चिन्तयित्वा यथा "प्रच्छन्नगोऽप्यलक्षत्वदृष्टः सं स्थितोऽभ्येत्य चन्द्रो भानोर्बिम्बं स्वदृष्टितया छादयत्यात्ममूर्त्या । पश्चात् सूर्यो स्फुरदृष्टितो ततो मुक्तिरस्यात् एव क्वापि च्छद्म. क्वचिदपिहितो नैव कस्यान्तरत्वात्" शि०। "अर्कादधश्चन्द्रकक्षा । यथा मेघोऽधःस्थः पश्चाद्भागादागत्य रविं छादयति एवं चन्द्रोऽपि शीघ्रत्वात् पश्चाद्भागादागत्य रविं छादयति । ततः पश्चात् स्पर्शः । निःसरति चन्द्रे पूर्वतो मोक्षो रवेः । अत एव कक्षाभेदात् क्वचिदर्कच्छन्नो दृश्यते क्वचिदेव न छन्नः । यथाधःस्थे मेघे कश्चिदूरस्थिन दृश्यते कश्चिदृश्यते प्रदेशान्तरस्थैः। इदानीं नतिसंस्कारयोः कारणमाह" प्रभि०। "पर्वान्तेऽर्कं नतसंस्कृतिच्छन्नमेव प्रपश्येत् भूमध्यस्थो न तु वस्तुमतीपृष्ठनिरस्तदानोम् । तद्दृक्सूत्राद्विमरुचिरधोलम्बितोऽर्कगृह्येऽतः कक्षाभेदादिह खलु नतिर्नाम्नि चोपपन्नम् । समकलकाले भूभा लगति मृगाङ्के नतस्तया ग्लानम् । सर्वे पश्यन्ति समं समकक्षत्वान्न लम्बनावनती । पूर्वाभिमुखो गच्छन् वक्ष्यायान्तर्यतः शशी शिशिरः । तेन प्राक् ग्रहणं पश्चान्मोक्षोऽस्य निःसरतः । भानोर्बिम्बं पृथुत्वादृपृथुधिष्ण्याः प्रभा हि सूच्यग्रा । दीर्घतया शशिकक्षामतीत्य दूरं बहिर्यातो । अनुपातात् तद्दैर्घ्यं शशिकक्षायां च तद्बिम्बम् । भूमेर्बोरन्यदिशि व्यक्तः क्षेपः शशिगृह्ये तस्मात्" शि०।"दर्शान्तकाले रविं पूर्वतः पश्चिमतो वा नतं चन्द्रेण च्छन्नमेव पश्यति भूमध्यस्थो दृष्टा, यतो दर्शान्ते समौ भवतः । यो भूपृष्ठस्थो दृष्टा स तदार्कं छन्न न पश्यति । यतस्तद्दृष्टिसूत्राच्चन्द्रोधो लम्बितो भवति । अतः कक्षाभेदाच्छन्नं नतिसंस्कारमपेक्षते । चन्द्रगृह्ये तु लम्बनतोरभावः । यतः समकक्षकाले भूभा चन्द्रे लगति । तया छन्नं सर्वे विदेशान्तरस्था अपि नतमपि तं चन्द्रं समं पश्यन्ति । यतस्तत्र छाद्यच्छादकयोरैक्यं कक्षा वाता । तथा भूभा तावत् पूर्वाभिमुखमर्कगत्या गच्छति । चन्द्रश्च स्वगत्या । स च पूर्वत्वात् पश्चिमाभिमुखो गच्छन् भूभां प्रविशति । तेन तत्र प्राक् स्पर्शः । भूभाया निःसरतः पश्चान्मुक्तिः । भानोर्बिम्बं विपुलं पृथ्वी लघु । अतो भूभा सूच्यग्रा भवति । दीर्घत्वेन चन्द्रकक्षामतीत्य दूरं गता । तद्दैर्घ्यमनुपातात् साध्यते । चन्द्रकक्षाप्रदेशे भूभा चन्द्रबिम्बं चेति सर्वं गृह्यके प्रतिपादितमेव । (अर्थे स च गृह्योदयशब्दे) इदानीं छादकनिर्णयमाह" प्रभि० । "छादकः पृथुतरत्वतो विधोरर्केखण्डिततनोर्विधायवोः । कुण्ठता च महती स्थितिर्यतो लक्ष्यते स्फरिधलक्षणयुक्ते । अर्धखण्डिततनोर्विधायवोः कोणता भवति तीक्ष्णदीधितेः । स्यात् स्थितिर्लघुरतो

लघुः पृथक् छादको दिनकृतोऽवगम्यते। दिग्देशकालावरणादिभेदात् छादको राहुरिति ब्रुवन्ति। यन्मानिनः केवलगोलविद्यास्तत् संहितावेदपुराणबाह्यम्। राहुः कृष्णमण्डलगः शशाङ्कः, शशाङ्कगच्छादयतीनबिम्बम्। तमोमयः शम्भुवरप्रदानात् सर्वागमानामविरुद्धमेतत्' सि०। "अर्कच्छादकाच्चन्द्रच्छादकः पृथुतरोऽवगम्यते। कुतः यतोऽर्धखण्डितस्येन्दोर्विषाणयोः कृशता दृश्यते स्थितिश्च मन्दा। अर्कस्य पुनरर्धखण्डितस्य तीक्ष्णता विषाणयोः। स्थितिश्च लघ्वी। एतत्कारणद्वयान्यथानुपपत्त्यार्कस्य छादकोऽल्पः। स च लघुकालः। एवं रवीन्दोर्भे छादको राहुरिति वदन्ति। कुतः दिग्देशकालावरणादिभेदात्। एकस्य प्राक् स्थितेः इतरस्य पश्चात्, रवेः क्वापि ग्रहणमस्ति क्वापि नास्ति। क्वापि दर्शनादपतः क्वापि पृथक्। अतो राहुकृतं न ग्रहणम्। नहि बकवो राहवः एवं केचन वदन्ति। केवलगोलविद्याखदभिमानिनश्च। इदं संहितावेदपुराणबाह्यम्। यतः संहितासु "राहुरहनी गृह्णः","स्वर्भानुर्हि वा असुरः सूर्याचन्द्रमसौ विव्याधति" माध्यन्दिनी श्रुतिः। "सर्वं गङ्गासमं तोयं सर्वे ब्रह्मसमा द्विजाः। सर्वं भूमिसमं दानं राहुग्रस्ते दिवाकरे" इत्यादिपुराणवाक्यानि। अतोऽविरुद्धमुच्यते। राहुरनियतगतिस्तमोमयो ब्रह्मवरप्रदानाद्भूभां प्रविश्य चन्द्रं, चन्द्रं प्रविश्य रविं, छादयतीति सर्वागमानामविरुद्धम्" प्रमि०। अत्र लल्लः। "ग्रहणे कमलासनानुभावाद्ध्रुवतत्तांघ्रभुजोऽस्य सन्निधानम्। यदतः स्मृतिवेदसंहितासु ग्रहणं राहुकृतं गतं प्रसिद्धिम्"। श्रीपतिः "भूच्छायायां प्रविष्टः स्वगयति यधिनं शुक्लपक्षावसाने राहुर्ब्रह्मप्रसादात् समधिगततरत्नतमोव्याप्तसत्त्वः। जह्यूं भानुबिम्बं सलिलमयतनोरप्यधोवर्ति बिम्बं संस्पर्धं च भासव्युपरतिसमये स्वस्य साहित्यहेतोः"।

ग्रहणप्रकारस्तज्ज्ञानोपायश्च सू० सि० रङ्गनाथेन दर्शितो यथा "साधनानि षट्सहस्राणि ६५००योजनानि विस्तृतः। विष्कम्भो मण्डलस्येन्दोः सप्तभागोत्था चतुःशती ४८०। स्फुटखभक्ता गुणितौ मध्यभक्तयोर्हृतौ स्फुटौ। रवेः खभगणाभ्यस्त. शशाङ्कभगणोद्धृतः" सू०सि०। "सूर्यस्य मण्डलस्य गोलरूपबिम्बस्य विष्कम्भोव्यासः। ६५००योजनानि, चन्द्रस्य गोलाकारबिम्बस्य ४८० योजनानि व्यासः" "व्यासस्तैव गणिते बिम्बव्यवहार" इ०ना०

"शशाङ्कलवागुणितो भाजितो वार्कलवया। विष्कम्भश्चन्द्रकलायां तिथ्याप्ता मानलिप्तिका:" सू०सि०।

"सूर्यस्य विष्कम्भः ६५०० प्रागुक्तः स्वो व्यासः स्वभगणे सूर्यभगणैकर्क्षगुणितस्वन्द्रभगणैर्भक्तो वाथवा चन्द्रकलया वक्ष्यमाणया गुणितः सूर्यकलया वक्ष्यमाणया भक्तश्चन्द्रकलायां चन्द्राधिष्ठिताकाशगोले सूर्यव्यासः स्पष्टो भवति। ततो व्यासयोजनसङ्ख्या पञ्चदशभक्ता सूर्यचन्द्रयोर्बिम्बव्यासप्रमाणकला भवन्ति। अत्रोपपत्तिः। यदा चक्रकलाभिश्चन्द्रकलाश्चोजनानि तदैककलया कामीति चन्द्रकलास्त्रिभैककलायां पञ्चदश योजनानि। अतश्चन्द्रस्य स्वकलायां स्थितत्वात् स्पष्टचन्द्रबिम्बव्यासयोजनानि पञ्चदशभक्तानि चन्द्रबिम्बव्यासकला भवन्ति। एवं सूर्यकलायामेका कला सार्धशतद्वययोजनैरिति स्पष्टसूर्यव्यासस्तैर्भक्तो व्यासकला भवन्ति। तत्र सूर्यस्य लोकैर्दूरान्नराचन्द्राकाश इव दर्शनात् प्रत्यक्षतो विविक्तान्तरेण दर्शनाभावाच्च चन्द्रकलाप्रमाणेन सूर्यबिम्बव्यासः यदि सूर्यकलायाः स्यं तदा चन्द्रकलया का? इत्यनुपातेन गणितार्थमवस्तुभूतः साधितः। न तु वस्तुतश्चन्द्रकलायां सूर्यमण्डलावस्थानं सूर्यग्रहणे चन्द्रस्य छादकत्वानुपपत्तेः अथ सूर्यस्पष्टव्यासश्चन्द्रभगणभक्तस्वकलारूपचन्द्रकलया भक्त इति स्वकलारूपगुणहरयोर्नाशात् सूर्यभगणगुणितश्चन्द्रभगणभक्त इति पूर्वं कलयोरनुक्रियं प्रकारो सुस्थत्वात् प्रथमसंस्कृतश्चन्द्रकलासिद्धसूर्यबिम्बव्यासः पञ्चदशभक्तः सूर्यबिम्बव्यासकलाः सिद्धा इत्युपपन्नम्" रङ्ग० "स्फुटेन्दुभुक्तिर्भव्यासगुणिता मध्ययोद्धृता। लब्धं स्फुटी महीव्यासस्फुटार्कश्रवणान्तरम् मध्येन्दुव्यासगुणितं मध्यार्कव्यासभाजितम्। विशोध्य लब्धं स्फुटां तु तमोलिप्तासु पूर्ववत्" सू०सि०।

"स्पष्टा चन्द्रस्य गतिर्भूव्यासेन गुणिता मध्यया चन्द्रगत्या भक्ता फलं सूचीसंज्ञं स्यात्। भूव्यासस्पष्टसूर्यबिम्बव्यासयोरन्तरं मध्येन चन्द्रबिम्बव्यासेन ४८० योजनेन गुणितं मध्येन सूर्यबिम्बव्यासेन ६५०० योजनेन भक्तं फलं सूच्यां प्राक्सिद्धायां न्यूनीकृतं तुकाराच्छेषं तमः भूच्छायारूपं योजनात्मकं भावस्तम इति छायायास्तमत्वात्। अस्य कलात्मकं मानमाह। लिप्ता इति। पूर्ववत् तिथ्याप्ता मानलिप्तिका इति पूर्वोक्तेन भूच्छायायाः कलाः कार्याः। अत्रोपपत्तिः। "भूव्यासहीनं रविबिम्बमिन्दुकक्षोद्धृतं भास्करकर्णभक्तम्। भूविस्तृतिर्लब्धफलेन हीना

भवेत् कृभाविस्तृतिरिन्दुभागैः' इति सि० शि० उक्ता तत्र ३६०० भूव्यासोनस्य रविबिम्बस्य ३६०० खल्यान्तराङ्कीकारेण स्वशुगतिभक्तमध्यगतिगुणितचन्द्रमध्ययोजनकर्णरूपस्फुटेन्दुयोजनकर्णो गुणः। तादृशसूर्यकर्णो हरः। तत्रैतत्खण्डस्य कलाकरणार्थं त्रिज्यागुणचन्द्रकर्णलाभ्यो हर इति चन्द्रस्फुटमध्यगत्योस्तुल्यगुणहरत्वेन नाधात् त्रिज्यामध्येन्दुयोजनकर्णयोस्त्रिज्यापवर्तनेन हर पञ्चदश पृथग्गुणः। अथ ऽवयिनौ भूव्यासहीनमध्यार्कबिम्बयोजनानां रविस्फुटगतिमध्यमगतौ गुणहरौ। चन्द्रसूर्ययोजनकर्णाविप क्रमेण गुणहरौ। तत्र कर्णस्थाने लाघवात् तयोर्बिम्बयोजनानि गृहीतानि। यद्यपि सूर्यचन्द्रयोर्मध्ययोजनकर्णानुसारित्वाभावाद्बिम्बयोजनयुक्तमनुचितं तथाप्यल्पान्तराङ्कीकारेण तददोषः। इन्दुव्यासार्कव्यासयोर्भूगे लाघवायोक्तकला मूलेन गुणिता महीखण्डभाजिता तत्कर्ण इति। तत्कलाव्यासार्धत्वे तु सुतराम्। तत्रापि स्पष्टार्कबिम्बयोजनयुक्तेन मध्यार्कयोजनबिम्बं सूर्यस्फुटगतिगुणितं सूर्यमध्यगतिभक्तमिति सिद्धम। न चोक्तरीत्या सूर्यस्फुटमध्यगती गुणहरौ भूव्यासमध्यार्कबिम्बयोजनान्तरस्योत्पत्तौ न कोऽपि बिम्बस्येति भूव्यासस्तादृशो महीव्यास इत्यनेन कथं सिद्ध इति वाच्यम् भगवता खल्यान्तरेण महीव्यासस्य यथास्थित एवाङ्गीकारात्। महीव्यासस्फुटार्कश्रवणान्तरमित्युक्त्या मध्यस्फुटपदयोरभयत्रान्वयेनार्कश्रवणसन्निधानेन च सूर्यबिम्बस्फुटरीत्यैव महीव्यासस्य स्फुटत्वसिद्धेश्च। अथैतत्खण्डसिद्धं फलं भूव्यासादीनं भूभायोजनानि। तत्र कलाकरणार्थं भूव्यासस्यापरखण्डस्य त्रिज्या गुणः स्पष्टचन्द्रगतिभक्तमध्यगतिगुणितचन्द्रमध्ययोजनकर्णरूपस्फुटयोजनकर्णो हरः। तत्र त्रिज्यामध्ययोजनकर्णौ गुणहरौ गुणेनापवर्त्य हरस्थाने पञ्चदश चन्द्रस्पष्टमध्यगती गुणहरावितिं स्फुटोपपन्ना। भूभायाः स्फुटानुकारित्वात् प्रथमखण्डं द्वितीयखण्डे हीनं भूभायोजनानीका सा पञ्चदशभक्ता कलादिकेत्युक्तमुपपन्नम्। यदि तु भूव्यासहीनं रविबिम्बमित्यादौ मध्यबिम्बानुक्तेः प्रथमसेव स्पष्टार्कबिम्बयुक्तं तदा महीव्यासस्य स्पष्टत्वापत्तिस्तदा महीव्यासस्फुटार्कश्रवणान्तरमित्येव यथाश्रुतं सम्यक्। परन्तु तदा भूव्यासोनार्कबिम्बस्य सूर्यमध्यस्पष्टगती हरगुणावपवर्तितौ वाच्यावपि भगवता खल्यान्तरत्वादनुक्तौ। न चानुपाते सूर्यचन्द्रयोर्मध्ययोजनकर्णावेव गृहीतौ न स्फुटाविति मध्यस्फुटगतौ हरगुणावनुपपन्नौ वाच्यम्। चन्द्रस्पष्टयोजनकर्णस्याकरूपयुक्तेनोत्पन्नस्य अनुक्तत्वापत्तेः। न च चन्द्रकर्णस्य मध्यत्वेन गृहीते बहुन्तरमतः स्पष्टत्वेन तस्य गृहे क्षेप्युपपन्ना सूर्यकर्णस्य मध्यत्वेन गृहीतेत्यल्पान्तरमिति वाच्यम्। मध्यार्कबिम्बयोजनयुक्तेन स्फुटार्कश्रवणानुपपत्तेः। न चोभयत्राग्रहीते प्रत्येकमल्पान्तरमपि बहुन्तरमत एवात्र सूर्यगतिपदयुक्तमुचितमिति वाच्यम् विनिगमनाविरहात् पूर्वं सूर्यबिम्बस्यैव सूर्यस्पष्टगतौ गुणहरौ न महीव्यासस्य प्रान्ते तूभयोरिति स्थूलस्तत्त्वविनिगमके तु प्रान्ते सूर्यगतिपदयुक्तस्यौचित्याच्च। अत्र महीव्यासस्य प्रथमखण्डस्य चन्द्रगतिपदयुक्तेन क्षेप्युक्तावेव द्वितीयखण्डस्य भूव्यासो नस्फुटरविबिम्बस्यार्धात् सूर्यगतिपदयुक्तं सूचितमिति न युक्तमिति चेन्न व्याख्याप्रसङ्गे सूर्यगतिपदयुक्ते मानाभावात् उपपत्तेरप्रसङ्गाच्च। अन्यथात्रापि चन्द्रगतिपदयुक्तापत्तेरिति। एतेन यदा चन्द्रमध्यगत्या भूव्यासस्तदा चन्द्रस्पष्टगत्या क ? इति भूव्यासरूपं खण्डं स्पष्टं सूचीसज्ञं यदा सूर्यबिम्बप्रमाणेनापरं भूव्यासोनस्फुटरविबिम्बखण्डं तदा चन्द्रबिम्बप्रमाणेन किमिति स्पष्टं द्वितीयं खण्डं तयोः, स्पष्टयोरन्तरं स्पष्टा भूभेति सर्वमुपपन्नमिति निरस्तम। उक्तानुपातार्थयोः स्पष्टत्वसिद्धौ मानाभावात् स्पष्टत्वस्याप्रसङ्गाच्च चन्द्रसूर्ययोर्मध्यबिम्बानुपपत्तेश्च' र०ना०।

अथ चन्द्रार्कयुक्तिद्वयसम्भवमाह।

'भानोर्भार्धे महीच्छाया तत्स्थोर्कसमेऽपि वा। न यात्यङ्गपाते यद्यत्र क्रियद्भागाधिकोनके' सू०सि०।

"सूर्यात् सकाशात् यद्भानोरधो भूच्छाया सर्वापरदिङ्मा। तत्स्थे सषड्भार्कक्रमपच्छायास्थेत्यादिना समे चन्द्रपाते ऽपि वाऽथवा सूर्यतुल्ये चन्द्रपाते सूर्यचन्द्रयोः प्रत्येकं यद्यत्र न यात्यङ्गपाते क्रियद्भागेत्यादि। सषड्भार्कादर्कोद्धा कतिपयभागैरधिके जनेऽपि चन्द्रपाते यद्यत्र न यात्यङ्गपातः। भागासन्नत्वग्रहणे द्वादश, सूर्यग्रहणे तु नतांशषण्डांशसंस्कारात् सप्तेत्यायातः। अतोपपत्तिः। सषड्भार्कोनलार्कान्यतरतुल्ये चन्द्रपाते शराभावस्तदृक्षं तत्तुल्यत्वात्। तदा चन्द्रो भूच्छायायां भवतीति यद्यत्र न यात्यङ्गपातः। एवं शरसाम्येऽपि मानैक्यखण्डादल्पे भूच्छायायां मण्डलैकदेशस्य सत्त्वेन यद्यत्र न यात्यङ्गपातः। एवं शराभावे मानैक्यखण्डान्नूनयोरे च चन्द्रमण्डलं सूर्यमण्डलस्पर्शादकं भवति परन्तु तत्र शरो नति

सकलोऽतः सम्यगुक्तसदृशम्" र०ना०। तत्र गृहणकाल
"तुल्यो राश्यादिभि र्यातमावास्यान्तकालिकौ"।
सूर्येन्दू पौर्णमास्यन्ते भागैः भागादिकैः समौ" सू०सि०।
"अमावास्यान्तकालोत्पन्नौ सूर्यचन्द्रौ राश्यादिवयवैः समौ भवतः। पौर्णमास्यन्ते भागादिकैः तुल्यौ सूर्यचन्द्रौ षड्भान्तरे स्यातां। तथा चामान्ते सूर्यचन्द्रयोरेकलौप्यधिरान्तरेण सत्त्वात् सूर्यग्रहणम्। पौर्णमास्यन्ते चन्द्रभूभयोरेकलावस्थनाच्चन्द्रग्रहणम्। एतेन पर्वान्तो "शाद्भपातदृश्यत्व चन्द्रचन्द्रपातौ हौ न स्यातामिति सूचितम् एतच्लोकस्य वैयर्थ्यापत्तेः। अत्रोपपत्तिः। अमान्ते सूर्यचन्द्रयोः पर्वापरान्तरामावेन योगात् तुल्यौ सूर्यचन्द्रौ, पूर्णिमान्ते भचक्राधोन्तरत्वात् षड्राश्यन्तरौ भागादिसमाविति" र०ना०।
"गतैष्यपर्वनाडीनां स्वफलेनोनसंयुतौ। समलिप्तौ भवेतां तौ पातस्तात्कालिकोऽन्यथा" सू०सि०।
अथ पर्वान्ते सूर्यचन्द्रचन्द्रपातानां संधनमाह।
"तौ सूर्यचन्द्रौ गतैष्यपर्वनाडीनां यत्कालिकौ सूर्यचन्द्रौ तत्कालाहता गुण्या वा दर्शान्तपर्णिमान्तान्यतरघटिका ज्ञातां स्वफलेन स्वगतिसम्बन्धेन यत फलम्। 'इष्टनाडीगुणा स्फुटिः भक्ता भोगकालादिकम्" इति मध्याधिकारोक्तेनानीतम्। तेन गतैष्यक्रमेणोनयुतौ तत्र समकलौ स्तः। यद्यपि समांशाविति वक्तुं युक्तं तथाप्यन्यतिथ्यन्तीयसाधिौ समकलाविति द्योतनार्थं समकलावित्युक्तम्। यतः स्वगत्यन्तरफलेनान्यथा गतैष्यक्रमेण युतोनत्वात्कालिकः पर्वान्तकालिकः स्यात्" र०ना०।
अथ ग्राह्यग्राहकानां बिम्बानां प्रयोजनमाह "छादकोभास्करेन्दुरधःस्थो धनवद्भवेत्। मूर्छायां ग्राह्यचन्द्रो विग्रासस्य भवेदसौ" सू०सि० 'सूर्यमण्डलच्छाद्यत्वाच्छादकश्चन्द्रः स्यात्। नन्वाकाशेहयोः सत्त्वेन सूर्य एव चन्द्रस्य छादकः कथं ? न खादियत आह अध स्थ इति। वक्ष्यमाणकक्षाध्याये सूर्यकक्षातोऽधःकक्षास्थत्वाच्चन्द्रस्यैवाच्छादकत्वम्। न ह्यूर्ध्वस्थच्छादकोयेन सूर्यचन्द्रस्य छादकः', ननु विनैकत्वाय स्थानं छादनं न भवत्यत आह। घनवदिति। यथाऽधःस्थो मेघः सूर्यस्याच्छादको भवति तथा चन्द्रो भवतीत्यर्थः। प्राङ्मुखः पूर्वाभिमुखो गच्छन्चन्द्रो भूच्छायां प्रति प्रविशति। अतः कारणादस्य चन्द्रस्यासौ भूभा च्छादिका भवेत्। तथा च सूर्यग्रहणे सूर्यचन्द्रबिम्बयोः प्रयोजनं चन्द्रग्रहणे चन्द्रभूभाबिम्बयोः प्रयोजनमिति भाव। अत्रोपपत्तिः। चन्द्रो दर्शान्ते सूर्यादधो भवतीति चन्द्रः सूर्यस्याच्छादकः। बुधशुक्रयोस्तु मण्डलाल्पत्वाच्छाद्यत्वम्। चन्द्रस्याधो यद्यभावात् षड्भान्तरे भूच्छाया प्रतिबद्धाः सूर्यकिरणाश्चन्द्रगोलेन पतन्ति। अतो निष्प्रभस्य चन्द्रस्य भूभाया प्रवेश इति चन्द्रस्य भूभाच्छादिका"र०ना०। अथ ग्रासानयनमाह "तात्कालिकेन्दुविक्षेपं छाद्यच्छादकमानयो। योगार्धात् प्रोज्झ्य यच्छेषं तावच्छन्नं तदुच्यते" सू०सि०। "यस्माच्छाद्यते स छाद्यः सूर्यग्रहणे सूर्यचन्द्रग्रहणे चन्द्रः। यस्माच्छादयति स छादकः। सूर्यचन्द्रग्रहणयोः क्रमेण चन्द्रभूभे। तयोः पूर्वानीतमानान्तरैक्यार्धात् तात्कालिकचन्द्रात् पूर्वोक्तप्रकारेण साधितं विक्षेपं कलादिकं वियोज्य यदवशिष्टं तत्प्रमाणकम् छन्नं छादकेन छाद्यस्य यावान्मण्डलप्रदेशः आच्छादितस्तावत्प्रदेशात्मकं ग्रासरूपं ग्रहणनक्षत्रैः कथ्यते। अत्रोपपत्तिः। छाद्यच्छादकमण्डलनेमियोगे ग्रहणादानरूपे मण्डलैक्यन्तरं स्वबिम्बखण्डयोगरूपम् बिम्बस्य व्यासमानात्मकत्वात्। तत् तु समत्वात्त्रयाणां च योगार्धरूपं धृतम्। ततो यथा प्रवेशस्तथा ग्रासो भवतीति पर्वान्ते छाद्यच्छादकयोर्विक्षेपान्तरितत्वात् तदूने विक्षेपे मण्डलयोगखण्डान्तरमित एव ग्रास" र०ना०।
अथ सम्पूर्णन्यूनग्रहणज्ञानं ग्रहणाभावज्ञानं चाह "यद्ग्राह्यमधिके तस्मिन् सकलं न्यूनमन्यथा। योगार्द्धादधिके न स्याद्विक्षेपे ग्राससम्भवः" सू०सि०।
"तस्मिन् छन्नमानेऽधिके ग्राह्यमानाधिके यद्ग्राह्यात् कारणाद्ग्राह्यमानमस्ति। अतः कारणात् सकलं सम्पूर्णं गृहणं भवति। अन्यथा ग्राह्यमानाद्यूने ग्रासे न्यूनं ग्राह्यमानान्तर्गतं ग्रहणं स्यात्। मानैक्यखण्डाद्विक्षेपेऽधिके सति न ग्राससम्भवः ग्रहणं न स्यात्। अत्रोपपत्तिः। ग्राह्यमानार्धाधिके ग्रासे सम्पूर्णग्रहणं न्यूने न्यूनं मानैक्यखण्डार्धाधिके विक्षेपे मण्डलसंयोगसम्भवाद्ग्रहणाभावः"र०ना०।
अथ स्थित्यर्धविमर्दार्धे आह। 'ग्राह्यग्राहकसंयोगवियोगौ दर्शतो पृथक्। विक्षेपवर्गहीनाभ्यां तद्योगाभ्यासभे पदे। भक्ता सकृच्च सूर्येन्दोर्भुक्त्यन्तरविभाजिते। स्यातां स्थितिविमर्दार्धे नाडिकादिफले तयोः"सू०सि०।
"ग्राह्यग्राहकमानयोर्योगान्तरे अर्धिते पृथक् स्थानान्तरे स्याते। अग्रिमक्रियायां कदाचिदशुद्धत्वसम्भव पुनः क्रियार्थमेतयोरावश्यकत्वात्। तद्वर्गाभ्यां योगार्द्ध-

न्तरार्धयोर्गोभ्यां विक्षेपवर्गेण वर्जिताभ्यामूने हृते मूले षष्ट्या गुणयित्वा सूर्यचन्द्रयोर्गत्यन्तरकलाभिर्भक्ते तयो र्गवियोगयो: स्थाने षष्ट्यादिभक्ते क्रमेण स्थित्यर्धविमर्दार्धे भवत: । अत्रोपपत्ति: । यत्कृष्णरन्ध्राद्यत्कृष्णान्तपर्यन्त: य: काल: स स्थितिसञ्ज्ञ । तत्र हे खण्डे, एकं यत्कृष्णरन्ध्रान्मध्यगृहणपर्यन्तम्,अपरं मध्यगृहणाद्यत्कृष्णान्तपर्यन्तम् । तत्र विक्षेपेणेत्यर्धकाले मानैक्यखण्डं कर्ण: स्यात्तत्कालिकयरो भुज: सूर्यमोक्षान्यतरकालिकशरागमध्यकालिकशरागयोरन्तरं पर्वापरं कोटिरिति तत्खण्डसाधकं क्षेत्रम् । एवं सम्मीलगृहणे सम्मीलनोन्मीलनकालयोरन्तरकालोविमर्दस्तत्र मध्यगृहणात् सम्मीलनोन्मीलनकालावधिखण्डे तत्साधक ज्याच्छादकमण्डलकेन्द्रयोरन्तरं त्रिक्षेपदृत्ते पर्वापरं कोटिरिति क्षेत्रम् । सम्मीलनं ज्याग्रमण्डलस्याच्छादनसमाप्ति: । उन्मीलनं तु छादकमण्डलादाच्छादितसूर्यच्छाद्यमण्डलस्य निःसरणारम्भ: । तत्र सूर्यमोक्षसम्मीलनोन्मीलनकालानामन्यतमान्मध्यकालिकविक्षेपग्रहणम् । भुजकर्णवर्गान्तरपदं कोटिरिति पूर्वक्षेत्रोक्तमुपपन्नम् । ज्याच्छादकमण्डलकेन्द्रयो: पूर्वापरान्तराभावे मध्यगृहणसम्भवाच्छाद्यच्छादकयुतिर्गत्यन्तरकलाभिर्यदि षष्टिघटिकास्तदानीतकोटिकलाभि: का इत्यनुपातेन स्थिति विमर्दखण्डे । तत्र चन्द्रग्रहणे भूभासतेः सूर्यगत्यनुरोधात् सूर्यगतित्वमिह युपपन्नं हितीयक्षेत्रोक्तम्" र०ना० ।

अथ स्थित्यर्धविमर्दार्धे यथासत् साध्ये दर्शयति । "स्थित्यर्धनाडिकाभ्यस्ता गतय: षष्टिभाजिता: । लिप्तादि प्रग्रहे योज्यं मोक्षे देयं पुनः पुनः । तद्विक्षेपैः स्थितिदलं विमर्दार्धं तथाऽसकृत् । संसाध्यमन्यथा पाते तल्लिप्तादि फलं स्वकम्" सू०सि० ।

"सूर्यचन्द्रपातानां गतय: स्थित्यर्धघटीभिर्गुणिताः षष्ट्या भक्ताः फलं कलादि ग्रग्रहे सूर्यस्थित्यर्द्धनिमित्तं सूर्यचन्द्रयोर्दैयं मोक्षे मोक्षस्थित्यर्द्धनिमित्तं सूर्यचन्द्रयोर्देयं मोक्षम् । चन्द्रपाते तल्लिप्तादि फलं स्थित्यर्धघट्यादीतं कलादिपूर्वं फलं स्वकं स्वगत्युत्पन्नमन्यथा विपरीतं ग्रगृहस्थित्यर्धनिमित्तं मोक्षं मोक्षस्थित्यर्धनिमित्तं हीनमित्यर्थः । तद्विक्षेपैस्तात्कालिकचन्द्रपाताभ्यामानीतशरकलाभिः कलानां वक्रत्वाद्विक्षेपैरिति बक्रवचनम् । विक्षेपाभ्यामित्यर्थः । पुनः पुनः स्थितिदलं ज्ञाद्यम् ग्रहणं पुनः पदं सूर्यस्थित्यर्धखण्डं, द्वितीयं मोक्षस्थित्यर्धखण्डं पुनः पदम् । तेन सूर्यस्थित्यर्धार्दसाधितचन्द्रपाताभ्यामानीतशरेण प्रागुक्तप्रकारेण सूर्यस्थित्यर्धं संसाध्यम् । मोक्षस्थित्यर्धार्धसाधितचन्द्रपाताभ्यामानीतशरेण पूर्वोक्तरीत्या मोक्षस्थित्यर्धं साध्यमित्यर्थः । तत्रैवमसकृद्ग्रहणवारं सूर्यस्थित्यर्धानीतचालनेन मध्यकालिकौ चन्द्रपातावुक्तरीत्या प्रचाल्य तच्छरेण पूर्वोक्तरीत्या सूर्यस्थित्यर्धमस्मादभ्युक्तरीत्या सूर्यस्थित्यर्धमेवं यावदविशेषः । एवं मोक्षस्थित्यर्धानीतचालनेन मध्यकालिकौ चन्द्रपातावुक्तरीत्या प्रचाल्य तच्छरेण पूर्वोक्तरीत्या मोक्षस्थित्यर्धमस्मादभ्युक्तरीत्या मोक्षस्थित्यर्धमेवं यावदविशेष इत्यर्थः । ननु स्थित्यर्धविमर्दार्धयोरेकरीत्युक्तौ: कथं विमर्दार्धमसकृत् साध्यमिति मोक्षमित्यत आह विमर्दार्धमिति । तथा च सूर्यमोक्षस्थित्यर्धसाधनरीत्याऽसकृद्यावदविशेषस्तावत् सूर्यमर्दार्धं मोक्षमर्दार्धं च संसाध्यम् । तथा हि स्थित्यर्धनाडिकाभ्यस्ता इत्यत्र विमर्दार्धनाडिकाग्रहात् सूर्यमर्दार्धमोक्षमर्दार्धे साध्ये । आभ्यां प्रत्येकमसकृत् सूर्यमर्दार्धमोक्षमर्दार्धे स्फुटे स्तः । अत्रोपपत्तिः । प्रागुक्तं क्षेत्रं सूर्यमोक्षसम्मीलनोन्मीलनकालिकशरवशादिति तदज्ञानान्मध्यकालिकशरगृहणेन स्थूलं स्थित्यर्धं मर्दार्धं चातो मध्यकालात् तदन्तरेण पूर्वापरमकालिकयोक्षेत्रं सम्भवात् तत्कालसाधितचन्द्रपाताभ्यां विक्षेपस्तात्कालिको भवति परं स्थूलः स्थूलस्थित्यर्धाद्यानीतत्वात् । अतोऽस्मादानीतं स्थित्यर्धादि पूर्वापेक्षया सूक्ष्ममपि स्थूलमित्यसकृत् सूक्ष्मामिति । तत्र सम्मीलनोन्मीलनकालयोराकाशस्थसूर्यमोक्षसम्भवात् सूर्यमोक्षमर्दार्धमिति ध्येयम्" र०ना० ।

अथ मध्यगृहणस्थसूर्यमोक्षकालानाह । 'स्फुटतिथ्यवसाने तु मध्यगृहणमादिशेत् । स्थित्यर्धनाडिकाहीने मोक्षो मोक्षस्तु संयुते" सू०सि० ।

"स्फुटतिथ्यन्तकाले तत्कालात् तत्पूर्वापरकालनिराक्षः । मध्यगृहणं सोपपत्तिसमाप्तिं कथयेत् । मध्यगृहणसम्भवेन मध्यस्फुटसूर्यचन्द्रगतिमध्यतिथ्यन्ते तत्सम्भव इति कथ्यविरुद्धमसङ्गतमित्यर्थः स्फुटेति स्थित्यर्धघटिकाभिहीने तिथ्यन्तकाले मोक्षः स्यात्: । संयुते स्थित्यर्धघटीभिर्युते तिथ्यन्तकाले मोक्षः । तुकारः सूर्यमोक्षस्थित्यर्धाभ्यां सूर्यमोक्षकालाक्षितिं विषयव्यवस्थार्थकः । अत्रोपपत्तिः । तिथ्यन्तकाले ज्याच्छादकयोः पूर्वापरान्तराभावाद्योगे मण्डलसूर्यो यावान् भवति ततः पूर्वापेक्षयोनेन एवानेनोत्र मध्यगृहणकालात् [illegible]

घटीभिः स्पर्शः । अधिमकाले मोक्षस्थित्यर्धघटीभिर्मोक्षः । स्थित्यर्धयोस्तदन्तरस्यपत्वेन सिद्धः" र०ना० ।

अथ सम्पूर्णग्रहणे निमीलनोन्मीलनकालावप्याह "तद्वदेव विमर्दार्धनाड्यूनसंयुते । निमीलनोन्मीलनाख्ये भवतां सकलग्रहे" सू०सि० ।

"सम्पूर्णग्रहणे तद्वत् यथा स्थित्यर्धोनाधिके तिथ्यन्ते स्पर्शमोक्षौ तथेत्यर्थः । एवकारात् तद्विपरीतिमुक्तम् । स्पर्शविमर्दार्धमोक्षविमर्दार्धघटीभ्यां क्रमेणोनयुते तिथ्यन्ते क्रमेण निमीलनोन्मीलनसंज्ञे स्याताम् । अत्रोपपत्तिः । मर्दार्धस्य मध्यकालात् तदन्तररूपत्वेन तदूनाधिके तस्मिन् क्रमेण निमीलनोन्मीलने सम्पूर्णग्रहण एव भवतः । न्यूनग्रहणे तत्स्वरूपव्याघातात् तदभावः" र०ना० ।

अथेष्टके इष्टग्रासज्ञानार्थं कोटिकज्ञानमाह । "इष्टनाडीविहीनेन स्थित्यर्धेनार्कचन्द्रयोः । भुक्त्यन्तरं समाहृत्य षष्ठ्याप्ता कोटिलिप्तिकाः" सू०सि० । "स्वयं चन्द्रभोगान्तरं कलात्मकं गृहणारम्भाद्या इष्टघटिका, स्पर्शस्थित्यर्धघटनाधिकात्ताभिश्चेन स्पर्शस्थित्यर्धेन गुण्यते । अस्मात् घटिविभक्तप्राप्ताः कोटिकला भवन्ति । अत्रोपपत्तिः । इष्टकाले ज्ञाताच्छादकभगोलकेन्द्रयोरन्तरं विक्षेपकर्णे कोटिरिति क्षेत्रे इष्टघटीनस्पर्शस्थित्यर्धघटिकानां कलाः कोटिः सिद्धाः । पूर्वं स्पर्शकालिककोट्याः स्थित्यर्धघटिकानां सिद्धत्वात्" र०ना० ।

"भानोर्ग्रहे कोटिलिप्ता मध्यस्थित्यर्धसङ्गुणाः । स्फुटस्थित्यर्धसम्भक्ताः स्फुटाः कोटिकलाः स्फुटाः" सू०सि० ।

"अथात्र सूर्यग्रहणे विशेषमाह । सूर्यस्य ग्रहणे उक्तप्रकारेण याः कोटिकलाः सूर्यग्रहणोक्तस्पष्टस्थित्यर्धानीतस्थित्यर्धेन सङ्गुणिताः स्फुटस्थित्यर्धेन सूर्यग्रहणाधिकारोक्तेन भक्ताः सत्यः स्पष्टाः कोटिकलाः सूर्यग्रहणतत्त्वैर्भक्ताः । अत्रोपपत्तिः । सूर्यग्रहणे स्पर्शमोक्षान्यतरमध्यकालयोरन्तरस्य स्थित्यर्धत्वात् तस्य च स्फुटरविहृतस्थित्यर्धसम्बन्धान्तरैक्यस्यैकारमितत्वात् स्पष्टस्थित्यर्धानुद्धृत्य उक्तरीत्यानीताः कोटिकलाः । अभीष्टिकाया स्पष्टरविहृतस्थित्यर्धानुद्धृताः । एतत् कोटिसम्बद्धं क्षेत्रम् स्थित्यर्धक्षेत्रान्तर्गतत्वात् । स्पष्टस्थित्यर्धस्य सम्बन्धान्तरैक्यसंस्कारानुल्लिखितत्वात् । अतः स्पष्टस्थित्यर्धेनैता आगताः कोटिकलाद्या स्पष्टरवीदृतक्षेत्रजमध्यमरूपस्थित्यर्धेन वा ? इति स्फुटाः कलाः सिद्धाः र०ना० । "क्षेपो भुजज्ञायोर्वर्गयुतेर्मूलं अवस्तु तत् । मानयोगार्धतः प्रोज्झ्य ग्रासस्तात्कालिको भवेत्" । सू०सि० ।

"अथेष्टग्रासानयनमाह । क्षेपो विक्षेपो भुजः कोटिभुजयोः कर्णसाम्येऽन्तरात्तदाह तयोरिति । कर्णस्तु तयोः कोटिभुजयोर्वर्गयोगान्मूलं सिद्ध एव । तत् कर्णः गतात्मकं मूलं यात्प्राक्कमानैक्यार्धाद्विशोध्य शेषं तात्कालिकः कल्पितेष्टकालसम्बन्धी ग्रासोऽवान्तरग्रासः स्यात् । अत्रोपपत्तिः क्षेपं पूर्वं प्रतिपादितम् । स्पर्शकाले मानैक्यखण्डस्य कर्णत्वात् क्षेपयोरुभयोर्मध्यकालावधित्वादिष्टकर्णोनं मानैक्यखण्डमिष्टग्रास एव" र०ना० । "मध्यग्रहणतश्चोर्ध्वमिष्टनाड्यो विशोधयेत् । स्थित्यर्धान्मौलिकाच्चैवं प्राग्वच्चैवं तु मौलिके" सू०सि० । "अथ मध्यग्रहणानन्तरमिष्टग्रासानयनमाह । 'मध्यग्रहणकालादूर्ध्वमनन्तरम् । चकारो विशेषार्थकस्तुकारपरः । इष्टघटिकाः कर्म । मौलिकान्मोक्षकालसम्बन्धात् स्थित्यर्धात् । न स्पर्शस्थित्यर्धात् । विशोधयेत् गणक इति कर्तृक्षेपः । शेषं कोटिलिप्तादिग्रासानयनान्तं गणितकर्म प्राग्वद्ग्रहणान्तर समाख्यादिसूक्तप्रकारेण कुर्यात् । मौलिके मोक्षस्थित्यर्धान्तर्गतेष्टकाले तृतीयादिशेषे ग्रासः शेषसूर्यरविर्ता ग्रासोऽवान्तरग्रासो भवति । न पूर्ववदृतः । अत्रोपपत्तिः । मध्यग्रहणात् पूर्वमिष्टकालस्य ग्रहणारम्भावधिकस्य स्पर्शस्थित्यर्धसम्बन्धात्तादागतो ग्रास उपचयात्मकः । नावशिष्टः । अवशिष्टमण्डलस्य गुह्यत्वेन गृह्यत्वासम्भवात् । एवं मध्यग्रहणानन्तरमिष्टकालस्य मोक्षस्थित्यर्धान्तर्गतत्वादुक्तरीत्यानीतो ग्रासोऽपचयात्मकः । न गुह्यबिम्बदर्शनात्मकः । गृह्यत्वाभावात्" र०ना० । "ग्राह्यग्राहकयोर्मानार्धाद्योध्याः खण्डविप्तिप्तिकाः । तद्वर्गात् प्रोज्झ्य तत्कालविक्षेपस्य लवि पदम् । कोटिलिप्ता रवेः स्पष्टस्थित्यर्धाहृता हृताः । मध्येन लिप्तास्तत्राद्याः स्थितिवद्ग्रासघाटिकाः" सू०सि० । "अथाभीष्टग्रासाद्यिष्टकालानयनमाह ज्ञाताच्छादकमानैक्यखण्डादभीष्टग्रासकलाः शोध्याः शेषस्य यदभीष्टग्रासकालिकविक्षेपस्य वर्गं विशोध्य शेषस्य मूलं कोटिकलाः । सूर्यग्रहणे विशेषमाह रवेरिति सूर्यस्य ग्रहणे इति शेषः भानोर्ग्रहे इति पूर्वसूत्रे । उक्तप्रकारेण याः कलाः मध्यग्रहणकालस्पर्शमोक्षान्यतरकालयोरन्तरकलेषु स्पष्टस्थित्यर्धेन गुण्याः । स्पष्टरवीत्यस्थित्यर्धेन मध्येन भक्ताः फलं कोटिकला भवन्ति । स्थितिवत् स्थित्यर्धाधनरीत्या । "यद्वा यद्गुण्य सूर्येन्दोर्भुक्त्यन्तरविभाजिताः" इत्युक्तेन

तासां कोटिकलानां घटिका यास्ता अभीष्टगुरुसम्बन्धिघटिकाः स्वर्णभोत्पन्नतरस्थितिघटीगताः क्रमेण मध्यगृहक्षाच्छेषा गता वा भवन्ति । अत्रोपपत्तिः पूर्वोक्तमत्वात्सुगमतरा । परन्तु खाभीष्टगुरुसकाशिकमध्यरात्रौ स्फुटम् । तच्छरात्राने मध्यकालिकमरगृहेण स्थूलम् । अतएव भास्कराचार्यैः "कालसाधने तत्कालसाधनेन सूक्ष्मः स्फुट इत्युक्तमिति" रङ्ग० ।

अथ वक्ष्यमाणगृहयपरिलेखोपयुक्तवलनानयनमाह ।

"नतज्ञकालज्यया भाज्यस्त्रिज्याप्राग्वत्तस्य कार्मुकम् । वलनांशाः सौम्ययाम्याः पूर्वापरकपालयोः । रात्रिलग्नयुताद्गृहात् क्रान्त्यर्कदिक्स्वर्मयुताः । भेदेऽन्तरात्रज्ज्या वलना सप्तत्यङ्गुलभाजिता" सू० सि० ।

"यत्कालिकं वलनं कर्तुमिष्टं तात्कालिकं नतं, चन्द्रग्रहणे चन्द्रस्य, सूर्यग्रहणे सूर्यस्य साध्यम् । तद्यथा खोदयात् स्वास्तावृतशेषघटिकाः खदिनार्धोनगताः खदिनार्धोनाः क्रमेण पूर्वापरनतघटिका भवन्ति । ते नतं नवतिगुणं खदिनार्धभक्तं भवांशास्तेषां ज्या नतज्ज्येत्यर्थः । खदेग्ज्यांशज्यया गुणिता त्रिज्याभक्ता फलं धनुः कनात्मकं षष्टिभक्तं पूर्वापरकपालयोः पूर्वापरनतयोः क्रमेणोत्तरदक्षिणा वलनांशा भवन्ति । यत्कालिकं वलनं तात्कालिकाद्गुरुगृहाद्राशियुतात् स्वायनांशाद्यै क्रान्त्यंशास्तैर्दिक्तुल्यैर्युतास्तेषां ज्या, भेदे भिन्नदिक्के ऽन्तरात् क्रान्त्यंशवलनांशयोरन्तरात्रज्ज्या सप्तत्यङ्गुलैर्भक्ता शेषदिक् । अङ्गुलात्मकत्वेन फलशोद्याद्गुरुगृहादिका वलना भवति । अत्रोपपत्तिः । समप्रोतवलवृत्तं पूर्वापरादिदिग्भ्यः क्रान्तिवृत्तपूर्वापरादिदिग्यो यावतान्तरेण वलिता उत्तरस्यां दक्षिणस्यां वा वलनांशाः । तदानयनार्थं प्रयमतः समप्रोतवलवृत्तदिग्भ्यो विषुवद्वृत्तदिशो यावतान्तरेण वलिता दक्षिणोत्तरयोस्तदाशयवलनम् । तथा हि समप्रोतवलवृत्तं गृहक्षिक्षं समविषुवद्वृत्तयोर्यत्र लग्नं तत्प्रदेशात्तवलंशान्तरे प्राच्योत्तरं वलनं तत्सप्तमेनेतरदिग्भागन्तरं पूर्वकपालस्थे, पश्चे समवृत्तप्राचीतो विषुवद्वृत्तप्राच्या उत्तरात्तरम् । पश्चिमकपालस्थे तु समवृत्तप्राचीतो विषुवद्वृत्तप्राच्या दक्षिणत्वाद्दक्षिणम् । तत्र क्षितिजस्थे गृहे तद्दन्तरभागांशतुल्यम् । याम्योत्तरवृत्तस्थे पश्चे तदन्तराभावः । अतो यदि त्रिज्यातुल्यया नतकालज्यया ज्ञज्यातुल्याद्यवलनज्या प्रतिपद्यते तदेष्टनतज्यया कीदृगुपपातागतावलज्यावा भवतीति त्रैराशिकं वलनसाधनमुपपन्नम् । द्वितीयं तु विषुवद्वृत्तदिग्भ्यः क्रान्तिवृत्तदिशो यावतान्तरेण वलिता दक्षिणोत्तरयोस्तदाशयवलनम् । तथा हि ध्रुवप्रोतवृत्तं यद्गृहक्षिक्षं विषुवद्वृत्ते यत्रावलं लगति तत्क्षणानायनुर्यांशान्तरे यत् क्रान्तिवृत्तप्राची । तथा यद्गृहक्षात् त्रिभान्तरितक्रान्तिवृत्तप्राची यद्दन्तरेण तदायनं वलनम् । तत्क्षणमेवेतरदिग्भागन्तरम् । उत्तरायणस्थे गृहे उत्तरं दक्षिणायनस्थे गृहे दक्षिणम् । तत्तु अयनसम्भवाभावाद्भगोलसन्धौ परमक्रान्तितुल्यमतः स त्रिभक्रान्तितुल्यं सत्रिभगृहभोदयदिक्कमित्युपपन्नं राशित्रययुताद्गृहात् क्रान्त्यंशैरिति । इयमेवलनयोरैक्यदिक्के समवृत्तप्राचीतः क्रान्तिवृत्तप्राची तद्योगकृतस्फुटवलनान्तरेण वलनमिति भवति । भिन्नदिक्के तु वलनान्तरकृतस्फुटवलनान्तरेण शेषदिशि भवति । तज्ज्या स्फुटवलनज्या त्रिज्याहते अये परिलेख एकोनपञ्चाशन्मितव्यासार्धवृत्ते द्वादशभक्ते त्रिज्याहृते लब्धेयम्, तदेकोनपञ्चाशन्मितज्या कीदृगुपपातेति प्रमाणेच्छयोरिष्टव्यासार्धवृत्तस्थानेऽधोऽयवलाभात् सम्पतिः । अतो दिक्साधनेवुपपन्नम् इत्यादूपपन्नम्" रङ्ग० ।

अथ कलात्मकविम्बविक्षेपादीनामङ्गुलीकरणमाह ।

"खोदृतं दिनमध्यर्धं दिनार्धाप्तं फलेन तु । लिप्तादि क्षेपमानानि तान्येषामङ्गुलानि तु" स्फु० सि० ।

"दिनमानमर्धेनाधिकम् इत्यध्यर्धं स्वर्धयुक्तमित्यर्थः । अभीष्टकालिकोदृतघटीभिः खहृतं दिवार्धेन भक्तं फलेन । तत्कारो यद्गृहक्षं तस्य दिनमानोन्नते गृहेऽर्यार्धकः । विक्षेपगृहगृहाङ्गविम्बमानानि । तानि पूर्वोक्तानि कलात्मकानि । गुणादिकमपि ध्रुवम् । भजेत् । तत्कारात् फलमेषां कलात्मकानामङ्गुलानि भवन्ति । अत्रोपपत्तिः । उदयास्तकाले विम्बस्थितानां भूमिगोलावलम्बेनाल्पोन्नतस्थितिकरणानां नयनप्रतिघननार्कत्वाद्विम्बं अल्पत्वान्नदृश्यते । तत्राङ्गुलात्मकं विम्बं कलात्मकयात्रैकाङ्गुलप्रमाणेन भवति । खमध्यस्थे गृहे तु विम्बस्य सर्वकिरणावलम्बत्वात्तयनप्रतिघाताभ्र स्फुटं विम्बं भासते । तत्राङ्गुलात्मकं विम्बं कलात्मकैकाङ्गुलप्रमाणेन भवति । तदोदयास्तयोर्ग्रहोदयभावात् खमध्यस्थे तस्य त्रिज्यातुल्यत्वात् त्रिज्यातुल्यमङ्गुलोदयकालिकैकाङ्गुलमानस्य कलात्मकस्यैकाङ्गुलस्योपपन्नो लभ्यते तदेष्टगृहो का? दृग्गुणोपपातेनागतोऽक्षजे फलं लम्बनाङ्गुलस्य कलात्मकं मानं भवति । अत एव

भास्कराचार्यैरुदयास्तयोर्यो दृग्ज्ञानसाधनमुक्तम् "क्षितिजोन्नतलम्बहतेष्टभुजः स्वाहतिभुजोद्धृतलम्बगुणः" इत्यादि । तत्र भगवता लोकानुग्रहमया खल्वाचार्यत्वात् मध्याह्नेऽपि लम्बाभावात्कालकर्णभावात् दिनार्द्धसाधनपरमोन्नतकाल एवोपपद्यतइत्येतावत्कालेन च दृग्ज्ञानसाधनमुक्तं तत्र दिनार्द्धभोन्नतकालस्य लम्बाभावेन तथा एवाकर्णभावेनाभीष्टत्वात् ।

विभेदेष्वावनतिसम्भवो नतिकालोत्पत्तिर्गौलस्थिता यथा भवति । लम्बनस्यापिः सप्तम्यै । त्रिभोनलग्नस्थानात् पूर्वापरदिगनुरोधात् । षष्ठारात् सम्भवो देयस्याक्षविभेदेष्वेव यथा भवतीर्थः । तथा तत्तुल्येन नतिलम्बने आनयनद्वारा मया कथ्यते" रङ्ग० । तत्रोपयुक्तानुदयाभिधानमाह । "लग्नं पर्वविनाडीभां कुर्यात् खैर्दृदयासुभिः । तज्ज्ञान्त्यापक्रमज्ञाभ्यो लम्बज्ञाप्योदयाभिधा" सू० सि० । "खैः खदेर्योर्वदयासुभी राश्वसुदयासुभिः पर्वघटिकानां लग्नं गणकः कुर्यात् । पर्वान्तकालिकं लग्नं साध्यमित्यर्थः । यद्यपि पूर्वं लग्नसाधनं खेदयैरेवोक्तमिति खैर्दृदयासुभिरिति व्यर्थं तथापि समनन्तरमेव दृग्गणितसाधनोक्त्या कस्यचिल्लग्नं व्यत्ययेनैवेत्यत्र साध्यमिति ज्ञानस्य वारणाय पुनरुक्तिः । तत्र लग्नायनांशसंस्कृतस्य ज्ञा भुजज्या परमक्रान्तिगुणा खदेर्योदयलम्बज्यया भक्ता फलमुदयसञ्ज्ञं स्यात् । अत्रोपपत्तिः । लग्नक्रान्तिज्यासाधनार्थं लग्नभुजज्यायाः परमक्रान्तिज्या गुणस्त्रिज्या हरस्तदा लम्बज्या कोटी त्रिज्या वर्गस्तदा लग्नक्रान्तिज्याकोटी कः वर्ग इत्यनुपाते त्रिज्यावर्गाप्तलग्नभुजज्या परमक्रान्तिज्या गुणलम्बज्यया भक्ता फलं लग्नज्या । इयं भगवतोदयसञ्ज्ञोक्ता लग्नखोदयसञ्ज्ञत्वात् उदयलम्बज्याश्चेत्युक्तमुपपन्नम्" रङ्ग० । "तदा लग्नोदयैर्लग्नं मध्यसञ्ज्ञं यथोदितम् । तदुत्क्रान्त्यायनांशयोगो दिक्साध्येऽन्तरमन्यथा । मेषं नतांशसंस्कारौ मध्यज्ञा साभिधीयते" सू० सि० । "अक्षोपयुक्ता मध्यज्ञामाह । तदा पर्वान्तकाले लग्नोदयैर्यल्लग्नेष्टेवराद्युदयैर्यथोदितं पूर्वोक्तप्रकारेण लातत्रयदृग्लग्नतघटीभिर्धनलग्नं यथायोग्यं मध्यसञ्ज्ञं लग्नं दृग्लग्नभावात्मकं साध्यम् । अत्र लग्नसम्बन्धेन खेदयराद्युदयासुपदस्य लग्नोदयैरित्युक्तम् । तस्य दृग्लग्नभावस्यायनांशसंस्कृतस्य क्रान्तिः खेदयाख्यांशाः । अनयोर्योगे एकदिक्त्वे कार्ये । अन्यथा भिन्नदिक्त्वेऽन्तरं तयोरेव मेषसंस्कारदिक्त्वे नतांशानां ज्ञा कार्या सा मध्यलग्ननतांशज्ञा मध्यज्योच्यते तत्सम्बन्धात्" रङ्ग० । "अपक्रान्त्यमपक्रम्य इत्यत्रेषं लम्बनोपयुक्तां दृग्गतिमाह ।

"मध्योदयसञ्ज्ञयाभ्यस्ता त्रिज्याप्ता वर्गितं फलम् । मध्यज्यावर्गविश्लिष्टं इत्यत्रेषः मेषतः पदम् । तच्छिज्यावर्गविश्लेषान्मूलं यद्भुजः स दृग्गतिः" सू० सि० ।

"पूर्वोक्तमध्यज्ञा पूर्वानीतोदयाभिधोदयज्यया ज्ञा ज्याक्रुत्पक्षज्ञेन गुणम् । गुणिता त्रिज्यया भक्ता फलं वर्गितं वर्गः सङ्क्रामितो यत्र तत् । फलस्य वर्गः कार्य इत्यर्थः । मध्यज्यावर्गं विश्लिष्टं हीनं वर्गितं फलं कार्यम् । मेषान्मूलं इत्यत्रेषः स्यात् । इत्यत्रेषमित्यत्र योर्यौ वर्गौ तयोरन्तरान्मूलं यद्भुजः । स आनीतः यद्भुजदृग्गतिसञ्ज्ञो भवति न तु यद्भुजमात्रम् । अत्रोपपत्तिः । त्रिभोनलग्नस्य दृग्ज्यानयनार्थं चेलम् । मध्यलग्नदृग्ज्याकर्णत्रिभोनलग्नस्य याम्योत्तरदृक्क्षात् प्राग्यरक्षितत्वेन तत्पक्षक्षितिजान्तरक्षिततदीयदृग्वृत्तप्रदेशांयज्या कोटिः । मध्यलग्नत्रिभोनलग्नान्तरांशज्या क्रान्तिवृत्तस्थो भुजः । अत्र भुजानयनं पोदयलग्नस्वक्रान्तिवृत्तप्रदेशः प्राक्क्षितिजात् तदग्रान्तरेणोत्तरदक्षितिजो भवति । एवमस्तलग्नप्रदेशः परक्षितिजाद्दक्षिणोत्तरः । तदनुरोधेन च त्रिभोनलग्नप्रदेशक्रान्तिवृत्तीययाम्योत्तरदृक्क्षपतद्दृग्वृत्तं क्षितिजे याम्योत्तरदृक्क्षितिजलम्बनात् तद्याम्यान्तरेण लग्नमवश्यं भवति । अतस्त्रिज्यातुल्यमध्यलग्नदृग्ज्यया लग्नाग्रातुल्यो भुजस्तदाभीष्टदृग्ज्यया च दृक्क्षानुपातेन च फलसञ्ज्ञः । तदर्थेनाग्रध्यलग्नदृग्ज्यावर्गाच्चूनं त्रिभोनलग्नस्य दृग्ज्या दृक्क्षेपाख्या । एतद्वर्गोनात् त्रिज्यावर्गान्मूलं त्रिभोनलग्नस्य दृग्गतिर्दृक्क्षेपपक्षे न भवतः । किन्तु दृग्गतिदृक्क्षेपाभ्यां क्रमेण न्यूनाधिके भवतः सर्वदा भूकोर्जत्वानुभवात् । अत आनीतोऽयं दृक्क्षेपक्षितिजलग्नान्तरज्यातुल्यस्तयोरपि न तिज्यानुरूपः । किन्तु फलवर्गोनत्रिज्यावर्गपदरूपपक्षितिजाक्षज्यार्धप्रमाणेन सिद्ध इति गम्यते । अतो दृग्ज्याक्षितिजान्तरज्यत्वेन त्रिज्याहतपरिणतोदृक्क्षेपक्षितिभोनलग्नस्य दृग्ज्या स्फुटदृक्क्षेपरूपा । अक्षाक्षज्यावर्गादिना दृग्गतिः स्फुटा त्रिभोनलग्नमरूपा । एतद्वृत्तिः स्वल्पान्तरत्वाद्व्यक्षितसुखार्थं लघ्वनुना कृता । त्रिप्रश्नाधिकारोक्तवलनाभिधैतल्लग्नान्तरं लाघवादुक्तमिति" रङ्ग० ।

अथ लाघवाद्दृक्क्षेपदृग्गती लक्षितसुखार्थमाह ।

"नतांशयोस्तुकोटिज्ये स्फुटे दृक्क्षेपदृग्गती" सू० सि० ।

"दृग्लग्नभावनतांशानां भुजकोट्योर्भनतांशतद्भूनवतिक्रमेषोदयज्यौ क्रमेण दृक्क्षेपदृग्गती अस्फुटे स्यूते । तद्वा स्फुटे ग्राह्यते दृक्क्षेपदृग्गती विज्ञाय लक्षितलाघ-

वार्थं दृग्मभावसंस्कारार्थमुभयत्रोक्तं तत्स्थानापन्ने लग्ने । अत्रोपपत्तिः त्रिभोनलग्नस्य दृग्मभावासन्नत्वेन दृग्मभावस्य व्याप्योनत्वात्तस्यत्वेन लाघवार्थं दृग्मभावमेव त्रिभोनलग्नं प्रकल्प्य तत्संस्कारया मध्यलग्नादृग्या त्रिभोनलग्नस्फुटकरणोपपत्तिः । उन्नतलग्नाद्दृग्गतिः । इदमत्रितत्त्वम् । यैस्तु भगवतोक्तं मध्यलग्नं दृग्मभावपरतया व्याख्यातं तेषां मतं एतदुक्तमिति । प्रयासाधिक्यस्फुटत्वाभ्यां प्रागुक्तो वृद्धैरुक्तो अयमेवास्माभिस्तथा ध्येय इति ध्येयम् । भास्कराचार्यैस्तु "त्रिभोनलग्नस्य दिनार्धजातेर्नतोन्नतस्य यदि वा सुखार्थम्" इति यदुक्तं तदस्माभिः स्वल्पमिति ध्येयम्" रङ्ग० ।

अथ लग्नोपयुक्तच्छेदकथनपूर्वकं लग्नानयनमाह ।

"एकराशिगतस्फुटो लग्नं दृग्गतिजीवया । मध्यलग्नार्कविश्लेषलब्धा छेदेन विभाजिता । रवीन्दोर्लग्नं स्वं प्राक् पश्चाद्घटिकादिकम्" सू० सि०।

"एकराशिस्थया यस्मात् दृग्गतिजीवया प्रागुक्तदृग्गत्या दृग्मनेस्त्रिभग्रहस्फुटेन तत्स्फुटत्वाज्जीवयेति स्वरूपप्रतिपादनम् । आनुपूर्व्येण लब्धं छेदैरुक्तं स्यात् । अथ मध्यलग्नम् त्रिभोनलग्नं दृग्मीलकालिकं वस्तु दृग्मभावमानकालिकं सूर्यं तत्स्फुटलग्नस्य त्रिभागाधिकस्य लब्धा छेदेन भक्तमधिकेन भक्ता फलं घटिकादिकं प्राक् पश्चात् त्रिभोनमध्यस्फुटलग्नस्यानात् पूर्वापरविभागयोः सूर्यवत्स्फुटीकृतं लग्नं स्पष्टं भवेत्। अत्रोपपत्तिः "त्रिभोनलग्नार्कविश्लेषविहिनी लवात्मता व्याहतेन भाजिता । फलात् पश्चाद्विलग्नघट्या त्रिजीवया" घटिकादि लग्नस्य" सि० शि० सूत्रं लग्नानयनसूत्रम् । मध्यलग्नस्य त्रिभोनपरत्वेन व्याख्यानान्मध्यलग्नार्कविश्लेषलब्धा त्रिभोनलग्नार्कविश्लेषविहिनी लवात्मता जाता । इदं चतुर्भक्तं त्रिभोनलग्नस्फुटक्रान्तिगत्या च लब्धया त्रिज्यया भक्तं इति लग्नानयनप्रकारेण सिद्धम् । नन्वत्रोक्तिप्रत्यक्षार्थं पूर्वस्फुटदृग्गतिजीवयेत्यस्य स्थाने एकराशिस्थयेति किं न ? उच्यते इष्टलग्नैकराशिस्थत्वादौ दृग्गतेः पुनरुक्तिः स्यात् परस्तात् एकराशिस्थयेति वक्ष्यमाणत्वात् ! अतो मध्यलग्नार्केत्यादूक्तमुपपन्नम् । लग्नघटीभिरभीष्टं लग्नं यस्मात्तस्मात् सूर्यगतभूभासूत्रात्तत्स्फुटचन्द्रगत्या चन्द्रविक्षेपतत्स्फुटीभिस्तत्स्फुटत्वादृग्मनेः स्फुटत्वानुपपत्तिः । त्रिभोनलग्नसमेऽर्के लग्नाभावात् पूर्वापरविभागे सूर्ये सति लग्नं भवतीति प्राक् पश्चादित्युक्तम् । अत्रेदमवधेयम् । लग्नानयने मध्यलग्नस्य त्रिभोनलग्नस्येत्यर्थे छेदः पूर्वसाधितमध्यलग्नगत्या सूक्ष्मो नतांशेत्यादिस्फुटीकृतस्य लग्नगत्या स्थूल इति । एवं मध्यलग्नेत्यस्य दृग्मभावार्थेत्यु विपरीतमिति" रङ्ग०।

अथ मध्यमध्यलग्नकालज्ञानार्थं तिथौ लग्नसंस्कारं तदसकृत् साधयमिति चाह ।

"मध्यलग्नाधिके भानौ तिथ्यन्तात् प्रविशोधयेत् । धनमूनेऽसकृत् कर्म यावत् सर्वं स्थिरोभवेत्" सू०सि०।

"सूर्ये मध्यलग्नं त्रिभोनलग्नं तत्कादधिके सति तिथ्यन्तार्हगतिथ्यन्तकालदागतं लग्नं शोधयेत् । सूर्ये त्रिभोनलग्नादूने सति तिथ्यन्तकाले लग्नं धनं युतं कार्यम् । एवं कर्म गणितमसकल्लग्नुकृः कार्यम् । अक्षमर्थः । तिथ्यन्तकालिकं सूर्यो लग्नघटीभिः क्रमेण भूमौधिमकाले चाल्पो लग्नसंस्कृततिथ्यन्तेऽर्के भवति तस्मात्तल्लग्नसंस्कृततिथ्यन्तकाले लग्नदृग्मभावौ प्रसाध्य पूर्वोक्तरीत्या लग्नं साधयम् । इदमपि केवलतिथ्यन्ते संस्थाप्यैकर्त्या लग्नं केवलं तिथ्यन्ते संस्थाप्यम् । तस्मादपि लग्नं तिथ्यन्ते संस्थाप्यमित्यादिना । यावदधिमाह । यावदिति । सर्वं गणितं लग्नादि यद्यत्परिवर्तावधि स्थिरोभवेत् । अविलग्नं यावदधिमेव इत्यर्थः । अत्रोपपत्तिः दर्शान्तकालेरविगतभूष्टसूत्रात्चन्द्रस्याधो लक्षितत्वेन त्रिभोनलग्नादूने रवौ क्रान्तिवृत्ते पूर्वापरान्तराभावेनैकसूत्रस्थितत्वरूपयुतिर्दर्शान्तकालात्लग्नकालेनाग्रे भवति शीघ्रगचन्द्रस्य मन्दगरवितः पृष्ठे स्थितत्वात् । अधिके रवौ चन्द्रस्य पुरः स्थितत्वेन दर्शान्तकाल लग्नकालेन पूर्वं युतिर्भवति । अतो दर्शान्तकालो लग्नसंस्कृतो मध्यमध्यलग्नकालः स्यात् । युतिकालस्य मध्यमध्यलग्नकालत्वात् । परन्तु तावता लग्नकालेन सूर्यस्यापि क्रान्तिवृत्ते चलनात्तल्लग्नसंस्कृतदर्शान्तकाले रविगतभूष्टसूत्राच्चन्द्रस्य लक्षितत्वं स्यादेवेति मध्यमध्यलग्नकालस्यवसिद्धः । न हि सूर्यो धनलग्नेन ऋणलग्नेन चन्द्रस्य लग्नकाले स्थिरो येन तयोर्युतिः सकृता स्यात् । तस्मात्तदग्रकालात् पुनस्तात्कालिकं लग्नं प्रसाध्य दर्शान्ते पुनः संस्थाप्यम् मध्यमध्यकालः स्यात् । एवं तादृग्लग्नसंस्कृतदर्शान्तेऽपि तयोर्भूष्टसूत्ररत्वाभावात् पुनर्लग्नं साधयम् । तत्संस्कृतो दर्शान्तो मध्यमध्यलग्न-

सन्निधिना यदा लम्बनं पूर्वलम्बनतुल्यं सिध्यति तदावश्यं तादृग्लम्बनसंस्कृतदर्शान्तरूपमध्यभुक्तिकाले भूपृष्ठसूत्रे तयोः सन्निवेशः यतस्तदा सूर्यगतभूपृष्ठसूत्रचन्द्रयोरन्तराभावेन पूर्वागतलम्बनतुल्यलम्बनस्य पुनः सिद्धिः अन्यथा तुल्यलम्बनानुपपत्तेः। तस्मान्मध्यकालीनस्वल्पावधिविशेषः साध्य इत्युपपन्नं मध्यलम्बनेत्यादि" रङ्ग० ।

अथ नतिसाधनम्। "हक्क्षेपः शीतरश्मिभोमध्यभुक्तिलग्नान्तराहतः। तिथिघ्नलिप्तया भक्तो लब्धं स्वाक्षवनतिर्भवेत्" सू०सि०। "हक्क्षेपः प्रागानीतः शीतरश्मिभोश्चन्द्रार्कयोर्मध्यगती कलात्मिके तयोरन्तरेण गुणितया तिथ्या भक्तः फलं सा देशकालविशेषाभ्यां या गोले सिद्धा भवति सैवात्र गणिते नतिर्भवेत्। अत्रोपपत्तिः यदा क्रान्तिहत्तं हगवृत्ताकारं तदा नत्यभाव इति प्रागुक्तम्। तत्र त्रिभोनलग्नस्य क्षमध्यस्थत्वेन हक्क्षेपो भावः। यत्र च पञ्चभाद्यास्तत्र देशे त्रिभोनलग्नस्य क्षितिस्थत्वेन परमा नतिः। परमासु नतिकला भूगर्भस्थितिज्ञाभूपृष्ठस्थितिजस्य भूव्यासार्धान्तरेणोक्तित्वात्, नतियोजनैर्यदि लम्बान्तरकला लभ्यन्ते तदा भूव्यासार्धयोजनैः का इत्यनुपातेन तत्र मध्यगतियोजनानां भूव्यासार्धस्य च भिन्नत्वाद्भूव्यासार्द्धेनापवर्त्तः कृतः। तेन मध्यगतलम्बनकलाभिः स्वल्पान्तरेण पञ्चदशांशः परमा नतिकलाः। अतएव षष्टिघटिकानां पञ्चदशांशो घटिकाचतुष्टयं परमं लम्बनं सिद्धम्। आभिस्त्रिलग्नात्मकहक्क्षेपे सूर्यगतभूपृष्ठसूत्राच्चन्द्रस्य दक्षिणोत्तरेणावलम्बनं भवति। अनस्त्रिलग्नात्मकहक्क्षेपेण यदि मध्यगतलम्बनपञ्चदशांशो नतिस्तदेष्टहक्क्षेपेण कीदृगनुपातेन लम्बनगुणो हक्क्षेपो फलघातेन पञ्चदशगुणितत्रिलग्नात्मकेन भक्तो नतिकला दृश्युपपन्नम्" रङ्ग० ।

अथ प्रकारान्तराभ्यां नतिसाधनं लाघवाद्दाह।

"हक्क्षेपात् सप्तनिघ्नाद्वेदाप्तनतिः फलम्। अथवा त्रिघ्न्या भक्तात् सप्तसप्तघ्नसङ्गुणात्" सू०सि०।

"सप्तघ्ना भक्तादृक्क्षेपात् फलं लग्नादिका नतिः प्रकारान्तरेण भवेत्। अथवा प्रकारान्तरेण सप्तसप्तघ्नसङ्गुणात् सप्तानां सप्तकं सप्तवारमाहत्तिर्वर्ग एकोनपञ्चाग्रद्विशत्यः तेन गुणितादृक्क्षेपात् त्रिज्यया भक्ता लग्नादिका नतिः। अत्रोपपत्तिः हक्क्षेपस्य लम्बान्तरकलासित ७२।२७ गुणकपञ्चदशगुणितत्रिज्याभक्तस्य ५।१५ ७० प्रथमप्रकारे लम्बनदापवर्त्तितो फलस्थाने सप्तघ्नः। द्वितीयप्रकारे पञ्चदशभिरपवर्त्त गुणस्थाने स्वल्पान्तराहतोनपञ्चाग्रद्विशत्यास्थाने त्रिज्येत्युपपन्नम्" रङ्ग० ।

अथ नतेर्दिग्ज्ञानं स्पष्टविक्षेपं चाह ।

"मध्यलग्ना दिग्यास्या च विक्षेपा दक्षिणोत्तरा। सैन्दुविक्षेपदिक्कास्ये युक्ता विक्षेपिताऽन्यथा" रङ्ग०सि०।

"साऽवनतिर्मध्यजग्रायां दिगनुरोधाद्दक्षिणोत्तरा मध्यजग्रा चेद्दक्षिणा तदा नतिरपि दक्षिणा चेदुत्तरा तदोत्तरा स्यात्। यः सप्तसप्तघ्ने। तेन मध्यजग्रा नतांशदिक्केति। सा दक्षिणोत्तरा नतिश्चन्द्रविक्षेपदिक्कसमत्वे तयोरेकदिक्के इत्यर्थः। युक्ता विक्षेपेण युतेत्यर्थः। अन्यथा तयोर्भिन्नदिक्त्वे विक्षेपेणान्तरिता भेददिक्का विक्षेपसंस्कृता नतिः स्पष्टदरकृपा स्यात्। चन्द्रविक्षेपो मध्यगृहणकालिक इति ध्येयम्। अत्रोपपत्तिः नतांशदिक्कमध्यजग्रायामाकृष्टक्षेपस्योत्पन्नत्वात् तदुत्पन्ननतेस्तद्दिक्त्वं युक्तमेव। अत्र रविगतभूपृष्ठसूत्राच्चन्द्राकाशगोले क्रान्तिवृत्तावधिव्याप्योत्तरान्तरस्य नतित्वात् क्रान्तिमण्डलाच्चन्द्रविम्बावधि विक्षेपत्वाद्रविगतभूपृष्ठसूत्राच्चन्द्रविम्बावधिव्याप्योत्तरान्तरस्य सूर्यनृहणोपयुक्तनतिसंस्कृतविक्षेपस्पष्टविक्षेपत्वाद्दयोरेकदिग्यि योगोभिन्नदिग्यन्तरमित्युपपन्नम्" रङ्ग० ।

अत्र चन्द्रग्रकृतिदेशः "तया स्थितिविमर्दार्द्धघ्नाद्यात् तथोदितम्। प्रमाणं वलनाभीष्टघ्नादि स्फिमरश्मिवत्" रङ्ग०सि०। "अथ चन्द्रग्रकृत्याधिकारोक्तया विक्षेपसंस्कृतया नत्या स्पष्टविक्षेपकपलैरित्यर्थः। स्थित्यर्धविमर्दार्धघ्नाद्यात् स्वर्णमोक्षसंलीनोन्मीलनं यथोदितं चन्द्रग्रकृत्यधिकारे तथोक्तं तथा। तुकारस्तदितिरिक्तोऽतिव्यवच्छेदार्थश्चैवकारपरः। प्रमाणं मतमित्यर्थः। अग्रिमश्लोकाद्वलनेत्यादि। वलनाभीष्टघ्नादौ। आदिपदाद्दृष्टसाधितकालवलनम्। स्फिमरश्मिवत् चन्द्रग्रकृत्योक्तरीत्या कार्यमित्यर्थः। अत्रोपपत्तिरविशेष एव" रङ्ग० ।

अथ स्थित्यर्धे विमर्दार्धे च विशेषः।

"स्थित्यर्धेनाधिकात् प्राग्वत् तिथ्यन्ताल्लग्नं पुनः। व्यासमोक्षोद्भवे साध्यं तन्मध्यस्फिजान्तरम्। प्राक्तपालेऽधिकं मध्याल्लग्नं प्राग् दक्षिणं यदि। मौक्षिकं लग्नं क्षीणं पश्चार्धे तु विपर्ययः। तदा मोक्षस्थितिदले देयं पश्चिमके तथा। स्फिजान्तरं शोध्यं यत्र तत् स्यादिपर्ययः। एतद्वयं कपालैक्ये तद्दले लग्नमेकता। खे नी स्थितिदले योज्या विमर्दार्धेऽपि शोधवत्" रङ्ग०सि०।

"चन्द्रग्रहणाधिकारोक्तप्रकारेणासन्नं साधितं अर्धस्थित्यर्धं मोक्षस्थित्यर्धं च। तद्यथा मध्यग्रहणकालिकस्पष्टग्राद्धरीत्या स्थित्यर्धघटिकाभिस्तिथ्यन्तकालिकपङ्क्तौ। अर्धस्थित्यर्धनिमित्तं पूर्वं चाल्याः। मोक्षस्थित्यर्द्धनिमित्तमग्रे चाल्याः। तत्कालयोः प्रत्येकं गतिभरौ प्रसाध्य स्पष्टग्रः साध्यः। ततः प्रथमकालिकस्पष्टग्रात् स्थित्यर्धमनेन पूर्वं तिथ्यन्तकालिकपक्षात् प्रसाध्योक्तरीत्या स्पष्टग्रं प्रसाध्य स्थित्यर्धं साध्यम्। एवमसन्नं अर्धस्थित्यर्धम्। एवमेव द्वितीयकालिकस्पष्टग्रात् स्थित्यर्धमनेनापि तिथ्यन्तकालिकपक्षात् प्रसाध्योक्तरीत्या स्पष्टग्रं प्रसाध्य स्थित्यर्धं साध्यम्। एवमसन्नमोक्षस्थित्यर्धमिति। अथाभ्यां अर्धमोक्षस्थित्यर्धाभ्यां क्रमेण क्षीणयुतार्धान्तकालात् प्राग्वदुक्तरीत्या लम्बनं पुनरसदुपपादमोक्षोद्भवं अर्धमोक्षकालिकं कार्यम्। तथाहि अर्धस्थित्यर्धक्षीणात् तिथ्यन्तात् तात्कालिकस्पष्टचन्द्रग्रमयोर्यः प्रसाध्योक्तरीत्या लम्बनं साध्यम्। तेन अर्धस्थित्यूनतिथ्यन्तं संस्कृत्याक्षलम्बनमनेनापि अर्धस्थित्यधिकतिथ्यन्तं संस्कृत्याक्षलम्बनमेवमसन्नं अर्धकालिकं लम्बनम्। एवमेव मोक्षस्थित्यर्धयुतात् तात्कालिकसूर्याचन्द्रग्रयमभावौ प्रसाध्योक्तरीत्या लम्बनं साध्यम्। तेन मोक्षस्थित्यर्धयुततिथ्यन्तं संस्कृत्याक्षलम्बनमनेनापि मोक्षस्थित्यर्धयुततिथ्यन्तं संस्कृत्याक्षलम्बनमेवमसन्नमोक्षकालिकं लम्बनमिति। प्राक्कपाले विभोनलग्नात् पूर्वभागे विभोनलग्नाधिके रवौ मध्यान्मध्यकालिकात्। अधोलम्बनस्य विभक्तिविपरियासाद्दिग्भेदेन लम्बनात् प्राग्वत्पक्षणं प्रगृह्णं अर्धः अर्धकालिकम्। अत्रापि लम्बनमित्यन्वयः। लम्बनं चेदधिकं स्यात्। औत्तरिकं मोक्षकालिकलम्बनात् पश्चिमभागे विभोनलग्नात् पश्चिमभागे क्षीणे रवौ। तकारः समुच्चयार्थकारकः। विपर्ययः उक्तवैपरीत्यम्। मध्यकालिकलम्बनात् अर्धकालिकं लम्बनं न्यूनं मोक्षकालिकं लम्बनमधिकमित्यर्थः। तदा तर्हि तन्मध्यग्रहणजालम्। तयोः अर्धमोक्षकालिकलम्बनेन प्रत्येकमसन्नं मोक्षस्थित्यर्धं वोह्यम्। प्राग्वत्पक्षणे अर्धस्थित्यर्धं तथा ज्ञेयम्। मोक्षमध्यकालिकलम्बनयोरन्तरं मोक्षस्थित्यर्द्धं वोह्यम्। अर्धमध्यकालिकलम्बनयोरन्तरं अर्धस्थित्यर्धं मोक्षकालिकमित्यर्थः। अत्र यत्रापि क्षीणे विपर्ययः उक्तवैपरीत्यं प्राक्कपाले मध्यकालिकलम्बनात् अर्धकालिकलम्बनं न्यूनं मोक्षकालिकलम्बनमधिकं पश्चिमकपाले तु मध्यकालिकलम्बनात् अर्धकालिकलम्बनमधिकं मोक्षकालिकलम्बनं न्यूनं भवतीत्यर्थः। तत्र तन्मोक्षार्धमध्यकालिकं फरिजान्तरं लम्बनान्तरं मोक्षस्थित्यर्द्धं, मध्यमोक्षकालिकलम्बनयोरन्तरं अर्धस्थित्यर्द्धं मध्यमार्धकालिकलम्बनयोरन्तरमित्यर्थः। मोक्षं क्षीणं कुर्यात् एतल्लम्बनान्तरं मोक्षं मोक्षं वा कपालैक्ये हयोः अर्धमध्यमोक्षमोक्षयोर्वैलक्षपाले लम्बनकालिकलिप्तोनलग्नात् लम्बनकालिकलग्नं उभयत्राधिके न्यूने वेत्यर्थः। उक्तं कथितम्। तद्भेदे तयोः अर्धमध्यमोक्षमोक्षयोश्च भेदे कपालभेदे अर्धकालिकलिप्तोनलग्नात् तात्कालिकलग्नं स्वाधिक्ये मध्यकालिकलिप्तोनलग्नात् तात्कालिकार्कस्य न्यूनत्वे मध्यकालिकलिप्तोनलग्नात् तात्कालिकार्कस्याधिकत्वे मोक्षकालिकलिप्तोनलग्नात् तात्कालिकार्कस्य न्यूनत्वे इत्यर्थः। लम्बनैक्यता लम्बनैक्यम्। अर्धमध्यमोर्भेदे तात्कालिकलम्बनयोर्योगः मध्यमोक्षयोर्भेदात् तात्कालिकलम्बनयोर्योग इत्यर्थः। स्वकीये स्वकीये स्थित्यर्धे संयुता कार्या। अर्धस्थित्यर्द्धे अर्धमध्यकालिकलम्बनयोर्योगो योज्यः मोक्षस्थित्यर्द्धे मोक्षमध्यकालिकलम्बनयोर्योगो योज्य इत्यर्थः। अर्धस्थित्यर्धं मोक्षस्थित्यर्धं च स्फुटं भवति। आभ्यां चन्द्रग्रहणोक्तरीत्या मध्यग्रहणकालात् पूर्वमपरत्र क्रमेण अर्धमोक्षकालौ स्त इत्यर्थसिद्धम्। अथोक्तरीत्या विमर्दार्धेऽपि स्पष्टयमितिद्यति। विमर्दार्धं इति। अर्धमर्दार्धमोक्षमर्दार्धं चन्द्रग्रहणाधिकारोक्तरीत्या स्पष्टग्रेण सन्नं साधितं उक्तवत् "स्थित्यर्धोनाधिकात् प्राग्वत् तिथ्यन्ताल्लम्बनं पुनः" इत्याद्युक्तरीत्या स्थित्यर्धस्थाने मर्दार्धपक्षणेन पश्चाद्भोद्भवमिश्रसम्मीलनोन्मीलनोद्भवमिति पक्षणेन प्राग्ग्रहणजन्यसम्मीलनपक्षणेन औत्तरिकमित्यत्रोन्मीलनपक्षणेन स्फुटे साध्ये। अपिः समुच्चये। चकारात् साभ्यां सम्मीलनोन्मीलनकालौ मध्यग्रहणकालात् पूर्ववत् साध्यावित्यर्थः। अत्रोपपत्तिः स्थित्यर्धोनयुते मध्यग्रहणकालः अर्धमोक्षकालः मध्यकालिकलम्बनसंस्काराद् अर्धमोक्षकालिकलम्बनसंस्कारस्यापेक्षितत्वात्। न हि यः कालो लम्बनसंस्कृतः स्फुटः स सन्निकालिकलम्बनसंस्कृतः स्फुटः स्यात् सम्बन्धाभावात् पूर्वं अर्धमोक्षकालयोरज्ञानात् तात्कालिकलम्बनज्ञानाभावाच्च। अतो मध्यग्रहणकालार्थं यथा तिथ्यन्तादसन्नलम्बन प्रसाध्य तिथ्यन्ते संस्कृत्य

लिङ्गां मातृलक्षणोद्वाहस्तु शिष्टैरपि क्रियते तस्य स्मृतिविरुद्धत्वेऽपि किञ्चित् श्रौतं लिङ्गमाश्रित्य तेषांतथाचरणमिति वक्ष्यः। तस्य श्रौतलिङ्गस्यान्यार्थपरता परापर भाष्यादौ दर्शिता। अतएव द्वारकाकपदक्षिणदेशवासिनां तथाचरणे भाग०१०स्कन्धे। "यदाध्यनुस्मरन् वैरं रुक्मी कृष्णावमानत। व्यतरत् भागिनेयाय सुतां कुर्वन् खसुः प्रियम्"। "दौहित्रायाग्निदाहाय पौत्रीं रुक्माटदद्वरे। रोचनां बद्धवैरोऽपि स्वसुः प्रियचिकीर्षया जानन्नधर्मं तद्दोषं स्नेहाग्रयवशानुगः"। अधर्मं जानन्निति तं तेन तस्याधर्मत्वम्। "मातुलस्य सुतामूढ्वेति प्रागुक्तवचनात् तस्याधर्मत्वम् सुव्यक्तमेव। स च विवाहोऽष्टविधः "ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः। गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः" मनु॰ एतेषां लक्षणं तत्तच्छब्दे द्रष्टव्यम्। "येन भार्या कृता पूर्वं स्नुषोद्वाहा परस्य वै" हरिवं॰।

उद्वाहन न॰ उद्+वह्-णिच्-ल्युट्। १पुत्रादेरुद्वाहसम्पादने २उद्वयने ३स्थानान्तरनयने। उद्वाह्यते स्थानान्तरं नीयतेऽनेन उद्+वह-णिच्-करणे ल्युट्। ४उद्वारणसाधने "उद्घाटनं घटीयन्त्रं वलिरुद्वाहने मते:" अमरः। उद+वह-भावे णिच्-भावे ल्युट्। ५विवाहे। वाङ्मनस्य कृत्वार्थमेवकोपरि वाहनं कर्मणं यत्र। दैहिकस्थे खेले यत्र प्रथमभेवसारं हृदा पुनः कर्मणं क्रियते तादृशे खेले खेल॰। [टके (कड़ि) खेल॰।

उद्वाहनी स्त्री उद्वहन्ति स्वार्थे णिच्-कर्मणि ल्युट्। वरा-

उद्वाहिक त्रि॰ उद्वाहः प्रयोजनमस्य ठक् संज्ञापूर्वकविधेरनित्यत्वात् न वृद्धिः। विवाहसाधने मन्त्रादौ "नोद्वाहिकेषु मन्त्रेषु विधयावेदनं क्वचित्" मनुः। द्वौ नोद्वाहिकौ यस्य त्रि॰।

उद्वाहित पु॰स्त्री उद्वाहोजातोऽस्य तारका॰ इतच्। जातविवाहे "बाले वृद्धे तथैवार्ते गते च दैवमन्त्रिणि। उद्वाहितां कन्यां दद्यात्तोरेवनायनम्" राजमा॰।

उद्वाहिनी स्त्री उद्वाहः उद्वरणं साध्यतयाऽस्त्यस्या इति ङीप्। रज्ज्वो नेद्विनि:।

उद्विग्न त्रि॰ उद्+विज-कर्तरि क्त। उद्वेगयुक्ते, "निमन्नोद्विग्नसंक्षोभैः पन्ने दोषैव मेदिनी" भट्टिः। दुःखपरिहाराक्षमतया२आकुलचित्ते,३व्यथिते च।

उद्वीक्षण न॰ उद्+वि+ईक्ष-भावे ल्युट्। १ऊर्द्धदृष्टौ। करणे ल्युट्। २तत्साधने नेत्रे "वक्षोजनोद्वीक्षणकौतुदीक्षणम्" रघुः।

उद्वीत त्रि॰ उद्+वि+इ-क्त। विगतेनोद्गते। (जयद्रथविक्षोभा) वमनात् स्राविते "ततोयुधिष्ठिरानीकमुद्वीतार्णवनिस्वनम्" भा॰ द्रो॰ १६अ॰।

उद्वृत्त त्रि॰ उद्गतो वृत्तात् निरा॰त॰। १दुष्टे। उद्+वृत-क्त। २उत्तृप्ते ३भक्षीकृते। ४अधिके। "उद्वृत्तोहि मन्य समधिकफलमाचष्टे" व्या॰ न्यायः। "कल्पत्रयोद्वृत्तमिवार्णवाम्भः" भा॰ आ॰ प॰७। ५क्षुभिते च "उद्वृत्तनक्रात् सहसोन्मथ्य" रघुः।

उद्वेग पु॰ उद्+विज-घञ्। १व्याकुलचित्ततायाम् २विरक्तजन्ये दुःखोद्गमे, "अनोभिः सोद्वेगं प्रथयविकृतिभ्रस्तहृदयः" किरा॰। "सकृत्सोद्वेगमिव त्रजेदिति" रघुः। "यान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या" मेघ॰। "प्रोज्झ्याम् बाधते उद्वेगं जनयति शिरोऽन्तर्द्धाने नासिकाञ्च आवयति स कटुकः" सुश्रु॰। "सङ्कोचेऽप्यनुद्वेगो धार्ष्ट्यं परिकीर्त्तितम्" सा॰द॰। ४भये च। ५गुणावकर्षके न॰। उद्वतोवेगोऽत्र। ६निश्चले, ईस्तिमिते ७यौ॰ग्रहणमिति च त्रि॰।

उद्वेजन त्रि॰ उद्+विज-भावे ल्युट्। १उद्वेगे अमरः "परदारादिसर्वत्र प्रहर्त्तारन्तृणं मन्यते पतिः। उद्वेजनकरैर्दण्डैर्विक्षयित्वा प्रशास्यते" मनु॰ तत्कर्त्ता साधु च। उद्वेजनीय उद्वेजके त्रि॰ "परिहरेदुद्वेजनीयाञ्च कथाः" श्रुश्रु॰।

उद्वेजित त्रि॰ उद्+विज-णिच्-क्त। क्षतोद्वेगे "उद्वेजिता इष्टभिरात्मबन्धे" कुमा॰।

उद्वेदि त्रि॰ उद्गता वेदिर्यस्य प्रा॰ ब॰ नलोपः। उद्गतवेदिके। "विमान मयसमुद्वेदि चतुःस्तम्भप्रतिष्ठितम्" रघुः

उद्वेप पु॰ उद्+वेप-भावे घञ्। १उत्कम्पने। कर्त्तरि अच्। २तद्युक्ते त्रि॰। ततः तेन निर्वृत्तमित्यर्थे ठञ्वुञौ। अण् औद्वेप तद्विदर्त्ते त्रि॰। स्त्रियां ङीप्।

उद्वेल त्रि॰ उत्क्रान्तोवेलाम् अत्या॰ स॰। १वेलातिक्रान्ते २मर्य्यादातिक्रान्ते "भयमप्रलयोद्वेलादाच्छ्यामैर्कतोदधेः" रघु

उद्वेष्टन न॰ उद्+वेष्ट-ल्युट्। १कलापादवेष्टने, २उपवेष्टने च। "वल्ले मधुरता तस्मात् वृद्धवोद्वेष्टनं भवः" "वृद्धवोद्वेष्टनं तस्मात् वाक्यानुस्तिरोधकः" श्रुत॰। उद्वृतं वेष्टनात् निरा॰त॰। ३उत्कुलवलने त्रि॰। "कथाविद्वेष्टन बालबाहुवा" रघु॰ कुमारच

उद्वोढृ पु॰ उद्+वह-तृच्। परिवेत्तरि। "उद्वोढारि भवेत् भ्राता ज्ञातृत्वात् कुलनाविके!। वेद्यानलनलं पाप तस्य पुंसोहिनेदिने" भट्टानि॰त॰।

उभ्रस उञ्छे क्या॰ पर॰ अक॰ सेट्। उभ्रस्यति औभ्रासीत्

थक्स्याः । द्विघ्नाः खनागाङ्कगजांश ८६८ होनाः पञ्चाप्त ६५ भक्ताः प्रथमान्विताः स्युः । मासा पृथक्ते द्विगुणास्त्रिपूर्णबाणाऽ ५०२धिकाः खाङ्कदस्राश १६६ युताः । लिभि ३र्विभक्ताः फलमंशपूर्वं मासीघतुल्यैश्च गटैर्युतं स्यात् । सपातसूर्ययोऽस्य भुजांयका यदा भवन् १४नकाः स्याद्यकृष्णस्य सम्भवः"ग्रि० । "कल्पितस्याहे रारभ्य गतायुदा द्वादशगुणाश्चैत्रादिगतमासयुताः पृथक्स्था द्विघ्नाः स्वकीयेन गजाङ्काष्ट ८६८ भागेनोनाः पञ्चघच्छा ६५ भक्ताः फलमधिमासाः । हे, पृथक्स्था युतास्चान्द्रा मासा भवन्ति । अत्रोपपत्तिस्त्रैराशिकेन । यदि युगभविमासैः ५१८४०००० युगाधिमासा १५६३-३००लभ्यन्ते तदैभिः कल्पगतैः किमिति । अत्राधिमासानामर्धेनानेन ७८६६५०गुणकभाजकाववर्त्तितौ जातं गुणकस्थाने हृयम् भागहारस्थाने पञ्चघट्टिः किञ्चिदभ्यधिका ६५।४। २१। अतः पञ्चघट्टिगुणानामधिमासानां १०२५६४५००द्विगुणानां रविमासानां च १०३६८०००० यदन्तरं ११५५००। तेन द्विगुणा रविमासा भक्ता लब्धमष्टाङ्गजाः ८६८। तैर्द्विगुणाः कल्पिगतमासा भाजयाः । यल्लभ्यते तेन तान् वर्जितान् कृत्वा पञ्चघच्छा ६५ भागे हृते यदधिमासा लभ्यन्ते इत्युपपन्नम् । तैरधिमासैः पृथक्स्था युताश्चान्द्रमासाः स्युः । ते चान्द्रमासाः पृथगष्टिनिघ्नास्त्रिपूर्णबाणैः ५०२ सहिताः स्वकीयेनाङ्कदस्राग्रेण १६६ युक्तास्त्रिभिर्भाजयाः । फलमंशादयं प्राग्वत् । लब्धमधिमासा भवन्ति । तैरधिमासैः पृथक्स्था युताश्चान्द्रमासाः स्युः । ते संक्रान्तिरहिता अधिमासाः । शेषास्तु संक्रान्तिसहिता मासाः । तत्र यदा कार्त्तिकादिमासत्रयं संक्रान्तिरहितं भवति तदा तत्पूर्वमासस्य क्षयसंज्ञा भवति । तत्र गणितागतं यत्कार्त्तिकादिमासत्रयं तत्पूर्वमासस्य क्षयसंज्ञा कार्या । एवं सति यदा कार्त्तिकमासे संक्रान्तिर्न भवति तदा कार्त्तिकक्षयः । यदा मार्गशीर्षे न भवति तदा मार्गशीर्षक्षयः । यदा पौषे न भवति तदा पौषक्षयः । एवं फाल्गुनक्षयः । एवं पञ्चक्षयाः । एवं चान्द्रमासानां द्वादशसंख्यकत्वं सिद्धम् । अत्र वासनोच्यते । सूर्यसिद्धान्तेन भगणाः कल्पे ४३२०००० । सौरवर्षाणि कल्पे ४३२०००००० । अतो भगणवर्षयोरैक्यं सिद्धम् । अतः सौरवर्षतुल्या भगणाः । सौरवर्षाणि च चान्द्रमासैः किं लभ्यन्ते इति त्रैराशिकेन जातं चान्द्रमासाः ५१८४०००० । अत्र सौरवर्षाणां चान्द्रमासानां च तुल्यत्वात्

तुल्यदिशां योगोऽन्यदिग्यामलग्नमेषं ते नतांशा भवन्ति। तेषां रव्यंशैर्गतैष्यैर्जन्याः स्थापिता भागाः संस्कृता कार्याः। समदिशां योगोभिन्नदिग्यामलग्नमित्यर्थः। एवं ते भागा यदि सप्तभ्य ७ जना भवन्ति तदा सूर्यगृहसम्भवो वेदितव्यः। अथ सपातसूर्यस्य प्रतिमासशोधनम्। यदि तस्मिन् मासे नार्कगृहस्तदा सपातसूर्ये राशिस्थाने कृत्वम्? । भागस्थाने पूर्णम्० सपादाश्चत्वारिंशत् कलाश्च ४०। १५। प्रतिमासं प्रक्षिप्य सम्भवो ज्ञेयः। आते सम्भवे स्फुटार्थं तत्र गृहाः कार्याः। अत्रोपपत्तिः। ये सपातसूर्यस्य भुजांशास्ते शरार्धं पृथक् स्थापिताः। अथ च सूर्यगृहे शरो नत्या संस्कृतः कार्यः। तदर्थं दर्शान्ते या नतघटिकास्तालम्बनेनोनाधिकाः कार्याः नतघटीनां चतुर्थांशः स्थूलं लम्बनम्। पञ्चभिः पञ्चभिर्घटिकाभिरेकैकः किल राशिः। याः किल नतघटिकास्ताश्चतुर्थांशेन लम्बनेनाधिकाः कार्याः। ततः पञ्चभिर्भोज्याः। एवं कृते पूर्वघटिकाश्चतुर्भिर्भक्ता भवन्ति। अतस्तेन राश्यादिनोनो रविः पूर्वाह्णे विलिभासन्नो भवति। पश्चिमकपाले तु युतः सन्। अतस्तत्कालादिदृतो विलिभं वर्तते। एवं विलिभलग्नस्य क्रान्तिरत्रांशैः संस्कृता नतांशा जाताः। ते यदा नतांशाः पञ्चचत्वारिंशद् ४५ भवन्ति तदा। यदि त्रिज्यया परमा-वनति ४८। ४६ लभ्यते तदा पञ्चचत्वारिंशद्गतानां ज्यया। २४३१ किमिति। फलं नतिः साधाश्चतस्त्रिंशत् कलाः ३४। ३० एतावांश्चरो यैर्भुजभागैरुत्पद्यते ते ज्ञेयाः। यदि सप्तत्या कलानां पञ्चदश १५ भागा लभ्यन्ते तदाभिर्नतिकलाभिः ३४।३०किमिति लब्धा अंशाः सप्त०,२४ चतुर्विंशति कलाश्च। एते तु नतलग्नानां षडंशेनोनोत्पद्यन्ते। अत उक्तं रसलवेनाढ्याश्च ते संस्कृता दृग्ज्यपक्षम्" प्रभि०।

एवं सिद्धान्तोक्ते ग्रहणसम्भवनियमे स्थिते "ज्यो०त०। "भतिपादान्तरे राहोः केतोर्वा संस्थितो रविः। चन्द्रपादान्तरे चन्द्रस्तदा सम्भाव्यते ग्रहः। यस्मिन्नृक्षे रविस्तस्मात्तुर्यगतः शशी। पूर्णिमाप्रतिपत्सन्धौ राहुणा गृह्यते शशी। त्रयोदशे तृतीयायां भागस्थं यदि जायते। ततस्तयोर्दशे सूर्यं राहुणा गृह्यते रविः" इत्युक्तिर्निर्मूला, समूलत्वे अतिस्थूलत्वात् तथोक्तिः कथञ्चित्समर्थनीया। सिद्धान्तशिरोमणौ ग्रासोद्भवनयने विशेष उक्तो यथा "समस्तर्क्षांशकलाविक्षेपौ स्फुटौ रविविधू विदधीत रविगृहम्। समलग्नावयवौ तु विधुगृहं समत्रिगलग्नयुगं च तदोक्तवत्" गि०। "सति संभवे रविगृहं ज्ञातुमभावास्यायां रविविधू तमश्च स्फुटं कृत्वा ततोऽर्केन्दू देशान्तरादिस्फोटकर्णौ; स्फुटौ विधाय तिथिं च कृत्वा यथोक्तं नतकर्म च। तथा कृते सति तिथ्यन्तकालिकौ तौ कार्यौ। तमश्च एवं चन्द्रग्रहणं ज्ञातुं पौर्णमास्यां च। यतस्तेनो ग्रहणक्रिया" ग्रभि०।

इदानीमर्कस्फोटः कलाव्यासार्धे आह। "नगनगाग्निनवाष्टरसा ६८६२७७ रवे रसरसेषुमहीषु ५१५६६ मिता विधो। निगदितोऽवनिमध्यत इच्छति स्फुतिरियं किल योजनसंख्यया" गि०। "स्पष्टार्कात्। अत्रोपपत्तिः कलाध्याये चन्द्रार्कयोः किल (४३३१४६७,२० रवेः,१२४०००इन्दोः,) कले कथिते। किन्तु व्यासौ न कथितौ। तावित्यानीं त्रैराशिकेन। यदि भनन्दाग्निमित १६२७ परिधेः खनागसूर्य्यं १२५० मितो व्यास स्तदा साधार्कद्विगोभसुरराब्धिमिता ४३३१४६७। २० र्ककलायास्तथा सहस्रगुणितजिनरामसंख्याया २२४००० चन्द्रकलायाः क इति। फलं क्रमेण तयोः (१३७८७।४ र० १०३१३२ च०) व्यासौ। तयोरर्धे एते (श्लोकोक्ते) स्फुटी। इयं भूमध्यात् कलाया उच्छ्रितिः" ग्रभि०।

इदानीमस्य योजनात्मकस्यर्णस्य स्फुटीकरणार्थमाह। "मन्दस्फुटद्रिकृतिवत् प्रसाध्या तया त्रिभज्या द्विगुणा विहीना। त्रिज्याकृतिः शेषकृता स्फुटा स्यात्त्रिघ्न स्फुतिस्तिग्मरुचेर्विधोश्च" गि०। "यथा यत्रस्थ शीघ्रकर्णाग्रे कर्णः साधितस्तथार्कस्य विधोश्च पृथक् पृथक् मन्दकर्णः साध्यः। स कर्णो द्विगुणायास्त्रिज्याया विशोध्य शेषेण त्रिज्याकृतिर्भाज्या। फलं स्फुटः कलात्मको भवति। एवं विधोश्च। अत्रोपपत्तिः। इह स्पष्टीकरणे ये मन्दनीचोच्चवृत्तपरिधिभागाः पठितास्ते त्रिज्यातुल्ये कलाव्यासार्धे यदा गृह्यन्ते कर्णे उत्पन्नस्तदा कर्णो व्यासार्धे गृह्यन्ते कलायाः। अतस्तैरार्यिकेन तत्परिणतास्ते कार्याः। यदि त्रिज्याव्यासार्धे एते मन्दपरिधिभागास्तदा कर्णव्यासार्धे क इति। एवं परिधेः स्फुटत्वं विधायासकृत् कर्णः कार्यः। स कलात्मकः स्फुटो भवति। एतदसकृत्कर्मोपसंहृत्य सकृत्कर्मणा कर्णस्य स्फुटत्वं कृतम्। प्रथमं यः कर्णः आगतस्तमेव त्रिज्याकृतिं प्रक्षिप्य स्फुटः कर्णोऽत्र साध्यते। यदा किल कर्णस्त्रिज्यातो न्यूनो भवति यावता न्यूनात् त्रिज्यया संयोज्य यदधिको वर्तते या-

वताधिकस्तत् त्रिज्याव्या विशेष्य शेषेणानपातः । यद्य-
नेन त्रिज्या लभ्यते तदा त्रिज्यया किमिति । अने-
नानुपातेन स्फुटः कर्णः सङ्गच्छति । अत्र भुजीकर्मणा
प्रसङ्गप्रतीतिः"प्रमि० ।

"इदानीं योजनात्मककर्णस्य स्फुटत्वमाह । "खित्रा-
स्तिग्नखिगुणेन भक्तः स्फुटो भवेद्योजनकर्ण एवम्" यि० ।
"स्पष्टार्थम् । अत्रोपपत्तिर्ज्ञैराशिकेन यदि त्रिज्याव्या-
सार्धे एतावान् स्फुटः कर्णस्तदा योजनात्मकव्यासार्धे
किमिति । फलं भूमध्याद्गुणोच्छ्रितियोजनानि"प्रमि० ।

इदानीं योजनविम्बान्याह । "विम्बं रवेर्हि द्विगरर्तु
६५२२ संख्यानीन्दोः खनागाब्धि ४८० योजनानि ।
भूव्यासहीनं रविबिम्बमिन्दुकर्णाहतं भास्करकर्णभक्तम् ।
सूचिस्तृतिर्लब्धफलेन हीना भवेत् कुजादेस्तिथिरिन्दुमार्गे"यि० ।
"रवेर्योजनात्मकं विम्बं मध्यमं द्विगवाक्षषट्कसंख्यानि
६५२२ योजनानि (सौरागमे६५०० मितविम्बोक्तेः किञ्चिद-
धिकपरत्वपरतया सङ्गमनीया) । इन्दोस्तु भूव्यवसुवेद४८०
मितानि । अथ राहोरुच्यते । रविविम्बं भूव्यासेन हीनं
४६४१ लम्बेन्दुकर्णेनास्फुटेन योजनात्मकेन संगुण्य स्फुटेन
रविकर्णेन भजेत् । फलेन भूव्यासो वर्जितश्चन्द्रकक्षा-
यां भूभाव्यासो भवति । एतानि योजनविम्बानि । अ
त्रोपपत्तिः । यस्मिन् दिवेऽर्कस्य मध्यगत्यर्थं स्फुटा गतिः
स्यात् तस्मिन् दिने उदयकाले चक्रकलाव्यासार्धमितेन
अहिहितेन भूवलिखितेन तत्स्पष्टया तद्गाभ्यां विम्ब-
प्रान्तौ विभेत् । वा षष्टयुद्धरन्तरकलाभा रविविम्बकला
भवन्ति मध्यगाः । तास द्वात्रिंशत् किंचिदधिकैकत्रिंश-
द्विकलाधिकाः ३२ । ३१ । ३२ । एवं विधोरपि पौर्ण-
मास्यां यदा मध्यैव गतिः स्पष्टा तदा विम्बेत् तत्रैवं
द्वात्रिंशत् कलाः ३२ । ० । ६ उत्पद्यन्ते । विम्ब-
कलानां योजनोद्धरन्यायानुपातः । यदि त्रिज्याव्यासार्धे
एतावत्प्रमाणं विम्बं तदा पठितस्फुटियोजनैः किमित्येव-
मुत्पद्यन्ते द्विद्विगरर्तु६५२२ संख्यानि योजनानि । वि-
धोस्तु खनागाब्धि ४८० मितानीति । अथ भूभा-
विम्बक्षेपपत्तिरुच्यते । अर्कविम्बव्यासाद्भूव्यासो यतोऽऽ
ल्पोऽतो भूभा मध्यगा भवति दीर्घतया चन्द्रकक्षामतीत्य
दूरं बहिर्गच्छति । अतो भूस्तृतेः क्रियत्प्रमाणे जाते
चन्द्रकक्षायां भूभाविस्तृतिर्भवतीति त्रैराश्यानुपातः । यदि
रविकर्णेन सूर्यविम्बभूव्यासान्तरयोजनानि४६४१ लभ्यन्ते
तदा चन्द्रकर्णेन किमिति । फलं भूव्यासक्षेपचयोज
नानि भवन्ति । अतस्तैर्भूव्यास ऊनीकृतश्चन्द्रकक्षायां भूभा
व्यासो भवतीत्युपपन्नम् प्रमि० ।

इदानीं योजनानां कलाकरणार्थमाह । "सूर्येन्दु-
भूभातलयोजनानि त्रिज्याहतान्यर्कयुताङ्गकर्णैः ।
भक्तानि तत्कार्धकविप्रिकाख्यास्तेषां क्रमाल्लम्बकला
भवन्ति" यि० । स्पष्टार्थम् । अत्रोपपत्तिर्ज्ञैराशिकेन
यदि योजनात्मकव्यासार्धे एतावन्ति विम्बमानानि तदा
त्रिज्याव्यासार्धे कियन्तीति फलानां चापानि कृतज्यानि
प्रायेणोक्तानि" प्रमि० ।

इदानीं प्रकारान्तरेण विम्बकलानयनमाह "भानो-
र्गतिः खदृग् १० भागयुताधिता वा विम्बं विधोस्त्रि
२गुणिता युगशैल ७४ भक्ता । तिथ्यृद्धि ७१५ हीन-
यधिभुक्तिरिन्दुद्धि २५ भक्ता लब्धानि २६ युग् भ-
वति वा विधुविम्बमेवम्" यि० "रवेर्गतिः खदृग्भागैः१०युताऽ-
धिता च रवेः कलाविम्बं भवति । अथ चन्द्रगतिस्त्रि
गुणिता युगशैल७४भक्ता तद्विधुविम्बं भवति । अथ वा
चन्द्रभुक्तिस्त्रिभिः ७१५ हीना पञ्चविंशत्या २५ भक्ता
फलमेकोनत्रिंशता २६युतं चन्द्रबिम्बं भवति । अत्रोपपत्तिः
त्रिज्यातो भवति कर्णे भूभविम्बं लभ्यते तथा गतिस्त्र
ज्ये भूमध्याद्भूरगतत्वाद्भुभक्षस्य । अथात्रे कर्णे विम्बं
पृथु गतिस्त्र भवती तत्रासन्नत्वात् । विम्बगतीक्षेपचया-
पचययोस्तुल्यकालत्वाद्गतेरपि विम्बं साधयितुमुचितं
भवति । तद्यथा तत्र त्रैराशिकम् यदि योजनात्मिकया
गत्या पादोनगोऽब्धृतिभूमितया ११८५९।४५ द्विद्विगर्तु ६-
५२२ संख्यं विम्बं लभ्यते तदा कलागत्या किमिति । अत्र
गुणकस्य द्विद्विगरर्तुसंख्यस्यैकादशभागेन ५९२ । ५५
गुणकभाजकावपवर्तितौ जाता गुणकस्थाने एकादश ११ ।
भाजके विंशतिः २० । अतो रविगतिः सुखार्थं दश-
गुणा विंशत्या छिद्यते तावद्धिता भवति अत एकादश-
भिर्गुण्यातो दशांशेनाधिका कृतेत्युपपन्नम् । एवं चन्द्रस्य
खनागाब्धि ४८० मितो गुणो भागहारो योजनगति-
रेव ११८५९।४५ । एतौ खदृग्भै६०रपवर्तितौ जात
गुणकस्थाने त्रयं भागहारस्थाने चतुःषष्टिः ७४ अत्र
परमं विकलात्मितयं यद्यत्तरं तत् सुखार्थमङ्गीकृतम् ।
अथ चन्द्रविम्बानयने क्षिप्तोपसंहारः सुखोपायार्थं कृतः ।
तत्र तिथ्यृद्धि ७१५ मुत्क्षेप्य गतिखण्डस्यैकोनत्रिंश २९
न्मितं विम्बखण्डं लभ्यते । गतिशेषस्य पञ्चविंशत्या
२५ भागे हृते विम्बशेषं कलात्मकं १ लभ्यते । अतस्त-

दैक्ये हारितंय ३२ साध्यम् चन्द्रविम्बम् । गतेरुपचयापचयवशात् स्फुटत्वे बिम्बस्यापि स्फुटत्वमुपपन्नम्" इति० ।

इदानीं राहोः प्रकारान्तरेण कलाविम्बमाह । "भानोर्गतिः शरः५ हृता रविभि १२र्विभक्ता चन्द्रस्य लोचन २ गुणा तिथि १५ भाजिता च । लब्धान्तरं भवति वाऽवनिभाप्रमाणं भूभा विधुं, विधुरिनं यदृक्षे पिधत्ते" त्यि० । "रविगतिः पञ्चगुणा हादयभक्ता फलं कलात्मकमनष्टं स्याद्यम् । अथ यत्रिगतिर्द्विगुणिता पञ्चहृदयभाजिता हृदयमपि कलात्मकं फलम् । अनयोः फलयोरन्तरं भूमाबिम्बप्रमाणं भवति । इदानीं यदृक्षे ज्ञाद्यच्छादकत्वमुच्यते भूभा विधुगृक्षे विधुं ज्ञादयति रविगृक्षे तु रविं विधुश्छादयति । अत्रोपपत्तिः । अत्र क्रकैव्यासान्तरमितानां भोजनानां रविकलायां कलाकरणायानुपातः । यदि गतिभोजनै ११८५६गतिकला लभ्यन्ते तदा क्रकैव्यासान्तरभोजनैः ४६४१ किमिति । अत्र रविगतेः क्रकैव्यासान्तर गुणः ४६४१ । गतियोजनानि हृरः । एतौ वसुवसुनवभि ८८८ रपवर्तितौ जातौ गुणस्थाने पञ्च ५ । हरस्थाने हादय १२ । फलं रविगतिसञ्ज्ञमिन्दोरुपचयक्षिप्राः । अथ भूव्यासस्य चन्द्रकलायां क्षिप्राकरणार्थमनुपातः । यदि गतियोजनै ११८५६चन्द्रगतिकला लभ्यन्ते तदा भूव्यासयोजनैः १५ ८१ किमिति । अत्र गुणार्धेन गुणकभाजकावपवर्तितौ जातं गुणकस्थाने हयम् २। भागहारस्थाने पञ्चहृदय १५। फलं भूव्यासकलाः । एताभ्यः पूर्वकलाः शोध्याः । यत उपर्युपरि गच्छन्त्या भूभाया विस्तृतिरुपचयिनो भवति" इ०।

इदानीं चन्द्रविक्षेपानयनमाह । "खपातात्क्रान्तिक चन्द्रदोर्ज्या खभै २७० हृता व्यासदलेन भक्ता । खपातशीतद्युतिगोलदिक् स्याद्विक्षेप इन्दोः स च वाणसंज्ञः" त्यि० । "यस्मिन् काले विक्षेपः साध्यस्तस्मिन् काले तात्कालिकयोश्चन्द्रपातयोर्योगः कर्तव्य इति वाधरात्रयोगोऽत्र । इह चन्द्रग्रहणावगमे समकालस्य चन्द्रस्य तात्कालिकपातस्य च योगः कर्तव्यः । तस्य दोर्ज्या खभै २७० र्भुक्त्या विहृत्या भाज्या फलं कलात्मकश्चन्द्रविक्षेपः । स च वाणसंज्ञः । यदि षड्भादून: खपातचन्द्रभोगस्तदा दक्षिणो क्षेपः । अत्रोपपत्तिः । चन्द्रो हि विमण्डले भवति क्रान्तिमण्डलस्य विमण्डलस्य च यः संपातस्य पातसंज्ञा । स पातो नीलाम्बादक्षिणेन गच्छति । तस्मात् पातादयतक्षिप्रभेऽन्तरे तद्विमण्डलं साद्रैर्वसुभि ८,२० भागैः क्रान्तिदक्षादुत्तरतो भवति । पातात् पृष्ठतक्षिप्रभेऽन्तरे तैरेव भागै ८,२० दक्षिणतो भवति । अथ विमण्डलगतस्य चन्द्रस्य क्रान्तिमण्डलेन सह यद्यन्तरं स याम्योत्तरो विक्षेपः । तज्ज्ञानार्थं चन्द्रपातयोरन्तरं क्षेयम् । तच्च चन्द्रपातयोर्योगे कृते भवति पातस्य विलोमगत्वात् । तस्य सपातचन्द्रस्य दोर्ज्यानुपातः । यदि त्रिज्यातुल्यया दोर्ज्यया परमः क्षेपनिबन्ध २७० कलातुल्यो विक्षेपस्तदानया किमायात इति । फलमिन्दुविक्षेपः । यतः पातादयतः षड्भं क्रान्तिदक्षादुत्तरतोऽन्यद्दक्षिणतोऽतः सपातशीतद्युतिगोलदिक् दक्षुपपन्नम्" इति० । इदानीं यदृक्षे यावत्प्रमाणमाह । "यच्छाद्यसंछादकमण्डलैक्यखण्डं शरोनं स्थगितप्रमाणम् । तच्छाद्यबिम्बादधिकं यदा स्याज्ज्ञेयं च सर्वग्रहणं तदानीम्" इ०। "स्पष्टार्थम् अतोपपत्तिः । रवेरयतो भार्धान्तरे क्रान्तिदक्षे भूभा भ्रमति । अतः पौर्णमास्यन्ते भूभाचन्द्रौ समौ भवतः । किन्तु याम्योत्तरमन्तरं विक्षेपतुल्यं भवति स विक्षेपस्ताद्यच्छादकबिम्बमध्ययोरन्तरम् । तदा तिथ्यर्धैक्यसमं तदा बिम्बप्रान्तयोर्योगसमं स्यात् । यदा चादता मानैक्यार्द्धोनं तावच्छाद्यबिम्बे छादकबिम्बं प्रविशति । अत उक्तं तत्स्थगितप्रमाणमिति । तत् स्थगितं छाद्यबिम्बादधिकं यदा भवति तदा सर्वग्रहणमित्यपि सुगमम्" इति० ।

इदानीं स्थितिमर्दार्धयोरानयनमाह । "भानार्धयोर्नान्तरयोः कृतिभ्यां शरस्य वर्गेण विवर्जिताभ्याम् । मूले खदृ ६० संगुणिते विभक्ते भुक्त्यन्तरेण स्थितिमर्द्धखण्डे" इ० । स्पष्टार्थम् । "अतोपपत्तिः । सर्वग्रासे तु बिम्बगर्भयोरन्तरं भानैक्यार्धम् । तच्च कर्णरूपं भवति । तत्र यः शरः सा कोटिः । कर्णकोट्योर्लम्बान्तरघातं भुजः । तच्च पार्श्वकर्णखण्डम् । तत्क्रमणकालावानुपातः । तच्चन्द्रार्कयोः प्राग्गमनात् भुक्त्यन्तरेण यदि भुक्त्यन्तरतुल्यकलाभिः स्थित्यर्ध घटीर्लभ्यन्ते तदा लब्धाभिर्भुजकलाभिः किमत्र इति । फलं स्थित्यर्धघटिकाः । यदा स्पर्शकालशरात्तान्नाध्यक्षणशरेष्वैतत् कर्म कृतमतः स्थूलं स्थित्यर्धं जातम् । अथ मर्दार्धमुच्यते । यदा छादकेन छाद्ये ग्रसे ग्रसे संमीलनमानं तदा बिम्बगर्भयोरन्तरे बिम्बार्धान्तरतुल्याः कला भवन्ति । ताश्च कर्णरूपाः । तस्मिन् काले यावान् विक्षेपस्तावती कोटिर्लम्बान्तरघातं पार्श्वकर्णखण्डं भव-

ति । तत्रापि पूर्ववदनुपातेन घटिकात्मकः कालो मर्दखण्डं भवति । सोऽपि स्थूलः" प्रमिताक्षरा ।

इदानीं घटीकरणमाह । "स्थित्यर्धनाडीगुणिता स्वभुक्तिः षष्ट्या ६० हृता तद्दृक्तौ युतौ च । क्रमेन्दुपातासक्तक्षराभ्यां स्थित्यर्धमाद्यं स्फुटमन्त्यमं च" । "स्पष्टार्थम् । अत्र स्पर्शकालभवयरेण कोटिक्रमेण कर्म कार्यम् । एवं स्थित्यर्द्धमक्रमत् स्फुटं भवतीति सुगमा वासना" प्रमिताक्षरा ।

"इदानीमेवं विमर्दार्धमपीत्यतिदिशति । "एवं विमर्दार्द्धं फलोनयुक्तपातचन्द्रार्द्धवसायकाभ्याम् । पृथक् पृथक् पूर्ववदेव सिद्धे स्फुटे स्त आद्यान्त्यविमर्दखण्डे" शि० स्पष्टार्थम् । इदानीमिष्टकाले भुज्यानयनमाह ।

"स्पर्शोपगतः स्पार्शिकमिष्टसूक्तं प्राङ्मोक्षतो मौक्षिकमत्र पूर्वे । शेषेण निघ्नः स्थितिखण्डकेन भक्तान्तरांशा भुज इष्टकाले । एवं विमर्दार्द्धकृतः पृथक् ते संमीलनोन्मीलनयोर्भुजौ स्तः" शि० । पूर्वार्द्धं स्पष्टार्थम् । इष्टोनेन स्थितिखण्डेन गुणिता भुक्त्यन्तरभागाः कलात्मको भुजो भवति । एवं त एव भुक्त्यन्तरांशाः प्रथमविमर्दार्द्धगुणाः संमीलनभुजो भवति । द्वितीयगुणास्तदोन्मीलनम् । अत्रोपपत्तिः । इष्टकाले यत्र चाक्षकविम्बमध्यचिह्नं यत्र च मध्यग्रहाभिमुखं तयोरन्तरं चाक्षकमार्गखण्डं भुज इष्टोच्यते । तस्यानयनं त्रैराशिकेन । यदि घटीषष्ट्या भुक्त्यन्तरकला लभ्यन्ते तदेष्टोनस्थितिदलेन किमिति । अत्र गुणकभाजकयोः षष्ट्यापवर्त्तने कृते जाता भुक्त्यन्तरांशा गुणकस्थाने । हरस्थाने रूपम्१ । एवं विमर्दार्धाभ्यां विमर्दभुजौ" प्रमि०

इदानीं कर्णार्थमाह । "कोटिश्च तत्कालनरोऽथ कोटीदोर्वर्गयोगस्य पदं श्रुतिः स्यात् । मानैक्यखण्डं श्रुतिवर्जितं सद्गुणासप्रमाणं भवतीष्टकाले" शि० । "इष्टकाले यावान् नरः सा तत्र कोटिः । कोटिभुजवर्गयोगपदं कर्णः । कर्णोनं मानैक्यार्धमिष्टकाले घासप्रमाणं भवति । अत्रोपपत्तिः । भुजोऽत्र क्रान्तिदृत्ते प्राच्यपरस्वाद्दृग्ज्यायोर्नरः कोटिः । तद्वर्गयोगपदं कर्ण इत्युचितम् । कर्णो नाम बिम्बमध्ययोरन्तरम् । स यावता मानैक्यार्धोनो भवति तावद्गुणाक्षकबिम्बं ग्रास्ये प्रविष्टम् । अतस्तावानिष्टकाले ग्रास इत्युपपन्नम्" प्रमि०।

इदानीं ग्रासात् तत्कालज्ञानमाह । "ग्रासोनमानैक्यदलस्य वर्गाद्विलिप्तालवरहितात् पदं यत् । गत्यन्तरांशैर्विहृतं फलोनं स्थित्यर्धकं स्वं भवतीष्टकालः । तत्कालयोगेन हृतः स्फुटोऽर्कः पक्षेऽन्यथा वा परिलेखतोऽभ्रम्" शि० । इष्टग्रासेनोनस्य मानैक्यार्धस्य वर्गात् तत्कालविक्षेपवर्गोनान्मूलं गत्यन्तरांशैर्विभजेत् । फलेन स्पर्शस्थित्यर्धं हीनं यदि स्पार्शिको घासः । यदि मौक्षिकस्तदा मौक्षिकं हीनम् । शेषमिष्टकालो भवति । स च स्थूलः । अथ तत्कालनरेण च आनीयते स सूक्ष्मासन्नः । एवमक्रमत् स्फुटः स्यात् । अस्मिन्नष्टकालभग्ने परिलेखादेव वक्ष्ये । अतोपपत्तिर्विलोमगणितेन, ग्रासोनमानैक्यार्द्धं कर्णस्तत्कालनरः कोटिस्तद्वर्गान्तरपदं भुजः । स गत्यन्तरांशैर्विहृतः फलमिष्टकालस्य मध्यग्रहस्य च सावनान्तरगतः स्वस्थित्यर्द्धोच्छोधितमिष्टमुपपन्नम्" प्रमि० ।

इदानीं स्पर्शादिव्यवस्थितिमाह । "मध्यग्रहः पर्वविरामकाले प्राक् प्रग्रहोऽस्मात् परतश्च मुक्तिः । स्थित्यर्द्धनाड्यश्च मर्दजास्तु संमीलनोन्मीलनके तथैव" शि० । स्पष्टार्थम् । इदानीं वलनानयनमाह । "खाङ्का ६० हृतं स्वद्युदलेन भक्तं स्पर्शादिकालोत्थनतं लवाः स्युः । तेषां क्रमज्या पलभाग्निनाग्नौ भक्ता द्युमौर्व्या यदवाप्तचापम् । प्रजायते प्रागपरे नते क्रमाद्दृग्यमार्धं वलनं पलोद्भवम्" शि० । "यस्मिन् काले वलनं साध्यं तस्मिन् काले या नतघटिकाप्ताः खाङ्का ६० हृतास्तद्रूपक्षे रात्रार्द्धेन भक्ता अर्कपक्षे दिनार्द्धेन, फलमंशाः स्युः । तेषां क्रमज्याक्षज्यया गुण्या द्युजीव्या भक्ता लब्धस्य चापं पलोद्भवं वलनं जायते । प्राङ्नते सौम्यं, पश्चिमते याम्यम् । वलनानयनसूत्रक्रमज्यया कैश्चित् कृतं तद्विरासार्थमत्र क्रमज्येति विशेषणम् । न पुनरेतद्विशेषणबलादन्यत्र सर्वत्रोत्क्रमज्याः प्राप्नुवन्ति" प्रमि० ।

इदानीमायनं वलनमाह । "युतायनांशोद्भवकोटिभिञ्जिनी जिनांशमौर्व्या १३६७ गुणिता विभाजिता । द्युजीवया लब्धफलस्य कार्मुकं भवेच्छराङ्गायनदिक्कमायनम्" शि० । "पक्षस्य सायनांशस्य कोटिज्या जिनांशज्यया १३६७गुण्या द्युज्यया भक्ता फलस्य चापमायनं वलनं भवति । तच्च यस्मिन्नयने यत्रो वर्त्तते तद्दिक् भवति । अत्रोपपत्तिर्गोले" प्रमि० ।

इदानीं स्फुटवलनार्थमाह । "तयोः पलोत्थायनयोः समाशयोर्युतेर्विशुद्धेषु विभिन्नकाष्ठयोः । या भिन्नदिक्मानदलैक्यनिघ्नी त्रिज्योद्धृता तद्वलनं स्फुटं स्यात् । यैरुत्क्रमज्याविधिनैतदुक्तं सम्यक्ते गोलगतिं विदन्ति" शि० ।

"तयोः पलोद्भवायनयोर्वलनभागयोः समागयोर्योगो भिन्नागयोरन्तरं तस्य ज्या मानैक्यार्द्धगुणा त्रिज्यया भक्ता फलं स्फुटा वलनज्या भवति । यैरिदं वलनद्वयसंस्कृतक्रमज्याविधिनोक्तं सम्यङ्न ते गोलगतिं विदन्तीति गोलं परित्यज्य दिगां वलनस्योत्क्रमज्ययोर्भुजयः क्रमज्यया वेति तैः सम्यक् किमपि नावलोकितमित्यर्थः । अत्रोपपत्तिर्गोले सविस्तरा । इह समसण्डलं दृष्टः प्राची समसण्डलादिष्टे नते काले विषुवन्मण्डलप्राची यावता यतश्चलिता तावत् तद्दिक् पलोद्भवं वलनं ज्ञेयम् । अथ विषुवन्मण्डलात् क्रान्तिवृत्तप्राची यावता यतश्चलिता तदायनं तद्दिक् ज्ञेयम् । तयोर्योगवियोगात् स्फुटमिति । समसण्डलात् क्रान्तिमण्डलप्राची यावता यतश्चलिता तत् स्फुटमित्यर्थः । एवं त्रिज्यापरिणतं तदक्षानुपातेन मानैक्यार्द्धपरिणतं कृतम् । यतोऽत्र मानैक्यार्द्धवृत्ते वलनं देयम्" इति० । इदानीमङ्कुलक्रियार्थमाह ।

"त्रिज्योद्भूतस्तत्समयोत्यशङ्कुः सार्द्धद्विघ्न२,३० युक्तोऽङ्कुलिप्रिकाः स्युः । स्थूलाः सुखार्थं द्युदलेन भक्तं सप्तघ्नं सार्धयमा२,३०न्वितं वा"ग्रि० । "मध्यपङ्क्तयक्षजे पङ्क्तिस्त्रिप्रश्रोक्ता शङ्कुः साध्यः । स शङ्कुस्त्रिज्यया भक्तः । फलं सार्धत्रियुक्तमङ्कुलिप्रिका भवन्ति । अथवोद्गतघटिका पङ्क्तिस्थ दिनार्द्धघटीभिर्भक्ताः फलं सार्धत्रियुक्तं सुखार्थं स्थूला अङ्कुलिप्रिका भवन्ति । अत्रोपपत्तिः । गगनमध्यस्थं यद्भपङ्क्तिबिम्बं तस्य निखिलकरनिकरक्षिप्तपरिधित्वात् किञ्चिन्न्यूनं दृश्यते । अथोदये क्षितिजस्थं भूव्यवच्छिन्नतत्करनिकरविशालमिव प्रतिभाति । तत् स्फुटमतं त्रिज्यालग्नं चोपलब्ध्या बुद्धिमद्भिः कल्पितम् । तच्च गगनमध्ये सार्धत्रिकलं २,३० । उदये सार्द्धत्रिकलं २,३० अङ्कुलं कल्पितम् । अवान्तरेऽनुपातेन । यदि त्रिज्यातुल्ये शङ्कावङ्कुलिप्रान्तरं रूपं १ लभ्यते तदेष्टेन किमिति फलं सार्धत्रियुक्तमङ्कुलिप्रिकाः स्युरित्युपपन्नम् । अथवा स्थूलोऽनुपातः । यदा दिनार्धतुल्याभिरुन्नतघटिकाभी रूपं १ लभ्यते तदेष्टाभिः किमिति"प्रभि० ।

इदानीं वलनादीनामङ्गीकरणमाह "आभिर्विभक्ता वलनेषुबिम्बदोष्कलिप्राः स्युरथाङ्गुलानि । धरा यथाग्रा पङ्क्तेः धरांशोस्तद्भपङ्क्तेः व्यस्तदिग्स्तु वेद्याः" ग्रि० । आभिरङ्गुलकलाभिर्वलनविक्षेपबिम्बच्छन्नभुजकोटिकर्णा भाज्याः । फलान्यङ्गुलानि भवन्ति । इह रविपङ्क्तेः धरा यथागतदिग् यत्र । चन्द्रपङ्क्तेस्तु व्यस्तदिशो ज्ञातव्याः । अत्रोपपत्तिः अङ्कुलकरणे तु कथितैव । धरायै हि चन्द्रः, धरमूले भूभाऽतश्चन्द्रविक्षेपादन्यदिशि भूभा वर्त्तते । तत्स्थानज्ञानार्थं चन्द्रपङ्क्तेः व्यस्तदिशः धरा वेद्या इत्युपपन्नम्" प्रभि० । इदानीं परिलेखमाह ।

"प्राग्वार्धसूत्रेण विधाय वृत्तं मानैक्यखण्डेन च साधितायम् । बाह्योत्तवृत्ते वलनं त्यजावत् प्राक्चिह्नतः स्वर्गभवं हिमांशोः । सव्यापसव्यं खलु याम्यसौम्यं नीत्वा तथा पश्चिमतश्च देयम् । परिपश्चे पश्चिमपूर्वतश्च विक्षेपदिक्चिह्नित एव साध्यम् । सूत्राणि कोन्द्राहवलाग्रसङ्गान्यङ्कग्राम्यतः स्वर्गविसृष्टिमध्यगासाः क्रमेणैवमिहावगम्याः"गि० । "सपायामवृत्तं प्राग्वार्धप्रमाणेन सूत्रेणेष्टस्थानकल्पितविन्दोर्भूपं लिखित्वा तत्राद्देयविन्दोर्मानैक्यखण्डप्रमाणेन सूत्रेणाग्रवृत्तं कृत्वा तस्य विन्दोरुपरि प्राच्यपरं याम्योत्तरं च सूत्रं खटिकाद्या रजसोक्ताद्य रेखे कार्ये । अथ मानैक्यार्धवृत्ते वलनं देयम् । तत्र चन्द्रस्य क्रान्तिकं प्राचीचिह्नतो, भौक्तिकं प्रतीचीचिह्नतः । रवेस्तु क्रान्तिकं प्रतीचीचिह्नतोभौक्तिकं प्राचीचिह्नतः । अथ सव्यवलनं यदि विक्षेपो दक्षिणतो देयस्तदा दक्षिणचिह्नाद्यदोत्तरखदोत्तरचिह्नात् । तत्र कथं देयमित्याह । सव्यापसव्यं याम्यसौम्यमिति । यदि याम्यवलनं तदा सव्यक्रमेण प्राचीचिह्नाद्याम्यं, दक्षिणचिह्नात् पश्चिमं, पश्चिमचिह्नादुत्तरखदोत्तरचिह्नात् पूर्व्वमिति सव्यम् । इतोऽन्यथापसव्यम् । तच्च वलनं त्यजावद्देयं न धनुर्वत् । एवं वलनानि दत्त्वा कोन्द्राहवलाग्रगतानि सूत्राण्यङ्कग्राणि । अथ स्वर्गवलनाग्रात् क्रान्तिकौ भौक्तवलनाग्रान्भौक्तिको विक्षेपो देयः । स च त्यजावत् । अथ सर्व्वे विक्षेपः कोन्द्राहवलनसूत्रे देयः । तेभ्यः धरागृहिक्षेभ्यो गृहकार्धप्रमाणेन सूत्रेण दत्ताग्रात्पाद्य स्वर्गविसृष्टिमध्यगासाः वेदितव्याः अत्र वासना । मानैक्यार्धवृत्ते याम्यवृत्तस्य मध्यं यदा भवति तदा याम्यक्रान्तिकयोर्बिम्बप्रान्तौ संलग्नौ भवतोऽतो मानैक्यार्धवृत्तं यद्भिलिखितं तत्र दिगङ्कितं तत्र या प्राची सा समसण्डलप्राची ततस्तस्यां वलने दत्ते या कोन्द्राहवलाग्रगा रेखा सा क्रान्तिवृत्तप्राची । एवं सर्व्वदिग्वां वलनम् । अथ वलनसूत्राग्र्याग्रहिक्षेपः । यतः क्रान्तिवृत्तप्राच्या विक्षेपो याम्योत्तरः । एवं स्वर्गभौक्तयोः किञ्च । अथ

मध्याग्रयोः केन्द्राहलनसूत्रेऽतो दत्तो यतो मध्यवलनं नाम तत्कालक्रान्तिदत्तप्राच्या याम्योत्तरा दिक्। विक्षेपाग्रे याक्रकदत्तमध्यमतस्तत्र क्रतैर्दत्तैः स्वर्गोन्नतमध्या भवन्तीत्युपपन्नम्" प्रमि०।

इदानीं निमीलनोन्मीलनेष्टघाताधपरिलेखमाह। "केन्द्राङ्गुलं खे वलनस्य क्षते यरं भुजाप्राक्पश्चिमं च केन्द्रात्। प्रसार्य कोटिस्थितियोगचिह्नादृष्टे क्षते याक्रकखण्डकेन। संमीलनोन्मीलनकेष्टकालघासाश्च वेद्या यदि वाल्पघाऽभी"ति०। "संमीलनकाले वलनमानीय तत् प्राक्चिह्नतः प्राग्वद्दत्त्वा केन्द्राहलनाग्रगां रेखां कृत्वा तस्यां रेखायां केन्द्रात् पूर्वतो भुजो देयः। भुजाग्रात् तत्कालधरप्रमाणां शलाकां तथा केन्द्रात् कर्णमितां च प्रसार्य शलाकाग्रयोर्यत्स्थितिचिह्नादृष्टाक्रार्द्धेन दत्तं विलिख्य संमीलनस्थानं ज्ञेयम्। उन्मीलनवलनं पश्चिमतो दत्त्वोन्मीलनस्थानं ज्ञेयम्। एवमेव तत्कालवलनमिष्टघटीभिर्भक्तं प्राक् पश्चिमतो वा दत्त्वोक्तवद्दृष्टघाताग्रे ज्ञेयः। यदि वाल्पघाऽभी दृष्टघाग्रे सम्बन्ध। अत्रोपपत्तिः। भुजो हि याक्रकमार्गखण्डम् तत्र यरः कोटिस्थितिगतोपपदं कर्णः। कर्णाद्दृग्याक्रकवित्रे लिखिते संमीलनादिकं भवतीति युक्तमुक्तम्। वस्तु याक्रवित्रमध्याद्वलनसूत्रं भुजो दत्तत्वात् कथं भुजो याक्रकमार्गखण्डमित्युच्यते सत्यम् यत्र तुल्यचिह्नलकोटिकर्णैक्यप्रसक्तिरुपपद्यते तदत्यल्पमन्तरमत्रादरार्हं स्यात्। तदत्र भुजाग्राद्विक्षेपः कोटिः। एवं भुजमूलादपि। विक्षेपमूलयोरन्तरं तावान् भुजस्य तु विक्षेपाग्रयोरपि। अतोयाक्रकमार्गखण्डं भुज इत्युच्यते तदुदितम्" प्रमि०।

इदानीमन्यथा मध्यलग्नादिपरिलेखमाह। "वे सूर्यसूक्ष्मोर्विधिस्थापचिह्ने लग्नां पृथग्मध्यरागुयाते। रेखे किल प्रगृहनोन्नतमार्गौ तयोश्च माने विगण्यश्च वेद्यौ। विश्वान्तरार्द्धेन विधाय दत्तं केन्द्रेऽथ तन्मार्गयुतिद्वयेऽपि। भूभार्द्धसूत्रेण विधाय दत्ते संमीलनोन्मीलने च वेद्ये" ति०। सूर्यग्रराग्रान्मध्यग्ररागुयाता रेखा कार्या। स प्रगृहनमार्गो ज्ञेयः। अथ मध्यग्ररागान्नतिग्ररागुगा पृथगन्या रेखा कार्या। स सूक्ष्मार्गो ज्ञेयः। तयोर्मार्गयोः प्रमाणे शङ्कुशलाकया चित्वा पृथगनते स्याताम्। अथ विश्वान्तरार्धप्रमाणेन सूत्रेण केन्द्रे दत्तत्वात् तत्र दत्तस्य मार्गद्वयेन यो योगो तन्मार्गयोगद्वयचिह्नात् भूभार्धसूत्रेण दत्ते विधाय संमीलनोन्मीलने ज्ञातव्ये। अत्रोपपत्तिः। स्वमार्गेणागच्छतो गृहकमध्यस्य यत्र भागान्तरार्धतुल्यः कर्णो भवति तत्रस्थे तस्मिन् गृहके संमीलनसन्नीलनं च यत उत्पद्यते ततो विश्वान्तरार्धेन दत्तं विलिख्य ते स्थाने ज्ञातव्ये"प्रमि०।

इदानीमिष्टग्रासार्थमाह। "मार्गाङ्गुलघ्नं स्थितिखण्डभक्तमिष्टं स्युरिष्टाङ्गुलसंज्ञकानि। इष्टाङ्गुलानीष्टवशात् स्वमार्गे दत्त्वात्र च याक्रकखण्डदत्तम्। क्रान्त्येष्टखण्डं यदि वाऽवगम्यं स्थूलः सुखार्थं परिलेख एवम्"ति०। "इष्टमितेष्टकालो घटिकादिरनेष्टस्थापितैर्मार्गाङ्गुलैर्गुणः स्वस्थित्यर्द्धघटीभिर्भाजितः फलमिष्टाङ्गुलानि भवन्ति। तानीष्टाङ्गुलानि स्वमार्गे दत्त्वा। कथमिति चेत् इष्टवशात्। यदि स्वार्कादयत इष्टं कल्पितं तदा सूर्यग्ररागादयत इष्टाङ्गुलानि देयानि यदि मध्यात् पूर्वत इष्टं तदा मध्यग्ररागात् पूर्वतो देयानि। एवं सूक्ष्मार्गेऽपीष्टवशादिष्टाङ्गुलाग्रे याक्रकवित्रार्द्धेन दत्तं विलिख्येष्टग्रासो ज्ञेयः। एवं वा स्थूलः सुखार्थं परिलेखः। अत्रोपपत्तिस्त्रैराशिकेन। यदि स्थित्यर्द्धघटीभिर्मार्गाङ्गुलानि लभ्यन्ते तदेष्टघटीभिः किमिति फलमिष्टाङ्गुलानि। तदग्रे याक्रकवित्रमध्यमित्यर्थः। तत्र याक्रकार्द्धेन दत्ते कृते इष्टग्रासो भवतीति किं चित्रम्" प्रमि०। इदानीं ग्रासात् कालानयनं परिलेखेनैवाह॥ "ग्रासोनमार्केक्यदलेन केन्द्रे वृत्तात् कृतान्मार्गदले बहिर्द्वौ। ते संगुणे स्वस्थितिखण्डकेन मार्गाङ्गुलाग्रे पृथगङ्कितौ वा" ति०। "मार्केक्यार्द्धेन ग्रासोनेन केन्द्रे वृत्तं लिखेत्। तस्मादुदक्पश्चाद्बहिर्थे मार्गखण्डे भवतस्ते स्वस्थितिखण्डकेन गुणिते स्वमार्गाङ्गुलैर्भाजिते। फलं स्वार्कादयत इष्टकालो भवति। मोक्षात् पृष्ठतश्च। अत्रोपपत्तिः। ग्रासोनमार्केक्यदलमिष्टकाले गृहकृग्रःकविम्बमध्ययोरन्तरं कर्णः तुल्यः। इदं पूर्वमेव कथितम्। तेन कर्णेन केन्द्रे वृत्तात् कृतार्द्धे मार्गखण्डे बहिर्भवतस्ताभ्यामङ्कितत्वात्। यदि मार्गाङ्गुलैः स्थित्यर्द्धघटिका लभ्यन्ते तदा बहिर्भूतखण्डाङ्गुलैः किमिति फलमिष्टकालघटिति"प्रमि०।

इदानीं गृहके वर्णमाह। "खस्थे रवौ भूभवर्णः सुधांशोरर्के कृष्णः कृष्णरक्तोऽधिकेऽर्कात्। खवेऽस्ते वर्णः पिशङ्गो भानोश्चन्द्रे सर्वदा कृष्ण एव" ति०।

इदानीमादेश्यानादेश्यानाह।

"इन्दोर्भानोः शोकृतः कृष्णतोऽपि तेजःपुञ्जत्वभावाच्च शुक्लः। तेजस्वित्वात् तीक्ष्णभोद्दीप्तभावो नादेश्योऽतोऽसौ

गृहो बुद्धिमद्भिः" शि० स्पष्टार्थम् इति चन्द्रग्रहणाधिकारः।

अथ सूर्यग्रहणाधिकार तत्रादौ नतिप्रयोजनोक्तिः। "दर्शान्तकालेऽपि समौ रवीन्दू दृष्टा नतौ येन विभिन्नकक्षौ। अधोऽस्थितः पश्यति नैकसूत्रे तल्लम्बनं तेन नतिं वदन्ति" शि०। "अमावास्यान्तकाले समकक्षावपि चन्द्रार्कौ नतौ खार्धादन्यत्र यतस्ततोऽपि वा स्थितौ भूव्यर्द्धनोच्छ्रितौ दृष्टैकसूत्रे न पश्यति। येन कारणेन तौ विभिन्नकक्षौ। चन्द्रस्य कक्षा लघ्वी अर्कस्य महती। यथा चन्द्रग्रहणे यैव चन्द्रस्य कक्षा सैव भूभाया अपि तत्र तिष्ठन्ते समौ भूभेन्दू नतावपि कुर्द्वोच्छ्रितोऽपि दृष्टैकसूत्रे पश्यति तथार्कपर्वणेऽर्केन्दू न पश्यति भिन्नकक्षत्वात्। तेन कारणेन तल्लम्बनाख्यमन्तरं नत्याख्यं च वक्ष्मि" इति०।

इदानीं लम्बनस्याभावाभावं धनर्णत्वं च कथयति। "दर्शान्तलग्नं प्रथमं विधाय न लम्बनं विलिभलग्नतुल्ये। रवौ तदूनेऽभ्यधिके च तत् स्यादेवं धनर्णं क्रमतश्च वेद्यम्" शि० "अत्र लम्बनं ज्ञातुं दर्शान्तकाले लग्नं विधाय तत् लिभोनं कार्यम्। तेन लिभोनेन लग्नेन समे रवौ लम्बनं नास्ति। ऊनेऽभ्यधिके च स्यादिति वेदितव्यम्। तथा विलिभलग्नाद्ऊने रवौ यल्लम्बनमुपपद्यते तद्धनसंज्ञं वेदितव्यम्। तिथ्यन्तघटिकासु योज्यमित्यर्थः। यदधिके तदृणं तिथ्यन्तघटिकाभ्यः शोध्यमित्यर्थः। अथ लम्बनस्योपपत्तिस्तावदुच्यते। दृक्तुल्ये सममण्डलयाम्योत्तरकोणवृत्तानामल्पान्तरेण परिकरवद्दृक्सूत्रं निबध्यते ततः क्षितिजम्। तत्रस्थः पुरुषो भूगर्भस्थो दृष्टा पश्यति। भूपृष्ठस्थस्तु भूव्यासं ततः क्षितिजमपि न पश्यति। किन्तु भूव्यर्द्धयोजनैस्तत्क्षात् क्षितिजादुपरि समगादन्यत् क्षितिजं स मन्यते। यतस्तस्मादूर्ध्वं स पश्यति। तदधः क्षितिजं दृक्सूत्रावलम्बितं न पश्यति अतो दृक्तुल्यायां दृङ्मण्डले तेषां योजनानां संबन्धिन्योया लिप्तास्ताः कुक्षलिप्ता एव परमलम्बनलिप्ताः परमावनतिलिप्ताश्च। तास्तु गृहभूक्षिप्तद्वयांशतुल्या भवन्ति। यतो गतियोजनानां पञ्चदशांशो भूव्यासार्द्धम्। यदा किल क्षितिजस्थस्तदा कुक्षलिप्ताभिर्नतत्वं गतः। अथ यदा समध्यस्थो रविस्तदा तं भूगर्भस्थो दृष्टा भूपृष्टस्थोऽपि समध्यस्थमेव पश्यति। न कुतोऽपि नतमतस्तत्र लम्बनाभावः। क्षितिजे तु कुक्षलिप्तासंख्यं परमं लम्बनम् अतो ज्ञातं खार्धान्तरे पञ्चे लम्बनदृत्पद्यते। एवं चन्द्रस्यापि। दर्शान्ते चन्द्रलम्बनलिप्याभ्योर्कलम्बनलिप्यास्तु गुणाश्च शेषं रविदृक्तुल्यखार्धचन्द्रस्य परमा लम्बलिप्याः। अथ यदा दृङ्मण्डलाकारं क्रान्तिवृत्तं भवति तदा परमलम्बनलिप्यानां घटीकरणायानुपातः। यदि गत्यन्तरकलाभिर्घटीपर्त्तिर्लभ्यते तदा गत्यन्तरदृग्मण्डलतुल्याभिः किमिति। फलं घटिकाचतुष्टयं परमं लम्बनम्। अतो घटिकाचतुष्टयानुपातेन लम्बनं साधयितुं युज्यते परं यदि दृङ्मण्डलाकारं क्रान्तिवृत्तम्। यदा तदपि तिरश्चीनं तदानुपातद्वयेन। लम्बनं हि दृङ्मण्डलसूत्रेणोत्पद्यते तच्च मध्यमं लम्बनम्। तत् किल कर्णरूपम्। ततः क्रान्तिवृत्तप्राचीपरिगतं कोटिरूपं स्फुटं भवति। यदा दृङ्मण्डलमेव क्रान्तिवृत्तं तदा तदेव स्फुटम्। यतः क्रान्तिवृत्तप्राच्यपरया लम्बनस्य स्फुटत्वम्। अतः क्रान्तिवृत्तस्य परमनीचस्थाने लम्बनस्य परमत्वम्। परमोच्चस्थाने लम्बनाभावः। तच्च तस्य परमोच्चत्वं विलिभलग्ने भवति। यदा विलिभं खमध्ये भवति तदा तच्छङ्कुच्छायातुल्याः स्यात्। तदा मध्यमेव स्फुटं लम्बनम्। यदा तद्विलिभं खमध्यागतं भवति तदा तच्छङ्कुच्छायातो न्यूनो भवति तदा मध्यमलम्बनात् स्फुटं लम्बनं कोटिरूपकरणेन तदल्पतां याति। अतो विलिभलग्नयङ्कोरपचयवशेन लम्बनस्यापचयः। अतो विलिभलग्नयङ्कुना मध्यमलम्बनस्य स्फुटत्वकरणेऽनुपातः कर्तुं युज्यते" प्र०मि०।

अनुमेवार्थं संप्रधार्यानुपातद्वयेन लम्बनमाह। "लिभोनलग्नं तरणिं प्रकल्प्य तल्लग्नयोर्यः समयोऽन्तरेऽसौ। लिभोनलग्नस्य भवेद्द्युयातः यङ्कुद्यतस्तस्य चरान्तरार्द्धैः। लिभोनलग्नार्कविशेषघट्यिङ्किनी कृताहता व्यासदलेन भाजिता। हृतात् फलाद्विलिभलग्नयङ्कुना लिप्तीकृतात्प्राग्घटिकादि लम्बनम्" शि०मि०। "दर्शान्तकाले लग्नं विधाय तदनष्टं विलिभं च कृत्वा तयोर्विलिभस्य भोग्यं लग्नस्य भक्तमन्तरोदयगुणं विलिभस्योदितः कालो भवति। तेन कालेन विलिभलग्नजनितकुजाद्युज्यान्यादिभिस्त्रिप्रश्नोक्त्या यङ्कुः साध्यः। यङ्कोश्च दृग्ज्या तच्छायाकर्णश्च साध्यः। अथ लिभोनलग्नार्द्धयोरन्तरस्य ज्या साध्या। अथ तया लम्बनार्थमनुपातः। यदि त्रिज्यातुल्यया विलिभलग्नार्कान्तरज्यया चरतो घटिका लम्बनं तदानयाभीष्टया किमिति फलं मध्यमलम्बनम्। अतस्तत्स्फुटीकरणार्थं द्वितीयोऽनुपातः। यदि त्रिज्यातुल्यविलिभलग्नयङ्कावेतावल्लम्बनं लभ्यते तदा

क्षिप्तलग्नरात्रीते किमित्येवं लम्बनं स्फुटं भवति"मभि०।

इदानीं प्रकारान्तरेण स्फुटीकरणमाह। "फलाद्रवि १२ घ्नात् त्रिभज्ञोनलग्नकर्णेन लब्धं खलु लम्बनं वा" सि० शि०। "मध्यलम्बनात् द्वादशगुणाद्विभिभलग्नसंभूतच्छायाकर्णेन भक्तादृग्ज्यालब्धं तद्वा स्फुटं लम्बनं भवति। अत्रोपपत्तिस्त्रैराशिकेन। तत्र विभिभलग्नभुजोद्दांद्यार्केण विभिभलग्नभुज्ज्या चापवर्जिता जाता गुणकस्थाने द्वादश १२ फलस्थाने विभिभलग्नकर्ण इत्युपपन्नम्" मभि०।

इदानीं प्रकारान्तरेण लम्बनमाह। "त्रिभोनलग्नस्य रवेश्च भुजक्रोर्वा दृग्ज्यायोर्वर्गवियोगमूलम्। स्वाहतिर्वेद ४ गुणा त्रिभौव्यां भक्तावधा लम्बनाड़िकाः स्युः" सि० शि०। "त्रिभोनलग्नस्य यः भुजः साधितस्तथा दृक्क्षेपः रवेः ओपकर्णयोः भुजत्पद्यते तावन्तौ स्थापयित्वा तयोः दृग्ज्ये साध्ये। अथ तयोः भुजक्रोर्यद्दृग्ज्यान्तरपदं तद्दक्क्षिप्तं भवति। प्रथमप्रकारोऽयम्। अथ दक्क्षेपतृतीयः प्रकारः। तत्रोर्दृग्ज्यायोर्वर्गान्तरपदं दक्क्षेपतिभक्तं भवति। अथ दक्क्षेपतुल्यमुच्यते। दक्क्षेपतिचतुर्गुणा त्रिज्यया भक्ता फलं लम्बनाड़िकाः स्युः अत्रोपपत्तिः सैव। यदा विभिभलग्नं खमध्ये भवति तदा दक्क्षेपमण्डलमेव क्रान्तिवृत्तम्। त्रिभोनलग्नार्कयोर्यान्तरज्या सैव तदार्कस्य दृग्ज्या। सा चतुर्गुणा त्रिज्यायाम्ना मध्यम् किल लम्बनं भवति। तदेव स्फुटम् अर्ध्वस्थितत्वात् क्रान्तिवृत्तस्य। अथ यदा विभिभलग्नं खार्धोनतम् तिर्यक्स्थितत्वात् क्रान्तिवृत्तस्य तदा तत् प्राच्यपरया स्फुटं लम्बनं कोटिरूपं भवति। तत्र विभिभलग्नभुजक्रुत्पातेन तथा स्फुटं कोटिरूपं कृतम्। तत् कथमिति चेत् तदुच्यते। मध्यलम्बनानयने त्रिज्यैव विभिभलग्नभुजः ततः स्फुटत्वार्थं यः साधितो विभिभलग्नभुजः स दक्क्षेपमण्डले स्फुटदृग्ज्या भुजस्त्रिज्या कर्णः। विभिभलग्नस्य यद्भुजमण्डलमिति गोले पठितम्। अतस्त्रिज्यापरिणतया नतज्यया यदानीतं तज्जातं कर्णरूपं तत् कोटिरूपस्य विभिभलग्नभुजक्रुत्पातेन कोटित्वं नीतमित्युपपन्नम्। यदेव स्फुटलम्बनस्य कोटिरूपत्वमुपपन्नं तदेव प्रकारान्तरेणोपपादितम्। रवेर्दक्क्षेपमण्डले दृग्ज्या सा कर्णरूपिणी। विभिभलग्नस्य या दृग्ज्या स एव दक्क्षेपः स भुजरूपः। यतः क्रान्तिमण्डलप्राच्याः सम्यग्दक्षिणोत्तरं खार्धाद्विभिभलग्नोपरिगतं दक्क्षेपमण्डलम्। तत्र विभिभलग्नस्य या दृग्ज्या स दक्क्षेपः। तज्ज्ञानिना नतिकलासन्द्रार्ककलयोर्याम्योत्तरमन्तरं सर्वत्र तुल्यमेव दृष्ट्वा पठति। यथोक्तं गोले। "कलयोरन्तरं यत् खार्द्विभे सर्वतोऽपि तत्। नतिलिप्ता भुजः कर्णो दृग्लम्बनकलाक्षयोः। अन्तरपदं कोटिः स्फुटलम्बनलिप्तिकाः" शि०। यत् इदं लम्बनज्ञेतुमतो दक्क्षेपार्कदृग्ज्ययोर्वर्गान्तरपदतुल्या दृङ्नतिर्विलुप्तमर्हति। परं यथा स्थिते गोले क्षेत्रोपरीयं न दृश्यते। यतो विभिभलग्नार्कयोरन्तरज्या विभिभलग्नभुज्यासार्द्धपरिणता सती दृङ्नतिर्भवति। अत एवानेनापि प्रकारेण क्षितिजस्थेऽर्के परमा दृङ्नतिर्विभिभलग्नभुजतुल्या भवति। अतोऽयमपि प्रकारः पूर्वतुल्य एव। किन्तु दक्क्षेपार्कदृग्ज्ययोस्तुल्ये यत्रके भुजकर्णरूपे समायां भूमौ विन्यस्य तदन्तरे कोटिरूपां दृङ्नतिं दर्शयेत्। एवमने कविधान्युपपत्त्यनुसारेण क्षेत्राणि परिकल्प्य श्लोकमीपत्कारमार्याः कुर्वते। अथ प्रस्तुतमुच्यते। अत्र किल विभिभलग्नस्य रवेश्च दृग्ज्ययोर्यद्वर्गान्तरपदं तावदेव तच्छङ्कोरपि भवति। तत् कथमिति चेत् तदुच्यते। अत्र खस्वस्तिकयोर्वर्गयोर्नौ त्रिज्यावर्गौ दृग्ज्यावर्गौ भवतः। तयोरन्तरे कृते त्रिज्यावर्गयोस्तुल्यत्वाच्छङ्कुवर्गान्तरमेवावशिष्यते। एवं यत्र कुत्रचिद्दासार्द्धेऽपि भुजज्ययोर्वर्गान्तरतुल्यं तत्कोटिज्ययोर्वर्गान्तरं भवतीति। अत उक्तं त्रिभोनलग्नस्य रवेश्च भुजक्रोर्वा दृग्ज्ययोरिति"। दक्क्षेपतत्क्षितिजानुपातेन लम्बनस्य घटीकरणम्" मभि०।

इदानीं प्रकारान्तरेण लम्बनमाह। "भुजक्रोत्क्रमयोर्द्विगुणयोस्तयोर्वा त्रिज्याचतुर्घ्नीयविभक्तयोः स्यात्। यद्वर्गविश्लेषपदं द्विधैवं विलम्बनं तद्घटिकादिकं वा" सि०शि०।

"तयोरनन्तरकथितयोर्विभिभलग्नार्कभुजक्रोत्क्षिप्तज्याचतुर्घ्नीयेनापवर्त्तितयोर्यद्वर्गान्तरपदं तल्लम्बनं वा भवति। अथ तयोः भुजक्रोर्ये दृग्ज्ये तयोस्त्रिज्याचतुर्घ्नीयभक्तवर्गान्तरपदं वा लम्बनं भवति। अत्रोपपत्तिः। अत्र निरक्षायां दृङ्नतेः कोटिरूपायाः घटीचतुष्टयेन त्रिज्यया चानुपातः। स तदुपकरणभूतयोः भुजक्रोस्तद्दृग्ज्ययोर्वा क्रियालाघवार्थं यदि क्रियते तदा घटिकात्मिकैव दृङ्नतिरुत्पद्यते। तदेव लम्बनम्। अतस्तथा कृते लाघवमत्र प्रकारद्वयम्" मभि०।

लम्बनप्रयोजनमाह । "तत्संस्कृतः पर्वविराम एवं स्फुटोऽक्षज्ञ स चक्रमध्यकालः" सि०शि० । "एवं यद्दर्शान्तकाले लम्बनसंस्कृतं तद्विभलग्नादूनेऽर्के धनमतो दर्शान्तघटिकासु शोध्यम् । यदि विभिभादधिकेऽर्के जातं तदृणं दर्शान्तघटीष्वः शोध्यम् । एवमक्षज्ञलम्बनसंस्कृताद्दर्शान्तकालाल्लम्बनानीय विभिं च ज्ञात्वोक्तप्रकारेण लम्बनं साध्यम् । तेन शशिनागतो दर्शान्तः पुनः संस्कार्यः । एवं सकृदावृत्तिविशेषः । एवं संस्कृतो दर्शान्तो यक्ष्यमध्यकालो भवति । अत्रोपपत्तिः । अत्र चन्द्रकक्षाया आसन्नत्वाद्रविकक्षाया दूरत्वात् कुर्वोश्चक्षुषादृष्टं रविनक्षत्रगामि यत् स्फुटं तस्मादधस्थचन्द्रोऽवस्थितो दृश्यते तल्लम्बनम् । क्रान्तिसाम्ये परमोऽस्थाने किंतु विभिभम् । तस्मादूनो यदा रविस्तदार्कादधस्थितश्चन्द्रः पृष्ठतो भवति । चन्द्रो हि शीघ्रगतिः । शीघ्रे पृष्ठगते युतिरेष्या । अतो लम्बनं तिथौ धनम् । यदा विभिभलग्नादधिकोऽर्कस्तदा चन्द्रोऽवलक्षितोऽर्कादग्रतो भवति । शीघ्रेऽग्रगे युतिर्जाता लम्बनतुल्येन कालेनातस्तस्य लम्बनस्योनम् । एवं लम्बनसंस्कृतो दर्शान्तो गृह्यणमध्यकालः स्यादिष्टमुपपन्नम् । यदि त्रिज्यातुल्यबाहुज्यया परमा भुक्तरपक्षेपज्यांघातुल्या लम्बनलिप्रा ४८ । ४६ लभ्यन्ते तदेष्टयाकेऽनया किमिति । फलं इष्टलम्बनकलाः । एवमनेनैवानुपातेन स्फुटे याते लम्बनलिप्राउत्पद्यन्ते ता अवनतिलिप्राः ता भुजरूपाः । इष्टलम्बनकलाः कर्णः तयोर्वर्गान्तरपदं स्फुटलम्बनलिप्राः । यतो दृक्तुल्यावनेऽर्कदृग्ज्या कर्णो दृक्क्षेपो भुजः । अतो दृक्क्षेपाक्षलिप्ताऽवनतिर्भुजः । स्फुटलम्बनलिप्राः कोटिः । इदमस्मिन्नर्णवे लम्बनोपपत्तौ कथितम् । तद्यथा । "यतः कुर्वोश्चिह्नतो दृष्टा चन्द्रं पश्यति लम्बितम् । साध्यते कुदवेनातो लम्बनं च नतिस्तथा । इष्टापवर्तितां पृथ्वीं कक्षे च यमित्तयोः । भित्तौ विलिख्य तन्मध्ये तिर्यग्रेखां तयोर्भागम् । तिर्यग्रेखायुतौ कर्ण्यां कक्षायां लिप्तिजं तथा । अर्धरेखायुतौ चार्धं दृग्ज्याचापांघ्रकर्णतौ । ज्ञात्वार्केन्दू यथास्थानं लम्बनस्य प्रदर्शयेत् । एकं भूमध्यतः स्फुटं नवेश्वरांशुमण्डलम् । दृष्टभूपृष्ठगादन्यद्दृष्टिसूत्रं तदुच्यते । कक्षायां सूत्रयोर्मध्ये यात्रा लम्बनलिप्रिका । गर्भसूत्रे यदा स्थातां चन्द्रार्कौ लम्बलिप्रिकौ । इष्टसूत्रावस्थितचन्द्रसूत्रेण तल्लम्बनं स्फुटम् । इष्टगर्भसूत्रयोरैक्यात् चक्रमेषं नाम्नि लम्बनम् । अत्र याम्योत्तरावां तु भित्तौ पूर्वोक्तमालिखेत् । ये कक्षे मण्डले ते तु खेचरे विक्षेपमण्डले । त्रिभोनलग्नदृग्ज्या वा स दृक्क्षेपो द्वयोरपि । तज्ज्यापार्श्वगतौ बिन्दू ज्ञात्वा विभिभसंस्थितौ । प्राग्वद्भुक्स्फुटतत्सन्दृविभिभस्य नतिर्मितिः । कक्षयोरन्तरं यत् स्याद्विभे सर्वतोऽपि तत् । याम्योत्तरं नतिः साऽतो दृक्क्षेपात् साध्यते ततः । यत् तत्र नतादर्कादधस्थचन्द्रावलम्बनम् । तद्दृग्वृत्तेऽन्तरं चन्द्रभान्वोः पूर्वापरं तु तत् । पूर्वापरं च याम्योदग्जातं तेनान्तरहृयम् । अत्रापमण्डलं प्राची तत्स्पर्शिदृष्टिसूत्रा । यत् पूर्वापरभावेन लम्बनाख्यं तदन्तरम् । यद्याम्योत्तरभावेन नतिसंज्ञं तदुच्यते । नतविभिन्ना भुजः कर्णो दिग्लम्बनकलास्रवोः । लम्बनान्तरपदं कोटिः स्फुटलम्बनलिप्रिकाः । परलम्बनलिप्रा ४८/४६ त्रैराशिका १४२८ प्रा रविदृग्ज्यका । इष्टलम्बनकलाभाः स्युरेवं दृक्क्षेपजीवनतिः । लम्बनान्तरस्य ७२१/२७ द्वित्र्यंशः ४८/४६ परलम्बनलिप्रिकाः गतियोजन ११८५६/४५ तिथ्यंश ७६०/२५ कुदवस्य यतो मितिः। स्फुटलम्बनकलाभाः गत्यन्तरवशोद्भवाः । प्राग्यतो रवेश्चन्द्रः पश्चात् पृष्ठेऽवलक्षितः । शीघ्रेऽग्रगे युतिर्जाता लग्ना पृष्ठगते यतः । प्राग्यं तद्धनं पश्चात् क्षिप्ते लम्बनं तिथौ । याम्योत्तरं परस्तावदन्तरं यमित्तयोः । नतिस्तथा तथा दृक्क्षात् संस्कृतः स्यात् स्फुटः परः" प्रमि० ।

इदानीं सकलप्रकारेण लम्बनमाह । "त्रिभोनलग्नस्य नरश्मिभू १२ भो दन्तै ३२ र्विभक्तः परमं लवः स्यात् । लग्नार्कयोरन्तरकोटिदोर्ज्यै र्विधाय दोर्ज्यापरबोर्विशेषात् । खखाद्युतात् कोटिगुणस्य लब्धा भूकं स्फुतिः कोटिगुणात् परस्मात् । स्फुटा भुनाब्धभुजःकलायाः स्युर्लम्बनाः सज्जनसज्ज्ञकाः" सि०शि० । "त्रिभोनलग्नस्य वः यद्भुः स त्र्युद्ध्यगुणो हार्त्रिभद्भक्तः फलं परसंज्ञं भवति । दर्शान्तकाले यद्भुजं तत्कादौ नादृभुजकोटिजे साधे तत्र दोर्ज्याबा अक्षजरामीतस्य च परस्य यो विशेषस्तत्साहगीक्षितात् कोटिज्याचर्गेण युतात्पदं स कर्णः । कोटिज्यापरबोर्घातात् तेन कर्णेन भक्तात् फलं तस्य चापे यावत्यः कलास्तावलो लम्बनाख्याः सज्जदेव भवेयुः । अत्रोपपत्तिः । यदि त्रिज्यातुल्ये १२० विभिभलग्नयष्टेः परमलम्बनज्यातुल्यगुणकेन त्रिज्या फरस्तदा त्र्युद्ध्यगुणकेन कः । फलं हार्त्रिभं यत् । तस्य परसंज्ञा कृता । अधोऽधःस्थयोरपि चन्द्रार्कयोः क्रियोपसंहारार्थमन्यथा कल्पितं लम्बनमेतत् । तत्र

तावत् परमं लम्बनमुच्यते । यतस्तो घटिकाः खिल परमं लम्बनम् । तत् तु लिप्ताद्यल्पे विलिप्तोलग्नखण्डौ । तावंशघटीनां यावन्तोऽवयवास्तावत्य एव चतुर्विंशतिभागानां कला भवन्ति । अतस्त्रिज्याग्रमभुक्तान्तेः कलानां तत्प्राप्तदा परमलम्बनासवो भवन्ति । यदा पुनर्विलिप्तलग्नखण्डस्त्रिज्यातोऽल्पो भवति तदा तज्जनितकालेः कलानां तुल्या भवन्ति । अतो विलिप्तलग्नखण्डजनिता क्रान्तिज्या तदा परमलम्बनासूनां ज्या यावतीत्यवगन्तव्यम् । अथ पूर्वापरायतायां मित्रेतरपार्श्वे निजक्रान्तिज्यातुल्यकर्कटेन इस्तां क्षितिज्यं तत्रस्थे तिर्यग्रेखामूर्ध्वरेखां च कुर्यात् । तत् खिल धन्वृत्तखण्डं कल्पयम् । तन्मध्याद्युपरि परमलम्बनाक्षज्यान्तरे भूसंस्थितं बिन्दुं कृत्वा तत्र तेनैव कर्कटेनाग्रहृत्तं विलिखेत् । तत्रस्थेऽन्यत्रा तिर्यग्रेखा कार्या । ऊर्ध्वरेखा सर्वोपरितो नेया । तत् खिलार्ककलावृत्तम् । ते वृत्ते चक्रार्धघटिकाभक्ता चाक्षज्या । ऊर्ध्वरेखायुतौ द्वयोरपि विलिप्तलग्नसंज्ञौ बिन्दू कार्यौ ततो विलिप्तलग्नार्कोन्नतभागं रविकलायां विलिप्तलग्नान्वितं रविसंज्ञकं बिन्दुं कुर्यात् । एवं चन्द्रविलिप्तालग्नचन्द्रकलायां तेनैव भागेनैतं चन्द्रबिन्दुं च । ततो भूबिन्दोः सकाशाच्चन्द्रबिन्दुपरिगतं सूत्रं प्रसार्यम् । तत् सूत्रं रविकलायां लग्नति तत्सूर्यबिन्दोरन्तरे यावत्यो घाटकाद्यावत्यस्तस्मिन् काले लम्बनघटिका ज्ञेया । एवंविधे क्षेत्रेऽस्य लम्बनस्य साधनोपपत्तिर्गुरुणोक्तफलवदुत्पद्यते । तत्र रविकलायां कलालग्नखण्डं, चन्द्रकलायां प्रतिलग्नखण्डं, परमलम्बनाक्षज्याग्रलग्नफलज्यां विलिप्तलग्नं सवडभं भोग्यं प्रकल्प्य शेषा क्रियोक्ता । एतदानयनं किञ्चित् स्फुटम्" इति० ।

अथ नतार्धभुक्तेरुदक्क्षेपसाधनम् । "इग्लग्नैव या विलिप्तलग्नयोः स एव इक्क्षेप इनस्य तावत् । सौम्येऽयने विलिप्तभेऽधिकेऽयात् सौम्योऽन्यथा दक्षिणएव ज्ञेयः । चापीकृतस्यास्य तु संस्कृतस्य तिथीनलग्नोदयरेण जीवा" गि० । "पूर्ववद्धि सुगमं प्रागेव व्याख्यातम् । सौम्यो दक्षिणो वेति ज्ञानायोच्यते । तत्र विलिप्तलग्नखण्डापने सौम्येऽयनांशेभ्योऽधिके सति सौम्यो ज्ञेयः । कुतोऽन्यथा याम्यः । अथ तस्य इक्क्षेपस्य धनुः कार्यम् । विलिप्तलग्नं चन्द्रं प्रकल्प्य समाप्ततात्कालिकचन्द्रदोर्जीवात्रैव विक्षेपः साध्यः । तेन विलिप्तलग्नविक्षेपेण तद्भुक्षेपधनुः संस्कार्यम् । एकदिशोर्योगो भिन्नदिशोरन्तरमित्यर्थः । स संस्कृतिधानुश्चन्द्रेक्षेपस्य दिक् । तस्य जीवा इक्क्षेप इनदोरिष्टगुणे लम्बन्न । अत्रोपपत्तिः । विलिप्तलग्नं क्रान्तिसाम्ये तद्भुजवशात् कटाचिह्नदिशोत्तरदक्षात् पश्चिमतः कदाचित् पश्चिमतो भवति । यद्युदक्षलग्नमुत्तरगोले तदा पूर्वतो भवति । तदन्यथा पश्चिमत इत्यर्थः । खार्धाद्विलिप्तलग्नोपरिगतं इक्क्षेपमण्डलं यत्र विलिप्ते लगति तत्खार्धान्तरेऽर्कइक्क्षेपचापांशाः । यत्र विलग्नखण्डे लगति तत्खार्धान्तरे चन्द्रइक्क्षेपचापांशाः । तज्ज्ये तयोर्इक्क्षेपौ" । "यदा कलालग्नखण्डं खमध्ये भवति तदा तस्य इक्षवलयाकारत्वात्तत्र स्थितोऽपि अक्षो खस्थितोऽपि कलालग्नखण्डं न स्पृशति । अतोऽत्रावनतेरभावः । यदा खार्धोन्नतं विलिप्तलग्नं दृश्यतः । तदा तिरश्चीनत्वात् क्रान्तिवृत्तस्य तत्रस्थो रविर्दृङ्मण्डलसम्पर्कवलम्बितः क्रान्तिवृत्ताहृश्यतो यावतान्तरेण लक्ष्यते तावती तस्य नतिः । एवं विलिप्तलग्नं यदि खार्धोन्नतसंस्तदोत्तरा नतिः । एवं चन्द्रस्यापि नतिः । किन्तु चन्द्रकलालग्नखण्डं विलग्नखण्डमेव कल्प्यम् । यतश्चन्द्रो विलग्नखण्डे भ्रमति । अतः खार्धाद्विलग्नखण्डं यावता नतं तावच्चन्द्रइक्क्षेपस्य चापम् । तज्ज्या तद्भुक्षेपः । एवं इक्क्षेपयवशात् तिरश्चीने स्थिते विलग्नखण्डे सति इष्टलग्नखण्डान्यखण्डसंस्थितस्य चन्द्रस्य विलग्नखण्डेन सह यदन्तरं दक्षिणोत्तरं सा चन्द्रनतिस्तस्य इक्क्षेपादागच्छति" इति० ।

"इक्क्षेपाक्षतिसाधनमाह । "इक्क्षेप इन्दोर्भिन्नभभुक्तिसंस्थनिधौ त्रिगुणोद्धृतौ तौ । नतो रवीन्दोः समभिन्नदिक्के तदन्तरैक्यं तु नतिः स्फुटात्र" गि० । "तौ चन्द्रार्कयोर्इक्क्षेपौ स्वस्वमध्यभुक्तिप्रसूदयांशेन गुणितौ त्रिज्याभक्तौ फले तयोर्नतौ भवतः । तयोर्नत्योः समदिग्योरन्तरं भिन्नदिग्योर्योगो रविगृहे स्फुटा नतिर्भवति । अत्रोपपत्तिस्त्रैराशिकेन । यदि त्रिज्याग्रतुल्ये इक्क्षेपेष परमा भुक्तिप्रसूदयांशतुल्या नतिर्लभ्यते तदेष्टेन किम् । फलं नतिज्याः । अथ तयोर्नत्योर्योगविधोगकारणमुच्यते । यस्यां दिशि चन्द्रो नतस्तस्यां दिशि यदि रविस्तदा नत्योरन्तरेण चन्द्रार्कयोरन्तरं ज्ञातं भवति यदा भिन्नदिशौ नतौ तदा तयोर्योगेन चन्द्रार्कयोरन्तरमुच्यते" इति० । इदानीं स्फुटनतेरेवावनतिः ।

"इक्क्षेप इन्दोर्द्विगुणो विभक्तः खिलैः १४१ स्फुटैरावनतिर्भवेद्वा । स्वभुजाक्षोत्थो द्विगुणोऽयभक्तः स्वर्णं यमुक्तोऽवनतिः स्फुटा वा" गि० । "चन्द्रस्य इक्क्षेपो द्विगुणो भूयश्च १४१ भाजितः फलं स्फुटैरावनतिः । यदि स्वभु-

जयोर्योगो विश्वदृक्क्षेपखण्डदा हिगुणः पञ्चभक्तः स्फुटिफलं खमध्यं युक्तं स्फुटैवानतिर्भवेत् । अत्रोपपत्तिः । तत्र खल्पान्तरत्वाच्चन्द्रविश्वदृक्क्षेपतुल्यमर्कदृक्क्षेपं परिकल्प्य भुक्त्यन्तरपञ्चदशांशेनानुपातः । यदि त्रिज्याप्तदृक्क्षेपे इष्टभुक्त्यन्तरपञ्चदशांशमिता स्फुटा नतिर्लभ्यते तदाऽभीष्टदृक्क्षेपे किमिति । अत्र भुक्त्यन्तरपञ्चदशांशो गुणश्चिज्या फलं । गुणकफलयोर्गुणकाहॅनापवर्तितौ । जातं गुणकस्थाने हयं २ फलस्थाने किन्द्राः १४१ । एवं दृक्क्षेपज्याकाभिः । लघुज्याकाभिस्तु गुणकस्थाने हयं २ फलस्थाने किंचिदूनाः पञ्च ४ । ५५ । ते सुखार्थं पञ्च कृताः ५। अतस्तत् फलं खमध्यंयुतं कृतम्"प्रभि०

इदानीं स्फुटे लम्बनावनती सुखार्थमाह । "त्रिभोनलग्नस्य दिनार्धजाते नतोन्नतज्ये यदि वा सुखार्थम् । दृक्क्षेपघातं परिकल्प्य साध्यं खल्पान्तरं लम्बनवन्नतिश्च"भि० । "त्रिभोनलग्नं चन्द्रं प्रकल्प्य तस्य क्रान्तिः फलं साध्यः । तेन फलेन क्रान्तिः संस्कार्या । सा तस्य स्फुटा क्रान्तिः । प्रथावल्लम्बावपनेन संस्कृतादिनादिना नतांशा उन्नतांशाश्च कार्याः । तज्ज्ये त्रिलिभलग्नस्य दिनार्धजाते नतोन्नतज्ये । अतस्त्रिज्ञा त्रिलिभलग्नयातं नतज्ञा चन्द्रदृक्क्षेपं च परिकल्प्योक्तवल्लम्बनं खल्पान्तरत्वेनतिं सुखार्थं साध्या । अत्रोपपत्तिः । त्रिलिभलग्नमहोरात्रस्य एव दिनार्धमहोरात्रार्धयोर्दृक्क्षेपः"प्रभि०।

इदानीं नतेः प्रबोधनमाह ।

"खहोरात्रार्धयो नतिर्खहोरात्रात् प्राग्वत् प्रसाध्या स्थितिनर्दखण्डे"भि० । "अत्र सूर्यगृहे यः पूर्ववच्चरः आनीयते । असौ नाड्या संस्कृतः सन् स्फुटो भवति । अर्कनतिः भवति । गणितागतो दर्शान्तकालो लम्बनेनावनतः स्फुटोऽतः स चित्र गृहमध्यकालः । तत्र तात्कालिकं सपातं चन्द्रं कृत्वा विक्षेपः साध्यः । अथ स्थिरलम्बनकाले यद्दिनभलग्नं तत्कादवनतिः साध्या । तया च विक्षेपः संस्कृतः । स मध्यपक्षविक्षेपः स्फुटो भवतीत्यवगन्तव्यम् । ततो"नाड्यर्धयोगान्तरयोः क्रान्तिभ्याम्" इत्यादिना स्थितिनर्दखण्डे साध्ये । अत्रोपपत्तिः । चन्द्रस्थाने क्रान्तिमण्डलविषमषड्भजोन्नतांशं विक्षेपः । चन्द्रो विषमषड्भे, रविः क्रान्तिमण्डलेऽतस्तयोर्विक्षेपौ साध्योत्तरमन्तरम् । यदि भूगर्भस्थो दृष्टा । यदा तु सूर्यभोक्षितो भूपृष्ठस्थत्वादा रविक्रान्तिमण्डलाश्चन्द्रक्रान्तिमण्डलमधो दृक्क्षेपवशाच्छिन्नं भवति । तद्याम्योत्तरभागेन यावता खण्डितं तावतो नतिखण्डगुणाच्छरोऽतस्तदा यदि संस्कृते स्फुटमर्कोन्नोरन्तरं भवति स एव स्फुटशरः । यतोऽत्र भोक्षे "याम्योत्तरं यत्खावन्तरं यश्चिसूर्ययोः । नतिस्तथा तया तच्चात् संस्कृतः स्यात् स्फुटः शरः" शि०।

इदानीं स्पर्शमुक्तिसम्मीलनादिकालार्थमाह।'तिथ्यन्ताङ्गणितागतात् स्थितिदलेनोनाधिकाल्लम्बनं तत्कालीनोन्नतीयुतं संस्कृतिभवस्थित्यर्धहीनाधिके । दर्शान्ते गणितागते धनलग्नं वा तद्विधावासलज्ञे यौ प्रगृह्योक्तसंस्कारसमयावेवं कृतात् प्रस्फुटौ । तत्सध्यकालान्तरयोः समाने स्फुटे भवेतां स्थितिखण्डके च । दर्शान्ततो भद्दलोनयुक्तात् तल्लीनोन्मीलनकालः एवम् ।सलग्नकारेण विलम्बनं चेत् सलग्नं स्फुटौ प्रपञ्चमोक्षकालौ । किंतल वाद्यावनतो पुनश्च तात्कालिकाभ्यां विधुविलिभाभ्याम्"भि०।"प्रथमं यो गणितागतस्तिथ्यन्तस्तत्कात् स्थितिदलेनोनाधिकाल्लम्बनं साध्यम् । स्पर्शे स्थितिदलेनोनात्,मोक्षेऽधिकादित्यर्थः । अत्र क्रिया स्पर्शकालः साध्यते । तत्र गणितागततिथ्यन्तात् स्थितिदलेनात् प्राग्वल्लम्बनमानीय तदनतं स्थापयित्वा तद्गणितागते तिथ्यन्ते स्थितिदलेनोने धनलग्नं वा कार्यम् । स स्फुटः स्पर्शकालः । तत्सध्यकालयोरन्तरं स्फुटं स्थित्यर्धम् । तज्जनितफलोनात् समलग्नेन्दोः शरात्कालविलिभकालजनितवा नाड्या संस्कृतः स्यात् । स्फुटविक्षेपात् पुनः स्थित्यर्धम् । तेन स्थित्यर्धेन गणितागते दर्शान्ते जने तल्लग्नं धनलग्नं वा कार्यम् । एवं जाते सति यावान् कालस्तावान् स्पर्शकालः । एवमन्यदपि । स्पर्शमध्यगृहकालयोरन्तरं स्पार्शिकं स्थित्यर्धं भवेत् । स्पर्शकालात् सुलग्नलग्नमानीयानतं स्थाप्यम् । अथ स्पार्शिकस्थित्यर्धघटीफलेन चन्द्रसूनीलग्ने शरः साध्यः । अत्रान्तरातीतविलिभलग्नात्तथा । तया स्फुटीकृताच्छरात् पुनः स्थित्यर्धम् । तेनोनिते गणितागते दर्शान्ते तल्लग्नं धनलग्नं वा कार्यम् । एवं स्फुटः स्पर्शकालः । असदिति यावद्विशेषः । मौक्षिकार्थं मध्यपक्षकालोत्थस्थितिः पुनश्चालोत्थतिथ्यन्ते योज्या । तत्रालग्नलग्नान्तरभवस्थित्या गणितागततिथ्यन्तो पुनः स मोक्षस्थितिरुक्ता । तल्लग्नलग्नान्तरभवोत्थस्थित्या वारं वारं पूर्वदर्शान्तोयोज्यः । एवं स्थिरलग्नलग्नान्तरभवोत्थस्थितिर्मोक्षस्थितिर्वा । सैव मौक्षिकम् । एवं स्थितिदलेनाढ्यान्वितागतान्मोक्षकालोऽपि । तत्र चन्द्रघातात्तात्कालिकीकरणे फलं धनम् । एवं मोक्षमध्यपक्षकालयो-

रन्तरं मौलिकं स्थित्यर्द्धम् । एवं मर्दलेनोनाङ्गुलितागतात् सम्मीलनकालः । मर्दलेन युक्तादुन्मीलनकालः । सम्मीलनमध्यपर्वकालयोरन्तरं प्रथमं स्फुटं मर्दार्द्धम् । उन्मीलनमध्यपर्वकालयोरन्तरं द्वितीयम् । यदाऽसकृद्विधिना लम्बनं क्रियते तदैवम् । यदा पुनः सकृद्विधिना लम्बनं तदा स्पर्शकालो मोक्षकालोऽपि सकृदेव स्फुटो भवति । किन्तु तत्राय विशेषः । स्पर्शकाले मोक्षकाले वा पुनर्विलम्बनं कृत्वा तत्कालगतिः साध्या । तया तत्कालभवो विक्षेपः संस्कृतः सन् स्फुटः स्पार्शिकः । मौक्षिको वा स्फुटो भवति । नचैवं तदा स्थूलः । अत्रोपपत्तिः स्थित्यर्धानयने पूर्वोक्तैव । तत्स्फुटीकरणे प्रोच्यते । गणितागतो हि दर्शान्तकालो मध्यपर्वकालो भवितुमर्हति चन्द्रार्कयोस्तुल्यत्वात् । स्थित्यर्द्धोनो दर्शान्तकालः स्पर्शकालो भवति । युतो मोक्षकालः । अथ च दृष्टः क्रमोच्छिन्नत्वाल्लम्बनसंस्कृतम् । अतस्तेन संस्कृतो दर्शान्तो मध्यपर्वकालः स्फुटो भवति । एवं स्पर्शकालोऽपि तत्कालजनितलम्बनेन संस्कृतः स्फुटो भवितुमर्हति । या युक्तिर्मध्यपर्वकालस्य लम्बनसंस्कारे स्पर्शमोक्षसम्मीलनोन्मीलनकालानां, किन्तु स्पर्शमोक्षकालस्य लम्बनसंस्कारे क्रियमाणे कालान्यत्वाच्छरः किञ्चिदन्यथा भवति । गतिश्च किञ्चिदन्यादृशी । तत्संस्कृतिभवं स्थित्यर्द्धमपि किञ्चिदन्यादृशम् । अतस्तेनोने गणितागते दर्शान्ते तल्लम्बनं धनर्णं वा कर्तुं युज्यते । अत उक्तं तत्कालोत्पन्नतीव्रसंस्कृतिभवस्थित्यर्द्धहीनाधिक इत्यादि । यदाऽसकृद्विधिना लम्बनं तदा पुनः पुनर्लम्बनं गतिश्च । तया तत्कालशरः स्फुटः स्थित्यर्धार्थं किल क्रियते । तदा स्थित्यर्धं स्फुटं भवति । तदा तत्कालशरोऽपि स्फुटो भवति । स एव स्पार्शिकः शर इति वेदितव्यम् । यदा पुनः सकृद्विधिना लम्बनं तदा पुनः पुनः शरस्य गतेश्चाकरणात् स्पार्शिकः शरः पुनः कर्तुं न युज्यते । अत उक्तं किन्वत्र यावानतो पुनश्च तात्कालिकाभ्यां विधुविलिप्तिभाभ्यामिति" प्रमितास्मरा ।

इदानीं विशेषमाह ।

"शेषं यथाङ्गुलपर्वोन्नमत्र स्फुटेषुजेन स्थितिखण्डेन । हृतोऽथ तेनैव हृतः स्फुटेन बाहुः स्फुटः स्याद्युपर्वोन्नभागोः । यावान्न कालानयने फलं यत् स्फुटेन निघ्नं स्थितिखण्डकेन । स्फुटेषुजेनासकृदुद्धृतं तत् स्थित्यर्द्धगुद्धं भवतीष्टकालः" इति सिद्धान्तशिरोमणिः ।

"अत्र रविगृहणे विम्बलनभुजकोट्यादीनामानयनं यथाङ्गगृहणोक्तवत् वेदितव्यम् । किं त्वत्र भुजसाधने विशेषः अत्र पूर्वानयनेन यो भुज आगच्छति । असौ तत्कालस्फुटशरजनितेन स्थित्यर्धेन गुण्यः स्फुटेन स्थितिखण्डकेन भाज्यः । स्पर्शमध्यकालयोरन्तरेण भाज्यः इत्यर्थः । फलं स्फुटो भुजो भवति"।"ग्रासोनमानैक्यदलस्य वर्गाद्विक्षेपकृत्या रहितात् पदं यत् । गत्यन्तरार्घैर्विकृतमिति" यत् फलमभ्यते तस्य स्फुटीकरणम् । तत् फलं स्फुटेन स्थित्यर्धेन स्पर्शमध्यकालयोरन्तरेण गुणितं तत्कालस्फुटशरजनितेन स्थित्यर्धेन भक्तं स्फुटं भवति । तत् खस्थित्यर्द्धक्षुण्णमिष्टकालो भवति । स च स्पर्शादग्रतो मोक्षात् पृष्ठतः । तस्मिन् काले गतिसंस्कृतं शरं पुनः कृत्वा ग्रासोनमानैक्यदलस्य वर्गाद्विक्षेपकृत्यादिना फलं साध्यम् तत् फलं पुनः स्फुटं कर्त्तव्यम् । एवं यावदिष्टकालः स्फुटो भवति तावदसकृत्कर्म । अत्रोपपत्तिः । भुजानयने पूर्वोक्तैव । तत्स्फुटीकरणे प्रोच्यते । यथा चन्द्रग्रहणे स्थित्यर्धं शरमानैक्यार्द्धयोर्वर्गान्तरादुद्भूतं तथेहानीतम् । तदस्फुटम् । लम्बनसंस्कारे कृते स्पर्शमध्यग्रहकालयोरन्तरं तत् स्फुटं स्थित्यर्द्धम् । लम्बनान्तरसंस्कृतमित्यर्थः । भुजो हि स्थित्यर्द्धसम्बन्धेनागच्छति । यथा चन्द्रग्रहे मध्यमभेव स्थित्यर्द्धम् । तत्सम्बन्धेन यादृशो भुजस्तत्रागच्छति तादृशेतेहापि भवितव्यम् । वासनायास्तुल्यत्वात् । अथ च "वेष्टेन निघ्नाः स्थितिखण्डकेनेत्येवम्" यदानीयते तदा स्फुटस्थित्यर्धं वेष्टं कृत्वा गुणकमानीयते तदा स्फुटस्थित्यर्धसम्बन्धी भुजः स्यात्। असावसम्यक् । अतस्तस्य तत्कालस्फुटशरजनितस्थित्यर्द्धसम्बन्धीकरणायानुपातः । यदि स्फुटस्थित्यर्धेनैतावान् भुजस्तदा तत्कालजनितस्फुटशरभवस्थित्यर्द्धेन किमिति । फलं स्फुटो भुजो भवति । एतदेव विपरीतं कर्म ग्रासात् कालानयने । "ग्रासोनमानैक्यदलस्य वर्गात्" इत्यादिना यत् फलमागच्छति तन्मध्यं स्थित्यर्धं वेष्टम् । तत् स्फुटस्थित्यर्धावद्विद्योध्यते तावदसम्यागष्टं भवति । अतस्तस्य फलस्य स्फुटस्थित्यर्द्धपरिणामायानुपातः । यदि मध्यमस्थित्यर्धेनैतावत् फलं तदा स्फुटस्थित्यर्द्धेन कियदिति । अत्र यल्लभ्यते स्फुटं फलं तस्मिन् स्फुटस्थित्यर्धाच्छोधिते स्फुटमिष्टमवशिष्यत :" इति प्रमितास्मरा ।

इष्टलक्षितायां ग्रासप्रकारस्तद्भेदज्ञानफलानि चोक्तानि यथा

"अङ्गारखादिग्रेषाच्छिन्नमपि शिरः शिलासुरस्योदम्। प्राणैरपरिक्लान्तं गृहतां यातं वदन्त्येके। इन्दुर्कमण्डलाक्रान्तिरसितत्वात् किल न दृश्यते गगने। अचल पर्वकालाद् वरप्रदानात् कमलयोनेः। सुखपुच्छविभक्तार्कं भुजङ्गमाकारमपदिशन्त्यन्ये। कथयन्त्यमूर्त्तसपरे तमोमयं सैंहिकेयाख्यम्। यदि मूर्त्तो भवितारो शिरोऽपि भवति मण्डली राहुः। भगणार्धमन्तरितो गृह्णाति कृष्णं नियतवारः। अनियतवारः खलु चेद् उपलब्धिः सङ्ख्या कथं तस्य। पुच्छाननाभिधानोऽन्तरेण कक्षाद्वयं गृह्णाति। अथ तु भुजगेन्द्ररूपः पुच्छेन मुखेन वा न गृह्णाति। सुखपुच्छान्तरसंस्थं स्वगयति कक्षासु भगणखार्द्धम्। राहुदृश्यं यदि स्यादुगुप्ते उस्तमिते ऽथवोदिते चन्द्रे। ततसमगतिनाम्येन गुप्तः स्यादेवोऽपि दृश्येत। भूच्छायां स्वगृह्णे भास्करमर्कपक्षे प्रविशतीन्दुः। अयकृष्णमतः पश्चाच्छन्दोऽभिनेष पूर्वार्धात्। दृश्यस्य खच्छाया यथैकपार्श्वेन भवति दीर्घा च। निशि निशि तद्वद् भूमेरावरणयाद्विनेयस्य। स्यात् सप्तमरात्रौ यदि चोदग्दक्षिणेन नातिगतः। चन्द्रः पूर्वाभिमुखच्छायावाभौर्यं तदा विशति। चन्द्रोऽधःस्थ स्वगयति रविमण्डलवत् समागतः पश्चात्। प्रतिदेशमतश्चित्रं दृष्टिविघाद्भास्करस्य कृष्णम्। आवरणं मन्दिन्दोः, कुराठविषाणक्षतोऽर्द्धसंक्षयः। खल्वं रवेर्यतोऽतस्तीक्ष्णविषाणो रविर्भवति। एतत्परागकारणसङ्गमिदं दिव्यदृग्भिराचार्यैः। राहुरकारणमस्मिन्नयुक्तः शास्त्रसद्भावः। योऽप्यावनुरो राहुस्तस्य वरो ब्रह्मणायमात्रप्रः। आध्यायनसपरागे दत्तकृतांगेन ते भविता। तस्मिन् काले खादिध्यमस्य तेनोपचर्यते राहुः। वाय्योत्तरा यस्मिगतिर्गणितेऽप्युपचर्यते तेन। न कथञ्चिदपि निमित्तैर्मुक्तं विज्ञायते विनातैस्तु। अत्यल्पेऽपि काले भगन्त्यधोलातरूपाणि। पश्च यद्युक्तसंयोगाद् किल यद्युक्तस्य सम्भवो भवति। तैर्न च विनाऽस्यां न विधिन्त्यन्ति विपश्चिद्भिः। अवनत्यार्कं पाशो दिग्भेदा वलनवावनता च" अथ नेक्षाभेदे फलम्। "सिध्यवसानाद्देवा करणे कथितानि तानि मया। सख्यासोत्तरदक्षा पर्वेशाः सप्त देवताः क्रमयः। ब्रह्मयमेन्द्रकुबेरा वरुणाग्नियमाश्च विप्रेन्द्राः। आद्ये द्विजपशुवृद्धिक्षेमारोग्याणि यज्ञसम्पच्च। तद्वत् सौम्ये तस्मिन् पीडा विद्युन्नामदृष्टिश्च। ऐन्द्रे भूपविरोधः शारदयज्ञक्षयो रुजश्चैवम्। कौबेरेऽर्थपतीनामर्थविनाशः सुगित्वं च। वारुणमग्नीशानुभमन्येषां क्षेमसख्यदृष्टिकरम्। आग्नेयं मित्राख्यं सख्यारोग्याभयाम्बुकरम्। याम्यं करोत्यदृष्टिं दुर्भिक्षं सङ्क्षयं च सस्यानाम्। यदतः परं तदशुभं ज्ञात्वा राहुदृष्टिं पर्व। नेक्षाहीने पर्वणि गर्भविपत्तिश्च यज्ञकोपश्च। अतिवेले कुसुमफलक्षयो भयं सस्यनाशश्च। क्षीणातिरिक्तभावे फलमुक्तं पूर्वशास्त्रउदत्वात्"।

अथ एकमासे गृह्यदृश्यस्य गुणभेदश्च फलम्। "स्फुटगणितविदः कालः कथञ्चिदपि भाव्यथा भवति। यद्येकस्मिन् मासे पर्वाणं रविसोमयोस्तदा क्षितिपाः। स्वबलक्षोभैः सङ्क्षयमायान्त्यन्तेयवक्षोपश्च। पश्चादुदिताक्षमितौ शारदधान्यावनीश्वरजयदौ सर्वपक्षौ दुर्भिक्षमरकदौ पापसंज्ञदौ" अथ दिनार्द्धभेदे शास्त्रफलम्।

"अर्धोदितोपरक्तो नैर्ऋतिकान् हन्ति सर्वयत्नांश्च। अग्नयुपजीविगुरुधाधिपविप्राग्निभयोऽयुगार्ध्यदितः। अर्धमपराधिकवणिक्तलियवलनायकान् द्वितीयेऽर्धे। कारवसूद्रक्षत्रान् क्षतजोत्थांश्च समन्त्रिजनान्। मध्याह्ने नरपतिमध्यदेशगा शोभनश्च भान्वर्धः। दक्षभुगमात्यान्तःपुरवैद्यक्षुधः पञ्चमे खांशे। क्षीणसूद्रान् वङ्गेऽर्धे दक्षुप्रलम्बकाश्मलमयकाशे। वक्षिणे खांशे शोषक्षतप्रोक्षाणां शिवं भवति"।

अथायनादिभेदे फलम्"द्विजक्षपतीक्षुदशने विट्क्षुद्रान् दक्षिणायने हन्ति। राक्षुदगार्द्धदृष्टः प्रदक्षिणं हन्ति विप्राद्यान्। नेक्षान् विदिक्स्थितोध्वयाधिनश्च हन्यादुताशसक्तांश्च। सलिलचरदन्तिवातो याम्येनोदग्गतासगुभः। पूर्वेण सलिलपूर्णां करोति वसुधां समागतो दैत्यः। पश्चात्सर्वक्षेयकबीजविनाशाय निर्दिष्टः। याम्याक्षक्षिक्लन्नूरसेनाः काम्बोजोद्भिरातयक्षवार्ताः"

अथ नेक्षादिरोधे गुणफलम्। "जीवन्ति चिरं कृतायदृश्या ते पीडासुपद्यन्ति नेक्षसंस्थे। गोपाः पशवोऽथ मोक्षिणो मनुजा ये च कक्षत्वमागताः। पीडासुपद्यन्ति भास्करे गुप्ते शीतकरे ऽथवा हृषे। निधुने प्रवराङ्गना कृपा स्त्रपमाला बलिनः कलाविदः। यज्ञ यानटजाः क्षमाभृजा भवगाः सङ्गजनैः समन्विताः। आभीराश्वरान् वणिक्कान् सह मल्लान् मल्यकरूक्षानपि। याम्यालम्बिकलांच पीडनत्वं चापि निर्दिशन्ति बुधैः। सिंहे दुर्भिक्षगवेलकक्षयवृक्षान् राजोपसारपतीन् वनगोचरांच। वह्नौ तु यज्ञक्रियेक्षणगेयसक्तान् हन्त्यक्षक्षतिपुरयाजियुतांच देवान्। तुलाधरेऽन्यपरा-

लसाधून् वणिगदयाणीन मद्यकल्पांश्च। अलिन्यधोदुग्धरसदूर्वालान हृद्यान् वर्यांश्चेवविधानुशीरान्। धन्विन्यमांसवरवाजिविदेहमत्स्यान् पाञ्चालवैद्यवणिजो विषमायुधत्यान्। कन्यानूपे तु भल्लातकिल्वकानि नीवान् मन्त्रौषधिषु कुशलान् स्थविराधुधीवान्। कृष्णोऽन्तर्गिरिजाङ्गे स पश्चिमजनान् भारोद्वहांस्तस्करान् आभीरान्दरदार्यशिंशुपुरकानुत्कन्याश्चाधा वर्ष्मरान्। मौले सागरकूलसागरजलद्व्याणि मान्यान् जलान् प्रातान् वार्य्युपजीविनश्च मत्स्यकूर्म्मौपदेशाद्देत्" तारामत्स्यं कूर्म्मविभागश्च वक्ष्यते।

अथ मांसभेदनामतत्फले "सद्यःपलव्यडेकपलनिरोधावमर्दनारोहाः। आत्रात मध्यतमस्त्वभोज्य इति ते दश प्लवाः। सद्यःगते तमसि जगच्छलभूतं भवति क्षुदितभयं च। अपलव्ये नरपतितस्करावमर्दैः प्रजानाम्। जिह्वेव लेढि परितस्तिमिरस्तदो मण्डलं यदि च लेढ्। प्रक्षुदितसमस्तभूता प्रभूततोया च तत्र मही। पलमिति यदा त्र्यंशः पादो वा व्यक्ततेऽथवार्द्धम्। श्लोतलपथिकस्थानिः पोढ़ा च श्लोतदेश्यानाम्। पर्व्वन्तेषु स्फोटा मध्ये पिण्डीकृतं तमस्तिलेत्। स निरोधो विज्ञेयः प्रमोदलत् सर्व्वभूतानाम्। अवमर्दनमिति निःशेषमेव सच्छाद्य यदि चिरं तिष्ठेत्। कन्यात् प्रधानदेशान् प्रधानसूपांश्च निरवयवः। वृत्ते गृहे यदि तमस्तत्क्षणमादत्त ह्रसते भूवः। आरोहणमित्यभ्योऽन्यमर्दनैर्भयकरं राज्ञाम्। दर्पश्च दुर्वैद्यदेशे सद्यांश्चनिःश्वासमारुतोपहृतः। ह्रस्वेतात्रातं तत् क्षुद्दृष्टिदह्यावहं जगतः। मध्ये तमः प्रविष्टं वितमस्कं मण्डलं च यदि परितः। तन्मध्यदेशनाशं करोति कृच्छ्रामयभयं च। पर्य्यन्तेष्वतिवक्रं खलु मध्ये तमसोऽभ्यागमम्। सस्यानामीतिभयं भयमङ्गिनां राज्ञां च"।

अथोत्पातिकराक्षुवस्तुभेदे फलम्। "श्वेते क्षेमसुभिक्षं ब्राह्मणपोढ़ां च निर्दिशेद्राज्ञः। अग्निभवमनलवर्णे पीड़ा च कृतायहत्तीनाम्। हरिते रोगोत्थिता सस्यानामीतिभिश्च विध्वंसः। कपिले पीड़ागतत्वच्छ्वध्वंसोऽथ दुर्भिक्षम्। अरुणकिरणात्तरुपे दुर्भिक्षाद्दहवो विहगपीड़ा। आधूमे क्षेमसुभिक्षमादिशेन्मन्दवृष्टिं च। कापोताक्षकपिलश्यावाभे क्षुद्भयं निर्दिष्टम्। कापोतः मूद्राणां व्याधिकरः कृष्णवर्णश्च। विमलकमणिपीताभो वैश्यध्वंसी भवेत् सुभिक्षाय। सार्चिश्चाग्निभयं गौरिवरूपे तु वृद्धानि। दूर्वाशाद्वलश्यामे स्फारिते वापि निर्दिशेन्नरेन्द्रम्। अथनिभयसस्यदायी पाटलकुसुमोपमोराजः। पांशुलिलोहितरूपः सलभ्यनाय भवति दृष्टश्च। बालरविकमलसुरचापरूपदृष्टस्त्वलोकोपाय। शिरोभयमुल्लो गासभेदे गासवर्णभेदस्तु स्वाभाविक इन्दविरोध।

अथ गृहभेदैर्दर्शने फलभेदः। "पक्षान् यक्षं सौम्यो दहनधनक्षयाय राज्ञां च। भौमः समरविमर्दं शिखिकोपं तस्करभयं च। शुक्रः सस्यविमर्दं नानाक्षेमांश्च जनयति धरित्र्याम्। रविज करोत्यदृष्टिं दुर्भिक्षं तस्करभयं च। यदशुभमवलोकनाभिख्यं यच्छनितं गृहेषु प्रमोक्षाय वा। सुरपतिगुरुभावलोकजं तच्छुभमुपयाति जलैरिवाग्निरिद्धः"।

अत्र गृहोत्तरणाभ्यन्तरे पुनर्गृहे भूमन्यादौ स्थापितेन्द्रा सूर्य्यस्येव भौमादिग्रहस्याच्छादसन्धानेन तत्राग्ने ओत्पातिकं मृत्तं तेजनिष्टफलानि चोक्तानि यथा "गृहे क्रमाच्छिखिभिः पुनर्गृहो मासषट्कपरिवृद्ध्या पवनोत्थपांसुरजःक्षितिकम्पतमोऽग्निनिपातैः। आवन्तिका जनपदा आवेरीनर्मदातटाश्रयिणः। ह्रस्वास्तनुजघनयः पीड्यन्ते क्षितिसुते गृध्रे। आन्तर्वेदी सरयूं नेपालं पूर्व्वसागरं गोपम्। स्त्रीप्रथमोधकुमारान् सह विद्वद्भिर्बुधो हन्ति। गृध्रोपगते जीवे विद्वद्भूपसन्निगजकृषभ्रंशः। सिन्धुतटाश्रितमद्रुद्रिमं संश्रितानां च। भृगुतनये राक्षसते दक्षिरोगाः शैत्यजवराः सबीजेभ्यः। आवन्तीः शिवयः स्त्रीषविषगवाश्च पीड्यन्ते। सौरे मद्यभक्षारक्षीराद्या भावतोऽर्बुदान्यजनाः। लोमशसारिवाला क्षितिश्च नाथं व्रजन्त्यायुः"।

अथ मांसभेदे मांसफलम्। "आर्त्तिक्यामनलोपजीविमनधान् प्राच्याधिपान् कोशलान् कलमाशानथ सूरसेनसहितान् आर्षी च सन्तापयेत्। कल्माशाग्र्य क्षिप्रदेशमतिं सामात्यभृत्यं तमो दृष्टं क्षतियतापदं जनयति क्षेमं सुभिक्षान्वितम्। काश्मीरकान् कोशलकान् सपुण्ड्रान् कलिंगांश्च कन्यादपरान्तकांश्च। ये सोमपाश्चांश्च निघ्नन्ति सौम्ये (मार्ने) सुदृष्टिकृत् क्षेमसुभिक्षकृच्च। पौरे द्विजक्षत्रजनोपरोधः सर्वैश्वर्याढ्याः कुकुरा विदेहाः। ध्वंसं व्रजन्वल च मन्दवृष्टिं भयं च विन्द्यादशुभिक्षयुग्मम्। जाये तु माहेषिकभल्लवल्लिगोत्रान् साध्यावधर्मनिरतान् करिवस्तुरङ्गान्। वक्राकृताधिमनुजांश्च दुनोति राष्ट्रवृष्टिं च सर्वजनानुमतां करोति। पीड़ाकरं फाल्गुनमासि पर्व वक्राकृतावन्तजनेकलानाम्। सत्यव्रतस्त्रप्रवराकुलानां च

लुप्तकरलतपक्षिणां च । जैत्रे तु चित्रकरलेखकगेयस्त्रीन् रूपोपजीविनिगमज्ञाहिरण्यपण्यान् । पौण्ड्रोड्र कैवर्तजनानथ चाश्मकांश्च ताप स्यूत्यमरपोऽत्र मिलितवर्षी । वैद्याक्षमाश्च गृहदे विनायसायान्ति कर्षाभिलिताः सस्तुद्राः । कृष्णाकृयोधियकाः कलिङ्गाः सोपदूत्राः किन्तु सुभिक्षमस्मिन् । उर्व्यां नरेन्द्रद्विजराजपत्न्याः सस्यानि दृष्टिश्च महागणाश्च । प्रध्वंसमायान्ति नराश्च सौम्याः सार्वैः समेताश्च निषादयक्षाः । आम्रादपत्रस्यदुमानम्रनदीप्रवाहान् फलमूलवासान् । गान्धारकाम्रोरपुलिन्दहीनान् कृतान् वदेन्मण्डलवर्षमस्मिन् । काम्रोरान् सपुलिन्दहीनयवनान् कन्थात् कुरुक्षेत्रकान् गान्धारानपि मध्यदेशसहितान् दृष्टो यदः आयवे । काम्बोजैकयफांश्च पारदमपि त्यक्त्वा यथोक्तानिमान् अन्यत्र प्रचुरान्नकृष्टमनुजैर्धार्मी करान्वाहताम् । कक्षिङ्गवङ्गान् मगधान् सुराष्ट्रान् म्लेच्छान् सुरोरान् वरदाञ्छकांश्च । स्त्रीणां च गर्भानसुरो निहन्ति सुभिक्षलक्ष्मीरुपदेश्युपेतः । काम्बोजचीनयवनान् सह यत्यश्वहस्त्रीक्षीकिन्धुतटवासिजनांश्च कन्यात् । आनर्त्तसौण्ड्रभिवजश्च तथा किरातान् दृष्टोऽसुरोऽम्बुजि भूरिसुभिक्षलक्ष्म" ।

अथ मोक्षभेदनामतत्फलानि "कृतुकक्षिपायुभेदाद्विर्द्दिः सम्छर्दनं च जरणं च । मध्यान्नयोश्च विदरथमिति दश यमिरूर्य्य योर्नाशाः । आग्नेय्यामपगमनं दक्षिणकृतुभेद संज्ञितं यमिनः । वस्त्रविमर्दो सुखरग् रूपपीड़ा स्यात् सुदृष्टिश्च । पूर्वोत्तरेण वामो कृतुभेदो रूपकमारभयदायी । मुखरोगं यक्षभयं तस्मिन् विन्द्यात् सुभिक्षञ्च । दक्षिणकुक्षिभेदो दक्षिणपार्श्वेन यदि भवेन्नोग्रः । पीड़ा रूपपुत्राणामभियोज्या दक्षिणा रिपवः । वामस्तु कुक्षिभेदो यद्युत्तरमार्गसंस्थितो राहुः । स्त्रीणां गर्भविपत्तिः सस्यानि च तत्र मध्यानि । नैर्ऋतवायव्यस्थौ दक्षिणवामौ तु पायुभेदौ द्वौ । गुह्यरुगल्पा दृष्टिर्हयोस्तु राज्ञीत्ययो वाच्ये । पूर्वेण गृह्यं त्यक्त्वा प्रागेव चापसर्पति । सच्छर्दनमिति तत् क्षेमसस्यक्षार्दिप्रदं जगतः । प्राक्प्रगृह्यं यस्मिन् पश्चादपसर्पणं तु तत्प्रारुपम् । क्षुच्छस्त्रभयोद्विग्नाः क्व यरन्यसुपयान्ति तत्र जनाः । मध्ये यदि प्रयायः प्रथमं तन्मध्यविदरथं नाम । अन्तःकोपकरं स्यात् सुभिक्षदं नातिदृष्टिकरम् । पर्य्यन्तेषु विनयतावबुद्धं मध्ये तमोऽन्तदरणाख्यम् । मध्याख्यदेशनाथः पारदवस्त्रक्षयवाहिनम् । एते वर्षे मोक्षा वस्त्रव्या भास्करेऽपि विन्यस्त । पूर्वा दिक् यमिनि यथा तथा रवौ पश्चिमा कल्प्या" ।

अथ गुह्योत्सर्ग सप्तदिनमध्ये पांशुपातादौ फलम् । "मुक्ते सप्ताहान्तः पांशुनिपातोऽन्नसंक्षयं कुरुते । नीहारो रोगभयं धूमभयः प्रवरूपपक्षयुग् । उल्का मन्त्रिविनाशं नानावर्णा घनाश्च भयमतुलम् । खनितं गर्भविनाशं विद्युद्रूपदंष्ट्रिपरिपीड़ाम् । परिवेषो रूक्षपीड़ां दिग्दाहो नृपभयं च खाग्निभवम् । रूक्षो वायुः प्रबलश्चौरसमुत्थं भयं धत्ते । निर्घातः सुरचापं दण्डश्च चुक्षुवं सपरचक्रम् । यद्यद्वुं नृपवुं क्षेत्रुं तदेव संदृष्टः । अधिवासलिखनिघाते सप्ताहान्तः सुभिक्षमादेश्यम् । यद्वाशुभं यद्यजं तत् सर्वं नाशमुपयाति । सोमपदे निहत्ते पश्चान्ते यदि भवेद्रूपक्षोऽस्य । तत्तानवः प्रजानां दस्युभिरैरमद्योऽत्यम् । अर्कगृहात्तु यमिनो गृह्यं यदि हरन्ते ततो विप्राः । नैकफलभाजो भवन्ति सुदिताः प्रजार्चैव" इ०व० ।

ज्यो०त० "रविभौमवारांशे तु निरभ्रं गृह्यमादिशेत् बुधसौरिवारांशे तु मलिनं क्षुद्भयवर्षम् । गुरोरंशकवारात्तु हरन्ते सस्यरक्षकः । यमिगृह्यं वारांशे तु प्राहुर्भाद्रे महत्फलम् । अन्यवाक्यभूतौ तौ दृश्येते आदित्यास्तरौ" । "अन्यत्र वर्षे तत्र तौ चन्द्रार्कौ ।

एवं गृह्यस्य कालभेदेन शुभाशुभसूचकत्वे सामान्यतः स्थिते कदाचिद्व्यक्तिभेदेन जन्मादिराशिभेदेन गृह्यस्य दर्शननिषेधस्तत्फलञ्चोच्यते । राजमा० "सप्ताष्टजन्मराशिषु (१२) चतुर्थे दृश्यमे तथा । नवमे च तथा चन्द्रे न कुर्याद्राहुदर्शनम् । श्रीपतिव्यवहारनिर्णये वशिष्ठः । "जन्मभे जन्मराशौ च जन्मर्क्षगते तयोः । चतुर्थे द्वादशे चन्द्रे न कुर्याद्राहुदर्शनम् । यावद्दर्शनमालिप्य यावत्कालनिर्मुक्तत्वम् । जायते नात्र सन्देहस्तावत्तत्परिवर्जयेत्" । "जन्मर्क्षलग्नापेक्षया यदि सप्तमे अर्थात् निधनतारायाम्" ज्यो०रत्न० । "जन्मसप्ताष्टरिष्फाह्वदशमस्थे निशाकरे । दृष्टोदिष्टप्रदोराहुर्जन्मर्क्षे निधनेऽपि च" । "वैनाशिक कले दृष्टं गृह्यं सुधांशुभास्करयोः । जनयति रोगं बहुधा क्षेमं वित्तक्षयं चायु" वराहः । तच्चान्तिरभ्युक्ता ज्यो०त० तत्रैव "जन्माष्टजावान्यतमस्थधर्मसंस्थे निशाकरे जन्मनि तारकाख्ये । दृष्टा तमस्चन्द्रमसं प्रवालादभ्यर्च्य दद्यात् कनकं द्विजाय" चन्द्रग्रसनमित्युपलक्षणं चन्द्रगृहे चन्द्रं सूर्यगृहे सूर्यमभ्यर्च्येत्यर्थः" ज्यो०रघुनन्दनः ।

ग्रहणं च स्वराशे स्थानभेदेन शुभादिसूचकं यथाह ज्योतिषे । "त्रिषडृद्यायोपगतं नराणां शुभप्रदं स्याद्ग्रहणं रवीन्दोः । द्विसप्तनन्देषु मध्यमं स्याच्छेषेष्वनिष्टं कथितं मुनीन्द्रैरिति" । पृथ्वीचन्द्रोदये विष्णुधर्मे "यत्रत्यजगतो राहुर्ग्रसते ग्रसिभास्करौ तज्जातानां भवेत्पीड़ा ये नराः ग्रान्तिवर्जिताः" तत्रैव पुरा० "सूर्यस्य संक्रमोवापि ग्रहणं चन्द्रसूर्ययोः । यस्य त्रिजन्मनक्षत्रे तस्य रोगोऽथवा मृतिः । तस्य दानं च होमं च देवार्चनजपौ तथा । उपरागाभिषेकं च कुर्याच्छान्तिर्भविष्यति । स्वर्णेन वाथ पिष्टेन कृत्वा सर्पस्य चाकृतिम् । ब्राह्मणाय दद्यात्तस्य न रोगादिश्च तत्कृतः" । त्रिजन्मनक्षत्रम् जन्मादयमैकोनविंशति तारा इति । सर्पस्य तदाकारस्य राहोरित्यर्थः । अङ्गुलसागरे भार्गवः । "यस्य राज्यस्य नक्षत्रे स्वर्भानुरुपरज्यते । राज्यभङ्गं गुरुहानिं मरणं वात्र निर्दिशेत्" तच्छान्तिश्च निर्णयसिन्धौ दर्शिता तत एवावगम्या चन्द्रार्कयोर्ग्रहणे यस्य पुंसोदर्शनं न पर्य्युदस्तं तस्यैव स्नानाद्यधिकार इति नि० त० रघुनन्दनेन समर्थितं यथा "नतु ज्योतिःशास्त्रादुक्तनिषेधो हिंसावदुपाददीक्षितपरोऽस्तु न तु वैधपरः अैवम् "राहुदर्शनसंक्रान्तिविवाहात्ययदुष्टेषु । स्नानदानादिकं कुर्युर्निधि काम्यव्रतेषु च" इति देवलवचने दर्शनपदस्यावश्याद्यर्थने यति स्नानादेर्नित्यादृष्टफलत्वादृदर्शनमपि विधेयम् । तथा च संवत्सरप्रदीपे भार्कण्डेयः । "एकरात्रमुपोष्यैव राहुं दृष्ट्वा व्रतं नरः । पुत्रमायुश्च लभते कृत्वा च दानमात्मवित्तशाठ्यतः" । ततश्च तत्रैव प्रकृतत्वेनोपस्थितस्य वैधदर्शनस्य पर्युदासो न तु रागप्राप्तदर्शनस्य निषेधोऽप्रकृतत्वेनानुपस्थितेः । एवञ्च पदार्थान्तरसाकाङ्क्षविशेषविधिमपेक्षाय तद्विरत्व सामान्यमन्वेतीति सर्वत्र पदार्थवत्तीयादौ सामान्यस्य विशेषेतरपरत्वे बीजम् । यथा "अक्षरक्षुद्व्याप्त्" इति "दीक्षितो न ददातीति" प्रतिषेधात् दीक्षितेतरपरं न रागप्राप्तनिषेधकम् । तदुक्तं "त्रिषैव ह्यार्थते कर्त्ता विशेषेण प्रतिक्रियम् । योग्यत्वं प्रतिपित्सुत्वं विशेषस्यप्रदान्यथैः" "यजमानः पठतीति श्रुत्वा तदयोग्योविद्वान्, दीक्षितो न ददातीति प्रतिषेधाद्दीक्षितेतरः, "स्वर्गकामोऽग्निष्टोमेन यजेत" इत्यत्र विशेषाच्च स्वर्गकामः कर्त्तेति तेन सप्तमचन्द्रादीतरो राहुं दृष्ट्वा स्नायादिति कृप्यते । एवं वैधदर्शनपर्युदासेऽपि निन्दाप्रायश्चित्तयोः श्रवणाद्रागप्राप्तदर्शनस्य प्रशस्यप्रतिषेधः कालभिगमननियमे पर्यवसः पर्युदस्तत्वेऽपि तत्र रागप्राप्तगमनस्य प्रशस्यप्रतिषेधवदिति" तदेतच्चिन्त्यम्विमुक्तता निराकृतं यथा "कैचिदुभौ तुल्या राहुग्रहणस्य निमित्तत्वेन तच्छ्रवणस्य प्रयोजकत्वात् ज्योतिःशास्त्रादिना ज्ञातस्य स्नानस्य निमित्तत्वे प्राप्तेऽपि "स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने । चन्द्रसूर्योपरागे तु यावद्दर्शनगोचर इति ज्ञाबाल्यादिवचनेषु दर्शनप्रयोगाङ्गानुपस्थानस्य दोषसंहारन्यायेन निमित्तत्वम् । अन्यथा दर्शो लक्षणा स्यात् । तेन मेघाच्छादने स्नात्वादीनां, जन्मनक्षत्रेत्यादिनिषिद्धदर्शनानां च स्नानश्राद्धादौ नाधिकारः" इति । कल्पतरुरप्याह । "दर्शनशब्देन चाक्षुषज्ञानं गृह्यते । न ज्ञानमात्रम् अज्ञातस्य निमित्तत्वासम्भवात्तन्निमित्तमपि स्नानलाभेन दर्शनपदवैयर्थ्यापत्तेः । तेन चाक्षुषधीयोग्यकालः पुरुषः । योग्यत्वं च प्रयत्नानपेक्षचाक्षुषज्ञानप्रतिबन्धकराहित्यं तेन मेघच्छन्ने योग्यताभावान्न स्नानादीति" निर्णयामृतेऽप्येवम् । तदेतच्चुच्यम् । यदि चाक्षुषज्ञानं निमित्तं स्यात्तदा "सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति" वाक्यं व्यर्थं स्यात् । चाक्षुषज्ञानाभावेन प्राप्ताभावात् तत्पूर्वकत्वाच्च निषेधस्य । न चेदं गृह्यतात्परम् रविचन्द्रयोरस्तानन्तरं रात्रिदिवायदृश्यादिति वाच्यम् तत्रापदस्य गृह्यपरत्वेऽधिकरणत्वायोगान्निमित्तपरत्वे च तद्ग्रहनिमित्तकस्नानादेरस्तात्प्रागप्यभावापत्तेः । अथ तत्रेति रात्रिदिने उच्यते वैधदेवीतिवदुपपन्नम् अपि तत्र ताद्दशमनन्तरिक्तभावात् । तयोर्निमित्तत्वेऽधिकरणत्वे वाऽन्यप्रयुक्तस्नानाद्यभावापत्तेश्च । किञ्च "नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन । नोपरक्तं न वारिस्थमप्रमं नभसोगतमिति" मनुवचनं बाध्येत "दृष्टोऽरिष्टप्रदो राहुरित्यादि"च । न चात्र विहिते दर्शने निषेधाप्रवृत्तिस्तत्पर्युदस्तोऽयतापि न युक्तेति वाच्यम् दर्शनस्यानुवादेन विधेयत्वाभावात् । एतच्चाग्रे वक्ष्यामः । तत्त्वे वा विरुद्धनिरुद्धयोः श्रुत्योः अस्तु सङ्कोचेन दर्शनविधानेन सङ्कोच इति चेत् न "शुक्ले दृष्ट्वा ततः स्नायादिति" शुक्लस्नानेऽपि चाक्षुषज्ञानस्य निमित्तत्वापत्तेः अस्तु किं नश्छिन्नमिति चेत् न गृह्यास्ते "तयोः परेद्युरुदये दृष्ट्वाभ्यवहरेच्छुचिरिति" दर्शनोत्तरं भोजनविधानादस्यस्य पूर्ववैधकाल इव यावद्दर्शनं भोजननिषेधापत्तिः मध्येऽस्तीभूतस्य सुतरां यावच्चक्षुःप्राप्तुप्रवासप्रसङ्गश्च ।

अथाङ्गोपसंहारतया तत्र स्नानमात्रं विवक्षितं तत् तत्पूर्वमपि निर्लक्ष्येण क्षोकियताम् । एतेन यत्तु केचिदुक्तं अर्घस्नाने सन्निस्नाने च यस्य दर्शनं विहितं तेनैव कार्यं नान्येन ज्ञाप्रत्यक्षेण समानकर्तृत्वावगतेरिति तन्निरस्तम् । का तर्हि तस्य गतिः दृष्टेहेयविशेषणत्वाद्गुणैकत्वबद्विवक्षयार्थतः सिद्ध-स्नानमात्रानुवादत्वे सर्वं सुस्थम् । अङ्गस्याद्यनादेयगुणकृत्यार्थे वा दर्शनस्यार्थवत्त्वम् । न चोक्तयोग्यतापि साध्वी दर्शनोत्तरं मेघच्छन्ने योग्यताभावापत्त्या दानाद्यभावापत्तेः । तेन तत्तद्देशावच्छेदेन ज्योतिःशास्त्रावेद्यत्वमेव योग्यता । किन्तु "रजसोदर्शने नारी त्रिरात्रमशुचिर्भवेत्" इत्यत्रापस्त्रीणामाशौचाभावप्रसङ्गः । यत्तु वर्द्धमानेनोक्तम् "दानोत्तरं क्षधिकारे न स्नानकाले, स्नानकाले दानाभावात् । एवं दर्शनोत्तरं सन्निपत्यैनमस्यैव योग्यतेति" तदपि प्रतिज्ञामात्रम् । किञ्च यस्तास्ते "तयोः परेद्युरुदये स्नात्वाभ्यङ्गपुरःसरम्" इत्यादि" वाक्य वैयर्थ्यापत्तेः । चातुर्थस्नानान्यथानुपपत्त्यैवार्थादुदये स्नानसिद्धेः । नन्वत्र सन्निस्नाने यावज्जीवमेव स्नानं निमित्तं न चातुर्थम् "चन्द्रसूर्यग्रहे नाद्यात् तन्निमित्तनिमित्तिपूर्वतः। राहोर्विम्बं विलोक्याथ स्नात्वा कुर्वीत भोजनमिति" इङ्गगोतमेन विलोकेति स्नानमात्रोक्तेः । यत्तु "मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततःपरमिति" तदपि स्नानमात्रपरम् । "मेघमालादिदोषेण यदि मुक्तिर्न दृश्यते । आकण्ठमन्न तं कालं स्नात्वा भुञ्जीत वाग्यतः" । इति गौडनिबन्धे दर्शनात्" मैवम् अस्नानस्य निमित्तत्वाभावेन निमित्तसन्निधानेनैव स्नानलाभे वाक्यवैयर्थ्यात् । यस्तास्तेऽपि तदापत्तेश्च । किञ्च, दर्शनं पुंसोविशेषणमुपलक्षणं वा, आद्यः दर्शनावच्छिन्ने काले स्नानस्यैवोक्तेः । दर्शनविच्छेदे सतमपि स्नानादि न ग्रहण निमित्तं स्यात् । नान्त्यः, "यावद्दर्शनगोचर" इति यावत् पदवैयर्थ्यप्रसङ्गात् दृष्टग्रहणोत्तरमपि स्नानाद्यापत्तेश्च । स्नानपक्षेऽप्येष दोषस्तुल्य इति चेत् । मूर्खोऽसि । यदि स्नानवाचकं पदं श्रूयेत ततस्तस्यान्वयो विचार्यते । इयस्तु श्रूयत इति वैषम्यात् कथं तर्हि स्नानं लभ्यते । संक्रान्तौ स्नायादिति वदर्थादित्यवेहि । अस्तुतत्वादेवनेहेयविशेषणविवक्षाक्रमो वाक्यभेदोऽपि । अस्तु तर्हि दृष्टग्रहणं निमित्तमिति चेत् । यस्तास्तेऽप्युत्तरं स्नानापत्तेः । विशिष्टहेये वाक्यभेदाच्च तस्याप्यत्तस्तन्निमित्तमिति चेत् "यावद्दर्शनगोचर" इति वचनेन तन्निषेधात् । तत्र तस्याप्यग्रह एव यस्तास्तेऽपि स्यात् । किञ्च, दर्शनस्य विधिरनुवादो वा । आद्ये ग्रहणोद्देश्येन दर्शनविधिरुत दर्शनविशिष्टस्नानविधिः । नाद्यः, ग्रहोद्देश्येन स्नानविधाने दर्शनविधाने च वाक्यभेदात् । एतेन द्वितीयोऽपि परास्तः दर्शनस्य निमित्तत्वेनाविधेयत्वात् स्नानस्याप्राप्तेः । अन्यथा सोमयजनादौ प्रसञ्जनविधिः केन वार्यते । अथ नानावाक्येषु क्वचिद्दर्शनविशिष्टस्नानविधिः । क्वचिच्च प्राप्तदर्शननिमित्तोऽत्र स्नानमात्रविधिः । तत्र, स्नानस्य प्रधानस्य प्राप्तौ तदङ्गदर्शनप्राप्तिः, तस्यां च निमित्ते सति स्नानमित्यन्योन्याश्रयात् । एवं दर्शनविधौ सति तन्निमित्तकस्नानविधिः सति च प्रधानस्नानविधौ तदङ्गदर्शनविधिः । एवमधिकारे प्रयोजकत्वे च योज्यम् । क्रियार्थपूर्वकालत्वविधौ चास्ते च वाक्यभेदः । अन्यथा स्नानोत्तरमपि दर्शनमङ्गं स्यात् । न द्वितीयः । तत्रापि दर्शनग्रहणयो निमित्तत्वे स्नानद्वयापत्तेः दर्शनाद्वतौ नैमित्तिकाद्वत्तिप्रसङ्गात् । दर्शनविशिष्टग्रहस्य विशिष्टस्यानुवादे वाक्यभेदाच्चेः । न च कृत्तिरार्त्तिविशिष्टं निमित्तमिति वाच्यं आर्त्तिमात्रस्य हि निमित्तत्वे निमेषाद्यार्त्तेरपि तत्त्वापत्तेर्नैमित्तिकत्वभङ्गाद्युक्तं विशिष्टोद्देश्यत्वम् । ग्रहस्तु ग्रहणमात्रस्य निमित्तत्वे न काचित् क्षतिः । तस्माद्दर्शनवाक्यानां गुह्यास्तद्विषयत्वात् अनादेयग्रहणपरत्वाद्वा स्नानस्य चार्थतः प्राप्तेस्तद्देव निमित्तम् । तेन मेघाच्छादनेऽभ्यादेव स्नानादि भवत्येवेत्यलं वेदवार्द्धैः संक्षेपेण" ।

"प्रागुक्तमनुवचनेनोपरक्त दिवाकरदर्शननिषेधः स्नानाद्दर्शनपरः । अतएव ब्रह्मसिद्धान्ते "सर्वैः पटस्थितं वीक्ष्यं स्नात्वैवाभ्युदयैषिभिः। ग्रहणं गुर्विणी जातु न पश्येत्तु पटं विना"पटस्थितयैव गृहणदर्शनमुक्तम् ।

अत्र पूर्वापरवेधः हेमाद्रौ दर्शितो यथा "त्रयोदश्यादितो वक्ष्ये दिनानां नवकं ध्रुवम् । मार्कण्डेयपुराणेषु गृहणे चन्द्रसूर्ययोः"। प्रकारान्तरं तत्रैवोक्तम् । "द्वादश्यादि तृतीयान्तो वेध इन्दुग्रहे स्मृतः । एकादश्यादिकः सौरे चतुर्थ्यन्तः प्रकीर्त्तितः" इदं च पूर्णमासे,"ग्रस्तं सग्रहणे तत्रेति"तत्रैवोक्तेः इदञ्च "गुह्यास्ते तिथिनं पूर्वमिति नारदेन गुह्यास्ते विशेषोक्तेर्गुह्यास्तभिन्नग्रहणपरम् । ज्योतिर्निबन्धे च्यवनः गृहणोत्पातभं त्याज्यं मङ्गलेषु शुभत्रयम् । यावच्च रविणा भुक्ता मुक्तं भं दग्धकादिवत्"

चन्द्रार्कयहणस्य मूर्च्छायाचन्द्राभ्यामावरणरूपस्याऽपि अभावाख्यसंक्रान्तिकालवत् तत्र स्नानदानादौ बहुपुण्यसाधनत्वं स्मृत्यादिषु प्रसिद्धम् तत्रादौ कालमाधत्ते यथा निर्णीतं तत् प्रदर्श्यते हेमाद्रौ व्यासः "पूर्णिमाप्रतिपत्सन्धौ राहुः सम्पूर्णमण्डलम् । ग्रसते चन्द्रमर्कं च दर्शप्रतिपदन्तरे" इति तत्र पर्वणोऽन्तिमोभागः स्पर्शकालः प्रतिपद आद्योभागोमोक्षकालः तदुक्तं ब्रह्मसिद्धान्ते "यावत्कालः पर्वणोऽन्ते तावान्प्रतिपदादिमः । रवीन्दुग्रहणानेष्टाः स पुण्योमिश्रणाद्भवेदिति" ग्रहणानेष्टाः राहुग्रहणकालः तत्र कर्त्तव्यमाह हेमाद्रौ व्यासः "गङ्गातोये च संप्राप्ते इन्द्रो कोटी रवेर्दश । गवां कोटिप्रदानेन सम्यग्दत्तेन यत् फलम् । गङ्गास्नाने तत फलं ग्रहाद्राहुगृहे निशाकरे । दिवाकरे पुनस्तत्र दशसंख्यसहस्रकमिति" अस्य श्लोकद्वयस्य प्रथमार्द्धमर्धोनाधिकारेण योजनीयं इन्दोर्गृहणे संप्राप्ते सति गङ्गातोये अवगाहनं गोकोटिदानसमं भवति रवेर्गृहणे ततो दशगुणं फलम् अयमेवार्थ उपरितनेनार्द्धत्रयेण स्पष्टीकृतः । व्यासोऽपि "इन्दोर्लक्षगुणं पुण्यं रवेर्दशगुणं ततः । गङ्गातोये तु संप्राप्ते इन्दोः कोटीरवेर्दश । गवाकोटिसहस्रस्य यत् फलं लभते नरः । तत् फलं जाह्नवीस्नाने राहुग्रस्ते निशाकरे । दिवाकरे तु स्नानस्य दशसंख्यसहस्रकम् चन्द्रसूर्ययहे चैव बोऽवगाहेत जाह्नवीम् । स स्नातः सर्वतीर्थेषु किमर्थमटते महीमिति" गङ्गाव्यतिरिक्तमहानदीतोये लक्षगुणदशलक्षगुणत्वं गङ्गातोये तु कोटिगुणदशकोटिगुणत्वम् । ब्रह्मपुराणेऽपि "तिस्रोनद्यो महापुण्या वेणा गोदा च जाह्नवी । गां हरीयाद्भिक्षात् प्राप्ता गङ्गा इति हि कीर्त्तिताः" हरेः पादादीश्वरस्य शिरसश्च गां भूमिं प्राप्ता गङ्गा । यद्यपि जाह्नव्येव तादृशी न तु वेणागोदे तथापि छत्रिणो गच्छन्तीति न्यायेन जाह्नव्या सह निर्दिष्टयोस्तयोरपि गङ्गात्वमविरुद्धं यद्वा जाह्नवीजलमेव केनचिन्निमित्तेन ब्रह्मगिरिवायुगिर्योरुद्भूतमिति ज्ञात्वा तयोरपि तुल्यमेव गङ्गात्वन्तासु गङ्गासु स्नानं तुल्यं तदसम्भवे नद्यन्तरेषु स्नायात् तदुक्तं महाभारते "गङ्गास्नानं तु कुर्वीत ग्रहणे चन्द्रसूर्ययोः महानदीषु चान्यासु स्नानं कुर्याद्यथाविधीति" महानद्यो ब्रह्मपुराणे दर्शिताः "गोदावरी भीमरथी तुङ्गभद्रा च वेणिका । तापी पयोष्णी विन्ध्यस्य दक्षिणे तु प्रकीर्त्तिताः । भागीरथी नर्मदा च यमुना च सरस्वती । शिप्रोका च वितस्ता च विन्ध्योत्तरतलेति" महानद्यस्वभावे जलान्तराण्याह यमः "वापीकूपतडागेषु गिरिप्रस्रवणेऽपि च । नद्याद्यदे देवखाते सरसीभूतवाम्बुनि । उष्णोदकेन वा स्नायात् ग्रहणे चन्द्रसूर्ययोरिति" एतत् सर्वमभिप्रेत्याह व्यासः "सर्वं गङ्गासमन्तोयं सर्वो ब्रह्मसमो द्विजः । सर्वं भूमिसमं दानं ग्रहणे चन्द्रसूर्ययोरिति" उष्णोदकस्नातुरविषयत्वमाह व्यासः "आदित्यकिरणैः पूतं पुनः पूतं च वह्निना । अतोऽध्यातुरः स्नायादुष्णेष्वप्युष्णवारिणेति" गङ्गातोयमारभ्योष्णोदकान्तेषूत्तरोत्तरस्नातुकल्पत्वमुक्तम् । एतदेवाभिप्रेत्योशनाऽऽदिषु सप्तद्रजलान्तेषूत्तरोत्तरस्य प्राशस्त्यमाह मार्कण्डेयः "शीतत्वोष्णोदकात्पुण्यमपारक्यं परोदकात् । भूमिष्ठमद्भूतात्पुण्यं ततः प्रस्रवणोदकम् । ततोऽपि सारसं पुण्यं ततः पुण्यं नदीजलम् । तीर्थतोयं ततः पुण्यं महानद्याम्बुपावनम् । ततस्ततोऽपि गङ्गाम्बु पुण्यं पुण्यतरतोऽम्बु धिरिति" मासविशेषेण ग्रहणे नदीविशेषो देवीपुराणेऽभिहितः "कार्त्तिके ग्रहणं श्रेष्ठं गङ्गायमुनसङ्गमे । मार्गे तु ग्रहणं प्रोक्तं देविकायां महामुने । पौषे तु नर्मदा पुण्या माघे सन्निहिता शुभा । फाल्गुने वरणा पुण्या चैत्रे पुण्या सरस्वती । वैशाखे तु महापुण्या चन्द्रभागा सरिद्वरा । ज्यैष्ठे तु कौशिकी पुण्या आषाढे तापिका नदी । श्रावणे सिन्धुनामा तु तथा भाद्रे तु चन्द्रिका । आश्विने सरयूः श्रेष्ठा तथा पुण्या तु नर्मदेति" ग्रहणविशेषे नदीविशेषस्तत्तन्मासाभिहित । "गोदावरी महापुण्या चन्द्रेराहुसमन्विते । सूर्ये च राहुणा ग्रस्ते तमोमूले महामुने ।" नर्मदातोयसंस्पर्शे कृतकृत्या भवन्ति हीति" स्नानवत् स्मरणादिष्वपि पुण्यमाह "स्मृत्वा शतक्रतुफलं दृष्ट्वा सर्वाघनाशनम् । स्पृष्ट्वा गोमेधपुण्यं तु पीत्वा कौलाभणेर्लभेत् । स्नात्वा वाजिमखे पुण्यं प्राप्नुयादविचारतः रविचन्द्रोपरागे च अयने चोत्तरे तथेति" जलविशेषमाह । "गङ्गा कनखले पुण्यं प्रयागः पुष्करं तथा । कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे" इति ग्रहणे श्राद्धं विहितं लिङ्गपुराणे "व्यतीपातक्षणो यावांश्चन्द्रसूर्यग्रहक्षणः । गजच्छाया तु सा प्रोक्ता पितॄणां दत्तमक्षयम्" इति महाभारतेऽपि "सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने । अकुर्वाणस्तु नास्तिक्यात्पङ्के गौरिव सीदतीति" । कूर्मपुराणेऽपि "चन्द्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत् । तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करे" इति । विष्णुरपि "राहुदर्शनदत्तं हि श्राद्धमाचन्द्रतारकम् । गुणवत् सर्वकामीयं पितॄणा

सूपतिष्ठते" इति ग्रहणे रात्रावपि स्नानादेर्न निषेधः। तथा च पातातपः "स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने। आसुरी राविरन्यत्र तस्मात्तां परिवर्जयेदिति" देवलः "यथा स्नानं च दानं च सूर्यस्य ग्रहणे दिवा। सोमस्यापि तथा रात्रौ स्नानं दानं विधीयते" श्राद्धं प्रकृत्य कूर्मपुराणे "नैमित्तिकं तु कर्त्तव्यं ग्रहणे चन्द्रसूर्ययोः। बान्धवानां तु मरणे नारकी स्यादनोदकमिति" वारविशेषे योगफलातिशयमाह व्यासः 'रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा। चूडामणिरिति ख्यातस्तत्र दत्तमनन्तकम्। वारेष्वन्येषु यत् पुण्यं ग्रहणे चन्द्रसूर्ययोः। तत्पुण्यं कोटिगुणितं गत्वा चूडामणौ स्थितमिति' अतिथिप्राप्त्यादिवद्ग्रहणस्यापि श्राद्धकालत्वमाह मार्कण्डेयः "विशिष्टे ब्राह्मणे प्राप्ते सूर्येन्दुग्रहणे तिने। जन्मर्क्षगृहपीडासु श्राद्धं कुर्यात् तथेच्छयेति"। अत्र च श्राद्धं नाम्ना किन्तु हेमादिना तदाह बौधायनः "अलाभे द्विजाभावे प्रवासे पुत्रजन्मनि। हेमश्राद्धं संग्रहे च कुर्याच्छूद्रः सदैवहीति" यातातपोऽपि "आपद्यनग्नौ तीर्थे च चन्द्रसूर्यग्रहे तथा। आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वेति" अथौचिनोऽपि ग्रहणे स्नानादि न निषिद्धं तथा च हेमाद्रिधृतः "सूतके मृतके चैव न दोषो राहुदर्शने। तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते' इति दृश्यश्च शुद्धिः सर्वैवार्त्तकर्मविषया अविशेषोक्तेः एतदेवाभिप्रेत्य व्याघ्रपादाह "वार्त्तकर्मपरित्यागो राहोरन्यत्र सूतके। औते कर्मणि तत्कालस्नातः शुद्धिमवाप्नुयादिति" यत्तु ग्रहणनिमित्तमाशौचं तत्स्नानेन निवर्त्यमित्युक्तं ब्रह्मपुराणे "आशौचं जायते नृणां ग्रहणे चन्द्रसूर्ययोः। राहुस्पर्शे तयोः स्नात्वा दानादौ कल्पते नरः" इति षड्त्रिंशन्मतेऽपि "सर्वेषामेव वर्णानां सूतकं राहुदर्शने। स्नात्वा कर्माणि कुर्वीत ग्रहमन्त्रं विवर्जयेदिति" ग्रहणस्य आद्यन्तयोः स्नानं विहितं मध्यान्तरे "गृह्यमाणे भवेत् स्नानं गृह्ये होमो विधीयते। सद्यमाने भवेद्दानं मुक्ते स्नानं विधीयते" होमदानहेतोर्वाचनमपि स्नानद्वयमध्ये कार्यं तदुक्तं ब्रह्मवैवर्ते "स्नानं स्यादुपरागादौ मध्ये होमः सवाचनमिति" तत्काले स्वाध्यादिकं न कुर्यात् तदुक्तं शिवरहस्ये "सूर्येन्दुग्रहणं यावत् तावत् कुर्याज्जपादिकम्। न स्पृशेच्च न भुञ्जीत स्नात्वा भुञ्जीत शुद्धयोरिति" मोक्षानन्तरभावि यत् स्नानं तस्य शुद्ध्यर्थतया तत् सचेलं विधेयं तदाह हरदत्तः "सर्वेषामेव वर्णानां सूतकं राहुदर्शने। सचेलं तु भवेत् स्नानं सूतकान्नञ्च वर्जयेदिति" ग्रहणकाले ततः पूर्वं वा यावत् पक्वं तत्सूतकान्नं तच्च पश्चादपि न भुञ्जीत"। अत्र विशेषोऽभक्ष्यग्रन्थे २८०पृ० उक्तस्तत्रावसेयः "आदिमध्यावसानेषु यद्यद्विहितं तस्य फलातिशय उक्तो ब्रह्मपुराणे "उपमर्दे लक्षगुणं ग्रहणे चन्द्रसूर्ययोः। पुण्यं कोटिगुणं मध्ये सङ्क्रिकाले त्वनन्तकमिति" अत्र ग्रहणे यद्दानं तत् सत्पात्रे कर्त्तव्यं तदुक्तं भट्टाभारते। "अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः। पात्रभूताय विप्राय भूमिं दद्यात् सदक्षिणामिति" पात्रलक्षणमाह याज्ञवल्क्यः। "न विद्यया केवलया तपसा वापि पात्रता। यत्र ह्येतत्रिभे चोभे तद्धि पात्रं प्रकीर्त्तितमिति" पात्रे सङ्ख्यानुक्रमादाह बौधायनः "श्रोत्रियोऽश्रोत्रियो वापि पात्रं वाऽपात्रमेव वा। विप्रमुख्योऽपि वा विप्रो ग्रहणे दानमर्हतीति"। अस्मिन् सूर्यग्रहणं निशि चन्द्रग्रहणमिति हि प्रसिद्धिः सर्वजनीना, तादृशे ग्रहणे यद्भक्ष्यं तदुक्तं यत्तु कालविपर्य्यासेन ज्ञाप्यमानं ज्योतिःशास्त्रमात्रप्रसिद्धं ग्रहणं तत्र स्नानादिकं न कर्त्तव्यं तदुक्तं निगमे "सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा। तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति" यस्तास्तमये जाबालिराह "संक्रान्तौ पुण्यकालस्तु षोडशोभयतः कलाः। चन्द्रसूर्योपरागे तु तु यावद्दर्शनगोचरे" इति यस्तस्तमनपर्य्यन्तं दर्शनगोचरत्वात् तावत् पुण्यकालो भवति ग्रहणे भोजनव्यवस्थामाह मनुः। चन्द्रसूर्यग्रहे नाद्यादाद्यात् स्नात्वा विमुक्तयोः। असुक्तयोरसगयोर्दृष्ट्वा भुक्त्वा परेऽहनीति" ग्रहे ग्रहणकाले सूर्यमारभ्य मोक्षपर्य्यन्तोग्रहणकालः तस्मिन् काले न भुञ्जीत किन्तु रात्रौ चन्द्रसूर्ययोर्मुक्तयोः सतोः पश्चात् स्नात्वा भुञ्जीत यदा तु यस्तास्तमयस्तदा परेद्युस्तौ विमुक्तौ दृष्ट्वा स्नात्वा भुञ्जीत। न केवलं ग्रहणकाल एव भोजनाभावः किन्तु ग्रहणात्प्रागपि तदाह व्यासः "नाद्यात् सूर्यग्रहात् पूर्वं सन्ध्यां सायं ग्रहात्यये। ग्रहकाले च नाश्नीयात् स्नात्वान्नीयाद्विमुक्तयो। सङ्क्रे ग्रहणि भुञ्जीत यदि न स्यान्महानिशा। असुक्तयोरसुगयोर्दृष्ट्वा परेऽहनीति"। पूर्वकाले भोजननिषेधे विशेषः अभक्ष्यग्रन्थे २८०पृ० उक्तस्तत्रावसेयः। "ग्रहर्क्षस्य भोजने प्रायश्चित्तमुक्तं कात्यायनेन "चन्द्रसूर्य-

हे भुक्त्वा प्राजापत्येन शुध्यति"। पश्चात्तत्समये विशेषमाह भगुः "पश्चात्तेषान्तमानं तु रवीन्दू प्राप्नुतोयदि। परेद्युरुदये हृत्वा स्नात्वाभ्यर्च्य हरेश्वरः" इति हेमाद्रिणार्य्योऽपि "सन्ध्याकाले यदा राहुर्ग्रसते शशिभास्करौ। तदर्द्धमेव भुञ्जीत रात्रावपि कदाचनेति"। विष्णुधर्मोत्तरेऽपि "अहोरात्रं न भोक्तव्यं चन्द्रसूर्य्यग्रहो यदा। मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति" नन्वेवमेघाद्यन्धकारे चाक्षुषदर्शनं न सम्भवतीति न दर्शनयज्ञेन ग्राह्मीयज्ञानस्य विवक्षितत्वात् तदाह हेमगौतमः "चन्द्रसूर्य्यग्रहे नाद्यात्क्षिप्तमन्नं पुरातनं। तयोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनमिति" एवं तर्हि परेद्युरुदयात् प्रागपि ग्राह्मीयविज्ञानसम्भवात्तदैव भोजनं प्रसज्येतेति चेन्न "परेद्युरुदये हृत्वा स्नात्वाभ्यर्च्य हरेः" "अहोरात्रं न भोक्तव्यमिति" वचनद्वयेन तदप्रसक्तेः यत्तु "स्कन्दपुराणे "यदा चन्द्रग्रहस्तात निशीथात्परतो भवेत्। भोक्तव्यं तत्र पूर्वाह्णे नापराह्णे कथञ्चन। पूर्वं निशीथादुपरागं यदा चन्द्रस्य वै भवेत्। तदा निशि न कर्त्तव्यं भोजनं यिस्विवाहनेति" तदिदं यामत्रयाभिप्रायं "चन्द्रग्रहे तु यामांस्त्रीनिति" विशेषस्य हेमगौतमेनाभिधानात्। पापक्षयकामोपरागे उपवसेत् तदाह दक्षः "अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः। अहोरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यत" इति पुत्री तु नोपवसेत् तदाह नारदः "संक्रान्त्यासुपवासस्तु ऋणकादधिकादिने। चन्द्रसूर्य्यग्रहे चैव न कुर्य्यात् पुत्रवान् गृही" इति "यस्तात्समये तु पुत्रिणोऽप्युपवासएव "अहोरात्रं न भोक्तव्यमिति,भोजनप्रतिषेधात्"। काशका०।

ग्रहणश्राद्धे विशेषः नि०सि० "सैंहिकेयो यदा सूर्यं ग्रसते पर्वसन्धिषु। गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत्। हतेन भोजयेद्विप्रान् हतं भुञ्जीत सम्पुटञ्जेत्" इति वायुपु० विज्ञानेश्वरोप्याह "ग्रहणश्राद्धे भोक्तुर्दोषो दातुश्चाभ्युदय इति। "स्नातके हृतके भुक्ते गृहीते शशिभास्करे। च्छायायां क्षत्रियस्त्रैव न भूयः पुरुषो भवेत् इत्यापस्तम्बेन भोजननिषेधात् अयं च निषेधः श्राद्धभोक्तुः। अत्र ग्रहणनिमित्तकश्राद्धे नैवामासंक्रान्त्यादिनिमित्तकानां सिद्धिः"। प्रागुक्तवचनैरौध्वाभ्यन्तरेऽपि स्नानादिकर्म्मविधानात् "स्नानमात्रं प्रकुर्वीत दानश्राद्धविवर्जितमिति" निर्मूलं वदन्तो गौड़ाः पराक्ताः नि०सि०। अशौचिनां ग्रहणकाले शुद्धिरविशेषान्मन्वादीनामपुरश्चरणादिसर्वकर्म्मविधया मदनरत्नेऽप्येवम्। रत्नमालायान्तु भार्गवाचनदीपिकायाम् भेदः। "न स्नातव्यादि दोषोऽस्ति ग्रहे क्षीमजपादिषु। ग्रसते स्नायादुदक्यापि तीर्थादुद्धृतवारिणेति" अत्र "स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला। पात्रान्तरिततोयेन स्नानं कृत्वा व्रतं चरेत्" इत्यादि मिताक्षरोक्तो विधिर्ज्ञेयः"नि०सि०।

गृहणदिने वार्षिकं श्राद्धं हेमाद्रिना कार्य्यम् यथाह प्रयोगपारिजाते गोभिलः। "दर्शे रविग्रहे पित्र्ये प्रत्याब्दिकमुपस्थितम्। अन्नेनासम्भवे हेम्ना कुर्यादामेन वा सुतः" इति। अत्र दर्शरविग्रहसुतयद्वाः प्रदर्शनार्थाः न्यायसाम्यात्। तेन चन्द्रग्रहेऽपि सपिण्डादि वार्षिकमन्नादिना तद्दिन एव कार्य्यमिति" मदनपारिजाते व्याख्यातम्। पृथ्वीचन्द्रोदयेऽप्येवं तेन यानि "आमश्राद्धं तु कुर्वीत माससंवत्सरादृते" इति। "अन्ने नैवाब्दिकं कुर्यादहेम्ना वाऽऽमेन न क्वचिदिति" मरीचिगौरगाद्यादिवचनानि तानि गृहणदिनातिरिक्तविषयाणि निर्णयाद्यन्तेऽप्येवम्। यानि तु "गृहणास्तु द्वितीयेऽह्नि रजोदोषान्न पञ्चमे"। तथा "गृह्यतेयद्यमामन्तु रवीन्दू प्राप्नुतोयदि। प्रत्यब्दं तु तदा कार्य्यं परेऽह्न्येव सदा"। "चन्द्रसूर्य्योपरागे च तथा श्राद्धं परेऽहनि" इत्यादीनि वचनानि तानि अन्नामिसम्बन्धेषु काम्यानुपलम्भान्नित्यानि। प्रत्युत पूर्वोक्तवचनेऽप्येतत्तद्दिन एव श्राद्धसङ्क्रमित्वम्" नि० सि०।

"गृहणादिसप्तदिनपर्य्यन्तमागमे दोषोक्ता शिवार्चन चन्द्रिकायां स्नानार्थत्वे। "मन्त्राद्यारम्भणं कृत्वादुपरागे चन्द्रसूर्य्ययोः। ग्रहणाद्यापि देवेशि कालः सप्तदिनावधीति"। रत्नसागरे "सप्तानामेकविध्यासे तन्तुदानमपर्वणि। मन्त्रादीनां प्रकुर्वीणोमासश्राद्धेन शोधयेत्"। अत्र सूर्य्यग्रहणमेव सङ्गच्छम्। "सूर्य्यग्रहणकाले तु नान्यदन्वेषितव्यवेत्। सूर्य्यग्रहणकालेन समो नान्यः कदाचन। न मासतिथिवारादिशोधनं सूर्य्यपर्व्वणीति" तत्रैव कालोत्तरवचनात्। "चन्द्रग्रहे तु या दीक्षा या दीक्षा व्रतचारिणाम्। वनस्थस्य च या दीक्षा दारिद्र्यं सप्तजन्मसु" इति तत्रैव योगिनीतन्त्रे निषेधाच्च" नि०सि०

"पुरश्चरणचन्द्रिकायाम्। "चन्द्रसूर्य्योपरागे च स्नात्वा प्रयतमानसः। सप्तर्षिभोज्यपर्य्यन्तं जपेन्मन्त्रं समाहितः। जपाद्दशांशतो होमस्तथा होमात्तु तर्पणम्। तर्पणस्य दशांशेन मार्ज्जनं कथितं किल। मार्ज्जनस्य दशांशेन ब्राह्मणानपि भोजयेत्। जपार्चापूर्वकोहोमस्तर्पणञ्चाभिषेचनम्। भूदेवपूजनं यज्ञप्रकारोक्ता पुरस्क्रिया। होमाशक्तौ जपं कुर्याद्धोमसंख्याचतुर्गुणम्"। ॥विशेषणतया सन्मन्त्रजाले च।

३निन्दायाम् हेम० ५व्यसकक्लोले दैव्यसने ७दुष्टनीतौ च मेदि० उपरज्यते मिथ्याभिसम्बन्धेन सम्बध्यते अनेन करणे घञ्। आध्यासिकसम्बन्धेन सम्बद्धे पटविशेषणभेदे। यथा घटत्वोपरागेण पटभानम्। घटत्वं हि पटस्य आध्यासिकसम्बन्धेन सम्बद्धं विशेषणम्।

उपराज अव्य० सामीप्येऽव्ययी० अच् समा०। १रात्रेः सामीप्ये उपगतो राजानं सादृश्येन अया०स०टच् समा०। २राजतुल्ये त्रि० स्त्रियां ङीप्। ततः काश्या० भवार्थे ष्यञ् (औपराजिकः तद्भवे त्रि० स्त्रियां ङीष्। तदर्थे त्रिठोऽपि रूपमेकं स्त्रियां तु टाप् इति भेदः

उपराधय त्रि० उप+राध-णिच्-या० य। उपसेवके। ततः आत्मया० भावे कर्मणि च अच्। औपराधय तद्भावे तत्कर्मणि च न०।

उपराम पु० उप+रम-घञ् वा ह्रस्वः। १उपरतौ २म्रत्यौ ३निवृत्तौ ४संन्यासे च। अव्ययी०। ५रामसामीप्ये अव्य०

उपराव पु० उप+रु-घञ्। समीपोच्चारितशब्दे

उपरि अव्य० अर्ह+रिल् उपादेशश्च। प्रथमापञ्चमीसप्तम्यन्तार्थवृत्तेः अर्हशब्दस्यार्थे। अर्हुपरम् अर्हुया वा वसति; अर्हात् पुरात् अर्हुयाया वसतेरागतः अर्हुपुरे अर्हुयां वा वसतौ वसति इलाद्यर्थे सर्व्वत्र उपरीलेव। "तदुपर्य्यपि बादरायणः" भा०सू०। "नीचानाः स्युरुपरि बुध्नएषामस्थे" ऋ० १,२४,७, "अधः स्विदासीदुपरि स्विदासीत्। १०,१२९,५, "तत्पाणिमात्मोपरिपासुकन्तं" नैष०। "त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः" मेघ०। "अयाङ्मुखस्योपरि पुष्पवृष्टिः" "परस्परस्योपरि पर्य्यचीयत" रघुः। "क्षिप्त्वा मांसानि यज्ञेषु यदिवोपरिजोभवेत्" स्मृ०। "उपरिजतरुजानि यावमानाम्" किरा०। "मिथ्या ततस्तादुपरिप्लुता भङ्गेन" यजु० ७,१, अस्य सामीप्ये द्वित्वं उपर्य्युपरि समीपोर्द्धे अव्य० "उपर्य्युपर्य्यम्बुचरा विताने" माघः। "अभिसर्व्वतोऽर्थाद्यां धिक्युपर्य्यादिषु त्रिषु। द्वितीयाद्यैस्तिसृभिर्योगे तथान्यतापि दृश्यते" इत्यमरः; तद्योगे सप्तम्यन्ति हि द्वितीया। "उपर्य्युपरि लोकं हरिः" सि०कौ०। उपर्य्युपरि गच्छतः शैलराजमुदङ्मुखाः" भा० आ० ४१४ अ०। बाहुलकात् क्वचित्र। "उपर्य्युपरि बुद्धीनां चरन्नीश्वरवद्भवः"।

उपरिचर त्रि०उपरि+चर-ट। १अर्हुचरे विहगादौ। २राजभेदे ह०। स च वसुनामा चेदिदेशपतिः शक्रध्वजपूजाप्रवर्त्तकः। तस्येतिहासश्च भा०आ० ६३अ०। "राजोपरिचरोनाम धर्म्मनित्योमहीपतिः" इत्युपक्रम्य तुष्टेन शक्रेण तस्मै आकाशगं विमानं दत्तं तत्र चरणाट्टपरिचरनामेत्युक्तं यथा "देवोपभोग्यं दिव्यञ्च आकाशे स्फाटिकं महत्। आकाशगं त्वां महत्तं विमानमुपपत्स्यते। त्वमेकः सर्व्वमर्त्येषु विमानवरमास्थितः। चरिष्यस्युपरिगो हि देवो विग्रहवानिव। ददामि ते वैजयन्तीं मालामम्लानपङ्कजाम्। धारयिष्यति संग्रामे या त्वां शस्त्रैरविक्षतम्। लक्षणं चैतदेवेह भविता ते नराधिप। इन्द्रमालेति विख्यातं सर्व्वलोकेषु महत्। वैश्यस्यायन उवाच। यस्त्विमं वैश्यवीं तस्मै ददौ दुष्टनिसूदनः। दुष्टप्रदानसहिष्णु शिष्टानां प्रतिपालनीम्। तस्याः शक्रस्य पूजार्थं भूमौ भूमिपतिस्तदा। प्रवेशं कारयामास गते संवत्सरे तदा। ततः प्रभृति चाद्यापि यज्ञैः क्षितिपसत्तमैः। प्रवेशः क्रियते राजन्! यथा तेन प्रवर्त्तितः। अपरेद्युस्ततस्तस्याः क्रियतेऽल्पव्ययो नृपैः। अलङ्कृतायाः पिटकैर्गन्धमाल्यैश्च भूषणैः। माल्यदामपरिक्षिप्ता विधिवत् क्रियतेऽपि च। भगवान् पूज्यते चात्र कंसरूपेण शङ्करः। स्वयमेव वटेहीतेन वसोः प्रीत्या महात्मनः। स तां पूजां महेन्द्रस्तु दृष्ट्वा देयः क्रतां शुभाम्। वसुना राजसख्येन प्रीतिमानब्रवीत् प्रभुः। ये पूजयिष्यन्ति नरा राजानश्च महं मम। कारयिष्यन्ति च सदा यथा चेदिपतिर्नृपः। तेषां श्रीर्विजयश्चैव सराष्ट्राणां भविष्यति। तेषां स्फीतो जनपदो मुदितश्च भविष्यति। एवं महात्मना तेन महेन्द्रेण नराधिपः। वसुः प्रीत्या मघवता महाराजोऽभिसत्कृतः। उत्सवं कारयिष्यन्ति सदा शक्रस्य ये नराः। भूमिरत्नादिभिर्हीनैस्तथा पूज्या भवन्ति ते। वरदानप्रभावैस्तैस्तथा शक्रोत्सवेन च। संपूजितो मघवता वसुश्चेदीश्वरो नृपः। पालयामास धर्म्मेण चेदिस्थः पृथिवीमिमाम्। इन्द्रप्रीत्या चेदिपतिश्चकारेन्द्रमहं वसुः। पुत्रांश्चास्य महावीर्य्यान् पञ्चासञ्जनमेजयः। नानाराज्येषु तान् पुत्रान् स सम्राडभ्यषेचयत्। मगधानां नृपतिर्यो बृहद्रथः। प्रत्यग्रहः कुशाग्रेण यमाङ्गर्भेण शाकुनम्। मावेल्लञ्च यदुश्चैव राजन्यश्चापराजितः। एते तस्य सुता राजन्! जर्ज्जर्भूरितेजसः। व्यवेयवस्तामभिः स्वैस्ते देशांश्च पुराणि च। वासवाः; पञ्च राजानः पृथग्वंशाश्च भारताः। वसन्तमिन्द्रप्रासादे आकाशे स्फाटिके च तम्। उपतस्थु-

मेहात्मानं गन्धर्वाप्सरसोऽपश्यम् । राजोपरिचरैतेयं नाम तस्याग्र विस्तृतम् । पुरोपशाहिनीं तस्य नदीं शुक्तिमतीं गिरिः । अरौत्सीच्चेतनायुक्तः कामात् कोलाहलः किल । गिरिं कोलाहलं तन्तु पदा वसुरताडयत् । निष्पक्रामं ततस्तेन पुरुषारविवरेण सा । तस्यां नद्यामजनयन्मिथुनं पर्वतः स्वयम् । तस्माद्विमोचनात् प्रीता नदी राज्ञे न्यवेदयत् । यः पुमानभवत्तत्र तं स राजर्षिसत्तमः । वसुर्वसुप्रदत्वके सेनापतिमरिन्दमः । चकार पत्नीं कन्यान्तु तथा गिरिकां वसुः" । [जर्द्धभवे ।

उपरितट त्रि० उपरि भवः खुञ् तुट् च स्त्रियां ङीप् ।

उपरिमर्त्य अव्य०वेदे वा० अव्ययी० । मर्त्यस्योपरीत्यर्थे "अवोदेवमुपरिमर्त्यं ददधि" ऋ० ८,१६,१२, "उपरि मर्तं मर्त्यानामुपरि" इति भा० । लोके तु तथा नैत० । मर्त्यापरीत्येव । अतएव "तदुपर्यपि बादरायणः" या० सू० । "आलोपरिपातुकन्तु" नै० इत्यादौ वा षष्ठीसमासप्रयोगः ।

उपरिमेखल पु० उपरि ऊर्द्धा मेखला यस्य । गोत्रप्रवर्त्तके ऋषिभेदे तत्र; गोत्रार्थे इञ् औपरिमेखलि तद्गोत्रे पुंस्त्री बहुषु तु अस्त्रियाम् यस्कादि०तस्य लुक् । उपरिमेखलाः ।

उपरिबृहती स्त्री वैदिके बृहतीच्छन्दोभेदे "चतुर्थं बृहती तृतीयो द्वादशकः । आद्यपेत् पुरस्ताद्बृहती द्वितीयश्चेद्ब्राह्मणधारिणी उपरिबृहती स्वस्त्रयोवा वा अन्त्यश्चेदुपरिबृहती" सर्वानुक्रमणिका० ५ अ० । एवमुपरिबृहतीत्यपि वैदिके बृहतीच्छन्दोभेदे ।

उपरिष्टात् अव्य०ऊर्द्ध+ल०रिष्टातिल् उपादेशश्च । उपरिशब्दार्थे "उपरिष्टादाख्यास्यामिधास्यति" शत० ब्रा० १, ६,१,२१, "पुरुष उपरिष्टात् पश्चूनतितिष्ठति" १३,२,६,४, "तस्योपरिष्टाद् वत्सस्य वत्साका संन्यधीयत" भा०व० २०५ अ० "लिप्रक्षोपरिष्टादुभयतः कूर्चः" सुश्रु० ।

उपरिसद् पु० उपरि सीदति सद-क्विप् । राजसूययज्ञे सोमनेतृके दुग्धसाध्यके देवभेदे । "सोमनेतेभ्यो देवेभ्य उपरिसद्भ्यो दुग्धसद्भ्यः स्वाहा" "ये देवा सोमनेता उपरिसदो दुग्धसत्स्तेभ्यः स्वाहा" यजु० ६,३५,३६ । २ऊर्द्धस्थे त्रि० ।

उपरिसद्य न० उपरि सद्यं सदनमुपवेशनम् सद-भावे वा० यत् । ऊर्द्धोपवेशने अन्तरिक्षोपवेशने "उपरिसद्यं वा एष जयति योऽयज्ञरित्यज्ञसद्यम्" शत० ब्रा० २,१, २२, उपरिसद्यम् अन्तरिक्षसद्यमाकाशे उपवेशनम्" भा० ।

उपरीतक पु० "एकपादभूरो भूत्वा द्वितीयं स्वाभसंस्थितम् । नारीं कामयते कामी बस्तः स्यादुपरीतकः" रतिम० उक्ते ऊर्द्धारबन्धभेदे

उपरुद्ध त्रि० उप+रुध+क्त । १निरुद्धे २आवृते च "अलघुविलम्बिपयोधरोपरुद्धा" माघः "उपरुद्धाः निरुद्धा आवृताश्च" मल्लि० ३प्रतिरुद्धे च । "दृष्टं हि राज्ञामुपरुद्धदृष्टम्" रघुः ४मूत्रादिवेगयुक्ते च ।

उपरूपक न० उपगतं रूपकं दृश्यकाव्यम् सादृश्येन अल्पा० स० । नाटकभेदे तल्लक्षणादर्शे अष्टादश यथाह सा० द० "नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् । प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा । संलापकं श्रीगदितं शिल्पकञ्च विलासिका । दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च" अष्टादश प्राहुरुपरूपकाणि मनीषिणः । विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्" तल्लक्षणानि तत्तच्छब्दे वक्ष्यन्ते

उपरोध पु०उप+रुध-घञ् । १आवरणे "गरुत्मद्बाह्वयुपरोधरोधम्" रघुः । २प्रतिबन्धे च "अन्येषामपि भैक्षोपजीविनां हन्त्युपरोधं करोषि" भा०आ० २अ० । "तपोधन निवासिनामुपरोधो मा भूत्" शक० ३अनुरोधे च । भावे ल्युट् उपरोधनमप्युक्तार्थेषु न० ।

उपरोधक न० उप+रुध-ण्वुल् । १वासगृहे शब्दरत्ना० । २उपरोधकर्त्तरि ३आवरके ४प्रतिबन्धके ५अनुरोधकर्त्तरि च त्रि०स्त्रियां टाप् अत इत्त्वम् ।

उपल पु० उप+ला-आदाने क उपलीयते गिरिरित्यादि वा स्त्री वा० ङ, पल-गतौ अच् पलः ओः शिवस्य पलः बोधक इत्यपरे । १पाषाणे "रेखां दृश्यस्य पलविधमे विन्ध्यपादे विशीर्णाम्" मेघ० "परिघट्टा यतश्चीव सचक्राः सगुडोपलाः" भा०व० २८३अ० २पाषाणकायाम् "भिषगुपलप्रक्षिप्तो नना" ऋ० ६,११२,३ । "उपलेषु वासुकाल्प मक्षिण्वन्ति" भा० ३रत्नमाले मेदि० "वलयार्पितासितमणेरुपलप्रभाः "शुकाङ्गनीलोपलनिर्म्मितानाम्" "नीलोपलस्यूतविचित्रधातुः" माघः "मध्यमोपलनिभे नलदंशौ" किरा० । ४शर्करायां स्त्री । उपराति वारि रा-दाने क वा रस्य लः । ५मेघे निरु० । लत्वाभावे उपरोऽपि मेघे

उपलक्षक त्रि० उप+लक्ष-ण्वुल् । १उद्भावके "मेधावी वाक्पटुः प्राप्तः परचित्तोपलक्षकः । धीरो यथोक्तवादी च एष दूतो विधीयते" नीतिः उपादानलक्षणया स्वेतर बोधके २शब्दे च यथा काकेभ्योरक्ष्यतामन्नमित्यादौ काकशब्दः उपघातकत्वेन काकतदितरबोधकत्वात् उपलक्षकः ।

उपलक्षण न० उपलक्ष्यते स्वेतरज्ञानेन उप+लक्ष-करणे

ख्युट्। खस्य खान्यस्य च अजहत्स्वार्थया लक्षणया बोधके शब्देयया काकेभ्योदधि रक्ष्यतामित्यत्र काकपदं खस्य खान्यस्य वाहेव बोधकम्। तल्लक्षणस्तु स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकत्वम्। भवति चोक्तोदाहरणे उपघातकत्वेन क काकाकीभयद्वत्तित्वं काकशब्दस्येति तथात्वम् ततश्च यत्र तावच्छेदकधर्म्मपरित्यागेन इतर धर्म्मरूपेण स्वेतरबोधकं हि पदस्य लक्षणं भवति "मञ्चस्थः क्रोशति" ब्राह्मणस्यामुपलक्षणम्" सि०कौ०। उप+लक्ष-भावे ल्युट्। २ताद्दशज्ञाने। "क्रमणस्य नियोगोपलक्षणार्थम्" सि०कौ०। ३गणभेदे राजनि०।

उपलधिप्रिय पु० बालधिः प्रियोऽस्य षष्ठी०। चमरनाम-

उपलब्ध त्रि० उप+लभ-क्त। १प्राप्ते, २ज्ञाते च। आख्यायिकोपलब्धार्था" अमरः। क्तवतु। उपलब्धवत् प्राप्तरि ज्ञातरि च स्त्रियां ङीप् "उपलब्धवती दिवच्युतम्" रघुः।

उपलब्धि स्त्री० उप+लभ-क्तिन्। १प्राप्तौ "इयं हि मे स्यात् स्वपदोपलब्धि" रघु०। २प्रत्यक्षादिज्ञाने च। "नाभाव उपलब्धेः" भा०सू०। योग्यानुपलब्धिः "अनपायिपदोपलब्धये" रघु।

उपलभृ त्रि० उप+लभ-तृच् स्त्रियां ङीप्। १प्राप्तरि २ज्ञातरि ज्ञानाश्रये ३आत्मनि पु०। [षाणभेदे शब्दे राजनि०।

उपलभेदिन् पु० उपलं भिनत्ति भिद्-णिनि ई तत्। पा-

उपलभ्य त्रि० उप+लभ-कर्म्मणि यत्। १प्राप्ये "आरम्भसिद्धौ समयोपलभ्यम्" रघु०। २ज्ञेये च प्रशंसायां सुम् उपलभ्यः।

उपलम्भ पु० उप+लभ घञ् सुम् च। १लाभे, २ज्ञाने च। "कर्त्तृता तदुपलम्भतोऽभवत्" माघ०। "ज्ञातौ सुतस्यैव सुखोपलम्भात्" रघुः।

उपलिङ्ग न० उपमितं लिङ्गेन अव्या०स०। लोकनिङ्गसाधनभावेन लिङ्गेनानुमापकेन सहचे अलौकिकसाधनभावके अरिष्टसूचके मूकस्मादौ उपद्रवे।

उपलेप पु० उप+लिप-घञ्। १गोमयादिना आलेपने "गात्रेषु सर्वेन्द्रियाणामुपलेपोऽवसादनमिति" सुश्रुतोक्ते २सर्वेन्द्रियावसादने च। "कासोपलेपस्वरभेदनिद्रातन्द्रास्तृदौर्गन्ध्यविषोपसर्गाः" वादोपलेपबलकृत् सुश्रु०। भावे ल्युट् उपलेपन गोमयादिना आलेपने न० "मण्डलालेपनादिकं कर्म समाप्तापयति" पञ्चत०।

उपवक्तृ पु० उपवक्ति उपदिशति उपवक्ष्यति वा उप+वच तृच्। यज्ञे ऋत्विग्भेदे १ब्रह्मणि २सदस्ये च "वेत्थ ह्यध्वरीयतामुपवक्ता जनानाम्" ऋ०४,६,५, "उपवक्ताऽध्वर्युप्रभृतीनां सर्वेषां कर्मणामनुष्ठातृणां नित्यं प्रणयेत्यादिरूपस्य वाक्यस्य वक्ता सन् ब्रह्मासि, सर्वेषां कर्मणामर्थवत्कर्त्तव्यार्थमुपदष्टा सदस्यो वासि" भा०

उपवङ्ग पु० उपगतोवङ्गम् अव्या०स०। वङ्गदेशसमीपस्थे देशभेदे देशशब्दे विदृतिः। [देशे राजनि०

उपवट पु० उपमितो वटेन अव्या०स०। वटवृक्षसदृशे प्रियासाल

उपवन न० उपमितं वनेन अव्या०स०। वनतुल्ये कृत्रिमे आरोपितवृक्षसमूहे १उद्याने। "पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नैः" मेघ० "साकेतमालोपवना वहन्ति" रघुः आरामशब्दे पृ० ८०१ विदृतिः वनस्य सामीप्यम् वने वा अव्ययी०। २वनसामीप्ये ३वने इत्यर्थे च अव्य० "कुसुमयन् फलिनीरलिनीरवैर्मदविकाशिभिराकृतकूजितः। उपवनं निरभर्त्सयत प्रियान्" माघः।

उपवर्णन न० उप+वर्ण-ल्युट्। सम्यक्कीर्त्तने स्वरूपलक्षणगुणादिभिः प्रतिपादने "अतिशयोपवर्णनं व्याख्यानम्" सुश्रु०

उपवर्त्तन न० उपेत्य वर्त्तन्तेऽत्र उप+वृत-आधारे ल्युट्। जनपदे १विषये "तस्योपवर्त्तनेऽप्येको न सुतो गोवृषोऽभवत् कचित्" काशी० तटकदेशे २सजलस्थले भरतः।

उपवर्ष पु० पाणिनिभ्रातृपाणिनऋषिप्रभृतीनामध्यापके ऋषिभेदे तत्कथा वृहत्कथायाम् दृश्या "वर्षा एव तु भगवानुपवर्षः" भा०सू०

उपवर्हं पु० उप+वृह-उद्यमने करणे घञ्। शिरोधाने (बालिश) हेम०तत्र हि स्थापयित्वा शिर उद्यम्यते इति तस्य तथात्वम्। ल्युट्। उपवर्हणमप्यत्र न०[राजनि०।

उपवल्गिका स्त्री० उप उत्कर्षे गादिषु०। अन्तस्वस्वतायाम्

उपवल्गु पु० उप+वल्ह-प्राधान्ये घञ्। प्राधान्ये उत्कर्षे "तत् सर्वेषां हृतानां धारयतामेव धनमुपाहितं भवत्युपबृंहाय विभ्यताम्" शत०ब्रा०१,४,२,१,

उपवसथ पु० उपेत्य वसत्यत्र उप+वस-आधारे अथ। १ग्रामे हेमच०। "यद्याहिताग्निरुपवसथे म्रियते कथमस्य यज्ञसंयात्" ऐत० "यजमानस्य समीपे वसन्ति देवा अस्मिन्निति आधारे अथ। २यागपूर्व्वदिवसे। तस्मिन्विधानादिकं शत०ब्रा० १,११,१,७,२, दर्शितं यथा

"अथातोऽयनानयनयोश्च। तदुहाचार्यः सावयसोऽयनयनमेव व्रतं मेने मनोरूपं देवा मनुष्यस्याजानन्ति तत् एनमेतद्वृतमुपयन्तं विदुः प्रातर्नो यक्ष्यत इति तेऽस्य विश्वे देवा गृहानागच्छन्ति तेऽस्य गृहेषूपवसन्ति स उपवसथः। तत्रैवानवक्लृप्तम्। यो मनुष्येऽयनमृतुषु पूर्वोऽ

श्नीयादथ किम् यो देवेष्वनश्नत्सु पूर्व्वोऽश्नीयात्तस्मादु नैवान्नीयात् । तदुहोवाच याज्ञवल्क्यः । यदि नाश्नाति पित्तदेवत्यो भवति यदु अश्नाति देवानत्यश्नातीति स यदेवाग्नितमनग्नितं तदश्नीयादिति यस्य वै हविर्नि ष्टक्कन्ति तदग्नितमनग्नितं स यदश्नाति तेनापित्तदेवत्यो भवति यदु तदश्नाति यस्य हविर्नि ष्टक्कन्ति तेनो देवान्नात्यश्नाति । स वा आरण्यमेवान्नीयात्" "व्रतप्रसङ्गादागतं तद्विसर्जनं समाप्य पूर्व्वेद्युर्यजमानेन व्रतानन्तरं यत् कर्त्तव्यं तद्दक्षत्वं प्रतिजानते ते अथेति । यतो व्रतानन्तरमशनानशनापरनामकमारण्यान्नाशनमेव यजमानेन कर्त्तव्यम् अतस्तदनन्तरमेव तस्य निरूपणं क्रियत इत्यर्थः । प्रतिज्ञातस्याशनानशनपक्षस्य प्रशंसार्थम् । केवलानशनपक्षं निरसितुमपन्यस्यति तदु हेति । तत्तत्रिरशनाशननिषये अनशनं सर्व्वात्मना व्यशनत्यागम् । उपवसथनामनिर्व्वचनेन देवानामागमनं दृढयति तेऽस्येति उपसमीपे यजमानस्य वसन्ति देवा अस्मिन्निति पूर्व्वदिवस उपवसथनामक इत्यर्थः । गृहे मनुष्येष्वागतेषु अनश्नत्सु पूर्व्वोऽश्नीयादिति यत्तस्यानग्नितृप्तिः किमु वक्तव्या ? अग्नितेन चेन्मुनिना निर्णीतोऽनशनपक्षः तर्हि स एव परमार्थः । कथमशनानशनपक्षः ? इति चेत् अनेन मुनिनैव स्वमतसमर्थनाय प्रत्येकपक्षौ दूषयित्वा याज्ञवल्क्येन सोपपत्तिना तोभयोरविरुद्धम् । यदीति अशनानशनलक्षणं यदीति । दैविके हि कर्म्मणि देवान् प्रत्युद्दिश्यैव हविषः प्रथममनुप्रयोगः कामम्मन्यस्य, पित्र्ये पुनरनियमाद्भक्षिणोऽन्यदापि अनुप्रयोज्यमिति पित्तदेवत्यतामापादयतीति याज्ञवल्क्यस्याशयः । तत् किं दैविके कर्म्मणि प्राग्पि भोक्तव्यमिति यस्मादाश्वयमजानानः यद्वृत्ते तस्माद्व यदु इति यदि तु अश्नाति तदा अग्निमतो देवानतिक्रम्य स्वयं भुङ्क्ष्वान् स्यात् । अशनानशनपक्षयोरुभयोरपि दोषश्चेत् का गतिरिति यद्द्रव्यमग्नितमश्नग्नितवद्भवति तदश्नीयात् । यस्य द्रव्यस्य संबन्धान्न हविषेन देवा न ष्टक्कन्ति तदग्नितमपि सदग्नितवद्भवति । तथात्वे यथोदीरितदोषद्वयाभावमाह स यदिति । आरण्यपक्षं प्राह्नतदर्शपूर्णमासहविर्व्यतिरिक्तोपलक्षणम् भा० । तत्र विहितः ठञ् भावे अथ । वैदिके कर्म्मभेदे तच्च कर्म कात्या० ८,८,८, दर्शितम् । नवमाध्यायादौ "उक्तमौपवसथ्यं कर्मेति" कर्कः । [उपवासे अमरः ।

उपवस्त न० उप+वस्तु स्वार्थे अण् । उपवस्तथादभोजने भावे क्त । उपवस्ति स्त्री उप+वस्तु-स्वार्थे भावे क्तिन् । उपवस्तेन आत्मत्वेन जीवति वेतना० ठञ् । औपवस्तिक तदुपजीविनि त्रि० ।

उपवाक पु० उप+वच-घञ् कुत्वम् । उपेतं वचनं परस्परालापे "नमस्वन्त इदुपवाकमीयुः" ऋ० १,१६४,६, "उपवाकमुपेतं वचनं परस्परवचनम्" भा० । उपवाति उप+वा-भावे क्विप् तस्यैकं जलं यत्र । २यत्र पु० "सक्तूनां रूपं यद्दरमुपवाकः करम्भस्य" यजु० १६०,२०, "सरस्वत्युपवाकैर्व्यानम्" १६,६०, "उपवाका यवाः" वेददी० "अथ नासिकयोर्लोमानि तान्युपवाकसक्तवश्च यद्दरसक्तवश्च श्रोत्रे एवास्येन्द्रौ यद्दौ" शत०ब्रा० १२,६,१,५, भक्ष्यवैकृं जलसंशोषणात् तथात्वम् । १ङीषन्यत्रे स्त्री ङीष् "यद्दरैरुपवाकीभिर्भक्षं लोकमिः" यजु०२१, ३०, तस्मिन् हितः यत् । उपवाक्य तत्साधने वल्ली उप+वच-कर्म्मणि ण्यत् कुत्वम् । सम्भाषणीये "अयमग्निर्ब्राह्मणस्य दत्तश्चा सनकात् प्रेङ्खो नमसोपवाक्यः" ऋ० १०,६६,१२. क्त्वाभावे उपवाच्य स्तुते प्रशस्ये च "अक्षद्विष्णुर्यथा विदे शीर्ष्णाशीर्ष्णोपवाच्यः" ऋ० २,१,१३२,

उपवाद पु० उप+वद-घञ् । अपवादे निन्दायाम् "पञ्चमपवादाच्च" कात्या० "पञ्चमपवादः पञ्चदाननिन्दा" कर्कः णिनि उपवादिन् । तत्कारिणि "तस्माद्ब्राह्मणोपवादी स्यादतो ह्येवंवित्परो भवति" श्रुतेः "येऽस्याः कलहिनः पिशुना उपवादिनः" छा० उ० ।

उपवास पु० उप+वस-घञ् । भोजनाभावे भोजननिवृत्तौ स च द्वैधः अद्वैधश्चेति भेदात् द्विविधः । तत्र द्वैधस्य व्रतरूपत्वम् । तस्य संकल्परूपत्वं निरस्य एका० तं० संकल्पजन्यत्वमुक्तम् यथा "दीर्घकालानुपालनीयः सङ्कल्पोव्रतमिति नारायणोपध्यायानां स्वरसः । स्वकर्त्तव्यविषयोनियतः सङ्कल्पोव्रतमिति श्रीदत्तहरिनाथवर्द्धमानप्रभृतयः । सङ्कल्पस्य भावे मयैतत् कर्त्तव्यमेव, निषेधे न कर्त्तव्यमिति ज्ञानविशेषः अतएव सङ्कल्पः कर्म्मानसमित्याभिधानिकाः । वस्तुतस्तु पूर्व्वोक्तवराहपुराणवचनैकादश्युपवासस्य व्रतत्वाभिधानात् "एकभक्तेन नक्तेन तथैवायाचितेन च । उपवासेन चैकेन पादकृच्छ्रं उदाहृतः" इत्यादियाज्ञवल्क्याद्युक्तेषु एकभक्तनक्तायाचितभोजनोपवासादिषु पादकृच्छ्रादित्वाभिधानाच्च न सङ्कल्पोव्रतं किन्तु सङ्कल्पविषयतत्तत्कर्म्मैव व्रतमिति । अतएव व्रतानां सङ्कल्पसम्भवत्वमाह मनुः "सङ्कल्पमूलः

ऋग्वेदगतानां दशसङ्ख्याकानामुपनिषदां "बाङ् मे मन-सीति" शान्तिः। १ऐतरेय २कौषीतकि ३जाबाल ४क्षुरिक ५परमहंस ६सुबाल ७मन्त्रिका ८निरालम्ब ९पैङ्गि-रिको" १०बाष्कलमन्त्रक ११बाष्कलबाह्वृचक १२मैत्रेयक १३भिक्षु १४।१५तुरीयातीताध्याय १६तारसार १७या ज्ञवल्क्य १८याज्ञायनी १९मुक्तिकानां शुक्लयजुर्वेद गतानामेकोनविंशतिसङ्ख्याकानामुपनिषदां "पूर्णमद." इति शान्तिः। १कठवल्ली २तैत्तिरीयक ३ब्रह्म ४कैवल्य ५श्वेताश्वतर ६गर्भ ७।८नारायणाऽमृतबिन्दु ९अमृतनाद १०कालाग्निरुद्र ११क्षुरिका १२सर्वसार १३शुकरहस्य १४तेजोबिन्दु १५ध्यानबिन्दु १६ब्रह्मविद्या १७योगतत्त्व १८दक्षिणामूर्ति १९स्कन्द २०शारीरका २१योगशिखे २२.२३काक्षवाल्य २४।२५धूम २६कठरुद्र २७हृदय २८ योगकुण्डलिनी २९पञ्चब्रह्म ३०प्राणाग्निहोत्र ३१वराह ३२कलिसन्तरण ३३सरस्वतीरहस्यानां कृष्णयजुर्वेदग तानां द्वात्रिंशत्सङ्ख्याकानामुपनिषदां "सह नाववत्विति" शान्तिः। १हंस २।३बान्दोग्यादित्य ४नैत्रायणी ५मैत्रे-य। ६वज्रसूचिक ७योगचूडामणि ८वासुदेव ९मुक्त १०संन्यास ११अक्ष १२कुण्डिका १३सावित्री १४स्कन्द १५जाबालदर्शन १६जाबालीनां सामवेदगतानां षोड-शसङ्ख्याकानामुपनिषदाम् "आप्यायन्निति" शान्तिः। १अक्ष २मुक्तक ३मावल्क्य ४सर्वसारोऽ५सर्वसिद्धा ६नृसिंहतापनी ७नारसिंहतापनी ८नारदपरिव्राजक ९सीता १०शरभ ११महानारायण १२रामरहस्य १३रामतापनी १४गोपीचन्दन १५परमहंस १६परिव्राजकाऽऽरुणेयी १७ सावित्र १८पाशुपत १९परब्रह्म २०त्रिपुरातपन २१ देवी २२भावना २३भस्म २४जाबाल २५गणपति २६कृ-ष्णोपनिषद २७गोपालतपन २८हयग्रीव २९दत्ता-त्रेय ३०गारुडानामथर्ववेदगतानामेकत्रिंशत्सङ्ख्याका-नामुपनिषदां "भद्रं कर्णेभिरिति" शान्ति."। पूर्वोत्तर-वाक्ये नामभेदः नामान्तरपरतया बलाधेयः। २योगे च। 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्य वत्तरम्" छा०उ० "उपनिषदा योगेन युक्तश्चेत्पुरुषः" भा० "योगो देवतादिविषयमनुष्ठानम्" आनन्दगि० ३धर्मे ५ निर्ज्ञानस्थाने मेदि० ६ सभीपवर्तने त्रिका०। ७द्विजातिकर्त्तव्ये चत्वारिंशत्संस्कारमध्ये वेदव्रतभेदे तच्च व्रतं गोदानाख्यकेशान्तकर्मणः प्राक् कर्त्तव्यं यथाह आश्वलायनगृह्यकारिका "प्रथमं क्षौरकर्मान्ते द्वितीय-यज्ञ महाव्रतम्। ततोयं स्नादुपनिषद्गोदानं च ततः परम्' ततश्च विप्रस्य ब्रह्मतेजोवृद्ध्यै वर्षे ब्रह्मवर्चसीव्रतं, चतुर्थे महाव्रतं, पञ्चमे उपनिषद्व्रतं, षोडशे वर्षे गोदानम्, क्षत्रस्य बलविंशादिवर्षचतुष्के, वैश्यस्य एकविंशादिचतुष्के यथाक्रमं महानाम्न्यादिवेदव्रताख्यकर्म्मचतुष्टयं कर्त्त-व्यम्। तत्र चूडादिनखलादिकमेव शास्त्रम्" यथाह मी०धा० श्रीधरः। "तिथिनक्षत्रवारादि वर्णोदयनिरी-क्षणम्। चौलवत् सर्वमाख्यातं गोदानव्रतेषु च" यदा तु वैयादतीतकालानि महानाम्न्यादिव्रतानि युक्तदा समा-वर्त्तनेन सह कार्य्याणि "यद्दागामिक्रियासुख्यकालस्याध्वन-राश्रयवत्। गौणकालस्यभिज्ञत्वात्" इति न्यायात्। उपनिषत्सु व्यज्यते अण्। औपनिषद वेदान्तमात्रवेद्ये परब्रह्मणि। "तन्मौपनिषदं पुरुषं वेद" छा०उ०। उपनिषदं वेत्ति अण् वेदान्तविज्ञे "गुरुवक्त्रस्थभाव इत्यौपनिषदा "कुलू०।

उपनिषादिन् त्रि० उप+नि+सद्-णिनि स्त्रियां ङीप्। समीपे स्थायिनि "तद्दिग्बधक्षादुपनिषादिनीं करोति" भट० आ० ६,४,२,६।

उपनिष्कर न० उप+निस्+कृ-अप्रे संज्ञायां ष। म कृति राजमार्गे अमरः। तत्र हि महतामपि सैन्यानां असंबाधेन निष्क्रमणात्तथात्वम्। [अमरः।

उपनिष्क्रमण न०उप+निस्-क्रम करणे ल्युट्। राजपथे।

उपनिष्ठित त्रि० उप+नि-धा-क्त। १उपनिधित्वेन स्थापि ते द्रव्ये उपनिधिशब्दे मिता० उदा० २स्थापिते च।

उपनीत त्रि० उप+नी-क्त। १कृतोपनयनसंस्कारे "अथो-पनीतं विधिवद्विधिसूत्रित" रघु०। २ज्ञानलक्षणासूत्रि कर्मणि ज्ञाते च "उपनीतं विशेषणतयैव भासते मान-मेय तु नायं नियम" प्राचीनगाथा उपनयशब्दे दृश्या ३समीपे प्रापिते ४उपन्यासिते च।

उपनेतृ पु०उप+नी-तृच्। १उपनयकर्त्तरि गुरौ २उपढौ ककर्त्तरि त्रि० स्त्रियां ङीप्। "नियमविधिजुषामा च र्हिषां चोपनेत्री" कथा०।

उपनेत्र न०उपगतं नेत्रम् अत्या०स०। नेत्रसमीपे धार्य्यकाचा-दिनिर्मिते नेत्रतिरोधकारके द्रव्यभेदे (चसमा)

उपन्यास पु० उप+नि+अस-घञ्। १वाक्योपक्रमे २वाक्य प्रयोगे उपचारच्छलशब्दे उदा०। "तत्कादुत्तर-जिज्ञासोपन्यासस्तेन" शारी०भा०। "आत्मिकायामय-मुपन्यासः सङ्गच्छति" माल्वि०। ३विचारे मुख्यमुपन्यासं निबोधत" मनुः। "उपन्यासं विचारम्" कुल्लू०।

विष्णुधर्मोत्तरे । "सा तिथिस्तद्व्रतोरात्रं यस्यामभ्युदितोरविः । तया कर्माणि कुर्वीत ह्रासवृद्धौ न कारणम् । सा तिथिस्तद्व्रतोरात्रं यस्यामस्तमितोरविः । तया कर्माणि कुर्वीत ह्रासवृद्धौ न कारणम् । शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितोरविः, कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितोरवि" । तच्च तिथ्यन्तरसङ्कीर्णत्वं विना प्रायेण सम्भवति अतएव व्रतपरिशिष्टे युग्मानीत्याद्यभिधाय "तिथ्योर्युग्मं महाफलम्" इत्युक्तं अत्र प्रयोजनन्तु तिथे खण्डविशेषनियमनम्, स्मृतिष्वा कर्मोत्पत्तौ सकृत्प्रत्यभावेनान्यतिथ्यनुप्रवेशेनोपवासाधोपवासाद्याचरणञ्च । एवञ्च प्रातःकाले तत्सङ्कल्पे तिथ्यन्तरेऽभ्युपवासस्य सङ्कल्पे अहोरात्राभोजनरूपस्य तस्य प्रातरारम्भात् । संवत्सरप्रदीपेऽपि "प्रातःसन्ध्यां ततः कृत्वा सङ्कल्पं विधिवच्चरेत्" इत्युक्तम् । अत्र च कर्माणप्रत्ययादपूर्वजनकत्वेन विधेयत्वेन प्राधान्यम् तिथ्यादेर्गुणत्वेन क्वचित्पक्षत्यागस्तु गौणः । "तिथिनक्षत्रयोगादि साधनं पुरुषार्थयोः । प्रधानगुणभावेन स्वातन्त्र्येण न तैः क्वचित्" इति स्मृत्यन्तरात् । कर्मणोगुणभावेनाङ्गत्वेन । एवञ्च निराकारदर्शोपवासपरत्वे न कलङ्कधिक्करणन्यायेनाहोरात्रोपवासत्वेऽपि भोजनम् । किन्त्वेकादश्यादिवत् तिथिर्नक्षत्रादीयुक्ताहोरात्रपरम् । अथ कलङ्काधिकरणम् । तत्र श्रुतिः "न कलञ्जं भक्षयेत्" इति कलञ्जभक्षणाभावविशिष्टं कार्यमित्यर्थः । तत्र कालविशेषानुपादानात्सर्वदा निषेधप्राप्तौ तस्यां प्रवृत्तिमतोनिषेधविधावधिकारिविशेषणायनुकल्पेन तस्यां तस्य निवृत्तिः । न हि कलञ्जभक्षणाद्यत् कृतश्चित् कारणाद्विहितस्य निषेधानुपालनं यद्वृत्तमिति कलञ्जभक्षणनिषेधो न पुनर्नं निवर्त्तयति किन्तु भक्षणप्रवृत्तिमत्तामात्रमधिकारिविशेषं यदा यदा भवति तदा तदा एव निषेधविधिरपि तं निवर्त्तयति । न हि कलञ्जभक्षणमनुपक्रम्य यावत्कालं तद्भक्षयति । अतस्तत्तिरस्कारे निवृत्तिः सिद्धेति भवति विफलोविधिः । ननु नायं निवृत्तिरप्रवृत्तस्य निवर्त्यत्वमपेक्षते, यस्यां प्रवृत्त्युपाधिना विनाशं प्राप्नुयात् प्रागभावश्च प्रवृत्तिनिराकरणात् साध्यमानोनिवृत्तिरुच्यते न तु प्रवृत्तिरपि साध्यतयोपदिश्यते किन्तु रागप्राप्तप्रवृत्तिमतश्च निषेधविधावधिकारः । यत्तु "अनया तु प्रवृत्तस्य भूतचेष्टावतोऽपि वा । यद्रागतश्चरस्य वर्ज्जनं तन्निवर्त्तनम्" इति तत्रापिशब्देनाप्रवृत्तस्यापि ग्रहणाच्च विरोध भूतचेष्टावत इति । "भूतं ह्यादौ पिशाचादौ जन्तौ क्लीवं निगद्यते । प्राप्ते दक्षे समे सत्ये देवयोन्यन्तरे तु ना" इति मेदिन्युक्तेः भूते प्राप्ते निषेध्ये चेष्टावत इत्यर्थः । तत्र प्रागभाव एव कालान्तरसम्बन्धितया साध्यत्वेनोपदिश्यते । प्रागभावस्यानादिसंसर्गाभावत्वात्तत्र; सत्यां प्रवृत्तस्य भक्षणकारणमननुष्ठितः विध्यलाभे । तस्मात् सकृत्क्रियाफलशेषत्वे विफलोविधिः कादाचित्कारणस्य निषेधमन्तरेणापि प्राप्तेः । न च स्वर्गकामादिवत् साध्यतया प्रवृत्तिमत्कर्त्तृकत्वमध्रुवं विषयमात्रानुष्ठानाधीनसिद्धत्वात्तस्य निषेधनियोगानभिसन्धिकर्त्तृव्यतोऽकाङ्क्षाविरहात् अतएव शुचित्वमपि तत्र नाङ्गम् । तस्मान्निषेधविधिषु कालवन्नोदेयदृष्टत्वञ्च दृष्टार्थत्वादिवदृष्टस्थत्वेनाधिकारिविशेषणीभूतायाः पुरुषशेषितयैवालम्बनमुत्पत्तिश्च । यत्कालमेव निवृत्तौ साफल्यं पुनर्निमित्तान्तरत्वं सकृदनुष्ठानेनैव शास्त्रार्थसिद्धिं" । गदाधरस्तु विधिस्वरूपे उपवासादिव्रतादेर्निषेधविधिवोध्यत्वं वैधत्वं कलञ्जभक्षणादेश्च निषेधविषयतया निषिद्धत्वमङ्गीकार । तस्यायमाशयः । विधिप्रत्ययार्थस्येष्टसाधनत्वादेर्धात्वर्थे एवान्वय श्रुतयश्च । एकादश्याद्युपवासादिव्रतादेश्च उपवासादि क्रियार्थेष्टसाधनत्वस्यान्वयबोधात् भोजनाभावरूपोपवासस्य निषेधरूपतया तत्र च विध्यलाभ्यात् नियमविधित्वम् तदेव शास्त्रतया च एकादश्यां न भुञ्जीतेत्यादौ भुञ्जातोत्यवासपरत्वकल्पने लक्षणा तत्र तात्पर्यलक्षणाधीनत्वः एवञ्च तत्र निषेधरूपभोजनाभावे दृष्टसाधनत्वबोधनाद्विधेयविधित्वम् । प्रकृतार्थे एव प्रत्ययार्थान्वयनियमेन तथान्वयस्यैवोचितत्वम् । न कलञ्जं भक्षयेदित्यादौ तु यद्या कलञ्जभक्षण एव विध्यर्थेष्टसाधनत्वस्याभावबोधनात् निषेधरूपत्वम् । नञ् समभिव्याहृतस्थले तत्र यस्यान्वय तत्समभिव्याहारे तु तत्र तस्याभावान्वयनियमात् मैत्रः पचतीत्यादौ मैत्रे पाचकर्त्तृत्वान्वयेन मैत्रो न पचतीत्यादौ तत्रैव कर्त्तृत्वाभावान्वयदर्शनात् । ननु एकादश्यां न भुञ्जीतेत्यत्रापि कुतो न तथान्वय इति चेत् तत्र तथान्वयसम्भवेऽपि एकादश्यामुपवसेत् इत्यादौ तथान्वयात्तत्र धातुनैव भोजनाभावबोधस्यावश्यकत्वात् तत्रैव विध्यर्थान्वयौचित्यात् न च तत्र ज्ञातत्वेनाभावबोधकपदमस्ति येन विध्यर्थान्वयलाभः स्यात् । तदेवमवाक्यतया च न भुञ्जीतेत्यादौ यद्यपि निषेध विधित्वमुक्तमिति । निषेधविधेश्च दृष्टसाधनताज्ञानजन्यद्वारा प्रवर्त्तकत्वम् निषेधस्य तु उक्तोत्पत्तिदृष्टसाधनत्वज्ञानजन्य-

वात् निवर्त्तकत्वमिति भेदः विस्तरस्तु विधिरत्नाकरे द्रष्टव्यः। प्रायश्चित्त अवि० पु० वाक्यव्याख्यायाम् एका०त० रघु० "उपाकृत्यञ्च निष्कृत्यञ्च पापेभ्यः पापकर्म्मभ्यः। मैथिलास्तु दोषेभ्य इति पठित्वा दोषेष्वीरागद्वेषप्रभावात् स्त्र्यादिनिषिद्धात्मधर्म्मभ्यइत्यर्थमाहुः। गुणाकरे गौतमः। "दया सर्व्वभूतेषु क्षान्तिरनसूया शौचमनायासोमङ्गलमकार्पण्यमस्पृहा चेति"। दयादिलक्षणान्याह वृद्धवसिष्ठः। "परे वा ब्रह्मवर्णे वा मित्रे द्वेष्टरि वा सदा। आत्मवद्वर्त्तितव्यं हि दयैषा परिकीर्त्तिता"। परे उदासीने। आत्मवदित्यत्र आपस्तम्बरक्षितव्यमितिकल्पतरौ पाठः व्याख्यातश्च दक्षः। "यथैवात्मा परस्तद्वद्द्रष्टव्यः सुखमिच्छता। सुखदुःखानि तुल्यानि यथात्मनि तथा परे"। वृद्धवसिष्ठः। "बाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित्। न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता। न गुणान् गुणिनोऽश्नुते क्षमीति मन्दगुणाऽपि। नान्यदोषेषु रमते साऽनसूया प्रकीर्त्तिता। अभक्ष्यपरिहारस्तु संसर्गाद्यनिन्दितैः। स्वधर्म्मे च व्यवस्थानं शौचमेतत् प्रकीर्त्तितम्। शरीरं शोध्यते येन शुभेनापि कर्म्मणा। अत्यन्तं तस्य कुर्वीत अनायासं स उच्यते। प्रयत्नाचरणं नित्यमप्रयत्नविवर्जनम्। एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः। श्लोकादपि च दातव्यमदीनेनैव चेतसा। अकल्यत्वनि यत् किञ्चिदकार्य्यमिह हि स्मृतम्। प्रयोजनवशेन तयोः कर्त्तव्योऽभ्यवहारणा। प्रत्यवायान्वितत्वार्थं साऽस्मृता परिकीर्त्तिता"। देवीपुराणे। "यद्यज्ञानं तज्जपः स्नानं तत्कथाश्रवणादिकम। उपवासस्तथा क्षान्तिः शुद्धाः पञ्चेति कीर्त्तिताः।" सर्व्वौषधिवर्जनतः भाद्रपदशुक्लद्वादशीव्रतादिकरणम्।" अत्र दन्तधावने नैत्यिकमतमुत्थाप्य दूषितं तत्रैव। "अत्र केचित्तु दन्तधावनस्य तपोभोगविशेषान् प्रतिपन्नते। "गन्धाद्यङ्गादवस्तूनि पुष्पमाल्यानुलेपनम्। उपवासे न दुष्येत दन्तधावनमक्षतम्"। गौडीयस्मृतिः "उपवासे तथा श्राद्धे न खादेद्दन्तधावनम्। दन्तानां काष्ठसंयोगोदहत्यासप्तमं कुलम्" तत्र ज्योतीश्वरः "तस्मात् सर्व्वप्रयत्नेन भक्षयेद्दन्तधावनम्" इत्यभिधाय दन्तकाष्ठसंयोगं निषिध्य अङ्गोद्वादिना दन्तधावनमिति विरोधं परिजहारेति वदन्योनर्थं व्याचक्षुः तच्च मृषैवातदीयं "सुखे पर्य्युषिते नित्यं भक्षयेद्दन्तधावनम्" इत्यभिधाय तद्विधानाभिप्रायेण दन्तधावने दोषदर्शनात्। अन्यथा पौनरुक्त्यापत्तेः "अक्षतं रोचनञ्चापि गन्धान् सुमनसस्तथा। पुराणके घोषयोसे च नित्यमेव विवर्जयेत्" इति हरिवंशात् जितेन्द्रियाच्च। "गात्राभ्यङ्गं शिरोभ्यङ्गं ताम्बूलं चानुलेपनम्। व्रतस्थोवर्जयेत् सर्व्वं यच्चान्यदुपलक्षणम्" इत्यनेनानुलेपनरागलक्षितभोगाच्च। अतएव प्रायश्चित्तविवेकलिङ्गैः सुभूक्षुपवासेन क्षेत्रमेति"।

ओमुपवासक्षमेऽपि उपवासे क्षेत्रमिति पठित्वा चकारादनुक्ताद्विधुपोति व्याख्यातम्। तत्राक्षम्येत्यादि सर्व्वभोगसंत्यजपूर्व्वकं तेन विलासार्थगन्धादिवर्ज्जनं कार्य्यम्। देवलः "उपवासः प्रधानेन दिवास्वापान्नमैथुनम्। अन्नसे चाञ्जनाने च नोपवासः प्रधान्यति"। उपवासोऽपि मध्येतेति कल्पतरुपाठे अधिकान्यहानि सप्तभोयत इति विशेषः। अन्नैर्दूनैः। अन्नदे मासे सम्भाव्यमाने। मैथुने विशेषमाह देवलः। "उपवासे तथा यौनं घ्नन्ति हव्यकव्यानि वै। स्त्रीणां संपेषणात् सद्यस्तासामः सङ्गमनादपि। ब्रह्मचर्य्यं विपद्येत न दारेष्वृतुसङ्गमात्" संपेषणात् संकथनादित्यत्र सरागं संभाष्यसंप्रार्थ्य वाऽभ्युपगात् स्वभोऽपि तथेति प्रायश्चित्तविवेकः। कालादर्शोऽपि "रेतःसेकात्मकं भोगमृतेऽप्यत्र त्रयः स्मृतः तथाच दक्षः। "स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम्। सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च। एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः। अनुद्रेकात् व्रतस्थैव ब्रह्मचर्य्यविरोधकम्"।

अनुक्तमक्षमप्रधानमक्षमयोर्यायोगम् अन्याभ्यामि सर्व्वत्रेति कालमा०उक्तानि यथा "कांस्यं मांसं मसूरांश्च चणकान् कोद्रूषकान्। भावदूषितान् भोजनेषु परान्नञ्च विवर्जयेत्" कूर्म्मपु०। "अञ्जनञ्जलमाल्यञ्च दिवास्वापञ्च मैथुनम्। ताम्बूलवर्जनं मांसं वर्जयेदुपवासवासरे" विष्णुध०। "पतितपाषण्डिनास्तिकसम्भाषणमनृताक्षीलादिकमुपवासादिषु वर्जयेत्" हारीतः। "दन्तिपीमान्यलान् क्षुतं पतितं च रजस्वलाम्। न स्पृशेच्चाभिभाषेत नेक्षेत व्रतवासरे" कूर्म्मपु०। "क्षुत्याकोकनगन्धादिसेवनं परिकीर्त्तितम्। अन्नञ्च वर्जयेत् सर्व्वं यासानाश्नाभिकाङ्क्षयम्। गात्राभ्यङ्गं शिरोभ्यङ्गं ताम्बूलं चानुलेपनम्। व्रतस्थोवर्जयेत् सर्व्वं यच्चान्यत् निरामिषम्" विष्णुध०। तस्मादक्षमोपवासे "यानि कानि च पापानि ब्रह्महत्यादिकानि च। अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे, इति भवि०पु०अन्नमात्रस्य निषेधेऽपि मांसमद्यादिनिषेधोऽ-

नैव विद्वे पुनः पित्रादित्राग्यकृत्यं व्याख्यातम् । अवाच्यानाज्ञातिकर्मदुष्टानां सूद्रव्रात्यादीनां याजनम् । पित्तमात्रस्तुतानामपतितानां त्यागो रुष्टाद्धिक्रयणम् । तडागक्षारागस्य चोद्यानोपवनादेर्विक्रयः । कन्याबादूषणमकृत्वादिना योनिनिदारणं न तु सम्भोग इत्य 'षष्ठिभार्या कुमारीष्विति' शुक्रतत्त्वसमत्वस्योक्तत्वात् । परिविन्दक्रयाजनस्य च कन्यादानम् । कौटिल्यकुरोरन्यत्र गुरुविषयस्य तु कौटिल्यस्य सुरापानसमत्वस्कम् । पुनर्व्रतलोपप्रकृत्यं पित्रादिप्रतिषिद्धेषु कृच्छ्रचरणकमलप्रेक्षणात्मात्मान्यादिकस्य भक्षणयामिते[वंकृपेषु प्राप्तार्थं न तु स्नातव्रतप्राप्तार्थत्वम् "स्नातकव्रतलोपे च प्रायश्चित्तं भोजनमिति" मनुना लघुप्रायश्चित्तस्य प्रतिपादितत्वात् तात्पर्यस्य पापक्षयकरत्वस्य "अर्धं न केवलमुक्ते यः पथतप्रात्मकारणादिति" मत्स्यैः [illegible] । क्रियामात्र विषयत्वे तु प्रतिषेधकल्पनागौरवं स्यात् । मद्यपायाः स्त्रियोजायाया अपि निषेधवचनप्रयोगः । स्वाध्यायत्यागो व्याख्यातः अनीनाद्य श्रौतस्मार्त्तकर्मत्यागः सुतत्यागः संस्काराद्यकरणम् । बन्धवानाग्निमत्व्यमाहुलदीनामत्यागः सति विभवे अपरिरक्षणम् । पाकादिदृष्टप्रयोजनसिद्ध्यर्थमार्द्रेन्धनच्छेदेन स्वाकृत्वमीयपरिरक्षणार्थमपि । स्त्रिया स्त्रिंस्या जीविकेन च जीवनं वर्त्तनं स्त्रीस्त्रिंस्त्रीवधजीवनम् । तत्र स्त्रीजीवनं नाम भार्य्यात्वगत भावेन प्रयोज्य तद्वृत्त्योपजीवनम् स्त्रीधनोपजीवनं वा । स्त्रिंस्या जीवनस्यापि वधेन जीवनम् । औषधजीवनं वणीकरणेन । स्त्रिंस्वत्वस्य तिलेतुषीजनकस्य प्रवर्त्तनम् । व्यसनानि मृगयादीन्यष्टादश । आत्मविक्रयोदूढ्यगुरुकरणेन परदास्यकरणम् । सूद्रसेवनं क्रीतेषु मैत्रीकरणम् । अनूढसवर्णदारस्य कौलस्त्रीसवर्णदारोपयमनम्, साधारणस्त्रीसम्भोगश्च । अनाश्रमे वासः अस्त्रीकोत्राग्निमत्त्वम् । परपाकरतित्वम् । अकृच्छ्रस्य चान्द्रायणादि पञ्चस्वाधिमासः । सर्वकरेषु सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञयाधिकारित्वम् । भार्य्याविक्रयः । चपटाग्न्याधुल्काभिसारान्नतिपूर्व्वकमृगयादिभक्षणादेर्यत्कृत्वम् । एषां गोवधादीनामतेषूक्तप्रायश्चित्तसंग्रावेदित्या "मिता० । उपपातकमाह ।"जक्षोदरं वक्त्रमीक्षाभुक्तरोगप्रणयनि च । वाक्यजीर्ण अुरुच्छर्द्दि भ्रमणोन्मत्तयकृत्ताः । रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः" भाता० ।

उपपातिन् त्रि० उप+पत–णिनि स्त्रियां ङीप् । १कुठादागते ।२अतर्कितोपस्थिते च।"रज्ज्वुपपातिनोऽनर्थाः" क्षितो०

उपपाद पु० उप+पद–घञ् । १उपपत्तौ । उपगतः पादम् अत्रा०समा० ।२पादोपगते त्रि० । स्त्रियां गौरा०ङीष् ।

उपपादक त्रि० उपपादयति उप+पद–णिच्–ण्वुल् । उपपत्तियुक्तकारके पद–ण्वुल् । उपपत्तियुक्ते २युक्तियुक्ते च ।

उपपादन न०उप+पद+णिच् ल्युट् । १युक्त्या समर्थने २सम्यक्प्रतिपादने ३प्रापणप्रयुक्तकरणे च ।"लोकपिण्डं यथा वह्निः प्रविश्य स्यात्पिपादयेत् । तथात्मपिजीवेहि गर्भे जीवोपपादनम्" भा० आश्व०१८अ० ।

उपपादित त्रि० उप+पद–णिच्–क्त । १युक्त्या समर्थिते, "उपपादितस्तूर्वत् पुरस्तात्"जग०२सम्यक् प्रतिपादिते च

उपपादुक त्रि० उपपद्यते उप+पद–उकञ् । हस्कारक शिरपेक्षतया अष्टमासात्परकृतेभ्योऽण्डाभ्यो जायमाने देवदेहे नारकिदेहे च"क्षेमं टिट्टिभोपपादुका देवाः" अमर० ।

उपपाद्य त्रि०उप+पद–णिच्–यत् ।१युक्त्या समर्थनीये २प्रतिपाद्ये च । स्यन् । २उपपत्तियुक्तं कृत्वेत्यर्थे अव्य० ।

उपपुर न०समीपस्थं पुरं प्रा०स० । पुरसमीपस्थे ग्राखानगरे । उपपुरे भवः अण् उत्तरपदवृद्धिः । उपपौर तद्भवे त्रि० ।

उपपुराण न० उपतमनुगतं पुराणम् अत्या०स० । व्यासोक्तादष्टादशपुराणसदृशेषु नानासुनिप्रणीतेषु नानाविधेषु पुराणेषु । तानि यथा । आद्यं सनत्कुमारोक्तं नारसिंहमतः परम्० । तृतीयं वारुणञ्च २कुमारेणानुभाषितम् । चतुर्थं शिवधर्माख्यं ४ साम्बोक्तन्दीश भाषितम् । दुर्वासोक्तमाद्यर्थं ५नारदीयमतः परम्६ । नन्दिकेश्वरयुग्मञ्च७, दत्तर्षेरौशनसेरितम्८, कापिलं वामनं९० याम्यं ११ कालिकाह्वयमेव च १२ । माहेश्वरं १३ तथा पाद्म १४ वैष्णवं १५ सर्व्वार्थसाधकम् परात्परोक्तमपरं १६ भागवं १७ भास्कराह्वयम् १८ । भक्त०कूर्मपु० । हेमाद्रौ तु एतद्वचनमन्यथा पठितम् यथा "अन्यान्युपपुराणानि मुनिभिः कथितानि तु । आद्यं सनत्कुमारोक्तं नारसिंहमतःपरम् । तृतीयं नारदोक्तं कुमारेण तु भाषितम् । चतुर्थं शिवधर्माख्यं साम्बोक्तन्दीशभाषितम् । दुर्वासोक्तमाद्यर्थं नारदोक्तमतःपरम् । कापिलं मानवं चैव तथैवोशनसेरितम् । वह्न्याख्यं वारुणं चाथ कालिकाह्वयमेव च । माहेश्वरं तथा याम्यं सौरं सर्वार्थसञ्ज्ञकम् परात्परोक्तमपरं तथा भागवसञ्ज्ञकम् । इदमष्टादशं प्रोक्तं पुराणं कौर्मसंज्ञितम् । चतुर्णां संहितं पूर्वं संक्षितानां प्रभेदतः"। अत्र सङ्क्षिप्तपुराणे भागवम्

ज्ञायी भिताहारो गुरुदेवद्विजार्चकः । त्यजेत् क्षौरञ्च ताम्बूलं मधुमांसादि वर्जयेत्" पृथ्वीच० अग्निपु० । तारास्तत्रैवोक्ताः "तिलसङ्घाटते विल्वाः यवे गोधूमकोरवौ । धान्यार्के देवधान्यञ्च शमीधान्यं तथैव च । क्षिप्रधान्यं तथा पत्रं मूलं चारमणाः स्मृताः" गोधूमस्य चारत्वेऽपि उपवासानुकल्पे प्रतिप्रसवत्वमेव "व्रीहिश्यामाकमुद्गाश्च कलायाः सतिलं पयः । श्यामाकश्चैव नीवारा गोधूमाद्या व्रते हिताः" । कृष्णाष्टम्यालाबवार्क्षकृष्णालक्ष्मीतन्त्रिकाख्यजेत् । चतुर्भिश्च सक्तुकणा यावकं दधि हतं मधु । श्यामाकयावनीवारा यावकं मूलतत्फलम् । कृत्तिका व्रतनक्षत्रावग्निकं यावकं क्षितम् । मधुमांसं विष्कान्यव्रते वा क्षितमीरितम्" । "चतुर्भिश्च सक्तुकणायावकयावकपयोदधिघृतमूलफलादिभिः क्रमोत्तरोत्तर प्रयुक्तैः" मिता० गौत० । निर्णया० मय० । सेनकृत्सक्तवः सक्त्वम् लाजा लाज्यञ्च क्षिसनम । प्रायश्चित्तं व्रती कुर्यात उपवासमयतत्वम् । मिथ्यावादे दिवास्वापे वह्वशोऽश्वनिषेवणे । अष्टाक्षरं व्रती जप्त्वा व्रतमष्टोत्तरं शुचि" । अतएव समर्थस्य किञ्चिल्लक्षणमपि भङ्ग्या निषिद्धम । 'उपवासो यदा राम । आद्य नैमित्तिकं भवेत । उपवास तदा कुर्यादाद्याय पितृसेवित इति लाघा० ।

अथ कर्तृप्रतिनिधिः स्वयमशक्तौ प्रतिनिधिनापि उपवासादिव्रत कार्यमित्याह स्कन्दपु० । 'पत्न्यश्च विनयोपेत अग्निनी ज्ञातरन्तथा । एवामभाव एतासा ब्राह्मण विनियोजयेत्" गरुडपुरा० । "भार्या भर्तुर्व्रतं कुर्याद्भार्यायाश्च पतिस्तथा । असामर्थ्ये ह्योस्त्वन्या व्रतभङ्गो जायते" । वराहपुराणे "पितृमातृपतिभ्रातृस्वसृगर्वादिभूभुजाम् । अष्टार्थमुपोष्यैव स्वयञ्च फलभाग्भवेत" ।

अत्र निर्णयसिन्धावष्टमभङ्गे विशेष 'काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः । काम्येऽप्युपक्रमादूर्ध्वं केचित् प्रतिनिधिं विदुः न स्यात् प्रतिनिधिर्धर्मस्त्वन्यस्मिन्देवाग्निकर्मणि । स देशकालयोर्नास्ति नारणेरग्निरेव सा । नापि प्रतिनिधातव्य निषिद्धं वस्तु कर्मचित् । ततश्च ग्लौ उपोषणादिक्रमनुक्त्वादिना काम्य पूजादिकं तु स्वयमसामर्थ्ये अन्येन कारयेदिति एका० त० रघु० ।

नित्यकाम्ययोरुपवासयोरयं भेद 'उपवासफलं प्रेप्सुरुपवासेत् भक्तचतुष्टयमिति" कालमा० भारतम् "लक्षाङ्गकृच्छ्रं नित्ये काम्ये भक्तचतुष्टयम् । सायमाद्यन्तयोर्भक्तमेकैकं मध्यमे ह्वयम्" एका० त० स्मृतिः । अत्र सायमित्यस्य एकभोजनमात्रपरत्वम तेन दैवात् पर्व्वदिने दिवा भोजने रात्रभोजनेऽपि न फल प्राप्ति 'अष्टौग्रासान्योरुक्तमेकैकं मध्यतो ह्वयम । उपवासफलाप्तौ त्रैलोक्य भक्तचतुष्टयमिति" वाराहात ।

उपवासव्रतस्य बैधत्वात्तत्रैव प्रत्यवायपरिहारः कर्त्तव्यता तत्रनिरूपणाय प्रतिपदमारभ्य एकादशीविशेषनिरूपण कालमा० दर्शितं तत्रादौ प्रतिपत्प्रकरणे यथाह स्कन्दः ततो मार्गशिरे मासि प्रतिपद्यपरेऽहनि । इदं गरुडोपपुराणेऽपि स्मरन्ति ऋषिः" । अत्र पर्वोक्तायां शुक्लप्रतिपदि योऽयमुपवासो विहितस्तत्र संशयः किं प्रातः कार्यं किं वा परत्र नास्य प्रतिपत्क्षय वा सकल्पस्यात्र । अतएव बौधायन "योऽयं विहित काल कर्मणस्तमुपक्रमे । तिथिर्यावदभिव्याप्त सा तत्र कार्या नोपक्रमोच्छित्तेरिति" स्कन्दपुराणेऽपि "योऽयं विहित कल्प कर्मणस्तदुपक्रमे । विद्यमानो भवेद्यत्र नोच्छित्तापत्तिरेव तं प्रति रात्रौ)। तद्वितीय प्रात कालस्यैव सकल्पाङ्गत्वात तथा च कार्यते प्रात संकल्पयेद्विद्वानुपवासव्रतादिकमिति" तथा "प्रातरारभ्य मतिमान् कृत्वोशक्तव्रतादिकम । मध्याह्ने पितृपूजां कृत्वा कृतोपवासः स्यादिति । अत्रोच्यते यथोक्तवचनबलात प्रातरेव संकल्प कार्य तदानीं ज्योतिषाद्यप्रसिद्धप्रतिपदभावेऽपि कृतिथिमात्रादर्शित या प्रतिपत् सत्त्वात् अतएव देवल "यान्तिथिं समनुप्राप्य अस्तं याति दिवाकरः । तिथि सा सकला ज्ञेया दानाध्ययनकर्मसु" इति दानाध्ययनयोरुपवासादिनिखिलदैवपित्र्यकर्मणामर्थत्वविवक्षया कर्म्मण्येतद्वचन निर्दिष्टम् । अत्रोक्तमयात पर्व्व सकर्त्तृकलयव्यापिनी तिथिं समनुप्राप्येति व्याख्येयम् । न तु ततोऽल्पव्याप्तिर्निक्षिता तथा सति पूर्वोत्तरदिने धाभावेनोत्तरतिथेरेव याह्यत्वप्रसङ्गात् तथा च त्रिमुहूर्त्त व्याप्ति स्कन्दपुराणे दर्शिता । "यान्तिथिं समनुप्राप्य बालत्वं पक्षिणोऽपि च । सा तिथिस्त्वाहिने ज्ञेया त्रिमुहूर्त्ता यदा भवेदिति" । यत्परत्वमौशनपुराणयोरपि "या प्राप्यास्तमुपैत्यर्क या चेत् स्यात्त्रिमुहूर्त्तिका । धर्म्म कृत्येषु सर्वेषु सपूर्णा सा विदुर्बुधा" इति । एकादश्यपि "यस्यान्तिथावस्तमियात् सूर्य्यस्तु त्रिमुहूर्त्तकं । यामदानजपादिभ्यस्तामेवोपक्रमेत् तिथिमिति' । अनुवादतस्त्रिमुहूर्त्तयुक्तप्रतिपदुपेतायां तिथौ प्रातरेव संकल्प्य प्रतिपदुपवास कार्य इति युक्तादित्यवचनमस्मिन्न निर्णीतं तत्तिथिमात्रे तथाऽस्तु ह्रासवृद्धीस्तु खर्वादि

वाक्यान्तरेष्वुपवासः प्रोष्ठपदीति चेत् मैवं ह्यर्थादिवाक्यैकवाक्यत्वात् तथा च व्यासः "द्वितीयादिकं युग्मानां पूर्वतो नियमादिषु । एकादिष्वादिशब्दादौ ह्रास इत्यादि नोदनेति" नियमादिष्वित्यादिशब्देन पित्र्यकर्मव्यतिरिक्तव्रतोपवासादिसकलकर्मणोपलक्षणम्, एकादिष्वादीत्यादिशब्देन विवाहादिमङ्गलाङ्गभूतव्यङ्गव्यतिरिक्तपार्वणश्राद्धस्य, इत्यादावित्यादिशब्देन नान्दीमुखश्राद्धस्य, ह्रासइत्यादीत्यादिशब्देन यथाशक्तिमित्यादिशब्दस्य" । पूर्वोक्तवाक्यस्य सामान्यरूपत्वेन परविद्धोपवासविषयत्वेन संकोचनीयत्वादिति तत्रोक्तं न पूर्वोक्तादिमाह्यं वैषम्यम् । एतदेवाभिप्रेत्य निगमे श्रूयते । "पूर्वविद्धासु तिथिषु भेषु च व्रतेषु च । उपोष्य विधिवत् कुर्यात्तदन्ते चैव पारणमिति" । भेषु नक्षत्रेषु स्कान्दपुराणेऽपि । "तिथीनामेव सर्वासामुपवासव्रतादिषु । तिथ्यन्ते पारणं कुर्याद्विना श्रवणवर्दर्शम्" । अतोऽपवासव्रतादिशब्दा नैकभक्तादिव्रतानां लक्षणार्थाश्चितानि द्रष्टव्यानि । यानितिथिमुद्दिश्यैतानि पूर्वेद्युर्विहितानि परेद्युरुक्तक्षणेऽभागे समाप्ते प्रत्याख्यानं कार्यम् अन्यथा पूर्वदिनानुष्ठितैकभक्तादिव्रतानां वैकल्यं स्यादित्यभिप्रायः । अस्य च तिथिभक्षणस्यापवादः क्वचित् स्मर्यते । "तिथ्यन्ते चैव भक्ते च पारणं यत्र नोद्यते । यामत्रयोर्द्धगामिन्यां प्रातरेव हि पारणमिति" । तदाभे उदयगामिन्याः पूजायां यथाह तत्रैव देवलः । "यान्तिथिं समनुप्राप्य उदयं याति भास्करः । सा तिथिः सकला ज्ञेया स्नानदानजपादिषु" इति व्यासोऽपि "उदयत्येव सविता यां तिथिं प्रतिपद्यते । सा तिथिः सकला ज्ञेया दानाध्ययनकर्मणि" । भविष्योत्तरपुराणेऽपि । "व्रतोपवासनियमे घटिकैका यदोदये । सा तिथिः सकला ज्ञेया पित्र्ये चापराह्णिकी" । पद्मपुराणेऽपि "व्रतोपवासनियमे घटिकैका यदा भवेत् । उदये सा तिथिज्ञेया विपरीता तु पैतृके" इति । स्कान्दपुराणेऽपि "व्रतोपवासस्नानादौ घटिकैका यदा भवेत् । उदये सा तिथिर्ज्ञेया विपरीता तु पैतृके" इति । विष्णुधर्मोत्तरेऽपि व्रतोपवासस्नानादौ घटिकैका यदा भवेत् । उदये सा तिथिर्ज्ञेया श्राद्धादावपराह्णगामिनी" । बोधायनोऽपि "आदित्योदयवेलायां यावत्यापि च तिथिर्भवेत् पूर्णा दृश्येत सा ज्ञेया प्रभूता भोदयं विनेति" अत्रमा० । "अन्यत्रैवं तत्रैवाह्निकाभ्युदया । तत्र भूयस्त्वविद्धायामाह्निकेऽर्धक्षणे विनायादिनाद्यघटद्वयेऽपीत्यर्थः" इति विवेचनीयम् । तत्र बौधायनेनाल्पायीत्यभिधानात् निमेषमात्रं प्रतिभाति । तथा व्यासवाक्येऽपि प्रतिभाति उदयत्येवेत्यभिधानात् । भविष्यत्पुराणादिवचनेषु घटिकामात्रं प्रतीयते । वचनान्तरे तु विष्णुधर्मोत्तरबौधायनोक्तं घटिकाचतुष्टयं प्रतिभासते । तथा च पठ्यते । "उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ" द्विमुहूर्त्ता त्रिमुहूर्त्ता सा तिथिर्हव्यकव्ययोरिति" । अस्यार्थः । भानावुदिते सप्तमुहूर्तकालेऽर्द्धो मुहूर्तसहितं दैवत्यं तस्मिंश्चास्तमिते ततः पूर्वकालीनमर्द्धोनमुहूर्तत्रयं पित्र्यमस्तम् अतस्त्रयस्त्रकाल्यापनी या तिथिर्भवति सैव क्रमेण हव्यकव्ययोर्ग्राह्या भवतीति" । तत्रैवान्यत्र "पौर्वाह्णिकादिसञ्ज्ञेन दैवे पूर्वाह्णव्याप्तायास्त्रिमुहूर्तपरिमितायास्तिथेर्ग्रहणं त्रिमुहूर्त्तन्यूनायास्तिथेः पूर्वाह्णव्याप्त्यभावात् पूर्वाह्णस्य पञ्चधा विभक्तस्य सप्तम्यत्वादुदिते भानौ त्रिमुहूर्ता तिथिर्ग्राह्येत्या । यत्तु दक्षोक्तं "त्रिमुहूर्तोऽपि नोक्तायां यातिथ्युदयगामिनीति" न तत् त्रिमुहूर्तव्याप्तेर्बाधकं प्रत्युतोपोद्बलकमेव । तथा हि प्रतिषेधः सर्वत्र प्रसक्तिपूर्वकः प्रसक्तिश्च यथोक्तरीत्या पौर्वाह्णिकग्राह्या त्रिमुहूर्त्तविधिविधायिपठितेनसिद्धाग्राह्या भवति तच्च प्रकृतं त्रिमुहूर्त्तत्वं समतिथौ बाधकाभावात्तथैव व्यवतिष्ठते तिथिक्षये त्वधिकव्याप्तिविषयत्वा प्रतिषिध्यते । अतस्तत्र चतुर्यसहितत्रिमुहूर्त्तार्द्धिनी तिथिर्ग्राह्या तिथिसाम्यवत्तिथिद्वयेऽपि मुहूर्त्तत्रयमेव मुख्यं मुहूर्त्तद्वयं त्वनुकल्पः । एतदेव सूचयितुं त्रिमुहूर्त्तापीत्यपिशब्दः पठ्यते । तत्रैव स्मृत्यन्तरे स्मृत्यन्तरे "एकादशी तथा ह्यष्टौ अमावास्या चतुर्थिका । उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः" । शिवगीतायाञ्च कृष्णार्जुनसंवादे "द्वितीया पञ्चमी वेधाद्दर्शो च त्रयोदशी । चतुर्थी चोपवासे स्युः पूर्वोत्तरे तिथी" द्वितीयादयः स्ववेधेन पूर्वामुत्तराङ्गं कुर्युरित्याह । तेन प्रतिपद् द्वितीययुक्ता उपवासे निषिद्धा । "प्रतिपत् सहितीया स्याद् द्वितीया प्रतिपद्युतेति" आपस्तम्बवाक्यं त्वन्यप्रतिपद्विषयम् उपवासातिरिक्तदैवकर्मपरं चेति माधवः । उपवासस्याकोरात्रसाध्यत्वेन खण्डतिथौ संपूर्णकालव्याप्तसम्बन्धेन व्याप्तिवाकुल्यं पूर्वविद्धायामेव सम्भवति अक्षोऽपरस्मिन् सकलरात्रौ च तद्व्याप्तेः । "उदये सा तिथिर्ग्राह्येति सामान्यवाक्यस्य विशेषवाक्याद्दुर्बलत्वं ततश्च अपराह्णादिनि मुहूर्त्तव्याप्तिरूपे पूर्वविद्धा उपोष्येति माधवमते त्रिमुहू। एवमन्यत्रापि ते "पञ्चमी दशमी चैव द्वादशी च त्रयोदशी ।

प्रतिपद्युक्तो चैव कर्त्तव्या साम्मुखी तिथिः"। पैठी०उक्तेः "साम्मुख्यं नाम सायाह्नव्यापिनी दृश्यते यदा" इतिस्मृत्युत्तराधोक्तसाम्मुख्ययुक्तायां प्रतिपदोपात्ततया सायाह्नव्याप्तिश्च मूलोक्तान्यूनेन सार्द्धेति। उभयदिने ततप्राप्तौ त्रिमुहूर्त्तव्याप्तिपक्षे तु परैवोपोष्या "त्रिमुहूर्त्तव्यापिनी या तु सैव पूज्या सदा तिथिः। न तत्र युग्मादरणमन्यत्र करिवासरादिति" पराशरवाक्येन तद्विषयत्वात् एतच्च जयन्तीव्रतराजादि विषयेतरपरमिति तिथितत्त्वोक्तम्। अत्र प्रागुक्तविशेषवचनानुसारिसाधवसमतमेव व्याय्यं। गौडाहतमपि रघुनन्दनमतन्तु सामान्यशास्त्रानुसारित्वाद् दुर्बलमिति सुधीभिरपक्षपातिभिर्विवेच्यम्।

अन्यासु तिथिषु व्यवस्था तु तत्र एवावगन्तव्या दिङ्मात्रमिह दर्शितम् तिथितत्त्वे विस्तरः। उपवासे दृष्टे कर्त्तव्ये वा ब्युष्टा० अण्। औपवासिक तत्र देये तत्र कार्य्येच त्रि०। तत्रैं प्रभवति ठिमुक्। औपवासिक तत्र पर्याप्ते त्रि०।

उपवासक त्रि० उप+वस ण्वुल्। [अस्य कृत्याकौमुद्यां उपवासे स्थितस्य कर्त्तव्ये। २व्रतभेदे त्रि०। "अथ यत्प्रतिदा कार्त्तिक्यां नोपवासकम्" भा० व० १४ अ०

उपवासन न० उप+वस-उपसेर्यानं भावे ल्युट्। उपवेशने। "यदा सन्ध्यमपाधाने अनेदासने कृतम् आप १४,२,६२।

उपवासिन् त्रि० उप+वस-णिनि। अलङ्कारवदरि "उपवासी तु नियमाधिष्ठानो लटाधरः। यत कृत्वाभिलाषी स्यात्सार्थः 'विमानैर्हंससंयुक्तैर्यान्ति मासोपवासिनः' भा० व० १६६ अ०।

उपवाहन न० उप+वह-णिच् भावे ल्युट्। समीपनयने।

उपवाह्य पु० उप उत्कर्षे प्रा०स०। राजवाह्यहस्तिनि हेम०

उपविद् स्त्री उप+विन्दते; वेत्तेर्वा सम्प० क्विप्। [उपलब्धौ प्राप्तौ ज्ञाने च "उपविदा वह्निर्विन्दते वसु" ऋ० ८,२१,१। "उपविदा उपवेदनेनैते ऋषीणि देवार्थं न प्रयच्छन्तीत्येतज्ज्ञानेन" भा०। कर्त्तरि क्विप्। १प्राप्तरि ३बोद्धरि च त्रि०।

उपविन्दु पु० उपगतो विन्दुम् अत्या०स०। राजभेदे तद्वंशजम् बाह्वा० ठञ्। औपविन्दवि तदपत्ये पुंस्त्री०।

उपविष पु० उपगतं विषेण अत्या०स०। "अर्कक्षीरं स्नुक्षीरं तथैव कण्टकारिका। धत्तूरः करवीरश्च पञ्च क्षीरविषाः स्मृताः" इत्युक्तेषु [अर्कक्षीरादिषु २अतिविषवि

क०हेम०। ३अतिविषायां (आतश्च्) स्त्री।

उपविष्ट त्रि०उप+विश कर्त्तरि क्त। क्रमोपवेशने "उपविष्टक्रमा स्वाकारप्रदाना शकुन्तला" आत्मा० १,१,७।

उपवीणि वर्णया उपगायति उप+वीणा+णिच् नामधातुः सक०उभ०सेट्। उपवीणयति ते उपवीणयित्वा त। उपवीणयाम बभूव व्यास बभार चक्रे उपवीणित "स्मितमोकर्णनिकृतं स्वरम् उपवीणयितुं ययौ रवेरुदयाद्दक्षिणेन नारद" रघु।

उपवीत न० उप+व्ये क्त सम्प०। वक्ष्यमाणदक्षिणकक्षतयावामांसस्थे पित्रे कार्पासादि [यज्ञसूत्रे। तच्च त्रिगुणं सूत्रस्य सूत्रस्य पुनस्त्रैगुण्ये भवति यतश्च ऊर्द्धो० प० "ऊर्द्धं तु त्रिवृत कार्यं तन्तुत्रयमधोमुखम्। त्रिवृतस्त्रीणीत स्यात नवैकीभूयन्थिरिष्यते। तथा च प्रथम ऊर्द्धपवनेन सूत्रत्रयमेकं ततः पुनस्त्रयाभूतसूत्र त्रयस्याधःपवनेन नवभूतात्मकमेकं त्रिगुणीकृत भवति तच्च पुनस्त्रिगुणसूत्रकरणेन त्रिगुणीकृतमेकमन्थियुक्तमेकं यज्ञोपवीत भवति। व्यासश्च देवल; "यज्ञोपवीतीनां कुर्यात् कृत्वाधि नवतन्तव इति। यद्यपीयं सर्व्वदा धार्य्या कुरुराजयज्ञारम्भे तु तत्त्रयं धार्य्यम् "यज्ञोपवीते द्वे धार्य्ये कार्ये च कर्मणि। हतीयमुत्तरं वस्त्रालाभेऽपि दृश्यते" आ०त० स्मृते। तदग्रन्थिश्च सावित्र्यारम्भ कर्त्तव्य "सावित्र्यग्रन्थिसंयुक्तमुपवीतं तथाकृतं" विष्णुपूजने ब्रह्मपराणात "लौकिकास्तु सावित्री ग्रन्थिप्रवेश व्यत्यासेनोपवीतग्रन्थिरित्याहुः" आ०त० रघु०। अत्र सावित्रीग्रन्थिरित्युक्ते देवब्रह्मादौ सावित्रीग्रन्थिः देवाग्रात सावित्रीग्रन्थि ब्रह्मग्रन्थिरिति गार्ग्यभेदाद्व्यवस्था। तत्सूत्रभेदश्च मनुना वर्णभेदेन उक्तः 'कार्पासमुपवीतं स्यात् विप्रस्योर्द्धवृतं त्रिवृत्। शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्'। "ऊर्द्धवृतं दक्षिणावर्त्तितम्" कुल्लू०। वृद्धशौनकयजनकाले उत्तरकाले तु सर्वेषामेव कार्पासमयमिति भेदः। ब्रह्मोपान्त यथेच्छसूत्रमयम् अत एव मार्के "विश्वकर्मराजाकृच्छ्रैरिवायतैरिरण्मयोपवीतैरुपशुशुभे" "सुक्लायज्ञोपवीतानि बिभ्रतो रूपमत्तमा; कुमारे च वक्ष्यितम्। यद्यप्युपनयनप्रकरणे उपवीतधारणं यज्ञसूत्रादौ न विहितमपि प्रागुक्तमनुवचने "मेखलामजिनं दण्डमुपवीतं जलमण्डलुम्। अप्सु प्राप्य विनष्टानि यज्ञोपवीतादीनि मन्त्रवत्" इति मन्त्रवचने मन्त्रवत्त्वधारणविधानात् "यदोपवीतिना भाव्यं

मिति कल्पे "दक्षवाजिनोपवीतञ्च मेखलाञ्चैव धारयेत्" याज्ञ० वाक्यात् "यविष्ठं चाक्षौ प्रयच्छतीति" जातू कर्म्मवाक्यात् तद्धारणमवश्यं कार्य्यमिति गम्यते। किञ्च सूत्रकारैरपि कर्म्मविशेषे यज्ञोपवीतधारणनियमोऽभिहित "यज्ञोपवीतशौचे च" आश्व० गृ० १, १, १८ "मानुषपैतृकव्यतिरिक्ते कर्म्मणि उपवीतधारणनियम" ना० भ०। "यज्ञोपवीतिना आचान्तेन क्रियमाणे" गोभिल स्मृते च तथा नियम्यते। "यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनोपनेह्यामि" मन्त्रभाग्धृतमन्त्रलिङ्गात् "यज्ञोपवीतिनं कुर्य्यादिति" सांख्यायनसूत्राच्च "वेणुवी धारयेद्यदि सोदकञ्च कमण्डलुम्। यज्ञोपवीत वेदञ्च शुभे रौद्रे च कण्डले" इति मानवाच्च तद्धारणविधिः। "यज्ञोपवीतं परमं पवित्रम् इत्यस्तमेर्यत् सहज पुरस्तात्। आयुष्यमग्र्यं प्रतिमुञ्च शुभ्र यज्ञोपवीतं बलमस्तु तेज" इति मन्त्रोक्तफलमेव तद्धारणे हेयम्। तथाहि श्रवणे च

न क्षौरे यज्ञसूत्रस्य तथार्थे तथानवेक्षितस्य वस्त्रस्य स्पृष्टि तथात्मम् "दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणे स्कन्धे प्रतिष्ठापयति दक्षिणं कक्षमवलम्बनं भवति सव्यं यज्ञोपवीतं भवति सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेऽंसे प्रतिष्ठापयति सव्यं कक्षमवलम्बनं भवत्येवं प्राचीनावीत भवति निवीती मनुष्यसंवीती पितृकर्म्म" गोभिलेन मनुष्यसंवीती भिधानात् "शिरोऽवधाय दक्षिणादपाणावुद्धृत्य प्रतिष्ठापयेत् सव्यस्कन्धे अजुप्राग्ग्रीवे यज्ञसूत्रे वस्त्रे च निवीती भवति" कुल्लू० उक्ते मनुना "उद्धृते दक्षिणे पाणावुपवीतीव्यते द्विज सव्येतु प्राचीनावीती निवीती च यज्ञसूत्रवत्" इति सामान्यतोऽभिधानाच्च। उपवीतमस्यास्ति इति। उपवीतिन् तथासञ्जिवेशितसूत्रवस्त्रधारिणि। उपवीतस्य यज्ञादिसंबन्धिसूत्रस्य प्राकरणिकाकृता कोमलत्वादस्य० (पाठे निर्णीता दृष्टा "दर्भपौर्णमासयोः ७, ब्रह्मौदनाग्नयुत्क्रयो सामधेय्यञ्च नवमे निर्दिष्ट दशमे कात्या सामधेनिकल्पा, एकादशे यज्ञोपवीतमाख्यातम्। 'उपव्ययते इत्यस्यैव तन् वुकृते इति सूत्रे ब्राह्मणे उपवीते सामधेनीना प्रकरणे निहत्ते निहत्ते या इति मन्त्रे सामधेनीप्रकरणमभिसृत्य तत्र उपवीत समाम्नायमिति वक्तुं काम्यानां सामधेनीरूपाणामानन्त्यवचनात् कृदयनसूत्रमिदमित्यत्र कर्म्मणि दाक्षो विन्यासभागे गुप्तो भवति उपवीतं स्यात्, किं कुर्वता तत्कर्त्तव्यमिति? भवति तत्र पदार्थोकाङ्क्षा तत्र बुद्धौ सन्निहितेनाविप्रकृष्टेन सामधेनीवाक्येन एकवाक्यतारूपस्य सामधेनीषु उपवीतम् उपव्ययते इति यज्ञोपवीतधारि इति गम्यते इति पूर्व्वपक्षः। सिद्धान्ते तु निविदा व्यवधानात् बुद्धा विप्रकृष्टत्वाच्च वाक्यभेदभिया च न सामधेनीभि सहैकवाक्यतोपवीतस्य तत्कात दर्शादिप्रकरणे यदनुष्ठेय तदुपवीतिना कार्य्यम् इति'। सूत्रे उपव्ययते इति श्रवणात् उपपूर्व्वकात् व्येञ एव रूपमुपवीतमिति तु न्याय्यमित्यभ्युपेत्यमितम्। अजश्च-तूष्णीक्षः सूत्रदर्शनात् प्राचादिकी।

उपहृंहित त्रि० उप+हृन्ह्-णिच्-कर्म्मणि क्त। १ वर्द्धिते बकुल करोति बकुल+णिच्-ब्रूञ्-आदेशे क्त। २बकुलीकृते आत्मार्थे वर्म्मवादिरवमिति भेद।

उपवेणा स्त्री उपगता वेणाम् आत्मा० स०। नदीभेदे 'वेणोपवेणा भीमा च वङ्गा चैव भारत'। भा० व० २२१ अ०।

उपवेद पु० उपगत वेदेन अव्ययी० स०। वेदसदृशे आयुर्वेदादौ। स च वेदभेदेन चतुर्द्धा "तत्रर्ग्वेदस्यायुर्वेद उपवेद, यजुर्वेदस्य धनुर्वेद, सामवेदस्य गान्धर्ववेद, अथर्ववेदस्य शस्त्रशास्त्रार्थाति" गौतमोक्तचरणव्यूहोक्तादिभावसेय:। भावप्रकाशमते तु "विधातार्थ सर्वलोकायुर्वेद प्रकाशयन्" इत्युक्तेः अथर्ववेदोपवेदत्वमायुर्वेदस्येति भेद। अतएव सुश्रुते "इह खल्वायुर्वेदो नाम यदथर्ववेदस्योपाङ्गम्"

उपवेश पु० उप+विश-भावे घञ्। (वसा) स्थिती "प्रातः स्नने जुहोति सवेशायोपवेशाय गायत्र्यै छन्दसेऽभिभूत्यै स्वाहा" कात्या० २५, ४१६, उपनिवेशेन अव्ययी० स०। आचार्यकृतोपवेशसदृशे २वेशे। तेन जीवति ३शेतनादिठञ्। औपवेशिक तेनोपजीविनि त्रि० स्त्रियां ङीप्।

उपवेशन न० उप+विश-भावे ल्युट्। (वसा) १आसने "प्रातोपवेशनमतिर्द्धपतिर्बभूव" रघुः। "अन्वासितमरुन्मत्या" रघुव्या० "पश्चादुपवेशनेनोपसेवितम्" भट्टि०। "प्राङ्मोपवेशने" आश्व० श्रौ० ४, ८, २, "ब्रह्मोपवेशने विनियोग" भवदेव णिच्-भावे ल्युट्। निवेशने २स्थापने च

उपवेशि पु० उप+विश-इन्। यजुर्वेदसम्प्रदायप्रवर्त्तके ऋषिभेदे 'अरुणादरुण उपवेशेरुपवेशि" भत० ब्रा० १४, ६, ४, २२, वंशार्थाने उक्तम्। ऋषिदे।

उपवेशिन् त्रि० उप+विश-णिनि। उपवेशनकर्त्तरि उ० उपवेष पु० उप+विष-करणे घञ्। आचारविभजनार्थे काठे "स उपवेषमादत्ते दृष्टिरीति" भत० ब्रा० १, २, १२, आचारविभजनार्थे काष्ठविशेष उपवेष' भा० शचारक्लिन्नाः प्रा-

देयमाज्यं वा तत्करणप्रकारः "मूलादुपवेषं करोति" का० ४,१,१२, दर्शितः "प्रथमं तूष्णीं याज्यानुवाक्यरहितप्रयाजाधिकप्रयाजं जित्वा पृथक् कार्यं ततस्तत्काडुपवेषं करोति उपवेषकारणमात्रः प्रादेशमात्रो वा पराचरोक्तः" कर्कः । ब च फलाप्तिः "दृष्टिरक्षीत्युपवेषमादायाप्य दृक्षुक्षारान् प्राचः करोति" आश्वा० २,३,२६, आ० उपवेषोऽक्षारायोऽपवर्गे फलाप्तिः आह्वम्" कर्कोक्तेः "इतावधिमासवति भक्षणा वैदेनोपवेषेण वा" आश्वा० २,५,२५,

उपवेषण न० उपवेषु-अच् उत्तरपदवृद्धिः । निवन्धे हेम०

उपव्याख्यान न० उप+वि+आ+ख्या-ल्युट् । फलमाकाङ्क्षी-यासनप्रकारादिकथने । "ओमित्युद्गायति तस्योपव्याख्यानम्" छा० उ० "तस्यात्तरस्योपव्याख्यानम् एवमुपासनम्, एवंविभूतः, एवंफलमित्यादिकथनम्" भा० भा० । "आदित्यो ब्रह्मेत्यादेशस्योपव्याख्यानम्" "ओमित्ये तदक्षरं सर्वं तस्योपव्याख्यानम्" इति च छा० उ० ।

उपव्याघ्र पु० उपगतो व्याघ्रेण अवा० स० । १व्याघ्रतुल्ये क्षुद्र-जन्तौ (चितावाघ) चित्रकाख्ये पशुभेदे । सामीप्ये अव्ययी० । २व्याघ्रसमीपे अव्य० ।

उपव्युषस अव्य० विगता उषाः व्युषाः प्रा० ब० ततः विभक्त्यर्थे सामीप्ये वा अव्ययी० अच् समा० । विगतायामुष-सीत्यर्थे "उपव्युषं सपरीदं दक्षिणा गच्छन्ति" आश्वा० २१,६,१२, "उषसि विगच्छन्त्याम्" कर्कः । २विगच्छन्ती उषसः समीपे च ।

उपशम पु० उप+शम-घञ् अदन्तिः । १इन्द्रियाणां निग्रहे २क्षमायां, ३रोगोपशमयान्तौ च । "तेषां पैत्तिकाना-माधीनामुपशमोऽमले, श्लैष्मिकाणां, निदाघे वातिकानां वर्षासु चये स्वभावत एव ते एते सद्वृत्तयप्रकोपोप शमाः" "तत्कालजेषु व्याधिषु प्रकृतस्योपशमार्थम्" इति च सुश्रु० । ४निवृत्तौ "लगत्युपशमं याते मदयत्योत्सवाकुले" भा० ब० २० अ० ।

उपशमन न० उप+शम-भावे ल्युट् । उपशमार्थे "आधीना मुपशमनार्थम्" सुश्रु० । उप+शम-णिच्-ल्युट् । अदन्तिः २निवारणे । तत्र हितम् अ । उपशमनीय रोग-शान्तिहेतौ आयुर्वे० । कर्मणि अनीयर् । निवारणीये । "कटुकौषधिमनीयम्" वा० ६० ।

उपशय पु० उप+शी-अच् । १वसीपशयने । "हेतुव्याधिविप-रीतविषमार्थकारित्वम् । औषधान्नविहाराणा मनुबन्धोनं सुखावहम् । विद्याद्व्यवं व्याधेः यदि वात्मा-निति स्थितः" इति निदानोक्ते व्याधिहेतुविपरीतौषधा-दितः २सुखावहोपयोगे । यत्र फलः तस्मिन् तत्सामीप्ये वा अव्ययी० । ३फले इत्यर्थे ४फलसमीपे च अव्य० ।

उपशरद् अव्य० विभक्त्यर्थे सामीप्ये वा अव्ययी० अच् समा० । १शरदि इत्यर्थे २शरत्समीपे च

उपशल्य न० उपगतं शल्यम् अस्मिन्स्थाने (भागाङ्) आश्वा० स० । आश्वाले "अश्वस्य विषाक्तोपशल्ये कण्याकीडभावाद्य" दृश्यकर्मा० । "उपशल्यनिविष्टौ" "अधोपशल्ये रिपुमन्यशल्ये" रघुः । उपचारात् २आलभागे च । "मै-त्रोपशल्यनिपतद्रुधनेनिधारा" इति माघः ।

उपशान्ति स्त्री उप+शम-क्तिन् । निवृत्तौ उपशमे । "यज्ञ-जार्त्तभयोपशान्तये" रघुः । "वेदनोपशान्तिरस्मदुक्तप्रकारो-नार्हत्व" इत्युक्तः । ["नियोपशायः कर्त्तव्यः" भाष्यः ।

उपशाय पु० उप+शी-घञ् । वासिकभटानां पर्य्यायेण शयने ।

उपशायिन् त्री० उप+शी-णिनि । समीपशयनशीले "अ-ग्न्याधेयाग्निनित्यधारी क्षीरक्षोभ्युग्निमुपशायी हादशरात्रं वसात्रं त्रिरात्रमन्वतः" आश्वा० ४,१०,१६, अग्निमुपशायी अग्निसमीप एव भूमौशयः" कर्कः । शीलार्थत्वात् भावे कर्मणि घञ् । "आहूताध्यायी गुरुकर्मस्वबोधः पूर्वोत्थायी चरमं चोपशायी । मृदुर्दान्तो धृतिमान्प्रमत्तः स्वाध्यायशीलः सिध्यति ब्रह्मचारी" भा० आ० ८१ अ०

उपशिक्षा स्त्री उप+शिक्ष-अ । सन्निधिशब्दे "उपशिक्षाद्वा अभिप्रशिक्षनम्" बृजु० १०,१०, ल्युट् । उपशिक्षण तत्रार्थे ल०

उपशिक्षण न० उप+शिक्ष-आधारे ल्युट् । १आधारे । शिक्ष-ल्युट् । २आधारवस्त्वाधारे च । (योगाभ्यासे) "तीक्ष्णा-ङ्गनावपीड्याभ्यां तीक्ष्णगन्धोपशिक्षणैः । वर्त्तिप्रयोगैरथ वा अवपीड्यं प्रवर्त्तयेत्" सुश्रु० । तत्र शिक्षणैः शिक्षणैरिति वा पाठः प्रादादिकः नत्वपाठे शिक्षिधातोरेव पाठात् शिक्षिधातोर्ल्यन्तशिक्षधातोश्चाभावात् ।

उपशिष्य पु० उपगतः शिष्यम् आश्वा० स० । शिष्यसमीपे "ऋतःप्रभावं भरतःप्रभावं गुरुक्रमाद्वेत्ति सहोदरेभ्यः । शिष्योपशिक्षैश्चपगीयमानमतश्च तस्यद्भुतसिन्धुपारम्" भट्ट०

उपशुन अव्य० शुनि, तत्र समीपे वा अव्ययी० अच् समा० । १कुक्कुरे इत्यर्थे २कुक्कुरस्य सामीप्ये वा ।

उपशोभ स्त्री उपगता शोभां वाहल्येन आश्वा० स० । आरो-पितशोभायाम् "विक्षिप्तशोभमनुपवाति माधवे" माघः ।

उपशोषण न० उप+शुष-णिच्-ल्युट् । १शोषणाधने आ-धारे । उपशोषयति कर्त्तरि ल्यु । २तत्कारके त्रि०

(कटुकः) "विष्णुक्रान्तेदमेदोवसापक्षोपक्षोभणक्षमेति" (कषायः) "क्लेदोपशोषणक्षमेति सुश्रु०। शोषणश्लाघ्यः-स्थितजलादेर्वातोद्यादिना नाशनम्।

उपश्रुत् पु० श्रूयते स्म+क्त० क्विप् श्रुत् स्तुतिः उपगता श्रुद् यत्र। यज्ञे "आ नो यातमुपश्रुत्यश्विना ऋ० ८, ८, ५, "उपश्रुति यज्ञे" भा०

उपश्रुति स्त्री उप+श्रु–क्तिन्। १समीपश्रवणे "श्रुश्रुतिञ्च नोपश्रुतिञ्च मा क्षासिष्टाम्" अथ० १९,२,५, "शोभया गिरामुपश्रुतिः" ऋ०१,१०,१, "उपश्रुतिः सभीमे श्रवणम्" भा० श्रुतिः श्रवणम् तस्य समीपे अव्ययी०। २श्रवणसमीपे "आ नोयाह्युपश्रुत्यश्विना" ऋ० ८,२४,११, उपश्रुति श्रवणसमीपमायाहि" भा० "नक्तं निर्णेजनं यत्किञ्चित् शुभाशुभकरं वचः। श्रूयते तद्विदुर्धीराश्चैवप्रज्ञमुपश्रुतिम्" क्षीरस्वामिधृते ३देवे प्रतिश्रुतशुभाशुभप्रश्नं तदाविष्टवाक्यादिभिरुद्घाट्यते उत्तरवाक्ये च "परिजनोऽपि चाक्षाः श्रुततदुपश्रुत्यै निर्जगाम" काद०। उपश्रुतिश्रवणप्रकारश्च विधानपा० यत्नकाण्डे दर्शितो यथा "उपश्रुतौ विधानं तु यथा कार्यं फलार्थिना। ज्ञातव्या यत्नकर्मान्ते सा पौरुषजा त्रिधा:। अन्यजानां स्पष्टे वाक्ये पूर्वरात्रे यदुच्यते। स्त्रिया वा बालकैर्वापि तथा सुप्तैः परस्परम्। विचार्य तद्वचस्तत्त्वमादेष्टव्यं फलं बुधैः। निर्णेजकालये पश्येत् प्रतिपद्येव बुद्धिमान्। मद्यक्लृप्तसदने पश्येत् द्वितीयायां न संशयः। वैश्यविक्रयिणो गेहे शुक्लपक्षस्य तथाऽहये। क्षौरकल्पदने चैव त्रिगुणानां स्पष्टे तथा। मद्यकारिस्पष्टे चैव तथा वैद्यस्पष्टेऽपि च। क्षौरजातिगृहे पश्येत्तथा पौष्पकर्मगेहके। सिन्दोलकस्पष्टे पश्येत् कुम्भकारस्पष्टे तथा। खर्जूराराजके चैव जातिकद्विजन्मनोः। तृतीयादितिथौ श्रेष्ठा क्रमेणोपश्रुतिर्भवेत्। अमावां सूदजातीनां स्पष्टे पश्येदुपश्रुतिम्"। पश्येत् शुभाशुभमालोचयेत्। तत्र क्रमश्च। "उपाश्च पश्चिमां सन्ध्यां जरत्पालधिनं सुधीः। खलिताच्च द्विजान् गच्छेद्वृद्धपन्थिनमुदाश्रितः। चन्दनेनानुलिप्ताङ्गः श्वेतमाल्यधरः शुचिः। श्वेतवस्त्रसमावृतो धृतश्वेतविभूषणः। अक्षतानक्षतौ धृत्वा मन्त्रेणानेन मन्त्रितान्। ओं ऐँ ह्रीँ श्रीँ भद्रकाल्यै! भद्रकाल्यै वरदे! भद्रे! विमोक्षय जनान् सर्वान् मनाङ्मनसि यद्गतान् कुरु। वरुणेन वरुणैः सञ्जीवनेऽन्येन तदृष्टकम्। स्पष्टोपरि परिक्षिप्य मुक्तकेशः स्मृतिर्भवेत्"। "तदृष्टे भद्रमयद्भानु यदि दृष्टयात्। तच्छुभमशुभं वा विचार्यादेष्टव्यम्। तेषु यत्नेषु कर्मराज्यजयित्वाभ्यर्चनादिष्वर्थाः नेष्टाः। प्रव्राजि स्पष्टाश्च गच्छन्ति अत्राजनार्था दानार्था लाभार्थाः साधुसन्दाः प्रशस्ताः तेष्वपि कार्यार्था दुष्टाः न याहि न गच्छ नास्ति भवत्यर्थो अयानयत्नाश्च गमने दुष्टाः तच्छब्दान् दृष्ट्वान् यात्रां निवर्तयेत्। अत्यत्कटकार्ये तु हिरण्यस्य जलदेवतां संस्मृत्य मुहूर्तं तिष्ठन् गच्छेत्। वैन्यं पृथुं वैश्यमित्यादि पठन् पुनरपि निषिद्धप्रयाणेत्ये श्रुतादिभिरुदा सिद्धिविनायकव्रतोपयाचितं संस्मृत्य गच्छेत्। तत्रापि निषिद्धेषु गच्छेदेव" वि०पा०।

उपश्लेष पु०उप ईषदर्थे एकदेशेन श्लेषः संबन्धः। आधाराधेययोरेकदेशसंबन्धे। यथा स्पष्टघटयोः। उपश्लेषे साधुत्वम्। औपश्लेषिक आधारभेदे "औपश्लेषिकं वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा" सि०कौ०। भावे ल्युट्। उपश्लेषण तत्रैव स०"अत्याधानमुपश्लेषणम्" सि०कौ०।

उपश्लोकि श्लोकैरुपस्तौति उप+श्लोक+णिच् नामधातुः उभ०सक० सेट्। उपश्लोकयति-ते उपाश्लोकत्-त उपश्लोकयाम्-बभूव-आस-चकार चक्रे उपश्लोकयन् उपश्लोकितः उपश्लोकयितुम् उपश्लोकनम्।

उपसत्या पु० उप+सद्म-यञ् वा०भत्वम्। १पतनप्रतिरोधे (चामान) २आसन्ने ३आडम्बरे च स्वार्थे कन्। तत्रार्थे ३आधिक्ये च। उपसद्मानति ल्युड्। उपसद्मक पतनप्रतिरोधके, ल्यूषायां न० "सर्व एव द्विजप्रकाराऽस्मात्प्राप्ताः उपसद्मकः" इ०त० "उपसद्मकः सदृश्येव सद्मादिलक्षणः" भा०।

उपसृत् त्रि०उप+सृ-क्विप् वा०भत्वम्। उपसूयमाने "यथेवस्तावा उपसृत्" ऋ० ६,८७,६,

उपसं(सङ्)क्रमण न०उप+सम्+क्रम-भावे ल्युट् वा ङीः। १सन्निवेशे कस्यचित् वस्तुनः पूर्वाधारत्यागेन समीपस्थितवस्तुनि संक्रमणे "सविशेषे हि विधिनिषेधौ विशेषस्योपसंक्रान्ततः सति विशेषे बाधे" इत्यादौ विधिष्टे विधिनिषेधबाधे तद्भेदविशेषे उपसंक्रमणं भवतीत्युक्तं यथा यिष्ठो विनष्टः पुत्रो न नष्ट इत्यत्र विशेषणभूतयिष्ठायामेव नाशस्योपसंक्रमणम्। उपसंक्रमणे दीयते कार्ये वा ल्युट्। औपसंक्रमण तत्र देये कार्ये त्रि०। स्त्रियां ङीप्।

उपसं(सङ्)गृह पु०उपसंगृह्यते इति घञर्थात् उप+सम्-ग्रह-आधारे अच् वा ङीः। १घादप्रकृतपूर्वकलभिधाने उपसंगृह्यतेऽनेन करणे अच्। २उपकरणे "उपातिष्टत वैवाहः

पर्यङ्के सोपसंग्रहे" भा० वि० १७अ०। भावे क्यप्। २सम्यक् संग्रहे "ब्रह्मानाप्युपसंग्रहः" राजा०

उपसं(सङ्ग्र)ग्रहण न० उप+सम्+ग्रह-आधारे ल्युट् वा ङ्। पादग्रहणपूर्वकप्रणामे "उपसंग्रहणं कृत्वा द्रोणाय स विसर्जयते" भा० द्रो० ७३अ० "वामहस्तेनाग्निना कार्मुकमुपसंग्रहणं गुरोः" मनुः। २सम्यक् संग्रहण च।

उपस(सङ्ग्र)ग्राह्य त्रि० उप+सम्+ग्रह-कर्मणि यत् वा ङ्। पादग्रहणेन अभिवाद्ये "भ्रातुर्भार्योपसंग्राह्या सवर्णाऽन्यादकन्यपि। विप्रोष्य तूपसंग्राह्या ज्ञातिसम्बन्धिवोधितं" मनुः। [२सम्यग्नियमे २बन्धने च।

उपसंयम पु० उप+सम्+यम-घञ् अवृद्धिः। १उपसंहारे।

उपसंयमन न० उप+सम्+यम-णिच् ल्युट्। १सम्यग्यन्त्रणे करणे ल्युट्। २तत्साधने।

उपसंयोग पु० वाक्येन संयोगः। समीपसंबन्धे। "नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति उपसर्गाः" व्या०

उपसंरोह पु० उपगतः संरोहः प्रा०स०। समीपप्ररोहे "अल्पमात्रानुपसंरोहः" सुश्रु०।

उपसंवाद पु० उपेत्य अङ्गीकृत्य संवादोवदनम्। पणबन्धे नाङ्गीकारपूर्वकवदने उपसंवादाद्यदुयोच" या०। "उपसंवादः पणबन्धः" वि० कौ०। स च "यदि भवानिदं कुर्यात् तर्हि दृढमङ्गं ते दास्यामीत्येवं वाक्यरूपः।

उपसंव्यान न० उपसंव्यायतेऽनेन उप+सम्+व्येञ्-संहतौ करणे ल्युट्। परिधानवस्त्रे "अन्तर बहिर्वोपसंव्यानयोः" या०।

उपसंहार पु० उप+सम्+हृ-घञ्। १समाप्तौ, स च प्रबन्धतात्पर्यावधारकविशेषभेदः "उपक्रमोपसंहारौ-हेतुस्तात्पर्यनिर्णये, इत्युक्तेः। तत्रोभयोरेव तद्धेतुत्वं न तु प्रत्येकस्योक्तमुपक्रमग्रन्थे। २संग्रहे च। ३सम्यक्करणे ४एकत्र स्तुत्यर्थख्यातान्यत्वार्थत्वपक्षे यथा गुणोपसंहारः। तच्छब्दे विवृतिः। ५साकल्येन सम्बन्धे "सर्वोपसंहारवत्वाच्याग्नेर्दुर्ज्ञानत्वात्" सर्व०स०।

उपसंहारिन् त्रि० उप+सम्+हृ-णिनि। १उपसंहारके साकल्येन सम्बन्धेन व्याप्ते अनुपसंहारिशब्दे उदा०।

उपसङ्ख्यान न० उपरि सूत्रोक्तादतिरिक्तायाः संख्यायते अनेन उप+सम्+ख्या-करणे-ल्युट्। सूत्रातुक्तस्यार्थस्य वार्त्तिकादिभिः ज्ञापने वाक्यभेदे। "ब्रह्मत्वादिभ्य उपसंख्यानमित्यादि" वार्त्तिके भूरिप्रयोगः। दृष्टुपसंख्यानेनेत्यमेव्येण" २,१।२,भाष्या० मल्लिनाथः।

उपसत्ति स्त्री उप+सद-भावे क्तिन्। १सैकट्येन सम्बन्धे २आनुगत्ये ३सम्बन्धमात्रे च। करणे क्तिन्। ४सेवायाम् मेदि०।

उपसत्तृ त्रि० उप+सद-तृच्। १आसन्ने निकटस्थिते २अनुगते ३सेवके च। "मा च रिक्तोपसत्ता ते अग्ने!" "ज्ञानमग्ने सुजनमस्तुभ्यमुपसत्ता" यजु० २७,२,४, उपसत्ता सेवकः वेददी०।

उपसद् त्रि० उपसीदति उप+सद-क्विप्। १समीपस्थिते। "ब्रह्मणोद्यावोपसदम्" यजु० २०,६,करणे क्विप्। २दृष्टिभेदे स्त्री। सा चेष्टिः "अथोपसदः" आश्व० श्रौ० ४,८,१, आरभ्य पाशुकोपसदः "इत्यन्तेषु १।१सूत्रेषु उक्ता दृष्ट्या। "अथोपसद्भिः प्रचरति" "यदोपसद्भिः प्रचरति" अथैतानि हवींषि निर्वपति आग्नेयमष्टाकपालं पुरोडाशं सौम्यं चरुं वैष्णवं त्रिकपालं वा पुरोडाशं चरुं वा तेन यजेतैवं यजते। तदु तथा न कुर्यात् स्खलति वा एव यो यज्ञं प्रयाहेत्येति वा एव यज्ञप्रयाद्य उपसत्प्रयाहेति तस्मादुपसत्प्रयाहेव नेयात्" श्रुत० ५,४,५,१६, "अथ दर्शपेयं ब्रह्मवादिने स्थापितं सोमसाकल्यासन्द्यामासाद्यातिथ्यवा प्रवरेयुः तदनन्तरमुपसद्याग: तत्राग्नीषोमविष्णुदेवता ओपसत्प्रतिनिधित्वेन संस्कृतयागसम्बन्धिनामाज्यानां लवणामाग्नेय सौम्यवैष्णवानामेव निर्वापं पूर्ववत्करोति यदोपसद्भिरिति। तेन यष्टेरिति एकैकोपसत्स्थाने तेन एकेन हविषा यष्टेरिष्टितन्त्रेण कुर्यात् उपसत्त्वमार्थमेतद्विधेयं कर्त्तव्यमिति याज्ञवल्क्यादयः; पक्षे तस्मिन्निराकरोति तदु तथेति। नेवात् न प्रच्युतोभवेत् तत उपसदः पृथक् कुर्यात् तदन्त एतानि संस्कृतयागनिमित्तानीति हवींषि चेष्टितन्त्रेण पृथक् कुर्यात् स एव दर्शपेयः कृतः यत्प्रदर्शयोमवाध्योऽग्नीषोमयं क्षोभयति" भा०। "उपसद्भिश्चरित्वा मासमेकमग्नीषोमौ जुहोति" श्रुतिः। "उपसदामेतत्तिस्रोरात्रीः यजु० १९,१४, "उपसत्सु दौक्षिणौ कुर्यात्" कात्या० ४,९,४४, "उपांशूपसदः। ७,२,२२,। ज्योतिष्टोमे २प्रवर्ग्यकृतविद्याग्निहोत्रे ३गार्हपत्यादिभिस्त्रिभिश्च। "गार्हपत्योदक्चाग्नित्रयं वा दक्षणीयकः। एतेऽग्नयश्चत्वारो मुख्याः मेधातिथेरुपसदश्च:" अग्नि पु० गयभेदनामाख्याते। उपसद् तच्छब्दोऽस्यास्ति विज्ञा० अच्। औपसद तच्छब्दयुक्ते ज्ञाख्याते अनुवाके च पु०।

उपसद पु० उपसीदत्यग्निमत्र उप+सद-वह वा० अप्रत्ययः क। उपसदुयागे "अथ वह्यति अत्र पिबति वहन्ते तदुपसदं

रेति" भा०उ०। "यद्गमने रतिश्चानुभवति इदादि संबोधनसदुपसदैः समानतामेति उपसदादयु पयोव्रतनिमित्तं सुखमस्ति अल्पभोजनीयानि चाङ्गानि आसद्यानीति ब्रह्मणोऽयनादीनामुपसदादयु सामान्यम्" भा०भा०। "पयोव्रतत्वं पयोभक्षणं च क्रतुत्वम् यत्ते यान्यङ्गान्यभोजनीयानि तानि प्रसङ्गानि उपसत्तु क्रियमाणायु ब्रह्मणः खाध्यायविशेषः अयनादिषु सोऽस्तीति प्रसङ्गनिमित्तसुखनिमित्तत्वं क्रतुधर्मत्वयु सामान्यम्" आ०गि०

उपसदन न०उप+सद-ल्युट्। १सेवायामुपसेवने २आनुगत्यादिना प्राप्तौ "तत्रोपसदनं चक्रे द्रोणस्येषुबलार्णवे" भा० द० १०८ अ०। "प्रतिमट्ट च तान् सर्वान् द्रोणश्चैव समग्रवीत्। रक्ष्यतेऽः प्रतीतात्मा क्रतोपसदनान्तया" भा० १२२अ०। शमीध्ये अग्नयौ०। ३सदसमीपे अव्य०। "अन्योऽप्यनुसदीतोऽस्मि यस्य मे मुनिपुङ्गव!। यत्तोपसदनं ब्रह्मन् प्राप्तोऽस्मि मुनिभिः सह" रामा०। अत्राव्ययीभावस्यापि यत्नेन समासः आर्षः।

उपसदी स्त्री उप+सद-क्विप्+ङीप्। सन्ततौ धारायाम्। "खट्वेऽस्योपसदां मा कर्तृषीत् प्रजाता च पशुभिरायितम् मत०१४,६,४,२२। अस्य यजमानस्य उपसदां सन्ततौ" भा०। सन्ततिश्च द्वेधा कालिकी दैशिकी च। तत्र समानानेककालिककार्यमालधर्मत्वं कालिकसन्ततित्वम्। विभिन्नकालीनघटपटादिकार्यमालवृत्तिधर्मघटत्वादौ सन्ततित्वव्यवहारश्च समानेति सामान्यशब्दान्वितावच्छेदकधर्मेण। तेन सत्त्वद्रव्यत्वादिना घटपटयोः समत्वेऽपि न क्षतिः। सत्त्वद्रव्यत्वादिकमादाय तद्व्यवहार आर्थ्यमालेति। एककालोत्पन्नेषु बहुषु घटेषु तद्व्यवहारश्च अनेककालिकेति। दैशिकसन्ततित्वञ्च समानानेकवृत्ति आर्थ्यमालधर्मत्वमितिभेदः। तत्र कालिकसन्ततेः प्रवाहादिपदेन व्यपदेशः यथा ज्ञानप्रवाहः, दुःखप्रवाहः इत्यादि दैशिकसन्ततौ तु श्रेणिप्रभृतिशब्दव्यवहारः यथा वृक्षश्रेणी वृक्षपङ्क्तिरित्यादि। उभयसन्ततौ तु सन्ततिधारादि शब्दप्रयोगः यथा ज्ञानधारा सुखधारा दुःखसन्ततिरित्यादि एवं ज्ञानधारा तैलधारा तैलसन्ततिरित्यादि। तादृशधर्मश्च सुखवद्दुःखज्ञानत्वादिकं वृत्तित्वतैलत्वादिकञ्च। उभयविधापि सन्ततिः पुनर्द्विविधा अविच्छिन्ना विच्छिन्ना च देशकालोरव्यधानेऽविच्छिन्ना यथा धारावाहिनि स्थले ज्ञानादिधारा। तयोर्व्यवधाने विच्छिन्ना यथा विच्छिन्ने विच्छिन्नजातीयदुःखानाम्। विच्छिन्नसन्ततिमादायैव स्मृतिप्रवाहः। सुखदुःखसन्ततिरित्यादिव्यवहारः।

उपसद्य त्रि०उपसद् सेवामर्हति यत् उप+सद-कर्मणि वा० यत् वा। १सेवनीये २नैकट्येन प्राप्ये च "भरेषु हव्यो नमोपसद्योगन्ना" ऋ० २,२३,१३। "उपसद्याय मीढुष आस्ये जुहुता हविः" ऋ० ७,१५,१।

उपसदन् त्रि० उप+सद-क्विनप् स्त्रियां ङीप् वसान्तादेशः। १उपसन्ने २सेवके च। कर्म्मणि क्विनप्। २सेव्ये च। "नमस्ते अस्तु भीढुषे नमस्त उपसदने" आ०श्रौ०२,५,६।

उपसदव्रत न० उपसदस्तु विहित व्रतम्। उपसद्विहिते पयोव्रते। "आपूर्य्यमाणपक्षस्य हादशाहमुपसदव्रती भूत्वा" ह०उ०। "उपसत्तु व्रतमुपसदव्रतमुपसदः प्रसृताः ज्योतिष्टोमे। तत्र क्रतोपचयापचयहारेण पयोभक्षणं व्रतं तत्र च तत्कर्मानुपसंहारात् क्रतुधर्मतिकर्त्तव्यतानुप्रवेशः पयोभक्षणमात्रमुपादीयते। उपसद्व्रतो पयोव्रतो यज्ञियार्थः भा०भा०।

उपसन्न त्रि० उप+सद-क्त। १उपस्थिते, २निकटागते ३उपसेवके च ४आनुगत्यत्वेन नैकट्यप्राप्ते "प्रीतः भगवांस्तस्मै उपसन्नोऽब्रवीद्धि भोः" भा०शा०२८६ अ०। "भगवद्दर्शनजन्यजले सुखदुःखवद्धवे पतितं व्यथितम्। अपवा शरणागतमङ्गर मामनुशाध्युपसन्नमनन्यगतिम्" "तथेति स विद्वानुपसन्नाय-प्रोवाच तत्त्वतो ब्रह्मविद्याम्" श्रुतिः।

उपसमाधान न० उप+सम-आ-धा-ल्युट्। राशीकरणे, "निवासचितिशरीरोपसमाधानेत्यादि" पा०। "उपसमाधानं राशीकरणम्" सि०कौ०। २समिधः प्रक्षिप्य ज्वालने। "विवाहाग्निमुपसमाधाय पश्चाद्धोमः" आश्व०गृ०१,८,६, "उपसमाधाय समिधःप्रक्षिप्य प्रज्वाल्य" भा०टीका। अग्निमुपसमाधाय" गो०ब्रा०। "उपसमाधाय ज्वालयित्वेति यं तत्त्वे च समापूर्व्वधाऽधातोस्तदर्थदर्शनात् तदर्थत्वम्।

उपसमिध(ध्) अव्य०समिधः समीपे अव्ययी०वा अच्समा०। समिधः समीपे।

उपसम्पत्ति स्त्री उप+सम्+पद-क्तिन्। अभिनवत्वेन सम्प्राप्तौ। "प्रथमोऽचिरोपसम्पत्तौ" पा०"अभिसम्पत्तौ अभिनवत्वे" सि०कौ०। सम्पत्तिश्चानुबन्धाभावः सि०कौ०

उपसम्पन्न त्रि०उप+सम्-पद+क्त। १प्राप्ते २श्रिते च हेम०। "श्रोत्रिये तूपसम्पन्ने त्रिरात्रमशुचिर्भवेत्" मनुः।

उपसम्भाषा स्त्री उप+सम्+भाष-भावे अ। उपसाखने। "भाषणोपसंभाषाज्ञानयज्ञेत्यादि" पा० "उपसम्भाषा उपसाखनम्" सि०कौ०।

उपसर पु॰उप+सृ "प्रजनने सर्त्तेः" पा॰ अच्। गर्भपङ्क्त्यर्थं स्त्रीपशुषु पुंसगमने। "प्रजननं प्रथमगर्भपङ्क्त्यम्। गवासुपसरः" सि॰कौ॰। उपचारात् २नैरन्तर्य्येऽनिगमने "धेनासुपसरं दहा" भट्टिः "धेनासुपसरं नैरन्तर्य्येण निर्गमनम् दहा उपसर इव उपसरः नैरन्तर्यमालेपोपलक्षितत्वात् उपसरो हि स्त्रीगवेषु पुङ्गवानामभिगमनमुच्यते स च नैरन्तर्य्येण भवति" जय दूक्षः।

उपसरण न॰उप+सृ-ल्युट्। १उपसरार्थे २छलोपगमने च। "यस्तूर्ध्वमधो वा मेढ्रजघनं प्रहृत्यमत्तत्वादिनिघ्नन्ति तल्लोपसरणं क्षुद्रं कर्ब्बन्ति दोषाः" "परिव्राजः प्रव्राजिका क्षुद्रयोपसरणं विबन्ध" सुश्रु॰ कर्म्मणि ल्युट्। २उपसर्त्तव्ये उपगन्तव्ये च। "अथ खल्वायोः सद्वृद्धिरुपसरणान्नोत्पद्यते" छा॰उ॰। "उपसरणानि उपसर्त्तव्यानि उपगन्तव्यानि स्त्रोयानि" भा॰।

उपसर्ग पु॰ उप+सृज-घञ्। १रोगविकारे २उपद्रवे, शुभाशुभसूचके ३दिव्यादिविकारभेदे उत्पाते, व्याकरणोक्तेषु "निपातोपसर्गादयो धातवः प्रादयश्चोपसर्गकाः"। द्योतकत्वात् क्रियायोगे द्योतकादयगता दूमे" दृक्षलक्षणेषु क्रियायोगे ४प्रादिषु च। "उपसर्गाः क्रियायोगे" पा॰। "यत्र प्रादीनामन्यतमं प्रत्ययापसर्गतेतिद्योतनाय योगरूढत्वम्। तेन निर्गतः सैनिको यस्यादिति वाक्ये निःसैनिक इत्यादौ न तथात्वम्" मल्लिनाथः। ते च द्वाविंशतिविधा यथा, प्र, परा अप, सम्, अनु, अव, निस्, निर् दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप एते प्रादयः। निस् दुस् इति स्थाने "निसस्तपतावनासेवने" पा॰ सूत्रे निस इति निर्देशात्। निष्क्रान्तं दुष्कृतमित्युदाहृत्य दुदुपधस्य रो विसर्जनीयः" इति भाष्योक्तेश्च 'निरःकृप इति' "सुदुरोरधिकरणे" इति च पा॰निर्देशात् रान्तोऽपि" मनो॰। निर्दुरोरभेदारोपेण क्वचिद्विंशतिधात्वर्थवत्त्वं द्रष्टव्यम्। "तस्य लिधा प्रवृत्तिः" "धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते। तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा। क्रमेणोदाहरणानि यथा। आदत्ते प्रकृते प्रथमनोति। अपि च। "उपसर्गेण धात्वर्थो बलादन्यत्र नीयते। प्रहाराहारसंहारविहारपरिहारवत्" "विभाषोपसर्गे" "ह्यन्तक्षणश्वसजागृणिश्व्येदिताम्भ्योऽपरैत्" पा॰।

प्रादयस्तूपसर्गा न सार्थकाः, सार्थकाश्च चादयो निपाता वाचकत्वात् उपसर्गास्तु न तथा किन्तु द्योतका इति नैयायिकाः। वैयाकरणास्तु उभयेऽपि द्योतका इति मेनिरे तदेतत् वै॰भू॰दर्शितम् "प्रादयोद्योतकाश्चादयोवाचका इति नैयायिकमतमयुक्तम् वैषम्ये योजाभावादिति ज्ञानक्रियातानां द्योतकत्वं समर्थयते। "द्योतकाः प्रादयो येन निपाताश्चादयस्तथा। उपाक्षेने करिष्यौ चकारोदाहृते यथा" येन हेतुना प्रादयोद्योतकास्तेनैव हेतुना चादयोनिपातास्तथा द्योतका इत्यर्थः। अयं भावः। ऐश्वरमनुभवतीत्यादावनुभवादि प्रतीयमानो न धात्वर्थः भवतीत्यनापत्तेः। नोपसर्गार्थः; तथा सत्यप्रकृत्यर्थतया तत्राख्यातार्थान्वयापत्तेः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वात्त्वत्पक्षे; अनुगच्छतीत्यादौ अनुभवादिप्रत्ययापत्तेश्च। न विशिष्टार्थः गौरवात्। तथा च धातोरेव विशिष्टवाचकत्वादिवाचकत्वं तथा उपसर्गस्यार्थद्योतकत्वमस्तु। तथा च नार्थद्योतकत्वमेव द्योतकत्वमिति। तच्च चादिष्वपि तुल्यम् चैत्रमिव पश्यतीत्यादौ सादृश्यविशिष्टं चैत्रपदवाच्यम् इवशब्दस्तार्थद्योतक इत्यत्र इवकारादिति। अयं युक्तिमदाह। उपाक्षेते इति। अत्र क्षुधासया किमुपसर्गार्थः? विशिष्टस्य? धातुमात्रस्य? वा। नाद्यः तथा सति खार्थकस्वव्यधिकरणव्यापारवाचकत्वरूपसकर्मकत्वस्यासत्त्वेन धातोरुपसर्गरूपफलवाचकत्वेनाभावादकर्मकत्वापत्तेश्चेतः कर्म्मणि चकारोन स्यात्। न द्वितीयः गौरवात्। तृतीये त्वागतं द्योतकत्वं तात्पर्यार्थकत्वमात्रात् इति भावः। इक्षते इत्यत्र कर्म्मणीति शेषः। तच्चादिष्वपि तुल्यमित्याह। "तथान्यत्र निपातेऽपि चकारः कर्म्मवाचकः। विशेषाद्यद्योगोऽपि प्रादिष्वादिषु समः"। (अन्यत्र) साक्षात्क्रियते अक्षद्भिर्व्यते ऊरीक्रियते स्म इत्यादौ। अत्रापि धातोरुक्तदर्थे कर्म्मणि चकारसिद्धयर्थं तत्तदर्थवाचकत्वं वाच्यमित्युपसर्गसहेतुत्वमनीषामपीत्यलम्;। यद्यपि क्षधातोः सकर्मकत्वमक्षेव तथाप्येवमर्थेषु सकर्मकता न स्यात्। अन्यथा वायुर्विकुरुते वैक्लव्यं विकुर्वन इत्यत्रापि स्यादिति भावः। अथोपाक्षनासाक्षात्कारादि निपातार्थोऽस्तु "साक्षात्प्रभृतयश्चेति" कोषस्वरसात् तदनुकूलोव्यापार एव धात्वर्थोऽस्तु सखसमुत्थनिपातान्वतरार्थकस्वव्यधिकरणव्यापारवत्त्वं सकर्मकत्वमपि सुवचमिति हृदालम्बादीनामिवाश्रयणीयमिति चेन्न साधकमिति चेन्न नानार्थधात्वर्थयोर्भेदेन साक्षादन्वयासम्भवेन निपातधात्वर्थयोरन्वयासम्भवात्। अन्यथा तण्डुलः पचतीत्यत्रापि कर्म्मतया तण्डुलानां धात्वर्थेऽन्वयापत्तेरिति। किञ्च प्रादीनां वाचकत्वे धूवादनु प्रकर्षः शोदयोनिश्च इतिसङ्ग-

यात् प्र. कीदृयोनिरित्यपि स्यात् ॥ अकल्पते प्रादेरर्थकत्वात्र तदन्वय इयत एव द्योतकता तेषां स्यादिति । साधकान्तरमभिप्रेत्याह । विशेषणेति । शोभनः सत्त्व इति वक्ष्यमाणस्य दृश्य इत्यस्यान्वयापत्तेरित्यभिप्रेत्याह आदेति । धवखदिरयोः सत्त्वस्य इति वक्ष्यमाणस्य च खदिरस्य चत्वेव स्यादिति भावः । नन्वेवं प्रातिपदिकार्थयोरभेदान्वयबोधे विभक्तिजन्योपस्थितिर्हेतुरिति कार्यकारणभावो निपातातिरिक्तविषय एवेति नोक्तदोष इत्याशङ्क्याह । "पदार्थः सहयान्वेति विभक्तेः [illegible] निपातेतरसङ्गीचे प्रमाणं किं विभावय" । (सहया) सहयेन समानाधिकरणेनेति यावत् । (अन्वेति) अभेदेनेति शेषः । (विभक्तेन) असहयेन असमानाधिकरणेनेति यावत् । अयमर्थः समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिर्निपातातिरिक्तविषयेति कल्पने मानाभावोमौरवञ्च । अस्माकं निपातानां द्योतकत्वादन्वय एव नास्तीति नायं दोषः अतएव घटोनास्त्यादौ घटपदं तत्प्रतियोगिके ज्ञानलक्षणमिति नैयायिकाः । अपि च निपातानां वाचकत्वे ह्याख्यादावन्वयोन स्यादिति साधकान्तरमाह । "अरैरङ्कैरिवोद्योग्यात् उङरित्यत् रङानिव । इत्यादावन्वयोन स्यात्प्राप्ते त्रवीति ततः" । अत्रोक्तसदृशैः अरैः रसवदानुदीच्यानुङरित्यर्थः । अयञ्चोद्योतादिपदानां तत्तद्दृश्यपरत्वे इवशब्दस्य द्योतकत्वे च सङ्कुचते । अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोधः । तथाहि । उक्तैरिति करणे तृतीया । न चोक्तोत्तिकरणस्य इवार्थसदृशस्य करणत्वेऽपि तस्य करणत्वं ज्ञानेन बोधयितुं शक्यम् अप्रकृत्यर्थत्वात् । इवशब्दस्य चासत्यार्थकतया तदुत्तरतृतीयाया असम्भवात् । सम्भवे वा श्रवणप्रसङ्गात् । उक्तपदोत्तरतृतीयानन्वयप्रसङ्गाच्चेत्याह । सुपां चेति । सुपां श्रवणस्येत्यर्थः । चकाराद्धुक्षपदोत्तरतृतीयानन्वयः सत्त्वमेवते इत्यादाविन्द्रादिपदात् "वागर्थाविव सम्पृक्तौ वन्दे पार्वतीपरमेश्वरौ" इत्यत्र वागर्थयोर्वैन्द्रिकर्मत्वाभावात्तदुत्तरद्वितीयाया अनन्वयः इवार्थस्य अर्थात्मान्वयबोधसम्भवश्च संगच्छते । यदि च विशेषणविभक्तिरभेदार्था साधुत्वमात्रार्था वा तदापि इवशब्दस्य वाचकत्वेऽनन्वय एव उक्तसदृशयरायां समानाधिकरणपदोपस्थाप्यतया भेदेनान्वयायोगात् । बाधाद्भेदेनापि नयः । नह्युक्ताभिन्नसदृशाभिन्नः पर इत्यर्थ एष्टव्यः" ।

उत्पातरूप उपसर्गश्च त्रिविधः "अन्तरिक्षाद्दिवोल्काद्या नास्त्रिक्ष्वाहाऽप्यधर्मतः । नरापचारात्त्रियतमपवर्गः प्रवर्त्तते । अतोऽपचारात्त्रियतमपवर्ज्जन्ति देवताः । ताःस्वजन्मद्रुता ज्ञावह्निज्वलनाभसभूमिजात् । तएव त्रिविधा घोरे उत्पाता देवनिर्म्मिताः । विचरन्ति विनाशाय रूपैः सन्त्रासयन्ति च" गर्गः । "उपसर्गस्तते चैव सद्यः यौघं विधीयते" पराश० । उपद्रवरोगलक्षणाश्चोपसर्गा सुश्रु० उक्ताः "दैवबलप्रवृत्ता ये देवद्रोहादभियुक्तका अथर्वकृता उपसर्गलक्षणाश्च तेऽपि द्विविधा विद्युदशनिकृताः पिशाचादिकृताश्च पुनश्च द्विविधाः संसर्गजा आकस्मिकाश्च" "उपसर्गादयोरोगा ये चाप्यागन्तवः स्मृताः" स्त्रीणां क्रव्यादोपसर्गाः प्रसूताः" सुश्रुतः उपद्रवयत्वे विष्टतिः । "उपसर्गानयेवांस्तु मङ्गलाचारीयत्तद्भवान् । तथा त्रिविधसत्पातं माङ्गल्यं प्रशमेच्छया" देवीमा० । तत्र प्रभवति सत्तापः तेन निर्वृत्तम् वा ठञ् । औपसर्गिकतत्र पर्य्याप्ते तेन निर्वृत्ते च त्रि० । औपसर्गिकात्यन्तमरक्षणीड़ाम् शु० त० ।

उपसर्ज्जन त्रि० उप+सृज-ल्युट् । १दैवाद्युपद्रवे "निर्घाते भूमिचलने ज्योतिषामुपसर्ज्जने" भट्टिः । २अप्रधाने गौणे विशेषणे "दोषसर्ज्जनस्य" "गोस्त्रियोरुपसर्ज्जनस्य" पा० । "उपसर्ज्जनं प्रधानस्य धर्मतो नोपपद्यते" मनुः "उपसर्ज्जनमप्रधानम्" कृञ्० । "अनुपसर्ज्जनात्" "आचार्योपसर्ज्जनश्चान्तेवासी" पा० उपसृजत्यनेन करणे ल्युट् । ३संमार्गसाधने त्रि० स्त्रियां ङीप् । "अधिकरणोपसर्ज्जनेभिरेभिः" मत० १,२,२,२, "पिष्टसमार्जनार्थासु अप्सु पिष्टसम्मार्ज्जनार्थमुपसर्गं साधनानि उपसर्जनम्" भा० "प्रथमानिर्दिष्टमुपसर्ज्जनम्" पा० उक्ते । समासविधायकशास्त्रे ४प्रथमान्तपदनिर्दिष्टे । "एकविभक्ति चापूर्वनिपाते" विप्रतिषेधवाक्ये बहिरङ्गविभक्तिकं तदुपसर्जनसंज्ञम् इत्यर्थक पाणिनिसूत्रोक्ते ५प्रत्ययभेदे च "उपसर्ज्जनं पूर्व्वम्" पा० समासे उपसर्ज्जनस्य पूर्व्वप्रयोगः यथा "हितीया श्रितेत्यादि" पा० सूत्रे हितीयेति प्रथमान्तम् पदं तदेव प्राप्तप्रयोज्यम् यथा कष्टं श्रित इत्यादि वाक्ये कष्टश्रित इत्यादि

उपसर्पण न० उप+सृप-भावे ल्युट् । समीपगमने "न तावदयमुपसर्पणक्षमः" किरा० । "मल्लिकोपसर्पणमाचक्षमित्यादि" सुश्रु० ।

उपसर्पिन् त्रि० उप+सृप-गतौ णिनि । समीपगन्तरि

"एकमेव दहत्यग्निर्नैनं दुष्यत्यपक्रियम्" मनुः। "युक्तं मात्रा कृतं तेषां परमीडोपसर्पणम्" भा० अ० २० अ०।

उपसर्य्या स्त्री उपसीयतेऽसौ सू-कर्मणि यत्। गर्भधारणयोग्यायाम् कृतमत्यां स्त्रीगव्यादौ। अप्रजनार्थे तु ण्यत् उपसार्य्य प्राप्ये त्रि०।

उपसि अव्य०उप+सो बा०कि। समीपस्थाने "आसीन ऊर्ध्वोपसि क्षिणाति" ऋ० १०, २७, २। "उपसि समीपस्थाने" भा० "पि मे पुत्र उपसि प्रेतः" ऋ० ५, ४३, ७।

उपसीर अव्य० सीरे हले तत्प्रयोज्यं वा अव्य०। हलेहलार्थे २ हलसमीपे वा। तरो भवार्थे परिखा० आ। उपसीर्य्य तत्प्रभवे त्रि० आप्रा० स०। हलोपगते त्रि० ततोभवार्थेऽण्येव। औपसीर तद्भवे त्रि०

उपसुन्द पु० दैत्यभेदे तत्कथा भा० आ० "महासुरस्यान्धकाख्यस्य हिरण्यकशिपोः पुरा। निकुम्भो नाम दैत्येन्द्रस्तेजस्वी बलवानभूत्। तस्य पुत्रौ महावीर्य्यौ जातौ भीमपराक्रमौ। सुन्दोपसुन्दौ दैत्येन्द्रौ दारुणौ क्रूरमानसौ। तावेकनिश्चयौ दैत्यावेकधर्म्माणमास्थितौ। निरन्तरमसंतोषसमन्युसंयुक्तानुभौ। विनान्योन्यं न भुञ्जाते विना योन्यं न गच्छतः। अन्योन्यस्य प्रियकरावन्योन्यस्य प्रियंवदौ। एकयोगसमाचारौ द्विधैकं यथा कृतौ। तौ विद्वान् महाबीर्य्यौ कार्य्येष्वेकनिश्चयौ। त्रैलोक्यविजयार्थाय समाधायैकनिश्चयौ। दीक्षां कृत्वा ततौ विन्ध्यं तापस्यं तेपतुस्तपः। तौ तु पूर्वेण वयसा तपोयुक्तौ बभूवतुः। जटिलौ चीरवासानौ जटावल्कलधारिणौ। मलोपचितसर्वाङ्गौ वायुभक्षौ बभूवतुः। आत्ममांसानि जुह्वन्तौ पादाङ्गुष्ठाग्निधिष्ठितौ। ऊर्द्धबाहू खानिलिखौ दीर्घकालं धृतव्रतौ। तयोस्तपःप्रभावेण दीप्तकालं प्रतापितः। धूमं प्रमुमुचे विन्ध्यस्तदद्भुतमिवाभवत्। ततो देवा भयं जग्मुस्तपं दृष्ट्वा तयोस्तपः। तपोविघातार्थमजो देवा विघ्नानि चक्रिरे। रत्नैः प्रलोभयामासुः स्त्रीभिश्चैनौ पुनः पुनः। न च तौ चक्रतुर्भङ्गं व्रतस्य सुमहाव्रतौ। अथ मायां पुनर्देवास्तयोश्चक्रुर्महात्मनोः। बलिनौ भ्रातरौ भ्रात्रोर्भावोत्कालजनस्तथा। प्रपात्यमाना विलक्षाः स्नुवहस्तेन रक्षसा। भ्रष्टाभरणकेशान्ता भ्रष्टाभरणवाससः। अभिभाष्य ततः सर्वास्तौ त्राहीति विचुक्रुशुः। न च तौ चक्रतुर्भङ्गं व्रतस्य सुमहाव्रतौ। यदा लोभं नोपयाति नास्तिमन्यतरस्तयोः। ततः स्त्रियस्ता भूतस्य सर्वमन्तरधीयत। ततः पितामहः साक्षादभिगम्य महासुरौ। वरेच्छन्दयामास सर्वलोकेश्वरः प्रभुः। ततः सुन्दोपसुन्दौ तौ भ्रातरौ दृढविक्रमौ। दृष्ट्वा पितामहं देवं तस्थतुः प्राञ्जली तदा। ऊचतुश्च प्रभुं देवं ततस्तौ संहितौ तदा। आवयोस्तपसाऽनेन यदि प्रीतः पितामहः। मायाविदावस्त्रविदौ बलिनौ कामरूपिणौ। उभावप्यमरौ स्याव एसन्नौ यदि नौ प्रभुः। ब्रह्मोवाच। कृतेऽमरत्वं युवयोः सर्वसृक्कं भविष्यति। अन्यद्वृणीतं यत्तोषे विधानममरैः समम्। प्रभविष्याव इति यन्मृदध्युद्यतं तपः। युवयोर्हेतुज्ञानेन नामरत्वं विधीयते। त्रैलोक्यविजयार्थाय भवद्भ्यामास्थितं तपः। हेतुज्ञानेन दैत्येन्द्रौ न वां कामं करोम्यहम्। सुन्दोपसुन्दावूचतुः। विभु त्रैलोक्येषु यद्भूतं किञ्चित् स्थावरजङ्गमम्। सर्वस्मात्तो भवं न स्यादेतेऽन्योन्यं पितामह!। पितामह उवाच। यत्प्रार्थितं यथोक्तञ्च कामयेतं ददानि वाम्। त्रैलोक्यविधानमेतच्च यथावद्वां भविष्यति। नारद उवाच। ततः पितामहो दत्त्वा वरमेतत्तदा तयोः। निवर्त्त्य तपसस्तौ च ब्रह्मलोकं जगाम ह। लब्ध्वा वराणि दैत्येन्द्रावथ तौ भ्रातरावुभौ। अवध्यौ सर्वलोकस्य स्वमेव भवनं गतौ" २११० अ० "तावन्योन्यमुपागम्य दैत्यौ कामगमावुभौ। देवानामेव भवनं जग्मतुर्युद्धदुर्मदौ। तयोरागमनं ज्ञात्वा वरदानञ्च तत् प्रभोः। श्रित्वा निषिद्धं जग्मुर्ब्रह्मलोकं ततः सुराः। तानिन्द्रलोकं निर्जित्य यत्तस्तोगपांस्तथा। खेचरानपि भूतानि जग्मतुस्त्रिविक्रमौ। अनभ्रमिगतान् नागान् जित्वा तौ च महारथौ। सप्तद्वीपवतीः सर्वा म्लेच्छजातीर्विजिग्यतुः। ततः सर्वां महीं जित्वारब्धवन्तावयुध्यासनौ। सैनिकांश्च समाहूय स्तुतीश्चाकथयन्तुभौ। राजर्षयो महावीर्यास्तेऽभ्यकर्षन्हि जातयः। तेजो बलञ्च देवानां वर्द्धयन्ति श्रियं तथा। तेषामेवं प्रवृत्तानां सर्वेषामसुरहिताम्। सम्भूय सर्वैरभिः कार्य्यः सर्वात्मना वधः। एवं सर्वान् समादिश्य पूर्वतीरे महोदधेः। क्रूरां मतिं समास्थाय जग्मतुः सर्वतोदिशौ। यज्ञैर्यजन्ति ये केचिद्याजयन्ति च ये द्विजाः। तान् सर्वान् प्रभवं कृत्वा बलिनौ जग्मतुस्ततः। आश्रमेषून्मिषोन्मीलि सुनीनां भावितात्मनाम्। भक्षीत्वा प्रक्षिपन्तस्तु विध्वंसं सैनिकास्तयोः। तपोधनेषु ये क्रुद्धाः शापा उक्ता महात्मभिः। शापाभ्यन्तं तयोस्तेऽपि वरदानविरोधतः। नाक्रामन् यदा शापा वाचा शक्ताः शिताश्चिव। निवसान् सम्परित्यज्य अद्रवन्त द्विजातयः। पृथिव्यां ये

तपःक्षिप्ता दान्ताः यमपरायणाः । तयोर्भवाद्दुःखसे वैनतेयादिघोरजाः । अथितैरात्मभिर्भक्तैर्विशोर्णकलुषस्मरैः । न्यधायीत् जगत् सर्वं नाडीरेव कृतं तदा । ततो राजन्नदक्षिणकर्णविनिर्गतौ महासुरौ । उभौ विनिश्चयं ज्ञात्वा विवृद्धौ वर्धयिष्यौ । प्रभञ्जकटौ मत्तौ भूत्वा क्रूरक्षुधान्वितौ । संक्रोधमपि दुर्गेषु निर्यतुर्यमसादनम् । त्रिपुरौ भूत्वा पुनर्व्योम्नि पुनश्चार्क्षितावभौ । तैर्लोकपायैर्लोकानां क्रूराद्योन् दहा निजग्रहः । निहत्यतत्क्षाध्याया प्रणष्टरूपतिद्विजा । उत्पन्नोत्सवयज्ञा च बभूव वसुधा तदा । काष्ठाभूता भयार्त्ता च निहत्तविषयापया । निहत्तदेवयार्त्ता च पुनरोहाकृतिर्वर्त्तिता । निहत्तब्रह्मिणोरक्षा विध्वस्तनगरान्वया । ऋक्षिकक्षालयक्षौघा सूर्यभूयोदयर्दया । निहत्तपितृकार्यञ्च निर्षट्कारमण्डलम् । जगत् प्रतिजगाम दुष्प्रेक्षणभयत्रहा । चन्द्रादित्यौ ग्रहाकारा नक्षत्राणि दिशोऽखः । अम्बुविन्दं तत् कर्म दहा सुन्दोपसुन्दयोः । एवं वां दिशो दैत्यौ जित्वा क्रूरेण कर्मणा । निःउपत्तौ कथंजीवे निर्भयमभिचक्रतुः" २१।अ० । तत जित्वोत्तमाक्रुष्टिमुपवर्ण्य तयोस्तदा वक्तव्यमुक्ता तत्रान्योन्ययुद्धेनान्योन्यवधः २१२अ०उक्तः यथा "ततस्तिलोत्तमा तत्र वने पुष्पाणि चिन्वती । वेषमाच्छिन्नमाधाय रक्तैनैकेन वाससा । नदीतीरेषु जातानु वा वर्त्तिकारान् प्रचिन्वती । यत्नेनैजगाम तं देशं यत्रास्तां तौ महासुरौ । तौ तु दृष्ट्वा परं भावं मदरक्तान्तलोचनौ । इहैव तां वरारोहां भवितौ सम्भूयसुः । तावुत्थायासनं क्षिप्त्वा जग्मतुर्यत्र वा स्थिता । उभौ च कामसन्तापौ प्रार्थयतस्तु तामु । दक्षिणे तां करे सुभ्रूं सुन्दो जगृह भाविना । उपसुन्दोऽपि जग्राह वामे वामौ तिलोत्तमाम् । वरप्रदानमत्तौ तावौरसेन बलेन च । बलरूपमदाभ्याञ्च सुरापानमदेन च । सर्वैरेतैर्मदैर्मत्तावन्योन्यं भ्रुकुटीकृतौ । मदकामसमाविष्टौ परस्परवधोद्यतः । मम भार्या तव गुरुरिति सुन्दोऽभ्यभाषत । मम भार्या तव वधूरुपसुन्दोऽभ्यभाषत । नैषा तव ममैवेति ततस्तौ मन्युरावित्त । तस्या क्षेत्रेच संमत्तौ विनत्तेतरौ तदा । तस्या क्षेत्रोत्तमे भीमे संक्रोधौ तावुभौ तदा । मत्तश्च मदे भीमे तस्यां तौ जातसोहितौ । अन्योन्यं पूर्वमन्योन्यं निजघ्नतुः । तौ गदाभिहतौ भीमौ क्षेत्रतुर्धरणीतले । रुधिरेणावलिप्ताङ्गौ हाविवार्क्षौ नभश्चुतौ" । सुन्दोपसुन्दवधः ।

उपसूर्यक न० उपगतं सूर्यं चन्द्रं वा संज्ञायां कन् । चन्द्रार्कसमीपे मण्डलाकारे परिधौ ।

उपसृष्ट न० उप+सृज-क्त । १मैथुने । २व्याकरणोक्ते प्राद्युपसर्गयुक्ते, "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" पा० । ३विसृष्टे ४उपदृष्टे च मि० । ५यक्ष्मरोगे चन्द्रार्के पु० "नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन । नोपसृष्टं न वारिस्थं न मध्यं नभसोगतम्" मनुः ६कालुके "उपसृष्टा इव कुद्राधिष्ठितभवना" काद० । ७व्याप्ते च रोगोपसृष्टतनुर्वर्त्तति मुमुक्षुः" रघुः । [अरण्ये ।

उपसेक पु० उप+सिच-भावे घञ् । जलादिसेचनेन भूदृ

उपसेचन नि० उप+सिच-ल्यु । उपसेककर्त्तरि "लवः कोशाय उपसेचनाय" ऋ०७,१०१,४,सच् । उपसेक्तृ तत्रार्थे नि० "कोशेभ्य उपसेक्तारमवकल्पे" यजु०१०, १२,स्त्रियां ङीप् । भावे ल्युट् ।२उपसेके न० दुष्कृत्यूभक्षपसेचनाय कम्" ऋ०१०,७६,७, "यत्पूर्वाह्णोपसेचनात् ज्ञात्वा" आश्व०८,५,२६, वा० कर्त्तरि ल्युट् । २उपसेचक नि० स्त्रियां ङीप् "येति त्वामुपसेचनी" ऋ०१०,२१,२, उपसेचनी उपरिस्थरज्जुवेष्टा आकृतिः भा० । अरण्ये ल्युट् । ३तत्राश्रमे

उपसेवक नि०उप+सेव-ण्वुल् । उपभोगादिना सेवमानकर्त्तरि २भोगप्रसक्ते । "अदत्तादानिरतः परदारोपसेवकः" याज्ञ० ३उपेक्ष्ये सेव्ये च ।

उपसेवन न० उप+सेव-भावे ल्युट् । १उपभोगप्रसक्तौ । "नक्षोदयमनायुष्यं लोके किञ्चन विद्यते । यादृशं पुरुषस्येह परदारोपसेवनम्" मनुः २सम्यगधिष्ठाने सेवने च । "निरताङ्गं सदा सत्ये ! भर्त्तुश्चाप्युपसेवने" भा०व०२१२ अ०३तत्तत्कर्म्मणि अजस्रासक्तौ "अशोक्षाध्ययनाद्यावद्विद्वत्ताद्योपसेवनात्" "एवंविधानां दृष्ट्यादामन्येषाञ्चोपसेवनात्" स्मृ० भावे च उपसेवा । तत्रार्थे स्त्री । "गोभिरश्वैश्च वासैश्च कन्या राजोपसेवया" । "परदारोपसेवा च शारीरं त्रिविधं स्मृतम्" "विप्रयोपसेवा याज्ञक्यम्" मनुः।

उपसेविन् नि० उप+सेव-णिनि । उपसेवके "अभिधानमशीलञ्च नित्यं ह्यद्योपसेविनः । तेषां सततमज्ञानां विपदाम्युपसेविनाम्" मनुः । "ये स्तिं वाक्यमृतंकुर्व्वन्ति विपरीतोपसेविनः" भरतः । "सुहृत्सा पुरुषस्यात्मदोषसेवी" स्मृ० स्त्रियां ङीप् ।

उपसोम पु० उपगतः सोमम् अत्या० स० । सोमोपगते सोमलतादिभि । अत्र तत्पुरुषत्वात् इत्यृकारादमोदा-

सता । उपगतः सोमोऽनेन प्रा० ब० । तत्रार्थे स्वामीश्ये अव्ययी० । २सोमस्वामीश्ये अव्य० एतयोर्नान्योदात्तत्वेनेति भेदः

उपस्कर पु० उप+कृ-भावे अप् किंसने सुट् । १किंसने उपस्करोति उप+कृ-अच् भूषणे समवाये प्रतियत्ने विकारे अध्याहारे च सुट् । २भूषके कटकरञ्जनादौ ३समर्दने संहते । ४व्यञ्जनसंस्कारकपिष्टधान्याकार्दिद्रव्ये (वाटना) । ५हविःसंस्कारके ६सम्मार्ज्जन्यादौ । ६विकृते अध्याहारेण ७कवचे च "पशुस्नुना यज्ञस्थस्य चर्म्मो मेषस्योपस्करः" । "वको भवति हूत्वाग्निं यश्चोपस्करी ऋषुपस्करम्" मनुः ।

उपस्करण न० उप+कृ-भावे ल्युट् किंसने सुट् । १किंसने । उप+कृ-भावे ल्युट् उपस्करशब्दोक्तभूषणादौ सुट । २भूषणे ३संघाते ४सत्वोगुणान्तराधानरूपसंस्कारे ५विकारे ६वाक्याध्याहारे च । उभाभ्यां करणे ल्युट् । उक्तार्थेषु सुट् । ७हिंसासाधने ८भूषणादिसाधने कटकादौ च न० ।

उपस्कार पु० उप+कृ-भावे घञ् उपस्करशब्दोक्त भूषणादौ सुट । १भूषणे २संघाते ३प्रतियत्नरूपसंस्कारे ४विकारे ५अध्याहारे च । "वाक्याञ्जनमुपस्कारं विघ्नगणति निराकुलम्" किरा० ।

उपस्कीर्ण त्रि० उप+कृ-क्त किंसने सुट् । किंसिते

उपस्कृत त्रि० उप+कृ-क्त उपस्करशब्दोक्तभूषणादौ सुट । १भूषिते २संहते ३संस्कृते ४विकृते ५अध्याहृते च । भावे क्तिन् उक्तार्थेषु सुट् । उपस्कृतिः उपस्करशब्दार्थे स्त्री । उप+कृ-भावे क्तिन् किंसने सुट् । उपस्कृणिः किंसने स्त्री ।

उप(ष्ट)स्तम्भ पु० उप+स्तभ घञ् । पतनप्रतिरोधने अवलम्बने "भूमिकम्पोपस्त(ष्ट)म्भे नेनापि कारणेनात्र भवितव्यम्" स्फितो० । नि० षत्वम् । उपस्तम्भ १उपस्तम्भशब्दार्थे २आलम्बने ३स्थितौ ४सङ्कोचे च "स्थानात् बीजाद्रसस्तम्भात् प्रस्यन्दात् निधनादपि" भात० भा० गाथा । भावे ल्युट् । उपस्तम्भन तत्रार्थे न० । करणे ल्युट् । तत्साधने घटाद्याधारकाष्ठे च "वरुणस्योत्तम्भनमसीत्युपस्तम्भनेनोपस्तभ्नाति" शत० ब्रा० १,१,४,२५, "उपस्तभ्यते प्रतिरुध्यते दृषदुपस्तम्भनं घटाद्याधारकाष्ठम्" भा० "देवानामित्युपस्तम्भनस्य पचादीनाम्" काशि० २,१,१४, "घटस्य काष्ठशोणा तदधस्य भूमिरुच्चैर्यो वा मृदिति तदाधारत्वेन स्थापितं काष्ठमुपस्तम्भनम्" वेददी० । ततो ल्युट् । उपस्त(ष्ट)म्भक वा नि० षत्वम् । उपस्त(ष्ट)म्भकर्णरि आधिक्याधायके त्रि

उपस्तरण न० उप+स्तृ-ल्युट् । १आस्तरणे (बिछान) २भूमेः समकरणे च । "पुनर्नवोल्लेखनोपस्तरणैः" आ० श्रौ० २,१,१,१, ३आधारे ल्युट् । ४आस्तरणाधारे "अङ्गनोपस्तरणमसि" भोजनस्थादौ जलपात्रमन्त्रः "अग्नावग्नीषोमसवामसि अङ्गनोपस्तरणमसीति" आ० श्रौ० १,२४,११, । "स्तरणमाच्छादनम् उपस्तरणं भूमेः समीकरणम्" ना० वृत्तिः

उपस्ति पु० उप+स्त्यै इन नि० दृद्धे । "उपस्तिरस्तु सोऽस्माकम्" यजु० १२,१०१, "उपास्यायन्ति उपकारायोपपूर्व निराकरणाय च समीपे संहतास्तिष्ठन्तीत्युपस्तयः इष्टाः वेददी० ।

उपस्तिर् त्रि० उप+स्तृ-कर्म्मणि क्विप् । आग्नीध्र्यभाण्डे आस्तरणाये । "अभि शुक्रमुपस्तिरम्" ऋ० ९,६२,२८,

उपस्तुत त्रि० उप+स्तु-क्त । समीपस्तुते अन्ययोग्यस्तवेन स्तुते "चोदराध उपस्तुतश्चिदर्वाक्" ऋ० ७,२७,२, "त्वं त्वमस्मयया उपस्तुत पूर्व्वेभिरिन्द्र" ऋ० १०,९६,५ ।

उपस्तुति स्त्री उप+स्तु-क्तिन् । समीपस्तवे अन्ययोग्यस्तुतिवाक्ये "कर्मोपस्तुतिं भरमाणस्य" ऋ० १,१७८,२,

उपस्तृत्य त्रि० उप+स्तृ-क्यप् । समीपे स्तरणीये । "उपस्तृत्यं महिजातं ते अर्व्वन्" ऋ० १,१६२,१,

उपस्थ पु० न० अर्त्तीत्यादि० उप+स्था-क । १स्त्रीपुंसयोरिन्द्रियविशेषे तत्र पुंसिन्द्रिये "स्नानशौचोपवासेज्याश्चाशोपस्थनिग्रहाः" याज्ञ० । स्त्रीन्द्रिये "दक्षिणेन पाणिना उपस्थमभिमृशेत् विष्णुर्योनिं कल्पयतेत्येतयर्चा" गोभि० । "यितिष्ठन्तो मातुरस्या उपस्थात्नाकृपा पशवो जायमानाः" ऋ० १४,२, २५ । "मुखदत्तं ब्राह्मणस्योपस्थदत्तं स्त्रियाः" शत० १२,८,२,११ । उभयेन्द्रिये "हस्तौ पायुरुपस्थश्च वाक्पादौ चेति पञ्च वै । कर्म्मेन्द्रियाणि जानीयात्" याज्ञ० । "उपस्थसदृशं जिह्वा हस्तौ पादौ च पञ्चकम्" मनुः "सर्वेषामानन्दानामुपस्थ एकायनम्" शत० ब्रा० १४,५,४,११ । उपस्थश्च न तत्रैवेन्द्रियस्थानमात्रं किन्तु तत्स्थानाधिष्ठितः प्रजापतिरेवतादृशमैथुनिकानन्दनव्यापारकारकः कर्म्मेन्द्रियभेदः । तत्र "मेढ्रोपस्थेन्द्रियविदाः" इति या० तिं० तस्य कामदेवाख्यप्रजापतिदेवताकत्वसूक्तम् शत० ब्रा० उक्तयाज्ये कामानन्दनव्यापारसाधनत्वमुक्तम् तच्चैवोपाटवे क्लैव्यम् । इन्द्रियाणां भौतिकत्वमते तस्य पृथिवीरजोगुणोपटानकता आहङ्कारिकत्वमते गन्धतन्मात्रसहिताहङ्कारोपदानकता । स च सूक्ष्म

विक्रूदेहान्तर्गत इति वेदान्तिनः सांख्याश्चाहुः । तेन जीवति वेदना० ठञ् । औपस्थिक जारकर्मोपजीविनि जारभेदे पु० । वेश्यायां स्त्री । २उपसङ्गे क्रोडे ३मध्यदेशे "आत्मन्युपस्थेन एकस्य होम" यजु० १६,८२ । "वरोयवोभा पृणन्ती पितोरुपस्था" ऋ०१,१२४,५ । "उपस्था उपस्थे उपसङ्गेऽन्तराक्षदेशे वा" भा० "तस्याः कुमारमुपस्थ आदधु" गोभि० "उपस्थे उपसङ्गे" भं०त० "भूम्या उपस्थेऽपक्रमत्वात्" ऋ०२२,१४,७ । "रथोपस्थ उपाविशत्" गीता । उप+स्था घञर्थे भावे क । सर्वाङ्गीभिः भूमिमाश्रित्य ४स्थितौ "समस्तजङ्घोरुररत्निभ्यां जानुभ्यां चोपस्थं कृत्वा" आश्व०श्रौ० ६,५,५ । "उपस्थं कृत्वा भूमिमाश्रित्येत्यर्थः पादाङ्गुलीभिश्च भूमिमाश्रित्य वसुपविशेत्" नारा०ह० । "प्राङ्मुख उपविश्योपस्थं कृत्वा" आश्व०ह० १,२,२, । उप+तिष्ठति स्था—क । "उपस्थक्रतस्त्वेवाग्निं गच्छेत्" आ०श्रौ०६,५,५ । ५समीपस्थिते त्रि० ।

उपस्थपत्र पु० उपस्थं स्त्रीचिह्नमिव पत्रमस्य । अश्वत्थे वृक्षे तत्पत्रस्य तदाकारत्वात्तथात्वम् अतएव नैष० दमयन्त्यास्तदुक्तिर्यथा । अश्वत्थस्य चलपत्र नामसाधारण्यमुत्प्रेक्षितम् । "अङ्गेन केनापि विजेतुमस्मान्वेत्ति किं ? चलपत्रपत्रम् । नो चेद्विधेर्वादितरक्षदेभ्यस्तास्तु कस्मात्तु कृतोभयेन" उपस्थदलादयोऽप्यत्र । उपस्थमशब्दे स्त्रीजघने च तद्वृक्षस्य अश्वत्थदलारतोक्ता ।

उपस्थात त्रि० उप+स्था—क्त्वच् । १उपासके २उपगते, च ३यथोक्तकाले उपगते "अन्यवादी क्रियार्हेभ्यो नोपस्थाता निरुत्तरः । आकूतप्रपलाया च क्षीणः पञ्चविधः स्मृतः" मिता० स्मृतिः । ५स्मृत्यृग्भेदे पु० ।

उपस्थान न० उप+स्था—ल्युट् । १उपेत्य स्थितौ, २अनुसन्धाने स्मरणे "तत्त्वज्ञानेऽपस्थानात् मनोयोगात् परिक्षयात् । कर्मणां सञ्चितानाञ्च सतां योगः प्रवर्त्तते" याज्ञ० । "कर्म्मासन्निहितं नैव बुद्धौ विपरिवर्त्तते । यद्वाप्यु तदुपस्थानमुपादेये गुणो भवेत्" भट्टिका० । ३उपसेवने उपासने "सूर्य्योपस्थाने विनियोगः" सन्ध्याप्रयोगः "तूष्णीं वोपस्थानम्" काल्या० ४,१२,२०, ४उपसर्पणे । "तस्योक्तमुपस्थानम्" आश्व०श्रौ०५,१२,२, "उपस्थानं प्रसर्पणम्" नारा०ह० । ५आनतीकरणायोपगतौ "सुरद्विषश्चैव जगच्च सर्व्वमुपस्थाने सन्नमन्ति प्रभावात्" भा०आ० ७६ । ६समीपस्थाने "कृपाणु यवांचावनोपस्थानेषु प्रोक्षेत्" पार०सू० । उपस्थीयतेऽत्र आधारे ल्युट् । ७उपासनाधारे गृहादौ । "पार्थिवैर्व्वैकृभि कार्म्मुपस्थानं दिदृक्षभिः" भा०स०४७ अ० "उपस्थानगृहैर्व्वैद्य-भीभिश्च योभितम्" भा०आ०१२८ अ० अनुसन्धानञ्च कारणम् तस्य च चित्तेऽनुभवाहितसंस्कारेणोपस्थितत्वात् तथात्वम् ।

उपस्थानीय त्रि० उप+स्था—"भव्येत्यादि" पा०नि० कर्त्तरि अनीयर् । १उपासके । कर्म्मणि अनीयर् । २उपास्ये त्रि०

उपस्थापक त्रि० उप+स्था-णिच् ण्वुल् । १स्मारके अनुभवजन्यसंस्कारेण चित्तेऽनुसन्धानसम्पादके । उपस्थितौ च समानविषयत्वं तन्त्रम् यद्विषयकोऽनुभवस्तद्विषयकः संस्कारस्तद्विषयिकैव स्मृतिरिति कार्य्यकारणभावः स च समवायेनैव, तेनात्मान्यानुभवसंस्काराभ्यां नान्यस्य स्मारणम् । तत्र च शब्दादिज्ञानादि सहकारि कारणम् तत्समवहितसंस्कारस्यैव स्मृतौ हेतुत्वात् । उभेच्छात्मकज्ञानेन च संस्कारो न जन्यते । संस्कारस्य चरमफलजनकः तेन कृतधारायां न संस्कारान्तरकल्पनमिति वेदा०प० । क्वचिच्च दार्ढ्यकारणरोगादिना जन्मान्तरेण वा तत्स्मायः । जन्मान्तरन्तु कर्म्मविशेषाभावसहकृतमेव तत्स्मापकम् तेन "जातिं स्मरति पौर्व्विकीम्" इत्यादिमन्त्रादुत्कृष्टकर्म्मविशेषस्य न तत्स्मायः । उपस्थापकस्तु यथा पदज्ञानं पदार्थस्य स्मृतिज्ञानं स्मृतिपदस्येत्यादि एकसंस्मृत्यन्वितज्ञानस्यापरसंस्मृत्यन्वितारकत्वनियमात् पदपदार्थयोश्च यत्किञ्चित्सम्बन्धेन सम्बन्धितेति तथात्वम् ।

भावे ल्युट् । उपस्थापन—उपस्थिति साधन व्यापारे उद्बोधकसमवधाने तत्सहकारे । उपस्थापनं प्रयोजनमस्य प्रप्रवचना० क । उपस्थापनीय उपस्थापनसाधने उद्बोधकादौ त्रि० उप+स्थापि-कर्म्मणि अनीयर् । आर्य्ये त्रि० ।

उपस्थावरा स्त्री उप+स्था—वा०कर्म्मणि वरच् । उपसेवनीये पुरुषमेधयज्ञाङ्गे देवताभेदे "वरोभ्योर्धवरसुपस्थावराभ्योदाय" यजु० ३०,१६,

उपस्थित त्रि० उप+स्था—क्त । १समीपस्थिते, २समीपागते "तदुपस्थितमग्निहोत्रं तस्मादुपस्थितमन्वहुपस्थिता दुहाः प्रजाः प्रजायन्तेऽहुपस्थितो ह वै स्त्रिया प्रजाया प्रजायते" शत०ब्रा० २,३,१, १२, "उपस्थितेयं कल्याणी" रघुः । कैश्चित्क्षणानादाय योगेनोपस्थितान्" भट्टिः । ३प्राप्ते, उपस्थितपरित्यागे प्रमाणाभावात्" न्यायवार्त्तिकम् "अनुपस्थितलक्षणाऽ

न्याया" इति मीमां० ४वेदाप्रयुक्ते अनार्षे च। "अ-प्रुतप्रदुपस्थिते" पा०। "उपस्थितोऽनार्षः" सि० कौ०। "उद्बुद्धे स्मारेण चित्ते उपगते प्रभूते "तौ जौ गुरु-योयमुपस्थिता" ह० र० उक्ते दण्डकप्रपादके ईकन्दोभेदे स्त्री "उपस्थितमिदं जसौतसौ यदि गुरुः स्यात्" इति ह० र० उक्ते त्रयोदशाक्षरपादके ७छन्दोभेदे न०। टसेविते त्रि०। भावे क्त सेवने ८उपस्थाने न०। तेन जीवति वेतनात् ठक्। औपस्थितिक सेवनोपजीविनि त्रि०

उपस्थिति स्त्री उप+स्था-क्तिन्। १उपसेवने २उपगतौ ३स्मृतौ च "आसत्तिरव्यवधानेन पदजन्यपदार्थोपस्थितिः" सा० द० आसत्तिशब्दे उपसर्गशब्दे च उदा०।

उपस्थूण अव्य० स्थूणायां तत्समीपं वा अव्ययी०। १स्थूणायामित्यर्थे २तत्समीपे च तत्र भवः परिखा० अ। औप-स्थूण्य तद्भवे त्रि०। उपगता स्थूणाम् अत्या० स०। ३तद्भक्षणोपगते त्रि० ततो भवार्थे अण्, न अ इति भेदः

उपस्थेय त्रि० उप+स्था-सेवार्थत्वात् कर्मणि यत्। उपसेव्ये "वासस्तप्रं क्षत्रोपस्थेयं चेत्" कात्या० १७,१,२, "यदीदृशं, रङ्कं विप्रं रूपस्थेयं रूपस्थितः" राजा०।

उपस्नेह पु० उप+स्निह-घञ्। स्निग्धस्य नैजद्रव्यस्नेहेन क्लेदे "मूलयुक्त उपस्नेहात् प्रविश्य कुरुतेऽङ्करीम्"। "स्नाय्व मातुराहारस्नेहोपस्नेहेनास्या अभिवृद्धिर्भवति"। "सर्वशरीरावयवानुसारिणीनां रसव-हानां तिर्यग्गतानां धमनीनामुपस्नेहो जीवयति" सुश्रु०।

उपस्पर्श पु० उप+स्पृश-घञ्। १स्पर्शे, २स्नाने च। उपस्पृ-श्यन्ते इन्द्रियाणि यत्र आधारे घञ्। विधिना जलपान-पूर्वके स्नानादिस्पर्शयुक्ते ३वैधाचमने तत्र हि "त्रिः प्राश्या-पोहिरण्मयेन सुस्रमेतानुपस्पृशेत्। आस्यनासाक्षि कर्णांश्च नाभिवक्षःशिरोऽसकान्" छन्दो० आस्यनासिकादिस्पर्शो विहित इति तस्य तथात्वम्। "तथेत्युपस्पृश्य पयः पवि-त्रम्" रघौ आचमनार्थे उपात्स्पृशतेः प्रयोगात्। भावे ल्युट्। उपस्पर्शनम् तत्रार्थे न० "अथात उपस्पर्श-नम्" कात्या० ५,१०, २०

उपस्रवण न० उप+स्रु-भावे ल्युट्। सन्यक्षरणे उपरतं स्रवणम् प्रा० स०। १विरतस्रवणे क्षरणनिवृत्तौ "पत्युद-क्या दीक्षाहुपाणि निधाय सिकतासंतोपस्रवणात्" का० २५,११,१२, "ज्योतिष्टोमादौ दीक्षितस्य पत्नी रज-स्वला दीक्षाहुपाणि यज्ञपात्राणि निधाय सिकतासु आ-प्रीत आ रक्तस्रावविरमणात्" कर्क०।

उपस्रव्य न० उपगतमुतपक्तिकं क्षेत्रं प्राप्तं स्रव्यं यत्र। स्रव्या-स्यदीभूतभूम्यादिभ्य उत्पन्नस्यादेयं। लोकव्यवहारः। अन्यस्य द्रव्यस्य प्रतिग्रहार्जनाधीनं स्रव्यं न तु उत्पत्ति-कालात्, अन्न तु तत्काले एव स्रव्यवत्त्वेन तथात्वम्।

उपस्रावत् पु० सत्राजितो नृपस्य पुत्रभेदे। "सत्राजितो दश स्त्रीषत् भार्यास्तासां सुतं सुताः। ख्यातिमन्त-स्रयस्तेषां भरद्वारश्च पूर्वजः। वीरोवातपतिश्चैव उप-स्रावांस्तथैव च" हरिवं० ३६अ०

उपस्वेद पु० उप+स्विद-करणे घञ्। १स्वेदादिसमीपस्था-नात् जाते ऊष्मणि "तयोरण्डानि निदधः प्रकृष्टाः परि-चारिकाः। सोपस्वेदेषु भाण्डेषु पक्षु वर्षशतानि च" भा० आ० १६अ० "सोपस्वेदेषु जन्मत्सु तत्र स्नायुस्नायुजलभू-ताया मात्रं घर्मोभवतीति" नी० क०। "अलाबुमध्यादिषु क्षत्र बीजं यत्नेन गोपयताम्। सोपस्वेदेषु पात्रेषु हतपर्णेषु भागशः" भा० व० १०६अ०। भावे घञ्। २उपतापे

उपहृत त्रि० उप+हन-क्त। १तिरस्कृते "करोत्यस्योपहृतं पृ-थगुजनम्" किरा०। "उपहृतं तिरस्कृतम्" मल्लि०। २दू-षिते "क्रिमिभिरायोपहृतात्मवृत्तिभिः" कुमा०। "आगया उपहृता दूषिता" मल्लि०। ३विनाशिते ४उत्पातपक्षे अशुद्धद्रव्यसंयोगेन ५अशुद्धे च "शारीरैर्मलैः सुरामिर्म-द्यैर्वा यदुपहृतं तदत्यन्तोपहृतम्" विष्णुः। ६अभिभूते "यस्मृपहृतः सहसा" किरा०।

उपहृति स्त्री उप+हन-क्तिन्। १उपघाते। २कार्यासामार्थे प्रयोजकापाटवे ३प्रतिहनने च।

उपहृत्नु त्रि० उप+हन-क्नु। उपहन्तरि "मृगं न भीममु-पहत्नुमुग्रम्" ऋ० २,३३,११,

उपहन्तृ त्रि० उप+हन-तृच् स्त्रियां ङीप्। उपघातके (कटुकः) "स्तन्यशुक्रमेदसामुपहन्ता चेति" सुश्रु०।

उपहरण न० उप+हृ-ल्युट्। १परिवेषणे २उपायनदाने च

उपहर्तृ त्रि० उप+हृ-तृच् स्त्रियां ङीप्। परस्वाप-हर्तरि "अनुमन्ता विशसिता निहन्ता क्रयविक्रयी। संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः" मनुः। २उपायनदातरि च।

उपहव पु० उप+हृ-अप् संप्र०गुणः। आह्वाने, "दोला-मुपसरं दृढा तेऽभ्योन्योपहवाः गुरुम्" भट्टिः। "अ-ध्वर्युर्होतर्युपहवं काङ्क्षते" आ० श्रौ० ५,७,४, "प्रति-रुद्धोपहवमिहाऽऽवेक्षेत" ई० १२,१,

उपहार्य पु० उपहूयतेऽत्र उप+हृ-घा० आधारे यत्। यज्ञ-

दशसोमकेषु पञ्चसु क्रतुषु मध्ये क्रतुभेदे। ते च क्रतवः काल्या० २२, दर्शिताः यथा। "सप्तदशाः पञ्च ६, "वक्ष्यमाणाः पञ्च क्रतवः सप्तदशस्तोमका भवन्तीत्यर्थः" कर्कः। "उपरुव्योऽनिरूक्तो यामकामस्य" ७ "उपरुव्य इति विशेषसत्ता स यामकामस्य भवति अनिरुक्तस्य" कर्कः। "अनृतेनाभिशस्यमानस्य" ८ "अलीकेनाभिशस्यमानस्याप्युपरुव्यो भवति" कर्क "ब्रह्मणेऽग्नीध्रो दक्षिणां तं ब्रह्मणे ददाति" ६, इत्युपक्रम्याग्ने चत्वारस्तत्र दर्शिताः।

उपहसित न० उप+हस-भावे क्त। उपहासे (ठाट्टाकरा) निन्दासूचके हासभेदे। कर्मणि क्त। २हास्येन सूचितनिन्दे त्रि०।

उपहस्त पु० उपहस्ति भावे अच्। हस्तेन यत्किणे प्रतिग्रहे तेन जीवति वेतना० ठञ्। औपहस्तिक तदुपजीविनि त्रि०।

उपहस्ति हस्तेन उपस्पृशति उप+हस्त-णिच् नामधातुः उभ० सक० सेट्। उपहस्तयति ते उषा(जा)जीहस्तत त।

उपहस्तिका स्त्री उपगता हस्तम् अल्पा० स० संज्ञायां कन् अत इत्त्वम्। (वेटया) वस्त्रादिनिर्मिते ताम्बूलाद्याधार पात्रभेदे। "उपहस्तिकायास्ताम्बूलं कर्पूरसहितसङ्कल्प्य मह्यं दत्त्वा" दशक०।

उपहार पु० उप+हृ-घञ्। (भेट) १उपढौकने उपायने "ततः सपर्यां सपर्युपहाराम्" "रत्नपुष्पोहारेण क्रीयामानश्च पादयोः" रघुः कर्मणि घञ्। २उपढौकनाये उपायनद्रव्ये "बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः" मेघ० उपगतः हारम् अल्पा० स०। ३हारसमीपस्थे तदुपयोगके द्रव्ये। अव्ययी०। ४हारसमीपे अव्य०। उभयत्र "उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वयस्कृतेन किम्" नै०। "ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम्" कुमा०। [प्रसक्तोऽयत्र। कुल्लदेशे हैम०।

उपहालक पु० हले प्रहृतः बा० वुण् उपगतोहालको हल-

उपहास पु० उप+हस-भावे घञ्। निन्दासूचके हास्ये (ठाट्टा) "फलमस्योपहासस्य सद्यःप्राप्नुहि पञ्च मान्" रघुः

उपहास्य त्रि० उप+हस-कर्मणि यत्। उपहासेन निन्दनीये "गणिकाश्चोपहास्यताम्" रघुः।

उपहित त्रि० उप+धा-क्त। १निहिते २अर्पिते ३समीपस्थापिते ४आरोपिते च। "बलमुपहितयोर्भातृभायाद्वयोश्याम्" भट्टिः। "पुष्पं प्रवालोपहितं यदि स्यात्" कुमा०। ५उपाधिसङ्गते उपलक्षिते "अन्तःकरणोपहितं चैतन्यं जीवः अज्ञानोपहितचैतन्यमीश्वरः" वेदान्तप०।

उपहूत त्रि० उप+हृ-क्त संप्रसारणे दीर्घः। समाहूते आचितादित्वाद्दूतिपूर्वकत्वेऽपि नान्योद्दिष्टता।

उपहूति स्त्री उप+हृ-क्तिन् संप्रसारणे दीर्घः। आह्वाने "षट्हूतयादक्षिणोपहूतयः" माघः।

उपहृत त्रि० उप+हृ-क्त। १उपढौकिते उपहारछलेन दत्ते "उपहृतपशुकरः" सि० कौ०।

उपहोम पु० उपगतः होमं प्रधानहोमम् अल्पा० स०। प्रधानयागसमीपे स्विष्टिकृतः पूर्वं होतव्ये अग्निसोमादिदशदेवताके प्रत्येकं दशाकृतिके दशदक्षिणाके होमभेदे। स च शत० ब्रा० ११,४,१८, अवधि१७पर्यन्तेषु दर्शितः। "सैतानुपहोमानधीयन" इत्युपक्रम्य "अग्निरन्नाद इत्यादि१ "सोमोराजेत्यादि२" "वरुणः सम्राडिति३ "मित्रः क्षत्रमिति४ "इन्द्रोबलमिति ५" बृहस्पतिर्ब्रह्मेति ६ "सविता राड्डिति७ "पूषा भगमिति८" "सरस्वती पुष्टिमिति९" "त्वष्टा रूपाण्यामिति १०" इत्येतैर्दश देवता उक्त्वा "तावाएता दश देवता, इमानि दशाकृतयोदश, दश दक्षिणाः" इति यथोक्तविशेषणतया दर्शिताः।

उपह्वर उप+हृ-आधारे च। निर्जने रहस्योपगमाधारे "उपह्वरे पुनरित्थमिदं धनमित्रम्" दशक०। "यत्सीमुपह्वरे विदत्" ऋ० ८,६६,६, "चरन्तमुपह्वरे नद्यः" ऋ० ८,६६।४, "उपह्वरे अत्यन्तगुह्यस्थाने" भा०। २अन्तिकस्थाने "ऊर्ध्वीतरङ्गैर्जाङ्घ्याः समालीताम्पह्वरम्" भा० व० ३०८अ० ३भूप्रदेशमात्रे च "उपह्वरे यदुपरा अपिन्वन्" ऋ० १,६२,६, "कौटिल्यलक्षणगतिवाचिनात् गतिमात्रं लक्ष्यते उपह्वरन्ति गच्छन्त्यस्मिन् इत्युपह्वरोभूप्रदेशः" भा०। कर्मणि घ। ४गन्तव्ये "उपह्वरेषु यदचिध्वम् १,८७,२। "उपह्वरेषु गन्तव्येषु" भा० ५प्रान्तभागे। उपह्वरे गिरीणां संगथे च" ऋ० ८,६,२८ "उपह्वरे प्रान्तभागे" भा०।

उपह्वान न० उप+हृ-ल्युट्। १आह्वाने २मन्त्रोच्चारणे आह्वाने च "द्यावापृथिव्योरुपह्वाने यजमानस्य" कात्या० २,४,१६, "आग्नीध्रे भक्षणं वषट्कारोपह्वानाभ्याम्" १०,६,२२,

उपांशु अव्य० उप+अन्शु-अ। १निर्जने "परिचेतुमुपांशु धारणाम्" रघुः। "उपांशु विजने" मल्लि०। २अप्रकाशे च। "जिह्वोष्ठौ चालयेत् किञ्चित् देवतागतमानसः। निजश्रवण्यं व्यः स्यादुपांशुः स जपः स्मृतः इत्युक्तलक्षणे ३मन्त्रादेरुच्चैरुपभेदे पु०। जपोहि त्रिविधः नरसिंह पु० उक्तः।

"त्रिविधो जपयज्ञः स्यात् तस्य भेदान् निबोधत । वाचिकश्च उपांशुश्च मानसश्च त्रिधा मतः । त्रयाणां जपयज्ञानां श्रेयान् स्यादुत्तरोत्तरः । यत्नोच्चनीचस्वरितैः अस्पष्टपदशब्दवत् । मन्त्रमुच्चारयेद्वाक्यं जप प्रोक्तः स वाचिकः । यत्नैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयेत् । किञ्चिच्छ्रवणयोग्यः स्यात् स उपांशुर्जपः स्मृतः । धिया पदाक्षरश्रेण्या वर्णाहर्षं पदात् पदम् । शब्दार्थचिन्तनाभ्यासं तदुक्तं मानसं स्मृतम् । तेषामुत्तरोत्तरफललाभस्तस्याह" मनु "विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः । उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः" "उपांशुदेवतां यजत्यनिरुक्तं वा उपांशु इति यत० ब्रा० १,३,५,२, उक्ते ४ अनिरुक्तमासे ५ मौने । "उपांशु वै रेतः सिच्यते" यत० ६,२,२,२, मैथुनकाले मौनविधानात् तस्योपांशुत्वम् । ६निगदे च "अस्य स्वेऽसवुपांशु व्रतम्" भा० आ० ३ अ० । परस्परश्रवणायोग्यतया निगदभिन्नार्थः नीह० क०

उपांशुयाज पु० यज-घञ् यज्ञाङ्गत्वात् प्रयाजादिवत् न कुत्वम् । उपांशु अनुच्चैर्योयाजः । यजभेदे तच्च यत० ब्रा० १,६,२,६३ दर्शयित्वा "एतेन वै देवाः उपांशुयाजेन यं यमद्विषाणामकामयत तमेतस्यै यज्ञेन यजेत्कारेणाभ्रंशत एवैव एतेनोपांशुयाजेन प्राणानां ह्विष्मन्मात्रत्वमेतस्य यज्ञेन यजेत्कारेण कल्पि तस्मादुपांशुयाजं यजते" तत्फलमुक्तम् । "उपांशुयाजमन्तरा यजति" प्रयाजादियागेतिकर्त्तव्यतायां स्मृतिः ।

उपाक पु० उप+अक-अच् । परस्परं समीपगते सङ्क्षिप्ते "आशुजयन्ती यजते उपाके" यजु० २६,११, उपाके परस्परसमीपगते वेददी० । "आ भन्दमाने उषसा उपाके" ऋ० १.४,६, "आभन्दमाने उपाके" १,१४२,७, २अग्निके च । "सूर उपाकचत्वरम्" ऋ० ८,६,२५, "उपाक इत्यन्तिकनाम" भा० ।

उपाकरण न० उप+आ+कृ-ल्युट् । उपाकर्त्तव्यमेतेन होम

प्रभे "नापव्याहरेदोपाकरणादुपाकर्तव्यमित्येवाधर्युकृत्वाह्यः" यत० ब्रा० १,१,२,१२, "यदा ह्याहुतिः स्रोत्यं प्रारभेरन् तावदध्वर्युरुपाकरणान्तरं नापव्याहरेत्" भा० "प्राग्वा च प्रवदितोः प्रातरनुवाकोपाकरणम्" कात्या० ६,१,१०, । "सोमे च यद्दं यद्दत्वोपकरणात्" १,२, १७, उपाकर्त्तव्यमित्यर्थः स्रोत्यप्रैषः उपाकरणशब्दे नोच्यते कर्म । तथा प्रैषणे हि स्रोत्यसारूप्यात्तस्य तथात्वम् । २यत्तिथयमुसंस्कारविशेषे च "गोतमस्तोमः प्रथमं हितीयस्याङ्ग पयोरूपाकरणकाले ऽश्वमानीय बर्हिर्वेद्यामावेशयेत्" आश्व० श्रौ० १०,८,२ । "तमवस्थितमुपाकरणाय यदक्रन्दत्यत्कादशभिः स्तौत्य प्रणुवन्" ५ "पशुकल्पेन पशुं संज्ञप्य प्रोक्षणोपाकरणवर्ज्यं यथासूत्रखिद्य जुहुयात्" आश्व० श्रौ० २,७,१५, १आरम्भे च । "अथातोऽध्यायोपाकरणम्" आश्व० श्रौ० १ २,२, "उपाकरणमारम्भः" ना० छ० । उपाकर्म शब्दार्थे च तत्प्रकारकालादिकं वक्ष्यते

उपाकर्म्मन् न० उप+आ+कृ-करणे मनिन् । येन कर्मविशेषेण वर्षाऋतौ पुनर्वेदः पठितुमारभ्यते तादृशे, कर्मभेदे तच्च "अथातोऽध्यायोपाकरणम्" इत्युपक्रम्य आश्व० सू० दर्शितम् तत्प्रकारकर्त्तव्यतादि च तत्रैवोक्तम् विशेषस्तु नि० सि० उक्तो यथा "तत्र बहूनां प्रयोगपरिजाते यौगकः । "अथातः श्रावणे मासि श्रवणऋक्षयुते दिने । श्रावण्यां श्रावण मासि पञ्चम्यां हस्तसंयुते । दिवसे विहितोतदुपाकर्म यथोदितम् । खध्यायोपाकृतिं कुर्यात्तत्रोपासनवर्जिना" अत्र पौर्णमासी उपसंहारन्यायेन यजुर्वेदपरेति हेमाद्रिः । अत्र हस्तयुक्ता पञ्चम्युक्ता कारिकयाऽपि "तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते" इति । केवलपञ्चम्यां हस्तयुतेऽन्यस्मिन् वा दिन इति तु हेमाद्रिः । उपासनवर्जिनेति तु "कर्मेदमिदं केचिल्लौकिकाग्नौ प्रकुर्वते" इति कारिकोक्तलौकिकाग्निना विकल्प्यते । तत्र 'अध्यायं रभ्यारब्ध्य" इति सूत्रात् सविधत्वेन तदधिकारित्वात् नाचार्याग्नौ "मान्यस्थाग्नावन्वोजुहोतीति" निषेधाल्लौकिक एव । तदभावे आर्त्ते इति निगर्वः । यद्यपि दीपिकायाम् । "वेदोपाकृतिरोषधिप्रजनने पक्षे स्थिते श्रावणे" इति शुक्लषष्ठोऽपि सर्वेषां सुखसाध्यत्वेनोक्तः । वक्ष्यमाणगार्ग्यवचनेन छन्दोगान् प्रति विहितस्य तस्योत्सर्गिता सर्वान् प्रति सिद्धत्वेन । तथापि श्रावणमासबन्धस्य सत्योक्तत्वात् अणपक्षेऽपि कार्य्यमिति दृष्टाः । तथा च आश्व०

स्मृत्यादि "अथातोऽध्यायोपाकरणम्" "ओषधीनां प्रादुर्भावे" "श्रवणेन श्रावण्यां पञ्चम्यां हस्तेन वा"। अत्र श्रवणोऽक्षोऽन्यो गौणः। तस्याहर्द्वययोगे हेमाद्रौ व्यासः। "धनिष्ठासंयुतं कर्याच्छ्रावणं कर्म यद्भवेत्। तत्कर्म सकलं श्रेयस्तदाकरणसंज्ञितम्। श्रवणेन तु यत् कर्म हस्तोत्तराद्यसंयुतम्। संवत्सरकृतोऽध्यायस्तत्तत्रणादेव नश्यतीति"। प्रयोगपारिजाते गार्ग्योऽपि। "उदयव्यापिनी त्वेव विज्ञेया घटिकाद्वयम्। तत्कर्म सकलं श्रेयं तस्य पुण्यमनन्तकमिति" पूर्वेद्युरुत्तराद्याढायोगे, परेद्युः श्रवणाभावे घटिकाद्वयन्यूने वा पञ्चम्यादौ कार्यम्। न तु पूर्वविद्धायां सङ्कवेऽपि, अपवादाभावात्। किञ्च परेद्युः सङ्गवास्पर्शे निशि पूर्वस्पर्शे किं मानम्। सङ्गवावाक्यं श्रवणवाक्यं वेति चेत् तर्हि ग्रीष्मिवाक्यादस्यापवादवाक्यात् मासमिश्रायामप्युपादानं स्यादिति महत्प्रायश्चित्तम्। एतेन पर्वाण्यौदयिकं व्याख्यातम् निषेधप्रवेशयोभयत्र साम्यात्। श्रवणयुतदिने संक्रान्त्यादौ तु "उपाकर्म न कर्वन्ति क्रमात्तामर्ग्यजुर्विदः। पञ्चसंक्रान्तियुक्तेषु हस्तश्रवणपर्वसु" इति हेमाद्रौ निषेधात् पञ्चम्यादयो याह्याः। अत्र पञ्चसंक्रान्तिदिने येषां प्राप्तैः सर्वैरुपाकर्म न कार्यम् इत्येको वाक्यार्थः। तेनार्धरात्रेदिनामपि निषेधः। अन्यथा हस्तादिदिने प्रत्येकं पञ्चसंक्रान्त्योः महावाक्यकल्पनापत्तेः। मदनरत्नेऽपि "यदि स्यात् श्रावणं पर्व पञ्चसंक्रान्तिदूषितम्। स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्य तु" स्मृतेः, स्मृतिमहार्णवे "संक्रान्तिपर्वदूषं वापि यदि पर्वणि जायते। तत्रापि हस्तयुक्तायां पञ्चम्यां वा तदिष्यते"। तत्रापि प्रयोगपारिजाते हस्तमृक्षात्रावणौ। "अर्धरात्रादधस्ताच्चेत् संक्रान्तिर्यदि दृश्यते। उपाकर्म न कुर्वीत परतश्चेत्त दोषदमिति"। मदनरत्ने गार्ग्योऽपि। "यद्यर्धरात्रादर्वाक् तु पञ्चसंक्रमणं वा। नोपाकर्म तदा कुर्याच्छ्रावण्यां श्रवणेऽपि वा"। एतेन पञ्चसंक्रान्तिकाले श्रवणसत्त्वे एव निषेधोनावीगिति मूर्खयाजपरास्ता, पञ्चविशिष्टानां हस्तश्रवणपर्वणां प्रत्येकं निषेधे तदुक्तोपाकर्मनिषेधे च विशिष्टोद्देश्ये वाक्यभेदात् पञ्चम्यां संक्रान्तौ निषाभावापत्तेश्च। तेनार्धरात्रात् पूर्वं पञ्चसंक्रान्तौ उपाकर्मनिषेधो न तद्योगे। यत्तु "प्रतिपन्मिश्रिते नैव नोत्तराद्याढसंयुते। श्रवणे श्रावणं कुर्यात्पञ्चसंक्रान्तिवर्जिते" इति प्रतिपन्मिश्रितनिषेधकं वचनं तन्मूलम्। हेमाद्रौ निगमः। "पञ्चम्यां गौ गुरुं हन्ति संक्रान्तिः शिष्यघातिनी। तपोहन्त्युत्तराषाढा उपाकर्मणि वैष्णवे" अत्र च "वेदोपाकरणे प्राप्ते कुजीवे संस्थिते रवौ। उपाकर्म न कर्त्तव्यं कर्त्तव्यं सिंहयुक्तके" इति वचनं देशान्तरविषयम्। "नभोऽन्तरभागे तु कर्त्तव्यं सिंहयुक्तके। कर्कटे संस्थिते भानावुपाकुर्य्यात्तु दक्षिणे" इत्० वचनात् इति प्रयो०पा० उक्तम्। प्रदोषरात्रव्यापित्वेऽप्येवम्; सामगानां सिंहस्थरविवाक्तेऽहिश्रवणमेवेदं, पुरोडाशचतुर्द्वाकरणवदुपसंक्रियत इति। न तु बह्वृचादिपरम्। तेषां स्मृतेः चान्द्रश्रावणोक्तेः सौरे पञ्चम्ययोगात् सामान्येन सौरविशेषस्य बाधायोगादिति तु वयं पश्यामः। यत्तु कालादर्शे "अध्यायानामुपाकर्म श्रावणाश्वयुजीषु च। बह्वृचाः श्रवणे कुर्युः सिंहस्थोऽर्कोऽभवेद्यदि। सकलशुक्लपञ्चम्यां तदहुपक्षसंक्रमे। असिंहार्कपौष्णपर्व्यां श्रवणेन व्यवस्थेति" तन्मूलादिखनात् स्मृतिविरोधाच्च चिन्त्यम्। स्मृतौ हि श्रवणेन श्रावणेति चान्द्रमास एवोक्तो न सौरः तस्य पञ्चम्यभावात् स्मृतिलक्षणाभ्युपगमपरत्वे दृष्टिहस्यविरोधाच्च। तेन सिंहस्थोऽर्कोऽभवेद्यदि तदा कर्कोऽपि पक्षसंक्रमे सति असिंहार्के शुक्लपञ्चम्यां श्रवणे वा बह्वृचाः, प्रौष्ठपदान्तैत्तिरीया इति व्याख्येयम् तेषां सौरमासाभावात्। श्रावणे यज्ञानुक्रमादौ बह्वृचपरिशिष्टे "अहश्चोषधयस्तस्मिन् मासि तु न भवन्ति चेत्। तदा भाद्रपदे मासि श्रवणेन तदिष्यत इति"। "तत्राप्यनुक्रमे तु "कुर्यादेव तदार्षकमित्याचष्टे" इति स्मृतात्। वर्षासु भवं वार्षिकम्। एतच्च शुक्लादावपि कार्यम्। "उपाकर्मोत्सर्जनं च पवित्रदमनार्पणमिति" हमनारोपणे लिखितवचनात् "नित्ये नैमित्तिके अत्ये क्रोधवशक्रियासु च। उपाकर्मणि चोत्सर्गे पक्षवेधो न विद्यते" इति प्रयोगपारिजाते हेमाद्रौ च संपक्षोक्तेः। पर्वणि पक्षे सति पूर्वं त्रिरात्रादिवेधाभावं बह्वृचिदम्। तेन पर्वणि पक्षवेऽपि चतुर्द्व्यां श्रवणे कार्यमिति हेमाद्रिः। प्रथमारम्भस्तु न भवति "शुक्लभार्गवकौण्डिन्यवाक्ये वा दार्शकेऽपि वा। तथाधिकासंसर्गे मलमासादिषु द्विज! प्रथमोपाकृतिर्न स्यात्कृता कर्मविनाशकृदिति" तत्रैव वाक्योपोक्तेः। अत्र प्रथमारम्भे हस्तिन्यां कुर्यादिति। नारायणबलौ एतच्चाधिमासे न कार्यम् "उपाकर्म तथोत्सर्गः प्रथमाकरणं तथा। माव-

द्वौ परा: कार्य्या वर्जयित्वा तु पैष्टकामिति" ज्योतिःपराशरैः: "उत्कर्षः कालयुक्तौ स्यादुपाकर्म्मौदिकर्म्मणि । अभिषेकादिहोमानां न तत्कर्षो दुगादिषिति" काल्यायनो ह्येव । यत् "उपाकर्म्मणि चोत्सर्गे च्छेतरिष्टं दृषादित" इति छन्दोगचरणतत्सामगविषयत्वेनां सिंहार्के एवोक्तेः। एतच्चापराह्णे कार्य्यम । "उपाकर्मापराह्णे स्यादुत्सर्गः प्रातरेव हि" "अध्यायानामुपाकर्म कुर्य्यान्नक्षत्रयोगतः पराह्णके। पूर्व्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुरिति" हेमाद्रौ गोभिलोक्तेः । वस्तुतस्तु "भवेदपाकृतिः पौर्णमास्यां पूर्व्वाह्ण एव हीति" प्रवेतोक्तत्वात् पूर्व्ववाक्यं सामगविषयम् । तेषामपराह्णे एवोक्तेरित्यनुपदं वक्ष्यते । दोषोक्तिश्च । "अस्य तु विधिः पूर्व्वाह्णकालः स्मृत" इति । वाजुषास्तु पर्वणि कुर्युः । तच्चापस्तम्बैरौदयिकं प्राह्णम् । अन्यैस्तु पूर्वम् । "पर्वण्यौदयिके कर्यु श्रावण्यन्तैस्तिरीयकाः । बह्वृचाः श्रवणे कर्युर्यदृक्षं क्रान्तिवर्जिते" इति गर्गोक्तेः "संप्राप्नुवान् स्तुतीर्ब्रह्मा पर्वण्यौदयिके पुनः । अतो भूतदिने तस्मिन्नोपाकरणमिष्यते" इति कालिकापुराणात् । "अथ चेद्दोषसंयुक्ते पर्वणि स्याद्युपाकृिया । दुःस्वप्नोत्कामसमयस्तारादृष्टे तस्मिन् द्विजातयः" इति मदनरत्ने गर्गोक्तेः । अत्र सिङ्गभट्टीये विशेषः । "श्रवणः श्रावणं पर्व सकृत्स्पृशेदया भवेत् । तदैवौदयिकं कार्यं नान्यदौदयिकं भवेत्" । पराशरमाधवीयेऽपि गार्ग्यः "श्रावणी पौर्णमासी तु सकृत्स्पर्शात्परतो यदि । तदैवौदयिकी प्राह्णा नान्यदौदयिकी भवेत्" । कर्मकालमाह कालादर्शे निर्णयः । "श्रावण्यां प्रौष्ठपद्यां वा प्रतिपत्परयुक्तायां । विद्धा स्याच्चन्द्रसंतत्योपाकर्मोत्सर्जनं भवेत्" । अत्र पौर्णमासी श्रवणर्क्षयोर्युक्तत्वं तेन तावपि सकृत्स्पृशौ प्राह्णौ । "उदये सकृदृक्षर्क्षैर्युक्ते पर्वणि वार्कभे । कुर्युर्नैभस्युपाकर्म ह्यन्यद्युःसामगाः क्रमात्" इति पृथ्वीचन्द्रः । "विद्धे घटिकाद्वयमिति" पूर्वोक्तविरोधात् सामान्यवाक्यादौदयिकी कर्म्मण्यर्थाप्ता प्राह्णा न पूर्वा । सकृत्स्पर्शमित्तपूर्वविद्धापवादाभावात् भाट्टादौ काम्यान्तरे वास्तु न तु नित्यकर्म । न हि श्रौतस्मार्त्तयोः नित्ये निषिद्धमात्रपक्षः युक्तम् । अतएव परेद्युः सकृत्स्पर्शौ पूर्वनिषेधः । तदभावे तु नेति सूर्य्यव्यवस्थाप्यपास्ता विधिवैयर्थ्यात् मात्रनिषेधे तथापत्तेश्च । पूर्वविद्धावचनस्थो हि सा युज्यते । एवं श्रवणेऽपि ज्ञेयम् । एतच्चोदाहृतिपरं तेन यत्तैत्तिरीयादौ यावं प्रातः काले सामान्यस्य जीवनार्थोत्सर्गकाल रत्नाकरः । यथा श्रौतस्मार्त्ताद्याधाने यागाग्निप्रज्वलितिकादेरुत्तरत्र सकृत्स्पर्शाभावेऽनिषिद्धावस्थकर्म्मपर्व्याप्तौदयिके कालान्तरे वानुष्ठानं न तु कदापि निषिद्धे अपवादाभावे उत्सर्गस्यैव प्राप्तेः । काल्यायनादीनान्तु दिनद्वये पूर्वाह्णव्याप्तौ एकदेशस्पर्शे वा पूर्वेति ज्ञेयम् । घटिकाद्वयमिति पूर्वोक्तविरोधात् तेन प्रायश्चित्तमात्रपरमिदम् । यद्यपि "श्रावणी दौगनयमो दूर्वा चैव कुशायनी । पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिर्बलेर्दिनमिति" ब्रह्मवैवर्त्तम् तदुभयाप्राप्तविषयमिति हेमाद्रिः । मदनपारिजातेऽपि पूर्वविद्धायां श्रावण्यां वाजसनेयिनामुपाकर्मोक्तम् मदनरत्नेऽपि "पर्वण्यौदयिके कुर्युः श्रावण्यन्तैस्तिरीयकाः" इति बह्वृचपरिशिष्टाङ्गृह्यान् प्रति कर्म्मविधानार्थं प्रवृत्ते तत्र तैत्तिरीयकर्कर्म्मविध्ययोगात् पूर्वोक्तकालिकापुराणादौ सामान्यत औदयिकपर्वप्राप्तेस्तद्विशेषे न बह्वृचानां श्रवणविधानात्तैत्तिरीयकपदम् अनुवादत्वात्तस्य च प्राप्तप्रधीनत्वात् प्राप्तेश्च यजुर्वेदमात्रपरत्वात् सर्वयजुर्वेद्युपलक्षणार्थम् । अवयुत्यनुवादो वा । न तु विधायकम् । तेन विशेषविधिना उपसंहारः स्यात् । अनुवादत्वाच्छ्रुत्या न दोषः । अन्यौदयिकपर्वविशिष्टोपाकर्मोद्देशेन कर्त्तृविधौ कर्त्तृविशिष्टे औदयिकपर्वविधौ वाक्यभेदापत्तेः । तस्मात्तैत्तिरीयकपदाविवक्षया सर्वयजुर्वेदिनामौदयिकमेव पर्व्वोक्तम् । तच्च न तावत्परिशिष्टे बह्वृचान् प्रत्येव विधिः । धनिष्ठाप्रतिपद्युक्तत्वात् "त्वाष्ट्रऋक्षसमन्वितमित्यादि तद्दाक्षुते एव परिशिष्टे वेदान्तरधर्म्मविधीनां दर्शनात् । नाप्यनुवादोऽयम् कालिकापुराणाद्बह्वृचादीनामपि तदापत्तेः कुर्वुरित्यस्य विधित्वेन तच्छेषार्थवादत्वेनैतत्प्राप्तानुवादित्वाच्च । न च तैत्तिरीयकाणां स्मृत्ये तद्विधिरस्ति येनानुवादः स्यात् । न च वाक्यभेदः । तैत्तिरीयकपदमात्रस्य कर्म्ममात्रस्य वा उद्देश्यत्वाश्रयेण कविरार्षित्वदृष्टयर्थं ब्राह्मणमुपनयीतेतिवच्छ्रुतत्वाद्विधिरुद्देश्यत्वात् । अन्यथोत्तरार्द्धे बह्वृचपदस्याऽप्यविवक्षापत्त्या श्रावण्यस्य सर्वसाधारण्यापत्तेः । तस्मात् हेमाद्रिमतमेव युक्तमिति दिक् । इदं च । शिष्यानध्यापयत आचार्य्यस्यैनो अनध्यापयतोनाधिकार इति कर्म्म: । श्रावण्यामपि अदृष्टादिदुष्टायां वातीयभिः: प्रौष्ठपद्यां कार्यं तैत्तु श्रावण्यनुवाद्यम् । "सकृत्स्पर्शदृक्षं यदि पौर्णमासी यदा भवेत् । उपा-

स्मृतिस्तु पञ्चम्यां कार्यावाजसनेयिभिरिति" स्मृतिमङ्गार्थत्वे वाजसनेयिपक्षेणादिति हेमाद्रिः। इदं खलूक्तं कालपरत्वात् बह्वृचपरमपि। गार्ह्यायनैस्तु हस्ते कार्यम्। आपस्तम्बैरार्षवर्णेश्च पौष्यपद्याम्। यत्तु बौधायनः "श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्योत्सृजेत। तत् पौष्यपद्यामपि दोषे आषाढ्यां कर्यमित्यवमर्थम्। तच्छार्खीयविषयं वा। सामगास्तु श्रावणे हस्ते कुर्युः। "बह्वृचाः श्रावणे चैव हस्तर्क्षे सामवेदिनः" इति निर्णयात्। गोभिलोक्तेः। सोऽप्युत्तरः "धनिष्ठाप्रतिपद्युक्तं त्वाद्यृक्षसमन्वितम्। श्रावणं कर्म कुर्वीरन्यजुःसामपाठकाः" इति मदनरत्ने परिशिष्टोक्तेः। गर्गोऽपि "सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णेऽथ विवरे बहिः। छन्दोगानिलिताः कुर्युरुत्सर्गं स्वस्वछन्दसाम्। शुक्लपक्षे तु हस्तेन उपाकर्माप्यराह्णिकमिति"। पुष्यर्क्षे पूर्वाह्णे उत्सर्गः अपराह्णिकमुपाकर्मोत्तरयः। अविवरे अहादिदोषरहिते। अन्योविशेषः पूर्वमुक्तः। प्रयोगपारिजाते गोभिलः "उपाकर्मोत्सर्जनं च वनस्थानामपीष्यते। धारणाध्ययनाद्वृत्तादृष्टर्णिनां ब्रह्मचारिणाम्। उत्सर्जनं च वेदानां सोपाकरणकर्म च। अकृत्वा वेदजन्येन फलं नाप्नोति मानवः"। सर्वथा लोपे तु छन्द उपवासश्च "वेदोदितानां नित्यानामिति" मनुनाऽभोजनोक्तेः। एवमुत्सर्गेऽपि।

अथ प्रसङ्गादवैतोत्सर्जनमुच्यते। तच्च पौषमासे रोहिण्यां तत्कृष्णाष्टम्यां वा कार्यम्। "पौषमासस्य रोहिण्यामष्टकायामथापि वा। जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बुधः" याज्ञ० उक्तेः। श्रावण्यां प्रौष्ठपद्यां चोपाकृतौ क्रमेण पौषशुक्लप्रतिपदि, माघशुक्लप्रतिपदि च कार्यम् "अष्टकासु माघानधीयीतेति" तेनैवोक्तेः। यत्तु हारीतः "अर्धपञ्चमान्मासानधीत्योर्ध्वं मृतृजेत् एष्वार्धपञ्चमेष्विति"। तदाषाढ्युपाकर्मविषयम्। बौधायनस्तु पौष्यां माघ्यां वा कुर्युः। "पौष्यां माघ्यां वोत्सृजेदिति" तत्सूत्रात्। तैत्तिरीयस्तु तैष्यां कार्यं "तैष्यां पौषमास्यां रोहिण्यां वा विरमेदिति" तत्सूत्रात्। बह्वृचस्तु माघ्यां कार्यम् "अध्यायोत्सर्जनं माघ्यां पौषमास्यां विधीयते" इति कारिकोक्तेः। कालोयास्तु भाद्रपदे कुर्युः। "उत्सर्गे चेत्तदा तिष्यतिष्यां पौष्यपदेऽपि वेति" कात्यायनोक्तेः। सामगास्तु सिंहार्के पुष्ये कुर्युः। तथा च सिंहे रवौ चेति गार्ग्यवचनं पूर्वमुक्तम्। स्वशैरुपाकर्मदिने वा कार्यम्। "पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेऽथवेति" हेमाद्रौ खादिरसूत्रोक्तेः। यदा सिंहस्थे सूर्ये सति तत्कथ्यस्थहस्तनक्षत्रात्पूर्वं पुष्यः कर्कस्थो भवति तदा तस्मिन् पुष्ये उत्सर्गं कृत्वा तदुत्तरहस्ते उपाकर्म सामगाः कुर्युः। "मासि प्रोष्ठपदे हस्तात्पूर्वः पूर्वोभवेद्यदि। तदा तु श्रावणं कर्म्यादुत्सर्गं छन्दसां द्विजः" इति तत्रैव परिशिष्टोक्तेः। अत्र द्वावपि सौरौ मासौ ज्ञेयौ तेषां सौरत्वोक्तेः। अत्र विशेषमाह काण्वाजिनिः। "उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च। ऋषीन्दर्भमयान् कृत्वा पूजयेत्तर्पयेत्ततः। संप्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनोदये। स्नानं कुर्वीत मतिमान् स्मृतिस्मृतिविधानतः। उपाकृत्यादिनं प्रोक्तमृषीणां च तर्पणम्। मूढ्राणां मन्वरहितं स्नानं दानं प्रशस्यते"। "उपाकर्मण्युत्सर्गे च त्रिरात्रं पक्षिणीमहोरात्रं वाऽनध्याय" इति मिताक्षरायामुक्तम्। अत्र नदीनां रजोदोषोनास्ति। "उपाकर्मणि चोत्सर्गे रजोदोषो न विद्यते इति" गर्गोक्तेः। "उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च। चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते" छन्दो० उक्तेश्च उपाकर्मणि चोत्सर्गे दुर्गादौ मृतवासरे। निषेधेऽपि दिने कार्यात्तर्पणं तिलमिश्रितम्" स्मृतिः। "त्रयोदश्यादितो वर्ज्यं दिनानां नवकं ध्रुवम्। मङ्गल्येषु समस्तेषु यज्ञे चन्द्रसूर्ययोरिति" सामान्यतो यज्ञे दिननक्षत्रनिषेधस्तु अनियतकालीनकर्मपरः न तु नियतकालीनकर्मपरः। "नित्ये नैमित्तिके जप्ये होमे यज्ञक्रियासु च। उपाकर्मणि चोत्सर्गे ग्रहदोषो न विद्यते इति नि०सि० स्मृत्युक्तेर्नोपाकर्मणि ग्रहणदोषः। आषाढ्यामपि उपाकर्मविधानात् आषाढीप्रयोजनकत्वात् दण्डस्याषाढनामता वेदग्रहणस्य दण्डपूर्वकत्वात् तथात्वमिति बोध्यम्। करणे क्त्रिन् उपाकृतिरप्यत्र स्त्री कर्मकरण्योरभेदोपचारात् उपाकृत्याप्यत्र स्त्री।

उपाकृत त्रि०उप+आ+कृ-क्त। यज्ञे कृतनामके संस्कारे पशौ, "अनुपाकृतमांसानि देवान्नानि हवींषि च" अभक्ष्ये मनुः। "पशुयागादौ मन्त्रवत्कृतेन पशौ कर्मणोपकरणं तद्रहितपशुरनुपाकृतः" कुल्लू०। "पशुरेवोपाकृतः पशुमालभेत वाजपे तमतुद्दिश्य तद्दर्शं तद्वयसमालभेत" कात्या० २५,६,१ श्रौतप्रयोगे प्रेषिते च "उपाकृत उद्गातार आहोश्रवणात्" कात्या० १,१,१८। ३आरब्धे च। भावे क्त। ४उपाकरणे ऐकाहिकपशुसंस्कारे ७आरब्धे च न०। ततः इदा० कर्मणि इनि। उपाकृतिन् उपा-

करणकर्त्तरि त्रि० स्त्रियां ङीप् उपाक्षरिणी ।

उपाक्ष अव्य० अक्षः समीपम् अव्ययी० नि० टच्समा० । नेत्रसमीपे "कूलतीरतूलनाशालसमसव्ययीभावे" पा० अन्तोदात्तता अत्रैव अक्षोतिनिर्देशात् नि० टच्समा०

उपाख्या स्त्री उप+आ+ख्या–भावे अ । १प्रत्यक्षे "द्वितीयतृतीयाभ्यामुपाख्ये" पा० । उप ख्या प्रत्यक्षं तच्छून्योऽनुमानगम्ये इत्यर्थः । २शब्दादिभिर्निर्वचने च । "ज्ञानविज्ञानयुक्तानां निरुपाख्या निरूपणा । कैवल्या या गतिर्देवैः परमो स गतिर्भवेत्" भा० अनु० २६ अ० । निरुपाख्योऽभावः । तस्य च भावभिन्नत्वादिना यथा निर्वक्तुमशक्यत्वं तथाऽभावशब्दे उक्तम् "प्रतिसंख्याप्रतिसंख्यानिरोधाकाशेति" भा० सू० भाष्ये "तदवस्तु अभावमात्रं निरुपाख्यम्" "न हि भावानां निरन्वयो निरुपाख्योविनाशः सम्भवति" "निरोधहेत्वभावाकाशेति निरुपाख्यम्" । "तत्र निरुद्धहेतुयस्य निरुपाख्यत्वम् पुरस्तान्निराकृतमाकाशस्येदानीं निराक्रियते" "आकाशे च न युक्तो निरुपाख्यत्वाभ्युपगमः" इत्येवम् सौगतमतनिराकरणे अभावपरतयाऽसदुक्तम् ।

उपाख्यान न० उप+आ+ख्या–ल्युट् । १पूर्व्ववृत्तकथने "रामोपाख्यानमत्रैवेति" भा० आ० १अ० । एवं नलोपाख्यानान्युपाख्यानानि बहून्युपाख्यानानि तत्र सन्ति । "चतुर्विंशतिसाहस्रीं चक्रे भारतसंहिताम् । उपाख्यानैर्विना तावत् भारतं प्रोच्यते बुधैः" भा० आ० १अ० । २विशेषकथने । "सर्व्वाख्यानं श्रुतं ब्रह्मन् अतीव परमाद्भुतम् । अधुना श्रोतुमिच्छामि दुर्गोपाख्यानमद्भुतम्" "हृष्ण नारद यच्चापि त्वयोपाख्यानमद्भुतम्" इति च ब्रह्मवै० । तत्र साधु कन् । उपाख्यानक तत्प्रतिपादके ग्रन्थभेदे स्वार्थे कन् । तत्रैवमाले च । [गते च ।

उपागत त्रि० उप+आ+गम–क्त । १स्वयमुपस्थिते २अभ्युपगते च ।

उपागम पु० उप+आ+गम "पदृदृदृनिगमश्च" पा० अप् । १स्वीकारे २समीपगमने च ।

उपाग्रहण न० उप+आ+ग्रह–ल्युट् । संस्कारपूर्व्वकवेदारम्भे अमरटीकायां रायमु० ।

उपाग्रहायण(णि) अव्य० आग्रहायण्याः समीपं अव्ययी० वा० टच्समा० । आग्रहायण्यासमीपे

उपाङ्ग न० उपलिङ्गमङ्गं न अवा० स० । १प्रधानस्याङ्गोपयोगिनि "शाङ्गाधाङ्गैरुदाहृतम्" इत्यमरः २वेदाङ्गसदृशे शास्त्रभेदे उपङ्गानि शास्त्राण्यत्रे "पुराणन्यायमीमांसाधर्म्मशास्त्राणि । चत्वार्युपङ्गानि इत्यङ्गानि तेषां अङ्गवत् वेदार्थस्य बहुत्वकरणादुपाङ्गत्वम् । "सङ्गोपाङ्गोपनिषदः" फरि० २५ अ० "शाङ्गोपाङ्गचतुर्वेदाः सरहस्याः क्रमेण तु" विक्रमो० । "यद्वेदशास्त्रं तच्चापि क्रतसङ्गमखिलं प्रतिष्ठितम् । तत्र पुत्रे महाबाहौ शाङ्गोपाङ्गं महात्मनि भा० व० १०० अ० । अङ्गं देहस्तदुपयोगिनि ३मत्यङ्गे प्रत्यङ्गानि च अङ्गशब्दे ७२ पृ० दर्शितानि ४तिलके पु० जटाधरः ।

उपाजिन त्रि० उपगतोऽजिनम् अव्ययी० स० । चर्मोपगते उपात् अजिनान्ततत्पुरुषत्वात् अन्तोदात्तता । अजिनस्य सदृशं समीपम् अव्ययी० । २चर्म्मसदृशे अव्य० । निरुदकादित्वात् अन्तोदात्तता । उपगतमजिनं येन या० ब० । २उपगतचर्म्मके त्रि० अत्र प्रकृतिस्वरः इति भेदः

उपाजे अव्य० उप+अज–घञ् के वीर्य्याभावः दुर्बलस्य बलाधाने, "उपाजे अन्वाजे" पा० अज धरे तस्य गतित्वम् तेन समासे उपाजेक्रिय असमासे तु उपाजे क्रियते दुर्बलस्य बलमाधायेत्यर्थः" सि० कौ० । एतौ च विभक्तिप्रतिरूपकाव्ययौ इत्यन्ये

उपाञ्जन न० उप+अञ्ज–ल्युट् । लेपने "मार्ज्जनोपाञ्जनैर्नित्यं पुनः पाकेन शुध्यति" मनु २गोमयादिनानुलेपने च "सम्मार्जनोपाञ्जनेन सेकोल्लेखनेन च । गवाह्निकं परिवासेन भूमिः शुध्यति पञ्चभिः" "ज्ञानं तपोऽग्निराहारो ध्यानमनो वार्य्युपाञ्जनम् । वायुः कर्म्मकालो च शुद्धेः कर्त्तणि देहिनाम्" मनुः उपाञ्जनमनुलेपनम्" कुल्लू० । आधारे ल्युट् । ३अञ्जनाधारे स्फटादौ च । "चतुरङ्गुलमाहानीयस्योपयमनीष्वानीध्रीयस्योपाञ्जने च" कात्या० ८, ६, २४, तृतीयं चतुर्भागमत्तोपाञ्जने अक्षधुरावलक्षणाय अञ्जनार्थोऽक्ष्यर्थे मक्षीपाणावित्यर्थः" कर्कः । अक्षधुराञ्जनप्रकारस्तत्रैव "दक्षिणया द्वारोऽञ्जीता पत्नी पाणिभ्यां शोणे प्रतिगृह्याऽक्षधुरावनक्ति "पराग् देवसुतिरिति" "प्रतिप्रस्थाता समानीता पत्नी क्रोडशोणेषणाय्यानाक्षस्याञ्जनाभावात्पत्न्यञ्जनादिति सूत्रार्थः" वेदटी० ।

उपात्त त्रि० उप+आ–दा क्त । १गृहीते, २प्राप्ते च "अयं केचिदुपात्तस्य दुरितस्य प्रवर्त्तते" सावार्ल० । ३अन्तर्गतभेदे गजे पु० हलायुधः ।

उपात्यय पु० उप+अति–इण्–अच् । लोकयात्राचारातिक्रमे, २व्यतिक्रमे, क्रमोल्लङ्घने, ३नाशे च । "परावनुपात्यय इणः" पा० क्रमप्राप्तस्यानतिपातोऽनुपात्ययः" सि० कौ० ।

उपादान न० उप+आ+दा–ल्युट् । १ग्रहण "विश्वं मा-

लक्षः भूयात् इत्ये "पादानमाचरेत्" मनुः । "आदात्तनोऽनुपादानात्" सा० द० । "लक्षविषयेऽन्यन्निर्व्याणां निवारणरूपे २प्रवाहारे. अर्थेण ल्युट् । कार्यजननार्थसुपादानमाचष्टे कार्योन्मिते २कारणे. यथा मृदादि घटादेः खण्डादि अवहारादेः. जननार्थं मृच्यते । तच्च सर्वदा कार्येषु गतम् । "अवहरत्व दुपादानग्रहणात् सर्वसम्भवाभावात् । प्रकृतस्य प्रकृतत्वात् कारणभावाच्च तत् कार्यम्" सां० का० "उपादानानि कारणानि तेषां ग्रहणं कार्येण सह सम्बन्धस्य उपादानैः कार्यस्य सम्बन्धादिति यावत् एतदुक्तं भवति कार्येण संबन्धि कारणं कार्यस्य जनकं सम्बन्धश्च कार्यजातीनो न सम्भवति तस्मात् तत् कार्यमिति" सा० कौ० "उपादाननियमात्" "जनकत्वेन उपादानयोगात्" सां० सू० उपादानकारणञ्च कार्याभिन्नकारणमिति सांख्या वेदान्तिनश्च मन्यन्ते यथा मृत्तिकादयः घटादिकं प्रति, सुवर्णं कुण्डलादिकं प्रति, तन्तवः पटं प्रति, तत्तत्कार्याभिन्नत्वात्तदुपादानकारणम् । नैयायिकास्तु उपादानकारणं समवायिकारणतया व्यवस्थापयते । "तत्समवेतं कार्यं भवति श्वेतं वस्त्रं समवायि जनकं तन्तवः" भाषा० तेषांमते उपादानशब्देनापि तस्य व्यवहारोऽस्त्येव 'उपादानस्य साध्यस्य ग्रहणो जनकं भवेत्" भाषोक्तेः । तत्तदुपादानगोचरचिकीर्षाज्ञ तत्तत्कार्यजन्यत्वेन तैः ईश्वरस्य सर्वकर्तृत्वाभ्युपगमात् तच्च ईश्वरशब्दे विस्तरतः द्रष्टव्यमत्रैव ३आध्यात्मिकतद्भिन्नभेदे च यथाह सा० का० । "आध्यात्मिकस्य प्रकृतः प्रकृत्यादानकाभाव्याख्याः । बाह्या विषयोपरमात् प्रकृत नव तृप्तोऽभिमानः" । "बाह्य प्रकृतिविवेकख्यातिः सा प्रकृतेर्लयात् सा भूत सर्वेषु सर्वदा तस्मात्तस्य तस्यात् प्रकृतिविषयात् प्रकृत्यादास्तु सा भवति तस्मात् प्रकृत्यादुपादेयाः ततः ते आध्यात्मिकादुच्यन्ते" इति उपदेशे या तदिः सोपादानाख्या नामाख्या दृश्यते" सां० कौ० । बीजतरोर अङ्कुरं प्रति प्रकृत्यादाः साक्षात्कारं प्रति सहकारिकारणत्वेन सर्वजन्यत्वात् सर्वजन्यत्वम् । आत्मसाक्षात्काराय च जन्यत्वेन उपादानत्वा तच्चा उपादानत्वमिति बोध्यम् । तेन निर्दोषम् ठक् । औपदेशिक स्त्रीकारमात्रजन्ये ज्ञानादौ यथा शिष्यादौ दृश्ये प्रकृत्यभावादेव ज्ञानजन्यत्वे । उपादानोपादेयभावः

उपादानलक्षणा स्त्री उपादानात् कार्यस्य ग्रहणात् लक्षणा । "मुख्यार्थबाधेतद्योगे रूढितोऽथ प्रयोजनात्" । आदात्तनोऽप्युपादानादेशोपादानलक्षणा" सा० द० उक्तो अजहत्स्वार्थारूपे लक्षणाभेदे । यथा कुन्ता एविशन्तीत्यादौ कुन्तधारिव्यस्य कुन्तधारिणि लक्षणाभ्युपगमेऽपि तत्र कुन्तरूपमुख्यार्थस्यापि विशेषणविधयान्वयात्तथात्वम् ।

उपादिका पु० उप+आद-ण्वुल् अत इत्वं च । कीटभेदे । उपोदिकायां स्त्री

उपादेय त्रि० उप+आ+दा-कर्मणि यत् । ग्राह्ये ग्रहीतुं योग्ये विषये "उपादेयतारतम्यमेव" सा० द० । "भवे सौख्यं क्षिप्त्वा यमसुखमुपादेयमनघम्" भल्लिन० उपादानकारणे सम्बद्धे २तद भवे कार्ये । ३विधेयत्वादिना उतुद्दिष्टे च "कर्मासन्निहितं नैव बुद्धौ विपरिवर्त्तते । यद्धात्तु तदुपस्थानमुपादेये गुणोभवेत्" भट्टिका० । "उपादेये विधेये" ति० त० रघुनन्दनः ।

उपादेयं ग्रहणयोग्यं तच्चानुकूलवेदनीयं सुखं तत्साधनञ्च "हेयोपादेयरहिते परिनिष्ठिते" भा० भा० वाक्ये "स यथा मत्स्यार्थी सरसस्तात् सकण्टकात् मत्स्यानुपादत्ते स यावदुपादेयं तावदादाय निवर्त्तते" सर्व० दर्शने च प्रपञ्चम् ।

उपाधि पु० उप+आ-धा-कि । अन्यव्यावर्त्तकस्य वस्तुनोऽन्यत्वा प्रकाशनरूपे १कपटे, उपधिशब्दे उदा० । उपाधीयते स्वधर्मोऽनेन करणे वा० कि । स्वसाधर्म्यादिना अन्यस्मिन् स्वधर्मारोपसाधने विशेषणभेदे । २उपाधिभेदेऽप्यभेदस्य न्यायसिद्धः आकाशस्येव घटादिना" गतिस्तुतिरप्युपाधियोगादाकाशवत्" सा० सू० "उपाधिना क्रियते भिन्नरूपः" इति स्मृतिः "कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः" पञ्चद० कार्यसम्बन्धरूपं कारणसम्बन्धमिति वक्ष्यमाणोपाधिवादे उदा० ३उपलक्षणरूपे विशेषणे च । स च आत्मादिस्वलक्षणपदार्थेतरनिष्ठधर्मः । "पदार्थविभाजकोपाधिमत्त्वम्" सक्षा० । पदार्थविभाजकत्वञ्च द्रव्यत्वगुणत्वकर्मत्वसामान्यत्वविशेषत्वसमवायत्वभावत्वरूपाः तत्र द्रव्यत्वादयो जातिरूपाः सामान्यत्वादयस्तल्लिङ्गाः तत्र नित्यत्वे सति समवेतत्वम् जातित्वम् परमसामान्यवर्त्तित्वे सति नित्यद्रव्यवृत्तित्वं विशेषत्वम् । नित्यत्वे सति सम्बन्धत्वम् समवायत्वम् । भावभिन्नत्वसभावत्वसमोन्नाभावात् अवस्तूपाधेरभावत्वमिति नव्याः । एवं प्रतियोगित्वादयोऽपि अवस्तूपाधयः तैः सह्यन्ते । "उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक्" भाषा० ४कुटुम्बव्याप्ते । उपाधीयते ज्ञानसमीपे कर्मणि कि । ५उपनामनि यथा भट्टाचार्यमिश्रादयः उपाधीयतेऽनेनेऽस्मि

आधारे कि । (धर्मचिन्तायाम् उपाभिचारोद्धारके न्यायमतसिद्धे पदार्थभेदे च । "सर्वे साध्यसमानाधिकरणाः-सदुपाधय हेतोरेकान्तेयेषां सकलसाध्यव्यभिचारिता भावा० उपाधिपदार्थनिरूपणप्रन्थस्य प्रायेण दुरूहत्वेन दौ पठन-पाठनाभावेन सुप्रणालतया प्रचारो नास्तीति अनुमान-चिन्तामणिप्रकाशतया तथा उपाधिवादे तन्निरूपितं यथा च तस्य दूषकतायां वक्तव्यं निरूपितं तदत्र प्रदर्श्यते ।

"तत्रोपाधिः साध्यव्यापकत्वे सति साधनव्यापकत्वाभिमतोधर्मः । अनौपाधिकत्वशङ्कानस्तु न व्याप्तिज्ञाने हेतुतयो व्यापकत्वादितज्ज्ञानेन व्यर्थोऽन्वयव्यभिचारः । यद्वा व्यापकत्वं तद्विशिष्टाव्यभिचारप्रतियोगित्वं तत्प्रतियोगित्वाव्याप्यत्वं प्रतियोगित्वञ्च तदधिकरणावच्छेदकत्वमिति वदन्ति तन्न साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यग्राहेः । न च तयोरनुपाधित्वं दूषकतावीजसाध्यत्वं सिद्धसाधनत्वेन व्याप्यत्वसाधने याचकयाचकत्वाय, प्रत्यक्षसाध्यत्वेन बाधोः पक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च यावदप्रयोजकत्वेनोपाधित्वस्वीकारात् पक्षेतरेतिव्याप्तेश्च । न च व्यतिरेके पर्वतेतरत्वाद्यतिव्याप्तिदूषणत्वाच्चरमविशेषणवैयर्थ्यात् पर्वतपद विशेषणमिति व्यतिरेके व्यर्थविशेषणत्वाच्च स उपाधिः, बाधोद्धीतस्याप्यनुपाधितापत्तेः । न चेष्टापत्तिः दूषकत्वव्याप्यत्वाप्सिद्धौ विशेषणं विना व्याप्यत्वेन तत्तदर्थत्वात् । वस्तुतस्तु साध्यव्यापकः पक्षेतर उपाधिरिति चेत् अस्तु तथा, तथापि पक्षातिरिक्ते साध्यव्यापकताप्रयुक्तदूषणत्वं तत्र तत्र अस्ति, अन्यथा पक्षे साध्यसन्देहाद्यनुमानोच्छेदापत्तेः विपक्षाव्यावर्त्तकविशेषणशून्यत्वं विशेषणं तेन बाधोद्धीतपक्षेतरस्य परिग्रहः, तत्र पक्षत्वेन विपक्षत्वात् न तु पर्वतेतरत्वादेरिति चेन्न हि वस्तु विपक्षव्यावर्तकविशेषणशून्यं सर्व्वत्र प्रमेयत्वादेः सत्त्वात्तत्तदुपाधेरिति विशेषणे सिद्धसाधनात् तथापि च साध्यव्यापकत्वसाधनाव्यापकत्वे तत्र सत्त्वं इति तत्र इत्था पक्षे साध्यव्यभिचारितो हेतुर्व्यभिचार एव व्यभिचारे चावच्छेदकानुपाधिरिति पक्षेतरएव तत्रोपाधिः स्यात् तावतालक्षैव दूषकत्वात् व्यर्थं विशेषणम् । अतएवानुमानमात्रोच्छेदकतया आतिरूपत्वाच्च पक्षेतर उपाधिरित्यपास्तम् दूषकसमर्थत्वेन जातित्वाभावात् । हतेन पक्षेतरव्यावृत्तार्थं प्रकारान्तरमपि निरस्तम्, उपाधित्वाभावेऽपि दूषकसमर्थत्वात् । अथोपाधिः स्वव्यतिरेकेण सत्प्रतिपक्षोद्भावकतया दूषकं, पक्षेतरत्वन्तरेकेण न साध्याभावसाधकोऽसाधारणत्वात् न तु व्यभिचारोद्भावकतया दूषकं यथा हि साध्यव्यापकोपाध्यव्याप्यतया हेतोः साध्यव्याप्यत्वं तथा साध्यव्याप्यहेत्वव्यापकतयोपाधेर्न साध्यव्यापकत्वमपि सिध्येत् व्याप्तिग्राहकस्तोभयत्रापि साम्येन विनिगमकविरहात् । तस्माद्यथा साध्यव्याप्येन हेतुना साध्यं साधनीयं तथा साध्यव्यापकोपाधिव्याहत्या साध्याभावोऽपि साधनीयो व्याप्तिग्रहकतोद्यादिति दूषकतावीजं सोऽयं सत्प्रतिपक्ष एवेति मैवम् एवं हि सत्प्रतिपक्ष उपाध्युद्भावनं न स्यात् सत्प्रतिपक्षान्तरवत् । किञ्चैवं बाधोद्धीतोऽपि पक्षेतरो नोपाधिः स्यात् व्यतिरेकेऽसाधारण्यात् । ननु बाधे नोपाधिनियमः धूमेन वह्नेरनुमाने तदभावात् । न च हेतुमति पक्षे बाधे पक्षेतरोपाधिनियमः प्रत्यक्षे वह्नौ कृतकत्वेनानुमाने साध्येऽतेजस्त्वादेरुपाधित्वसम्भवादिति चेन्न तेजोमात्रपक्षत्वेऽतेजस्त्वं विशाल्यस्य उपाधेरभावात् । किञ्च पर्वतावच्छेदकत्वं पर्वतेतरवृत्तित्वं ह्रदपर्वतसंयोगाधारत्वं ह्रद-पर्वतान्यत्वादिरनुपाधिः स्यादेव व्यतिरेकेऽसाधारण्याभावात् व्यतिरेकस्य सत्प्रतिपक्षसम्भवात् । न चासाधारण्यं, तस्यापि सत्प्रतिपक्षोद्भावकतया दोषत्वात् तादृशयोरपि व्याप्तिग्राहकसाम्ये विरोधात् व्याप्तिनिश्चयः किन्तु भयत्र व्यभिचारसंशयः तथा च व्यभिचारसंशयाधायकत्वेनोपाधेर्दूषकत्वं तत्र पक्षेतरेऽप्यस्ति तदुक्तसुपाधेरेव व्यभिचारग्रहेति । भवतु वह्न्यायेन सकलानुमानभङ्गभिया पक्षेतरोऽनुपाधिः तथापि सत्प्रयोजनविशिष्टव्यापकम् । नापि साध्यसमव्याप्यत्वे सति साधनाव्यापकत्वमुपाधित्वं दूषकतावीजस्य व्यभिचारोद्भावनस्य सत्प्रतिपक्षस्य वा साम्येन विपक्षव्याप्यत्वादुपाधित्वात् तथा दूषकतावीजं साध्यव्याप्यत्वस्यान्योन्याश्रयात् । अथ साध्यप्रयोजकोधर्म्मः उपाधिः प्रयोजकत्वञ्च न न्यूनाधिकदेशवृत्तेः तस्मिन् सत्प्रयोजकत्वेन विनापि भवतस्तदप्रयोजकत्वात् अन्यथा पक्षेतरस्याप्युपाधित्वप्रसङ्ग इति चेत् न दूषकोपक्षिप्तं हि प्रयोजकत्वमिह विवक्षितं तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमेवेति तदेव प्रयोजकं सत्तदधिकं व्यर्थत्वात् ।

अथोपाधिः स उच्यते यद्धर्मोऽन्यत्र प्रतिबिम्बते यथा जवाकुसुमं स्फटिकलौहित्ये उपाधिः तथा चोपाधिवृत्तित्वं दूषकत्वाभिमते वह्नौ तेजोत्वमुपाधिः न च व्यापकत्वमात्रेण दूषकत्वमिति साध्यव्यापकतायोग्यते तथा च सकलव्याप्य एवोपाधिरिति चेत् तत् किं विपक्षव्याप्यत्व

दूषकतावीजाभावाच्चोपाधिरुद्भाव्यत्वं तथात्वेऽप्युपाधिपदप्रवृत्तिनिमित्ताभावाद्दोषः तस्यापि व्यभिचारादुद्भावकत्वात् । नापरः न हि लोके समव्याप्तत्वान्यत्व स्वधर्मानधिकरणजनक एवोपाधिपदप्रयोगः लाघवादुपाधिना कृतमित्यादौ लाघवादपि उपाधिपदप्रयोगात् । किञ्च न शास्त्रे लौकिकव्यवहारार्थमुपाधिग्रहणं किन्त्वनुमानदूषणार्थं तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमात्रमिति शास्त्रे तत्रैवोपाधिपदप्रयोगात् । अन्ये तु यद्भावेऽव्यभिचारविरोधी स उपाधिः न च विषमव्याप्तस्याभावेऽव्यभिचारं विरुणद्धि तस्याभावेऽपि व्यभिचारात् अस्ति ह्यनित्यत्वव्यापकं प्रमेयत्वं तच्च पृथ्वे गुणत्वं नचानित्यत्वगुणत्वयोर्व्याप्तिरस्ति समव्याप्तिरूपस्य च व्यतिरेकस्तथा, न हि साध्यव्यापकव्याप्यीभूतस्य व्याप्यं यत्तत् साध्यं व्यभिचरति व्यभिचारे चान्ततः साध्यमेवोपाधिः अभेदेऽपि व्याप्यव्यापकत्वात् साधनव्यापकत्वादिति स्वीचक्रुस्तत्र तथापि ह्यव्यभिचारे साध्यव्यापकव्याप्यत्वं तन्मात्रस्यैकत्वाल्लाघवाच्च न साध्यव्यापकव्याप्यत्वमपि भवतैव व्यभिचारस्य दर्शितत्वात् । न च साध्यव्याप्यव्याप्यत्वमेवानौपाधिकत्वं साध्यव्याप्यनित्यत्वापि ह्यनौपाधिकत्वं तदेव वाच्यं तथा चानवस्थेति । अनौपाधिकत्वे च व्याप्तिलक्षणे यावदिति पदं साध्यव्यापके विशेषणं दत्तमेव किञ्च यस्मिन् सत्यनुमितिर्न भवति तदेव तत्र दूषणं न तु यद्व्यतिरेके न भवत्येवेत्येतद्गर्भं विरुद्धत्वादेरप्यदोषत्वापत्तेः नापि पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनव्यापकत्वमुपाधित्वं साधनावच्छिन्नसाध्यव्यापकोपाध्यव्यापनात् । यद्दोऽभिधेयः प्रमेयत्वादिरात्मादावप्यस्तीत्युपाधित्वापत्तेश्च यद्धर्मगुणावच्छिन्नाभिधेयत्वं यत्र रूपादौ तत्राश्रयत्वं व्यापकं पक्षे प्रमेयत्वस्य साधनस्याव्यापकं हि तत् । यावैन्धनवत्त्वं तावुपाधौ पक्षनियतताद्दशधर्माभावाच्च । अथ साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापक उपाधि तत्र ध्वंसस्य जन्यत्वेन ध्वंसप्रतियोगित्वे साध्ये साधनावच्छिन्नसाध्यव्यापकं भावत्वमुपाधिः । व्योमत्वे साकल्यापकत्वमुपाधिरिति तत्र पक्षधर्मावच्छिन्नसाध्यव्यापकतृणिगोचरत्वमुपाधित्वं सङ्कात् सोपाधित्वादसाधकमित्यत साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वे साधनावच्छेदकस्य व्यर्थत्वप्रसङ्गाच्च । किञ्च पक्षद्वयेऽपि विशिष्टसाध्यव्यभिचार त्रिशिष्टसाध्यव्यतिरेकं वा प्रसाध्य यद्यात् केवलसाध्यव्यभिचारः केवलसाध्यव्यतिरेको वा साधनीयस्तथा चार्थान्तरं केवलसाध्ये हि विवादो न तु विशिष्टे । अथ प्रकृतसाध्यव्यभिचारनिरूपणे विशिष्टसाध्यव्यभिचारः साध्य इति चेन्न अप्राप्तकत्वात् प्रथमं साधनव्यभिचार एवोद्भावयितव्यतावच्छेदकावुपाधिरिति चेन्न तर्हि प्रकृतानुमाने नोपाधिर्दूषणं स्यात् । किञ्च साध्यव्यभिचारहेतुत्वेन पक्षधर्मावच्छिन्नसाध्यव्यापकत्वप्रकारः एवोपन्यसनीयोनोपाधिः । स्यादेतत् पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक उपाधि पर्यवसितं साध्यं च पक्षधर्मतावलक्षण्यं यथा यद्दोऽनित्यत्वातिरिक्तगुणधर्मातिरिक्तधर्मवान् मेयत्वादित्यत्र पर्यवसित यत्स्वधर्म अनित्यत्वं तस्य व्यापकं कृतकत्वमुपाधिः यदि च तत्रैव कृतकत्वमपि यद्दो साध्यते तदा अनित्यत्वमुपाधिः तदुक्तं वाद्युद्भाव्यनियमस्त्वेतोऽपि कथञ्चित्कृपाधिरुद्भाव्यः पर्यवसितं नियमयन् दूषकतावीजसाध्याद्यादि त । अनेन पक्षधर्मतावच्छिन्नसाध्यव्यापकोपाधिः सङ्गच्छते तादृग साध्यस्य पर्यवसितत्वादिति तन्न एव हि द्रव्यत्वे सावयवत्वे सिद्धे द्रव्यत्वमनित्यद्रव्यासमवेतं जन्यमकृत्वानधिकरणद्रव्यत्वादि यत्र नित्यद्रव्यसमवेतत्वमुपाधि स्यात् । भवति हि नित्यद्रव्यसमवेतत्वं पर्यवसितं साध्यं तस्य व्यापकं साधनाव्यापकञ्च । किञ्च पक्षधर्मतावललभ्यसाध्यसिद्धौ निरुपफल उपाधिः तदसिद्धौ च कस्य व्यापकः न हि सोपाधौ पक्षधर्मतावलात् साध्यं सिध्यति यस्य व्यापक उपाधिः स्यादिति । अत्रोच्यते यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वं स उपाधिः लक्षणन्तु पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वं यद्धर्मावच्छेदेन साध्यं स च धर्म । क्वचित् साधनमेव क्वचिदुद्भावयत्वादि क्वचिन्मूर्तत्वादि । तथा हि समव्याप्तस्य विषमव्याप्तस्य वा साध्यव्यापकस्य व्यभिचारेण साधनस्य साध्यव्यभिचारः स्फुटएव व्यापकव्यभिचारिणस्तद्व्याप्यव्यभिचारनियमात् साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकयोर्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमेव यथा ध्वंसस्यानित्यत्वे साध्ये भावत्वस्य, वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च विशेषणाव्यभिचारिणि साधने विशिष्टव्यभिचारस्य विशेष्यव्यभिचारित्वनियमात् । अतएव नार्थान्तरं, विशेषणाव्यभिचारित्वेन ज्ञाते साधने विशिष्टव्यभिचारः सिध्यन् विशेष्यसाध्यव्यभिचारमादायैव सिध्यति पक्षधर्मतावलात् । अन्यथा प्रतीतेरपर्यवसानात् । न च पक्षधर्मतावलात् प्रकृतसिद्धावर्थान्तरम् । यद्वा प्र-

लक्षणस्यैवत्वं प्रत्यक्षत्वव्यभिचारि द्रव्यत्वाव्यभिचारित्वे सति द्रव्यप्रत्यक्षत्वव्यापकत्वव्यभिचारित्वान्महत्त्ववत् तथा मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनयत्वाव्यभिचारित्वे सति श्याममित्रातनयत्वव्यापकत्वव्यभिचारित्वात् अघटत्ववत् । अव्यभिचारश्च तनसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं तच्चाभेदेऽपि । यद्वा यः साधनव्यभिचारी साध्यव्यभिचारीत्यायकः स उपाधिः तच्चञ्च साक्षात् परम्परया वेति तार्थान्तरम् । किञ्च अर्थान्तरस्य पुरुषदोषत्वादाभासान्तरस्य तत्राभावादुपाधिरेव भावत्वादिकं दोषः न चैवं शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वं, जलं प्रमेयं रसवत्त्वादित्यत्र पृथिवीत्वमुपाधिः स्यात् केवलान्वयित्वसाधकप्रमाणेन तत्र साध्यसिद्धेरुपाधेर्विशिष्टाव्यापकत्वात् न च पक्षेतरे स्वव्याघातकत्वमनुपाधावतिव्याप्तेः तत्रानुकूलतर्काभावेन साध्यव्यापकत्वानिश्चयात् सहचारदर्शनादेवेन विना संशयकत्वादित्यत्रुक्तं बाधोद्भावे चानुकूलतर्कोऽस्त्येवेति । एवं पर्वतीयवह्नित्वान्यत्वादेरपि नोपाधित्वं पक्षमात्रव्यावर्त्तकविशेषणवत्त्वात् अतएव धूमे आर्द्रेन्धनप्रभवत्वक्रमित्वं बहिरिन्द्रियप्रत्यक्षत्व उद्भूतरूपवत्त्व मित्रातनयश्यामत्वे शाकपाकजत्वं जन्यानित्यत्वे भावत्वमुपाधिः तदुत्कर्षेण साध्योत्कर्षात् अनन्यथासिद्धान्वयव्यतिरेकतो वैद्यकात् कारणतावगमेन घटोन्मज्जनप्रसङ्गेन साध्यव्यापकतानिश्चयात् । तत् किं काष्ठकारणयोरेव वह्निः तथा च बहुधा व्याकुलास्यादिति चेन्न तदुपजीव्यन्येषामप्यनुकूलतर्केण वह्निमत्त्वात् यत्र साध्योपाधेर्हेतुसाध्ययोर्वा वह्निमात्रकसाध्यत्वं वह्निनिश्चयस्तत्र सन्दिग्धोपाधित्वं व्यभिचारसंशयोपाधायकत्वात् । यदा च तादृशैकत्वानुकूलतर्कावतारस्तदा हेतुत्वमुपाधित्वं वा निश्चितं पक्षेतरस्य स्वव्याघातकत्वेन न हेतुव्यभिचारसंशयकत्वमतो न सन्दिग्धोपाधिरपि स । यत्तु पक्षेतरस्य यथा साध्यव्यापकत्वं तथा साध्याभावव्यापकत्वमपि व्याहतसाम्यात् तथा चोभयव्यापकनिश्चित्या साध्यतदभावाभ्यां पक्षे निवर्त्तितत्वम् न चैवम् । तथा च पक्षेतरः साध्यव्यापकतासंशयेन सन्दिग्धः कथं परं दूषयेदिति तन्न तथापि हि साध्यव्यापकता पक्षमालम्ब्य हेतुव्यभिचार संशयाधायकत्वेन दूषणं स्यादेव । ननु यत्रोपाधिस्तत्रानुकूलतर्कोयदि नास्ति तदा तदभावेनैव व्याप्तेरग्रहः अथास्ति तदा साध्यव्याप्यव्यापकत्वेनोपाधिः साध्यव्यापकत्वनिश्चयान्नोपाधिरित्युभयथापि नोपाधिर्दूषणं न च व्याप्यतदभावव्याप्यमुभयमत उपाधिरपि तदभावोद्भवनेन दोष इति वाच्यं उपाधेरात्मलाभार्थमनुकूलतर्काभावोजीवकत्वेन तस्यैव दोषत्वादिति चेन्न सोपाधावेकत्र साध्यतदभावसम्बन्धस्य विरुद्धत्वादवच्छेदभेदेन तदुभयसम्बन्धो वाच्यः तथा च साधने साध्यसम्बन्धितावच्छेदकरूपमनुकूलतर्काभावोपजीवनमन्तरेणोपाधिरावश्यकस्तथानुकूलतर्काभावोऽप्यावश्यक इति उभयोरपि विनिगमकाभावाद्दूषकत्वम् । अन्ये तु यद्व्याहत्या यस्य साधनस्य साध्यं निवर्त्तते स धर्म्मस्तत्र हेतावुपाधिः स च धर्म्मोयस्याभावात् पक्षे साध्यसाधनसम्बन्धाभावः यथा आर्द्रेन्धनत्वं, व्यावर्त्तते हि तद्व्याहत्या धूमवत्त्वमयोगोलके । अतएव तत्र साध्यसाधनसम्बन्धाभावः पक्षे । एवं भावत्वव्याहत्या ध्वंसे जन्यत्व नित्यत्वयोः सम्बन्धोनिवर्त्तमानः पक्षधर्म्मतावलादनित्यत्वाभावमादाय सिध्यति । तथा वायावुद्भूतरूपत्वं निवर्त्तमानं बहिरिन्द्रियत्वे सति प्रत्यक्षत्वं निवर्त्तयत् प्रत्यक्षत्वाभावमादाय सिध्यति तथा चोभयत्वापि पक्षे साध्याभावसिद्ध्या साध्यसाधनसम्बन्धाभावोऽस्तीति अतएव बाधानुद्भोतपक्षेतरस्यानुपाधित्वं स्वव्याघातकत्वेन तद्व्यतिरेकस्य साध्याव्यावर्त्तकत्वादिति । यत्तूपाधिमात्रस्य लक्षणं व्यतिरेकिधर्म्मत्वं पक्षेतरोऽपि क्वचिदुपाधिः तत्तदुपाधेस्तु तत्तत्साध्यव्यापकत्वे सति तत्तत्साधनाव्यापकत्वं न च धूमवह्निसम्बन्धोपाधिः पक्षेतरत्वं स्यादिति वाच्यम् आपद्यापद्येतरिति तन्न अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमुपाधित्वमिह निरूप्यं तच्च न व्यतिरेकित्वमतिप्रसङ्गात् विशेषलक्षणे वह्निधूमसम्बन्धे पक्षेतरत्वस्योपाधित्वप्रसङ्गाच्च । केचित्तु साधनव्यापकोऽप्युपाधिः क्वचित्तत्र पक्षावृत्तिर्हेतुः यथा करका पृथिवी कठिनसंयोगात् इत्यत्रावयवाश्रितसंयोगत्वं न च तत्र स्वरूपासिद्धिरेव दोषः सर्व्वत्रोपाधेर्दूषणान्तरसङ्करादित्याहुः । साध्यञ्च नोपाधिः व्यभिचारसाधने साध्याविशिष्टत्वात् अनुमितिमात्रोच्छेदप्रसङ्गाच्च ।

स चायं द्विविधः निश्चितः सन्दिग्धश्च साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितोव्यभिचारनिश्चयाधायकत्वेन निश्चितोपाधिः यथा वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभवत्वम् । यत्र साधनव्यापकत्वसन्देहः साध्यव्यापकत्वसंशयो वा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशयाधायकत्वेन सन्दिग्धोपाधिः यथा मित्रातनयत्वेन श्यामत्वे साध्ये

शाकाद्याकारपरिणतिजत्वं न च तेन हेतुना शाकपाकजत्वमपि साध्यं तत्र श्यामत्वस्योपाधित्वादुभयस्यापि साधने अर्थान्तरं श्यामत्वजाते विवादो नतूभयत्व । न चैवं धूमाहङ्कानुमानेऽपि वह्निसामग्र्युपाधिः स्यात् तत्र वह्निनेव तत्सामग्र्यापि समं धूमस्यानौपाधिकत्वनिश्चयात् । अत्र तु मिलातनयत्वव्याप्यश्यामसामग्र्या स्यात्व्यभिचरत्वं कार्यकारणभावादीनां व्याप्यिपाकृकाणामभावात् । अतएव साध्यसामग्र्या सकृ हेतोरपि यत्र व्याप्यिपाकृकमस्ति तत्र सामग्री नोपाधिः यत्र तु तन्नास्ति तत्र साध्युपाधिरित्यभिसन्धाय सामग्री च क्वचिन्नोपाधिर्नतु सर्वत्र दृष्टान्तं यथा तुल्ययोगक्षेमयोरुपाधेर्व्यापकतासन्देहे ईश्वरानुमाने शरीरजन्यत्वाणुत्वादिः यथा च शाकपाकजत्वस्य साध्यव्यापकतासन्देहे मिलातनयत्वे । यत्तु उपाधिसन्देहो नोपाधिर्न वा हेत्वाभासान्तरमिति तदुद्भावने निरनुयोज्यानुयोग इति तन्न सन्दिग्धानैकान्तिकव्यभिचारसंशयाधायकत्वेन दूषणत्वादुपाधेरिव व्यभिचारनिश्चयाधायकतया ।

इदानीमुपाधेर्दूषकतावीजं निरूप्यते । नाप्यस्य व्यतिरेकद्वारा सत्प्रतिपक्षत्वेन दूषकत्वं तदा हि सत्प्रतिपक्षे सत्प्रतिपक्षान्तरवदुपाधेर्दूषणं न स्यात् न च प्रतिपक्षबाहुल्येनाविवक्षार्थसङ्कोचनं यतमप्यक्षो न पश्यतीति न्यायात् एकेनापि बहूनां प्रतिबन्धाच्च व्याप्रियत्वधर्म्मतेति वक्तुं तत्र तुल्यमेव न तु भूयस्त्वमपि एकस्मादनुमितेरदर्शनात् । सन्दिग्धोपाधेरदूषकतापातात्र तद्व्यतिरेकस्य पक्षे सन्दिग्धत्वात् अपि चैवं बाधोद्भावितपक्षेतरस्योपाधित्वं न स्यात् व्यतिरेकेऽसाधारण्यात् पक्षधर्म्मश्चोपाधिर्न स्यात् यथा घटोऽनित्यो द्रव्यत्वादित्यत्र कार्यत्वं, गन्धवान् द्रव्यं स्यात्तत्रैव प्रतीयमानत्वादित्यत्रावयवत्वं, तद्व्यतिरेकस्य पक्षावृत्तित्वात् । न च नावयवोपाधिः, तल्लक्षणसत्त्वात् अन्यथा दूषकत्वसम्भवात् । किन्तु साध्यव्यापकव्याप्यत्वेनोपाधेः साध्यव्यापकत्वे तद्व्यतिरेकेण कथं सत्प्रतिपक्षः, न ह्यव्यापकव्यतिरेकादव्याप्यव्यतिरेकः । नापि व्याप्यिविरुद्धतया असिद्धत्वेनानौपाधिकत्वस्य व्याप्यत्वनिरासात् । नाप्यनौपाधित्वज्ञानस्य व्याप्यिधीहेतुत्वस्य तत्त्वेन व्याप्यिज्ञानकारणविघटकतया व्याप्यत्वासिद्धावनुभवात् । नन्वन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यव्याप्यिज्ञानं प्रति प्रतिबन्धकमित्युक्तम् । न च साध्यव्यापकत्वसाध्यव्याप्यत्वज्ञाने विद्यमाने साधनस्य साध्यव्यापकत्वज्ञानं नोत्पत्तुमर्हतीति वाच्यं न हि साध्यव्यापकत्वव्याप्यत्वज्ञानं व्याप्यिज्ञानकारणं येन तत् प्रतिबन्धकं स्यात् किन्तु साध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वज्ञानद्वारा, नापि व्यभिचारोद्भावकत्वेन । यथा हि साध्यव्यापकव्यभिचारितया साधनस्य साध्यव्यभिचारित्वमनुमेयं तथा साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमुपाधेरप्यनुमेयं व्याप्यिपाकृकत्वात् । नापि साध्यव्यापकाव्याप्यत्वेन व्याप्यिविरोधोद्भावकतया, साध्यव्याप्याव्यापकत्वेनोपाधेरेव साध्याव्यापकत्वसाधनात् तस्मादुपाधिर्हेत्वाभासान्तरमिति । उच्यते आर्द्रेन्धनसंयोगादेरुल्कादिना साध्यव्यापकत्वसाधने व्यापकत्वे निश्चिते दूषकतावीजचिन्तनं यदि हि साध्यसाधनसहचारदर्शनेनोपाधौ साध्यव्यापकतानिश्चय एव नास्ति तदोपाधित्वनिश्चयाभावात् दूषकतैव नास्तीति कः बह्निभावाभावचिन्ता । किन्तु सत्प्रतिपक्षतया व्याप्यत्वासिद्धितया स्वातन्त्र्येण वा यदि दोषत्वं सर्वथा साध्यव्यापकतानिश्चयोवाच्यः तेन विना तेषामभावात् । तस्मादुपाधिनिश्चयाद्व्यभिचारनिश्चयः तन्निश्चयात् संशय इति व्यभिचारज्ञानद्वारा साध्यव्यापकाव्याप्यत्वेन व्याप्यिविरोधोद्भावकतया चोपाधेर्दूषकत्वम् । यद्वा साध्यव्यापकाभावयदवृत्तितया साध्यव्यभिचारित्वमुक्तं न च साधनाभावयदवृत्तित्वमुपाधेरिति वाच्यम् उपाधिमात्रोच्छेदप्रसङ्गात् सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकवत् अवृत्तिगगनादौ साध्याव्यापकत्वात् संयोगादौ हेतौ साधनव्यापकत्वाच्च । अथोपाध्याभासाः । असाधारण्यविपर्ययो यथान्वयव्यतिरेकिणि साध्ये बाधोद्भावितान्यपक्षेतरत्वम् । अप्रसिद्धसाध्यविपर्ययो यथा केवलान्वयिनि साध्ये पक्षेतरत्वादिः । बाधितसाधकविपर्ययो यथा वह्निरनुष्णो जन्यत्वादित्यत्रातकत्वम् । पक्षाविपर्ययो यथा लिङ्गादिकं सकर्तृकं कार्यत्वादित्यत्राणुव्यतिरिक्तत्वम् अत्राणुव्यतिरेकव्यतिरेकस्य लिङ्गादेरकृतत्वेन भागासिद्धेः । पूर्वसाधनव्यतिरेको यथा शर्करारसोऽनित्योऽनित्यद्रव्यवृत्तिगुणत्वात्, रसोऽनित्यो रसनेन्द्रियजन्यत्वान्निर्विकल्पकविषयत्वात् रसत्ववदित्यादौ पूर्वसाधनतायाः प्रयोगान्तरोपाधित्वेनाव्यवस्थितत्वात् कदाचिन्नित्यत्वसाधनव्यतिरेकस्योपाधित्वं कदाचिदनित्यत्वसाधनव्यतिरेकत्वमिति वस्तुव्यवस्था न स्यात् उपाधेर्निस्तेजस्कत्वाच्च । न हि यद्येन

सोपाधिसम्बन्धं तत्तेनानुपाधित्वसम्बन्धं सम्भवति न तु सत्प्रतिपक्षोच्छेदः पूर्वसाधनव्यतिरेकस्यानुपाधित्वे बीजं स्यादनवा यत्नाभासत्वं तत्र पूर्वसाधनव्यतिरेकस्य साध्यव्यापकत्वेनानुपाधित्वात् न च पूर्वहेतोरुत्तर एवासाधकत्वात् सत्प्रतिपक्षवैयर्थ्यं तत्रेति वाच्यम् अन्यहेत्वभाव-विशेषदशायां सत्प्रतिपक्षसम्भवात्। पूर्वसाधनव्याप्यव्यतिरेको यथा अकर्तृत्वानुमाने नित्यत्वादिः। पक्षविपक्षान्यतरान्यो यथा प्रसिद्धानुमाने पर्वतजलह्रदान्यतरान्यत्वम्। पक्षेतरसाध्याभावो यथात्रैव पर्वतेतराग्निमत्त्वं न चात्र व्यर्थविशेषणत्वं दूषणं सत्त्वेप्युपाधेराभासत्वात्। तस्योक्तं यथात्रैव पर्वतेतरेत्यनवद्यत्वम्। एवं वह्निसामान्यादिकमूह्यम्" विवरणं दीधितावादौ दृश्यं विस्तरभयान्नोक्तम्। उपाधिना निर्वृत्तः ठञ् स्त्रियां ङीप्। औपाधिक उपाधिजनिते मिथ्याभूते आरोपिते स्फटिकलौहित्यादौ जपाद्यौपाधिकत्वात् स्फटिके च मिथ्याभूतं लौहित्यमुत्पद्यते इति वेदान्तिनः। नैयायिकादयस्तु तत्र लौहित्यस्य भ्रान्तित्वमुररीचक्रुः। प्रमेयविवेचनेऽस्मिन्नेतयोः पक्षयोर्युक्तायुक्तत्वं यथावस्थितं तदत्र दर्श्यते।

"यस्तु लौहित्यमिथ्यात्वं न सहते स वक्तव्यः किं स्फटिकं द्रष्टा नयनरश्मयः स्फटिकप्रतिफलितजपाकुसुमसम्पर्कयुः? किंवा कुसुमगतरूपमात्रं स्फटिके प्रतिबिम्बितं स्फटिकालम्बना भासते? उत यद्रागादिमणीप्रभयेव कुसुमप्रभया व्याप्तत्वात् स्फटिकोल्लोहितदृष्ट्या वभासते?। अथ या तत्र व्याप्नुवती प्रभैव लोहिता भाति? आद्योल्लिखितवा प्रभया स्फटिके नूतनं लौहित्यमुत्पादितम्! आद्ये नेत्राभिसृतं कुसुममपि प्रतीयेत। यदि च दोषवशात् कुसुमेन संयोगः तर्हि लौहित्यमपि न भासेत तद्युक्तसभायस्य तत्राभावात्। न द्वितीयः क्वचिदपि दृश्यं परित्यज्य रूपमात्रस्य प्रतिबिम्बादर्शनात्। तृतीये तु स्फटिकलौहित्ययोः सम्बन्धोलिख्येति त्वयाप्युपगतमेव स्यात् दृश्यसम्प्रयोगात्। चतुर्थे स्फटिकगौक्ल्यमपि प्रतीयेत अप्रतीतिकारणाभावात्। न च जपाप्रभवा विरोधिगुणयुक्तया गौक्ल्यप्रभयादितं तथासति गौक्ल्यस्य स्फटिकस्यानुभवप्रसक्तेः न हि रूपं विहाय द्रव्यमात्रस्य चाक्षुषत्वं सम्भवति वायोरपि तत्प्रसङ्गात्। पञ्चमेऽपि प्रभा निमित्तकारणं चेत्तदा प्रभापगमेऽपि स्फटिके लौहित्यमवतिष्ठेत्। उपादानं प्रभेति चेत् न मणाविव कुसुमे प्रभाया एवादर्शनात्

प्रतिबिम्बाकारपरिणामो युक्तिसङ्गः चक्षुर्नासिकादि निम्नोन्नतभावस्य स्वयमनानुपलम्भात् । समतलमेव हि दर्पणादि स्वीक्रियते । समतलेन व्यवच्छिन्नं सुखमिति चेत् । तर्हि चाक्षुषमपि न स्यात् । तत्र एततसिद्धम् । विमत आदर्शोमुखव्यक्त्यन्तररहितः तज्जन्यकारणशून्यत्वात् । यथा विषाणजन्यकारणशून्यं विषाणरहितं शशमस्तकमिति । ननु तर्हि शुक्तिरजतवन्मिथ्यात्वापत्तेर्न बिम्बैक्यसिद्धिः प्रत्यभिज्ञा तु व्यभिचारिणी मिथ्यारजतेऽपि मदीयमिदं रजतमिति तद्दर्शनादिति चेत् । विषमोऽहम् । नेदं रजतमिति हि तत्र रजतस्वरूपबाधया रजताभिन्नाया भ्रमत्वे तत्प्रत्यभिज्ञाया अपि भ्रमत्वमुचितम् इह तु न तथा नेदं मुखमिति स्वरूपबाधः किन्तु नात्र मुखमिति देशसम्बन्धमात्रबाधे सत्यप्यत्र मदीयमेव मुखमिति प्रत्यभिज्ञा कथं भ्रमः स्यात् । न च स्वसुखावयवानामचाक्षुषत्वात् कथं प्रत्यभिज्ञानमिति वाच्यम् नासाद्यादिकृतिपयावयवदर्शनादपि घटादिवदवयविनश्चाक्षुषत्वोपपत्तेः । यः पुनर्दर्पणापगमे प्रतिबिम्बापगमः नासौ स्वरूपबाधः दर्पणेऽपि तत्प्रसङ्गात् । ननु तत्त्वमस्यिवाक्येन जीवरूपः प्रतिबिम्बो बाध्यते यः स्थाणुरसौपुरुष इति वह्वाधार्यां सामानाधिकरण्यात् संसार्थविनाशे च मोक्षानुपपत्तेः । मैवम् सोऽयं देवदत्त इति वदैक्यपरत्वेनापि सामाधिकरण्यसम्भवात् विरुद्धांशबाधमात्रेण मोक्षोपपत्तेः । कृतस्य जीवस्य बन्धे मोक्षस्यापुरुषार्थत्वात् । यस्तु मन्यते प्रतिबिम्ब एव नास्ति, दर्पणप्रतिस्खलिता नेत्ररश्मयः पराहत्य बिम्बमेव दर्पणादविविक्तं स्पृशन्तीति, स्वदप्रत्यक्षसुखत्वाद्यनुभवेनैवासौ निराकरणीयः । कथं तर्हि मूर्तद्रव्यस्य सुखस्यैकस्य विच्छिन्नदेशद्वये युगपत् कात्स्न्येन वृत्तिः । दर्पणदेशवृत्तेर्मायाकृतत्वादिति ब्रूमः । न हि मायायामसम्भावनीयं नाम खरशिरश्छेदादिकमपि स्वप्ने माया दर्शयति । नन्वेवमेव जलमध्येऽधोमुखस्य वृक्षप्रतिबिम्बस्य तीरस्थवृक्षेऽपि सति तीरस्थवृक्षोऽधिष्ठानं तत्र च मायया जलगतत्वमधोमुखत्वं चाध्यस्यमिति वक्तव्यम् । न चात्राध्यासहेतुरस्ति । अधिष्ठानस्य साकल्येन प्रतीतेस्तत्कथमत्रावध्यासः । उच्यते । किमत्र वस्त्वावरणाभावादध्यासाभावः ? किं वा दोषाभावात् । आद्योऽखिलध्यासविरोधिनोऽधिष्ठानतत्त्वज्ञानस्य सद्भावात् ? । नाद्यः । नैतन्मायावरणस्यैवाध्यासोपादानतया जडे पृथगावरणानुपयोगात् । एतेन द्वितीयोऽपि निरस्तः । न द्वितीयः । सोपाधिकभ्रमेष्वपाधेरेव दोषत्वात् । न चतुर्थः । निरुपाधिकभ्रमस्यैवाधिष्ठानतत्त्वज्ञानविरोधित्वात् । तर्हि सोपाधिकभ्रमस्य कर्तृत्वादेर्नात्मतत्त्वज्ञानाश्लिष्टत्तिः किन्तु अहंकारोपाध्यपगमादिति चेत् । बाढम् । पारमार्थिकदर्पणाद्युपाधेस्तत्कृतभ्रमस्य च ज्ञानादनिष्टत्तावप्यज्ञानजन्योपाधेरहङ्कारस्य निरुपाधिकभ्रमरूपस्यात्मतत्त्वज्ञानाश्लिष्टौ कर्तृत्वादेर्ज्ञानाश्लिष्टत्तिरर्थात् सिध्यति" ।

परिभाषायां तु उपाधिसन्निकर्षस्थले भ्रममेवाङ्गीचकार न तु तत्र मिथ्यत्वमिति भेदः। "तत्र सङ्केतवज्ज्ञाम सैव संज्ञेति कीर्त्यते । नैमित्तिकी पारिभाषिकौपाधिक्यपि तद्भिदा" इति संज्ञां त्रिधा विभज्य । "उभयाहत्तिधर्म्येण संज्ञा स्यात् पारिभाषिकी । औपाधिकी स्वनुगतोपाधिना या प्रवर्त्तते" इति "यद्वाधनिकसङ्केतग्राह्यित्वात् पारिभाषिकम्। जात्या नैमित्तिकं यद्वत्तौपाधिकमुपाधिना" । "यदुपाध्यवच्छिन्नयत्किञ्चिज्ज्ञाम तदौपाधिकं यथाकाशपक्षादि" इति च यद्वत्प्र०। अत्र उपाधिना यद्वत्स्वच्छेदकरणात् तद्वत्कत्वम् इति बोध्यम्।

उपाधेय त्रि० उप+आ+धा-कर्मणि यत् । १अभिनिवेशनीये २आरोप्ये ३उपाधिना विशेष्ये च । "उपाधेयसङ्करेऽपि उपाधेरसङ्करात्" जगदी०।

उपाध्याय पु० उपेत्याधीयतेऽस्मात् उप+अधि+इङ्-घञ् । "एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः । योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते" इति मनूक्तलक्षणे वेदैकदेशतदङ्गाध्यापके । स्त्रियां ङीपि उपाध्याया उपाध्यायीतिरूपद्वयम । उपाध्यायस्य पत्न्यर्थे ङीष् आनुक् वा उपाध्यायानी "उपाध्यायानी कृतमतो" भा० आ० १अ० उपाध्यायी च । "उपाध्यायान् दशाचार्य आचार्याणां शतं पिता"। "आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम्" मनुः। तन्मरणे एकरात्राशौचम् "आचार्यपत्न्युपाध्यायसगोत्रसम्बन्धिगुर्वग्निसङ्घाध्यायिशिष्येष्वेकरात्रेण" विष्णुः ।

उपानस् त्रि० उपगतमनः शकटं पितरं वा अत्वा० समा०। १शकटसदृशे २पितृसदृशे पितृव्यादौ च । जातौ अच् समा० । उपानस शकटसदृशे क्लीबमन्यादौ शकटे आकरेव्यङ्गतयाऽस्य जातित्वम् । वेदे तु पुंस्त्वमपि "सचायोरिन्द्रचर्क उपानसः" ऋ०१०,१०५,४,

उपानह् स्त्री उप+नह्–क्विप उपसर्गदीर्घः। चर्मपादुकायाम्। "ऋतावरोरुस्य कृधादुपानहौ निवोढुकामेव वहुर्वधूमीं" इति मैत्र०। अत्रोपानहोः चर्मत्वमोतृप्रत्ययात् तस्याः सर्वावयवकत्वं गम्यते तेन छोत्रे (जोजा) इत्यादिप्रसिद्धायां एव तथात्वम् एकदेशमात्रावरकत्वे तु पादुकाया अप्यत्र प्रयोगः। "अध्वक्रमञ्जनं चाक्ष्णोरुपानच्छत्रधारणम्" "क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमासनम्" मनुः छत्रो पानहश्च प्रसि० समा० द्व० अच् समा०। एवमन्यत्रापि द्वन्द्वेऽपि। दण्डोपानहश्चित्यादि "उपानहौ च वासश्च धृतमन्यैर्न धारयेत् "छत्रं नोपानहौ हरेत्" "नोपानत्कश्च यद्भुञ्जे तद्वै रक्षांसि भुञ्जते" मनुः। सप्तमे वैदिके वाक्यभेदे

उपानुवाक्या न० उपगतमनुवाक्याम् अव्ययी० स०। अनुवाक्यायाम्

उपान्त पु० उपनितमन्तेन अव्ययी० स०। १निकटे, २प्रान्ते च। "दिशासुपान्तेषु सखर्ज हविम्" "नयनोपान्तविलोकितञ्च यत्" "उपान्तभागेषु च रोचनाङ्कः" कुमा०। "मेरोरुपान्तेष्वपि वर्तमानः" "उपान्तवानीरशटाहणि हठा रघुः। अत्रोपान्तनिविष्टसञ्चितसुखो' सा०द०"तिरोहितोपान्तलभोदिमन्तरा" किरा०। अन्तस्य सीमाभेदः स च द्वैरूप्यः कार्त्स्न्यः वृत्तिकल्पितश्च। "उपान्तगो निवसेत" इ०र०। अन्तश्च समीपम् अव्ययी०। इत्यन्तसमीपे अव्य०।

उपान्तिक म०त्रि आधिक्यो मा०स०। अत्यन्तान्तिके अतिनिष्टे "बहुपान्तिकयु दृतोमङ्गीकृतः माघः "प्रसभानुपान्तिकमीपदेवजीर्णम्" किरा०। अन्तश्चौ त्रि० अव्ययादाप्सुपेत्यादिना सप्त. प्रातपदिकार्थे प्रत्ययौ "यच्च वीरं न यच्छन्ति धनमुच्चयमौपान्तिकात्" मा०व० अ०

उपान्तिम त्रि० उपान्तमभिमम् अव्ययी० स० उपान्तशब्दात् न डिमच् तस्यविधौ तदन्तस्यिध्यभावात्। अन्तिमोपगते "गुरुभारक्लान्तं गुरुणेव कृषादुत्सारितेनेवोपान्तिमादीनु" नैषा०। सामीप्ये अव्ययी०।२अन्तिमसमीपे अव्य०

उपान्त्य त्रि० उपान्ते भवः दिगा० यत्। अन्तसमीपवर्त्तिनि "अन्योपान्त्यो त्रिभौ कौ द्वौ कालान्तस्त्रिभो मतः" भ०त०। "उपान्तयधुपान्त्यलोपश्चेत्यार्थम्" सि०कौ०।

उपाप्ति स्त्री उप+आप्–क्तिन्। प्राप्तौ, "यदेतानि सर्वाणि ०६ हुत्वोपाप्तानि भवन्तीत्युपाप्तिरिति" श० मा० १०,१,२,६

उपायन न स्त्री उप+आ–इ–क्विप् ल्युट्। उपाहरणे, "न ज्ञातोपायनस्यार्थस्य नाम गृह्णाति" मा० १,१०८,२। "उपायनमिति उपाहरणे" भा०।

उपाय पु० उप+अय–भावे घञ्। १उपगमे। उपायतेऽर्थोऽनेन करणे घञ्। २साधने, स च द्विविधः लौकिकोऽलौकिकश्च तत्र घटादिकं प्रति दण्डादिर्लौकिक उपायः स्वर्गं प्रति यागादिरलौकिक उपायः। "उपायेन च यत्कार्यं तत्कार्यं न पराक्रमैः" हितो०। "पुंसोनेटाभ्युपायत्वात्" कारि०। इत्यां रिपुनिराकरणक्षेत्रेषु सामादिषु च। "चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया"। "उपायमास्थितस्यापि नश्यन्त्यर्था प्रमादतः" माघः। "सर्व्वोपायैस्तथा कुर्य्यात्सीतिस्तं पृथिवीपतिः" मनुः। राज्ञां विजयोपायास्तु सामादयश्चत्वारः "साम भेदश्च दण्डश्च दानञ्चैव चतुष्टयम्। उपाया कथिताह्याद्या स्वार्थसम्पत्तयेभृशम्" इत्यत्रैः एतेषां लक्षणानि तत्तच्छब्दे वक्ष्यन्ते। क्वचित् सप्तोपायाः पठ्यन्ते। "साम दानञ्च भेदश्च दण्डश्चेति चतुष्टयम्। मायोपेक्षेन्द्रजालञ्च सप्तोपायाः प्रकीर्त्तिताः" अङ्कारोपायौ च द्वौ "अङ्कारे तु पुरादिद्विरूपायौ द्वौ प्रकीर्त्तितौ। उपायौ द्वौ प्रयोक्तव्यौ कालात्तु सुविचक्षणैः। सामदानं इति प्राहुः अङ्कारस्त्रयकोविदाः। भेदे प्रयुज्यमाने हि रक्षाभ सक्तु जायते। निपुणे रक्षभङ्गः स्यात्कालौ दूषितौ यदि" इत्यङ्कारिकोक्तेः। प्रयुज्यमानप्रतिसाधनं उपसर्गव्यापारभेदे च "धैर्येरुपायैरपि च प्राहुर्यादुत्तमर्णिकः। तैस्तैरुपायैः संदद्यात् दाप्येदधमर्णिकम्" मनु। ते चोपाया मनुना दर्शिता यथा "धर्म्मेण व्यवहारेण छलेनाचरितेन च। प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च"। तत्र धर्म्म उक्तो बृहस्पतिना "सूक्ष्मलक्ष्मिन्दी साक्षा चानुगमेन च। प्रायेण सा कार्य्य दाक्षेण उदाहृतः" छलादि लोगाक्षिणा "छल याचितसाधनाय क्रीणीहीति, छल कृत्रि दाप्यते यत्र सोपधि। दारपुत्रपशून् क्षुत्वा क्षत्वा द्वारोपवेशनम्। यत्रार्थी दाप्यते ऽर्थं तदाचरितमुच्यते। बहुस्वल्पकमानीय ताडनार्थकृपक्रमं यत्रार्थोदयते यत्र बलात्कारः स कीर्त्तितः" व्यवहारस्तु मनुना क्वय दर्शितः। "अर्थेऽपदशमांतु कारणेन विभावितम्। दापयेद्धनिकस्यार्थं दण्डलेशञ्च यौक्तिकः"। तेन राज्ञा नेटनकपोव्यवहारः" कुल्लू० (नालिश, मेकदमा) तस्तु निःस्रोतव्यवहारेण दापयितव्यः व्यवस्तु कर्मोपपदेऽण धन दत्त्वा, ऋणाधमर्ण्यादि तेन कारयित्वा तत्रोत्पन्न धन तथा दुष्टकीयादित्वाच्च" । ५उपक्रमे च।

उपायन न० उपाय्यते समीपे उपस्थियते उप+अय-ल्युट। १उपढौकने (भेटदेऽोया)"तस्योपायनयोग्यानि रत्नानि सरितां पतिः" कुमा० कर्म्मणिल्युट्। २उपढौकनीये "परस्परेण विश्रान्तस्त्रीषूपायनपाणिषु" रघुः "साधिवेश्म निहितैरुपायनैः" माघः "प्रतीच्छ चोपायनमिति" कादं०। भावे ल्युट्। ३उपगमने "उपायन उषसा गोमतीनाम्" ऋ० २,२८,२, "उपायने उपगमने" भा०। "सङ्कोपायनकीर्त्या उवास" रा०उ०"उपायनकीर्त्या उपगमन कीर्त्तनमात्रेण" गो०भा०।

उपायिन् त्रि० उपायोऽस्यास्ति इनि। १साधनयुक्ते। उप+इण-णिनि। २उपगन्तरि। "सर्व्वान् वोक्षमेनोपायित्वात्" काल्या०१,१,८, "यद्भूमसत्तृजः सर्व्वे उपयन्ति उपगच्छन्ति" कर्क०। "खल्यानाल्येन वोपायित्वात्" काल्या०१,५,१६,एकोऽधः प्राक्पायो मध्याच्चतुर्जायोपायी काल्या० ५,२,२,१, चतुर्जालएव सर्व्वोपायी" काल्या० १८,६,२७, । उभयतः स्त्रियां ङीप्।

उपायु त्रि० उप+इण्-उण्। उपगन्तरि। "तस्मादाहुः वायवः स्थेति उपायवःस्थेत्येवैतेन आहुरुप हि द्वितीयोऽयनीति" शत० ब्रा०१,७,१,१,

उपार पु० उप+ऋ-गतौ कर्म्मणि घञ्। उपागते १समीपे। "अस्ति व्यायामे जनोऽस्य उपारे" ऋ० ७,८६,१, "उपारे उपागते समीपे" भा०।

उपारण पु०उपेत्य न रमणं यत्र प्रभो०। उपेतस्यारतिस्थाने "सुप्त वा सप्तपारणे" ऋ०८,१२,२१, उपारणे ब्राह्मणा उपेत्य यस्मिन् देशे न रमन्ते सउपारणः" भा०।

उपारत त्रि० उप+आ+रम-क्त। १प्रतिनिवृत्ते "उपारताः पश्चिमरात्रगोचरात्" किरा०।

उपारम्भ उप+आ+रभ-घञ् मुम्। प्रारम्भे "सर्व्वकर्म्मोपारम्भे विनियोगः" सन्ध्याप्रयोगः

उपार्ज्जन न० उप+अर्ज्ज्-ल्युट्। आदरसम्भ्रमव्यापार भेदे स च अर्ज्जनशब्दे १६५५ पृ० दर्शितः "ब्रह्मणां सरघानाञ्च क्षत्रा मध्युपार्ज्जनम्" रामा०। एवुल्। उपार्ज्जक तत्कर्त्तरि त्रि०।

उपालब्ध त्रि० उप+आ+लभ-क्त। तिरस्कारेण निन्दिते

उपालम्भ पु०उप+आ-लभ-घञ् मुम् च। निन्दापूर्व्वकतिरस्कारे। ल्युट्। उपालम्भन तत्रार्थे न०। कर्म्मणि ल्युट्। उपालम्भ्य हिंसनीये, "क्रौर्य्यः पशुरुपालम्भ्यः सवनीयश्च" वाजसा०सू०। तिरस्कार्य्ये तु न मुम्; उपलब्ध एवेव।

उपावर्त्तन न० उप+आ+वृत-ल्युट्। १पुनरागमने प्रत्यावृत्तौ। "तदुपावर्त्तनायास्मि मे मनः" रघुः। २भूम्नो लुठने च।

उपावृत्त त्रि० उप+आ+वृत-क्त। १असमाप्तनयनाय पुनःपुनः-र्मिलुठितेऽम्भसि, २प्रतिनिवृत्ते च। "उपावृत्तस्य पापेभ्यो यस्य वासो गुणैः सह" ए०त० भविष्यपुराणम्।

उपावृत् स्त्री उप+आ-वृत-क्विप्। १आवर्त्तिनां समीपे आवृत्तौ। "घृतं ते सम्प्लावृतः सक्तुं त उपावृतः" यजु० १२,८। "खल्वेवावर्त्तनमावृत् तत्समीपवर्त्तिनामावर्त्तनमुपावृत्" वेददी०। २निवृत्तौ च। उप+आ+वृत-क्विप्। उपावृत्तिरप्युभयत्र स्त्री

उपाश्रम पु० उपमितमाश्रमेण अच्०स०। १आश्रमसदृशे प्राणुपमितादिदीक्षादौ। "उपाश्रमाभ्यपरान् यागवत्तान् विविधानपि" भा०शा० ३५अ०। "उपाश्रमान् प्राणुपमितप्राजापत्यादीक्षायोगान्" नीलक०। सामीप्ये अव्य०। २आश्रमसमीपे अव्य०।

उपाश्रय पु०उप+आ+श्रि-अच्कर्म्मणि घञ्। १आश्रयकर्त्तरि "ब्राह्मणोपाश्रयोनित्यसुतृप्तां जातिमश्नुते" मनुः कर्म्मणि अच्। २आश्रयणीये "राजर्षीणां हि सर्व्वेषामन्ते वनमुपाश्रयः" भा०आश्र०४अ०। "त्वं हि नस्तात! सर्व्वेषां दुःखितानामुपाश्रयः" भा०व० ६११ अ०। भावे अच्। ३आश्रये।

उपाश्रित त्रि० उप+आ+श्रि-कर्म्मणि क्त। यत्नाश्रयोऽङ्गीकृतस्तस्मिन् "तथैवोपाश्रिता देवी बुद्धिर्बुद्धिमतांवर!" भा०शा० ४५अ० उपश्लिष्टेति पाठान्तरम्। कर्त्तरि क्त। २लताश्लिष्टे त्रि०।

उपासक त्रि०उप+आस-ण्वुल्। १सेवके २उपासनाकर्त्तरि "चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः। उपासकानां सिद्ध्यर्थं ब्रह्मणोरूपकल्पना" वेदा०। ३स्त्रियां ङीप्। यस्य द्विजस्त्रीत्वात् तथात्वम् स्त्रियां जातित्वात् ङीप्। हेमचन्द्रोक्ते ४बौद्धादयाभेदे यथा वाक्यमुपक्रम्य "आचारात् क्षत्रजातं स्यान्नाङ्गं समवायतः। पञ्चमं भगवत्कर्म्म ज्ञाता धर्म्मस्तथापि च। उपासकान्तस्तदङ्गसरोपप्रातिकादृशः। प्रत्यक्षाकरणञ्चैव विपाकात्ततमेव च। दृश्यैकादश सोपाङ्गान्यङ्गानि द्वादश पुनः" इति। उपासनञ्च चित्तनापरपरपर्य्यायमननात्मिका मानसी क्रिया। सा च क्वचिद्गुणादिज्ञानारोप्य प्रवर्त्तते यथा निर्गुणे ब्रह्मणि सगुणत्वाद्यारोपेण प्रागुक्तवचने निर्गुणस्य ब्रह्मणोरूपारोपेणैव उपासनोक्तेः अतएव "सर्व्वं खल्विदं ब्रह्म तज्जलान् इति

मान्न उपासीत यथाक्रतुरस्मिन् लोके भवति तथेत्य प्रेत्य भवति स क्रतुं कुर्वीत" इत्युपक्रम्य "मनोमयः प्राणशरीरः" इत्यादिना छा० उ० "उपासनायां तत्तद्गुणोपाधयोऽभिहिता निर्गुणे ब्रह्मणि चित्तप्रवेशायासम्भवेन सगुण एव मनोऽभिनिवेश्यम् ततो विक्षिप्तमनसः चित्तैकाग्र्यम् ततः उपासितेश्वरानुग्रहादेव समाधियोगसिद्धिः इति पात० सू०भाष्ययोर्दर्शितम्। "ईश्वरप्रणिधानाद्वा" सू०"प्रणिधानाद्भक्तिविशेषादाविर्जित ईश्वरस्तमनुगृह्णाति अभिध्यानमात्रेण" व्यासभा० "प्रणिधानाद्भक्तिविशेषात् मानसाद्दाढ्यादाविर्भावितः आर्द्रीकृत आभिमुख्यीभूतस्तमनुगृह्णाति अभिध्यानमनागतेऽर्थे दृक्षा, दृष्टमस्याभिप्रेतमस्मिंस्तावन्मात्रेण न व्यापारान्तरेण" विव०। तादृशेश्वरोपासनाऽसमर्थस्तु प्रथमं स्थूलादिभ्यो विविच्यात्मनइन्द्रियाद्यात्मकतया चिन्तनं कार्यं तस्मिन्ने च फलसङ्गः वायुपु०। "इत्थं मन्वन्तराण्येव तिष्ठन्तीन्द्रियचिन्तकाः। भोक्तारः इत्थं सङ्ख्यानि तिष्ठन्ति विगतज्वराः। पूर्णं यत्सकृत्तु तिष्ठन्त्यब्रह्मचिन्तका।" विष्टस्तु तत् पात० भाष्यविवृतौ वाचस्पतिना "अव्यक्तमहदहङ्कारपञ्चतन्मात्रेषूत्तरोत्तरमात्मत्वेन प्रतिपन्नाः तदुपासनागमनतद्वासनावासितान्तःकरणाः पिण्डपातालान्तरभवब्रह्मादीनामन्यतमे लीनाः" ब्रह्मतत्तत्कालपर्य्यन्तं तिष्ठन्तीत्यर्थः। उपासनभेदेऽधिकं वक्ष्यते। तन्नोक्ता उपासकाश्च पञ्चविधा पञ्चदेवतोपासकत्वात्। "शाक्तः शैवोगाणपत्यः सौरश्च वैष्णवः क्रमात्। उपासकाः पञ्चविधास्तत्तन्मन्त्रविधानतः"। पुनस्ते त्रिविधाः। "सात्त्विको राजसश्चैव तामसश्चेति ते त्रिधा"। प्रकारान्तरेणापि तद्भेदसङ्ग्रहं त्रिधा।"पशुवीरस्तथा दिव्य आचारभेदतस्त्रिधा"

उपासङ्ग पु०उपासज्यन्ते धरा अत्र उप+आ+षञ्ज-आधारे घञ्। तूणे। "तूणि च बद्ध्वा वाराहाः सङ्ख्या लोमवाहिनः। समन्तात्तत्कलौताश्चा उपासङ्गे स्थिरण्वये"भा०वि०४२अ० "एतान् सर्व्वानुपासङ्गात् चिरं बभ्रोहि मे रथे" वि० ४५अ० भावे घञ्। २समीपासङ्गे च।

उपासन न० उपास्यन्ते भूयःक्षिप्यन्ते धरा अत्र उप+आस-विक्षेपे आधारे ल्यु। १धरक्षेपयित्र्यां धराभ्यासे अमरः। उप+आस-भावे ल्युट्। २चिन्तने मनने ३सेवने च "नित्यनैमित्तिकप्रायश्चित्तोपासनेन" "उपसनानि गार्हस्थ्यविद्यादीनि" "उपासनस्य चित्तैकाग्र्यं परं प्रयोजनम् अर्चिरादिमार्गेण ब्रह्मलोकप्राप्तिरवान्तरफलम्" इति वेदान्तसारः। "आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः" इत्युपक्रम्य "एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा" गीतायाम् आचार्य्योपासनस्य ज्ञानसाधनत्वेन ज्ञानत्वमुक्तम् आचार्य्योपदेशं विना हि ज्ञानानुत्पत्तिः "आचार्य्योपासनं वेदशास्त्रार्थेषु विवेकता" इत्युपक्रम्य "एतैरुपायैः संयुक्तः सत्त्वयुक्तोऽक्षती भवेत्" याज्ञ० तद्धेतुत्वमुक्तम्। "आचार्य्यमग्निकार्य्यञ्च सम्योपासनमेव च" मनुः। ब्रह्मण उपासनानि च वेदे नानाविधान्युक्तानि तत्र प्रतीकोपासनेतरेषामवान्तरफलमर्चिरादिमार्गेण ब्रह्मलोकप्राप्तिः। प्राप्तब्रह्मलोकस्य तत्र श्रवणमननादिसम्भवेन क्रममुक्तिः "न स पुनरावर्त्तते" इति श्रुतेः तत्र प्राप्तविवेकस्यैवानावृत्तिर्नान्तरापतने "तत्र प्राप्तविवेकस्यानावृत्तिश्रुतिः" सां०सू० उक्तेः। अतएव "इमं मानवं नावर्त्तन्ते" इति स्मृतौ इममिति इदमा विशेषणात् मानवान्तरे आवृत्तिरिति सूचितम्। कार्य्यब्रह्मणोऽधिकारसमाप्तिपर्य्यन्तं तत्रस्थाविनस्तेन सहैव मोक्षः। "कार्य्यान्तये तदध्यक्षेण सहातः परमभिधानात्" भा०सू० उक्तेः ब्रह्मणासह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्" स्मृतेः। प्रतीकोपासनायां तु चार्चिरादिना ब्रह्मलोकप्राप्त्यादि फलम् किन्तु तत्तच्छास्त्रेषूक्तं फलं तत्र तावत् प्रतीकोपासनं तत्फलञ्च भा०सू०भाष्ययोर्दर्शितं यथा "न प्रतीके हि सः" "मनोब्रह्मेत्युपासीतेत्यध्यात्मम्" "आदित्यो ब्रह्मेति" तथा "आदित्यो ब्रह्मेत्यादेशः, "स यो नाम ब्रह्मेत्युपास्ते" इत्येवमादिषु प्रतीकोपासनेषु सर्वत्रः विधेयत्वेनाश्रयत्वेन कर्त्तृत्वं न वेति। किन्तावत् प्राप्तं तेष्वात्मत्वेन एव युक्तः कस्मात्? ब्रह्मणः श्रुतिप्रामाण्येन प्रसिद्धत्वात् प्रतीकालम्बनेऽपि ब्रह्मविकारत्वात् ब्रह्मत्वे सत्यात्मत्वोपपत्तेरित्येवं प्राप्ते ब्रूमः। न प्रतीकेष्वात्मबुद्धिं कुर्वीयात् न हि स उपास्यः प्रतीकानि ब्रह्मात्मत्वेनावगन्तव्यानि। यत्पुनर्ब्रह्मविकारत्वात् प्रतीकानां ब्रह्मत्वं तत्सत्यमित्यसि, तदसत् प्रतीकाभावप्रसङ्गात् विकारस्वरूपोपमर्देन हि नामादिजातस्य ब्रह्मत्वमेवाश्रितं भवति स्वरूपोपमर्दे च नामादीनां कुतः प्रतीकत्वमात्मत्वं वा। न च ब्रह्मण आत्मत्वाद्ब्रह्मदृष्ट्युपदेशेष्वकर्त्तृदृष्टिः कल्प्या कर्त्तृत्वाद्यनिराकरणात् कर्त्तृत्वादिसर्व्वसंसारधर्म्मनिराकरणेन हि ब्रह्मण आत्मत्वोपदेशनिराकरणेन चोपायनविधान

ततश्चोपासकस्य प्रतीकैः समत्वादात्मपक्षो नोपपद्यते । न हि कृत्स्नस्त्विक्कयोरितरेतरात्मत्वमस्ति किन्तु तुरीयांशत्वमेव । ब्रह्मात्मत्वेनैकत्वे प्रतीकाभावप्रसङ्गमवोचाम: । श्रुतो न प्रतीकेष्वात्मत्वदृष्टि: क्रियते" भा० । "ब्रह्मदृष्टिरुत्कर्षात्" भा० । "तेषूपोद्घातरूपेषूत्पन्नः संशयः किमादित्यादिदृष्योब्रह्मगुणाध्यासितव्या: ? किं वा ब्रह्मदृष्टिरादित्यादिष्विति ? । कुत: संशय: ? सामानाधिकरण्ये कारणानुपलब्धात् अत्र हि ब्रह्मशब्दस्यादित्यादिशब्दै: सामानाधिकरण्यमुपलभ्यते "आदित्यो ब्रह्म" प्राणो ब्रह्म" "विद्युद्ब्रह्म" इत्यादिसमानविभक्तिनिर्देशात् । न चात्रात्मं समानाधिकरण्यमवकल्पते अर्थान्तरवचनत्वाद्ब्रह्मादित्यादिशब्दानां न हि भवति गौरश्व इति सामानाधिकरण्यम् । ननु प्रकृतिविकारभावाद्ब्रह्मादित्यादीनां कृष्णसारवादिवत् सामानाधिकरण्यं स्यात् नेत्युच्यते विकारप्रविलयोक्त्यैवं प्रकृतिसामानाधिकरण्यात् स्यात् ततश्च प्रतीकाभावप्रसङ्गमवोचाम । परमात्मयाथात्म्यं वेदान्तानां स्यात् ततश्चोपासनाधिकारोबाधेत परिमितविकारोपादानञ्च व्यर्थम । तस्माद्ब्रह्मण: "अग्निर्वैश्वानर" इत्यादिवदन्यतरत्राप्यन्यतरदध्यासे सति किंदृष्टिरध्यस्तव्येति संशय: । तत्रानियम: नियमकारिण: शास्त्रस्याभावादित्येवं प्राप्तम् । अथवा आदित्यादेरेव ब्रह्मणि कर्त्तव्या इत्येवं प्राप्तम् एवं ब्रह्मादित्यादिदृष्टिभिर्ब्रह्मोपासनञ्च फलवदिति शास्त्रमर्थादा । तस्माद्ब्रह्मदृष्टिरादित्यादिष्वित्येवं प्राप्ते ब्रूम: । ब्रह्मदृष्टिरेवादित्यादिषु स्यादिति । कस्मात् ? उत्कर्षात् ।

स्यात् । यथा च लौकिकन्यायोऽनुमतो भवति । उत्कृष्टदृष्टिर्हि निकृष्टेऽध्यस्तिव्येति लौकिकोन्याय: यथा राजदृष्टि: क्षत्तरि, सचालुगन्तव्य: विपर्यये प्रत्यवायप्रसङ्गात् । न हि क्षत्तृदृष्टिपरिदृष्टीतोराजा निकर्षं नीयमान: श्रेयसे स्यात् । ननु शास्त्रप्रामाण्यादनाश्वासोऽयं [illegible] निर्णयमं सूचयति । उच्यते निर्णीते शास्त्र [illegible] स्यात् सन्दिग्धे तु तस्मिंस्तात्पर्यं प्रति लौकिकेऽपि न्याय आश्रीयमाणो न विरुध्यते । तस्मात् [illegible] शास्त्रार्थेष्वेवाध्यास्यमाणे निकृष्टदृष्टिमध्यस्य प्रत्यवेयादिति सिध्यति । प्राचुर्यादादित्यादिशब्दानां तुल्यार्थत्वमविरोधादुपपद्यतेऽन्यत्र ।

नै: स्वार्थदृष्टिभिरवरुद्धायां बुद्धौ पश्चादवतरतो ब्रह्मशब्दस्य तुल्यदृष्ट्या सामानाधिकरण्यात्तत्स्वभावाद्ब्रह्मदृष्टिविधानार्थतैवावतिष्ठते । इतिपरत्वादपि ब्रह्मशब्दस्यैव एषोऽर्थोन्याय्य: । तथा हि ब्रह्मोत्तादेव: ब्रह्मैत्युपासीत, ब्रह्मैत्युपास्त इति च सर्व्वत्रेतिपरं ब्रह्मशब्दस्तावयति गुणांस्त्वादित्यादिशब्दान् । ततश्च यथा शुक्तिकां रजतमिति प्रत्येतीत्यत्र शुक्तिशब्दस्य शुक्तिकाशब्द: रजतशब्दस्तु रजतप्रतीतिलक्षणार्थ: प्रतीत्यैव हि केवलं रजतमिति न तु तत्र रजतमस्ति, एवमात्मादित्यादीन् ब्रह्मेति प्रतीत्यादिति गम्यते । वाक्यशेषोऽपि च द्वितीयादिर्देवेत्यादिशब्दैरेवोपासक्रियया व्याप्यमानान् दर्शयति "स य एतदेवं विद्वानादित्यं ब्रह्मेत्युपास्ते" "द्यौर्वाव ब्रह्मेत्युपास्ते "य: सङ्कल्पं ब्रह्मेत्युपास्ते" इति । यत्तूक्तं ब्रह्मोपासनमेवात्रादरणीयं फलवत्त्वायेति तदयुक्तं उक्तेन न्यायेनादित्यादीनामेवोपास्यत्वावगमात् । फलवत्तयाद्युपासन इत्यादित्याद्युपासनेऽपि ब्रह्मैव द्योतते सर्वोपनिषत्त्वात् । वक्ष्यति चैतत् "फलमत उपपत्तेरित्यत्र" । ईदृशञ्चात्र ब्रह्मण उपास्यत्वं यत्प्रतीकेषु तद्दृष्ट्यारोपणं प्रतिमादिष्विव विष्ण्वादीनाम्" भा० । एवं प्रतीकोपासनं निरूप्य तत्फलसाम्यं तत्रैव ४ अ० ३ पादे "अप्रतीकालम्बनान्नयतीति बादरायण उभयथाऽदोषात्तत्क्रतुश्च"सू० । "स्थितमेतत् कार्य्यविषया गतिर्न परविषयेति । इदमिदानीं सन्दिह्यते किं सर्व्वान् विकारालम्बनानविशेषेणैवाभानव: पुरुष: प्रापयति ब्रह्मलोकम् ? उताच्चिरादेवेति ? । किं तावत् प्राप्तं सर्व्वेषामेवं विदुषामन्य [illegible] सद्य: मुक्तिफलप्राप्तिरिति स्यात् । तत्र हि नियम: सर्व्वेषामात्मत्वाविशेषेणैवा विद्यास्तरेषुवतारितेत्येव प्राप्ते प्रत्याह । अप्रतीकालम्बनादिति । प्रतीकालम्बनान् वर्जयित्वा सर्व्वानन्यान् विकारालम्बनान्नयति ब्रह्मलोकमिति बादरायणाचार्य्यो मन्यते । नन्वेवमुभयथाभावाभ्युपगमे कथमुदाहोऽस्ति । नियमन्यायस्य प्रतीकव्यतिरिक्तेष्वुपासनेषूपपत्ते: । तत्क्रतुत्वाच्चोभयथाभावस्य सम्भवकोहेतुर्द्रष्टव्य: । योहि ब्रह्मक्रतु: स ब्राह्मणश्चर्य्यमाणोदितिस्मिन्तरं "यथा यथोपासते तदेव भवतीति" श्रुते: । न तु प्रतीकेषु ब्रह्मक्रतुत्वमस्ति प्रतीकप्रधानस्यानुपासनस्य । ननु अब्रह्मक्रतुमानपि ब्रह्म गच्छतीति श्रूयते यथा पञ्चाग्निविद्यायां श्रद्धनात् ब्रह्म नमयतीति" । भवत यत्रैवमात्मत्व वाद उपलभ्यते, तदभावे-

स्तोत्रसंज्ञेच्च तत्प्रकृतत्वाच्च ब्रह्मप्रकृतत्वमेव तत्प्राप्तिर्नेतरेषामिति ज्ञायते" भा० । "विशेषञ्च दर्शयति" सू० । "नामादिषु च प्रतीकोपासनादिषु पूर्व्वस्मात् पूर्व्वस्मात् फलविशेषसूत्तरस्मिन्नुत्तरस्मिन्नुपासने दर्शयति 'यावद्ध्यो नामतं तदस्य यथाकामचारो भवति' 'वाग्वाव नाम्नोभूयसी' 'यावद्वाचोगतं तदस्य यथाकामचारो भवति 'मनोवाव वाचोभूयः" इत्यादिना । स चायं फलविशेषः प्रतीकतत्त्वाद्युपासनासापेक्षते, ब्रह्मतत्त्वे तु ब्रह्मणोऽविशिष्टत्वात्कथं फलविशेषः स्यात् ? । तस्माच्च प्रतीकालम्बनानामितरैस्तुल्यफलत्वमिति" भा० ।

उपासनञ्च मानसव्यापारो यद्यपि देहव्यापारानपेक्षस्तथापि आसीनस्यैव तद्भवति नान्यस्य यथाह या० सू० भाष्ययोः" "आसीनः सम्भवात्" सू० ;"कर्माङ्गत्वञ्चास्मिन् कर्मतत्त्वाद्दानादिचिन्तनेऽपि सम्यग्दर्शने वस्तुतत्त्वात् ज्ञानस्य तदेहेतुव्यापारेण किमनियमेन तिष्ठन्नासीनः शयानो वा प्रवर्त्तेतेत्यनियमे न आसीत एवेति । तत्र मानसत्वाद्युपासनस्यानियमः यत् दक्षिणेतरस्मिन् पार्श्वे शेते इति आसीन एवोपासीतेति कुतः ? सम्भवात् । उपासनं नाम समानप्रत्ययप्रवाहकरणं न च तद्दक्षतो धावतो वा सम्भवति गत्यादीनां चित्तविक्षेपकरत्वात् । तिष्ठतोऽपि देहधारणे व्यापृतं मनो न सूक्ष्मवस्तुनिर्भासक्षमं भवति । शयानस्यापि श्रमादेव निद्राऽभिभूयते । आसीनस्य त्वेवं नार्त्तायको भूयान्दोषः सुष्ठ्वेवं इति सम्भवति तद्धोपासनम्" भा० । "ध्यानाच्च" सू० "अपि च ध्यायतर्थ एवः यतमानप्रत्ययप्रवाहकरणं, ध्यायतिश्च प्रणिधिसाक्षात्क्रियेषु प्रतिसंततदिध्येक्षणविषयाभिप्रणिधिषूपपद्यमानो दृश्यते ध्यायति यज्ञो ध्यायति प्रोक्षितबर्ह्मुरिति । आसीनस्यानायासो भवति । तस्मादासीनस्य धर्म्म उपासनम्" भा० । "अचलत्वापेक्षया" सू० । "अपि च ध्यानवीव पृथिवीमन्त्र प्रक्षिप्यादिषु चलत्वमपेक्ष्य ध्यानविधानादो भवति तत्र क्षिप्तमुपासनमासीनकर्म्मत्वे" भा० । "स्मरन्ति च" सू० "स्मरन्त्यपि च क्षिप्ता उपासनाङ्गत्वेनासनम्" "शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः" इत्यादिना अतएव च ब्रह्मक्षत्रादीनामासनविशेषानासनविशेषोपयोगाच्च" भा० । उपासनस्यानारब्धत्वात् भूयः क्रत्वर्थत्वेऽपि तत्रैवोक्तम् ।

"आ प्रायणात् तत्रापि हि दृष्टम्" सू० ।"आदृत्तिः सर्वोपासनेष्वादर्त्तव्येति चित्तसमाधेरधिकारे । तत्र यानि तावत् सम्यग्दर्शनार्थान्युपासनानि तान्यवधातादिवत् कार्यपर्य्यवसानानीति ज्ञातमेवैषामादृत्तिपरिमाणं न हि सम्यग्दर्शने कार्ये निष्पन्ने यत्र क्वचिच्चिकीर्षितं यावत् अनियोज्यब्रह्मात्मप्रतीतेः याज्ञस्य विषयत्वात् । यानि पुनरभ्युदयफलानि तेषु वा चित्ता हि क्रियन्त्यावृत्तयाङ्गं प्रत्ययभावर्त्तोपरमेत् उत यावज्जीवमावर्त्तयेदिति । किन्तावत् प्राप्तं क्रियन्त्यावृत्तयाङ्गं प्रत्ययमभ्यस्योत्तृङ्जेत् आदृत्तिविधिरुपो यत्नशब्दार्थस्य ज्ञातत्वादित्येवं प्राप्ते ब्रूमः। आ प्रायणादेवावर्त्तयेत् प्रत्ययम्, अन्यप्रत्ययवधाद् दृष्टफलप्राप्तेः। कर्म्मण्यपि हि अन्यान्तरोपभोज्यं फलमारभमाणानि तदनुरूपं भावनाविशेषं प्रायणकाले आलिखन्ति । "सविज्ञानो भवति" "सविज्ञानमेवान्ववक्रामति" "यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः सहात्मना यथा संकल्पितं लोकं नयतीति" चैवमादिश्रुतिभ्यः दृष्टलक्षायूंषादिदर्शनाच्च । प्रत्ययावृत्तेः कथं दृष्टसिद्धिः तत्रा किमन्यत् प्रायणकाले भावनाविशेषमपेक्षेरन् । तस्माद्दो प्रतिपन्नफलभावनालक्षाः प्रत्ययावृत्तेर्वा प्रायणादृत्तिः । तथा च श्रुतिः "स यावत्क्रतुरयमस्माल्लोकात् प्रैतीति" प्रायणकालेऽपि प्रत्ययावृत्तिं दर्शयति । स्मृतिरपि "स यं यापि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय । सदा तद्भावभावितः" इति "प्रयाणकाले मनसाऽचलेनेति" च । लोऽन्तवेलायामेतत् त्वया प्रतिपद्येतेति" च मरणवेलायां कर्त्तव्येषु आवर्त्यति" भा० । प्रतीकाभिषेषु उपासनेषु अर्चिरादिमार्गेण ब्रह्मलोकावाप्तिः फलम् । "अर्चिरादिना तत्प्रथितेः" भा० सू० भाष्योक्तम् तच्च अर्चिरादिमार्गशब्दे अतिवाहिकशब्दे च उक्तम् । युच् उपासनाश्रय स्त्री । "न्यायवर्त्तैर्यमीयस्य मननव्यपदेशभाक् । उपासनैश्च क्रियते श्रवणाभरणात्मा" इत्यु० शैवने च "उपासनानेत्यपितुः स्व इत्यते नैव० । याज्ञिकस्योक्ता भक्तिरुपोपासना भक्तिशब्दे वक्ष्यते ।

उपासा स्त्री उप+आस भावे अ । उपासने "उपासाविधिश्च प्रसंख्यानात्मम्" शां० सू० ।

उपासादित त्रि० उप+आ+सद्–णिच्-कर्म्मणि क्त । प्राप्ते भावे क्त । २प्राप्तौ तत्, तत्कृतमनेन इत्या० इति उपासादितिन् कृतत्वाभे ख्रियां ङीप् ।

उपासित त्रि० उप+आस–सेवनार्थत्वात् कर्म्मणि क्त । कृतोपासने यज्ञोपासनं कृतं तस्मिन् देवादौ ।

उपासि स्त्रीउप+आस-क्तिन् स्त्रीप्रत्ययेऽपि या०युच् च या न क्तिनोबाधकः । उपासनायाम् "स्वर्गापवर्गयोर्मार्गमास्थानमि

मनोविषय । यदुपास्तिमसाद्यत्व परब्रह्मानिरुध्यते" कुसु० ।

उपास्त्र न० उपगतमस्त्रम् उपकरणत्वेन अत्या०स० । अस्त्रोपकरणे तृणादौ" । "राजानौ नीतिमार्गरतौ अस्त्रोपास्त्रकृतिनौ भा०व० १६६अ० ।

उपास्य त्रि० उप+आस–सेवनार्थत्वात् कर्मणि यत् । १सेवनीये २चिन्तनीये "पुत्रवच्च ततो रक्ष्या उपास्या गुरवश्च ते" भा० अनु० ८अ० "गङ्गा सर्वात्मवर्त्मेवोपास्या" भा० अनु० २६अ० उप+आस–ण्यप् । ३सेवयित्वेत्यर्थे ४चिन्तयित्वेत्यर्थे च अव्य० । ४उपास्य सन्ध्यां विधिवत्" स्मृतिः ।

उपाहित पु० उप आसङ्गमर्हितं यतः । १अक्षोपघातादौ अग्नुत्पातरूपे उपद्रवे उप+आ–धा–क्त । २आरोपिते, त्रि० ।

उपेन्द्र पु० गान्दिनीसुते अक्रूरभ्रातृभेदे । "अक्रूरः सुषुवे तस्मात् सुफल्कात् भूरिदक्षिणः । उपमद्गुगुस्तथा मद्गुर्मृदुरारिमेजयः" । आदित्यिपत्नयोमेलः यत्र घोऽरिमर्हणः" हरिः २५तत्रैव १६अध्याये च गान्दिनीसुतत्वमस्योक्तम्

उपेक्षक त्रि० उप+ईक्ष–ण्वुल् । उपेक्षाकारके योगिनि "उपेक्षकोऽसङ्कुसुको मुनिर्भावसमन्वितः" मनुः "दृष्टा मयेत्युपेक्षक एको दृष्टाऽहमित्यपरया स्वया" सां०का० ।

उपेक्षण न० उप+ईक्ष–भावे ल्युट् । १त्यागे २औदासीन्ये च २राज्ञां सप्तविधोपायान्तर्गते उपायभेदे "दानेन भेदेन दण्डेनोपेक्षणेन च" भा० व० १५० । उपेक्षणस्य यथोपायत्वं तथा उपायशब्दे दृश्यम् ।

उपेक्षणीय त्रि० उप+ईक्ष–अनीयर् । १त्याज्ये २प्रतीकारार्थमनालोचनीये च "नक्षत्रं दुरुदादनुपेक्षणीयम्" रघुः ।

उपेक्षा स्त्री उप+ईक्ष–अ । १त्यागे इदं न मम स्यादिति इच्छाभेदे २औदासीन्ये ३अनपेक्षणे च । उपेक्षा च परस्वत्वानभिसन्धानपूर्वकस्वप्राग्भावासमानकालीनस्वत्वाविषयबोधः । उपेक्षायाः स्वत्वनाशकत्वम् स्मृतौ व्यवस्थापितम् "उपेक्षानात्मकं ज्ञानं निश्चयः कारणं भवेत्" आर्यशास्त्रे ५दृष्टप्रयोज्यं न भवतीत्याकारकज्ञानभेदे च "कर्त्तुमुपेक्षा कृतमीप्सितेऽस्मिन्" रघुः । दैर्योगशास्त्रोक्ते चित्तप्रसादनार्थभावनाचतुष्टयान्तर्गते भावनाभेदे । "मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्" पात०सू० ।

उपेत त्रि० उप+इण–क्त । १उपगते २सभीपगते सेवादिधर्मेण २प्राप्ते ३उपनीते च । "यं प्रव्रजन्तमनुपेतमपेतकृत्यम्" भा० स्क० । "न स्त्री जुह्वयाज्ञानुपेतः" स्मृतिः । "अनुपेतः अनुपनीतः" भ० त०रघु० । गर्भाधानार्थं ५स्त्रियङ्गते च "गर्भाधानमुपेतो ब्रह्मगर्भं वन्दधाति" हारीतः "उपेतः स्त्रियमुपगतः" भ० त०रघुनन्दनः ।

उपेन्द्र पु० उपगत इन्द्रम् अनुजत्वात् अत्या०स० । १विष्णौ । स हि जन्मप्रभृति अदितौ इन्द्रादनन्तरं वामनरूपतया संजातः इति तस्य तथात्वम् । "उपेन्द्रो वामनः प्रांशुः" विष्णुस० । अत्र भाष्ये अन्यापि निरुक्तिर्दर्शिता यथा । "ममोपरि यथेन्द्रत्वं स्थापितोगोभिरीश्वरः । उपेन्द्र इति तस्मात् त्वं गास्यन्ति दिवि देवताः" इति हरिवंशवचनात् उपरि इन्द्रः उपेन्द्रः इति । अत्र वासुदेवस्यैव यद्योपेन्द्रनामता, तथा गोवर्द्धनोद्धारणेन गोषु रक्षितासु तत्प्रीतेन गोभिरस्य सर्वोपरिस्थीकारितत्वेन उपेन्द्रनामताऽभिषेकः कृत इति वर्त्तते हरिवं० ७६अ० यथा । "अधमर्षस्तमोलोकस्तस्योपरि महीधराः । नागानामुपरिष्टात्तु पृथिव्युपरि मानुषाः । मनुष्यलोकादूर्द्धं तु खगानां गतिरुच्यते । आकाशस्योपरि रविर्हरिं स्वर्गस्य भानुमान् । देवलोकः परस्तस्माद्विमानगमनो महान् । यतोऽयं कृष्ण ! देवानामेन्द्रे विनिहितः पदे । स्वर्गादूर्द्धं ब्रह्मलोको महर्षिगणपूजितः । तत्र सोमगतिश्चैव ज्योतिषाञ्च महात्मनाम् । तस्योपरिगवां लोकः सिद्धानां पालयन्ति हि । स हि सर्वगतः कृष्ण ! ब्रह्माकायगतो महान् । उपर्युपरि तस्मादि गतित्वं तपोमयी । यां न विदुः सर्वं पृच्छन्तोऽपि पितामहम् । लोकास्त्वधो दुष्कृतिनां नगलोकस्तु दारुणः । पृथिवी कर्मणीलानां लोकं सर्वस्य कर्मणः । स्वर्गस्थिराणां विषयो वायुना तुल्यवर्त्तिनाम् । गतिः शमदमाढ्यानां स्वर्गः सुकृतकर्मणाम् । ब्राह्मो तपसि युक्तानां ब्रह्मलोकः परा गतिः । गवामेव तु गोलोको दुरारोहा हि सा गतिः । स तु लोकस्त्वया कृष्ण क्षीदमानः कृपालुना । हतो पृथिमता वीर ! निधूतोपद्रवं गवाम् । तदेवं समनुप्राप्तो गवां वाक्येन नोदितः । ब्रह्मणश्च महाभाग गौरयाचत वानघ ! । अयं भूपतिं कृष्ण ! देवराजः पुरन्दरः । अदितेर्गर्भमर्यायं पूर्व्वजस्ते पुरातनः । तेजसोऽक्षिणश्चैव यस्ते दर्शितवानहम् । मेघस्वरेण तत्रैव चन्द्रसूर्यौ मे विभो ! । एवं ज्ञानमनाः कृष्ण । श्लक्ष्णेन सौम्येन तेजसा । ब्रह्मणः प्रहृणु मे वाक्यं गवाञ्च गजविक्रम ! । आह त्वां भगवान् ब्रह्मा गावश्चाह गवा दिवि । कर्मभिर्लोकिता दिव्यैस्तव संरक्षणादिभिः । भवता रक्षिता लोका लोकाश्च महात्मयम् । सहयं पुरुषैः सार्द्धं वसुभिः प्रवरैश्चया । कर्म-

वान् पुरुषैर्वाह्यैर्मध्येन हविषा हरान्। स्त्रियं यजत्-प्रहसेन तर्पयिष्यामः कामदाः। तदलाकं गुरुत्वं हि प्राणदस्य भक्षावल'। अद्यप्रभृति नो राजा त्वमिन्द्रो वै भव प्रभो!। तच्छ्रुत्वा वाक्यनैः पूर्णैर्हव्यस्य पयसो घटैः। एभिरद्याभिषिञ्चस्व मया कृत्वावनामितैः। अहं किलेन्द्रो देवानां त्वमुपेन्द्रताङ्गतः। गोविन्द इति लोकास्त्वां स्थास्यन्ति भुवि शाश्वतम्। ममोपरि यदेन्द्रत्वं स्थापितो गोभिरीश्वरः। उपेन्द्र इति लक्ष्मा! त्वां गास्यन्ति दिवि देवताः"।

"ततः यज्ञस्तु तान् दृष्ट्वा घटान् दिव्यपयोधरान्। अभिषेकेण गोविन्दं याजयामास योगवित्। ह्रद्याऽभिषिच्य-माणं तं गायत्रा: सप्त यूथपैः। स्तनैः प्रस्रवसंयुक्तैः सिषिचुः लक्ष्मसम्भवम्। मेघाश्च दिवि सङ्गाभिः सा-मृताभिः समन्ततः। सिषिचुस्तोयधाराभिः सिच्यमानं तमव्ययम्। वनस्पतीनां सर्वेषां सुखावेन्द्रनिभं पयः। ववर्ष पुष्पवर्षञ्च मेदुरान्धोणि चाम्बरे। स्तुवन्ति स्तनयः सर्वे वाग्भिर्मन्त्रपरायणाः। एकार्णवविधिक्लिन्ना दधार वसुधा वपुः। प्रसादं सागरा जग्मुर्ववृधुः सरितां जलैः। चार्गस्यो विबभौ भानुः सोमो नक्षत्रसंयुतः। दैत्यैः प्रथमं लब्धं लक्ष्म्या निर्वर्तनं रुपाः। प्रवालपत्रशाखाः पुष्प-वन्तश्च पादपाः। मदं प्रमुञ्चन्नुन्मत्ता यातास्तोषं वने द्विजाः। अलङ्कृता मालवर्षैर्धातुभिर्भान्ति पर्वताः। देव-लोकोपमो लोकस्तृप्तोऽमृततरङ्गैरिव। आसीत् लक्ष्म्याभि-षेके हि दिव्यः स्वर्गरसोत्सवः। अभिषिञ्चन्तु तं गोभिः सक्रो गोविन्दमव्ययम्। दिव्यमाख्यान्वरधरं देवदेवोऽब्र-वीदिदम्। एष ते प्रथमः लक्ष्म! नियोगो गोषु वः कृतः"। हरिवं १७७अ०। "यज्ञस्तु क्षयमागत्य दैवतैः सह हरिहरा। अभिषिञ्चाब्रवीत् लक्ष्मणमेन्द्रेति यचोचतिः"। वासुदेवस्यै-वेन्द्रेण उपेन्द्रनाम्नाऽभिषेकः कृतः दृश्यताम्। भा०८स्क०२२ अ०। तु वामनस्यैव तच्छ्रावणात् यथो वामनेन यज्ञेदमनाल-म्बरम्। "लक्ष्मप्रधादितेः प्रीत्यै सर्वभूतभवाय च। लोकानां लोकपालानामकरोत् वामनं पतिम्। वेदानां सर्वदेवानां धर्मस्य यशसां शिवः। मङ्गल्यानां व्रतानाञ्च कल्पं स्वर्गापवर्गयोः। उपेन्द्रं कल्पयाञ्चक्रे इति सर्व-विभूतये इति" "प्राप्य त्रिभुवनञ्चेन्द्र उपेन्द्रभुजपालितः" इति तत्रैव। वामनस्य उपेन्द्रत्वमिन्द्रानुजातत्वात् वासु-देवस्य तु पूर्वोक्तप्रकारेण तच्छ्रावता उभयोरेव एक परमेश्वरांशत्वात् न विरोधः। "तदिन्द्रसन्निकृष्टमुपेन्द्र! यद्वत्" माघे नारदस्य वासुदेवसम्बोधनतया प्रयोगः।

उपेन्द्रवज्रा स्त्री "उपेन्द्रवज्रा जतजास्ततो गौ" इति छ०र० उक्ते एकादशाक्षरपादके अन्त्यभेदे। अस्यास्य इन्द्रवज्रया सहैक्यने यथोपजातित्वं तथा इन्द्रवज्रायाश्च दर्शितम्।

उपेय त्रि० उप+इण्-यत्। १उपायसाध्ये, २प्राप्यवे च। २उपगम्ये "उपेतारमुपेयञ्च सर्वोपायाश्च कृत्स्नशः" मनुः "शातित्वेनानुपेयास्ताः" मनुः। ३अभिगम्ये "भूधरव्यि-रक्षुपेयमागतम्" माघः। "उपेयमभिगम्यं" मल्लि०

उपेयिवस् त्रि०उप+इण-क्वसु लोकेऽपि त्रि०। उपगते "प-चाद्वेदमुपेयुषे"कुमा०"उपेयिवांसि कर्त्तारः पुरीमालात यालयोम्। राजन्यकानि" "उपेयुषोमोक्षपथं मनस्विनः" माघः। स्त्रियां ङीपि उपेयुषी।

उपोढ त्रि० उप+वह-क्त। सन्निवेशविशेषयुक्ते १व्यूढे सैन्ये २निकटे, "तदुपोढेषु नभस्वरैः पृथक्तः" किरा०, "वराङ्-नुपोढैः प्रत्यासन्नैः" मल्लि०। ३लब्धे लतविवाहे च। भावे क्त। सैन्यविन्यासभेदे व्यूहे न०।

उपोत त्रि०उप+वेञ्-क्त। उपस्यूते। गौरा०ङीष्। पूति-कायां स्त्री शब्दरत्ना०

उपोत्तम त्रि० उपगतमुत्तमम् अव्ययीभावेन अत्या० स०। उपान्तिमे अन्त्यात् पूर्व्वतने। "गुरूपोत्तमयोः षाड्-गोत्ते"। "योपधाद्गुरूपोत्तमाद्वुञ्" "भाल्लुपोत्तमम्" "उपोत्तमं रिति" पा०

उपोदक पु० उपगतमुदकम् अत्या०स०। उदकसमीपस्थे। "प्रजापतौ त्वा देवतायामुपोदके" यजु०१५,६, "अयं वै लोक उपोदकस्तदेनं प्रजापतौ देवतायामुपोदके लोके निदधाति" शत०ब्रा०१२,८,२,१, सायणेऽप्यर्थे। २उदकसमीपे अव्ययम्।

उपोदकी स्त्री उपगतमुदकमस्य गौरा०ङीष्। पूतिकायाम् (पुदीना)। राजनि०। "द्वादश्यां पारणं कुर्याद्व-र्जयित्वाऽमुपोदकीम्" ई०त०कूर्म्मपुराणम्।

उपोदिका स्त्री उपाधिकमुदकं यस्य उदादेयः संज्ञायां कन् अतइत्त्वम्। पूतिकायाके अमरः तत्पाकादि प्रकारगुणादि वैद्यके उक्तम्। "एकाङ्गं यदुमोपेता किमन्यैर्व्यञ्जनान्तरैः। तयुक्तैरानतव्याजैर्हसन्त्येषा उपोदिका। वटपलाग्यशुभ-मलिका परिभृष्टतैलसुपाचिता। नवचिञ्चुवासलवासिता परिभोक्तृचित्तसुविकाशिका। सुतप्तवतैलविपाचिता सुख-नाम्लतक्रसुपाचिता। सूपोटिकाव्यभक्षिता भोक्तृ-राशु रसनाप्रनर्त्तकी। पोदिका गीतका वल्ली क्षेत्रजा

यातपिसङ्घा । पश्चात् दोषशमनो निद्राप्रवृत्तिकरी मता" उपाधिसत्तदं वल उदाहेयः गौरा० ङीष् स्वार्थे कन् वा ह्रस्वः । उपोदीकाऽपि स्त्री

उपोदग्रह पु० उप+उद्+ग्रह-अप् । स्नाने । "तस्माद् उ-त्तपोदग्रहमिति" मा० उ० । "उपोदपूर्वकग्रहेः स्नानार्थ स्वदर्शनात् तथार्थत्वम् ।

उपोद्घातः पु० समीपवर्त्तिनः प्रस्तुतस्य उद्घातः उद्भवनम् स्वार्थे घञन्तम् अत्र । उप+उद्-हन-गतौ नत्वर्थत्वात् स्नानार्थता आधारे घञ् । प्रस्तुतसिद्ध्यर्थमाक्षेपलाभके सङ्गतिभेदे । "चित्तां प्रस्तुतसङ्ग्रार्थोत्तपोद्घातं विदुर्बुधाः" अमरटीकायां विद्वतिः । तदर्थवर्णने च । अत्रयोपोद्घातेन विधिरुत्तानत्वादारभ्यं व्यवस्थापयति" होधि० १प्रारम्भे च

उपोद्वलन न० उप+उत्+वल-ल्युट् । उद्वीपने उत्तेजने ।

उपोषण न० उप+उष-ल्युट् । उपवासे अक्षोरात्राभोजने । "प्राप्ते श्रीरामनवमीदिने मर्त्तोविमूढधीः । उपोषणं न कुरुते कुम्भीपाके महीयते" । "उपोषणं नक्तमयाचु दृष्यन्नाभेव धारणम्" ति० त० अनुक्तम० । उपवास-शब्दे विद्वतिः । उपवासस्य उपदाक्षसाधनत्वात् तथात्वम् ।

उपोषित न० उप+वास+भावे-क्त । उपवासे । "नक्ति स्त्रीणां पृथग्यज्ञः न व्रतं नाप्युपोषितम्" मनुः । कर्त्तरि क्त । २उपवासकर्त्तरि त्रि० । "उपोषितो द्वितीयेऽह्नि पूजयेत् पुनरेव ताम्" दुर्ग० त० पु० ।

उपोष्य त्रि० उप+वस-अधर्मकत्वादयोगे कालस्य धर्मसंपु-विधानात् ण्यति आ० ण्यप् । १उपवासेन यापनीये तिथ्यादौ । "त्रिमध्यव्यापिनी या तु सैवोपोष्या सदा तिथिः" कालमा० पु० । उप+वस-ण्यप् । २उपवास' शब्देतर्थे अव्य० ।

उभ त्रि० वप-क्त । ज्ञानवापे धान्यादौ अधिकरणे क्त । २उप्त-धान्यादौ क्लेत्रे । "उप्तं यत्रेव तदभूदसदीय । रिक्तं भजनु कृतं कृषकराजनिवोप्तमूप्यम्" भाग० । ३सञ्चिते च । "पर्य्युप्तरिक्तमिति" भार० स्त्री० । परिवर्त्तनाभावेन उप्तपरिरक्षम् सञ्चितपरिरक्षम्" श्रीस्वामी० । भावे क्तिन् । उप्ति वपने स्त्री "बीजानामुप्तिरिष्टा स्यात्" मनुः ।

उप्तक्षेष्ट त्रि० पूर्व्वमुप्तं पश्चात् लष्टं पूर्व्वकालेष्टादिना ष० । बीजवपनानन्तर लष्टे क्षेत्रे (बीजाक्षते क्षेत्रे) । (आक्षान)

उप्तिम त्रि० वप+क्त्रि अप् च । वपनजाते ।

उप्य त्रि० वप-या० ण्यति ण्यप् । वपनीये संस्कारादौ "दोषितवे इमतप्येतोप्यानां येनेच्छेत् विधिवेत्" स्मार्त्ता० २५,१२,२० । "उप्यानां व्रीहियवादीनाम्" मेधा० ।

उभ आर्जवे उद्वा० पर० अक० सेट् । उभति औभीत् । विधि उभयति ते औभिभत् त । "इन्द्राग्नीरक्ष उभ-तम्" ऋ० १,२१,५ । "उभन्तु त्वा घृताः पर्व्वतासः" ६,५२,१ । यङ् नि० यङ्ग दः उभग्रः अभ्युः । नि+उभ (उद्धरण) उत्तानस्रावतानकरणे व्युत्पत्ति उत्तानं वस्तु अवतानं करोतीत्यर्थः ।

उभक्त त्रि० उभ-क्त । आर्जवयुक्ते । ततः तिका० फिञ् औभायनि तदपत्ये पुंस्त्री । तिकादिवाद्दित्वात् गोत्रप्रत्ययस्य बहुषु इतो लुक् । उभकवृषाः ।

उभ(भ्रा) पूर्त्तौ तुदा० प० सक० सेट् । उभति औभीत् । उदोभ । उभ्नाति उभ्नीत् अत्र मुचादिरिति कविकल्प तन्नाते ओभ्नात्' ओपधत्वात् ओपधाओधः उभ्नाम् बभूव आस चकार । वेदे नवप्रत्ययः उभ्नि उभ्नाति "हृदा-व्यौभ्नादुशमानओजः" ऋ० ३,१८,३ । "इमामूर्ज्जं गा ये सादम् परिस्रसद्भिस्" ऋ० ४,१,१५ । "ऊर्ज्जमूर्ज्ज कामदुरस्यौभ्नात्" । श्लीलमूर्त्ते" भट्टिः । भा० अतै लुकि रूपम् । अभ्नमते लुकि रूपम् ।

उभ त्रि० द्वि० । उभयोः-भक् । उभ-पूर्त्तौ क वा । द्वित्वावि-शिष्टे एकत्वापेक्षायां प्रथमं द्वित्वस्यैव ग्रहणेन द्वित्व-स्यैवात्र स्थानद्वारा अवयवत्वात् पूर्व्वशब्दावोधकत्वात् तथात्वम् । "उभौ यदि व्योम्नि पृथक् प्रतेताम्" माघः । "उभावपि हि तौ धर्म्मौ सम्यगुक्तौ मनीषिभिः" "ब्रह्मक्षत्रा अपणावभौ" "आत्मन्य प्रयतोनित्यमुभे सन्ध्ये समाहितः" मनुः । ततः इतिकरणे नित्यम् अव्यय । "उभयपक्ष-विनीतविद्याः" रघुः । उभयविधः, उभयथा उभयतः उभयत्र । अस्य सर्व्वादि० सर्व्वनामकार्य्यम् तेनात्र द्वित्वना-त्मत्वेन अवयवार्थाभावेऽपि टेरत्वम् । उभौ भागौ । स्वार्थे तद्धितकनि तु अवयवप्रसङ्गः । ततः प्रथमाषष्ठ्यौ समभ्यर्थे तसिल् अव्यय । उभयतस् । द्वाभ्यां द्वाभ्यिभ्यां द्वयोरित्यर्थे च अव्य० "तस्मात्तः पुनाभ्युभयतः पुरुषा-नेजविंशतिम्" भाग० । "यस्मिं योभयतोऽन्नाद्यमात्मन दधतेऽमृता वा" । "ओभयः फलपाकान्ताः बहुवृक्षलतौषधा-अमृताः फलपाकान्ते ते वनस्पतय स्मृताः" । पुनश्च, फलिनश्चैव ह्यान्नाद्यभयतः स्मृताः" मनुः । प्रकारे याच् अव्यय । उभयथा द्विप्रकारेण अव्य० । "नेव नः प्रियतमोभयथाऽर्हसि वक्तुम् प्रथमे पुरुषे वा" नैष० । "विनाशे नाशे वा तव खलु विधेयोऽभयधा" ।

प्रयो०। सप्तम्यर्थे तस् अव्यय्। उभयत इयोरित्यर्थे अव्य० "उभयतश्चरौ हनोन्द्रः" जातरूप०"द्वौ दैवे पितृकार्ये त्रीनेकमुभयत्र वा" छन्दो०। अस्मि युष एद्युस् वा-अव्यय्। उभयद्युस् उभयेद्युस् च द्वयोरह्नोरित्यर्थे अव्य०। "यो अन्येद्युरुभयद्युरभ्येति" अथ०१.२५,४। "उभयेद्युरात्मा प्राप्तौ परोपोह्या मनीषिभिः" स्मृतिः।

उभय त्रि०उभ+अवच्। द्वावयवे हित्वविशिष्टे अस्य हित्वबोधकत्वेऽपि एकवद्भवचनान्तत्वेन प्रयोगः न द्विवचनप्रयोगः। वि०कौ०।"उभयमानशिरे वसुधाधिपाः"रघुः। सर्वादि० सर्वनामकार्यम्। उभयस्मै उभयेषाम्। "अथा न उभयेषाममृत मर्त्यानाम्" ऋ०१,२६,६। अस्ति वा यौ। उभये उभयाः। "परेऽवर उभया अमित्राः" ऋ०२,१२, १८। 'ये जना उभये भुञ्जते विशः"२,२४,१०। "किं तत्साध्यं यदुभये साधयेयुर्न सङ्गताः" रघुः। स्त्रियां गौरा०ङीष्। "उभयीं विहितुमुभयवाप्तुः" रघुः।

उभय(व)चर पुंस्त्री०उभयत्र उभयोर्वा चरति चर-ट। भूम्यन्तरिक्षचरे पक्षिभेदे स्त्रियां ङीष्। सूर्याक्कान्तरायेहार्दयहितोऽस्यत्वयोगभेदे स्त्री "सूर्याङ्कुज्यवेऽपि च धने च तथोभयत्र संस्थैर्विना विधुसुतादि खगेषु योगान्। वेधौ च योगिमुभयत्रचरौ गुणीन्द्राः स्पष्टं फलानि विविधानि वदन्ति तेषाम्" "समो राशोभयचरीप्रभो बकुष्टयभाक्" जातकपद्धतिः।

उभयतोदत्(न्त) पुंस्त्री० उभयतोदन्तः दन्तपङ्क्तिरस्य वा दन्तादेशः। उभयदन्तपङ्क्तियुक्ते मनुष्यादौ। "पञ्चनखा भक्ष्यान् मनुष्यांश्च व्याघ्रांश्चोभयतोदतः" मनुः। स्त्रियां ङीष्। दन्तादेशाभावपक्षे तत्त्वार्थे स्त्रियां वा ङीष्। "उभयतोदन्ता प्रजाः प्रजायन्ते" यत०ब्रा० १,६,२,२,

उभयतोमुख त्रि० उभयतो मुखे यस्य। द्विमुखे सर्पादौ "उभयतोमुखाभ्यां पात्राभ्याम्" यत०ब्रा० ४,७,१,७, स्त्रियां स्वाङ्गत्वाभावे टाप् स्वाङ्गे तु ङीष्। उभयतोमुखी धेनुः।'सवत्सा रोमतस्त्वानि युगान्युभयतोमुखी। दाताऽसौ स्वर्गमाप्नोति पूर्त्तेन विधिना ददत्। यावद्वत्सस्य पादौ द्वौ मुखं योनौ च दृश्यते। तावत् गौः पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति" याज्ञ०उक्तौ धेनुभेदः। अन्यत्र द्वयमेव सत्कान्तिसंयोक्ता। "उत्क्रान्ते तु प्रदत्तस्य दुग्धोत्क्रान्तिसङ्गदये। तुभ्यं संप्रदहे नाम्ना यावत्सुत क्रान्तिसंस्थितम्" विधा० पा० ब्रह्मानन्दः।

उभयतश्चयीर्णा स्त्री उभयतः यीर्णे यस्याः यीर्णादेशः ङीष् अङ्गोपः विसर्गस्य वा षः। उभयतःयीर्णदुग्धप्रावरणादिमुक्तायां गवि "अदितिरस्युभयतश्चयीर्णा" यजु० ४,१८, "उभयतः यीर्णे यस्याः स्त्रीतिरोमस्वादन्तयोः प्रायश्चीयोदयनायोः यीर्णत्वम् "हे यीर्णे प्रायणायोदयनीये" याज्ञो०।" वेददी०।

उभयवेतन पु०उभयो० भेदो स्वामिनि च वेतनं यस्य अवच्। दूतभेदे यो हि स्वामिसकाशात् प्रच्छन्नं भृतिं गृहीत्वा तद्भेदयत्नमुत्सृजते तदीयदासत्वेनात्मानं ख्यापयित्वा तत्सकाशात् भृतिं गृह्णात्यपि पूर्वस्वामिनोऽहितभृतिनिरूपणार्थमुत्तरस्य सचिवादिभेदं जनयति स उभयवेतन इत्युच्यते।"अज्ञातदोषैर्दोषज्ञै रुद्दुष्टोभयवेतनैः। भेद्याः शत्रोरभिव्यक्तायासनैः सामवायिकाः" माघः। तादृशदूतानुद्धारान्तरे चाणक्येन प्रेषिता बहवो वर्णिताः ते च मन्त्रयोक्तोः प्रधानसचिवादीन् राजसादीन् ततो विभिद्य चाणक्यकार्यं साधितवन्तः तच्च तत एवावसेयं विस्तरभयान्नोक्तम्।

उभयादन्ति अव्य०उभौ दन्तौ प्रहरणं यत्र युद्धे इदमर्थाद् दन्त उभा०अयच्। उभयदन्तसाधने युद्धे एवम् उभयाङ्गेषि उभबाहाङ्ग उभयाहस्ति उभयाकर्णि इत्यादयोऽपि नि० साध्याः तत्तत्साधनयुद्धे। उभाहस्ति उभाकर्णि उभाबाहु उभादन्ति इत्यादयः नि० साध्याः तत्र नायच्। तेऽपि तत्तदर्थेषु।

उम् अव्य० उ-वा०डुमि। १रोषे, २स्वीकारे, ३प्रश्ने च।

उमा स्त्री ओ. शिवस्य मा लक्ष्मीरिव उं शिवं माति मन्यते पतित्वेन मा+क वा। शिवपत्न्याम् १दुर्गायाम् "उ शेति माता सपत्ने निषिद्धा पश्चादुमाख्यां सुमुखी, जगामेति"कुमारे निरुक्तायां २पार्वत्याम्। "यदाह तपसे पुत्रीदानं गतस्तु मेनका। उ मेति,तेन सोमेति नाम प्राप तदा सती" कालि०पु०। "मात्रा निषिद्धा तपसे यदा सा तयामुमाख्यां भवभक्तिभाविनी"शिवपु०अत्रपक्षे उ मेति शब्दः नामहेतुत्वेनाख्यातः अर्थ आ०अच्'यश्चेति"पा० आकोपे टाप्। "उमामुखे बिम्बफलाधरोष्ठे"'उमामुखन्तु प्रतिपद्य लोलाः' "उमाकृपेण ते यूयम्'"उमा वधूर्भवान् दाता" इति च कुमा०। "नियोजयितुकामस्तु उमायां चन्द्रशेखरम्" वि०पु० उमामाहेश्वरव्रतम्। व्रतशब्दे वक्ष्यते। वे-वा०मक् संप्रसारणम्।१फरिद्रायाम् ४अतसीवृक्षे (मसिना) उमाकटः उम्यः औमीनः।५कौशौ ६कालौ, ७मालौ च।

उमाकट पु० उमाया अतस्या कपर्दिन्याया वा रजः कटच् । अतस्या कपर्दिन्याश्च रजसि ।

उमागुरु पु० ६त० । हिमालये तस्य उमायाजनकत्वात्तथात्वम् । उमाजनकादयोऽण्यत्र । तस्याश्च तदुत्पत्तिकथा शिवपु० दृश्या ।

उमाचतुर्थी स्त्री उमायाजन्मदिनम् चतुर्थी । ब्रह्मशुक्लचतुर्थ्याम् "ब्रह्मशुक्लचतुर्थ्यान्तु जाता पूर्व्वमुमा सती । तस्मात् सा तत्र संपूज्या सर्व्वाभिः सौभाग्यवृद्धये" ब्र० पु० ।

उमापति पु० ६त० । महादेवे । स च यथा तासुपरमेश्वरे तत्कथा शिवपु० दृश्या तन्मूलकं कुमारे च वर्ण्यिता एवमन्यत्रापि पुराणे दृश्या । "मेनां यावत् सतीं प्राप्य हिमाचलपतिव्रताम् । उमारूपा हि तपसा पतिं प्राप पिनाकिनम्" । कार्यीस० उमाधवाद्योऽण्यत्र ।

उमावन न० उमाप्रीतये वनमत्र । पुरभेदे शोणितपुरे हेम० ।

उमासहाय पु० ६त० । महादेवे दुर्गासहायतत्सहचरादयोऽण्यत्र ।

उमासुत पु० ६त० । कार्त्तिकेये । तत्कथा अग्निकुमारशब्दे ५५५ पृ० शिवपुराणे च दृश्या । उमातनयपार्व्वतीसुतादयोऽण्यत्र

उम्बर पु० उम्बत्यव्यक्तशब्दं वृणोति वृ अच् । १हारोर्द्धकाष्ठे, २गन्धर्व्वभेदे च । "उम्बरस्तुम्बुरुश्चैव जगुरुत्वे च षड्गणान्" हरि० १२८अ० ।

उम्बी स्त्री उम्+वा–क गौरा० ङीष् पृषो० वस्य बः । "मञ्जरी तद्वद्भक्षा वा यवगोधूमयोर्भवेत् । दग्धानलेन सम्मृष्टा बुधैरुम्बीति सा स्मृता" इति भा० प्र० भक्षायाम् अर्द्धपक्वयवगोधूमयोर्मञ्जर्य्याम् । "उम्बी कफप्रदा बल्या लघ्वी पित्तानिलापहा" भा० प्र० ।

उम्बुर पु० उम्+ब–क उत् रपरः । हारोर्द्धकाष्ठे ।

उर्व्वि त्रि० उर्व्व–इन् । पूरके । ततः ङीप्–आताद्यर्थे टकञ् । और्व्विक तज्जातादौ त्रि० ।

उर्व्वस न० उर्व्वाया अतस्या भवं लेलम् वा वत् । अतसीभवतैले पक्षे खञ् और्व्वीन तत्रार्थे न० ।

उर्व्वोचा स्त्री अप्सरोभेदे । "ऋतुस्थला घृताची च विश्वाची पूर्व्वचित्तिपि । उर्व्वोचेति च विख्याता" भा० आ० १२१अ० ।

उर गतौ सौ० पर० सक० सेट् । ओरति औरीत् उवोर अरत्; उर् पुंस्त्री उर–क । १मेषे स्त्रियाम् अजा० टाप् । "अजा-वि मेषिरेषासुराम्" ८,२४,१, 'उरां मेषीम्' भा० २गन्धरि त्रि० । "उरामधिरा वसुनेषु" ऋ० ८,६६,८ ।

उरःक्षिका स्त्री ७त० । वक्षोहारे अमरः ।

उरग पुंस्त्री० उरसा गच्छति उरस्+गम–ड सकोपच । १सर्पे, स्त्रियां जातित्वात् ङीष् पादमूलतया उरसैव तेषां हि गमनम् । "भित्त्वोत्थितं भूमिमिवोरगाणाम्" "विलमत्यनाविषोरगौ" "अकृतीवोरगस्तता" रघु । २तद्देवतायां अश्लेषानक्षत्रे । "उरगविधिषताख्याः सर्व्वरीनाथदारे" ज्यो० त० । ३सीसके तस्य नागैर्जन्यनागभेदोपचारात्तथात्वम् । अस्त्रियाम् ५८१ पृ० विवृतिः ।

उरगभूषण पु० उरगोभूषणमस्य । सर्पभूषणे महादेवे

उरगराज पु० ६त० टच् समा० । १सर्पराजे वासुकौ । उरगोराजेव उपमि० स० । २महासर्पे च । "एकस्तैरेवोरगराजराज्ञवः" माघः उरगेशतिन्द्रादयोऽप्यत्र । "उरगेन्द्रमूर्द्धकृतरत्नसन्निभे" माघः । [तथात्वम् ।

उरगस्थान न० ६त० । पाताले तेषां तत्रस्थितत्वात् पातालञ्च

उरगाशन पु० उरगानश्नाति अश–ल्यु ६त० । सर्पभक्षके १गरुडे च २मयूरे उरगभक्षादयोऽप्यत्र । "खावासभाग मुरमाशनकेतुवच्छा" माघः ।

उरङ्ग पुंस्त्री उरसा गच्छति उरस्+गम–ड नि० । सर्पे स्त्रियां जातित्वात् ङीष् । [सर्पे स्त्रियां जातित्वात् ङीष् ।

उरङ्गम पुंस्त्री उरसा गच्छति उरस्+गम–अच् सकोपः ।

उरण पुंस्त्री ऋ–क्यु, धातोरत्व रपरः । १मेषे स्त्रियां जातित्वात् ङीष् । "हकीवोरणमाखाद्य खल्वराद्याय गच्छति" भा० मा० ६५ अ० । "द्व उरणं जघान नव चक्रुश्चांसं नवतिं च वाहून्" ऋ० २,१४,४,२ दर्द्दुभट्टस्ते पु० स्वामी ।

उरणाक्ष पु० उरणस्य मेषस्य अक्षीव अक्षि पृष्ठं यस्य । दद्रुघ्ने (दादमर्द्दने) वृक्षे । स्वामी न उरणाक्ष्यस्तत्रार्थे दत्वोक्तेः । तन्मते उरणाक्ष्याख्या आख्या यस्येति विग्रहः

उरभ्र पुंस्त्री उरु उत्कटं भ्रमति भ्रम–ड पृषो० उत्वोपः । १मेषे स्त्रियां जातित्वात् ङीष् २दर्द्दुभट्टस्ते पु० स्वामी । तस्येदम् अण् । और्भ्र मेषमांसादौ "हविषाऽऽर्षेण वै मांसं पार्षतेन च वत्सरम् । मांसखड्गारिषक्रौरभ्रयाजनक्षाग पार्षतैः । ऐणरौरवबाराहखार्श्यमांसैर्द्वयाक्रमम् । मासाभिवृद्ध्या तृप्यन्ति दत्तेनेह पितामहाः" याज्ञ० । "दार्षता भाङ्गखड्गाङ्गमहिषौरभ्रकूकुराः" सुश्रुते पशुषु तस्य दर्षितत्वमुक्तम् स च माध्यमपशुः "अजाश्वतरगोखरोष्ट्रवस्तोरभ्रमेदःपुरुषप्रभृतयो माध्याः" सुश्रु० तन्मां सगुणाश्चैव "माध्या वातहराः स्वेद्या दृंहणाः कफपित्तदाः । मधुरा रसपाकाभ्यां दीपना बलवर्द्धनाः" "दृंहणं मांसमौरभ्रं पित्तश्लेष्मावहं गुरु" ।

उरभ्रसारिका स्त्री तुन्नवोक्ते कीटभेदे कीटशब्दे विवृतिः ।

उररी अव्य० उर–वा०अरीक् । १अङ्गीकारे, २विस्तारे च । ऋजि अञ्च गतित्वात् तेन सह समासः उररीकृत्य इति "कालिकं भेदमुररीकृत्य" सा०द० । घञ् उररीकार अङ्गीकारे पु० । क्त । उररीकृत अङ्गीकृते त्रि० ।

उरल त्रि० उर–वा० कलच् । गतियुक्ते ततो वला०चतुरर्थ्यां वत् । उरल्य तत्सन्निकृष्टदेशादौ त्रि० ।

उरश पु० मुनिभेदे तस्यापत्यम् पाठान्तरे तिका० फिञ् औरशायनि तस्य भर्गा० स्त्रियां तत्पुत्रस्यस्य न लुक् औरशायनी ।

उरस्कट पु० उरस्याद्यतेऽनेन कट–णिच्-च कुत्वः । कवचे

उरस् वलार्थे कण्ड्वा०प० अक० सेट् । उरस्यति वलवान्भवतीत्यर्थः औरस्यीत् अौरसीत् उरस्याम्(साम्)बभूव आस चकार

उरस् न० क्त–असुन् धातोरुच्च रपरः । वक्षःस्थले । "कवाटविस्तीर्णमनोरमोरु स्थलस्थित श्रीलवनस्य तस्य" "जनितमुदमुदस्यादुच्चकैरुच्छ्रितोरःस्थलनियतनिवसन्श्रीस्तनाशुस्रुवान् सः" माघः । "उरोरुकुक्षितस्तं जघनमंसबन्धोद्भुरम्" भागवते० अस्य ब०व० अलग्यस्कपृषमा० "व्यूढोरस्को वृषस्कन्धः" रघुः । "प्रलम्बेव गिरोरस्कः" कुमा० । क्वचित् "क्षारोरा वनमार सा" सुप्रसिद्धपद्यम् । तेन निर्मित अण् औरस, तत्प्रभेदे "औरसः चेतजश्चैव दत्तःक्षेत्रिमएव चेति" याज्ञ० उरोजातमाले च औरसं भवम् । प्रज्ञे यत् उरस्य । वक्षोगते । २श्रेष्ठे न० । तस्य ईत० श्रेष्ठे अच् समा० । औरस्य अग्रप्रधाने । ३ऋषिभेदे पु० तस्यापत्यम् तिका० फिञ् औरसायनि । उरसवत् भर्गादिकार्यम् । उरः प्रायस्कस्यास्य अर्शआ० अच् । उरस प्रयस्कोरस्के त्रि० । पाठान्तरे तिकादिषु उरसशब्दोऽपि पठ्यते उरसवत् फिञ् भर्गादिकार्यञ्च ।

उरसिज पु० उरसि जायते जन–ड त० सप्तम्या अलुक् । स्तनोद्भवजाते स्तने । "परिपस्पृशिरे चैनं पीनैरुरसिजैः नुन्नः" रामा० । उरसिजातोरसिरुहादयोऽत्र । "क्षेत्रानामुरसिरुहेषु हारलीलाम्" माघः

उरसिल त्रि० उरः प्रायस्केनाच्छन्नस्यस्पिच्चा० रुच् । प्रायस्को रक्षे । पक्षे मत्व० मस्य वः । उरस्यत् तत्रार्थेऽस्त्रियां ङीष् ।

उरस्कट पु० उरः कवते आश्रियतेऽनेन कट–घञर्थे क । १वाजानामुत्तरोत्तरभेदे तद्दीवे यज्ञोपवीताकारे २वस्त्रभेदे च । (वृक्षशाङ्क) । त्रिका० ।

उरस्तस् अव्य० उरसैका दिक् तसिः, यद्वा स्याद्यर्थे तसिल् वा । १हृदयैकदेशभवे हृत्ते २वक्षस्यर्थे च अत इत्त्वात् खरितखर इतिभेदः । [ख्युट् । उरस्याघनमस्यत्र न० ।

उरस्य न० उरस्यावते तं–क । वक्षोरक्षे । करणे

उरस्य पु० उरसैका दिक् यत् । वक्षसैकदृग्गते "कर्मणा बाष्पुरस्येन वक्षो यस्य विदारितम्" भट्टिः निर्म्मितार्थे यत् । २पुत्रे

उरी अव्य० उर–गतौ वा० ईक् । १अङ्गीकारे, २विस्तारे च । ऋयादि० ऋजि गतित्वम् तेन समा० । ख्यर् उरीकृत्य "तदुरीकृत्य कृतिमर्वाचस्त्यं प्रतीयते" भा० ।

उरीकार पु० उर +च्वि–घञ् । १स्वीकारे, विस्तारे च ।

उरीकृत त्रि० उरी+च्वि–क्त । १अङ्गीकृते, २विस्तृते, च ।

उरु त्रि० ऋण्–कु तुलोपो वुगागमश्च । १विशाले, २बहुले निरु० "तुविजाता उरुक्रया" ऋ०१,१२,६, "उरुव्यचा बहुनिवासौ" भा० "रथे युङ्क्ष्वोरुचक्रे" । ४विस्तीर्णे च वृक्षत्वस्य विस्तीर्णायत्तत्वात् । "जनास उरुज्रयं सुजनिमा चकार" ऋ०७,१००,४, "स्वस्तिमदुरुशतो गृणीहि" ऋ०६,८४,१, उरुगायः "उरुगव्यूतिरभयानि" ऋ० ६,६०,४, अक्षोविदा उरुधाक्रिरद्भुतः" २,२६,४, "अस्यामिषन्नुरुधारामरङ्कृतम्" ८,१,१०, "उरुप्रथाः प्रथमानम्" यजु०२०,१६, "गाथयोरो रथ उरुयुगे" ऋ० ८,६८,६, ।५दीर्घे च "गतोरुमार्गा:" माघः भाविते क्तत्वात् क्रीबे क्वचित् त्रिषु च । उरवे उरुषे इत्यादि स्त्रियां गुणवचनत्वात् वा ङीष् । "शिरोभिक्षे मङ्गीतोर्वी" "अजमारक्षव वसः" मनुः उरो–विः ह्रस्वा० डुमसिच् । उरिमन् तद्भावे । प्रज्ञे त्व, उरुत्व न० । तद् उरुता स्त्री अण् औरव न० । तद्भावे ।

उरुकाल पु० उरुः कालःयस्येऽस्य । (राक्षालयया) १महाकालतायाम् रत्नमा० । कर्म्म० । २दीर्घकाले ।

उरुक्रम पु० उरवः भूम्यादिव्यापकत्वात् क्रमाः पादविक्षेपा अस्य । १वामनरूपे भगवदवतारे "यस्योरुषु त्रिक्रमणेषधिक्षियन्ति भुवनानि विश्वा" ऋ०१,१५४,२, "यस्य विष्णोरुरुषु त्रिविक्रमणेषु त्रिक्रमणेषु पादप्रक्षेपेषु विश्वा सर्वाणि भुवनानि भूतजातान्याश्रित्य क्षियन्ति स विष्णुः क्षूयते" भा० । इति तस्योरुक्रमत्वे हेतुरुक्रमः । "यं न इन्द्रो वृकद्वरिः यं नो विष्णुरुरुक्रमः" ऋ०१,६, ६, उरु विस्तीर्णं क्रामति पादान् विक्षिपतीत्युरुक्रमः विष्णुः" भा० । उरु प्रधानं पदमाश्रमं क्रामति-क्रम–

अच् ६त०। भगवतोऽष्टमावतारे २ऋषभदेवे च। "अहमेकदेव्यान्तु नाभेर्जात उरुक्रम:। दर्शयन् वर्त्म धीराणां सर्वाश्रमनमस्कृतम्" भा० १स्क० ३अ० ऋषभशब्दे विवृतिर्द्रष्टव्या।

उरुगाय पु०उरुभि: बहुभिर्गीयते गम्यते वा गै-गाने गाङ् गतौ वा कर्मणि घञ्। परमेश्वरे वासुदेवे "त्रीयधेक उरुगाय। विक्रमे" ऋ०८,२६,७,"उरुभिर्बहुभिर्गीतम्य: बहुषु देशेषु गत्वा बहुकीर्त्तिर्वा"भा०बहुकीर्त्तिरिति पक्षे गीयते गाय: कीर्त्तिरित्यर्थ:; "अतश्च तदुरुगायस्य विष्णो:" यजु०६,३, "विष्णु उरुगायेष:"यजु०८,१, य: पार्थिवानि त्रिभिरिद्विष्णुरिति सामभिरुरु क्रमिष्टोरुगायाय जीवसे ऋ०१ १५५,४, "उरुगायाय उरुगातव्याय" भा०। गाङ् गतौ भावे घञ् गाया गाति: कर्म०। २विस्तीर्णया गत्या "स्तोममुरुदृढगायं प्रतिष्ठां दृढा"कठश्रु०। "उरुगाय विस्तीर्णां गतिम्"भा०भा० "अस्माधारादुरुगायवतोऽभिध्यायत" छा०उ०उरुगायवतोविस्तीर्णगतीन्" गै गाने घञ् कर्म०। ३बहुकीर्त्तने। "प्राणस्य वातायोरुगायं कुरुते" शत० ब्रा०,१,५,१४,

उरुचक्षस् त्रि० उरु यथा स्यात् तथा चष्टे चक्ष-असुन्। १महादर्शने "वर्धदग्नेव उरुचक्षसा गिरा:" ऋ० ८, १०१,२,सर्वद्रष्टृत्वात् २सूर्ये पु०"नमोभिरुरुचक्षसं सूक्तिभिरान्" ६,५१,८,यं न: सूर्य उरुचक्षा उदेति"७,३५,८,

उरुजम्भन् त्रि०उर्वीं जम्भा क्षितिर्यस्य। बहुभूमियुक्ते "उरुजम्भा, य उरुजम्भमप्रयुच्छन्" अथ०६,४,२,

उरुजयस् त्रि०ज्रि-अभिभवे करणे असुन् उरु अत्यर्थं विस्तीर्णं वेगे। वेगेन हि सर्वाभिभवात् जयसस्तथात्वम्। "उरुजयसमिन्दुभि:" ऋ०८,६,२८, "उरुजयवम् विस्तीर्णवेगम्" भा०। "उरुजयसं द्रुतयोनिमाकुतम्" ५,८,६, वेहान: पूतना उरु जय:"८,३६,१, इत्यत्र जयसोवेगार्थकस्यासुन्नन्तया प्रयोगात् तस्या दन्तत्वम् प्रमादिकम।

उरुज्रि त्रि०उरु यथा तथा जूयति ज्रि क्विप् वेद त्रि० न तुक्। लू-दा०किंवा। प्रभूतगतियुक्ते। "अयोऽग्नय उरुज्रय: क्रतुश्रेष्ठम्" ऋ० ७,१६,२,"उरुज्रव प्रभूतगमना:" भा०।

उरुण्ड पु० उपद्रावके असुरभेदे। "उरुजा: यक्षधूम्रा उरुण्डा वे च मट्मटा:। कुल्माषमुखा अवाग्रव:। तानस्या मक्षयन्ते प्रतिबोधेन गायव" अथ० ८,६,१५,

उरुत्रिष्ण त्रि०उरु उरुणत् विक्रमस्य। उरुक्रिश्युक्ते पाले स्याञ्च स्त्री गौरा० ङीष्। "वयोवोचा भिद्येत वाऽभिक्षा नवा स्याद्यूरुत्रिष्णो खात्सखामिमं पथ्यामियेत्" यत० ब्रा०१,६, ४,८,

उरुज पु०उरुभ्योऽवयवेभ्यो जायते जनयति जन्मभूतमर्थं जन-ड पृषो० अलोप:। प्रभूतपयोजनके। "नवासुरुजमभ्यर्षति व्रजम्" ऋ०१,७७,४."उरुजं प्रभूतानामपां जनकम्"भा०

उरुरी अव्य०उरु+रा-आ०की०। १अङ्गीकारे २विस्तारे च।

उरुलोक न० उरु यथा तथा लोक्यते लोक-कर्मणि घञ्। १अन्तरिक्षे तस्य सर्वलोकेभ्यो महत्त्वेन स्थानात् तथात्वम्। "आसप्तसाप्तदिगां सर्वजगतश्च परमं महत्"आधोक्षजस्य परममहत्त्वम्। "ममान्तरिक्षमुरुलोकमस्तु" ऋ०१०,१२८,२। कर्म०। २महल्लोके पु०।

उरुव्य पु० उरु वायति वै गोचरे क। एरण्डवृक्षे "गव्याजोरुव्यर्वामूवाजिगव्यानियाच्चद्दै:" सूत्र० स्वार्थे कन् तत्रैव। रामसूत्रस्तु उरुव्यकस्थाने उरुव्यकल्पमीरयति पृषो० साधु।

उरुव्यूक पु० उरु वायति वै गोचरे "उरुव्यादयश्च"उणा० नि०। रक्षौरण्डे "पुनर्भवाद्यदत्तकार्य्यं दूरुव्यकस्यादनीविलयाकप्रभृतीनि उष्णानि स्वादुतिक्तानि वातप्रशमनानि च"सुश्रु०।"पटोलवार्त्ताकीकारवेल्लकटुकिकालेबुकोदूरुव्यपर्पटकत्रिफलातिक्तकर्कोटकारिष्टकोशातकीनेत्रकरीराटरूषकार्कबुध्नप्रभृतीनि रक्तपित्तहरणान्यरुष्कराणि सुरुचीनि कृमिनेत्रव्यरक्षासक्षारक्षिरराणि च" सुश्रुत:।

उरुव्यचस् त्रि०उरु विचति व्यच-व्याजे (विशेषव्याप्तौ)असुन् अतिव्यापके। "ओरुव्यचा: पृथ्यताम्" ऋ०२,५०१। "उरुव्यचा: प्रभूतव्याप्ति:"भा०। २विस्तीर्णे "उरुव्यचसे महिने" ऋ० ७,३१,११। "उरुव्यचसा विस्तीर्णेन"भा०। "ननमुरुव्यचा अदिति:" ५,४६,६। "उरुव्यचसोधात्मा यत्समाना:" यजु०२७,१६,

उरुषा त्रि० उरु सनोति सन-विट् का वेदे षत्वम्। बहुदातरि "मघोनामभ्यमुरुषामुरुज्रय:" ऋ० ५,४३, ६। "उरुषां बहुदातारम्"भा०।

उरुष्य रक्षणे पर०सक० सेट्। अरुरुष्यति औरुष्यीत्। "उरुष्य राय एषो यजस्व"यजु०७,३,अत्र व्याख्याने "उरुष्य रक्ष उरुष्यतीरक्षयकर्मा" वेददी०। "उरुष्यदग्नि: पिलोदपस्ये" ऋ० ३,५,८। "अरुरुषत् रक्षतु" भा०। "नोपीपेन उरुष्यतम्" ऋ० ५,६५,६।

उरुष्या स्त्री उरुष्यं रक्षणमिच्छति क्यच् अ यक्षोपः रक्षणेच्छायाम् । "उरुष्या पायुरभवत् वसिष्ठयः" ऋ० ६,४४,७ । "उरुष्या रक्षणेच्छया" भा० ततीयाया लुक् । ततः ङ । "उरुष्यु रक्षणेच्छावति "इमे मा पीता यशस उरुष्यवोरयम्" ऋ० ८,४८,५ । "उरुष्यवः रक्षाकामाः" भा० ।

उरूची स्त्री उरु अञ्चति क्विप् ङीप् अल्लोपे पूर्वाचो दीर्घः । अतिव्याप्तिन्यां स्त्रियाम् । "उरूची विश्वे यजते निपातम्" ऋ० ४,५६,४ । "यं न उरूची भवतः सधमाभिः" ऋ० ७,३५,२ "विश्वयशाचो अमतिमुरूचीम्" ऋ० ७, ३५,२ "या ते जिह्वा मधुमती सुमेधा अग्ने देवेष्वृत्विग् उरूची" ऋ० १,५७,५ । स्त्रीलिङ्गे उर्वच् तथार्थे यस्मादावपि उरूचः उरूचा इत्यादि ।

उरूच्यस् त्रि० उरू दीर्घे नासिके तस्य नसादेशः वेदे नि०यत्वं दीर्घत्वं च । दीर्घनासिकायुक्ते "उरूच्यसावसुतृपा" ऋ० १०,१४,१२ ।

उरोज पु०उरसि जायते जन–ड "जे विभाषा" पा० सप्तम्या लुक् । स्त्रीजाते "दधत्पुरोजहृतमर्डयीतवम्" "रेजाते रुक्मिरथायुरोजसा" माघः स्तनादिकं स्त्रीलक्षणमेव जन्मकाले उत्पन्नमपि यौवने उद्भिद्यते । तथाह भावप्रकाशः । "बालानां शुक्रमस्त्रीव किन्तु यौवनागमे दृश्यते । तेषां तदेव तारुण्ये पुनस्त्वाङ्गिमेष्यति कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेदुषसा । रोमराज्यादयः पुंसां नारीणामपि यौवने । सावयवं तयोर्भेदो योनेश्चाख्यानतः स च" । तथा च पुंसां रोमराजीप्रभृतयः नारीणां तु रोमराजीस्तनकक्षार्त्तवप्रभृतयः" । आर्त्तवलक्षणोक्ते द्वादशवर्षादूर्द्धं ऋतावुक्तः । "अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी । दशमे कन्यकाप्रोक्ता तत ऊर्द्धं रजस्वला" उ०त० स्मृतिः । इदमपि वस्त्राद्यावितविषयम् आतुभेदेन तत उत्तरमपि भवतीति लोके दृश्यते वस्त्रावनाभिज्ञा दशमाद्दादशाद् देवेति तत्त्वम् । स्तनते तु हादशवर्षोपरि रजःसम्भव उक्तः । "रसादेव रजः स्त्रीणाम् आर्त्तवं तु ततो भवेत् । तद्वर्षाद्द्वादशाद्ध्वं याति पञ्चाशतः क्षयम्" रजःपदं स्तनोद्भेदस्यापि लक्षणम् । गर्भिण्याः पीनस्तनत्वे दुग्धवक्त्रत्वे च वारत्वसूत्रम् भा०प्र० । "स्पृहीतगर्भायां स्त्रीणामार्त्तवं वक्षोजानां स्तोतसां गर्भोपरोधादार्त्तवं न जायते तदेव प्रतिहतमूर्द्ध्वं गामतमुपचीयमानमनपरा भवति स्तनौ तरामानतं पयोधरौ याति तस्माद् गर्भिण्याः पीनौ स्तनौ पयोधरौ भवतः"इति । उरोभूषणमस्त्रियाम् "उरोभुवा कुङ्कुमेन लुलितम्" नैष० ।

उरोभूषण न० उरोभूष्यतेऽनेन भूष–करणे ल्युट् तै० । १वक्षोऽलङ्कारे हारे । उरोभूषयति ल्यु । २तद्यति त्रि० ।

उरोबृहती स्त्री वैदिके छन्दोभेदे । "बृहती जागतस्यैव गायत्र्याः । पथ्या पूर्वार्धे सप्तमेः । न्यङ्कुसारिणी द्वितीया । स्वरमध्यौ कौटुम्बिकैः । उरोबृहती याज्ञिक्य" काल्या० उक्तेः याज्ञिकते द्वितीयचरणस्य जागतालक्षणे अन्येषां तत्रायां गायत्रालक्षणे च सा भवतीत्यर्थः ।

उरोहस्त न० उरसि हस्तपेटाघातोयत्र । बाहुयुद्धभेदे बाहुयुद्धप्रकारः भा०स०२२अ० दर्शित यथा

"करपल्लवपूर्वन्तु कृत्वा पादाभिवादनम् । कक्षौ कक्षां विधुन्वानावास्फोटं तत्र चक्रतुः । स्कन्धे दोर्भ्यां समाक्षिप्य निहत्य च मुकुर्मुहुः । अक्रमक्रैः समाक्षिप्य पुनरास्फालनं विभो ! । चिलहस्तादिकं कृत्वा कक्षाबन्धं च चक्रतुः । गलनक्षाभिघातेन सक्कुल्लिकृतेन चापनिम् । बाहुप्रायादिकं कृत्वा पादाकृतपरिग्रहौ । उरोहस्तं ततश्चक्रे पूर्वकल्पौ प्रयुद्धतौ । करसंपीडनं कृत्वा गर्जन्तौ वारणाविव । दुर्दान्तौ मेघसङ्काशौ बाहुप्रहरणाबुभौ । तत्रैनाकृत्यमानौ तु अन्योन्यं कृतवेदनौ । सिंहाविव सुसंक्रुद्धावालक्ष्यालक्ष्य युध्यतम् । अक्रमाक्रं समाधाय बाहुभ्यामुभयोरपि । आहत्य बाहुभिश्चापि उदरं च प्रचक्रतुः । उभौ कट्यां सुपार्श्वे तु तत्रबन्धौ च चिक्षितौ । अधोहस्तं स्वकण्ठे तदरस्योरसि चाक्षिपत् । सर्वोत्तिकालमर्याद्यं मुहूर्तमुक्तं चक्रतुः । संपूर्णमूर्द्धा बाहुभ्यां पूर्णकुम्भं प्रचक्रतुः । तत्पीडं यथाकामं पूर्णयोगं समुद्धिकम् । एवमादिनियुद्धानि प्रकुर्वन्तौ परस्परम्" । व्याख्यातस्त्वेतत् नीलकण्ठेन "कक्षैः दोर्मूलैः कक्षां प्रबोधनतां रज्जुं धुन्वानौ । ततः तत्र कक्षे आस्फोटं चक्रतुः बाहुमूलास्फालनेन अकृत्रिमरज्जुभेदं बन्धवन्त्याविव्यर्थः । चिलहस्तादिकं कृत्स्नात्रिवेदेन आकुञ्चनप्रसारणोपर्यधश्चालनमुद्गरास्त्राणि चिलहस्ताः आदिपदात् पादस्याष्टाङ्गनादि । कक्षाबन्धं परस्परकक्षावां हस्तौ कृत्वा बन्धनम् गलेन गलेन भालेन भालेनाभिघातेन पार्श्वस्थयोराकृत्वाक्षयोरभिघातेन सिक्कुल्लिकोत्पक्ष्याङ्गनं वज्रमिव वक्षजतुरित्यर्थः। बाहुप्रायादिकं चरणपाय आदिपदार्थः । पादाभ्यामुद्यताः

शिरः स्नायुशोथाभ्यान्तौ हृदयप्रहारौ नाड्योपघ्मं नखपि वदनावलोकितस्य । उरोफलं उरसि चपेटाप्रहारम् । पूर्वकल्पौ हित्वं परस्परं हावपि चक्रतुरिति वक्तुम् । तलेन चपेटया । आहत्य जानुदेशे पृष्ठं त्यक्त्वा बाहुभिः बद्धत्वाहावपि मिथः उदरम् आदाय प्रचक्रतुः प्रचिक्षिपतुः क्षु क्षिप्तेरस्य छान्दसं रूपम् । एवं कक्षां सुपार्श्वं च प्रचक्रतुः । तच्चलनौ तत्प्रसारणकरणं गात्रसङ्कोच इत्यर्थः तद्वन्तौ । अधोफलं उदरस्याधस्तात् फलं कृत्वा फलाभ्यामुदरमावेष्ट्य स्वकरहे खोरसि च कण्ठोरःसमीपे अनीय आक्षिपत् आस्फालितवान् । पृष्ठस्य भूसम्बन्धेन जातं भङ्गं पराभवं बाहुभ्यां उदरादिनिपीडने सम्मर्दं मूर्छा हृत्पीडं पर्स्पयोगं योगोविश्लेषघातनं तच्च पुरुषम् । अत्यल्पं मृदः पातं प्रदर्श्य अन्यत्र पातनमित्यर्थः एवमादिनियुद्धानि पादाकर्षणयोषिकलीकरणादीनि"

उ(ऊ)र्ज जीवने वा चु० उभ० अक० पक्षे भ्वा० पर० सेट् । उ(ऊ)र्ज्जयति ते उ(ऊ)र्ज्जति । ऊर्ज्जित-त ऊर्ज्जीत् । उ(ऊ)र्ज्जयाम् बभूव आस चकार चक्रे पक्षे उ(ऊ)र्जाम् बभूव आस चकार । क्त उ(ऊ)र्ज्जित, हृद्ये बलान्विते । णिचलत्वे वर्द्धिते वि० दीर्घादिरयमिति बहवः

उ(ऊ)र्णनाभ पु० उर्णैव सूत्रं नाभौ गर्भेऽस्य अच् समा० ह्रस्वः । लूतायाम् (माकडसा) दीर्घादिरयमिति केचित् ।

उ(ऊ)र्णा स्त्री ऊर्णुयते आच्छाद्यते ऊर्णु-ड ह्रस्वः । भ्रूमध्यरोम्णि ललाटस्थलोमसमूहभेदे त्रिकर्मभेदे । "ललाट पट्टे शबलललिनलोलभङ्गतन्वीयमूर्द्धा परिस्फुरति" काद० । दीर्घादिरयमिति बहवः

उ(ऊ)र्द दाने खादे सक० क्रीड़ायाम् अक० भ्वा० आत्म० सेट् । उ(ऊ)र्दते ऊर्दिष्ट दीर्घादिरयमिति बहवः ।

उ(ऊ)र्द्रु पु० उर्द-रक् । जलविड्जाते (उहिराल) दीर्घादिरयमिति बहवः ।

उ(ऊ)र्ब हिंसायां भ्वा० पर० सक० सेट् । उ(ऊ)र्बति ऊर्बीत् । क्विपि वलोपे ऊः ऊरौ दीर्घादित्वे ऊरौ इति भेदः ।

उर्व्व पु० उर्वी पृथिवी संस्कारस्थानत्वेनास्त्यस्य अर्श० अच् । १पृथिवीसंस्कारिणि पिङ्गभेदे तारुण्य० भा० हस्वः । २ऋषिभेदे ततः विदा० अञ् । ऊर्वि तदपत्ये पुंस्त्री ।

उर्वट पु० उरु यथा तथाऽटति अट+अच् ह्रस्वः । वटवृक्षे त्रिका० । तस्य दीर्घोच्चत्वादिना अटनात् तथात्वम् ।

उर्वरा स्त्री उरु यस्यादिकमृच्छति क-अच् ह्रस्वः । १सर्वयस्यामूमौ "पततां गणैः पिबतु वाहिनीमुर्वरा" माघः २भूमिमात्रे विश्वः ३अधिकेऽपि त्रि० उर्वरमधिकं जातमस्य तारका० इतच् । उर्वरित आधिक्ययुक्ते (उपचात) अधिके । उरून् महत अञ्चति अ-अच् ह्रस्वः । अमरोभेदे "कलानिधिर्गुरुनिधिकर्पूरतिलकोर्व्वरा" काशीख० ।

उर्वरासा त्रि० उर्वरां भूमिं सनोति सन-विट् क्वा । भूमिविभाजके पुंवादौ "हेतासां ददथुर्वरासाम्" ऋ० ४, ३८,१, उर्वरासां पुत्रम्" भा० । २उर्व्वरादिविभाजके त्रि० "त्वं नः सक्ष्यभरमुर्वरासाम्" ६,२०,१ । "उर्वराणां भूमीनां सनितारं संभक्तारम्" भा० ।

उर्वरी स्त्री ऋ-गतौ वनिप् ङीष् वलोपश्च । आधिक्यप्रायायां स्त्रियाम् "ओषधीनामहं इव उर्वरीरिव साधुवा" अथ० १०,४,२ अन्यलिङ्गे उर्वन् इत्येव

उर्वर्य त्रि० उर्वर्यायां भवः यत् । १सर्वयस्यादिभूमिभवे रुद्रभेदे "नम उर्वर्याय खल्याय" यजु० १६,२३, रुद्राध्यायः ।

उर्वशी स्त्री उरून् अश्नुते वशीकरोति उरु+अश-क ङीष् । स्वर्गवेश्यायाम् । अमरोभेदाश्च अमर शब्दे उक्ताः दृश्यञ्च नारायणोरुं भित्त्वा जाता यथोक्तं हरिवं० ८५ अ० "नारायणोरुं निर्भिद्य सम्भूता वरवर्णिनी । ऐलस्य दयिता देवी योगिरूपं किमुर्वशी" ततश्च उरुं नारायणोरुं कारणत्वेनाश्नुते प्राप्नोति अश-क ङीष् पृ० ह्रस्वः । इति विग्रहः । दृश्यमेव पुरूरवसः पत्नी आसीत् । "पुत्रोबुधस्तस्य तथैवौर्वशेयकर्मा पुरूरवा यस्य सुतो सुदेवः । तथैव मद्यात्मजमेव महात्मा पुरोर्वशीमप्सरसां वरिष्ठाम्" १५,४ अ० "पुरूरवा सुतोविश्वानिलायां समपद्यत" इत्युपक्रम्य "षट् सुता जज्ञिरे चैलादायुर्धीमानमावसुः । दृढायुश्च वनायुश्च शतायुश्चोर्वशीसुताः" भा० आ० ७५ अ० । सा च इन्द्रलोकगताऽर्जुनस्य समीपे रिरंसया गत्वा तेन प्रत्याख्याता तस्मै शापं ददाविति कथा भा० व० ४६ अ० "तव पित्राभ्यनुज्ञातां स्वयञ्च पतिमागताम् । यत्कामां नाभिनन्देथाः क नपुंसकमंगनाम् । तस्मात्त्वं नर्त्तनं पार्थ! स्त्रीमध्ये मानवर्जितः । अप्रमानिति विख्यातः प्रण्डवद्विचरिष्यसि" २नदीभेदे उर्वशीतीर्थयज्ञे उदा० ।

उर्वशीतीर्थ न० भारतोक्ते तीर्थभेदे । "उर्व्वशीतीर्थमासाद्य ततः सोमाश्रमं वुधः" भा० व० ८४ । तच्च नदीरूपम् । "उर्वशी क्षत्तिकायोगे गत्वा चैव समाहितः सौहित्ये विधिवत् स्नात्वा पुण्डरीकफलं लभेत्" भा० अनु० २५ अ० ।

उर्वशीरमण पु० उर्वशीं रमयति रम-णिच् ल्यु ।

पुरुषपुत्रे पुरुरवसि रूपे उर्वश्यीवल्लभादयोऽप्यत्र ।

उर्वारु पु० उरु-यया तया वृणोति वृ-उण् । कर्कट्याम् । स्वार्थे कन् अत्रैव । "उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामुतः" ऋ०७,५९, १२, । यजु०३,६, "उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः" ३,७, अस्य स्त्रीत्वमपि अप्राणिजातिवचनत्वात् ङीष् । उर्वारुः तदर्थे 'छिन्नस्य बन्धनं मूलमूर्वारा इव" अथ० ६,१४,१,

उर्वी स्त्री उरु+गुणवचनत्वात् स्त्रियां वा ङीप् । १दृढत्वगुणावां स्त्रियाम् "उर्वी सजम्" उरुगन्त्रे उदा० २पृथिव्यां च तस्यादृढत्वात् तथात्वम् । "तैरुर्वीनिहितबलत्पदं प्रचेले" माघः । "अनन्यशासनामुर्वीं शशासैकपुरं मिव" "स्थितः सर्वोन्नतेनोर्वीम्" रघुः भेदे "सुपांसुलुगित्यादिना" पा० षष्ठ्यभावो ङियजादेशः "सिन्धुर्नदो उर्विया व्यश्वैत्" ऋ०१,८२,१२, "उर्विया महती" भा० "प्रतीची चक्षुरुर्विया विभाति" १,९२,८, १नद्याम् निरु० ।

उर्वीधर पु० उर्वी धरति धृ-अच् ६त० । पर्वते तेषां लोकधरणेन अवस्थानेन पृथिव्याधारकत्वात् तथात्वम् भूधरादयोऽप्यत्र "गर्भोऽभवत् भूधरराजपत्न्याः" कुमा०

उर्वीपति पु० २त० । पृथिवीनाथे राजनि । उर्वीयोर्वीश्वर तत्राधादयोऽप्यत्र

उर्वीभृत् पु० उर्वीं बिभर्त्ति धारयति पालयति वा भृ-क्विप् तुक् ६त० । १पर्वते २राजनि च एवं पृथिवीभृद्धरणीभृदादयोऽप्यत्र । 'उदयति स्म तदङ्गुलिभिर्धरणीभृद्भृवि तत विभज्य यत् । अनुमितोऽपि हि बाधवनिरीक्षणात् व्यभिचार न तापकरोऽनलः" नैष० तत्र धरणीभृत् राजा पर्वतश्च अत्र व्यभिचारश्च साधनसमानाधिकरणाभावप्रतियोगित्वरूपः तेन साध्ये तत्सम्बन्धः ताहशव्यभिचारश्च उपाधिवादे विस्तारणौ अस्माभिः तत्र उपाधिशब्दे दर्शितम्

उर्वीरुह पु० उर्व्यां रोहति रुह-क ७त० । वृक्षे "छिन्नस्यरोहोर्वीरुहवल्लितन्तुभिः" माघ.

उर्व्या स्त्री उरोर्भाव ष्यञ् त्यत् उरोरपत्य । महत्त्वे "कृष्णाच्चर्व्यायां स्त्रादित्याः" यत० ब्रा० १,५,१,१७, "उर्व्यायां महत्त्वे" भा०

उल दाहे (सौत्रः)पर०सक०सेट् । ओलति औलीत्

उल पु० उल-टाहे कर्मणि घञर्थे क । व्रणभेदे "उल्लोछिन्नो दृढबंधश्चर्मे धार्ये" यजु० २४,३१ । "उल्लोव्रणभेदः" वेददी० । ततः चतुरर्थ्यां वला०य । उल्लसदृशचिह्नदेशादौ त्रि० ।

उ(ओ)लड उत्क्लेशे इदित् वा चुरा० उभ० पक्षे भ्वा० पर० सक०सेट् । उ(ओ)लण्डयति ते उ(ओ)लण्डति औलिलण्डत् त औलण्डीत् अयं खडि ओदित् इत्येके ।

उलन्द्र(न्द्र) पु०राजभेदे तेन निर्वृत्तम् अरुष्पादि० दृञ् । औलिन्द्र(न्द्र)क तन्निर्मितपुरादौ त्रि०

उलप पु०न०वृक्ष-कपच् संप्रसारणम् । १घासादिसमूहे २तायां ३कोमले त्रिष्वभेदे न० (उलपड) । 'नयोलपमलकृतयैवलाभः" "उत्तीर्णभारलघुनाप्यलघूपमेयौचित्यनिःसृकतरेण तयोरधस्तात्" माघः ।

उलप्य पु० उलपे भवः यत् । वृक्षभेदे । "नमोलोप्याय चोलप्याय" यजु० १६,४५, रुद्राध्यायः

उलिन्द पु०वृक्ष-बा०किन्दच् संप्र० । देशभेदे उषादिकोषः।

उलु त्रि०उरु रक्षति रक्ष-कु । १दृढति २दृढियुक्तशब्दे च विवाहादौ स्त्रीभिरुच्चार्ये शब्दभेदे "प्रकारे गुणवचनस्य" पा० प्रकारे द्वित्वम् । उलूलु उरुप्रकारे । "उलूलुध्वनिरुच्चार" नैष० "यत्तदजायत सोऽग्निरादित्यश्च जायमानं घोषा उलूलयोऽनूदतिष्ठन् सर्वाणि च भूतानि सर्वे च कामाश्चाजातस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूलयोऽनुतिष्ठन्ति" छा० उ० । "उलूलयः उरवः विस्तीर्णरवाः" भा०भा० ।

उलुप पु० उरु पायते रक्ष्यते अस्मात् पा रक्षणे-अपादाने घञर्थे क रस्य लः । उलपवृक्षे । "तयोलुपपुलाकचिक्षातुमेर्यैर्जरत्कान्तारकूपैरिव" काद०

उलुलि पु० उल-उलि । दृब्धिकृचकशब्दे । "पृथग् घोषा उलूलयः केतुमन्त उदीरताम्" अथ० ४,१९,९,

उलूक पु०वृक-समवाये ऊक संप्रसारणम् ।१भेदने, जातित्वात् स्त्रियां ङीष् उलूकी च तदपत्यायां कन्यायाम् स्त्रीत्वे च कन्या "षट् सुतासु महासत्त्वाज्जायायाः परिकीर्त्तिताः" इत्युपक्रम्य "शुकीशुकानलजयदुलूकी प्रभुलूकजान् "विष्णुपु०। २दृन्द्रे, कैतवे ३दुर्योधनदूतभेदे ४तृणभेदे । (उलूखड) "लजति मृदुलूकः प्रीतिमांश्चक्रवाकः" माघः "मृगोधोलूकजातिकांक्षुः मूढत्वात्प्रतं चरेत्" मनुः "यदूलूको वदति मोघमेतत्" ऋ०१०,१६५,४, "विविधाश्चैव सम्भोगाः काकोलूकैश्च भक्षणम्" मनुः । अत्र काकोलूकैरित्यृक्षैः काकोलूकमित्यादि विरोधे समाहारैकत्वविधानं प्रायिकमिति गम्यते । "उलूकात् सुप्तमे काकी श्येनी श्येनात् व्यजायत" भा०आ०६१ । उलूकनामा दूतश्च युधिष्ठिरादीनां समीपे दुर्योधनेन प्रेषितः यथा "आचूयोपसरे

राजन्नुलूकमिदमब्रवीत् । उलूक! नक्तं कैतव्य! पाण्डवान् वञ्चयोमकान्" इत्यादिना भा० उ० ५०।अ० । उलूकश्च कैतव्यः कितवस्यापत्यम् । तदागमनमभिप्रेत्यैव उलूकदूतागमनपर्व उद्योगपर्वान्तर्गतं पर्व्व ।४देशभेदे । "उलूकवाहिनं राजन् दृष्ट्वान्तमुपजग्मिवान्" । "उलूकान्तरं चैव तांश्च राज्ञः समानयत्" भा० स०अ०। अयञ्च देशः "प्रययावुत्तरां तस्माद्दिशं धनदपालिताम्" इत्युपक्रम्य तस्य कीर्त्तनात् धनञ्जयस्य उत्तरदिग्विजय एव तस्य उलूकदेशस्य वर्त्मनाञ्च उत्तरदेशवर्त्तीति गम्यते । ५तद्देशे रूपे च "उत्तरं पर्वतोद्देशं ये ते दुर्गसहा नृपाः । आरोहन्त विमर्द्दन्तो वज्रप्रतिमगौरवाः । उलूकः कैतवेयश्च" हरिवं०६६।

उलूकयातु पु० उलूकरूपेण यातीति या–तुन् । असुरभेदे । "उलूकयातुं शुम्भूलूकयातुं जहि" ऋ० ७,१०४,१२ । "उलूकरूपेण यातमुलूकयातुम्" भा० ।

उलूखल न० ऊर्द्धं खम् उलूखं पृषो० तत् खाति रक्षति खा–क । धान्यादिकण्डनसाधने काष्ठमये १पात्रे (ओखरी) तच्च यत्तियपात्रभेदः । तल्लक्षणञ्च "उलूखलमुखे अरत्निमात्रे औदुम्बरे प्रादेशमात्रे चतुरश्रमुलूखलं मध्यसंग्रहीतमूर्द्धं दृत्तम्, मुषलं दक्षिणमुलूखलात्" कात्या०१७,५,२ । तदुत्तरत्र मूलेऽपि उदा० । "अनश्नतिभ्य इत्येव मुषलोलूखले हरेत्" मनुः "स्फाम्पूर्यशकटाद्वाऽपि मुषलोलूखलस्य च । अद्विस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम्" तस्य मनुक्ताशौचं श्रेयम् उलूखलशब्दस्य याज्ञे नान्यथा निरुक्तिर्दर्शिता यथा । "उलूखलसुतङ्करं वोर्करं वोर्ढुकं वोर्ढ मे कुर्वित्यब्रवीत्तदुलूखलमभवत्सुतङ्करं वै तदुलूखलमित्याचक्षते परोक्षेण" । स्वार्थे कन् तत्रार्थे "षट्टे सह उलूखलके" ऋ० १,१२८, ५ । तदस्य साधनत्वेनास्त्यस्य ठन् । उलूखलिकः । तत्साधनके जले "दन्तोलूखलिकोऽपि वा" अमरः।२गुल्मलो पु०

उलूखलसुत पु० ३त० । उलूखलेनाभिधुते सोमरसे "उलूखलसुतानामवेद्विन्द्रः" ऋ० १,२८,१,२,१ ।

उलूत पु० उल–क्त० अतच् । अजगरसर्पे त्रिका० ।

उलूपिन पु० ओ. मन्त्राः रूपमस्यास्य इनि रस्य लः । शिशुमारे अमरः । पृ० हस्वराठोऽपि तत्रैव उलूपिन् इत्यपि पाठः क्वचित् तत्रार्थे ।

उलूपी स्त्री कौरव्यनागस्य भेदे तत्कन्या भा०आ०२११अ०। "उलूपश्च ऐरावतकुले जातः कौरव्यो नाम पन्नगः। तस्याऽस्त्रि दुहिता राजन्! उलूपी नाम पन्नगी । सा त्वामभिषेकार्थमवतीर्णं ससुहृदम् । हृदेषु पुरुषव्याघ्र! कन्दर्पेणाभिमूर्च्छिता । तां मामनङ्गसन्तप्तां स्वकृते कुरुनन्दन!। अनन्यां नन्दयस्वाद्य प्रदानेनात्मनोऽनघ!। अर्जुन उवाच। ब्रह्मचर्य्यमिदं भद्रे! मम द्वादशवार्षिकम् । धर्म्मराजेन चादिष्टं नाहमस्मि स्वयंवशः। तव चापि प्रियं कर्त्तुमिच्छामि जलचारिणि!। अन्तं नोत्पूर्वमस्य मया किञ्चन कर्हिचित् । अवश्यं नाशनं मे स्यात्तव परिप्रियं भवेत् । न च धर्म्मोऽत्र मे धर्म्मज्ञता कार्य्या भुजङ्गमे!। उलूप्युवाच। जानाम्यहं पाण्डवेय! यथा चरसि मेदिनीम् । यथा च ते ब्रह्मचर्य्यमिदमादिष्टवान् गुरुः । परस्परं वर्त्तमानानां भ्रातृणां स्नेहसंज्ञां प्रति । यो नोऽन्तःप्रविभेदोऽद्य वै द्वादशवार्षिकम् । वने चरेदुब्रह्मचर्य्यमिति वः समयः कृतः । तदिदं द्रौपदीहेतोरन्योऽन्यस्य प्रवासनम् । कृतवांस्तत् धर्म्मार्थमत्र धर्म्मो न दुष्यति । परित्राणञ्च कर्त्तव्यमार्त्तानां पृथुलोचन!। कृत्वा मम परित्राणं तव धर्म्मो न दुष्यते । यदि वाऽस्य धर्म्मस्य सूक्ष्मोऽपि स्याद्व्यतिक्रमः। स च ते धर्म्म एव स्याद्दत्त्वा प्राणान्ममार्जुन! । भक्तां च भज मां पार्थ! सतामेतन्मतं प्रभो! । न करिष्यसि चेदेवं मृतां मामुपधारय। प्राणदानान्नरश्रेष्ठो! वर धर्म्ममनुत्तमम् । वरयञ्च प्रपन्नाऽस्मि त्वामद्य पुरुषोत्तम । दीनानाथान् कौन्तेय! परिरक्षसि नित्यशः। साऽहं वरयमभ्येमि रोरवीमि च दुःखिता । याचे त्वां चाभिकामाऽहं तस्मात्कुरु मम प्रियम् । त्वमात्मप्रदानेन सकामां कर्त्तुमर्हसि । वैशम्पायन उवाच। एवमुक्तस्तु कौन्तेयः पन्नगेश्वरकन्यया । कृतवांस्तत्तथा सर्व्वं धर्म्मसुद्दिश्य कारणम् । स नागभवने रात्रिं मासमित्वा प्रतापवान् । उदितेऽभ्युत्थितः सूर्य्ये कौरव्यस्य निवेदनात् । आगतस्तु पुनस्तत्र गङ्गाद्वारं तदा ययौ । परिष्वज्य गता साध्वी उलूपी निजमन्दिरम् । दत्त्वा वरमजेयत्वं जले सर्व्वत्र भारत!। साध्या जलचराः सर्व्वे भविष्यन्ति न संशयः" ।

उल्का स्त्री उष–दाहे क निं० षस्य लः । रेखाकारे गगनात् पतत्तेजःपुञ्जे । अस्मिन्नुत्पातलक्षणे ६।२५४ तत्स्वरूपफलादिकमुक्तम् । "बाधेतोल्काशनिपतनसरोवाक्षभारोदवाग्निः" मेघ०। "उल्कानिर्घातकेतूंश्च ज्योतींष्युत्पातवानिलान् च" । "उल्कापाते दिशां दाहे मोहादुत्विक्ते तथा" "विद्युत्तप्तनिपतनेषु मरुोल्कानां च संप्लवे मनुः । "एकरु-

ज्वालेति विशिष्यन्तेषु" किरा० । उल्काकारणमुक्तम् श्रीपतिना "यासां गतिर्दिवि भवेद्ग्रहितेन सम्या तारारकाः सकलखेचरतोऽतिदूरे । तिष्ठन्ति या अनियतोद्गतयश्च ताश्चन्द्रादधोऽपि नियतन्ति तदन्विताश्चाः । शीतांशुवज्जलमयात्तपनात् स्फुरन्ति ताश्चावकृष्यवकृमारुतसन्निसंस्थाः । पूर्व्वानिलेरितमभावमुपागतेऽस्मिंस्तारा यतन्ति कृकविद्युदुतायवेन" । (ज्वलनलखटेरनुड़ा) २गुरुकृष्णवस्त्रादिदीपिते (मशाल) इति प्रसिद्धे ३दीपभेदे च । "तुलाराशिं गते भानौ अमावास्यां नराधिपः । स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च । स्नात्वा तु पार्वणश्राद्धं दधिक्षीरगुड़ादिभिः । ततोऽपराह्णसमये घोषयेन्नगरे नृपः । लक्ष्मी मनुष्यरा लोका । उल्काभिर्व्याप्ति वेच्छन्ताम् ति० त० ज्यो० उल्कटाने दर्शदैधे निर्णयः । "तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः । उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम्" ति० त० ज्यो० वचनात् प्रदोषव्यापिदर्शे कार्यम् । उभयत्र प्रदोषप्राप्तौ परदिने एव, युग्मादिगास्नात् । "दर्शे करजनीयोगोदर्शस्य स्यात् परोऽहनि । तदा विहाय पूर्व्वेद्यु परेद्यु सुखरात्रिका ज्योतिर्व्वचनात् । उभयत्र प्रदोषाप्राप्तावपि उल्कादानं पूर्व्वोक्तपार्वणानुरोधात्, न पूर्व्वदिने भूताद्ये ये प्रकुर्व्वन्ति उल्कायुक्तमचेतसः । निराशाः पितरो यान्ति यावं दत्त्वा सुदारुणम् ज्योतिर्व्वचनात् । उल्कायुक्तादि पिण्डत्रयत्वात् प्राचीनावीतिना दक्षिणाभिमुखेन कार्यम् । "प्राचीनावीतिना सम्यगपसव्यमतन्द्रिता । पितृभ्यो निधनात् कार्यं विधिवद्भूमावपि ना" मनूक्तेः । तद्दानमन्त्रादि ति० त० दृश्यम् । ४ज्योतिषोक्ते नाक्षत्रिकदृयाभेदे । "मङ्गला पिङ्गला धान्या भ्रामरी भद्रिका तथा । उल्का सिद्धा सङ्कटा च क्षौटी चेया मङ्गदयाः" ज्यो० । तदानयनञ्च "वह्निभाक्षीनलग्नतो लग्नभाक्षाच्छिखिभादथ" इत्यत्रोक्तः मतभेदेन लक्षितलग्नतो लग्नात् पूर्व्वभादूपदचतुर्थभात् जन्मलग्नतो वाऽऽरभ्य एवैकादितिराद्यया क्रमेण मङ्गलादिका दशा भवन्ति इत्येवं चतुर्विंशतिसङ्ख्यकैः शिराद्यया अष्टौ दशा अवसेयाः ततोऽन्तिमत्रिभेषु मङ्गलादीक्षितो भवन्ति । एवमन्यत्राप्युह्यम् । तासां भोगकालश्च । "एकाद्येकोत्तरा अष्टयोगिनीयत्सरा अमी; दयुल्का मङ्गलाया; १एकोवर्षः पिङ्गलायाः २द्वौ, धान्यायास्त्रय, भ्रामर्याः ४वर्षा:, भद्रिकायाः पञ्च, उल्कायाः षट्, सिद्धायाः सप्त, सङ्कटायाः अष्टौ वर्षाः, तेषां योगेन १६वर्षात्मकत्वादानां भोगकाला, इत्येवं शिरादृष्ट्या अष्टोत्तरशतवर्षात्मको भोगकाल । अन्तर्दशादिकं योगिनीशब्दे वक्ष्यते ।

उल्काचक्र न० कृत्यामतोक्ते यात्रामन्त्रशुभाशुभसूचके चक्रभेदे "उल्काचक्रं सर्वसारं मन्त्रदोषादिनिर्णयम् । मन्त्रोद्धारभूर्ज्जसुखं सर्वमन्त्रादिविग्रहम् । खखखेटेशावधि नाथ । पुच्छपर्य्यन्तमेव च । अक्रराक्षरमारभ्य हादयाक्षरमाहकम् । विलिखेत् पृष्ठदेशे तु शुभाशुभविशुद्धये । त्रयोदशाक्षरान्नाथ! एकविंशाक्षरान्तकम् । नेतव्यं साधकैर्मन्त्रं पृष्ठस्थं सप्तदाहृतम् । तथा शीर्षदं प्रोक्तं कण्ठादिपुच्छकान्तकम् । द्वाविंशादि चतुस्त्रिंशदक्षरान्तं शुभं मनुम् । पुच्छस्थं नापि गृह्णीयान्मन्त्रमन्यञ्च तथा ध्रुवम् । शीर्षस्थञ्चापि गृह्णीयात् तदक्षरं शृणु प्रभो ! । पञ्चत्रिंशादि द्वात्रिंशदक्षरान्तमेव च । मन्त्रकर्म्म शुभं प्रोक्तं सुखवर्णान् शृणु प्रभो । त्रिचत्वारिंशवर्णादि एकपञ्चाशदन्तकम् । सुखस्थमन्त्रं मन्त्रो तु न गृह्णीयात् कदाचन । पुच्छस्थं शृणु यत्नेन निरर्थकमुदाहृतम् । भ्रमो गात्रस्य पीडाभिः देवता कृष्यतेऽनिशम् । द्विपञ्चाशदक्षरादि एकषष्टिमान्तिकान् । वर्णान् पुच्छस्थितान् प्रोक्तान् नेतव्यान् शृणु वल्लभ ! । द्विषष्टितमवर्णादि चतुष्षष्ट्यन्तरान्तकम् । अक्रं लोचनमन्त्रञ्च तत्तोऽन्यत् रसनान्वितम् । तत् सर्वं शुभदं प्रोक्तं एतदन्यत्तमं शृणु । वैष्णवानाञ्च शैवानां शाक्तानां मन्त्रजापनम् । अन्यदेवेषु भक्तानां भक्तिकृद्भद्र शृण्वम्" । "एतच्च चतुष्षष्टिस्तिषष्टिर्वा वर्णाः सम्प्रतोमताः । स्वरादिंशतिरेकस्य स्पर्शानां पञ्चविंशतिः । यादयश्च क्षकाराष्टौ चत्वारश्च यमास्तथा । अनुस्वारो विसर्गश्च+कँपौ चापि परान्वितौ । दुस्पृष्टेति विशेषो नूकरः प्रत एव च" इति शिवोक्तविभक्तागाभिप्रायं चतुःषष्टेरन्यकथनम् क्षकारस्य द्वैविध्यमत्तेनेति बोध्यम् ।

उल्काजिह्व पु० उल्केव जिह्वाऽस्य । राक्षसप्रसिद्धे राक्षसभेदे

उल्काप्रास्य पु० उल्केव मुखमस्य । प्रेतभेदे "बालाग्युल्कामुखः प्रेतो विप्रोधर्म्मात् स्खलात च्युतः" मनुः (ख्याङ् सेक्योयानि) इति प्रसिद्धे जन्तुभेदे स्त्री ङीष् ।

उल्कुषी स्त्री उल्-दाहे क्विप् उल्का दाहेन कृष्णाति कृष-क गौ० ङीष् । उल्कायाम् । "अग्निरेव प्रथमोऽहयाजः स्वाहुनिर्हितीय उल्कुषी हनीयः" । "उल्कुषमुल्कुषीति हनीयम्" "उल्कुषीव तमनयाजोहनि" उल्क-

कृष्णललाटाद् देवानां यशः" इति शत० ब्रा० ११,२,७, २१,२५, "उल्कषो उल्का" भा० । "अभिवरत्नयाजानुमन्त्रणमग्न्यमुं जहि क्षुद्रव्यसं जहि उल्कव्यसं जहि" काल्या० १,५,१४,

उल्बम् न० उल्ब दाहेन बध्नाति बध-घञ् ड । जरायौ गर्भवेष्टनचर्म्मणि । "यथोल्बेनावृतोगर्भस्तथा तेनेदमावृतम्" गीता । "तस्मात् जायमानस्योल्ब आसीद्धिरण्ययः" ऋग्० ४,२,८, "गर्भो वा एष यद्दीक्षित उल्बं वास प्रोर्णुते" । "तस्माद्गर्भः प्रावृता उल्बेन जायन्ते तैत्ति० सं० "उल्बे गर्भवेष्टने तिष्ठति" यजु० ५,२,४,१८, "गर्भोजरायुणावृत उल्ब इवाति जन्मना" १६,७६,

उल्बण त्रि० उल्ब बध्नाति अच् । उत्कटे २प्रकाशमाने ३मनोज्ञे च । "त्यजितैः फलसूत्खातैर्भग्नैश्च बकुधा नृपैः । तस्यासं दुर्ललितो भृगुराटैरिव द्रुमः" रघु० "प्रववर्ष च तत्रैव सहसा तोयमुल्बणम् भा० व० ६ अ० ।

उल्मुक न० उल्म-दाहे सक, पृषो० कः । १अलातदङ्गारे अमरः । २वह्निभेदे "उल्मुकोनियतश्चैव वीरस्त्वाद्यावहस्तथा भा० स० २१ अ० ३अग्न्याधानार्थे अलातदङ्गारे च । "अन्यत्रा र्थपचनादुल्मुकमादायोदङ्परेत्य जुहोति" शत० ब्रा० २,१,२,७ "उद्यत एवैष आग्नीध्रीयोऽग्निर्भवत्येष एवैकैकमेषो ल्मुकमादाय यथाधिकं विपरायन्ति तैरेव तेषामुल्मुकैः प्रज्ञप्तीति" ४,६,८,७ । उल्मुकेन भव यत् । उल्मुकाग्नौ त्रि० । "अथ हैक उल्मुकेन दहन्ति" शत० ब्रा० १२,५,१,१६ ।

उल्लङ्घन न० उद्+लङ्घ-भावे ल्युट् । अतिक्रमे, अर्द्धभागगमनादिना अतिक्रमणे (डिङ्गान) । [२उल्लङ्घिते त्रि० ।

उल्लल त्रि० उत्+लल-अच् । १चञ्चलरोगयुक्ते हारा० ।

उल्ललित त्रि० उद्+लल-क्त । १उल्लङ्घिते २तरङ्गिते, ३आन्दोलिते च ।

उल्लसन न० उद्+लस-ल्युट् । १उल्लासे हर्षजनकव्यापारे आधारे ल्युट् । संज्ञायां कन् । २रोमाञ्चे हेम० ।

उल्लसित त्रि० उद्+लस-क्त । १स्फुरिते २उद्गते ३हृष्टे च ।

उल्लाघ त्रि० उद्+लाघ-क्त त्रि० । १रोगनिर्मुक्ते, २दक्षे, ३शुचौ, च । ४मरिचे पु० ।

उल्लाप पु० उद्+लप-घञ् । १काकुवाक्ये, २गीतरीत्यादिना विलक्षणस्वरयुक्तवाक्ये ३दुष्टवाक्ये "खलोल्लापा सोढाः" अथमपि तदाराधनपरैः वारा० । ४ क्षुद्रवने च ततोऽस्यर्थे ठन् । क्षुद्रके त्रि० "लाजोल्लाषिकधूमाढ्यं सक्षुप्राकारतोरणम्" भा० उ० १६२ अ० [स्थाने ।

उल्लापन न० उद्+लप-णिच्-ल्युट् । दृक्षादिना व्या-

उल्लास पु० उद्+लस-घञ् । १प्रकाशे, २आह्लादे, "निपतन्ति चन्द्रलवनोल्लासाः पयोविन्दवः" अमरुशत० । "सौष्ठिल्यवचनोल्लासप्रहासप्रतिभादिभिः" सा० द० । अन्यस्याध्यायस्यार्थाये ३परिच्छेदे च यथा काव्यप्रकाशे । ४प्रारम्भे च

उल्लासिन् त्रि० उद्+लस-णिनि । १उल्लासयुक्ते प्रभान्विते २आह्लादिनि स्त्रियां ङीप् । "सुमनसामुल्लासिनीमानसे" चन्द्रालोके ।

उल्लिखित त्रि० उद्+लिख-क्त । १उत्कीर्णे २तनूकृते "त्वङ्मेव यन्नोल्लिखितो विभाति" रघुः । ३उपरि लिखिते । ४चिन्तिते ५कर्त्तव्यतया ज्ञातोल्लेखे पदार्थे च ।

उल्लुञ्चन न० उद्+लुचि अपनयने ल्युट् । १उत्कर्त्तने (उपड़ान) २उन्मूलने च "पादकेशाग्रकक्षोल्लुञ्चने च पञ्चाद्दश" या० ।

उल्लुठन न० उद्+लुठि-ल्युट् । स्वाभिप्रायप्रकाशेन अन्यथाभावप्रकाशने (ठाड़ा) अ । उल्लुठाऽत्र स्त्री । "धीराधीरा हि सोल्लुठाभिधैः संतर्देदृश्यम्" यथा "अनवद्यतोऽपि सततं हरसि मनोमे यतः प्रसभम् । किं पुनरवद्यतप्तं सम्प्रति नखरत्नतेजसा" सा० द० अत्र सपत्नीनखक्षतदर्शनजातेर्ष्यापक्षेण मनोहर्षजनकत्वोक्तिस्तदभावद्योतनार्था"।

उल्लूल त्रि० उद्+लू-क्विप । उत्पटके

उल्लेख पु० उद्+लिख घञ् । इदं कर्त्तव्यमित्यादिना संकल्पितार्थप्रतिपादकग्रन्थोद्धारे "संज्ञायाञ्चोदमेव प्रयोजनम यत्नयोल्लेखः" ति० त० । अलङ्कारभेदे पु० म च १६८ पृ० उक्त । २धर्षणे च । "अमर्षक्रियितग्रन्थोल्लेखविधिमितधिक्करेण काट० । ३उत्कीर्णने च

उल्लेखन न० उद्+लिख ल्युट् । १क्षपणे, २खनने कर्त्तव्यतया ३संकल्पितार्थप्रतिपादकग्रन्थोद्धारे "मासपक्षतिथीनाञ्च निमित्तानाञ्च सञ्चय ग । उल्लेखनक्रियाणां न त्र्यं फलभाग् भवेत्" त० त० ब्र० प [illegible] यत्किञ्चित् कृतन्न नः । फलं च त्र्यात्मकं तस्य धर्म्मार्थकामदो भवेत्" ति० त० ब्र० पुराणाद्यु स कल्पवाक्ये मासादीनामवश्य कीर्त्तनं यत्र तत्रागम्यते । "मनसा सङ्कल्पयति वाचाऽभिलषतीत्युल्लेखेऽपि अभिलाषस्यावश्यकता । अभिलाषवाक्ये च मासादिनिमित्तानामिव आत्मसम्बन्धित्वेन तत्तत्कर्मादिवत्त्वापि कीर्त्तनं कर्त्तव्यम्" "प्रदेयं नि-

यतं कालमात्मनोऽनुग्रहादिच्छेत्" मा०त०संव० उल्लेः। "सेकादुल्लेखनाल्लेपात् स्पृष्टे मार्ज्जनलेपनात्" "सम्मार्ज्जनोपलेपनेन शैलीमुल्लेखनेन च" मनुः। यत्ने वस्तुस्थापनाङ्कस्थिरत्वादिरूपबालुकादौ रेखाभिः ४चिह्नकरणे। "उल्लेखनात् करोति मेखलादि चेत्" कात्या०७,४,६। तदा भूमौ प्राच्या रेखया उल्लेखनात् कर्म्म कुर्यात्" कर्क। ५घर्षणे च।

उल्लोच पु० उल्लुं लोच्यते उद्+लोच-कर्मणि घञ् निडायां ईटकत्वात् न कुत्वम्। चन्द्रातपे विताने।

उल्लोप्य न० उद्+लुप-यत्। लौकिकगीतिभेदे। तच्च मिताक्षरायां दर्शितं यथा।

"यस्य पुनश्चित्तवृत्तिर्निराकारालम्बनतया समाधौ नाभिरमते तेन यद्ब्रह्मोपासनं कार्य्यमित्याह। "यथाविधानेन पठन् सामगायमविच्युतम्। सावधानसदभ्यासात्परं ब्रह्माधिगच्छति" या०। "स्वाध्यायावगतसमागानतिक्रमेण सामगाय सामगानालम्बनत्वेऽपि गायमिति विशेषणम् अगीतसम्बन्धव्युदासार्थम्। अविच्युतमक्खलितम्। सावधान समाध्यनुष्ठानात्कार्य्यचित्तवृत्तिः। पठन् तदभ्यासवशात्तत्र निष्णातः। यद्ब्राह्मणशून्योपासने परब्रह्माधिगच्छति। तदुक्तम्। "यद्ब्रह्मण्यपि निष्णातः परं ब्रह्माधिगच्छतीति"। यस्य पुनर्वैदिक्यादौ चित्तं नाभिरमते तेन लौकिकगीतानुष्ठानात्तोषणकार्य्यमित्याह। "अपरान्हकमुल्लोप्यं भद्रकप्रकरीलया। औशनसं शरोविन्दुमुत्तरकौतकानि च। ऋग्गाथायाणिकादत्तलिङ्गता ब्रह्मगीतिका। नेयमेतत्तदभ्यासकरणाल्लोकवृत्तम्" या०। "अपरान्हकोल्लोप्यभद्रकप्रकर्य्यौविणकानि शरोविन्दुकसङ्गितशौत्तरमिलेतानि प्रकरणाख्यानि सप्त गीतकानि। यथच्छादासारितबर्द्धमानकादि गीतकानि स्तुत्याने। गाथाख्यातखलोगीतकानि स्तुत्याने। ऋग्गाथाख्यातखलोगीतिका ब्रह्मेतदपरान्हकादिगीतजातमभ्यारोपितात्मभावमोक्षसाधनत्वान्मोक्षसंज्ञितं मन्तव्यम्। तदभ्यासस्यैकाग्रतापादनद्वारेणात्मैकतापत्तिहेतुत्वात्। "चित्तविक्षेपाद्यन्तरायदूषितस्य गीतस्य फलान्तरमाह"। "गीतस्तो यदि योगेन नाप्नोति परमव्ययम्। दृढव्रतानुचरोभूत्वा ब्रह्म तेनैव मोदते" या०। "गीतस्तोयदि कथञ्चिद्योगेन परमव्ययं प्राप्नोति। तर्हि दृढव्रतः सचिवीभूत्वा तेनैव ब्रह्म मोदते"। [२अतिचञ्चलेत्रि०।

उल्लोल पु० उद्+लोल-घञ्।।मद्यान्तरङ्गे अमरः।

उल्व पु० उच-समवाये आधारे वन् "उल्वादयश्च" उणा०नि०चस्य लः; गुणाभावश्च। गर्भवेष्टनचर्म्मणि "उल्वावृतोगर्भोदय वा मासाद्वत्सः प्रथित्वा यावद्वाऽथ जायते" भा० उ०। "उल्वावृत इत्यादि वैराग्यप्रकरणे। कदं हि मातुः कुक्षौ मूत्रपुरीषवसातपित्तक्लेदादिपूर्णे तदनुलिप्तस्य गर्भस्योल्बाशुचिपूयावृतस्य लोहितरेतोऽशुचिबीजस्य मातुरशितपीतरसानुप्रवेशेन विवर्द्धमानस्य निरवद्यमक्षिवद्वीर्य्यतेजःप्रज्ञाचक्षुषो वयन, ततो योनिद्वारेण पीड्यमानस्य कष्टतरा निःसृतिर्जन्मेति वैराग्यं जनयति सुखुर्ल्लभ्यस्यं दय वा मासानतिदीर्घकालमन्तःप्रथित्वेति" इति भा०भा०। कर्त्तरि वन्। २गर्भे

उल्वण त्रि०उला दात्रेण वलति पचाद्यच् पृषो०। अग्रे खटे उलूखलशब्दे उदा०। [ऋ०१,६६,७]। "कामयमानद्राक्षी" भा०

उश त्रि०वश-क। कामयमाने "अपो यदग्न उशधग् वनेषु"

उशत् त्रि० वश-शतृ सम्प्र०। कामयमाने। "उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ" कठ उ०। स्त्रियां ङीप्। "उश इ मातरः" अघमर्षणसूक्तम्। सा च अक्षरव्याख्यायां यास्केन यद्धरत्वा०। तत्र दृशतीत्येव पाठोयुक्तः दृश क्षिप्तायामित्यादिकस्यैव यत्नलस्य तद् रूपम्। इति अमरटीकायां भानुजदीक्षितः। उशतीति पाठस्तु लिपिकरप्रमादात्। तन्मूल एव यद्धरत्वमप्युक्तोऽपि चिन्त्यः; वशधातोरिच्छार्थकतया तदर्थत्वासङ्गत्यात्।

उशनस् पु० वश-कनसि सम्प्र०। भार्गवे शुक्रे। औ उशना संबुद्धौ उशनन्-उशन,-उशनः। "अध्यापि च्छोशनसापि नीतिम्" कुमा०। उशनसा प्रोक्तम् अण्। औशनस तत्तत्ते धर्मशास्त्रे "मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोङ्गिराः" इत्युपक्रम्य "धर्मशास्त्रप्रयोजका" याज्ञ०। तस्येदम् अण्। तदीये त्रि०स्त्रियां ङीप्। औशनसी नीतिः। अयञ्चासुराणां पुरोहितः यथोक्तम् "सुराणामसुराणाञ्च समजायत वै मिथः। ऐश्वर्ये प्रति संघर्षस्त्रैलोक्ये सचराचरे। जिगीषया ततो देवाबृहस्पतिरङ्गिरसं मुनिम्। पौरोहित्येन याज्ञार्थे काव्य तूशनसं वरे। ब्राह्मणौ तावुभौ नित्यमन्योन्यस्पर्द्धिनौ नृप!" भा० आ० ७६ अ०। "असुराणामुपाध्यायः शुक्रश्चर्षिसुतोऽभवत्। ख्याता उशनसः पुत्रास्त्वारोऽसुरयाजकाः" भा०आ०६५ अ०। एष भृगुपुत्रः भा० आ०६६ अ० उक्तः "भृगोः पुत्रः कविर्विद्वान् शुक्रः कविसुतो ग्रहः। त्रैलोक्य प्राप्ययात्मार्थं वर्षावर्षे भयाभये। स्वयम्भुवा नियुक्तः

लन् भुवनं परिधावति । योगाचार्योमिताहारो दैत्या-नामभवद्गुरुः" । तस्य नक्षत्रविशेषगत्या वर्षादिफलादिकम् बृ०सं०८अ०उक्तम् "नागगजैरावतवृषभगोजर-द्वस्तगाजदकृनाख्याः । अश्विन्याद्याः कैश्चित् त्रिभाः क्रमाद्दीपय कथिताः । नागा तु पवनवान्यानखानि यैतामहाक्षित्रभाक्षित्रः । गोवीथ्यामस्विन्यः पौष्णं हि चापिभाद्रपदे । जरदुगव्यां श्रवणात् त्रिभं नागाद्यात् त्रिभं च नैवाद्यम् । कृत्तविशाखान्वाङ्गाद्रयजैत्यषाढा-द्वयं दृक्ना । तिरुलित्तस्तासां क्रमादुदङ्मध्ययाम्य-मार्गस्थाः । तासामभ्युत्तरमध्यदक्षिणावस्थितैकैका । वीथीमार्गानपरे कथयन्ति यथा स्थिता भमार्गस्थ । नक्षत्राणां तारा याम्योत्तरमध्यमाक्रान्ताः । उत्तरमार्गो याम्यादिनिर्गदितो मध्यमस्तु भाग्याद्यः । दक्षिणमा-र्गोऽषाढादि कैश्चिदेवं कृता मार्गाः । ज्योतिषमार्गम भ्रष्टं विप्रतिपत्तौ न वीक्ष्यमक्षाक्षम् । स्वयमेव विक-ल्पयितुं किन्तु बहूनां मतं वक्ष्ये ।

उत्तरवीथिषु शुक्रः सुभिक्षयिवक्रगतोऽस्तहृदयं वा । मध्यासु मध्यफलदः कटफलो दक्षिणस्थासु । अत्युत्तमोत्तमोमं समम-मध्यन्यूनमधमकटफलम् । कृत्तमं सौम्याद्यासु वीथिषु यथाक्रमं ब्रूयात् । भरण्यादिपूर्वं मघान्तमन्तचतुष्कं सुभि-क्षकरमाद्यम् । वक्राक्रमक्षिप्तवाङ्मीकक्लिङ्गदेशेषु भयज-नकम् । अतोदितमारोहेदुपरोऽपरो यदि स्थितं ततो हन्यात् । भद्राश्वसूरसेनकयौधेयककोटिवर्षकपान् । भ-वतश्यमार्द्रादि द्वितीयमभिताभ्युग्रसम्यस्थं । विप्रा-क्षामशुक्रकरं विशेषतः क्रूरचेष्टानाम् । म्लेच्छान्ध्रा-क्रान्ते म्लेच्छाटविकाम्बष्ठजाविगोमन्तान् । गोनर्दनीच सूद्रान् वैदेहांश्चानयः स्यूर्गति । विवरन् मघादिप-ञ्चकसुदितः यस्यप्रणायकश्चक्रः । क्षुत्तस्करभयजननो नीचोच्चस्थिसङ्करकरश्च । चित्रादेऽवष्टब्धो हन्त्यैरा-विकाच्छ्वरसूद्रान् । पुण्ड्रापरान्ध्रमूलिकवनवासिदविड-काञ्चद्रान् । स्वात्याद्यं भवितव्यं मण्डलमेतच्चतुष्टयसमभयक-रम् । मन्त्रिसचतुर्भिलाभिषद्वये भिन्नभेदाय । अत्या-क्रान्ते म्लेच्छाः किरातभर्तुः पितृष्टि चेच्छाकून् । प्रलया-वलिपुलिन्दतङ्गणाच्छूरसेनांश्च । ज्येष्ठाद्यं पञ्चकं क्षुत्त-स्करोगदं प्रबाधयते । काम्बोराभ्रक्रमत्स्यान् सबाह्लदे-शवल्लींश्च । आरोच्छेत्राभीरान् दविडाम्बष्ठत्रिगर्तसौ-राष्ट्रान् । नाशयति सिन्धुसौवीरकांश्च काश्मीरस्य वधः । धनं मण्डलस्य शुभमेतन्मण्डलं धनिष्ठाद्यम् । भूरिध-नशोकुलाकुलमनल्पधान्यं कचित् समयम् । अत्यारोहे सुस्थितगान्धारावन्त्यः प्रपद्यन्ते । वैदेहवधः, प्रलयवन-यकदासपरिवृद्धिः । अपरस्यां स्वात्याद्यं ज्येष्ठाद्यं चापि मण्डलं शुभदम् । पित्र्याद्यं पूर्वस्यां शेषाणि यथोक्तफ-लदानि । दृष्टोऽनलगतेऽर्के भयदस्तु क्षुद्रोगदस्तु समला सङ्घः । अर्धदिवसं च सेन्दुर्मण्डलपरिवेदलक्षकः । भि-न्दन् गतोऽनलर्क कूलातिक्रान्तवारिवाहाभिः । अव्यक्त-तुङ्गनिम्ना समा धरित्रीभवति धात्री । प्राजापत्ये यकटे भिन्नेऽलत्येव पातकं वसुधा । नेयास्थियकलयवला कापा-लिक व्रतं धत्ते । सौम्योपगतो रसपस्सङ्क्षयायोपगः समुद्दिष्टः । आर्द्रागतस्तु कोयलकलिङ्गा सलिलनिकर-करः । अग्नेकवैदर्भाणां पुनर्वसुस्थे स्थिते महाजनकः । पुष्ये पुटा दृष्टिर्विद्याधरगणविमर्दश्च । अश्लेषासु भुज-ङ्गमदाहव्यपीडाश्वखरच्छत्रकः । भिन्दन् मघां महामात्र-दोषक्षुद्रदृष्टिकरः । भाग्ये यवरपुलिन्दमध्वंसकरोऽ-न्यनिवृत्तिमोक्षाय । आर्यम्णे कुरुजाङ्गलपाञ्चालघ्नः स-लिलदायी । सौरवचित्रकराणां फल्गे पीडा जलस्य च निरोधः । कूपकदण्डजपीडा चित्रास्थे शोभना दृष्टिः । स्वातौ प्रभूतदृष्टिर्दुर्भक्षविनाशिकानू स्यूर्यत्नयवः । ऐ-न्द्राग्नेऽपि सुदृष्टिर्बभिजां च भयं विजानीयात् । मैत्रे जलविरोधो ज्येष्ठायां जलसस्यसन्तापः । मौलि-कभिषजां मूले त्रिष्वपि चैतेषु नाहदृष्टिः । आप्ये सलिलज-पीडा विश्वे व्याधयः प्रकुप्यन्ति । श्रवणे श्रवणव्याधिः पार्थिवभयं धनिष्ठासु । शतभिषजि शौण्डिकानामजै-कपे द्यूतजीविनां पीडा । कूपाम्बुलालामपि करोति वाम्भिनं स्थितः सलिलम् । अहिर्बुध्न्ये फलमूलतापः-ल्याधिनां च रेवत्याम् । अश्विन्यां कृषकानां याम्ये तु किरातयवनानाम् । चतुर्दशे पञ्चदशे तथाऽष्टमे तमि-स्रपक्षस्य तिथौ भगोः कृतः । यदा ग्रहैर्दूषितमेति वा तदा सङ्घो वारिभयेव लक्ष्यते । गुरुर्भृगुश्चापरपूर्वकाष्ठयोः परस्परं सप्तमराशिगौ यदा । तदा प्रजा रुग्भयशोकपीडि-ता न वारि पश्यन्ति पुरन्दरोज्झितम् । यदा स्थिता जाववधारकूर्यजाः सितस्य सर्वेऽपधातुवर्त्तिनः । क्षुना-गविद्याधरसङ्करादा भवन्ति वातास्य समुच्छ्रितालकाः । न मित्रभावे सुहृदो व्यवस्थिताः क्रियासु सम्यग्रता द्विजातयः । न चाल्पमप्यम्बु ददाति वासवो भिनत्ति वज्रेण शिरांसि भूभृताम् । यनैश्चरे म्लेच्छविडालकु-क्कुराः खरा मक्षिकोऽसितभान्यसूकराः । क्षुद्रेन्दुसूर्यस्य

वदन्निषादपत्नाः क्षयं व्रजन्त्यधिवसन्कृदोङ्कैः । निहन्ति शुक्रः क्षितिजेऽपतः प्रजा कृताग्रयस्खलनुदृष्टिविस्फुरैः । चराचरं व्यक्रमयोत्तरापथं दिशोऽग्निचित्युद्भुजसा च पीडयेत् । दृक्षन्तौ क्रन्ति पुरःस्थिते सितः सितं समक्तं द्विजगोसुराक्षयान् । दिशं च पूर्वां करकास्फुलोल्कदा गलेगदा भूरि भवेच्च गारदम् । सौम्योऽस्तोदयोः पुरो भृगुसुतस्थायस्थितस्तोयदृद् रोगान् पित्तलकामलांश्च कुर्वते पुष्णाति च यं क्रियम् । हन्यात् प्रव्रजिताग्निहोत्रिकभिषग्पक्षोपजीव्यान् हयान् वैद्यान् गाः सह वाहनैर्नरपतीन् पीतानि पश्वाहिगम् । गिरिभयमल्लाभे शस्तकोपश्च रक्ते कनकनिकषगौरे व्याधयो दैत्यपूज्ये । हरितकपिलरूपे श्वासकासप्रकोपः पतति न सलिलं खाद्भस्मरूक्षासिताभे । दधिकुसुदशशाङ्कान्निभस्तु स्फटिकमत्किरणो दृक्तनुः ।सुगतिरविजनो जयान्वितः क्रतयुगरूपकरः सिताङ्गयः" "उशने काव्याय" ऋ० ६,२०,११।"उशने उशनसे" भा०छान्दसम् ।

उशनसस्तोम पु० उशनसः स्तोमो यत्र अलुक्समा० वा विसर्गस्य लुक् । एकाहसाध्ये यागभेदे "उशनसस्तोमेन गरगीर्णमिवात्मानं मन्यमानो यजेत" आ०श्रौ० ६,५,१ । "उशनसस्तोमोनाम एकाहसाध्यः पुनः स्तोम इति चास्यैव संज्ञा गरोविषं गीर्णो येन स गरगीर्णः यो बहुप्रति ग्रहादिना पापादिभयात् गरगीर्णमिवात्मानं मन्यते स एतेन यजेत" नारा० ध्र० "उशना यत् सहस्यैरयातं त्वमपोयद्वेतुर्वगायेति सूक्तमृषिर्ये" इति तत्रैव सूक्तप्रारम्भ २सूक्ते उक्तः ।

उशाना स्त्री वश–ताच्छील्ये चानश् । सोमसाधनभूतायां गिरिजातायामोषधौ । "यद्यदाप्यायन्ति देवो वै सोमो दिवि हि सोमो हतो वै सोम आसीत् तस्यैतच्छरीरं यद्गिरय; यदग्रावाणस्तदैवोशाना नामौषधिर्जायत इति ह्याह श्वेतकेतुरुद्दालकिस्तामेतदाहृत्याभिषुण्वन्ति" शत०ब्रा० ३,४, ३,१० । "उशानाख्या ओषधिर्जायते इत्येवं श्वेतकेतुराह अतस्तामेव गिरावुत्पन्नाम् उद्दालोनना यजमाना अभिषुण्वन्ति न यात्यात् सोमम्" भा० ।

उशिज् पु०वश–इजि किच्च संप्र० १अग्नौ २ऋते च उच्च० तत्र यक्षे: कविःकामयमानत्वात्, ऋतस्य तु काम्यमानत्वात् तथात्वम् । २कामयमाने त्रि० । "उशिगसि कविरिति" "उशिगसि वसुभ्य इति"च ता०ब्रा०"ऋषदुशिजो-वयाविधः" ऋ० १, १२१,५, "उशिजः कामयमानान् यजमानान्" भा० । उशिजोमर्नीषिणः" ऋ० २,२१,२, "उशिज इन्द्रं कामयमानान्" भा० । "स हव्यवाड्मर्त्य उशिगृदूतस्य लोहितः" १,११,२ । "उशिक् कविःकामयमानः" भा०उशिजोयविष्ठो वक्षितमानाम्" १,१५, २१। "प्र पूर्वादिगुरुशिज."यजु०"उशिजः कवीषि कामयमानान्"वेददी०४काण्डे "उशिक्त्व देव । सोमाग्ने; प्रिय पार्थेऽप्रोहि" यजु०८,५५ "उशिक् कामयमानः" वेददीप: । "उशिगसि कवि:" ५,२२, । उशिक्कामयमानः" वेददी० ५काण्डे तस्य काम्यमानत्वात्तथात्वम् । "उशिजा वसुभ्योवसून् जिन्वः" यजु० १५,६ । उशिजा इच्छकान्तौ इति उशिगच्छ तेन"वेददी०। तत प्रज्ञा स्वार्थेण। औशिजः उक्षार्थे। करणे इजि । ६इच्छा हेतौ मेधायाम् निरु० । मेधाऽपसानस्येच्छाहेतुत्वात् तथात्वम् । ततः अस्यर्थे अर्श० अच् । उशिजः मेधाविनि त्रि० निरु०

उशी स्त्री वश–ई–संप्र० । इच्छाभेदे उशीनरः ।

उशीनर पु० हृष्णिवंशोद्भवे क्षत्रियभेदे । "उशीनरस्य विक्रान्तो वृष्णयस्ते प्रकीर्त्तिता:"भा०आ० १८६अ० । २पौरवे नृभेदे "ग्रहण परोमङ्कारान ! वंशमुत्तमपौरुषम्" इत्युपक्रम्य "सञ्जयस्यासभवत् पुत्रो वीरो राजा पुरञ्जयः । जनमेजयो महाराजो पुरञ्जयसुतोऽभवत् । जनमेजय यस्य राजर्षेर्महाशीलोऽभवत् सुत; । महामना नाम सुतो महाशीलस्य धार्मिकः । महामनास्तु द्वौ पुत्रौ जनयामास भारत ! । उशीनर च धर्मज्ञं तितिक्षुञ्च महाबलम्" हरिवं० २१अ० तस्य चरितं वर्णितम्" भा०व० "अवागच्छन्नृषवरं शत्रुसमग्निः ससायकः । जिज्ञासमानो वरदो महात्मानमुशीनरम् । इन्द्रःश्येनः कपोतोऽग्निर्भूत्वा यज्ञेऽभिजग्मतु । ऊरू राज्ञः समासाद्य कपोतः श्येनजाङ्घयात् । शरणार्थी तदा राजन् ! निलिल्ये भयपीडितः' १३०अ० । "श्येन उवाच । धर्मज्ञमात्मानं त्वा रेकं सर्व्वे राजन्यहीक्षितः । सर्वे धर्म्मविदस्त्वं कस्मात् कर्म्म विकीर्षसि ? । विक्षिप्तं भक्षणं राजन् ! पीड्यमानस्य मे क्षुधा । मा रक्षीर्धर्म्मलोभेन धर्म्मसूक्ष्मदृष्टवानसि । राजोवाच । सत्रासरूपसम्त्राणार्थी त्वत्तो भीतो महाद्विज ! । मत्सकाशमनुप्राप्तः प्राणान्दुरयं द्विजः । एवमभ्यागतस्त्वेष कपोतस्त्राभयार्थिनः । अप्रदाने परं धर्म्मं कथं श्येन ! न पश्यसि ? । प्रसन्नमानसंभ्रान्तः कपोतः श्येन ! लक्ष्यते । मत्सकाशे जीवितार्थी

तस्य त्यागो विगर्हितः । यो हि कश्चिद्बुजान् हन्याद्वा लोकस्य मातरम् । शरणागतञ्च त्यजते तुल्यं तेषां हि हि मातरम् । श्येन उवाच । आहारात् सर्व्वभूतानि सम्भवन्ति महीपते ! । आहारेण विवर्द्धन्ते तेन जीवन्ति जन्तवः । यत्नते दुरत्यजेऽप्यर्थे चिररात्राय जीवितुम् । न तु भोजनमुत्सृज्य यत्नं वर्त्तयितुं चिरम् । भक्ष्यद्वियोजितस्याद्य मम प्राणा विशाम्यते । । विसृज्य कायमेष्यन्ति पक्षानमकृतोभयम् । प्रयते मयि धर्म्मात्मन् पुत्रदारं विसृज्यति । रक्षमाणः कपोतं त्वं वृथा प्राणान् रक्षसि । धर्म्मं यो बाधते धर्म्मो न स धर्म्मः कुधर्म्मवत् । अविरोधात्तु यो धर्म्मः स धर्म्मः सत्यविक्रम ! । विरोधिषु महीपाल ! निश्चित्य गुरुलाघवम् । न बाधा विद्यते यत्नतं धर्म्मं समुपाचरेत् । गुरुलाघवमादाय धर्म्माधर्म्मविनिश्चये । यतो भूयांस्ततो राजन् ! कुरुष्व धर्म्मनिश्चयम् । राजोवाच । बहुकल्याणसंयुक्तं भाषसे विहगोत्तम । । सुपर्णः पक्षिराट् किं त्वं धर्म्मतत्त्वास्तसंशयम् । तथा हि धर्म्मसंयुक्तं बहु चित्रञ्च भाषसे । न तेऽस्त्यविदितं किञ्चिदिति त्वां लक्षयाम्यहम् । शरणैषिपरित्यागं कथं साध्विति मन्यसे । आहारार्थं समारम्भस्तव चायं विहङ्गम । यत्नयत्नान्यथा कर्त्तुमाहारोऽप्यधिकस्तया । गोहयो वा वराहो वा मृगो वा महिषोऽपि वा । त्वदर्थमद्य क्रियतां यद्वान्यदिह काङ्क्षसि । श्येन उवाच । न वराहं न चोलाणं न मृगान् विविधांस्तथा । भक्षयामि महाराज ! किं ममान्येन केनचित् । यस्तु मे दैवविहितो भक्ष्यः क्षत्रियपुङ्गव ! । तमुत्सृज्य महीपाल ! कपोतमिममेव मे । श्येनः कपोतमत्तीति स्थितिरेषा सनातनी । सा राजन् ! सारमज्ञात्वा कटलीखण्डमासजः । राजोवाच । राष्ट्रं गिरीणामखिलं वै ददानि तव खेचर ! । यं वा कामयसे कामं श्येन सर्वं ददानि ते । विनेमं पक्षिणं श्येन ! शरणार्थिनमागतम् । येनेमं वर्जयेयाख्यं कर्म्मणा पक्षिसत्तम ! । तदाचक्ष्व करिष्यामि न हि दास्ये कपोतकम् । श्येन उवाच । उशीनर कपोते ते यदि स्नेहो नराधिप ! । आत्मनो मांसमुत्सृज्य कपोततुलया धृतम् । यदा समं कपोतेन तव मांसं नृपोत्तम ! । तथा देयन्तु तन्मह्यं सा मे तृप्तिर्भविष्यति । राजोवाच । अनुपश्यामि मं मन्ये श्येन ! यन्माभियाचसे । तत्ते दास्ये प्रदास्यामि स्वमांसं तुलया धृतम् । लोमश उवाच । उत्सृज्य स स्वयं मांसं राजा परमधर्म्मवित् । तुलयामास कौन्तेय ! कपोतेन समं विभो । म्रियमाणः कपोतस्तु मांसेनाप्यतिरिच्यते । पुनश्चोत्सृज्य मांसानि राजा प्रादादुशीनरः । न विद्यते यदा मांसं कपोतेन समं धृतम् । तत उत्सृज्य मांसोऽसावारुरोह स्वयं तुलाम् । श्येन उवाच । इन्द्रोऽहमस्मि धर्म्मस्त्वं कपोतो हव्यवाहयम् । जिज्ञासमानौ धर्म्मं त्वां यत्नवादुपागतौ । यत्ते मांसानि गात्रेभ्य उत्सृज्यानि विधास्यते । एषा ते भास्वरी कीर्त्तिर्लोकानभिभविष्यति । यावल्लोके मनुष्यास्त्वां कथयिष्यन्ति पार्थिव ! । तावत् कीर्त्तिस्त्व लोकास्त्र स्थास्यन्ति तव शाश्वताः । इत्येवमुक्त्वा राजानमारुरोह दिवं पुनः । उशीनरोऽपि धर्म्मात्मा धर्म्मेणाष्टौ रोदसी । विराजमानो वपुषा प्रारुरोह विमिश्रितम्" १२१ अ० । उशीरकः वाञ्छाप्रदो नरो यत्र । इतदधिकृतदेशे ञटाधरः ।

उशीर पु० न० वश-ईरन् किच्च । वीरणमूले (खसखस) तस्य गुणाः "उशीरं पाचनं शीतं वल्यं लघु तिक्तकम् । मधुरं ज्वरकृद्दाहश्रमच्छर्द्यतिसारनुत् । कफपित्तनुत् । तृष्णार्त्तिविषवीषर्पिदाहरक्तक्षयप्रणाशकम्" भावप्र० "अगरुपद्मकोशीरभद्रदारुकुङ्कुमानि पुन्नागकेशरश्चेति" "चन्दनकुचन्दनहीवेरोशीरमल्लिकाषयस्याविदारोशतावरीक्षिप्तैः" सुश्रु० स्वार्थे कन् तत्रैव । उशीरं पद्मकस्य किञ्जरादि वत् । उशीरिक तद्विक्रेतरि स्त्रियां ङीष् । उशीनरस्यापत्यम् अण् । औशीनर तदपत्ये स्त्रियाम्भूतौ ।

उशीरबीज पु० उशीरस्य वीरणमूलस्य बीजं योनिरत्र । उत्तरदिक्स्थे पर्वतभेदे "उशीरबीजं मैनाकं गिरिं श्वेतञ्च भारत ! । समतीतोऽसि कौन्तेय ! नीलञ्चैवञ्च पार्थिव ! " इत्युपक्रम्य "श्वेतं गिरिं प्रवेक्ष्यामो मन्दरञ्चैव पर्वतम् । यत्र माणिवरोयक्षः कुबेरश्चैव वसराट्" भा० व० १३० अ० उक्तेस्तस्य उत्तरदिक्स्थत्वं मन्दरगिरिसन्निकटत्वञ्च "तुषारचयसङ्काशो मन्दरश्चैव पर्वतः । उशीरबीजश्च गिरीरुद्रोपस्यस्तथाद्रिराट्" हरि० २३६ अ० उक्तेः कैलाससन्निकटत्वमपि ।

उशीरादि न० चक्रदत्तेन ज्वरातिसाराधिकारोक्ते पाचनभेदे । "उशीरं बालकं मुस्तं धान्यकं विल्वभेषजम् । सभृङ्गाधातकी लोध्रं विल्वं दोषनपाचनम् । कन्यरोचकपिच्छाम विल्वं सातिवेदनम् । सशोणितमतीसारं सज्वरं याथ विज्वरम्" ।

उशीन्ध्य त्रि० वश-बा० कीन्ध्य सं प्र० । कर्मनीये । "आ वेमातोदयेद्योजनिष्ट" ऋ० ८, ३, ८, "उशीन्ध्यः कर्मनीयः" भा०

उष दाहे वधे च भ्वा० पर० सक० सेट्। ओषति औषीत् ओषाम् बभूव आस चकार उवोष ओषित्वा। ओषितः—उषित। उष्टा। कर्म्मणि उष्यते ओषामासे अत्रे "ओषामासे मत्सरो तृपातवातालिष्यहृल्लक्षारुक्षाम्" माघः। "क्षिरण्यमायुरस्तञ्च भूर्गौश्चाप्योषतस्तनुम्" मनुः। "दण्डे नैव समोषेत् कदाचन्नाप्नि विच्युतम्" मनुः ओषाञ्चकार कामाग्निदेवब्राह्मणकर्म्मियम्" भट्टिः "चिक्षेप रामस्तनुकञ्चमोषाञ्चक्रे शुचेश्वरः" भट्टिः तस्य "मूत्रप्रतीघातादुष्यते चुष्यते दह्यते पच्यते इव" सुश्रुतः।

उष दाहे वधे च भ्वा० पर० सेट् उदित सक० सेट्। ओषति औषीत् ओषाम् बभूव—आस—चकार उवोष। उदित्त्वात् ओषित्वा उष्टा वेट्। क्त। उष्टः। ओषणः।

अभि-सर्व्यतो दाहे। "येऽभ्युष्टिमग्न इव" यत० ब्रा० ११,२,७,२३। अभित ओषणं अभ्युष्ट सर्व्यतोदाहः तेनाभ्युष्ट इव" भा०। [अन्यभेदः अपूषादि०।

अव-अधःसन्तापनेन दाहे। अवोषः अधोभागे दाघो

उद्-आधिक्येन दाहे। "मा मोदोषिष्टम् मा मा क्षिप्तिष्टम्" यत० ब्रा० १,५,१,२५। "युवां मासुतृक्षमुदोषिष्टमाधिक्येन वा उदोषिष्टं दाहं काष्टम्" भा०।

उप-सामीप्येन दाहे। "अग्निना वा कलमुपोषेत्" आश्व० श्रौ० २,४,६। तमग्निभिः सप्तमोपोषणदेनम्" यत० ब्रा० १२,५,१,१२। उपवासे च उपोषणम्।

प्रति-प्रतिदाहे। "य त्वमग्ने प्रतीकेन प्रत्योषः यातुधान्यः" ऋ० १०,११८,८। प्रत्येकदाहे च "प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः" यजु० १,७, "प्रत्युष्टं प्रत्येकं दग्धम्" वेददी०।

उषस् प्रभातीभावे कण्ड्वा० पर० सक० सेट्। उषस्यति औषस्यीत् औषस्यीत् उषस्याम् बभूव आस चकार।

उष त्रि० उष-क। १दाहके २सन्ध्यात्रयसमये ३कालिनि ४युगगुणौ। ५रात्रिशेषे पु० मेदि०। रात्रिशेषश्च मुहूर्त्तात्मककालः पञ्चपञ्चाशदघटिकोत्तरसूर्य्योदयपर्य्यन्तकालः। ६दैत्यिसे पु०।

उषङ्गु पु० उष वा० अङ्गु। रुद्रे तस्य संज्ञकृत्वात्तथात्वम्। "उषङ्गु च विधाता च सान्ध्याता भूतभावनः" भा० अनु० १७

उषण न० उष-क्यु। १मरिचे २पिप्पलीमूले च २गुणत्रां, ४चव्यिके(चइ)। पिप्पल्यां च स्त्री। अमरश्चन्द्रे विहितः

उषती स्त्री उष-शत-ङी०नुम् गुणभावः रायसुकुट०। अकल्याख्यायां वाचि। "अयाश्च वाचा पर उद्विजेत न तां वदेदुषतीं पापलोक्याम्" भा० स० ६ अ० ८७ अ०। यज्ञे पु० उषन् शब्दः वाक्ये न० उषत् वाक्यं तेनास्य तल्लिङ्गता

उषत् पु० यदुवंशीये ऋषभेदे। क्रोष्टुवंशवर्णने "अनन्तरं सुयज्ञस्तु सुयज्ञतनयोऽभवत्। उषन् यो यज्ञमखिलं स्वधर्म्मसुखनावरः। यिनेयुरभवत् पुत्र उषतः शतुतापनः" हरि० ३७

उषद्गु पु० यदुवंश्ये ऋषभेदे। "स्वाहे पुत्रोऽभवद्राजा उषद्गुर्वेदतांवरः। मरुत्तकृतभिरीजे योविविधैर्भूरिदक्षिणैः। ततः प्रस्तुतिमिक्ष्वाकुर्व उषद्गुःसोऽप्युमात्मजम्" हरि० ३७

उषद्रथ पु० पौरवे ऋषभेदे उशीनरस्य भ्रातृस्तितिक्षोःसुतभेदे। "तैतिक्षवोऽभवद्राजा पूर्व्वस्यां दिशि भारत। उषद्रथो महाराज! फेनस्तस्य सुतोऽभवत्" हरि० ३१ अ०।

उषप पु० उष-दाहे कपन्। १वह्नौ २सूर्य्ये च तयोस्तापकत्वात्तथात्वम्। ३चित्रकवृक्षे च।

उषर्बुध् त्रि० उषसि बुध्यते बुध-किप् अकारादि० निपा० रः। अग्निहोत्रकाले प्रबुद्धे। "मर्त्तेष्वग्निरुषर्बुदस्तिग्मजम्भो वेदाः" ऋ० ६,४,२। "आकाँ सूर्य्यस्य रोचनाद्विश्वान् देवानुषर्बुधः" १,१४,६ "आ दाशुषे जातवेदो वहाद्या देवा उषर्बुधः" ऋ० १,४४,१।

उषर्बुध् त्रि० उषसि बुध्यते बुध-क अकारा० निपा० रः। अग्निहोत्रकाले प्रबुद्धे। "इमामू षु वो अतिथिमुषर्बुधम्" ऋ० ६,१५,१।२ अग्नौ पु० ३चित्रकवृक्षे च अमरः।

उषस् न० ओषत्यन्धकारम् उष-असुन् किच्च। १प्रत्यूषे, "उष उषो हि वसो अग्रमेषि" १०,८,४। स च कालः। "पञ्चपञ्च उषःकालः" स्मृतेः पञ्चपञ्चाशद्घटिकोत्तरः। "आसीदासन्ननिर्वाणः प्रदोषार्द्धविशेषसि" रघुः। "पुनरुषसि विविक्तैर्मातरिश्वावचुम्बे" माघः २सन्ध्यात्रये स्त्री "इह सुरेन्द्राय पूर्व्वोरुषसोदुहाना" ऋ० ६,६४ ५। तेन उषा उषसौ-उषस रत्यादि भकारादौ परे वेदे मस्य दः उषद्भिः त्रि० कौ०। "निम्नुच उषसस्कर्व्वरिषु" ऋ० १,१५१,५, ३तदभिमानिदेवताभेदे स्त्रियां देवताद्वन्द्वे पूर्व्वापरयोः उषासादेशः। "नक्तोषासा सुपेशसा" ऋ० १,१४२,७। तदभिमानिदेवताभेदाभिधायित्वेन देवताद्वन्द्वः। "जिगीषोषासानक्ता सुदुघेव धेनुः" १,१८६,४। आदिपदलोपोऽपि उषासावश्विना" यजु० २१,५०। नक्तोषासाविति प्राप्ते आदिपदलोपः वेददी०। "उषासा वां सुहिरण्ये" यजु० २९,६। नक्तोषासावित्यत्रैः वेददी०। "सास्य देवता यत्र। उषस्तद्देवताके पशावादौ" कात्यायिकर्म्मकाण्डिक उषस्यः यजु० २४,४, उषस्या उषादेवताकाश्वतर्ये यूपे 'नक्तोष्या'

वेददी० ४ब्राह्मसूक्ते "उषासैनयस्य मेध्यस्य विव्याध" इ०उ०। "उषा ब्राह्मो मुहूर्त्तकालः" ग०भा०।

५दिवोदासकन्यादेवतायाम् स्त्री औदमनोरमा।

उषसी स्त्री उषं तापकत्वात् त्विषं स्यति सो-क गौरा० ङीष्। सायं सन्ध्यायाम् मेदिनिः।

उषस्ति पु०ऋषिभेदे "उषस्तिर्ह चाक्रायणः" का०उ०। उशनोऽपत्यं "अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ" "ततो होषस्तश्चाक्रायण उपरराम" इति च शत०ब्रा०१४,६,५,१।

उषा स्त्री ओषत्यन्धकारम् उष+क। प्रातरादिसन्ध्यासु "वेनीरनुव्रतसुषाः सखः" ऋ०८,४१,३। तिस्रः प्रातःसायं मध्याह्नप्ररूपा उषाः "भा०। "उषा विभातीरनु भासि पूर्व्वीः" १,६,७, "तेज परिहानिरुषा भानोरुदयं यावत्" इ० सं०उक्ते २कालेनक्षत्रप्रभात्ययः काल उषा। तेन पञ्चपञ्चाशद्घटिकेस्तरमारभ्य सूर्य्योदयपर्य्यन्तः स कालः। लग्नाद्यभावे उषाकाले यात्रा यस्ता यथाह ज्यो० "प्रस्फुटदुतितारका स्फुटतटी प्राची भवेद्विर्म्मला त्वीषद्रक्तविलोहितानलयुक्ता दैवैः सदा वाञ्छिता। नो वारं न तिथिं न योगकरणं लग्नञ्च नापेक्षते कृत्वा दोषसहस्रसञ्चयमुषा नूनं करोत्युत्तमिमिति"। "तिथ्यादिषु निषिद्धेषु चन्द्रतारादिलोमतः। उषां गोधूलियोगं वा वर्जयित्वा गमनं चरेत्। प्राच्यामुषां प्रतीच्यान्तु गोधूलिं वर्जयेन्नृप। दक्षिणेऽभिजितं चैवमुत्तरे च निशां तथा"। "आरक्तबिम्बं रजनीविरामे वदन्त्युषायोगमिह प्रवीणाः। व्यास" "आहुः प्रयातुः सकलार्थसिद्धिः संलक्ष्यते हस्ततलस्थितेव" ज्यो०त०व्यास। अन्धकारेण सन्ध्यापकारिण्यां रात्रौ मेदि० "अधिकरुचिरयेषामप्युषां जागरित्वा" माघः। ४प्रत्यूषभूमौ। ततः क्वचित् गौरा० ङीष्। "भक्षन् क्षुतं कृष्णकराङ्गिमोष्णाम्" भाग० ५स्त्रीगव्यां क्षेम० ६उषायां विश्व० ७श्यालायां रमानाथः। ८बाणराजसुतायाञ्च तस्या दीर्घादित्वमपि भारतादौ तथैव निर्देशात्। तया च यथा अनिरुद्धः प्रतित्वेनाप्त तथा वर्णितं भाग०१०स्क०६२अ०यथा (बाणस्य) "तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिम्। कन्या लभ्नतकालेन प्रागदृष्टपतेन सा। सा तत्र तमपश्यन्ती काप्ति कान्तेति वादिनी। सखीनां मध्य उत्तस्थौ विह्वला व्रीडिता भृशम्। बाणस्य मन्त्री कुम्भाण्डचित्रलेखा च तत्सुता। सख्यपृच्छत् सखीं मूयः कौतूहलसमन्विता। कं त्वं मृगयसे सुभ्रु! कीदृशस्ते मनोरथः। हस्तप्राप्तं न तेऽद्यापि राजपुत्रप्रलम्भने। ऊषोवाच। दृष्टः कश्चिन्नरः स्वप्ने श्यामः कमललोचनः। पीतवासा दृढबाहुर्योषितां हृदयङ्गमः। तमहं मृगये कान्तं पाययित्वाऽधरं मधु। क्वापि यातः स्पृहयन्तीं विद्मो मां हृज्जनार्णवे। चित्रलेखोवाच। व्यसनमपकर्षामि त्रिलोक्यां यदि भाव्यते। तदानेष्ये नरं। यस्ते मनोहर्त्ता तमादिश। इत्युक्ता देवगन्धर्व्वसिद्धचारणपन्नगान्। दैत्यविद्याधरान् यक्षान् मनुष्यांश्च तथाऽलिखत्। मनुजेषु च सा वृष्णीन् शूरमानकदुन्दुभिम्। व्यलिखत् रामकृष्णौ च प्रद्युम्नं बीक्ष्य लज्जिता। अनिरुद्धं विलिखितं बीक्ष्योषाऽवाङ्मुखी ह्रिया। सोऽसावसाविति प्राह ह्रियमाणा महीयते। चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी। यक्षी विद्यायसा राजन् द्वारकां कृष्णपालिताम्। तत्र सुप्तं सुपर्य्यङ्के प्राद्युम्निं योगमास्थिता। गृहीत्वा गोपितं पुरं सख्यै प्रियमदर्शयत्। सा च तं सुन्दरवरं विलोक्य मुदिताननाः। दुष्प्रेक्ष्ये गृहे पुंसां रेमे प्राद्युम्निना समम्। परार्द्ध्यवासःस्रग्गन्धधूपदीपासनादिभिः। पानभोजनभक्ष्यैश्च वाक्यैः सुश्रूषयार्च्चितः। गूढः कन्यापुरे यत्नात् प्रद्युम्नस्तेन हृया तया। नाहर्गणान् स बुबुधे ऊषयोपहृतेन्द्रियः" विस्तरस्तु हरिव०१७६अ०। प्रातःकाले अव्य० मेदि०अव्ययत्वात् ततो भवार्थे ष्युञ् टच्। उषातन तद्भवे त्रि० स्त्रियां ङीप्।

उषाकाल पु०उषायां कलोरवो यस्य। कुक्कुटे।

उषापति पु० ६त०। कृष्णपौत्रे प्रद्युम्नपुत्रे यदुवंश्ये अनिरुद्धे तत्पतित्वप्राप्तिकथा उषाशब्दे उक्ता उषानाथादयोऽपि, अमरे "अनिरुद्ध उषापतिरिति" सुखपाठः भारतादौ तु दीर्घपाठः।

उषित त्रि० वस क्त। १पर्य्युषिते २कृतवासे च। उष-दाहे क्त। ३दग्धे मेदि०। ४चरिते धरणिः। भावे क्त। ५वासे न० "चातुर्व्वालैरुषितं यत्र" शु०त० देवलः।

उषीर पुंन० उष-कीरच्। वीरणमूले रायमुकुटः।

उष्ट्र पु० उष्-सेचने ष्ट्रन् वेदे नेट्। १सस्यकृच्छत्रारि चतीवर्षे। तस्यामोघवीर्य्यत्वात् तथात्वम् "ओदारो वा" काल्या० ५,११,१२। "ओदारो मघवतीवर्षी" कर्कः। आ+सम्यक् उदारो इति विग्रहः। "उदारेव वर्षरेषु शयेषे" ऋ० १५,१०६,२। लोके तु उष्ट्रेति एव। सेऽस्मिन् त्रि० स्त्रियां ङीप्।

उष्ट्र पुंस्त्री० उष+ष्ट्रन् त्रिका। (उट) प्रसिद्धे पशुभेदे

स्त्रियां जातित्वात् ङीष्। "हस्तिगोऽश्वोष्ट्रदमकोनक्तंचर्य्यश्च जीवति" "नाधीयीताश्वमारूढो न रथं न च हस्तिनम्। न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः" मनु। तद्याननिषेधमाह "उष्ट्रयानं समारुह्य खरयानं तु कामतः। स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुध्यति" मनुः। कामतः" इत्यस्या कर्म्मभेदे तद्याने न दोष इति क्षत्तिम् अतएव 'उष्ट्रमारोक्ष्यन्नभिमन्त्रयते त्वाष्ट्रोऽसि" पार० गृ०सू० मन्त्रलिङ्गेन तद्यानं विहितम्। तस्य मांसं न भक्ष्यम् "भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः" मनूक्तेः। तेनास्य एकदन्तपङ्क्तियुक्तत्वम्। "गौरजो महिषः कृष्णः शूकरो गवयोरुरुः। द्विशफा पशवश्चैते अनुक्त्वा भक्षयेत्तु तम्" भाग० उक्तेः गवादयः उष्ट्रान्ता द्विशफाः इति बोध्यम्। तथा तद्दाने दोषः "मनुष्यमारणे क्षिप्रं चौरवत् किल्बिषं भवेत्। प्राणभृत्तु महत्स्वर्द्वं गोगजोष्ट्रहयादिषु" मनूक्तेः। ब्रह्महत्याशेषपापेन तज्जातिर्भवति यथाह मनुः "यां या योनिन्तु जीवोऽयं येन येनेह कर्म्मणा। क्रमशो याति लोकेऽस्मिंस्तत्तत् सर्वं निबोधत। बहून् वर्षगणान् घोरा रुरकान् प्राप्य दारुणान्। संसारान् प्रतिपद्यन्ते महापातकिनस्त्विमे। शूकरखरोष्ट्राणां गोऽजाविमृगपक्षिणाम्। चण्डालपुक्कसानाञ्च ब्रह्महा योनिमृच्छति" यान हरणपापेऽप्युष्ट्रयोनिप्राप्तिमाह हरिवंशे यनुक्तौ मनुः "स्त्रीहस्तः स्तोकको वारि.यानाल्लुब्धः, पशूनजः। तल्पधे प्रायश्चित्तमाह "हयोष्ट्रगोविकोदेषु गर्दभेषु च मारणात्। प्राजापत्यार्द्धमेवेह प्रायश्चित्तं विधीयते" प्रा०वि०विष्णु। तद्भक्षणे प्रायश्चित्तमाह भुक्त्वेत्यनुक्तौ प्रा०वि०शङ्खः "ग्रामस्थं कुक्कुरोष्ट्रौ च सर्वं पञ्चनखं तथा। क्रव्याद् कुक्कुटं श्याम्यं कृत्वात् संवत्सरव्रतम्" "अथोष्ट्रवामीगतवाहितार्थः" रघुः। "इतिञ्च तत्र कुर्व्वीत यासुष्ट्रोनायलोकयेत्" मनुः। "अन्योन्यतः पथि वतावभीतावभिभोष्ट्रौ" माघः। तन्मूलगुणाः सुश्रु० उक्ताः। "अथ मूत्राणि गोमहिषाजाविगजहयखरोष्ट्राणां तीक्ष्णानि कटून्युष्णानि तिक्षाणि लवणानुरसानि लघूनि शोधनानि कफवातकृमिभेदोविषगुल्मार्शउदरकुष्ठशोफारोचकपाण्डुरोगहराणि कृच्छ्राणि दीपनानि च सामान्यतः। भवन्ति चात्र। तत्सर्वं कटु तीक्ष्णोष्णं लवणानुरसं लघु। शोधनं कफवातघ्नं क्रिमिगेदोविषापहम्। अर्शोजठरगुल्मघ्नं शोफारोचकनाशनम्। पाण्डुरोगहरं भेदि कृच्छ्रं दीपनपाचनम्"। सामान्यत उक्ता "अर्शोघ्नं कारभं मूत्रमिति" विशेषगुण उक्ताः। तन्मांसगुणाः सुश्रुते उक्ताः; तच्च उरभ्रशब्दे दर्शितम्। तस्य याम्यत्वं तत्रोक्तम्। तच्च उरभ्रशब्दे दर्शितम्। किन्तु तस्यारण्यत्वमपि अतएव "उष्ट्रमारण्यमनु ते दिशामि" यजु०१२।२४, तस्यारण्यत्वमुक्तम्। तस्य त्वष्टृदेवतायै अश्वमेधे देयतोक्ता "इहस्पतये गवयान् त्वष्टृ उष्ट्रान्" यजु०२४।२८, द्विखे गोयुगच्च उष्ट्रगोयुग उष्ट्रद्विखे न० षष्ठ्याः गोच्च। उष्ट्रगोऽउष्ट्रयाष्ठ्यां न० षट्के षड्गवच्च। उष्ट्रषड्गवः उष्ट्रषट्के न०। तत्रोदमण्। ओष्ट्र तत्सम्बन्धिमांसादौ त्रि०। "परं चौष्ट्रं मैषं नरमहिषयोस्त्वागमपि वा" कर्पूरस्तवः।

उष्ट्रकर्णिक पु० उष्ट्रस्य कर्णः भेदनम् कर्ण+भिदि-अच्। सोऽस्त्रिन्नस्तिठन्। दक्षिणस्थे यवनदेशभेदे तद्देशवासिभिर्हि भोजनार्थम् उष्ट्रभेदनात् तद्देशस्य तथात्वम्। सहदेवदक्षिणदिग्विजयवर्णने "अन्ध्रांस्तालवनांश्चैव कलिङ्गानुष्ट्रकर्णिकान्। आटवीं च पुरीं रम्यां यवनानां पुरीं तथा" भा०स०२०अ० उष्ट्रतुल्यकर्णजनवत्त्वाद्धा तथात्वम्।

उष्ट्रकाण्डो स्त्री उष्ट्र इव काण्डोऽस्य जातित्वात् ङीष् (उटाटी) पुष्पभेदे राजनि०।

उष्ट्रग्रीव पु० उष्ट्रग्रीवा आकारत्वेनास्त्यस्य अर्श० अच्। सुश्रुतोक्ते पैत्तिके भगन्दररोगभेदे। तल्लिदानस्वरूपादि तत्रोक्तं यथा "वातपित्तश्लेष्मसन्निपातागन्तुनिमित्ताः शतपोनकोष्ठग्रीवपरिस्रावित्वस्त्रूकावर्त्तान्त्रार्गिणो यथासङ्ख्यं पञ्च भगन्दरा भवन्ति। ते तु भगगुदवस्तिप्रदेशदारणाच्च भगन्दरा इत्युच्यन्ते। अपक्काः पिड़काः पक्वास्तु भगन्दराः। तेषान्तु पूर्वरूपाणि कटीकपालवेदना गुदकण्डूर्दाहः शोफश्च गुदस्य भवति" इत्युपक्रम्य। "पित्तन्तु प्रकुपितमनिलेनाधःप्रेरितं पर्ब्बदरन्ध्रस्थं रक्तां तन्वीमुच्छ्रितामष्ट्रग्रीवाकारां पिड़कां जनयति। सा ऽऽस्यचोषादीन्वेदनविशेषान् जनयन्ती प्रतिक्रियमाणा च पाकमुपैति वल्मीकाग्निदाह्याभ्यामिव दह्यते दुर्गन्धसुषिरामाक्राव स्रवन्मुपेक्षितश्च वातमूत्रपुरीषरेतांसि विसृजति, तं भगन्दरमष्ट्रग्रीवमित्याचक्षते"। उष्णगिरेधरोऽस्यत्र "प्रकोपणं पित्तमतिप्रकोपितः करोति रक्ता पिड़का गुदागताम्। ततानुपाकाश्चिमपूतिवाहिनीम् भगन्दरं तूष्ट्रगिरोधरं वदेत्" निदानम्।

उष्ट्रधूमरपुच्छो स्त्री उष्ट्रस्येव धूसरः पुच्छ इव मञ्जरी अस्याः जातित्वात् ङीष्। (विलाति) क्षुपभेदे रत्नमाला स्वार्थे कन् ह्रस्वः। तत्रार्थे।

उष्ट्रपादिका स्त्री उष्ट्रस्य पादाइव पादोमूलमस्याः कपि अत इत्त्वम्। (मदनसाली) भूमिखतायाम् रत्नमा०

उष्ट्रस्थान न०ई त०। उष्ट्रस्य स्थानायाम्। तत्र भवः अण्। स्थानान्तत्वात् तस्य लुक्। उष्ट्रस्थान तत्रभवे त्रि०तद्धित लुकि विशेष्यलिङ्गत्वनियमात् त्रिलिङ्गत्वम्।

उष्ट्रासिका स्त्री आसनम् आसिका आस–भावे ण्वुल् उष्ट्रस्येवासिका। उष्ट्रस्येव आसने। "उष्ट्रासिकाः आस्तने" पा० भाष्यम् अत्र क्रियाविशेषेऽपि यथा वस्तुवचनान्तताऽस्त्रीत्वता च तथाकारे समर्थितम् तत्र मदर्थरत्ने अस्माभिर्दर्शितम्।

उष्ट्रिका स्त्री उष्ट्रस्याकारः पृषोदरत्वं इव आकारोऽस्त्र्यर्थः ठन्। ह्रस्वमये मद्यभाण्डभेदे त्रिका: "धूर्मरुक्त्रिकोपविदारितोष्ट्रिका" माघः। उष्ट्री+स्वार्थे कन्। उष्ट्रजातिस्त्रियाञ्च।

उष्ण पु०उष+नक्। १पीते, ऋतौ, २आतपे, ३पलाण्डौ ४नरकभेदे, ५भीतविरोधिस्पर्शे च। अर्श०अच्। ६तद्वति, ७आशुस्पर्शरहिते ८दहने च त्रि०। "क्षुतके क्षुतके चैव न स्नायादुष्णवारिणा" स्मृतिः "आदहे नातिशीतोष्णः नभस्यानिव दक्षिणः" रघुः "अभीक्ष्णमुष्णैरपि तस्य शोषयः" "स्नापयन्तमभिमानोष्णैर्वनमालां सुखानिलैः" माघः ऽतापे पु०मुष्णन्तमुष्णं ततिभिस्तरूणाम्" माघः "उष्णं तापम्" मल्लि०। तत्र पीतस्य सूर्यतापाधिक्यवत्त्वात् उष्णत्वम् "पीतातीव्रकरोभानुर्न हेमन्ते तथाविधः" इति मयमत्ते "अत्यासन्नतया तेन पीत्वा नीत्वा करान् रवेः। देवभागेऽसुराणान्तु हेमन्ते मन्दताऽभवत्" स्मृ०वि०तथैवोक्तेः। विवृतक्षेत्रं रङ्गनाथेन "तेन उत्तरदक्षिणगोलयोः सूर्यस्योत्तरदक्षिणसञ्चारूपकारणेनेत्यर्थः। देवभागे जम्बूद्वीपे अत्यासन्नतया सूर्यस्यात्यन्तनिकटस्थत्वेन पीत्वे पीतत्वौ सूर्यस्य तेजोगोलकस्यकिरणाक्षीच्छा अत्युष्णाः। अत एव राक्षां देवभाग इत्यस्य समन्वयाद्देवानां भागे समुदाहृत्यप्रदेशे हेमन्ते हेमन्तर्तौ तत्कारात् सूर्यस्यात्युष्णाः किरणाः सूर्यस्यात्यासन्नत्वात्। अन्यथा सूर्यस्य दूरस्थत्वे मन्दता किरणानामुष्णताभावः। देवभागे हेमन्तर्तौ नराणां मन्दता। अतएव तत्र शीताधिक्यम्, दैत्यभागे पीत्वे नराणां मन्दता शीताधिक्य च। तथाच देवभागे दक्षिणगोले सूर्यस्य दूरस्थत्वत्तरगोले निकटस्थत्वं मध्यगतदेशानां क्रमेणाधिक्यत्वादीति भावः"। अतएवोक्तं भिक्षकटयोर्मध्ये गाढं तपति भास्करः" ति०त०पु०। एतच्च देवभाग एव नासुरभागे, पीत्व ऋतुत्व उष्णताधाताभावः। "मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रैष्मावृतू" काल०मा०दृष्टकोपधानन्नोक्तेः। ततो भावे ष्यञ्। उष्णिमन् पु० तत्र उष्णता स्त्री त्व उष्णत्व न० ष्यञ् औष्ण्य न०। उष्णस्यर्थे स्वार्थे कन् उष्णकार्थाद्यर्थे। उष्णकयोगेतु तेजसोयुक्तः "अर्श आद्यच्" भाषोक्तेः जलादीनां तेजःसंयोगविशेषादौपाधिकः। देहस्य तथात्वे कारणमूह्यम्यद्वक्ष्यते गुणवचनत्वात् प्रकारे द्वित्वम् उष्णोष्ण उष्णप्रकारे। "उष्णोष्णीकरणूजः" माघः

उष्णक त्रि०उष्णमिव करोति कन्। १अनलसे, क्षिप्रकारिणि क्षिप्रकारी हि जाठराधायकमाहारजलमनाहत्य स्वकर्त्तव्ये व्याप्रियते इति तस्य तथात्वम्। उष्णं करोति उष्ण+णिच्-ण्वुल्। २ज्वरे पु०।

उष्णकर ष० उष्णः करः किरणोऽस्य। १सूर्ये। उष्णकिरणोष्णदीधिति प्रभृतयोऽप्यत्र। उष्णं करोति क–अच् ई त०। २उष्णकारके त्रि०

उष्णकाल पु०कर्म०ई त०वा। पीत्वे ऋतौ। "नक्तं नैव क्षुते दद्यात् नोष्णकाले न दुर्दिने" स्मृतेः।

उष्णग पु०उष्णमुष्णत्वं गच्छति यत्र गम–ड० आधारे ड। पीत्वे काले "मातङ्गोन्मथितं भूमौ नदीरोधदुरोष्णगे" भा०उ०३२३अ०। आधारे यज् उष्णगमोऽत्र ह्रेम०।

उष्णगु पु० उष्णागावः करा अस्य वृक्षः। सूर्ये। उष्णरश्म्यादयोऽत्र "कुबेरगुप्ता दिशमुष्णरश्मेः" कुमा०।

उष्णकरण न० ई त०करणे परे लुप्। उष्णसाधने।

उष्णनदी स्त्री कर्म०। "यमद्वारे महाघोरे तप्ता वैतरणी नदी" इत्युक्तायाम् तप्तायां वैतरण्याम् नद्याम्।

उष्णवारण न०उष्णं वारयति वृ–णिच्–ल्यु ई त०। आतपत्रे, छत्रे "वर्ष्मसन्मोजमिवोष्णवारणम्" कुमा०। अमोत्पत्त्यादिकम् आतपत्रशब्दे ई४६ पृ० उक्तम्। तच्छत्रं दृढ़सं० दर्शितं यथा "सिचितं तु कुसुमैः; कवाकुनयूरसारसानां च। दौकूलेन नवेन तु समन्ततश्चादितं शुक्लम्। शुक्लाकर्करचितप्रलम्बमालाविलं स्फटिकसूत्रम्। मध्यस्थगुणैकं नवपर्व नगैकदण्डं च। दण्डार्थविधृतं तत् सुमाहृतं रत्नविभूषितसुदग्रम्। नृपतेस्तदातपत्रं कल्याणकरं विजयदं च। युवराजसदपतिपक्षयाः सेनापतिदण्डनायकानां च। दक्षोऽर्धपद्मकृतः समपद्मकृतार्धविकारः। अन्येषान्तुष्णं प्रसादपद्मैर्विभूषितशिरस्कम्। व्यावस्थिरत्नभाजं छत्रं कार्यं च नागरम्।

अन्येषां च नराणामातपवारणं तु छत्रकम्। समदण्डयुक्तं छत्रं कार्यं तु विप्राणाम्" उष्णात्तादयो ऽस्य। तद्वारणे गुणाः सुश्रुते उक्ता यथा "वर्षानिलरजोघर्मक्लिमादीनां निवारणम्। बलं चक्षुरनौजस्यं शरीरं छत्रधारणम्"।

उष्णवीर्य्य पु० उष्णमुष्णं वीर्य्यमस्य। १शिग्रुमाराख्ये जलजन्तौ। २उष्णवीर्य्यवति त्रि०। उष्णवीर्य्यत्वाच्च सुश्रुते नानास्थाने उक्तानि तानि तत एवावगन्तव्यानि

उष्णांशु पु० उष्णाः अंशवोऽस्य। सूर्य्ये।

उष्णागम पु० उष्ण आगम्यतेऽत्र गम+आधारे-अप्। निदाघकाले। उष्णाभिगमोऽप्यत्र यज्ञेषु०।

उष्णालु त्रि०उष्णं न सहते आलु। उष्णाऽसहने। "उष्णालुः गिरिरे निषेदति तरोर्मूलावलग्ने गिरौ"विक्रमो०।

उष्णासह पु०उष्णं आसह्यतेऽत्र आ+सह-अच्। १ग्रीष्मर्त्तौ ऋतौ। उष्णं न सहते अच्। २असह्योष्णे त्रि०।

उष्णिका स्त्री अल्पमल्पमस्याम् अल्पार्थे कन् त्रि० अत इत्वम् उष्णादेयः। १यवान्याम्(यावा)। उष्णिकायत्वात् स्त्रियां टाप् अत इत्वम्। २दलायाम् स्त्रियाम्।

उष्णिज् पु० उष्ण-इजिक् वा० नुट्। उष्णस्वर्यक्ते तत्प्रसा० स्वार्थे क। औष्णिज तदर्थे।

उष्णिह् स्त्री उत्क्षिप्यति क्षिप् नि०उदोऽन्त्यलोपे नत्वम्। सप्ताक्षरपादके १छन्दोभेदे। स्वादौ कुः उष्णिक्। उष्णिग्भ्याम्। "गायत्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च"इ०र०। "अथ छन्दांसि गायत्र्युष्णिगनुष्टुब् बृहती" इत्युपक्रम्य "द्वितीयवसुष्णिक् त्रिपदान्योद्वादयक्षरः। आद्यक्षरे पुरउष्णिक्, मध्यमक्षरे ककुप्। त्रैष्टुभ जागतचतुष्पक्षाः ककुब्न्यङ्कुपिरेकादशिनो परः षट्कलनुपिराः मध्ये चेत् पिपीलिका मध्यान्यपक्षलक्षयोऽष्टका अनुष्टुब्गर्भा चतुःसप्तोष्णिगेव" सर्वानु० ५अ०। "एवमेवोष्णिहं सवितारं श्रीवाक्षनूके"इति सर्वानु० ७अ० उक्तेः तस्याः सवितृदेवताकत्वेन श्रीवाक्षनूके च न्यासः। तस्या उपधानप्रकारः यत०आ० ८,६,२,३, आदौ दर्शितं तत एवावसेयः। २तद्विशिष्टदेवभेदे च। अन्यमेधे "त्रिवत्सा अनुष्टुभे तूर्य्यवाह उष्णिहे" यजु० २५,१२१। पशुविशेषावालम्भदेवताविशेषोद्देशेन यूपादौ बन्धनसाधनम्। अस्य छन्दस्त्वेऽपि अजादि०टाप्। उष्णिहा "उष्णिहा छन्द इन्द्रियम्" यजु० २१,१२, "इडयोष्णिहा ककुप् छन्दोभिः यज्ञयुत्वा २१,२२, "सूयवसाद् भगवती हि भूया अथो वयं भगवन्तः स्याम उद्यन्तस्त्वा सुमतये जनासो ऽनु द्यून्त्सदमिद्धर्षमाणाः" ऋग्वेदे ६,१२४,१,

उष्णीगङ्ग न० उष्णीभूता गङ्गा नदीभेदो यत्र मध्यपदलोपः। भृगुतुङ्गपर्वतस्थे तीर्थभेदे "अपां ह्रदं च पुण्याख्यं भृगुतुङ्गं च पर्वतम्। उष्णीगङ्गे च कौन्तेय! सामान्यः समुपस्पृशेत्" भा०व०१२५ अ०।

उष्णीष पु०न०उष्णमीषते क्षिणोति ईष-क यक० परह्रस्वम्। १शिरोवेष्टनवस्त्रे(पागड़ि)२किरीटे च "अथाका अश्वर्षुर्ष्णीषं प्रयच्छति तदङ्गिरसा प्रतिष्ठत्र त्रिःप्रदक्षिणं शिरः सम्मुखं वेष्टयित्वा" आ०औ०सू०६,७। सवत्सा लोहितोष्णीषा निक्षिणिनो यान्तेयुः" आ०औ० ६, ७,४। "लोहितोष्णीषा ऋत्विजश्चरन्तीति" श्रुतिः। समावर्त्तनकाले च तस्य धारणमाचार्य्याय दानं च विहितम्। "अथैतान्युपकल्पयीत समावर्त्तमाने मणिकुण्डले वस्त्रयुगं छत्रमुपानद्युगं दण्डं जलकुम्भमनुलेपनमाञ्जनमुष्णीषमित्यालाने आचार्य्याय च"। "यद्युभयोर्न विन्देताचार्य्यायैव"आ० स्मृ० २,८,१,२। तद्वारणगुणः सुश्रु० उक्तः "पवित्रं केश्यमुष्णीषं वातातपरजोऽपहम्। वर्षानिलरजोघर्मक्लिमादीनां निवारणम्"।

उष्णीषिन् त्रि० उष्णीष+अस्त्यर्थे इनि। १उष्णीषधारिणि स्त्रियां ङीप् २सङ्कीर्णे पु०। "उष्णीषी च सुवस्त्राय उदोषिन्नन्तया" शिवसुतौ" भा०अनु०१७। "उष्णीषिणे सुवस्त्राय सङ्कीर्णाय भीरवे" भा० अनु० ८।

उष्णोदक न० कर्म०। अग्निना तप्तजले वाष्पभावनादग्नेर्वायवेयपादादिहीनजले अले बहुगुणादि भावप्र०

"अष्टमेनांशयेषेण चतुर्थेनार्द्धकेन वा। अथवा क्वथनेनैव विद्यादुष्णोदकं बुधः"। तद्गुणाः "क्षेत्रामवातमेदोघ्नं वातश्लेष्मविषापहम्। आस्यवासहरं हृद्यं पीतमुष्णोदकं नृणाम्। क्वाथ्यमानन्तु निर्वेगं निष्फेनं निर्मलन्तथा। अर्द्धावशिष्टं यत्तोयं तदुष्णोदकमुच्यते। जूरकास क्रफक्वासवातपित्तारुमेदसाम्। नाशनं वस्तिशोधिपथ्यमुष्णोदकं सदा। त्रिपादग्रथं सलिलं पीत्वे यदि यच्छते। क्रिमेर्दुष्टेन गिरिरे तथा वर्षासन्नयोः" अन्ये तु "निदाघे त्वर्द्धपादोनं पादहीनन्तु शारदम्। गिरिरे च वसन्ते च क्रिमे चार्द्धावशेषितम्। अष्टमांशावशेषन्तु वारिवर्षासु यच्छते" केचित्तु "विधिश्चक्रेषु वाप्येषु देवेषु त्रिषु यत्नतः। एकभागावशेषं स्यादन्यु वर्षादिषु क्रमात्"। अत्र दोषाणां वयोवस्थता क्षीणता वा तथा अवस्था ग्राह्यणीया। "तत् पादहीनं पित्तघ्नम-

र्द्धोनन्तु यातनुत् । त्रिपादहीनं लघ्वन्नं संध्याह्नग्नि करं लघु" त्रिपादहीनस्य तत्कालस्य आरोग्यान्वुसंज्ञा । तस्य लक्षणगुणास्तु । "पाटयेपन्तु यत्तोयमारोग्याब्वु तदुच्यते । आरोग्याब्वु सदा पथ्यं कायस्यामकफापहम् । सद्यो लघुकरं प्राहि दीपनं पाचनं लघु । आनाहशमाद्भुत्मूलार्शोगुल्मशोथोदरापहम्" भा० प्र० "दिवा प्रतप्तन्तु यत्तोयं रात्रौ तद्गुणवत्तां व्रजेत्" वैद्यकम् । "संक्रान्तौ वर्षदर्शे च पर्वणे चन्द्रसूर्ययोः । सूतके मृतके चैव न स्नायाद्युग्मवारिणा" स्मृतिः । "क्षौरस्यस्नृतं वापि शीतस्नानमथापि वा । गात्रं पय पुनात्याशु पापमामरणान्तिकम्" मरीचिः । "नित्यं नैमित्तिकञ्चैव क्रियाङ्गं मलकर्षणम् । तीर्थाभावे च कर्त्तव्यमुष्णोदकपरोदकैः" यमः । "उष्णाम्बुनाधःकायस्य परिषे[illegible]
तेनैव चोत्तमाङ्गस्य बलकृत् केशचक्षुषो" आ० त० आयुर्वेदः । उष्णोदकेनाचमननिषेध आचमनशब्दे उक्तः ।

उष्णोपगम पु० उष्ण उपगम्यतेऽत्र आधारे घञ् अलुक्सः । निदाघकाले । स्त्रीत्वञ्च । [कन् । तत्रैव आतपे च ।

उष्म पु० उष–मक् । १घर्मे, २आतपे, ३पित्ते च । स्वार्थे उ(ऊ)ष्मन् त्रि० अष–आधारे मनिन् वा० वा कुत्वम् । १स्त्रीत्वञ्च । कर्त्तरि मनिन् । २आतपे "सोपतापि मनः सोष्म" "उष्णोष्णीकरणम्: प्रबलोष्णोऽग्निः" "अभिज्ञानमुष्णैरपि तस्य सोष्णैः" माघः । दीर्घादिः ३यमसङ्ख्यभेदे च ।

उ(ऊ)ष्मप पु० उष्माणं पिबति पा–क्विप् । भर्गोः पुत्रे ३पितृगणभेदे "सुकालिनो बर्हिषद उ(ऊ)ष्मपा आज्यपास्तथा" पितृगणनायां स्मृतिः । २उ(ऊ)ष्मपानकर्त्तरि तपस्विभेदे त्रि० । "उष्मसङ्खैरिव रविनिषिक्तदृष्टिभिरु(ऊ)ष्मपैः" काद० । [घञ् अलुक्सः । निदाघकाले ।

उ(ऊ)ष्मागम पु० उ(ऊ)ष्मा आगम्यतेऽत्र आ+गम–आधारे

उ(ऊ)ष्माय नामधा० उ(ऊ)ष्माणमिच्छति उ(ऊ)ष्मन्+क्यङ् । उ(ऊ)ष्मायते औष्माणिष्ट उ(ऊ)ष्मायमाणः ।

उक्ष पु० वक्षन्ति रसान् अत्र वक्ष–रक् नि० न षत्वम् । १किरणे, सूर्य्यकिरणानां जलाकर्षकत्वेन रसवत्त्वात्तथात्वम् । २अन्येषां यथायथं रसवत्त्वम् बोध्यम् । ३वृषे । ४सुरभ्यां ५जतायां ६पृथिव्यां च स्त्री निघ० । देवमात्रे पु० उज्ज्व० "उक्षावेतं धूर्वाहौ" यजु० ४,२२ । "उक्षो अनड्वाहौ" वेदी० "क्रत्वा नावोक्षः पितेव" ऋ० ६,१२,४ । "उक्षौ इषभः" भा० "शरदर्कैरिवोदीच्यानुदरिच्यत रसानिव" रघुः "यो धर्त्ता भुवनानां य उक्षाणमपीजा" ऋ० ८,४१,५ । ७ऋषौ "प्रमित्रासो न दृतरुक्षो अग्ये" १,५८,४ । "वसन्त नभसोत्युक्षः सूर्य्यः" भा० । सूर्य्यरश्मिसम्पर्कात् दिवसे च । "वसुमा उक्षयामा" ऋ० ७,७१ ४, उक्षयामा दिवसं प्रति गन्ता" भा० उक्षमिच्छति उक्षते "उक्षोमाङ्काटः प्रतिषेधः" वार्त्ति० लङादौ नाट उक्षीत्यृक्षेः सत्वाभावश्च आर्षत्वात् । दृसहवासिनोः अश्विनीकुमारयोः हि० ष० । "अग्नय उक्षा जरन्ते" ऋ० ४,४, ५,५, उक्षा सहनिवसन्नावश्विनौस्तुतौ" भा० ।

उक्षि स्त्री वक्ष–का० कि पत्वाभावः । गन्त्र्याम् "क्षिण्वन्ति क्षर मुक्षय" ऋ० ६,५,१, "उक्षयः सर्व्वतो गन्त्र्यः" भा० ।

उक्षिक पु० उक्ष+अल्पार्थे स्वार्थे वा ठन् । अल्पवाहके १जीर्णवृषभे अल्पक्षीरस्रावित्र्यां २स्त्रीगव्याम् स्त्री

उक्षिय पु० उक्ष+स्वार्थेऽल्पार्थे वा घ । १जीर्णवृषभे "उक्षियो वृषभः क्रन्दतु स्तौ" ऋ० ५,५८,६, २स्त्रीगव्याम् स्त्री निरु० । "गवामूर्ज्जमुक्षियाणाम्" ऋ० ५,२४, उक्षियाणां क्षीरमुत्सारयन्तीनाम्" भा० ।

उक्ष अर्दने भ्वादि० पर० सक० सेट् इरित् । ओक्षति औक्षत्, औक्षीत्, उवोक्ष उक्षतुः । अप अपसारणे तानपौक्षीत् निगाचरः" भट्टिः "अपौक्षदुत्तरः" रघुः

उक्ष अव्य० उ च क्ष च ह० । १सम्बोधने, २एवार्थे च ।

उक्षक्ष अव्य० उक्ष च क्ष च । सम्बोधने ।

उक्षू स्त्री उक्ष–कू । १खेदसूचके शब्दे "नखानि विधुनुद्या करतलेन तत्प्राद्रुणोत् ततः किसलयभ्रमात् करमथाशु यहूरतः । ततोवलयशिञ्जिते भ्रमरगुञ्जिताशङ्कया उक्षूरिति कुक्षूरवध्वनिभियाऽपतत् मूर्च्छिता" । वक्ष–कू । वाक्षे त्रि० । "क्षिरण्य पर्षा उक्षुव उपर्बुधः" ऋ० १,४५, ४, उक्षुवः वाक्षकाः" भा० उक्षन् शब्दवत् ।

उक्ष्यमान त्रि० वक्ष–कर्म्मणि शानच् । यज्ञे वक्षनं क्रियते तस्मिन् "यथोक्ष्यमाणः किल भोगसम्पदा" नैषध० ।

उक्ष पु० वक्ष–रक् । वृषभे शब्दार्थचिन्तामणिः

इति वाचस्पत्ये उकारादिशब्दार्थसङ्कलनम् ।

ऊ

ऊकारः स्वरवर्णभेदः "ओतऊावूप्" इत्युक्तेः ओष्ठ्यौष्ठ्यौकारयोः स च उदात्तानुदात्तस्वरितभेदात् त्रिविधः दीर्घश्च ह्रस्वां मात्राकालाभ्यामुच्चार्यत्वात् तस्य प्लुतत्वोक्तिरिन्द्रियां त्रिमात्रकालस्यैव प्लुतत्वात् व्यञ्जकाकारभेदाच्च प्लुतस्य पार्श्वस्थात्प्रकृतिभूताकारेणैव लेखनसमाचारात्। त्रिविधोऽपि अनुनासिकाननुनासिकभेदात् द्विधा तेन षड्विधः तस्योच्चारणे विवार आन्तरप्रयत्नः "स्वराणामूष्माणाञ्चैव विवृतं करणं मुखम्" शिक्षोक्तेः विवृतस्य जिह्वाग्रादेः स्थानाभावः। "अवोऽस्योदायतश्चीयत, नेमस्यूदाः यत्नः सृताः" इति शिक्षोक्तेः तस्य तन्त्रे शुक्लाद्याकारतया ध्येयतोक्ता यथा "शुक्लकुन्दसमाकार ऊकारः परकुण्डली" कामधेनुतन्त्रम्। तस्य वामकर्णे बिन्दुकतया निर्बिन्दुकतया वा मातृकान्यासे न्यासः। अतएव वामकर्णशब्देन तस्याभिधेयता "ईशानः सेन्दुर्वामश्रवणपरिगतो बीजमन्यन्नकेपि। "कर्पूरस्त्वे कूकारमन्योद्धारः। तत स्वरूपे कारप्रत्ययः। तप्रत्ययश्च। अधिकं स्वरवर्णसमाम्नौ वक्ष्यते।

ऊ अव्य० वेञ् क्विप्। १सम्बोधने, २वाक्यारम्भे, ३दयायां, ४रक्षायाञ्च मेदि० उञ स्थाने इतौ परे अनुनासिक ऊँ इति आदेशे तदर्थे तस्य प्रयोगात्यादितौ न सन्धिः।

ऊ पु० अवतीति अव-क्विप् ऊठ्। १मङ्गादेवे २चन्द्रे च। २पालके त्रि० मल्लरत्नाव०

ऊढ़ पु० वह-प्रापणे ज्ञानार्थत्वात् १कर्त्तरि क्त। १ऊतविवाहे पुंसि "परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहात्" अमरः ह्रस्वत्वञ्चास्य तत्रैव पु०। कर्मणि क्त। ऊतविवाहायां स्त्रियाम् स्त्री। "भार्योढां तमवज्ञाय तस्थे सौमित्रयेऽसकौ" भट्टिः "कन्या पितुर्धनहरी यदनूढा भवेत्तदा" स्मृतिः "ऊढालूढासमवायेऽनूढैव प्रथमं धनहारिणी" दायक०। ऊढनाम्न्यत् "इति वाक्यो औजठत् त त्रि०कौ०औडठत् त इत्यन्ये। १ऊतवहने धृते त्रि०। अस्य प्रयोगेण प्रा० ब०ढ्रिः। प्रौढः "प्रौढकन्यायादोषदर्शनात्" रघु० "अथवा दुपकृतेनार्थकल्पेति" परिभाषया प्रौढवानित्यत्र न ढ्रिः

ऊढकङ्कट पु० ऊढो धृतः कङ्कटःकवचोयेन। धृतकवचे वर्म्मिते।

ऊढि स्त्री वह-भावे क्तिन् संप्र०। १वहने २विवाहे च। प्र+ऊढि प्रा०ब०ढ्रिः। प्रौढि। ऊढिनाम्न्यत् औजिठत् त त्रि०कौ०औडिठत् त इत्यन्ये।

ऊत त्रि० वेञ्-क्त सम्प्र०दीर्घः। १ऊतवयने २ग्रथिते। ऊर्णातन्तुसन्ताने क्त। १स्मृते "यस्मिन्नोतञ्च प्रोतञ्च" स्मृतिः। ऊत-क्त ऊठ्। ४रक्षिते त्रि०।

ऊति स्त्री ऊत-क्तिन् ऊठ्। १रक्षणे। "देवस्य यन्त्यूतयो विविधाः" ऋ०१,१४,६, "यतमस्यान् सदसमूतयः" ४,३१,१० कर्त्तरि क्तिच् ऊठ्। २रक्षितरि "उरुष्यन्तस्माध्यादस्मा ऊती" ऋ०४४,२, "ऊतीःऊतयःरक्षणः" भा०ऊय-वेञ् वा क्तिन्। ३सीवने (सेलाई) ४वयने (बोना) ५ग्रन्थे मल्लिः। ६लीलायाम् "नचास्य कश्चिन्निपुणेन धातुरवैति जन्तुः कुमनीष ऊतीः" भा०१,५,२८, "ऊतीर्लीलाः" श्रीधरः वेञ्-कर्मणि कर्त्तरि वा क्तिन् क्तिच् वा। पुराणलक्षणमध्ये ७कर्म्मवासनारूपे तल्लक्षणभेदे। "तत्रादिदं भागवतं पुराणं दशलक्षणम्" इत्युक्त्वा "अत्र सर्गोविसर्गश्च स्थानं पोषणमूतयः। मन्वन्तरेशानुकथा निरोधोमुक्तिराश्रयः" इति दश लक्षणान्युद्दिश्य तेषां लक्षणान्युक्तानि यथा "भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः। ब्रह्मणो गुणवैषम्यात् विसर्गः पौरुषः स्मृतः। स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः। मन्वन्तराणि सद्धर्म्मऊतयः कर्म्मवासनाः। अवतारानुचरितं हरेश्चास्यानुवर्त्तिनाम्। पुंसामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः। निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः। मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः। आभासश्च निरोधश्च यतोऽध्यवसीयते। स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते" भाग० २,१०,२,८ "कर्म्मणां वासनाः ऊयन्ते कर्मभिः सन्तन्यन्ते इत्यूतय यद्वा ऊत्यर्थात् संक्लेशार्थाद्धा क्तयेधीतेरादि रूपम्। ऊयन्ते कर्मभिर्वर्द्धन्ते संक्लिश्यन्ते वा ऊतयः" श्रीधरः

ऊधन् न० ऊधस्+टच० सस्य नः। स्त्रीपयोदुग्धाधारस्थाने (मेढ़) "वत्सो न मातृरूप सर्ज्यूधनि" ऋ०६,६६,१। "यदा पीतासो अंशवो गावो न दुह्र ऊधभिः" ८,६६,१६। "प्र धेनवः सिस्रते वृष्ण ऊधः" ऋ०४,२२,६।

ऊधर् न० ऊधस्+टच० सस्य रः। स्त्रीगव्यादेः अवधि (मेढ़) "ऊधर्नग्ना जरन्ते" ऋ० ८,२,१२।

ऊधस् न० उन्द्-क्लेदने असुन् किच्च दीर्घः। स्त्रीगव्यादेः दुग्धाधारे स्थाने (मेढ़) "गवामूधस्सु वृष्णयम्" ऋ०१०,४६,१०।

"यदैव स्त्रियै जनायाधायेते अध: पश्चात्" यत०ब्रा० २,५,१,५। अस्य वक्त०ष०अनङ् समा०ङीप्। पौनोल्ली घटोघ्नी। "भुवं कोणेन कण्डोधी मेध्यै नावघ्नयादपि" रघु:। अक्षियान्त न कण्डोधैनुकम्" सि०कौ०। अनन्तर्त्वनेवोपपत्तौ अनङ्विधानं समासे सान्तप्रयोगवारणार्थम्। सप्तम्यन्तविधेरनित्यत्वात् क्वचित् "मयङ्गनेत्रां खाकारां पीनोधस्यनिन्दिताम्। अभिनन्द्य सतां राजन्निन्दीं गाधिनन्दन:" भा० आ०१७५अ०। आर्षत्वाद्वा तथा प्रयोग:। लोके तु न तथा। तस्य भव: शरीरावयवत्वात् यत्। अधस्य तद्भवे दुग्धे न०। "अधस्यमिच्छामि तवोपभोक्तुम्" रघु:। प्राग्वत्ते मयट् मय च: ङीप्। अधस्ती प्रथमोधायुक्तायां गवि। "सिषिचुश्च व्रजान् गाव: पयसोधस्वतीर्मुदा" भा० १, १०,५। अधसे क्षितम् गवादि० यत् अनङ् च। अधस्य अधसोक्षिते द्रव्यभेदे, यज्ञोजने आपीन पीनं भवति तच्चिन् द्रव्ये लि०। २रात्रौ निघ० तच्चात्र हि मकरकरसम्पर्केण क्लेदयोगात्तथात्वम्।

जन परिष्काणे अदन्तचुरा० उभ० सक०सेट्। जनयति ते औनिनत् त लुडि वा चङ् औनयीत् औनयिष्ट। जन: जनित:। "मा त्वायतोजरितुर्मानयीः" ऋ० १,५,२,१।

जन पुं० जन-क्वानौ अच्।१क्षौने, २असंपूर्णे च। "जनं न क्षत्रेषुधिकोषवाधे" "किञ्चिदूनमनूनर्द्धैः परदाभयुतं ययौ" रघु:। "जने दत्ताद्गुरुक्षेत्रे यावत् सर्व्वक्षयुर्भवेत्" ह० र०। "जनहिरार्थिकं प्रेतं निदध्युर्मान्यवा बहि:" मनु: "जनं वाप्यधिकं वापि क्षिपेद्यो राजयाजनम्" याज्ञ०। जनार्थयज्ञयोगे तृतीया। एकोनोन:। जनार्थकयज्ञेन वा तृतीयास०। मानेऽोन: मानोन: वस्तूोन: वस्तुयोन:। एकोनविंशति: एकोनविंशत् एकोनचत्वारिंशत् एकोनपञ्चाशत् एकोनषष्टि: एकोनसप्तति: एकोनाशीति: एकोननवति: एकोनशतम्। तत्तत्संख्याया एकैकोनसंख्यायाम्। एवं द्वयूनविंशत्यादयोपि अष्टाद्यादिसंख्यान्ता। संख्यान्त एकत्वस्य प्रथमोपस्थितत्वात् एकशब्दाप्रयोगेपि एकत्वैवोनत्वावगमात् अनविंशत्यादिपञ्चाशदेकोनविंशत्यादीनां बोधकत्वम्। "एकेन ह्याभ्यामूनके निधृत:" सर्वान्तु०।

जनचत्वारिंश त्रि० जनचत्वारिंशत: पूरण: डट्। जनचत्वारिंशद्संख्यापूरके एवमूनविंश उनविंश उनषष्टाय इत्यादय: तत्तत्संख्यापूरकेषु। स्त्रियां ङीप्। तदर्थे तमप्। जनचारिंशत्तम तदर्थे। एवमूनविंशतितमादयस्तत्तत्संख्यापूरकेषु स्त्रियां ङीप्।

जबध्य न० ज-ऐदर्थे बध्यं जीर्णम्। ऐवञ्जीर्णे त्रयादौ "बदूबध्यसुदरस्यापयति" ऋ० १,१६२,१० "जबध्यम् अजीर्णं त्रयादि" भा० "अपामति दुर्मतिं बाधमाना जबध्यं वातं सर्व्वं तदारात्" यजु०१६,८४, "जबध्यमाभाषयगतम् वेदद्दो०।२तत्स्थाने च "एतद्वोऽन्न तद्भक्षयितं सर्वेभ्योयत्तत्राद्यगूबध्यं यावच्छुतं भवति तद्रन्ति सर्पा:" आश्व०श्रौ० ४,६,२६। अस्य अन्त:स्थ ब मध्यत्वमिच्छे के।

जबध्यगोह पुं० जबध्यञ्च गोहः प्रच्छादनं यत्र। आत्मप्रच्छादनस्थाने। "सव्याहृतः शामित्रोबध्यगोहचात्वालोत्करावाप्यावान्" आश्व० श्रौ० ५,२,१६, "जबध्य गोहोनाम आत्मप्रच्छादनस्थानम्" नारा०श्रौ०। [बाच्च।

जम् अव्य०अव-डुक्। १रोषोक्तौ, २प्रश्ने, ३निन्दायां, ४खेदा-

जम न०अव-मन् किच्च अठ्च। नगरभेदे उज्ज्वलद०। वर्त्तरि मन्। २रक्षितरि त्रि०। "वरि व जमेभ्य: सिषुता मघ" ऋ० १०,२२,५, "जमेभ्यो रक्षितृभ्य:" भा०। भावे मन्। ३रक्षणे न०। "ये मर्त्ता पूतनयान्तमूभि:" १,१६६,७, जमै: अल्परक्षणै:" भा०। उज्ज्वलदत्तस्तु तस्य वा० कुत्व प्रकल्प्य उमाग्रहणाच्च। स च उमाग्रहणार्थे। वेजोकृपस्य यदि वाऽवते: रूपसमवयापि वा० कुत्व इति बोध्यम्

जय तत्परत्वाने भ्वा० ऐदित् आत्म० स क०सेट्। जयते औयिष्ट। ऐदित्त्वात् निष्ठायां नेट् अत: अजयत अजित:

जरी अव्य० जय-वा०रीक्। १अङ्गीकारे, २विस्तारे च। ऋजि गतिस्व०अरीत्यत्र। ऋ अरीङ्गत अङ्गीकृते विस्तीर्णे च त्रि०। षष्ठ् अरीकार: अङ्गीकारे विस्तारे च पु०।

जरत्क पुं स्त्री जरौ भव: शरीरावयवत्वात् यत्। १वैश्ये तज्जातिस्त्रियां टाप् योपधत्वात् न ङीप्। वैश्यानां ब्रह्मणा अरुजातत्वञ्च "ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्य: कृत:। ऊरू तदस्य यद्वैश्य: पद्भ्यां शूद्रो अजायत" यजु०३१,११, उक्ते: "लोकानां च विवृद्ध्यर्थं मुखबाहूरुपादत:। ब्राह्मणं क्षत्रियं वैश्यं शूद्रञ्च निरवर्त्तयत्" मनूक्तेश्च। तस्य क्षत्रियेपि तथोक्ता। "मुखबाहूरुपज्जानां पृथक् कार्य्याण्यतस्त्रिणाम्" इत्युपक्रम्य "पशूनां रक्षणं दानमिज्याध्ययनमेव च। वणिक्पथं कुसीदञ्च वैश्यस्य कृषिमेव च"। २ऋक्षभवनाम्नि त्रि०।

जरी अव्य० जय-वा०रीक्। १अङ्गीकारे, २विस्तारे च।

जर्यादि० ङजि गतिसमासादि जरदीवत् द्रष्टव्यम् ।

जरु पु० अर्च्यते आच्छाद्यते अर्च्-कर्मणि कु तुलोपश्च । जानूपरिभागे तस्य वस्त्रादिभिराच्छादनीयत्वात् तथात्वम् । "निशानलारीपरिधानधूननस्फुटागसाम्यू रुषु लोलचक्षुषः" "करभकरोरुभिरूरुभिर्दधानैः" माघः । "कदली कदली, करभः करभः; करिराजकरः करिराजकरः । भुवनत्रितये न बिभर्त्ति तवामिदमूरुयुगं न चमूरुदृशः" प्रसन्नरा० । "धात्रीकराभ्यां करभोपमोरूः" "भुजमूर्वोरुवाङ्कुल्या-देकोऽपि धनदानुजः" रघुः अस्य उपमानपूर्व्वकत्वे उत्तरपदस्य ऊरु० ङ० स्त्रियाम् ङीप् । करभोरूः "करभोरु ! रतिप्रान्ते क्षितौ वसुमेऽध्वरम्" विद्यासुन्दरं० संहितयकलक्षणयामपूर्वकत्वेऽपि ऊङ् । संहितोरू सम्यग्हितोरुका दृश्यर्थः यष्टाविव संश्लिष्टौ ऊरू यस्याः यष्टोरूः । लक्षणयुक्तावूरू यस्याः लक्षणोरूः । वामौ मनोहरौ ऊरू यस्याः वामोरूः "लक्ष्मणो लक्षणफरीविघट्टितोरुर्वामोरूरतिश्रमाप विभ्रमस्य" किरा० । संहितसक्थिपूर्व्वकत्वेऽपि तादृशस्य ऊङ् । संहितौ हितयुतौ ऊरू यस्याः संहितोरूः । भारं सहेते सहायूरू यस्याः सहोरूः । ऊरौ भवः ऊरीरोमवत्त्वात् यत् । ऊरव्य ऊरुभवे वैद्ये पुंस्त्री तद्वत्त्वात्ते त्रि० । स्वार्थतयाऽऽत्मनि विद्यमानात् वहु० स० स्त्रियां ङीप् । ऊरुभिन्नी ।

ऊरुग्राह पु ऊरू गृह्णाति ग्रह-अण् उप० स० । ऊरुस्तम्भरोगे ऊरुस्तम्भग्रन्थे विहितः । "ऊरुग्राहकृष्टकीतास्त्रीचित्तलाभवत् भुवि" भा० द्रो० १४६ अ० ।

ऊरुज पुंस्त्री ऊरोर्जायते जन-ड । वैद्ये स्त्रियां जातित्वात् ङीष् । २ ऊरुजातमात्रे त्रि० ऊरुजातोरुजन्मादयोऽप्युभयत्र । ३ भृगुवंशेऽ ऋषिभेदे पु० तस्य ऊरुतोऽजनकथा भा० आ० १७८, ७६ पु० "ऊरुतोर्यं इति ख्यातो बभूव पृथिवीपतिः । यास्यो वेदविदां लोके भृगूणां पार्थिवर्षभः । स तानपभुजत्यात । धान्येन च धनेन च । लोभान्ने तर्पयामास विधुतेन विधाम्यते । तस्मिन्नृपतियाहूते स्वर्यातेऽथ मघवन् । बभूव तत्कुलेयाना द्रव्यकार्यसमुत्थितम् । भृगूणान्तु धनं ज्ञात्वा राजानः सर्व्व एव ते । याचिष्णवोऽभिजग्मुस्तांस्ततो भार्गवसत्तमान् । भूमौ तु निदधुः केचित् भृगवो धनमक्षयम् । दद्युः केचिद्द्विजातिभ्यो ज्ञात्वा शक्तिवतो भयम् । भृगवस्तु ददुः केचित्तेषां वित्तं यथेप्सितम् । शक्तिमाद्यां तदा तात ! कारयामासुरर्थवत् । ततो गर्भीतकं तात ! ऊरुमेव वरस्त्रियां । जनयामासुरुर्व्वीं तेनाभिजघ्नुश्च क्षत्रियान् । तद्भिन्नं दृष्ट्वा सर्वे समेताः क्षत्रियर्षभाः । अवमन्य ततः क्रोधादृचीकं भृगुसत्तमम् । निजघ्नुः परमेष्वासाः सर्वांस्तान्निर्यतैः शरैः । आगर्भादवशत्तस्य चक्रुः सर्वा वसुन्धराम् । तत उच्छिद्यमानेषु भृगुष्वेवं भयात्तदा । भृगुपत्न्यो गिरिं दुर्गं हिमवन्तं प्रपेदिरे । तासामन्यतमा गर्भं भयाद्बभ्रे महौजसम् । ऊरुणैकेन वामोरुर्भर्तुः कुलविवृद्धये । तद्गर्भमुपलभ्याथ ब्राह्मण्यात्तु भयार्दिता । गर्वैका कथयामास क्षत्रियाणामुपश्रुतिः । ततस्ते क्षत्रिया जग्मुस्तं गर्भं द्रष्टुमुद्यताः । दृष्ट्वा तान्मुनिर्वीर्यं तेजश्च दीप्यमानं स्वतेजसा । अथ गर्भः स भित्त्वोरुं ब्राह्मण्या निर्जगाम ह । मुष्णन् दृष्टीः क्षत्रियाणां मध्याह्न इव भास्करः । ततस्तूर्व्विकीनाख्ये गिरिदुर्गेऽवसन्मुनिः । ततस्ते मोहमापन्ना राजानो नष्टचेतसः । ब्राह्मणीं शरणं जग्मुर्दृष्ट्वा तामनिन्दिताम् । ऊचुश्चैनां महाभागां क्षत्रियास्ते विचेतसः । ज्योतिःप्रदीप्ता दुःखार्त्ताः प्राणार्द्धिव दृशन्नवः । भगवत्याः प्रसादेन गच्छेत् चक्षुः सचक्षुषम् । उपलभ्य च गच्छेम संहिताः पापकर्मणः । सपुत्रात्तं प्रसादं नः कर्त्तुमर्हसि शोभने ! । पुनर्दृष्टिप्रदानेन रात्तः सन्तानमर्हसि । ब्राह्मण्युवाच । नाहं सृष्टाऽस्मि वस्त्राता ! दृष्टीनामिह कर्हिचित् । अयन्तु भार्गवो बालमूरुजः कुपितोऽद्य वः । तेन चक्षूंषि वस्त्राता । व्यक्तं कोपान्महात्मना । अरता निर्हृतानू बन्धून्दक्ष्यति न संशयः । गर्भोऽपि यदा बालं भृगूणां व्रत पुत्रकाः ! । तदायमुरुजा गर्भो मया वर्षशतं धृतः । षड्वक्त्रश्चिरजो वेदं सर्वं गर्भस्थमेव ह । विवेद भृगुवंशस्य भूयः प्रियचिकीर्षया । सोऽयं पितृवधाद्ब्रह्मन् क्रोधाग्नेः कृन्तजिह्वति । तेजसा तस्य दिव्येन चक्षूंषि सुषितानि वः । तस्मिन् त्राता । याचध्वमौर्वं मम सुतोत्तमम् । अयं वः प्रक्षिपातेन तुदो दृष्टीः प्रमोक्ष्यति । वसिष्ठ उवाच । एवमुक्तास्ततः सर्वे राजानस्ते तमूरुजम् । ऊचुः प्रसीदेति तदा प्रसादञ्च चकार सः । अनेनैव च विख्यातो नाम्ना लोकेषु सत्तमः । स और्व इति विप्रर्षिरूरुं भित्त्वा व्यजायत । चक्षूंषि प्रतिलभ्य च प्रतिजग्मुस्ततो नृपाः" ।

ऊरुद्घ्न त्रि० ऊरू+"प्रथमस्य द्वितीयस्य ऊर्ज्ञाने मतौ मम" वार्त्तिकोक्तेः ऊर्ज्ञाने दृच् । ऊरुपर्य्यन्तोच्छ्रायान्विते स्थानादौ । "यावानुद्धान्तःपुरुषस्तावत् क्षत्रियस्य

कुर्यात् सक्थदघ्नं ब्राह्मणस्योपस्थदघ्नं स्त्रिया ऊरुदघ्नं वैश्यस्याष्टीवद्घ्नं शूद्रस्यैवंवीर्या ह्याप्ते" शत०ब्रा० १३,८,३,११। "ऊरुघ्नो द्वितीयोजानुदघ्नस्तृतीयः १२,३,१,२। अत्रार्थे ह्ययच् ततःपरिमाणे उभयत्र स्त्रियां ङीप्।

ऊरुपर्व्वन् पु० ऊर्वोः पर्वेव। जानुनि (घुंटू)।

ऊरूरी अव्य० अव-ऊरीक्। अङ्गीकारे विस्तारे च अवादि० गतित्वात् ह्रस्वः। ऊरूरीकृत्य। घञ्। ऊरूरीकार अङ्गीकारे विस्तारे च पु०। क्त। ऊरूरीकृत अङ्गीकृते विस्तीर्णे च त्रि०।

ऊरुस्तम्भ पु० ऊरू स्तम्भयति स्तभ्-अच् उप०स०। रोगभेदे स च रोगः भावप्र० निदानपूर्वरूपादिर्दर्शितः यथा "शीतोष्णद्रवसगुरुकगुरुस्निग्धैर्निषेवितैः। जीर्णाजीर्णतायासस्त्रीभिरप्रजागरैः। सङ्क्षोभमेदःपवनः सामसम्पर्कसञ्चितम्। अभिभूयेतरं दोषमूरू चेतः प्रतिपद्यते। शक्थ्यस्थिसन्धीन् प्रपूर्य्यन्तः स्तब्धौ स्तिमितेन सः। तदा स्तम्भयति तेनोरू स्तब्धौ शीतावचेतनौ। परकीयाविव गुरू स्यातां मतिमयव्ययौ। ध्यानाक्षमहृत्स्तैमित्यतन्द्रादरुचिज्वरैः। संयुतौ पादसदनक्लेदोत्क्लेशसुप्तिभिः। तमूरुस्तम्भमित्याहुराढ्यवातमथापि" "प्राग्रूपं तस्य निद्रा प्रतिध्यानं स्तिमितता ज्वरः। रोमहर्षोऽरुचिश्छर्द्दिर्जृम्भाक्लेशौ सदनं तथा। वातमूत्रशकृन्नाशात्तत् स्यात् स्नेहनात् पुनः। पादयोः सदनं सुप्तिः क्लेदाद्युत्क्लेदणं तथा। अङ्गोत्क्लेशनिरस्यैष यत्नादाहृत्य वेदना। पदं च व्यथते न्यस्तं शीतस्पर्शं न वेत्ति च। संस्थाने पीड़ने गत्यां चालने चाप्यनीश्वरः। अन्यनेयौ हि सम्भग्नावूरुपादौ च मन्यते। यदा दाढ्यात्तिशैत्यादौ वेपनः पुरुषो भवेत्। ऊरुस्तम्भस्तदा कृच्छ्रात् साधयेदन्यथा नवम्" अन्यथा दाढ्याद्युत्क्लेशवरक्षितं तमपि नवमुत्पन्नमात्रं साधयेत्। सात्त्विकभावेन २ऊर्वोः स्तम्भे च। "करिणीवोरुसम्भविष्टता" काद०।

ऊर्ज्ज् बलाधाने जीवने वा अदन्तचु० पक्षे भ्वा०अक० तत्करणे सक० सेट्। ऊर्ज्जयत्। नाभयो वाजिनमूर्जयन्ति" ऋ०६,८६,४, "यो क्षेत्रबाह्यशक्ति च प्राणिति तमूर्ज्जयति" शत०ब्रा० ७,५,१,१८, "तां वो देवाः सुमतिमूर्ज्जयन्तीमिषमश्याम" ऋ०५,४१,१८।

ऊर्ज्ज् स्त्री ऊर्ज्ज-भावे क्विप्। १बले। करणे क्विप्। २अन्ने न०। ३अन्नरसाभिधेयेऽन्नस्य अत्यन्तसारभूते रसभेदे स्त्री "विश्वे देवा वामूर्ज्जं वहन्ति" ऋ०७,४६,४, "यास्ते ऊर्ज्जस्वत्य-सम्भवुः" अथ०१२,१,१२, इह पृथिव्याः सम्बोधनेन तस्या विकारान्नस्यापि तत्त्वमूर्ज्जामित्युक्तम्। "स ऊर्जमुपजीवतीति" उ० उ० "ऊर्ज्जं सूक्ष्मति सूक्ष्मम्" ऋ० २,२०, "उर्गस्य क्षिरस्यन्नदा ऊर्ज्जं मयि धेहि" यजु०४,४० "ऊर्क् अन्नरसरूपा" वेददी० ऊर्ज्जं बलं धेहि इत्यर्थः "अन्नमूर्जं बलं पुंसाम्" इत्युक्तेः अन्नरसस्य बलाधायकत्वम्। "तमःसमूहाकृतिमध्यमाधादूर्जा जयन्तं ग्रथितप्रकाशम्" भट्टिः ऊर्ज्जा बलेन "बलमूर्ज्जञ्च यच्छति" मनुः अत्र रजोजोभेदौदैहिकमानसिकत्वाभ्यां शारीरिकं बलमूर्क् इति बोध्यम्। ४जले स्त्री। "ऊर्जो नपातं स हि नायमस्यूः" यजु०२७,४४, ऊर्क् शब्देनात्र उच्यते अङ्गोत्क्लाजायन्ते ततोऽग्निः इत्यग्नेरूर्ग्रूपत्वम्। वेददी०। "ऊर्ज्जांपते पाहि" यजु०२७,४३।

ऊर्ज्ज पु० ऊर्जति रसादिकं सोमोऽत्राधारे अच्। १कार्त्तिके मासि तस्य शरत्तात्पर्यात्तत्र सोमेन रसवीर्याधिक्यवर्द्धनेन तथात्वम्। "दूणोर्जो शरत्" इत्युपक्रम्य अयने विभज्य च "तयोर्दक्षिणं वर्षाशरद्धेमन्तेषु भगवानाप्यायते सोमोऽन्नरसाग्रमधररसा बलवन्तो भवन्त्युत्तरोत्तरं च सर्वप्राणिनां बलमभिवर्द्धते" श्रुतेः शरदुत्तरत्वस्य कार्त्तिकस्य उत्तरोत्तरबलाधिक्याभिधानेनास्य तथात्वम्। करणे अच् घञ् वा सेट्कत्वान्न कृत्त्वम्। २उत्साहे। भावे अच् घञ् वा। ३बले ४जीवने च। करणे अच् घञ् वा। ५जले न० "ऊर्जं वहन्तीरमृतं घृतं पयः कीलालम्" यजु० २,३४। अन्नस्योर्जाधायकतात् अन्नस्य जलाधीनतयैव बलहेतुत्वात् तथात्वम् "ऊर्जसन ! ऊर्ज्जं धाः" ऋ०६,४,४, "ऊर्जस्य सने ! अन्नस्य दातः !" भा० "ऊर्जादं उत यद्विव्यास" ऋ०१०,५३,४। ऊर्जादः अन्नदा भा० "अन्नं ऊर्जशब्दः अन्नगतं रसमभिधत्ते तेन तदाधायकत्वात् तथात्वम्। "तदन्तिषदोषादंच क्षमेतोर्जमसंशयम्" हरि० कर्त्तरि अच्। दैवज्ञान्विते त्रि० "ऊर्जतजन्मयमूर्जमतज्जम्" माघः।

ऊर्ज्जयोनि पु० ऋषिभेदे "ऊर्ज्जयोनिरुदामेत्री नारदोऽपि महाऋषिः" भा० अनु०४अ०।

ऊर्ज्जय पु०राजभेदे "सिषेक्तु न ऊर्ज्जयस्य पूर्वीः" ऋ०५,४१, २०, ऊर्ज्जयस्य एतन्नामकस्य राज्ञः" भा०

ऊर्ज्जस् न० ऊर्ज्ज-असुन्। उत्साहातिशयायायवे बले २अन्नरसभेदे च। ततोऽस्त्यर्थे विनि ऊर्ज्जस्विन्, वत्वम् ऊ-

ऊर्जस्वल, मतुप् मस्य वः। ऊर्जस्वत्। तद्वति त्रि०तत्र विद्यमानस्य मतुबन्तस्य च स्त्रियां ङीप्। "ऊर्जस्वन्तं हविषोदस्य भागम्" ऋ०१०,५१,८, "ऊर्जस्वती पयसा पप्रथाना च" यजु०१,२७, "ऊर्जस्वन्मधुमानम् आत्मान भगा नज" भाग०३,२०,४२, 'ऊर्जस्वलं हरिमेतरङ्ग मेतत" भट्टिः "ओजोरसमूर्जस्वलमात्मदेहम्" रघुः "ऊर्जस्विनं ऊर्जसेधास्य यत्ने" भा० अनु ७६ अ०। "ऊर्जस्वरान् हव्य वाहान्" भा०३०२२अ०।

ऊर्जा स्त्री भा०ऊर्ज—भावे अ। १बले २उत्साहे ३अक्षरस विकारे ४वृद्धौ च। ऊर्जास्यस्य मतुप् मस्य वः। ऊर्जावत् बलान्विते वृद्धिमति च त्रि० स्त्रियां ङीप्। "ऊर्जावतीं मङ्गलपुण्या मधुमतीं त्रिपथगाम्" भा०अनु० २६अ०।

ऊर्ज्जित त्रि०ऊर्ज्ज-कर्तरि क्त। १बलान्विते २वृद्धियुक्ते च। "मारुतं च धनुरूर्ज्जितं दधत्" रघु। "विनिहत्य बलमूर्ज्जितश्री" माघ। भावे क्त। ३बले ४सामर्थ्ये ५उत्साहे च न०। "उपपत्तिमदूर्ज्जितास्पदम्" किरा० णिच् क्त। कृतवृद्धौ वृद्धियुक्ते त्रि०। "किमकरोमकरोर्ज्जि-तलोचनम्" रघुः।

ऊर्ण न० ऊर्ण आच्छादनसाधनत्वेन ऊर्ण+अच्। मेषलोम विनिर्मितवस्त्रादौ "ऊर्णासु रत्नानि वसूनि कीटजं पट्टस्तथा। कटोल्लतं तथैवात्र कम्बलानां शतस्य। क्षौमं वस्त्रमकार्पासमाविकं रूढ चाजिनम्" भा०स० ५०अ०। २मेषलोम त्रि स्त्री। "मार्कवस्योर्णावलयिनि पट प्रावरकस्योल्लिखस्य" रघु "कार्पासकीटजोर्णानां द्विज फैकशफस्य च" मनु। ३ललाटस्थचिह्नभेदे ऊर्णागन्धे उदा०। स च भ्रूमध्यवर्त्तिरक्तवर्ण भ्रूद्वयमध्यगत मणाक्षतसन्निभः प्रशस्यते। तल्लक्षणमग्रे वक्ष्यते।

ऊर्णनाभ पु०ऊर्ण नाभवत्। (माकडसा) १लूतायाम् "यथोर्ण नाभ हृदय तन्तुभि प्रधानजैः" भा०७०। गोत्रप्रवर्त्तके २ऋषिभेदे तत: अपत्ये शिवा० अण्। और्णनाभ तदपत्ये पुंस्त्री। स्त्रियां ङीप्। तस्य परिगीतोदेश० राजन्या० दुक्। और्णनाभक तल्लीलतदेशे। समासान्तविधेरनित्यत्वात् क्वचित् अच् न। "नाचारेण विना सृष्टिरूर्णनाभेरपीष्यते। न च निश्चयत: कश्चित् सृजति किञ्चन शङ्खादुत्तवाक्रम।" "यथोर्णनाभि सृजते गृह्णते च यथा पृथिव्यामोषधय: सम्भवन्ति" सुश्रुतोक्त०।

ऊर्ण्मृदम् त्रि० ऊर्णेव ऊर्णानिर्म्मितवस्त्रमिव मृदीय अतिशयेन मृदु वेष्टे मृदीयस्+नि० ईयसोलोप। ऊर्णातुल्यातिमृदौ "ऊर्ण्मृदा यूयमदितिर्भवन्त" ऋ० १०, ८८,१८, "ऊर्ण्मृदस्या वृणीमहि" यजु०२०, "ऊर्ण्यास्त्रिरश्यूर्ण्मृदा ऊर्ज मयि धेहि ४,१०। अत्र मृदुत्वोर्णायां उपमानत्वोक्त्या काश्मरदेशजस्य (गम्भारीति ख्यातस्य वृक्षस्य आश्रिकत्वेऽपि एव ऊर्णात्वं तत्रैवातिमृदुत्वात्।

ऊर्णाभि पु० ऊर्णानाभि पृ० षरोक्ते या नस्य ण:। (माकडसा)। लूतायां "यथोर्ण्नाभिस्तन्तुनोच्चरे" भट्ट० ८४,२३।

ऊर्णामय ऊर्णा+विकारे मयट। ऊर्णालोमविकारे रूढादौ "ऊर्णामयं कौतकरत्नरत्नम्" रघु०।

ऊर्ण्यायु त्रि ऊर्णा—अस्त्यर्थे युस् सिच्चात मत्वाभावेन न ऊर्णो लोप:। १ऊर्णायुविशिष्टे "ऊर्ण्मृदस्या" यजु०२७,५० "ऊर्ण्यायुमजानानम्" वेदा०। २गन्धर्वभेदे "ऊर्ण्यायुश्चित्रसेनश्च हाहा हूहूश्च गायन" हरिवं० ५२८ अ० "बहुभि: सह गन्धर्वै प्रगायति च तुम्बुरु। मरीच्यादिभिर्विप्रैरा ऊर्ण्यायुप्रमुखस्तथा" भा० २६१ अ०। "ऊर्णायुर्नाम गन्धर्वो ऊर्ण्यायुर्दक्षनन्दन" भवत्" रामायण०।

ऊर्णायुवन त्रि०ऊर्ण्यायु+मत्वर्थे वनच्। ऊर्णायुक्ते "ऊर्णायुवे, इमामूर्ण्यायुवित्यूर्णायवं इत्येतत्कृष्णाजिनम्" शत०ब्रा० ७,५,२,३१।

ऊर्ण्रस्त्र त्रि० ऊर्णेति विभर्त्तिरूर्णम् ऊर्ण+स्त्रन् ऊर्णस्त्रत्व च० अत्र। ऊर्ण्यायुके "ऊर्ण्रस्त्रस्यूर्णे वो नाम" ऋ० १०,

ऊर्ण्णु आच्छादने अदा०उभ०सक० सेट्। ऊर्णोति ऊर्णुते ऊर्णुत ऊर्णुवति ऊर्णुवते, ऊर्णुयात् ऊर्णुवीत। ऊर्णोतु ऊर्णुताम् ऊर्णुवतु ऊर्णुवताम्। और्णौत और्णुत। और्णुयीत् और्णुवीत् और्णुयात और्णु(र्णो)विष्ट ऊर्णुनाव ऊर्णुनुवत। ऊर्णुनुविरे। ऊर्णु(र्णो)विता। ऊर्णुयात् ऊर्णु(र्णु)विषीष्ट। ऊर्ण(र्णु)ष्यति ते और्णु(र्णो)विष्यन्त। ऊर्णुवत् ऊर्णुवान्। ऊर्णुत। "स ह्यावीर्न्नोदनविदम्" ऋ०७,१,२, "ऊर्णुनाव दिव: शर्द्धे" "ऊर्णोर्णुवानान् कृष्णो ऽजीवानू" भट्टिः "ऊर्णुना-

भिर्यथोर्णुते" भा० २,६,२७, । यत्र अर्ण्वमुपति ते अर्ण्वमुविधति ते अर्ण्वमविधति ते ।

अप+अपच्छतावरणे "अपीहता अपोर्णुवन्तो अस्तृतः" ऋ० १ १६०,६, "अपोर्णुवन्तः अपगतनिरवलम्बनाः" भा०।

अभि+आभिमुख्येन आच्छादने । "अभ्यूर्णोति बलगं भिमिक्षि" ऋ० ८,७६,२, [२,१४,२

आ– सर्वतआच्छादने । "इन्द्रं द्यौरोर्णोत् अदितेः सधस्थे" ऋ० ४, ५४,२, "अर्णुते प्रकाशयति" भा०

प्र– प्रच्छादने । प्रोर्णुवन् धरवर्मेव तानपीहिषियाधरः" । "प्रोर्णुवन्तं दिशोवाणैः" भट्टिः ।

वि–विगतावरणे प्रकाशने । "सवितर्व्यूर्णुषेऽमृतीना" ऋ०४, ५४,२, "व्यूर्णुते प्रकाशयति" भा०

अर्ह् अर्हधातुवत् ।

अर्ह वि० अर्ह–अच् । क्रीडायुक्ते स्त्रियां गौ० ङीप् ।

अर्हर् न० अर्त्या वयेन हयति ह–"अर्त्तिं हयातेरहौ पूर्व्वान्त्यलोपश्च" उषा० अस् अच् वा अर्त्तो-ऽन्त्यलोपश्च इत० । १स्थिरे २राजर्षौ च उज्ज्वल० । उर्हीर्त्तम् पूर्त्तम् उर्ह इ–अच् इत्वो० उद अरादेशः । धान्याधारभेदे कल्पके माधवः । "अर्हरं पूरयता यवेन देहम्" ऋ०२,१४,११। उर्हरीर्त्तम् अर्हरं कल्पकम्" भा०

अर्ह(र्ह्) वि० उर्ह–काक्–ड पृषो०अरादेशः । १उत्तमे २उत्तरिते च "प्रबोधयन्नर्हसेमयूर्ह्णः"कुमा० "नीलोर्ह्णरेखाभवलेन मंसम्" । "अस्रोर्ह्णरेखाभ्रुकुटीर्वहन्ति:" "गङ्गेवोर्ह्वप्रवर्त्तिनी" रघुः । ४उत्पाटिते उर्ह्णकः देश० । ५अनुपविष्टे दृष्टाशयाने "आसीनः अर्हः प्रभुर्वा निजमोचन मेहम:" अन्नो० "अर्ह: अनुपविष्टः" आ०त० रघु० । ६उत्क्षिप्ते "अर्हयावाचः" ऋ० ७,५,४,१२ । अर्हयावाचः शोभाभिलषार्थसहृत-यावाचः भा० । ऊहतेर्वा ड तेन ववकारस्यमपि तलार्थे

अर्ह(र्ह्)क पु० अर्ह: सन् कायति शब्दायते । कटप्रभेदे च च नोपुच्छदण्डाकारस्थितावयविनः सुखेऽप्यङ्गुलः अर्ह इत्वा वाह्यते । "अर्हकोनोपुच्छसन्निभावोऽप्यङ्गुलो ह्यसौ । इत्योर्ह्वा वाह्यते"शब्दार्ण्वोक्तेः । "करीतकाद्यातिसदृशलक्षणाश्छिन्नोपधाजाति: । अर्हकोदण्डतुल्यः स्यात् कुरजाभेदनोमताः" वैद्यचि० ।

अर्ह(र्ह्)कृत वि० अर्हां उत्पाटिता कृता यस्य । विद्धे देश० स्त्रियां स्वार्थात् वा ङीप् ।

अर्ह(र्ह्)कण्ठ वि० अर्ह: कण्ठोऽस्य । १उच्चस्वरे स्त्रियां वा ङीप् । २महाशतावरीलतायां स्त्री ङीप् राजनि० ।

अर्ह(र्ह्)कर्मन् न० अर्हं अर्ह्यदेयप्राप्त्यर्थं कर्म क्रिया । उत्थानक्रियायाम् उद्दोऽनूर्ह्वकर्मणि" भा० । अर्ह्यदेशोर्ह्वक्रियादयोऽस्य । बहु०स० । तत्कर्म्मवति वि० स्त्रियां वा ङीप् ।

अर्हकाय पुंन० । अर्हं कायस्य एकदेशत० । देहस्योर्ह्वभागे

अर्हकेतु वि० अर्हः उच्छ्रित: केतुर्यस्य यत्र वा । १उच्छ्रित-ध्वजे राजादौ तथाभूतपुर्य्यां स्त्री । २जलजवृक्षे ऋषभेदे पु० । "अर्हकेतुःसनद्राजादक्षोऽथ पुरजित्ततः" भाग० ६,१२,१२ ।

अर्हकेश पु० अर्हः केश इव कृशाग्रं यस्य । "अर्हकेशो भवेद्ब्रह्मा ब्रह्मकेशस्तु विष्टरः"ब्रह्मवै० कृशमूलाग्रयुक्ते । उन्नताग्रकेशयुक्ते वि० स्त्रियां वा ङीप्

अर्हग वि०अर्हं गच्छतिगम–ड । १उपरिगते ।"भुवा सर्वो-ऽग्रभसद्धदूर्ह्वगम्" कुमा०।परांश्चाधोविधाकारानूर्ह्वगान् दीप्ततेजसः" भा० व० २२अ० । अर्हगतदेहस्थ-वायुभेदे २रोगभेदे "अर्हगे रक्तपित्ते च शीतलाः प्रयुञ्जते"सुश्रु०"तस्योर्ह्वगोऽनिलः कार्श्यं दौर्बल्यं पार्श्व-गालता"सुश्रु० । सर्वेषामुपरिगतत्वात् ३परमेश्वरे पु० "अर्ह्वगः सृमृपथाचारः" विष्णुसह० । "सर्वेषामुपरि तिष्ठन्नूर्ह्वगः" भा०भा० । अर्हगतियाचिनि ४धार्म्मिके वि० "धर्म्मेण गमनमूर्ह्वमधश्चानुवत्सधर्म्मेण" सां०का० ध-र्म्मेणोर्ह्वगमनाभिधानात् धार्म्मिकस्य तथात्वम् । अर्ह्व-गतादयोऽस्य । ५अर्ह्वगतियुक्ते उत्पाचिनि वि० ।

अर्हगति स्त्री० अर्हं गतिः । १अर्ह्वगमने । यथा व्यवहारे: यथोक्तं सुश्रु० "उत्थानीयस्तु रूक्षखरलघुशिथिरं रूपगुणबहुलं लीवल्लवणं कटुकरसप्रायम् विशेषतश्चोर्ह्वगतिस्वभाव मिति तैजसं समूहनयनभेदरोचनायप्रकाशनप्रभावर्ण्ण-करमिति" । अर्ह्वज्ञानादयोऽस्य । "श्रमणं रेचनं स्वप्नमोर्ह्वव्यवनमेव च । तिर्य्यग्गमनमध्वानं गमनादेव शम्यते" भाषा० । "प्रविशन्नूर्ह्वकृत्तनं कपिर्मुक्त:" भाग: अर्ह्वगतिश्च ज्ञानवातियेन भवति तत्त्वज्ञ च बहुत्वादूर्ह्व-गतिहेतुत्वमुक्तम्"सा०का० "सत्त्वं लघु प्रकाशकमिष्टम-पष्टम्भकञ्चलञ्च रज:"। "तत्र ज्ञानेऽनने हेतुत्वाच्च गौर-वप्रतिहन्ति, यतोऽन्नेऽर्ह्वज्वलनं भवति"सा०कौ० । २अर्ह्व लोके स्वर्गादौ गमने च तद्देतुश्च धर्म: "धर्मेण गम-नमूर्ह्वमिति" सा०का०उक्ते: "अर्ह्वं गच्छन्ति सत्त्वस्था:" इति गीतोक्तेश्च सात्त्विकभावमात्रस्थापि तद्धेतुत्वम्। अर्ह्वगे देवात् २उत्पन्नजने । अर्ह्वं गतिर्यस्य ५अर्ह्वगामिनि वि० ।

अर्द्धगपुर न० कर्म०। अम्बरस्थपुरे खपुरे स्फरिचन्द्रपुरे त्रिका०। स्फरिचन्द्रपुरे तत्पुरस्यार्द्धत्वं वक्ष्यते। २त्रिपुराखरपुरे च तत्पुरस्याम्बरस्थखण्डम् स्फरिं०१२४ अ० यथा

"त्रिपुरं पुरुषव्याघ्र! दृष्ट्वाऽतुलसमीरितम्। विक्रामति नभोमध्ये मेघखन्दनिवोल्लितम्। प्राकारेण प्रदहेन काञ्चनेन विराजता। मणिभिश्च प्रकाशद्भिः सर्वरत्नैश्च तोरणैः। नभसि नभसो मध्ये श्रिया परमया ज्वलत्। गन्धर्वाधिष्ठितोद्यं कर्म्मणा साधितं पुरम्। वाजिनः पतत्रं युक्ता वहन्ति बलदर्पिताः। पुरं प्रभावरं श्रेष्ठ मनोभिः कामचारिणः। धावन्तो वेगमाश्रित्य विक्रमैः प्राणसंभृतैः। आकृष्यन्त इवाकाशं खुरैः पञ्चदशप्रभैः। वायुवेगसमैर्वेगैः कम्पयन्त इवाम्बरम्। सर्वतः समदृश्यन्त चक्षुर्भिर्विदितात्मभिः। ऋषिभिर्व्वलनप्रख्यैस्तपसा दग्धकिल्बिषैः। गीतवादित्रवल्गुत्वं गन्धर्वनगरोपमम्। चित्रायुधसमाकीर्णैः प्रतप्तकनकप्रभैः। भवनैर्नलवर्णैश्च पाण्डुभिः समलङ्कृतैः। देवेन्द्रभवनाकारैः शुशुभे तत्पुराद्भुतम्। प्रासादाग्रैः प्रहर्षं कैलासशिखरप्रभैः। शुशुभे दैत्यनगरं वज्रस्तम्भैरिवाम्बरम्। चयाट्टालकसम्पन्नं तप्तकाञ्चनसप्रभम्। क्ष्वेडितोत्कुष्टवल्गुत्वं सिंहनादविनादितम्। बभौ यज्ञजनाकीर्णं वनं चैत्ररथं यथा। सप्ततन्तुपताकं तद्दिग्भिश्च विराजितम्। रराज त्रिपुरं राजन्! मङ्गाविद्युदिवाम्बरे"।

अर्द्धचरण पु० अर्द्धं अर्द्धस्य चरणोऽस्य। १तत्पक्षिभेदे अर्द्धादहोऽच्। २अष्टादे गरभे च तच्छास्त्राणां पादानां मध्ये चतुर्थांशस्यात्वात् तथात्वम्।

अर्द्धजातु त्रि० अर्द्धमुत्तमं जातु यस्य। उत्तमजातुके वा कप् अर्द्धजातुक तदर्थे। कथमभावपक्षे वा आतुनोप्; अर्द्धतु तदर्थे "अध्वयवसप्तभूय अप्रपूर्व्वुरेव" माघः अत्रार्द्धे अर्द्धशः इति द्विरुक्तयोगः पृथो० साधु।

अर्द्धया अव्य०अर्द्ध+धा०याच्। अर्द्धप्रकारे अर्द्धं दत्तार्थे च "प्र ब्रह्मन् दोधुवदूर्ध्वयाभूत्" ऋ० १०,२२,१।

अर्द्धदृष्टकेय पु०अर्द्धदृष्टया आधासक्ततदृष्टया भूतावावेशोऽस्य। १मङ्गादेवे "नमोऽर्द्धदृष्टकेयाय भूताधावसताय च। विशोषिताय भूयाय नोक्षपीवाय वै नमः" भा०आ०२८६ अ० नमोऽर्द्धत्व "वैदग्धगरजो रामः" इति वत् पादपूरणाय सन्धिः।

अर्द्धदृष्टि स्त्री अर्द्धा भ्रुवोर्मध्यस्था दृष्टिः। उपासनाङ्गे योगार्थे भ्रुवोरन्तराक्षसक्षौ २अर्द्धोन्मिषितदृष्टौ च अर्द्धा दृष्टिरस्य बहु०। २ताडग्यष्टिभुते ३अर्द्धोन्मिषितदृष्टियुक्ते च अर्द्धनेत्रोर्द्धगादयोऽत्र।

अर्द्धदेव पु०अर्द्धं अन्यो देव.। १पञ्चमेश्वरे २विष्णौ शब्दरत्ना०

अर्द्धदेह पु० अर्द्धःमरणोत्तरं भावी देहः। मरणोत्तरभाविनि देहे "अर्द्धदेहनिमित्तार्थमर्कं दातुं जलाञ्जलीन्" रामा० अर्द्धदेहाय साधु "अर्द्धन्मात्र देहात्र लोकोत्तरपदस्य च" वा० ठक्। और्द्धदेहिक मरणोत्तरकर्त्तव्ये श्राद्धादौ तच्च कर्म्म स्मृतिषु प्रसिद्धम् और्द्धदेहिकशब्दे विवृतिः।

अर्द्धनभस् पु० अर्द्धं नभोयस्य। नभोमध्ये वर्त्तमाने मासे "श्राद्धाह्ने अर्द्धनभसं मासं गच्छतम्" यजु०६,१६,

अर्द्धन्दम त्रि० अर्द्धम्+दम—अच्। अर्द्धस्थे त्रिका० ततो भवार्थे ठक्। और्द्धन्दमिक तद्भवादौ त्रि०।

अर्द्धपाल न०अर्द्धं नेतव्यं पालम्। यत्पाले उद्धृतादौ "लौवर्णैरर्द्धदीनारमूर्द्धपालमथाढकम्" याज्ञ० "अर्द्धपालम् यन्त्रियोद्धृतादि पञ्चादिसाधनत्वात्" मिता०

अर्द्धपुण्ड्र पु०अर्द्धं अर्द्धमुखः पुण्ड्रः; इवुपदिरिव। ललाटस्थे अर्द्धमुखे पुण्ड्रेऽवत् देवात्मके तिलकभेदे। तद्धारणे विधिनिषेधादिकं लिख्यते। "अर्द्धपुण्ड्रं सदा कार्यात् त्रिपुण्ड्रं भक्तिमान् सदा। तिलकं वै त्रिजः कुर्याच्चन्दनेन सदृच्छया" आ०त०पु०। "अर्द्धपुण्ड्रं द्विजः कुर्यात् क्षत्रियस्तु त्रिपुण्ड्रकम्। अर्द्धचन्द्रन्तु वैश्यस्य वर्णुं शूद्रयोनिजः" आ०त० ब्रह्मा०पु०। "अग्निर्म्मा नाचारो मनसा प्रायमाचरत्। शुचिरेव भवेद्यस्य मूर्द्धपुण्ड्राङ्कितोनरः" अर्द्धपुण्ड्रधरो मर्त्योऽभियते यम कुलचित्। [illegible] यथोक्तं देवीभागवते श्रीनारायणेन "अर्द्धपुण्ड्रं त्रिपुण्ड्रञ्च वर्त्तुलं चतुरङ्गुलम्। अर्द्धचन्द्रादि वा त्रिजं वेदनिष्ठो न धारयेत्। जन्मना ब्रह्मजातिस्तु वेदसंस्कारतोद्विजः। पुण्ड्रान्तरं ललाटाद्यं नैव धारयेत्। ख्यातिलाभादिसिद्ध्यर्थमपि विष्णुवैष्णवादिषु। स्थितं पुण्ड्रान्तरं नैव धारयेद्वैदिकोजनः"। नि०सि०धृतस्व० "विष्णुलाभादितन्त्रेषु दीक्षितानां विधीयते। यद्यत्कर्म्मकृतादम्भैरङ्गं नाम्यदेहिनाम्। वेदमार्गेऽनुसन्तु लोकेनाभ्युपतोयदि। यतस्त्वेन न सन्देहः कथा पुण्ड्रान्तरादपि। यद्यत्कर्म्माङ्गमं च गीतस्मार्त्तादिकं तथा। एकजातेरयं धर्म्मो न जातु स्यात् द्विजन्मनः"। "यद्यत्कलदा वस्तु कुर्य्यात् तन्नामयेन वा। यत्पूरयद्भिः कार्य्यः; धर्म्मका-

हि ज्ञवर्जणे "यथा ब्रह्मणानजं काष्ठमनर्हं सर्व्वकर्मसु। हिजन्तु तप्तगङ्गादिलिङ्गाङ्कितमनुक्तया। समाप्य कर्म्म यति यावदिन्द्रास्तुदर्शं इत्यत्र। 'शिवकेशवयोरङ्गान् शूलचक्रादिकान् हिज। न धारयेत मतिमान् यदि वैष्णवसत्तमः' इत्यत्र स्थित ततश्च त्रिपुण्ड्रादिधारणविधायकवाक्यं वैष्णवहिजविषयम् सूत्रविषयञ्च। यदपि ब्राह्मणस्य तद् [illegible] धानम् अनर्हत्वे यथा नित्य वटमाध्ययन यथ [illegible] दर्शनम्" पद्मपु०। 'ब्रह्मण क्षत्रियो वैश्य [illegible] यदि वैष्णवः। ऊर्द्ध चक्रा ङ्कितमनुत्तमाभरणधरः। गोपीचन्दनलिप्ताङ्गोऽहश्चेत्तदर्च [illegible] काशः। तदपि वैदिकतन्त्रविप्रपरम सर्वसामान्यात एव प्रस्तावेऽस्मिन्नपि कलाचारात तस्य सर्वे कर्म्मयुक्ता। तथैव भारतटीकायां नीलकण्ठेन निगमीतम् यथा

श्रोणमेकं तटकं गामजाति मासमेकं पिशुनि स्तनया भूमम् आ निकच शुक्लकोऽणवानां कि स्विन्नु पुत्रेभ्य पितरावृणा तु श्रुति। व्याख्यातं हे कृष्ण। भवता सर्व्वे एक श्रोणा श्लक्ष्णा गा कृष्ण गोपचन्दनादिकृपा तत्र निकटस्थान् सख्यकर्म्मभूता प्रति उटक जल गौणकर्म अजा जाति अवगमय त अन्तर्भावितण्यर्थोऽजति। श्रोणा गाम उटकेन मिश्रयतात्यर्थ श्रोणा गा रक्तचन्दनादिकृपा गा तय। एक स्तनया विशया तत्कर्त्ता आहत अकृत मास गरोचन व्य पिशुनि पि ष्टिउटकेन सह इति शेष निकच नितराम्भस गच्छता दग्धेन्धनस्याग्ने सम्बन्धि गवा गाय शुक्लगोमयोथ भस्मेति शाक्त अपाभरत अपाहृतवान अत्र पुटकेन सह त शेष व्यवहितार्थेति छन्दसि व्यवहितस्याप्युपसर्गेण क्रियाया सम्बन्ध। कृष्णको मेऽस्त्वद्भसीति कृष्ण भ। एतानि मन्त्रपदानि असमूर्णार्थत्वात स्वार्थलाभाय ब्रह्मणमपेक्षन्त इषे त्वोर्जे त्वेत्यादि मन्त्रवत् तत्र यथा 'इषे त्वेति शाखा छिनत्ति ऊर्जे त्वेत्यनुमार्ष्टीति ब्राह्मणानुसारात् इषे शाखे त्वा त्वाम इषे अन्नाय छिनद्मीति ऊर्जे पशुभ्य अनुमार्ज्मीति व्याख्यातम् एवमिहापि वासुदेवोपनिषदुक्तब्राह्मणतन्त्रपुराणोपदृष्टानुसारात ऊर्द्धपुण्ड्रार्थं श्लक्ष्णा गाद जलेन मिश्रयदिति व्याख्येय तथा कालाग्निरुद्रोपनिषदुक्तब्राह्मणादुपनिषद्ब्राह्मणतन्त्रपुराणोपदृष्टानुसारात् त्रिपुण्ड्रकर्त्तृनिच्च, शुक्लदाभरादिति च व्याख्येयम् एवमितरस्यापि पटस्य ब्राह्मणमन्त्रलिङ्गादुपदृष्टत्वे स्मृतिभ्यश्चाहताप्रया विधिरनुमेय तथाच श्रोणामिति पटस्य रक्तामिति व्याख्याने गौराङ्गगणेशाना रक्तमेव पार्थिवं द्रव्य पुण्ड्रार्थं तत्कल्पे विधीयते वैष्णवाना पीतं शैवाना भस्मेति अनेन तत्तत्पुण्ड्रविशेषोपलक्षिततत्तद्देवता भजनेनापि देवताभावं प्राप्नुवन्तीति विधीयते। केवलवैदिकाना तु श्रोणा श्लक्ष्णामिति व्याख्यानेन त्रितयस्यापि समुच्चय कृत्वा पुण्ड्र कृता कर्यात धृत्वा चैव तु भक्षणा। देवान् विप्रान समभ्यर्च्च चन्दनेन समाचरेदिति" स्कन्दस्मृतेश्च गोरोचनाद्यक्षण चन्दनादुत्तमत्वोपलक्षणार्थम् एतेषा विकल्पसमुच्चयव्यवस्थाना पितृपैतामहपरम्पराक्रमेण व्यवस्थामाह किं स्विन्नु पुत्रेभ्य पितरा नुशासतीति पत्यर्थिनार्थे यत्किञ्चिद्धनं पितरौ माता पितरौ पितृपितामहौ वा उपेत्य स्वीकृत्य अवतु रक्षतु सम्यक् परिपालयामासतु तदेव तस्य श्रेय साधनमित्यर्थ एव स्मृतिताधानि यद्यादृश्यत्वमार्गेण सख्यादान्यतमापत्तिः केवलवैदिकता चेति देवताभावप्राप्तिसाधनानि इत्यन्तेन।

आहकर्म्मणि तु त्रिपुण्ड्रादौ विधिनिषेधयोर्व्यवस्थामि० सि० उक्ता यथा।

"जपे होमे तथा दाने स्वाध्याये पितृकर्म्मणि। तत्सर्वं नश्यति क्षिप्रमूर्द्धपुण्ड्रविनाकृतमिति' हेमाद्रावुक्तेः। 'यत्तोदान जपो होम स्वाध्याय पितृकर्म च। हृदा भवति विप्रेन्द्रा ऊर्द्धपुण्ड्रविनाकृतमिति' वृद्धहारीतेश्च 'ऊर्द्धञ्च तिलक कृत्वाद्वै पित्र्ये च कर्मणीति" वृद्धपराशरोक्तेश्च ऊर्द्धपुण्ड्रधारण पैत्रे विहितम्। अन्यत्तु 'ऊर्द्धपुण्ड्रोद्विजातीनामग्निहोत्रसमोविधि। आहकाले च संप्राप्ते कर्त्ता भोक्ता च जायतेदिति' वामकल्पे च ये दर्भा मट्टे रक्तबलिस्तथा। ललाटे तिलकं हृदा निराशा पितरो गता" इति सत्यकोक्ते "ऊर्द्धपुण्ड्र त्रिपुण्ड्रं वा चन्द्राकारमथापि वा। आहकर्त्ता न कुर्यात यावत् पिण्डान्न निर्वपेत" इति विश्वप्रकाशे वचनाच्च न सार्व्वत्रिकम्। अत्र कृत्याचारादेव व्यवस्था। अत एव वृद्धहारीतोक्तेः 'ऊर्द्धपुण्ड्रञ्च तुलसीं आहे नेच्छन्ति मोचन" इत्यत्र ऊर्द्धपुण्ड्रं ऊर्द्धपुण्ड्रविधि आहभोक्तृपर, निषेध ऊर्द्धपर: इति पृथ्वीचन्द्र। यत्तु हेमाद्रौ देवल "ललाटे पुण्ड्रकं हृदा ऋजे मालं तथैव च। निराश पितरो यान्ति हृदा च हृषीकपतिमिति"। तन्नक्षत्रिपुण्ड्रविषयम्। "प्राक्पिण्डदानात् गन्धाद्यैर्नालङ्कुर्यात्क्षत्रियकम्" इत्यश्वलायनोक्तेः

पुण्ड्रं वर्त्तुलमिलपराकें मदनरत्ने च। पृथ्वीचन्द्रस्तु "पुण्ड्रं त्रिपुण्ड्रम् अर्द्धञ्च तिलकं कुर्य्याच्च कुर्य्यादर्द्धं त्रिपुण्ड्रकम्। निराया: पितरो यान्ति ब्रह्मा चैव त्रिपुण्ड्रकमिति" ब्रह्मपराशरोक्तेः। भोक्तृत्वियंग्लपो भवत्येव। "यजेत्तिलकं भाले श्राद्धकाले च सर्वदा। अर्द्धं पुण्ड्रं त्रिपुण्ड्रं वा धारयेत्तु प्रयत्नतः" इति व्यासोक्तेरित्याह"। पृथ्वीचन्द्रोदये ब्राह्मे "सकृदर्भेण फलेन यः कुर्य्यात्तिलकं बुधः। आचम्य स विशुध्येत दर्भत्यागेन चैव हि"।

अर्द्धपृश्नि पु० अर्द्धा: पृश्नयोऽवयवा अस्य। पशुभेदे। अश्वमेधे तृतीयसवने बध्नीयमानपशुकीर्त्तने "पृश्निशिरसीनपृश्निरर्द्धपृश्निरसे माहताः" यजु० २४,४,

अर्द्धबर्हिस् पु० अर्द्धं प्राग्यं बर्हिर्येषाम्। सोमपाख्ये पितृभेदे "स्वाहा पितृभ्य अर्द्धबर्हिभ्यो धर्म्मपाभ्यः" यजु० २,१५, "अर्द्धबर्हिभ्यः सोमपाभ्य." वेददी०

अर्द्धबाहु पु० अर्द्धं उत्तोलितो बाहुः कर्म्म०। १अर्द्धोत्तोलिते बाहौ "तद्यदेनमूर्द्धबाहुमभिधिष्ठति" शत०५,४,१,१७,। बहु०। २प्रसारितबाहुके त्रि० अर्द्धबाहुः प्राञ्चं प्रस्कन्दात्पूर्वं ज ष्णु इति" कात्या० १६,३,८, अर्द्धबाहुः प्रसारितबाहुः" कर्के. "पञ्चमोरैवतो नाम मनुस्तामससोदरः" इत्युपक्रम्य "हिरण्यरेतोवेदशिरा अर्द्धबाह्वादयो द्विजाः" इति" भाग०८,५,३,श्लोकोक्ते ऽरैवतमन्वन्तरीयसप्तर्षिभेदे ते च "वेदबाहुर्व्यदुष्यच्च मुनिर्व्वेदशिरास्तथा। हिरण्यरोमा पर्जन्य अर्द्धबाहुश्च सोमजः। सप्तमेऽस्तथाऽतीते एते सप्तर्षयोमताः" हरिवं० ७अ० विशेषत उक्ताः। अर्द्धसृष्टिप्रो बाहुर्यस्य। ४तपस्यार्द्धमूर्द्धोत्तिष्ठन्बाहौ तपस्विभेदे।

अर्द्धबुध्न पु० अर्द्धं बुध्नं शिरोऽस्य। अर्द्धशिरस्के यज्ञे "अर्वाग्विलश्चमस अर्द्धबुध्नस्त्वष्टुर्म्म यमोनिहितं विश्वरूपम्। तस्मात: सप्त धीराः वागष्टमी ब्रह्मणा वेदितेति" "अर्वाग्विलश्चमस अर्द्धबुध्न इति तच्छिरः एष ह्यर्वाङ्विलश्चमस अर्द्धबुध्नस्त्वष्टुर्म्म यमोनिहितं विश्वरूपमिति प्राणा वै त्वष्टुर्म्म यमोनिहितं विश्वरूपं प्राणानेतदाह तस्मात: सप्त सप्त धीरा इति प्राणा वा ऋषय: प्राणानेतदाह द०भ०। "देवस्य चमसरूपेण रूपकमिदम् अर्वाग्विलश्चमस अर्द्धबुध्नः इह तच्छिरः चमसाकारं. हि तत् कथम्? एष ह्यर्वाग्विलः सुखस्य विवक्षणात्, शिरसोबुध्नाकारत्वात् अर्द्धबुध्नः तस्मिन् यमोनिहितं विश्वरूपमिति यथा सोमचमसे एव तस्मिन् शिरसि विश्वरूपं नानारूपं निहितं भवति, किं पुनस्तत्राप्राणाः? प्राणा वै यमोविश्वरूपम्। प्राणाः श्रोत्रादयः सप्त ऋषयः धीरा (श्रोत्रे हे नासिके हे नेत्रे हे रसना चैतेति सप्त) तेषां परिस्पन्दात्मकयज्ञादिज्ञानहेतुत्वात्"। ऋषिधातोर्गत्यर्थतया परिस्पन्दात्मकत्वस्मन्त्रम् ज्ञानहेतुत्वेन धीरत्वमिति बोध्यम्।

अर्द्धभाग पु० अर्द्धः उपरिस्थोभाग एकदेशः कर्म्म०। उपरितनदेशे "ताल्वादिषु सभागेषु अर्द्धभागे निषण्णोऽदात:" सि०कौ०।

अर्द्धभाज् त्रि०अर्द्धं भजते भज–क्विप्। १उपरिभागस्थे २अर्द्धदेशस्थे वस्तिभेदे पु०। "अर्द्धभागूर्द्धभाङ् नाम कविः प्राणाश्रितस्तु यः" भा० व०२१८अ० अग्निनामतत्कर्म्मभेदकथने।

अर्द्धम् अव्य० ऊर्द्ध–ऋज इसु आदेशश्चास्य। अर्द्धगर्द्धार्थे। "अर्द्धं प्राणाश्रुत्कामन्ति यूनःस्थविर आयति" "तिष्ठेदूर्द्धं रजः पिबेत्" मनुः "अधश्शोर्द्धञ्च प्रहृतात्स्य यात्राः" गीता।

अर्द्ध(र्द्ध)मन्यिन् पु० अर्द्धं ब्रह्मचर्य्यादुत्तराश्रमं गार्हस्थ्यादि मन्यति मन्य–णिनि ईत्व०। नैष्ठिकब्रह्मचारिणि स हि ब्रह्मचर्य्योत्तरगार्हस्थ्याद्याश्रमं त्यजतीति तस्य तथात्वम्। "यस्मिन् प्रदर्शयितुकामोवातरसनानां श्रमणानामूर्द्धमन्थिनां शुक्लया तन्वावततार" भाग०५,३,२१,

अर्द्ध(र्द्ध)मान न० अर्द्धमारोप्य मीयत येन मा–करणे ल्युट्। पलकर्षादिमिते पाषाणादौ(बाटखारा)। तेन हि तुलादावारोपितेन खर्णादेर्गुरुत्वमुन्मीयते। भावे ल्युट्। २उन्मानपरिच्छेदकपरिमाणे च "अर्द्धमानं त्रिलोन्मानं परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यात् संख्या वाक्ष्रा तु सर्वतः" व्या० का०। अयमर्थः। तुलादावारोपितस्य खर्णादेर्गुरुत्वमितिःतुलापरकोटिदेशे आरोपार्हयद्वस्तून्मीयते तदुन्मानम्। प्रस्थादिना खगताभ्यामारोहपरिणाहाभ्यां व्रीह्यादेः सर्वतोमानात् परिमाणम्। आयामोदैर्घ्यं वस्त्रादेर्जलादेश्च मितिर्हस्तदण्डादिना वस्तु मीयते तत् प्रमाणम्। सर्वतः उन्मप्रकारमानलक्षणाक्ष्रा बहिर्भूता संख्या द्वित्वादिरित्यर्थः। "प्रमाणे द्वयसज्दघ्नमात्रचः" पा० विहितौ द्वयसज्दघ्नौ प्रत्ययौ अर्द्धमानादेव. "प्रथमश्च द्वितीयश्च अर्द्धमाने मतौ मम" वार्त्तिकोक्तेः।

अर्द्धमुख त्रि० अर्द्धं मुखमस्य। १अर्द्धं गतप्रथमप्रसरे "प्र-

बोधयन्नूर्द्धसर्वेभ्यः" कथा० २ ऊर्द्धस्थितायभागे "अधोधूर्द्धकृत्सर्वेश्च पक्षिभिः" रघुः। ३ उन्नमितवदने च स्वार्थकात् क्विप्। ऊर्द्धं सञ्जस्य एक० त०। ४ सञ्जस्योर्द्धभागे न० "ललाटोर्द्धसन्धौ सन्धेरष्टमम्" तत्त्वसा०। माहकाव्यादौ सञ्जस्योर्द्धभागे विन्दोर्व्यञ्जनत्वादभेदोपचारात् विन्द्वर्थेऽपि तदर्थे।

ऊर्द्धमूल त्रि० ऊर्द्धं मूलमस्य। ऊर्द्धस्थितमूलभागे कथादौ ऊर्द्धः प्ररादुत्कटः पुरुषोत्तमो मूलमस्य। २ संसारे च "ऊर्द्धमूलमधःशाखमश्वत्थं प्राहुरव्ययम्" गीता।

ऊर्द्धरेतस् पु० ऊर्द्धमूर्द्धगं साधःपतत् रेतो यस्य। १ महादेवे, २ सनकादिसनौ ३ तपस्विभेदे, ४ भीष्मे च। रेतो हि पुंचिह्नेन प्रायः सर्वेषामधो गच्छति यस्तस्य अधोगतं संरुणद्धि स ऊर्द्धरेता इत्युच्यते। सनकादीनां निवृत्तिधर्म्मपरत्वेन नैष्ठिकब्रह्मचारितया तथात्वम् "अष्टाशीतिसहस्राणि ऋषीणामूर्द्धरेतसाम्" भा० स० ११ अ०। "दृष्ट्वा चोर्द्धमनस्कांस्तानृषभान्वयवर्द्धनः। ऊर्द्धरेताः समभवत् ततः प्रभृति चापि सः" भा० अनु० ८ अ०। "ऊर्द्धरेता ऊर्द्धलिङ्ग ऊर्द्धायुर्वै नभस्वतः" भा० अनु० १७० अ० विश्वस्तुतौ। भीष्मस्य च कृतसमावर्त्तस्यापि पितृकार्य्यविधार्थं सत्यवतीसंज्ञके गार्हस्थ्यपरित्यागप्रतिज्ञानात् तथात्वम् तत्कथा "कदाप्रभृति मे दारा ब्रह्मचर्य्यं भविष्यति" भा० आ० १०० अ० द्रष्टव्या।

ऊर्द्धरोमन् पु० ऊर्द्धानि रोमाण्यस्य। १ ऊर्द्धसञ्जतया विकटरोमणि यमदूतादौ "स पाशयन्तांस्त्रीन् दृष्ट्वा पुरुषान् भयदारुणान्। यमस्तुरङ्गानूर्द्धरोम्ण आत्मानं नेतुमागतान्" भा० ६ अ० १, २६। २ कृष्णहापसीमापर्व्वतभेदे च। कृष्णहापर्वणि "तेषां तत्रैव सीमागिरयोऽद्यापि विश्रुताः खगैव। पञ्चमश्चाभवत्तत्र कपिलश्चित्रकूटोदेवानीक ऊर्द्धरोमा दृषिः" इति भाग० ५, २०, ११। ऊर्द्धसञ्जरोमयुक्ते त्रि०। ३ रक्षःसमूहे रोम्णां जातत्वात्तस्मिन्नासिकम्" भा० अनु० ६८ अ०। स्त्रियां टाप्।

ऊर्द्धलिङ्ग पु० ऊर्द्धसमुत्थं लिङ्गं चिह्नमस्य। १ महादेवे ऊर्द्धलिङ्गं विरूपाक्षमिति" सम्भ्याकल्पमन्त्रः "ऊर्द्धरेता ऊर्द्धलिङ्ग ऊर्द्धायुर्नभस्वतः। विश्वरूपोरुवाहाय हरः सेनापतिर्विभुः" भा० अनु० १७०।

ऊर्द्धलोक पु० कर्म्म०। स्वर्गे।

ऊर्द्धवात पु० ऊर्द्धगतो वातः। सुश्रुतोक्ते स्वाभाविकगतिरोधेन ऊर्द्धगते वायौ। स च मूत्रादिवेगधारणाद्भवति यथोक्तं सुश्रु०। "ऊर्द्धगेषूदरे भावानां प्रवृत्तानां स्वभावतः। न वेगान् धारयेद्धीमान् वातादीनां जिजीविषुः"। अधिकसदावर्त्तशब्दे ११६१ पृ० उक्तम्। "आटोपमूत्रौ परिवर्त्तशङ्खौ पुरीषस्य तथोर्द्धवातम्" सुश्रु० २ सप्तमाहतालव्येते परोवरे वायौ तस्य सर्ब्बवायूनामुपरिस्थितत्वात् तथात्वम् आयुर्व्वेदशब्दे विवृतिः।

ऊर्द्धवृत्त त्रि० ऊर्द्धगत्या वेष्टनेन वृतः। ऊर्द्धावर्त्तनेनावृते दक्षिणावर्त्तनेनावर्त्तिते सूत्रादौ "आपोवसुप्रवीतं स्यात् विप्रस्योर्द्धवृतं त्रिवृत्" मनुः। यथा च दक्षिणावर्त्तितस्यैव तथात्वम् तत्रोपवीतशब्दे उक्तम्।

ऊर्द्धवृहती स्त्री वैदिके छन्दोभेदे। "चतुर्थे बृहती"। प्रस्तुपक्रम्य "अष्टिनोर्मध्ये दशकोष्टिकारवृहती त्रिजागतोर्द्धवृहती" सर्व्वानु० ५ अ०।

ऊर्द्धायुस् त्रि० ऊर्द्धः वसु येते यौ—क्विनि। १ उत्तमायुर्विशिष्टे। स्त्रियां ङीप्। २ महादेवे पु०। ऊर्द्धलिङ्गशब्दे उदा०।

ऊर्द्धोषम् अव्य० ऊर्द्धः वसु शुष्यति ऊर्द्ध+शुष-असुन्। ऊर्द्धतया शुष्के कसादिषु यथाविध्यनुप्रयोगनिषेधात् शुषधातुप्रयोग एवास्य साधुत्वम्। "ऊर्द्धशोषं शुष्यति दण्डः ऊर्द्धः वसु शुष्यतीत्यर्थः" सि० कौ०। "यद्वोर्द्धशोषं लक्षणवहिशुष्कम्" भट्टिः।

ऊर्द्धसानु पुंन० कर्म्म०। १ पर्व्वतादीनामुपरिस्थे सानौ। ऊर्द्धं सानि सो-डु। २ उपर्य्युपर्य्युच्चे "अभिक्रदत् पतत्रिभिरूर्द्धसानुः" ऋ० १, १५२, ५। "ऊर्द्धसानुरुपर्य्युपरिसञ्चरणः" भा०।

ऊर्द्धस्थिति स्त्री ऊर्द्धं स्थितिर्यत्र यद्वा। १ अम्बुजभागे त्रिका०। २ ऊर्द्धस्थे त्रि०। ऊर्द्धं स्थितिः। ३ ऊर्द्धस्थाने स्त्री

ऊर्द्धस्रोतस् पु० ऊर्द्धमूर्द्धगतं साधोगामि स्रोतः रेतसः प्रवाहोऽस्य। १ ऊर्द्धरेतसि योगिभेदे च हि उत्पतनशक्तेः सत्त्वाधिक्येन रेतः प्रवाहमूर्द्धमानयतीति तथा तथात्वम् सत्त्वाङ्कुरे एव यथोर्द्धस्रोतस्त्वं तथा सां० कौ० उक्तम् यथा "रेचितं खलु सत्त्वकुक्षेः सत्त्वनिधायाः यथोर्द्धस्रोतस इति' ऊर्द्धं स्रोत आधारस्वाधारोऽस्य २ वनस्पत्यादिषु "वनस्पत्योषधितालतृणवीरुधोर्द्धस्रोतसः। तमस्तोतसलक्षणाः प्राणाः अन्तःप्रज्ञाविशेषिणः" भाग० १, ८, २०, तेषां तथात्वोक्तेः "ऊर्द्धं स्रोत आधारस्वाधारो येषाम्" श्रीधरः। मूले छिन्नजलादीनां मूलेनैवोर्द्धमाकर्षणात् तेषामूर्द्धस्रोतस्त्वम्।

अर्द्धिय त्रि॰ अर्द्धिभवं यत्। १अर्द्धगत मूलद्वीपस्थे २वैश्यवर्षस्थानीये पक्षिभेदे। मूलद्वीपवर्णने अस्याधिष्ठानादयो दर्शिता 'यासां जलीयपक्षपवनविधूतरजसामसौ कुंसपतङ्गोर्द्धा वनस्पत्यं प्राचत्वारोवर्षाः" भाग॰ ५,२०,७। "कुंसादयः पक्षिणः प्राक्कुशद्वीपवासिनोवैश्याः" श्रीधरः। ३अर्द्धगतौ न॰

अर्द्धिन्याय पुं अर्द्धमात्राय्यते आ+ण्या–कर्म्मणि घञ्। वेदभागोत्तिरिक्तबोधके तन्त्रभेदे

अर्द्धिवर्त्त पु॰ अर्द्धमात्रमावर्त्तते आ+वृत आधारे घञ्। १अक्षवृक्षस्थाने निक्षा॰भावे घञ् ह्रस्व॰। २दक्षिणावर्त्ते च

अर्द्धासित पु॰ अर्द्धमपरिभागे असितः कृष्णः आसितो वा। १कारनेले (करेला) वृक्षे। २अर्द्धोपविष्टे त्रि॰।

अर्द्धेह पु॰ अर्द्धमीहा चेष्टा। उत्थानानुकूलायामूर्द्धचेष्टायाम् "उद्दोऽर्द्धेहे" सूत्र॰ अर्द्धेहाप्यत्र स्त्री।

अर्ध्वि पुंस्त्री॰ ऋ॰ अर्च्यते ऋच्–क्विप्। १तरङ्गे, "ओमगङ्गोर्ध्वि-वायुभिः" रघुः "मरुद्भिर्ध्वि भिर्व्याकृतवाङ्मिश्रार्थैः" २प्रकाशे, ३वेगे, ४वह्निसङ्घोदरेखायाम्, ५पीड़ायाम्, ६उत्कण्ठायाम्, ७धनुष्कादिषु, घटस्य देहमनःप्राणानां यथायथं सम्बन्धे च "वृष्णश्च पिपासा च प्राणस्य, मनसः स्तनौ। योवनोर्ध्वौ, शरीरस्य जरामृत्यू वदूर्ध्वयः" भा॰ ति॰ विभक्तोक्तेः "पङ्क्तीलतानामस्थानां जलनोऽमनाङ्गति। अतिवेगसमायुक्ता गतिरूर्ध्वि रुदाहृता" वैजयन्त्यु क्तलक्षणायाम् ८अश्वगतौ स्त्री "तूर्णं मयोधय हयोर्ध्वि भिरात्मतन्त्रः" माघः "क्षिपद्भिरूर्ध्वीभपरैरिवोर्ध्वि भिः" माघः "पक्षे अर्ध्वि भिरश्वगतिभिरित्यर्थः।

अर्ध्वी भव॰ यत्। अर्घ्य अर्ध्वि भवे त्रि॰ दात्रौ स्त्री निरु॰ "तिरश्चमोदश्य अर्घ्यासु" ऋ॰ ६,४८,६, "अर्घ्यासु दात्रिषु" भा॰। बहुभेदे पु॰ "नम अर्घ्याय चावट्याय च" यजु॰ १६,२१।

अर्ध्विका स्त्री अर्ध्वि रिव कायति कै–क। १तरङ्गवत् प्रकाशमाने अङ्गुरीयके। स्वार्थे कन्। २तरङ्गादौ च। ३उत्सवच्छटायाम् ४भङ्गनादे ५वस्त्रभङ्गे च हेम॰

अर्ध्विन् त्रि॰ अर्ध्विरस्त्यस्य इनि। अर्ध्वियुक्ते स्त्रियां ङीप्। "सम्यञ्चमध्वमृतावरीरूर्ध्विणा मधुमत्तमाः" आश्वा॰ ७,२,२२, "प्रज्ञापशव्यूर्ध्विणम्" ऋ॰ ६,६८,६, २समुद्रे पु॰ "ततः सागरमासाद्य कुक्षौ तस्य मरोर्ध्विणः" भा॰ व॰ २०॰ अ॰।

अर्ध्विमत् त्रि॰ अर्ध्विरिव वक्रताऽस्त्यस्य मतुप् यवा॰ मस्य व॰। १वक्रे। "दोर्घेषु नीलेष्वथ चोर्ध्विमत्सु जघाच केशेषु नरेन्द्रपत्नीम्' भा॰ स॰ ६५ अ॰ २तरङ्गवति च।

अर्ध्विमालिन् पु॰ अर्ध्विमालाऽस्त्यस्य इनि। समुद्रे "चन्द्रं प्रवृद्धोर्ध्विरवोर्ध्विमाली" रघुः

अर्ध्विमाला स्त्री लक्षणयुक्तायाम् जनकस्त्रीरत्नायां कन्यायाम् "पार्थिवीसदयक्रूरचूडे लक्षणसदनुजामथोर्ध्विमालाम्" रघुः

अर्य्यादि पु॰ पाणिन्युक्ते गतिसंज्ञानिमित्ते शब्दरूपभेदे च गणः अरी, अररी, तन्त्री, तान्त्री, आतान्त्री, वेतान्त्री, धूस्त्री, धूस्री, शकला, संशकला, भ्रंशकला, भ्रंसकला, गुलगुधा, शकूः, फल, फली, विल्ली, आलोली, वेवाली, वेवासी, पर्यालो, वेवाली, वर्षाल्लि, अलूमधा, वल्गुसा, मरुसा, मसमसा, श्रौषट्, वौषट् वषट्, स्वाहा, स्वधा, वन्वा, प्रादुस्, अन्, आविस्, अत्र पाठान्तरम् अरुरी उरीति अरीलय।

अर्व पु॰ ऋ॰ कारणत्वेनाऽस्यस्य अर्थ॰ अच् सम्प्रसारणपूर्वकविसर्जनीयलोपेन साधनम्। १अश्वे ऋग्विभेदे उपचारात् तद्युक्ते २बाड़वानले "अर्व इत्यश्वे" ऋ॰ २,३,१६, अर्वः बाड़वानलः भा॰ २तहति सप्तके "अपारे अर्वेऽवतं दुरन्ताः" ऋ॰ ३,१,१६, समानमूर्वं नद्यः पृणन्ति" ऋ॰ २,३५,३, अर्वः साड़ाख्येऽस्यस्य अच्। बाड़वानलतुल्ये ४मरुति "दिव अरुहदूर्वं अभितः" २,१३,७, "अर्वान मरुतः" भा॰ तमुख्ये ५विष्णौ च "मरुद्विदन्न एनसो अभीकृ अर्वात् ४,१२,५, "अर्वात् विष्णुतात्" भा॰।

अर्वङ्क न॰ अरुरिव अङ्कम् यस्य। क्षत्रिकायाम् शिलीन्ध्रे शारा॰

अर्वश्री स्त्री अरुं नारायणोरुं कारणत्वेनाऽस्यते अर्च–अच् ह्रस्व॰ गौरा॰ ङीष्। अर्वश्यामा। पु॰ अस्य दन्त्यसवर्णमपि।

अर्वष्ठीव न॰ अरुश्च अष्ठीवन्तौ च समा॰ इन्द्वः नि॰। अर्वोष्ठीवतोरेव समाहारे

अर्वी स्त्री अरु मध्यस्थत्वेनाऽस्यस्य अर्थ॰ अच् सम्प्रसारणवत् व गुणः गौरा॰ ङीष्। अरुमध्यस्थाने "अरुमध्ये अर्वी नाम तत्र योनिसमुद्भवात् शक्तिशब्दोयः "अर्व्या अर्वन्मध्यवर्त्तिन्यास्त्वेरुरुमूले लोहितायामिति" लोहितायामिति जानकीं मूर्खाः शिटकुपरा" इति च हेमचन्द्रः।

अर्व्य पु॰ अर्वे बाड़वानले भवः यत्। अधिष्ठातृतया बाड़वानले स्थिते देवे "नम अर्व्याय च सूर्य्याय च" यजु॰ १६,४,

अर्षा स्त्री ऋ–स निं॰ नेट्। देवताऽङ्गुलौ शब्दच॰।

अलुपिन् पु॰ उलुपिन्+पृ॰ दीर्घः। १जलजन्तुभेदे २मत्स्यभेदे च

अलूक पुंस्त्री॰ उल–अकच् दीर्घश्च। पेचके स्त्रियां ङीप्।

अष पु॰ कृजायाम् भ्वा॰ पर॰ सक॰ सेट्। अर्षति औषीत्

जषाम् बभूव आस चकार । जषितः जुषः जषणः ।

जष पु० जष-कृञायां क । १क्षारे, २कर्पूरभेदे, ३चन्द्रनाम्नौ च । "कौशेयाविकयोर्जषैः" मनु । "मोषैरुदकगोमूत्रैः शुध्यत्यार्थिकौषिकम्" या० । तत्र चन्दनाहे: विरचितापकत्वात् कर्णच्छिद्रस्य अल्पजाद्यादिप्रवेशेन उद्वेगहेतुत्वात् क्षारवृत्तिकाया मलापहारकत्वात् तथात्वम् इति भेदः । जषति अन्धकारं प्रेषकं वा । ४प्रभाते ५रेतसि न० । तस्य च क्षारवत्तीव्रत्वात् उष्णत्वाच्च तथात्वम् । यथा च रेतस जषत्वम् तथाह "रेतो वा जषाः प्रजननं तदेनं प्रजनन आभजत्येतद्वै पितरः प्रजननमाभक्ता भवन्ति यदेषां प्रजा भवति" शत० ब्रा० १२,८,१,१४ । ६क्षारवृत्तिकायां स्त्री [शब्दच० ।

जषक न० जषति अन्धकारं प्रेषकं वा जष-ण्वुल । प्रत्यूषे

जषण न० जष-ल्यु । १मरिचे २पिप्पलीमूले ३शुण्ठ्याञ्च । (चिता) ४चित्रके पु० । ५पिप्पल्यां ईषच्चे च (चइ) स्त्री । मरीच्यादीनां कटुत्वेन जिह्वोद्वेजकतया तथात्वम् । त्रयूषणं त्रिकटुगुण्ठी पिप्पली मरिचं च यथाह "त्रिषोषकल्या मरिचं त्रयूषं त्रिकटु कथ्यते । कटुत्रिकं त्रिकटुकं त्रयूषणं व्योषमुच्यते । त्रयूषणं दीपनं कृमि श्वासकासस्वरामयान् । गुल्मप्लीहं च सक्रूरशौत्यं मेदसा सह पीनसान्" भावप्र० । त्रयूषणं मकरणमूषं कथितं यद्धत्रयूषणकम् । व्योषस्येव गुणाः प्रोक्ता अधिक त्रयूषणे" भा० प्र० । षड्भूषणम् । "पिप्पली पिप्पलीमूलम् चव्या चित्रकनागरैः । पञ्चभिः कोलमात्रैश्च पञ्चकोलम् तदुच्यते । पञ्चकोलं समरिचं षड्भूषणमिहेष्यते" भावप्रकाशः ।

जषर त्रि० जष+मत्वर्थीयो रः, जषं क्षारवृत्तिकां राति ददाति कः वा । क्षारवृत्तिकायुक्ते देशे यत्र शुभं बीजं न प्ररोहति । "अनूषरमविवदिषु भूम" ऋग्० ८० २, ७,२ । आधाराक्षोषरमृदुपक्वकृष्णम् शत० ब्रा० २,१,१,६ । उक्तम् यथा "अयोषान् सम्भरति । "असौ वै द्यौरस्यै पृथिव्या एतान् पशून् प्रददौ तस्मात् पशव्यमूषरमित्याहुः" । "षर्षुकस्य किमपः क्षतोद्भवेरन्वृद्धस्य परिहार्यमूषरम्" माघः । "तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे" मनुः "नषोषरां न निर्देश्यां मही दद्यात् कदाचन" भा० अनु० ११४ १.

जषरज न० जषराज्जायते जन-ड । (यावूक्षार) लवणभेदे । तद्गुणादि सुश्रु० "उषस्कृतं बालुकैलं शैलं मूलाकरोद्भवम्" लवणं विभज्य "लवणं कटुकं क्षेदिविष्टिम्भि पटु चोच्यते" सुश्रु०

जषवत् त्रि० जष-मतुप् मस्य वः । जषरस्थाने । स्त्रियां ङीप् ।

जषा स्त्री बाणराजकृतायाम् उषागृह्ये तत्कथोक्ता ।

जष्म पु० जष-म । १ग्रीष्मतिरोधिनि स्वर्गे । अर्ग-अच् । २तद्युति त्रि० । ३निदाघकाले अमरः ।

जष्मण त्रि० पामादि० अस्त्यर्थे न । जष्मयुक्ते मतुप् मस्य वः जष्मवत् तदर्थे त्रि० स्त्रियां ङीप् ।

जष्मण्य त्रि० उष्मा शिवारणीयत्वेनास्त्यस्य यत् । जष्मनिवारणार्हे "उष्मण्या पिधानां वरुणामद्भाः" ऋ० १,१६२, १२ । "उष्मण्य जष्मनिवारणार्हाणि पात्राणि" भा० ।

जष्मन् पु० जष-मनिन् । १ग्रीष्मे २तेजोद्रव्यस्य सूक्ष्मावयवे (भाप) "भुवा सङ्गोष्णमसञ्चदुर्वीगम् कृमा० "यथाग्नेर्धूम उदयते एवमेषामूष्मोदयते" शत० ब्रा० १, ६,३,१,५ । व्यारणोक्तेषु सोष्मवायुषोष्मार्थमाणेषु शमसङ्कुमेषु वर्णेषु । "स्वराणामूष्माणश्चैव विवृत करणं मतम्" शिक्षा । "जषसहा जष्माणः" त्रि० कौ० । "सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्याः इन्द्रे बलं ददातीति । सर्व्वजष्माणोऽस्त्रा अनिरस्ता विवृता वक्तव्याः प्रजापतेरात्मानं परिददानीति" छा० उ० । "सर्व्वे जष्माणोऽस्त्रा अनिरस्ता अघ्नन्तराक्षिप्ता विवृता विवृतप्रयत्नोच्चारिताः प्रजापतेरात्मानं परिददानि प्रयच्छामि" या० भा० । "अथ यदोष्मभूयिष्ठमिव प्रजापतेः शरणोऽभूत् स त्वा प्रतिपेक्ष्यतीत्येनं ब्रूयात्" छा० उ० । "सर्वस्वस्याभयस्यैव स्वरोदेष्ट उदाहृतः । उष्माणमिन्द्रियाणाञ्चरन्तस्था बलमात्मनः । स्वरा, सप्त विकारेण भवन्ति स्म प्रजापतेः" भाग० ३,१२,३०, जष्माणं शषसह इति चतुष्टयम् अन्तःस्था यरलवाः सप्त स्वराः षड्जादय विकारेण क्रीड्या" श्रीधरः । "खे खानि वायौ निश्वासं तेजः रूपाणमालभेत् । अप्सु सृक्कं क्षितौ शरीराणि तत्तौ येन यथोद्भवम्" भाग० ७,१२,२४, । अत्र तेज रूपाण मिति स्वकारणे लयाभिधानात् तस्य तेज कार्य्यता गम्यते । दृश्यते च तस्य तेजः कार्य्यत्वञ्च तत्र उष्मणशब्दे दर्शितम् । देहस्थौष्मा च ब्रह्माण्डे कौशेयानलोपाधिजलीवसंयोगेनैव भवति यथोक्तं छा० उ० भाष्ययोः । "अथ यदतः परोदिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्व्वतः पृष्ठेषु अनुत्तमेषूत्तमेषु लोकेषिदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिरिति वा हृदि विजानाति" उप० । "इदं वावेदमेव तद्यदिदमस्मिन् पुरुषेऽन्तर्मध्ये ज्योतिः चक्षुः श्रोतमेवाक्षीत्यक्षिणोष्मा शब्देन शब्द्यते । यच्चचा स्पर्शेनैव स्पृशते तच्छरीरमेव । हृदयमिति करत्वात्त्वचोऽविनाभूतत्वाच्च रूप-

स्वर्गयोः । कथं पुनरस्य ज्योतिषो लिङ्गं चक्षुर्दृष्टिगोचरत्वमापद्यते ? इत्याह यत्र यस्मिन् काले एतदिति क्रियाविशेषणं अस्मिन् शरीरे क्षतेनानाद्य संस्पर्शेनोष्णिमानं रूपसहभाविनमुष्णस्पर्शभावं विजानाति स ह्युष्णिमा नामरूपव्याकरणाय देहमनुप्रविष्टस्य चैतन्यात्मज्योतिषो लिङ्गमव्यभिचारात् । न हि जीवन्मात्मानमुष्णिमा व्यभिचरति ।"उष्ण एव जीविष्यन् शीतो मरिष्यन्निति" हि विज्ञायते । मरणकाले च "तेजः परस्यां देवतायामिति" परेणाविभागत्वोपगमादतोऽसाधारणं लिङ्गमौष्ण्यमग्नेरिव धूमः । अतस्तस्य परस्यैषा दृष्टिः साक्षादिव दर्शनं दर्शनोपायः इत्यर्थः" ।

एतद्वाक्यञ्च कौक्षेयानलोपाधिकजीवाभिन्नब्रह्मपरं तस्यैव ज्योतिःशब्दाभिधेयत्वेन तत्सम्बन्धादेव देहस्यौष्ण्यसम्भवः; तदेतत् शा० सू० भाष्ययोः समर्थितं यथा"ज्योतिश्चरणाभिधानात्" शा० सू० "इदमामनन्ति अथ यदतः परोदिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिरिति"तत्र संशयः किमिह ज्योतिःशब्देनादित्यादिकं ज्योतिरभिधीयते ? किं वा पर आत्मेति ? । अर्थान्तरविषयस्यापि शब्दस्य तल्लिङ्गाद्ब्रह्मविषयत्वसम्भवम् इह तल्लिङ्गमेवास्ति नास्ति वेति विचार्यते किन्तावत् प्राप्तं आदित्यादिकमेव ज्योति यद्धेन परिगृह्यते इति । कुतः ? प्रसिद्धेः तमो ज्योतिरिति ह्रीमौ शब्दौ परस्परप्रतिद्वन्द्विविषयौ प्रसिद्धौ । चक्षुर्दृष्टेर्निरोधकं शर्वरादिकन्तम उच्यते । तस्माच्चानुग्राहकमादित्यादिकं ज्योतिः । तथा दीप्यते इतीयमपि श्रुतिरादित्यादिविषया प्रसिद्धा न हि रूपादिहीनं ब्रह्म दीप्यत इति सख्यां अतिमर्हति । किञ्च द्युभ्वाद्यत्वश्रुतेश्च । न हि चराचरबीजस्य ब्रह्मणः सर्वात्मकस्य द्यौर्भ्यादा युक्ता कार्यस्य तु ज्योतिषः परिच्छिन्नस्य द्यौर्भ्यादा स्यात् "परोदिवो ज्योतिरिति"च ब्राह्मणम् ननु कार्यस्यापि ज्योतिषः सर्वत्र गम्यमानत्वात् मर्यादावत्त्वमसमञ्जसं अस्तु तर्हि लिङ्गतत्तेजः प्रथमजम् । न अग्नितत्तेजसः प्रयोजनाभावादिति । इदमेव प्रयोजनं यदुपास्यत्वमिति चेन्न प्रयोजनान्तरप्रयुक्तस्यैवादित्यादेरुपास्यत्वदर्शनात् । "तासां त्रिवृतं त्रिवृतमेकैका करवाणीति" चाविशेषश्रुतेः । नचाग्नितत्तेजसापि तेजसोद्युभ्वाद्यत्वं प्रसिद्धम् । अस्तु तर्हि त्रिवृतत्तेजसमेव तेजो ज्योतिःशब्दम् । ननूक्तमर्थापि दिवो गम्यतेऽम्बादिकं ज्योतिरिति नैष दोषः सर्वत्रापि गम्यमानस्य ज्योतिषः परोदिव इत्युपसर्जनार्थः प्रदेशविशेषपरिच्छेदो न विरुध्यते न तु निःप्रदेशस्य ब्रह्मणः प्रदेशविशेषकल्पनाभागिनी । सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विति चाधारवत्त्वश्रुतेः कार्ये ज्योतिष्युपपद्यतेतराम् । "इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिरिति"च कौक्षेये ज्योतिषि परं ज्योतिरध्यस्यमानं दृश्यते साकल्यनिमित्ताध्यासा भवन्ति यथा"तस्य भूरिति शिरः एकं शिर एकमेतदक्षरमिति" कौक्षेयस्य तु ज्योतिषः प्रसिद्धमब्रह्मत्वं तस्यैषा दृष्टिस्तस्यैषा श्रुतिरिति चौष्ण्यधोषविशिष्टत्वश्रवणात्"तदेतद्दृष्ट्या श्रुत्या श्रुत्येत्युपासीतेति"च श्रुतेः ।"चक्षुष्य श्रुतो भवतीति च एवं वेदेति" चाल्पफलश्रवणाद्ब्रह्मत्वं भजते हि फलाय ब्रह्मोपासनमिष्यते । नचान्यदपि किञ्चित् स्ववाक्ये प्राणाकाशवत् ज्योतिषोक्ति ब्रह्मलिङ्गम् । न च पूर्वस्मिन्नपि वाक्ये ब्रह्म निर्दिष्टमस्ति । "गायत्री वा इदं सर्वं भूतमिति" छन्दोनिर्देशात् । अथापि कथञ्चित् पूर्वस्मिन् वाक्ये ब्रह्म निर्दिष्टं स्यात् एवमपि न तच्छेष प्रत्यभिज्ञानमस्ति । तत्र हि त्रिपादस्यामृतं दिवीति द्यौरधिकरणत्वेन श्रूयते । अत्र पुनः परोदिवो ज्योतिरिति द्यौर्मर्यादात्वेन । तस्मात् प्राकृतं ज्योतिरिह प्रास्मिन्नेव प्राप्ते ब्रूमः । ज्योतिरिह ब्रह्मप्राप्तं कुतः ? चरणाभिधानात् पादाभिधानादित्यर्थः । पूर्वस्मिन् हि वाक्ये चतुष्पाद् ब्रह्म निर्दिष्टं "तावानस्य महिमातो ज्यायांश्च पूरुषः पादोऽस्य सर्वाभूतानि त्रिपादस्यामृतं दिवि" इत्यनेन मन्त्रेण । तत्र यत् चतुष्पदो ब्रह्मणः त्रिपादमृतं द्युसम्बन्धिरूपं निर्दिष्टं तदेवेह द्युसम्बन्धादिर्दिष्टमिति प्रत्यभिज्ञायते तत् परित्यज्य प्राकृतं ज्योति, कल्पयतः प्रकृतप्राकृतप्रक्रिये प्रसज्येतायाम् । न केवलं ज्योतिर्वाक्य एव ब्रह्मानुवृत्तिः परस्मादपि हि गायत्रिलक्षणविद्यायामनुवर्तिष्यते ब्रह्म । तस्मादिह ज्योतिरिति ब्रह्म प्रतिपत्तव्यम् । यत्तूक्तं ज्योतिर्दीप्यते इति चैतौ शब्दौ कार्ये ज्योतिषि प्रसिद्धाविति, नायमेवोभः प्रकरणाद्ब्रह्मावगमे सत्यनयोः शब्दयोरविरोधकत्वात् दीप्यमानं कार्यज्योतिरूपलक्षिते ब्रह्मणापि प्रयोगसम्भवात् "येन सूर्यस्तपति तेजसेद्धः" इति च मन्त्रवर्णात् । यद्वा नाम ज्योतिःशब्दश्चक्षुर्दृष्टेरेवानुग्राहके तेजसि वर्तते । अन्यत्रापि प्रयोगदर्शनात् "वाचैवायं ज्योतिषाऽऽ" मनोज्योतिर्जुषतामिति" च । तस्माद्यद्यतत्सत्य चिदभासकत्वात्

ज्योतिःशब्दे नाभिसंधत्ते । तथा सति ब्रह्मणोऽपि चैतन्यस्वरूपस्य समस्तजगदवभासहेतुत्वादुपपन्नो ज्योतिशब्दः "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति"। "तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्" इत्यादिश्रुतिभ्यश्च । यदप्युक्तं दामयादित्वं सर्वगतस्य ब्रह्मणोनोपपद्यते इति । अत्रोच्यते सर्वगतस्यापि ब्रह्मणउपासनार्थः प्रदेशविशेषपरिग्रहो न विरुध्यते । ननूक्तं नि प्रदेशस्य ब्रह्मणः प्रदेशविशेषकल्पना नोपपद्यत इति। नायं दोषः निष्प्रदेशस्यापि ब्रह्मण उपाधिविशेषसम्बन्धात् प्रदेशविशेषकल्पनोपपद्यते । तथाहि आदित्ये चक्षुषि हृदय इति प्रदेशविशेषसम्बन्धीनि ब्रह्मण उपासनानि श्रूयन्ते । एतेन "पञ्च पृथिव्याधारबद्धत्वमुपपादितम् । यदप्येतदुक्तं ज्योतिष्टोमाख्यामनुमिते कौलेये कार्ये ज्योतिष्यस्मदादि प्रत्यक्षेऽपि दिवः कार्ये ज्योतिरेवेति । तदप्ययुक्तं परस्यापि ब्रह्मणोनामादि प्रतीकवत् कौलेयज्योति प्रतीकत्वोपपत्तेः । "इदञ्च श्रुतञ्चेत्युपासीतेति" तु प्रतीकग्रहणं इदत्वं श्रुतत्वञ्च भविष्यति । यदप्यल्पफलश्रवणाच्च ब्रह्मेति तदप्यनुपपन्नम् । न हि श्रूयते फलाय ब्रह्मात्मत्वमीयमियते नेति नियमे हेतुरस्ति । तत्र हि निरस्तसर्वविशेषसम्बन्धं परं ब्रह्मात्मत्वेनोपदिश्यते तत्रैवंरूपमेव फलं मोक्ष इत्यवगम्यते यत्र तु गुणविशेषसम्बन्धं प्रतीकविशेषसम्बन्धं वा ब्रह्मोपदिश्यते तत्र संसारगोचराण्येवाश्वादीनि फलानि श्रूयन्ते "अन्नादो वसुदानोविन्दते वसु य एवंवेद" इत्याद्यासु श्रुतिषु । यद्यपि न खलाक्ये किञ्चित् ज्योतिषो ब्रह्मलिङ्गमस्ति तथापि पर्वस्मिन् वाक्ये दृश्यमानं गृहीतव्यं भवति । तदुक्तं स्मृतिकारेण ज्योतिश्चरणाभिधानादिति । कथं पुनर्वाक्यान्तरगतेन ब्रह्मसन्निधानेन ज्योतिःश्रुतिः स्वविषयात् प्रच्याव्य ब्रह्मा व्यावर्त्तयितुम् । नैष दोषः । "यदतः परोदिवो ज्योतिरिति" प्रथमतरपठितेन यच्छब्देन सर्वनाम्नादृष्टसम्बन्धात् प्रत्यभिज्ञायमाने पूर्ववाक्यनिर्दिष्टे ब्रह्मणि स्वसामर्थ्येन परामृष्टे सत्यर्थात् ज्योतिःशब्दस्यापि तद्विषयत्वोपपत्तेः । तस्मादिह ज्योतिरिति ब्रह्म प्रतिपत्तव्यम्" भा० । सुत्तन्तरे तु कौलेयाग्निसंबन्धात् देहस्यौष्ण्यलक्षणम् । तथापि कौलेयाग्नेरपि जीवस्थितिनियतत्वात् जीवाधीनत्वं कल्पमित्याकरे प्रपञ्चः

ऊह वितर्के भ्वादि० आत्म० सक० सेट् । ऊहते औहिष्ट । ऊहां बभूव आस चक्रे । ऊहितः ऊहमानः ऊहितम् ऊहः । "औहिष्ट तान् वीतविकल्पबुद्धीन्" भट्टिः । कर्मणि ऊह्यते औह्यि णिच् । ऊहयति ते औजिहत् त । "कृषेण तावौजिहतां ऋसिहौ" भट्टिः अस्य ऊहशब्दे वक्ष्यमाणेऽर्थेऽपि वृत्तिः । परब्रह्मैतदित्यमध्यस्य ऊहति, इत्युक्तेनहिदैवतं दैविकेषु" कात्या० १०,२,१,१७,यादौ उपसर्गात् परस्यादेर्ह्रस्वः । समूहते

अति-एकदेशस्थितस्य तद्विपरीतदेशप्रेरणे "दोषैकलसमत्यूहा" कात्या०६,२,१६ । "अत्यूहा प्राङ्मुखमेव प्रताच्यां प्रेर्य" कर्कः ।

अधि+अङ्गने । "अग्निमग्नीत् संमृहतीति यथाधुरमधिगूहे देवं तदात् पूर्वमाधार माधार यत्यधुक्ष्व 'हि धुरं युञ्जन्ति" शत० ब्रा० १,४,४,१२,

अप+निरसने दूरीकरणे । "अपोह्य बर्हीषि" कात्या० २,२,१७, "एतैर्व्रतैरपोहेत पापं क्षेयवतं द्विजः" मनुः । "सर्वान् रसानपोहेत लवणञ्च तिलैः सह" मनुः प्रतिकूलतर्केण प्रबलतर्कापनयने अपोहः ।

अप+वि+निवारणे "व्यपोहत शरांस्तस्य सर्वानेव धनञ्जयः" भा० आ० ४७० । [२८ । "अभ्यूहति आच्छादयति" भा० ।

अभि+आच्छादने । "अथाङ्गारैरभ्यूहति" शत० ब्रा० १,२,४,

उद्+उत्कर्षणे । "रथनाभुदूह्य प्राच्याम्" कात्या० १,६,१ । "उदूह्य उत्कृष्य" कर्कः निरसने च । "तेन प्राचोऽङ्गारानुदूहति" शत० ब्रा० १,२,१,४ । [१,३,५,१७ ।

प्रति+उद्+प्रक्षेपणे "दक्षिणतः पुरीषं प्रत्यूहेत" शत० ब्रा० वि+उद्+अन्ने विवर्त्तने । "चतस्रः कुलभवयतो बाह्यतो व्युदूहति" शत० ब्रा० १०२,१,४ । व्युदूहति अन्ने विवर्त्तयति" भा०

उप+अधस्तात् प्रवेशने । "पशाच्छम्यामुपोहति" कात्या० २,५,४ । "उपोहति अधस्तात् प्रवेशयति कर्कः ।

निर्+निष्कास्य दहने पृथक्करणे च । गार्हपत्यादुष्णं भस्म निरूह्य" शत० ब्रा० १२,४,२,२ । "गिरः स्त्रियमस निरौहत्" शत० ब्रा० १०,५,४ । वपाग्नेऽनमेदसश्चर्युः प्रेष्यति निरूहैतं गर्भमिति" "निरूह्यमाणमभिमन्त्रयेत" कात्या० २५,१०,४,५ । निरूह्यमाणं पृथक्क्रियमाणम् वेददी० निरूहणम्

परि+परितः व्याप्तपूरणे । "अरत्निमात्रे संस्तरे वोपदधाति-पर्यूहति च" कात्या०८,५,२५ । पर्यूहति पांशुभिरन्तराले परितः पूरयति" कर्कः । पर्यूहणम् ।

प्र+देशान्तरनयने । "प्रोह्य द्रोणकलशम्" कात्या० ६, ५, १४ । "प्रोह्य प्रेर्य" कर्क० । पातने च "कृष्णाजिने प्रोहति" कात्या० २, ५, ७ । प्र+जुहोत्यादेर्वृद्धिः प्रौहः ।

प्रति+उपरिस्थापने । "दोग्धिनीरौ दक्षिणे प्रत्यूह्य वासः" कात्या० ७८, २१ । "प्रत्यूह्य उपरि स्थापयित्वा" वेददी० निदाने च । "प्रत्यौहतमग्निनो मुखात्" यजु० २७, "प्रत्यौहत व्यवर्त्तयताम्" वेददी० ।

वि+विपरीततया प्रेरणे "जुहूपभृतौ व्यूहति" कात्या० ३, ५, १७ । सैन्यानां सन्निवेशविशेषेण स्थापने च । व्यूहः । "प्रकर्षयेद्बलं व्यूह्य तांश्च सम्यक् परीक्षयेत्" मनुः । समवेतभवने । "योवैश्वियते क्षतयोऽस्य व्यूह्यन्ते" शत० ब्रा० ८, ७, २, ११,

प्रति-वि प्रतिरूपव्यूहकरणे । "वार्क्षस्त्यविधिं ज्ञात्वा प्रतिव्यूह्य निवारयेत्" भा० व० २८४ अ० । विरोधाचरणे च प्रत्यूहः ।

सम्- समवेतभवने संहनने सम्यक्प्रापणे च । "यद्गव्यन्ता ह्या जना स्व र्यन्ता समूहसि" ऋ० १, १२१, २, समूहसि प्रापयसि भा० । सम्यक्पूरणे "अङ्गारैरभि समूहति" शत० ब्रा० ४, ५, २, १८, समूह ।

उप+सम समीपे सङ्कोचने "पलाशपसमूहन्ति" शत० ब्रा० १०, २, १, १, "समूहन्ति मध्यभागसमीपे सङ्कोचयन्ति" भा० ।

परि-सम्-समन्तात् परिमार्जने "वेदिं परिसमूह्य" कात्या० २, ६, १२, "परिसमूह्य सर्माभ्य" कर्क० । "अग्निं प्रतिष्ठाप्यात्माधाय परिसमूह्य" आश्व० श्रौ० १, १, १, "परिसमूहनं नाम चात्रेः समन्ताद् परिमार्जननम्" नारा० ६० ।

समूढव्यूढनिरूढादिकमस्यैव रूपमाहुः कोचित् । अस्येटकृत्वात् जहित इत्यादय एव रूपाः । अतस्तानि उपरूढस्य वहतेरेव रूपाणीत्यन्ये । अस्यैव आङ्पूर्व्वकस्य ओहते इति रूपम् । न तु केवलस्य, दीर्घोपधत्वेन गुणाप्रसक्तेः ।

जहु पु० जह-बन् । १वितर्केऽागमाविरोधिना तर्केण आगमार्थस्य संशयपूर्व्वं पक्षनिवारणपूर्व्वकोत्तरपक्षव्यवस्थापनेन निर्णयरूपे २परीक्षणे, ३अनन्वितार्थकविभक्तिलिङ्गत्यागपूर्व्वके अन्वययोग्यविभक्त्यादिकल्पने, यथा पार्वणे सौम्यास इति बहुवचनमन्वितमपि एकोद्दिष्टे अनन्वितत्वात् सौम्य इत्येकत्वेनान्वितया कल्पनम् । ४पदान्तरेणाकाङ्क्षापूरणार्थेऽध्याहारे च । "जहुः यज्ञोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः । दानञ्च सिद्धयोऽष्टौ सिद्धेः पूर्व्वोऽङ्कुशस्त्रिविधः" सा० का० उक्ते तारास्थे ५सिद्धिभेदे "जहुस्तर्कः आगमाविरोधिन्यायेनागमार्थपरीक्षणम् । संशयपूर्व्वं पक्षनिराकरणेनोत्तरपक्षव्यवस्थापनं तदिदं मननमाचक्षते आगमिनः सा तृतीया सिद्धिस्तारमुच्यते" सा० कौ० "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" का० वार्त्ति० । "जहुः खल्वपि न सर्व्वैर्लिङ्गैर्न च सर्व्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदितास्ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः तत्रावश्याकरणः यज्ञोक्ति विपरिणमयितुम् तच्चाध्येयं व्याकरणम्" महाभा० । "जहुः खल्वपीति । इह यस्मिन् याग इतिकर्त्तव्यतोपदिष्टा यागान्तरेणोपजीव्यते सा प्रकृतिः येन चोपजीव्यते सा विकृतिः प्रकृतिवद्विकृतिः कर्त्तव्येति मीमांसकैर्व्यवस्थापिते न्याये प्रकृतिप्रत्ययादीनामहं वैयाकरणस्तुभ्यंखिजानाति । तत्र अग्नेमन्त्रोऽस्ति "अग्नये त्वा जुष्टमिर्वपामीति" तत्र 'सौर्य्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम' इति सौर्य्ये चरौ मन्त्र जहुते सूर्य्याय त्वा जुष्टं निर्वपामीति । विस्तरेण भर्त्तृहरिणा प्रदर्शित जहुः" कै० । "जहुः खल्वपीत्यस्य प्रयोजनमिति शेषः । ननु यत्र प्रकरणे ये मन्त्राः पठितास्तत्र तेषां तथैव प्रयोग इष्ट इति नोक्तेन प्रयोजनमित्याशङ्क्य प्रकृतावहृाभावेऽपि विकृतावहृ इति दर्शयितुम् प्रकृतिग्रहणार्थ माह । इष्टेति । यस्मिन्नग्नेयादौ । यागान्तरेण सौर्य्यादिना । प्रकृतिविकृत्योरगमश्च द्विदैवत्यत्वैकदेवत्यत्वादिसाम्येन बोध्यः । अन्यत्र पठितमन्त्राणामुच्चमन्यत्र गमनमत आह प्रकृतिवदिति । यथा सोपकारा प्रकृतिरनुष्ठीयते तथा विकृतिरपीति तदर्थः । तदनेनोपकारातिदेशे तत् पृष्ठभावेन पदार्था व्यभिचरन्ति इतिकर्त्तव्यताया अभावनायास्माकाङ्क्षत्वादेतन्मूलकमेव प्रकृतिवदितीति मीमांसकसरणिः । यागान्तरगताश्च मन्त्राः । तत्र अग्निसम्बन्धिनिर्वापप्रकाशक मन्त्रस्थ ग्निपदस्य सूर्य्यसम्बन्धिनिर्वापप्रकाशनासमर्थत्वात्तदपहाय तत्स्थाने सूर्य्यायेत्यूह्यमित्याह त त्राग्नेरिति । मन्त्र जहुत इति । यद्यप्यूह्ये न मन्त्रत्वं तथाप्येकदेशेऽपि अनेकपदसमुदाये मन्त्रत्वप्रसिद्धानामनुघटिते समुदाये मन्त्रत्वव्यवहारः, कर्म्मणा स्मृतत्वेति बोध्यम् । सोऽयमूह्यलक्षणः अन्येऽप्याहुः । तत्फलस्य हि आत्मिज्यलाभेन द्रव्यप्राप्तिद्वारा ऐहिकसिद्धिःफलमिति बोध्यम् । भाष्ये लिङ्गपदस्य प्रकृत्या देरुपलक्षणम् । यथायथमिति । अर्थप्रकाशनसाध्यानतिलङ्घनेनेत्यर्थः" उद्योतः ।

तादर्थ्येऽभेदस्तु अधिकरणमात्रादौ द्रव्य० । द्रव्यप्रतिनिधौ तु नोह० । "तैलं प्रतिनिधिं कृत्वानेतव्यं याज्ञिकोऽयदि । प्रकृत्यैव तदा होता ब्रूयात् स्रुतवतीमिति" मीमां० काात्यायनसूत्रादौ प्रतिनिधिविषये ऊहाभावेदर्शितो यथा "अग्नेर्वं चिन्यते विहितद्रव्यस्याभावे द्रव्यान्तरे प्रतिनिधित्वेनोपात्ते ऊहाभावे मेषरूपे अनुवाचनप्रेषादौ किमकृत्वा प्रतिनिधितद्रव्यशब्दस्य प्रयोगः कार्य्यः "अग्नीषोमाभ्यां मेषस्य वपाया" इत्येवम्भूत विहितद्रव्य शब्दस्यैव अग्नीषोमाभ्यां छागस्येत्येवमेवेति । तत्र मन्त्रेण द्रव्यमभिधेयम् न चानर्हितः प्रतिनिधितं द्रव्यं यन्नोत्पभिधातम् तस्मादूहित्वा प्रतिनिधितद्रव्यवाचिशब्दस्य प्रयोगे प्राप्त आह" "शब्देविपरिक्रमः" कात्या० १, ४, ९, "प्रतिनिधावुपात्तेऽपि विहितद्रव्यवाचिनि शब्दे अविप्रतिपत्तिरविपरिणामः अनूहो भवति अग्नीषोमाभ्यां छागस्य वपाया इत्यूहितमेव मेषेऽपि प्रयोक्तव्यम् न तु मेषस्येत्येवं विपरिणतरूपमित्यर्थः कृतः ? प्रतिनिधिः स्रुतद्रव्यबुद्ध्या गृह्यते न तु द्रव्यान्तर बुद्ध्या अतस्त्याग एवायमिति बुद्ध्या गृहीतत्वात्तच्छब्देनैवाभिधानम् । यद्यत्र मेषस्त्यागवत साधनं भवेत्तदा तत्प्रकाशकम् मेषपदं प्रक्षिप्येत न त्वेवम् किं तर्हि मेषगता ये छागांशास्त एवात्र साधनम् ते च छागगता इव मेषगता अपि छागशब्देनैव प्रकाशयितुं शक्यन्त इत्यजशब्देनैव प्रयोगः । यत्र तु द्रव्यान्तरं वचनेन विधीयते यथा "वारवन्तीं मेषीमिति" "ऐन्द्रं मेषमिति" "ऐन्द्रं और्भ्रः" इति तत्र द्रव्यान्तरबुद्धिर्भवति तत्र ऊहोऽपि भवति । नचात्रेयंविधं किमपि वचनमस्ति तस्मादूहनामावयवानां सामान्याच्च तद्द्रव्यमेवेदमिति बुद्ध्या मेषादिद्रव्यस्य छागादिप्रतिनिधित्वेनोपादानम् । तेन स्रुतद्रव्यशब्देनैवाभिधानं युक्तमिति साधूक्तम् शब्देऽविप्रतिपत्तिरिति । यत्र तु वचनेन द्रव्यान्तरं विधीयते तत्र ऊहो भवत्येवोक्तम् तेन सोमाभावे पूतीकानभिषुण्वादिति पूतीकानां वाचनिकत्वादूहो भविष्यतीत्याशङ्क्याह" कर्क० "सोमेन जात्यभावात्" का०सू०१० "सोमेनेति हतीयैकवचनम् । सोमाभावे पूतीकेषूपात्तेषु सोमशब्देनैव पूतीकानामभिधानं कर्त्तव्यम् । "अंशुरंशुष्टे देव । सोम ! पाययतामिलेवम् न तु पूतीकाशब्देन । अथ वा सोमे इति सप्तम्येकवचनम् नेति निषेधः । सोमप्रतिनिधित्वेनोपात्तेषु कर्त्तुमशक्यत्वेनस्थितपूतीकादिषु सोमे सोमशब्दे ऊहो न भवति कुतः जात्यभावात् जात्यन्तरबलाभावात् तस्मात् वचनेन द्रव्यान्तरं विधीयते किं तर्हि सोमाभावे यागस्यावश्यकर्त्तव्यत्वादनेकेषु हुस्वदीर्घप्लुतस्वरेषु च प्राप्तेषु पूतीकादेर्नियमः क्रियते तेनैन्द्रमेषवृत्तिवद् वाचनिक जात्यन्तराभावादतोऽप्यूहो न भवति" कर्क० ।

"छाग ! ते वलिरूपेणेत्यादिमन्त्रेषु च बहुपशुघाते न बहुत्वोहः । तदेतत् "ति०त० "बहुपशुघातेऽपि मन्त्रे एकवचनान्त एव प्रयोक्तव्यः न बहुवचनोहः । "नरं पशुत्वमागतम्" इत्यत्र नार्यां स्त्रीत्वोहाभाववत् अतएव सपत्नीकयजमानप्रयोगेऽपि "पत्नीं सन्नह्यति" मन्त्र एकवचनान्त एवेति । ऊहं प्रकृत्य "प्रकृतावपूर्व्वत्वात्" कात्यायनेनोहस्य प्रकृतौ प्रतिषेधात् । विकृतावेवोहः । "ऊहोऽपूर्व्वोत्पत्तेरुक्तमिति" जै० तल्लक्षणात् न वाक्यबाधः वैभक्तिकार्थापेक्षया प्राथमिकत्वेन बलवतः प्रातिपदिकार्थस्य समन्वितत्वेनाविरोधात् । एवञ्च प्रकृतौ नररूपबहुपशौ बहुवचनोहाभावात् छागादौ विकृतिभूतेऽपि न बहुवचनोहः किन्तु एकवचनमात्रमिति" वदता रघुनन्दनेन तथा समर्थितम् । संकल्पादिवाक्येतु ऊह इति भेदः । ऋत्विगादिप्रयोगे च अक्षरादिपदघटिते "दातारोऽभिवर्द्धन्तामित्यादि" मन्त्रेऽपि नोहः तैस्तथा प्रयोगेऽपि यजमानगतानामेव तत्तत्फलानामवगम इत्याकरे प्रपञ्चः । तथा चासमवेतार्थस्य समन्वयाय मन्त्रे समवेतार्थकरणरूपमपूर्व्वमुत्पद्यमूहः । ५ आरोपे दैसमूहने च । "इमे मनुष्या द्रष्टव्ये ऊहापोहविशारदाः" भा०अनु० १४५ अ० "ऊहापोहाभ्यां तत्त्वावधारणम्" पातञ्ज०भा० ।

ऊहगान न० सामगानपञ्चभेदे ऊहगीतिरत्र स्त्री ।

ऊहा स्त्री ऊह अ स्त्रीत्वात् टाप् । १अध्याहारे २ऊहशब्दार्थे

ऊहिनी स्त्री ऊह-णिनि । समवेतायाम् "अज्ञात् परस्तस्मादेर्द्विः अक्षौहिणी सेना ।

ऊह्य त्रि० ऊह-गयत् । १तर्कणीये २उद्भावनीये ३अध्याहार्य्ये ४मीमांसकोक्तोहविषये च । अनीयर् । ऊहनीय तदर्थे त्रि०

ऊह्यगान न० सामगानपञ्चभेदे ।

इति वाचस्पत्ये ऊकारादिशब्दार्थसङ्कलनम् ।

ऋ

ऋकारः स्वरवर्णभेदः मूर्धन्यः "ऋटुरषाणां मूर्धा" इत्युक्तेः। स तु उदात्तानुदात्तस्वरितभेदात् त्रिविधः। अनुनासिकाननुनासिकभेदात् प्रत्येकं द्विधेति षड्विधः। स च ह्रस्वः एकमात्राकालेनोच्चार्यत्वात्। तस्य च ऋकविद्युल्लाङ्गलेषु ध्येयतोक्ता। "ऋकविद्युल्लताकारऋकारं प्रणमाम्यहम्" काम०त०। तस्य च माहत्काल्यासे वामनादिवायां व्यञ्जता उक्ता तेन अभेदोपचारात् वामनादिग्रन्थेष्वपि व्यञ्जता। स्वरूपपरत्वे ततः तकारऋकारप्रत्ययौ स्वरूपरः तत्कालोच्चार्ये "तपरस्तत्कालस्य" पा० शक्तिः। व्याकरणशास्त्रे अनुबन्धः ऋ इत्येतत् अष्टादशविधस्य ऋवर्णस्य, द्वादशविधस्य ऌकारस्य संज्ञा भवति तेन "ऋ इति त्रिंशतां संज्ञा" इति सि०कौ०। अधिकं स्वरवर्णादिशब्दसमाप्तौ वक्ष्यते समानवर्णग्रहणद्योतनार्थम् वर्णग्रहोत्तरः प्रयुज्यते ऋवर्णः त्रिंशता संज्ञा।

ऋ गतौ भ्वा०पर०सक०अनिट्। ऋति ऋच्छादेश। ऋच्छति आर्च्छत् आरत्-आर्षीत्। आर आरिथ आर्त्ता आर्त्यात् अरिष्यति। आरिष्यत्। ऋच्छन् ऋतः ऋतिः अर्त्तव्यः अरणीयः अर्थः यत् वैश्यस्वामिनोः अन्यत्र यत्। आर्त्वा आरी आरित्वा अर्त्तुम्। सङ्गमार्थत्वेनाकर्मकत्वात् समुपपूर्वकात् ततः आत्म०। समृच्छते। समारत समार्त्त। "सारमानवरारोहा-वनमार सा" उद्भटः। ऋ-णिच् अर्पयति ते। सत् अरिरिषति समरिरिषते नलयोरेक्येऽपि कौटिल्ये यङ्। अराय्यते "किमभीरराय्यते" भट्टिः। अर्णयि अय्यते। आरि।

ऋ गतौ प्रापणे च लृङो०पर०सक०अनिट्। लडादौ गुणोद्भूतत्वेन ब्नित्परत्वाभावात् न ऋच्छादेशः। यङ्लुगन्तोक्तुतदादेशः। इयर्त्ति इयृतः इयृति। इयृवात्। इयर्तु इयृहि इवरावि। ऐवः ऐयृतात् ऐवतः। आरत्-आर्षीत् स्वरादिभ्यात् अकृविधौ भाहेरेव ग्रहणं सिद्धत्वे तन्नते आर्षीदित्येव। समारत समार्त्त इत्यत्र आर इत्यादि भ्वादिवत्। चित्त्वात् इयृक्नु सत्कार्य न इति भेदः। अयं वैदिक एवेति बहवः "वस्वङं छन्दसीति" पा०सिद्धेः "अर्त्तिपिपर्त्तिभ्यां" पा० इतीत्वविधानसामर्थ्यादयं भाषायामपि" सि०कौ०। "गुप्त इयर्त्ति ग्रन्थतो मे अहि" ऋ०१,१६५,७। "इयर्त्ति वाचमरितेव नावम्" २,४२,१। अन्यत्र नित्यत्वात् उपसर्गभेदेनार्थभेदस्तु धात्वनुवत् स च तत्रैव उक्तः "अर्थैः कपयोऽन्यारत् कृत्याकर्णं मरुत्सुतः" "सीतां जिघांसुः सौमित्रे रात्रञ्चारतां ध्रुवम्" भट्टिः। आ+ऋत आर्त्तः दृष्टः "तथार्तोऽपि क्रियां धर्म्याम्" भट्टिः "उदयर्षि भानुमान्" ऋ०१०,१४०,२, "यस्माद्भूमिरुदियर्त्ति वेनः" १०,१२१,१, "यदा यज्ञा निःसरा भियसोपारिम जाग्रतो यत् स्वपन्तः" ऋ०१०,१६४,२, एवं यथायथमुपसर्गपूर्वस्य उदाहरणं द्रष्टव्यम्।

ऋ हिंसायां स्वा०पर०सक०अनिट्। ऋणोति। ऋणुयात् ऋणोतु ऋणवत् आर्णोत्। आर्णीत् क्विप्रादौ भ्वादिवत् यङ्-ऋवन् ऋ ऋणम् इतिभेदः "त्वे यक्ते धूम ऋणवति" ऋ०६,२,६, "ऋणं देयमदेयस्य येन यत्र यथा च यत्" याज्ञ० स्मृतिः। "अपद्वारा मतीनां प्रत्ना ऋण्वन्ति वाघतः" ऋ०८,१०,६, ऋणोरक्षं न शचीभिः" ऋ०१,३०,१५, अस्य रिकारादित्वमित्यन्ये रिणोति इत्यादि।

ऋ अव्य० ऋ-क्विप् बा०न लुक्। १सम्बोधने २गर्हणे ३वाक्ये च नेदि० ४परिहासे वाक्यविचारे यङ्लुगा० ५देवमातरि स्त्री।

ऋकक्कुस् अव्य० ऋच्+यस्। ऋचम् ऋचमित्यर्थे "ऋग्वेदयजुः सामाथर्वभाष्यभूतवाक्यानीतिवाक्ये उदा० द्रष्टव्यम्।

ऋकण त्रि० ऋच-क्त पृ०वलोपः। ऋक्ते लिखिते "वाचमेव तदाप्नां आत्मानमृकणवर्हीं वङ्करांणीमृक्कन्ति" ऐत०।

ऋकत्थ न० ऋच्-थक्। १धने २स्वर्णे स्मृतिप्रसिद्धे ३दायरूपे धने च "ऋकत्थाकृी ऋणं दाद्यः" याज्ञ० "स मो ऋकत्थ ऋणसंविभागपरिग्रहाधिगमेषु" गौत०तत्र "ऋकत्थमप्रतिबन्धोदाय यथा पुत्राणां पौत्राणाञ्च पुत्रत्वेन पौत्रत्वेन च पितृधनं पितामहधनं च एवं भवतीत्यप्रतिबन्धः" मिता० क्वचित् अप्रतिबन्धदायत्वाविशेषेऽपि "पुत्रपौत्रस्य ऋक्थिनः" इति याज्ञ०प्रयोगात् तथा च सम्बन्धनिमित्तं स्वत्वास्पदीभूतं द्रव्यमृक्थम्। क्वचिद्धनमात्रेऽपि प्रयोगः। ऋक्थं स्टक्कति णिनि ऐत०। ऋक्थमाहिनु दायहरेति० स्त्रियां ङीप्। "ऋकत्थाकृी ऋणं दाद्यः" या० अत्र उप०स०। ऋक्थप्राप्तोऽस्य त्रि०स्त्रियां टाप् तद्धितान्तत्वेऽपि स्त्री०कौ०। ऋक्थ+अस्यर्थे इनि। ऋक्थिन् तदुपादाने "पुत्रपौत्रस्य ऋक्थिनः" याज्ञ०स्त्रियां ङीप्।

ऋक्ष पु०क्लो ऋच-स बिच्। १भल्लूके तज्जातिस्त्रियां संयोगोपधत्वात् न ङीप् किन्तु टाप्। २नक्षत्रे।

६मेषादिराशौ च स० ४भक्षके हक्षे (भेक्षा) ५योनाक्षत्रे च (योना)ईपर्व्वतभेदे च पु०मे०। स च रैवतापरनामकः "ऋक्षोऽपि रैवताज्जाते तस्य पर्व्वतमूर्द्धनि। ततोरैवत उत्पन्नः पर्वतः सागरान्तिके। साम्ना रैवतकः नाम भूमौ भूमिधरःस्मृतः" हरिवं० १२अ०। स च कुशावर्त्तपर्व्वतः यथोक्तं वि० पि०। "माङ्गेन्द्रयुग्मिभलयत्रकपारियात्रा सह्यः सविन्ध्य इह सप्त कुलाचलाख्याः" इति। ऊरुपभेदयोः तत्रैव; "आजमीढपुत्रः। "धूमिन्यां च तया देव्यां त्रजमीढः समीषिवान्। ऋक्षं संजमयामास धूम्रवर्णसुदर्शनम्। ऋक्षात् संवरणो जज्ञे कुरुः संवरणात्तथा" अपरो विदूरथस्य पुत्रः "विदूरथस्य दायाद ऋक्ष एव महारथः। ऋक्षस्य च हितीयस्य भीमसेनोऽभवत्सुतः" इति हरि० १२अ०। भल्लकारणत्वयुक् जरायुजश्च। "जरायुजानां प्रवराः मानवाः पशवश्च ये। नानारूपधराराजन्! एषां भेदास्तुहर्य्यश्च। अरण्यवासिनः सप्त सप्तैषां ग्रामवासिनः। सिंह्यांचा वराहाश्च अश्विनौ वारणास्तथा। ऋक्षाश्च वानराश्चैव सप्तारण्याः स्मृता नृप।" भा०आ० तत्र प्रवरा इति विशेषणात् एतद्विज्ञानाधारणत्वमस्यैव तेनोदाहार्य्यत्वं सुस्थते उक्तम् तच्च उद्वयन्हे उक्तम्। दक्षरिक्षपुत्रे च "अरिष्टः खश्वाश्वेयीसुपवेमे सुदेवां नाम तस्यां पुत्रमजीजनदृक्षम्" भा०आ०६५अ०। ६उत्तर दिशि स्त्री निह० यद्यपि नक्षत्रस्य सामान्यतो गगनस्थिततारामात्रवाचकता तथापि ज्योतिषे येषामुदयास्तायनं तेषामेव ऋक्षयन्त्रेण व्यवहारः तानि च सप्तविंशतिः। अभिजिन्नेत्यष्टाविंशतिः। "अश्विनी भरणी चैव कृत्तिका रोहिणी तथा। मृगशीर्षस्तथा चार्द्रा पुनर्वसुरुपुष्यकौ। अश्लेषा च मघा पूर्वफल्गुन्युत्तरफल्गुनी। हस्ता चित्रा तथा स्वातीविशाखा चानुराधिका। ज्येष्ठा मूलं तथाषाढे पूर्वोत्तरपदादिके। श्रवणा च धनिष्ठा च शतभिषगाद्यभाद्रिका। उत्तरादिभाद्रपदा रेवती भानि च क्रमात्" ज्योति०अभिजित् अभिजिच्छब्दे उक्तम्। एतानि हादयश्चाश्विकारादिषट्कषट्कत्वात् प्राधान्याच्च ऋक्षयन्त्रेण व्यपदिश्यन्ते एतेषां स्वरूपप्रमाणाधिष्ठातृदेवताः ऋक्षशब्दे ४६७४० श्रीपतिवाक्योक्ताः अन्यान्यपि यानि तदवान्तराणि गगनमण्डले सन्ति तेषामपि गतिं ज्ञात्वा तत्तत्पदव्याख्यानि। ऋक्षवलयप्रमाणमुक्तं वि०पि०। "अभ्रेभिभाङ्गजकुञ्जरगोऽ-क्षयुगाः(२५८८८८५० योजनानि) ऋक्षं स्थानि नथका भगणस्य चैतान्"। नक्षत्रकक्षायाः सूमध्यादुच्छ्रितिमानम् "नागाक्षषड्दुगरसाग्निकुवेदसंख्यो(४१२६२६५८ योजनमितः) नक्षत्रमण्डलभवः त्रयणीनिरुक्तः" ज्यो० उक्तम्। "तेषामन्येषामुदयादिज्ञानाय" सि०शि०। ध्रुवकभागा उक्ता यथा "अष्टौ नखा गजगुणा खशरास्त्रिषट्काः सप्तर्तवस्त्रिनव चाक्षदृगोऽष्टकाष्ठाः। गोऽर्कोक्षयाद्रिमनवः शरवाणचन्द्राः खाग्न्यश्वयस्त्रिशतयो नवनन्दचन्द्राः। अर्कास्त्रिनो जिनयमा नव बाहुदस्राः कक्ष्यास्त्रिनो जलधितत्त्वमिताश्च भागाः। षट्त्रिंशच्च पवनोत्कृतयोऽभ्रभानि ऋक्षास्त्रिनो नखगुणा रसदन्तसंख्याः। सप्तामराः ऋषिति भध्रुवका निरुक्ता हक्षर्मणाब्जभवेन सहाश्विधिष्ण्यात्। ब्रह्माग्निभध्रुवकवा रदहिम्निकोना मैत्रेन्द्रयोर्ह्यधिपभस्य च सेषुखिप्राः" शि० "अष्टौ नखा इत्यादयोऽस्मिन्यादीनां साभिजितां ध्रुवभागा वेदितव्याः। तत्रापि विशेषमाह। ब्रह्माग्निभध्रुवकवा इत्यादि। कृत्तिकारोहिण्यभिजिन्मैत्रयोर्हास्तिं यत्कलोनाः। विशाखानुराधाज्येष्ठानां कलापसुक्लेनाधिका ध्रुवकभागा वेदितव्याः" ग्रहि०। एषां यथानाह "दृग्योऽकौ स्वार्धाब्धयः स्वार्धवेदा दृग्या रसाः खं खरा: खं च रूप्याः। तिचन्द्राः कुचन्द्राः विषादौ च दस्रो तरङ्गाग्नयः खलिभागं च रूपम्। विषादं हयं साधरामाश्च साधो गजाः खलिभागेशवो मार्गणाद्रः। द्विषष्टिः खरामाश्च षड्वर्गसंख्याब्धिभागो जिना उत्कृतिः खं च भागाम्। निरुक्ताः स्फुटाः योगनक्षत्रराशयांशाख्यं ब्रह्माधिष्ण्याद्विधाख्यादिषट्कम्। करो वाक्यं स्वाष्टभं सार्पमेषां धरा दक्षिणा उत्तराः शेषभागाम्" सि०शि०। "दृग्योऽर्का इत्यादयस्त्रेषां भागा धरांशा ज्ञेयाः। शेषं स्पष्टार्थम्। अत्रोपपत्तिः। तत्र भचक्रार्धं गोलबन्धोक्तविधिना विषुवं गोलजन्यं कार्य्यम्। तत्र खगोलस्थानभगोल आधारवृत्तद्वयस्योपरि विषुवद्वृत्तम्। तत्र च यथोक्तं क्रान्तिवृत्तं भगवांश्च २६० छिन्नं च कार्य्यम्। ततस्त्रोक्तवलयं सध्यगभ्रुवाभिमुखयष्टिकं ऊर्ध्वसमस्थितिजवलयं यथा भवति तथा स्थिरं कृत्वा रात्रौ गोलमध्यगविभ्रमतया दृष्ट्वा रेवतीतारां विलोक्य क्रान्तिवृत्ते यो भागान्तरं रेवतीतारायां निवेश्य मध्यमतयैव दृष्ट्याश्विन्यादेर्भगणस्य योगतारां विलोक्य तस्योपरि-नेधवलयं निवेश्यम्। एवं कृते सति नेधवलयस्य क्रान्ति-

दक्षस्य च यः संपातः सोमात्तादृगतोयावद्भिरंशैस्तावन्त्य धिष्ण्याग्र्य भ्रुवांशा ज्ञेयाः । अथ वेधवलये तत्रैव संपातस्य योगतारायाश्च यावन्नोऽन्तरेऽशास्तावन्त्यस्य भरांशा उत्तरा दक्षिणा वा वेदितव्याः । अथ ये ध्रुवभागाः पठितास्ते कृतदक्कर्मका एव । ये तु भरांशाः पठितास्ते स्फुटा एव । यतो ध्रुवहृयकोत्क्रयोः प्रोतं वेधवलयम् । तस्मिन वेधवलये यो ज्ञातः भरः स ध्रुवाभिमुखः । ध्रुवाभिमुख भर स्फुटः । अस्फुटस्तु कदम्बाभिमुखः । अत एव पर्यं भगणोत्पत्तिकथने पद्मवेधवलयं कदम्बकोत्क्रयोः प्रोतं कर्त्तव्यमित्युक्तम् । अत एव कारणात् कृतदक्कर्मका एव ध्रुवाः । यतो ध्रुवादृग्यष्टेरुपरि नीयमानं सूत्रं यत्र क्रान्तिवृत्ते लगति तत्र कृतायनदक्कर्मको ध्रुव इति दक्कर्मवासनायां पूर्वं कथितमेव । अथागस्त्य शुक्रकयोराह" ब्रह्म० । "अगस्त्यध्रुवः सप्तनागास्तु भागास्तुरङ्गादयस्तस्य याम्याः भरांशाः । षड्दौ खाश्वा शुक्रकस्य ध्रुवोऽयं नभोऽम्भोधिभागाः भरस्तस्य याम्यः" सि० शि० । अस्यम् "अस्योपपत्तिः पूर्ववत् । अथेष्टघटिका आह" ब्रह्म० । "अगस्त्यस्य नाड्योहयं प्रोक्तमिष्टं सवङ्गनाड्योहयं शुक्रकस्य । त्रिभागाधिकं स्थूलभानामधूनां ततस्याधिकं तारतम्येन कल्प्यम्" सि० शि० स्पष्टार्थम् । "अस्योपपत्तिः अगस्त्यस्य नाड्योहयं यदिष्टं तत् तस्य द्वादशकालांशा उत्पद्यन्ते । सवङ्गभागनाड्योहयं शुक्रकस्येति । तत्र त्रयोदश १३ कालांशाः त्रिभागाधिकं स्थूलभानामिति । यानि स्थूलानि नक्षत्राणि तेषां चतुर्दश कालांशाः । अधूनां ततस्याधिकमिति केषाञ्चित् पञ्चदश केषाञ्चित् षोडशेति कल्प्यते । अत्र षण्णां भानां वा ये कालांशास्ते स्थूलसूक्ष्मत्वतारतम्यपर्य्यालोचनया । वा: स्थूलास्तारास्ता अर्कोदयादल्पेन कालेनान्तरिता दृश्या भवन्ति । वा: सूक्ष्मास्ता अधिकेनेत्युपपन्नम्" ब्रह्म० ।

सू० शि० टीकायाञ्चतदुदयज्ञानार्थमन्यप्रकार उक्तो यथा "प्रोच्यन्ते खिप्रिका भानां स्वभोगोद्य दृग्धृत । भवन्त्यूनोतधिष्ण्यानां भोगखिप्र युता ध्रुवाः" सू० शि० । "भानामश्विन्यादिनक्षत्राणामुत्तराषाढाभिजिच्छ्रवणधनिष्ठापर्य्यन्तानां खिप्रिका भोगसंज्ञाः कलाः प्रोच्यन्ते समनन्तरमेव कथ्यन्ते । अथानन्तरं स्वभोगः स्वाभीष्टनक्षत्रभोग कलाकरो यच्छब्दाग्रो ग्रभिर्गुणितः कार्यः । तत्र स्वाभीष्टभवनक्षत्रतनक्षत्राणामश्विन्यादीनां भोगखिप्राः । "अभोगोऽष्टमी खिप्राः" इत्युक्तास्तत्कलाः । प्रत्येकं युताः । अश्विन्याद्यतीतनक्षत्रसङ्ख्यागुणितकलाश्च ध्रुवा युतास्तत्यर्थः । ध्रुवा नक्षत्राणां भवन्ति" । ब्रह्म० । अथ प्रतिज्ञाता नक्षत्रभोगखिप्रा उत्तराषाढाभिजिच्छ्रवणधनिष्ठाव्यतिरिक्तानां तेषां ध्रुवकानक्षत्रभरांशाश्लोकैराह । "अष्टार्णवाः स्युरुत्तराः पञ्चवह्निर्नगेषवः । अहार्णा अब्धयोऽष्टागा अङ्गागा मनवस्तथा । ऋतवश्च युगरसाः शून्यखाग्नि वियद्वसाः । खवेदाः सागरनगा गजागाः सागरर्तवः । मनवोऽथ रसा वेदा वैश्वमं ध्रुवभोगगम् । आद्यस्यैवाभिजित्प्रान्तो वैश्वान्ते ध्रुवस्थितिः । त्रिंशत्तु पादयोः सन्धौ ध्रुविष्ठा ध्रुवगस्तु । स्वभोगतो विशुद्धागा षट्कृतिर्यमलाश्विनः । रन्ध्राद्रय क्रमाद्देया विक्षेपाः खादपक्रमात् । दिङ्मासविषयाः सौम्ये याम्ये पञ्च दिशो नव । सौम्ये रसाः खं याम्ये गाः सौम्ये खार्काखयोदय । दक्षिणे रुद्रयमलाः सप्तर्तिर्यदधोत्तरे । याम्येऽध्यर्धत्रिकलता नवसार्धशरेषवः । उत्तरस्यां तथा षष्टिस्त्रिंशत् षट्त्रिंशदेव हि । दक्षिणे त्वर्धभागस्तु चतुर्विंशतिरुत्तरे । भागाः षड्विंशतिः खं च दक्षादीनां यथाक्रमम्" सू० "अश्विन्यादिनक्षत्राणां क्रमाद्भोगा एते । तत्राश्विन्या अष्टचत्वारिंशत् कलाः । भरण्यास्त्वष्टचत्वारिंशत् कृत्तिकायाः कलाः पञ्चषष्टिः । रोहिण्याः सप्तपञ्चाशत् कलाः । मृगशिरसोऽष्टपञ्चाशत् । आर्द्रायाश्चत्वारः । अलाभ्य इत्यत्र गोऽभ्यो गोऽग्नय इति वा पाठस्ययुक्तः । शाकल्यसंहितावि[रो]धात् । एतेन "सौरोक्तदृङ्मण्डलांशास्त्रयोऽशाभ्यः कलाः" इति नार्मदोक्तम् "दृक्क्रान्तिपञ्चदृग्भागा मिथुने सर्वजनाभिमतध्रुवको दृक्क्रान्तियुतत्रयोदशभागाः पर्वताभिमतध्रुवकश्च निरक्ष" । पुनर्वसोरष्टसप्ततिः । पुष्यस्य षट्सप्ततिः । अश्लेषायाश्चतुर्दश । तथेति छन्दःपूरणार्थम् । मघायाश्चतुःपञ्चाशत् । पूर्वफाल्गुन्याश्चतुःषष्टिः । उत्तरफाल्गुन्याः पञ्चाशत् । हस्तस्य षष्टिः । चित्रायाश्चत्वारिंशत् । स्वात्याश्चतुःसप्ततिः । विशाखाया अष्टसप्ततिः । अनुराधायाश्चतुःषष्टिः । ज्येष्ठायाश्चतुर्दश । अनन्तरं मूलस्य षट् । पूर्वाषाढायाश्चत्वारः । उत्तराषाढाया ध्रुवकमाह । वैश्वमिति । उत्तराषाढायोगतारानक्षत्रम् । आद्यार्धभोगगम् । आद्यस्य पूर्वाषाढानक्षत्रस्यार्धभोगः । धनूराशेर्विंशतिभागस्थं स्थितं ध्रुवम् । अष्टौ रामयो विंशतिभागा उत्तराषाढाया ध्रुव इत्यर्थः । एतेन पूर्वाषाढायोगतारायाः सकाशादुत्तराषाढायोगतारा

विंशतिकलोनसप्तभागान्तरिता । तेन पूर्वाषाढाध्रुवको-ऽष्टाविंशयचतुर्दश भागा विंशतिकलोनसप्तभागैर्युत उत्त राषाढाया ध्रुवस्त्वारिंशत्कलाधिकोक्तध्रुव इति पर्व तोक्तमयुक्तम् अस्मिन्सिद्धान्तविरोधात् , अभिजिद्ध्रुव-कमाह । आद्यस्येति । पूर्वाषाढाया अवसाने धनूराशे र्विंशतिकलोनसप्तविंशतिभागेऽभिजिद्योगतारा ज्ञेया । चत्वारिंशत्कलाधिकषड्विंशतिभागाधिका अष्टौ राशयो-ऽभिजितो ध्रुव इत्यर्थः । एवकारोऽन्ययोगव्यवच्छेदार्थः । तेन संहितासम्मतं श्रवणपञ्चदशांशस्थानं विंशतिविकला-युतत्रयोदशकलायुतचतुर्दशभागादिकनवराशयो निरस्तम् । श्रवणस्य ध्रुवकमाह । वैश्वान्त इति उत्तराषाढाया अवसाने श्रवणयोगतारायाः स्थानं ज्ञेयम् । नव राशयो दश भागाः श्रवणध्रुवक इत्यर्थः । धनिष्ठाया ध्रुवकमाह । त्रिचतुःपादयोरिति । श्रवणस्य क्रमेणयचतुर्थचरणयोः क्रमेणान्तादिसन्धौ मकरराशेर्विंशतिभागे अविष्ठा धनिष्ठा ज्ञेया । नव राशयो विंशतिभागा धनिष्ठाध्रुव इत्यर्थः । तुकारात् क्षेत्रान्तर्गतधनिष्ठास्थानं कुम्भस्य विंशतिकलोन-सप्तभागा निरस्तम् । शततारायाः भोगमाह । खभोगत इति । धनिष्ठाभोगात् कुम्भस्य विंशतिकलोनसप्त भागावधेरित्यर्थः । शततारायाः अशीतिर्भोगः । अतः प्राग्ध्रुवा इति स्थापनार्थं स्वभोगत इत्युक्तम् । शत-तारायाः स्थानं शततारकाध्रुव इति पर्यवसन्नम् । अव शिष्टनक्षत्राणां भोगानाह । षट्कृतिरिति । पूर्वभाद्र पदायाः षट्त्रिंशत् कला भोगः । उत्तरभाद्रपदाया द्वात्रिंशतः । रेवत्या एकोनार्धतिः । अथ ध्रुवकानयनं यथा । अस्मिन्या भोगः । ४८ । दशगुणितः ४८० । अतीतनक्षत्राभावाद्भोगयोजनाभावः । अतोऽस्मिन्याः कलात्मको ध्रुवः । ४८० । राश्याद्यस्तु । ०८ । भरण्या भोगः । ४० । दशाहतः । ४०० । अतीतनक्षत्रैक-त्वादृणयुतो भरण्याः परिभाषया राश्याद्यो ध्रुवः । ० । २० । एवमार्द्राभोगः । ४ दशाहतः ४० । अतीत-नक्षत्राणां पञ्चतया पञ्चगुणिताष्टशतेन ४००० चतुः-सप्तत्यात्मकेन युतः कलाद्यो ध्रुवः४०४०राश्याद्यस्तु २ । ७ । २० । एवं पूर्वाषाढाया दशगुणितो भोगः । ४० । एकोनविंशतिगुणिताष्टशतेन । १५२०० युतः परि-भाषया राश्याद्यो ध्रुवः । ८ । १४ । शततारायाः दश-गुणितो भोगः । ८०० । त्रयोविंशतिगुणिताष्टशतेन । १८४०० । युतसप्तविंशतिगुणिताष्टशतरूपो । १९२०० । जातो ध्रुवो राश्याद्यः । १० । २० । पूर्वाभाद्रपदाया-दशगुणितो भोगः २६० । चतुर्विंशतिगुणिताष्ट-शतेन । १९२०० युतः । १९५६० जातो ध्रुवो राश्याद्यः । १० । २६ । उत्तराषाढाभिजि-च्छ्रवणधनिष्ठानां स्वभोगस्थानात् पश्चात् स्थितत्वेनोक्त-रीत्यसम्भवाद्भिन्नरीत्या ध्रुवका उक्ताः स्वादिस्थानाद्योग तारा यदन्तरकलाभिः स्थितास्ता स्वाधराद्यापवर्तिता भोगसञ्ज्ञा उक्ताः । तथा च ब्रह्मसिद्धान्ते । "अष्टौ विंशतिरर्केण गजाग्निर्वर्षैश्चेषवः । त्रितर्काः सप्तिभागा-स्त्रिरसाब्ध्यद्रयश्च षट्शतम् । नवाशा नवरन्ध्राणि वेदेन्द्रः शरराणभूः । खाक्षाष्टिः खवृतिर्गोऽतिधृतिर्विश्वाश्विन-खया । वेदाक्षतिर्गोऽद्रिहता ऋक्षिहता युगार्धहृक् । खोत्क्षतिहता भङ्गीनाम रसहताः खहस्तिहृक् । खगो-ऽग्निः खदृता; खदृता; शैलगुणान्नयः । मेषाद्यस्त्रा-दिमध्यांशाः षडंशोनाः खषड्गुणाः" इति । अथ नक्ष त्राणां विक्षेपभागानाह । एषामिति । उक्तध्रुवक-सम्बन्धिनामश्विन्यादिनक्षत्राणां यथाक्रमं क्रमादित्यर्थः । स्वात् स्वकीयापक्रमात् क्रान्त्यपात् क्रान्तिवृत्तस्थध्रुवक स्थानादित्यर्थः । विक्षेपा विक्षेपभागा दक्षिणा उत्तरा वा भवन्ति । तत्रोत्तरदिग्भवाश्विन्यादिनक्षत्राणां दिङ्मान-विषयाः क्रमेण दश द्वादश पञ्चेत्यर्थः । दक्षिणदिग्भ वोक्तिरण्यादिनक्षत्राणां पञ्च दश नव । उत्तरस्यां पुनर्वसो; षड्भागाः । पुष्यस्य खं विक्षेपाभावः । अत्र पञ्चमाक्ष-रस्य गुरुत्वेन छन्दोभङ्ग आर्षत्वात् दोषः । दक्षिणस्या-मश्लेषायाः सप्त । उत्तरस्यां मघादिनक्षत्राणां शून्यं द्वादश त्रयोदश । दक्षिणस्यां फल्गुनीत्रयोरेकादश द्वौ । अनन्तरं स्थाप्या उत्तरदिशि सप्तविंशत् । दक्षिणस्यां विशाखादीनां षण्णां सार्धैकं नवं चत्वारः नव सार्धपञ्च पञ्च क्रमेण उत्तरदिशि तथा विक्षेपभागाः । अभिजितः षष्टिः । श्रवणस्य त्रिंशत् । धनिष्ठायाः षट्त्रिंशत् । एवकारो न्यूनाधिकव्यवच्छेदार्थः । चकारः पूरणार्थः । दक्षिणस्यां तुकारस्तथा । अर्धभागः शततारायाः । तुका-रस्तथा । उत्तरस्यां पूर्वभाद्रपदायाश्चतुर्विंशतिः । तस्या-मेव दिशि भागा विक्षेपभागा उत्तरभाद्रपदायाः षड्-विंशतिः । रेवत्या विक्षेपाभावः । चकारः पूरणार्थः । अथानन्तरमुक्तध्रुवकक्रमेणाश्विन्यादिनक्षत्राणां ध्रुवकविक्षेपांस्तदुप-पत्तिं श्लोकत्रयेणाह "रङ्क० । "अशीतिभागैर्वर्षाद्यागणस्यो मिथुनान्तगः । विंशे च मिथुनस्यांशे जातस्याभो ध्रव-

स्थितः । विक्षेपो दक्षिणे भागे खार्यवैः खादपक्रमात् । कृतभुग्नक्षत्रहृदयो ध्रुवे द्वाविंशभागगो । अष्टाभिस्त्रिंशता चैव विक्षिप्ता उत्तरेण तौ । गोलं बध्वा परीक्षेत विक्षेपं ध्रुवकं स्फुटम् सू०"खखीयात् क्रान्तिविभागस्थानाहृत्तिर्यक्षामर्गोलयैस्तारात्मकोऽग्र्यो मिथुनालगः ककादिभागे स्थितः । अगस्त्यनलतस्य राशित्रयं ध्रुवकः । दक्षिणविक्षेपोऽशीतिरित्यर्थः । मृगव्याधो लुब्धको मिथुनराशेः विंशतिभागे स्थितः । चकारः समुच्चये । लुब्धकनलतस्य राशिद्वयं विंशतिभागा ध्रुवक इत्यर्थः । दक्षिणस्यां चत्वारिंशता भागं परिमितस्य च क्रान्तिवृत्तस्यानाहित्तेपः । हस्तरायौ वक्रिनक्षत्रहृदयौ द्वाविंशभागस्थितौ वक्रिनक्षत्रहृदयनलतयोर्द्वाविंशतिभागाधिकैकराशिर्ध्रुवकः। तौ वक्रिनक्षत्रहृदयौ । अष्टाभिस्त्रिंशता । चकारः क्रमार्थे । एवकारो न्यूनाधिकव्यवच्छेदार्थः । उत्तरेणोत्तरस्यामित्यर्थः । विक्षिप्तौ विक्षेपवन्तौ । वक्रेविक्षेपोऽष्टभागः उत्तरः । अनक्षत्रहृदयोत्तरे विक्षेपस्त्रिंशदित्यर्थः । नन्वेते ध्रुवा विक्षेपाद्य क्रान्तिक्रमेण नियता अनियता वेत्यत आह । गोलमिति । गोलं वक्ष्यमाणं बध्वा वंशशलाकादिभिर्निबध्य स्फुटं विक्षेपं क्रान्तिसंस्कारयोग्यं ध्रुवाभिख्यं ध्रुवकं स्फुटमायनदृक्कर्मसंस्कृतं परीक्षेत । खखकाले हग्गोचरस्थितमवलोकयेत् । अथ च क्रान्तिसंस्कारयोग्यविक्षेपायनसंस्कृतध्रुवकयोरयनांशवशादस्थिरत्वादपि अवेदानीनलसमयानुरोधेन खाधर्थमायनदृक्कर्मसंस्कृता ध्रुवाः क्रान्तिसंस्कारयोग्यविक्षेपाश्च नियता उक्ताः । कालान्तरे गोलयन्त्रेण वेधसिद्धा श्रेयाः । नैत इति भावः । गोलयन्त्रेण वेधस्तु गोलबन्धोक्तविधिना गोलयन्त्रं कार्यम् । तत्र खगोलस्योपरि भगोलम्, आधारवृत्तस्योपरि विषुवद्वृत्तम् । तत्र यथोक्तं क्रान्तिवृत्तं भगणांशाङ्कितं च बध्वा ध्रुवयष्टिकोलयोः प्रोतमध्यवृत्तं भवेधवलयम् । तत्र भगणांशाङ्कितं कार्यम् । ततस्तद्गोलयन्त्रं सम्यग्ध्रुवाभिख्यवटिकं नलसमन्वितलयवत्वं च यथा भवति तथा स्थिरं कृत्वा रात्रौ गोलमध्यच्छिद्रगतया दृष्ट्या रेवतीतारां विलोक्य क्रान्तिवृत्ते क्रीनाड्यन्तरितयद्यद्भागं रेवतीतारायां निवेश्य मध्यगतयैव दृष्ट्याश्विन्यादेर्नलतस्य योगतारां विलोक्य तस्या उपरि तद्वेधवलयं निवेश्यम् । एवं कृते सति वेधवलयस्य क्रान्तिवृत्तस्य च यः सम्पातः स योगनाड्यन्तो यावद्भिरंशैर्नाड्यन्तरितस्तावन्नलतस्य ध्रुवांशा श्रेयाः । वेधवलये तस्यैव सम्पातस्य योगतारायाश्च यावन्तोऽन्तरेऽंशास्तावन्नलतस्य विक्षेपांशा दक्षिणा उत्तरा वा श्रेयाः । अथ कदम्बप्रोतवेधवलयेन वेधे तु सदा स्थिरा ध्रुवका आयनदृक्कर्मसंस्कृताः परन्तु कदम्बतारयोरभावाद् यद्यपीति यथोक्तवेधेनैवायनदृक्कर्मसंस्कृता ध्रुवाः सराश्च ध्रुवाभिख्याः स्फुटाः सिद्धा भवन्तीति दिक् । अथ रोहिणीयकटभेदमाह"रङ्क०।"दृषे सप्तदशे भागे यस्य याम्येऽयनद्वयात् । विक्षेपोऽभ्यधिको भिन्द्याद्दाक्षिणात्यः यकटं तु सः"सू०।"हस्तरायौ सप्तदशे श्रेयस्य पक्षस्य भागद्वयादधिको विक्षेपो दक्षिणः स पक्षो रोहिण्याः यकटं यकटाकारसन्निवेशं भिन्द्यात् । तन्मध्यगतो भवेदित्यर्थः । तुकाराद्यकटविक्षेपो रोहिणीविक्षेपादल्प इति विशेषार्थकः । विक्षेपस्य दक्षिणस्य रोहिणीविक्षेपादधिकत्वे यकटाद्बहिर्दक्षिणभागे पक्षस्य स्थितत्वेन तद्भेदकत्वाभावात् । अत्र यकटाग्रिमनलतस्य ध्रुव एकराशिः सप्तदशांशाः दक्षिणः धरो भागद्वयमिति वेधसिद्धा स्फुटा युक्तिः । अथ पक्षयोगसाधनार्थं लुप्तयोगसाधनरीत्यतिदेशमाह"रङ्क०।"पक्षवद्दृग्विशे भानां कुर्याद्दृक्कर्म पूर्ववत् । पक्षमेलकमर्क्षं पक्षभुक्त्या दिनानि च"सू०।"पक्षवद्दृग्विशे पक्षाणां यथा दिनरात्रिमाने आयनदृक्कर्मार्थं कृते तथा दिनमानरात्रिमाने भानां नलतध्रुवकाणामायनदृक्कर्मार्थं गणकः कुर्यात् । तदनन्तरं पूर्ववन्नलतनिरोदयास्तौ साधयित्वाभीष्टके दिनगतघटीभ्यां नतं कृत्वा विषुवच्छायया भभोगान्तरादित्यादिनेत्यर्थः । दृक्कर्म कुर्यात् । अत्र नलतध्रुवके पर्वतेनायनदृक्कर्माभ्युदाहरणे कृतं तदयुक्तम् । तस्य ध्रुवके स्वतः सिद्धत्वात् । तदनन्तरं शेषं नलतपक्षयुतिसाधनं पक्षध्रुवतुल्यतारूपं पक्षमेलकवदुपक्षयोगसाधनरीत्या पक्षान्तरकला इत्यादिना कार्यम् । ननु तत्र पक्षान्तरकला: स्वस्वभुक्तिप्रासमाहताः । भुक्त्यन्तरेण विभजेदित्युक्ते नलतस्य का गतिर्याहीत्यत आह । पक्षभुक्त्येति । तेषां तया पक्षभुक्त्या पक्षस्य फलं पक्षध्रुवान्तरूपपक्षे संस्थाप्य ध्रुवसमो पक्षो भवति । नलतस्य पूर्वगत्यभावाद्ध्रुवो यथास्थित इत्यर्थः । ननु तथापि पक्षनलतयुतिकालसाधनं भुक्त्यन्तराभावात् कथं कार्यमिति मन्दाशङ्क्येत्यत आह । दिनानीति । अभीष्टसमयादिष्टरात्र्यादिना केवलया पक्षभुक्त्या पक्षनलतयुतिदिनानि साध्यानि । यः सम्पात इति । नलतानां गत्यभावात् । अथाभीष्टकालादुपक्षनलतयुतिकालस्य गतैष्यत्वसम्भवार्थं पुनराह"रङ्क० ।

"एष्यो हीने पश्चे योगो ध्रुवकादधिके गतः । विपर्ययाद्वक्रगते पश्चे ज्ञेयः समागमः" सू०। "नक्षत्रमध्रुवादुक्ताद्यच्च आयनदक्कर्मसंस्कृतयच्च आत्मदक्कर्मसंस्कृतनक्षत्रध्रुवकात् दक्कर्मद्वयसंस्कृतोयच्च इति विवेकार्थः । न्यूने सति योगो नक्षत्रयच्चयोगः स्वाभीष्टसमयाद्भावी । अधिके सति पूर्वं जातः । वक्रगते पश्चे विपर्ययाद्वक्रवैपरीत्यात् समागमो नक्षत्रयच्चयोगो ज्ञेयः । हीने पश्चे गतोऽधिके पच्च एष्यो योगः । अस्तोपपत्तिर्नक्षत्रस्य गत्यभावेन सदा स्थिरत्वाद्रुपदृगमनेनैव योगसम्भवादिति सुगमतरा । अधाश्विन्यादिनक्षत्रस्य वक्तारात्मकत्वात् कस्यास्तारायाः एते ध्रुवका इत्यस्य योगतारायां ध्रुवकत्वमित्यत्तरं मनसि धृत्वाश्विन्यादिनक्षत्राणां योगतारां विवक्षुः प्रथममेषां नक्षत्राणां योगतारामाह" रङ्ग० ।

"फाल्गुन्योर्मादृपदयोस्तथैवाषाढयोर्द्वयोः । विशाखाश्विनिभौष्णानां योगरोत्तरा स्मृता" सू०। "एषासक्तनक्षत्राणां प्रत्येकं स्वतारासु योत्तरादक्रम्या तारा सा योगतारा नोक्तनक्षत्रैक्या । अधान्ययोरनयोराह" रङ्ग० । "पश्चिमोत्तरतारायां हितीया पश्चिमे स्थिता । फल्गुन्या योगतारा सा श्रविष्ठायाश्च पश्चिमा" सू०।

"फल्गुनद्वयं पञ्चतारात्मकं फल्गुन्याकृतिसन्निवेशाकारम् । तत्र नैर्ऋत्यदिगाश्रितपश्चिमावस्थिततारायां उत्तरदिगवस्थिततारायां हितीया पूर्वोक्तातिरिक्ता पश्चिमे वायव्याश्रिते वा स्थिता सा फल्गुन्या योगतारा ज्ञेया । उत्तरतारायाश्च पश्चिमाश्रिता तारा फल्गुन्या योगतारेति फलितार्थः । धनिष्ठाया योगतारामाह । अविष्ठाया इति । धनिष्ठाद्यतारासु या पश्चिमदिक्स्था सा तस्या योगतारा । चः समुच्चये । अथान्ययोरमेषामाह" रङ्ग०। "ज्ञेष्ठाश्रवणभैत्राणां वार्क्षस्यत्वय मध्यमा । भरण्याश्लेषित्राणां रेवत्याश्चैव दक्षिणा" सू० ।

"ज्ञेष्ठाश्रवणात्तराधानां मुख्यस्य च प्रत्येकं तारात्रयात्मकत्वान्मध्यमतारा योगतारा स्यात् । भरण्यालेषित्रामधानां रेवत्याः । चः समुच्चये । प्रत्येकं स्वतारासु या दक्षिणदिक्स्था सा योगतारा । अथान्येषामवशिष्टानां चाह ।" रङ्ग० "रोहिण्यादिनक्षत्राणां प्राची सार्धस्य चैव हि । तथा प्रत्यग्रयेषाणां स्थूला स्याद्योगतारका" सू० "रोहिणीपुनर्वसुमूलानामग्नेयाश्च प्रत्येकं स्वतारासु या पूर्वदिक्स्था सैव योगतारेत्यवधारणार्थः । प्रत्यग्रयेषाणामवशिष्टनक्षत्रतारात्रयाद्रोहिणीस्वातिभिन्नतारायां स्वतारासु यात्तरं स्थूलका सकृती सा योगतारा स्यात् । अथ मृगस्य नक्षत्रतारावस्थानमाह रङ्ग० । "पूर्वस्यां नक्षत्रहृदयादंशकैः पञ्चभिः स्थितः । प्रजापतिर्हयास्ये स्त्री सौम्ये ऽस्मिंश्चदंशकैः" सू० "नक्षत्रहृदयस्थानात् पूर्वभागे पञ्चभिरंशैः प्रजापतिस्तारात्मको मृगः क्रान्तिवृत्ते स्थितः । कस्मिन्नित आह । हयास्य इति । हयास्यनिकटे । एकराशिः सप्तविंशत्यंशा मृगध्रुवक इत्यर्थः । अस्य विक्षेपमाह । असाविति । मृगो उत्तरस्यामष्टत्रिंशद्भागैः स्थितः । अष्टत्रिंशद्भागा अस्य विक्षेप इत्यर्थः । अथापांवत्सापयोस्तारयोरवस्थानमाह" र० । "अपांवत्सस्तु चित्रायास्तरेऽस्तं पञ्चभिः । दक्षत किञ्चिदेतो भागैरापः षड्भिस्तथोत्तरे" सू० "चित्रायाः सकाशादपांवत्ससंज्ञकतारात्मकः पञ्चभिर्भागैरुत्तरस्यां स्थितः । प्रथमतृतीयचित्राध्रुवतुल्यध्रुवकार्थकः । हितीयतृतीयचित्राविक्षेपस्य दक्षिणभागद्वयात्मकत्वादपांवत्सविक्षेप उत्तरस्मिन्भाग इति स्फुटार्थकः । अतोऽपांवत्सात् किञ्चिदल्पान्तरेण दक्षत स्थूलतारात्मक आपसंज्ञकः तत्रोऽपांवत्सात् षड्भिरंशैरुत्तरस्यां स्थितचित्राध्रुवक एवापस्य ध्रुवको विक्षेप उत्तरे नयांशा इत्यर्थः" रङ्ग० ।

नक्षत्राणामुदयास्तकालनिरूपणम् उदयग्रन्थे ११२८ पृष्ठादौ दर्शितम् ।

नक्षत्रघटितत्वात् राशीनां तदात्मम् । राशिनाम भवेत् नाम भस्यं रूपनाम च "ज्यो०। राशयश्च द्वादश "पुनर्हृदयघात्तानं व्यभजद्राशिसंज्ञकम् । नक्षत्रपिण्डं भूयः सप्तविंशात्मकं वशी" सू० सि० उक्तेः । ते च मेषवृषमिथुनकर्कटसिंहाः कन्या तुलाश्च वृश्चिकम् । धनुरथ मकरः कुम्भोमीन इति च राशयः स्मृताः" ज्योति० उक्ताः राशिश्च "विश्वानां नक्षत्राणां नक्षत्राणां तनुर्नक्षत्राणां भाग उच्यते । तस्मिंस्तता भवेद्राशिर्भमयोर्द्वादशैव तु" सू० सि० उक्तेः १०८०० विश्वात्मकः १८०० नक्षत्रात्मकः त्रिंशत्तमभागात्मकः । तैर्द्वादशभिः २६ अंशैर्भमयोराशिचक्रं स्यात् तत् सप्तविंशतिनक्षत्रात्मकराशिचक्रे द्वादशधा विभक्ते सपादनक्षत्रद्वयस्यैव प्रत्येकराशिघटकता तेन प्रत्येकनक्षत्रस्य ८०० कलात्मकत्वम् । "अभोगोऽष्टगतौ क्षिप्राः" सू० सि० उक्तेः । राशिभेदे नक्षत्रभेदनिरूपणमुडुचक्रग्रन्थे १०७१ पृ० द्रष्टव्यम् ।

"मासर्क्षादीन न बोधयेत्" "जन्मर्क्षं ग्रहतापिते" ज्यो० । "दक्षिणां दिशमृक्षेषु वार्धिकोऽथ भास्करः" स्फु:

ऋक्षगन्धा स्त्री ऋक्षात् गन्धयति हिनस्ति गन्ध-अच् टाप् । ।

१आङ्क्तोऽस्त्री, (ऋक्षिजाङ्क्तो) २मङ्गाम्बेतायां, ३वीरविदार्याञ्च । (वीरताङ्) स्वार्थे कन् तत्रैव

ऋक्षगिरि पु० कर्म०। कुशाचलभेदे ऋक्षनामके पर्वते ।

ऋक्षचक्र न० ईत०। ऋक्षलक्षणद्योतके ऋक्षाणां चक्रमिव गगनस्थे नक्षत्रात्मके चक्राकारे पदार्थभेदे। ऋक्षचक्रञ्च तद्विधृतिः। भचक्रञ्च प्रवहवायुना प्रत्यहं पश्चाद्गमनेऽपि यद्यथा प्राग्गतित्वं भवेत्तथा रू० वि० रङ्गनाथव्याख्यायो; यथा "अथ यद्यपूर्व्वं गत्युत्क्रान्तौ कारणमाह।" "पश्चाद्व्रजन्तोऽतिजवाच्चक्रं: सततं यद्वत्। जीयमानास्तु लम्बन्ते तुल्यमेव खमार्गगाः" रू० वि० । "पश्चादनन्तरं पुनराहत्या पश्चात् पश्चिमदिगभिमुखं नक्षत्रैर्लारकादिभिः सह यद्वत् स्वयोदयोऽतिजवात् प्रवहवायुसत्वरगतिवशात् सततं निरन्तरं व्रजन्तो गच्छन्तः स्वमार्गगाः स्वकक्षाहत्तस्था लीयमाना नक्षत्रैः पराजिता नक्षत्राणामग्रे गमनात्। अतएव तुल्यमेव गुरुभूता इति तात्पर्यार्थः। तुल्यं समम्। एवकारादधिकन्यूनव्यवच्छेदः। लम्बन्ते खस्थानात् पूर्वकिनु लम्बायमाना भवन्ति। यथा लज्जितः पश्चाद्भवति नाथे। तुकारादधोऽधः कक्षाक्रमानुरोधेन ग्रन्थादिपठितानां चन्द्रान्तानां गुरुतापचयः अश्विरितिशब्दभूतत्वात् किञ्चिन्यूनोगुरुस्तस्मादपि भौम इत्यादि यथोत्तरम्। यस्य कक्षा महती तस्य गुरुत्वाधिक्यं यस्य लघ्वी तस्य तदनुरोधेन गुरुतालघुत्वमिति। एतदुक्तं भवति। नक्षत्रा प्रवहवायौ नक्षत्राधिष्ठितो मूर्त्तो गोलः स्थापितस्तदन्तर्गताः स्वकक्षाक्रमगोलस्थाः ग्रन्थादयो नक्षत्राधिष्ठितमूर्त्तगोलस्थक्रान्तिवृत्तस्थरेवतीयोगतारासन्निवेशादिप्रदेशसमसूत्रस्थाः स्थापिताः। क्रान्तिवृत्तं तु नेमेरुस्थाने विषुवद्वृत्तलग्नं सम्मातात् तिर्य्यान्तरितक्रान्तिवृत्तप्रदेशाभ्यां चतुर्विंशत्यंशान्तरेण दक्षिणोत्तरौ मकरकर्कादिरूपौ तद्देवं द्वादशराश्यात्मकं वृत्तं भचक्रमुच्यते। विषुवद्वृत्तं तु ध्रुवमध्यं निरक्षदेशोपरिगम्। तत्र प्रवहवायुना खाघातेन मूर्त्तो नक्षत्रगोलो नाक्षत्रदिवसैः परिवर्त्तते। तदन्तर्गतवायुभिस्तदाघातेन वा यद्वा भगणोऽपि नक्षत्रगोलस्थितक्रान्तिवृत्तीयमेषादिप्रदेशेन समं न गच्छन्ति वायूनां स्वल्पत्वात् तदाघातस्वाल्पत्वाद्ग्रन्थानां गुरुत्वाच्च। अतस्तत्स्थानादुपरिष्टाद्यथा लम्बना दृश्यन्ते। अतएव नक्षत्रोदयकाले तेषां द्वितीयदिने पोदयः किन्तु यद्वो लज्जितप्रदेशेन वायुना तदनन्तरभूतभगणस्थनक्षत्रोदयः। लम्बनं तु ग्रन्थादीनां कक्षानुरोधेन गुरुत्वाद्यायनां तद्वातानां वा कक्षानुरोधेन बहुत्वात् तुल्यम्। यद्यपि नाडीध्रुवानुरोधेन खल्पत्वादुपरिष्टाद्विषुवद्वृत्ते भवितुमुचितं न क्रान्तिवृत्ते। तथा च वक्ष्यमाणक्रान्त्यनुपपत्तिः क्रान्तिवृत्तस्थाद्ग्रहराशिभोगेन वक्ष्यमाणानां भगणानामनुपपत्तिश्च। तथापि वायुनावलम्बितो यद्यो विषुवन्मार्गगोऽपि तद्विषुवप्रदेशासक्तक्रान्तिवृत्तप्रदेशेन यद्वाकाशगोल एव खसमसूत्रे याऽवस्थित इति नानुपपत्तिः। अतएव खमार्गगा इति क्रान्तिवृत्तानुसृतस्वाकाशगोलस्थकक्षामार्गगता इत्यर्थकमुक्तमिति नञ्जेपः" रङ्ग० । "अथात एव यद्वाणां लोके प्राग्गतित्वं सिद्धमित्याह। 'प्राग्गतित्वमतस्तेषां भगणैः प्रत्यहं गतिः। परिवाहवशाद्भिन्ना ग्रहवाजानि भुञ्जते' रू० वि०। "अतोऽवलम्बनादेव तेषां यद्वाणां प्राग्गतित्वं प्राच्यां दिशि गतिर्येषां ते प्राग्गतयस्तद्भावः प्राग्गतित्वं सिद्धम्। लम्बनरूपेव यद्वाणां पूर्वगतिरुत्पन्ना लोकैः कारणानभिज्ञैः प्रत्यक्षावगता तच्छक्तिजनिता कल्पितेत्यर्थः। सा कियतीत्यत आह। भगणैरिति। वक्ष्यमाणभगणैः प्रत्यहं प्रतिदिनं गतिः प्राग्गमनरूपा भगणानां गत्युपलक्षत्वात् भगणसम्बन्धिवक्ष्यमाणदिनैः सूर्य्यसावनैर्यद्वभगणा लभ्यन्ते तदैकेन दिनेन कीदृशोपातात्तेषां। ननु यद्वभगणानां तुल्यत्वाभावात् प्रतिदिनं यद्वगतिभिर्भुक्तिः पूर्वं लम्बनरूपा यद्वगतिरुक्तोक्ता यद्वलम्बनस्याभिन्नत्वादित्यत आह। परिवाहवशादिति। परिवाहः कक्षापरिधिसहचारात् तदनुरोधादियं यद्वगतिर्भिन्नाऽतुल्या। अयमभिप्रायः यद्वाणां लम्बनं तुल्यप्रदेशेन, परन्तु स्वस्वकक्षायां तत्तत्प्रदेशे तुल्ये याः कक्षाया गतिस्वकक्षास्तासु मध्यति कक्षाहत्तेष्वेषा ध्रुवकक्षाहत्ते बहुभिः सर्वकक्षापरिधीनां चक्रकक्षाहृतत्वात्। भगणास्तु गतिवशादेव यस्य कक्षाहत्तं मध्यत् तस्मात्तस्य च खचक्षाहत्तं तस्य बहुभिस्तदुत्पन्ना गतिरपि तथेति न विरोधः। नन्वेवंरूपगतिं विहाय भिन्नरूपा गतिः कथं लक्षीकृतेत्यत आह। तदुक्तमाहेति। भिन्नगतिवशाद्भानि राशीन् नक्षत्राणि भुञ्जते यद्वा भुञ्जन्तीत्यर्थः। तथा च यद्वराश्यादिभोगसाधनार्थमियमेव गतिरुपयुक्ता नैवंरूपेति भावः" रङ्ग० "अथ भभोगे विशेषं वदन् वक्ष्यमाणभगणस्वरूपमाह। "शीघ्रगस्तान्यथाल्पेन कालेन महताऽल्पगः। तेषां तु परिवर्त्तेन पौष्णान्ते भगणः स्मृतः" रू० वि० "अथग्रहः पूर्वोक्तैर्विशेषैर्यद्वचक्रं। शीघ्रगतिमपह-

स्थानि भान्त्यल्पेन कालेन भुवनस्थगतित्वाद्दो बहुकालेन भुवनस्थि तस्यैराश्यादिभोगो मन्दशीघ्रगतित्वकृयोस्तुल्यकालेन न भवतीति विशेषाद्यः । तेषां राशीनां परिवर्तेन भ्रमणेन । तुलाराद्युपलक्षादिगतिभोगजनितेन भगणः प्राप्तैचक्रः । क्रान्तिवृत्ते द्वादशराशीनां सत्त्वात् तद्भोगेन चक्रभोगसमाप्तेर्यत् स्थानमारभ्य चलितो यदः पुनस्तत् स्थानमायाति स चक्रभोगः परिवर्तसंज्ञोऽपि द्वादशराशिभोगाद्भगण इत्यर्थः । ननु क्रान्तिवृत्ते सर्वप्रदेशेभ्यः परिवर्तसत्त्वाद्भ कः परिवर्ताटिभूतः प्रदेश इत्यत्र आह पौष्णान्त इति । ऋक्षाद्दौ ब्रह्मणा क्रान्तिवृत्ते रेवतीयोगतारासक्तप्रदेशे सर्वऋक्षाणां निवेशितत्वात् तदवधितो यदचलनाच्च पौष्णस्य रेवतीयोगतारायाः अन्ते निकटे प्रदेशे तथा च रेवतीयोगतारासक्तान्तिमस्थानमेवाद्यन्तावधिभूतमिति" रङ्गः ।

तत्सन्निवेशप्रकारः सि०शि० उक्तो यथा "ब्रह्मा भचक्रं क्रमखोडूवेन यदैः सहैतद्भगणादिसंस्थैः । यच्चक्रभ्रमेऽनवरतभ्रमध्ये नियुक्तम् । एतदुक्तं भवति । भान्यश्विन्यादीन्यन्यानि विशिष्टानि ज्योतींषि तेषां समूहचक्रं, यद्दाक्ष क्रमोदयस्थैः सह स्थितम् । तानि भानि ब्राह्मसंस्थया क्रमान्नक्षत्रेषितानि । यदास्तु भगणादावश्विनीतारके निवेशितास्ता उपर्युपरिसंस्थया । तत्रादौ नादधत्यन्द्रः । ततुपरि बुधः । ततः शुक्रः । ततो रविः । तच्चाङ्गारकः । ततो गुरुः । ततः शनिः । सर्वेषामुपरि दूरे भचक्रम् । एवं ब्रह्मप्रभाणानि ब्रह्माध्याये प्रतिपादयिष्यते । यदो बद्धूर्ध्वाधस्था यदाक्षतुपरि दूरतो भगणत्वात् कथं भगणादिसंस्थैर्यमुपरिलक्ष्यते । सत्यम् । अत्र भूमध्ये क्षितिरेखायां ब्रह्मा द्वितीयमध्य भचक्रेऽश्विनीतारके खिल निवद्धम् । तस्मिन् क्षणे योगा भचक्र एव चन्द्रादयो यदाः ऋक्षादौ ब्रह्मणा निवेशिताः । भगणत्वं द्वादशधा विभज्यैवं भूमध्यात् क्षितौ प्रतिभागं नीत्वा खिल यद्भानि तैः क्षणैः सह यदचक्रभागं ये संजातास्तान् तत्तत् राशिभान् राक्षसाः । तदृक्षप्रचारा राक्षस इति यद्भिरभिधीयते । ब्रह्माध्याये गोले च किञ्चिद्विशेषार्थं वक्ष्यामः । एवंविधं भचक्रं ब्रह्मणा गगने निवेशितम् । यत्र निवेशितं तत्र प्रवहो नाम वायुः । स च नित्यं प्रत्यगतिः । तेन समाक्रान्तं भचक्रं सखेचरं पश्चिमाभिमुखभ्रमे प्रवर्तते । यत् तच्च भगणभ्रमणं तच्छीघ्रतरम् । यत एवैनाक्षा भगणलक्षं (भूमेः) परिवर्त्तः । एवं तस्मिन् भपञ्जरे सखेचरे शीघ्रतरे भ्रमत्यपि खेचरा इन्द्रदिग्यं चरन्ति पूर्वाभिमुखं व्रजन्ति । नीचोच्चतरात्मवर्त्मसु । अमलरकथितेषु खखमार्गेषु तेषां प्राग्भ्रमणम् । तत् तदल्पगत्या । प्रत्यगतेर्बलत्वात् प्रागल्पगत्या व्रजन्तो नीयमाना इति भावः । तथा च तद्भपञ्जरस्य यो दक्षिणोत्तरावन्तौ तत्र ये तारे ते ध्रुवे" इति । राशिचक्रस्य प्रवहवायुना पश्चाद्भ्रमणेऽपि व्यत्ययेनोपरिगतत्वाभिप्रायेण देवासुरपक्षयोः सू०सि०सत्यापसव्यभ्रमणोक्तेः यथा "सव्य भ्रमति देवानामपसव्यं सुरद्विषाम्" इति "व्यत्ययेन पश्चाद्गतिः सदैव" वक्ष्यत एव पश्चाद्गतेरुक्तेश्च इति द्रष्टव्यम् ।

ऋक्षर पु० ऋक्ष-क्षरन् । ऋक्षाणि । ऋक्षतेः क्षणतेः क्षटतेर्वा निरु० क्षरन् पृ० । १नक्षत्रे "द्योना पृथिवी भवानृक्षरा निवेशनी" यजु० २५,२१, "ऋक्षरा ऋक्षटका" वेददी० २वारिधारायां स्त्री मेदिनिः ।

ऋक्षराज पु० ६त०टच्समा० । १नक्षत्रेशे चन्द्रे २भल्लूकेशे जाम्बवति च । "अथ किं प्रथावन्नक्षराजो भल्लाक्षः" हरिवं० २९९अ० "शेषे जाम्बवतो जन्याक्षराजस्य सज्ञताम्" हरिवं० २९ "जाम्बवाक्षराजेन्द्रः" भाग० ८,२१,४ । ऋक्षमालादयोऽस्य ।

ऋक्षला स्त्री ऋक्ष-सलच् स्त्रियां । गुरुक्षाधःस्थनाक्षाम् "क्रमर्क्षं स्थूराभ्याक्षलाभिः कपिक्षाम्" यजु० ५,२, "ऋक्षला गुरुक्षाधःस्था नाक्षाः" वेददी०

ऋक्षवत् पु० ऋक्षाः बाहुलकेन सन्त्यत्र मतुप् मस्य वः । नर्मदातीरस्थे पर्वतभेदे "वभ्रुक्रियाऋक्षवतस्तटेषु" रघुः "नर्मदातीरमेवाथो सेवितुं ऋक्षवन्तं गिरिं जित्वा गुल्फिलमाक्षतवान्" हरिवं० २७अ० उक्तेः तत्र नर्मदातीरस्थत्वम् बोध्यम् "ऋक्षवन्तं गिरिवरं विन्ध्यञ्च गिरिसत्तमम्" हरिवं० १९अ० ।

ऋक्षवन्त ऋक्ष+मा० वन्त । भल्लराक्षसपुरे नगरभेदे "तत्रऋक्षवन्ते नगरे विरूपाक्षपुरस्तमम् । ब्रह्मा जाम्बवतीं देवीमानयच्छुभगर" पितुः" हरिवं० १९अ० तं भल्लरम् ।

ऋक्षीक त्रि० ऋक्ष इव स्वार्थे कन् । ऋक्षतुल्ये त्रिषु ।

"ऋलीकाः पुरुषव्याघ्राः परिघोपिण आव्याधिन्यश्चक्षारा ऋगयमेधाजायेरन्" शत० ब्रा० १२,२,४,२,४, २ऋक्षनाकारपुरुषमेधायदेवताभेदे स्त्री।"नदीभ्यः पौष्णिष-मृक्षाकाभ्यो नैर्ऋतम्" यजु०३०,८। पुरुषमेधे उक्तम्।

ऋक्षेष्टि स्त्री नक्षत्रविशेषविहिते इष्टिभेदे।

ऋक्षोद पु० ऋक्षं नक्षत्रमिव स्वच्छम् उदकं यत्र उदादेशः। पर्वतभेदे। "ऋक्षोदः पर्वतोऽभिजनो येषाम् अण्। आर्क्षोदा द्विजाः" सि०कौ०।

ऋक्संहिता स्त्री ६त०। ऋग्वेदसंहितायाम् ऋग्वेदग्रन्थे विहिते; "ऋक्संहितां निरभ्यस्य यजुषां वा समाहितः। साम्नां वा सरहस्यानां सर्वपापैः प्रमुच्यते" मनुः वेदोहि मन्त्रब्राह्मणभेदेन द्विविधः तत्र मन्त्रात्मको भागः संहिता। "अग्निमीळे"इत्यादिकः ऋक्समुदायात्मकः ऋक्संहिता। मन्त्रेतरवेदभागो ब्राह्मणम्। संहितारूपसन्निकार्य-निबन्धनतया संहितात्वं ब्राह्मणे षष्ठग्रन्थे च न संहितानियम 'इति तयोः संहितात्वमिति भेदः संहिता-स्थपदविच्छेदज्ञापकोग्रन्थः षष्ठग्रन्थः। स च ऋग्वादिक्रमः पौरुषेय इति बोध्यम्।

ऋक्सम न० कर्म० समम्। सामभेदे। "जगत्या ऋक्समम् ऋक्समाच्छन्दः" यजु० १२,६५, "ऋक्समम्ऋक्समसंज्ञं यत् साम" वेददी०।

ऋक्साम न०द्वि०। ऋक् च साम तदाकारगानं च द्वयोः समाहारः अच् समा०नि०द्वि०। ऋगृक्षमन्त्र-भेदतदाकारगानयोः समाहारे "ऋक्सामाभ्यां संतरन्तः" यजु०४,१। "ऋक्सामयोः शिल्पे स्थले" ४,६। ऋचश्च सामानि चेति बहुत्वे तु नाच्। ऋक्सामनी इत्येव।"ऋक्-सामान्यस्य एतद्योनाम" यजु०१८,४२।

ऋगयन न० ऋचामयनम्। ऋक्पारायणग्रन्थे पूर्वपदात् संज्ञायां नेह नञ्प्रयोगात्। ऋक्षयनञ्च व्याख्यानो ग्रन्थः ऋक्षयनादि० अण्। आर्गवन तद्व्याख्यान ग्रन्थे।

ऋगयनादि पु० प्राचिकृत्ये तस्य व्याख्यान इत्यर्थे ऋक्प्रातिप-दिकान्निमित्तप्रातिपदिकसप्तम्यन्तादणे। स च ग्रन्थः "ऋगयन, पद-व्याख्यान, छन्दोमान, छन्दोभाषा, छन्दोविचिति, न्याय, पुनरुक्त, निरुक्त, व्याकरण, निगम, वास्तुविद्या, क्षत्र-विद्या, अङ्गविद्या, विद्या, उत्पात, उत्पाद, उत्पाद संवत्सर, तुलूर्ण, उल्कानिपात, निमित्त, शिक्षा, शिक्षा"

ऋगावान न० आ+वेञ्गतौ क्त्वा ल्युट् ऋचामावानं गमनं संहिताध्यर्थं ज्ञातसम्बन्धनम्। वेदपाठकाले अर्द्धाहीनां संहितया पूर्वोत्तरयोः सम्बन्धे "ऋचमृचमनावानसङ्गा प्रणुद्यावस्थेत्" आश्व० श्रौ० ४,६,२। "नैनार्द्धर्चाः संहितयैव व्याख्याः" नारा० ६०। ऋचामन्ते तु न संहितया गमनमित्यर्थः। "अभिष्टुयादृगावानम्"५,६,१। "तस्योक्तमृगावानधर्मेण" ५, १२,२। "तस्माद्यां यच्छ ऋगावानं यच्छः यस्या चेत्" ५,२०,२।

ऋगाथा स्त्री ऋचामिव गाथा। लौकिकगीतिवेदे। "ऋग्-गाथापाणिकादत्तयिहिताब्रह्मगीतिका;" वाच०।

ऋग्मत् त्रि० ऋक् स्तुतिः पूजा वा अस्त्यस्य मतुप्। १स्तोतरि २अर्चनीये पूजनीये। "राजानमुपतस्थुर्ऋग्मियम्" ऋ० ६,८,४ स्तुतेर्निरुक्तौ ऋग्मियमृग्भिस्तर्चनीयं पूजनीयम्" निरुक्तकारः। ऋग्मान्निर्वा स्वार्थे घ द्वितीयायाः परलोपः। ऋग्मियोऽप्यत्र। "नाभिष्टपन्नृग्मियम्" ऋ०१,६,६।

ऋग्मिन् त्रि० ऋच्+अस्त्यर्थे मिनि। स्तोतरि। "गिरा यदि निर्ऋग्मिणो ययुः" ऋ० ६,८६,७६। "ऋग्मिणः स्तोतारः" भा०।

ऋग्विधान न० ऋचा ऋग्वेदेन कर्मविशेषस्य विधानम्। ऋग्वेदोक्तमन्त्रभेदेन कर्मविशेषविधाने तत्र हेमाद्रौ व्रत-खण्डे विस्तरेणोक्तम्। वह्निपुराणोक्तमत्र दर्श्यते

"अग्निरुवाच प्रतिवेदन्तु कर्माणि काम्यानि प्रवदामि ते। प्रथमं ऋग्विधानं वै शृणु त्वं भुक्तिमुक्तिदम्। अन्तर्जले तथा होमे जपतो मन्त्रमेव हि। कामं करोति गायत्री प्राणायामाद्विशेषतः। वा वाग्यतश्चाक्षतो जपो-नक्षाशनोद्विजः। आत्मनात्मृद्धिः स्यात्तथ सर्वकर्मप्रसाधनः। दशायुतानि जप्त्वाथ ऋविद्याग्री स मुक्तिभाक्। प्रणवोहि परं ब्रह्म तज्जपः स च पापहा। ओङ्कार यतजप्तस्तु नाभिमात्रोदके स्थितः। जलं पिबेत् स सर्वेषु पापेषुभ्यः प्रमुच्यते। सावित्रं त्रयीवेदास्त्रयोदेवास्त्रयोऽग्नयः। महाव्याहृतयः सप्त लोकाश्चोभयत्र-पक्षः। अन्तर्जले तथा राम! प्रोक्तश्चैवाघमर्षणः, अग्नि-होत्रे पुरोक्तिं ऋक्षोऽयं वह्निदैवतः। गिरता धारयन् वह्निं बीजमेतं परिवत्सरम्। होमं लिखन्नं भैक्षाशन-मिच्छन्वन चरेत्। अत परमृचां सप्त आद्याद्या वाः प्रयो-क्तिताः। भोजयन् प्रयतोनित्यमिष्टान् कामान् समश्नुते। मेधाकामोजपेन्नित्यं सदसस्पतिमित्यृचम्। अग्न्य व-जन्ति वाः प्रोक्ता नवर्चो मृत्युनाशनः। शुनःशेपमृचं यज्ञ, सन्निरुद्धोऽथ वा जपेत्। सच्यते सर्वपापेभ्यो गही चाग्नगही भवेत्। यदुच्छेत् यात्मनः कामं नित्यं प्राप्नं

पुरन्दरम् । ऋगभि रोडशभिः कर्म्यादिन्द्रस्येति दिने-दिने । स्थिरायुस्तु समिद्धेतन जपन् यत्नम् प्रवाधते । सोमो भवति वाधाग्ने ये ते पन्था जपन्नरः । रौद्रं ति वह्निरीशानं स्तूयादृग्भिर्दिने दिने । चरुं वा कल्पयेद्धौरं तस्य शान्तिः परा भवेत् । उद्यन्नुदितमादित्यसुपतिष्ठन् दिनेदिने । त्रिमेज्जलाञ्जलीन् सप्त मनोदुःखविनाशनः । हिरण्यमित्यथर्चेदं यद्दिवान्तं जपन् स्मरेत् । आगम्यो सप्तरात्रेण विद्वेषमधिगच्छति । आरोग्यकामो योधो च प्रत्यहाभ्यासमभ्यसेत् । उत्तमस्तस्य चाद्भिर्धोजमेदुर्वैरिविनाशने । उदयस्यायुरुत्तम्यं तेजो मध्यंदिने जपेत् । अस्तं यन्तिगते सूर्ये द्विपन्तं प्रतिबाधने । तव यश्चेति सूक्तेन जपन् शत्रं स्त्रियच्छति । एकदेशं सुवर्णस्य सर्वकामान् विनिर्दिशेत् । आध्यात्मिका क इत्येता जपन्नोमभ्र इत्यनेन दीर्घमायुरवाप्नुयात् । यः समाति च सूक्तेन नवं पश्यस्त्रियाकरम् । उपतिष्ठेत् समित्पाणिर्व्यासिं स्त्राप्नोत्यसंशयम् । आयुरायूंषि समिति कोषसूक्तकलाटजमेत् । अपानः शीशुचदिति स्तुत्वा मध्ये दिवाकरम् । यथा सूक्तेति वेधोक्तान्तथा पापं प्रणश्यति । त्रातारमिन्द्र इत्येतज्जपेत् स्वस्त्ययनं पथि । भयैर्विमुच्यते सर्वैः स्वस्तिमानाप्नुयाद् गृहम् । व्युष्टायाञ्च रात्र्यामेतद् स्वप्ननाशनम् । प्रमन्दिनेति सूक्तस्य जपेद्गर्भविमोचनम् । जपन्निन्द्रमिति स्तोत्रो वैश्यदेवं तु सप्तकम् । सूक्त्येभ्यस्तथा जुहुत् सकलं किल्बिषं नरः । इमामिति जपन् यत्नत कामानाप्नोत्यभीप्सितान् । मा नस्तोक इति ह्याभ्यां त्रिरात्रोपोषितः शुचिः । औदुम्बरीञ्च जुहुयात् समिधश्चाज्यसंप्लुताः । स्त्रित्वा सर्वान् मृत्युपाशान् जीवेद्वर्षशतं नरः । अर्द्धर्चाभ्यामनेनैव स्तुत्वा यत्नं तथैव च । मा नस्तोकेति च ऋचा शिखाबन्धे कृते नरः । अक्षयः सर्वभूतानां जायते संशयं विना । चित्रमित्युपतिष्ठेत त्रिसन्ध्यं भास्करं तथा । समित्पाणिर्नरोनित्यमीप्सितं धनमाप्नुयात् । दुःस्वप्नं तुदते सूक्तं भोजनं चाप्नुयाच्छ्रियम् । हतेषणामीति तथा रक्षोघ्नः परिकीर्त्तितः । यदि वाचा इत्यृचेन जपन् कामान् वाप्नुयात् । नमोयवश्चेति जपन् सुप्रजे तापनः शुचिः । वयाम इति च जपन् जातिश्रेष्ठमवाप्नुयात् । इमन्ते-शेममित्येतत् सर्वान् कामानवाप्नुयात् । पितुर्भृगुपतिष्ठेत नित्यमन्नसुपस्थितम् । अग्नेतत् पतिसूक्तेन स्त्रियमाप्नोत्यनुत्तमम् । योमेराजन्नित्यपान्तु दुःस्वप्नप्रशमनीमृषम । अध्वनि प्रस्थितो यस्तु पश्येच्छकुनमथाशुभम् । अप्रशस्तं प्रशस्तं वा कनिकृदसिं जपेत् । द्वाविंशकं जपन् सूक्तमाध्यात्मिकमनुत्तमम् । पूर्वं सुप्रयतोनित्यमिष्टान् कामान् समश्नुते । क्रतुश्चेति जपेन्नक्तं जुह्वदाज्यं समाहितः । अरातीनां हरेत् प्राणं रक्षांस्यपि च नाशयेत् । उपतिष्ठेत् स्वयं वह्निं परीत्यं च दिने दिने । सुरक्षति स्वयं वह्निर्विश्वतोमुखः । हंसं शुचिषदित्येत् शुचिर्धीत्यं दिवाकरम् । स्त्रियं प्रपद्यमानन्तु स्थालीपाकं यथाविधि । जुहुयात् क्षेत्रमध्ये तु स्थालीपाकांस्तु पञ्चभिः । इन्द्र यमसदित्सूर्य्यपर्जन्याय भगाय च । यथाविधिं तु विहरे लाङ्गलन्तु क्षणैबलः । प्रोक्षोधान्याय सीतायै सुनासीरमथोत्तरम् । गन्धमाल्यनमस्कारैर्जपेदेतास्तु देवताः । प्रवापने प्रवपने खले स्थापनकारयोः । अमोघं कर्म्म भवति वर्त्तते सर्व्वदा ऋषिः । सप्तऋषिदिति सूक्तेन कामानाप्नोति पावकात् । वैश्वानर इति ह्याभ्यां च ऋग्भ्यां वह्निमर्हति । स तरत्यापदः सर्वा यः प्राप्नोति चात्मयम् । विपुलां श्रियमाप्नोति जयं प्राप्नोत्युत्तमम् । अग्ने त्वमिति च स्तुत्वा धनमाप्नोति पोच्छितम् । प्रजाकामोजपेन्नित्यमरुणादेवमित्यृचम् । दत्तात्रेयं जपेत् प्रातः सदा स्वस्त्ययनं महत् । स्वस्ति पन्था इति प्रोच्य स्वस्तिमान् व्रजतेऽध्वनि । विजिगीषुर्जपन्नित्यं यत्नं वा व्याधिदस्यवेत् । स्त्रियागर्भप्रसूताया गर्भमोक्षणसुत्तमम् । आ बह्वादिति सूक्तस्य दृष्टिकामः प्रयोजयेत् । निराहारः स्त्रिग्धवासो नक्तिरेष प्रवर्त्तते । मनसः काममित्येतां पशुकामो नरोजपेत् । अर्हन्न इति स्त्रायात् प्रजाकामः शुचिव्रतः । अये पूर्व्वामिति स्त्रायात् ब्राह्मणस्तु यथा विधि । क्षत्रधर्म्मणि वैव्याय स्त्रागे वैश्यस्तथैव च । इयमाहुस्त्रिलोकेशः प्रत्यृक परिकीर्त्तितः । आ गा वहेति सूक्तेन गोष्ठं गां लोकमातरम् । उपतिष्ठेत्तमेवैव यद्दीक्षेत्ताः सदाऽत्मवान् । उभेते तिसृभीरात्रो इन्दुभिं चाभिमन्त्रयेत् । तेजोबलञ्च प्राप्नोति यत्नं चैव नियच्छति । हव्यवाहमिति ह्यृचं जपेत् सूक्तं रक्षोघ्नं दस्युभिर्हृतः । ये केचिच्छत्रवः जप्त्वा दीर्घमायुरवाप्नुयात् । जीमूतस्येति सूक्तेन वाङ्मात्यभिमन्त्रयेत् । यथा त्रिषु ततो राजा विनिर्हन्ति रथे रिपून् । अमीवेतिति त्रिभिः सूक्तैर्धनमाप्नोति चात्मवत् । अमीवहेति सूक्तेन भूतानि स्त्रापयेन्निशि । यंयंदिशं विधमे

दुर्गे वृक्षो वा निगडैः क्वचित् । पलायन् वा गृहीतो वा सूक्तमेतत्पठन् जपेत् । तिरात्रमपि चोपोष्य अपयेत् पायसं चरुम् । तेनाक्तैतिघृतं पूर्णं जुहुयात् ताम्रकोलूचा । सप्तहिंश्च महादेवं जावेदवृद्धे घृतं सुखम् । तच्चतुरित्यृचा स्नात उपतिष्ठेद्दिवाकरम् । उद्यन्तं मध्यमं चैव दीर्घमायुर्जिजीविषुः । सूक्ताभ्यां परभागाभ्यां भूताभ्यां भूतिमाप्नुयात् । इन्द्रा सोमेति सूक्तन्तु कलितं धनुनाशनम् । यस्य क्रुद्धं व्रतं मोहादन्यैतैः संसृजेत वा । उपोष्याब्दं स जुहुयादग्ने व्रतपते इति । आदित्य दृत्यसाम्राज्यं जप्त्वा वादे जयी भवेत् । मदोतीति चतुष्कोण सुच्यते महतो भयात् । ऋचं जप्त्वा यदित्येतत् सर्वान् कामानवाप्नुयात् । द्वाचत्वारिंशकं चैन्द्रं जप्त्वा नाशयते रिपून् । रायऋर्हति जप्त्वा च प्राप्नोत्यारोग्यमेव च । यज्ञोभवेति द्वाभ्यान्तु भुक्त्वान्नं प्रयतः शुचिः । कृष्टयं पाणिना स्पृष्ट्वा व्याधिभिर्नाभिभूयते । उत्तमेदमिति स्नातो भूत्वा यत्नं प्रमापयेत् । त्वन्नो अग्नेति सूक्तेन कृतेनात्ममवाप्नुयात् । कन्यावा मिति सूक्तेन दिग्दोषात् विप्रमुच्यते । यदद्य कच्चेत्युदिते जप्तुर्वध्यं जगद्भवेत् । यद्दागमिति च जप्तेन वाणी भवति भास्वती । वाचोविदन्मितीत्येता जपन् वाचं समश्नुते । पवित्राणां पवित्रन्तु पावमान्य ऋचां मताः । वैखानसा ऋचस्त्रिंशत् पवित्राः परमा मताः । ऋचोहिषष्टिः प्रोक्तास्ता यस्त्वेतृषिसत्तम ! । सर्वकल्मषनाशाय परिणामसुखाय च । स्वादिष्ठयेति सूक्तानां सप्तषष्टिरुदाहृता । दशोत्तरायतुपार्श्वाः पावमानीः यतानि षट् । एतज्जपंस्तु जुहुयाद्घोरं मृत्युभयं जयेत् । आपोहिष्ठेति चारिष्टौ जपेत् पापभयार्दने । प्रवेदनेति नियते जपेच्च मरुधन्वसु । प्राणान्तिके भये प्राप्ते क्षिप्रं प्राणांस्तु विन्दति । व्युष्टायामुदिते सूर्ये ये चेति जपमाप्नुयात् । आयुर्हीनेति सूक्तस्य पन्थानं पथि विन्दति । क्षीणे युवति मन्त्रेण यं कञ्चिद्धृदयप्रियम् । यत्तेयमेति सूक्तान्तस्य मूर्द्धानमालभेत् । सहस्रकृत्वः पञ्चाहं तेनायुर्विन्दते महत् । इदं मेध्येति जुहुयाद् घृतं प्राप्तः सहस्रगः । पशुकामो गवाक्षीके अर्थकामस्तथाश्वे । वयः सुपर्ण इत्येतां जपन्ना विन्दते प्रियम् । कविध्यन्नीं समभ्यस्य सर्वपापैः प्रमुच्यते । तस्य रोगा विनश्यन्ति कायाग्निर्वर्द्धते सदा । त्यन्नायः स्वस्त्ययनं सर्वव्याधिविनाशनम् । इन्द्रस्तुते व्यतीत्येतद्दृष्टिकामः प्रयोजयेत् । सर्वं त्वेति परा शान्तिर्जयाप्रतिरथस्तथा । मृताबं कल्पयित्वं प्रजाकामस्य कीर्त्तितम् । अहं रुद्रेभिरित्येतद्दाग्नी भवति मानदः । न यो नो जायते विद्वान् जपंस्त्रिसप्तसु रात्रिषु । रात्रिसूक्तं जपन् रात्रौ रात्रिं क्षेमां नमेश्वरः । आकम्यन्तीति जपेत्सिद्धं कल्याविनाशनम् । आयुष्यञ्चैव वर्चस्यं सूक्तं दात्रायणं महत् । उत देवा इति जपेदाख्यानान्तं धृतव्रतः । अप्रमार्गे तु जपिते जपेदग्निभये सति । अरण्यानीत्यरण्येषु जपेत्सङ्कटनाशनम् । आस्रीमासाद्य सूक्ते द्वे वरां आस्रीं यतावरीम् । पृथगग्निष्टुतेनाथ मेधां कर्म्मांश्च विन्दति । मान इत्यसपत्नन्तु संग्रामे विजिगीषतः । ब्रह्मणोऽग्निं संविदानं गर्भमत्तुनियारणम् । अपैहीति जपेत् सूक्तं शुचिर्दुःस्वप्ननाशनम् । वेनेदमिति वै जप्त्वा समाधिं विन्दते परम् । मयोभूर्वात इत्येता जपेत् स्वस्त्ययनं परम् । शामरीमिन्द्रजननम् बाधामेतेन वारयेत् । महिर्स्तीणामवोस्त्वितिसूक्ते स्वस्त्ययनं जपेत् । अग्नये द्विषद्वेषं जपेच्च रिपुनाशनम् । बाधोषतेति मन्त्रेण जपेच्च गृहदेवताः । जपस्यैष विधिः प्रोक्तो होमान्ते दक्षिणा देया पापशान्तिकृतेन तु । सूक्तं यस्यति चाग्नेन अन्नकोष्ठप्रदानतः । विप्राग्निधरणीमोषाः सूर्य्यश्चि; स्नातं च सर्वतः । सिद्धार्थका यवा धान्यं प्रयोगश्चेतं तथा । क्षीरवृक्षात्तथेध्मन्तु होमा वै सर्वकामदाः । समित् कण्टकिनश्चैव राजिका रुधिरं विषम् । अभिचारे तथा शैलमसनं यज्ञवः पयः । दधि मैक्ष्यं फलं मूलमृग्विधानसदाहृतम्" ।

ऋग्वेद पु० ऋच्यते स्तूयते ऋक् कर्म्म० । वेदभेदे । स च मन्त्रब्राह्मणोभयात्मकः । तत्र मन्त्रसमूहात्मकः ऋक्यज्ञे वक्ष्यमाणलक्षणलक्षितः संहितारूपो ग्रन्थः । तत्र दश मण्डलानि तत्राद्ये मण्डले २४ अनुवाकाः "अग्निमीळे" इत्यादीनि आग्नेयानि १९१ सूक्तानि तानि यतर्चिकार्षदृष्टानि । अग्नेयोपाकरणोत्सर्गयोर्विनियुक्तानि ।

द्वितीये गौनकाष्टकसमदर्षिदृष्टे चत्वारि अनुवाकाः । त्वमग्न इत्यादीनि ४३ सूक्तानि आग्नेयानि उपाकरणोत्सर्गयोर्विनियुक्तानि । गौनकाष्टकसमदः ऋषिरेतन्मण्डकृष्टा च पूर्व्वमाङ्गिरसकल्पे शुनःशेपस्य पुत्रः सन् यज्ञकाण्डेऽसुरैर्व्वधोद्यत इन्द्रेण मोचितः । प्रजापतिवचनेनैव भृगुकुले शुनकपुत्रो गृत्समदनामाऽभूत् । "य आङ्गिरसः शौनहोत्रो भूत्वा भार्गवः शौनकोऽभवत् स गृत्समदो द्वितीयमण्डलमपश्यत्" सर्वानु० उक्तेः । "त्वमग्न इति गृत्समदः शौनको ऋषुतां गतः । शौनहोत्रः प्रजाया तु य

आङ्गिरस उच्यते" इति कण्वानुक्रमोक्तेश्च । ऋग्वेदभाष्यम् ।

तृतीये विश्वामित्रदृष्टे पञ्चानुवाकाः सोमस्य मेत्यादीनि ६२ सूक्तानि । तानि च आग्नेयानि प्रातरनुवाकाश्विनयज्ञयोश्चैष्टुभे छन्दसि विनियुक्तानि ।

चतुर्थे वामदेवर्षिदृष्टे पञ्चानुवाकाः । आग्नेयानि त्वां ह्यग्ने इत्यादीनि ५८ सूक्तानि । आद्याध्यायोपाकरणे मण्डलादिहोमे च विनियुक्तानि ।

पञ्चमे आत्रेयवृषगविश्वरादृर्षिके षड् अनुवाकाः ८७ अवोध्यग्निरित्यादीनि सूक्तानि आग्नेयानि आग्नेये क्रतौ त्रैष्टुभे छन्दस्याश्विनयज्ञे चत्वारि गिष्टानि अध्यायोत्सर्जनोपाकरणयोर्विनियुक्तानि ।

षष्ठे भरद्वाजदृष्टे षडनुवाकाः त्वं हि इत्यादीनि ७५ सूक्तानि आग्नेयानि तत्र प्रातरनुवाके आग्नेये क्रतौ त्रैष्टुभे छन्दसि एतदादिसूक्तकं द्वितीयवर्जं विनियुक्तम् गिष्टानि आद्योपाकरणे विनियुक्तानि ।

सप्तमे वसिष्ठदृष्टे ६ अनुवाकाः अग्निं नरः इत्यादीनि १०४ सूक्तानि आग्नेयानि तेषां विशेषतो विनियोगो बाष्कलात् बोध्य आकरे द्रष्टव्यः ।

अष्टमे मेधातिथिमेध्यातिथ्यादिनामर्षिके । दध्यानुवाकाः । इन्द्रादिदैवत्यानि "मा चिदन्यद्वोचादीनि १०२ सूक्तानि महाव्रतादौ विनियुक्तानि ।

नवमे वैश्वामित्रमधुच्छन्दआद्यृषिके सप्तानुवाकाः पावमानसोमादिदेवताकानि स्वादिष्ठयेत्यादीनि ११४ सूक्तानि तेषाञ्च उपाकर्मणि मण्डलादिपर्वणे च यथायथं विनियोगः ।

दशमे मण्डले आम्प्रातिताद्यर्षिके द्वादशानुवाकाः अग्ने दृढस्थित्यादीनि १९१ सूक्तानि आग्नेयादीनि । प्रातरनुवाकाश्विनयज्ञयोराग्नेये क्रतौ त्रैष्टुभे छन्दसीत्यादि कर्मसु विनियुक्तानि । इत्येवं दशसु मण्डलेषु १म० १९१, २म० ४३, ३म० ६२, ४म० ५८, ५म० ८७, ६म० ७५, ७म० १०४, ८म० १०३, ९म० ११४, १०म० ११९१ । इत्येवं समष्टि भूतानि १०२८ सूक्तानि । सूक्तानि च एकद्व्यादिवर्ग घटितानि यथायथं तत्तत्सूक्तेषु द्रष्टव्यानि । एतत्संख्या च बालखिल्यसहितानां तद्व्यतिरिक्तानि तु १०१७ सूक्तानि तत्र चरणव्यूहभाष्ययोः स्पष्टम् । तत्र च प्रकारान्तरेण विभागः तत्र अष्टकानि प्रत्येकाष्टके च अष्टौ अष्टौ अध्यायाः इत्येवं ६४ अध्यायाः

तत्र च वर्गा २००६ संख्यकास्वरणव्यूहोक्ताः खिलसहितस्तु ततोऽप्यधिकाः । चरणव्यूहभाष्ययोर्दर्शितविभागो दर्श्यते यथा ।

"चातुर्वेद्य चत्वारोवेदा विज्ञाता भवन्ति ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति तत्र ऋग्वेदस्याष्टभेदा भवन्ति चर्चा आवसक्यश्च अवणीयपारः क्रमपारः क्रमजटाः क्रमदण्डश्चेति चतुश्चारायणभेदेषां शाखाः पञ्च भवन्त्याश्वलायनी सांख्यायनी शाकला बाष्कला माण्डूकाश्चेति तेषामध्ययनम् । अध्यायानां चतुःषष्टिमण्डलानि दर्शयेत् । वर्गाणां परिसंख्यातं द्वे सहस्रे षडुत्तरे सहस्रमेकं सूक्तानां निर्विशङ्कं विकल्पितम् । दश सप्त च पञ्चन्ते संख्यातं वै पदक्रमात् । एकयतसहस्रं वा द्विपञ्चाशत्सहस्रार्द्धमेतानि चतुर्दश वासिष्ठानामितरेषां पञ्चाशीतिः । ऋचां दश सहस्राणि ऋचां पञ्चशतानि च । ऋचामशीतिः पादश्च पारायणं प्रकीर्त्तितम् । एकश्च एकवर्गश्च नवकश्च तथा स्मृतः । द्वौ वर्गौ द्विऋचौ ज्ञेयौ ऋक्त्रयं यतं च स्मृतम् । चतुर्ऋचां पञ्चसप्तत्यधिकञ्च यतं तथा । पञ्चर्चां तु द्वियतं सहस्रं रुद्रसंयुतम् । पञ्चत्यार्ध्यधिकं तु षड् ऋचां च यतत्रयम् । सप्त ऋचां यत ज्ञेयं विंशतिस्त्वाधिकाः स्मृताः । अष्टर्चां तु पञ्चशत् पञ्चाधिकास्तथैव च । दशाधिकद्विसहस्राः पञ्चाशास्तु निश्चिताः । वर्ग संज्ञा न सूक्तस्य चत्वारश्चात्र कीर्त्तिताः" चरणव्यूहः । वेदपारायणचतुर्विभागात् चरण उच्यते । तस्य व्यूहः समुदायः, चतुर्वेदानां समुदायं व्याख्यास्यामः इत्यर्थः । कथमेकोवेदः तदुक्तं आरण्यके, "सर्वे वेदाः सर्वेघोषा एकैव व्याहृतिः प्राणा एव प्राणा ऋच इत्येता विद्यादिति" तस्य चतुर्धा भागः कृतः । तथा चोक्तं भागवते । "तेनासौ चतुरो वेदान् चतुर्भिर्वदनैः प्रभुः । सव्याहृतिकान्सोङ्कारांश्चातुर्होत्रविवक्षया । पुत्रानध्यापयत्तांस्तु ब्रह्मर्षिर्व्रह्मकोविदान् । ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् । ते परम्परया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः । चतुर्युगेष्वथव्यक्ता द्वापरादौ महर्षिभिः । क्षीणायुःक्षीणसत्त्वञ्च दुर्मेधा वीक्ष्य कालतः । वेदान् ब्रह्मर्षयोव्यस्यान् हृदिस्थाऽच्युतनोदितः । अस्मिन्मन्वन्तरे ब्रह्मन् सर्गत्रा लोकभावनः । ब्रह्मोशाद्यैर्लोकपालैर्याचितोधर्मगुप्तये । पराशरात् सत्यवत्यामंशांशकलया विभुः । अवतीर्णोमहाभागो वेदं चक्रे चतु-

विधम्। ऋगथर्ववेदयजुःसाम्नोराशीनृत्य वर्गयः। चतस्रः संहितास्तके मन्त्रैर्मिश्रिताः इव। तासां च चतुरः-शिष्यान् उपाकृत्य महामतिः। एकैकसंहितां तत्रैकैकस्मै ददौ विभुः। पलाय संहितामाद्यां बह्वृचाख्यामथाच ह। पैलायनसंज्ञाय 'निगदाख्यं यजुर्गणम्। सान्नां जैमिनये प्राहात्मजा छन्दोगसंहिताम्। अथर्वाङ्गिरसं नाम स्वशिष्याय सुमन्तवे। पैलः स्वसंहितामूचे इन्द्रप्रमितये मुनिः। बाष्कलाय च सोऽध्याह शिष्येभ्यः संहितां स्वकाम्। चतुर्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव!। पराशरायाग्निहोत्रे इन्द्रप्रमतिरात्मवान्। अध्यापयत् संहितां स्वां माण्डूकेयमहामुनिम्। तच्छिष्यो देवमित्राय शौभर्यादिभ्य ऊचिवान्। (इन्द्रप्रमतिसुतो माण्डूकेयः। माण्डूकेयसुतः शाकल्यः। शाकल्यशिष्यो देवमित्रः)। शाकल्यस्तसुत स्वान् पञ्चधा व्यस्य संहिताम्। वात्स्य मुद्गलशालीयगोखल्यशिशिरेष्वधात्। जातूकर्णश्च तच्छिष्यः संहितां स्वसंहिताम्। बाभ्रवाकपैङ्गवेताबलिरजेभ्योददौ मुनिः। बाष्कलिः प्रतिशाख्येभ्यो बालखिल्याख्यसंहिताम्। चक्रे बालायनिर्भल्लः शाखाश्चक्रे तां दृधुः। बह्वृचाः संहिताह्येता एवैरृग्भिर्मिश्रिताः। स्तुत्यैव मन्त्रसां व्यास सर्वपापैः प्रमुच्यते" भाग० १२, ६ अ०। "ब्रह्मणा नोदितो व्यासोवेदान् व्यस्यन् प्रचक्रमे। अथ शिष्यान् समाहूय चतुरोवेदपारगान्। ऋग्वेदभावकं पैलं जग्राह महामतिः। वैशम्पायननामानं यजुर्वेदस्य चाग्रहीत्। जैमिनिः सामवेदस्य तथैवाथर्ववेदवित्। सुमन्तुश्च शिष्योभूद्दैदग्धस्य धीमतः" विष्णु० स्कन्धे प्रथमे। "सुमन्तुर्जैमिनिर्वैशम्पायनपैलाः सूत्रभाष्यमहाभारतधर्माचार्या" इति। अतिमाहत्वीत्यारभ्य माण्डूकेया इत्यन्तमाण्डूकमनघाः गर्गीयाश्च बीजारभ्य सांख्यायनमित्यन्ताः सांख्यायनमघाः। एतेषां कौथीतकीयं ब्राह्मणम् आरण्यकं च। ऐतरेय इत्यारभ्य आश्वलायनान्ताः आश्वलायनमघाः एषान्तु ऐतरेय आरण्यकं ब्राह्मणम्। आश्वलायनसूत्रम्।

तत्र बह्वृचं चातुर्वेद्यं चत्वारोवेदाविज्ञाता भवन्ति। अस्मिन् पक्षे चातुर्वेद्यं तेन चत्वारोवेदाविज्ञाता भवन्ति ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति इति स्पष्टार्थः। वेदा हि यज्ञार्थम् अभिप्रवृत्ताः। ते यज्ञाः द्विविधाः। अग्नौ हूयमाना, अनग्नौ प्रहुताः। अग्नौ हूयमाना नेतार्विधाः। अनग्नौ प्रहुता नित्याभ्यासो ब्रह्मयज्ञः पारायणं च। अत्र स्कन्दस्कन्दे ब्रह्मयज्ञखण्डे "यद्दहोऽर्धानेन यज्ञाकृतिभिरेव तद्देवताप्रयोत् यद्यजूषि हुताकृतिभिः, यत्सामानि मध्वाकृतिभिः, यदथर्वाङ्गिरसः सोमाकृतिभिः, यत् ब्राह्मणानि कल्पान् गाथानाराशंसीरितिहासपुराणानीत्यक्षताकृतिभिर्यद्दहोऽर्धानं स्वधा अस्य पितॄन् उपतरन्ति" इति। तत्र ऋग्वेदस्याष्टभेदा भवन्ति। स्यानानि भवन्तीति पाठान्तरम्। शाकलबाष्कलौ ऽऐतरेयब्राह्मणारण्यकौ 8 सांख्यायनमाण्डूकौ ६। कौथीतकाय ब्राह्मणारण्यकावितिष्ट अष्टभेदाः। अन्यच्च "वेदाश्च विकृतिः शाखाभेदस्तु त्रिविधस्मृतः। पृथग्नामाभिधानेन व्यासेन कथितं पुरा" इति। अतोऽष्टभेदेनाष्टस्थानेन वा प्रकृतिर्माकृता विकृतिस्तु अग्रे वक्ष्यामः। तस्मात् ब्रह्मयज्ञार्थं पारायणार्थं च ऋग्वेदस्याध्ययनं कर्त्तव्यम। ततश्चतुष्पदेन वक्ष्यति। चर्चेत्यादि चर्चाध्ययनम्। तात्पर्येणपदव्यापारेण मन्त्रोच्चारणं क्रियते सा चर्चा। तस्याध्ययनस्य गुरुः आचार्यः। तस्य चर्चकः शिष्यः अवणीयपारः। अवणीयो वेदः। तस्य पारं समाप्तिः। इति चतुष्पदेन अध्ययनं सूचितम्। अग्रे चतुष्पदेन चत्वारि पारायणानि सूचयति। तत्पारायणं द्विविधम्। प्रकृतिविकृतिरूपम् का प्रकृतिः ?। प्रकृतिः संहिता। सा द्विविधा रूढा योगा च रूढा यथा।"अग्निमीळे पुरोहितमिति। योगा यथा। अग्निम् ईळे पुरोहितमिति। प्रातिशाख्ये द्वितीयपटले भाष्यकारेण व्याख्यातम्। अथ चतुष्पारायणं यथा। क्रमपारः क्रमपदः क्रमजटाः क्रमघनः इति चतुष्पारायणम्। क्रमशब्देन उभयसंहिता बाह्या च कथम् ?। "अनुलोमविलोमाभ्यां द्विवारं हि पठेत् क्रमम्। विलोमे पदवत्तस्मिन्नुलोमे यथाक्रमम"। यथाक्रमं यथा संहिता इत्यर्थः। अन्यच्च वर्णक्रमः। अक्षरसमाम्नाय एवेत्यारण्यके। "कथमभिष्टुयादित्यथर्वः चतुरक्षरः पक्षः अर्द्धर्चेय ऋक्ष्ण"। इति ब्राह्मणम्। क्रमः संहितायाश्चेति कथम् ?। पद प्रकृतिः संहिता इति भैरुक्तवचनात्। सा क्रमरूपा इत्यर्थः। क्रमपदः। क्रमः संहिता तस्याः पदानि इति प्रकृतिपारायणे द्वे प्रकृतिरूपे। विकृतिस्तु अष्टधा भवति। तत्र "जटा माला शिखा लेखा ध्वजो दण्डोरथोघन। अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः" इति व्यासमध्ये जटादण्डयोः प्राधान्यं तत्कथम् ?। जटानुसारिणी शिखा दण्डानुसारिणी माला लेखाध्वजोरथश्च। घनस्तु उभयो

रेवानुसारी। तत्र जटाषट्के जटाविकृतम्। "क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्व्वम्। अभ्यस्य पूर्व्वं च तथोत्तरे पदेऽवसानमेव हि जटाभिधीयते" अस्यार्थः। क्रमे यथोक्ते सति क्रमोत्क्रमाभ्यामिश्रके क्रमप्रकारे पदजातं पदद्वयं वा पदत्रयं वा द्विरभ्यसेत्। द्विरभ्यसेत। अभ्यासप्रकारः। उत्तरमेव पूर्व्वम्। क्रमवत्पदद्वयं गृहीत्वा पूर्व्वेण सह प्रथमम् उत्तरपदमभ्यसेत। ततः उत्तरपूर्व्वपदयोः सन्धानद्वारा पूर्व्वम् द्विरभ्यस्योत्तरपदे अवसानम् एवंप्रकारेण अध्ययनं जटा अभिधीयते उदाहरणेन दर्शयते। अग्निमीळे ईळेऽग्निमग्निमीळे ईळे पुरोहितं पुरोहितमीळे ईळे पुरोहितमित्यादि द्रष्टव्यम्। अथ दण्डलक्षणम्। "क्रमसक्तं विपर्य्यस्य पुनश्च क्रमसत्तरम्। अक्षरादेव मन्त्रोक्तः क्रमदण्डोऽभिधीयते। उदाहरणम्। अग्निमीळे ईळेऽग्निम् अग्निमालरैळेपुरोहितम् पुरोहितमीळेऽग्नि'मित्यादि द्रष्टव्यम्। अथ मालालक्षणम्। "ब्रूयात् क्रमविपर्य्यासावर्धर्चस्यादितोऽन्ततः। अन्तं चादिवदेवेदं क्रममालेति गीयते। माला मालेव पुष्पाणां पदानामुपनिबन्धिता। आवर्त्तने क्रमस्यास्यां क्रमभ्युत्क्रमसंभवात्। अथ शिक्षालक्षणम्। "पदोत्तराऽटामेव शिक्षामार्याः प्रचक्षते। अथ लेखालक्षणम्। क्रमहितिचतुःपञ्चपदक्रममुदाहरेत्। पृथक् पृथक् विपर्य्यस्य लेखामाहुः पुनः क्रमात्"। अथ ध्वजलक्षणम्। "ब्रूयादादेः क्रमं सम्यगान्तादुत्तरवेद्यादि। वर्गे च ऋचि यत्र स्यात् पठनं स ध्वजः स्मृतः"। अथ रथलक्षणम्। "पादयोर्द्वयोर्वापि सङ्ख्या दण्डवद्भवेत्"। अथ घनलक्षणम्। "जटामुक्ता विपर्य्यस्य घनमाहुर्मनीषिणः"। अन्यच्च। "जटाशिखाघनाः प्रोक्ता क्रमपूर्व्वा मतोषिभिः"। इति विकृतिलक्षणान्युक्तानि। अध्ययने संहितापारायणम् पदपारायणम् जटापारायणम् क्रमदण्डपारायणं चतुष्पारायणमित्यर्थः। एतेषां शाखाः पञ्च भवन्ति। एतेषां वेदपारायणानां पञ्च शाखा भवन्तीत्यर्थः। ताः काः ? । आश्वलायनी शांख्यायनी शाकला बाष्कला माण्डूकेति इति प्रसिद्धाः। तेषामध्ययनम्। तेषाम् आश्वलायनादिशाखानां समानाध्ययनं सूचयति। अध्यायाच्चतुःषष्टिः। अग्निमीळे अयं देवायेत्यादि। चतुःषष्टिरध्याया इत्यर्थः। मण्डलानि दर्शयन्। अग्निमीळे—कुमुद्वत्कम् इत्यादि उपाकर्म्म च प्रसिद्धानि इत्यर्थः। वर्गाणां परिसंख्यातन्दे सप्तके षड्वरे। वर्गादिः आश्वालाः संख्या बालखिल्यैर्विना त्रयी। षड्वरसप्तकद्वयं वर्गा इत्यर्थः। सप्तकमेकं सूक्तानां निर्विष्टं विद्धि स्थितम्। दश सप्त च पञ्चन्ते। सप्तदशाधिकसप्तकं सूक्तानीत्यर्थः। संख्यातं वै षट्क्रमम्। एकं शतसप्तकं च द्विपञ्चाशत्सप्तरूपकम् सार्द्धम् चतुर्दश वालिखिल्यानि तरेषां पञ्चाशीतिः। एकलक्षद्विपञ्चाशत्सप्तरूपपञ्चशतं चतुर्दश वालिखिल्यानां सहितगोलिखाम् इन्द्रोनिरेकसप्तति-पदात्मकोवर्गोनास्ति। एतद्गोलीयाणां पञ्चाशीत्यधिकपदानीत्यर्थः। अथ बालखिल्यसंहितपदसंख्या उच्यते। लक्षैकन्तु त्रिपञ्चाशत्सप्तरूपं शतसप्तकम्। पदानि च द्विनवति प्रमाणं शाकलस्य च। एकलक्षत्रिपञ्चाशत्सप्तरूपशतसप्तयतं द्विनवति साधिकानि पदानि इत्यर्थः। पदानि बालखिल्यस्य अर्कसंख्यायतानि च। अधिकानि तु सप्तैव वर्गा अष्टादश स्मृताः सप्ताधिकाष्टादशयतानि पदानीत्यर्थः। दशाश्वलायनानाम् सांख्यायनानान्तु बालखिल्यसंहितपदसंख्या उच्यते। याज्ञवल्क्ये पदलक्षमेकं सार्द्धं तथैव त्रिसप्तरूपयुक्तम्। शतानि सप्तैव तथाधिकानि चत्वारिंशच्च पदानि चर्चा। याज्ञवल्क्योक्तसूक्तसप्तशतसंहितापदानि एकलक्षत्रिपञ्चाशत्सप्तरूपशतसप्तयतचतुर्विंशदधिकानि पदानीत्यर्थः। पदानि बालखिल्यस्य दशसंख्या यतानि च षड्यीत्यधिकानि वर्गाः सप्तदशापि च। एकादशयतषट्पञ्चाशदधिकानि बालखिल्यपदानीत्यर्थः। अष्टपञ्चाशत्पदात्मकत्वस्य यस्त्वित्यजो वर्गोनास्ति आश्वलायनानाश्रुतर्ऋचात्मको वर्गः। इत्याश्वलायनसांख्यायनशाकलयोरध्ययनयोर्भेद इत्यर्थः। अथ पारायणे ऋक्परिमाणमुच्यते। ऋचां दश सहस्राणि ऋचां पञ्चशतानि च। ऋचामयीतिः पादस्य पारायणं प्रकीर्त्तितम् एतत्पारायणं बालखिल्यैर्विना संख्यातम्। बालखिल्यानि पारायणे न सन्ति। तदुच्यते। ऋग्वेदान्तर्गतबालखिल्यमेकादशसूक्तम् सूक्तसप्तसप्तदशाधिकमित्यत्र ऋचां दशसहस्राणीत्येतत्संख्याव्यतिरिक्तानि बालखिल्यानीति प्रसिद्धिः" भाष्यम्। अत्र प्रधान शाखाभेदाभिप्रायेण पञ्चविधत्वसङ्ख्यम् "ऋग्वेदस्य तु शाखाः स्युरेकविंशतिसंख्याकाः" इत्यादिकोपनिषदि एकोनविंशतिभेदोक्तिः प्रशाखाभिप्रायेण अत एव प्रशाखाश्च इति प्रागुक्तभाष्ये वाक्ये तथोक्तम्। पृथ्वी उपनिषद्भेदस्तु उपनिषच्चन्द्रे उक्तः। "ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः। सामवेदः स्मृतः पैतृलक्षणात्रयीविद्भिः

मनुः ।"ऋग्वेदाधिपतिर्जीव०"ब्रह्मो०उक्तेः जीवस्य ऋग्वेदाधिपत्यं तेन तस्य वारे तद्वृद्धे च तत्तत्कर्म ऋग्वेदिभिः करणीयम् "याज्ञाधिये बलिनि वीर्य्ययुतेऽथवाऽग्नौ" । ब्रह्मो०त० तदुध्यानं तु "ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः । आत्रेयगोत्रः" इति विद्या०पा० उक्तम् । ऋग्वेदोऽध्येतव्योऽस्य इनि । ऋग्वेदिन् तत्पाठके ।

ऋघा स्त्री ऋ-घा०घन् किच्च । हिंसायाम् । "ऋषिरस्त्र ऋघावान्" ऋ० १,१५२,२, "ऋघावान् हिंसकः" भा० । "मरुद्भ्रातस्तुवि कूर्मिर्ऋघावान्" ऋ०२,३०,३ ।

ऋच स्तुतौ तुदा० परo सकo सेट् । ऋचति आर्चीत् । आनर्च । कर्मणि ऋच्यते आर्चि । "याभ्यां गायत्रमृच्यते" ऋ० ८,१८,१० "ब्रह्मागायत्रमृचे युवभ्याम्"७,७०,६,

ऋच् स्त्री ऋच्यते स्तूयतेऽनया ऋच-करणे क्विप् । वेदमन्त्रभेदे "यत्रार्थवशेन पादव्यवस्थितिः सा ऋक्"जै० । "ऋचो यजूंषि सामानि निगदाश्चैव मन्त्राः" कात्या० १,२,१, । "ऋगादयो निगदान्तास्चत्वारोमन्त्राः । तत्रार्थवशेन छन्दसि वा यत्र पादव्यवस्था, सा ऋक् तत्र "समिधाग्निं दुवस्यत" इत्यादौ यत्र प्रयत्नेन समाप्तेऽर्थोऽवसीयते तत्रार्थवशेन पादव्यवस्था यत्र च क्रियापदानुपादानात् "सुसमिद्धाय शोचिषे तं त्वा समिद्भिरङ्गिरः" इत्यादौ अपर्यवसितोऽर्थस्तत्र छन्दसा पादव्यवस्था भवति अतश्च यत्र नियताक्षराणि नियताश्च पादानियतानि यावत्सामानि सा ऋगित्युच्यते । अनियताक्षरपादावसानं यजुः यद्यपि ऋगेतं मन्त्रवाक्यं सामेत्यभियुक्तप्रयोगः तथापि तत्र विशेषणं गीतिः विशेष्यायमृगक्षराणि नाऽऽश्रौतविशेषणा विशेष्ये वृत्तिरिति प्रथमं प्रतीयमानत्वात् गीतिरेव सामेत्युच्यते तथा च "ऋचनीषु रथन्तरं गायति" "यद्योन्यां बृहत्तरयोगायति""ऋच्यधूढं साम गायति" प्रजापतेर्हृदयमनृचं गायतीत्यादयुपपन्नं भवति अतऋगक्षरातिरिक्तं ब्रह्मोतियद्ब्राह्मणं तत् सामयद्वेनोच्यते । ननु यदि रथन्तरादियच्चा गीतेरेव वाचकाः तदा "रथन्तरेण स्तुवीतेति" कथं स्तुतिसाधनत्वम् गुणगुणिसम्बन्धकीर्त्तनं हि स्तुतिः सा च गीतिरूपेण मन्त्रा न सम्भवति । उच्यते गीतेः कार्यस्तुतिवाक्यतात्पर्याभावाङ्गान्तरप्रकटनद्वारा स्तुतिसाधनत्व भवतीति नोक्तदोषः । निगदाः प्रैषाः परसम्बोधनार्थाः "प्रोक्षणीरासादय" "अग्नीदग्नीन्धिहर" इत्येवमादयः । ननु निगदा अपि यजूंष्येव ततः किमर्थं पृथगुक्ताः । उच्यते "उपांशु यजुषा अङ्गैर्निगदेनेति" धर्म्मभेदेन यजुःप्रभेदद्वया पृथगुपचनम् । यद्यु तत्र निगदानां यजुष्टमेन परसम्बोधनार्थत्वात् उच्चैर्निगदेनेति धर्म्मभेदः न च धर्म्मभेदाद्भेदः कस्यसामयोरपि क्वचिदुपांशुप्रयोगविधानात् अतस्त्रैविध्यमेव मन्त्राणाम् । तथाचोक्तम् "अहेर्बुध्नमन्त्रं मे गोपाय यमृषयस्त्रैविदा विदुः" ऋचः सामानि यजूंषीति वेदान्विदन्तीति त्रिविदः त्रिविदां सम्बन्धिनोऽध्येतारस्त्रैविदाः ते च यं मन्त्रभागमगृह्णादिरूपेण त्रिविधमाहुस्तं गोपायेति योजना । ऋग्यजःसामात्मको मन्त्रभेदोऽभिहितः तदवान्तरभेदाकाङ्क्षायाञ्चर्च साञ्चां चाध्येत्प्रसिद्ध्यैव भेदे सिद्धे लक्षणं न क्रियते" कर्कः । "ऋचैव होत्रमकरोद्यजुषाध्वर्यवं साम्नोद्गीथम्" श्रुतेः "त्रिधा विहिता वाग्वो यजूंषि सामानि" शत०ब्रा० ६,६,१,४ । "ऋच सामानि जज्ञिरे पुरुषच्छन्दः।"तदेतदृचाभ्यनूक्तम्" छा०उ० २विध उत्तरे निरु० समासे तदन्तात् अच् । अर्द्धर्चः एकर्चम् द्व्यृचं बह्वृचम् इत्यादि । बह्वृ० अध्येतार्थे अच् । अन्तः बह्वृचः इत्यादि अन्ये तु न अच् । अनृक् साम । प्राचुर्ये मयट् । ऋङ्मय तत्प्रचुरे त्रि० स्त्रियां ङीप् । 'एतं यज्ञस्य ऋङ्मयं यजुर्मयं साममयमाकृतिमयम्" शत०ब्रा० ४, २,४,५ । भावे क्विप् । २स्तुतौ ४पूजायाञ्च ।

ऋचस् त्रि० ऋच-वा०असुन् । स्तोतरि । "गा अर्चतो नृँऋचसे रिरीहि" ऋ० ६,२६,५ । "ऋचसे स्तोत्रे" भा०

ऋचसे अव्य०ऋच-तुमर्थे कसेन् । स्तोतुमित्यर्थे । "प्र वां महामनूषतसे वाणि" ऋ० ७,६१,६ ।

ऋचीक पु० ऋच-ईकक् ।१दिव्यपुत्रे सविदभेदे ।"दिव्यपुत्रो हरिद्भानुश्चतुरात्मा विभावसुः । सविता स ऋचीकोऽभूदानुराधाबलोरविः"भा०आ०१अ० । भृगुवंश्ये २जमदग्निपितरि ऋषिभेदे । "तस्मिंश्चियुक्ते विधिना योगक्षेमाय भार्गवे । अन्यच्चतुष्पादयास पुत्रं भृगुरनिन्दितम् । च्यवनं दीप्ततपसं धर्म्मात्मानं यशस्विनम् । यः सरोषाद्भुतोगर्भो स्राक्सौभाग्य भारत ।। आरुषी तु मनोः कन्या तस्य पत्नी मनीषिणः । और्वस्तस्यां समभवद्भूरुं भित्त्वा महायशाः । महातेजाः महावीर्योबाल एव गुणैर्युतः । ऋचीकस्य पुत्रस्तु जमदग्निस्ततोऽभवत्" भा० आ० ६६ अ० । तस्य चरितम् । भा०अनु०प०४अ० विस्तरेण वर्णितम् संक्षेपतस्तु हरिवंशे २८अ० यथा "गाधेः कन्या महाभागा नाम्ना सत्यवती शुभा । तां गाधिर्भृगुपुत्राय ऋचीकाय ददौ प्रभुः । तस्याः प्रीतोऽभव-

कर्त्ता भार्गवो भृगुनन्दनः । पुत्रार्थं सत्यवत्यास्च वरं याचेत्यथेत्य च । उपाचार्य्य तां भर्त्ता ऋचीको भार्गवस्तदा । उपयोज्यश्चरुरयं त्वया माता त्वयंतव । तस्यां जनिष्यते पुत्रो दारुणात् क्षत्रियर्षभः । अजेयः क्षत्रियैर्लोके क्षत्रियर्षभसूदनः । तवापि पुत्रं कल्याणि ! शृणुतमन्तं तपोधनम् । शमात्मकं द्विजश्रेष्ठं चरुरेष विधास्यति । एवमुक्त्वा तु तां भार्यामृचीको भृगुनन्दनः । तपस्यभिरतो नित्यमरण्य प्रविवेश ह । साधिः सदास्तु तदा ऋचीकाश्रममभ्यगात् । तीर्थयात्राप्रसङ्गेन सुतां द्रष्टुं नरेश्वरः । चरुहस्यं गृहीत्वा तद्गतेः सत्यवती तदा । चरुमादाय यत्नेन सा तु माता न्यवेदयत् । माता व्यत्यय दैवेन दुर्बुद्धे स्वं चरुं तदा । तस्याश्चरुमथाज्ञानादात्मसंस्थं चकार ह । अथ सत्यवती गर्भं क्षत्रियान्तकरं तदा । धारयामास दीप्तेन वपुषा घोरदर्शनम् । तामृचीकस्ततो दृष्ट्वा योगेनाभ्यनुकम्पया च । तामब्रवीद्द्विजश्रेष्ठः स्वां भार्यां वरवर्णिनीम् । मातासि बन्धिता भद्रे ! चरुव्यत्यासहेतुना । जनिष्यते हि पुत्रस्ते क्रूरकर्माऽतिदारुणः । भ्राता जनिष्यते चापि ब्रह्मभूतस्तपोधनः । विश्वं हि ब्रह्म तपसा मया तस्मिन् समर्पितम् । एवमुक्ता महाभागा भर्त्तारं सत्यवती तदा । प्रसादयामास पतिं पुत्रो मे नेदृशो भवेत् । आत्मार्थाय प्रसादः स्यात् इत्युक्तो मुनिरब्रवीत् । नैष सङ्कल्पितः कामो मया भद्रे ! तथाऽस्त्विति । उग्रकर्मा भवेत् पुत्रः पितुर्मातुश्च कारणात् । पुनः सत्यवती वाक्यमेवमुक्ताऽब्रवीदिदम् । इच्छन् लोकानपि मुने ! सृजेयाः किं पुनः सुतम् । शमात्मकमृजुं त्वं मे पुत्रं दातुमिहार्हसि । काममेवंविधः पौत्रो मम स्यात्तव च प्रभो ! । यद्यन्यथा न शक्यं वै कर्त्तुमेतद्द्विजोत्तम । । ततः प्रसादमकरोत् स तस्याश्चपसो बलात् । भद्रे ! नास्ति विशेषो मे पौत्रे च वरवर्णिनि । त्वया यथोक्तं वचनं तथा भद्रे ! भविष्यति । ततः सत्यवती पुत्रं जनयामास भार्गवम् । तपस्यभिरतं दान्तं जमदग्निं शमात्मकम् । भृगोश्चरुविपर्यासे रौद्रवैष्णवयोः पुरा । यजनाद्ध्वर्युवेदाभ्यां जमदग्निरजायत । सा हि सत्यवती पुण्या सत्यधर्मपरायणा । कौशिकीति समाख्याता प्रहृत्तेयं महानदी । इक्ष्वाकुवंशप्रभवो रेणुनाम नराधिपः । तस्य कन्या महाभागा कामली नाम रेणुका । रेणुकायान्तु कामल्यां तपोविद्यासमन्वितः । आर्च्चीको जनयामास जामदग्न्यं सुदारुणम् । सर्वविद्यान्तगं श्रेष्ठं धनुर्वेदस्य पारगम् । रामं क्षत्रियकुलान्तकरं प्रदीप्तमिव पावकम् । और्वस्यैवमृचीकस्य सत्यवत्यां महायशाः । जमदग्निस्तपोवीर्य्यात्तपसे ब्रह्मविद्वरः । मध्यमस्य सुतः श्रेष्ठः सुनःपुच्छः कनिष्ठकः । वैश्वामित्रन्तु दायादं गाधिः कृशिकनन्दनम् । जनयामास पुत्रन्तु तपोविद्याश्रयात्मकम् । प्राप्य ब्रह्मर्षिसमतां योऽयं सप्तर्षितां गतः । विश्वामित्रस्तु धर्मात्मा नाम्ना विश्वरथः स्मृतः । जज्ञे भृगुप्रसादेन कौशिकाद्यंवर्द्धनः" । "ऋचीकादयोऽभ्येत्य पितरो राममब्रुवन् । राम ! राम ! महाभाग ! प्रीताः स्म तव भार्गव ! भा० आ० ३य० ३भरतसुतभुमन्यु सुते ऋषभेदे । "ततोमरुद्भिः क्रतुभिरीजानो भरतस्तदा । लेभे पुत्रं भरद्वाजाद् भूमन्यु नाम भारत ! इत्युपक्रम्य "पुष्करिण्यामृचीकाच्च भूमन्योरभवत् सुतः" भा० आ० ९४अ० ।

ऋचीष न० ऋच—कीषन् । पिष्टपचनपात्रे हेम० ।

ऋचीषम पु० ऋचा स्तुत्या समः वेदे नि० ईषं यत्वञ्च । ऋग्वेदेन समानगुणे । "इन्द्र सुत इन्दो अद्रे सखे वसो ऋचीषमः" ऋ० १०,२२,२ । ऋचीषमः । "ब्रह्मा इन्द्र ! ते शतं शतं भूमीरुत स्युः । न त्वा वजिन्" इत्यादिकया ऋ० ८,७०,५ । स्तुत्या समानगुणकः "भा० "ऋषीमात्मऋचीषमभिन्दुसुषम्" ऋ० ८,६८,९ । ऋचीषमम् ऋचा स्तुत्या समम् यद्यप्यपरिच्छिन्नत्वादपि स्तुतिर्यावन्मात्रं विषयीकरोति तत्समम्" इत्यर्थः भा० । "अवच्छ ऋचीषमः" ऋ० ८,६२,९ । "इलक्षा परमज्मा ऋचीषमः"८,९०,१ । "२दीप्रा समे च "अकृन् इन्द्रऋचीषमः ऋचा दीप्रा समः" भा० ।

ऋचेयु पु० राजभेदे । पूरुवंशवर्णने "रौद्राश्वस्य सुतेघृताची दशाप्सरसि सूनवः" इत्युपक्रम्य "ऋचेयुरप्सु कक्षेयुः स्थलेषु च वीर्य्यवान्" भा० आ० ९४अ० ।

ऋच्छ भौ० धा० मूर्त्तौ (कठिनीभावे) अक० गमने सक० तुदा० पर० सेट् । ऋच्छति आर्च्छीत् आनर्च्छ । उपसर्गात् अस्यादेर्ऋच्छिः प्रार्च्छति अपार्च्छति । "उपसर्गाः क्रियायोगे" पा० इत्युक्तेः यत्क्रियया योगस्तत्क्रियायामेवोपसर्गत्वम् तेन प्रगतः ऋच्छकोऽस्मात् वाक्ये प्रादि० ब० । प्रर्च्छकः इत्यादौ न ऋच्छिः अत्र प्रस्य गमेरुपसर्गत्वेन ऋच्छेरुपसर्गत्वाभावात् ।

ऋच्छरा स्त्री ऋच्छ—कर्मणि करके वा चरः । वेश्यायाम् । उज्ज्वल० साधारणत्वेन सर्वेषां स्मरणात् इन्द्रियमोहजनकसाधनत्वाच्च तस्यास्तथात्वम् ।

ऋज गतौ अर्जने (वलाधाने) अर्जने च भ्वा० आत्म० सक० सेर्य्ये अक० सेट्। अर्जते आर्ज्जिष्ट आनृजे।

ऋज भर्त्सने इदित् भ्वा० आ० सक० सेट्। अर्ज्जते आर्ज्जिष्ट। अर्ज्जां बभूव आस चक्रे। अर्ज्जमानः।

ऋजिप्य त्रि० ऋजु आप्नोति गच्छति आप-यत् पृ०। ऋजुगामिनि "ऋजिप्यं श्येनं प्रुषितप्सुम्" ऋ० ४, २८,२। "ऋजु आप्नोति गच्छतीत्यृजिप्यः" भा०। "ऋजिप्य इन्द्रावतः" ४,२७,४।

ऋजिप्यन् पु० राजभेदे "अग्निमृजिप्यमृजिप्याने दानं दाशुषे" ऋ० ६,२०,७। ऋजिप्याने एतन्नामकाय राज्ञे" भा०।

ऋजीक त्रि० ऋज-गतौ ईकन् किच्च। १इन्द्रे २धूमे च उज्ज्व०। उपार्जीकमन्ह उदा० करणे ईकन्। २साधने च "आविर्ऋजीको विदथा" ऋ० ४,२८,४। "आविर्ऋजीका आविर्भूतसाधना" भा०।

ऋजीति पु० ऋज गच्छति ई-गतौ क्तिच् पृ०। ऋजुगामिनि वाचे "ऋजीते ! परि वृङ्धि नोऽश्मा" ऋ० ६,७५,१२। "ऋजु गच्छति ऋजीतिरिव" भा०।

ऋजीष न० अर्ज्यते रसोऽस्मिन् अर्ज्ज आधारे कीषन् ऋजादेशः। १पिष्टपचनपात्रे २नरकभेदे पिष्टपचनाकारपात्रभेदेन पापिनां पचनहेतुत्वेन तस्य तथात्वम्। नरकगणनायाम् मनुः। "लोहशङ्कुऋजीषञ्च" नरकमन्ह विवृतिः। ३नीरसे सोमलतादौ "सोमो राजामृतं सुत ऋजीषेणाजहान्नृक्षत्रमुम्" यजु० १६,७२ "ऋजीषं नीरसं सोमलतादौ" वेददी०। ४गतसारे सोमे पु०। "सप्तऽइ त इति ऋजीषकुम्भ आवपति" ब्राह्म० १०,६,१। "गतसारः सोमः ऋजीषस्थेन पूर्णकुम्भम्" कर्कः। यद्वा मादकद्रव्याभिषवशेन सारांशे गृहीते अवशिष्टः नीरसभागः (सिटि) अवतिष्ठते एवं सोमस्याभिषवे निःसारांशं ऋजीष इत्युच्यते। कर्मणि कीषन्। ५अभिषुते सोमे च "कुविद्राजानं मघवन्नृजीषिन्" ऋ० १,४२,५। "ऋजीषिन् ! सोमवन् !" भा०। "अन्तरिक्षाद्ऋजीषी" १,४६,१। "ऋजीषी सोमवान्" भा०। तैत्ति० अस्य विश्लिर्दर्शिता "तेनांशुमत्याभिषुणोति तेनेर्जीषि" ततः जातार्थे तारका० इतच्। ऋजीषित नीरसतया जाते त्रि०। ऋजीषं दध्यं देवत्वेनाध्यस्य दधि। ऋजीषिन् गतसारसोमद्रव्यमद्दाने देवे "इन्द्र। सोमं सोमपते पिबेमं माध्यन्दिनं सवनं चारु यत्ते। प्रप्रुथ्या शिप्रे मघवन्नृजीषिन् ! विसृष्या हरी इह मादयस्व" ऋ० १,२२ १, ऋजीषयद्भिर्न गतसारं सोमद्रव्यमुच्यते" भा०।

ऋजु त्रि० अर्जयति गुणान् अर्ज्ज-कु नि० ऋजादेशः। १प्रगुणे २सरले अवक्रे। सरलस्य बहुगुणार्ज्जकत्वात् तथात्वम्। स्त्रियां गुणवचनत्वात् वा ङीष्। "ऋज्वीर्धानैरवतन्त कन्यराः" भाघः। "ऋजावतः स्रुक्त्रिणि ऋजवनीः" भट्टिः "उमां स पश्यन् ऋजुनैव चक्षुषा" कुमा०। "ऋजवस्ते तु सर्वे स्युरन्याः सौम्यदर्शनाः" यत्नः ते टवर्गाः। "ऋजवोदभौः" गोभि०सू०। नान्दीश्राद्धादौ दैवे पैत्ये च दर्भा ऋजवः कार्य्याः। "धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः" याः। ततः वेदे वा० प्रकारे धात्वा। ऋजुधा सरलप्रकारे अव्य०। "यज्ञमेव तदृजुधा प्रतिष्ठापयति" ऐत०। भावे पृषो० दृमनिच्। ऋजिमन् सारल्ये अकौटिल्ये पु०। भावे तल्। ऋजुता तदर्थे स्त्री "ऋजुतां नयतः शरामि ते" कुमा०। त्व। ऋजुत्व न० गुणवचनत्वात् अण् आर्ज्जव न० तलार्थे। प्रशस्तकुले ५कल्याणे। "ऋजुकृत्सा ऋजुवनिः" ऋ० ५,४१,१५। "ऋजुकृत्साऋदनुकूलकृत्सा ऋजुवनिः कल्याणदानात्" भा०। ६घोषणे च "भारद्वाजेभ्य ऋजगाथः"। ऋ०५, ४४,५ "ऋजगाथ ! घोषणस्तुतिकः" भा०। ७वसुदेवपुत्रभेदे पु०। "वसुदेवस्तु देवक्यामष्ट पुत्रानजीजनत्। कीर्त्तिमन्तं सुषेणञ्च भद्रसेनमृजादरधीः। ऋजुं संमर्दनं भद्रं सङ्कर्षणमक्षीश्वरम्। अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल। सुभद्रा च महाभागा तव राजन् ! पितामही" भाग० ६,२४, अ०२५,२६। ऋजुत्वञ्च आर्ज्जवशब्दे ८०६ पृष्ठे व्याख्यातम् वाक्यस्य तत्त्वञ्च स्वार्थत्वेन। "धर्मशास्त्रऋजुभिर्मिताक्षरैः" मिता०।

ऋजुकाय पु० ऋजुः कायोऽस्य। १कम्बलपक्षिणि त्रिका० २ऋजुशरीरदेहमात्रे त्रि०। "ताञ्जन् क्षत्रिऋमाणीन ऋजुकायः समभ्यसेत्" भाग०१,२८,६। [हारिणि २वाच्ये पु०।

ऋजुग त्रि० ऋजु यथा तथा गच्छति गम ड। १सरलव्यव-

ऋजुरोहित न० कर्म्म०। सरले इन्द्रधनुषि कोचित् वस्तुतः "रोहितं रुधिरे प्रोक्तमृजुरूकरराजने" विश्वोक्तेः ततः पातल्यचक्रे सरले इन्द्रधनुषि रोहितशब्दस्यैव वृत्तिः तेन "इन्द्रायुधं शक्रधनुरृजुरोहितम्" अमरे "शक्रायुधं धनुर्वैवायुधं तदृजु रोहितम्" हेमचन्द्रे च तदेव ऋजु रोहितमिति व्याख्यानात् न विशिष्टनामैक्यमेयम्।

ऋजुसर्प पु० ऋजुपर्वत नित्यसमा०। सुश्रुतोक्ते दर्वीकरविशेषे सर्पभेदे। "तत्र दर्वीकरा ऋजुप्रक्रम्य ऋजुसर्पः

श्वेतोदरो महायिरा अजगर्हआशोविव" इति उक्तम् ।

ऋजूक पु० ऋज–वा० अकक् । देशभेदे विपाशानदी-जन्मभूमौ । ऋजूके भवा ऋण्–पृषो० । आर्जीकीया तत्-प्रभवायां विपाशायाम् "इमं मे गङ्गे ! यमुने ! सरस्वति ! शुतद्रि ! स्तोमं सचता परुष्ण्या । असिक्न्यामरुद्वृधे "वितस्तयार्जीकीये ! शृणुह्या सुषोमया" ऋ० १०,७५,५, इत्यासदाकृत्य निरुक्तेऽपि । "आर्जीकीयां विपाडित्याहुः ऋजूकप्रभवा ऋजुगामिनी वा" तेन विपाशानद्युत्-पत्तिस्थानमृजूक इति गम्यते ।

ऋजूकरण न० अन्नज; ऋजुः क्रियतेऽनेन ऋजु+अभूततद्भावे च्वि+कृ–करणे ल्युट् । १सरलतासम्पादनसाधने शुश्रू-षोक्ते १यन्त्रव्यापारभेदे । "यन्त्रकर्म्माणि तु निर्यातनपुरण-बन्धनव्यपकर्षनवाहनविवर्त्तनविवरणपीडनमार्गविशोधन विकर्षणाहरणोल्लेखनोन्मथनविमथनभञ्जनोल्लायनाधूपणैषण दारणोर्ज्जूकरणप्रक्षालनप्रधावनप्रमार्जनानि चतुर्विंशतिः" सुश्रु० । २तथाभूतव्यापारमात्रे च ।

ऋजूयत् त्रि० अजु गच्छति ऋजुं गच्छति वा ऋजु+अजु+–वा क्यच् ऋजूय–शतृ० तस्य जोवा शश । ऋजु-गामिनि २ऋजुगामिनि च "देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो निवर्त्तताम्" ऋ०१,८९,१, स्मृतिमा-श्रित्य "ऋजूयतामृजुगामिनामृजुगामिनां नेति" निरुक्तम् ।

ऋज्र पु० ऋज–गत्यादिषु रन् नि० १नायके उज्ज्वल० । २ऋजुगामिनि त्रि० । "ऋ मन्यू ऋज्रा वातस्याश्वा" ऋ०१, १९३,५ । "ऋज्रा ऋजुगामिनौ" भा० । "ऋज्रा वाजं न गध्यम्" ऋ० ४,१६,११ ।

ऋज्वी स्त्री ऋजु+स्त्रियां वा ङीष् । १आर्जववत्यां स्त्रियाम् ऋजुशब्दे उदा० । २ऋ०सि० उक्ते यज्ञाणां २गतिभेदे । "वक्राद्वक्रा कुटिला मन्दा मन्दतरा समा । तथा शीघ्रा शीघ्रतरा यज्ञानामष्टधा गतिः । तत्रातिशीघ्रा शीघ्रास्त्रा मन्दा मन्दतरा समा । अष्टौति पञ्चधा ज्ञेया या वक्रा सानुवक्रगा" स्मृ० । "तत्राष्टविधगतिषु अतिशीघ्रेत्यादिः समेत्यन्त इत्येवं पञ्चधा गतिः ऋज्वी-मार्गी गतिर्ज्ञेया या गतिः सानुवक्रगा अनुवक्रगमनेन सह वर्त्तमाना पूर्व्वश्लोकेऽनुवक्रगतेर्वक्रकुटिलमध्येऽभिधा-नात् उभयासङ्गत्वाच्च सानुवक्रा कुटिलेति गतिर्वक्रा ज्ञेया तथा च यज्ञानां मार्गी वक्रेति गतिद्वयम्" रघु० ।

ऋज्वीसान पु० ऋजि–असानच् । मेघे उज्ज्वल० ।

ऋण गतौ तना०उभ० सक०सेट् । अर्णोति अर्णोति, अर्णुते आर्णीत् आर्णिष्ट । आनर्क्ष आनृहुः आनृक्षे । ऋणः ।

ऋण त्रि० ऋण–क । १गन्तरि । "धनीवान्नो न तावुरति धन्वा राट्" ऋ०६,१२,५ "ऋणः गोचुगन्ता" भा० "उत ऋणेव वातव" १०,१२७,७ । ऋ–ल्युट् नि० । २अवश्यदेये (धार) अर्द्धर्चा० पुंन० । "ऋतावानश्चमाना ऋ-णानि" ऋ० २,२७,४ । "ऋणानि त्रीण्यपिरन्धेभ्यो देयानि" भा० । "पर ऋणा सावीरध मत्कृतानि" ऋ०२,२८ ६ । "ऋणानि पितृादिभिः कृतानि अस्माभिर्देयानि । अथ मत्कृतानि ऋणानि" भा० तच्च अवश्ययोध्यत्वेन लौकिकमलौकिकञ्च । तत्र देवादित्रयाणां चतुर्णां पञ्चानां वा अवश्ययोध्यत्वादलौकिकर्णत्वम् अयोधने पापहेतु-त्वात्तस्य तथात्वम् । ऋणानपक्रियाया उपपातकमध्ये उक्त-त्वात्तेषु पापहेतुत्वम् । "देवानाञ्च पितृणाञ्च ऋषीणाञ्च तथा नरः। ऋणवान् जायते यस्मात् तस्मोक्षे प्रयतेत् सदा । देवानामर्चनो जन्तुर्यज्ञैर्भवति मानवः । ऋषि-वित्तस्य पूजाभिरुपवासव्रतैस्तथा । आद्धेन प्रजया चैव पितृणामनृणो भवेत् । अधीत्य ब्रह्मचर्य्येण सुतेन तपसा तथा" विष्णुधर्म्मो० पु० । "जायमानो वै ब्राह्म-णस्त्रिभिर्ऋणैर्ऋणी भवति ब्रह्मचर्य्येण ऋषिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः" मिता०श्रुतिः । "न च जातमात्रोऽक्षतदारोग्निपरिग्रहोयज्ञादिष्वधिक्रियते । तस्मादधिकारी जायमानो ब्राह्मणादित्रयत्वादेनस्तितिक्षेत्" मिता० । "ऋणानि त्रीण्यपाकृत्य मनोमोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः" । "ऋषि-पितृदेवानां गत्वानृण्यं यथाविधि । पुत्रे सर्व्वं समासज्य वसेन्माध्यस्थ्यमाश्रितः" मनुना क्रमेण चातु-राश्रम्यपक्षमाश्रित्योक्तम् । यथा च ब्रह्मचर्य्यादेव प्रव्र-ज्याधिकारस्तथा आश्रमशब्दे ८२६ पृ० उक्तम् । अवश्यदेयत्वेन चतुर्विधं पञ्चविधञ्चर्णं दर्शितं भा० आ० १२० अ० । "ऋणैस्तुभिः संयुक्ता जायन्ते मानवा भुवि । पितृदेवर्षिमनुजैर्देयं तेभ्यश्च धर्म्मतः" इत्युपक्रम्य "यज्ञैस्तु देवान् प्रीणाति स्वाध्यायतपसा मुनीन् । पुत्रैः श्राद्धैः पितॄंश्चापि आनृशंस्येन मानवान्" "ऋणमु-न्मुच्य देवानामृषीणाञ्च तथैव च । पितृणामथ विप्राणा-मृणीवाञ्च पञ्चमम्" मनु० ३७अ० । "ऋणाभिधानात् स्वयमेव देयं तदा पितृणां सुकृते स जन्मनात्" "अन-ल्पपीडं भगवन्नृणमन्यमनेहि मे" "नघोषमेभे पूर्वेषामृणस्य निर्मोक्षसाधनम्" रघुः । ओषिजऋणम् (धार) (ऋक्)

ऋणादानप्रस्ते वक्ष्यते । १दर्शे ४भूमौ ५जले च त्रि० कौ० प्रवत्सरकम्बलवसनर्सदृयपूर्वात् अस्मादेर्ढञ्: प्रार्ध्यम् वत्सरार्द्धं कम्बलार्द्धं वसनार्द्धम् दृषार्द्धो-देयो दृषार्द्धो नदी । ऋणशोधनार्थमृणग्रहणार्द्धम् । अन्यस्मात्कोशात् कुतश्चित् राज्ञस्तदादेयं वियोज्यसंख्यान्विते पदार्थे । तत्सूचकसंख्यायाः सजातीयेन विजातातीयेन धनेन च योगवियोगादिक्रियादिकं बीजगं०उक्तं यथा ।

"धनर्णसङ्कलने करणसूत्रं इत्तार्द्धम् । योगे युतिः स्यात् तयोः स्वयोर्वा धनर्णयोरन्तरमेव योगः । उदा० । रूपत्रयं रूपचतुष्टयं च त्रयं धनं वा सञ्चितं वदाशु । स्वर्णं त्रयं स्वं च पृथक् पृथङ्मे धनर्णयोः सङ्कलनामवैधि । अत्र रूपाणामव्यक्तानां चाव्यक्तरागमुपलक्षयार्थं लेख्यानि । यानि ऋणगतानि तान्यूर्ध्वबिन्दूनि । न्यासः रू ३ रू ४ योगे जातं रू ७ न्यासः रू ३ रू ४ योगे जातं रू ७ । न्यासः रू ३ रू ४ योगे जातं रू १ । न्यासः रू ३ रू ४ योगे जातं रू १ । एवं विभिन्नेष्वपि । धनर्णव्यवकलने करणसूत्रं इत्तार्द्धम् । संशोध्यमानं स्वमृणत्वमेति स्वं त्रयस्तदृयुतिरूक्तवच्च । उदा० त्रयाद्दृयं स्यात् स्वमृणाढ्यं च व्यस्तं च संशोध्य वदाशु शेषम् । न्यासः रू ३ रू २ अन्तरे जातं रू १ । न्यासः रू ३ रू २ अन्तरे जातं रू १ । न्यासः रू ३ रू २ अन्तरे जातं रू ५ न्यासः रू ३ रू २ अन्तरे जातं रू ५ ।

गुणनभागे करणसूत्रं इत्तार्द्धम् । स्वयोरस्वयोः स्वं वधः स्वर्णघाते त्रयोभागहारेऽपि चैवं निरुक्तम् । उदा० । धनं धनेनर्णमृणेन निघ्नं हयं त्रयेण स्वमृणेन किं स्यात् । न्यासः रू २ रू ३ धनं धनघ्नं धनं स्यादिति । रू ६ । न्यासः रू २ रू ३ ऋणमृणघ्नं धनं स्यादिति जातं रू ६ । न्यासः रू २ रू ३ धनमृणगुणमृणं स्यादिति जातं रू ६ । न्यासः रू २ रू ३ ऋणं धनगुणमृणं स्यादिति जातं रू ६ । इति धनर्णगुणनम् ।

भागहारेऽपि चैवं निरुक्तमिति । उदा० । रूपाष्टकं रूपचतुष्टयेन धनं धनेनर्णमृणेन भक्तम् । ऋणं धनेन स्वर्णेन किं स्यादृतं वदेदं यदि बोद्धुधीवि । न्यासः रू ८ रू ४ धनं धनहृतं धनं स्यादिति जातं रू २ । न्यासः रू ८ रू ४ ऋणमृणहृतं धनं स्यादिति जातं रू २ । न्यासः रू ८ रू ४ ऋणं धनहृतम् ऋणं स्यादिति जातं रू २ । न्यासः रू ८ रू ४ धनमृणहृतमृणं स्यादिति जातं रू २ । इति धनर्णभागहारः ।

वर्गमूलयोः करणसूत्रं इत्तार्द्धम् । क्रतिः स्वर्णयोः स्वं स्वमूले धनर्णे न मूलं त्रयस्यास्ति तस्मात्क्रतित्वात् । उदा० । धनस्य रूपत्रितयस्य वर्गः त्रयस्य च वृद्धि सखे नमाशु । न्यासः रू ३ रू ३ जातौ वर्गौ रू ९ रू ९ । धनात्मकानामनात्मकानां मूलं नवानां च पृथग्वदाशु । न्यासः रू ९ मूलं रू ३ वा रू ३ । न्यासः रू ९ एतावर्गत्वान्मूलं नास्ति । इति धनर्णवर्गमूले ।

स्वसङ्कलव्यवकलने करणसूत्रं इत्तार्द्धम् । त्रयोगे वियोगे धनर्णं तथैव च्युतं शून्यतस्तद्विपर्ययमेति । उदा० रूपत्रयं स्वं त्रयगं च खं च किं स्यात् स्वयुक्तं वद खाच्च्युतं च । न्यासः रू ३ रू ३ रू ०एतानि त्रयुतान्यविक्षतान्येव । रू ३ रू ३ रू ०एतानि खाच्च्युतानि रू ३ रू ३ विपर्ययस्थानि" ।

"क्षेदं गुणं गुणं क्षेदं वर्गं मूलं पदं क्षतिम् । ऋणं स्वं स्वर्णं कुर्याद्दृश्ये राशिप्रसिद्धये" लीला० ।

ऋणकर्त्ति त्रि० ऋणपदवाच्यफलप्रदा कर्त्तिः स्तुतिर्यस्य । अवश्यफलदायकस्तुतियाचिनि "यास्त्विन्द्रऋणकर्त्तिमदाभ्यम्" ऋ० ८,६१,१२ । ऋणकर्त्तिः ऋणपदवाच्यफलप्रदस्तुतिकः भा० ।

ऋणञ्चय पु० ऋणभेदे "ऋणञ्चयस्य प्रयता मघानि" ऋ० ५, ३०,१२, "ऋणञ्चयस्यैतन्नामकस्य राज्ञः" भा० ऋणञ्चये राजनि दृश्यमानाम्" ऋ० ५,३०,१३ ।

ऋणचित् पु० ऋणमिव चिनोति चि—क्विप् । ऋणस्येव स्तोतृकामस्याधायके यजमाने । "स ऋणचिदृणया ब्रह्मणस्पतिः" ऋ० २,२३,१७ । ऋणचित् स्तोतृकामस्यर्णमिव चिनोति" भा० ।

ऋणदास पु० ऋणात् मोचनेन क्रीतोदासः । दासभेदे ।

"यष्टिजातस्तथा क्रीतो लब्धोदायादुपागतः । अनाकालहृतस्तद्वदाकृतः स्वामिना च यः । मोक्षितो भक्तदण्डाद्यैर्युक्ते प्राप्तः पणे जितः । तथाऽभिशस्तदृष्टश्च वडवाकृतः । विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः" नारदः । "यष्टे दासाज्जातो यष्टिजातः । क्रीतोमूल्येन, लब्धः प्रतिग्रहादिना । दायादुपागतः पित्रादिदासः । अनाकालहृतोदुर्भिक्षे यो दासत्वाय मरणाद्रक्षितः । आकृतः स्वामिना धनग्रहणेनाधितां नीतः । ऋणमोचनेन दासत्वमभ्युपगतः ऋणदासः" मिता० ।

ऋणमत्कुण पु० ऋणं परक्षतं मनैवेति कृणति कृष-क

सुप्तुमेति स०। प्रतिभुवि (जामिनि) यद्धर०। स हि परकीयर्णस्य सदीयत्वेन स्वीयतयोति तस्य तथात्वम्।

ऋणमार्गण पु० ऋणं ऋ णते परणं जगतत्वेन प्रार्थयते मार्ग–ल्यु ऐत०। (जामिन) प्रतिभुवि धारा०।

ऋणमुक्ति स्त्री ऋणान्मुच्यतेऽनया मुच–क्तिन्। ऋण शोधने लिखा०। ऋणशोधोऽत्र धारा०।

ऋणमोचन न० ऋणात् मोचयति मुच–णिच्–ल्यु ५त०। काशीस्थे तीर्थभेदे काशीखण्डे प्रसिद्धम्।

ऋणलेख्य न० ऋणसूचकं लेख्यं लेखपत्रम्। ऋणपत्रसूचके व्यवहारोपयोगिनि (खत) (तमःसुक) इत्यादि प्रसिद्धे पत्रभेदे। तल्लेखनप्रकारादि मिता० दर्शितं यथा "तत्र लेख्यं द्विविधं शासनं जानपदं चेति। शासनं निरूपितं जानपदमभिधीयते। तच्च द्विविधम् स्वहस्तलिखितमन्यलिखितं चेति। तत्र स्वहस्तलिखितमसाक्षिकम्, अन्यलिखितं ससाक्षिकम्। अनयोश्च देशाचारानुसारेण प्रामाण्यम् यदाह नारदः। "लेख्यन्तु द्विविधं ज्ञेयं स्वहस्तान्यलिखितं तथा। असाक्षिमत्साक्षिमच्च सिद्धिर्हेप्यस्तेस्तयोरिति" तत्रान्यलिखितमाह। "यः कश्चिद्धनिनाज्ञातः स्वहस्त्या तु परस्परम्। लेख्यन्तु साक्षिमत् कार्यं तत्तिन् धनिकपूर्वकम्"इत्या०। धनिकाधमर्णयोर्योऽर्थो हिरण्यादिः परस्परं स्वहस्त्या दृयता काकेनैतावद्देयमित्येवंरूपेण च प्रतिमासं वृद्धिरिति निष्णातो व्यवस्थितः तत्तिन्नर्थे कालान्तरे निप्रतिपत्तौ वस्तुतत्त्वनिर्णयार्थं लेख्यम् साक्षिमद्भुक्तजयसाक्षियुक्तम् धनिक. पूर्वं यस्मिन् तद्धनिकपूर्वकम् धनिकनामलेखनपूर्वकमिति यावत् कार्यं कर्त्तव्यम्। उक्तलक्षणाः साक्षिणो वा कर्त्तव्याः "कर्त्ता तु यत्कृतं कार्यं सिद्ध्यर्थमस्य साक्षिणः। प्रवर्त्तन्ते विवादेषु खलतं वाप्यलेखकमिति" स्मरणात्। अपि च "समासासतदर्द्धाङ्गनामजातिखगोत्रकैः। सप्रकृत्यारिकालीवपितृनामादिचिह्नितम्" या० समा संवत्सरः मासः चैत्रादिस्तदर्द्धं पक्षः शुक्लः कृष्णो वा अहर्तिथिः प्रतिपदादिः। नाम धनिकाधमर्णयोः। जातिः ब्राह्मणादिः खगोत्रं वाशिष्ठादिगोत्रमेतैः समादिभिश्चिह्नितम्। तथा सप्रकृत्यारिकं बह्वृचादिशाखायुक्तं गणनाम बह्वृचः कठ इति। आत्मीयपितृनाम धनिकर्णिकपितृनाम। आदिपदग्राह्यं जाति संख्याचारादेयपदम्। एतैश्चिह्नितं लेख्यं कार्यमिति गतेन सम्बन्धः। किञ्च "समाप्रेऽर्द्धे ऋणी नाम स्वहस्तेन निवेशयेत्। मतं लेऽस्तुवृत्तस्य यद्-लोपरि लेखितम्"या० धनिकाधमर्णयोर्योऽर्थः स्वहस्त्या व्यवस्थितः तस्मिन्नर्थे समाप्ते लिखिते ऋणी अधमर्णोनामात्मीयं स्वहस्तेनार्द्धश्लोके यदुपरि लेखितं तन्मासशुक्लस्य मतमभिप्रेतमिति निवेशयेत् पत्रे लिखेत्। तथा "साक्षिणश्च स्वहस्तेन पितृनामपूर्वकम्। अलाङ्गमशुकः साक्षी लिखेयुरिति ते समाः"या०। तस्मिन् लेख्ये ये साक्षिणो लिखिताः तेऽप्यात्मीयपितृनामलेखनपूर्वकमस्मिन्नर्थे अहमसुको देवदत्तः साक्षीति स्वहस्तेनैकैकशो लिखेयुश्चे समाः संख्यातो गुणतश्च कर्त्तव्याः। यदाधमर्णः साक्षी वा लिखितो न भवति तदाऽधमर्णोऽन्येन साक्षी च साक्ष्यन्तरेण सर्वसाक्षिसन्निधौ स्वमतं लेखयेत्। यथाह नारदः "अलिखित्वा ऋणी यः स्यात् स्वमतं तु न लेखयेत्। साक्षी वा साक्षिणान्येन सर्वसाक्षिसमीपतः" इति अपि च "उभयाभ्यर्थितेनैतन्मयाऽन्यसुकसूनुना। लिखितं ह्यसुकेनेति लेखकोऽन्ते ततो लिखेत्"या० ततो लेखको धनिकाधमर्णिकाभ्यासुभाभ्यां प्रार्थितेन मयाऽसुकेन देवदत्तेन विष्णुमित्रसूनुना एतल्लेख्यं लिखितमित्यन्ते लिखेत्" साम्प्रतं स्वमतं लेख्यमाह। "विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत्। तत्प्रमाणं स्मृतं लेख्यं बलोपधिकृताहते"या०। यल्लेख्यं स्वहस्तेन लिखितं अधमर्णेन तत् साक्षिभिर्विनापि प्रमाणं स्मृतं मन्वादिभिः। बलोपधिकृताहते बलेन बलात्कारेण, उपधिना छलकौशलादिलक्षणेन यत्कृतं तत्राहिना। नारदोऽप्याह "असाक्षियुक्तलेखाद्यबलात्कारकृतं च यत्। तत्प्रमाणं लिखितं भयोपधिकृतन्नचेति"। तच्चैतत् स्वहस्तकृतं परहस्तकृतञ्च यल्लेख्यं देशाचारानुसारेण सम्बन्धव्यवहारे बन्धकव्यवहारयुक्तमधमर्णकरापरिलोपेन लिख्यमानापरिलोपेन च लेख्यमित्येतावत्र पुनः साधुशब्दैरेव प्रातिस्विकदेश्यभाषयापि लेखनीयम् यथाह नारदः "देशाचाराविरुद्धं यद्व्यवहारविधिचिह्नितम्। तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रियाक्षरमिति"। विधानं विधिराधेर्विधिराधीकरणस्य चिह्नम् गोत्राधिभ्योत्राधिकाकृतमित्यादि तद्व्यक्तं विस्पष्टं यस्मिंस्तद्व्यक्तविधिचिह्नितम्। अविलुप्तक्रियाक्षरम् अर्णानां क्रमः क्रमवाचरादि च क्रियाक्षरादि अविलुप्तानि क्रियाक्षरादि यस्मिंस्तदविलुप्तक्रियाक्षरम्। तदेवं भूतं लिखितं प्रमाणम्। राजशासनवत् साधुशब्दनिबन्धोऽत्रेत्यभिप्रायः। लेख्यप्रसङ्गेन लेख्याकृतमपि लिखि-

रेव देयमित्याह "ऋणं लेख्यकृतं देयं पुरुषैस्त्रिभिरेव तु। यथा साक्ष्यादिकृतमृणं त्रिभिरेव देयम् तथा लेख्यकृतमप्याहर्तृपुत्रतत्पुत्रैस्त्रिभिरेव देयम्। न चतुर्थादिभिरिति नियम्यते। ननु पुत्रपौत्रैर्ऋणन्देयमित्यविशेषेणर्णमात्रं त्रिभिरेव देयमिति नियतमेव। बाढमस्त्येवात्रार्थे पत्राकृढर्णविषये स्मृत्यन्तरप्रमाणमपवादं गङ्कामपनेतुमिदं वचनमारब्धम्। तथा हि पत्रलक्षणमभिधाय कात्यायनेनाभिहितम् "एवं कालमतिक्रान्तं पितृणां दाप्यते ऋणमिति"। इत्थं पत्राकृढमतिक्रान्तकालमपि पितृणां सम्बन्धि दाप्यते। अत्र पितृणामिति बहुवचननिर्देशात् कालमतिक्रान्तमिति वचनाच्चतुर्थादिर्दाप्यत इति प्रतीयते। तथा नारदेनापि "लेख्यं यस्य भवेद्धस्ते लाभस्तस्य विनिर्दिशेदिति"। अत्रापि यस्य हस्ते पत्रमस्ति तस्यर्णलाभ इति सामान्येन चतुर्थादिभ्योपगणलाभोऽस्तीति प्रतीयते। अतश्चेतदागङ्कानिवृत्त्यर्थम् एतद्वचनमिति युक्तम्। वचनद्वयन्तु योगीश्वरवचनानुसारेण योजनीयम्। अस्यापवादमाह "आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते"। सबन्धकेऽपि पत्राकृढे ऋणे त्रिभिरेव देयमिति नियमाद्दापकस्यानधिकारेणाऽऽध्याकृरणेऽध्यनधिकारप्राप्ताविदुच्यते। यावच्चतुर्थेन पञ्चमेन वा ऋणं न दीयते तावदेवाधिर्भुज्यत इति वदता सबन्धकर्णापाकरणे चतुर्थादेरप्यधिकारो दर्शित। नन्वेतदप्ययुक्तमेव। "फलभोग्यो न नश्यतीति" न्यायम्। तदयं तत्रिचतुरपवादवचने पुरुषत्रयविषयमेव स्यादिति सर्वमनवद्यम्। प्रासङ्गिकं परिसमाप्य प्रकृतमेवानुसरति। "देयान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा। भिन्ने दग्धेऽथवा छिन्ने लेख्यमन्यत्तु कारयेत्" या०। व्यवहाराङ्गमेव पत्रे पत्रान्तरं कुर्यादिति विधीयते। व्यवहाराङ्गमत्वं चालनव्यवहितदेयान्तरस्थे पत्रे दुर्लेख्ये दुष्टानि सन्दिग्धानानि अवाचकानि वा लेख्यानि लिप्यक्षराणि पदानि वा यस्मिंस्तस्मिन् दुर्लेख्ये नष्टे कालवशेन, उन्मृष्टे मषीदौर्बल्यादिना, मृदिते लिप्यक्षरे, हृते तस्करादिभिः, भिन्ने विदलिते, दग्धे अग्निना, छिन्ने छिद्रीभूते सति हिर्भवति। एतच्चार्थिप्रत्यर्थिनोः परस्परानुमतौ सत्यां विमत्यान्तु व्यवहारप्राप्तौ देयान्तरस्थपत्रानयनाध्यपेक्षया कालोदात्तवृः दुर्देवावस्थिते नष्टे वा पत्रे साक्षिभिरेव व्यवहारनिर्णयः कार्यः। यथा ह नारदः "लेख्ये देयान्तरस्थे यैर्ऋणं द्विर्लिखिते हृते। सतस्तत्कालकरणमसतोदृष्टदर्शनमिति"। सतो विद्यमानपत्रस्य देशान्तरस्थस्यानयनाय कालकरणं कालावधिर्दातव्यः यतः पुनरविद्यमानस्य पत्रस्य पूर्वं ये दृष्टाः साक्षिणस्तैर्दर्शनं व्यवहारपरिसमापनं कार्यम्। यदा तु साक्षिणो न सन्ति तदा दिव्येन निर्णयः कार्यः। "अलेख्यसाक्षिके दैवी व्यवहारे विनिर्दिशेदिति" स्मरणात्। एतच्च जानपदं व्यवस्थापत्रं सन्दिग्धं चेत् स्वहस्तलिखितादिभिः शोधनीयम् "सन्दिग्धलेख्यशुद्धिः स्यात् स्वहस्तलिखितादिभिः क्लिप्राप्रक्रियाचिह्न सबन्धागमसंज्ञकैः" या०उक्तेः।

ऋणादान न० ऋणमादीयते यत्र। व्यवहारे अष्टादशविवादान्तर्गते व्यवहारभेदे "तेषामाद्यमृणादानमित्यादीनि अष्टादश व्यवहारपदानि मनुना दर्शितानि। तत्रलक्षणादि नारदादिवाक्येन भिन्नोदर्शितं यथा "अधुनाष्टादशानां व्यवहारपदानामाद्यमृणादानपदं दर्शयति। "अशीतिभागो वृद्धिः स्यादित्यादिना मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने" इत्येषमन्तेन। तच्चार्णादानं सप्तविधम्। दृष्टमदृष्टन्देयमदृष्टमदेयमनेनाधिकारिणा देयमस्मिन् समये देयमनेन प्रकारेण देयमित्यवधारणं पञ्चविधसत्तमर्णे दानविधिरादानविधिश्चेति द्विविधमिति। एतच्च नारदेन स्पष्टीकृतम् "ऋणन्देयमदेयञ्च येन यत्र यथा च यत्। दानग्रहणधर्मश्च ऋणादानमिति स्मृतमिति" तत्र प्रथमसत्तमर्णश्च दानविधिमाह तत्पूर्वकत्वादितरेषाम्। "अशीतिभागो वृद्धिः स्यान्मासिमासि सबन्धके। वर्णक्रमाच्छतं द्विजेचतुष्पञ्चकमन्यथा" या० "मासिमासि प्रतिमासं विश्वासार्थं यदाधीयते आधिरिति यावत् बन्धकेन सह वर्त्तत इति सबन्धकः प्रयोगस्तस्मिन् सबन्धके प्रयोगे प्रयुक्तस्य द्रव्यस्यार्शीतिभागो वृद्धिर्ग्राह्या भवति। अन्यथा बन्धकरहिते प्रयोगे वर्णानां ब्राह्मणादीनां क्रमेण द्विजेचतुःपञ्चकं शतं धर्म्यं भवति ब्राह्मणेऽधर्मे द्विकं शतम्, क्षत्रिये त्रिकं, वैश्ये चतुष्कं, शूद्रे पञ्चकं, मासिमासीत्येव। द्वौ वा त्रयो वा चत्वारो वा पञ्च वा द्विजेचतुःपञ्चाः द्विजेचतुःपञ्चा अस्मिन् शते वृद्धिर्दीयते इति द्विजेचतुःपञ्चकं शतम्। "तदस्मिन् वृद्ध्यायत्तमभुक्तोपदा दीयते इति (पा०)कन्। इदं वृद्धिर्मासिमासि गृह्यत इति कालिका। इयमेव वृद्धिर्दिवसगणनया विभज्य प्रतिदिवसं गृह्यमाणा कायिका भवति तथा च नारदेन। "कायिका कालिका चैव कारिता च तथाऽपरा। चक्रवृद्धिश्च याख्येष तस्य वृद्धित्रिधा"

दृष्टमुक्तम् "कायाग्निरोधिनो ग्रहणत्वादादि. वायिका। प्रतिमासं स्वल्पा या वृद्धिस्सा कालिका मता। वृद्धिं सा कारिता नाम यत्किंचेन स्वयं कृता। वृद्धेरपि पुनर्वृद्धि-स्सकृद्वृद्धिरुदाहृतेति"। गृहीतविशेषेण वृद्धेः प्रकारान्तरमाह। "कान्तारगास्तु दशकं सासृग्भ्यो विंशकं शतम्" या०। कान्तारमरण्यन्तत्र गच्छन्तीति कान्तारगाः ये वृद्ध्या धनं गृहीत्वाधिकलाभार्थमतिगहन प्राणधनविनाशशङ्कास्थाने प्रविशन्ति ते दशकं शतं दद्युः। ये च सकृद्गामिनो विंशकं शतं मासिमासि वृद्धेः। एतदुक्तम्भवति कान्तारगेभ्यो दशक शत सासृग्भ्यश्च विंशकं शतम् उत्तमर्णः प्रयच्छेत् मूलविनाशस्यापि शङ्कितत्वात् इति। वृद्धानो कारिता वृद्धिमाह। "वृद्ध्या स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु दद्युः"। "सर्वे ब्राह्मणादयोऽधमर्णा अवन्धके सबन्धके वा सकृता स्वाभ्युपगता वृद्धिं सर्वासु जातिषु दद्युः। क्वचित्कृतापि वृद्धिर्भवति यथाह नारदः "न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित् अनाकारितमप्यूर्ध्वं वत्सराद्वार्द्धिवर्द्धते" इति। यस्तु याचितकं गृहीत्वा देशान्तरं गतस्तं प्रति कात्यायनेनोक्तम्। "यो याचितकमादाय वदत्त्वादिशं व्रजेत्। ऊर्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयादिति" यस्तु याचितकमादाय याचितोऽप्रदत्त्वा देशान्तरं याति तम् प्रति तेनैवोक्तम्। "क्रीतोद्धारमदत्त्वा वो याचितस्तु दिशं व्रजेत्। ऊर्ध्वं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयादिति" यः पुनः स्वदेशे स्थित एव याचितो याचितकं न ददाति तं याच नकालादारभ्य वृद्धिं दापयेद्राजा। यथाह "स्वदेशेऽपि स्थितो यस्तु न दद्याद्याचितः क्वचित्। तत्क्षणोद्धारितां वृद्धिमनिच्छन्नं च दापयेदिति"। अनाकारित वृद्धेरपवादो नारदेनोक्तः "प्रयत्नमूल्यमूर्तिर्यासोद्धरणोद्यत प्रकल्पितः। दृष्टादानात्क्रियाफला वर्द्धन्ते नाविवक्षिताः"। अविवक्षिता अनाकारिता इति। अधुना द्रव्यविशेषे वृद्धिविशेषमाह। "सन्ततिस्तु पशुस्त्रीणाम्" या० "पशूनां स्त्रीणां सन्ततिरेव वृद्धिः पशूनां स्त्रीणाञ्चोपयोगसमर्थस्य तत्पुष्टिसन्ततिकामस्य प्रयोगः सम्भवति। यत्किञ्चन्तु क्षीरपरिचर्यार्थिनः। अधुना प्रयुक्तस्य द्रव्यस्य वृद्धिप्रकृतमन्तरेण चिरकालावस्थितस्यकस्य द्रव्यस्य कियती परा वृद्धिरित्यपेक्षिते आह "रसस्याष्टगुणा परा। वस्त्रधान्यहिरण्यानामुत्तरोत्तरद्विगुणा परा" या०। "रसस्य तैलघृतादेर्वृद्धिप्रकृतमन्तरेण चिरकालावस्थितस्य स्वकतया वृद्ध्या वर्द्धमानस्याष्टगुणा वृद्धिः परा नात परं वर्द्धते। तथा वस्त्रधान्यहिरण्यानां यथासंख्यं चतुर्गुणाः त्रिगुणा-द्विगुणा च वृद्धिः परा। वसिष्ठेन तु रसस्य त्रैगुण्यमुक्तम् "द्विगुण हिरण्य त्रिगुणं धान्यम् धान्येनैव रसा व्याख्याताः पुष्पमूलफलानि च तुलाधृतं त्रितयमष्टगुणमिति"। मनुना तु धान्यस्य पुष्पमूलफलादीनाञ्च पञ्चगुणत्वमुक्तम्। "धान्ये शते लवे वाह्ये नातिक्रामति पञ्चतामिति" शतं जीवफल पुष्पमूलफलादि। लवोभिषोषी धमराकेशादि। वाह्योवलावर्दतुरगादि। धान्यशतलववाह्यविषया वृद्धि पञ्चगुणत्वातिक्रामतीति। तत्राधमर्ण-योग्यतावशेन दुर्भिक्षादिकालवशेन च व्यवस्था द्रष्टव्या। एतच्च सकृत्प्रयोगे सकृद्धरणे च वेदितव्यम्। पुरुषान्तरसङ्क्रमणेन प्रयोगान्तरकरणे तस्मिन्नेव वा पुरुषे अनेकश प्रयोगान्तरकरणे सुवर्णादिकं द्वैगुण्याद्य तत्कृत्य पूर्ववद्वर्द्धते। सकृत्प्रयोगेऽपि प्रतिदिनम् प्रतिमासम्प्रति वत्सरं वा वृद्ध्याहरणेऽधमर्णदेयस्य द्वैगुण्यसम्भवात् पूर्वाहृतवृद्ध्या सह द्वैगुण्यमतिक्रम्य वर्द्धत एव यथाह मनुः "कृसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता"। सकृदाहृतेत्यपि पाठोऽस्ति। उपचर्यार्थं प्रयुक्तं द्रव्यं कृसीदनस्य वृद्धिः कृसदवृद्धिर्द्वैगुण्यं नात्येति नातिक्रामति यदि सकृदाहृता सकृत्प्रयुक्ता पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणे द्वैगुण्यमत्येति। सकृदाहृतेति पाठे पुनः प्रतिदिनम्प्रतिमासं प्रतिवत्सरं वाऽधमर्णादाहृता द्वैगुण्यमत्येतीति व्याख्येयम्। तथा गौतमेनाप्युक्तम् "चिरस्थाने द्वैगुण्यम् प्रयोगस्येति" प्रयोगस्येत्येकवचननिर्देशात् प्रयोगान्तरकरणे द्वैगुण्यातिक्रमोऽभिप्रेतः। चिरस्थान इति निर्देशाच्चान्नपानैर्वर्द्धमाने धने द्वैगुण्यातिक्रमोऽधिप्रेतः। क्षणप्रयोगधर्मा उक्ताः साम्प्रतम् प्रयुक्तस्य धनस्य प्रकृतधर्मा उच्यन्ते। "प्रयत्नं साधयेदर्थं न वाच्यो ह्यपतेर्भवेत्। साध्यमानोऽप्रकुर्वन्तु दण्डशोधाभ्यञ्च तद्धनम्" या०। प्रयत्नमभ्युपगतमधमर्णेन धनं साक्ष्यादिभिर्भावितं साधयन् प्रत्याहरन धर्मादिभिरुपायैः उत्तमर्णो नरपतेर्न वाच्योनिवारणीयो न भवति। धर्मादयश्चोपाया मनुना दर्शिताः। "धर्मेण व्यवहारेण छलेनाचरितेन च। प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन चेति" धर्मेण प्रीतियुक्तेन साम्नवचनेन, व्यवहारेण साक्ष्यादिलक्षणोपायेन, छलेन उल्लवादिप्रयोगेन भूषणादेर्दर्शनेन, आचरितेन अभोजनेन। पञ्चमेनोपायेन बलेन निगडबन्धनादिना

उपचयार्थं प्रयुक्तं द्रव्यमेतैरुपायैरात्मसात्कुर्यादिति । प्रपन्नं साधयन्नयं न वाच्य इति वदन्नप्रतिपन्नं साधयन् राज्ञा निवारणीय इति दर्शयति । एतदेव स्पष्टीकृतङ्कात्यायनेन 'पोड्येद्योधनाकृष्टमृणिकं न्यायवादिनम्। तस्मादर्थात् स क्षीयेत तत्समं प्राप्नुयाद्दमिति''। यस्तु धर्मादिभिरुपायैः प्रपन्नमर्थं साध्यमानो याच्यमानो नृप गच्छेत । राजानमभिगम्य साधयन्नभियुक्तै स दण्डो भवति य क्षनुसारेण । धनिने तद्दत्तन्दाप्यञ्च । राज्ञा दापने च प्रकारादर्शिताः "राजा तु खामिने विप्रं मान्यैर्नैव प्रदापयेत् । देयाचारेण चान्यांस्तु दुष्टान् सर्व्वस्व दापयेत् । रिक्थिनं कुहृदं वापि छलेनैव प्रदापयेदिति या०। साध्यमानो ऽपह्नवेऽदित्येतत् स्वल्पाचारव्यपेतनेत्यस्य प्रत्युदाहरणं बोद्धव्यम्। बहूत्तमर्णिकेषु युगपत्प्राप्तेष्वेकोत्तमर्णिक केन क्रमेण दापोरन्नित्यपेक्षायामाह । "गृहीतानुक्रमाद्दद्युरोधनानामधमर्णिकाः । दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरम् या०। समानजातीयेषु येनैव क्रमेण धनं गृहीतन्तेनैव क्रमेणाधमर्णिको दाप्योराजा, भिन्नजातीयेषु तु ब्राह्मणादिक्रमेण । यदा तु पुनरुत्तमर्णो दुर्बलः प्रतिपन्नमर्थन्नमीदृभिरुपायैः साधयित प्रपन्नवन् राज्ञा साधितार्थे भवति तदाऽधमर्णस्य दण्डउत्तमर्णस्य च भवतीदमाह "राज्ञाऽधमर्णिकोद्यः साधितार्थस्य दण्डः । पञ्चकन्तु शतस्याद्यः प्राप्तार्थोत्तमर्णिकः" या०।' अधमर्णिकोराज्ञा प्रतिपन्नार्थात्साधितार्थस्य दण्डः पञ्चकं शतं दाप्यः" प्रतिपन्नस्य साधितस्यार्थस्य दशमन्तेन राजाधमर्णिकाद्गृह्यमाणस्य दण्डः । उत्तमर्णिकस्तु प्राप्तार्थः पञ्चकं शतं दण्डरूपेण दाप्य साधितस्यार्थस्य विंशतितमन्भागम् उत्तमर्णाद्राजार्थं गृह्णीयादित्यर्थः । अप्रतिपन्नार्थसाधने तु दण्डविभागो दर्शितः "निह्नवे भावितोदद्यात्" इत्यादिना । समधनमधर्मर्णिकमित्युक्तमधुना निह्नवमधर्मर्णिकमित्याह । "क्षीणजातिस्परिक्षीणमृणार्थं कर्म कारयेत् । ब्राह्मणस्तु परिक्षीणः शनैर्दद्यो यथोदयम्"या०। ब्राह्मणादिजातिउत्तमर्णो क्षीनजातिं क्षत्रियादिस्परिक्षीणं निह्नवमृणार्थमृणनिह्नव्यर्थं कर्म स्वजात्यनुरूपं कारयेत्तत्कुटुम्बाविरोधेन । ब्राह्मण पुनः परिक्षीणो निह्नवः शनैर्यथोदयं यथासम्भवमृणन्दाप्यः । अत्र क्षीनजातिग्रहणं समजातेरप्युपलक्षणमतस्य समजातिमपि परिक्षीणं यथोचितं कर्म कारयेत् । ब्राह्मणग्रहणं च श्रेयोजाते रुपलक्षणमतस्य क्षत्रियादिरपि क्षीणो वैश्यादेः शनैः शनैर्दाप्योयथोदयम् एतदेव स्पष्टीकृतं मनुना "कर्म्मणापि समङ्कुर्य्याद्धनिकेनाधमर्णिकं । समाऽपकृष्टजातिस्तु दद्यात्क्षेयान्तु तच्छनैरिति"। उत्तमर्णेन सभं निह्नवोक्त मर्णाधमर्णव्यपदेशमात्रानमधमर्णः कर्म्मणा कुर्य्यादित्यर्थः । किन्तु 'दीयमानं न गृह्णाति प्रयुक्तं यः स कन्धनम । मध्यस्थस्थापितं तत्स्याद्दत्ते न ततः परम्'या० उपचयार्थं दत्तं धनमधमर्णेन दीयमानमुत्तमर्णोदृद्धिलोभाद्यदि न गृह्णाति तदाऽधमर्णेन मध्यस्थहस्ते स्थापितं स्यात्तदा तत स्थापनादूर्द्धन्न वर्द्धते । अथ स्थापितमपि याच्यमानो न ददाति ततः पूर्व्ववद्दद्यादेव ।

इदानीन्देयमर्णं यदा येन च देयन्दाह । "अविभक्तैः कुटुम्बार्थे यद्दत्तन्तु कृतन्भवेत् । दद्युस्तत्कुथिनः प्रेते प्रोषिते वा कुटुम्बिनि"या० अविभक्तैर्बन्धुभिः कुटुम्बार्थमेकेनैव वा यदृणं कृतन्तदृणं कुटुम्बी दद्यात्तस्मिन् प्रेते प्रोषिते वा तत्कुथिनः सर्वे दद्युः । येन देय मित्यत्र प्रत्युदाहरणमाह । "न योषित् पतिपुत्राभ्याञ्च पुत्रेण कृतमृता । दद्यादृते कुटुम्बार्थात्र पतिः स्त्रीकृतन्तथा' या० । पत्या कृतमृणं योषिद्भार्या नैव दद्यात् । पुत्रेण कृतं योषित् माता न दद्यात् । तथा पुत्रेण कृतमृता न दद्यात्तथा भार्योकृतमृतिर्न दद्यात्कुटुम्बार्थादृत इति सर्व्वमेषमतस्य कुटुम्बार्थं येन केनापि कृत तत्तत्कुटुम्बिना देयम "कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं समाचरेत् । स्वदेशे वा विदेशे वा तत्र विद्वान् विचालयेत्''इति मन (अध्यधीन दासः)। तदभावेतद्दायहरैर्देयमिति उक्तमेव । पुत्रपौत्रैर्ऋणन्देयमिति वक्ष्यति तस्य पुरस्तादपवादमाह"सुराकृते मद्यतन्तन्तद्दण्डश्चुल्कवर्धिष्यकम्। द्यूतादानन्तथैवेह पुत्रोदद्यान्न पैतृकम्" या०। सुरापाणेन यत् कृतमृणं कामकृतं स्त्रीव्यसनेन कृतम् । द्यूते पराजयनिमित्तं दण्डश्चुल्कवर्धिष्यं द्यूतादानं धूर्त्तबन्दिमल्लादिभ्यो यत् प्रतिज्ञातम् 'धूर्त्ते बन्दिनि मल्ले च कुवैद्ये कितवे शठे चाटचारणचौरेषु दत्तं भवति नि फलमिति" नारदात्। एतदृणमपि त्वा कृतं पुत्रादिः यौणिकादिभ्यो न दद्यात् । अत्र दण्डश्चुल्कवर्धिष्यकमित्यवधिष्यकरणात् सर्वं दातव्यमिति न मन्तव्यम् "दण्डं वा दण्डशेषं वा शुल्कन्तच्छेषमेव वा । न दातव्यन्तु पुत्रेण यच्च न व्यवहारिकम् इत्यौशनसस्मरणात्। गौतमेनाप्युक्तम "मद्यशुल्कदातृदण्डा न पुत्रानध्यारुहेयुरिति"।

न पुत्रस्योपरि भवन्तीत्यर्थः । अनेनादेयमृणमुक्तम् । न पतिः स्वोक्तं तथेत्यस्यापवादमाह । "गोपौण्डिकशैलूषरजकव्याधयोषिताम् । ऋणं दद्यात् पतिस्तासां यस्माद्वृत्तिस्तदाश्रया" या० । गोपो गोपालः पौण्डिकः सुराकारः शैलूषो नटः रजकोवस्त्राणां रङ्गकः । व्याधो मृगयुः एषां योषिद्भिर्यद्ऋणं कृतं तत्पतिभिर्देयं यस्मात्तेषां वृत्तिर्जीवनं तदाश्रया योषिदधीना । यस्माद्वृत्तिस्तदाश्रयेति हेत्वव्यवदेशादन्येऽपि ये योषिदधीनजीविनस्तेऽपि योषित्कृतमृणं दद्युरिति गम्यते । पतिकृतमार्या न दद्यादित्यस्यापवादमाह "प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत् कृतम् । स्वयंकृतं वा यद्ऋणं नान्यत स्त्री दातुमर्हति" या० । "समूर्षणा प्रवृत्तस्यता वा पत्या नियुक्तया ऋणदाने यत्प्रतिपन्नमन्यतिकृतमृणन्देयं यद्व पत्या सह भार्यया कृतन्तदपि भर्तृभावे भार्यया व्यवहारे देयम् । यच्च स्वयमेव कृतमृणं तदपि देयम् । ननु प्रतिपन्नादित्रयं स्त्रिया देयमिति न वक्तव्यम् सन्देहाभावात् उच्यते । "भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः । यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनमिति" वचनाच्चिर्धनत्वेन प्रतिपन्नादिष्वदानशङ्कायामिदमुच्यते । प्रतिपन्नं स्त्रिया देयमित्यादि । न चानेन वचनेन स्त्र्यादीनां निर्धनत्वमभिधीयते पारतन्त्र्यमात्रप्रतिपादनपरत्वात् । एतच्च विभागप्रकरणे स्पष्टीकरिष्यते । नान्यत स्त्रीदातुमर्हतीत्येतत्तर्हि न वक्तव्यम् विधानेनैवान्यत्र प्रतिषेधसिद्धेः । उच्यते "प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत् कृतम्" इत्यनयोरपवादार्थमुच्यते । अन्यच्च सुराकामादिवचनोपात्तं प्रतिपन्नमपि पत्या सहकृतमपि न देयमिति । पुनरपि यद्ऋणं दातव्यं येन च दातव्यं यत्र च काले दातव्यं तत्त्रितयमाह "पितरि प्रोषिते प्रेते वा व्यसनाभिपरिप्लुते । पुत्रपौत्रैर्ऋणन्देयं निष्क्रये साक्षिभावितम्" या० । पिता यदि दातव्यमृणमदत्त्वा प्रेतो दूरदेशक्रान्तोऽधिक्रियमाणव्याध्यादिभिभूतो वा तदा ततकृतमृणमवश्यन्देयं पुत्रेण पौत्रेण वा पितृधनाभावेऽपि पुत्रत्वेन पौत्रत्वेन च । तत्र क्रमोऽप्ययमेव पितृभावे पुत्रः, पुत्राभावे पौत्र इति । पुत्रेण पौत्रेण वा निष्क्रये कृतेऽर्थिना साक्ष्यादिभिर्भावितमृणन्देयं पुत्रपौत्रैरित्यन्वयः । अत्र पितरि प्रोषित इत्यादावुक्तं कालविशेषस्तु नारदेनोक्तो द्रष्टव्यः । "नार्वाक् संवत्सरादृणं ग्राह्यं पितरि प्रोषिते सुतैः । ऋणं दद्यात् पितृव्ये वा ज्येष्ठे भ्रातर्यपि क्वचित्" प्रेतेऽप्यप्राप्तव्यवहारकालस्तु न दद्यात् प्राप्तव्यवहारकालस्तु दद्यात् स च कालस्तेनैव दर्शितः । "गर्भस्थैः सहजो ज्ञेय आष्टमाद्वत्सराच्छिशुः । बाल आषोडशाद्वर्षात् पौगण्डश्चेति यद्भवेत् । परतो व्यवहारज्ञः स्वतन्त्रः पितराहृत इति" । यद्यपि पितृमरणादूर्ध्वं बालोऽपि स्वतन्त्रोजातस्तथापि न ऋणभाग् भवति । यथाह "अप्राप्तव्यवहारस्तु स्वतन्त्रोऽपि हि नर्णभाक् । स्वातन्त्र्यं हि कृतं ज्येष्ठे ज्येष्ठ्यं गुणवयःकृतमिति" । तथा आसेधाद्ज्ञाननिषेधस्य ज्ञप्यते । "अप्राप्तव्यवहारस्य दूतोदानोन्मुखो व्रती । विषमस्थस्य नाशेध्यो न चैतानाक्षयेत्पुनः" इति तस्मात् । "अतः पुत्रेण जातेन स्वार्थसत्सूज्य यत्नतः । ऋणात् पिता मोचनीयोयथा नोनरकं व्रजेदिति" । पुत्रेण व्यवहारज्ञतया जातेन निष्पन्नेनेति व्याख्येयम् । आद्ये तु बालस्यापि अधिकारः "न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयनादिति" गौतमस्मरणात् । पुत्रपौत्रैरिति बहुवचननिर्देशाद्बहवः पुत्रा यदि विभक्ताः, स्वांशानुरूपेणर्णं दद्युः । अविभक्तास्तेत् सम्भूय समुत्थानेन, गुणप्रधानभावेन वर्त्तमानानां प्रधानभूतएव दद्यादिति गम्यते यथाह नारदः "अत ऊर्ध्वं पितुः पुत्रा ऋणं दद्युर्यथांशतः । अविभक्ता विभक्ता वा यस्यां चोद्वहते धुरमिति" । अत्र च यद्यपि पुत्रपौत्रैर्ऋणं देयमित्यविशेषेणोक्तम् । तथापि पुत्रेण यथा पिता स्वशक्त्यनुरूपं दाप्यति तथैव देयं पौत्रेण तु समं मूलमेव दातव्यं न वृद्धिरिति विशेषोऽवगन्तव्यः । "ऋणमात्मीयवत् पित्रा पुत्रैर्देयं विभावितम् । पैतामहं समं देयमदेयं तत्सुतस्य तु" इतिहस्मृतिवचनात् । अत्र विभावितमित्यविशेषोपादानात् साक्षिभावितमित्यत्र साक्षिग्रहणं प्रमाणोपलक्षणम् । समं यावद्गृहीतं तावदेव देयं न वृद्धिः तत्सुतस्य प्रपौत्रस्यादेयमगृहीतधनस्य । एतच्चोत्तरश्लोके स्पष्टयिष्यते । ऋणापकरणे ऋणी तत्सुतः पौत्र इति त्रयः कर्त्तारोदर्शिताः तेषाञ्च समवाये क्रमोऽपि दर्शितः ।

इदानीं कर्त्तृसमवाये क्रममाह । "ऋक्थग्राह्यं ऋणं दाप्यैर्योषिद्दुराहृतञ्चैव च । पुत्रोऽनंशांशिभिर्देयः पुत्रहीनस्य रिक्थिनः" या० । अन्यदीयं द्रव्यमन्यस्य क्रयादिव्यतिरेकेण यत् स्वीयं भवति तदृक्थं विभागद्वारेण ऋक्थं गृह्णातीति ऋक्थग्राहः स ऋणं दाप्यः । एतदुक्तं भवति यो यदीयन्द्रव्यं रिक्थक्रमेण गृह्णाति स तत्कृतमृणं दाप्यो न चौरादिरिति । योषितं भार्यां गृह्णातीति योषिद्ग्राहः स तथैव ऋणं दाप्यः । यो यदीयां योषितं

गृह्णाति स तत्सुतमृणं दाप्यः योषितोऽविभाज्यद्रव्यत्वेन ऋक्थव्यपदेशानर्हत्वाद्धेतुना निर्देशः । पुत्रवानन्याश्रितद्रव्य ऋणं दाप्यः अन्यमाश्रितमन्याश्रितम् मातृपितृसम्बन्धिद्रव्यं यस्यासावन्याश्रितद्रव्यः न अन्याश्रितद्रव्योऽनन्याश्रितद्रव्यः पुत्रहीनस्य ऋक्थिन ऋणं दाप्य इति सम्बन्धः । एतेषां समवाये क्रमस्य पाठक्रमएव ऋक्थग्राहः ऋणं दाप्यस्तदभावे योषिद्ग्राहस्तदभावे (तथाभूतः) पुत्र इति । नन्वेतेषां समवाय एव नोपपद्यते । "न भ्रातरो न पितरः, पुत्रा ऋक्थहराः पितुरिति" पुत्रे सत्यन्यस्य ऋक्थग्रहणासम्भवात् । योषिद्ग्राहोऽपि नोपपद्यते "न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते" इति स्मरणात् । तदृणं पुत्रो दाप्य इत्यप्युक्तं पुत्रपौत्रैर्ऋणं देयमित्युक्तत्वात् । अनन्याश्रितधन इति विशेषणमप्यनर्थकम् पुत्रे सति द्रव्यसाध्याश्रयणासम्भवात् सम्भवे च ऋक्थग्राह इत्यनेनैव गतार्थत्वात् पुत्रहीनस्य ऋक्थिन इत्येतदपि न वक्तव्यम् । पुत्रे सत्यपि ऋक्थग्राह ऋणं दाप्य इति स्थितमसति पुत्रे ऋक्थग्राहः सुतरां दाप्यः इति सिद्धमेवेति । अत्रोच्यते । पुत्रे सत्यन्य ऋक्थग्राही सम्भवति स्त्रीवाग्बन्धरादीनां पुत्रत्वेऽपि ऋक्थहरत्वाभावात् । तथा च स्त्रीवादीननुक्रम्य "भर्तव्यास्तु निरंशकाः" इति वक्ष्यति तथा "सवर्णापुत्रोऽप्यन्यायवृत्तो न ऋभेतेति केषामिति" गौतमवचनात् । अतश्च स्त्रीवादिषु पुत्रेषु सत्स्वन्यायवृत्ते च सवर्णापुत्रे सति ऋक्थग्राही पितृव्यतत्पुत्रयादिः । योषिद्ग्राहो यद्यपि शास्त्रविरोधेन न सम्भवति तथाप्यतिक्रान्तनिषेधः पूर्वपतितक्रतर्णांपकरणाधिकारी भवत्येव । योषिद्ग्राहोयत्सुतऋणं स्त्रैरिणीनामन्तिमं गृह्णाति, यच्च पुनर्भान्तिकृणं प्रथमम्, यथाह नारदः "परपूर्वास्त्रियस्वन्याः सप्त प्रोक्ता यथाक्रमम् । पुनर्भूस्त्रिविधा तासां स्त्रैरिणी तु चतुर्विधा । कन्यैवाऽक्षतयोनिर्या पाणिग्रहणदूषिता । पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्मणा । देवधर्मानपेक्ष्य स्त्री गुरुभिर्या प्रदीयते । उत्पन्नसाहसाऽन्यस्मै सा द्वितीया प्रकीर्त्तिता" । उत्पन्नसाहसा उत्पन्नव्यभिचारा । "असत्सु देवरेषु स्त्री वान्धवैर्या प्रदीयते । सवर्णाय सापराङ्गाय सा तृतीया प्रकीर्त्तिता । स्त्री प्रसृताप्रसृता वा पत्यावेव तु जीवति । कामात् समाश्रयेदन्यं प्रथमा स्त्रैरिणी तु सा । कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषाश्रिता । पुनःपत्यृगृह्यं यावत् सा द्वितीया प्रकीर्त्तिता । क्षते भर्त्तरि तु प्राप्तान् देवरादीनपास्य या । उपगच्छेत् परं कामात् सा तृतीया प्रकीर्त्तिता । प्राप्ता देशाद्विक्रीता क्षुत्पिपासातुरा तु या । तवाहमित्युपगता सा चतुर्थी प्रकीर्त्तिता । अन्तिमा स्त्रैरिणीनां या प्रथमा च पुनर्भुवाम् । ऋणान्तयोः प्रतिकृतं दद्यात्सुते उपाश्रितः" इति । तथान्योऽपि योषिद्ग्राहः ऋणापाकरणाधिकारी तेनैव दर्शितः "या तु सप्रधनैव स्त्री सापत्या वान्यसायेत् । सोऽस्या दद्यादृणं भर्त्तुरुत्सृजेद्वा तथैव ताम्" । प्रकृष्टेन धनेन सह वर्त्तत इति सप्रधना बहुधनेति यावत् । तथा "अधनस्य सापुत्रस्य मृतस्योपैति यः स्त्रियम् । ऋणं वोढुः स भजते सैव चास्य धनं मृतमिति" । पुत्रस्य पुनर्वचनं क्रमार्थम् । अनन्याश्रितद्रव्य इति बहुपुत्रेषु ऋक्थाभावेऽप्यंशग्रहणयोग्यस्त्रैरिणीपाकरणाधिकारोनायोग्यस्यादेरित्येवमर्थम् । "पुत्रहीनस्य ऋक्थिन" इत्येतदपि पुत्रपौत्रहीनस्य प्रपौत्रादयो यदि ऋक्थं गृह्णन्ति तदृणं दाप्यानान्यथेत्येवमर्थम् । पुत्रपौत्रौ तु ऋक्थग्रहणाभावेऽपि दाप्यावित्युक्तम् यथाह नारदः "क्रमाद्भ्यागतं प्राप्तं पुत्रैर्यत्तर्णमुद्धृतम् । दद्युः पौत्रास्तथाच्चिवर्त्तन्ते" इति सर्वं निरवद्यम् । यद्वा योषिद्ग्राहाभावे पुत्रोदाप्य इत्युक्तत्वाभावे योषिद्ग्राहो दाप्य इत्युच्यते । पुत्रहीनस्य ऋक्थिशब्देन योषिदेवोच्यते "सैव चास्य धनं मृतमिति" स्मरणात् "यो यस्य हरते दारान् स तस्य हरते धनमिति" च । ननु योषिद्ग्राहाभावे पुत्र ऋणं दाप्यः पुत्राभावे योषिद्ग्राह इति, परस्परं विरुद्धम् उभयसद्भावे च क्वचिदाप्य इति, नैष दोषः अन्तिमस्त्रैरिणीग्राहिणः प्रथमपुनर्भूग्राहिणः सप्रधनस्त्रीहारिणश्चाभावे पुत्रोदाप्यः । पुत्राभावे तु निर्धननिरपत्ययोषिद्ग्राहो दाप्य इति । एतदेवोक्तं नारदेन "धनस्त्रीहारिपुत्राणामृणभाग् यो धनं हरेत् । पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारी धनिपुत्रयोः" । धनस्त्रीहारिपुत्राणां समवाये यो धनं हरेत् स ऋणभाक् । पुत्रोऽसतोः स्त्रीधनिनोः स्त्री च धनञ्च स्त्रीधने ते विद्येते ययोः तौ स्त्रीधनिनौ तयोः स्त्रीधनिनोः असतोः; यत्र एवर्णभाक् । धनिपुत्रयोरसतोः स्त्रीहार्यवर्णभाक् स्त्रीहार्यभावे पुत्र ऋणभाक् ; पुत्राभावे स्त्रीहारीति विरोधप्रतिभासपरिहारः पूर्ववत् । पुत्रहीनस्य ऋक्थिनः इत्यस्यान्या व्याख्या, एते धनस्त्रीहारिपुत्राः ऋणं कस्य दाप्याः ? इति विवक्षायामुत्तम-

र्णस्य दातुस्तदभावे ततपुत्रादेः पुत्राद्यभावे कस्य दाप्या इत्यपेक्षायामिदमुपतिष्ठते। पुत्रर्क्थानस्य ऋक्थिन इति पत्रा[illegible]व्यक्त नप्तोत्तमर्णस्य य ऋक्थ्यो ऋक्थ्यलक्षणयोग्य सपिण्डादिस्तस्य ऋक्थिनो दाप्याः। तथा च नारदेन "ब्राह्मणस्य तु यद्देयं सान्वयस्य न चाक्षि सः। निर्वापणेन सर्वस्मिन् तदभावेऽस्य बन्धुषु" इत्यभिधायाभिहितम् "यदा तु न सकुल्याः स्युर्न च सम्बन्धिबान्धवाः। तदा ब्राह्मणदेहिभ्यस्तत्सुतस्वस्य विनिर्जिगमेदिति"। अधुना पुरुषविशेषे ऋणस्य ऋणप्रतिषेधनप्रसङ्गादन्यदपि प्रतिषिध्यते। "भ्रातृणामथ दम्पत्योः पितुः पुत्रस्य चैव हि। प्रातिभाव्यमृणं माद्यमविभक्ते न तु स्मृतम्" या०। प्रतिभुवो भावः प्रातिभाव्यम्। भ्रातृणां दम्पत्योः पितापुत्रयोश्च। अविभक्ते द्रव्ये द्रव्यविभागात् प्राक् प्रातिभाव्यमृणं माद्यं न स्मृतं मन्वादिभिः। अपि तु प्रतिषिद्धं साधर्म्यणघनत्वात् प्रातिभाव्यसाक्षित्वयोः पक्षे द्रव्यव्ययावसानत्वात् ऋणस्य चावश्यप्रतिदेयत्वात्। एतच्च परस्वराजनुमत्या अनुमत्या त्वविभक्तानामपि प्रातिभाव्यादि भवत्येव। विभागादूर्ध्वं परस्परानुमतिव्यतिरेकेणापि भवति। ननु दम्पत्योर्विभागात् प्राक् प्रातिभाव्यादिप्रतिषेधो न युज्यते तयोर्विभागाभावेन विशेषणस्यानर्थक्यादविभागाभावश्च आपस्तम्बेन दर्शितः "जायापत्योश्च विभागो विद्यते" इति। सत्यं श्रौतस्मार्ताग्निसाध्येषु कर्मसु तत्फलेषु च विभागाभावो न पुनः सर्वकर्मसु द्रव्येषु च। तथा हि "जायापत्योर्न विभागो विद्यते" इत्युक्त्वा किमिति न विद्यत इत्यपेक्षायां हेतुमत्त्वात् "पाणिग्रहणादि सहत्वकर्मसु तथा पुण्यफलेषु चेति" हि यस्मात् पाणिग्रहणादारभ्य कर्मसु सहत्वं श्रूयते "जायापती अग्निमादधीयातामिति"। तस्मादाधाने सहाधिकारादाधानसिद्धाग्निसाध्येषु कर्मसु सहाधिकारः। तथा "कर्म स्मार्त्तं विवाहाग्नित्यादि" स्मरणात् विवाहसिद्धाग्निसाध्येष्वपि कर्मसु सहाधिकार एव। अतस्त्रीभयविधाग्निनिरपेक्षेषु कर्मसु पत्नीषु जायापत्योः समानोधिकारः सम्पद्यते। तथा पशूनां फलेषु स्वर्गादिषु जायापत्योः सहत्वं श्रूयते "द्यवि ज्योतिरजरमारभेतामिति"। येषु पशुकर्मसु सहाधिकारस्तेषां फलेषु सहत्वमिति बोद्धव्यम्। न पुनः पूर्तानां भर्तुरनुमत्यानुष्ठितानां फलेष्वपि। ननु द्रव्यस्वामित्वेऽपि सहत्वसङ्गम् "द्रव्यपरिग्रहेषु च न हि भर्तुर्विप्रयोगे नैमित्तिकदाने स्त्रीयश्च दृश्यन्ते" इति सत्यं द्रव्यस्वामित्वं पत्न्या दर्शितमनेन न पुनर्विभागाभावः यस्माद्द्रव्यपरिग्रहेषु चेत्युक्त्वा तत्र कारणमुक्तम्भर्तुर्विप्रवासे नैमित्तिकेऽवश्यकर्त्तव्यदानेऽतिथिभोजनभिक्षादानादौ हि यस्मात् स्त्रीयश्च दृश्यन्ते तस्माद्द्रव्यस्वामित्वमस्ति अन्यथा स्त्रीयं स्यादिति तस्माद्भर्तुरिच्छया भार्यायां अपि द्रव्यविभागोभवत्येव न स्वेच्छया यथा यज्ञयति "यदि कुर्यात् समानांशान् पत्न्याः कार्या समांशिकाः" इति। अधुना प्रातिभाव्यं निरूपयितुमाह। "दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते। आद्यौ तु वितथे दाप्यावितरस्य सुता अपि" या० प्रातिभाव्य विश्वासार्थं पुरुषान्तरेण सह समयः, तच्च विषयभेदात् त्रिधा भिद्यते। यथा दर्शने दर्शनापेक्षायामेनं दर्शयिष्यामीति, प्रत्यये विश्वासे मत्प्रत्ययेनास्य धनं प्रयच्छ नायं त्वां वञ्चयिष्यते यतोऽस्यैकस्य पुत्रोऽयमुर्वरापार्यभूरस्य धामवरोऽस्तीति, दाने यद्ययं न ददाति तदानीमहमेव धनं दास्यामीति, प्रातिभाव्यं विधीयत इति प्रत्येकं सम्बध्यते। आद्यौ तु दर्शनप्रत्ययप्रतिभुवौ वितथे अन्यथाभावे अदर्शने विश्वासव्यभिचारे च दाप्यौ राज्ञा प्रस्तुतं (अष्टविकम्)धनसत्तमर्णस्य। इतरस्य दानप्रतिभुवः सुता अपि दाप्याः। वितथे इत्येव शब्देन निर्देशत्वेन वा अधमर्णेऽप्रतिकुर्वति। इतरस्य सुता अपीति वदता पूर्वयोः सुता न दाप्याः इत्युक्तम्। सुता इति वदता न पौत्रा दाप्या इति दर्शितम्। एतदेव स्पष्टीकर्त्तुमाह। "दर्शनप्रतिभूर्यस्य मृतः प्रात्ययिकोऽपि वा। न तत्सुता ऋणं दद्युर्हृद्युदानाय यः स्थितः" या० यदा दर्शनप्रतिभूः प्रात्ययिको वा प्रतिभूर्दिवंगतः तदातयोः पुत्राः प्रातिभाव्यागतं पैतृकम् ऋणं न दद्युः। वस्तु दानाय स्थितः प्रतिभूर्दिवं गतस्तस्य पुत्रा दद्युर्न पौत्राः। ते च मूलमेव दद्युर्न वृद्धिम्। "ऋणं पैतामहं पौत्राः प्रातिभाव्यागतं सुतः। सममेव दद्यात् तत्सुतौ तु न दाप्याविति निश्चयः" इति व्यासवचनात्। प्रातिभाव्यव्यतिरिक्तं पैतामहऋणं पौत्रैः समं यावदुत्कीर्तं तावदेव दद्यान्न वृद्धिम्। तथा तत्सुतोऽपि प्रातिभाव्यागतं पितृऋणं समसमेव दद्यात्तयोः पौत्रपुत्रयोः सुतौ प्रपौत्रपौत्रौ च प्रातिभाव्यायातमप्रातिभाव्यायातं चर्णं यथाक्रममुत्कीर्तवित्तौ न दाप्याविति। यदपि स्मरणम् "स्वादकोवित्तहीनः स्याज्ज्ञानकोवित्तवान् यदि। मूलं तस्य भवेत्तद्देयं न वृद्धिं दातुमर्हतीति" तदपि ज्ञानकः प्रतिभूः स्वादकोऽध-

मर्णः, ऋणको यदि वित्तवान् मृतस्तदास्य पुत्रेण मूलमेव दातव्यं न वृद्धिरिति व्याख्येयम् । यत्र दर्शनप्रतिभूः प्रत्ययप्रतिभूर्वा बन्धकपर्याप्तं गृहीत्वा प्रतिभुज्जीतः तत्पुत्रा अपि तस्मादेव बन्धकात् प्रातिभाव्यायातमृणं दद्युरेव । यथा ह कात्यायनः "गृहीत्वा बन्धकं यत्र दर्शनेऽस्य स्थितो भवेत् । विना पित्रा धनात्तस्मात् दाप्यः स्यात् तद्धनं सुतः" इति । दर्शनग्रहणं प्रत्ययोपलक्षणम् विना पित्रा पितरि प्रेते दूरदेशस्थिते वेति । यस्मिन्नेकप्रतिभू सम्भवत्यन्य कथं दातव्यमित्याह । "बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवोधनम् । एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि" या० । यद्येकस्मिन् प्रयोगे द्वौ बहवो वा प्रतिभुवस्तर्हि विभज्य स्वांशेन दद्युः । एकच्छायाश्रितेषु प्रतिभूषु एकस्याधमर्णस्य छाया सादृश्यं तामाश्रिताः एकच्छायाश्रिताः अधमर्णा यथा कृतस्वद्रव्यदानायस्थितस्तथा दानप्रतिभुवोऽपि प्रत्येकं कृतस्वदानाय स्थिताः एवं दर्शनप्रत्यये च तेषु एकच्छायाश्रितेषु प्रतिभूषु सत्सु धनिकस्योत्तमर्णस्य यथारुचि यथाकामम् । अतश्च धनिको वित्तादिप्रेत्यया स्वार्थं यं प्रार्थयते स एव कृत्स्नं दद्यादुपयतः । एकच्छायाश्रितेषु यदि कश्चिद्देशान्तरं गतस्तत्पुत्रस्य सन्निहितस्तदा धनिकेच्छया स सर्वं दाप्यः मृते तु कस्मिंश्चित् स्वपित्र्यमंशमात्रिकं दाप्यः । यथाह कात्यायनः "एकच्छायाप्रविष्टानां दाप्योयस्तत्र दृश्यते । प्रोषिते तत्सुतः सर्वं पित्र्यमंशं मृते सति" प्रातिभाव्यर्णदानविधिरुक्तः प्रतिभूदत्तस्य प्रतिक्रियाविधिमाह । "प्रतिभूर्दापितो यत्तु प्रकाशं धनिनो धनम् । द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत्" या० । यदृणं प्रतिभूस्तत्पुत्रो वा धनिकेनोपपीडितः प्रकाशं सर्वजनसमक्षं राज्ञा धनिनो दापितो न स्वयंद्विगुण्यलोभेन स्वयमेव दत्तम् । यथाह नारदः ऋणं प्रतिभूर्दद्याद्धनिकेनोपपीडितः । ऋणिकस्तं प्रतिभुवे द्विगुणं प्रतिदापयेदिति" । ऋणिकैरधमर्णैस्तस्य प्रतिभुवस्तद्द्रव्यं द्विगुणं प्रतिदातव्यं स्यात् । तच्च कालविशेषमनपेक्ष्य सद्य एव द्विगुणं दातव्यम् वचनारम्भसामर्थ्यात् । एतच्च स्थिरद्रव्यविषयम् । तच्चेदं वचनं द्वैगुण्यकालं प्रतिपादयति तच्च पूर्वोक्तकालकलाकृताबाधेनाभ्युपपद्यते यथा ज्ञाते स्थिरधनं शुचित्वाबाधेन । अपि च सद्यः सर्वर्णदानपक्षे पशुस्त्रीणां सद्यःसन्नभावान्न तदानमेव प्राप्नोतीति तदसत् "वस्त्रधान्यस्थिरद्यानां चतुस्त्रिद्वि-गुणा परा" इत्यनेनैव कालकलाकृतेन द्वैगुण्यसिद्धेर्द्वैगुण्यमात्रविधान इदं वचनमनर्थकं स्यात् । पशुस्त्रीणान्तु कालक्रमपक्षे सन्नत्वभावे स्वरूपदानमेव । यदा प्रतिभूरपि द्रव्यदानानन्तरं क्रियता कालेनाधमर्णेन संघटते तदा संततिरपि सम्भवत्येव यद्वा पूर्वस्मिन्नसन्नत्वा सह पशुस्त्री योदास्यतीति न किञ्चिदेतत् । अथ प्रातिभाव्यं प्रीतिकृतमतश्च प्रतिभुवा दत्तं प्रातिदत्तमेव न च प्रीतिदत्तस्य याचनात् प्राक्वृद्धिरस्ति यथाह "प्रातिदत्तं तु यत्किञ्चिद्दत्तं न त्वयाचितम् । याच्यमानमदत्तञ्चेद्दत्तं पञ्चकं शतमिति" । अतश्च प्रातिदत्तस्यायाचितस्यापि दानदिवसादारभ्य यावत् द्विगुणं कालक्रमेण वृद्धिरित्यनेन वचनेनोच्यत इति । तदयमत्र अस्यार्थस्य स्वाम्याहूयनादप्रदानेः द्विगुणं प्रतिदातव्यमित्येतावदिह प्रतीयते तस्मात् कालक्रमनपेक्ष्यैव द्विगुणं प्रतिदातव्यं वचनारम्भसामर्थ्यादिति सूक्ष्मम् । प्रतिभूदत्तस्य सर्वत्र द्वैगुण्ये प्राप्ते अपवादमाह "सन्ततिः स्त्रीपशुष्वेव धान्ये त्रिगुणमेव च । वस्त्रे चतुर्गुणं प्रोक्तं रसेष्वष्टगुणस्तथा" या० । स्थिरद्रव्यद्वैगुण्यवत् कालानादरेणैव स्त्रीपश्वादयः प्रतिपादितद्विगुणा दाप्या श्लोकस्तु व्याख्यातएव यस्य द्रव्यस्य यावती वृद्धिः परिकल्पोक्ता तद्द्रव्यं प्रतिभूदत्तं स्वादकेन तया वृद्ध्या सह कालविशेषमनपेक्ष्य सद्यो दातव्यमिति तात्पर्यार्थः । यदा तु दर्शनप्रतिभूः संप्रतिपन्ने कालेऽधमर्णं दर्शयितुमसमर्थस्तदा तदन्वेषणाय तस्य पञ्चत्रयं (अवधिभूतम्) दातव्यम् तत्र यदि दर्शयति तदा मोक्तव्योऽन्यथा प्रस्तुतं धनं दाप्यः; "नष्टस्यान्वेषणार्थन्तु देयं पञ्चत्रयं परम् । यदासौ दर्शयेत् तत्र मोक्तव्यः प्रतिभूर्भवेत् । काले व्यतीते प्रतिभूर्यदि तं नैव दर्शयेत् । निबन्धं दापयेत्तन्तु प्रेते चैष विधिः स्मृतः" इति कात्यायनवचनात् । सन्नत्वे विशेषनिषेधश्च तेनैवोक्तः । "न स्वामी न च वै पत्युः स्वामिनाधिकृतस्तथा । निरुद्धो दस्युभिस्तद्वच्च संदिग्धश्चैव न क्वचित् । नैव कश्चन्नो न मित्रञ्च नचैवान्यान्ववासिनः । राजकार्यनियुक्तश्च ये च प्रव्रजिता नराः । न शक्तो धनिने दातुं दण्डं राज्ञे च तत्समम् । जीवन्त्यापि पितरि यस्य तथैवेच्छाप्रवर्तकः । नाविज्ञातो व्यतीतवृत्तः प्रतिभूः स्वकीयां प्रतीति" सन्दिग्धोऽभिप्रेतः । अन्यत्रवासिनोनैकिकमस्वाचारिणः । इति प्रतिभूविधिः । धनप्रयोगे हौ "विश्वासहेतू प्रतिभूराधिश्च यथाह नारदः । विश्वासहेतू द्वावत्र प्रतिभूराधिरेव चेति" । प्रतिभूर्निरूपितः" जिता०

आधिस्तु विस्तरेणाधिशब्दे ७११ पृष्ठादौ निरूपितः ।

अत्र विशेषः वीरमि० व्यासः "सर्वस्वे भाग आधीतः षष्ठोभागः सहस्रके । निराधाने द्विकायतं मासलाभ उदाहृतः" अत्र आधानपदं प्रतिभुवोऽप्युपलक्षणम् । तत्रैव नारदः । "स्थानलाभनिमित्तं यद्दानमुच्छ्रयणमिष्यते । तत्कुसीदमिति ज्ञेयम् तेन वृद्धिः कुसीदिनाम्" स्थानं मूलधनस्यावस्थानं लाभो वृद्धिः तन्निमित्तं तत्प्रयोजनम् । कुसीदशब्दार्थमाह वृद्धः । "कृतसंवित्सीदतश्चैव निर्विशङ्कैः प्रगृह्यते । चतुर्गुणं वाष्टगुणं कुसीदाख्यमृणाम्मतः" । कृतसंवित्सीदतश्च अधमर्णात् इत्यर्थः । वृद्धौ विशेषमाह स एव । "वृद्धिस्तुर्विधा प्रोक्ता पञ्चधान्यैः प्रकीर्त्तिता । षड्विधान्यैः समाख्याता तत्त्वतस्ता निबोधत । कायिका कालिका चैव चक्रवृद्धिरतोऽपरा । कारिता सशिखा वृद्धिर्भोगलाभस्तथैव च । कायिका कर्म्मसंयुक्ता मासयाम्या तु कालिका । वृद्ध्यै वृद्धिश्चक्रवृद्धिः कारिता ऋणिना कृता । प्रत्यहं गृह्यते या तु शिखा वृद्धिस्तु सा स्मृता । गृहीतोभः फलं क्षेत्रात् भोगलाभः प्रकीर्त्तितः" कर्म्मसंयुक्ता कायिका यत्र बन्धकीकृतस्य गवाश्वादेर्हलवहनादिकं कर्म्म वृद्धित्वेन स्थापितं तत्र सा कायिका । यथाह व्यासः 'दोह्यवाह्यकर्मयुता कायिका सप्तदाहृता" प्रत्यहं गृह्यते या तु शिखा वृद्धिस्तु सा स्मृता । शिखेव वर्द्धते नित्यं शिरस्यैवाभिवर्त्तते । मूले दत्ते तथैवैषा शिखावृद्धिर्निवर्त्तते" । परमवृद्धौ विशेषस्तत्रैव वृद्धः । "शिरस्यै द्विगुणा वृद्धिर्द्विगुणा वस्त्रकुप्यके । धान्ये चतुर्गुणा प्रोक्ता शदवाह्यवेषु च । उक्ता पञ्चगुणा याके बीजे तौ षड्गुणा स्मृता । लवणक्षौमदोषु वृद्धिरष्टगुणा मता । गुडे मधुनि चैवोक्ता प्रयुक्ते चिरकालिके" कुप्यं तपुसीसादि शदः क्षेत्रफलं धान्यस्य पृथग्गृहीतात्तदतिरिक्तं पुष्पफलादि । कात्या० "तैलानाञ्चैव सर्वेषां मद्यानामथ सर्पिषाम् । वृद्धिरष्टगुणा ज्ञेया गुडस्य लवणस्य च" । सर्वेषां सर्वप्रकाराणां सर्वत्रान्वयः । गुडादौ विभक्तिव्यत्ययेन सर्वस्येत्यन्वयः । वसिष्ठः "वज्रमुक्तिप्रवालानां क्षौमस्य रजतस्य च । द्विगुणा तिष्ठते वृद्धिः कृतकालानुसारिणी" कात्या० "मणिमुक्ताप्रवालानां सुवर्णरजतस्य च । तिष्ठतो द्विगुणा वृद्धिः फलकैटाविकस्य च" फलं फलजं कार्पासादि आविकमाङ्गवर्ज्यात् कैटं कीटोद्भवं पट्टकृमादि आविकं कम्बलादि । वसिष्ठः "ताम्रायःकांस्यरीतीनां त्रपुणः सीसकस्य च । त्रिगुणा तिष्ठतो वृद्धिः कालात् चिरकृतस्य तु" विष्णुः "अनुक्तानां त्रिगुणा" । देशाचारभेदादुक्तायाः सर्वप्रकारवृद्धेरन्यथात्वमाह नारदः "ऋणानां सार्वभौमोऽयं विधिर्वृद्धिकरः स्मृतः । देशाचारस्थितिस्त्वन्या यत्रर्णमवतिष्ठते । द्विगुणं त्रिगुणञ्चैव तथान्यस्मिंस्तुरगुणम् । तथाष्टगुणमन्यस्मिन् तत्र देयेऽवतिष्ठते" । द्रव्यभेदेऽन्यद्वृद्धिमाह वृद्धः० "तृणकाष्ठेष्टकाक्षत्रकिण्वचर्म्मास्थिवर्म्मणाम् । हेतुपुष्पफलानाञ्च वृद्धिस्तु न निवर्त्तते । किण्वं सुराद्र्योपकरणं द्रव्यविशेषः । वसिष्ठः "दन्तचर्म्मास्थिपट्टकाणां मृण्मयानां तथैव च । अल्पया वृद्धिरेतेषां पुष्पमूलफलस्य च" पुष्पादौ पूर्वापरविरोधः अधमर्णयत्नमेलानमेताभ्यां समाधातव्यः । शिखावृद्ध्यादौ वृद्धेरत्ययमाह वृद्धः० "शिखावृद्धिं कालिकाञ्च फलभोगं तथैव च । धनी तावत् समादद्यात् यावन्मूलं न शोधितम्" "क्वचिदप्यकृतेऽपि वृद्धिभवतीत्याह" विष्णुः "योऽगृहीत्वा ऋणं पूर्वं स्वोदास्यामीति सामकम् । न दद्यात्तोभतः पश्चात् तदृणादृद्धिमाप्नुयात्" सामकं समयेवाद्यदिकं स्वोदास्यामीति प्रतिश्रुत्येत्यः स इति पदं दानकालोपलक्षणम् । अङ्गीकाराभावे क्वचित् विषये वृद्ध्यभावमाह संवः० "न वृद्धिः स्त्रीधने लाभे निःक्षिप्ते च यथास्थिते । सन्दिग्धे प्रतिभावे च यदि न स्यात् स्वयं कृता" स्त्रीधने "अधिविन्नक्षियै देयमाधिवेदनिकं समम्" इत्युशनोवाक्यात् स्त्रियै दातव्ये धने स्त्रीशुल्कधने च लाभे लभ्यादाये वाणिज्याद्युत्पन्ने आये च कालातिक्रमेऽपि न वृद्धिः । कात्या० "धर्म्मकृत्यासवद्यूते पण्यमूल्ये च सर्वदा । स्त्रीशुल्केषु न वृद्धिः स्यात् प्रातिभाव्यागतेषु च" धर्म्मकृत्ये प्रतिश्रुतायां, द्यूते कृतसंपराजितार्थे च सुरापाणार्थमृणे क्रीतद्रव्यस्य पण्यस्य मूल्ये प्रातिभाव्यागतेषु सन्दिग्धप्रातिभाव्यागतेषु प्रागुक्तसंवर्त्तवाक्यैवाक्यत्वात् अत्र सर्वदेति विशेषणम् याचनेऽपि न वृद्धिरिति सूचनार्थम् । व्यासः "न धर्म्मे चिरस्थं च मद्यशुल्कप्रतिश्रुतम्" । शुल्कं चट्टादिदेयं राजकरादि । पूर्त्तावधौ ऋणदानासामर्थ्ये विशेषमाह मनुः "ऋणं दातुमशक्तोयः कर्त्तुमिच्छेत् पुनः क्रियाम् । स दत्त्वा निर्जितां वृद्धिं करणं परिवर्त्तयेत् । अदर्शयित्वा तत्रैव क्रियाणं परिवर्त्तयेत् । यावती सम्भवेद्वृद्धिस्तावतीं दातुमर्हति । चक्रवृद्धिं समारूढो देशकालव्यवस्थितः । अतिक्रामन् देशकालौ न तत्फलमवाप्नुयात्" । निर्जितां व्यवहाराधीनत्वं नीताम् । करणमन्यल्लेख्यं कुर्यात् । अदर्शयित्वा

सान्निध्यो देयद्रव्यमदर्शयित्वैव व्यवसर्जनं मया एतावती वृद्धिरित्यन्यूनमित्येवमङ्गीकारयेन देयमृणं परिवर्त्तयेत् सवृद्धिकत्वेनाधिकतया अन्यथाभावना।दापयेत् तदेव पत्रे सान्निध्यलेख्यम् एतच्च यावतीं वृद्धिं तदा दातु मङ्गीकरोति तावतीं दत्त्वा लेख्यं कार्यं तथाकृते सति द्विगुणातिक्रमेण वृद्धिर्भवतीत्यर्थः तथाकृते च वृद्धेरपि वृद्धिः तस्य सवृद्धिकस्य मूलस्थानीयत्वात् यथाह वृद्धः "पूर्व्वाधौ यान्नलाभमृणमुद्ग्राहयेद्धनी। कारयेद्वा क्रियां लेख्यं चक्रवृद्धिव्यवस्थया। द्विगुणोपरि सा चक्रवृद्धिः प्रवर्त्तते। भोगलाभस्तथा तत्र मूलं स्यात् सोदयमृणम्" ऋणग्रहणोपायाश्च मिता० याज्ञ० उपायशब्दे च १२५५ पृ० विस्तरेण दर्शिताः। अवधिमध्ये सवृद्धिकसर्व्वदानासम्भवे क्रमेण दाने सलेख्यप्रयोगे लेख्यपृष्ठे लिखितैव दानप्रकारमाह याज्ञ०। "लेख्यस्य पृष्ठेऽभिलिखेद्दत्त्वार्द्धर्द्धिकं धनम्। धनी वोपगतं दद्यात् खड्गलाञ्छनपरिचिह्नितम्" उपगतशब्दे १२०१ पृ० व्याख्यातम्। विष्णुः "असमग्रदाने लेख्यासन्निधाने चोत्तमर्णः स्वलिखितं दद्यात्"(रसिद) प्रत्येयपत्रादाने विशेषमाह नारदः। "गृहीत्वोपगतं दद्यादृणिकायोदयं धनी। अदद्याच्चमानश्च येषड्भागमवाप्नुयात्" "उदयं प्राप्तम्। सर्व्वस्वदाने तु ऋणलेख्यच्छेदनमाह "दत्तर्णं पाटयेल्लेख्यं शुद्धौ वान्यत्तु कारयेत्। सान्निध्यञ्च भवेद्यत्र तत्र तद्दातव्यं ससान्निध्यम्" या०।

तत्रायत्नो विशेषमाह कात्या० "धनदानासहं बुद्ध्वा स्वाधीनं कर्म कारयेत्। अयत्नो बन्धनागारे प्रवेश्यो ब्राह्मणाद्दते"। अशुभकर्मकारयं बन्धनागारप्रवेशनञ्च राजावेदनपूर्वकमेव कार्य्यमन्यथा दण्डमाह कात्या०। "यदि स्यादादिष्टमशुभं कर्म कारयेत्। प्राप्नुयात् साहसं पूर्वमृणान्मुच्येत चर्त्तिकः" "अनादिष्टम् राज्ञाऽनिवेदितम्। अवधाद्दापयेत् विशेषयति कात्या० "ऋणं तु दापयेत् क्षत्रम् यदि स्याद्विक्रियद्वयं। दुर्विधार्त्तश्च धूर्त्तश्च नान्यथा दापयेत् क्षतम्। व्यसनाभिप्लुते पुत्रे बाले वा यत् प्रदीयते। द्रव्यङ्कुटुम्बदापयेत्तं तस्याभावे पुरस्कृतम्" कुटुम्बार्थे कृतर्णे विशेषमाह वृद्धः "पितव्यभ्रातृपुत्रस्त्रीदासधिष्ण्यानुजीविभिः। यत् गृहीतं कुटुम्बार्थे तद्धि गृह्णीत दातृकम्" इति। नारदः "शिष्यान्तेवासिदासस्त्रीप्रेष्य ज्ञातिकरैश्च यत्। कुटुम्बहेतोर्यत् क्षिप्रं दातव्यं तत कुटुम्बिनां" शिष्यः वेदशिष्यः अन्तेवासी शिल्पशिष्यः।

"कुटुम्बार्थमृणं दर्शयति" कात्या० "कुटुम्बार्थमयत्नेन गृहीतं व्याधितेन तथा। उपप्लवनिमित्तं च विद्यादापत्कृतन्तु तत्। कन्याप्रवाहिते चैव प्रेतकार्य्येषु यत् कृतम्। एतत् सर्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः"। पुत्रकृते विशेषमाह नारद०"पितरैव नियोगाद्वा कुटुम्बभरणाय वा। कृतं वा यदृणं कुर्य्यात् पुत्रस्य तत्पिता"। स्त्रियाः पतिकृतर्णदाने विशेषमाह कात्या०"भर्त्तुकामेन या भर्त्रा उक्ता देयमृणं त्वया। प्रतिपन्ना च सा दाप्या धनं यद्यास्थितं स्त्रियाम्"। जार० "दद्यादपुत्रा विधवा नियुक्ता या सपूर्वजा। या वा तद्विक्रयमादद्यात् पतोरिक्थमृणं ततः"। मातुर्निर्धनत्वेऽपि तत्कृतर्णं पुत्रेण देयमाह" नारदः "पुत्रिणी तु सवृत्तस्थञ्च पुत्रं स्त्री यान्यमाश्रयेत्। तस्या ऋणं हरेत् सर्वं निःस्वाया पुत्रएव तु"। अधनत्वे तासहोढैव दद्यात' यथाह कात्या०"बालपुत्राधिकार्था स्यात् भर्त्तारं वान्यमाश्रिता। आश्रितस्तमृणं दद्यात् बालपुत्राविधिः स्मृतः"। अविभक्तर्णे विशेषमाह विष्णुः अविभक्तैः कृतमृणं यस्मिन्नृतिस दद्यात्"। नारदः "पितव्येणाविभक्तेन भ्रात्रा वा यदृणं कृतम्। भ्राता वा यत् कुटुम्बार्थे दद्युस्तत् सर्व बान्धवैः" अविभक्तकाले कुटुम्बार्थे कृतमृणं विभक्तैरपि देयमाह मनुः। "गृहीता यदि नष्टः स्यात् कुटुम्बार्थे कृतोव्ययः। दातव्यं बान्धवैस्तत् स्यात् प्रविभक्तैरपि स्वतः"। कामकृतमसमाह कात्या०। "लिखितं सक्रकं वापि देयं यत्तु प्रतिश्रुतम्। परपूर्वस्त्रियं तत्तु विद्यात् कामकृतं ऋणम्" सक्रकं लेखरहितम्। अनेकधनिसमवाये विशेषमाह कात्या०। "नानर्णसमवाये तु यद्यात् पूर्वकृतं भवेत्। तत्तदेवाग्रतो देयं राज्ञः स्याच्छ्रोत्रियात् परम्। एकाहे लिखितं यत्र तत्र कार्य्यन्तु समम्। यद्गृणं रक्षणं लाभमन्यथा तु यथाक्रमम्"। भिन्नदिवसे कृतं श्रोत्रियपूर्वकं देयम्। एकदिनकृतनानर्णे समवाये युगपद्देयम् अनाढ्यत्वबहुत्वयोस्तदनुसारेण भागं परिकल्प्य देयमित्यर्थः। अत्र विशेषमाह कात्या "यस्य द्रव्येण यत्पण्यं साधितं यो विभायेत्। तदृद्रव्यमृणिकेनैव दातव्यं तस्य नान्यथा" यदुत्तमर्णात् द्रव्यं गृहीत्वा वाणिज्यादिकं करोति तस्मात् लब्धधनं तस्मै एव देयं तत्सत्त्वे नान्यस्य इत्यर्थः। पैतामहपित्र्ययोरृणे देयतामाह वृद्धः "पित्र्यं पूर्वमृणं देयं पश्चात्तैतीयमेव च। तयोः पैतामहं पूर्वं देयमेवमृणं

सदा । पितर्यं विद्यमाने तु न च पुत्रो धनं हरेत् । देयं तद्धनिके दत्त्वा मृते पौत्रैस्तु दाप्यते" । एवं मातर्यपि "मातुर्दुहितर शेषमणात्राभ्य ऋतेऽन्वयः" या० उक्तेः । पुत्रपौत्रादिभेदेन ऋणे विशेषमाह विष्णुः "धनमाहिणि प्रेते प्रव्रजिते वा द्विदशा समाः प्रोषिते वा ततपुत्रपौत्रैर्देयं नातः परमनीशुभिः" प्रेते अप्राप्त व्यवहारस्य विंशतिवर्षोत्तरं, संन्यस्ते प्रोषिते च सर्वस्यैव तत्कालोत्तरं देयम् । एतच्च अप्राप्तधनस्य गृहीतधनस्य तत् ऋणाहेयता ऋणावशेषधनस्यैव प्रागुक्तशास्त्रसिद्धे । ऋणाप्रकरणाभावे दोषमाह व्यासः "तपस्वी वाग्निहोत्री वा ऋणवान् म्रियते यदि । तपश्च वाग्निहोत्रञ्च सर्वं तद्धनिनो भवेत् । अन्यकृतपापस्यान्यत्र संक्रमाप्रसङ्गेऽपि विन्दोर्धनदातृ तेन तत्पुण्यनाशकतेति पापेऽधिनेऽपि । कात्या० "—ऽ राद्धिकमादाय स्वामिने न ददाति यः । क तस्य दासो भवति स्त्री पशुर्वा जायते ऽरुहे" तथा नारदः "याच्यमानं न ददाद्यः ऋणं वापि प्रतिग्रहम् । तद्दद्यं वर्द्धते तस्य यावत् कोटिगतं भवेत् । ततः कोटिगते पूर्णे वेष्टितस्तेन कर्मणा । अस्य सुरो हणे दासो भवेज्जन्मनि जन्मनि" तेनमानपक्रियाया ऽऋणपत्त्यादियोनिप्राप्तिहेतुरुद्दद्यजनकत्वम् । ऋणप्रकरणेन पापहेतुः तच्छोधनस्य तत्साधकतेति गदाधरः आह च ।

ऋणावत् त्रि० ऋण-मतुप् दीर्घश्च । ऋणवति । "ऋणावानं न पतयन्त सर्गाः" ऋ०१,१६६,७ । ऋणायानऋणावत्तम्" भा० । "ऋणावा विंशद्धनम्" ऋ०१०,२४,१० ।

ऋणान्तक पु० ऋणमन्तयति अन्ति-नामधा० ण्वुल् । मङ्गल्यपद्मे यद्धरत्ना०तत्सेवने ऋणमोचनात्तस्य तथात्वम् ।

ऋणापकरण न० ६त० । ऋणशोधने ऋणापनयनादयोऽध्याय ।

ऋणिक त्रि० ऋणमस्यास्ति ठन् । ऋणयुक्ते (खातक) "द्विगुणं प्रतिदातव्यमृणिकैरुक्तमृद्धनम्" या० ।

ऋणिन् त्रि० ऋणमस्यास्ति इनि स्त्रियां ङीप् । ऋणयुक्ते (खातक) "ऋणी न स्यात् यथा पिता" स्मृ० । "समाप्तेऽर्थे ऋणी नाम स्वस्वामिने निवेदयेत्" । "जायमानोवै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणी भवति" श्रुतिः ।

ऋणिधनिचक्र न० तन्त्रोक्ते षाड्गुण्यभाग्यभक्षणार्थे चक्रभेदे तच्चक्रलेखनप्रकार उक्तः तन्त्रसारे "अथ ऋणिधनिचक्रम् । तद्यथा लिखेत् । प्रथमं पञ्चकोष्ठेषु ह्रस्वदीर्घक्रमेण तु । ह्रयं ह्रयं लिखेत् तत्र विचारे खलु साधकः । शेषेष्वेकैकशोवर्णान् क्रमतस्तु लिखेत् सुधीः । षट्कं लकालवियदग्निसप्तकं वेटखाकाशशून्यदहना खलु साध्यवर्णाः । युग्मद्विपक्षवियदम्बरयुक्तयमाङ्घ्र्योभाब्धिवेदयमिनः खल साध्यकार्णाः । नामाद्यक्षरादकठवाद्यजभक्तशेषं ज्ञात्वोभयोरधिकशेषमृणं धनं स्यात्" । अस्यार्थः साध्यवर्णान् स्वरव्यञ्जनरूपेण पृथक्कृत्वान षट्कात्षाड्गुण्येन । गुणयित्वा (मिलितान्) तथा साधकनामाक्षराणि स्वरव्यञ्जनरूपेण पृथक्कृत्वानि युग्माद्यैरष्टभिर्गुणयित्वा (सकलनया) अष्टसंख्याभिर्भक्त्वा उभयो साध्यसाधकयोरधिकम ऋणं शेषं धनं ज्ञात्वा मन्त्रं दद्यात् । मन्त्रशेषणे भवति तदा मन्त्रः शुभदायको भवति धनी चेन्न । तन्त्रान्तरे "मन्त्रस्तृणे शुभफलोऽप्यशुभो धनी च तुल्यो यदा समफलः कथितो मुनीन्द्रैः" । अन्यच्च "शून्ये मृत्युमवाप्नोति धने च विफलोभवेत् । ऋणे तु प्राप्तिमात्रेण सर्वसिद्धिस्तु जायते तथा हृदयामले "मन्त्रे पदाधिकाङ्कः स्यात्तदा मन्त्रं जपेत् सुधीः । समेऽपि जपेन्मन्त्रं न जपेत् तु ऋणाधिके । शून्ये मृत्युं विजानीयात् तस्मात् शून्यं विवर्जयेत् । "तथा इन्दुर्लेखनेत्रं रविपक्षदशकुलदाङ्ग्र्यायुधाश्वत्रं भगणितानथ साध्यवर्णान् । द्विगुणं गजरसुतिगजाग्निसुनीषुवेदैः षडवस्थिभिस्तु गणितं तथ साधकार्णान्" इदन्तु उपलक्षणं विष्णुविषयम् रामार्चनचन्द्रिकाधृतत्वादिति केचित् । यस्तुतस्तु पूर्वस्यैव विवरणं तथा हि इन्दुर्लेखनेत्रात्तदनन्तरं "नामार्णकोष्ठाङ्कमथाभिहन्यात् एकादिषड्गुणितमेव" । व्याख्यं हृदयामले "साध्याङ्कान् साधकाङ्कांश्च पूरयेदुपरिसंख्यया । गुणिते तु गुणैरष्टाभिर्यत्क्षेपं जायते स्फुटम् । तद्दद्यं ऋणमाख्यात्र एकादिषट्कहस्थितम्" इत्युक्त्वा षट्कालेत्याद्युक्तम् । प्रकारान्तरं यथा "नामाद्यक्षरमारभ्य यावत् मन्त्रादिमाक्षरम् । लिखित्वा स्वरैर्भिन्नं तदन्यद्विपरीतकम्" । अस्यार्थः साधकनामाद्यक्षरतोगणनया यावत् मन्त्रादिमाक्षरम् तत्संख्यां लिखित्वा स्वरभिन्नं कृत्वा अधिकम् ऋणं शेषं धनं ज्ञात्वा । तदन्यद्विति मन्त्राद्यक्षरमारभ्य यावत् साधकाद्यक्षरं भवेत् तावत् संख्यां स्वरयुक्तां कृत्वा लिखित्वेत् । अन्यच्च 'साध्यनाम द्विगुणितं साधकेन समन्वितम् । अष्टभिश्च हरेच्छेषं तदन्यद्विपरीतकम्" । अस्यार्थः साध्यनामस्वरव्यञ्जनभेदेन द्विगुणीकृत्य साधकनाम्ना स्वरव्यञ्जनभेदेन मिलितं कृत्वा अष्टभिर्हरेत् अधिकम् ऋणं शेषं धनम् । तदन्यद्विति साधकनाम स्वरव्यञ्जनभेदेन

द्विगुणीकृत्य साध्यं न युक्तं कृत्वा अष्टभिर्हरेत् । नामप्रकृतिप्रकारमाह पिङ्गलामते । "प्रसिद्धं यद्भवेन्नाम किं वास्य जन्मनामतः । यज्ञानां पुष्पपातेन गुरुणा यत् कृतं भवेत् । लोकप्रसिद्धमथ वा माता पिता तथा कृतम्" । यामले "सुप्तोजागर्त्ति येनासौ दूरस्थस्य प्रभाषते । वदत्यन्यमनस्कोऽपि तन्नाम याज्ञमत्र तु" । सनत्कुमारार्चे "पितृमातृकृतं नाम लब्धा यमादिदेवकान् । अ(आ)वर्णञ्च ततो विद्वान् चक्रेण योजयेत् क्रमात्"

ऋत गतौ जुहोत्यादौ सौत्रः सक०सेट्सार्वधातुके वैयङ् आत्म० आर्द्धधातुके वा वैयङ् वैयङभावे पर० । ऋतीयते ऋतीयीत ऋतीयताम् आर्त्तीयत । आर्त्तीयिष्ट आर्त्तीत् । णौयाम्—अभ्यर्च आर्च चक्रे आनर्त्त । ऋतीयिता-आर्त्तिता । ऋतीयिषिष्ट ऋत्यात् । ऋतायिष्यते आर्त्तिष्यति । आर्त्तीयिष्यत आर्त्तिष्यत् । ऋतीयमानः भावे क्य । ऋतीया । "तस्मात्तीर्थेरन् न योषैवं विद्वान् नस्तीर्थमृतीयिष्यं द्विषतां करोति" शत० २,१,२,१ । ते ऋत्तीयमाने ऊचतुः २,६,२,१ । यद्वै सेनायां च समितौ चर्त्तीयन्ते" ८,६,१,१६ ।

ऋत न० ऋ-क्त । "ऋतसुब्भ्यामि क्षेत्रे" सिद्धौ ब्राह्मणस्य १उपजीव्यवृत्तिभेदे २मोक्षे, ३जले, "तन्न ऋतं पातु शतशारदाय" ऋ० ७, १०१,६ । "ऋतसदकम्" भा० । "न गावो नक्षन्नृतं जरितारस्त इन्द्र" ऋ०७,२१,४। "ऋतसदकम्" भा० "ऋतस्य धाराः सुदुघा दुहानाः" ऋ० ७,४१,४ "गोजा ऋजा अविजा ऋतजम्" ऋ०४,४०,५ । ४ कर्मफले "ऋतं पिबन्तौ सुकृतस्य लोके" श्रुतिः ५ सुप्रिये वाच्ये ६ मानसादिसत्ये च । ७दीप्ते ८पूजिते च त्रि० । ९यज्ञे पु० "पीतये चारुमृताय पीतये" ऋ० १,१, १७,२ । "ऋताय यज्ञाय" भा० । "चारु ऋताय पीतये ६,१७,८ । "ऋताय यज्ञाय"भा०१०सूक्ष्ये पु० । "एष ते योनिर्ऋतायुभ्याम्" यजु०७,१० "ऋतायुभ्यां मित्रावरुणाभ्याम् । ऋतयुरिन्द्र ऋतयुर्वरुण" वेददी० । "ब्रह्म वा ऋतं ब्रह्म हि मित्रो ब्रह्म क्षत्रं वरुण एवायुः" शत०ब्रा०४,१,४,१० । ११आदित्ये न० । "ऋतं सत्यमृ० सत्यम्" यजु० ११,४७, "ऋतमादित्यः" वेददी० । ऋतमिति सत्नाख्यमिति त न्याय्यम् "ऋतन्तु सत्यब्रह्मणी" अथर्वभाष्योक्तेः १२परब्रह्मणि । ऋतमक्षरं ब्रह्म सत्यं स्थानमनलकम्" ऋ० १२सत्ये च वाक्यादौ । "ऋतं वाचमृतां वर्त्तुमर्हसि त्वमरिन्दम !" भा० आश्व० ६७ । "तस्मात् साक्षात् वदेदृतम्" "साक्षं पृच्छेदृतं द्विजान्" मनुः । "सर्वमेतदृतं मन्ये यन्मां वदसि केशव !" गीता १४ऋतुहति च त्रि० । १५ऋतदेवनामके देवभेदे पु० । "ऋतस्य हि शुरुधः सन्ति" ऋ० ४,२३,८ "ऋतस्य ऋतदेवस्य" भा० । "गर्भमृतस्यतिः" ऋ० ६, ४८,५ । "ऋतस्य यज्ञस्योदृक्षस्य वा पतिः" भा०पृषो० सुडागमः "ऋतविद्भि सत्यः" ऋ० १,१४५,५ । "ऋतस्य यज्ञस्य जलस्य वा चित् चेतयिता ज्ञाता" भा० । १६वसुकर्षिभेदे "ऋतस्य सत्यस्य ध्रुवस्य वरुणस्य" यजु०१७,८२ ।

ऋतजित् पु० ऋतं जयति जि-क्विप् तुँक् । १यज्ञभेदे । "त्वष्टा च जगदग्निश्च कम्बलोऽथ निलोत्तमा । ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रश्च सत्तमः । माघमासे वसन्त्येते सप्त मैत्रेय ! भास्करे" विष्णु० १०अ० । "ब्रह्मापेतो ब्रह्मराक्षसः ऋतजित् यज्ञभेदः" श्रीधरः । २यज्ञजयिनि त्रि० "ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च अन्तिमित्रश्च दूरेऽमित्रश्च गणः" यजु० १७,८३ । अयञ्चाग्नेर्धामप्रियभेदः "सप्त तेऽग्ने ! समिधः, सप्त जिह्वाः, सप्तऋषयः, सप्तधामप्रियाणि । सप्त होत्राः सप्तधा त्वा यजन्ति । सप्त योनीरापृणस्व घृतेन स्वाहा" यजु० १७,७६ इत्युपक्रम्य "अग्नेः समिधादिसप्तसप्तकोपक्रमेषु धामप्रियत्वोपलम्भे तस्याभिधानात् ।

ऋतद्युम्न त्रि०ऋतं द्युम्नं कीर्त्तिर्दीप्तिर्यस्य । १सत्येन दीप्यमाने २सत्ययज्ञे च । "एतं वदन्तृतद्युम्न! सत्यं वदन् ऋतध्वमेनं !" ऋ० ६,११२,४ । "हे ऋतद्युम्न ! ऋतेन दीप्यमान ! सत्ययज्ञ ! वा" भा० ।

ऋतधामन् पु० ऋतं धामास्य । १विष्णौ त्रिका० । "ऋतं प्रियशब्दं सामगानं धाम स्थानमस्य । २सामगानस्थानयुक्ते त्रि० "ऋतधामासि सुज्योतिः" यजु०५,३२ । "ऋतं सामगानं धाम स्थानमस्याः औदुम्बर्याः" वेददी० ऋतं सत्यमविनश्वरं स्थानमस्य । ३अविनश्वरस्थानयुक्ते त्रि० । "ऋताबाऽऋतधामानिः" यजु० १८,३८ । ४इन्द्रभेदे स च द्वादशमन्वन्तरीयः इन्द्रभेदः । "भविता द्वादशस्यर्णौ राजन् द्वादशको मनुः । ऋतधामा च देवेन्द्रोदेवाश्च हरितादयः" भाग०८,१३,१३ । ५यदुवंश्ये नृपभेदे । "कङ्कस्य कर्णिकायां वै ऋतधामाजयावपि" भाग०९,२,२३ ।

ऋतध्वज पु० १ब्रह्मर्षिभेदे । "कुमारोनारद ऋभुरित्युपक्रम्य" "हिरण्यनाभः कौशल्यः श्रुतदेव ऋतध्वजः । एते परे च द्विजेयास्तन्निष्ठामात्रतेवतः" भाग० ६,१५,११ । २राजर्षौ च तत्र कथने "मन्युर्मनुर्महिनसोमहान् शिव ऋतध्वजः

ऋषरेता भव कामो वामदेवो ऋतव्रत" भाग० २,१२,१० ।

ऋतनि त्रि० ऋतं जलं यत्तं वा नयति नी+क्विप् वेदे नि० ह्रस्वः । ऋत्विजे तस्य जलदायकत्वेन उदयेन यज्ञप्रवर्त्तकत्वेन च तथात्वम् । "यो राजभ्य ऋतनिभ्यो ददाश" ऋ० २ २७,१२ । लोके तु ऋतनीरित्येव ।

ऋतपर्ण सूर्यवंश्ये नृपभेदे । "भगीरथसुतो राजा" इत्युपक्रम्य "अयुताजितसुतस्य मित्रसहस्य मदयन्त्यां । दिव्याक्षहृदयज्ञोऽयं राजा नलसखो बली । ऋतपर्णऋतश्वामीत्तर्त्तपर्णमहीपति" हरिवं० ११ अ० । तस्य च नलेन सख्यमक्षहृदयत्वेषु भा० व० ७२ अ० दर्शितं यथा "यदासक्तो नलेनाथ तदा भाङ्गासुरिर्नृप । आमसादवने राजन् ! फलवन्तं विभीतकम् । तं दृष्ट्वा वार्ष्णेयः राजा त्वरमाणोऽभ्यभाषत । नलस्मि ऋत ! पश्य त्वं सङ्ख्याने परं बलम् । सर्वं सर्वेण जानाति सर्वज्ञो नास्ति कश्चन । नैकत्र परिनिष्ठास्ति ज्ञानस्य पुरुषे क्वचित् । इक्षोरक्षिणी यानि पत्राणि फलान्यपि च वार्ष्णेय ! । पतितान्यपि यान्यत्र तत्रैकमधिकं शतम् । एकमत्राधिकं पत्रं फलमेकञ्च वार्ष्णेय । पञ्चकोट्योऽथ पत्राणां द्वयोरपि च शाखयो । प्रविचिन्त्यस्य शाखे द्वे यास्याभ्यां प्रयाखिलो । व्याप्ता फलसहस्रे द्वे पञ्चोनं शतमेव च । ततो रथमवाप्य राजान वार्ष्णेयोऽब्रवीत् । परोक्षमिव मे राजन् ! कथयसे शत्रुकर्षण ! । प्रत्यक्षमेतत कर्त्तास्मि यातयित्वा विभीतकम् । अथात्र गणिते राजन् ! विद्यते न परोक्षता । प्रत्यक्षं ते महाराज ! यातयिष्य विभीतकम् । अहं हि नाभिजानामि भवतेवं न वेति वा । सङ्ख्यास्यामि फलान्यस्य पश्यतस्ते जनाधिप । मुहूर्त्तमपि वार्ष्णेयो रश्मीन् यच्छतु वाजिनाम् । तमब्रवीन्नृप ऋत नायं कालो विलम्बितुम । वार्ष्णेयत्रवीदेनं परं यत्नं समास्थित । प्रतीक्षस्व मुहूर्त्तं त्वमथ वा त्वरते भवान् । एष याति गिरः पन्था याहि वा स्वैर्य । सारथिः । अब्रवीत्तुपर्णस्तु सान्त्वयन् कुरुनन्दन ! । त्वमेव यदा नान्यो ऽस्ति पृथिव्यामपि वार्ष्णेय ! । त्वत्कृते वासुमिच्छामि विदर्भा दयितो यदि । शरणं त्वा प्रपन्नोऽस्मि न विघ्नं कर्त्तुमर्हसि । कामञ्च ते करिष्यामि यत्ना वक्ष्यसि वार्ष्णेय ! । विदर्भा यदि यात्वात्मा सूर्यं दर्शयितासि मे । अथात्रैव हृषीकेश सङ्ख्याय च विभीतकम् । ततो विदर्भा यास्यामि कुरुश्रेष्ठं यथो मम । अकामं इव तं राजा गणयस्वेत्युवाच ह । सोऽवर्तार्य रथात्सूर्यं यातयामास तं द्रुमम् । ततः स विस्मयाविष्टो राजानमिदमब्रवीत् । गणयित्वा यथोक्तानि तावन्त्येव फलानि च । यत्सङ्ख्यातमिदं राजन् ! हृदयानस्मि ते बलम् । श्रोतुमिच्छामि ते विद्यां यदेतज्ज्ञायते नृप ! । तस्याश्च ततो राजा त्वरितो गमने नृपः । विस्मयाविष्टहृदयश्चक्रे सङ्ख्याने च विस्मयम् । वार्ष्णेयस्तमथाचाथ दृष्ट्वा विद्यामिमां मम । मत्तोऽपि चाक्षहृदयं गृहाण पुरुषर्षभ । ऋतुपर्णस्ततो राजा वार्ष्णेयं कार्यगौरवात् । हयज्ञानस्य लोभाच्च तं तथेत्यब्रवीद्वच । यथोक्तं त्वं गृहाणेदमक्षाणां हृदयं परम् । निक्षेपो मेऽस्त्वहृदयं स्थिरं तिष्ठतु वार्ष्णेय ! । नलस्य वार्ष्णेयश्चाप्यृतुपर्णस्य चाश्वविद्यां ततः, उक्तं यथा "ऋतपर्णोऽपि शुश्राव वार्ष्णेयश्चिन्नं नलम् । दमयन्त्या समायुक्तं जहर्ष च नराधिपः । तमानाय्य नलं राजा क्षमयामास पार्थिवम् । स च तं क्षमयामास हेतुभिर्बुद्धिसम्मतैः । स सत्कृतो महीपालो नैषधं विस्मितानतः । उवाच वाक्यं तत्त्वज्ञो नैषधं वदतां वरः । दिष्ट्या समेतो दारैः स्वैर्भवानित्यभ्यनन्दत । कञ्चित्तु नापराधं ते ऋतवानस्मि नैषध ! । अज्ञातवासं वसतो मनुष्येषु वसुधाधिप ! । यदि वा बुद्धिपूर्वाणि यद्बुद्ध्यापि कानिचित् । मया कृतान्यकार्याणि तानि त्वं क्षन्तुमर्हसि । नल उवाच । न मेऽपराधं ऋतवांस्त्वं खल्वपि पार्थिव ! । कृतेऽपि च न मे कोपः क्षन्तव्यं हि मया तव । पूर्वं हृदयि सखा मेऽसि सम्बन्धी च जनाधिप ! । अतः कर्त्तुमर्हसि भूयस्त्वं प्रीतिमाहर्तुमर्हसि । सर्वकामैः सुविहितैः सुखमक्षोषितस्त्वयि । नतथा स्वगृहे राजन् ! यथा तव गृहे सदा । इदञ्चैव हृयज्ञानं त्वदीये मयि तिष्ठति । तदुपाहर्त्तुमिच्छामि मन्यसे यदि पार्थिव ! । एवमुक्तो ददौ विद्यामृतपर्णाय नैषधः । स च ताः प्रतिजग्राह विधिदृष्टेन कर्म्मणा । दत्त्वा चाक्षहृदयं राजन् ! भाङ्गासुरिर्नृप ! । निषधाधिपतेश्चापि दत्त्वाक्षहृदयं नृप !" । भा० व० ७५ अ० । "कर्कोटस्य नागस्य दमयन्त्या नलस्य च । ऋतपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनम्" भा० "ऋतपर्णमाहतम्" नैष० ।

ऋतपेय पु० ऋत खगादिफलं पेयं भोग्यमस्मात् । एकाहे यागभेदे । "यः कामयेत नैर्ऋणिः पाप्मना दृव्यामिति स ऋतपेयेन यजेत" आ० श्रौ० ९,७,१५ । "नि क्रोक्ष भावो नैर्ऋणिरस्मय; पाप्मनोनैर्ऋणिमिवा गच्छेयमिति कामयेत स ऋतपेयनामकेन एकाहेन यजेत अत्यमपि

पापं नयि नो तिष्ठेत् इति यः जानयेत स ऋतमेधेन यजेतेत्यर्थः" नारा०उ०। सप्तदशस्तोमेषु पञ्चत्रु ऋतुषु मध्ये खगकामस्यर्त्व्ये २ऋतुभेदे च। "सप्तदशाः पञ्च" काल्या० २२,८,६। इत्युपक्रम्य "खगकामस्यर्त्वेयः" १० खण्डे दर्शितः।

ऋतपेशस् पु० ऋतमुदकं पेशोरूपमस्य। जलात्मके वह्नौ "वह्नाय ऋतपेशसे दधीत" ऋ० ५,६६,१।

ऋतपु पु०ऋतं यज्ञियहविः स्रोतति स्रा-बा०कु। १यज्ञियहविर्भोजके देवे। ऋतं सत्यं स्वरूपमस्येति। २सत्यस्वरूपे देवे च। "अन्तर्यदनिनो वाऋतपू" ऋ० १,१८०,२। "ऋतपू यज्ञियहविर्भक्षयितारौ सत्यस्वरूपौ वा" भा०।

ऋतम् अव्य० ऋत-कमि। सत्यमित्यर्थे। ऋतम्भरः।

ऋतम्भर पु० ऋतमित्यव्ययं तद्बिभर्त्ति अच्। १सत्यधारके परमेश्वरे "ततोगतो ब्रह्मगिरोपहूत ऋतम्भरध्यानविधारिताघः" भाग० ६,१२,१२। ब्रह्मह्रीपान्तर्गते २नदीभेदे स्त्री। तस्य वर्णाग्रयभिधाय "तेषु गिरयोनद्यश्च सप्तैवाभिख्याताः" इत्युक्त्वा "अरुणा नृम्णाङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति सङ्गानद्यः" भाग० ५,२०,६। भाव० उक्ते ३विधर्य्यासन्नुत्थे समाधिस्थप्रज्ञाभेदे च स्त्री "ऋतम्भरा तत्र प्रज्ञा" सू०। "तस्मिन् समाहितचित्तस्य या प्रज्ञा जायते तस्या ऋतम्भरेति संज्ञा भवति अन्वर्था च सा सत्यमेव बिभर्त्ति न तत्र विपर्य्यासज्ञानगन्धोऽप्यस्तीति। तथा चोक्तम् "आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम्" इति"भा०भा०। तस्याः शब्दादिभ्यो विशेषादिकथनं तत्रैव। "श्रुतानुमानप्रज्ञाभ्यामन्यविषयविशेषार्थत्वात्" सू०। "श्रुतमागमविज्ञानं तत् सामान्यविषयं न ह्यागमेन शक्योविशेषोऽभिधातुं कस्मात् ? नहि विशेषेण ऋतसङ्केतः शब्द इति। तस्यानुमानं सामान्यविषयमेव यत्र प्राप्निस्तत्र भवति; यत्राप्राप्निस्तत्र न भवति गतिरित्युक्तम् अनुमानेन च सामान्येनोपसंहारः; तस्मात् श्रुतानुमानविषयो न विशेषः; कश्चिदाह न चास्य सूक्ष्मव्यवहितविप्रकृष्टस्य वस्तुनोलोकप्रत्यक्षेण ग्रहणम्। न चास्य विशेषस्याप्राप्तस्याभावोऽस्तीति" समाधिप्रज्ञानिर्ग्राह्य एव स विशेषो भवति भूतसूक्ष्मागतो वा पुरुषगतो वा तस्मात् श्रुतानुमानप्रज्ञाभ्यामन्यविषया सा प्रज्ञा विशेषार्थत्वादिति। समाधिप्रज्ञाप्रतिलम्भे योगिनः प्रज्ञाकृतः संस्कारो नवो नवोजायते। समाधिप्रज्ञाभवः संस्कारोऽन्यव्युत्थानसंस्काराशयं बाधते व्युत्थानसंस्काराभिभवात् तत्प्रभवाः प्रत्यया न भवन्ति पात० भा०।

"तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी" सू०। "प्रत्ययनिरोधे समाधिरुपतिष्ठते ततः समाधिजा प्रज्ञा ततः प्रज्ञाकृताः संस्कारा इति नवोनवः संस्काराशयो जायते ततः प्रज्ञा ततश्च संस्कारा इति। कथमसौ संस्कारातिशयश्चित्तं समाप्राधिकारं न करिष्यतीति ? न ते प्रज्ञाकृताः संस्काराः क्लेशमलक्षयहेतुत्वात् चित्तमधिकारविधिरं कुर्व्वन्ति चित्तं हि ते स्वकार्य्यादपसादयन्ति। ख्यातिपर्य्यवसानं हि चित्तचेष्टितमिति" पात०भा०। विहतञ्चैतत् वाचस्पतिना। "अतश्च योगिजनप्रसिद्धानर्थसंज्ञाकथनेन योगिसंमतिमाह। ऋतम्भरेति आगमेनेति वेदविहितं श्रवणमुक्तम्। अनुमानेनेति मननं, ध्यानं चिन्ता तदाभ्यासः पौनःपुन्येनानुष्ठानं तस्मिन् रस आदरः तदनेन निदिध्यासनमुक्तम्। स्यादेतत् आगमानुमानदृष्टार्थविषयभावनाप्रकर्षजन्यानिर्विचारा आगमानुमानविषयमेव गोचरयेत् न स्वल्पविषयानुभवजन्या संस्कारः शक्तोऽन्यत् ज्ञानं जनयितुम्, अतिप्रसङ्गात् तस्मान्निर्विचारा चेतम्भरा आगमानुमानयोरपि तत्प्रसङ्ग इत्यत आह। श्रुतानुमानेत्यादि। बुद्धिसत्त्वं हि प्रकाशस्वभावं सर्व्वार्थदर्शनसमर्थमपि तमसावृतं यतश्चैव रजसोद्घाट्यते तत्रैव स्थगयति यदा त्वभ्यासवैराग्याभ्यामपास्तरजस्तमोमलजालवद्यदा विशारदीभवति तदाख्यातिपर्यवसानमासाद्य सर्व्वज्ञातृत्वादिभावेन प्रकाशयत्त्वे सति किं नाम यन्न गोचर इति भावः। व्याचष्टे श्रुतमागमज्ञानं तत्सामान्यविषयं कस्मात् ? नह्यागमेन शक्योविशेषोऽभिधातुं, कुतः ? यस्मादागन्तवाद्व्यभिचाराच्च न विशेषेण ऋतसङ्केतः शब्दः; यस्मादस्य विशेषेण सह वाच्यवाचकसम्बन्धः प्रतीयेत नच वाक्यार्थोऽपीदृशो विशेषः सम्भवति। अनुमानेऽपि लिङ्गलिङ्गिसम्बन्धग्रहणाधीनजन्मनि गतिरेवमेवेत्याह तथानुमानमिति। यत्र प्राप्निरिति बलतत्त्वयोर्व्याप्यव्यापकभावो गमयितव्यः। अतोऽनानुमानेन सामान्येनोपसंहारः। उपसंहरति तस्मादिति। अस्तु तर्हि सम्बन्धग्रहणमेवं लोकप्रत्यक्षं न तत् सामान्यविषयमित्यत आह। स चास्यादिना भूत सम्बन्धग्रहाधीनं, लोकप्रत्यक्षमिन्द्रियाधीनमतः। नचेन्द्रियाणामसन्निकृष्टे योग्यदेशे मनु च यद्या-

मानमानप्रत्यक्षागोचर विशेषः तर्हि नास्ति प्रमाण-विरुद्धादित्यत आह न चेति । न हि प्रमाण व्यापक कारण वा प्रमेयस्य, येन तद्विरुद्धो निवर्तेत । न खलु कलावत्त्वस्य परमाणुपरिमाणसद्भावं प्रति स निरुद्धते प्रामाणिका इत्यर्थः । तस्मात् समाधि प्रज्ञानिर्ग्राह्य एवेति । अत्र च विवादाध्यासिता परमाणव अत्यन्तस्य प्रातिस्विकविशेषशालिन इत्यत्वे सति परस्पर व्यावर्त्तमानत्वात् ये इत्थत्वे सति परस्पर व्यावर्त्तन्ते ते प्रातिस्विकविशेषशालिन यथा खण्ड कुण्डादय इत्यनुमानेन गमेन च ऋतम्भरप्रज्ञोपदेशपरेण यद्य थो निरूप्यते तदनिरूपणे रूपरहित स्थान न्यायात् प्रत्यात् तथाप्यदृष्टविशेषकल्पेन तत्कल्प कल्पयित्वा चरयत अतोऽनन्त ते रूपाक्षोभेण सख्यया वृद्धि घटन्ति लिङ्गसख्यायोगितया, तस्मात् सिद्ध अतो नमानप्रत्यक्षाभ्यामलक्षितपरमाणु । स्यादेतत् भवतु परमाणोऽ पयक्रमप्रान्तो यथोक्तोपायाभ्यास सात अनादिना तु व्या त्मानस्य रेण निरन्तरनिरुद्धतया प्रतिक्षणं या समाधि प्रज्ञा तद्व्यवधानमध्यवर्त्तिन्यः परमाणुरिवेति शङ्कामप नेतु स्वलक्षण तत्पर्यति समाधिप्रज्ञेति स्वत्र पठति । तज्ज इति तद्रहिते निर्विचारा समापत्तिः परामर्शति अत्रुति । व्याख्यानमाह । अतार्थेपक्षपातो हि धिया स्वभाव, तावदेवयमनवस्थिता भ्रास्यति न यावत तत्त्वं प्रतिलभते तत्प्रतिलम्भे त्वत्र स्थितपटो सती संस्कारवृद्धि सस्कार वृद्धिवक्रमेणावर्त्तमाना सती अनादिमप्यतत्त्वसंस्कारवृद्धि क्रमं बाधत एवेति तथा च वाक्या व्याख्या 'निरुपद्रवभू तार्थस्वभाव्य विपर्यये । न बाधो नादिमत्त्वेऽपि बुद्धे ऋतपक्षपातत " इति । स्यादेतत समाधिप्रज्ञातोऽस्तु यूयं नजन्यसंस्कारस्य निरोधः ससाधिजस्तु संस्का रातिशय समाधिप्रज्ञाप्रसवे हेतुरस्त्वऽखिल इति तदवस्थैव चित्तस्य सधिकारतेति चोदयति कथम सीति । परिहरति न न इति । चित्तस्य हि कार्य्य इय ग्रह्याद्युपभोग विवेकख्यातिश्चेति तत्र क्लेशकर्म्म शयसहित ग्रह्यादयुपभोगे वर्त्तते प्रज्ञाप्रभवसंस्कारो न्तिनि खलु क्लेशकर्म्माशयस्य तु तेनसोऽवसितप्रायाधि कारभावस्य विवेकख्यातिमात्रमवशिष्यते कार्यम् । तस्मात् समाधिसंस्कारचित्तस्य न भोगाधिकारहेतुत्व, प्रत्युत तत्परिपन्थिन इति स्वकार्य्याद्भोगलक्षणा प्रसादयन्ति सममर्थ कुर्वन्ति इत्यर्थः । कस्मात् ? विवेकख्यातिपर्य्य वसानं हि चित्तचेष्टितम् । तावद्धि भोगाय चित्त चेष्टते न यावद्विवेकख्यातिमनुभवति सङ्घातविवेकख्यातेस्तु क्षेत्र निवृत्तौ न भोगाधिकार इत्यर्थः । तदत्र भोगा धकारप्र याप्ति प्रयोजनं प्रज्ञासंस्काराणामित्युक्तम् तत् प्रविर चित्तप्रसादनीयतत्सोमैत्र्यादिभावना प्रसादयत विशोक ज्योतिष्मती नाम चित्तवृत्ति, समापयतु परञ्च तत्प्र सादज ऋतम्भराभिधानप्रज्ञाच साधनोपाख्य वी०च०।

ऋतव्य त्रि० कृतुरर्दभिर्भावी देवो देवताऽस्य यत्। कर्तृदेवताके इष्टकादौ "ऋतव्ये मधुश्च माधवश्चेति" कात्या० १७, ४ २४। विश्वज्योतिष. पुरोडे पशौ प्राणलक्षणे ऋ तव्ये इष्टके अनुक्रमेण उदङ्मुख उपदधाति वेदटी० "अथर्त्तव्ये उपदधाति कृतव्य एते यदृतव्ये कृतूनेवतदुप दधाति मधुश्च माधवश्च वासन्तिकावृतू इति इष्टके भवतो द्वौ हि मासौ कृतु" इति भरद्वाजः ७,१ २२६ "अथ ऋतव्ये उपदधाति इत्यादिप्रपञ्चत । शुक्रश्च शुचि र्मधुश्च माधव इत्युक्ता प्राग्वत ८,२ ६। "नवसटोनु कोषु पर्व्वसूक्तऋतव्यलक्षणायाम कात्या० १७,२,१।

ऋतव्रत प० ऋतमविनश्वरफलत्व व्रत यस्य। शाकद्वीपस्थे भगदुपासकभेद। शाकद्वीपवर्षाणि भा० ६,१०। "तेषु पुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतानाम भरन्ति ना युत्मक प्राणायामविधूतरजस्तमस परमसमाधिना य जन्ते" ऋतव्रतादयोवर्षस्थानीया इति बोध्यम अन्य द्वीपेषु वर्षभेदोक्तौ रुक्तु तेषामेव ततस्थान यत्नौचि त्यात् यतु सख्यास त्याज्य।

ऋतसद् पु० ऋते यज्ञे सीदति सद्-क्विप् ७त०। यज्ञे "ऋषद्वरसदृतसद्वोमसदञ्जा" ऋ० ४,४०,५। "ऋतस दग्नि" भा०।

ऋतसदन न० ऋतस्य यज्ञार्थं सीदत्यस्मिन् सद्-आधारे ल्युट् ६त०। यज्ञार्थमण्डपेऽग्निस्थाने। "वरुणस्य ऋतसदन मसि वरुणस्य ऋतसदनमासीद" यजु० ४,३६। स्त्रिय ङीप्। "वरुणाय ऋतसदन्यसि" तत्रैव।

ऋतसाप् त्रि० ऋत+क्विप् सहापा साप् प्राप्ता ६त०। यज्ञस्य प्रापयितरि "ये चिद्धि पूर्व्व ऋतसाप आसन्" ऋ० १,१७६,२। "ऋतसाप ऋतस्य यज्ञस्यप्रापयितार:" भा०।

ऋतस्पति पु० ऋतस्य पति: ब० बेदे सुट्। यज्ञपतौ "तव वायवृतस्पते" ऋ० ८,२६,२१। "ऋतस्पते। यज्ञान पते।" भा० लोके तु ऋतपतिरित्येव।

ऋतावन् त्रि० ऋतमस्यास्य "छन्दसीवनिपौ" पा० वनिप् दीर्घ

यज्ञवति । "ऋतावानं महिषं विश्वदर्शतमग्निम्" यजु० १२,११९ । "ऋतावानो जने जने" ऋ० ५,६८,४ । "ऋतावानः यज्ञवन्तः भा० । लोकेतु मतुप् मस्य व । ऋतवत् इत्येव । "ऐक्ष्वाहवस्य ऋतवानिति विप्रलब्धः" भाग० १५,२० । "ऋतवान् सत्यवान्" इति श्रीधरः ।

ऋताषाह् त्रि० ऋतं यज्ञं वर्द्धयति दृध-क्तान्तभूतण्यर्थे क्विप् दीर्घः । यज्ञवर्द्धके । "विश्वयन्ताऋताषाहोद्वारः" यजु० २८,५ । "सुतः सोम ऋताषाट्" ७,६ । "देवीरृताऋताषाहः" ४,१२ ।

ऋताषाह् त्रि० ऋतं सहते असत्यं न सहते-क्विप् दीर्घः ६त० । "सहेः पृतनर्ताभ्याञ्चेति" षा० षत्वम् । सत्यसहने असत्ये कुपिते "ऋताषाडृतधामाग्निः" यजु० १८,३८ ।

ऋति स्त्री ऋ-क्तिन् । १गतौ २स्पर्द्धायाम् ३निन्दायाञ्च । कर्म्मणि क्तिन् । ४वर्त्मनि ५मङ्गले च । ६पुरुषमेधयज्ञयदेवभेदे । तत्र चतुर्थवृपे बन्धनीयपशुकीर्त्तने । "ऋतये त्वा नक्षत्रियम्" यजु० २० १२ । कर्त्तरि क्तिच् । ७यज्ञो पु० निरु० । "अग्निरृषामृतीषहम्" ऋ० ६,१४,४ "शरव्यासुखेऽपि नक्षत्रमान ऋतिर्हन्यमाना" अम० ३,५,२५ । [कारके ।

ऋतिङ्कर त्रि० ऋतिं पीडां करोति कृ-खच् मुम् । पीडाकारके ।

ऋतीय नामधा० ऋतामिच्छति ऋतीयति आत्मीयत् । ऋतीयाम बभूव आस चकार । वेदे लृ न छन्दसि" पा० न ईत्वम् । ऋतयति इत्यत्र "अक्षतसाधेधातुकयोः" पा० क्वचिदात्त्वं ऋतायति । ऋतायत् । "देवा ऋतायते दमे" ऋ० ४,८,२ । "ऋतायते यज्ञमिच्छते भा० । "अग्निरृतयज्ञसादि" ऋ० ५,५१,७ । "ऋतयन् यज्ञमिच्छन् भा० । अर्वतो ऋतायन्" ऋ० ७,८७, १ "ऋतायन् याचमानमभिच्छन्" भा० । तत उ ए । ऋतयु यज्ञकामे "त्वं न इन्द्र ऋतयुस्त्वानिटो नि तृम्पास" ऋ० ८,७०,१० । दीर्घे ऋतायु तत्रार्थे "न वा एतस्य ब्राह्मणा ऋतायवः" तै० ३,२,५,५, भावे ष्यञ् । ऋतया ऋतायां वा "श्रियं वने ऋतया वपन्ता" ऋ० २,११,१२ । "ऋतया ऋत कर्मफलं ततकामनया" भा० । वह सुपासुलुगित्यादिना ऋतायास्थाने आ० ।

ऋतीया स्त्री ऋत-ईयङ् भावे अ । जुगुप्सायाम् अमरः ।

ऋतीषह् त्रि० ऋतिं पीडां यत्नं वा सहते क्विप् दीर्घः । "सहेः पृतनर्ताभ्याञ्च" पा० षात् ऋतिशब्दादपि षत्वम् । १पीडासहे २यत्नसहने च "अग्निरृषामृतीषहम्" ऋ० ६,१४,४ ऋतीषहम् अरातीनां सोढारम्" भा० ।

ऋतु पु० ऋ-तु किच्च । शिशिरः पुष्पसमयो ग्रीष्मो वर्षा शरद्धिमः । माघादिमासयुग्मेषु ऋतवः षट् क्रमादिमे इत्युक्ते १कालभेदे । "ऋतु स्वाभाविक स्त्रीणां रात्रयः षोड़श स्मृताः" इति मनूक्ते स्त्रीणां २शोणितदर्शनयोग्ये गर्भधारणसमर्थे च काले "ऋतौ भार्यामुपेयात्" स्मृतिः "सकृत्सकृदृतावेतौ, ऋतुकालभिगामी स्यात्" मनुः । ऋतुरस्य प्राप्त अण् । आर्त्तव स्त्रीरजसि न० आर्त्तवशब्दे ८०८ पृष्ठे विवृतिः । ३दीप्तौ ४मासे च । मासद्वयात्मक

ऋतुश्च सौरचान्द्रश्च यथा काल० भा० "ऋतुशब्दस्य ऋ गतावित्यस्माद्धातोर्निष्पन्नः । इयर्त्ति गच्छति अशोकपुष्पविकासान् साधारणलिङ्गमिति वसन्तादिकालावशेष ऋतु । स च षड्विधः षड्वा ऋतव इति श्रुतेः । यत्तु "द्वादश मासाः पञ्चर्त्वव इति श्रुतं तत्र हेमन्तशिशिरयोरेकीकरणं विवक्षितं याजमानेषु पशुप्रयाजानुमन्त्रणमन्त्रेषु हेमन्तशिशिरयोरेकस्मिन् कैनव पदैनैकीकरणमिलुक् तथा हि "वसन्तस्तनां प्राणामि ग्रीष्मस्तनां प्राणामि वर्षा ऋतूनां प्राणामि शरदृतूनां प्राणामीति" चतुर्णां प्रयाजानां पृथक् पृथगनुमन्त्रणमन्त्राम्नाय यज्ञमप्रयाजस्थानु मन्त्रणे मन्त्र एवं श्रूयते "हेमन्तशिशिरावृतूना प्राणामीति" एतदेवाभिप्रेत्य बह्वृचब्राह्मणे द्वादश मासाः पञ्चर्तवो हेमन्तशिशिरयो समासेनेति" यत्तवयोर्मन्त्रब्राह्मणयोर्द्वित्वं ततस्यरूपद्वैविध्याभिप्रायेण शिशिरस्य षडङ्गानिमत्वात्तेनानुमन्त्रणीयस्य षडप्रयाजस्याभावाच्च तस्यैव पञ्चमे हेमन्तेऽन्तर्भावोन्याय्यः । अतएव प्रयाजब्राह्मणे "वसन्तमेवर्तूनामवरुन्ध" इत्यादिना चतुरः प्रयाजान् प्रशस्य पञ्चमे प्रयाजे केवलेन हेमन्तेन प्रशंसा "स्वाहाकारं यजति हेमन्तमेवावरुन्धे" इति । अस्तु नाम यथा तथा पञ्चसंख्या तथापि स्वरूपेण षोढा भिद्यते द्वादशमासात्मके संवत्सरे एकैकस्य ऋतोर्मासद्वयात्मकत्वे सत्येकादश द्वादशमासयोर्वर्जयितुमशक्यत्वात् षष्ठर्तौ पृथगनुष्ठानविधानाच्च तच्चोपरिष्टादुद्धरिष्यामः । मासद्वयात्मकत्वं चाग्निचयने ऋतव्येष्टकोपधानब्राह्मणे श्रूयते । "इन्वत्पदघाति तस्मात् इन्वतवः" इति । एकस्मिन् ऋतौ कयोर्मासयोर्हन्तं पक्षीतव्यमिति चेत् वसन्ताद्यृतुक्रमेण चैत्रवैशाखादि इन्वमिति क्रमः । तच्चेष्टकोपधानमन्त्रेषु श्रूयते "मधुश्च माधवश्च वासन्तिकावृतू" "शुक्रश्च शुचिश्च ग्रैष्मावृतू" "नभश्च नभस्यश्च वार्षिकावृतू" इत्यत्रोर्जश्च "शारदावृतू" "सहश्च सहस्यश्च हैमन्तिकावृतू" "तपश्च तपस्यश्च

शिशिराहतू" एषु च वाक्येषु ऋतु इति द्विवचनं मासाभिप्रायम् अन्यथा षड्तव इति श्रूयमाणा षट्संख्या बाध्येत। अवयवावयविनोर्वसन्तादेरैक्यात्वं सौत्रामणीयकौत्रमन्त्रेषु एकवचनेन व्यवहारादवगन्तव्यं "वसन्तेन ऋतुना देवाः, ग्रीष्मेण ऋतुना देवा" इत्यादि हि तत्र पठ्यते तथैवाधानब्राह्मणे श्रूयते "वसन्तो वै ब्राह्मणस्यर्तुः, ग्रीष्मो वै राजन्यस्यर्तुः, शरद्वैश्यस्यर्तुरिति" यदप्येते षड्तवो घटीयन्त्रवद्वैरन्तर्येण प्रवर्त्तन्ते तथापि संवत्सरोपक्रमरूपत्वेन वसन्तस्य प्राधान्यं द्रष्टव्यम् एतदेवाभिप्रेत्य श्रूयते "सुखं वा एतदहर्नां वसन्त" इति पूर्वोदाहृतेषु मन्त्रब्राह्मणेषु सर्वत्र वसन्तोपक्रमणाच्च वसन्तस्य प्राधान्यं ते च वसन्तादयो द्विविधाः चान्द्राः सौराश्च। चैत्रादयश्चान्द्राः तच्चोदाहृतं "मधुश्च माधवश्चेत्यादिना" न च तत्र चैत्रादयो नोक्ता इति शङ्कनीयं मध्वादिगुच्चानां चैत्रादिपर्यायत्वात्। अत एवाह: "चैत्रोमासो मधुः प्रोक्तो वैशाखो माधवो भवत्। ज्येष्ठमासस्तु शुक्रः स्यादाषाढः शुचिरुच्यते। नभोमास आयुषः स्यान्नभस्यो भाद्र उच्यते। इषश्चाश्वयुजोमासः कार्त्तिकश्चोर्ज संज्ञकः। सहोमासो मार्गशिरः सहस्य पुष्यनामकः। माघमासस्तपाः प्रोक्त स्तपस्यः फाल्गुनः ऋतुः" इति। एतेषां चैत्रादीनामकानां वसन्तादीनां चन्द्रगतिपरिकल्पितत्वाच्चान्द्रत्वम्। अतएव ज्योतिष्टोमब्राह्मणे आम्नायते "चन्द्रमाः षड्होता स ऋतून् कल्पयति तथा" सूक्तविशेषे सूर्याचन्द्रमसौ प्रकृत्य आम्नायते "पूर्वापरं चरतो माययैतौ शिशू क्रीळन्तौ परियातो अध्वरम्। विश्वान्यन्यो भुवनाभिचष्ट ऋतूनन्यो विदधज्जायते पुनरिति" अत्र पुनर्जायत इति लिङ्गादृतुविधाता चन्द्र इति अवगम्यते। नन्वस्त्वेवं मध्वादीनां चान्द्रमासानां वसन्तादृतुत्व संवत्सरस्य तु त्रयोदशस्य चान्द्रमासस्य कथमृतुषु निर्वाहः। तन्मासषट्कभावर्त्तुषट्कब्राह्मणे मन्त्रानुवादपूरकमाम्नायते "उपयामगृहीतोऽसि संसर्पोऽसि अहस्पत्यायत्ते स्वाहाऽसि त्रयोदशोमास इत्याह्यक्षमेव तत् प्रीणातीति" तथा ब्रह्मब्राह्मणेऽपि "अस्ति त्रयोदशोमास इत्याहुः यत्त्रयोदश परिधिर्भवति तेनैव त्रयोदशं मासमवरुन्धे" इति। तदुत्पत्तिप्रकारोऽप्यभिलमास निरूपणे वक्ष्यते। विद्यतामेवं त्रयोदशोमासस्य वा उपपत्तिर्वसन्तादिषु ऋतुषु इति चेत् उच्यते किमयं सप्तम ऋतुः? आहोस्विदुक्तेष्वेव षट्सु अन्तर्भावः? उतर्त्वन्तरालवर्त्ती कश्चिदनृतुरूपः? न तावत् प्रथमः; 'ऋतुर्ऋतुमानुद्यमान" इति ऋतूनां नैरन्तर्यश्रवणात्, नाप्यन्तिमः। 'षड्वा ऋतवः" इति षट्संख्यानियमात्। वसन्तादिवन्मन्त्रब्राह्मणयोर्मध्यान्तराश्रवणाच्च नापि मध्यमः मध्वादिषु अपाठात्। उच्यते यदोर्मासयोर्मध्ये मलमासो दृश्यते तयोरुत्तरस्मिंस्तस्यान्तर्भावः। तथा चासौ षष्टिदिवसात्मकोमलिम्लुचभागद्वयात्मक इति मध्वादिषड्वाच्यत्वेनोक्तेऽन्तर्भावाच्च काप्यनुपपत्तिः। सौरेषु ऋतुषु बौधायनेन मीनमेषयोर्मेषवृषयोर्वा वसन्त इत्यभिधानात् मीनादित्वं मेषादित्वं च वैकल्पिकं वसन्तस्याङ्गीकृतम्। तथा च तदनुसारेण उत्तरे ग्रीष्मादयोऽपि यथायथं विकल्प्यन्ते। विनियोगसंबंधां ऋतुविशेषाणां स्मृतिस्मृति पुराणेष्ववगम्यते। तत्र स्मृतिः। "वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्य आदधीत, शरदि वैश्य आदधीतेत्यादि" स्मृतिरपि "वसन्ते ब्राह्मणं उपनयेत, ग्रीष्मे राजन्यं शरदि वैश्यमिति" विष्णुधर्मोत्तरेऽपि परामर्शिन्यते वसन्तादृतुषु पृथक्पूजा विशेषतः कथिताः। तथा तत्रैव वसन्ते स्नानानुलेपादिदानम् ग्रीष्मे मानकादिदानमुक्तं देवीपुराणे। वर्षासु तिलदानं तथा शरद्यन्नदानं हेमन्ते वस्त्राग्निदानं शिशिरे वस्त्रदानमित्येतानि विष्णुधर्मोत्तर एवोक्तानि एवमन्यदप्युदाहार्य्यम्"।

"वसन्तेन ऋतुना देवा वसवस्त्रिष्टुतास्तुताः" "ग्रीष्मेण ऋतुना देवा रुद्राः पञ्चदशे स्तुताः" "वर्षाभिर्ऋतुनादित्या स्त्रीणि सप्तदशे स्तुताः" "शारदेन ऋतुना देवा एकविंश अभवस्तुताः" "हेमन्तेन ऋतुना देवास्त्रिणवे अभवस्तुताः" "शैशिरेण ऋतुना देवास्त्रयस्त्रिंशेऽहतास्तुताः प्राक्षत्रात्" यजु० २१,२३,२४,२५,२६,२७,२८। सूर्यसिद्धान्तेतु सौरत्वमङ्गीकृतम्। यथा "हिरण्मिनाद्याऋतवस्तोऽपि गिरिरादयः। मेषादयो द्वादशैते मासास्तौ रैव वत्सरः"। ऋतुमध्ये च वत्सरारम्भत्वं वसन्तस्यैव तत्र काल० मा० उक्तम् अतएव गोतमाः "ऋतूनां कुसुमाकारः" इत्यनेन वसन्तस्य ऋतुषु प्रथमत्वेन भगवद्विभूतित्वमुक्तम् "म० त० ब्रह्मपु०। "चैत्रे मासि जगत् ब्रह्मा ससर्ज्ज प्रथमेऽहनि। शुक्लपक्षे समग्रन्तु तदा सूर्योदये सति। प्रवर्त्तमासि तदा कालस्य गणनामपि। पञ्चाङ्गमीश्वरस्तून् मासान् वत्सरान् वत्सराधिपान्"। मासर्त्वृत्सरादि. व्यक्तं चान्द्रत्वमुक्तम् ब्रह्मसिद्धान्तेऽपि "चैत्रसितादेर्दशवाङ्गानोर्बर्षर्त्तुमासयुगकल्पाः। कृष्णादौ खलु मासाः प्रथमा दिनैर्वेत्रयं"। चैत्रसितादेर्वैशाखशुक्लप्रतिपदमा-

रभ्येयर्षं दिनैस्त्रिभिः" म० त० । "आसुहृयमाने "सख्यं आद्यं मासि मासि अपर्व्याप्तात्तं प्रति" स्मृतिः । सुश्रुते ऋतुनिरूपणं तदुपलिङ्गादि च दर्शितं यथा "अथातः ऋतुचर्य्याध्यायं व्याख्यास्यामः कालोहि नाम भगवान् स्वयम्भूरनादिमध्यनिधनोऽत्र रसवीर्यपक्त्री जीवितमरणे च मनुष्याणामायत्तो न खल्वामपि कलां न लीयत इति कालः सङ्कलयति कलयति वा भूतानीति कालः । तस्य संवत्सरात्मनोभगवतोऽनादिनो गतिविशेषेणाक्षिनिमेषकाष्ठाकलामुहूर्ताहोरात्रपक्षमासर्त्वयनसंवत्सरयुगप्रविभागं करोति । तत्र लघ्वक्षरोच्चारणमात्रोऽक्षिनिमेषः । पञ्चदशाक्षिनिमेषाः काष्ठा । त्रिंशत्काष्ठाः कला विंशतिकलोमुहूर्तः कलादशभागश्च । त्रिंशन्मुहूर्तमहोरात्रम् । पञ्चदशाहोरात्राणि पक्षः । तत्र द्विविधः शुक्लः कृष्णश्च मासः । तत्र माघादयो द्वादश मासा हिमाशिशिरमृतुं कृत्वा षड्ऋतवो भवन्ति । ते शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ताः । तेषां तपस्तपस्यौ शिशिरः । मधुमाधवौ वसन्तः । शुचिशुक्रौ ग्रीष्मः । नभोनभस्यौ वर्षाः । इषोर्जौ शरत् । सह सहस्यौ हेमन्त इति । त एते शीतोष्णवर्षलक्षणाश्चन्द्रादित्ययोः कालविभागकरत्वादयने हे भवतो दक्षिणमुत्तरञ्च । तयोर्दक्षिणं वर्षाशरद्धेमन्तेषु भगवानाप्यायते सोमोऽम्ललवणमधुराश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्वप्राणिनां बलमभिवर्द्धते । उत्तरञ्च शिशिरवसन्तग्रीष्मेषु भगवानाप्यायतेऽर्कस्तिक्तकषायकटुकाश्च रसा बलवन्तोभवन्त्युत्तरोत्तरञ्च सर्वप्राणिनां बलमपक्षीयते । भवति चात्र । शीतांशुः क्षेटयत्यूर्मीं विस्रान् शोषयत्यपि । तावुभावपि संश्रित्य वायुः पालयति प्रजाः" । अथ खल्वयने हे युगपत् वत्सरो भवति । ते तु पञ्च युगमिति संज्ञां लभन्ते । स एष निमेषादि युगपर्य्यन्तः कालचक्रवत्परिवर्त्तमानः कालचक्रमुच्यत इत्येके । इह तु वर्षाशरद्धेमन्तवसन्तग्रीष्मप्रावृषः षड्ऋतवो भवन्ति दोषोपचयप्रकोपोपशमनिमित्तम् । ते तु भाद्रपदाद्वेन द्विस्त्रिकेण व्याख्याताः । तद्यथा भाद्रपदाश्वयुजौ वर्षाः । कार्त्तिकमार्गशीर्षौ शरत् । पौषमाघौ हेमन्तः । फाल्गुनचैत्रौ वसन्तः । वैशाखज्यैष्ठौ ग्रीष्मः । आषाढश्रावणौ प्रावृडिति । तत्र वर्षासूपचयप्राप्तो दोषोऽल्पवीर्यो ह्यपचयप्राप्तः क्षितिसलिलप्रायाश्च उपयुज्यमाना नभसि मेघायते जलपल्वलिप्रायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातसंस्पर्शान्मोघां विदधते विदाहात् पित्तसञ्चयमापादयन्ति स सञ्चयः शरदि प्रविरलमेघे वियत्यनुपश्यति पङ्केऽर्ककिरणप्रविलापितः पैत्तिकान् व्याधीन् जनयति । तां एवौषधयः कालपरिणामात्परिणतवीर्या बलवत्यो हेमन्ते भवन्त्यापश्च प्रसन्नाः स्निग्धा व्यपगतगुरुत्वा उपयुज्यमाना मन्दकिरणत्वाद्भानोः सततमारुतोपस्तम्भितदेहानां देहिनामविदग्धाः क्लेदाच्छैत्यान्नीरवादुपलेपाच्च श्लेष्मणः सञ्चयमापादयन्ति स सञ्चयो वसन्तेऽर्करश्मिप्रविलापितः पेषस्तब्धदेहानां देहिनां श्लैष्मिकान् व्याधीन् जनयति । तां एवौषधयो निदाघे निःसारा रूक्षा अतिमात्रं लघ्वीभवन्त्यापश्च ता उपयुज्यमानाः सूर्यप्रतापोपशोषितदेहानां देहिनां रौक्ष्यान्नुत्वाद्देशस्वाभाव्याच्च वायोः सञ्चयमापादयन्ति स सञ्चयः प्रावृषि चात्यर्थं जलोपस्निग्धायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातसंस्पर्शैरितो वातिकान् व्याधीन् जनयति । एवमेव दोषाणां सञ्चयप्रकोपोपशमक्रमः । तत्र वर्षाहेमन्तग्रीष्मेषु सञ्चितानां दोषाणां शरद्वसन्तप्रावृट्सु च प्रकुपितानां निहरणं कर्त्तव्यम् । तत्र पैत्तिकानां व्याधीनामुपशमो हेमन्ते, श्लैष्मिकाणां निदाघे, वातिकानां वसन्तान्ते, स्वभावत एव ते एते सञ्चयप्रकोपोपशमा व्याख्याताः । तत्र पूर्वाह्णे वसन्तस्य लिङ्गं मध्याह्ने ग्रीष्मस्य, अपराह्णे प्रावृषः, प्रदोषे वार्षिकम्, शारदमर्द्धरात्रे प्रत्यूषसि हैमन्तमुपलक्षयेत् । एवमहोरात्रमपि वर्षास्विव शीतोष्णवर्षलक्षणं दोषोपचयप्रकोपोपशमं जानीयात् । तत्राप्यापन्नेष्वनुबन्धापन्ना ओषधयो भवन्त्यापश्च ता उपयुज्यमानाः प्राणायुर्बलवीर्याण्यजस्रं हरन्ति । तेषां व्यापदोऽष्टकारिताः । शीतोष्णातिवर्षाणि खलु विपरीतान्योषधीर्व्यापादयन्त्यपश्च, तासामुपयोगाद्विविधरोगप्रादुर्भावो मरको वा भवेदिति । तत्रावद्यापन्नानामोषधीनामपां चोपयोगः कदाचिदवाप्नुयात्, तत्रोपघातुषु कृत्स्नपिशाचरक्षोधर्मैरुपद्रव्यते जनपदाः । विषौषधीपुष्पगन्धेन वायुनोपनीतेनाक्रम्यते यो देशस्तत्र दोषप्रकृत्यविशेषेण कासश्वासज्वरमुपप्रतिपद्यन्ते, रोहन्त्यरुषश्च, तत्र नक्षत्रजलचरितैर्वा ग्रहदारुणयोगैर्वा जनपदाश्चाकस्मिकमरणविकारलक्षणनिमित्तप्रादुर्भावैर्वा । तत्र स्थानपरित्यागशान्तिकर्मप्रायश्चित्तमङ्गलजपहोमोपहारेज्याकुलिनमस्कारतपोनियमदयादानदेवानामुपगमदेवताब्राह्मणगुरुपरमैर्भवितव्यमेव साधु भवति । ऋतुलक्षणमत ऊर्द्ध मध्यमानां लक्षणान्युपदेक्ष्यामः । वायुर्वायुत्तरः शीतो रजोधूमाकुला दिशः । ऋतुस्तु

धारः सविता हिमानद्धा जलाशयाः । दर्पिता ध्वाङ्क्षखड्गाङ्कमक्षिशोरभक्कुराः । ते प्रियङ्गुपुष्पाभाः पुष्पिता हिमसङ्क्षये । शिशिरे शीतमधिकं वातवृष्ट्याकुला दिशः । शेषं हेमन्तवत्सर्वं विज्ञेयं लक्षणं बुधैः । द्विगो वसन्ते विमलाः कानने रूपशोभिताः । किंशुकाम्भोजवकुलचूताशोकादिपुष्पितैः । कोकिलाः षट्पदगणैरुपगीता मनोहराः । दक्षिणानिलसंवीताः सुखाः पल्वलोज्वलाः । ग्रीष्मे तीक्ष्णांशुरादित्यो मारुतेना नर्कतेऽसुखः । भूस्तप्ता खरितप्तत्वाद्दिवः प्रज्वलितः इव । भ्रान्तचक्राङ्गयुगलाः पयःपानाकुलाः खगाः । ध्वस्तशीतृणलतावितपर्णाकुलपादपाः । प्राप्तेऽध्वरमानलं पवित्रमानिलकर्षितैः । अम्बुदैर्विद्युदुद्योतप्रकृतैस्तुमुलस्वनैः । कोमलश्यामशष्पाढ्या भक्तगोपोज्ज्वला मही । कदम्बनीपकुटजसर्जकेतकिभूषिता । तत्र वर्षासु सद्यस्काः पूरोद्गम्यतटद्रुमाः । वाप्यः प्रोत्फुल्लकुसुदनीलोत्पलविराजिताः । मूरपद्मस्यलक्ष्मभा बकुलश्लोकशोभिता । जातिनर्जुत्वसम्पन्नघनिरुद्धार्कपङ्कं नभः । बभ्रुकृष्णाः शरद्भूमौ श्वेताभ्रविमलं नभः । तथा शरीरस्यम्बुकर्षन्ति रसांशुघटितैः । षड्गुणकटुकाक्षीरी निम्बोत्तनसमेषु भूः । वाप्तसप्ताङ्गवल्मूककाशासनविराजिता । स्त्रीपुंरतिषुक्रतेषु विपरीतेषु वा हनः । विषमेष्वपि वा दोषाः कृच्यन्यतुषु देहिनाम् । शरेहसन्ते श्लेष्माणं पित्तं शरदि निर्हरेत् । वर्षासु शमयेद्वायुं प्राग्विकारवसन्तत्वात्" ऋतुचर्याध्यायः। आ० त० ऋतुगुणादि यथा "मासैर्द्विसंख्यैर्माद्यैः क्रमात् षड्ऋतवः" स्मृता: । हेमन्ते कुपिताद्वायोः स्नाद्यल्लवणान्वितान् । गोधूमपिष्टमांसेक्षुक्षीरोत्थविकृतिर्भजेत् । नवमन्नं रसान् तैलं गौडे तप्तोदकं नरः । शस्त्राकिकिरणान् खेदं पादत्राणञ्च सर्वदा । उष्णस्नानावलेपैश्च प्राहृतः शयनं भजेत् । व्यत्ययेन विधिः कार्य्यः शिशिरेऽपि विशेषतः । वसन्ते कुपितः श्लेष्मा हृन्निमान्द्यं करोत्यतः । तीक्ष्णं वमनमस्यादि कवलग्रहमञ्जनम् । व्यायामोद्वर्त्तनं धूमं यौवे तप्तोदकं भजेत् । पुराणयवगोधूमशौद्रजाङ्गलमांसभुक् । गुरूष्ण स्निग्धमधुरं दिवा स्वप्नञ्च वर्जयेत् । स्वादु शीतं द्रवं स्निग्धमनुपानं घृतकरम् । हृत पयः सयाल्लञ्च भजन् ग्रीष्मे न सीदति । मध्याह्ने शीतले क्षौद्यात् निशि वातक्षमाश्रिते । लवणाम्लकटून्यानि व्यायामञ्चात्र वर्जयेत् । वर्षास्वग्निबले क्षीणे कुप्यन्ते पवनादयः । अग्नेः संवर्द्धकं द्रव्यं जीर्णधान्यं रसान् लघु । आकाशं पिथितं सूक्ष्मान् दिव्यं कौपं जलं शुचि । दग्धाम्लवणं स्नेहं वंशुष्कं शौद्रमेव च । नदीजलौदनस्नाक्षःस्वप्नायासातपांस्त्यजेत् । शरदि कुपिते पित्ते विरेकं रक्तमोक्षणम् । स्वादुतिक्तकषायेक्षुयाक्षिलघुशरोजलम् । सुधारलारसौक्षिद्यदधितैलरसातपान् । क्रव्यतीक्ष्णदिवास्वप्नप्राग्वीषातान् विवर्जयेत् । नित्यं सर्वरसाभ्यासः स्वस्थवृत्तादृतौ ऋतूनां शेषसप्ताहे सेवितव्यः परक्रमः । तत्र नित्यं प्रयुञ्जीत स्वास्थ्यं येन प्रवर्त्तते । अजातानां विकाराणामनुत्पत्तिकरञ्च यत् । व्यायामादपतर्पणादभिघाताद्भयात् क्षयाज्जागरात् वेगानाञ्च विधारणादतिशुचः शैत्यादतिवासतः । रूक्षाम्लभक्षणायासतिक्तकटुकैरेभिः प्रकोपं व्रजेद्वायुर्विरेचनाद्यैः । कटूष्णक्षीणविदाहितीक्ष्णलघ्वक्रोधोपवासातपस्त्रीसम्पर्कतिलासीदधिसुराक्षारनालादिभिः । भुक्ते जीर्य्यति भोजने च शरदि पित्तं प्रकोपं व्रजेत् । मध्याह्ने च तथार्द्धरात्रसमये पित्तप्रकोपं व्रजेत् । गुरुमधुररसातिस्निग्धदुग्धेक्षुभक्ष्यद्रवदधिदिननिद्राक्षपर्षपैः प्रपूरैः । हृच्छिनपतनकाले श्लेष्मणः संप्रकोपः प्रभवति दिवसादौ भुक्तमात्रे वसन्ते" । ऐकाहिकमात्रे ऋतुयागप्रयोगे उदा० । ऐतदभिमानिदेवे प्रु० । ऋतव्यग्रहे उदा० । ट्विष्णौ प्रु० । "ऋतुः सुदर्शनः कालः" विष्णुस० । "कालात्मना ऋतुत्वेन लक्ष्यते इति ऋतुः" भा० । "प्रधानपुरुषलोकं यत्कालाख्यं रूपं तदृतुशब्देन लक्ष्यते" आनन्दगि० । ऋतुरस्य प्राप्नः अण् । आर्त्तव प्राप्तर्त्तुके त्रि० स्त्रियां ङीप् । छन्दसि घस् सिच्वाच्च गुणः । ऋत्विय तद्धे त्रि० । ऋतुर्देवतास्य यत् । ऋतव्य ऋतुदेवताके दृष्टादौ ।

ऋतुकाल पु० वसन्तसूत्रयवत् कर्म्म० राकुशिरोवत् वैत० वा । स्त्रीणां पुष्पदर्शनयोर्ग्ये षोडशरात्रात्मके काले । "ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः" मनुः । "ऋतुकालाभिगामी स्यात्" मनुः । पुंस्यादिवर्जे तत्काले च स्त्रीगमनं नियम्यते । तत्र नियमस्वरूपनिर्णयकारणादिप्रदर्शनेन ऋतुविगमस्य यथानियमविधित्वं तथा प्रा० त० न्यायवाक्योक्तम् यथा "ऋत्वा क्रियमाणे तु फलाभावः क्रिया क्वचित् । नोच्यते नियमस्तत्र ऋतावभिगमो यथा" मीमांसकवाक्यम् । ऋतुविगमनस्य परिसंख्यापरत्वनिराकरणेन नियमपरत्वं समर्थितं यथा ।

"तस्मिन् युष्मासु संविशेदिति"। "किमयं विधिर्नियमः परिसंख्या वा। "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति। तत्र चान्यत्र च प्राप्तौ परिसंख्या निगद्यते"। उच्यते। न तावद्विधिः, प्राप्तार्थत्वात्। नापि परिसंख्या, दोषत्रयसमावेशात्। अतो नियमम्पेदिरे न्यायविदः। कः पुनरेषां भेदः। उच्यते। अत्यन्ताप्राप्तप्रापणं विधिः। यथा अग्निहोत्रं जुहुयात्" "अष्टकाः कर्त्तव्याः" इति। पक्षे प्राप्तस्याप्राप्तप्रकारान्तरप्रापणं नियमः। यथा "समे यजेत" "दर्शपूर्णमासाभ्यां यजेतेति" यागः कर्त्तव्यतया विहितः स च देशमन्तरेण कर्त्तुमशक्य इत्यर्थात् देशः प्राप्तः। स च समो विषमश्चेति द्विविधः। यदा यजमानः समे वियजते तदा "समे यजेतेति" वचनमुदास्ते स्वार्थस्य प्राप्तार्थत्वात्। यदा तु विषमे देशे वियजते तदा समे यजेतेति" स्वार्थं विधत्ते स्वार्थस्य तदानीमप्राप्तत्वात्। विषमदेशनिवृत्तिस्वार्थिकी नोदितदेशेनैव यागनिष्पत्तेः। अनोदितदेशोपादानेन यथाशास्त्रं यागोऽनुष्ठितः स्यादिति। तथा "प्राङ्मुखोऽन्नानि भुञ्जीतेति"। इदमपि ह्यर्त्तमुदाहरणं पूर्वेण व्याख्यातम्। एकस्यानेकत्र प्राप्तस्यान्यतो निवृत्त्यर्थमेकत्र पुनर्वचनं परिसंख्या। तद्यथा। "इमानग्न्यन्तू रथनाभ्तस्येत्यग्न्याभिधानीमादत्ते" इत्यत्र मन्त्रः स्वतोऽग्न्याद्याभिधान्या गर्दभाभिधान्याच्च रथनाभौ प्रक्षिप्ते विनियुक्तः। पुनरग्न्याभिधानीमादत्त इति वचनेनाग्न्याभिधान्यां विनियुक्तश्चासौ गर्दभाभिधान्या विनिवर्त्तते। तथा "पञ्च पञ्चनखा भक्ष्याः" इत्यत्र यदृच्छया यथादिषु श्वादिषु च भक्षणं प्राप्तम्। पुनर्यथादिषु भक्षणार्थं श्वादिभ्यो निवर्त्तत इति। किं पुनरत्र युक्तं परिसंख्येत्याह। तथाहि क्रतुदारभ्यमाणस्य स्वेच्छयैव क्रतौ गमनं प्राप्तमिति न विधेरयं विषयः। नापि नियमस्य स्मृत्यनुमतिविरोधात्। एवं हि स्मरन्ति स्मृतिकाराः "दारसंग्रहणानन्तरं त्रिरात्रं द्वादशरात्रं संवत्सरं वा ब्रह्मचारी स्यादिति"। तत्र द्वादशरात्रात् संवत्सरात् वा पूर्वमेवर्त्तुसम्भवे क्रतौ गच्छेदेवेति नियमात् ब्रह्मचर्यमखण्डं बाध्येत। अपि च प्राप्ते भावार्थे वचनं विधेयपरं युक्तम्। प्राप्तस्यर्त्तौ भार्यागमननिश्चयेनातो यदि गच्छेदतावेवेति वचनमर्थवन्निर्युक्तं स्यात्। किञ्च नैयमिकात् पुत्रोत्पत्तिविधेरेवर्त्तौ नित्यं गमनं प्राप्तमेवेति क्रतौ गच्छेदेवेति नियमोऽनर्थकः स्यात्। नियमे चावश्यं कल्पनीयम्। किञ्च क्रतौ गन्तव्यमेवेति नियमेऽसन्निहितस्य व्याघ्रादिनाऽसमर्थस्यानिच्छोत्पादकयोरर्थे उपदिष्टः स्यात्। विध्यनुवादविरोधश्च नियमे। तथा हि एकः शब्दः सकृच्छ्रुतिरूपमेवार्थं प्रत्याययतीति पक्षे विधत्ते चेति। तस्मादतावेव गच्छेन्नान्यत्र इति परिसंख्यैव युक्ता। तदिदमाह चिरन्तनः पादयोर्नानुमन्यन्ते। यतो नियम एव युक्त पक्षे स्वार्थविधिसम्भवात्। अगमने दोषश्रवणाच्च यथाह पराशरः "ऋतुस्नातान्तु यो भार्यां सन्निधौ नोपगच्छति। घोरायां भ्रूणहत्यायां युज्यते नात्र संशय इति" न च विध्यनुवादविरोधोऽनुवादाभावात् विध्यर्थत्वाद्वचनस्य। तत्र हि विध्यनुवादविरोधो यत्र विधेयावधितया तदेवानुवदितव्यमप्राप्तत्वाद्योद्देश्येन विधातव्यश्चेति। यथा वाजपेयाधिकरणे पर्वपक्षे "वाजपेयेन स्वाराज्यकामो यजेतेति" वाजपेयलक्षणगुणविधानावधित्वेन यागोऽनुवदितव्यः स एव स्वाराज्यलक्षणफलोद्देश्येन विधातव्य इति। न चानुवादेनेह कृत्यमस्ति। यत्तु नियमेऽदृष्टं कल्पनीयमित्युक्तं तत्परिसंख्यायामपि समानम्। अन्यतो गच्छतो दोषकल्पनात्। यत्तु नैयमिकपुत्रोत्पादनविध्याक्षेपेणैव क्रतौ नित्यगमनप्राप्तेर्न नियम इति। तदसत् स एवायं नैयमिकः पुत्रोत्पादनविधिः। स्मृतम् "एवं गच्छन् स्त्रियं काम्यां लक्षणज्ञां पुत्र जनयेदिति" स्मृत्यभिगमनादिकः पुत्रोत्पादनविधिरिति। तत्र गमनकरणिकायां भावनायां एव पुत्रोत्पत्तिरर्थतः प्रतीयते। "एवं गच्छन् लक्षण्यं पुत्रं जनयेदित्यनेन" यथाग्निहोत्रं जुहुत् स्वर्गं भावयेदिति। न चासन्निहितादेरप्यर्थे विधिप्रसङ्गः सन्निहितयज्ञयोरेवोपदेशात् "ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति" "यः खदारानृतुस्नातान् स्वस्यः सन्नोपगच्छतीति" विधेयोपादानात्। अग्निहोत्रादिवृत्तिस्तु नियमविधानादेव। न च विशेषणपरता पक्षे भावार्थविधिसम्भवात्। नापि स्मृतिविरोधः सद्यस्त्वरात् पूर्वमेवर्तुदर्शने संविशतो न ब्रह्मचर्यस्खलनदोषः। तथा श्राद्धादिषु, तस्मात् स्वार्थसम्भवे परार्थकल्पनाप्राप्तबाधलक्षणदोषत्रयवती परिसंख्या न युक्ता। "पञ्च पञ्चनखा भक्ष्याः" इत्यत्र यद्यपि यथादिषु भक्षणस्य पक्षे प्राप्ते नियमः, यथादिषु श्वादिषु च प्राप्ते परिसंख्येति उभयसम्भवस्यापि नियमपक्षे यथाद्यभक्षणे दोषप्रसङ्गः। श्वादिभक्षणे चातोषप्रसङ्गेन प्रायश्चित्तस्मृतिविरोध इति परिसंख्यैवाश्रिता। एतेन सायं

प्रातर्हि जातीनामयनं श्रुतिनोदितम्" इत्यत्रापि नियमो व्याख्यातः "मान्तरा भोजनं कुर्यादिति" च पुनरुक्तं स्यात् परिसंख्यायाम् । एवं च 'नियमे सकृच्छ्रुतस्तावतेति" शेषो लभ्यते "निमित्तावृत्तौ नैमित्तिकमध्यावर्त्तत" इति न्यायात् । "यदा कामो भवेदित्यपि" नियम एवानृतावपि स्त्रीकामनायां सत्यां स्त्रियमभिरमयेदेवेति" । "ऋतावुपेयात् सर्वेण वा प्रतिषिद्धवर्जम्" इत्येतदपि गौतमीयं स्मृतिहृदयं नियमपरमेव । ऋतावुपेयादेवानृतावपि स्त्रीकामनायां प्रतिषिद्धवर्जमुपेयादेवेत्यनुमतिप्रसक्तेरिति" । "अनृताद्दुष्यति च मन्त्रसंस्कारजत् पतिः । सुखस्य निलं दातेह परलोके च योषितः" "तद्वृतौ रतिकाम्यया" इति च मनुना अन्यकाले स्त्रीकामनया गमनस्योक्तेः "यथा कामी भवेद्वापि स्त्रीषां वरमनुस्मरन्" या० अन्यकाले स्त्रीगमनोक्तेश्च न परिसंख्यापरत्वम् । तासां स्त्रीणां वरश्च दत्तदत्तः । स च मिता० श्रुतौ दर्शितो यथा "ता अब्रुवन् वरं वृणीष्वै क्षत्रियात् प्रजां विन्दामहै क्षत्रियो भर्तुः कामसाविजनितोः सम्भवावेति तस्माद्वनिया: स्त्रियः प्रजां विन्दते कामसाविजनितोः सम्भवन्तीति वरं दत्तं स्त्रीभ्यः" इति तासां वरस्तुपवर्णने "भवतीनां कामविहना पातको स्यादिति" इन्द्रेण तासां वरोदत्तः । दक्षासुरयजन्यब्रह्महत्यायां भागयःस्त्रीभिर्यज्ञपतोधितेन यज्ञेन तासां वरदानम् भारतादौ वर्णितम् ।

ऋतुग्रह पु० ऋतूनां ग्रहः पात्रभेदग्रहणं यत्र । यागभेदे तत्प्रपाटी काल्या० ६,१२ अ० दर्शिता यथा "उपविष्टेऽच्छावाके" इत्युपक्रम्य ।"ऋतुग्रहैश्चरतः" १सू० ।"अच्छावाके सदः प्रविश्य स्रुक्स्रुग्भ्यां पत्नीमुपविष्टे सत्यध्वर्युप्रतिप्रस्थातारौ ऋतुग्रहैश्चरतः । अत्रेडाभक्षणे पत्नीयजमानाभ्यामन्वित्रिभक्षणादने च कृते मार्जनभागपरिहरणयाजिनयाजप्रणीतापविमोक्षरान्तभागभागावेक्षणप्रभृतीनि कर्त्तव्यानि तत ऋतुग्रहप्रचारः। अथ "ऋतुग्रहप्रचारस्य विधिमुपदिशति" कर्कः।"द्रोणकलशादग्रवामग्रहीतोऽसि मधवे त्वेति हादग्रमतिमन्त्रम्"२सू०। "ऋतुग्रहान् गृह्णीत: द्रोणकलशादिति नियमाधसूत्रम् । मन्त्रविभागमाह" कर्कः "अध्वर्योः पूर्व:"३सू०। पूर्वोमन्त्रः। यज्ञां मन्त्रमृग्भानां पूर्वोमन्त्रोऽध्वर्योः स्यात् कर्कः । "उत्तर उत्तरः प्रतिप्रस्थातुः" ४सू० । "युगपत्प्रत्तौ गृह्णीतः" ५सू०।"उत्तमौ च"६सू०। "व्यत्यासम् ७सू० "मध्ये न युगपत् प्रचरणं च सर्वेषाम्" ८सू० । "सर्वेषाम् हादग्रमानमभृत्पक्षाणां प्रचरणं भागानुष्ठानं चकारात् व्यत्यासं व्यत्यासेनैव पूर्वमध्वर्योः ततः प्रतिप्रस्थातुः । पुनरध्वर्यो पुनःप्रतिप्रस्थातुरित्येवं सर्वेषामपि । स व्यत्यासः कथं कर्त्तव्य इत्यपेक्षायामाह ।"निष्क्रामतोऽग्रेतः प्रविशतीतरः" ९सू० । "कृविर्धानमध्यात् अपरोकृविधानं प्रविशति"कर्कः । "उत्तरउत्तरः प्रतिप्रस्थाता परकालत्वात्" १०सू०। अत्र पक्षे प्रचरणे च देशतः कालतश्च प्रतिप्रस्थाता उत्तरो भवेत् कुतः अपरकालत्वात् प्रतिप्रस्थातृमन्त्राणां पश्चात्कालीनत्वात् परकालत्वादिति केचित् स एवार्थोऽत्रापि पाठे "उभयतोऽध्वर्युपात्रेण परिगृह्णाति"११सू० । उभयत इति "स वै कृविर्धानाद्विष्क्रामन्तं कृविर्धाने प्रविशन्तं चाध्वर्युं प्रतिप्रस्थाता पात्रेण परि गृह्णाति व्यत्ययार्थं पात्रमध्वर्योर्दक्षिणतोऽहरति स्वयमुत्तरतो यातीत्यर्थः मानवे "कृत्वा गृहीत्वा च प्रतिप्रस्थाता दक्षिणेनाध्वर्युमभिप्रयम्य पात्रं हरति नान्योऽन्यमभि प्रपद्यते येषे पूर्वोत्तरमभि परिगृह्णीतः" इति काठके "प्रपद्यमानः प्रतिप्रस्थाता दक्षिणेनाध्वर्योः पात्रं हरेदुत्तर एव सञ्चरेदिति"कर्कः । "सर्वेऽनुताः प्रागुत्तमाभ्याम्" १२सू०। "उत्तमाभ्यामेकादग्रहाभ्यां प्राग्वे दग ऋतुग्रहाः ते सर्वेऽनुताः कार्याः सकृदेव सर्वे होतव्यम् अनुवषट्कारोऽपि न भवति" कर्कः । 'ऋतुनेति वट् प्रेष्यतः"१३सू०। "आद्येषु षट्सु ऋतुग्रहयागेषु ऋतुना प्रेष्येत्येव मैत्रावरुणं प्रेष्यतः"कर्कः । 'ऋतुभिरिति चतुरः पात्रमुखे विपर्यस्य' १४सू० । 'ततः पात्रमुखयोर्विपर्यासं कृत्वा सप्तमाष्टमनवमदशमेष्वृतुग्रहयागेषु ऋतुभिः प्रेष्येत्येव प्रयाजान् प्रेष्यतः मानवे "ऋतुना प्रेष्येति षड्भिः प्रचरतो यतो ऋतुम् । ततः पात्रे गृहीत्वा ऋतुभि. प्रेष्येति चतुर्भिर्यथादितस्तथा गृहीत्वा ऋतुना प्रेष्येति हाभ्यामिति" अतश्च यज्ञामधेन होमः । ततश्चतुर्णां पात्रमूलेन होमोऽयं कृत्वे गृहीत्वा उत्तमयोः पुनरप्येवं यजूंषि पात्रमुखयोर्विपर्यस्यैव कार्यम्"कर्कः ; "बहूदुत्तमौ" १५सू०"उत्तमावेकादग्रहादग्राहतुग्रहौ बहून् प्रचरतः तेन पात्रयोरग्रेण होमः ऋतुना प्रेष्येति चेत्येतद्हतिना गृह्यते कृत्पुनर्मन्त्रार्थः ऋतुना इत्येवंरूपं हतीयैकवचनान्तर्तुशब्दयुक्तां याज्यां प्रेष्येत्यर्थः ऋतूनेत्येतत्पदयुक्तेन प्रैषेण वा एवऋतुभिः प्रेष्येत्यनेनापि"कर्कः । "य-

जमानः प्रेषितो होतरेतद्यजेति ब्रूयात्" १९ सू० । "द्वादशे ऋतुपक्षे ऋतुपते : यजेत्येवं प्रयाज्या प्रेषितो यजमानः होतरेतद्यजेति एवं ब्रूयात् ततश्चां यजमानयाज्यां होता ब्रूयात्" कर्क: । "अध्वर्यू च" १७सू० "एकादशे ऋतुपक्षे प्रयाज्या अध्वर्यू यजतमित्येवं प्रेषितावध्वर्यू होतरेतद्यजेति एवं ब्रूयाताम् ततश्च तद्याज्यामपि होतैव ब्रूयात् । याज्यान्तरे तु विकल्पेन होतुः प्रेषणं अध्वर्यो वा याज्यापठनमित्येवमुक्तम् । मानवे "एकादशे प्रेषेऽध्वर्यू यजतमित्युक्ते तयोरन्यतरो मध्यमस्य परिधेः पश्चादुपविश्य ये यजामहेऽश्विनावध्वर्यू आध्वर्यवादतुना सोमं पिबतां वौषडिति प्रैषेण यजेदथ चेतरथा । ये यजामहेऽश्विना पिबतं मधु दीद्यग्नी शुचिव्रत ऋतुना यज्ञवाहसा वौषडित्यनवानं यजेति होतरेतद्यजेति वा न चेध्यत्तमे प्रैषे यजमानस्य याज्यानि प्रैषो वेति" काठके विशेषः "द्वारे हविर्धानस्योपविश्याध्वर्यो यजतमित्युक्तेऽश्विनावध्वर्यू यजतम् आध्वर्यवादतुना सोमं पिबतमिति होतारं वा प्रेष्येद्धोतरेतद्यजेति यदध्वर्युर्यजेतोक्तेना चरेणेति" कर्क: । "त्रयोदशं ऋतूंश्चादिच्छत्युपयामगृहीतोऽस्यंहस्पतय इति" १८सू० । अत० ब्रा० ४,२,१,२, द्वादशादिपक्षपक्षणे हेतुर्दर्शितो यथा "सप्तेऽच्छावाके । ऋतुपक्षैश्चरति तद्यत् सप्तेऽच्छावाक ऋतुपक्षैश्चरति मिथुनं वा अच्छावाक ऐन्द्राग्नोऽच्छावाको द्वौ हीन्द्राग्नो इन्द्रं हि मिथुनं प्रजननं स एतस्मान्मिथुनात् प्रजननाद्ऋतून् संवत्सरं प्रजनयति यद्वै सप्तेऽच्छावाके ऋतुपक्षैश्चरति सर्वं वा ऋतवः संवत्सरः सर्वमेवैतत् प्रजनयति तस्मात् सप्तेऽच्छावाक ऋतुपक्षैश्चरति तास्त्रे द्वादश ऋतूंयात् । द्वादश वै मासाः संवत्सरस्य तस्माद्द्वादश मासा इति द्वादश त्वेव ऋतूंयात् । द्वैधैव सम्पत् । द्रोणकलशाद् ऋतूंयात् प्रजापतिर्वै द्रोणकलशः स एतस्मात् प्रजापतेर्ऋतून् संवत्सरं प्रजनयति उभयतोसुखाभ्यां पात्राभ्यां ऋतूंश्चति । कुतस्त्योरनोर्ये उभयतोसुखे तस्मादयमनन्तः संवत्सरः परिप्लवते तं ऋतूंश्चा न क्षादयति तस्मादयमनन्तः संवत्सरः नानुवाक्यमस्याह । श्रूयते वानुवाक्यया गतोऽथायजतुर्यदि दिवा यदि नक्तं नानुवषट्करोति नेदतूनप्रहणजा इति सप्तैव प्रथमौ ऋतूंश्चोतः सप्तोत्तमावित्येवैतत् सर्वं संवत्सरेण परिगृहीतमादित्येवैतत् सर्वं संवत्सरेण परिगृहीतम् ! तिरेवान्यतरः क्रामति प्रान्यतरः पद्यते तस्मादित्येऽन्यश्चोभावा वन्यश्च यदुभौ वा सप्त निष्क्रामेतामुभौ वा सप्त प्रपद्येतां पृथगुहैवेमावा रेयुस्तस्मादित्येवान्यतरः क्रामति प्रान्यतरः पद्यते । तौ वा ऋतुनेति षट् प्रचरतः । तद्देवाऽसुरक्षजन्नक्तुभिरिति चतुस्त्रिंशदक्षरक्षजन्ना यद्वैतावद्देवाभविष्यद्रात्रिर्द्वैवाभविष्यच्च व्यवत्स्यत् तौ वा ऋतुनेत्युपरिष्टाद्विहरतः । तद्देवाः परस्तादक्षरदनुस्तुब्भादित्यमद्याक्षरेण श्रीरुक्षभवित्री । ऋतुनेति वै देवाः मनुष्यानसृजन्तऽक्तुभिरिति पशूनसृजत ऋतं तन्मध्ये येन पशूनसृजन्त तस्मादित्ये पशव उभयतः परिगृहीतावपश्यन्नेता मनुष्यान्याम् । तौ वा ऋतुनेति षट् प्रचर्य इतरथा पात्रे विपर्यस्येते ऋतुभिरिति चतुरित्येतरथा पात्रे विपर्यस्येते अन्यतरत एव तद्देवा अक्षरक्षजन्नान्यतरतोरात्रिमन्यतरतएव तद्देवानसृजन्नक्षजन्नान्यतरतः पशून् । अथातोऽष्टाक्षर एव उपयामगृहीतोऽसि मधवे त्वेत्येवाध्वर्युर्ग्रहात्युपयामगृहीतोऽसि माधवाय त्वेति प्रतिप्रस्थातैतावेव वाग्वनिष्णौ स यद्वसन्त ओषधयो जायन्ते वनस्पतयः पच्यन्ते तेनोर्हतौ मधुश्च माधवश्च . उपयामगृहीतोऽसि शुक्राय त्वेत्येवाध्वर्युर्ग्रहात्युपयामगृहीतोऽसि शुचये त्वेति प्रतिप्रस्थातैतावेव ग्रैष्मौ स यद्वेतयोर्बलिष्ठं तपति तेन हैतौ शुक्रश्च शुचिश्च । उपयामगृहीतोऽसि नभसे त्वेत्येवाध्वर्युर्ग्रहात्युपयामगृहीतोऽसि नभस्याय त्वेति प्रतिप्रस्थातैतावेव वार्षिकावृतू वै दिवोवर्षति तेनोर्हतौ नभश्च नभस्यश्च । उपयामगृहीतोऽसि इषे त्वेत्येवाध्वर्युर्ग्रहात्युपयामगृहीतोऽस्यूर्जे त्वेति प्रतिप्रस्थातैतावेव शारदौ स यत्करद्भूर्यश ओषधयः पच्यन्ते तेनोर्हताविषयोर्जश्च । उपयामगृहीतोऽसि सहसे त्वेत्येवाध्वर्युर्ग्रहात्युपयामगृहीतोऽसि सहस्याय त्वेति प्रतिप्रस्थातैतावेव हैमन्तिकौ स यद्वसन्त इमाः प्रजाः सहसेव स्वं वपमुपनयते तेनोर्हतौ सहश्च सहस्यश्च । उपयामगृहीतोऽसि तपसे त्वेत्येवाध्वर्युर्ग्रहात्युपयामगृहीतोऽसि तपस्याय त्वेति प्रतिप्रस्थातैतावेव शैशिरौ स यद्वेतयोर्बलिष्ठं तपति तेनोर्हतौ तपश्च तपस्यश्च । उपयामगृहीतोऽसि अंहस्पतये त्वेति त्रयोदशं यूपं ग्रहाति यदि त्रयोदशं ग्रहीष्यादथ प्रतिप्रस्थाताध्वर्योः पात्रे संस्रवनवनयत्यध्वर्युर्वा प्रतिप्रस्थातुः पात्रे संस्रवनवनयत्याहरति भक्षम् । अथ प्रतिप्रस्थाता भक्षितेन पात्रेण ऐन्द्राग्नं यूपं ग्रहाति तद्भक्षितेन पात्रे-

ऐन्द्राग्नं यद्वं गृह्णाति न वा ऋतुयद्वाभावात् वषट्कुर्वन्त्येतेभ्यो वा ऐन्द्राग्नं यद्वं यद्वीभूत्वा भवति तदाग्नेन्द्राग्नेनैवानुवषट्कृता भवन्ति यद्वैन्द्राग्नं यद्वं गृह्णाति सर्वं वा इदं प्राजीजनद्य ऋतुयद्वानयद्वीत्वा इदं सर्वं प्रजनयत्येदमेवैतत् सर्वं प्राणोदानयोः प्रतिष्ठापयति तदिदं सर्वं प्राणोदानयोः प्रतिष्ठितमिन्द्राग्नी हि प्राणोदानाविमे हि द्यावापृथिवी प्राणोदानावनयोर्हीदं सर्वं प्रतिष्ठितम् । यद्वैन्द्राग्नं यद्वं गृह्णाति । सर्वं वा इदं प्राजीजनद्य ऋतुयद्वानयद्वीत्वा इदं सर्वं प्रजनयिष्यन्नेवैतत् सर्वस्मिन् प्राणोदानौ दधाति तावित्यावस्मिन् इसर्वस्मिन् प्राणोदानौ हितौ । अथातो गृह्णात्येव । इन्द्राग्नी आगतं सुतं गीर्भिर्नभोवरेण्यम् । अस्य पातं धियेषिता । उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वेति सादयतीन्द्राग्निभ्यां हेतुं गृह्णाति । अथ वैश्वदेवयद्वं गृह्णाति । सर्वं वा इदं प्राजीजनद्य ऋतुयद्वानयद्वीत्वा यद्वैतावदेवा भविष्यन्त प्राजनिष्यन्त । अथ यद्वैश्वदेवं यद्वं गृह्णाति । इदमेवैतत् सर्वमिमाः प्रजा यथायथं व्यरुजति तस्मादिमाः प्रजाः पुनरभ्यावर्त्तं प्रजायन्ते शुक्रपात्रेण गृह्णात्येव वै शुक्रो य एष तपति तस्य ये रश्मयस्ते विश्वे देवास्तान्शुक्रपात्रेण गृह्णाति । अथातोगृह्णात्येव ओ ग्रावर्षभौधूतो विश्वे देवास आगत । दाश्वांसो दाशुषः सुतम् उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति सादयति विश्वेभ्यो हेतुं देवेभ्यो गृह्णाति" ।

ऋतुथा अव्य० वीप्सार्थे वा० थाल् । काले काले इत्यादार्थे "ऋतवस्त ऋतुथा पर्व यमितारो वियासतु" यजु० २२,४०, "ऋतुथा ऋतौ ऋतौ काले काले" वेददी० । "या ते गात्राणामृतुथा कृणोमि" कौ० १,१६२,१६ ।

ऋतुपति पु० ६त० । वसन्तकाले तस्य सर्वर्तुषु प्रधानत्वात् "ऋतूनां कुसुमाकरः" गीतायां भगवद्विभूतित्वेनोक्तेश्च तथात्वम् । ऋतूनां पतिरित्यर्थे मनुः ।

ऋतुपर्य्याय पु० ६त० । ऋतूनां परिपाट्या गमने । "अयऋतुपा पु० ऋतून् पाति निर्वाहकतया, ऋतुषु सोमं पिबति ऋतुभिर्वृद्धिः सन् सोमं पिबतीति वा पा-पाने वा क्विप् । वर्षपालके तथाभूतसोमपातरि च । इन्द्रे "उत ऋतुभिरृतुपा: पाहि सोममिन्द्र !" ऋ०१,४७,२ ऋतुयाजदेवे च । "सजोषा इन्द्र ! वरुणेन सोमम् सजोषाः पाहि गिर्वणोमरुद्भिः । अर्यमाभिर्ऋतुपाभिः सजोषाः" ऋ० ४,२४,७। "ऋतुपाभिः ऋतुयाजदेवैः" भा०

ऋतुपात्र न० ऋतुहविषे पात्रम् । आश्वत्थे श्रीपर्णीदारुमये वा यज्ञिये यद्वरूपे पात्रभेदे तदाकारत्वं "ऋतुपात्रे पूर्णे स्रुक्कपालराजती उभयतोलुप्ते काश्मर्यमये आश्वत्थे वा" कात्या० ६,२,१३ उक्तः । "पूर्णे आश्वत्थस्याख्याः पूर्णे हे ऋतुपात्रे योजनीये स्रुक्कपालरूपे वाक्षारोपयोगे अथे मूले च सुखं ययोक्ते द्विसुखे इत्यर्थः । काश्मर्यमये श्रीपर्णीदारुविकारौ आश्वत्थे वा पिप्पलदारुनिर्म्मिते वा" कर्कः । "तदाकारवतीयानू यद्वातीयानुपपन्नस्य । "तस्मादाश्वत्थे ऋतुपात्रे स्यातां काश्मर्यमये स्रुचौ भवतः" श्रुत० ४,२,२,४ ।

ऋतुप्राप्त त्रि० ऋतुस्नातोक्ष्यः पुष्पादिः प्राप्तोऽनेन विधानेन परनि० । फलेग्रहौ अवश्यदृश्ये ।

ऋतुबल पु० ऋतौ ऋतुभेदे बलं यस्य । गिरिरादिषु बलयुक्तरव्यादिपक्षेषु ते च यथा । "गृध्रिगृध्रकुलेन्द्रगुरवः गिरिरादिषु । भवन्ति कालबलिनो योग्ये स्वर्यत्नवर्धने च" ज्यो० ।

ऋतुमत् त्रि० ऋतुस्नातकालयोग्यप्रशस्तपुष्पफलादिभिर्युक्तवाऽस्यास्य ऋतु+प्राशस्त्ये मतुप् । १प्रशस्तर्तुफलपुष्पयोक्तरि । "कल्पन्ते हास्या ऋतव ऋतुमान् भवति यएवं विद्वान्ऋतुषु पञ्चविधं सामोपास्ते" छा० उ० । "आर्त्तवैर्नैगमैश्च यस्यस्रो भवति" भा० । ऋतुकाले २यजनीयविल्वभेदे पु० । "अग्निष्वात्तानृतुमतोहवामहे" यजु० १९, ६१ । ऋतुः स्त्रीरजःकालः प्राप्तस्त्रेनास्त्यस्याः मतुप् स्त्रियां ङीप् । ३स्त्रीमात्रवत्यां स्त्रीधर्म्मिण्यां स्त्रियाम् "कामप्रधानमरणात् तिष्ठेत् सप्ते ऋतुर्मतयपि" मनुः । "तत्र प्रथमदिवसे ऋतुमत्यां मैथुनगमनमनायुष्यं पुंसां भवति" सुश्रु० । "उपाध्यायानी ते ऋतुमती उपाध्यायश्च प्रोषितोऽस्ति यथायमृतुर्व्यर्थो न भवति तथा क्रियताम्" भा० आ० ३अ० । ऋतुमत्या धर्म्मश्च आर्त्तवशब्दे उक्तः । विशेषस्त्वयम् "स्त्रीधर्म्मिणी विरात्रन्तु स्वं सुखं नैव दर्शयेत् । स्वयाक्यं श्रावयेन्नापि यावत् स्नाता न शुद्धितः । शुद्धाता भर्त्तृवदनमीक्षेतान्यस्य न क्वचित् । अथ वा मनसि ध्यात्वा पतिं भ्रातुं विलोकयेत्" काशीख० ।

ऋतुमयी त्रि० ऋतुप्रचुरा क्षितिः ऋतु+प्राचुर्य्ये मयट् ङीप् । ऋतुप्रधाने क्षितिभेदे तदुपधानप्रकारः शत० ब्रा० ८,६, २,१० उक्तः यथा "अथ उत्तरतः पीठमसाद्यं प्रथमा, वर्षा द्वितीया, शैवलमृतीया, शैवलमृतुर्थी, वर्षाः पञ्चमी

पौष्णः षष्ठी, पौष्णः सप्तमी, वर्षा अष्टमी, शैलूषो नवमी, यजमान एवास्य दशमी सएष यजमान एतस्यां विराज्यधिरूढः प्रतिष्ठितः ऋतुमध्यामर्ध्वाचीश्च पराचीश्चोपदधाति"

ऋतुमुख न० ६त० । गौणचान्द्रमासप्रथमदिने प्रतिपद्रूपे तिथिभेदे । "चातुर्मास्येषु चर्तुसक्तस्य" कात्या० १, २,१२ । "चातुर्मास्येषु च न यथाकाम्यम् कृतः ऋतुमुखस्य ते: "कृतसक्त ऋतुमुखे चातुर्मास्यैर्यजेतेति" वीप्साश्रवणात् ऋतोर्मुख प्रथमदिनं प्रतिपत् तत्रेत्यर्थः । अत एव वैश्वदेवरूपप्रघासादीनि चातुर्मास्यपर्वाणि प्रतिपद्येव क्रियन्ते न पौर्णमास्यामित्यवसीयते यतः प्रतिपदेव चर्तुसक्तं न पौर्णमासीति तथा च श्रूयते" "एषा ह संवत्सरस्य प्रथमा रात्रिर्यत् फाल्गुनी पौर्णमासी योत्तरैरोत्तमा या पूर्णा सुखतएव तत् संवत्सरमारभते" शत०ब्रा० ६,२,१,१७, कर्कः । "द्वे ह वै पौर्णमास्यौ द्वे अमावास्ये" इति श्रुतेः योत्तरा पौर्णमासी ऊर्ध्वप्रतिपदित्यर्थः । तथा च पौर्णमास्यां दीक्षा प्रतिपदि पौर्णमास्येष्टिसमापनम् ऋतुसन्धिपर्व विहितः । एतच्च पौर्णमासेष्टिविषयम् अमावास्येष्टौ दर्शएव दीक्षा शत० ब्रा० ६,२,२,२०,२६, "अमावास्यायां दीक्षन्ते" इत्युपक्रम्य "या प्रथमामावास्या तस्यां दीक्षित एतद्वै संवत्सरस्य प्रथमान्यहानि तान्यस्य तदारभते" इत्युक्तेः ।

ऋतुराज पु० ऋतूना राजा ६त० टच् समा० । वसन्ते ऋतौ

ऋतुलिङ्ग न० ६त० । वसन्तादिषु जायमाने भूतलक्ष्मादिरूपे तल्लिङ्गे "यथर्तुलिङ्गान्यृतवः स्वयमेवर्तुपर्यये" मनुः । तल्लिङ्गानि च ऋतुग्रन्थे दर्शितसुश्रुतवाक्यादवगम्यानि ।

ऋतुवृत्ति पु० ऋतूनां वृत्तिः पर्य्यायेणावर्त्तना यत्र । १वत्सरे त्रिका० । ६त० । २ऋतुधर्म्मे स्त्री ।

ऋतुशस् अव्य०कारकार्थे ऋतु+शस् । ऋतौ ऋतौ इत्यादार्थे "शसविधिष्वतुयोदेश्यानम्" का० १,१६२,४ । "ऋतुशः ऋताहतौ काले काले" भा० "अति क्षेतार ऋतुशो वजन्ति" यजु० २२,५७ । ऋतुशः काले काले" वेददी० ।

ऋतुष्ठा(ष्ठ्या) त्रि० ऋतौ तिष्ठति ष्ठा—क्विप् वेदे षत्वं ह्रस्वो तु न । वसन्तादिषु स्थायिनि । "ऋतवःस्थ ऋताद्यः ऋतुष्ठाः स्थ ऋताद्यः" यजु० १७,२, ।

ऋतुसंहार पु० ऋतूनां संहारः, समूहीकरणं यत्र । कालिदासप्रणीते काव्यभेदे ।

ऋतुसन्धि पु० ऋतोः सन्धिः । दर्शाख्यचन्द्रमासघटिते १दर्शे, पौर्णमास्याख्यचान्द्रमासघटिते २पौर्णमास्याम् । ऋतोर्मासघटितत्वात् मासस्य च पर्व्वसन्धिरूपत्वेन पर्वसन्धिरेव ऋतुसन्धिः अतः प्रसङ्गात् पर्व्वसन्धिर्निरूप्यते स च कालमा० उक्तः यथा "वृद्ध्यतिरिक्तानां लघ्वक्षरोच्चारणपरिमितः कालः सन्धिरित्युच्यते कृकूलघ्वक्षरद्वयपरिमितः कालः तदेतदुक्तं भगवतः पुराणे "अनुमत्याश्च राकायाः सिनीवाल्याः कुहूं विना । एतासां द्विलवः कालः कुहूमात्रा कुहूः ऋतेति" तत्र लवस्वरूपं ऋत्यन्ते दर्शितम् "लघ्वक्षरचतुर्भागस्त्रुटिरित्यभिधीयते । त्रुटिद्वयं लवः प्रोक्तो निमेषस्तु लवद्वयमिति" एवं च त्रुटित्रुटिद्वाभिधेयानां भागानां चतुष्टयं लवद्वयरूपं लघ्वक्षरसमं भवति तस्मिन् लघ्वक्षरपरिमिते काले एकः पर्वणोभागः, द्वितीयः प्रतिपदः, तदुभयं मिलित्वा सन्धिर्भवति कुहूप्रतिपदोः सन्धिस्तु पूर्वभागात् द्विगुणः अक्षरद्वयपरिमितत्वात् भट्ट्र भट्टाचार्यपुराचार्यो; "राकानुमतिरेव सिनीवाली कुहूस्तथा । एतासां द्विलवः कालः कुहूमात्रा कुहूस्तथा । कौक्कुटिकोकिलेनोक्तो यावान् कालः समाधते । तत्कालसंमिता चैषा अमावस्या कुहूः स्मृता । इत्येष पर्वसन्धीनां कालोयोद्विविधः स्मृतः" इति ।

एवं सन्धौ निरूपिते सति योऽयं प्रकृतोविचारस्तत्र सन्धिरेवेष्टिकाल इति तावत् प्राप्तम् "सन्धौ यजेतेति" श्रुतेः एवं सूक्ष्मत्वात्तत्र यागानुष्ठानानुपपत्तेः का तर्हि श्रुतेर्गतिः पार्श्वद्वयलक्षणेति ब्रूमः यथा गङ्गायां घोष इत्यत्र गङ्गाशब्दः प्रवाहेऽनुपपन्नस्तत्समीपं तीरं लक्षयति तथा सन्धिशब्दोऽपि पार्श्वद्वयं लक्षयति । अतएव सूत्रान्तरं "सन्धिमभितो यजेतेति" बौधायनोऽपि "सूक्ष्मत्वात् सन्धिकालस्य सन्धेर्विषय उच्यते । सामीप्यं विषयं प्राहुः पूर्वेद्युरपरेद्यु रिति" अत्र पर्वापरशब्दाभ्यां सन्धेः प्राचीन प्रतिपदिदं चाभिधीयते । तत्र पूर्वस्मिन्पर्वदिने प्रयोग प्रारभ्य नोत्तरस्मिन्, प्रतिपदिने य गसमाप्तिः ऋत्वाधानाग्निष्टुद्यावहिःसम्पादनमग्निपरिचरणमुपस्तरणं चेत्येवमादि प्रयोगप्रारम्भ स पूर्वेद्युरनुष्ठेयः तथा च तैत्तिरीय ब्राह्मणे श्रूयते "पूर्वेद्युरग्निष्टावहिः करोति यत्तमेवास्य स्तोमोपयसीति" शतपथब्राह्मणेऽपि "पूर्वेद्युरग्निं व्रह्मति उभरमन्वहं यजतीति" तत्र यद्यपि नामाध्वर्यु आह्वनीयगार्हपत्यदक्षिणाग्निषु "समाधे वर्च" इत्यादिभिर्मन्त्रैः समिदाधानलक्षणे अन्वाधाने क्रियमाणे पार्श्ववर्त्तिना यजमानेनापि स्रुक्शमीशाखादीनां मन्त्राणां पठनं सदृशं पर्वदिने क्रियते । प्रतिपद्दिने तु "कर्मणे वां देवेभ्य" इ

स्यादिभिरध्वर्युर्हविष्पत्नीसंनयनतण्डुलनिर्वापपुरोडाशप्रदानादि लक्षणप्रयोगं करोति तदिदं यजनम् । एतदेवाभिप्रेत्य गोभिल आह "पत्नीसंयाजा उपवसथ्याः पत्न्यादयोऽपि यष्टव्याः" इति । अत्रोपवासशब्देन स्नानपुरस्सरोदितिविवक्षितः तस्मिन् क्रियमाणे यजमानसमीपे देवतानां निवासात् तदेतत्तैत्तिरीयब्राह्मणे दर्शितम् "उपावसन् स्नो यज्ञमायन्ते देवताः सन्ति य एवंविदान्निसुपवसन्तीति" उपवासशब्दाभिधेयस्य पर्वदिने कर्तव्यस्यान्वाधानादेः पर्व्वणि चतुर्थ्यवति आख्यातयोऽर्थाविहितः कालः न तु चतुर्थ्योऽर्थः यागशब्दाभिधेयस्य पुरोडाशप्रदानादेः पूर्वोक्तः पर्व चतुर्थ्योऽर्थः प्रतिपदाख्यस्तव विहितः कालः न तु प्रतिपच्चतुर्थ्योऽर्थः । तदेतदाह लौगाक्षिः; "त्रीनंशानौपवसथस्य यागस्य चतुरोविदुः । द्वावंशावुत्सृजेदन्त्यौ यागे च व्रतकर्मणीति" तमेतं यत्कालं यत्पार्श्वोऽयमाह "पञ्चदश्याः परः पादः पञ्चादेः प्रथमाक्षयः" । कालः पर्वणयागे स्यादान्वाधानं तु न विद्यत इति इदमयातातपोऽपि "पर्वणोयश्चतुर्थोऽर्थ आद्याः प्रतिपदस्तय । यागकालः स विज्ञेयः प्रातरुत्थायिभिरिति" अत्र प्रातरिति विशेषणात् सूर्योदयस्योपरि मुहूर्त्तत्रयं यागकाल इत्युक्तं भवति प्रतिपदश्चतुर्थांशं निषेधति कात्यायनः "न यष्टव्यं चतुर्थांशे यागैः प्रतिपदः क्वचित् । रक्षांसि तद्धि जुम्भन्ति श्रुतिरेषा सनातनीति" तदेवं पर्वयज्ञान्वाधानादिकं प्रतिपदि चेद्विहितं सन्निपार्श्वयोरुभयोः प्रारम्भपरिसमाप्ती व्यवस्थिते । यदा पर्वप्रतिपदादयमारभ्य सम्पूर्णतिथौ भवतः तदा न सन्देहः यदा तु खण्डतिथौ तदा निर्णयोऽभिधीयते तत्र गोभिलः "आवर्त्तने यदा सन्धिः पर्वप्रतिपदोर्भवेत् । तदह्नीज्यं दृश्येत परतश्चेत् परेऽहनि । पर्व प्रतिपदोः सन्धिरवीगावर्त्तनाद्यदि । तस्मिन्नहनि यष्टव्यं पूर्वेद्युस्तदुपक्रमः । आवर्त्तनात् परः सन्धिर्यदि तस्मिन्नुपक्रमः । परेद्युरिष्टिरित्येष पर्वहयविनिश्चयः" इति आवर्त्तनमक्षोमध्यभागः । लौगाक्षिरपि "पूर्वेद्युरह्नि मध्याह्ने यदि पर्व समाप्यते । उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते । अपराह्णेऽथवा रात्रौ यदि पर्व समाप्यते । उपोष्य तस्मिन्नहनि यो भूते याग इष्यते" इति एतद्वचनेषु मध्याह्नादिशब्दा यौगिकाः न तु पञ्चधा विभागभाक्त्वे प्रवृत्तास्तथा सत्यक्षोमध्योमध्याह्न इति व्युत्पत्तेरावर्त्तनं मध्याह्नशब्देनाभिधीयते अतएव गोभिलेनावर्त्तनयुक्तः प्रयुक्तः यातातपेनापि नमध्यमशब्दः प्रयुक्तः "पर्वाह्णे मध्यमे वापि यदि पर्व समाप्यते । तदेवास्तः पूर्वेद्युस्तदहर्याग इष्यते" इति अक्षोऽपरोभागोऽपराह्णः अतस्ताभ्यां शब्दाभ्यामावर्त्तनात् पूर्वोत्तरभागावभिधीयेते । वाजसनेयिनान्तु विशेषमाह भाष्यार्थसंग्रहकारः "मध्यंदिनात् स्यादूर्ध्वमाह यज्ञिन् प्राक् पर्वणः सन्धिरिय हतीया । सा खण्डिका वाजसनेयिमत्या तस्यासंयोज्याथ परेद्युरिष्टिरिति" आवर्त्तनादूर्ध्वमस्तमयादर्वाक् यदा सन्धिर्भवति तदाऽस्तमितो तिथि प्रथमा रात्रौ सन्धिश्चेत् सा तिथिर्द्वितीया उभे अपेक्ष्य पूर्वाह्णे सन्धिमती पर्वतिथिस्तृतीया भवति तस्यां हतीयतिथौ पर्वकालस्यात्यन्तात् सा खण्डिकेत्युच्यते । आख्यानराध्यायिनामोहये विषये पूर्वेद्युरन्वाधानादिकं सन्धितिथाविष्टिर्वाजसनेयिनान्तूक्तरतिथाविष्टिः एवं सति वाजसनेयिनां न क्वापि सन्धिनातपूर्वेद्युरन्वाधानादिकमस्ति सोऽयं विशेषः आवर्त्तने तत; पुरा वा यदा सन्धिर्भवति तदा वाजसनेयि व्यतिरिक्तानां पर्वचतुर्थांशे दृष्टिः प्राप्नोति तत्र विशेषमाह गार्ग्यः "प्रतिपद्यप्रविष्टायां यदि वेष्टिः समाप्यते । पुनः प्रणीय कर्त्तव्येष्टिः कर्त्तव्या यागसिद्धयेति" पर्वणश्चतुर्थांशः प्रतिपदश्चतुर्थांशश्च यागकालत्वेन विहिताः । अत्र पर्वचतुर्थांशस्य विषय उदाहृत प्रतिपदंशानां विषय उदाहरिष्यते । उषःकाले सन्धौ प्रतिपदः प्रथमांशो यागकालः निशीथे सन्धौ हितीयांशः रात्रिप्रारम्भे सन्धौ हतीयांशः तत्त्वेन न्यायेनापराह्णे सन्धौ प्रतिपच्चतुर्थांशस्य यागकालत्वं प्राप्नोति तच्च प्रतिषिद्धं "न यष्टव्यं चतुर्थांशे" इति स्मृतेः अतस्तादृशे विषये याग एव लुप्येतेति चेत् नैवं हयातातपेन प्रतिप्रसवाभिधानात् "सन्धिर्यद्यपराह्णे स्याद्यागं प्रातःपरेऽहनि । कुर्याः प्रतिपदाग्रे चतुर्थेऽहनि न दुष्यतीति" एवं सति प्रतिषेधो निर्विषयः स्यादिति चेन्नैवं सद्यस्कालविषये चरितार्थत्वात् न च विषयं दर्शयति कात्यायनः "सन्धिश्चेत् सङ्गवादूर्द्ध्वं प्राक्चेदवर्त्तनादधः । सा पौर्णमासी विज्ञेया सद्यस्काल विधौ तिथिरिति" भाष्यार्थसंग्रहकारोऽपि "अन्वाहितिकालरणोपवासः पूर्वेद्युरेते खलु पौर्णमास्याम् । आवर्त्तनात् प्राग्यदि पर्वसन्धिस्तदैव यागः क्रियते समस्तः" इति । आपस्तम्बोऽपि "पौर्णमास्यामन्वाधानपरिक्रणोपवासाः सद्यो वा सद्यस्कालायां सर्वं क्रियते" इति सङ्गवावर्त्तनयोर्मध्ये पौर्णमासीप्रतिपदोः सन्धौ सति पूर्वेदाहृतै-

वद्याख्यावाक्यैः सन्धिदिन उक्तलक्ष्यते । नन्वीदृशे विषये सन्धिदिनात् परदिने याग उक्तलक्ष्यतां तथा सत्यपराह्णादिसन्धिव्याप्त्याधानन्यायागयोर्दृष्टभेदो भविष्यति । अस्ति च दृष्टान्तः बालसनेयिनामीदृशे विषये, अन्वाधानोत्कर्षे सति यागस्याप्युत्कृष्टत्वात् मैवम् अन्वयव्यतिरेकरूपाभ्यां विधिनिषेधाभ्यामस्याः प्रकृतायानिवारितत्वात् तत्र सद्याख्यविधयोऽन्वयरूपाः, प्रतिपच्चतुर्थ्यादौ प्रतिषेधाश्च व्यतिरेकरूपाः एवं च सति प्रतिषेधवाक्यं सावकाशं भवति । अमावास्यायां विशेषमाह बृहद्यातापः "द्वितीया त्रिमुहूर्ता चेत् प्रतिपद्यापराह्णिकी । अन्वाधानं चतुर्दश्यां परतः सोमदर्शनादिति" सोऽयं विशेषोऽनाश्रयणीयविषयः किन्तु बौधायनमतानुसारिविषयः अतएव बौधायनः "द्वितीया त्रिमुहूर्ता चेत् प्रतिपद्यापराह्णिकी । अन्वाधानं चतुर्दश्यां परतः सोमदर्शनात् । चतुर्दशी चतुर्यामा अमावास्या न दृश्यते । स्त्रीभूते प्रतिपद्येत् स्यात् पूर्वां तत्रैव कारयेत् । चतुर्दशी च संपूर्णा द्वितीया त्वयगामिनी । प्रातरिष्टिरमायां स्यादभूते कव्यादिका क्रियेति" एतेषां वचनानामयमर्थः यद्यपि चतुर्दशी संपूर्णा अस्तमयादर्वागमावास्या स्वल्पा तत एवापराह्ण्याप्त्यभावाच्छ्राद्धान्वाधानाय वा पूर्वोक्तरीत्या यद्यपि निमित्तभावं न भजते तथापि प्रतिपदि द्वितीयायां सत्यां चन्द्रस्य दृश्यमानत्वात्तद्दर्शने चेष्टेर्निरुद्धत्वात् प्रतिपद्युतायामप्यमावास्यायामिष्टिः स्वल्पामावास्योपेतायां चतुर्दश्यां श्राद्धान्वाधानादिकं कर्त्तव्यमिति । एतदेवाभिप्रेत्य स्मृत्यन्तरे "आदित्येऽस्तमिते चन्द्रः प्रतीच्यामुदियात् यदा । प्रतिपत्तिथिप्राप्तिः स्यात् पञ्चदश्यां यजेतेति" दृश्यविशेषेऽपि "ऐन्द्रे निरूढे पर्यस्ते पुरस्तादुदिते विधौ । बहुगुण्यं कृतं तस्मिन् पश्चादपि हि तद्भवेदिति" अस्यायमर्थः यदा सम्पूर्णचतुर्दश्यामविचारेणामावास्यामुद्दिश्य ज्ञात्वा अन्वाधानादिकं कृत्वा कृष्णिर्निर्वपेत् कृते तस्मिन् उभयकाले पूर्वस्यां दिशि चन्द्रमा उदेति । तदा न दर्शकर्म भवितुमर्हति दर्शकालस्याप्राप्तत्वात् किन्तु कालापरार्धं निमित्तीकृत्य दर्शदेवता अपनीय दात्रादिगुणविशिष्टान्नादिदेवतान्तराण्युद्दिश्य कृविः प्रक्षेपो विहितः तदेतत् तैत्तिरीयब्राह्मणे श्रूयते "यस्य कृष्णिर्निरूढं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् विभजेत् त्रयो मध्यमाः स्युस्तान्नये दात्रे पुरोडाशमष्टाकपालं कुर्य्यात् ये स्युर्विद्यास्तेभ्यः प्रदात्रे दधिचरुम् ये जोदिद्यास्तु विन्द्यते, शिपिविष्टाय ह्यते चरुमिति" सोऽयं दृष्टान्तोऽविधि निरूढे सति तदूर्द्धं पञ्चम्यां दिशीन्दावुदिते सति दर्शकर्मविधेर्यद्दैगुण्यशास्त्रकरोत्यावस्थितं तदेव वैगुण्यं होमदिने पश्चिमदिशि चन्द्रोदये भवतीति । एतदेव बोधायनमतमुपोद्बलयति श्रुतिः "यस्मिन्नहनि पुरस्तात्पश्चात् सोमौ न दृश्यते तदहर्यजेतेति" अयमर्थः त्रिनीवाल्यां पुरस्ताच्चन्द्रदर्शनं भवति द्वितीयायुक्तायां प्रतिपदि पश्चाच्चन्द्रो दृश्यते तयोरुभयोर्मध्यवर्त्तिन्यां कृष्णां द्विविधमपि चन्द्रदर्शनं नास्ति अतस्तस्मिन् दिने यष्टव्यमिति चन्द्रदर्शनोपेतायां शुक्लप्रतिपदि यागानुष्ठाने प्रायश्चित्तमाह कात्यायनः "यजमानेऽङ्गिरोमरुद्देवत्यां दिशि दृश्यते । तत्र व्याहृतिभिर्हुत्वा दक्षं दद्याद्द्विजातये" इति चन्द्रदर्शनराहित्यमेवाभिप्रेत्य बोधायनकारिकासु पठ्यते "दृष्टेरक्तं प्रातिपदादि नाड्यः सप्राप्ते वा यत्र भवन्ति तत् स्यात् । स्त्रीणासु नाडीषु दिनस्य पूर्वः कल्पोऽयष्टुश्च भवेद्द्वितीयः" इति अयमर्थः अमावास्यातिथेः सम्बन्धिनीषु नाडीषु स्त्रीणासु सतीषु तस्मिन् दिने अस्तमयात् पूर्वं प्रतिपत्सम्बन्धिन्यो नाड्यः सप्राप्ते वा यदि भवन्ति तदा तद्दिनमिष्टेरक्तं योग्यं सोऽयमेकः पक्षः । अमावास्याप्रतिपदौ यदा वर्द्धेते तदा द्वितीयः कल्पो भवेत् । अमायामग्निमाधाय सोमदर्शनरहिते प्रतिपद्दिने यागः कर्त्तव्य इति । स्वल्पत्वनिरेऽपि "अर्धगस्तमयात् यत्र द्वितीया तु प्रदृश्यते । तत्र यागं न कुर्वीत स्फुर्तेर्वासु पराङ्मुखः" इति बौधायनमतानुसारिणामग्न्याधानयद्दर्शश्राद्धमपि स्वल्पामावास्योपेतायां चतुर्दश्यां कर्त्तव्यं तथा च बौधायनेनोक्तम् "यदा चतुर्दशी यामान्तरीयमनुपूरयेत् । अमावास्या स्त्रीयमाणा तदैव श्राद्धमाचरेत् । चतुर्दश्यां चरुयामे अमा यत्र न दृश्यते । स्त्रीभूते प्रतिपदात्र भूते कव्यादिका क्रियेति" चतुर्थे यामे अमावास्या सम्पूर्णा न दृश्यते किन्त्ववसाने स्वल्पा सा चेत् परदिने स्त्रीयते तदानीं चतुर्दश्यां श्राद्धमाचरेत् । ननु चन्द्रदर्शनोपेतायां प्रतिपदीष्टिः समाम्नाता तथा च शतपथब्राह्मणम् "यदहः पश्चाच्चन्द्रमा अभ्युदेति तदहर्यजन्निभाङ्गानभ्युदेतीति" । तैत्तिरीयब्राह्मणमपि "एषा वै सुमना नामेष्टिर्यत्प्रत्यङ्चन्द्रमा अभ्युदेत्यस्मिन्नेवाह्नि लोके सुमनस्कं भवतीति" अयमर्थः येयमिष्टिश्चन्द्रदर्शनोपेते दिने क्रियते सेयमिष्टिः सुमनःशब्दवाच्या तादृशीमिष्टिं कृतवन्तं यजमानमभिलक्ष्य तस्मिन् दिने पश्चाच्चन्द्रमा उदेति तस्मै यजमानायास्मिन् लोके सुमनस्कं भवतीति वाक्यं तदेतच्छ्रुतिद्वयं बौधायनमतानुसारिव्यति-

रिक्तविषयम् एतदेवाभिप्रेत्य प्रतिपदृतुर्यांशे याग उदाहृतः । ननु बौधायनव्यतिरिक्तानामपि चन्द्रदर्शनयोग्यं द्वितीयायुतं प्रतिपदृदिनमेवौ लिखितं तथा च स्मृतिः "पर्वणोऽंशे चतुर्थे तु कार्या चेष्टिर्हविर्मखे । द्वितीयासहितं यस्यादृषयन्याश्वलायनाः" इति तदेतदावर्त्तनतत्पूर्वकालयोः सत्वौ मति दृष्टव्यं अपराह्णादिसन्धिषु चतुर्थांशेष्टाववप्राप्तत्वात् । तदेवं प्रकृतिरूपाया इष्टेः कालोनिरूपितः विकृतेस्तु कालो निरूप्यते तत्र कात्यायनः "आवर्त्तनात् प्राग्यदि पर्वसन्धिः स्यात्तु तस्मिन् दिवसे प्रकल्पा । तत्रैव यागः परतो यदि स्यात्तस्मिन् विकल्पाः प्रकृतेः परेद्युरिति" आवर्त्तने तत्र पुरा वा पर्वसन्धौ तस्मिन् सन्धिदिने प्रकृतियागं कृत्वा पश्चाद्विकृतिसम्बन्धी याग कर्त्तव्यः । यद्यावर्त्तनात्परतः सन्धिस्तदा केवलं विकृतियागः सन्धिदिने कर्त्तव्य इति प्राप्ते तु सन्धिदिनात्परेद्युरनुष्ठेय इत्यर्थः । आवर्त्तनतः पूर्वकाले ततः परकाले वा सन्धिरित्येतेषु त्रिष्वपि पक्षेषु सन्धिदिन एव विकृतेरनुष्ठानं प्रकृतेस्तु पूर्वोक्तरीत्या सन्धिदिने परेद्युर्वानुष्ठानं व्यवतिष्ठते

दर्शानां सर्वासां प्रकृतिर्दर्शपूर्णमासौ 'ऐन्द्राग्नमेकादशकपालं निर्वपेत् पशुकामः' इत्यादयः कात्यदाक्षान्तरपठिताः काम्येष्ट्योविकृतयः। तत्र "प्रकृतिवद्विकृतिः कर्त्तव्येति" न्यायेन विकृतीनामपि सन्धिदिनात् परेद्युः कदाचिदनुष्ठानं प्राप्तं तदेतदुदाहृतेन वचनेन निवार्यते" ।

तेन सन्धेः सूक्ष्मकालत्वेन कर्म्मानर्हत्वात् संक्रान्तिवत्तदुपलक्षितदिनविशेषे तत्तत्कर्म्म कर्त्तव्यमिति फलितम् । अत एव "ऋतुसन्धिषु वापयेत्" इतियतिधर्म्मे स्मृतिः तत्र यदि दर्शान्तविद्धा स्यात् तदा दर्शस्यैव सन्धित्वात् तत्रैव वपनं कुर्युः कुर्व्वन्ति तु पूर्व्विमायां तत्कालत्वपूर्व्विद्धान्तयोः समो विकल्पः अनुष्ठाने तु तत्र वचनविशेषाच्छिष्टाचाराच्च व्यवस्था" कालमा० । अयञ्च कालः श्रौतस्मार्त्तकर्म्माङ्गम् वैद्यके तु कालविशेषोऽपि परिभाषितः "यथा ऋतोरित्यादि सम्प्राहाहृतुसन्धिरिति स्मृतः । तत्र पूर्वोविधिरुच्यते सेवनीयः परोविधिः" वाग्भटः । ज्योतिः शास्त्रे तु ऋतोः सन्ध्युपलक्षितस्य कालभेदस्य "रवेर्भभेदैकगतेरधिकस्य यदंशसन्दं खलु सायनस्य । तदत्र राशिद्वयभागतष्टं खण्डं वसन्तादतवो भवन्ति । तत्सन्धयोऽर्द्धाङ्गदैर्घटीसमाः स्युर्हिसंगुणा (१२४ घटीसमाः) खेषु विषुवायनीयाः । स सन्धिसन्धिः खलु यत्र शेषं शून्यं भवेदेष विशेषपक्षः" ज्योषार्केण सन्धिसन्धित्वेनापि परिभाषा लता तत्र शून्यांशेषे स्नानदानादौ विशेषपुण्यफलम् । इतरस्य विवाहे वर्ज्यता । यथाह स एव "सन्धौ पुरन्ध्री शुचिमेति बन्ध्या मृतप्रजा वा यदि सन्धिसन्धिः" इति ।

ऋतुसेव्य त्रि० ऋतुभेदे सेव्यं वैद्यकोक्तगुणयुतमाहारादि । सुश्रुतोक्ते ऋतुभेदे सेवनीये पथ्यरूपे वस्तुभेदे तत्र तत्र दर्शितं यथा । "यस्मिन्नयस्मिन्नृतौ ये ये दोषा वृध्यन्ति देहिनाम् । तेषु तेषु प्रदातव्याः रसास्ते ते विजानता ।

प्रकृतिस्वल्पशरीराणां वर्षासु खलु देहिनाम् । मन्देऽग्नौ कोपमायान्ति संदूषान्नास्तादयः । तस्मात् क्लेदविशुद्ध्यर्थं दोषसंहरणाय च । कषायतिक्तकटुकै रसैर्युक्तमथाऽन्नपम् । नातिस्निग्धं नातिरूक्षमुष्णं दीपनमेव च । देयमन्नं नृपतये यज्जलं चोक्तमादितः । तप्तावरतमम्भोवा पिबेन्मधुसमायुतम् । व्यक्ति मेघानिलाविष्टे ह्यर्थशीतास्वसुखे । तरुणत्वाद्विदाहित्वं गच्छन्त्योषधयस्तदा । मतिमांस्तस्मिन्नित्यं नैव व्यायाममाचरेत् । व्यत्यम्बुपानावश्याय्यायाय्यधर्मातपांस्तथा । भूयाप्यपरिहारार्थं भयीत च विहायसि । शीते सान्नौ निवाते च गुरुप्रावरणे सति । यथाबलागबधभिश्च प्रशस्ताशुरुभूषितः । दिवास्वप्नमजीर्णञ्च वर्ज्ययेत्तत्र यत्नतः" । वर्षासेव्यासेव्ये ।

"सेव्या शरदि यत्नेन कषायस्वादुतिक्तका । क्षीरेक्षुविकृतिर्लाजा मुद्गादिजाङ्गला । सलिलञ्च प्रसन्नत्वात् सर्व्वमेव तदा हितम् । सरःस्वाप्लवनञ्चैव कमलोत्पलशालिषु । प्रदोषे शयनं पादासेवनं स्नानुवासनम् । तिक्तञ्च सर्पिषः पानं रक्तमोक्षश्च युक्तितः । वर्षासूपचितं पित्तं शरेऽपि विरेचनैः । नोपेयात्तीक्ष्णमध्युष्णं क्षारं खड्गं दिवाऽऽतपम् । रात्रिजागरणञ्चैव मैथुनञ्चापि वर्ज्जयेत् । स्वादु शीतजलं मद्यं शुचिस्फटिकनिर्म्मलम् । शरच्चन्द्रांशुनिर्द्धौतमयत्नोदयनिर्विषम् । प्रसन्नत्वाच्च सलिलं सर्व्वमेव तदा हितम् । सचन्दनं वा कर्पूरं वासस्वामलिनं शुचु । भजेच्च शारदं माल्यं सोधोः पानञ्च युक्तितः । पित्तप्रशमनं यच्च तच्च सर्व्वं समाचरेत्" । शरदि सेव्यासेव्ये

"हेमन्तः शीतलो रूक्षो मन्दसूर्य्योऽनिलाकुलः । ततस्तु शीतमासाद्य वायुस्तत्र प्रकुप्यति । कोष्ठस्थः शीतसंस्पर्शात्तः पित्तीकृतोऽनलः । रूक्षत्वोष्णवयत्वाभ्यां पक्षात् स्निग्धं तदा हितम् । हेमन्ते लवणाम्लतिक्तमधुरकटुकौकटम् । सर्पिरौक्षमरिष्टमथनं हितमुच्यते । तीक्ष्णान्यपि च पानानि पिबेदग्रभूषितः । तैलाभ्यक्तः सुखोष्णे च वारिकोष्ठेऽवगाहयेत् । साल्कारधामे मकृति कौशेयास्तरणावृते । शयीत

शयने वापि हते गर्भस्त्रोदरे । स्त्रीःस्त्रिहागुरुधृपाढ्याः पीनोरुजघनस्तनीः । एकामन्यं निषेवेत मैथुनं तर्पितो रूपः। मधुरं तिक्तकटुकमम्लं लवणमेव च । अन्नपानं तिलान् माषान् शाकानि च दधीनि च । तल्लेच्छविहितो: शालीन् सुगन्धांश्च नवानपि । प्रसन्नानूपमांसानि क्रव्याद्विलशयिनाम् । स्रोतसां प्लवानाञ्च पादिनाञ्चोपजाङ्गलान् । मद्यानि च प्रसन्नानि यच्च किञ्चिल्लघूपदम् । कामतस्तांश्चिषेवेत पुष्टिमिच्छन् हिमागमे" हेमन्तसेव्यादि "एष एव विधिः कार्यः शिशिरे सप्तदाहृतः" ।

"लवणम् नचिरं स्नेहा शैत्याच्छीतगुणत्वाच्च । औष्ण्यादुष्णं न कर्षितः करुते च गदान् बहून् । ततोऽम्लमधुरस्निग्धं लवणानि गुरूणि च । वर्जयेद्दमनादीनि कर्म्माण्यपि च कारयेत् । पक्षिकं यवान् शालीन् शुद्धान् नीवारकोद्रवान् । लावादिविष्किरैर्मेदोवाद्यैश्च युक्तितः । पटोलनिम्बवार्त्ताकिकैश्च हिमात्यये । सेवेत माधवेऽरिष्टान् शीधु माध्वीकमासवान् । व्यायाममक्षं धर्मं तीक्ष्णञ्च कवलग्रहम् । सुखाम्बुना च स्नानार्थान् सेवेत कुसुमागमे । तीक्ष्णरूक्षकटूष्णारकषायं कोष्णमद्रवम् । यत् सूक्ष्ममधुप्राय वस्त्रे भोजनं हितम् । व्यायामोऽत्र निगूढाङ्गसन्धिनिर्घातजो हितः । उत्सादनं तथा स्नानं वनिताः कानने च । सेवेत निर्झरेष्वापि हेमन्तोपचितं कफम् । शिरोविरेकधूमनिरूहकवलादिभिः । वर्जयेन्मधुरस्निग्धदिवास्वप्नगुरुद्रवान्" वसन्तसे०

"व्यायामक्षुण्णमायासं मैथुनञ्चातियोगि च । रसांस्तीक्ष्णगुणोद्रिक्तान् निदाघे परिवर्जयेत् । सरांसि सरितोऽपि वनानि रुचिराणि च । चन्दनानि परार्ध्यानि स्रजः सकमलोत्पलाः । तालवृन्तानिलाहारांस्तथा शीतगृहाणि च । घर्मकाले निषेवेत वासांसि सुलघूनि च । शर्करास्वण्डदध्यानि सुगन्धीनि हिमानि च । पानकानि च सेवेत मन्थांश्चापि सशर्करान् । भोजनं च हितं शीतं सघृतं मधुरद्रवम् । घृतेन पयसा रात्रौ शर्करामधुरेण च । प्रत्यग्रकुसुमाकीर्णशयने हर्म्यसंस्थिते । शयीत चन्द्रमाकीर्णः स्पृश्यमानोऽनिलैः सुखैः" ग्रीष्मसेव्यादि ।

"तापात्यये हिता नित्यं रसा ये गुरवस्तथा । पयोमांसरसाः कोष्णास्नेहाश्च हृतानि च । हृष्टेष्वपि यत्किञ्चिदभिष्यन्दि तथैव च । निदाघोपचितस्त्वेव प्रकृत्या सशीरयम् । निर्हरेदनिलघ्नेन विधिना विधिकोविदः । नदीजलं कृत्तमुक्तासदृशं तथाऽऽतपम् । व्यायामञ्च दिवास्वप्नं व्यायत्वात्र वर्जयेत् । यवगोधूमान् शालींश्चाश्नन्यथर्तुतः । हर्म्यमध्ये निशाते च भजेच्छय्यां महोत्तराम् । सविषप्राणिविषमूलक्षाराभिषेचनादिभिः । समाप्तं तदा तोयमान्तरीक्षं विषोपमम् । वायुना विषदुष्टेन प्राहृष्येण च दूषितम् । तद्धि सर्वोपयोगेषु तस्मिन्काले विवर्जयेत् । निरूहैर्बस्तिभिश्चान्यैस्तथान्यैर्भोजनादिभिः । कृपितं शमयेद्वायुं वार्षिकं वा चरेद्विधिम् । ऋतावृतौ य एतेन विधिना वर्त्तते नरः । घोरान्नतुकृतान् रोगान्नाप्नोति स कदाचन" भाष्टसे०

ऋतुस्तोम पु० एकाहसाध्ये यागभेदे "नाकसद ऋतुस्तोमादिकस्तोमाश्चाभिप्लवाहानि" आश्व० श्रौ० ६,८,२६ । "ऋतुस्तोमनामानश्च षडेकाहाः" नारा० ।

ऋतुस्थला स्त्री अप्सरोभेदे "ऋतुस्थला हताची च विश्वाची पूर्व्वचित्त्यपि" भा० आ० १२२ अ० अप्सरोभेदकथने ।

ऋतुस्नाता स्त्री कर्त्तरि क्तकाले विहितदिने (चतुर्थदिवसे) स्नाता । कृतुकाले चतुर्थदिवसे शुद्धार्थं कृतस्नानायां स्त्रियाम् । "ऋतुस्नातां तु यो भार्य्यां सन्निधौ नोपगच्छति" मिता० स्मृतिः धर्म्मलोपभयाद्रात्रौ ऋतुस्नातामिमां स्मरन्" रघुः । "पूर्व्वं प्रस्थेऽतुस्नाता यादृशं नरमङ्गना । तादृशं जनयेत् पुत्रं भर्त्तारं दर्शयेदतः" सुश्रुतः । अधिकसूक्तमार्त्तवशब्दे ऋतुमत शब्दे च । दारविशेषणत्वे पुंस्त्वम "यः स्वदारानृतुस्नातान् स्वस्थः सन्नोपगच्छति" मिता०स्मृतिः ।

ऋतुस्नान न० कर्त्तरि शुद्ध्यर्थं स्नानम् । रजस्वलायाश्चतुर्थदिनकर्त्तव्ये स्नाने तस्या आर्त्तायाः स्नानप्रकारश्चार्त्तवशब्दे ८०८४० उक्तः ।

ऋतुहरितकी स्त्री ऋतुभेदे द्रव्यभेदे न सेव्या हरितकी । वर्षादिषु ऋतुषु क्रमेण सन्धवशर्करागुडशुण्ठीजीरकमधुगुडैर्मिश्रयेन सेव्यायाः हरितक्याम् । "सिन्धूत्थशर्करागुडशुण्ठीकणामधुगुडे क्रमात्, वर्षादिष्वभया प्राश्या रसायनगुणैषिणा" भावप्र० ।

ऋते अव्य० ऋत (सौत्रः) के । वर्जने २ विनार्थे च । "अवेहि मां प्रीतमृते तुरङ्गमात्" रघुः "अंशादृते निपिक्तस्य नीललोहितरेतसः" कुमा० । "शक्रोऽन्यः सहितुं वेगमृते देवं पिनाकिनम्" भा० व० ३६ अ० । "नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते" मनुः "अभ्यादधीत हरेत्सर्वं दुहितृभ्यो धनादृते" या० । एतच्छब्दस्य विनार्थत्वात्

तद्योगे पञ्चमी द्वितीया तृतीया च भवति उक्तोदाहरणेषु पञ्चमी द्वितीयादृष्टव्या तृतीयाया उदाहरणं वाच्यम् ।

ऋतेकर्म्म अव्य० वेदे ३त०वर्ज्जने अव्ययी० अच्समा० । कर्म विनेत्यर्थे । "ये कर्म्मणः क्रियमाणस्य मन्नृतेकर्म्मणः सपाजायन्त देवाः" ऋ० १०,५५,६ ।

ऋतेजा त्रि०ऋते यत्ननिमित्तं नायते जन-विट् अलुक्-स० । यत्ननिमित्तजाते । "ऋन्ने म ऋेषऋतपा ऋतेजाः" ऋ० ६ ३ १ । "ऋतेजा यत्ननिमित्तं जातः" भा० ।

ऋतेयु पु० ऋणस्य ऋत्विजि ३ऋभेदे । "ऋदेयुश्च ऋतेयुश्च परिव्याधश्च कीर्त्तिमान् । एकस्य द्वितस्यैव त्रितस्यादित्यसन्निभाः ॥ ऋत्रेः पुत्रस्य धर्म्मात्मा ऋषिः सारस्वत स्तथा । वरुणस्यर्त्विजः सप्त पञ्चमां दिशमाश्रिताः" भा० आनु० १५० अ० । २पौरवे नृपभेदे । "पूरोर्यं प्रवक्ष्यामि" इत्युपक्रम्य । "संयातिस्याहंयातीरौद्राश्वऋतेषुताः स्मृताः । ऋतेयुस्तस्य कलेयुस्यखिलेयुऋतेयवः । जलेयुः सन्नतेयुश्च धर्म्मस्यत्रतेयवः । दृशेतेरारमः पुत्रा वनेयुश्चावमः स्मृतः । एताच्या इन्द्रियाणीव सत्यस्य जगदात्मनः । ऋतेयोरन्तिनावोऽभूत्" भाग० ६ । २० , ३ ।

ऋतेरत्नम् पु० ऋते उद्देश्यतया वर्ज्जितं रत्नोपरः । यत्ते "ऋतेरत्ना वै यत्तः" ऐत०ब्रा० । यत्तस्य रत्नेभ्यो रक्षणीयत्वात् तथात्वम् ।

ऋतोद्य न० ऋत+वद-भावे क्यप् । सत्यकथने "ऋतं वदन्ना ऋतोद्येषु" अथ० १४,१,३१ ।

ऋत्विज् पु०ऋत+यज-क्विन् उ०प० । १याजके, "अग्न्याधेयं पाकयज्ञानग्निहोत्रादिकान् मखान् । यः करोति ऋतौ यस्य स तस्यर्त्विगिहोच्यते" इति मनूक्ते २स्वानुष्ठेयवैदिककर्म्मकरे । ऋत्विजश्च षोड्श तत्र सङ्ख्याश्चत्वारः तेषां प्रत्येकं सहकारिण ऋत्वय ऋत्वय इति षोड्श । विवृतिरध्वराकाण्डे ८५ पृ०दृश्या । "अथर्त्विजो यां काञ्चिदाशिषमाशासते सा यजमानस्यैवेति श्रुतेः "ऋत्विग्वादेनियुक्तौ च सभौ संपरिकीर्त्तितौ । यज्ञे स्वाम्यानुयात् पुण्यं ऋानिवादेऽथवा जयम्" इति ऋहस्पत्युक्तेश्च ऋत्विक्कृतयज्ञफलं वेतनदक्षिणादिना वरयितुरेव । "श्रोतकार्त्तक्रियाहेतोर्वृणुयादृत्विजः स्वयम्" या० । "तस्य सांख्यपुरुषेण तुल्यतां बिभ्रतः स्वयमकुर्व्वतः क्रियाः । कर्त्तुता तदुपलम्भतोऽभवद्वृत्तिभाजि करणे यथार्त्विजि" भा० । ऋत्विजः कर्म ष्यञ् । आर्त्विज्य ऋत्विक्कर्म्मणि आर्त्विज्यवद्दे उदा० ऋत्विक्कर्म्मार्हे "दाक्षिण्यादिदं ऋतमार्त्विजीनैः" भट्टिः ।

ऋत्विय त्रि०ऋतुरस्य प्राप्तः तत्र भवं तत्रानुष्ठेयं वा वेदे घस् सिच्वात् भत्वाभावेन न गुणः । १प्राप्तर्तुकाले०कालभवे २ऋतुकालानुष्ठेये च "ऋयं वो गर्भऋत्वियः प्रत्नं सधस्थमासदत्" यजु० ११,१८ । "दधे ह गर्भऋत्वियं यतोजाता प्रजापतिः" २१,६३ । ऋत्वियावान् लोके तु यत् । ऋतव्य इत्येव तेष्वर्थेषु त्रि० ।

ऋत्वियावत् त्रि०ऋत्वियऋतुकालभवं प्रजोत्पादनकर्म्म तत्रानुष्ठेयकर्म वाऽस्यास्ति मतुप् मस्य वः दीर्घः । १प्रजोत्पादनकर्मयुक्ते २तत्रानुष्ठेयकर्मयुक्ते च । "ऋतं न ऋत्वियावतः" ऋ० ८,८,१० स्त्रियां ङीप् । "ऋयं न ऋत्वियावती धीतिरेति नवीयसी" ऋ० ८,१२,१० । "ऋतौ वसन्तादिकालेऽनुष्ठेयं यत्तत्कर्म ऋत्वियं तद्वती" भा० ।

ऋत्वा त्रि० ऋतुरस्य प्राप्तः तत्र भवं तत्रानुष्ठेयं वा कर्म यत् संज्ञापूर्वकविधेरनित्यत्वात् न गुणः अजन्तश्च । ऋत्वियार्थे "अपश्यं त्वा मनसा दीध्यानां स्वायां तनू ऋत्व्ये साधमानाम्" ऋ० १०,८२,२ ।

ऋदूदर त्रि० ऋद् उदरं यस्य वेदे पृ० मलोपः । ऋदूदरे निरु० । "ऋदूदरः सुकृतो मा नो अस्यै" ऋ० २,३३,५, ऋदूदरेण सख्या सचेय" ऋ० ८,४८,१० ।

ऋदूपा त्रि०पृषो० । १ऋदूनपातिनि २गमनपातिनि ३दूरपातिनि निरु० । "उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिदूदुधा" ऋ० ८,७७,११ । इमामेवर्चमधिकृत्य यास्केन तथार्थतया निर्वचनं कृतम् ।

ऋदूदुध पु० पृषो० । १मर्म्मगन्तृ नवेधिनि २गमनवेधिनि ३यन्त्रवेधिनि ४दूरवेधिनि च निरु० । ऋदूपायच्छे उदा० । तामेवर्चमधिकृत्य यास्केन तथार्थतया निरुक्तम् ।

ऋद्ध न० ऋध-क्त । १पक्वम् दृतधान्ये २सिद्धान्ने ३वृद्धौ च । ४समृद्धे ५सम्पन्ने त्रि० "इयमृद्धवती दृषद्वती" नैष० । अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम्" गीता "धनधान्यैश्वर्य्यादिभिः सम्पन्ने प्रपञ्चरूपेण विवर्त्तमाने च दैविष्णौ पु० । "ऋद्धः ऋद्धाक्षरो मन्त्रः" विष्णुस० धर्म्मादिभरूपेतत्वात् ऋद्धः" भा० । "सर्व्वर्द्धिर्द्धो वृद्धात्मा" विष्णुस० । "प्रपञ्चरूपेण वर्द्धमान ऋद्धः" भा०

ऋद्धि स्त्री ऋध-भावे क्तिन् । १वृद्धौ २सम्पत्तौ ३सिद्धौ च । "परिच्छन्नप्रभावर्द्धिर्न मया न च विष्णुना" कुमा० । "ऋद्धो भवान् ज्योतिरिव प्रकाशते" भा० व० १११ । कर्त्तरि क्विप् । ४पार्श्वस्थां यक्षरत्ना० । ५लक्ष्म्यां

ईदेवभेदे । करणे क्लिच् । ७ओषधिभेदे स्त्री राजनि० ।

तल्लक्षणं यथा । "ऋद्धिर्दृद्धिश्च कन्दौ द्वौ भवतः कोशयामले । श्वेतलोमान्वितः कन्दोलताजालैः सरन्ध्रकः । स एव ऋद्धिर्दृद्धिश्च भेदमध्येतयोर्द्वये । तुलयन्त्रिसमा ऋद्धिर्वामावर्त्तफला च सा । दृद्धिस्तु दक्षिणावर्त्तफला प्रोक्ता महर्षिभिः । 'ऋद्धिर्बल्या त्रिदोषघ्नी शुक्ला मधुरा गुरुः । प्राणैश्वर्य्यकरी मूर्च्छा रक्तपित्तविनाशिनी" भावप्र० । "काकोली क्षीरकाकोली जीवकर्षभकावुभौ । तथा मेदा महामेदा ऋद्धिर्दृद्धिर्मधूलिका । निरूहेषु त्रयं लाभमेषु वर्गो विधीयते" सुश्रु० । तयोर्लाभे वर्गमध्ये वाराह्या देया ऋषभशब्दे प्रमाणम् । टकवेरपत्याञ्च । 'तरौ तत्र निबध्याथ क्षत्रियं प्रददौ शुभा । आदितिर्मम पुत्रार्थं सौभाग्यार्थं तथैव च । निष्क्रयेण मया दत्तः कश्यपस्तु तपोधनः । इन्द्रोदत्तस्तथैवाग्र्या सौभाग्यार्थं ततो मम ! सोमस्याथ रोहिण्या ऋद्ध्या च धनदस्तथा । एष सौभाग्यदोदत्तः पारिजातो न संशयः" हरिवं० १२६ । "ऋद्धिः कुबेरकान्ता च जलेश महिषी तथा" हरिवं० १२६ अ० । "सावित्री ब्रह्मणःसाध्वी कौशिकस्य गवी सती । मार्कण्डेयस्य धूमोर्णा ऋद्धिर्वैश्रवणस्य च" भा० अनु० १४६ अ० । "शक्रः शचीपतिर्देवयमोधूमोर्ण्या सह । वरुणः सह गौर्या च सहद्ध्या च धनेश्वरः" हरि० १५ अ० । साऽस्त्यस्यास्ति मतुप् । ऋद्धिमत् दृद्धियुक्ते त्रि० स्त्रियां ङीप् । "तन्महिममन्युजनाधिरूढैः" कुमा० । "धाराग्रहेष्वातपवद्ऋद्धिमत्" रघुः तन्त्रोक्ते दुष्कारे । "अथाभिधास्ये त्वरितां त्वरितं फलदायिनीम् । "तारो रमा वह्निवियदृद्धिर्वामश्वरान्विता" ऋद्धिः खकारः" तन्त्रसारः ।

ऋध दृद्धौ दिवा० स्वा० च पर० अक० सेट् उदित् इरित् । दिं० ऋध्यति ऋध्यात् ऋध्यतु आर्ध्नुत् स्वा० ऋध्नोति ऋध्नुवन्ति ऋध्नुयात् ऋध्नुत ऋध्नुहि आर्धौत् । उभयतः । आर्ध्नुत-आर्धीत् । आनर्ध आनृधतुः । अर्द्धिता ऋध्यात् अर्द्धिष्यति आर्द्धिष्यत् । अर्द्धितव्यः अर्द्धनीयः । ऋध्यः । ऋद्धः ऋर्द्धः । ऋध्यन् ऋध्नुवन् अर्द्धः । उदित्त्वात् वेट् अर्द्धित्वा ऋद्ध्वा । समृध्य । "नाऋद्ध्वा यत्तदृध्नोति नाऋत्वं ब्रह्म वर्द्धते मनुः' सपत्नाऋध्यतो दृद्धा हीनमात्मानमेव च । सोऽहं न स्त्री नचाप्यस्त्री न पुमान् नाप्रमाणप" भा० स० ४६ अ० । 'पृथिव्यामन्ये समनसन्तु स आर्ध्नोत्" अथ० ४,१६,१ । वे भक्षयन्तो न वसून्यान्धुः" २,२५,८ । आत्मनेपदित्वमपि "ते च लोमश ! लोकेऽस्मिन्नृध्यन्ते केन हेतुना" भा० व० ६४ । वेदे गणव्यत्यासात् अम् । "य एषां भृत्यान्धयत स जीवात्" ऋ० १,८४,१६ । मन्त्रानि धीतिरुत यज्ञमृध्नुत" १०,११०,२ । अन्तर्भूतण्यर्थत्वात् सक० । णिचि अर्द्धयति ये "त्वां यज्ञैर्यविष्ठ्ये अर्द्धयन्ति" ऋ० ७,८२,४ । सनि वेट् अर्द्धिधिषति ईर्त्सति । वेदे गणव्यत्यासात् य तेन । "इच्छानास्वा यतं हिमा ऋधेम" अथ० ६,५५,४ । ऋधच्छब्दे उदा० । "ऋधद्यस्ते धिया मर्त्तः यशमते" ऋ० ६,२१४। स्वा० तर्पणे वर्द्धने च सक० । "आद्ध्नोति हविष्कृतिम्" ऋ० १,१८,८ । "अन्तत एव तद्देवान्द्ध्नुवन्ति" ऐ० ब्रा० । 'सोऽहं प्राग्भवतैव भूतजननीमृद्ध्नोमि" भवभूतिः ।

अधि+अधिकवृद्धौ । "यदस्मिन्निदं सर्वमध्यार्ध्नोत्तेनाध्यृद्धः" इति शत० ब्रा० १४,६,१० ।

आ+समृद्धौ । "कृष्णाच्चोनर्ष्यमेतं समानो यमस्य लोकेऽधिरज्जुरायत्" अथ० ६, ११८,२ । ताच्छील्ये चानश् ।

उप+उपगमे । "तस्मादेतत् क्षत्रिय एव नक्षत्रमुपेत्यैश्वर्य्यमाशंसतीव" शत० ब्रा० २,१,२,१७ । "उपर्त्तमेत् स्त्रीकुर्य्यात्" भा० । "एतेषामेव संवत्सरमुपेर्त्तमेत्" २,३,२,१४ ।

वि+ऋद्धिविगमे विगतायां वृद्धौ "अथ यस्मान्न क्षत्तिकाभ्यादधीतर्क्षाणां वा एता अग्रे पत्ना आसुः सप्तर्षीनु ह स्म वै पुरस्ता दित्याचक्षते ता मिथुनेन व्यार्द्धन्नाभी ह्युत्तराहि सप्तर्षय उद्यन्ति पुर एता अग्रमिव वै तद्योमिथुनेन व्यृद्धः स नेन्मिथुनेन व्यृद्धा" इति शत० ब्रा० २,१,२,४ । "व्यार्द्धन्ना विगतर्द्धिका अभवन्" भा० । गण्य० साधुः । "यद्यज्ञक्षये यज्ञक्षये जुह्वयात् पशुभिर्व्यृध्येत पापीयानृत्स्यात्" १२,१,२,८ । "अव्ययं विभक्तीत्यादि" पा० सूत्रे विगता ऋद्धिः व्यृद्धिः" सि० कौ० ।

सम्+ऋद्धेराधिक्ये अतिशयितवृद्धौ । "अव्ययं विभक्तीत्यादि" पा० "ऋद्धेराधिक्ये समृद्धिः" सि० कौ० । "कः खिल्वेतान् समृध्नुयात्" मनुः । "यत्पुत्रं समृध्यन्तं यो मोहात् समुपेक्षते" भा० व० ५४ अ० "अयं कामः समृध्यताम्" यजु० २६,२ । षत्व्यत्यासः ।

ऋधज(क्) अव्य० ऋध-बा० अजि(कि)क् स्वरा० । १सत्ये, २वियोगे, ३शैघ्र्ये, ४क्षमायाञ्च । ५लाघवे, च औदम० । वियोगः पृथक्करणम् । "ऋधगृहेषु क्षणत" ऋ० ८१, ८,११ । "ऋधक् पृथक् क्षणुत कृणुत" भा० । "यदि-

न्नो दिवि पर्शो यत्रधक्" ऋ० ६,४०,५ । "ऋधक् सा वो मरुतः" ७,६०,४ । "ऋधग्देवा इह यजा चिकित्व." १,२८,१ । "ऋधगिया स मर्त्यः" ऋ० ८,१०१,१ । "ऋधक् सत्यम्" भा० । "ऋधगयतो अनिमिषं रक्षमाणाः" ६,१,३ । "ऋधगयतः सत्येन गच्छत" भा० । कर्त्तरि अञ्जिक् । ६समङ्गे, ७वङ्गे च त्रि० । "ऋधगया ऋधगतायमिवाः" यजु० ८,२० । "ऋधक् समङ्गमयाः" "ऋधक् यत्तं समङ्गियत्" वेददी० । "ऋधक् सोम स्वस्तये" ऋ० ६, १० । "ऋधक् ऋधुवन तया च" यास्क० "ऋधगति पृथगभावस्यानुप्रवचनम् भवति अणप्यधोत्यर्थे दृश्यते" भा० । "ऋधगधुवेम कविनेषितास." ऋ० ६, ५६,१० । "ऋधक् समङ्ग यथा तना च्छयेम" भा० ।

ऋधत् त्रि० ऋध+शतृ वेदे गणव्यत्ययः । वर्द्धमाने । "दश ग्व्या ऋधत्योतिबारास आशव." ऋ०८,४६,२३ । "ऋधदयोऽश्वगणाः" भा० । रयिशब्दो वेगवाची जसः स्थाने प्रथमा । "शमाभिर्ऋधद्वाराय्याजने ददाय" ६,१, २ । "ऋधद्वाराय ऋधत् समङ्गं यार वरणाय धन यस्य" भा० ।

ऋन्फ्(म्फ) हिंसायां तुदा०सृचा०सक०पर०सेट् । ऋम्फति आर्म्फीत्—आर्फीत् ऋम्फाम् बभूव अम चकार आनर्फ

ऋफ दाने हिंसायां निन्दायां युद्धे च सक० ज्ञाघायाम् अक० तुदा० पर० सेट् । ऋफति आर्फीत । कविकल्पद्रुमे ऋफधातुस्तदर्थे पा० मते रिफधातुस्त्वर्थेषु ऋफधातुस्तु हिंसायामिति भेदः । आनर्फ आनृफतुः ।

ऋबीस न० ऋ+वल्ने भास-अच् पृ० । १पृथिव्यां निरु० सप्तस्थे २अग्नौच । "हिमेनाग्निं घ्रंसमवारयेथां पितुमतीं गूर्ज्जमस्मा अधत्तम । "ऋबीसे अत्रिमश्विनावनेतमृज्रासन्यतः सर्वगणं स्वस्ति ऋ० १,११६,८ । इमामूचथुरित्यत्र यास्केन ऋबीसमपगतभासमन्तर्हितभासं गतभासम वा इति निरुक्तोक्तम् "योऽयं ऋबीसे पृथिव्यामग्निरन्तरोदधिवनस्पतिवत्स्थ एक एतन्मन्यते" "युवमृबीसमत तप्तमत्तये" ऋ० १०,३९,८ । "तप्तमृबीसमत्तये" भा० । "अत्रिर्यद्वामवरोहत्पर्वसम" ऋ० ५,७८,४ । "ऋबीसं तुर्याग्निम्" भा० । "अनृतातिथ्यपनोदपूतिदोषोधान बीसपक्वान्युदकानि वर्ज्जयेत्" काल्या० ४,१०१,५ । "ऋबीसशब्दः पृथिवीवाची "योऽयमृबीसे पृथिव्यामिति" यास्कोक्तेः" कर्यासे यत ऋं तिन्कृदि" कर्कः ।

ऋभु पु० अरि स्वर्गे ऋदिनौ वा भाति ऋ++भू-ड । १देवे । तेन ऋभुत्वस्य स्वर्गवाचित्वं द्रष्टव्यं तच्च प्रसादात् पूर्वमनुक्रमितिं तस्य च स्वर्गे पुंस्त्वम् बोध्यम् । "सभाचीनोऽस ऋभवः समस्वरन्" ऋ०८,३,७ । "तं नेमिऋभवो यथा" ऋ०७५,५ । २मेधाविनि निरु० । "अग्नये ब्रह्म ऋभवस्ततक्षु" ऋ० १०,८०,७ । "ऋभिर्विप्रः पुर एता जनानामृभुर्धीर उशना काव्येन" ऋ०१,८३,५ । ३देवानामपि वन्द्ये देवे । "ऋभवोनाम तत्रान्ये देवानामपि देवताः । तेषा लोकाः परतरे यान् यजन्तीह देवताः" भा० व० १५४५६ । चाक्षुषमन्वन्तरे ये ४देवगणभेदे च । "चाक्षुषस्यान्तरे तात मनोर्दैवानिमान् शृणु । आद्या प्रभूतः ऋभवः पृथुकाश इरीकसः । तेषामाद्यः सङ्घराजः शुचिः देवगणाः स्मृताः" हरिवं० ७ । ५वैवस्वतेऽष्टमे ५जातिभेदे "ऋभणा त्वेति रथवृत" "कात्या० ४,६,५, "ऋभु सौधन्वन सात्वतापरपर्यायस्तैर्धर्मिकेभ्योऽनो नियत कश्चिज्जाति विशेष इति पाणिनिरपि मन्यते" कर्कः । तत्तीयसवनीये सुधन्वनः पुत्ररूपे ६देवभेदे च । "इन्द्रोपयात यवसो नमात सौधन्वना ऋभवो माप भूत" ऋ० ४,३५,१, एतत्सूक्ते च नवत्वैन्द्रत्वं गुणादिपठनम् । ऋ+भा-डु । ७उरुभासमाने त्रि० "ऋभुमृभुक्षणो रयिम्" । ऋ० ४, ३७,५, "ऋभुमरुभासमानम्" भा० ऋभुरस्यास्त इष्टतया स्तुत्य । ऋभुमत् ऋभुदेवताके त्रि० । "ऋभुमन्नं वाजवन्तं त्वा कवे" ऋ०३,५२,६ । ऋभुणा दृष्टं साम अण । आर्भव तद्दृष्टे सामभेदे आर्भवशब्दे उदा० । क्विप् । ऋभुरेव देवे पु० ।

ऋभुक्ष पु० ऋभवो देवा क्षियन्ति वसन्त्यत्र क्षि+आधारे बा० ड । १स्वर्गे २वज्रे ३इन्द्रे च रायमुकुट । ऋभूनाम्नां क्षीयते गम्यते कर्म्मणि बा० ड । ऋभूनामके देवे "उप नो याजा अध्वरमृभवाः" ऋ० ४,३७,१, "ऋभवा ऋभवः" भा० ऋभुक्षन् पु० ऋभुनाम्ना क्षायते क्षै-क्षये धातूनामनेकार्थत्वात् ख्यातौ कर्म्मणि कनिन् । ऋभुनामख्याते देवभेदे "स्तोमो याजा ऋभुक्षणो दद्दे वः । "ऋभुमृभुक्षणो रयिम्" ऋ० ४,३७,२,५ ।

ऋभुक्षिन् पु० ऋभुनः वज्रं स्वर्गोवाऽस्यास्ति इनि । इन्द्रे खादौ ऋभुना ऋभुक्षाणौ यशादाजादौ टिलोपः ऋभुक्ष इत्यादि "इन्द्रो विश्वा ऋभुक्षा वाजो अर्य" ऋ०७,३८,२, "ऋभुक्षेवाचरति ऋभुक्षिन्+आचारे क्विप् अनुनासिकदीर्घः ऋभुक्षीणति । तत: क्विप् ऋभुक्षीन् तद्दाचारान्विते त्रि० ।

ऋभ्व त्रि॰ उरुभूतः पृषो॰। महति उरुभूते निरु०।"सुप्रेष्य पुरुवर्षसमृभ्वधिनतममाप्राप्रमाप्रायानाम्" ऋ० १०,१२०,६, अस्या ऋव: यास्केन "स्तोतव्यं बहुरूपमुरुभूतमीश्वरतममाप्रायमाप्रायानामिति"क्रमेण पदानि निरुक्तानि। ऋभु: उरुभूत इत्याचरति ऋभु+आचारे क्विप् ततो बा० अतु। ऋभुत् उरुभूते महति। "पुरुरुतोयः पुरुगूर्त्त ऋभुं। एकः पुरुप्रशस्तः" ऋ० ६,३४,२, "ऋभान् महान् भा० अत्यन्तत्वाच्छान्त्यलोपः। कनिन्। ऋभुन् तत्रार्थे "जुषद्वया मनुषस्योर्ध्वसाधया यत्ते" ऋ० १०,२०,५ बा०असच्। ऋभस ऋतिहृद्वे। "सत्यशवसऋभसम्" ऋ०५,५२,८, "ऋभसम् अतिमहद्वमिति"भा०"इन्द्रं न यज्ञैर्विश्वगूर्त्तमृभ्वसमष्टये"ऋ०८,७०,३,

ऋश हिंसायां गतौ च सौ०पर०सक०सेट्। अर्शति आर्षीत् आनर्श आनृशतुः अर्शः। ऋश्यः।

ऋश्य त्रि०ऋश-कर्मणि क्यप्। १हिंसे २मृगे पुंस्त्री शब्दरत्ना०। स्त्रियां जातित्वेऽपि योषिदधत्वात् टाप्। "ऋश्यो न दृष्यत्नयपानमा गहि"ऋ०८,४,१८,"ऋश्य ऋश्याक्ष्योमृग इव दृश्यत् भा०"वसुभ्य ऋश्यानालभेत"यजु०२४,२७, "ऋश्यो मयूरः सुपर्णस्ते गन्धर्वाणाम्" यजु० २४, २७, ततः चतुर्थ्यां ऋश्या० क। ऋश्यक तत्सदृशदृष्टेयादौ। भावे क्यप्। १हिंसायां न०। ऋश्यं हिंसां प्रतनेन दृदाति दा-क। ऋश्यद कूमे पु० "युवं वन्दनऋश्यादादूपथुः" ऋ० १०,३६,८। "ऋश्यदात् कूपात्" भा०।

ऋश्यपादु त्रि० ऋश्यस्येव पादावस्य अन्यलोपः समा०। मृगसदृशपादयुक्ते स्त्रियां ङीप् पङ्गावत्र। "ऋश्यपदीं दृषदतीं मोषेधां विषदास्यत" अथ० १,१८४।

ऋश्यादि पु०पाणिन्युक्ते चतुरर्थ्यां कप्रत्ययनिमित्ते शब्दगणे च गणः। "ऋश्य,न्यङ्क्षु,शर,निलीन,निवास, निपात, निधान, निबन्ध, विबद्ध, परिगूढ, उपगूढ, अयनि, सित, मत वेष्टन, उत्तरापथिन्, अपथिन्, स्थल, बाह्य, खदिर, अङ्गार, अनड्वह्, अरड, परिवेश, वेणु, वीरण, खण्ड, दण्ड, परिघ, कर्दम, अंशु"।

ऋष गतौ वधे च तुदा०पर०सक०सेट्। ऋषति आर्षीत्। आनर्श आनृषतुः अर्षिता ऋष्यात् अर्षिष्यति आर्षिष्यत्। अर्षितव्यः अर्षणीयः ऋष्यः। अर्षिता दैदिन् ऋष्टः ऋष्टवान् ऋष्टिः।"ऋष्टाभ्यां रज्जु ऋषत्यर्थतिम्"अथ०६, ४,१७। अथ दाक्षायण्यस्तपार्थति" यत० ब्रा० ५, ४,२,८।"हृदं न छित्वान्यृषन्त्यर्थयः" ऋ०१,५२,७, "यदुदर्थस्य मेदस परिरिण्यते तदुगुदे न्यृषेत्" यत० ब्रा०२,८,४,५। "अथ पर्यृषति"इत्यपक्रम्य "समं भूमि पर्यर्षणं करोति" २,६,१,१८। अस्य वेदे स्वादित्वमपि दृश्यते। गणव्यत्यासात् साधुः।"अर्षन्त्वापस्त्वयेह प्रसूताः" ऋ० ३,३०८। "ऋषी गतौ व्यत्ययेन शप्"भा०"तस्मा-आपोष्टतमर्षन्ति सिन्धवः" १,१२५,५। "मही न धारा-त्यर्षो अर्षति" ६,८६,४४। "एता अर्षन्त्यनला भवन्ती" ४,१८,६। "एता ऋर्षन्ति हृद्यात् समुद्रात्" ४,५८,५। "शमाखन्दमर्षति" यजु० २३,५५।

अभि+आभिमुख्येन गतौ"अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मा-सु" ऋ०४,५८,१०। "ऋषन्ति वरिवो गवे अभ्यर्षन्ति सुष्टुतिम्' ६,६२,३।

नि+परि+सम्+इत्यादौ गत्यर्थधातोरिवार्थे। "गुहाकरिन्द्रं याता वीर्येण न्यृष्टम्" ऋ०४,१८,०। "न्यृष्ट नितरां प्राप्तम्" भा०। "अय निधिः सरमे अद्रिबुध्नोगोभि-रश्वेभिर्वसुभिर्न्यृष्टः"१०,१०८,७।

ऋषङ्गु पु० यदुवंश्ये राजभेदे। "यदुस्तस्यान्वयात्सत्वः क्रो-ष्टा तस्माद्भविष्यति' इत्युपक्रम्य "वृजिनीवतस्तु भविता ऋषङ्गुस्तस्माजितः। ऋषङ्गोर्भविता पुत्रस्ततश्चित्ररथ-स्तथा" भा० अनु० १४७ अ।

ऋषभ पु० ऋष-अभक्। १ओषधिभेदे ओषधिभेदश्च द्रव्य-गणान्तर्गतः। स च सुश्रु०दर्शितः यथा

"अथातो द्रव्यसंग्रहणीयमध्यायं व्याख्यास्यामः। समा-सेन सप्तविधं यदुद्रव्यगणा भवन्ति। तद्यथा विदारिगन्धा विदारी सहदेवा विश्वदेवाश्वदंष्ट्रा प्रत्यक्पर्णी यतावरी सारिवा कृष्णसारिवा जीवकर्षभकौ महासहा क्षुद्रसहा दृढ्यौ पुनर्णवैरण्डो हंसपादी हस्तिकाल्यृषभी चेति"। तल्लक्षणादुक्तं भावप्र०"ऋषभातिविषा कृष्णा काकनासाच चामरैः। जीवकर्षभकौ स्त्रेयौ हिमाद्रिप्रियरोद्भवौ। रसोनकन्दयत्कन्दौ निःसारौ सूक्ष्मपत्रकौ। जीवकः कूर्च-काकार ऋषभो वृषशृङ्गवत्। जीवकोमधुरः स्निग्धो स्व-ल्पाङ्गः कूर्चशीर्षकः। ऋषभो वृषभोवीरो विषाणी ब्राह्म्य-पि। जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ। मधुरौ पित्तदाहघ्नौ कायवातनुत्यापहौ"। अयञ्चाष्टवर्गान्तर्गतः। जीवकर्षभकौ भेदे काकोल्यौ क्षीरशुक्लिके। अष्टवर्गोऽष्ट-भिर्द्रव्यैः कथितस्तरकादिभिः" भावप्र०।"राज्ञामप्यष्टवर्गस्तु यतोऽयमतिदुर्लभः। तस्य दस्य प्रतिनिधिं गृह्णीयात्तदुपं

भिषक्। मेदा जीवकर्षभकौ। ऋद्धिर्वृद्धिस्तथा ऽस्तौ। यरीविदार्य्यङ्गस्यावाराकौस्तु क्रमात् क्षिमेत्" भावप्र०। २सुनिभेदे च। ऋषभकूटगन्धे सुनिभेदो हरः। वर्षति रेतः इष-अभक् पृ०बलोपः। १ऋषभे "ते ते भवन्तृक्षण ऋषभासो यथा उत" ऋ० ६,१६,४७। ऋषभासो रेतोवर्षकाद्वृषभाः" भा०। "उप ऋषभस्य रेतस्युमेन्द्र! तव वीर्य्ये"२८,८ "ततो नियुक्ताः पशवो यथा शास्त्रं मनीषिभिः। तं तं देवं समुद्दिश्य पक्षिणश्च, यथाविधि ऋषभाः शास्त्रपठितास्तथा जलचराश्च ये" सर्वांस्तानभ्युक्ष्य ते तत्राग्नियज्ञकर्मणि" भा० आश्व०८८। अश्वमेधस्य वृषभादयश्च सलक्षणा अश्वमेधशब्दे दर्शिताः अथ व्याघ्रादिषु पाठात् उपमितसमासः। नरःऋषभ इव वाक्ये नरर्षभः एवं राजर्षभ पुरुषर्षभ इत्यादि। सर्वत्र प्राशस्त्यं तेन द्योत्यते। "श्युत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थयाचकाः" अमरोक्तेः। क्वचिदृषाक्ष्येऽपि श्रेष्ठत्वं द्योत्यते। "सात्वतामृषभं सर्वे भूतावासममंसत' भाग० २०२,१०। "स्वलक्षणा प्रादुरभूत् किलास्यतः स मे ऋषीणामृषभः प्रसीदतु" भाग० २,४,२३। गोलक्षणान्तर्गतवृषभलक्षणमुक्तं वृहसं०"सास्नाविलम्बकुक्षाच्यौ मूषकनयनाश्च शुभदा गावः। प्रचलच्चिपिटविषाणाः करटाः खरसदृशवर्णाः। दशसप्तचतुर्दन्याः प्रलम्बसुखलाङ्गना विनतपृष्ठाः। लक्षस्थूलश्रीवा यवमध्या दारितखुराश्च। ह्रस्वातिदीर्घजङ्घा गुल्फैरतितनुभिरतिवृद्धिर्वा। अतिकृकदाः जघनेहा नेष्टा क्षीणाधिकाङ्ग्यश्च। वृषभो ऽप्येवं स्थूलातिलम्बवृषणः सिरातनक्रोडः। स्थूलासिराचितगण्डस्त्रिस्थानं मेहते यश्च। मार्जाराक्षः कपिलः करटो वा न शुभदो द्विजस्येष्टः। कृष्णौष्ठतालुजिह्वः श्वसनो यूथस्य घातकरः। स्थूलयवलक्षणश्चित्रकः सितोदरः कृष्णसारवर्णश्च। वृद्धजातो ऽपि ह्यास्यो यूथावनाशाय वृषभः। श्यामकपुष्पचिताङ्गो भस्मारुणसन्निभो विड्वालाक्षः" विप्राणामपि न शुभं करोति वृषभः परिष्टहीतः। ये चोद्धरन्ति पादान् पङ्क्त्यादिव योजिताः क्रमयीवाः। कातरनयना क्षीणाश्च पृष्ठतस्ते न भारसहाः। वृद्धसंहतताम्रोष्ठास्तनुस्निग्धवस्त्यास्यतालुजिह्वाश्च। तनुरुक्षोच्चश्रवणाः सुकृतयः स्पष्टजङ्घाश्च। आताम्रसंहतखुरा व्यूढोरस्का वृत्तस्कन्धपृष्ठाः। स्निग्धश्लक्ष्णतनुत्वग्रोमाणस्त्वास्यतनुवृक्काः। तनुभूस्थूलवालधया रक्तान्तविलोचना महोच्छ्वासाः। सिंहस्कन्धास्तत्वलक्ष्मलाः पृथिताः हृगताः। वामावर्तैर्भ्रमे दक्षिणपार्श्वे च दक्षिणावर्तैः। शुभदा भवन्त्यनड्वहो जङ्घाभिर्वृषणकर्णाभिः। वैदूर्य्यसन्निकाशबुद्बुदेक्षणाः स्थूलनेत्रवर्त्माणः। पार्ष्णिभिरुत्कटाभिः श्रस्ताः सर्वेऽपि भारवहाः। ग्रीवोद्देशे सवलिर्मार्जारसुखः सितश्च दक्षिणतः। कमलोत्पललाक्षाभः सुबालधिर्वाजितुल्यजवः। लम्बैर्वृषणैर्मेढोदरश्च सङ्क्षिप्तयकृत्प्लीहक्रोडः। त्रेयो भाराध्वसहो जवेऽश्वतुल्यश्च बलफलः। सितवर्णः पिङ्गालसास्यविषाणलक्षणो महाघण्टः। हंसो नाम शुभफलो यूथस्य विवर्धनः प्रोक्तः। भूस्थूलबालधिरातास्यकृष्णो रक्तान्तकर्णश्च। कल्याणस्य स्वामिनमचिरात् कुरुते पतिं लक्ष्म्याः। यो वा सितैकचरणो यथेष्टवर्णश्च सोऽपि शस्तफलः। मिश्रफलोऽपि ग्राह्यो यदि नैकान्तप्रशस्तो ऽस्ति"। "ऋषभाख्यमेतददितिं सजसाः सयौ चेत्" इत्युक्ते ४छन्दोभेदे पुष्कर्णच्छन्दे ६क्षोरपुष्के भेदि० ७पर्वतभेदे धरणी। ८वराहपुष्के ९जिनभेदे च हेम०। "नाभिमूलात् यदा वायुः उत्थितः कुरुते ध्वनिम्। वृषभस्येव निर्घोषं तेनेयं ऋषभः स्मृतः" इति सङ्गीतदा० उक्ते १०स्वरभेदे। "निषधर्षभगान्धारषड्जमध्यमधैवताः। पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः" अमरः। ११भगवदवतारभेदे स च नाभेर्मेरुदेव्यामजान भाग०५।६ अ०। "नाभिरित्यत्कामो मेरुदेव्या भगवन्तं यज्ञपुरुषमवरुद्धात्माऽयजत" इत्युक्तस्य तपःप्रसन्नो भगवांस्तयोः प्रत्यक्षतयावतीर्य्य इत्युक्तं तत्रैव। यथा "भवद्भिरवितृप्तेभिर्बहुमन्यमभियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति' १८। यद्यप्यसमानाभरूपस्य कैवल्यात् ६६ अथापि ब्रह्मवादो न क्षमा भवितुमर्हतीति ममैव हि सुखं यदु द्विजदेवकुलम्। तत आत्मनीत्रीयेऽकलयाऽवतरिष्यन्नात्मतुल्यमलपक्षमाण इति निशामयन्त्या मेरुदेव्याः पतिमभिधायान्तर्हिते भगवान्! बर्हिषि तस्मिन्नेवं विष्णुदत्त भगवान् परमर्षिभिः प्रसादितोनाभेः प्रियचिकीर्षया तदवरोधायने मेरुदेव्यां धर्मान् प्रदर्शयितुकामो वातरशनानां श्रमणानामृषीणामूर्ध्वमन्थिनां शुक्लया तन्वावततार" ६अ०। "शुक उवाच ऋषभ उवाच नैतत्सुपत्र्यं वाभिव्यञ्जमानभगवल्लक्षणं साम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावं प्रकृतय: प्रजा आह्मणा देवतासाधनतत्समवनायातितरां लक्षयुः। तस्य ह वा इत्थं वर्त्मना वरीयसा वृहच्छो-

केन च ओजसा बलेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदं नाम चकार। यस्य हैन्द्रः स्वर्गमानो भगवान् वर्षेण ववर्ष तदधार्थं भगवान्ऋषभदेवो योगेश्वरः प्रदर्शितात्मयोगमायया स्वं वर्षमजनाभं नामाभ्यवर्षत्। नाभिस्तु यदाभिजितं सुप्रजास्त्वमवरुध्याति प्रमोदभरविभ्लवोद्गदगद्गिरया गिरा स्वैरं स्फुटीतनरलोकसधर्म्यं भगवन्तं पुराणपुरुषं मायाविजृम्भितमतिर्वत्सेति सानुरागमपलालयन् परां निर्वृतिमुपगतः। विदितानुरागसागरमतिजनपदो राजा नाभिराजं सभार्यमेतदवायामभिषिच्य ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां प्रसन्ननिपुणेन तपःसमाधियोगेन नरनारायणाख्यं भगवन्तं वासुदेवमुपासीनः कालेन तन्निधानमवाप। यत्र ह पाण्डवेय! श्लोकावुदाहरन्ति। को नु तत् कर्म राजर्षेर्नाभेरन्वाचरेत् पुमान्। अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा। ब्रह्मण्योऽन्यः! कुतोनाभेर्विप्रा मञ्जुलयूजितः। यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा। अथ ह भगवानृषभदेवः स्वं वर्षं कर्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासोऽनुरूपगुणविभवानुरूपया सुदक्षिणानाम्न्या पत्या धर्मानेवावशिक्षमाणो जयन्त्यामिन्द्रदत्तायामात्मभवविभवलक्षणं कर्मसमाम्नायमभियुञ्जानोऽजनाभमात्मसमानानां शतं जनयामास। येषां खलु महायोगो भरतो ज्येष्ठः श्रेष्ठगुण आसीत् येनेदं वर्षं भारतमिति व्यपदिशन्ति"। १२राजकर्तृव्ये ऋषभसक्थ्यादिदक्षिणके एकाहसाध्ये यागभेदे "ऋषभगोसवौ" कात्या० २२,११,२, "ऋषभस्य गोसवस्य ऋतू भवतः" कर्कः "पूर्वोत्तरौ"४। "पूर्वः ऋषभसंज्ञोत्तरः" कर्कः "दक्षिण ऋषभसक्थं द्वादशं वा यतम्" ५। "ऋषभाणां सक्थं द्वादशाधिकं शतं वा" संज्ञकः। १२ यज्ञान्तरयुक्ते ऋषभेदे च। "एकविंशस्तोमेन ऋषभो वाशतर ईजे विश्वामां राजा तदेतद्वाशत्यार्चाभिगीतम्। वाशतरे यजमाने ब्रह्मणे ऋषभे जनाः। अश्वमेधे धनं विप्रा विभजन्तेऽथ दक्षिणाः" शत०१२,५,४,१५,

ऋषभकूट पुं० हेमकूटपर्वते भा०व०११०अ०। "पर्वतं स समासाद्य हेमकूटमनामयम्। अचिन्त्यानद्भुतान् भावान् ददर्श सुमहान् नृप!" इत्युपक्रम्य तदाश्चर्यमूलप्रश्ने युधिष्ठिरं प्रति लोमशवाक्यं यथा

"अस्मिन्नृषभकूटेऽभूदृषभोनाम तापसः। अनेकशतवर्षायुस्तपसो लोपनोद्यतः। स वै सम्भाव्यमाणोऽन्यैः लोपाद्विरिक्तमात्मानं कृ। यं हैव व्याहरेत् कश्चिदपकारान्तरं जेष्यन्। ततश्चाकूतमात्मनश्च स तापसः। व्याहरंश्चेह पुरुषो मेघयज्ञेन वार्त्रहा। एवमेतानि कर्माणि राजंस्तेन महर्षिणा। कृतानि जानि चित् लोधात् प्रतिषिद्धानि कानि चित्। नन्दां त्वभिगता देवा पुरा राजर्षिति स्तुतिः। अन्वपद्यन्त सहसा पुरुषा देवदर्शिनः। ते दर्शनं त्वनिच्छन्तो देवाः शक्रपुरोगमाः। दुर्गमुत्क्रुरिमं देशं गिरिप्रस्थमुपस्थिताः। तदा प्रभृति कौन्तेय! नरा गिरिमिमं सदा। नाशक्नुवन्नभिद्रष्टुं कृत एवाधिरोहितुम्। ततस्तपसा शक्रो दृष्ट्वेमं सहसागिरिः। आरोढुं वाऽपि कौन्तेय! तत्राग्नियतवाग्भव। इह देवास्तदा सर्वे यज्ञानाजह्रुरुत्तमान्। तेषामेतानि लिङ्गानि दृश्यन्तेऽद्यापि भारत!। कुशाकारेव दूर्वेयं संस्तीर्णेव च भूरियम्। यूपप्रकाराबहवो दृश्यन्ते विषमास्ते!। देवास्त्रयस्त्रिंशदेवात्र यजन्त्यद्यापि भारत!।"

ऋषभगजविलसित न० "भतिभगैः खरात् खलृषभगजविलसितमिति" छ०र०उक्ते षोडशाक्षरपादके वर्णवृत्तभेदे।

ऋषभतर पु० तनुः ऋषभः, तनुत्वे तरच्। भारवहने मन्दे गवादौ ऋषभे। जातित्वेन स्त्रियां ङीष्। ऋषभतरी।

ऋषभद्वीप पु०न० ऋषभ इव श्वेतः द्वीपः। द्वीपभेदे श्वेतद्वीपे यत्र क्रौञ्चो नाम पर्वतोऽस्ति स च कुमारेण विदारितः "ऋषभद्वीपमासाद्य सेव्यं क्रौञ्चनिसूदकम्" भा०व०८४अ०।

ऋषभध्वज पु० ऋषभोऽयमोध्वजोऽस्य। ईश्वराख्ये शिवदेवे। ऋषभश्चेतनादयोऽत्र। २अर्हद्विशेषे मेदिनिः।

ऋषभी स्त्री ऋषभ+गौरा०ङीष् जातौ वा ङीष्। १शरारायां स्त्रियाम् २शूकशिम्बाम् ३शिरालायाम् ४विधवायाञ्च मेदिनिः। ५ऋषभजातिस्त्रियां स्त्रीगव्याम् ६कपिकच्छ्वाञ्च। ऋषभशब्दे उदा०।

ऋषि पु० ऋषति ज्ञानेन संसारपारं ऋषी गतौ कि। ज्ञानेन संसारपारगते १यविष्ठादौ २याज्ञवल्क्यादाचार्ये ३वेदे ४शिरसे च तस्य व्युत्पत्तिर्यथा। ऋषी हिंसा गतौ धातुर्विद्यासत्यतपःश्रुतिः। एष सन्निधयो यस्मात् ब्राह्मणश्च ततस्त्वृषिः। विज्ञस्तमकालं तु बुद्ध्या हस्तिलघिघ्वयम्। ऋषन्ति परमां यस्मात् परमर्षिस्ततः स्मृतः। गत्यर्थाद्दृशते धातोर्नामनिर्वृत्तिकारकम्। यस्मादेतत् स्वतन्त्रस्तत्कालाच्च ऋषिता मतेति" मत्स्य० पु०१२०अ० "अजान् ह वै पुत्रीस्तपस्यमानान् ब्रह्मा स्वयम्भूरभ्यानर्षत्ते ऋषयोऽभवन् तदृषीणामृषित्वम्" ऐत० ब्रा० कृदादिरयम् "विद्याविद्यामतयोविषयः प्रसिद्धाः" भरतः। "सप्त ब्रह्मर्षयो विदि-

ऋषिप्रवरर्षयः । काण्डर्षिश्च श्रुतर्षिश्च राजर्षिश्च क्रमावराः" रत्नकोषोक्ते सप्तविध ऋषिर्भवति । तेषां विशेषस्त्रिका०उक्तः यथा "व्यासाद्यास्तु महर्षयः । परमर्षयस्तु भेलाद्याः देवर्षयः कणादयः । ब्रह्मर्षयो वसिष्ठाद्याः सुश्रुताद्याः श्रुतर्षयः । क्षुपपर्णादयो राजर्षयः काण्डर्षयस्त्वमी । जैमिन्याद्याः" वसिष्ठाद्याश्च मरीच्याद्याः दश । "भृगुर्मरीचिरत्रिश्च अङ्गिरा पुलहः क्रतुः । मनुर्दक्षो वसिष्ठश्च पुलस्त्यश्चेति ते दश । ब्रह्मणो मानसाश्चैते उत्पन्नाः स्वयमीश्वराः । परत्वेनर्षयस्तस्माद्भूतास्तस्मान्महर्षयः" मत्स्य०१२०अ०। तेषां पुत्राणां तु तपसैव ऋषित्वं यथोक्तं तत्रैव "ईश्वराणां सुतास्तेषामृषयस्तान्निबोधत । काव्यो बृहस्पतिश्चैव कश्यपश्चावनस्तथा । उतथ्यो वामदेवश्च अगस्त्यः कौशिकस्तथा । कर्दमो बालखिल्याश्च विश्रवाः सप्तिवर्चसः । इत्येते ऋषयः प्रोक्तास्तपसा ऋषितां गताः"। किन्तु मरीच्यादीनामेव ऋषित्वं भूरि प्रसिद्धम् । तएव भोगसमाप्तौ नक्षत्रक्रमेण गगनमण्डले उत्तरस्यां सप्तर्षीकाः स्थिताभवंत्यन्ते तेषां च गति कालसहितवारादि निरूपितं बृह० सं० यथा "सैकावलीव राजति सप्तितोत्पलमालिनी सहासेव । नाथवतीव च दिग्यैः कौबेरी सप्तभिर्ऋषिभिः । ध्रुवनायकोपदेशाच्चरिन्तीवोत्तरा भगक्रिया । यैश्चारभ्य तेषां कथयिष्ये दृष्टगर्गसंहितात् । आसन्मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ । षड्दिकपञ्चद्वियुतः (२५२६) शककालस्तस्य राज्ञश्च । एकैकस्मिन्नृक्षे शतं शतं ते चरन्ति वर्षाणाम् । प्रागुत्तरतश्चैते सदोदयन्ते सदाध्वीकाः। पूर्वे भागे भगवान् मरीचिरपरे स्थितो वसिष्ठोऽत्रात् । तस्याङ्गिरास्ततोऽत्रिस्तस्याश्च पुलस्त्यः पुलहः क्रतुरिति भगवानसङ्गक्रमेण पूर्वाद्याः । तत्र वसिष्ठं सन्निवसत्यरुन्धती साध्वी । उल्काग्रनिधूमाद्यैर्हता विपर्यया विरूपयो दुःखाः । हन्युः स्वं स्वं वर्गं विपुलाः स्निग्धाश्च तदृष्ट्वा । गन्धर्वदेवदानवमन्त्रौषधिसिद्धयक्षनागानाम् । पीड़ाकरो मरीचिर्नयो विद्याधराणां च । यक्षयवनदरदपारतकाम्बोजांस्तापसान् वनोपेतान् । हन्ति वसिष्ठोऽभिहतो विदर्भिदो रश्मिसंयुतः । अङ्गिरसो ज्ञानयुता धीमन्तो ब्राह्मणाश्च निर्दिष्टाः । अत्रेः कान्तारभया जलजान्यन्मोनिधिः सरितः । रक्तःपिशाचदानवदैत्यभुजङ्गाः कृताः पुलस्त्यस्य । पुलहस्य तु नूनफलम् क्रतोस्तु यज्ञाः सयज्ञभृतः" । एते च स्वायम्भुव मन्वन्तरे सप्तर्षय आसन् ततोऽधिकारसमाप्तौ नक्षत्रक्रमेण नभोमण्डले स्थिताः । मन्वन्तरभेदे तु अन्ये एव सप्तर्षयोभवन्ति यथाह हरि० ।

१ "मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः । पुलस्त्यश्च वशिष्ठश्च सप्तैते ब्रह्मणः सुताः । उत्तरस्यां दिशि तथा राजन् । सप्तर्षयः स्थिताः । नाभा नाम तथा देवास्तासन् स्वायम्भुवेऽन्तरे" ।

२ और्वो वशिष्ठपुत्रश्च स्तम्बः काश्यप एव च । प्राणोदृहस्पतिश्चैव दध्यङ्निश्च्यवनस्तथा । एते सप्तर्षयस्तात ! वायुप्रोक्ता महाव्रताः ।

३ वसिष्ठसुताः सप्तासन् वासिष्ठा इति विश्रुताः । हिरण्यगर्भस्य सुता ऊर्ज्जानाम सुतेजसः । ऋषयोऽत्र मया प्रोक्ताः कीर्त्यमानान्निबोध तान् ।

४ काव्यः पुरुस्तथाग्निर्जनुर्धामा च भारत । कपीवान् कपीवांस्तत्र सप्तर्षयोऽपरे ।

५ वेदबाहुर्यदुश्रेष्ठ सुनिर्वेदधिरास्तथा । हिरण्यरोमा पर्जन्य ऊर्द्धबाहुश्च सोमजः । सप्तमेत्वन्तरेऽतीते एते सप्तर्षयोऽपरे ।

६ भृगुर्नभो विवस्वांश्च सुधामा विरजास्तथा । अतिनामा सहिष्णुश्च सप्तैते तु महर्षयः । चाक्षुषस्यान्तरे तात ! मनोर्हैवानिमान् शृणु

७ अत्रिर्वशिष्ठो भगवान् काश्यपश्च महामुनिः गौतमश्च भरद्वाजोविश्वामित्रश्च तथैव च । तथैव पुत्रो भगवान्कक्षीवश्च महातपाः । सप्तमोजमदग्निश्च ऋषयः सप्त्वृते दिवि । मन्वन्तरे व्यतिक्रान्ते चत्वारः सप्तका गणाः । कृत्वा कर्म दिवं यान्ति ब्रह्मलोकमनामयम् । ततोऽन्ये तपसायुक्ताः स्थानं तत्पूरयन्त्युत । अतीतावर्त्तमानाश्च क्रमेणैतेन भारत ! । एतान्युक्तानि कौरव्य ! सप्तानीतानि भारत ! ८ रामो व्यासस्तथात्रेयो दीप्तिमानिति विश्रुतः । भारद्वाजस्तथाद्रोणिरश्वत्थामा महाद्युतिः । गौतमश्शारद्वतश्चैव भरद्वाजाम गौतमः । कौशिको गालवश्चैव वृद्धः काश्यप एव च । एते सप्त महात्मानोभविष्या मुनिसत्तमाः । ब्रह्मणः सदृशास्तेते धन्याः सप्तर्षयः कृताः ।

९ मेधातिथिस्तु पौलस्त्योवसुः काश्यप एव च । ज्योतिष्मान् भार्गवश्चैव द्युतिमानङ्गिरास्तथा । सवनश्चैव वाशिष्ठ आत्रेयो हव्यवाहनः । पौलहः सप्तः इत्येते मुनयो रोहितेऽन्तरे

१० दशमे तत्र पर्याये द्वितीयस्यान्तरे मनोः । हविष्मान

पौलहश्चैव सुलतिश्चैव भार्गवः । आपोमूर्तिस्तथात्रेयो वाशिष्ठश्चाष्टकः स्मृतः । पौलस्त्य प्रमतिश्चैव नभोगश्चैव काश्यपः । अङ्गिरानभसः सत्यः सप्तैव परमर्षय ।

११ एकादशे तु पर्याये तृतीयस्यान्तरे मनोः । तस्य सप्त ऋषीणामपि कीर्त्यमानान्निबोध मे । हविष्मान् काश्यपश्चापि हविष्मान् यस्य भार्गव । तरुणश्च तथात्रेयोवासिष्ठ स्तनयस्तथा । अङ्गिरासोदधिष्णुश्च पौलस्त्योनिश्चरस्तथा । पुलहाग्नितेजाश्च भव्याः सप्त महर्षयः ।

१२ चतुर्थस्याथ सावर्ण ऋषीन् सप्तनिबोध मे । द्युतिर्वपिष्ठ पुत्रस्य आत्रेयः सुतपास्तथा । अङ्गिरास्तपसोमूर्त्ति स्तपस्वी काश्यपस्तथा । तपोधनश्च पौलस्त्यः पौलहश्च तपोरविः । भार्गव सप्तमस्तेषाम्"

१३ त्रयोदशेऽथ पर्याये भव्ये मन्वन्तरे मनोः । अङ्गिरास्चैव धृतिमान् पौलस्त्यो हव्यपस्तु यः । पौलहस्तत्त्वदर्शी च भार्गवश्च निरुत्सुकः । निष्प्रकम्पस्तथात्रेयो निर्मोहः काश्यपस्तथा । वेतपाश्चैव वासिष्ठः सप्तैते तु महर्षयः ।

१४ चतुर्दशेऽथ पर्याये भौत्यस्यैवान्तरे मनोः । अग्नीध्रः काश्यपश्चैव पौलस्त्यो भार्गवस्तथा । भार्गवोऽतिबाहुश्च शुचिरङ्गिरसस्तथा । युक्तश्चैव तथात्रेयः शुक्रोवाशिष्ठ एवच । अजितः पौलहश्चैव सप्तैव ऋषयस्त इते । सप्तर्षीणां उत्तरात्तुदयः" मत०आ० २,१,२,१ । उक्तः क्रमो यथा "सप्तर्षीनुह्य वै पुरस्ता दित्याचक्षते अमीह्युत्तराहि सप्तर्षय उदञ्चि" ।

विश्वामित्रसृष्टाः सप्तर्षयस्तु दक्षिणस्यां नभोमण्डले स्थिताः यदुक्तं "ततो ब्रह्मतपोयोगात् प्रजापतिरिवापरः । ससर्ज दक्षिणे भागे सप्तर्षीनपरान् पुनः" । "मनुमेकाग्यमासीनमभिगम्य महर्षयः" । "ऋषयो दीर्घसत्त्रत्वाद्दीर्घमायुरवाप्नुयुः" । "ऋषयःसंयतात्मान इति च" मनुः । "वसन्ति ऋषिकुलेषु सः" "आकौर्ष्णमृषिपत्नीनाम्" रघुः । "ऋषीन् ज्योतिर्मयान् सप्त" "सप्तर्षिरुत्तरावचितायमेषा-मृक्षाणां विश्वान् परिवर्त्तमानः" कुमा० । वेदमन्त्रस्य प्रथमं १४दृष्टरि च । "येन यज्ञमिमा दृष्टं सिद्धिः प्राप्ता च येन वै । मन्त्रेण, तस्य तत् प्रोक्तमृषि-भावः स उच्यते" योगिया० । येन ऋषिणा कल्पादौ यो-मन्त्रोदृष्टस्तस्य मन्त्रस्य स ऋषिः । तज्ज्ञानावश्यकत्वमार्ष-ग्रन्थे दर्शितम् तत्र वेदितमन्त्राम्नातमृषिविरूपपक्षु सर्वानु-क्रमणिकादौ दृश्यं संक्षेपेण तल्लोकतोऽप्युच्यते । "सर्व-ज्ञानेन गायत्रं गौतमीयम्, सर्वं सावित्रमौष्णिहं भारद्वाजीयम्, सर्वं सौम्यमानुष्टुभमाथर्वणिकम् । सर्वं वार्हस्पत्यं वासिष्ठमाङ्गिरसम्, सर्वं वारुणं पाङ्क्तमालम्बायनीयम्, सर्वमैन्द्रं त्रैष्टुभं याज्ञवल्क्यीयं, सर्वमादित्यदैवतं जागतम् कौत्सम् । ज्योतिष्टोमे दीक्षाप्रभृति वक्ष्यमाण दीक्षायां भृगुरग्निर्विष्णुर्गायत्री । प्रायणीये, आङ्गिरसो-ऽदितिरुष्णिक् क्रये विश्वामित्रः सोमोऽनुष्टुप् । आतिथ्ये वसिष्ठो विष्णुर्धृतिः, प्रवर्ग्ये काश्यप आदित्यः पङ्क्तिः । उपसत्स्वात्रेय उपसदुदेवता त्रिष्टुप् । अग्नीषोमीयेऽग-स्त्योऽग्नीषोमौ जगती । प्रायणीयेऽतिरात्रे आग्निवेश्योऽ-होरात्रे अतिजगती, चतुर्विंशत्यहे सौकरायणः संवत्सरः शक्करी । अतिप्लवे षड्हे सावर्णोऽर्द्धमासा मासाश्चेति शक्करी, पृष्ठ्ये षड्हे सावकायन ऋतवोऽष्टिः, अभिजिति, विश्वजिति वैश्वामित्रः त्रिष्टुप्, स्वरसामसु सरस्वत्यापो धृतिः, विषुवति रौहिणायण आदित्योऽतिधृतिः, त्रिवृज्जिति सौभर इन्द्रो निर्ऋतिः कृतिः, गो आयुर्वार्क्षकिनिलावरुणौ प्रकृतिः, दशरात्रे आत्रेयो विश्वेदेवा आकृतिः, दशरात्रिके पृष्ठ्ये षड्हे सावेयो दिशो विकृतिः, छन्दोमेषु, शौल्वायन ऋषि-लोकाः संकृतिः, दशमेऽहनि पराशरः संवत्सरोऽतिकृतिः, महाव्रते गौतमः प्रजापतिरुत्कृतिः, उदयनीयेऽतिरात्रे भौवनायनो वायुश्छन्दांसि सर्वाणि, ऋषिभिरुपलक्षितं वाक्यमृषयः" । अधिक देखो० व्रत०हेमाद्रयम् । भावे क्तिन् । १५दर्शने १६ज्ञाने च । ऋषिकृत् ऋषिमनाः । १७तन्त्रोक्तमन्त्रस्य प्रथमोपासानेन सिद्धे ऋष्यादिग्रन्थे पु०उदा० ।

ऋषिकुल्या स्त्री ऋषीणां कुल्येव । १नद्यां स्त्रियाम् । ऋषीणां कृतिमा सरित् । मानससरोऽन्तिकस्थे ऋषिनिर्म्मितसरोवरे "तांस्तु सान्त्वेन निर्जित्य मानसं सर उत्तमम् । ऋषि-कुल्यास्तथा सर्व्वा ददर्श कुरुनन्दनः । सरो मानस मासाद्य हाटकानभितः प्रभो ! । गन्धर्वरक्षितं देव मजयत् पाण्डवस्ततः" भा०स० २७ अ० । २तीर्थभेदे "ऋषिकुल्यां समासाद्य वासिष्ठश्चैव भारत ! वासिष्ठो स-मभिक्रम्य सर्वं वर्षा द्विजातयः । ऋषिकुल्यां समासाद्य नरःस्नात्वा विकल्मषः । देवान् पितॄंश्चार्चयित्वा ऋषि-लोकं प्रपद्यते" भा०व० ८४अ० । "भूमिभागास्तथा पुण्या गङ्गाद्वारमयापि च । ऋषिकुल्यास्तथामेध्या नदी चित्रव-हातथा" भा०अनु० १६५अ० । ऋषिकुलाय हितं यत् । ३ऋषिकुलहिते त्रि० । "उभयोर्ऋषिकुल्याया: सर-स्वत्या: सरोधसे." भाग० २,२२,२६ । "ऋषिकुल्याया: ऋषिकुलहितायाः सरस्वत्याः" श्रीधरः । ऋषिकुलसंभि

यत्। ५ऋषिकुलयोग्ये त्रि०। "अथ तस्योपयंती देवी-मृषिकुल्यां सरस्वतीम्" भाग० ३,१६,१३,। सा च "भूम्न ऋषिकुल्यायाश्चोपस्पर्शनतः प्रस्तारो देवकुल्यायाम्" भाग० ५,१५,६। भारतवर्षस्थे ईषद्गानदीभेदे तत्र-त्यमहानदीकीर्त्तने भा० ५,१६,१८। चन्द्रवंशे तार्क्ष्य-पर्णीसुपक्रम्य "ऋषिकुल्याऽद्रिसामा कौशिकी मन्द्रा-किनीति ताः प्रदर्श्य इति महानद्य इत्युक्तम्।

ऋषिकृत् त्रि० ऋषिं दर्शनं करोति कृ-क्विप् ६त०। सर्व्व-द्रष्टरि। "ऋषिमनास ऋषिकृत् स्वर्षाः" ऋ०६,६६,१८,

ऋषिगिरि पु० गिरिव्रजाख्यमागधदेशस्थजरासन्धपुरसन्निह-तस्थेषु पञ्चसु पर्व्वतेषु मध्ये पर्वतभेदे "एष पार्थ! महान् भाति पशुमान्नित्यमम्बुमान्। निरामयः सुवेण्वाढ्यो नि-वेशो मागधः शुभः। वैहारोऽपिपुलः शैलो वराहो वृष-भस्तथा। तथा ऋषिगिरिश्चात! शुभाश्चैतेऽकपञ्चमाः। एते पञ्च महाशैलाः पर्व्वता गीतलद्रुमाः। रत्नान्नीवाभि संरुध्य संस्थिताऽगिरिव्रजम्" भा०स०२०अ० [रत्नमा०

ऋषिजाङ्गलिकी स्त्री ऋषिप्रिया जाङ्गलिकी। जङ्गलगम्भाटके

ऋषितर्पण न० ऋषीणां तर्पणम्। ऋषीनुद्दिश्य जलाञ्जलि दाने तद्विधिः आ०त० "ब्रह्मोपवीतो देवेभ्यो निवीती च भवेत्सतः। मनुष्यांस्तर्पयेत्पश्चा ऋषिपुत्रान्धनैस्तथा। सनकश्च सनन्दश्च तृतीयश्च सनातनः। कपिलश्चासुरिश्चैव बोढुः पञ्चशिखस्तथा। सर्व्वे ते ऋषिमायान्तु मद्दत्तेनाम्बुना सदा। मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्। प्रचेत सं वसिष्ठञ्च भृगुं नारदमेव च। देवान् सर्व्वानृषीन् सर्व्वान् तर्पयेदक्षतोदकैः" अक्षता अत्र यवाः; "अक्षतास्तु यवाः प्रोक्ताः" इत्युक्तेः। तच्च स्नानकाले नित्यं कर्त्तव्यम् यथाह याता० "तर्पणञ्च शुचिः कुर्यात् प्रत्यहं स्नातकोद्विजः। देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम्। "नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम्" मनुः। तर्पणस्य प्रधानाङ्गभेदेन द्विविधता तर्पणशब्दे वक्ष्यते।

ऋषिपञ्चमी स्त्री ऋषीणां सप्तर्षीणां पूजाङ्गं पञ्चमी। भाद्र-शुक्लपञ्चम्याम्। तत्र हि सप्तर्षीन् प्रतिमास्थान् पूजयित्वा-ऽक्षतभूमिजयावकेन वर्त्तनम् कार्य्यम्। सप्त वर्षाण्येवं कृत्वा अष्टमेऽब्दे सप्तकलशस्थितासु प्रतिमासु सप्तर्षीन् संपूज्य तन्नामोच्चारणपूर्व्वकं तिलैर्हुत्वा सप्त ब्राह्मणान् भोजये-दिति विधिः। मूलं हेमाद्रौ व्रतखण्डे द्रष्टव्यम्। सा च मध्याह्नव्यापिनी ग्राह्या "पूजाव्रतेषु सर्व्वेषु मध्याह्नव्यापिनी तिथिरिति" माधवीये कारीतोक्तेः दिनद्वये तल्लाभे हेमाद्रिमते परा ग्राह्या "पराविद्धा त्याज्या पञ्चमीति" दीपिकोक्तेः माधवमते पूर्व्वा "सर्व्वत्र पञ्चमी पूर्व्वा" इत्युक्तेः दुग्धव्रताच्च। "ऋषिपञ्चमी वर्षासु नैव भोक्तेति" दिवोदासः। [ऋषयोऽस्याम्" रत्नमा०।

ऋषिप्रोक्ता स्त्री ऋषिणा धन्वन्तरिणा भैषज्याय प्रोक्ता। सा-

ऋषिबन्धु पु० ऋषिर्बन्धुः उत्पादकोऽस्य। ऋषिवंशजाते अ-ल्पदर्शी २वरभेदभाजके ऋषौ च। "वस्वपाद्यो; वरभाय ऋषिबन्धवे" ऋ०८,१००,५। ईत०। ऋषिसिते च।

ऋषिमनस् पु० ऋषिर्वार्षदर्शि मनोऽस्य। सर्व्वार्थदर्शिमनस्के ऋषिकल्पे छन्दे उदा०।

ऋषियज्ञ पु० ऋष्युद्देश्यको यज्ञः ऋषिर्वेदैकदध्ययनरूपो यज्ञो वा। नित्यं स्नात्वा स्वकर्त्तव्यमृषियज्ञं ततो गते वेदाध्ययनरूपे ब्रह्मयज्ञे "ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा। नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत्। एतानेके महायज्ञान् यज्ञशास्त्रविदो जनाः"। स्वाध्यायेनार्चयेतर्षीन् होमैर्देवान् यथाविधि। पितॄन् श्राद्धैश्च नृन्नैर्भूतानि बलिकर्मणा" मनुः

ऋषिलोक पु० ऋषिभिर्भोग्यो लोकः। सप्तलोकवच्छिन्नदेशे ऋषीणां भोगस्थानभेदे ऋषिकुल्याशब्दे उदा०। स च लोकः ध्रुवलोकादूर्द्ध्वं ध्रुवलोकादधोवर्त्तमानः यथाह काशीखण्डे ध्रुवलोकवर्णनानन्तरं "नेतयो; प्राप्नुयोद्यत्र ते तत; सप्तर्षि मण्डलम्" इत्युपक्रम्य 'शिवधर्म्मान्! शिवभक्ते! सदा सप्तर्ष-योऽमलाः। वसन्तीह प्रजाः सृष्टुं विनियुक्ताः प्रजाकृजा। मरीचिरत्रिः पुलहः पुलस्त्यः; क्रतुरङ्गिराः। वसिष्ठश्च महाभागा ब्रह्मणोमानसाः सुताः। सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः। संभूतिरनसूया च क्षमा प्रीतिश्च सन्नतिः। ऋतिरूर्ज्जा क्रमादेषां पत्न्योलोकस्य मातरः। एतेषां तपसा चैतद्ब्राह्म्यते भुवनत्रयम्। उत्पाद्य ब्रह्मणा पूर्व्वमेतत् प्रोक्ता महर्षयः। प्रजाः सृजत हे पुत्रा! नानारूपाः प्रयत्नतः" इत्यादिकमुपपाद्य "ध्रुवतो-रिति संख्यां तथा मण्डलयोर्विष्णुपदयोर्दोषहाम्। ध्रुवलोक उपागतस्योर्जनातिश्रमतश्चवर्त्तितः" १८अ०।

ऋषिश्राद्ध न० ईत०। ऋषीणां कर्त्तृके श्राद्धे। तत्र हि ब्रह्मा-स्त्रे लघुक्रिया तदुक्तम् "अजायुद्धे ऋषिश्राद्धे प्रभाते मेघडम्बरे। दम्पत्योः कलहे चैव ब्रह्मास्त्रे लघुक्रिया"।

ऋषिसाह् त्रि० ऋषीन् सहते अभिभवति सह-क्विप् ईत०। ऋषीणां द्रष्टृणामभिभावके। "ऋतस्य धीतिमृषि-साडवीवशत" ऋ०६,७३,४। "सहेसाड्" पा० षत्वम्

वत्वमन्यत्र ऋषिगादौ दृत्वादौ न वत्वमिति भेदः ।

ऋषिषाण पु० ऋषिभिः सायते भज्यते षण-संभक्तौ कर्मणि अच् वेदे वत्वम् । ऋषिभिः संभक्ते । "वे त्वा छन्दन्तृषिषाण ! वेषसः" ऋ०६,८६,४। "ऋषिषाण ! ऋषिभिः संभक्त" भा० । लोके तु न वत्वम् ।

ऋषि(ष्टि)षेण पु० ऋषभेदे । ततो विदा० अञ् । आर्षि(ष्टि)षेणः । तद्गोत्रापत्ये पुंस्त्री०ङिषयां ङीष् ।

ऋषिष्टुत त्रि० ऋषिभिः स्तुतः वेदे वत्वम् । ऋषिभिः स्तुते "ऋषिष्टुता जरयन्ती" ऋ०७,७५,५। २अग्नौ च "ऋषिष्टुत ऋषयोऽस्तुवंस्तस्मादाहर्षिष्टुत ऋषिः" यत० १,४,२,६ । लोके तु न वत्वम् । ऋषिस्तौकेऽपि वत्वम् । "ऋषिष्टुतां विष्णुपदीं पुराणाम्" भा० अनु० २७

ऋषिस्तोम पु० एकाहसाध्ये यागभेदे । "ऋषिस्तोमा व्रात्यस्तोमाश्च पृष्ठ्याहानि" आश्व०श्रौ० २५ । "ऋषिस्तोमा नाम सप्त एकाहाः । उभयत्र सप्तमोज्योतिष्टोमः प्रकृतिः" नारा० ।

ऋषिस्वर पु० ऋषिभिः स्वर्यते शब्द्यते सूयते स्व-कर्मणि अप् ऐत० । ऋषिभिः स्तुते । "ऋषिस्वरं चरति वासु नाम ते" ऋ० ५,४४,८ । "ऋषिस्वरमृषिभिः स्तुत्यम्" भा० । [क्ते जगत्सर्जने ।

ऋषिसर्ग पु० ऋषिभिः कृतः सर्गः । ब्रह्मणानियुक्तैर्ऋषिभिः

ऋषी स्त्री ऋषि+गौरा० ङियां ङीष् । ऋषिपत्न्याम् ।

ऋषि(षी)क पु० ऋष्यां भवः क वा ह्रस्वः । ऋषिपत्नी गर्भजाते ऋषेरौरसे पुत्रे । "ऋषिपत्न्या ऋषीकास्तु मैथुनात् गर्भसम्भवात् । परत्वेनर्षयस्ते वै भूताये ऋषिकात्मजाः । ऋषीकाणां सुताये वै विप्रेभ्या ऋषिपुत्रकाः" इत्युपक्रम्य कतिचिदधीत्योक्त्वा "तेषां पुत्रान्ऋषीकांस्तु गर्भोत्पन्नान्विनोधत" इत्युपक्रम्य ऋषीकाणामौरसान् कतिचिदुक्त्वा "इत्येते ऋषिकाः सर्वे सकलेन ऋषितां गताः" भक्तपु० १२० अ० ।

ऋषीवत् त्रि० ऋषिः स्तोत्रेणास्त्यस्य मतुप् "छन्दसीरः" या० मस्य वः दीर्घः । ऋषिस्तोत्रेण ऋषिस्तुते । "अग्निरृषीवः शचीवो" ऋ० ८,२,२८, "ऋषीवः ! ऋषिभिर्युक्त" भा० । अत्र "मतुवसोरुसम्बुद्धौ छन्दसि" या० सम्बुद्धौ मस्याने रुः । ऋषीवःपञ्चकल्पन' ग्रामादिकमेव । लोके तु ऋषिमत् दृश्येव ।

ऋषीवन् त्रि० ऋषीन् वहति पचा० अच् ऐत० "इकोवहेः षीवो" या० दीर्घः । ऋषिवाहके

ऋषु पु० ऋष-गतौ कु । "अनवरतगतियुक्ते सूर्यरश्मौ" "ऋषेर्भियो भानुभिर्ऋषूणां पर्येति" ऋ० १०,१, "ऋषूणां सूर्यरश्मीनाम्" भा० । गन्तृमात्रे २मरुति ३वज्रवति ४शब्दमात्रे च "अग्ने रेभोन जरत ऋषूणां जूर्णिर्होत ऋषूणाम्" ऋ० १,१२०, "ऋषूणामागन्तृणाम्" "ऋषूणां मरुतां शब्दयतां च" भा० । पुमन्त्रद्दृष्टरि ऋषौ च "हृष्योभुवद्वसुर्ऋषूणाम्" ऋ० ८,७१,१५, ऋषूणामृषीणां कृतादिद्रष्टृणाम्" भा० ।

ऋष्टि स्त्री ऋष-वधे क्तिन् । उभयतो धारायुक्ते १खड्गे । २खड्गमात्रे अमरः । ३आयुधमात्रे च "चित्रोवोयामः प्रयताखृष्टिषु" ऋ० १,१६६,४, "ऋष्टिषु युद्धस्थक्षेत्रेषु" भा० । "अग्नेष्वेवां निमिमृक्षुर्ऋष्टयः" ऋ० १,६४,४, "ऋष्वा ऋष्टीरसृजत" ऋ० ५,५२,६, "ऋष्टीरायुधविशेषान्" भा० "वाशीमन्त ऋष्टिमन्तो मनीषिणः" ऋ० ५,५७,२, "ऋष्टिर्नाम क्षुरिका" भा० "यरयन्ति ऋष्टि दृष्टिभिः" देवीभा० "धनूंषि चाप्यायुधानि यस्याः चित्रा यस्यामृष्टयः काञ्चनभूषणाश्च" भा० आ० १६४ अ० "कोवोऽन्तर्मरुत ऋष्टिविद्युतः" ऋ० १,१६८,५, "ऋष्टिविद्युत ऋष्टा मेघभेदनायुधविशेषेण विद्योतमानाः" भा० भावे क्तिच् । ४हिंसायाम् ५अनिष्टोत्पादने । "हिरण्यनिर्णिगुपरा ऋष्टिः" ऋ० १,१६७६, रिष हिंसायां रिष्टिरप्यत्र "गोचरे वा विहरणे वा ये यष्टा रिष्टिरक्षकाः" ज्योति० ईदोर्नौ च । ऋष्टिरस्यास्ति मतुप् । रिष्टियुक्ते दीप्तियुक्ते त्रि० स्त्रियां ङीष् "विद्युद्भा मरुत ऋष्टिमन्तो दिवोमर्याः" ऋ० १,५४,१२ "ऋष्टिमन्तो दीप्तिमन्तः" भा०

ऋष्टिषेण पु० ऋषभेदे ततः पाठान्तरे विदा० अञ् शिवा० अण् वा । आर्ष्टिषेण ततपुत्रे । "आर्ष्टिषेणोऽहोत्रमृषिर्निधीदन्देवापिर्देवसुमतिं चिकित्वान्" एतामृचमधिकृत्य यास्केनेतिहासो वर्णितः यथा "तत्रेतिहासमाचक्षते देवापिरार्ष्टिषेणः शान्तनव आसीत् कौरव्यो भरतो बभूवतुः स शान्तनुः कनीयानभिषेचयाञ्चक्रे देवापिस्तपः प्रपेदे ततः शान्तनोराज्ये द्वादश वर्षाणि देवो न ववर्ष तमुपब्राह्मणा ऊचुरधर्मस्त्वया चरितो ज्येष्ठं भ्रातरमग्न्यरेत्यभिषेचितं तस्मात्ते देवो न वर्षतीति" ऋष्टिषेणस्य नामान्तरं प्रतीप इति । "प्रतिबभूवः प्रतीपः खलु वै व्याहृतमेषेमे मनुं नाम तस्यां पुत्रानुत्पादयामास देवापिं शान्तनुं बाह्लीकं चेति देवापिः खलु वाव एवारण्यं विवेश शान्तनुस्तु महीपालो बभूवेति" भा० आ० ६५ । "कलत्रकाद्दक्षिणोपोऽभूत् प्रतीपस्तस्य चा-

त्मजः। देवापिः शान्तनुश्चेति बाह्लीक इति चात्मजाः। पितुरार्ज्यं परित्यज्य देवापिस्तु वनं गतः। अभवच्छान्तनूराजा प्राङ्महाभिषसंज्ञितः। यमा द्वादश तद्राज्ये न ववर्ष यदा विभुः। शान्तनुर्ब्राह्मणैरुक्तः परिवेत्ता यदग्रजः। राज्यं देह्यग्रजायाशुपरं राष्ट्रविवृद्धये। एवमुक्तो द्विजैर्ज्येष्ठं क्रन्दयामास सोऽब्रवीत्। नाहं राजा त्वमेवाग्र विप्राग्र्य इति मे मतिः। तच्छ्रुत्वाप्रकृतिर्विप्रैर्वेदादुद्विजितोगिरा। वेदवादातिवादान् वै ततो देवो ववर्ष ह। देवापियोगमास्थाय कलापग्राममास्थितः। सोमवंशे कलौ नष्टे कृताटौ स्थापयिष्यति" भाग०९,२२, १२ श्लो०। ऋष्टिषेणश्चक्रस्यावयवार्थो निरु० दर्शितो यथा "ऋष्टिषेण ऋष्टिमतोऽस्य पुत्रः ऋषतिसेनश्चेति वा। सेना सेश्वरा सृप्ता गतिकर्मा। पुत्रः पुरु नायते निपरणाद्वा पुरुरवा ततस्तत्सेनः इति वा"।

ऋष्य पु० ऋष-क्विपि कर्मणि क्यप् अन्नादि० यत् नि०। "ऋष्योनीलाण्डकोलोके कृष्णे ऋति कीर्त्तितः" इत्युक्ते मृगभेदे।

ऋष्यकेतु पु० अनिरुद्धे तिका०। ऋष्यकेतनादयोऽस्य।

ऋष्यगता स्त्री ऋष्यस्य गता गतिर्यत्र। ऋष्यप्रोक्ताछन्दे यद्वरत्ता०

ऋष्यगन्धा स्त्री ऋष्यस्य गन्ध इव गन्धो यस्याः। १इक्ष्वाकौ इक्षे। २क्षीरविदार्यां ३महाश्वेतायाम्।

ऋष्यजिह्व न० सुश्रुतोक्ते महाकुष्ठरोगभेदे। सुश्रुते। "यत्र महाकुष्ठानि" इत्युपक्रम्य "तत्र महाकुष्ठान्यरुषौ डुम्बर्ष्यजिह्वकपालकाकणपुण्डरीकदद्रव इति" विभज्य। तत्र "वातेनारुषं, पित्तेनौडुम्बर्ष्यजिह्वकपालकाकणाभि। श्लेष्मणा पौण्डरीकं दद्रुकुष्ठेति" तल्लिदानलक्षणा "ऋष्यजिह्वाप्रकाशखरत्वानि ऋष्यजिह्वानि" लक्षितम्।

ऋष्यप्रोक्ता स्त्री ऋषिभिरप्रोक्ता ऋष्य इव प्रोक्ता इति वा। १धृतार्यायाम्, २अतिबलायाम्, ३शूकशिम्बीवृक्षे च। "ऋष्यप्रोक्ता वयस्था च" सुश्रु०।

ऋष्यमूक पु० ऋष्यो मृगो मूको यत्र। "ऋष्यमूकस्तु पम्पायाः पुरतः पुष्पितद्रुमः" इति रामायणोक्ते पम्पासरोऽन्तिकस्थे पर्वतभेदे "ऋष्यमूकमगात् कपिः" भट्टिः अयञ्च पर्वतः कूर्मविभागे दृश्यः दक्षिणस्यतयोक्तः "अथ दक्षिणेन सह्येत्युपक्रम्य "क्रौञ्चद्वीपजटाधरकाश्मैं ऋष्यमूकम्"।

ऋष्यशृङ्ग पु० ऋष्यस्य मृगभेदस्य शृङ्गमिव शृङ्गमस्य। विभाण्डकस्तनिपुत्रे लोमपादराजजन्यायाः शान्तायाः पत्यौ ऋषिभेदे तस्योत्पत्त्यादि भा०व० ११० अ० उक्तं यथा।

"विभाण्डकस्य विप्रर्षेस्तपसा भावितात्मनः। अमोघवीर्य्यस्य सुतः प्रजापतिसमद्युतेः। ऋष्य पुत्रो यथा जात ऋष्यशृङ्गः प्रतापवान्। महाहृदे समाहाद्य काश्यपस्तपसि स्थितः। दीर्घकालं परिश्रान्त ऋषिः स देवसम्मतः। तस्य रेतः प्रवस्कन्द ह्रदाम्भरसमुर्वशीम्। अम्भूपस्पृशतो राजन्! मृगी तच्चापिबत्तदा। सङ्ग तोयेन दृषिता गर्भिणी चाभवत्ततः। सा पुरोक्ता भगवता ब्रह्मणा लोककर्त्तृणा। देवकन्या मृगी भूत्वा सुतं त्वय विमोक्ष्यसे। अमोघत्वाद्विधेयैव भावित्याद्दैवनिर्मितात्। तस्यां मृग्यां समभवत्तस्य पुत्रो महाद्युतिः। ऋष्यशृङ्गस्तपोनित्यो वन एवाभ्यवर्त्तत। तस्मैं शृङ्गं शिरसि राजन्नासीन्महात्मनः। तेनर्ष्यशृङ्ग इत्येवं ततः स प्रथितोऽभवत्। न तेन दृष्टपूर्व्योऽन्यः पितरन्यत्र मानुषः। तच्चास्य मनो नित्यं ब्रह्मचर्य्येऽभवत्तप। एतस्मिन्नेव काले तु सखा दशरथस्य वै। लोमपाद इति ख्यातो अङ्गानामीश्वरोऽभवत्। तेन कामात् कृतं मिथ्या ब्राह्मणस्येति नः श्रुतम्। स ब्राह्मणैः परित्यक्तस्तदा वै जगतः पतिः। पुरोहितापचाराच्च तस्य राज्ञो यदृच्छया। न ववर्ष सहस्राक्षस्ततोऽपीड्यान्त वै प्रजाः। स ब्राह्मणान् पर्य्यपृच्छत्तपोयुक्तान्मनीषिणः। प्रवर्षणे हरेन्द्रस्य समर्थान् पृथिवीपते! कथं प्रवर्षेत् पर्जन्य उपायः परिदृश्यताम्। तमूचुर्नोदिताश्चेन क्षमतानि मनीषिणः। तत्र त्वेको मुनिवरस्तं राजानमुवाच ह। कुर्विताश्रव राजेन्द्र! ब्राह्मणां निर्ऋतिं पर। ऋष्यशृङ्गं मुनिसुतमानयस्व च पार्थिव!। वानेयमनभिज्ञस्तु नारीणामार्जवे रतम्। स चेदृतरेद्राजन् विषयं ते महातपाः। सद्यः प्रवर्षेत् पर्जन्य इति मे नात्र संशयः। एतच्छ्रुत्वा वचो राजन्! ज्ञात्वा निर्ऋतिमात्मनः। स गत्वा पुनरागच्छन् प्रवर्षेषु द्विजातिषु। राजानमागतं श्रुत्वा प्रतिसंजहृषुः प्रजाः। ततोऽङ्गपतिराजूय ब्राह्मणान्मुनिकोविदान्। ऋष्यशृङ्गानये यत्नमकरोन्मन्त्रनिश्चयम्। सोऽध्यगच्छदुपायन्तु तैरमात्यैः सहाच्युत!। ब्राह्मणैरनमर्थज्ञैर्नीत्या च परिनिश्चितैः। तत आनाययामास वारस्त्रीः सङ्घशोपतिः। वेश्याः वर्षन्त निष्यातास्ता जग्मुश्च पार्थिव!। ऋष्यशृङ्गमृषेः पुत्रमानयध्वमितीवतः। लोभयित्वाभिविश्वास्य विषयं मम शोभना!"।

ब्रह्मवैवर्त्तेऽग्निखण्डेन तच्छीघ्रत्वप्रवर्षणं "ततो राजन्!

कं ग्रथमेकपुत्रं प्रवेश्य योगेन विसृज्य नाथम्। प्रमोदयन्त्यो विविधैरुपायैराजग्मुरङ्काधिपतेः समीपम्। संस्थाप्य तामाश्रमदर्शने तु सन्तारितां श्वश्रमथातिशुभ्राम्। तीरादुपादाय तथैव चक्रे नाव्याश्रमं नाम वनं विचित्रम्। अन्तःपुरे तं तु निवेश्य राजा विभाव्य कन्यात्रजमेकपुत्रम्। ददर्श देवं सहसा प्रहृष्टमापूर्यमाणश्च जगज्जनेन। स लोमपादः परिपूर्णकामः सुतां ददाऽभ्यङ्काय धात्राम्" अनेनैव याजयित्वा दशरथेन पुत्रचतुष्टयं लेभे इति कथा रामायणादिष्वानुसन्धेया "मान्योऽसि: खां पुरमृष्यशृङ्गः" भट्टिः।

ऋष्यादि पु० ऋषिरादिरस्य। वैदिकमन्त्रस्यावश्यज्ञातव्ये ऋषिप्रभृतिपञ्चके तत्र पञ्चकं यथा "ऋषिं छन्दस्य दैवतं विनियोगमथैव च। वेदितव्यं प्रयत्नेन ब्राह्मणेन विपश्चिता" योगिया०। ब्राह्मणेन सह आर्षादिकमित्यर्थः व्याख्याङ्गं स एव "यस्तु जानाति तत्त्वेन ऋषिं छन्दस्य दैवतम्। विनियोगं ब्राह्मणस्य मन्त्रार्थज्ञानकर्म च। एकैकस्या ऋचः सोऽभिसन्धीज्ञातिथिवद्भवेत्। देवतायाश्च सायुज्यं गच्छत्यत्र न संशयः। पूर्वोक्तेन प्रकारेण ऋष्यादीन् वेत्ति यो द्विजः। अधिकारोभवेत्तस्य दक्षस्यादिषु कर्मसु। मन्त्रे मन्त्रे प्रयत्नेन ज्ञातव्यं ब्राह्मणेन तु। विज्ञानपरिपूर्णस्तु स्वाध्यायफलमश्नुते। छन्दांस्ययातयामानि भवन्ति फलदान्यपि। त्रैयम्बञ्च लभते सोऽत्र धर्ममायुश्च विन्दति। दिव्यं वर्षसहस्रन्तु स्वस्थाने ऋषिभिः सह। तिष्ठन्ति तत्र तैः सार्द्धं तत्तुल्यश्चैव जायते"। ऋष्यादिपदार्थोनाह स एव। "येन यद्विधिना दृष्टं सिद्धिः प्राप्ता च येन वै। मन्त्रेण, तस्य तत्प्रोक्तऋषिभावस्तदात्मकः। छादनाच्छन्द इत्युक्तं वासवीवाऽथ वा ऋते। आत्मा तु ऋषिदेवैर्मृत्योर्भीतैस्तु वै पुरा। आदित्यैर्वसुभीरुद्रैश्छन्न ऋन्दूतीरितम्। यस्य यस्य च देवस्य उद्दिष्टा या च देवता। तदाकारं भवेत्तस्य दैवतं देवतोच्यते। पुरा कल्पे स्वरूपज्ञामन्त्राः कर्मार्जनेव च। अनेनेदं तु कर्त्तव्यं विनियोगः स उच्यते। निरुक्तं यस्य मन्त्रस्य वस्तुयुक्तिः प्रयोजनम्। प्रतिज्ञानं स्तुतिश्चैव ब्राह्मणं तदभिधीयते। एवं पञ्चविधं प्रोक्तं जपकाले तु ऋग्विदः। होमे दानेऽर्जने योगे स्वाध्याये याजने तथा"।

ऋष्यादिन्यास पु० ऋष्यादीनां न्यासः। तन्त्रोक्ते मूलादिषु ऋष्यादीनां न्यासे। ऋष्यादिपदार्थप्रदर्शनपूर्वकं तन्न्यास-प्रकारः तन्त्रसा० उक्तः। "मस्तकेऽरक्तवर्णात्मा यः साक्षात्तपसा मनुः। संस्थापयति गुह्यात्मा च तस्य ऋषिरीरितः। गुह्यत्वात् मस्तके चास्य न्यासस्तु परिकीर्त्तितः। सर्वेषां मन्त्रतत्त्वानां छादनात् छन्द उच्यते। अक्षरत्वात् पदत्वाच्च मुखे छन्दः समीरितम्। सर्वेषामेव जन्तूनां भावनात् प्रेरणात्तथा। हृदयाम्भोजमध्यस्था देवता तत्र तां न्यसेत्। ऋषिच्छन्दोऽपरित्यागात् मन्त्रफलभाग्भवेत्। दौर्बल्यं याति मन्त्राणां विनियोगमजानताम्"। तन्त्रान्तरे "ऋषिं न्यसेन्मूर्द्ध देशे छन्दस्तु मुखपङ्कजे। देवतां हृदये चैव बीजन्तु गुह्यदेशके। पादयोश्चैव सर्वाङ्गे कीलकं न्यसेत्"। "आदावष्टव्यादिकन्यासः करशुद्धिस्ततःपरम्। अङ्गुलिव्यापकन्यासौ हृदादिन्यास एव च। तालत्रयञ्च दिग्बन्धः प्राणायामस्ततःपरम्। ध्यानं पूजा जपश्चेति सर्वतन्त्रेषु यं विधिः" तन्त्रम्"। तत्तद्देवमन्त्राणां विशेषत ऋष्यादयस्तु तन्त्रसारादौ द्रष्टव्याः।

ऋष्वु त्रि० ऋष व—उत्वादयश्च नि०। महति महत्त्वाच्च निरु०। "अजा इन्द्रस्य गिरयश्चिदृष्वाः" ऋ० ६,२४,८, "ऋष्वा महान्तः" भा०। "गम्भीरेव ऋष्वया यः" ऋ० ६,१८,१०। "गिरिर्न यः सतवाँ ऋष्व इन्द्रः" ऋ० ४,२०,६। "त्वं भुवा प्रतिमानं पृथिव्याः ऋष्वीरश्च पतिर्मूः" ऋ० १,५२,१२। "प्रास्तौदृषूजा ऋष्वभिस्तत्" ऋ० १०,१०५,६। "ऋष्वा ऋष्टीः" ऋष्टिशब्दे

ऋहत् त्रि० रह-शतृ पृ० साधु। तुरुकायादौ। "दृहन्तं चिद्दृहते रन्धयानि" १०,२८,६। "ऋहते तुरुकायादयाय" भा०।

इति वाचस्पत्ये ऋकारादियन्त्रार्थसङ्कलनम्।

ऋ ट्

ऋकारः स्वरवर्णविशेषः मूर्द्धन्यः स च दीर्घः उदात्तानुदात्तस्वरितभेदात् त्रिविधः पुनः अनुनासिकाननुनासिकभेदेन प्रत्येकं द्विधेति षट्। मातृकान्यासे वामनासायां तस्य न्यासस्तथा वामनासाशब्देनाभिधेयता। तस्य कामधेनुतन्त्रे ध्येयस्वरूपमुक्तं यथा। "ऋकारं परमेशानि! स्वयं परमकुण्डलीम्। पीतविद्युल्लताकारं पञ्चदेवमयं

सदा । चतुर्त्तानमयं वर्णं पञ्चप्राणयुतं सदा । लिंगत्रयसहितं वर्णं प्रणमामि सदा प्रिये !" । अस्य प्लुतत्वोक्तिरिच्छया दीर्घस्य त्रिमात्रत्वेन त्रिमात्रोच्चार्य्यप्लुताद्विलक्षणत्वात् आकारभेदाच्च ।

ॠ गत्यां क्र्यादि० प्रादि० पर० सक० सेट् । प्रादि० आप्रत्यये त्रुरवः । ऋणाति ऋणीतः ऋण्वन्ति । ऋणीयात् ऋणात् ऋणीहि । आर्णोत् आर्णीताम् आर्णन् । आरीत् । आर ! आरतुः । अरिता । ऋर्य्यात् । अरिष्यति । आरिष्यत् । अरितव्यः अरणीयः आर्य्यः । अरिता । ऋणन् । ऋर्त्तुः । अरुः ।

ॠ अव्य० ऋ-क्विप् वा० दृत्वाभावः । १वाक्यारम्भे २रक्षायां मेदि० । ३निन्दायां ४भये च भरतः । ५देवमातरि ६दानवमातरि ७ऋतौ ८गतौ च स्त्री० वक्षसि न० मेदि० । ९भैरवे १०दनुजे पु० मेदि० ।

इति वाचस्पत्ये ऋकारादिशब्दार्थसङ्कलनम् ।

ऌ

ऌकारः स्वरवर्णभेदः स च दन्त्यमूलीयः । उदात्तानुदात्तस्वरितभेदात् त्रिविधः अनुनासिकाननुनासिकभेदात् प्रत्येकं पुनर्द्विधेति षड्विधः । तस्य मातृकान्यासे दन्तमूले न्यस्यतया तच्छब्देनाप्यभिधानम् । तस्य ध्येयरूपं कामधेनुतन्त्रे उक्तं यथा । "ऌकारश्चञ्चलापाङ्गि ! कुण्डली परदेवता । अस्य ब्रह्मादयः सर्व्वे लयोऽस्मिन् सततं प्रिये ! । पञ्चदेवमयं वर्णं चतुर्त्तानमयं सदा । पञ्चप्राणयुतं वर्णं तथागुणत्रयात्मकम् । बिन्दुत्रयात्मकं वर्णं पीतविद्युल्लता यथा" । अस्य प्लुतत्वोक्तिरिच्छया एकमात्रत्रिमात्रत्वाभ्यां तयोर्भेदात् । तत्काररहितस्तु द्वादशानां बोधक इति सि० कौ० ऋवर्णे विस्तरः ।

ॡ अव्य० ऋगतौ ऋ-क्विप् तुगभावः लत्वम् । १देवमातरि २भूमौ ३पर्व्वते च मेदि० ।

इति वाचस्पत्ये ऌकारादिशब्दार्थसङ्कलनम् ।

ॡ

ॡकारः तन्त्रमते सुधबोधमते च स्वरवर्णभेदः पा० मते तस्य दीर्घत्वं नास्ति तेन उदात्तानुदात्तस्वरितभेदात् अनुनासिकाननुनासिकभेदाच्च षड्विधः । अतोऽयं बोध्यम् ॡवर्णस्य दीर्घत्वाभावेऽपि "ऌति ॡवा" वार्त्ति० उक्तेः लकाररहितयुत ऌवर्ण एव तत्र विधेयः तत्र लकारहयरूपपञ्चकुलहयस्य एका मात्रा अवशिष्टा इति द्विमात्रत्वं तेन कोॡकारः इत्यादौ दीर्घत्वव्यवहारः । सुधबोधे ॡवयमित्युक्तिरपि एकमात्रद्विमात्रत्रिमात्रत्वभेदापेक्षया । तेन न विरोधः । अतएव त्रिलिंगायां "दुस्प्लुतश्चेति विसर्ज्जनीयः ऌकारः प्लुतएव वेति" ऌकारऌकारयोः दुःस्प्लुतोक्तिः । दुःस्प्लुतत्वञ्च दैर्घ्यस्प्लुतं तस्य रकारऌकारादिषु एव सम्भवति "अधोऽस्प्लुतायणस्त्रीषण्डेऽस्प्लुताःयजसया" मित्यायां यवरलानामीषत्स्प्लुतोक्तेः । "तेन ऌकार ऌकारयोरीषत्स्प्लुतत्वात् दुःस्प्लुतम् । एवं सर्व्वेषामकुण्डे ऌवर्णस्य न दीर्घत्वकल्पनमिति सूक्ष्ममीक्षणीयम् । अस्य च लकारहयघटितत्वात् दन्त्यता । अन्ते च स्वरवर्णयोगात् अस्प्लुतत्वम् । तस्य च उदात्तादिभेदैः षड्विधत्वमपि । मातृकान्यासे च तस्य वामगण्डे न्यसता तेन तच्छब्देनाप्यस्याभिधानम् । कामधेनुतन्त्रे तस्य ध्येयरूपमुक्तम् यथा "ॡकारं परमेशानि पूर्णचन्द्रसमप्रभम् । पञ्चदेवात्मकं वर्णं पञ्चप्राणात्मकं तथा । त्रयात्मकं वर्णं तथाबिन्दुत्रयात्मकम् । चतुर्वर्गप्रदं देवि ! ध्यायेत् परमकुण्डलीम्" ।

ॡ अव्य० ऋ-रक्षणे ऊ० । १देवमातरि २दैत्यस्त्रियाम् ३दनुजमातरि ४कामधेनुमातरि च स्त्री एकाक्षरकोषः । ५भैरवदेवे पु० एकाक्षरकोषः ।

इति वाचस्पत्ये ॡकारादिशब्दार्थसङ्कलनम् ।

ए

एकारः स्वरवर्णभेदः एषः "एदेतौ कण्ठतालव्यावित्युक्तेः कण्ठतालवोः स्थानयोरुच्चार्य्यः । स च दैर्घः हिमात्वात् उदात्तानुदात्तस्वरितभेदैरनुनासिकाननुनासिकभेदाभ्यां षड्विधः। तस्य मातृकान्यासे जङ्घोर्ध्वस्थाने न्यसनतया तच्छब्देनाभिधेयता । तस्य ध्येयरूपं कामधेनुतन्त्रे ।

"एकारं परमं दिव्यं ब्रह्मविष्णुशिवात्मकम् । रक्तिनी कुसुमप्रख्यम् पञ्चदेवमयं सदा । पञ्चप्राणात्मकं वर्णं तथा बिन्दुत्रयात्मकम् । चतुर्वर्गप्रदं देवि ! ध्यायेत् परम कुण्डलीम्" । एषां बीजस्य वाचकाः शब्दास्तन्त्रे उक्ता यथा "एकारो वाहनं शक्तिभिर्युक्तोऽयौ भगं भरुत् । क्लिन्नो भूतोऽर्द्धकेशी च ज्योत्स्ना श्रद्धा प्रमर्दिनः । भयं ज्ञानं क्षमा धीरा जङ्घा सर्वसङ्कटः । शक्तिर्विष्णुर्भगवती कुण्डली मोहिनी वसुः । योषिदाधारयक्तिश्च त्रिकोणा देवसंज्ञकः । सम्भिरेकादशी भद्रा पद्मनाभः कुलाचलः" । "एकारो वामगण्डान्तः शक्तिभिर्युक्तो भगन्तथा । मार्च्चीजङ्घ विजया ज्योतः एकादशस्वरः" इति बीजवर्णाभिधानम्

ए अव्य० इ-विच् वा० न ह्रस्वः । १स्तुतौ २सम्बोधायाम् ३अनुकम्पायाम् ४संबोधने ५आह्वाने च" मेदिनिः ईविष्णौ पु० एकाक्षरकोषः ।

एक त्रि० इण्-कनु । १एकत्वरूपप्रथमसंख्यान्विते, २केवले, ३मुख्ये, ४अन्यार्थे, ५सत्ये, ६अद्वितीये, ७समाने, ८अग्रे च । प्रायशः संख्यावाचकस्य संख्यासंख्येयोभयपरत्वेऽपि एकशब्दस्यसूरिभिः एकत्वसंख्यान्वितपरत्वम् । तेन एकोघट इत्यादि न तु घटस्यैकः । क्वचित्तु भावप्रधाननिर्देशपरत्वेन संख्यावाचकत्वमपि । "द्वयोर्द्वितीयैकवचने" पा० । इह द्वित्वम् एकत्वं च द्वैकशब्दयोरर्थः। अत्र द्विवचनान्तत्वमेव तदर्थत्वे लिङ्गम् संख्येयपरत्वे द्वौ केवामिति स्यात् द्वन्द्वार्थानां संख्यान्वितानां बहुत्वात् । तेन एकद्विवचनशब्दोऽपि एकत्वद्वित्वार्थकः तत्तदर्थे तयोःपरिभाषितत्वात् अतएव "सुपां कर्म्मादयोऽप्यर्थाः संख्या चैव तथा लिङ्गम्" इति सुपां लिङ्गस्य च संख्यावाचकत्वसङ्गमः । तथा "अनेकमन्यपदार्थे" पा० सूत्रे अनेकपदस्य एकवचनान्ततया प्रयोगात् नास्ति एकत्वं यत्र इति विग्रहेण एकत्वसून्यार्थकता । एकसंख्यान्वितपरत्वे अनेके इति स्यात् "यतन्त्यनेके जलधेरिवोर्मयः" इत्यादौ बहुवचनान्तत्वयोरनेकशब्दस्य प्रयोगात् । स्वारसिकप्रयोगे तु न लक्षणा तेन घटश्चैक इत्यादि न प्रयोगः इति द्रष्टव्यम् । इतरसंख्यासु एकत्वस्यानुगमात् द्वित्वादीनामेकत्वबुद्ध्यैव जननाच्च दृष्ट्यर्थानुगमात् तस्य अन्वर्थनामता । संख्या च द्रव्यसमवेतो गुणविशेषः गुणादौ च संख्यान्वयः परम्परयेति विशेषः । एकत्वादेर्जातित्वनिरासेन गुणत्वव्यवस्थापनं कणा० सू० उक्त्योरुक्तं यथा

"रूपरसगन्धस्पर्शव्यतिरेकादर्थान्तरमेकत्वम्" क० सू० "रूपरसगन्धस्पर्शेति संख्यादिपञ्चकभिन्नगुणोपलक्षणं व्यतिरेकादिति व्यभिचारात् । तदयमर्थः, एकोघट इति विशिष्टप्रतीतिर्विशेषणजन्या, तत्र विशेषणं न रूपादि, तद्व्यतिरेकेण जायमानत्वात् । न च घटत्वादिकमेव निमित्तम्, पटेऽपि जायमानत्वात्, न चैकत्वं सत्तावत् सामान्यम्, सत्तया सङ्ख्यान्यूनानतिरिक्तादृत्तित्वात्, न च द्रव्यमात्रे सामान्यं तत्, द्रव्यत्वेनान्यूनानतिरिक्तदेश्यत्वात्, न चान्यूनानतिरिक्तदेश्यत्वेऽपि प्रतीतिभेदाद्भेदः, प्रतीतिभेदस्य स्वरूपभूतत्वे मानाऽपि भिद्येत, विषयभेदकृतत्वे तु विषयभेदानुपपत्तेरुक्तत्वात् अन्यथा घटत्वकलसत्वयोरपि भेदापत्तेः । न च स्वरूपभेद एकत्वमिति भूषणोक्तं युक्तम् । घटस्वरूपभेदश्चेदेकत्वं तदा पटादावेकत्वप्रत्ययो न स्यात् स्वरूपभेदोहित्वादिकमित्यपि भूषणमतमनुपपन्नं स्वरूपभेदस्य त्रित्वचतुरादिसाधारण्येन व्यवहारवैचित्र्यानुपपत्तेरिति भावः" । वैया० सू० सङ्ख्यानिरूपणपूर्वकं तद्विवक्षादिनिरूपणं यथा "अभेदैकत्वसंख्याया इष्टौ भानमिति स्थितिः । कपिञ्जलाजन्यबाक्ये त्रित्वन्यायाद्बोध्यते । उक्तञ्च वाक्यपदीये । "यथौषधिरसाः सर्वे मधुन्याहितशक्तयः । अविभागेन वर्त्तन्ते संख्यां तां तादृशीं विदुरिति" । परित्यक्तविशेषं वा संख्यासामान्यं तत् । उक्तञ्च "भेदानां वा परित्यागात्संख्याता च तथाविधः । व्यापाराज्जातिभागस्य भेदाधीनेन वर्त्तते । अदृष्टोतविशेषेण यथा रूपेण रूपवान् । प्रख्यायते न शुक्लादि भेदाधीनस्तु गम्यते इति" । अस्याः इष्टौ समासादौ भानं न्यायसिद्धमिति शेषः । इति सतस्थितिर्वैयाकरणानाम् । अयं भावः राजपुरुष इत्यादौ राज्ञोराज्ञोः राज्ञां वायं पुरुष इति जिज्ञासा जायते । विशेषजिज्ञासायां सामान्यरूपेण तत्प्रतीतिः यद्यादाव-

ग्यको व्यतस्तस्यां शक्तिरिति । तस्या एकत्वेन प्रतीतौ न्यायमाह कपिञ्जलेति । वस्तुत्वगणनायां त्वित्थस्यैव प्रथमोपस्थितत्वात् तद्भेदेनैव भानवद्देकत्वस्य सर्वत: प्रथमोपस्थितत्वमस्तीति । वस्तुतस्तु जिज्ञासैव नानुभवसिद्धा । तथात्वे वा ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुहेतुमद्भावात्तत्तद्भेदेनैव वाच्यता स्यादिति ध्येयम्" ।

तथा च उत्सर्गात् सर्वत्र अभेदैकत्वसंख्यैव उक्तौ प्रतीयते न तु विशेषेण । अत एव "संख्या तु व्यञ्जकाभावाद्-व्यक्ता प्रातरादिवत् । यत्र तु व्यञ्जकं किञ्चित् तत्र संख्या प्रतीयते" इति वाक्यपदीये उक्तम्

तेन राजपुरुष इत्यादौ न विशेषसंख्याप्रतीतिः व्यञ्जकाभावात् त्वतुप्तल: व्यञ्जनम् इत्यादौ तु विशेषेण तत्प्रतीतिः त्वादेयतद्भावयोर्व्यञ्जकत्वात् "त्वभावैकवचने" इति पा० एकवचने त्वभावादेश्च विधानात् । तद्भावादेव द्वित्वबहुत्वयोर्विशेषेण प्रतीतिः । एवं द्रव्यैक्ये एकदेशितत्पुरुषविधानात् अर्द्धपिप्पलीत्यादौ एकत्वप्रतीतिः द्वित्वादौ विवक्षिते तु पिप्पल्यर्द्धमित्यादाविव स्यादिति तत्र विशेषसंख्याप्रतीतिः । "एक: शब्दः सुप्रयुक्तः सम्यगुज्ञातः स्वर्गे लोके कामधुग्भवति" श्रुतिः एकमेवाद्वितीयं ब्रह्म" श्रुतिः । ऽभेदत्रयशून्ये परमेश्वरे पु० । "एकोऽनेकः सव: क: किम्" विष्णुस० । "परमार्थतः सजातीयविजातीयस्वगतभेदराहित्यात् एकः" भा० । सजातीयभेदः यथा वृक्षे वृक्षान्तरात् भेदः विजातीयभेदः यथा वृक्षे पटाद्भेद: । स्वगतभेदः यथा वृक्षे शाखादिभ्योभेद इत्येवंभेदत्रयराहित्यस्य सर्वस्य ब्रह्मात्मकत्वात् कार्यकारणयोरभेदात् तदरिक्तपरमार्थवस्त्वन्तराभावाच्च । तदेव "एकमेवाद्वितीयमिति"श्रुतौ पदत्रयेणोक्तम् दृष्ट तु अन्यपदाभावात् एकशब्दस्यैव तथा भेदत्रयराहित्यपरत्वमिति बोध्यम् । सांख्यमते तु "एकोऽद्वितीय इति वेदवचांसि पुंसि वैधर्म्यलक्षणभिदाविरहं वदन्ति" इत्युक्तवैधर्म्यरूपभेदराहित्यमेकत्वमिति बोध्यम् । न्यायमते तु "एकत्वमनुपश्यत:" इति श्रुत्यन्तरात् एकत्वेन चिन्यतया, प्राधान्येन वा एकत्वं समर्थनीयम् ।"एकातपत्रा पृथिवीभुताकृणोः"माघः । "त्वमेकदृश्यं नयनैः पिबन्यः" "समाल भावैकरसं मनः स्थितम्" कुमा० त्वमेकोऽस्य सर्वस्य विधानस्य स्वयम्भुवः" मनुः । "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः । अजोह्येकोजुषमाणोऽनुशेते" श्रुतिः।"एकातपत्रं जगतः प्रभुत्वम् "त्वमेका कल्याणी गिरिशरमणी काचि! सततम्" कर्पू०स्त० "हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता" भाषा० । विशेषणयोरेकस्य विशेष्यत्वविवक्षया क०स० एकशब्दस्य पूर्वनिपात: एकधनुर्द्धर इत्यादि "अमोघं सन्दधे शस्त्रं धनुष्येकधनुर्द्धरः" रघु: । वीरशब्देन समासे तु एकवीरः वीरैक इति रूपद्वयं भवतीति भेदः । वस्तुतस्तत्र वीरैकः इत्येव एकेषु सख्येषु वीरयते इति वीरधातोरूपवीरशब्देन सम्प्रमीतपुरुषे एकशेर इति प्रौढम० । एकशब्दस्य संख्यावाचकत्वेऽपि "संख्यापूर्वो द्विगुः" पा० न द्विगुत्वमिति । अस्य सर्वनामकार्यम् एके एकस्मै एकस्मात् एकेषाम् एकस्मिन् । स्त्रियाम् एकस्यै एकस्याः एकासामेकस्यामित्यादि नञ्तत्पुरुषे तु । अनेक एकभिन्ने द्वि० ब० व० । तत्र एकत्व संख्यान्वयासम्भवाच्चैकवचनप्रयोगः । तत्र च सर्वनामकार्यम् "अनेके अनेकस्मै इत्यादि अनेके सेवन्ते भवदधिकगोर्वाणनिवहान्" कर्पू०स्त० । एकत्वार्थकेन तेन बहुत्वेऽपि एकवचनप्रयोगोऽपि "अनेकमन्यपदार्थे" पा० ।

एकस्य भाव: त्व । एकत्व न० तल् । एकता स्त्री, व्यञ् ऐक्य न० एकत्वसंख्यायां साम्ये श्रेष्ठ्ये अभेदे च । "तत्र कोमोहः कः शोक एकत्वमनुपश्यतः" श्रुतिः "अथान्तरमेकत्वम्" कणा०सू० । "एकत्वं सागता यस्मात्" स्मृतिः । "समालोक्यैकतामेव यस्मिनो भास्करस्य च" भा०य० २२१ । "ब्रजतोरपि प्रणयपूर्वमेकताम्" माघः "दैक्यं सोऽन्वये" साधवो० । "द्व्यैक्ये" सि०कौ० ।

इतर । एकतर द्वयोर्भेदे जातिगुणक्रियादिभिर्निर्धार्ये एकस्मिन् त्रि० "एकतरो ब्राह्मण: एकतरः कठः एकतरो नीलः एकतरस्य इत्यादि । "अस्त्राणि वा शरीरं वा ब्रह्मन्नेकतरं दृण" भा० आ० १६६ अ० । "एकतरपक्षपातिनी युक्तिर्विनिगमना"न्याय० । स च शब्दः अन्यतरान्यतमवत् अव्युत्पन्नं प्रातिपादिकमित्यन्ये अतएव "अदृङ्कतरादिभ्यः"पा० एकतरशब्दाच्च अदृङ् । एकतरं कुलम् । तेन न सर्वनामकार्यम् "द्वयोरेकतरे बुद्धिः क्रियतामित्यादि, एकशब्दस्य भिन्नार्थकत्वेन एकतरशब्दोऽपि भिन्नार्थे अमर: । इतम । एकतम बहूनां मध्ये जात्यादिभिः निर्धार्ये एकस्मिन् त्रि० "यदि ह्येकतमोलोकां स्त्रीधनं भक्षयेदबलात्" काल्या०सू० । सर्वनामकार्यम् एकतमे एकतमस्मादित्यादि स्त्रीत्वे ङीषो: अदृङ् एकतमत् । तस्मिन् । एकतस् एकस्मिन्नर्थे अव्य० "एकतोदत:"मनुः "तामेक-

तस्य विमर्त्ति गुरुर्वितन्वो" रघुः । त्व । एकत्व एकस्मिन्नित्यर्थे अव्य० "एकत्व स्फटिकतटांशुभिन्नशोराः" माघः । "तथैकत्व करे दण्ड" मनुः "अन्यजैर्गर्हभैर्वृद्धैः सङ्गैकत्वावतिष्ठते" या० । दाच् । एकदा एकस्मिन् काले अव्य० । "स च भुङ्क्ते सकृत्सायं बहूनामप्यहमेकदा । एकदा ह्यात्मकं भुङ्क्ते" भा० अनु० १५६ अ० । अल्पाद्यर्थकात् कारकार्थेऽप्यर्थे अस् । एकयस् अल्पमल्पमेकमेकं वेत्यादयर्थे अव्य० "परिस्तोर्यं तं पूर्ववत् पात्रासादनमेकयः" कात्या० ४,२,४ । एवमेकैनैकेन एकैकस्मै इत्याद्यर्थेऽपि । प्रकारे धा । एकधा एकप्रकारे "एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" स्मृतिः । ध्यसुञ् ऐकध्यम् एकधेत्यर्थे अव्य० ।

एककृत् त्रि० एक+असहाये ऽर्थे वा कनु । असहाये "क्षमाचरिष्णुककं भरतामप यद्रपः" रघु० १०,५६,६ । "महानप्येकको हन्ति सर्वतः क्षुप्रतिष्ठितः । प्रसह्यैव हि वातेन यक्षोधर्षयितुं यतः" भट्टत० । "विधिरेककचक्रचारिणम्" नैषधम् । सर्वनामत्वेन टेरकचि तु । एकयद्यर्थे इति भेदः

एककपाल त्रि० एककपाले संस्कृत. अण् तस्य लुक् । एककपालसंस्कृते पुरोडाशादौ । "एतं द्यावापृथिव्यमेककपालं पुरोडाशम्" यत० ब्र० २,४,२ ।

एककर त्रि० एकं करोति एक+कृ–"दिवाविभानिशादिवा" या० संख्यापूर्वकत्वेन अणोबाधकः ट उप०स० स्त्रियाम् ङीप् । एकमात्रकारके एवं द्विकरत्रिकरादयोऽपि तत्तत्संख्यान्वितकारके त्रि० स्त्रियां ङीप् ।

एककार्य त्रि० एकं समानं कार्यं यस्य । समानकार्यकरे एकस्य पाकर्तुर्दर्शने अन्यस्य पाककर्तुःस्मरणं भवतीति स्मारकगणमध्ये गौत० सू० उक्तम् यथा । "प्रणिधानं निबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिपृच्छाश्रयान्वितसंबन्धानन्तर्यविरोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषरागार्थित्वक्रियाधर्माधर्मनिमित्तेभ्यः" सू० । "एककार्यात् एककर्तृदर्शनात् कर्त्तान्तरस्य स्मृतिः" इत्तिः । एकं कार्यं ययोः तयोर्भावः । एककार्यत्व तत्सकार्यकरत्वरूपे सङ्गतिभेदे । तया च समानकार्यकारित्वं स्मर्तव्यकार्यकारित्वं सङ्गतिः । "सप्रसङ्गरूपोद्घातो हेतुतादात्म्यरक्षया । निर्वाढ्वैककार्यत्वं घोढा सङ्गतिरिष्यते" अनुमानमा० । कर्मधार० । एकस्मिन् कार्ये "एककार्ये सहायित्वं कर्णौ युद्धेऽपराजिते" भा० द्रो० १०अ० । "शुचायुष्मनायुष्मन्नेककार्यं मनन्तरम् । एतत्तु ब्रह्मणो दृष्टमाकुरेकपदं हयम्" भा० व० २१२अ० ।

एककाल कर्मधारयः । एकस्मिन् काले "एककालं चरेद्ग्रासं न प्रसज्येत विस्तरे" मनुः । "सनिभिर्हि रयनसङ्गम्" इत्युक्तेर्भोजनस्य द्विकालिकत्वं सार्व्वजनीनं यतेस्तु भिक्षालब्धभोजनस्य रागप्राप्तया तदंशे विधित्वासम्भवेन एककालत्वञ्चेन द्वितीयकालनिवृत्त्यर्था परिसंख्यैवेहागम्याश्रयणीया न च नियमः, एककालभोजनाकरणे दोषाश्रवणात् । एककालोजनकतयाज्ञातस्य ठन् । "कालाट्ठञ्" तु न भवति समासप्रतिषेधविधौ तदन्तविधेः प्रतिषेधात् । एककालिक एककालभवे त्रि० । "तेभ्यो लब्धे भैक्ष्येण वर्त्तयेदेककालिकम्" स्मृतिः । तत्रभवः खञ् । एककालीनोऽप्यत्र त्रि० ।

एककुण्डल पु० एकं कुण्डलमस्य । बलरामे २कुबेरे च मेदि०

एककुष्ठ न० एकमसाध्यत्वात् प्रधानं कुष्ठम् । क्षुद्रकुष्ठे । तच्च "एकादशक्षुद्रकुष्ठानीति" उद्दिश्य "क्षुद्रकुष्ठान्यपि स्थूलारुष्कं महाकुष्ठमेककुष्ठं चर्म्मदलम् विसर्पः परिसर्पः सिध्म विचर्चिका किटिभं पामा रकसेति" विभज्य "क्षणात्करणं येन भवेच्छरीरं तदेककुष्ठं प्रवदन्त्यसाध्यमिति" लक्षितम् ।

एकगम्य त्रि० एकत्वेन गम्यः । निर्विकल्पकसमाधिगम्ये अखण्डाकारे विदात्मनि । तत्र च मितिमात्रमेयशून्यत्वेनैकरूपतया ज्ञानात् तथात्वम् । परसीमतया गम्ये २परमेश्वरे च "त्र्यम्बकमेको गम्यत्वमसि पयसामर्णव इव" पुष्पदन्तेन तस्यैकपगम्यत्वोक्तेरुक्तथात्वम् ।

एकगुरु पु० एकोऽभिन्नो गुरुर्यस्य । समानाध्यापके सतीर्थे ।

एकग्राम पु० कर्म० । अभिन्नग्रामे । "एकग्रामे चतुःशाले दुर्भिक्षे राष्ट्रविप्लवे । यतिना भैक्ष्यमानायाः पुरः शुक्लो न दुष्यति" उद्यो० । तत्रभवः ख । एकग्रामीण एकग्रामभवे त्रि० । "नैकग्रामीणमतिथिं विप्रं साङ्गतिकं यथा । यज्ञे उपस्थितं विद्यात् भार्या यत्राग्नयोऽपि वा" मनुः अस्य गङ्गा० पाठात् छप्रत्ये एकग्रामीय तत्रार्थे । एकग्रामीणप्रयोगस्तु आर्षः । एकोग्रामोऽस्य । २समानग्रामवासिनि त्रि० ।

एकचक्र न० एकं श्रेष्ठं वा चक्रं यत्र । पुरीभेदे स्त्री यत्र बकासुरस्य वधो भीमेन कृतः । "एकचक्रोरथो यस्य" सूर्यस्तुतिः "पृथुवर्त्मुलसच्चित्तम्बजन्मिदिरस्यन्दनधिल्लधिष्ण्या । विधिरेकचक्रचारिणं किल निर्मित्सति मामयं रथम्" नैष० सूर्यरथस्यैककचा-

रित्यनुक्रमम्" । ७ असहायवरे त्रि० "सूर्यरथवर्णनञ्च" ऋ० १,१६४,२ । "सप्त युञ्जन्ति रथमेकचक्रमेकोऽश्वो वहति सप्तनामा । त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधितस्थुः" । व्याख्यातैषा भाष्यकृता यथा

'एकचक्रमेकरथाङ्गोपेतम् । यद्यपि त्रीणि चक्राणि तथापि तेषामेकरूपत्वादेकचक्रमित्युच्यते रथं रंहणस्वभावं सूर्यस्य सम्बन्धिनं सप्तैतत्संख्यका अश्वा युञ्जन्ति अनुबध्नन्ति वहन्त्येकोऽत्रानिर्वाच्याय किं वस्तुतः सप्त नेत्याह । एकोऽश्वः सप्तनामा । एक एव सप्ताभिधानः सप्तधा नमनप्रकारो वा एक एव वायुः सप्तरूपं धृत्वा वहतीत्यर्थः वायुधीनत्वादन्तरिक्षसञ्चारस्य एकचक्रमित्युक्तं कीदृशं तदित्यत आह । त्रिनाभि बलयत्रयमध्यस्थितनाभिस्थानीयच्छिद्रत्रयोपेतम् । अजरम् अमरणधर्माकम् । अनर्वम् अश्वितिलं पुनस्तदेव विशेष्यते । यत्र यस्मिंश्चक्रे इमा विश्वा भुवना इमानि प्रसिद्धानि सर्वाणि भूतजातान्यधि आश्रित्य तस्थुः तिष्ठन्ति । यद्वा एकचक्रमेकचारिणमसाक्षाद्येन सञ्चरन्तं रथमादित्यमण्डलं सप्त युञ्जन्ति सर्पणस्वभावाः सप्तसंख्या वा रश्मयः सप्तप्रकारकार्या असाधारणाः परस्परविलक्षणाः षड्ऋतवः एकसाधारण इत्येवं रूपाः अथवा मासद्वयात्मकाः षट् अपरोऽधिमासात्मक एक इत्येवं सप्तर्त्तवो युञ्जन्ति । एतस्य कार्यं निर्वहन्तीत्यर्थः । स चैकोऽसहायोऽश्वो व्यापनशील आदित्यः सप्तनामा सप्तरसानां सप्तमयितारोरश्मयो यस्य तादृशः । सप्त ऋषिभिः स्तूयमानो वादित्यो वहति धारयति भ्रमयतीत्यर्थः । किं भूतं ? त्रिनाभि चक्रम् । तिस्रो नाभिस्थानीया सन्ध्यासन्ध्या वा एव ऋतवो यस्य तत्तादृशं के ते योऽवयवाहेमन्ताख्याः यद्वा भूतभविष्यद्वर्त्तमानाख्यास्त्रयः कालास्त्रिनाभयः । तद्विशिष्टं चक्रं चक्रवत् पुनःपुनः परिभ्रममाणं संवत्सराख्यचक्रमजरममरणं न हि कदाचिदपि कालोम्रियते "अनादिनिधनः कालः" इति स्मृतेः । अनर्वमप्रतिहतम् । ईदृशं संवत्सराख्यं चक्रं नानाकालावयवोपेतमयमादित्यः पुनः पुनरावर्त्तयति संवत्सरादयोचोनानां तत्तत्कालाभावात् युगादीनां तदाधत्तिसाध्यत्वात संवत्सरस्य चक्रत्वेन रूपणम् । पुनः कीदृशं तत् । यत्र यस्मिंश्चक्रे इमा विश्वा भुवना इमानि सर्वाणि भूतान्यधितस्थुः आश्रित्य तिष्ठन्ति कालाधीनत्वात् सर्वेषाम् स्थितेः , ईदृशस्य कालस्य कारणभूतपरमेश्वरपरित्राणेन मोक्षसद्भावात् एतन्मोक्षाजरप्रशंसा चेत्यनुक्रमण्यामुक्तम् । अयमपि मन्त्रो यास्केन सप्त युञ्जन्ति रथमेकचक्रमेकचारिणमित्यादिना व्याख्यातः तदत्राप्यनुसन्धेयम्" भा० ।

भाष्येऽनुसन्धेयतयोक्तं यास्कवाक्यमुदाहियते "सप्त युञ्जन्ति रथमेकचक्रमित्यादि"श्रुतिमधिकृत्योक्तम् सप्त युञ्जन्ति रथमेकचक्रमेकचारिणम् । चक्रं चकतेर्वा चरतेर्वा क्रामतेर्वा । एकोऽश्वो वहति सप्तनामादित्यः सप्तास्य रश्मयो रसानभि संनामयन्ति सप्तैनमृषयः स्तुवन्तीति वा । इदमपरं नामेतरैर्देवाभिसंनामात् । संवत्सरप्रधान उत्तरोऽर्धर्चः । त्रिनाभि चक्रं तृतः संवत्सरो योऽयो वर्षा हेमन्त इति । संवत्सरः संवसन्त्यस्मिन् भूतानि । योऽयोऽयसन्तोऽस्मिन्नसा:, वर्षा वर्षत्यासु पर्जन्यो हेमन्तो हिमवान् हिमं पुनर्हन्तेर्वा हिनोतेर्वा । अजरममरणधर्माणमनर्वमप्रतृतमन्यस्मिन् यत्रेमानि सर्वाणि भूतान्यभि संतिष्ठन्ते तं संवत्सरं सर्वमाददाभिः स्तौति । "पञ्चारे चक्रे परिवर्त्तमाने" श्रुतिपदमृत्तया । "पञ्चर्तवः संवत्सरस्येति"इति च ब्राह्मणं हेमन्तशिशिरयोः समासेन । "षडर आकृतिर्पितमिति"श्रुतिः षडृतुतया । अराः प्रत्यृता नाभौ । षट् पुनः सहते: । "द्वादशारं नहि तज्जराय द्वादशप्रधयश्चक्रमेकम"इति श्रुतिः मासानाम् । मासा मानात् । प्रधिः प्रहितोभवति "तस्मिन्त् साकं त्रिंशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलास." श्रुतिः। "षष्टिश्च वै त्रीणि च शतानि संवत्सरस्याहोरात्रा इति च" ब्राह्मणं समासेन । "सप्तशतानि विंशतिश्च तस्थुः"श्रुतिः ।"सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रा इति च"ब्राह्मणं विभागेन" ५दनोः पुत्रभेदे पु० "चत्वारिंशदृदनोः पुत्राः" इत्युपक्रम्य "एकपादेकचक्रश्च विरूपाक्षोदरौ" भा० अ० ६५ । स एव प्रतिविन्ध्यतया जातः यथाह भा० आ० ६७ । "एकचक्र इति ख्यात आसीद् यस्य महात्मनः । प्रतिविन्ध्य इति ख्यातो बभूव प्राथितः क्षितौ"भा० पुरीभेदस्तु "एकचक्रां ततो गत्वा पाण्डवाः संशितव्रताः" इत्युपक्रम्य "मात्रा सहैकचक्रायां ब्राह्मणस्य निवेशने । तत्रासुखाद् क्षुधितं पुरुषादं वृकोदरः । भीमसेनो महाबाहुर्वकं नाम महाबलम्" भा०आ० ६१ अ० उक्तः । एकमेव चक्रं सैन्यसंघो यत्र । ६एकराजचिह्ने त्रि० । "तावत् प्रयास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः" भाग० ३,१,६० । "एकस्यैव चक्रं सैन्यं

यत्र श्रोधरः । "एकराजसमित्रत्वहेतैकचक्राम्" काद० । एकस्य तत्पुरीपरक्षणभीमकर्त्तृकबधकत्वा च भा०आ० १५७ अध्यायादौ । "एकचक्रां गतास्ते तु कुन्तीपुत्रा महाबला" इत्यादिना "भक्ष्यमाणस्य भीमेन तस्य घोरस्य रक्षसः" इत्यन्तेन १६३अ० वर्णिता ।

एकचत्वारिंशत् स्त्री एकाधिका चत्वारिंशत् या० त० । (एक चत्वारिंश) १एकाधिकचत्वारिंशत्संख्यायां २तत्संख्यान्विते च बहुत्वबोधकत्वेऽपि उभयत्र नित्यैकवचनम् । एवमेकत्रिंशति एकत्रिंशत् एकपञ्चाशत् एकषष्टि एकसप्तति एकाशीति एकनवति इत्येते शब्दाः क्रमेण एकत्रिंशदादिसंख्यायां तदन्विते चस्त्री एकाधिकादश इत्यत्र तु आत् एकादश इति भेदः सर्वेभ्यः पूरणे डट् । एकचत्वारिंशादिस्तत्संख्यापूरणे त्रि० स्त्रियां ङीप् ।

एकचर त्रि० एक सन् चरति चर-पचा० अच् सुमुपेति स० । एकाकीभूत्वा चारिणि सहायचारिणि । "मुनिरेकचरः क्षेमात्" धर्म्मो द्वितीयवानिव भा० व० ७८अ० । "अनेकाशायो लघुरल्पचारस्त्वन् देवानेकचरः स भिक्षुः" भा० आ० ६१अ० । "न भक्षयेदेकचरान् पशूंश्चारण्य मृगद्विजान्" मनुः । "ये एकाकिनः प्रायेण चरन्ति सपदि यस्तानेकचरान्" कल्प० "अयमेकचरोऽभिवर्त्तते माम्" किरा० । "पृथिव्यामेकचरः परिबभ्राम" भा० ५,५,१० ।

एकचरण पु० एकश्चरणो यस्य । एकपादयुते १मनुष्यभेदे २तद्युक्तजनपदभेदे च स च देशः बृहत्सं० कूर्मविभागे ऐशान्यामस्कः । "ऐशान्यामेकलव्याख्यप्रमुखाश्चैकचरकाश्चोराः" इत्युपक्रम्य "एकचरणानुविश्वाः सुवर्णभूमिसुवर्णद्विपिशाच" [यगमने

एकचर्य्या स्त्री एकस्य चर्य्या चर-भावे क्यप् ईत० । असहाचरे १एकचरे त्रि० । २बुद्धसहचरभेदे पु० तिका० ।

एकच्छाया स्त्री एकस्य ऋणयोधनेऽन्यसहायस्याधमर्णस्य च्छाया सादृश्यम् । अधमर्णसादृश्ये । "बहवः स्युर्यदि स्वांश्यान् दद्युः प्रतिभुवोधनम् । एकच्छायाश्रितेष्वेषु धनिकस्य यथार्हति" या० । "एकच्छायाश्रितेषु प्रतिभुषु एकस्या धमर्णस्य छाया सादृश्यं तामाश्रिताः एकच्छायाश्रिताः अधमर्णो यथा ऋणदानाय स्थितस्तथा दानप्रतिभुवोऽपि प्रत्येकं द्रव्यदानाय स्थिताः" मिता० । "एकच्छायाप्रविष्टानां दाप्यो यस्तत्र दृश्यते । प्रोषिते तत्सुतो दाप्यः पितृमयं मृते सति" कात्या० स्मृ० । एकैव च्छाया व्याच्छादनरूपा यस्य । तुल्यच्छादने त्रि० "एकच्छाय चक्रतुस्तावाकाशं शरवृष्टिभिः" भा० वि० १८७ ।

एकज त्रि० एकस्मात् जायते जन-ड ५त० । १एकस्माज्जाते "साकञ्जानां सप्तथमाहुरेकजम्" ऋ० १,१६४,५ । साकंजानामेकस्मादादित्यात् सहोत्पन्नानां मध्ये सप्तथं सप्तसंख्यकम् एकजमेकेनोत्पन्नमाहुः कालतत्त्ववित्, चैत्रादीनां द्वादशानां मासानां द्वयमेलनेन वसन्ताद्याः षड्ऋतवो भवन्ति अधिमासेनैक उत्पद्यते सप्तमर्त्तुः" भा० । एकेन जातमित्युक्तिस्तन्त्या कर्त्तृकरणयोरेव हतीयासभासो न हेतुहतीययेति नियमात् । २सोदरासोदरभ्रातरि तत्रैकयोरोत्पन्नत्वात् एकजत्वम् ३भगिन्यां स्त्री जन-क । ५त० । एकजातादयोऽप्यत्र सर्वेषामेकजातानामेकश्चेत् पुत्रवान् भवेत् । सर्वास्तास्तेन पुत्रेण पुत्रिणीमनुरब्रवीत्" स्मृतिः "ब्रह्मीषु चैकजातानां नानास्त्रीषु निबोधत" मनुः । एकः असहायः एव जायते जन-ड सुमुपेति स० । ४असहायतया जाते "एकजम्" काल्या० ६, १,१ । "एकः असहाय एव भूमेर्जातः तमेकं यूपं वसवो वृत्रहणं क्रन्" ऋ० १०,८४,२ ।

एकजटा स्त्री एका जटा यस्याः । सर्व्वतारिणीगणप्रकृतिरूपे देवीभेदे तदाविर्भावः कालिका० ६१अ० वर्त्तते यथा "सर्वे सुरगणाः सेन्द्रास्तोषमाप्ता हिमाचलम् । गङ्गावतारनिकटे महामायां प्रतुष्टुवुः । अनेकैश्च स्तुता देवी तदा सर्वामरोत्करैः । मातङ्गवनितामूर्त्तिर्भूत्वा देवानपृच्छत । युष्माभिरमरैरत्र स्तूयते का च भाविनी । किमर्थमागतायूयं मातङ्गस्याश्रमं प्रति । एवं श्रुत्वा मातङ्गात्तस्यास्तु कायकोषतः । रुरुदुः सुतरां देवा मां स्तुवन्ति सुरा इति । एषो निशुम्भोऽसुरो बाधते सकलान् सुरान् । तस्मात् तयोर्बधायाशु स्तुयेऽद्य सकलैः सुरैः । विनिःसृतायां देव्यास्तु मातङ्ग्याः कायतस्तदा । भिन्नाञ्जननिभा कृष्णा साभूत् गौरी तथादिमा । कालिकाख्याऽभवत् सापि हिमाचलकृताश्रया । तामुग्रतारामृषयो वदन्तीह मनीषिणः । उग्रादपि भयात् त्रातीं यस्माद्भक्तान् सदाम्बिका । एतस्याः प्रथमं बीजं कथितं तन्त्रमेव च । एवं चैकजटा ख्याता यस्मात्तस्या जटैकिका । हृदयं चिन्तनं चास्याः सम्यक् वेतालभैरवौ ! । यथा ध्यात्वा महादेवीं भक्तः प्राप्नोत्यभीप्सितम् । चतुर्भुजां कृष्णवर्णां सुमुण्डमालाविभूषिताम् । खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं तथः । कर्त्रीञ्च

खपरश्चैव क्रमाद्दामेन बिभ्रती । खं लिखन्ती जटामेकां बिभ्रती शिरसा स्वयम् । मुण्डमालाधरा धीरे पीवायामपि सर्व्वदा । वज्रसा नागहारन्तु बिभ्रती रक्तलोचना । लम्बोदरधरां कक्षां व्याघ्राजिनसमन्विता । वामपादं प्रसार्य्यादि संस्थाप्य दक्षिणं पदम । शिवस्य शिरसि न्यस्य तु खेलिहानाऽऽस्यं स्वयम् । साट्टहासमहाघोरारावयुक्ताऽति भीषणा । चिन्योग्रतारा सततं भक्तिमद्भिः सुखेप्सुभः । एतस्याः संप्रवक्ष्यामि या अष्टौ योगिन्योमताः । महाकाल्यथ कङ्काणी उग्रा भीमा तथैव च । घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी । भैरवी चाष्टमी प्रोक्ता योगिनीस्तु प्रपूजयेत्' । तन्त्रसा० पञ्चाक्षरीं विद्यां प्रदर्श्य "पञ्चाक्षरी एकजटा ओम्)तारात्मके महेश्वरि ! । (ओम्) तारात्मा तु भवेद्देवि ! श्यामनीलसरस्वती" । "अन्यासां विद्यानामेकजटैव देवता प्रकृतित्वात्' कक्षा० । तद्भेदास्तु "तारोग्रा महोग्रा च वज्रा कालो सरस्वती । कामेश्वरी च चामुण्डा इत्यष्टौ तारिणीभिदाः" तन्त्रसा० ।

एवजन्मन् पु० एकं प्रधानं जन्म यस्य एकेभ्यो प्रधानेभ्यो दिक्पालांशेभ्यो वा जन्म यस्य वा । ईश्वरे क्लिका० दृत मनुष्यापेक्षया प्रधानभोगसाधनजन्मत्वेन दिक्पालांशभूतत्वेन च तथात्वम् । एकमेव न द्वितीयं जन्म यस्य । २शूद्रजातौ पुंस्त्री तस्य सावित्रजन्माभावात् गर्भमात्रजन्मकत्वात्तथात्वम् स्त्रियां वा ङीप् ।

एकजाति पुंस्त्री एका जातिर्जन्मास्य । शूद्रजातौ "ब्राह्मणः क्षत्रियोवैश्यस्त्रयोवर्णा द्विजातयः । चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः" मनुना तस्यैकमात्रजन्मत्वप्रतिपादनेन द्विजातिवत् सावित्रजन्माराहित्येन एकजातित्वम् । "एकजातिर्द्विजातीस्तु वाचा दारुणया क्षिपन्" मनुः । "एकजातेरयं धर्मो यद्विप्रोद्विवहेत्क्वचित्" पुरा० । श्रुत्युक्ते २कीटभेदे । "एकजातीनतन्तूंश्च कीटान् वक्ष्यामि भेदतः । सामान्यतोदृष्टविधैः साध्यासाध्यक्रमेण च । त्रिकण्टकः कुणी चापि कृमिकोशोपरञ्जितः । चत्वार एते कथिता व्याख्यातास्तीव्रवेदनाः" इति कीटशब्दे विवृतिः । एका तुल्या जातिः सामान्यधर्म्मोऽस्य । २तुल्यधर्म्मयुक्ते त्रि० कर्म्मधा० । ४तुल्यधर्म्मे स्त्री । तामर्हति क । एकजातीय समानधर्म्मान्विते त्रि० "एवमेकजातीयानां महाशरीरेभ्यः क्षयशरीराः प्रधानसमाः" सुश्रु० "एकः प्रकारः जातीयर् । एकजातीय । मुख्यप्रकारे त्रि० ।

एकजीववाद पु० एक एव जीव इत्येवं वादः । एक चैतन्यमेकयैवाविद्यया बद्धं संसरति तदेव ज्ञानेन कदाचिन्मुच्यते नाखदादीनां बन्धमोक्षौ स्त इत्येवं रूपे विद्यान्येकदेशिवादभेदे । उक्तौ चैकानेकजीववादौ: वेदा० प० यथा "एकजीववादेऽविद्याप्रतिबिम्बो जीवः अनेकजीववादे तु अन्तःकरणप्रतिबिम्बः स च जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान् । तत्र जाग्रद्दशा नाम इन्द्रियजन्यज्ञानावस्थावस्थान्तरे इन्द्रियाभावाद्व्याप्तिः । इन्द्रियजन्यज्ञानञ्चान्तःकरणवृत्तिः स्वरूपज्ञानस्यानादित्वात् । सा चान्तःकरणवृत्तिरावरणाभिभवार्थेत्येकं मतम् । तथाहि अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्व्वदा घटादिभानप्रसक्तौ घटाद्यवच्छिन्नचैतन्यावरकभानं मूलाविद्यापरतन्त्रमवस्थापदवाच्यमभ्युपगन्तव्यम् । एवं सति न सर्व्वदा घटादिभानप्रसङ्गः अनादृतचैतन्यसम्बन्धस्यैव भानप्रयोजकत्वात् । तस्य चावरणस्य सदातनत्वे कदाचिदपि घटभानं न स्यादिति तद्भङ्गाय तद्भञ्जकं न चैतन्यमात्रं, तद्भासकस्य तदनिवर्त्तकत्वात् नापि वृत्त्युपहितं चैतन्यं परोक्षस्यैऽपि तत्तद्वृत्त्यापत्तेरिति परोक्षव्यावहारवृत्तिविशेषस्य आवरणभङ्गकत्वमित्यावरणाभिभवार्था वृत्तिरुच्यते । सम्बन्धार्था वृत्तिरित्यपरं मतम् । तत्राविद्योपाधिकोजीवोऽपरिच्छिन्नः स च घटादिप्रदेशे विद्यमानोऽपि घटाद्याकारापरोक्षवृत्तिविरहदशायां न घटादिकमवभासयति घटादिना सम सम्बन्धाभावात् तत्तदाकारवृत्तिदशायां तु भासयति तदा सम्बन्धसत्त्वात् । ननु अविद्योपाधिकस्य जीवस्यापरिच्छिन्नस्य स्वतएव सर्व्ववस्तुसम्बन्धस्य वृत्तिविरहदशायां सम्बन्धाभावाभिधानमसङ्गतं असङ्गतत्वदशा सम्बन्धाभावाभिधाने च वृत्त्युत्तरमपि सम्बन्धेन स्यादिति चेत् उच्यते न हि वृत्तिविरहदशायां जीवस्य घटादिना सह सम्बन्धसामान्यं निषेध्यम् किन्तर्हि घटादिभानप्रयोजकं सम्बन्धविशेषम् । स च सम्बन्धविशेषोऽविद्यावभासकस्य जीवचैतन्यस्य च व्यङ्ग्यवृत्तकतालक्षणः कादाचित्कत्वसदाकारवृत्तिनिबन्धनः । तथाहि तैलसमन्वक्तं घटद्रव्यवत्तु स्वतएव जीवचैतन्याभिव्यङ्ग्यसमर्थं घटादिकन्तु न तथा अस्वच्छद्रव्यत्वात् । साकारवृत्तिसंयोगदशायान्तु वृत्त्यभिभूतजाड्यधर्म्मवत्तया वृत्त्युत्पादितचैतन्याभिव्यञ्जनयोग्यतावत्तया च वृत्त्युदयानन्तरं चैतन्यमभिव्यनक्ति ।

तद्वत्तं विवरणे अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गि-ण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयतीति । दृष्टान्तस्वकद्रव्यस्यापि स्वकद्रव्यसम्बन्ददशायां प्रतिबिम्ब-माहित्वम् । घटादेरभिव्यङ्कत्वञ्च तत्प्रतिबिम्बमाहित्वम् चैतन्यस्याभिव्यक्तत्वञ्च तत्र प्रतिबिम्बितत्वम् । एवंविधा-भिव्यङ्कत्वसिद्ध्यर्थमेव दृक्तेरपरोक्षस्थले बहिर्निर्गमना-ङ्गीकारः । परोक्षस्थले तु वक्त्रादेर्दृक्तिसंयोगाभावेन चै-तन्यानभिव्यङ्कतया नापरोक्षत्वम् । एतन्मते च विषया-णामपरोक्षत्वं चैतन्याभिव्यङ्कत्वमिति दृष्टव्यम्' । "एकानेकजीववादौ सिद्धान्तेऽपि दर्शितौ यथा । "अथ विद्योदये सत्युपाधिविलयादपेतजीवभावस्य किमीश्वरभावा-पत्तिरुत शुद्धचैतन्यमात्ररूपेणावस्थानमिति विवेचनीयम् । उच्यते । एकजीववादे तदेकाज्ञानकल्पितस्य जी-वेश्वरविभागादिकृतस्वभेदप्रपञ्चस्य तद्विद्योदये विलयाद्वि-र्विशेषचैतन्यरूपेणावस्थानम् । अनेकजीववादमभ्युपगम्य बद्धमुक्तव्यवस्थाङ्गीकारे यद्यपि कस्यचिद्विद्योदये तद-विद्याकृतप्रपञ्चविलयेऽपि बद्धपुरुषाज्ञानविद्याकृतोजीवे-श्वरविभागादिप्रपञ्चोऽनुवर्तते तथापि जीवबद्धेश्वरोऽपि प्रतिबिम्बविशेष इति पक्षे शुद्धस्य बिम्बभूतशुद्धचैतन्यरूपेणा-वस्थानम् अनेकोपाधिषु एकस्य प्रतिबिम्बे सत्येकोपाधि-विलयेन तत्प्रतिबिम्बस्य बिम्बभावेनावस्थानौचित्येन प्र-तिबिम्बान्तरत्वापत्त्यभावात् तज्ज्ञानेन कदाचिज्जीवरूप-बिम्बान्तरत्वापत्तेरपि दुर्वारत्वेनावच्छेदपक्ष इव शुद्धस्य पुनर्बन्धापत्तेः । अतएवानेकजीववादेऽवच्छेदपक्षोऽनादृ-तस्तदवच्छेदेनान्तःकरणान्तरसंसर्गे पुनरपि बन्धापत्तेः प्रतिबिम्बो जीवः बिम्बस्थानीय ईश्वर उभयानुस्यूतं शुद्धचै-तन्यमिति पक्षे तु शुद्धस्य यावत्संसृष्टि सर्वज्ञत्वस-र्वेश्वरत्वसत्यकामत्वादिगुणकपरमेश्वरभावापत्तिरि-ष्यते यथानेकेषु दर्पणेषु एकस्य मुखस्य प्रतिबिम्बे तत्तद्दर्पणाधनवे तत्प्रतिबिम्बोबिम्बभावेनावातिष्ठते । न तु मुखमात्ररूपेण, तदानीमपि दर्पणान्तर-सन्निधानप्रयुक्तस्य मुखे बिम्बत्वस्थानापायात् तथैकस्य ब्रह्मचैतन्यस्यानेकेषूपाधिषु प्रतिबिम्बे सत्येकस्मिन् प्रतिबि-म्बे विद्योदयेन तदुपाधिविलये तत्प्रतिबिम्बस्य बिम्बभावे-नावस्थानावश्यम्भावात् । न च मुक्तस्याविद्याऽभावात् सत्य-कामत्वादिगुणविशिष्टसर्वेश्वरत्वानुपपत्तिः तदविद्याभावेऽपि तदानीं बद्धपुरुषान्तरविद्याभावात् न हीश्वरेश्वरत्वं बद्धकामादिगुणविशिष्टत्वञ्च स्वाविद्याकृतं तस्य निरञ्जन-त्वात् किन्तु बद्धपुरुषाविद्याकृतमेव तत्त्ववेमनवत्त्वम्" ।

एकत पु० पिङ्गलिप्रभृतीप्रज्ञाजनजननियमनेहेतौ देवभेदे । तस्योत्पत्तिकथा यज्ञांगभागित्वकथा च यत० ब्रा० १, २,१,१,दर्शिता यथा । "चतुर्धा विक्रमोह वा अग्नेऽङ्गिरसः । स यमग्नेऽङ्गिरसं क्षेत्राय प्राहिणुत स प्रैषाधन्वद्धं द्वितीयं प्राहिणुत स प्रैषाधन्वद्धं तृतीयं प्राहिणुत स प्रैषाधन्वदथ योऽयमेतर्ह्यग्निः स भीषा निलिल्ये सोऽपः प्रविवेश तं देवा अनुविद्य सहसैवाङ्गा आनिन्युः सोऽपोऽभितिष्ठेवावद्भूताः स्थ या अप्रपदनं स्थ याभ्यो वोमामकामं नयन्तीति तत आप्नुवः सम्बभूवुस्तितोहित एकतः । तदस्मै सह चेरुः यद्वै ब्राह्मणो राजानमनुचरति स यत्र त्रिर्गोर्णं स्वाद्वं विश्वरूपं जघान तस्य हैतेऽपि बध्यस्य विदाञ्चक्रुः यन्नद्वैनं त्रित एव जघानात्यह तदिन्द्रोऽसुच्यत देवो हि सः । त उ हैत ऊचुः । उपैवेमएनो गच्छन्तु येऽस्य बध्यस्यावेदिषु इति त्रिमिति यत्र एवैष मृष्टामिति तदेषैतद्यज्ञो मृष्टे य देष्योः पात्रीनिर्णेजनमङ्गुलिप्रणेजनं निनयन्ति ।

त उ हाप्या ऊचुः । अत्येव वयमिदमगन् परो नयामेति क्रममीति य एवादक्षिणेन हविषा यजाता इति तस्मादाद्दक्षिणेन हविषा यजेताप्रेषु ह यज्ञो वृष्ट आप्ना उ ह तस्मिन् यजते, यो दक्षिणेन हविषा यजते । ततो देवाः, एतां दर्शपूर्णमासयोर्दक्षिणामकल्पयन् यद्-वाहार्यं नेदद्दक्षिणं हविरसदिति तन्नाना निनयति तथै-व्योऽसमदं करोति तदभि तपति तथैषां भृतं भवति स निनयति त्रिताय त्वा द्वितीय त्वैकतय त्वेति" "यं हो-त्रकर्मणे प्राहिणुत ते देवा इत्यर्थः। प्राधन्वत् प्रागच्छदक्षियत धवि गमने । भीषा पूर्वान्निवत्सरणभयेन निलीनोऽन्तर्हितो बभूव । लिव निरसने । अप्रपदनमनायतयभूताः । वः यज्ञस्यर्त्वं चतुर्थीं युष्मत् सकाशात् । ततो निर्लीयनजन्यत्व-बीर्यधारणात्तास्योद्भवः सकाशात् । यद्येदानीं ब्राह्मणः द्वेषोक्तिः । तं बध्यं बधार्हं ज्ञातवन्तः। अनन्तरं चैनं त्रि-श्वरूपं त्रित एवेन्द्रसाहाय्यार्थं जघान इन्द्रस्य तद्धननजनि-तात् पापादति शुक्रोऽभवत् यस्मात् इन्द्रो देवः अतोऽस्मिन् पापसंश्लेषो न युक्त इत्यर्थः । ते लौकिकाजना त्रि-श्वरूपहननानन्तरमेतदूचुः । एषु त्रितादिषु दुर्हृश्वरूप-वधजनितमेनस्त्वाद्यो मृजीत शोधयेदिति अत एतत् एतेन पात्रीनिर्णेजनादिनियमेन एषु तदेनो यत्नः संशोध-यति तस्मादवहननमेधस्यादिजनितस्तेनसो रूपं पा-

त्रयादिनिर्णेजनमन्त्रेभ्यो निनेतव्यमित्यर्थः । यदयम् पञ्चमेन: परःपरस्तादन्यत्रासाधारणे व्यवस्थाप्यते नयाम अस्याहरति यज्ञसम्बन्धि दोषजातं परिहरत्यनेनेति व्युत्पाद्यार्थानाम ऋत्विग्भ्यो देय ओदनः । निर्नीतसूदकमङ्गारेण प्रतपति" भा०।

"तनय त्वा, हिताय त्वा, एकताय त्वा" यजु०१।२२, "पात्राक्षुलिप्रक्षालनोदकं तिताय तितनाम्ने देवाय त्वा त्वा निनयामीति, तस्मा हिताय त्वा निनयामि, तस्मा एकताय त्वा निनयामि इति व्याख्याय शत०ब्राह्मणोक्ता कथा रूपकेण दर्शिता यथा "पूर्वं कृतश्चित् कारणात् भीतोऽग्निरपः पाविशत्ततोदेवास्तं ज्ञात्वा जम्भङ्गस्तदाग्निमा वोर्य्यमसृजन्त तत आपोऽपक्षयाः तितहितैकतसंज्ञास्ते देवैः सह चरन्तो यज्ञपात्राण्यक्षुलिप्रक्षालनजलञ्च भागं लेभिरे" इति वेददी०। "तदुदकनयनप्रकारः" कात्या० २,५,२५, दर्शितो यथा "पात्राक्षुलिप्रक्षालनमन्त्रेभ्यो निनयत्यभितप्य प्रयतसंस्पन्दमानं तिताय त्वेति प्रतिमन्त्रम्" सू० "पिष्टलिप्रपात्राप्रक्षालनं पिष्टलिप्रक्षुलिप्रक्षालनम् चाभितप्य पात्रीभ्यमेव व्यवतोक्षुकेण तापयित्वा प्रत्यक्संस्पन्दमानं परस्परमङ्गुलिमप्राक्षुवदाग्नेयेभ्यो देवभूतेभ्यो निनयति क्षिप्तलहदेवोभयरूपमेतत् कर्म प्रतिपत्तिरूपमपूर्व्यात्पादकञ्च । तेन द्रव्यविनाशेऽपि क्षिप्तलहञ्च द्रव्यान्तरेणापि निनयनं कर्त्तव्यम् । अपरे तु द्रव्यप्रधानत्वात् तद्विनाशे नोत्पत्तिमिच्छन्ति" कर्क०। अग्नौकरणप्रयोगे ऋषिभेदे "प्रजापतिसुतात्रात्रेः सदस्यात्रिभवं स्मृतम्। एकतस्य हितस्यैव तितस्यैव मरुत्वतः" "हितैकतत्रितात्रेयानुसृता चित्रयज्ञिनम्" "वयं हि अग्नेः पुत्रामनसाः परिकीर्त्तिताः" भा० या० २३८अ० स एव वरुणस्यर्त्विक्सप्तमकान्तर्गतः तस्य प्रमाणम् ऋतेयुशब्दे भा०अनु०१५° अध्यायस्यात्रिसुदाहृतम् ।

एकतान त्रि० एकं तानयति चु० तन+अच्+आयाम् ल्युण् उ० स०।१अनन्यचित्तवृत्तौ एकविषयासक्तचित्ते २तद्वतचित्ते च। "सहैकतानमनयः प्रजाहैकतयज्ञरेणैकतानयोः" भाग०१, २०,२, । स्वार्थे कन्। एकतानकोऽप्युक्तार्थे त्रि० "एकस्यानो विस्तारो गीतिभेदोऽस्य। २एकरूपविस्तारे ४एकतायाम् स्वरभेदे च। "तानोनाम स्वरान्तरप्रवर्त्तकः रागादिस्थितिप्रवृत्त्यादिहेतुः व्यंग्यापरनामा वंशावयवसाध्यः स्वरविशेषः। "गाता यं यं स्वरं गायेत् तं तं वंशेन तानयेत्" इति भरतः" कुमा०टी०मल्लिनाथः

एकताल पु० एक समस्तालोमानं यत्र। १समन्वितलये, विश्रान्तिरहिते स्वल्पवाद्यगीतादौ। एक एव तालोयत्र। २वाद्यभेदे च (एकतालो)।

एकतीर्थिन् एकं समानं तीर्थमाचार्यसमस्यस्य इनि। समानाचार्ययुक्ते। "ज्ञानप्रदायतिब्रह्मचारिणाङ्कृष्णभागिनः। क्रमेणाचार्यशिष्यधर्म्मावलिकर्तीर्थिनः" इति या० "एकतीर्थी एकाचार्यः" मिता०।

एकतोदत त्रि० एकतोदन्तो यस्य दन्तादेशः। एकपार्श्वे दन्तपङ्क्तियुक्ते पशुभेदे भक्षादौ "अनड्वांश्चैकतोदतः" मनुः।

एकत्रिकपु पु० अन्नाद्यकामकर्त्तृके एकाहसाध्ये यागभेदे "एकत्रिकेण त्रयेकेण वान्नाद्यकामेन" आश्व० श्रौ० ६,५,१२,सू०। "एकत्रिक त्रयेकश्च द्वावेकाहौ तयोरन्यतरेणान्नाद्यकामो यजत। एकत्रिक एवं भवति एकस्तोमो बहिष्पवमानः त्रिस्तोमोऽहीनराज्यम्, एवं व्यत्यासेन सर्वत्रैतौ स्तोमौ भवतः त्रयेकस्त्वेतावेव स्तोमौ विपरीतौ भवतः त्रिस्तोमो बहिष्पवमानः एकस्तोमोऽहीनराज्यम् । एवमेव व्यत्यस्य व्यत्यस्य समाप्नुयात्" नारा०। कात्या० २२,३,२४, २५,२६ सूत्रैः तस्य साद्यस्क्रत्वेन परिभाषां कृत्वा तद्विधानाद्यक्रमः। "षट् साद्यस्क्राः" ६ सू०इत्युपक्रम्य षडपि कल्पक्रमेण षटस्थे षष्ठमेकत्रिकं प्रतिपादयितुं तद्धर्माः प्रथमसूत्रा "साद्यस्कधर्म्मा हिरण्यस्रक्त्ववत्" २४ सू०। "साद्यस्क्र शब्देनात्र ग्रहेणोऽभिधीयते तस्य धर्म्मान्लोहितोष्णीषादय हिरण्यस्रग्ववत्। यदस्योपसृक्तं तस्य भवति" कर्क०। "साद्यस्क्रधर्म्मा लोहितवस्त्रादय यथा वाजपेये हिरण्यस्रजो यथोपसृक्तं दीयन्ते एवमत्रापि येन यद्वस्त्रादि परिहितं तत्तस्मै देयम्" भाष्य०। "एकत्रिके दक्षिणा षष्टिशतं षट् च २५सू०। एकत्रिकः षडः साद्यस्क्रः तत्र षट्षष्टिशतं दक्षिणा" कर्क०। इतःपरं साद्यस्कधर्म्माः २६सूत्रजाताः उक्ताः। तत्र स्तोमादि सामसं० भा० निरूपित यथा

"एकत्रिकनामकः कश्चित् क्रतुर्भवति, सर्वेषु श्रूयते "अथैष एकत्रिकस्तस्यैकस्यां बहिष्पवमानम् । तिसृषु स्तोत्रीयासु एकस्यां मैत्रावरुणस्य तिसृषु माध्यन्दिनः पवमानः" इति। सन्ति प्रकृतौ माध्यन्दिनपवमानस्य तत्रस्तृचाः "उचा ते जातम्" इत्ययं (ऊ।प्र,८सू० २,२ ऋ०) प्रथमोगायत्रीच्छन्दस्कः,"पुनानः सोम" इत्यृक् (ऊ।प्र,६सू० १,२,२ ऋ) द्वितीयोष्टुप्छन्दस्कः, "प्र ह

इवा" इत्ययं (उ११प्र,१०सू० १,२,२ च) हतीयश्चि-दृष्टच्छन्दस्कः ।" एतदेवाभिप्रेत्य सूत्रम्, लिच्छन्दोभावा-भोमाध्यन्दिनः इति । एवं सति एकलिङ्गस्य माध्यन्दि-नपवमाने तिसृष्विति यदुक्तं तत्र किं तयाशा हचानाबाह्यालिङ्गः क्रमो बाधाः? किं वा प्रथमहचस्थाः क्रम-घटितालिङ्गः? इति संशयः । तत्र लिच्छन्दस्त्वस्थाप्रबलया दुर्बलं पाठक्रमं बाधित्वा प्रथमपक्षो याद्यः इति प्राप्ते, अभिधीयते यदेतत् लिच्छन्दस्त्वं तदेतत् प्राकृतम्, तत्र छन्दस्त्वयोपेतस्य हचत्रयस्योपदिष्टत्वात् विकृतावपि तत्सर्वमतिदिश्यमिति चेत् बाढम् । अत एव पाठक्रमोऽप्यतिदिष्टः, तथा सति प्रकान्तन्यायबलोच्छन्द-स्कस्य हचस्य समाप्तौ सत्यां पश्चाद् दृष्टलोच्छन्दस्के हचे प्रथमायाः ऋचः पारम्भावसरः स चारम्भस्तिसृषु इति विशेषविधानेन बाध्यते, तच्च दाढ्यं सूत्रकारनिखिलोपात्तः"

एकत्वादिविवक्षान्याय पु० जैमिनीये एकत्वादिसंख्या-विवक्षावधारणार्थे न्याये स च न्यायः ४अ० १पादे ११सूत्र आख्यादौ दर्शितो यथा "तत्रैकत्वमयत्नाङ्गमर्थस्य गुणभूत त्वात्" ११सू०अस्ति ज्योतिष्टोमे पशुः अग्नीषोमीयो, ज्यो दीक्षितः "यत् अग्नीषोमीयं पशुमालभते" इति, तथा, "अनड्वाहौ युनक्ति" इति, तथा, अश्वमेधे "वस-न्ताय कपिञ्जलानालभते" इति । तत्र सन्देहः, किं वै वक्षितम्, एकत्वं द्वित्वं बहुत्वं च, उत अविवक्षितम् ? इति । तत्र एकत्वमयत्नाङ्गभूतं न विवक्षितम्, इत्यर्थः, अर्थस्य गुणभूतत्वात् न आलम्भस्य गुणभूता संख्या नियोजनस्य वा । कस्य तर्हि ? पशोः अनड्वाहोः कपि-ञ्जलानां च, विभक्तिर्हि श्रुत्या प्रातिपदिकार्थगतं संख्यार्थं ब्रूते, वाक्येन सा यत्नाङ्गं ब्रूयात्, वाक्यात् श्रुतिर्बलीया-सी । तस्मात् न यत्नाङ्गं विवक्षितम् इति" "अङ्ग मा भूत् यत्नाङ्गम्, पश्वादीनामङ्गम्, विवक्षितं तथापीति" उच्यते, न, पश्वादीनामङ्गेन उक्तेन अनुक्तेन वा किञ्चित् प्रयोजनमस्ति, यत्नाङ्गेन हि अविपक्वेन प्रयोजनम्, विपक्वेऽपि हि पश्वाद्यङ्गेऽविगुण एव कृतर्भवति, यत्नाङ्ग तद्धं न पश्वादेः । तस्मात् पश्वादेर्गुणेन अज्ञातेन ज्ञातेन वा न किञ्चित् प्रयोजनमस्ति इति न तत् विवक्षितम्, यदि प्रयोजनवत् तत् विवक्षितम् इत्युच्यते" भा० ।

"एकश्रुतित्वाच्च" १२सू० "भवति च किञ्चित् वचनं येन विज्ञायते, न तत् विवक्षितम् इति, 'यदि सोममपरे-युरेयां मां दध्नियां दद्यात्, इति, यदि हि विवक्षितं भवेत्, नैकामिति ब्रूयात्, गामिश्येकवचनस्य विवक्षि-तत्वात्, तथा, "अयी हे धेनू हे" इत्यत्रापि हे इति वचनं ज्ञापकम्, अविवक्षितम् अयी इति द्वित्वम् इति "तीन् लवामान्" इत्यत्रापि तीनिति वचनं लिङ्गम् । लवामानितिबहुत्ववचनम् अविवक्षितम् इति" भा० ।

"प्रतीयते इति चेत्" १३सू० "एवं चेत् पश्यसि, अ-विवक्षिता संख्या इति, तत् न, प्रतीयते हि संख्या आख्यातवचनस्य अङ्गभूता, यथा "पशुमानय" इत्युक्ते एक एवानीयते, पशु इति, द्वौ, पशून् इति बहव आ-नीयन्ते, यच्च प्रतीयते स शब्दार्थः, तस्मात् यच्छब्दाङ्ग-भूता संख्या इति शब्दात् गम्यते, न च शब्दात् गम्यमा-नम् क्वचित् कारणात्, अविवक्षितं भवति" भा० "नाशब्दं तत्प्रमाणत्वात् पूर्ववत्" १४सू० "नैतदेवं, सत्यं प्रती-यते, न तु अयं शब्दार्थः व्यामोहादेषा प्रतीतिः । कुतः एतत् ? व्याकृतेभ्यः पदाङ्गम् इत्यवगम्यते, वाक्यं च श्रुत्या बाध्यते । तस्मात् अशब्दार्थोऽयं यत्ने एकत्वादीति अशब्दार्थोऽपि हि प्रतीयते, यथा पूर्वो धावति इति, स पूर्व इत्युच्यते, यस्य अपरोऽस्ति, तेन पूर्वः इ-त्युक्ते, अपरो गम्यते, न तु, अपरो धावति इति अवणात् प्रतीयते, एवम् इहापि पशुम् इत्येकत्वं गम्यते, न तु यत्ने यथैव हि पूर्वम् इत्युक्तेऽपरो गम्यते एव केवलं, न तु स विधीयते कस्मिंश्चिदर्थे, एवम् इहापि संख्या प्रतीयते एव केवलं, न तु कर्त्तव्यतया यत्ने विधी-यते न पशौ । कथं न पशौ विधीयते ? इति चेत् विधायकस्याभावात् । आख्यातशब्दो विधायको भवि-ष्यति इत्येतदपि नोपपद्यते, द्रव्यदेवतासम्बन्धस्य स वि धायकः यत् आलभते इति न संख्यासंख्येयसम्बन्धं वि-धातुमर्हति इति, भिद्येत हि तथा वाक्यम् । तस्मात् अविवक्षिता संख्या इति" भा० । "शब्दस्वरूपलभ्यते त-दागमे हि तत् दृश्यते तस्य ज्ञानं यथान्येषाम्" १५सू० "तशब्दः पक्षं व्यावर्त्तयति, न तत् अस्ति, न यत्ने संख्या शब्देन श्रूयते इति, आख्यातवाच्ये हि अर्थे उ-पलभ्यते, लोके पशुमानय इत्येकवचने सति एकत्वपशुवि-शिष्टो गम्यते, तत्र हि एकत्वमर्थतः, द्वित्वमुपजायते । यस्य चागमे यत् उपलायते, स तस्य अर्थः इति गम्यते तस्य ज्ञानं, यथान्येषाम् शब्दानाम्, अश्वमानयेति उक्ते अश्वानयनं प्रतीयते,न गामानय इति ज्ञायते, अश्व-शब्दस्य अश्वोऽर्थो गोशब्दस्य गौः इति । यदुक्तं, श्रुत्या

वाक्यार्थो बाध्यते, इति, उच्यते, न श्रुतिर्भूते, वाक्यार्थो नास्ति इति, केवलं तु प्रातिपदिकार्थगतां संख्यामाह । तादृशी संख्या वाक्येन यत्रे विधीयते, प्रातिपदिकार्थो हि आख्यातवाच्येन संबध्यते, विभक्त्यर्थोऽपि, तथा हि तद्विशेषणविशिष्ट आलम्भो गम्यते, तत एकार्थत्वात् एक वाक्यम् अवकल्पते । पशौ हि संख्यायां विधीयमानायामेक आख्यातशब्दो न शक्नुयात्, आख्यातार्थं विधातुम्, संख्यासंख्येयसम्बन्धं च । तस्मात् यत्रे विवक्षिता संख्या इति" भा० "तद्वच्च लिङ्दर्शनम्" १९सू० । लिङ् ? इति । "कण्वाश्वा, अश्वखिप्रा रौद्रा, नभोरूपाः वार्जन्याः, तेषाम् ऐन्द्राग्नो दशमः" इति, यदि लिङ्त्वं विवक्षितं तदा ऐन्द्राग्नो दशमो भवति । तथा "लक्षणा भौमाः, धूम्रा आन्तरिक्षाः, हरितो दिव्याः, शबला वैद्युताः, सिद्धान्तरक्ताः" इति प्रकृत्य आह । "अङ्गभागानां वा एतत् रूपं यत् पशुदर्शनम्" इति तस्मात् अपि पश्यामि, विवक्षिता संख्या इति । यत्तु उक्तम्, "एकां गाम्" इत्यविवक्षां दर्शयति इति । अत्र उच्यते नोसंख्यासम्बन्धं विधातुम्, एतत् उच्यते, इतरथा हि, गोदक्षिणासम्बन्धो विहितो गम्यते । तस्मात् विवक्षितेऽपि वाच्यमेतत् । अपी हे धेनू हे तीव्रक्षीरामात् इति च अनुवादाः" भा० "तथा च लिङ्गम्" १७सू० "एवं च कृत्वा समानश्रुतिकं लिङ्गमपि विवक्षितं भविष्यति, तत्र इदं दर्शनम् उपपद्यते, "वसन्ते प्रातरग्नेयीं क्षीरश्रीमालभते, ग्रीष्मे माध्यन्दिने सिंहोमैन्द्रीं यदि अपराह्णे श्वेतां वार्ष्णयाम्" इति । तत्र श्रूयते, "गर्भिण्यो भवन्ति" इति, गर्भः स्त्रीणां शुक्रं, तेन स्त्रियोदर्शयति इति भविष्यति । तथा "अन्न अन्नभो इन्द्रियं वै वसः शुक्रः इति ते प्राजापत्याः" इति । तत्र श्रूयते "शुष्कारा भवन्ति रेन्द्रियत्वाय" इति, शुष्कत्वं पुंसां शुक्रः, तेन पुंप्राप्तिं दर्शयति इति । अधिकारवान्तरं वा, तथा च लिङ्गम् इति, संख्याधिकरणं लिङ्गाधिकरणेऽतिदिश्यते । लिङ्गम् अविवक्षितं, श्रुत्या वाक्यस्य बाधितत्वात्, न च; विवक्षितमिव श्रूयते इति, भवति लिङ्गं, "स्त्री नौः सोमक्रयणी" इति, स्त्रीवचनात् सोमक्रयणी इत्यविवक्षितमेव लिङ्गं प्रतीयते । "नन्वत्र अङ्गीमात्रत्र इति न शुक्रं आलीयते ?" नैवम्, तत्, अशब्दत्वं पूर्वो भवति इति यथा । लिङ्गं विवक्षितं वाक्यार्थस्य श्रुत्याऽभिविहितत्वात्, तथा च लिङ्गम् "गर्भिण्यो भवन्ति" इति, तथा "शुष्कारा भवन्ति" इति । यद्युक्तं, "स्त्री नौः सोमक्रयणी" इति, तत्र स्त्रीलिङ्गविवक्षितं, तथा "प्रजापतये पुरुषात् फल्गिन आलभते" इति, पुरुषशब्दश्रवणं अविवक्षितं, विस्पष्टो हि न्याय शब्दो लिङ्गविवक्षायाम् । तस्मात् विवक्षितं लिङ्गम् इति" भा० ।

तत्त्वबोधिन्यां स्पष्टत्वं यथा "अग्नीषोमीय पशुमालभेत" "पशुना रुद्रं यजेत" इत्यादौ पशोरेकत्वं विवक्षितं न वेति संशयः । तत्र पशुमित्यत्र द्वितीयाया आदिश्रुत्या पुंस्त्वैकत्वयोरुपस्थितयोः परस्परान्वये परस्पराकाङ्क्षाभावात् तयोरपेक्षणे पशुरेकत्वे पशवः परस्परमन्वयः, पशुना आलभेतेत्यादि पदान्तराकाङ्क्षया वाक्यादेकत्वान्वयपशोर्यागादावन्वय इति वाक्यात् श्रुतेर्बलीयस्त्वेन पशुविशेषणस्यैवोपस्थीयस्यैकत्वस्य न यागादावन्वयः निराकाङ्क्षत्वात् तथा च स्थितम् "एकत्वमयाकाङ्क्षमर्थस्य गुणभूतत्वात्" । अर्थस्य पशोर्गुणभूतत्वात् विशेषणत्वेन प्रागनन्वयात् तस्यादेकत्वमविवक्षितं द्वाभ्यां बहुभिरपि यागसिद्धिरिति प्राप्ते उच्यते । पशुमित्यादौ प्रकृत्या पशुरुपस्थापितः प्रत्ययेन चैकत्वं कारकत्वञ्च ततश्चैकपदोपात्तत्वप्रत्ययोक्तत्वा एकत्वस्यैकत्वात्मादौ कारके ऽन्वयः कारकत्वञ्च क्रियानिमित्तत्वनिमित्तक्रिया चोपस्थितयागादिरिति पशोः प्रथमं कारकद्वारा क्रियायामन्वयः । पशोश्चाङ्गभूतस्यैकत्वस्य क्रियासाधनत्वान्नान्वयानुपपत्त्या द्वितीयद्वारा तदन्वयार्थं पशुविशेषणत्वेनान्वयः आलभेतेत्यादिति विवक्षितमेकत्वमनेकाभ्यां बहुभिर्वा न यागसिद्धिः तदुक्तं "समानप्रत्ययत्वेन कारकेष्वानन्त्यात्तुल्यता । क्रिया वै नीयते संख्या न परत्वं पदादुदेहिति" । एवमनङ्गाङ्गौ युगक्षि कपिञ्जलाभ्यामालभेतेत्यादौ हितत्वबहुत्वयोर्विवक्षितत्वम् । एवं शुक्लमपि विवक्षितं प्रत्ययार्थत्वेन कारकान्वयित्वात् । अथ कथं लिङ्गं विवक्षितं शब्दार्थश्च तदनुज्ञानश्च विचारे तदुपयोगादर्थवान् अपुंस्कमपि दृश्ये दृश्यशब्दः, मक्षिकादौ चाक्षियामपि मक्षिकादिशब्दः प्रयुज्यत इति लिङ्गं न शब्दार्थः अपिच्छप्रयोगसाधुतामात्रार्थं तदप्रयोगेऽनुज्ञाने एकत्वविशिष्टपशुत्वस्यैवविधेयात् स्त्रियामपि अनुज्ञानसाध्यात् आलेत्यादिवत् लिङ्गस्य दृश्यप्रकारेष्वन्यव्यतिरेकाच्च शब्दार्थत्वेनात् तस्य च तत्तत्पदसमभिव्याहारेण तत्तत्पदवाच्यत्वाध्यवसानात् दृश्यादिषु न वाच्यं पुंस्त्वं किन्तु अभिधुक्तोक्तिवशेन तेषां पुंस्त्वं साधुतेति । न वानुज्ञानात्मकं पुंसत्वं विधेयत्वात् "आदत्ते आलभेताम्" इत्यादि

मन्त्रजातवत्स्याध्यायनकाले "मेदं ते आप्यायताम्" इति मन्त्रवत्स्याध्यायनश्रवणात् । यत्र च सारङ्गतमेधीयवादौ स्त्रिया आलम्भनस्य तत्र स्त्रीत्वं विवक्षितम्" ।

एवं स्मृतसंख्यामात्रे विवक्षा नास्तीति यद्यप्ययद्दे वक्ष्यते एकत्वविवक्षायामेव गदाधरेण धर्म्मिधारतन्त्रत्वेन एकत्वादेर्योगादावन्वयोऽभ्युपगतः धर्मिणः प्रयोगान्वये बहुत्वैकत्वस्य स्वाश्रयपशुकरणकत्वस्यानाश्रयपशुकरणकत्वो भयसम्बन्धेन योगेऽन्वय इति तेनोक्तम् ।

एकदण्डिन् पु० एका दण्डा यस्य । गर्व्वेण त्रिका० । तस्य परशुरामेणैकदन्तस्योत्पाटनात् तथात्वम् परशुरामेण तद्दन्तोन्मूलनकथा च ब्रह्मवै० पु० गणेशखण्डे दर्शिता । यियासुर्व्वोः रक्षसि वर्त्तमानयोर्हारपालत्वेन स्थितेन गणपतिना परशुरामस्य शिवं दृष्ट्वा अन्तःपुरमध्ये जिगमिषोर्हारेरोधे कृते तयोः कलहाद्रणपर्य्यन्तं "क्षिप्तेन पर्णुमर्य्यन्तं गिरितुल्यं तु तेजसा" इति गणेशं प्रति परशुनिक्षेपमङ्गा[1] निपत्य पर्णुवेणेन छित्वा दन्तं समूलकम् । जगाम रामसकाशं तु महादेवस्य च" इत्युक्त्वा "पपात भूमौ दन्तस्य महान् यज्ञसत्वरम्" इत्युक्तम् अत्र दन्त इत्येकवचननिर्द्देशात् एकस्यैव दन्तस्य भग्नता प्रतीयते । एकदन्तादयोऽप्यत्र । "कपिलश्चैकदन्तश्च" गणेशवचः ।

एकदण्डिन् पु० एकः केवलः शिखायज्ञोपवीतादिशून्यो वा दण्डोऽस्यास्ति इनि । "यद्वा कूटादध्यवसितं परं ब्रह्म सनातनम् । तदैकदण्डं संन्यस्य शिखां त्यक्त्वेत्" इत्युक्तलक्षणे परिव्राजके । संन्यासी तावत् चतुर्व्विधः कुटीचकबहूदकहंसपरमहंसभेदात् तत्र कुटीचकबहूदकयोस्त्रिदण्डधारणं हंसस्यैकदण्डधारणम् परमहंसस्य न दण्डधारणमिति भेदः । तदेतत् निर्ण्णयसिन्धौ निरूपितं यथा

"कुटीचकोबहूदकोहंसश्चैव ततोयकः । चतुर्थः परमहंसोयः पश्चात् स उत्तमः" हारीतः । आद्यः पुत्रादिना कुटीकारयित्वा तत्रैव वसन् कायवयसाः शिखोपवीतत्रिदण्डवान् बन्धुषु भिक्षेद्वा भुञ्जान आत्मज्ञो भवेत् । एतदलाभपक्षपरम् । द्वितीयस्तु बन्धून् क्रित्वा सप्तागारादि भैक्षं चरन् पूर्वोक्तवेषः स्यात् । हंसस्तु पूर्वोक्तवेषोऽप्येकदण्डः । "एकन्तु वैष्णवं दण्डं धारयञ्छिखमादरादिति" स्कान्दात् । विष्णुरपि "यज्ञोपवीतं दण्डं च रज्जुशोधनिर्म्मिताम् । शिखां यज्ञोपवीतं च नित्यं कर्म परित्यजेत्" अयमप्येकदण्ड एव । ये तु शिखोपवीतादित्यागमिच्छन्ति ते कुटीचकादिपराः । यत्तु मेधातिथिः 'यावत्स्युस्त्रयो दण्डास्तावद्देवेन वर्त्तयेदिति" । तदपि तत्परमेव । यज्ञाति: "चतुर्णां भिक्षवः प्रोक्ता. सर्वे चैव त्रिदण्डिनः" इति तत् वाग्दण्डादिपरं न यष्टिपरम् । "वाग्दण्डोऽथ मनोदण्डः कर्म्मदण्डस्तथैव च । यस्यैते नियता दण्डाः स त्रिदण्डीति चोच्यते" इति मनूक्तेः । तस्मात् परमहंसस्यैव दण्ड एव । सोऽप्यविद्वुषः । विदुषस्तु सोऽपि नास्ति । "न दण्डं न शिखां नाच्छादनं चरति परमहंस" इति सन्न्यासनिषदुक्तेः "ज्ञानमेवास्य दण्ड इति" वाक्यशेषाच्च । यत्तु यमः 'काष्ठदण्डो धृतो येन सर्व्वशौचान्वितः । स याति नरकान् घोरान्महारौरवसंज्ञकानिति तद्दैन्यं विना जीवनाय संन्यासपरम् । "एकदण्डं समाश्रित्य जीवन्ति बहवो नराः । नरके रौरवे घोरे कर्मेत्यागात्पतन्ति ते" इति स्मृतेः । यच्चाश्वमेधिके "एकदण्डी त्रिदण्डी वा शिखी मुण्डित एव वा । कायावयसात्सारोऽपि यति पूज्योयुधिष्ठिरेति" तस्यापि पूर्व्वोक्ता व्यवस्था ज्ञेया । "त्रिदण्डी एकदण्डी वेति" बौधा० "चतुर्थमाश्रमं गच्छेत् ब्रह्मविद्यापरायणः । एकदण्डी त्रिदण्डी वा सर्वसङ्गविवर्ज्जितः" स्मृत्यन्तरमपि तस्य व्यवस्थितविकल्पाश्रयणात् कुटीचकबहूदकविषयम् इति मध्वाचार्य्यमतानुसारिणः । रामानुजमतानुसारिणस्तु त्रिदण्डधारणमेवाचरन्तः सम्प्रदायाचारो व्यवस्थाभेदक इति कल्पयन्ति । एतेषां शिखायज्ञोपवीतधारणमपि वैकल्पिकम् । "शिखी मुण्डी वेति" गौतमस्मरणात् "मुण्डीमनोपरिष्कृ" इति वसिष्ठस्मरणात् । "वपित्वान् केशाञ्छिखां त्यक्त्वा विमुच्य यज्ञोपवीतमिति" काटकश्रुतेः "कटुम्बपुत्रदारांश्च वेदाङ्गानि च सर्व्वशः । केशान् यज्ञोपवीतञ्च त्यक्त्वा गृह्यैरमन्त्रकैः" वाक्यशेषाच्च सिता० । एतदपि कुटीचकबहूदकविषयकम् व्यवस्थितविकल्पाश्रयणेनावगन्तव्यम् । अत्र एकदण्डात् यतिधर्म्मा उच्यन्ते ते च सिता० दर्शिता यथा

"वर्षभूतं कृतः शान्तश्चिदण्डी यतमानसः । एकाग्रः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत्" वा० ।

'काषायी मुण्डः त्रिदण्डी यतमानसः पवित्रमादृत्य जलमन्त्रमात्रं" इति देवलः । औचाद्यर्थं कमण्डलुं धारितश्च भवेत् । एकारामः अव्रजितान्नैरन्तर्यकृतः सन्ध्यास्नायी; स्त्रीभिश्च 'स्त्रीवार्त्तां' इति औत्सर्गिकेण स्त्रीवार्त्तापि प्रतिषेधात्तस्य । तथा च दक्षः "यतोऽस्तु-

मैथोक्षय हावेव मिथुनं स्मृतम् । त्रयोयामः समाख्यात जर्तु तु नगरायते । राजगात्तीदि तेषान्तु भिक्षावार्त्ता परत्वारम । अपि मैथुन्यमात्मार्थ संस्कर्षाच्च संशय" इति । परिव्रज्य परिव्रज्यां व्रजतिरत्र गे वर्त्तते । अतस्याहंममाभिमानान्तत्कृतस्य लौकिकस्य कर्म्मनिचयं वैदिकस्य नित्यकाम्यात्मक सन्यस्य । तदुक्तं मनुना "सुखास्युदयिकञ्चैव नै श्रेयसिकमेव च । प्रवृत्तञ्च निवृत्तञ्च द्विविधञ्च वैदिकम् । इह चाहत्र वा काम्य प्रवृत्तकर्म्म कीर्त्यते । निष्कर्म ज्ञानयुक्तस्तु निवृत्तमुपदिश्यते । यथोक्तान्यपि कर्म्माणि परिहाय द्विजोत्तमः । आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवानिति" । अत्र वेदाभ्यास प्रणवाभ्यास । तत्र यत्नवान् । भिक्षाप्रयोजनार्थं ग्रामान्मार्श्वयेत् प्रविशेत् न पुनः सुखनिवासार्थम् । वर्षाकाले तु न दोषः । "ऊर्द्धं वार्षिकाभ्यां मासाभ्यां नैकस्थान वासः" इति ग्रन्थकरणात् । अयञ्चो पुनर्मासचतुष्टयपर्य्यन्त मपि स्थातव्यम् । "न चिरमेकत्र वसेदन्यत्र वर्षाकालात्" इतिस्मरणात् । "एकरात्रं वसेत् ग्रामे नगरे पञ्चरात्रकम् । वर्षाभ्योऽन्यत्र वर्षासु मासास्तु चतुरोवसेत" इति कल्पकारणात् "कथम्भिक्षाऽऽदानङ्ग्रार्थमित्यत आह । "अप्रमत्तश्चरेद्भैक्षं सायाङ्के नाभिलक्षितः । रक्षितं भिक्षुकैर्ग्रामे यात्रामात्र मलोलुपः" अप्रमत्तो वाक्यचक्षुरादिव्यापारहितोभैक्षं चरेत् । वसिष्ठेनात्र विशेषोदर्शितः । "सप्तागारान्समुल्लिखानि चरेद्भैक्षं मिति" । सायाङ्के अङ्गः पञ्चमे भागे । तथाच मनुः "विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने । वृत्ते शरावसम्पाते नित्यभिक्षां यतिश्चरेत्" तथा "एककालञ्चरेद्भिक्षान्न प्रसज्जेत विस्तरे । भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जतीति" । अनभिलक्षित ज्योतिर्विज्ञानोपदेशादिना अचिह्नितः । "नचोत्पातनिमित्ताभ्यान्न नक्षत्राङ्गविद्यया । नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचिदिति" तेनैवोक्तत्वात् । यत्मनुर्विशेषवचनम् "ब्राह्मणकुले यत्नवेत तद्भुञ्जीत सायम्प्रातर्मासवर्ज मिति" । तदयत्नविषयम् । "भिक्षुकैर्भिक्षणार्थैः पाषण्डादिभिर्वर्जिते ग्रामे । मनुना चात्र विशेष उक्तः । "न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा स्त्रीभिः आकीर्णग्रामे भुक्तैरन्यैरागारसुपसं व्रजेदिति" । यावता प्राणयात्रा वर्त्तते तावन्मात्र भैक्षं चरेत् । तथाच संवर्त्तः "अष्टौ भिक्षाः समादाय स्थानिः सप्त पञ्च वा । अद्भिः प्रक्षाल्य ताः सर्वास्ततोऽश्नीयाच्च वाग्यत" इति । अलोलुपः भिक्षाव्यङ्गमादित्यप्रसङ्गं । भिक्षाचरणार्थं यतिपात्रमाह । "यति पात्राणि मृद्दारुकाण्डालाबुमयानि च । वलिर्वैः शुद्धिरेतेषामद्भिर्वाऽऽवधर्षणम्" या० मृदादिप्रकृतिकानि यतीनां पात्राणि भवेयुः । तेषां वलिवर्जं वालावधर्षणञ्च शुद्धिसाधनम् । द्रव्यञ्च शुद्धिर्भिक्षाचरणादिप्रयोगाङ्गभूताऽभिधायानुपकृतिविषया तदुपघाते द्रव्यशुद्धि प्रकारोक्ता द्रष्टव्या । अतएव मनुना "अलाबुदारु मृन्मयानि पात्राणि यस्य स्युर्निर्व्रणानि च । तेषामद्भिः स्मृतं शौचमुमसानामिवाध्वरे" इति चमसदृष्टान्तोपादानेन प्रायोगिकी शुद्धिर्दर्शिता । पात्रान्तराभावे भोजनमपि तत्रैव कार्य्यम् "तद्भुक्तं दृष्टोत्पन्नकाले तेन पात्रेणान्येन वा तूष्णीं मात्रया भुञ्जीतेति" देवलस्मरणात् । एवम्भूतस्य यतेरात्मोपासनाङ्गनियमविशेषमाह । "सन्निरुध्येन्द्रियग्रामं रागद्वेषौ प्रहाय च । भयं हित्वा च भूतानामृतो भवति द्विज" या० । चक्षुरादीन्द्रियसमूहं रूपादिविषयेभ्यः सम्यक्निरुध्य विनिवर्त्य रागद्वेषौ प्रियाप्रियविषयौ प्रहाय त्यक्त्वा चशब्दाद्भयादीनपि । तथा भूतानामपकारकरणेन भवमकुर्वन् शुद्धान्तःकरणः सन्ब्रह्मतत्त्वात्साक्षात्कारेणामृतो भवति मुक्तो भवति । किञ्च । "कर्त्तव्यायैव शुद्धिस्तु भिक्षुकेण विशेषतः । ज्ञानोत्पत्तिनिमित्तत्वात्वातन्त्र्याकरणाय च" या० । विषयाभिलाषहेतुकलितदोषकलुषितस्यायत्यस्यान्तःकरणस्य शुद्धिः कर्त्तव्यैव प्राणायामैःकर्त्तव्यः । तस्याः शुद्धेरात्मतत्त्वसाक्षात्कारहेतूत्पत्तिनिमित्तत्वात् । एवञ्च सति विषयासक्तिजन्यनिजदोषात्मकप्रतिबन्धक्षये सत्यात्मध्यानधारणादौ स्वतन्त्रोभवति । भिक्षुकेण त्वेषा शुद्धिर्विशेषतोऽनुष्ठेया । तस्य मोक्षप्रधानत्वात् मोक्षस्य च शुद्धान्तःकरणतामन्तरेण दुर्लभत्वात् । यथाह मनुः "दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः । तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहादिति" ।

तेषां कर्त्तव्यानि च निर्ण० सि० दर्शितानि यथा "प्रातरुत्थाय ब्रह्मचर्य्यते इति जपित्वा दण्डादीनि भूमौ निधाय मूत्रपुरीषयोर्यत्स्यचद्गुणं शौचं कृत्वाऽऽचम्य पर्यहाद्गोवर्त्तं प्रणवेन दन्तधावनं कृत्वा तेनैव कृता वहिःकटिं प्रक्षाल्य स्नानतर्पणवर्त्तं स्नात्वा पुनर्जले प्राक्षाल्य वस्त्रादीनि गृहीत्वा केशवादिनमोन्तनामभिस्तर्पयित्वा मूलमन्त्रेणात्मादित्यसंज्ञकाभिव्याहृतिभिरन्तर्जलेनार्घत्रयमपीति तर्पयेत् । ओं भूः आ-

ऽेति खाङ्गायन्नान्तैरेव पुनस्तर्पयेदिति केचित् । तत आचम्याङ्गुलिना प्रणवेन जलमादाय व्याहृतिभिरभ्युक्ष्य गायत्र्या त्रिः शिखां त्रिः गायत्रीं जपेत् । ततः शिखां बध्वा प्रणवेन व्याहृतिभिर्वा त्रिर्दत्त्वा शिखस्पर्शनोत्तरं पूर्वोक्तैः सौरैः इदं विष्णुरितिवैष्णवैः ब्रह्म यज्ञानमिति वोपस्थाय सर्वभूतेभ्यो नम इति प्रदक्षिणं आवर्त्तते । ततो नत्वादित्याय विद्महे सहस्रकिरणाय धीमहि । तन्नः सूर्यः प्रचोदयात् इति त्रिजपेत् । एवं त्रिकालम् । विष्णुपूजां ब्रह्मयज्ञं च कुर्यात् । अथ भिक्षा । "विधूमे सन्नसुसले व्यङ्गारे" इत्यादिमन्त्रकाले उद्दृत्यभिक्षादित्यमुपस्थाय तेनैक्यं ध्यात्वा "आकृष्णेनेति प्रदक्षिणं कृत्वा "येते पन्थान" इति जप्त्वा "योऽसौ विरात्र्ये आदित्ये पुरुषोऽन्तर्हृदिस्थितः । सोऽहं नारायणोदेव इति ध्यात्वा प्रणम्य तम् । त्रिदण्डं दक्षिणे त्वंसे ततः सव्यार्थं वासयेत् । पात्रं वामकरे त्रिप्रा क्षेपयेद्दक्षिणेनेति" बौधायनोक्तदिशा त्रीन् पञ्च सप्त वा गृहान् गत्वा भवत्पूर्वं भिक्षां याचित्वा "पूर्णमसि पूर्णं मे भूयाः" इत्यागत्य शुचिरन्नं प्रोक्ष्य ओं भूः स्वधा नम इत्यादिव्याहृतिभिः सूर्यादिभ्यो भूतेभ्यश्च भूमौ क्षिप्त्वा भुञ्जीताऽऽचम्य प्रणवेन षोड़शप्राणायामान् कुर्यादिति संक्षेपः । गौतमव्याख्यायां भर्तृयज्ञः । "यतिश्चेत् जलं दद्याद्भैक्षं दद्यात् पुनर्जलम् । भैक्षं पर्वतमात्रं स्यात् तज्जलं सागरोपमम्" अत्र सर्वत्र मूलं माधवापरार्कमदनरत्नस्मृत्यर्थसारादौ द्रष्टव्यम् । जाबालिश्रुतौ "शून्यागारे देवगृहे तृणकुटीवल्मीकवृक्षमूलकुलालशालाग्निहोत्रगृहनदीपुलिनगिरिकुहरनिर्झरस्थण्डिलेष्वनिकेतनः" इति । भाल्लवे "अष्टौ मासान् विहारः स्याद्यतीनां संयतात्मनाम् । एकत्र चतुरोमासान् वार्षिकान् नियमेत् पुनः । अनियते प्रविष्टानां विहारस्तु न विद्यते" । अत्रिः । "भिक्षाटनं जपं स्नानं ध्यानं शौचं सुरार्चनम् । अन्यानि भक्षेतानि सर्वथा न्यूनदण्डधृत् । जलकं गुल्फयोश्चं च स्त्रीकरा जौघमेव च । दिवाखापश्च यानं च यतीनां पतनानि षट् । आसनं पात्रशौचार्थं सञ्चयः शिक्यसंग्रहः । दिवास्वापोऽहोरात्रोपवासेनैवान्नकारणाच्च षट्" । दक्षः "नाश्नीयात्र न वक्तव्यं न श्रोतव्यं कथञ्चन" । मदनरत्ने व्यासः "भिक्षार्थकल्पितं पूर्वमन्नं देवादिकोत्थात् । वर्जयेत् तादृशीं भिक्षां परवाधाकरीं तथा" इत्यस्मृतिः "न तीर्थवासी नित्यं स्याद्गोपवासपरो यतिः । न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेत्" । एतद्दण्डिभिन्नपरम् । अत्रिः "स्नानं तुरार्चनं ध्यानं प्राणायामोवलिस्ततः । भिक्षाटनं जपः सन्न्यासत्यागः कर्मफलस्य च" । अन्येऽपि माधवीयमिताक्षरादौ द्रष्टव्याः । यतिधर्मसमुच्चये "न स्नानमाचरेद्भिक्षुः पुत्रादिनिधने सुते । पितृमातृकृतं श्रुत्वा स्नात्वा शुद्ध्यति सान्वरः" । वापनं च पौर्णमास्यां कार्यम् "ब्रह्मसन्धिर्न वापयेत्" कालसा० धृतवाक्यात् । [दिक्] पा० ।

एकदिश् त्रि० एका समाना दिक् यस्य । तुल्यदिक्के "तेनैकदिश्यमध्यास्ते" ।

एकदृश् त्रि० एका दृक् यस्य । १एकनेत्रे काणे । २कौके पु० एकं सर्वमभिन्नं पश्यति दृश—क्विन् । ३शिवे । एकत्वेन सर्वद्रष्टरि ४तत्त्वत्रे त्रि० ।

एकदृष्टि स्त्री एका अभिन्ना अनन्यविषयत्वात् दृष्टिः । अनन्यविषयदर्शने । "ततस्तमेकदृष्ट्या तमवलोकयत्" पञ्चत० । बहु० । २तथाविधदृष्टियुक्ते २काणे च त्रि० काण्यत्वञ्च चक्षुःशून्यैकगोलकत्वमन्यत्वं चक्षुरिन्द्रियशून्यत्वमिति भेद । ४काके पु० ।

एकदेव पु० कर्म० । मुख्यदेवे परमेश्वरे "एकोदेवः सर्वभूतेषु गूढः इति" श्रुतेस्तस्य तथात्वम् "स हि पूर्वेषामपि गुरुः कालेनानवच्छेदात्" पात० उक्तेः यो "ब्रह्माणं विदधाति पूर्वमिति" श्रुतेश्च ब्रह्मणोऽप्युत्पादकत्वात्तस्य तथात्वम् ।

एकदेवत त्रि० एका देवता यस्य । एकदेवताके अग्निहोत्रादौ । "एकदेवतेषूभयम्" कात्या० २२,८,४ । "यत्र पुनः कर्मणयेकैव देवता यथाऽग्निहोत्रे पुनराधेये च तत्रोभयं तद्देवत्यश्चेति" कर्कः । एकदेवतोऽत्र कर्मधा० । एकस्यां देवतायां स्त्री ।

एकदेवत्य त्रि० एका श्रेष्ठादेवता अर्हति यत् । १श्रेष्ठदेवताके । "तस्मादाहुरिन्द्रः सर्वदेवता इन्द्रश्रेष्ठादेवा इत्येतद्वै देवानामेकैकदेवत्वा अभवन्" शत० ब्रा० १,६,३,२२ । २एकदेवताके च । "सोमादेषु उभयमेकदेवत्यं भवति" कात्या० संग्रहव्याख्या । एकदैवत्योऽत्र त्रि० ।

एकदेश पु० कर्म० । १अवयवे, प्रतीके । अवयवश्च समुदायसंगतरूपः स च वास्तवोपचरितत्वेन सावयवानां घटादीनामवयविभेदः ग्रीवामूलादिः वास्तवः, कालविशेषादीनां निरवयवानां तु बुद्धिकल्पितः यथा पूर्वाह्णः पूर्वराह्णादि । तथा गुणविशेषाणामपि चन्द्रादीनां बुद्धिकल्पितत्वेन "एकदेशविशिष्टतमनन्यवद्भवतीति" व्या० परिभाषा "एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः" मनुः यज्ञसमूहात्मकवेदस्य बौद्धमेव तथात्वम् । "सम्भोगक्षीणसम्बन्धविटस्तु भूर्खः कर्मकदेशपः" सा० द० । भिन्नविशेषरूपक-

स्थानां तथात्वम् । "उदाहृत: सर्वेषां ते गुणानां मयैकदेश: प्रसमीक्ष्य बुद्ध्या" भा० अनु० २६ अ० अत्रापि तथा । "तान्येकदेशाद्विभृतं पयोधि:" माघ: "शाखिनैकदेशसाहचर्याये प्राप्नोति" काया० २. ६. १४। एकदेशशब्दस्य पूर्वापरमध्योत्तरादिशब्द: तेन सहैकदेशिना षष्ठीसमासापवादक: एकदेशिसमास: । "पूर्वापरावरोत्तरमेकदेशिनैकाधिकरणे" पा० "सर्वो ऽप्येकदेश: कालेन सह समस्यते" सि० कौ० । "उपरतात्पश्चिमरात्रगोचरात्" किरा० । एवं मध्यरात्र इत्यादि । एकाधिकरणे इत्युक्ते: पूर्वमुक्तात्राणामित्यादौ न । तत्रार्द्धशब्दस्यैकदेशवाचकत्वेऽपि समांशपरत्वेन एव एकदेशिसमा० अत्र विपूर्वस्य इति वाक्ये अर्द्धपिपूर्वत्वादि । असमांशपरत्वे तु षष्ठीसमास: "क्रोशार्द्धं क्षितिजवेन गत्वा" रघु: । एकदेश एव तेन विपूर्वस्य नामर्द्धमित्यादौ न किन्तु ईत० । अवयवे रूढस्य इनि । एकदेशिन् उक्तांशयुक्ते त्रि० स्त्रियां ङीप् । "अक्षमेव शब्द आश्रित्य प्रवृत्तसमासस्य एकदेशिसमासस्य संज्ञा तत्र प्रमाणम् । "पूर्वापरेत्यादि" पा० सू० ।

एकदेशविभावितन्याय पु० एकदेशेऽविभावित: प्रमाणादिना ससाध्याङ्गीकारितो येन तमधिकृत्य न्यायोन्यायसाध्यसाधकविशेष: । कृष्णादानादिव्यवहारे सुवर्णादिबहुद्रव्याभियोगे प्रतिवादिनाऽपह्नवे वादिनैकदेशमात्रस्य प्रमाणै: साधने एकदेशे तयो: सत्यमिथ्यात्वावधारणमूलके सर्वधनदापनानुकूले तर्कभेदे तत्र एकदेशसाधने क्वचित् पूर्वं निवेदितसर्वधनदापनं क्वचिन्नेति विषयविशेषव्यवस्थापनम् मिता० यथा । "निह्नुते लिखितस्यैकमेकदेशविभावित: । दाप्य: सर्वं न्यूनेऽर्थे, न आह्नुस्वनिवेदित:" या० नैकमप्येकं सुवर्णरजतवस्त्रादि लिखितमभियुक्तमर्थिना प्रत्यर्थी यदि सर्वमेव निह्नुते अपजानीते तदार्थिनैकदेशे स्थिरीकृते साक्ष्यादिभि: प्रत्यर्थी भाविनोऽङ्गीकारित: सर्वं रजतादार्थं पूर्वलिखितं दाप्योऽर्थिने न्यूनेऽर्थे न आह्नुस्वनिवेदित: पूर्वं भाषाकाले अनिवेदित: पश्चादर्थिना पूर्वं मया विस्मृतम् इति निवेद्यमानो न आह्नवादर्शनव्यूनेऽर्थे । एतच्च न केवलं वाचनिकमेकदेशे प्रत्यर्थिनोमिथ्यावादित्वसम्भवात् । अर्थिनश्चैकदेशे सत्यवादित्वनिश्चयादेकदेशान्तरेऽपि सत्यवादित्वसम्भवात् । एवं तर्कापरनामसम्भावनाप्रत्ययानुच्छेदादेव योगीश्वरवचनत: सर्वं दापनेऽर्थे न्यूनेऽर्थे इति निर्णय: । एतच्च तर्कयोरनुसरणेन निर्णये क्रियमाणे वस्तुनोऽन्यथात्वेऽपि व्यवहारदर्शनाच्च दोष: तथा च गौतम:" "न्यायाधिगमे तर्कोभ्युपेयस्तेनाभ्यूह्य यथास्थानमुपनयेत्" इत्युक्त्वा "तस्माद्राजाचार्यावनिन्द्यौ" इत्युपसंहरति । नचैकदेशविभावितोनुपादेयवचन: प्रत्यर्थीत्येतावदिह गम्यते एकदेशविभावितो न्यूनेऽर्थे सर्वेऽन्याय्य इति वचनात् । यत्तु कात्यायनेनोक्तम् । "अनेकार्थाभियोगेऽपि यावत् संसाधयेद्धनं । साक्षिभिस्तावदेवासौ लभते साधितं धनमिति" तत् पुत्रादिदेयपित्रादृणविषयम् । तत्र हि बहूनर्थानधियुक्त: पुत्रादिर्न जानामीति प्रतिवदन् निह्नवादौ न भवतोल्लेकदेशविभावितोऽपि न क्वचिदसत्यवादीति "निह्नुते लिखितस्यैकमिति शास्त्रान्तरं न प्रवर्त्तते । निह्नवाभावादप्येतिततर्काभावाच्च" "अनेकार्थाभियोगेऽपीति" कात्यायनवचनं सामान्यविषयं विशेषशास्त्रस्य विषयं निरूप्योत्तरं परिकल्पयन्नानोत्तरे प्रवर्त्तते । मनु "ऋणादिषु विवादेषु स्थिरप्रायेषु निश्चितम् । जने वाप्यधिके चार्थे प्रोक्तो साध्यश्च सिध्यतीति" वदता कात्यायनेन अनेकार्थाभियोगे साक्षिभिरेकदेशे विभाविते अधिके वा भाविते साध्यं सर्वमेव न सिध्यतीत्युक्तम् । तथा सत्येकदेशे भाविते अभावितैकदेशसिद्धि: कुतस्त्यात् ? उच्यते लिखितसर्वार्थसाधनतयोपन्यस्तै: साक्षिभिरेकदेशाभिधानेऽधिकाभिधाने च कृत्स्नमेव साध्यं न सिध्यतीति तस्यार्थस्यात्रापि निश्चितत्वं सिध्यतीति वचनात्पूर्ववत् संशय एवेति प्रमाणान्तरस्यावश्यमपेक्षित्वेन "ऋणं निरवशेषं" नियमात् । साहसादौ तु सकलसाध्यसाधनतयोपदिष्टै: साक्षिभिरेकदेशेऽपि साधिते कृत्स्नसाध्यसिद्धिर्भवत्येव तावतैव साहसादे: सिद्धत्वात्कात्यायनवचनाच्च । "साध्यार्थांशेऽपि गदिते साक्षिभि: सकलम्भवेत् । स्त्रीकृते साहसे चौर्ये यत्साध्यं परिकीर्त्तितम्" ।

अस्यैवार्थमवलम्ब्य एकदेशविभावितन्याय: प्रवर्त्तते इत्येकदेशविभावितन्यायस्य तात्पर्यार्थकत्वम् इति बोध्यम् ।

एकदेह पु० एक: श्रेष्ठो देहोऽस्य । ब्रह्मपक्षे त्रिका० तस्य यक्षेषु अतिसुन्दरत्वात् तथात्वम् । एकस्मात्क्षोदेहो यत्र एकस्मात् देहोयत्र वा । २बंशरूपे गोत्रे तत्र सर्वेषां तुल्यदेहत्वादेकस्मादुत्पन्नदेहत्वाच्च तथात्वम् । "बहूनि विप्र गोत्राणि सुनीनां भावितात्मनाम् । एकदेहानि तिष्ठन्ति विश्वकानि विना प्रजाः" हरिवं० ४ अ० ३समानदेहारम्भे सख्यरूढे च एकमेकतां गतं देहमस्य । ४द्वयस्यो: तयोर्विवाहेन एकदेहत्वोत्पादनात्तथात्वम् "अस्मिन्नद

स्योनि मांसैर्मांसानि त्वचा त्वचमिति" श्रुतेः। "आत्मार्थे स्मृतितन्त्रे च लोकाचारे च सूरिभिः। शरीरार्द्धं स्मृता जाया पुण्यापुण्यफले समा। यस्य नोपरता भार्या देहार्द्धं तस्य जीवति। जीवत्यर्द्धशरीरे तु कथमन्योधनं हरेत्" इत्यं०मरतेश्च तयोरेकदेहत्वम्। तत्र पुंसि पुं०, स्त्रियां स्त्रीति भेदः एकाङ्गादयोऽप्यत्र। स्त्रियां ङीष् इति भेदः। कर्म्म०। ५ एकस्मिन् देशे न०।

एकट् पु० एकेन परात्मना दीव्यति दिव-क्विप् ऊठ् उत०। आत्मारामे ब्रह्मणि सच्चि आत्मनेव रमत इति प्रसिद्धम्। "अमर्न्दाटेकट्टर्देवाउत यास देवीः" ऋ०८,८०,१०, "एकट्ः ब्रह्मणिः" भा०।

एकधन न० एकमेव धनम्। १एकमात्रधने "हृतानां धावतामेकधनमुपाक्षितम्" शत०ब्रा०११,४,१,१, 'एकमेकसमम्युग्मं धनं धीयमानमुदकं यत्र। २अयुग्मसंख्याके उदकाधारे कलसे "अयुग्मा अयुग्मा एकधना भवन्ति "त्रयो वा पञ्च वा, पञ्च वा सप्त वा, सप्त वा नव वा, नव वैकादश वा, एकादश वा त्रयोदश वा, त्रयोदश वा पञ्चदश वा इत्यमङ्गमिथुनं प्रजननम्। अथ य एष एकोऽतिरिच्यते स यजमानस्त्रियमभ्यतिरिच्यते स वा एषां सधनं यो यजमानस्य स्त्रियमभ्यतिरिच्यते तद्यदेषां सधनं तस्मादेकधना नाम" शत०ब्रा०३,९,३,४, "प्रत्यगेकधनानां युग्मात्तदङ्गरणाच्छिद्रमध्यायाम्पदृदयम्यः" कात्या० ९, ३,२२, "उत्तरस्यैवासतोऽन्तात् प्रत्यक् अधोभूमौ एकधनानामुल्मसंख्याच्छिद्रधाति एकधनयज्ञार्थं स्वयमेव व्याचष्टे उदङ्गरणानिति उदकं क्षियते एभिरित्युदङ्गराः कलसास्तान् त्र्यादिपञ्चदशपर्य्यन्तायुग्मसंख्यान् विषमसंख्यान्। तत्राग्निष्टोमे त्रय पञ्चम वा, अत्यग्निष्टोमेऽपि तावन्त एव, उक्थ्ये पञ्च वा सप्त वा, षोडशिनि सप्त नव वा, वाजपेये नवैकादश वा, अतिरात्रे एकादश त्रयोदश वा आप्तोर्यामे त्रयोदश पञ्चदश येति" कर्कः "अत्र कलसपरत्वात् पुंस्त्वम् आपां विशेषणत्व स्त्रीत्वम् "आवर्ष्टतीरधनुद्विधारा इत्याश्वलायनेकधनासु" आश्व० श्रौ० ५,१,१। "द्विविधा आपः वसतीयं एकधनाश्च तत्र पूर्वेद्युरेव वसतीयाः संहीता एकधना इदानीं नवकपा। ता संहीता अहरहरेव यजनदेश प्रति यथा वर्त्तन्ते तद्देशलक्षणनुवक्ष्यामः" नारा० ६०। अपामाधारं विना देशान्तरगमनासम्भवात् प्रागुक्तवाक्यात् पुनरुग्मकलसैरुदकहरणं कर्त्तव्यमिति बोध्यम्। वस्तुतः एकधनशब्देन अयुग्मसंख्याकलसा एवोच्यन्ते। स आधारत्वेनाङ्गस्य अच् २ततस्य जस्त्वादौ त्रि०इत्येव न्यायम् "तावच्चैकधनानाम्" कात्या०९,२२,सू० "एकधनानामेकधनस्थानामपामिति" कर्केण तथा व्याख्यानात् "एकधनांस्त्रीनुत्तयन्ति" कात्या० ९,१०, "एकधनान् उद्वयन्ति उदकेन पूरयित्वा उत्तिष्ठन्ति जलमध्यादूर्द्ध निनयन्ति निष्कायन्ति" कर्कः एकं मुख्यं धनम् कर्म०। ४मुख्ये धने न० "सोमभाग्यतामिन्द्रायैकधनविदे" यजु०५,७, "एकं धनं मुख्यं धनं सोमरूप विन्दते लभते स एकधनवित्। यहा सोमकण्डनाय यैर्जलमानीयते ते कलशाः एकधना एकं धनं सोमरूपं यत्रेति वेत्ति जानातीति"वेददो० "एकधनस्याङ् कलस अस्त्यस्य इनि। एकधनिन् ताद्दशैक धनयुक्ते त्रि० "प्रत्तारोदानयेकधनिन "शत०ब्रा०३,९,३,१७, "एकं समानं साधारणं धन यस्य। ५अविभक्ते ६संहिते च त्रि०। अविभक्तधनानां संहृष्टधनानाञ्च साधारणधनत्वात् तथात्वम्। ७एकमात्रधनयुक्ते त्रि०।

एकधर्म्मन् त्रि० एकस्तुल्योधर्म्मो यस्य अनिच् स०। तुल्यधर्मयुक्ते स्त्रियां वा ङीप्। एकोधर्मोऽस्त्यस्य इनिरत्यत्र साधुः। "सर्वेषामेकधर्मिणाम्" स्मृतिः। अत्र स्त्रियां ङीप्

एकधुरा स्त्री एका धूः कर्म०अ समा०। १एकभारे। तद्दृतीयर्थेऽण् तस्य लुक्। एकधुर-एकभारवाहके २गवादौ त्रि०। अस्त्यर्थे अच्। २एकधुरायुक्ते त्रि०। एकधुरं वहति ख। एकधुरीण एकधुरवाहके त्रि०।

एकधुरावह त्रि० एकधुरां वहतीति वह-अच् उत०। एकभारवाहके गवादौ।

एकनक्षत्र न० एकं नक्षत्रं यत्र। एकतारात्मके नक्षत्रभेदे आर्द्रा चित्रा स्वातिश्च एकतारात्मकं नक्षत्रं तच्च अच्छे शब्दे ४९७पृ०दर्शितम्। शत०ब्रा०भाष्ये तु पुष्यश्लेषतारात्मकत्वमुक्तं तदनुसारेण सरलयामभाभिश्चोक्तं किंवा तन्मूलं ज्योतिषवचनं ज्ञेयम्। वस्तुतोऽत्र एकशब्दस्यायुग्मपरत्वं पुष्यस्य च त्रितारात्मकत्वेन तथात्वाभिप्रायेण पुष्यश्लेषयुक्तिः "अयुग्मं हि पितृणामेकनक्षत्रे एकनक्षत्रं हि पितृणाममावास्यायाम् अमावास्या वा एकनक्षत्रमेको हि यद्देवतां रात्रिं सर्वाणि भूतानि संवसन्ति तेनो तं कामयाग्नोति या सर्वेषु नक्षत्रेषु" शत० ब्रा० १०,१२,८,१२। 'एकनक्षत्रे कात्या० २१, २,२। एक नक्षत्रं हि पितृणामिति" एकनक्षत्रं च यत्रैका तारा चित्रा स्वाति रेवत्यादि यथा"

कर्कः । अत्र रेवत्या द्वात्रिंशत्तारकत्वम् अश्लेषा-शब्दे उक्तम् अतस्तस्या एकत्वाभावात् रेवत्यादिग-ब्देन बहुत्वमिति बोध्यम् तस्याश्च त्रितारत्वेनायुग्मप-रत्वम् । अमावास्या वा एकनक्षत्रमित्युक्तेः २अमावास्या-याञ्च । तत्र च रविचन्द्रयोरेकनक्षत्रस्थितत्वात् एकनक्ष-त्रतुल्यफलदाहत्वाद्वा तथात्वम् कर्म० । ३एकस्मिन् नक्षत्रे

एकनट पु० एको मुख्यो नटः । नाट्यप्रवर्त्तके मुख्यनटे त्रिका०

एकपक्ष पु० एकः पक्षो यस्य । १पक्षाये कर्म० । एकश्चा-सौ पक्षश्च २पक्षे पु०

एकपत्नी स्त्री० एकः समानः अनन्यो वा पतिर्य्यस्याः नान्तत्वात् ङीप् ।सपत्न्याम् "सर्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत् । सर्वास्तास्तेन पुत्रेण प्राह पुत्रव-तीर्मनुः" मनुः २पतिव्रतायाञ्च "ये धर्मे एकपत्नी नां काङ्क्षन्ती तमनुत्तमम्" मनुः "तान्त्रायध्वं दिव-सगणनातत्परामेकपत्नीम्" मेघ० । "कामेकमतीं व्रत दुःखशीलाम्" कुमा० । एकःपतिरीयो यस्य वा कप् । एकपतिके एकस्वामिके त्रि० स्त्रियां टाप् । "पत्न्यैक्ये यज्ञ-सम्बन्ध" इत्यधिकारात् भर्त्रैक्यस्यैव नादेयशेषो नेतरस्य ।

एकपत्निका स्त्री एकं गन्धयुक्ततया श्रेष्ठं पत्रं यस्याः कप् टापि अत इत्त्वम् । गन्धपत्रायाम्हे राजनि० ।

एकपद न० एक पदं पदोच्चारणयोग्यकालो यत्र । एकपदो-च्चारणयोग्यकाले ।तत्काले । कर्म० । एकञ्च तत् २स्थाने श्रुतिसिद्धलक्षणे पदे च "निहन्त्यरीनेकपदे य उदात्तः खरानिव" माघः । "अनुदात्तं पदमेकवर्जम्" पा० एकपदे अन्यस्वरस्य उदात्तेन निघातविधानात्तेन सादृश्यमिहोक्त-मिति बोध्यम् "कथमेकपदे निरागसम्" रघुः । एकं पदं चरणो यस्य । ३एकचरणभनुष्ये ४तद्युक्ते देवभेदे पु० स च देव इत्थम् "कूर्म्मविभागे प्राच्यास्तुः। अत्र पूर्वस्यामञ्ज-नत्वाद्युक्तम् "एकपदतामलिम्लिम्लिकोशलकावर्द्धमानेति" एकं पदं कोष्ठं पूजास्थानं यस्य । वास्तुमण्डले एककोष्ठपूर्णे देवभेदे पु० "भगुर्यमपदोत्तेयः" वास्तु० त० देवीपु० । एकं पदं कोष्ठरूपं स्थानम् । कर्म० । वास्तुमण्डलस्थे ७एककोष्ठात्मकस्थाने न० "इन्द्रचेन्द्रात्मजयोर्भावैकपद संस्थिता" तत्रैव । तत्कोष्ठजिष्णवादिप्रजापतिवास्वन्ते वक्ष्यते । एकं पदं चरणोऽस्य । ८नागभेदे पुंस्त्री । स्त्रियां जातित्वात् ङीष् । "कर्णैरेकपदान्यासैर्निजुष्टं एकलाखिभिः" भाग० ४,६,१५ । एकं सुपन्नं पदं वाचकं यस्य । ९एकपदवाच्ये त्रि० "किं स्त्रिदेकपदं धर्म्यं किं स्त्रिदेकपदं सुखम्" । यक्षप्रश्ने "दाक्ष्यमेकपदं धर्म्यं दानमेकपदं यशः । सत्यमेकपदं स्वर्ग्यं शीलमेकपदं सुखम्" भा० व० ३१२ अ० । युधिष्ठिरेणैकपदबोध्यदाक्ष्यादयुत्तरे उक्तम् एकं पदं पदविन्यासविशेषो यत्र । १०रतिबन्धभेदे पु० "पादमेकं हृदि स्थाप्य द्वितीयं स्कन्धसंस्थितम् । स्तनौ धृत्वा रमेत् कामी बन्धस्त्वेकपदः स्मृतः" रतिमञ्जरीकोक्तेः ।

एकपदि अव्य० एक पादः साधनं यस्मिन् प्रहरणे । द्विद-ण्डादि०दृक्समा० अत्वात् पद्भावश्च । पादसाधने प्रहरणे ।

एकपदी स्त्री एकं गन्तुः समानं पदं तच्चिह्नमत्र गौ०ङीष् । पथि अमरः । तत्र हि गन्तुः पदमसमानचिह्नं दृश्यते इति तस्य तथात्वम् । एकः पादो यस्याः संख्या-पूर्वकत्वात् पाद्भावः कुम्भपद्या० ङीष् पद्भावश्च । २एक-चरणयुक्तायां स्त्रियाम् ३एकदृत्तचतुर्थांशयुक्तायाञ्छन्दसि च "गायत्र्यास्त्येकपदी द्विपदी त्रिपदी" श्रुतिः । "एकपदीं द्विपदीं त्रिपदीं चतुष्पदीमक्षरपदीम्" यजु० ८,२१ ।

एकपरि अव्य० एकेन विपरीतं यत्तम् "अनश्चाक्षण्णंख्याः परिणा" पा० अव्ययी० । एकेन विपरीततया पतनेन परा-जये द्यूते व्यवहारेवाय प्रयोगः । यस्य यया पातने जय-योभवति तस्य एकस्यान्यथाभावेः पातने एवं प्रयो-जनः एवं व्यवहारेऽपि ।

एकपर्णा स्त्री एकं पर्णं तपःसाधनतया आहारो यस्याः । शैल राजस्य मेनायादुत्पन्नदक्षिणतयमध्ये ३दुक्षिणमेदे । "तिस्रः कन्यास्तु मेनायां जनयामास शैलराट् । अपर्णामेकपर्णाञ्च तृतीयामेकपाटलाम्" इत्युपक्रम्य । "आहारमेकपर्णेन एकपर्णा समाचरत्" हरि० १८अ० । स्वार्थे कन् बहु०कप् वा अत इत्त्वम् अपर्णिकाप्यत्र । "अप्यपर्णा निराहारा एकाशा एकपर्णिका" देवीपु० ४५अ० । अस्य पूर्वोक्तवा-क्येनैकवाक्यतया स्त्रिमवत्कथाभेदपरत्वम् न तु दुर्गापर त्वमिति बोध्यम् । एकमात्रं पर्णमस्य । एकपलाशवृक्षादौ त्रि०

एकपर्व्वतक पु० पर्वतभेदे "कुरुभ्यः प्रस्थिताञ्छे तु (शल्य-भीमार्জ্জुनाः) मध्येन कुरुजाङ्गलम् । रम्यं पद्मसरोगत्वा कालकूटमतीत्य च । गण्डकीञ्च महाशोणं सदानीरां त-थैव च । एकपर्वतके सद्यः क्रमेणोत्तीर्य्य जाह्नवीम् । उत्तीर्य्य सरयूं रम्यां दृष्ट्वा पूर्वाञ्च कोशलाम्" भा० स० २१ अ० ।

एकपलाश पु० एकः पलाशो यस्य । एकपलाशमात्रश्चेत् तत्र भवः तस्येदं वा शङ्खा० ञ । एकपलाशीय तत्रभवे तदीये च त्रि०

एकपाटला स्त्री एकं पाटलं पुष्पं तपःसाधनतया आहारो

यस्याः । हिमवतोमेनायास्तृपद्मदुहितृत्रयमध्ये दुहितृभेदे एकपर्णाशब्दे मूलं दृश्यं तत्रैवैतन्नामनिरुक्तिर्यथा । "पाठलापुष्पवर्णकत्वं चादधावेकपाटला" ।

एकपातिन् त्रि० एकः सन् पतति पत णिनि "सङ्घसुपेति" स० । एकाकितया पतनशीले अतिरात्रयागस्थे २अहर्विशेषे न० "एकपातीनि त्वहानान्यतिरात्रोः" आश्व०श्रौ०१२,६,२२ । "चतुर्विंशाभिजिद्विषुवन्महाव्रतादीनि एकपातीन्यहानि तानि अतिरात्रसंख्यानि भवन्ति" सारा० । २व्रतभेदे स्त्री ङीप् । "धाय्यास्वतैकपादि नोः" आश्व०श्रौ० ५ १६,११ । "अग्निर्हौता गृहपतिः स राजेति प्रतिपदेकपातिनी पञ्चः" ६,५,६ ।

एकपाद् त्रि० एक पादोऽस्य अन्यलोप· समा० । १विष्णौ "चतुरात्मा चतुर्भावस्तत्त्वैदविदेकपात्" विष्णु-सं० । "एकः पादोऽस्येत्येकपात् पादोऽस्य विश्वाभूतानीति" श्रुतेः 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' गीतोक्तेश्च" भा० । परमेश्वराभिन्नत्वेन एकपादयुक्तत्वेन वा २शिवे च । स च रुद्रभेदः । "अजैकपादहिर्बुध्नोविरूपाक्षश्च रेवतः । हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः । रुद्राएकादशप्रोक्ता जयन्तश्चापराजितः" विष्णुध० अन्यनामान्योऽपि रुद्राः सन्ति तत्तद्दानादौत्वेत एव पूज्याः । अजैतिनामान्तरं हैन एकादशसंख्यापूर्त्तिः अतएव विष्णुध० "अजनामा महारुद्रः" इत्यादिना तद्व्यानमुक्तम् "एकपादभिधो विप्र ! ओङ्कारः स्याद्दृढव्रत ! परम् । चक्रं डमरुकं शूलं खट्वाङ्गं तदधोवरम् । अक्षं खड्गं मेखलायां खट्वाङ्गांश्च भजेत्ततः । धनुर्वज्रं कपालञ्च कौमुदीं तर्ज्जनीघटम् । परशुं चक्रमाधत्ते क्रमाद्बाहुषु करे । अनेकभोगसम्पत्तिं कुरुते यज्वनः सदा" इति तत्रैव एकपदोध्यानान्तरमुक्तम् । २एकपादयुक्ते त्रि० स्त्रियां ङीषि पक्षे एकपदीति भेदः एकपदीशब्दे उदा० ।

एकपाद् पु० कर्म० । "एकमात्रचरणे "अष्टसिद्धकपादेन परमं योगमास्थितः" भा०अनु ०८२अ० । "अष्टसिद्धेकपादेन दृष्टे विबुधबन्धुभिः" भाग० ३,१,१६ । "एकःपादोऽस्य सर्वाद्यालविधेरनित्यत्वात् नान्यलोपः । एकपादयुक्ते २परमेश्वरे । "पादोऽस्य विश्वाभूतान्यात्मकोः तस्य सर्वभूतरूपैकपादत्वात् तथात्वम् "तत्र शिवियेऽज एकपादः" अथ० १३,१,६,२, एकपदयुक्तमात्रे त्रि० स्त्रियां स्वाङ्गत्वात् ङीष् टाप् वा । "द्वावीं तावीं विधातारौं दीर्घजिह्वाभजिह्विकाम् । त्रिसन्ध्यमेकपादाञ्च त्रिजटामेकलोचनाम्" भा०व०२७६अ० "एकपादांश्च पुरुषान् क्रोरान् वनवासिनः" भा० स० ३०अ० सहदेवदक्षिणदिग्विजये" "एकपादाश्च तत्राक्षमपश्यं हरि वारितान्" ५०अ० । ४अक्षुरभेदे "एकपादमहोदरौ" भा०आ० अक्षुरगणनायाम् । एकपादोऽप्यलम्बनत्वेनाक्ष्यस्य अच् । ५एकपादमात्रालम्बके । "पर्वतारोहणं कृत्वा एकपादो विभावसुम् । निरीक्षेत निराहार ऊर्द्ध बाहुः कृताञ्जलि "भा०आ०१२५अ०

एकपादिका स्त्री एकः पादोऽवलम्बनत्वेनाक्ष्यस्याः ठन् । एकपादावलम्बनेन खगानां स्थितिभेदे "अथावलम्ब्य तत्पक्षमेकपादिकाम् तदा स्थिरद्रायुपयत्वन खगः" नैष० ।

एकपिङ्ग पु० एकं पिङ्गं नेत्रमस्य । कुबेरे । तस्य क्रूरदृष्ट्या पार्वतीदर्शने वामनेत्रस्य स्फुटने शिववाक्येन प्रसन्नायास्तस्या वरेण पिङ्गलं वामनेत्रं जातमिति तस्य तथात्वम् तत्कथा कार्यी० यथा

"प्रसार्य नयने पूर्वसमामेव व्यलोकयत् । यन्मोः समीक्षे का योषिदेषा सर्वाङ्गसुन्दरी । अनया किं तपस्तप्तं ? मयापि तपसोऽधिकम् । अहो रूपमहो प्रेम सौभाग्यं चारहो भयम् । क्रूरदृग्वीक्षते यावत् पुमः पुनरिदं वदन् । तावत् प्रस्फोटितं नेत्रं वामं वामविलोचनात् । अथ देव्यवधीद्देवं किमसौ दुस्तपस्तपः । अवज्ञादीक्ष्य मां वक्ति स्यक्तुर्वज्ञे तपःप्रभाम् । अवज्ञहलिप्येनाक्षा पुनर्मामेव पश्यति । अवश्यमनो मे रूपं प्रेमसौभाग्यसम्पदं । इति देवीगिरं श्रुत्वा प्रहस्य प्राह तां प्रभुः । उमे ! त्वदीयपुत्रोऽयं न च क्रूरेण चक्षुषा । संपश्यते तपोवृद्धां तव किन्त्वधिकंपदम् । इति देवीं समाभाष्य तमोघः पुनरब्रवीत् । वरं ददामि ते वत्स ! तपसाऽनेन तोषितः । निधीनामधिनाथत्वं गुह्यकानां भवेश्वरः । यक्षाणां किन्नराणाञ्च राजा राज्ञाञ्च सुव्रत ! । पतिः पुण्यजनानाञ्च सर्वेषां धनदोभव । मया सख्यञ्च ते नित्यं वत्स्यामि च तवान्तिके । अलकां निकषा मित्र ! तव प्रीतिं विवर्द्धयन् । आगच्छ पादयोरस्याः पतते जननी त्वियम् । इति दत्त्वा वरान् देवः पुनराह शिवां शिवाम् । प्रसादं कुरु देवेशि ! तपस्विन्यङ्गजे तव । देव्युवाच । वत्सस्ते निर्मला भक्तिर्भवे भवतु सर्वदा । भवैकपिङ्गनेत्रे च वामेन स्फुटितेन च । देवदत्तास्तु ये तुभ्यं वरास्तान्तु तथैव ते । कुबेरो भव नाम्ना त्वं मम तुल्येश्वरो सुत !" एकपि-

कृलोऽप्यत्र । एकपिङ्गलवर्णनेत्रयुक्तत्वात्तस्य तथात्वम् ।

एकपिण्ड त्रि० एकःसमानः पिण्ड देहः श्राद्धदेयपिण्डो वा यस्य । १सपिण्डे तस्य एकदेहारब्धदेहैकत्वात् दातृत्वभोक्तृत्वान्यतरसम्बन्धनैकपिण्डत्वाद्वा तथात्वम् । "त्रयाणामूर्द्धं कर्त्तव्यं त्रिषु पिण्डः प्रवर्त्तते । चतुर्थः सम्प्रदातैषां पञ्चमोनोपपद्यते" इति मनुक्तेः । लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिन" इत्युक्तौ "जायति यत्पिण्डदाता स ऋतः सन् ततपिण्डभोक्तोत्युक्तेश्च सप्तानामेव सपिण्डत्वमिति दायभागानुसारिणः ।

एकपुरुष पु० एकः श्रेष्ठः पुरुषः । १पुरुषोत्तमे परमेश्वरे तस्य श्रेष्ठत्वमुक्तं गीतायाम् "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" तस्यच पुरुषत्वमन्तर्यामितया सर्व्वदेहे पुरि वासात् । "द्वा सुपर्णा सयुजा सखाया समानवृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्ति अन्योऽनश्नन्नभिचाकशीति" श्रुतौ वृक्षरूपदेहे वासोक्तेश्च पुरुषत्वम् । २प्रधानपुरुषे च । एकः पुरुषो यस्मिन् । ३एकपुरुषान्विते त्रि० । "तदैकपुरुषं राष्ट्रं विलम्बाहतनिर्गमम्" भाग० ६ । ५ । ७, "एकः पुरुषोभोक्ता यत्र । ४एकपुरुषभोक्तृके भोगभेदे तत्रायं भेदः प्रपितामहादीनां त्रयाणां जीवित्वे एकपुरुष एव भोगः यथाह दा० तत्त्व० व्यासः "पिता पितामहो यस्य जीवेच्च प्रपितामहः । त्रयाणां जीवतां भोगोविज्ञेयोह्येकपुरुषः" । "युगसङ्घोगे चाप्येवमेव प्रपितामहस्य तत्र स्वातन्त्र्यात् तस्यैव भोगस्तत्र तत्रैकपुरुषो भोग" दायतत्त्व रघु०

एकपुष्कल(र) पु० एकं पुष्करं हस्तं यस्य रस्य वा लः । काष्ठके वाद्यभेदे । "अथ प्रयाते दाशार्हे प्रावाद्यन्तैकपुष्क(रा)लाः" भा० उ० ६३ अ० एकपुष्करा काष्ठलाः" नीलकण्ठः

एकपुष्पा स्त्री एकं पुष्पं यस्याः । १वृक्षभेदे यस्यैकमात्रं पुष्पं जायते तस्मिन् जातित्वेऽपि अजा० टाप् ।

एकप्रस्थ पु० कर्म० । १एकस्मिन् प्रस्थे धान्यमानभेदे माद्रादि० व्यादुदात्तोऽयम् । एकः प्रस्थोऽस्य । २एकप्रस्थयुक्ते पर्वते पु०

एकफला(ली) स्त्री एकं फलमस्याः सुग्धबोधमते टाप् । भा० मते ङीष् । १एकमात्रफलके औषधिभेदे

एकभक्त न० एकं भक्तं भोजनं यत्र । व्रतभेदे तत्स्वरूपकालादिनिरूपणं कालमाधवीये यथा "अथैकभक्तनिर्णयः । ब्रह्मपुराणे वैश्वानरव्रते प्रोक्ते "प्रतिपद्येकभक्ताशी समाप्ते कपिलाप्रदः" इति । तत्रादावेकभक्तव्रतं त्रिविधम् खतन्त्रमन्याङ्गोपवासप्रतिनिधिरूपं चेति । तेष्विदानीमुदाहृतं खतन्त्रम् । तत्रेदं चिन्त्यते । किमुपवासवत् तिथिरत्रिश्च ग्रहीतव्या ? उत प्रकारान्तरेणेति ? । उपवासवदिति तावत् प्राप्तम् "दैवं पित्र्यं तथा कार्य्यम्" इति वचनेन उपवासैकभक्तादिव्रतदैवस्य विधिचोदितत्वात् । न च कर्मकालव्याप्त्या तन्निर्णेयइति शङ्कनीयम् । तत्कालस्य व्याप्तिनिर्णीतत्वात् । किञ्च तन्निर्णये कर्मकालव्याप्तिवचनस्य पित्र्यविषयत्वेनोपपत्तेः । तस्मादुपवासवत्तन्निर्णय इति प्राप्ते ब्रूमः । कर्मकालव्याप्तिरेवात्र निर्णयहेतुः । कर्मकालस्तत्कर्मस्वरूपं चेत्युभयं स्कान्दपुराणे दर्शितम् । "दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत् । एकभक्तमिति प्रोक्तं व्रतज्ञैस्तत् स्वाहिवैव हीति" । देवलोऽपि "दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत् । एकभक्तं तु तत् प्रोक्तं सूर्य्यास्तसमयेऽपि वेति" । अत्र च दिनार्द्धस्योपरि सार्द्धसप्तघटीपरिमितोसमयः कालः पञ्चधा विभागे मध्याह्नस्यापरभाग एकभक्तस्य कालः दिनार्द्धेऽतीते सति समनन्तरत्वात् । अस्तमयात् प्राचीनोऽवशिष्टोगौणः कालः दिवेलक्ष्य भुक्तावात् एवंस्थिते सति मुख्यकालव्यापिनी तिथिर्ग्रहीतव्या अतएव पद्मपुराणम् । "मध्याह्नव्यापिनी ग्राह्या एकभक्ते सदा तिथिरिति" । बौधायनोऽपि "उदये त्वपवासस्य नक्षत्रास्तमये तिथिः । मध्याह्नव्यापिनी ग्राह्या एकभक्तव्रते तिथिरिति" नचात्रोपवासन्यायो युक्तः तत्र पूर्वविद्धायामेव विशेषशास्त्रपर्य्यवसानात् । द्विविधं हि विशेषशास्त्रं तिथियुक्तमेकं कर्मयुक्तमपरम् । तत्र "पौर्वाह्णिकास्तु तिथयोदैवे" इत्यनेन कर्मविशेषेण सामान्यशास्त्रेणोत्तरविद्धायां प्राप्तायाम् "उपोष्याः परसंयुक्ताः परा पूर्व्वेण संयुताः" इत्यनेन कर्मविशेषेण विशेषशास्त्रेण पूर्वविद्धतिथिविषये अपि सामान्यविशेषशास्त्रे उदाहरेते "पूर्वाह्णिकास्तु तिथय" इति तिथिमात्रमुपजीव्य प्रवृत्तत्वात् सामान्यशास्त्रम् "प्रतिपत् सम्मुखी कार्येति" तिथिविशेषमुपजीव्य प्रवृत्तत्वाद्विशेषशास्त्रम् । तथा सति द्विविधेनापि विशेषशास्त्रेण पूर्वविद्धायामेवोपवासः सुस्थितः । अत्र तु मध्याह्नव्यापिनीत्येतत्कर्मविषयं विशेषशास्त्रम् । अतस्तदनुसारेण निर्णयो युज्यते । ननु प्रतिपत्सम्मुखी कार्य्येत्यनेन तिथिविषयेण विशेषशास्त्रेण कृतो न निर्णय इति चेत् उपवासविषयत्वेनापि तस्योपपत्तेरिति ब्रूमः । ननु मध्याह्नव्यापित्वचनमपि तिथ्यन्तरैकभक्तविषयत्वेनोप-

पादयितुं शक्यम् अतः कर्मविशेषशास्त्रतिथिविशेषशास्त्रयोः समानबलत्वमिति चेत् अस्तु नाम किं नश्छिन्नं मध्याह्नव्यापित्वसुखत्वयोः पूर्वविद्धायामापादयितुं शक्यत्वेन विरोधाभावात् । यदा तूत्तरविद्धायामेव मध्याह्नव्यापित्वं तदा विरोधः स्फुट इति चेत् । बाढम् । तथापि तिथिविषयविशेषशास्त्रात् कर्मविषयविशेषशास्त्रं प्रबलं मध्याह्नातिशयेनैव गुणत्वात् कर्मणश्च प्रधानत्वात् । तस्मादेवंविधैर्विषयैः कर्मकालव्याप्तिरेव निर्णेतव्यम् । अत्र निर्णेतव्योविषयोभिद्यते । पूर्वेद्युरेव मध्याह्नव्यापित्वम् परेद्यरेव तदव्यापित्वम् । उभयत्र तद्व्यापित्वम् उभयत्र तदव्यापित्वम् उभयत्र साम्येन तदेकदेशव्यापित्वम् । उभयत्र वैषम्येण तदेकदेशव्यापित्वं चेति । तत्र प्रथमद्वितीययोर्मध्याह्नव्यापित्वस्य निर्णायकत्वम् । तृतीये पूर्वविद्धा याह्या सुख्यकालव्याप्तेः समत्वेऽपि गौणकालव्याप्तेरधिकत्वात् । अनेनैव न्यायेनोभयत्र सुख्यकालव्याप्त्यभावेऽपि गौणकालव्याप्तिलाभात्पूर्वविद्धैव । पञ्चमेऽप्ययमेव न्यायो योज्यः । षष्ठे तु यदा पूर्वेद्युर्मध्याह्नैकदेशमधिकं व्याप्नोति तदाधिकगौणकालव्याप्तेश्च पूर्वेद्युर्ग्राह्या । यदा परेद्युर्मध्याह्नैकदेशमधिकं व्याप्नोति तदा गौणकालव्याप्त्यभावेऽपि सुख्यकालव्याप्त्याधिक्यानुसारेण परेद्युर्ग्राह्या । नन्वस्त्वेवं स्वतन्त्रैकभक्ते निर्णयः अन्याङ्गे तु कथम् ? तत्र का नुपपत्तिः ? इति चेत् । "पूजाव्रतेषु सर्वत्र मध्याह्नव्यापिनी तिथिः" । "मध्याह्ने पूजयेद्देवीमित्यादि"शास्त्रैरङ्गिनः पूजादेर्मध्याह्ने विहितत्वेनाङ्गस्यैकभक्तस्यापराह्णादौ सुख्यकालासम्भवः । ना भूदाद्ययविषये सुख्यः कालः । प्रधानानुसारेण गुणस्य नेतव्यत्वात् । यदा स्वतन्त्रैकभक्तेऽपि केनचिन्निमित्तेन सुख्यकालासम्भवे गौणकालोऽभ्युपगम्यते तदा किमु वक्तव्यम् अन्याङ्गे । यत्तूपवासप्रतिनिधिरूपमेकभक्तं तदुपवासतिथौ कार्यं तस्य गौणेऽभ्युपगमात् । अतएव सुमन्तुः "तिथौ यत्रोपवासः स्यादेकभक्तेऽपि सा तथेति" नच तादृशमेव नास्तीति शङ्कनीयम् । उपवासव्रतं प्रक्रम्य रोगादिना तदशक्तौ शुक्लैकादश्यादितस्तस्यैकभक्तस्य सम्भावितत्वात् । "अष्टौ ताम्रव्रतानि आपोमूलं फलम्पयः । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधमिति" शास्त्रात् । "एकभक्तं न नक्तेन तथैवायाचितेन च" या० एकस्मिन् नान्यस्मिन् भक्तम् । २नित्यानित्यभक्ते ३अन्यस्मिन्भक्ते च त्रि० "प्रौढ्याम चैकभक्तानु" मनुः । एकभक्तानु अन्यानासक्तान्यरक्तानु ।

एकभक्ति स्त्री एका अनन्यविषया भक्तिः । १नित्यानन्यभक्तौ २अनन्यभक्तौ एकस्मिन् अनन्यस्मिन् भक्तिरस्य । २नित्यानन्यभक्ते त्रि० "एकभक्तिर्विशिष्यते" गीता ।

एकभङ्गीनय पु० एका भङ्गी रीतिस्तस्य तामधिकृत्य नयः । एकरूपाणां बहूनां मध्ये एकस्य यथा प्रवृत्तिरन्यस्यापि तथा प्रवृत्तिरित्येवंज्ञापके न्यायभेदे "सर्वेषामेकरूपाणामेकस्यापि यदुच्यते । सर्वेषामेव तत्कृत्यादेकरूपाहि ते स्मृताः" इत्युक्तेस्तथात्वम् ।

एकभार्य्या स्त्री एकस्यैव भार्या । १अनन्यपतिकायां साध्व्यां स्त्रियां "तामेकभार्य्यां परिवादभीरोः" रघुः । "एकभार्यां सखीम्" भट्टि० । एका भार्या यस्य । २अन्यस्त्रीरहिते पु० । एकेन भार्यैः । ३एकभर्तृके त्रि० ।

एकभाव पु० एको भावः । अनन्यविषये रागे २एकस्वभावे ३एकार्थे "स्त्रीणामयत्नो कृमिलस्य पशवस्त्रीणां विशेषतः । यो भवेदेकभावेन न स जीवति मानवः" इति पञ्चत० । एकस्य भावः ष्ट्यञ् । ४अभिन्नत्वे अभेदे "स्वतेजसा सत्त्वगुणप्रवाहमात्मैकभावेन भजध्वमद्धा" भाग० ४,२१,१६, एकीभावोऽस्य । ५तुल्यभावके त्रि० "या वै यूथं सोऽहमद्यैकभावः" भा० अनु० ७३ अ० ।

एकभूत त्रि० अनेक एको भूत चूर्णे श्रेण्या० त० स० । एकीभूते । एकस्मिन् भूतः । २एकासक्ते च "नियतेनैकभूतेन मनसा यदृदर्शम्" भा० शा० ४३ अ० ।

एकभूम पु० एका भूमिर्यत्र व्य समा० बहु० । एकभूमिरस्यस्य अर्श० अच् वा० (एकतला) प्रासादभेदे एवं द्विभूमादयोऽपि (दोताला) (तेतला) इत्यादि प्रासादभेदे ।

एकमति स्त्री एका मतिः । एकस्यां मतौ "तथा मनुर्वैभगवान् पितामहोयमेकमत्या पुरुदस्मिन्नैमेखैः" ४,१,२४, एका मतिर्यस्य । २एकविषयमतियुक्ते "तैरेकमतिभिर्भूत्वा यज्ञोक्तं शास्त्रसत्तमम्" भा० शा० २३७ अ० । मतेरेकस्य एकरूपविषयावलम्बने विरोधिविषयानवलम्बने तु भावः ष्यञ् । ऐकमत्य एकविषयज्ञाने विवादाभावे च "कैकमत्यं महाधियाम्" पुरा० ।

एकमुख न० एकं मुखं प्रधानं यत्र । १एकप्रधाने द्यूतादौ "द्यूतमेकमुखं कार्यं तस्करज्ञानकारणात्" या० । एकं मुखं द्वारं यत्र । २एकद्वारे मण्डपभेदे । "मण्डपकारवेत्तत्र प्राङ्मुखं याम्यदङ्मुखम्" पुरा० अन्यत्रादौ एकमुखमण्डपं विहितम् अन्यत्र तु चतुर्मुखमिति भेदः ।

एक सुखमिवोदितोदाहारविशेषोऽस्य । एकस्यैकाकारोदितताय-विरुद्धयुक्ते २रुद्राक्षफलभेदे । तत्फलस्य एकदिवसस्थता यावत्से उक्ता । तत्फलन्तु "रुद्राक्षस्योदितं प्रोक्तं सुखं पुण्यन्तु निष्फलम्" तत्सा० खण्डे महेश्वरे उक्तम् । रुद्राक्षशब्दे विवृतिः । एकवक्त्रादयोऽप्यत्र ।

एकमूला स्त्री एका मूलमस्त्र्यस्य अच् । एकं मूलमस्याः बहु० टाप् जातौ ङीष् वा । (धालपान) १धालपर्ण्याम् अमरः । २एकमूलयुक्ते त्रि० ।

एकयष्टिका स्त्री एका यष्टिरिवावली यस्याः ब० कप् । (एकनर) एकावलीहारभेदे ।

एकयोनि त्रि० एका समा योनिर्जातिरस्य । समानजातौ "एतद्विधानं विज्ञेयं विभागमेकयोनिषु" मनुः "समानजातिषु" कुल्लू० कर्म० । २एकस्मिन्नुत्पत्तिस्थाने स्त्री एका योनिरुत्पत्तिस्थानं यस्य । ३समानोत्पत्तिस्थानके त्रि० ।

एकरज पु० एकं रजतया रञ्जते कर्त्रोनेन रञ्ज-घञर्थे कर्त्रे क । भङ्गराजे जटा० । स च केशरञ्जनद्रव्यम् ।

एकरस त्रि० एकोऽनन्यविषयकोरसः रागः अभिप्रायः एकोऽभिन्नः स्वभावो वास्य । १एकरागे २एकाभिप्राये ३अभिन्नस्वभावे च "अस्थूलमनण्वह्रस्वमदीर्घमनन्तमनपरमबाह्यं प्रज्ञानघनमेकरसम्" इति श्रुतिः "चिदेकरसवस्तुनि वेदः० । एकोरसोयत्र । ४एकरागविषये त्रि० "तपस्येकरसे रतम्" रामा० । एकोरसोवीरत्वेन यत्र । प्राधान्येन एकरसयुक्ते ५नाटके न० । "एकएव भवेदङ्गी शृङ्गारो वीरएव वा । अङ्गान्यन्ये रसास्तस्य" इति सा० द० उक्तेः नाटकस्य प्राधान्येन शृङ्गारवीररसान्यतरत्वेन वर्णनीयत्वात्तथात्वम् ।

एकराज् पु० एको राजते क्विप् । १सार्वभौमे "हिरण्यकशिपूराजन्नजेयमजरामरम् । आत्मानमप्रतिद्वन्द्वमेकराजं व्यधित्सत" भाग० ७,१,१, "तस्मिन् महेन्द्रभवने महाबलो महासुरोनिर्ज्जितलोकएकराट्" भाग० ७ ४, ११, "यावदीयो महानुव्योभिमन्यव एकराट्" भाग० १,१८,६ "एकएव राजते राज-क्विप् । २परमेश्वरे तस्यैव भासा सर्वस्य भासनात् तस्य तथात्वम् । तथा हि "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" श्रुत्या "यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्" गीतोक्तेः "अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् । आद्यं त्रिकं ब्रह्मरूपं मायारूपं ततो द्वयम्" इत्युक्तेश्च तस्य सर्वेषां भानप्रयोजकत्वात् "एष स्वयंज्योतिरिति श्रुतेस्तस्य स्वयंप्रकाशमानत्वात् स्वप्रकाशे अन्यानभेक्षणाच्च तथात्वम् ।

"स वा एष द्रष्टा नापश्यद्दृश्यमेकराट्" भाग० २,५,२०,

एकराज पु० एको राजा टच्स० । एकस्मिन् श्रेष्ठे च राजनि

एकरात्र न० एका रात्रिः—नि० अच् संख्यापूर्वकतया रात्रान्तत्वेऽपि न पुंस्त्वम् । एकरात्रे । "एकरात्रं तु नियमस्मृतिषिद्धब्राह्मणः स्मृतः" "यत् करोत्येकरात्रेण हवलीसेवनात् द्विजः" । "एकरात्रोपवासस्य कृच्छ्रं शान्तपनं स्मृतः" मनुः । रात्रिपदमहोरात्रपरम् । "कलत्रं त्वेकरात्रेण" भाग० २,३१,२ । एकरात्रभोजने पर्य्याप्तम् ठन् । एकरात्रिक एकदिनभोजननिर्वाह्यपर्य्याप्ते त्रि० "आददीतामिषाद्यादहत्वावैकरात्रिकम्" मनुः ।

एकराशि पु० कर्म० । १एकस्मिन् मेषादौ राशौ । "एकराशिगतौ स्यातामेकर्क्षविषये यदा" ज्यो० । २एकस्मिन् धान्यादेः स्तूपे च । "एकराशिं पञ्चधा वृत्ते" सि० कौ० ।

एकरिक्थिन् त्रि० एकस्य पितुः रिक्थमस्त्यस्य इनि । एकपित्र्यांशहरे । "यदौकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ" मनुः । एकं समानं रिक्थमस्त्यस्य इनि । २अविभक्ते ३संसृष्टे च । स्त्रियां ङीप् ।

एकरूप त्रि० एकं समानं रूपमस्य । १तुल्यरूपे "सर्वेषामेकरूपाणामेकमापि यदृच्यते । सर्वेषामेव तत् कुर्य्यादेकरूपाहि ते स्मृताः" स्मृतिः । कर्मधा० । २एकस्मिन् रूपे । "पुरुषार्थं प्रति विभोर्नयत्येकरूपेण सांका० । एकरूपस्य भावः ष्यञ् । ऐकरूप्य तुल्यरूपे न० । त्वएकरूपत्व न० तल्, एकरूपता स्त्री तत्रार्थे ।

एकरूप्य त्रि० एकस्मात् एकस्या वा आगतः रूप्यप् । १एकतआगते । कर्म० । २केवलरजते न० बहु० । ३हरति त्रि० ।

एकर्च पुंन० एका ऋक् च समा० अर्द्धर्चादि । १एकस्यामृचि एका ऋक् यत्र । २एकर्चयुक्ते क्लीबे न० । "चतुरुत्तराण्येकर्चानि" शत० ब्रा० १०,१,२ ८, ३एकर्चस्तुत्ये देवभेदे "तृचेभ्यः स्वाहा एकर्चेभ्यः स्वाहा" यजु० १६,२३,२०,

एकल त्रि० इण-किट् एगतः कलाः यस्य । १अनवयवे एकवल्लायते श्लथते श्लायते ला-घञर्थे क "श्लथ शिथिलेति" स० । २असहाये एकके "अथ ऊर्द्ध उदेत्य नैवेहेता नास्तमेतैकल एव मध्ये स्याता" छा० उ० "एकलोऽद्वितीयोनवयवो वा" भा० "जायेत चैकलः प्राणीप्रणीयेत तथैकलः । एकलः सुकृतं भुङ्क्ते स्वीयाहृक्तमेकलः" कार्षा०

एकमेकत्वं ख्याति ख्या क। एकत्वाख्ये "तस्मिन् वाव किल स एकत्व पुनरुक्तात्रभोपवने" भाग०५,७।१२।

एकलव्य पु० निषादराजस्य हिरण्यधनुषः पुत्रे तत्कथा भारते या० १२४ अ०।

"ततो निषादराजस्य हिरण्यधनुषः सुतः। एकलव्यो महाराज! द्रोणमभ्याजगाम ह। न स तं प्रतिजग्राह नैषादिरिति चिन्तयन्। शिष्यं धनुषि धर्म्मतस्तेषामेवान्ववेक्षया। स तु द्रोणस्य शिरसा पादौ गृह्य परन्तप!। अरण्यमनुसंप्राप्य कृत्वा द्रोणं महीमयम। तस्मिन्नाचार्य्यवृत्तिञ्च परमामास्थितस्तदा। इष्वस्त्रे योगमास्थे परं नियममास्थितः। परया श्रद्धयोपेतो योगेन परमेण च। विमोक्षादानसन्धाने लघुत्वं परमाप स। अथ द्रोणाभ्यनुज्ञाताः कदाचित् कुरुपाण्डवाः। रथैर्विनिर्ययुः सर्व्वे मृगयामरिमर्दनाः। तत्रो पकरणं गृह्य नरः कश्चिदुपाक्रमत्। राजन्ननुजगामैकः श्वानमादाय पाण्डवान्। तेषां विचरतां तत्र तत्तत् कर्म्म चिकीर्षया। श्वा चरन् स वने गृह्यो नैषादिं प्रतिजग्मिवान्। स कृष्णमलदिग्धाङ्गं कृष्णाजिनजटाधरम्। नैषादिं श्वा समालक्ष्य भषंस्तस्थौ तदन्तिके। ततो ताञ्छरभषतः शुनः सप्त शरान्मुखे। लाघवं दर्शयन्नस्त्रे सुमोच सुसमाहितः। स तु श्वा शरपूर्णास्यः पाण्डवानाजगाम ह। तं दृष्ट्वा पाण्डवा वीराः परं विस्मयमागताः। लाघवं शब्दवेधित्वं दृष्ट्वा तत् परमं ततः। प्रेक्ष्य तं व्रीडितास्तत्र प्रशशंसुश्च सर्व्वशः। तं ततोऽन्वेषमाणास्ते वने वननिवासिनम्। ददृशुः पाण्डवा राजन्नश्नन्तमनिशं शरान्। न चैनमभ्यजानंस्ते तदा विकृतदर्शनम्। अर्जुनः परिपप्रच्छ कोऽयं भवान् कस्य वेत्युत। एकलव्य उवाच। निषादाधिपतेर्व्वीरा हिरण्यधनुषः सुतम्। द्रोणशिष्यञ्च मां वित्त धनुर्व्वेदकृतश्रमम्। वैशम्पायन उवाच। ते तमाज्ञाय तत्त्वेन पुनरागम्य पाण्डवाः। यथावृत्तं वने सर्व्वं द्रोणायाचख्युरद्भुतम्। कौन्तेयस्यर्जुनो राजन्नेकलव्यमनुस्मरन्। रहो द्रोणं समासाद्य प्रणयादिदमब्रवीत्। अर्जुन उवाच। तदाहं परिरभ्यैकः प्रीतिपूर्व्वमिदं वचः। भवतोक्तो न मे शिष्यस्त्वद्विशिष्टो भविष्यति। अथ कस्मात्त्वद्विशिष्टो लोकादपि च वीर्य्यवान्। अस्त्योऽस्ति भवतः शिष्यो निषादाधिपतेः सुतः। वैशम्पायन उवाच। मरुत्तमिव तं द्रोणश्चिन्तयित्वा विनिश्चयम्। सव्यसाचिनमादाय नैषादिं प्रति जग्मिवान्। ददर्श मलदिग्धाङ्गं जटिलं चीरवाससम्। एकलव्यं धनुष्पाणिमस्यन्तमनिशं शरान्। एकलव्यस्तु तं दृष्ट्वा द्रोणमायान्तमन्तिकात्। अभिगम्योपसंगृह्य जगाम शिरसा महीम्। पूजयित्वा ततो द्रोणं विधिवत् स निषादजः। निवेद्य शिष्यमात्मानं तस्थौ प्राञ्जलिरन्तिकः। ततो द्रोणोऽब्रवीद्राजन्नेकलव्यमिदं वचः। यदि शिष्योऽसि मे वीर! वेतनं दीयतां मम। एकलव्यस्तु तत् श्रुत्वा प्रीयमाणोऽब्रवीदिदम्। एकलव्य उवाच। किं प्रयच्छामि भगवन्नाज्ञापयतु मां गुरुः। न हि किञ्चिददेयं मे गुरवे ब्रह्मवित्तम!। द्रोण उवाच। यद्यदेयं त्वया ते-यमेकलव्य! प्रयच्छ मे। एकाङ्गुष्ठं दक्षिणस्य हस्तस्येति मतं मम"। "एकलव्यस्तु तच्छ्रुत्वा वचो द्रोणस्य दारुणम्। प्रतिज्ञामात्मनो रक्षन् सत्ये च निरतः सदा। तथैव छेदयन्नङ्गुष्ठं दक्षिणस्य महामनाः। छित्त्वा प्रदिश्यार्य्य तं प्रादात् द्रोणायाङ्गुष्ठमात्मनः। ततः शरस्तु नैषादिरङ्गुलीभिर्व्यकर्षत। न तथा च स शीघ्रोऽभूदुद्यता पूर्व्वं नराधिप"। अयञ्च निषादराजस्य पालित पुत्रः श्रुतदेवपुत्रः यथोक्त हरिवं० ३५ अ०। "श्रुतदेवात् प्रजातस्तु नैषादिर्यः प्रतिश्रुतः। एकलव्योमहाराज! निषादैः परिवर्द्धितः" अतएवौपगवारे "कृष्णो च रूपवाहून! राजा च जनमेजय"! इत्युपक्रम्य एकलव्य-प्रभृतीन् कतिचिदुपान्तु "गणात् क्रोधवशादेव राजपुत्रोऽभवत् क्षितौ" आ० ६७ अध्याये तस्य राजबंधत्वेन राजपुत्रान्तर्गणतोक्तिः। "एकलव्यमिव जन्मान्तरगतम्" काद०

एकलिङ्ग न० एकं पञ्चक्रोशमध्ये लिङ्गं यत्र। शिवविशेषसाधनक्षेत्रभेदे "पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्ष्यते। तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा" आगमः। एकं लिङ्गं प्रधानादि यस्य। नियतैकलिङ्गे शब्दे पु०। एकं लिङ्गमिन्द्रियं यस्य ब० व्रीहौ। शङ्खवेरे शब्दरत्ना०।

एकल् पु० एक ल्वा० क्विप् दीर्घः। ऋषिभेदे ततः गोत्रे गर्गा० यञ्। ऐकलव्य तद्गोत्रापत्ये पुंस्त्री बहुत्वे यञो लुक्। एकल्व इत्येव स्त्रियां न लुक् ऐकलव्यः स्त्रियः

एकवक्त्र पु०। शिवासुरभेदे "एकवक्त्रो महावक्त्रो द्विवक्त्रः कालसन्निभः" हरिवं २६२ अ०। २ एकमुखे रुद्राक्षफले न०।

एकवचन न० एकमेकत्वसंख्यातेऽनेन वच-करणे ल्युट् दीर्घः। व्याकरणोक्ते एकत्वसंख्यावाचके "द्व्येकयोर्द्विवचनैकवचने" पा० उक्ते सुबादौ तिङादौ च। "एकत्वबोधकाच्च

सु अमू टा ङे ङसि ङस् ङि इत्येवं रूपाः सिप् सिप् सिप् ते से इ इत्येवं रूपाश्च प्रत्ययभेदाः "अथोनेदेकवचनेन बहुवचनं व्यवायामेति" यत० ब्रा० १२,५,१,१८ ।

एकवत् अव्य० एकस्येव वति । १एकताश्रयस्य सदृशे कार्य्ये "नपुंसकमपुंसकेनैकवच्चान्यतरस्याम्" पा० । शुक्लः पटः शुक्ला शाटी शुक्लं वस्त्रम् इत्येवंवाक्ये नपुंसकमात्रग्रहे विकल्पेन एकवत् कार्य्यविधानात् इदं शुक्लम् इमानि शुक्लानीति वा" सि० कौ० । २एकवचनवदित्यर्थे च । "एकवत्स्वानहेतौकोद्दिष्टे" विष्णुः । "एकवत् एकवचनवत् यथा स्यात्तथोद्देत" आ० त० रघु० । एकेन तुल्यक्रियति । २एकेन तुल्यक्रियायाम् अव्य० ।

एकवद्भाव पु० एकेन तुल्योभावः भवनम् । एकत्वाश्रयस्यैकवचनान्तरूपे यङ्लिङि कार्य्यभेदे ।

एकवर्ण त्रि० एकोवर्णो रूपं यस्य । अन्यरूपामिश्रितवर्णयुक्ते । एकोवर्णः जातिभेदो यत्र । २ब्राह्मणादिवर्णविभागशून्ये कलियुगावयवस्थस्त्रीके । "एकवर्णस्तदा लोको भविष्यति युगक्षये" भा० व० १९० अ० । वर्ण्यतेऽनेन वर्णः एकः वर्णः स्वरूपं यस्य । ३एकस्वरूपे । "य एकवर्णं तमसः परम्" (उपासते) भाग० ८,५१८ । एकवर्णमेकस्वरूपं ज्ञानम् एकरूपमित्यर्थः । कर्म्मधा० । एकस्मिन् ४शुक्लादौ रूपे एकस्मिन् ५ब्राह्मणादौ जातिभेदे एकस्मिन्नरूपे ऐशब्दे च । ७श्वेतवर्णे ८श्वेतजातौ च पु० । तमर्हति ठक् । ऐकवर्णिक असाधारण्ये ब्राह्मणवर्णमात्रार्हे ऋतधर्मादौ त्रि० । "द्विजातीनाञ्चतं धर्म्मेत्यैकवर्णिकः । यज्ञाध्ययनदानानि सवःसाधारणाः स्मृताः" भा० व० १५० अ० । ९बीजगणितोक्ते सजातीये तुल्यवर्णे द्रव्यभेदे च ।

एकवर्णसमीकरण न० एकवर्णौ तुल्यरूपौ समीक्रियेते अनेन करणे ल्युट् ६त० । बीजगणितोक्ते बीजचतुष्टयान्तर्गतबीजभेदे अव्यक्तशब्दे तद्भावितप्रकारो दर्शितः "प्रथममेकवर्णसमीकरणं बीजं, द्वितीयमनेकवर्णसमीकरणं बीजम्, यत्रैकवर्णयोर्द्वयोर्बहूनां वा वर्गादिगतानां समीकरणं तन्मध्यमाहरणम्, यत्र भाविनस्य तद्भावितमिति बीजचतुष्टयं वदन्त्याचार्याः" भास्कराचार्य्यः । अस्योदाहरणम् । "एकस्य रूपतिंशती षड्भक्ता अष्टादशान्यस्य तु तुल्यमूलाः । रूपं तथा रूपयुतस्य तस्य यौ तुल्यवित्तौ च किमस्यमूल्यम्" एतच्छ्लोकशब्दे व्याख्यातम् ।

अत्र तुल्यमूल्यस्याश्वरूपस्यैकविधस्यैव पृथक्संख्यान्वितस्य समीकरणात् एकवर्णसमीकरणमित्यनुगतार्थसंज्ञा ।

एकवर्षी स्त्री एकमेकवर्षं यथा तथा वर्त्तते यङ्लुगन्ताद्वर्ष-करणे ल्युच् २त० गौरा० ङीष् । करतालीरूपे वाद्ये शब्दरत्ना० । कराभ्यामितरकारणानपेक्षया तद्वाद्यवादनात् तथात्वम् ।

एकवर्षिका स्त्री एको वर्षो वयःकालोऽस्याःकप् अत इत्वम् । एकहायन्यां स्त्रीगव्याम् हेम० एकवर्षभवे त्रि० ।

एकवस्त्र त्रि० एकं वस्त्रं यस्य । १उत्तरीयवस्त्रशून्ये २एकजातीयवस्त्रान्विते च एकवास शब्दतयोऽप्यत्र । कर्म्म० । एकस्मिन् वस्त्रे उत्तरीयरहितपरिधानमात्रवस्त्रे न० । तन्मात्रे स्नाननियेधमाह आ० त० गौतमः

"एकवस्त्रेण यत्स्नानं सूच्या विद्धेन चैव हि । स्नातस्तु न च विशुद्धः स्यात् स्त्रिया च परिदृश्यते" अतएव "स्नानं तर्पणपर्य्यन्तं कुर्य्यादेकेन वाससा" । इति यदि समूलं तदा प्रेततर्पणपरमिति । तत्र "एकवस्त्रा स्नातव्य" इत्यादिना एकवस्त्रत्वविधानात् "एकेन एकजातीयेन इति" वाचस्पतिमिश्रः "येन वाससा स्नानं कृतं तस्यैव तेनैव तर्पणम्" इति तत्तत्त्वार्थवः । न च "स्नानयाच्यान्तु दातव्यान्यदिच्छोर्विशुद्धये । तत्तन्मध्ये तु यः कश्चित् द्विजातिर्ज्ञानदुर्बलः । निष्पीड्यति तदस्त्रं स्नानं तस्य वृथा भवेत्" । इति वशिष्ठवचने स्नानयाच्यामिति तदस्त्रमिति एकवचननिर्देशेन च स्नानेऽप्येकवस्त्रत्वमिति वाच्यम् । अत्र विशुद्धय इत्यभिधानेनाधौतवस्त्रस्यैव त्यक्तव्येन प्रक्षालनं तदुत्तरीयस्य एतदर्थमेकवचनम् । अतएव "त्यक्तव्येनाधरीयस्य वस्त्रस्य प्रक्षालय" इत्यङ्गिरःवचनान्तरमपि । वशिष्ठवचनैकवाक्यतया "स्नातोनाक्रान्तनिर्मुक्तात् स्नानयाच्यान यापिना" इति विष्णुपुराणीयेनाधरीयवस्त्रेणैव गात्रमार्জ্জनं निषिध्यते । एतेन "निष्पीड्य स्नानवस्त्रमिति" काण्वायनवचने एकत्वमविवक्षितमिति निरस्तम् । अतएव सर्वत्रैकवचननिर्देशः" आ० त० रघु० । एवं वैदिककर्म्ममात्रे एकवस्त्रतानिषेधः उत्तरीयशब्दे दर्शितः ।

एकवाक्य न० एकम् एकार्थं वाक्यम् । वाक्यार्थाकाङ्क्षितावाङ्क्षापूरणेन विशिष्टैकार्थबोधके १वाक्यभेदे तच्च द्विविधं पदैकवाक्यं वाक्यैकवाक्यञ्च तच्च भेदा० प० निरूपितं यथा "एवमर्थवादवाक्यानां प्रशंसापराणां प्रामाण्ये सत्यपि, घोरोदीर्णादिवाक्यार्थवादवाक्यानां निन्दितत्वे सत्यपि अर्थवादगतपदानां प्रामाण्यादिसत्त्वाभ्युपगमे एकेन पदेन सत्त्वया तदुपस्थितिसम्भवे पदान्तरवैयर्थ्यं स्यात्

एवञ्च विध्यपेक्षितप्राशस्त्यरूपपदार्थप्रत्यायकतया अर्थवादपदसमुदायस्य पदस्थानीयतया विधिपदेनैकवाक्यता भवतीत्यर्थवादवाक्यानां षट्कवाक्यता । कुतस्तर्हि वाक्यैकवाक्यता ? यत्र प्रत्येकं भिन्नभिन्नसंसर्गप्रतिपादकयोर्वाक्ययोराकाङ्क्षावशेन महावाक्यार्थबोधकत्वं यथा "दर्शपौर्णमासाभ्यां स्वर्गकामोयजेत" इत्यादिवाक्यानां "समिधोयजति" इत्यादिवाक्यानाञ्च परस्पराकाङ्क्षाभावबोधकतयैकवाक्यता । तदुक्तम् भट्टपादैः "स्वार्थबोधे समाप्नानामाकाङ्क्षाद्यपेक्षया । वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते इति" । एकमविसंवादितया तुल्यरूपं वाक्यम् । अविसंवादितया तुल्यरूपे २वाक्ये च । "अवखट्टु रूपाणामेकवाक्यं विवक्षुः" रघुः । "एकमविसंवादिवाक्यमेकवाक्यम्" मल्लि० ।

एकवाद् पु० एकेन फलेन वाद्यते वाद्-कर्मणि अच् । १डिण्डिमे वाद्ये शब्दरत्ना० तस्यैकफलेन वादनात् तथात्वम् । वादः कथाभेदः एकस्य एकत्वस्य ब्रह्माभिज्ञत्वस्य वादः । २वेदान्तिभिरुक्ते वादभेदे सर्वेषां ब्रह्माभिज्ञत्वेनैकत्वस्य प्रतिपादनात्तद्वादस्य तथात्वम् ।

एकविंशत् स्त्री एकाधिका विंशतिः पृ० । (एकश्च) १संख्याभेदे २तद्वति च एकविंशतिशब्दोऽत्र स्त्री । एकविंशतेः एकविंशतेर्वा पूरणः डट् । एकविंश ततसंख्यापूरके स्वार्थे कन् तत्रार्थे "दश पूर्वान् परान् वंश्यानात्मानं चैकविंशकम्" मनुः । पूरणार्थे डटि वा तदर्थे तु एकविंशतस एकविंशतितम इतिभेदः ततपूरकार्थे क्रियाभ्यासतो डट् । तदधिकमधीते तद्वेद वेत्यर्थे कन् । एकविंशतिक एकविंशद्क एकविंशत्यधिकशतादौ तद्व्यवहाराभोपदाकरूपेण दीयते इत्यर्थे कन् । एकविंशतिक एकविंशत्क इत्यादिरूपेण दीयमानविंशतिके यते । अवयवे कन् रूपसिद्धेः एकविंशतिसंख्यायां न० । एकविंशतिर्मन्त्राः परिमाणमस्य स्तोमस्य ठ । एकविंश १तावन्मन्त्रके स्तोमभेदे एकविंशस्तोमशब्दे दृश्यः । "यत्तयोर्डिनिवेक्तव्यः" "विंशतेश्च" वार्त्ति० डिनि । एकविंशिन् एकविंशतिसंख्यायुक्ते त्रि० स्त्रियां ङीप् । प्रकारे धा एकविंशतिधा एकविंशतिप्रकारे अव्य० । एकाधिका विंशतिः संख्येया इच् समा० । एकाधिकविंशतिसंख्येये । एकविंश संख्यातः स्तोमोऽस्य मनुष् मस्य वः । एकविंशवस् एकविंशस्तोमान्विते त्रि० स्त्रियां ङीप् । "त्रिद्वृतौ हरन्ताद्वदधातोरेकविंशतौ यवात्" यत०भा० ८,३,७,१ ।

एकविंशस्तोम पु० कर्म० । एकविंशतिमन्त्रपरिमिते स्तोमभेदे "एकविंशस्तोमेन स्वर्गो यात्तस्तरेजे" यत०भा० १२,५,३,१५, स्तोमस्य स्तोमादियागेषु सामगैः क्रियमाणाः पृष्ठ्यादिसंज्ञाः स्तुतिभेदाः । एकविंशस्तोमस्य विष्टुतिप्रकारः ताण्डम० भा० भा० दर्शितो यथा "एकविंशस्तोमस्य चतस्रो विष्टुतयः । तत्र सप्तसप्तिन्यायां प्रथमां विष्टुतिं दर्शयति" भा० । "सप्तभ्यो हिङ्करोति स तिसृभिस्तिसृभिस्स एकया, सप्तभ्यो हिङ्करोति स एकया स तिसृभिः स तिसृभिः, सप्तभ्यो हिङ्करोति स तिसृभिस्स एकया स तिसृभिः, सप्तसप्तभ्येकविंशस्य विष्टुतिः" भा० । "अथास्यैव स्तोमस्य उद्यात्याख्यां द्वितीयां विष्टुतिमाह" भा० । "षड्भ्यो हिङ्करोति स तिसृभिः स एकया स एकया, सप्तभ्यो हिङ्करोति स एकया स तिसृभिः स तिसृभिः, नवभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स तिसृभिरुद्यात्येकविंशस्य विष्टुतिः" भा० । "अथास्यैव स्तोमस्य प्रतिष्टुतिर्नाम तृतीया विष्टुतिः प्रदर्श्यते" भा० । "नवभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स तिसृभिः, षड्भ्यो हिङ्करोति स एकया स तिसृभिः स एकया, सप्तभ्यो हिङ्करोति स तिसृभिः स एकया स तिसृभिः, प्रतिष्टुतिः" भा० । "त्रिद्वृदादिस्तोमचतुष्टयप्रतिरूपकत्वात् अस्याः प्रतिष्टुतिरिति संज्ञा यौगिकी अथास्यैव स्तोमस्य स्वर्म्यांख्यां चतुर्थीं विष्टुतिं दर्शयति" भा० । 'नवभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स तिसृभिः, तिसृभ्यो हिङ्करोति स पराचीभिः, नवभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स तिसृभिः स्वर्म्यभवत आदीग्ना" भा० । "उभयत आद्यान्तयोः पर्यायवोर्ङ्यवयवान्तेन लिङ्गत्वादुभवतः आदीग्ना त्रिवृतश्चान्तेन प्रजापतिसाम्ना सङ्गोत्पत्तेरादीग्ना स्वर्मी तया सर्व्यं स्वर्म्यं तस्मादस्यादस्या अयमेवा संज्ञा । अस्या अपि मध्यमपर्यायस्य अक्षुल्लत्वात्तत्वेन अक्षुल्लवाक्याभ्यामत्यत्वात्" भा० । अत्र उद्यातीयस्थे दर्शिततद्भाष्यानुसारेण एतदर्थोदर्श्यते एकैकस्य साम्नः प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनाख्याः तत्र हिङ्कारेषु त्रिभिस्त्रिभिरुद्गातृभिः कर्त्तव्यः; "साम्ने साम्ने हिंकुर्युरिति" श्रुतेस्ततोक्तेः । तथा च सप्तभ्य इति चतुर्थी सप्त स्तोमाद्यं हिङ्कुर्युरित्यर्थः । तत्र एकैकं स्तुतं त्रिरावर्त्तनीयम् । तत्राद्यास्तौ आद्याया द्वितीयायाश्च त्रिरभ्यासः । द्वितीयाद्यास्तौ द्वितीयाया अन्त्यायाश्च त्रिरभ्यासः । तृतीयाद्यास्तौ

आद्यान्त्ययोस्त्रिरभ्यासः। एवं सप्तसप्तिनी नाम विष्टुतिः। पर्य्यायत्रयेऽपि सप्तर्चैः स्तवनात् तथात्वम् सप्त सप्त ऋचः प्रतिपर्य्यायं परिमाणमस्या "सप्तसप्तिनि" वार्त्ति० ङीनि ङीप्। सप्तसप्तिनीति व्युत्पत्तेरन्वर्थसंज्ञा। पञ्चर्चश्चोगातुं छिङुर्युरित्यर्थः। तत्र पञ्चानां मध्ये आद्याद्यृक्तौ आद्याया स्त्रिराहृत्ति। द्वितीयाद्यृक्तौ सप्तर्चोगातु छिङुर्युः तत्र च मध्यमान्त्ययोस्त्रिराहृत्ति। तृतीयाद्यृक्तौ नवर्चोगातुं छिङुर्युः तत्र च सर्वासां त्रिराहृत्ति इयमुत्पत्तेरुक्तिः स्तोमस्य विष्टुतिः। पञ्चर्चसप्तर्चनवर्चानां यथोत्तरमृक्संख्याधिक्येन उद्गातृणामधिकारः स्यात्। नवर्चो गातुं छिङुर्युः तत्राद्याद्यृक्तौ सर्वासां त्रिरभ्यासः। ततः पञ्चर्चो गातुम् छिङुर्युः। तत्र द्वितीयाया त्रिराहृत्ति। ततः सप्तर्चोगातुं छिङुर्युः तत्र तृतीयाद्यृक्तौ तासु आद्यान्त्ययोस्त्रिरभ्यासः। इयं पञ्चतितिनाम तस्य स्तोमस्य विष्टुतिः। नवर्चोगातुं छिङुर्युः आद्याद्यृक्तौ तासु सर्वासां त्रिराभ्यासः। ततश्च ऋक्चोगातुं छिङुर्युः। द्वितीयाद्यृक्तौ तासां कस्यापि न त्रिराहृत्तिः। ततो नवर्चो गातुं छिङुर्युः तत्र तृतीयाद्यृक्तौ सर्वासां त्रिराहृत्तिः। इयमस्य स्तोमस्य क्षुल्लो नाम विष्टुतिः तत्संज्ञानिमित्तं भाष्ये उक्तम्।

एकविध त्रि० एका विधा प्रकारोऽस्य। एकप्रकारे "मानुष्यश्चैकविधः समासतो भौतिकः सर्ग" सां० का०।

एकविलोचन त्रि० एकं विलोचनं यस्य ब० ङीप्। २तत्प्रधानदेवभेदे च स च देव दक्षस्य० कूर्मविभागे पश्चिमोत्तरस्थाश्रुक्। पश्चिमोत्तरस्थामिमुपक्रम्य एकविलोचनमूर्त्तिकदीर्घपीवास्रक्त्रेयाच"। ३कवरे पु० तस्य वामनेत्रस्य स्फोटनात् तथात्वम्। एकपिङ्गश्चन्दे विष्टुतिः। ४काके पुंस्त्री स्त्रियां जातित्वात् ङीष्। तस्योभयगोलकस्त्वेऽपि एकमेव नेत्रेन्द्रियमुभयगोलके सञ्चरतीति तस्य तथात्वम्। एकलोचनादयोऽत्र। कर्म्म०। ५एकस्मिन् लोचने न० बौह्वेभेदैर्हि। एकमेव लोचनं नासास्थिभेदेन व्यवधानाद्द्वित्वेन प्रतीयते इत्यलीकियते तदेतन्नातत्त्वज्ञाप्य गौत० सू० वृत्तौ० खण्डितं यथा

"नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात्" सू० एकस्मिन् चक्षुर्मध्ये नासास्थिव्यवहितं तस्मान्नो ग्रहणमतो द्वित्वाभिमानं प्रयोजयत; मध्यव्यवहितस्य दीर्घत्वेव" इ०।"एकविनाशे द्वितीयाविनाशाच्चैकत्वम्" सू० "एकस्मिन्नुपहते लोपाते वा चक्षुषि द्वितीयमवस्थितं चक्षुर्विषयमुपलब्धुं नालम् तस्मादेकस्य व्यवधानानुपपत्तिः" इ०।"अवयवनाशेऽप्यवयव्युपलब्धेरहेतु" सू० "एकस्मिन्नाशे द्वितीयाविनाशादित्यहेतु; कस्मात् एतस्मिन्हि कारणे कारणान्तरेषु विद्यमानेषु कार्य्यद्रव्यमवतिष्ठमानं दृश्यते एव इत्यर्थः" इ०। "दृष्टान्तविरोधादप्रतिषेधः" सू०"न कारणद्रव्यस्य विभागे कार्य्यद्रव्यमवतिष्ठते नित्यत्वप्रसङ्गात् बहुष्ववयविषु यस्य कारणानि विभक्तानि तस्य विनाशः। येषां कारणान्यविभक्तानि तान्यवतिष्ठते अथवा दृश्यमानार्थविरोधो दृष्टान्तविरोधः स्यात्तस्य हि शिरःकपाले द्वावयवौ नासास्थिव्यवहितौ चक्षुषः स्थाने भेदेन गृह्येते न चैतदेकस्मिन्नासास्थिव्यवहिते सम्भवति। अथ चैकविनाशस्यानियमात् द्वावप्यवयवौ तौ च पृथगावरणोपघातौ अनुमीयेते विभिन्नाविति अवपीडनाच्चैकस्य चक्षुषो रश्मिविषयसन्निकर्षस्य भेदाद् दृश्यभेद एव गृह्यते तच्चैकत्वे विरुद्धयते अवपीडननिवृत्तौ चाभिन्नप्रतिसन्धानमिति तस्मादेकस्य व्यवधानानुपपत्ति।"अवपीडनं चिपिटीकरणम्।

एकवीर पु० कर्म्म० स० एकश्चन्द्रस्य पूर्वनि०। १श्रेष्ठवीरे "यस्त्वेकवीरोऽतिरथो विजिग्ये" भाग० १०,१,४०। "गोप्रैकवीरो नरदेवनाथः" ४,१६,१८। २मकारवीरे "मादकोऽस्मुष्णकटुकक्षोदशादिनायकः। चटुलीकटिपृष्ठादिखलपल्लादिघातकः" इति वैद्यकोक्तगुणके ४वृक्षभेदे वीरैक इत्यपि साधुः वस्तुत एकशब्दस्य संख्यापरत्वे वीरैकः श्रेष्ठपरत्वे एकवीर इति व्यवस्था।

एकवीराकल्प पु० एकः प्रधानं वीरः कुलाचारी यस्याः ताद्दश्याः तारादिविद्यायाः कल्पः उपासनाशास्त्रं यस्मिन्। तन्त्रभेदे यत्र वीराचारसेव्यायाः देव्या रहस्यादिकथनं तस्मिन् तन्त्रशास्त्रभेदे।

एकवृक्ष पु० एकोवृक्षोयत्र। "यतः क्रोशान्तरे यत्र न वृक्षान्तरमीक्ष्यते। एकवृक्षः स विज्ञेयोदेशः सिद्धिप्रदायकः" इत्यागमोक्ते १देशभेदे। कर्म्म०।२एकस्मिन् वृक्षे "एकवृक्षो यथा पुरुष" गीता अवतीति" शारदतिलकटीका।

एकवृत् स्त्री एकधैव वर्त्तते अजर्भूतग्रहार्थे इत—भावे क्विप्। १एकधावर्त्तने एकावृत्तौ "एकवृत्करणम्" काशा०८,२, १८। कर्त्तरि क्विप्। २एकधा वर्त्तमाने। एकधा वर्त्ततेऽत्र आधारे क्विप्। ३स्वर्गलोके। "एकोत्तरानुत्तोत्तेकवृद्धे स्वर्गो लोकएकधैवैनं स्वर्गं लोकं गमयति" शत० ब्रा० १२,२,१,५।

एकवृन्द पु० "वृक्षोद्भवोत्थ व्यवयुःसदाङ्गः कण्डूस्त्रिलोऽपाक्य मृदुर्गुरुश्च। नाम्नैकवृन्दः परिकल्पितोऽसौ" इति सु-

स्तोक्ते १रोगभेदे स च कण्ठगतो मुखरोगभेदः। "मुख-रोगाः पञ्चषष्टिः" इत्युपक्रम्य तेषां मध्ये सप्तदश कण्ठमूले इत्युक्त्वा "अथ कण्ठगतास्तु रोहिणयः पञ्च कण्ठशालूक-मधिजिह्वो बलयोबलास एकद्वन्दोद्वन्दः शतघ्नीगिलायुर्ग-लविद्रधिर्गलौघःस्वरघ्नो मांसतानोविदारी चेति" इति कण्ठ गतान् विभज्य तेषां लक्षणाभिधाने एतल्लक्षणस्योक्तस्य मुखरोगत्वम्। "एकद्वन्द्वं तु विज्ञाय विधिं शोणितमाचरेत्" सुश्रु०। कर्म्म०। एकस्मिन् द्वन्द्वे २एकराशौ च।

एकदृष्य पु० कर्म्म०। १एकस्मिन् दृष्ये तस्य स्वामिनोऽभिहृदा-यकत्वम् यथा "एकोदृष्यस्वयोगातः सप्राप्ता नवदन्तिनः। सिंहघ्रसुस्तिका नावः कथिताः स्वामिघातकाः" पुरा० वङ्ग०। २एकदृष्ययुक्ते त्रि०। "एकदृष्य इन्द्रसखा जिगी-वान्" ऋग्० ४,२२,६ "इमं विश्वामेकदृष्यं क्रणुध्वम्" ऋग्० ४,२२,१।

एकवेणि(णी) स्त्री एकीभूता संस्काराभावेन जटावत् संहृतिं प्राप्ता वेणी। प्रोषितभर्तृकायाः स्त्रियः केशसंस्कारराहित्येन एकीभूतसंहतिप्राप्तायां जटाकारायां वेण्याम्। "गण्डा-भोगात् पतनविषयामेकवेणीं करेण" मेघ०। "एकवेणीम् एकीभूतां वेणीम्" मल्लि०। वेणीनां संस्काराभावेन एकीभूतत्वेन गुम्फितत्वम् "प्रोषितेषु पतिषु द्यूयेषि-तासु गुम्फना; शिरसि वेणयोऽभवन्" इति माघे वर्णितम्। "ततः प्रविश्यैकवेणीधरा शकुन्तला" शकु०।

एकशत न० एकाधिकं शतम् शा०त०। १एकाधिकशते एक-स्मिते शतम्। २एकस्मिते शते शततत्संख्यान्विते च। तत्र संख्येये "विश्वामित्रस्य चैवासन् पुत्रा एकशतं नव!" भाग० ९,१६,१७। संख्यायाम् "प्रमाप्य वैद्यं दत्तस्य दद्याच्चैकशतं गवाम्" मनुः ततः पूरणे डट् तमट् च। एकशततमः ततपू रणे त्रि०स्त्रियां ङीप्। एकशत परिमाणमेषाम् कन्। एकशतक ततपरिमाणे त्रि०। अवयवे कन्। एकशतक ततसंख्यायां न०। प्रकारे धाच्। एकशतधा एकशत-प्रकारे अव्य० वीप्सार्थे कारकाद्विभक्तेः शस्। एकशतस् एकशतमेकशतमित्यादार्थे अव्य०।

एकशफ पु० एकं शफं खुरो यस्य। एकखुरयुक्ते खरादौ ते च "खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा। एते चैक-शफाः प्रोक्ताः शृणु पञ्चनखान् पशून्" भा०३,१०,२२ उक्ताः। "अजाविकं चैकशफं न जातु विषमं भजेत्" मनुः अविकेयमध्ये "मद्यं नीलीञ्च लाक्षाञ्च सर्वांश्चैकशफां-स्तथा" मनुः अभक्ष्यमध्ये "अनिर्दिष्टांश्चैकशफान् ठिट्टि-भञ्च विवर्जयेत्" मनुः "कार्पासकीटजोर्णानां द्विशफैकशफस्य च" "एकशफो वा एष पशुर्यदश्वः" शत०ब्रा०७,५,२, २२। "इमं वा छिंसीरेकशफं पशुं कनिक्रदं वाजिनं वाजिनेषु" यजु०१३,४८ "एकविंशत्यास्तुवतैकशफाः पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत्" यजु० १४,१०। "एकविंशत्यास्तुवतैभिः। दशकृत्व्या अङ्गुल्यः दश पादाः आत्मैकविंशस्तैतदस्तुवतैकशफाः पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत्" शत०ब्रा० ८,४,१२। एकशफमांसगुणाः "हृद्यं मांसं गौरभ्रं पित्तश्लेष्मावहं गुरु। मेद्यं पुष्ट्योजवं हृद्यमौरभ्रसदृशं गुणैः। औरभ्रवत्तु खरजं मांसमेकशफोद्भवम्" सुश्रुते उक्ताः।

एकशाख त्रि० एका तुल्या शाखा वेदशाखा यस्य। १तुल्य-शाखे "एकशाखोद्भवोदर्को वल्लीतश्चोपनायितः" स्मृतिः। एका शाखा यस्य। एकशाखके २वृक्षे च। ततः गहादि० भवादौ क। एकशाखीय तद्भवादौ त्रि०।

एकशाला स्त्री कर्म०। एकस्यां शालायाम्। सैव ठन्। एक-शालिक वाठक् ऐकशालिक ततसदृशे त्रि०।

एकशितिपाद् पु० एकः शितिः कृष्णः पादोऽस्य। अश्वभेदे। स च अश्वमेधे वरुणदैवत्यः पशुः। "वारुणः कृष्णः एक-शितिपात्मेधा" यजु० २९,५८। अस्य शुक्लारोह्या-दि०आद्युदात्तता। तदृगये कृष्णलपाठात् त्रि०अल्लोपः।

एकशुक्ल त्रि० एकं शुक्लं मङ्गल्यं यस्य। (एकशुक्ले) ओषधिभेदे "प्रक्षालतोऽस्मिन्नीरेकशुक्लाः प्रतन्वतीरोष-धीरावदामि" ऋग्० ८,७,४,

एकशृङ्ग पु० एकमेकत्वं शृङ्गं प्रधान्यमस्य। एकत्वसंख्याके १विष्णौ त्रिका०। २पितृगणभेदे। "पितृणान्तु गणान् वि-द्धि शृणु मे पुरुषर्षभ!। मूर्त्तिमन्तो वै चत्वारस्त्रयश्चा-व्यक्तरीरिणः। वैराजास्तु महाभागा अग्निष्वात्ताश्च भारत!। गार्हपत्या नाकचराः पितरोलोकविश्रुताः। सोमपा एकशृङ्गास्तु चतुर्वेदकलाश्रयाः। ऋते चतुर्षु वर्णेषु पूज्यन्ते पितरो नृप!। एतेषाध्यायितैः पूर्व्वं सोमचा-ध्यायते पुनः" भा०स० ११अ०। ३शृङ्गदेशमधिकृत्य कृतो ग्रन्थः। शृङ्गशब्दस्य प्राधान्यवाचकतया अखाङ्गवाचित्वात् न ङीप्। "तवैव वंशे वा दृप्ता शुक्लस्य महिषी प्रिया। एकशृङ्गेति विख्याता साध्वीनां कीर्त्तिवर्द्धिनी" हरिवं० ११८अ०। एकं शृङ्गं शिखरमस्य। ४एकशिखरे पर्वते पु०। एकं शृङ्गमस्य। ५एकशृङ्गयुक्ते पशौ पुंस्त्रीलिङ्गयोः स्त्रियां ङीप्।

एकशेष पु० एकः शेषोमूलमस्य ।(एकशिकड़युक्त) एकमूले वृक्षभेदे

एकशेष पु० एकः शिष्यतेऽन्योलुप्यते यत्र शिष–आधारे घञ् । "सरूपाणामेकशेष एकविभक्तौ" इत्यादिना पा० उक्ते वृत्तिभेदे । अस्मे समासत्वतदभावौ मतभेदेन सरलायामस्माभिर्दर्शितौ यथा सरूपाणां समानार्थानां समानानुपूर्वीकाणां च मध्ये एक एव शिष्यमाणस्तत्तत्सरूपाय व्यक्तिबोधकः" तत्र अपरांशोलुप्यते इति बोध्यम् । अयञ्चैकशेषः "प्रत्ययलक्षणनिषेधः" इति मते व्यक्तिभेदापेक्षया ह्रस्वप्राप्तौ तदपवादकः । एष च सुबुत्पत्तेः पूर्व्वमेवोत्पद्यतेऽतः पदनिमित्तकह्रस्वबाधकस्त्येवेति । सुबुत्पत्त्यनन्तरन्तुत्पद्यत इत्यन्ये । तत्र पदनिमित्तकत्वाभावे समासत्वं नास्तीत्यतः तत्तद्धितसमासैकशेषेत्यादिवृत्तिभेदगणने पृथग्वृत्तिर्दृश्यते च समासत्वाभावेन प्रत्ययानावित्यत्व न समासान्त इति एकपदः । अस्य पदनिमित्तकत्वेऽपि गोवत्सीयन्यायेन वृत्तिभेदगणने पृथग्ग्रहणं समासान्ताभावश्च तत्तत्सूत्रे एकशेषभिन्नत्वेन निवेशनादिति पल्लवितम् । "विरूपाणामपि समानार्थानामिति" वार्त्ति० घटश्च कलशश्च घटौ कलशौ वा । तथा च समानानुपूर्वीकाणां भिन्नानुपूर्वीकाणाञ्च समानार्थानामेकशेषः । स प्रकारान्तरेण द्विविधः समानार्थकानां भिन्नार्थकानाञ्चेति भेदात् । तत्र घटौ इत्यादौ समानार्थकानामेकशेषः । भिन्नार्थैकशेषः यथा पितरौ मातरौ भ्रातरावित्यादि । एक: प्रधानं शेषोऽन्यः । २एकान्ते पु० बकु० । अतिशयिते त्रि० । "तत्तद्धितसमासैकशेषेषु । नाद्यन्तधातवः तत्तयः पञ्च" सि० कौ० ।

एकश्रुति त्रि० एका श्रुतिर्यस्य । १उदात्तानुदात्तस्वरितानामविभागेनैकस्वरस्यवस्थायोच्चारिते यज्ञभेदे कर्म्म० । २तथैकस्वरश्रुतौ स्त्री । कुलकुलेकश्रुतिर्भवतीति पा० उक्तं यथा "एकश्रुति दूरात् सम्बुद्धौ" पा० दूरात् सम्बुद्धौ वाक्यमेकश्रुति स्यात् । उदात्ताद्यपवादः । "यज्ञकर्मण्यजपन्यूङ्खसामसु" पा० यज्ञक्रियायाञ्च मन्त्र एकश्रुतिः स्यात् जपादीन् वर्ज्जयित्वा । यज्ञेत्युक्तेः स्वाध्यायकाले त्रयोऽक्षराः प्रयोक्तव्याः । जपोनाम उपांशुप्रयोगः । यथा जले निमग्नस्य । न्यूङ्खनाम नोदृच ओकारः सामानि गीतयः । एषु यथोक्ताक्षरा नैकश्रुतिरिति बोध्यम् । "उञ्छैखरां वा वषट्कारः" पा० यज्ञकर्म्मणि वषट्शब्द उदात्तो वा स्यात् पक्षे एकश्रुतिः । "विभाषा छन्दसि" पा० व्यवस्थाविकल्पः संहितायां त्रयोऽक्षराः ब्राह्मणे तु एकश्रुतिर्बह्वृचानाम् अन्येषान्तु यथासम्प्रदायात् व्यवस्था । अस्यापवादः । "न सुब्रह्मण्यायां स्वरितस्य तूदात्तः" पा० सुब्रह्मण्याख्ये निगदे "यज्ञ कर्मणीति" "विभाषा छन्दसीति" प्राप्ता एकश्रुतिर्न स्यात् स्वरितस्योदात्तश्च स्यात् । "स्वरितात् संहितायामनुदात्तानाम्" पा० स्वरितात् परेषामनुदात्तानामेकश्रुतिः स्यात् एकश्रुतेरेव प्रचयनाम" सि० कौ० । एकश्रुतेर्भावः ष्यञ् ऐकश्रुत्य "उदात्तानुदात्तस्वरितानां परःसन्निकर्ष ऐकश्रुत्यम्" आश्व० श्रौ० १,२,६ उक्ते उच्चारणभेदे "उदात्तानुदात्तस्वरितानामभिव्यक्तका ये प्रयत्ना आयामविस्रम्भाक्षेपाक्षेपाणामन्यतमस्यैकस्यैवात्यन्तसन्निकर्षेणासजातीयप्रयत्नाव्यवधानेन यदुच्चारणं तदैकश्रुत्यम्" नारा० । क्वचिच्चैव उक्तं "तं एकश्रुतिसन्ततमनुब्रूयात्" आश्व० श्रौ० १,२,८ । एका श्रुतिः कर्णो यत्र । क्षेत्रव्यवहारे भुजकोटिवर्गयोगस्य मूलमितकर्णयुक्ते त्रिकोणादौ २क्षेत्रे ४एककर्णयुक्ते त्रि० । एका श्रुतिर्वेदः कर्म्म० । एकस्मिन् पूर्ब्बवाक्ये । "उभयोरेकश्रुतिमूलकत्वादिति" स्मृतिनिबन्धेषु भूरिप्रयोगः ।

एकषष्ट त्रि० एकषष्ट्याः पूरणः डट् संख्यापूर्ब्बकत्वात् डटि न तमट् । एकषष्टिपूरणे यत्संख्यया एकषष्टिः पूर्य्यते तत्संख्यान्विते स्त्रियां ङीप् । एकषष्ट्या युतं यतादि ट्ठञ् ष० । २एकषष्ट्या युते यते सङ्घे च तेन क्रीतं कविकल्पद्रुमे उक्तम् "इति स्फीतः सम्प्रदायस्त्या षट्कोनषष्टया" । पा० मते तु नास्ति डट् तेन दशान्तात् यदन्तात् विंशतेश्च तदन्तिमधिकमित्यर्थे डटोविधानादिति भेदः । तेन तन्मते एकषष्टिरूपसंख्याधिकतया अर्थ० अच् । तेन तद्रूपसिद्धिः स्वरे भेदः । इदन्त्वबधेयम् येषाम् अच्प्रत्ययेन न रूपसिद्धिस्तेषामेव स्वतन्त्रता दशान्तस्य यदन्तस्य विंशतेश्च पक्षणं कृतम् अष्टिसप्तत्यशीतिनवतीनां तु अच्प्रत्ययेनैव तद्रूपसिद्धेर्न तेषां पक्षणमिति । एवमेकसप्तत्यादयोऽपि तत्तत्संख्यापूरणे त्रि० तत्तत्संख्याधिके यते सङ्घे च न० । एकषष्ट्यादि परमाणमेषां ड । एकषष्ट्येकसप्तत्यादि तत्तत्संख्यान्विते त्रि० एकषष्ट्यादि अधिकसंख्यिते यते सङ्घे वा कतृ एकषष्टिकैकसप्ततिकादि-तत्तत्संख्याधिके. यते सङ्घे च । अवयवे कतृ । एकषष्टिकैकसप्ततिकादयस्तत्तत्संख्यावयवे न० ।

एकसभ त्रि० एका सभा गोष्ठी सदादयो यत्र । जगद्दाल्लैकगोष्ठीयुक्ते "सभसि जगदसि पूर्ब्बसभि प्रलम्बसङ्केसभसभसि"

भत० भा० १४,६,२,६ । "याज्ञवल्क्या सभा जगदात्मिका सा त्वदात्मिकैवेति त्वमेकसभमसीति" भा० ।

एकसर्ग पु० एक एकविषयः सर्गः चित्तवृत्तिः यत्र । १एकार्थे एकतानेऽसमाधिसक्तचित्ते अमरः । कर्म० । २एकसृष्टौ पु०

एकसूत्र पु० एकं सूत्रं वाटनसं धनं यत्र । डमरूरूपे वाद्ये शब्दरत्ना० । तस्य एकसूत्रवेष्टनेन वादनात् तथात्वम् ।

एकस्थ त्रि० एकस्मिन् तिष्ठति स्था-क ७त० । एकत्वस्थिते "एकस्थसौन्दर्यदिदृक्षयेव" कुमा० । "तान्येकस्थानि सर्वाणि ततस्त्वं प्रतिपत्स्यसे" भा० व० २७ अ० । 'फल्गै-कस्थं कचिदपि न ते चण्डि ! साहश्यमस्ति' मेघ० । स्था-क ७त० । एकस्थितादयोऽप्यत्र त्रि० ।

एकहंस म० एकः श्रेष्ठो हंसोऽत्र । सरोभेदरूपे तीर्थभेदे "एकहंसे नरः स्नात्वा गोसहस्रफलं लभेत् । ततश्चौचं समासाद्य तीर्थसेवी नराधिप ! । पुण्डरीकमवाप्नोति ततः शौचो भवेच्च सः;" भा० व० ८२ अ० । "हन्ति गच्छति जाग्रदाद्यवस्था इहलोकपरलोकौ वा हंसः कर्म० । २जीवे । "शुक्रमादाय पुनरैति स्थानं हिरण्मयः पौरुष एकहंसः" "स ईयते व्यक्तो यत्र कामं हिरण्मयः पौरुष एक हंसः" शत० ब्रा० १४,७,१,१२,१३ । "शुक्रं शुद्धं ज्योतिष्टोमादिमात्ररूपं गृहीत्वा पुनः स्वप्नेतुकर्मोपरमानन्तरं जाग्रल्लोकेतुकर्मणा जागरितं स्थानमागच्छति हिरण्मयश्चैतन्यज्योतिःस्वभावः पौरुषः पुरुषएव स्वार्थे अण् एकहंसः एकश्चासौ हंसश्चेत्येकहंसः एक एव जाग्रत्स्वप्नाविहलोकपरलोकौ च हन्ति गच्छति क्षिणोति वा एकहंसः" भा० जीवस्योपाधिरहितजाग्रदाद्यवस्थाभिर्न किञ्चिद्विहितत्वमिति द्योतनार्थमेकत्वविशेषणम् ।

एकहायनी स्त्री एकोहायनोवयोमानं यस्याः ङीप् । एकवर्षवयस्कायां स्त्रीगव्यादौ । एकहायन एकवर्षवयस्के पशुमात्रे त्रि० । "अजमेषावनड्वाहं खरं स्त्रैवैकहायनम्" मनुः । २एकवर्षोत्पन्ने धान्यादौ त्रि० तत्र वयोवाचित्वाभावेन स्त्रियां ङीबिति भेदः एकहायना इत्येव

एका स्त्री सर्वत्र अभिन्नत्वेन स्थितायां १दुर्गायाम् "एका सा तु पृथक्त्वेन विना सर्वत्र विश्रुता । यथा तु व्यज्यते यत्नैर्विचित्रैः स्फटिकोमणिः । तथा गुणवयाहेवी नानाभावेषु वर्णते" देवीपु० ४५ अ० । २हितीयरहितस्त्रियाम् । "एकैवाहं जगत्यत्र का द्वितीया ममापरा:" देवीमा० । ३एकत्वान्वितस्त्रियाञ्च "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः" इति श्रुतिः "एका सुमित्रा सह लक्ष्मणेनेति" भट्टि । पुत्रयोरेकत्वोपपत्तिकथनार्थमेकेति विशेषणम् । अन्ये तु एष विष्णौ कायति अभिरमते कै-क अलुक् स० । विष्णुरतेत्यर्थमाश्रित्य ४तदर्थे त्रि० ।

एकाकिन् त्रि० एक+असहाये पक्षे आकिनि । सजातीयसहचररहिते "एकाकी हयमारुह्य जगाम गहनं वनम्" देवीभा० । अत्र हयस्य विजातीयत्वात् तत्सहायत्वेऽपि न क्षतिः । असहायत्वञ्च एकजातीयक्रियान्तरे अन्यसहायरहितत्वम् तेन हयस्य स्वगतिक्रियां प्रति सहचरत्वाभावात् नानुपपत्तिः । तत्तान्यत्वं प्रकृत्यर्थसंख्यान्वितपदार्थभिन्नत्वम् तेन "एकाकिनोऽपि पतितः पौरुषेयकला इव" माघे प्रत्येकमेकत्वसंख्यान्वितानां रामलक्ष्मणोडुपानामन्यासहायकत्वात् एकाकिन इति प्रयोगः । "एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनः । एकाकी चिन्तयानोहि परं श्रेयोऽधिगच्छति" मनुः । "एकाकिना चालयिके" मनुः । स्त्रियां ङीप् । "एकाकिन्यपि यामि सत्वरमतः स्रोतस्यमालावलम्" सा० द० ।

एकाक्ष पु० एकमक्षि यस्य बहु० समा० । १काके । २काणे त्रि० । स्त्रियां ङीप् । काकस्य यथा तथात्वं तथोक्तं रामा० अ० का० १०५ अ० यथा

"एवमुक्तस्तु रामेण संप्रधार्य्य स वायसः । अध्यगच्छद्दुर्ह्रदयोरन्तरं ज्ञानमेकस्य पण्डितः । सोऽभ्येत्योवाच वै काको नेत्रमेकं त्वजाम्यहम् । एकनेत्रोऽपि जीवेयं त्वत्प्रसादाच्चराधिप ! रामानुज्ञातमेकं तत् (दृष्टीकाक्षम्) काकनेत्रमथात्यजत्" । तज्जातीयत्वादन्येषामपि तथात्वम् । एकनेत्रादयोऽप्युभयत्र । स्त्रियामुभयार्थे टाप् ।

एकाक्षर न० एकमद्वितीयमक्षरम् । १एकमात्रवर्णे "एकाक्षरद्वयक्षराद्येव प्रथमं वदन् कुमारो वदति" शत० ब्रा० ११,११६,४ । २एकाक्षरवर्णे "एकाक्षरात् क्षतोजातेः सम्प्रत्याङ्च न तौ स्मृतौ" व्याक० ओमित्येकाक्षरब्रह्मोपासीत" छा० उ० । "एकाक्षरं परं ब्रह्म इति" मनुः । "एकाक्षरम् ओङ्कारः" कुल्लू० । ओङ्कारस्य त्रिवर्णत्वेऽपि एकस्वरवर्णत्वात् एकाक्षरत्वम् । अकाराद्युत्तरौ द्वौ स्वरवर्णावेवाक्षरत्वव्यवहारात् स्वरवर्णमहणार्थं केवलव्यञ्जनवर्णस्य प्राक् अनुच्चार्य्यत्वात् तस्य सर्वत्र उच्चारणे स्वरस्याभावात् अक्षरत्वम् । एकमक्षरं यत्र । ३एकाक्षरयुते त्रि० स्त्रियां गौरा० ङीष् । "गिरौ मे काञ्चिका पातु स्त्रीङ्कारैकाक्षरी परा" श्यामार्कवचम् ।

एकागार न० एकमेकायमगारम् । हृतैयजनानधिष्ठित गृहे तत्प्रयोजनमस्य ठञ् ऐकागारिक चौरे त्रि० स्त्रियां ङीप् "कैनचित्तु दुस्तरतैकागारिकेण" दशकुमा० । चौरादन्यत्र दुष्टत्वात् क । एकागारीय तुल्यादौ त्रि० ।

एकाग्र त्रि० एकमग्रं विषयप्रवणता यस्य । १विषयान्तरव्याहृत्तैकमालविषयकचित्तवृत्तिके २चित्तेऽपरक्षितस्थाने च । "मनुमेकाग्यमाधीनमभिगम्य मनर्षयः" मनुः । स्वार्थे अण् । ऐकाग्य अत्रार्थे त्रि० । तस्य भावः ष्यञ् ऐकाग्य्य तद्भावे न० "मनसश्चेन्द्रियाणाञ्चैकाग्य्य परमं तपः" भा० १०२५ अ० । "तद्योतिश्चरणैकाग्य्या संसदत्सुसखो बभौ" रघु० । तल् एकाग्यता स्त्री, त्व एकाग्य्य न० तत्रार्थे ।

एकाग्यता च चित्तस्य धर्म्मविशेषः विषयान्तरावलम्बनशून्यसंसर्गशून्यः । एकविषयकधारावाहिकवृत्तिरूपः स च त्रिगुणात्मकस्य चित्तस्य सत्वगुणोद्रेके रजोगुणतमविक्षेपाभावात् तमोगुणक्षततन्नाद्याभावाच्च उदेति । तत्र बाह्याभ्यन्तरकारणान्युक्तानि" पात० सू० भाष्यविवरणेषु यथा "यस्य चित्तस्यावस्थितस्योदं बाह्येण परिकर्म निर्दिश्यते, तत्कथम् ? भा० ।

"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्" सू० ।

"तत्र सर्व्वप्राणिषु सुखसम्भोगापन्नेषु मैत्रीं भावयेत् दुःखितेषु करुणाम्, पुण्यात्मकेषु मुदिताम्, अपुण्यशीलेषूपेक्षाम्। एवमस्य भावयतः शुक्लो धर्म्म उपजायते ततश्चित्तं प्रसीदति प्रसन्नमेकाग्र्यं स्थितिपदं लभते" भा० । "अपरिकर्म्मितमनसोऽसुखादिभितः समाधितदुपायसम्पत्त्यभावात् चित्तप्रसादनोपायानसुखादिविरोधिनः प्रतिपादयितुमुपक्रमते-यस्य-चित्तस्यावस्थितस्येदमिति । मैत्रीकरुणेत्यादि प्रसादनानम् । सुखितेषु मैत्रीं सौहार्द्दं भावयत ईर्षाकालुष्यं निवर्त्तते चित्तस्य । दुःखितेषु च करुणामालम्बनीय परस्मिन् दुःखप्रहाणेच्छां भावयतः परापकारचिकीर्षाकालुष्यं चेतसोनिवर्त्तते । पुण्यशीलेषु प्राणिषु मुदितां पुण्यं भावयतः असूयाकालुष्यं चेतसो निवर्त्तते । अपुण्यशीलेषु चोपेक्षां माध्यस्थ्यं भावयतोऽमर्षकालुष्यं चेतसोनिवर्त्तते । ततश्चास्य राजसतामसधर्म्मनिवृत्तौ सात्विक शुक्लोधर्म्म उपजायते । सत्वोत्कर्षस्वभावः सम्भवति । वृत्तिनिरोधपक्षे तस्य प्रसादस्वाभाव्याच्चित्तं प्रसीदति प्रसन्नञ्च वस्त्वाकाशेभ्य उपादेभ्यः एकाग्र्यं स्थितिपदं लभते । अस्तां पुनर्मैत्र्यादिभावनातां न ते उपायाः स्थित्यै कल्पन्ते-तानिदानीं स्थित्युपायानाह" वाचस्पतिविवरणम् ।

"प्रच्छर्द्दनविधारणाभ्यां वा प्राणस्य" सू० ।

"कोष्ठ्यस्य वायोर्नासिकापुटाभ्यां प्रयत्नविशेषात् वमनं प्रच्छर्द्दनं, विधारणं प्राणायामः; ताभ्यां वा मनसः स्थितिं संप्रसादयेत्" भा० ।

"वाशब्दो वक्ष्यमाणोपायान्तरापेक्षो विकल्पार्थो न, मैत्र्यादिभावनापेक्षया तया सह समुच्चयात् । प्रच्छर्द्दनं विहृणोति-कोष्ठ्यस्येति । प्रयत्नविशेषात् योगशास्त्रविहितात् येन कोष्ठ्योवायुर्नासिकापुटाभ्यां यत्नेरेच्यते । विधारणं विहृणोति विधारणं प्राणायामः रेचितस्य कोष्ठ्यस्य वायोर्यद्यामो बहिरेव स्यात्मनं न तु सहसाप्रवेशेन तदेताभ्यां प्रच्छर्द्दनविधारणाभ्यां वायोर्बहूद्गतशरीरस्य मनः स्थितिपदं लभते । अत्र चोत्तरस्तत्रगतात् स्थितिनिबन्धनीतिपदात् स्थितिप्रकरणमाक्षिप्य सम्बन्धादेरित्यर्थप्राप्तेन सम्बन्धनीय;" विव० । 'स्थित्युपायान्तरमाह" भा० "विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनि बन्धनी" सू० "नासिकाग्रे धारयतोऽस्य या दिव्यगन्धसंवित्सा गन्धप्रवृत्तिः, जिह्वाग्रे रससंवित्, तालुनि रूपसंवित्, जिह्वामध्ये स्पर्शसंवित्, जिह्वामूले शब्दसंवित्, इत्येताः प्रवृत्तय उत्पन्नाश्चित्तं स्थितौ निबध्नन्ति संशयं विधमन्ति समाधिप्रज्ञायाञ्च द्वारीभवन्तीति" भा० ।

"व्याचष्टे-नासिकाग्रे धारयत इति । धारणाध्यानसमाधीन् कुर्वतस्तत्त्वज्ञस्य या दिव्यगन्धसंवित् सा साक्षात्कारः एवमन्यास्वपि प्रवृत्तिषु योज्यम् । एतज्ज्ञानात् प्रत्येतव्यं नोपपत्तितः" विवरणम् ।

तत्र सामान्यकारणञ्च यौगमेव तत्रोक्तम् "यौगात् खल्वेव योगानुष्ठानपरैरसंसर्गः" सू० "सत्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च" सू० । "शुचे: सत्वशुद्धिसतः सौमनस्यं ततः ऐकाग्र्यं ततः इन्द्रियजयस्ततश्चात्मदर्शनयोग्यत्वं बुद्धिसत्वस्य भवतीति एतत् यौगस्यैवादधिगम्यते" भा० । तत्राद्यं सूत्रं बाह्ययौगसूचकं द्वितीयन्तु आन्तरयौगसूचकम् "चित्तमलानां क्षालने चित्तमलं भवति बैमल्यात् सौमनस्यं खल्वता खल्वत्सादैकाग्र्यं ततो मनोवश्यादिन्द्रियाणां जयस्ततश्चात्मदर्शनयोग्यं भवतीति क्रमेण आन्तरयोगस्य फलसूत्रम् । एतच्च विवरणे स्थितम् एकाग्रतायां आविर्भावे यथा समाधिलाभस्तथा तत्रैवोक्तम् "सर्वार्थतैकाग्र्ययोः क्षयोदयौ चित्तस्य समाधिपरिणामः"

सू० "सर्व्वार्थता चित्तधर्म्मः एकाग्रता च चित्तधर्म्म सर्व्वार्थतायाः क्षयस्तिरोभाव इत्यर्थः एकाग्रतायाः उदय आविर्भाव इत्यर्थः तयोर्धर्म्मित्वेनानुगत चित्तं, तदिदं चित्तसपर्य्योपजनयो: खात्मभूतयोर्धर्म्मयोरनुगतं समाधीयते स चित्तस्य समाधिपरिणामः" भा० ।

"क्षयोदयौ समाधिपरिणामावस्यां चित्तस्य दर्शयति । सर्व्वार्थतेत्यादि । विक्षिप्तता सर्व्वार्थता । सत्र विक्षिपतीति क्षयशब्दोऽभाव:, नासदुत्पद्यत इति उदय आविर्भावः । आत्मभूतयोः सर्व्वार्थतैकाग्रतयो: धर्म्मयोः यौ अपायोपजनौ सर्व्वार्थताया अपायः एकाग्रतायाः उपजनस्तयोरनुगतं चित्तं समाधीयते पूर्व्वापरीभूतसाध्यमान समाधिविशेषवत् भवतीति" वा० विवरणम् ।

"ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता परिणामः" सू० ।

"समाहितचित्तस्य पूर्व्वप्रत्ययः शान्त उत्तरस्तत्सदृश उदित समाधिचित्तभूम्योरनुगतं पुनस्तयैव या समाधिश्चेत्यादिति । स खल्वयं धर्म्मिणश्चित्तस्यैकाग्रता परिणाम" भा० ।

"पुनः समाधेः पूर्व्वापरीभूतायां अवस्थायाः निष्पन्नौ सत्यां शान्तोदितावतीतवर्त्तमानौ तुल्यौ च तौ प्रत्ययौ चेति तुल्यप्रत्ययौ एकाग्रतायान्तु द्वयोः साहश्यं समाहितचित्तस्येति समाधिनिष्पत्तिः दर्शिता । तथैवैकाग्र्यावधिमाह आसमाधिभेदात् । असमाधिभ्यं यादिति" । वा० विवरणम् ।

एकाग्र त्रि० एकमग्रं यस्य । एकतावे एकावलम्बने ।

एकाङ्ग पु० एकं प्रधानम् सुन्दरत्वेनाङ्गमस्य । यज्ञमध्येअतिसुन्दराङ्गे १बुधग्रहे त्रिका० । एक सुन्दरमङ्गं यस्मात् । २चन्द्रे न० हारा० । कर्म्मधा० । ३एकञ्चिदङ्गं न० । अथैकाङ्गेऽप्यधोवस्त्रमित्यामि च शुकृतसिद्धे" भा० अनु० ८२ अ० ३श्लोकाङ्के मस्तके च । एकमङ्गमस्य । एकदेहतां प्राप्नुयोः ४टब्यन्तयोः क्रमेण पुंस्त्री० स्त्रियां ङीष् ।

एकाण्ड पु० एकमण्डं दृषणमस्य । अश्वभेदे अश्वशब्दे विदृतिः

एकात्मन् पु० कर्म्म० । १एकस्मिन्नात्मनि । एक आत्मा स्वरूपम् स्वभावो वा यस्य । २एकस्वरूपे ३एकस्वभावे त्रि० स्त्रियां वा ङीप् । एकोऽसहाय आत्मा यस्य । ४असहायात्मनि त्रि० । "नार्चन्त्यनैर्वगर्णैरात्मभिरसाधनैः" भा० ४० ८२ अ० । तस्यभावः ष्यञ् । ऐकात्म्य तद्भावे न० । "अवबोधरसैकात्म्यमानन्दमनुसन्ततम्" भाग० ४,१२,८ । "वर्गस्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना" भागव० ३,२१,२९

एकादशन् त्रि० एकाधिकादश नि० आत्(एगार) १संख्यान्विते २तत्संख्यायाञ्च ततः पूरणे डट् । एकादश तत्पूरणे यत्संख्यया एकादशसंख्या पूर्य्यते तादृशसंख्यान्विते त्रि० स्त्रियां ङीप् । एकादशी सा च चन्द्रस्य क्षयमण्डलप्रवेशनिर्गमक्रियायुक्तैकादशचन्द्रमण्डलकलाक्रियारूपे तत्क्रियोपलक्षितै वा तिथिभेदे स्त्री । डटि संख्या पूर्व्वकादपि क्वचित् सुट् । एकादशम तदर्थे त्रि० । "मनुर्वै धर्म्मसावर्णिरेकादशमथात्मवान्" भाग० ८,१३, १० । स्त्रियां ङीप् । एकादश परिमाणमस्य संघस्य कन् । एक दशक तत्संख्यामिते गणे । "एकादशकस्य गणस्यात्मात्मपञ्चकश्चैव" "सात्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात्" सां०का० स च गणस्तत्रैव दर्शितः "बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि । वाक्पाणिपादपायूपस्थानि कर्म्मेन्द्रियाण्याहुः । उभयात्मकमत्रमनः" सां०का० । एवं सुदृगण । एकादशानामवयवः कन् । एकादशक तत्संख्यायाम् न० "रुद्रैकादशकोऽधिकम्" सुश्रु० ।

एकादशद्वार न० एकादश द्वाराणि छिद्रायस्य । शरीरे तत्र नवद्वारत्वप्रसिद्धावपि क्वचिदेकादशद्वारत्वं श्रूयते । सप्तोर्द्धगत्यानि नाभिसहितान्यधःस्थाने त्रीणि शिरस्येकं ब्रह्मरन्ध्रमित्येक दशच्छिद्रवत्त्वात्तस्य तथात्वम् । नवद्वारव्यवहारस्तु नाभिशिरसोश्छिद्रस्य सूक्ष्मत्वात् "प्रधानेन व्यपदेशा भवन्तीति" न्यायात् । प्रधानतयच्छिद्रावलम्बनेन ।

एकादशाह पु० एकादशानामह्नां समाहारः टच् समाहारे नाह्नादेशः अह्नान्तत्वात् पुंस्त्वम् । एकादशानामह्नां समाहारे । ङौ तु एकादशाहे एकादशाह्नि एकादशाहनि रूपाणि । स साधनतयाऽस्यास्य अच् । एकादशाहसाध्ये यागभेदे "एकादशाहैरयजन् सदक्षिणैर्हिरण्मयैरश्वमेधैर्देव" भा० अनु० १०२ अ० । ब्राह्मणजातीनामेकादशाहकर्त्तव्ये २श्राद्धे च । तमधीष्टो भूतोभूतोवेत्यर्थे अण् । एकादशाहीन उक्तार्थे त्रि० ।

एकादशिन् त्रि० एकादश संख्या परिमाणमस्य इनि । एकादशसंख्यामितस्तोमादौ स्त्रियां ङीप् । "एकामेकादशिनीमपश्यत्" "स एकादशिन्यो ह प्रजापतिः पुनरात्मानम्" "तस्मै क्रमेकादशिन्या यजेत" श० ब्रा० २,६,१, ४,५ । "यूपैकादशिनी स्यात्" ३,७,१,२२ । बहु पक्षे ङीनी स्यात् ३,६,१,२१ ।

एकादशी त्रि० एकादशानां पूरणी उभयपदीयप्रतिपदादितः

एकादश्यूपवास्यां तिथौ । यत्र हि हरिवासरव्रतम् । अस्यां व्रतस्य नित्यत्वादिसमर्थनतद्व्रतकालव्यवस्थादि कालमा० दर्शितं यथा "अथैकादशी निर्णीयते । तत्रैकादश्युपवासविधिवाक्येषु नित्यशब्दसदाशब्दादीनां नित्यत्वसाधकानां श्रवणान्नित्यत्वसिद्धिः । तानि च साधकानि संग्रहकारेण संगृहीतानि । "नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत् । उपेत्यातिक्रमे दोषश्रुतेरत्यागनोदनात् । फलाश्रुतेर्वीप्सया च तन्नित्यमिति कीर्तितम्" । अत्र च नित्यशब्दादीन्यष्टौ नित्यत्वसाधकानि । नित्यशब्द उदाहृतो गारुडपुराणे "उपोष्यैकादशी नित्यं पक्षयोरुभयोरपीति" । सदाशब्द उक्तः सनत्कुमारसंहितायाम् "एकादशी सदोपोष्या पक्षयोः शुक्लकृष्णयोः" यावदायुःशब्द उक्तो विष्णुरहस्ये "द्वादशी न प्रमोक्तव्या यावदायुः सुहृत्तिभिरिति" । आग्नेयपुराणेऽपि "उपोष्यैकादशी राजन् ! यावदायुः सुहृत्तिभिरिति" अतिक्रमनिषेधः कण्वेन दर्शितः "एकादश्यामुपवसेन्न कदाचिदतिक्रमेदिति" विष्णुनापि "एकादश्यां न भुञ्जीत कदाचिदपि मानवः" इति । अक्करणे दोषमाह सनत्कुमारः "न करोति हि यो मूढ एकादश्युपोषणम् । स नरो नरकं याति रौरवन्नमसाहतम् । एकादश्यां तु भुञ्जीत यो भुङ्क्ते मूढचेतनः । प्रतिमासं स भुङ्क्ते तु किल्बिषं शास्त्रविद्विषम् । निष्कृतिर्नाद्यपश्योक्ता धर्मशास्त्रे मनीषिभिः । एकादश्युपवासस्य निष्कृतिः क्वापि नोदिता । सदापानात् सुनिश्चेतः प्रायेण नरकं व्रजेत् । एकादश्युपवासस्तु पितृभिः सह मज्जतीति" नारदीये "पापानि कानि चिद्दुर्यानि ब्रह्महत्यासमानि च । अक्षमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे । तानि पापान्युपाश्नाति भुञ्जानो हरिवासरे" इति स्कान्दे "मातृहा पितृहा चैव भ्रातृहा गुरुहा तथा । एकादश्यां तु यो भुङ्क्ते पक्षयोरुभयोरपीति" अकरण इवासमापने दोष उक्तो विष्णुरहस्ये । "परिस्तृत्य व्रतं सम्यगेकादश्यादिकं नरः । न समापयते तस्य गतिः पापीयसी भवेदिति" अत्यागनोदना दर्शिता विष्णुरहस्ये "परामापदमापन्नोऽपवर्गं वा समुपस्थिते । स्तनके स्तनके चैव न त्यजेत् द्वादशीव्रतमिति" विस्तरः फलाश्रवणञ्च केषुचिद्वाक्येषु तत्र कात्यायनः "एकादश्यां न भुञ्जीत पक्षयोरुभयोरपीति" स्कान्देऽपि "उपोष्यैकादशी सम्यक् पक्षयोरुभयोरपीति" कूर्मपुराणेऽपि "वदन्तीह पुराणानि भूयोभूयो वरानने ! । न भक्षोव्यं न भक्षोव्यं संप्राप्ते हरिवासरे" बोधायनः सनत्कुमारः "पक्षे पक्षे च कर्त्तव्यमेकादश्युपोषणमिति" नारदोऽपि "नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः । पक्षे पक्षे च कर्त्तव्यमेकादश्युपोषणमिति" तदेवं नित्यशब्दादिभिर्हेतुभिरुपवासस्य नित्यत्वं सिद्धम् । काम्यत्वं च सायुज्यादिश्रवणादवगम्यते तदुक्तं विष्णुरहस्ये "यदीच्छेद्विष्णुसायुज्यं सुतानं सम्यदमात्मनः । एकादश्यां न भुञ्जीत पक्षयोरुभयोरपीति" । कूर्मपुराणेऽपि "यदीच्छेद्विष्णुसायुज्यं श्रियं सन्ततिमात्मनः । एकादश्यां न भुञ्जीत पक्षयोरुभयोरपीति" कात्यायनः "संसारसागरोत्तारमिच्छन् विष्णुपरायणः । ऐश्वर्यं सन्ततिं स्वर्गं मुक्तिं वा यदि वाञ्छति । एकादश्यां न भुञ्जीत पक्षयोरुभयोरपीति" स्कान्दपुराणे "यदीच्छेद्विपुलान् भोगान् मुक्तिं चात्यन्तदुर्लभाम् । एकादश्यामुपवसेत् पक्षयोरुभयोरपीति" नारदोऽपि "एकादशीसमं किञ्चित् पापघ्नाणं न विद्यते । स्वर्गमोक्षप्रदा ह्येषा राज्यपुत्रप्रदायिनी । सुकलत्रप्रदा ह्येषा शरीरारोग्यदायिनीति" । तदेवं फलश्रवणात् काम्यत्वं सिद्धम् । ननु काम्यत्वमनित्यत्वमस्ति कामे परित्यक्तुं शक्यत्वात् तथा सत्येकस्य कर्मणोनित्यत्वकाम्यत्वाभ्यां हैरूप्याङ्गीकारे नित्यानित्यसंयोगविरोधः, नायं दोषः खादिरादिवत् प्रमाणद्वयेन हैरूप्योपपत्तेः । तथा हि । "खादिरो यूपो भवतीति" श्रुतौ नित्यः खादिरो विहितः । "खादिरं वीर्यकामस्य यूपं कुर्वीतेति" तत्रैवश्रुतौ काम्यत्वेनानित्यः खादिरो विहितः । तत्र यथा प्रमाणद्वयसम्बन्धादेकस्यापि खादिरस्य हैरूप्यमङ्गीकृतं तद्वदत्रापि द्विविधप्रमाणसद्भावादुपवासस्य हैरूप्यं किं न स्यात् ? । ननु विषमोऽत्र न्यायः नित्यः खादिरः कर्त्तव्यः, काम्यस्तु पुरुषार्थः । उपवासस्तु नित्योऽपि पुरुषार्थ एव तस्य खादिरवत् श्रुतश्रुतबोधकप्रमाणाभावात्, बाढम् । अस्तु एवं वैषम्यं, प्रयोजकं तु हैरूप्ये प्रमाणद्वयमस्त्येव । स्मृतिकारेण प्रमाणद्वयस्यैव हैरूप्यसाधकत्वेनोपन्यासात् । तथा च स्मृतम् "एकस्य तूभयत्वे संयोगपृथक्त्वमिति" (जै०) । अतः केवलपुरुषार्थस्याप्युपवासस्य हैरूप्यमविरुद्धम् । यदि बुधास्तोरुक्षस्य सदयो दक्षान्तोऽपेक्षितः तर्ह्यग्निष्टोमादिदक्षान्तोऽस्तु । न ह्यग्निष्टोमः फलार्थं तस्य स्वयमेव फलत्वात् । तस्य च नित्यकाम्यत्ववाक्यद्वयादवगम्यते । "यावज्जीवमग्निष्टोमं जुहोतीति" नित्यत्वावगमकं वाक्यम् । "अग्निष्टोमं जुहुयाद् स्वर्गकामः"

इति च काम्यत्वावगमकम् । तस्य च क्रत्वर्थत्वाभावेन केवलपुरुषार्थत्वम् । अतोऽग्निहोत्रे नित्यत्वं काम्यत्वं चेति द्वैरूप्यमस्ति । तत्र यद्यान्तराभ्यासादिकर्मभेदहेत्वभावेनैकस्यैव कर्मणः सतः प्रयोगभेदोऽवगन्तव्यः । प्रयोगभेदश्च यावज्जीवाधिकरणे निर्णीतः । तस्य चाधिकरणस्य संग्राहकावेतौ श्लोकौ भवतः । "यावज्जीवं जुहोतीति धर्मः कर्मणि पुंसि वा । काल्यः पुरुषधर्मोऽतः काम्य एकः प्रयुज्यताम् । न कालो जीवनं तेन निमित्तप्रविभागतः । काम्यः प्रयोगभिन्नः स्याद्यावज्जीवप्रयोगतः" इति । अयमर्थः "अग्निहोत्रं जुहुयात् स्वर्गकाम" इति । काम्याग्निहोत्रं श्रूयते तथा वाक्यान्तरं पठ्यते "यावज्जीवमग्निहोत्रं जुहोतीति" तत्र संशयः । किं यावज्जीवमित्यनेनाधिकारान्तरं नोद्यते किं वा काम्याग्निहोत्रे गुणविधिरिति । यद्यर्थभेदान्तरचिन्ता किं यावज्जीवमित्यस्यार्थः कर्मधर्मः उत पुरुषधर्म इति । यावज्जीवशब्देन पुरुषायुषपरिमितः कालोऽभिधीयते । काम्येन चाग्निहोत्रेण कालविशेष एव कङ्क्षितः । तस्य च कालस्यानेन समर्पणादयं कर्मधर्मः । तस्मात्गुणविधिः । तथा चाग्निहोत्रस्य काम्यप्रयोगः एक एव न त्वन्योनित्यप्रयोग इति प्राप्ते, ब्रूमः यावज्जीवशब्दो न कालस्य वाचकः । किन्तु क्रियाकर्तुः वाच्यार्थस्तु क्रियाजीवनं तच्च न कर्मधर्मत्वेन विधातुं शक्यं पुरुषधर्मत्वादिति जीविधातुः प्राणधारणमभिधत्ते न तु कालम् । प्राणधारणं च पुरुषधर्मः कालस्य तदसम्भवात् । तेन स्वर्गकामनेव जीवनमपि किञ्चिन्निमित्तम् । तस्मादधिकारान्तरनोदना । तथा सति जीवननिमित्तो नित्यप्रयोगः कामनिमित्तः कादाचित्कप्रयोग इत्यस्य परस्परं भिद्यते इति सिद्धान्तः । अनेनाग्निहोत्रन्यायेन प्रकृतस्याप्युपवासस्य निमित्तभेदेन नित्यप्रयोगः काम्यप्रयोगश्चास्तु । नन्वेकस्य कर्मणः कालभेदेन कर्तृभेदेन वा विना द्वौ प्रयोगौ न सम्भवतः । न चात्र कालभेदः संभवति नित्यकाम्योपवासयोरेकादश्यामेव विधानात् । नाप्यत्र कर्तृभेदोऽस्ति । यद्यपि काम्यं परित्यज्य केवलं नित्यमनुष्ठातुं शक्यं तथापि काम्यमनुतिष्ठतापुना नित्यस्य परित्यक्तुमशक्यत्वात् । अतः सर्वैक्यात् कालैक्याच्च नित्यकाम्यरूपौ द्वौ प्रयोगौ न घटेते । नायं दोषः, विविदिषाधिकरणन्यायेन सकृदेवानुष्ठितेन प्रयोगद्वयसिद्धेः । तस्य चाधिकरणस्य संग्राहकावेतौ श्लोकौ भवतः "विद्यार्थमात्मार्थं च द्विःप्रयोगोऽथ वा सकृत् । प्रयोजनविभेदेन प्रयोगोऽपि विभिद्यते । आद्यं भुक्त्वा यथा तृप्तिर्विद्यार्थेनात्मकृत्यया । अनित्यनित्यसंयोग उक्तिभ्यां खादिरे मतः" इति । अयमर्थः "तमेतं वेदानुवचनेन ब्राह्मणाविविदिषन्ति यज्ञेन दानेन तपसा नाशकेनेति" श्रुतिवाक्येन यज्ञादय आत्मविद्योदयाय विहिताः गृहस्थाद्याश्रमधर्मत्वन्तु यज्ञादीनां सर्वस्मृतिसूत्रितेषु प्रसिद्धम् । तत्र संशयः किं यज्ञादीनां द्विःप्रयोगः ? उत सकृदिति ? । तत्र प्रयोजनभेदात् प्रयोगभेद इतिपूर्वपक्षः । निमन्त्रितेन ब्राह्मणेन क्रियमाणभोजनेन यथा अन्यकर्तृकश्राद्धनिष्पत्तिः स्वतृप्त्यै न च द्विर्भुज्यते । तद्वदब्रह्मविद्यार्थमनुष्ठितेन कर्मणा प्रयोजनद्वयं सिध्यति । न च नित्यानित्यसंयोगविरोधः खादिरवाक्याभ्यां तदुपपत्तेः । तस्य पूर्वमुपपादितं तस्मात् सकृदेव प्रयोग इति । एवमत्रापि सकृदेवोपवासं कुर्वतः काम्यप्रयोगोनित्यप्रयोगश्चेत्युभय सिध्यति । ननु सकदनुष्ठानेनानेकार्थसिद्धिर्द्वेधा भवति तन्त्रेण वा प्रसङ्गेन वा । तद्यथा दर्शपूर्णमासयो यस्यां प्रधानयागानां मध्ये तयाणां सकृत्सकृदनुष्ठितेन प्रायाजादेरुपकारः सिध्यति । तदिदं तन्त्रम् । पशुनिमित्तेन प्रयाजादिना पशुतन्त्रमध्यपातिनः पशुपुरोडाशस्याप्युपकारः सिध्यति सोऽयं प्रसङ्गः । एवं सति प्रकृतेऽपि तन्त्रप्रसङ्गयोः कतरस्योपादानमिति चेत् । प्रसङ्गस्येति ब्रूमः । काम्यप्रयोगेणैव नित्यप्रयोगस्यापि सिद्धत्वात् तथा च स्मृतिः । "काम्येऽपि नित्यसिद्धिः स्यात् प्रसङ्गेनोभयात्मकः इति" तदेवमेकादश्युपवासस्य नित्यत्वकाम्यत्वसकृद्द्वैरूप्ये विरोधाभावात् द्वैरूप्यमभ्युपेयमिति स्थितम् ।

अतोपवासाकृतिविधिनिर्णयस्य वेधाधीनत्वात् प्रथमं दशमीवेधो निरूप्यते । स च वेधस्त्रिविधः अरुणोदयवेधः सूर्योदयवेधः पञ्चदशनाडीवेधश्चेति । तत्रारुणोदयवेधो भविष्यत्पुराणे दर्शितः । "अरुणोदयकाले तु दशमी यदि दृश्यते । सा विद्धैकादशी तत्र परामूलक्षुपोषणमिति" । "अरुणोदयवेधायां दिशो गन्धो भवेद्यदि । दुष्टं तत्तु प्रयत्नेन वर्जनीयं नराधिप !" । गारुडपुराणेऽपि "दशमीवेधसंयुक्तो यदि स्यादरुणोदयः । नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतमिति" । अरुणोदयस्य प्रमाणं स्कान्दनारदाभ्यामुक्तम् । "उदयात् प्राक्चतस्रस्तु घटिका अरुणोदय" इति । तस्मिन्नरुणोदये वेधा बहुविधा । ते च प्रश्नोत्तराभ्यां ब्रह्मवैवर्ते दर्शिताः । "कीदृशस्तु भवे-

हेयो योगोविधेन्द्र ! कीदृशः ? । योगवेधौ समाचक्ष्व याभ्यां दुष्टमुपोषणम् । चतस्रोघटिकाः प्रातरुणोदयनिश्चयः । चतुष्टयविभागोऽत्र वेधादीनां किलोदितः । अरुणोदय वेधः स्यात्सार्द्धान्त घटिकात्रयम् । अतिवेधोऽधिघटिकः प्रभासन्दर्शनादृवेः । सङ्गवेधोऽपि तत्रैव दृश्यतेऽर्को न दृश्यते । तुरीयस्तत्र विज्ञेयोयोगः सूर्योदये सतीति" । अयमर्थः वेधातिवेधसङ्गवेधयोगाश्चत्वारउपवासस्य-दूषकाः । तत्र रवेः प्रभासन्दर्शनानुपलब्ध्या सार्द्धघटिका त्रयमेकादश्या व्याप्तं ततः प्राच्यांने घटिकार्द्धे अरुणोदयसम्बन्धिनि दशमीसङ्गवे वेध इत्युच्यते । यदा सूर्य्यदर्शनानुपूर्व्वं घटिकात्रयमुपरितनमेकादशीव्याप्तं पूर्व्वं तु घटिकात्रय दशमीव्याप्तं तदातिवेध इत्युच्यते । यदा सूर्योदयस्य दर्शनादर्शनसन्देहकाल मेकादशी व्याप्नोति ततः प्राङ् नाड्योऽरुणोदयकालो दशमीव्याप्तश्चेदा महावेध । यदा सूर्योदये सति पश्चादेकादशी प्रवृत्ता ततः प्रव्याहृतवेलायां दशमी विद्यते तदा योगसन्ज्ञेनाभिधेयोदोषोभवति । न च वेधा-द्यपेक्षया तुरीयोभवतीति । नन्वरुणोदयानुपपत्तिर्यदि मध्यरात्रानन्तर दशमीकला विद्यते तदा नोप वासस्तदभावे तूपवास कर्त्तव्यः । तथा च स्मृतिः "अ-र्द्धरात्रात्परा यत्र एकादश्युपलभ्यते । तत्रोपवासः क र्त्तव्यो न तु दर्शसंकलेति' । अतोयथाभिदिष्टेभ्य स्त्रि-ध्योऽन्योऽपि कश्चिद्वेधोऽस्तीति चेत् नैवम् । अर्द्धरात्र वेधोऽपि यदा वर्त्तसदा किंतु वक्तव्यम् अरुणोदयवेध इति वक्तुमर्धरात्रवेधउपन्यस्तो न तु वेधाभप्रायेण । तदेव ब्रह्मपुराणेऽपि गौणत्वेन स्पष्टीकृतम् । "अर्द्धरात्रेतु वे ज्ञाविद्धायां वेध इष्यते । अरुणोदयवेलायां नावकाशो विचारणे । कापालवेध इत्याकुराचार्या ये हरिप्रियाः ! न तन्मम मतं यस्मात्क्रियामा रात्रिरिष्यते" इति । य एते वेधातिवेधसङ्गवेधयोगाःपूर्व्वमभिहितास्तेषु त्रयोऽरुणो-दयवेधाचतुर्थउदयवेधः । तत्रोदयवेधदूषकोऽप्याह "उ-दयेवैधरिक्ता तु दशम्यैकादशी यदा । दानवेद्यः प्रीय ताथं दत्तानुपाकयाचन इति" । स्मृत्यन्तरेऽपि । "दश्या: प्रान्तमादाय यदोदेति दिवाकरः । तेन सृष्टं हरिर्दिनं दत्तं जन्माष्टमीव्रत मिति" । पञ्चदशनाडीवेध-स्तु स्कन्दपुराणे दूषितः "नागोद्दादशनाडीभिर्दिक् पञ्च दशभिस्तथा । भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरान्वि-त्रिथिति" । तदेव वेधत्रय निरूपितम् । तत्र पञ्च-दशनाडीवेधस्य वेधान्तरस्य च विषयव्यवस्था निगमे दर्शिता । "सर्वप्रकारवेधोऽयमुपवासस्य दूषकः । सार्द्ध-सप्तमुहूर्त्तस्तु वेधोऽयं बाधते व्रतमिति" । सर्व्वप्रकार इ-त्यत्र प्रकारशब्देन कलाकाष्ठादयोवेधातिवेधादयो वा गृह्यन्ते नात्र तिथ्यन्तरवत्त्रिमुहूर्त्तत्वं वेधेऽपेक्षितं किन्तु लवकलाकाष्ठादिकमपि ग्राह्यम् । तदुक्तं नार-दीये । 'लवादिवेधे विप्रेन्द्र ! दशमीं कादशीं त्यजेत् । सु-रायां बिन्दुना पृक्तं गङ्गाम्भ इव निर्मलमिति' । स्कन्द-पुराणेऽपि "कलाकाष्ठादिगत्यैव दृश्यते दशमी विभो, । एकादश्यां न कर्त्तव्यं व्रतं राजन् ! कदाचनेति" । स्मृत्य-न्तरेऽपि । "कलार्द्धेनापि विद्धा स्याद्दशमी कादशी यदि । तदाप्येकादशीं हित्वा द्वादशीं समुपोषयेदिति' । सोऽयं कलाकाष्ठादिवेधोऽरुणोदये सूर्योदये च समानः । त-त्रारुणोदयवेधोवैष्णवविषयः । तच्च गारुडपुराणे विस्प-ष्टमवगम्यते । "दशमीशेषसंयुक्तोयदि स्यादरुणोदयः । नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतमिति" । वैष्णव न सपञ्चरात्रादिवैष्णवागमोक्तदीक्षां प्राप्तोवैष्णवः । अत एव स्कान्दपुराणे वैष्णवस्वरूपमभिहितम् "परामापद-मापन्नोऽप्युत्सर्गे वा समुपस्थिते । नैकादशान्यजेद्यात्तु यस्य दीक्षास्ति वैष्णवी । समात्मा सर्व्वजीवेषु निजाचारा-दविच्युतः । विष्णुर्पिताखिलाचार स हि वैष्णव उच्यते" इति । विष्णुपुराणेऽपि । "न चलति निजकर्मणोयः समनतिरात्मसुहृद्विपक्षपक्षे । न हरति न च हन्ति किञ्चिदुर्वैः स्थितमनसं तमवेहि विष्णुभक्तमिति" ।

यथोक्तगुणसम्पन्नो वैष्णवदीक्षां प्राप्तोयस्तं प्रति तिथि-वेधोनिर्णीयते । एकादशी द्विविधा अरुणोदयवेधवती शुद्धा-चेति । तत्र वेधवती सर्व्वा त्याज्या । 'तद्दिनैकादशीव्रत-मिति' गारुडपुराणे सामान्येन प्रतिषेधात् । विशेष तस्तु संपृक्तादिभिर्देश प्रतिषेधोद्रष्टव्यः य एते वेधाति-वेधसङ्गवेधयोगाख्याद्दोषाः पूर्वसूक्तास्तेषु सप्तस्वेकादशी संपृक्तसंदिग्धसंयुक्तसंकीर्णनामभिर्व्यवह्रियते । अरु-णोदयस्य प्रथमघटिकायां दशमीसङ्गवे वेध इत्युक्तः । स च द्विविधः । घटिकाप्रारम्भे क्रान्तघटिकायां च दशमीप्राप्तिभेदात् । तत्र प्रारम्भमात्रदशमीयुक्तैकादशी संपृक्तेत्युच्यते । क्रान्तघटिकावर्त्तिदशमीसङ्गवयुक्तैका-दशी सन्दिग्धा । अरुणोदयप्रथमघटिकोदीर्घोदयमोव्या-प्तिरतिवेधस्तदुपेतैकादशी संयुक्तेत्युच्यते । सूर्य्यमण्डल-दर्शनसन्देहवेलायां दशमीसङ्गवे महावेधः तद्यु-

क्षैदशी संकीर्णेत्युच्यते । तां एतां संपूर्णादयश्च तस्योऽपि त्याज्याः । तथा च गोभिलः "अरुणोदय-वेलायां यदिदृश्यमोसङ्गता । संपूर्णैकादशी तान्तु मोहिन्यै दत्तवान् प्रभुरिति" । गारुडपुराणे "उदया-त्पाक् त्रिघटिकाव्यापिन्येकादशी यदि । संदिग्धैकादशी नाम वर्जनीयं धर्म्मकाङ्क्षिभिः । उदयात्पागनुक्रूर्त्तेन-व्यापिन्येकादशी यदा । संपूर्णैकादशी नाम वर्जयेद्धर्म-वृद्धये । आदित्योदयवेलाया आरभ्य घटिनाडिका । सं-कीर्णैकादशी नाम त्याज्या धर्म्मफलेषुभिः । पुनर्मौलप्रह-रार्द्धन्तादश्यासुपवासयेत् । तत्र कृतुगतं पुण्यं त्रयोद-श्यां तु पारणमिति" । यद्यपि पूर्व्वत्र वेधवाक्ये "सार्द्ध तु घटिकात्रयम्" इत्युक्तम् अत्र तु सन्दिग्धैकादशीवाक्ये त्रिघटिकेत्युक्तं तथापि नैतावता वैष्णवेन विरोधः म-न्तव्यः शास्त्रहृदयस्यापि दशमीवेधत्यागपरत्वात् । तदेवं सामान्यविशेषाभ्यां प्रतिषिद्धत्वादरुणोदयविद्धैका-दशी वैष्णवेन परित्याज्या । यस्तु योगस्तत्कथनन्तु योगस्तस्य त्याज्यत्वमर्थात्सिद्धम् । अरुणोदयवेधोऽपि यदा त्यज्यते तदा किमु वक्तव्यं सूर्य्योदयवेध इति । यच्च-नन्वत्र कथमुक्तं पूर्व्वमेवोदाहृतम् । या तु चतुर्विध वेधरहिता शुद्धैकादशी सा द्विविधा । आधिक्येन युक्ता तद्रहिता चेति । आधिक्यं च त्रिविधम् एकाद-श्याधिक्यं द्वादश्याधिक्यमुभयाधिक्यं चेति । त्रिष्व-प्येतेषु पक्षेषु अरुणोदयमारभ्य प्रहरान्तं शुद्धामप्ये-कादशीं परित्यज्य परेद्युरुपवासः कर्त्तव्यः । तत्रैका-दश्याधिक्ये नारदः "संपूर्णैकादशी यत्र द्वादश्यां तद्विगामिनी । द्वादश्यां लङ्घनं कार्य्यं त्रयोदश्यां तु पार-णमिति" । स्मृत्यन्तरेऽपि "एकादशी यदा पूर्णा परतः पुनरेव सा । पुण्यं क्रतुशतस्योक्तं त्रयोदश्यान्तु पारणमिति" विष्णुरहस्येऽपि "एकादशीकलाप्राप्ता येन द्वादश्युपो-षिता । तस्य क्रतुशतं प्रोक्तं त्रयोदश्यान्तु पारणमिति" द्वादश्याधिक्ये व्यास आह "एकादशी यदा लग्ना परतो द्वादशी भवेत् । उपोष्या द्वादशी तत्र यदीच्छेत् परमां गतिम्" उभयाधिक्ये गुरुराह "संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । तत्रोपोष्या द्वितीया तु परतो द्वादशी यदीति" नारदोऽपि "संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । सर्वैरेवोत्तरा कार्य्या परतो द्वादशी यदीति" स्मृत्यन्तरेऽपि "एकादशी यदा पूर्णा परतो --- । एकादशीं परित्यज्य द्वादशीं समुपो-षयेदिति" । उभयाधिक्यरहितायां न कोऽपि सन्दे-होऽस्ति । इति वैष्णवदीक्षायुक्तानामेकादशी निर्णीता ।

अथ स्मार्त्तस्मार्त्तपर्य्यवसितानां पञ्चरात्रादिदीक्षार-हितानाम् एकादशी निर्णीयते । अरुणोदयवेधस्य वैष्णवविषयत्वे व्यवस्थिते सत्युदयवेधः स्मार्त्तानुष्ठान-विषयत्वेन परिशिष्यते । अतएव स्मर्य्यते "अतिवेधा महावेधा ये वेधास्त्रिषु स्मृताः । सर्व्वेष्ववेधा विज्ञेया वेधः सूर्य्योदये मतः" इति । एवञ्च सति सूर्य्योदय वेधसमेतैकादशी द्विधा भिद्यते शुद्धा विद्धा चेति । तत्र शुद्धायां पूर्ववच्चत्वारोभेदा भवन्ति एकदश्याधिक्यं द्वादश्या-धिक्यमुभयाधिक्यमनुभयाधिक्यं चेति । एवं विद्धा-यामपि चत्वारोभेदा उन्नेयाः । शुद्धायामेकादश्याधिक्ये ह्योक्त्योरुपवासयोग्यतामाह हरिवंशिष्टः "संपूर्णै-कादशी यत्र प्रभाते पुनरेव सा । लुप्यते द्वादशी तस्मिन्नु-पवासः कथम्भवेत् ? । उपोष्ये द्वे तिथी तत्र विष्णु प्रीत्यनतत्परैरिति" । उभयोरधिकारिभेदेन व्यवस्था स्कन्द-पुराणे दर्शिता "प्रथमेऽहनि संपूर्णा व्याप्ताहोरात्रसं-युता । द्वादश्यां च तथा तात ! दृश्यते पुनरेव च । पूर्व्वा-कार्या गृहस्थैस्तु यतिभिस्तूत्तरा तिथिरिति" एतच्च परेद्युर्द्वादश्यभावविषयम् तथा च स्मृत्यन्तरे । "पुनः प्रभातसमये घटिकैका यदा भवेत् । अतोपवासो वि-हितस्तृतीयाश्रमवासिनाम् । विधवायाश्च तत्रैव परतो द्वादशी न चेदिति" । गारुडपुराणेऽपि "पुनः प्रभा-तसमये घटिकैका यदा भवेत् । अतोपवासो विहितो वनस्थस्य यतेस्तथा । विधवायाश्च तत्रैव परतो द्वा-दशी न चेदिति" । पुराणान्तरे "एकादशी यदा पूर्णा परतः पुनरेव सा । पुण्यं क्रतुशतस्योक्तं त्र-योदश्यान्तु पारणमिति" एवमेकादश्याधिक्यपक्षे गृहित-स्त्रीव्यवस्थाऽभिहिता । द्वादश्याधिक्ये पूर्वेद्युरुपवासमाह नारदः "न चेदेकादशी विष्णो द्वादशी परतः स्थिता । उ-पोष्यैकादशी तत्र यदीच्छेत् परमं पदमिति" । स्कन्द पुराणेऽपि "शुद्धा यदा समा हीना समहीनाऽधिकोत्तरा । एकादश्युपवासेन शुद्धां वैष्णवीमपीति" दशमीवेधरहिता-शुद्धैकादशी यदा परेद्युरुदयादूर्द्धं नाडि किञ्चिदूये समा ता-तोन्यूना वा ह्योरपीत्यर्थः । एवं च सति प्रहरे द्वादश्या-धिक्येऽपि एकादशी समन्यूनयोरन्यतरत्वात् प्रथमेवोपो-ष्येत्युक्तं भवति । उभयाधिक्ये परेद्युरुपवासो गारु-डपुराणे दर्शितः "संपूर्णैकादशी यत्र प्रभाते पुनरे-

व सा । तत्रोपोष्या परार्द्ध युक्ता परतो द्वादशी यदीति" वराहपुराणेऽपि । "एकादशी विष्णुना चेत् द्वादशी परतः स्थिता । उपोष्या द्वादशी तत्र यदीच्छेत् परमं पदमिति" स्कान्दान्तरेऽपि "संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । वैष्णवी च त्रयोदश्यां षाटकैकापि दृश्यते । स्मृतिस्थोऽपि परां कुर्यात् पूर्वां नोपवसेत्तदा । पूर्वोपोष्यैकादशी त्यक्त्वा वर्द्धते हितयं यदीति" एवमेकैकाधिक्ये द्वितयाधिक्येऽपि निर्णयो दर्शितः । अनुभयाधिक्ये तु नास्ति सन्देहः । इति शुद्धायां चत्वारोभेदाव्यवस्थिताः । अथ विद्धायां चत्वारोभेदा व्यवस्थाप्यन्ते । तत्राप्येकादश्याधिक्ये पूर्ववदुत्कृष्टस्यैवोपवास्या दृष्टया । तदाह प्रचेताः "एकादशी विद्धा चेच्छुक्ले कृष्णेऽविशेषतः । उत्तरान्तु यतिः कुर्यात् पूर्वासुपवसेद्गृहीति" नचैतद्वाक्यं शुद्धाधिक्ये चरितार्थमिति शङ्कनीयम् बाधकाभावेन विद्धाधिक्येऽपि तद्वचनप्रवृत्तेर्निवारयितुमशक्यत्वात् । द्वादश्याधिक्ये परेद्युरुपवासः । तदाह व्यासः "एकादशी यदा लुप्ता परतो द्वादशी भवेत् । उपोष्या द्वादशी तत्र यदीच्छेत् परमां गतिमिति" लुप्ता आदौ दशमीमिश्रितत्वात् परतोद्वादशीभावाच्च त्रयं गतेति यावत् । उभयाधिक्येऽपि परेद्युरुपवासः । तदुक्तं भविष्यपुराणे "एकादशीं दिशायुक्तां वर्द्धमाने विवर्जयेत् । त्रयमार्गस्थिते सोमे कुर्यात् दशमी युतामिति" उभयानाधिक्ये तु नैवास्ति सन्देहः कोऽन्तराभावात् । न च विद्धत्वादस्ति सन्देह इति वाच्यं कोऽन्तराभावे विद्धाया अप्युपादेयत्वात् । तथा च विष्णुरहस्ये "एकादशी भवेत् काचिद्द्वयस्पृशा दूषिता तिथिः। उद्विद्धपक्षे भवेद्दोषः क्षयपक्षेऽतिपुण्यदेति" । इति विद्धाभेदाव्यवस्थापिताः। अत्र शुद्धाविद्धयोरप्येष निर्णयसंग्रहः । एकादशीद्वादश्योरुभयोरपि दर्शौ परेद्युरुपवासः । द्वयोरप्यदर्शौ पूर्वेद्युः । एकादशीमात्रदर्शौ स्मृतिस्थत्योर्व्यवस्था । द्वादशीमात्रदर्शौ शुद्धायां सर्वेषां पूर्वेद्युः विद्धायां परेद्युरिति"तदेवं शास्त्रार्थे व्यवस्थिते यावन्ति शुद्धिवाक्यानि विधायकानि निषेधकानि सर्वाणि तात्पर्यविरोधेन व्यवस्थापनीयानि । तत्र व्यवस्थापनप्रकारं दर्शयामः स्कान्दपुराणे "प्रतिपत्प्रभवः सर्वा उदयादोदयावधेः । संपूर्णा इति विख्याता हरिवासरवर्जिताः" इति हरिवासरेषु तु संपूर्णत्वं प्रकारान्तरेणोक्तं गारुडपुराणे "उदयात् प्राग्यदा विप्र ! हरूसंज्ञवयुता । संपूर्णैकादशी ज्ञेया तत्रोपोषविदुत्तमैरिति" भविष्यपुराणेऽपि "आदित्योदयवेलायां प्राङ्मुहूर्तद्वयान्विता । एकादशी तु संपूर्णा विद्वाऽन्या परिकल्पितेति" । तदेतद्वचनद्वयमरुणोदयवेधोपजीवनेन प्रवृत्तत्वादुवैष्णवविषयम् । दशमीवेधे निन्दकानि तु वचनानि द्विविधान्युपलभ्यन्ते । कानिचिदरुणोदयानुवादेन प्रवृत्तानि, कानिचित्तदननुवादेनेति । यथा भविष्यपुराणे "अरुणोदयकाले तु दशमी यदि दृश्यते । तत्र नैकादशी कार्या धर्मकामार्थनाशिनीति" कौत्सः "अरुणोदयवेलायां विद्धा गान्धार्युपोषिता । तस्याः पुत्रशतं नष्टं तस्मात् तां परिवर्जयेदिति" एतादृशानि सर्वाणि वैष्णवविषयाणि द्रष्टव्यानि । अरुणोदयानुवादमन्तरेण दशमीविद्धानिन्दकानि च कानिचिद्वचनान्युपलभ्यन्ते तद्यथा नारदः "दशम्यनुगता यत्र तिथिरेकादशी भवेत् । तत्रोपवासे नाशश्च परत्र नरकं व्रजेदिति" ब्रह्मवैवर्ते "दशमीवेधसंयुक्तां यः करोति विमूढधीः । एकादशीं फलं तस्य नश्येत् द्वादशवार्षिकमिति" विष्णुरहस्येऽपि "दशमीवेधसंयुक्तामुपोष्यैकादशीं किल । संवत्सरकृतेनेह नरोधर्मेण युज्यते इति दैवानि सर्वाण्यपि वेधविषये वैष्णवविषयाण्यद्वयविषये तूभयाधिक्ये द्वादश्याधिक्ये च सर्वपुरुषविषयाणि द्रष्टव्यानि । दशमीविद्धाभ्यनुज्ञापकानि च कानिचिद्वचनान्युपलभ्यन्ते तद्यथा स्कान्दपुराणे "त्रयोदश्यां न लभ्येत द्वादशी यदि किञ्चन । उपोष्यैकादशी तत्र दशमीमिश्रितापि चेति" स्मृत्यन्तरे "उपोष्यैकादशी तत्र द्वादशी न भवेद्यदि । दशम्यापि हि मिश्रैव एकादश्येव धर्मदेति" हरिवंशेऽपि "द्वादशी खलु खल्वापि यदि न स्यात् परेऽहनि । दशमीमिश्रिता कार्या महापातकनाशिनीति" अत्यन्तरूक्षः "एकादशी न लभ्येत सकला द्वादशी भवेत् । उपोष्यैकादशी विद्धा ऋषिरुद्वासकोऽब्रवीदिति" हारीतोऽपि "त्रयोदश्यां यदा नष्टा द्वादशीघटिकाद्वयम् । दशम्येकादशी विद्धा सैवोपोष्या यदा तिथिरिति" एतादृशानि वाक्यानि सर्वाणि अनुभयाधिक्ये सर्वपुरुषविषयाणि एकादश्याधिक्ये तु स्मार्तोत्कृष्टस्यविषयाणि द्रष्टव्यानि नत्वेतानि वैष्णवविषयाणि वैष्णवप्रकरणेषु विद्धाभ्यनुज्ञाया अदर्शनात् । संपूर्णैकादशीपरित्यागविषयाणि कानिचिद्वचनान्युपलभ्यन्ते । तद्यथा स्कान्दपुराणे "एकादशी भवेत् पूर्वा परतो द्वादशी यदि । तदा त्रयोदशीं त्यक्त्वा द्वादशीं समुपोषयेदिति" तथा कार्तिकपुराणे "एकादशी यदा

पूर्वा परतो द्वादशी भवेत्। उपोष्या द्वादशी तत्र तिथिवृद्धिः प्रयच्छत इति" गारुडपुराणे "पूर्णा भवेद्यदा नन्दा भद्रा चैव त्रिपुष्करे। तदोपोष्या तु भद्रा स्यात् तिथिवृद्धिप्रयच्छति इति"। एवाद्यानि सर्वाणि वैष्णवविषयाणि। दिनत्रयविषयाणि कानिचिद्वचनान्युपलभ्यन्ते। यदाह नारदः "यदि दैवात्तु संविध्येदेकादश्यां तिथित्रयम्। तत्र कृत्वव्रतं पुण्यं द्वादशीपारणे भवेदिति" कूर्मपुराणेऽपि "द्विस्पृगेकादशी यत्र तत्र सन्निहितो हरिः। तामेवोपवसेत् कामममकामो विष्णुतत्परः" इति अतस्त्रयोदश्यमीद्वादश्योर्मध्ये एकादशीत्येतद्दिनत्रयं यदाप्नोति तदा परतो द्वादश्यां हरिवासरविद्धत्वेनोभयं सम्भवति। तत्र यद्यहर्द्वयस्पृक्तदा यथोक्तं दिनत्रयमुपोष्यम्। तदुक्तं पुराणान्तरे "दिनत्रयस्पृशेत्! देवि नोपोष्या दशमी युता। सैवोपोष्या सदा पुण्या परतश्चेत् त्रयोदशीति" द्वादशीयुतौ "एकादशी यदा लुप्ता" इत्यनेन व्यासवचनेन परेद्युरुपवास इति पूर्वमेव निर्णीतं यदा त्वाद्यन्त्योरेकादश्यो त्रयोदश्योर्मध्ये द्वादशीत्येतादृशं दिनत्रयं तदा नाद्देन लभ्यते "एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। तत्र कृत्वव्रतं पुण्यं त्रयोदश्यां तु पारणम्"। "एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। त्रिस्पृशा नाम सा प्रोक्ता ब्रह्महत्यां व्यपोहतीति"। नदेतदुभयविषयं अतिविषयं वा द्रष्टव्यम्। दृष्टस्य तु तन्निबन्धनं तथा च कूर्मपुराणे "एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः" इति पद्मपुराणे "एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। लङ्घस्यूषदहोरात्रं नोपोष्यं तत् श्रुतार्थिभिरिति" यत्तु ऋष्यशृङ्गेणोक्तम्। "अविद्धानि तिथिर्द्धैव न लभ्यन्ते दिनानि तु। तस्मात्तैः पञ्चभिर्विद्धा पार्श्वैकादशी तिथिः। तदर्द्धविद्धान्यन्यानि दिनान्युपवसेद्बुधः। पूर्वविद्धा न कर्त्तव्या पञ्चभिः कादश्यादशी। एकादशीं तु कुर्वीत जीयते द्वादशी यदेति" अत्र निषेधो यतिविषयः, विधिर्दृष्टस्यविषयः वेधवाहुल्ये ह्येतत्पक्षा मा भूदिति पञ्चभिर्भुक्तैरित्युक्तम्। तदेवं नानाविधवचनस्य व्याख्यानप्रकारो व्युत्पादितः। अनया व्युत्पत्त्या मन्दबुद्धिरपि व्यवस्थापयितुं शक्नोत्येव। इत्युपवासतिथिनिर्णयः कथितः।

अथाधिकारी निरूप्यते तत्र नारदः "अष्टवर्षाधिको मर्त्यो ह्यशीतिर्न्यूनवत्सरः। एकादश्यामुपवसेत् पक्षयोरुभयोरपीति"। दृष्टस्यस्य तु शुक्लैकादश्यामेव नित्योपवासः यथा कूर्मपुराणे "एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि। वानप्रस्थो यतिश्चैव शुक्लामेव सदा दृष्टीति" भविष्योत्तरेऽपि "एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि। ब्रह्मचारी च नारी च शुक्लामेव सदा दृष्टीति" नारी विधवा तस्या एव यतिधर्मत्वात्। पतिसत्त्वेऽपि पत्यौ निषेधति विष्णुः "पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत्। आयुष्यं हरते भर्तुर्नरकं चैव गच्छतीति" मनुः "नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणमिति" मार्कण्डेयपुराणे "नारी खल्वनुज्ञाता भर्त्रा पित्रा सुतेन वा। निष्फलं तु भवेत् तस्या यत्करोति व्रतादिकमिति" आदिशब्दादुपस्थाङ्कारगन्धचूषाङ्गनालासपर्शवर्जः मनुः "पुष्पाक्षतैरलङ्कारैश्चापि गन्धधूपानुलेपनमिति" पत्युरनुमत्या व्रतादिष्वधिकारिणी भवति तदाह कात्यायनः। "भार्या पत्युर्मतेनैव व्रतादीनाचरेत् सदेति" शुक्लामेवेत्येवकारः कृष्णैकादश्या व्रतादिनिषेधपरः। तथा च कूर्मपुराणे "संक्रान्त्यां क्षयपक्षे च रविर्क्षदिने तथा। एकादश्यां न कुर्वीत उपवासञ्च पारणमिति" गौतमोऽपि "आदित्येऽहनि संक्रान्त्यामर्कवारैकादशीषु च। व्यतीपाते क्षते श्राद्धे पुत्री नोपवसेद्गृहे"। अत्र पुत्रीति विशेषणं पुत्रवतो दोषविशेषप्रतिपादनार्थम् तथा च पद्मपुराणे "संक्रान्त्यामुपवसेन पारणे न युधिष्ठिर!। एकादश्यां च कृष्णायां क्षये पुत्रोविनश्यति" नारदोऽपि "इन्दुभेदेकसंक्रान्त्यामेकादश्यां सितेतरे। उपवासं न कुर्वीत यदीच्छेत्सन्ततिं सुखमिति"। अत्र संक्रान्त्यादिषूपवासस्य निषेधः संक्रान्त्यादिनिमित्तकस्य। तथाच कात्यायनः "एकादशीषु कृष्णासु रवि संक्रमणे तथा। चन्द्रसूर्योपरागे च न कुर्यात्पुत्रवान् दृष्टी। तत्रयुक्तोपवासस्य निषेधोऽयमुदाहृतः। निमित्तान्तरयुक्तस्य न विधिर्न निषेधनमिति" जैमिनिरपि "तन्निमित्तोपवासस्य निषेधोऽयमुदाहृतः। नानुषक्तस्तोपाद्योवतोनित्यमुपोषणमिति"। अयमर्थः एकादश्युपवासस्य नित्यत्वात् संक्रान्त्याद्युपवासस्य च काम्यत्वात्काम्योपवासनिषेधे सति न नित्योपवासनिषेधः सिध्यतीति। संक्रान्त्यादिनिमित्तोपवासः संक्रमोक्तः। "अमावास्याद्वादशी च संक्रान्तिश्च निषेधतः। एताः प्रयत्नतस्तिथ-

यो भानुवारस्तथैव च । अत्र स्नानं जपोहोमो देवतानां च पूजनम् । उपवासस्तथा दानमेकैकं पावनं स्मृतमिति" । स्मृत्यन्तरे तु रूक्ष्यामेव निरुपवास इत्युक्तम् । नैमित्तिकाकाम्योपवासौ तु कृष्णायामपि कर्तव्यौ । तत्र नैमित्तिकः स्मृत्यन्तरे पठ्यते । "अयनीबोधनीमध्ये या कृष्णैकादशी भवेत् । सैवोपोष्या स्मृतेस्तेन नान्या कृष्णा कदाचनेति" । काम्यस्तु स्कन्दपुराणे "पितृणां गतिमन्विच्छन् कृष्णायां सन्नुपोषयेदिति" सनत्कुमारः "भानुवारेण संयुक्ता कृष्णा संक्रान्तिसंयुता । एकादशी सदोपोष्या सर्वसंपत्करी तिथिरिति" । मत्स्यपुराणेऽपि "एकादश्यां तु कृष्णायामुपोष्य विधिवत्तरः । पुत्रानायुः सद्गतिं च साम्राज्यं च स गच्छतीति" । दिनत्रये पुत्रवतो स्मृत्यन्तरोपवासोऽपि निषिद्धः तथा च पितामहः "एकादश्यां दिनत्रये उपवासं करोति यः । तस्य पुत्रा विनश्यन्ति मघायां पिण्डदोयथेति" । मत्स्यपुराणेऽपि "दिनत्रयेऽर्कसंक्रान्तौ पर्वणे चन्द्रसूर्ययोः । उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः" इति । दिनत्रयलक्षणं पद्मपुराणे "द्वौ तिथ्यन्तावेकवारे यस्मिन् स स्याद्दिनत्रयः" इति । यस्मिंस्तिथौ "एकस्मिन् वासरे त्रिषु तिथीनां वितयं यदा । तदा दिनत्रयः प्रोक्तस्तत्र साङ्कल्पिकं फलमिति" । फलमत्रोपवासव्यतिरिक्तदानादिजन्यं द्रष्टव्यम् उपवासस्य निषिद्धत्वात् । दैवस्य विषये किं कर्त्तव्यमित्याकाङ्क्षायां वायुपुराणे पठ्यते "उपवासे निषिद्धे तु भक्तं किञ्चित्प्रकल्पयेत् । न दुष्यत्युपवासेन उपवासफलप्रदेत्" । "नक्तं हविष्यान्नमनोदनं वा फलानिलाः क्षीरमथाम्बु वाज्यम् । यत्पञ्चगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरसत्तरं चेति" । उपवासासमर्थस्त्वेकभक्तादीनि कुर्यात् तथा च स्मृतिः । "उपवासेत्य यत्नात्तामशीतेरूर्ध्वजीविनाम् । एकभक्तादिकं कार्यमाहुर्बोधायनो मुनिरिति" । मार्कण्डेयपुराणे "एकभक्तेन नक्तेन तथैवायाचितेन च । उपवासेन दानेन न निहीदधिकोभवेदिति" । कूर्मपुराणेऽपि "एकभक्तेन नक्तेन क्षीणदुग्धाहारः स्त्रियेत् । नातिक्रामेद्दिनद्वयन्तु उपवासव्रतेन चेति" । स्मृत्यन्तरेऽपि "एकभक्तेन नक्तेन वाक्षीणदुग्धाहारः स्त्रियेत् । पयोमूलफलैर्वापि न निहीदधिकोभवेदिति" । भविष्यपुराणेऽपि "एकादश्यामुपवसेन्नक्तं वापि समाचरेदिति" । नित्यकाम्ययोरयन्तु प्रतिनिधिभिर्न तत्कारयेत्; । तथा च विष्णुरहस्ये "असामर्थ्ये परैरस्य व्रते च वस्तु पस्थिते । कारयेद्धर्मपत्नीं वा पुत्रं वा विनयान्वितमिति" । पैठीनसिः "भार्यां पत्युर्व्रतं कृत्स्नमुपवासाद्यात्मकं पतिव्रतम् । असामर्थ्ये परस्ताभ्यां व्रतभङ्गो न जायते" इति । स्कन्दपुराणे "पुत्रं वा विनयोपेतं भगिनीं भ्रातरन्तथा । एषामभावेऽन्यं ब्राह्मणं विनियोजयेत्" । अन्यत्रापि "भ्रातरं भगिनीं शिष्यं कारयेद्ब्राह्मणादिभिरिति" । स्मृत्यन्तरेऽपि "पितामहपतिभ्रातृश्वशुरगुर्वर्थभूभुजाम् । अष्टार्थमुपोषित्वा स्वयञ्च फलभाग्भवेदिति" कात्यायनः । "पितामहस्वश्वशुरभ्रातृगुर्वर्थं च विशेषतः । उपवासं प्रकुर्वाणः पुण्यं यत्नगुणं लभेत् । दक्षिणा नात्र दातव्या शुश्रूषा विहिता च सा । नारी च पतिमुद्दिश्य एकादश्यामुपोषिता । पुण्यं यत्नगुणं प्राप्नोत्यत्र मुनयः पारदर्शिनः । उपवासफलं तस्याः पतिः प्राप्नोत्यसंशयम् । राज्यस्वजनिवार्थं च एकादश्यामुपोषितः । पुरोधाः क्षत्रियस्यार्थं फलं प्राप्नोति निश्चितम् । पितामहादीनुद्दिश्य एकादश्यामुपोषणे । कृते ते तु फलं विप्राः ! समग्रं समवाप्नुयुः । कर्त्ता दशगुणं पुण्यं प्राप्नोत्यत्र न संशयः । यमुद्दिश्य व्रतं सोऽपि संपूर्णं फलमाप्नुयादिति" । प्रतिनिधौ च विशिष्टविशेषः स्मृतौ "काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः । काम्येऽप्युपक्रमादूर्द्धं कश्चित्प्रतिनिधिं विदुरिति" । अयमर्थः नित्यं नैमित्तिकं च प्रतिनिधिनाप्युपक्रम्य कारयेत् काम्यं तु स्वसामर्थ्यं परीक्ष्य स्वयमेवोपक्रम्य कुर्यात् असामर्थ्ये उपक्रमादूर्द्धं प्रतिनिधिनापि तत् कारयेत् ।

उपवासाकरणे प्रायश्चित्तं अथ ते "अष्टम्यान्तु चतुर्दश्यां दिवा भुक्त्वैव चरेत् । एकादश्यां दिवा रात्रौ नक्तञ्चैव तु पर्वणीति" स्मृत्यन्तरे "अर्के पर्वद्वये रात्रौ चतुर्दश्यष्टमीदिवा । एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणञ्चरेत्" ।

अथ काम्योपवासक्रमः तत्राङ्गिराः "सायमाद्यन्तयोरह्नोः सायं प्रातस्तथा मध्ये । उपवासफलं प्रेप्सुर्जह्यान्नक्तचतुष्टयम्" इति । देवलः "दशम्यामेकभक्तन्तु मांसमैथुनवर्जितः एकादशीमुपवसेत् पक्षयोरुभयोरपि । देवतास्तस्य तुष्यन्ति कामितं चास्य सिध्यतीति" हरिस्मृतिरपि "दिवानिद्रां परान्नं च पुनर्भोजनमैथुने । क्षौद्रं कांस्यामिषं तैलं हादश्यामष्ट वर्जयेदिति" कूर्मपुराणे "कांस्य मांस मसूरांश्च चणकान् कोरदूषकान् । शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियमिति" स्मृत्यन्तरेऽपि "शाकं मांसं मसूरांश्च

पुनर्भोजनमैथुने । द्यूतमद्यमधुपानञ्च दन्तस्यां वैष्णवव्रत-लोपेति "विष्णुधर्मोत्तरे" अस्नात्वाद्यान् हि यस्माद्य तुलस्य तत्रिकादलम् । आमलक्या: फलं वापि पारणे प्राश्य शुध्यति" "अस्नातस्याप्रपानं च दिवास्वापश्च मैथुनम् । ताम्बूलचर्वणं मांसं वर्जयेत् व्रतवासरे" इति च । वसिष्ठ: "उपवासे तथा श्राद्धे न खादेद् दन्तधावनम् । दन्तानां काष्ठसंयोगोऽस्नि यत्र कृतानि चेति" दन्तधावने प्रायश्चित्तं च विष्णुरहस्ये "श्राद्धोपवासदिवसे खादित्वा दन्तधावनम् । गायत्र्याः शतसंपूतमम्बु प्राश्य विशुद्ध्यतीति" हारीत: "पतितपाषण्डिनास्तिकसम्भाषणमन्तर्द्यूतादिकसुप्तवासादिषु वर्जयेदिति" कूर्मपुराणे "बहिर्ग्रामान्त्यजान् स्पृष्ट्वा पतितञ्च रजस्वलाम् । न शृणुयान्नाभिभाषेत नेक्षेत व्रतवासरे" इति विष्णुरहस्ये "स्पृत्यालोकनगन्धादिखादनं परिकीर्त्तनम् । अपञ्च वर्जयेत् सर्वं पाषानास्थाधिकङ्तृणम् । गात्राभ्यङ्गं शिरोऽभ्यङ्गं ताम्बूलं चानुलेपनम् । व्रतस्थो वर्जयेत् सर्वं यद्यन्मनसि नाकृतमिति" ब्रह्मवैवर्तपुराणे "क्षौद्रं मांसं सुरां शौद्रं लोभं वितथभाषणम् । व्यायामञ्च प्रवासञ्च दिवास्वप्नं तथाऽञ्जनम् । तिलपिष्टं मसूरांश्च द्वादश्यां वर्जयेन्नरः । द्वादश्यां वर्जयेच्चित्रं सर्वप्रायैः प्रसज्यते" इति ।

एकादश्यां श्राद्धं कृत्वापि न भोक्तव्यं तदाह कात्यायनः "'उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत् । उपवासं तदा कुर्यादाद्याय पितृसेवितमिति" तथा "मातापित्रोः क्षये प्राप्ते भवेदेकादशी यदा । अश्वर्क्षं पितृदेवांस्तु आजिघ्रेत् पितृसेवितमिति" यत्तु वचनम् "श्राद्धं कृत्वा तु यो विप्रो न भुङ्क्ते पितृसेवितम् । कृविर्देवा न गृह्णन्ति कव्यञ्च पितरस्तथेति" तदेकादशीव्यतिरिक्तविषयम् आचारेणापि भोजनकार्य्यं सिध्यति तस्य भोजनकार्य्ये विधानात्"

व्रतकाले दानार्चनरहितसुपवासकालं कुर्यात् तदुक्तं कूर्मपुराणे "काम्योपवासे प्रक्रान्ते त्वत्करा व्रतकर्त्तके । तत्र तावद्व्रतं कुर्यात्तदानार्चनविवर्जितम्" इति वराहपुराणे "व्रतके च नर: स्नात्वा प्रणम्य मनसा हरिम् । एकादश्यां न भुञ्जीत व्रतमेवं न लुप्यते । व्रतके न च भुञ्जीत एकादश्यां सदा नर: । द्वादश्यान्तु समश्नीयात्स्नात्वा विष्णुं प्रणम्य चेति" । तत्र परित्यक्तं देवार्चनं व्रतकाले कुर्यात् तदुक्तं मत्स्यपुराणे "व्रतकाले न स्नात्वा पूजायित्वा जनार्द्दनम् । दानं दत्त्वा विधानेन व्रतस्य फलमश्नुते" इति । स्त्रीणां रजोदर्शनेऽपि न व्रतलोप: किन्तु देवतार्च्चनादिरहितं व्रतकादाविधोपवासमात्रं कार्य्यं तदाह पुलस्त्य: "एकादश्यां न भुञ्जीत नारी ह्यृतुरजस्यपि" इति । अत्यत्रह: "संप्राप्तेऽपि रजसि व्रतार्च्चं द्वादशीव्रतमिति" । सत्यव्रतोऽपि "प्रारब्धद्वादशव्रतां नारीणां चेद्रजोभवेत् । न तत्रापि व्रतस्य स्याद्व्रतरोध: कदाचनेति" शुद्धाम्बरं देवतार्च्चनादिकं कुर्यात् तथा च स्मृति:"स्नात्वा मन्त्रवतार्घ्यञ्च शुद्धा स्यात्परिचारके । पञ्चमेऽह्नि शुद्धा स्याद्दैवे पित्र्ये च कर्म्मणीति"

नित्योपवासप्रकारो विष्णुरहस्येऽभिहित:"अथ नित्योपवासी चेत्स्यां प्रातर्भुञ्जिक्रियाम् । वर्जयेन्नतिमात्रञ्च विप्र: संप्राप्ते हरिवासरे" इति ब्रह्मवैवर्त्तेऽपि "इति विज्ञाय कुर्वीत नित्यमेकादशीव्रतम् । विशेषनियमायक्षोऽहोरात्रं भुक्तिवर्जित: । निष्टप्तेन्द्रियव्रात: अहोरात्रोपवासपर: । उपोष्यैकादशीं यामाद्भुज्यते नात्र संशय:" । यक्षौ सत्यां नियमाचरेत् तदा च जाबालायन: "यक्षिमांस्तु ततः कुर्यान्नियमं सविशेषतमिति" ।

यदा द्वादश्यां श्रवणनक्षत्रमभवेत् तदा शुद्धैकादशीमपि परित्यज्य द्वादश्यामेवोपवसेत् तथा च नारदीये "शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता । तयोरेवोपवासस्तु त्रयोदश्यां च पारणमिति" तथा "एकादश्यान्तु विद्धायां संप्राप्ते श्रवणे तदा । उपोष्याद्वादशी शुद्धा सर्व्वपापप्रणाशनेति" यदा पारणपर्य्याप्ता द्वादशी स्यात्तदा तस्यामेव पारणा कार्य्या न तु त्रयोदश्यां तदुक्तम् "भवेद्यत्र त्रयोदश्यां द्वादश्यास्तु चतुष्टयम् । द्वादश द्वादशीर्ह्यत्र त्रयोदश्यां तु पारणम् । अतादृङ् त्रयं यत्र द्वादशी न त्वतिक्रमेत् । पारणे सरणे चैव तिथिस्तात्कालिकी स्मृतेति" मनु द्वादश्यतिक्रमेऽपि नास्ति दोष: "सा तिथि: सकला ग्रसेति "वचने साकल्यविधानादिति चेत् मैवं साकल्यस्य स्नानादिविषयत्वात् वाक्यशेषे "स्नानदानजपादिषु"इत्यभिधानात् । पारणे तु साकल्यवचनं न प्रवर्त्तते "तिथिस्तात्कालिकी ग्रसेत्युक्ते:

अल्पद्वादशीकाले यदा पारणन्तदा सन्धि: प्रागेवसर्व्वा: क्रिया: कर्त्तव्या: तदुक्तं नारदीये "अल्पावामत्व विप्रेन्द्र! द्वादश्यामरुणोदये । स्नात्वार्चनादिका: कार्य्या दानहोमादिसंयुता: । एतस्मात्कारणाद्विप्र! प्रत्यूषे स्नानमाचरेत् । पित्र्यदैवसमायुक्तं सत्यां तद्वच्च द्वादशीम् । अहोरात्रिकरी श्रेष्ठा द्वादशी कथिता बु

वाम् । वरोति धर्म्मरत्नमालातेष वरणमीति" तद्वद्धरादेऽपि "यदा खल्वा हादशी स्यादपरेद्युर्भुञ्जीतैवेत् । प्रातर्मध्याह्निकयोपि तत्र चादपरेद्युरिति" । स्कान्दपुराणे तु "यदा भवेदतीवाल्पा हादशी पारणादिने । अपरेद्युर्दृयं कुर्यात् प्रातर्मध्याह्निकद्वयमिति" । तत्र पारणा तत्रैव अङ्गिः पारणङ्कुर्यात् तदाह कात्यायनः "सन्ध्यादिवत्प्रवेशित्वं पारणस्तु निशिक्षतः । अङ्गिस्तु पारणं विद्याच्चैतिक्षान्ते भुजिर्भवेदिति" देवलोऽपि "सङ्कटे विषमे प्राप्ते हादश्यां पारवेत्कथम् ? । अङ्गिस्तु पारणङ्कुर्यात्पुनर्भुक्तं न दोषकृदिति" । यदा त्वत्यापि हादशी नास्ति तदात्वयोदश्यामपि पारणङ्कुर्यात् तदुक्तं नारदीये "त्रयोदश्यां तु शुक्लायां पारणं पृथिवीफलम् । शतयज्ञाधिकं वापि नरः प्राप्नोत्यसंशयमिति" । पारणञ्च नैवेद्यमिश्रितङ्कुर्यात् तदुक्तं स्कान्दपुराणे "ज्ञात्वा वैष्णवयोऽश्नाति हादश्यादिने । नैवेद्यं तुलसीमिश्रं कृत्वाकोटिविनाशनमिति" ।

अस्यामेकादश्यां वाल्पुपवासप्रतिनिधिरूपाणि एकभक्तनक्तायाचितदानानि तेषां प्रतिपद्भुक्त्वाप्येकोपवासतिथावेवानुष्ठानं, यत्र तु स्वतन्त्रायत्तैकभक्तनक्तादीनि तेषां पूर्व्वोक्तन्यायेन मध्याह्नादिव्यापितिथिपरिग्रहः प्राप्तौ दशमीविद्धा प्रतिषिध्यते द्वादशीकल्पे "पूर्वाविद्धां दिनार्द्धेन नन्दां पूर्वामपि त्यजेत् । यदीच्छेदात्मसन्तानं निखमेषु चतुर्ष्वपि । नोपोषितं च नक्तञ्च नैकभक्तमवाचितम् । नन्दायां पूर्वविद्धायां कुर्याद्दैवं न मोहितः । एकादशी तिथा यत्र द्वादश्या वसुपोषके । तत्र चाप्याचितं नित्यं नैकभक्तं तथाऽनघ ! । नक्तञ्चाप्याचितं तात ! नैकभक्तं तथाचरेत् । दशमीसहिते दानमनर्थं फलमाचरेत्" इति दिनार्द्धेन वार्द्धमुहूर्त्तैरित्यर्थः । एतदेवाभिप्रेत्य "दिनपञ्च दशनिघ्नेति" उदाहृतम् । तथा "वार्द्धमुहूर्त्तैस्तु वेधाऽयं बाधते व्रतमिति" एतदुनवेधे तु तिथ्यन्तरव्याप्त्याद्दिव्यापित्वं ज्ञातव्या" ।

अत्राधिकारिविशेष हरि०भ०वि०धृते "सङ्कल्पोन्नत्ता चारी वा आहिताग्निर्यतिस्तथा । एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि" । पाद्मोत्तरखण्डे "वर्णानामाश्रमाणाञ्च स्त्रीणाञ्च वरवर्णिनि ! । एकादश्युपवासस्तु कर्त्तव्योनात्र संशयः" । "एतच्चातुरपारणाविषयं । एकादश्युपवासः कर्त्तव्यः । कुर्याच्चारीवा नारी वा पक्षयोरुभयोरपि" विष्णुधर्म्मोत्तरीयम् "वैष्णवो वाथ मैत्रोवा कुर्यादेकादशीव्रतम्" । गौरपुराणम् "वैष्णवोवाथ मैत्रोवा सौरोऽन्येतत् समाचरेत्" । स्कान्दम् । "न मैत्रेण च सौरेण नान्यमी तीर्थसेवकः । भोभुङ्क्ते वासरे विष्णोः स्वपचादधिको हि सः । विप्रेण तेन मे गौरि ! ज्ञातं दुष्टेन पापिना । अहमक्षिसमाश्रित्य येन भुक्तं हरेर्दिने" । "विधवा वा भवेद्वारी भुञ्जीतैकादशीदिने । तस्मात्तु सुव्रतं मर्त्यैः भूत्वोदत्वा दिनेदिने" कात्या० । एकादशीं विना व्रतञ्च यतिस्त्रीशूद्रजातयः । पच्यते ज्ञानतोऽज्ञाने यावदाकूतसंप्लवम्" नारदीयम् । "सधवायास्तु पक्षद्वयेऽप्येष एवाधिकारः । "सपुत्रस्य सभार्य्यस्य सव्रतस्य भक्तिसंयुतः । एकादश्यामुपवसेत् पक्षयोरुभयोरपि" विष्णुधः । तदनुमत्या सधवाया अधिकारिता कालमा० दर्शिता ।

"वैष्णवस्योभयपक्षयोर्नित्याधिकार यथाह तत्त्वसागरे । "यथा शुक्ला तथा कृष्णा यथा कृष्णा तथेतरा । तुल्ये ते मनुते यस्तु स वै वैष्णव उच्यते" एवमेव ए०त०रघु० । "व्याधिभिः परिभूतानां पित्ताधिक्यकरोरिणाम् । तिथिग्रहर्क्षाधिकानाञ्च नक्तादिपरिकल्पनम्" मार्क० पु० । प्रायुक्तकालसाध्यव्रतानुष्ठानेष्वेकादश्यादिव्रतकालादिव्यवस्था सर्व्वदेशवासिभिः प्रायेणाद्रियते । गौड़निवासिभिस्तु रघुनन्दनोक्ता व्यवस्थाद्रियते । तत्रातिवृद्धव्यवस्था तु एकादशी त०धृतवचनजातादनुसन्धेया तत्र संक्षेपतस्तु दर्शितो यथा "तत्र संक्षेपः पारणादिने द्वादशीकाले सर्व्वत्र पूर्वां त्यक्त्वा खण्डाद्वयेपवसेत् तदलाभे स्वल्पे पूर्व्यां तदन्यत्परे विधवापि । यदा तु पूर्व्वदिने दशम्या उत्तरदिने द्वादश्या युक्तैकादशी तदोत्तराद्वयेऽप्य द्वादश्यां पारणं कुर्यात् । परदिने द्वादश्यानिर्गमे त्रयोदश्यामपीति । यदा तु सूर्य्योदयानन्तरं दशमीयुतैकादशी अद्य च परदिने न निःसरति तदा तां विद्धाव द्वादशद्वयेपवसेत् । (अत्रमाधवमते भेदः) यदा तु सूर्य्योदयात् प्राक् त्रिमुहूर्त्तादिदशमीविद्धैकादशी परदिने न निःसरति तदा तामुपवसेत् । यदा तु तथाविधा सती परदिनेऽपि निःसरति तत्परदिने च द्वादशी तदा तां विद्धाव द्वयेनोपोष्य द्वादश्यां पारयेत् । यदा तु पूर्व्वदिने तद्विद्धैकादशी परदिने च द्वादशी तदा मध्यदण्डत्रिंशां विद्धामुपोष्य परदिने द्वादश्याः प्रथमपादेनोषः पारयेत् । वैष्णवस्तु तत्रापि शुक्लपक्षे परामुपोष्य त्रयोदश्यां पारयेदिति ।

सर्वेषां तथैकादश्यां वैष्णवानां सदुपवासो स्मार्त्तानामशक्तपवासोनित्यः । प्राजापत्यस्य तु विशेषतो-नित्यः । वैष्णवेतरेषान्तु ताडयानां फलश्रवणमध्यवर्त्ति-नीषु तथैकादश्यामुपवासोनित्यः । अयुक्तानां स्मार्त्ति-स्यान्तु सर्व्वास्वेव नित्याधिकारः । काम्योपवासे तु अ-विशेषेण सर्व्वेषामधिकारः । नित्योपवासे तु रविसं-क्रमणादिदोषोनास्ति अष्टाब्दादिकोभर्त्तोत्तरपूर्व्वायोतियत्-करोनित्याधिकारी विधवायास्तु सर्व्वास्वेव नित्याधिकारः ।

अत्र मलमासादिदोषोनास्ति । यथा ज्योतिः परा-शरः "अनादिदेवतात्वाच्च कालदोषोन विद्यते । नित्य-काम्यव्रतयोगे च तथैकादशीव्रते"एका०त०रघु० ।

अत्र विशेषोदेशमाह स्कान्दे ।"एकादशी कला यत्र द्वादशी च लवं गता । नक्तं तत्र प्रकुर्व्वीत नोपवासं कदाचनी" । अतोपवासविधायकसामान्यवाक्यस्य नक्तविधायकविशेषवाक्येन बाधः । "एकादशी कला-प्येका द्वादशी यत्र लभ्यते । तत्रोपवासं कुर्वीत विष्णु-प्रीणनतत्परः" तत्रैव स्कान्दम् । "तत्र पूर्वापर-त्वमपर्य्यालोचनया नक्तविधानं कामिनः काम्योपवास व्रतविषयं, निष्कामस्य, नित्योपवासादिनो विष्णुपरायणस्य कदाप्यनुपवासः" ए० त० रघु० । वाचस्पतिमते "निष्कामस्तु कदा कुर्य्यादुत्तरैकादशीं तथा । सकामस्तु तदा पूर्वां कुर्य्यान्नोचेदवाप्नुयात्" विष्णुरहस्यात् सकामेन तत्र दशमीविद्धा कार्य्या निष्कामेण द्वादशी-युक्तोपोष्येतिभेदः ।

वेधविषये हेमाद्रौ तु सार्द्धषटिकात्रयोक्तिरष्टाविंशति-मात्रारात्रिविषया मकरस्थरात्रौ रात्रीरभेद्य चन्द्रोद-टिकायाञ्च "निशःप्राप्ते तु यामार्द्धे देवादित्यवादने । द्वादशतालध्वयने चाद्यघोदय उच्यते इति "स्मृतेरित्युक्तम् । हेमाद्रिनतात्रुसारेण निष्क०सि० एकादशीभेदा अष्टा-दशेत्युक्तम् तद्व्यवस्था तत्रोक्ता यथा

"शुद्धा विद्धा हयो नन्दा लेखा न्यूनसमाधिकैः । षट्प्र-कारा: पुनस्तेषा द्वादशन्यूनसमाधिकाः" इत्यष्टादशैकादशी भेदाः तत्र शुद्धाधिकन्यूनद्वादशिका शुद्धाधिकसमद्वादशिका च क्रमात्रैः पूर्वा निःशङ्कैवोत्तरा कार्या "प्रथमेऽह्नि संपूर्णैः" पूर्वोक्तस्कान्दात् "समद्वादशिकायां तु विष्णु-प्रीतिकामैर्व्रतयुग्मत्वहेतवं कार्य्यम् "संपूर्णैकादशी यत्र प्रभाते पुनरेव वा । लभ्यते द्वादशी क्वचिदुपवासः कथं भवेत् ? । उपोष्य द्वे तिथी तत्र विष्णुप्रीणनतत्परैरिति" इदवचि-त्रोक्तेः । "शुद्धन्यूना शुद्धाधिका शुद्धसमा विद्धन्यूना विद्ध समाधिकद्वादशिका च सर्व्वैः परैरेति" हेमाद्रिः मदनरत्ने तु शुद्धाधिका परा । "संपूर्णैकादशी यत्रेति" पूर्वोक्तेः । "शुद्धा यदा समा हीना समा स्वाधिकोत्तरा । एकादशी त्रयस्त्रेते शुद्धां वैष्णवोलभेति"स्कान्दात् अत्र शुद्धा एका दशी, उत्तरा द्वादशी "नवेदेकादशी विद्धेति"नारदो-क्तेश्च । यत्तु "अविद्धापि च विद्धा स्यादिति" पाद्मात् तच्छुद्धाधिकापरम् । यत्तु "संपूर्णैकादशी त्याज्या परतो द्वादशी यदि । उपोष्या द्वादशी शुद्धा द्वादश्या मेव पारण-मम्" इत्यादि तदुत्तरैव्यापरम् । आद्यानां तु पूर्वैवेत्युक्तम् । विद्धन्यूना समद्वादशिका तु तत्तत्पूजां पुत्रवतां च परा अ-न्येषान्तु पूर्वा । पुत्रवतोऽपि पूर्वेति मदनरत्ने । विद्धसमा समद्वादशिकोनद्वादशिका च तत्तत्पुंभिः परान्यैः पूर्वा कार्या ।"दशमी मिश्रिता पूर्वा द्वादशी यदि लभ्यते । शु-द्धैव द्वादशी राजन्नुपोष्या मोक्षवाञ्छिभिरिति" व्यासोक्तेः मोक्षवाञ्छिव्यक्तिकत्वेनां पूर्ववैव । "पारणाहे न लभ्येत द्वादशी सलयापि चेत् । उदयौ दशमीविद्धावुपोष्यैकादशी तिथिरिति" ब्रह्मवैवर्त्तोक्तेश्च । विद्धाधिका समद्वा-दशिका च सर्व्वैः परैव माधवमते तत्र वृद्धिक्षयः पूर्वा मतेत्तरा "सर्व्वैकादशी कार्य्या द्वादशीविमिश्रिता नरैः । प्रातर्भवेद्यदा या वा यतो निलम्पोपवासिति" प्राचेतसोक्तेः । विद्धाधिका न्यूनद्वादशिका मोक्षपरैः विष्णु-प्रीतिकामैः परा कार्या वृद्धिक्षयेन तु नक्त कार्य्यम् "एकादशी द्वादशी च त्रयोदश्येव लक्षणे । उपवासं न कुर्वीत पुत्रपौत्रसमन्वित" इति कौर्मे दिनत्रये उपवास निषेधात् । "दशम्येकादशी विद्धा द्वादशी च लवं गता । मोक्षा वा द्वादशी सैवा नक्तं तत्र वृद्धिक्षयः स्मृत-मिति" इदयातातपोक्तेश्च वृद्धिक्षयः पूर्वतोपवासः । ए-कादश्याः शुद्धन्यूनत्वे शुद्धसमत्वे वा द्वादश्या न्यूनसम-त्वयोरेकादश्यामुपवासः । यानि तु "दशम्येकादशी विद्धा द्वादशद्वादशी फलम् । धर्मार्थिभिर्धनार्थिभिश्च त्रयोदश्यां तु पारयेदिति" कौर्मादीनि दशमीवेधबलोद्भः पारण्यवेधानि तानि विक्षिप्तचित्तपरापि, अत्र मूलवचनानि तदुव्यवस्था चाकरे द्रष्टव्या । यत्तु वाराहेहाद्रौ"वृद्धावृद्ध-विरोधेन सन्देहो जायते यदा । द्वादशी तु तदा ग्राह्या त्रयोदश्यां तु पारयेदिति" वाराहेऽप्युक्तेः "वह्निश्चेषु च वाक्येषु द्वादशी दशमीयुतेत् । विवाहेषु च सर्व्वेषु द्वा-दश्यां दशमीयुतम् । पारणं च त्रयोदश्यामाहोक्तं मा-

मकी स्मृते ।" इति पाद्मोक्तेश्च वेधसन्देहे ज्योतिर्विदां वि प्रतिपत्तौ वा परा कार्यैव्यम् । तदुक्तं वैष्णवविषयम्"

"अथात्रोपयुक्तं किञ्चिदुच्यते । तत्र दशम्यामेकादश्योगे दशमीमध्य एव भोजनम् । "एकादश्यां न भुञ्जीतेति" तस्या एव निमित्तत्वात्, "निषेधस्तु निहत्साक्षाद्भोजनमपेक्षते" इति देवलोक्तेश्च । केचित्तु एकादशी व्रताङ्गत्वेन पूर्वेद्युरेव क्रियाकालादिधिस्पृष्टे च विषये निषेधानवकाशेन काम्यव्रताङ्गे न भोजननिषेध प्रवर्त्तते ते नैकादशीमध्येऽपि पूर्वदिने भोजनमित्याहुः"निर्ण०सि०। तत्रैकादशीदिवसे आद्धप्राप्तौ विशेषः नि०सि० उक्तः

माधवीये "उपवासो यदा नित्यः" इत्यादि प्रागुक्त कात्यायनवाक्यमाश्रित्य उपवासदिनेश्राद्धं कृत्वा आद्धशेष वाश्नं कार्य्यमिति व्यवस्थाप्योक्तम् ; "हेमाद्र्यादिसंवनिबन्धेष्वयम् । एतेनैकादशीनिमित्तकं श्राद्धं द्वादश्यां कार्य्यमिति" बहवः परास्ताः किन्तु, मदालये । "स पक्षः सकलः पूज्यः श्राद्धशेषमकं प्रतीति, स्मृतं षोडशत्यम् । यौवैकादश्यां च मन्वादिश्राद्धं, त्रयाङ्गापरिग्राने च कृष्णैकादश्यां विहितं श्राद्धं बाधितमेव स्यात् । यद्यपि स्मृतिचन्द्रिकास्थं पठन्ति । "अन्नाश्रितानि पापानि तन्नोक्तदोषदुरेव वा । भञ्जन्ति पितरस्तस्य नरके शाश्वतीः समा इति । तस्यापि रागप्राप्तभुजिगोचरस्य वैधं श्राद्धं गोचरयतां भक्तश्राद्धसमित्यलम् । योऽपि "अक्षतश्राद्धविषया जलपिण्डविनाकृताः" इति लघुनारदीये एकादश्यां श्राद्धादिनिषेधः स मातापितृभिन्नविषयः पूर्ववाक्ये तदुपक्रमात्"

कृरिमल्लिविलासस्तुवारिष्वस्तु वैष्णवदीक्षावतां तद्दिने श्राद्धनिषेधः द्वादश्यां तत् करणीयमिति वदन्ति यथा "अथोपवासदिने श्राद्धनिषेधः । पाद्मे पुष्करखण्डे "एकादश्यां यदा राम ! श्राद्धं नैमित्तिकं भवेत् । तर्हि तं तु परित्यज्य द्वादश्यां श्राद्धमाचरेत्" । तत्रैवोत्तरखण्डे "एकादश्यान्तु प्राप्तायां मातापित्रोर्मृताहनि । द्वादश्यां तत् प्रदातव्यं नोपवासदिने क्वचित् । गर्हितान्नं यदाश्नन्ति पितरस्य दिनैकशः" । स्कान्दे "एकादशी यदा नित्या श्राद्धं नैमित्तिकं भवेत् । उपवासं यदा कुर्यात् द्वादश्यां श्राद्धमाचरेत्" । ब्रह्मवैवर्त्ते । "ये कुर्वन्ति महीपाल ! श्राद्धं त्वेकादशीदिने । त्रयस्ते नरकं यान्ति दाता भोक्ता परेतकः" । कृरिमल्लि० धृतवाक्यानि ।

"एकादश्यां यदा रामेत्यादिना उपवासदिने श्राद्धं निषिद्धम् । यच्च स्कान्दादौ "श्राद्धदिनं समासाद्य उपवासो यदा भवेत् । तदा कृत्वा तु वै श्राद्धं भुञ्जीयान्तु यद्भवेत् । तत् सर्व्वं दक्षिणे पाणौ गृहीत्वाद्धं विचिन्तयेत् ।। अयमभिप्रेतोनार्थ भवेत् श्राद्धं विचिन्तयेत् ।। पितृणां ह्यग्रिदं तात ! व्रतभङ्गो न विद्यते" इत्यादि । तच्च वैष्णवेतरविषयं मन्तव्यम् वैष्णवपितृष्वपि श्रीविष्णुदिने श्राद्धभक्षणायोगादिति" तट्टीका ।

अत्रेदं बोध्यं स्मृतिचन्द्रिकास्थवचनेन कृरिमल्लिविलासधृतवचनचतुष्टयेन च उपवासदिने श्राद्धनिषेधात् प्रागुक्त कात्यायनस्कान्दादिवचनेन श्राद्धशेषभोजनसम्भवेऽपि आधाधमात्राङ्गकतया श्राद्धविधानात् परस्परं विरोधस्यापि विरोधपरिहाराय कर्तृभेदविषयकत्वमवश्य कल्पनीयं तद्विना तद्परिहारात् तत्र वैष्णवेतरविषयता आधाधाङ्गश्राद्धस्य, वैष्णवविषयकतया च श्राद्धनिषेधस्य कल्पनं युक्त न च विनिगमनाविरहेण वैपरीत्यं शङ्कनीयं वैष्णवस्य सत्वगुणाधिकविष्णोः सेवकत्वेन सात्विकपुराणोक्तविधेरेव श्राद्धतया सात्विकपुराणेषु च पाद्मस्य कीर्त्तनात् वैष्णवैः पाद्मोक्तविधेरेव श्राद्धतौचित्येन स्कान्दस्य तामसत्वेन तदुक्तविधेस्तत्रैवाद्धतौचित्येन च विनिगमनासम्भवात्"पाद्मस्कान्दयोर्यथा सात्विकतामसत्वं तथोक्तम्" मात्स्यं कौर्म्मं तथा लैङ्गं शैवं स्कान्दं तथैव च । आग्नेयस्य षडेतानि तामसानि निबोधत । वैष्णवं नारदीयञ्च तथा भागवतं शुभम् । गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने । सात्विकानि पुराणानि विद्धियानि शुभानि वट्" पद्मपु० । एवञ्च सति पाद्मवाक्यस्य वैष्णवविषयकत्वनिश्चये स्कान्दकात्यायनादिवाक्यस्य तद्दितरविषयत्वं निर्णीयते । निर्णयसिन्धुकृता श्राद्धनिषेधवाक्यस्य मातापितृश्राद्धव्यतिरिक्तविषयकत्वं यत्कल्पितं तच्च मनोरथमं पाद्मोक्तवाक्ये गर्हितान्नं न दृष्टमतो पितरदृति पितृमात्रस्यापदृष्टेः सर्व्वश्राद्धस्यैव निषेधात् मातापित्रोर्मृताहनात्वादिपाद्मोत्तरवचने तयोरपि श्राद्धनिषेधात् । तेन कैमुतिकन्यायेनेतरश्राद्धस्यापि निषेधः सुप्रपञ्च एव । किञ्च शेषभोजननिमित्तकाद्धयोरभोज्यरूपतया आसीनां शेषभोजनरूपाङ्गबाध वैष्णवानां तु श्राद्धबाध इत्युभयोरपि एकतरबाधस्य शास्त्रबोधिततया न दूषकत्वम् । आसौरपि यस्तोदया दिनिमित्तकोपवासदिने श्राद्धं निषिद्ध पश्चात् परेद्युः श्राद्धविधानेन श्राद्धरूपाङ्गबाधस्य तत्र बीजारोप्य तद्-

दवापि एकादश्युपवासदिनस्यैव विद्धतादृक्फलकालबाधेनोत्तरदिने आद्धविधानेनावश्यम्। तथा च "अस्तोदये यदा चन्द्रे प्रत्यब्दं समुपस्थितम्। तद्दिने चोपवासः स्यात् प्रत्यब्दं तु परेऽहनि" "अस्तावेशात्समानं तु रवीन्दू प्राप्नुतो यदि। प्रत्यब्दं तु तदा कार्यं परेऽह्न्येव सर्व्वदा" नि० सि० धृतवचनैः निमित्तकालबाधेनापरेद्युः आद्धकालः। एतेन एकादशीव्रतदिवसे आद्धनिषेधे विप्रपतितश्राद्धस्य कृष्णैकाद्श्यां विधानम् अश्वयुक्कृष्णपक्षनिमित्तकषोडशश्राद्धविधानञ्च निर्विषयं स्यादित्यापत्तिरपास्ता विषयभेदेन व्यवस्थासम्भवात्। तथाहि विप्रपतिताद्धे आद्धकालव्याप्तैकादशीतिथिमात्रस्य निमित्तता तस्य व्रतदिवसात् पूर्व्वेद्युरपि कदाचित् सम्भवेन तदुपविध्यत्वाभावेन निर्विषयत्वाभावात् कचिदेकदिने तत्प्रसक्तावपि सामान्यरूपेण प्रवृत्तस्यास्य उपवासदिनव्यतिरिक्ततिथिखण्डविषयकत्वकल्पनेनाविरोधः। किञ्चात्र कर्त्तृभेदेन व्यवस्थाप्युपपद्यते वैष्णवेतरसपुत्रमृतस्यैव कृष्णैकादश्युपवासस्य नित्यत्वाभावेन तत्परं श्राद्धविधानं, वैष्णवविषयः श्राद्धनिषेध इति कर्त्तृभेदसम्भवात्। अश्वयुक्कृष्णपक्षनिमित्तकषोडशश्राद्धविधानमपि न निर्विषयं तिथिच्छासादिप्रयाद्येकसावनदिवसे तत्तद्विहितश्राद्धद्वयवद्वैष्णवैः द्वादश्यां श्राद्धद्वयकरणेन षोडशसंख्यापूर्त्तिसम्भवात्। पौर्णमासीप्रभृत्यमावास्यादिनिमित्तकश्राद्धस्यापि नैमित्तिकतया मन्वादिद्वयत्वेन पर्व्वाह्णे विहितत्वेन उपवासदिन एव तत्सम्बन्धस्यैव लाभसम्भवेन पूर्व्वदिवसे च तदसम्भवेन विरोधप्रसक्तेरपि वैष्णवानां द्वादश्यामेव कृताद्धश्राद्धस्येव तस्य कर्त्तव्यता वैष्णवेतरमृतस्यास्य तद्दिने कर्त्तव्यतेति कर्त्तृभेदात् व्यवस्थाया नानुपपत्तिः।

पाद्मे नैमित्तिकमित्युक्तेः ब्रह्मवैवर्त्ते परेतकृत्युक्तेश्च आद्यश्राद्धमपि एकादश्युपवासदिवसे वैष्णवैर्न कर्त्तव्यमेव। "एकोद्दिष्टं तु यत् श्राद्धं तन्नैमित्तिकमुच्यते। तदप्यदैविकं कार्य्यं मयुग्मानाग्नयेदु द्विजान्" इति भविष्य पु० एकोद्दिष्टस्य नैमित्तिकत्वेन परिभाषितत्वात् प्रेतोद्देश्यकश्राद्धस्य च एकोद्दिष्टत्वात् तस्यापि तद्दिने निषेध एव प्रेतश्राद्धस्य यथैकोद्दिष्टत्वं तथैकोद्दिष्टशब्दे वक्ष्यते इत्यं स्मार्त्तवैष्णवकर्त्तृभेदात् व्यवस्थाभेदः।

एकादशगुरु पु० एकदशमिता गुरवः। "आचार्य्यश्च पिता ज्येष्ठोभ्राता चैव महीपतिः। मातुलः श्वशुरश्चाता मातामहपितामहौ। वर्णज्येष्ठः पितृव्यश्च पुंसोते गुरवोमताः" इति देवलोक्तेषु आचार्य्यादिषु। त्राता त्राणकर्त्ता। वर्णज्येष्ठः क्षत्रियादीनां ब्राह्मणादिः। "अनेनैकादश गुरवःसङ्केतिताः। कथमनेकेषामेकगुरुशब्दवाच्यत्वमेकस्य प्रवृत्तिनिमित्तस्याभावात् इति चेन्न "गुरूनुगन्तव्यः" इत्यादि श्रुत्या यदापरितोषणीयत्वादिधर्म्मात्मकस्योपाधित्वात् यद्यप्याचार्य्यस्यैव परितोषणीयता श्रूयते तथापि तदन्येष्वतिदिश्यते अतोऽतिदिष्टधर्म्मोऽप्येकपदप्रवृत्तावुपाधिर्भवति दृष्टिशब्दप्रवृत्ताविव तद्धर्म्मसंबन्धः शास्त्रीयगुरुपदप्रवृत्तिविषयत्वं बोधाधिर्भव तु विशेषापेक्षादाचार्य्यशब्दवदनेकार्थतैव कोदोषः" प्रा० वि०। अयञ्च शब्द एकादशिनशब्दात् पूर्व्वं बोध्यः प्रमादात्तत्र न लिखितोऽतोऽत्र लिखितः।

एकादशराशिक न० एकादश राशीनधिकृत्य प्रवृत्तं गणनम् कन्। लीलावत्युक्ते गणनप्रकारभेदे तत्प्रकारश्च तत्रैव यथा "पञ्चसप्तनवराशिकादिकेऽन्योन्यपक्षनयनं फलच्छिदाम्। संविधाय बहुराशिजे बधे स्वल्पराशिवधभाजिते फलम्" इत्युक्तदिशा फलानयनम्। तत्रोदा० "त्रिघ्ने वेदकृतिताङ्कलाः किल चतुर्वर्गाङ्कला विंशतौ पि० १२ ८ षट्त्रिंशद्धतया चतुर्हय करास्त्रिघ्नास्त्रिभिः" वि० १६ १२ "एता विंशतिदोर्घत्रिघ्नमितयो वेदा दो० १४ १० चतुर्वर्जिताः" इति नवराशिके उक्ता। मि० ३० १४

"षड्हते प्रथमोदितप्रमितयोगव्यूतिमात्रे गतास्तेषा वि० १२ ८ मानमनाय चेच्छकटिनां दूरात्पथं भाट वि० १६ १२ कम्। अन्ये ये तटनन्तरं निगदितामाने दो० १४ १० चतुर्वर्जितास्तेषां का भवतीति भाटक मि० ३० १४ मितिर्गव्यूतिषट्के वद"। अत्र फलस्वेतर ग० १ ६ पक्षनयने तस्य बहुराशिकत्वं तद्विहितपक्षस्य भा० ८ ० स्वल्पराशिता तेन समानाङ्कोभयपक्षयोरपवर्त्तने फलसहितबहुराशिपक्षस्याङ्कस्य परस्परगुणने जाताः ४८अङ्काः फलरहितपक्षाङ्कानां परस्परघातनिष्पन्नेन ६ षड्हतेन भाजिते लब्धाः ८अष्टौ अङ्केन अष्ट दूरात्पथं भाटकमितिरिति तत्र विषयः। अत्रेदमवधेयम फलच्छिदामित्युक्तावपि फलच्छेदभिन्नराशिच्छेदस्यैव अन्योन्यपक्षनयनमेव तु फलच्छेदस्येति। अयञ्च शब्दः एकादशहारशब्दात् परं बोध्यः प्रमादात्तत्र न लिखितोऽतोऽत्रोक्तः।

एकादि त्रि० एक आदिर्यस्य। [एकतस्य ख्यातिपरारभ्य परार्द्धान्तसंख्यायुक्ते। २ तत्प्रकारके रेखासन्निवेशविशेषकर्मे-

अङ्के च । अङ्कास्य नव तेषामेव स्थानविशेषयोगभेदेन विभिन्नसंख्याकारकत्वम् । अथ एकादयङ्कैः यद् यत्संख्यान्विताः आर्यत्वे तदुच्यते ।। इत्यङ्केन एकः एवं २,द्वौ, ३,त्रयः, ४,चत्वारः ५,पञ्च ६,षट् ७,सप्त ८,अष्टौ ९,नव १०,दश । दशानामेकादिनवभिरङ्कैराधिक्ये ११,१२,१३,१४,१५,१६,१७, १८,१९ इत्येतेऽङ्काः क्रमेण एकादयद्वादशत्रयोदशचतुर्दश पञ्चदशषोडशसप्तदशाष्टादशनवदशानां कारकाः। दशाङ्कस्य च ह्यादिनवभिर्गुणने क्रमेण २०,३०,४०,५०,६०, ७०,८०,९० एतेऽङ्काः क्रमेण विंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिसंख्यान्वितानां कारकाः । एषाञ्च एकादिकनवभिराधिक्ये २१, ३१, ४१, ५१, ६१, २७,२८,२९, इत्येतेऽङ्का एकविंशत्यादीनां कारकाः । एवं २१इत्यादयोऽङ्का एकविंशदादीनां कारकाः। दशभिर्गुणिते दशाङ्के १००इत्यङ्कः शतस्य कारकः। क्रमेण दशोत्तरगुणने "एकदशयुतसङ्ख्यायुतलक्षप्रयुतकोटयः क्रमशः । अर्बुदमब्जं खर्वनिखर्वं महापद्मशङ्कवस्तस्मात् । जलधिरन्त्यं मध्यं परार्द्धमिति दशगणोत्तराः संज्ञाः संख्यायाः स्थानानां व्यवहारार्थं कृताः पूर्वैः"इति लीलावत्यङ्कादिप्रकाशेषम् । संक्षेपेण तत्रैकादयङ्कानां क्रमशः स्थितानां योगज संख्यानानार्थमुपायान्तरमुक्तं तत्रैव यथा "एकादिनवानामङ्कानां योगे का संख्येति प्रश्ने "सैकपदघ्नपदार्द्धमन्त्यैकाद्यङ्कयुतिः किल सङ्कलिताख्या" इत्युक्त्वा पृष्टसंख्यापदं एकयुक्तेन तेन १०अङ्केनाहृतं पृष्टाङ्कार्धम् ९/२ ४५ सङ्कलितसंख्या । तथाचैकादिनवाङ्कानां योगे ४५ संख्या भवतीति निश्चय एवमन्यत्राप्यूह्यम् । "एकाद्येकोत्तरा अङ्का व्यस्ता भाज्याः क्रमस्थितैः" लीला० एकादिसंख्यानां वाचकाश्च क्वचित्क्वचित् ग्रन्थाः कविकल्पनायां संगृहीताः यथा ।

"एकोमङ्कोन्दुरूपश्चणजाक्षोदन्तरङ्कदक् १ । द्वयं पक्षनदीकूलाश्विधारानासनन्दनौ २ । त्रयं काग्नेोऽग्निभुवनं मङ्गलामार्गगुणाः । श्रीवारेखा कालिदासकाव्यम् भूलग्निखा वह्निः । सन्ध्यापुरपुष्करादि रामविष्णुपदं नवः ३ । चत्वारि वेदब्रह्मास्यवर्णाब्धिहरिवाहवः । खर्दैन्दिदन्तसेनाङ्गोपालयामयुगाश्रमाः ४ । पञ्च पाण्डवरुद्राक्षेन्द्रियखर्दृतवोऽब्धयः । महापापमहाभूत महाकाव्यमहामखाः । पुराणलक्षणान्यङ्गकालिकर्मेन्द्रियार्थकाः ५ । षट् वज्रकोणतिथिरोनेत्रतर्काङ्गदर्शनम् । चक्रवर्त्तिमहासैनवदनानि गुणा रसाः ६ । सप्त पातालभुवनसुनिद्रीपार्कोक्षिजिनः । वाराब्धिरूपराज्याङ्गप्रीतिर्ऋक्षगिरिख्यादयः ७ । अष्टौ योगाङ्गवस्वीशमूर्त्तिदिग्गजसिद्धयः । ब्रह्मस्तुतिव्याकरणदिक्पालाहिकुलाश्वसाः ८ । नवाङ्गहारभूखण्डलक्षरावणमल्लकाः । व्याघ्रीलक्षनसुराकुञ्जसेन्द्रधुरस्यक्षाः ९ । दश कृष्णावतारदिग्भिक्षे देवावस्थेन्द्रयाजिनः १० । एकादश महादेवाः सेनाश्च रुद्रभूपतेः ११। द्वादशार्कमासराशिसंक्रान्तिगुरुवाक्षवः । मासीकोष्ठकसेनानीनेत्रक्षापतिमण्डलाः १२ । त्रयोदश स्युरम्बूनां गुणा १३ अथ चतुर्दश । विद्यामनुतिथिदिवराड्भुवनभ्रुवतारकाः१४। तिथयः स्युः पञ्चदश १५ षोडशेन्दुकलातिथयः १६ । अष्टादश हीपविद्यापुराणधृतिधान्यकम्१८। विंशतीरावणभुजाकुण्डलयो२० ऽथ यतं यथा । धार्त्तराष्ट्राः यतमिश्रकृतारकाः पुरुषायुषम् । रावणाकुण्डलजदलशकलयत्ताब्धियोजनम् १००। सकलं जाम्बूनदीवर्त्म मेरुर्मीमांसुजच्छदम् । रविवाचार्क्षुनकरा वेदयाश्वेन्द्रदृष्टयः" । १००० ।

या० ति० केषाञ्चित् संख्याभेदान्विततत्तद्योतकशब्दानां तेषां तत्तत्संख्याबोधकत्वं सूचितं यथा "हंसवर्षौ परावानौ यद्वर्षौ वासरत्नमे । कृतत्रेषा परा देवी तदा ब्रह्मतिपूरुषौ । यद्वादेष्वत्तगत्यक्षिन् युग्मं तत्तदजायत२ । त्रिगुणोक्तसवर्णो चिद्रूपा शिवभेक्षिणी । ब्रह्मते मैपुरं मन्त्रम्" इत्युपक्रम्य "श्लोकत्रयगुणत्रये । धामत्रयं धा वेदानां त्रयं वर्णत्रयं गुणम् । त्रिपुष्करं खरान्देवीब्रह्मादीनां त्रयं तथा । वह्निकालत्रयं यक्तित्रयं दक्षित्रयं महत् । नाडीत्रयं त्रिवर्गं सा यदाद्यन्त्रिधा मतम् । चतुःप्रकारगुणिता शाम्भवी धर्मदायिनी" इत्युपक्रम्य "चतुरः सागरानन्तःकरणानां चतुष्टयम् । ब्रह्मादीनां चतुर्भावान् विष्णोर्मूर्त्तिचतुष्टयम् । चतुष्टयं गणेशानामात्मादीनां चतुष्टयम् । उड्डियानादिकं पीठं धर्मादीनां चतुष्टयम् । दमकादीन् गजान् देवी यद्वद्यत्र चतुष्टयम्४। पञ्चधा गुणिता पत्नी यन्त्रोः सर्वार्थसाधिनी। पञ्चरत्नं महादेवी सर्वकामफलप्रदम्। पञ्चाक्षरं महेशस्य पञ्चवर्णान् गरुत्मतः। ब्रह्मोक्तान् पञ्च वायून् वायून् पञ्च सुरद्रुमान्। पञ्च प्राणादिकान् वायून् पञ्चवर्णान् महेशितुः। मूर्त्तीः पञ्च, लक्षाः पञ्च पञ्च ब्रह्मक्रमः क्रमात्। कृतत्रेषा परा यन्त्रभेदभेदार्थरूपिणी५। षोढा संगुणिता देवी धत्ते मन्त्रं षडक्षरम्। चतुर्वेदमनुस्मृत्यो-

मोदादीन् गणाधिपान् । लोकानलीन् रसान् यक्षीडाकिन्याद्याः षडध्वनः । वस्वं षड्गुणितं यक्षेः षडाधारानलोजनम् । षड्विधं यज्ञगत्रस्थिन् सर्वन्तु परमेश्वरीई । सप्तधा गुणिता नित्या यक्षरार्द्धशरीरिणी । सप्तार्णं त्रिपुरामन्त्रं सप्तवर्णं विनायकम् । सप्तकं व्याहृतीनां सा सप्तवर्णं सुदर्शनम् । लोकानद्रीन् स्वरान् धातून् सुनीन् द्वीपान् यक्षानपि । समिधः सप्त संख्याताः सप्तजिह्वा कृविर्भुजः । अन्यत् सप्तविधं यद्यत्तदख्याः सप्त जायतव । अष्टधा गुणिता यक्षिः मैथमष्टाक्षरहृदयम् । गन्धाष्टकं शुभं देवीदेवानां हृदयङ्गमम् । ब्राह्म्याद्याभैरवान् सर्वान् मूर्त्तीरेयोर्वसूनपि । अष्टपीठं महादेव्या अष्टाष्टकसमन्वितम् । अष्टौ सा प्रकृतीर्विघ्नान् वक्रतुण्डादिकान् क्रमात् । अणिमादिगुणाश्चागान् यक्षेमूर्त्तीर्यमादिकान् । अष्टात्मकं जगत्सत्यं सर्वं वितनुते सदा ८ । गुणिता नवधा नित्या सूते मन्त्रं नवात्मकम् । नवकं यक्षितत्त्वानां तत्त्वरूपा महेश्वरी । नवकं पीठ यक्षीनां ब्रह्मादीन् रसानपि । मणिक्यादीनि रत्नानि नवरत्नयुतानि सा । नवकं प्राणदूतीनां नवखं नवकं शुभम् । यद्यत्सवात्मकं लोके सर्वमस्यात्तदद्भुत ९ । दशधा गुणिता यक्षीभीमिनो भवदुःखहा । दशकं यक्षितत्त्वानां तत्त्वरूपा महेश्वरी । नाडीनां दशकं विष्णोरवतारान् दश क्रमात् । दशकं लोकपालानां यद्यत्तत्कञ्चयत्सखो१० । एकादश क्रमात् संविद् गुणिता सा जगन्मयी । रुद्रैकादशनामाद्या यक्षे रैकादशाक्षरम्११ । वसुाङ्गरति सर्वात्मा गुणिता द्वादश क्रमात् । राशीन् मासान् स्वरैर्मूर्त्तीर्यन्त्रं सा द्वादशात्मकम । अन्यदेतादृशं सर्वं यत् तदख्याय्यजायत" ।

अत्र च द्वौ द्वौ पदार्थौ यद्यत्संख्यान्वितत्वेन उपात्तौ; यद्यत्संख्यातत्संख्यात्मकः भवति च निदर्शित पदार्थानां तत्तत्संख्यायुक्ततया लोकयात्राप्रसिद्धिः कृत्यत तत्तत्संख्यानां तत्तत्संख्याकारकत्वम् । तथाचैकविधसंख्यायुक्तिप्रकृतिकार्य्यत्वेन तत्संख्याबोधकत्वम् । अन्येऽपि केचित् संख्याविशेषसूचकाः भा० प० १२४ अ० दर्शिता यथा । "वस्त्वा च । एक एवाग्निर्बहुधा समिध्यत एकः सूर्यः सर्वमिदं विभाति । एको वीरो देवराजोऽरिष्टघ्ना यमः पितृणामीश्वरश्चैक एव१ । अष्टावक्र उवाच । द्वाविन्द्रौ बलतो वै सखायौ द्वौ देवर्षी नारदपर्वतौ च । द्वावश्विनौ दे रूपसंपदे चक्रे भार्योपती दौ विहितौ विधात्रा२ । वन्दुरुवाच । त्रिः कृयते कर्म्मणा वै प्रजेयं त्रयीयुक्ता वाजपेयं वहन्ति । अध्वर्य्यवस्त्रिसवनानि तन्वते त्रयो लोकास्त्रीणि ज्योतींषि चाङ्गः३ । अष्टावक्र उवाच । चतुष्टयं ब्राह्मणानां निजेतं चत्वारो वर्णा यज्ञमिमं वहन्ति । दिशश्चतस्रो वर्णश्चतुष्टयञ्च चतुष्पदा गौरपि यच्चतुष्का४ । वन्दुरुवाच । पञ्चाग्नय पञ्चपदा च पङ्क्तिर्यज्ञाः पञ्चौषध्य पञ्चेन्द्रियाणि । दृष्टा वेदे पञ्चचूडाश्चराश्च लोके ख्यातं पञ्चनदञ्च पुण्यम्५ । अष्टावक्र उवाच । षडाधाने दक्षिणामाहुरेके षड् वै चेमे ऋतवः कालचक्रम् । षड्इन्द्रियाण्युत षट् क्षत्तिकाश्च षट् साध्याख्याः सर्व्ववेदेषु दृष्टाः६ । वन्दुरुवाच सप्त ग्राम्याः पशवः सप्त वन्याः सप्त च्छन्दांसि ऋतवश्चैकं वहन्ति । सप्तर्षयः सप्त चाग्नयश्चानि सप्ततन्त्री ग्रथिता चैव वीणा७ । अष्टावक्र उवाच । अष्टौ गावः पतत्यानं वहन्ति तथाष्टपादः शरभः सिंहघाती । अष्टौ वसून् गुरुभं देवतासु यूपस्याष्टास्रिर्श्छिताः सर्व्वयज्ञे८ । वन्दुरुवाच । नवैवौक्षाः सामधेन्यः पितृणां तथा प्राकुर्नवयोगं विसर्गम् । नवाक्षरा दुहतो संप्रदिष्टा नवाक्षयोगोगणनामेति यश्चतुर९ । अष्टावक्र उवाच । दिशो दशोक्षाः पुरुषस्य लोके सक्थ्यमाकुर्दशपूर्णं यतानि । दशैव मासान् बिभ्रति गर्भवत्यो दशैरुदाद्दशा दशार्हाः १०। वन्दुरुवाच । एकादशैकादशिनः पशूनामेकादशैवाश्च भवन्ति यूपाः । एकादश प्राणभृतां विकारा एकादशोक्षा दिवि देवेषु रुद्राः ११ । अष्टावक्र उवाच । संवत्सरं द्वादशमासमाहुर्जगत्याः पादो द्वादशैवाक्षराणि । द्वादशाहः प्राकृतयज्ञ उक्तो द्वादशादित्यान् कवयश्चीह धीराः १२ । वन्दुरुवाच । त्रयोदशी तिथिरुक्ता प्रशस्ता त्रयोदशद्वीपवती मही च । लोमश उवाच । एतावदुक्त्वा विरराम वन्दी स्रोतस्यार्द्धं व्याजहाराष्टावक्रः । अष्टावक्र उवाच । त्रयोदशाहानि सहस्र कोयी त्रयोदशादीन्यतिछन्दांसि चाङ्गः" १३ अस्य श्लोकस्यार्द्धोक्तदिशाव्याख्या यथा एकोऽग्निः सूर्य्यो वा द्वयरूपकार्य्यद्वयोत्पादकश्च । एवं देवानामिन्द्रियाणां राजा प्रधानभूतः अरिष्टघ्ना यमोऽभिभूततत्त्वान्तराभिभावकः । यमः सर्वेन्द्रियाणां नियन्ता पितॄणां विषयोपहारद्वारा पालयितृणामिन्द्रियाणाम् ईश्वरो भोक्ता सर्वा प्रधानभूत एक एव १। सखायौ सत्वजीवौ जीवेश्वरौ वा । २ पुरुषेण देवस्यावरमनुष्यरूपं, पक्षेण नारदस्यावरर्षिस्वरूपो-

निरूपं जन्मत्रयम् । याज्ञमेवोपलक्षितं कर्ममात्रम् तच्च वेदभेदात् द्विजभेदाच्च त्रयम् । लोकत्रये प्रातर्मध्याह्न तृतीयसवनानि । त्रयो लोकाः स्वर्गोनरकं भूरिति भोगभूमयः । त्रीणि ज्योतींषि जाग्रदाद्यवस्थात्रयम् । २ । निकेतमात्रमम् यत्तस्मिन् स्थानत्रयं तेन चातुर्वर्ण्यमध्ये शूद्रस्यापि तत्राधिकारः । दिशः विराट्छन्दस्त्रान्तर्यामित्वेन साक्षात्कारहपाः चतस्रः दिशः । वाङ्मयप्रपञ्चस्य वर्णे चतुष्टयम् अकारउकारोमकारः अर्द्धमात्रा इत्येवं चतुष्टयम् । चतुष्पदा परा पश्यन्ती मध्यमा वैखरीति भेदात् गौर्वाक् चतुष्पदा ४ । पञ्चाग्नयः गार्हपत्यदक्षिणाग्न्याहवनीयसभ्यावसथ्याख्याः । पञ्चपदाऽक्षरैः पादैः पङ्क्तिः छन्दः पञ्चपदा । यज्ञाः पञ्च ब्रह्मर्षिपितृभूतमनुष्याः पञ्च स्रोतांसि, अग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि पशुः सोम इति श्रौता वा पञ्च । अप्सु शरीराकारपरिणतासु जलप्रधानासु मात्रासु सरति गच्छतीत्यप्सरा; चितिः पञ्चभूता तत्तद्विषयाकारतया प्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपवृत्तिपञ्चकसाहचर्येण विज्ञानपञ्चकवती पञ्चानां विषयरूपश्रोत्रत्वं समाहारः पञ्चनदम् ५ घट् आधाने गायति गेयः। मनस इन्द्रियत्वमभ्युपेत्य षट्कोपपत्तिः साङ्ख्या यत्तद्विषेया ई। 'याम्यारण्याः पशवश्चतुर्दश गौरविरजोऽश्वोऽश्वतरोगर्दभोमनुष्यश्चेति सप्त ग्राम्याः सृमरचमरराजसरीसृपरुरुपृषन्मृगाश्चेति सप्तारण्याः" पैठीनसयुक्ताः । सप्त छन्दांसि गायत्र्युष्णिगनुष्टुबृहतीपङ्क्तित्रिष्टुब्जगतीसमाख्यानि । सप्तर्षयः सप्त प्राणाः "प्राणा वै ऋषयः" इति श्रुतेः मनोबुद्धिसहिताः प्राणादयः पञ्च सप्तेत्यर्थः । सप्त अर्ध्यानि अर्घ्यार्हाणि सुखानि पञ्चभिरिन्द्रियैः मनोबुद्धिभ्यां प्राप्यानि सुखानीतिभेदात् सुखानि सप्त । ७ "अष्टौ पदा वसतिपक्षाः" श्रुतेः पाशाः पशुनिर्मिता गौरव्यः शब्दपतनविषेया इव इन्द्रियप्रमेयविषयाः अष्टौ । ८। पितृवाग्मिष्टौ "उपत्मन्या निधीमहीति" ऋक् तिरश्चस्या प्रत्येकं त्रिसमित्का नव सामधेन्योऽग्निसमिन्नामार्था अवयः सम्पद्यन्ते । तथा एका प्रकृतिरेव त्रिगुणा एकाद्विगुणप्रधानभावविभक्तैः प्रत्येकं त्रिविधा नवैव संपद्यते तथा नवैवाहाः क्रमस्थानभेदात् यज्ञेऽसंख्यावाचिनो भवन्ति । दिग्उपदेशादाहा तत्त्वप्रकाराः। अहंकारतत्त्वाधिकारिणश्च इमे १०। इन्द्रियाणि मनसा सह ज्ञानकर्मेन्द्रियाणि तेषां विषयाः तद्रूपकलाविकाराश्च एकादश ११ । प्राजापत्यः द्वादशाहताध्यत्वात् द्वादशाहः १२ । त्रयोदशद्वीपवती भूरादिघटकेन पातालषट्कमेकेन युक्ता च मध्यस्था मही त्रयोदशद्वीपवती १३ । एवमेकादिसंख्याया बोधकत्वं तत्तत्पदार्थानाम् दर्शितम् । अन्ये च शब्दाः शास्त्रान्तरेषु एकादिसंख्याबोधकतया प्रयुज्यन्ते ते च शब्दाः धर्म्मदर्शितशब्दाश्च यथा तत्तत्संख्याबोधकाभवन्ति तथा दर्शयते तत्र सर्व्वत्र शब्दतदर्थयोरभेदात् स्वशास्त्रार्थगतसंख्यातुल्यसंख्याबोधकत्वेन स्वशास्त्रार्थसंख्यापूर्व्वसंख्यातुल्यसंख्याबोधकत्वेन वा तथात्वं बोध्यम् । सर्वेषाञ्च क्वचित् तत्तत्संख्यापूरणवाचकतापि "युष्मान्नौ ङतसूतानि वयस्तनौ वसुरत्नयोः" इत्यादौ युष्मादिभिः तत्तत्संख्यापूरणद्वित्वादीनां बोधनात् ।

१ तत्त्वादौ एकत्वबोधकाः। कवि०ख० । ब्रह्मणः "एकमेवाद्वितीयं ब्रह्मेति" श्रुतेरेकत्वात्तथात्वम् विरञ्चिवाचिब्रह्मणो ब्रह्मलोके एकत्वात्तथा च "इन्द्रमिन्द्रे" इति पाठे भूमिचन्द्रयोरेकत्वात्तथा । इन्द्रकल्पित ऐरावतस्य तदश्वयोश्च अवश्यैकत्वात् तथा । गणेशदन्तस्य शुक्रनेत्रस्य चैकत्वात् तथा एवं काननेत्रस्यापि । भा०व०उक्ताः । स्वप्रकाशस्य अन्यप्रकाशकस्य सूर्य्यस्यान्येव यमस्य सर्व्वनियन्तुरीश्वरस्य, इन्द्रपदाभिधेयस्य तथा "इन्द्रोमायाभिः पुरुरूप ईयते इति" श्रुतेरीश्वरस्येन्द्रपदवाच्यत्वात् ।

रूपम् वैशेषिकमतसिद्धचतुर्विंशतिगुणेषु आद्यत्वात् तथा । "भजेच्छिरोऽधरेण तैर्विभिन्नै रूपं भजेत् स्वात् परिपूर्त्तिकामः" लोला० । अश्विनौ तस्याः तारास्थाद्यत्वात् अभेदात्तदधिष्ठात्रिग्रन्थोरपि । तस्य स्वपरत्वे द्वित्वबोधकेति भेदः । उक्ष्णा तस्या एकाक्षरपादकत्वात् प्रधानवाची प्रकृतिशब्दस्तथा "अजामेकां लोहितशुक्लकृष्णाम्" इत्यादिश्रुतेस्तदर्थस्यैकत्वात् ।

२ द्वित्वबोधकाः । कवि०ख० उक्ताः । चान्द्रमासषट्कयोः पक्षिच्छदरूपयोर्वा पक्षयोः, नदीभुजयोः, अश्विधारयोः, कृष्णशुक्लरूपयोर्दीप्तरश्मिशुक्लयोश्च तथा । भा० ति०" उक्ताः । हंस इति वर्णौ जीवपरमरूपौ परात्मानौ शब्दार्थौ हिमरात्री स्त्रीपुरुषौ, परस्परविरोधिगुणरूपा शीतोष्णसुखदुःखादयश्च तथा । भा०ब० उक्ताः । इन्द्राग्नी सत्त्वजीवौ नारदपर्व्वतौ अश्विनौ एवञ्च च तथा । एवम् अरण्यो तारास्तु तस्याद्विती-यत्वात् तद्भेदात् तद्विषयोयमोऽपि । यमयद्वस्तु जगन्नियन्तरीश्वरपरत्वे एकत्वम्, जगज्जीवपरत्वे द्वित्वम् योगाक्षय-

रत्वे चतुष्टयस्य बोधकतेति भेदः । प्रेतराजपरकालयज्ञ-स्थापि तथात्वम् । तस्य समयपरत्वे त्रित्वस्य, शिवपरत्वे आद्याधिपत्यस्य च षट्कस्येति भेदः । व्यत्यूक्था ह्यक्षरप्रा-टत्वात्तथा । शकटीयभेदार्थकयुगशब्दस्तथा तस्य शकटादौ द्वित्वसंख्यकतयैव योजनात् । एवं द्व्यर्थकयुगशब्दोऽपि । अयनयज्ञोऽपि तथा यत्र तदर्थयोर्द्वयोरेव घटकत्वात् । पर्वसन्धिः चान्द्रमासे तयोर्द्वित्वात् ; शब्दः ध्वन्यात्मक-वर्णात्मकरूपः, अङ्गम् पुरुषाणुगुणरूपम्, शब्दशक्तिः अभिधालक्षणारूपा, बुद्धिः अनुभवस्मृतिरूपा, गन्धः सुरभिदुर्गन्धरूपः, ध्वनिधर्मः तारत्वमन्द्रत्वात्मकः, स्पर्शः उष्णानुष्णात्मकः, स्नायुत्वकाठिन्यात्मको वा, अभावः संसर्गाभावभेदात्मकश्च द्वित्वस्य बोधकः । सामान्यं व्याप्य-व्यापकात्मकम्, क्रिया सिद्धसाध्यात्मिका वेदान्तिमते पदार्थ चिज्जडरूपः दृष्टव्यरूपो वा आर्हतमते जीवाजीव-रूपो वा न्यायमते भावाभावरूपो वा, परिमाणम् वेदान्तिमते अणुत्वमहत्त्वरूपं च द्वित्वात्तथा । वैशेषिकमते तु अणुमहत्त्वह्रस्वदीर्घत्वरूपं चतुष्कात् चतुष्कस्य तथेति भेदः । पदम् सुबन्तितिङन्तरूपत्वात्, धात्वर्थः फलव्यापाररूपत्वात् तथा । प्रयोजनं गौणमुख्यरूपत्वा-त्तथा । न्यायमते व्याप्तिः अन्वयव्यतिरेकरूपत्वात्तथा ।

वेदान्तादिमते व्यतिरेकव्याप्तेरभावात् तस्याः एक त्वादेकत्वस्येति भेदः । संयोगः कर्मजसंयोगजातात्मकः, विभागः कर्मजविभागजात्मकश्च द्वित्वात् तथा । नाटक-प्रस्ताव्यवस्तु आधिकारिकप्रासङ्गिकरूपं द्वित्वात् तथा । काव्यम् दृश्यश्राव्यरूपं द्वित्वात् तथा अवान्तरभेदपरत्वे ध्वन्यादिपरत्वात् त्रित्वस्येति भेदः । गुरुत्वपरुषद्रव्यम् रस-वद्द्रव्यञ्च क्षितिजलात्मकत्वात्तथा । नैमित्तिकद्रवद्रव्यं क्षितितेजोरूपत्वात्तथा । समाधिः सविकल्पनिर्विकल्पा-त्मकः सबीजनिर्बीजात्मकः संप्रज्ञातासंप्रज्ञातात्मको वा द्वित्वात्तथा । समापत्तिः सविचारानिर्विचारात्मिका द्वित्वात् तथा । परमस्तु क्रविदेहकैवल्यात्मिका द्वित्वात्तथा । सालोक्यादिपरत्वे चतुष्केति भेदः । समाधि-प्रज्ञा ज्योतिष्मत्यन्धारात्मिका द्वित्वात्तथा । कर्मकारकं सङ्कल्पगोत्यात्मकं द्वित्वात्तथा । कर्तृकारकं स्वतन्त्रप्रयो जकरूपं, सम्प्रदानकारकं प्रेरकानुमन्तृरूपञ्च द्वित्वात्तथा । प्रत्यक्षं लौकिकालौकिकात्मकतया द्वित्वात् तथा अवान्तरप्र-भेदपरत्वे षट्कस्येति भेदः । ज्ञानं सविकल्पकनिर्वि-कल्पकात्मकं तथा । अनुमानं स्वार्थपरार्थात्मकं अनु मानफलं तत्त्वनिर्णयविजयरूपं तथा । ब्रह्म सगुणनिर्गुण रूपम्, जीवभावः एकानेकविषयात्मकः वेदान्तिमते ज्ञान वृत्तिव्याप्यावच्छिन्नचैतन्यात्मकम् जीवभेदक अवच्छेद प्रतिबिम्बरूपश्च द्वित्वात् तथा । कर्म शुक्लकृष्णात्म पुण्यापुण्यसाधनम् विहितनिषिद्धरूपं, धर्मः प्रवृत्ति निवृत्तिलक्षणः वेदमेयं सिद्धसाध्यरूपं, प्रयागः पवित्र-मदविशेषरूपः, वेदान्तिमते अविद्या कार्यकारणरूपा तूलाविद्यामूलाविद्यात्मिका द्वित्वात्तथा । काङ्क्षिः विष्णुशिवकाङ्क्षिरूपत्वात् तथा । आगमरूपप्रमाणशब्दः दृष्टादृष्टार्थकत्वात्तथा उदाहरणं साधर्म्यवैधर्म्यभेदम्, अहङ्कारः विषयसम्भोगात्मक , मानस्य प्रणयेर्ष्याजातः द्वित्वात्तथा

३ त्रित्वबोधकाः कवि० ल० उक्ताः । कालः भूत-भविष्यद्वर्तनरूपत्वात्, अग्निः दक्षिणाग्निगार्हपत्याह वनीयरूपत्वात्, लोकः स्वर्गमर्त्यपातालरूपत्वात्, श-क्त्यावर्त्त त्रिलोकस्थत्वात्, शिवनेत्रम् सूर्येन्दुवह्निरूप-त्वात्, गुणः सत्त्वरजस्तमोरूपत्वात् तथा । नीतिशास्त्रप्र-सिद्धगुणपरत्वे षट्कस्य, दुःखधर्मभेदपरत्वे चतुर्विंशति त्वस्य बोधकतेति भेदः । श्रीवारेखा, कालिदासग्रन्थकाव्यं कुमा-रघुरत्नमेघदूतरूपत्वात्, त्रिस्थूलशिखा, देहोदराधःस्थल-स्थितमांसरूपवलिश्च त्रित्वात् तथा । प्रातर्मध्यसायाह्नरूप सन्ध्यानां, त्रिपुराद्यसुरस्वर्गादिस्थपुराणां, कारतिथिनक्ष-त्रभेदात्मकज्योतिषोक्तपुष्करदोषाणाम्, परशुरामदाशरथि-बलभद्रात्मकरामाणां, त्रिलोकव्यापित्रामनरूपविष्णुपदानां, बाल्ययौवनजराद्यवयवस्य च त्रित्वात् तथा । ग्रा० ति०उक्ताः । सूर्येन्दुवह्निरूपधात्नाम्, ऋग्यजुःसामरूप-त्रय्यात्मकवेदानां त्रित्वात् तथात्वम् । अथर्ववेदसहितत्र-यीपरत्वे तु चतुष्टयस्य बोधकतेति भेदः । प्रथमवर्णानाम् अकारोकारमकाररूपाणाम्, उदात्तानुदात्तस्वरितरूपस्व-राणाञ्च त्रित्वात् तथा । स्वरस्य षड्जादिपरत्वे सप्त-कस्य अजवर्णपरत्वे षोढ्यत्वस्येति भेदः । देवीनां गायत्रीसावित्रीसरस्वतीरूपाणां, ब्रह्मविष्णुशिवरुद्रेश्वर-मूर्तीनाञ्च त्रित्वात् तथा । ऋषिपाशुपाल्यवाणिज्यरूपा आजनाध्यापनप्रतिग्रहरूपा वा आजीविकात्रित्व वृत्ति-त्वेन मनोवृत्तिपरत्वे चतुष्कस्य, प्रमाणादिवृत्तिपरत्वे पञ्चकस्य, शब्दनिबोधनार्थक्रियारूपवृत्तिपरत्वे आख्या-तिकमते त्रित्वस्य, अन्यमते द्वित्वस्य, वाचक-शब्दभेदपरत्वे तद्धितादिपञ्चत्वस्येति भेदः । ब्रह्मेशरौद्री वामारूपा, ज्ञानेच्छाक्रियारूपा वा प्रभावोत्साह-

मन्त्रजारूपा वा शक्तिः तथा, नाडी रुड़ापिङ्गला-सुषुम्णात्मकप्राणनाड़ीरूपा तथा । गान्धार्यादिनाड़ी-परत्वे सप्तत्वम्, दण्डपरत्वे तस्याः षष्टिपलात्मकत्वात् टिवमे षष्टिमंख्यकत्वाच्च षष्टिश्लेति भेदः । भा०व०उक्ताः। प्रजा देवतिर्य्यङ्मनुष्यरूपा, त्रयीभेदात् द्विजभेदाच्च वाजपेयादिकर्म च तथा । मातर्मध्यसायाङ्कर्त्तव्यानि सवनानि, ज्योतिः विश्वप्राप्तैजसरूपम् तथा । एवम् कटु शुण्ठीपिप्पलीमरिचरूपतया, फलम् हरीतक्यामलकीवयस्थारूपतया, दोषः वातपित्तकफरूपतया रागद्वेषमोहरूपतया वा तथा । क्षत्तिका तस्या राशिचक्रे क्षतीयत्वात्, अभेदोपचारात् तद्धिप वक्ष्यन्ति । तद्घटकतारारूपत्वे तु घटकस्य बोधिका इति भेदः । मध्या त्रयुत्तरपादत्वात् तथा गरुडवृत्तिः यक्षिलक्षणाव्यञ्जनारूपा तथा इत्यालङ्कारिकाः अन्यमते हितस्येत्युक्तम् । कारणम् समवाय्यसमवायिनिमित्तात्मकं त्रित्वात् तथा । फलावरुद्धेतुः दैवपुरुषकारकालात्मकः "दैवं पुरुषकारश्च काले फलति पार्थिव ! । त्रयमेतन्मनुष्यस्य परिरुद्धं फलावरुम्" इत्युक्ते स्तयाप्तां तथात्वात्तथा । "अधिष्ठानं तथा कर्त्ता करणञ्च पृथग्विधम् । विविधाश्च पृथक्चेष्टा दैवञ्चैवात्र पञ्चमम्" गीतोक्तत्वात् पञ्चत्वस्यापि । संस्कारः स्थितिस्थापनवेगभावनात्मकत्रित्वात् तथा, गर्भाधानादिपरत्वे दशत्वस्य चत्वारिंशत्त्वस्य वेति भेदः । संसर्गाभावः प्रागभावध्वंसात्यन्ताभावात्मकत्वात्तथा । यतः प्रवृत्तिनिवृत्तिजीवनयोनिरूपत्वात्तथा । दुःखम् आध्यात्मिकाधिभौतिकाधिदैविकात्मकत्वात्तथा । त्यागिकर्त्तृकरणकर्म्मज्ञानबुद्धिधृतिसुखादिकं गीतोक्तं प्रत्येकं सात्विकराजसतामसरूपतया त्रित्वात्तथा । अवस्था सांख्यमते आविर्भावतिरोभावाभिव्यक्तिरूपा वेदान्तमते जागृत्स्वप्नसुषुप्तिरूपा, अधिकारस्तु गङ्गास्रोतोमण्डूकप्लुत सिंहावलोकितात्मकः त्रित्वात् तथा

असिद्धिः आत्मयासिद्धिव्याप्यत्वासिद्धिस्वरूपासिद्धिरूपत्वात् तथा, विप्रलम्भेतुदोषः साधारणासाधारणानुपसंहारिरूपत्वात् तथा । न्यायमते "प्रकृतिः प्रत्ययश्चैव निपातश्चेति स त्रिधा" इत्युक्तानां प्रकृत्यादीनां सार्थकशब्दानां त्रित्वात् तथा । वाचकशब्दः कठयौगिकयोगरूढरूपतया त्रित्वात्तथा वाचकशब्दशक्तिः नैमित्तिकौपाधिकीपारिभाषिक्यात्मकतया त्रित्वात्तथा । खलपा जहत्स्वार्थाऽजहत्स्वार्थाजहदजहत्स्वार्थात्मिका त्रित्वात्, आलङ्कारिकमते वक्ष्यत्वेति भेदः । यामः स्वरारोहावरोहक्रमात्मकः त्रित्वात्तथा "सप्त स्वरास्त्रयो-ग्रामा मूर्च्छनास्तेकविंशतिः । तानास्तेषां शतमेषामेतावतीस्त्रयस्त्रयः । स्थानत्रयं यतीनाञ्च षडास्थानि रसा नव । रागाः षट्त्रिंशत्तु भावास्त्वारिंशत्ततः (तान) स्मृताः" भरतोक्तेः कृतमध्यविलम्बितकालरूपा मात्रा, त्रयः उत्तममध्याधममानात्मकः, आदिमध्यान्त्यरूपयतिस्थानं, च त्रित्वात् तथा । विश्लेषफलम् भूमिक्रियायतिलक्षाभात्मकं त्रित्वात् तथा । काव्यं ध्वनिगुणीभूतव्यङ्ग्याव्यङ्ग्यात्मकसत्तममध्यमाधमात्मकं त्रित्वात् तथा । देहः कारणस्थूलसूक्ष्मात्मकः त्रित्वात् तथा । मूर्त्तभेदः देहेन्द्रियविषयात्मकस्तथा । सर्गः सात्विकराजसतामसात्मकस्तथा । सुखसिद्धिः दुःखत्रयाभिघातात्मिका प्रमोदमुदितमोदमानाभिधेया त्रित्वात् तथा । सिद्ध्यङ्कुरः विपर्य्ययाशक्तितुष्टिरूपस्त्रित्वात् तथा । कर्मविपाकः जात्यायुर्भोगात्मकस्त्रित्वात् तथा । अतीन्द्रियगुणः गुरुत्वाद्रवभावनात्मकः त्रित्वात् तथा । कर्मगुणः वेगसंयोगविभागात्मकस्त्रित्वात्तथा । मिश्रभेदः यत्नुभेदश्च सहजप्राप्तलब्धत्रित्वात्मकस्त्रित्वात्तथा । संसृतिमार्गः देवायनपितृयान यमयात्मकः त्रित्वात्तथा । विश्वफलम् तस्य प्रत्येकपक्षे त्रित्वात् तथा । वेदान्तिमते सत्ता पारमार्थिकीव्यवहारिकीप्रातभासिकीरूपा त्रित्वात्तथा । स्रोतः ऊर्द्धधस्तिर्य्यग्रूपं त्रित्वात्तथा । ईप्सिततमकर्म निर्वर्त्त्यविकार्य्यप्राप्यात्मकं त्रित्वात्तथा । आधारकारकम् औपश्लेषिकाभिव्यापकवैषयिकात्मकं त्रित्वात् तथा । अपादानकारकम् निर्दिष्टविषयोपात्तविषयापेक्षितक्रियात्मकं त्रित्वात्तथा । व्यापारः कायिकवाचिकमानसात्मकस्तथा । ऋणं देवर्षिपितृसम्बन्धिरूपं तथा । अलौकिकसन्निकर्षः सामान्यलक्षणाज्ञानलक्षणायोगजात्मकस्त्रित्वात्तथा । काव्यगुणः माधुर्य्यौजःप्रसादात्मकः त्रित्वात्तथा । श्लेषौदार्य्यादीनामोजस्त्वभावात् त्रित्वम् सा० द० । नायिका स्वकीयापरकीयासाधारणात्मिका, मुग्धा मध्या प्रगल्भात्मिका वा तथा तासामेकैकस्या उभयधर्मत्वे नवत्वस्य अवस्थाभेदात् वक्ष्यत्वेति भेदः । अनुमितिलिङ्गं पूर्ववच्छेषवत्सामान्यतोदृष्टात्मकं कोशान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिरूपं वा त्रित्वात्तथा । लक्षं वाक्यसामान्योपचारलक्षणात्मकं त्रित्वात्तथा ।

४ चतुष्कबोधकाः कवि० ज० उक्ताः । वेदः ऋग्यजुःसामाथर्व्वात्मकः, चतुर्वर्णब्रह्मणोमुखादि, पूर्व्वापरदक्षिणो-

मनादत्व, चतुष्टात् तथा । लक्षणसमुद्रादिपरत्वे सप्तत्वानाक इति भेदः । चतुर्भुजविष्णुबाहुगरुडोऽपि तथा । खगेन्द्रलिनामैरावतादीनां चतुर्दन्तानामुत्तरं दन्तशब्दस्तथा । कृत्स्नस्वरथपादातरूपसेनाङ्गम्, उपायः सामदानभेददण्डरूपः, दिनरात्रियोश्चतुर्थांशरूपयामशब्दश्च तथा । युगं सत्यत्रेताद्वापररूपं तथा शकटांघ्रिविशेषपरत्वे द्वन्द्वपरत्वे च द्वित्वबोधकमिति । आश्रमः ब्रह्मचर्य्यगार्हस्थ्यवानप्रस्थसंन्यासरूपस्तथा । या० ति० उक्ताः । तत्त्वम् आत्मविद्यायितत्त्वरूपम् प्रधानादितत्त्वपरत्वे चतुर्विंशतिसंख्याबोधकमिति भेदः । मनोवृत्तिः संशयनिश्चयगर्व्वाभिमानरूपा तथा । वाग्वृत्तिः परापश्यन्तीमध्यावैखरीरूपा तथा । अर्थबोधनशक्तिविशेषपरत्वे द्वित्वस्य नित्यस्य वा मतभेदेन बोधिकेति भेदः । भावः वेदान्तिमते जाग्रत्स्वप्नसुषुप्तितुरीयरूपस्तथा । सांख्यमते तु धर्मादयः परत्वेनाप्तत्वबोधकः वैशेषिकमते षट्त्वस्येति भेदः । विष्णुमूर्त्तिः वासुदेवानिरुद्धसंकर्षणप्रद्युम्नरूपा तथा । ब्रह्मादित्रितयविन्यासभेदतया तन्मूर्त्तिस्तु चतुर्विंशतित्वस्य बोधिकेति भेद । गच्छेयः "गणाधिपं गणेशानं तृतीयं गणनायकम् । गणक्रीडं प्रीतगौररक्तनीलद्युतेः क्रमात्" या० ति० १३५० उक्तप्रीतादिवर्णयुक्तगणाधिपादिरूपस्तथा । आत्मादि आत्मान्तरत्रजीवात्मपरात्मरूपस्तथा । पीठयन्त्र उड्डियान जालन्धरपूर्णगिरिकायार्थकं तथा । धर्मादि धर्मज्ञानैश्वर्य्यवैराग्यरूपम् अधर्मादि अधर्मज्ञानानैश्वर्य्यावैराग्यरूपञ्च तथा सांख्यमते धर्मादि अष्टत्वस्य बोधकमिति भेदः । लक्ष्मीगजः दमकादिरूपः, दिग्यः प्राच्यवाचीपश्चिमोत्तररूपा तथा । अवान्तरदिक्परत्वे अष्टत्वस्य दशत्वस्य वा बोधिका इति भेदः । ज्योतिः विश्वात्मतत्त्वात्मान्तर्वाग्रूपम् । एवमन्येऽपि यथा रोहिणी राशिचक्रे तस्याऋर्यत्वात् तदभेदात् तदधिष्ठ ब्रह्मादि तथा । प्रतिष्ठा तस्याश्चतुरत्वरूपादत्वात् तथा । चतुर्युगार्थकलघुशब्दः चतुस्त्रिद्वैकसंगुणा" सू० सि० उक्तेः "कृतयुगप्रमाणाद्दशसङ्खद्यं चतुर्गुणकृत्वात्तच्च तथात्वम् । सार्थकशब्दः नामाख्यातनिपातोपसर्गात्मकत्वात्, पुरुषार्थश्च धर्मार्थकाममोक्षरूपत्वात् तथा । नायकः धीरोदात्तधीरोद्धतधीरललितधीरप्रशान्तात्मकत्वात् दक्षिणधृष्टानुकूलशठात्मकत्वाद्वा तथा तेषां प्रत्येकमुत्तमधर्म्मत्वे षोडशभेदत्वात् षोडशत्वस्येति भेदः । काव्यरीतिः वैदर्भीगौडीपाञ्चालीलाटिकात्मिका चतुष्टात्तथा । प्रलयः नित्यनैमित्तिकप्राकृतात्यन्तिकात्मकत्वात् तथा भगवद्भक्तः "चतुर्विधा भजन्ते मां" इत्युपक्रम्य "आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ!" इति गीतोक्तेः चतुष्कत्वात् तथा । अभिनयः आङ्गिकवाचिकाहार्य्यसात्विकात्मकः चतुष्कत्वात् तथा । नायकादिव्यापारविशेषात्मकरीतिः कौशिकीसात्वत्यारभटीभारतीरूपा चतुष्कत्वात्तथा । कौशिक्यङ्गम् "नर्म्म च नर्म्मस्फूर्जो नर्म्मस्फोटश्च नर्म्मगर्भश्च" इत्युक्तनर्मादिरूपं तथा । सात्वत्यङ्गम् । "उत्थापकोऽथ संघात्यः संलापः परिवर्त्तकः । विशेषा इति चत्वारः सात्वत्याः परिकीर्त्तिता" इत्युक्तोत्थापकादिरूपत्वात्तथा । आरभट्यङ्गम् "वस्तूत्थापनसंफेटौ संक्षिप्तिरवपातनम् । इति भेदास्तु चत्वार आरभट्याः प्रकीर्त्तिताः" इत्युक्तवस्तूत्थापनादिरूपं तथा । अनेकान्वितगुण संयोगविभागहित्वादिसंख्याद्वादिपृथक्त्वरूपः चतुष्टात्तथा । आध्यात्मिकतुष्टिः "आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः" सां० का० उक्तप्रकृत्यादिरूपा चतुष्टात्तथा । चित्तपरिकर्मार्थभावना मैत्रीकरुणामुदितोपेक्षात्मिका चतुष्टात्तथा । समाधिविघ्नक्षयविक्षेपकषायरसास्वादात्मकः चतुष्कत्वात्तथा । संन्यासी कुटीचक बहूदकहंस परमहंसात्मकस्तथा । अनुबन्धः विषयप्रयोजनसम्बन्धाधिकारिरूपस्तथा । ब्रह्मविविदिषासाधनम् इहामुत्रार्थफलभोगविरागनित्यानित्यवस्तुविवेक शमादिषट्कमुमुक्षारूपं तथा । कल्पितकर्मकारकम् । औदासीन्यप्राग्भावीच्छिताकथितान्यपूर्वकरूपं तथा । बीजम् एकानेकवर्णसमीकरणमध्यमाहरणभावितात्मकं तथा । सङ्केतविषयः जातिद्रव्यगुणक्रियारूपस्तथा । द्रव्यारम्भकः सर्गवद्द्रव्यञ्च क्षितिजलतेजोवायुरूपत्वात्तथा । अपरसृष्टिः सालोक्यसार्ष्टिसामीप्यसारूप्यात्मिका तथा । कार्य्योत्पत्तिप्रकारः असतः सदुत्पत्तिः सतोऽसदुत्पत्तिः सतोविवर्त्तः सतः सदुत्पत्तिश्चेति चतूरूपत्वात् तथा । दृष्टिः कायिकाकायिकाकारिताचक्षुर्दृष्टिरूपा तथा । सिद्धान्तः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थितिरूपः चतुष्टात्तथा । बलोत्पत्तौ आभ्यन्तरप्रयत्नः स्पृष्टेषत्स्पृष्टविवृतसंवृतात्मकचतुष्कत्वात्तथा । विप्रलम्भः, पूर्वरागमानप्रवासकरुणात्मकः चतुष्कत्वात्तथा ।

५ पञ्चत्वबोधकाः । कवि०ल० युधिष्ठिरभीमार्जुननकुलसहदेवानाम् पाण्डुपुत्राणां, पञ्चाननशिवस्वरूपाणां, श्रोत्रत्वग्चक्षुरसनघ्राणात्मकानां ज्ञानेन्द्रियाणाम्, वाक्पाणि-

पादपायूपस्थरूपाणां कर्मेन्द्रियाणां वा, सन्तान कल्पवृक्षमन्दारपारिजातहरिचन्दनानां देववृक्षाणां, मन्त्राणामाद्यादिवेदपञ्चमाक्षराणां व्रतानाम्, दक्षिणाग्निगार्हपत्याहवनीयान्वाहार्य्यपचनाग्नयस्थानां वह्नीनां, ब्रह्महत्यासुरापाणब्राह्मणस्वाम्यिकसुवर्णहरणगुर्वङ्गनागमनतत्संसर्गजानां पातकानाम्, लित्यप्तेजोमरुद्व्योमरूपाणां भूतानां, कुमाररघुवंशमाघकिरातनैषधाख्यानां महाकाव्यानां, होमस्वाध्यायपाठपितृतर्पणातिथिपूजनवैश्वदेवबलिरूपाणां ब्रह्मयज्ञकर्त्तव्यानां आत्तीनाम्, अग्निहोत्रादीनां यो० क० प्रागुदर्शितानां श्रौतानां वा यज्ञानां, सगरप्रलयमन्वन्तरराजवंशतत्संस्थारूपाणां पुराणलक्षणानाम्, प्राणापानसमानोदानव्यानरूपाणां हृत्स्थवायूनाम्, उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनात्मिकानां क्रियाणां, घ्राणेन्द्रियविषयाणां गन्धस्वरूपरसगन्धात्मकानां, कर्मेन्द्रियविषयाणां वचनादानगमनविसर्गानन्दात्मकानां वा पञ्चत्वात् तथा । या० ति० उक्ताः । नीलकङ्कीरकपद्मरागप्रवालमौक्तिकरूपाणां स्याद्यघटेद्येषां रत्नानां पञ्चत्वस्य बोधकता वास्तुमुभावारोग्यरत्नानां कालिदासादिकवीनाञ्च नवत्वात् तत्परत्वे नवत्वस्य बोधकताये वक्ष्यते । श्वेतगौररक्तहरितश्यामरूपाणां वर्णविशेषाणाम् पञ्चत्वात् तथा पाटलादिवर्णानां मिश्रणेनैव जातत्वात् न पृथग्वर्णता, वर्णशब्दस्य ब्राह्मणादिजातिपरत्वे चतुष्कस्य, अक्षरपरत्वे तन्त्रान्ते पञ्चाशल्लिपिभिर्विभक्तेत्यादुक्तेः पञ्चाशत्त्वस्य,सिद्धान्ते "चतु षष्टि-र्द्वि षष्टिर्वा वर्णाः सम्प्रदायतोमताः" इत्यसंख्याबोधकत्वमिति भेदः । तत्पुरुषाघोरसद्योजातवामदेवेशानरूपाणां शिवमूर्त्तीनाम्, "सन्मोहनस्तापनश्च शोषणः स्तम्भनस्तथा । उन्मादनश्च कामस्य बाणाःपञ्च प्रकीर्त्तिताः" इत्युक्तानां कामबाणानाम् "निवृत्तिः सुप्रतिष्ठा स्याद् विद्या शान्तिरनन्तरम् । शान्त्यतीता कलाः पञ्च विज्ञेयाः" इति उक्तानां कलाविशेषाणाम्, ईशानमनोभवतत्पुरुषसद्भावाघोरकुमारतेजोवामदेवसद्भावसद्योजातकामदेवात्मकानाम् तत्त्वेच उक्तानां कामदेवभेदानां च पञ्चत्वात्तथा । तत्पुरुषादिसद्भावरूपाणां ब्रह्मरूपत्वात्तु पञ्चत्वात् तथा । भा० व० उक्ताः । प्रमाणविपर्य्ययविकल्पस्मृतिनिद्रारूपाणां वृत्तीनाम्, इन्द्रियवृत्तिरूपाणां स्रोतसाम्, "किरणा धृतपापा च सुप्रतोया सरस्वती । गङ्गा च यमुना चैव पञ्च नद्यः प्रकीर्त्तिताः" काशी० उक्तानां नदीनां वा पञ्चत्वात्तथा । वृत्तिः क्षत्तडुत्तसप्रसैकशेषसनाद्यन्तधातुरूपा, पल्लवस्य "आम्रास्वत्थवटप्लक्षयज्ञोडुम्बरपल्लवाः । पञ्चपल्लवमित्युक्तम्" इत्युक्तानां पल्लवानां पञ्चत्वात्तथा । मूलम् "विल्वशोनाकगाम्भारीपाटलागणिकारिका । पञ्चमूलमिति ख्यातम्" इत्युक्तविल्वादिमूलानां पञ्चत्वात्तथा । कषायः "जम्ब्वाम्रप्लक्षन्यग्रोधवकुलं बदरं तथा । कषायाः पञ्च विज्ञेयाः" इत्युक्तजम्ब्वादीनां कषायाणां पञ्चत्वात् तथा । कोषः वेदान्तोक्तानन्दमयविज्ञानमनःप्राणमनोमयानां कोषाणां पञ्चत्वात्तथा । देहत्वक् परत्वे षट्कबोधकताग्रे वक्ष्यते । गव्यम् "पञ्चगव्यं दधि क्षीरं घृतगोमूत्रगोमयैः" इत्युक्तानां दध्यादीनां, पञ्चत्वात्तथा । तत्त्वम् "मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च । पञ्चतत्त्वमिदं प्रोक्तम्" इत्युक्तमद्यादीनां पञ्चत्वात् तथा । वल्कलम् "न्यग्रोधोदुम्बराश्वत्थप्लक्षबेतसवल्कलम् । पञ्चवल्कलमित्युक्तम्" इति न्यग्रोधादिवल्कलानां पञ्चत्वात् तथा ।धान्यम् "धान्यं सप्तास्तिलामाषा यवाः सिद्धार्थकोऽपि वा । पञ्चधान्यमिति प्रोक्तम्" इत्युक्तानां धान्यादीनां पञ्चत्वात्तथा । सुगन्धिः कर्पूरकक्कोलजातीपुष्पपुन्नागजातिफलरूपाणां सुगन्धिकानां पञ्चत्वात् तथा । स्नेहः "पञ्च स्नेहा वृक्षस्य चूर्णो पेषणयुष्करः । कण्डनो चोदकश्चैव" इत्युक्तचूर्णादिरूपषष्ठ्यस्यानां पञ्चत्वात् तथा । एकवृक्षाङ्गम् "त्वक् पत्रं कुसुमं मूलं फलञ्चैकस्य यस्यिनः । एकवृक्षस्यतु पञ्चाङ्गम्" इत्युक्तानां एकस्य वृक्षस्य त्वगादीनां पञ्चत्वात् तथा । पुरश्चरणाङ्गम् "जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम् । पञ्चाङ्गोपासनं शास्त्रे पुरश्चरणमिष्यते" इत्युक्तानां जपादीनां पञ्चत्वात् तथा । अमृतम् "दुग्धं च मकरा चैव घृतं दधि तथा मधु । पञ्चामृतमिदं प्रोक्तम्" इत्युक्तानां दुग्धादिरूपाणामन्यतमस्यस्वादूनां पञ्चत्वात्तथा । ज्योतिः-स्वगतप्रकाशापसारितजगन्निकायगतात्मिका पञ्चत्वात् तथा । अनुप्राणः क्षेत्रवृत्तिस्तुत्यन्यघाटानुप्राणात्मकः पञ्चत्वात् तथा । धातुलौहकम् "सुवर्णं रजतं ताम्रं रङ्गं नागं तथैव च । पञ्चलौहमिति प्रोक्तम्" इत्युक्तसुवर्णादिलौहानां पञ्चत्वात्तथा । ऋणाधरा तस्याः राशिचक्रे पञ्चमत्वात्तथात्वम् । अभेदोपचारात्तदधिपचन्द्रोऽपि तथा । सुप्रतिष्ठा तस्याः पञ्चाक्षरपादत्वात्तथा । तर्कः न्यायाश्रयान्योन्याश्रयचक्रकानवस्थाप्रमाणबाधितार्थकल्पनारूपतया पञ्चत्वात्तथा । कार्य्यावस्था

आरम्भयत्नप्रयत्नानियताग्निसंयोगसमवायिका पञ्चत्वा-
त्तथा । नाटकस्यसन्धिः मुखप्रतिमुखगर्भविमर्शोपसंहृति-
रूप पञ्चत्वात्तथा । प्रस्तावना उद्घात्यकथोद्घात-
प्रयोगातिशयप्रवर्त्तकावलगितात्मिका पञ्चत्वात् तथा ।
प्रयोजनसिद्धिहेतु बीजबिन्दुपताकाप्रकरीकार्थाख्या तथा ।
विपर्ययः अविद्याऽस्मितारागद्वेषाभिनिवेशात्मक तथा ।
अन्वगति "आक्षान्दित धारितकं रेचितं वस्तितं नुतम्"
इत्युक्ताक्षन्दितादिलक्षणा तथा । गर्भस्थानुगामिधर्मः
"आयुः कर्म च वित्तं च विद्या निधनमेव च । पञ्च-
तानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः" इत्युक्तायुरा-
दिलक्षणत्वात्तथा । योगाङ्गासनं "पद्मासनं स्वस्तिकाख्य
मुभयासने तथा । वीरासनमिति प्रोक्तं क्रमादासन-
पञ्चकम्" या०ति०चक्रस्वस्तिकादीनां पञ्चत्वात्तथा ।
पूजाङ्गासनं तु आसनयज्ञे उक्तसंख्याबोधकमिति
भेदः । हेत्वाभासः अनैकान्तिकप्रकरणसिद्धसमयातीतसंशया-
त्मकः तथा । न्यायावयवः प्रतिज्ञाहेतूदाहरणो-
पनयनिगमनात्मकः तथा । षट्त्रिंशत्तत्त्वे तु त्रित्वस्थेति
भेदः । कालगुणः दिग्गुण मूर्त्तासूर्त्तसाधारणगुणस
संयोगविभागपरत्वापरत्वपृथक्त्वात्मकः तथा । बा-
ह्येन्द्रियग्राह्यगुणः शब्दस्पर्शरूपरसगन्धात्मकस्तथा
'दुःख संसारिणः स्कन्धस्तौ च पञ्च प्रकीर्त्तिता' ।
विज्ञानं वेदना संज्ञा संस्कारोरूपमेव च" इत्युक्त
विज्ञानादिलक्षणः स्कन्धस्तथा । प्रातिपदिकार्थः वि
शेष्यविशेषणसंख्याकारकलिङ्गात्मकस्तथा । अधिकरणा
श्रयः "विषयोविषयश्चैव पूर्व्वबुद्धयोत्तरम् । निर्विष-
यश्चेति विज्ञानः ग्राह्येऽधिकरणं स्मृतम्" इत्युक्तस्य
यादिरूपस्तथा वर्षेषिक अकोषाधिः "वर्षान् जनयते
तेषां विभागः पञ्चधा मतः । खरतः कालतः व्याप्तात्
प्रायशोनुग्रहान्मतः" त्रिलोकेः उदात्तादिस्वरोच्चारण
कालव्यापकत्वरूपत्वात्प्रयत्नानां पञ्चत्वात् तथा ।
षट्संख्याबोधकाः ऋ० ख० उक्ताः । वज्रशक्तीनां,
त्रिमूर्द्धासुरनेत्राणां; तर्कोणां ज्ञानसाधनप्रमाणानां प्रत्यक्ष-
नुमानोपमानानामर्थापत्त्यनुपलब्धिरूपाणाम्, विनियोग-
यामरूपाणां सृष्टिस्थित्युपसंहारप्रकरणप्रमाणप्रमेयात्मकानां
वा षट्कत्वात्तथात्वम् । आपाद्यज्ञानकर्मणामाद्यज्ञानरूप-
त्वे आत्मान्यादिपदार्थविभक्तप्रकरणत्वात् पञ्चत्वम् इति
भेदः । अङ्गानां अङ्गत्वात्तद्धयहृदयमध्यरूपाणां प्रधाना
ङ्गानां शिखाकवचास्त्रनिर्दहनज्योतिरन्यस्नेहरूपाणां
वेदाङ्गानां वा, न्यायवैशेषिकसांख्ययातञ्जलमीमांसावेदान्ता
त्मकानां तत्त्वज्ञानसाधनानां, दर्शनानाम् चक्रवर्त्तिनां चक्रा-
वयवरूपाणाम् अराणां, कलौ शक्तिप्रवर्त्तकानाम् "युधि-
ष्ठिरोविक्रमश्चालिवाहनो धराधिनाथो विजयाभिनन्दनः ।
इमे तु नागार्जुनभैदिनीविभुर्बलिः क्रमात् षट् शकारकाः
कलौ" ज्योतिर्वि० उक्तानां युधिष्ठिरादीनां सार्व्वभौ-
मानां वा, षडाननकार्त्तिकेयसुब्रह्मण्य, सन्धिविग्रहया-
नासनद्वैधाश्रयरूपाणां गुणानामात्म षट्त्वात्तथात्मम् ।
गुणवद्रूप सत्त्वादिपरत्वे त्रित्वस्थ, द्रव्यधर्मभेदपरत्वे
चतुर्विंशतित्वस्येति भेदः । मधुरकटुकषायाम्लतिक्तलव
णानां रसानां षट्कत्वात्तथा । ह्रस्वादिरसपरत्वे
त्रित्वस्थ बोधकतेति भेदः । या०ति० उक्ताः । आमोद-
प्रमोदसुमुखदुर्मुखविघ्नविघ्नकर्त्तृरूपाणां गणेशानां, क्रमे
णोल्कामोदादिप्रियाणां सिद्धिसरस्वतिकालिमद्रभावतीभद्र-
काल्विणीरूपाणाम्, "स्नायुरस्थिमज्जशुक्राणि त्वङ्मांस-
रुधिराणि च । षाट्कौशिकमिदं प्रोक्तं सर्वदेहेषु
देहिनामिति" तत्त्वोक्तानां स्नाय्वादीनां कोशाणाम्, बुभु-
क्षापिपासायोकमोहजराम्रत्युरूपाणामूर्मीणाम्, डाकिनी
राकिणीलाकिनीकाकिनीशाकिनीहाकिनीरूपाणाम् षट्-
चक्राधिष्ठितानां शक्तीनाम्, "कलाध्वा चैव तत्त्वाध्वा
भुवनाध्वेति च त्रयम् । वर्णाध्वा च पदाध्वा च मन्त्रा-
ध्वेत्यपरं त्रयम्" इत्युक्तानां कलाध्वादीनामध्वनाम्-
मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञारूपाणां हे-
रम्बयक्षभैरवरूपाणां डाकिन्यादिषट्शक्त्याधाराणां च षट्-
कत्वात्तथा । ऋतूनां वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिरात्मकानां
षट्त्वात्तथा भा०व०उक्ताः । आधाने दक्षिणात्वेन विहित-
गवां षट्त्वात्तथात्वम् । शक्तिकर तासां षट्तारात्मक-
त्वात् तथा नक्षत्रचक्रस्थत्रीयत्रित्वपरत्वे त्रित्वस्थेति भेदः ।
एकाक्षरसाध्यानामेकाक्षरकर्त्तव्यदीक्षोपसदुन्नयनाङ्गानां सद्य-
स्त्रिधावतां "षट् साद्यस्क्रा" कात्या०१२,२,६, सू०उप-
क्रम १२,१३,२५, सूत्रान्तरेषु दर्शितानां साद्यस्क्रादीर्घ-
सत्राधिप्रमथादिकामकर्त्तव्यानुक्रीविन्नजिज्ञिप्तव्यरूपाणां नैकत्रिक-
रूपाणाम् षट्त्वात् तथात्वम् । आद्या राशिचक्रे तथाः षट्
त्वात् तथा तद्भेदात् तद्धिपतिग्रहवाक्यादिग्रहोऽपि तथा ।
नाक्षत्रो तथाः षडक्षरपादत्वात् । भावविकाराणां अस्ति
नास्तिवृद्धिविपरिणामापक्षयनाशरूपाणां वाक्यांशानां षट्-
त्वात्तथा । नीवरदार्वीनां वैद्यविकल्पलोहानां कुष्माण्ड-
वर्षाभाव्यविशेषसजातीयानां षट्कत्वात्तथा । "ऐश्व-

र्थस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना" इत्युक्तभगस्य षट्संख्यायोगात्तथा । कारकाणामधादानसंप्रदानकरणाधारकर्म्मकर्तृरूपाणां षट्कत्वात्तथा "सुपां सुपा तिङां नाम्ना धातुनाऽथ तिङां तिङा । सुबन्तेनेति च प्रोक्तः समासः षड्विधोबुधैः" इत्युक्तानां, द्वन्द्वकर्मधारयद्विगुतत्पुरुषबहुव्रीह्यव्ययीभावात्मकानां वा समासानां षट्कत्वात्तथा । सङ्कृतिः प्रसङ्गोपोद्घातहेतुतावसरनिर्वाहैकैकार्थत्वरूपा षट्कत्वम्, भाष्याध्यायपादसङ्गतिरूपा तु त्रित्वम्, अधिकरणसङ्गतिरूपान्तरसङ्गतिस्तु आक्षेपहेत्वानप्रत्युदाहरणादिरूपा बहुत्वमेति भेदः। अङ्गन्यासः शीर्षशिखामुखहृदयनेत्रकरतलतत्पृष्ठन्यासरूपतया षट्त्वम्, अभिधा टिव्यक्तिः श्रोत्रपरिणामपूर्वनिवासानुस्मृतिस्वात्मतत्त्वज्ञानक्रियाफलरूपा षट्त्वम्, नृपसैन्यं पौलस्त्यशुक्रकौणपराजितयत्नसैन्याटविकात्मकम् षट्त्वात् तथा। सुरायाणसमम् "ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः । गर्हितान्नाद्ययोर्ज्जग्धिः सुरापाणसमानि षट्" इत्युक्तम् षट्त्वात् तथा । नारीदूषणानि "पानं दुर्ज्जनसंसर्गः पत्या च विरहोऽटनम् । स्वप्नोऽन्यगेहवासश्च नारीणां दूषणानि षट्" काशी० उक्तानि षट्त्वात्तथा । यावत्तात्पर्य्यनिर्णायकः 'उपक्रमोपसंहारावभ्यासोऽपूर्व्वता फलम् । अर्थवादोपपत्ती च हेतुस्तात्पर्य्यनिर्णये" इत्युक्तेः षट्त्वात् तथा । प्रीतिलक्षणम् "ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति । भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्" इत्युक्तादानाद्यात्मकम् षट्कत्वात् तथा । गीताङ्गत्वसन्नादिरागः षट्त्वात् तथा । पताकास्थानाङ्गकम् "दृष्टार्थरचनार्थत्वाभोक्तान्यविकारः । रागप्राप्तिः प्रयोगस्य शोभानां शोभनं तथा । प्रकाशनं प्रकाश्यानामङ्गानां षड्विधम् फलम्" इत्युक्तेरर्थरचनादिरूपं षट्त्वात्तथा । रिपुः कामक्रोधलोभमोहमदमात्सर्य्यात्मकः षट्त्वात्तथा जन्मबन्धावधिकपशुत्वाने चिन्तनीयत्वाच्च तथा । विप्रकर्म्म यजनयाजनाध्ययनाध्यापनदानप्रतिपङ्कात्मकं षट्त्वात्तथा । अभिचारः मारणोच्चाटनविद्वेषणस्तम्भनमोहनवशीकरणात्मकः षट्त्वात् तथा । यमादिः यमदमोपरतितितिक्षाश्रद्धासमाधिरूपतया । प्रत्यक्षम् आप्तत्वाच्च आप्तपुरातनप्राज्ञजनानुमानात्मकं षट्त्वमौधकम् लौकिकप्रत्यक्षलक्षिकम्; इन्द्रियार्थसंयोगतत्संयुक्तसमवायसमवायसमवेतसमवायसंयुक्तविशेषणतात्मकः षट्कत्वात्तथा । आकाशगुणः संख्या परिमाणपृथक्त्वसंयोगविभागशब्दात्मकः षट्त्वात्तथा । निक्षिप्तासमवायिकारणतापन्नगुणः उष्णस्पर्शवद्रवत्वबेगस्य योगविभागात्मकः षट्त्वात्तथा । मानभङ्गोपायः सामदानभेदनीलुप्तेक्षारस्थानात्मकः षट्कत्वात्तथा ।

७ सप्तसंख्याबोधकाः । कवि० ल० उक्ताः । लोकः भूर्भुवः स्वर्महोजनतपःसत्यात्मक ऊर्द्ध्वः, अतलवितलसुतलतलातलमहातलरसातलपातालात्मकः अधःस्थो वा, द्वीपः जम्बुप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करात्मकः, मुनिश्च वैवस्वतमन्वन्तरे वसिष्ठकश्यपात्रिविश्वामित्रजमदग्निगौतमभारद्वाजात्मकः स्वायम्भुवान्तरे मरीच्यत्रिपुलस्त्यपुलहक्रतुप्रचेतोवशिष्ठात्मको वा सप्तत्वात् तथा । सूर्य्यरथः तद्वानां सप्तत्वात् तथा । सप्तद्रव्यं खण्डेक्षुसुराहतदधिक्षीरस्वादूदकात्मकः, नृपराज्याङ्गम् स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलात्मकम्, धान्यम् यवव्रीहितिलमाषप्रियङ्गकङ्गुसप्तात्मकं सप्तत्वात् तथा । वह्निशिखा काली कराली मनोजवा सुलोहिता धूम्रवर्णा स्फुलिङ्गिनी विश्वरुचात्मिका, अद्रिश्च महेन्द्रमलयसह्यशुक्तिमद्ऋक्षविन्ध्यपारियात्रकुलपर्व्वतरूपात्मकः सप्तत्वात् तथा । या० ति० उक्ताः । सुदर्शनम् आयुधचक्रसुखचक्रधीचक्रसचक्रस्वाम्याचक्रसुदर्शनचक्रात्मकम्, स्वरश्च निषादर्षभगान्धारषड्जमध्यमधैवतपञ्चमात्मकः सप्तत्वात् तथा उदात्तादित्रित्वम्, अनुदात्तरूपत्वे नीचत्वमेति भेदः । यज्ञः रविचन्द्रभौमबुधगुरुशुक्रशनिरूपः सप्तत्वात् तथा । राजनीत्योर्मेलनेतु नवत्वम् वह्निशपालभेदात्वे दशत्वम् "दश यज्ञान् यजन्तीति" श्रुतौ दशानामेव सोमसंस्थपात्राणां विधानात् । "अष्टौ यज्ञा अष्टावतियज्ञाः" इति श्रुतेः ज्ञानसाधनात्मत्वे पञ्चज्ञानेन्द्रियमनोबुद्ध्यहङ्कारात्मकाष्टविधार्थसंग्रहत्वेनत्वात् अष्टत्वबोधकश्रुतिभेदः । समिधामप्यर्कपलाशखदिरापामार्गविष्णुक्रान्तोदुम्बरशमीरूपाणां, गो० ब० उक्तानां ग्राम्यपशूनां गवादीनां, वन्यपशूनां महिषादीनाञ्च भूतादीनां आकृतीनाञ्च सप्तत्वात् तथा । भा० व० उक्ताः मनोबुद्धिसहितज्ञानेन्द्रियपञ्चकात्मात्मारूपः ऋषिः सप्तत्वात् तथा । मनोबुद्ध्यादिप्राण्यादि सुखानि सप्तत्वात् तथा, वेदातन्त्री तानां लोके सप्तत्वप्रसिद्धेश्च तथा । छन्दः गायत्र्यादिजगज्जगतीवैदिकछन्दोरूपम् सप्तत्वात्तथा लौकिकछन्दःपरत्वे

षष्ठिर्यतित्वस्येति भेदः । सामसप्तिः ओङ्कारहिङ्कारप्रस्तावोद्गीथप्रतिहारोपद्रवनिधनरूपा सप्तत्वात् तथा । "लोकेषु सप्तविधं सामोपासीतेति" श्रुतौ साम्नां सप्तविधत्वोक्तेश्च तथात्वम् । वैशेषिकमते पदार्थः द्रव्यगुणकर्मसामान्यविशेषसमवायाभावात्मकः सप्तत्वात् तथा । प्रकृतिविकृतिः महदहङ्कारपञ्चतन्मात्रात्मिका सप्तत्वात् तथा । पुनर्वसुनक्षत्रस्यारायिचक्रे सप्तमत्वात् तथा । अभेदात्तदधिपतिरदितिरपि । उष्णिक् तथाः सप्तानुष्टुप्पादत्वात् तथा । अश्वजन्मस्थानम् "अमृतादु वाप्यतोवश्वेदेभ्योऽश्वाञ्जगर्भतः । साध्योऽयानासृत्पत्तिः सप्तधा परिकीर्त्तिता" इत्युक्तानां सप्तत्वात्तथा । ताडयोत्पत्तिस्थानकत्वेन अश्वयद्वोऽपि तथा । मदस्रुतिपर्वतः "करात् कटाभ्यां मेढ्राच्च नेत्राभ्याञ्च मदस्रुतिः" इत्युक्तानां सप्तत्वात् तथा । वरगुणः "कुलञ्च शीलञ्च मनोज्ञता च विद्या च वित्तं च वपुर्वयश्च । एतान् गुणान् सप्त विचिन्त्य देया कन्या बुधैः शेषमचिन्तनीयम्" इत्युक्तकुलादीनां सप्तत्वात् तथा । मौनभेदा "सप्त मौनभेदाः कन्या वर्ज्जनीयाः कुलाधमाः । वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला । उदकस्पर्शिता या च या च पाणिगृहीतिका । अग्निं परिगता या च पुनर्भूप्रभवा च या" इत्युक्तानां सप्तत्वात् तथा । धर्म्यवित्तागमः "सप्त वित्तागमा धर्म्यादायोलाभः क्रयोजयः । विभागः संप्रयोगश्च सत्प्रतिग्रह एव च" इत्युक्तादायादीनां सप्तत्वात् तथा । मरुत्, आवहप्रवहोद्वहसंवहविवहपरावहपरीवहात्मकः सप्तत्वात्तथा । अवान्तरभेदपरत्वे ऊनपञ्चाशत्त्वस्येति भेदः । मोक्षदपुरी "अयोध्या मथुरा माया काशी काञ्चिरवन्तिका । पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः" इत्युक्तपुरीणां सप्तत्वात्तथा ।

अष्टबोधकाः कवि० उक्ताः । योगाङ्गं यमनियमासन प्राणायामप्रत्याहारध्यानधारणासमाधिरूपं, शिवमूर्त्तिः शिवादिपञ्चभूतचन्द्रसूर्य्ययजमानरूपा, ऐरावतपुण्डरीकवामनकुमुदाञ्जनपुष्पदन्तसार्वभौमसुप्रतीकरूपोदन्ती च अष्टत्वात्तथा एकयेषात् करिणीयद्वोऽपि तथा करिण्यश्च अञ्जनवामनपुष्पदन्तसार्वभौमसुप्रतीकरूपाः । सिद्धिः अणिमलघिमप्राप्तिप्राकाम्येशितावशिता व्याप्तिकामावसायितात्मिका अष्टत्वात् तथा । चतुर्वदनब्रह्मकर्णस्तथा । व्याकरणम् इन्द्रचन्द्रकाशकृत्स्नापिशलिशाकटायनपाणिन्यमरजैनेन्द्रात्मकाष्टकर्तृकतम् अष्टत्वात् तथा । टिकपाल: इन्द्रवह्नियमनिर्ऋतिवरुणवायुकुबेरेशात्मकः प्राच्यादीनामष्टानां दिशामीश्वराणामेषामष्टत्वात् तथा । ऊर्द्धाधोदिक्सहितदिक्पालपरत्वे दशत्वस्येति भेदः । व्यष्टिःशेषवासुकिपद्मकर्कोटपद्मतक्षककुलीरकर्कटयङ्कात्मकः अष्टत्वात्तथा । कुलाचलः मतान्तरे हिमाचलसहितः पूर्व्वोक्तमहेन्द्रादिरूपः अष्टत्वात्तथा । कुलाचलानां सप्तत्वप्रसिद्धावपि क्वचिदष्टत्वव्यवहारः । "अष्टकुलाचलसप्तसमुद्राः" मोक्षमुद्गरः । भा०ति०उक्ताः । भैरवः असिताङ्गरुरुचण्डोन्मत्तकपालिभीषणक्रोधनसंहारात्मकः । प्रकृतिः प्रधानमहदहङ्कारपञ्चतन्मात्रात्मिका अष्टत्वात्तथा । प्रकृतिशब्दः प्रधानपरत्वे एकत्वस्य तत्त्वान्तरोपादानत्वपरत्वे अष्टत्वस्येति भेदः । गणेशः वक्रतुण्डैकदंष्ट्रमहोदरगजाननलम्बोदरविकटविघ्नराजधूम्रवर्णात्मकः अष्टत्वात्तथा । अग्निमूर्त्तिः "जातवेदाः सप्तजिह्वो हव्यवाहनसंज्ञकः । अश्वोदरजसंज्ञः स्यात् पुनर्वैश्वानराख्य । कौमारीजाः स्याद्विश्वमुखोदेवसुखः स्मृतः" भा०ति०उक्तानां जातवेद्आदीनामष्टत्वात्तथा भा०व० उक्ताः । घाणः घ्रायमनङ्गल्यपूरणीयः महदहङ्कारचित्तसहितज्ञानेन्द्रियरूपः अष्टत्वात्तथा । शरभपादस्य लोके अष्टत्वप्रसिद्धेस्तथा । यूपकोणस्य वेदे अष्टत्वप्रसिद्धेस्तथा । द्विजगुणाः "दया सर्व्वभूतेषु क्षान्तिरनसूया शौचमनायासोमङ्गलमकार्पण्यमस्पृहेति" गौतमोक्तानामष्टत्वात्तथा । वैशेषिकोक्तेश्वरगुणः संयोगविभागपृथक्त्वसंख्यापरिमाणबुद्धीच्छाकृतिरूपः अष्टत्वात्तथा । राज्याङ्गम् पौरस्त्यैर्युक्तं स्वाम्यमात्यादिसप्तकम् अष्टत्वात्तथा । नृपगतिः "आदाने च विसर्गे च तथा प्रेषनिषेधयोः । पञ्चमे चार्थवचने व्यवहारस्य चेक्षणे । दण्डशुद्धेरपक्वः स्यात्तेनाष्टगतिको नृपः" एतन्मोक्षगतिरूपा अष्टत्वात्तथा । तारिणी "तारा चोग्रा महोग्रा च वज्रा काली सरस्वती । कामेश्वरी च चामुण्डा इत्यष्टौ तारिणीयोगाः" इत्युक्तानां तारामूर्त्तिभेदानामष्टत्वात्तथा । होमद्रव्यम् "अश्वत्थोडुम्बरप्लक्षन्यग्रोधसमिधश्चिताः । सिद्धार्थपायसाज्यानि द्रव्याण्यष्टौ विदुर्बुधाः" इत्युक्तानामष्टत्वात्तथा । धातु "स्वर्णं रौप्यञ्च ताम्रञ्च वङ्गं यशदमेवच । सीसं लौहं रसश्चेति धातवोऽष्टौ प्रकीर्त्तिताः" इत्युक्तानामष्टत्वात् तथा देहस्थधातुपरत्वे सप्तत्वस्येति भेदः । मकारसरस्वतीभुजत्वस्था अष्टभुजत्वात्तथा । सात्त्विकभावः "स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रु

प्रलय इत्यादौ खात्मिकाः उक्ताः" सा० द० उक्तलक्षणादीनामष्टत्वात्तथा। असमवायिकारणगुणः रूपरसगन्धस्पर्श परिमाणैकपृथक्त्वसंयोगेतरशब्दात्मकः अष्टत्वात्तथा। निमित्तकारणगुणः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाहृष्टभावनात्मकत्वात्तथा। मनोगुणः संख्यापरिमितिपृथक्त्वसंयोग विभागपरत्वापरत्ववेगात्मकत्वात्तथा। मङ्गलम् "मृगराजो वृषोनागो कलसोव्यजनं तथा। वैजयन्ती तथा भेरी दीप इत्यष्टमङ्गलम्" इत्युक्तानां "लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो, गौर्हुताशनः हिरण्यं सर्पिरादित्यो राजा तथाऽप्सः" इत्युक्तानां वाष्टत्वात्तथा। नायिकावस्था स्वाधीनभर्तृका खण्डिता[illegible] विप्रलब्धाप्रोषितभर्तृकावासकसज्जाविरहोत्कण्ठितात्मिका अष्टत्वात् तथा। दृष्टलौहम् "सुवर्णं रजतं ताम्रं सीसकं वाङ्गिकं तथा। रङ्गं लौहं तीक्ष्णलौहं लौहान्यष्टौ इमानि तु" इत्युक्तानामष्टत्वात् तथा। लघुलौहपरत्वे पञ्चत्व स्य बोधकमित्युक्तम्। आयुर्वेदोक्तम् "शस्त्रं शालक्यं कायचिकित्सा भूतविद्या कौमारभृत्यागदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रमिति" सुश्रुतोक्तानामष्टत्वात्तथा। अर्घोक्तम् "आपः क्षीरं कृशाश्वस्तु दधि सर्पिः सतण्डुलम्। पयः सिद्धार्थकश्चैव अष्टाङ्गोर्घः प्रकीर्त्तित" इति इत्युक्तानाम् "आपः क्षीरं कृशाश्वापि घृतं मधु तथा दधि। रक्तानि करवीराणि तथा चैव रक्तचन्दनम्। अष्टाङ्ग एष वा अर्घ इत्युक्तानां वाष्टत्वात् तथा। प्रणामोक्तम् "जानभ्यान्तु तथा पद्भ्यां पाणिभ्यामसृजा धिया। शिरसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग ईरितः" इत्युक्तानामष्टत्वात्तथा। "मैथुनाङ्गम् स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम्। संकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च। एतन्मैथुनमष्टाङ्गम्" इत्युक्तानामष्टत्वात्तथा। पुष्पं तस्य राशिचक्रे अष्टत्वात् तथा। तदभेदात् तदधिष्ठोनीषोऽपि। अनुष्टुप् तस्याः अष्टाक्षरपादत्वात् तथा। तमः अव्यक्तमहदहङ्कारपञ्चतन्मात्रात्मकोध्वनात्मभूतेष्वात्म बुद्धिरूपमष्टविधविषयत्वात् तथा। "भेदस्तमसोऽष्टविधो मोहस्य च तथा" सा० का०। मोहः अणिमादिसिद्धीनामात्मगतानां मात्मतिरस्कारेणाभिमानरूपः अणिमाद्यष्टविधविषयत्वात् तथा। विवाहः ब्राह्मादैवार्षप्राजापत्यासुरगान्धर्वराक्षसपैशाचात्मकः अष्टत्वात् तथा। सद्वि "जन्मः मन्त्रोऽध्ययनं दुःखविघातार्थमुच्यते। सुखप्राप्तिः" [illegible] सा० का० उक्तोक्तादीनामष्टत्वात्तथा। उक्तसिद्धीनां नामान्तराणि सांख्यकौमुदीग्रन्थेषु दर्शितानि। तारहुतारतारतारण्यकसदाशिवप्रमोदसुदितप्रमोदमानरूपाणि। खगगति "सपातं विप्रपातश्च महापातं निपातनम्। यक्षं तिर्यक् तथा चोर्द्धमष्टम लघुसंज्ञकम्" इत्युक्त सम्पातादिरूपा अष्टत्वात् तथा परिकर्म अङ्गशास्त्रोक्त योगवियोगगुणनभागवर्गततपदघनततृपदकम् अष्टत्वात्तथा" वर्गोत्पत्तिस्थानम्। "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च" गिलोकोक्तादीनामष्टत्वात् तथा। अव्रतभङ्गः अष्टौ तान्यव्रतभङ्गानि आपामलं फल पय। रुषिर्ब्राह्मणकाम्या च सुरोच्छिष्टमौषधम् स्मृत्युक्ताद्यादीनामष्टत्वात्तथा। नक्षारोग उन्मादत्वगदोषराजयक्ष्मश्वास मधमेहभगन्दरोदरार्शकुरोरूपः अष्टत्वात् तथा।

नवत्वसंख्याबोधकाः कवि० ल० उक्ता। सप्तनासिकानेत्रकर्ण द्वयोपस्थपायुरूपाणां देहद्वाराणाम् नवसंख्यायोगात् तथा भारतकिन्नरहरिकुरङ्गिरण्मयरथकेलातभङ्गुरगजेतुमाख्यानां भूखण्डानाम्, तपस्याकाले स्वयंकृतानां राक्षसतानां, व्याघ्रनखानां 'गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा' इति त्रिविधसुरायाः सात्त्विकराजसतामसाधिकारिभेदसैव्यतया नवत्वात्तथा। खण्डानां अष्टासु दिक्षु अष्टौ शैलानीप्राच्योर्मध्ये आचार्यकखण्डमेकमिति मण्डपाङ्गकखण्डानां नवत्वात्तथा। "पद्मोऽस्त्रियं महापद्म शङ्खोमकरकच्छपौ। मुकुन्दकुन्दनीलाश्च वर्चोऽपि निधयो नव" द्वारा० उक्तानां पद्मादीनाम्" अङ्कानामेकादीनां नवानानां, शृङ्गारवीरकरुणाद्भुतहास्यभयानकबीभत्सशान्ताख्यानामलङ्कारोक्तानां रसानाम्, रविचन्द्रभौमबुधगुरुशुक्रशनिराहुकेतुरूपाणां ग्रहाणाञ्च नवत्वात् तथात्वम्। ग्रा० वि० उक्ता "सच्चिदानन्दविभवात् सकलात् परमेश्वरात्। आसीच्छक्तिस्ततो नादो नादाद्विन्दुसमुद्भवः। परशक्तिमयः साक्षात् त्रिधासौ भिद्यते पुनः। विन्दुर्नादो बीजमिति तस्य भेदाः समीरिताः। विन्दुः शिवात्मको बीजं शक्तेर्नादस्त्वयोनिधः। समवायः समाख्यातः सर्वागमविधारदैः। रौद्री विन्दोस्ततो नादात् ज्येष्ठा बीजादजायत। वामा, तस्याः समुद्भूताः कृष्णसारमाधिमाः" तत्र वाद्यो उक्तानां यक्षिणत्वानां पीठशक्तीनां तत्तद्देवताभेदेन भिन्नानां तत्तद्वीजानाञ्च "शङ्खमाणिक्यवैदूर्य गोमेदानृ वज्रविद्रुमौ। पुष्परागं मरकतं नीलमेति नवैतानि क्रमात्' इत्युक्तानां रत्नानां

नवत्वात् तथा । वर्गाणामकचटतपयशलरूपाणाम् नवत्वात् तथा लोके लक्षरूपनवसंख्याभावात् अप्रसंख्याबोधक इति भेदः । प्राणरन्ध्रकटुगोभेदरूपाणाम् भा० ति० २३प० उक्तानां प्राणदूतीनाम्, नवत्वात्तथा । भा० व० । सामधेनो तथात्व यथा नवत्वं तथा नी० क०व्या० दर्शितं प्रकृतिसंयोग० इ च ह्रस्वौ यथा नवधा योगस्तथोक्तं प्राक् ।

ऐश्वरलक्षणम् जगज्जन्मस्थितिप्रलयेषु प्रत्येकं ज्ञानक्रियोपयोगितया नवत्वात्तथा । "विसर्गबिसर्गादिनवलक्षणलक्षितम्' श्रीधरः । पत्रिका कटली दाडिमी धान्यं हरिद्रामानकं कच० । विल्वोऽग्निको जयन्ती च विज्ञेया नव पत्रिकाः" इत्युक्तानां पत्रिकाणां नवत्वात् तथा । नवपत्रिकात्मदेवीरूपा दुर्गा ब्रह्माणीरूपदन्तिकालरूपोजयन्तीचामुण्डाकालिकायिवा शोकरहिताकार्त्तिकीरूपाणां नवत्वात् तथा । अविश्रेष्ठार्थकरत्नयन्त्रः "धन्वन्तरिः क्षपणकोऽमरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः । ख्यातोवराहमिहिरोनृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य" ज्योतिर्वि०उक्तानां विक्रमादित्यसभास्थकविश्रेष्ठानां नवत्वात् तथा । विष्णुभक्तिः "श्रवणं कीर्त्तनं विष्णोःस्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् । इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा" भाग० ७,५ उक्तश्रवणादिरूपा नवत्वात् तथा । तुष्टिः "आध्यात्मिकस्तुतस्तः प्रकृत्युपादानकालभाग्याख्याः । बाह्या विषयोपरमात् पञ्च नव तुष्टयो भवन्तीह" सां०का० उक्तानां नवत्वात् तथा । अभ्यागतेऽभ्ययकार्य्यम् । "नवैतानि गृहस्थेन कार्य्याण्यभ्यागते सदा । अभ्यर्च्चनि च यत् तोय्यं वाक्यं चक्षुरमनोऽ सूनृतम् । अभ्युत्थानम् शिष्टावाते सङ्केतं पूर्वभाषणम् ७ । उपासन ८ नमस्कारः९" काशी० उक्तानि नवत्वात् तथा । अभ्यागते देयद्रव्यसाध्यकार्य्याणि । "तत्रेदमभ्ययुक्तानि कार्य्याण्यभ्यागते नव । आसनं १पादशौचं२ च यथायत्नमनं३ क्षितिः ४ । शय्या५ वर्त्मानुगमनं ७अनुव्रज्या दीपार्पणार्हस्यविद्विदाः" काशी० दर्शितानि नवत्वात्तथा । गृहस्थावश्यज्ञातव्यनिन्द्यकार्य्याणि "तथा नव विनाशीनि त्याज्यानि गृहमेधिना । मैथुन्यं परदाराश्च द्रोहः क्रोधानृतानृते । द्वेषोदम्भश्च मायाश्च स्वर्गमार्गार्गलाश्च ये" काशी० उक्तानि नवत्वात्तथा । अवश्यकर्त्तव्यानि "नवावश्यककर्म्माणि कार्य्याणि प्रतिवासरम् । स्नानं सन्ध्या जपोहोमः स्वाध्यायो देवतार्चनम् । वैश्वदेवं तथातिथ्यं नवमं पितृतर्पणम्" काशी० उक्तानि नवत्वात् तथा । गोप्यानि "जल्पनं मैथुनं मन्त्रो गृहच्छिद्रञ्च वञ्चनम् । व्यायुर्धनापमानं स्त्री नवप्रकाश्यानि सर्व्वथा" काशी० उक्तानि नवत्वात्तथा । प्रकाश्यानि "नवैतानि प्रकाश्यानि बुद्ध्युपयमकृत्तिमम् । प्रायोज्य २क्षणशुद्धिस्व२ स्वाम्यः ४ क्रय५ विक्रयौ६ । कन्यादानं७ गुर्योटत्कर्ष८" काशी० दर्शितानि नवत्वात्तथा । अक्षयदानपात्राणि । "पात्रमित्रविनीतेषु दीनानाथोपकारिषु । पितृमातृगुरुष्वेतन्नवकं दत्तमक्षयम्" काशी० उक्तानि नवत्वात्तथा । निष्फलदानपात्राणि "निष्फलं नवकं ह्रस्वं चाटचारणतस्करु । कुवैद्ये क्षितवे धूर्त्ते षण्ढे मन्दे च बन्दिनि" काशी० उक्तानि नवत्वात्तथा । अदेयवस्तूनि "आपत्स्वपि न देयानि नव वस्तूनि सर्व्वदा । अन्यत्वे सति सर्व्वस्व दारास शरणागताः । न्यासाधी कुलटस्त्रि निक्षेपः स्त्रीधनं सुतः" काशी० उक्तानि नवत्वात्तथा । साधारणकर्म्म 'सत्य' शौचमहिंसा च शान्तिर्नान दया दम० । अक्षयेमिन्द्रियाकोचः कर्म्म साधारणं नवम्" काशी० उक्तानि नवत्वात् तथा । द्रव्यं क्षितिजलतेजोवायुाकाशकालदिग्मनआत्मरूप' नवत्वात् तथा । तमसोद्रव्यत्वमते द्रव्यत्वबोधकमिति भेदः । स्वाविभावः "रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा । जुगुप्सा विस्मयश्चेत्यमष्टौ प्रोक्ताः शमोऽपि च" सा०द०उक्तरत्यादीनां नवत्वात्तथा ।

१० दशत्वबोधकाः । काव०व० उक्ताः । कृष्णाकुलीनां, दशभुजगणेशबाहूनां, दशशेखरावलीनां, मीनकूर्म्मवराहनृसिंहवामनपरशुरामदाशरथिबलभद्रबुद्धकल्किरूपाणां ज्ञानावताराणाम्, पूर्व्वाग्नेयीदक्षिणनैर्ऋतीपश्चिमवायव्योत्तरैशान्यूर्द्धाधोरूपाणां दिशां,नविंशेषां देवानां गणदेवताभेदानां, कृतद्रव्यलक्षणकालाकाशदिगात्मनिरोचकपुरुषवोधाद्रव्योरूपाणाम्, दशाक्षरचन्द्रीमानाञ्च दशत्वात्तथा भा०ति०। शक्तितत्त्वानि "निवृत्त्याद्याः कलाः पञ्च ततो विन्दुकला पुनः। नादः शक्तिः सदापूर्णः शिवस्य प्रकृतेर्विदुः" इत्युक्तनिवृत्त्यादिरूपाणि दशत्वात्, तथा । नाडीनाम् इडापिङ्गलासुषुम्णासहितानाम् "नाभ्यारोहणिलिङ्गाख्या सप्तनाड्यूर्ध्वगा मता । वयश्चिनो यशिनी च कुहूः कुः

सप्त नाडिकाः" इत्युक्तानां दशत्वात् तथा । भा० व० । पुरुषस्य वागादीनामधिदैवमधिभूतं स्थितानां विषयसर्पणवत्तोक्तदिशां दशत्वात्तथा "ता वा एता दशैव भूतमात्रा अधियज्ञं प्राणमात्रा अधिभूतमिति" श्रुतेस्तथात्वम् । गर्भमासानाम्, उपनिषद्भेदेन उपदेशक्रमद्वावाख्यानाम् "ब्रह्माहमस्मीति" एवमादीनां तद्विनेयानां तद्विषयकाणाञ्च दशत्वात्तथा ।

महाविद्या "काली तारा महाविद्या षोडशी भुवनेश्वरी । भैरवी छिन्नमस्ता च विद्या धूमावती तथा । बगला सिद्धविद्या च मातङ्गी कमलात्मिका । एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः" इत्युक्तकाल्यादीनां दशत्वात्तथा । ब्राह्मणः सारस्तकान्यकुब्जगौडमैथिलोत्कलद्राविडमहाराष्ट्रतैलङ्गगुर्जरनागररूपतया दशत्वात्तथात्वम् । पापानि "अदत्तानामुपादानं हिंसा चैवाविधानतः । परदारोपसेवा च कायिकं त्रिविधं स्मृतम् । पारुष्यमनृतं चैव पैशुन्यं चापि सर्व्वशः । असम्बन्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् । परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् । वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् । एतानि दश पापानि" इत्युक्तानां दशत्वात्तथा योगाङ्गरूपो यमः "अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं क्षमार्जवम् । दया धृतिर्मिताहारः शौचं चेति यमा दश" इत्युक्ताहिंसादीनां दशत्वात्तथा । नियमः "तपः सन्तोषआस्तिक्यं दानं देवस्य पूजनम् । सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपोऽुतम् । दशैते नियमाः प्रोक्ताः" या०ति०उक्ततपआदीनां दशत्वात् तथा । रूपकाव्यम् "नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः । ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश" इत्युक्तनाटकादीनां दशत्वात्तथा लास्याङ्गम् "गेयं पदं स्थितपाठ्यमासीनं पुष्पगण्डिका । प्रच्छेदकस्त्रिगूढं च सैन्धवाख्यं द्विगूढकम् । उत्तमोत्तमकं चान्यदुक्तप्रत्युक्तमेव च । लास्ये दशविधं ह्येतदङ्गजातं मनीषिभिः" इत्युक्तगेयादीनां दशत्वात्तथा । धर्म्मलक्षणम् "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः । धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्" इत्युक्तधृत्यादीनां दशत्वात् तथा । पञ्चमूलद्वयम् "उभाभ्यां पञ्चमूलाभ्यां दशमूलसदाहृतम्" इत्युक्तानां दशत्वात्तथा । पञ्चमूले च "श्रीफलः सर्व्वतोभद्रा पाटला गणिकारिका । शोनाकः पञ्चभिश्चैतैः पञ्चमूलसदाहृतम् । गोक्षुरः पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम्" भा० प्र० परिभाषिते । तेन प्रत्येकमूलशब्दः पञ्चार्थकत्वात् पञ्चत्वस्य बोधक इति भेदः । उपनिषद् "ईशाकेनकठः प्रश्नोमण्डमाण्डूक्यतित्तिरिः । ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश" इत्युक्तेशादीनां प्रधानोपनिषदां दशत्वात्तथा । मन्त्रसंस्कारः तन्त्रोक्तदशविधतया दशविधत्वात्तथा ।

न्यायावयवः केषांचिन्मते जिज्ञासासंशयशक्यप्राप्तिप्रयोजनसंशयव्युदासस्थितानां प्रतिज्ञाहेतूदाहरणोपनयनिगमनानां दशत्वात्तथा । मघा राशिचक्रे तस्या दशमत्वात्तथा तद्भेदात् तदधिपतिग्रहोऽपि तथा । पङ्क्तिः दशाक्षरपादत्वात्तथा । दशरथ इत्यर्थे पङ्क्तिरथः इत्यादिः । बौद्धबलम् "दानं शीलं क्षमा वीर्य्यं ध्यानं प्रज्ञा बलानि च । उपायः प्रणिधिर्ज्ञानं दश बुद्धबलानि वै" इत्युक्तदानादीनां दशत्वात्तथा । वह्निकला "धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी । सुश्रीः सुरूपा कपिला हव्यकव्यवहे अपि" इत्युक्तधूम्रार्चिरादीनां दशत्वात्तथा । योगभङ्गः "तिथ्यङ्गवेदैकदशयोगविघ्नैकादशाद्यादशविंशसंख्याः । दृष्टोदुना सूर्य्ययुतोदुयोगाद्योगा अमूषेतु दश योगभङ्गाः" ज्यो० उक्तयोगजातपञ्चदशाद्यङ्कानां दशत्वात्तथा । विप्राशौचदिनम् "शुध्येद्दुविप्रोदशाहेन" मनूक्तेः विप्राशौचस्य दशदिनव्यापित्वात्तथा । बहुर्हिजसंस्कारः गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्म्मनामकरणनिष्क्रामणान्नाशनचूडोपनयनविवाहरूपतया दशत्वात्तथा । दहनसंस्कारस्तु अष्टचत्वारिंशच्छब्दे उक्तचत्वारिंशत्त्वबोधक इति भेदः । महापुराणलक्षणम् "सर्गोऽस्याथ विसर्गश्च वृत्तीरक्षान्तराणि च । वंशोवंशानुचरितं संस्था हेतुरपाश्रयः । दशभिर्लक्षणैर्युक्तं पुराणं तद्विदोविदुः । केचित् पञ्चविधं चाद्यु र्महदल्पव्यवस्थया" भाग० १२,७ । महोक्षः दिव्यादिव्ययज्ञादीनां तद्विषयाणां दशत्वात्तथा । "दशविधो महोक्षः" या० का० ।

हेरम्बवायुः प्राणादिपञ्चकसहितनागकूर्म्मधनञ्जयकलदेवदत्ताख्यानाम् हेरम्बानां दशत्वात्तथा । वह्निः "आजकोरङ्गकश्चैव खेटकः खेचकस्तथा । चारकोमन्थकश्चैव द्रावकाख्यश्च सप्तमः । व्यापकः पावकश्चैव ग्रहैकः दशमः स्मृतः" इति पदार्थादर्शोक्तानाम् हेरम्बाग्नीनां "तेजकोदीपकश्चैव विश्वमञ्जमधोधराः । आवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च । अग्नाहार्य्यो गार्हपत्य इत्येते दश वह्नयः" इति तत्रैवोक्तानां वाह्यवह्नीनां वा दशत्वात्त-

था। दिक्पालवाङ्मनम् ऐरावतहस्तागमहिषसिंहमकरहरिणाश्वहंसपद्मरूपम् दशत्वात् तथा। मतान्तरे सोमस्थाने कुबेराधिपतित्वे तस्य नरवाहनत्वमिति भेदः। दिक्पालास्त्रम् वज्रयष्टिदण्डखड्गपाशाङ्कुशगदात्रिशूलचक्रपद्मरूपम दशत्वात् तथा। दुर्गाभुजःतस्या दशभुजत्वात् तथा। सामान्यगुणः संख्यापरिमितिपृथक्त्वसंयोगविभागपरत्वापरत्वनैमित्तिकद्रवगुरुत्ववेगरूपो दशत्वात् तथा। तेषाञ्च अनेकद्रव्यगुणत्वात् सामान्यत्वम्। अमूर्त्तगुणः "धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च। एतेऽमूर्त्तगुणाः सर्वे" इत्युक्तधर्मादीनां दशत्वात् तथा। बुद्ध्यादयश्च षट् बुद्धिसुखदुःखेच्छाद्वेषयत्नरूपा इति दशत्वम्। मूर्त्तगुणः 'रूपं रसःस्पर्शगन्धौ परत्वमपरत्वकम। द्रवोगुरुत्वं स्नेहश्च वेगो मूर्त्तगुणा अमी" इत्युक्तरूपादीनां दशत्वात् तथा।

एकादशबोधकाः :कवि०ख० उक्ताः रुद्राणाम् "अजैकपादहिर्बुध्नोविरूपाक्षश्च रेवतः। हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः। रुद्रा एकादश प्रोक्ता जयन्तश्चापराजितः" इत्युक्ताजादिकानामेकादशत्वात् तथा। दुर्य्योधनसेनानामेकादशाक्षौहिणीमितत्वात् तथा।

भा०व०उक्ताः। पशुयागे स्रोमभेदानां, तत्तत्स्तूपानां चैकादशत्वात्तथा मनसासहितज्ञानकर्मेन्द्रियाणां तदुग्राह्यविषयाणाञ्च एकादशत्वात् तथा।

इन्द्रियघातः "बाधिर्य्यं कुब्जितात्वं जडताऽलिघुता तथा। मूकता कौशयपङ्गुत्वकुब्जोदावर्त्तमन्दताः" इत्युक्तबाधिर्य्यादीनामेकादशत्वात्तथा। "एकादशेन्द्रियवधः" सां०का०। पूर्वफाल्गुनी तस्याः भल्लचक्रे एकादशत्वात् तदधिपोभगश्च तथा। तेजोगुणः रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वनैमित्तिकद्रवरूपतया एकादशत्वात् तथा। कारणोद्भवगुणः अपाकजरूपरसगन्धस्पर्शापाकजद्रवस्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणस्थितिस्थापकसंस्काररूपत्वात् एकादशत्वबोधकः। अव्याप्यवृत्तिगुणः बुद्धिसुखदुःखेच्छाद्वेषयत्नाहृष्टभावनाशब्दसंयोगविभागरूपतया एकादशत्वात् तथा।

द्वादशबोधकाः कवि०ख०उक्ताः "धाता मित्रोऽर्य्यमा रुद्रो वरुणः सूर्य्यएव च। भगोविवस्वान् पूषा च सविता दशमः स्मृतः। एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते" विष्णुधं० उक्ताः आदित्यानां विष्णुधर्ममूर्त्तीनाञ्च तथात्वम्। तत्रैव १५५० "द्वादशादित्यसंज्ञितामूर्त्तीर्द्वादश विन्यसेत्। केशवाद्याः क्रमाद्देहे वक्ष्यमाणविधानतः। ललाटे केशवं ध्यात्वा, कृष्णं नारायणं न्यसेत्। अर्यमणं हृदि मित्रेण३माधवं ३कण्ठदेशतः। वरुणेन४ च गोविन्दं४, पुनर्दक्षिणपार्श्वके। अंशुना५ विष्णु५ मंसस्थं भगेन६ मधुसूदनम्६। गण्डे विवस्वताऽ युक्तं त्रिविक्रम७ मनन्तरम्। वामपार्श्वस्थमिन्द्रेण८ वामनाख्यं८ यथांसके। पूष्णा९ श्रीधरनामानं९ गले पर्जन्य१० संयुतम्। हृत्कोष्ठेत्वाष्ट्रयं १० पृष्ठे पद्मनाभं११ ततःपरम्। त्वष्ट्रा११ दामोदरं१२ पश्चात् विष्णुना१२ ककुदि न्यसेत्१२" इत्युक्तानां द्वादशत्वात् तथा। भा०व०। जगती तस्याः द्वादशाक्षरपादत्वात्तथा। प्राजापत्यसाधनाङ्गः तस्य द्वादशाङ्गसाध्यत्वात् तथा।

नाटकीयसुखाङ्गम् "उपक्षेपः परिकरः परिन्यासो विलोभनम्। युक्तिः प्राप्तिः समाधानं विधानं परिभावना। उद्भेदः कारणं भेद एतान्यङ्गानि वै मुखे" भा०द०उक्तोपक्षेपादिरूपतया तथा। बौद्धमतसिद्धमायतनम् "अर्थानुपार्श्वं बहवो द्वादशायतनानि वै। परितः पूजनीयानि जिनस्थैरिह पूजितैः। ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च। मनोबुद्धिरिति प्रोक्तं द्वादशायतनं बुधैः" इत्युक्तायतनानां द्वादशत्वात् तथा। उत्तरफाल्गुनी राशिचक्रे तस्या द्वादशत्वात् अभेदोपचारात् तदधिपार्य्यमापि तथा। स्मृतिः: "प्राणापानसमानाश्च उदानोव्यान एव च। चक्षुः श्रोत्ररसाघ्राणस्पर्शबुद्धिर्मनस्तथा। द्वादशैते च तृप्तिता देवाः स्यायज्ञ वेऽब्रुवन्" इत्युक्तप्राणादिनामकगणदेवात्मकत्वात्तथा। जटाधरमते "षट्त्रिंशतस्तृप्तिमता:" इत्युक्तेः षट्त्रिंशत्त्वेति भेदः। त्रिंशद्यागौचदिनम् "द्वादशाहेन भूमिपः" इति मनूक्तेस्तस्यागौचस्य द्वादशाहसाध्यत्वात्तथा। साध्याः "मनोमना तथा प्राणो नरोऽयानश्च वीर्य्यवान्। विनिर्भयोनयश्चैव दंशो नारायणो हयः। प्रभुश्चेति समाख्याताः साध्याः द्वादश गौर्विदाः" इत्युक्तमनादिगणदेवात्मकः द्वादशत्वात्तथा। सूर्य्यकला "तपिनी तापिनी धूम्रा मरीचि-

ज्योत्स्निनी रुचिः । सुषुम्णा भोगदा विश्वा बोधिनी धारिणी क्षमा" शा०ति० उक्तत्वन्यादीनां द्वादशत्वात् तथा मद्यम् "पानसं द्राक्षमाधूकं खार्जूरं तालमध्वम् मार्क्षिकं टाङ्कमाध्वीकमैरेयं नारिकेलजम् । समानानि विजानीयान्माध्वीकादेव तु । द्वादशन्तु सुरामद्यं सर्वेषामधमं स्मृतम्"। पुलस्त्योक्तपानसादीनां द्वादशत्वात्तथा

१३ त्रयोदशसंख्याबोधकाः । कवि० ल० उक्ताः ताम्बूलगुणः ताम्बूलशब्दे वक्ष्यमाणत्रयोदशविधत्वात्तथा । भा० व० । मङ्गीद्वीपः जङ्गीलोकघटकाधोलोकसप्तकरूपत्रयोदशद्वीपत्वयोगात्तथा । अतिच्छन्दः गायत्र्यादिवैदिकच्छन्दःसप्तकातिक्रान्तातिजगतीच्छन्दोरूपम् त्रयोदशाक्षरपादत्वात् तथा । प्रतिसखाङ्गं "विलापः परिसर्पश्च विधूतं तापनं तथा । नर्म नर्मद्युतिश्चैव तथा प्रमुषनं पुनः । विरोधश्च प्रतिमुखे तथा स्यात् पर्युपासनम् । पुष्पं वज्रमुपन्यासोवर्ज्यसंज्ञार इत्यपि" सा०द० उक्तविलासादीनां तथात्वात्तथा । गर्भाङ्गम् "अभूताहरणं मार्गो रूपोदाहरणे क्रमः । संपत्तिश्चानुमानञ्च प्रार्थनाक्षिप्तिरेव च । त्रोटकाधिबलोद्वेगा गर्भे स्युर्विंशतिस्तथा" तत्तदुक्तभूताहरणादीनां तथात्वात्तथा । विमर्षाङ्गम् "अपवादोऽथ संफेटो व्यवसायोद्गमः स्मृतिः । यत्नः प्रसक्तः खेदश्च प्रतिषेधोविरोधनम् । प्ररोचना विमर्षे स्यादादानं छादनं तथा" सा० द० उक्तापवादादीनां त्रयोदशत्वात्तथा । कृष्णनलं तस्य राशिचक्रे त्रयोदशत्वात्तथा तदभेदात् तदधिपदिनकृदपि तथा । करणं "करणं त्रयोदशविधम्" सा०का० उक्तत्वानकर्मेन्द्रियदशकमनोबुद्ध्यहङ्काररूपं त्रयोदशत्वात्तथा ।

चतुर्दशसंख्याबोधकाः कवि० ल० उक्ताः । विद्या "अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश" इन्द्वुक्ताङ्गविद्यादिरूपा "मनुः "स्वायम्भुवो मनुरादौ प्रथमस्तस्योत्तौ आग्नीध्रमेधातिथिवसुरैवताद्याः । यद्वस्तु चाक्षुष इति प्रथितः पृथिव्यां वैवस्वतस्तदनु सप्तम एष भावी" सि०शि०उक्तानां "सावर्णिर्दक्षसावर्णिर्ब्रह्मसावर्णिकस्तथा । धर्मसावर्णिकोरुद्रपुत्रो रौच्यश्च भौत्यः" पुराणोक्तानां च चतुर्दशत्वात्तथा । इन्द्रः इन्द्रशब्दे मन्वन्तरभेदे उक्तानामयुक्तः, भुवनम् भूरादिसप्तकातलादिसप्तकरूपं भूतारकयोगतारास्तु चतुर्दशत्वात्तथा । एवं यमसूत्तिः यमधर्मराजशब्दोक्त

यज्ञतक्षाक्षवर्षभूतचक्षौद्भवद्दक्षगोद्भवरभेद्विद्रुकोदरचित्र-

चित्रयुग्प्रात्मिका चतुर्दशत्वात्तथा । क्षितिगुणः रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगगुरुत्वद्रवत्वात्मकः, जलगुणः गन्धहीनस्तेरूपसहितक्षितिगुणात्मकः, आत्मगुणश्च बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नसंख्यापरिमाण पृथक्त्वसंयोगविभागभावनाधर्माधर्मात्मकः चतुर्दशत्वात्तथा । चित्रा तस्याराशिचक्रे चतुर्दशत्वात्तथा तदभेदात्तदधिपत्वेऽपि तथा । शक्रेरी तस्याश्चतुर्दशाक्षरपादकत्वात् तथा । श्रीविद्यायन्त्रबाह्यकोणम् तत्रत्ये तेषां चतुर्दशत्वोक्तेस्तथा । निर्वेहणाङ्गम् । "सन्धिर्विबोधोऽथनं निर्णयः परिभाषणम् । कृतिः प्रसादानन्दः समयोऽप्युपगूहनम् । भाषणं पूर्ववाक्यस्य काव्यसंहार एव च । प्रशस्तिरिति संहारे उक्तान्यङ्गानि नामतः" सा०द० उक्तमन्यादीनां चतुर्दशत्वात्तथा ।

पञ्चदशसंख्याबोधकः विशेषव्यवहार्या चन्द्रकलाक्रियात्मिका तिथिः उभयपक्षीयप्रतिपदादिरूपा पञ्चदशत्वात्तथा । चन्द्रस्यामाकलायाः सामान्यतिथित्वेऽपि तथा विशेषतो व्यवहाराभावात् न पञ्चदशत्वव्यघातः । खानलत्वं तस्याश्चक्रे पञ्चदशत्वात् तदभेदात् तदधिपवह्नेरपि तथा अतिशक्तरी तस्याः पञ्चदशाक्षरपादकत्वात् तथा । वैश्वामित्रीछन्दः "वैश्वः पञ्चदशर्क्षेण" मनूक्तेस्तस्याश्चैत्रीछन्दसः पञ्चदशाक्ष्यात्मकत्वात्तथा । पक्षमम् तस्य पञ्चदशतिथिरूपत्वात् तथा । काण्वीयशाखायां "त्रिपञ्चारे पीठे" इत्युक्तेश्चेयं पञ्चदशत्वात्तथा ।

षोडशसंख्याबोधकाः इन्द्वुक्ता "अमृता मानदा पूषा तुष्टिः पुष्टिश्च रतिर्धृतिः । शशिनश्चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा । पूर्णा पूर्णामृता कामदायिन्यः स्वराः कलाः" शा०ति० उक्तामृतादिरूपा, कलाशब्दे वक्ष्यमाणा दिगादिरूपा नक्षत्रकला च षोडशत्वात् तथा । स्वरवर्णः तन्त्रमते अकारादिविसर्गान्तकः षोडशत्वात् तथा । सिद्धान्तमते "स्वरा विंशतिरेकेति" इत्युक्तेः एकविंशतिस्वरेति भेदः । अदितिः षोडशाक्षरपादत्वात् तथा । विशाखा राशिचक्रे तस्याः षोडशत्वात् तथा । तदभेदात् तदधिपौ इन्द्राग्नी अपि तथा । तत्त्वज्ञानोपयोगितया ज्ञातव्यपदार्थः "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानरूपः गौतमोक्तः षोडशत्वात्तथा । प्रेतस्नानम् आद्यद्वादशमासिकाब्दसापिण्ड्यश्राद्धपिण्डोत्करणरूपं षोडशत्वात्तथा । रूप षोडशराजिके प्रसिद्धमक्षत्रादिरूपः षोड-

त्वात्तथा। ते च रूपाः "मरुतः, १हुहोतः२ गौरवोऽङ्गः३ औशीनरशिविः४ दाशरथिरामः५ भगीरथः६ ऐलविलिलीपः७, यौवनाश्वोमान्धाताः८, नाहुषययातिः९ नाभागोऽम्बरीषः१० मयविन्दुः११, गयः१२ साङ्कृतिः रन्तिदेवः१३, दौष्मन्तिर्भरतः१४, वैरयः१५, जामदग्न्यो रामः१६ इत्येते भा०द्रो० ५५, ७० अ० दर्शिताः। तत्त्वान्तरान्तरापादानलक्षणः सांख्योक्तः विकार एकादशेन्द्रियपञ्चमहाभूतात्मकत्वेन षोडशत्वात्तथा। "षोडशकस्तु विकारः" सां०का०।

१७ सप्तदशसंख्याबोधकाः। अनुराधा राशिचक्रे तथाः सप्तदशत्वात् तथा तद्भेदात्तदधिपतिरपि तथा। अत्यष्टिः सप्तदशाक्षरपादत्वात् तथा। लिङ्गदेहावयवः "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्। अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" इत्युक्तानां सप्तदशत्वात् तथेति वेदान्तिनः। सांख्यमते तु पञ्चप्राणस्थाने पञ्चतन्मात्राणीति भेदः "न सप्तदशैनापि युज्यते नाम संशयः"। "सप्तदशैकं लिङ्गम्" सां०सू०।

१८ अष्टादशसंख्याबोधकाः कवि० ल० सप्त द्वीपाः सप्तद्वीपा जम्बूप्रभृतयः एकादश उपद्वीपा इत्यष्टादशत्वात् तथा। "अष्टादशद्वीपनिखातयूपः" रघुः "नवद्वयद्वीपपृथग्जयश्रिया" नैष०। विद्या धनुर्वेदायुर्वेदगान्धर्वार्थशास्त्रसहितचतुर्दशविद्यारूपा अष्टादशत्वात् तथा। सप्तपुराणम् उपपुराणग्रन्थे दर्शितसाङ्ख्यादिरूपम् अष्टादशत्वात् तथा। स्मृतिः अष्टादशस्मृतिकारिग्रन्थे दर्शितविष्णुप्रभृतिप्रणीता अष्टादशत्वात् तथा। धान्यम् अष्टादशधान्यग्रन्थे दर्शितयवादिरूपम् तथा। सप्तावस्थोभजाः तथा अष्टादशभङ्गत्वात्तथा। लेखा राशिचक्रे तथा अष्टादशत्वात्तथा तद्भेदात् तदधिप इन्द्रोऽपि तथा। धृतिः तथा अष्टादशाक्षरपादत्वात्तथा। विवादः अष्टादशविवादपदग्रन्थे दर्शितर्णादानादीनामष्टादशत्वात्तथा। कृच्छ्रसंस्काराः "अष्टादश खु संस्काराः कृच्छ्राणां तन्त्रनोदिताः। वीक्षणं मूलमन्त्रेण प्राशनेन प्रोक्षणं मतम्। तेनैव तावृतं दर्भैर्वस्त्राभ्युक्षणं स्मृतम्। अस्त्रेण खननोद्धारौ तन्मन्त्रेण प्रपूरणम्। समीकरणमस्त्रेण सेचनं वरुणेन तत् मतम्। कृत्वा कृतिमन्त्रेण वर्म्मणाभ्यर्च्य गायत्र्या विलेपनं कलाकृष्टं कल्पनं तदनन्तरम्। लिखनीयं च पञ्चाक्षरेणार्चनं मतम्। अस्त्रेण हतरक्षाकरणं हुत्वा मेषं कुशैः शुभैः। चतुर्थ्यं तन्त्रेण तन्त्रयाज्ञेनपाटनम्" शा०ति०उक्तानाम् अष्टादशत्वात्तथा। भाषा संस्कृता शौरसेनी मागधी अर्द्धमागधी आवन्तिका दाक्षिणात्या शाकरी वाह्लिकी द्राविडी आभीरी चाण्डाली शाबरी वैशाची मालवा चेतिषा०द० उक्तानां षोडशानां राक्षसीपैशाच्याश्चान्तर्भूतानामष्टादशत्वात् तथा "अष्टादशभाषाचारविलासिनी" सा०द०। व्यसनम् "दश कामसमुत्थानि तथाष्टौ क्रोधजानि च। व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत्। मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियोमदः। तौर्यत्रिकं वृथाट्या च कामजोदयकोगणः। पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः" मनूक्तमृगयादीनामष्टादशत्वात्तथा। भारते पर्व्व तेषामष्टादशत्वात्तथा।

१९ अनविंशतिबोधकाः। धर्म्मशास्त्रकारकः "मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः। यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती। पराशरव्यासशङ्खलिखिता दक्षगौतमौ। शातातपोवसिष्ठश्च धर्म्मशास्त्रप्रयोजकाः" इत्युक्तमन्वादीनामूनविंशतित्वात्तथा। मूलनक्षत्रम् तच्च राशिचक्रे अनविंशतितमत्वात्तथा। तद्भेदात् तदधिपनिर्ऋतिरपि तथा। अतिधृतिस्तथा अनविंशत्यक्षरपादत्वात्तथा। अभिजिन्नाम तथाः उत्तराषाढापञ्चदशदण्डश्रवणचतुर्दशदण्डरूपतत्तौनविंशतिदण्डात्मकत्वात्तथा।

२० विंशतिबोधकः रावणभुजानां, नखानाम्, अङ्गुलीनां च कृत्स्नपादयोस्तावन्मितत्वात् तथा। पूर्व्वाषाढा राशिचक्रे तथा विंशत्वात्तथा। तद्भेदात् तदधिपजलमपि तथा। जन्तोरूपा कृतिस्तथाः विंशत्यक्षरपादत्वात्। धनेस्तुतायास्तृतीयांशः मेषे नीचांशश्च तथा। तत्र तस्य विंशांशे एव परमोच्चनीचयोः ज्ञेयः उक्तत्वात्। राजकोशकपर्दोवलम् "विंशतिखभे विंशतिरुच्चभे खे" नी० क० उक्तेस्तस्य विंशतितमत्वात्तथा।

२१ एकविंशतिसंख्याबोधकाः। परशुरामक्षत्रियजयस्तस्य एकविंशतिभित्तत्वात् तथा। उत्तराषाढा तस्या अन्यत्रके एकविंशत्वात्तथा। तद्भेदात् तदधिपविश्वोऽपि तथा। जन्तोरूपा प्रकृतिस्तथा एकविंशत्यक्षरपादत्वात्तथा। मूर्च्छना "मूर्च्छनाश्चैकविंशतिः" भरतोक्तेः सप्तस्वराणाम् आरोहावरोहक्रमकृत्पैक्षित्वात् एकविंशतिरूपतया तथा। खरवर्त्तः "खरा विंशतिरेकश्चेति" त्रिलोकीनाथस्य खराणां तत्संख्यत्वात्तथा।

२२ द्वाविंशतिसंख्याबोधकाः । अवधा तस्या ऋक्षचक्रे द्वाविंशत्वात्तथा । तदभेदात् तदधिपश्चरिरपि तथा । आकृतिः तस्या द्वाविंशत्यक्षरपादत्वात्तथा । निषधस्थानम् "प्रतिष्ठाक्षानिः प्रतिष्ठान्तरं प्रतिष्ठाविरोधः प्रतिष्ठान्यायोपेक्षेत्यन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभाप्रतिभेदो मतानुज्ञा पर्य्यनुयोज्योपेक्षणम् निरनुयोज्यानुयोगोऽपसिद्धान्तोहेत्वाभासाश्च" गौ० सू० उक्तानां प्रतिष्ठाक्षान्यादीनां द्वाविंशतित्वात् तथा ।

२३ त्रयोविंशतिसंख्याबोधकाः । धनिष्ठा तस्या ऋक्षचक्रे त्रयोविंशत्वात्तथा । तदभेदात् तदधिपश्चन्द्रोऽपि तथा । विकृतिः तस्याः त्रयोविंशत्यक्षरपादत्वात् तथा ।

२४ चतुर्विंशतिसंख्याबोधकाः । तत्त्वम् प्रधानमहदहङ्कारपञ्चस्वर्थरूपरसगन्धतन्मात्रकादशेन्द्रियपञ्चस्थूलभूतरूपं चतुर्विंशतित्वात् तथा । पुरुषसहितप्रधानादिपरत्वे पञ्चविंशतित्वस्य पुरुषेश्वरयुततत्परत्वे षड्विंशतित्वस्य बोधकमिति भेदः । गायत्र्यक्षरम् तस्या षड्क्षरपादत्वाच्चतुष्पाद्यां तथासंख्यायोगात् तथात्वम् । जिनः ऋषभाजितसम्भवाभिनन्दनसुमतिपद्मप्रभसुपार्श्वचन्द्रप्रभसुविधिशीतलश्रेयांसवासुपूज्यविमलानन्ततीर्थङ्करमल्लिसुनिसुव्रतनमिनेमिपार्श्ववीरास्ते ऋषभचतुर्विंशतित्वात् तथा । तथा क्रान्तिश्च वि० शि० चतुर्विंशतिमितत्वोक्तेस्तथा । यतभिक्षा तस्या राशिचक्रे चतुर्विंशत्वात्तथा तदभेदात् तदधिपश्चन्द्रोऽपि । स्वगतनानारागसंज्ञायपरत्वे यतत्वस्येति भेदः । संकृतिस्तस्याश्चतुर्विंशत्यक्षरपादत्वात्तथात्वम् । जातिः न्यायोक्तदोषभेदरूपा प्रतिषेधहेतुः चतुर्विंशतित्वात् तथा । सा च गौ० सू० दर्शिता यथा "साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्य्यसमाः" इति । वैशेषिकोक्ताः द्रव्याश्रिताः गुणाः रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दात्मकत्वात् चतुर्विंशतित्वस्य बोधकाः । अन्यार्थपरत्वेत्यादीनां बोधकं दृष्टव्यं प्राक् । विष्णुमूर्त्तिः यद्गदाचक्रपद्मानां दक्षवामहस्तेषु विन्यासविशेषेण जातचतुर्विंशतिभेदा तथा । तस्य मूर्त्तिभेदोध्यानग्रन्थे वक्ष्यते ।

२५ पञ्चविंशतिसंख्याबोधकाः "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" सां० का० उक्तपुरुषसहितप्रधानादि पञ्चविंशतितत्त्वानामङ्गीकारात् तथा । "पञ्च पञ्चजनाः" इति श्रुतिरेव तत्र मानतया तैरङ्गीकृता । या० भा० तु तस्याः श्रुतेः देवपितृगन्धर्वासुरयक्षादीनां पञ्चप्राणादीनां पञ्चविंशतित्वपरतेत्युक्तम् । पूर्वभाद्रपदा तस्या राशिचक्रे पञ्चविंशत्वात्तथा । तदभेदात् तदधिपः अजैकपादपि तथा । उत्कृतिः तस्याः पञ्चविंशत्यक्षरपादत्वात्तथा । स्पर्शः कादिमावसानवर्णानां पञ्चविंशतित्वात् तथा । "स्पर्शानां पञ्चविंशतिः" चित्ता ।

२६ षड्विंशतिसंख्याबोधकाः तत्त्वम् जीवेश्वरसहितप्रकृत्यादिरूपं तस्य षड्विंशत्वात्तथा । उत्तरभाद्रपदा तस्याः राशिचक्रे षड्विंशत्वात् तथा तदभेदात् तदधिपाहिर्बुध्नोऽपि तथा । संकृतिस्तस्याः षड्विंशत्यक्षरपादात्तथा ।

२७ सप्तविंशतिः । नक्षत्रं उडुचक्रगते दर्शितराशिचक्रस्थाश्विन्यादिसप्तविंशतिरूपत्वात् तथा । रेवती तस्या राशिचक्रे सप्तविंशत्वात्तथा । शुक्रस्य मीने स्वर्क्षं कन्यायां स्वोच्चं च तथा ।

२८ अष्टाविंशतिसंख्याबोधकाः साभिजिन्नक्षत्रम् तस्याष्टाविंशत्वात्तथा । सात्त्विकनार्य्यलङ्कारः "यौवने सत्त्वजास्त्रीणामष्टाविंशतिसंख्यकाः । अलङ्काराश्च भावश्च हेलाश्चेत्यङ्गजाः । शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता । औदार्य्यं धैर्य्यमित्येते सप्तैवस्युरयत्नजाः । लीला विलासो विच्छित्तिर्विब्बोकः किलकिञ्चितम् । मोट्टायितं कुट्टमितं बिभ्रमोललितं मदः । विक्षेपश्च तपनं मौग्ध्यं विब्बोकसंकुलम् । कुत्सितं चकितं केलिरित्यष्टादशसंख्यकाः" सा० द० उक्तादशस्वभावजभावसहितलीलादीनामष्टादशानामष्टाविंशतित्वात्तथा ।

२९ द्वात्रिंशत्त्वबोधकाः दन्तः तस्य मनुष्ये द्वात्रिंशत्संख्यकत्वात्तथा । भगवदपराधः अपराधशब्दे २१२पृ० दर्शितानां यानगमनादीनां बलिबर्हिस्नानभोजनादीनां वा द्वात्रिंशत्त्वात्तथा ।

३३ त्रयस्त्रिंशत्त्वबोधकः । नाट्यालङ्कारः "आशीराक्रन्द, कपटाऽऽत्तमागर्वोद्यमाश्चयाः । उत्पातवर्णनं स्मृत्यादीभ्रमौ पश्चात्तापोपपत्तयः । आशंसाऽध्यवसायौ च विषर्योक्षे संक्षिप्तौ । उत्तेजनं परीवादो नीतिरर्थविशेषणम् । प्रोत्साहनञ्च साक्षाय्यमभिमानोऽनुशयनम् । उत्कीर्त्तनं तथा प्राप्तिः परीहारोनिवेदनम् । प्रवर्त्तनाख्यान

युक्तिप्रहर्षासोपपदेयनम्" सा० द० उक्तानीरादीनां तत्संख्यकत्वात्तथा । व्यभिचारिभावः "निर्वेदावेगदैन्य-श्रममदजडता औग्र्यमोहौ विबोधः स्वप्नापस्मारगर्व्या-मरणमलसताऽमर्षनिद्रावहित्थाः । औत्सुक्योन्मादयशाः स्मृतिमतिसहिता व्याधिसंत्रासलज्जा हर्षाख्या विषादाः सुप्तिचपलतास्त्रानिचिन्तावितर्काः" सा० द० उक्तानां तत्सं ख्यत्वात्तथा ।

६ षट्त्रिंशत्संख्याबोधकाः । रागिणी "रागाः षट्त्रिंश-च्च भार्याः इति भरतोक्तेः वसन्तादिरागभार्याणां तत्-संख्यकत्वात् ततसंख्याबोधकता । रागिणीशब्दे तास्व-क्ष्यन्ते । नाटकलक्षणम् सा०द० "षट्त्रिंशल्लक्षणान्यत्र" इत्युपक्रम्य "भूषणान्तरसंजातो गोभोदाहरणं तथा । हेतुसंशयदृष्टान्तास्तुल्यतर्कः पदोच्चयः । निदर्शनाभिप्रायौ च प्राप्तिर्विचार एव च । दिष्टोपदिष्टे च गुणातिपाता तिशयौ तथा । विशेषनिरुक्ती च सिद्धिर्भवितुमर्थयौ । दाक्षिण्यानुनयौ मानार्थापत्तिर्गर्हणा तथा । पृच्छा प्रसिद्धिः साकूतम् संभ्रमोद्गुणकीर्त्तनम् । क्षेपो मनो-रथोऽनुक्तसिद्धिः प्रियवचनता" इत्युक्तभूषणादीनां षट्त्रिंशत्त्वात्तथा ।

२८ अष्टत्रिंशत्संख्याबोधकाः सोमसूर्य्याग्निकला "सोमसूर्य्या-ग्निभेदेन मातृकावर्णसंख्याः अष्टत्रिंशत्कलात्मकत्व-मुक्तेषु व्यवस्थिताः" या०ति० उक्तानां सोमषोडशकला सूर्य्यद्वादशकलावह्निदशकलारूपाणामष्टत्रिंशत्त्वात्तथा ।

४० चत्वारिंशत्संख्याबोधकः । तानः "चत्वारिंशत्तानाः" इति भरतोक्तेः ततसंख्यत्वाच्चतानानां तत्संख्यत्वात्तथा ।

४९ अनपत्रात्संख्याबोधकः । अनिलः अनिलशब्दे दर्शितो-नपत्राशब्देऽपि तथात्तथा ।

५० पञ्चाशत्संख्याबोधकः । मातृकाक्षिपिः तस्याः तन्त्रमते पञ्चाशद्वर्णात्मकत्वात्तथा । "पञ्चाशल्लिपिभिर्विभक्तमुखा-दि" या०ति० ।

५१ एकपञ्चाशद्बोधकः महापीठः महापीठशब्दे वक्ष्यमाण भेदानां महापीठविशेषाणां तत्संख्यकत्वात्तथा ।

६४ षष्टिसंख्याबोधकाः । वर्ष्माः शिखामते "चतुःषष्टिक्षपिते-र्वर्ष्माः सम्प्रतयोमताः । खरविंशतिवेदाक्ष्यर्यामां पञ्च-विंशतिः । वादयश्च ऋतावष्टौ चत्वारश्च यमाः ऋतवः । अनुस्वारोविसर्गश्च+कूपौ चापि परावृतौ । दुस्पृष्टमिति विज्ञेय ऊकारः प्लुतएव वा' इतिग्रन्थोक्तेश्च । यक्षी कामाख्यशब्दे वक्ष्यमाणभेदानां तासां चतुःषष्टित्वात्तथा ।

महादेवीपीठम् "मायामङ्कलनागवामनमहाकालश्रीचरित्रा भ्युक्तायाञ्जनचित्रघण्टकुलिशनमहेन्द्रोड्डायवम्पुरम् । पद्मं क्षीरकमञ्जनेश्वरपटेलीचन्द्रपूः श्रीगिरिः कोलाजलुक-पूर्णपर्व्वतकरुलेलं कलिङ्गार्बुदाः । काश्मीरैकाम्रकाञ्ची-मलयगिरिवरेकारकनभूतदेवीकौ दाम्लाक्षेयजालन्धरसुर-भिमणीयादिकाग्रीपयागाः । त्रिस्रोतःकाकलोड्डीय-यिनिसमयूरं कोयलाकान्यकुब्जौ डाण्डेकारार्बुदाख्या विरजं इह ततः कुलिशं राजगेहम् । नेपालं पुण्ड्रवर्द्धन मालवपारसोकामरूपकेदाराः । विन्ध्यमहामठगोस्तुतिक-म्मिल्लाश्रीपीठमदेशाः" पदार्थादर्शोक्तानां तत्संख्य-कत्वात्तथा ।

१०० शतसंख्याबोधकाः पुरुषायुषम् "शतायुर्वै पुरुषः इति श्रुतेश्च । रावणस्यैकाङ्कुलि- तस्य विंशतिबाहुत्वेन प्रत्येकं बाहौ पञ्चाङ्गुलियोगात् शतत्वेन तथात्वम् । इन्द्रियाणां तस्य शतयज्ञत्वेन तद्यज्ञानां शतत्वात् तथा ।

१००० सहस्रबोधकाः । इन्दुनेत्र तस्य सहस्रनेत्रतया तत्ने-त्राणां सहस्रत्वेन तथा । विराट्पुरुषवपुः तत्पादाः तद्बाहवस्तन्मूर्द्धा च तथा । "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्" श्रुतिः । कार्त्तवीर्य्यार्जुनबाहुः बाणासुरबाहुश्च तयोः सहस्रबाहुत्वात् तथा । अनन्तशीर्षम् तस्य सहस्र-शीर्षतया तथा । गङ्गास्रोतोवस्तुम् सहस्रसङ्गमसमीपस्थाने सहस्रसङ्गतया तस्याः प्रसहस्रनाम्नात्मम् । साम्नवेदशाखा तद्वेदस्य सहस्रशाखात्वात् तथा ।

१०००० अयुतसंख्याबोधकः रामराज्यकाल "दश वर्षसहस्रा णि रामोराज्यमकारयत्" रामा० उक्तेस्तथा ।

अत्रेदं बोध्यम् । शास्त्रकारैः ये ये पदार्था यद्यत्संख्यक-तया उक्तास्तत्तच्छब्दास्तत्तत्संख्याबोधकाः । तेषु दिङ्-मात्रमत्र दर्शितम् अन्यत्रैव रीत्यान्येऽपि सुधीताद्युक्तभेद युक्तास्तत्तत्पदार्थपराणा शब्दाना तत्तत्संख्यार्थकत्व कल्पनीयम् । यद्यर्थयोरभेदाच्च क्वचिच्छब्दस्य तदर्थकता उक्ता क्वचिच्चार्थस्यैव तत्तत्संख्यायोगउक्तः तेनैव तत्त-दर्थकशब्दस्य तत्तत्संख्याबोधकता चोह्या । इयांस्तु विशेषः समुदायवर्त्तिपदार्थस्यैकदेशवृत्तित्वाभिप्रायेण बहुसंख्या-न्वितपदार्थबोधकानामपि एकवचनादिप्रयोगोऽपि । यथा "रामोऽगवेदैर्जडधिस्तु मैत्रैरित्यादौ" रामशब्दयोः त्रित्व चतुष्टबोधकत्वेऽपि एकवचनान्तता अगवेदैरित्यादौ सप्तत्व चतुष्टबोधकयोः बहुवचनान्तता । एवमन्यत्रापि । उक्त-शब्दानां क्वचित्संख्यापरत्वम् क्वचित्संख्येयपरत्वम

क्वचित्तु पूरणार्थतापि यथा "दिग्भिर्गुणैरष्टयमे धार्कं वार्णैर्भसंख्यैर्नवमे सतैश्च" नी०क०दिगादिशब्दानां दयमाद्यंशपरत्वम्। एवं "युग्मान्नो क्षतभूतानि षण्मुनी वसुलन्नयो:" इत्यादौ युग्माग्निप्रकृतीनां तत्तत्संख्यापूरणो द्वितीयादिपरत्वम्। अत्र च ते शब्दा उक्तास्तत्पर्याय शब्दा अपि तत्तत्संख्याबोधकाः इति।

एकादेश पु० कर्म०। पाणिन्युक्ते उभयस्थानिप्रभवे एकस्मिन्नादेशे। एकादेशश्च यथा मुरारिरित्यत्र मुरशब्दस्य अन्त्याकारस्य अरिशब्दादिभूताकारस्य चेत्युभयोः स्थाने दीर्घभूत एक आकारः एकस्मन्नपि। "एकादेश उदात्तेनोदात्तः" पा०।

एकादन स्त्री)विंशति स्त्री एकेन न विंशतिः। [illegible] आदुक् दृश्य वा न। एकोनविंशतिसंख्यायां, स्त्रियां ङीप् च एवमेका(हून)ऽपि तिथिभेदाः।

एकानंशा स्त्री एको न अंशोयस्याः असमर्थसमा०। अनेकयादवार्त्यां दुर्गायां सा च यशोदागर्भसंभूता प्रजापतेरपजाता। तथोक्तं हरिवं०६०अ०यथा "नन्दगोपस्य भार्य्यैका वसुदेवस्य चापरा। तुल्यकालं हि गर्भिण्यौ यशोदा देवकी तथा। देवक्याजनयद्विष्णुं यशोदा तान्तु कन्यकाम्" इत्युपक्रम्य "वसुदेवस्तु संगृह्य दारकं क्षिप्रमेव च। यशोदायाश्च्छन्नं रात्रौ विवेश सुतवत्सलः। यशोदायास्ततोवस्त्रात्तल्पं निक्षिप्य दारकम्। गृहीत्वा दारिकां तान्तु देवकीशयने न्यधत्। परिवर्त्ते ऽतते ताभ्यां गर्भाभ्यां भयविक्लवः। वसुदेवः ऽतातर्वो वै निर्जनाम निवेदनात्। उग्रसेनसुतायाथ कंसायानकदुन्दुभिः। निवेदयामास तदा कन्यां तां वरवर्णिनीम्। तच्छ्रुत्वा त्वरितः कंसोरक्षिभिः सह वेगितः। आजगाम गृहद्वारं वसुदेवस्य वीर्य्यवान्। स तत्र त्वरितं दृष्ट्वा किं जातमिति चाब्रवीत्। दीयतां शीघ्रमित्येवं वाग्भिः समभितर्ज्जयन्। ततो गृहीत्वा सहसा देवकीभवने स्त्रियः। उवाच देवकी दीना वाष्पविक्लवया गिरा। दारिका पुत्र! जातेति कंसं समभियाचती। भ्रातस्तो मे कृताःसप्त पुत्रगर्भास्त्वया विभो!। दारिकेयं कृतैवैषा पश्यस्व यदि मन्यसे। दृष्ट्वा कंसस्तु तां कन्यामब्रवीत् सदा युतः। कृतैवैषा यदा कन्या जातेत्युक्त्वा ददामतिः। सा गर्भशयनक्षिप्तागर्भाम्बुक्लिन्नमर्ज्जजा। कंसस्य पुरतोव्यक्ता पृथिव्यां पृथिवीसमा। पादे तां गृह्य पुरुषः समाविध्यावधूय च। उल्लाल्लेव सहसा शिलायां समपोथयत्। ताडयेधूता शिलायां पृष्ठे निक्षिप्ता दिवस्पृशत्। क्षिप्ता गर्भतनुं सा तु सहसा सप्तमूर्ज्जजा। जगामाकाशमाविश्य दिव्यस्रगनुलेपना। कन्यैव चाभवत् सा तु दिव्या देवैरभिष्टुता। नीलपीताम्बरधरा गजकुम्भोपमस्तनी। रथविस्फीर्णजघना चन्द्रवक्त्रा चतुर्भुजा। विद्युद्विस्पष्टवर्णाभा बालार्कसदृशेक्षणा। पयोधरस्तनवती सर्व्वैव सपयोधरा। सा वै निपतितोव्यक्ते सर्व्वभूतगणाकुले। नत्यन्ती हसती चैव विपरीते नभस्यति। विहायसि गता रौद्री पपौ पानमनुत्तमम्। जहास च महाहासं कंसञ्च कुपिताऽब्रवीत्। कंस कंसात्मनाशाय यदहं घातिता त्वया। सहसा च समुत्क्षिप्य शिलायामभियोधिता। तत्काऽत्तवान्तकालेऽहं क्रूयमाणस्य मत्तया! पाटयित्वा करैर्हृत्वा पास्याभि शोणितम्। एवमुक्त्वा वचो घोरं सा यथेष्टेन वर्त्मना। खं सा देवालयं देवी सगणा विचचार ह। सा कन्या वहवे तत्र दक्षिणस्यानि पूजिता। पुत्रवत् पाल्यमाना सा देवदेवात्मया तदा। विद्धि चैनामयोत्पन्नामंशाहेर्वी प्रजापतेः। एकानंशां योगकन्यां दक्षार्थे केशवस्य च। तां वै सर्व्वे सुमनसः पूजयन्ति स्म यादवाः। देवीञ्च दिव्यवपुषं कृष्णः संरक्षितो यया। तस्यां गतायां कंसस्तु तां मेने मृत्युमात्मनः"।

"सा कन्या वहवे तत्र दक्षिणस्यानि पूजिता। पुत्रवत् पाल्यमाना वै वसुदेवात्मया तदा। एकानंशा तु यामाकृतपुत्रां मानवाभुवि। योगकन्यां दुराधर्षाम्" इति च। हरिवं० मूर्त्तिलक्षणे "एकानंशा कार्य्या देवी बलदेवकृष्णयोर्मध्ये"।

एकानुद्दिष्ट त्रि० एकमनु दिष्टम् "सहरा" पा०। एकोद्देशेन दत्तश्राद्धे। "यावदेकानुद्दिष्टस्य गन्धोलेपश्च तिष्ठति। विप्रस्य विदुषोदेहे तावद्ब्रह्म न कीर्त्तयेत्" मनुः।

एकान्त त्रि०एकः अन्तः निश्चयः सीमा वा। २अत्यन्ते अतिशये "तेजःक्षमा वा नैकान्तं कालस्तस्य महीपतेः" माघः। "एकस्मिन्नेकान्तमनोविनोदिनम्" नै०। क्रियाविशेषणत्वेनाव्य०। "एकान्तविध्वंसिषु महिधानाम्" रघु०"नात्यश्नतस्तु योगोऽस्ति नचैकान्तमनश्नतः" गीता। तद्वति २तृ० त्रि०। "एकान्तपाण्डुवलक्षिहारम्" रघुः। "एकान्तशैत्यात् कदलीविशेषाः" कुमा०। एक एवान्तो यत्र। निर्जने ४रहसि। "तस्माद्ध्यान्ते कर्त्तव्यान्तः शत्रैकान्ते कर्त्तव्या" ज्यो०त०। "वासे बहूनां कलहे भवेद्वार्त्ता द्वयोरपि। तस्मादेकान्तलाभाय चिन्तयेत् निजसंवृतः, हरा०। ततः तसिल्। एकान्तस्य एका-

न्ते दत्यादार्थे। "दृष्टे साऽपार्था चेद्वैकान्तोऽत्यन्तो ऽभावात्" सां०का०। तत्र भवः ठञ्। ऐकान्तिक एकान्तभवे त्रि०स्त्रियां ङीप्। 'ऐकान्तिको हरेर्भक्तिरुत्पातायैव कल्पते''पुरा०। एक एवान्त स्वभावो यस्य। एक रूपतामात्रे त्रि०। "विलोक्यैकान्तभूतानि भूतान्यादौ प्रजापतिः। स्त्रियं चक्रे स्वदेहार्द्धं यया पुंसां मतिर्हृता" भाग० ६,१८,२२।

एकान्तत्यागवाद पु० वस्तुनः एकान्तता एकस्वरूपता अस्तित्वादिसम्बन्धरूपता तस्य त्यागप्रतिपादकोवादः। अर्हद्विषयोक्तवादभेदे। सच वादः अर्हच्छब्दे स्याद्वाद प्रकरणे २८६ पृ० दर्शितः।

एकान्तदुःषमा स्त्री दुष्टा समा वर्षौघो यस्यां सा दुःषमा० बहुव्र० एकान्तेन दुःषमा ३त०। बौद्धकल्पिते कालभेदे हेमच०। यथा "कालो द्विविधोऽवसर्पिण्युत्सर्पिणीषु भेदतः। सागरकोटिकोटीनां विंशत्या स समाप्यते। अवसर्पिण्यां षडरा उत्सर्पिण्यां तथैव विपरीताः। एवं द्वादशभिरेविवर्त्तते कालचक्रमिदम्। तत्रैकान्तसुषमारब्धतत्रः कोटिकोटयः। सागराणां सुषमातु तिस्रस्तूकोटिकोटयः। सुखमदुःखमाने द्वे दुःखमसुखमा पुनः। सैका सहस्रैर्वर्षाणां द्विचत्वारिंशतोनिता। अथ दुःखमैकविंशतिरब्दसहस्राणि तावती तु स्यात्। एकान्तदुःषमापि ह्येतत्संख्या परेऽपि विपरीता। प्रथमारत्रये मर्त्याश्छिद्रहेकपल्यजीविता। त्रिद्व्येकगव्यूत्युच्छ्राया छिद्रहेकदिनभोजनाः। कल्पद्रुफलसंतुष्टास्तृतीये त्वरके नराः। पूर्व्वकोट्यायुषः पञ्चधनुःशतसमुच्छ्रयाः। पञ्चमे तु वर्षशतायुषः सप्तरत्नोच्छ्रयाः। षष्ठे पुनः षोड्शाब्दायुषो हस्तसप्तोच्छ्रयाः एकान्तदुःखप्रचिता उत्सर्पिण्यामपीदृशाः। पञ्चानुपूर्व्या विंशेषु अरेषु किल षट्स्वपि"।

एकान्तर त्रि० एकमन्तरं व्यवधानम्। १एकव्यवधाने "एकान्तरे त्वानुलोम्यादन्यतोपौ तथा स्मृतौ" मनुः। वहु०। २एकान्तरवर्त्तिनि त्रि०। "एकान्तरास्तु जातानां धर्म्यं विद्यादिमं विधिम्" मनुः। एकदिनव्यवधानेन भोजनरूपे ३व्रतभेदे न० एकदिनव्यवधानेन जायमाने ४ज्वरभेदे पु०।

एकान्तसुषमा षष्ठ समावर्षः सुषमा सुषमादि०बहुव्र० ३त०। बौद्धमतसिद्धे कालभेदे एकान्तदुःषमायाम् विवृतिः।

एकान्तिन् त्रि० एकान्तमस्यास्य इनि स्त्रियां ङीप्। १अतिशययुक्ते एकान्तः एकस्वरूपः उपायस्त्वेनास्यास्य इनि। स्त्रियां ङीप्। २भगवद्भक्तविशेषे त्रि०। "एकान्तेनासमोविष्णुर्येषामेवं परायणः। तेषामेकान्तिनः प्रोक्ता-स्तद्भागवतचेतसः" गरुडपु० १२१।

एकान्न त्रि० एकस्मिन्नेवान्नं भक्ष्यं यत्र। १एकस्मिन्नेकभक्षणे एकभक्तरूपे व्रते कर्म्म०। २एकमात्रभक्ष्ये अन्ने न०। "जग्ध्वा यत्रान्नमश्नीयादेकान्नमथ वा पुनः। तत्रान्नं सूरणञ्चैव शुक्तिशिग्रुञ्च वर्जयेत्" काशी०। "भक्तेन वर्त्तयेन्नित्यं नैकान्नाटी भवेद् व्रती" मनुः। "कृत्वा तत्र्यूह्य प्राप्य गृहमेकान्नभक्षणमेकरात्रं त्रिरात्रं वा भोक्तव्यमिति" शु०त० स्मृतिः। एकस्मिन् स्थाने पचनीयमन्नं यस्य। अभिक्षौ भ्रात्रादौ "एकान्नवर्त्तिनाञ्चैव एकोद्दिष्टं न पार्व्वणम्। एकपाकेन वसतां पितृदेवद्विजार्च्चनम्। एक भवेद्विभक्तानां तदेव स्यात् गृहेगृहे" दक्षः

एकायन त्रि० एकमयनं विषयोऽवलम्बनं वा यस्य। १विषयान्तरव्याहृत्तचित्ते एकाग्रमनस्के २एकावलम्बने च। "तानि वा एतानि संकल्पैकायनानि संकल्पप्रतिष्ठितानि" छा०उ०। एकमयनमवलम्बनीयं यस्य। २एकावलम्बनीये त्रि०। "एवमेकायन धर्ममाङ्गवेदविदोजनाः" भा०शा० ७८७२ श्लो०। एकस्यायनं गतिर्यत्र। ४एकमात्रगमनयोग्ये त्रि० "भ्रातर भीमसेनन्त विज्ञाय हनुमान् कपिः। दिव्यक्रमं रुरोधाथ मार्गं भीमस्य कारणात्। अनेन हि पथा मा वै गच्छेदिति विचार्य्य सः। आस्त एकायने मार्गे कदलीखण्डमण्डिते। भ्रातुर्भीमस्य रक्षार्थम्" भा० व० १४६अ०। कर्म्म०। ५एकस्थाने न०। "यः स्यादेकायने लीनस्तूष्णीं किञ्चिदचिन्तयन्" भा० अनु० ५३२श्लो०।

एकार्थ पु० एकः अर्थः प्रयोजनमभिधेयम् पदार्थो वा। एकस्मिन् १प्रयोजने २अभिधेये ३पदार्थे च। "वर्णाः पदं प्रयोगार्हान्यन्वितैकार्थबोधकाः" सा०द०। बहु०। ४एकाभिधेये शब्दभेदे एकार्थस्य एकशब्दोपस्थापितार्थक। ५एकप्रयोजनयुक्ते त्रि०। अभूततद्भावे च्वि+भू-घञ्। एकार्थीभाव अनेकार्थानामेकार्थतापाप्तौ पु० "समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्। बहूनां हेतिधर्माणां वचनैरेव साधने। स्यान्मुख्ये गौरवं तस्मादेकार्थीभाव आश्रितः" इति भर्त्तृहरिः। कर्त्तरि क्त। एकार्थीभूत परस्परमन्विते एकस्मिन् विशिष्टार्थे च "एकार्थमनेकमन्दं वाक्यम्" सिद्ध०। वैभाषिकमते वाक्येऽपि शक्तिः अखण्डवाक्यस्फोटस्यैव वाचकत्वात् "पदे न वर्णाविद्यन्ते वर्णेभ्यो वाक्यमेव न च। वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन।

ब्राह्मणार्थोयथा नास्ति कश्चिद् ब्राह्मणकम्बले । देवदत्तादयो वाक्ये तथैव स्युर्निरर्थकाः" इति "वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिरिति च" हरिः ।

एकावली स्त्री एकाऽद्वितीया आवली माला मणिश्रेणी । (एकनर) हारभेदे, सा० द० उक्तेऽर्थालङ्कारभेदे अलङ्कारशब्दे ३६८ पृ० विवृतिः ।

एकावद्दा स्त्री एकः अर्द्दो वयोमानं यस्याः । १एकहायन्यां स्त्रीगव्याम् । "एकाव्दा त्वेकहायनी" अमरः । २एकवर्षयुक्ते त्रि० । एकवर्षादयोऽप्यत्र । "एकवर्षे गवि कृते लक्ष्मपादो विधीयते" स्मृतिः । एकहायनोऽप्यत्र हायनस्य वयोवाचित्वेन संख्यापूर्वकत्वात् स्त्रियां ङीप् इति भेदः । "अदत्त्वा पितृव्याय्यैकहायन्या गवा सोमं क्रीणाति" श्रुतिः ।

एकाशीतिपद न० एकाशीतिः पदान्यत्र । गृहारम्भप्रवेशादौ वास्तुपूजार्थं कर्त्तव्ये तावन्मितकोष्ठके वास्तुमण्डलभेदे । तच्च मण्डलं तिर्यगूर्द्ध्वाभिर्दशभीरेखाभिः एकाशीतिकोष्ठात्मकं गृहारम्भाद्यर्थं वास्तुयागे लेख्यम् यथाह देवीपु० । "प्रासादे च चतुःषष्टिरेकाशीतिपदं गृहे" तल्लेखनप्रकारादि वास्तुमण्डलशब्दे वक्ष्यते ।

एकाश्रय त्रि० एक आश्रय आधारोऽवलम्बनं वा यस्य । १अनन्यगतिके । २एकाधारस्थौ ३वैशेषिकोक्तगुणभेदे च ते च गुणाः अनेकाश्रितगुणभिन्नाः । "संयोगश्च विभागश्च संख्यात्वादिकास्तथा । द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः । अतः शेषगुणाः सर्वे मता एकैकवृत्तयः" भाषा० दर्शिताः । एवं च रूपरसगन्धस्पर्शशब्दाः एकत्वमेकपृथक्त्वं परिमाणपरत्वापरत्वानि बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वसंस्कारादृष्टानि च तादृशाः, तेषां प्रत्येकस्य एकैकवृत्तित्वात् संयोगादीनान्तु एकैकस्यैव द्विवृत्तित्वमिति न तथात्वम् । एकाधिकरणादयोऽप्यत्र । कर्म० । ४एकस्मिन् आधारे पु० "हेतोरेकाश्रये येषां साध्यव्यभिचारिता" भाषा० ।

एकाष्टका स्त्री एका अष्टका । १माघकृष्णाष्टम्याम् २तत्कर्त्तव्ये श्राद्धे च । अष्टानां तासु कर्त्तव्यश्राद्धानां च नित्येऽपि आ०औ०सू० "हेमन्तशिशिरयोश्चतसृषामपरपक्षाणामष्टमीष्वष्टका एकस्यां वेति" एकस्या अपि कर्त्तव्यतया विधानात्तथा । सा च मध्यत्वेन माघकृष्णाष्टमी ग्राह्या । अत एव "गवामयनयैकाष्टकायां दीक्षा" श्रुत्या० १२,१,२, सू० श्रा० "एकाष्टका नाम माघस्य कृष्णाष्टमी प्रसिद्धेः" कर्कोक्तम् । २तदभिमानिदेव्यां शब्दाम् "एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् । तेन देवा असहन्त शत्रून् हन्तासुराणामभवच्छचीभिः" सा० श्रा० २प्र० २क० । शचीभिरित्यत्र शचीपतिरिति" अथ० ६,१०,१२, पाठः । "एकाष्टके ! सुप्रजसः सुवीरा वयं स्याम पतयो रयीणाम्" अथ० ३,१०,५

एकाष्ठील पु० एकमस्थीव काष्ठं तद्वत्कठिनत्वात् खार्थे-क प्रषो०-षत्वं दीर्घश्च । यकष्टष्ठे अमरः पाठायां स्त्री । (आकनादी) राजनि० ।

एकाह पु० एकमहः टच्समा० एकशब्दोत्तरत्वात् साङ्गादेयः । "अङ्गाहान्नाःपुंसि" या० पुंस्त्वम् । "एकस्मिन् दिवसे 'एकाहेनैव निर्वपेत्' कात्य०स्मृतिः "सत्रस्याचरिष्यन्नेकाहः" मनुः । "अस्यैकाहगमः" पा० । उपचारात् । २एकाहसाध्ये अग्निष्टोमादौ यागभेदे च । "उक्तप्रकृतयोऽहीनैकाहाः" आश्व० ६,१,१ । "उक्तो ज्योतिष्टोम एकाहाहीनसत्राणां प्रकृतिभूतः उक्तानि पञ्चविंशतिरहानि सातिरात्राणि एतेभ्य एव सातिरात्रेभ्योऽहोभ्यो ऽहीनैकाहा व्याख्यायन्त इत्युक्तम् इदानीं तानेकाहाहीनान् वक्तुकामेनाचार्येण 'उक्तप्रकृतयोऽहीनैकाहाः' इत्युक्तम् । तस्यायमर्थः उक्ता प्रकृतिर्येषां ते इमे उक्तप्रकृतयोऽहीनैकाहाः । प्रकृतिः प्रकारो न रूपान्तरमित्यनर्थान्तरं ज्योतिष्टोमोहि सर्वेषामेकाहाहीनसत्राणां प्रकृतिरिति सिद्धम्" नारा० । "अनतिदेशे त्वेकाहो ज्योतिष्टोमो ह्यादयश्चतदतिक्रमस्तेन यस्यमेकाहानाम्" ६,१,२ ।

एकाहगम पु० एकाहेन गम्यते गम-कर्मणि यत् । एकाहगम्ये देशे "अस्यैकाहगमः" पा० ।

एकाहार पु० एकस्मिन् दिने एक आहारः । एकस्मिन् दिने एकभोजने "एकाहारव्रया (विधवया) कार्य्यो न द्वितीयः कथञ्चन" शु० त० पुरा० । "सुनिभिर्द्विरशनस्मृतम्" इत्यादिना द्विर्भोजनस्य विधानेऽपि एकवारमात्रभोजनं तथा विहितम् । एकाहारे च परिसंख्यैवाहारस्य रागप्राप्तेर्न द्वितीय इत्यनेन तथैव प्रतिपादनात् । एक आहारो यस्य । एकस्मिन्नहि भक्षणीये त्रि० "प्रौष्ठपदं तु वो भाक्तमेकाहारो भवेच्चरः" भा० अनु० १० ६अ० ।

एकीकरण न० एक+अभूततद्भावे च्वि-कृ-अनुप्रयोगः ल्युट् । अनेकधान्यादेः राशिकरणेन एकतापादने । कर्म्मणि क्त ।

एकीकृत तथाभावितेधान्यादौ त्रि० एकी+भू-घञ् । एकीभाव अनेकधान्यादेः राशिताप्रापणरूपे व्यापारे पु० । कर्त्तरि क्त । एकीभूत एकत्वप्राप्ते अनेकधान्यादिराशादौ । क्त-ल्यप् । एकीकृत्य तथाभावनं कृत्वेत्यर्थे अव्य० भू-ल्यप् । एकीभूय एकत्वं प्राप्येत्यर्थे अव्य० ।

एकीय त्रि० एक+भवार्थे तस्येदमित्यर्थे वा छ । १एकपक्षभवे सहाये, २एकसम्बन्धिनि च ।

एकेक्षण पु० एकमीक्षणं यस्य । १काके २एकचक्षुर्युतमात्रे काणे त्रि० । ३शुक्राचार्य्ये पु० । बलिना वामनाय दीयमानभिपदभूमिं प्रतिषेधतः शुक्रस्य वचनमनादृत्य तद्दानाय प्रवर्त्तमानं बलिं वीक्ष्य दानार्थमुद्गृहीतजलपात्रद्वारं सूक्ष्ममूर्त्त्या प्रविश्य कमण्डलुस्थं जलं बुद्ध्वा जलद्वारावरणनिवारणच्छलेन कुशेन तस्यैकं नेत्रं वामनेन विदारितमिति तस्य तत्कालादेकनेत्रतेति पौराणिकी कथाऽत्रानुसन्धेया ।

एकैक त्रि० सुबन्तस्य एकस्य वीप्सार्थे द्वित्वम् "एक बहुव्रीहिवत्" पा० द्विरुक्त एकशब्दो बहुव्रीहिवत् तेन सुब्लोपश्च तत्कार्य्यभावौ । प्रत्येकपदार्थे इह द्वयोरपि सुपोलुकि कृते सति बहुव्रीहिवद्भावादेव प्रातिपादिकत्वात् ससुदायात् पुनः सुप् । स्त्रियां टाप् । एकैका व्याहृतिः । "न बहुव्रीहौ" पा० सर्वनामसंज्ञानिषेधः सुख्यबहुव्रीहिपरस्तेन एकैकस्मै एकैकस्मात् इत्यादौ सर्व्वनामकार्य्यम् । "दश दश वा एकैकस्मिन् प्राणाः" श० ब्रा० ८,१,१,२ । ततः कारकार्थे यत् । एकैकयस् कारकरूपप्रत्यये अव्य० । "एकैकमुद्धरेत् कृच्छ्रं द्विजः पापापनुत्तये" प्रा० त० विष्णु० "ब्राह्मणस्य त्वयाकृस्य यत् प्रमाणं समासतः । एकैकयोर्युगानां तु क्रमशस्तान् निबोधत" मनुः । स्वार्थे यत् । एकैकस्य तदर्थे न० "एकैकस्येतानुपूर्व्या भूत्वा भूत्वेह जायते" भा० ७,१५,४२ "एकैकस्यं तदा योधा धार्त्तराष्ट्रस्य भारत । पर्य्यवर्त्तन्त गच्छन्तैर्दयभिर्दयभिः सह" भा० द्रो० २४० । नीलकण्ठेन "एकैकस्येति पठित्वा एकैकमिति व्याख्यातम्" एकैकयो भावः यत् । एकैकस्य "एकैकराशिभवने" "एकैकस्येन यथानुपूर्व्यम्" भाग० ५,१,२५ ।

एकैषिका स्त्री नित्यकर्म्मधा० । (आकनादी) दृष्टे रत्नजाता । "एकैषिकालष्टनी च प्रलेपे श्लेष्मणोल्बणे" । "एकैषिकातेन सततमतियात पित्तकफरुधिरलिप्तप्रकोपणं श्लेष्माभिहरणम्" इति च सुश्रु० । क्वचित् रत्नमालायाम् एकोविकेतिपाठं दृष्ट्वा यद्दत्तत्वन्नु मे तादृशयन्त्रोल्लिखितः ।

एकोक्ति स्त्री एका उक्तिः अभिधाशक्तिः । उभयपदार्थविषयिण्यामेकस्यां शक्तौ । यथा पुष्पवन्तौ इत्यादौ पुष्पवत्पदेन दिवाकरनिशाकरयोरुभयोरेव बोधः न तु अन्यपदादिवत् प्रत्येकपदार्थबोध इत्याकरे द्रष्टव्यम् । एवं "जात्याकृतिव्यक्तयः पदार्थः" गौ० सू० जात्यादीनामेकशक्त्यैव बोध इति व्युत्पत्तिवादे गदाधरः ।

एकोत्तर त्रि० एकैकमुत्तरं यत्र यत्तौ सम्पच्छब्दवत् संख्याशब्दस्य वीप्सार्थता । एकैकाधिके । "एकाद्येकोत्तरा अङ्का व्यस्ताभ्यासाः क्रमस्थिताः" ज्योति० । "सर्गादौ तु यथा कार्यं वायुं ज्योतिर्जलं महीम् । सृजत्येकोत्तरगुणां तथादत्ते भवत्रपि" । "तन्मात्रादीन्यहङ्काराद्येकोत्तरगुणानि च" इति च भाग० । "यथासंख्यमेकोत्तरपरिवृद्धाः यद्वत्सर्गरूपरसगन्धाः" सुश्रु० एकाधिकादयोऽत्र त्रि० ।

एकोदक पुंस्त्री एकं समानमुदकं यस्य । समानोदके सप्तमपुरुषाद्ध्वं चतुर्थपुरुषपर्य्यन्ते गोत्रजे "समानोदकभावस्तु निवर्त्तेताचतुर्दशात्" स्मृतेस्तत्पर्य्यन्तानामेकोदकत्वम् । "जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते" मनुः ।

एकोदर पु० एकं समानमुदरं गर्भस्थानं यस्य । समानोदरे भ्रातरि स्त्रियां टाप् । कर्म्म० । २समाने उदरे न० । "एकोदरप्रसूतानाम्" स्मृतिः ।

एकोद्दिष्ट न० एक प्रेतः उद्दिष्टोयत्र । प्रेतोद्देश्यके श्राद्धभेदे तस्य कृतिकर्त्तव्यतादिकं श्रा० त० निरूपितं यथा । गोभिलः । "अथैकोद्दिष्टमेक पवित्रमेकोऽर्घ एकः पिण्डो नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः खदितमिति ह्यग्नयः सुखदितमिति प्रत्युत्तरम् उपातिष्ठतामितृत्वव्यत्यासे, अभिरम्यतामिति विसर्गे, अभिरतोऽस्मीति प्रतिवचनमेतस् प्रेतस्याङ्गमिति" । अथेत्यनेनैकोद्दिष्टस्य पार्व्वणानन्तर्य्याभिधानं तयोः प्रकृतिविकृतित्वं सूचयति । अतएवैकोद्दिष्टे पार्व्वणधर्म्मप्राप्त्याहावाहनादिप्राप्तौ नावाहनमित्यादिनिषेध उपपद्यते अन्यथा प्राप्त्यभावान्निषेधोऽनुपपन्नः स्यात् । एतत् प्रेतस्यार्द्धसपिण्डीकरणात् एकं प्रेतमुद्दिश्य यद्दीयते श्राद्धं तदेकोद्दिष्टमिति वैदिकप्रयोगाधीनयौगिकम् । अतएव प्रतिसंवत्सरिकस्य नैकोद्दिष्टत्वं किन्त्वेकोद्दिष्टविधिकत्वम् । अत्रार्घैक्याद्दिदलरूपसङ्कलितपवित्रैक्यप्राप्तौ एकं पवित्रमिति पुनरभिधानमसंख्यार्थकत्वाय तदवयवैकदलपरम् ।

श्रौज्योत्पवनप्रकरणे "बर्हिष: प्राङ्देशमात्रे पवित्रे कुरुते" इति गोभिलसूत्रे पवित्रपदस्य दलपरत्ववत् । अत्र नावाहनं नाम्नोकरणमिति निषेधयो: पौर्व्यापर्य्यादग्नौकरणपूर्व्वकालीनं प्रधानसम्बन्धि आङ्गसूत्रोदितं आङ्गावाहनमेव निषिध्यते नत्वप्रधानसम्बन्धि पितृयज्ञवदितिदेयप्राप्तं पिण्डाङ्गावाहनमिति । एतेन पिण्डाङ्गावाहननिषेधोमैथिलोक्तो रद्द: । अग्नौकरणनिषेधेन हुतशेषस्यालाभ "हुतशेष दत्त्वा पात्रमालभ्य जपति पृथिव्यादि स्वाहाद्यन्तसूत्रोक्तपात्रालम्भनस्यापि बाध: आनन्त्याभावात् अक्षतमिति मन्त्रलिङ्गविरोधाच्च । खदितमिति लप्रिप्रम्र इति लप्रा:स्य इति लप्रिप्रम्रं, खदितमित प्रम्र । कृशमयत्वाङ्गुष्ठपक्षे तु प्रतिवचनानुपपत्त्या प्रम्रस्यापि निवृत्ति: अत्रयशब्दस्थाने उपतिष्ठतामिति प्रयोग: अत्रोपतिष्ठतामित्यनेनाग्नादिकमग्रस्थान्यत्रेऽग्निस्थस्यान्यत्रायनुपपत्त्या तस्याग्यप्रयोग: । अतएव पितृदयितायामग्नादिकमपतिष्ठतामिति लिखितम् । ततश्च "प्रेतायाज्ञयमस्तु च" इति ब्रह्मपुराणीय "ततो वदेत् पुनर्धीमानज्ञयमुपतिष्ठताम्" इति मार्कण्डेयपुराणीयश्च गोभिलविरुद्धत्वात् शाखान्तरीयम् । अभिरम्यतामिति "प्राज प्राजे" इति स्थानेऽभिरम्यतामित्यनेन विसर्जनमिति । एतेन "प्रेतत्वाङ्गेषु सर्व्वेषु न स्वधा गृह्यतामभिरम्यताम् । स्वस्त्यस्तु विसृजेदेवं सकृत् प्रणवर्जितम्" इत्यास्वलायनवृत्तपरिशिष्टात् एकोद्दिष्टे प्रणववर्जितस्वस्त्यस्त्वित्यनेन यद्विसर्जनं तत्प्रेतश्राद्धविषयम् अभिरम्यतामिति तु सांवत्सरिकविषयमिति कल्पतरूद्धृतवाचस्पतिमिश्रादयुक्तं निरस्तम् । बहूचानामेव पार्व्वणेऽभिरम्यतामिति विसर्जनस्य प्राप्तत्वादेकोद्दिष्टेऽपि तथात्वात् सर्व्वशाखिसाधारणनिषेधानुपपत्तेश्च । एतदिति पूर्व्वोक्तिकर्त्तव्यताकश्राद्धमित्यर्थ: । प्रेतश्राद्धं नतु पार्व्वणविकृतित्वेन प्राग्गपिण्डोकरणप्रयुक्तं श्राद्धम् अकृतसपिण्डीकरणस्य तथाविधपितृत्वाभावात् । अतएव तत्सूत्रायमूलकमेवास्वलायनवृत्तपरिशिष्टेऽपि "पितृशब्दं न युञ्जीत पितृहा चोपजायते" इत्युक्तम् । अतएव विष्णुना "प्रेतस्य नामगोत्राभ्यां दत्तान्नाद्येषु"च इत्यत्र प्रेतनामगोत्राभ्यामित्यनेन प्रेतस्योक्तं नतु सम्बन्धिन इत्युक्तम् ततश्च मन्त्रे प्राग्गपिण्डोकोपाधिकस्य पितृपदस्थाने प्रेतपदोक्तौ नतु अग्निष्वात्ताद्युपाधिकौ । एवमभिलाषवाक्ये सम्बन्धित्वेन नोल्लेख किन्तु प्रेतत्वेन असम्बन्धिनोऽपि मठब्राह्मणादेरपि प्रेतश्राद्धाधिकारित्वात् । अतएव शातातपेनापि "प्रेतान्नानामगोत्राभ्यामुत्सृजेदप्रतिष्ठताम्" इत्युक्तम् । अत्र प्रेतस्यान्न: प्रेतान्नो नतु सम्बन्धिवाचकस्यान्न: नवा सैंथिलोक्तो बहुव्रीहिरस्तु तत्पुरुषापेक्षया जघन्यत्वात्, प्रेतपदस्य सम्बन्धिस्थानीयत्वेन तत्पुरुषस्यैव युक्तत्वाच्च । ततश्च प्रेतान्नानाम च गोत्रञ्च इति हन्द: अतएव तर्पणे विष्णु: "ततश्च सर्व्वं घटस्थगोत्रनामगोत्रा पितृपदस्थाने प्रेतपदोक्तेन द्वितीयान्तं तर्पयेयु: पितृयज्ञोद्धारणे पितृहाभवति" इति । एतेषां वचनानां न्यायमूलकत्वात् सांवत्सरिकश्राद्धे एकोद्दिष्टविकृतीभूतेऽपि प्राग्गपितृलोकोपाधिकपितृपदवन्मन्त्रेऽभिलापे च सम्बन्धिबोधकपितृत्वेनैवोल्लेख: । एवञ्च देवताभ्य पितृभ्यश्चेत्यत्र न प्रेतपदोक्त तत्र पितृपदस्य दिव्यपितृपरत्वात् एवं नैकवचनोक्तोपि तथा "मधु द्यौरस्तु न पिता" इत्यत्र द्यौ: स्वर्ग: पिता पितेव सर्व्वस्याधिगम्यत्वात् मध्वस्तु मधुमयी भवत्विति भाष्यव्याख्याने द्यौरिति पितेतिपदयो: सामानाकरण्यं प्रतीयते अत्र च द्युपितृत्वयोर्भेदेऽपि धर्मिणो: सामानाधिकरण्येनाभेदावगमात् दिव: पितृसाधर्म्म्यप्राप्तिरिति पितृपदं पितृतुल्यपरं नतु जनकपरं प्राग्गपितृलोकपरं वेति तेनात्र मन्त्रे पितेत्येव वक्तव्यं नतु प्रेतपदोक्त: नवा "पितृशब्दं न युञ्जीत" इत्यनेन निषेध । एवम् आमावेति मन्त्रे पितरेत्यत्र नोक्त: यदाऽहं आद्य करोमि तदा मातरपितरावागच्छतमित्यनुव्रजने क्रियमाणे श्राद्धफलस्य प्रार्थनीयत्वात् । एवं सद्विश्राद्धेष्वेतेषु नान्दीमुखविशेषण न देयमेवेति अन्यत्र सर्व्वत्रोत्सर्गवाक्ये मन्त्रे च पितृपदप्रयोगनिषेधात् प्रेतपदोक्त कार्य्य: ।

"अत्रैकोद्दिष्टे गोभिलानुक्तोविशेषोऽभिधीयते । यथाह विष्णु: "एकवचनान्तानुक्तैकोद्दिष्टे" इति एकवचनवदुभयथा स्यात्तथोक्तं "अपूर्व्वात्प्रेतभूत:" (जै०) इत्युक्तेन पूर्व्वाप्राग्गपिण्डवचनान्तत्वकल्पनेन बहुवचनान्तान्मन्त्रान् विकृतान् कुर्य्यात् एकस्मिन् पितरि बहुवचनासमवेतार्थत्वात् प्रेतत्वावर्द्धप्रकाशनाख्यहेतुप्रयोजनकस्य मन्त्रस्य विकृतौ बहुवचनस्थाने एकवचनोक्त: कर्त्तव्य इति न्यायमूलमिदं वचनम् । यद्वा "पवित्रे स्थो वैष्णव्यावित्यत्र "पवित्रासि वैष्णवी"इति न चात्र पवित्रमसि वैष्णवम् इति पितृदयितोक्तं युक्तं "पवित्रे स्थो वैष्णव्यावितिं" मन्त्रस्य हे पवित्रे युवां विष्णुदेवताके स्थ: भवत: स्त्रीलिङ्गत्वं चान्दसमिति कायनाचार्य्यव्याख्याने गुण-

विष्णुनापि तथा व्याख्याने बन्धुजीवतामतीतेः । एवं "विष्णोर्मनसा पूते स्थः" इत्यत्रापि पूतमसीति । "अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्" इति मन्त्रे अत्र प्रेत मादयस्व यथाभागमावृषायस्वेत्युक्तम् । प्रार्थनार्थकलतीयलकारीयमध्यमपुरुषबहुवचनस्थाने तद्देकवचनस्यैव उक्तत्वात् न तु भूतार्थकचतुर्थलकारीयमाशिषायथा इत्यनिरूढमष्टोक्तौ युक्तं अतएव श्रीदत्तादिभिरपि "मादयस्वेत्युक्तम् "अमीमदन्त पितरः" इत्यत्र अमीमदतृप्येतेति क्षयाधिकरणेत्यत्र दर्शयिष्येति । एत पितर इत्यादिपिण्डदानावाहनमन्त्रे एहि प्रेतेति, सौम्यासइत्यत्र सौम्येति दत्तासभ्यमित्यत्र देत्तासभ्यमिति, नियच्छतेत्यत्र नियच्छेति, नमोवइत्यादिमन्त्रेषु पितर इति स्थानचतुष्टये प्रेतेत्युक्तम् । एवं वइत्यत्र ते इति ; आर्द्रः प्रार्थने च वेभ्य इत्यत्र यत्रै इति तेषामित्यत्र तस्येत्युक्तम् । एतद्दः पितरइत्यत्र तु प्रेता इति विक्लवतावृद्धो न तु बहुवचनस्य "एतद्दः पितरो यान इति जल्पन पृथक् पृथक्" इति ब्रह्मपुराणेन प्रकृतावेव पार्वणे पित्रादिषु प्रत्येकमेतद्दः पितर इति बहुवचनान्तमन्त्रप्रयोगात् अत्रानर्थक्येन तद्विकृतावेकोद्दिष्टेऽप्यसमवेतार्थं बहुवचनस्यैव युक्तत्वात् । ततश्च प्रकृतौ समवेतार्थस्यैव विक्लवतावृद्धः ।

सांवत्सरिके त्वेकवचनान्ततयैवोद्धो न तु पित्रादेस्तत्र प्राप्तपितृलोकत्वेन तथैव युक्तत्वात्" आ० त० रघुनन्दनः ।

एकोद्दिष्टस्य "द्वादश प्रतिमास्यानि आद्यं षाण्मासिकं तथा" इत्युक्तपञ्चदशश्राद्धात्मकम् । अत्र द्वादशपदं त्रयोदशानामप्युपलक्षणम् "संवत्सरे विवृद्धेऽपि प्रतिमासञ्च मासिकमिति" काल० मा० कोथुमिना वत्सरघटकप्रतिमासे तस्य विधानात् अत एव "द्वादश मासाः संवत्सरः क्वचित् त्रयोदश मासाः संवत्सरः" इति श्रुतौ वत्सरस्य त्रयोदशमासात्मकत्वमुक्तम् ।

अथैकोद्दिष्टनिमित्तकाद्धोनिरूप्यते स च चा० त० रघुनन्दनेन दर्शितो यथा

आद्यवस्त्र्यम् । "अतश्चाद्यं तु कर्त्तव्यं प्रतिमासन्तु वत्सरम् । अतिसंवत्सरञ्चैवमाद्यमेकादशेऽहनि" । एकादशेऽहनीति क्षयाशौचान्तद्वितीयदिनोपलक्षणम् । "अतादिः क्षतकाले तु भोजयेदयुजो द्विजान्" इति मत्स्यपुराणैकवाक्यत्वात् । आद्यं षोडशश्राद्धानामादिभूतम् । तथा च छन्दोगपरिशिष्टम् । "आद्यमग्निमतः कुर्यात् दाहादेकादशेऽहनि । अथापि तु प्रकुर्वीत प्रमिताहनि सर्वदा । द्वादश प्रतिमास्यानि आद्यं षाण्मासिकं तथा । सपिण्डीकरणञ्चैव दशमेऽह्नि श्राद्धभोक्तृकम् । एकाहेन तु षण्मासा यदा स्युरपि वा त्रिभिः । न्यूनाः संवत्सरश्चैव स्यातां षाण्मासिकं तदा" । अग्निमतः श्रौताग्निमतः दाहादेकादशेऽहनि आद्यं कर्त्तव्यं तस्य दाहावधिदशाहशौचित्वात् । अन्येषान्तु मरणावधि तथा च यम "मरणादेव कर्त्तव्यं संयोगा यस्य नाग्निना । दाहादूर्द्धमशौचं स्याद्दशमस्यैव वैतानको विधिः" । वैतानिकः श्रौतो होमः तस्मादग्निमतं श्रौताग्निपरम् । ततश्च केवलस्मार्त्ताग्निमतो निरग्नेश्च मरणादेवाशौचम् । ध्रुवाण्यपि एतानि षोडश श्राद्धानि नित्यानि सर्वदा मृतधनलाभेऽपि । प्रमिताहनि मृततिथौ आद्यं श्राद्धमाब्दिकश्राद्धवेतरश्राद्धानि कार्य्याणि आद्यश्राद्धस्यैकादशाहे विधानात् षाण्मासिकयोस्तु कालान्तरविधानात् । अत्रायोक्तान्हिकीयदिवसायाद्यश्राद्धस्यादिमपक्षमाख्यानुरोधेन तदसरकर्त्तव्यमासिकतिथेर्मृततिथित्वानुपपत्त्या तत्सजातीयत्वमेव प्रतीयते । तेन प्रथममृततिथिं विहायान्यमृततिथिमादाय मासिकादिसंज्ञेरिति । एवञ्च एकाहेन तु षण्मासान्यूना इत्यनेन मृततिथिरेव तिथिः प्रतीयते । एवं त्रिभिरित्यत्रापि तथा संवत्सरस्याप्येकादिनूने । अत्र संवत्सरकर्त्तव्यस्यापि षाण्मासिकत्वं द्वितीयषण्मासभवत्वाच्चानुपपन्नम् । संवत्सराभिधानन्त्वादिमध्याधिमासयुक्तप्रथमाब्दस्य "द्वादश मासाः संवत्सरः क्वचित्त्रयोदश मासाः संवत्सर" इति श्रुत्यनुसारेण त्रयोदशमासघटितत्वात् त्रयोदशमासएव द्वितीयषाण्मासिककरणाय कालः सम्पन्नमासकर्त्तव्यस्य षाण्मासिकत्वं "पक्षा तु दिवसैर्मासः क्वचितो बादरायणैः" इत्यनेनाविरुद्धम् । अत्र षोडशश्राद्धगणने द्वादशमासिकत्वस्य कथं त्रयोदशमासयुतावृद्धे त्रयोदशमासिकत्वमिति चेत् "संवत्सरस्य मध्ये तु यदि स्यादधिमासकः । तदा त्रयोदशश्राद्धं कार्य्यं तदधिकं भवेत्" इतिसत्यव्रतवचनेन द्वादशमासिकादधिकं त्रयोदशमासिकं श्राद्धमित्युक्तेः । एतद्वचनं व्याघ्रमूलकम् । "एवं मृताहनि प्रतिमासं श्राद्धं कुर्यादतन्द्रितः" "मृताहनि तु कर्त्तव्यं प्रतिमासन्तु वत्सरम्" इति वचनद्वयेन पूर्व्वोक्तसुप्राप्तत्रयोदशमासात्मकं संवत्सरं व्याप्य मृततिथेर्मृततिथिं यावच्छब्द इत्युक्ततत्प्रतिमासकर्त्तव्यमासिकादरोधेन तत्पक्षीयतत्तिथिषु श्राद्धमिति बोधवता अर्थापत्त्या वैशाखादि

भूतस्यान्यमासिकं तन्मासीयतत्पक्षीयतत्तत्तिथिषु कर्त्तव्यमिति बोधनात् मध्येऽधिमासपाते द्वादशे मासि मृतमासीयतिथिप्राप्त्या वर्षान्तरविहितस्य मासिकस्य सपिण्डनस्य चाप्राप्तेः । एवमाद्याधिमासेऽपि अतएवाद्यावद्देऽधिमासपातेऽपि क्रमुकारीतेन द्वादशमासे यद्द्वादशमासिकमित्युक्तं तदन्याधिमासविषयम् तत्र द्वादशमासे मृतमासीयतत्तत्तिथिप्राप्तेः । यथा क्रमुकारीतः 'प्रत्यब्दं द्वादशे मासि कार्य्या पिण्डक्रिया द्विजैः । क्वचित्त्रयोदशेऽपि स्यादाद्यं श्रुत्या तु वत्सरम् । चक्रवत् परिवर्त्तन्ते दुःखानि सुखानि च । कालबाधादयतः । अतः सांवत्सरं श्राद्धं कर्त्तव्यं मासचिन्तितम् । मासचिन्तन्तु कर्त्तव्यं पौषमाद्यमेव हि । व्रतस्थत्व विधानेन मासः स परिकीर्त्तितः । असंक्रान्तेऽपि कर्त्तव्यमाब्दिकं प्रथमं द्विजैः । तथैव मासिकं पूर्व्वं सपिण्डीकरणात्यया । सपिण्डीकरणे चैव नाधिमासं विदुर्बुधाः" । सपिण्डीकरणादूर्द्ध्वं यत् किञ्चित् श्राद्धिकं भवेत् । दृष्टं वाप्यथ वा पूर्वं तच्च कुर्य्यान्नलिम्लुचे" आ०त० रघुनन्दनः ।

एकोद्दिष्टस्तु मध्याह्नकालव्यापितिथौ कर्त्तव्यं यथाह 'आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टन्तु मध्यतः । पार्वणं चापराह्णे तु प्रातर्दैविकमुच्यते" हारी० । "पूर्वाह्णे दैविकं श्राद्धमपराह्णं तु पार्वणम् । एकोद्दिष्टं तु मध्याह्ने प्रातर्दैविकमित्युक्तम्" मनुः । "यो यस्य विहितः कालस्तत्कालव्यापिनी तिथिः । तथा कर्म्माणि कुर्वीत क्षयवृद्धौ न कारणम्" वायु० । मध्याह्नकालस्तिधा विभक्तदिनतृतीयभागरूप एव । तत्रापि क्रुतप्रथमभागस्यैव तदारम्भकालः "क्रुतमे प्रथमे भागे एकोद्दिष्टमुपक्रमेत् । आवर्त्तनस्य पैपे वा तत्रैव नियतत्वात्" काल० व्याख्यौ । आवर्त्तनं पञ्चमदिगवस्थितस्यायायाः पूर्वदिग्गमनारम्भकालः तत्सञ्चारे क्रुतप्रथमेऽवस्थे । गौतमोऽपि "आरभ्य क्रुतमे श्राद्धं कुर्य्यादारोहिणं बुधः । विधिज्ञो विधिमास्थाय रोहिणन्तु न लङ्घयेत्" अत्र क्रुतपञ्चारम्भकालतयोः पर्य्यायैः रोहिणभालभागे परदिने क्रुतप्रथमभागेऽपि परेद्युरेव श्राद्धं "योयस्यः विहितःकालः कर्म्मण्यनुपक्रमे । तिथिर्वाभिमता या तु श्राद्धा नोपक्रमोज्झिता" गौधायनेनोपक्रमयोस्तिथेरेव श्राद्धतोक्तेः । उभयदिने क्रुतप्राभे रोहिणभालभागे तु तत्रैव श्राद्धम् 'रोहिणन्तु न लङ्घयेदिति युक्तेः । उभयदिने तयोरभावे क्रुतप्रथमक्रुत्सर्वं श्राद्धं तच्चाभावे तयोर्वाभे वा पक्षभेदेन व्यवस्था "शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितोरविः । तया कर्म्माणि कुर्व्वीत ह्रासवृद्धौ न कारणम् । कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितोरविः । तया कर्म्माण्युदादि स्कन्दपुराणोक्तेः । "हितोयादिकयुग्मानां पूज्यता नियमादिषु । एकोद्दिष्टादिश्राद्धादौ ह्रासवृद्ध्यादिदूषणा" व्यासोक्तेश्च । तत्र स्कान्दवाक्ये ह्रासवृद्धिशब्दः तिथिविषयः व्यासवाक्ये चन्द्रह्रासवृद्धिपरत्वेन कृष्णशुक्लपक्षभेदेन व्यवस्थेति स्थितम् । तदेतत् कालमा० निर्णीतम् यथा । "नन्वत्र क्षयवृद्धिप्रयोजनेन निर्णयः क्रियते । सचानुपपन्नः । व्यासवाक्ये ह्रासवृद्धिनोदनायाः पित्र्याविषयत्वाभिधानात् । "एकोद्दिष्टादिश्राद्धादौ ह्रासवृद्ध्यादिनोदनेति" हि पूर्वमुदाहृतम् । "दानव्रते चैतदेवेति" च अतः कथमनयोर्दैवित्र्याभ्यां निर्णयः । किंचोदाहृतयोस्तयस्कान्दपुराणगार्ग्यवचनेषु "ह्रासवृद्धौ न कारणमित्युक्तं तत्कथमत्र ह्रासवृद्धोर्निर्णयकारणत्वम् । अत्रोच्यते । सन्ति ह्रस्वानि ह्रासवृद्धिवाक्यानि । तत्रोशनाः, "खर्वोदर्पस्तथा हिंसास्त्रिविधं तिथिलक्षणम् । खर्वदर्पौ परौ त्याज्यौ हिंसा स्यात् पूर्वकालिकी" । पितामहोऽपि "खर्वोदर्पस्तथा हिंसास्त्रिविधं तिथिलक्षणम् । खर्वदर्पौ परौ पुज्यौ हिंसा पूर्वत्र पूजयेदिति" भविष्योत्तरे "खर्वोदर्पस्तथा हिंसा त्रिविधं तिथिलक्षणम् । खर्वदर्पौ परौ कार्य्यौ हिंसा स्यात् पूर्वकालिकीति" । खर्वसाम्यमल्पत्वयो वा । दर्पो वृद्धिः । हिंसाधिक्यतयः । एतैः खर्वादिवाक्यैः सह यद्यस्मिन्दिने युग्मादिवाक्यस्य विरोधः प्राप्नोति तत्र दैवपित्र्याभेदेन व्यवस्थापकं व्यासवाक्यम् नतु प्रकृतयोः क्षयवृद्धोः पित्र्यविषयत्वप्रतिपादकयावस्कात्यादिवचनेष्वपि कर्म्मकालव्याप्तिग्राह्यस्य खर्वदर्पादिग्राह्यस्य च विरोधप्राप्ते सति कर्मकालव्याप्तिग्राह्यस्य प्राबल्यमुच्यते न तु प्रकृतयोः क्षयवृद्धोः निर्णयहेतुत्वं प्रतिषिध्यते । न तु व्यासः खर्वादिवाक्यानि पित्र्यविषयत्वेन संकोचयामास, वास्तवस्कात्यादेरस्य पित्र्येऽपि कर्मकालव्याप्त्या खर्वादिवाक्यान्यबाधन्त, कुम्भैः निर्विशतीनेयं प्रवृत्तेतेति चेत् नैवं यदा पूर्वोत्तरदिनयोः पित्र्याविषयकर्म्मकालव्याप्तिः समाना यदा वा द्वितयेऽपि कर्म्मकालव्याप्त्यभावः तत्रोभयत्र खर्वादिवाक्यैर्निर्णेतुमशक्यत्वात्" , तत्रैवास्य विषयत्वात् इति भावः ।

"एकोद्दिष्टे तु संप्राप्ते यदि विप्रं प्रलभ्यते । नाधिकारिणि तिथौ तस्मिन् तदा दद्यात् विचक्षणः

देवतः"। एकोद्दिष्टविधिकत्वात् सांवत्सरिकं श्राद्धमपि एकोद्दिष्टशब्देन शास्त्रे व्यवह्रियते। "एकं दिष्टं मृता दर्श" "एकोद्दिष्टं न पार्वणम्" इति च स्मृत्योः सांवत्सरिकोऽपि तथा प्रयोगात्।

एकोद्दिष्टाविकारिणस्तु निर्णयसिन्धौ दर्शिताः यथा "चन्द्रिकायां सुमन्तुः "मातुः पितुश्च प्रकुर्वीत संस्थितः औरसः सुतः। पैतृमेधिकसंस्कारं मन्त्रपूर्वकमाहृतः"। तत्रैव हेमाद्रौ शङ्खः "पितुः पुत्रेण कर्त्तव्या पिण्डदानोदकक्रिया। पुत्राभावे तु पत्नी स्यात्तदभावे तु सोदरः। अत्र पुत्रपदं यद्यपि क्षेत्रजादिद्वादशविधपुत्रपरम्। ते च द्वादशपुत्रा याज्ञवल्क्येनोक्ताः "औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः। क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा। गूढे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृत। कानीन कन्यकाजातो मातामहसुत स्मृतः। अक्षतायां क्षतायां वा जातः पौनर्भवः स्मृतः। दत्तात्माता पिता वा यं स पुत्रोदत्तकोभवेत्। क्रीतस्तु ताभ्यां विक्रीत कृत्रिमः स्यात् स्वयंकृतः। दत्तात्मा तु स्वयंदत्तो गर्भे विप्रः सहोदजः। उत्सृष्टो गृह्यते यस्तु सोऽपविद्धोभवेत्सुतः। पिण्डदोऽशहरश्चैषां पूर्व्वाभावे परःपरः"। इति तथापि "दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः" इति हेमाद्रावादित्यपुराणे कलावितरेषां पुत्रत्वनिषेधादौरसदत्तपरमेव। यद्यपि "पिण्डदोऽशहरश्चैषां पूर्व्वाभावे परःपरः" इति याज्ञवल्क्योक्तेरौरसाभावे दत्तकप्राप्तिस्तथाप्यौरसाभावे पौत्रः प्रपौत्रश्चदभावे दत्तकादय इति शेषम्। "पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते" इति "अथ पुत्रेण पौत्रेण ब्रह्मलोकमाप्नोति विष्टपमिति" जीमूतवाहनधृतहारीतवसिष्ठशङ्खलिखितोक्तेः "लोकानन्त्यन्दिवःप्राप्तिः पुत्रपौत्रप्रपौत्रकैरिति" याज्ञवल्क्योक्तेश्च। "पुत्रः पौत्रश्च तत्सुतः पुत्रिकापुत्र एव च। पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा। भगिनी भागिनेयश्च सपिण्डःसोदकस्तथा। असन्निधाने पूर्व्वेषु तत्तरे पिण्डदाः स्मृताः" इति स्मृतिसंग्रहे प्रपौत्रानन्तरं पुत्रिकापुत्रोक्तेस्तत्समत्वाच्च दत्तकस्य। यद्यपि हरदत्तेन "पौत्रश्च पुत्रिकापुत्रः स्वर्गप्राप्तिकरावुभौ। रिक्थे च पिण्डदाने च समौ तौ परिकीर्त्तितौ"। पौत्रसाम्यमुक्तम्। याज्ञवल्क्येन च "औरसोधर्मपत्नीजस्तत्समः पुत्रिकासुतः" इत्यौरससाम्यमुक्तम् "तथापि लोके राजसेवोन्नत्योदौ विद्यमाने समयशब्दप्रयोगाच्च मुख्ययोः साम्ययोगाच्च मुख्यार्थत्वं न तु समविकल्प इति भ्रमितव्यम्। 'पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसन्ततिः। सपिण्ड सन्ततिर्वापि क्रियार्हो नृप! जायते। एषामभावे सर्वेषां समानोदकसन्ततिः। मातृपक्षः सपिण्डेन सम्बन्धो यो जलेन वा। कुलद्वयेऽपि चोच्छिन्ने स्त्रीभिः कार्या क्रिया नृप!। तत्कुलान्तर्गतैर्वापि तद्वित्कृत्याकारयेन्नृपः" इति विष्णुपुराणाच्च प्रपौत्रानन्तरन्दत्तकादयः इति पृथ्वीचन्द्रमदनरत्नकालादर्शादयः। मदनपारिजातेऽप्येवम्। वोपदेवकल्पधरादयस्तु "पुत्रेषु विद्यमानेषु नान्योर्हः कारयेत्क्वचित्" इति सुमन्तूक्तेः "पितामहः पितुः पश्चात्पुत्रत्वं यदि गच्छति। पौत्रेणैकादशाहादि कर्त्तव्यं श्राद्धमेकयम्। नैतत्पौत्रेण कर्त्तव्यं पुत्रवांस्तेत्पितामहः" इति छन्दोगपरिशिष्टे च पुत्रशब्दस्य द्वादशविधसुतपरत्वात् पूर्व्वाभावे पर-पर इत्यस्यानन्यपरत्वाच्च दत्तकाद्यभावे पौत्रादीनामधिकार इत्याहुः। अतएव निषेधादुपनीतपौत्रस्यैवोपनीतपुत्रस्यैवाधिकारः। औरसस्याप्युपनीतोऽपि कुर्य्यादित्याह पृथ्वीच० सुमन्तुः। "श्राद्धं कुर्य्यादृक्थस्य तु प्रमीतपितृकोद्विजः। व्रतस्थो वाऽव्रतस्थो वा एकएव भवेदृषि" इद्धमनुः। "कुर्य्यादनुपनीतोपि श्राद्धमेको हि यः सुतः। पितृयज्ञाकृतिं पाणौ जुह्वदाद्ब्राह्मणस्य सः" मनुः "नत्वन्यस्मिन् युज्यते कर्म्मकश्चिदाशौञ्जिबन्धनात्"। सुमन्तुरपि नाभिव्याहारयेदृक्थञ्च यावन्नौर्ध्वी निबध्यते। मन्त्राननुपनीतोऽपि पठेदेवैकमौरसः"। ब्रह्म वेदम् मन्त्रपाठस्त्रिवर्षकृतचूडस्यैव। "अनुपेतोऽपि कुर्वीत मन्त्रवत्पैतृमेधिकम्। यद्यसौ कृतचूडःस्याद्दिस्त्रिवत्सरः" इति सुमन्तूक्तेः। यत्तु व्याघ्रः "कृतचूडस्तु कुर्वीत उदकं पिण्डमेव च। स्वधाकारं प्रयुञ्जीत वेदोच्चारं न कारयेत्" इति स्मृतिसंग्रहे "कृतचूडोऽनुपेतस्य पित्रो श्राद्धं समाचरेत्। उदाहरेत्स्वधाकारं न तु वेदाक्षरान्वितम्"। तत्प्रथमवर्षचूडाविषयमिति माधवमदनरत्नपूर्व्वचन्द्राः। त्रिवर्षोर्द्ध मन्त्रवत्त्वस्य विकल्प इति चन्द्रिका वोपदेवश्च। मदनरत्नेऽप्युक्तम्। 'यत्तेषु मन्त्रवत्कर्म पत्नी कुर्य्याद्यथा नृप!। तथौर्द्धदैहिकं कर्म कुर्य्यात् सा धर्मसंस्कृता"। अग्नौ तु कात्यायनः। "असंस्कृतेन पत्न्या च अग्निदानं समन्त्रकम्। कर्त्तव्यमितरत्सर्वं कारयेदन्यमेव हि"। पुत्रस्य न जन्मतोऽधिकारी किन्तु वर्षोत्तरमिति कालादर्शः "चौलाद्याद्यादृ

कादर्वाक् न कर्य्यात्पैतमेधिकम्" इत्युक्तेः। मदनरत्ने सुम न्तुरपि "पुत्रशोत्पत्तिमात्रेण संस्कुर्य्यादिष्मोचनात्। पितरं नाविदित्वौतात्पितृमेधेन कर्मणा"। एतच्चौरसस्यैव दत्तकादीनां तूपनीतानामेवाधिकारः इति कालादर्शे। पृथ्वीच० खान्दे "पित्रोरनुपनीतोऽपि विदध्याद्यौरसः सुतः। और्द्ध्वदेहिकमन्यत्तु संस्कृताः आद्धकारिणः" इति। अन्यत्रापि दर्शमहालयादावनुपनीतस्याधिकारोऽस्माभिः पूर्वमुक्तः। प्रथौत्राभावे दत्तकादयो हादश पुत्राः। तदभावे भर्तुः पत्नी तस्याश्च स "अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता। पत्यौ व दद्यात् तत्पिण्डं क्रतुस्नानेन लभेत चेति" हेमाद्रिधृते। "भार्य्या पिण्डं प्रतिदद्याद्भर्तुर्भार्य्या तथैव च। [illegible] चैव तदभावे सपिण्डकाः" इति। पुत्राभावे तु पत्नी स्यात्पत्यभावे सहोदरः" इति च हेमाद्रौ शङ्खोक्तेः। देवयाज्ञिकस्तु "ज्ञानेनगृहसहजपुनर्भूतनयाश्च ये। पत्न्यभावेऽपि कर्त्तव्ये अप्रशस्ताः स्मृता हि ते" इति स्मृतिसंग्रहात् पत्न्यभावे कार्ष्णाजादय इत्याह। पत्न्यपि सपत्नी पुत्रे सति नाधिकारः। "पितृपत्न्याः सपत्नीमातर" इति मदनरत्ने। "विदध्यादौरसः पुत्रो जनन्या और्द्ध्वदेहिकम्। तदभावे सपत्नीज क्षेत्रजाद्याः स्तथा सुताः। तेषामभावे नृपतिस्तदभावे सपिण्डकाः" इति मदनरत्ने कात्यायनोक्तेः 'बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः। एका चेत्पुत्रिणी तासां सर्वासां पिण्डतन्तु सः" इति हरिस्मृतिवचनञ्च। अपरार्कोऽप्येवम्। तेन यच्छङ्खविवेके उक्तम् "सत्यपि सपत्नीपुत्रे पत्युरेवाधिकार इति तन्निरस्तम्। यच्च तत्रैव कात्यायनः "न भार्य्यायाः पतिर्दद्यात्पुत्रायाः अपि क्वचित्"। यच्च विष्णुपु० "कुलद्वयेऽपि चोच्छिन्ने स्त्रीभिः कार्य्या क्रिया नृपेति"। यच्च मार्क० पु० "सर्वाभावे स्त्रियः कुर्युः स्वभर्तृणामसन्त्वकमिति"। तदाशुरादिविषाद्दोषविषयम् "धर्म्मार्थं विवाहेऽहृदया या सा पत्नी परिकीर्त्तिता। क्रयक्रीता तया सार्द्धं न सा पत्न्यभिधीयते। न सा देवे न सा पित्र्ये दासी तां हव्यो विदुरिति" मन्वर्थवादे यातातपोक्तेः। यत्तु गुरिरत्नाकरे भूतपाणिश्च "अपुत्रस्य च या पत्नी सैव पिण्डप्रदा भवेत्। तस्यै पिण्डान् दर्शैकं वा एकाहेनैव निःक्षिपेत्, इति जाबालोक्तेः "भर्त्रैधनहरा पत्नी तां विना दुहिता स्मृता। अकादशात् सन्भवति पुत्रवद्दुहितेता ऋणमिति" हरिस्मृतिना दुहितुर्धनहारित्वोक्तेश्च पुत्राभावे कन्या तदभावे पत्नी इत्याहुः। तत् पूर्वविरोधात् "मातुर्दुहितरः शेषमन्याभ्यश्चेतरेभ्यः" इति दुहितुर्मातृधनहारित्वेन पुत्रस्य तच्छ्राद्धानधिकारापत्तेश्चोपन्यस्म्। वचनं भ्रातृपुत्राद्यभावविषयम्। पत्न्यभावे अविभक्तस्य सोदरः पूर्वोक्तयाज्ञवचनात्। विभक्तस्य तु दुहिता धनहारित्वात् पूर्वोक्तजाबालवचनाच्च। तत्राप्युढानूढासत्त्वयोरप्येव "दुहिता पुत्रवत् कुर्य्यान्माता पित्रोस्तु संस्कृता। अयौचसूतकं पिण्डमेकोद्दिष्टं सदा तयोरिति" भरद्वाजोक्तेः। तदभावे दौहित्रः धनहारित्वात्। "मातापित्रोरुपाध्याये चार्य्ययोरौर्द्ध्वदेहिकम्। कुर्वन्मातामहस्यापि व्रती न भ्रश्यते व्रतादिति" चन्द्रिकायां हेमाद्रौ मनुः "यद्यव्रतघ्नोऽपि सुतः पितुः कुर्य्यात्क्रियां नृप!। उद्धरेद्यां महाघोरात् दौहित्रो दुहितेहेति" अपरार्के भविष्योक्तेश्च। एतद्धनहारित्वं आवश्यकं नान्यथेत्याह तत्रैव स्कन्दः "आद्धं मातामहानां तु अवश्यं धनहारिणा। दौहित्रेणार्थनिष्क्रय्यं कर्त्तव्यं पूर्वसूत्तरमिति"। तेन दौहित्रोऽपि पुत्रोक्त इति देवयाज्ञिकोक्तिः परास्ता। अत्र पत्नादौहित्रसभावे ऽर्धंहरत्वात्पत्न्यैव कुर्य्यात्। दौहित्रभ्रातृपुत्रसत्त्वे विभक्तस्य दौहित्रः। अविभागे भ्रातृपुत्रं। भ्रातृतत्पुत्रसत्त्वे कनिष्ठभ्रातुरेव। ज्येष्ठस्यैतत्पुत्रः कुर्य्यादिति दायिनाद्यन्यः। हारलतादौ तु "भ्रातृभ्राता स्वयं चक्रे तद्भार्य्या चेन्न विद्यते। तस्य भ्रातृसुतश्चक्रे यस्य नास्ति सहोदरः" इति भाङ्गोक्तेः "पत्नी कुर्य्यात् सुताभावे पत्न्यभावे सहोदरः" इति कौर्मोच्च। ज्येष्ठभ्रातैव कुर्य्याच्च तत्पुत्र। यत्तु "नानुजस्य तथा पुत्रः" इति, तत्कनिष्ठभ्रातृसत्त्वविषयम्। यच्च मनुः "स वैषामेकजातानामेकश्चेत्पुत्रवान् भवेत्। सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत्" इति तत् सोदराभावविषयमित्युक्तम्। एतेन पुत्रस्थानादेयोऽयम् अतश्चैषां सत्त्वेऽादश पुत्राः प्रतिनिधयो न कार्य्याः। स एव पिण्डदोंऽशहरश्च" इत्यपीति वाचस्पतिमदनटीकाकल्परत्नाकरादयः परास्ताः। मदनरत्ने स्मृतिसंग्रहे "पुत्रः कुर्यात्पितुः श्राद्धं पत्नी च तदभिधौ। धनहार्य्यपि दौहित्रस्ततोभ्राता च तत्सुतः। भ्रातोः सहोदरो भ्रातः कुर्य्याद्धारादि तत्सुतः। ततश्चोदरजाता तदभावे

भावे च तत्सुतः" इति । भ्रात्रपुत्राभावे क्रमेण पितृभ्रातृस्वसृजनकतत्सुतादयः धनहारित्वात् । "भगिनीतत्सुतयोर्विधेयमाह मदनरत्ने कात्यायनः "अनुजो ह्यपजो वापि भ्रातुः कुर्वीत संक्रियाम् । ततस्त्वसोदरस्तद्वत्क्रमेण तर्पयेत्तयोः" अपरार्के काण्वाजिनिः । "पुत्रः शिष्योऽपि वा पत्नी पिता भ्राता स्वसा गुरुः । स्त्रीहारो धनहारी यः कुर्यात्तस्योदकक्रियाम्" । मार्कण्डेयपुराणे "पुत्रोभ्राता च तत्सुतः पत्नी माता तथा पिता । वित्ताभावे तु शिष्यश्च कुर्वीरन्नौर्ध्वदेहिकम्" । तेन धनहारी एतद्विज्ञ इति कात्यादर्शः। अत्र पाठक्रमो न विवक्षितः पूर्वपाक्येषु अथ ततःशब्दादिभिः श्रौतक्रमोक्तेः "अथ जिह्वाया अथ वक्षसः" इति वत् । त्रयोदन्द्रोदये द्रष्टव्यः । "स्वसासक्षीयततपुत्रपत्नीति सम्बन्धिबान्धवाः । पुत्राभावे तु कुर्वीरन् सपिण्डान् यथाविधि" । मार्कण्डेयपुराणे "पुत्राद्युच्छिन्नबन्धोश्च सखापि स्वगुरुश्च च । जामाता श्लेष्मवत् कुर्यादखिलं पैतृमेधिकम्" । चन्द्रिकायां हरदत्ततः "मातुलो भागिनेयस्य स्वस्रीयो मातुलस्य च । श्वशुरस्य गुरोश्चैव श्वश्रूमातामहस्य च । एतेषामप्यभावे तु कर्त्तव्यमिति वेदविदो विदुः"। शुद्धिविवेके ब्राह्मे "दत्तानां वाग्दत्तानां कन्यानां कथते पिता । चतुर्थेऽह्नि तासां तु कुर्वीरन् सुसमाहिताः" । दत्ताः वाग्दत्ताः । "मातामहानां दौहित्राः कुर्व्यस्त्रयहनि त्वपरे । तेऽपि तेषां प्रकुर्वन्ति हितास्तेऽहनि सर्वदा । जामातुः श्वशुरस्यक्रत्वोस्तेऽपि च संमताः । मित्रायां तदपत्यानां श्रोत्रियायां गुरोस्तथा । भागिनेयसुतानां च सर्वेषान्त्वपरेऽहनि । राज्ञोऽपति सपिण्डे तु निरपत्ये पुरोहितः । मन्त्री वा तदधीकारी पुरा कीर्त्वा करोति सः" । अत्र द्वितीयाद्यादौ भ्रात्रविधान्मध्यिसञ्चयनपरम् । कात्यादर्शे "दाहादि मन्त्रवत्पित्रोर्विदध्यादौरसः सुतः । तदभावे तु पौत्रश्च प्रपौत्रः पुत्रिकासुतः । दौहित्रोधनहारी च भ्राता तत्सुत एव च । पिता माता स्वसा चैव स्वसा तत्सुत एव च । सपिण्डः सोदकोभ्रातृ सपिण्डश्च सहोदकः । स्त्री च शिष्यर्त्विग्भार्या जामाता च सखापि च । उच्छिन्नबन्धोरिक्थेन कारयेदवनीपतिः" । गौतमः "पुत्राभावे सपिण्डाः शिष्यश्च दद्युरभावे क्षत्रियाचार्यो"। वसु चन्द्रिकायां हरदत्ततः "प्रोक्ता आद्यं प्रकर्तव्यं सर्वेषां वर्णिविक्रिनामिति" तत्सवर्णविषयम् । "ब्राह्मणस्वबन्धवर्ज्ञानां न कुर्यात्कर्म किञ्चन । कामाल्लोभाद्भयान्मोहात् कृत्वा तज्ज्ञातिनां व्रजेत्" इति ब्राह्मोक्तेः "न ब्राह्मणेन कर्त्तव्यं शूद्रस्याप्यौर्ध्वदेहिकम् । शूद्रेण वा ब्राह्मणस्य विना पारस्वात् क्वचित्" इति पारस्करोक्तेश्च । पारस्वः जठरभ्रातृपुत्रः । अत्रेदन्तत्वं सर्वपुत्रादेः पूर्वस्याभावे पत्न्यादेरधिकार उक्तः । तदाभावोऽसन्निधिः नात्यासोच्यते । अतएव पूर्वत्र "असन्निधाने पूर्वेषाम्" इत्युक्तम् । तत्रासन्निधौ पत्न्यादेः सर्वत्राधिकारे प्राप्ते "प्रोषितावसिते पुत्रः कालादतिचिरादपि । एकादयाद्याः क्रमयोज्ज्येष्ठस्य विधिवत्क्रियाः" "ज्येष्ठ एव च यत्कृतम्" इत्यादैर्द्वयोरेरुपवादात्पुत्रस्यैव पत्न्यादेः सपिण्डनादावधिकारः। असन्निधौ तु पूर्वमेव नौर्ध्वम् । अतोऽनधिकारिणा भ्रात्रादिना कृतमप्यकृतमेवेति पुनरावर्त्तनीयम् । मासिकाप्रकरणेऽप्यावर्त्तनीयः । एकादयाद्यमासिकानि नावर्त्यन्ते "वृद्धश्राद्धेऽपि कर्त्तव्यं सपिण्डीकरणं पुनरिति" वटाद्वृत्तिविधानाभावादिति केचित् । तन्न अस्य निर्मूलत्वात् । अतएवादौ कृतिश्राद्धमावर्त्यन्ते द्वादशौतसपिण्डपितृयज्ञार्थं तु कृतं नावर्त्यन्ते । नासपिण्डेऽग्निमान् पुत्रः पितृयज्ञं समाचरेत् । न पार्वणं नाभ्युदयिकं कुर्याच्च लभते फलमिति" हेत्वुत्तरनिषेधादिति "भ्राता वा भ्रातृपुत्रो वा" इत्यादिकारीतादिवचोभ्यः कनिष्ठादेरप्यधिकारात् तथा चात्र ज्येष्ठकर्तृकत्वबाधः । सपिण्डने तु बहु वक्तव्यं तच्चिन्त्यं वक्ष्यामः। अधिकारिविशेषेण क्रियाव्यवस्थोक्ता विष्णुपुराणे (पूर्वादिक्रियाः शुद्धितत्त्वे दर्शयिष्यमाणाः)। "प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु । क्रियन्ते याः क्रिया पुत्रैः प्रोच्यन्ते तान्पोत्तराः । पितृमातृसपिण्डैश्च समानसलिलैस्तथा । तत्सङ्क्रान्तगतैश्चैव राज्ञा वा धनहारिणा । पूर्वा मध्याश्च कर्त्तव्याः पुत्रादारैश्चोत्तराः । दौहित्रैर्वा नरश्रेष्ठ ! कार्याश्चैतत्त्रयेत्तथा । अतोऽन्यानि तु कर्त्तव्या स्त्रीणामप्युत्तराः क्रियाः"। दौहित्रतत्पुत्रयोर्द्वैधहारिणीरिदम् । एवमन्यत्र धनहर्तुः । "यस्यार्थहरः स पिण्डदायी स्यात्" यमोक्तेः । "प्रेतस्य प्रेतकार्याणि अकृत्वा धनहारकः । वर्षाणां शतमे प्रोक्तं तद्धनं प्रभवत्यरेदिति"पृथ्वीचन्द्रोदये व्यासादीक्तेः । मदनरत्ने ह्यन्येऽपि "मत्तमेतन्मतुल्यानां दृष्टिं यत्प्रकीर्तितं"मित्युक्त्वा "अविभक्तस्य

निर्दिष्टा निष्कृतिः पावनी परा । आदेहपतनात्तस्य कुर्यात्पिण्डोदकक्रियाम्" इत्युक्तम् । क्रियानिबन्धे कात्यायनः "न च माता न च पिता कुर्यात्पुत्रस्य लौकिकम् । नाप्यजश्च तथा भ्राता भ्रातृणां तु कनीयसाम्"। पृथ्वीचन्द्रोदये बौधायनः।"पिता आद्यं न कर्त्तव्यं पुत्राणां तु कथञ्चन । भ्राता चैव न कर्त्तव्यं भ्रातृणाञ्च कनीयसाम् । यदि स्नेहेन कुर्वीत सपिण्डीकरणं विना । गयायां तु विशेषेण तस्यायामपि समाचरेत्"। अन्याभावे पित्रादिरपि कुर्यात् ।"उच्छिन्नबान्धवं प्रेतं पिता भ्राताथ वाऽग्रजः जननी वापि संस्कुर्यान्महदेनोऽन्यथा भवेदिति" सुमन्तूक्तेः । ब्रह्मचारिणां तु गुर्वादिविवेके आद्धे "असमाप्नुवतस्यापि कर्त्तव्यं ब्रह्मचारिणः । आद्धं तु मातापितृभ्यां तु तेषां करोति सः"। आद्धं मासिकावृद्धिकादि सर्वं कार्य्यमित्यर्थः । नत्विति निषेधोऽन्यसत्त्वे । यत्तूच्छन्दोगपरिशिष्टे "न त्वजेत्कृतके कर्म्म ब्रह्मचारी स्वयं क्वचित् । न दीक्षणात्परं यत्ते न ब्रह्मोद्वाहतः परम् । पितर्य्यपि मृते नैषां दोषोभवति कर्हिचित् । अयौचं कर्म्मणां न स्यात्त्यागं वा ब्रह्मचारिणाम्" । यच्च याज्ञवल्क्यः "न ब्रह्मचारिणः कुर्युरुदकम्यतिताश्रेति" तदप्यन्यसत्त्वे । अन्याभावे तु ब्रह्मचारिणापि कार्य्यम् पूर्व्वोक्तवृद्धमनुवचनात् । "आचार्य्यपित्रुपाध्यायान् निर्हृत्याऽपि व्रती व्रती । स तदङ्गं च नाम्नायाच्च तैः सह संवसेदिति" तेनैवोक्तेः । "ब्रह्मचारिणः यवकर्मिणोव्रताश्रिवृत्तिः अन्यत्र मातापित्रोरिति" वसिष्ठोक्तेः । अत्रायौचमेकाहं वक्ष्यामः । प्रागुपनयनात्तु पञ्चवर्षोत्तरं सपिण्डीकरणवर्ज्जं षोडशश्राद्धादि सर्व्वं कार्य्यमित्युक्तं देवलाचार्य्येण "असंस्कृतानां भूमौ पिण्डं दद्यात्संस्कृतानां कुशेष्विति" प्रचेतोवचनात् । एतच्चाग्रे वक्ष्यामः । अविभक्तानां विशेषमाह पृथ्वीचन्द्रोदये मरीचिः । "बहवः स्युर्यदा पुत्राः पितुरेकत्रवासिनः । सर्वेषां तु मतङ्कृत्वा ज्येष्ठेनैव तु यत्कृतम् । द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्" । ज्येष्ठस्य कर्त्तव्येऽपि सर्वे फलभागिन इत्यर्थः । तेन ये ब्रह्मचर्य्यपरान्नवर्ज्जनादयः कथिताः संस्कारास्ते सर्वेषां भवन्तीति सिद्धम् संस्कृतिनामध्येयम् तत्त्यागात् । विभक्तानां विशेषमाहोशनाः । "नवश्राद्धं सपिण्डत्वं आब्दान्यपि च षोडश । एकेनैव तु कार्य्याणि संविभक्तधनेऽपि" । लघुहारीतः "सपिण्डीकरणान्तानि यानि श्राद्धानि षोडश । पृथक्तेन हुताः कुर्युः पृथगन्नेन वापि क्वचित् । कर्त्तृं सपिण्डीकरणात् सर्वे कुर्युः पृथक्पृथक्" । मदनरत्ने "विभक्तास्तु पृथक्कुर्युः प्रतिसंवत्सरादिदम् । एकेनैवाविभक्तेन कृते सर्वैस्तु तत्कृतम्" एतेनाब्दिकादिव्यविभक्तानामनियम इति वदन् शूलपाणिः परास्तः"। अयमधिकारिक्रमोदाहरणात्प्रपञ्चितः ।

गौड़देशवासिभिस्तु रघुनन्दनमतानुसारिणी व्यवस्थादृश्यते सा च व्यवस्था शुद्धितत्त्वे तेन दर्शिता यथा व्यासः "ज्ञातचूड़स्तु कुर्वीत उदकं पिण्डमेव च" । एतच्च पुत्रेतरपरम् "असंस्कृतः सुतः श्रेष्ठोनापरोवेदपारगः" इति दायभागधृतात् । अन्यथा सुतत्वेन विशेषोपादानं व्यर्थं स्यात् । आद्येऽनुपनीतस्य मन्त्राधिकारमाह मनुः । "नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते । शूद्रेण हि समस्तावद्यावद्वेदे न जायते"। अभिव्याहारयेत् वदेदिति यावत् स्वार्थे णिच् । तत्र प्रथमतोऽग्निपुत्रः यथाह मरीचिः "मृते पितरि पुत्रेण क्रिया कार्य्या विधानतः । बहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः । सर्वेषामेव मतं कृत्वा ज्येष्ठेनैव तु यत्कृतम् । द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्"। तदभावे यथाक्रमं क्षत्रियपुत्रपौत्रप्रपौत्राः । तथाच विष्णुपुराणम् 'पुत्रः पौत्रः प्रपौत्रो वा तद्वृत्ता भ्रातृसन्ततिः । सपिण्डसन्ततिर्वापि क्रियार्हा रूपजायते"। एतच्च षोडशश्राद्धपर्य्यन्तम् तथाच छन्दोगपरिशिष्टम् "पितामहः पितुः पश्चात् प्रेतत्वं यदि गच्छति । पौत्रेणैकादशाहादि कर्त्तव्यं श्राद्धषोडशम् । नैतत् पौत्रेण कर्त्तव्यं पुत्रवांस्तेत् पितामहः" । सपिण्डीकरणपर्य्यन्तमपृथक्कर्त्तव्यमाह लघुहारीतः 'सपिण्डीकरणान्तानि यानि श्राद्धानि षोडश । पृथक्तेन हुताः कुर्युः पृथगन्नेन वापि क्वचित्" । एवमभावे पत्नी तथाच यमः 'पितुः पुत्रेण कर्त्तव्या पिण्डदानोदकक्रिया । तदभावे तु पत्नी स्यात्तदभावे सहोदरः । भार्य्यापिण्डं पतिर्दद्यात् भर्त्तुर्भार्य्या तथैव च' । इति "अपुत्रस्य पत्न्यभिगामि तदभावे दुहितृगामीत्यादि"विष्ण्वादिवचनेन धनाधिकारश्रुतेः । तदभावे इति प्रपौत्रपर्य्यन्ताभावपरं पार्वणपिण्डदातृत्वेन धनाधिकारित्वेन च तेषां बलवत्त्वात् । 'अपुत्रा स्त्री यथा पुत्रः पुत्रवत्यपि भर्त्तरि । पिण्डं दद्यात् अतस्त्वेव अजमातन्तु पुत्रिणी' इति निर्मूलं समूलत्वेऽपि बालदेयान्तरितपुत्रसद्भावविषयमिति श्राद्धविवेकप्रभृतयः । पत्न्यभावे कन्या । 'अपुत्रस्य तु

वा पुत्रो वैव पिण्डप्रदो भवेत् । तस्य पित्र्यान् दर्शयेत्तामेकाहेनैव निर्वपेत्" इति कात्यायनवचनात् "गोत्रऋक्थानुगः पिण्डः" इति मनुवचनेन दत्ताद्यपेक्षया तस्याबलवत्त्वात् । कन्याभावे यथाक्रमं वा दत्तादत्तादौहित्राः "दत्तानां चाप्यदत्तानां कन्यानां कुरुते पिता । अतर्षेऽहनि नाप्तेषां कुर्वीरन् सुसमाहिताः" इति ब्रह्मपुराणवचनात् । ननु "दुहिता पुत्रवत् कार्य्यान्मातापित्रोश्च संमता । अयौ वस्तदकं पित्र्यमेकोद्दिष्टं सदा तयोः" इति यमवचनात् पुत्रानन्तरमेव दुहितृधिकारस्मृतेः इति चेन्न पत्न्याः प्रथमं धनाधिकारस्मृतेः यथा याज्ञवल्क्यः । "पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा । तत्सुतो गोत्रजो बन्धुः शिष्य सब्रह्मचारिणः । एषामभावे पूर्वेषां धनभागुत्तरोत्तरः" इति । तथा "भ्रातामहानां दौहित्राः कुर्वन्त्यहनि चापरे" । इति ब्रह्मपुराणात् । "पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः । तयोर्हि माता पितरौ संभूतौ तस्य देहतः" । इति मनुवचनेन 'पौत्रदौहित्रसंयुक्ता ये तथा चिरजीविनः । प्रियङ्कराश्च बालानां ते नराः स्वर्गगामिनः" इति विष्णुधर्म्मोत्तरेण पौत्रतुल्यतानिधानाच्च । तेन यथा पुत्राभावे पौत्रस्तथादुहितृभावे दौहित्रः । न च दत्तकन्यादौहित्राभ्यां प्राक्स्वगोत्रत्वात् सोदराधिकार इति वाच्यम् गोत्रबलापेक्षया पिण्डदानादेर्धनसाध्यत्वात् ऋक्थग्राहिणोर्दुहितृदौहित्रयोर्बलवत्त्वात् । अत एव दुहितृधनाधिकारे तद्धनेन स्वतोपकारकरण हेतुरत्नाकरः । "अन्येषामर्थसम्बन्धे धर्म्मसम्बन्ध इष्यते । दुहिता वेति" तदर्थेषु साक्षिकादिना तद्भोगार्थं धर्मसम्बन्धोऽङ्गीकर्त्तव्यमिति । "गोत्रऋक्थानुगः पिण्डः" इति मनूक्तेः । "अमेध्यौ लोकपतितौ जात्यन्धबधिरौ तथा । उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः" । इति मनूक्तानां "पिङ्गाक्षिपतितः षण्ढोयश्च स्यादौपपातिकः । क्लीवस्यापि नैतेऽर्थं लभेरन् क्लेशजाः कृतः" इति नारदोक्तानाञ्च भागानधिकारिणां पिण्डदानानधिकारः । जात्यन्धबधिरौ जन्मप्रभृत्यन्धबधिरौ निरिन्द्रियाः पङ्गुत्वः पौत्रऋक्थकर्म्मानधिकारिणोऽपि स्युरिति रत्नाकरः । तथाच वृद्धयातातपः । "चाण्डालं पतितं व्यङ्गमुन्मत्तं षण्ढकारकम् । सूतिकां सूतिकां नारीं रजस्वां च परिप्लुताम् । ऋक्थक्रयक्रियाहांश्च त्याज्यान् संकल्प्य मानवः । सचेलं सशिरःस्नात्वा तदानीमेव शुध्यति" । व्यङ्गः पाखादिविकलः । व्यङ्गोन्मत्तयोः सदाचारहीनत्वात् अस्पृश्यत्वेनेति प्रायश्चित्तविवेकः । औत्तराधर्मक्रियानधिकारित्वं सदाचारहीनत्वञ्च मूलपुरोवाद्यौचापनयनासमर्थत्वेनेति बोध्यम् । सूतिकां प्रसवकारयित्रीम् । पितृहिट् प्रोषणौर्द्धदैहिकविलुप्तः । औपपातिकः उपपातकैः संसृष्टः । उपपातकैति प्रकाशकारपाठोऽपि सएवार्थः । अपपातित इति पाठे तु राजबधादिदोषेण ब्राह्मण्यैर्यस्य घटापवर्जनं कृतमिति कल्पतरुः । अत्रं याज्ञवल्क्योक्तम् "न ब्रह्मचारिणः कुर्य्युरुदकं पतिता न च । पाषाण्डमाश्रिताश्चान्ये ब्रात्या न विकर्मणः । गर्भभर्त्तृहृच्चैव सुरापाश्चैव योषितः" । पाषण्डं त्रयीबाह्यधर्मम् । स्तेनाः सतत चौर्यरतयः । ब्रात्याः षोडशवर्षपर्य्यन्तमप्राप्तोपनयनाः, विकर्मणः आचरणीयानभिज्ञतया स्वधर्म्मानुष्ठानासमर्थाश्च बोध्या इति "कश्चित् क्षिपति सुतपुत्रोदौहित्रोवा सहोदरः । स्त्रीत्वास्त्रीणि तद्धन हीत्वा तोये विनिःक्षिपेत्" इत्यादिपुराणे क्रमदर्शनादत्रापि दौहित्राभावे सोदरः पूर्व्योक्तयाज्ञवल्क्यवचनेऽध्येयं क्रमोबोध्यः । अत्र ज्येष्ठः कनिष्ठश्चाविशेषात् । "मातुलस्य तथापत्यं" इति छन्दोगपरिशिष्टं कनिष्ठभ्रातृविषयं तयोरभावे तथाविधौ वैमात्रेयौ । "भ्रातृभ्यो भ्राता स्वयं चक्रे तद्भार्य्यां चेन्न विद्यते । तस्य भ्रातृसुतश्चक्रे यस्य नास्ति सहोदरः" इति ब्रह्मपुराणाद्वैमात्रेयस्यापि एकजातत्वेन भ्रातृत्वात् । "देशान्तरस्थश्चौर्यवैरदुष्टानसहोदरान्" इत्यादिछन्दोगपरिशिष्टेन परिवेदने वैमात्रेयस्य भ्रातृप्रसक्तावसहोदरानित्यनेन प्रतिप्रसवाच्च । पितृव्यसुतादौ भ्रातृपदप्रयोगो गौणः । मुख्यत्व बीजिसुतत्वापेक्षया समानसंख्यजनकजन्यत्वमिति । धनिपित्रादि पिण्डहरसद तुः सोदरसुताद् धनिपित्रादिपिण्डलयदातृत्वाद्वैमात्रेयस्य धनाधिकारित्वेन बलवत्त्वाच्च । ततश्च सहोदरइति पूर्व्वोक्तुरोधात् वैमात्रेयपरमपि अन्यथा सहोदराभावे वैमात्रेयसत्त्वे वैमात्रेयसुत धिकारापत्तेः । तेन वैमात्रेयाभावे सोदरवैमात्रेयभ्रातृक्रमवत् सोदरसुतस्तदभावे वैमात्रेयसुतः । तस्माद्भोज्यपिण्डदातृतया प्रथमाधिकारित्वेन बलवत्त्वात् तस्यातिदिष्टपुत्रत्वाच्च । तदभावे पिता । "पुत्रोभ्राता पिता वापि मातृलोगुरुरेवच । एते पिण्डप्रदाश्चेद्याः सगोत्राश्चैव बान्धवाः" इति प्रचेतोवचनात् । "न पुत्रक्ष पिता दद्यात्" इति छन्दोग-

परिगिह्यते भ्रातृपुत्रपर्य्यन्तसङ्गविषयम् । तदभावे माता । "पुत्रोभ्राता पिता वापि" इत्यत्रापिशब्देन मातुः सङ्ग्रहात् । "पितरौ भ्रातरश्चैत्यादौ धनाधिकारे तथा दर्शनात् । अतएव श्राद्धविवेके, पितृरभावे तुल्यन्यायतया मातापीत्युक्तमिति । तदभावे पुत्रवधूः । तथाच यमः "भार्य्यापिण्डं पतिर्दद्यात् भर्त्रे भार्य्या तथैव च । श्वश्वादेव स्नुषा चैव तदभावे द्विजोत्तमः" । अत्रादिपदात् श्वशुरादेरपि परिग्रहः इतरत्र स्नुषात्वाभावात् । द्विजोत्तमदत्त्वात् सपिण्डक इति मैथिलानां पाठः । स्वस्वपदोपात्तसपिण्डविशेषाभावे "अनन्तरः सपिण्डाद्यस्तस्य धनं भवेत्" इति धनाधिकारे तथादर्शनादत्रापि सन्निधितारतम्येन माता पुत्रवधूः पौत्री पौत्रवधूः प्रपौत्री प्रपौत्रवधूः पितामहः पितामही पितृव्यादयः सपिण्डाश्चाधिकारिणः" "पुत्राभावे च पिण्डदाः" इति वक्ष्यमाणवचनात् । यद्वचनस्थमैथिलपाठात् । तदभावे समानोदकाः !"सपिण्डसन्ततिर्वापि" इति वक्ष्यमाणात् । सपिण्डसन्ततिः समानोदकात्तत्वं । तदभावे सगोत्राः "सगोत्रास्वैवेति" "गोत्रक्रक्थातुगःपिण्डः"इत्युक्तत्वात् "एषामभावे सर्व्वेषां समानोदकसन्ततिरिति" वक्ष्यमाणात् । तदभावे मातामहः "दौहित्रा दौहित्रिण्यश्च कुर्वन्त्यखिलं चापरे । तेऽपि तेषां प्रकुर्वन्ति हितीयेऽहनि सर्वदा" इति ब्रह्मपुराणात् । तदभावे मातुलः तदभावे भागिनेयः "मातुलोभागिनेयस्य स्वसीयोमातुलस्य च" इति मातामहीयपाठक्रमात् । तदभावे सन्निधिक्रमेण मातामहसपिण्डाः । तदभावे मातामहसमानोदकाः।"सपिण्डसन्ततिर्व्वापि क्रियाकर्त्तृरूपा जायते । एषामभावे सर्व्वेषां समानोदकसन्ततिः । मातामहस्य पित्रादिना सम्बन्धा ये लक्षणेन वा" विष्णुपुराणात् । तदभावे श्वशुरः तदभावे जामाता "जामातृः श्वशुरास्यकुलेषां तेऽपि च संयताः" इति ब्रह्मपुराणपाठक्रमात् । तदभावे पितामहीभ्राता । "भागिनेयश्चतुर्थानाञ्च सर्व्वेषान्त्वपरेऽहनि । श्राद्धं कार्य्यञ्च प्रथमे ज्ञात्वा ज्ञात्वा तु तत्क्रियाम्" इति ब्रह्मपुराणात् । अपरेऽहनि इत्यनायौचान्तदिनमेवेति मेधः । तदभावे यथाक्रमं शिष्यर्त्विगाचार्य्याः, गौतमेन "पुत्राभावे सपिण्डाः मातृसपिण्डा वा शिष्या वा दद्युः तदभावे ऋत्विगाचार्य्यौ" इत्युक्तत्वात् । तदभावे सकुल्यसपिण्डसकुल्यौ "शिष्याणां तदप्राप्तानामिति" ब्रह्मपुराणपाठक्रमात् । तदभावे एकग्रामवासी । "संघातानामसंतर्पेऽपि कार्य्या प्रेतस्य तत्क्रिया" इति विष्णुपुराणात् तदभावे तद्ग्रामं संगृह्य यः कश्चित् सवर्णः । "उच्छ्रयन्त्वन्ये श्राद्धं कारयेद्वनीपतिः" इति विष्णुपुराणात् । और्द्ध्वदेहिकमधिकृत्य विष्णुपुराणं "ब्राह्मणस्वन्यवर्णानां न करोति कदाचन । कामाल्लोभाद्भयाल्लोकात् कृत्वा तज्जातितामियात्" ।

स्त्रियास्तु यथाक्रमं पुत्रपौत्रप्रपौत्राः विष्णुपुराणे "पुत्रः पौत्रः प्रपौत्रो वा" इत्यविशेषश्रुतेः । तदभावे कन्या ।"अपुत्रस्य च या पत्नी" इतस्रोक्त्यगतलिङ्गाविवक्षया स्त्री पुंसाधारणत्वात् धनाधिकारित्वाच्च । तदभावे दौहित्रः "दत्तानामप्यदत्तानाम्" इत्यत्रापि पितृपदस्य मातृपदोपलक्षकत्वात् । तदभावे दत्ता "दुहिता पुत्रवत् कुर्य्यान्मातापित्रोश्च संस्कृता" इति मनुवचनात् । तदभावे दौहित्रः प्राग्युक्तब्रह्मपुराणे तथा दर्शनात् । "पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्म्मतः । तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः" इत्यनेन यथा पुत्राभावे पौत्रः तथा दुहित्रभावे दौहित्रः इति प्रागेव उक्तत्वात् । "भागिनेयोभागिनेयस्य स्वसीयोमातुलस्य च । श्वशुरस्य गुरोश्चैव सख्युर्मातामहस्य च । एतेषां चैव भार्य्याभ्यः स्नानमाहुः पितृस्वसा । पितृव्यदानन्तु कर्त्तव्यमिति वेदविदां स्थितिः" इति ब्रह्मयातातपवचनेन मातामह्यास्तु साक्षात् दौहित्रेण पितृव्यदानस्य धनाधिकारित्वाच्च । दौहित्राभावे सपत्नीपुत्रः । तस्य पुत्रत्वकरणात् । यथाह मनुः । "सर्व्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत् । सर्व्यास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः" । एकपत्नीनामिति एकः पतिर्यासामिति अत्र सपत्नीपुत्रस्य पुत्रत्वातिदेशात् तत्सम्बन्धेऽपि स्त्रीणां सपिण्डनं मैथिलैरुक्तं तच्च "पुत्रेणैव तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः । पुत्रस्य पुत्रवन्ये भ्रातृपुत्राद्बोधिते" इति बहुप्रकारीतवचने एवकारेणातिदिष्टपुत्रनिषेधात् । अतएवोत्तरार्द्धे भ्रातृपुत्रोपादानं सङ्गच्छते । अन्यथा पुंसां तत्र पुत्रत्वातिदेशात् पुत्रत्वेनैव प्राप्तेः भ्रातृपुत्रोपादानं व्यर्थं स्यात् । तथाह मनुः । "भ्रातृणामेकजातानामेकश्चेत् पुत्रवान् भवेत् । सर्व्वे ते तेन पुत्रेण पुत्रिणोमनुरब्रवीत्" एकजातानामेकपितामहजातानां तथाच "इक्ष्वाकुतिः । यद्येकजातास्तद्भवोभ्रातरः स्युः सहोदराः । एकस्यापि सुते जाते सर्व्वे ते सुनिनोमताः" । एतन्मूलमूलं तदिति चेन्न आदिपदग्राह्येषु "भ्राता वा भ्रातृपुत्रो वा सपिण्डः पितरेव वा ।

सपिण्डक्रियां कृत्वा कुर्यादभ्युदयन्तत:"इति बसुहारीतोक्तेषु न्यायानुपपत्तेः । भ्राता चेति वाग्ग्रहात् पूर्वेषां दौहित्रादीनां तदभावेन प्रधानाधिकारित्वं सङ्गच्छते:। अत एव सपिण्डत्वेनैव भ्रातृतत्पुत्रयोरधिकारसिद्धौ पृथगुपादानं प्राधान्यज्ञापनार्थम् । पुत्रत्वातिदेशफलन्तु पुन्नामनरकनिस्तारः । अतस्तत्सत्त्वे चेतराद्यकरणञ्च । तथाहि "पुन्नाम्नोनरकादुयस्मात्तायते पितरं सुतः । तस्मात्सन्दर्शनेनापि तदुत्पत्तौ यतेत सः" इति मनुवचने पुन्नामनरकत्राणाय पुत्रोत्पादनं विहितम् । तच्च फलं यद्यतिदिष्टपुत्राभ्यां भ्रातृसपत्नीजाभ्यां निष्पन्नं तदा सिद्धे इच्छाविरहात् तदुपायान्तरपुत्रप्रतिनिधीभूतक्षेत्रजादेर्नोपादानम् । पुत्रोत्पादनन्तु तथापि कार्य्यं पुत्रसत्त्वेऽपि पुत्रान्तरेच्छाविधानेन तत्कर्त्तव्यतापतीतेः यथा मत्स्यपुराणम् । "एतच्छ्राद्धन्तु पुत्रायद्यप्येकोगयां व्रजेत् । यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्" । एवमेव कल्पतरुपारिजातशूलपाणिरघुनन्दनोपाध्यायरत्नाकरवाचस्पतिमिश्रादयः । स्त्रीणामपि पुत्रात् पुन्नामनरकनिस्तारणमाहत्वरत्नाकरे यङ्कलिखितौ "आत्मा पुत्र इति प्रोक्तः पितुर्मातुरनुग्रहात् । पुन्नाम्नस्त्रायते पुत्रस्तेनापि पुत्रसंज्ञितः" । पूर्वोक्तबसुहारीतवचने पुत्रेणेति तत्सत्त्वमात्रं विवक्षितम् । "सपिण्डीकरणन्नाम्ना पुत्राभावे न विद्यते" इति मार्कण्डेयपुराणैकवाक्यत्वात् । "यानि चैवादयाद्यानि अपुत्रस्येतराणि च । एकस्यैव तु दातव्यमपुत्रायाश्च योषित:" इति छन्दोगपरिशिष्टेनापुत्रायाः एवाद्यश्राद्धैः प्रेतत्वपरिहारोक्तत्वाच्च । एतत् पत्युरभावे द्रष्टव्यम् । "अपुत्रायां मृतायान्तु पतिः कुर्य्यात् सपिण्डनम् । श्वश्रादिभिः सहैवास्याः सपिण्डीकरणं भवेत्" इति पैठीनसिवचनात् । ततश्च यथा पितौ पुत्रेऽन्येष्वपि सपिण्डयते । एवं पतिसत्त्वेऽपि । अतएव मैथिलैरेवोढायाः सपिण्डनं नास्तीत्युक्तम् तदभावे पतिः । "भार्य्यापिण्डं पतिर्दद्यात्" इति यमवचनात् । "न जायायाः पतिः कुर्य्यादपुत्रायाः क्वचित्" इति छन्दोगपरिशिष्टवचनम् सपत्नीपुत्रपर्य्यन्तबहुत्वविषयम् । पत्न्यभावे स्नुषा "स्नुषादेया स्नुषा चैव" इति यमवचनात् । तदभावे सालिध्यक्रमेण सपिण्डता । यङ्कवचने "तदभावे सपिण्डकाः इति मैथिलपाठात्" । "तदभावे सपिण्डः" इति पूर्वोक्तगोत्रमववचने सामान्यतः श्रुतेश्च । तदभावे समानोदकाः । "सपिण्डसन्ततिर्वैश्वविश्वेभ्यश्च श्रुतेः । तदभावे सगोत्राः । समानोदकसन्ततिरिति वक्ष्यमाणात् । आद्यविवेकोऽप्येवम् । एषामभावे पिता । "दत्तानाञ्चाप्यदत्तानां कन्यानां कुरुते पिता" इत्युक्तत्वात् । तदभावे भ्राता । "पुत्रोभ्राता पिता वापि" इत्यविशेषश्रुतेः । तदभावे यथाक्रमं दायभागोक्तोपकारतारतम्येन. "मातृस्वसागिनेयस्य श्वश्वायोमातुलस्य च । श्वशुरस्य गुरोश्चैव सख्युर्मातामहस्य च । एतेषाञ्चैव भार्याभ्यः श्वश्रूभ्यः पितृसख्या । पिण्डदानन्तु कर्त्तव्यमिति वेदविदां स्थितिः" इति यातापवचनात् भगिनीपुत्रभर्तृभागिनेयभ्रातृपुत्रजामातृभर्तृमातुलभर्तृभिन्नाः पत्न्यभावेन पौत्रादिवत् पिण्डदानतारतम्येन क्रमेणाधिकारिणः । तथाहि तत्पिण्डतत्पुत्रदेयतत्पित्रादिपिण्डत्वयदाहत्वात् भगिनीपुत्रः । तदभावे भर्तृभागिनेयः । पुत्राद्भर्तृदुबलत्वेन तत्स्थानापातिनोऽपि तथैव। बलाबलस्य न्याय्यत्वेन तद्भर्तृदेयपुत्रत्वयपिण्डतद्भर्तृ पिण्डदत्वात् । तदभावे भ्रातृपुत्रः । तत्पिण्डतत्पुत्रदेयतत्पित्रादिपिण्डद्वयदत्वात् । तदभावे जामाता । "मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा । श्वश्रूः पर्य्यायपत्नी च मातृतुल्या प्रकीर्त्तिता" इति दक्षस्मृतिवचनेन मातृष्वस्रादीनां मातृतुल्यत्वाभिधानात् । स्वस्त्रीयादेः सह जामातुः पुत्रतुल्यत्वप्रतीतेः । अतएव तेषां धनभागित्वमाह दक्षस्मृतिः । "यदासामौरसोनास्ति सुतोदौहित्रएव वा । तत्सुतोवा धनं तासां स्वस्त्रीयाद्याः समाप्नुयुः" । धनग्राहित्वेनापि पिण्डदातृत्वमाह मनुः । "गोत्रऋक्थानुगः पिण्डः" इति । तदभावे भर्तृमातृबन्धुभर्तृभिन्नाः क्रमेणाधिकारिणः भ्रातातत्पौत्रपाठक्रमाद्दायोद्वाहात् । प्रातिस्विकानामभावे पितृबन्धुमातृबन्धौ । "पितृमातृसपिण्डेषु समानसलिलेषु च !" इति ब्रह्मपुराणेऽविशेषश्रुतेः । तयोरभावेऽसम्बन्धी द्विजोत्तमः पूर्वोक्तगुरुवचने द्विजोत्तम इति गौड़ीयपाठात् संघातान्तर्गतेऽप्यपीति अविशेषश्रुतेः ।

क्रियाक्रियाकरणमाह विष्णुपुराणम् "दत्तः पौत्रः प्रपौत्रोवा तद्वद्वा दौहित्रसन्ततिः । सपिण्डसन्ततिर्वापि क्रियार्हा नृप ! जायते । एषामभावे सर्वेषां समानोदकसन्ततिः । मातृपक्षस्य पिण्डेन सम्बन्धाये जलेन वा । कुलद्वयेऽपि चोत्सन्ने स्त्रीभिः कार्य्या क्रिया नृप । संघातान्तर्गतैरप्यि कार्य्या प्रेतस्य सत्क्रिया ।

उत्सृष्टवत्योर्ब्रूयाद्वा कारयेदेवमेवोभयोः । पूर्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः । त्रिप्रकाराः क्रियाश्चैतासामासां भेदान् शृणुष्व मे । आदाहदाहांश्चुधादिस्मर्याद्यान्ताश्च याः क्रियाः । ताः पूर्वामध्यमासंज्ञिकोद्दिष्टसंज्ञिताः । प्रेते पितृत्वमापन्ने सपिण्डीकरणादृते । क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते तान्परोत्तराः । पितृमातृसपिण्डैश्च समानसब्रह्मचारिभिः । संघातान्तर्गतैर्वापि राज्ञा वा धनहारिणा । पूर्वक्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः । दौहित्रैर्वा भरतश्रेष्ठ ! कार्याश्चत्तत्रयैस्तथा । मृताहनि तु कर्त्तव्याः स्त्रीणामप्युत्तराः क्रियाः । प्रतिसंवत्सरं राजन् ! एकोद्दिष्टं विधानतः" । आदाहेति दाहावधेरग्नौकरणविहितवार्ष्यायुधादिस्मर्याद्यान्ता या पूर्वाः । मासिमासीत्यादाद्याब्दादिसपिण्डनान्तप्रेतक्रियोपलक्षणम् । सपिण्डनोत्तराः पार्वणादिक्रिया उत्तराः । अतः पुत्रादिसपिण्डादयः पूर्वाः क्रिया अवश्यं कुर्युः । मध्यमक्रियायामनियमः । उत्तरक्रियायां पुत्रादयो भ्रातृसन्ततिपर्य्यन्तानियताः । आदाहविवेकेऽप्येवम् । दौहित्रैर्वेति वाशब्दः समुच्चयार्थः तेन दौहित्रोऽप्युत्तरक्रियायां नियताधिकारी । दौहित्रतनयैरिति पुत्रिकापुत्रविषयमिति कल्पतरुः । कर्त्तृप्रकरणात् स्त्रीणामिति "वा कर्त्तरि कृत्ये" इति कर्त्तरि षष्ठी । उत्तरक्रियायां प्रतिसंवत्सरमेकोद्दिष्टविधाननियमात् । न पार्वणश्राद्धादौ स्त्रीणामधिकारः । मार्कण्डेयपुराणम् "सर्वाभावे स्त्रियः कुर्युः स्वभर्त्तुः स्नानमन्नकम् । तदभावे च पतिः कारयेत् स्वकुटुम्बवत् । स्त्रीणामप्येवमेवंतदेकोद्दिष्टसटाकृतम् । मृताहनि यथान्यायं नरवा यदुदितोदितम्" । स्त्रियोऽनुव्यञ्जनाद्यपरिणीता वेति श्राद्धविवेकः । सव्यञ्जनाद्याः पुत्रपौत्रपर्य्यन्ताभावएव विधानात् । स्त्रीणामिति तु संप्रदानपरम् । एवमेवामन्नकमिति श्राद्धविवेकः । अत्र स्त्रियश्चत्वारिंशदपरिणीतापरत्वव्याख्यानात् स्त्रीणां सन्ततिनिषेधोऽपि ततसंप्रदानकश्राद्धएवावगम्यते । नतु स्त्रीजातसंप्रदानके । एतच्च विप्रेतरपरं तस्य क्षौनवर्षश्राद्धनिषेधात् । कल्पतरौ तु स्त्रीणामप्येवमिति सम्बन्धेन स्त्रीणामेतत् कर्त्तव्यमिति एतद्व्याख्याने स्त्रीसंप्रदानकश्राद्धे स्तुतरां मन्त्राः पाठ्याः । याज्ञवल्क्योऽपि समानकमेकोद्दिष्टं सपिण्डीनश्राद्धात् । एतत् सपिण्डकरणमेकोद्दिष्टं स्त्रियाश्चापि दृष्टत्वेन स्त्रियाश्चापि तथैवेत्युक्तम् । "मातुः सपिण्डीकरणं पितामह्या सहोदितम् । यथोक्तेनैव कल्पेन पुत्रिकायाश्च नेतरत्" इति छन्दोगपरिशिष्टेनापि यथोक्तेनैव कल्पेनेत्यनेन मन्त्रादिकमतिदिष्टम् । व्यवहारोऽपि तथेति ।

तदयसंक्षेपः । ज्येष्ठपुत्रकनिष्ठपुत्रपौत्रप्रपौत्रापुत्रपत्नीकन्यासमर्थपुत्रयुक्तपत्नीकन्यावाग्दत्ताद्दत्तकन्यादौहित्रकनिष्ठसहोदरज्येष्ठसहोदरकनिष्ठवैमात्रेयज्येष्ठवैमात्रेयकनिष्ठसहोदरपुत्रज्येष्ठसहोदरपुत्रकनिष्ठवैमात्रेयपुत्रज्येष्ठवैमात्रेयपुत्रपितृमातृपत्नीबधूपौत्रीपौत्रबधूप्रपौत्रीप्रपौत्रबधूपितामहपितामह्यौपितृव्यादिसपिण्डसमानोदकसगोत्रमातामहमातृष्वसृभागिनेयमातृपक्षसपिण्डतत्समानोदकासवर्णभार्य्याऽपरिणीतस्त्रीश्वशुरजामातृपितामहीभ्रातृगुरुव्यत्विगाचार्य्यमित्रपितृमित्रदौहित्रकन्यामातृवासरुद्दौहित्रवेतनसजातीयाः अष्टचत्वारिंशत्प्रकाराः क्रमेणाधिकारिणः ।

स्त्रियास्तु ज्येष्ठपुत्रकनिष्ठपुत्रपौत्रप्रपौत्रकन्यावाग्दत्तादत्तादौहित्रसपत्नीपुत्रपतिश्वशुरसपिण्डसमानोदकसगोत्रपितृभ्रातृभागिनेयभ्रातृपुत्रजामातृभर्त्तृमातृष्वसृभर्त्तृपितृसमानोदकपितृबंधुमातृसमानोदकमातृबंधुद्विजोत्तमासंतुर्विंशतिप्रतिकाराः" इति

अथाद्दिकमाद्धकर्मैकोद्दिष्टे विशेषः आ० त० निर्णीतः यथा गोभिलः । "अतऊर्द्धं संवत्सरे संवत्सरे प्रेतायान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यादिति" । अतऊर्द्धं सपिण्डीकरणान्नाद्धनिमित्तादाद्यसंवत्सरादूर्द्धं संवत्सरे संवत्सरे प्रतिवर्षं यस्मिन्नहनि मृतस्तस्मिन्नहनि मृताय दद्यात् । व्याघ्रः । 'प्रतिसंवत्सरञ्चैवमेकोद्दिष्टं मृताहनि" । एतेन सपिण्डीकरणापकर्षे आद्यसंवत्सरेऽपि मृताहे श्राद्धान्तरं कर्त्तव्यमिति मैथिलोक्तं हेयम् । व्यक्तमाह हेमाद्रिधृतवचनम् । 'पूर्णे संवत्सरे श्राद्धं षोढ्यं परिकीर्त्तितम् । तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते" । अत्र पूर्णसंवत्सरक्रियमाणश्राद्धादयोभयनिर्व्याकृतयापक्षत्वसपिण्डीकरणश्राद्धादयुभयनिर्व्याकृतो न पूर्णसंवत्सरे आब्दिकान्तरम् एवं पञ्चदशश्राद्धेष्वुह्यम् । अतश्चपुराणम् "ततःप्रभृति संक्रान्तावुपरागादिपर्व्वसु । त्रिपिण्डश्चाचरेत् श्राद्धमेकोद्दिष्टं मृताहनि" । ततः प्रेतत्वपरीहारात् त्रिपिण्डं नैपुरुषम् । निरूपपदमृताहशब्दः मृतसम्बन्धिमासपक्षतिथिविशेषपरः । उपपदात्तु क्वचित्तिथिविशेषपरः । यथा मृताहे प्रतिमासम् वर्ष्यादिश्राद्धे । यद्वः "सपिण्डीकरणादूर्द्धं वत्सरम् प्रदीयते । तत्र तत्र तयम्

कुर्यात् वर्जयित्वा मृताहनि । अमावस्यां त्रयो यस्य प्रेतपक्षेऽथवा पुनः । सपिण्डीकरणादूर्ध्वं तस्योक्तः पार्व्वणो विधिः" । त्रयं सम्प्रदानानां त्रयं कुर्यात् त्रिभ्यो दद्यादित्यर्थः । मृताहपर्य्युदस्तानि देवतत्वस्य प्रतिप्रसवमाह अमावस्यामिति प्रेतपक्षोऽत्र पितृपक्षः अश्वयुक्कृष्णपक्ष इति यावत् न तु कृष्णपक्षमात्रं कृष्णपक्षस्याऽपरत्वेऽमावास्यापदवैयर्थ्यापत्तेः। पितृपक्षं विशेषयति हेमाद्रिमाधवाचार्य्यधृतं नागरखण्डम् 'नभोवाश्व नभस्योर्वा मलमासो यदा भवेत् ! सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः" । अत्र श्रावणभाद्रयोरन्यतरस्य मलमासत्वे आषाढ्यपेक्षया सप्तमपक्षस्य पितृपक्षत्वम् । अत्र मृतस्यैव प्रेतपक्षमृतत्वं न तु मलमासभाद्रकृष्णपक्षमृतस्य । ततश्च तत्र मृतस्य वर्षान्तरेऽश्वयुक्कृष्णपक्षेऽपि तच्छ्राद्धकरणेन न पार्व्वणं किन्त्वेकोद्दिष्टमिति । अत्र पार्व्वणोविधिः पार्व्वणेतिकर्त्तव्यतैकोद्दिष्टविधिरिति नव्यवर्द्धमानप्रभृतयः । तत्र पूर्व्ववचनोक्तपौरुषिकस्य मृताहे पर्य्युदस्तस्य पार्वणो विधिरित्यनेन प्रतिप्रसवात् तस्मात् सदैवैकोद्दिष्टं त्वपौरुषिकं तत्तु षाट्पौरुषिकं "कपूरसमन्वितं सक्तून् तथाद्यं श्राद्धषोड्शम् । प्रत्याब्दिकञ्च मेषेषु पिण्डाः स्युः षड्तिस्थितिः" इति छन्दोगपरिशिष्टवचनेन प्रत्याब्दिकव्यतिरेकेण षट्संख्यानियमात् । एवममावास्यादिमरणनिमित्तेन मातरपि प्रत्याब्दिकं पार्व्वणविधिनैव 'अपुत्रा ये मृताः केचित् स्त्रियोवा पुरुषाश्च ये । तेषामपि च दातव्यं स्यादेकोद्दिष्टं न पार्व्वणम्" इति आपस्तम्बवचने अपुत्रा इति विशेषणोपादानात् सपुत्राणां पार्व्वणाभ्यनुज्ञानात् । एतच्च मात्रादितिथयदैवतं कार्य्यम् । "मातरं पितामहीं प्रपितामहीञ्च पूर्व्ववत् ब्राह्मणान् भोजयित्वा" इत्यन्वष्टक्यायां तथादर्शनात् अवसानदिनमित्तत्वेन पार्वणविधिना छन्दोगैरपि मात्रादितिकायां श्राद्धं कर्त्तव्यं "न ह्येकस्मिन् पृथग्दद्यादवसानदिनाहते" इति छन्दोगपरिशिष्टवचने विशेषतः प्रतिप्रसवात् । एवं सपिण्डीकरणेऽपि । एतच्च मृताहपार्व्वणं मातापित्रोरेव । तथाच हेमाद्रिधृतं कालायनवचनम् । "सपिण्डीकरणादूर्ध्वं पित्रोरेव हि पार्व्वणम् । पितृव्यभ्रातृमातृणामेकोद्दिष्टं स दैव तु" । मातृपदं सपत्नीमातृपरम् । सपत्नीमातृत्वञ्च मातृपदस्य राजदन्तादित्वात् परनिपातः । ततश्च वाक्ये मातृसपत्नीति न प्रयोज्यं किन्तु सपत्नीमातरित्यादिकम् । एवं चाग्निकौरणसंज्ञकाभ्यां मृताहे पार्वणं कर्त्तव्यम् । 'औरसक्षेत्रजौ पुत्रौ विधिना पार्वणेन तु । प्रत्यब्दमेव कर्त्तव्यमेकोद्दिष्टं सुता इव' इति जाबालिवचनस्य "यत्र यत्र प्रदातव्यं सपिण्डीकरणात् परम् । पार्वणेन विधानेन देयमग्निमता सदा" इति मत्स्यपुराणवचनस्य चैकवाक्यत्वात् । उद्यता च 'प्रत्यब्दं दर्शवच्छ्राद्धं साग्नि कुर्वीत वै द्विजः । एकोद्दिष्टं सदा कर्य्यादग्निः श्राद्धदः सुतः" । अत्र प्रागुक्तयुक्त्या प्रेतश्राद्धस्य एकोद्दिष्टत्वाभिधानात् सांवत्सरिकश्राद्धे सहैकोद्दिष्टपदसत्त्वं तत् प्रेतश्राद्धधर्म्मत्वाद्दित्वार्थम् । ततश्च योग्यत्वादेकार्य्यादिलाभ. न च यथा प्रेतश्राद्धे पितृषष्ठ्यस्थाने प्रेतपदोक्तः तथात्रापीति वाच्यं सांवत्सरिके प्रेतत्वाभावात्तत्राविधानानुप्रपत्तेः । एवं प्रतिसांवत्सरिकश्राद्धे सम्बन्धार्थकपदं आमी:प्रार्थनं मेषभोजनञ्च कर्त्तव्यम् ।

रजस्वलायां विशेषयति गौतमः 'अप्रजा तु यदा भार्य्या सम्प्राप्ते भर्त्तुरार्त्तवे । रजस्वला भवेत् सा तु कुर्य्यात्तत्पञ्चमे दिने' । कर्य्याच्छ्राद्धमिति शेषः । यत्तु श्राद्धचिन्तामणौ "एकोद्दिष्टं त्रैवर्णिकेन सिद्धान्नेन जर्त्तव्यम् । "एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा क्वचित् । अभावे पाकपात्राणां तदङ्गः सक्तुपोषणैः" इति कण्वशातातपवचनात् पाकपात्राभाव. पाकसामग्र्यभावोपलक्षणं तदापि नामश्राद्धं किन्तूपोषणमेव श्राद्धस्थानीयमित्यर्थः । स्वयमित्यभिधानादपाटवादिनापि अन्यद्वारा कारयितव्यमु अतएव उपवासेनैव श्राद्धस्थानीयेन तदकरणप्रायश्चित्तेन वा कृतकृत्यतया श्राद्धविघ्नदोषादिवचनादपि नैकादश्यामनुष्ठानमिति" तत्र पितृप्रेरणातत्वेनैकादश्यां तदनुष्ठानस्य युक्तत्वात् । अन्यथा षोड्शश्राद्धाधिकारिणः कदाचित्तथात्वे 'यस्यैतानि न दीयन्ते प्रेतश्राद्धानि षोड्श । पिशाचत्वं ध्रुवं तस्य दत्तैः श्राद्धशतैरपि" इति यमवचनेन षोड्शश्राद्धाभावे प्रेतत्वपरिहारो न स्यात् । तस्मादुपवासेन श्राद्धार्थः किन्तु तदानीन्तनाकरणप्रायश्चित्तार्थः यथा स्वकाङ्क्षाकृतसंस्कारे प्रायश्चित्तं कृत्वा कालान्तरे तत् करणं तथात्रापि तद्दिने उपवासं कृत्वा एकादश्यां श्राद्धं कर्त्तव्यमिति । एकोद्दिष्टान्यद्वारा कार्य्यमित्यत्रापि गोत्रजेतरत्वेन विशेषणीयं 'न कदाचित् सगोत्राय श्राद्धं कार्य्यमगोत्रजैः' इति प्रेतश्राद्धे ब्रह्मपुराणात् । अत्र हि सगोत्रजस्य साक्षात् कर्त्तृत्वं निषिध्यते सगोत्रायेत्यस्यापत्तेः तस्मादगोत्रजैर्द्वारभूतैः सगोत्राय श्राद्धं न

कार्य्यमित्यर्थः । तथाच पर्य्युदासपक्षे गोत्रजद्वारा कारयि तव्यमिति शुध्यक्षमेव प्रसज्यपक्षे तु अगोत्रजविशेषणस्वरसात् गोत्रजलाभः । प्रेतश्राद्धधर्म्माधिकारात् सांवत्सरिकमपि तथेति श्राद्धविवेकः । कल्पतरुरत्नाकरयोस्तु स्वगोत्रावेति पठितं स्वमात्मायं गोत्रं यस्य स स्वगोत्रः विद्यमानगोत्रइत्यर्थः । यस्मै श्राद्धं कर्त्तव्यं तस्य स्वगोत्रजे विद्यमानेऽन्यगोत्रजेन संघातान्तर्गतेन तेन श्राद्धं न कारयितव्यमिति व्याख्यातञ्च । एतन्मतेऽपूढदुहितृपुत्रादीनामसगोत्रत्वेऽपि न निषेधः । वस्तुतस्तु तत्पाठेऽपि कर्म्म धारयामेत्यया बहुव्रीहेर्जघन्यत्वात् स्वमात्मीयञ्च तत् गोत्रञ्चेति तच्च अन्यगोत्रजद्वारा श्राद्धं न कार्य्यमित्यर्थः । अतोबहुव्रीहीतत्वचने स्वयंपदं स्वगोत्र परम् । अन्यथा ब्रह्मपुराणोक्तागोत्रजपदवैयर्थ्यापत्तेः । एवञ्च भविष्यपुराणप्रभासखण्डयोः "मृताहनि पितुर्यस्तु न कुर्य्यात् श्राद्धमादरात् । मातुश्चैव वरारोहे ! वत्सरान्ते मृताहनि । नाकस्थस्य महादेवि ! पूजां गृह्णाति नोहरिः" । मरीचिः । "पतिताऽग्निनिर्मूर्खास्त्रियोऽथ ब्रह्मचारिणः । मृताहं समतिक्रम्य चाण्डालेष्वभिजायते" । इत्याभ्यां कालमाधीयधृताभ्यां वचनाभ्यां सांवत्सरिक श्राद्धस्य मृताहकर्त्तव्यत्वेनावश्यकत्वात् भविष्यन्मृताहे स्वयं कर्त्तव्यत्वसम्भावनारहितेन मृताहात् पूर्वकालेऽपि प्रतिनिधायते । 'प्रक्षिप्याग्नि खदारेषु परिकल्प्यर्त्विजं तथा । प्रवसेत् कार्य्यवान् विप्रोहव्यैव न चिरं क्वचित" इति कन्होगपरिशिष्टोक्तन्यायेन प्रातर्होमप्रतिनिधिवत् । एवं सति प्रतिनिध्यकरणएव एकादश्यां क्रियते । नच पाकस्याङ्गत्वेन प्रधानतिथिकर्त्तव्यतानियम इति वाच्यम् । 'प्रतोषवासनियमे घटिकैका यदा भवेत् । सा तिथिः सकला ज्ञेया पित्रर्थं चापराह्णिको" इति वचनेन मुहूर्त्तमात्रलाभेऽपि कर्त्तव्यतोपदेशात् तदानीं पाके तदसम्भवात् । 'एवन्तर्दाच्चाङ्गभोजनेऽपि न तद्विधम इति" । एतच्च पुनर्दुहितृनित्य प्रागुक्तवचनेभ्यः । मृतपितृकपौत्रस्यापि तथा । "मृतमातुस्तु यः पत्न्यामुत्पत्तिर्यो प्रतिष्यति । "यावत्स्करोति पौत्रोऽपि एकमुद्दिश्य दापयेत्"प्रचेतोवाक्यात् बहुव्रीहीतवाक्येन द्विजानां सिद्धान्तेनैवैकोद्दिष्टकरणविधानात् तत्पाकेधिकारिविशेषोनिरूप्यते । तत्र आ० त० देवलः "तत्रैवान्नमितोदाता प्रातः स्नातः सहाक्षरः । आरभेत नवैः पात्रैरन्नाद्यं सयवान्वयः" । अत्र सयवान्वय दत्यनेन सपिण्डानामपि पाकाधिकारः इति गौड़ाचारः । नि० सि० विशेष उक्तः । शेषं आश्वला० "समानप्रवरैर्मित्रैः सपिण्डैश्च गुणान्वितैः । ज्ञातोपकारिभिश्चैव पित्रर्थं प्रयतेत" । व्यासः "महिला चैव सुस्नाता पाकं कुर्यात् प्रयत्नतः । निष्पन्नेषु च पाकेषु पुनः स्नानं समाचरेत्" पृथ्वीचन्द्रोदये ब्राह्मे । "रजस्वलाञ्च पापण्डां पुंश्चलीं पतितां तथा । त्यजेच्छूद्रां तथा वन्ध्यां विधवाम् चान्यगोत्रजाम् । व्यङ्गकुष्ठां चतुर्थीञ्च स्नातामपि रजस्वलाम् । वर्ज्जयेच्छ्राद्धपाकार्थमात्मपित्रवं गजाम्" स्मृतिसारे "न पाकं कारयेत् पुत्रीमन्यां वाप्यसगोत्रजाम् ! स्नातवन्ध्यां पुंश्चलीं च गर्भिणीञ्चैव दुर्मुखाम्" ।

एकोनचत्वारिंशत् स्त्री एकेनोना चत्वारिंशत् । (अनचक्षिय) १संख्यायां २ततस्संख्यान्विते च एवम् एकोनविंशत्यादयोऽपि एकेनोनतत्संख्यासंख्येययोः स्त्री ।

एकौघ पु० एकः अविच्छिन्नओघः प्रवाहः । अविच्छिन्नप्रवाहे "एकौघेन स्वर्सुद्धिर्भवन्तः" माघः ।

एज कम्पने भ्वा० आत्म० अक० सेट् । एजते ऐजिष्ट एजांबभूव आस चक्रे । एजकः एजितव्यः एजिता । एजितः एजमानः एजनम् णिच् । एजयति जनमेजयः । "शुद्धमन्नमत एजयतेऽक्षिणी मे" भाग० ५,२,१५ । वेदे गणव्यत्ययः । "एजतु दृषदाश्वो गर्भः" यजु०,२८ अथाश्व मध्यमेजतु" २१,२७ शुष्का विद्धा एजतो गोपक" २१,२८ । "उदेजति पतति यस्य तिष्ठति" अथ० २०८ ११,१ । "सुखेन हरिणिरेजति" ऋ० १,१०,२ उदञ्जुक्ते जन्यन्तरा वा एतदाहवनीयम्" श० ब्रा० १,५,१,२५ क्वचिल्लोके तथा । "शतान्यमीतिरष्टौ च सहस्राणि च विंशतिः । सर्पाणां प्रयुता यान्ति धृतराष्ट्रोऽयमेजनि" भा० आ० ८० अ० 'त्वत्तः परं नापरमप्यनेजदेजच्च किञ्चिद्धु व्यतिरिक्तमस्ति" भाग० ७,२,२० । बलीपलित एजत्कः" भाग० ६,९,४२, एजत्कः कम्पमानगीर्भः" अप+अपगमने एजिः परस्मैपम् अपेजते । क्वचिदन्यपूर्वत्वमर्थेऽपि । "अपेजते शूरो अस्तेव शत्रून्" ऋ० ६,६ ४, २ "शत्रून् अपेजते अपगमयति भा० । उद्+उर्द्ध-गतौ उदेजते । "उदेजत प्रजापति र्हंसा शुक्लेव वालिनी अथ० ४,४,२, "उदेजयान् भूतगणान्न्यमेधीत्" भट्टिः । प्र+प्रकर्षचलने परस्मैपम् प्रेजते । सम्+सङ्गतौ नियमेन चलने 'एवेदेतु द्यून् किरण समेजात्" ऋ० १०, २७,५ । 'समेजात् नियमेन प्रयाति" भा० ।

एज दोप्तौ भ्वादि० पर० अक० सेट्। एजति ऐजीत्। एजाम्बभूव आस चकार। एजनम्। [घुटि" अच०१२,१,१८।

एजथु पु० एज-बा०भावे अथु। कम्पे "मरुतां वेग एजथुर्वेपथुः"

एजय त्रि० एज-णिच्-अच्। कम्पके जनमेजयः अनङ्गमेजयः अरिमेजयः विश्वमेजयः।

एजि त्रि० एज-इन्। वातरोगयुक्ते तदीयपक्षे कुर्वा० अच्। ऐज्य तदपत्ये पुंस्त्री।

एज्य त्रि० आ+यज-कर्म्मणि क्यप्। सम्यग्यजनीये "आयजतामेज्या इव इति प्रजाया इवैता एवैतद्यावजूकाः" शत०ब्रा० १७,२,१५।

एठ वाधने भ्वादि० आत्म०अक०सेट्। एठते ऐठिष्ट एठाम्बभूव आस चक्रे। एठनम् एठितः। वाधनमत्र याच्ञा

एड पंस्त्री इड-स्वार्थे अच् डस्य डः। १मेषे "चैडवराड्डेपूद्धारा प्राचीदं विशुरिति" कात्या० २५,४,१८। स्त्रियां जातित्वात् ङीष्। २बधिरे त्रि०। एडमूकः।

एडक पुंस्त्री० इड-स्वार्थे कन् डस्य डः। १वत्सजाते, २पृथुग्रीवे मेषे ३मेषमात्रे च जातित्वात् स्त्रीत्वे अजादित्वात् टाप् क्षिपकादि० नात इत्वम् एडका। एड इव प्रतिकृतौ कन्। मेषसदृशे दक्षिणापथप्रसिद्धे ४पशुभेदे। वह्निने पत्निसंघाय तथा पशुगवेडकम्" भा०व०१४२अ०। तस्येदम् अण्। ऐडक तत्संबन्धिनि त्रि० स्त्रियां ङीष्। "अनेडकीकृष्णाः प्रत्ययः" कात्या० ५,१,७; एडको जात दक्षिणापथे मेषाकृतिः पशुः तस्येमाः ऐडकाः" कर्क०। "तयोर्मेधे मेध्यां च यद्यनेडकीकृष्णां विन्देत ताः प्रक्षिप्य निर्मन्थेत्" शत०ब्रा०३,५,२,१५, एडकदृवाचरति क्यच् एडकीयति उपसर्गस्यात्वात् परस्य वा परत्वम् उभे(पै)डकीयति

एडगज पु० एडोमेष एव गज इव भक्षकत्वादस्य। (दादर्इन) चक्रवर्दे दद्रुघ्ने वृक्षे अमरः। [यक्ष्मरक्षिते।

एडमूक त्रि० श्रुतिरहितएडोबधिरश्चासौ मूकः। वाक्श्रुतिरहिते

एडु(डू)क न० ईड-(ज)उक उलूका० नि० गुणः। १अन्तर्म्मर्म्मास्थियुक्ते २अन्तस्सकठिनद्रव्ययुक्ते च कृष्णतभित्तिमात्रे च। एडूकच्छिन्ना पृथिवी न देवयष्टभूषिता" भा०व० १०। तस्य पुत्वमपि "एडूकान् पूजयिष्यन्ति वर्ष्मविघ्नानि देवताः" भा०व० १६०अ०। स्वार्थेऽण च। ऐडूकमपि वा०श्लोकः एडोकमपि तत्रैव द्विरूपकोषः।

एण पुंस्त्री इ-ण तस्य णत्वम्। कृष्णवर्णे मृगे। स्त्रियाम् ङीष्। "इण्ण जनप्रवादिभिर्दुरेणभावैः" रघुः। "अष्टावेणस्य मांसेन रौरवेण नवेन तु" मनुः। तस्य छन्दोक्तम् छन्दोम० "अन्तर्दोमाणवोत्तेय एणः कृष्णमृगः स्मृतः। बहुगौरस्तुजः प्रोक्त एवरः श्वेत उच्यते"। "तं त्वेणकृष्णकं कृष्णं स्रोतसातुल्यमानसम्" भाग०५,८,८ "एणकृष्णकं मृगशावकम्" श्रीधरः। एणया क्रीतम् "एणया ठञ्ठक्। पा०ठञ्। ऐणेय एणीक्रीते त्रि०। एणेन क्रीतमित्यर्थेण। ऐण तत्क्रीते त्रि०। स्वार्थे कन्। एणक तत्रैव यद्धरत्ना०। [कारा०।

एणतिलक पु० एणतिलकमिव चिह्नं यस्य। मृगाङ्के चन्द्रे

एणभृत् पं० एणं बिभर्त्ति भृ-क्विप् दैत०। चन्द्रे तस्य मृगाङ्कत्वात् तथात्वम्।

एणीपचन न० एणी पच्यते अत्र पच-आधारेल्युट् "एणीपाकाधारे देशभेदे स्त्रीपशोरबध्यत्वेऽपि तद्वधविधिनिषेधसङ्कुचितप्रवृत्तिकत्वात्तथात्वम्। तत्रभवः एकञ्। एणीपचनीय तद्देशभवे त्रि० [एणीपादाकारपादयुक्ते।

एणीपद त्रि० एणाः पादाविव पादावस्य अच् नि० षट्पादः।

एत पु० इण-तन्। १अर्च्चुरवर्णे। २तद्वति त्रि०। तोपधवर्णवाचित्वात् स्त्रियां ङीप् तस्य नच। "स्त्रेण्याः शस्त्र्याः" श्रुतिः "सैलोदवएणोऽग्नत एण्योसैल्याः" यजु० २४,८। वर्णवाचिनि एते शब्दे "वर्णोवर्णेनेते" पा० एतशब्दपर्य्युदासात् तत्पुरुषे पूर्व्वपदं न प्रकृत्या। ऋणेतः शुक्लेत इत्यादौ न प्रकृतिस्वरः। आ+इण-कर्त्तरि क्त। १आगते त्रि०। "कया मती कुत एतास एतेऽर्चन्ति" ऋ०१,६५,१। "एतास आगताः" भा० अङ्गो भिरेता उपयुजमहे" ऋ०१,६६,५। "एतानागन्तून्" भा०

एतग्व पु० एतस्यैऽग्वः पृषो०। १चित्रवर्ष्मणि। "एतग्वा चिद्ध एतया युयोजते हरी" ऋ०८,७०,७। "एतग्वा एतवर्ष्मादेवाग्नौ" भा०। "पिपर्त्त्येतग्वा चिद्ध सुयुजा युजानः" ऋ० ७०,७,२। २अश्वमात्रे निघ०।

एतद् त्रि० इण्-अदि तुक् च। बुद्धिस्थे समीपवर्त्तिनि "इदमस्तु सन्निकृष्टं समीपवर्त्ति चैतदो रूपम्। अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्" इत्यमरोक्तेः समीपवर्त्तिबुद्धिस्थोपस्थितधर्म्मावच्छिन्ने एतदो वृत्तिः। क्रिया विशेषणत्वेऽस्य स्त्रीत्वता "न वा उ एतन्मियसे" ऋ० १,१६२,२१। अस्य सर्व्वनामकार्य्यम्। एते एतस्मै एतस्मात् एतेषाम् एतस्मिन् एतस्या एतासामित्यादि। "एते वयमनी दाराः" कुमा०। "देवा एतस्मादबिभ्यत् पूर्व्वे" १०,१००,१४। इव वै प्रथमः कल्पः" श्रुतेः। "एतस्मि-

न्तरे देवी" "देवीभा० "एतान् महाराज ! विभेषधर्मान्" भा० त० पुरा० । "एषा तेऽभिहिता सांख्ये" "एतत्ते सर्वमाख्यातम्" गीता । अनयौ तु "द्वितीयाटौस्ङैनः" पा० एनम् एनौ एनान् एनेन एनयोः । "एनोनिहत्तेन्द्रियवृत्तिरेनम्" रघुः । "महाघनोमहाभागा विद्वन्नमिह वैरिणम्" गीता स्त्रीत्वेऽपि अनयौ एनादेशः । इदं कुलं शोभते एनत्पश्य । परिभाषे तु आदन्तादेशश्च । एतावत् एतत्परिमाणे त्रि० "एतावानेव पुरुषोयज्जायात्मा प्रजेति ह" मनुः "किं वेतावन्मात्रमुपजानीत" शत० ब्रा० १,६,१,४ । "एतावदुक्त्वा विरते मृगेन्द्रे" रघुः "एतावता नन्वनुमेयशोभि" कुमा० स्त्रियां ङीप् । "एतावती महिमा स बभूव" ऋ० १०,१२५,८ । एतदि दम-किन् कुत्व टक् । आदन्तादेशः । एतादृश् एतादृक्ष एतादृश एतत्तुल्यदर्शने त्रि० तत्र किमनत्र भवति पदान्ते च चकः "एतादृक्प्रकृतयः कृतः" सा० द० । टगन्तस्य स्त्रियां ङीप् । "अस्थाने पततामनेव महतामेतादृशी खादुगतिः" उद्भटः । तस्येदमित्यर्थे ञ । एतदीय एतत्सम्बन्धिनि त्रि० । एतदात्मकः मयट् एतन्मय एतदात्मके त्रि० । परिमाणे मात्रच् । एतन्मात्र एतत्परिमाणे त्रि० स्त्रियां ङीप् । दिग्देशकालवस्तुनः क्रमात् प्रथमाद्यन्तस्यैतच्छब्दस्यार्थे त्रल् तसिच् । एतत्र एतस् प्रथमाद्यर्थयुक्तैतच्छब्दार्थदिगादौ अव्य० । अव्यादेशे "एतदोऽत्र तसोस्तसौ चानुदात्तौ" पा० उक्ते अथादेशे अत्र अतः इत्येवेति भेदः । [गतित्वात्तथा ।

एतन पु० आ+एण्-तन । निश्वासे क्षेमच० । निश्वासस्य सन्तत

एतर्हि अव्य० इदम्+काले र्हिल् "एतेतौ रथो" पा० एतादेश । अस्मिन् काले इत्यर्थे "अथ यो ह्यमेतर्ह्यग्निः स भोषा निलिल्ये" शत० ब्रा० १,२,१,१ । "एतर्हि खलु वा एतद्यज्ञस्य" तैत्ति० ।

एतश पु० इण्-तशन् । १ब्राह्मणे उज्ज्व० २अश्वे निघ० । "येन हविषादेतशो मनुष्यति" ऋ० १०,५२,६ । "यत्तेतशोऽभिधीयसे" यजु० ४,१२ । "सजूः सूर एतशेन" १२,७४ । एतशेनाग्नेनेति" वेददी० "उभे चक्रं न वर्त्येतशस्य" ऋ० ८,६,१८ ।

एतशस् त्रि० इण्-तसुन् । १ब्राह्मणे २अश्वे च ।

एदिधिषुःपति पु० इण्-धिष् कर्म्म० पृषो० मध्ये षुट् । अपेदिधिषुपतौ । "निर्कृत्यै, परिविन्नान्नारब्धा अदित्यै, एदिधिषुःपतिं निर्वल्यै" यजु० १०,६ । इदमेधीवपशुरेवताभेदकीर्त्तने

एध इद्धौ भ्वादि० आत्म० अक० सेट् । एधते ऐधिष्ट । एधाम्बभूव आस-चक्रे । एधितव्य. एधनीयः एध्यः एधिता एधितः एधनम् एधः एधमान; एधित्वा समेध्य एधांसि । "स्थिरयष्टिभूमिसंप्राप्ता पार्थिवो न तथैधते" मनुः । क्वचिदस्य आत्मभावः "यत्र मैथुनैरेधिरे प्रजाः" भाग० २,२१,१ । आर्षत्वात् समाधेयः "तपसा महतैधित" भा० आ० ८८ अ० । 'विवर्द्ध ज्वलना इवैधमानाः' ७१,५५ । "लोकयोरुभयोः श्रेयः नित्यदा सुखमेधितम्" रामा० । क्वचित् घञ् । "न हि साहसकर्त्तारः सुखमेधन्ति भारत !" भा० व० २४५ अ० । णिचि एधयति ते ऐदिधत् त । "किं त्वं मामजुगुप्सितमैदिधः स्वपराक्रमम्" भट्टिः । उपसर्गस्थात्कारात् इट्येव न परस्मै प्रैधते एङादित्वे एव तथा तेन मा प्रैदिधत् इत्यादौ न वृद्धिः ।

एध पु० एध्यतेऽग्निरनेन इन्ध-करणे घञ् नि० नलोपगुणौ । काष्ठे "एधान् कुशान्यजमानः स समिद्भिर्याचे" रघुः "एधोदकं मूलफलमन्नमभ्युदितं च यत्" मनुः । "यथैध खसमित्येन वह्निना नाशमृच्छति" भा० व० ८४ अ० ।

एधतु पु० एध-कर्त्तरि चतु । १पुरुषे उज्ज्व० २अग्नौ मे० ३वृद्धियुक्ते त्रि० यङ्लुगन्ताद्भावे चतु । ४वृद्धौ स्त्री । "युवं हिन्वा पुरुभुजेमेधतम्" ऋ० ८,८६,३, "एधतु धनादिवृद्धिम्" भा० "ते वैतामेधतुमेधामसृजिरे" शत० ब्रा० ६,२,३, "एतामेधतुवृद्धिम्" भा० ।

एधस् न० एध्यतेऽग्निरनेन इन्ध-असि नि० नलोपगुणौ । काष्ठे "यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन !" गीता । "अनलायायुरुचन्द्रमैधसे" रघुः । "फलैधः कुसुमस्तेयमधर्म्यञ्च मलावहम्" "यथैधसे जसा वह्निः" मनुः ।

एधा स्त्री एध-भावे अ । समृद्धौ अमरः

एधित त्रि० एध-कर्त्तरि क्त । १वृद्धे णिच्-कर्म्मणि क्त । २वर्द्धिते त्रि० । "मधुसर्पिरसमेधितमेधया" माघः ।

एनस् न० एति गच्छति प्रायश्चित्तेन क्षमापणेन वा आगसि अर्थे इण-असुन् नुट् च । १अपराधे । ईश्वराज्ञालङ्घनरूपनिषिद्धाचरणापराधजन्यत्वात् २पापे च । "एनोनिहत्तेन्द्रियवृत्तिरेनम्" । "अकामोऽपनतेनेव साधोर्हृदयमेनसा" । "एनसां स्थूललक्ष्याणां चित्तौदनपचोदनम्" मनुः । पापभेदाश्च प्रा० वि० दर्शिताः यथा "अथ पापोद्देशः । तत्र विष्णुः "अथ पुरुषस्य कामक्रोधलोभात्मकं रिपुत्रयं सुघोरं भवति परिपन्थिप्रकृतिविघ्नेषु स्टष्ट्वाश्रितेष्वेतायमानात्मोऽतिशातक

महापातकानुपातकोपपातकेषु प्रवर्त्तते । जातिभ्रंशकरेषु सङ्करीकरणेषु अपात्रीकरणेषु मलावहेषु प्रकीर्णेषु च" । अनेन नवविधत्वं पापस्योक्तम् । हारीतस्तु पञ्चविधत्वमाह "पञ्चविधमशुद्धं भवति प्रासङ्गिकोपपातकपातकमहापातकात्यन्तपातकानि" पूर्व्वपूर्व्वं वचने पूर्व्वं पूर्व्वं गरीयः अतु त्तरोत्तरम् । प्रासङ्गिकं जातिभ्रंशकरादिपञ्चकम् । पातकपदमनुपातकपर्य्यायः । ननु नवस्वेव पापेषु पातकशब्दो दृश्यते यथा पैठीनसिः "स्त्रीगोब्राह्मणबालहत्याघाती शूद्रसङ्गभोजी कन्यादूषणगारदाहो दृषलीपतिः अग्न्युच्छेदी चेति पातकानि" नवविधं पापमभिधायाह विष्णुः । "एवं पातकिनः पापमनुभूय सुदुःखिताः । तिर्य्यग्योनौ प्रपद्यन्ते दुःखानि विविधानि च" । याज्ञवल्क्यः "नोपपातमहापातकसंसर्गजानि च" । मनुः "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः । वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् । इह दुश्चरितैः केचित् केचित् पूर्व्वकृतैस्तथा । प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्य्ययम्' । तथा विष्णुपुराणम् "नरके कर्म्मणः पापादेवमाकल्पकल्पयं" । तथा यमः "सुरापो ब्रह्महा गोघ्नः सुवर्णस्तेयकारकः । पतितैः संप्रयुक्तश्च कृतघ्नोगुरुतल्पगः । एते पतन्ति सर्व्वेषु नरकेषुनुपूर्व्वशः" । अत्रैते सुरापादयः पतन्तीति सुरापादीनां पतनकर्त्तृत्वावगतेः कर्त्तृत्वञ्च साधनत्वविशेषः अतः सुरापानादिविशिष्टस्य पुरुषस्य पतनसम्बन्धे विशेषणस्य सुरापानादेः सति सम्भवे पतनसाधनत्वमवगम्यते "मद्गृहे ब्राह्मणस्यान्न भक्षणमेतेति वर् । एवं "वारिदस्तृप्तिमाप्नोति" इत्यादावपि । नरकसाधनत्वस्य कार्य्यान्वयाभावान कथं शब्दादवगतिरिति चेत् शंखवद्विधयविशेषण तथा इति ब्रूमः यथा पतनायतनासाधनादवगोरण्यादिवर्जितव्यमिति विधिः, तथा नरकसाधनात् सुरापानादेर्निवर्त्तेतेति, निमेषेऽपि यस्याकरणे प्रत्यवायस्तस्मिन् कर्म्मणि प्रवर्त्तेतेति विध्यङ्गीकारात् । अथवा यदु यत्साधन तदभावस्तत्परीहारसाधनमिति लोकादवगतत्वात् अर्थात् प्रत्यवायपरिहारस्योपस्थितत्वात् तदर्थिनोऽधिकारोनित्यनिमेषेषु । ननु "अक्षरैः सन्ध्यानुपासीत" इत्यादौ जीवनस्य सन्ध्योपासनव्याप्यत्वगमात् जीवनवतोऽधिकारः । "न कलञ्जं भक्षयेत्" इत्यादौ निवृत्तिस्वभावनिरूपा प्रवृत्ति रधिकारिविशेषण तथाचोक्त "मनसा हि प्र-

धर्म्म इत्यधर्म्मलक्षणं सूचितम् । अनर्थश्चानिष्टसाधनं तथाचोक्तं भाष्यकृता "कोऽर्थोयोऽभ्युदयाय कोऽनर्थोयोऽनभ्युदयायेति" । ननु पापस्तत्रायां किं प्रमाणं न तावद्वेदः तस्य कार्य्ये कार्य्यान्विते वा प्रामाण्यात् न च दुरितापूर्व्वं कार्य्यं कार्य्यान्वितं वा । न च नित्यकर्म्मानाचरणस्य निषिद्धाचरणस्य च वेदोक्तप्रत्यवायसाधनत्वानुपपत्त्या कल्प्यम् तस्य तथाविधशब्दाभावेन सिद्धत्वेन चावगन्तुमशक्यत्वात् उच्यते "यो ब्राह्मणायावगुरेत्तं यतेन यातयेदिति" स्मृतौ लिङ्लक्षयत्नतेरवगोरण्यतयातनयोः साध्यसाधनफलभावोऽवगम्यते "हेतुहेतुमतोर्लिङिति" पा० लिङः सार्व्वधातुकमपादिति यथोक्तं भंयुधिकरणे, तथाऽत्रापि क्वचित् पञ्चम्या क्वचित् तृतीयया क्वचित् विशेषणपदादवगम्यते । यथा याज्ञवल्क्यः "विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् । अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति" । मनुः "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः । वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् । इह दुश्चरितैः केचित् केचित् पूर्व्वकृतैस्तथा । प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्य्ययम्' । तथा विष्णुपुराणम् "नरके कर्म्मणः पापादेवमाकल्पकल्पयं" । तथा यमः "सुरापो ब्रह्महा गोघ्नः सुवर्णस्तेयकारकः । पतितैः संप्रयुक्तश्च कृतघ्नोगुरुतल्पगः । एते पतन्ति सर्व्वेषु नरकेषुनुपूर्व्वशः" । अत्रैते सुरापादयः पतन्तीति सुरापादीनां पतनकर्त्तृत्वावगतेः कर्त्तृत्वञ्च साधनत्वविशेषः अतः सुरापानादिविशिष्टस्य पुरुषस्य पतनसम्बन्धे विशेषणस्य सुरापानादेः सति सम्भवे पतनसाधनत्वमवगम्यते "मद्गृहे ब्राह्मणस्यान्न भक्षणमेतेति वर् । एवं "वारिदस्तृप्तिमाप्नोति" इत्यादावपि । नरकसाधनत्वस्य कार्य्यान्वयाभावान कथं शब्दादवगतिरिति चेत् शंखवद्विधयविशेषण तथा इति ब्रूमः यथा पतनायतनासाधनादवगोरण्यादिवर्जितव्यमिति विधिः, तथा नरकसाधनात् सुरापानादेर्निवर्त्तेतेति, निमेषेऽपि यस्याकरणे प्रत्यवायस्तस्मिन् कर्म्मणि प्रवर्त्तेतेति विध्यङ्गीकारात् । अथवा यदु यत्साधन तदभावस्तत्परीहारसाधनमिति लोकादवगतत्वात् अर्थात् प्रत्यवायपरिहारस्योपस्थितत्वात् तदर्थिनोऽधिकारोनित्यनिमेषेषु । ननु "अक्षरैः सन्ध्यानुपासीत" इत्यादौ जीवनस्य सन्ध्योपासनव्याप्यत्वगमात् जीवनवतोऽधिकारः । "न कलञ्जं भक्षयेत्" इत्यादौ निवृत्तिस्वभावनिरूपा प्रवृत्ति रधिकारिविशेषण तथाचोक्त "मनसा हि प्र-

महापातकानुपातकोपपातकेषु प्रवर्त्तते । जातिभ्रंशकरेषु सङ्करीकरणेषु अपात्रीकरणेषु मलावहेषु प्रकीर्णेषु च" । अनेन नवविधत्वं पापस्योक्तम् । हारीतस्तु पञ्चविधत्वमाह "पञ्चविधमशुद्धं भवति प्रासङ्गिकोपपातकपातकमहापातकात्यन्तपातकानि" पूर्व्वपूर्व्वं वचने पूर्व्वं पूर्व्वं गरीयः अतु त्तरोत्तरम् । प्रासङ्गिकं जातिभ्रंशकरादिपञ्चकम् । पातकपदमनुपातकपर्य्यायः । ननु नवस्वेव पापेषु पातकशब्दो दृश्यते यथा पैठीनसिः "स्त्रीगोब्राह्मणबालहत्याघाती शूद्रसङ्गभोजी कन्यादूषणगारदाहो दृषलीपतिः अग्न्युच्छेदी चेति पातकानि" नवविधं पापमभिधायाह विष्णुः । "एवं पातकिनः पापमनुभूय सुदुःखिताः । तिर्य्यग्योनौ प्रपद्यन्ते दुःखानि विविधानि च" । याज्ञवल्क्यः "नोपपातमहापातकसंसर्गजानि च" । मनुः "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः । वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् । इह दुश्चरितैः केचित् केचित् पूर्व्वकृतैस्तथा । प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्य्ययम्' । तथा विष्णुपुराणम् "नरके कर्म्मणः पापादेवमाकल्पकल्पयं" । तथा यमः "सुरापो ब्रह्महा गोघ्नः सुवर्णस्तेयकारकः । पतितैः संप्रयुक्तश्च कृतघ्नोगुरुतल्पगः । एते पतन्ति सर्व्वेषु नरकेषुनुपूर्व्वशः" । अत्रैते सुरापादयः पतन्तीति सुरापादीनां पतनकर्त्तृत्वावगतेः कर्त्तृत्वञ्च साधनत्वविशेषः अतः सुरापानादिविशिष्टस्य पुरुषस्य पतनसम्बन्धे विशेषणस्य सुरापानादेः सति सम्भवे पतनसाधनत्वमवगम्यते "मद्गृहे ब्राह्मणस्यान्न भक्षणमेतेति वर् । एवं "वारिदस्तृप्तिमाप्नोति" इत्यादावपि । नरकसाधनत्वस्य कार्य्यान्वयाभावान कथं शब्दादवगतिरिति चेत् शंखवद्विधयविशेषण तथा इति ब्रूमः यथा पतनायतनासाधनादवगोरण्यादिवर्जितव्यमिति विधिः, तथा नरकसाधनात् सुरापानादेर्निवर्त्तेतेति, निमेषेऽपि यस्याकरणे प्रत्यवायस्तस्मिन् कर्म्मणि प्रवर्त्तेतेति विध्यङ्गीकारात् । अथवा यदु यत्साधन तदभावस्तत्परीहारसाधनमिति लोकादवगतत्वात् अर्थात् प्रत्यवायपरिहारस्योपस्थितत्वात् तदर्थिनोऽधिकारोनित्यनिमेषेषु । ननु "अक्षरैः सन्ध्यानुपासीत" इत्यादौ जीवनस्य सन्ध्योपासनव्याप्यत्वगमात् जीवनवतोऽधिकारः । "न कलञ्जं भक्षयेत्" इत्यादौ निवृत्तिस्वभावनिरूपा प्रवृत्ति रधिकारिविशेषण तथाचोक्त "मनसा हि प्र-

दृष्टस्य भूतचेष्टावतोऽपि वा। यदनागतभावस्य वर्जनं तच्चिवर्त्तनमिति" अतः कथं प्रत्यवायपरीहारार्थिनोऽधिकारः उच्यते प्रत्यवायपरीहारस्याप्युपस्थितत्वात् जातेष्टिवत् संचलिताधिकार एव भविष्यति तथा च जाबालः "क्षयं कोचिदुपात्तस्य दुरितस्य प्रपद्यते। अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्वते। नित्यक्रियावानर्थवान्ये फलानुषङ्गफलां स्मृतिम्"। अनुत्पत्तिमितिनेन प्रत्यवायपरीहारः फलमित्युक्तम्। अथवा प्रायश्चित्तविधिरप्रातिपत्तन्यायेनार्थवादकपापत्वार्थिनोऽधिकारात्। एवं च विधयः प्रापसक्तां बोधयन्ति तथाचाङ्गिराः "उद्गच्छन् यदादित्यस्तमः सर्वं व्यपोहति। तद्वत् कल्याणमातिष्ठन् नरं पापं व्यपोहति"। पापसङ्घं पुरुषं कृत्वा कल्याणमभिपद्यते। श्रूयते पातकैः सर्वैर्मेघाभ्रैरिव चन्द्रमा."। कल्याणं प्रायश्चित्तम्। यमः "तपसोऽन्ते विशुद्ध्यन्ति कर्मणां वापरिक्षयात्। तस्मात् कर्त्तव्यमेतत्तु प्रायश्चित्तं विशुद्धये"। कर्म्मणां भोगेन परिक्षयादित्यर्थः। अपरं स्मृत्यन्तरे द्रष्टव्यमिति। ननु किं पापोत्पत्तिकारणम्? उच्यते विहितस्याकरणं निषिद्धाचरणञ्च पापकारणं तदाह मनुः। अकुर्वन् विहितं कर्म्म निन्दितञ्च समाचरन्। प्रसजंस्तेन्द्रियार्थेषु प्रायश्चित्तीयते नरः"। प्रायश्चित्ताकरणापतनेन पापसक्तां प्रतिपाद्यति। तच्चावश्यकाः। "विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्। अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति"।

पापस्य यथा वेदबोध्यत्वं तथा मीमां०भा०दर्शितम् यथा "उभयमिह चोदनया लक्ष्यते अर्थोऽनर्थश्च इति कोऽर्थः? यो निःश्रेयसाय ज्योतिष्टोमादिः। कोऽनर्थः? यः प्रत्यवायाय श्येनोवध्यः दुष्टरित्येवमादिः तत्र अनर्थो नाम दुःखं दुःखसाधनं वा। कथं पुनरनर्थः? हिंसा हि सा सार्थं प्रतिषिद्धेति। कथं पुनरनर्थः कर्त्तव्यं नत्वोपदिश्यते?। उच्यते नैव श्येनादरः कर्त्तव्यः विद्वान् यद्येव हिंसितुमिच्छेत् तस्यायमभ्युपायः इति हि तेन उपदेशः "श्येनेनाभिचरन् यजेत" इति समामनन्ति हि "नाभिचरितव्यम्"। "अतएव मूलकर्म्मरूपाभिचारस्योपपातकसंज्ञा कृता मनुना तेन तस्यानर्थहेतुत्वं लभ्यतामेव। यथा च कलञ्जभक्षणस्यानर्थहेतुत्वेऽपि वेदबोध्यत्वं तथा यज्ञ०चि० समर्थितं यथा तच्च "न कलञ्जं भक्षयेत्" इत्यत्र विध्यर्थनिषेधानुपपत्तेः तद्भक्षणस्य दृष्टेष्टसाधनत्वात्। न चासुराविद्यावत् पर्युदासलक्षणया विरोध्यनिष्टसाधनताबोधनं, नञोऽसमभिव्याहृतत्वेन प्रतिषेधशक्तत्वव्यभिचारेण विधेयाप्रतीतेः विशिष्टनिषेधस्य "सविशेषणे हीति" न्यायेन विशेषणविशेषितयैव विधेयत्वावगतेश्च कलञ्जभक्षणजनितोत्पत्तिनानारौरवादिदुःखाधिकदुःखसाधनमिति "न कलञ्जं भक्षयेत्" इत्यनेन बोधनात्। दृष्टसाधनतायाश्चकस्य विधेः सामान्ये निषेधानुपपत्तेः बलवदनिष्टाननुबन्धीष्टसाधनविशेषे तात्पर्यम् तथा चायक्रयविशेषनिषेधपरत्वं नञ इति कश्चित् तन्न यथाश्रुतयोग्यतया क्रिडं विहाय चटखेन तदितरान्वयो न तु क्रिडेतरत्वेन, युगपद्वृत्तिद्वयविरोधात् तथेहापि बलवदनिष्टाननुबन्धित्वेन बोधस्यितिरिति कथं निषेधः?। "श्येनेनाभिचरन् यजेत" इत्यत्र कथं विधिप्रवृत्तिः हिंसाया बलवदनिष्टसाधनत्वादिति चेत् तत्र क्रतिसाध्यत्वे सति दृष्टसाधनता योग्यतया न तु बलवदनिष्टाननुबन्धित्वमपि अयोग्यत्वात् निन्दार्थवादेन प्रायश्चित्तोपदेशेन या हिंसाया बलवदनिष्टसाधनत्वोपगमात्। अत एव विहितेऽपि श्येने विहितानुष्ठानाच्चाकिञ्चित्करप्रवृत्तिः। रागद्वेषयोर्बलवत्त्वेनानिष्टानुबन्धो यस्य तिरोधानात् कस्यचित् प्रवृत्तिरित्येके। अन्यत्वभिचारस्य वैरिवधफलत्वेन श्रुतत्वात् तत्साधनत्वेन श्येनो विधीयते नतु बधसाध्यनरकसाधनत्वेनाश्रुतत्वात्। न च जनकजनकस्य जनकत्वनियमः कुलालकारपरम्परायां कुलालकारणत्वापत्तेः विधिनैव श्येनस्य बलवदनिष्टानुबन्धित्वस्य बोधनाच्च। न च श्येनस्य नरकाहेतुत्वेनाप्रेक्षितत्वेऽविरुद्धहेतुत्वे सत्यधिगीतत्वेन प्रवृत्तिः स्यादिति वाच्यम्। श्येनाद्यविरुद्धोधबाधाच्चायं नरकमिति प्रतिसन्धानेन विनाशात्। ननु श्येनोनरकफलकव्यापारत्वेन हिंसा हिंसा च नरकजनिकेति चेत्। नहि साक्षात् परम्परासाधारणनरकफलकव्यापारो हिंसा कूपादौ नष्टे सति तत्कर्तुरुन्मत्तत्वप्रसङ्गात् बध्यस्यापि कृतमनभूतपादनहारात्कृतत्वप्रसङ्गाच्च। न कृतोत्पादितमन्यः कश्चित् कञ्चित् व्यापादयति। नन्वनन्तरादितमरणफलकव्यापारो हिंसा यद्वत्तस्मरणं भवेत्। न च श्येनस्तथा किन्तु खड्गपतनादिवमेव। अथ मरणानुकूलव्यापारो मरणहेतुरेव नानुष्ठीयमानो हिंसा श्येनश्च तथा, कूपादौ च न मरणहेतुरेवानुष्ठीयमानत्वमिति चेत् एवं सति गौरवात् मरणाहेतुत्वेन विघ्नमात्रासाधने साध्ये हिंसा लघुत्वात्।

हिंसलिप्स।त्पर्यतावच्छेदकं फलमव्यवहितमेव मरणम् व व्यवहितफलकव्यापारस्यैव घातुवाच्यत्वात् अन्यथा परम्परया विकृत्तिफलकाद्यकामे तण्डुलं कुर्वत्यपि पचतीति प्रसङ्गात् अथ खड्गघातानन्तरं यत्र विलम्बेन मरणं व्रणपाकपरम्परया वा, यत्रे विषप्रयोगेण वा तत्र हन्तृत्वं प्रायश्चित्तादि च न स्यादिति चेत् न प्रायश्चित्ततुल्यत्वार्थं हि तत्र हन्तृत्वव्यपदेशो गौणः विनिगमनन्तु लाघवमेव

वस्तुतस्तु मरणोद्देशेन कृतोऽदृष्टाद्वारकस्तदनुकूलो व्यापारः हिंसा यत्रेनयादृष्टद्वारामरणसाधनमतो न हिंसा। यदादृष्टद्वारा मरणसाधनं हिंसा स्यात्तदा सप्तमीतैलाभ्यङ्गस्यादृष्टद्वारेण विनाशसाधनत्वात् तत्कर्त्तुः हिंसकत्वापत्तिः। अत एव कूपादौ गोमरणेऽपि न गोवधकर्त्तृता तत्कर्त्तुः, गलल्गनान्नमरणेन भक्तारात्हन्तृत्वं, परिवेषयितुर्वा ब्राह्मणहन्तृत्वम्। व्रणपाकपरम्परया विलम्बेन विषप्रयोगेण च हन्तृत्वं मुख्यमेव। नायनुनिष्पादितमरणफलकत्वं गललग्नान्नमरणेखहन्तृत्वापत्तेः। अन्योद्देशेन क्षिप्तमाराचरते ब्राह्मणे ब्राह्मणहन्तृत्वं न स्यादिति चेत् न दृष्टापत्तेः। व्यपदेश प्रयोगो वा लक्षणया समर्थयितुं शक्यते, त्वत्प्रसङ्गतिप्रसङ्गो वारयितुं न शक्यत इतीदमेव विनिगमनम्। अन्योद्देशेन कृतेऽपि निषिद्धे प्रायश्चित्तार्हसूक्तम्। अपरे तु अनभिसंहितावान्तरव्यापारमद्वारीकृत्य मरणसाधनं हिंसा, खड्गकारस्थानभिसंहितावान्तरव्यापारद्वारा मरणसाधनत्वं तस्य हि अवान्तरव्यापारोनाभिसंहितः। किन्तु धनलाभ इति खड्गकारो न घातकः विषस्यात्रे प्रक्षेपणमवान्तरव्यापारो भोजनमेवाभिसंहितम् अनेनेदं भोक्तव्यमिति सम्बाय विषप्रयोगादिति क्षिप्तेव विषप्रयोग इति तत्र गरलस्यान्नकर्त्तृत्वादयत्न मरणं तत्र परिवेषयितुर्वीतकत्वापातात् अनेनेदं भोक्तव्यमित्यभिसन्धायैवान्नपरिवेषणात् भोक्तुःहन्तृत्वापत्तेश्च अनभिसंहितमवान्तरव्यापारमद्वारीकृत्य मरणानुकूलभक्षणानुज्ञानात्। अत एव अव्यवहितप्राणवियोगफलकोव्यापारो हिंसा व्रणपाकपरम्परयामृते न हन्तृत्वं व्यापारव्यवधावकत्वादिति निरस्तम्"॰

यत्रेनादेर्वेदबोधितत्वेऽपि यथाऽनर्थहेतुत्वं तथाऽभिचारशब्दे दर्शयिष्यमेवकृत्यम् अधिकं यत्रेनयब्दे वक्ष्यते।

एनस्वत् त्रि॰ एनस्+मतुप्+मस्य वः। एनस्वति त्रियां ङीप्। "मा त एनस्वतो यक्षिन् भुजेम" ऋ॰७,८८,६।

एनस्वत् त्रि॰ एनस्+मतुप्+मस्य वः। एनस्वति त्रियां ङीप्। "मा त एनस्वतो यक्षिन् भुजेम" ऋ॰७,८८,६। एनस्वन् त्रिदेवसः सुदानवः८,१८,१२। "एनस्विभिरनिर्णिक्ते नार्थं किञ्चित् समाचरेत्"। "अवदार्ङ्मिन्द्रमित्येतदेनस्वी सप्तकं जपेत्" मनुः। 'इण आगसोति" उणा॰ अपराध एव साधुत्वम् पापे तु ईश्वरात्तालक्षुन रूपापराधजन्यत्वेनोपचारात् इति बोध्यम्।

एम त्रि॰ इण-कर्म्मणि म। १प्राप्ये। "अर्षन्त्य एमस्य" यजु॰ १८,१५, "एमः प्राप्त्यर्थः" वेददी॰।

एमन् न॰एत्यनेन मार्गेण इण-करणे मनिन्। १गतिमार्गे "क्षणं त एम रुशतः" ऋ॰४,७,६। "क्षणं त एम रुशदूर्मे १,५८,४। "एमनयज्ञेन गमनमार्ग उच्यते" भा॰ एत्यत्र आधारे मनिन्। २अवस्थितिस्थाने। "पृक्षे सुसदस्येमन्" यजु॰१२,१७, "एमन् अवस्थाने" वेददी॰। "अपां त्वेमन्त्सादयामि" १२,५३। सप्तम्या लुकि न नलोपः। भावे मनिन्। ३गमने। "दूरे हयो ये चितयन्त एमभिः" ऋ॰५,५६,२ एमभिर्गमनैः" भा॰।

एरका स्त्री इण-बा॰ र ततः संज्ञायां कन्। निर्गन्धिदृणभेदे (नलखाडा) "एरका गुन्द्रमूला च गिल्वो गुन्द्रा गरीति च। एरका गिरिरा दृष्या चक्षुष्या वातकोपिनी। मूत्रकृच्छ्राश्मरीदाहपित्तशोणितनाशिनी" भावप्र॰। "ददार करजैरुरावेरकां कटजग्रथा" भाग॰ १,३१६, "एरकाणां तदा सृष्टिं कोपाज्जग्राह केशवः"। भा॰मौस॰२अ॰ "एरकाकृपिभिर्व्वर्निजघ्नुरितरेतरम्" भा॰ आ॰ २अ॰। २कौरव्यवंशजे सर्पभेदे "एरकः कुण्डलोवेणी वेणीस्कन्दः कुमारकः" भा॰आ॰५७अ॰। नागनामकीर्त्तने

एरङ्ग पु॰ आ+ईर अङ्गच्। मद्यभेदे, "एरङ्गोमधुरः स्निग्धो विदग्धो शीतलो गुरुः" राजनि॰ तद्गुणः।

एरण्ड पु॰ईरयति वायुम् मलं वा धः ईर-अण्डच् नि॰गुणश्च। १वृक्षभेदे (एरंडी)। (भेरण्डा)। "एरण्डयुग्मं मधुरं सुरं गुरु विनाशयेत्। सूक्ष्मयोषकटीवस्तिगुरुशीतोदरज्वरान्। ब्रध्नबस्तिकफानाहकासकुष्ठानमारुतानिति" एरण्डयुग्मम् शुक्लरक्तैरण्डौ "एरण्डपत्रं वातघ्नं कफघ्नमिविनाशनम्। मूलञ्चक्षुष्करञ्चापि पित्तरक्तप्रकोपणम्। वातार्शयदृढं गुह्यवस्तिशूलहरं परम्। कफवातजनीनू क्ष्णि हृद्धि सप्तविधामपि। एरण्डफलमज्जा गुह्यशूलानिलापहम्। यकृत्प्लीहोदरार्शांसि कटुकं दीपनं मतम्। तद्गन्धजा च विड्भेदी वातघ्नो उदरापहा। आध्मानशूलं संग्राह्यनिलाङ्गरपरे जगः"

"एरण्डतैलं तीक्ष्णोष्णं दीपनं पित्तिकं गुरु। दृष्यं वृष्यं वयःस्थापि मेधाग्न्यनिलशुक्रदम्। कफवातहरं कृच्छ्रं योनिशुक्रविशोधनम्। पित्तं खादुरसं पाके सृतिक्तं कटुकं सरम् (रेचकम्) विषमज्वरकृद्रोगपृष्ठगुह्यादिशूलकृत्। हन्ति वातोदरानाहगुल्माष्ठीलाकटिग्रहान्॥ वातशोणितविड्बन्धश्लीपदामयिकक्षीणान्। आमवातगलेन्द्रस्य धरीरवनचारिणः। एक एव निहन्त्यामेरण्डश्चैकेश्वरी" भावप्र०। स्वार्थे कन्। तत्रैव। एरण्डस्य फलम् अण्। ऐरण्ड तत्फले। "ऐरण्डं कोमलं पाक्यं फलं तत्रैव खेदितम्। पाचितं कटुतैलेन स्निग्धं नातिसुवासितम्। कफानिलहरं हृद्यं रूक्षस्वाद्वम्ल पित्तलम्। अग्निसंजननं रुच्यं गुरु पाकेऽतिपिच्छिलम्" भावप्र०। "फले लुक्" पा० अणोलुग्विधानात् एरण्डशब्दोऽपि साधु। पिण्डखर्जा स्त्री यद्भच०। ङीप् गौ० ङीष् वा।

एरण्डपत्रिका स्त्री एरण्डस्य पत्रमिव पत्रमस्याः कप् संज्ञायां वा कन् अत इत्त्वम्। दन्तीवृक्षे। [वृक्षे। राजनि०।

एरण्डफला स्त्री एरण्डस्य फलमिव फलमस्याः। क्षुद्रदन्ती-

एरु त्रि० आ+ईर-उनु। गन्तरि। "एजाति ग्लहा कन्येव तन्तुरेव तन्त्राना पत्येव जाया" अथ० ९, २२, १,

एर्वारु पु० आ+ईर-क्विप् एरं वारयति इ-णिच् उण्। खिर्णिकायाम् कर्कटीभेदे (काकुड) "एर्वारुबीजं तोयेन पिबेद्वा लवणीकृतम्" सुश्रु०। "कट्वेर्वारौ यथा पक्वे मधुरः क्षतुरपीह न" वा० स्वार्थे कन् तत्रैव।

एलक पुंस्त्री एडक+इत्वं लः। मेषे स्त्रियां अजा० टाप् त्रिया० नातदृत्वम् डलयोरैक्यस्मरणात्।

एलङ्ग पु स्त्री आ+इल-अङ्गच्। (राजखड़ा) मत्स्यभेदे स्त्रियां ङीष्। "एलङ्गोमधुरोष्णः संग्राही कफवातहा। मेधाग्निवृद्धिकारी च योनेः क्लेद्यो गुरुः" राजनि०।

एल(ला)वालु न० एलेव वलते वल-उप् ङ्यापोरिति संज्ञायां वा ह्रस्वः। (जालुका) तृणभिद्भेदे "पुलागैलेवालुनि नागपुष्पोत्पलाधिता" सुश्रु०। स्वार्थे कन् एल(ला)वालुकमप्यत्र न०।

एला स्त्री इल-अच्। १खनामख्यातलतायाम्। (एलाची) तद्भे दगुणादि भावप्र० उक्तम्। "एला स्थूला च बहुला पृथ्वीका लिपुटापि च। भद्रैला हरितैला च चन्द्रबाला च निष्कुटी। स्थूलैला कटुका पाके रसे वातापहा लघुः। कफोष्णा श्लेष्मपित्तास्रकफश्वासहरा मता। सूक्ष्मैला विषवस्त्यास्रशिरोरुग्वमिकासनुत्। सूक्ष्मैला कृमिकृच्छ्रा को ष्ठी कृमिविषे गुटिः। एला सूक्ष्मा कफश्वासकासार्शो मूत्रसंकृच्छ्रनुत्। रसे तु कटुका याता सूक्ष्मा वातहरी मता" "एलाबलाजिकुलितचन्दनाद्यु" रघुः। तस्याः फलम् अण् तस्य लुप् लुपि प्रकृतिलिङ्गत्वेन तत्फलेऽपि स्त्री। "सस्मुरस्मत्सुखानामेलालासुपतिष्यथः" रघुः। "सजला नयौ यरद्दयतिरियमेला" वृ०र० उक्ते २पञ्चदशाक्षरपादके छन्दोभेदे।

एला विलासे कण्ड्वा० प० अक०सेट्। एलायति ऐलायीत्। एलायां बभूव आस चकार।

एलाक पु० एलाय-खल्। ऋषिभेदे गर्गा० यञ्। ऐलाक्ष तद्गोत्रे पु स्त्री०। स्त्रियां ङीपि यस्येतिः। ऐलाकी।

एलादिगुटिका स्त्री "एलापत्रत्वचोऽर्द्धांशाः पिप्पल्यर्द्धपलं तथा। सितामधूकखर्जूरमृद्वीकास्य पलोन्मिताः। संचूर्ण्य मधुना युक्ता गुटिकाः कारयेद्भिषक्" चक्रद०उक्ते रक्तपित्ताधिकारोक्ते गुटिकारूपौषधभेदे।

एलापत्र पु० एलापत्रमिवाकारोऽवयवोऽस्य अच्। नागविशेषे "नागस्तथा पिङ्गरकः एलापत्रोऽथ वामनः" भा० आ० ३५ अ०। नागनामकीर्त्तने। [(काटा आमरुल)।

एलापर्णी स्त्री एलायाः पर्णमिव पर्णमस्याः। राज्ञायाम्

एलापुर न० नगरभेदे।

एलीका स्त्री आ+इल-ईकन्। क्षुद्रैलायाम् (गुजराटि) राजनि०। [च सर्वेषु लवणेषु च" सुश्रु०।

एलुक न० इल-उक। गन्धद्रव्यभेदे। "भद्रदार्वेलुकाक्षुद्रे

एलवालुक न० एलवालुक पृषो० लुडागमः। एलवालुक तृणभिद्भेदे (जालुका) राजनि०

एव अव्य० इण्-वन्। १सादृश्ये, २अनियोगे, ३वाक्यभूषणे, ४धारनियोगे, ५विनिश्चये, ६परिभवे ७ईषदर्थे च। विशेषणसङ्गतः एकान्तयोगव्यवच्छेदे। यथा पार्थ एव धनुर्द्धरः इत्यादौ पार्थान्यपदार्थे प्रयुक्तधनुर्द्धरत्वम् व्यवच्छिद्यते। विशेषणसङ्गतः एवयोगव्यवच्छेदे यथा शङ्खः पाण्डुर एवेत्यादौ शङ्खे पाण्डुरत्वायोगो व्यवच्छिद्यते। क्रियासङ्गतः १०अत्यन्तायोगव्यवच्छेदे यथा नीलं सरोजं भवत्येवेत्यादौ सरोजे नीलत्वात्यन्तायोगो व्यवच्छिद्यते। ११गर्हार्थे त्रि०। "एवेत्यवधारणानियोगौ प्रत्यनियोगेषु" इत्युक्ता गर्हायां यथाक्रमघटनम्। "अकृमेव ददासि। अद्येव। कृष्येव। ओदनमेव

मेऽस्तु । अद्यैव गच्छ । अत्यन्तियोगेऽप्ययमारभ्यम् । "एवे चानियोगे" पाणि० । तत्र क्वेव भोक्ष्यसे" इत्यत्र परोक्षमादेयः । एतद्योगे च "न च वाक्यारंभयुक्ते"भा० न वर्तमानाद्यादेयः । "ब्राह्मणस्यैव कर्म्मैतदुपदिष्टं मनीषिभिः" । "स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" मनुः । १२एवमित्यर्थे च । "एवा न इन्द्रोतिभिः" ऋ० ४,३२,७, एवा एवम् भा० । अत्र वेदे "एवा हि दूर्वे प्रतनु" इत्यादि वत् दीर्घः । तत्र गत्वरि "एवा न देव्यादितिरनर्वा" तैत्ति० २,१,१,५, "एवा मनसशोका" भा० । शीघ्रगन्तृत्वात् १३अश्वे पु० । "शूरोनाम पत यद्भिरेवैः" ऋ० १,१५८,२, "एवैरश्वैः" भा० । करणे भावे वा वन् । १४गमनसाधने १५गमने च । "एवेन सद्यः पर्य्येति पार्थिवम्" ऋ० १,१२८,३, "एवेन गमनसाधनेन गमनेन वा" भा० ।

एव त्रि० एवमस्यस्य अच् अव्य० ठिलोपः । एवंक्रियमाणप्रकारे "सुदानूनेवया मरुतः" ५,४१,१६, एवया एवंक्रियमाणप्रकारेण" भा० तृतीयस्थाने याच् ।

एवय पु० अय–भावे अच प्रषो० अतः एत्वम् । गमने "न को राया नैवया न भन्दनो"ऋ०८,२४,१५, एवया यत्नपुरणि संग्रामं प्रति गमनेन । तृतीयास्थाने आङ् ।

एवम् अव्य० इण–वा०अम् । "एवमिति प्रकृतपरामर्शप्रकारेवाद्योपदेशनिर्देशनिह्नवाक्षोकारवाक्येषु" गदाध० उक्तेषु अर्थेषु । क्रमेण उदा० तत्रैव । १प्रकृतपरामर्शे "एव वादिनि देवर्षौ" कुमा० । २प्रकारे । एवं कुरुते । इदार्थे ३सादृश्ये अग्निरेवं विप्रः । ४उपदेशे एवं पठ । ५निर्द्देशे एव तावत् । ६निश्चये । एवमेतत् कः सन्देहः । ७अङ्गीकारे एवं कुर्य्याः । वार्थे ८समुच्चयार्थे "अङ्गार्थमेवंशब्दगणमाभिप्रेतम्" । "अजेतमनेवम्" या० स्मृ० । ९समाप्तौ १०परकृतौ ११प्रश्ने च मेदि० । तत्र एवम् भूतः एवंभूत इत्यादौ क्रियाविशेषणत्वम् एवंविधः एवंप्रकारइत्यादौ द्रव्यविशेषणत्वमिति भेद "एवंविधेनाश्ववेष्टितेन" रघुः । "एवमादीन् विजनीयात् प्रकाशाञ्जौ कवटकान्" "अन्येषामप्येवमादीनाम् मद्यानामोदनस्य च" मनुः ।

एवया त्रि० एव एवं अवनं वा याति या–क्विप् प्रषो० । रक्षके "युञ्ज एवया उ सप्रथाः" ऋ० १,१५६,१, "एवया रक्षकप्रापयित्रा" भा० ।

एवयामरुत् पु० एवया रक्षकोमरुद्यस्य । ऋषिभेदे । "मरुत्वते गिरिजा एवयामरुत् । "एतत्सामरुद्भ्यः प्रशस्तम्"भा० ।

एवयावन् पु० एवस्य एवंप्रकारस्य यावा या–वनिप् । रक्षके विष्णौ । "विश्वजन्यामप्रयुतामेवयावो मां दाः" ऋ०७,१००,२, "एवयावः ! विष्णो !" भा० । वेदे सम्बुद्धेरुदात्तम् । एव गत्वरि त्रि० "तान्नो मरुतो मरुत् एवयावोः ऋ० २,३४,११, स्त्रियां ङीप् वनोरच । एवयावरी । "या सुष्वैरेवयावरी" ऋ० ६,४८,१२,

एवार पु०एव एवमृच्छति ऋ–अण् । सोमभेदे । "एवारे इवभाःसते"ऋ०८,४५,२८,"एवारोनाम कश्चित सोमः"भा०

एवावद् पु० एव एवमावदति आ+वद–अच् । ऋषिभेदे "यद्धि त्वस्य मनसस्य चित्तिभिरेवावदन्त यजतस्य मन्मभिः" अवतसारस्य सृणयाम्" ऋ० ५,४३,१, "अत्रस्य मनसश्चैवावदस्य यजतस्य मन्मभिरवतसारस्य चैषामृणीयाम्" भा०

एष गतौ भा० आत्म० सक० सेट् । एषते ऐषिष्ट एषाम् बभूव आस चक्रे । एषणीयः एषितव्यः एषितः एषिता । एषितुम् एष्टिः एषणम् एषा एषमाणः । "परोक्षेऽपि एव स्वर्वाची गौरुपैषत" अथ० ६,६७,१, वेदे गणव्यत्ययात् पर० । उपेयतु एकिःपरकृपम्" । "स वै वस अदमतिकर्मणते यः कर्म्मणां पारमपारकर्म्मणः" भाग० २,१२,४४, धातूनामनेकार्थत्वात् अवलोकयतीत्यर्थः" "तस्माद्विद्वान् एतदेव एति" शत०ब्रा० ११,२,४,२, ।

परि+अन्वेषणे पर्य्येषते पर्य्येषिः कोऽपि कश्चित् गणव्यत्ययात् । "अन्यः संविशस्व जायाः पर्य्येषको विभावसुम्" भा० अनु० ८५ ।

एष स्त्री एष–भावे क्विप् । गतौ "तावाजिमेव रथानाशुर्वीम्" ऋ० ५,६६,२, "एवे गन्तुम्" भा० । "राय एवेऽवसे दधीत"५,४१,५,"एवे प्राप्तुम्" भा० । "तेभ्यः स्वधेव चकार" शत०ब्रा० २,४,२,४, । इण–क्विप् । इदुधी । "न सोदोऽस्थीतमेधे" ऋ० १,१८०,४, एषे कौक्षलिरुक्षते" भा० ।

एषण पु०एषते यत्नं कुरुतेऽयम् एष् । १लौहमयबाणे हेमाद्रयुधः । इण इच्छायां क्यिच् भावे-ल्युट् । एषणा २प्रेरणायां ३पुत्रलोकवित्तकामनायाञ्च स्त्री "अ कश्चिदस्यः संसार उल्लादक्षेत्रवत्तात्" वेदा० । "तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति । या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे

भवतः" शत०ब्रा० १४,६,४,१, "पुत्रैषणा पुत्रोत्पत्तिसहिता दारसंग्रहेच्छात्मिका । वित्तं द्विविधं मानुषं गवादि दैवं विद्यादि, तस्य कर्मणा साधनस्य गवादेरुपादानरूपा इच्छा वित्तैषणा।नेन कर्म कृत्वा पितृलोकं जेष्यामीति विद्यासंयुक्तेन वा देवलोकम् । केवलया वा हिरण्यगर्भविद्यया देवेन वित्तेन देवलोकं जेष्यामीतीच्छा लोकैषणा । एवमेकत्वेऽपि लोकैषणायाः साधनमन्तरेणासिद्धे साध्यसाधनभेदेन द्वैविध्यमाह उभे इति" भा० । "अपकृतसकलैषणामलात्मन्यविरतमेधितभाव नोपकृतः" भाग० ४,३१,१८, एष्यते ज्ञायते मानसनया करणे ल्युट् ङीप् एषणे । ४तन्नासाधन । क्तिच्) मानयत्नभेदे मेदिनि स्वर्थे कन् । एषणिकाऽप्यत्र । अमरः । एषते व्रणपरिमाणया करणे ल्युट् ङीप् । (वैद्यकार) ५व्रणस्फोटनाख्यभेदे मेदि० । भावे ल्युट् । सुश्रुतोक्ते व्रणविदारणव्यापारभेदे । तत्र हि "यन्त्रकर्म्मणि तु नियोजनपूरणत्यादुपक्रमे "चूषणैषणदारणेत्यादि पठित्वा चतुर्विंशतिरित्युक्तम् । तत्र एषणमभ्यन्तरे यन्त्रप्रवेशनेन पूयादेरपसारणम् । तत्साधनयन्त्रमेषणी यथाह सुश्रुतः "सा यति यन्त्राणि तद्यथा मण्डलाग्रकरपत्रवेल्लाद्युपक्रमे "षडिमानि यन्त्राङ्गैषणी" इत्युक्त्वा "एषणयेषणे आनुलोम्ये च" इति तत्प्रयोजनमुक्तम् । एषणमभ्यन्तरगमनमानुलोम्यं विज्ञायम् तत्रैव एषणीलक्षणं "एषणी गण्डूपदाकारहस्ती" उक्तम् ।"एष्ये षेऽयनलाभे तु मात्राकृत्यङ्कुरा हिताः" सुश्रुतः ।

एषणीय त्रि० इष-एष-वा कर्मणि अनीयर् । १आशास्ये "जायापती लौकिक मेषणीयम्" कुमा० । २गम्ये च ।

एषा स्त्री एष-अ । इच्छायां जटाधर ।

एषावीर पुंस्त्री । एषायां यज्ञेऽं धनादिप्रतिग्रहेच्छायां वीरः । यतः कृतत्रित् प्रतिग्राहके निन्दितब्राह्मणभेदे । स्त्रियां जातित्वात् ङीष् । "यद्वै नमैषावीरा याजयेयुः" शत० ब्रा० ११,२,७,२२, "एषावीरोनाम निन्दितब्राह्मणजातिविशेषः तत्संबन्धिन ऋत्विजः" भा०

एषिन् त्रि० इष-णिनि । इच्छौ अभिलाषके । "यौवने विषयैषिणाम्" "बभूव युद्धं तुमुलं परस्परजयैषिणोः" रघुः । स्त्रियां ङीप् ।"तदाश्रिता हि सा श्रेया बुद्धि सञ्जैषिणी भवेत्" भा०व० ८१ अ० ।

एष्टव्य त्रि० इषु वाञ्छायाम् तव्य । वाञ्छनीये । "एष्टव्या पक्षवः पुत्रा यज्ञेऽश्वो गयो व्रजेत्" मु०त० मत्स्यपु० "तद्वेव ब्राह्मणेनैष्टव्यम्" शत०ब्रा० १,६,३,१७ ।

एष्टि स्त्री आ+यज आ+इष वा क्तिन् । १अभियजने २अभिकामनायाञ्च ।"पितृणां शम्बदुबभूव सुहृदष्टौ"रघु० ६,२१ ८, । "एष्टौ आयजनेऽभिकामवे वा" भा० करणे क्तिन् ३आशासनसाधनेषु ऋक्सामेषु । "प्रजापतिर्वै विश्वकर्मा सहीदं सर्वमकरोत् मनोगन्धर्वस्तस्य ऋक्सामान्यप्सरस इति मनोह गन्धर्व ऋक्सामैरप्सरोभिर्मिथुनेन सहोक्तामैष्टयोनामेत्यृक्सामानि वा एतस्य ऋक्सामैर्ह्याशासते इति नोऽस्विति नोऽस्विति" शत०ब्रा० ६,४,१,१२ । "प्रजापतिर्विश्वकर्मा मनोगन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयोनाम" यजु० १८,४२ ।

एष्य त्रि० इष-कर्मणि यत् ।१वाञ्छनीये भावे यत सुश्रुतोक्ते "तत्र शस्त्रकर्म्माष्टविधं तद्यथा छेद्यं भेद्यं लेख्यं वेध्यमेष्यमाहार्य्यं विस्राव्यं सीव्यमित्यृक्षेषु अष्टसु मध्ये २शस्त्रकर्म्मभेदे न० । "एष्येष्वेषणयोगे" सुश्रु० "घृणोपहतकाले वेणुनलनालीशुष्कालाबुसंखेषु एष्यम्" इत्युक्तेषु तत्कर्म्माचरणम् । कर्मणि यत् ।४एषणकर्मसाध्ये त्रि० । "एष्या नाड्यः सप्तत्यास्त्रया उन्मार्गिण्यस्ये" सुश्रु० एष गतौ यत् । ५गन्तव्ये त्रि० । "गतैष्यदिवसाद्येन गतिर्निर्घृणे खण्डकृता" नीलक०ता० । इष गतौ दि० इष इच्छायां स्वा० इष आभीक्ष्ण्ये क्र्या० एष्य यत् । एष्य तत्त्वज्ञात्यर्थकर्म्मणि प्राक् प्रेष्य इत्येव प्रेष्यस्तु इष गतिहिंसादर्शनेषु इत्यस्य यदन्तस्य रूपम् इति भेदः ।

एह त्रि० आ+ईह अच् । १सम्यक् चेष्टायुक्ते । एला एहाः परिपाते दृढत्वात्" ऋग्० १२,३,२२ । आ ईषदर्थे ईह चेष्टायां करणे क । २क्रोधे निरु० क्रुजस्य सम्यक्कार्य्यानर्हत्वात् ईषच्चेष्टाक्षेन तथात्वम् । [ङीन् । एही ।

एहि त्रि० आ+ईह-त इन् । सम्यक् चेष्टान्विते स्त्रियां ङीप् ।

एहीड न० एहि ईडे इत्युच्यते यस्मिन् कर्मणि अयूर० नि० । एहि ईडे इत्युच्यते यस्मिन् कर्मणि तादृशे कर्मणि एवं एहिकटा एहिबाणिजका एहिहितीया एहिस्वागता एहिविषया इत्यादयोऽपि तत्तत्क्रियावाच्यस्त्री एहियं तु तत्कर्मणि न० इति भेदः ।

इति वाचस्पत्ये एकारादिशब्दार्थसङ्कलनम् ।

ऐ

ऐकारः स्वरवर्णभेदः एतौ कण्ठतालव्यावित्युक्तेः कण्ठतालुस्थानयोरुच्चार्यः। स च दीर्घः द्विमात्रत्वात् प्लुतस्तु त्रिमात्र इति भेदः। द्विमात्रस्य उदात्तानुदात्तस्वरितभेदैः प्रत्येकमनुनासिकाननुनासिकभेदाभ्यां षड्विधः एवं प्लुतस्यापीति द्वादशविध। तन्त्रे तस्य वाचकशब्दा उक्ता यथा।"ऐकेच्छा भौतिकः कान्ता वाग्यो मोहिनी विभुः। दक्षा दामोदरः प्रज्ञो धरो विश्वतनुस्त्र्यपि। क्षमात्मकोजगद्योनिः परः परनिबोधकृत्। ज्ञानामृता कपर्द्दिश्रीः पीठेशोऽग्नि समात्मकः। त्रिपुरा लोहिता रात्री वाग्भवो भौतिकासनम्। महेश्वरी द्वादशी च त्रिमलश्च सरस्वतो। कामकोटो वामजानुर्गुणान् विजयो जटा"। "ऐकारः कोठरात्री च मालिन्युत्तरभैरवी"इति च वर्णाभिधा०। मातृकान्यासेऽधरोष्ठे न्यस्तत्वात् तच्छब्दाभिधेयता। तस्य ध्येयरूपं कामधेनुत० उक्तं यथा "ऐकारं परमं दिव्यं महाकुण्डलिनीं स्वयम्। कोटिचन्द्रप्रतीकाशं पञ्चप्राणमयं सदा। ब्रह्मविष्णुमयं वर्णं तथा रुद्रमयं प्रिये!। सदाशिवमयं वर्णं बिन्दुत्रयसमन्वितम्"। तपरत्वे कारपरत्वे च तत्स्वरूपपरः।

ऐ अव्य० आ+इण्–विच्। १आह्वाने २स्मरणे ३आमन्त्रणे च ४महेश्वरे पु० तस्य सर्वगत्वात्तथात्वम्।

ऐक त्रि० एक+स्वार्थे अण्। एकशब्दार्थे ततोभवादार्थे गर्हा० क। ऐकीय एकसम्बन्धिनि तद्वादौ च त्रि०।

ऐकध्यम् अव्य० एकधा+धास्थाने ध्यञ्तञ् एकधेत्यर्थे "ऐकध्यं च अपथम्" कात्या० १४,२,२४। "एतदैकध्यं संगृह्य" सूत्र०। ततः स्वार्थे ड। ऐकध्य तद्वर्थे न० "ऐकध्येन अपथम्" उक्तकात्या० सूत्रभाष्ये कर्क०।

ऐकपत्य न० एकपतेर्भावः कर्म वा ष्यञ्। सार्वभौमत्वे "अप्रतिद्वन्द्वतामैकपत्यञ्च सर्वदेहिनाम्" भाग०७,२,२६। एकपतौ भवः प्रत्युत्तरपदत्वात् यत्। एकपतिभवे त्रि०।

ऐकपदिक त्रि० एकस्मिन् पदे स्थाने विभक्तौ वा भवः ठञ्। १एकस्थानभवे २एकविभक्त्यन्तपदभवे च। एकपदाय प्रभवति ठञ्। "कृतोऽध्येकपदिका भवन्ति यथा व्रततिर्दमूनाः" इत्यादि निरु० "एकार्थमनेकशब्दमित्यत्र तद्वक्तम् अथ यान्यनेकार्थान्येकपदानि तान्यतोऽनुक्रमिष्यामोऽवगतसंस्कारांश्च निगमान् तदैकपदिकमित्याचक्षते इति निरु०उक्ते अनेकशब्दे एकार्थपरे समासादिवृत्तिरूपे २वाक्यभेदे च।

ऐकपद्य न० एकपदस्य एकार्थैकविभक्त्यन्तस्य भावः ष्यञ्। संहृतार्थत्वे अनेकपादानामेकार्थबोधकतासम्पादने समासादिभावे। [भावत्वे।

ऐकभाव्य न० एको भावो यस्य तस्य भावः ष्यञ्। एकस्व-

ऐकमत्य न० एकं मतं येषां तेषां भावः ष्यञ्। तुल्यसम्मतौ "स्वर्गामिणस्तस्य तमैकमत्यात्" रघुः। "ऐकमत्यं हि नो राजन्! सर्वेषामेव लक्ष्यते" भा०व० ७अ०। "ऐकमत्यञ्च सर्वस्य जनस्याथ न्यपं प्रति" भा०व० २६८ अ०। "सुहृदस्तैकमत्यात्" भा०उ० २२ अ०। "ऐकमत्यं महाधियाम्" नीतिः। ऐकमत्यमस्त्यस्मिन् अच्। ऐकमत्ययुक्ते त्रि०। "गर्हैतान्योन्यमतयो मल्लिखो ब्रुवते सदा। नचैकमत्यः येषोऽस्ति मन्मथः सोऽधम उच्यते" रामा०।

ऐकराज्य न० एकराजो भावः ष्यञ्। चक्रवर्त्तित्वे "यजुःसूपसर्गे यैनैकराज्यमजयो हि नौ" आश्व०श्रौ०५,१६,४।

ऐकलव्य ३स्त्री एकस्वः अपत्यं गर्गा० यञ्। एकलूनामकवैश्यगोत्रापत्ये स्त्रियां ङीप् यलोपः ऐकलवी। ऐकलव्यस्य छात्राः कण्वा० ततोऽण् यलोपः। ऐकलव तच्छात्रेषु स्त्रियां ङीप्।

ऐकशतिक त्रि० एकशतमस्यास्ति ठञ्। एकशतपरिमितद्रव्यस्वामिनि। एवमैकसप्तिकादयोऽपि तत्तत्संख्याद्रव्ययुक्ते त्रि०।

ऐकश्रुत्य न० एका श्रुतिर्यत्र तस्य भावः ष्यञ्। "उदात्तानुदात्तस्वरितानां परः सन्निकर्षः ऐकश्रुत्यम्" आश्व०श्रौ० १,२ ६, सूत्रोक्ते स्वरभेदे। एकश्रुतिशब्दे विवृतिः ऐकस्वर्य्यमप्यत्र न०।

ऐकागारिक त्रि० एकमसहायमगारं प्रयोजनमस्य ठञ्। चौरे स्त्रियां ङीप्। "ऐकागारिकवद्भूमौ दूराच्छ्वभ्रदर्शनम्" माघः "क्वचिदैकागारिकेण कृतवता" दशकु०।

ऐकाग्र्य त्रि० एकाग्र+स्वार्थेष्यञ्। एकाग्रचित्ते एकतानचित्ते

ऐकाग्र्य न० एकाग्रस्य भावः। अनन्यासक्तचित्तत्वे एकमात्रालम्बिचित्तत्वे एकाग्रतायाञ्च विवृतिरुदाहरणञ्च।

ऐकात्म्य न० एक आत्मा स्वरूपं यस्य तस्य भावः ष्यञ्। १ऐक्ये २एकस्वरूपत्वे। "तथैकात्म्यानुभावानां विकल्परहितः स्वयम्" भाग० ६,८,३१। "एतेषां श्रेयआयासे उतैकात्म्यं महात्मनि" ७,१२,२६। "एकात्म्यगमनात् सद्यः कलुषाद्विप्रमुच्यते" भा०अनु० ३७५। ३क्षमभेदे च

"ऐकात्म्यं वासुदेवस्य मोक्षवानर्जुनस्य च" भा० आ० १अ०। एकस्यात्मा तस्य भावः। ४आत्मन एकत्वे ऐकात्म्यवादः ऐकात्मवादी

ऐकादशिन त्रि० एकादशानां संघ इनि एकादशिनी क्षत्रियीवत् स्त्रीत्वं सा साधनत्वाऽस्यास्त्य० अण्। एकादशिनीसाध्यफले। "इमे त्वेवैते एकादशिन्यावालभेत य एवैकादशिनेषु कामस्तस्मा एनं" यत० ब्रा० १२,१,१,२ तत्राऽभ्यहितविधैकादशसंख्यपशुभेदाः देवतासहिताः यजु० २६,५८,५६ उक्ता यथा

"आग्नेयः कृष्णग्रीवः१ सारस्वती मेषी २बभ्रुः सौम्यः३ पौष्णः श्यामः४ शितिपृष्ठो बार्हस्पत्यः५ शिल्पोवैश्वदेवः६ ऐन्द्रोऽरुणो७ मारुतः कल्माषः८ ऐन्द्राग्नः संकृतोऽधो रामः सावित्रो १०वाक्यः कृष्ण एकशितिपात्११मेत्रः"५८ "अश्वमेधे स्तुतिरस्ति इमे त्वेवैते एकादशिन्यावालभेतेति" तयोरेकादशिन्योः पशवस्तद्देवताश्च कथिताह्येनोक्ताने तेमेमानि ब्राह्मणवाक्यानि द्रव्यदेवताप्रतिपादकानि नतु मन्त्राः। कृष्णा ग्रीवा यस्य स कृष्णग्रीवः पशुरग्नेयः अग्निदेवत्यः १, मेषी सारस्वती सरस्वतीदेवताका२ बभ्रुः पिङ्गलवर्णः पशुः सौम्यः सोमदेवत्यः३ श्यामः कृष्णवर्णः पौष्णः पूषदेवत्यः४ शितिः श्यामः पृष्ठमस्य स शितिपृष्ठः बार्हस्पत्यः बृहस्पतिदेवत्यः५ शिल्पो विचित्रवर्णो वैश्वदेवः विश्वेदेवदेवत्यः६ अरुणः रक्तः ऐन्द्रः इन्द्रदेवत्यः७ कल्माषः कर्बुरो मारुतः मरुद्देवत्यः८ संकृतः शबलः ऐन्द्राग्नः इन्द्राग्निदेवत्यः९ अधोरामः अधोदेशे श्वेतः सावित्रः सवितृदेवत्यः१० एकः शितिः श्वेतः पादोऽस्य स एकशितिपात् एकपदे श्वेतोऽन्यत्र कृष्णः मैत्रः एतन्नामको वेगवान् पशुः वाक्यः वाक्देवत्यः११। एव मेकादश"वेदद्दो। "आग्नेयोऽष्टाकपाले रोहितायाश्विनेऽनड्वानधोरामो सावित्रो पौष्णो रजतनाभी वैश्वदेवो पिशङ्गो द्रुपदो मारुतः कल्माषः आग्नेयः कृष्णोऽजः सारस्वती मेषी वाक्यः मैत्रः"५६।"द्वितीयैकादशिनीपशुदेवानाम्। रोहिती रक्तोऽक्षिप्तिलको वक्ष्य ओजनद्वान् इषमोऽनीक वतेऽन्नमेव आत्मन्' अनीकं सुखं वैन्यं वा वक्ष्य ओजीकवत्। तस्मै १ अधोरामौ अधोभागे श्वेतौ द्वौ पन्थ सावित्रौ सवितृदेवतौ२,१। रजतवर्णा नाभिर्यस्योसौ रजतनाभी द्वौ पौष्णौ पूषदेवतौ३,५"पिशङ्गौ पीतौ द्रुपदौ त्रिःकृष्णौ वैश्वदेवौ विश्वेदेवदेवतौ६,७ कल्माषः कर्बुरो मारुतः८ कृष्णः श्यामोऽजोमेषः आग्नेयः आग्निदेवतः९ मेषो सारस्वती१० मैत्रः वेगवान् वक्ष्यदेवतः११ एवमेकादश" इति वेदद्दीपः

ऐकाधिकरण्य न० एकाधिकरणस्य भावः ष्यञ्। एकाधिकरणवृत्तित्वे सामानाधिकरण्ये। "अथवा हेतुमात्रवृत्तिरूपप्रतियोगिना। साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते" भाषा०। मुख्यविभक्तिकपदयोः स्वोपस्थाप्यार्थयोरभेदबोधकत्वं च।

ऐकान्तिक त्रि० एकान्तमवश्यं भावी ठञ्। १अवश्यभव्ये। "सुखस्यैकान्तिकस्य च" मनुः। "ऐकान्तिकमात्यन्तिकमुभयमाप्नोति कैवल्यम्" सां०का० ऐकान्तिकमवश्यं भावि" कौ०। एकान्त भूतः स्वसत्तया व्यापी ठञ्। २एकान्तस्य स्वसत्तया व्यापके "क्षणश्चैकान्तिक सुकृत्" भाग० २,२, स्त्रियां ङीप् "ऐकान्तिकी हरेर्भक्तिरुत्पातायैव कल्पते" वरा०पु०।

ऐकान्तिक त्रि० एकमन्यत् विपरीतं वृत्तमध्ययनेऽस्य। "कर्माध्ययने वृत्तम्" पा० ठक्। यज्ञाध्ययने प्रवृत्तस्य परीक्षाकाले विपरीतोच्चारणरूपं स्खलनमेवं ज्ञातम् तादृशे कुपाठके ज्ञाते।

ऐकायन पुंस्त्री एकस्य तच्छाखोक्तनैगौत्रापत्यम् नडा० फक्। एकस्यमैगौत्रापत्ये स्त्रियां टाप्।

ऐकार्थ्य न० एकार्थस्य भावः ष्यञ्। एकयज्ञा विधिर्द्वयोर्यस्यापने एकार्थीभावे। १एकप्रयोजने च। "२अत्र बन्धेनैकार्थ्यं सन्धिः" वि०कौ०।

ऐकाहिक त्रि० एकाहमवोऽतीतोभवतोभावी वा ठञ्। १एकाहसाध्ये यागादौ स्त्रियां ङीप्। ततोऽन्यार्थे "काहिकानि" आश्व० श्रौ० ८,१६,१६, "ताभ्यां पूर्वे ऐकाहिके" २,१०,१०, "अन्यासामैकाहिकानामेतत्" २एकाहव्याप्ये ज्वरादौ "सप्तरश्मेस्तरे तीरे हिपदोनाम वानरः। ऐकाहिकज्वरं कृत्वा तस्य नामानुकीर्त्तनात्"। ऐकाहिकज्वरस्य एकाहानन्तरे एकदिनं व्यापकोज्वरः इति वैद्यके प्रसिद्धम्। एकाहभवे १दार्ढे एकाहमधीते सतूलम् व्यापारिते ४अध्यापके स्वसत्तया एकाह व्याप्यकाले ५ एकाहभाविनि तत्तद्वाटौ च। एकाहसाध्ययागभेद एकाहः तस्य इष्टित्व ठञ् ङीप्। ६एकाहसाध्ययागदक्षिणायां स्त्री।

ऐक्य न० एकस्य भावः ष्यञ्। १एकत्वे २अभिन्नत्वे ३एकार्थीभावे च "ऐक्यं योऽन्वये" सुश्रु० "ऐक्यसंबोधनालाप्त समवायविचारदः" भा० स० ५अ०। ४ऐकमत्ये औकार्ढे च "तेषां द्वयोर्द्वयोरैक्य विभेदे न कथञ्चन" रघुः। एवञ्चा-

मद्यं गर्गा०यत्र । एकापतेऽ पुंस्त्री०स्त्रियां ङीप् यलोप ऐको ।

ऐक्षव त्रि० इक्षोर्विकारः विल्वा० अण् । इक्षुविकारे गडादौ इक्षुविकारभेदाश्च इक्षुशब्दे ६०६ पृ० उक्ताः । "ऐक्षवं गुडसर्जितम्" "फलान्यगुडमैक्षवमिति" च स्मृतिः । २मद्यभेदे च । "पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् । मार्द्वीकं टाङ्कमाध्वीकमैरेयं नारिकेलजम् । समानानि विजानीयान्मद्यान्येकादशैव तु । हादयन्ति सुरामद्यं सर्व्वेषामधमं स्मृतम्" पुलस्त्यः । मद्यान्येकादशेष्वुक्तिः अधिकदोषार्था अन्येषामपि मद्यानां मदनपालेन दर्शितत्वात् । प्रसङ्गात् तान्यत्र गुणसहितानि दर्श्यन्ते ।

"मद्यं फाला सुरा गुण्डा मदिरा वरुणात्मजा । सुरा गन्धोत्तमा कल्या देवस्पृष्टा च वारुणी । मद्यं पित्तकरं प्रायं सरं रोचनदीपनम् । विदाहि स्रुतविण्मूत्रं तीक्ष्णं वातकफापहम् । विधिना तु युतं पीतं तन्नात्ममृतसन्निभम् । अन्यथा कुरुते रोगानातपीतं विषोपमम् । १द्राक्षोत्थमविदाहि स्याद्रक्तपित्तेषु शस्यते । बल पुष्टिकरं मद्यं रक्तार्शोहारि दीपनम् । माध्वीकस्य गुणं किञ्चित् २खार्जूरमनिलप्रदम् । तदेव विशदं रुच्यं स्निग्धं कर्फ लघु । यालिषष्टिकपिष्टादिजातं मद्यं सुरा १मता । सुरा गुर्वी बलस्त्यपुष्टिभेदःकफप्रदा । वारुणी योगगुल्मार्शोपहणीमूत्रकृच्छ्रनुत् । पुनर्नवाशालिपिष्टैर्विहिता वारुणी ४मता । सुरावद्वारुणी ज्ञेया पीनसाध्मानशूलनुत् । प्रसन्ना ५खाल्पुरामण्डस्तत्खात्कादम्बरी दैघना । ७जङ्गलजदधः प्रोक्तो जङ्गलाम्लोदकोदधनः । पक्वसो ६जङ्गलः सारः सुरावीजन्तु किण्वकम् १० । प्रसन्नाशाकृच्छ्रमार्गस्त्रंसरोचकवातजित् । दीपन्यास्यानकृत्कुक्षितोदशूलप्रणाशिनी । कादम्बरी गुरुर्ह्याही दीपनी वातजित् सरा । जङ्गलः कफतृट्प्राही शोफार्शोगणहरः । मेदको मधुरो रूक्षस्तन्मनः पीतको गुरुः । पक्वसो कृतसारत्वात् विष्टम्भी वातवर्द्धनः । किण्वकं वातघमनमकृच्छ्रं दुर्जरं गुरु । आलिको ११सा सुरा या स्यादल्पकल्कावशिष्टवर्द्धनं । आलिको पाक्वयोगाद्यैःपित्तासृककफकृल्लघुनुत् । किञ्चिद्धातकरी कृत्वा दीपनी रेचनी लघुः । यत्पिष्टजं मद्यं शोक्तं यवसुरा १२च सा । कादम्बिको १३कृत्वा पेया मैरेयो १४धान्यजास्रवः । आसवश्च सुराद्याश्च द्वयोरेकभाजनम् । साधनं तद्विजानीयान्मैरेयस्यावलम्बनम् । क्वचित्तु धातकीपुष्पं गुडधान्याम्ब्वधिष्ठितम् । गुर्व्वी यवसुरा कृत्वा खाद्विदग्धान्नविदाहिनम् । कादम्बरी दृढ्या दृष्टिमान्द्यप्रदा गुरुः । मैरेयं दृढ्यं दृढ्यं गुरु सन्तर्पणं सरम् । मद्यं सर्व्वरसं जातं मधूलकसदीर्य्यते । मधूलकं १५गुरु स्वादु स्निग्धं शुक्रकफप्रदम् । पर्कटी १६दीपन स्वादुः पाचनो रोचनो लघुः । स्त्रीविलासकरो वातशोषक्षतविकारनुत् । मध्वासवो १७लघुरूक्षः कृच्छ्रमेहविषापहः । गौडोऽग्निवर्द्धनो वर्ण्यो बलकृत्तर्पणः कटुः । तिक्तको दृढ्यः स्वादुः स्रुतविण्मूत्रमारुतः । रसोः पीतरसः १६पक्वः सीधुः २०पक्वरसः स्मृतः । आर्मः स एव विज्ञेयो बुधैः पीतरसो मतः । सीधु पक्वरसः श्रेष्ठः खराग्निबलवर्णकृत् । वातपित्तकरो हृद्यश्चक्षुष्यो रोचनो जयेत् । विबन्धमेहशोथार्शःशोथोदरकफामयान् । तस्मादल्पगुणः पीतरसः संक्षेपनः स्मृतः । जाम्बवं पौष्पसम्भूतः अम्बुरसगुडोद्भवः । जाम्बवो २१बद्धनिष्ठ्यूतः कषायोऽनिलकोपनः । अरिष्टासवसीधूनां गुणान् कर्म्माणि चादिशेत् । बुद्ध्वा यथास्वं संस्कारमवेक्ष्य कुशलो भिषक् । सान्द्रं विदाहि दुर्गन्धि विरसं क्लमिसङ्कुलम् । अकृत्स्नं तक्रयं कूलसृष्टं दुर्भोजने हितम् । अल्पौषधं पर्य्युषितमत्यर्थपिच्छलञ्च यत् । कफप्रकोपि तन्मद्यं दुर्जरञ्च विशेषतः । पित्तप्रकोपि बहुलं तीक्ष्णसुष्णं विदाहि च । अकृत्स्नं मेषयं पूतिक्लिन्नं विरसं गुरु । तथा पर्य्युषितं वापि विद्यादनिलकोपनम् । सर्व्वदोषैरुमेतन्तु सर्व्वदोषप्रकोपणम् । चिरस्थितं यातरसं दीपनं कफवातजित् । रुच्यं प्रसन्नं सुरभि मेध्यं सेव्यं मदात्ययम् । तच्चाप्येकप्रकारस्य मद्यस्य रसबोधतः । स सौम्यत्वादौष्णवातत्वादु विकाशित्वाच्च वक्ष्यते । समेत्य हृदयं प्राप्य धमनीरूर्द्धमार्गगाः । विभ्रमेन्द्रिय चेतांसि मदयत्याशु बोधतः । चिरेण श्लेष्मिके दुष्टे पातनो जायते मदः । अचिरा हातिके दृष्टः, पैत्तिके मोहमेव च । नवं मद्यमभिष्यन्दि विदोषजनकं सरम् । अरिष्टं दृढ्यं दाहि दुर्गन्धि विषदं गुरु । जीर्णं तदेव रोचिष्णु क्लमिश्लेष्मानिलापहम् । हृद्यं सुगन्धि सुपाच्यं लघु स्रोतोविशोधनम् । वातिके गीतकाद्याहि राजसे खाण्डवादिकम् । तामसे निम्बमार्कादि निर्दाहि कुरुते तदा । शुक्लं कफघ्नं तीक्ष्णोष्णं लघु रोचनपाचनम् । पाण्डु क्लमिकरं रूक्षं भेदनं रक्तपित्तजित् । गौडादिरेवमुक्तानि मद्योपधानि यानि च । यथापूर्वं गुरुतरान्यनिष्टकराणि च ।

स्वाकाङ्क्षिकन्तु २२सौवीर २३मारनालं २४तु दीपनम् । काङ्क्षिकं शिशिरस्पर्शं पाचनं रोचनं लघु । तुषोदकं यवैरामं सतुषैः सकलैः कृतम् । सौवीरकं कृतन्त्वामैः पक्वैर्वा निस्तुषैर्यवैः । सर्व्वैरेरसाम्लं २५स्यात् सौवीरकमिति क्वचित् । तुषाम्बु दीपनं रूक्षं पाण्डु क्रमिगदापहम् । सौवीरकं यवशणौनाशनं भेदि दीपनम् । धान्याम्ल२५ मान्ययोनित्वात्प्रीपनं लघु दीपनम् । स्पर्शदाहकरं पानात्पाचनं श्लेष्मनाशनम् । गण्डूषाम्लखैरस्यदौर्गन्ध्यकफक्लमनम्" । ऐक्षवस्य द्वैविध्यमाह भावप्र० "इक्षोः पक्वैः रसैः सिद्धः सीधुः पक्वरसस्य सः । आमैस्तैरेव यः सीधुः स च धौतरसः स्मृतः" इति । इक्षुः काण्डमूलं तस्येदम् अण् । १काण्डमूलावयवभूते स्त्रियांङीप् । इक्षुः इक्षुपत्राकारः अस्यास्य अण् । ४इक्षुपत्राकारे च स्त्रियां ङीप् । "ऐक्षव्यौ विष्टनी" कात्या० ८,१,१४, "विष्टती ऐक्षव्यौ काण्डमूलावयवभूते अत्र भवतः "काण्डमयः प्रस्तरः काण्डमूलमये विष्टती" याज्ञान्तरीयवाक्यशेषात्" कर्कः । अधिकरणमालायां "बर्हिःप्रस्तरयोर्मध्यराले तिर्य्यक्प्रसार्य्यमाणौ दर्भौ विष्टती ते अत्र इक्षुपत्ररूपे ख्याता मिति" माधवः । तेनात्र ऐक्षव्यशब्दकल्पनं प्रामादिकम् । "दीर्घकलशं यायव्यानिधूमकार्ष्यमयान् परिधीनास्यवालं प्रस्तरमैक्षव्यौ विष्टती तद्बर्हिरुपसंनद्धं भवति" शत०ब्रा० ३,६,३,१०,

ऐक्षुक त्रि० इक्षौ साधु गुडा० ठञ् । इक्षुसाधुनि चेत्यादौ इक्षुं भारभूतं वहति आवहति वा ठञ् । १भारभूतेक्षुवाहके २तदावाहके च । इक्षवःसन्त्यस्यां नडादि० ङ क्वुक् च । इक्षुकीया भूमिरस्यां भवः अण् विल्वकादि० क्रमादस्य लुक् । ऐक्षुक ; तादृशभूमिभवे त्रि० ।

ऐक्षुभारिक त्रि० इक्षुभारं वहत्यावहति वा ठञ् । इक्षु १वाहके २तदावाहके च ।

ऐक्ष्वाक पु० इक्ष्वाकोर्गोत्रापत्यम् अण् नि० । १सूर्य्यवंशे नृपे बहुषु अधोलुक् । "इक्ष्वाकूणां दुरापेऽर्थे त्वदधीनाहि सिद्धयः" रघुः । इक्ष्वाकोरयं जनपदः । ऐक्ष्वाक २तद्राजके जनपदे च बहुषु लुक् । तत्र भवः कोपधत्वात्अण् ऐक्ष्वाक तज्जनपदभवे बहुषु लुक् । क्वचिन्न लुक् । "ऐक्ष्वाकेषु च मैथिलेषु च फलन्त्यस्याकमद्यापिषः" इति मुरारिः । "ऐक्ष्वाक पुरुषव्याघ्रमतिमात्रपराक्रमम्" भा० भा० २६अ० । "त्रिशङ्कुर्बन्धुभिर्मुक्त ऐक्ष्वाकः प्रीतिपूर्व्वकम् भा० अनु० १अ० । अत्र ऐक्ष्वाकुरितिपाठस्तु आर्षत्वात् साधः [इक्षुदोष्टक्फले (जिँआपुती)

ऐक्षुद न० इक्षुद्याः फलम् फले अण् तस्य लुक्वा० न लुक् ।

ऐच्छिक त्रि० इच्छया निर्वृत्तः ठञ् । इच्छया कृते स्त्रियां ङीप्

ऐड पु० इडायाश्छोऽस्त्यस्मात्यवाकोऽध्याये वा विल्लक्षा० अण् । इडाशब्दयुक्ते १अध्याये २अनुवाके च एडस्येदम् अण् ३मेषसम्बन्धिनि त्रि० स्त्रियां ङीप् । इडा+अपत्ये शिवा० अण् । इडापत्ये पुरूरवसि पु० ।

ऐडक पुंक्ली एडक एव स्वार्थेऽण् । १मेषाकारे दक्षिणापथप्रसिद्धे पशुभेदे "त्रयो वा पशवोऽमेध्यादुर्वराश्च ऐडकः श्वा च" शत०ब्रा० १२,४,६,४ । एडकस्येदम् अण् तत्संबन्धिनि त्रि० एडकशब्दे उदा० ।

ऐड(ल)विड(ल) पु०इड(ल) विडा(ला) या अपत्यम् "अष्टकाभ्यो नदीमानुषीभ्यस्त्रामिकाभ्यः" पा० ढकोऽपवादः अण् डलयोरैक्यस्मरणात् उभयत्र अन्यतरतो वा डस्य लो वा । कुबेरे । "तस्य प्रीतेन मनसा तान् दत्त्वे डविडस्ततः" भाग० ४,१२,८ ।

ऐडविड पु० सूर्य्यवंश्ये क्षत्रियभेदे "नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत् । ततोदशरथः पुत्रस्तस्मादैडविडस्ततः" भाग० ९,९,२२ । सूर्य्यवंशवर्णने ।

ऐण त्रि० एणस्य कृष्णमृगभेदस्य अण् । कृष्णमृगचर्म्मादौ । एणशब्दे उदा० । [एणीपचनदेशभवे ।

ऐणीपचन त्रि० एणीपचनदेशं भवः छात्रावपत्ये अण् ।

ऐणेय त्रि० एणस्येदम् ढक् ।१कृष्णमृगचर्म्मादौ "ऐणेयरौरवाजानि अजिनानि" गोभि० । २रतिबन्धभेदे हेम० ।

ऐतर त्रि० इतरस्यापत्यादौ सङ्घादि० चतुरर्थ्यांम् अण् । इतरापत्यादेयतत्सम्बन्धिनि तदादेयादौ ।

ऐतरेय न० इतरस्य तस्याम्न अपत्यस्य गुभ्रा० ढक् । १इतरपुत्रापत्ये । "महिदायः ऐतरेयः ऋषि तेन प्रोक्तम् उ०अण् । २आरण्यकादि ग्रन्थाध्यापके ऋग्वेदीयब्राह्मणभेदे "ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं दश" इत्युक्ते तदीये ३उपनिषद्भेदे ४वेदशाखाभेदे च तदधीयते वृत्ति । ऐतरेयिन् तदध्येतृषु "अन्तरेण ऋत्विजो विष्णुसुमांस्त्रैतरेयिणः" आश्व०श्रौ०१,३,१२ "अग्नीषोमावेवमिच्छैतरेयिणः १,६,३ । एकाङ्गांस्त्रैतरेयिणः"१०,१,१२ ।

ऐतिकायन पुंस्त्री इतिकस्यगोत्रापत्यं नडादि० फक् । इतिकर्षेर्गोत्रापत्ये । अनन्तरापत्ये तु एञ् । ऐतिकिरिति

ऐतिशायन पुंस्त्री ऐतिकवत् । इतिशर्षेर्गोत्रापत्ये ।

ऐतिहासिक त्रि० इतिहासादागतः इतिहासं वेत्त्यधीते वा

ठक् । १इतिहासपर्यन्तलक्ष्ये २तद्वेत्तरि ३तदध्येतरि च ।

ऐतिह्य न० इतिह पारम्पर्योपदेशः अनिर्दिष्टप्रवक्तृकोपदेश इति यावत् स्वार्थे ष्यञ् । पारम्पर्योपदेशे । यथात्र वटे यक्षः प्रतिवसतीत्यादि परम्परोपदेशमात्रम् न तु कैर्नाप्येतदुपलब्धं कथितम् । अप्रमाणवादिनः पौराणिका इदं प्रमाणान्तरमरोचकुः तदेतन्मतं सां० कौ० निराकृतम् यथा "यज्ञानिर्दिष्टप्रवक्तृकं प्रवादपारम्पर्यमात्रम् इति केचिदैतिह्यं यथा इह वटे यक्षः प्रतिवसतीति न तत् प्रमाणम् अनिर्दिष्टप्रवक्तृकत्वेन साधर्म्यिकत्वात् आप्तप्रवक्तृकत्वनिश्चये त्वागम इत्युपपन्नं त्रिविधम् प्रमाणमिति" "स्मृतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम्" ऐतरे० "ऐतिह्यमनुमानञ्च प्रत्यक्षमपि चागमम् । ये हि सम्यक् परीक्षन्ते कृतस्तेषामबुद्धिता" रामा० । [साधौ

ऐतंयुगीन त्रि० इदंयुगे साधु प्रत्ययुगा० खञ् । इदंयुगप्रत्यासन्ने ।

ऐतश न० एत एव प्रज्ञा० स्वार्थे अण् । पापे ।

ऐन्दव न० इन्दुर्देवताऽस्य । १मृगशिरोनक्षत्रे २इन्दुदेवताके ऋचिरादौ त्रि० । तस्येदम् अण् । ३चान्द्रे मासे पु० "ऐन्दवस्त्रिंशदिवसैस्तु संक्रान्त्या सौर उच्यते" सू० सि० । ४चन्द्रसम्बन्धिनि त्रि० । इन्दु:इन्दुलोकप्राप्तिः प्रयोजनमस्य अण् । ५चान्द्रायणे व्रतभेदे । "सहस्रपालकल्पासु भास्वं योधनमैन्दवम्" मनुः । "कर्त्तव्यमैन्दवव्रतम्" स्मृतिः तद्व्रतस्य यथा चन्द्रलोकप्राप्तिफलकत्वं तथा चान्द्रायणशब्दे वक्ष्यते । ६सोमराज्ञाम् स्त्री ङीप् ।

ऐन्द्र त्रि० इन्द्रोदेवताऽस्य अण् । इन्द्रदेवताके १ऋचिरादौ "ऐन्द्रं दधि ऐन्द्रं पयः" श्रुतिः । २ऋग्विशेषे स्त्री । "ऐन्द्राग्नमेकादशकपालं पुरोडाशं निर्वपेत्" श्रुतिः । सा च ऋक् "कदाचन स्तरीरसीत्यादि" । ३तद्देवताके ज्येष्ठानक्षत्रे न० "ऐन्द्रे गुरुः यमौ चैव प्राजापत्ये रविस्तथा" प्रा० त० पुरा० । तस्येदम् अण् । ४इन्द्रसम्बन्धिनि त्रि० "ऐन्द्रं हि राज्यं पदमैन्दवानाम्" "ऐन्द्रं पदं भूमिगतोऽपि भुङ्क्ते" रघुः । ऐन्द्रं स्थानं तपोबलेन ब्रह्मभूता हि ते सदा" "ऐन्द्रस्थानमभिप्रेप्सुर्यथाशास्त्रमथव्रतम्" मनुः । ५तच्छक्तिरूपदेवीमूर्त्तिभेदे स्त्री ङीप् । "ऐन्द्रीतमसुरेश्वरम्" देवीमा० तन्त्रोक्ते भूतशुद्धौ ६धारणाभेदे "ऐन्द्र्या धारणया देहं स्थिरीकृत्येति भूतशुद्धौ" रघु० । तत्र भवः अण् । ७अर्जुने ८वाहिवाह्यारे च पु० तयोरुत्पत्तिनक्षत्रात् । अपत्ये तु इञ् । ऐन्द्रिरित्येव ९वनार्हके न० राजनि० । "ऊर्द्धे मूले च नक्षत्रे चरेद्यदि इन्द्रसूतिः । ऐन्द्रः संवत्सरः स स्यात् सर्वभूताधिवत्सरः" विष्णुध० उक्ते द्वादशवर्षमध्ये १०संवत्सरभेदे पु० । तत्फलञ्च "ऊर्द्धे जातिकुलश्रेष्ठा श्रेष्ठा नृपाः सर्वधर्म्मज्ञाः । पीड्यन्ते सर्वधान्यानि हित्वा कङ्गुयवाजानि" भवि० त० ।

ऐन्द्रजालिक त्रि० इन्द्रजालेन चरति ठक् । मायाविनि (बाजिकर) जटाधरः ।

ऐन्द्रद्युम्न न० इन्द्रद्युम्नमधिकृत्य कृतमाख्यानम् । इन्द्रद्युम्नशब्दाधिकारेण कृते आख्याने "प्रोक्तिर्प्रोणिकाख्यानाच्च ऐन्द्रद्युम्नं तथैव च" भा० आ० १अ० । इदञ्चाख्यानं प्रोक्तिर्प्रोणिकाख्यानात् परं सुदृश्यते भारते न दृश्यते क्वचित् पुस्तकान्तरेऽस्ति ।

ऐन्द्रमहिक त्रि० इन्द्रमहः प्रयोजनं कारणमस्य वाक्ष ठञ् । १ऐन्द्रमहकारणके २तत्फलके च ।

ऐन्द्रवायव त्रि० इन्द्रश्च वायुश्च इन्द्रवायू तावुद्दिश्य द्रव्ययुक्तत्वात् देवताद्वन्द्वेऽपि नानङ्तौ देवते अस्य अण् । इन्द्रवायुदेवताके ऋचिरादौ । ऐन्द्रवायवपात्रं तत्रास्य द्वितीयम्" शत० ब्रा० ४,१,५,१६ "यदैन्द्रवायवाभ्यां प्रातःसवने" ४,४,१,१७ ।

ऐन्द्रशर्म्मि पुस्त्री इन्द्रशर्म्मणोऽपत्यं वाक्षा० इञ्-टिड्ढोपध० । इन्द्रशर्म्मनामकऋषेरपत्ये स्त्रियां ङीप् ।

ऐन्द्रहव त्रि० ऐन्द्रहव्यस्य ज्ञातः कथा० अण् यञो लुक् । ऐन्द्रहव्यज्ञाते । इन्द्रहूयन्ते इन्द्रहव्यसाधनं दण्डम् ।

ऐन्द्राग्न त्रि० इन्द्राग्नी देवते अस्य अण् । इन्द्राग्निदेवताके ऋचिरादौ । "एता ऐन्द्राग्नी द्विरूपा आग्नीषोमीया" यजु० २४,८ "ऐन्द्राग्नः संहितोऽधोरामः" २६,५८ । "ऐन्द्राग्नेन विधानेन" भा० अनु० ६० अ० ।

ऐन्द्रापौष्ण त्रि० इन्द्रश्च पूषा च द्वन्द्वे आनङ् इन्द्रापूषाणौ देवते अस्य अण् उपधात्तोलोपः । इन्द्रापूषदेवताके ऋचिरादौ । "ऐन्द्रापौष्णं चरुं निर्वपति" शत० ब्रा० ३,२,५,५ । "आग्नापौष्णः ऐन्द्रापौष्णः" काठा० १६,२,१७ एवम् ऐन्द्राबार्हस्पत्यादयोऽपि इन्द्रबार्हस्पत्यदेवताके ऋचिरादौ त्रि० ।

ऐन्द्रायण पु० इन्द्रस्यापत्यम् गो० फक् । इन्द्रापत्ये ततः चतुर्थ्यां अर्शआद्यच् । ऐन्द्रायणश्च तेन निर्वृत्तादौ त्रि० ।

ऐन्द्रि पु० इन्द्रस्यापत्यम् इञ् । १जयन्ते २अर्जुने ३वाहिवाह्यारे ४काके च मेदिनिः । तत्र जाते । "ऐन्द्रिः किल

नक्षेत्रस्थाः" रघु । अवन्ते "कामस्तु वसन्तेशः । ऐन्द्रिमभ्यर्दयामास बाणैराघीविषोपमैः" हरिवं० १३२ अ० अर्जुने "सम्मोहनं शत्रुसङ्घेऽस्यस्त्रं प्रादुरकारैन्द्रिरवारणीयम्" भा०वि० ६६ अ० ।

ऐन्द्रिय त्रि० इन्द्रियेण प्रकाश्यते अण् । १इन्द्रियप्रकाश्ये प्रत्यक्षालके ज्ञानभेदे तस्येदम् अण् । २इन्द्रियसंबन्धिनि त्रि० "चतुर्थेन्द्रिय सर्गः" भा०३,१०,१६ । स सर्ग "मनसश्चेन्द्रियाणाञ्चेति" भाग० २,१५,२६, उक्तः । स च तैजसएव "तैजसानीन्द्रियाण्येव" भा० ३,२५,२१, उक्तः । इन्द्रियमेव स्वार्थेऽण् । २इन्द्रिये न० । "वैकारिकं तामसञ्चैन्द्रिय सृजे" भाग०५,२४,१७ ।

ऐन्द्रियक त्रि० इन्द्रिय प्रकाश्यः वुञ् । इन्द्रियप्रकाश्ये प्रत्यक्षालके ज्ञाने [illegible] "स च परिणामभेद ऐन्द्रियक इति नास्ति प्रत्यक्षं अन्य इन्द्रोविषय इति" सां०कौ० "यथा मनोरथः स्वप्न सर्व्वमैन्द्रियकं तथा" भाग० ७,२,४४

ऐन्द्री स्त्री इन्द्रस्येयम् इन्द्रोदेवताऽस्या वा अण् ङीप् । १पौच्याम् । २ज्येष्ठायां तारायां स्वर्यस्यां दिशि ४अवस्थानाम् त्रिका० । इन्द्रवारुणयां (रास्ना।लसया) रत्नमा० ईङ्क्ष्यां तायाम्" राजनि० । ऐन्द्रशब्दोक्तार्थेषु च ।

ऐन्द्रायन पुंस्त्री इन्द्रस्यर्षेर्गोत्रापत्यम् गर्गा० फक् । इन्द्रनामर्षेर्गोत्रापत्ये स्त्रियां टाप् । [यंभवे २स्वामिभवे च ।

ऐन्द्र त्रि० इन्द्रे स्वर्गे स्वामिनि वा भवः कुर्वा० यत्र । १सुरभवे

ऐभावत पु० इभावतोऽपत्यम् अण् । अर्जुनभेदे प्रतोदर्गे । "तद्वैतत् पश्यन् इभाः शार्ङ्गवः प्रतोदर्गैभावतम्" शत०ब्रा० २,८,२१ ।

ऐभी स्त्री इभ इभवाचकशब्दः अस्त्यस्या, प्रज्ञा०अण् ङीप् । १हस्तिघोषवत्तायाम् राजनि० इभस्येयम् अण् ङीप । २हस्तिसम्बन्धिनि त्रि० ।

ऐर त्रि० इरायाम् अन्ने दृष्यां जले वा भवः अण् । १अन्नभवे मण्डे २तत्पूर्णे ब्रह्मलोकस्थे वरुणे न० । "तदैरं सदीयं सरः" छान्दो०उ० । "तत् तत्रैव इराङ्गं तस्य ऐरोमखण्डेन पूर्णमैरम् सदीयं तदुपयोगिनां मदकरं कर्मोत्पादकं सरः" भा० । तेन ऐरमित्येकं पदम् सदीयमित्यपरं पदम् ऐरं सदीयमित्येकमवयवलक्षणं प्राग्वादिकमेव । ३भूमिभवे ४जलभवे च त्रि० ।

ऐरका त्रि० एरका+भवार्थे कुर्वा०ढक् । एरकाभवादौ त्रि० ।

ऐरावण पु० इरा जलं तस्या वनसङ्घः यत्र तत्र भवः अण् । पूर्वपदादिति णत्वम् । १इन्द्रगजे ऐरावते । इरया उदकेन वर्धते शब्दायते वध-अच् इरावध् सञ्ज्ञायां भव अणित्येव न्यायम् । "सर्वैर्देवैश्चतुर्भिस्तु महाकायस्ततः परम् । ऐरावणो महानागोऽभवत् वज्रहता पुरः" भा०आ०१८अ० । तस्य क्षीरसमुद्रोद्भवत्वेन सुरासमुद्रोद्भवत्वाभावात् । सुरार्थमेवत्वात् वनशब्दकमस्य तत्र भव अण् पक्षमित्यपि साधु । प्रागुक्ता क्षीरखण्ड्यादयुत्पत्तिषु काल्पनिकी सुरासमुद्रे तस्याजातत्वात् । २सर्पभेदे "वासुकिस्तक्षकश्चैव मानसश्चैरावणस्तथा" भा०स्व०९ अ० । वरुणलोकवर्त्तिनि ।

ऐरावत त्रि० इरा जलानि भूम्ना सन्त्यस्य इरा+मतुप् मस्य वः इरावान् समुद्रजात भवः अण् । समुद्रजाते इन्द्रगजे । "प्राद्वेष्यं प्रयोवाहं त्रिदशैरावतादिव" ऐरावताख्यानविशेषं हरिः" रघु । "ऐरावतस्फालनकर्कशेव" कुमा० "कुर्वन् कामं क्षरत्सप्तपर्णोत्तिमैरावतस्य" मेघ० । २सारङ्गेऽश्वे ४नक्षत्रभेदे च मेदि० । ५पञ्चकलमात्राप्रस्तारे आदिलघुके अन्त्यगुरुद्वयके प्रथमे भेदे पु० ६अजुदीर्घे यतुधनुषि मेदि० । इरावत्याः नद्याः सन्निवेशोदेशः अण् । ७अवस्थलभेदे न० । "बभूव परमाश्चर्या मैरावतपथे यथा" भा०व०१६२अ०तत्र भव, "धन्वयोपधाद्वुञ्" पा० वुञ् । ऐरावतक ऐरावतरूपधन्वदेशभवे त्रि० ।

ऐरावती स्त्री इराः सन्त्यस्य भूम्ना मतुप् मस्य वः इरावान् मेघः तत्र भवा अण् । १विद्युति । २ऐरावतयोषायां च मेदि० ३वटपत्रीवृक्षे राजनि० । ४पाञ्चालदेशस्थे नदीभेदे ।

ऐरिण न० इरिणे उषरे भवम् अण् । लवणभेदे । (पाक्ष) राजनि० [तत्र भवः ठक् । २भक्षके पु० ३अक्षाटी त्रि०

ऐरेय न० इरायामन्ने भवम् ढक् । १अन्नविशेषभवे अर्थे । इरायां भूमि

ऐर्म्म न० इर्म्मायै हितम् यञ् । "नक्षत्रार्थास्तुवरकाः कुलत्थेङ्गुदपङ्कराः । सौवर्चलस्य मज्जा तु दग्धः स्निग्धस्तथैव च । ऐर्म्मं इन्द्रादिभक्षणाच्छादनोद्वीरोगं तैमिरं चाञ्जनेन" सुश्रुतोक्ते अञ्जनभेदे अञ्जनेन नेत्रे लेपनेन ।

ऐल पु० इलाया अपत्यम् शिवा० अण् । १बुधपुत्रे पुरूरवसि । "सोमपुत्रात्तु धात्राजस्तस्यां जज्ञे पुरूरवाः । जनयित्वा सुतं सा तमिला सुद्युम्नतां गता" हरिवं० १७८अ० इडाशब्दे विवृतिः । "पट्टिता अस्त्रिरे चैवादायुधीमानमावसुः । इडायुच्च वनायुच्च शतायुश्चैवमीक्षिताः" भा० आ० ७५अ० । इडा पुत्रो तस्यां भवः । २कौरवे

मङ्गले । इलानामज्ञानां समूहः अण् । ३ऋक्षसमूहे न० । इलायाः पृथिव्याइदम् अण् । ४पृथिवीजाते अत्रे च । "ये पथां पथि रक्षस ऐलबृदा आयुर्युधः" यजु० ६,६०, ऐलमत्रसमूहमत्रं वा बिभ्रति ऐलबृत इत्या भत कारयोर्बदकारौ । डलयोरैक्यात् ऐडशब्दोऽप्युक्तार्थेषु

ऐलवालक न० इलवालकमेव स्वार्थे अण् । इलवालुके (लालुका) भवलिङ्गे अमरः ।

ऐलविल न० राजभेदे । "भरतस्य पितौशीनरिलिभे भूमिमया दसिम् । तस्यात्मजेभे च धर्म्मणो राजन्नैलविलस्तया । ततस्त्रैलविलाल्लेभे" भा० या०१६१अ० । अधिविद्यावंश वर्णने । २ऋषेरे च । "वरासनगतं तत्र यथैवैलविलं तथा" हरिवं० १७७अ० । ऐडविलशब्दे व्युत्पत्तिः ।

ऐलाक वि० ऐलाकस्य ज्ञातं कथा० अण् यञोलोप । ऐलाकज्ञाते ।

ऐलिक पु० इलिन्यां भवः ठक् पुंवत् । इलिन्यपत्ये दुष्मन्तादिपितामहे संवौ राजनि "इलिनीनाम तस्यासीत् कन्या वै जनमेजय ! । ब्रह्मादिन्यधि स्त्री च संसुता सभ्यनक्षत । तंसोः सुरोधो राजर्षिर्धर्म्मनेत्र प्रतापवान् । ब्रह्मवादी पराक्रान्तस्तस्य भार्योपदानवी । उपदानवी सुतान् लेभे चतुरस्त्रैलिकात्मजात् । दुष्मन्तमथ सुषन्तं प्रवीरमनघं तथा" हरिव० २२

ऐलेय पु० इलायाः अपत्यम् ढक् । १औमे मङ्गले इलायां भवः ढक् । २पुलवालुके गन्धद्रव्ये न० शिवादौ० इलाशब्दस्तु भानुप्रत्ययाडापरत्वेन ततोऽणेवेति भेदः ।

ऐश वि० ईशस्येदम् अण् । ईशसंबन्धिनि "सुरसरिदिव तेजो वह्निभिर्भूतमैशम्" रघु० "यो लोकवीरसमितौ धनुरैशमग्र्यम्" भाग० ६,१०,६ । एषमैशानेश्वरादयोऽस्य स्त्रियां ङीप् । ऐशानी "पञ्चोत्तरवोरन्तराद्दिशि "ऐशानीक्रमतो रेखोत्तरापा देवमण्डले । नैर्ऋतीक्रमतो रेखा प्रागपा पितृमण्डले" स्मृतिः । "ऐशान्यां मरणं प्रभुं निगदितं टिगलक्षणं खञ्जने" ति० त० धर्मशास्त्रम् । ईश्वरसम्बन्धिनि वि० "पश्य मे योगमैश्वरम्" गीता 'ऐश्वरं धनुरभाजि यत्त्वया" रघुः २दुर्गायां स्त्री ।

ऐश्वर्य्य न० ईश्वरस्य भावः ष्यञ् । १प्रभावे "तत्त्वं जिज्ञासमानानामैश्वर्यं प्रतिपद्यते" रघु० । इच्छानभिघातात्मके २ईश्वरधर्मे ३अणिमादौ च "ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ज्ञान." इति पुरा० । ऐश्वर्यञ्च द्विविधं नित्यं नित्येश्वरानुध्यानजन्यं योगजं वा तत्र नित्यैश्वर्यमीश्वरस्य स्वाभाविकम् "स्वाभ्यं यस्य निजे जगत्तु" आगम० । योगजञ्च मद्वं सात्विकगुणभेदं यथोक्तम् "अध्यवसायो बुद्धिर्धर्म्मो ज्ञानं विराग ऐश्वर्यम् । सात्विकमेतद्रूपं तामसमस्माद्विपर्य्यस्तम्" सां० का० । व्याख्यातञ्चैतद् वाचस्पतिना "ऐश्वर्यमपि बुद्धिधर्म एवोऽणिमादिप्रादुर्भावः । तत्राणिमा अणुभाव एव शिलामपि प्रविशति । लघिमा लघुभावः यतः सूर्य्यमरीचिमालम्ब्य सूर्य्यलोकं याति । महिमा महतोभाव एवोमहान् सम्भवति । प्राप्तिरङ्गुल्यग्रेण स्पृशति चन्द्रम् । प्राकाम्यमिच्छानभिघातो यथोभूमावुन्मज्जति निमज्जति यथोदके । वशित्वं भूतभौतिकं वशीभवत्स्वाश्रयम् । ईशित्वं भूतभौतिकानां प्रभवस्थितिभोगे यत्र कामावसायित्वं सत्यसङ्कल्पता यथास्य सङ्कल्पो भवति भूतेषु तथैव भूतानि भवन्ति । अन्येषां निश्चया निश्चेतव्यमनुविधीयन्त योगिनस्तु निश्चेतव्याः पदार्था निश्चयमिति चत्वार एते बुद्धिधर्म्माः" ।

पातञ्जलसूत्रभाष्यविवरणेषु कारणफलसहितं तस्य स्वरूपादिकं दर्शितं यथा । "कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम्" ४१ सू० ।

"यत्र कायस्तत्राकाशं तस्मात्कायाद्गतेः कायस्य नेन सम्बन्धमाप्तिस्तत्र संयमो जित्वा तत्सम्बन्धं लघुतूलादिष्वाप्रमाणुभ्यः समापत्तिं कृत्वा जितसम्बन्धो लघु भवति लघुत्वाच्च जले पादाभ्यां विहरति ततस्तृणादिषु तन्तुमात्रे विहृत्य रश्मिषु विहरति ततो यथेष्टमाकाशगतिरस्य भवतीति" भा० ४१ ।

"कायाकाशसम्बन्धसंयमाद्धा लघुनि वा तूलादौ लघु संयमात्समापत्तिं चेतसस्तत्समनुधावति लक्ष्यते क्रियाक्रममाक्ष जल इति" वि० ४ ।

"बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षय" सू० "शरीराद्बहिर्मनसोवृत्तिर्विदेहा नाम धारणा सा यदि शरीरप्रतिबन्धस्य मनसो बहिर्वृत्तिमात्रेण भवति सा कल्पितेत्युच्यते या तु शरीरनिरपेक्षा बहिर्भूतस्यैव मनसो बहिर्वृत्तिः सा अकल्पिता । तत्र कल्पितया साधयत्कल्पितां भद्रविदेहाख्यां यया परशरीरागत्यावेशन्ति योगिनः ततश्च धारणातः प्रकाशात्मनोबुद्धिसत्वस्य प्रावरणं क्लेशकर्म्मविपाकत्रयं रजस्तमोमूलं तस्य च क्षयोभवति" भा० १२ ।

"अपरमपि परशरीरावेशहेतुसंयमं क्लेशकर्म्मविपाकक्षयहेतुं विदेहाख्यं शरीरादिति । अकल्पितामा

महाविदेहाया य उपायत्वात् प्रदर्शनाय कल्पितां विदेहा-माह सा यदीति। हस्तिमात्रं कल्पनात्तामात्रं तेन महाविदेहामाह या तीति। उपायोमेयते कल्पिता-कल्पितयोराह तत्रेति। किं परशरीरावेशमात्रमिती नेत्याह ततश्चेति। ततोधारणातो महाविदेहाये मनसि प्रहते सिद्धे क्लेशाश्च कर्म्म च तान्या विपाकक्षय आत्मायु र्भोगाः तदेतद्रजस्तमोमूल विगलितरजस्तमसः सत्यमात्रात् विवेकख्यातिमात्रसन्तुष्टादात्तदेतद्विपाकक्षयं रजस्तमोमूल-तया तदात्मकं सह बुद्धिसत्वमाहणोति ततश्चयाञ्च निरावरणं योगिचित्तं यथेष्टं विहरति जानाति" इति "स्थूलस्वरूप सूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः" सू० ४४। "तत्र पार्थि-वाद्याः शब्दादयोविशेषाः सङ्कल्पादिभेदेन भूतेन्द्रियेषु परिभाषिता एतद्भूतानां प्रथमं रूपं द्वितीय रूपं स्वसा-मान्यं मूर्त्तिर्भूमि स्नेहोजलं वह्निरुष्णता वायु प्रणामो सर्व्वतोगतिराकाशद्रव्येतत् स्वरूपशब्देनोच्यते अस्य सामा-न्यस्य शब्दादयोविशेषाः तथाचोक्तम् "एकजातिसम-न्वितानामेषां धर्म्ममात्रव्यावृत्तिरिति" सामान्यविशेषस-म्बन्धोऽत्र द्रष्टव्यः। द्विष्ठोऽपि समूहः प्रत्यक्षमितभेदाव-यवानुगतः शरीरं इत्येवं वनमिति शब्देनोपात्तभेदा-वयवानुगतः समूह उभये देवमनुष्याः समूहस्य देवा एको भागो मनुष्या द्वितीयोभागस्तान्यामेवाभिधायते समूहः। न चभेदाभेदविवक्षित आत्मार्थं वनं ब्राह्मणानां सङ्घ 'आत्मन ब्राह्मणसंघ" इति सयुतसिद्धावयवोऽयुतसिद्धावयवश्च युतसिद्धावयवः समूहेन सङ्गृह्यते। अयुतसिद्धावयवः सङ्गृह्यते शरीरं इत्यः परमाणुरिति। अयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमिति यत्सङ्गृह्यते। एतत्स्वरूपमित्युक्तम्। अथ किमेषां सूक्ष्मरूपं? तन्मात्रं भूतकारणं तस्यैकोऽवयवः परमाणुसामान्यविशेषात्मा अयुतसिद्धावयवभेदानुगत सम-दाय इत्येवं सर्व्वतन्मात्रेषि एतत् द्रष्टव्यम्। अथ भूता-नां चतुर्थं रूपं ख्यातिक्रियास्थितिशीलगुणाः कार्य्यस्य भावानुपातिनोऽन्वयस्वरूपेणोक्ताः। अथैषां पञ्चमरूपमर्थ वत्त्वं भोगापवर्गार्थता शुद्धेष्वन्वयिनो गुणास्तन्मात्रभूतभौ-तिकेष्विति सर्वमर्थवत्। तेषिदानीं भूतेषु पञ्चसु पञ्चरूपेषु सवमानस्य तस्य रूपस्य स्वरूपदर्शनं जयश्च प्रादुर्भवति तत पञ्चभूतस्वरूपाणि जित्वा भूतजयी भवति तज्जयाद्दुत्वा-दारिष्व इव गावोऽस्य सङ्कल्पानुविधायिन्योभूतप्रकृतयो भवन्ति" भा०। स्थूलञ्च स्वरूपञ्च सूक्ष्मञ्चान्वयश्चार्थ-वत्त्वञ्चेति स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वानि तेषु संय-मात्तज्जय। स्थूलमाह तत्रेति पार्थिवा पार्थस्यया-स्तैजसा वायवीया आकाशीयाः शब्दस्पर्शरूपरसगन्धा यथासम्भव विशेषाः षड्जगान्धारादयः शीतोष्णादय नीलपीतादयः कषायमधुरादयः सौरभादयश्च, एते हि नामरूपप्रयोजनं परस्परतोभिद्यन्तइति विशेषाः एतेषां पञ्च पृथिव्यां, गन्धवर्জ्जमुत्तारोऽपु, गन्धरसवर्জ तेजसि गन्धरसरूपवर्জ द्वौ नभस्वति, शब्दएवाकाशे। तत्र ए इत्था विशेषाः शङ्कादिभिर्धर्म्मैः स्थूलशब्देन परिभाषिता भास्ते तत्रापि पार्थिवास्तावद्धर्म्माः। "आ-कारो गौरवं रौक्षं वरणं स्पर्श्यमेव च। हस्तिभेदः क्षमा कार्ष्ण्या काठिन्यं सर्व्वभौम्यता"। अपां धर्म्माः "स्नेह शैत्यं प्रभा सौम्य माईव गौरवञ्च यत्। मैत्य रसा पवित्रत्वं सन्तानं शौटका गुणाः"। तैज-साधर्म्माः "जर्द्धभाक् पाचकं दृग्ष्ट पावकं लघु भास्वरम्। प्रच्छन्नौजस्विवै तेजः पृथ्व्याः भिन्नलक्षणम्"। वायवीयाधर्म्माः "तिर्य्यग्यानं पवित्वमाक्षेपो नोदन बलम्। चलमक्षायता रौक्ष्यं वायौ धर्म्माः पृथग्विधाः"। आकाशीया धर्म्माः "सर्व्वतो गतिरव्यूढो विप्रकर्षश्च तत्त्वयः। आकाशधर्म्मा व्याख्याता पृथ्वीधर्म्मविलक्षणाः इति। तत्र आकारप्रभृतयो धर्म्माश्चैः सहेति आकार सामान्यविशेषो गोत्वादि। द्वितीयरूपमाह। द्वितीय रूपं स्वसामान्यं मूर्त्तिः सांसिद्धिकं काठिन्यं, स्नेहः जलं स्वल्पजपुष्टिबलाधानहेतु। वह्निरुष्णता औदर्य्ये गौर्ये भौमे च सर्व्वतेव तेजसि समवेतोष्णतेति सर्व्वत्रैतद्धर्म्म-धार्म्मयोरभेदविवक्षयाभिधानम्। वायुः प्रणामी वहन शीलः तदाह "चलनेन तत्पादीनां शरीरस्फोटनेन च। सर्व्वगं वायुसामान्यं लिङ्गमनुमीयते" सर्व्वतो-गतिराकाशः सर्व्वत्र शब्दोपलब्धिदर्शनात् श्रोता-श्रयाकाशगुणेन हि शब्देन पार्थिवादिशब्दोपलब्धि-रित्युपपादितमधस्तात् एतत् स्वरूपशब्देनोक्तम्। अ-स्यैव मृत्पिण्डसामान्यस्य शब्दादयः षड्जादय उष्ण-त्वादयः शुक्लादयः कषायत्वादयः सुरभित्वादयो मृ-त्पिण्डादीनां भेदाः सामान्यान्यपि मृत्पिण्डादि जलीरप-नसामलकफलादीनि रसादिभेदात् परस्परं व्यावर्त्तन्ते तैर्भे-तेषाम् एते रसादयो विशेषाः तथा चोक्तम् "एकजातिस-न्वितानां प्रत्येकं पृथिव्यादीनामेकैकया जात्या मूर्त्ति स्नेहा-दीनां समन्वितानामेषा षड्जादिधर्म्ममात्रव्यावृत्तिरिति। तदेवं सामान्यं मूर्त्त्यादयुक्तं विशेषाश्च शब्दाद्या इत्याः।

ये चाहुः "सामान्यविशेषाश्रयो द्रव्यमिति" तान् प्रत्याह सामान्यविशेषसमुदायोऽत्र दर्शने द्रव्यम् येऽपि तदाश्रयो द्रव्यमास्थिषत तैरपि तत्समुदायोऽनुभूयमानो नापह्नोतव्यः नच तदपह्नवे तदाधारो द्रव्यमिति भाति तस्मात्तदेवास्तु द्रव्यं न तु ताभ्यां, तत्समुदायाच्च तदाधारमपरद्रव्यमुपलभामहे ताभ्यो व्यावसमुदायादिति च तदाधारमपरं पृथग्विधं शिखरं समूहो द्रव्यमित्यक्रम। तत्र समूह मात्रं द्रव्यमिति क्रमापन्नत्वे समूहविशेषोद्रव्यमिति निर्धारयितुं समूहप्रकारानाह। द्विरोहीति यस्मादेवं तस्मात् समूहमात्रं द्रव्यमित्यर्थः। द्वाभ्यां प्रकाराभ्यां तिष्ठतीति द्विध। एकं प्रकारमाह। प्रत्यस्तमितेति प्रत्यस्तमितभेदो येषामवयवानां ते तथोक्ता प्रत्यस्तमितभेदा अवयवा यस्य स तथोक्तः एतदुक्तं भवति घटोरहलयुथवनगह्वेभ्यः समूहः प्रतीयमानोऽप्रतीतावयवभेदस्तद्वाचकयब्दप्रयोगात् समूह एकोऽवगम्यते इतियुतायुतसिद्धावयवत्वेन चेतनाचेतनत्वेनोदाहरणचतुष्टयम्। युतायुतसिद्धावयवत्वञ्चाग्रे वक्ष्यते। द्वितीयं प्रकारमाह। यद्धेनोपात्तभेदावयवानुगतः समूहः उभये देवमनुष्या इति देवमनुष्याः इति हि यद्धेनोभयशब्दवाच्यस्य समूहस्य भागौ भिन्नावयवौ। ननूभयशब्दात्तावद्वयवभेदो न प्रतीयते तत्कथमुच्यते भेदावयवानुगत इत्यत आह। ताभ्यां भागाभ्यामेव समूहोऽभिधीयते उभयशब्देन भागद्वयाच्च शब्दसङ्केतेन समूहोवाच्यः वाक्यस्य वाक्यार्थोवाचकत्वादिति भावः। पुनर्द्विधमाह स चेति। भेदेन चाभेदेन च विवक्षितमाह। आम्राणां वनं आम्राणानां समूह इति। भेदएव प्रतीयते। यथा गर्गाणां गौरिति। अभेद विवक्षितमाह। आम्रवनम्। आम्राश्च ते वनञ्चेति समूह समूहिनोरभेदं विवक्षित्वा सामानाधिकरण्यमित्यर्थः। विधान्तरमाह। स पुनर्द्विविधः युतसिद्धावयवः समूहः युतसिद्धाः पृथक्सिद्धाः सान्तराला अवयवा यस्य स तथोक्तः यूथं वनमिति सान्तराला हि तदवयवा उक्ताश्च शास्त्रायुतसिद्धावयवश्च समूहो द्वयोर्गोः परमाणुरिति निरन्तराह तदवयवाः सामान्यविशेषा वा साक्षादयोवेति। तदेतेषु समूहेषु द्रव्यभूत समूहं निर्धारयति अयुतसिद्धेति तदेवं प्रासङ्गिकं द्रव्यं व्युत्पाद्य प्रकृतमुपसंहरति एतत्स्वरूपमित्युक्तमिति। तृतीयं रूपं विवक्षुः पृच्छति अथेति। उत्तरमाह। तन्मात्रमिति। तस्मैकोऽवयवः परिणामभेदः परमाणुसामान्यं मूर्त्ति। शब्दादयोविशेषाः तदात्मानः अयुतसिद्धा निरन्तरावयवाः सामान्यविशेषाश्रयद्रव्यभेदेष्वनुगतः समुदायः यथा च परमाणुः सूक्ष्मं रूपम् एवं सर्वतन्मात्राणि सूक्ष्मं रूपमिति उपसंहरति एतदिति। अथ भूतानां चतुर्थं रूपं व्याख्यातिक्रियास्थितयोलाघवगुणाः कार्य्यस्वभावमनपतितुमनुगन्तुं शीलं येषां ते तथोक्ताः अनपपात्ययशब्देनोक्ताः। अर्थवां पञ्चमं रूपमर्थवत्त्वं विवृणोति भोगेति। नन्वेवमपि सन्तु गुणा अर्थवल्लक्षणकार्य्याणां तु कतोऽर्थवत्त्वमित्यत आह। गुणा इति। भौतिका गोघटादय। तदेवं त्रयमविषय सत्त्वा त्रयं तत् फलत्वाच्च नेष्यति। भूतप्रकृतयोभूतस्वभावाः" ४२ वि० ॥

"ततोऽणिमादिप्रादुर्भावः कायसम्पत्तद्धर्मानभिघातश्च" सू० "तत्राणिमा भवत्यणुः। लघिमा लघुर्भवति। महिमा महान् भवति। प्राप्तिरङ्गुल्यग्रेणापि स्पृशति चन्द्रमसम्। प्राकाम्यमिच्छानभिघातः भूमावुन्मज्जति मज्जति यथोदके। वशित्वं भूतभौतिकेषु वशीभवत्यवश्यमधान्येषाम् ईशित्वं तेषां प्रभवाप्ययव्यूहानामीष्टे यत्र कामावसायित्वं सत्य सङ्कल्पता यथासङ्कल्पशक्तयोभूतप्रकृतीनामवस्थानम्। न च यत्नोऽपि पदार्थविपर्यासं करोति, कस्मात् अन्यस्य यथा कामावसायिनः पूर्वसिद्धस्य तथा भूतेषु सङ्कल्पादिति। एतान्यष्टावैश्वर्याणि। कायसम्पद्व्याख्यायते तद्धर्मानभिघातश्च पृथ्वी मूर्त्त्या न विरुणद्धि योगिनः, शरीरादिक्रियाः शिलामध्यनुविशतीति, नापः स्निग्धाः क्लेदयन्ति, नाग्निरुष्णो दहति न वायुः प्रणामी यत्कल्पनावरणात्मकोऽप्याकाशे भवत्याहतकायः सिद्धानामप्यदृश्योभवति" भा०।

"सङ्कल्पानुविधाने भूतानां किं योगिन सिध्यतीत्यत आह "स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वः सिद्धयो भवन्तीत्याह। तत्राणिमा ऽमहानपि भवत्यणुः। लघिमा २महानपि लघुर्भूत्वेषीकातूल इवाकाशे विहरति। ३महिमाऽल्पोऽपि नागनगगगनपरिमाणो भवति। प्राप्तिः ४सर्वे भावाः सन्निहिता भवन्ति योगिनस्तदयया भूमिष्ठ एवाङ्गुल्यग्रेण स्पृशति चन्द्रमसम्। स्वरूपस्वसंयमविजयात् सिद्धिमाह। प्राकाम्यमिच्छानभिघातो ५नास्य रूपं भूतस्वरूपं मूर्त्त्यादिभिरभिहन्यते भूमावुन्मज्जति मज्जति च यथोदके। सूक्ष्मविषयसंयमजयात् सिद्धिमाह वशित्वं भूतानि पृथिव्यादीनि भौतिकानि गोघटादीनि तेषु वशी स्वतन्त्रोभवति ६। तेषां स्वरूपं तत्कारणतन्मात्रपृथिव्यादिपरमाणुवशीकारात्तत्कार्यवशीकारस्तेन यानि

यथावस्थापयति तानि तथावतिष्ठन्ते इत्यर्थः । अन्यत्र विषयस्य यमजयात् सिद्धिमाह ऐशित्वं ७ तेषां भूतभौतिकानां विजितमूलप्रकृतिः सन् यः प्रभव उत्पादो यथाकामायोविनाशो यत्र व्यूहो यथावदवस्थारूपः तेषामीष्टे । अर्थवत्त्वसंशयमात् सिद्धिमाह । यत्र कामावसायित्वं दर्शनसङ्कल्पता विजितगुणार्थवत्त्वो हि योगी यदृयदर्थतया सङ्कल्पयति तत्तत्रै प्रयोजनाय कल्पते । विषमप्यमृतकार्थे सङ्कल्पा भोजयन् जीवयतीति । स्यादेतद् यथा शक्तिविपर्ययात्तरोरेव पदार्थविपर्यासमपि कथञ्चित् करोति तथा चन्द्रसमादित्यं कथात् कृत्स्नं सिनीवालीमित्यत आह न च शक्तोऽपीति । न खल्वेते यत्कामावसायित्वात्तत्तथा भवतः परमेश्वरस्यात्मानमैश्वर्यमहङ्कुर्वत्स्वरूपे। वस्तुपदार्थानां जातिदेशकालावस्थाभेदेनानियतस्वभावा इति युज्यते तासु तदिच्छानुविधानमिति । एतान्यष्टावैश्वर्याणि तद्धर्मानभिघात इति अणिमादि प्रादुर्भाव इत्यनेनैव तद्धर्मानभिघातसिद्धौ पुनरुपादानं कायसिद्धिवत् एतत् स्तवार्थनिबद्धमकलविषयसंयमफलवत्त्वख्यापनाय । सुगममन्यत्" ॥४४ वि० ।

वेदान्तिमते नित्यैश्वर्यभोश्वरस्यैव योगिनान्तु ऐश्वर्यं तदधीनमिश्रतोन जगत्सर्ज्जने तेषां शक्तिः । यथोक्तं शारीरकस्त्रभाष्ये

"जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च"सू० । "ये सगुणब्रह्मोपासनात् सहैव मनसेश्वरसायुज्यं व्रजन्ति किन्तु एषां निरङ्कुशमैश्वर्यं ? अस्त्याहोस्विन् सावधकमिति संशयः । किन्तावत् प्राप्तं निरङ्कुशमेवैषामैश्वर्यं भवितुमर्हति "आप्नोति स्वाराज्यम्" "सर्व्वेऽस्मै देवा बलिमावहन्ति" "तेषां सर्व्वेषु लोकेषु कामचारोभवतीत्यादि" श्रुतिभ्यः । इत्येवं प्राप्ते पठति जगद्व्यापारवर्जमिति । जगदुत्पत्त्यादिव्यापारं वर्जयित्वाऽन्यदणिमाद्यात्मकमैश्वर्यं मुक्तानां भवितुमर्हति जगद्व्यापारस्तु नित्यसिद्धस्यैवेश्वरस्य । कुतः ? तस्य तत्र प्रकरणादसन्निहितत्वाच्च तरेषाम् । परस्परेश्वरो जगद्व्यापारेऽधिकृतः तमेव प्रकृत्योत्पत्त्यादिपदमाश्रित्यसूत्रनिबन्धनत्वाच्च तदन्येषामविजितज्ञानपर्य्यन्तकर्मकृतरेषामादिमदैश्वर्यं श्रूयते तेनासन्निहितत्वाच्च जगद्व्यापारे । समानस्कत्वादेव चैषामनैकभव्ये क्वचित् स्थितिनियमः कस्यचित्तत्संस्कारानभिप्राय इत्येवं विरोधोऽपि कदाचित् स्यात् । अथ कस्यचित्तत्सङ्कल्पमन्यस्य सङ्कल्प इत्यविरोधः समर्थ्यते । ततः परमेश्वराधीनतन्त्रत्वमेवेतरेषामिति व्यवतिष्ठते" भा० ।

ऐषमस् अव्य० आख्यातृवत्सरे नि० । वक्ष्यमाणवत्सरे । ततः भवार्थे ष्यञ् लुट् च । ऐषमस्तन तद्भवे स्त्रियां ङीप् । पक्षे त्यप् । ऐषमस्त्य तत्रार्थे त्रि० स्त्रियां टाप् ।

ऐषीक न० इषीकमेव स्वार्थे अण् । इषीकाशब्दार्थे ।

ऐषुकारि पु० इषुकारस्यापत्यम् इञ् । शरकारापत्ये तस्य विषयोदेशः भक्तञ् । ऐषुकारिभक्त तद्विषये देशे ।

ऐषुकार्य्यादि पु० पाणिन्युक्ते विषये देशेऽर्थे भक्तञ्प्रत्ययनिमित्ते शब्दगण भेदे । स च गणः "ऐषुकारि, सारस्वायन । चान्द्रायण । ह्यात्वायण । त्रयात्वायण । औडायन । जौलायन । खाडायन । दासमित्रि दासमित्रायण गौद्रायण द्राक्षायण, गायखायन । ताल्वायण । गौभ्रायण । सौवीर । सौवीरायण । मयखड । गौखड । मयाखड । वैश्वमानव । वैश्वधेनव । नड । तृणडदेव । विश्वदेव । सार्पिराड" ।

ऐष्टिक पु० इष्टेर्व्याख्यानो ग्रन्थः ह्यादृक्त्वात् ठक् । इष्टेर्व्याख्याने ग्रन्थे इष्टाय हितम् ठक् । इष्टरूपयागादेर्हिते २अन्तर्विदिके कर्मभेदे "दानधर्मं निषेवेत नित्यमैष्टिकपौर्त्तिकम्" मनुः । "अस्ति तावत् प्राचीनवंशशाला तस्याग्राहवनीयादग्नित्रयमैष्टिकवेदिश्च" यजु०५,१४ वेददृष्टे इष्टे प्रभवति ठक् । ३इष्टिसाधनसदृशे प्रयोगे च । "अजमानशब्दादैष्टिकेषु निगमेषु" आश्व०श्रौ० ५,३,७, । तेषां समावापादि यथार्थमभिधानमैष्टिके तन्त्रे" ४,१,६ ।

ऐहलौकिक त्रि० इहलोके भवः ठञ् द्विपदवृद्धिः । इहलोकजाते "ऐहलौकिकमेवेह उताहो पारलौकिकम्" भा०व० १८१ अ० । "ऐहलौकिकमीहन्ते मांसशोणितवर्द्धनम्" भा०व० ११८ अ० । स्त्रियां ङीप् ।

ऐहिक त्रि० इह भवः कालाट्ठञ् । इहलोकभवे २सत्कीर्तशरीरसम्बन्धिनि स्वकुटुम्बादिसुखानुभवादौ च । "ऋषि कृषयदैहिकार्थेषु रूढेषु" भाग०५,१४,१२ । "यथैहिकासुष्मिककामलम्पटः" भाग० ५,१६,१४ । इह विदित ठञ् । २इहविदिते ४ "ऐहिकब्रह्मप्रपतेर्दाक्षादिनिषेधात जन्मान्तरीयतत्पापक्षय एव सहमरणेनोद्धारः" स्मृ०त० रघु० । स्त्रियां ङीप् ।

इति वाचस्पत्ये ऐकारादिशब्दार्थसङ्कलनम् ।

ओ

ओकारः स्वरवर्णभेदः कण्ठौष्ठ्यस्थानयोरुच्चार्यः दीर्घः त्रिमात्रत्वात् प्लुतस्तु त्रिमात्रः । सयोदात्तानुदात्त स्वरितभेदः प्रत्येकमनुनासिकाननुनासिकाभ्यां द्वैविध्यात् षड्विधः तथा प्लुतोऽपि षड्विधः एवं द्वादशविधः। तपरत्वे कारपरत्वे च स्वरूपपरः। तन्त्रे तस्य वाचकमन्त्रा वर्णाभिधाने उक्ता यथा "ओकारः सत्यपदवर्णो पश्चिमास्यः स्मृतः स्थिरा। सद्योजातो वासुदेवो गायत्री दर्भजङ्घकः। आथर्वणो चोर्द्धदन्तो लक्ष्मीर्वर्णोसुखो द्विजः। उद्देश्य दर्शकस्त्रः कैलासो वसुधाक्षरः। प्रणवाद्यो ब्रह्मरूपमजेयः सर्वमङ्गला। त्रयोदशी दीर्घनादसारतिनाथो दिगम्बरः। त्रैलोक्यविजया मन्त्रा प्रीतिर्विजादि कर्षिणी" इति। तदधिष्ठातृदेवता च तत्रैवोक्ता "ओङ्कारात्पौरुषा क्रोधा भीमा च मत्तमालिनी।" तस्य ध्येयरूपं कामधेनौ उक्तं यथा। "ओकारं चतुरो वाक्षि! पञ्चदेवमयं सदा। रक्तविद्युल्लताकारं त्रिगुणात्मानमीश्वरम्। पञ्चप्राणमयं वर्णं नमामि देवमातरम्। एतद्वर्णं महेशानि! सर्वं परमकुण्डलम्"।

ओ अव्य० उ-विच्। १सम्बोधने २आह्वाने ३स्मरणे ४अनुकम्पने च मेदि०। ५ब्रह्मणि पु० एकाक्षरकोषः।

ओक पु० उच-घञ् चस्य कः। १पक्षिणि २वृक्षे ३आश्रये च। "अनोकयायौ लघुरत्नप्रचारस्मरन् देवाऽनेकचरः स भिक्षुः" भा०आ०६१अ०। उच भावे घञ् कः। ४समवाये च। ओकाय क्षिति यत्। ओक्य निवासाय क्षिते त्रि० "ज्योतीरथः पवते राय ओक्यः" ऋ०९८६,४५। [(उकण) केशकोटे शब्दर०।

ओकण(णि) पु० उ-विच् औः सन् कण्यति कण-अच्-इन् वा ओकस् न०उच-असुन् न्यङ्क्वादित्वात् कुत्वम्। १गृहे २आश्रयमात्रे च। "यस्मिन्निन्द्रः प्रदिवि बाधमान ओको दधे ब्रह्मण्यन्तश्च नरः" ऋ० २,१६,१। "यस्मिन् देवा ओकांसि चक्रिरे" १,४०,५। "लोकाश्चाश्च शुभाः पार्थ। नौतनौकःसमोपजाः" भा०स० २०। बनौकस; त्रिदिवौकसः दिवौकसः जलौकस इत्यादि।

ओकिवस् त्रि० उच-समवाये क्वसु वेदे त्रि०। समवेते "ओकिवांसा सुते सचा" ऋ०६,५६,१। ओकिवांसा ओकिवांसौ समेतौ" भा०।

ओकुल पु० उच-उलच् न्यङ्क्वा० नि० कु। अङ्गारिनिदग्धे अर्धके गोधूमे (हडा) 'ओकुलस्तु गुरुर्ग्राम्यो मधुरो बलकारकः। रक्तपित्तापहः स्निग्धो वृष्योमदविवर्द्धनः" राजनि०। [गौ०ङीष्। (उकण) केशकोटे शब्दरत्ना०।

ओकोदनी स्त्री ओक आश्रयः मूर्द्धरूपम् ओदनं भक्ष्यं यस्याः ओक्कण्णो स्त्री उच-विच् ओक् सर्वं कर्णति कण-अच् गौ०ङीष्। (उकण) केशकोटे शब्दरत्ना०।

ओख शोषे सामर्थ्ये अक० भूषणे वारणे सक०भ्वा० पर० सेट् ऋदित्। ओखति औखीत् ओखाम् बभूव आस चकार। ओखितः ओखनम्। ओखः खिचि ओखयति ते मा भवान् ओचिखत् त ऋदित्त्वात् न लुक्। उपसर्गविपूर्वात् परस्मैपम् प्रोखति परोखति।

ओगण त्रि० अव-गण्यते अव+गण कर्मणि घञर्थे क सम्प्र०। अवगण्ये अधरतया गण्ये। "मह्यि ग्राधन्तओगणास इन्द्रे" ऋ०१०,८६,१५ ["बलं सत्यादोगीयः" हरदत्त०।

ओगीयस् त्रि० ओजीयस् वेदे नि०। अत्यन्तौजस्विनि।

ओघ पु०उच-घञ् पृषो०ध। १समूहे,२जलवेगे,३ऋतज्वलादौ ४आध्यात्मिक तुष्टिभेदे च सा च तुष्टिः प्रज्ञख्यायां चिरकालसमाध्यनुष्ठानेन या तुष्टिः सा कालाख्या तुष्टिरोघ इत्युच्यते" इति सां०प्र०भा०उक्ता। इयं तुष्टिः सां०कौ० मेघत्वेन परिभाविता यथा "प्रज्ञख्यापि ते न सद्योनिर्याणहेति सा च कालपरिपाकमपेक्ष्य सिद्धिं ते विधास्यति अलब्धतत्प्रतिष्ठा तेष्वेवोपदेशे या तुष्टिः सा कालाख्या मेघ उच्यते"। क्वचित् पुस्तके मेघ इत्यत्र ओघ इत्येव पाठः। तत्र जलवेगे "ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति" मनुः। "भङ्गीभक्ता विरचितपु क्षत्रियान्तर्जलौघः" मेघ०। "पुनरोघेन हि युज्यते नदी" कुमा०। समूहे "स्त्रीर्ण्यज्जितमर्थौघमनाथ कृपणस्तमः" भा०व० २५५ अ०। "गजवाजिरथौघेन बलेन महताऽगमत्" आ० ११२अ० २परम्परायाम् ६उपदेशे मेदि० परम्पराऽविच्छिन्ना सन्ततिः"। "ताटौघभक्तिस्तुहृन्" भाग०४,१२,११।

ओघरथ पु० ओघवतो नृपतेः पुत्रे। "अथोघवान्नाम नृपो नृगस्यासीत् पितामहः। उग्रायोघवतो जन्या पुत्रयोघरथोऽभवत्" भा०अनु० २अ०।

ओघवत् त्रि० ओघः जलवेगादिरस्यास्य मतुप् मस्य वः। १जलवेगादियुक्ते स्त्रियां ङीप्। "एषा सरस्वती रम्याद्रिजा चौघवती नदी" भा०व०१३६। अङ्गनृपस्य पितामहे २वृष्णिभेदे पु० ३तत्कन्यायां स्त्री ङीप्। सा च भर्तुराज्ञया

द्विजरूपधरधर्मरूपातिथेः आत्मपर्यन्तप्रदानादिरूपपरिचरणेन तुष्टधर्मवरेण अर्जुनेन लोकानां पावनार्थं नदीत्वमाप्ता इति तन्नामप्रसिद्धिं कुरुक्षेत्रस्थे इनदीभेदेऽपि। तत्कथा भा०अनु० २अ० यथा "तस्यां समभवत्पुत्रो नाम्नाग्नेयः सुदर्शन। सुदर्शनस्तु रूपेण पूर्णेन्दुसदृशोपमः। शिशुरेवाध्यगात्सर्वं परं ब्रह्म सनातनम्। अथौर्वयाश्रमं रम्यो नगस्यासीत्प्रियतमः। तस्यौघवती कन्या पुत्रत्वौघरथेऽभवत्। तामौघवान् ददौ तस्मै स्वयमौघवतीं सुताम्। सुदर्शनाय विदुषे भार्यार्थे देवरूपिणीम्। स गृहस्थाश्रमरतस्तया सह सुदर्शनः। कुरुक्षेत्रे ऽवसद्राजन्नौघवत्या समन्वितः। गृहस्थस्यापजेष्यन्ति मृत्युमित्येव स प्रभो!। प्रतिज्ञामकरोद्वीमान् दृढं प्रतेजा विशाम्पते। तामथौघवतीं राजन स पावकसुतोऽब्रवीत्। अतिथेः प्रतिकूलं ते न कर्त्तव्यं कथञ्चन, येन येन च तुष्यत नित्यमेव त्वयाऽतिथिः। अध्यात्मन प्रदानेन न ते कार्या विचारणा। एतद्व्रतं मम सदा हृदि संपरिवर्त्तते। गृहस्थानान्तु दुष्प्रेक्षि नातिथेर्विद्यते परम। प्रमाणं यदि वामोरु! वचस्ते मम शोभने!। इदं वचनमव्यग्रा हृदयं धारयेः सदा। निष्क्रान्ते मयि कल्याणि! तथा भक्तिकृतेऽनघे!। नातिथिस्त्वमनव्यः प्रमाणं यद्ब्रवीमि तत्। तमब्रवीदौघवती तथा मूर्ध्नि कृताञ्जलिः। न मे यद्वचनात्किञ्चिदकर्त्तव्यं कथञ्चन। जिगीषमाणस्तु गृहे तदा मृत्युः सुदर्शनम्। पृष्ठतोऽन्वगमद्राजन रन्ध्रान्वेषी तदा सदा। दृष्ट्वार्थन्तु गते तस्मिन्नग्निपुत्रे सुदर्शने। अतिथिर्ब्राह्मणः श्रीमांस्तामाहौघवतीं तदा। आतिथ्यं बहुमिच्छामि त्वयाद्य वरवर्णिनि!। प्रमाणं यदि धर्म्मस्ते गृहस्थाश्रमसंमतः। इत्युक्ता तेन विप्रेण राजपुत्री यशस्विनी। विधिना प्रतिजग्राह वेदोक्तेन विशाम्पते!। आसनञ्चैव पाद्यञ्च तस्मै दत्त्वा द्विजातये। प्रोवाचौघवती विप्रं केनार्थः किं ददामि ते। तामब्रवीत्ततो विप्रो राजपुत्रीं सुदर्शनाम्। त्वया समार्थः कल्याणि! निर्विशङ्केन दाक्षर। यदि प्रमाणं धर्म्मस्ते गृहस्थाश्रमसंमतः। प्रदानेनात्मनो राज्ञि! कर्त्तुमर्हसि मे प्रियम्। स तया कृच्छ्रमानोऽपि न्यरोधिष्टैर्मुपक्रमैः। नान्यमात्मप्रदानात्तु तस्मा वव्रे वरं द्विजः। सा तु राजसुता ज्ञात्वा भर्त्तुर्वचनमादितः। तथेति कृत्वमाना सा तस्याद्य द्विजर्षभम्। ततो विप्रस्य विप्रर्षिः सा चैवोपविवेश ह। संपूज्य भर्त्तुर्वचनं गृहस्थाश्रमकाङ्क्षिणः। अथैषा समुपादाय स पावकिरुपागमत्। मृत्युना रौद्रभावेन नित्य बद्धुरिवान्वितः। ततस्त्वाश्रममागम्य स्वं पावकसुतस्तदा। तां व्याजहारौघवतीं क्वासि यातेति चासकृत्। तस्मै प्रतिवचः सा तु भर्त्रे न प्रददौ तदा। कराभ्यां तेन विप्रेण स्पृष्टा भर्त्रव्रता सती। उच्छिष्टार्क्षेति मन्वाना लज्जिता भर्तरेव च। तूष्णीं-भूताऽभवत्साध्वी नचोवाचाथ किञ्चन। अथ तां पुनरेवेदं प्रोवाच स सुदर्शनः। क्व सा साध्वी कृतो यातागर्हायः किमतो मम। पतिव्रता सत्यशीला नित्यं चैवार्जवे रता। कथं न मृत्युर्जेतव्य आयमाना यथा पुरा। उदङ्मुखस्तु तं विप्रः प्रत्युवाच सुदर्शनम्। अतिथिं विद्धि संप्राप्तं ब्राह्मणं पावकं च माम्। अनया ह्यर्द्यमानोऽहं भार्यया तव सत्तम। तैर्वरैरतिथिसत्कारैर्ब्रह्मचर्येण ह्यता मया। अनेन विधिना सेयं मामर्च्चति शुभानना। अनुरूपं यदत्रान्यत्तद्भवान् कर्त्तुमर्हति। कूटसङ्करहृत्तस्तु मृत्युस्तां वै समन्वगात्। क्षीणप्रतिज्ञमर्त्तारं वधिष्यामीति विनयत्। सुदर्शनस्तु मनसा कर्म्मणा चक्षुषा गिरा। त्यक्तैर्मृत्युक्रमन्यञ्च आयमानोऽब्रवीदिदं। सुरतं तेऽस्तु विप्राग्र्य! प्रीतिर्हि परमा मम। गृहस्थस्य तु धर्म्मोऽयं समाप्तोऽतिथिपूजनम्। अतिथिः पूजितो यस्य गृहस्थस्य हि गच्छति, नान्यलोकात्परो धर्म्म इति प्राहुर्मनीषिणः। प्राप्ता हि मम दाराश्च यज्ञाग्नयहि विद्यते वसु। अतिथिभ्यो मया देयमिति मे व्रतमाहितम्। निःसन्दिग्धं मया वाक्यमेतत्ते सदृशं कृतम्। तेनाहं विप्र। सत्येन स्वयमात्मानमालभे। पृथिवीं वायुराकाशमापो ज्योतिश्च पञ्चमम्। बुद्धिरात्मा मनः कालो दिशश्चैव गणा दश। निश्चयेते हि पश्यन्ति देहिनां देहसंश्रिताः। शुभं दुष्कृतं चापि कर्म्म धर्म्मभृतां वर। यथैषा नास्मृता वाणी मयाद्य सदृशीरिता। तेन सत्येन मां देवाः पालयन्तु दहन्तु वा। तेन नादः समभवद्दिक्षु सर्वासु भारत!। अश्रुतपूर्वं सत्यभिलेवं नैतन्मिथ्येति सर्वतः। ततोऽजात्तु ततस्तस्य चिक्षेप स वै द्विजः। यदुवा ह्यास्य भूमिश्च व्याप्य वायुरवेदयत्। स्वरेण विप्रः सैन्येन लोकानन्वनादयत्। उवाच चैनं धर्म्मस्त्वं पूर्वमासन्त्वया नामतः। धर्म्मोऽहमस्मि भद्रन्ते जिज्ञासार्थं तवागतः!। प्राप्त सत्यञ्च ते ज्ञात्वा प्रीतिर्म्मे परमा त्वयि। विजितस्त्वया मृत्युर्योऽयं त्वामनवकृति। रन्ध्रान्वेषी ह्यं सदा त्वया हतो यशोजतः। न चाऽपि भविताऽनेकोऽ

कस्यचित् पुरुषोत्तम । पतिव्रतामिमां साध्वीं तवेहोक्तिं तमब्रुत । रक्षितो त्वद्गुणैरेषा पातिव्रत्यगुणैस्तथा । अदृश्या यदियं ब्रूयात्तथा तद्भाव्यथा भवेत् । एषा हि तपसा स्वेन संयुक्ता ब्रह्मवादिनी । पावनार्थं तु लोकस्य चरिष्यते भविष्यति । अनेन चैतद्वचेन लोकांस्त्वमिह पश्यसे । अङ्गैर्नीयतो नाम त्वामङ्गैर्नानुयास्यति"

ओङ्कार पु॰ ओम्+स्वरूपे कारप्रत्ययः । प्रणवे । "प्राणायामैस्त्रिभिः पूतस्ततओङ्कारमर्हति" मनुः । "ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा"पुरा॰ अधिकम् ओमशब्दे-वक्ष्यते।"ओङ्कारं पूर्व्वमुच्चार्य्य पश्चाद्वेदमधीयते"इति स्मृतेः "तस्य देशिक्युदाहृत्य यत्तदानतपाःक्रियाः । प्रवर्त्तन्ते विधानोक्ता" इति गीतोक्तेः "स्वयत्नेनोद्धृतं सर्व्वम्" इत्युक्तेश्च ओङ्कारस्य सर्व्वब्रह्मकारणादौ पाश्चात्यात् आर-म्भसाधनत्वेन २आरम्भे । सप्तानां सामावयवानां २प्र-थमावयवे च । उद्गीथयज्ञे ११७० पृ० सप्तावयव-सामानि दृश्यानि । ओङ्कारः तदाकारः अस्यस्य अच् । काशीस्थे शिवलिङ्गभेदे "ओङ्कारं प्रथमं लिङ्गं द्वितीयन्तु त्रिलोचनमिति" काशीस्थशब्दे ५५४पृ॰ प्रधानलिङ्ग-कथने । तदाविर्भावकथा तत्रैव ७१अध्याये

"अथोङ्कारस्य लिङ्गस्य प्रादुर्भाव इहाभवत् । पुरानन्दवने-चात्र ब्रह्मणा विश्वयोनिना । तपस्तप्तं महादेवि ! समाधिं दधता परम् । पूर्व्वं युगसहस्रेऽथ भित्त्वा पातालमण्डलम् । उदतिष्ठत् पुरोज्योतिर्विद्योततरिनस्वनम् । यदनन्-तादिरभवद्विर्य्याजनं समाधिना । तदेव परमं धाम बहिराविरभूद्विधेः । अभूत्तटतायङ्गः स्फुटितो भूमि-भागतः । तच्छब्दाद्ब्रह्मजङ्घेधाः समाधिं क्रमतोवधी । खट्वाङ्गवत्तत तत्सानौ यावदुन्मील्य लोचने । पुरःप-श्चाद्दर्शये तावदन्तरमादिमम् । अक्षरं सत्यसम्भवक्र-तोर्बीजं स्फटिपाकृतम् । नारायणात्मकं साक्षात्तमःपारे प्रतिष्ठितम् । ओङ्कारमत्र तस्याग्रे रजोरूपं यजुर्जनिम् । विधातारं समस्तस्य खाकारमिव चिन्तितम् । नीरव-ध्वान्तसङ्केतसदनार्थं तदग्रतः । मकारं च ददर्शाथ तमोरूपं विशेषतः । साक्षात् योनिं जगे चेत्रं साक्षाद्दु-ष्प्रकृतिप्रियम् । अथ तत्पुरतोधाता व्यधात् खनवनाति-थिम् । त्रिरूपमथोङ्कारं सगुणत्वादि निर्गुणम् । खनाख्यमादृदनं परमानन्दविग्रहम् । यज्ञमङ्गोति यत् ख्यातं सर्व्वयज्ञमयत्वारत्वम् । अथोपरिष्टाद्यत्स्व-च्चिद्रूपं परात् परम् । चारत्वं चारयोगाच्च जगदा-सङ्गम परम् । विधिर्विलोकयाञ्चक्रे तपसा गोचरी-कृतम् । अवनादोमिति ख्यातं सर्व्वस्यास्य स्वभावतः । भक्त-सङ्गयते यस्मात्तदोमिति यतीरितः । अरूपोऽपि स्वरूपाढ्यः स धाता नेत्रयोरभूत् । तारयेद्यद्भवाम्भोधेः खजपाक्षम मानसम् । ततस्तार इति ख्यातोयमं ब्रह्मा व्यलोकयत् । प्रणूयते यतः सर्व्वैः पुरनिर्व्याणकाङ्क्षिः । सर्व्वेभ्यो-ऽभ्यधिकस्तस्मात् प्रणवोयः प्रकीर्त्तितः । सृष्टेवितारं पुरुषं प्रणमेदः परमादरम् । अतस्तं प्रणवं शास्त्रं प्रयत्नोऽकरोत्तयान् विधिः । त्रयीमयस्तुरीयोयस्तुर्यातीतोऽखिलात्मकः । नादबिन्दुस्वरूपो यः स प्रैक्षि द्विजगा-मिना । प्रावर्त्तन्त यतोवेदाः साङ्गाः सर्व्वत्र लोकयः । स वेदादि पद्मभुवा पुरस्तादवलोकितः । एवमोंबह्मिधा-बह्मोरारवीति मन्त्रोदयः । स नेत्रविषयीचक्रे परमः परमेष्ठिना । ब्रह्मास्त्रमत्रि यस्मात्तन्त्रमासनमुत्तम एव च । हेयोर्धे च त्रयः पादाः स देवोपिधिनेत्रितः । यदन्तर्लीन-मखिलं भूतं भावि भवत् पुनः । तद्बीजं बीजरहितं दृष्टिहीनेन विलोकितम् । क्षीणं क्षय्यते यस्मैतदाक्षरमक्षत्व भाजनम् । अतः समाख्यते सद्भिर्यत्क्षिप्रं तद्विलोकितम् । यस्मात्पायत्र भासन्ते पञ्चब्रह्ममयं हि यत् । आदिपञ्च-स्वरूपं यद्विरेचि ब्रह्मणा हि तत् । तमाख्येयं ततो-ऽथैषा लिङ्गरूपिणमीश्वरम्" । ओङ्कारेश्वरोऽप्यत्र । ३गुह्य-यक्षिभेदे स्त्री त्रिका० । अवर्णोऽस्यादेः परत्वे परकृपम् ।

ओज बले अद॰ चुरा॰ उभ॰ अक॰ सेट् । ओजय-ति-ते औजिजत् त ओजयाम् बभूव आस चकार तक्रे । ओजित:

ओज पु॰ ओज-अच् । "ओजोऽथ युग्मं विषमः समस्त्र" । ज्या॰ त॰ उक्ते मेषादीनां द्वादशानां मध्ये १अयुग्मे विषमे राशौ यथा १,३,५,७,९,११,अङ्कैर्बोधिता मेष-मिथुनसिंहतुलाधनुःकुम्भाः ओजराशयः "ओजे रवीन्दो: समदृन्द्रव्योः" मीज॰ता॰ । ओजस् शब्दोऽत्र न॰ । "कुजार्किशुक्रसौम्यानां भागाः शुक्रस्य च क्रमात् । पञ्च-षट्चाष्टसप्तेषु त्रयोजाख्या राशिषु ज्ञो॰त॰ अत्र ओजेषु राशिषु इत्येव क्वचित्पाठः । २अयुग्मनाम्नि (त्रिशोद) च "भवयोजनतं शुक्रणा चेत्" "ओजे तपरौ अरौ शुक्रचेत्" इत्यादौ अयुग्मपदे प्रयोगात्

ओजस् न॰ उज-असुन् वलोपे गुणः । १दीप्तौ २धातुभेदे, ३प्राणवले, ४प्रकाशे, ५धात्वर्थे वैद्यकोक्ते शुक्रसङ्गो-त्पादे विषमराशौ, ७यक्षादिदीप्तिवपुषि ८धात्वाकाशेन्द्रिये, ९तेजसि स्त्रियाञ्च ङीष्टापि, १०बालशुक्रभेदे, ११औषा०रोगाम्,

वैद्यकोक्ते, "भ्रमरैः फलपुष्पेभ्यो यथा सञ्चीयते मधु । तद्वदोजः शरीरेभ्यो धातुभिर्भियते नृणाम्" इति । २ बलवति धातुरसपोषके वस्तुभेदे च । अञ्च् । ओजयञ्छोऽयत । ओजःस्वरूपं मिता० शरीरे दर्शितं यथा । "हृदि तिष्ठति यत् शुद्धमोषदुष्णं सपीतकम् । ओजः शरीरे संख्यातं तस्याघातान्मरुच्यति"। "पुनर्द्वितीयं पुनर्गर्भभोजस्तस्य प्रधावति । अष्टमे मासि तेनागर्भोजातः प्राणैर्वियुज्यते" या० स्मृतिः सुश्रुते तु बलपर्य्यायत्वमस्योक्त्वा तत्फलान्युक्तानि यथा "बलवत्त्वं बलक्षयलक्षणमत ऊर्द्धं वक्ष्यामः । तत्र रसादीनां शुक्रान्तानां धातूनां यत्परं तेजस्तत्खल्वोजस्तदेव बलमित्युच्यते स्वयास्मिद्वान्तात् । तत्र बलेन स्थिरोपचितमांसता सर्व्वचेष्टास्वप्रतिघातः स्वरवर्णप्रसादो बाह्या नामाभ्यन्तराणाञ्च करणानामात्मकार्य्य प्रतिपत्तिर्भवति । भवन्ति चात्र । "ओजः सोमात्मकं स्निग्धं शुक्लं यत् स्थिरं सरम् । विविक्तं मृदु मृत्तस्नु प्राणायतनमुत्तमम् । देहस्थितिनिबन्धनं व्याप्तो भवति देहिनाम् । तदभावाच्च शीर्य्यन्ते शरीराणि शरीरिणाम् । अभिघातात्तुल्यात्कोपाच्चोत्क्लेशनात् क्षयात् क्षुधः । ओजः सङ्क्षीयते क्षोभ्यो धातुरक्षणनिःसृतम् । तेजः सञ्चारितं तस्माद्विस्रंसयति देहिनः । तस्य विस्रंसो व्यापत् क्षय इति लिङ्गानि व्यापन्नस्य भवन्ति । सन्धिविश्लेषो गात्राणां सदनं दोषोच्छ्वसनं क्रियासन्निरोधश्च विस्रंसे । स्तब्धगुरुगात्रता वातशोथोवर्त्तभेदो ग्लानिस्तन्द्रा निद्रा च व्यापन्ने । मूर्च्छा मांसक्षयो मोहः प्रलापो मरणमिति क्षये । भवन्ति चात्र । "एते दोषा बलस्योक्ता व्यापद्विस्रंसनक्षयाः । विस्रंसादौ गात्राणां दोषविस्रंसनक्षयाः । अप्राचुर्य्यं क्रियाणाञ्च बलविस्रंसलक्षणम् । गुरुत्वं स्तब्धताक्लेषु ग्लानिर्ध्वंसस्य भेदनम् । तन्द्रा निद्रा वातशोथौ बलव्यापदि लक्षणम् । मूर्च्छा मांसक्षयो मोहः प्रलापोऽप्यत्तमेव च । पूर्व्वोक्तानि च लिङ्गानि मरणस्य बलक्षये । तत्र विस्रंसे व्यापन्ने च क्रियाविशेषैरविरुद्धैर्बलमाश्वाययेत् । नरुसंसृष्टमितरच्च वर्जयेत्" ।

"ओजः समाभूत्स्वं मांसं प्रदक्षरं"मित्युक्तलक्षणः काव्य गुणभेदः । सा० द० तु "रसस्याक्लिष्टमाधुर्य्य धर्म्मः शौर्य्यादयो यथा । एवं माधुर्य्यमोजश्च प्रसाद इति ते" त्रिधा इति गुणान् विभज्य तत्तल्लक्षणमुक्तम् "ओजश्चित्तस्य विस्तारस्वरूपं दीप्तत्वमुच्यते । वीरबीभत्स रौद्रेषु क्रमेणाधिक्यमस्य तु"इति । तद्व्यञ्जकवर्णादयश्च तत्रोक्ताः । "वृत्त्यास्वाद्यतयाभ्यां युक्तौ वर्णौ तदन्तिमौ । उपर्य्युपरि वा स्यातां रेफः टठडढैः सह यकारश्च वकारश्च तस्य व्यङ्कनाकृतयः तथा समासबहुला घटनौद्धत्यशालिनी" "महौजसा तु प्रहृतं त्वयाऽस्माकम्"रघुः । "महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः" "पुरुषाणां महौजसाम्" "महात्मानो महौजसः" इति मनुः । अतस्तृतीयायाः लुतादौ अलुक् । ओजसाकृतम् तस्यापत्यम् वृञ् । औजसाकृतिः तदपत्ये । युवतिविशिष्टे त्रि० ततः भवा० अभूततद्भावे कृञ् सम्पदादि० क्विप् । "ओजायते ओजायमाना तस्यार्घ्यं प्रणीय जनकात्मजा" भट्टिः । "ओजायमानस्तन्वस्तुम्भते" ऋ० १,१४०,६ ।

ओजसीन न० "ओजसोऽहनि यत्खौ"पा० ओजोऽच्यलोपश्च हन्यर्थे ख । ओजोयुक्तेऽहनि । "शुचि शुक्रे अहन्योजसीना"तैसि० "पक्षे यत् ओजसमहः" सि० कौ० "मत्वर्थे मासतन्वो" पा० मत्वर्थे यत् । ओजसा तनुः ।

ओजस्वत् त्रि० ओजोऽस्यास्ति मतुप् मस्य वः । बलवति तेजस्विनि "मरुत्वन्मृजीषिणमोजस्वन्तम्" ऋ० ८,७६,५ विनि । तत्रार्थे त्रि० "रूपं तदोजस्वि तदेव वीर्य्यम्" रघुः । "ओजस्विनोऽस्त्रबलत्तत्रशालिनम्" माघः । "मतक्रतुरिवौजस्वी धर्म्मात्मा संमितव्रतः" भा० आश्व ५ अ० । स्त्रियां ङीप् । "ओजस्वतोस्य राष्ट्रस्य राष्ट्रमस्मै दत्त" यजु० १०,२२ । ताभ्याम् अतिशयने तरप् तमप् वा । ओजस्वितर ओजस्वितम अत्यन्तौजोयुक्ते । तत्रार्थे ईयसुन् इयसुन् वा । मतोर्लुक् । ओजिष्ठ ओजीयस् तदर्थे त्रि० इयसुनन्तात् स्त्रियां ङीप् इति भेदः अजीयसी ।

ओज्मन् त्रि० आ+यज–डुमसिप् वा० सम्प्र० । १प्रेरके २वेगे पु० "अपामोज्मानं परि गोभिः"ऋ०६,४७,२७ । "ओज्मानं प्रेरकं वेगं वा" भा० ।

ओडव पु० सङ्कीर्णदाशोदरोक्तेषु पञ्चस्वरयुक्तरागभेदेषु तत्र पञ्चस्वरास्तु ऋषभपञ्चमवर्জ্জिताः विवादवान्वारषड्जमध्यमधैवतात्मकाः ।

ओडिका स्त्री उ–ड तस्य नेत्वम् गौरा० ङीष् स्वार्थे क ह्रस्वः । (उडिधान) नीवारे स च "नीवारः शीतलो-ग्राही पित्तघ्नः कफवातजित्" भावप्र० उक्तगुणकः ।

ओडी स्त्री उ ड तस्य नेत्वम् गौरा० ङीष् ।(उडिधान)नीवारे

ओड्र पु० ओ+ईषत् उनत्ति उन्द् रक् णि० दस्य डः । १जनपदभेदे २उत्कलदेशे प्र० (उडिया) तद्देशस्य राजा तत्प्रभवो वा

अण्। औड्र, तद्देशजे तद्भवे मनुष्ये च बहुषु तु तस्य लुक्। औड्रास्तज्जनपदवासिनः तद्देशजत्वात् ते च क्रमेण शूद्रत्वं प्राप्ता यथाह मनुः। "शनकैस्तु क्रियालोपादिमाः क्षत्रजातयः। वृषलत्वं गता लोके ब्राह्मणादर्शनेन च। पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजाः यवनाः शकाः। पारदाः पह्लवाश्चीनाः किराता दरदाः खसाः"। उत्कलदेशस्य दृक्क० सं० कूर्म्मविभागे पूर्व्वदिक्स्थिततया उक्तः। अथ पूर्वाम्नायेत्याद्युपक्रमे "उदयगिरिभद्रगोडकपौण्ड्रोत्कलकाश्मिकलाम्बष्ठाः" उत्कलशब्दे ऽधिकसूक्तम्। "तैव चौड्राः पौण्ड्राश्च वामचूलाः सकेरलाः" हरि० २२६

औड्रपुष्प पु० ओड्रं पुष्पमस्य। जवाहत्ते।

ओण अपनयने अपसारणे क्वादित् स्वादि० पर० सक० सेट्। ओणति औणीत्। ओणाम् बभूव आस चकार ओणनम् क्तिन् अवाप क्तियाम् अवावरी। ओणयंत ते मा भवान् ओणिणत् त।

ओणि त्रि० ओण-इन्। १अपनयनकारके २द्यावापृथिव्योः स्त्री ङीप् द्वि० निरु०। "प्रते सोतार ओण्योरसम् मदय" ऋ० ६, १६, १। "तं त्वा धर्त्तारमोण्योः" ६, ६५, ११, "ओण्योः द्यावापृथिव्योः" भा०।

ओत त्रि० आ+वेञ्+क्त। १अनर्व्याप्तौ कर्म्मणि क्त। २तथाभूते त्रि० "यस्मिंस्त्वं सर्वमोतं जनानाम्" यजु० ३४, ५। "ओतञ्च प्रोतञ्चेति" श्रुतिः। ३पटीयदीर्घतन्तौ च (टानारसूत)। "यदिदं सर्वमप्योतं च प्रोतञ्च, कस्मिन् खल्वाप ओताश्च प्रोताश्च" इत्यादि। छा० उ० बहुलत्वप्रयोगः। तत्र स्थूलानां परिच्छिन्नानां कारणेन सूक्ष्मेण व्यापकमात्मपर्य्यन्तं व्याप्यत्वमेवेति छा० उ० भाष्ययोर्निर्णीतं यथा "यदिदं सर्वमप्योतञ्च प्रोतञ्च, कस्मिन् खल्वाप ओताश्च प्रोताश्चेति" छा० उप०। "यदिदं सर्वं पार्थिवं धातुजातमप्यूदके ओतञ्च दीर्घपटतन्तुवत्प्रोतञ्च तिर्य्यक्तन्तुवदुपरितत या अद्भिःमर्व्वतोऽन्तर्बहिर्भूताभिर्व्याप्तमित्यर्थः। अन्यथा सक्तुसुदधिवदीर्य्येत। इदं तावदनुमानसुपन्यस्तम्। यत्कार्य्यं परिच्छिन्नं स्थूलं कारणेनापरिच्छिन्नेन सूक्ष्मेण व्याप्तमिति दृष्टम्। यथा पृथिव्यद्भिस्तथा पूर्व्वं पूर्व्वं भूतसूक्ष्मैरुत्तरोत्तरेण व्यापिना भवितव्यमित्येष आसर्व्वान्नरादात्मन प्रारम्भः; यत्र भूतानि पञ्च संहतान्येवोत्तरोत्तर सूक्ष्मभावेन व्यापकेन कारणरूपेण च व्यवतिष्ठन्ते। न च परमात्मनोऽनन्यद्भूतिरेव यत्किञ्चनरमस्ति "सत्यस्य सत्यमिति" श्रुतेः। सत्यञ्च भूतपञ्चकं सत्यस्य सत्यं च परमात्मा। कस्मिन् खल्वाप ओताश्च प्रोताश्चेति। तासामपि कार्य्यत्वात्स्थूलत्वात्परिच्छिन्नत्वाच्च कचिद्वि ओतप्रोतभावेन भवितव्यम्। क्व तासामोतप्रोतभाव इत्येवमुत्तरोत्तरं प्रश्नप्रसङ्गो योजयितव्यः" भा०।

"वायौ गार्गीति, कस्मिन् खलु वायुरोतश्च प्रोतश्चेति, अन्तरिक्षलोकेषु गार्गीति, कस्मिन् खल्वन्तरिक्षलोका ओताः प्रोताश्चेति, गन्धर्वलोकेषु गार्गीति, कस्मिन् खलु गन्धर्वलोका ओताश्च प्रोताश्चेति, आदित्यलोकेषु गार्गीति, कस्मिन् खल्वादित्यलोका ओताश्च प्रोताश्चेति, चन्द्रलोकेषु गार्गीति, कस्मिन् खलु चन्द्रलोका ओताश्च प्रोताश्चेति, नक्षत्रलोकेषु गार्गीति, कस्मिन् खलु नक्षत्रलोका ओताश्च प्रोताश्चेति, देवलोकेषु गार्गीति, कस्मिन् खलु देवलोका ओताश्च प्रोताश्चेति, इन्द्रलोकेषु गार्गीति, कस्मिन् खल्विन्द्रलोका ओताश्च प्रोताश्चेति, प्रजापतिलोकेषु गार्गीति, कस्मिन् खलु प्रजापतिलोका ओताश्च प्रोताश्चेति, ब्रह्मलोकेषु गार्गीति, कस्मिन् खलु ब्रह्मलोका ओताश्च प्रोताश्चेति, सहोवाच गार्गि! मातिप्राक्षीर्मा ते मूर्द्धा व्यपप्तदनतिप्रश्नां वै देवतामतिपृच्छसि गार्गि! मातिप्राक्षीरिति ततो ह गार्गी वाचक्नव्युपरराम" उपनि०।

"वायौ गार्गीति। नन्वग्नाविति वक्तव्यम्। नैष दोषोऽग्नेः पार्थिवमपां वा धातुमनाश्रित्येतरभूतवत्स्वातन्त्र्येणालाभो नास्तीति। तस्मिन्नोतप्रोतभावो नोपदिश्यते। कस्मिन् खलु वायुरोतश्च प्रोतश्चेत्यन्तरिक्षलोकेषु गार्गीति। तान्येव भूतानि संहतान्यन्तरिक्षलोकास्तान्यपि गन्धर्वलोकेषु गन्धर्वलोका आदित्यलोकेष्वादित्यलोकाश्चन्द्रलोकेषु चन्द्रलोका नक्षत्रलोकेषु नक्षत्रलोका देवलोकेषु देवलोका इन्द्रलोकेष्विन्द्रलोका विराड्शरीरारम्भकेषु भूतेषु प्रजापतिलोकेषु प्रजापतिलोका ब्रह्मलोकेषु ब्रह्मलोका नामावयवारम्भकाणि भूतानि। सर्व्वत्र हि सूक्ष्मतारतम्यक्रमेण प्राण्युपभोगाश्रयाकारपरिणतानि संहतानि। तानेव पञ्चेति बहुवचनमाह्नि। कस्मिन् खलु ब्रह्मलोका ओताश्च प्रोताश्चेति। स होवाच याज्ञवल्क्यो हे गार्गि! मातिप्राक्षीः स्वं प्रश्नं न्यायप्रकारमतीत्यागमेन प्रष्टव्यां देवतामनुमानेन मा प्राक्षीरित्यर्थः। पृच्छन्त्याश्च मा ते तव मूर्द्धा शिरो व्यपप्तद्विस्रस्तं मा पतेत्। देवतायाः प्रश्नः प्रमम-

विषयं प्रज्ञाविषयमतिक्रान्तो गार्ग्याः प्रज्ञः आत्मानिकत्वात् यस्या देवतायाः प्रज्ञः सातिप्रज्ञा नातिप्रज्ञा अनतिप्रज्ञा खात्माविषयैर्बोधागमगम्येत्यर्थः । तामनतिप्रज्ञां वै देवतामतिपृच्छसि अतो गार्गि ! मानिप्राक्षीर्मर्तुष्टेऽक्षि ततो ह गार्गी वाचक्नव्युपरराम" भा० ।

ओतु पुंस्त्री अव्य०–तनु अठ् गुणः । १विडाले मार्जारे । आ+वे–तनु वा० संप्रसारणम् (पद्यानत्वम्) तिरश्चीनसूत्रे । "नाहं तन्तुं न विजानाम्योतुम्" ऋ०६,९,२ । "तन्तवः षटस्य प्रागायतानि सूत्राणि"ओतवस्तिरश्चीनानि सूत्राणि" भा० । अत्र रूपकतया वियदादीनां विस्तीर्य्यमाणत्वात् ओतुत्वं यथा तत्रैव भाष्ये "वैश्वानरस्य प्रतीच्यौ परस्ताद्दिवि यः स्थितः । तन्तोरूध्वरश्मितन्तुस्तुतगस्तानि तन्तवः । यजूंषि वेटाओतु स्तोहस्तं वाल्यमध्वरः" औ ओतून् पक्षीकृतानि स्थूलानि ओतुत्वात्तीयान्यपि वियदादीनि" भा० । "ये अन्ता यावतो सिचो य ओतवो ये च तन्तवः । वासोयतृघ्नीभिरितं तन्तः स्योनसुषमुयात्" अथ०१४,२,५१ । समासेऽवस्तात्परस्ताच्छब्दौ परकृपम् स्युओतुः स्युओतुः ।

ओदती स्त्री उन्दि–निच्० । "नद्य ओदतीनाम्"ऋ० ८,७६,२ । 'ओदतीनाम् ओदत्यः जलवत्यः तासाम्" भा० ।

ओदन पु० उन्द–युच् नलोपो गुणश्च । १मेघे निघ० । २भक्ष्ये खिलाखे अर्द्धर्चादि० पु०न० । "अन्नेन व्यञ्जनम्" भा० स० गुडौदनः गुडोदनः दध्योदन इत्यादि स्त्रीकरत्वद्वारा सामर्थ्यम् । "गुडौदनं पायसं च हविष्यं क्षीरषटिकम् । दध्योदनं हविष्यं स्यात् सक्तवश्चैव च" वा० स्मृतिः गुडमिश्र ओदनः गुडौदन एवं दध्योदनः हविर्दातौदनः" मिता०ततो हिताद्यर्थे छ यत् वा । ओदनीय ओदन्य ओदनसाधने तण्डुलादौ । "अमी जगद्भाजनचक्रिकाश्चिरं विलुप्तमन्योन्यरसैकमार्द्रम् । रसोत्तरं सौरभसारवत्तरं स्वादभूतौदनमोदनज्ञाः" नैषधे अन्नवर्गे "अन्नेषाद्यौदनादीनां मध्यानामोदनस्य च"अनुः

ओदनपाकी स्त्री ओदनस्य पाक इव पाको यस्याः ङीष् । १लोखण्डिकायाम् । २ओषधिभेदे शब्दार्थच० ।

ओदनाकुया स्त्री ओदनस्याकुय आकुयो यस्याः । मद्रासमकक्षायां (वेलियाडा) राजनि० ।

ओदनी स्त्रीओदन इवाचरति ओदन+आचारे क्विप् ततः ङीष् गौरा० ङीष् । (वेलेया) वल्लायाम् ।

ओद्म पु० उन्द–क्लेदने भावे मन् नि० । उन्दने क्लेदने ।

ओद्मन् वि० उन्द–मनिन् नलोपश्च । ओषधौ । "अपां स्वोद्मन् त्वादयामि" यजु०१२,५२ । अपान ओद्मन् ओद्मनि ओषधौ, भा० सप्तम्या लुकि नलोपाभावः ।

ओम् अव्य०अव–मन् नि० । १प्रणवे, २आरम्भे, ३स्वीकारे, "ओमित्युक्त्वतोऽथ ब्राह्मणं इति व्याहृत्य वाचनम:" भाषः । ४अनुमतौ, ५अभ्यागतौ, ६अखीकारे, ७मङ्गले, ८शुभे, ९सत्ये, १०ब्रह्मणि च । अस्य उव मुच तेषां समाहारः । विष्णुमहेश्वरब्रह्मरूपत्वात् १परमेश्वरे अव्य० यथा तस्येश्वरवाचकता तथा भाग०स्कन्ध भा०शिवरहस्ये दर्शितं यथा

"तस्य वाचकः प्रणवः" स्कं० । "वाच्य ईश्वरः प्रणवस्य, किमस्य सङ्केतितं वाच्यवाचकत्वम् ? अत्र प्रदीपप्रकाशवदवस्थितमिति । स्थितोऽस्य वाच्यस्य वाचकेन सह सम्बन्धः, सङ्केतस्त्वीश्वरस्य स्थितमेवार्थमभिनयति । यथावस्थितः पितापुत्रयोः सम्बन्धः, सङ्केतेनावद्योत्यते अयमस्य पिता, अयमस्य पुत्र इति । सर्गान्तरेष्वपि वाच्यवाचकत्वमेतदर्थमेव सङ्केतः क्रियते" भा० ।

"सङ्गति तत्प्रतिधानं दर्शयितुं तस्य वाचकमाह, तस्य वाचकः प्रणवः । व्याचष्टे, वाच्य इति । तस्य परेशस्य नतं विनयद्वारेणोपन्यस्यति, किमस्येति वाचकत्वं प्रतिपादकत्वम् इत्यर्थः । परे हि मन्यन्ते, यदि स्वाभाविकः शब्दार्थयोः सम्बन्धः सङ्केतेनाकाङ्क्षादयर्थः प्रत्यक्षेतस्य दृष्टेष्वनाकाङ्क्षेनाभिव्यज्यते ततो यत्र नास्ति स सम्बन्धस्तत्र सङ्केतयतेनापि न व्यज्यते न हि प्रदीपव्यङ्ग्योघटो यत्र नास्ति तत्र प्रदीपसहस्रेणापि शक्यो व्यूढविष्टम् । ततश्चेदमस्य वाचकत्वमिति विज्ञस्याभिनतमवधारयति, स्थितोऽस्येति । अयमभिप्रायः सर्व एव शब्दा सर्वाकारार्थाभिधानक्षमा इति स्थित एवैषां सर्वाकारैरर्थैः स्वाभाविकः सम्बन्धः । ईश्वरसङ्केतस्तु प्रकाशकस्तियामकश्च, तस्य ईश्वरसङ्केतासङ्केतत्वाच्च वाचकाप्रवृत्तिभागलक्षटिदमाह, सङ्केतः स्वीश्वरस्येति । निदर्शनमाह, यथेति । ननु यद्यस्य प्राधानिकस्य महाप्रलयसमये प्रधानभावप्रणतस्य चक्षिरपि प्रलीना ततोमहदादिक्रमेणोत्पन्नस्य वाचकत्वेन माहेश्वरेण सङ्केतेन न शक्या वाचकशक्तिरभिव्यक्तिं विनष्टप्रतिपादिका आह, सर्गान्तरेष्वपीति । यद्यपि यद्यपि प्रधानलाभ्युपगतः शब्दस्तथापि प्रणवविधाने

तच्छक्तियुक्त एवाविर्भवति, वर्णातिपातसमधिगतब्रह्मभाव इत्योङ्कारोमेधविच्छब्दविधारावसेकात्तेन पूर्वसञ्चस्य सङ्घातानुस्वारेण सङ्गतः क्रियते भग ता इति तच्छास्त्रं प्रतिपत्तेः सङ्घत्यक्षरपारम्पर्यया निस्तपसा निजःयङ्गार्थयोः सम्बन्धः न कूटस्थनित्य इत्यागमिनः प्रतिजानते, न पुनरागमनिरपेक्षाः सर्गान्तरेष्वपि तादृश एव सङ्गत इति प्रतिपत्तुमीशत इति भावः" विव० ।

"तज्जपस्तदर्थभावनम्" सू० ।

"प्रणवस्य जपः प्रणवाभिधेयस्य चेश्वरस्य भावनम् । तदस्य योगिनः प्रणवं जपतः, प्रणवार्थं च भावयतश्चित्तमेकाग्र्यं सम्पद्यते । तथाचोक्तं ।

"स्वाध्यायाद्धि योगमासीत योगात् स्वाध्यायमामनेत् । स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते" इति भा० ।

"वाचकमाख्याय प्रणिधानमाह, तज्जपस्तदर्थभावनम् । व्याचष्टे, प्रणवस्येति । भावनं पुनःपुनस्तस्मिं निवेदनम् । ततः किं सिध्यति इत्यत आह प्रणवमिति । एकस्मिन् भगवति आरमति चित्तम् । अतोऽत्र वैयासिकीनाम्नाऽऽहरति, तथा चेति । ततः ईश्वरः समाधितत्फलदानेन तमनुगृह्णाति" विव० ।

ओङ्कारस्य माहात्म्यं स्वरूपादिकं ब्राह्मणस०दर्शितं यथा योगियाज्ञवल्क्यः; "प्रणवाद्याः स्मृताश्चान्याश्च वर्णफलप्रदाः । तच्चाऽऽ निःसृताः सर्वे प्रयोज्यन्ते च तत्र वै । अक्षरस्य पावनं धर्म्यं सर्वकामप्रसाधनम् । ओङ्कारं परमं ब्रह्म सर्वमन्त्रेषु नायकम् । प्रजापतेर्मुखोत्पन्नं तपःसिद्धस्य वै पुरा" । स एव "यथा पर्णं पलाशस्य सङ्कुचेन धार्यते । तथा जगदिदं सर्वमोङ्कारेणैव धार्यते । अमेण दह्यते पापं प्राणायामैस्त्रयो मलम् । ध्यानेन सञ्चितिर्नाशं धारणाभिस्तु सुध्यते" । मनुः "अकारश्चाप्युकारश्च मकारश्च प्रजापतिः । वेदत्रयान्निरदुहद्भूर्भुवःस्वरितीति च । गीता "ओं तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः । ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा । तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः । प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्" । योगियाज्ञ० "सिद्धान्तार्थं सर्वेषां वेदवेदान्तयोरपि । अन्येषामपि शास्त्राणां निश्चयोऽयं प्रकाश्यते । प्रणवाद्यास्ततोवेदा प्रणवं पर्य्युपस्थिताः । वाङ्मयं प्रणवः सर्वं तस्मात् प्रणवमभ्यसेत्" । तथा स एव "आद्यं यदक्षरं ब्रह्म सर्वोपरि प्रतिष्ठितम् । सद्युक्तोऽन्यद्धि-

दृङ्वेदोयो वेदैनं स वेदवित् । एक एव तु विज्ञेयः प्रणवोयोगसाधनम् । स्टष्टोनं सर्वसिद्धान्तैरितरैर्ब्रह्मवादिभिः । वेदभारभराक्रान्तैर्यः स वै ब्राह्मणगर्दभः । योवेत्ति ब्रह्मणोऽभ्यन्तं त्रिमात्रार्द्धं तिष्ठति" । तथा "त्रिमात्रार्द्धं परं ब्रह्म मात्राक्षरविवर्जितम् । अचिन्त्यमव्ययं सूक्ष्मं निष्कलं परमं पदम्" मनुः "ऋचि सर्व्यावैदिकोऽनुद्घोतिवर्जतिक्रियाः । त्र्याक्षरं दुष्करं लोके ब्रह्म चैव प्रजापतिः" । योगिया० यथाऽऽकाशेन शब्दस्य पक्षयोः किं प्रयोजनम् । तथोङ्कारविधिस्थाने ज्ञानशब्दौ न विद्यते । सर्वमन्त्रप्रयोगेषु ओमित्यादौ प्रयुज्यते । तेन सर्वपरिपूर्णानि यथोक्तानि भवन्ति हि । यस्यूनमतिरिक्तस्य यत् किञ्चिद् वदवर्त्तियम् । यदमेध्यमशुद्धस्य वातयामस्य यद्भवेत् । तत्सर्वमोङ्कारयुक्तेन मन्त्रेणाविकलं भवेत्" । छन्दोगसङ्घपरिशिष्टम् "यदोङ्कारमकृत्वा तु किञ्चिदारभ्यते तदृक्षं भवति तस्मात् सर्वत्रभवात्मीत ओङ्कारं पूर्वमारभेत्" । गर्ग्यव्यासः ओङ्कारं खगेहारं तस्मात्सर्वत्रैव कर्मादौ प्रयुञ्जीत" । छन्दोगसङ्घपरिशिष्टम् "ओङ्कारपूर्वं हि योगोपासनं यानि नित्यानि पुण्यतमानि कर्माणि दानयज्ञतपःस्वाध्यायजपध्यानसन्ध्योपासनप्राणायामहोमदेव पितृमन्त्रोच्चारणब्रह्मचर्यादि यच्चान्यत् किञ्चित्सर्वं प्रणवसञ्चार्थं प्रवर्त्तयेत् समापयेच्च" । मनुः "प्राक्कूले पर्य्युपासीनः पवित्रैश्चैव पावितः । प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति" । व्यासः "प्रणवस्य ऋषिर्ब्रह्मा गायत्री छन्द एवच । देवोऽग्निः सर्वकार्येषु विनियोगः प्रकीर्त्तितः" । तथा "एवमाद्यादिकं कृत्वा तत ओङ्कारमभ्यसेत् । सार्द्धं त्रिमात्रमत्यर्थं दीर्घप्लुतविनादवत्" । योगियाज्ञवल्क्यः "त्रिमात्रस्तु प्रयोक्तव्यः सर्वाराम्भेषु कर्म्मसु । त्रिधः सार्द्धेषु कर्त्तव्यामात्रालक्षार्थचिन्तकैः । देवताध्यानलक्षे तु प्लुतं कुर्य्यात् संयतः । तैलधारावदक्षिप्तं दीर्घघण्टाविनादवत् । अधीतं प्रणवस्यान्तं यस्तं वेद स वेदवित् । आद्यं तदक्षरं ब्रह्म त्रयी यत्र प्रतिष्ठिता । स युक्तोऽन्यद्धि दृङ्वेदोयोवेदैनं स वेदवित् । छन्दोगपरिशिष्टम् "ऋतिरोदात्त एकाक्षर ओङ्कार ऋग्वेदे, लॅ ऋक्षौदात्तओङ्कारोयजुर्वेदे, दीर्घोदात्तएकाक्षरः सामवेदे, संक्षिप्तोदात्तएकाक्षर ओङ्कारः अथर्ववेदे" बौधायनः "अपि वा प्रणवेन त्रिरन्तर्जले पठेत् सर्वं ह्यात्मापात्र प्रक्षुयते" । हरदत्तः "ऋदेकमक्षरमुच्चा प्रणवोत्तरारणिम् । ध्याननिर्मन्थनाभ्यासं पण्डितोदग्निमूढ-

वत् । गीता "ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम्" ।
ओङ्कारस्य मात्राविशेषाभिध्यानफलम् प्रश्नोपनिषदि यथा
"एतद्वै सत्यकाम ! परं चापरं च ब्रह्म यदोङ्कारस्तस्मा-
द्विद्वानेतेनैवायतनेनैकतरमन्वेति । स यद्येकमात्रमभिध्या-
यीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसम्पद्यते ।
तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्येण
श्रद्धया सम्पन्नो महिमानमनुभवति । अथ यदि द्विमा-
त्रेण मनसि सम्पद्यते सोऽन्तरिक्षं यजुर्भिरुन्नीयते ।
सोमलोकं, स सोमलोके विभूतिमनुभूय पुनरावर्त्तते ।
यः पुनरेतन्मात्रेणैवोमित्येतेनैवाक्षरेण परं पुरुष-
मभिध्यायीत स तेजसि सूर्ये सम्पन्नः । यथा पादो-
दरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनि-
र्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जी-
वघनात् परात् परं पुरिशय पुरुषमीक्षते तदेतौ श्लोकौ
भवतः । "तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता अन्योन्यसक्ता
अनविप्रयुक्ताः । क्रियासु बाह्याभ्यन्तरमध्यमासु सम्यक्
प्रयुक्तासु न कम्पते ज्ञः । ऋग्भिरेतं, यजुर्भिरन्तरिक्षं,
सामभिर्यत्तत्कवयो वेदयन्ते । तमोङ्कारेणैवायतनेना-
न्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परञ्चेति"ऽ० ।
"एतद्ब्रह्म वै परञ्चापरञ्च ब्रह्म परं सत्यमक्षरं पुरु
षाख्यमपरञ्च प्राणाख्यं प्रथमजं यत्तदोङ्कार एवोङ्कारा-
त्मकमोङ्कारप्रतीकत्वात् । परं हि ब्रह्मशब्दाद्युपलक्षणा-
र्हं सर्वधर्मविशेषवर्जितमतो न यत्किञ्चनेन्द्रियगो
चरत्वात्केवलेन मनसाऽवगाहितुमोङ्कारे तु विष्ण्वादि-
प्रतीमास्थानीये भक्त्यावेशितब्रह्मभावे ध्यायिनां तत्प्रसी-
दतीत्यवगम्यते यास्कप्रामाण्यात् । तस्मादपरञ्च ब्रह्म ।
तस्मात्परञ्चापरञ्च ब्रह्म यदोङ्कार इत्युपपद्यते । तस्मा-
देवं विद्वानेतेनैवात्मप्राप्तिसाधनेनैव ओङ्काराभिध्याने-
नैकतरं परमपरञ्चेति ब्रह्मानुगच्छति नेदिष्ठं ह्यालम्ब-
नमोङ्कारो ब्रह्मणः । स यद्योङ्कारस्य सकलमात्रा-
विभागज्ञो न भवति तथाप्योङ्काराभिध्यानप्रभावाद्विशि-
ष्टामेव गतिं गच्छति किन्तर्हि यद्यप्येवमोङ्कारमेकमात्रा-
विभागज्ञ एव केवलोऽभिध्यायीतैकमात्रं सदा ध्यायीत
सतैनैव मात्राविशिष्टोङ्काराभिध्यानेनैव संवेदितः
सम्बोधितस्तूर्णं क्षिप्रमेव जगत्यां पृथिव्यामभिसम्पद्यते
किं मनुष्यलोकमनेकानि जन्मानि जगत्यां तत्र तं पाठकं
जगत्यां मनुष्यलोकमेवोपनयन्ते उपनिगमयन्ति ऋचः
ऋग्वेदरूपा ओङ्कारस्य प्रथमा एका मात्रा । तदभि-
ध्यानेन स मनुष्यजन्मनि द्विजाद्यः सन् तपसा ब्रह्म-
चर्येण श्रद्धया च सम्पन्नो महिमानं विभूतिमनुभवति
न वीतश्रद्धो यथेष्टचेष्टो भवति योगभ्रष्टः कदाचिदपि
न दुर्गतिं गच्छति । अथ पुनर्यदि द्विमात्राविभागज्ञो
द्विमात्रेण विशिष्टमोङ्कारमभिध्यायीत खप्राणके मनसि
मननीये यजुर्मये सोमदैवत्ये सम्पद्यते एकात्मतयात्मभावं
गच्छति स एवं सम्पन्नो ऋतोऽन्तरिक्षाधारं द्वितीयरूपं
द्वितीयमात्रारूपेरेव यजुर्भिरुन्नीयते सोमलोकं सौम्यं
जन्म प्राप्यन्ति तं यजूंषीत्यर्थः । स तत्र विभूति-
मनुभूय सोमलोके मनुष्यलोकं प्रति पुनरावर्त्तते ।
यः पुनरेतमोङ्कारं त्रिमात्रेण त्रिमात्राविषयविज्ञान-
विशिष्टेनोमित्येतेनैवाक्षरेण प्रतीकेन परं पुरुषमभिध्यायीत तेनाभिध्यानेन प्रतीकत्वेन त्वात्मत्वं
प्रकृतमोङ्कारस्य, परञ्चापरञ्च ब्रह्मेति भेदाभेदश्रुतेरोङ्कार-
मिति च द्वितीयानेकशः श्रुता बाध्येत अन्यथा यद्यपि-
तृतीयाभिधानत्वेन करणत्वमुपपद्यते तथापि प्रकृतानु-
रोधाच्चिमात्रं परं पुरुषमिति द्वितीयैव परिशिष्या । "तृजे-
र्द्वेकं कुलस्यार्थे" इति न्यायेन । स तृतीयो मात्रारूपस्ते-
जसि सूर्ये सम्पन्नो भवति ध्यायमानो ऋतोऽपि सूर्या-
त्सोमलोकादिवत्र पुनरावर्त्तते किन्तु सूर्यसम्पन्नमात्र
एव । यथा पादोदरः सर्पत्वचा विनिर्मुच्यते जीर्णत्वग्-
विनिर्मुक्तः स पुनर्नवो भवति । एवं ह वै एष यथा
दृष्टान्तः स पाप्मना सर्पत्वक्स्थानीयेनाशुद्धिरूपेण विनिर्मुक्तः
सामभिरुत्तीयमात्रारूपैरुन्नीयते ब्रह्मलोकं हिरण्य-
गर्भस्य ब्रह्मणो लोकं सत्याख्यम् । स हिरण्यगर्भः सर्वेषां
संसारिणां जीवानामात्मभूतः क्षेत्रज्ञरूपेण
सर्वभूतानां तस्मिन् लिङ्गात्मनि संहृताः सर्वे जीवाः ।
तस्मात्स जीवघनः स विद्वांस्त्रिमात्रेणोङ्काराभिज्ञः । एव-
मुज्जीवघनाद्धिरण्यगर्भात् परात्परं परमात्माख्यं
पुरुषमीक्षते । पुरिशय सर्वशरीरानुप्रविष्ट पश्यति ध्याय-
मानः । तदेतावस्मिन्नर्थेऽर्थप्रकाशकौ मन्त्रौ भवतः ।
तिस्रस्त्रिसङ्ख्याका अकारोकारमकाराख्या ओङ्कारस्य
मात्राः । मृत्युर्यासां विद्यते ता मृत्युमत्यः मृत्युगोच-
राद्गतिकान्ता मृत्युगोचरा एवेत्यर्थः । ता आत्मनो
ध्यानक्रियासु प्रयुक्ताः । किम्भूतान्योन्यसक्ता इतरेतरस-
क्ताः । अनविप्रयुक्ता विशेषेणैकैकविषय एव प्रयुक्ताः ।
तथा न विप्रयुक्ता अविप्रयुक्ता नाविप्रयुक्ता अनविप्रयुक्ताः

किंनहि विशेषेणैकाग्र्यध्यानकालेऽतिसूक्ष्मासु क्रियासु वाह्याभ्यन्तरमध्यमासु जाग्रत्स्वप्नसुषुप्तिप्रस्थानपुरुषाभिध्यानलक्षणासु योगक्रियासु सम्यक्प्रयुक्तासु सम्यग्ध्यानकाले प्रयोजितासु न कम्पते न चलति तत्रः स्थो योगी यथोक्तविभागतः ओङ्कारस्येत्यर्थः। न तस्यैवंविदश्चलनमपपद्यते। यस्माज्जाग्रत्स्वप्नसुषुप्तपुरुषा सह स्थानैर्मात्रात्वरूपेणोङ्कारात्मरूपेण दृष्टाः। स चैवंविद्वान् सर्व्वात्मभूत ओङ्कारमयः कृती वा चलेत्कश्चिद् वा। सर्व्वार्थसङ्ग्रहार्थो द्वितीयो मन्त्रः। ऋग्भिरेतं लोकं मनुष्योपलक्षितम्। यजुर्भिरन्तरिक्षं सोमाधिष्ठितम्। सामभिर्यत्तद्ब्रह्मलोकमिति कृतीय कवयो मेधाविनो विद्वांस एव नाविद्वांसोवेदयन्ते। तं त्रिविधलोकमोङ्कारेण साधनेनापरब्रह्मलक्षणमन्वेत्यानुगच्छति विद्वान्। तेनैवोङ्कारेण यत्तत्परं ब्रह्माक्षरं सर्वं पुरुषाख्यं शान्तं विभुं जाग्रत्स्वप्नसुषुप्तादिविशेषसर्वप्रपञ्चविवर्जितमत एवाजरं जरावर्जितमतएव मृत्युवर्जितमेव। यस्माज्जरादिक्रियादिरहितमतोऽभयम्। यस्मादेवाभयं तस्मात्परं निरतिशयम्। तदेतोङ्कारेणायतनेन गमनसाधनेनान्वेतीत्यर्थः"भा०।

स च सामावयवभेदः ब्रह्मवाचकः आत्मबोधकाक्षररूपश्च तदेत् छा०उप० भाष्ययोर्दर्शितं यथा।

"ओमित्येतदक्षरमुद्गीथमुपासीत" छा० उ० ॥

"ओमित्येतदक्षरमुपासीत। ओमित्येतदक्षरम्। परमात्मनोऽभिधानं नेदिष्ठम्। तस्मिन् हि प्रयुज्यमाने स प्रसीदति प्रियनामग्रहण इव लोकः। तदिहेति परं प्रयुक्तमभिधायकत्वाद्व्यावर्त्तितं यद्यक्षरमात्रे प्रतीयते 'तथाचोदितत्वात्परमात्मनः प्रतीकं सम्पद्यते।

एवं नामत्वेन प्रतीकत्वेन च परमात्मोपासनसाधनं श्रेष्ठमिति सर्व्ववेदान्तेषुगतम्। जपकर्म्माध्यायाद्यन्तेषु बहुशः प्रयोगात्प्रसिद्धमस्यौङ्कारम्। अतस्तदेतदक्षरं वर्णात्मकमुद्गीथभक्त्यवयवत्वादुद्गीथशब्दवाच्यमुपासीत। कर्म्माङ्गावयवभूते ओङ्कारे परमात्मप्रतीके दृढामेकाग्र्यलक्षणां मतिं सन्तनुयात्" भा०।

"ओमित्युद्गायति तस्योपव्याख्यानम्। एषां भूतानां पृथिवी रसः पृथिव्या आपोरसः। अपामोषधयो रस ओषधीनां पुरुषो रसः, पुरुषस्य वाक्सो, वाच ऋक्स, ऋचः साम रसः, साम्न उद्गीथो रसः। स एष रसानां रसतमः परमः परार्द्धोऽष्टमो यदुद्गीथः। रसतमा रसतमर्ङ्, रसतमत्वात्साम, रसतमः रसतम उद्गीथइति विस्पष्टं भवति। वागेवर्क्, प्राणः साम, ओमित्येतदक्षरमुद्गीथः, तद्वा एतन्मिथुनं यद्वाक च प्राणश्चर्क् च साम च। तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम्। आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते। तद्वा एतदनुज्ञाक्षरं यद्धि किञ्चानुजानात्योमित्येव तदाह एषो समृद्धिर्यदनुज्ञा, समर्द्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते। तेनेयं त्रयी विद्या वर्त्तते ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायतीतस्यैवाक्षरस्यापचित्यै महिम्ना रसेन" उप०।

"स्वयमेव श्रुतिरोङ्कारस्योद्गीथशब्दवाच्यत्वे हेतुमाह। ओमिति ह्युद्गायति। ओमित्यारभ्य हि यस्मादुद्गायति अत उद्गीथ ओङ्कार इत्यर्थः। तस्याक्षरस्योपव्याख्यानमेतत्सुप्रसन्नमेवं विभूत्येवं फलमित्यादिकथनमुपव्याख्यानम्। प्रवर्त्तते इति वाक्यशेषः। एषां चराचराणां भूतानां पृथिवी रसो मतिः परायणमवष्टम्भः। पृथिव्या आपो रसोऽप्सु स्रोता च प्रोता च पृथिव्यस्ता रसः पृथिव्याः। अपामोषधयो रसोऽप्परिणामित्वादोषधीनाम्। तासां पुरुषो रसोऽन्नपरिणामत्वात्पुरुषस्य। तत्रापि पुरुषस्य वाक्सः। पुरुषावयवानां हि वाक् सारतरा। अतो वाक् पुरुषस्य रस उच्यते। तस्या अपि वाचः ऋक्सः सारतरा। ऋचः साम रसः सारतरम्। तस्मादपि साम्न उद्गीथः प्रकृतत्वादोङ्कारः सारतरः। एवं स एष उद्गीथाख्य ओङ्कारो भूतादीनामुत्तरोत्तररसानामतिशयेन रसो रसतमः परमात्मप्रतीकत्वात् परार्द्धः अर्द्धं स्थानं परञ्च तदर्द्धञ्च तदर्द्धमिति परार्द्धः परमात्मस्थानार्हः परमात्मवदुपास्यत्वादित्यभिप्रायः। अष्टमः पृथिव्यादिरससङ्ख्यायां यदुद्गीथः य उद्गीथः। वाच ऋक्सस्य इत्यक्रम कतमा सा ऋक् कतमत्तत्साम कतमो वा स उद्गीथः। कतमा कतमेति वीप्सादरार्था। ननु 'वा बहूनां जातिपरिप्रश्ने कतमच्"पा०न ह्यत्र ऋग्जातिबहुत्वं कथं कतमच्प्रत्ययः। नैष दोषो जातौ परिप्रश्नो जातिपरिप्रश्न इतीतरत्किञ् विपक्षे जातावृगध्यक्षीनां बहुत्वोपपत्तेः। न तु जातेः परिप्रश्न इति विस्पष्टते। ननु जातेः परिप्रश्न इत्यभिप्रेते कतमः कठ इत्यादुदाहरणमुपपद्यते जातौ परिप्रश्न इत्यतो न युज्यते। तत्रापि कठादिजातावेव व्यक्तिबहुत्वाभिप्रायेण परिप्रश्न इत्यदोषः। यदि जातेः परिप्रश्नः स्यात् कतमा

कतमा ऋगित्यादौ उपसङ्ग्रहणं कर्त्तव्यम् स्यात् । विस्पष्टं भवति विमर्शः ज्ञानी भवति । विमर्शे हि कृते सति प्रतिवचनोक्तिरुपपन्ना वागेवर्क् प्राणः सामेति । वाङ्मनोरेकत्वेऽपि नाष्टमत्वव्याघातः पूर्व्वजाहाक्यान्नरत्वादाग्निगुण्यसिद्धये ओमितेतदक्षरमुद्गीथ इति वाक् प्राणाद्दक्सामयोनी इति वागेवर्क् प्राणः सामेत्युच्यते । यथाक्रममृक्सामयोन्योर्वाक्प्राणयोर्यत्किञ्चे हि सर्व्वासाम्नां सर्व्वेषाञ्च साम्नामवरोधः कृतः स्यात् । सर्व्वर्क्सामावरोधे सर्व्वसामसाध्यानां च सर्व्वकर्म्मणामवरोधः कृतः स्यात् । तदवरोधे च सर्व्वे कामा अवरुद्धाः स्युः । ओमितेतदक्षरमुद्गीथ इति भक्त्यायत्ता निरूप्यते । तद्धैतदिति मिथुनं निर्दिश्यते । किमन्मिथुनमित्याह यद्दाक् च प्राणश्च सर्व्वर्क्सामकारणभूतौ मिथुनम् ऋक् च साम चेति ऋक्सामकारणौ ऋक्सामशब्दोक्तावितरार्थः । न तु स्वतन्त्रम् ऋक् च साम च मिथुनम् । अन्यथा हि वाक् च प्राणश्चेत्यमिथुनऋक्साम चापरं मिथुनमिति द्वे मिथुने स्याताम् तथा च तदेतन्मिथुनमितेत्येकवचननिर्देशोऽनुपपन्नः स्यात् । तस्माद्दक्सामयोन्योर्वाक्प्राणयोरेव मिथुनत्वम् । तदेतदेवंलक्षणं मिथुनमोमितेतक्षिप्तमक्षरे संसृज्यते । एवं सर्व्वकामावाप्तिगुणविशिष्टं मिथुनमोङ्कारे संसृष्टं विद्यात इत्येतावत्कारस्य सर्व्वकामावाप्तिगुणवत्त्वं प्रसिद्धम् । वाङ्मयत्वमोङ्कारस्य प्राणनिष्पाद्यत्वञ्च मिथुनेन संसृष्टत्वं मिथुनस्य कामापविद्धत्वं प्रसिद्धमिति दृष्टान्त उच्यते । यथा लोके मिथुनौ मिथुनाभावयौ स्त्रीपुंसौ यदा समागच्छतो गाम्यधर्म्मतया संयुक्ष्येयातां तदाऽऽप्नुवतः प्राप्नुयातोऽन्योन्यस्येतरेतरस्य तौ कामम् । तथा च स्वाभाविकप्रविष्टेन मिथुनेन सर्व्वकामाग्निगुणवत्त्वमोङ्कारस्य सिद्धमित्यभिप्रायः । तदुपासकोऽप्युद्गाता तद्गन्धी भवतीत्याह आप्नविता ह वै कामानां यजमानस्य भवति य एतदक्षरमेवाग्निगुणवदुद्गीथमुपास्ते तस्यैतदोङ्कृतं फलमित्यर्थः । "तं यथा यथोपासते तदेव भवतीति"श्रुतेः । सङ्गृहीतमोङ्कारः कथं ? तदुक्तं एतत्प्रकरणमनुसंहारमनुसृता च साक्षरस्य तस्य अनुसंहारमतिरोङ्कार इतरथः । कथमनुसंहरतीत्याह श्रुतिरेव । यद्वि किञ्च यत्किञ्च लोके ज्ञानं धनं वानुजानाति विद्वान्मनो वा तत्सानुमतिं कुर्वन्नोमित्येव तदाह । तथा च वेदे यत्तदेवाक्षयवस्तिं वदितृनोमिति लोकाचेत्यादि । तथा च लोकेऽपि तवेदं धनं मद्भोगाय इत्युक्ते ओमित्याह । अत एवा उ एवैव सङ्गृह्यैवंनुज्ञा वा अनुज्ञा वा सङ्गृहीतस्यानुज्ञत्वादनुज्ञायाः सङ्गृहोऽ ओमित्यनुज्ञां ददाति तस्मात्सङ्गृहीतगुणवानोङ्कार इतरार्थः । सङ्गृहीतगुणो यावत्कर्त्तृसम्बन्धी समर्द्धितो हि वै कामानां यजमानस्य भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते इतरादि पूर्ववत् । अथेदानीमक्षरं स्तौति उपास्यत्वात्प्ररोचनार्थम् । कथं ? तेनाक्षरेण प्रकृतेनेयत्त्वे दार्ढ्यलक्षणा त्रयी विद्या विहितं कर्म्मेतरार्थः । नहि त्रयी विद्यैवाश्रवणादिभिर्वर्त्तते कर्म्म तु तथा प्रवर्त्तत इति प्रसिद्धम् । कथमोमितीत्याश्रवयतीत्यादि यंस्तत्रोमित्युद्गायतीति विशेषात् सोमयाम इति गम्यते तच्च कर्म्म एतत्खल्वाक्षरस्यापचित्यै पूजार्थम् । परमात्मप्रतीकं हि तत् । तदपचितिः परमात्मन एव सा । "स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" इति स्मृतेः । महिम्ना रसेन किञ्चैतत्खल्वाक्षरस्य महिम्ना महत्त्वेन स्तुतिरुद्गीथादिप्राप्तैरितरार्थः" भा० ।

ओमित्यस्य प्रकृतं तु नार्थः किन्तु प्रकृतसाधनत्वं श्रवणेन भवतीत्येतदर्थमभिसन्धाय तदुत्कीर्त्तनम् आदित्यवत् । अतएव "ओङ्कारस्यादित्यस्य हावेतौ ब्रह्मणः द्वारा । कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ" इत्यत्र ओङ्कारस्य माङ्गलिकत्वमुक्तम् तथाचार्चान्तरे प्रयुक्तावोङ्कारयन्त्रौ स्तुत्वा अभिप्रेतार्थसिद्धिरुपलक्षणं लक्षयत इत्याकरे द्रष्टव्यम् । "अवर्णात्ओम् यद्दक्षादेः परस्यैकादेः ओम्+अ-यञ् । ओमित्यस्य करणे ओङ्कार अ । ओङ्कृत अङ्कीकृते ओमित्यादावुच्चारयितरि च त्रि० । स्वस्वामीङ्कृतं सर्व्वं मतः ।

ओमन्यु० अव-मनिन् अट् गुणः । अवने रक्षणे "ब्रह्मणो मना वा यो गातु" ऋ० ७,६६,४ । "ओमनाऽवनेन रक्षणेन" भा० "यो वाजोमानं दधते प्रियः सनु"७,६८,५ । "ओमानं रक्षणम्" भा० । "विश्वेभिर्म्नोमभिर्वाजसाः" ऋ० ५,४२,१२ । "ओमभिः रक्षणैः" भा० । ओमाविद्यतेऽस्य मतुप् मस्य वः त्रि० ननलोपः । ओमन्वत् ओमयुक्ते रक्षके "ओमन्वन्तं चक्रथुः सप्त वध्रय" ऋ०१०,२६,६ । "ओमन्वन्तं रक्षणवन्तम्"भा०ओमा लावते लै क नलोपश्च । ओमान अवनेन लायकर्त्तरि त्रि० । "न ओमानं शरदोविहः" ५०,५,ओमनि क्षितम् यत् टिलोपः । ओम्न रक्षणक्षिते त्रि० "वसूना रातौ स्याम इद्राधानोओमावताम्" सांखा०

औ० सू० १,६,२ । ततोऽस्यर्थे मतुप् पूर्वस्य दीर्घः ओषावत् तदुक्ते त्रि० । "तप्तघर्म्मोऽयावत्तमसवे" ऋ०१,११२,७

ओष पु० ओषति आ+उन्द्-क नलोपे पृषो० दस्य डत्वम् ।सूरर्थे (ओड) इति ख्याते कन्दे ।२आर्द्रे-त्रि० (भिजा) त्रिका० । ओषश्च शुष्काः भावप्र०"सूरणः कन्दओषश्च कन्दशोऽर्शसु इत्यपि । सूरणोदोषनोरुक्तः कषायः कण्डूहृत् कटुः । विष्टम्भी विषदोरुच्चः कफार्शः-क्षननोखदुः । विशेषादर्शसे पथ्यः श्लीपदगुल्मविनाशनः । सर्वेषां कन्दयाकानां सूरणः श्रेष्ठ उच्यते । दद्रूणां रक्तपित्तानां कुष्ठानां न हितो हि सः । वल्यानयोगं वल्याश्च सूरणोशुष्कवत्तरः" उक्ताः ।

ओलस्ज उत्सर्गे इदित् भ्वा०पर०सक०सेट् । ओलस्जति औलस्जीत् । ओलस्जाम्-बभूव आस चकार ।

ओलड लेखे इदित् वा चुरा०उभ० पक्षे भ्वादि० पर०सक० सेट् । ओलण्डयति ते औलिलण्डत् त ओलण्डयाम् बभूव आस चकार चक्रे । पक्षे ओलण्डति औलण्डीत् ओलण्डाम् बभूव आस चकार ।

ओल्ल पु० ओल+पृषो० । ओले सूरणे राजनि० ।

ओष पु० उष-घञ् । १दाहे । "अग्निसाराभ्यामोषधीषूषरीदाहाय भवन्ति" ! "वैषम्यं तोदसुप्तत्वगुरुत्वौषसमन्वितौ" "तेषां चतुर्णामप्योषधीषूषरीदाहधूमायनानि लिङ्गोत्थान प्रथमभेदित्वानि लक्षिलक्ष्म च सामान्यानि लिङ्गानि" सुश्रु० । २पाके च ओषः ३क्षिप्रे न०निघ० ।

ओषण पु०उष-ल्यु । कटुरसे (झाल) इति ख्याते ।रसभेदे । गौ०ङीष् । ओषणी (पुडिया) २याकभेदे स्त्री । "ओषणी कक्षयातत्तु" राजवल्लभः ।

ओषधि(धी) स्त्री ओषः पाको धीयतेऽत्र ओष+धा-कि जातिविवक्षायाङ् ङीत्वे वा ङीष् ओषधी च । फलपाकान्ते प्रौढिवादौ स्थावरभेदे । ओषधिश्च स्थावरभेदो यथाह सुश्रुतः "तासां स्थावराश्चतुर्विधाः वनस्पतयो वृक्षा वीरुध ओषधयः । तात्रपुष्पाः फलवन्तो वनस्पतयः । पुष्पफलवन्तो वृक्षाः प्रतानवत्यः कण्डिन्यश्च वीरुधः । फलपाकान्ता ओषधयः" अमरस्त्वाह "उद्भिज्जाः स्थावराश्चैव बीजाङ्कुरविरोहिणः । ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः । अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः । पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः । गुच्छ गुल्मं तु विविधं तथैव तृणजातयः । बीजकाण्डरुहाः सैव प्रताना वल्ल्य एव च । तमसा बहुरूपेण वेष्टिताः कर्म्महेतुना । अन्तःसंज्ञाभवन्त्येते सुखदुःखसमन्विताः" । ओषधीनामुत्पत्तिः तल्लिङ्गवचनञ्च "तां (आकूतिम्) हैनां नाभिरार्धयांचकार वेयमिन्नेव हास तां व्यौह्यदोषं धयेति तत ओषधयः समभवंस्तस्मादोषधयो नाम" शत०ब्रा० २,२,३,५ दर्शितम् । "तामाकूतिं तस्मिन्नग्नौ व्यौह्यत् अत्यजत् हृदमाकूतिहव्यम् ओषं पक्वं कृत्वा धय पिबेति अग्नौ प्रतिप्रास्तजादोषधयः पृथिव्यां समभवन्"भा० । निरु० "या ओषधीः पूर्वजाताः" इत्येतामृचमधिकृत्य अन्यापि निरुक्तिर्दर्शिता "ओषधय ओषं धयन्तीति वौषत्वे नाधयतीति वा दोषं धयन्तीति वा" । सर्वत्र पृषो० । भाग०३,१०अ०स्थावराणां षड्भेदा उक्ताः यथा "सप्तमो मुख्यसर्गस्तु षड्विधस्त्वयुताय । वनस्पत्योषधिलतात्वक्सारा वीरुधोद्रुमाः । उदस्रोतस्तमःप्राया अन्तःस्पर्शा विशेषिणः" १६,२०,श्लो० । "मुख्यमेव सर्ग्यः प्रथमः मुख्यसर्गः तस्त्वयुतं स्थावराणाम् । षड्विधत्वमेवाह ये पुष्पं विना फलन्ति ते वनस्पतयः,१ ओषधयः फलपाकान्ता २, लता आरोहणापेक्षाः३ त्वक्सारा वेणुकादयः४ लता एव काठिन्येनारोहणानपेक्षा वीरुधः,५ ये पुष्पैः फलन्ति ते द्रुमाः६ तेषां साधारणलक्षणमाह अर्वाङ् स्रोत आहारसञ्चारो येषां ते तमःप्रधाना अव्यक्तचैतन्या अन्तःस्पर्शमेव जानन्ति नान्यत् तदभ्यन्तरेव न बहिः, विशेषिणः अव्यवस्थितपरिणामाद्यनेकभेदवन्तः" श्रीधरः । तत्र भैषज्यौषधयोगिनोः कतिचिदोषधीः सुश्रुतो लक्षणसहिता दर्शयामास यथा "अथ वक्ष्यामि विज्ञानमोषधीनां पृथक् पृथक् । मण्डलैः कपिलैश्चित्रैः सर्पाभा पञ्चपर्णिनी । पञ्चाङ्गुलिप्रमाणा या विज्ञेयाऽजगरी बुधैः । सिध्मला नलकाभासा मूले दृश्यङ्कुरलक्षिता । सर्पाकारा लोहितान्ता श्वेतकापोतिरुच्यते । द्विपर्णिनी मूलभवामरुणां कृष्णमण्डलाम् । ह्रस्वरोमालतां जानीयाद्रोमशीं रोमशां महतीं रक्तेक्षुरुचोपमाम् । एवंरूपरसाच्छापि कृष्णकापोतिकादिशेत् । कृष्णवर्णरूपेण वाराही ५ कन्दसम्भवा । एकपत्रा महावीर्या भिन्नाञ्जनसमप्रभा । लताप्रिच्छलक्षण ७ विद्याद्रूलोष्ठे कन्दसम्भवे । जराभृत्यु निवारिण्यौ श्वेतकापोतिसंस्थिते । कान्तदर्शनैः पत्रैर्मयूराङ्गसमैर्युते । कन्दजा काञ्चनक्षीरी कन्या ८ नाम महौषधी । करेणुः ९ हस्तिकक्षीरा कन्देन गजसन्निभी । कृष्णवर्ण-

यवाग्रश्च तुल्यपर्वा द्विपर्णिनी । अजाक्षीनाभवन्ध्या तु क्षीरा क्षुपरूपिणी । अजा १०मङ्गौषधी श्वेता यष्टिकुन्देन्दुपाण्डुरा । श्वेता विचित्रकुसुमा काकादन्या सभा क्षुपाम् । चक्रका ११ओषधीं विद्याल्लाक्षालुनिवारिणीम् । भूम्निनी पत्रभिः पत्रैः सुरक्तांशुकशोभकैः । आदित्यपर्णिनी १२श्वेता सदादित्यानुवर्त्तिनी । वनकाभा जलान्तेषु सर्वतः परिसर्पति । क्षीरा पद्मिनीप्रख्या देवी वृक्षसुपर्णका १३ । अरलिनालक्षुपका पत्रैर्हरिकुलक्षणैः । पुष्पैर्नीलोत्पलाकारैः फलैश्चाक्षसन्निभैः । श्रावणी १४मङ्गली श्वेता वनकाभा पयस्विनी । श्रावणीप्रावृडाभासा मङ्गल्यावपिच्छिका । गोलोमी १५चाजलोमी १६च रोमशे जन्तुजन्तवे । कंसवल्ली १७च विच्छिन्नैः पत्रैर्मूलफलैर्वरैः । अथवा बहुपुत्री च १८वनजा सर्वरूपतः । वेगेन मङ्गतादिष्टा सर्वनिर्णोदसन्निभा । एषा वेगवती १९नाम जायते क्षुद्रजन्तुदजे । पद्मादी सर्वरूपिण्यो याह्योषध्यः प्रकीर्त्तिताः । तासां सङ्ग्रहणं कार्य्यं मन्त्रेणानेन सर्वदा । मन्त्रेणानेन मतिमान् सर्व्वानप्यभिमन्त्रयेत् । अन्नहृद्यानैरन्नैश्च कृतघ्नैः पापकर्म्मभिः । नैवाददीत यक्ष्याः सोमाः २०सोमसमालया । सोमावमेधनक्षत्रं देवैर्मुक्षुपरोगनैः । निर्हितं सोमदीर्घासु सोमे चाप्योषधीपतौ । देवसत्रे क्षुदवरे तथा सिन्धौ महानदे । दृश्यते च जलान्तेषु मध्ये वृक्षसुपर्णका । आदित्यपर्णिनी श्वेता तथैव हि हिमत्रये । दृश्यतेऽजगरी नित्यं गोसरी चाप्युदानजे । क्षारक्षीरेषु सरो दिव्यं नाम्ना क्षुद्रवमानसम् । सरेषुत्तम कन्या च जलातिच्छत्रके तथा । सोलोमी चाजलोमी च मङ्गली श्रावणी तथा । वल्ली जन्यतमा गोसरी च प्रदृश्यते । कौशिकी चरितं तीर्त्वा वङ्कवन्ध्यालु पूर्व्वतः । क्षितिप्रदेशो बह्वोषधिचितो योजनत्रयम् । विश्रेया तत्र कामोली श्वेता बह्वीषधूर्वरा । मङ्गले मङ्गलेली च वेगवत्योषधी प्रभा । वार्त्तिका पौर्णमासाख्या मङ्गलेत्तामुपोषितः । सोमवल्लात्र वर्त्तते जन्म तावच्च कीर्त्तितम् । सर्वा विश्वेशाक्षौषध्यः सोमे चाप्यर्बुदे गिरौ । सङ्गच्छन्ते चरितैरन्यदोषधीभिः । आप्तकोर्वैर्विख्यातैः सिद्धर्षिसुरवन्दितैः । गुह्याग्निर्नीलरूपाभिः सिद्धनागदितकृत्तिभिः । मन्त्रौषोषित सोमाग्निरामनाभिः समन्ततः । विविधैर्बाह्यनिर्दिष्टैः सर्वत्रौषधोषितः । महीतु यैश्च सरत्सु वापि पुरुषेषुरत्नेषु तथान्नभेषु । सर्वत्र सर्वाः परिमार्गितव्याः सर्वत्र भूमिर्हि वसूनि धत्ते' । मारिषाप्रभृत्योषधीनां जलपादिकं भावप्र० दर्शितं तत्तच्छब्दे उक्तं वचास्थानं वक्ष्यते च । वैद्यकशास्त्रोपयोगित्व ओषधयो आम्नायस्वभेदेन चतुर्दशविधाः यथा "तिलमाषश्रीव्रीहियवाः प्रियङ्गवो गोधूमाश्चेति ग्राम्याः ओषधयः । वेणुश्यामाक नीवारशर्त्तिका गवेधुका वर्कटका गार्ष्टताश्चेति ग्रम्य आरण्याः ओषधयः" इति तैत्तरीयसंहिताभाष्ये ४र्थ काण्डे ५प्रपाठके ६अनुवाके । "अथौषधीनामधिपस्य दृष्टौ" "मङ्गोषधीं मङ्गलिवाञ्जनाय" कुमा० "भोगीव मन्त्रौषधिरुद्धवीर्य्यः" । "नवोदयं नाथवतीषधीनाम्" रघुः । ओषधीनामृतभेदे शुक्रविशेषा भवन्ति १४२५पृ० उक्ताः । २देवपत्नीभ्यश्च । "देवानां पत्नीभ्यो देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽग्निरायहपुत्राभिरेवैनामेतद्दधाति ता वै ता ओषधय एवौषधयो वै देवानां पत्न्य ओषधिभिरेवैनं सर्वं क्षितमोषधिभिरेवैनामेतद्दधाति" शत० ब्रा० ६,५,४,४ ।

ओषधिगर्भ पु० ओषधीनां गर्भ उत्पत्तिर्यस्मात् । १चन्द्रे तत्किरणसम्पर्कादोषधीनामुत्पत्तेस्तस्य तथात्वम् । २सूर्य्ये च । तस्य च दृष्टिद्वारा ओषधीगर्भाधायकत्वात् "अपां गर्भं दर्शतमोषधीनाम्" ऋ० १,१६४,५२ मन्त्रे सूर्य्यस्यौषधीगर्भाधायकत्वोक्तेश्च तथात्वम् ।

ओषधिज त्रि० ओषधिभ्यो जायते जन+ड ५त० । ओषधीजाते १औषधे २तज्जाते वस्तौ पु० । अजवतीषधिजेन वह्निना" माघः ।

ओषधिपति पु० ऐत० । चन्द्रे तस्य किरणैरोषधीनामाप्यायनात् "अमायां त्व सदा सोम ओषधीः प्रतिपद्यते । तमोषधिगतं भावःपिबन्त्यमृतवत् तया" काशका० सोमोत्पत्तिवाक्याच्च तथात्वम् "अपसार्गं ओषधिपतिः क्व गतैः" । माघः ओषधीनामोषधीपादत्वोऽस्य । २सूर्य्ये ३सोमलताया च । यथा च चन्द्रस्यौषधिपतित्वं तथा हरिवं० २५अ० आत्रेः सोमोत्पत्तिप्रकरणे उक्तं यथा "तस्य यद्भ्राजितं तेजः पृथिवीमन्वपद्यत । ओषध्यश्चाः सञ्जातास्तेजसा प्रज्वलन्त्युत । तान्योषधीर्व्याप्तसोमाः प्रजार्थं च चतुर्विधाः । पोता हि भगवान् सोमो जगतां जगतीपते ! । स यज्ञतेजा भगवान् संस्तवैश्च वर्च्चोभिः । तपसेमे महाभागः पद्मानां दलतेदृश । हिरण्यवर्चा वादेव्यो धारयन्त्याप्यना जगत् । विष्णुजाताश्च सूत

देवः प्रख्यातः खेन वर्त्मना । ततस्तस्मै ददौ राज्ञे ब्रह्मा ब्रह्मविदां वरः । बीजौषधीनां विप्राणामपां च जगतीपते ! । सोऽभिषिक्तो महाराज राज्येन द्विजराजराट् । सोमं सोमाय भास्वन्तं भास्वतां वरः" । आग्नेय० १४अ० सोमोत्पत्तिस्तुतौ श्लोकम् । "तस्य यत् प्लावितं तेजः पृथिवीमन्वपद्यत । तेनौषध्यः समुद्भूता याभिः संधार्य्यते जगत् । स खल्वतेजा भगवान् ब्रह्मणा वर्द्धितः स्वयम् । तपस्तेपे महाभागः पद्मानां दयितीर्दश । अविप्लुतं समाधाय क्षेत्रं परमपावनम् । संख्याय शिष्टमव्यक्तं चन्द्रेशाख्यं ततोऽमतः । बीजौषधीनां तोयानां राजाऽभूदप्रजन्मनाम् । प्रसादाद्देवदेवस्य विश्वेशस्य पिनाकिनः । तुष्टेन देवदेवेन सोमोऽसौ योऽमृतः वृतः । आदाय तां कलामेकां जगत् संजीवनीं पराम् । पश्चाद्देवेश यन्नोऽपि भास्वान् स्वयमाप्यते । आप्यायतेऽसौ कलया पुनरेव यथा यथी" ।

ओषधिप्रस्थ पु० ओषधियुक्तं प्रस्थमत्र । किंनरवरराजधान्याम् "तत्र प्रवातौषधीप्रस्थं स्थितये किंनरेश्वरम्" "आसेदुरोषधिप्रस्थम्" "दृष्ट्वौषधिप्रस्थविलासिनीनाम्" कुमा० ।

ओषम् अव्य० उष-कसुन् । अभीक्ष्णं पङ्क्तेरर्थे "ओषं धवेति" यत० मा० वाक्यम् ओषधिशब्दे दर्शितम् ।

ओषिष्ठ त्रि० उष-दाहे इनि अतिशयेन ओषी दहनं ष्ठिवत्वात् ठिलोपः । दाहकतरे "ओषिष्ठवन्नं मिलिकयाभ्याम्" तैत्ति० १,४,२६,१ ।

ओष्ठाविन् त्रि० उष+करणे ट्रन् तदस्यास्ति इनि । "छन्दोविन् करणे ओष्ठ्येवेत्यादिति" वार्त्ति० दीर्घः । दाहकरणयुक्ते । "पुनरोष्ठाविन्यतत" श्रुतिः सि० कौ० ।

ओष्ठ पु० उष्यते उष्णकारेण उष-बाहुलकात् थक् । (ओठ) दशनच्छदे । "अवनिरोषतेदर्पादुद्वाबोष्ठौ क्षेदयेत् क्रमः" मनुः । निरुपपदोऽयमुष्ठ्य प्रायेण उत्तरपदएव कविभिः प्रयुज्यते । "ताम्रौष्ठपर्य्यन्तरुचः क्षितस्य"कुमा० । "ओष्ठेन राजा राजोष्ठविम्बफलरुचा"भाघः । उपपदे तूभयतः "उभाभ्यामेव विम्बाफलाधरौष्ठे" कुमा० । अधरौष्ठ उत्तरोष्ठ इत्यादि । "वक्त्राधरौष्ठः पतितः शिरस्कं तथोत्तरः । उभौ वा जाम्बवाभासौ दूरेऽहं तस्य जीवितम्" रघुतः । ओष्ठस्य स्वाङ्गत्वात् संज्ञोपधत्वेऽपि उपसर्ज्जने स्त्रियां वा ङीष् । "बिम्बोष्ठी चारुनेत्रा गजपतिगमना दीर्घकेशी सुभद्रा" भट्टावा० । समासे उत्तरपदत्वेऽस्यानुपूर्वनिपातवर्त्तने वा वरूथम् । बिम्बौष्ठः बिम्बोष्ठः । अरीरावयवत्वात् भवादौ यत् । ओष्ठ्य तद्भवे त्रि० तत्र भवे पवर्गे च "ओष्ठ्यावुपू" विधोक्तेः तत्रोच्चारणभवत्वात्तथात्वम् । ओष्ठे प्रशितः वनु । ओष्ठकः ओष्ठसंस्कारप्रशिते त्रि० । औष्ठ्य मूलं जाद्यच् । ओष्ठजाद्य तन्मूले न० ।

ओष्ठकोप पु० ओष्ठस्य कोपो यत्र । सुश्रुतोक्ते सुखरोगभेदे । सुखरोगनिरूपणे तल्लक्षणं यथा

"तत्रौष्ठकोपा वातपित्तश्लेष्मक्षिप्तरक्तमांसमेदोऽभिघातनिमित्ताः । कर्कशौ परुषौ स्तब्धौ लम्बौ तीव्रशूलिनौ । दाल्येते परिपुष्येते ओष्ठौ मारुतकोपतः १ । आक्षिप्तौ पिडकाभिस्तु सर्षपाकृतिभिर्भृशम् । सदाहपाकसंमोहौ नीलौ पीतौ च पित्ततः २ । सवर्णाभिस्तु कोथ्येते पिडकाभिरवेदनौ । कण्डूमन्तौ पिच्छिलौ च श्वेतलौ कफजौ ३ गुरू । सक्तत्कृष्णौ सक्तत्पीतौ सक्तच्छ्वेतौ तथैव च । सन्निपातेन ४ विद्येयावनेकपिडकाचितौ । खर्ज्जूरफलवर्णाभिः पिडकाभिः समाचितौ । रक्तोपसृष्टौ ५ रुधिरं स्रवतः शोणितप्रभौ । मांसदुष्टौ ६ गुरू स्थूलौ मांसपिण्डवदुन्नतौ । जन्मप्रभृति मूर्च्छन्ति कफस्रोभयतो सुखात् । मेदसा ७ घृतमक्षाभौ कण्डूमन्तौ स्थिरौ मृदू । अक्षस्फटिकसङ्काशमाक्षाद्यं स्रवतो गुरू । जातजाभौ विदीर्येते पाट्येते चाभिघाततः ८ । ग्रथितौ च समाख्यातावोष्ठौ कण्डूसमन्वितौ" । ऐत० ओष्ठरोगादवोऽत्र ।

ओष्ठपुष्प पु० ओष्ठोपमानं पुष्पं यस्य । बन्धुजीवे । राजनि० ।

ओष्ठी स्त्री ओष्ठ इवाचरति ओष्ठ+क्विप् ततः अच् गौरा० ङीष् । बिम्बफलनामके (तेलाकुचा)वृक्षे । रत्नमाला ।

ओष्ठोपमफला स्त्री ओष्ठ उपमेयतेऽनेन ओष्ठोपमं फलं यस्याः । बिम्बिकावृक्षतायाम् (तेलाकुचा) लटाधरः ।

ओष्ण पु० ईषदुष्णः आ+उष्ण प्रा० स० । ईषदुष्णे ।

ओह पु० आ+वह घञर्थे क संज्ञा० । शब्दगुवहने । "दक्षागोरोहेण तौयग्रो न जीव्रिः" ऋ० १,१८०,५ । "ओहेन वहनेन" भा० । वर्त्तते मूलविभुजः । २वाहके ३प्रापके च त्रि० । "अध्वाना त ओहैः" ऋ० ४,१०,१ । "ओहैः इन्द्रादिप्रापकैः स्तोमैः" भा० ।

ओहब्रह्मन् पु० ओह एवं ब्रह्मेति वा निरुक्तेः पृषो० । ओहब्रह्मयुक्ते । "वेद्याभिरोहब्रह्मणो विचरन्ति त्वे" निरु० १२,१२, । धृता श्रुतिः । ओहेण' भा० ।

ओहस् त्रि० आ+ओह असुन् । वहनसाधने स्तोत्रादौ । "न ये देवास ओहसा" ऋ० ६,६८,६, "ओहसा वहनसाधनेनाम० इति वाक्यशेषे ओकारादियङ्लोपार्थवहुवचनम् ।

औ

औकारः स्वरवर्णभेदः कण्ठौष्ठस्थानयोरुच्चार्यः दीर्घ-प्लुतत्वात्। प्लुतस्तु त्रिमात्रः। स च उदात्तानुदात्त स्वरितभेदात् त्रिविधोऽपि अनुनासिकाननुनासिकाभ्यां पुनर्द्वैविध्यात् षड्विधः एवं प्लुतोऽपि षड्विधः। तेन द्वादशविधः। तपरत्वे कारपरत्वे च स्वरूपमात्रपरः। तन्त्रे तस्य वाचकशब्दा वर्णाभिधाने उक्ता यथा। "ओकारः शक्तिकोनादस्तज्जोवामजङ्घकः। मनुरुद्रर्षयश्चैव गरुडः कर्णः सदाशिवः। अधोदन्तश्च कण्ठौष्ठौ सङ्घर्षणः सरस्वती। आत्मा चोर्द्ध्वस्थो यान्ता व्यापिनी प्रकृतिःपरा। अनन्ता व्यापिनी व्योमा चतुर्थो रतिप्रियः। नेत्रमात्राकर्षिणी च ज्ञानाज्ञानिनिका स्मृतः"। तदधिष्ठातृदेवता च तत्रैवोक्ता। "ओकारे डाकिनी सिंहनादिनी चण्डभैरवी" तस्य ध्येयरूपं कामधेनुतन्त्रे उक्तं यथा "रक्तविद्युल्लताकारमोकारं कुण्डलीं स्वयम्। अत्र ब्रह्मादयः सर्व्वे तिष्ठन्ति सततं प्रिये!। पञ्चप्राणमयं वर्णं सदाशिवमयं सदा। सदा ईश्वरसंयुक्तं चतुर्व्वर्गप्रदायकम्"। मातृकान्यासेऽधोदन्तपङ्क्तौन्यस्तत्वात्तच्छब्दवाच्यताऽस्येति बोध्यम्।

औ अव्य० आ+अव-क्विप् ऊठ्। १आह्वाने २संबोधने मेदि०। ३विरोधे ४निर्णये" शब्दरत्ना०। ५अनन्ते पु० एकाक्षरकोषः ६निश्चये पु०मेदि०। ७पृथिव्यां स्त्री मेदि० स च "चतुर्हयक्षरोयोऽसौ सेतुरौकारसंज्ञितः। सचाकारादाख्यां शूद्राणां सेतुरुच्यते" तन्त्रसारधृत कालिकापु० उक्तेः शूद्राणां जघन्यभेदः।

औक्थ त्रि० उक्थ-गर्गा० अपत्ये यञ् औक्थ्यः तस्य छात्रः वृद्धादि० अण् यञोलुक्। औक्थ्यच्छात्रे

औक्थिक त्रि० उक्थं सामावयवभेदं वेत्त्यधीते वा ठक्। १उक्थाध्यायिनि २तद्वेत्तरि च। तेषां धर्म्मं आम्नायो-वा ततः अण्। औक्थ्य औक्थिकानां धर्म्मे तदाम्नाये च न०।

औक्ष न०उक्षाणां दृषाणां समूहः अण् टिलोपः। १वृषभसमूहे वुञ्। औक्षक तत्समूहे न०। तस्येदमण् टिलोपः। २वृषभसम्बन्धिनि त्रि०। अपत्ये अपि तु औक्ष्य इत्येव। मेदे क्वचित् वृद्धमर्षेऽपि उपधातोलोपः। "तामौक्षैर्वृषभिः पत्नीम्" यत०ब्रा०१,२,५,२।

औक्षीय त्रि० उक्षेन प्रोक्तमधीयते छ। उक्षप्रोक्त ब्राह्मणाध्यायिषु ब०व०।

औक्ष्य त्रि० उक्षायां संस्कृतं यत् ततः स्वार्थे अञ्। १स्वार्थिकेऽस्त्रादौ। २नगरीभेदे स्त्री। उक्षायां जातादि कन्त्रादि० ढक्। औक्ष्येयक तत्रजातादौ त्रि०।

औघ पु० वहति पुंसि संज्ञायां घ प्रुषो०ततः स्वार्थेऽण्। जलसंघाते "औघ इमाः सर्व्वाः प्रजा निर्वोढा" यत० ब्रा० १,८,१,२, "वहतीत्योघ उदकसंघातः" भा०।

औच(त)थ्य पु० उतथस्यापत्यम् अण् मेदे प्रुषो०। उतथ्यापत्ये दीर्घतमसि "उपस्तुतिरौचथ्यमरध्येघाः" ऋ० १, १५८,४, "औचथ्यमुतथ्यस्य दीर्घतमसम्" भा०। "दक्षं ह यद्दक्ष्णा औचथ्यः" ऋ० १,५८,१, उतथ्यस्यैव नामान्तरमुचथ्येति तेन "उचथ्यानामाङ्गिरसौचथ्यगौतमेति" आश्व०औ०१२,११,१, उक्तम्। तस्य च गोत्रप्रवर्त्तित्वम् उक्तवाक्यात्। शैवे तु उतथ्यः औतथ्यदृक्षेव।

औचित्य न० उचितस्य भावःष्यञ्। वृत्तत्वे। "एता अपि यथोचित्यादुत्तमाधममध्यमाः" वा०ट०। नित्यवालत्वात् स्त्रीत्वमपि तत्र ङीष् वक्तोपच। औचिती तत्रार्थे। "सामर्थ्यमौचिती देशः कालोव्यक्तिः स्वरादयः" वा०ट० दृढा०ष्ट्यनिच् उचितिमाप्यत्र पु०।

औजसिक त्रि० ओजसा वर्त्तते ठक्। शूरे तेजस्विनि

औजस्य न० ओजस्+स्वार्थे अञ्। ओजसि। "दौर्गत्यार्त्तिरनौजस्यं दैन्यं मलिनतादिकृत्" वा०ट०।

औज्जयनक त्रि० उज्जयिन्यां जातादि धूमा० वुञ्। उज्जयिनीनगरजातादौ।

औज्झिहानि पुंस्त्री उज्झिहानस्यापत्यमत्र इञ्। उज्झिनामपत्ये ततः इञन्तत्वात् बहुषु फक् मैत्रेयादि०तस्य लुक्। तदीययुवापत्येऽपि।

औड त्रि० उन्द्-क नलोपः नि० दस्य ड स्वार्थेऽण्। आर्द्रे ततः नड्वा०फक्। औडायन आर्द्रस्य युवापत्ये तस्य विषयोदेशः ऐषुकार्षा० भक्तञ्। औडायनभक्त तद्दीये विषये देशे

औडव पु० ओडव+स्वार्थेऽण्। "औडवः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तु षाडवः। सम्पूर्णो सप्तभिः प्रोक्ता राग जातिस्त्रिधा मता" सङ्गीतरत्ना० उक्ते रागभेदे। स च भङ्गारादिः इति संगीतदामोदरः।

औडवि त्रि० ओडवं रागविशेषमधीयतेऽण्। ओडव रागाधीते। ततः स्वार्थे दामन्या०ञ औडवीय। तद्वर्त्ते

औडुप त्रि० उडुपेन निर्दृत्तादि वहुलादि० अण्। १चन्द्रनिर्दृत्ते २प्लवनिर्दृत्ते ३ततृतीयस्मिन्नटदेशे च।

औडुपिक त्रि० उडुपेन प्लवेन तरति ठक्। १प्लवेन तारके उडुपेन हरति उत्तरपदा० ठक्। २प्लवेन हारके च त्रि०।

औडु(दु)म्बर त्रि० उडु(दु)म्बरस्य विकारः रक्तादि० अञ्। १ताम्रविकारे पात्रादौ। "मृद्दीत्वौडु(दु)म्बरं पात्रम् स्मृतिः "सौवर्णराजतौडुम्बरकाङ्गमयिमयानां पात्राणाम्" गोभि०। २यज्ञाङ्गवृक्षविकारे च। "पञ्चात्प्रतिरवस्थाय युगमन्तमौडु(दु)म्बरं मुष्टाटुयजु मा बध्नाति"गोभि०। स्त्रियां ङीप्। औडु(दु)म्बरीं स्तुत्वा गायेत" स्मृतिः। "औडु(दु)म्बरी मासाद्यपगूहति"यत०ब्रा०५,४,१,२५, ३तपस्विविशेषे पु०। "वेत्रासना वार्क्षिखिल्यौडुम्बराः फेनपावने। न्यासे कुटीचरः पूर्वम् वह्वोदो हंसनिष्क्रियौ' भाग०३,१२,२७। "औडु(दु)म्बराः प्रातरुत्थाय यं दिशं प्रथमं पश्यन्ति तत आचक्षतेऽदिभिः जीवन्तः" श्रीधरः। औडुम्बरं तत्फलं तत्रेवाकारोऽस्यस्य अर्श० अच्। ४मशकादभेदे। "तत्र मशकाऽऽख्यऽऽयौडुम्बरर्ष्य जिह्मकपालकाकपृष्ठकरीषदङ्गकुटाकीति" विभक्ष "पित्तेन पक्वौडुम्बरफलाकृतिवर्णान्यौडुम्बराणीति" तल्लक्षणमुक्तम्। स च रोगः ताम्रभक्षणकर्मविपाकः यथाह माता० "औडु(दु)म्बरी ताम्रभक्षो नरकान्ते प्रजायते"। ५यमभेदे च "औडुम्बराय दन्ताय" यमतर्पणमन्त्रः।

औडुलोमि पुंस्त्री उडुलोम्नोऽपत्यम् वाह्वा० इञ्। उडुलोम्नोऽपत्ये बहुषु च। उलोमाः उडुलोमान्

औड्र पु० ओड्रदेशानां राजा अण्। १ओड्रदेशभवे ओड्रदेशे विद्यतिः २ततृतीयवासिनि च। बहुषु अणो लुक्।

औत्कण्ठ्य न० उत्कण्ठैव चातुर्व० स्वार्थे ष्यञ्। उत्कण्ठाभावे "औत्कण्ठ्यान्मुक्तकाञ्चीत्वं कृत्वासीत्ते यमैर्हरिः" भाग० १,९,१७। "औत्कण्ठ्याद्देवकीसुतः" १,१० ४।

औत्कर्ष्य न० उत्कर्ष+स्वार्थे ष्यञ्। उत्कर्षे।

औत्क्षेप पुंस्त्री उत्क्षेपस्य अर्हत्क्षेपवहनापत्यं शिवा० अण्। उत्क्षेपवहनापत्ये स्त्रियां ङीप्।

औत्तम त्रि० उत्तमेन निर्दृत्तादि वहुला० अण्। १उत्तमेन निर्दृत्ते २ततृतीयस्मिन्नटदेशादौ च।

औत्तमि पु० उत्तमस्यापत्यम् इञ्। मनुभेदे उत्तमपत्ये उदा०। "आरोचिषश्चौत्तमिश्च तामसोरैवतस्तथा" मनुः तस्य पत्नी उत्तमी तस्या अपत्यम् ठक्। उत्तमपत्न्यपत्ये बहुत्वेन "औत्तमेयान् मुहाराज! दश पुत्रान् निबोध तान्" हरिवं०७अ० उत्तमपत्ने ते च नामतोऽभिहिताः।

औत्तर त्रि० उत्तरत्वमात् उदु+तृ—अपादाने ऽण् ततः स्वार्थेऽण्। उत्तारके "इतरेषामुपदेशेन दुःखादिनिवारके ऋषौ। "यत्नौत्तराणां सर्वेषामहमीशाम् नाकुषश्च" भा०व० १०,५४६।

औत्तरपथिक त्रि० उत्तरपथेन गच्छति तेनाहृतं वा ठञ्। उत्तरपथेन अर्हिरादिमार्गेण १गन्तरि उपासकभेदे २तेनाहृते च। याज्ञके।

औत्तरपदिक त्रि० उत्तरपदं मट्टीकति ठक्। उत्तरपद-

औत्तरवेदिक त्रि० उत्तरवेद्यां भवः ठञ्। उत्तरवेद्यां भवे कर्मादौ "औत्तरवेदिकं कर्म कृत्वा" यत०ब्रा० ७,१२,१७

औत्तराधर्य्य न० उत्तरे च अधरे च तेषां भावः ष्यञ्। अर्हनीचभावेन स्थितौ। "पंक्ते वानौत्तराधर्य्ये" मा०

औत्तराह त्रि० उत्तरस्मिन् आसादौ भवः "उत्तरादाहञ्" मा० उत्तर+आहञ्। उत्तरस्यादौ भवे।

औत्तरेय पु० उत्तरायां अपत्यम् ढक्। अभिमन्युसुते विराट दुहितृकस्तरायाः पुत्रे परिक्षिति "औत्तरेयेण दत्तानि व्यवसत्तद्विरेयत्नत्" भाग० १,१७,४०। "अवधार्य्य मतिं कृष्ण औत्तरेयः सतीं व्यधात्" भाग० २,४,२।

औत्तानपाद(दि) पु० उत्तानपादे स्वमे भवः अण्। उत्तानपादभवे ध्रुवे "ध्रुवस्योत्तानपादस्य ब्रह्मर्षीणां तथैव च"भा० अनु० २अ०। "उत्तानपाद! भगवांस्तव याचते धन्वा" भाग० ४,१०,२५। अपत्ये तु इञ्। तत्रैव। "उत्तानपादिर्निर्गत्य ततः कालनतो द्विज!" काशी०। तस्य यथा तपश्चर्या सर्वलक्षणसारतापदप्राप्तिस्तथा वर्णितम् भाग० ४, ८,६,"जाये उत्तानपादस्य सुनीतिःसुरुचिस्त्रियोः। सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतोध्रुवः। एकदा सुरुचेः पुत्रमङ्कमारोप्य लालयन्। उत्तमं नाददत्तातं ध्रुवं राजाभ्यनन्दत। तथा चिकीर्षमाणं तं सपत्नाऽऽत्मजं ध्रुवम्। सुरुचिः श्रुत्वतोराज्ञः सेर्ष्याऽऽहातिगर्विता। न वत्स! नृपतेर्धिष्ण्यं भवानारोढुमर्हति। न मट्टीतोऽन्यो वत्स कुक्षावपि नृपात्मजः। बालोऽसि तव नाल्पायुस्त्वयीत्थं गर्भसंभृतम्। नूनं वेद भवान् यस्य दुर्लभेऽर्थे मनोरथः। तपसाराध्य पुरुषं तस्यैवानुग्रहेण मे। गर्भे त्वं साधयात्मानं यदीच्छसि नृपासनम्। श्रीमैत्रेय उवाच। मातुः सपत्न्याः सुदुरुक्तिविद्धः श्वसन् रुषा दष्टदृशो यथाऽहिः। हित्वा मिषन्तं पितरं सन्नवाचं जगाम मातुः स रुदन् सकाशम्। तं निःश्वसन्तं स्फुरिताधरौष्ठं

-ज्ञनीतिरतयक्षसङ्कुलं बालम् । निशम्य कर्णौरसुखाक्षिताक्षं
सा विव्यथे यद्वदितं सपत्न्या । सोत्सृज्य धैर्यं विललाप
शोकदावाग्निना दावलतेव बाला । बाष्पं सपत्न्याः क्षरती
सरोजनिभया दृशा बाष्पकलाक्षवक्त्रं । दीर्घं श्वसन्ती हरि-
नस्य पादमपश्यती बालकमाह बाला । मा मन्युकं तात !
परेषु मंस्था भुङ्क्ते जनोयत् परदुःखदस्तत् । स्वं सुख
माप्तिस्थितं भवाब्धेर्यद्भंगाया उदरे पतीतः । सत्त्वेन
हत्वच विलज्जते यां भार्येति वा बोढुमिलत्यतिर्नाम् ।
प्राप्तिश्च तत्तात ! विमत्सरत्वसुखं समात्मापि यदन्यशी-
लम् । आराधयाधोक्षजपादपद्मं यदीच्छसेऽध्यासनमुत्तमो
यथा । यस्याङ्घ्रिपद्मं परिचर्य विश्वविभावनाद्यास्तनु-
यामिपत्नेः । अजोऽध्यतिष्ठत्खलु पारमेष्ठ्यं पदं जिता-
त्मश्वसनाभिवन्द्यम् । तथा मनुर्वो भगवान् पितामहो
यमेवमत्या पुरुदक्षिणैर्मखैः । इहाऽभिपेदे दुरवापमन्यतो
भौमं सुखं दिव्यमथापवर्गम् । तमेव यस्याश्रय भृत्य
वत्सलं सुहृत्सुभिर्मृग्यपदाब्जपद्धतिम् । अनन्यभावे निज-
धर्म्यभाविते मनस्यवस्थाप्य भजस्व पूरुषम् । नान्यं ततः
पद्मपलाशलोचनाद्दुःखच्छिदं ते मृगयामि कञ्चन । यो
मृग्यते कृच्छ्रतपोपपत्तया श्रियेतरैरङ्ग ! विमृग्य भाक्तया ।
एवं संकल्पितं मातुराकर्ण्याचिंगमं वचः । संनियम्या-
त्मनात्मानं निश्चक्राम पितुः पुरात् । नारदस्तमुपाकर्ण्य
प्राप्तं विद्वान् चिकीर्षितम् । सृष्टा सूर्यन्यषेधेन पथिनाप्राकृविक्षितः । अहोतेजः क्षत्रियाणां मानभङ्गमसह्यताम् । बालोऽयं हृदा धत्ते यत् समातुरसद्वचः । श्रीनार-
दउवाच । नाधुनाप्यवमानं ते क्षत्रियत्वापि पुत्रक ! । क्षन्त-
व्यमः कुमारास्य क्षत्रस्य क्षीणनादिषु । विकल्पे विद्यमानेऽपि
नह्यसन्तोषहेतवः । दुःसो मोक्षयते भिक्षा यज्ञोके निज-
कर्मभिः । परितप्येत्ततत्तात ! तावन्मात्रेण पूरुषः । दैवोपसादितं यावद्दीक्ष्येश्वरगतिं बुधः । अथ मानोप-
दिष्टेन योगेनावहरत्यृषिः । वत्सप्रसादं स वै पुंसान्दु-
राराध्योनतोमम । सुलभः पदमीं यस्य निःसङ्गेनोरुजन्म
भि । न विदुर्ब्रह्मगयन्तोऽपि तीव्रयोगसमाधिना । अतो-
निवर्त्तनामेष निवर्त्तेत यथा निष्फलः । यतिष्यति भवानु-
ताहो श्रेयसि सत्पथिस्थिते । यस्य यद्दैवविहितं स तेन सुख-
दुःखयोः । आत्मानं तोषयन् देही तमसः पारमश्नुते । गुणाधिकान्दुःखिदेनुकोशं गुणाधमात् । मैत्रीं स-
मात्मदिभिश्च तापैरभिभूयते । श्रीध्रुव उवाच । सोऽयं
ममोभगवता सुखदुःखहतात्मनाम् । दर्शितः कृपया पुंसां
दुर्मर्षोऽक्षद्विधेस्तु यः । अथापि नेऽविनीतस्य क्षात्रं गो-
त्रमुपेयुषः । क्षुत्क्षाम दुर्वर्णोवार्षभं भिक्षु आश्रये क्षुदि ।
यदं त्रिभुवनोत्तुङ्गं लिलीषोः साधु वर्त्म मे । मूलस्वत्
पिङ्गलिप्त क्षुत्क्षन्यैरुपनधिष्ठितम् । नूनं भवान् भगवतो-
योऽङ्गजः परमेष्ठिनः । विदुदक्षटते वीर्यां क्षिताव
जगतोऽर्कवत् । मैत्रेय उवाच । इत्युदाहृतमाकर्ण्य भग-
वान्नारदस्तदा । प्रीतः प्रीताह तं बाढं ब्रह्मण्यमनु-
व्रतया । श्रीनारद उवाच । जनन्याभिहितः पन्थाः
सर्वेनिःश्रेयसस्य ते । भगवान् वासुदेवस्तं भज तं प्रव-
णात्मना । धर्म्यार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्म-
नः । एकं ह्येव हरेस्तात चारणं पादसेवनम् । तत्तात !
गच्छ भद्रन्ते यमुनायास्तटं शुचि । पुण्यं मधुवनं यत्र
सान्निध्यं नित्यदा हरेः । स्नात्वानुसवनं तस्मिन् कालिन्द्याः
सलिले शिवे । कृतोचितानि निवसन्नात्मनः कल्पितासनः ।
प्राणायामेन त्रिवृता प्राक्तेन्द्रियमनोमलम् । मनेर्मुह्य-
माभिध्यायेन्मनसा गुरुणा गुरुम् । प्रसादाभिमुखं भ-
क्तमत् प्रसन्नवदनेक्षणम् । स्निग्धं गम्भीरं चारुमयोगं सु-
रसुन्दरम् । तरुणं रत्नकेयूरकपोलोल्लसवाससम् । प्रणतानुसवं नम्रं वरदं कृपणार्जवम् । श्रीवत्साङ्कं
जगद्धाम पुरुषं वनमालिनम् । शङ्खचक्रगदापद्मैरुप-
व्यक्तचतुर्भुजम् । किरीटिनं कुण्डलिनं केयूरवलया-
न्वितम् । कौस्तुभाभरणग्रीवं पीतकौशेयवाससम् ।
काञ्चीकलापपर्यन्तं लसत्काञ्चनपूपुरम् । दर्शनीयतमं
शान्तं मनोनयनवर्धनम् । पद्भ्यां नखमणिश्रेण्या विद्यु-
द्भ्यां जनमार्तिहृत् । कृतपक्षकर्णिकाधिष्ठ्यमाक्रम्या-
त्मन्यवस्थितम् । ध्यायमानमभिध्यायेत् सानुरागावलो-
कनम् । निवर्तेनैवमूर्तेन मनसा वरदर्षभम् । एवं भग-
वतोरूपं सुभद्रं ध्यायतोमनः । निर्वृत्या परया तूर्णं सम्प्लवं न निवर्त्तते । अथ परमोदुदः स्तू-
यतां मे कृपालज ! । यं सप्तरात्रं प्रपठन् पुमान् पश्यति-
खेचरान् । ओं नमो भगवते वासुदेवाय । मन्त्रेणानेन
देवस्य कुर्याद्द्रव्यमयीं बुधः । सपर्यां विविधैर्द्रव्यैर्दे-
शकालविभागवित् । सलिलैः शुचिभिर्मुख्यैर्मन्त्रैर्मूलकलादि-
भिः । यत्तत्कुशैरगुलैर्वा सुलभा प्रियवा प्रभुम् । लब्धा द्रव्यमयीमर्चां चित्तम्बादिषु चार्चयेत् । आ-
भूतात्मा मुनिः यान्तोवृतवाङ्मितवन्यभुक् । खेच्छावतार-
चरितैरचितं निजमायया । हरिन्यनुसवनोत्थं
ध्यायेद्धृदयंगतम् । परिचर्या भगवतो यावतीः

पूर्वेषितः । तां मन्नाथदयेनैव प्रयुक्तान्मत्सृतये । एवं जातेन मनसा वपुषा च मनोगतम् । परिचर्यमाणो भगवान् भक्तिमत्परिचर्यया । पुंसामयिनां सम्यग्-भजतां भाववर्धनः । श्रेयोऽर्थिनामभिमत आत्मादिषु देहिनाम् । विरक्तश्चेन्द्रियरतौ भक्तियोगेन भूयसा । तं निरन्तरभावेन भजेतानाद्विमुक्तये । इत्युक्तो परिक्रम्य प्रणम्य च पदाम्बुजम् । वयौ मधुवनं पुण्यं हरेः चरणचर्चितम् । तपोवनं गते तस्मिन् प्रविष्टोऽन्तःपुरं मुनिः । अपार्थितार्थोपरामा सुखासीन उवाच ह । श्रीनारद उवाच । राजन् ! किं भ्रियसे दीर्घं क्षुधया परिशुष्यता । किं वा न रिष्यते काले धर्मोवार्थेन संयुतः । श्रीराजोवाच । क्षुतोजे नाष्टकोत्रस्तं क्षेत्रेणाकरुणात्मना । निर्भर्त्सितः पुरुषभः कृच्छ्रं मह्यान् मुनिः । अप्य नार्थमने मह्यन्ना खादन्त्यर्भकं क्षुधाः । आत्मं मयानं क्षुधितं परिज्ञानसुखाय्यमम् । अथो मे बत दौरात्म्यं स्त्रीजितस्योपधारय । योऽहं प्रेम्णाग्रहयन्तं नाथमनन्यसत्तमः । श्रीनारद उवाच । मा मा शुचः स्वतनयं देव-गुप्तं विधास्यते । तत्प्रभावमविज्ञाय प्राहुरुक्षे बलयोजयत् । तुदुस्कारं कर्म ज्ञात्वा लोकपालैरपि प्रभुः । एवमात्मचिरतोराजन्मयोविश्वजंस्तव । इति देवर्षिणा प्रोक्तं विज्ञाय जगतां पतिः । राजन्यच्छ्रीलनाहत्य पुत्रमेवात्मचिन्तवत्" । "तत्राभिषिक्तः प्रयतस्तान्योक्ष विधावरीम् । उपोषितः पर्वचरद्भावेन पुरुषम् । शिरात्मान्ते शिरात्मान्ते वधित्वपदराधनः । आत्मन्यात्मानुसारेण भावं निर्मेऽर्थ्य मनुस्मरन् । द्वितीयस्तु तथा भावं यदा यदे भेदोदिते । हृत्पद्मकर्णिकामध्ये योगैः क्षताक्षोऽभ्यर्च्य बहिर्मुखम् । हृतीयस्यान्यभावं नवमे नवमे ऽहनि । अवभृथप्लुतस्नानो ह्यपूजयधावत् समाधिना । चतुर्थमपि वै भावं द्वादशे द्वादशेऽहनि । वायुभक्षोजितश्वासोध्यायन् देवमधारयत् । यदृच्छयागतप्राप्ते जितश्वासोत्पात्मजः । ध्यायन् ब्रह्म-यदैवेन तस्मै स्वाङ्गरिवाधवः । सर्वतोमनआत्मान्य हृदि भूतेन्द्रियाशयम् । ध्यायन् मनसोऽपं नाद्राक्षीत् विघ्न-भावरम् । आवारं सर्वदादीनां प्रधानं पुरुषेश्वरम् । ब्रह्म धारयमाणस्य मनोऽक्षाक्षिभिरे । यदैवमादेव स-मार्धिमाज्ञमस्तो यदङ्गुष्ठविडीडिता नदी । तमान मत्तार्द्विभिरुच्छिता तरीव क्षुब्धेतरतः पदेपदे । तस्मिन्-निमज्जावसि चित्तमात्मनोद्वारं निरुध्यात्मनमन्यथा धिया । लोका चित्तस्यविधोडिताश्चर्यं यत्रोपधाताः परमं वदु-हृदिम् । श्रीदेवा ऊचुः । नैवं विदामोमनवत् ! प्राक्तरोर्ध चराचरस्याखिलसत्वधाम्नः । विधेहि तत्रोद्वलिनाहिमोर्धं प्राप्ता वयं त्वां शरणं शरण्यम् । श्रीभगवानुवाच । मा भैष्ट वाचं तपसोदुरत्ययाच्चित्तस्थिम्ये प्रतिघात खधाम । यतोहि वः प्राक्तनिरोध आसीदौत्तानपादिर्मयि संगताक्षा । तपश्च चुतुश्चमवाप्तकामे कृतावनामाः प्रवयुक्षिपिष्टम् । बहुक्ष-णीर्षाऽपि ततोऽहमतानधोर्वं अल्पादिहलवागतः । स वै धिया योगविपाकतीव्रया छिन्नपद्मकोशे स्फुरितं तडित् प्रभम् । तिरोहितं सहसैवोपलक्ष्य बाह्यः स्थितं तद्-वक्षं ददर्श । तद्दर्शनेनागतसाध्वसः क्षिताववन्दताङ्गं विनमय्य दण्डवत् । हृग्भ्यां प्रपश्यन् प्रपिबन्निवार्भकश्चुम्बन्निवास्येन भुजैरिवाश्लिषन् । स तं विदित्वानतहिं स्फुरन्मणिग्रीव वर्षेण च शुद्धयवस्थितः । कृताञ्जलिं बद्ध-वदेन सम्भृता प्रणम्य वाचं कृपया कपोले । स वै तदैव प्रतिपादितां गिरं दैवीं परिज्ञातपरात्मनिश्चयः । तं भ-क्तिभावोऽभ्यगदात्सदुत्तरं परिस्रुतोदञ्जवसं प्रचक्षितिः । ततो प्रुवेच स्तुतो भगवान् तस्मै यथा वरं दत्तवांस्तथा वर्णितं तत्रैव "यथाभिषुतपरं वै ब्रह्मक्षत्रेण धीजता । भक्तानु-कम्पो भगवान् प्रतिनन्द्याभजत्प्रभोः । श्रीभगवानुवाच । वेदाहं ते व्यवसितं हृदि राजन्यबालक ! । तत् प्रयच्छामि भद्रं ते दुष्प्रापमपि सुव्रत ! । नाम्नैरधिपतिं भद्र ! लोकानां लोकभावनः । भविष्यसि ध्रुवः क्षितौ यस्य माता पितरौ च तम् । मेध्यां गोचक्रवत् स्वाङ्गपरस्तात् ब्रह्म वादिनाम् । धर्मोऽग्निः कल्पयः ब्रह्मो क्षत्रवो ये वनौकसः । चरन्ति दक्षिणीकृत्य भवन्तोवत् सतारकाः । प्रक्षितेत्र वनं पित्रा दत्त्वा गां धर्मसंश्रयः । षट्त्रिंशद्वर्षसाहस्रं रक्षिता व्याकृतेन्द्रियः । स्वदुश्चातर्जुत्तमे भद्रे भवनावां च तत्परः । अन्तेवती वनं मातां दावाग्निं सा प्रवेक्ष्यति । दृष्ट्वा मां तत्पदं ब्रह्मः पुण्यश्लोकर्षिभिः । ब्रह्मा चेन्द्राग्निवः सत्या अन्ते मां संस्मरिष्यति । ततोभक्ष्यति भूतानां सर्वक्षोभनमक्षतम् । उपरिष्टाद्विमध्यस्थं यतोनावर्तते गतिः"

भक्तभक्तयतत्त्वविवेचविवेचकत्वेन ५ स्क० उक्तो यथा "अथ तस्मात् (ध्रुवलोकात्) परतश्चक्रोद्भवजयोजनात्-रतो सप्तर्षिभ्यः परमं यद्भमभिवन्दन्ति यत्र भगवतो ध्रुव औत्तानपादिरग्निनेत्रेण प्रजापतिना यज्ञेन धर्मेण च वनवासद्युभिः यद्द बहुमान दक्षिणतः शिवश्च यद्दानीमपि यज्ञभोगिमात्रोत्र उपास्ते

तस्य महानुभाव उपवर्णितः । स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनां अग्निमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टम्भ ईश्वरेण विहितः यत्प्रदक्षिणयते । यथा मेधीकृत्य आक्रमणपशवः संयोजितास्त्रिभिः सवनैर्वेधा स्थानं मण्डलानि चरन्ति । एवं भगवता प्रधानादय एतस्मिन्नन्तर्बहिर्गतिर्गण कालचक्र आयोजिता ध्रुवमेवालम्ब्य वायुनोदीर्य्यमाणा आकल्पान्तं परितः क्रामन्ति । नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मगतयः परिवर्त्तन्ते । एवं ज्योतिर्गणाः प्रवृत्तिपुरुषसंयोगानुग्रहीताः कर्मनिर्मितमनवोधुवि न पतन्ति । केचिदेतत् ज्योतिरनीकं विष्णुपारसंस्थानेन भगवतो वासुदेवस्य योगधारणाबलमनुवर्णयन्ति । यच्च पुरुषाख्येवाक्षिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितः" ५,२३,१क्ष० अ० ।

वि०शि० सर्वनक्षत्राधारो द्वौ ध्रुवौ कल्पितौ यथा "निरक्षदेशे क्षितिमण्डलोपरौ ध्रुवौ नरः पश्यति दक्षिणेतरौ । तदाश्रितं खे भवयन्त्रवत् तथा भ्रमद्भचक्रं निजमस्तकोपरि । उदग्ध्रुवं याति यथा नरस्तथा तथा खात्तमृक्षमण्डलम् । उदग्ध्रुवं पश्यति योजनं क्षितेस्तदन्तरे योजनजाः प्रभांशकाः । योजनसंख्या भांशैर्युक्तिता खपरिधिस्थिता भवन्त्यंशाः । भूमौ कलाद्यां वा भागेभ्यो योजनानि च व्यस्तम्"शि० । "उदग्ध्रुवं याति यथा यथा नर स्तथैवनाधस्ययोजनैरनुपातः स्फुटितः । यदि भूपरिधियोजनैश्चक्रांशा लभ्यन्ते तदाप्तसारयोजनैः किमिति । फलनक्षांशाः । यदि चक्रांशमितपरिधिना भूपरिधिर्लभ्यते तदाक्षांशैः किमिति लब्धं निरक्षदेशस्थदेशयोरन्तरयोजनानि स्युः शेषं स्पष्टम् । एवं निरक्षदेशात् क्षितिचतुर्थांशे क्षिति शेषः । तत्र भवति ९० पलांशाः" प्रति० । "सौम्यं ध्रुवं नेत्रगताः खमध्ये याम्यं च दैत्या निजमस्तकोर्ध्वे । व्यत्यस्तयम्यं भ्रमदक्षचक्रं विलोकयन्ति क्षितिजप्रवक्त्रम्" शि० ।

औत्पत्तिक उत्पत्ता भावेन अविमुक्तः ठक् । १नित्यसंबन्धे यल्लाघवोः सम्बन्धस्य नित्याविमुक्तत्वात् औत्पत्तिकत्वम् जै सू० भाष्यवार्त्तिकं यथा

"औत्पत्तिकस्तु यद्वस्त्वर्थेन सम्बन्धस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत् प्रमाणं बादरायणस्यानपेक्षत्वात्" । सू०

"औत्पत्तिक" इति नित्यं सूत्रः, उत्पत्तिर्हि भाव उच्यते लक्षणया । अविमुक्तः सम्बन्धो योर्थयोः सम्बन्धः नोत्पन्नयोः पश्चात् सम्बन्धः, औत्पत्तिकः सद्वस्त्वर्थेन सम्बन्धः, तस्य अग्निहोत्रादिवचनस्य धर्मस्य प्रमाणादिभिरनवगतस्य ज्ञानं निमित्तम् । कथं ? । उपदेशो हि भवति, "उपदेशः" इति विधिरत्र उच्चारणम् । अव्यतिरेकश्च ज्ञानस्य, न, हि तदुत्पन्नं ज्ञानं विषयीति । यच्च नाम ज्ञानं न तत् शक्यते वक्तुं 'न एतदेवम्" इति, यथा विज्ञायते, न तथा भवति, यच्चैतन्न विज्ञायते, तथैवहिति, अन्यदस्य हृदये, अन्यद्वाचि स्यात्, एवं बहुतो विरुद्धमिदं गम्यते, अस्ति नास्ति वेति । तस्मात् तत् प्रमाणमनपेक्षत्वात् । न खेवंजाति प्रमाणान्तरमपेक्षितव्यं, पुरुषान्तरं वापि, अवं प्रमाणोक्षौ । बादरायणस्य कृष्णं बादरायणस्येदं मतं कीर्त्यते बादरायणं पूजयितुं, नात्रीयं मतं पर्य्युदस्तितुम् ।

उत्पत्तिर्भावः १स्वभावः तत्र भवः ठक् । २स्वभावे स्वभावश्च यावद्द्रव्यभावित्वात् तथात्वम् । "मातरमुपक्रान्तौत्पत्तिकेनैव कंसनलक्षणेनेतः पिता विभ्रान्तः" भा० ग०५,२,२१, तत्रियमाह कर्म्मण्या औत्पत्तिकनीवया भाग० ४,५,१० ।

औत्पात त्रि० उत्पातस्य तत्प्रापकत्वात्तस्य व्याख्यानो ग्रन्थः तत्प्रभवो वा प्रभवति० अण् । १उत्पातावेदकग्रन्थव्याख्याने ग्रन्थे २तत्प्रभवे च ।

औत्पातिक त्रि० उत्पाते दैवारिष्टे भवः ठक् १दैवारिष्टभवे "औत्पातिकं मेघ इवाप्रवर्षणम्" रघुः । "औत्पातिकं तद्धि देव । विचिन्तनीयम्" उद्भटः । "औत्पातिके महाघोरे तथा दुःस्वप्नदर्शने" बहुलत्वः उत्पाताद्य प्रभवति ठक् । उत्पातसम्बन्धदर्शनार्थे "प्रपाते तु ततः स्कन्दे बभूवौत्पातिकं महत्" भा० व० २१०अ० ।

औत्पाद त्रि० उत्पादं तदावेदकग्रन्थं वा वेत्त्यधीते वा तत्प्रभवो वा प्रभवति० अण् । १भावाभावोत्पादवेत्तरि २तदावेदकग्रन्थाध्येतरि ३तत्प्रभवे च ।

औत्पुट त्रि० उत्पुटेन निर्वृत्तादि सङ्घा० चतुरर्थ्यां अण् । उत्पुटेन उत्कुटेन १निर्वृत्ते २तत्प्रक्षिप्तदेशादौ च ।

औत्पुटिक त्रि० उत्पुटेन क्रीणति उत्पुटिका० ठक् । उत्पुटेन क्रीणके । [वस्तुसंस्कारान्वितेन क्रीणके ।

औत्पुटिक त्रि० उत्पुटेन क्रीणति उत्पुटिका० ठक् । उत्पुटेन क्रीणके ।

औत्स त्रि० उत्से भवः अञ् । प्रवाहप्रभवे स्त्रियांङीष् ।

औत्सङ्गिक त्रि० उत्सङ्गेन क्रीणति ठक् । क्रोडेन क्रीणके ।

औत्सर्गिक त्रि० उत्सर्गं सामान्यविधिमर्हति ठञ्। सामान्यविधियोग्ये स्त्रियां ङीष्। [फञ्। उत्सर्गगोत्रापत्ये।

औत्सायन पुंस्त्री उत्स ऋषिभेदस्य गोत्रापत्यम् अश्वा०

औत्सुक्य न० उत्सुकस्य भावः ष्यञ्। उत्कण्ठायाम्। "औत्सुक्येन ततत्वरा सहभुवा व्यावर्त्तमाना स्त्रिया" रत्नावली "तमाक्षितौत्सुक्यमदर्शनेन" रघुः। "रथक्रियासमाकृष्टावौत्सुक्यानुज्ञा" माघः "इत्यौत्सुक्यादपरि गणयन् गुह्यकस्तं ययाचे" मेघ०। तच्च अलङ्कारोक्त व्यभिचारिभावभेदः सा०द०निर्वेदावेगेत्याद्युपक्रमे "औत्सुक्योन्मादशङ्का" इत्युक्ता "इष्टानवाप्तेरौत्सुक्यं कालक्षेपासहिष्णुता" ललितम्। २इच्छामात्रे च। "औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्त्तते लोकः" सा०का०। "औत्सुक्यनिवृत्तिश्च सा च द्रव्यलाभप्राप्तौ निवर्त्तते द्रव्यमात्रञ्च स्वार्थं इष्टलक्षणत्वात् फलस्य" त०कौ०। "मनोऽक्षेन्द्रियक्षोभ विषयान् याति सेवितुम्। तस्यौत्सुक्यं संभवति प्रवृत्तिरुपजायते" भा०व० ११४ श्लो०।

औदक त्रि० उदकेन पूर्णं स्पृणाति उदकस्येदं वा अण्। १उदकपूर्णकुम्भ्याहृते "अपरेद्युरग्निमौदकोऽनुसंव्रज्य पाणिग्राहं मूर्द्धदेशेऽवसिञ्चति" गोभिलः। "औदको घटक्षीरोदकुम्भः" सं०त०रघु०। २उदकसम्बन्धिनि। "औदकेनैव विधिना निर्वपेत् दक्षिणाहुखः" मनुः। उदके भवः अण्। ३जलभवे च। "यानि चैव प्रकाराणि स्थलजान्यौदकानि च" "स्थलजौदकयाकानि पुष्पमूलफलानि च" मनुः

औदकि पुंस्त्री "उदक उदक (संज्ञायाम्)" पा०ग० वाह्वा० अपत्ये इञ्। उदकनामर्षेरपत्ये ततः स्वार्थे दामन्या० क। औदकीय तत्रार्थे। एवम् औदकि औदकीय इत्यपि उदकापत्ये पुंस्त्री। [स्त्रापत्ये।

औदञ्जायनि पुंस्त्री उदञ्जनर्षेरपत्यं तिका० फिञ्। उदञ्ज-

औदञ्जन त्रि० उद्यते उत्क्षिप्य क्षियतेऽस्मिन् उदञ्जनोजलाधारः मणिकस्तस्येदम् अण्। मणिकस्थिते जलादौ (जलाधारजल) "एनां (मक्षिकाम्) तत आदाय न्यधाद्यौदञ्जनोदके" भाग० ८,१४,१५। "औदञ्जनोदके मणिकस्थजले" श्रीधरः उदञ्जनस्य मणिकस्थदेशादि अरीहणादि० वुञ्। औदञ्जनक मणिकस्थ मणिकस्थदेशादौ त्रि०। [नामकर्षेरपत्ये।

औदञ्चनि पुंस्त्री उदञ्चोरपत्यं वाह्वा० इञ्। उदञ्चु-

औदञ्चि पुंस्त्री उदञ्चापत्यम् इञ्। १उदञ्चापत्ये ततः यूनि त्रिञ् वैया० तस्य लुक्। २तदीययुवापत्येऽपि।

औदन्तिक त्रि० ओदनाय प्रभवति संताप० ठञ्। ओदननिष्पादनाय समर्थे सूपकारे।

औदन्य पु० उदन्यायुक्ते ऋषौ भवः ष्यञ्। पिपासायुक्त ऋषिभवे सुरिद्भवे ऋषौ। "एतां ह वै सुरिद्भ औदन्यः ब्रह्महत्यायै प्रायश्चित्तिं विदाञ्चकार" शत०ब्रा० २२,२, ५,६। तस्यापत्ये तु इञ्। औदन्वि इत्येव तत्रार्थे ततः युवप्रत्ययस्य फिञः पैङ्गा० लुक्। तदीययुवापत्ये च।

औदपान त्रि० उदपानादागतः शुण्डिकादि० अण्। आयस्थानरूपोदपानादागते १राजपाङ्क्तेयादौ। उदपाने भवः पक्षद्या० अण्। २उदपानसामान्यभवे करादौ त्रि०। उदपाने जलाधारस्थानभेदे भवः उत्सादि० अञ्। ३उदपानभवे त्रि०। स्त्रियां सर्वत्र ङीष्।

औदभृञ्जि पुंस्त्री उदभृञ्जस्यापत्यम् इञ्। १उदभृञ्जस्यापत्ये ततोयुवप्रत्ययस्य पैङ्गादि० लुक्। २तदीययुवापत्ये च। एवं औदमज्जि औदमेधि औदव्रजि औदशुद्धि इत्येतेऽपि यद्वाः तत्तदपत्ये तत्तद्युवापत्ये च। [सम्बन्धिनि।

औदमेधीय त्रि० उदमेधेरिदम् रैवतिकादि० छ। औदमेधि

औदमेयि पुंस्त्री उदमेयस्यापत्यम् इञ्। उदमेयस्यापत्ये ततः मनुष्यजातित्वात् स्त्रियां ङीष्। [स्त्रियां ङीष्।

औदयिक त्रि० उदये लग्नकाले भवः ठञ्। लग्नकालभवे

औदरिक त्रि० उदरे प्रहितः ठक्। आद्यूने, (पेटुक)

उदरमात्रपूरणापेक्षके। "ऐश्वर्यवन्तं रौद्रं च सूरं चण्डमसूयकम्। एकाशिनमौदरिकमासुरं सत्वभीदृशम्" स्मृते तस्यासुरसत्वसङ्गम्। अमरे विजिगीषाविवर्जितस्य तथात्वसङ्गम्। विजिगीषा च विगानेच्छा सा च स्वोदरपूरणासक्ततया निन्देच्छा तस्याःत्याग एवास्य प्रवृत्तिः। "सर्व्वमेवौदरिकस्याभ्यवहार्य्याय कल्पते" भाट०

औदर्य्य त्रि० उदरे भवः यत् उदर्य्यः ततःस्वार्थे अण्। १उदरभवेऽजलादौ। २अभ्यन्तरप्रविष्टे च। "स त्वयाराधितः शुक्लोवितन्वन् मामक यशः। क्षेमं ते हृदयस्यन्यिमौदर्य्यो ब्रह्मभावनः" भाग० २,२४,५।

औदल त्रि० चिकितगालवकाक्षवधमनुतन्तुकुड्डिलानां वैश्वामित्रदेवरातौदलेति" आ०औ०१२,१४,२, उक्ते चिकितादीनां वर्णां प्रवरर्षिभेदे।

औदवापि पुंस्त्री उदवापस्यापत्यम् इञ्। उदवापापत्ये स्त्रियां ङीष्। तस्येदं रैवतिका० अञ्। औदवापीय तत् सम्बन्धिनि त्रि०।

औदवाहि पु० उदवाहस्यापत्यम् इञ्। ऋग्वेदिनाम्

प्राचीनामीतितया तर्पणीयत्वभेदे। द्वादशमितर्पणान्तरम्। "प्राचीनामीती" "सुमन्तुजैमिनिवैशम्पायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्यजानन्तिबाह्विगाम्बे गौतमशाकल्यबाभ्रव्यमाण्डव्यमाण्डूकेभ्यो गार्गी वाचक्नवी बडवा प्रातीथेयी सुलभा मैत्रेयी कहोलं कौषीतकं पैङ्ग्यं महापैङ्ग्यं सुयज्ञं साङ्ख्यायनमैतरेयं महैतरेयं माण्डूकं बाष्कलं सुजातवक्त्रमौदवाहिं महौदवाहिं सौजामिं शौनकमाश्वलायनं ये चान्ये आचार्यास्ते सर्वे तृप्यन्विति" आश्व०श्रौ०३,४,४, "त्रयोविंशति वाक्यानि तत्र कहोलादिषु अर्थात् तर्पयामीतिपदम् आर्ष्यः। सर्वत्र प्रतिवाक्यं तर्पयाम्यहमित्यर्थात् "एकमन्वाह ब्रह्मणेति" न्यायात्" नारा०। "औदवाहेश्च याज्ञिक्याश्च याज्ञिक्यः" भट्ट०भा०१४,७,३,२६, वंशवर्त्तिनि

औदञ्चित त्रि० उदञ्चति तत्रभवे संस्कृतः अण्। उदञ्चित्रुप्रतक्षे संस्कृतभक्षणद्रव्ये। यत्रे ठक् उदञ्चित्कोऽत्र उदञ्चित्रिव अकुत्सा० ठक्। औदञ्चित्क तत्सदृशे त्रि०।

औदश्वान त्रि० उदश्वान् गोत्रमस्य अत्रा० च। १उदश्वान्गोत्रे। उदश्वाने भवः उत्सा०अञ्। २उदश्वानभवे च।

औदार्य्य न० उदारस्य भावः गुणवचनत्वात् ष्यञ्। उदारतायाम्। "औदार्य्यञ्च नायकयोरयत्नसिद्धसात्त्विकालङ्कारविशेषः। यथाह सा० द० "शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता। औदार्य्यं धैर्य्यमित्येते सप्तैव गुरवस्त्रजाः" इति विभज्य। "औदार्य्यं विनयः सैव" इति लक्षितम्। सात्त्विकगुणभेदश्च यथाह तत्रैव। "शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यं तेजसी। ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषागुणाः" इति विभज्य। "दानं सदृशभाषणमौदार्य्यं यत्र मित्रयोः समतेति" लक्षितम्। २वाक्यस्यार्थस्य च। "सखीष्वौदार्य्यं विशेषयाचिनीं विनिश्चितार्थामिति वाचनादर्शे किरा०। "औदार्य्यमर्थसम्पत्तिः" मल्लि०। तस्य वाग्गुणभेदः "संस्कारवत्त्वमौदार्य्यं मित्रादिना" हेमच०। वाग्गुणादर्शने उक्तेः।

औदासीन्य न० उदासीनस्य भावः ष्यञ्। शुभाशुभयोरुपेक्षायाम् साहित्ये। "प्रत्यासीदति प्रजाः पालनौदासीन्येन वर्त्तितुम्" रघुः। २राहित्ये ३रागनिवृत्तौ च "न च स्वभावप्राप्तस्यान्यथानुरागेण नञ् यत्नमप्राप्तिनिवारणत्वं सत्यवितुम्, फलनिवृत्तिनिवृत्तौदासीन्यमनिरोधेन" "अभावबुद्धिरौदासीन्यकारणम्" "तस्मात् प्रवृत्तिनिवृत्तिफलौदासीन्यमेव "प्राप्तत्यागे फलत्व" इत्यादिषु प्रतिषेधार्थं मन्यामहे" इति च शारीरकभाष्यम्।

औदास्य न० उदासे उद+आस-ष्यञ् तस्य भावः ष्यञ्। वैराग्ये रागशून्यतायाम् २मनोयोगविरहे। "औदास्यं संविदवलम्बितशून्यमुद्रामक्षिनूदयोनिपतितामयगस्य भैषज्यः" नैष०। "औदासिलिप्यनलेतोर्वयमपि कृताः क्षिणौ दास्यम्" पद्यावली।

औदुम्बरक पु० उदुम्बरस्य विषयोद्देशः राजन्या० वुञ्। १उदुम्बरविषये देशे। तस्य वसूक इत्यधिकारात् राजन्या० वुञ्। २तत्समूहे न०।

औदुम्बरायण पुंस्त्री उदुम्बरस्य गोत्रापत्यम् गर्गा० फक्। उदुम्बरस्य गोत्रापत्ये। अनन्तरापत्ये तु दुञ्। औदुम्बरि तदीयानन्तरापत्ये पुंस्त्री स्त्रियां ङीप्।

औदुगात्र न० उद्गात्रर्त्वङ्कम् अदनत्वात् अञ्। उद्गात्रः ऋत्विग्भेदस्य १धर्म्मे "खरिरौदात्र आहवनीये" कात्या०२५,१,८, उद्गात्रभेदावहिते भवे खरिराहवनीये जुहोति" कर्कः। उद्गात्रः कर्म्म भावो वा उद्गात्रा० अण्। उद्गात्रः उद्गेर्गानात्मके २कर्म्मणि ३तद्भावे च।

औद्गाहमानि पुंस्त्री उदगाहमानस्यापत्यम् दुञ् ततोऽनि फक् तस्य पैङ्गा० लुक्। १उद्गाहमानस्यापत्ये २तद्दोषे युवापत्ये च स्त्रियां गौरा० ङीप्। ततो भवादौ गर्गा० ञ। औद्गाहमानीव तद्भवादौ त्रि०।

औदुम्भण त्रि०उदुम्बशब्दाद्यत्साधु अण् वेदेऽस्य भः। अर्द्धर्चशब्दाभवे "सर्वाणि रूपाणि दीक्षायामुदुम्बरशाखायां औदुम्भणानि" उदुम्बमश्नोते वा एतोऽन्नाद्येनोदुम्बरोऽन्नमिति यद्दीक्षते" शत०ब्रा० ३,१,४,१, "औदुम्भणानि जुहोति स्वाध्यायाद्वा इति प्रतिमन्त्रम्" कात्या० ७,२,१६। भवार्थाभावे औदुम्बरमभवत्।

औद्दण्डक त्रि० उद्दण्डस्य संज्ञातदेशादि अरीहादि० वुञ्। उद्दण्डसंज्ञितदेशादौ।

औद्दालक न० उद्दालेन उद्दालेन निर्वृत्तः अण् संज्ञायां कन्। "प्रायो बह्वीकजनाध्यास्ताः वणिजाः क्षत्रकोटिकाः। तुर्वन्ति वणिजं क्षत्रं तत् स्यादौद्दालकं यथु" इत्युक्ते बह्वीककोटिकन्यृते मधुनि "औद्दालकं रुचिकरं वर्च्यं कृमिविषापहम्। कषायमुष्णमम्लञ्च कटुपाकञ्च पित्तलम्" तद्गुणा वैद्यकोक्ताः ज्ञेयाः।

औद्दालकि पुंस्त्री उद्दालकस्यर्षेरपत्यम् इञ्। उद्दालकापत्ये गौतमे ऋषौ स्त्रियां मनुष्यजातित्वात् ङीप्। ततः

यूनि फक्। औद्दालकायन तद्दीयुत्रापत्ये प्राच्यभरते तु वल्लुचकत्वात् तस्य बहुषु लुक्। उद्दालकाः। तदीय-युवापत्यादि प्राच्यादि भारतादि वा

औद्धत्य न० उद्धतस्य भावः। अविनीतभावे तस्य "अस्तयान्य गुरुस्त्रीणामौद्धत्याद्यस्क्रियाता" भा०८० उक्तलक्षणम्।

औद्धारिक त्रि० उद्धाराय उद्धृतदानाय प्रभवति ठञ्। विभागकाले उद्धारार्थं देये द्रव्यभेदे। "विप्रस्यौद्धारिकं देवनेकांशच प्रधानतः" मनुः।

औद्धारि पु० उद्धारस्यैरपत्यम् इञ्। उद्धारैः पुत्रे स्त्रियाञ्च ङीप्। "स्त्रियाञ्च यौद्धारिरस्य प्राविदिकं वेद" यत०ब्रा० १,८,२४,१। [राजनि०।

औद्भिज्ज न० उद्भिद्य जायते जन-ड स्वार्थेऽण्। पांशुलवणे

औद्भिद् न०उद्भिनत्ति उद्+भिद्-क-स्वार्थेऽण्। १पांशुलवणे। "औद्भिदं पांशुलवणं बल्लात् भूमितः स्वयम्। क्षारं गुरु कटूष्णञ्च क्लेदकं वातनाशनमिति" तस्य गुणाः "विद्यात् भूमिं निम्नां बल्लात् धारया क्षरेत्। तत्तोय-मौद्भिदं नाम वदन्तीति मनीषिणः" इत्युक्ते २जलभेदे च "औद्भिदं वारि पित्तास्रमविदाहि रुतिशोषजम्। प्रीणनं मधुरं बल्यमीषद्वातकरं लघु"। वैद्यकान्तरम्

तन्मते आन्तरिक्षजलक्षणञ्चा "तत्राद्याभे भौमं तद्याका-शगुणबद्धलं तत्पुनः षड्विधम्। तद्यथा कौपं नादेयं क्षारं ताडाकं प्राक्षरणमौद्भिदं चौरुठमिति। तत्र य-दाकाशान्तरिक्षमौद्भिदं वा सेवेत मरुगुणत्वात्" इत्यादि उक्त्वा "कफघ्नं दीपनं रुच्यं लघु प्रसन्नमोजस्करम्। मधुरं पित्तशमनमविदाह्यौद्भिदम् स्मृतम्"। तद्गुणाः उक्ताः। औद्भिदलवणगुणास्तु तत्रैव। "लघु तीक्ष्णोष्णरुक्षादि रुच्यं वातानुलोमनम्। रुतिकृत् कटुलवणक्षारं विद्याल्लव-णौद्भिदम्"

औद्भिद्य न० उद्भिदोभावः ष्यञ्। उद्भादीनामुत्पत्तौ। "जैलं च न औद्भिद्यं च ये वल्लेन बल्लत्तमाः" मनु० १८,६, उद्भिदोभावः औद्भिद्यं भूताद्यितरोद्भत्तिः मेधा०।

औद्यान न० उद्यानस्य व्याख्यानोपन्यासः तत्र भवो वा अण-जना० अच्। १उद्यानव्याख्यानपन्ये २तत्र भवे च।

औद्वाहिक त्रि० उद्वाहकाले देयं दीयते वा ठञ्। वि-वाहकाले १देये दीयमाने च "विद्याधनन्तु यद्यस्य तत्तस्यैव धनं भवेत्। मैत्रमौद्वाहिकञ्चैव माधुपर्किकमेव च" स्मृतिः "विद्रुद्याविनाशेन यदन्यत् स्वयमर्जयेत्। मैत्रमौद्वाहिकञ्चैव दायादानां न तद्भवेत्" याज्ञ०। तत्-सर्व्वैरविभाज्यम्। [ङीप्ते २तत्सम्बन्धिशब्दमात्रे च

औद्वेग त्रि०उद्वेग+सहरर्थम् सहुलात् अण्। उद्वेगेन १नि-

औधस त्रि० अधस इदम् अण्। अधःदृष्टान्विनि "यवसं ज-ग्धमुतदिनं नैव दोग्ध्रौधसं पयः।" भाग० ४,१०,१६, अवार्थे तु शरीरावयवत्वात् यत् अधस्यमित्येव। "अ-धस्यन्यानि तत्रोपभोक्तुम्" रघुः। औधस्यमिति क्व-चित् पाठः स्वार्थेऽण्प्रत्यये स्वमर्थम्।

औधेय न० उधसेदः कर्म्म भावो वा यदुगालादि० अञ्। उधसेदः १कर्म्मणि उधसने २सङ्गमे च। तस्य धार्य्यम् ऋदन्तत्वात् अञ्। २उधसेदर्थे च।

औपकर्षिक त्रि० उपकर्षे प्रायभवः ठक्। उपकर्षणीये प्रायभवे। "औपकर्षिकलोचनः"। भट्टिः।

औपकलाप्य त्रि० उपकलापं भवः परिमाणा० अञ्। कलापसमीपभवे।

औपकायन पुंस्त्री उपकस्य गोत्रापत्यं नडा० फक्। उपकस्य गोत्रापत्ये। बहुत्वे इञ्यञ्यौ च वा फको लुक्। उपका उपकायनाः। उपकलामका औपकायनकालवासाः।

औपगव पुंस्त्री उपगतोगौरस्य उपगुर्गौपः तस्यापत्यम् अण्। १गोपालकपुत्रे २तद्वाजिपुत्रे च तस्यया उपगुयज्ञ-स्तद्वाजिविप्रोऽपि उपगुयज्ञ इत्युच्यते "यं वर्षं याजयेद्यस्तु स तन्नाम्नात्मजायते। सद्योवर्षेण वर्षेऽस्मिन्नेवमेवाग्रजोऽभवत्।" हारीतोक्तेः। तत्सम्बन्धिनि २तद्वंशे ४अन्ने ५वंशे च तस्यापत्ये तु स्त्रियां ङीप्। औपगवस्येदम् गोत्रचरणात् वुञ्" पा० वुञ्। औपगवक औपगवसम्बन्धिनि"तत आ-गत" इत्यधिकारे "गोत्रादङ्कवत्" पा० वुञ्। औपगवक ततआगतेऽर्थे। तेषां समूहः गोत्रोक्षोष्ट्रेत्यादिना वुञ्। औपगवक तत्समूहे न० औपगवौष्ट्रिकस्य "गोत्रखलिजा-खेभ्यो वक्तव्यम् वुञ्"पा०। औपगवक तद्वृत्तियुक्ते त्रि०

औपगव पुंस्त्री उपगतो गां शिरं पतितेन उपगवोगोमिन्-स्तस्यापत्यम् ज्ञातो वा इञ्। १गोमतेरपत्ये २तज्ज्ञाते उक्षवे पु० "तस्यामिव पुत्रिणे बलसत्तमां वसुचित औप-गविनियां ततोऽजात्" भाग०२,४,२८ "औपगविरुक्षवः" श्रीधरः"

औपग्रस्तिक पु० उपग्रस्तं ग्रासकालं भूतः स्वस्तया व्याप्तः "तमधीष्टोभृतो भूतोभावी वा"पा० ठञ्। उप-ग्रासकालस्य स्वस्तया व्याप्ते १चन्द्रे २सूर्य्ये च मेदि०

औपचलनि पु०उपच(ल)स्यापत्यम् इञ्। गुरुवज-

ब्राह्मण वंशीये ऋषिभेदे । "औपच(ज)घ्नेरौपच(ज)घ्नि" शत०१४,५,५,२१ । १४,७,२,२६,ब्राह्मणे च ।

औपचारिक पु० उपचार+स्वार्थे-विनयादि० ठक् । उपचारे उपचारस्य लक्षणया बोधनम् सेवनञ्च । उपचारः प्रयोजनमस्य ठञ् । उपचारहेतुके त्रि० । स्त्रियां ङीप् । औपकारिकी उक्तिः ।

औपच्छन्दसिक त्रि० उपच्छन्दसा निर्वृत्तं वा०ठक् । उपच्छन्दनेन निर्वृत्ते । "आतत्वानं मुरारिकान्ताखौपच्छन्दसिकं कदा विनोदम्" छन्दोमञ्ज० । "गड्विषमेऽष्टौ समे कलास्ताश्च समे द्यु र्नौ निरन्तराः । न समात्र परास्थिता कला" इति वैतालीयादिलक्षणयुक्ते "पर्य्यन्ते यौ तथैव शेषमौपच्छन्दसिकं सुधीभिः" वृ०र०उक्ते २मात्रावृत्त भेदे न० । "पुष्पिताग्राभिधं केचिदौपच्छन्दसिकं विदुः" इत्युक्ते २पुष्पिताग्राख्यवर्णवृत्तछन्दोभेदे च ।

औपजानुक त्रि० उपजानु जानुसमीपे प्रायभवः ठक् । जानुसमीपपर्य्यन्तव्यापके "पाणौ यस्यौपजानुकौ" भट्टिः ।

औपतस्विनि पु० उपतस्विनस्यापत्यम् इञ् । उपतस्विनस्यापत्ये रामनामके ऋषौ । "तदुक्तोयाच राम औपतस्विनिः" शत०ब्रा० ४,६,१,७ ।

औपदेशिक त्रि० उपदेशेन जीवति वेतना० ठक् । उपदेशोपजीविनि । उपदेशेन प्राप्तः वा० ठक् । २उपदेशेन प्राप्ते च

औपद्रविक त्रि०उपद्रवमधिकृत्य कृतोपन्थः ठक् । उपद्रवाधिकारेण सुश्रुतान्तर्गते पन्थभेदे स च "अथात औपद्रविकमध्यायं व्याख्यास्यामः" इत्युपक्रम्य उत्तरतन्त्रान्तर्गतः सुश्रुतकृतः ।

औपद्रष्ट्र पु० उपद्रष्टृ+स्वार्थे अञ् । पुरुषमेधीये देवभेदे । "विविधं क्षत्तारम्, औपद्रष्ट्र्यायानुक्षत्तारम्" यजु०३०,१२ । तत्र तद्धेयेनानुक्षत्ता द्वारपालसेवकः आलभ्यत्वेन विहितः ।

औपधर्म्य उपधर्म्म+स्वार्थे चातुर्व० ष्यञ् । उपधर्म्मे । "लोकान् व्रतां मतिविकोहमतिप्रलोभं वेषं विधाय बकवन्नाशत औपधर्म्याम्" भाग० २,७,७८ ।

औपधेनव पु० उपगताधेनुरस्य तस्यापत्यम् अण् । सुश्रुतोक्ते धन्वन्तरिं प्रति प्रश्नकारके ऋषिभेदे । "काशीराजं दिवोदासं धन्वन्तरिमौपधेनवप्रैतरणौरभ्रपुष्कलावतकरवीर्य्यगोपुररक्षितसुश्रुतप्रभृतयः ऊचुः । "औपधेनवमौरभ्रं सौश्रुतं पौष्कलावतम्" सुश्रु० । [रथाङ्गे ।

औपधेनव न० उपधीयते इत्युपधिः रथाङ्गं ततः स्वार्थे ढक् ।

औपनायनिक त्रि० उपनयनं प्रयोजनमस्य ठक् अनुप० द्विपदवृद्धिः कुक्कू० वस्तुतः उपनायनशब्दोऽपि उपनयनार्थे प्रायुक्तः ततः ठक् इत्येव न्याय्यम् । उपनायनप्रयोजनके विधाने "एष प्रोक्तोद्विजातीनामौपनायनिको विधिः" मनुः । उपनायनाय हितः ठक् । २उपनयनसाधने च । ३ब्रह्मचर्य्यविधौ काल औपनायनिकः परः" याज्ञ० ।

औपनासिक त्रि० उपनासे भवः ठञ् स्त्रियां ङीप् । नासासमीपभवे । "छिद्वादिव नासायां तासाद्यौपनासिकाच तस्तस्ताः परिक्षरेत्" सुश्रुतः ।

औपनिधिक न० उपनिधिरेव स्वार्थे ठक् । "वासनस्थमनाख्याय कृत्स्नेऽन्यस्य यदर्प्यते । कृत्यं तदौपनिधिकं प्रतिदेयं तथैव तत्" याज्ञ० विश्वरूपनिधिशब्दे दृश्या ।

औपनिषत्क त्रि० उपनिषदा तदुक्तोपदेशेन जीवति वेतना० ठक् । उपनिषदुक्तोपदेशेनोपजीविनि ।

औपनिषद् पु० उपनिषत्सेवाभिव्यक्ते यैश्चिह्नैरण् । उपनिषन्मात्रवेद्ये परमात्मनि । "तत्त्वौपनिषदं पुरुषं पृच्छामि" बृ०उ० । उपनिषत् ब्रह्मविद्या तस्या इदम् । २ब्रह्मप्रतिपादके वाक्यादौ स्त्रियां ङीप् । "विविधाश्चौपनिषदीरात्मसंस्थितये श्रुतीः" मनुः । उपनिषद् भव प्रकाश्यः तस्याख्यानो पन्थोवा अगवना० अण् उपनिषत्प्रकाश्ये २ब्रह्मणि तस्याख्याने ३पन्थे च ।

औपनीविक त्रि० उपनीवि नीविसमीपे प्रायभवः ठक् । नीविसमीपे प्रायभवे "औपनीविकवस्त्रञ्च किञ्च स्वं वल्लभस्य करमालकराभ्याम्" माघः "वस्त्रोदुर्वहरत्नार्थमर्द्धेनौपनीविकः" भट्टिः ।

औपपक्ष्य त्रि० उपपक्षं वाक्यसूत्रं तत्रेदम् अञ् । वाक्यमूलसम्बन्धिनि । "तस्मादिमाः प्रजा लोभया आयन्ति यक्षादासां पुनरिव ब्रह्मञ्ज्योपपक्ष्याणि दुर्वीरयानि जायन्ते" शत०ब्रा० ११,४,१,६ । "उपपक्षं वाक्यसूत्रं तत्सम्बन्धीनि" भा० ।

औपपत्तिक त्रि०उपपत्त्या कल्पितम् ठक् । उपपत्त्या कल्पिते युक्ते । "औपपत्तिकमाहारं प्रयच्छन्तीति भारत ! भा० अनु०९२अ० ।

औपपातिक त्रि० उपपातेन उपपातकेन गोवधादिना संसृष्टः ठक् । उपपातकैः संसृष्टे "पिशङ्गिष्टं पतितं षण्ढो यश्च स्यादौपपातिकः" नार० "यश्च स्यादुपपातकीति" प्रकाशदत्त पाठः । [ब्राह्मोरपत्ये

औपबाह्वि पुंस्त्री उपबाह्वोरपत्यम् ब्राह्मा० इञ् । उपबाह्वोरपत्ये

औपभृत त्रि० उपभृता पात्रेण संस्कृतः ठक्। १उपभृत्पात्रेण संस्कृते घृतादौ। "ब्रह्मानुज्ञातोऽनुयाजैश्चिभिरग्नौपभृतं समानीय" कात्या० ३,५,२ अध्वर्यु रौपभृतमाज्यं स्रुवेण जुहूां समानीय" कर्कः। तस्येदम् अण्। २उपभृत्सम्बन्धिनि "औपभृतासादनम्" कात्या० ५,४,२८, औपभृतमुपभृत्सम्बन्धासादनम्" कर्कः। "सप्त श्रोत्रियौपभृतानि" कात्या० ६,७,७।

औपमन्यव पुंस्त्री उपमन्योरपत्यं विदा० अञ्। उपमन्योरपत्ये स्त्रियां ङीप्। "प्राचीनशालऔपमन्यवः सत्ययज्ञः पौलुषिः"। "औपमन्यव! किं त्वमात्मानं सुपाख्यु?" इति च छा०उ०।

औपमिक त्रि०उपमया निर्वृत्तः ठक्। उपमयानिर्वृत्ते। "अभ्रात्मकाया इत्यनिर्वृत्ते औपमिकः" "मधु सोमस्त्वौपमिकं माद्यतेः" "प्रीपिलिकामध्येत्यौपमिकं ।।५।।शुक्ला प्रेक्षतेर्गतिक :" इति च निरु०।

औपम्य न० उपमा+चातु स्वार्थे ष्यञ्। १उपमायाम् २सादृश्ये "प्राणा यथा सोऽभीष्टा भूतानामपि ते तथा। आत्मौपम्येन सर्वत्र यां कुर्वन्ति साधवः" हितोप०। "आत्मौपम्येन सर्वत्र सीता "सा पूर्णा यदि सामान्यधर्म्म औपम्यवाचि च"। "औपम्यवाचिनो लोपसमासे तद्धिते द्विधा" इति च सा०द०।

औपयज त्रि० उपयजदृदम् अण्। उपयजः सम्बन्धिनि उपवट् च तच्छब्दे दर्शितः। "मार्जिते प्रेष्यत्यग्नौपयजानङ्गारानाहरति" कात्या० ६,६,७,

औपयिक त्रि० उप+अय-घञ् उपायेन लब्धः ठक् तुक्च। १उपायलब्धे, २युक्ते न्यायागतवस्तुनि च। "एतत्तव महाराज! पुत्रेषु तेषु चैव हि। दृत्तमौपयिकं मन्ये भीष्मेण च भारत!" भा०आ०२०४अ०। स्त्रियां ङीप्। "नचैवौपयिकी भार्य्या . नृषी जपया तव" भा० व० २८०अ० "यदत्रौपयिकं कार्य्यं तच्चिन्तयितुमर्हसि" भा०उ० १७७ अ०। उपायएव विनया० स्वार्थे ठक् तुक्च। २उपाये पु०। "शिवमौपयिकं नरीवर्त्तीम्" किरा०। "औपयिकम् उपायम्" मल्लि०।

औपयौगिक त्रि० उपयोगः प्रयोजनमस्य ठञ्। उपयोगनिमित्ते "अथातः स्तेयौपयौगिकं चिकित्सितं व्याख्यास्यामः" सुश्रु० स्त्रियां ङीप्।

औपरिष्ट त्रि० उपरिष्टात् भवः अण्। अमेरुकृततत्रिलेभ्य एव"वार्त्ति०नियमात् न लुप् टिलोपः। उपरिष्टाद्भवे।

औपरोधिक त्रि० उपरोधः प्रयोजनमस्य ठक्। १उपरोधनिमित्ते २यंत्रणे दण्डे पु० हेमच०।

औपल त्रि० उपलादागतः शुल्कादिका० अण्। १आयस्थानरूपोपलादागते। उपलस्येदम् अण्। २प्रस्तरसम्बन्धिनि "यथा प्लवेनौपलेन निमज्जेत्तुदके तरन्" मनुः।

औपवसथिक त्रि० उपवसथे भवः ठञ्। उपवसथकर्त्तव्ये कर्म्मादौ। उपवसथस्य यामः यागपूर्वदिवसस्य उपवसथशब्दे उक्तः। ष्यञ् औपवसथ्य तत्रार्थे। "अग्निप्रणयनीया औपवसथ्येऽनियमः" आश्व०श्रौ० ४,१,२६। स्वार्थे ष्यञ्। "यागपूर्व्वदिने च। "औपवसथ्येऽह्नि" स्मृतिः।

औपवस्त न० उपवस्तमेव प्रज्ञा० अण्। १उपवस्ते उपवस्तुः कर्म अण्। २उपवासे। उपवस्ता प्राग्रोऽस्येति विग्रहे "व्रतोरण्" पा० व्रतप्रदर्शनं प्राग्रादिकमेव। तत्र व्रतशब्दस्यैव ग्रहणं न तु व्रदन्तस्य तथात्वे व्रतोऽण् इत्येव स्यात् आर्त्तवमित्युदाहरणं चासङ्गतम् इति बोध्यम् "मासात् मधुमसूरांश्च वर्ज्यन्नेदौपवस्तकात्" स्मृतिः

औपवास त्रि० उपवासे दीयते व्युष्टा० अण्। उपवासव्रते दीयमाने द्रव्ये।

औपवासिक त्रि० उपवासे साधु गुडा० ठञ्। १उपवासे साधौ। तत्र प्रभवति सन्नाया० ठञ्। २उपवाससमर्थे च

औपवास्य न० उपवास+चातुर्व० स्वार्थे ष्यञ्। उपवासे "सङ्कल्पेन यदाप्नोत पीत्वा वारि समाहितः। औपवास्यं तदाऽऽप्नोद्राघवः सह सीतया" रामा०।

औपवाह्य पु० उपवाह्य एव स्वार्थेऽण्। उपवाह्यके रथादौ "औपवाह्यः कुबेरस्य सार्वभौम इति स्मृतः" रामा०। सर्वासु भूमिषु विदितः अण्। सार्वभौम इत्यर्थः।

औपविन्दवि पुंस्त्री। उपविन्दोरपत्यम् गर्गा० इञ्। उपविन्दोरपत्ये स्त्रियां ङीप्। [वेदेनोपजीविनि।

औपवेशिक त्रि० उपवेशेन जीवति वेतना० ठञ्। उप-

औपश्लेषिक त्रि० उपश्लेषेण निर्वृत्तः ठक्। एकदेशेन सम्बन्धे आधारभेदे "औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधार स्त्रिधा" वि०कौ०।

औपसंक्रमण त्रि० उपसंक्रमणे देये दीयते व्युष्टा० अण्। उपसंक्रमणे देये स्त्रियां ङीप्।

औपसद पु० उपसदग्नेरग्निरिति विसृष्टा० अण्। उपसदग्नौ १स्थाधारे २अनुवाके च। उपसत् समीपस्थानं तदस्य प्रज्ञा० अण्। १हविषे "प्रजापतिकामस्यौपसदः" कात्या० २२,१०,१२। "औपसदोहविः" कर्कः

औपसर्गिक त्रि० उपसर्गाय प्रभवति सत्ताया० ठक्। उपसर्गसमर्थे। स च सुश्रुतोक्तः रोगभेदः यथा "व्याधिविशेषास्तु प्रागभिहिताः सर्व एवैते त्रिविधाः साध्या याप्याः प्रत्याख्येयाश्च तत्रैतान् भूयस्त्रिधा परीक्षेत त्रिसमाधौषधर्गिकः प्राक्चयोऽन्यतमश्च इति तत्रौपसर्गिको यः पूर्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपद्रवजाति स तन्मूल एवोपद्रव उच्यते" इति। वैद्यकान्तरे तु "यक्ष्मोऽतुल्योभयातेन यदि पित्तानुगो भवेत्। खेदज्वरानुषक्तस्तदा भवति मानवः। प्रतिलोमः पुनस्तेन ज्वरस्तमनुधावति तत्तुल्यत्वात्। औपसर्गिक एवायमधिपाति उदाहृतः" इत्युक्ते श्वासादिसन्निपाते च। २देवादिष्ट ऋचि यष्टव्यादौ। ३उपसर्गसम्बन्धिनि त्रि० यद्ग्रहसङ्गमः। तन्मूलं ज्ञानम् उपसर्गसम्बन्धित्वेन ठकोऽत्यन्तात् बोधान्तराभावात्। शौचे उपासने।

औपस्थान त्रि० उपस्थान मोक्षाय हितः० च। उपस्थान-

औपस्थानिक त्रि० उपस्थानेन सेवनेन जीवति वेतना० ठक्। सेवनोपजीविनि।

औपस्थ्य न० उपस्थस्य भावः कर्म्म वा ष्यञ्। उपस्थव्यापारसाध्ये मैथुने। "औपस्थ्यजैह्म्यावर्षवातात्" भाग० ७,१५,१६ "औपस्थ्यजैह्म्यं वस्तु मन्यमानः" भाग० ७,६,१४। औपस्थ्यं मैथुनं जैह्म्यात् शुष्कम्" श्रीधरः।

औपहारिक त्रि० उपहाराय साधु ठक्। उपहारार्थे द्रव्ये "परमान्नेन वो दद्यात् पितृभ्यश्चौपहारिकम्" भा० अनु०९०,२० श्लो०।

औपाधिक त्रि० तेन विहितः वा० ठञ्। उपाधिज्ञाते स्त्रियां ङीप् "ऋठ शुद्धेतरस्थाम शैव संज्ञेति औपाधिकी संज्ञा" नैमित्तिको पारिभाषिकोपाधिकश्चापि तद्विदा" शब्दर० तुच्छस्य वस्तुनो औपाधिक एव न नैमित्तिकः नापि तात्त्विकः तुच्छेतत् सां०सू०भाष्ययोर्मिश्रोक्तेः यथा "न स्वभावतो बद्धस्य मोक्षसाधनोपदेशविधिः" सू०

"दुःखात्यन्तनिवृत्तेर्मोक्षत्वोक्तेस्तथा बन्धोऽत्र दुःखयोगएव तस्य बन्धस्य पुरुषे न स्वाभाविकत्वं बन्धस्वभावत्वस्य श्रुतिषु यतो न स्वभावतो बद्धस्य मोक्षाय साधनोपदेशस्य विधिरनुष्ठानं नियोज्यानां घटते। न च श्रुतेः स्वाभाविकदौरूप्यात्मोक्षः सम्भवति। स्वाभाविकस्य यावद्द्रव्यभावित्वादित्यर्थः। तदुक्तमीश्वरगीतायाम्।

"बद्धात्मा सहितोऽत्यन्तो विकारी स्यात् स्वभावतः। न हि तस्य भवेन्मुक्तिर्जन्मान्तरशतैरपि"।

"यस्मिन् सति कारणविरुद्धाहितत्वो बन्धोत्पत्तौ न भवति तस्य तत् स्वाभाविकमिति स्वाभाविकत्व लक्षणम्। ननु सर्वदोषबन्धापनेर्दुःखस्य स्वाभाविकत्वमहेव नास्तीति चेत् नित्यचैतन्यत्वेन चित्तस्य दुःखस्वभावत्वेऽपि सत्त्वाधिक्येनाभिभवात् सदा दुःखानुपलब्धिवदात्मनोऽपि तदनुपलब्धिसम्भवात्। दुःखस्वाभाविकत्वादिभिर्बौद्धैश्चित्तस्वाभाव्यमुपगमात्। अतएवात्मनाशादेव मोक्षोऽस्त्विति चेत्। अहं बद्धो मिथ्याज्ञः स्वाभिति बन्धस्वाभाविकारणत्वेनैव मोक्षस्य पुरुषार्थत्वादिति। भवत्वनुष्ठानं तेन किमित्यत आह" भा०।

"स्वाभाविकत्वादित्यनुष्ठानवैयर्थ्यमाशङ्क्य" सू०।

"स्वाभाविकं यावद्द्रव्यभावित्वान्मोक्षोऽत्यन्तमेव तत्साधनोपदेशस्तेरनुष्ठानवैयर्थ्यमाशङ्क्य खादितत्पूर्वः भा०। ननु श्रुतिबलादेवानुष्ठानं स्यात् तत्राह।

"नायमुपदेशविधिरुपदिष्टेऽप्यनुपदेशः" सू०।

"नायमुपदेशविधिः फलाद्योपदेशवदनुष्ठानं सम्भवति। यतः उपदिष्टेऽपि विधिते स्वयमुपाये स उपदेशो न भवति। किन्तूपदेशाभास एव "बाधितमर्थं बोधोऽपि न बोधयतीति" न्यायादित्यर्थः" भा०। अत्र शङ्कते।

"शुक्लपटबीजवत्तु" सू०।

"ननु स्वाभाविकस्याप्युपायो दृश्यते। यथा शुक्लपटस्य स्वाभाविकं मौढ्यं रागेणापनीयते। यथा च बीजस्य स्वाभाविकमङ्कुरयत्किरणेनापनीयते। अतः शुक्लपटबीजयोश्च स्वाभाविकस्य बन्धस्योपायः पुरुषे बन्धवतीं तद्वदेव तत्साधनोपदेशः स्यादिति चेदित्यर्थः" भा० समाधत्ते।

"यत्तु प्रवाहनुबन्धाभ्यां नायमुपदेशः" सू०।

"उक्तदृष्टान्तयोरपि नायमुपदेशः स्वाभाविकबोधस्य बोधानां भवति। यतः यत्तु प्रवाहनुबन्धाभ्यां दृष्टान्तद्वये हि मौढ्याद्यपरिभवनिरोधाभावयोर्न भवतः न तु मौढ्याङ्कुरयत्नयोरभावो भवति। रजकादिव्यापारैर्मौढ्यस्य कृत्रिमत्वात् शुक्लपटबीजयोः पुनः मौढ्याङ्कुरयत्नाभावाभ्यादित्यर्थः। नन्वेवं पुरुषेऽपि दुःखयन्निवृत्तिरोधाभाव एव मोक्षोऽस्तिति चेत् दुःखात्यन्तनिवृत्तेरेव मोक्षे पुरुषधर्मत्वानुपपत्तात् श्रुतिरुद्धत्वात् नहि दृष्टान्तयोरिव तिरोभावमात्रमत्रेति। किन्तु दुःखयन्निवृत्तिरोधाभावमात्रस्य मोक्षत्वे कदाचिद्योगीश्वरकृपाद्यादिना बन्धहेतुभूतधर्माधर्मयोरपि दग्धबीजवत् सञ्चितेऽपि कर्म्मणि फलजनकत्वाभावेन

त्तिरिति" भा० । स्वभावतो बन्धं निराकृत्य निमित्तेभ्योऽपि बन्धमपाकरोति सूत्रजातेन । पुरुषे दुःखस्य नैमित्तिकत्वे ज्ञानाद्युपायोच्छेदत्वं न घटेत । अनागतावस्थलक्षणदुःखस्य चावहेयत्वादिति न्यायेन नैमित्तिकत्वं निराक्रियते ।

"न कालयोगतो व्यापिनो नित्यस्य सर्वसम्बन्धात्" सू० ।

"नापि कालसम्बन्धनिमित्तकः पुरुषस्य बन्धः कुतः ? व्यापिनो नित्यस्य कालस्य सर्वावच्छेदेन सर्वदा सत्त्वात् सत्त्वसत्त्वपुरुषसम्बन्धात् सर्वावच्छेदेन सदा सकलपुरुषाणां बन्धापत्तेरित्यर्थः । अत्र च प्रकरणे कालदेशधर्मादीनां निमित्तसामान्यं नाश्रयते श्रुतिस्मृतियुक्तिभिः सिद्धत्वात् । किन्तु यन्नैमित्तिकत्वं प्राकृतरूपादिवन्निमित्तजन्यत्वं तदेव बन्धे प्रतिषिध्यते पुरुषे बन्धस्यौपाधिकत्वाभ्युपगमात् । ननु कालादिनिमित्तकत्वेऽपि सहकार्यन्तरसव्यपेक्षत्वाभ्यां व्यवस्था स्यादिति चेत् एवं सति यत्संयोगे सतीत्यस्य बन्धस्यैव सहकारिणि कालत्वोन्नयो युक्तः पुरुषे बन्धव्यवहारस्यौपाधिकत्वेनाप्युपपत्तेरिति कृतं नैमित्तिकत्वेनेति" भा० "न देहयोगतोऽमलात्" सू० ।

"देहयोगतोऽपि न बन्धः कुतः ? अमलात् पूर्वसूत्रोक्तान्मुक्तावस्थसर्वपुरुषसम्बन्धात् सूत्रस्थापि बन्धापत्तेरित्यर्थः" भा० ।

"नावस्थातो देहधर्मत्वात् तथाः" सू० ।

"सङ्गातविशेषरूपतास्था देहरूपा यावस्था न तन्निमित्ततोऽपि पुरुषस्य बन्धः । कुतः ? तथा अवस्थाया देहधर्मत्वात् अचेतनधर्मत्वादित्यर्थः । अन्धधर्मस्य साक्षाद्व्यबन्धकत्वे ऽतिप्रसङ्गात् । सूत्रस्थापि बन्धापत्तेरित्यर्थः" भा० । ननु पुरुषस्याप्यवस्थायां किं बाधकं तत्राह ।

"असङ्गोऽयं पुरुष इति" सू० ।

"इति यस्मो हेत्वर्थे । पुरुषस्यासङ्गत्वादवस्थाया देहजात्यधर्मत्वमिति पूर्वसूत्रे योज्यम् । पुरुषस्यावस्थाकृतविकारलोकारे विकारहेतुसंयोगाभावः सङ्गः प्रवक्ष्यतेति भावः । असङ्गत्वे च श्रुतिः । "स यदत्र किञ्चित् पश्यत्यनन्वागतस्तेन भवति असङ्गो ह्ययं पुरुष"इति । सङ्गश्च संयोगजात् न भवति । कालदेशसम्बन्धस्य पूर्वसूत्रितत्वात् । श्रुतिस्मृतिषु पद्मपत्रस्थजलेनेव पद्मपत्रस्थावस्कृतावाः पुरुषावस्कृतायाः दृष्टान्तसाम्यस्याच्च" भा० ।

"न धर्मस्यान्धधर्मत्वादतिप्रसङ्गेन" सू० ।

"न हि विहितनिषिद्धकर्मजापि पुरुषस्य बन्धः धर्माधर्मजात्मधर्मत्वात् । अन्धधर्मेण साक्षादन्यस्य बन्धे च मुक्तस्यापि बन्धापत्तेः । ननु स्वरूपोपाधिकधर्मभ्यां बन्धाङ्गीकारे नायं दोष इत्याशयेन हेत्वन्तरमाह । अतिप्रसङ्गेनेति । प्रकृत्यादावपि दुःखयोगरूपबन्धापत्तेरित्यर्थः । सङ्कार्यान्तरविलम्बतो विलम्बकल्पनं च प्रागेव निराकृतं न कालयोगत इत्यादिसूत्रे इति" भा० ।

नन्वेवं दुःखवद्धर्मोऽपि बन्धः कर्मसाक्षाधिकरणाद्यनुरोधेन चित्तस्थोवास्तु दुःखस्य चित्तधर्मताया सिद्धत्वात् । किमर्थं पुरुषस्यापि कल्प्यते बन्धस्तत्राह शङ्कायामाह "विचित्रभोगानुपपत्तिरन्यधर्मत्वे" सू० ।

"दुःखयोगरूपबन्धस्य चित्तमात्रधर्मत्वे विचित्रभोगानुपपत्तेः । पुरुषस्य हि दुःखयोगं विनापि दुःखसाक्षात्कारात्मकभोगसौकार्ये सर्वपुरुषदुःखादीनां सर्वपुरुषभोग्यता स्यात्विशेषकाभावात् । ततश्चायं दुःखभोक्तायं च सुखभोक्तेत्यादिरूपभोगवैचित्र्यं नोपपद्येतेत्यर्थः । अतो भोगवैचित्र्योपपत्तये भोगनियामकतया दुःखादियोगरूपो बन्धः पुरुषेऽपि स्वीकार्यः । स च पुरुषे दुःखयोगः प्रतिबिम्बरूप एवेति प्रागेवोक्तम् । प्रतिबिम्बस्य स्वोपाधिवृत्तेरेव भवतीति न सर्वपुंसां सर्वदुःखभोगः इति भावः । "चित्तवृत्तिभोगे च पुरुषस्यानादिः स्वस्वामिभावः बन्धश्च हेतुरिति"योगभाष्यादयं सिद्धान्तः सिद्धः । चित्ते च पुरुषस्य स्वत्वं स्वभृत्यवृत्तिवाक्यात्सिद्धमिति । यत्र तु चित्तस्थैव बन्धभोगौ न पुरुषस्येति श्रुतिस्मृतिषु गीयते तद्विम्बरूपदुःखयोगरूपं पारमार्थिकं बन्धमादाय बोध्यम्"भा० । सामान्यात् प्रकृतिनिमित्तकत्वमपि बन्धस्योपाददीत ।

"प्रकृतिनिबन्धनाच्चेत्र तथा अपि पारतन्त्र्यम्" सू० ।

"ननु प्रकृतिनिमित्तात्मुक्तो भवतीति चेत्र तत्रापि तथा अपि बन्धकत्वे संयोगपारतन्त्र्यमुत्तरत्र वक्ष्यमाणमस्ति । संयोगविशेषं विनापि बन्धकत्वे प्रकृत्यादावपि दुःखसम्बन्धप्रसङ्गादित्यर्थः । प्रकृतिनिबन्धना चेदिति पाठे तु प्रकृतिनिबन्धना चेद्भवतीत्यर्थः" भा० । अतो बन्धरहितस्या प्रकृतिर्बन्धकारणं सम्भवेत् तस्मादेव संयोगविशेषादौपाधिको बन्धोऽग्निसंयोगात्तप्तौष्ण्यवदिति खण्डितालम्बनेनैव प्रकृत्यालम्बनेनैव एवावधारयति ।

"न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगाद्वा" सू० ।

"तस्मात् तद्योगाद्वा प्रकृतिसंयोगं विना न पुरुषस्य तद्योगो बन्धसम्बन्धो वेति । अपि तु स एव बन्धहेतुः । बन्धस्यौपाधिकत्वाभाव नञ्द्वयेन सङ्गोक्तिः । यदि हि बन्धः

प्रकृतिसंयोगजन्यः स्यात् पाकजरूपवत् तदा तद्वदेव तद्वियोगेऽप्यनुवर्त्तेत । न च हितोपदेशादेर्दुःखनाशकत्वं कस्यां कारणनाशस्य कार्यनाशकतायाः कृप्तत्वेन तेनैवोपपत्तावधिकाऽकल्पनात् । दृष्टिर्हि दुःखादेरुपादानम् । अतो दीपशिखावत् क्षणभङ्गुरायां वृत्तेरानुविनाशित्वे नैव तद्वर्त्तिनां दुःखेच्छादीनां विनाशः सम्भवतीति । अतः प्रकृतिवियोगे बन्धाभावादौपाधिक एव बन्धो न तु स्वाभाविको नैमित्तिको वेति । तथा तत्संयोगनिवृत्तिरेव साक्षाज्ज्ञानोपाय इत्यपि वक्रोक्तिफल्गुकम् । तथा च स्मृतिः

"यथा ज्वलदुल्काहस्तो नष्टं विच्छिद्य रक्षते ।
तथा सदोषप्रकृतिविच्छिन्नोऽयं न योचति" ।

वैशेषिकाणामिव पारमार्थिको दुःखयोग इति भ्रमो मा भूदित्येतदर्थं निलेत्यादि । यथा स्वभावशुद्धस्य स्फटिकस्य रागयोगो न जपायोगं विना घटते तथैव नित्यशुद्धादिस्वभावस्य पुरुषस्योपाधिसंयोगं विना दुःखसंयोगो न घटते अतो दुःखादयसम्भवादित्यर्थः तथाह शौरे

'यथा हि केवलो रक्तः स्फटिको लक्ष्यते जनैः" ।
रक्तकाद्युपधानेन तद्वत् परमपूरुषः" ।

नित्यत्वं कालानवच्छिन्नत्वम् । शुद्धादिस्वभावत्वं च नित्यशुद्धत्वादिकम् । तत्र नित्यशुद्धत्वं सदा पापपुण्यसम्बन्धत्वम् । नित्यबुद्धत्वमखण्डचिद्रूपत्वम् । नित्यमुक्तत्वं सदा पारमार्थिकदुःखायुक्तत्वम् । प्रतिबिम्बरूपदुःखयोगस्यपारमार्थिको बन्धः इति भावः । आत्मनो नित्यशुद्धत्वादौ च स्मृतिः । "अयमात्मा सनातनो नित्य शुद्धः बुद्धः सदा मुक्तो निरञ्जनो विभुरित्यादिः" भा० ।

अयमेव पक्षो वेदान्तिभिरभ्युपगतः 'तदुगुणसारत्वादित्यादि" भा०सूत्रभाष्ये 'न हि बुद्धेर्गुणैर्विना केवलस्यात्मनः संसारित्वमस्ति बुद्ध्युपाधिधर्माध्यासनिमित्तं हि कर्तृत्वभोक्तृत्वलक्षणं संसारित्वमकर्तुरभोक्तुश्चासंसारिणोनित्यमुक्तस्य सत आत्मनः" इति "यावदात्मभावित्वादित्यादि" भा०सूत्रभाष्ये च "यावदेव चायं बुद्ध्युपाधिसम्बन्धस्तावदेव चास्य जीवत्वं संसारित्वञ्च । परमार्थतस्तु न जीवोनाम बुद्ध्युपाधिपरिकल्पितस्वरूपव्यतिरेकेण"इति च संसारित्वं बुद्ध्युपाधिसंबन्धाधीनतयौपाधिकत्वोक्तेः ।इदांस्तु विशेषः एतन्मते बन्धस्येव जीवभेदस्यापि औपाधिकत्वं तदपि भा०सू०भाष्ययोर्निर्णीतं यथा "अतएव चोपमा(जल)सूर्यकादिवत्"सू० "अतएव चायमात्मा चैतन्यस्वरूपोनिर्विशेषो वाङ्मनसातीतः परमतिभेदेनोपदिश्यते अतएव चास्योपाधिनिमित्तामपारमार्थिकीं विशेषवत्तामभिप्रेत्य जलसूर्यकादिवदित्युपमोपादीयते मोक्षशास्त्रेषु 'यथाह्येष ज्योतिरात्मा विवस्वानपोभिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपोदेवः क्षेत्रेष्वेवमजोऽयमात्मेति" । "एकएव तु भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवदिति चैवमादिषु । अत्र पत्यवस्थीयते" भा० । "अम्बुवदग्रहणात्तु न तथात्वम्"सू० । 'न जलसूर्यादिदृष्टान्तत्वमिहोपपद्यते तद्दर्शनात् । सूर्यादिभ्योहि मूर्त्तेभ्यः पृथगभूतं विप्रकृष्टदेशं मूर्त्तञ्च जलं दृश्यते तत्र युक्तः सूर्यादिप्रतिबिम्बोदयोनत्वात्मा मूर्त्तः नचात्मनः पृथग्भूता विप्रकृष्टदेशा उपाधयः, सर्व्वगतत्वात् सर्व्वान्यत्वाच्च तस्मादयुक्तोऽयं दृष्टान्त इति । अत्र प्रतिविधीयते । भा० "दृङ्मात्रत्वमात्मनोऽभ्युपगम्यते तस्मादुभयसामञ्जस्यादेवम्"सू० । युक्त एवत्वयं दृष्टान्तो विवक्षितांशसम्भवात् न हि दृष्टान्तदार्ष्टान्तिकयोः क्वचित्कस्चिद्विवक्षितमंशं मुक्त्वा सर्व्वसाम्यं कोऽपिदर्शयितुं शक्यते सर्व्वसाम्ये हि दृष्टान्तदार्ष्टान्तिकभावोच्छेद एव स्यात् । न चेदं स्वमनीषया जलसूर्य्यकादिदृष्टान्तप्रणयनम् । याज्ञवल्क्यीयस्य स्वस्य प्रयोजनमात्मसंपन्यस्यते । किपुनरत्र विवक्षितं साम्यमिति ? तदुच्यते दृङ्मात्रसमात्मेति । जलगतं हि सूर्य्यप्रतिबिम्बं जलबुद्धौ वर्द्धते जलह्रासे ह्रसते जलचलने चलति जलभेदे भिद्यते इत्येवं जलधर्म्मानुविधायि भवति न तु परमार्थतः सूर्य्यस्य तथात्वमस्ति एवं परमार्थतोऽविक्रियमेकरूपमपि सद्बुद्ध्यादेह्याद्युपाध्यन्तर्भावाद्बुद्धत्वादीन् दृङ्मात्रत्वादीन् एवमुभयोर्दृष्टान्तदार्ष्टान्तिकयोः सामञ्जस्यादविरोधः"भा० । "दर्शनाच्च"सू० । "दर्शयति च श्रुतिः परस्यैव ब्रह्मणोदेहादिषूपाधिष्वनुप्रवेशम् "पुरः स चक्रे द्विपदः पुरश्चके चतुष्पदः । पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति" "अनेन जीवेनात्मनानुप्रविश्येति" च तदुक्तमेतत्' ।

उपाधिरेव विनया० स्वार्थे ठञ् । साध्यसमव्यापकत्वे सति साधनाव्यापकत्वरूपे प्रायुक्ते उपाधौ "अनौपाधिको व्याप्तिः', अनुमा० चि० ।

औपाध्यायक त्रि० उपाध्यायादागतः वुञ् । उपाध्यायाद्वुञ् **औपानह** पु० उपानहे अवम् । "तदर्थं विकृतेः प्रकृतौ" पा० इत्यधिकारे अण् । उपनहूपविकारसाधने तत्प्रकृतौ ।छत्रे २चर्म्मणि न० ।

औपावि पुंस्त्री उपावस्थापत्यम् इञ् । उपावसेरपत्ये

"तत्र औपासनेन आनन्तुतायनेन प्रत्यवरुद्धम्" शत० ब्रा० ५,१,१,५। स्त्रियां ङीप्।

औपासन त्रि० उपास्यते प्रतिदिनमित्युपासनो गृह्योऽग्नित्वात् भवः अण्। गृह्याग्नौ कर्त्तव्ये सायंप्रातर्होमादौ कर्म्मणि। गृह्याग्निश्च विवाहाग्निः। तत्र कर्त्तव्यं दर्शितं "औपासनसूत्रेः" कात्या० १,१,२, "यदुक्तम् वैतानिकेष्वेवाग्निषु श्रौतं स्मार्तं च कर्त्तव्यमिति तत्र कुतः? औपासनसूत्रेः यत आहिताग्नेरयौपासनः श्रूयते पिण्डमेधे "अहारेयौपासनं निरस्यतीति" यदि स्मार्तमपि वैतानिकेष्वेव क्रियते तदा आहिताग्नेः पिण्डमेधे औपासनदर्शनं न स्यात् अस्ति च। तस्मात् स्मार्त्तमौपासने कर्त्तव्यमिति तथा च स्मृतिः 'स्मार्त्तं कर्म विवाहाग्नौ कुर्वीत प्रत्यहं गृही। दायकालाकृते वापि श्रौतं वैतानिकाग्निषु इति"। "तस्मिन् गृह्याग्नौ लाघवस्मरणाच्च"। गृह्यम् हितं गृह्यम् गृह्यस्य इध्मसंवर्त्तते तस्मिन्नित्यावश्यं। अतश्च यत्किञ्चिद्ध्मसंवर्त्तितं कर्म यानिकं पौत्तिकं व्रताङ्गहोमादिकं स्मार्त्तं तत् सर्वमावश्यकोऽग्नौ भवतीति। तथा च खादिरगृह्यसूत्रकारिकायाम् "होमानात्मार्थपत्न्यर्थान् ऋत्विजौपासने न च। परार्थानृत्विग्भ्योऽग्नौ स चान्ते लौकिको भवेत्" अत एव आश्वायनः (कर्मप्रदीपे) "न खेऽग्नावन्यहोमः स्यात्सूत्रकारैकां समिदाहुतिम्। स्वकर्म्म सत्क्रियार्थस्य यावज्जीवं प्रजायते। अग्निसु नामधेयादौ होमे सर्व्वत्र लौकिकः। न हि पिता समाधत्ते पुत्रस्य भवति क्वचित्"। अतश्च सीमन्तोन्नयनमपि स्मार्ताग्नावेव कार्य्यम्। अपिच आधानेनोत्पादितानां गार्हपत्यादीनामग्नीनाम् प्रयोजनमपेक्षायां सत्यां "गार्हपत्ये हवींषि अपयत्याहवनीये जुहोति दक्षिणाग्नावन्वाहार्य्यं पचतीति" प्रत्यक्षवचनलिङ्गैरेव प्रयोजनैर्निरूक्तानाम् न सामर्थ्यमात्रेणोत्पादनस्य विनियोगः कल्पयितुं शक्यते"। तस्मात् स्मार्त्तान्यौपासन एव कार्य्याणि इति कर्क।

विधानपा० तस्यारम्भकालादि निरूपितं यथा गृह्यपरिशिष्टे "अथ नित्यौपासनं तस्य सायमारम्भः" इति। यौगकोऽपि यस्मिन्नृक्ष विवाहः स्यात्तस्यामारभ्य तंस्त्र। परिचर्य्यां विवाहाग्नेर्विदधीत स्व द्विजः। यदि रात्रौ विवाहाग्निरुत्पन्नः स्यात्तथा सति। उपक्रमोत्तरं स्यात्तः सायं परिचरेदग्निमिति"। इदमपि नवनाड्यातिक्रमेऽवश्यम्। तथा चापस्तम्बसूत्रे भाष्यकृद्भिर्दर्शनाच्चार्थः। "अस्तंचारभ्यं रात्रावेव यदि नव नाड्योनातीताः। अतीताश्चेत् परेद्युः सायमेवाग्निहोत्रमेवायामारभ्य इति"। अन्यत्रापि। "प्रातर्होमे सङ्कल्पात्तः कालस्त्वनुदिते उच्च वा। सायमस्तमिते होमः कालस्तु नवनाडिकेति"। अत्रानुदितहोमकालस्तु यावत्तमनेयिनां वेदितव्यः। तथा च कात्यायनसूत्रम्। "औपासनस्य परिचरणमस्तमितानुदितयोरिति"। तेनौपासनसमारम्भोऽपि चतुर्थीहोमानन्तरमाहिताग्नौ भवति न तु विवाहाग्नौ "आवसथ्याधानं दारकाले दायाद्यकाले वेति" कात्यायनसूत्रात् तङ्काध्यमपि। "दारकालस्तूर्ध्वं सप्तरात्रः। दायाद्यकालो धनविभागकाल इति" औपासनात्पूर्व्वं यदि विवाहाग्निः भाग्येत तदा प्रायश्चित्तसूत्रं विस्तारार्थं "उद्वासौपासनात् पूर्व्वमग्नेर्वा यानिमागते। स्वाङ्गीपाकं ततः कृत्वा स्त्रौपासनमथाचरेत्। नवनाड्योर्ध्व जर्ध्वं चेत्स्वाङ्गीपाकोभवेत्तु वै। औपासने तदा कुर्यात् परेद्युः सायमेवचेति"। तस्य प्रादुष्करणकाल उक्तः आश्वायनसूत्रे "तस्याग्निहोत्रेण प्रादुष्करणहोमकालो व्याख्यातावितिं तत्कारिकायामपि। "उच्चावेदपराङ्गेऽग्निमस्तं याते दिवाकरे। पर्य्युक्ष्याग्निं परिस्तीर्य्य पर्य्युक्ष्य च ततः परमिति"। स्पष्टमाह कात्यायनः। "सूर्य्ये तु यौगमप्राप्ते यद्यद्विरिक्तकुम्भैः। प्रादुष्करणमग्नीनां प्रातरासोमदर्शनम्"। तथा "दुरितानां स्तुषया वाग्निविहारो न विरुध्यते। निक्षेपणं च पात्राणां तत्पक्षेपममेव चेति"। उक्तकाले प्रादुष्करणाभावे प्रायश्चित्तसूत्रम् आश्वलायनकारिकायाम्। "प्रायश्चित्तं विशेषेण यत्र नोक्तं भवेद्विधिः। होत्रव्याख्याकृतिस्तत्र भूर्भुवःस्वरितीति चेति"। कात्यायनः अनुदितास्तमयकालमाह। "रात्रेस्तु षोडशे भागे सङ्कल्पस्तमभूमिते। कालं त्वनुदितं ज्ञात्वा तत्र होमं प्रकल्पयेत्"। तथा "यावत्सम्यङ्भासन्ने नभस्यृक्षाणि सर्वतः। न च लौकिकमायाति तावत्सायं तु कूयते"। अत्राश्वायनादीनां होमे कृष्यकालमाह चन्द्रिकायामत्रिः "कृष्णादूर्द्धं रविर्यावद्भूमिं त्रिभिर्न गच्छति। तावद्धोमविधिः पुण्योनाड्योऽभ्युदितहोमिनाम्। रात्रौ प्रहोमो लुप्तः स्यादिति वेदविदो विदुरिति"। अत्र गौणकालमाह यौगकः "पञ्चादस्तमयात्कालोयोमवेक्षिमूर्ध्वजः। स सायंहोमकालः स्यात् प्रहोमान्त उदाहृतः। यस्तु षड्नाडिकाकालः पञ्चादेवोदयात्रवेः। स होमकालो विप्राणां सङ्कल्पवान्न इति स्मृत इति। यदि गौणकालोऽभ्युत्तस्तदा गृह्यपरिशिष्टे प्रायश्चित्तसूत्रम्

"नित्यहोममतीत्य मनसत्या चतुर्गृहीतं जुहुयात् द्वादशरात्रादूर्ध्वं पुनराधानमिति"। केचित्तु प्रायश्चित्तं कृत्वा प्रातर्होमकालात् पूर्वं सायंहोमः कार्य्यः सायं होमात्पूर्वं प्रातर्होमः कार्य्यइत्याहुः "आसायकर्मणः प्रातरप्रातः सायकर्मणः। आहुतिं नातिपद्येत पार्वणं पार्वणान्तरादिति" बोधायनस्मृतेरिति। अग्निहोत्रवदुविधानं प्रदर्शितं यौगकेन। "अग्निहोत्रवदित्यतेऽौपासनेन प्रपञ्चितम्। पुनः पर्य्युक्ष्य चकारात्तु दर्शनेरपोहृ च। होम्यानां द्वादशानां तु पक्वमेतेऽधिश्रयेत्। पयोव्रतानां सर्पिस्तु ओदनं दधि तण्डु लाः। सोमस्तेजसयो प्रोक्षिद्रव्यमेते तिलाधवाः। यव आद्यानि चत्वारि विदुः पक्वानि वाग्विदाः। दध्यादीनामपक्वानामधिश्रयणमिष्यते। उद्वासनेनैव त्वपक्वमेदपक्वं पक्वमेव च। अधिश्रिते स्रुवेऽाज्यः परिलिखेत्तवाधिश्रयः। प्रक्षिप्तव्यवता तेन परिश्रुत्य प्रतप्तं तत्। उदगग्रं लिखोत्पाद्याग्नेरानतिदूरतश्च। अग्नेःपश्चात्पूर्वे त्वेव निधाय समिधा सप्त। त्रिवारमेकं संकल्प्य हुत्वा चावदन्ते (तैषां द्वादशद्रव्याणां मध्ये एकं द्रव्यमित्यर्थः)। स्वाहेति मन्त्रान्ते हार्द्धं जुहोति प्रथमाहुतिम्। प्रातर्होमे तु सूर्य्याय स्वाहेति प्रथमाहुतिम्। तूष्णीं प्रजापतिं ध्यात्वनुभवत इतीतिवाक्यमिति"। अत्राप्योविशेषः स्वयाकोऽयमवलम्ब्यः। होमस्थानं स्मृत्यर्थसारे "वह्नयुक्ते अनेनाग्नौ सुसमिद्धे कृताग्नये। अङ्गारे लोहिताने च होतव्यं नान्यथा क्वचित्। योऽनग्निमुपासीत जुहोत्यग्नौ अङ्गारे वैव मानवः। तस्याग्निरामयावीच दरिद्रश्चोपजायते। अग्निः प्रदक्षिणावर्त्तः सर्वदेव शुभावहः"इति। अग्नावुपवेशनमन्त्राह यौगकः "परिस्तृत्य च पर्य्युक्ष्याभ्युक्षेद्विर्भुजम्। अग्नेः स्रुक्च स्रुवश्च प्राजापत्यश्चनिलयः"बाह्य०। हुतान्नीन् रुद्रदेवत्यान् जपेन्मन्त्रान् समाहितः" एतद्धोमं प्रशंसन्नङ्गिराः "बह्वाकाशन मेतद्धि पृथिवी च सहागराम्। तस्मायं प्रातर्होमस्य तुल्यं भवति वा नवेति"। अन्यत्रापि "नाग्निहोत्रात्परोधर्म्मो नाग्निहोत्रात्परं तपः। नग्निहोत्रात्परं स्वानं नाग्निहोत्रात्परा गतिरिति" अत्रापि प्रत्यवायमाह गर्गः "कृतदारोन तिष्ठेत क्षणमप्यग्निना विना। तिष्ठत्येहिजोन्नाय स्वया च पतितो भवेत्। यथा स्नानं यथा सन्ध्या वेदस्याध्ययनं यथा। तथैवौपासनं कार्य्यं न स्थितिस्त्विहोत्रतः। को हि क्षिप्त्वा विवाहाग्निं मूढस्य इति मन्यते। अस्य तस्य न भोक्तव्यं हृत्यापाकोऽपि स स्मृतः। हृत्यापाकस्य भुक्त्वाऽग्नेः प्रायश्चित्तं समाचरेत। प्राणायामशतं कृत्वा हुतं प्राश्य विशुध्यतीति"।

तस्याग्नौजेऽपि कर्त्तव्यतामाह याज्ञ०। "वैतानौपासनाः कार्य्याः क्रियाश्च स्मृतिनोदनात्"। स्त्रीजनस्य आर्षः लोके तु औपासनीत्येव

औपोदिति पुंस्त्री उपोदितस्यापत्यम् इञ्। उपोदितवंशे पत्ये स्त्रियां ङीप्। तस्या अपत्यम् ढक्। औपोदितेयः तस्या अपत्ये। "उतोहमाऽौपोदितेय एवास्य मन्त्रं गा दास्यति" यत० ब्रा० १,६,२,१६। [स्त्रीविकारे।

औमा(क) त्रि० उमाया विकारः अण् वुञ् वा। अत-

औमायन त्रि० उमाया निमित्तं संयोग उत्पातो वा अश्वा० फञ्। अतस्या निमित्ते संयोगे उत्पाते च स्त्रियां ङीप्। [क्षेत्रे।

औमीन त्रि० उमानां भवं क्षेत्रम् खञ्। अतसीभवने

औरग न० उरगोदेवताऽस्य अण्। १सर्पाधिष्ठातृदेवताके अङ्गेषणक्षत्रे। तस्येदम् अण्। २सर्प सम्बन्धिनि त्रि० स्त्रियां ङीप्।

औरभ्र न० उरभ्रस्य मेषस्येदम् अण्। १मेषलोमजाते कम्बले २ततःसम्बन्धिनि त्रि०। "औरभ्रेणाथ चतुरः प्राकृतेनाथ पञ्च वै" मनुः। "हरिणं मांसमौरभ्रं पित्तमेषावकं गुरु" सुश्रु०। धन्वन्तरिं प्रति प्रश्नकारकर्षिभेदे २ऋषिभेदे पु० औषधेनवशब्दे उदा०।

औरभ्रक न० उरभ्राणां समूहः वुञ्। मेषसमूहे।

औरभ्रिक त्रि० उरभ्रः पण्यमस्य ठञ्। मेषविक्रयोपजीविनि "औरभ्रिकैश्चाक्षिकैः परपूर्व्वापतिस्त्रिया" मनुः। स्त्रियांङीप्।

औरस पु० उरसा निर्म्मितः यद्भावे अण्। "क्षेत्रजादीनां संस्कृतायां स्वयमुत्पादयेत्तु यम्। औरसं तं विजानीयात् पुत्रं प्रथमकल्पितम्" मनूक्ते पुत्रभेदे "औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च" मनुना द्वादशविधपुत्रमध्ये तस्य प्राधान्योक्तेः "अङ्गादङ्गात् सम्भवति" आत्मा वै जायते पुत्रः" श्रुतेश्च स्वदेहजातत्वेनास्य तथात्वम्। १उरसानिर्म्मितमात्रत्वेन असवर्णासुते परपूर्व्वासुतेऽपि औरसशब्दस्य वृत्तिः अतएव "अर्जुनस्य परपूर्व्वायां नागकन्यायामुत्पन्नमैरावतमभिप्रेत्य" भा०भी० ६१अ० "अजानन् अर्जुनश्चापि निहतं पुत्रमौरसम्" ऐरावतस्य औरसत्वविधेयवम्। "एकएवौरस पुत्रः सर्व्वस्व वसुनः प्रभुः" मनुः

"औरसः क्षेत्रजः पुत्रौ पितरिक्थस्य भागिनौ" स्मृतिः औरसे पुनरुत्पन्ने दत्तोयंगुरुराः सुताः" मनुः उरस इटच्। २क्षेत्रजभवे त्रि० उरसा नाम पुरोभेदः तत्र भवः सिन्धा० अण्। ३औरस उरसापुरोभवे त्रि०।

औरसिक न० उरस अङ्गत्वा० स्वार्थे ठक्। १उरसि। "दत्तस्वीकृतात्मजः" पा० उक्तेरिसुसादिभिन्नत्वात् औरस्क इति यङ्ग कल्पं ग्रामादिकमेव।

औरस्य न० उरसि भवः शरीरावयवत्वात् यत् ततः स्वार्थे ष्यञ्। उरसिभवे। "हकारं पञ्चमैर्युक्तमनःस्थाभिश्च संयुतम्। औरस्यं तं विजानीयात्" शिक्षा "औरसपुत्रे तु उरस एव 'उरसोऽण् चेति' सूत्रे चादु यद्विधानात् अतएव औरसपर्य्याये उरसशब्द एवामरे बोध्यः तथैव टीकाकृद्भिर्व्याख्यानात्। [लोमविकारे कम्बलादौ।

और्ण(क) त्रि० ऊर्णायाः विकारः अञ् पक्षे वुञ्। मेष-

और्णावत त्रि० ऊर्णावतोऽयम् अण्। ऋषिभेदे ततः स्वार्थे ष्यञ्। और्णावत्योऽप्यत्र। [तद्विमित्तादौ स्त्रियां ङीप्।

और्णिक त्रि० ऊर्णायानिमित्तं संयोग उत्पादो वा ठञ्।

और्द्धकालिक त्रि० ऊर्द्धकाले भवः कार्य्यो० ठञ् जिटच्। ऊर्द्धकालभवे। ष्ठञि स्त्रियां ङीविति भेदः।

और्द्धदेह त्रि० ऊर्द्धदेहस्येदम् अण्। ऊर्द्धदेहसम्बन्धिनि "और्द्धदेहनिमित्तार्थमवतीर्य्यौदकं नदीम्" रामा०

और्द्धदेहिक त्रि० ऊर्द्धदेहाय साधु-ठञ्। ऊर्द्धदेहप्रापके शास्त्रोक्ते क्रियादौ मरणोत्तरं हि मनुष्याणां प्रथममातिवाहिकदेहोत्पत्तिस्ततः पूरकपिण्डदानेन प्रेतदेहप्राप्तिः आद्यादिसपिण्डनान्तक्रियाभिः प्रेतदेहनिवृत्त्या भोगदेहप्राप्तिस्तत्र च पूर्व्वोत्तरभवे क्रिये हेतू। तदेतत् शुद्धितत्त्वे निर्णीतं यथा।

"अत्रेदं बीजं पूर्व्वक्रियायामातिवाहिकदेहतन्त्रागोत्तरदेहान्तरजननं, मध्यक्रियायामपि प्रेतत्वपरिहारोत्तरदेहान्तरजननं ततश्चैकस्यैव तत्सिद्धौ पुनस्तत्करणं वचनाभावेऽनर्थकम्। तथाच विष्णुधर्म्मोत्तरम् "तत्तत्क्षणादेव गृह्णाति शरीरमातिवाहिकम्। ऊर्द्धं व्रजन्ति भूतानि त्रीण्यक्षाणि तस्य त्रिपक्षात्"। त्रीणि भूतानि तेजोवायुाकाशानि, पृथिवीजले तु अधोगच्छतः। तत्तत्क्षणात् मत्युत्तरक्षणात्। तथा "आतिवाहिकसंज्ञोऽसौ देहोभवति भार्गव!। केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्"। तथा "प्रेतपिण्डैस्तथा दत्तैर्देहमाप्नोति भार्गवः। भोगदेहमिति प्रोक्तं क्रमादेव न संशयः। प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोक्षणम्। घृताप्लावितदेहोऽग्नौ हूयते नैव सिद्धये। तस्मात्स यातना घोरा भोगयातनगोचराः। ततः सपिण्डीकरणे वाक्यैस्तु कृते नरः। पूर्व्वं संवत्सरे देहमतोऽन्यं प्रतिपद्यते। ततः स नरके याति स्वर्गे वा स्वेन कर्म्मणा"। तथा वायुपुराणम् "पुरुषेण तु पिण्डेन देहोनिष्पाद्यते यतः। ततस्तु करणाभोगात् पुनर्नावर्त्तयेत् क्रियाम्"। अतएवातिवाहिकदेहपरित्यागाय तत्कालीनकर्म्मासमर्थपुत्रस्याप्यन्येन दाहादि क्रियते। "पितामहसपिण्डेषु समानसलिलेषु च। संघातान्तर्गतैर्व्वापि राज्ञा वा धनकारिणा। पूर्व्वाः क्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः"।

तत्र क्रियाश्च त्रिविधाः विष्णुपुराणे दर्शिता यथा "पूर्व्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः। त्रिप्रकाराः क्रिया ह्येताः सर्व्वासां भेदतो मुने। आदाहकार्य्यायुधादिस्पर्शान्ताश्च याः क्रियाः। ताः पूर्व्वामध्यमा मासिमासिकोद्दिष्टसंज्ञिताः। प्रेते पितरि सापिण्ड्ये सपिण्डीकरणादनु। क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते ता ह्युत्तराः। पितामहसपिण्डेषु समानसलिलेषु च। संघातान्तर्गतैर्व्वापि राज्ञा वा धनकारिणा। पूर्व्वाः क्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः। दौहित्रैर्वा नरश्रेष्ठ! कार्य्यास्तत्सर्व्वमेव तु। स्नानादीनि तु कर्त्तव्याः स्त्रीणामप्युत्तराः क्रियाः। प्रतिसंवत्सरं राजन्! एकोद्दिष्टं विधानतः"। आदाहेति दाहावधेरर्वाचीनविहितयाय्यायुधादिस्पर्शान्ताश्चाः पूर्व्वाः, मासिमासीत्येकादयाद्यादिसपिण्डनान्तप्रेतक्रियोपलक्षणम्। सपिण्डनोत्तराः पार्व्वणादिक्रिया उत्तराः। अत्र पुत्राद्यसपिण्डाद्यः पूर्व्वाः क्रिया अवश्यं कुर्युः। मध्यमक्रियासामनियमः। उत्तरक्रियायां पुत्रादयो भ्रातृसन्ततिपर्य्यन्तानियताः। आद्यविवेकेऽप्येवम्। दौहित्रैर्वेति वाशब्दः समुच्चयार्थः तेन दौहित्रोऽप्युत्तरक्रियायां नियताधिकारी"। अत्राधिकारिणश्च एकोद्दिष्टशब्दे १५२५ पृ० उक्ताः "अकरोत् स तदौर्द्धदेहिकम्" रघुः। अनुगतिका० द्विपदबहिरिति सूत्रे० अनुगतिकादिगणे तस्य पाठाभावेऽपि आकृतिगणत्वात् ततसिद्धिरिति ढक्सायवयः। किन्तु बहुषु स्वरेषु एकपदवृद्धियुक्तं दृश्यते तेन उभयमपि साधु इति तत्त्वम्। "भृत्यानामनुरोधेन यत्करोत्यौर्द्धदेहिकम्। तद्भवत्यक्षयं तस्य जीवतश्च मृतस्य च" मनुः। उपानहौ च वस्त्रञ्च प्रतिमल्यौर्द्धदेहिकम्" भारते अनु० पर्व्वणि ६ २२८ श्लो०

और्वदर्भिक त्रि॰ अर्वदर्भे भवः "अर्वात् दर्भाच्च ठेकाञ्च लोकोत्तरपदात्तथा" युक्तेः ठक्। अर्वदर्भभवे त्रि॰ स्त्रियां ङीप्।

और्वस्रोतसिक त्रि॰ अर्वस्रोतसि अर्वरेतसि प्रसक्तः ठक्। यवे यिवभक्षे त्रिका॰।

और्व पु॰ उर्वस्यापत्यम् अण्। १उर्वगोत्रापत्ये गोत्रापत्ये तु यिदा॰ अञ्। २उर्वगोत्रापत्ये उभयतः स्त्रियां ङीप्। उर्व्यां भवः अण्। ३पांशुलक्षणे न॰ राजनि॰। ४उर्वीभवमात्रे त्रि॰। उरुतोजातः अरु+अण् संज्ञापूर्वकविधेरनित्यत्वात् गुणः। भृगुवंशे ५ऋषिभेदे। तस्य भवः अण्। ६बाडवानले। तदुत्पत्तिकथा अरुजयब्दे १२८५ पृ॰उक्ता ततो बाडवनलोत्पत्तिकथा तु भा॰आ॰१८०।८१ अ॰उक्ता यथा "ब्राह्मणयुवाच।"नाहं स्पृशामि वस्तातो दृष्टीनाशिरसान्विता। अयन्तु भार्गवो नूनमूरुजः कुपितोऽद्य वः। तेन सर्वाणि वस्तात! व्याप्तं क्रोधाग्निकालना। अरता निकृतान् बन्धूनादत्तानि न संशयः। गर्भानपि यदा नूनं भृगूणां प्रत पुत्रकाः!। तदायमूरुणा गर्भो मया वर्षशतं धृतः। षडङ्गवाप्तिलो वेद इमं गर्भस्थमेव हि। विवेश भृगुवंशस्य भूयः प्रियचिकीर्षया। सोऽयं पितृवधाद्युक्तं क्रोधाग्नो हन्तुमिच्छति। तेजसा तस्य दिव्येन चक्षूंषि सुचितानि वः। तस्मिन् तात याचध्वमौर्वं मम सुतोत्तमम्। अयं वः प्रक्षिपातेन तुष्टोदृष्टीः प्रमोक्ष्यति। वयिष्ठ उवाच। एवमुक्तास्तदा सर्वे राजानस्ते तमूरुजम्। ऊचुः प्रसीदेति तदा प्रसादञ्च चकार सः। अनेनैव च विख्यातो नाम्ना लोकेषु सत्तमः। स और्व इति विप्रर्षिर्हरुं भित्त्वा व्यजायत। चक्षूंषि प्रतिलब्धा च प्रतिजग्मुस्ततो नृपाः"।

"दृक्प्रसादविति कर्तुं भृगूणां भृगुनन्दनः। सर्वलोकविनाशाय तपसा सङ्घतेधितः। तापयामास तान्लोकान् सदेवासुरमानुषान्। तपसोष्मेण महता सन्दिधक्षन् पितामहान्। ततस्तं पितरस्तात! विज्ञाय कुलनन्दनम्। पितृलोकादुपागम्य सर्वे ऊचुरिदं वचः। पितर ऊचुः। और्व! दृष्टःप्रभावस्ते तपसोष्मश्च पुत्रक!। प्रसादं कुरु लोकानां नियच्छ क्रोधमात्मनः। नानीर्यं हि तदा तात भृगुभिर्भावितात्मभिः। वधो ह्युपेक्षितः सर्वैः क्षत्रियाणां त्रिकिंसताम्। आयुधा विप्रहृष्टेन यदा नः खेद आत्थितः। तदाज्ञाभिर्व्यवस्तात! क्षत्रियैरीप्सितः क्षयः। निखातं यच्च वै वित्तं भृगुभिर्भृगुसत्तमैः। हृतान्येव तदा स्वानि क्षत्रियान् क्रोधविह्वलः। किं हि वित्तेन नः कार्यं सर्वेषामेव जीवितम्। यदज्ञानं धनाध्यक्षः प्रभूतं धनमाहरत्। यदा तु ज्ञास्यते सर्वं नः यक्ष्यति सर्वशः। तदाज्ञाभिरयं हृष्ट उपावसात! सत्यतः। आत्मज्ञाच पुत्रात! न लोकाञ्जुभते शुभान्। ततोऽज्ञाभिः समेत्यैवं नाम्नाम्ना निपातितः। न चैतस्यः प्रियं तात! यदिदं कर्तुमिच्छसि। नियच्छेदं मनः पापात् सर्वलोकपराभवात्। मा वधीः क्षत्रियांस्तात! न लोकान् सप्त पुत्रक!। दूयन्तं तपसोजः क्रोधसूपतितं जहि"।

"और्व उवाच। उक्तायानक्षि यां क्रोधात् प्रतिज्ञां पितरस्तदा। सर्वलोकविनाशाय न सा मे वितथा भवेत्। इयारोषप्रतिघो वै नाहं भवितुमुत्सहे। अग्निर्लोकौ हि मां रोषो दहेदग्निरिवारणिम्। यो हि कारयतः क्रोधं संजातं जन्तुमर्हति। नाहं स मनुजः सम्यक् क्षत्रियं परिरक्षितुम्। क्षत्रियाणां निकृत्या हि पितॄणां परिरक्षिता। स्यात्ते रोषः प्रयुक्तः स्यादृषैः सर्वत्रिभोकुभिः। अश्रौषमकृमूरुस्थो गर्भस्थश्चानलप्रभः। आरावं मातृवर्गस्य भृगूणां क्षत्रियैर्वधे। संहारो हि यदा लोके भृगूणां क्षत्रियाधमैः। आगर्भोच्छेदनात् क्रान्तस्तदा मां मन्युराविशत्। संपूर्णकोपाः किल मे मातरः पितरस्तथा। भयात् सर्वेषु लोकेषु नाधिजग्मुः परायणम्। तान् भृगूणां यदा दारान् क्षत्रियाभ्युपपद्यते। माता तदा दधारैयमूरुणैकेन मां शुभा। प्रतिघेद्धा हि पापस्य यदा लोकेषु विद्यते। तदा सर्वेषु लोकेषु पापलोपपद्यते। यदा तु प्रतिघेद्धारं पापो न लभते क्वचित्। तिष्ठन्ति बहवो लोकास्तदा पापेषु कर्मसु। जानन्नपि च यः पापं यशिमात्र नियच्छति। दोषः सतू लोऽपि तेनैव कर्मणा सम्प्रयुज्यते। राजभिस्तैस्तरैर्वै यदि वै पितरो मम। यज्ञैर्न यजिताश्चात्र निरं नस्तेच जीवितम्। अत एवाहं क्रुद्धो लोकानामीश्वरो जातम्। भवतान्तु वधो नाहमहं समतिवर्तितुम्। तथापि चेद्भवेद्वीश्वरस्य सतो मम। उपेक्षमाणस्य सुनर्लोकानां किल्बिषाद्भवम्। नन्वयं मनुजो मेऽग्निर्लोकानादास्यति। दहेदेव च मामेव निरुद्धोतः सतेजसा भवतां च विशालाक्षि सर्वलोकक्षितेषुताम्। तस्माद्विदध्वं यच्छ्रेयो लोकानां मम चेश्वराः!। पितर ऊचुः। न एष मन्युजस्तेऽग्निर्लोकानादास्यति। अम्भ्तं तव भद्रन्ते लोका स्थास्यन्ति निर्वृताः। आपोमयाः सर्वरसाः सर्वप्राणी-

भवं जगत्। तस्मादहमु विप्रर्षेभं क्रोधाग्निं द्विजसत्तम!। अवं तिष्ठतु ते विप्र! यदोच्छ्वसि मक्षोदधौ। मन्युजोऽग्निर्हृदापो वोर्वीं ज्वालोमयाः स्रुताः। एवं प्रतिष्ठा वडवेयं तवानघ! भविष्यति। न चैवं च. भरा लोका गमिष्यन्ति पराभवम्। वसिष्ठ उवाच। ततस्तं क्रोधजं तात! और्व्वोऽग्निं वडवामुखे। उत्सृष्टवन्तं च वैराग उपयुक्ते मक्षोदधौ। मक्षद्वधिरो भूत्वा वत्सहे दविदो विदुः। तमग्निर्हरन् वक्त्रात् पिबन्नापो मक्षोदधौ"।

आङ्गवानस्य स्थितिस्थानम् वि॰ यि॰ उक्तम् भूमेर्याम्ये ऽर्द्धे सप्तद्वीपवसुन्धराणां स्थितिकीर्त्तनान्ते "खादूदकान्तर्बडवानलोऽसौपातालसंज्ञोकाः पृथिव्यापुटानि" इति। और्वस्य च प्रवर्त्तयितृत्वम् ऋग्वेदशब्दे उक्तम्। "जामदग्न्यायनुद्यानां यस्यार्षेयो भार्गवच्यावनाप्रवानौर्वजामदग्नेति च आश्व॰श्रौ॰ १२,१०,६,६ और्वमधिकृत्य क्रतोपन्यः अण्। भारतान्तर्गते और्वचरितोद्याने। "तापलमधवासिष्ठमौर्वं चाख्यानसत्तमम्" भा॰ आ॰ १। तच्चाख्यानं भा॰ आ॰ १८६ अध्यायादौ द्रष्टव्यम्।

और्वशेय पु॰ उर्व्वशी तच्छब्दोऽस्यम् विवक्षा॰ अण्। और्वशी शब्दयुक्ते १ख्याध्याये २अनुवाके च। उर्व्वश्या इदम् अण्। २उर्व्वशीसम्बन्धिनि त्रि॰।

अर्वशेय पु॰ उर्व्वश्या अपत्यम् ढक्। १अगस्त्ये मुनौ ऐमच॰ तस्य च उर्व्वशी इद्धा मित्रावरुणयोः स्खलितरेतोजातत्वात् तथात्वम् तत्प्रमाणञ्चागस्तिशब्दे ४७५ उक्तम्। ऐलशब्दे दृश्यितेषु उर्व्वशीगर्भजातेषु पुरूरवसः सुतेषु २आयुरादिषु षट्सु च

औलपि पु॰ उलपस्य कवायन्नेवाधिविषेयस्यापत्यम् इञ्। उलपापत्ये ततः स्वार्थे दामन्या॰ ढक्। औलपेय तदर्थे यकुञ् तस्य लुक्। औलपय इत्यादि।

औलपिन् पु॰ ब॰व॰। उलपेन प्रोक्तं छन्दोऽधीयते कवायन्नेवाधिवात् णिनि। उलपप्रोक्तछन्दोध्यायिषु

औलान न॰ अवलम्बन वेदे घञो॰। अवलम्बने। "विद्वान् पथ ऋतुथोदेवयानान्औलानं दिविधे" ऋ॰१०,६८,११।

औलूक न॰उलूकानां समूहः अण्ठिकाक॰अञ्। पेचकसमूहादौ

औलूक्य पु॰ उलूकर्षेरपत्यम् गर्गा॰ यञ्। उलूकनामर्षेरपत्ये कवायै वैशेषिकसूत्रकारे तस्य आप्तः कण्वादि॰ अण्। ततो बहो लुक्। औलूक औलूक्यशास्त्रे वैशेषिकसूत्रतात्पर्ये। उलूक इति कुलमध्ये कोविदाकुः औलूक्यदर्शनन्तु वैशेषिकदर्शनं तत्प्रतिपाद्यविषया उक्तम्

"आथातो धर्मं व्याख्यास्यामः"। १सू॰

"तापलवपराकृता विवेकिनस्तापलवनिहचिनिदानमनुसन्दधाना नानास्तिसंज्ञतीतिहासपुराणेषूत्पातलक्षणाद्यात्कारमेव तदुपावमाकलयाञ्चभूवुः। तत्प्राग्निश्रेयसमपि यत्मान जिज्ञासामानाः परमकारुणिकं कणादं मुनिमुपसेदुरथ कणादो मुनिस्तत्प्रणीतैरन्त्यैर्व्यवयवसम्बन्धः प्रमाणं पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानमेवात्मतत्त्वसाक्षात्कारप्रापणे परमः पन्था इति मनसिकृतम् तन्निश्चित्यकणाद्यर्षेतेषामनायासेन सेत्स्यतीति जलपतः खल्वपत्य धर्ममेव प्रथमसूत्रयिष्यन्ननन्तर यद्यपि पदार्थोद्देशलक्षणपरीक्षाभिरुपदेक्ष्यतीति वुद्धि निधाय तेषामवधानाय प्रतिजानीते। अथातो धर्मजिज्ञासेति" उप॰

"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः"। २सू॰

"को धर्मः किंलक्षणश्चेति? सामान्यतः शिष्यजिज्ञासायां यतोऽभ्युदयनिःश्रेयससिद्धिरित्युपतिष्ठते" तथा च यतोऽभ्युदयसिद्धिर्यत्र निःश्रेयससिद्धिस्तदुभय धर्मः एवं पुरुषार्थसाधारणकारण धर्म इति वक्तव्ये परमपुरुषार्थयोः सुखदुःखाभावयोर्विशेषतः परिचयार्थं मभ्युदयनिःश्रेयससिद्धिरित्युक्तं स्वर्गापवर्गयोरेवाभ्युच्चानधीनेच्छाविषयत्वेन परमपुरुषार्थत्वात्। बाधयिष्यते च दुःखाभावस्यापि पुरुषार्थत्वम्" उपस्कारः।

"तद्वचनादाम्नायस्य प्रामाण्यम्"। ३सू॰

"ननु निश्चितलक्षणो धर्मस्तत्त्वज्ञानद्वारा निःश्रेयसहेतुरित्यत्र श्रुतिः प्रमाणं श्रुतेरेव प्रामाण्ये वक्तं विप्रतिपद्यामहे अन्योन्यव्याघातपुनरुक्तदोषेभ्यः, पुत्रेष्टौ ज्ञातावामपि पुत्रात्मत्वादद्वैतत्वम् "उदिते जुहोति अनुदिते जुहोति समयाध्युषिते जुहोतीति" विधेः प्राप्त एवोदितादिकाले होमो व्याहन्यते "स्यावोऽस्याक्षतिमभ्यवक्रामति य उदिते जुहोति योऽनुदिते जुहोति स्यावयवस्यावक्षतिमभ्यवक्रामति यः समयाध्युषिते जुहोति" इत्यादिना। तथा "त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाह" इत्यनेन प्रथमोत्तमयोरभिधेयोच्चारणाभिधानात् गौणत्वमेव। न चाम्नायप्रामाण्यप्रतिपादकं किञ्चिदस्ति प्रमाणम् नित्यत्वे विप्रतिपत्तौ नित्यनिर्दोषत्वमपि सन्दिग्धं पौरुषेयत्वे तु भ्रमप्रमादविप्रतिपत्तिकरणपाटवादिसम्भावनया आप्तोक्तत्वमपि सन्दिग्धमेवेति न निःश्रेयसं न वा तत्र तत्त्वज्ञानं द्वारं न वा धर्म इति

सर्वमेतदाकूतमत आह । तदुक्तवचनादाम्नायस्येत्यादि । तदित्यनुपक्रान्तमपि प्रसिद्धिसिद्धतयेश्वरं परामृशति यथा "तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः" इति गौतमीयसूत्रे तच्छब्देनानुपक्रान्तोऽपि वेदः परामृश्यते । तथा च तद्वचनात्तेनेश्वरेण प्रणयनादाम्नायस्य वेदस्य प्रामाण्यं यद्वा तदिति सन्निहितं धर्ममेव परामृशति तथाच धर्मस्य वचनात् प्रतिपादनात् आम्नायस्य वेदस्य प्रामाण्यं यद्धि वाक्यं प्रामाणिकमर्थं प्रतिपादयति तत्प्रमाणमेव यत इत्यर्थः । ईश्वरस्तदाप्तश्च साधयिष्यते अथोक्तमनृतव्याघातपुनरुक्तदोषेभ्य इति तत्रानृतत्वे जन्मान्तरोपयोगकल्पनं कर्मकर्तृसाधनवैगुण्यकल्पनं वा श्रौतात् साक्षात् कर्मणः फलानुत्पत्तिनिश्चयात् न च कारीरीयदैष्टिकमात्रफलकत्वं तत्र हि गुणवत्त्वस्य सञ्जीवनकामस्याधिकारः पुत्रेष्टौ पुत्रकामस्येतिविशेषात् न च व्याघातोऽपि उदितादिहोमं विशेषतः प्रतिपाद्य तदन्यकाले होमानुष्ठाने "ह्यो वाऽश्वाऽकृतिमध्यवहरति" इत्यादिनिन्दाप्रतिपादनात् न च पुनरुक्तादोषोऽपि एकादशसाभिधेनीनां प्रकृतौ पाठात् "पञ्चदशावरेण वाग्वज्रोऽभिवर्धे तस्मिन् भ्रातव्यम्" इत्यत्र सामिधेनीनां पञ्चदशत्वस्य प्रथमोक्तसप्तदशसामिधेन्यो स्थिरभिधानमन्तरेणानुपपत्तेः स्वयमभिधानात्" । उपस्कार० २।

शिष्याकाङ्क्षानुरोधेन स्वरूपतोलक्षणतस्तस्य धर्मस्य व्याख्यायाभिधेयसम्बन्धप्रयोजनप्रतिपादनायाह "धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्" ४सू ।

"एतावद्यं तत्त्वज्ञानं वैशेषिकशास्त्राधीनमिति तस्यापि निःश्रेयसहेतुत्वं दण्डापूपायितम् । तत्त्वं ज्ञायतेऽनेनेति करणव्युत्पत्त्याशास्त्रपरत्वे धर्मविशेषप्रसूतादित्यनेनानर्थक्यापत्तेः, सर्वपदार्थप्रधानो ह्यसौ शास्त्रः; सर्वपदार्थतत्त्वज्ञानस्य निःश्रेयसहेतुत्वात् तदत्र शास्त्रनिःश्रेयसयोर्हेतुहेतुमद्भावः शास्त्रतत्त्वज्ञानयोर्व्यापारव्यापारिभावः निःश्रेयसतत्त्वज्ञानयोः कार्यकारणभावः द्रव्यादिपदार्थशास्त्रयोः प्रतिपाद्यप्रतिपादकभावः सम्बन्धोऽवगम्यते एतेषां तु सम्बन्धानां ज्ञानान्निःश्रेयसार्थिनामिह शास्त्रे प्रवृत्तिः । मोक्षमाणाश्च मुनेर्मतीताप्तभावा एव शास्त्रे प्रवर्त्तन्ते । निःश्रेयसमात्यन्तिकी दुःखनिवृत्तिः । दुःखनिवृत्तेरात्यन्तिकत्वं समानाधिकरणदुःखप्रागभावासमानकालीनत्वं युगपदुत्पन्नसमानाधिकरणसर्वात्मविशेषगुणध्वंससमानकालीनत्वं वा । अथेवविशेषगुणध्वंसावधिकदुःखप्रागभावो वा सन्निः नचासाध्यत्वात्तस्य पुरुषार्थः, कारणविघटनसुखेन प्रागभावस्यापि साध्यत्वात् नच तस्य प्रागभावत्वक्षतिः प्रतियोगिजनकाभावत्वेन तथात्वात्, जनकत्वञ्च स्वरूपयोग्यतामात्रम्, नहि प्रागभावस्वरूपसामर्थ्येन तस्मिन् सति कार्यमवश्यमुत्पद्येत तथा सति कार्यस्याधनादित्वप्रसङ्गात् तथाच यथा सहकारिविरहादियन्तं कालं नाजीजनत् तथाऽपि तद्विरहाद्य जनयिष्यति हेतूच्छेदे पुरुषव्यापारात् इत्यस्यापि प्रागभावपरिपालन एतात्पर्यात्, अत एव गौतमोऽवहितोऽयसूत्रे "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" इत्यत्र कारणाभावात् कार्याभावाभिधानं दुःखप्रागभावरूपामेव मुक्तिं दृढयति नहि दोषापाये प्रवृत्त्यपायः, प्रवृत्त्यपाये जन्मापायः, जन्मापाये दुःखापायस्यात्यन्तापायो ध्वंस किन्त्वनुत्पत्तिः सा च प्रागभाव एव न च प्रतियोग्यप्रसिद्धिः सामान्यतो दुःखत्वेनैव प्रतियोगिप्रसिद्धेः प्रायश्चित्तवत् तत्रापि प्रत्यवायध्वंसद्वारा दुःखानुत्पत्तेरेवापेक्षितत्वात् लोकेऽपि कण्टकादिनिवृत्तेर्दुःखानुत्पत्तिफलकत्वदर्शनात् दुःखसाधननिवृत्त्यर्थमेव प्रेक्षावतां प्रवृत्तेः । केचित्तु दुःखात्यन्ताभाव एव सन्निः स च यद्यपि नात्मनिष्ठस्तथापि लोष्टादिनिष्ठ एवात्मनि साध्यते सिद्धिश्च तस्य दुःखप्रागभावासहवर्त्तिदुःखध्वंस एव तस्य तत्सम्बन्धतयोपगमात् तस्मिन् सति तत्र दुःखात्यन्ताभावप्रतीतेः एवञ्च सति "दुःखेनात्यन्तं विप्रमुच्यते" इत्यादिश्रुतिरप्युपपादिता भवतीत्याहुः तत्र दुःखात्यन्ताभावस्यासाध्यत्वेनापुरुषार्थत्वात् दुःखध्वंसस्य च न तत्र सम्बन्धत्वं प्रतिभाषायत्तेः "दुःखेनात्यन्तं विप्रमुच्यते" इति श्रुतेर्दुःखप्रागभावस्यैव कारणविघटनसुखेनात्यन्ताभावसमानरूपत्वतात्पर्यकत्वात् । नन्वयं न पुरुषार्थः निरुपाधीच्छाविषयत्वाभावात् दुःखाभावे सुखं तावदौत्पद्यते इति सुखार्थिनामेव दुःखाभावार्थं प्रवृत्तेरिति चेन्न वैपरीत्यस्यापि सुखत्वात् सुखेच्छायामपि दुःखाभावौपाधिकीत्येव किं न स्यात् शोकाकुलानां सुखविस्मरणमपि दुःखाभावत्वमभिसन्धाय विषभक्षणोद्बन्धनादौ प्रवृत्तिदर्शनात् । ननु पुरुषार्थोऽयं ज्ञायमान एव सुकरः सुखाभावस्य ज्ञायमानतैव नास्ति अन्यथा मूर्छाद्यवस्थार्थमपि प्रवर्त्तेतैरिति चेन्न श्रुतानुमानाभ्यां ज्ञायमानस्यापेक्षितत्वानुपपत्तेः । अस्ति हि श्रुतिः "दुःखेनात्यन्तं विप्रमु-

रति" "तमेव विदित्वातिमृत्युमेति" इत्यादिका। अनुमानमप्यस्ति दुःखसन्ततिरत्यन्तोच्छिद्यते सन्ततित्वात् प्रदीपसन्ततिवदित्यादि चरमदुःखध्वंसस्य दुःखसाक्षात्कारेण सह विषयं कारणात् प्रत्यक्षवेद्यतापि। योगिनां योगजधर्मानुग्रहेणानागामिनो दुःखध्वंसस्य प्रत्यक्षोपगमाच्च। तथापि तुल्यान्यव्ययतया नायं पुरुषार्थो दुःखवत् सुखस्यापि ज्ञाने हेयोपि समानसामग्रीकत्वादिति चेत् उत्पन्नतो वीतरागाणां दुःखदुर्निभीक्ष्णां सुखखद्योतिकामात्रेऽल्पत्वव्ययतां तत्र प्रवृत्तेः। ननु तथापि दुःखनिवृत्तिर्न पुरुषार्थः, अनागतदुःखनिवृत्तेरप्यकार्यत्वात् अतीतदुःखवानीतत्वात् वर्त्तमानदुःखस्य पुरुषतन्त्रयत्नमन्तरेणैव निवृत्तेरिति चेन्न हेत्वन्तरे पुरुषव्यापारात् प्रायश्चित्तवत् तथाहि सवासनं मिथ्याज्ञानं संसारहेतुस्तदुच्छेदस्तत्त्वज्ञानात् तत्त्वज्ञानं च योगविधिसाध्यमिति तदर्थं प्रवर्त्तमुपपन्नः" उपस्करः कियदन्तरे च "धर्मविशेषप्रसूतादिति तत्त्वज्ञानादिदमस्य विशेषणं तत्र धर्मविशेषो निवृत्तिलक्षणो धर्मः दृढि तु तत्त्वं ज्ञायतेऽनेनेति तत्त्वज्ञानं शास्त्रमुच्यते तदा धर्मविशेष ईश्वरनियोगप्रसादरूपो वक्तव्यः सूयते हीश्वरनियोगप्रसादवधिगम्य कणादो महर्षिः शास्त्रं प्रणीतवानिति तत्त्वज्ञानमात्मतत्त्वसाक्षात्कार इह विवक्षितस्तस्यैव सवासनमिथ्याज्ञानोन्मूलनक्षमत्वात् "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इत्यत्र "ब्रह्म वेदि ब्रह्मैव" इत्यत्र च वेदनपदस्य साक्षात्कारपरत्वात् "पश्यत्यचक्षुः" इत्यत्रापि तथा। सच शास्त्रान्मननिदिध्यासनादिपरम्परयेति हेतुपञ्चम्या तथैवाभिधानात्" उप० न्यायकन्दल्यां प्रयोजनस्यानित्यं विवृतं यथा "तच्चेश्वरनोदनाभिव्यक्तादृष्टादेवेति" भाष्यप्रतीकव्याख्यायाम् "यस्य वस्तुनो यो भावस्तत् तत्त्वम् साधारण्योधर्म्मः साधर्म्यम् असाधारण्योधर्म्मो वैधर्म्यं तयोस्तत्त्वज्ञानं निःश्रेयसहेतुः विषयसंभोगजं सुखं तावत् अग्निसंविनापि दुःखवदुच्च स्वर्गादिपदं प्राप्यमपि सप्रत्यवं, ज्ञानिवचनं तथा च श्रुतिस्मृतिस्वर्गसाधनपरस्य स्वर्गराज्यम् अतस्तदपि सततं प्रच्युतिमत्त्वा परमसुखस्वर्गोपतापाच्च दुःखान्तरान्न निश्चितं श्रेयः। आत्यन्तिकी दुःखनिवृत्तिरसंसंवेदननिमित्तदुःखवेदनाकृपत्वादपरार्थत्वेन निश्चितं श्रेयः तस्य कारणं इत्यादिग्रन्थसमासः। एतेनैतत् प्रत्युक्तं यच्चोक्तं विशेषगुणनिवृत्तिलक्षणा मुक्तिरुच्छेदपक्षान्न भिद्यत इति। विशेषगुणोच्छेदे हि सति आत्मनः स्वरूपेणावस्थानं नोच्छेदोनित्यत्वात् नचायमपुरुषार्थः समस्तदुःखोपरमस्य पुरुषार्थत्वात् समस्तसुखाभावादपुरुषार्थत्वमिति चेत् न सुखस्यापि क्वचित्तया बहुजन्मलभनीयतया साधनप्रार्थनायतपरिक्लिष्टतया च सदा दुःखाक्रान्तस्य विषमिश्रस्येव मधुनोदुःखपक्षे निक्षेपात्"। कियदन्तरे तत्रैव। "तत् निःश्रेयसं धर्म्मादेव भवति इत्यादि तत्त्वज्ञानं तस्य कारणत्वेन निःश्रेयसाधनम् इत्यभिप्रायः तत्त्वतोज्ञातेषु बाह्याध्यात्मिकेषु विषयेषु दोषदर्शनाद्विरक्तस्य सम्यक्त्वानिष्टसाधनत्वज्ञस्य तदर्थानि कर्म्माण्यकुर्व्वतस्तत्परित्यागसाधनानि च श्रुतिस्मृत्युदितानि अकुर्व्वतः फलान्युपादत्तस्यात्मज्ञानमभ्यस्यतः प्रकृष्टविनिवर्त्तकधर्म्मोपचये सति परिपक्वात्मज्ञानस्यात्यन्तिकपरशरीरवियोगस्यवादृष्टोहि विषयाणामधिकरणकारणानां, परित्यागोविषयदोषदर्शनादभिसन्धिकृततनिवर्त्तकालविशेषगुणात् प्रकर्षात् तेन चरीरादीनामात्यन्तिकः परित्यागोविषयदोषदर्शनपूर्वकानभिसन्धिकृततनिवर्त्तकालविशेषगुणनिमित्तविघातः इति मोक्षाधिकारे वक्ष्यामः। धर्म्मोपि केवलं न तावत्पुरुषं करोति यावदीश्वरेच्छया नानुगृह्यते तेनेदमुक्तम् ईश्वरनोदनेत्यादि। नोदना प्रेर्य्यन्ते स्वकार्य्येषु प्रवर्त्यन्ते अनया भावा इति नोदना ईश्वरस्य नोदना ईश्वरेच्छाविशेषः अभिव्यक्तिः कार्य्यारम्भं प्रत्याभिमुख्यम् ईश्वरनोदनयाऽभिव्यक्तात् ईश्वरेच्छाविशेषेण कार्य्यारम्भाभिमुखीभूताद्धर्म्मादेव निःश्रेयसं भवतीति वाक्यशेषना"। एवं विषयप्रयोजनादिकं यत्रःस्वग्रामभिहितं तत्र प्रतिपाद्यविषयाश्च सर्वत्र० दर्शिता यथा

इह खलु निखिलक्लेशावसिसर्गप्रतिकूलवेदनीयतया निखिलसंवेदनसिद्धं दुःखं जिहासुस्तद्धानोपायं जिज्ञासुः परमेश्वरसाक्षात्कारहेतुपायसाकल्यात् "यदा चर्म्मवदाकाशं वेष्टयन्तीह मानवाः। तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति" इत्यादिवचनविहितप्रामाण्यात्। परमेश्वरसाक्षात्कारश्च श्रवणमननभावनाभिर्भावनीयः यदाह "आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम्" इति तत्र मननमनुमानाधीनमनुमानञ्च व्याप्तिज्ञानाधीनं व्याप्तिज्ञानञ्च पदार्थविवेकापेक्षम्। अतः पदार्थनिरूपणम्" "अथातो धर्म्मं व्याख्यास्यामः इत्यादिकायां दयानन्दस्वामिकृतभाष्ये भगवता व्यवस्थापि तत्राग्निहोत्रादीनां प्रथमे

ऽध्याये समवेतार्थपदार्थकथनमकारि । तत्रापि प्रथमाह्निके जातिमन्निरूपणं, द्वितीयाह्निके जातिविशेषनिरूपणम् । आह्निकद्वययुक्ते द्वितीयेऽध्याये द्रव्यनिरूपणं, तत्रापि प्रथमाह्निके भूतविशेषलक्षणं, द्वितीये दिक्कालप्रतिपादनम् । आह्निकद्वययुक्ते तृतीये आत्मान्तःकरणलक्षणं, तत्रात्मलक्षणं प्रथमे, द्वितीये अन्तःकरणलक्षणम् । आह्निकद्वययुक्ते चतुर्थे शरीरतदुपयोगिविवेचनं, तत्रापि प्रथमे तदुपयोगिविवेचनं द्वितीये शरीरविवेचनम् । आह्निकद्वयवति पञ्चमे कर्मप्रतिपादनं, तत्रापि प्रथमे शरीरसम्बन्धिकर्मचिन्तनं, द्वितीये मानसकर्मचिन्तनम् । आह्निकद्वयवर्तिनि षष्ठे श्रौतधर्मनिरूपणं, तत्रापि प्रथमे दानप्रतिपक्षधर्मविवेकः, द्वितीये चातुराश्रम्योचितधर्मनिरूपणम् । तथाविधे सप्तमे गुणसमवायप्रतिपादनं, तत्रापि प्रथमे बुद्धिनिरपेक्षगुणप्रतिपादनं, द्वितीये तदपेक्षगुणप्रतिपादनं समवायप्रतिपादनञ्च । अष्टमे निर्विकल्पकसविकल्पकप्रत्यक्षप्रमाणचिन्तनम् । नवमे बुद्धिविशेषप्रतिपादनम् । दशमे अनुमानभेदप्रतिपादनम् । तत्र उद्देशो लक्षणं परीक्षा चेति त्रिविधास्तत्र प्रवृत्तिः । ननु विभागापेक्षया चातुर्विध्ये वक्तव्ये कथं त्रैविध्यमुक्तमिति चेन्नैवं संख्याविभागस्य विशेषोद्देश एवान्तर्भावात् । तत्र द्रव्यगुणकर्मसामान्यविशेषसमवाया भावा इति षडेवैते पदार्था इत्युद्देशः । किमत्र क्रमनियमे कारणम् ? उच्यते समस्तपदार्थायतनत्वेन प्रधानस्य द्रव्यस्य प्रथमनिर्देशः । अनन्तरं गुणत्वोपाधिना सकलद्रव्यवृत्तेर्गुणस्य, तदनु सामान्यवत्त्वसाम्यात् कर्मणः, पश्चात्तन्निश्रितयोश्चितस्य सामान्यस्य, तदनन्तरं समवायाधिकरणस्य विशेषस्य, अन्ते अवशिष्टस्य समवायस्येति क्रमनियमः । ननु षडेव पदार्था इति कथं कथ्यते, अभावस्यापि सद्भावादिति चेन्नैवं बोधः नञर्थोल्लिखितधीविषयतया भावरूपतया षडेवेति विवक्षितत्वात् तथापि कथं षडेवेति नियम उपपद्यते विकल्पानुपपत्तेः. तथाहि नियमव्यवच्छेद्यं प्रमितं न वा प्रमितत्वे कथं निषेधः अप्रमितत्वे कथन्तराम्, नहि कश्चित् प्रेक्षावान् मूषिकविषाणं प्रतिषेद्धुं यतते, ततश्चानुपपत्तेर्नो निश्चय इति चेन्नैवं भाषितः सप्रमतया प्रमिते अन्धकारादौ भावत्वस्य भावतया प्रमिते यक्षिसादृश्यादौ सप्रमत्वादेश्च निषेधादिति ज्ञातं विस्तरेण ।

तत्र द्रव्यादित्रितयस्य द्रव्यत्वादिजातिर्लक्षणम् । द्रव्यत्वं नाम ननमारविन्दसमवेतत्वे सति नित्यगन्धासमवेतम् । (गगनसमवेतत्वे सति पद्मसमवेतत्वे सति नित्यत्वे सति गन्धासमवेतत्वं द्रव्यत्वलक्षणम् । सत्ताद्रव्यजातिव्यवच्छेदाय गन्धासमवेतत्वसङ्गतम् कालिकसम्बन्धेन द्रव्यत्वस्य गन्धवत्त्वादसम्भवव्यवच्छेदाय गन्धसमवेतत्वसङ्गतम् संयोगादेर्गन्धासमवेतत्वेन गगनादिसमवेतत्वेनातिप्रसङ्गव्यवच्छेदाय नित्यत्वे सतीति विशेषणम् । पद्मत्वपृथिवीत्वजातौ पद्मसमवेतत्वस्य नित्यत्वस्य गन्धासमवेतत्वस्य च सत्त्वादतिप्रसङ्गव्यवच्छेदाय गगनसमवेतत्वे सतीति विशेषणम् गगनपरिमाणस्य नित्यस्य गन्धासमवेतस्य तथात्वव्यवच्छेदाय पद्मसमवेतत्वे सतीति विशेषणम् इतिबोध्यम्) । गुणत्वं नाम समवायिकारणासमवायिकारणभिन्नसमवेतसत्तासाक्षाद्व्याप्यजातिः । (सत्तासाक्षाद्व्याप्यस्य समवायिकारणद्रव्यसमवेतस्य द्रव्यत्वस्य, असमवायिकारणसमवेतस्य कर्मसमवेतस्य कर्मत्वस्य च तथात्वव्यवच्छेदाय तदुभयभिन्नसमवेतत्वं जातौ विशेषणम् गुणत्वस्य तु तथात्वम् गुणेषु ज्ञानादिषु असमवायिकारणभिन्नेषु समवेतज्ञानत्वादेः सत्तासाक्षाद्व्याप्यत्वेऽपि नातिप्रसङ्गः) कर्मत्वं नामानित्यसमवेतत्वसहितसत्तासाक्षाद्व्याप्यजातिः । (अनित्यत्वसमवेतत्वे सति सत्तासाक्षाद्व्याप्यजातित्वम् कर्मत्वलक्षणम् द्रव्यत्वस्य गुणत्वस्य च नित्यत्वसमवेतत्वाभावान्न तथात्वम् । संयोगत्वादेस्तथात्वेऽपि सत्तासाक्षाद्व्याप्यत्वाभावान्नातिप्रसङ्गः) सामान्यन्तु ध्वंसप्रतियोगित्वरहितमनेकसमवेतम् । (संयोगविभागादौ अनेकसमवेतेऽतिप्रसङ्गव्यवच्छेदाय ध्वंसप्रतियोगित्वरहितेति अत्यन्ताभावे तथात्वव्यवच्छेदाय समवेतत्वं विशेषणम्) । विशेषो नामान्योन्याभावविरोधिसामान्यरहितः समवेतः । समवायस्तु समवायरहितः सम्बन्ध इति षण्णां लक्षणानि व्यवस्थितानि ।

"द्रव्यं नवविधं पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसीति । तत्र पृथिव्यादित्रितयस्य पृथिवीत्वादिजातिर्लक्षणम् । पृथिवीत्वं नाम पाकजरूपसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिः । अप्त्वं नाम सरित्सागरसमवेतत्वे सति सलिलसमवेतं सामान्यम् । तेजस्त्वं नाम चन्द्रामीकरसमवेतत्वे सति उष्णस्पर्शसमवेतं सामान्यम् । वायुत्वं नाम त्वगिन्द्रियसमवेतद्रव्यत्वसाक्षाद्व्याप्यजातिः । आकाशकालदिशामेकैकत्वादपरजात्यभावात् पारिभाषिकसंज्ञाः संज्ञा भवन्ति आकाशः कालो दिगिति । सर्वोत्पत्त्यवच्छेदकविशेषगुणसमानाधिकरणविशेषाधिकरणमात्मा

त्वम् । विभुत्वे सति दिगसमवेतपरत्वासमवायिकारणाधिकरणम् कालः । अकालत्वे सत्यविशेषगुणा महती दिक् । आत्ममनसोरात्मत्वमनस्त्वे । आत्मत्वं नाम अमूर्तसमवेतद्रव्यत्वापरजातिः । मनस्त्वं नाम द्रव्यसमवायिकारणत्वरहिताणुसमवेतद्रव्यत्वापरजातिः । रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्च कण्ठोक्ताः सप्तदश चगब्दसमुच्चिताः गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाः सप्तैवेत्येवं चतुर्विंशतिर्गुणाः । तत्र रूपादिशब्दान्तानां रूपत्वादिजातिर्लक्षणम् । रूपत्वं नाम नीलसमवेतगुणत्वापरजातिः । अथवा द्विधा स्थितानां लक्षणानि द्रष्टव्यानि । कर्म पञ्चविधम् उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनभेदात् । भ्रमणरेचनादीनां गमन एवान्तर्भावः । उत्क्षेपणादीनामुत्क्षेपणत्वादिजातिर्लक्षणम् । तत्र उत्क्षेपणं नाम ऊर्ध्वदेशसंयोगासमवायिकारणप्रमेयसमवेतकर्मत्वापरजातिः । एवमवक्षेपणादीनां लक्षणं कर्त्तव्यम् । सामान्यं द्विविधं परमपरञ्च परं सत्ता द्रव्यगुणसमवेता गुणकर्मसमवेता वा । अपरं द्रव्यत्वादि तल्लक्षणं प्रागेवोक्तम् । विशेषाणामनन्तत्वात् समवायस्य चैकत्वाद्विभागो न सम्भवति तल्लक्षणञ्च प्रागेवादि । (सर्व्वत्रापरत्वं व्याप्यत्वम् अल्पदेशवृत्तित्वं वा) ।

"हित्वे च पाकजोत्पत्तौ विभागे च विभागजे। यत्र न स्खलिता बुद्धिस्त्वं वै वैशेषिकं विदुरिति" आभाणकस्य सद्भावात् द्वित्वाद्युत्पत्तिप्रकारः प्रदर्श्यते । तत्र प्रथममिन्द्रियार्थसन्निकर्षजन्यत्वादेकत्वसामान्यज्ञानं ततोऽपेक्षाबुद्धिः ततो द्वित्वोत्पत्तिस्ततो द्वित्वसामान्यज्ञानं तस्मात् द्वित्वगुणज्ञानं ततः संस्कारः" । तदाह

"आदाविन्द्रियसन्निकर्षजटादेकत्वसामान्यधीरेकत्वोभयगोचरा मतिरतो द्वित्वं ततो जायते । द्वित्वत्वप्रमितिस्ततोऽनु परतो द्वित्वप्रमाजन्तरं हे द्रव्ये इति धीरिय निगदिता द्वित्वोदयप्रक्रियेति"।

द्वित्वादेरपेक्षाबुद्धिजन्यत्वे किं प्रमाणम् अत्राऽऽहुराचार्याः अपेक्षाबुद्धिर्द्वित्वादेरुत्पादिका भवितुमर्हति व्यङ्ग्यत्वानुपपत्तौ तनानुविधीयमानत्वात् यद्यं प्रति संयोगवदिति" । वयन्तु ब्रूमः द्वित्वादिकमेकत्वद्वयविषयानित्यबुद्धिजन्यं भवति अनेकाश्रितगुणत्वात् पृथक्त्वादिवदिति ।

निष्पत्तिक्रमो निरूप्यते अपेक्षाबुद्धेर्द्वित्वसामान्यज्ञानञ्च द्वित्वोत्पत्तिसमकालनिष्पत्तिः अपेक्षाबुद्धेर्द्वित्वसामान्यज्ञानात् द्वित्वगुणबुद्धिसमसमयं द्वित्वस्यापेक्षाबुद्धिनिष्पत्तेर्द्रव्यबुद्धिसमकालं गुणबुद्धेः, द्रव्यबुद्धितः संस्कारोत्पत्तिसमकालं द्रव्यबुद्धेस्तदनन्तरसंस्कारादिति । तथाच संग्रहः "आदावपेक्षाबुद्ध्या हि नष्टेदैकत्वजातिधीः । द्वित्वोदयसमं पश्चात् सा च सज्जातिबुद्धितः । द्वित्वाख्यगुणधीकाले ततो द्वित्वं निवर्त्तते । अपेक्षाबुद्धिनाशेन द्रव्यधीजन्मकालतः । गुणबुद्धिर्द्रव्यबुद्ध्या संस्कारोत्पत्तिकालतः । द्रव्यबुद्धिः संस्कारादिति नायकभो मतः" इति ।

बुद्धेर्बुद्ध्यन्तरविनाश्यत्वे संस्कारविनाश्यत्वे च प्रमाणं विवादाध्यासितानि ज्ञानानि उत्तरोत्तरकार्य्यविनाश्यानि क्षणिकविशेषगुणत्वात् शब्दवत् । द्रव्यारम्भकसंयोगप्रतिबन्धिविभागजनककर्मसमकालमेकत्वसामान्यचिन्तया आश्रयनिष्ठत्वेन हित्वनिष्ठत्तिः कर्मसमकालमपेक्षाबुद्धिचिन्तनाद्भाभ्यामिति सङ्क्षेपः । अपेक्षाबुद्धिर्नाम विनाशकविनाश्यप्रतियोगिनी बुद्धिरिति बोद्धव्यम् ।

अथ द्व्यणुकनाशमारभ्य कतिभिः क्षणैः पुनरन्यद् द्व्यणुकमुत्पद्य रूपादिमद्भवतीति जिज्ञासायामुत्पत्तिप्रकारः कथ्यते । नोदनाद्यभिघातेन द्व्यणुकनाशः नष्टे द्व्यणुके परमाणावग्निसंयोगात् श्यामादीनां निष्पत्तिः निष्पन्नेषु श्यामादिषु पुनरन्यस्मादग्निसंयोगाद्द्व्यादीनामुत्पत्तिः उत्पन्नेषु रक्तादिषु अदृष्टवशात्संयोगात् परमाणौ द्व्यारम्भणाय क्रिया तया पूर्व्वदेशाद्विभागः विभागेन पूर्व्वदेशसंयोगनिष्पत्तिः तस्मिन्निष्पन्ने परमाणवन्तरेण संयोगोत्पत्तिः संयुक्ताभ्यां परमाणुभ्यां द्व्यणुकारम्भः आरब्धे द्व्यणुके कारणगुणादिभ्यः कार्य्यगुणादीनां रूपादीनामुत्पत्तिरिति यथाक्रमं नव क्षणाः । दग्धेन्धनादिप्रकारान्तरं विस्तरभयान्नेह प्रतन्यते । इत्थं पीलुपाकप्रक्रिया पीठरपाकप्रक्रिया तु नैयायिकधीसख्यता ।

विभागजविभागो द्विविधः कारणमात्रविभागजः कारणाकारणविभागजश्च । तत्र प्रथमं कथ्यते कार्य्यव्याप्ये कारणे कर्मोत्पन्नं यदावयवान्तराद्विभागं विधत्ते न तदाकाशादिदेशाद्विभागः । यदा त्वाकाशादिदेशाद्विभागः न तदावयवान्तरादिष्यिति नियमः कर्म्मणो गगनविभागाकर्त्तृत्वस्य द्व्यारम्भकसंयोगविरोधिविभागारम्भकत्वेन धूमस्य धूमध्वजजनकेनैव व्यभिचारात्तृणजन्यात् ततस्तावयवकर्म अवयवान्तरादेव विभागं करोति नाकाशादिदेशात् तस्य हि भागाद्द्व्यारम्भकसंयोगनिष्पत्तिः ततः कारणाभावात् कार्य्याभाव इति न्यायादवयवनिष्पत्तिः निष्पन्नेऽवयविनि तत्का-

त्वयोरवयवयोर्वर्त्तमानो विभागः कार्यविभागपरिशिष्टं च संयुक्तयोर्भावावयवमपेक्ष्य क्रियायत्वेनावयवस्य कार्यं संयुक्तादाद्यावयवविभागमारभते न निष्क्रियस्य, कारणाभावात्। द्वितीयस्तु कर्म्मोत्पन्नमवयवान्तरादिभागं कुर्व्वत् आद्यावयविदेशेभ्यो विभागमारभते, ते कारणाकारणविभागाः। कर्म वा हि प्रति कार्यारम्भाभिमुखतामपेक्ष्य कार्याकार्यविभागमारभते यथा फलाद्यवयविभागाच्छरीरादाद्यविभागः न चासौ शरीरक्रियायाः कार्यं तदा तस्य निष्क्रियत्वात्, नापि फलक्रियायाः कार्यं: अधिकरणस्य कर्मणो विभागस्यैवं त्वानुपपत्तेः। अतः पारिशेष्यात् कारणाकारणविभागस्य कारणत्वमङ्गीकरणीयम्।

यदादि अन्यकारादौ भावत्वं निषिध्यत इति तदयुक्तं तत्र चतुर्द्धा विवादसम्भवात्। तथाहि द्रव्यं तम इति साङ्ख्याः वेदान्तिनश्च भणन्ति, आरोपितनीलरूपमिति श्रीधराचार्याः; आलोकसंयोगाभाव इति प्राभाकरैकदेशिनः आलोकाभाव इति नैयायिकादयः इति चेत्तत्र द्रव्यत्वपक्षो न घटते विरुद्धानुपपत्तेः द्रव्यं भवदन्धकारं द्रव्यान्यत्वसम्बन्धाद्वा साङ्ख्याः यस्मान्नाभावोऽस्य तस्य यावन्तो गुणाश्चावयवाश्च सन्ति तावत्प्रसङ्गात्। न च तमसो द्रव्यवर्त्तिभाव इति साध्यतं निर्गुणस्य तस्य द्रव्यत्वासम्बन्धेन द्रव्यान्तरत्वस्य सुतरामसम्बन्धात्। ननु तमसोऽप्यालोकसंयोगाभावत्वं तमः कथं निर्गुणं, सादिति, नीलं तम इतिवत् भ्रान्तिरेवेत्यदं दुरुद्धरया। अत एव नारोपितनीलरूपं तमः अधिष्ठानप्रत्यक्षमन्तरेणारोपाभावात् बाह्यालोकसंस्कारारहितस्य चक्षुषो रूपारोपे सामर्थ्याभावसम्भवात्। न चायमचाक्षुषः प्रत्यक्षः तद्धेतुविधानस्यान्यथासिद्धत्वात्। न च विधिप्रत्ययवेद्यत्वायोगो भावे इति साम्प्रतं प्रत्ययविनाभावधानादिषु व्यभिचारात्। अत एव नालोकसंयोगाभावः अभावस्य प्रतियोगिग्राहकेन्द्रियग्राह्यत्वनियमेन मानसत्वप्रसङ्गात्। तस्मादालोकाभाव एव तमः न चाभावे भावधर्माध्यारोपो दुरुपपादः दुःखाभावे सुखत्वारोपस्य संयोगाभावे विभागत्वादिमानस्य च दर्शनात्। नन्वालोकाभावस्य यदाद्यभावरूपवद्भावत्वे नालोकसंयोगस्यचक्षुर्जन्यज्ञानविषयत्वं सङ्गादितोचितं, रूपवत्वे यदपेक्षं चक्षुरुद्भावपक्षेऽपि तदपेक्षत इति न्यायेनालोकपक्षे आलोकापेक्षाया अभावेन तदभावपक्षेऽपि तदपेक्षाया अभावात्। न चाधिकरणस्वरूपत्वाच्चक्षुषः अभावप्रतीतावधिकरणस्वरूपज्ञानस्यानपेक्षणीयत्वादिति वाच्यं, अभावप्रतीतौ प्रतियोगिज्ञानस्यैव कारणत्वात्। अन्यथा तमसि रूपवत्त्वप्रतीतिप्रसङ्गात्। न च तमसो रूपवत्त्वे प्रमाणाभावात् तत्र रूपवत्त्वं न प्रतीयत इति वाच्यं, अप्रामाणिकं तव वचनं परम्। तत्सर्वमभिसन्धाय भगवान् कणादः पृथिव्यादि चतुष्टयसमवृत्तिरूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागसंस्कारादृष्टाभावत्वं इति प्रत्यक्षवेद्यत्वेनापि निरूपितम्।

अभावस्तु निषेधमुखप्रमाणगम्यः स्वप्नो निरूप्यते। स चासम्बन्धत्वेसतिसमभावः (अनुयोगित्वप्रतियोगित्वसादात्म्यान्यतमसम्बन्धेन समवायशून्यत्वसमवायत्वम्) स च संसर्गाभेदतो द्विविधः संसर्गाभावोऽन्योन्याभावभेदात् संसर्गाभावोऽपि त्रिविधः प्राक्प्रध्वंसात्यन्ताभावभेदात् तत्रानादितत्वः प्रागभावः, सदुत्पत्तिमान् विनाशी प्रध्वंसः, पृथिव्योन्यत्रावोऽभावोऽतद्भाभावः। नन्वन्योन्याभाव एवातद्भाभाव इति चेत् अहो राजमार्ग एव भ्रमः अन्योन्याभावो हि तादात्म्यपृथिवीयोगिकः पृथिवीभेदः यथा घटः पटात्मा न भवतीति स्वसंसर्गपृथिवीयोगिकः पृथिवीभेदोऽतद्भाभावो यथा वायौ रूपसम्बन्धो नास्तीति। न चास्य दुरवधार्थविषयित्वं नास्तीत्याशङ्कनीयं दुःखात्यन्तोच्छेदापरपर्यायनिःश्रेयसरूपत्वेन परमपुरुषार्थत्वात्"।

वाक्यान्ते च १०अ० २आह्निके "इष्टानां दिष्टप्रयोजनानां इष्टाभावे प्रयोगोऽभ्युदयाय" इत्र०। "इष्टानां प्रमाणत उपलब्धानां वाग्दानस्नानादीनां दिष्टप्रयोजनानां दिष्टमुपदिष्टं प्रयोजनं येषां तेषां तथाहि "स्वर्गकामोयजेत" "अग्निहोत्रं जुहुयात् स्वर्गकाम" इत्यादौ विधिसमभिव्याहृतमेव फलम्, क्वचिदर्थवादिकं यथा "अपता रात्रेरारोधोयोत तस्य पितरोऽन्तकुलाभधुकुल्याःसरन्ति"इत्यादौ, क्वचिदौपयादनिकम्, यथा "विश्वजिता यजेत" इत्यादौ, अत्र हि न विधिसमभिव्याहृतनार्थवादोपस्थितमितरौपयादनिकं काम्यत्वं स्वर्गस्यैव अतः इन्द्रस्य फलस्य काम्यत्वात्, तथाचानुष्ठरविनाशिनामेतेषां कर्म्मणां चिरभाविने फलाय कारणत्वमनुपपन्नमनन्तरमेवं प्रयोगोऽनुष्ठानमभ्युदयायापूर्वायेत्यर्थः। ननु श्रुतिप्रामाण्ये सति स्वादेव तदेव तु दुर्घटं नहि लोलांबालानामिव नित्यनिर्दोषत्वेन श्रुतिप्रामाण्यं त्वयेष्यते पौरुषेयत्वेनाभ्युपगमात्, दुरवद्यं च भ्रमप्रमादविप्रलिप्सादिसम्भवात् आह इष्टाभाव इति इष्टं दुरवधारणेऽनादौ भ्रमप्रमादविप्रलिप्सादिकं दुरवधूतं यदभावे यतीत्यर्थः। नित्यकर्त्तृत्वेन वेदस्य कृतेन वाऽनुपलब्धस्य पुरुषधौरेयस्य निर्दोषत्वे नैमोपस्थितेः, तथा च तद्वचसां न निरभिप्रेयता न विपरीताभिप्रेयता च विध्युद्देशनाभिधे-

वमा, भूतेन्द्रियमनसां दोषाणां भ्रमप्रमादकरणापाटवादि-प्रयुक्तो एव वचसामविशुद्धः सम्भाव्यते, न चेश्वरवचसि तेषां सम्भवः, तदुक्तम् "रागाद्यनादिभिर्दोषैर्मुक्ता यस्तत्त्वादर्शनं वहेत् । तेनेश्वरेण निर्मुक्तो न विपरीतं कथमन्यथेति"।

ननु तेनेश्वरेण वेदस्य प्रणीतत्वमेव विप्रतिपत्तिरतआह । उप० "तद्वचनादाम्नायस्य प्रामाण्यमिति" १०सू०।

"इति याज्ञपरिसमाप्तौ । तद्वचनात्तेनेश्वरेण वचनात् प्रणयनादाम्नायस्य वेदस्य प्रामाण्यं तथाहि वेदास्तावत् पौरुषेया वाक्यत्वादितिसाधितं मन्वादयस्तेषां सकलयाथार्थ्यविच्छेत्तारः सम्भाव्यन्ते, अतीन्द्रियार्थत्वात्, मन्वादीतीन्द्रियार्थदर्शिनोऽन्वादयः। किञ्चाप्तोक्तावेदा महाजनपरिग्रहीतत्वात् यदाप्तोक्तं न तन्महाजनपरिग्रहीतं महाजनपरिग्रहीतञ्चेदं तस्मादाप्तोक्तम् । स्वतन्त्रपुरुषप्रणीतत्वात्वाप्तोक्तत्वम् । महाजनपरिग्रहीतत्वञ्च सर्व्वदर्शनान्तःपातिपुरुषानुष्ठीयमानार्थत्वम्, क्वचित् फलाभावः कर्म्मकर्त्तृसाधनवैगुण्यादित्युक्तम् । कर्त्तृसाधनाभावात्तैर्वेति चेन्न कर्त्तृसाधनस्य पूर्व्वमेव साधितत्वात्, तत्प्रणीतत्वञ्च स्वतन्त्रपुरुषप्रणीतत्वादेव सिद्धम्, न त्वस्मदादीनां सकलयाथार्थ्यवेदप्रणयने स्वातन्त्र्यं संभवतीत्युक्तत्वात् । किञ्च प्रमाया गुणजन्यत्वेन वैदिकप्रमायामपि गुणजन्यत्वमावश्यकं तत्र च गुणोवक्तृयथार्थवाक्यार्थज्ञानमेव वाच्यतया च तादृश एव वेदे वक्ता, यः स्वर्गापूर्व्वादिविषयकसाक्षात्कारवान्, तादृशस्य नेश्वरादन्य इति सुष्ठु" ।

औलूखल त्रि० उलूखले भवं यौधिकोऽण् । १उलूखलेपिष्टयावकादौ । उलूखले भवः अण् । २उलूखलभवे यवक्षादौ च । "अभिषुणोतौलूखलाद्वायता" कात्या० १०,३,११, । "उलूखलेभवा औलूखलाः ध्वनयः" कर्क०

औवेणक न० "अपरान्तकसञ्ज्ञोऽयं मङ्कं प्रकरो तथा । औवेणकं सरोविन्दुसुतरं गीतकानि च" या० उक्ते गीतिभेदे

औशनस न० उशनसा गुरुणेाक्तं प्रोक्तम् अण् । गुरुणेाक्ते पुराणे "तत्रैवोशनसेरितम्" कूर्म्मपु० २दण्डप्रणयनरूपे धर्म्मशास्त्रभेदे तच्च प्रतिलोमजातवर्णसङ्करविधानप्रतिपादकग्रन्थम् । उशनसा दृष्टं साम अण् । ३उशनसा दृष्टे सामनि । ऋग्वेदम् अण् । ५तत् सम्बन्धिनि त्रि० । "व्युह्य चौशनसं व्यूहम्" भा० व० २८३अ० । "लोकमौशनसं दिव्यं शक्रलोकञ्च गच्छति" भा० अनु० १७३अ० । उशनसि भवः अण् । ६शुक्रभवे स्त्रियां ङीप् सा च ७देवयान्याख्यायां तदीय दुहितरि "विद्धौशनसि ! भद्रन्ते न त्वमर्हेाऽसि भाविनि !" भा० आ० ८१ अ० देवयानीं प्रति कचोक्तिः ।

औशिज पु० उशिजेा अपत्यं अण् । १ऋक्षायुत्रे । "औशिजाय वसिजे दीर्घश्रवसे" ऋ० १,१११,११ । २प्रवरर्षिभेदे "काक्षीवतामाङ्गिरसौचथ्यगौतमौशिजकाक्षीवतेति" आश्व० औ० १२,११,२ ।

औशीनर पु० उशीनरस्यापत्यम् उत्सा० अञ् । उशीनरस्यापत्येषु शिबिप्रभृतिषु । उशीनरशब्दे १३७५ पृ० उशीनरशब्दे उक्तः । तत्सुतास्तु "उशीनरस्य पत्न्यस्तु पञ्च राजर्षिवंशजाः । कृमा कृमिर्नवा दर्वा पञ्चमी तु दयद्वती । उशीनरस्य पुत्रास्तु पञ्च तासु कुलोद्वहाः । तपसा चैव महता जाता ब्रह्मसु चात्मजाः । कृमायास्तु कृमेः पुत्रः कृम्याः कृमिरजायत । नवायास्तु नवः पुत्रोदर्वायाः सुव्रतोऽभवत् । दयद्वत्यास्तु संजज्ञे शिबिरौशीनरो नृपः" हरिवं० २१अ० उक्ताः तच्चरितन्तु भा० वन० १९८अ०। "देवानां कथा संजाता महीतलं गत्वा महीपतिं शिबिमौशीनरं साध्वेनं जिज्ञासिष्याम इति। एवं भो इत्युक्त्वा अग्नीन्द्राभ्यामादिष्टौ । अग्निः कपोतरूपेण तमभ्यधावदाभिमार्थमिन्द्रः श्येनरूपेण । अथ कपोतो राज्ञो दिव्यासनाशीनस्य उत्सङ्गं न्यपतत् । अथ पुरोहितो राजानमब्रवीत् । प्राणरक्षार्थं श्येनाद्भीतो भवन्तं प्राणार्थी प्रपद्यते । यच्च ददाद्धनवान् पार्थिवोऽस्य निष्कृतिं कुर्य्यात् । घोरं कपोतस्य निपातमाहुः । अथ कपोतो राजानमब्रवीत् । प्राणरक्षार्थं श्येनाद्भीतो भवन्तं प्राणार्थी प्रपद्ये । अक्षैरक्षानि प्राणार्थी सृजित्वा प्राणांस्त्वां प्रपद्ये । स्वाध्यायेन ऋषिं ब्रह्मचारिणं मां विद्धि । तपसा दमेन युक्तमाचार्य्यस्याप्रतिकूलभाषिणम् एवं युक्तमापं मां विद्धि । यदाहि वेदान् विचिनोमि छन्दः सर्वे वेदा अक्षरशो मे अधीताः । न साधु दानं श्रोत्रियस्य प्रदानं मा प्रदाः श्येनाय न कपोतोऽस्मि । अथ श्येनो राजानमब्रवीत् । पर्य्याप्तेयं वसतिर्मा भवेद्धर्मे जातः पूर्व्वमनात् कपोतात् । त्वमाददानोऽद्य कपोतमेनं मा त्वं राजन् ! विघ्नकर्त्ता भवेथाः । राजोवाच । केनेदृशो जातु पुरा हि दृष्टा वागुच्यमाना यकृनेन संकृता । यो वै कपोतोवदतेत्यनाद्य श्येन उभौ विदित्वा कथमस्तु साधु । नाद्य वर्षति वर्षकाले नाद्य बीजं रोहति काल उप्तम् । भीतं प्रपन्नं बोधि ददाति यत्नवेन त्राणं

अभते लाजमिच्छन् स काले । जाता दुहा प्रजा प्रमीयते सदा न वै वासं पितरोऽस्य कुर्वते । भीतं प्रपन्नं योऽहि ददाति यत्नवे नास्य देवाः प्रतिगृह्णन्ति हव्यम । मोघमन्नं विन्दति चाप्रचेताः सर्वाद्लोकाद्भ्रश्यति नीव्रमेव । भीतं प्रपन्नं यो हि ददाति यत्नवे क्षेन्द्रा देवाः प्रहरन्त्यस्य वज्रम् । उत्तार्णं पक्षा सह ओदनेन अक्षात् कपोतात् प्रति ते नयन्तु । यस्मिन् हैमे रथसेऽतीव श्येन ! तत्र मांसं प्रियमक्षे वहन्त । श्येन उवाच । नोत्तार्णं राजन् प्रार्थयेयं न चान्यदन्यन्मांसमधिकं वा कपोतात् । दैवैर्दत्तः सोऽद्य ममैष भक्ष्यस्तस्मे दत्त्वा यक्तनानामभयात् । राजोवाच । उत्तार्णं वेह तमनूनं नयन्तु ते पश्यन्तु पुरुषा समैव । भयादितस्त्वं दायं ममान्तिकात्त्वा प्रापयन्तु त्वं श्येन मा हिंसीः । त्यजे प्राणांस्तव दद्मि कपोतं सौम्यो ह्ययं किंचु जानामि श्येन ! । यथा श्येनं मा कुरुष्वेह सौम्य ! नाहं कपोतमर्पयिष्ये कथञ्चित् । यथा मां हि वै साधुवादैः प्रशस्याः प्रशंसेयुः शिवयः कर्मणा ते । यथा श्येन ! प्रियमेव कुर्यां प्रयाधि मां यद्वदेस्तत् करोमि । श्येन उवाच । जरोर्दक्षिणादुत्कृत्य स्वपित्तं तावद्राजन् ! यावन्मांसं कपोतेन समम् । तथा तत्साधु तात: कपोतः प्रशंसेयुः शिवयः कृतञ्च प्रियं स्यान्ममेति । अथ स दक्षिणादूरोरुत्कृत्य स्वमांसमपेक्षी तुलया धारयन् गुरुतर एव कपोत आसीत् । पुनरन्यदुत्कर्त्त गुरुतर एव कपोतः । एवं सर्व्वं समधिकृत्य शरीरं तुलायामारोपयामास तत्रापि गुरुतर एव कपोत आसीत् । अथ राजा स्वयमेव तुलामारुरोह । न च व्यलीकमासीद्राज्ञ एतदुत्तमं दृष्ट्वा तात इत्युक्त्वा प्रालीयत श्येनः । अथ राजा व्यवसीत् कपोतं विद्वः शिवयस्त्वां कपोत ! पृच्छामि ते शकुने ! को नु श्येनः । नानीश्वर ईदृशं जातु कुर्यादेतं प्रश्नं भगवन्ते विचन्नु । कपोत उवाच । वैश्वानरोऽहं त्वलनो धूमकेतुरर्थं श्येनो वज्रहस्तः शचीपतिः । साधु ज्ञातं त्वामहमं सौरथेयं नो जिज्ञासवा तत्सकाशं प्रपन्नौ । यामेतां मेधीं मम निष्क्रयाय प्रादाद्भवान्सिनोत्कृत्य राजन् । एतद्धो लक्ष्म शिवं करोमि हिरण्यवर्णं रुचिरं पुरुषगन्धम् । एतासां प्रजानां पालयिता यशस्वी सुरर्षीणामथ सम्मतो भूयम् । एतस्मात् पार्श्वात् पुरुषो जनिष्यति कपोतरोमेति च तस्य नाम । कपोतरोमाणं विविनौद्भवं पुत्रं प्राप्स्यति रूपवन्तं संहननं यशोदीप्यमानं द्रक्ष्यसि शूरमृषभं सौरथानाम्" उशीनरश्च दक्षिणतश्चरितमेवंरूपं तच्छिबेरेवेति बहुभिःकल्पा नेतत् पितापुत्रयोरभेदोपचारात् उशीनरशब्दप्रयोगात् इति । वस्तुतः कल्पभेदात् उशीनरस्य तत्पुत्रशिवेश्च तथा चरित्रमित्यविरोधः । अथश्च ययातेर्दौहित्रः तेन च ययाते: पुनरुत्थाने स्वर्गात् पतने तत्र सत्पुरुषदत्तयाऽसौ पुनः स्वर्गलोकं प्रापितः तत्कथा यथा । "पृच्छामि त्वां शिबिरौशीनरोऽहं ममापि लोकावटि सन्तीह तात ! । यद्यन्तरोक्षे यदि वा दिवि स्थितः शेषञ्च त्वां तस्य धर्म्मस्य मन्ये । ययातिरुवाच । यत्त्वं वाचा हृदयेनापि साधून् परीप्सन्नासात्थमंस्था नरेन्द्र ! । तेनान्तरिक्षादिवि लोकाः स्थितास्ते विद्युद्रूपाः खगवल्लोभहान्तः । शिबिरुवाच । तांस्त्वं लोकान् प्रतिपद्यस्व राजन् मयादत्तान्यक्षिनेष्टः क्षयस्ते । मयाहं तान् प्रतिपत्स्येह दत्त्वा यत्र गत्वा नानुशोचन्ति धीराः" "अन्ते च यजातिरिक्ष नक्षत्रराजः पूरोः पिता सार्व्वभौमस्त्रिहासम् । शुक्लं चार्थं मामकेभ्यो ब्रवीमि मातामहोऽहं भवतां प्रकाश्यम्" भा० आ०८३अ०। उशीनरस्य गोत्रापत्यम् इञ् । औशीनरिस्तद्गोत्रापत्ये पंस्त्री स्त्रियां ङीप् । "सूद्रायां गौतमो यत्र महात्मा संशितव्रतः । औशीनर्य्यामजनयत् काक्षीवादान् सुतान् सुमिः" भा० श०२०अ०। तस्यापत्यम् अत इञपि । औशीनरि शिबिरिदमे । "आर्ष्टिषेणो दिलीपश्च महात्मा चाप्युशीनरः । औशीनरिः पुण्डरीकः ययातिः शरभः शुचिः" भा०स०८ । यमसभावर्णने ।

औशीर न०अय-ईरन् किच्च ततः स्वार्थे प्रज्ञाद्यण् । १षष्ठितयोः शय्यापीठयोः क्षीरस्वामी । २शय्यायाम् ३आसने च पृथक् इति सुभूतिः । "अभ्यवहार्य्यं परमान्नमौशीरेऽद्यकामचारः कृतोऽभूत्" दशकुमा० । उशीरमिवाकारो ह्यस्य अण् । ४चामरे तस्य नलदमूलाकारत्वात्तथात्वम् । औशीरं चामरमस्यस्य अच् । ५चामरदण्डे अमरः । हेमच० दण्डाथतोक्षिचामरदण्डपरा "कृतं वेष्टनमौशीरमुपानद्व्यजनानि च । यातयामानि देयानि भूदाय परिचारिणे" भा० श०६०अ० । उशीरस्येदमण् । ६उशीरजे "खनन्त्यौशीरम्" यक्ष० ।

औशीरणशीरण्डी स्त्री ऊषण एव स्वार्थेऽण् औषणे कटुरसे शीरण्डो ७त० । शुरुण्डाम् तस्याः कटुरसत्वात्तथात्वम् ।

औषदश्वि पु० ओषदश्वस्य ऋषस्यापत्यम् इञ् । ओषदश्वि ऋषभे दापत्ये बहुमति ययातिदौहित्रे । "पृच्छामि त्वां वसुमानौषदश्वियस्ति लोके यदि मे नरेन्द्र !" भा०आ०

६१अ०। अस्य च यथा ययातिर्मातामहत्वेन औशीनरिग्रन्थे दर्शितः। तत्र भवच्छब्देनैतस्यापि परामर्शात् ध न० औषधेरिदम् "ओषधेरजातौ" पा०अण्। औषधिजाते १अन्नादौ २रोगनाशके द्रव्यभेदे। स्वार्थेऽण्। २औषधौ च। औषधशब्दार्थश्च सुश्रुते दर्शितः "एवमेतत् पुरुषोव्याधिरौषधम् क्रियाकाल इति चतुष्टयं व्याख्यातम्" इत्युक्त्वा "औषधमफलात् द्रव्यगुणरस वीर्य विपाकप्रभावनामादेयः" इत्युक्तम्। तेन द्रव्यमात्रसाध्यत्वमौषधत्वम्। अतएव तैजसतत्तद्विषविशेषाणामप्यौषधत्वम्। "रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्। ततः कर्म भिषक् पश्चात् ज्ञानपूर्वं समाचरेत्" चक्रद० परिपाटीमुक्त्वा रोगभेदेन औषधविशेषा उक्तास्तत एव तेऽधिगम्याः। तद्प्रयोगिभूम्यादिकं सुश्रुते दर्शितं यथा

"अथातो भूमिप्रविभागविज्ञानीयमध्यायं व्याख्यास्यामः ब्रह्मयमर्करात्रञ्चिषमस्तलोकब्रह्मयानाद्यावतनदेवतायतनसिद्धतामिरिन्द्रपङ्क्तामनूपराजभङ्गुरामरुदूदीदकां स्निग्धां प्ररोहवतीं बहुलां स्थिरां समां क्षुण्णां गौरीं लोहितां वा भूमिमौषधार्थं परीक्षेत तस्यां जातमपि क्षमिविषमशस्त्रातपपवनदहनतोयसम्बाधमार्गैरनुपहतमेकरसं पुष्टं पृथ्ववगाढमूलस्कन्धीयां औषधमादद्दीतौषधभूमिपरीक्षाविशेषः सामान्यः। विशेषतस्तु तत्राश्वत्थवती स्थिरा गुर्वी श्यामा क्षुण्णा वा स्थूलस्कन्धशाखाप्राया स्वगुणभूयिष्ठा। स्निग्धा शीतला सक्षीरोदका स्निग्धपत्रपुष्पफलोपलक्षप्राया शुक्लाम्ब्वगुणभूयिष्ठा। न्यग्रोधवर्षा स्थिरपत्रवती प्रतिशाखाप्रपारुष्यस्थूलप्ररोहाऽग्निगुणभूयिष्ठा। स्थूला भल्लातसमवर्षा बहुस्थूलकोटराल्परक्तस्थूलप्राया ऽनिलगुणभूयिष्ठा। बहुली श्यामा श्यामवल्क्यङ्कुरसलता सर्वतोऽसारस्थूला महापर्वतस्थूलप्राया श्यामा चाकाशगुणभूयिष्ठा। तत्र केचिदाचार्याः। प्राहुरृतुवर्षाशरद्धेमन्तवसन्तग्रीष्मेषु यथासंख्यं मूलपत्रत्वक्क्षीरसारफलान्यादद्दीतेति तत्तु न सम्यक् कस्मात्। सौम्यान्यौषधानि सौम्येषु ऋतुषु आदद्दीताग्नेयान्याग्नेयेषु सममव्यापन्नगुणानि भवन्ति। सौम्यान्यौषधानि सौम्येषु ऋतुषु गृहीतानि सोमगुणभूयिष्ठावां भूमौ जातान्यतिमधुरस्निग्धशीतानि जायन्ते। यतेन श्रेष्ठं व्याख्यातम्। तत्र पृथिव्यम्बुगुणभूयिष्ठायां भूमौ जातानि विरेचनद्रव्याण्यादद्दीतान्यग्न्याकाशमारुतगुणभूयिष्ठायां वमनद्रव्याणि। उभयगुणभूयिष्ठायामुभयतोभागानि। आकाशगुणभूयिष्ठायां संशमनान्येवं बलवर्णकराणि भवन्ति। सर्वाण्येव चाभिनवान्यन्यत्र मधुघृतगुडपिप्पलीविडक्षेभ्यः। सर्वाण्येव सक्षीराणि वीर्यवन्ति तेषामल्पसारावनतिक्रान्तसंवत्सरान्यादद्दीतेति। भवन्ति चात्र। गोपालाश्चाषवा व्याधा ये चान्ये वनचारिणः। मूलाहाराश्च ये तेभ्यो भेषजव्यक्तिरिष्यते। सर्वावयवसाध्येषु पत्राग्रबलवत्सादिषु। व्यवस्थितो न कालोऽस्ति तत्र सर्वो विधीयते। गन्धवर्णरसोपेता बहुधा भूमिरिष्यते। तस्माद्भूमिस्वभावेन वीर्याणिः षड्ऋतुर्युताः। अव्यक्तः किल तोयस्य रसो नित्यं विनिश्चितः। रस एव यथाव्यक्तो व्यक्तो भूमिरसाद्भवेत्। सर्वलक्षणसम्पन्ना भूमिः साधारणा स्मृता। द्रव्याणि यत्र तत्रैव तद्गुणानि विशेषतः। विगन्धेनापरागेण विषघ्नं रसादिभिः। नवं द्रव्यं पुराणं वा पाक्यमेव विनिर्दिशेत्। विश्वक्सेनं पिप्पली चौद्रं सर्पिर्पक्वान्नवं हितम्। श्लेष्मलत्वमभिनवं मृद्वीयाद्दोषवर्जितम्। जङ्गमानां वयःस्थानां रक्तरोमनखादिकम्। क्षीरभूतपुरीषाणि क्षीणाहारेषु संहरेत्। मृतवद्ग्राह्यफलकषायकटुविल्वत्तभेषजम्। प्रयत्नायां दिशि गुर्वी भेषजागारमिष्यते"।

औषधमफले परिभाषादिकमुक्तं भावप्र० यथा

"प्रयत्नदेये यद्ग्रातं प्रयत्नोऽफलि चोद्धृतम्। अल्पमात्रं बहुगुणं गन्धवर्णरसान्वितम्। दोषघ्नमन्नानिकरमधिकं न विकारि यत्। समीक्ष्य काले दत्तञ्च भेषजं स्याद्गुणावहम्। आग्नेया विन्ध्यशैलाद्याः सौम्यो हिमगिरिः स्मृतः। अतस्तदौषधानि स्युरनुरूपाणि हेतुभिः। आग्नेयाः अधिकाग्न्यादयः सौम्यः अधिकसोमांशः। औषधयो एवौषधानि। अत्र स्वार्थे अण्। अनुरूपाणि सदृशानि। अन्येषामपि प्ररोहन्ति वनेषूपवनेषु च। मृद्वीकावल्लानि सुमनाः शुचिः प्रातः सुवासरे। आदित्य सम्मुखो भौमी नमस्कृत्य शिवं वदि। साधारणधरा द्रव्यं मृद्वीवादुत्तराश्रितम्। साधारणधरा द्रव्यम् सर्वभूमिभवन्द्रव्यम्। उत्तराश्रितं स्वभावात् उत्तरदिग्भवम्। वल्लीकृतसितानूपशुष्कयाशोधरकार्गजाः। जन्तुवल्मिकिमध्यात्मा भौमध्यः कार्यसाधिकाः। धरत्रयसिद्धकार्यार्थं पात्रं धरत्रयौषधम्। विरेकमन्यथैवन्तु वमनान्तः समाहरेत्। वमनान्तः वमनमध्ये समाहरेत् संगृह्णीयात्। अतिस्थूलजटा याः स्युस्तासां पात्राण्यथो भुवम्। मृद्वीयात् मृद्भूमुखानि सकलान्यपि बुद्धिमान्। अन्यच्च। महान्ति येषां मूलानि

काष्ठगर्भाणि सर्व्वतः । तेषान्तु वल्कलं प्राह्यं क्वथ्य मूलानि सर्व्वशः । न्यग्रोधादेस्त्वचो प्राह्या सारःस्या द्बीजकादितः । तालीसादेश्च पत्राणि फलं स्यात् त्रिफलादितः । क्वचिन्मूलं क्वचित् कन्दः क्वचित् पत्रं क्वचित् फलम् । क्वचित् पुष्पं क्वचित् सर्व्वं क्वचित् सारः क्वचित् त्वचः । त्रिफलं सूरणं निम्बो बालश्च त्रिफला क्रमात् । धातकी कण्टकारी च खदिरः क्षीरपादपः । कपित्थस्य त्वक्षीयात् पत्राभावे त्वचामपि । बालस्फलन्तु त्रिफलस्य पक्वमारब्धस्य च । अक्षेऽनुक्ते जटा प्राह्या भागेऽनुक्तेऽखिलं समम् । पात्रेऽनुक्ते मृदः पात्रं काचेऽनुक्ते त्वहर्त्तुकम् । नवान्येव हि योज्यानि द्रव्याण्यखिलकर्म्मसु । विना विड्वरुक्षाराभ्यां गुडधान्या व्यमार्त्तिकैः । धान्यमम्लम् । पुराणन्तु प्रशस्तं स्यात्ताम्बूलकुक्षिकन्यया । शुष्कञ्चवीनद्रव्यन्तु योज्यं सकलकर्म्मसु । आर्द्रन्तु द्विगुणं युञ्ज्यादेष सर्व्वत्र निश्चयः । गुडूची कुटजो बाला कूष्माण्डश्च शतावरी । अश्वगन्धा सहचरी शतपुष्पा प्रसारिणी । प्रयोक्तव्या सहैवार्द्रा द्विगुणं नैव कारयेत् । सहचरी कुरण्टक (कटरै ब्या) इतिलोके । वासानिम्बपटोलोदुम्बरबला कृष्णाश्वदंष्ट्री वरी वर्षाभूः कुटजाश्च कन्दसहिता सा पूतिगन्धा मता । ऐन्द्री नागबला कुरण्टक पुरी कृष्णामता सर्व्वदा । सार्द्रा एवतु कुत्रचित् द्विगुणिता कार्य्येषु योज्या बुधैः । ऐन्द्री इन्द्रवारुणी । वरी शतावरी पूतिमन्था गन्धप्रसादनी नागबला (गुलञ्चकरि) कुरण्टक (पीतपुष्पझाँटि) (कटसरैया) पुरो गुण्डुः । घृतन्तैलञ्च पानीयं कषायं व्यञ्जनादिकम् । पक्वान्नं पोतोक्तं चोष्णं तत्सर्व्वं स्याद्विषोपमम् ।

द्रव्याणां परीक्षा । सूक्ष्मास्थिमांसला पथ्या सर्व्वकर्म्मसु पूजिता । क्षिप्तास्मसि निमज्जेद्या भल्लातक्य सधोत्तमाः । वराहमूर्द्धवत्कन्दो वारट्टीकन्दसंज्ञक । सौवर्च्चलन्तु काचाभं सैन्धवं स्फटिकप्रभम् । सुवर्णक्षीरिकं ज्ञेयं स्वर्णमाक्षिकसन्निभम् । इन्द्रपुष्पप्रतीकाशा मनोज्ञा चोत्तमा मता । श्रेष्ठं खिलाजतं ज्ञेयं प्रक्षिप्तं न विशीर्य्यते । तोयपूर्णे कांस्यपात्रे प्रतानेन विवर्द्धते । कर्पूरस्तुवरः स्निग्धः एला सूक्ष्मफला वरा । श्वेतचन्दनमत्यन्तं सुगन्धि गुरु पूजितम् । रक्तचन्दनमत्यन्तं लोहितम्प्रवरं मतम् । काकतुण्डनिभः स्निग्धोगुरुः श्रेष्ठो गुरुर्मतः । सुगन्धि लघु रूक्षञ्च सरदारु वरं मतम् । सरलं स्निग्धमत्यर्थं सुगन्धि च गुणावहम् । अतिपीता प्रशस्ता च श्रेया दारुनिशा बुधैः । जातीफलं गुरु स्निग्धं समं गुप्तान्तरं वरम् । जातीपत्रं लघूत्तमा श्रेया या स्यात्तोलानसन्निभा । करमर्द्दफलाकार मध्यमा सा प्रकीर्त्तिता । गोस्तनसन्निभा । (मुनका) इति लोके । करमर्द्दफलाकारा । (करोन्दोदाख) इति लोके । खण्डन्तु विमलं श्रेष्ठं चन्द्रकान्तसमप्रभम् । गव्याज्यसदृशं रूक्ष्यगन्धं मधु वरन्मतम् । अथ स्वभावतो हितानि । बालानां लोहितः शालिः षष्टिकेषु च यष्टिका । मूलकधान्येष्वपि यवोगोधूमः प्रवरो मतः । शिम्बीधान्ये वरो मुद्गो मसूरश्चादकी तथा । रसेषु मधुरः श्रेष्ठो लवणेषु च सैन्धवम् । दाडिमामलकान्द्राक्षाखर्ज्जूरङ्ग पटूषकम् । राजादनं मातुलुङ्गं फलवर्गेषु शस्यते । पटूषकं (फलसा) इति लोके । राजादनं (खिरिणी) इतिलोके । मातुलुङ्गं (बीजपूरा) इतिलोके । शाकेषु वास्तूकं जीवन्ती पोतिका वरा । पटोलं फलशाकेषु कन्दशाकेषु सूरणम् । एणः कुरङ्गो हरिणो जाङ्गलेषु प्रशस्यते । पक्षिणां तित्तिरिर्लावो वरो मत्स्येषु रोहितः । हरिणश्चाम्लवर्णः स्यादेणः कृष्णतया मतः । कुरङ्गश्चाप्य तिहृष्टो हरिणः कृत्तिको महान् । जलेषु दिव्यं दुग्धेषु गव्यमाज्येषु गोघृतम् । तैलेषु तिक्तजन्तैलमेषु सेवेषु सिता हिता । अथ स्वभावादहितानि । शिम्बीषु माषान् शाकेषु, लवणेषूषरं त्यजेत् । फलेषु लकुचं शाके सार्षपं न हितम्मतम् । गोमांसं श्याम्यमांसेषु महिषी यसा । मेषीपयः कुसुम्भस्य तैलन्याज्यञ्च फाणितम् । इक्षुरसः परिपक्वो योऽम्लीभूतः तृषापितम् तद्धि (छोयारा) इति लोके । अथ संयोगविरुद्धानि । मत्स्यान्मांसञ्च दुग्धयुक्तं विवर्ज्जयेत् । कमोत्तं सर्षपस्नेहमल्पितं परिवर्जयेत् । मत्स्यान्मिश्रोत्किारेण तथा चौद्रेण वर्ज्जयेत् । सकृन् मांसपयोयुक्तान्तृष्णैर्दधि विवर्ज्जयेत् । उष्णैश्चभोज्यैर्न चौद्रं पायसं क्षीरसन्मितम् । रम्भाफलं त्यजेत्तक्रं दधि बिल्वफलान्वितम् । दध्याहुमुचितं सर्पिः कांस्ये, मधुघृतं समम् । कृताञ्च कषायञ्च गुरुद्रव्याञ्जितं त्यजेत् । एकत्र बहुमांसानि विरुध्यन्ते परस्परम् । मधुसर्पिर्वसातैलं पानीयं वा पयस्तथा । अथ भेषजसङ्ग्रहसङ्ग्रहेतः । खण्डं सैन्धवं प्रोक्तं चन्दनं रक्तचन्दनम् । चूर्णलेहासवक्वेहाः साध्या धवलचन्दनैः । कषायपयोः प्रायो युज्यते रक्तचन्दनैः । अम्लःस्वल्पाम्लवर्ज्जने श्रेया त्वजमोदा यवानिका । बहिःस्वल्पाम्लवर्ज्जने नैव विज्ञातव्याजमोदिका । घृतः सर्पिः प्रयोक्तव्यं नवमेवहि

रुह्यते । अथ प्रतिनिधिः । चित्रकाभावतो दन्ती क्षारः शिखरिजोऽथवा । अभावे धन्वयासस्य पुत्रंप्रव्या दुरालभा । शिखरी अपामार्गः । तगरस्याप्यभावे तु कुष्ठं दद्याद्विषम्बरः । मूर्वाभावे त्वचो ग्राह्या जिङ्गिनीप्रभवा बुधैः । अर्कपर्ण्या अभावे तु मानकन्दः प्रकीर्त्तितः । लक्ष्मणाया अभावे तु नीलकण्ठशिखा मता । नीलकण्ठशिखा मयूरशिखा । बकुलाभावतो देयं कह्लारोत्पलपङ्कजम् । नीलोत्पलस्याभावे तु कुसुदं देयमिष्यते । जातिपुष्पं न यत्रास्ति लवङ्गं तत्र दीयते । अर्कपर्ण्यादि पयसो ह्यभावे तद्रसो मतः। पौष्करावभावतः कुष्ठं तथा लाक्षाभावतः । स्थौणेयकस्याभावे तु भिषग्भिर्दीयतेऽग्रदे । चविकागजपिप्पल्यौ पिप्पलीमूलवत् स्मृतौ । अभावे सोमराज्यास्तु प्रपुन्नाटफलं मतम् । यदि न स्याद्दारुनिशा तदा देया निशा बुधैः । सोमराजी बाकुची । प्रपुन्नाटफलं चक्रमर्दफलम् । दारुनिशा दारुहरिद्रा निशा हरिद्रा । रसाञ्जनस्याभावे तु सम्यग्दार्व्या प्रयुज्यते सौराष्ट्राभावतो देया स्फटिका तद्गुणा जनैः । सौरट्टी (सोरटीमाटी) इति लोके । स्फटिका (फटिकारी) इति लोके । तालोद्यपत्रकाभावे स्वर्णताली प्रशस्यते । भार्ग्यभावे तु तालीसं कण्टकारी जटाऽथ वा । रुचकाभावतो दद्याद्धवं पांशुपूर्ध्वकम् । अभावे मधुयष्ट्यास्तु चातकीञ्च प्रयोजयेत् । रुचकं(चीहार) इति लोके पांशुक्षार (खारी) अथ वा (रेह इति लोके । अन्तर्वेतसकाभावे चुक्रं दातव्यमिष्यते । द्राक्षा यदि न लभ्येत प्रदेयं काश्मरीफलम् । तयोरभावे कुसुमं वन्धूकस्य मतं बुधैः । लवङ्गकुसुमं देयं नखस्याभावतः पुनः । कस्तूर्यभावे कक्कोलं क्षेपणीयं विदुर्बुधाः । कक्कोलस्याप्यभावे तु जातीपूष्पं प्रदीयते । सुगन्धोसुस्तकं देयं कर्पूराभावतो बुधैः । कर्पूराभावतो देयं चन्दिपर्णं विशेषतः । कुङ्कुमाभावतो दद्यात् कुसुम्भकुसुमं नवम् । श्रीखण्डचन्दनाभावे कर्पूरं देयमिष्यते । अभावे त्वेतयोर्वैद्यैः प्रक्षिपेत् रक्तचन्दनम् । रक्तचन्दनस्याभावे नखोशीरं विदुर्बुधाः । सुखा जातिविषाभावे शिलाभावे शिखा मता । अभावे नागपुष्पस्य पद्मकेसरमिष्यते । मेदा जीवकाकोली ऋद्धिवृद्धेऽपि वाञ्छति । वरी विदार्य्यौ सुगन्धा वाराह्यौ च क्रमात् स्मृता । वरी शतावरी । वाराह्याश्च तथाभावे चक्रकारालुको मतः । वाराह्याकन्दएवान्यः सर्व्वकारालुको मतः । अनूपसम्भवे देये वराङ्गं ह्यतिशोभवान् । भल्लातकासम्भवे तु रक्तचन्दनमिष्यते । भल्लातोभावतश्चित्रं नलस्यैवोरुभावतः । सुवर्णाभावतः स्वर्णमाक्षिकं प्रक्षिपेत् बुधः । श्वेतन्तु माक्षिकं श्रेयं बुधैः रजतवत् ध्रुवम् । माक्षिकस्याप्यभावे तु प्रदद्यात् स्वर्णगैरिकम् । सुवर्णमय वा रौप्यं स्मृतं यत्र न लभ्यते । तत्र कान्तेन कर्म्माणि भिषक्कुर्य्याद्विचक्षणः । कान्ताभावे तौक्ष्ण्यलोहं योजयेद्दोषसत्तमः । अभावे मौक्तिकस्यापि शुक्लाशुक्तिं प्रयोजयेत् । मधु यत्र न लभ्येत तत्र जीर्णगुडो मतः । मत्स्याण्डभावतो दद्युर्भिषजः सितशर्कराम् । असम्भवे सितायास्तु बुधैः खण्डं प्रयुज्यते । क्षाराभावे रसो मौद्गो माक्षरो वा प्रदीयते । अत्र प्रोक्तानि वस्तूनि यानि तेषु च तेषु च । योज्यमेकतराभावे परं वैद्येन जानता । रसवीर्य्यविपाकाद्यैः समं द्रव्यं विचिन्त्य च । युञ्जाद्यादिविधमन्यच्च द्रव्याणान्तु रसादिवत् । योगे यदप्रधानं स्यात्तस्य प्रतिनिधिर्मतः । यत्तु प्रधानं तस्यापि सदृशं नैव रुह्यते । याधेरयुक्तं यत् द्रव्यं गुणोक्तमपि तत् त्यजेत् । अनुक्तमपि युक्तं यत् योजयेत् तद्रसादिवत् । द्रव्यगतपञ्चपदार्थकर्म्माण्याह । द्रव्ये रसो गुणो वीर्य्यविपाकः शक्तिरेव च । पदार्थाः पञ्च तिष्ठन्ति स्वं स्वं कुर्व्वन्ति कर्म्म च" । "वीर्य्यवन्त्योषधिनांव विकारे सान्निपातिके" कुमा० । "द्वेष्योऽपि सम्मतः शिष्टस्यार्त्तस्य यथौषधम्" रघुः । "स्य विषमौषधम्"उद्भटः "भवौषधात् श्रोत्रमनोऽभिरामात्" भाग०१,१, "औषधं जाह्नवीतोयं वैद्यो नारायणः स्वयम्" पुरा० । संसाररूपदुःखदायकरोगनिवारके ४परमेश्वरे च "औषधं जगतां सेतुः" विष्णु०सं० ।

औषधि स्त्री आ+ओषधि—प्रा० स० । सस्यगोषधौ । "विरमन्ति न जुह्वितमौषधयः" किरा० वा ङीप् । औषधी ।

औषर न० उषरे भवः अण् । पांशुक्षारे राजनि० ।

औषरक न० औषरमिव कन् । (खारी) क्षारभेदे राजनि० ।

औषस न० उषसि भवः सन्धिवेलेत्यादिना योगविभागात् अण् । १उषसिभवे । वस्तुतः भवार्थे "कालाट्ठञ्" पा०ञ्नेः ठञ् स्यात् तेन औषस इदम् इत्यर्थे इत्युचितम् । २उषः सम्बन्धिनि । "अनुदितौषसरागेति "औषसातपभयाटपलीनम्" इति च" किरा० स्त्रियां ङीप् । "या ओषाः प्रत्यौषसी सा" शत० ब्रा० ६,१,२,८, उषस्+वा० यत् स्वार्थे अण् । औषस उषोभवे त्रि० ।

औष(स्त)स्य त्रि॰ उषस्तेरिदम् अण् यञ् वा । उषस्तिचरितान्ते का॰ उ॰ ब्राह्मणकाण्डभेदे । तच्च "उषस्तिर्ह चाक्रायणः" इत्यादि तत्तत्वं ब्राह्मणं "औषस्ते(स्त्ये) काण्डे ऽविदुषामपि आत्मिज्ञदर्शनात्" का॰ उ॰भा॰ ।

औषसिक त्रि॰ उषसा चरति ठक् टिलोपः । १उषसाचारिणि च । उषसि भवः कालाट्ठञ्"पा॰ ठञ् । २उषसिभवे च ।

औषिक त्रि॰ उषा उषसि भवः ठञ् । उषाभवे स्त्रियां ङीप् ।

औष्ट्र न॰ उष्ट्रस्येदम् अण् । उष्ट्रदुग्धादौ । "औष्ट्रं दुग्धं लघु स्वादु तत्तथा दीपनं तथा । कफिकृत्कफकासाक्ष्योर्वो दरकृमिं हरम्" भावप्र॰ । "अजिर्द्दाया: गोः क्षीरमौष्ट्रमेकगुणं तथेति" मनुः उष्ट्रशब्दे विवृतिः ।

औष्ट्रक न॰ उष्ट्राणां समूहः गोत्रोक्षोष्ट्रेत्यादिना वुञ् । उष्ट्रसमूहे । उष्ट्रस्य विकारोऽवयवो वा वुञ् । २उष्ट्रविकारे ३तदवयवे च त्रि॰ ।

औष्ट्ररथ न॰ उष्ट्ररथस्येदम् "पत्यपर्ष्वादञ्" पा॰ रथादित्वात्तस्तौ अञ् । उष्ट्रवाह्यरथसम्बन्धिनि ।

औष्टायण पुंस्त्री उष्ट्रस्यापत्यम् बा॰ फक् । उष्ट्रापत्ये ततः चतुरर्थ्यां अरोहणादि॰ वुञ् । औष्ट्रायणक तत्सम्बन्धिनि तदध्येतरि त्रि॰ ।

औष्ट्रिक त्रि॰ उष्ट्रे भवः ठक् । उष्ट्रभवे दध्यादौ "विपाके कटु सक्षारं गुरु भेद्यौष्ट्रिकं दधि" सुश्रुतः ।

औष्ठ त्रि॰ ओष्ठ ओष्ठाकारोऽस्य प्रज्ञा॰ अण् । ओष्ठाकारकालावयवयुक्ते आश्विनपक्षपाले । "औष्ठमाश्विनम्" काला॰ ६,१,७, "औष्ठावयवयुक्तमाश्विनपक्षपालम्"कर्कः "तद्धिदेवत्तमौष्ठमाश्विनपालम्" यत॰ ब्रा॰ ४,१,५,१६ ।

औष्ठ्य त्रि॰ ओष्ठे भवः यत् स्वार्थे अण् । ओष्ठभवे उपरि पवर्गयोः "ओष्ठ्यावुपू" इतिविधौक्ते ओष्ठ्यवर्णात्मनि

औष्णिज न॰ उष्णिज्+प्रज्ञा॰ स्वार्थेऽण् । उष्णिगर्थे ।

औष्णिह त्रि॰ उष्णिहि भवः उत्सा॰ अञ् तस्येदमण् वा । १उष्णिक्छन्दोभवे २ततुपसम्बन्धिनि च । उष्णिहा स्तुत्यः अण् । २उष्णिक्छन्दसा स्तुते सवितरि "सवित्र उष्णिहाय" यजु॰ १९,६ ।

औष्णीक त्रि॰ उष्णीषे शोभते अण् ठक्वो॰ । १उष्णीषधारिणि २तद्धारिजनपदविशेषे ३तद्भूमे च "औष्णीकानन्तवासांस्य योधकान् पुरुषादकान्" भा॰ स॰ ५० ।

औष्ण्य न॰ उष्णस्य भावः गुणवचनत्वात् ष्यञ् । उष्णस्पर्शे च च "उष्णस्पर्शस्तु तेजसः" इत्युक्तेः तेजसएव स्वाभाविकधर्म्मः ततसंयोगादितरेषामौपाधिकः । सुश्रुते तत्कार्य्यपित्तस्य धर्म्म इत्युक्तं यथा "औष्ण्यतैक्ष्ण्यद्रवौष्ण्यसरत्वसरगन्धवर्णवत्त्वगुणबहुलं पित्तं तस्य समानयोनिः कटुकोरसः सोऽस्यौष्ण्यादौष्ण्यं वर्द्धयति" सुश्रु॰ ।

औष्म्य न॰ उष्मणोभावः कर्म्मत्वं वा यञ् । उष्मस्पर्शे । "पूर्वराजवियोगौष्म्यं कृत्स्नस्य जगतोऽकृतम्" रघुः । उष्मस्पर्शो यद्यपि तेजोयोगात् भवति तथापि देहस्य तथा स्वर्गः स्वप्रदयाकृत्स्नकर्म्मदेहसंयोगादेव तथोक्तं या॰ सूत्रभाष्ययोः "अस्यैव चोपपत्तेरेष ऊष्मा" सू॰"अस्यैव च सूक्ष्मशरीरस्यैष ऊष्मायमेतस्मिन् जीवच्छरीरे संस्पर्शेनोष्णिमानं विजानाति तथाहि मृतावस्थायामवस्थितेऽपि देहे विद्यमानेषु च रूपादिषु देहगुणेषु नोष्मोपलभ्यते जीवदवस्थायामेव लभ्यते इत्यत उपपद्यते प्रसिद्धशरीरव्यतिरिक्तव्यापारस्य एवैष ऊष्मेति तथा च स्मृतिः "उष्ण एव जीविष्यञ्छीतोमरिष्यन्निति" भा॰ । तदपाधिकत्वात् जीवस्यापि ऊष्मत्वं व्यपदिश्यते इत्युक्तं ष्यञ् ।

इति वाचस्पत्ये औकारादिशब्दार्थसङ्कलनम् ।

इति श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्य्य-विरचिते वाचस्पत्येऽभिधाने स्वरवर्णादिशब्दार्थसङ्कलनं समाप्तम् ।

ॐ तत्सत्